44735

VAIDYAKAŚABDASINDHU

OR

A COMPREHENSIVE LEXICON OF HINDU MEDICAL TERMS AND NAMES OF DRUGS

(WITH THEIR SYNONYMS IN LATIN, SANSKRIT, HINDI, TELUGU, BENGALI, &C.)

WITH COPIOUS REFERENCES TO, AND QUOTATIONS FROM, STANDARD WORKS,

PREPARED UNDER THE LIBERAL PATRONAGE OF HIS HIGHNESS

MIRZÁ ŚRÍ ÁNANDA GAJAPATI RÁJ

MUNNYÄ SULTÂN BÂHÂDUR, G. C. I. E.

MAHÁRÁJA OF VIZIANAGRAM,

COMPILED BY

KAVIRÁJA UMEŚACHANDRA GUPTA KAVIRATNA

LATE LIBRARIAN, GOVERNMENT SANSKRIT COLLEGE, CALCUTTA; EDITOR AND COMMENTATOR OF THE "AŚVA-VAIDYAKA," PUBLISHED BY THE ASIATIC SOCIETY OF BENGAL; TRANSLATOR OF "RASENDRA-CHINTÁMANI," "GAURÍ-KANCHANIKÁ-TANTRA," "KATHÁ-SARIT-SÁGARA," &C. &C.

CALCUTTA:

PRINTED BY

ŚAŚIBHŪSHAṆA BHAṬṬÁCHÁRYYA

AT THE GIRIŚA-VIDYÂRATNA PRESS,

NO. 24, GIRIŚA-VIDYÁRATNA'S LANE.

PUBLISHED BY, AND TO BE HAD

ONLY OF, THE COMPILER,

NO. 84, JAUN BAZAR STREET, CALCUTTA.

1894.

Price—Ten Rupees,
Postage—Ánás Ten only.

For Foreigners—One Pound,
inclusive of Postage &c.

उत्सर्गः

सकलमङ्गलालयाखिलसद्गुणैकनिकेतन-प्रजारञ्जन-

महाराजाधिराज-

मिर्ज़ा-श्रीश्रीश्रीश्रीश्री-आनन्द-गजपति-राज-

मन्ये-सुलतान्-बाहादूर-जि. सि. आइ. इ.-

विजयनगराधीश-देव-श्रीकर-कमलेषु

वैद्यकशब्दसिन्धुरयं

भक्त्या श्रद्धया च सादरमुपहारीकृतः।

TO

HIS HIGHNESS

MIRZÁ ŚRÍ ÁNANDA GAJAPATI RÁJ

MUNNYÄ SULTÁN BÁHÁDUR, G. C. I. E.

MAHÁRÁJA OF VIZIANAGRAM.

THIS WORK

IS MOST RESPECTFULLY

DEDICATED

FOR HIS DISINTERESTED ZEAL AND OPEN-HANDED LIBERALITY IN HELPING BOTH STUDENTS AND PRACTITIONERS OF HINDU MEDICINE AND THE MEDICAL PROFESSION GENERALLY IN THE STUDY OF INDIA'S ONCE PERFECT SYSTEM OF MEDICINE AND PATHOLOGY

BY

HIS HIGHNESS' MOST OBEDIENT SERVANT,

THE COMPILER.

राजसकाशे विज्ञप्तिः ।

देव !

साहायकं प्राप्य परं त्वदीयं
साकल्यतो वैद्यकसंहिताभ्यः ।
संगृह्य शब्दान् परितः श्रमेण
प्रकाशितोऽयं परमाज्ञया ते ॥ १ ॥

तस्मिन् प्रभो वैद्यकशब्दसिन्धौ
रत्नावली शब्दमयी मया या ।
विगुम्फिता भक्तिगुणेन रम्या
बहुप्रयत्नेन समादरेण ॥ २ ॥

तया युतोऽयं शुभपुण्यपात्रे
त्वय्येव भक्त्या प्रतिपादनीयः ।
प्रतीच्छतामेष कृपापरेण
जनः कृतार्थीक्रियतां कृपालो ॥ ३ ॥

विनीत-
श्रीउमेशचन्द्र-गुप्तस्य ।

May it please your Highness—

It is solely through the munificence of your Highness that I have been able to present the public with my "Vaidyaka-Śabdasindhu"—the fruit of my earnest and long-continued labour in collecting all medical terms of India from various original sources.

2. Herein I have taken great care in stringing together with the thread of my heart's devotion these gems of medical terms into a delightful garland for your Highness' kind acceptance.

3. Now, that it has been brought to a close, I humbly take the liberty to dedicate the compilation to your Highness as a public acknowledgment of the pecuniary obligation I owe to your Highness, and in the fervent hope that your Highness would place me under infinite obligation, by accepting this poor but heart-felt token of a "debt immense of endless gratitude."

I have the honour to be
Your Highness'
Most Obedient Servant,
UMEŚACHANDRA GUPTA.

विज्ञापनम्।

इह खलु कोषापरनामधेयं शब्दभाण्डागारभूतं लिङ्गार्थनिर्णायकं शास्त्रमभिधानं नाम। पुरा किलास्मदीये जनपदे संस्कृतभाषायां शास्त्रानुशीलनार्थं सौकर्य्यातिशयात् अन्त्यवर्णक्रमेणाभिधानरचनारीतिः प्रचलितासीत्। तत्र प्राचीनकोषविषयकं संक्षेपेण किञ्चिदुच्यते। प्राचीन-शब्दसाधारणाभिधानानि रचयितृभेदेन बहून्यमरसिंहादिविरचितानि अमरकोषादीनि प्रसिद्धानि। तानि सर्व्वाण्येव तात्कालिकरीत्या सुखा-भ्यासलाभार्थं छन्दोपनिबद्धानि। स्वर्गमर्त्तादिवासिदेवतामनुष्यादिवाच-कानां शब्दानां यथाभागं पृथक्श्रेणीविभागेन स्वरादिवर्गविभागान् निर्म्माय वर्गमध्ये क्वचिदन्त्यवर्णक्रमेण, क्वचिदादिवर्णक्रमेण, क्वचिच्च क्रम-भङ्गेन शब्दपर्य्याया गुम्फिताः प्राचीनकोषकारैः। क्वचित् ते पर्य्यायाः श्लोकसमापिताः, श्लोकार्द्धसमापिताः श्लोकपादसमापिताश्च यथाप्रयोजनं दृश्यन्ते।

एवमेव प्राचीनवैद्यकाभिधानानि निघण्टुद्रव्यगुणादीनि रचयितृ-वैचित्र्यात् नानाविधानि विविधवैद्यकसंहितासङ्ग्रहादिचिकित्साग्रन्थेभ्यः समाहृतशब्दाद्युपादानैः प्राचीनरीत्या छन्दोपनिबद्धानि, भूलतादिनाना-वर्गैः खण्डैः परिच्छेदैर्वा विभक्तानि। तेषु च वैद्यशास्त्रोपयोगिनामुद्भिज्ज-तरुलतादीनां जरायुजाण्डजस्वेदजानां पशुपक्षिकीटपतङ्गसरीसृपादीनां प्राणिनां खनिजलौहादीनाञ्च सलिङ्गपर्य्यायनामगुणादीनि सुष्ठु विनिर्णी-तानि। तत्र द्रव्याभिधानं नाम चिकित्सोपयोगिसर्व्वविधद्रव्याणां सनामलिङ्गार्थपर्य्यायसंग्रहः। तानि च रत्नमालादीनि बहूनि वर्त्तन्ते। निघण्टुः द्रव्यगुणाभिधानञ्च द्रव्याणां सनामपर्य्यायार्थगुणदोषरसादि-संग्रहः। तेषु च धन्वन्तरिमदनपालराजनिघण्ट्वादीनि प्रसिद्धानि। परिभाषा नाम पारिभाषिकशब्दार्थविनिर्णायको ग्रन्थविशेषः। तत्र परिमाणक्वाथकषायफाण्टोष्णोदकद्रव्यमात्राः कषायादौ द्रव्यवारिमानं यवागूमण्डादिसाधनलक्षणानि रससाधनविधानप्रक्षेपविधयः क्षीरस्नेह-

गुड़ादिपाकसाधनलक्षणानि काथ्यवारिपरिमाणलौहमारणपाकलक्षणानि भावनाविध्यनुपानविधिबालौषधमात्राभेषजमात्रादीनि पञ्चकर्म्मादीनि च सविस्तरं वर्णितानि। ताश्च ग्रन्थकारभेदेन परिभाषाप्रदीपादयो बह्वः सन्ति। एतानि हि बाल्यएव समभ्यस्तानि चिकित्सकानां कार्य्यकाले विशेषोपयोगीनि भवन्ति।

आभिधानिकशब्दा असंख्या: नानोपायसिद्धत्वात् नानाजातीयाश्च भवन्ति। तेषु केचित् नामवाचका:, केचित् द्रव्यादिवाचका:, केचिच्च द्रव्यगुणादिवाचका:। नानोपायसिद्धेषु पुन: केचित् रूढ़िनिष्पन्ना:, केचित् स्वस्वप्रकृतिनिष्पन्ना:, केचन देश्योक्तिसिद्धा:, केचन विभिन्नलाञ्छनोपेता:, केचित् उपमानसिद्धा:, केचित् स्ववीर्य्यत: सिद्धा:, केचिच्चेतरदेशनामत: सम्पन्ना इति सप्तप्रकारा:। तदुक्तं राजनिघण्टौ—

"नामानि क्वचिदिह रूढ़ित: स्वभावा-
द्देश्योक्त्या क्वचन च लाञ्छनोपमाभ्याम्।
वीर्य्येण क्वचिदितराह्वयादिदेशा-
द्द्रव्याणां ध्रुवमिति सप्तधोदितानि॥"

द्रव्याभिधानेषु द्रव्यनामपरिचयस्त्रिधा भवति। यथा—कानिचित् द्रव्याणि नामसाधारण्येन सर्व्वत्र परिचितानि, कानिचित् पार्व्वतीयनामभि:, कानिचिच्च देशभेदेषु नामभेदै: परिचितानि। तथा मेदादीनि यानि कतिपयानि द्रव्याणि, तान्यस्मदीये देशे दुरधिगमानि, तस्माच्च इदानीन्तनचिकित्सकै: प्रायेणैव न प्रत्यक्षीकृतानि, केवलमेवाभिधाने तेषां पर्य्यायगुणादिकं पठ्यते। अत: कार्य्यकाले अनुकल्पतया तत्तत्स्थानेषु तत्तत्समगुणानि अश्वगन्धादीनि द्रव्याणि संग्रहादिषु व्यवस्थापितानि। येषाञ्च द्रव्याणां देशभेदेषु नामान्तराणि विद्यन्ते, तेषामवबोधनार्थममुकभाषया अमुकनामभि: प्रसिद्धानीत्यभिधानकारैरभिधाय परिलक्षितैर्लब्धा। तथा द्रव्याभिधानेषु द्रव्यनामानि भाषाभेदेन—कुत्रचित् वङ्गभाषया, कुत्रचित् हिन्दीभाषया, कुत्रचिच्च महाराष्ट्रकर्णाटादिभाषया—अभिहितानि।

प्रागुक्तकोषाभ्यासं विना चाव्युत्पन्नच्छात्राणामिष्टशब्दार्थसमुद्भावनमतीव दुरूहं भवतीति समालोच्य विद्यारम्भे एव सुकुमारमतिशिष्याणां तदभ्यसनरीतिः चतुष्पाठीषु प्रवर्त्तिता। अतएव पुराऽस्मिन् भरतवास्तव्येऽस्मदीये जनपदे साहित्यचिकित्सादिशास्त्राध्यापनरीतिः कालसापेक्षाप्यतीव फलोपधायिन्युपादेया चासीत्।

विशेषतो वैद्यकद्रव्यगुणनिदानादीनां सम्यगभ्यसनं चिकित्सकानामतीवावश्यकम्। तथाहि—चिकित्साशास्त्रेषु चिकित्सोपकरणद्रव्याणि असंख्येयानि, तेषु कानिचित् विषमयानि कानिचिदाहारोपयोगीनि कानिचित् कायपोषणानि कानिचित् प्राणहराणि कानिचिच्च रोगोपशमनानीति विभिन्नगुणानि दृष्ट्वा प्रजाहिताय महर्षयो भरद्वाजादयो द्रव्यज्ञानमूलं चिकित्सितमिति विचिन्त्य द्रव्याणां परीक्षया तद्गुणरसवीर्य्यविपाकादिविज्ञानं सम्यगुपलभ्य शिष्यपरम्परया कोषनिघण्टादीनि लोके प्रचारितवन्तः। द्रव्यं हि नाम विभिन्नरसाश्रयं, भिन्नरसाश्रयत्वाच्च भिन्नगुणम्। तदेव च द्रव्यं चिकित्सकस्य चिकित्सायां प्रधानमुपकरणम्। अतः चिकित्साप्रवृत्तेरादौ रुग्विनिश्चयादिशास्त्रपरिसमाप्त्यनन्तरमभ्यासेन द्रव्यनामगुणादिपरिचयं कृत्वा चिकित्सकैः सर्व्वप्रयत्नेन द्रव्यगुणादिप्रयोगसाधनं कर्त्तव्यम्। चिकित्साशास्त्राध्यायिनाम् आदौ कोषनिघण्ट्वाद्यभ्यासेन विना द्रव्यनामगुणादिपरिचयप्रयोगसाधनं न सुलभं, साकल्येन च न सम्पद्यते। तदुक्तं राजनिघण्टौ—

"निघण्टुना विना वैद्यो विद्वान् व्याकरणं विना।
अनभ्यासेन धानुष्कस्त्रयो हास्यस्य भाजनम्॥"

अभ्यासेन द्रव्यनामपरिचयाभावे च चिकित्सकस्य प्रमादसम्भावना। द्रव्यगुणाद्यनभ्यासेन च तस्य चिकित्साकर्म्मणि शास्त्रनिर्दिष्टव्यवस्थाविशेषेषु आशुचिकित्सासिद्धिमूलभूतं द्रव्ययोगवियोगक्षमत्वं न हि स्फुरति। अस्फुरिते च योगवियोगक्षमत्वे न हि सर्व्वदा सर्व्वत्र केवलेनैव शास्त्रव्यवस्थापितव्यवस्थाविशेषेण उपक्रमसाफल्यं जायते। एतदर्थमेव शास्त्रकृद्भिर्महर्षिभिः दिग्दर्शनाय व्याधिविशेषेषु योगविशेषान्

व्यवस्थाप्य स्वधिया समुद्भाव्य योगवियोगक्षमत्वं विदुषामुपदिष्टम् । तदुक्तं चरकेण—

"अल्पबुद्धेरयं यस्मान्नातिसङ्क्षेपविस्तरः ।
मन्दानां व्यवहाराय बुधानां बुद्धिवृद्धये ।
पञ्चाशत्को ह्ययं वर्गः कषायाणामुदाहृतः ।
तेषां कर्म्मसु वाह्येषु योगमाभ्यन्तरेषु च ।
संयोगञ्च वियोगञ्च यो वेद स भिषग्वरः ॥"

अधुना तु कालवशात् इंरेजीशिक्षारीतेः प्रचारेण सह आद्यवर्णक्रमाभिधानस्याविर्भावात् चतुष्पाठीभ्योऽप्यन्तर्हितप्राया प्राचीनरीतिः हताद्दरतया वर्त्तते । अतो वर्णमालानुक्रमणिकाभिधाने द्रव्यादिनिर्व्वाचनं तथाविधनियमेनैव भवितुमर्हति यथा साधारणोपकृतिः सम्भवति । अतो वर्त्तमानाभिधाने द्रव्यनामनिर्व्वाचनमुक्तनियमेनैव सम्पादयितुं यथाशक्ति प्रयासः कृतः । न हि अभिधाने एकभाषया द्रव्यनामनिर्वाचनं विश्वजनीनबोधसुकरं भवति । अतो बहुविधेभ्यः कोषेभ्यः संहितादिभ्यश्च सङ्कलय्य भारतस्य सर्व्वजातिगम्यैः हिन्द्यादिभाषानामभिः वैदेशिकलाटिनादिभाषाशब्दैश्च द्रव्यादिव्याख्यानं विहितम् ।

अस्मद्देशीयलिपिपुस्तकेषु लिपिकरप्रमादादिसङ्कुलेषु पुस्तकसंस्करणेषु च योग्यसमाकलनविरहात् प्रायेणैव भिन्नभिन्नपुस्तकेष्वन्तरान्तरा पाठवैषम्येण प्रकृतपाठं विनिश्चेतुं न शक्यते । स्थलविशेषे च भ्रमनिरासेन पाठसमन्वयं कर्त्तुं वृथैवाशा हृदये लालिता । अतो विदितमेवैतत् यथा अभिधानप्रणयनमतीव दुरूहो व्यापारः । तत्प्रणेत्रा च महामहोपाध्यायेनापि आत्मनोऽभ्रान्तमन्यता मनसि न विधेया । अस्मिन् कार्य्ये कदाचिद्बहुदर्शिनोऽपि विदुषो भ्रमप्रमादौ जायते, का कथा पल्लवग्राहिपण्डितस्येति । अत एवंविधे दुरूहविषये मादृशानां लेखनीधारणं साहसमिति विजानतापि मया पराङ्मुखतया न स्थीयते । यतोऽत्र यदि अंशतः श्रेयोलाभो भवेत् तदपि वरमिति हृदि कृत्वा बद्धपरिकरोऽहं याचे—सति भ्रमदर्शने मनस्विभिर्मनीषिभिः परिमार्जनीयमिति ।

न्यूनाधिकसप्ततिवर्षपूर्व्वं प्रचारक्रमेण राजभाषाविरचिताभिधानस्य समादरमुपादेयताञ्चावलोक्य तदादर्शेन शब्दकल्पद्रुमाभिधानं नाम सर्व्व-शास्त्रानुशीलनोपयोगि वृहदभिधानमेकं परमसात्त्विकेन सार्-उपाधि-धारिणा राजराधाकान्तदेववाहादुरेण सुविपुलार्थव्ययेन पण्डितमण्डली-नियोगेन च प्रथमं प्रचारितमासीत्। तस्य च मूल्यं विना वितरणेन दरिद्रशिक्षितसमाजस्य महानुपकारः साधितः। इह खलु धराधाम्नि विद्यायाः समादरो यावत् तिष्ठति तावत् राधाकान्तदेवस्यायमसा-धारणकीर्त्तिस्तम्भो जाज्वल्यमानस्तदीयं यशो विघोषयिष्यति।

परं तदाप्रभृति वर्णानुक्रमणिकाभिधानानि कतिपयान्येव प्रचा-रितान्यासन्। चिकित्सातन्त्रेषु नागराचरमुद्रितस्य तथाविधाभिधानस्य विरलप्रचारतया अप्रचारतया वा चरकानुवादकाले चिकित्सादिनाना-विज्ञानशास्त्रविशारदेन मदनुकूलेन पोष्टवरेण डाक्तार-श्रीयुक्तमहेन्द्रलाल-सरकारेण 'सि. आइ. इ'-उपाधिधारिणा महोदयेन तदनुवादसहकारी अहमेकस्य वैद्यकाभिधानस्य वर्णमालानुक्रमरीत्या सङ्कलने चिकित्सकानां विशेषोपकारित्वमुपवर्ण्य सविशेषमनुरुद्धः। यद्यपि मया कार्य्यान्तरवशा-त्तदनुवादसहकारित्वं परिहृतं, तथाप्यभिधानसमाकलने नौदासीन्यमव-लम्बितम्। तदुपदेशक्रमेण चाहं साष्टाङ्गचिकित्साशास्त्रोपादानसामग्री-र्विविधकोषनिघण्टुवैद्यकसंहितादिभ्यः समाकलय्य वर्षत्रयाधिकेन काले-नाभिधानमिदं लिपिनिबद्धमकरवम्। अथ प्रदर्शितञ्चैतत् प्रथमं समा-लोचनार्थं डाक्तारसरकारमहोदयाय। ततश्च मच्छुभाकाङ्क्षिणे राजोपाधि-काय राजेन्द्रलालमित्राय हन्ताधुना कीर्त्तिशेषाय। अथ तौ मय्यनुकम्पया एतत् समालोच्य प्रीतिमन्तौ एतस्योपादेयतामुपकारिताञ्च वर्णयित्वा स्व-स्वाभिप्रायसूचकं लेखद्वयं मत्सकाशे प्रेषितवन्तौ। अथाहं तदुत्साहलाभे-नैतन्मुद्रणोपयोगिवित्तसञ्चयार्थं वर्षं यावत् कृतश्रमो यदा निराश एवासं, तदा मम हितैषिणो मित्रस्य प्रेसिडेन्सिकालेजे संस्कृताध्यापकस्य एम्. ए. उपाधिधारिणः श्रीयुक्तनीलमणिमुखोपाध्यायस्य यत्नातिशयेन तथा प्रधान-राजकार्य्याधिकृतस्य श्रीयुक्तराधानाथविश्वासस्य चानुग्रहेण महाराजाधि-

राजस्य श्रीश्रीश्रीश्रीश्रीविजयनगराधिपतेः सकाशे समावेदनं समुपस्थापयितुं समर्थोऽभवत्। ततः परमोदारधीरचरितस्य विद्योत्साहितया तैस्तैरसाधारणदानावदानैः प्रकटितदानैकवीरताधर्म्मस्य श्रीश्रीश्रीश्रीश्रीविजयनगराधिनाथस्य महाराजाधिराजदेवस्य सम्पूर्णार्थसाहाय्येन मया विनैव वदान्यान्तरान्तिककरप्रसारणमिदं प्रारिप्सितायुर्वेदीयाभिधानं वैद्यकशब्दसिन्धुनामकं वर्णानुक्रमेणार्वाचीनसूचीविगुम्फनरीत्या गुम्फितं, नागराचरेण मुद्रितं, साधारणशिक्षितसमाजे प्रकाशितञ्च।

अस्य रचनाप्रणाली शब्दकल्पद्रुमस्य प्रणाल्यनुसारिणी। अतः शब्दकल्पद्रुम इव अत्रापि क्षवर्णस्य स्वतन्त्र एव पर्य्यायः कृतः। "क्ष"कारः क+ष योगेन निष्पन्नत्वात् संयुक्तवर्णो न स्वतन्त्रवर्णः। कादिसंयुक्तवर्णत्वाच्चास्य अभिधानान्तरेषु कवर्गमध्य एव पण्डितैः सन्निवेशः कृतः। स च सन्निवेशो युक्तिसङ्गतः प्रतिभाति। परमेतद्देशीयमहामहोपाध्यायाः शब्दकल्पद्रुमाभिधाने, महाराष्ट्रदेशीयाश्च विद्वांसो निघण्टुरत्नाकरे, विचार्य्य यादृश्यैव युक्त्या क्षवर्णस्य स्वतन्त्रपर्य्यायं स्वीकृतवन्तः, वयमपि अत्र तद्युक्त्यनुसारेण तत्प्रमाणानुसारेण वा तेषां मतवैपरीत्याचरणे तद्गौरवसम्पादनभिया वा स्वतन्त्रपर्य्यायं कृतवन्तः।

द्रव्येषु यानि देशभेदेषु विभिन्ननामभिः परिचितानि, अत्राभिधाने तेषु द्रव्येषु सर्व्वदेशीयानां सुखपरिचयलाभार्थम् एता भाषा निर्व्वाचिताः नानापुस्तकेभ्यः। यथा—लाटिनी, वाङ्गाला, हिन्दी, महाराष्ट्री, कर्णाटी, तदनुप्राणिता च आन्ध्री, लाटी, तैलङ्गी, तामिली, औत्कली चेति। तासु मतभेदभिन्नरूपाणि लाटिननामानि पाश्चात्यवैदेशिकानां बोधाय Dr. Watt's Economic products of India, Udayachánd Datta's Materia Medica, Professor Wilson's Sanskrit-English Dictionary, Professor Monier Williams' Sanskrit-English Dictionary, Jayadatta's Aśvavaidyaka प्रभृतिभ्यः समाकलितानि। वैद्यपतिनरसिंहपण्डितकृत-राजनिघण्टुतो निघण्ट्वन्तरतश्च महाराष्ट्रकर्णाटनामानि तदनुप्राणितान्ध्रलाटादिनामानि च परिगृहीतानि। तदुक्तं तत्रैव—

"व्यक्तीकृतात्र कर्णाटमहाराष्ट्रीयभाषया।
आन्ध्रलाटादिभाषास्तु ज्ञातव्यास्तद्द्वयाश्रयाः॥"

यानि च हिन्दीनामानि तानि भावप्रकाश धन्वन्तरिमदनपालनिघण्टुभ्यो गृहीतानि। तैलङ्गनामानि महाराजाधिराजश्रीश्रीश्रीश्रीश्रीविजयनगराधिपतेः सभासद्‌विदुषामनुग्रहाल्लब्धानि। वाङ्गालानामानि चास्मद्देशीयविविधकोषशब्दकल्पद्रुमादिभ्यः संगृहीतानि।

अत्राभिधाने सर्व्वमेव सप्रमाणमभिधातुं प्रयत्नः कृतः। द्रव्याणां सर्व्वकोषीयपर्य्यायशब्ददाननियमश्च ग्रन्थेऽस्मिन् स्थानाभावात् परित्यक्तः।

अत्राभिधाने केवलमेवायुर्वेदोपयोगिनः शब्दाः (रम्भाश्यामादिशब्दानां स्वर्गस्त्रीतरुण्याद्यर्थान् परिहृत्य) तदुपयोगिनश्च एवार्थाः सङ्कलिताः। द्रव्याणां गुणदोषरसवीर्य्यविपाकादिवर्णनस्थले द्रव्यगुणाद्यभिधानेषु मुनीनां मतभेदानाकलय्य अतिप्रामाणिकमेकं द्वे वा क्वचित् त्रीणि वा मतानि सामञ्जस्येनोपात्तानि। संक्षिप्तरोगलक्षणानि प्रसिद्धप्रचलितकतिपयघृततैलौषधानि च सपाठव्याख्यासहितानि महाराजाधिराजस्य समाज्ञया विन्यस्तानि। अपिच रसोपरसधातुमणिमुक्तादिशोधनजारणमारणादीनि सप्रमाणमुदितानि।

अत्र द्रव्याणां प्रतिपर्य्यायशब्दं सर्व्वभाषानामसन्निवेशनस्य औचित्येऽपि स्थानाभावात् पर्य्यायशब्दानामेकतम एव शब्दे भिन्नभिन्नभाषानामद्रव्यगुणादीनि विनिवेशितानि न तु सर्व्वत्र। अनेकार्थशब्दानाञ्च भिन्नभिन्नार्थे प्रयोगस्थलानि यथालाभं सप्रमाणोदाहरणं प्रदर्शितानि। प्रमाणीभूतभूरिभूरिप्रयोज्यशब्दानां पुनःपुनरुल्लेखगौरववारणाय सूचीविधानपुरःसरं तत्सूचकवर्णसंक्षेपश्च ग्रन्थादौ विनिवेशितः।

अधुना ये चास्योपादानभूता ग्रन्था वैद्यकसंहितानिघण्टुसंग्रहकोषादयः प्रमाणत्वेन परिगृहीतास्ते यथावकाशं सङ्क्षिप्तसमालोचनेन प्रदर्श्यन्ते। तेषाञ्च वैद्यकग्रन्थानां समालोचनसमारम्भात् पूर्व्वं स्तोकं स्थूलवृत्तान्तो वैद्यकसङ्ग्रहाणामुच्यते। एतद्देशीया वैद्यकसङ्ग्रहग्रन्थाः सिद्धयोगचक्रदत्तसङ्ग्रहादयो मुसलमानराजत्वात् पूर्व्वतनहिन्दुराजत्वकाले

विरचिता आसन्। यतः तेषु ग्रन्थेषु सर्पादिविषाणां पारदगन्धकलौहानां (कादाचित्कव्यवहारमृते) स्वर्णरजतादीनां विदेशोत्पन्नान्यद्रव्याणाञ्च व्यवहारो नैव दृश्यते। अत इदमेव स्फुटं प्रतिभाति यत् तदा वैदेशिका राजानो भारते न समागच्छन्निति। परं वैद्यकरसग्रन्थाश्च रसकौमुदी-रसेन्द्रचिन्तामणिभावप्रकाशादयो मुशलमानराजत्वसमये लब्धजन्मानो मुशलमानचिकित्सकमण्डलीषु रसविषादिचिकित्साभिः परां प्रतिष्ठामलभन्त। तेषु च रसग्रन्थेषु तदाऽऽनीतानि विदेशजाताहिफेनसोहारातीप्रचीनीप्रभृतिद्रव्याणि तद्गुणपरीक्षया औषधत्वे परिगृहीतानि। तेषु च रोगाणां कषायपाचनौषधादिव्यवस्थापुरःसरं चिकित्साप्रणाली सम्प्रदर्शिता। औषधतैलादिनिर्म्माणञ्च यथा क्रियते तस्य सरला प्रणाली सुखबोधाय दर्शिता। वैद्यकसङ्ग्रहेषु रसग्रन्थेषु च रोगविशेषेण निर्वाचितानि प्रायेण बहूनि औषधतैलादीनि अन्तरान्तरा ईषद्वैशिष्ट्यं विना सर्व्वत्र एकनामानि साधारणानि च दृश्यन्ते। अतो रसग्रन्थेषु रसघटितौषधानि ऋते सर्व्वाण्येव तैलघृतौषधानि चरकादिभ्यश्चक्रदत्तादिसङ्ग्रहेभ्यश्च परिगृहीतानि स्वविरचितानि च वर्त्तन्ते। सिद्धयोगादिषु तु औषधादीनि कानिचित् संहितासङ्कलितानि, शिष्टानि च स्वरचितानि।

चरकसंहिता हि कायचिकित्साप्रधाना आत्रेयसम्प्रदायस्य आदिमा संहितासु प्रथमा च। अस्यां भगवान् कृष्णात्रेयो वक्ता, अग्निवेशः श्रोता, चरकमुनिः प्रतिसंस्कर्त्ता च। तस्मादियं गुरुसूत्रशिष्यसूत्रप्रतिसंस्कर्त्तृसूत्रमयीत्यर्थतोऽवगन्तव्यम्। पुरा किल कृतयुगान्ते असुरनिपीड़िता आर्य्यास्तत्रैव पञ्चालक्षेत्रे पञ्चनदप्रदेशे समापतिता वारिवायुक्षेत्रनगनदतरुलताद्यशेषविधप्रकृतिसौन्दर्य्यस्वभावगुणविमोहिताः कृतनिवसतयः क्रमेण समाजबन्धनपुरःसरं तदुपयोगिजीवनोपायभूतकृषिरीतिनीतिस्वास्थ्यविधानादिषु सन्ततसमालोचनया क्षत्रियादिसम्प्रदायविभक्ताः स्वस्वकार्य्येषु निरता आसन् (ऐतरेयब्राह्मणः)। तेषु चिकित्सासम्प्रदायाध्यक्षेण भरद्वाजमहर्षिणा रोगाक्रान्तायां मेदिन्यां लोकहिताय यजुर्व्वेदाङ्गभूत आयुर्वेदः स्वर्लोकादानीतः स्वशिष्याय कृष्णात्रेयायोपदिष्टः। सोऽपि

तमग्निवेशादिशिष्यषट्कायोपदिष्टवान्। अथ ते शिष्याः पृथक् षट् तन्त्राणि चक्रुः। तेषु प्रधानशिष्याग्निवेशकृततन्त्रमुत्कृष्टमुपादेयञ्चाजनि।

अथ कदाचिच्चरकमुनिः पञ्चनददेशे कायचिकित्साप्रधानं तत् सङ्क्षिप्ततन्त्रं प्रतिसंस्करणमुखेन सविस्तरं वर्णयन् स्वनाम्नाभिनवां संहितां प्रचारितवानिति चरकसंहिताया एव लभ्यते। "अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते।" शल्याद्यष्टाङ्गमयी सा चेयमभिनवा संहिता यथास्थानमष्टभिर्भागैर्विभक्ता। अस्यां च संहितायां खनिजोद्भिज्जप्राणिवाचीनि द्रव्याणि भागत्रयेण विभज्य पुनः प्राणिनो जरायुजादिभागचतुष्टयेन विभक्ताः, उद्भिज्जानि च वनस्पतिवृक्षवीरुधोषधिचतुष्टयेन विभक्तानि। तानि च पुनरुद्भिज्जद्रव्याणि जीवनीयादिपञ्चाशद्गणैः संविभक्तानि। अस्या भाषा न प्राञ्जला, प्राचीनत्वात् विषयरचनाप्रणाली च न मार्जिता परमतीव विचित्रा। एभिः कारणैः गोमांसस्य च व्यवस्थया संहिताया अस्याः समाजबन्धनस्य बाल्यावस्थायामजातस्मृतिशासनायाम् उत्पत्तिरनुमीयते। अनेन वैदिकब्राह्मणप्रामाण्येन च चरकस्यापि तद्देशवासित्वमसन्दिग्धम्। अस्याः सिद्धिकल्पस्थानद्वयं सप्तदशौषधाध्यायैः संयोज्य सम्पूर्णमकरोत्पञ्चनदपुरवास्तव्यो दृढ़बल इति अस्या एव संहितायाः सिद्धिस्थानपरिसमाप्तावुक्तम्। यथा—

"अखण्डार्थं दृढ़बलो जातः पञ्चनदे पुरे।
कृत्वा बहुभ्यस्तन्त्रेभ्यो विशेषाच्च बलोच्चयम्।
सप्तदशौषधाध्यायैः सिद्धिकल्पैरपूरयत्॥"

यत्तु उदयचन्द्रेणोक्तं वाभटे अग्निवेशभेलहारीतसुश्रुतकवलादीनामेव उल्लेखो दृश्यते न तु चरकस्य, अतः चरकस्य अधस्तनत्वमवश्यं स्वीकार्य्यमिति, तत्तु भ्रान्तम्—तत्र भूरिप्रमाणदर्शनात्। See वाभट p. 110. Vol. I. and pp. 826—827. Vol. II. Bombay Ed. वयन्तु अग्निवेशतन्त्रस्य संस्करणं कूटलेखककृतमित्यवगच्छामः।

एवमेव सुश्रुतसंहिता शल्यतन्त्रोपदेशप्रधानाष्टाङ्गमयी धन्वन्तरिसम्प्रदायस्य आदिमा चरकादधस्तना च। अस्यां काशिराजरूपेणावतीर्णो

भगवान् धन्वन्तरिर्वक्ता विश्वामित्रमहर्षिसुतः सुश्रुतः श्रोता, परमरासायनिकः सिद्धनागार्जुनश्च प्रतिसंस्कर्त्ता। सूत्रादिपञ्चस्थानात्मके पूर्व्वतन्त्रे चिकित्सितागदरसायनवाजीकरणतन्त्रैः सह सचिकित्सितशल्यतन्त्रं प्रधानतो वर्णितम्। कल्पे सचिकित्सितविषतन्त्रं। चिकित्सिते च स्थाने रसायनवाजीकरणतन्त्रे वर्णिते। उत्तरे च तन्त्रे शालाक्यकायचिकित्साकौमारभृत्यभूतविद्या वर्णिताः।

एकदा सुश्रुताचार्य्यः पितुर्विश्वामित्रस्याज्ञया सहोत्थायिमुनिकुमारैः सह वाराणसीमागत्य काशिराजदिवोदासादायुर्व्वेदं यजुर्वेदाङ्गभूतं शल्यतन्त्रप्रधानमष्टाङ्गमयमधीत्य सहोत्थायिगणकृतसर्व्वतन्त्रप्रधानं सविंशाध्यायशतसम्पन्नं तन्त्रं स्वनाम्ना प्रणिनाय। अथ यदा बौद्धाः प्रबला भूत्वा वादेन बुधान् पराभूय वैदिकाः क्रिया विलोपयितुमारब्धवन्तः, तस्मिन्नेव बौद्धसङ्ग्रामसमये (खृः सहस्राधिकवर्षपूर्व्वं) जगति विश्रुतः परमरासायनिको बौद्धपालकः सिद्धनागार्ज्जुनः सौश्रुतं नाम तन्त्रं प्रतिसंस्करणमुखेन सूत्रादिपञ्चसु स्थानेषु अर्थवशाद्विभज्य सविस्तरं विशदञ्च व्याख्याय परिशिष्टभूते उत्तरे तन्त्रे शिष्टानर्थान् व्याकृत्य एकामभिनवां संहितां व्यरचयत्, सा सुश्रुतसंहितेति लोके गीयते। इति डल्वणाचार्य्यमतम्। अस्या भाषा प्राञ्जला, रचनारीतिश्च यथाभागमानुपूर्व्विकी। अस्याञ्च वर्णितं शारीरास्थिमालाव्याकरणसरुग्विनिश्चयव्रणचिकित्सितादिविज्ञानं तदा परां कोटिमधिरूढ़मित्यनिर्विकल्पं स्वीकार्य्यम्। तस्य च मूढ़गर्भाश्मरीप्रकरणमतीव प्रशस्तमुपादेयञ्च निदर्शनभूतम्। किमधिकं, डाक्तार् (Charles) साहेबमहोदयः श्रीकुचबेहारमहाराणी-चिकित्सकेन डाक्तार्-दुर्गादासगुप्तेन मत्साहाय्येनानूद्य विलायतभाषया प्रदत्तं मूढ़गर्भादिप्रकरणं समालोच्य सविस्मयं प्रशशंस।

अत्रिसंहिता—कुत्रचित् पञ्चनदादिप्रदेशे सुप्रसिद्धा अत्रिमुनिप्रणीता चरकादिवत् प्राचीना च। संहितेयं नातिसङ्क्षिप्ता नातिविस्तृता च। अयमेवादी प्रामाणिकः स्मृतिसंहिताकार आसीत्।

वाभटसंहितापि—आत्रेयसम्प्रदायस्य धन्वन्तरिसम्प्रदायस्य च नाना-

चिकित्सातन्त्रेभ्य आदावेव स्वयं संगृहीतादष्टाङ्गहृदयसंग्रहादाकृष्य वाभटाचार्य्येण विरचिता। यदुक्तं तत्रैव—

"अष्टाङ्गवैद्यकमहोदधिमन्थनेन
योऽष्टाङ्गसंग्रहमहामृतराशिराप्तः।
तस्मादनल्पफलमल्पसमुद्यमानां
प्रीत्यर्थमेतदुदितं पृथगेव तन्त्रम्॥" वा.उ.४०अ.।

एवमेवासौ स्वनाम्नालङ्कारादिनानाशास्त्रं रचितवान्। श्रूयते च यदसावादौ ब्राह्मणधर्म्मावलम्बी नियतमेव वैदिकाचारमनुतिष्ठतिस्म। अथ कदाचिदसौ बौद्धधर्मतत्त्वं जिज्ञासमानः कमपि बौद्धाचार्य्यं गुरुत्वेनाङ्गीचकार। एवं कियन्तं कालमविचलितचित्तेन तमनुशीलयन् तस्य धर्मस्य परमरहस्यमवगच्छन् तस्मिन्नतीव श्रद्दधानो यदा पूर्व्वाचार्य्यसमीपमाजगाम, तदा गुरुणा तस्य तद्धर्म्मानुरक्तिमवधारयता तद्धर्म्मावलम्बनायैवासौ समुपदिष्टः। इति दाक्षिणात्यविदुषां किंवदन्ती (Aufrecht's catalogue)। दाक्षिणात्यपण्डिता इममेव वाभटममरसिंहं ख्यापयन्ति। परं काश्मीरराजतरङ्गिणीसमालोचनया एवमवगम्यते यथा—सिंहगुप्तसुतः परमबौद्धो वाभटाचार्य्यः काश्मीरनरपतिजयसिंहस्य प्रजापालनसमये (खृः द्वादशशताब्दां, शक ११११८—४०) वर्त्तमान आसीत्। तथा विजयनगराधिपस्य वुक्करराजस्य समसामयिको माधवः स्वग्रन्थे वाभट उद्धृतः। इदमपि नववर्षशतमतीतम्। अतस्तस्मिन्नेव समये वाभटः संहितामकरोदिति माद्दशां मतम्। अतः वाभटसंहिता नातिप्राचीना चरकसुश्रुतयोरधस्तना इत्यनुमीयते। अत्र सर्व्वविधान्येव चिकित्सिताङ्गानि तुल्यं व्याख्यातानि। अस्या सुष्टियोगरोगलक्षणादिकञ्च विशेषतः प्रशंसनीयम्। अस्या भाषा विशुद्धा रचनारीतिश्च मार्जिता। वाभटस्य जन्मनि नाना किंवदन्ती श्रूयते यथा—केचित्तं धन्वन्तरिमाहु, केचिच्च तं सागरमन्थनादुद्भूतमेकतमं रत्नम्, केचिच्च तं कलियुगस्य प्रधानऋषिं गौतमबुद्धमाहुः।

"अत्रिः कृतयुगे चैव द्वापरे सुश्रुतो मतः।
कलौ वाग्भटनामा च ……… ॥" अत्रिः।

स्वरचिते तु अष्टाङ्गहृदयसंग्रहे स सिन्धुदेशज इति स्वयमेवोक्तम्। यथा—

"भिषग्वरो वाभट इत्यभून्मे
पितामहो नामधरोऽस्मि यस्य।
सुतोऽभवत्तस्य च सिंहगुप्तः
तस्याप्यहं सिन्धुषु जातजन्मा॥"

अरुणदत्तो मृगाङ्कदत्तस्य तनयो वैद्यवंशे जातश्च। असौ हि सुप्रसिद्ध-वाभटसंहितायाः सर्व्वाङ्गसुन्दर्य्याख्यटीकाया विरचयिता।

हेमाद्रिरतिप्रसिद्धो ग्रन्थकारः। असौ वाभटसंहितायाः सूत्रस्थानस्य आयुर्वेदरसायनाख्यां टीकामकरोत्। चतुर्वर्गचिन्तामणिनामकः स्मृति-संग्रहश्च तस्यैवेति गीयते।

चक्रदत्तसंग्रहः—चक्रपाणिदत्तविरचितो रोगाणां चिकित्सासंग्रहः। अत्रासौ माधवकरप्रणीतरुग्विनिश्चयग्रन्थस्यानुपूर्व्विकरोगानुक्रमेण ज्वरादि-रोगाणां चिकित्सा वर्णिता। तत्र रोगाणां तत्प्रणीतसिद्धयोगाः परमदृष्ट-फला इति संग्रहोऽयं सर्व्वत्र समादरेण परिगृहीतो लोकहितं संसाधयति।

चक्रपाणिदत्तो वीरभूमिदेशवास्तव्यो विश्रुतरोध्रबलसंज्ञकदत्तकुले जातो नारायणदत्तपुत्रो नरदत्तशिष्यश्चासीत्। स च विद्याकुलसम्पन्नस्य भिषजो भानुदत्तस्यान्तरङ्गभावात् तदनु गौड़राजस्य पाकशालाध्यक्षो-ऽभूत्। अतस्तत्प्रादुर्भावो द्वादशशताब्द्यामनुमीयते। श्रूयते च यथा तस्य जन्मभूमावद्यापि तत्प्रतिष्ठापितश्चक्रपाणीश्वर इति शिवोऽस्ति। अतोऽसौ धर्म्मेण शैव आसीदिति बुध्यते। स्वसंग्रहस्य मङ्गलाचरणेऽपि आत्मनः शैवत्वं विज्ञापितम्।

"गौड़ाधिनाथरसवत्यधिकारिपात्रं
नारायणस्य तनयः सुनयोऽन्तरङ्गात्।
भानोरनु प्रथितरोध्रबली कुलीनः
श्रीचक्रपाणिरिह कर्त्तृपदाधिकारी॥
यः सिद्धयोगलिखिताधिकसिद्धयोगां-
स्तत्रैव निःक्षिपति केवलमुद्धरेद्वा॥"

सिद्धयोगः—वृन्दकुण्डकृतोऽतिप्रामाणिकचिकित्सासंग्रहः। तस्य च कुसुमावली नाम टीका श्रीकण्ठकृता। यतश्चक्रपाणिः स्वग्रन्थे एतस्य ग्रन्थस्य समुल्लेखं चकार, अतोऽयं चक्रपाणेरूर्द्धतन इत्यवगन्तव्यम्।

रसकौमुदी—भिषजा माधवेन कृता। माधवेनात्र रसघटितानि दृष्टफलानि औषधानि नानारसग्रन्थेभ्यः समाहृत्य स्वरचितानि च समायोज्यायं चिकित्सौषधसंग्रहः कृतः, रोगविशेषेषु च विविधयोगाः स्वयमपि व्यवस्थापिताः। ग्रन्थकारोऽयं निदानसंग्रहकारो माधवकर इति वृद्धपरम्परया श्रूयते। परं माधवाभिधेन केनापि भिषजा कृतेति प्रसिद्धिरलीकैवेत्यपि सहसा प्रतिपत्तुं न शक्यते। यतो माधवकरस्य समये फणिफेणप्रयोगरसादिजारणमारणादिपुरःसरं रसप्रयोगस्य प्रचारो नासीत्।

रसरत्नाकरो—नित्यनाथविरचितो महान् रसग्रन्थः। तेनात्र रसजारणादिकं सविस्तरं प्रदर्श्य स्वरचितानि संगृहीतानि च तैलौषधादीनि बहूनि सन्निवेशितानि। नित्यनाथो न वङ्गदेशवासी ग्रन्थकृत् परं पश्चिमदेशज इत्यनुमीयते।

योगचिन्तामणिः—श्रीहर्षसूरिविरचितः। अत्र सिद्धाः चिकित्सोपयोगिनो बहवो योगा वर्त्तन्ते। तस्य समयः खृः एकादशी द्वादशी वा शताब्दी। रा.तर.।

योगतरङ्गिनी—नाम वैद्यकरसग्रन्थः त्रिमल्लभट्टविरचितः प्रामाणिकश्च। ग्रन्थोऽयं नास्मदीये देशे तथाद्रियते यथा पश्चिमदेश इति।

वैद्यजीवनं—हि लोलिम्बराजविरचितं नातिप्राचीनञ्च। तेनात्र काव्यकरणच्छलेन चिकित्सोपकरणौषधानुपानादिकमुपदिष्टम्।

वैद्यवृन्द-वैद्यामृते—नारायणकृतरसग्रन्थौ। वङ्गदेशीयवैद्यैरनयोः सविशेषसमादरो न क्रियते। (समयोऽष्टादशशताब्दी)।

सारकौमुदी—नाम आनन्दवर्म्मकृतार्वाचीनवैद्यकसंग्रहः, न्यूनाधिकसार्द्धशतवर्षाभ्यन्तरे विरचितः। अत्र मूढ़ानां सुखबोधार्थमौषधादीनि वङ्गभाषया पद्मीकृतानि। अतः स्वल्पबुद्धीनामियं व्यवहाराय परमोपयोगिनी जाता।

भैषज्यरत्नावली—शताधिकवर्षपूर्व्वं गोविन्ददाससेनेन सङ्कलिता। अर्व्वाचीनोऽयं रसग्रन्थोऽस्मदीये देशे कैश्चिदेव वैद्यैः व्यवह्रियते।

नाड़ीप्रकाशो—नाड़ीविज्ञानग्रन्थः शक्तिगोत्रजानन्दसेनवंशजेन शङ्करसेनेन विरचितः। वैद्यविनोदो रसशङ्करश्च तेनैव प्रणीतौ।

रसेन्द्रचिन्तामणिः—राधाविनोदकाव्यकृद्रामचन्द्रकविकृतो रसग्रन्थः। ग्रन्थोऽयं सर्व्वरसग्रन्थेषु प्राचीन इति लोके गीयते। अस्मिन् रसग्रन्थे रसजारणादिकं सविस्तरं वर्णितम्। रसपारिजातोऽपि रामचन्द्ररचितः। अन्योऽपि रसेन्द्रचिन्तामणिः ढुण्ढुकनाथविरचितो वर्त्तते। परं नास्माभिर्दृष्टः।

अमरकोषोऽमरसिंहविरचितः। अमरसिंहोऽमरदेवो वा विक्रमादित्यस्य समये प्रादुर्बभूवेति निश्चय एव। परं विक्रमादित्यानां त्रयाणां कस्य समये जात इत्यत्र नानामतं दृश्यते। उइल्फोर्डसाहवमते नव विक्रमादित्याः। सर्व्वेऽपि ते शालिवाहनादिभिर्युद्धमकुर्व्वन्। (Dr. K. M. B. विद्याकल्पद्रुमे)। परमाधुनिकैतिहासिकरहस्यानुसन्धित्सुभिः कारणप्रदर्शनपुरःसरं कदाचिदसौ (खृः पूः ५६) प्रथमविक्रमादित्यनरपतेः सभायां नवरत्नेषु* एकतमत्वेन, कदाचित् भोजप्रबन्धं समालोच्य (A.D. ६६५—७०८ Dr. Mitra and A.D. ५७८ Prof. Wilson) धारानगराधिपतेः द्वितीयस्य वृद्धभोजस्य सभायां, कदाचिच्च खृः एकादशशताब्द्यां (१००५) भोजस्यान्यतमस्य सभायां तथाविधरत्नेषु अन्यतमत्वेन चोपस्थाप्यते। परमेषु कल्पत्रयेषु कः कल्पो मुख्य इति विनिश्चेतुं न शक्यते। अस्माकन्तु संवत्प्रवर्त्तयिता विक्रमादित्यः A.D. ५६ अब्दे एवासीदिति विश्वासः। अमरसिंहो लोके बौद्धमतावलम्बीति सुप्रसिद्धः। तदीयः कोषः प्राचीनरीत्या छन्दोपनिबद्धः सर्व्वकोषश्रेष्ठः परमोपादेयतया जगति सर्व्वत्रैव समादृतः।

* धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य॥

स कोषमिमं स्वर्गादिकतिपयैर्वर्गैर्विभज्य वर्गमध्ये चान्तरान्तरा वर्णानुक्रमरीत्या विरचितवान्।

अमरकोषस्य प्रचलितटीकाकृतां मध्ये—

मधुरेशः प्राचीनः शकस्य नरपतेः षष्ठशताब्द्यां प्रादुरासीत्। असौ कस्यचित् मुशलमानवीरस्य साहाय्येन सदैव शास्त्रानुशीलनमकरोत् इति उइल्सनसाहेवमतम्। शब्दरत्नावलीकारश्च स एव।

क्षीरस्वामी काश्मीरपतिललितादित्यस्य राजत्वसमये प्रादुरासीत्। जयापीड़ो नाम कश्चिन्नृपतिः अस्मादेव शब्दविद्यामधिगत्य अन्ते ललितादित्यपण्डित इति प्रसिद्धिमगात्। (खृः ७०५—७३१) रा.तर.४त.।

रायमुकुटः (१४३० खृः अब्दे) प्रादुरासीत्। रा.तर.।

गौराङ्गमल्लिकात्मजो भरतमल्लिको नातिप्राचीनो ग्रन्थकारष्टीकाकारश्च। असौ वर्द्धमानप्रदेशस्य पातिलपल्लीग्रामे सुकुलीनवैद्यवंशे न्यूनाधिकसार्द्धशतवर्षपूर्व्वं जातः। कविरयं सुप्रसिद्धः शाब्दिकः, कारकोल्लासस्य रचयिता, रघुवंशभट्टिकाव्यकुमारसम्भवादीनां टीकाकारश्च। तत्कृतयामरकोषस्य टीकयैव तस्य महती कीर्त्तिर्भारते चिरं स्थास्यति।

धन्वन्तरिनिघण्टुरपि अमरसिंहविरचितामरकोषसमसामयिक एवेति प्रमाणतो लभ्यते। असौ तु षट्शतवर्षपूर्व्वतनः इति मधुसूदनगुप्तस्य मतमुदयचन्द्रेण स्वग्रन्थे समुद्धृतम्। तत्प्रणीतो निघण्टुः प्रसिद्धः प्रामाणिकश्च, काशीप्रदेशे च समधिकं समालोचितो भवति।

हेमचन्द्राभिधानमभिधानचिन्तामणिनाम्ना ख्यातं विशिष्टरीत्या भागद्वयेन विभज्य हेमचन्द्राचार्य्येण विरचितम्। तयोः प्रथमः स्वर्गादिभिः षड्भिर्भागैर्विभक्तः, शब्दानां श्रेणीविभागश्च अन्त्यक्रमेण कृतः। द्वितीयश्च नानार्थघटितः। परं हेमचन्द्रोऽवतरणिकायां स्वाभिधानस्य केवलं प्रथमभागस्य शब्दरचनाप्रणालीमुपवर्ण्य द्वितीयस्य न किमप्युक्तवान्। तथा प्रथमस्येव द्वितीयस्य टीकापि न दृश्यते। अतो द्वितीयस्य हेमचन्द्रकृतित्वमाशङ्कमानैर्विद्वद्भिर्महेश्वरकृतस्य नानार्थवर्गस्य सन्निवेशनं तर्क्यते।

हेमचन्द्रः हेमाचार्य्ययतिर्वा प्राचीनजैनग्रन्थलेखको जैनधर्म्मावलम्बी चासीत्। असौ संवत्त्रयोदशशताब्द्यां (खृः द्वादशशताब्द्यां) पाटलिपुत्र-नगरे स्वजीवनस्यादिमं भागं नानाशास्त्ररचनया यापयित्वा अन्तिमे वयसि गुजराटदेशं गत्वा तत्र जैनधर्म्मसमालोचनया परां प्रतिष्ठामलभत, तत्रत्यञ्च सप्रकृतिं नरपतिं जैनधर्म्मं ग्राहयामास। श्रूयते च पार्श्वनाथमतावलम्बी हेमाचार्य्ययतिः अस्मिन्नेव समये रजःपूतनरपतिं शुणमरपालमपि जैनधर्म्मे दीक्षितवान्। एवमपि प्रसिद्धिरस्ति यथासौ हलायुधगुरुः लक्ष्मणसेनस्य सभायामासीत्। (संवत् १२३०) इति उइल-सनसाहवस्य उट्टङ्कनम्।

शब्दमाला—च रामेश्वरशर्म्मकृतातिसंक्षिप्ताभिधानसंग्रहः अमर-कोषस्य परिशिष्टभूता वङ्गभाषायां व्याख्याता च। इयं मेदिनीकरस्य पूर्व्वतन इति उइलसन्साहवमतम्।

नाममाला—धनञ्जयकृता। तत्र श्रेणीविभागस्यासद्भावात् प्राचीने-येयमित्यनुमीयते। धनञ्जयश्च दशमशताब्द्यां वर्त्तमान आसीत् इति बडुयामतम्।

भूरिप्रयोगो—दामोदरदत्तपुत्रेण सुप्रसिद्धसुपद्मव्याकरणकारेण पद्म-नाभदत्तेन विरचितो भागत्रयेण विभक्तश्च। पद्मनाभो मेदिनीकरस्या-धस्तनः आसीदिति स्वयमेव स्वग्रन्थे मेदिन्याः उल्लेखात् प्रमाणीकृतम्।

शब्दरत्नावली—मुशखानाभिधस्य कस्यचित् मुशलमानवीरस्याश्रयेण अमरटीकाकृन्मथुरेशेनामरकोषस्यैव प्रणाल्या विरचिता। तत्र शब्दानां भिन्नरूपाः पाठाः निर्णीताः।

जटाधरकोषः—चट्टग्रामवासिजटाधरेण विरचितः। जटाधरश्च अमर-कोषादर्शेन स्वनाम्ना कोषं प्रणिनाय। अयं नातिप्राचीन इत्यनुमीयते।

अभिधानरत्नमाला—हलायुधप्रणीता। इयं संक्षिप्ता स्वर्गभूनरक-वारिमिश्राख्यैः पञ्चभिर्भागैर्विभक्ता। हलायुधो भट्टभास्करशिष्यः केरल-देशीयो ब्राह्मणोऽतिप्राचीनो बौद्धधर्म्मावलम्बी च खृः द्वादशशताब्द्यां वर्त्तमान आसीत्। तस्य चाभिधाने उद्भिज्जद्रव्यखनिजद्रव्याणां मनोरमा

सूची वङ्गभाषया व्याख्याता। एवञ्च श्रूयते यथा हलायुधो लक्ष्मणसेनस्य सभापण्डित आसीदिति।

राजनिघण्टुः—अभिधानचूड़ामण्यपरनामधेयो वैद्यपतिनरहरिपण्डितेन वैद्यकसंहितामरविश्वहलायुधधन्वन्तरिनिघण्टुमदनपालनिघण्टुभोजराजशेषराजादिकृतग्रन्थेभ्यः उपादानानि समाकलय्य आनूपभूमिगुड़्च्यादिभिस्त्रयोविंशतिवर्गैः संविभज्य महाराष्ट्रकर्णाटादिभाषाभिर्द्रव्यादीनि व्याख्याय च रचितः।

"धन्वन्तरीयमदनादिहलायुधादीन्
विश्वप्रकाश्यमरकोषसशेषराजान्।
आलोक्य लोकविदितांश्च विचिन्त्य शब्दान्
द्रव्याभिधानगणसंग्रह एष सृष्टः॥"

असौ कस्माचित् काश्मीरपरिवाराज्जात इति स्वयमेव स्वग्रन्थे स्वीचकार। मतान्तरे त्वसौ दाक्षिणात्यनिवसतिर्ब्राह्मण इत्यभिधीयते। अत्र तेन शारीररोगनामौषधद्रव्यद्रव्यगुणादिकं नानायुर्वेदीयाशेषविषयान् सविस्तरमुपवर्ण्य चिकित्सकानां महानुपकारः साधितः। असौ नरहरिपण्डितो मदनपालादीनामधस्तनो, मदनपालादयश्च तदूर्द्धतना आसन्। तत्प्रादुर्भावसमयः (संवत् १७२५) सार्द्धद्विशतवर्षपूर्व्वं वासीत्। इति उदयचन्द्रः। निघण्टुरयं संस्करणानन्तरमस्मदीये देशे समादरेण परिगृहीतः सर्व्वत्रैवानुशीलितो भवति।

भावप्रकाशो—लटकमिश्रात्मजभावमिश्रविरचितः। अयमतिविस्तृतः सरुग्विनिश्चयचिकित्सितश्चिकित्सासङ्ग्रहो नानाप्राचीनसंहितासङ्ग्रहकोषनिघण्टुसमालोचनेन स्वकल्पनया च रोगलक्षणचिकित्सितपथ्यापथ्यद्रव्यद्रव्यगुणरसवीर्य्यविपाकजारणमारणशोधनादीनि समाकलय्य लिखितः। असौ भावमिश्रो वैदेशिकपर्टुगीजदेशीयैरानीतमुपदंशरोगस्यैव प्रकारान्तरलक्षणसम्पन्नं फरङ्गरोगं स्वग्रन्थे सचिकित्सितं वर्णितवान्। अभिनवानि च तोपचीनीसोहारादीनि कतिचित् वैदेशिकद्रव्याणि सगुणानि तत्र सन्निवेशितानि। तेषु उपदंशहरं तोपचीनीमूलं चीनदेशीयै-

भारतवर्षस्य गोयाप्रदेशे शतत्रयाधिकवर्षात् पूर्वं खृः (१५३५) समानीतम्। इति श्रीयाद्गजसाहवस्य मतम्। सुतरामेव भावमिश्रस्याविर्भावस्तत्काले तदनन्तरकाले वासीत्। भावप्रकाशसङ्ग्रहः काशीप्रदेशे वङ्गदेशे च चिकित्सकैरधिकं पठ्यते।

माधवनिदानं—माधवकरविरचितम्। अत्र माधवेन विविधप्राचीनतन्त्रवैद्यकसंहितादिभ्यः क्वचिदादर्शोद्धरणेन क्वचिच्च स्वरचितभाषया सारसङ्ग्रहेण पर्य्यायानुक्रमतो विविधरोगनिदानलक्षणादिकं लिपिषु सन्निबध्य भारतस्य चिकित्साशास्त्राध्यायिनां छात्राणां महानुपकारः साधितः। इदं माधवाचार्य्यविरचितमिति केषाञ्चित् मतम्। तन्न साधु, माधवकरः कर इत्युपाधिकोऽतिपुराकालीनो वैद्यजातीयग्रन्थकार आसीदिति प्रसिद्धिः। अन्यच्च चक्रपाणिदत्तो माधवीयनिदानस्य रोगानुक्रमणीमनुसृत्य स्वसङ्ग्रहं रचितवानित्यसौ ग्रन्थकारश्चक्रपाणिदत्तस्योर्द्धतन आसीदिति प्रतीयते। तथासौ चक्रपाणिः द्वादशशताब्द्यां गौड़राजस्य पाकशालाध्यक्षत्वं स्वसंग्रहे लिखितवान्। अपिच माधवः स्वग्रन्थस्योपसंहारे—यो गोविन्दः वृद्धभोजस्य पातञ्जलवृत्तिकारस्य समये (सप्तमशताब्द्यां) वर्त्तमान आसीत् तत्कृतिसूक्तिकर्णामृतनामग्रन्थस्य मुक्तावलीकारं गोविन्दाधस्तनं गुरुमङ्गीकृत्यात्मानं तत्समसामयिकं तदधस्तनं वा प्रतिपादितवान्। तस्य निदानमष्टमशताब्द्यामारवीयभाषयानुवादितमारवीयैश्चिकित्सकैरधीतमिति पुरातत्त्वविद् उइल्सनसाहवस्य मतम्।

व्याख्यामधुकोषो—(माधवीयनिदानस्य टीका) वैद्यवरश्रीविजयरचितेन श्रीकण्ठदत्तेन च विरचितः। तत्र द्वयोरेव नामदर्शनात् द्वयोरेव टीकाकर्त्तृत्वमनुमीयते। श्रीकण्ठः वृन्दकृतसिद्धयोगस्यापि टीकाकारः। कुसुमावली नाम्ना च सा प्रसिद्धा।

अर्कप्रकाशो—नाम चिकित्सासंग्रहो रावणेन प्रणीतः। रावणेनाचाभिनवा रोगाणां चिकित्साप्रणाली केवलेनैवार्केण प्रवर्त्तिता।

उणादिकोषः—सिद्धान्तकौमुदीप्रभृतीनामध्यायविशेषः। यत्र शब्दाः 'उण्' इत्यादिप्रत्यययोगेन सिध्यन्ति।

चिकित्साक्रमकल्पवल्ली—काशीनाथद्विवेदिविरचिता ; अयं वैद्यकचिकित्सासंग्रहः पाश्चात्यप्रदेशे प्रचलति ।

जयदत्तसूरिर्नातिप्राचीनोऽश्ववैद्यकप्रणेता । जयदत्तः शालिहोत्रनकुलभोजराजादिकृताश्वशास्त्रेभ्योऽश्वानां शुभाशुभलक्षणं सरुग्विनिश्चितं चिकित्सितञ्च समाकलय्य स्वग्रन्थं रचितवान् । अस्य प्रादुर्भावसमयनिरूपणमतीव दुरूहमिति न चेष्टा कृता । ग्रन्थोऽयं वाङ्गालादेशस्य आसियाटिकसोसाइटीसभानुमत्या तत्कृतव्ययेन च संक्षिप्तटीकासमेतो मया संस्कृतः ।

शार्ङ्गधरसङ्ग्रहः—सुप्रसिद्धशार्ङ्गधरपद्धतिकारेण शार्ङ्गधरेण विरचितः । ग्रन्थोऽयं नातिसङ्क्षिप्तः नातिविस्तरश्च, बहुषु पाश्चात्यप्रदेशेषु प्रचलितः । अयञ्च ग्रन्थकारः विश्वप्रकाशकृन्महेश्वरादधस्तन आसीत् । (Burnel's catalogue.)

रसेन्द्रसारसंग्रहः—प्रामाणिकरसग्रन्थः गोपालभट्टेन विरचितः । अत्र रसजारणमारणादिपुरःसरं रोगाणामशेषविधरसघटितयोगाः सङ्कलिताः । एतद्ग्रन्थकारः त्रयोदशशताब्दां वर्त्तमान आसीत् । (Aufrecht's catalogue.)

डल्वणाचार्य्यो निबन्धसंग्रहाख्यायाः सुश्रुतटीकाया रचयिता । एष श्रीभादानकदेशस्य विश्रुतमथुरानगरीसन्निहिते अङ्कोलानाम्नि वैद्यस्थाने सौरवंशीयद्विजान्वये जातः । असौ गोविन्दपालस्य प्रपौत्रः जयपालस्य पौत्रः नृपालभूपतेः प्रियतमस्य श्रीभरतपालस्य च पुत्र आसीत् । तेन जेज्जटगयदासभास्करश्रीमाधवब्रह्मदेवादीनां टीकापञ्जिकाटिप्पनीः उपजीव्य निबन्धसंग्रहो रचित इति स्वयमेव स्वकृतटीकायामभिहितम् ।

परिभाषाप्रदीपः—श्रीकृष्णवल्लभसेनपुत्रश्रीगोविन्ददाससेनविरचितः ।

प्रयोगामृतम्—अतिसुविस्तृतो वैद्यकचिकित्साग्रन्थो नृसिंहधन्वन्तरिशिष्य वैद्यचिन्तामणिकृतः । अयं ग्रन्थकारः श्रीखण्डसमाजान्तर्गतं मीरोलग्रामे शताधिकवर्षपूर्व्वं जातः । अस्मिन् समालोचिते चिकित्सकानां नानायोगादिषु सम्यगधिकारो जायते ।

शब्दचन्द्रिका—नाम द्रव्यगुणादिसंग्रहः चक्रपाणिदत्तेन प्रणीतः प्रसिद्धश्च। इयमुद्भिज्जखनिजप्राणिपथ्यापथ्यादीनां कार्य्योपयोगितया समाकलनात् सर्व्वत्र समादरणीया। अत्र द्रव्यनामानि वङ्गभाषया व्याख्यातानि।

भोजराजशिवराजमदनपाला दशमशताब्द्यां वर्त्तमाना आसन् इति प्रमाणतो लभ्यते। एषु आद्यद्वयस्य ग्रन्थावस्माभिर्न दृष्टौ। मदनपालनिघण्टुस्तु सर्व्वत्र प्रसिद्धो विस्तृतः प्रशस्तश्च। निघण्टुरयं मदनपालस्य नरपतेर्विनोदनार्थं केनापि विरचितः। अधुनोत्तरपश्चिमप्रदेशे छात्रैरधिकतरमालोच्यते। अत्र सनामद्रव्यगुणाः सविस्तरं वर्णिताः। द्रव्यनामानि च हिन्दीभाषया कथितानि।

विश्वप्रकाशो—नाम प्राचीनतरकोषो यदा कान्यकुब्जे विद्योत्साहिताया अतीव समादरस्तदा महेश्वरेण खृः द्वादशशताब्द्यां सङ्कलितः (शक १०३३) (A.D. ११११) (११५० वङ्गा)। महेश्वरो गाधिपुरवास्तव्यस्य साहसाङ्कनरपतेः चिकित्साधिकृतस्य श्रीकृष्णस्यान्वये जातः। इति पुरातत्त्वविदुइल्सनसाहवमतम्।

अजयपालकृतसंग्रहः—संक्षिप्तः परं बहुप्रमाणभूयिष्ठः। अजयपालो मेदिनीकरादधस्तनो जैनश्चासीत्। उइल्सनसाहवमतम्।

धरणिकोषः—कान्यकुब्जदेशीयेन द्विजधरणिदासेन कृतः। स मल्लिनाथादूर्द्ध्वतन आसीत्। उइल्सनसाहवमतम्।

त्रिकाण्डशेषः—परमजैनपुरुषोत्तमदेवविरचितः अध्यायत्रयात्मकश्च। ग्रन्थोऽयं अमरादिकोषपरिशिष्टमात्र एवाप्रसिद्धशब्दैः परिपूर्णः।

हारावल्यपि—संक्षिप्ताप्रसिद्धासाधारणशब्दैः ग्रथिता भागद्वयेन विभक्ता च। तयोः प्रथमो भागः पर्य्यायसंग्रहः, द्वितीयश्च नानार्थसंग्रहः। (समयः नवमी दशमी वा शताब्दी) इति उइल्सनसाहवमतम्।

मेदिनीकोषः—प्राणकरसुतमेदिनीकरप्रणीतः अभिधानरत्नमालेत्यपरनाम्ना लोके विदितः। मेदिनीकरो महेश्वरादधस्तनः चतुर्दशशताब्द्या अन्ते महेश्वररायमुकुटयोर्मध्यवर्त्तिसमये (A.D. 1111—1430)

प्रादुरासीत्। कोषोऽयमन्त्यादिक्रमेण सुलभगम्यसुप्रशस्तसुष्टुरीत्या विरचितः। कर इत्युपाधिना वैद्यजातीयोऽयं वङ्गदेशवासी चेत्यनुमीयते। उज्ज्वलसनसाहबमतम्।

रत्नावली—नाम द्रव्याभिधानं वङ्गदेशवासिना रसकौमुदीकारेण माधवेन विरचितम्। तस्यां द्रव्यनामानि वङ्गभाषया कथितानि।

राजवल्लभीयद्रव्यगुणः—राजवल्लभकृतः परं श्रीनारायणदासकविराजेन सविस्तरं व्याख्याय प्रतिसंस्कृतश्च। राजवल्लभश्च वैद्यपरम्परागतश्रुत्या अष्टादशशताब्दां (१७६०) वर्त्तमान आसीत्। ग्रन्थोऽयं परिच्छेदषट्कैः अतीवसुष्ठुश्रेण्या विभक्तः प्रयोजनोपयोगी च। अयं वङ्गदेशे प्रायेणायुर्वेदपाठार्थिभिः पठ्यते।

रत्नमाला—नाम द्रव्याभिधानं केनापि वङ्गीयग्रन्थकाररचितमिति प्रतीयते। तस्यामुद्भिज्जखनिजद्रव्याणि सपर्य्यायाणि वङ्गभाषया व्याख्यातानि। उज्ज्वलसनसाहबस्तु बौद्धग्रन्थकाररचितमित्याह।

उपसंहारसमये महाराजाधिराजश्रीश्रीश्रीश्रीश्रीविजयनगराधिपतिमहोदयसमीपे विज्ञप्तिरियम्—

महाराजाधिराज!

सामग्रीषु सुसज्जितास्वपि यथाभीष्टानुकूलासु च
श्रीविष्णोरिव लोकरञ्जनरतेः राजाधिराजस्य ते।
आशास्यो यदि नाघटिष्यत कृपासंयोग एव प्रभोः
सिन्धोरन्तरलेष्यतैव मथनस्याशालता सा चिरम्॥

आशंसमानो देवस्य राजन्वत्तामविच्युताम्।
आयुष्मत्ताञ्च विनयनिवेदनपुरःसरम्।
याचतेऽयं जनो नित्यं कृतज्ञत्वमनुस्मरन्।
देवपादाब्जमूलेषु देहस्यैव विसर्ज्जनम्॥

साधुहृदय-डाक्तार-श्रीमहेन्द्रलालसरकारमहोदयसमीपेऽपि चिरकृतज्ञतापाशेन बद्धोऽस्मि। अत्र चाभिधाने प्रेसिडेन्सिकलेजे संस्कृताध्यापकेन श्रीयुक्तनीलमणिन्यायालङ्कारेण मच्छुभाकाङ्क्षिणा महोपकारः

साधितः। तथा तत्रैव सहकारिसंस्कृताध्यापकेन श्रीयुक्तहरिश्चन्द्रकविरत्नेन एतस्य मुद्रणे संशोधने च महान् परिश्रमः कृतः। अतस्तयोरुभयोः सकाशे कृतज्ञोऽस्मि। इत्यलं पल्लवितेन।

सङ्कलयितुः

श्रीउमेशचन्द्रगुप्तस्य।

PREFACE.

ANCIENT KOSHAS :—Dictionary or Kosha, as a rule, is a store-house of words in general specifying their applicable meanings and genders. Almost all the old Koshas or Sanskrit Dictionaries hitherto published have been composed in verse and divided into Vargas or groups and classified under different arrangements ; such as Amarakosha, Hemachandrakosha &c.

Dravyábhidhána, Nighaṇṭu, Dravyaguṇábhidhána and Paribhásha &c. are Áyurvedic Medical Dictionaries. There are many of these Dictionaries, but all of them are entirely devoted to the description of synonyms, properties, tastes, irritating and cooling qualities and vipáka or result of assimilation of individual medical drugs, minerals, animals and vegetables. Such works are composed in verse with explanations of drugs and other substances in different languages, viz :—Bengali, Hindi, Maháráshṭra &c. Works under the name of Dravyábhidhána, such as Ratnamálá, contain only lists of medical drugs, minerals, animals &c. Whilst works included under Dravyaguṇábhidhána, such as Rájaballabhíya Dravyaguṇa, Śabdachandriká &c. explain the names of medicinl substances with their properties, tastes &c. Paribhásha is a treatise on medical technical terms, and general descriptions of Pháṇṭa, Kasháya &c. They are Paribhásháprадípa and others.

The words contained in Sanskrit Dictionaries, innumerable as they are, are of seven kinds, so far as their construction and derivation are concerned ; viz :—रूढ़ि (usage) ; स्वभाव (derivation) ; देश्योक्ति (local use) ; लाञ्छन (outward signs of things named) ; उपमान (comparison) ; वीर्य्य (inherent energy) ; and भिन्नभिन्नदेशनाम (names of foreign origin). Drugs used in medical sciences have their nomenclature in three different ways :—(1) Some are known everywhere by one and the same name, (2) some by names used in hilly tracts of countries where they grow, and (3) others by different names given to them in different countries. The names of material objects are explained in different languages in different dictionaries, so as to render them intelligible to students conversant with any particular language. If however attempts were made to explain the words of material objects in one particular dialect, the result would be to make the vocabulary useless to those unacquainted with that language and thwart the very object of the compilation. It is, for this reason, absolutely necessary, that the names of medicinal drugs and other equally important substances should be explained in two or

three well-known current languages. There are some material drugs grown in hilly tracts mentioned in the Koshas which are never to be seen in the plains; and consequently the physicians know of their names and properties only in words. Some of these are मेदा, महामेदा &c. These substances being scarcely found now-a-days their discoverers have wisely suggested adequate substitutes in अश्वगन्धा, शारिवा &c.

The ancient mode of teaching was to make the pupils get the Kosha by heart as being indispensably necessary for the purpose of studying science in general and the medical science in particular. This process was of course resorted to by the few who happened to be gifted with retentive memory, but to others, whose number was far more numerous, it presented an insuperable barrier in the way of their medical study and not unoften dissuaded them altogether from such a pursuit. It cannot, however, be denied that, this process of training proved eminently advantageous to the few medical students who achieved success and began life as the reliever of human sufferings. The boundless fields of material objects, some nectar like, others possessing deleterious properties, some comprising our food affording nourishment both to our body and brain and some possessing healing and cooling properties; whilst others having killing properties. All these formed the exclusive subject of researches of the ancient Rishis—Bharadvája, Átreya, Agniveśa and others. These Rishis after having ascertained the different properties of different drugs, had them procured through the hermits and others who used to spend their lives in the wilderness. With their wonted zeal and perseverance they carefully verified their efficacious qualities as affecting human system and introduced them in the medical science. They therefore firmly believed that, a thorough knowledge of these drugs formed the most important factor in the attainment of success in medical treatment, and the only way to utilise them as the means of ready reference was to get their accumulated treasures of experience by heart. They were therefore of opinion that, before commencing his practice the medical student must get Dravyábhidhána by heart, as the students of the Calcutta Medical College do pathology; for without a complete knowledge of the drugs—both theoretical and practical,—the very object of medical treatment would be defeated.

Thus the idea to get all the above-mentioned ancient medical books by heart and to retain them in memory throughout lifetime without losing a single link of the entire chain, is positively impracticable and decidedly discouraging to many who may be inclined to study the Hindu medical science.

To compile therefore a dictionary of the description just given is indeed a hopeless task. To collect and collate words from different printed books and MSS. of this country, the latter replete with the blunders of copyists, is a task as arduous as it is discouraging. Sometimes it becomes even hopeless to ascertain the real reading even by consultation with learned physicians. When such difficulties presented themselves in my way, all my endeavours to surmount them with the assistance of others proved fruitless.

It will thus be easy to imagine how very difficult it must be for one of my moderate ability to undertake a task hitherto unattempted by the best Paṇḍits of the country. No one but those who have employed themselves in similar labours can at all realize the amount of tedious toil involved in the compilation of such a work. Indeed the prospect of success began to appear to me more and more gloomy, as I slowly pressed onward. The errors and imperfections with which the compilation must abound even if it were destined to be completed, became more and more manifest; and my attempt to complete the work would have been nipped in the bud but for the encouragement I received by the example of old writers on the subject.

A few years ago my patron Dr. Mahendralal Sircar was engaged in the task of translating the Charakasaṃhitá into English. I was appointed to assist him in this translation. In the course of his labours he had frequent occasions to consult the existing dictionaries for appropriate medical technical terms. He was, however, very much disappointed in his expectations. No alphabetical medical dictionary being available at the time to render him material help in the selection of appropriate terms, he had to own that such a work was a great desideratum, and expressed a desire that I should undertake to supply this long felt want. The method of compilation was also suggested by him.

In compliance with his request I commenced my work. Want of leisure prevented Dr. Mahendralal Sircar from continuing the translation above mentioned; but I did not abandon the idea of such a compilation. I persevered in my labours and after an unremitting work of upwards of three years I finished my compilation and had the satisfaction of presenting the first printed sheet to Dr. Sircar and subsequently to Dr. Rájá Rájendralála Mitra, both of whom while expressing their satisfaction favored me with their letters of approbation, which I have much pleasure to insert further on.

The difficulties I met with in the compilation of my lexicon were nothing in comparison to what I felt in connection with the publication

of the dictionary. Encouraged by these gentlemen I appealed to the public for pecuniary assistance to enable me to carry the work through the press and eventually present the publication to the public who take an interest in, and encourage the study of, Sanskrit Literature, especially the science of medicine. Unfortunately, however, I received very little support. In short after the lapse of one year I thought of giving up the work in despair when, by the help of my friend Bábu Nílamaṇi Mukerjee M. A. B. L. Professor of Sanskrit in the Presidency College, I obtained an introduction to His Highness the Mahárája of Vizianagram. This illustrious Mahárája accorded me a most cordial reception. The extraordinary and unexpected condescension on His Highness' part encouraged me to represent my case more fully than I had hoped to do. As an exemplar in the works of active benevolence and as a patron of Science and Literature, His Highness at once grasped and realized the necessity for an alphabetical medical lexicon of the above description for the purpose of helping the study of Hindu Medical Science ; and with His Highness' wonted liberality immediately offered me his full support. Thus the fruits of my labours extending over several years were at last saved from being consigned to oblivion. I am now able and do myself the honour to offer to the literary public my humble compilation of Vaidyakaśabdasindhu and hope that they will afford me the encouragement they think proper.

It is necessary to add that, in my alphabetical arrangements I have followed the method adopted in the Śabdakalpadruma and as a mark of my respect to the learned Paṇḍits of my country I have assigned to ক্ষ a separate space at the end.

For fear of unnecessarily increasing the bulk of the dictionary I have not followed the plan of Śabdakalpadruma in giving all the synonyms together. I have, however, given the most selected medical terms with their medical meanings which are quite enough for my present purpose. Where a word conveys various meanings, I have endeavoured to show them, as far as practicable, in their respective places. In the description of qualities and medicinal virtues of different drugs, the Rishis of different periods have held different opinions. In such cases, I have taken only two or three authorities generally accepted and avoided mentioning others whose opinions are either obsolete or not well grounded and consequently unnecessary for my present purpose. I have also attached at the beginning of the work a list of abbreviations of words required for reference. Pathology of diseases and the process of preparation of efficacious medicinal Oils, Ghṛitas and compound medicines have been added by the special desire of the Mahárája.

In order to render the names of drugs intelligible to the people of different countries, I have given their meanings and explanations in the following Languages, viz :—Latin, Bengali, Hindi, Mahárásh̤tra, Telegu, Kárṇátic &c. The Latin synonyms have been taken from Watt's Economic Products of India, Udayachánd Datta's Materia Medica, Professor Wilson's Sanskrit-English Dictionary and Professor Monier Williams' Sanskrit-English Dictionary. Hindi and other synonyms have been collected from Bhávaprakáśa, Rája-nighaṇṭu, Madanapála-nighaṇṭu, Dhanvantari-nighaṇṭu &c. For Telegu terms I am indebted to Bábu Rádhánáth Biswás, at whose request the Paṇḍits of His Highness' court have rendered me all the assistance I needed.

Of the authors, both ancient and modern, from whose works I have collected the materials for my dictionary, I would give only a brief history of their lives and writings—

Charakasam̲hitá—a treatise on Káyachikitsá or treatment of general diseases, is generally considered to be older than the Suśrutasam̲hitá, and it is the first medical work of the Átreya school. The origin and dissemination of this wonderful work are ascribed to the sage Bharadvája. At the close of Satyayuga when diseases began to make their appearance to an alarming extent, Bharadvájamuni, as President of the great council of Rishis, brought down Áyurveda, a part of Yajurveda, from heaven and gave instructions to his pupil Kṛishṇátreya. Agniveśa, one of the six pupils of Kṛishṇátreya, in common with his other fellow students, wrote a treatise on Káya-chikitsá in accordance with his instructions, which being found to be the best was published in the name of the writer and styled "Agniveśatantra." This work was subsequently re-edited and enlarged with elaborate explanations by Charakácháryya and published in his own name as "Charakasam̲hitá." He divided it into eight Sthánas or books, such as Sútrasthána, Nidánasthána &c. The whole work contains one hundred and twenty chapters. It is mentioned at the end of the Charakasam̲hitá, that Dṛiḍhabalamuni of the Punjab completed the book by adding seventeen chapters to Siddhi and Kalpasthánas.

According to Dr. Udayachánd it would seem that, Agniveśatantra was not edited and corrected by Charaka until after the period of Vábhaṭa; he infers this from the mere fact that while mentioning the name of all the learned and celebrated Rishis of the time, Vábhaṭa made no mention of the name of Charaka in his work. This opinion of Dr. Udayachánda Datta does not appear to be correct as Vábhaṭa mentions Charaka's name in many places of his work. (See वाभट p. 110. Vol. I. and pp. 826—827. Vol. II. Bombay Ed.)

अग्निरसः। पुं। राजयक्ष्मणि हितः। अन्यश्च क्षयकासे हितः। तयोः प्रथमः—वज्रहाटकसूतानां भस्मैकं द्वित्रिषट् क्रमात्। त्रिकण्टकरसैर्भाव्यं दिनान्ते तद्विचूर्णयेत्। गुञ्जामात्रं प्रयोक्तव्यं सज्वरे राजयक्ष्मणि। स्नुहीमूलञ्च जम्बीरद्रवैः स्यादनुपानकम्।…खादेत् त्रिनिष्कम्…। हीरकस्य १भ. स्वर्णस्य २भ. रसस्य ३भ. गन्धकस्य च ६भ.। द्वितीयः—शुद्धसूतं द्विधा गन्धं कुर्य्यादद्येन कज्जलीं। तयोः समं तीक्ष्णचूर्णं मर्द्दयेत् कतकद्रवैः। द्वियामान्ते कृतं गोलं ताम्रपात्रे विनिःक्षिपेत्। आच्छाद्यै रण्डपत्रेण यामार्द्धेऽप्युष्णता भवेत्। धान्यराशौ न्यसेत् पश्चात् द्वियामान्ते समुद्धरेत्। संपेष्य गालयेद्वस्त्रे सद्यो वारितरं भवेत्। त्रिकटु त्रिफला चैला जातीफललवङ्गकम्। एषाञ्च नवभागानां समं पूर्व्वरसो भवेत्। संचूर्ण्यालोड़येत् क्षौद्रैर्भक्ष्यं निष्कद्वयं द्वयम्। अयमग्निरसो नाम्ना क्षयकासनिकृन्तनः। इन्द्रवारुणिकामूलं भृङ्गकृष्णतिलैः सह। भक्षयेत् क्षयकासार्त्तो निष्कमात्रं प्रशान्तये॥ पारदस्य १भ. गन्धकस्य २भ.। द्वयोः समं तीक्ष्णलौहचूर्णं निर्म्मलीफलरसेन कन्यारसेन वा प्रहरद्वयं संमर्द्य गोलकङ्कृत्वा एरण्डपत्रैराच्छाद्य ताम्रपात्रे निवेश्य च धान्यराशौ प्रहरद्वयं अष्टरात्रं वा न्यसेत्। अथोद्धृत्य गोलितं जलवद्भवेत्। त्रिकट्वादिचूर्णं मिलितं पूर्व्वचूर्णसमं (नवद्रव्यस्य९भ.) ग्राह्यम्। रस.र.। भावप्रकाशे, कतकद्रवैः=कन्यकाद्रवैः। तथा द्वियामान्ते=अष्टरात्रात्।नवभागोन्मितैः। भा.पाठः।

अग्निरुहा। स्त्री। मांसरोहिण्याम्। रा.नि.व.१२।

अग्निरोहिणी। स्त्री। मांसरोहिण्याम्। মাংসরোহিণী। वा.उ.३१अ.। तन्नामकक्षुद्ररोगविशेषे। सा त्रिदोषजा। पित्तोल्वणैर्मलैः ज्वरवतः मांसदारणाः कक्षाप्रदेशेषु येऽग्निसदृशाः स्फोटा जायन्ते साऽग्निरोहिणीत्युच्यते। "मलैः पित्तोल्वणैः स्फोटा ज्वरिणो मांसदारणाः। कक्षाभागेषु जायन्ते येऽग्न्याभाः साऽग्निरोहिणी। पञ्चाहात्सप्तरात्राद्वा पक्षाद्वा हन्ति जीवित"मिति॥ एतस्य चिकित्सितं वा.उ.३२अ.मृग्यम्।

अग्निलौहः। पुं। अग्निमुखापरनामकोऽर्शोघ्नोऽयं रसः। यथा—"चित्रचित्रकनिर्गुण्डीस्नुहीमुण्डितिकाज्झटाः। प्रत्येकशोऽष्टपलिका जलद्रोणे विपाचयेत्॥ पलत्रयं विड़ङ्गस्य व्योषं कर्षत्रयं पृथक्। त्रिफलायाः पलं पञ्च शिलाजतुपलं न्यसेत्॥ दिव्यौषधिहतस्यापि वैकङ्कतहतस्य वा। पलद्वादशकं देयं रुक्मलौहस्य चूर्णितम्॥ घृताच्चतुर्विंशतिभिर्मधुशर्करयोरपि। घनीभूते च शीते च दापयेदवतारिते। एतदग्निमुखं नाम दुर्नामान्तकरः परः॥……मुण्डितिका मुण्डीरी। अज्झटा भूम्यामलकी। चित्रतादीनां रसेनापि पाकव्यवहारः। क्काथः पादावशिष्टः। पाकावतारणकाले प्रक्षेपार्थं विड़ङ्गादीनां चूर्णम्। त्रिफलाया मिलित्वा पञ्चपलानि। शिलाजतु १प.(शिवागुड़िकोक्तरीत्या शोधितम्)। दिव्यौषधिः स्वर्णमाक्षिक-मनःशिले। वैकङ्कतो वनपालङ्कः। रुक्मलौहं वज्रमाण्डादि। तच्च रसायनोक्तरीत्या जारणपुटनादिना सूक्ष्मचूर्णितं। घृतात् चतुर्विंशतिपलानि मधुशर्करयोरपि प्रत्येकं चतुर्विंशतिः। तप्तपूते लौहं दत्त्वा पश्चात् शर्करासहितं क्काथं दत्त्वा पाकः कार्य्यः। अवतारणसमये विड़ङ्गादिचूर्णप्रक्षेपः। शीते पर्य्युषिते च मधु देयं। रस.र.अर्शः-चि.।

अग्निवक्त्रः। पुं। भल्लातकवृक्षे। ভেলাগাছ।

मद.व.१। चित्रकक्षुपे। চিতে গাছ। [ओषधौ।
अग्निवती । स्त्री। आगिया इति लोकप्रसि-
अग्निवर्द्धक: (न:) । त्रि। अग्न्युद्दीपके,मरि-
चादौ। आग्नेयद्रव्यमात्रे। अग्निवृद्धिकर। राज.।
अग्निवलवृद्धि: । स्त्री। जठरानलस्य वृद्धौ।
च.द.अर्श:-चि.।
अग्निवल्लभ: । पुं। Resin. सर्जयोनिशाल-
विशेषे। राले। धूना। वै.च.। रा.नि.व. ६१२।
मद.व.३। See सर्ज:।
अग्निवल्ली । स्त्री। लताविशेषे। र.सा.सं. अ-
भिन्यासज्व. स्वच्छन्दनायकरसे।
अग्निवाह: (हु:) । पुं। धूमे। वै.च.४का.।
अग्निविकार: । पुं। तन्नामकरोगभेदे। स
चतुर्भेद:। शार्ङ्ग.पू.७अ.। See अग्नि:।
अग्निविवर्द्धन: । त्रि। यमान्यादौ।
अग्निविसर्प: । पुं। See अग्निवीसर्प:।
अग्निवीजम् । क्ली। सुवर्णे। त्रिका.।
अग्निवीज: । पुं। अग्निमन्थे।
अग्निवीर्य्यम् । क्ली। स्वर्णे। रा. नि. व. ३।
अग्निवीसर्प: । पुं।(Pain from a boil.)
विसर्पभेदे—यत्र सर्व्वाङ्गं दीप्ताङ्गाराकीर्णमिव भ-
वति, शरीरे च यं यं देशं प्रति चलति स स दे-
श: शान्ताङ्गारवदसितो नीलो रक्तो वा भवति।
तथा झटिति अग्निदग्ध इव स्फोटैराचितो भव-
ति। अङ्गव्यथा संज्ञानाश: निद्रानाशश्च भवति। ल-
क्षणं—वातपित्तज्वरच्छर्दिमूर्च्छातीसारतृड्भ्रमै:।
अस्थिभेदाग्निसदनतमकारोचकैर्युत:। करोति स-
र्व्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत्। यं यं देशं विस-
र्पश्च विसर्पति भवेत्स स:। शान्ताङ्गारासितो नीलो
रक्तो वाशु च चीयते। अग्निदग्धइव स्फोटै: शीघ्र-
गत्वाद्द्रुतञ्च स:। मर्मानुसारी वीसर्प: स्याद्वातोऽ-
तिवलस्तत:। व्यथेताङ्गं हरेत्संज्ञां निद्राञ्च श्वासमी-
रयेत्। हिक्काञ्च स गतोऽवस्थामीदृशीं लभते न
ना। क्वचिच्छ्रमारतिग्रस्तो भूमिशय्यासनादिषु। चे-
ष्टमानस्तत: क्लिष्टो मनोदेहश्रमोद्भवाम्। दुष्प्रबोधो-
ऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते॥वा.नि.१३अ.।
अग्निवृद्धि: । स्त्री। अग्निदीप्तौ। क्षुधावृद्धि।

अग्निशिखम् । क्ली। सुवर्णे। रा.नि.व.१३।
Safflower (Carthamus tinctorius) कु-
सुम्भपुष्पे। কুসুমফুল। Saffron (Crocus sa-
tivus) कुङ्कुमे। भा.पू.२भ.। मद.व. ३।
अग्निशिख: । पुं। कुंकुमवृक्षे। কুঙ্কুমগাছ।
रा.नि.व.१२। लाङ्गलिकावृक्षे। বিষলাঙ্গলিয়া
গাছ। रत्ना.। कुसुम्भवृक्षे। কুসুম গাছ। श.र.।
पूतिकरञ्जे। নাটা। शरवे। ওল গাছ। प.मु.।
अग्निशिखा । स्त्री। (Gloriosa super-
ba). लाङ्गलिकौषधौ। বিষলাঙ্গলিয়া। हिं क-
रिहारी। भा.पू.१भ.गु.व.।
अग्निशेखरम् । क्ली. पुं। कुङ्कुमे। रा. नि.
व.१२। कुसुम्भपुष्पे। लाङ्गलीवृक्षे। विशल्यानाम-
शाकभेदे। [२९अ.।
अग्निष्टोम: । पुं। सोमलतायाम्। सु. चि.
अग्निसंस्कार: । पुं। अग्निदाहकर्म्मणि।
अग्निसंस्पर्शा । स्त्री। पर्पटीनाम-सुगन्धद्रव्ये।
सा च उत्तरदेशे प्रसिद्धा। भा.पू. १भ.क.व.।
अग्निसन्दीपन: । त्रि। अग्निवर्द्धके। क्षुधा-
वर्द्धक। Increasing appetite.
अग्निसन्दीपनरस: । पुं। अग्निमान्द्ये रस:।
यथा—पञ्चकोलं मरिचं, पञ्चलवणं, यवक्षार:,
टङ्कणं, सर्जिक्षार:, जीरकं, कृष्णजीरकं, यमानी,
वचा, मधुरिका, हिङ्गु, चित्रकं, जातीफलं, कुष्ठं,
जातीकोष:, त्रिजातकं, तिन्तिड़ीत्वग्भस्म, अपा-
मार्गभस्म, विषं, गन्धकं, पारद:, अभ्रं, लौहं,
वङ्गं, लवङ्गं, हरीतकी चैतेषां प्रत्येकमेकैको भाग:
अम्लवेतसस्य २भ. शंखभस्मनश्च ४भ.। भैष.।
अग्निसम्भव: । पुं। (Wild saffron)
अरण्यकुसुम्भवृक्षे। বনকুসুম। रा.नि.व.४। अग्नि-
जारवृक्षे। रा.नि.व.६।
अग्निसहाय: । पुं। वन्यपारावते। घुघु।
मं होगला पक्षी। रा.नि.व.१९। वायौ।
अग्निसाद: । पुं। अग्निमान्द्ये। मन्दाग्नि।
सा.कौ.ज्व.चि.। [अर्श: चि.।
अग्निसाध्य: । त्रि। अग्निदाहसाध्ये। च.द.
अग्निसारम् । क्ली। (A sort of collyri-

um.) रसाञ्जने । रा.नि.व.१३ ।

अग्निसारा । स्त्री। फलशून्यशाखायाम् । रा. नि.व.२ । मञ्जर्य्याम् ।

अग्निसुन्दररसः । पुं। अजीर्णाधिकारे रसः। यथा—टङ्कणं भागमेकञ्च मरिचञ्च द्विभागिकम् । आर्द्रकस्य रसेनैव भावना चात्र दीयते ॥ अनु.लव-ङ्गम् । प्रयोगा. ।

अग्निसेवनम् । क्ली । अग्निसेवायाम् । আগুন পোওয়ান । गुणाः—शीतवातस्तम्भकफवेपथुघ्नं र-क्तपित्तकरम् आमाभिष्यन्दपाचनञ्च । मद.१३व. ।

अग्निहानिः । पुं। अग्निमान्द्ये । वा.नि.१३अ.।

अग्न्या । स्त्री । तित्तिरपक्षिणि । गवि । हला.।

अग्न्याशयः । पुं । पक्काशये । পাকাশয় ।

अग्रम् । क्ली । पलपरिमाणे । "परिमाणे पलस्य च" । मे.रद्विकं । वृक्षाग्रे ।

अग्रकाण्डः । पुं । काण्डाग्रे ।

अग्रजः । पुं । काकविशेषे । भासपक्षिणि ।

अग्रजङ्घा । स्त्री । The fore part of the leg. जङ्घाग्रभागे । हे.च.। [জরা ।

अग्रधान्यम् । क्ली । धान्यविशेषे। জনার । বা-

अग्रपर्णी । स्त्री । A plant cowhage. शू-कशिम्ब्याम्। আলাকুশী। प.मु.।See आत्मगुप्ता ।

अग्रपाणिः । पुं । हस्ताग्रे ।

अग्रपुष्पः । पुं। वेतसवृक्षे । বেতগাছ । प.मु.।

अग्रमांसम् । क्ली । The heart. हृदये । वुक्कायाम् । हृदयान्तर्गतमांसवृद्धिरूपरोगविशेषे । অগ্রমাস । सु.शा. ।

अग्रलोद्यः । पुं । चिञ्चोटकक्षुपे । চেঁচ্কো, চিঞ্চোড়মূল । गुणाः—गुरुपाकः,शीतलः, अजी-र्णकरश्च । राज. । [৩ ।

अग्रलोहिता । स्त्री । चिल्लीशाके । रा.नि.व.

अग्रवीजः । पुं । वीजाग्रवृक्षमात्रे । यथा कुरु-ण्टादिः । हे.च. । A viviparous plant as the Gomphroena globosa &c.

अग्रव्रीहिः । स्त्री । प्रसाधिकायाम् । নবান্নে ধান । र.मा.।

अग्रहायणः । पुं । मार्गशीर्षमासे । অগ্রহায়ণ মাস । [गौड़ । श.च.।

अग्रिमा । स्त्री। लवलीवृक्षे । নোণা গাছ इति

अग्रुः । स्त्री । अङ्गुली । আঙুল ।

अग्र्या । स्त्री । त्रिफलायाम् ।

अघनम् । क्ली । दधनि । দই । हला. ।

अघविषः । पुं । सर्पे ।

अघोरनृसिंहरसः । पुं। सान्निपातिकज्वरे रसः । See घोरनृसिंहरसः ।

अङ्कः । पुं । शरीरावयवे । কোল । रा. नि. व. १८ । वा.चि.७अ. । चिह्ने, रेखायाम् । पापे। दुःखे । मे.कद्विकम् । [प.मु. ।

अङ्कनः । पुं । अङ्कोटवृक्षे । আঁকোড় গাছ।

अङ्कपादम् । क्ली । कायेणाद्यवयवविशेषे । वा. सू.१६अ. ।

अङ्कपाली । स्त्री । धात्र्याम् । धात्री । वेदि-काख्यगन्धद्रव्यविशेषे । "धात्रीवेदिकयोरपि ।" मे. लचतुष्कं । आलिङ्गने । मे. ।

अङ्कलेख्यः । पुं । चिञ्चोडवृक्षे । চেঁচ্কোমূল।

अङ्कलोद्यः । पुं । चिञ्चोटकक्षुपे । চেঁচ্কো। See अग्रलोद्यः ।

अङ्कुरः । पुं । प्ररोहे । পোঁক । वा.उ.३६अ.। जले । रुधिरे । लोम्नि । मुकुले । फले । सर्व्वञ्च मे. रत्रिकं । अभिनवोद्भिदि । मे. ।

अङ्कुशः । पुं । शृणौ । ডাঙশ । हला. ।

अङ्कूरः । पुं । अङ्कुरे । हे.च.४का.।

अङ्कोटः(ठः) । पुं । अङ्कोटकवृक्षे । र.मा. । (सु.मि.अ.३६) । भा.पू.१भ.गु.व. ।

अङ्कोटकः । पुं। (Alangium Hexapeta-lum) स्वनामख्यातवृक्षे। আঁকোড় গাছ, ধলা আঁকোঁড় । हिं ढेरा । भा.। रा.नि.व.६। अस्य गु-णाः—कटुः, तीक्ष्णः, स्निग्धः, उष्णः, तुवरः, लघुः रेचनः, कृमिशूलामशोफश्लेष्मविषघ्नश्च। तत्फलगु-णाः—शीतलं, स्वादु, श्लेष्मलं, वृंहणं, गुरु, वल्यं, विरेचनं, वातपित्तदाहक्षयास्रजित्। मद.व. १ । विषलूतादिदोषनुत् वातकफहरः शुद्धिकृच्च । रा.

नि.व. ६ । च.द.अ.सा.चि. ।

अङ्कोठवटकः । पुं । रक्तातिसारे देय-वटके । यथा--पलमङ्कोठमूलस्य पाठां दार्व्वीञ्च तत् समाम् । पिष्ट्वा तण्डुलतोयेन वटकानक्षसम्मितान् ॥ छायाशुष्कांश्च तान् कुर्य्यात् तेष्वेकं तण्डुलाम्बुना । पेषयित्वा प्रदद्यात्तं पानाय ॥ भा.म.ख. ।

अङ्कोलः । पुं । अङ्कोटकवृक्षे । আঁকোড়গাছ। र.मा. । भा.म.ख.१भ.अतिसा.चि.। "अङ्कोलमूलकल्कः ।" वा.उ.३८अ. ।

अङ्कोलकः । पुं । अङ्कोटवृक्षे । কাঁক্‌রোল । ওকড়া इति च र.सा.सं. ।

अङ्कोलफलसङ्काशः । पुं। फलविशेषे । পেস্তা इति लोके ।

अङ्कोलतैलम् । क्ली । तन्नामकफलवीजतैले । আঁকোড়বীজের তৈল । गुणाः—"अङ्कोलतैलं वातघ्नमभ्यङ्गात्त्वग्रुजापहं । कफनाशकरं प्रोक्तं पूर्व्ववैद्यैर्महर्षिभिः ॥" वै.निघ. ।

अङ्कोल्लः । पुं । देवदारुणि । रा.नि.व.२३। वा.उ.३८अ. । [मद.व १ ।

अङ्कोल्लकः । पुं। अङ्कोटवृक्षे । আঁকোড়গাছ।

अङ्कोल्लसारः । पुं । मालवप्रसिद्ध-स्थावरविषप्रभेदे । A kind of poison. हे.च.४का.।

अङ्गम् । क्ली । वोले । সুগন্ধ বোল । रा.नि.व.६ । शरीरे । शरीरावयवे । रा.नि.व १८ । उपसर्जनभूते । हे.च.नानार्थः । [वा.नि.१३अ.।

अङ्गगौरवम् । क्ली। शरीरगुरुत्वे। গা ভার ।

अङ्गग्रहः । पुं । अङ्गवेदनायाम् । গা ব্যথা । वा.नि.१६अ. ।

अङ्गग्लानिः । स्त्री । Langour. देहजाड्ये । শরীরের জড়তা । वा.चि.२२अ. ।

अङ्गघातः । पुं । अङ्गाघाते । গায়েলাগা । Bodily pain.

अङ्गचयः । पुं। गुदवृषणयोर्मध्यभागे । वै.निघ.।

अङ्गचेष्टा । स्त्री । अङ्गचालने । অঙ্গচালনা । वा.नि.१५अ. ।

अङ्गजम् । क्ली । रक्ते । मले । मे.जत्रिकं ।

अङ्गजः । पुं। केशे ।रोगे ,मांसधातौ ।मदे ।वि.।

अङ्गज्वरः । पुं । राजयक्ष्मणि । যক্ষ্মা রোগ ।

अङ्गतापः । पुं । शरीरोष्णतायाम् । গায়ের তাপ ।

अङ्गदरणम् । क्ली । पित्तजन्यपीड़ायाम् ।

अङ्गदाहः । पुं । गात्रदाहे । গা জ্বালা ।

अङ्गना । स्त्री। नार्य्यां। मे.नत्रिकं। प्रियङ्गौ। भा.।

अङ्गनाप्रियः । पुं । अशोकतरौ । र.मा. । द्रुमोत्पले । ওলট্ কম্বল । प.मु. ।

अङ्गनाप्रिया । स्त्री । प्रियङ्गुनामगन्धद्रव्ये । भा.पू.१भ.क.व. ।

अङ्गपाकता । स्त्री । पित्तजन्यरोगे । পাকা ফোঁড়ার ন্যায় গাত্র বেদনা ।

अङ्गपीड़ा । स्त्री । वायुजन्यरोगे । গা ব্যথা ।

अङ्गपूजितः । पुं । अश्वतरे । मद. व. १२ ।

अङ्गप्रसारणम् । क्ली । कायविस्तारे । গা হাত মেলান । वा.नि.४अ. ।

अङ्गवली । स्त्री । त्रिवली । বড় ।

अङ्गभङ्गः । पुं । शरीरस्य भङ्गे । গা ভাঙা । वा.उ.२अ.।गुदवृषणयोर्मध्यभागे। रोगे । वायुरोगे।

अङ्गभेदः । पुं। वायुरोगे। বায়ুজন্য গাত্রভঙ্গ ।

अङ्गमर्द्दः । पुं । गात्रवेदनायाम् । वा.सू.४अ. ।

अङ्गमर्द्दनम् । क्ली। गात्रपीटने। গা কুটনো ।

अङ्गमेजयत्वम् । क्ली।अङ्गकम्पने। গা কাঁপা।

अङ्गरक्तः । पुं । कम्पिल्लके । কমলা গুঁড়ি । अम. । [मादि । গাত্ররঞ্জন দ্রব্য ।

अङ्गरागः । पुं । अङ्गलेपनद्रव्ये । यथा—कुंकु-

अङ्गरुहम् । क्ली । रोमणि । লোম ।

अङ्गरुहा । स्त्री । लोम्नि । केशे । চুল ।

अङ्गलाघवम् । क्ली । कायलघुत्वे । গা হাল্‌কি । वा.उ.१८अ.।

अङ्गलेपः । पुं । चन्दनादिद्रव्ये ।

अङ्गलोद्यः । पुं । Ginger (Amomum zinziber). आर्द्रके । আদা । चिञ्चोटकतृणे ।

अङ्गवः । पुं । शुष्कफले । শুকফল । श.च. ।

अङ्गवस्त्रोत्था । स्त्री । श्वेतयमान्याम् । যওয়ান ।

अङ्गविकृतिः । पुं । Apoplexy. अपस्माररोगे । रा.नि.व.२० । [गे । भा. ।

अङ्गविभ्रंशः । पुं । कायशोथि स्वरूपवायुजरो-

अङ्गविक्षेपः । पुं । अङ्गहारे । अङ्गचालने । वा. उ.२अ. ।

अङ्गशूलम् । क्ली । गात्रतोदे । গা শূলন ।

अङ्गशोथः । पुं । कायशोफे । গাত্র ফোলা ।

अङ्गशोषः । पुं । वायुजरोगे । [वा.उ.३अ. ।

अङ्गशोषणम् । क्ली । अङ्गस्य शुष्कतायाम् ।

अङ्गसङ्गम् । क्ली । मैथुने । [१२ अ. ।

अङ्गसदनम् । क्ली । शरीरावसादे । वा. नि.

अङ्गसादः । पुं । अवसादे । हारा. ।

अङ्गसुन्दरः । पुं । दद्रुघ्नवृक्षे । দাদমর্দন । अम. ।

अङ्गसुप्तिः । स्त्री । कायस्पर्शाज्ञतायाम् । शरीरस्वापे । গাত্রের অসাড়তা । [रत्ना. ।

अङ्गसेनः । पुं । अगस्तिद्रुमे । বাকস গাছ ।

अङ्गहर्षः । पुं । रोमाञ्चे । वा.नि. ३ अ. ।

अङ्गहारः । पुं । अङ्गचालने ।

अङ्गहीनः । त्रि । विकलाङ्गे, काणादौ ।

अङ्गारः । पुं । निर्धूमाग्निपिण्डे । আঙ্গার । "बृंहतः काष्ठसम्भूतोऽङ्गारः ।" वा.सू. ६अ. अरुणः । अङ्गारपूर्णपात्रे । हेमा. । कुरुण्टकवृक्षे । ঝাঁটীবিশেষ । পীতবর্ণ অম্লান বৃক্ষ । रत्ना. ।

अङ्गारकः । पुं । Yellow or white amaranth. कुरुण्टके । ঝাঁটীজাতি । अङ्गारे । আঙ্গার । मै.कचतुष्कं । भृङ्गराजे । ভীমরাজ । रा.नि.व.४ । भा.पू.१भ.गु.व. ।

अङ्गारकतैलम् । क्ली । स्वनामख्यातविषमज्वरघ्नतैलविशेषे । यथा—मूर्व्वा लाचाहरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी । बृहती सैन्धवं कुष्ठं बला मांसी शतावरी । आरणालाढ़केनैव तैलप्रस्थं विपाचयेत् । तैलमङ्गारकं नाम सर्व्वज्वरविमोचणम् ॥ इति रस.र. । पाकप्रकारः—तिलतैलं /४ श. मूर्व्वादि /१ श. । काञ्जिकं १६श. । प्रथमं काञ्जिकेन पक्त्वा पश्चात् कल्कद्रव्यञ्च पक्त्वा समापयेत् । च.द. । इन्द्रवारुणी = রাখাল শশামূল । अन्यत् व्रणशोथे हितम् । मूर्च्छिततिलतैलं ४ श. वर्वरी = বাবুই-তুলসী १२॥ श.वारि ६४ श.पादशिष्टक्काथेन वर्व्वर्य्यादीनां १श.कल्केन समं पाच्यम् । च.द.व्रणशो. चि. । प्रोष्ठिका = मच्चिका । [नि.व.१३ ।

अङ्गारकमणिः । पुं । Coral. प्रवाले । रा.

अङ्गारककर्कटी । स्त्री । रोटिकायाम् । রুটী । अगाकड़ी रोटी लिटी इति हिन्दी । यथा —शुष्कगोधूमचूर्णन्तु साम्बु गाढ़ं विमर्द्दयेत् । विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत् ॥ अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघुः । दीपनी कफकृद्बल्या पीनसश्वासकासजित् ॥ वैद्य.नि. । भा. ।

अङ्गारकुष्ठका । स्त्री । हिताबल्याम् ।

अङ्गारधूपः । पुं । अङ्गारेण यो धूपः हिङ्ग्वादिना प्रसिद्धः । वा.चि.८ अ. ।

अङ्गारपरिपाचितम् । क्ली । (Roasted food.) शूलादिपक्वमांसे । त्रि । अङ्गारपक्वे ।

अङ्गारपर्णी । स्त्री।भार्गी।বামণহাটী।र.सा.सं. ।

अङ्गार(क)पुष्पः । पुं । (Ingua.) जीवपुत्रद्रुमे । इङ्गुदी । जियापुता इति लोके । श.र. ।

अङ्गारपूरिका । स्त्री । रोटके । রুটী ।

अङ्गारमञ्जरी }
अङ्गारमञ्जी } स्त्री। A species of Bonduc or Bonducella. करञ्जविशेषे । श.र. । महाकरञ्जे । ডহর করঞ্জ । रा.नि.व.६ ।

अङ्गारमणिः । पुं । प्रवाले ।

अङ्गारवर्णी । स्त्री । भार्ग्याम् । বামণহাটী ।

अङ्गारवल्लरी । स्त्री । (Ovieda verticallata.) करञ्जविशेषे । নাটাকরঞ্জা इति भाषा ।

अङ्गारवल्ली । स्त्री । महाकरञ्जे,रक्तकरञ्जे च । भार्ग्याम् । वा.सू.१५ अ. । सुरसादि । भा.पू.१भ. । गुञ्जायाम् । কুঁচ । भा.पू.अने.व. । कटुकरञ्जे । करञ्जवल्लयाम् । रक्तगुञ्जायाम् । भा.पू.१भ.गु.व. ।

अङ्गारवृक्षः । पुं । इङ्गुदीवृक्षे । भा.पू. १भ. वटा. । रत्ना. । पूतञ्जिया इति च ।

अङ्गारवेणुः । पुं । रक्तवर्णवंशविशेषे ।

अङ्गारशकटी । स्त्री । चुल्ल्याम् चুলো ।

अङ्गारा । स्त्री । हितावल्याम् । इङ्गुदीवृक्षे । प.मु. । জিয়াপুতা ।

अङ्गारिका । स्त्री । The stalk of the sugarcane. इक्षुकाण्डे। আকগাছ । (Butea frondosa.) किंशुककोरके । পলাশকলি । मे. कचतुष्कं ।

अङ्गारितम् । क्ली । The early blossom of किंशुक । पलाशकलिकोद्गमे । हारा.।

अङ्गारिता । स्त्री । लतामात्रे । चुल्ल्याम् । मे. तचतुष्कं ।

अङ्गिरः । पुं । तित्तिरपक्षिणि ।

अङ्गुणः । पुं । वार्त्ताकौ । বেগুন । श.र. ।

अङ्गुरिः(री) । स्त्री । अङ्गुल्यां । पाणिपादाङ्गुल्याम्। হাত পায়ের আঙুল । अ.टी. ।

अङ्गुलः
अङ्गुलिः } पुं, स्त्री । The thumb. करपादशाखायां । আঙুল। गजकर्णिकावृक्षे । হাতিশুঁড়ে । करिशुण्डाग्रभागे । हे.च. । वृद्धाङ्गुष्ठे । उ. । रा.नि.व.१८ । अथाङ्गुष्ठप्रदेशिन्यौ मध्यमानामिका तथा । कनिष्ठा चेति पञ्च स्युः क्रमेणाङ्गुलयः स्मृताः ॥ रा.नि.व.१८ ।

अङ्गुलिकण्टकः । पुं । नखे ।

अङ्गुलित्राणकम् । क्ली । तन्नामकयन्त्रे । আঙুটা । वा.सू.२५अ. ।

अङ्गुलिपञ्चकम् । क्ली । कराङ्गुलिपञ्चकं—यथा, अङ्गुष्ठतर्जनीमध्यमानामिकाकनिष्ठम् ।

अङ्गुलिपर्व्व । क्ली । अङ्गुलिग्रन्थौ ।

अङ्गुलिफला । स्त्री । श्वेतनिष्पावे । रा.नि. ।

अङ्गुलिमानम् । क्ली । अङ्गुल्या योजनपर्य्यन्तमाने । ८ यवैः = १अङ्गुलिः । २४ अङ्गुलिभिः = १ हस्तः । ४ हस्तैः = १ दण्डः । २००० दण्डैः = १ क्रोशः । ४ क्रोशैः = १ योजनम् । इति । [का. ।

अङ्गुलिमोटनम् । अङ्गुलिमर्द्दनजशब्दे। चि-

अङ्गुलिसंज्ञा । स्त्री । यवाग्वां । যাউ । [१८ ।

अङ्गुलिसम्भूतः । पुं । नखे । নখ । रा.नि.व.

अङ्गुली । स्त्री । गजकर्णिकायाम् । मे.लत्रिकं ।

अङ्गुषः । पुं । नकुले । নেউল । वाणे । তীর ।

अङ्गुष्ठः । पुं । वृद्धाङ्गुलौ । বুড়ো আঙুল । रा. नि.व.१८।३ । [ম্লালজী ।

अङ्घ्रालजी । स्त्री । अम्लालजीरोगे । See अ-

अङ्घ्रिः । पुं । द्रुममूले । रा.नि.व.२ । अम. । पादे । रा.नि.व.१८ ।

अङ्घ्रिग्रन्थिकम् । क्ली । पिप्पलीमूले ।

अङ्घ्रिजिह्निकः । पुं । दमनकवृक्षे ।

अङ्घ्रिनामकः(नामन्) । पुं। दमनकवृक्षे । वृक्षमूले । रा.नि.व.२ । अम. ।

अङ्घ्रिपः । पुं । वृक्षे । रा.नि.व.२ । हला. ।

अङ्घ्रिपर्णिका
अङ्घ्रिपर्णी } स्त्री । पृश्निपर्ण्याम् । চাকুলিয়া । भा.पू.१.गु.व. ।

अङ्घ्रिबला । स्त्री । पृश्निपर्ण्याम् ।

अङ्घ्रिवल्लिः(का)
अङ्घ्रिवल्ली } स्त्री । पृश्निपर्ण्याम् । চাকুলিয়া । अ.टी.र. ।

अङ्घ्रिषः । पुं तन्नामकतालुरोगे। See अध्रुषः।

अङ्घ्रिसन्धिः । पुं । पादगुल्फे । [हे.च. ।

अङ्घ्रिस्कन्धः । पुं। गुल्फे । পায়ের গোড়ালি।

अङ्घ्रुः । पुं । पादगुल्फे ।

अचरणा । स्त्री । योनिव्यापद्विशेषे, यत्र योनिः प्रथममेव मैथुनाद्विरता वीजं न गृह्णाति । एवमतिचरणापि योनिरतिमैथुनात् न वीजं गृह्णाति । मैथुनात् पूर्व्वमेव रजोनिःसारणात् अचरणातिचरणयोः वीर्य्यं नावस्थितं भवतीति केचित्। लक्षणम्--मैथुनेऽचरणा पूर्व्वं पुरुषादतिरिच्यते । बहुशश्चातिचरणा तयोर्वीजं न विन्दति । मा.नि. ।

अचलत्विट् । पुं । कोकिले । श.च. ।

अचिकित्स्यः । त्रि । चिकित्सितुमशक्ये ।

अचिकुरः । पुं । खालित्ये । টাক্ ।

अचिन्त्यजः । पुं । पारदे । रा.नि.व. १३ ।

अचिन्त्यशक्तिरसः । पुं । रसोऽयं नवज्वरे व्यवस्थेयः । अस्य मात्रा रक्तिद्वयम् । अत्रानुपानं

धान्यपिप्पलीक्वाथः । रसोऽयं बङ्गमुषायां वालुकायन्त्रेण लघुपुटे पाच्यः । अत्र पारदादिस्वर्णपर्य्यन्तानामेकैको भागः, लौहस्यार्द्धो भागः, लौहार्द्धं वैक्रान्तं । द्रव्यसमुदायं भृङ्गराजरसेन संमर्द्य पर्पटीवत् पचेत् । ततो भावनाद्रव्याणां प्रत्येकं भावनात्रितयं दत्त्वा पचेत् । रसः गन्धकः प्र. २ मा. कज्जली कार्य्या । अथ भृङ्गराज-केशराज-निर्गुण्डी (निशिन्दा), मण्डूकी (थुलकुड़ि), ग्रीष्मसुन्दरकः (गिमा),अपराजितामूलं, शालिञ्चः, कालमारिषः (काँटानटे),सूर्य्यावर्त्तश्चेति द्रव्याणि । एषां प्र.रसं ४ मा. तेन मिश्रयित्वा पश्चात् स्वर्णमाक्षिकं १मा. मरिचचूर्णं १ मा. दत्त्वा च मुद्गाभा वटी कार्य्या । भैष.ज्व.चि. ।

अचिन्त्यात्मा । पुं । परमात्मनि ।

अचिरपल्लवः । पुं । सप्तपर्णवृक्षे । प.मु. ।

अचेतनः । त्रि । जड़े । सेन्द्रियं चेतनद्रव्यं निरिन्द्रियमचेतनम् । च. ।

अचैतन्यः । त्रि । चैतन्यरहिते । [कम् ।

अच्छः । पुं । गुन्द्रे । भल्लूके । स्फटिके । मे.छद्वि-

अच्छभल्ल(ल्लुकः) । पुं । भल्लूके । ভালুক । रा.नि.व.१९ । रत्ना. ।

अच्छर्दिका । स्त्री । वाली । रा.नि.व.२० ।

अच्छलः । पुं । तिलकल्के ।

अच्छिन्नपत्रः । पुं । शाखोटवृक्षे । শেওড়া গাছ । युक्तपत्रवृक्षमात्रे ।

अच्छुकः । पुं । तन्नामकरञ्जनपुष्पवृक्षे । আচ ফুলেরগাছ । तिनिशवृक्षे । प.मु. । [उदुम्बरवृक्षे ।

अच्युतावासः । पुं । अश्वत्थवृक्षे । रा.नि.व.११ ।

अजः । पुं । छागे । भा.पू. । स्वर्णमाक्षिके । हे. च. । तन्नामकौषधिविशेषे, अजशृङ्गीतिख्याते । अजनामकौषधिरजशृङ्गीति विज्ञायते । च.चि.१अ. ।

अजकर्णः } **अजकर्णकः** } पुं । छागकर्णवत्पत्रशालतरुविशेषे । असन इति र.मा. । बालसर्ज इति रत्ना. । पीतशाल इति च नाम्ना प्रसिद्धे । আসনা, পিয়াশাল । हिं आसन् । गुणाः—कटुतिक्तकषायः उष्णवीर्य्यः कफपाण्डुकर्णरोगप्रमेहकुष्ठविषव्रणघ्नश्च । भा.पू.१भा.वटा.व. । सर्जवृक्षे । रा.नि.व.९ । महासर्जतरौ शालभेद एव । सु.सू. अ.३८,५गणः ड. ।

अजका । स्त्री । अजागलस्तने । छागपुरीषे । तन्नामककृष्णगतशोणितजनेत्ररोगविशेषे । आतामपिच्छिलास्रहदातास्रपिटिकातिरुक् । अजाविट्सदृशोच्छ्रायकाष्ण्यविर्ज्याद्धजाजका । वा.उ.१०अ. ।

अजकाजातम् । क्ली । नेत्रतारकगतरोगविशेषे । तस्मात्र व्यथा, रक्तता, पूयस्रावश्च नेत्रयोर्भवति । लक्षणं—अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः । विगृह्य कृष्णं प्रचयोऽभ्युपैति तच्चाजकाजातमिति व्यवस्येत् ॥ मा.नि. ।

अजक्रीशी । स्त्री । नीलीवृक्षे । वै.निघ. ।

अजगन्धा } **अजगन्धिका** } स्त्री । वनयमान्याम् । चैत्रयमान्यां अम.।रत्ना.। वनयमानी । (Ocymum gratissimum.) गुणाः—कटुः तीक्ष्णा रुचा हृद्या अग्निवर्द्धनी दृष्टिह्रासकरी लघुः शुक्रवातकफघ्नी च । मद.व.१। वनतुलस्यां । वनतुलसी । हिं ववरी, ववइ । तिलोणि । मद.। मं रानतुलस, तिलवण । रा.नि.व.४ । गुणाः—लघुः रुचा हृद्या वातकफघ्नी च । मद.व.१ । वनयमान्यां । च.द.वि.ज्व.। "नीलिनीमजगन्धाञ्च।" फोफान्दी, वनयमानीति । च.सू.४अ. च.सू.२शिरो. वि. । वा.चि.१५अ. । उ.२२अ. ।

अजगन्धिनी । स्त्री । मेषशृङ्ग्याम् । গাড়ল শিঙে । र.मा. ।

अजगरः । पुं । (Boa constrictor.) सर्पविशेषे। मद.१२।१०६। विलेशयमृगविशेषे । अयमर्शसि हितः । सु.सू.४६अ. ।

अजगल्लिका } **अजगल्ली** } स्त्री । वर्वरीवृक्षे । বাবুই তুলসী । भा.पू.१भ.पु. । क्षुद्ररोगान्तर्गतबालरोगविशेषे । स च कफवातजन्यो भवतीति । वा.उ.३१अ. । स्निग्धाः सवर्णाः ग्रथिता नीरुजा मुद्गसन्निभाः । पिटिकाः कफवाताभ्यां बालानामजगल्लिका ॥ मा.नि.क्षुद्ररो. ।

अजघोषः । पुं । त्रयोदशविधसन्निपातज्वरान्यतमसन्निपातज्वरे । लक्षणं—छगलकसमानगन्धः स्कन्धरुजावान्निरुद्धगलरन्ध्रः । अजघोषसन्निपातादातास्राक्षः पुमान् भवति ॥ भा.म.१भ. ।

अजटा । स्त्री । (Flacourtia cataphracta.)

भूम्यामलक्याम्। ভূঁই আম্লা। रसे.चि.अर्शः-अग्निमुख-लौहे।

अजड़ा। स्त्री। भूम्यामलक्याम्। कपिकच्छ्वाम्। আলাকুশী, শুয়াশুয়া। भा.पू.गु.व.। कृष्णमरिचे। লঙ্কামরিচ। अत्रि.।

अजड़ाफलम्। क्ली। शूकशिम्बीफले। আলাকুশী ফল। च.चि.२अ. वृष्यचीरे।

अजथ्या। स्त्री। A plant, (Yellow jasmin.) स्वर्णयूथिकायाम्। छागसमूहे।

अजदण्डी। ब्रह्मदण्डीवृक्षे।

अजनामकम्। क्ली। माचिके। है.च.।

अजन्तजग्धः। त्रि। अकीटभक्षिते। च.द. अ.सा.चि.कुटजपुटपाके.। [भा.पू.१भ.फ.व.।

अजप्रिया। स्त्री। वदरीवृक्षे। কুল গাছ।

अजबला। स्त्री। कृष्णतुलस्याम्। কালতুলসী।

अजभक्षः। पुं। बर्बुरीवृक्षे। বাবুই, বাবর। रा.नि.। (क्षा) क्षुद्रदुरालभायां। रा.नि.व.४।

अजमलः। पुं। गोधूमे। गम्। प.मु.।

अजमांसम्। क्ली। छागमांसे। See छागमांसम्। वा.सू.६अ.।

अजमोदः। पुं। दीप्यके। वा.सू.१५अ. वत्सकादिव.। "कटुङ्गफलाजमोदः।"

अजमोदाख्या। स्त्री। वनयमान्यां। चैत्रयमान्यां। रत्ना.। वृहद्वङ्गादिचूर्णे। यमान्यां। रा.नि.।

अजमोदा(दिका)। स्त्री। (Pimpinella Involucrata, Ligusticum ajwaen; Syn. Apium involucratum.) स्वनामख्यातपण्यद्रव्ये। রান্ধনী। हिं अजमद। अजमोदा इति महाराष्ट्रकर्णाटयोः प्रसिद्धा। तैं वामं। गुणाः—कटुरुष्णा रुचा कफवातघ्नी रुच्या शूलाध्मानारोचकजठरनाशिनी च। रा.नि.व.६। कटुः तीक्ष्णा दीपनी वातकफघ्नी उष्णा विदाहिनी हृद्या वृष्या बलमला लघुः नेत्ररोगकृमिच्छर्दिहिक्कावस्तिरुजापहा च। मद.व.२। कटुः, तीक्ष्णा, आग्नेया, वातकफघ्नी, उष्णा, विदाहिनी, शुक्रवर्द्धनी, बल्या, लघुः, नेत्ररोगकृमिवमिहिक्कावस्तिशूलघ्नी च। भा.पू.१भ.ह.व.। सि.यो.अग्निमान्द्य-चि.। "त्रिकटुकमजमोदा।" यत्न-चि.एलादिमन्थे। तथा ग्रहणी चि.चित्रक-गुड़े। च.सू.४अ.४५दश। वनयमान्यां। यमान्याम्। सु.सू.३८अ.पि.व.। ड.। च.संग्रहणीचि. चित्रकाद्यगुड़िकायां। महाषट्पलकघृते। ग्रहणी-कल्याणगुड़े।

अजमोदाद्यवटकः। पुं। आमवाते हितः। अत्र यमान्यादिचूर्णं प्रत्येकं १ पलं, शुण्ठ्याः १० पलानि, वृद्धदारकस्य १० पलानि, हरीतक्याः ५ पलानि, सर्व्वचूर्णसमं गुड़ं दत्त्वा एकत्र विमिश्रयेत्। च.द.आ वा.चि.।

अजम्भः। पुं। भेके। श.र.।

अजया। स्त्री। विजयायाम्। भङ्गा सिद्धिरिति भाषा। रा नि.। [रहिते।

अजरम्। क्ली। स्वर्णे। रा.नि.व.१३। त्रि.। जरा-

अजरकम्। क्ली। अजीर्णे। सि.यो.कास-चि. वृन्दः। च.द.पाण्डुचि.योगराजे।

अजरा। स्त्री। गृहगोधिकायां। টিক্‌টিকি। जीर्णफञ्जीलतायां। वृद्धदारके। रा.नि.व.७। गृहकन्यायां। ঘৃতকুমারী। रा.नि.व.५। आत्मगुप्तायाम्। আলাকুশী। भा.पू.१भ.गु.व.।

अजलम्बनम्। क्ली। यामुनस्रोतोऽञ्जने। श. च.। Antimony.

अजलोमा(मी)। पुं। शूकशिम्ब्याम्। আলাকুশী। र.मा.। Cowach. See आत्मगुप्ता। महौषधिविशेषे। See ओषधिः।

अजवल्ली। स्त्री। मेषशृङ्ग्याम्। মেড়াশিঙে।

अजशृङ्गिका / अजशृङ्गी स्त्री। A plant, described as a milky and thorny plant with a front crooked figure like a ram's horn. भा.पू.१भ.गु.व. १७१। মেড়াশিঙে, গাড়লশিঙী, ছাগলবেঁটে इति वङ्गभाषा। तिक्तशाकगणीय-स्वनामख्यातवृक्षे। मं मेषसिंग। कं उरियमर। रा.नि.व.६। छागलविषाणिका उत्तमारणी सेखिडकेति। सु.सू.३८अ.। गुणाः—कटुः तिक्ता कफार्शःशूलशोथघ्नी चक्षुष्या श्वासहृद्रोगविषकासकुष्ठघ्नी च। एतत्फलं तिक्तं कटूष्णं कफवातघ्नं जठरानलदीप्तिकृत् हृद्यं रुच्यं लवणरसं अम्लरसञ्च। रा.नि.व.६। वातला पाके रुचा पित्त-

प्रचशीमनेत्रशूलघ्नी । मद.व.१ । भा.पू.१भ.गु.व. । कर्कटशृङ्गे, स च पुत्रजीवसदृशफलवृक्षविशेषः । सु.सू. ३७ ऋ.। भा.४भ.रेवतीग्रहचि. । मेषशृङ्गां, कर्कटशृङ्गां वा । सु.सू.३८भ.वल्लीपञ्चके । वा.चि.८भ । "अजशृङ्गी जटाकल्कम् ।" भा.पू.२भ.वने.व. ।

अजश्री: । स्त्री । फटिकारिकायाम् । मा.नि. ।

अजहा ।स्त्री ।(Corpopogon pruriens.) शूकशिम्ब्याम् । আলাকুশী । भ.टी. ।

अजक्षीरम् । क्ली । छागदुग्धे । वा.उ.१६भ. । See छागदुग्धं ।

अजक्षीरनाम: । पुं । शाखोटवृक्षे । শ্যাওড়া গাছ । रा.नि.व.९ ।

अजा । स्त्री । छाग्याम् । तन्नामकमहौषधिविशेषे । सु.चि.३०भ.। See ओषधिः ।

अजागर: । पुं । A plant (Eclipta or verbesina prostrata.) भृङ्गराजवृक्षे । ভীমরাজ । श.र.। महासर्पे ।

अजाघृतम् । क्ली । छागीघृते । गुणाः—अजाघृतञ्च चक्षुष्यं दीपनं बलवर्द्धनं । तथ्यं पाके कटु प्रोक्तं कासश्वासक्षयापहम् । कफार्शोराजयक्ष्माणां नाशनं परमं मतम् ॥ वै.निघ. । [व.६ ।

अजाजिक:(का) । पुं । पीतजीरके । रा.नि.

अजाजी(जि:) । स्त्री। (Cuminum cyminum.)Cumin seed. जीरके । কালাজীরা । हिं जीरा,कालाजीरा । स्थूलजीरके । বড়জীরে । रा.नि.व.६। च.द.संग्रहणी-चि.तृहचुके । काकोदुम्बरिकायाम् । यज्ञडुमुर । श्वेतजीरके । भा.पू. १भ.ह.व.। च.द.संग्रहणी-चि.भायामकाञ्जिके । र. सा.सं.माणिक्यरसे । कृष्णजीरके । सि.यो.दिवारात्रिज्वरे वृन्दः । "अजाजी गुड़संयुक्ता विषमज्वरनाशिनी।"

अजातक्रम् । क्ली। छागीतक्रे । गुणाः—अजातक्रं लघु स्निग्धं दाहगुल्मार्शनाशनं । त्रिदोषशोथग्रहणीपाण्डुरोगहरं परम् ॥ वै.निघ. ।

अजातदन्त: । त्रि । मासषट्कातीतेऽपि यस्य शिशोर्दन्तोद्गमो न भवति ।

अजादनी । स्त्री । A small species of prickly night-shade. क्षुद्रदुरालभायाम् । रा.नि.व.४ ।

अजादुग्धम् । क्ली । । छागदुग्धे ।

अजानय: / **अजानेय:** । पुं । A horse of good breed. उत्तमाश्वे । जयदत्तः ।

अजान्त्री । स्त्री । A potherb (Convolvulus argenteus.) नीलवृक्षायाम् । নীলবোনা, ছাগলবেঁটে । रत्ना. । गुणाः—कटुरसा, कासघ्नी, वीजदा, गर्भजननी च । रा.नि.व. ३ । वृद्धदारके । रा.नि.व.३ ।

अजापक्कम् । क्ली । पक्कघृतविशेषे ।

अजापञ्चकम् । क्ली । यक्ष्मरोगे घृतम् । छागघृतं४श.छागविष्ठारसः४श.छागीदुग्धं ४श.छागदधि ४श. छागमूत्रं ४श. प्रक्षेपः यवक्षारः ८ पलं यथाविधि पाच्यम् । च.द.यक्ष्म-चि. । भैष. ।

अजापय: । क्ली । छागदुग्धे । वा.उ.१३भ. ।

अजाप्रिया । स्त्री । बदरीवृक्षे । भा.फ.व.।

अजामांसम् । क्ली । छागमांसे । गुणाः—लघु स्निग्धं किञ्चिच्छीतं रुचिप्रदं मधुरं पुष्टिकृत् बल्यं वातपित्तघ्नञ्च । वै.निघ. ।

अजामूत्रम् । क्ली । छागीमूत्रे । गुणाः—कटु उष्णं रूक्षं नाड़ीविषघ्नं प्लीहोदरकफश्वासगुल्मशोफहरं लघु च । रा.नि.व.१५ । वा.उ.२४भ. ।

अजामेद:। क्ली । छागवसायाम् । वा.चि.३भ. ।

अजाविट् । स्त्री। छागविष्ठायाम्। वा.उ.१०भ.

अजाह्वा । स्त्री ।आत्मगुप्तायाम् । আলাকুশী । भ.टी.भ. । See अजहा ।

अजाक्षी । स्त्री। काकोदुम्बरिकायाम् । কাক্‌ডুমুর । मं काला उम्बर । रा.नि.व.११ ।

अजाक्षीरम् । क्ली । छागीदुग्धे ।

अजिततैलम् । क्ली । नेत्ररोगे हितं तैलम् । तिलतैलं अर्द्धशरावकं,मतान्तरे शरावकम् । आमलकीरसः ४श. दुग्धं ४श. । कल्कार्थं यष्टिमधु पलमितम् । च.द.नेत्ररोग-चि.। अकल्कोऽपि भवेत् स्नेहः यः साध्यः केवले द्रवे। स्नेहपाकविधौ यत्र प्रमाणं नेरितं क्वचित् । स्नेहस्य कुड़वं तत्र पचेत्कल्कपलेन तु ॥ इति प.प्र. ।

अजिनम् । क्ली । मृगचर्म्मणि । अम. ।

अजिनपत्रा । स्त्री । A bat. चर्म्मचटकायाम् । बाद्दुड़। चाम्‌चिकी इति च लोके । रा.नि.व.१९।

अजिनपत्त्रिका ।स्त्री। चर्म्मचटकायाम् । बाद्दुड़, चाम्‌चिकी। हे.च. । पेचके । [रा.नि.व.१९ ।

अजिनपत्त्री । स्त्री। जतुकायाम् । चाम्‌चिकी ।

अजिनयोनिः । पुं । An antelope. हरिणे । श.मु. । [नौ । स्व्यैच मे.रत्रिकम् ।

अजिरः । पुं, क्ली । दर्दुरे । वाते । विषये । त-

अजिह्मः । पुं । भेके । त्रिका. ।

अजीगर्त्तः । पुं । सर्पे ।

अजीर्णम् । क्ली । अपाकरोगविशेषे । आमं विदग्धञ्च यत्तदजीर्णम् । भा.म.ख.१भ.अ.सा. । तच्चात्यम्बुपानविषमभोजन वेगविधारण-दिवानिद्रा-रात्रिजागरणादिभिःकारणैरुत्पद्यते। उत्पन्ने चाजीर्णरोगे यथासमयं देहानुरूपमपि लघु भोजनं न परिपाकमेति । आदौ तत्त्रिविधम्, आम-विदग्ध-विष्टब्धाजीर्णभेदेन । तथान्नजरसशेषाहाररसज-दिनपाकित्वाद्विदत्रयमपि कल्पितम् । तेषु कफकोपादामाजीर्णं, पित्तकोपाद्विदग्धाजीर्णं, वायुकोपाच्च विष्टब्धाजीर्णं भवति । रसशेषतया रसशेषाजीर्णम् । माधवः । वा.नि.१२अ. । "गोमांसभक्षको मन्दजठराग्निर्भवेन्नरः । प्राजापत्यं चरेत्कृच्छ्रमतिकृच्छ्रं तथैव च॥" इत्यादि कर्म्मविपाकः । See अग्निमान्द्यम् ।

अजीर्णकण्टकरसः । पुं । रसोऽयं अजीर्णे प्रयोज्यः । रस.र. । र.सा.सं. । सा.कौ. । भा. । भैष. । प्रयोगा. ।

अजीर्णजरणः । पुं । कर्चूरे । See कर्चूरः ।

अजीर्णी । त्रि । अजीर्णरोगयुक्ते ।

अजेयः । पुं । अर्जुनवृक्षे । वै.निघ. ।

अज्झटा । स्त्री। भूम्यामलक्याम्। भूँ ई आम्‌ला। हिं भुइ आम्बरा । भा.पू.१भ.गु.व. ।

अज्झलः । पुं । कोकिले ।

अञ्चकम् । क्ली । नेत्रे । रा.नि.व.१८ ।

अञ्जनः । पुं । गृहगोधिकायाम् । टिक्‌टिकी ।

अञ्जनम्, **अञ्जनकर्म्म** } क्ली । Anointing or making clear. नेत्रप्रसाधने । काजल, आजनाई, आजन् इति भाषा। सुर्म्मा इति पश्चिमदेशे ।"अञ्जनं क्रियते येन तद्द्रव्यं चाञ्जनं स्मृतम्।"तच्च पञ्चविधम्—"सौवीरमञ्जनं प्रोक्तं रसाञ्जनमतः परम्। स्रोतोऽञ्जनं तदन्यच्च पुष्पाञ्जनकमेव च। नीलाञ्जनञ्चेति।"तेषु सौवीरं धूम्रं रक्तपित्तहरञ्च । रसाञ्जनं विषहिक्काक्षिरोगघ्नं व्रणरोपणशोधनञ्च । स्रोतोऽञ्जनं पीताभं, पुष्पाञ्जनं सितं,नीलाञ्जनञ्च नीलवर्णमिति । वा.। तच्च षड्‌विधमिति कालिकापुराणे; यथा—"सौवीरं जाम्बलं तुत्थं मयूरं श्रीकरं तथा। दर्व्विका मेघनीलञ्च अञ्जनानि भवन्ति षट्॥ खवद्रूपन्तु सौवीरं जाम्बलं प्रस्तरं तथा । मयूरं श्रीकरं रवं मेघनीलञ्च तैजसम् ॥ घृततैलादियोगेन ताम्रादौ दीपवह्निना । यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता॥"इति । गुणः—नेत्रनैर्मल्यकारित्वमेव । पुनस्तत्त्रिविधं रसो वटी तथा चूर्णमिति । "यथापूर्व्वं बलं तेषु श्रेष्ठमाहुर्मनीषिणः ॥" इति । तच्च पुनः प्रत्येकं त्रिविधं यथा—"तत्प्रत्येकं त्रिधा प्रोक्तं लेखनं रोपणं तथा। स्नेहनञ्चेति लिङ्गानि……। लेखनं क्षारतीक्ष्णाम्लरसैरञ्जनमुच्यते। नेत्रवर्त्मशिराजालस्रोतःशृङ्गाटकस्थितं। मुखनासाक्षिभिर्दोषमुत्क्लिश्य स्रावयेच्च तत् । कषायं तिक्तकं चापि सस्नेहं रोपणं मतम् । स्नेहस्य शैत्याद्बल्यं स्वाद्विष्टेश्च बलवर्द्धनं। मधुरं स्नेहसम्पन्नं तदञ्जनं स्यात्प्रसादनम्। दृष्टिदोषप्रसादार्थं स्नेहनार्थञ्च तद्धितं । एरण्डमात्रा वर्त्तिस्तु लेखनी स्यात्प्रमाणतः । सार्द्धकरेणुकमिता रोपणी वर्त्तिरिष्यते । क्रियते स्नेहनीवर्त्तिर्द्विहरेणुकमात्रया। रसाञ्जनस्य मात्रा तु पिष्टा वर्त्तिमिता मता। चूर्णन्तु लेखनं वैद्यैर्द्विशलाकं प्रदीयते । रोपणं त्रिशलाकं स्यात् चतस्रः स्नेहनाञ्जने ।" हेमन्ते शिशिरे मध्याह्ने ग्रीष्मे शरदपराह्णे वर्षासु वसन्ते च सर्व्वदैव काल इति । भा.पू.ख.२भ.। कज्जले । हे.च.।सि.यो.कामलाचि.रक्तपित्तचि.।स्रोतोऽञ्जने। भा. । सु.चि.२५अ. । रसाञ्जने । च.द.अ.सा.चि. प्रियङ्ग्वादिः । रक्तपित्तचि.। च.३अ. प्रदेहषट्के । अञ्जनयोगेच ।भा.बालचि.।सौवीराञ्जने। वा.सू.१५ अ.अञ्जनादिः । सु.सू.३८अ.। See अञ्जनविधिः ।

अञ्जनकेशिका, **अञ्जनकेशी** } स्त्री । हट्टविलासिनीनामगन्धद्रव्ये । A vegetable perfume. नखिकानाम-

गन्धद्रव्ये उत्तरदेशे प्रसिद्धे । भा.पू.१भ.क.व. ।

अञ्जनगुड़िका । स्त्री । विसूचिकायामौषधविशेषे । गुड़पुष्परसः, अपामार्गबीजं, अपराजितामूलं, हरिद्रा, त्रिकटु च । अञ्जनं कर्त्तव्यम् । च.द.अग्निमान्द्यचि. ।

अञ्जनत्रयम्(त्रितयम्) । क्ली । कालाञ्जन-स्रोतोऽञ्जन-रसाञ्जनेषु । "कालाञ्जनसमायुक्तं स्रोतोऽञ्जनरसाञ्जने ।" रा.नि.व.२२ ।

अञ्जननामिका । स्त्री । वर्त्मगतनेत्ररोगभेदे । आञ्जनी, आञ्जनाई । अत्र वर्त्ममध्ये रक्तेन ताम्रा सूक्ष्मप्रमाणा पिड़का भवति।वा.उ.८.१४अ.। "दाहतोदवती ताम्रा पिड़का वर्त्मसम्भवा । मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साञ्जननामिका ॥" मा.नि.।

अञ्जनभैरवः । पुं । सान्निपातिकज्वरे रसः। अत्र एकांशमिति प्रत्येकमेकांशम् । तीक्ष्णं तीक्ष्णलौहम् । र.सा.सं.सान्निपा.ज्व.। अस्याञ्जनं विधिः ।

अञ्जनयुग्मम् । क्ली । स्रोतोऽञ्जने रसाञ्जने च । वा.सू. प्रियङ्ग्वादिः ।

अञ्जनरसः । पुं । सान्निपातिकज्वरे नस्यम् । दह ईशः पारदः । मरिचचूर्णं समम् । र.सा.सं. ज्व.चि.। अन्यः सान्निपातिकज्वरदाहे। तत्र वाह्लिकं हिङ्गु । रसकं स्फटिकारी ।

अञ्जनविधिः । पुं । नेत्रप्रसाधनभेदे । यथा, "अथ सम्पक्वदोषस्य प्राप्तमञ्जनमाचरेत् । अञ्जनं क्रियते येन तद्द्रव्यं चाञ्जनं मतम् ॥ रसो वटी तथा चूर्णमिति त्रिविधमञ्जनम् । यथापूर्व्वं बलं तेषु स्नेहमाहुर्मनीषिणः ॥ तत्प्रत्येकं त्रिधा प्रोक्तं लेखनं रोपणं तथा । स्नेहनञ्चेति । तेषु,लेखनं चारतीक्ष्णाम्लरसैरञ्जनं नेत्रवर्त्मादिदोषहरम् । रोपणं सस्नेहं कषायं तिक्तं दृष्टिबलवर्द्धनञ्च ॥ मधुरं स्नेहसम्पन्नं स्नेहनं नेत्रस्नेहनार्थम् । भा.।

अञ्जनादिगणः । पुं । अञ्जनफलिनीमांसीपद्मोत्पलरसाञ्जनमधुकनागाह्वरूपो वर्गः । स च विषान्तर्दाहपित्तघ्नः । वा.सू.१५अ. । सौवीराञ्जनं, रसाञ्जनं, नागकेशरपुष्पं,प्रियङ्गुः, नीलोत्पलं, वीरणमूलं, नलिनं, मधुकं, पुन्नागश्चेति । सु.सू.३८अ.।

अञ्जनाधिका } **अञ्जनिका** } स्त्री । कृष्णकार्पासक्षुपे । See कालाञ्जनी । अञ्जन्याम् आञ्जनाई । अञ्जनी लेपकारिणी । हारा.। द्वि.न.३का. । क्षुद्रमूषिकायाम् ।

अञ्जनाम्भः । क्ली । अञ्जनजले । Liquid collyrium.

अञ्जनिकः । पुं । गन्धराखायाम् । [नि.व.४ ।

अञ्जनी । स्त्री । कटुकायाम्। कालाञ्जन्यां । रा.

अञ्जलिः । पुं । प्रसृतिद्वये, ३२तो. प.प्र.१ख.। कुड़वमाने । रत्ना.नानार्थः । भा.उ.वाजी । करसम्पुटे । मे.लत्रिकम् ।

अञ्जलिका । स्त्री । लज्जालुकायाम् । क्षुद्रमूषिकायाम् । जटा. ।

अञ्जलिकारिका । स्त्री । (Mimosa natans.) लज्जालुकायाम् । रा.नि.व.५ । भा.पू.गु.व.। (Lycopodium imbricatum.) वराहक्रान्तायाम् । वराक्रान्ता ।

अञ्जलिनी । स्त्री । लज्जालुकायाम् ।

अञ्जीरः । पुं । (Ficus carica, Psidium pomiferum.) स्वनामख्यातवृक्षे । बड़ पेयारा गाछ । हिं अँजीर । फलगुणाः—शीतलं, स्वादु, गुरु, रक्तपित्तवातघ्नञ्च । मद.व.६ ।

अटरुषः । पुं । (Justicia adhatoda.) वासकवृक्षे । र.सा.सं.सूतिकारिरसे, कन्दर्पसारतैले च । वा.चि.२अ. । See वासकः ।

अटरूषः } **अटरूषकः** } पुं । वासकवृक्षे । र.मा. । च.द. रक्तपित्तचि. ।

अटवी । स्त्री । अरण्ये । [इति रत्ना. ।

अटवीलता । स्त्री । कुष्माण्डवृक्षे । कुष्माड़ुया

अटिः । पुं । शरारिपक्षिणि । हला. ।

अट्टम् । क्ली । अन्ने । मे.टद्विकं ।

अट्टनम् । क्ली । अस्त्रभेदे । त्रिका. ।

अट्टहासः(कः) । पुं । (Jasminum multiflorum.) कुन्दपुष्पवृक्षे । कुँद फूलेर गाछ । रा.नि.व.१० ।

अड़ङ्गः । पुं । गोधूमे ।

अड़हुः । पुं । लकुचवृक्षे ।

अणुः । पुं । सूक्ष्मधान्ये । अणुव्रीहिविशेषे स्यात् । मे.णद्विकं । चीनधान्ये । [६२अ. ।

अणुज्योतिः । क्ली । स्रीकदृष्टौ । वा.शा.५अ.

अणुतैलम् । क्ली । केशगतरोगे तैलविशेषः । वा.सू.२०अ.उ.२२अ. । [नि.व.४ ।

अणुमुष्टिः । पुं । विषमुष्टौ, महानिम्बे । रा

अणुरेवती । स्त्री । (Croton polyandrum.) दन्तीवृक्षे । प.मु. । रा.नि.व.६ ।

अणुव्रीहिः । पुं । सूक्ष्मधान्ये । रा.नि.व.१६ ।

अण्डम् । पुं,क्ली । मुष्के । रा.नि.व.१८। डिम्बे । डिम्,आंण्डा । गुणाः—कटु स्वादु रुचिकरं शुक्रकरं वातश्लेष्महरञ्च। गन्धमार्जाराण्डे । थाटाशी ।वै. निघ.२भ.वा.व्या.विषगर्भतैले।मृगनाभौ।वीर्य्ये।वि.।

अण्डकः । पुं । अण्डकोषे । हे.च. ।

अण्डकोटरपुष्पा । स्त्री । अजान्त्राम् । नीलवुह्ना इति लोके । रत्ना. ।

अण्डकोषः । पुं । कुश्चले । वृषणे । अण्डकोष । रा.नि.व.१८ । अण्डकोषलक्षणं—रेतःशुक्रसमावृद्धं कोशगर्भेऽवतिष्ठते। रेतःस्रावाण्डयुगलं ग्रन्थ्याभं चाण्डवर्त्तुलं। भ्रूणस्योदरवेष्टन्याः पश्चा उदरगह्वरे । तिष्ठत्प्राक्स्पर्शनाद्भूमेः कोषमायाति तद्द्वयम्। दक्षिणस्मात् स्थूलतरं वामाण्डं निम्नलम्बि च । वामं रैतसिकं सूत्रं यतो दीर्घतरं परात् । उपर्य्युपरिसंस्थानस्तरवृन्देन निर्म्मितः। कोषो रैतसिके सूत्रे धत्तेऽण्डयुगलं तथा । तनोराभ्यन्तरो रक्तः सङ्कोचनगुणान्वितः । तनोर्वाह्यश्चर्म्ममयो लोमभिः कतिभिश्चन । तनोस्तिरस्करण्यान्तरेकया भिद्यते द्विधा । तद्गर्भद्वयमध्यान्ते पुंसोऽण्डयुगलं ननु । उदराद्रेतसः सूत्रे पश्चाद्गागमवाण्डयोः । नियतं समनुप्राप्ते धरास्नायुादिनिर्म्मिते ॥ अचिरिति कश्चित् ।

अण्डकोषकः । पुं । अण्डकोषे । श.र. ।

अण्डगः । पुं । गोधूमे ।

अण्डगजः । पुं । चक्रमर्द्दक्षुपे । रा.नि.व.४ ।

अण्डजः । पुं । मत्स्ये । पक्षिणि । भा.पू.२भ. ।

अण्डजा । स्त्री । ग्ररटे । वि. । सर्पे । मत्स्ये । पक्षिणि । मे.जत्रिकं । मृगनाभौ । वा.हेमा.।

अण्डपर्णः । पुं । मलाण्डतरौ । अचि.।

अण्डपेशी । स्त्री । कोषे । मुष्के । हे.च. ।

अण्डस्कन्दः । पुं । अण्डेषु स्कन्द इव,अश्वस्याण्डरोगविशेषे । तल्लक्षणं यथा—प्रकोपान्मारुतादीनां कारणैः पूर्व्वचोदितैः । अण्डस्कन्दस्तुरङ्गाणां जायते बहुसंज्ञकः ॥ तस्य रूपं चिकित्साञ्च भेदञ्चैव समासतः । प्रवक्ष्यामि यथायोगं वाजिनां हितकाम्यया॥ वृषणौ दूषयेद्वायुः श्लेष्मणा यस्य संयुतः । तस्य मुष्कशल्यको रोगो वाताण्डसंज्ञकः॥ यदण्डं कम्पतेऽश्वस्य तेन पादेन खञ्जति । स्वमपृष्ठस्य तस्याशु वेदना मुष्कयोर्भवेत् ॥ शूनता मुष्कयोश्चैव रक्तता कृष्णतापि वा । भवेत् पित्तेन दुष्टेन पिड़कानाञ्च सम्भवः॥ शूनौ पक्वौ तुरङ्गस्य मुष्कौ यस्य सवेदनौ । चिकित्सनेन युक्तस्य तस्य पूताण्डमादिशेत् ॥ स्पर्शतः कठिनौ रूक्षौ रूपतश्चैव यौ मृदू । वृषणौ यस्य वाहस्य स रक्ताण्डः प्रकीर्त्तितः ॥ तस्मिन् सर्व्वाः प्रयोक्तव्याः क्रियाः पोताण्डबोधिताः ॥ शूनौ तु कठिनौ रूक्षौ वृषणौ मन्दवेदनौ । कृच्छ्रमूत्रस्य वाहस्य मूत्रकोशश्च शूयते ॥ श्लेष्माण्डः स तु विज्ञेय औपाण्डौ वेधयेच्छिरां । निरूहं कटुतैलेन चाङ्गे स्वेदञ्च कारयेत् ॥ जयदत्तः ५०अ. ।

अण्डहस्ती । पुं । चक्रमर्द्दक्षुपे । रा.नि.व.५ ।

अण्डालुः । पुं । मत्स्ये । श.च. ।

अण्डिका स्त्री । यवचतुष्टयपरिमाणे । च. ।

अण्डिनी । स्त्री । सान्निपातिकयोनिरोगविशेषे। लक्षणं—"अतिकायगृहीतायास्तरुण्या अण्डिनी भवेत् ।" सु.चि. ।

अण्डीरः । पुं । पुरुषे । मे.रत्रिकं ।

अण्वस्थि । क्ली।मणिबन्धादिस्थे सूक्ष्मास्थ्नि।सु.शा.।

अण्वी । स्त्री । अङ्गुली । [इति च लोके। अचि.।

अतन्द्रा । स्त्री । काफि इति ख्याते फले । चा

अतरुणदारुः (पुं । वृद्धदारके । विज-
अतरुणदारः(कः) ताड़क । हिं विधारा ।
"अतरुणदारुरास्नापुराः।"भा.म.१भ.सन्धिकज्व.चि.।

अतलस्पृक् । क्ली । जले । हे.च.४का ।

अतसी । स्त्री।(Linum Usitatissimum) Common flax. क्षुमावृक्षे । मसिना । हिं तिसि । तें नल्लयगश्चिचेट्टु । गुणाः—मधुरा बल-

कारिका कफवातवर्द्धनी, ईषत्पित्तघ्नी कुष्ठवातघ्नी च । रा.नि.व.१६। शुक्रदृष्टिघ्नी स्निग्धा गुरुः वातास्त्रजिच्च । मद.व.१० ।

अतसीतैलम् । क्ली । अतसीजाततैले। মসিনার তৈল। गुणाः –मधुरं पिच्छिलं वातघ्नं मदगन्धि कषायं कफहरं कासहरञ्च । रा.नि.व.१५ । आग्नेयं स्निग्धोष्णं कफपित्तनुत् कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु । मलकृत् रसतः स्वादु ग्राहि त्वग्दोषहृद्घनम् । वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे । अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥ भा.पू.तैलव. ।

अतिकटुः । त्रि । निम्बादिद्रव्ये ।

अतिकण्टः(कः) । पुं । लघुगोक्षुरके । दुरालभायाम् । मद.व.१ । [कन्दशाके । रा.नि.व.७ ।

अतिकन्दः(कः) । पुं । हस्तिकन्दनाममहा-

अतिकृशः । त्रि । अतिदुर्ब्बले ।

अतिकेसरः । पुं । कुब्जकापुष्पवृक्षे । কোকণ দেশীয় পুষ্প বিশেষ । हिं कूजा । रा.नि.व.१० । भा.पू.पु.व.। कण्टकसेवत्याम् । কাঁটা সেউতি ।

अतिक्रान्तावेक्षणम् । क्ली । यत्पूर्व्वमभिहितं तत् । "यथा चिकित्सितेषु ब्रूयात् श्लोकस्थाने यदीरितमिति ।" सु.उ.६५अ.।

अतिगण्डः । त्रि । बृहद्गण्डे । मे.डचतुष्कं ।

अतिगन्धः । पुं । A sort of Jasmine (Jasminum zambac.) मुद्गरपुष्पवृक्षे । रा.नि.व.१०। गन्धके । रा.नि.व.१३ । (Michelia champaca.) चम्पकवृक्षे । रा.नि.व.१०।भूतृणे । গন্ধতৃণ । रा.नि.व.८। [स्पृक्कवृक्षे । रा.नि.व.१०।

अतिगन्धकः । पुं । हस्तिकर्णपलाशवृक्षे । च-

अतिगन्धा(लुः) । स्त्री । पुत्रदात्रीलतायाम् । रा.नि.व.४ । [জিয়াপুতা । रा.नि.व.४ ।

अतिगन्धिका । स्त्री । पुत्रदात्रीलतायाम् ।

अतिगुहा । स्त्री ।(Uraria lagopoedes.) पृश्निपर्ण्याम् । ছোট চাকুলে । र.मा. । शालपर्ण्याम् । मद.व.१। वा.सू.२६अ.। "लक्ष्मीं गुहामतिगुहाम् ।"

अतिघूर्णता । स्त्री । अतिनिद्रा । भा.म.४भ. मसूरिकानि. । "तृष्णा दाहातिघूर्णता ।"

अतिचरः । पुं । पक्षिभेदे ।

अतिचरणा । स्त्री । तन्नामककफजयोनिरोगविशेषे । अतिव्यवायेन शोथयुक्ता योनिरतिचरणोच्यते । "सैवातिचरणा शोफसंयुक्तातिव्यवायतः ।" वा.उ.३३अ. । See अचरणा ।

अतिचरा(ला) । स्त्री। पद्मचारिण्याम् । मद. व.३।(Hibiscus mutabilis.)स्थलपद्मिन्याम् । স্থলপদ্ম । रा.नि.व.५ । भा.पू.१भ. । See स्थलपद्मम् । भूतृणे ।

अतिच्छत्रः । पुं । रक्तकोकिलाक्षे । তালমাখনা । রক্ত কুলেখাড়া । प.मु.।रत्ना.। छत्रायाम्। Mushroom. কাটছাতু, পোয়ালছাতু । स्थूलतृणविशेषे ।

अतिच्छत्रकः । पुं। भूतृणे। प.मु.। भूतृणे। গন্ধতৃণ । रा.नि.व.८। तृणसाधारणे । वृक्षविशेषे । यस्य मूले पत्रे वा वचाकारः, कटुरसश्च । रा.नि.। सप्तपर्णवृक्षे ।

अतिच्छत्रा / **अतिच्छत्रिका** } स्त्री। शतालायाम्। শুল্ফা । रा.नि.व.४। मद.व.२ । वा. उ.६अ.। "अतिच्छत्रा पलङ्कषा ।" सि.यो.उन्मादचि.महापैशाचघृते । मधुरिकायां । মৌরী । च. चि.१अ.। छत्रवृक्षे । यस्य मूले पत्रे वा वचाकारः, कटुरसश्च । भूतृणे । रा.नि. । विषाणिकायाम् । वा.सू.२९अ.। तन्नामकमहौषधौ । See ओषधिः ।

अतिजागरः । पुं । नीलक्रौञ्चे । रा.नि.व.१६।

अतिजृम्भः । पुं । वायुरोगविशेषे । वै.निघ.।

अतितपस्विनी । स्त्री । गोरक्षमुण्ड्याम् । গোরক্ষ চাকুলিয়া । भा.पू.१भ.गु.व. ।

अतितर्पणम् । क्ली । अतितृप्तौ । वा.सू.८अ. ।

अतितीव्रा । स्त्री । गण्डदूर्व्वायाम्। रा.नि.व.८।

अतितीक्ष्णः । त्रि। मरिचादौ । पुं । शोभाञ्जनवृक्षे । क्ली । अजमोदायाम् । [निघ. ।

अतितृप्तिः । पुं । पित्तजन्यरोगविशेषे । वै.

अतितेजिनी । स्त्री । त्रिपर्ण्याम् । তেজবল, তেজবতী । मद.व.१ ।

अतिदग्धम् । क्ली । अग्निदग्धरोगे । अतिदग्धे

मांसावलम्बनं गात्रविश्लेषः शिरास्नायुसन्ध्यस्थिव्यापादनमतिमात्रं, ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति। व्रणश्चास्य चिरेण रोहति रूढ़श्च विवर्णो भवति। प्लुष्टस्याग्निप्रतपनं कार्य्यमुष्णं तथौषधम्। इत्यादि। सु.सू.१२अ.।

अतिदाहः। पुं। अतिसन्तापे। वै.निघ.।

अतिदीप्तिः। स्त्री। श्वेतसुरसायाम्। শ্বেত বাবুই তুলসী। वै.निघ.। [व.६।

अतिदीप्यः(कः)। पुं। रक्तचित्रके। रा.नि.

अतिदुष्टः। पुं। गोक्षुरके। वै.निघ.।

अतिदेशः। पुं। प्रकृतस्यानागतेन साधनम्। यथा—अनेनास्य वायुरूर्द्धमुपतिष्ठते तेनोदावर्त्तः स्यादिति। सु.उ.६५अ.। [सु.सू.१५अ।

अतिनिद्रता। स्त्री। कफवृद्धिजन्यरोगविशेषे।

अतिपक्वमांसम्। क्ली। पाकाधिकसिद्धमांसे। गुणाः—अतिपक्वन्तु यन्मांसं विरसं वातलं गुरु। वै.निघ.।

अतिपक्वक्षीरम्। क्ली। अतिशृतघनदुग्धे। ঘনাবৃত দুগ্ধ। इदम् अतिगुरु। "भवेद्गुरीयोऽतिशृतम्।" वा.टी.हेमाद्रौ चक्रपाणिः।

अतिपत्रः(कः)। पुं। शाकतरौ। শেগুন গাছ। रा.नि.व.९। उन्माद-चि.महापैशाचघृते। हस्तिकन्दनाममहाकन्दे। रा.नि.व.७।

अतिपत्रा। स्त्री। (Sida cordifolia.) बलायाम्। বেড়েলা। हिं खरैली।

अतिपातितम्। क्ली। अस्थिभङ्गविशेषे। तेनास्थि निःशेषेण भिन्नं भवति। सु.नि.१५अ.।

अतिपिच्छः। पुं। श्वेतरक्तालुके। वै.निघ.।

अतिपिच्छला। स्त्री। कुमार्य्याम्। घृतकुमारी। वै.निघ.।

अतिपिञ्जरः / **अतिपीड़कः** } पुं। दुष्टव्रणे। च.।

अतिबला। स्त्री। (Sida rhombifolia.) पीतबलायाम्। পীতবর্ণ বেলেড়া, পীতবাকুলি। हिं ककहिया। मं पिटारिणी। गुणाः—तिक्ता कटुः वातघ्नी क्रिमिघ्नी दाहतृष्णाविषच्छर्द्दिक्लेदोपशमनी च। रा.नि.व.४। शीतला मधुरा बलकान्तिकृत्। स्निग्धा ग्राहिणी वातरक्तरक्तपित्तघ्नी च। मद.व.१। हरेन्महाबला कृच्छ्रं भवेद्वातानुलोमनी। हन्यादतिबला मेहं पयसा सितया समम्॥ भा.पू.१भ.गु.व.। सु.म.३९ संशमने। च.सू.४अ.। सु.सू.क्रिमिचि.। चि.क.क.वल्ली स्त्रीरोगचि.। वा.उ.४०अ.। श्वेतवाट्यालके। गौरचतण्डुलायां। গোরক্ষচাকুলিয়া, কালিয়া ঝিটকী। विष्णु-नारायणतैले। शतावरीयो.सा.कौ.। चि.क्र.क.वल्लीकेतक्यादितैले।

अतिबलिका / **अतिबली** } स्त्री। वाट्यालके। रा.नि.व.४।

अतिभारगः। पुं। अश्वतरे। খচ্চর इति लोके।

अतिभोजनम्। क्ली। अतिमात्रया भोजने। गुणाः—आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकम्। सु.सू.४६अ. कृतान्नव.।

अतिमङ्गल्यः। पुं। (Aegle or cratoeva marmeloes.) विल्ववृक्षे। रा.नि.व.११।

अतिमञ्जुला। स्त्री। कण्टकसेवतीवृक्षे। हिं सेवती गुलाब। গোলাপ, রক্ত গোলাপ। भा.पू.१भ.पु.व.। मद.व.३। See सेवती।

अतिमण्डलः। पुं। भूधामनवृक्षे। वै.निघ.।

अतिमन्थः(कः)। पुं। अग्निमन्थक्षुपे।

अतिमुक्तः(कः) / **अतिमुक्तका** } पुं। Mountain eboney. तिनिशवृक्षे। अम.। तिन्दुकवृक्षे। তেঁদ, গাব। नवमल्लिकाभेदे। मं तें रायविर। রায়বেল। (Goertnera racemosa.) माधवीलतायाम्। प.मु.। "अतिमुक्तकमिच्छन्ति वासन्ती-माधवीलताम्।" हला.५४। अतिमुक्तस्तु निःसङ्गे वासन्त्यां तिनिशेऽपि च। मे.तचतुष्कं। वा.उ.१३अ.। "तथातिमुक्तकैरण्ड।" भा.पू.१भ.। गुणाः—कषायः शीतलः श्रमघ्नः पित्तदाहज्वरोन्मादहिक्काच्छर्द्दिघ्नश्च। रा.नि.व.१०। See तिनिशः। माधवी मधुरा शीता लघ्वी दोषत्रयापहा। भा.पू.१भ.पु.व.। (कः) हरिमन्थे। हारा.।

अतिमुक्ततैलम्। क्ली। अतिमुक्तकबीजतैले। गुणाः—वातपित्तघ्नं केश्यं श्लेष्मलं गुरु शीतलञ्च। वा.टी.हेमा.। [व.१०।

अतिमुक्ता। स्त्री। अतिमुक्तकायाम्। रा.नि.

अतिमोदनी(दिनी) । स्त्री । नवमल्लिकायां। रा.नि.व.१०।

अतिमोदा । स्त्री।(Jasmimum arboreum.) नवमल्लिकायां। সেউতি। रा.नि.व.१० । गणिकारीवृचे स्वनाम्ना कौंकणदेशे ख्याते। গণিরি । रा.नि.व.१० ।

अतियवः । पुं । निःशूकयवे । कृष्णवर्णे यवे । मद.व.१० । निःशूकोऽतियवः स्मृतः । यवादतियवो न्यूनः । भा.पू.१भ.धान्यव. ।

अतियुक्तः । त्रि । वारंवारं प्रयुक्ते । भा.म.ख. १भ.अ.सा. । "स्नेहाद्यैरतियुक्तैः ।" [१७अ.।

अतियोगः । पुं । अतिशयितप्रयोगे । वा.सू.

अतिरक्तः । पुं । हिङ्गुले । वै.निघ. ।

अतिरक्ता । स्त्री । जवापुष्पवृचे । वै.निघ. ।

अतिरसः । पुं । पौण्ड्रके । श.मा. ।

अतिरसा । स्त्री। मूर्व्वायाम् । মূরগা। वै.निघ. २भ.अप.चि.पलङ्कषातैले । रास्नायाम् । मद.व. ११ वल्लीयष्टिमधुनि । रा.नि.व.६ । शतमूल्याम् । च.सू.४ । [१२ । भा.पू.१भ. मद.व.१ ।

अतिरुहा । स्त्री । मांसरोहिण्याम् । रा.नि.व.

अतिरुचः । त्रि । स्नेहशून्ये, कङ्कोद्रवादौ ।

अतिरेचकः । पुं । काकोल्याम् । কাঁকলা । वै.निघ. । [नि.व.२० ।

अतिरोगः । पुं। चयरोगे । राजयक्ष्मणि । रा.

अतिरोमशः । पुं । वन्य-छागे । हारा. ।

अतिरोमशा । स्त्री। नीलवुह्नायाम् । ছাগলবেঁটে । प.मु. ।

अतिलङ्घितम् । क्ली । अत्युपवासे । तल्लक्षणं—पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च । क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः। मनसः सम्भ्रमोऽभीक्ष्णमूर्द्धवातस्तमो हृदि। देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ॥ च.द. ।

अतिलम्बी । स्त्री । शताह्वायाम् । भा.पू.१भ. ।

अतिलोहितगन्धः । पुं । दमनकवृचे । दना । प.मु. ।

अतिवर्त्तुलः । पुं । (Sida rhombifolia.) कलायविशेषे । মটর, বাটুলা, কড়াই । र.मा. ।

अतिविदाही । त्रि । राजसर्षपादौ ।

अतिविद्धा । स्त्री । दुष्टव्यधनविशेषे । प्रमाणातिरिक्तविद्धायाम् । सु.शा.८ ।

अतिविषः(षा) । स्त्री ।(Aconitum heterophyllum.)स्वनामख्यातोपविषजातीयपथ्यद्रव्ये। আতইচ্ । हिं आतइष । अतिविषा सर्व्वत्र भाषा । तें अतिवसचेटु । अतिविषा शुक्लकृष्णारुणभेदात् त्रिधा रसवीर्य्यविपाकेषु तुल्या । गुणाः— कटूष्णा तिक्ता कफपित्तज्वरघ्नी आमातीसारकासघ्नी विषघ्नी छर्द्दिघ्नी च । रा.नि.व.६ । वा.सू.३५अ. वचादि. । नागरातिविषाभयाः । च.द.ज्व.चि.पिप्पल्याद्यघृते । मदनपालस्तु श्यामकन्दोपविषयोश्चतुर्भेदानाह श्वेतरक्तकृष्णपीतत्वात् ते तासां यथापूर्व्वं श्रेष्ठा गुणोत्तमा सर्व्वदोषहरा शोथघ्नी श्लेष्मिकरोगघ्नी रसायनी च । मद.व.११ अतिविषाकटुकीप्रभृतीनामुष्णगोमयजलेन शुद्धिर्ज्ञातव्या । सा. कौ. । [वै.निघ. ।

अतिवीजः । पुं । वब्बूलकवृचे । বাবলাগাছ ।

अतिवृहत्फलः । पुं । पनसवृचे । কাঁটাল গাছ । भा.पू.१भ. ।

अतिव्यथा । स्त्री । अतिशयितयन्त्रणायाम् । पीड़ायाम् ।

अतिव्यायामः । पुं । व्यायामाधिक्ये । অধিক কুস্তি করা । अतिव्यायामो न पथ्यः । अतिव्यायामतः कासो ज्वरश्छर्द्दिः श्रमः क्लमः । तृष्णा चयः प्रतमकः रक्तपित्तञ्च जायते॥ भा.पू.१भ.।

अतिशष्कुली । स्त्री । तिलकृतरोटिकायाम् । गुणाः — रुचा श्लेष्मपित्तास्रघ्नी गुरुः विष्टम्भिनी, न चक्षुष्या च । भा.पू.कृतान्नव.। [मूल । र.मा.।

अतिशारिवा । स्त्री । अनन्तायाम् । অনন্ত-

अतिशूकः । पुं । यवे। যব । प.मु. ।

अतिशूकजः । पुं। गोधूमे । গম । Wheat.

अतिशृतचीरम् । क्ली । अतिक्वथिते दुग्धे कवलभोज्यवत् सञ्जाते । तद्गुरुतरम् । स्यान्निर्जलं शृतं द्विचिचतुरष्टांशशेषितम् । तथा शृततमं सारं गुरु बल्यतमं पयः ॥ वा.सू.५अ.अरु.टी.खरनादः।

अतिशोषः । पुं । क्षयरोगे । See क्षयः ।

अतिसख्या । स्त्री । वल्लीयष्टिमधुनि ।

अतिसर्जनम् । क्ली । वेधे । मे.नपञ्चकं ।

अतिसान्द्रः । पुं । राजमाषे। বাঞ্জাশী বরটী। रत्ना. । [लतायष्टिमधुनि।

अतिसाम्या । स्त्री । कृष्णमुखगुञ्जावल्ल्याम् ।

अतिसारः । पुं । पर्पटके । मद.व.१ । हिं पापड़ा । उदरामयरोगविशेषे । See अतीसारः ।

अतिसारकी । त्रि । अतिसाररोगिणि ।

अतिसारघ्नः । पुं । क्षेत्रपर्पटके । ক্ষেৎপাপড়া । वै.निघ. । [निघ.।

अतिसारघ्नी । स्त्री । अतिविषायाम् । वै.

अतिसारभेषजम् । क्ली । लोध्रे । तद्रोगनिवारके औषधे ।

अतिसारवारणरसः । पुं । अतिसारे रसः। अत्र कृतकर्पूरं पक्वकर्पूरम् । खाखसीक्षीरं अहिफेनम् । र.सा.सं. ।

अतिसारस्था । स्त्री । रास्नायाम् । वै.निघ. ।

अतिसूक्ष्मः । त्रि । अतिशयसूक्ष्मे ।

अतिसेवनम् । क्ली । अधिकमात्रया सेवने ।

अतिसौम्या । स्त्री।वल्लीयष्टिमधुके। रा.नि.व.६।

अतिसौरभः । पुं । आम्रवृक्षे । भा.पू.फ.व.।

अतिस्कन्धा । स्त्री । रक्तकुलत्थके । वै.निघ. ।

अतिस्थूलवर्त्मा । पुं । दुष्टव्रणविशेषे । च.।

अतिस्निग्धः । त्रि । अत्यन्तस्निग्धे । तस्य लक्षणम्—कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः । लवणं तदतिस्निग्धे रूक्षं तत्र प्रदापयेत् ॥ वै.निघ.। नस्यचि. । [निघ.।

अतिस्रवा । स्त्री । मयूरवल्ल्याम् । মুগ্‌বা । वै.

अतिक्षिप्तसन्धिः । पुं । सन्धेरतिशयविश्लेषे । सन्धिच्युतं सदुच्चैरवस्थानं । तेन सन्ध्यस्थ्नोरुभयोरेवातिक्रान्तता वेदना च। सु.नि.१५अ.। See भग्नः ।

अतीसारः। पुं। Diarrhœa or dysentry. अतीव सरति, प्रकृतिमतिक्रम्य गुदमार्गेण सरतीति अतीसारः।स्वनामख्यातोदरामयरोगे, बहुद्रवमलनिःसरणरोगे । तस्य निदानं गुरुभोजनादिकम् । तस्य निरुक्तिः—रसादिद्रवधातूनामग्निं मन्दीकृत्य मलेन सह मिश्रितानां वायुना चाधः प्रणुन्नानां भतिनिःसरणादतीसार उच्यते। तस्य च पूर्व्वरूपं—हृदयनाभिगुह्योदरादिस्थानेषु सूचीविद्धवद्वेदना, कायावसादवायुमलविबन्धतोदोदराध्मानापरिपाकादिकञ्च । स षड्विधः वातपित्तकफसन्निपातशोकापरिपाकजभेदाद्भवति । तत्र वातजे मलस्यारुणता फेणिलता रूक्षता पक्वता तथा गुदे सशब्दवेदनमल्पशो मुहुर्निःसरणञ्च लक्षणं भवति । पित्तजे च मलस्य हरितपीतलोहितवर्णता तृष्णामूर्च्छादाहाः, मलद्वारे ज्वाला क्षतञ्च लक्षणम् ; कफजे च शुक्लगाढ़सकफामगन्धिशीतलमल । निःसरन्ति, रोगी सरोमाञ्चश्च भवति । सान्निपातिके च वातजादिलक्षणानि दृश्यन्ते, प्रायशश्चात्र मलाः शूकरवसा-मांसधावनवारिवद्भवन्ति । शोकजे च गुञ्जाफलसदृशशोणितं केवलं मलमिश्रितं मलरहितं वा सरति, तत्र मलसहितं चेत् दुर्गन्धं मलरहितं चेन्निर्गन्धं भवति । आमातिसारे च नानावर्णं वारंवारञ्चातिसार्य्यते, तथा तत्रोदरशूलमतीव जायते । अतीसारस्य चासाध्यलक्षणं—मलस्य कृष्णस्निग्धता, यकृत्खण्डवत् कृष्णरक्तवर्णता, घृततैलवसामज्जदधिदुग्धमांसधावनवारिसदृशता, कृष्णनीलवर्णता, ईषत्कृष्णरूक्षचिक्कणता, शिखिपुच्छवत् विविधवर्णचन्द्रकयुक्तता, घनशवगन्धिमस्तिष्काभता, सुगन्धपूतिगन्धबहुलता च, तथा तृष्णादाहान्धकारदर्शनं, हिक्काश्वासपार्श्वशूलेन्द्रियचित्तमोहाः गुह्याभ्यन्तरवलिपाकः प्रलापश्च, तथा गुदसंवरणाक्षमता बलमांसहीनता अतीवोदराध्मानं शोथः, मलद्वारस्य पक्वतासत्त्वेऽपि गात्रस्य शीतलता उपद्रवाश्च । चिकित्सा-स्वस्वपर्य्याये प्रदर्शनीया।अतीसारे नानाविधद्रवधातुनिःसरणम्अन्यत्र केवलमेव कफनिःसरणमित्यतिसारप्रवाहिकयोर्भेदः । इति माधवकरसंग्रहादतीसारसंग्रहः। शार्ङ्गधरस्तु भयजमुक्त्वा सप्तविधमाह। तस्य सम्प्राप्तिः संशम्यापां धातुरन्तःकृशानुं वर्चोमिश्रो मारुतेन प्रणुन्नः । वृद्धोऽतीवाधः सरत्येव यस्माद्व्याधिं घोरं तं त्वतीसारमाहुः ॥ हृन्नाभिपायूदरकुक्षितोदगात्रावसादानिलसन्निरोधाः। विट्संङ्ग आध्मानमथाविपाको भविष्यतः तस्य पुरःसराणि॥ तस्य निदानम्—गुर्व्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः । विरुद्धाध्यशनाजीर्णैरसात्म्यै-

चापि भोजनैः॥ स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषाद्भयात्। शोकाद्दुष्टाम्बुमद्यातिपानात् सात्म्यर्त्तुपर्य्ययात्॥ जलाभिरमणैर्वेगविघातैः क्रिमिदोषतः। नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते॥ सु.उ. ४०अ.। स च वातपित्तकफसन्निपातशोकामजभेदात् षड्विध इति। अथातिसार-लक्षणम्—अनिलेनाथ पित्तेन श्लेष्मणा चापि वाजिनः। अतीसारस्तथा चान्यः सन्निपातेन जायते॥ सङ्कोचिताङ्गः स्थानेन सकफं योऽतिसार्य्यते। अल्पं तनु सशब्दञ्च पुरीषं बहु वा हयः॥ तस्य वातात्मकं विन्द्यादतीसारं विचक्षणः। पित्तजञ्चैव वक्ष्यामि श्लेष्मजञ्च समासतः॥ स्वेददाहपरीतानां लक्षयेन्मतिमान् भिषक्। सार्वेण नीलरक्तेन विस्रगन्धेन पित्तजम्॥ मन्दाहारस्तथा वाही हृष्टरोमातिपीड़ितः। श्यामैः सपिच्छिलैर्भिन्नैर्विद्यात् श्लेष्मसमुद्भवम्॥ सन्निपातात्मकञ्चैव सर्व्वेषां लक्षणैर्युतम्। द्विरूपं द्वन्द्वजं ज्ञेयमतीसारं विचक्षणैः। अतीसाराः समुद्दिष्टाः शालिहोत्रादिभिः पुरा॥ ज.द.४२अ.।

अतुलः । पुं । कफे । तिलकवृक्षे । श.च.।

अतृप्तिः । स्त्री । तृप्तिशून्यत्वे । अपरितोषे ।

अतेजाः । स्त्री । छायायाम् । रा.नि.व.२१।

अत्कः । पुं । अङ्गे । उणा.।

अत्नः । पुं । सूर्य्ये । वै.निघ.।

अत्यः । पुं । अश्वे । [भक्षके । विज.र.।

अत्यग्निः । पुं।क्षुधाधिक्ये। च.द.अग्निमा.चि.।

अत्यन्तपद्मा । स्त्री । कमलिन्याम् । वै.निघ.।

अत्यन्तशोणितः । त्रि । अतिरक्ते । क्ली । सुवर्णगैरिके । वै.निघ.।

अत्यन्तसुकुमारः । पुं। (Panicum Italicum.) कन्दलीवृक्षे । कङ्गुण्याम् । रा.नि.व.१६।

अत्यम्बुपानम् । क्ली । मात्रातिरिक्तवारिपाने। तल्लक्षणं यथा—अत्यम्बुपानान्न विपच्यतेऽन्नं अनम्बुपानाच्च स एव दोषः। तस्मान्नरो वह्निविवर्द्धनार्थं मुहुर्मुहुर्वारि पिबेदभूरि॥ इति जलपानलक्षणम्। रा.नि.व.१४।

अत्यम्लः । पुं, क्ली। (Spondias mangifera.) वृक्षाम्ले। তেঁতুল। रा.नि.व.६। See तिन्तिड़ी। वनमातुलुङ्गे। मातुलुङ्गे। त्रि, अत्यन्ताम्लरसयुक्ते।

अत्यम्ला । स्त्री । मातुलुङ्गवृक्षे । वनबीजपूरे । मधुरलेबु, मधुटावा वा मधुलेबु । रा.नि.व.११। महाकाँकड़ी। रत्ना. तिन्तिड्याम् । श.र.।

अत्यम्लपर्णी । स्त्री । वल्लिसूरणे लताविशेषे । कड़वड़वेलि । हेगगोलि । रा.नि.व.३ । अम्ललोण्याम् । आमरूल । गुणाः—अत्यम्लपर्णी तीक्ष्णाम्ला शोफशूलविनाशिनी । वातहृद्दीपनी रुच्या गुल्मश्लेष्मामयापहा ॥ रा.नि.व.३ । मात्रा.३माषा ।

अत्ययः । पुं । नाशे, दोषे, कृच्छ्रे । रत्ना.अने. व.। मे.यत्रिकं । [गाछ । रा.नि.व.१०।

अत्यर्कः । पुं । शुक्लार्कवृक्षे । শ্বেত আকন্দ

अत्यानन्दा । स्त्री । कफजन्ययोनिरोगविशेषे, येन स्त्री ग्राम्यधर्म्मेण सन्तोषं न लभते । अत्यानन्दा न सन्तोषं ग्राम्यधर्म्मेण विन्दति । भा.म. ख.४भ.योनिरोगचि.।

अत्यारक्ता । स्त्री । जवापुष्पवृक्षे ।

अत्युग्रम् । क्ली । हिङ्गुनि । मद.व.२ ।

अत्युग्रगन्धा । स्त्री । कृष्णगोकर्ण्याम् । कृष्णापराजितायाम् । अजमोदायाम् । मद.व.२ ।

अत्युदीर्णा । स्त्री । दुष्टव्यधनविशेषे । यत्र तीक्ष्णमहामुखशस्त्रेण वेधो भवति । सु.शा.८अ.।

अत्यूहः । पुं । कालकण्ठपक्षिणि । दात्यूहे । मे.हत्रिकं । [कायाम् । मे.हत्रिकं ।

अत्यूहा । स्त्री । नीलशेफालिकायाम् । नीलि-

अत्रिः । पुं । ऋषिविशेषे ।

अदनम् । क्ली । भक्षणे ।

अदन्तः । त्रि । दन्तहीने ।

अदलः । पुं । हिज्जलवृक्षे । श.च. । घृते ।

अदला । स्त्री । घृतकुमार्य्याम् । रा.नि. ।

अदंशः । पुं । महामूलके । বড় মূলা ।

अदारिका । स्त्री । वृक्षकमले, वृक्षोत्पले । ওলট্ কম্বল । वै.निघ. [निघ. ।

अदृढ़ः । त्रि । अस्थिरे । क्ली । तृणविशेषे । वै.

अद्भुतसारः । पुं । खदिरसारे । रा.नि.व.८ ।

अद्यम् । क्ली । धान्ये ।

अद्यतन: । त्रि । अद्यभवे । আজিকার ।

अद्यश्विना
अद्यश्वीना } स्त्री । आसन्नप्रसवायां गवि ।

अद्रक: । पुं । महानिम्बवृक्षे । वै.निघ. ।

अद्रि: । पुं । पर्व्वते । शैलवृक्षे । मे.रद्विकं । परिमाणविशेषे ।

अद्रिकर्णी । स्त्री । अपराजितायाम् । श्वेतापराजितायाम् । रा.नि.व.२३ । [भा.पू.१गु.व. ।

अद्रिका । स्त्री । धान्यके । धनে । महानिम्बे ।

अद्रिज: । त्रि.गिरिजाते । क्ली । शिलाजतुनि । र.सा.रत्ना. । तुम्बुरुवृक्षे । रा.नि.व.११ । गैरिके ।

अद्रिजतु । क्ली । शिलाजतुनि । हेमा.। भा.।

अद्रिजा । स्त्री । सैंहलपिप्पलीक्षुपे । रा.नि. व.६ । [व.२ ।

अद्रिभू: । स्त्री । आखुकर्णीलतायाम् । रा.नि.

अद्रिमाषा । स्त्री । वनमाषे । মাষাণী । वै. निघ. । [ডুমুর । वै.निघ. ।

अद्रिसानुजा । स्त्री । त्रायमाणायाम् । वला-

अद्रिसार: । पुं । लौहे । रत्ना. ।

अद्रेष्क:(ष्का) । पुं,स्त्री । निम्बविशेषे । हिं वकाइननिम्ब । পাহাড়ে নিম্ । भैष. कुष्ठचि. ।

अध: । अव्ययं । अधोभागे । योनौ । वै.निघ. ।

अध:कुन्तल: । पुं । अन्तर्लोम्नि ।

अध:पातनम् । क्ली । पारदस्य यन्त्रमार्गेणाध:क्षेपणे । यथा—नवनीताह्वयगन्धकं (লাউয়া গন্ধক) सूतञ्च समभागं गृहीत्वा जम्बीररसेन मर्द्दयित्वा, शुकशिम्बीमूलं शिग्रुमूलापामार्गश्वेतसर्षपसैन्धवकल्केन समभागेन संमिश्र्य यन्त्रस्योर्द्ध्वभाण्डाभ्यन्तरतले कल्कमिश्रितं तं सूतं लेपयेत् । अथ जलयुक्तमधोभाण्डं भुवि पूरयित्वा तस्य मुखे रसयुक्तं भाण्डमधोमुखं संस्थाप्य च द्वयो: सन्धिमुखं लेपयेत् । अथ उपरिष्टात् पुटे दत्ते पारदो जले पतति । इत्यध:पातनं । "नवनीताह्वयं सूत"मित्यादि । र.सा.सं. ।

अध:पुट: । पुं । चारोलीवृक्षे । वै.निघ. ।

अध:पुष्पी । स्त्री । (Hieracium.) गोजिह्वाक्षुपे । रा.नि.व.४ । चोरपुष्पीक्षुपविशेषे । চোরকাঁটকী,চোরথড়িকা,ভাঁটুই, উকুনে, বাটিয়া, লেঙরা । হিটাহলীতি গৌড়ীয়া: । স্নততত্ত্ব.ব্রহ্মদণ্ডী নক্ষে वै.निघ.२भ. ।

अध:प्रस्तर: । पुं । तृणासने । वै.निघ. ।

अध:शल्य: । पुं । अपामार्गक्षुपे । रा.नि.व.४ । भा.पू.१भ. । श्वेतापामार्गे ।

अध:शाख: । पुं । संसाराश्वत्थवृक्षे ।

अध:शेखर: । पुं । श्वेतापामार्गे ।

अधम: । पुं । अम्लवेतसे ।

अधमाङ्गम् । क्ली । चरणे । श.च. ।

अधर: । पुं । ओष्ठे । ঠোঁট । रा.नि.व.१८ । क्ली । स्त्रीयोनौ ।

अधरकण्टक: । पुं । दुरालभायाम् । वै.निघ.।

अधरकण्टिका । स्त्री । क्षुद्रशतावर्य्यां । वै.निघ.।

अधरा । स्त्री । नीचदिशि । वै.निघ. ।

अधामार्ग:
अधामार्गव: } पुं । अपामार्गे । धामार्गववृक्षे । গড়গণ্ড। हिं काइच । श.टी.।

अधिकण्टक: । पुं । यासक्षुपे । দুরালভাবিশেষ । रा.नि.व.४ । [निघ. ।

अधिकप्रियम् । क्ली । त्वचि । দারচিনি । वै.

अधिकरणम् । क्ली । यत्र कुर्व्वन्ति तदधिकरणम् । सु.सू.४१अ.। 'यमर्थमधिकृत्योच्यते ।' यथा रसं दोषं वा । सु.उ.६५अ. ।

अधिकारी । पुं । पुरुषे । वै.निघ. ।

अधिजिह्व: । पुं । A tumour on the tongue. कण्ठगतमुखरोगे । सु.नि.१६अ.। अयं द्विजिह्वोऽप्युच्यते ।

अधिजिह्वक: । पुं । जिह्वागतरोगविशेषे । See अधिजिह्वा ।

अधिजिह्वा
अधिजिह्विका } स्त्री । जिह्वारोगविशेषे कफशोणितजे । अत्र जिह्वोपरि जिह्वाग्रवत् शोथो जायते । पक्वश्चेदसाध्य; न उपजिह्वा जिह्वानिम्नतो भवतीत्यनयोर्भेद:। लक्षणम्—जिह्वाग्ररूप: श्वयथु: कफात्तु जिह्वाप्रबन्धोपरिरक्तमिश्र: । सु.नि.१६अ.। अथास्य जिह्वागत-

रोगे जिह्वोपरि शोफरूपे । लक्षणम्—"अधिजिह्वाभिधानन्तु उपरिष्टाद्विनिर्द्दिशेत्॥" ज.द.२८अ.।

अधिदन्तः (कः) । पुं । A tooth growing over another. दन्तमूलगतरोगविशेषे । गजदन्ते । গজদাঁত । अयन्तु दन्तोपरि षड्धिकदन्तनिर्गमरूपरोगः। तेन चास्य ग्रासग्रहणेऽनिच्छा भवति । सप्तदन्तविशिष्टोऽष्टदन्तविशिष्टश्चाश्वोऽधिदन्त इत्युच्यते । "सप्तभिश्चाष्टभिर्दन्तैः ख्यातश्चाधिकदन्तकः ।" ज.द.३अ. ।

अधिदैवतम् । क्ली । अधिदेवतायाम् । आधिदैविकरोगे । सु.शा.१अ. ।

अधिपतिः । पुं । मर्म्मस्थानविशेषे । तत्र रोमावर्त्तस्थानं मस्तकाभ्यन्तरे सर्व्वशिरासम्मिलनस्थानञ्च । सु.शा.६अ. ।

अधिभूतः । पुं । यमधिकृत्य योवर्त्तते स एव तस्याधिभूतो नाम । यथा यस्य नामेन्द्रियस्य यत् कार्य्यभूतं तदेव कार्य्यं तस्येन्द्रियस्याधिभूतविषयः । सु.शा.१अ. ।

अधिमन्थः । पुं । Acute pains in the balls of the eyes with pain and swelling of one side of the head. अभिष्यन्दोत्थनेत्ररोगविशेषे । स च वातजपित्तजकफजरक्तजभेदेन चतुर्विधः । सर्व्वेषाञ्चैव लक्षणं तीव्रवेदना। अभिष्यन्दे (চোক উঠা বা নেত্রশূল) उपेक्षिते अधिमन्थो जायते। लक्षणम्—ह्द्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम् । तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः ॥ उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा । शिरसोऽर्द्धञ्च तं विद्यादधिमन्थं स्वलक्षणैः ॥ हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधिमन्थो रक्तजः पञ्चरात्रात् । षड्रात्राद्वा वातिको वै निहन्यात् मिथ्याचारात्-पैत्तिकः सद्य एव ॥ अधिमन्थेषु सर्व्वेषु ललाटे वेधयेच्छिरां। अशान्ते सर्व्वथा मन्थे भ्रुवोस्तु परिदाहयेत् ॥ सु.उ. ६अ.

अधिमांसम् ।क्ली,पुं।मा.बे.री.।Seeनेत्रमांसार्म्म

अधिमांसकः । पुं । Inflammation of the tonsils. कफजन्यदन्तवेष्टजरोगविशेषे । हनुभवान्त्यदन्ते अतिवेदनमहाशोथो लालास्रावश्च भवति। हान्त्ये पश्चिमे दन्ते महाशोथोमहारुजः । लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः । भा.म.ख.४भ.मु.री.चि.। मा.नि.। सु.नि.१६अ. ।

अधिमांसार्म्म । क्ली, पुं । Fleshy excrescence on the eye, cancer of the eye. दृष्टिशुक्लगतरोगविशेषे मांसवृद्धीतिख्याते। लक्षणम्—पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सितेः पृथुमृदधिमांसार्म्म बहुलञ्च यकृन्निभम्॥ मा.नि.।

अधिमुक्तकः । पुं । माधवीलतायाम्। वै.निघ.।

अधिमुक्तिका । स्त्री । मुक्तास्फटे, शुक्तौ । मुक्ताझিণুক । वै.निघ. । [रत्ना. ।

अधिष्ठानम् । क्ली । स्थाने । ग्रामे । नगरे ।

अधीरः । पुं । अयोग्यवैद्ये । वै.निघ. ।

अधोंऽशुकम् । क्ली । परिधेयवस्त्रे । अम. ।

अधोगतः । पुं । अस्थिभङ्गरोगे । वै.निघ. ।

अधोघण्टा । स्त्री। अपामार्गे। আপাঙ্। रत्ना.।

अधोऽङ्गम् । क्ली । मलद्वारे ।

अधोमर्म्म । क्ली । गुदे । गुह्यद्वारे । हे.च. ।

अधोजिह्विका । स्त्री। तालुमूलस्थक्षुद्रजिह्वायाम् । আলজিব । हारा. । जिह्वाधःशोथरोगे । कफादधस्तादधिजिह्विका चेति । च. ।

अधोद्वारम् । क्ली । मलद्वारे । योनौ। हे.च.।

अधोभागहरः । त्रि । विरेचनकर्म्मणि हितकरे । च. ।

अधोमुखा । स्त्री। गोजिह्वायाम् । रा.नि.व.४।

अधोयन्त्रम् । क्ली । वक्रयन्त्रे ।

अधोवायुः । पुं । अपानवायौ ।

अधोरेचनः । पुं । आरग्वधवृक्षे ।

अधोऽस्रपित्तम् । क्ली। अधोगतरक्तपित्तरोगे। See रक्तपित्तम् ।

अध्यण्डा (व्यण्डा) । स्त्री । कपिकच्छुलतायाम् । আলাকুশী। See आत्मगुप्ता । भूम्यामलक्याम् । रत्ना. । कोकिलाक्षे । তালমাখনা । मद. व.१ । भा.पू. । प.मु. ।

अध्यर्बुदम्। क्ली । अर्ब्बुदोपरि जातार्ब्बुदरोगे। আবের উপর আব। लक्षणं—यज्जायतेऽन्यत्खलु-पूर्व्वजाते ज्ञेयं तदध्यर्ब्बुदमर्बुदज्ञैः । सु.नि.११अ.।

अध्यशनम्। क्ली। अजीर्णोपरि भोजने। लक्षणम्

—"अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते। प्राग्भुक्ते त्वनले मन्दे हिरक्री न समाहरेत्। प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यति। पूर्व्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम्। सायमाशे त्वजीर्णे तु प्रातर्भुक्तं विषोपमम्"। वै.निघ. दिनचर्य्या। भुक्तस्योपरि भूयोभोजने। भा.म.ख.१भ.अतो.सा.चि.। "विरुद्धाध्यशनाजीर्णैः।" वा.सू.८अ.।

अध्यण्डः । पुं। चीरिकावृत्ते। श.र.। महार्कवृत्ते। त्रि। प्रत्येकं कर्षाईमाने। सि.यो. र.पि.चि.एलादिगुटकायां हन्दः।

अध्युषितः । पुं। सर्व्वाचिरोगे। त्रि।उपविष्टे।

अध्रुषः । पुं। तन्नामकतालुगतमुखरोगे। अत्र तालुदेशे रक्तदोषजन्यलोहितानतिस्थूलशोथः, तेन च ज्वरस्तीव्रवेदना च भवति। मानि। तल्लक्षणं —शोफस्त्वथो लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्यः। सु.नि.१६अ.।

अध्वगः । पुं। उष्ट्रे। अश्वतरे। हे.च.।

अध्वगभोज्यः(ग्यः)।पुं। आम्रातकवृत्ते।त्रिका.।

अध्वगवृत्तः । पुं। आम्रातकवृत्ते।

अध्वगत्वमी । पुं। खेचरे, पत्तिणि। वै.निघ.।

अध्वजा । स्त्री। स्वर्णुलीत्तुपे। रा.नि व.४।

अध्वनिषेवणम् । क्ली। अध्वचलने। वै.निघ. See चंक्रमणं।

अध्वरा । स्त्री। मेदायाम्। भा.पू.१ ह.व.।

अध्वशोषः । पुं। पथिश्रमजन्यशोषरोगे। अध्वप्रशोषी स्रस्ताङ्गः संभ्रष्टपरुषच्छविः। प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः॥ नि.।

अध्वसिडकः । पुं। सिन्धुवारवृत्ते। रा.नि.व.४।

अध्वाण्डशावः। पुं। श्योणाकवृत्ते। শোণা গাছ। हिं नाउया श्योणाल। श.च.।

अनंशुमत्फला । स्त्री। कदलीवृत्ते। जटा.।

अनः । क्ली। अन्ने। उणा.। [निघ.।

अनग्ना । स्त्री। कार्पास्याम्। কাপাস। वै.

अनघः । पुं। गौरसर्षपे। रा.नि.व.१६।

अनघ्नः । पुं। गौरसर्षपे। वै.निघ.।

अनङ्गम् (कम्) । क्ली। मनसि। श.र.।

अनङ्गसुन्दररसः । पुं। वाजीकरणाधिकारे रसः। सूतस्य पलं गन्धकस्य च पलं रक्तकुमुदरसैः दिनत्रयं भावयेत्। ततो बालुकायन्त्रे प्रहरमात्रं पचेत्। अवतार्य्य रक्तवकपुष्पश्वेतपद्मरसेन दिनैकं भावयेत्। र.सा.सं.। [शा शाक। रा.नि.व.४।

अनडुज्जिह्वा । स्त्री। गोजिह्वायाम्। গোজি-

अनडुही । स्त्री। See अनड्वाही।

अनड्वान् । पुं। वृषे। भा.पू.।.रत्ना.।

अनड्वाही । स्त्री। गवि। গাই। हला.।

अनणुः । पुं,क्ली। सूक्ष्मधान्ये। সরুধান। वै.निघ.

अनन्तः । पुं। दुरालभायाम्। वै निघ.२म. अनन्तादिचूर्णे, सर्व्वज्वरे। सिन्धुवारवृत्ते। अश्वकधातौ। रा.नि.व.१३।

अनन्तकः । पुं। मूलके। नलतृणे। हिं नरकट। मद.व.१।

अनन्तमूलम् । क्ली। करालाख्यौषधे। सुगन्धायां। वचाभेदे। श.चि.। अनन्तायाम्।

अनन्तमूली । स्त्री। दुरालभायाम्। रक्तदुरालभायाम्। वै.निघ.।

अनन्तरन्ध्रका । स्त्री। खर्परपोलिकायाम्। আস্কে পিটে। वै.निघ.।

अनन्तवातः । पुं। तन्नामकशिरोरोगविशेषे। लक्षणं—दोषास्तु दुष्टास्त्रय एव मन्यां सम्पीड्य घाटासु रुजां सुतीव्राम्। कुर्व्वन्ति योऽचिभ्रुवि शङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु॥ गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान्। अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम्॥ मा.नि.।

अनन्ता । स्त्री। स्वनामख्यातलतायां। অনন্তমূল। हिं अनन्तमूल। सु. मिश्र.अ.। शारिवेति उत्तरापथे प्रसिद्धा। रा.नि.व.१२। See सारिवा। च.द.पि.ज्व.चि.शिरोलेपे। "कालेयचन्दनानन्ता।" भा.म.ख.४भ.गर्भ-चि.। "अनन्ता शारिवा रास्ना"। भा.म.ख.१भ.ज्वरे शारिवादौ। "अनन्ता बालकं मुस्तम्"। च.सू.४,३१दश.। दूर्व्वायां। हे.च.४। स्वर्णत्तीर्य्यां। प.मु.। लाङ्गल्यां। प.मु.। भा.पू. १गु.व.। दुरालभायां। प.मु.। भा.म.ख.४भ.

सु.री चि.। "कल्कैरनन्ता खदिरारिमेद.....।" बा.१५ष. प्रियङ्ग्वादि-व.। प्रियङ्ग्वादि-दूर्व्वादि-व. हेमा.अरुणदत्त। "दूर्व्वानन्ता निम्बवासात्मगुप्ता पथ्या-द्रजी योजनवल्ल्यनन्ता।" नीलदुर्व्वायाम्। भा.पू.१। रा.नि.व.२३। गोलोम्यां। श्वेतदूर्व्वा। रा.नि.व.८। यवासायाम्। भा.म.४भ.कावेल्यादिव., "अनन्तां कुक्कुटीं बिम्बीम्"। दुरालभाभावे यवासा ग्राह्या। अग्निमन्थवृक्षे। गुडूच्याम्। [दूर्व्वा।" भैष.कुष्ठ-चि.।

अनभिलाषः । पुं। अन्नविद्वेषे। अरोचके। रा.नि.व.२०।

अनलः । पुं। चित्रकक्षुपे। रा.नि.व.६। भा.पू.१भ.ह व.। च.द.संग्रहणी-चि.पाठाद्यचूर्णे। रक्त-चित्रके। र.सा.सं.। भल्लातकवृक्षे। रा.नि.व.११। पित्ते। रा.नि.व.२१। देवधान्ये। मद.व.१०। अग्नौ।

अनलम् । क्ली। भल्लातकबीजे। "अनलमरिच-

अनलनामा । पुं। चित्रकवृक्षे। [नि.व.३।

अनलप्रभा । स्त्री। ज्योतिष्मतीलतायाम्। रा.

अनलविवर्द्धनी । स्त्री। कर्कटिकायाम्। काँकुड़गाछ।

अनली (लिन्) लिः । पुं। वकवृक्षे। त्रिका.

अनवस्थितचित्तत्वम् । क्ली। वायुरोगे। वै.निघ.। चित्तचाञ्चल्ये।

अनशनम् । क्ली। लङ्घने। मा.नि.।

अनच्छः । त्रि। अस्थे।

अनच्छि । क्ली। कुचचुषि।

अनाक्रान्ता । स्त्री। कण्टकार्य्याम्। र.मा.।

अनागतार्त्तवा । स्त्री। कन्यायाम्। अजात-रजस्कायाम्। रा.नि.व १८। [सु.उ.६५अ.।

अनागतावेक्षणम् । क्ली। एतत् वक्ष्यतीत्यर्थे।

अनाचारः । पुं। असत्कर्म्मणि। वै.निघ.।

अनातङ्कः । त्रि। अरोगिणि।

अनातपः । पुं। आतपाभावे।

अनातुरः । त्रि। अरोगिणि।

अनामकम् । क्ली। अर्शोरोगे। श.र.।

अनामयम् । क्ली। आरोग्ये। रा.नि.व.२०।

अनामा । पुं। अनामिकाङ्गुलौ। श.र.।

अनामिका । स्त्री। तन्नामकाङ्गुलौ, अङ्गुष्ठा-त्तुर्थाङ्गुलौ। रा.नि.व.१८।

अनार्जवः । पुं। रोगे। रा.नि.व.२०।

अनार्त्तवजलम् । क्ली। पौषादिमासचतुष्टय-भवे वृष्टिजले। तच्च वातादिदोषत्रयकोपनं। यथा —अनार्त्तवं प्रमुञ्चन्ति वारि वारिधरास्तु यत्। त-त्त्रिदोषाय सर्व्वेषां देहिनां परिकीर्त्तितं। भा.पू. वारिव.।

अनार्त्तवा । स्त्री। रजःशून्यायां। तन्नामकयो-निव्यापदि रोगे। अनार्त्तवास्तनी षण्ढी खरस्पर्शा च मैथुने। मा.नि.।

अनार्य्यकम् । क्ली। Aloe wood. अगुरु-काष्ठे। हला.। काष्ठागुरुणि। रा.नि.व.१२। भा.पू.१भ.क.व.। [रा.नि.।

अनार्य्यजम् । क्ली। Aloe wood. अगुरुणि।

अनार्य्यतिक्तः (कः) । पुं। (Gentiana cherayta Rox.) भूनिम्बे। চিরাতা। अम.।

अनासिकः । त्रि। नासिकाहीने।

अनाहः । पुं। आनाहरोगे। See आनाहः।

अनाहारः । पुं। आहाराभावे।

अनिच्छः । त्रि। तृप्ते। वै.निघ.।

अनिमिषः } पुं। मत्स्ये। त्रिका.मे.षचतुष्कं।
अनिमेषः } त्रि। निमेषशून्ये।

अनिर्माल्या । स्त्री। (Medicago esculenta.Rox.) पिण्डिकायाम्। पृक्कायाम्। পিড়িং। रत्ना.।

अनिर्वाणः । पुं। कफे। वै.निघ.।

अनिलः । पुं। वायौ। श्योनाकतरौ। শোণ্ডন গাছ। रा.नि.व.२३। [वै.निघ.।

अनिलकपित्थकः । पुं। स्थूलाम्रातके।

अनिलकारकः । पुं। काञ्जिकभेदे। वै.निघ.

अनिलघ्नः(कः) । पुं।(Terminalia belerica.) विभीतकवृक्षे। रा.नि.व.११.।

अनिलज्वरः । पुं। वातिकज्वरे।। स च सा-

भनिरामभेदात् द्विविधः। च.द.। See ज्वरः।

अनिलनिर्यासः । पुं । प्रियालवृक्षे । पियाशाल। मं चिवला। वै.निघ.।

अनिलपर्य्ययः । पुं । वायुरोगे।

अनिलभुक् । पुं । सर्पे । वै.निघ. । [रस.र.।

अनिलरसः । पुं । रसोऽयं पाण्डुरोगे हितः।

अनिलरिपुः । पुं । एरण्डवृक्षे । वै.निघ.२भ. सन्धि-ज्व.चि. रास्नादिः।

अनिलहरम् । क्ली । कृष्णागुरुणि। वै.निघ.।

अनिला । स्त्री । नद्याम् । खटिकायाम् । फूलखड़ि । र.मा.।

अनिलाजीर्णम् । क्ली। वाताजीर्णे। वा.सू.८अ.।

अनिलाटिका । स्त्री । रक्तपुनर्नवायाम् ।

अनिलान्तकः । पुं । इङ्गुदीवृक्षे । जियापूती । हिं इङ्गोट् । रा.नि.व.८।

अनिलापहा । पुं। रक्तकुलत्थके । लालकर्ति। वै.निघ.।

अनिलामयः । पुं । वायुरोगे । वातव्याधौ।

अनिलारिरसः । पुं। वातव्याध्यधिकारे रसः। अत्र वातारिरसैः एरण्डमूलरसैः । अग्निः चित्रकः। तोयैः क्वाथैः। र.सा.सं.। रसेन गन्धं द्विगुणं विमर्द्य वातारिनिर्गुण्डिरसैर्दिनैकं । निवेशयेत्ताम्रमये पुटे तत्सर्व्वं मृदावेष्ट्य च बालुकाख्ये। यत्ने पुटे गोमयचूर्णवह्नौ स्वभावशीते तु समुद्धरेत्तत् ॥ निर्गुण्डिकावातहराग्नितोयैः संचूर्ण्य यत्नेन विभावयेत्तत् ॥

अनिलोचितः । पुं । नीलमाषके । वै.निघ.।

अनिष्टा (ष्ठा) । स्त्री । नागबला । रा.नि. ।

अनिःसारा । स्त्री । कदलीवृक्षे । कलागाछ । रा.नि.व.११। वै.निघ. ।

अनिक्षुः । पुं । (Chaccharum spontaneus.) इक्षुविशेषे । थागड़ा । र.मा.। आनाखौ। रत्ना. । [यचतुष्कं ।

अनीकस्थः । त्रि । हस्तिशिक्षाविचक्षणे । मे.

अनीली । स्त्री । काशतृणे । र.मा.।

अनुकदली । स्त्री । कदलीविशेषे । मं लोखंडीकेल ।

अनुकर्णम् । क्ली । कर्णसमीपे । वा.शा.४अ. ।

अनुकर्षणम् । क्ली । पानपात्रे । हारा. ।

अनुकल्पः । पुं । An alternative. अभावे तद्गुणद्रव्यान्तरग्रहणे ।

अनुकूलका । स्त्री । लघुदन्त्याम् । वै.निघ. ।

अनुकूला । स्त्री । क्षुद्रदन्तीवृक्षे । रा.नि.व.६।

अनुकूलिनी । स्त्री । क्षुद्रदन्त्याम् ।

अनुगः । पुं । परिचारके । रत्ना. ।

अनुजम् । क्ली । प्रपौण्डरीक-नाम-गन्धद्रव्यविशेषे । पुण्डरिया । रा.नि.व.१२ ।

अनुजा । स्त्री । त्रायमाणलतायाम् । गोओयालिया लता । रा.नि.व.५ । वना डुमुर । भा.पू. १भ.गु.व. । [दनु । सि.यो.पाण्डुचि.वृन्दः ।

अनुतक्रम् । क्ली।तक्रानुपाने । जग्ध्वा तक्रं पिबे

अनुतर्षः । पुं । तृष्णा । सुरापानपात्रे । भैष.मै. षचतुष्कं ।

अनुत्क्लेशः । पुं । उत्क्लेशाभावे । च.सं.विसूची.।

अनुत्थितविद्धा (शिरा) । स्त्री । दुःस्थानबन्धनात् वेपमानायाः यस्याः शिरायाः शोणितसम्मोहो भवति । सु.शा.८अ. ।

अनुपजः । त्रि । अनुपदेशजाते । ते च कूलेचरकोषस्थमत्स्यप्लवपादिनो भवन्ति । See अनूपवर्गः । [इत्यादि । हला. ।

अनुपदीना । स्त्री। उपानहि । जूता, थड़म

अनुपशयः । पुं । What increases the disease. उपशयविपरीते व्याध्यसात्म्यौषधान्नविहारादौ। यथा—हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणां । औषधान्नविहाराणामुपयोगं सुखावहं । विद्यादुपशयं व्याधेः सहि सात्म्यमिति स्मृतः॥ विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः । मा.नि. पञ्चनिदाने ।

अनुपानम् । क्ली । औषधाङ्गपेयविशेषे । अनुपान । तच्च औषधपानानन्तरं विलम्ब्य प्रयोज्यं, रात्रौ पुनः पाचनमेव व्यवस्थेयम् । "विलम्ब्य च क्रामणमेतदीरितं रात्रौ पुनः पाचनमेतदूचिरे।" रा.नि.व.२०। वातेऽनुपानं स्निग्धोष्णं, श्लेष्मणि

रूक्षोष्णं, पित्ते स्निग्धं,स्नेहपाने उष्णोदकमित्यादि। मद.व.१३। "चूर्णावलेहगुड़िकाकल्कानामनुपानकं। वातपित्तकफोद्रेके त्रिद्व्येकपलमाहरेत्" । शार्ङ्ग.म.ख.६अ.।

अनुपालुः । पुं । पानीयालुके। वन आलू । रा.नि.व.७। [तृणे । श.च. । खड्गतृणे । वेतसे ।

अनुपुष्पः । पुं । (Saccharum sara.) शर-

अनुबन्धी । स्त्री । तृष्णायां । हिक्कायां । मे. ।

अनुभासः । पुं । काकविशेषे । वै.निघ. ।

अनुभूतिः । स्त्री । त्रिवृतायाम् । তেউড়ী । हिं निसोत्तर । See त्रिवृत्।

अनुमतम् । क्ली । "परमतमप्रतिषिद्धम् । यथा-न्यो ब्रूयात् सप्तरसा" इति सु.उ.६५अ. ।

अनुयवः । पुं । यवाणूनोऽनुयवः। वा.। निःशूक-यवे । हेमा. । गुणाः—हृष्यः स्थैर्यकरः मूत्रभेदः-पित्तकफघ्नः पीनसश्वासकासोरुस्तम्भकण्ठरोगघ्नश्च । वा.शूकधान्यवर्गे । [रा.नि.व.६।

अनुरुहा । स्त्री । नागरमुस्तायां । नागरमुता ।

अनुरेवती । स्त्री । क्षुद्रदन्त्याम् । रा.नि.व.६ ।

अनुलासः । पुं । मयूरपक्षिणि । मयूर ।

अनुलास्यः । पुं । मयूरपक्षिणि ।

अनुलेपः / **अनुलेपनम्** } पुं, क्ली । चन्दनादौ । गन्धद्रव्यादिलेपने । চন্দনাদি লেপন । गुणाः—अनुलेपस्तृषामूर्च्छादौर्गन्ध्यश्रमवातजित् । सौभाग्यतेजस्त्वग्वर्णप्रीत्योजोबलवर्द्धनः॥ मद.व.१३। अपिच—अनुलेपनकं बल्यं तेजःसौभाग्यदायकम्। त्वच्यं प्रीतिप्रदं प्रोक्तं तृण्मूर्च्छाश्रमनाशनं । दौर्गन्ध्यवातहं प्रोक्तं पूर्व्वाचार्य्यैरिदं स्मृतम् ॥ वै.निघ. । प्रीतिकरं, ओजस्करं, शुक्रवर्द्धनं, दौर्गन्ध्यहरं, श्रमपापतन्द्राहरञ्च । राज. ।

अनुलोमनम् । क्ली । अनुलोमकरणे । मलादिधातूनां यथामार्गे गमनोपाये । মলাদিধাতুর যথাপথে গমনোপায়। यथा—कृत्वा पाकं मलानाञ्च भित्त्वा बन्धमधो नयेत् । तच्चानुलोमनं प्रोक्तं यथा प्रोक्ता हरीतकी ॥ भा. ।

अनुल्की । स्त्री । हिक्कायाम् । तृष्णायाम् । मे.।

अनुवासः / **अनुवासनः** / **अनुवासनक** } पुं,क्ली सौरभ्ये । स्नेहवस्तौ । स्नेहने । धूपने । मे. । "यः स्नेहो दीयते सः स्यादनुवासननामकः" । तस्य मात्रा च पलद्वयं तदर्द्धं वेति । भा. ।

अनुवासनवस्तिः । पुं । स्नेहवस्तौ । मात्रावस्तौ । "अनुवासनभेदश्च मात्रावस्तिरुदीरितः" । भा.। स च तैलादिस्नेहोपकरणैः स्नेहक्काथादिना वा साध्यते गोपुच्छाकारेण स्वर्णादिनिर्म्मितेन, गजदन्तादिकृतेन वा नेत्रेण । পিচকারী বা নল। नेत्रपरिमाणं वयोभेदेन विविधम् । एकवर्षीयात् षड्वर्षपर्य्यन्तं षड़ङ्गुलं । अष्टवर्षे अष्टाङ्गुलं। षोड़शवर्षे द्वादशाङ्गुलं।प्रत्येकञ्च परिणाहो यथाक्रमं कनिष्ठिकानामिकामध्यमाङ्गुलिपरिमितः । एतेषाञ्च प्रत्येकं यथाक्रमं सार्द्धाङ्गुलं सार्द्धद्व्यङ्गुलं सार्द्धत्र्यङ्गुलञ्च वस्तिमुखे सन्निवेश्यम् । वस्तिद्वारप्रवेशनीयनेत्रमुखञ्च यथाक्रमं कङ्कश्येनमयूरपुच्छमध्यनाड़ीवत् स्थूलं भाव्यम् । येन च द्रव्येणास्थापनं तत्परिमाणं पूर्व्वोक्तवयोऽनुरूपमेव यथाक्रमं रोगिणो द्व्यञ्जलिपरिमाणं चतुरञ्जलिमितमष्टाञ्जलिमितञ्च भाव्यम् । एवमुत्तरोत्तरं वयोऽनुरूपं नेत्रादिमानं वर्द्धनीयम् । द्वितीयञ्च—पञ्चविंशतेरूर्द्ध्वं नेत्रदैर्घ्यं द्वादशाङ्गुलं मूलपरिणाहश्च अङ्गुष्ठोदरसन्निभो भाव्यः । गृधिनीपत्रनाड़िकावच्चाग्रभागः, वदरास्थिमितं वा कलायपरिमितं वा छिद्रवर्त्म भाव्यम् । वस्तिबन्धनार्थञ्च नेत्रमूले कर्णिकाद्वयं (কাণি) कार्य्यम् । द्रव्यमानञ्च रोगिणो द्वादशाञ्जलि । अत्र कल्पे माधुकतैलं ग्राह्यम् । सु.चि.३५अ.। एतत्प्रकरणं सु.चि.३५।३६।३७अ.स्मृगं । विरेचनात्सप्तरात्रे गते जातबलाय च । भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः ॥ अथानुवास्यं स्वभ्यक्तं उष्णाम्बु स्वेदितं शनैः । भोजयित्वा यथाशास्त्रं कृतचंक्रमणं ततः । उत्सृष्टानिलविण्मूत्रं योजयेत् स्नेहवस्तिना । सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः । कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत्। बद्ध्वा वस्तिमुखे सूत्रं वामहस्तेन धारयेत् ॥ पीड़येद्दक्षिणेनैव मध्यवेगेन धीरधीः । जृम्भाकासक्षवादींश्च वस्तिकाले न कारयेत् ॥ वै.निघ.वस्तिविधिः । अथाशस्य यथा—अथानुवासनविधेस्तथैवास्थापनस्य च । प्रवक्ष्यामि यथायोगं शास्त्रदृष्टेन वर्त्मना ॥ काष्ठैर्दक्षैरयोभिश्च

शृङ्गवंशनलादिभिः । द्वादशाङ्गुलदीर्घन्तु परिणाहे षड़ङ्गुलम् ॥ कोलास्थिमात्रच्छिद्रन्तु कुर्य्यान्नेत्रं विचक्षणः । मूलादनुक्रमश्लक्ष्णमसृणन्तु विशेषतः । त्यक्त्वाङ्गुलानि चत्वारि कर्णिकान्तस्य कारयेत् । पुटकस्य प्रबन्धाय मूले द्वे चापि कर्णिके ॥ अनेनास्थापनं कुर्य्यादनुवासनमेव च । यथायोग्यं भिषक् प्राज्ञः सर्व्वरोगोपशान्तये ॥ अनुवासनविवरणम् — त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा । भोजयित्वा हयं प्राज्ञो रसकस्नेहभोजनैः ॥ भोजितं भोजनोक्तेन दिनान्ते चानुवासयेत् । निरूहयेदनाहारमपराह्णे विचक्षणः ॥ त्रिभिर्वारैः प्रदातव्यो निरूहः शास्त्रकोविदैः । ईषत्तीक्ष्णः प्रयोक्तव्यः प्रथमं पुटकोविदैः ॥ द्वितीयश्च तृतीयश्च तीक्ष्णौ चैव प्रकीर्त्तितौ ॥ ज.द.१६अ. ।

अनुवासनोपगवर्गः । पुं । षड्विंशदशकनाम-कषायवर्गे । यथा — रास्नासुरदारुविलमदनशतपुष्पवृश्चीरपुनर्नवाश्वदंष्ट्राग्निमन्थश्योणाका इति दशेमानि··· ॥ वृश्चीरः श्वेतपुनर्नवा । च.सू.४अ. ।

अनुवासाख्यः । पुं । अनुवासने । वै.निघ. ।

अनुवेल्लितम् । क्ली । शाखासु व्रणबन्धनभेदे । सु सू.१८अ. ।

अनुशयी । स्त्री । क्षुद्ररोगान्तर्गतपादरोगविशेषे । तल्लक्षणं यथा — गम्भीरामल्पशोथाञ्च सवर्णामुपरिस्थिताम् । पादस्यानुशयीं तान्तु विद्यादन्तः-प्रपाकिनीम् ॥ चि. — हरेदनुशयीं वैद्यः क्रियया श्लेष्मविद्रधेः । भा.पाद-रो.चि. ।

अनुशस्त्रम् । क्ली । त्वक्सारस्फटिककाचजलौकाग्निक्षारनखादिरूपशस्त्रेषु । तानि च शिशुभीरुप्रभृत्यर्थम् । सु.सू.८अ. । [त्रि । शीतले ।

अनुष्णम् । क्ली । उत्पले । नीलपद्म । रा.नि. ।

अनुष्णवल्लिका, **अनुष्णवल्ली** } स्त्री । नीलदूर्व्वायाम् । रा.नि.व.८ ।

अनुसार्य्यकम् । क्ली । सुगन्धद्रव्यविशेषे । मं कड़ीला ।

अनूचानः । पुं । उत्तमवैद्ये साङ्गवेदाध्यायिनि ।

अनूपः । पुं । महिषे । मे.पत्रिकं । अम्बुप्रायदेशे । मे. । तल्लक्षणं यथा — "बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः । देशोऽनूप इति ख्यातः ॥ तथा नदीपल्वलशैलाढ्यफुल्लोत्पलकुलैर्युतः । हंससारसकारण्डचक्रवाकादिसेवितः । शशी वराहमहिषरुरुरोहितकुलाकुलः । प्रभूतद्रुमसुख्याढ्यो नानाशष्पफलान्वितः । अनेकशालिकेदारकदलीक्षुविभूषितः । अनूपदेशो ज्ञातव्यो वातश्लेष्मामयार्त्तिमान्" । भा. । गुणाः — गुरुः, सान्द्रः, पिच्छिलः, मधुरः, श्लेष्मलः, स्निग्धः, प्रमेहगलगण्डश्लीपदवर्द्धिकरश्च । रा.नि. । राजवल्लभस्तु स्निग्धं शीतलं वातश्लेष्मलं गुरुञ्चाह ।

अनूपजम् । क्ली । आर्द्रके । रा.नि.व ६ । त्रि । अनूपदेशोत्पन्नद्रव्यमात्रे । पुं । वृक्षविशेषे । আনারস গাছ । वै.निघ. । [अनूपः ।

अनूपदेशः । पुं । अनूपलक्षणयुक्तप्रदेशे । See

अनूपमांसम् । क्ली । अनूपदेशस्थजन्तुमांसे । See आनूपमांसम् । [रा.नि.व.१० ।

अनूष्णम् । क्ली । उत्पले । শুন্দিফুল, হালা ।

अनृजुः । त्रि । शठे । असरले । पुं । तगरपुष्पवृक्षे ।

अनेकदिग्वायुः । पुं । नानादिग्भवविसंस्थुलवाते । এলো মেলো বাতাস ।

अनेकपः । पुं । गजे । হাতী । मद.व.११ ।

अनेकान्तः । पुं । क्वचित्तथा क्वचिदन्यथेति यः सः । सु.उ.६५अ. ।

अनेड़मूकः । त्रि । वाक्श्रुतिरहिते । मे. । अन्धे ।

अनोकहः । पुं । वृक्षे । গাছ ।

अन्तःकण्ठशल्यावलोकिनी । स्त्री । नाड़ीयन्त्रविशेषे । सा च दशाङ्गुला भवति । अत्रिः ।

अन्तःकरणम् । क्ली । अन्तरिन्द्रिये, मनसि ।

अन्तःकुटिलः । पुं । शङ्खे । শাঁক ।

अन्तःकोटरपुष्पी (ष्पिका) । स्त्री । नीलवुङ्गायाम् । ছাগলবেঁটে । प.मु. । रत्ना. ।

अन्तःपदवी । स्त्री । सुषुम्नाख्यनाड़िकायाम् ।

अन्तःसत्त्वा । स्त्री । भल्लातकवृक्षे । गर्भिण्याम् । श.च. ।

अन्तकः । पुं । काञ्चनारवृक्षे । রক্তকাঞ্চন । भा.गु.व. । यमे । सन्निपातज्वरविशेषे । तल्लक्षणं — यथा — दाहं करोति परितापनमातनोति, मोहं ददाति विदधाति शिरःप्रकम्पं । हिक्कां करोति

कसनश्च समानुहीति जानीहि तं विबुधवर्जित-मन्तकाख्यम् । भा.म.१भ. । [रचिकं ।

अन्तरम् । क्ली । अवकाशे । छिद्रे । मध्ये । मे.

अन्तरापत्या । स्त्री । गर्भिण्याम् ।

अन्तरायामः । पुं । आक्षेपकभेदे । लक्षणं यथा —अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः । स्नायु-प्रतानमनिलस्त्वः क्षिपति वेगवान् ॥ विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन् । अभ्यन्तरे धनुरिव यदा नमति मानवः । तदा सोऽभ्यन्तरायामं कुरुते मारुतो बली ॥ भा.। मा.नि. । [व.१३ ।

अन्तरि(री)क्षम् । क्ली । आकाशे । रा.नि.

अन्तरिक्षजलम् } क्ली । आकाशजले । वृष्टिर

अन्तरीक्षजलम् } जल । See गगनाम्बु ।

अन्तरुहा । स्त्री । श्वेतदूर्व्वायाम् ।

अन्तर्जठरम् । क्ली । कोष्ठे । कुक्षिमध्ये । अम.।

अन्तर्द्धनम् । क्ली । सुरावीजे । श.च. ।

अन्तर्दाहः । पुं । शरीराभ्यन्तरदाहे । গায়ের ভিতরে জ্বালা । कोष्ठसन्तापे । रा.नि.व.२०। स-न्निपातज्वरविशेषे । लक्षणं यथा—अन्तर्दाहः शैत्यं बहिः श्वयथुररतिरपि श्वासः । अङ्गमपि दग्धकल्पं सोऽन्तर्दाहार्दितः कथितः ॥ भा.म.१भ. ।

अन्तर्धूमः । त्रि । बद्धमुखहण्डिकाभ्यन्तरे अग्नि-दग्धे । च.द. ग्रहणी-चि. चित्रकक्षारे ।

अन्तर्मलः । पुं । मलान्तर्व्वे । कश्चिदत्रिः ।

अन्तर्महानादः । पुं । शङ्खे ।

अन्तर्मुखम् । क्ली । व्रणविस्रावणास्त्रविशेषे । लक्षणं यथा—तद्वदन्तर्मुखं तस्य मध्यमध्यर्द्धमङ्गु-लम् । अर्द्धचन्द्राननं चैतत् तथाध्यर्द्धाङ्गुलं फले ॥ कश्चिदत्रिः ।

अन्तर्मुखी । स्त्री । स्त्रीयोनिरोगविशेषे । तल्ल-क्षणं —व्यवायमतितृप्ताया भजन्त्यास्तत्र पीड़ितः । वायुर्मिथ्यास्थिताङ्गाया योनिस्रोतसि संस्थितः ॥ व-क्रयत्याननं योन्याः सास्थिमांसानिलार्त्तिभिः । भृ-शार्त्तिर्मैथुनासक्ता योनिरन्तर्मुखी मता ॥ च.चि. ।

अन्तर्वत्नी । स्त्री । गर्भिण्याम् । अम. ।

अन्तर्वमिः । स्त्री । अपरिपाके । त्रिका. ।

अन्तर्विद्रधिः । पुं । जठरान्तरस्थविद्रधिरोगे । लक्षणं यथा —पृथक् सम्भूय वा दोषाः कुपिता गुल्म-रूपिणं । वल्मीकवत् समुन्नद्धमन्तः कुर्व्वन्ति विद्रधिम् ॥ गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा । वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि चाप्यथ । एषां लि-ङ्गानि जानीयाद्बाह्यविद्रधिलक्षणैः ॥ भा.। [वृद्धिः ।

अन्तर्वृद्धिः । पुं । अन्त्रवृद्धिरोगे ॥ See अन्त्र-

अन्तर्वेधः । पुं । मर्म्मवेधे । मर्म्मपीड़ायाम् ।

अन्तशय्या । स्त्री । मरणे । मे. ।

अन्तस्नेहफला । स्त्री । श्वेतकण्टकार्य्याम् ।

अन्तावसायी । (इन्) । पुं । नापिते । मे.।

अन्तिका । स्त्री । सातलायाम् । চামরকষা । चुल्ल्याम् । मे.कश्चिकं ।

अन्त्यः । पुं । मुस्तायाम् । मे. ।

अन्त्यपुष्पा । स्त्री । धातकीवृक्षे । वै.निघ. ।

अन्त्रम् । क्ली। पुरीतति। নাড়ীভুঁড়ি। रा.नि.व. १८ । उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सू-रिभिः । अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि नि-र्द्दिशेत् ॥ सार्द्धत्रिव्यामान्यन्त्राणि पुंसां स्त्रीणामर्द्ध-व्यामहीनानि । सु.शा.५अ. । असृजः श्लेष्मणश्चापि यः प्रसादः परो मतः । तं पच्यमानं पित्तेन वायु-श्चाप्यनुधावति । ततोऽस्यान्त्राणि जायन्ते गुदं व-स्तिश्च देहिनः ॥ इति तदुत्पत्तिः । सु.शा.४अ. ।

अन्त्रकूजः । पुं । वायुरोगविशेषे । नाड़ीशब्दे । सु.नि.१अ. । [বাক্কেধরা इति भाषा । नि. ।

अन्त्रकूजनम् । क्ली । अन्त्रध्वनौ। ऑँत्‌डाका।

अन्त्रपाचम् । क्ली । स्थावरविषान्तर्गतलक्षार-निर्यासविषे । सु.कल्प.२अ. । [२ ।

अन्त्रवल्लिका । स्त्री । महिषवल्ल्यां । रा.नि.व.

अन्त्रवल्ली । स्त्री । सोमवल्लीलतायाम् ।

अन्त्रवृद्धिः । स्त्री । Rupture. स्वनामख्यात-रोगविशेषे । तल्लक्षणं यथा —वातकोपिभिराहारैः शीततोयावगाहनैः । धारणे रणभाराध्वविषमाङ्ग-प्रवर्त्तनैः ॥ क्षोभणैः क्षोभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा । पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् । कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा ॥ उपे-

ह्यमाणस्य च मुष्कऽङ्घ्रिम् आध्मानरुक्स्तम्भवती स वायुः । प्रपीड़ितोऽन्तः स्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः ॥ अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः । मा.नि. । [७ अ. । See कृमिः ।

अन्त्रादः । पुं । आभ्यन्तरकृमौ । मा.नि. । शार्ङ्ग.

अन्त्रालजी (मा.) / **अन्धालजी** (सु.) } स्त्री । वातश्लेष्मजन्यक्षुद्ररोगविशेषे । तल्लक्षणं—घनामवक्त्रां पिड़कामुन्नतां परिमण्डलां । अन्त्रालजीमल्पपूयां तां विद्यात्कफवातजाम् ॥ मा.नि. ।

अन्त्री । स्त्री । वृद्धदारकलतायाम् । अ.टी. ।

अन्थकम् । क्ली । अङ्गारे । रत्ना. ।

अन्धः । त्रि । नेत्रहीने । क्ली । तिमिरे । मे.धद्विकं । (न्धस्) अन्ने । रा.नि.व.२० । जले । भरतः ।

अन्धकः । पुं । तुम्बुरौ । কাঁচাধনে । भा.पू. १भ.ह.व. । [কৌড়ি । मं भेदजुया । त्रिका. ।

अन्धकाकः । पुं । काकाकारे पक्षिणि । পাণ-

अन्धकारः । पुं । आलोकाभावे । गुणाः—भयदृष्टितेजोऽवरोधकरः रोगजनकश्च । राज. ।

अन्धकूपः । पुं । मोहे ।

अन्धता । स्त्री । पित्तरोगे । वै.निघ. ।

अन्धपूतना । स्त्री । बालकग्रहपीड़ाविशेषे । लक्षणम्—यो द्वेष्टि स्तनमतिसारकासहिक्काच्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः । दुर्वर्णः सततमधःशयोऽम्लगन्धिस्तं ब्रुयुर्भिषजोऽन्धपूतनार्त्तम् ॥ चि.—तिक्तद्रुमपत्रसिद्धजलैः स्नानं । सुरादिसाधिततैलम् । पिप्पल्यादिसिद्धघृतादिकञ्च । सु.उ.२७।३३अ. ।

अन्धमूषा स्त्री । वज्रमूषापरनामके औषधपाकार्थे यन्त्रविशेषे । तस्य लक्षणं यथा—अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा । सैवाच्छिद्रान्विता मध्ये गम्भीरा सारणीचिता ॥ द्वौ भागौ तुषदग्धस्य एका वल्मीकमृत्तिका । लौहकिट्टस्य भागैकं श्वेतपाषाणभागिकम् । नरकेशसमं किञ्चित् छागीक्षीरेण पेषयेत् ॥ यामद्वयं दृढ़ं मर्द्यं तेन मूषां सुसम्पुटाम् । शोषयित्वा रसं क्षिप्त्वा तत्कल्कैः संनिरोधयेत् । वज्रमूषा समाख्याता सम्यक्पारदसाधिका । र.सा.सं. । कश्चिदत्रि. । [তাড়া । तृणविशेषे । श.च. ।

अन्धमूषिका । स्त्री । देवताड़वृक्षे । দেয়া-

अन्धाहिः । पुं । कुँचिया-मीने । কুঁচেমাছ, জলমেটে । त्रिका. । [वनस्पतिविशेषे ।

अन्धाहुली । स्त्री । आहुल्यनामकशिम्बीफल-

अन्धिका । स्त्री । सर्षप्यां । स्त्रीविशेषे । मे.कत्रिकं । नेत्ररोगविशेषे । श.र. ।

अन्धुः । पुं । कूपे । त्रिका. ।

अन्धुलः । पुं । शिरीषवृक्षे । श.च. ।

अन्नम् । क्ली । शस्ये । व्रीहियवादौ खाद्यद्रव्यमात्रे । चर्व्यचोष्यलेह्यपेयभेदेन अन्नं चतुर्विधम् । केऽपि च निष्पेयचर्व्यचोष्यखाद्यभेदेनाष्टधा वदन्ति । राजनिघण्टुकारोऽपि अन्नमष्टविधमाह चर्व्यादिभेदेन । व.२० । भक्ते । ভাত । तत्र तण्डुलपरिमाणापेक्षया पञ्चगुणजले सिद्धम् । अन्नं पञ्चगुणे साध्यम् । च.द.ज्व.चि. । प.प्र.२ख. । स्विन्नतण्डुले यथा—शस्यक्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते । आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम् ॥ वशिष्ठः । तथा जलदानप्रमाणतोऽन्नं चतुर्विधम् । चतुर्विधं भवेद्भक्तं जलदानप्रमाणतः । तत्र भक्तं विलेपी च यवागूः पेयया सह ॥ प्रयोगरत्नाकरः । अन्नगुणाः—अग्निकरं पथ्यं तर्पणं मूत्रलं लघु च । तत्र अधौतमन्नमसुतश्चान्नं—शीतलं गुरु वृष्यं कफजनकं । सुधौतमन्नं उष्णं विशदं गुणकरञ्च । भृष्टतण्डुलजमन्नं—रुच्यं सुगन्धि कफघ्नं लघु च । अतिक्लिन्नं—ग्लानिकरं, तण्डुलान्वितं—दुर्जरम् । मद.व.११।६ । धान्याम्ले पाचितं भक्तं लघु अग्निप्रदीपकं रुचिप्रदञ्च ॥ वै.निघ. । मथितयुक्तं भक्तं—स्वादु शीतलं रुच्यं अग्निदीपनं पाचकं पुष्टिकरं ग्रहण्यर्शःशूलघ्नं । रात्रौ भक्षितं—रुच्यं तृप्तिकरं दीपनमर्शोघ्नञ्च । मुद्गयूषयुक्तं—कफज्वरे, शर्करामिश्रितं पित्तज्वरे हितम् । लाजभक्तं—लघु शीतलमग्निकरं मधुरं वृष्यं निद्रारुचिकरं व्रणशोधनञ्च । यावकान्नं—गुरु स्वादु वृष्यं स्निग्धं गुल्मज्वरकण्ठरोगकासमेहघ्नञ्च । खेचरान्नं—तर्पणं गुरु वृष्यं धातुवर्द्धकम् । यौगन्धरान्नं—गुरु घनं कासश्वासघ्नञ्च । कोद्रवान्नं—रुचिकरं मधुरं प्रमेहघ्नं मूत्रदोषघ्नं तृष्णाघ्नं छर्दिकफवातामदाहघ्नञ्च । श्यामाकान्नं—रुच्यं लघु रुक्षं दीपनं बल्यं वातकरं मेहगलरोगमूत्रकृच्छ्रघ्नञ्च । नीवारान्नं—रुचिदं लघु दीपनं गुरुवातकृत् यकृत्प्लीहश्वासव्रणघ्नञ्च । कुल-

त्यान्नं—मधुरं रुद्यम् उष्णं लघु कटुपाकि दीपनं कफवातक्रमिश्वासहरञ्च। माषान्नं—दुर्जरं मांसवृद्धिकरं गुरुवातघ्नं हृद्यञ्च। शिम्ब्यन्नं—मधुरं रुचं वातपित्तकोपनञ्च। वैदलान्नं— गुरु रुचिकरं। आढ़कान्नं—गुरु कफपित्तघ्नञ्च। मत्स्यौदनं—कफकरं त्रिदोषकरं अग्निमान्द्यकरञ्च। शाकान्नं—लेखनं रुचमुष्णं दोषद्रावकञ्च। मांसौदनं—धातुवर्द्धकं स्निग्धं गुरु च। पलान्नं (फलान्नं)—रुच्यं गुरु फलसमगुणञ्च। षष्टिक-साधारणशाल्यन्नं—दीपनं बल्यं पाचनं त्रिदोषघ्नं चयविषघ्नञ्च। नवान्नं—मधुरं स्निग्धं गुरु मलस्तम्भनं रक्तपित्तघ्नञ्च। उष्णान्नं—दीपनं लघु श्रमकरं मदात्ययरक्तपित्तप्रमेहशातकरं कासश्वासक्रम्याधानगुल्मजाड्यवातकासहरञ्च। शीतान्नं—शीतलं लालास्रावकम् अग्निमान्द्यमेहमूर्च्छादिहरञ्च। वै.निघ.। क्लिन्नान्नं—दुर्जरं ग्लानिकरञ्च।

अन्नकालः । पुं। भोजनसमये।

अन्नकोष्ठः । पुं। तण्डुलधान्यादिरक्षणाधारे। গোলা, মরাই।

अन्नगन्धिः । पुं। अतिसाररोगे। त्रिका.। হাগা করা। मं हगवण।

अन्नजम् । क्ली। चैदिवसिकान्नमण्डे। मं तिनदिवसाचौं शिलीपेज।

अन्नजा । स्त्री। हिक्काभेदे। पलान्नैरतिसंयुक्तैः सहसा पीड़ितोऽनिलः। हिक्कयत्यूर्द्ध्वगो भूत्वा तां विद्यादन्नजां भिषक्॥ भा.।

अन्नद्रवशूलः । पुं, क्ली। परिणामशूले। See पक्तिशूलम्।

अन्नद्रवाख्यः । पुं। अन्नद्रवशूले मा.नि.।

अन्ननाड़ी । स्त्री। अन्नपाकनाड्याम्। सा च २० हस्तमिता कलापेशीनिर्म्मिता। तदुक्तं—हस्तविंशतिप्रमाणा कलापेशीविनिर्म्मिता। अन्नपाकक्रियार्थं च पाकनाड़ी प्रकीर्त्तिता॥ ऊर्द्ध्वांशो मुखनामास्य अधोऽंशो गुदनामकः। कण्ठादामाशयं यावदन्ननाड़ी तु कथ्यते॥ ततश्चामाशयस्तस्मात् स्थूलान्तः स्थूलमस्तकः। आमाशयात् समारभ्य भागः प्रथम-आन्त्रिकः॥ ग्रहणी चाग्न्यधिष्ठानं बुधैराद्यैः प्रकीर्त्तितः। ततः पक्वाशयः प्रोक्तः पक्वान्नपरिधारणात्॥ स्थूलान्त्रस्याप्यधोभागः सरलोगुदसंज्ञकः। अन्नकिट्टं मलं सर्व्वं वह्निर्निःसारयत्ययम्॥ श्वासनाड्याः स्थिता पश्चादन्ननाड्यन्नवाहिनी। अधस्तात् कुण्डलीभूता नाड़ी चोदरमध्यगा॥ कण्ठादधोगतिर्नाड़ी भित्त्वा वक्षःस्थलाश्रया। पेशीमुखद्वयवर्तीं प्रविष्टेयमधोगुह्याम्॥ इत्यादि। आत्रेयः।

अन्नप्राशनम् । क्ली। षष्ठे अष्टमे वा मासि बालस्यान्नभोजने। भा.।

अन्नमण्डः । पुं। भक्तमण्डे। ভাতের মাড়। गुणाः—क्षुद्बोधनो वस्तिविशोधनश्च प्राणप्रदः शोणितवर्द्धनश्च। ज्वरापहारी कफपित्तहन्ता वायुञ्जयेदष्टगुणो हि मण्डः॥ च.द.अग्निमा.चि.।

अन्नमयः । पुं। स्थूलशरीरे।

अन्नमयकोशः । पुं। शरीरे।

अन्नमलम् । क्ली। पुरीषे। मद्ये।

अन्नरसः । पुं। भक्तमण्डे।

अन्नलिप्सा । स्त्री। अन्नभोजनेच्छायाम्। क्षुधायाम्। वै.निघ.। प्रकृतिगामिमनोऽन्नलिप्सा। च.द.।

अन्नवहा । स्त्री। धमनीयुगले। याभ्यां भुक्तमन्नमुदरं नीयते। सु.शा.९अ.। तयोर्मूलमामाशयः, अन्नवाहिधमन्यश्च।

अन्नवाहिस्रोतः । क्ली। गलनाड्याम्। গলার নলী। [tion. भुक्तविकृतौ।

अन्नविकारः । पुं। Seminal secre-

अन्नविपाकनाड़ी । स्त्री। अन्ननाड्याम्। यथा—विचित्रविधिना पक्वमन्नं सत्त्वानि जीवयेत्। अन्नग्रासो रसैः पिष्टो लालाक्लिन्नोऽन्ननाड़िकाम्॥ श्वासरन्ध्रं नासारन्ध्रञ्चातिक्रम्य सुखं विशेत्॥ निरुणद्ध्यपजिह्वा सा सर्व्वथा श्वासनाड़िकां। जिह्वा प्रयाति पश्चाच्च पाकनाड़ीं ततोऽभितः॥ किञ्चिदूर्द्ध्वमुखी भूत्वा पिण्डं ग्रसति यत्नतः। आद्यरन्ध्रप्रविष्टं चेदन्नं कासैर्विनिःसरेत्॥ द्वितीयगं चवथुना क्षणेन प्रकृतेर्बलात्। अतो नैवातित्वरणं श्रेयः पानान्नकर्म्मणि॥ आत्रेयः।

अन्नाजीर्णम् । क्ली। अन्नं भुक्तं तदजीर्णञ्चेति अन्नाजीर्णम्। भा.म.१भ.आमातीसा.। "अन्नाजीर्णात्प्रद्रुताः चोभयन्तः।" तन्नामकशूलरोगे।

अन्नाद्यम् । क्ली । अन्ने । ভাত । रा.व.२० । धान्ये ।

अन्नाशयः । पुं । उदरे ।

अन्यकारुका । स्त्री । शकृत्कीटे । हारा. ।

अन्यतोवातः । पुं । सर्व्वाक्षिगतरोगे । अत्र वा अन्यत्रावस्थितस्य वायोरन्यत्र वेदनोत्पादकत्वात्तथाभिधानम् । लक्षणं यथा—"यस्यावटूकर्णशिरोहनुस्थः मन्यागतो वाप्यनिलोऽन्यतो वा । कुर्य्याद्रुजं वै भ्रुवि लोचने च तमन्यतोवातमुदाहरन्ति ॥" मा.नि. ।

अन्यपुष्टः । पुं । कोकिले । কোকিল ।

अन्यभृत् । पुं । कोकिले । हला. । काके । हे.च.

अन्यभृतः । पुं । कोकिले । रत्ना. ।

अन्यलोहम् । क्ली । कांस्यधातौ । वै.निघ. ।

अन्या । स्त्री । हरीतक्याम् । वै.निघ. ।

अन्येद्युष्कः । पुं । उरःस्थश्लेष्मजन्ये विषमज्वरविशेषे । तल्लक्षणं—"अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते" इति । मा.नि. । [वक्तौ ।

अन्वाशनम् । क्ली । कर्म्मशालायाम् । हला. । स्नेह-

अपक्वः । त्रि । आमे, अशृते । কাঁচা । तैले विपर्य्ययं विद्यात् पक्वे चापक्व एव च । प.प्र. ।

अपक्वकदली । स्त्री । अपक्वरम्भायाम् । কাঁচা কলা । मं जुण केलें । गुणाः—अपक्वकदलत्वैव मलस्तम्भकरं मतम् । तिक्तं कषायं रुच्यञ्च रक्तपित्ततृषाहरं । मेहाक्षिरोगरक्तातिसारज्वरविनाशकृत् ॥ वै.निघ. ।

अपक्वमांसम् । क्ली । असिद्धमांसे । কাঁচা মাঁস । गुणाः—अपक्वन्तु भवेन्मांसं रक्तदोषकरं मतम् । वातादिदोषजनकमिति मांसविदां मतम् ॥ वै.निघ. । [मा. ।

अपक्ववस्तु । क्ली । असिद्धे अशृते च वस्तुनि । र.

अपक्वक्षीरम् । क्ली । अपक्वदुग्धे । কাঁচা দুধ । गुणाः—अभिष्यन्दि गुरु च ।

अपघनः । पुं । शरीरावयवे । अङ्गे । अम. ।

अपचायितः । पुं । रोगे ।

अपचारः । पुं । अजीर्णे ।

अपची । स्त्री । गण्डमालाख्यगलरोगविशेषे । तस्या लक्षणम्—हन्वस्थिकक्षाक्षकबाहुसन्धिमन्यागलेषूपचितन्तु मेदः । ग्रन्थिं स्थिरं वृत्तमथायतं वा स्निग्धं कफश्चाल्परुजं करोति ॥ तं ग्रन्थिभिश्चामलकास्थिमात्रैर्मत्स्याण्डजालप्रतिमैस्तथान्यैः । अनन्यवर्णैरुपचीयमानं चयप्रकर्षादपचीं वदन्ति ॥ कण्डूयुतास्तेऽल्परुजः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये । मेदःकफाभ्यां खलु रोग एष सुदुस्तरो वर्षगणानुबन्धी ॥ सु.नि.११अ. ।

अपटुः । त्रि । रोगिणि । रा.नि.व.२० ।

अपतन्त्रः / **अपतन्त्रकः** } पुं । स्वनामख्यातवातव्याधिरोगे । अत्र कुपितो वायुरूर्द्ध्वं चरन् हृदयशिरःशङ्खमभिप्रपन्नस्तत्तत्स्थानं पीड़यन् देहं धनुरिव नतमाक्षिपञ्च करोति । तेन मूर्च्छा स्तब्धाक्षता निःसंज्ञता श्वासकाठिन्यं कपोतवत्कूजनं च जायते । लक्षणं – क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्द्ध्वं प्रपद्यते । पीड़यन् हृदयं गत्वा शिरःशङ्खौ च पीड़यन् ॥ धनुर्वन्नमयेद्गात्राण्याक्षिपेन्मोहयेत्तदा । स कृच्छ्रादुच्छ्वसेच्चापि स्तब्धाक्षोऽथ निमीलकः ॥ कपोत इव कूजेच्च निःसङ्गः सोऽपतन्त्रकः । मा.नि.वा.व्या. । अथापतन्त्रकेनार्त्तमातुरं नापतर्पयेत् । निरूहवस्तिं वमनं सेवयेन्न कदाचन ॥ इत्यादि । चिकित्सा ।

अपतर्पणम् । क्ली । तृप्त्यभावे । लङ्घने । हारा. च.द.रक्तपित्त-चि. । व्रणोच्छ्रायोपशान्त्यर्थमाद्ये उपक्रमे । सु.चि.१अ. ।

अपतानः / **अपतानकः** } पुं । वातव्याधिविशेषे । अत्र दृष्टिनाशः संज्ञानाशश्च भवति ; कण्ठस्थानमव्यक्तं कूजति ; वायुर्यदा हृदयमाक्रामति, तदा मूर्च्छा, यदा च हृदयाच्चलति, तदा स्वास्थ्यं जायते । लक्षणम्—दृष्टिं संस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति । हृदिमुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ॥ वायुना दारुणं प्राहुरेके तमपतानकम् । मा.नि.वा.व्या. । गर्भपातादिनिमित्तः सः न सिध्यति । अपतानकिने शस्तं दशमूलीशृतं जलम् । तैलेन मर्द्दनं स्वेदः तथा तीक्ष्णेण लावनम् । स्रोतोविशोधनं पश्चात् सर्पिःपानं हितं स्मृतम् ॥ साधारणचि. ।

अपत्यम् । क्ली । पुत्रे ।

अपत्यजीवः । पुं । पुत्रजीवहृचे । জিয়াপূতা গাছ । रा.नि.व.९ ।

अपत्यदा । स्त्री । पुत्रदालतायाम् । रा.नि.व.४ ।

अपत्यपथः । पुं । योनौ । हे.च. ।

अपत्यशत्रुः । पुं । कर्कटे । श.च. ।

अपत्यसिद्धिकृत् । पुं । पुत्रजीववृचे । वै.निघ. ।

अपत्रवल्लिका । स्त्री । महिषवल्लयां । সোমলতাবিশেষ । मं लघुसोमवल्ली । रा.नि.व.३ ।

अपत्रा । स्त्री । पुष्पवृचविशेषे । नेवतीति महाराष्ट्रादौ ख्याते ॥ वै.निघ. ।

अपथम् । क्ली । योनौ । श.र. ।

अपथ्यम् । क्ली । अहिते वस्तुनि ।

अपथ्यज्वरः । पुं । कुपथ्यजन्यज्वरे । अपथ्यजैमद्यभवे च हेतुर्हेतुर्ज्वरे पित्तमुदाहरन्ति । दाहश्च शैत्यञ्च शिरोव्यथा च कोष्ठाभिवृद्धिः कथितोदकण्डू मलातिपातस्खलितबद्धता च अपथ्यदोषेण भवेज्ज्वरे च ॥ वै.निघ.२भा.ज्व. ।

अपदः । त्रि । पादहीने, पङ्गौ ।

अपदरुहा / **अपदरोहिणी** } स्त्री । वन्दायाम् । মান্দরা । मं वादांगुल । वै.निघ. ।

अपदेवता । स्त्री । पिशाचादौ ।

अपदेशः । पुं । अनेन कारणेनेत्यपदेशः । यथोपदिश्यते मधुरेण श्लेष्माभिवर्द्धते । सु.उ.६५अ. ।

अपबाहुकः । पुं । वातकफजे अंसगतवातव्याधिविशेषे । लचणम्—अंसदेशस्थितो वायुः शोषयेदंशबन्धनं । शिराश्चाकुञ्च्य तत्रस्थो जनयेदपबाहुकम् ॥ मा.नि. ।

अपरम् । क्ली । गजपश्चार्द्धे । मे.रत्रिकं ।

अपरा । स्त्री । जरायौ । हिं आंवर् । भा.म.४भ.प्रसूतोपद्रवचि. । जठरादपरा यदि । पञ्चतन्मात्रमनोबुद्ध्यहङ्कारा एवापरेत्युच्यते, तेषामेव प्रकृते रूपत्वात् ।

अपराजितधूपः । पुं । धूपोऽयं सर्व्वज्वरघ्नः । स च गुग्गुलुगन्धतृणवचासर्जनिम्बार्कागुरुदेवदारुकृतः । पुरध्यामवचासर्जेत्यादि । च.द.ज्व.चि. ।

अपराजिता । स्त्री । स्वनामख्यातलतायाम् । (Clitoria Ternatea.) অপরাজিতা । हिं विष्णुक्रान्ति । तें नल्लनेलगुम्मिदि । विष्णुकान्त । नल्लविष्णुक्रान्त । गुणाः—कटुः तिक्ता कफवातघ्नी शोथघ्नी कासघ्नी कण्ठ्या च । राज. । त्रिदोषशमनी चक्षुष्या विषदोषघ्नी पित्तघ्नी हिमा तिक्ता च । रा.नि.व.५ । भा.पू.१भ.गु.व. । एषा श्वेतनीलभेदेन द्विधा, तयोर्विशेषाः श्वेतनीलापराजिताशब्दे ज्ञेयाः । पीतनिर्गुण्ड्याम् । जयन्तीवृचे । श्वेतापराजितायाम् । रा.नि.व.२३ । शालपर्ण्याम् । भा.पू.२भ. । श्वेतसिन्धुवारे । শ্বেতনিশিন্দা । ब्राह्म्यां । शमीभेदे । रा.नि.व.८ । जयन्तीवृचे । रा.नि.व.४ । शेफालिकायां । रा.नि.व.४ । शङ्खिन्यां । त्रपुषभेदे । हपुषाभेदे । रा.नि.व.४ । [लचणः । सु.मू.६ ।

अपराह्णः । पुं । दिवसशेषभागे । अयञ्च प्राह-

अपरिम्लानः । पुं । रक्ताम्लानपुष्पवृचे । रा.नि.व.१० । [नि.व.८ ।

अपर्व्वदण्डः । पुं । रामशरे । রামবাণ । रा.

अपलापः । पुं । तन्नामकशिरामर्म्मणि । अंसकूटाधोभागे पार्श्वोपरि च तस्य स्थानं । सु.शा.६अ. ।

अपलापिका । स्त्री । पिपासायाम् । हे.च. ।

अपवनम् । क्ली । कृत्रिमवने । हे.च. ।

अपवरकः । पुं । गर्भगृहे । हला. ।

अपवर्गः । पुं । अभिव्याप्यापकर्षणे । यथा—सेव्या विषोपसृष्टा अन्यत्र कीटविषादिति । सु.उं.६५अ. ।

अपविषा । स्त्री । निर्विषतृणे । रा.नि. ।

अपशोकः । पुं । अशोकवृचे । रा.नि.व.१० ।

अपसव्यः । त्रि । दचिणे । प्रतिकूले । मे. ।

अपस्करः । पुं । मलद्वारे । पुरीषे । धर. ।

अपस्तम्भ(म्ब)मर्म्म । क्ली । तन्नामकशिरामर्म्मणि । तस्य स्थानं वचस उभयत्र वायुवाहिन्यौ नाड्यौ । "उभयतोरसो नाड्यौ वातवहे अपस्तम्भौ नाम ।" सु.शा.६अ. ।

अपस्तम्भिनी । स्त्री । शिवलिङ्गिनीलताविशेषे । वै.निघ. ।

अपस्वरम् । अव्ययं । स्वभावस्वरादपगते । हीनस्वरे । वा.शा.५अ.४०श. ।

अपस्मारः (-स्मृतिः) । पुं । Epilepsy. स्वनामप्रसिद्धवातव्याधौ । अपस्मार मृगी । मं फेफ्रे । स चतुर्विधः वातपित्तकफसन्निपातैः । अस्य च साधारणलक्षणं ज्ञानाभावसंरम्भादिकम् । यथा —तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः । अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः ॥ तस्य सनिदानसम्प्राप्तिः—चिन्ताशोकादिभिः क्रुद्धा दोषा हृत्स्रोतसि स्थिताः । कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्व्वते । हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढ़ता । निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ ॥ इति सा.पूर्व्वरूपम् । वातिकरूपम्—कम्पते प्रदशेद्दन्तान् फेणोद्वामी श्वसित्यपि । परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात् ॥ पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शनः । सतृष्णोष्णानलव्याप्तलोकदर्शी च पैत्तिकः ॥ श्लेष्मफेनाङ्गवक्त्राक्षः शीतहृष्टाङ्गजो गुरुः । पश्यन् शुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात् ॥ सर्व्वैरेभिः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः । स चासाध्यो यः क्षीणस्यानवश्च यः इत्यादि । मा. नि.। पथ्यापथ्य' यथा—वस्तिर्वातोद्भवे पूर्व्वं पैत्तिके च विरेचनम् । वमनं श्लेष्मके चापि परं धूपनमञ्जनम् ॥ नस्यं शिराव्यधोदानं चासनं बन्धनं भयम् । 'तर्जनं ताड़नं हर्षो धूमपानञ्च विस्मयः । धीधैर्य्यात्यादि विज्ञानं स्नानमभ्यञ्जनानि च । लोहिताः शालयो मुद्गा गोधूमाः प्रतनं हविः । कूर्म्मामिषं धन्वरसा दुग्धं ब्रह्मीदलं वचा । पटोलं वृद्धकुष्माण्डं वास्तुकं स्वादु दाड़िमम् । शोभाञ्जनं पयःपेटी द्राक्षा धात्री परुषकम् तैलं खराश्वमूत्रञ्च गगनाम्बु हरीतकी । अपस्मारगदे न्‌णां पथ्यमेतदुदीरितम्। चिन्तां शोकं भयं क्रोधमशुचीन्यशनानि च । समं मत्स्य' विरुद्धान्नं तीक्ष्णोष्णं गुरुभोजनं । अश्वापस्मारे जयदत्तः यथा—"पतत्यकस्मादो भूमौ स्तब्धाक्षो गतचेतनः । स्वस्थाशयोऽपि यः शीघ्रं सोऽपस्मारीति कीर्त्तितः ॥ उन्मादोक्तक्रियां सर्व्वां ततः कुर्य्याद्विचक्षणः । घृतस्यातिपुराणस्य तस्य पानञ्च शस्यते ॥" [स्मारे वटिका ।

अपस्मारनाशिनी(वटिका)। स्त्री । अप-

अपांधातुः । पुं । रसजलमूत्रस्वेदमेदःकफ पित्तरक्तादौ । भा.म.१भ.अतिसा.चि. । "संशम्यापांधातुरग्निः प्रवृद्धः ।"

अपांपित्तम् । क्ली । चित्रकवृक्षे । अम. ।

अपाकः । पुं । अजीर्णे । पाकाभावे । उदरामये । [आले । रा.नि.व.६ ।

अपाकशाकम् । क्ली । आर्द्रके । आदा । मं

अपाङ्गः । त्रि । अङ्गहीने । मे.। पुं । नेत्रप्रान्ते। रा.नि.व.१८ । तिलके । मे.गत्रिकम् । तन्नामकमर्म्मणि । तत्रस्थवैकल्यकारमर्म्मान्यतममर्म्मद्वये वा। सु.सा.६अ. । [र.।

अपाङ्गकः । पुं। अपामार्गक्षुपे। आपाङ् । श.

अपाटवम् । क्ली। रोगे। जाड्ये । रा.नि.व.२०।

अपानः । पुं । गुदापानवायौ । अम. । अपानपवनो मन्यापृष्ठपृष्ठान्तपार्ष्णिगः । हे.च.४ । वृषणौ वस्तिमेढ्रञ्च नाभ्यूरुवङ्क्षणौ गुदं। अपानस्थानयन्त्रस्थः शुक्रमूत्रसकृन्ति सः । सृजत्यार्त्तवगर्भौ च युक्ताः स्थानस्थिताश्च ये । स्वकर्म्म कुर्व्वते देहो धार्य्यते तैरनामयः ॥ च. । क्ली । गुदे । मलद्वार । रा.नि.व.१८ । वा.सू.११अ. ।

अपानदेशः । पुं । गुददेशे । वै.निघ. ।

अपामार्गः । पुं। (Achyranthis aspera; Bidentata.) स्वनामख्यातक्षुपे । आपाङ् । हिं लटजीरा,चिरचिरा । अन्धकुड़क इति । सु.सू.३६। शिरो.चि. । ते उत्तरेणी । मं आघाड़ा । स त्रिधा —श्वेतकृष्णरक्तभेदात् भिन्नोऽपि गुणैः समश्च । गुणाः—तिक्तोष्णः कटुः कफघ्नः अर्शःकण्डूदरामघ्नो रक्तघ्नः ग्राही वान्तिकृत् । रा.नि.व.४। सरस्तीक्ष्णो । वा.सू.१५अ. । शिरोविरेचने । च.द.सन्निपातज्वरचि.। "पृश्निपर्णी त्वपामार्गः ।" दीपनः तिक्तः कटुः पाचको रोचनः छर्दिकफमेदोवातघ्नः हृद्रोगाध्मानार्शःकण्ड्वादिकं हन्ति । भा.पू.१भ. । तत्पत्रं रक्तपित्तघ्नम् । मद.व.१। श्वेतश्चापामार्गकस्तु तिक्तोष्णो ग्राहकः सरः । किञ्चित्कटुः कान्तिकरो पाचकोऽग्निप्रदीपकः । नस्ये वान्तौ प्रशस्तः स्यात्कफकण्डूदरापहः । दुर्नामानं रक्तरुजं मेदोरुगुदरं तथा । वातश्लेष्मापचीदद्रुवान्त्यामानां विनाशकः ॥ रक्तापामार्गकः किञ्चित्कटुकः शीतलः स्मृतः । मन्यावष्टम्भवमिकृद्वातविष्टम्भकारकः । रुचौ व्रणं विषं वातं कफं कण्डूञ्च नाशयेत् । वीजमस्य रसे पाके दुर्जरं स्वादु शीतलं । मलावष्टम्भकं रुच्यं वान्तिकृत् रक्तपित्तजित् । तोयापामार्गकश्चोक्तः

कटुः शोथकफापहः। कार्श्यं वातञ्च शोषञ्च नाशयेदिति च स्मृतः। वै.निघ.।

अपामार्गजटा स्त्री। अपामार्गमूले। सि.यो. तृतीयकज्वर.श्रीकण्ठः। "अपामार्गजटाकौश्यां॥" च.द.सन्निपातज्व.चि.। एतद्बन्धनं तृतीयकज्वरे हितम्। अपामार्गस्य मूलञ्च सम्यगव्चालितानन:। बध्नीयाद्वाममहस्तेन सर्व्वज्वरविमोचणम्॥ वैद्यकम्।

अपामार्गतण्डुलः । पुं। अपामार्गवीजे। च.सू.४अ.। See अपामार्गः।

अपामार्गतैलम् । क्ली। शिरोरोगे। अस्य पाठः—अपामार्गफलव्योषनिशाद्यवकरामठैः।सविड़ङ्गैः शृतं मूत्रे तैलं नस्यं क्रमीन् जयेत्॥ अत्र द्यवकः = হেঁচতা। तैलं ४ श. कल्कः १ श.। प्रयोगा.। च.द.।

अपामार्गक्षारः । पुं। अष्टविधक्षारान्यतमक्षारे। एष गुल्मशूलघ्नः। भा.पू.१भ.ह.व.।

अपामार्गक्षारतैलम् । क्ली। कर्णरोगे। तिलतैलं ४श. अपामार्गक्षारः २श. वारि १६श. एकविंशतिवारान् परिस्राव्य क्षारवारि कुर्य्यात्। (मतान्तरे तु क्षारपरिमाणं २६प.वारि च १८श.।) कल्कद्रव्यं शरावमितं। च.द.भैष.कर्ण-रो.चि.। अपामार्गक्षारजले तत्कृतकल्केन साधितं तिलजं। अपहरति कर्णनादं वाधिर्य्यञ्चापि पूरणतः॥ अपामार्गक्षारस्य १६ श. जलस्य २४ श. एकविंशतिवारान् परिस्राव्य तैः १६ श. तैलशोषभयात् जलेनालोड्यापामार्गक्षारकल्को देयः, पिण्डीभूतात् कल्कात् पृथग्भूतं तैलं ग्राह्यं न तु गालनीयम्। इति प्रयोगा.।

अपालापमर्म्म । क्ली। पृष्ठवंशवक्षःस्थलयोरन्तरालभागे। तथा तयोरेव च पृष्ठोरसोर्य्यें पार्श्वे, तयोरुपरिभागयोरंसकूटयोरधोऽपालापाख्ये द्वे मर्म्मणीति ज्ञेयम्। वा.शा.४अ.।

अपासनम् । क्ली। मारणे। अम.।

अपीनसः । पुं। नासारोगविशेषे। পীনসরোগ। लक्षणं यथा—"आनह्यते यस्य विधूप्यते च पापच्यते क्लिद्यति चापि नासा। न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत् तमपीनसेन॥ तच्चानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्ग"मिति। सु. चि.२२अ.। तथा "यो मस्तुलुङ्गाद्धनपीतपक्वं कफं स्रवेद्गाढ़मपीनसः सः।" च.चि.।

अपुच्छा । स्त्री। शिंशपावृक्षे। श.र.।

अपुष्टः । त्रि। अपरिपक्वे। कचि।

अपुष्पः । पुं। उदुम्बरवृक्षे। যজ্ঞডুমুর গাছ।

अपुष्पफलदः । पुं। पनसवृक्षे। কাঁঠালগাছ। मं फणस। रा.नि.व.११। अपुष्पजातफलवृक्षमात्रे। रा.नि.।

अपूपः । पुं। पिष्टके। हला.। পুলি পিটে। मं घारगे। गोधूमसूक्ष्मपिष्टं गुड़ेन युक्तं जलेन संमर्दितं। तद्वेल्यो वर्त्तुलनिभा घृते विपक्वा भवन्ति चापूपाः। बल्या हृद्या रुचिदा गुरवो वृष्याश्च तुष्टिदाः प्रोक्ताः। पित्तानिलशमनकरा मधुराः प्रोक्ताः······। वै.निघ.। পাঁউরুটী इति च केचिदाहुः। गोधूमे। रा.नि.व.१६। [जटा.।

अपूप्यः । पुं। गोधूमे। गोधूमचूर्णे। ময়দা।

अपूरणी । स्त्री। शाल्मलीवृक्षे। শিমুলগাছ। श.च.। कार्पासवृक्षे।

अपेकः । पुं। दुरालभायाम्।

अपेतराक्षसी । स्त्री। तुलसीक्षुपे। रा.नि.व. १०। कृष्णतुलस्यां। কাল তুলসী। मं कालीतुलस। भा.पू.१भ.गु.व.वर्व्वर्य्यां। বাবুই। र.मा.।

अपोगण्डः । त्रि। वलिभे। विकलाङ्गे। पुं। शिशौ। मे. डचतुष्कं। [अ.टी।

अपोदिका । स्त्री। पूतिकाशाके। পুঁই।

अप्नम्(स्) । क्ली। जले।

अप्पित्तम् । क्ली। चित्रकवृक्षे। अम.।

अप्रकाण्डः । पुं। काण्डरहितवृक्षे, झिण्टिकादौ। अम.।

अप्रकृष्टः । पुं। काके। श.र.। त्रि। अधमे।

अप्रतिकार्य्यः । त्रि। दुश्चिकित्स्ये।

अप्रसवधर्म्मी । त्रि। यः पुरुषः प्रसवधर्म्मी न भवति। "बहवस्तु पुरुषाश्चेतनावन्तोऽगुणा अवीजधर्म्मिणोऽप्रसवधर्म्मिणो मध्यस्थधर्म्मिणश्चेति।" सु.शा.१अ.। [मालभूमि। খিলভূমী। रा.नि.व.२।

अप्रहतः । त्रि। मालक्षेत्रे। কেদার ভূমি। मं

अप्रिया । स्त्री । शृङ्गीमत्स्ये । শিঙী মাছ । बोदालिमत्स्ये । বোওয়াল মাছ ।

अप्रेतराक्षसी । स्त्री । तुलसीवृक्षे । र.मा. ।

अप्रोटः । पुं । भारद्वाजाख्यपक्षिणि । वै.निघ.।

अफलः । पुं । फलहीनवृक्षे । ঝাউ গাছ । मं वांझवृक्ष। हे.च.४का.। त्रि। यो न फलति । श.च.।

अफला । स्त्री । भूम्यामलक्यां । काष्ठधात्रीवृक्षे । भा.रा.नि.व.११ । लघुकारवेल्लके । आमलकीवृक्षे । भा.पू.१भ. । कुमार्य्याम् । घृतकुमारी । श.च. ।

अफेनफलम् । क्ली । अहिफेनफले । পোস্তার ঢেঁড়ি । भैष.स्त्री-रोग-चि. ।

अफेलम् । क्ली । आफूके । আফিং । मं अफूकड़री । फा.अफफून । हिं अफीम । आं लब्नुलसुखास् । वै.निघ. । See अहिफेनम् ।

अबरम् । क्ली । अन्तर्वस्त्रे । मे.रत्रिकं ।

अबलः । पुं । वरुणवृक्षे । श.च. ।

अबालुकः । पुं । पानीयालुके । रा.नि.व.७ ।

अबिला । स्त्री । मेष्याम् । ভেড়ী ।

अब्जः । पुं । निचुलवृक्षे । शङ्खे । धन्वन्तरौ । हिज्जलवृक्षे । सर्व्वत्र मे.जद्विकं ।

अब्जम् । क्ली । पद्मे । प.मु.। रा.नि.व.१०। See कमलम् ।

अब्जकर्णिका । स्त्री । कमलबीजकोशे । वै.निघ. ।

अब्जकेशरः । पुं । पद्मकेशरे । च.द. ।

अब्जभोगः । पुं । कमलकन्दे । श.च.।

अब्जबीजभृत् । पुं। श्वेतकरवीरवृक्षे । वै.निघ.।

अब्जाह्वम् । क्ली । बालके । বালা । मं बाला । वै.निघ. । [रा.नि.व.१०। पद्मसमूहे ।

अब्जिनी । स्त्री । पद्मिन्यां । পদ্মের ঝাড় ।

अब्दः । पुं । मुस्तायां । सि.यो.ज्वर.किराताद्दि.। च.द.वातज्व.चि. । "किराताब्दामृतोदीच्या ।" नागरमुस्तायां । নাগরমুতা । मं नागरमोथ । भद्रमुस्तायां । मं भद्रमोथ । मद.१व. । मेघे । मे.दद्विकं । क्ली । अभ्रके । र.मा. ।

अब्दनादः । पुं । मेघनादक्षुपे । কাঁটানটে । स्त्री । शृङ्गिण्यां, भेक्यां । मं तान्दुलज । वै.निघ. ।

अब्दसारः । पुं । कर्पूरभेदे । रा.नि.।

अब्धिः । पुं । समुद्रे । रत्ना. ।

अब्धिकफः । पुं। समुद्रफेने। সমুদ্রের ফেনা । भा.पू.१भ.हृ.व. । गुणाः—रुचिकरः लेखनस्तुवरो लघुः । "चक्षुष्यः शीतलश्चैव पटलादिरुजाहरः । सरश्च विषदोषघ्नः कर्णशूलहरः परः । कफञ्च कण्ठरोगञ्च पित्तञ्चैव विनाशयेत् ॥" वै.निघ. ।

अब्धिजः । पुं । समुद्रफेने । रत्ना. । (-जौ) । अश्विनीकुमारौ ।

अब्धिजा । स्त्री । सुरायां । हे.च. ।

अब्धिडिण्डीरः । पुं । समुद्रफेने । वै.निघ. ।

अब्धिफलम् । क्ली । समुद्रजातफले । महाराष्ट्रादौ ख्याते औषधविशेषे । समुद्रफल इति लोके। गुणाः—फलं समुद्रस्य कटूष्णकारि वातापहं भूतनिरोधकारि । त्रिदोषदावानलदोषहारि कफामयभ्रान्तिविरोधकारि । रा.नि. ।

अब्धिफेनः । पुं । समुद्रफेने । रा.नि. ।

अब्धिमण्डूकी । स्त्री। मुक्तास्फोटे,शुक्तिकायां । ঝিনুক । मद.व.४। मं मोतीसीप । हे.च.४का. ।

अब्धिवृक्षः । पुं । शाखिमूलवृक्षे । काकातोदालोति लोके ।

अब्धिसारः । पुं । रत्ने । वै.निघ. ।

अब्धिहिण्डीरः । पुं । समुद्रफेने । रा.नि. ।

अभ्रम् । क्ली। अभ्रधातौ । मुस्तायाम् । रा.नि.

अब्रह्मचर्य्यकम् । क्ली । मैथुने । त्रिका. ।

अभक्तच्छन्दः । पुं । अरोचकभेदे । यत्र नान्ने भवेच्छ्रद्धा सोऽभक्तच्छन्दउच्यते । See अरोचकः ।

अभयम् । क्ली । उशीरे । वीरणमूले । বেণার মূল । रा.नि.व.१२ । मद.व.३ । अम.। भैष.कुष्ठचि.कन्दर्पसारतैले ।

अभयदा । स्त्री । भूम्यामलक्यां । भूँई आमला । मं भूम आंवली । वै.निघ. ।

अभयनृसिंहरसः । पुं । रसोऽयं अतीसारग्रहणीगदयोर्हितः । मात्रा १ गुञ्जा । अनुपानं जीरकचूर्णं मधु च । द्रव्याणि हिङ्गुलत्रिकटुविष-

जीरक-टङ्कणरसगन्धकाभाणि प्रत्येकं समभागानि सर्व्वसममहिफेनम्। निम्बुकरसेन मर्द्दनं। भैष.।

अभया। स्त्री। (Terminalia chebula; chebulic myrobalan.) हरीतकीभेदे। प. मु.। "पञ्चास्रा चाभया ज्ञेया।" रा.नि.व.११। इयं बाहुल्येन चम्पायां जायते। गुणः—चक्षुष्या। भा. पू.१भ.। अमृतापरनाम्नीति अरुणः, वा.सू.३५अ. वचादिव.।"नागरातिविषाभयाः।" च.द.कफज्व. चि.आमलक्यादिः। "आमलक्यभया कृष्णा।" See हरीतकी। श्वेतनिर्गुण्ड्यां। मञ्जिष्ठायां। जयन्त्यां। जयायां। सिद्धि। मृद्वालें। काञ्जिके। काञ्चनहृदये। रा.नि.व.१७।

अभयाद्यमोदकः पुं। विरेचनाधिकारे। अत्र हरीतक्यादीनां चूर्णं प्रत्येकं पलमितं दन्त्याः ६ तोलकानि, शर्करा १२ पलानि, त्रिवृतायाश्च पलद्वयमेकत्र मधुना मोदकं कुर्य्यात्। च.द.विरेचनाधिकारे।

अभयाद्यावलेहः। पुं। अतिसारे अवलेहः। हा.अचि:। २स्थाने.३अ.।

अभयारिष्टः। पुं। अर्शोऽधिकारे रसः। अत्र हरीतकी १२॥० श. द्राक्षा ६।०श. मधूकपुष्पं १० प. विडङ्गञ्च १० प. वारि २५६ श. शेषः ६४ श. गुड़: १२॥० श.। गोक्षुरादीनां प्र. चूर्णं २प. प्रक्षेपः। भैष.।

अभयालवणम्। क्ली। औषधमिदं यकृत्प्लीहाधिकारे देयम्। পালিধা, পলাশ, আকন্দ, সিজু, আপাং, বরুণ,আগগন্ত,বাসক,গোক্ষুর, বৃহতী,কণ্টকারী, নাটাকরঞ্জ বা গন্ধভাদুলি, হাপরমালী, কুড়চি, ঘোষা, পুনর্নবা,एषां प्रति समूलपञ्चाङ्गं समभागं कुट्टयित्वा हण्डिकाभ्यन्तरे स्थापयित्वा च तिलनालाग्निना दहेत्। ततो भस्म १६प. जलं ६४श. शेषः १६ श. क्षारतोयं ग्राह्यं। गोमूत्रं १६श. सैन्धवं १६ प. हरीतकीचूर्णं ८प. सर्व्वमेकीकृत्य पूर्व्ववत् क्षारकल्केन प्रस्थमितेन पक्तव्यं। पाकसिद्धौ घनीभूते च प्रक्षेपः—कृष्णजीरकं हिङ्गु त्रिकटु यमानी कुष्ठं शटी च, एषां प्रति ४ तो.। सा.कौ.रस.र.। भैष.प्रयोगा.।

अभयावटी। स्त्री। गुल्माधिकारे। अत्र कानकत्रं फलं जैपालम्। शिवा हरीतकी। र.सा. सं.। एषा वटी भेषज्यरत्नावल्यामुदरे धृता।

अभयाष्टकम्। क्ली। अष्टहरीतकीभक्षणे। यथा—"द्वे पूर्व्वमद्यादशनादितो द्वे द्वे चापि भुक्त्वा तु तथा स्वपन्तु। अस्य प्रयोगादभयाष्टकस्य त्रिसप्तरात्रेण पुनर्युवा स्यात्॥"इत्यादि प्रयोगा.रसायन.।

अभावः। पुं। मरणे। असत्त्वे। मे.वत्रिकं।

अभिघातः। पुं। आघाते। शस्त्रमुष्टिलगुड़ादिभिर्हनने। भा.म.१भ.आगन्तु-ज्वर-लक्षणे।"अभिघाताभिषङ्गाभ्याम्।"

अभिघातज्वरः। पुं। आघातजन्यागन्तुकज्वरे। "अभिघाताभिचाराभ्यां—आगन्तुर्जायते…।" मा.नि.ज्व.। अपिच—"तत्राभिघातजो वायुः प्रायो रक्तं प्रदूष्य च। सव्यथाशोफवैवर्ण्यं करोति सरुजं ज्वरमिति॥" च.। अत्र ज्वरे दोषा नारम्भकाः परन्तु पश्चादनुबन्धिनः स्युः।

अभिघारः। पुं। घृते। मं तूप। रा.नि.व.१५।

अभिचारः। पुं। मन्त्रादिना मारणादिप्रयोगे। मन्त्रादिद्वारा पीड़ायां वा। र.मा.। कृत्याद्युत्पादने वा। भा.म.१भ.आगन्तुज्व.। "अभिचाराभिशापतः।" यन्त्रमन्त्राद्यपीड़ने। "अभिचाराभिशापोत्थैः।" रत्ना.।श्येनादियागकृतज्वरे। "अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते।"मा.नि.ज्व.।

अभिज्ञः। त्रि। कुशले। [गज.वै.।

अभितापः। पुं। सर्व्वाङ्गतापे। अश्वज्वरे।

अभिनवकामेश्वरः। पुं। वाजीकरणमिदं भेषजम्। "तोलकैकं समादाय पृथग्गन्धकसूतयोः। रक्तोत्पलदलाम्भोभिर्मर्द्दयेत् दिवसत्रयं। मर्दयित्वा पुनर्देयं गन्धं माषचतुष्टयम्। तस्यैव पत्रतोयेन पुनर्दत्वा च गन्धकम्। शङ्खिन्याश्चापि तोयेन दत्वा काचघटे दृढ़े। ततस्तु वालुकायन्त्रे पचेद्यामत्रयं ततः। काचकूप्याः समाकृष्य सिद्धसूतमतःपरं॥" रत्तिकापञ्चकं खादेत्। रस.र.।

अभिन्यासः (कः)। पुं। सन्निपातज्वरविशेषे। तल्लक्षणम्—"त्रयः प्रकुपिता दोषा उरःस्रोतोऽनुगामिनः। आमाभिवृद्धा ग्रथिता बुद्धीन्द्रियमनोगताः। जनयन्ति महाघोरमभिन्यासं ज्वरं दृढ़म्॥ श्रुतौ नेत्रे प्रसुप्तिः स्यान्न चेष्टा काचिदीहते। न च दृष्टिर्भवेत्तस्य समर्था रूपदर्शने।

न घ्राणं न च संस्पर्शं शब्दं वा नैव बुध्यते । शिरो लोठयतेऽभीक्ष्णमाहारं नाभिनन्दति । कूजति तुद्यते चैव परिवर्त्तनमीहते । अल्पं प्रभाषते किञ्चिदभिन्यासः स उच्यते ॥ प्रत्याख्यातः स भूयिष्ठः कश्चिदेव प्रमुच्यते ॥ मा.नि.ज्व. । अस्य तन्वान्तरीक्तलक्षणं भावप्रकाशे मृग्यम् ।

अभिपीड़नम् । क्ली । अभिचारे ।

अभिमन्थः (मन्थुः) । पुं । नेत्ररोगे । त्रिका. । See अधिमन्थः ।

अभिमर्द्दः । पुं । अवमर्द्दे । [पीड़ायां । र.मा. ।

अभिमर्षणम् । क्ली । यक्षपिशाचादिभूतकृत

अभिमानितम् । क्ली । मैथुने । त्रिका. ।

अभिरूपः । पुं । बुधे । रम्ये । मे.पचतुष्कं ।

अभिलकपित्थः । पुं । आम्रातकवृक्षे । आमड़ा गाछ ।

अभिलावः । पुं । छेदे । अम. ।

अभिलाषः । पुं । रमणेच्छायाम् । रस.र. ।

अभिशापः । पुं । द्विजातिभिः क्रोधाद्दुःखातिभारधारणे । र.मा. । ब्राह्मणगुरुवृद्धसिद्धादिदत्तशापे । भा.म.१भ. । तज्जातागन्तुज्वरलक्षणं—"अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते ।" मा.नि.ज्व. । [ज्वरनिदानम् ।

अभिशापज्वरः । पुं । तज्जन्यज्वरे । See

अभिषङ्गः । पुं । भूतविषादिसम्बन्धे । यक्षपिशाचादिकर्तृकपीड़ायां । र.मा. । कामशोकभयक्रोधभूतादीनाम् आवेशे । भा.म.१भ.आगन्तुज्व.लक्षणं । रक्षःप्रभृतिभिरभिधर्षणे । रत्ना. ।

अभिषङ्गज्वरः । पुं । ज्वरविशेषे । स च भूताद्यावेशतो भवति । स कामादिजभेदेन षड्विधः । शार्ङ्ग. । लक्षणं यथा—"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः । आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत् ॥" मा.नि.ज्व. । कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः । सोऽभिषङ्गज्वरो ज्ञेयः यश्च भूताभिषङ्गजः । च.ज्व.नि. ।

अभिषवम् । क्ली । काञ्जिके । रा.नि.व.१५ । ताड़ीनामसुरायाम् । ताड़ी । मं ताड़ाचीदारु । पुं । स्नाने । मद्यसन्धाने । मे.वचतुष्कं ।

अभिषुकम् । क्ली । काबिलादौ प्रसिद्धे फलविशेषे । पेस्ता । च.चि.च्यवनप्राशः । पुं । तद्वृक्षे । सु. । [काञ्जिके । अम. ।

अभिषुतम् । क्ली । षण्डाख्याम् । शंडाकी ।

अभिषुविक्रान्तम् । पुं । माधवीसुरायाम् । वै.निघ. ।

अभिषेकः पुं }
अभिषेचनम् क्ली } स्नाने ।

अभिष्यन्दः । पुं । नेत्रशूलरोगे । চোক ওঠা । स चतुर्विधो वातादिभेदेन । See नेत्राभिष्यन्दः । अतिवृद्धौ । आस्रावे । मे.दचतुष्कं ।

अभिष्यन्दी । त्रि । दोषधातुमलस्रोतसां क्लेदजनने । कुसुमा.टी.ज्वरे । स्रोतःस्राविद्रव्ये । वा.टी. हेमा. । कफकृत्पदार्थे दध्यादिके । भा.मि. ।

अभिसरः । परिचारके । रत्ना. । प्राणाभिसर उच्यते । च.सू.८अ. ।

अभिसारः । पुं । शकुलीमत्स्ये । শল মাছ । मद.व.१२ । बले । बल । धर. । सख्ये ।

अभिहिता । स्त्री । जलपिप्पल्यां । वै.निघ. ।

अभीकः । पुं । कामुके । मे. कत्रिकं ।

अभीरणी । स्त्री । दुन्दुभसर्पे । वै.निघ. ।

अभीरुः । स्त्री । Asparagus racemosus. शतमूल्याम् । हिं शतावर । वा.सू.१५अ. । दूर्व्वादिव. । गुन्द्राभीरुः शतपाकी प्रियङ्गुः । अश्वगन्धाखताभीरुः । सि.यो.यक्ष्म-चि.त्रयोदशाङ्गे । महाशतावर्य्याम् । रसे.चि.८अ. । "प्रलम्बाभीरुवेत्राग्रम् ।" [अम. ।

अभीरुपत्री(त्रिका) । स्त्री । शतावर्य्याम् ।

अभीशुः(षुः) । पुं । प्रग्रहे । লাগাম । मे. ।

अभीष्टः । पुं । तिलकक्षुपे । তিল গাছ । रा.नि.व.१० । [व.३ ।

अभीष्टगन्धकः । पुं । माधवीलतायाम् । मद.

अभीष्टा । स्त्री । रेणुक-गन्धद्रव्ये । রেণুক । श.च. ।

अभुक्तः । त्रि । कृतोपवासे । अभुक्तस्य दिवानिद्रा पाषाणमपि जीर्य्यति । वै.निघ. ।

अभुग्न: । त्रि । अरोगिणि । [वजम् ।

अभेद्यम् । क्लो । हीरके । रा.नि.व.१३ । See

अभेषजम् । क्लो । विपरीतौषधे । উল্টো ও ষুধ্ । तच्च द्विविधं बाधनं सानुबाधनञ्च । "अभेषजमिति ज्ञेयं विपरीतं यदौषधम् ।" च.चि.१अ. ।

अभोजनम् । क्लो । उपवासे अमात्रभोजने वा উপোষ বা অমাত্র আহার । "अजीर्णे भोजनं येषां जीर्णे येषामभोजनम् । रात्रावभोजनं येषां तेषां नश्यन्ति धातव: ॥" संग्रह: ।

अभ्यङ्ग: । पुं । तिलकल्के ।

अभ्यङ्ग: । पुं । तैलादिमर्द्दने । আভাং করে তেল মাখা । "मूर्ध्नि दत्तं यदा तैलं भवेत्सर्व्वाङ्गसङ्गतम् । स्रोतोभिस्तर्पयेद्देह अभ्यङ्ग: स उदाहृत:"। च.द.ज्व.चि. । गुणा: —जलसिक्तस्य वर्द्धन्ते यथामूलेऽङ्कुरास्तरो: । तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते । शिरामुखै रोमकूपैर्धमनीभिश्च तर्पणम् । सुश्रु. । स जराश्रमवातहा । दृष्टिप्रसादपुष्ट्यायु:स्वप्नसुत्वक्त्वदार्ढ्यकृत् । वा.सू.१अ. । स च शिर:श्रवणपादेषु विशेषेणानुशीलनीय: । र.मा. । अभ्यङ्गो वातरोगघ्न: धातुसाम्यं बलं सुखं । निद्रावर्णमृदुत्वानि कुरुते दृष्टिपुष्टिकृत् । शिरोऽभ्यङ्ग: शिरस्तृप्तिकेशदार्ढ्याक्षिपुष्टिकृत् । केशप्रसाधन: केश: रजोजन्यमलापहा । मद.व.३ । तैलेन शिरोमर्द्दने । भा. । सदोषस्य व्रणस्य दोषोपशमनार्थं मार्द्दवार्थञ्च उपक्रमविशेषे । सु.चि.१अ. ।

अभ्यञ्जनम् । क्लो । तैले । हे.च.। तैलमर्द्दने । रा.नि.व.१५ ।

अभ्यन्त: । त्रि । आतुरे । अम. ।

अभ्यन्तरायाम: । पुं । तन्नामकधनुस्तम्भरोगविशेषे, अन्तरायामे । येन कुपितप्रबलवान् वायु: अङ्गुलिवचोहृदयगलदेशादिकमभिप्रपन्न: स्नायुसमूहमाकर्षन् मानवं क्रोडानतं करोति । तत्र चाक्षिस्तब्धता हनुस्तम्भादि च जायते।लक्षणम्—"अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रित: । स्नायुप्रतानमनिलो यदाक्षिपति वेगवान् । विष्टब्धाक्षस्तब्धहनुर्भग्नपार्श्व: कफं वमन् । अभ्यन्तरं धनुरिव यदा नमति मानव: । तदास्याभ्यन्तरायामं कुरुते मारुतो बली ॥" मा.नि.वा.व्या. ।

अभ्यमित: । त्रि । आतुरे । अम. ।

अभ्यवकर्षणम् । क्लो । शल्याद्युत्पाटने । শেল তোলা, কাঁটা তোলা । अम. ।

अभ्यवहरणम् । क्लो । भोजने ।

अभ्यवहार: । पुं । आहारे । रत्ना. ।

अभ्यान्त: । त्रि । रोगिणि । अम. ।

अभ्याहार: । पुं । भक्षणे । स च चर्व्यचोष्यलेह्यपेयभेदेन चतुर्विध: । सु. ।

अभ्यूष: । पुं । ईषत्पक्वकलायादौ । अम. ।

अभ्रम् । क्लो । मुस्तायां । मेघे । रा.नि.व.६ । अभ्रकधातौ । रा.नि.व.१३ ।

अभ्रकम् । क्लो । भद्रमुस्तायाम् । कर्पूरे । सुवर्णे । वेत्रे। Talc. स्वनामख्यातधातौ । অভ্ভর । হিং আভ্ । गुणा:—गुरु हिमं बल्यं कुष्ठमेहत्रिदोषघ्नञ्च । मद.व.४ । अभ्रकं चतुर्विधं—श्वेतपीतलोहितनीलभेदात् भिन्नभिन्नक्रियायां प्रयुज्यते । यथा—श्वेतं तारे, पीतरक्ते काञ्चने, नीलञ्च व्याधौ प्रयोज्यं यथोत्तरं गुणाढ्यञ्च। तेषु नीलाभ्रं दर्दुरनागपिनाकवज्रभेदेन चतुर्भेदम् । परीक्षा गुणाश्च यथा—अग्नौ क्षिप्तं दर्दुरं भेकरवं नागं फूत्कारं पिनाकं धनु:स्वनं वज्रञ्च न विकारं धत्ते । एषां सेवनेन गुल्मी व्रणी कुष्ठी च नीरोगी भवति । रा.नि.व.१३ । कुष्ठप्रदं पिनाकं स्यात् दर्दुरं मरणप्रदं । नागं देहगतं नित्यं व्याधिं कुर्य्यादभगन्दरम् । रसे रसायने चैव योज्यं वज्राभ्रकं प्रिये । तस्माद्वज्राभ्रकं ग्राह्यम् । र.सा.सं. । अभ्रशोधनम्—१।वकपुष्परसेन पिष्टमभ्रकं वन्यशूरणकन्दमध्ये निरुध्य गोष्ठभूमितले मासं स्थाप्यम् । २।त्रिफलाक्वाथगोमूत्रदुग्धकाञ्जिकेषु भस्त्राग्नौ पुन: पुन: सप्त, तप्तं तप्तं सेचितं शुद्धं भवति।३।अभ्रं सप्तवारं तप्तं तप्तं वदरीक्वाथे नि:क्षिप्तं शुद्धं भवति। र.सा.सं.।४।अभ्रपत्राणि पृथक्कृत्य चूर्णयित्वा चूर्णयेत् दिनैकं तानि काञ्जिकपर्य्युषितानि काञ्जिकेन पुन: पेषयेत् । ततो माणकादिरसेन प्रत्येकमेकञ्च पुन: पुनर्भावयित्वा संपिष्य च पुटपाकेन पुन: पुन: दहेत् यावन्न निश्चन्द्रतामागच्छन्ति । इति विशेषशुद्धि: अम्लपित्ते । च.द. । अस्य पाठे कन्द ওল্ । कालमारिष: ঢুহুৎপত্র চাঁপানটে । अभ्रमा-

रणं—१। अभ्रकं स्थालिकामध्ये संस्थाप्य कदलीक्षारेण गोमयाग्निना तावत् पचेत् यावत् स्थालीवह्निः सिन्दूरं न भवेत्। तत अवतार्य्य दुग्धैः संसिच्य सूक्ष्मं चूर्णयेत्।२। मुस्ताक्वाथेन, पुनर्णवाक्वाथेन, कासमर्द्दक्वाथेन, पर्णरसेन, अर्कक्षीरेण च प्रत्येकं मर्द्दयित्वा प्रत्येकं पुटत्रयं देयम्। तथा वटजटाक्वाथेन संमर्द्य पुटत्रयं देयं। ततो मूषलीक्वाथेन त्रिः पुटेत्। ततो गोक्षुरक्वाथेन त्रिः, शुकशिम्बीक्वाथेन त्रिः पचेत्। ततः मुचुकुन्दकोकिलाक्षक्वाथेन प्रत्येकं त्रिरात्रं पचेत्। ततः लोध्रक्वाथेन दुग्धेन दध्ना घृतेन मधुना शर्करया च प्रत्येकमेकैकं पुटं दत्त्वाभ्रं मारयेत्। ३। रम्भादिक्षारजलेन पिष्ट्वा चक्रीकृतं कदलीदलमध्ये संस्थाप्य व्यजनानिलेन ज्वालितेषु दग्धेन्धनेषु स्नुहार्कमूलाजलेन पुटेत्। र.सा.सं.। अथ विविधाधिकारे। अभ्रकविधिः यथा—कृष्णाभ्रपत्राणि पृथक्कृत्य चूर्णयेत्। अथ तच्चूर्णं शिलायां पिष्ट्वा वस्त्रपूतं कार्य्यम्। ततो भेकपर्णी (थूलकुड़ि) रसे आपीष्य दिनत्रयं स्थापयेत्। अथ तदुद्धृत्य हैमन्तिकधान्यकाञ्जिकेन संपिष्य पुनर्भेकपर्णीरसेनालोड्य स्थाल्यां पचेत्। अथ तदुद्धृत्य पिण्डङ्कृत्वा तालादिपत्रमध्ये निधाय वस्त्राग्नौ दहेत् यावदग्निर्नीलवर्णो न लक्ष्येत। अथ दुग्धे निर्वाप्य दुग्धेन तदनन्तरं जलेन धावयेत्। धावनानन्तरं सुपेषितं निश्चन्द्रकं कुर्य्यात्। च.द.रसायने।

अभ्रनामकः। पुं। मुस्तायाम्। श.र.।[निघ.।

अभ्रपटलः। पुं,क्ली। अभ्रके। अভ্ৰ। वै.

अभ्रपुष्पः। पुं। वेतसलतायाम्। भा.पू.१भ. गु.व.। वारिवेतसे। अम.। क्ली। जले।

अभ्रमांसी। स्त्री। आकाशमांसीलतायाम्। শূন্য জটামাংসী। रा.नि.। [१२।

अभ्ररोहः। पुं, क्ली। वैदूर्य्यमणौ। रा.नि.व.

अभ्रवटिका। स्त्री। रसविशेषोऽयं ज्वरातिसारगदे प्रयोज्यः। अत्र व्योषचूर्णं कर्षमानम्। केशराजादीनां स्वरसः सूतोन्मितो देयः। ग्रीष्मसुन्दरकः (গীমা শাক)। मण्डूकपर्णी (থুলকুড়ি)। तस्यायं पाठः—"अथ सूतस्य शुद्धस्य गन्धकस्याभ्रकस्य च। प्रत्येकं कर्षमेकन्तु ग्राह्यं रसगुणैषिणा॥" ततः कज्जलिकाङ्कृत्वा व्योषचूर्णं प्रदापयेत्।"केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च। ग्रीष्मसुन्दरकस्याथ जयन्त्याः स्वरसं तथा। मण्डूकपर्ण्याः स्वरसं तथा शक्राशनस्य च। श्वेतापराजितायाश्च स्वरसं पर्णसम्भवं। दापयेत्तच तुल्यञ्च विधिज्ञः कुशली भिषक्। रसतुल्यं प्रदातव्यं चूर्णं मरिचसम्भवं। देयं रसार्द्धभागेन चूर्णं टङ्गणसम्भवम्॥" मर्द्दयित्वा कलायप्रमाणा वटी कार्य्या। र.स.र.र.सा.सं.। भैष-ज्यर.।अवलग्रा.वि.अनेव ग्रहण्यां महाभ्रवटिका उक्ता। इयमेव प्रयोगामृते ग्रहण्यां रसाभ्रवटी। शुद्धरसः २ तो. शुद्धगन्धः २ तो. कज्जलीं कृत्वा जारिताभ्रं २ तो. मरिचचूर्णं २ तो. टङ्गणं १ तो. केशराजादिरसस्य प्रत्येकं १ तो., वटी कार्य्या। अन्या ग्रहण्याम्—पक्वेष्टकाहरिद्राभ्यामगारधूमकेन च। शोधितं पारदञ्चैव कर्षार्द्धं तुलया धृतम्॥ भृङ्गराजरसैः शुद्धं गन्धकं रससम्मितम्। द्वाभ्यां कज्जलिकां कृत्वा भावयेत्तत्तु भिषजैः। सिन्दुवारदलरसे मण्डूकपर्णिकारसे। केशराजरसे चैव ग्रीष्मसुन्दरजे रसे। रसेऽपराजितायाश्च सोमराजीरसे तथा। रक्तचित्रकपत्रोत्थे रसे च परिभावितं। रसमानसमानेन छायायां शोषयेद्भिषक्॥ वटी सर्षपमिता। হরিদ্রা, ইষ্টকচূর্ণ ও গৃহধূমশোধিত রস ১তোলা, ভীমরাজ শোধিতগন্ধক ১তো· কজ্জলি কর। নিশিন্দা, থুলকুড়ি, গিমা, কেশুর, অপরাজিতা, সোমরাজ, লালচিতের রসে ভাবনা। भैष.ग्रहणी। प्रयोगामृतोक्ताभ्रवटिकायामभ्रकस्यैको भागः पारदसम इति विशेषः। [গাছ। रा.नि.व.११।

अभ्रवाटकः। पुं। आम्रातकवृक्षे। আমড়া

अभ्रवाटिकः। पुं। आम्रातके। जटा.।

अभ्रसारः। पुं। भीमसेनीकर्पूरे। वै.निघ.।

अभ्राह्वम्। क्ली। कुङ्कुमे। मद.व.३।

अभ्रूषः। पुं। तालुरोगविशेषे। तेन लम्बलोहितः शोणितोत्थः शोथः ज्वरतीव्रवेदनायुक्तो भवति। तदुक्तं शोथस्तब्धो लोहितः शोणितोत्थो ज्ञेयोऽभ्रूषः सज्वरस्तीव्ररुक् च। भा.म.४भ.मुखरो.चि.।

अमः। पुं। रोगे। त्रि। पक्वफलादौ। श.र.।

अमङ्गलः। पुं। एरण्डवृक्षे। श.च.।

अमण्डः। पुं। एरण्डवृक्षे। प.मु.। हारा.।

अमध्यस्थधर्म्मिणी । त्रि । या चेतनजड़ीभयधर्म्ममध्यवर्त्तिनी न भवति । तस्याः केवलं जड़मयत्वात् पुरुषस्य च तथात्वात् । सु.शा.१अ. ।

अमरः । पुं । अस्थिसंहारे । হাড়ভাঙা । रत्ना.। वज्रीद्रुमे । सिजुा।मे.रत्रिकं । कुद्राचे । श्र.र.।पारदे। रा.नि.व.१३ । इस्तिनि । क्ली । सुवर्णे । वै.निघ. ।

अमरकणा । स्त्री । गजपिप्पल्याम् । वै.निघ. २भ.पाण्डु-चि.भूनिम्बादिगुटी । [व.४।

अमरकण्टिका । स्त्री । शतावर्य्याम् । रा.नि.

अमरकन्दः । पुं । कन्दविशेषे । वै.निघ. ।

अमरकालिकः । पुं । वृश्चिकाल्याम् । বিছাতী । भैष.वा.व्या.सिंहना.गुग्गुली ।

अमरकाष्ठम् । क्ली । देवकाष्ठे । দেবদারু ।

अमरकुसुमम् । क्ली । लवङ्गे । वै.निघ.ज्वरे. त्रैलोक्य-चि.रसे ।

अमरजः । पुं । दुष्खदिरवृक्षे । গুয়েবাব্লা । रा.नि. । देवदारुणि । नदीवटे । वै.निघ.२भ. ग्रन्थ्यादिः ज्व. ।

अमरतरुः । पुं । देवदारौ । वै.निघ.सा.ज्व. भर्कादिः । "किरातामरतरुरसना ।"

अमरदारु । पुं, क्ली । तैलदेवदारुणि । रा.नि. व.१२ । चि.क्र.क.वल्ली-क्षीरी.चि. । तैलदेववृक्षे । मलङ्गादेवदारु ।

अमरद्रुः । पुं । विट्खदिरवृक्षे । গুয়েবাব্লা ।

अमरपुष्पम् । पुं, क्ली । पूगफले । काशतृणे । भाम्रे । केतके । मे.पपञ्चकं ।

अमरपुष्पकः । पुं । काशतृणे । কেশে । प.मु. । काशभेदे । र.मा. ।

अमरपुष्पिका | **अमरपुष्पी** } स्त्री । चोरपुष्पीतृणे । চোর কাচকী, চোর থড়িকা । रमा. । काशतृणे । [काचे ।

अमर(ल)रत्नम् । क्ली । स्फटिके । रा.नि. ।

अमरवल्ली । स्त्री । आकाशवल्ल्याम् । मं अमरवेल । हिं अमरवेलि । আলোকলতা । भा. पू.१भ.गु.व. । मद.व.१ । सालशैतिख्यातलतायां । गुणाः—वृष्यवल्ली बलकरी परं वृष्या रसायनी । मूत्रकृच्छ्रस्वेदजननी पुष्टिदा कार्श्यवारिणी । श्लीपदंशिकरोगांश्च रक्तदोषं हरेदियम् ॥ वैद्यकम् ।

अमरसर्षपः । पुं । देवसर्षपे । রাই । वै.निघ.।

अमरसुन्दरी । स्त्री । ज्वराधिकारे रसः । पाठो यथा—त्रिकटु त्रिफला चैव ग्रन्थिकं रेणुकानलम् । चातुर्जातं मृतं लौहं पारदो विषगन्धकम् । समभागमिदं चूर्णं तस्माच्च द्विगुणो गुड़ः । कोलप्रमाणां गुड़िकां प्रातरुत्थाय सेवयेत् ॥ इत्यादि । प्रयोगा. ।

अमरा । स्त्री । दूर्व्वायाम् । मे.रत्रिकं । गुडूच्यां। र.मा.। इन्द्रवारुणीलतायां । রাখালশশা । रा. नि.व.३ । नीलदूर्व्वायां । गृहकन्यायाम् । रा.नि. व.५ । नीलीवृक्षे । मेषशृङ्ग्याम् । वृश्चिकाल्यां । বিছাতি গাছ । रा.नि.व.८ । नदीवटे । रा.नि.व. ११ । जरायौ । मे.रत्रिकं । गर्भनाड्याम् । ফুল । भैष.स्त्रीरो. । नाभिनालायाम् ।

अमराह्वम् । क्ली । देवदारुकाष्ठे । वा.सू.१५ एलादि.अरुणः। "शुक्तिर्व्याघ्रनखोऽमराह्वमगुरुः ।"

अमरी । स्त्री । नीलदूर्व्वायाम् । कृष्णनिर्गुण्ड्यां । मूर्व्वायाम् । মুর্গা । वै.निघ. ।

अमरुफलम् । क्ली । उत्तरदेशप्रसिद्धफले । गुणाः—अमरीश्च फलं शीतं मलद्रवकरं मतम् । सरं दाहं रक्तपित्तं कामलां मूत्रकृच्छ्रकम् । मूत्राश्मरीञ्च हन्तीति ऋषिभिः परिकीर्त्तितम् । वै. निघ. । [ज्व.निर्गुण्डीधूपे ।

अमरेन्द्रतरुः । पुं । देवदारुवृक्षे । वै.निघ.२भ.

अमलम् । क्ली । अभ्रके । मे.लत्रिकं । समुद्रफेने । र.मा. । कर्पूरे । वै.निघ.२भ.अपस्मा.चि. । रौप्यमाक्षिके । पित्ते । कतकवृक्षे । गन्धद्रव्यविशेषे।

अमलदीप्तिः । पुं । कर्पूरे । च.द. ।

अमलपत्री । पुं । हंसे ।

अमलमणिः । पुं । स्फटिके । रा.नि.व.१३ । कर्पूरमणौ । কর্পূরগন্ধমণিবিশেষ ।

अमलरत्नम् । क्ली । स्फटिके । रा.नि.व.१३ ।

अमला । स्त्री । महानील्याम् । বড় নীল । रा.नि.व.४। सेहुण्डभेदे । रा.नि.। भूम्यामलक्याम् । अम.। नाभिनालायाम् । आमलक्याम् । আম্লা ।

प्रयोगा.क्षुद्ररोग-चि. । [मूला । अ.टी.भ. ।

अमलाञ्झटा । स्त्री। भूधात्र्याम् । भूँइ आ-

अमसः । पुं । रोगे । उ. ।

अमानस्यम् । क्ली । पीड़ायाम् । दुःखे ।

अमिलातकम् । क्ली । वैलाख्ये पुष्पे । हला. ।

अमिलातका । स्त्री । महाराजतरुणीपुष्प-वृक्षे । বেল । रा.नि.व.१० । [वै.निघ. ।

अमूला । स्त्री। अग्निशिखावृक्षे । ईष्लाङ्गुलिया।

अमृणालम् । क्ली । लामज्जके । শ্বেত উশীর । रा.नि.व.१२। भा.पू.१भ.क.व.।मद.व.३। उशीरे । বেণার মূল । रत्ना. । रा.नि.व.१२ । च.द.अर्श-चि.प्राणदागुड़िका ।

अमृतः । पुं । पारदे । रा.नि.व.१३। वनमुद्गे । रा.नि.व.१६। See मकुष्ठकः । अत्रि.२स्थानं.२अ.। धन्वन्तरौ । ना धन्वन्तरिदेवयोः । मे.तत्रिकं । वाराहीनाममहाकन्दशाके । শুয়ার আলু । रा. नि.व.७ । क्ली । पीयूषे । सलिले । रा.नि.व.१४ । घृते । मे.रा.नि.व.१५।वै.निघ.वा.व्या.भुजङ्गीगुटी.। "अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते ।" मे.। विषसामान्ये । दुग्धे । रा.नि.व.१५। अन्ने । हे.च.। औषधे । रा.नि.व.२०। शृङ्गीविषे । स्वर्णे । भक्ष्य-द्रव्ये । हे.च. ।

अमृतकन्दा । स्त्री। कन्दगुडूच्याम् । मं कन्द-गुलवेल । वै.निघ. । See कन्दगुडूची ।

अमृतकल्परसः । पुं । अजीर्णाधिकारे रसः। शुद्धौ पारदगन्धौ च समानौ कज्जलीकृतौ । तयो-रर्द्धं विषं शुद्धं तत्समं टङ्कणं भवेत् । भृङ्गराजद्रवै-र्भाव्यं त्रिदिनं यत्नतः पुनः ॥ मात्रा मुद्गमाना। अत्र तत्सममिति विषसमम् । र.सा.सं. ।

अमृतगुड़िका । स्त्री । भैषज्यमिदं अजीर्णे हितम् । कुर्याद्गन्धविषव्योषत्रिफलापारदैः समैः । भृङ्गाम्बुमर्दितैर्मुद्गमात्रामृतवटीं शुभाम् ॥ रसे.चि.।

अमृतजा । स्त्री । हरीतक्याम् । वै.निघ. ।

अमृतप्राशघृतम् । क्ली । राजयक्ष्मणि प्रश-स्तम् ।"जीवकर्षभकौ वीरां जीवन्तीं नागरं शटीं । चतस्रःपर्णिनीर्मेदे काकोल्यौ द्वे निदग्धिकाम् । पुनर्णवे द्वे मधुकमात्मगुप्तां शतावरीम् । ऋद्धिं परूषकं भार्गीं मृद्वीकां बृहतीं तथा । शृङ्गाटक-मामलकीं पयस्यां पिप्पलीं बलाम् । बदराक्षोड़-वातादखर्जूराभिषुकाणि च । फलानि चैवमा-दीनि कल्कान् कुर्वीत कार्षिकान् । धात्रीफल-विदारीक्षुच्छागमांसरसान् पयः । दत्त्वा प्रस्थोन्मि-तान् भागान् घृतप्रस्थं विपाचयेत् । प्रसृतिं मधुनः शीते शर्कराईतुलां तथा । पलार्द्धकञ्च मरिचत्वगे-लापत्रकेशरम् । विनीय चूर्णयेत्तस्माल्लिह्यान्मात्रां यथाबलम् । अमृतप्राश इत्येष नराणाममृतोपमः। सुराघृतमयं पथ्यं क्षीरमांसरसाशिनः। नष्टशुक्र-क्षतक्षीणदुर्ब्बलव्याधिपीड़ितान् । स्त्रीप्रसक्तानकृश-लान् स्वरहीनांश्च बृंहयेत् । कासहिक्काज्वरश्वास-दाहतृष्णास्रपित्तनुत् । पुत्रदो वृद्धि···दाहशूलक्षया-पहः ॥" अस्य पत्री यथा, मूर्च्छितगव्यघृतं ४ श. । कल्कार्थद्रव्याणि प्रत्येकं कर्षमितान्येकत्र कल्कीकृत्य तैः,धात्र्यादिरसैः प्रत्येकं प्रस्थमितैश्च घृतं यथाविधि पाच्यम् । पाकसिद्धौ छानयित्वा मधुनः प्रसृतिं शर्करायाः ५० पलानि, मरिचस्य,गुड़त्वचः एला-याः तेजपत्रस्य नागकेशरस्य च प्रत्येकं चूर्णमर्द्धपलं (४तो.) मिश्रणीयम् । कल्कद्रव्यानि यथा—जीव-कर्षकौ (अभावे गुडूची, वंशलोचना) क्षीरविदारी (भूँइकुमड़ा) महाबला वा जीवन्ती शुण्ठी शटी शालपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी मेदा (अभावे अश्वगन्धा) महामेदा (अभावे शारिवा) काकोली क्षीरकाकोली कण्टकारी बृहती रक्त-पुनर्णवा श्वेतपुनर्णवा यष्टीमधु कपिकच्छुः (आ-लाकुशी मूल) शतावरी ऋद्धिः (अभावे बला (বেলেড়া) परूषकफलं भार्गी मृद्वीका शृङ्गाटकं भूम्यामलकी शुक्लभूमिकुष्माण्डं पिप्पली वाट्यालकं बदरफलं अक्षोटफलं वातादं (বাদাম) खर्जूरं अभिषुकं (পেস্তা) च । एवंविधानि अन्यानि फ-लानि च । रसाश्च यथा—आमलकीरसः भूमि-कुष्माण्डरसः इक्षुरसः छागमांसरसः, दुग्धञ्च । प्र-योगा. यक्ष्म-चि. । अन्यत् ध्वजभङ्गाधिकारे । त-स्यायं पाठः—"छागमांसं बलाञ्चैव वाजिगन्धां तथैव च । जलद्रोणे विपक्तव्यं कुर्यात् पादावशेषितं । घृतप्रस्थं पचेत्तेन अजाक्षीरं चतुर्गुणं । मूर्च्छनार्थं प्रदातव्यं कुङ्कुमञ्च द्विकार्षिकं । बलामूलञ्च गोधूमं चाश्वगन्धा तथामृता । गोक्षुरञ्च कशेरुश्च त्रिकटुश्च सधान्यकः । तालाङ्कुरस्तैफलञ्च कस्तूरीवीजवा-

मरी । मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शटी । दार्व्वी प्रियङ्गुर्म्मञ्जिष्ठा नतं तालीशपत्रकं । एलापत्रत्वचं नागं जातीकुसुमरेणुकं । सरलं जातिकोषञ्च मुञ्चैलोत्पलसारिवे । मूलं विल्वस्य जीवन्ती ऋद्धिवृद्धी उडुम्बरम् । प्रत्येकं कर्षमात्रन्तु पेषयित्वा विनिक्षिपेत् । वस्त्रपूते सुशीते च सितां दद्याच्छरावकम् ॥ भैष. । हा.अचि.३स्था.८अ. ।

अमृतप्राशावलेहः । पुं । अयं राजयक्ष्माधिकारे उक्तः । तस्य पाठः—"क्षीरे धात्री च मञ्जिष्ठा क्षीरिणाञ्च तथा रसैः । पचेत्समैर्घृतप्रस्थं मधुरैः कर्षसम्मितैः । द्राक्षाद्विचन्दनोशीरैः शर्करोत्पलपद्मकैः । मधूककुसुमानन्ताकाश्मरीतृणसंज्ञकैः । प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलां तथा । पलार्द्धिकांश्च संचूर्ण्य त्वगेलापत्रकेशरान् । विनीय तत्र संलिह्यान्मात्रां नित्यं सुयन्त्रितः । अमृतप्राशमित्येतदश्विभ्यां परिकीर्त्तितम् ॥" भा.म.ख.२भ. । क्षीरे काकोलीक्षीरकाकोल्यौ । क्षीरिणः वटाश्वत्थोदुम्बरप्लक्षपारीशाः तेषां त्वक् । तृणं गन्धतृणं क्षीरादीनां क्वाथैः द्राक्षादीनाञ्च कल्कैः पचेत् ।

अमृतफलम् । क्ली । (Nák. Pyrus communis.) The pear tree. लघुविल्वफलाकृती नास्पातीति प्रसिद्धे काबुलदेशजफलविशेषे । पञ्जावे च नाक् इति ख्याते । गुणाः—गुरु वातघ्नं स्वाद्वम्लं रुचिकृत् शुक्रकृच्च । मद.व.६ । अमृतस्य फलं धातुवर्द्धकं मधुरं गुरु । रुच्यश्चाम्लं वातहरं त्रिदोषस्य च शामकम् ॥ वै.निघ.। लघु हृद्यं स्वादु त्रिदोषहरञ्च । इदञ्च मुद्गलदेशे प्रचुरं लभ्यते । भावमिश्रः । पुं । पारदे । हृद्गिनामकौषधे । पटोललतायां । रा.नि.व.३ । धात्रीवृक्षे । आमलागाछ । मद. ।

अमृतफला । स्त्री । द्राक्षायाम् । किस्मिस् । हिं किसमिस् । आमलक्याम् । रा.नि.व.११ । लघुखर्ज्जूरीवृक्षे । ছোট খেজুরের গাছ । श्वेतद्राक्षायां । कोङ्कणे उत्तरा उत्तरीति च ख्याता ।

अमृतबन्धुः । पुं । अश्वे । वै.निघ. ।

अमृतभल्लातकावलेहः । पुं । कुष्ठाधिकारेऽवलेहः । यथा भल्लातकप्रस्थयुगं(४श.) छित्वा द्रोणजले (६४श.) क्षिपेत् । प्रस्थद्वयं गुडूच्याश्च (४ श.) चूर्णं तत्राम्भसि क्षिपेत् । शरावमात्रकं सर्पिः (१ श.) दुग्धं स्यादाढकं (१६ श.) तथा । सितां प्रस्थमितां (२ श.) दद्यात्प्रस्थार्द्धं (१ श.) माक्षिकं क्षिपेत् । सर्व्वाण्येकत्र भाण्डे तु पचेन्मृद्वग्निना शनैः । सर्व्वद्रवे घनीभूते पावकादवतारयेत् । तत्र क्षेप्याणि चूर्णानि ब्रूमो विम्बविषामृताः । वाकुची चाथ दद्रुघ्नः पिचुमर्द्दो हरीतकी । अक्षो धात्री च मञ्जिष्ठा मरिचं नागरं कणा । यमानी सैन्धवं मुस्तं त्वगेला नागकेशरम् । पर्पटं पत्रकं बालमुशीरं चन्दनं तथा । गोक्षुरस्य च वीजानि कर्चूरी रक्तचन्दनं । पृथक् पलार्द्धमानानां (प्र.४तो.) चूर्णमेषामिह क्षिपेत् । पलमात्रमिदं प्रातः समश्नीयाज्जलेन हि ॥ विषा = अतिविषा, अमृता = गुड़ची । वाकुची = सोमराजी । अक्षः = विभीतकं । पत्रकं = तेजपत्रम् । बालं (বালা) । कर्चूरः शटी एकाङ्गी वा । भा.म. ४भ.कुष्ठ-चि. ।

अमृतभल्लातकी । स्त्री । रसायनोऽयं योगः । रस.र. । अत्र पक्वभल्लातकफलं, विदलमिष्टकाचूर्णघृष्टं प्रक्षालितञ्च शुष्कं कृत्वा पुनस्तद्विदलीकृत्य ६४ प. वारि ५१२ प. शेषः १२८ प. शीतले क्षीरं १२८प.तत्पादशेषे शीते च घृतं ३२प.ततश्च मुद्रापाकेऽवतार्य्य,खण्डस्य १६प. मिश्रयित्वा दिनसप्तकं स्थापयेत् । भल्लातकानां पवनोद्धृतानां वृन्ताच्युतानाञ्च यदाढकं स्यात् । तच्चेष्टकाचूर्णकणैर्विघृष्य प्रक्षालयित्वा विसृजेत्प्रवाते । शुष्कं पुनस्तद्विदलीकृतञ्च ततः पचेदप्सु चतुर्गुणासु । तत्पादशेषं परिपूतशीतं क्षीरेण तुल्येन पुनः पचेत्तम् । तत्पादशेषं पुनरेव शीतं घृतेन तुल्येन पुनः पचेत्तम् । तदर्द्धया शर्करया विमिश्रं ततः खजेनोन्मथितं विधाय । तत्सप्तरात्रादुपजातवीर्य्यं सुधामृतादप्यधिकत्वमेति । रस.र.रसायन. । सा.कौ. । भैष.कुष्ठाधिकारे । अन्या च विविधाधिकारे—सुपक्वभल्लातकफलं द्विखण्डितं ८श. वारि ३२श. (जले द्वैगुण्याभावात्) पादशेषः ८ श. क्वाथो ग्राह्यः । अथ दुग्धं ३२ श. घृतञ्च शरावद्वयं (४ श.) दत्त्वा तावत्पचेत् यावद्घनतां न गच्छेत् । घनीभूते शर्करायाः १६ पलानि मिश्रयित्वा दिनसप्तकं स्थापयेत् । च.द.रसायने । पाठो यथा—सुपक्वभल्लातफलानि सम्यक् द्विधा विदार्य्याढकसम्मितानि । विपाच्य तोयेन चतुर्गुणेन चतुर्थशेषे व्यपनीय तानि । पुनः पचेत् क्षीरचतुर्गुणेन घृतांशयुक्तेन घनं यथा स्यात् । शितोपलाषोड़शभिः पलैस्तं विमिश्र्य संस्थाप्य दिनानि

सप्त इत्यादि। घृताच्चतुर्गुणं क्षीरं घृतस्य प्रस्थ-
श्च्यते इति। च.द.विविधाधिकारे।

अमृतमञ्जरी। स्त्री। गोरचदुग्धोचूपे। रा.नि.व.५। सामान्यज्वरे रसविशेषः।"हिङ्गुलं मरिचं टङ्गं पिप्पलीं विषमेव च। जातीकोषं समं सर्व्वं जम्बीराद्भिर्विमर्द्दयेत्॥" माचा २ वा ३ गुञ्जा। अत्र जातीकोषं (जयित्री)। अन्या कासाधिकारे,पाठ-तुल्य एव। र.सा.सं.।

अमृतमण्डुरः। पुं। परिणामशूले देयः। पाठः—"मण्डुरस्य पलान्यष्टौ शतावर्य्यारसस्तथा। चीराज्यं दधि प्रत्येकं पिष्टा चतुःपलं पचेत्।" इत्यादि। लौह.८प.शतावर्य्यादीनां प्रत्येकं चतुः-पलञ्च एकत्र पचेत्। रस.र.। [प.मु.२०व.।

अमृतमन्थः। पुं। दुग्धादिपरिगोलिते मन्थे।

अमृतयोगः। पुं। नचत्रयोगविशेषे दिनकरकरयुक्तः सोमसौम्येन वापि तुरगसहितभौमः सोमपुत्रोऽनुराधा। सुरगुरुरपि पुष्ये रेवती शुक्र-वारे दिनकरसुतयुक्ता रोहिणी सौख्यहेतुः। अचि. २स्था.६अ.।

अमृतरसा। स्त्री। कपिलद्राचायाम्। आङ्गुर इति लोके। मं कालेद्राख। रा.नि.व.११।

अमृतलता। स्त्री। गुडूच्याम्। रा.नि.व.३। हा.अचि.।

अमृतलतादिघृतम्। क्ली। पाण्डुरोगाधिकारे घृतम्। तस्य पाठः—अमृतलतारसकल्कं प्रसाधितं तुरगविद्विषः सर्पिः। चीरं चतुर्गुणमेत-द्धितरैव हलीमकार्त्तेभ्यः॥ भा.म.२भ.।

अमृतवटकः। पुं। सन्निपातातिसारे हितः। हा.अचि.३स्था.३अ.। पाण्डु चि.।

अमृतवटी। स्त्री। अग्निमान्द्ये रसविशेष। अमृतवराटकमरिचैः द्विपञ्चनवभागिकैः क्रमशः। विष २कड़ि ५ मरिच ६ तो.। जलेन मुद्गसमाना वटी कार्य्या। भैष.।

अमृतवर्त्तिका। स्त्री। मृत्युञ्जयतन्त्रोक्तरसा-यनवर्त्तौ। तत्साधनं यथा—त्रिकटु-त्रिफला-ब्राह्मी-गुडूची-चित्रक-नागकेशर-शुण्ठी-भृङ्गराज-निर्गुण्डी-हारिद्रा-दारुहरिद्रा-शक्राशन(सिद्धि)त्वगेला-गाम्भा-रीत्वक्-विडङ्ग-वचानां चूर्णं प्रत्येकं २प. काम-रूपदेशीयगुड़स्य च ५० प. एकत्र संमर्द्य ३६० वर्त्तिकाः कार्य्याः। प्रत्यहं भोजनात्प्राक् सन्ध्यायां वा शीतलजलेन एकैकं सेव्यम्। भैष.।

अमृतवल्लरी। स्त्री। गुडूच्याम्। भा.पू.१भ. गु.व.। उपोदक्याम्। बड़ पूँइ।

अमृतवल्लिका / **अमृतवल्ली** } स्त्री। चित्रकूटप्रसिद्ध गुडूच्याम्। र.मा.। रा.नि.व.३। अत्रि.२स्था.२अ.। अमृतस्य च वल्ली सा हितकारी विषापहा। किञ्चित्तिक्ता जराव्याधिहरी कुष्ठामनाशिनी। कामलव्रणशोथघ्नी ऋषिभिः परिकीर्त्तिता। वै.निघ.,जीर्णज्व.हरीतकीपाके।

अमृतसङ्गमः। पुं। खर्परिकायाम्। थापर। मं कलखापरी। वै.निघ.। [रा.नि.व.५।

अमृतसञ्जीवनी। स्त्री। गोरचदुग्धोनामचूपे।

अमृतसम्भवा। स्त्री। गुडूच्याम्। रा.नि.व.५।

अमृतसहोदरः। पुं। घोटके। जयद.।

अमृतसारजः। पुं। गुड़े। गुड़। मं काकवी। रा.नि.व.१४। तवराजखण्डे। नवात। रा.नि.व.१४। तृष्णाज्वरदाहरक्तपित्तघ्नः।

अमृतसारजा। स्त्री। शर्करायाम्। चिनि। मं खड़साकर।

अमृतसारताम्रम्। क्ली। रसायनाधिकारे।

अमृतसोदरः। पुं। घोटके। रा.नि.व.१६।

अमृतस्रवा। स्त्री।चित्रकूटदेशे स्वनामप्रसिद्ध-लतायां। रूदन्ती लता। अमृतवल्लि। गुणाः—ईषत्तिक्तरसायनी, विषघ्नी व्रणकुष्ठामकामलाशोफ-जिच्च। रा.नि.व.३। त्रायमाणायाम्। रा.नि.व. ५। माचा ३ माषा।

अमृतहरीतकी। स्त्री। अजीर्णे। यथा—"धान्यकं जीरकञ्चैव मुस्तकं पटुपञ्चकं।यमान्यामठ-पञ्चञ्च लवङ्गं त्रिकटुन्तथा। प्रत्येकं समभागन्तु श्लक्ष्णचूर्णानि कारयेत्। सर्व्वचूर्णसमं दद्यादभया-चूर्णसंस्कृतम्॥" सा.कौ.। तक्रे समुत्स्विन्नशिवा-शतानि तद्बीजमुद्धृत्य च कौशलेन। षड्रूषणं पञ्च-पटूनि हिङ्गुचारावजाजीमजमोदकञ्च। चुक्रेण सम्भाव्य त्वचा समानं चिपेत् शिवाबीजनिवास-मध्ये॥ प्रयोगा.।

अमृतचार: । पुं । नवसागरे । वै.निघ. ।

अमृता । स्त्री । गुडूच्याम् । रा.नि.व.३। र.मा.। आमलक्यां । रा.नि.व.११ । हरीतक्यां । प.मु. । "स्थूलमांसामृता स्मृता ।"इयं चम्पाजाता। रा.नि.व.११ । तुलस्यां । काष्ठधात्रीवृक्षे । भा. । मदिरायां । रा.नि.व.१४ । इन्द्रवारुण्यां । रा.नि.व.३। पारावतपद्यां। लता फट्की ।रा.नि.व.३। गोरक्षदुग्धायां । कृष्णातिविषायाम् । रक्तत्रिवृतायां । रा.नि.व.६ । दूर्व्वायां। पिप्पल्याम् । मे.। लिङ्गिन्यां । रा.नि.व.३ । नीलदूर्व्वायां । रा.नि.व.८ । श्वेतदूर्व्वायाम् । नागवल्लयाम् । पान । रास्नायाम् । गरुड़वल्लयाम् । वै.निघ.चय.चि.सूर्य्यप्रभायाम् । खर्वूजेतिख्यातलतायाम् । कन्दगुडूच्याम् । स्फटिकारिकायाम् । मद.व.४। प्रयोगा.। गुड़ूचीति त्रिचकगुड़े। वा.सू.१५, आरग्वधादिः । निम्बामृता मधुरसा श्रुवृक्षपाटाः, पद्मकादौ अरुणः । पञ्चामृता दश जीवनसंज्ञाः । चि.१अ.किराताद्दिः । किराततिक्तममृता । च.द.वातज्व.चि. । किराताब्दामृतोदीच्य—।च.द.पित्तज्व.लोध्रादिः । च.सू.४अ. ।

अमृताख्यगुग्गुलु: । पुं । वातरक्ते । गुड़ूची २ श. गुग्गुलु: १ श. त्रिफला प्रत्येकं १ श. वारि ६४ श. सङ्कुद्य पाच्यम् । पादशिष्टे छानयित्वा तावत्पुनः पाच्यं यावत् न घनीभूतं भवति । घनीभूते दन्त्यादिचूर्णं प्रत्येकं ४ तो. त्रिवृच्चूर्णञ्च २ तो. ईषदुष्णतासत्त्वे प्रक्षिप्य मर्द्दयेत् । बलाबलं वीक्ष्य मात्रा देया । च.द.वातरो.चि. ।

अमृताख्यलौह: । पुं,क्ली । रक्तपित्ताधिकारे लौहः । पाठो यथा—अमृता त्रिवृता दन्ती श्रावणी खदिरो वृषः । चित्रको भृङ्गराजश्च कोकिलाक्षः सपुष्करः । पुनर्णवा बलाकाश्शिग्रुमोरटदारकाः । गवाक्षी पीवरी कन्दश्चविका तालमूलिका । नागबला कणामूलं कुष्ठं ब्राह्मणयष्टिका । पलोन्मितानि चैतानि जलद्रोणे विपाचयेत् । अष्टभागावशेषन्तु कषायमवतारयेत् । त्रिफलायास्तथा प्रस्थं जलाष्टगुणपाचितं । तस्मादष्टावशेषन्तु कषायं सुपरिस्रुतम् । माक्षिकेण हतस्यापि पुटितस्य यथाविधि । अयसश्चूर्णितं पूतं पलषोड़शसम्मितम् । पलान्यभ्रस्य तावन्ति तावन्ति गन्धकस्य च । द्वे द्वे पले रसस्यापि खल्लितस्य विधानतः । गुड़स्य च पलान्यष्टौ सिताया वाथ पैत्तिके । रक्तपित्ते तु खण्डेन मत्स्यण्ड्या वापि कासवे । गुग्गुलोर्द्विपलं दत्त्वा प्रस्थमेकन्तु सर्पिषः। एवं पाकविधिज्ञस्तु पचेल्लौहं समाहितः । शीतेऽवतार्य्य मधुनः क्षिपेदष्टपलं भिषक् । माक्षिकस्य विशुद्धस्य द्विपलं रजसः क्षिपेत् । शिलाजतोस्तथा चूर्णं पलार्द्धसम्मितं भिषक् । तथैषां प्रक्षिपेच्चूर्णं पलमात्रं पृथक् पृथक् ॥ इत्यादि । अमृतादिब्राह्मणयष्ट्यन्तानां प्रत्येकं पलमितं, वारि ३२ श. शेषः ८ श.। त्रिफला मि. २ श. वारि. ३२ श. शेषः ८ श । शोधितलौहं १६ प. अभ्रं ४ प. रसगन्धकौ ४ प. खण्डः ८ प. गुग्गुलुः २ प. घृतं २ श.। एकत्र लौहपाकः कार्य्यः। शीतले प्रक्षे.मधु ८प.स्वर्णमक्षिकं २प.शिलाजतु ४ तो. । अत्र श्रावणी मुण्डितिका । मोरटमिक्षुमूलं । दारको वृद्धदारकः । दर्भ उलुमूलं। पीवरी शतावरी । गवाक्षी गोरक्षकर्कटी । नागबला गोरक्षचाकुलिया । कुष्ठपुष्कराभ्यां काण्डग्रन्थिभेदेन ग्रहणम् । अथवा भागद्वयग्रहणम् । माक्षिकेण हतस्य निरुत्थमारितस्येत्यर्थः । पुटितस्य सामान्यविशेषपुटितस्य । पलान्यभ्रस्येत्यत्रापि पुटितस्येति सम्बध्यते । तेन प्रथमपरिच्छेदोक्तक्रमेण रसायनाधिकारे वक्ष्यमाण-वृहदमृतसारोक्त-लौहाभ्रसमभिहित-विधिनैव वा चूर्णितपुटितस्येत्यर्थः । तावन्ति गन्धकस्येति चत्वारि पलानीत्यर्थः । गन्धकशुद्धिविधिश्च यथा—गन्धकन्तु समानीय नवनीतामलच्छवि । तत्सर्पिषि विपक्तव्यं यावत्तैलनिभं भवेत् । वस्त्रेणान्तरितङ्कृत्वा ढालयेत्त्रिफलाम्भसि । एवं गन्धाश्मसंशुद्धं तत्तत्कर्म्मसु योजयेत् । अथ रसस्येति पारदरसस्य पलद्वयं । खल्लितस्य मूर्च्छितस्येत्यर्थः । मूर्च्छनं खल्लशिलादिषु औषधचूर्णं रसं वा दत्त्वा विमर्द्य निर्म्मलीकरणमभिधीयते । तत्र तावत् पारदे सिद्धदोषत्रयनिवारणार्थं त्रिभिर्द्रवैः प्रत्येकं सप्तधा मूर्च्छनं कार्य्यम् । पटु लवणं अलम्बुषः कुलाहलं किण्वं मुरावीजं । माक्षिकस्य विशुद्धस्येति स्वरूपतः शोधितया ज्ञेयम् । चित्रकाण्डचूर्णानि प्रत्येकं पलमात्राणि । चतुर्जातकादीनां प्रत्येकमर्द्धपलम् । रस.र.रक्तपि.चि. ।

अमृतागुग्गुलु: । पुं । राजयक्ष्मणि हितः । प्रस्थं गुड़ूच्याः प्रस्थार्द्धं प्रत्येकं त्रिफलापुरं । पक्त्वा द्रोणेऽम्भसः शिष्टे पाकाद्वने ततः क्षिपेत् । कोषे

दन्त्यमृताव्योषविड़ङ्गत्रिफलारजः । प्रत्येकमर्द्धपलिकं त्वक्चूर्णञ्च कार्षिकम्॥ रस.र.वा.र.चि.। चक्रपाणिमते तु गुड़ूची ४ श.गुग्गुलुः २ श.आमलकी २श.विभीतकः २ श.पुनर्णवा २ श.हरीतकी २ श. एकत्र कुट्टयित्वा ६४ शरावत्नारिणि पक्का १६ शरावावशिष्टः क्वाथः कार्य्यः। अथ गालयित्वा पुनः पक्का घनीभूते तत्र दन्त्यादिचूर्णं प्रत्येकं ४तो. त्वक्तः २ तो. प्रक्षेप्यम्। प्रक्षेपश्च ईषदुष्णतायां देयः । मात्रा च यथाग्निबलं देया। च.द.वा.र.चि.। पाठो यथा—अमृतायाश्च द्विप्रस्थं प्रस्थमेकन्तु गुग्गुलोः। प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थमेव च। सर्व्वमेकत्र सङ्कुट्य क्वाथयेन्नल्वणेऽम्भसि। पुनः पचेत्पादशेषं यावत्सान्द्रत्वमागतं। दन्ती चित्रकमूलानां कणा विश्वफलत्रिकं। गुड़ूचीत्वग्विड़ङ्गानां प्रत्येकार्द्धपलोन्मितं। त्वक्तः कर्षमेकन्तु सर्व्वमेकत्र चूर्णयेत्। सिद्धे कोष्णं क्षिपेत्तत्र अमृतागुग्गुलोः परमिति॥ च.द.। अयं भावप्रकाशेऽपि वातरक्ते उक्तः। पाठस्तु मर्म्मार्थस्तुल्य एवेति पाठो न लिखितः। भा.म.२भ.।

अमृताङ्कुरलौहः। पुं, क्ली। उपदंशे लौहविशेषः। तस्यायं पाठः—"पारदं गन्धकं लौहमभ्रं ताम्रं सगुग्गुलुं। भल्लातं पलिकं सर्व्वं धात्र्याः सार्द्धं षड़त्रकं। द्वात्रं पथ्याहरीतक्योर्लोहात् षोड़शिकं हविः। पचेत्प्रस्थे वराक्वाथे लौहपात्रे विधानवित्। सुसिद्धं तत्समश्नीयात् सम्पूज्य गुरुदेवतां। संमर्द्य मधुसर्पिर्भ्यां गुञ्जावृद्ध्या दिने दिने। अत्रानुपानं पयसा नारिकेलोदकेन वा। कुष्ठोक्तामृताङ्कुरलौहादस्य त्रिफलाभागभेदः, अतः पाठद्वयम्। प्रयोगा.उ.द.चि.। भेषजमिदं कुष्ठरोगे हितम्। अत्र पलमेकं रसस्येति रससिन्दूरमिति केचित्। अपरे हिङ्गुलोत्थपारदं व्यवहरन्ति। वृद्धास्तु रससिन्दूरमेव व्यवहरन्ति। रसादिसर्व्वमेकीकृत्य लौहपात्रे त्रिफलाक्वाथेन पचेत्। पाकशेषे त्रिफलाचूर्णं देयम्। र.सा.सं.रस.र.। कुष्ठोक्तो यथा—"हुताशमुखसंशुद्धं पलमेकं रसस्य वै। पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च। गन्धकस्य पलञ्चैकमभ्रकस्य च गुग्गुलोः। हरीतकीविभीतक्योश्चूर्णं कर्षद्वयं द्वयोः। अष्टमाषाधिकं तत्र धात्र्याः पाणितलानि षट्। घृतं द्व्यष्टगुणं लौहात् द्वात्रिंशत्त्रिफलाजलम्। एकीकृत्य पचेत्पात्रे लौहे तद्विधिपूर्व्वकम्। पाकमेतस्य जानीयात् पाकज्ञः कुशली भिषक्"। इत्यादि। हुताशमुखसंशुद्धिः यथा रसार्णवे—रसस्य पञ्चमांशेन गन्धेन लौहपात्रके। लौहदण्डेन च तथा दत्त्वैषन्नवनीतकं। मर्द्दनात्कज्जलिं कृत्वा पिष्टं शालिञ्चिकाद्रवे। वृहद्दोच्यास्तु पित्तेन वेष्टयित्वा निधापयेत्। हण्डिकाया मुखं लिप्त्वा शनैर्मृद्वग्निना पचेत्। गन्धगन्धश्च यावत्स्यात् तद्धुताशमुखं विदुः॥ कश्चित्तु हुताशमुखसंशुद्धमिति गुग्गुलुपर्य्यन्तं संबध्नाति। तेन शोधनजारणादिक्रमेण सर्व्वेषामग्नौ शोधनमाह हरीतकीविभीतक्योः सार्द्धकर्षद्वयं पृथगिति वचनात्। हरीतक्यास्तु ५ तो. विभीतक्याश्च आमलक्याः षट्, पाणितलं १२ तो.। मिलितत्रिफला १६ प. पाकार्थजलं १६ श. शेषः ४श. घृतं १६ प. लौहपात्रे पाच्यम्। वस्त्रपीड़ितं यदा न निःसरति मुद्रा च भवति तदावतार्य्य चूर्णप्रक्षेपः। अस्य पाके सावधानेन भाव्यम्। अमृतसारलौहवदस्य क्रिया ज्ञेया। वृहदपि अमृताङ्कुरलौहं कुष्ठे उक्तम् यथा—सूतं हिङ्गुलसम्भूतं ताम्रं तद्द्विगुणं भवेत्। सुजीर्णलौहं तत्तुल्यमभ्रं भल्लातकं तथा। ताम्रद्विगुणगन्धश्च गुग्गुलुस्तद्द्विधा मतः। त्रिफलायास्तथा चूर्णं प्रत्येकं सूततुल्यकं ताम्राच्चतुर्गुणं सर्पिः तैलमेरण्डजं द्विधा। रसाञ्जनञ्चाभ्रतुल्यं पक्का चैवामृतद्रवैः। चतुर्गुणैर्घृतात्तैलात्त्रिस्तोयमवतारयेत्"॥ इत्यादि। भैष.प्रयोगा.कुष्ठचि.। अस्य रसेन्द्रसारसंग्रहोक्तः पाठः प्रायेण तुल्य एव। केवलं गन्धकस्य पलञ्चैकमित्यत्र—"अभ्रकस्य पलञ्चैकं गन्धकस्य चतुःपलमिति।" कर्षद्वयं द्वयोरिति प्रत्येकं कर्षद्वयमिति। घृतं द्व्यष्टगुणमित्यत्र—"घृतञ्चाष्टगुण"मितिभेदः। अभ्रकस्य पलञ्चैव गन्धकस्य चतुःपलमित्यत्र प्रयोगामृतधृतपाठं न साधु मन्यन्ते भट्टादयो विशिष्टवैद्याश्चेति। र.सा.सं.टी.। रसरत्नाकरः प्रयोगामृतेन तुल्य एव केवलं द्व्यष्टमाषाधिकमित्यत्र अष्टमाषाधिकमिति भेदः। रसेन्द्रचिन्तामणौ च "अष्टमाषाधिकानि" घृतं त्वष्टगुणमिति पाठभिन्नतास्ति। रसे.चि.कुष्ठ.। सा.कौ.। अन्यदम्लपित्ते उक्तम्।

अमृतादिः। पुं। कषायद्रव्यसमूहे यथा—"अमृतवृषपटोलं मुस्तकं सप्तपर्णं खदिरमसितवेत्रं निम्बकं द्वे हरिद्रे" इत्यादि। अयं विसर्पविस्फोटके हितः। असितवेत्रं श्यामा लता। रस.र.।

च.द.विसर्प-चि. । सा.कौ. । प्रयोगा. । अपरः मूत्रकृच्छ्रे यथा—"अमृतं नागरं धात्री वाजिगन्धा त्रिकण्टकं । प्रपिबेद्वातरोगार्त्तः सशूली मूत्रकृच्छ्रवान् ॥ भैष. ।

अमृतादिवटी । स्त्री । विषं २ भा. कपर्द्दभस्म ५ भा. मरिचं ९ भा. जलेन मुद्गमाना वटी कार्य्या । इयं कफे त्रिदोषेऽग्निमान्द्ये च हिता । भा.म.१भ.ज्वरचि. ।

अमृताद्यगुग्गुलुः । पुं। अयं मेदोरोगे हितः। यथा—"अमृता त्रुटिवेल्लवत्सकं कलिपथ्यामलकानि गुग्गुलुम् । क्रमवृद्धमिदं मधुप्लुतं पिड़काश्चौल्यभगन्दरं जयेत्।" अत्र त्रुटिः सूक्ष्मैला । वेल्लं विड़ङ्गं। वत्सकं कुटजत्वक् । एषां क्रमवृद्ध्या भागो ग्राह्यः । भैष.मेद. । भा.म.२भ.मेदचि. ।

अमृताद्यघृतम् । क्ली । वातरक्ते हितं । घृतं ४ श. कल्कद्रव्यं १ श. । पाककाले आमलकीरसं ४ श. वारि १२ श. दत्वा पाच्यम् । आरग्वधः शोणालुफलमज्जा । हृशीरः श्वेतपुनर्णवा । क्षुरकः कोकिलाक्षमूलम् । गन्धर्व्वः एरण्डमूलं । घनः मुस्ता । च.द.वातरोग-चि. । भा.म.२भ. ।

अमृताद्यचूर्णम् । क्ली । आमवाते । गुड़ूची नागरगोक्षुरमुण्डितिकावरुणचूर्णानि प्रत्येकं समभागानि । भा.म.२भ. ।

अमृताद्यतैलम् । क्ली । गलगण्डादौ । मूर्च्छिततिलतैलं ४ श. गुड़ूच्यादीनां शतपलं वारि ६४ श. शेषः १६ श.। उक्तद्रव्याणां मिलितकल्कः १श.। तैलपाकविधिना पाच्यम्। च.द.गलगण्ड-चि.। अथवा गुड़ूच्यादीनां प्रत्येकं १ प. वारि १२८ प. । तैलं पिबेन्नामृतवल्लिनिम्बहिंसाह्वयोवत्सकपिप्पलीभिः । सिद्धं बलावेतसदेवदारु हिताय नित्यं गलगण्डरोगी ॥ तैल ४ श. कल्कार्थ—গুলুঞ্চ, নিমছাল, গুড়কাউলী, কেলেকড়া, কুটজত্বক্,পিপুল,বেলেড়া, বেতস,দেবদারু । मिलित १ श.। भैष.। सिद्धं बलाभ्यामिति । च.द.।

अमृताफलः । पुं, क्ली । पटोले । भा.पू.१भ.। कावेलप्रसिद्धफलवृत्तविशेषे,रुचिफले वा, नास्पाती इति लोके । मद.व.७ ।

अमृतारिष्टम् । क्ली । अरिष्टमिदं विषमज्वरादौ हितं । अत्र गुड़ूच्याः पलशतं दशमूलस्य तथा एकत्र द्रोणचतुष्टयजले पक्त्वा पादशेषं ग्राह्यं। अथ तत्र क्वाथे गुड़स्य तुलात्रयं(৩৭॥০৮সের) गोलयित्वा, कृष्णजीरस्य १६ प. पर्पटस्य २ प. । तथा सप्तपर्ण त्रिकटु मुस्तक नागकेशर कटुकातिविषेन्द्रयवादीनाञ्च प्रत्येकं चूर्णपलं निक्षिप्य आज्यपात्रे मासमात्रं स्थापयेत् । तेनान्तरुत्थिकेनारिष्टं जायते । भैष. ।

अमृतार्णवः । पुं । रसोऽयं अतिसारे ज्वरातिसारे च हितः । मात्रा १ मा. । अनुपानं धान्यजीरक-शालवीजानां यथालाभं देयम् । द्रव्याणि यथा हिङ्गुलोत्थरस लौहगन्धक टङ्गण शटी धान्यकक्षीवेर मुस्तकाम्बष्ठाजीरकातिविषाजीरकाणि छागीक्षीरेण मर्द्दयेत् । भैष.। रस.र.अजाजी जीरकम् । घुणप्रिया अतिविषा । धान्यजीरकयूषेणेति यूषैः प्रदरतरं मुदां श्रेयम् । र.सा.सं.अतिसा.चि. ।

अमृतार्णवरसः । पुं । कासहरोऽयं रसः । अत्र अमृता गुड़ूची । पद्मकं पद्मकाष्ठं । र.सा.सं. कासचि. । रस.र. । भैष. । द्वितीयो रसः वाजीकरणाधिकारे । अत्र सूतभस्म रससिन्दूरम् । र. सा.सं. । अन्यः कासे—"रास्ना विड़ङ्ग त्रिफला रसगन्धकटुत्रिकं । अमृता पद्मकं क्षौद्रं विषतुल्यं सुचूर्णितम् ॥" मात्रा २ गुञ्जा । रस.र.कासचि. । अन्यः राजयक्ष्मणि—"पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्गणं । रास्नाविड़ङ्गत्रिफला देवदारु कटुत्रयम् । अमृता पद्मकं तुल्यं विषञ्चापि विचूर्णयेत्। मधुनाच वटी कार्य्या ।" प्रयोगा.। अन्यः रसेन्द्रसारधृते रसायनाधिकारे । "सूतभस्म चतुर्भागं लौहभस्म तथाष्टकं । अभ्रभस्म च षड़्भागं गन्धकस्य च पञ्चमं । भावयेत्त्रिफलाक्वाथैस्तत्सर्व्वं भृङ्गजद्रवैः । शिग्रुवह्निकटुक्वाथैर्भावयेत्तत्तथा पृथक् । सर्व्वतुल्या कणा योज्या गुड़ैर्मिश्रं पुरातनैः ॥" मात्रा निष्कमिता । र.सा.सं. प्रयोगा.रसायने ।

अमृतार्णवलौहम् । क्ली । कुष्ठाधिकारे । "त्रिकटुत्रिफलालौहं समभागं विचूर्णितं । सर्व्वेषामपि चूर्णानामर्द्धभागं शिलाजतु । गुड़ूचीस्वरसेर्देया भावना रविरश्मिभिः । वारत्रयं ततः शुष्कं घृतेन सह मर्द्दयेत् ॥" मात्रा १मा.मधुना लेह्यं । रस.र. प्रयोगा.। अयम् अमृतार्णवरस इति सेनेऽप्युक्तः । प्रयोगा. ।

अमृतावटिका (गुग्गुलुः) । स्त्री । सद्यो-व्रणघ्नी वटिका । व्रणशोथे इति च.द. । "अमृता-पटोलमूलत्रिफलात्रिकटुक्रमिघ्नानाम् । समभागानां चूर्णं सर्व्वसमो गुग्गुलोर्भागः ॥ प्रतिदिवसमेकैकां गुड़िकां खादेदक्षप्रमाणाम् । रस.र. ।" अक्षमा-नादधिकं न कर्त्तव्यं कोष्ठादिकबुद्धाल्पमपि। प्रयो-गा. । द्वितीया वृहदभिधाना व्रणे हिता । यथा— "अमृतायाः पलशतं दशमूलशतं तथा । पाठामूर्व्वा बला द्वे च तथा गन्धर्व्वहस्तकः ॥ पृथग्दशपलानेता-नभयानां शतं तथा । विभीतकशते द्वे च धात्री शतचतुष्टयं ॥ गुग्गुलोः प्रस्थसंयुक्तं जलद्रोणद्वये निशाम् । एकां पर्य्युषितां पक्वा चतुर्थांशावशेषि-ते ॥ क्काथे गुग्गुलुमालोड्य लौहपात्रे पचेद्बनं । शीते चैतानि संचूर्ण्य प्रक्षिपेत्पलिकानि तु ॥ त्रि-फलात्रिवृतादन्तीव्योषच्छिन्नाश्वगन्धकान् । विड़ङ्गं चित्रकं चोचं सूक्ष्मैलां नागकेशरम् ॥" इत्यादि । पोट्टलिबद्धगुग्गुलुना सह पर्य्युषितं कर्त्तव्यं । ततो-ऽपरदिने क्काथकरणम् । कैशोरगुग्गुलुवत् सर्व्व-मपरं ज्ञेयम्। प्रयोगा.व्रणचि. । रसरत्नाकरधृतपाठ-स्तुल्य एव। तत्र अस्य पत्री यथा—घृतपिष्टितगुग्-गुलुः १६ प. क्काथार्थं गुड़ूची १०० प. दशमूलं १०० प. आकनादी, मूर्व्वा, वाड़ियाला, श्वेतवा-ड़ियालामूलं, एरण्डमूलं, प्रत्येकं १० प. सास्थि-हरीतकी १००, वहेड़ा १००, आमलकी ४००, पाकार्थं देयं जलं द्रोणत्रयमितं (१९२श.) अत्रैव पोट्टलीबद्धं गुग्गुलुं दत्त्वा पाकशेषजलं ४८ श. कर्त्तव्यम्। अत्रैव क्काथे क्काथस्थापितगुग्गुलुं पिष्ट्वा पाचनीयम् । सिद्धे प्रक्षेपार्थं त्रिफला तेउड़ीमूलं त्रिकटु दन्तीमूलं गुड़ूची अश्वगन्धा विड़ङ्गं तेजपत्रं गुड़त्वक् सूक्ष्मैला नागेश्वरः गुण्ठा, एषां प्रत्येकं १ प. एकीकृत्य स्निग्धभाण्डे स्थाप्यम् । मात्रा ८ माषा। उष्णोदकमनुपेयम् । रस.र. व्रणशोथ-चि. । भा.म.२भ. । अन्या कुष्ठरोगे वातरक्ते च हिता । तस्या अयं पाठः—अमृतायाः पलशतं दशमूल्यास्तथा शतं । पाठा मूर्व्वा बला तिक्ता दार्वीगन्धर्व्वहस्तकाः । एषां दशपलान् भागान् विभीतक्याः शतं हरेत् । द्वे शते च हरीतक्याः आमलक्यास्तथा शतम् । जलद्रोणत्रये पक्वा अष्ट-भागावशेषितं । प्रस्थं गुग्गुलुमाहृत्य प्रस्थार्द्धञ्च घृतं पचेत् । पाकसिद्धौ प्रदातव्यं गुड़ूच्याः सत्त्वमेव च । पलद्वयं तथा शुण्ठ्याः पिप्पल्याश्च पलद्वयम् ॥ इ-त्यादि । भैष.कुष्ठ-चि. ।

अमृताष्टकः । पुं, क्ली। गुड़ूच्याद्यष्टद्रव्यसिद्धक-षाये । एष पित्तश्लेष्मज्वरे हितः । च.द.चि. । 'गुड़ूचीन्द्रयवारिष्टपटोलं कटुरोहिणी । नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम् । अमृताष्टक-इत्येष पित्तश्लेष्मज्वरापहः ॥" अरिष्टं निम्बत्वक् । रोहिणी कटुकी । एषां प्रति २०रत्तिकं वारि ३२ तो. शेषः ८ तो.। प्रक्षेपार्थं पिप्पलीचूर्णं ॥० तो.। सा.कौ. । [व.४ ।

अमृतासङ्गम् । क्ली । खर्परिकातुत्थे । मद.

अमृतासङ्गमः । पुं । खर्परीतुत्थे । তুঁতে । मं मोरचूत । वै.निघ. ।

अमृताह्वम् । क्ली । अमृतफले, नास्पातीति लोके । हिं अपो । मद.व.६ । गुणाः—गुरु वातघ्नं स्वादु त्रिदोषघ्नञ्च । 'नास्पाती' मुद्गलदेशे प्रचुरं लभ्यते । भा. । खर्वूजे । मद.व.६ ।

अमृताह्वयतैलम् । क्ली । वातरक्ते तैलम् । पाठो यथा—"गुड़ूची मधुकं क्षुद्रपञ्चमूलं पुनर्न-वा ।रास्नासैरण्डमूला च जीवनीयानि लाभतः । पलानां शतिकैर्भागैर्बला पञ्चशतं भवेत् । कोलं विल्वं यवान् माषान् कुलत्थांश्चाढ़कोन्मितान् । काश्मर्य्याश्च शुष्कानां द्रोणं द्रोणशतेऽम्भसः । साधयेज्जर्जरं पूतं चतुर्द्रोणञ्च शेषयेत् । तैलद्रोणं पचेत्तेन दत्त्वा पञ्चगुणं पयः । पिष्ट्वा त्रिपलिकञ्चैव चन्दनोशीरकेसरम्। पत्रैलागुरुकुष्ठानि तगरं मधु-यष्टिकां । मञ्जिष्ठार्द्धपलञ्चैव तत्सिद्धं सर्व्वयोगि-कम् ॥" भा.म.२भ.वातरोगचि. ।

अमृतेश्वररसः । पुं।अयं रसो यक्ष्मणि हितः। रसभस्मामृतासत्वं लौहं मधुघृतान्वितम् । अमृते-श्वरनामायं षड्गुञ्जो राजयक्ष्मणि ॥ भा.म.२भ। रसे-चि. । प्रयोगा. ।

अमृतोत्था । स्त्री । सुधामूलायाम्, सालम्-मिछरीति भाषा । अत्रि. ।

अमृतोत्पन्नम् । क्ली । तुत्थे । खर्परीतुत्थे । खापर। मं कालखापरी । रा.नि.व.१३। [नि.व. ।

अमृतोत्पन्ना । स्त्री । गृहमक्षिकायाम् । रा.

अमृतोद्भवः । पुं । धन्वन्तरौ । रत्ना. । क्ली ।

(५३पृष्ठस्थ-प्रथमस्तम्भस्य अष्टमपङ्क्त्यनन्तरं पाठ्यमेतत्)

अमोघा । स्त्री। पाटलावृक्षे । भा.। च.सू.४अ.। हरीतक्याम्। विड़ङ्गे । मे.। श्वेतपाटलायाम् । घ-घ्नभेदे । रा.नि.व.२३ ।

अम्बकः । पुं । वकुलवृक्षे । जटा. । क्ली । नेत्रे । हे.च. । ताम्रे । रा.नि.व.१३ ।

अम्बरम् । क्ली । कार्पासे । কাপাস । र.मा. । अभ्रधातौ । অভ্র । रा.नि.व.१३ । भैष. । वसन्तकुसुमाकरे । तन्नामकगन्धद्रव्ये । विश्वः ।

अम्बरदः । पुं । कार्पासवृक्षे । वै.निघ.।

अम्बरा । स्त्री । कार्पासवृक्षे । प.मु.।

अम्बरातकः (रीयः) । पुं। आम्रातकवृक्षे । আম্‌ড়া গাছ। जटा. । [भर्जनपात्रे । अम. ।

अम्बरि(री)षः । पुं, क्ली । आम्रातकवृक्षे । भर्जनपात्रे । अम. । [ज्जाते ।

अम्बष्ठः । पुं। देशविशेषे । वैश्यायां ब्राह्मणा-

अम्बष्ठका (की) } **अम्बष्ठा (ष्ठिका)** } स्त्री । (Stephania hernandifolia, Syn cissampelas hexandra.) पाठायां । নিমুকা। আক্‌নাদি। रा.नि.व.६ । पटाडू इति हिमालये । भार्ग्यां । र.मा. । लक्षणामूले । भैष. स्त्रीरोग.चि.पुष्यानगचूर्णे । अम्ललोण्याम् । আম্‌রুল । रा.नि.व.५ । भा.पू.१भ. । यूथिकायाम् । যুঁই । प.मु. । मयूरशिखायाम् । वा.सू.प्रियङ्ग्वादिः । "अम्बष्ठामधुकं नमस्कारी ।" आम्रातके । আম্‌ড়া । क्षुद्रक्षुपविशेषे । अम्बाड़ा, अम्बरी इति च दक्षिणापथे । हिं मोहुया । माचिका, साकुरुण्ड इति च पश्चिमदेशे ख्याता । পূদিনা । सु. सू.३८अ. । रस.र.पुष्यानगचूर्णे । गुणाः—कषायाम्ला कफघ्नी कण्ठरोगघ्नी वातरोगहरी रुच्या दीपनी च । रा.नि.व.४ ।

अम्बष्ठादिः । पुं। पाठादिगणविशेषे । यथा—अम्बष्ठा-धातकीकुसुमसमङ्गाकट्वङ्गमधुकविल्वपेशी-रोध्रसावरोध्रपलाशनन्दीवृक्षपद्मकेशराणीति । गुणाः—"गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ । सन्धानीयौ हितौ पित्ते व्रणानाञ्चापि रोपणौ ॥" सु.सू.३८अ. ।

अम्बष्ठी । स्त्री । कटुकाभेदे । কট্‌কীবিশেষ । यथा—"रक्तकाण्डरुहाम्बष्ठी कटुका चापरा स्मृता ।" द्रव्याभि. ।

अम्बा (लिका) । स्त्री । अम्बष्ठायाम् । পুদিনা । पाठायाम् । আক্‌নাদি । रा.नि.व.४ ।

अम्बिका । स्त्री । अम्बष्ठायाम्। পূদিনা । भा. पू.१भ. । मायाफलवृक्षे । हिं मयनफल । मद.व. ४ । कटुकाम् । श.च. ।

तुल्ये। रा.नि.व.१२। खर्परीतुल्ये। खापर। रा. नि.व.। आमलक्याम्।

अमृतोद्भवा । स्त्री। आमलक्याम्। मं आंवली। नागरवल्लयाम्। पान। वै.निघ.।

अमृतोपमम् । क्ली। खर्परीतुल्ये। तूँते। मं मोरचूत। वै.निघ.। [ते द्रव्ये। वै.निघ.।

अमृतोपहिता । स्त्री। तीपचिनी इति ख्या-

अमेध्यम् । क्ली। पुरीषे। अ.र.।

अम्बु । क्ली। जले। रा.नि.व.१४। बालके। च. द.ज्वरातिसार-चि.। "किराताम्बुयवासकम्।" भैष. शोथ-चि.पुनर्णवातैले।

अम्बुकः । पुं। श्वेतार्कमन्दारे। रक्तैरण्डे।

अम्बुकण्टकः । पुं। नक्रे। त्रिका.।

अम्बुकन्दः । पुं। शृङ्गाटके। वै.निघ.।

अम्बुकिरातः (टः)। पुं। नक्रे। त्रिका.।

अम्बुकीशः । पुं। गोधायाम्। शिशुमारे। त्रिका.।

अम्बुकुक्कुटी (टिका) । स्त्री। जलकुक्कुट्यां। पानकउड़ी। मं पानकोंवड़ी। See प्लवः।

अम्बुकूर्म्मः । पुं। गोधायाम्। वै.निघ.।

अम्बुकृष्णा । स्त्री। जलपिप्पल्यां। काँचड़ा दाम्। वै.निघ.। [सा.सं.।

अम्बुकेशरः । पुं। कोलङ्गवचे। लेबू। र.

अम्बुचरः । पुं। जलचरे। कच्छटे। वै.निघ.।

अम्बुचामरम् । क्ली। शैवाले। जटा.।

अम्बुचारिणी । स्त्री। स्थलपद्मिन्यां। हिं थल-पद्म। वै.निघ.।

अम्बुजः । पुं। हिज्जलवृक्षे। अम.। मत्स्यादौ। भा.। जलवेतसे। कच्छटे। वै.निघ.। त्रि। जल-जातमात्रे। क्ली। कमले। मं.जविकं। [वै.निघ।

अम्बुजामलकी । स्त्री। पानीयामलके।

अम्बुटः । पुं। अश्मन्तकवृक्षे। आवुटा। मं आ-पटा। रा.नि.व.९।

अम्बुतालः । पुं। शैवाले। त्रिका.।

अम्बुदः । पुं। मुस्तायां। सि.यो.कामला.चि. मूर्व्वाद्यघृते वृन्दः। "पटोलाम्बुददारुभिः।"

अम्बुधरः । पुं। नागरमुस्तायां। भद्रमुस्तायां। वै.निघ.।

अम्बुधिः । पुं। सागरे।

अम्बुधिफेनः । पुं। समुद्रफेने। भा.।

अम्बुधिश्रवाः । स्त्री। गृहकन्यायाम्। घृत-कुमारी। मं कोड़फल। रा.नि.व.५। [भा.।

अम्बुनाम । क्ली। ह्रीवेरे। वाला। भा.। बालके।

अम्बुपत्रा (त्रिका) (पत्री) । स्त्री। उच्च-टायाम्। र.मा.।

अम्बुप्रसादः
अम्बुप्रसादनः } पुं। निर्म्मलीफलवृक्षे। रा.नि. व.११। See कतकः।

अम्बुप्रसादनफलम् । क्ली। निर्म्मलीफले। वै निघ.।

अम्बुमयूरकः । पुं। जलापामार्गे। वै.निघ.।

अम्बुमात्रजः । पुं। शम्बूके। हे.च.।

अम्बुयष्टिका । स्त्री। भार्ग्यां। वामणहाटी। र.मा.। [वै.निघ.।

अम्बुरुहा । स्त्री। पद्मिन्यां। स्थलपद्मिन्याम्।

अम्बुवल्लिकः । पुं। क्रमिशङ्खे। वै.निघ.।

अम्बुवल्लिका । स्त्री। कारवेल्लयाम्। वै.निघ.।

अम्बुवल्ली । स्त्री। क्षुद्रकारवेल्लयां। जलपिप्-पल्यां। वै.निघ.। [वै.निघ.।

अम्बुवारिणी । स्त्री। स्थलकमलिन्याम्।

अम्बुवासिनी । स्त्री। रक्तपाटले।

अम्बुवासी । पुं। रक्तपाटले। वै.निघ.।

अम्बुवाहः । पुं। मुस्तके। चि.क्र.क.वल्ली प्रदर-चि.। [रत्ना.।

अम्बुवेतसः । पुं। जलवेतसे। मं लव्हाला।

अम्बुशिरीषिका
अम्बुशिरीषी } स्त्री। जलशिरीषे। वै.निघ.।

अम्बुशुक्तिः । स्त्री। जलशुक्तौ। झिनुक। मं जलशिंपी। वै.निघ.। [त्रिका.।

अम्बुसर्पिणी । स्त्री। जलौकसि। जोँक।

अम्बुसादनम् । क्ली। निर्म्मलीवीजे। वै.निघ.।

अम्बुसारा । स्त्री । कदलीवृक्षे।भा.पू.१भ.फ.व.।

अम्बुसाह्वः । पुं । कुन्दपुष्पक्षुपे । वै.निघ. ।

अम्भः । पुं । जले । रा.नि.व.१४ ।

अम्भःपा । पुं । चातकपक्षिणि ।

अम्भःसारः । पुं । मुक्तायां । वै.निघ. ।

अम्भःसूः । स्त्री । धूम्बूके । मं धुकें ।

अम्भोजम् । क्ली । पद्मे । वारिवेतसे ।

अम्भोजनालः । पुं । पद्मनाले । वै.निघ. ।

अम्भोजा । स्त्री । वल्लीयष्टीमधुनि । वै.निघ. ।

अम्भोदः । पुं । भद्रमुस्तायाम् । रा.नि.व.६। च.द.यक्ष्म-चि.एलादिमन्थे । प्रपौण्डरीके । प.मु. ।

अम्भोधिपल्लवः । पुं । प्रवाले । मं पोंवलें । रा.नि.व.१३ ।

अम्भोरुहम् । क्ली । पद्मे । च.द.र.पि.चि. ।

अम्भोरुहकेशरम् । क्ली । पद्मकेशरे । च.द.र.पि.चि. ।

अम्रः । पुं । आम्रवृक्षे । आम् गाछ । रा.नि. । See आम्रः। माचिकायां। पूदिना। हिं मौइया । अम्लवेतसे । रा.नि. ।

अम्रम् । क्ली । आम्रफले ।

अम्रगन्धहरिद्रा । स्त्री । (Curcuma reclinata.) आम्रहरिद्रायाम् । আমহলুদ। हिं आमहलदी ।

अम्रवेतसः । पुं । अम्लवेतसे ।

अम्रसारः । पुं । अम्लवेतसे । रा.नि. ।

अम्रातः (कः) । पुं । (Spandias mangifera.) Hogplum. आम्रातकवृक्षे । আমড়া গাছ । हिं अम्बाड़ा । मं अंबाडाचें झाड़ । श.मा. । चिका. । See आम्रातकः ।

अम्लः । पुं । षड्रसान्यतमरसे । অম্বল রস । स च जम्बीरमातुलुङ्गफलादिषु व्यक्तः। गुणाः—लघु, उष्णः, रुचिकरः, दीप्तिकरः,हृदयतर्पणः, वातानुलोमनः, बल्यः, कण्ठदाहकरश्च । रा.नि.व.२०। तद्विपाकोऽम्लः तद्विपाकगुणस्तु पित्तकृत् वातश्लेष्मरोगघ्नश्च । सु.सू. । प्रीतिकरः पाचनः मार्दवकरश्च । अतिसेवनात् भ्रान्तिकुष्ठकफपाण्डुकार्श्यकासजनकः। रा.नि.व.१२ । पाचनः रुचिकरः पित्तलः कफजनको रक्तवर्द्धकः लघुः लेखनः उष्णवीर्य्यः स्पर्शशीतलः सङ्कोचनः क्लेदनो वातघ्नः स्निग्धः तीक्ष्णः सारकः शुक्रविबन्धानाहदृष्टिघ्नः हर्षणश्च । अतिसेवने—भ्रमदङ्दाहतिमिरज्वरघ्नः, शोथविस्फोटकुष्ठपाण्डुत्वकृच्च । भा.पू.१भ. । लघुत्वं पाचकत्वं पित्तश्लेष्मवान्तिक्लेदत्वमुष्णत्वं वातघ्नत्वञ्च। राज.।

अम्लम् । क्ली। अम्लवेतसफले । काञ्जिके । घोले । रा.नि.। बदरफले । सि.यो.अरोचक-चि. । बर्बरचन्दने। रा.नि.व.१२ ।

अम्लकः । पुं । लकुचवृक्षे । श.र. ।

अम्लकरञ्जः । पुं। करञ्जविशेषे। टक्करञ्ज। तत्फलगुणाः—पिपासाघ्नं गुरु रुचिकरं पित्तकरञ्च । राज.।

अम्लका । स्त्री । पालङ्कशाके । পালং শাক । प.मु. । पलाशीलतायाम् । रा.नि.व.४ ।

अम्लकाञ्जिकम् । क्ली । काञ्जिके । কাঁজি । च.द.ग्रहणी-चि.महाषट्पलघृते ।

अम्लकाण्डः । पुं । शुक्लरसोने । वै.निघ.। क्ली। लवणतृणे । নোণা ঘাস । रा.नि.व.८ ।

अम्लकूचिः । पुं । वृक्षविशेषे ।

अम्लकेशरः । पुं। मातुलुङ्गे। টাবালেবু গাছ। प.मु. । दाड़िम्बवृक्षे । [লেবু।वै.निघ.।

अम्लकेसरी । पुं। अम्लरसनिम्बुकवृक्षे। গোঁড়া

अम्लकोशः (शाकः) । पुं । तिन्तिड़ीवृक्षे । मद.व.६ । [मं अंबटताक । वै.निघ. ।

अम्लगोरसः । पुं । अम्लतक्रे । टक् ঘোল ।

अम्लचाङ्गेरी । स्त्री। चाङ्गेरीभेदे । टक् আমরুল । च.चि.३अ.अगु.तैले. ।

अम्लचुक्रिका । स्त्री । चिञ्चाम्ले । তেঁতুলের অম্বল । रा.नि.व.११ । See चिञ्चासारः ।

अम्लचूड़ः । पुं । शाकाम्ले । चिञ्चासारे। তেঁতুলের অম্বল । रा.नि.व.११ । अम्लशाके । চুকা পালঙ্‌ । रा.नि. ।

अम्लजम्बीरः । पुं । अम्लरसनिम्बूकवृक्षे ।

टक् লেবু গাছ। मं इडनिंबू। रा.नि.व.११। See निम्बूक:।

अम्लटक: । पुं। अश्मन्तकवृक्षे। अम्न কুচাই।

अम्लवक् । पुं। प्रियालवृक्षे। मं चारोळी।

अम्लदोलक: । पुं। चुक्रे। চুকা পালঙ্। मं अंबोती। वै.निघ.।

अम्लद्रव: । पुं। वीजपूरादिरसे। भा.म. १भ.जिह्वाकल्प.चि.। "अम्लद्रव: संशमयेद्रसज्ञां ।"

अम्लद्रव्यम् । क्ली। वीजपूरादौ। तत्रै.वै.निघ.।

अम्लनायक: । पुं। अम्लवेतसे। থৈকল। मं आम्लवेतस। रा.नि.व.६।

अम्लनिम्बुक: । पुं। महाम्लनिम्बुके। গোড়া লেবু। मं मोटें इरनिम्बू। वै.निघ.।

अम्लनिशा । स्त्री। शट्याम्। শটী। रा.नि.।

अम्लपञ्चकम् । क्ली। १ कोलदाड़िमवृक्षाम्ल-चुक्रिकाम्लवेतसेषु।२जम्बीरनारङ्गाम्लवेतसतिन्तिड़ी-वीजपूरेषु। रा.नि.व.२१। See पञ्चाम्लम्।

अम्लपत्र: । पुं। दण्डालुके। থাম্ আলু। वै. निघ.। अश्मन्तकवृक्षे। रा.नि.व.९। क्षुद्रपत्र-तुलसीवृक्षे। र.मा.।

अम्लपत्रम् । क्ली। चुक्रशाके। रा.नि.व.७।

अम्लपत्रक: । पुं। भेण्डायाम्। अश्मन्तकवृक्षे। অম্ন কুচাই, আবুটা। रा.नि.व.९। मद.व.१। अम्ललोणिकायाम्। আমরুল। भा.पू.१व.।

अम्लपत्रा । स्त्री। शुक्रलतायां। ওকড়া। प.मु.।

अम्लपत्रिका । स्त्री। चाङ्गेर्य्याम्। ক্ষুদে নুনী। नुनी इति लोके। आवेता इति हिन्दी। रा.नि.व.५।

अम्लपत्री । स्त्री। पलाशीलतायाम्। रा.नि.व.४। चाङ्गेर्य्यां। रा.नि.व.५। क्षुद्राम्लिकायाम्। খুদে নুনী।

अम्लपनस: । पुं। लिकुचवृक्षे। ডেলো, মান্দার গাছ। मं ओटीचे झाड़। वै.निघ.।

अम्लपर्णिका } **अम्लपर्णी** } स्त्री। वृक्षविशेषे। सुरपर्ण्याम्। भा.। गुणा:—अम्लपर्णी वात-कफशूलस्य च विनाशिका। वै.निघ.।

अम्लपादप: । पुं। वृक्षाम्ले। তেঁতুল গাছ। मं कोकंबी। वै.निघ.।

अम्लपित्तम् । क्ली। रोगविशेषे। तल्लक्षणम्— विरुद्धदुष्टाम्लविदाहि पित्तप्रकोपि पानान्नभुजो विदग्धं। पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्त:॥ अविपाक: क्लमोत्क्लेश: तिक्ताम्लो-द्गारगौरवै:। हृत्कण्ठदाहारुचिभिरम्लपित्तं वदेद्भि-षक्॥ तच्च द्विधा—अधोगमूर्द्धगञ्चेति। मा.नि.।

अम्लपित्तान्तकमोदक: । पुं। अम्लपित्ते योगविशेष:। अत्र शुण्ठी ८ प. पिप्पली ८ प. गुवाकचूर्णं ८प.घृतं ४श.एकत्र पाक:। पाकसिद्धौ एषां प्रक्षेप: यथा लवङ्गचूर्णं वचाचूर्णं कुष्ठचूर्णं नागकेशरचूर्णं यमानीचूर्णं रक्तचन्दनचूर्णं रास्ना-चूर्णं कृष्णजीरकचूर्णं यष्टिमधुचूर्णं देवदारुचूर्णं त्रिफलाचूर्णं तेजपत्रलवङ्गेलाचूर्णं सैन्धवं हवुषाफल-चूर्णं शटीमदनफट्फलचूर्णं जटामांसीचूर्णं अभ्रं रङ्गं रौप्यं तालीशचूर्णं पद्मकाष्ठचूर्णं मूर्व्वाचूर्णं वराहक्रान्ताचूर्णं वंशलोचनं पिप्पलीमूलचूर्णं श-तावरीचूर्णं शतपुष्पाचूर्णं पीतभिण्टीमूलचूर्णं जा-तीकोषचूर्णं जातीफलचूर्णं काकोलीमुस्तकपिप्-पलीकर्पूरविड़ङ्गवनयमानीनां चूर्णं बलागुड़ूच्यपा-मार्गवीजगोक्षुरवीजचन्दनदेवताड़ानां चूर्णं लौहं कांस्यञ्चेति द्रव्यजातं प्रत्येकं २ तो. स्वर्णं १ तो.। भैष.।

अम्लपित्तान्तकरस: । पुं। रसोऽयमम्लपि-त्तघ्न:। रसे.चि.। अत्र तुल्यां पथ्यामिति सर्व्व-चूर्णसमां हरीतकीम्। र.सा.सं.। मृतसूतार्कलौ-हानां तुल्यां पथ्यां विमर्द्दयेत्। माषमात्रं लिहेत् क्षौद्रैरम्लपित्तप्रशान्तये॥ भैष.।

अम्लपुरम् । क्ली। वृक्षाम्ले। रा.नि.व.६।

अम्लपुष्पिका । स्त्री। आरण्यशणवृक्षे। বন্য শণ। मं रानताग। वै.निघ.।

अम्लपूरम् । क्ली। तिन्तिड्याम्। তেঁতুল। मं कोकम्बी। रा.नि.व.६।

अम्लफल: । पुं। आम्रवृक्षे। रा.नि.व.११।

अम्लफलम् । क्ली। वृक्षाम्ले। তেঁতুল। रा. नि.व.६। [कण्टारी। वै.निघ.।

अम्लफला । स्त्री। कण्टारिकायाम्। मं लघु-

अम्लबदरः । पुं । अम्लकोलिकायाम् । টক কুল । च.सू.४अ । [চুকা পালঙ্। वै.निघ. ।

अम्लभेदनः । पुं । अम्लवेतसे । रा.नि.। चुक्रे ।

अम्लमारीषः । पुं । अम्लशाकविशेषे । অম্ল নটিয়া । हिं मारसा । गुणाः —"अम्लमारीषको दोषकोपनो मधुरः पटुः ।" वै.निघ. ।

अम्लमूलकम् । क्ली । व्युषितकाञ्जिकपक्वमूलके । "काञ्जिकं व्युषितं पक्वं मूलकं त्वम्लमूलकम्।" प.प्र.३ख. । च.द.संग्रहणी-चि.बृहच्चुक्र. ।

अम्लमेहः । पुं पित्तजन्यमेहरोगभेदे । अत्र रोगी अम्लरसगन्धं मेहति । सु.नि.६अ. ।

अम्लरुहा । स्त्री। मालवदेशप्रसिद्धनागवल्लीभेदे। गुणाः —रुचिकरी दाहघ्नी गुल्महरी आध्मानहरी च । रा.नि. ।

अम्ललोणिका / **अम्ललोणी** स्त्री । (Oxalis corniculata.) चाङ्गेर्यां । আমরুল শাক । मं चुका । अ.टी. । गुणाः—दीपनी रुच्या रुक्षोष्णा कफवातघ्नी पित्तला अम्ला ग्रहण्यर्शः-कुष्ठातीसारघ्नी च । भा.पू.१भ. । मात्रा २—३ माषा । पालङ्कविशेषे । চুকা পালঙ্। र.मा. ।

अम्लवती । स्त्री । चाङ्गेर्याम् । আমরুল । रा.नि.व.५। क्षुद्राम्लिकायां । খুদে নুনী ।

अम्लवर्गः । पुं । चाङ्गेरी-लकुचा-अम्लवेतस-जम्बीरक-वीजपूरक-नागरङ्ग-दाड़िम-कपित्थाम्लवीजाम्लकाम्बष्ठा-करमर्द्दक-तिन्दुककोल-तिन्तिड़ीषु । अम्बष्ठासहितं विरेतदुदितं पञ्चाम्लकं तद्द्वयं, विज्ञेयं करमर्द्दनिम्बुकयुतं स्यादम्लवर्गाह्वयम् । रा.नि.व. २२। अम्लवेतसजम्बीरलुङ्गाम्लचणकाम्लकाः । नागरङ्गं तिन्तिड़ी च चिञ्चाफलञ्च निम्बुकम्। चाङ्गेरी दाड़िमञ्चैव करमर्द्दं तथैव च । एष चाम्लगणः प्रोक्तो वेतसाम्लसमायुतः ॥ र.सा.सं. । [रा.नि.व.७ ।

अम्लवल्ली (ल्लिका) । स्त्री । त्रिपर्णीकन्दे ।

अम्लवाटकः । पुं । आम्रातकवृक्षे । मं आंवाड़ा । वै.निघ. ।

अम्लवाटा / **अम्लवाटिका** / **अम्लवाटी** स्त्री । नागवल्लीभेदे । পানবিশেষ । मं अंबाड़े पर्ण । रा.नि.व.११। See नागवल्ली।

अम्लवातकः (वाड़कः) । पुं । आम्रातकवृक्षे । আম্ড়া গাছ ।

अम्लवाष्पः । पुं । मं आंवटमाठ ।

अम्लवासुकः । पुं । चाङ्गेर्याम् । আমরুল । मं चुका । वै.निघ. ।

अम्लवास्तु(स्तू)कम् । क्ली । चुक्रनामपत्रशाके । অম্লবেতুয়া, টাঙ্গাবেতো इति भाषा । रा.नि.व ७ ।

अम्लविदुलः । पुं । अम्लवेतसे । वै.निघ. ।

अम्लवीजम् । क्ली । वृक्षाम्ले । তেঁতুল । रा.नि.व.६ । See तिन्तिड़ी । [भा.पू.१भ. ।

अम्लवृक्षं (कम्) । क्ली,पुं । वृक्षाम्ले। তেঁতুল।

अम्लवेतसः (कः) । पुं, क्ली । (Ruxem vesicarius) country sorrel. स्वनामख्यातक्षुपे। অম্লবেতস । हिं आमलटास् । थैकल इति च.द. । च.द.ज्व.चि. । सिन्धुकूषणैः साम्लवेतसैः । च.सू.२अ. । गुणाः—अत्यम्लः कषायोष्णः वातघ्नः कफार्शोगुल्मारोचकहरश्च । भोटदेशे प्रसिद्धः । रा.नि.व.६ । लघुदीपनमत्यम्लं भेदनं हृद्रोगशूलगुल्मघ्नं पित्तलं लोमहर्षणं रुक्षं विण्मूत्रदोषहरं प्लीहोदावर्त्तघ्नं हिक्कानाहारुचिश्वासकासाजीर्णवान्तिहरं वातकफजरोगघ्नं छागमांसद्रवकरं चणकाम्लतुल्यगुण लौहसूचीद्रावकञ्च । भा.पू. १भ. । तत्पक्वफलगुणाः—दोषघ्नं गुरु दारकञ्च । राज. । चुक्रे । চুকা পালঙ্। हिं चुकेका शाक । प.मु. । अम्ललोण्याम्। च.द.काङ्काय.गु. ।

अम्लशाकम् । क्ली । वृक्षाम्ले । তেঁতুল । रा.नि.व.६। पुं । चुक्रनामपत्रशाके । অম্লকুচাই, টক পালঙ্, চুকা পালঙ্। गुणः—अत्यम्लं वातघ्नं दाहश्लेष्मघ्नञ्च । सशर्करस्य तस्य गुणः—दाहपित्तकफहरत्वम् । रा.नि.व.७ ।

अम्लशाकाख्यम् । क्ली । चुक्रनामकपत्रशाके। টক পালঙ্। मं थोरचुका । रा.नि.व.७ ।

अम्लष्टा । स्त्री । चाङ्गेर्याम् । मं आंबोती ।

अम्लसरा । स्त्री । नागवल्लीभेदे । रा.नि.व.११।

अम्लसारः । पुं । अम्लवेतसे । रा.नि.व.६ । निम्बुके । रा.नि.व.११। हिन्तालवृक्षे । रा.नि.व.६।

अम्लसारं (कम्) । क्ली । काञ्जिके । चुक्रनामककाञ्जिकभेदे । रा.नि.व.१५ ।

अम्लस्कन्धः । पुं । वा.सू १०।२२५ ।

अम्लस्तम्भनिका । स्त्री। तिन्तिड्यां। वै.निघ.।

अम्लहरिद्रा । स्त्री । शट्याम् । रा.नि.व.६ ।

अम्ला । स्त्री । चाङ्गेर्य्यां । আমরুল । रा.नि.व.५ । वनमातुलुङ्गे । अम्लवेतसे । रा.नि.व.६ । श्रीवल्लीवृक्षे । वर्षामल्लिका । रा.नि.व.८ । तिन्तिड्यां । रा.नि.व.११ । भा.पू.१भ.फलव. ।

अम्लाङ्कुशः । पुं । अम्लवेतसे । रा.नि.व.६ ।

अम्लाटनः । पुं । महासहावृक्षे । मे. ঝাঁটী বিশেষ । আম্লা इति च भाषा । हिं कटसरय्या लालगुलमखखन । आयनाट् इति दक्षिणदेशे। বাণপুষ্প इति च गौड़े ख्यातः । गुणाः — कषायो मधुरस्तिक्त उष्णवीर्य्यः स्निग्धश्च । भा.पू.१भ.पु.व.। ४ख.म.भ.योनिरो.चि. । चि.क्र.क.वल्ली.गर्भवेदनाहरयोगे ।

अम्लाख्यः । पुं । करुणनिम्बुके । নারাঙ্গা লেবুর গাছ । प.मु. । [१भ.पु.व. ।

अम्लातः (कः) । पुं । अम्लाटनवृक्षे । भा.पू.

अम्लातकी । स्त्री। पलाशीलतायां। रा.नि.व.४।

अम्लादानः । पुं । कुरण्टकवृक्षे । पीयावांसा इति प्रसिद्धे । वाणपुष्प इति गौड़े ।

अम्लादिः । पुं । तिन्तिड्याम् । रा.नि.व.६ । चुक्रनामकपत्रशाके । रा.नि.व.७ ।

अम्लाध्युषितः । पुं, क्ली । सर्व्वगताक्षिरोगे । लक्षणम् — "श्यावं लोहितपर्य्यन्तं सर्व्वञ्चाक्षि प्रपच्यते । सदाहशोथं सास्रावमम्लाध्युषितमम्लतः ॥" मा.नि. । करुणनिम्बुके ।

अम्लानः । पुं ।(Gomphrena globosa.) बन्धुजीवकवृक्षे । বাকুলীবৃক্ষ । त्रिका. । झिण्टिकाभेदे । अम्लानी झिण्टिकाभेदे । विश्व. । अम्लाटनवृक्षे । আম্লা इति भाषा । भा.म. ४भ. योनिरो.चि. । "अदंष्ट्रमधुकक्षुद्राम्लानैः ।" महासहायाम् । मे.नत्रिकं । महाराजतरुणीवृक्षे । रा.नि.व.१० ।

अम्लानम् । क्ली । पद्मे । श.र. ।

अम्लाना । स्त्री । महासेवतीपुष्पवृक्षे । বড়বন সেউতী । मं थोर राणशेवंती । वै.निघ. ।

अम्लानिनी । स्त्री । पद्मसमूहे । पद्मिन्याम् । त्रिका. । [रा.नि.व.६ ।

अम्लाम्ला । स्त्री । चाङ्गेर्य्यां । আমরুল শাক ।

अम्लायनी । स्त्री । मल्लिकाभेदे । मं नेवाली । वै.निघ. ।

अम्लिका । स्त्री । तिन्तिड़ीवृक्षे । प.मु.रा.नि.व.११ । आम्रे । रा.नि.व.२३ । पलाशीलतायां । माचिकायाम् । पूदिना । रा.नि.व.२३। श्वेताम्लिकायाम् । चाङ्गेर्य्याम् । रा.नि.व.२३ । अम्लोद्गारे । मे. । अर्शोरोगे तिन्तिड्यर्थे, एवं सर्व्वत्र दीपनयोगे । पुरीषसंग्रहणादौ पुनरम्लिका श्याामच्छदवृद्धदारके । सि.यो.अग्निमुखचूर्णे वृन्दः । सि.यो. अरोच.चि. । [वै.निघ. ।

अम्लिकाकन्दः । पुं । मं अम्लनालिकायाम् ।

अम्लिकापानम् । क्ली । तिन्तिड़ीपानके । তেঁতুলপানা । पक्वतिन्तिड़ीकं वारिमर्द्दितं शर्करामरिचलवङ्गकर्पूरमिश्रितं पानकमुच्यते । "अम्लिकायाः फलं पक्वं मर्द्दितं वारिणा दृढ़म् । शर्करामरिचैर्मिश्रं लवङ्गेन्दुसुवासितम् । अम्लिकाफलसम्भूतं पानकं वातनाशनम् ।" भा.पू.पानकवर्गः ।

अम्लिकावटकः । वटकविशेषे । অম্লবড়া । झोतीवरा इति लोके । "अम्लिकां स्वेदयित्वा तु जलेन सह मर्द्दयेत् । तन्नीरे कृतसंस्कारे वटकान् मज्जयेज्जनः । अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपनाः ॥" भा. ।

अम्ली । स्त्री । जलवेतसे । वै.निघ.२भ.मदात्यय. चि.खर्ज्जूरादिमन्थे । चुक्रिकायां । টকপালঙ্ । तिन्तिड्याम् । रा.नि.व.११ । भा.पू.१भ.फलव. । चाङ्गेर्य्याम् । मे.लत्रिकं ।

अम्लीका । स्त्री । तिन्तिड्याम् । अ.टी.। "वृक्षाम्लीकदाड़िमैः।" सि.यो.मदात्यय.चि.। अम्लोद्गारे। सु.नि.६अ. ।

अम्लीकाफलम् । क्ली । तिन्तिड़ीफले । तद्गुणाः—शुष्कं सद्दीपनं भेदनं तृषाघ्नं लघु कफवा-

तयो: पथ्यच। वा.सू.६अ.। "अम्ली हि चाम्लफलमविपक्वं तदस्रपित्तामकरं विदाहि। वातामये शूलगदे प्रशस्तं पक्वं तथा शीतगुणोपपन्नं॥" अत्रि.१७अ.।

अम्लीय: । पुं । अम्लवेतसे । वै.निघ. ।

अम्लोटक: । पुं । अश्मन्तकवृक्षे स्वनामैव प्रसिद्धे । हिं आमरीड़ा । अम्लकुचाई । रत्ना. ।

अम्लोटज: । पुं । चाङ्गेर्य्याम् । बड़ आमरुलपाता । च.द.चातुर्थ-ज्व.चि. । "अम्लोटजसहस्रेण दलेन ।"

अम्लोत्तमम् । क्ली । दाड़िमे । प.मु. ।

अयनम् । क्ली । मासषट्कं व्याप्य भानोरुदग्दक्षिणतो वा गतौ । मे.नत्रिकं । तच्च द्विविधम्— उत्तरायणं दक्षिणायनञ्च । तयोराद्यं वर्षाशरद्धेमन्तात्मकं, तत्र भगवानाप्याय्यते सोमोऽम्ललवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते । द्वितीयञ्च शिशिरवसन्तग्रीष्मात्मकं तत्र भगवानाप्याय्यतेऽर्क: तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमपहीयते । सु.सू. ।

अयस् } क्ली । लौहमात्रे । रत्ना. । च.द.पाण्डु.
अयसम् } चि. । कान्तलौहे । प.मु. । मुण्डलौहे । रा.नि.व.१३ ।

अयस्कान्त: । पुं । कान्तलौहे । रा.नि.व.१२। लौहचुम्बके । कान्तपाषाणे । चुम्बक पाथर । गुणा:—लेखन: शीतो मेदोविषघ्नश्च । मद.व.४ ।

अयस्कान्तशिला । स्त्री । लौहचुम्बके । चुम्बकपाथर । वै.निघ. ।

अयस्कार: । पुं । जङ्घाग्रभागे । त्रिका. ।

अयस्कीट: । पुं । लौहकिट्टे । वै.निघ. ।

अयानम् । क्ली । स्वभावे । हारा. ।

अयाह्वम् । क्ली । कांस्यधातौ । काँसा । वै.निघ.।

अयुक्छद: । पुं । सप्तपर्णवृक्षे । छातिमगाछ । हे.च. ।

अयुग्मक: । पुं । सप्तपर्णवृक्षे । वै.निघ. ।

अयुग्मच्छद: । पुं । सप्तपर्णवृक्षे । छातिम गाछ । अ.टी. ।

अयुग्मपत्र: } पुं । सप्तपर्णवृक्षे । वै.निघ. ।
अयुग्मपर्ण: }

अयोग: । पुं । विश्लेषे । कठिनोद्यमे । कूटे । मे.गत्रिकं ।

अयोगुड़: । पुं । लौहगुड़िकायां । "वरमाग्नेविषविषं कथितं ताम्रमेव वा । पीतमत्यग्निसन्तप्तो भक्षितो वाप्ययोगुड़: ॥" च. । [वै.निघ. ।

अयोच्छिष्टम् । क्ली । लौहकिट्टे । मण्डूर ।

अयोमलम् । क्ली । लौहमले । लोहार गु वा मण्डूर । प.मु.। "अयोमलन्तु सन्तप्तं ।" सि.यो. पाण्डु.चि.वृन्द: । च.द.पाण्डु.चि. ।

अयोरज: । क्ली । लौहकिट्टे । मण्डूर । लौहचूर्णे । च.द.पाण्डु.चि.नवायसचूर्णे ।

अयोवस्ति: । पुं, स्त्री । वस्तिकर्म्मविशेषे । यथा—एरण्डमूलं नि:क्वाथ्य मधुतैलं ससैन्धवम् । एष युक्त अयोवस्ति: सवचापिप्पलीफल: ॥" भा.।

अरक: । पुं, क्ली । शैवाले । हारा. । वै.निघ.।

अरक्त: । पुं । लाक्षायाम् । ला । रा.नि.व.६ । See अलक्त: ।

अरग्वध: । पुं। (Cassiafistula.) महाकर्णिकारवृक्षे । बड़ सोन्दालि, नड़िया शोणाल, राखाल नड़ी, बानर नड़ी इति । मं वड़िलु बाहव्याचे झाड़ । कं हेगगके । तें रेल्लचेट्टु । उत्. सुनारि । हिं आमलटा,धनवहेड़ा । गुणा:—अतिमधुर: शीतल: शूलघ्न: ज्वरकण्डूकुष्ठमेहकफविष्टम्भघ्नश्च । रा.नि.व.९ । स्रंसन: गुरु: हृद्रोगतोदोदावर्त्तघ्नश्च । एतत्फलं स्रंसनगुणयुक्तं रुच्यं पित्तकुष्ठकफघ्नं कोष्ठशुद्धिकरं ज्वरे हितञ्च । भा.पू. १भ. । "पर्णानि रेचकानि स्यु: कफमेदोहराणि च । पुष्पाणि स्वादुशीतानि तिक्तानि ग्राहकाणि च । तुवराणि विजानीयात्··· । मज्जा च मधुरा पाके स्निग्धा चाग्निविवर्द्धनी । रेचका पित्तवातानां नाशका समुदाहृता ।" द्रव्य.गु.वै.निघ. । See आरग्वध: । [दग्निमुखचूर्णे ।

अरग्वधम् । क्ली । स्वर्णालुफले । सि.यो.वृह-

अरङ्ग: (गा) (गी) । पुं,स्त्री । मत्स्यविशेषे । वै.निघ. । मधुशिग्रु: । रत्ना. ।

अरङ्गरः । पुं । कृत्रिमविषे । वै.निघ. ।

अरङ्गुदी । स्त्री । माधवीलतायाम् । वै.निघ. ।

अरजा । स्त्री । घृतकुमार्य्याम् ।

अरटुः । पुं। अरलुवृक्षे । শোণা গাছ। অ.টী.।

अरणः । पुं । चित्रकवृक्षे । वै.निघ. ।

अरणिः । पुं। क्षुद्राग्निमन्थवृक्षे । ছোটগণিরি । वा.टी.१५अ. । हेमा. वीरतर्व्वादौ । अरणिर्वह्निमन्थे ना इयोर्निर्मथ्यदारुणि। मे.णत्रिकं । श्योणाकवृक्षे । चित्रकवृक्षे ।

अरणिका । स्त्री। अग्निमन्थवृक्षे । वा.सू.१५अ. वेल्लन्तरादिव.। "वेल्लन्तरारणिकवूकवृषाश्मभेद···।"

अरणी । स्त्री । क्षुद्राग्निमन्थे । ছোট গণিরি । मं लघुऐरण । रा.नि.व.६ ।

अरणीकेतुः । पुं । महाग्निमन्थवृक्षे । বড় গণিরি । मं थोरऐरण । रा.नि.व.६ ।

अरण्यः । पुं । कट्फलवृक्षे । কট্‌ফলের গাছ। श.च. । शालभेदे । वै.निघ. ।

अरण्यम् । क्ली । कानने । वन । कं राण । कं अटवि । उद्यानमहावनोपवनप्रमदवनभेदात् तच्चतुर्विधम् । तत्रोद्यानं यत्र रागिणः क्रीड़न्ति । नृपालयेषु अन्तःपुरोचितं वनं प्रमदवनम् । उपवनं पुरः प्रान्तस्थवनम् । रा.नि.व.२ ।

अरण्यकः । पुं । महानिम्बे । মহানিম্ । मं. बकाननिम्ब । वै.निघ. ।

अरण्यकणा । स्त्री । कटुजीरके । জীরা বিশেষ । वै.निघ. । वनपिप्पल्याम् ।

अरण्यकदली । स्त्री । गिरिकदल्याम् । वनकदल्याम् । বীচেকলা, বুনো কলা, দয়া কলা इति च भाषा । मं राणकेल । रा.नि.व.११ । गुणाः—शीतला मधुरा बल्या वीर्य्यवर्द्धनी रुच्या दुर्जरा गुरुः दाहशोषपित्तनाशिनी । तत्फलं तुवरं मधुरं गुरु च । वै.निघ. ।

अरण्यकर्कटी । स्त्री । वनजातकर्कट्याम् । বুনো কাঁকুড় । मं राणतवसी । गुणाः—"अरण्यकर्कटी चोष्णा रसे तिक्ता च भेदका । पाके कट्वी कफकृमीपित्तकण्डूज्वरापहा । वै.निघ. ।

अरण्यकाकः । पुं । वनकाके । দাঁড়কাক । मं राणकावला । द्रव्य.गु.वै.निघ. ।

अरण्यकार्पासी । स्त्री । The wild cotton. वनकार्पासे । বনকাপাসী । मं राणकापासी । तें पत्ति । गुणाः—व्रणघ्नी शस्त्रवतघ्नी रुच्या च । रा.नि.व.४ ।

अरण्यकुक्कुटः । पुं। वनकुक्कुटे । বনকুক্‌ড়ো। हिं कौमड़ा. वनमोर्गा । मं राणकोंवड़े । तन्मांसगुणाः—हृद्यं लघु श्लेष्महरञ्च । रा.नि.व.१७ । बृंहणं स्निग्धं वीर्य्योष्णं वातघ्नं गुरु च । मद.व.१२।

अरण्यकुलित्थिका (त्था) (त्थी) । स्त्री । कुलत्थायाम् । বন কুর্ত্তিকলায় । रा.नि.व.५ । A blue stone used as a collyrium. कुलत्थाञ्जने। কৃত্রিমাঞ্জনবিশেষ । रा.नि.व.१३ । हिं कालसुर्मा । See कुलत्थाञ्जनं ।

अरण्यकुसुम्भः । पुं । वनकुसुम्भक्षुपे । বন কুসুম । मं राणकर्डई, राणकुसुम्भ । गुणाः—पाककटुः श्लेष्मघ्नः दीपनश्च । रा.नि.व.४ ।

अरण्यकोलिः । स्त्री । वनवदरे । বনকুল ।

अरण्यगवयः । पुं । वनगवये । अयं कूलचरजातीयः । सु.सू.४६अ. । कूलेचरशब्दं पश्य ।

अरण्यघोली (लिका) । स्त्री। वनघोलीति प्रसिद्धपत्रशाकविशेषे । घोलीशाके । रा.नि.व.६ । मन्यनदण्डे ।

अरण्यचटकः । पुं । वनचटकपक्षिणि । বন চটা পাখি, গুড়গুড়ে, নাগরভড়ুই, ছাতার इति च । तन्मांसं—लघु हितावहं चटकसमगुणञ्च । वै.निघ. द्रव्यगु. ।

अरण्यचम्पकः । पुं । वनचम्पके । বনচাঁপা। गुणाः—शीतलं लघु शुक्रवृद्धिकरं बलकरञ्च । रा.नि.व.१० ।

अरण्यछागः । पुं। वनछागे। বুনো ছাগল।

अरण्यजः । पुं । तिलकक्षुपे । हे.च. ।

अरण्यजार्द्रका । स्त्री । Wild ginger. वनार्द्रके । বন আদা । मं राणआले । गुणाः—कटु अम्लं रुचिकरं बल्यं आग्नेयञ्च । रा.नि.व.६ ।

अरण्यजीरम्(कम्) । क्ली । वनजीरके,कटु-

जीरके। वनजीरा। मं कडुजीरें। तें जीरकत्र। गुणा:—"अरण्यजीरकञ्चोष्णं तुवरं कटुकं मतम्। स्तम्भवातं कफञ्चैव व्रणञ्चैव विनाशयेत्।" वै.निघ.। द्रव्य.गु.।

अरण्यतुलसी । स्त्री । वनतुलस्यां, कृष्णवर्व्वर्याम्। বনতুলসী। हिं कालावावरी। मं राणतुलस, वैजयन्तीतुलसी। सा द्विधा ह्रस्वदीर्घभेदात्। गुणा:—"आरण्यतुलसी चोष्णा कटुका च सुगन्धिका। वातत्वग्दोषवीसर्पविषञ्चैव विनाशयेत्॥ आरण्यतुलसी क्षुद्रा कट्वी चोष्णा च तिक्तका। रुच्याग्निदीपनी हृद्या विदाही लघुपित्तला। रुचा कण्डूविषच्छर्दिकुष्ठज्वरविनाशिनी। वातं क्रमीन् कफं दद्रुं रक्तदोषञ्च नाशयेत्। वीजञ्चास्या दाहशोषनाशकं परिकीर्त्तितम्।"वै.निघ.।द्रव्य.गु.।

अरण्यत्रपुसक: । पुं । वन्यत्रपुषे । বনকাঁকুড়, বনশশা। मं गोड़शेंदनी। वै.निघ.।

अरण्यत्रपुसी । स्त्री । इन्द्रवारुण्याम्। রাখালশশা। महाकाललतायाम्। মাকালফল। वै.निघ.अपस्मा.चि.नस्ये।

अरण्यधान्यम् । क्ली । नीवारे। উড়িধান। मं देवभात। रा.नि.व.१६।

अरण्यधेनु: । स्त्री । वनजातायां गवि।

अरण्यपलाण्डु: । पुं । वनजातपलाण्डौ। বনপেয়াজ। गुणा:—मूत्रवैरेचन: श्लेष्महरणोऽत्युग्र एव च। मात्रातिरेकाद्भवति वान्तिकृन्मलभेदन:। अतिमात्रं प्रयुक्तोऽसौ विषवन्मारयेन्नरं। शोथे श्वासे च कासे च मूत्रसङ्गे प्रयुज्यते॥ अचि:।

अरण्यपिप्पली । स्त्री। वनपिप्पलीनामक्षुपे। বনপিপুল। रा.नि.व.६।

अरण्यमक्षिका । स्त्री । Gad fly. वनमक्षिकायाम्। ডাঁশমাছি। श.र.।

अरण्यमुद्ग: । पुं । वनमुद्गे। ঘোড়ামুগ। रा.नि.व.१६। See मकुष्ठक:। मुद्गपर्ण्याम्।

अरण्यमुद्गा । स्त्री। मुद्गपर्ण्याम्। মুগানী। रा.नि.व.३।

अरण्यमेथी । स्त्री। वनमेथिकायाम्। বনমেথি। मं राणमेथि। वै.निघ.।

अरण्यरजनी । स्त्री । वनहरिद्रायां। বনহলুদ। मं राणहलद। वै.निघ.।

अरण्यवायस: । पुं। Raven. अरण्यकाके। ডোমকাক। मं डोमकावला। रा.नि.व.१९।

अरण्यवासिनी । स्त्री। अत्यम्लपर्णीलतायां। অমর বেল इति लोके। रा.नि.व.३।

अरण्यवास्तुक: । पुं। कृष्णज्वरक्षुपे। বনবেতো। मं राणचाकवत। रा.नि.व.५। See कृष्णज्वर:।

अरण्यशालि: । पुं। Wild rice. नीवारधान्ये। উড়িধান। मं देवभात। रा.नि.व.२३।

अरण्यश्वन: । पुं। वनकुकुरे। নেকড়েবাঘ। वै.निघ.।

अरण्यशूरण: । पुं। वनजशूरणे। বুনো ওল। मं गोड़ासूरण। रा.नि.व.७। [चित्रकव्याघ्रे।

अरण्यश्वा । पुं। कपौ। বানর। हे.च.।

अरण्यसम्भूत: । पुं। कर्कटके কাঁক্‌রোল।

अरण्यहलदीकन्द: } पुं। वनहरिद्रायाम्।
अरण्यहरिद्रा (स्त्री) } বনহলুদ। हिं वनहर्दि। गुणा:—कुष्ठघ्न: वातरक्तघ्नश्च। भा.पू.१भ.ह.व.। कटु: मधुरा रुच्या अग्निदीपनी तिक्ता कुष्ठवातहा रक्तदोषविषश्वासकासहिक्काश्च नाशयेत्। वै.निघ.।

अरति: । स्त्री। अनिच्छायाम्। अस्वास्थ्यचिन्तयात्यर्थमरति: कथ्यते बुधै:। भा.। औदासीन्ये। पित्तरोगे।

अरत्नि: । पुं। निष्कनिष्ठमुष्टौ। বিতত কনিষ্ঠাঙ্গুলি মুষ্টি। रा.नि.व.१८।

अरम: । पुं। नेत्ररोगविशेषे। वै.निघ.। अर्म्मशब्दं पश्य। [श्म.।

अरल: । पुं। श्योणाकवृक्षे। শোণা গাছ।

अरला । स्त्री। हंसपद्याम्।

अरलु: (क:) । पुं। श्योणाकवृक्षे। শোণা গাছ। हिं अर्लु। मं टेंटु, दिंडा। श्योणापाठा इति भा.म.१भ.अतिसा.चि.गङ्गाधरचूर्णे। "नागरपाठारलुधातकीकुसुमै:।" च.द.गर्भज्वरे। वै.निघ.अतिसा.चि.अम्बष्ठादि:। वेतसवृक्षे।

अरलुपुटपाकः । पुं । श्योणाकत्वक्कृतपुटपाके । साधनविधिः कुटजपुटपाकवत् । “अरलुत्वक्कृतश्चैव पुटपाकोऽग्निदीपनः । मधुमोचरसाभ्याञ्च युक्तः सर्व्वातिसारजित् ॥” शार्ङ्ग.म.ख.१अ. ।

अरविन्दम् । क्ली । पद्मे । प.मु. । रा.नि.व. १०। ताम्रे । रा.नि.व.१३। कोकनदे । রক্তকমল। नीलोत्पले । रा.नि.व.१०। पुं। सारसपक्षिणि।अम.।

अरविन्ददलप्रभम् । क्ली । ताम्रे । তামা । वै.निघ. । [नलिन्याम् । श.र. ।

अरविन्दिनी । स्त्री । पद्मसमूहे । र.मा. ।

अरालः । पुं । Resin. सर्जरसे । धुना । हिं धुना । मं राल । शालवृक्षे । मत्तदन्तिनि । मे. ।

अरिः । स्त्री । स्वनामख्यातखदिरे। খদিরবিশেষ। मं आरि । कं शीगुरि । गुणाः—कषाया कटुका तिक्ता रक्तपित्तघ्नी च । रा.नि.व.८ ।

अरिपुरिमः । पुं। विट्खदिरे । গুয়েবাব্‌লা। मं गंधीहिंवर । वै.निघ. ।

अरिमः । पुं । विट्खदिरे । গুয়েবাব্‌লা । रत्ना. । भैष.मुखरो.चि. ।

अरिमर्द्दः । पुं। कासमर्द्दक्षुपे । কালকাশন্দা । मं कासविंदा । रा.नि.व.४ । एतत्पत्रं रुचिकरं वृष्यं विषकासरक्तघ्नं मधुरं वातकफघ्नं पाचकं कण्ठशोधनं विशेषेण कासहरं विषघ्नं धारकं लघु च । भा.पू.१भ. ।

अरिमेदः (कः) । पुं । (Accacia farnesiana, syn mimosa.)विट्खदिरवृक्षे । বিট্‌খয়ের, গুয়েবাব্‌লা, দুর্গন্ধখদির । मं गंधीहिंवर । कं करर्यवेलु । हिं गन्धाबुल । प.मु.। गुणाः—कषायः उष्णः तिक्तः भूतघ्नः शोफातिसारकासघ्नः विसर्पघ्नश्च । रा.नि.व.८ । मुखदन्तरोगघ्नः कण्डुविषश्लेष्मकृमिकुष्ठव्रणघ्नश्च । मद.व.५। कषायः उष्णः मुखरोगदन्तरोगरक्तदोषकण्डूकृमिकफविषकुष्ठव्रणघ्नश्च । भा.पू.१भ.वटादिः । भैष.मुखरो. चि. । च.सू.४अ. । मात्रा १ तो. ।

अरिमेदाद्यतैलम् । क्ली । मुखरोगे हितम्। मूर्च्छिततिलतैलं ८श.क्वाथार्थं खण्डीकृतारिमेदत्वक् (বিট্‌খদির, কাঁটানাগেশ্বর বা গুয়েবাব্‌লা) १२॥ श. वारि ६४ श. पादशेषः १६ श.। कल्कद्रव्याणां मञ्जिष्ठादीनां प्रत्येकं २ तो. । ततो वस्त्रपूतक्वाथकल्काभ्यां तैलपाकविधिना तैलं पचेत् । च.द.मुखरो.चि. ।

अरिष्टः । पुं । Soapberry plant.(Sapindus trifoliatus.)रीठावृक्षे । रीठाकरञ्जे । रा. नि.व.९ । রিটে গাছ । मे. । गुणाः—“अरिष्टः कटुकः पाके तीक्ष्णश्चोष्णश्च लेखनः । गर्भपातकरः प्रोक्तो लघुः स्निग्धस्त्रिदोषहा । ग्रहपीड़ादाहशूलनाशनश्च प्रकीर्त्तितः । वै.निघ. । लसुने । प. मु. । रा.नि.व.२२ । भा.पू.१भ. । निम्बवृक्षे । रा. नि.व.२३। प.मु.वा.सू.१५अ.गुड़्च्यादिः । “गुड़ूची पद्मकारिष्ट— ।”च.द.पित्तश्लेष्मज्व.अमृताष्टके— । “गुड़ूचीन्द्रयवारिष्ट— ।” सु.सू.४३अ. संशोधने । काके । द्वारा. । कङ्कपक्षिणि । मे. । सुराविशेषे । “औषधयुक्तैर्मद्याकारैः कृतं मद्यमासवः । स एव क्वथितौषधैररिष्टः ।” वा.टी.हेमाद्रिः । क्वाथसिद्धो वारिष्टः । शार्ङ्ग. । अरिष्टः क्वाथसिद्धः स्यात् । प.प्र.३ । तद्गुणाः—यथाद्रव्यगुणोऽरिष्टः सर्व्वो मद्यगुणाधिकः । ग्रहणीपाण्डुकुष्ठार्शःशोषशोफोदरज्वरघ्नः । गुल्मकृमिघ्नः कषायः कटुवातलश्च । वा. मद्यव. । इक्षुविकारसहिताभयाचित्रकदन्तीपिप्पल्यादि-भूरिभेषजक्वाथादिसंस्कारवानरिष्टोऽभिधीयते । गुणः—अर्शःशोथग्रहणीश्लेष्मरोगहरत्वम् । राज. । भाण्डाव्य सुरया सम्यक् द्रव्याणि विविधानि च । सप्ताहान्ते परिस्राव्य रसं वस्त्रेण गालयेत् । एषोऽरिष्टोऽभिधानेन भिषग्भिः परिकीर्त्तितः ॥ अत्रि. । पक्वौषधाम्बुसिद्धं यत् मद्यं तत्स्यादरिष्टकम् । अरिष्टकं त्रिदोषघ्नं गर्भस्रावकं ग्रहदोषघ्नञ्च । भा.पू.मद्य.व. । क्ली । पादजलेन त्रिभागदधिकृते तक्रे । ঘোল । रा.नि.व.१५ । सूतिकागारे । रत्ना.।आसवे । मरणचिह्ने । त्रि । अशुभे । सर्व्वत्र मे. । मद्यसामान्ये । रा.नि.व.१४ ।

अरिष्टकः । पुं। फेनिलवृक्षे । सि.यो.दाहज्वरे. श्रीकण्ठः। “फेनेनारिष्टकस्य च।” निम्बवृक्षे । अत्र निम्बकोमलपल्लवः । च.द.पित्त-ज्व.शिरोलेपे । रीठाकरञ्जे । मद.व.५ । सरलद्रुमे । रत्ना. । क्ली । मद्ये । भा. ।

अरिष्टत्रयम् । क्ली। स्वस्थारिष्टं वेधारिष्टं कीटारिष्टञ्चेति अश्वारिष्टत्रये। तत्र स्वस्थारिष्टं पञ्चविधं तद्यथा—भोजनारिष्ट छायाद्यरिष्ट-दर्शनेन्द्रियाद्य-

रिष्ट-श्रवणेन्द्रियारिष्ट-रसनेन्द्रियारिष्टाः। तत्र प्रथमे रोगं विना हीनवर्णता दुर्मनस्कता भोजनानिच्छा च भवति। द्वितीये छायापराङ्मुखता छिद्रता सच्छिद्रता वा भवति। तृतीयादौ नासामेढ्राक्षिपायुभ्योऽकस्मात् रक्तस्रावः, श्रवणादिबाधिर्यं जिह्वा कठिना सन्धा च भवति। वेधारिष्टः वेधाख्योपसर्गजः। स च शरदि रवितापेन, प्रावृषि शालाभावाच्च जायते। तस्मिंश्च जाते सज्वरता अधोमुखता श्वासकासौ सन्धाङ्गतादि भवति। कीटारिष्टे वाजिनां जठरे कीटगुच्छा जायन्ते, तेन वाजिनः सीदन्ति। जयदत्तः २३-२५अ.।

अरिष्टफलः । पुं। कटुनिम्बवृक्षे। रा.नि.व.९।

अरिष्टलक्षणम् । क्ली। मृत्युलक्षणे। "रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते। तल्लक्षणमरिष्टं स्यादिष्टञ्चापि तदुच्यते।" भा.।

अरिष्टा । स्त्री। कटुकायाम्। रा.नि.व.६। च. सू.४अ.। प.मु.। र.मा.। वै.निघ.२भ.। विषमज्व. पटोलादौ। नागबलायां। रा.नि.व.४। मद्ये।

अरिष्टाह्वः । पुं। रीठाकरञ्जे। রীটে। वै.निघ. २भ.उन्मा.चि.।

अरुः (स्) । पुं। आरग्वधवृक्षे। সোন্দাল গাছ। रक्तखदिरे। व्रणे। मर्मणि। सन्धिस्थाने। उ.।

अरुक् । त्रि। सुस्थे।

अरुग्णः । त्रि। सुस्थे।

अरुङ्निषः । स्त्री। नेत्ररोगविशेषे।

अरुचिः । स्त्री। स्वनामख्यातरोगे। আরুচ্ করা, অরোচক রোগ। सत्यामपि बुभुक्षायां भोजनासामर्थ्ये। भोजनानिच्छायाम्। भा.म.१भ.श्लेष्मज्व.। See अरोचकः।

अरुजः । पुं। आरग्वधवृक्षे। বড় সোণালু। रा.नि.व.९। क्ली। कुङ्कुमे। सिन्दूरे।

अरुणः । पुं। कोकिलाक्षभेदे। কুলেখাড়া। अतिविषायाम्। श्योणाकवृक्षे। प.मु.। मञ्जिष्ठायां। अर्कवृक्षे। मे.। पुन्नागवृक्षे। रा.नि.व.१०। गुडे। रा.नि.व.१४। चित्रकक्षुपे। मद.व.२। रक्तापामार्गे। रक्तकरवीरे। वै.निघ.। कुष्ठभेदे। लक्षणम्— वातेनारुणाभानि तनूनि विसर्पीणि तोदभेदस्वापयुक्तानि अरुणानि। सु.नि.५अ.। त्रि। रक्तवर्णे।

अरुणम् । क्ली। अहिफेने। वै.निघ.। रक्तोत्पले। रक्तलशुनायाम्। वा.टी.हेमाद्रिः। कुङ्कुमे। रा.नि. व.१२। सिन्दूरे। रा.नि.व.१३। माणिक्यभेदे। वै. निघ.२भ.क्षयरोग.त्रैलोक्य-चिन्तामणिरसे।

अरुणकपिशः । पुं। द्राक्षाभेदे। किस्मिस्विशेष। मं फकीरीद्राक्ष। वै.निघ.।

अरुणकमलम् । क्ली। कोकनदे। রক্তকমল। रा.नि.व.१०। [वै.निघ.।

अरुणचूड़ः । पुं। ताम्रचूड़पक्षिणि। কুক্কুড়া।

अरुणतण्डुलीयम् । क्ली। रक्ततण्डुलीयशाके। রাঙা নটে। च.द.।

अरुणनागः । पुं। मुद्राशङ्खे। अत्रिः।

अरुणनेत्रः । पुं। पारावते। পায়রা। कोकिले। वै.निघ.।

अरुणपुष्पी । स्त्री। बन्धुजीवकवृक्षे। রাঙ্গা ফুল। मं रक्तदुपारी। वै.निघ.।

अरुणमक्षिका । स्त्री। रक्तमक्षिकायाम्। লাল মাচি। वै.निघ.।

अरुणलोचनः । पुं। पारावते। পায়রা। हिं खबूतर। रा.नि.व.१९। कोकिले। वै.निघ.।

अरुणसर्पः । पुं। तक्षकसर्पे। वै.निघ.।

अरुणसारः । पुं। हिङ्गुले। वै.निघ.।

अरुणा । स्त्री। अतिविषायाम्। मे.। रा.नि.व. ६। भा.४भ.बाल.ज्व.चि.महाभल्ला.गुड़े। "घनकृष्णारुणाशृङ्गी।" भैष.प्रदरारिरसे। कुष्ठ.चि.। मञ्जिष्ठायां। मे.। रा.नि.व.६। भा.म.१भ.ज्व. चि.लाक्षातैले। "लाक्षा दशाक्षा लवणा षड़क्षा।" प्रपौण्डरीके। प.मु.। त्रिवृतायां। मे.। जवायाम्। मद.व.२। अरुणातिविषा श्यामा मञ्जिष्ठा त्रिवृता च। श्यामालतायाम्। मे.। इन्द्रवारुणीलतायाम्। गुञ्जालतायाम्। रा.नि.व.३। पुनर्णवायां। मुण्डीर्याम्। रत्ना.। [मं लांक। वै.निघ.।

अरुणात्मिका । स्त्री। कुमरिचे। লঙ্কামরিচ।

अरुणाभम् । क्ली। वज्रलौहे।

अरुणार्कः । पुं। रक्तार्के। प.मु.। मं मन्दार। कं मन्दार अर्क। रा.नि.व.१०। गुणाः— सरः

वातकुष्ठकण्डूविषव्रणघ्नः प्लीहगुल्मार्शःकफोदरमल-क्रमिहरश्च । कटुतिक्तोष्णः कफघ्नो मेदघ्नो विषघ्नः वातकुष्ठव्रणघ्नः शोथकण्डूविसर्पहरश्च । पुष्पं मधुरं तिक्तं धारकं क्रमिकुष्ठकफार्शोविषरक्तपित्तघ्नं गुल्मशोथहरञ्च । भा.पू.१भ. ।

अरुणोपलः । पुं । अरुणवर्णमणिविशेषे । चुनि इति भाषा । पद्मरागमणौ । हे.च. ।

अरुन्धती । स्त्री । जिह्वायां । वै.निघ. ।

अरुषः । पुं । व्रणे । घोटके । वै.निघ. ।

अरुंषिका । स्त्री । क्षुद्ररोगान्यतमकपालरोगे । शिरोव्रणे । अयं कफरक्तक्रमिकोपतो भवति । "अरुंषि बहुवक्त्राणि बहुक्लेदीनि मूर्द्धि तु । कफास्रक्रमिकोपेन नृणां विद्यादरुंषिकाम्" ॥ मा.नि. ।

अरुष्कः । पुं । भल्लातकवृक्षे । (भेला गाछ । मं विवबा । भा.पू.१भ. । रा.नि.व.११ ।

अरुष्करः । पुं । भल्लातकवृक्षे । प.मु. । रा.नि.व.११ । भा.पू.१भ. । मद.व.१ । अरुंषिकायाम् । त्रि । व्रणकृति । मे.रचतुष्कं ।

अरुष्करम् । क्ली । भल्लातकफले । च.द.अर्शचि. । भैष.कुष्ठ-चि.पञ्चतिक्त.घृते । "सनागराऽरुष्करवृद्धदारकम्" । सि.यो.चतुःसमलौहे । च.सू. ४अ.कुष्ठघ्नव. । [आमन । रा.नि.व.५ ।

अरुषा (टा) । स्त्री । भूम्यामलक्याम् । भूँइ

अरोकदन्तः । त्रि । कृष्णदन्ते । वै.निघ. ।

अरोचकः पुं । अरुचिरोगे । स पञ्चविधः —वातपित्तकफसन्निपातागन्तुभेदेन । मा.नि. । मनस्तापज आगन्तुक इति शार्ङ्ग.पू.७अ. । लक्षणं यथा—प्रक्षिप्तन्तु मुखे चान्नं जन्तोर्न स्वदते मुहुः । अरोचकः स विज्ञेयो भक्तद्वेषमथो शृणु ॥ चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वा तु भोजनं । द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥ यस्यान्ने न भवेच्छ्रद्धा स भक्तच्छन्द उच्यते । विजयरक्षिते भोजः । एते त्रिविधा अपि रोगा चरकसुश्रुताभ्यां एक एव स्मृताः । वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः । अरोचकाः स्युः परिहृष्टदन्तः कषायवक्त्रश्च मतोऽनिलेन ॥ मा.नि. । पथ्यं यथा—वस्तिः समीरणे पित्ते विरेको वमनं कफे । सर्व्वजे सर्व्वकार्यार्थं हर्षणं स्यादरोचके ॥ भा. । वस्तिर्विरेको वमनं यथाबलं धूमोपसेवाकवडग्रहस्तथा । तिक्तानि काष्ठानि च दन्तघर्षणं चित्तान्नपानानि हितैः कृतानि । गोधूममुद्गारुणशालिषष्टिका मांसं वराहाजशशैणसम्भवं । चेङ्गो झषाख्यं मधुरालिकेल्लिशः प्रोष्ठी खलिशः कवयी च रोहितः । कर्कोरुवेत्राग्रनवीनमूलकं वार्त्ताकुशोभाञ्जनमोचदाड़िमं । भव्यं पटोलं रुचकं घृतं पयो बालानि तालानि रसोनशूरणम् । द्राक्षा रसालं नलदम्बुकाञ्जिकं मद्यं रसालादधितक्रमार्द्रकम् । कक्कोलखर्ज्जूरपियालतिन्दुकं पक्वं कपित्थं बदरं विकङ्कतम् । तालास्थिमज्जा हिमवालुका सिता पथ्या यमानी मरिचानि रामठम् । स्वाद्वम्लतिक्तानि च देहमार्ज्जना वर्गोऽयमुक्तोऽरुचिरोगिणे हितः । इति पथ्यम् । कासोद्गारक्षुधानेत्रवायुवेगविधारणम् । अहृद्यान्नमसृक्स्रावं क्रोधं लोभं भयं शुचम् । दुर्गन्धरूपसेवा च न कुर्य्यादरुचौ नरः ॥ इति अपथ्यम् ।

अर्कः । पुं । (Calotropis gigantea, Syn, Asclepias gigantea.) स्वनामख्यातोपविषजातीयक्षुपे । आकन्द गाछ हिं मान्दार । मं रुइ । कं अक्के । तें जिल्लेडुचेट्टु । अर्कः श्वेतरक्तभेदेन द्विविधः । तयोर्विशेषास्तत्तत्पर्य्याये द्रष्टव्याः । गुणाः —कटुः उष्णः वातजित् दीपनीयः शोफघ्नः व्रणघ्नः कण्डूकुष्ठक्रमिघ्नश्च । रा.नि.व.१० । सारकः वातघ्नः कुष्ठकण्डूव्रणप्लीहगुल्मार्शःकफोदरमलक्रमिघ्नश्च । पुष्पं—मधुरं तिक्तं धारकं कुष्ठक्रमिकफार्शोविषरक्तपित्तगुल्मशोथघ्नञ्च । भा.पू.१भ. । अर्कद्वयं शङ्खवातकुष्ठकण्डूक्षयव्रणान् । निहन्ति प्लीहगुल्मार्शोयकृत्श्लेष्मोदरक्रमीन् । मद.व.१ । मात्रा २-३ रक्तिः । इति रावणकृतचिकित्साशास्त्रे । ताम्रे । मे. कद्विकं । त्रैलोक्यडम्बररसे । वै.निघ. वा.व्या. चि.चिन्तामणिरसे । स्फटिके । मे.कद्विकं । अरुणार्के । प.मु.भा.पू.१भ. । आदित्यपत्रक्षुपे । रा. नि.व. ४ । "अर्कोरक्तपुष्पः प्रसिद्धः ।" सु.सू.३७अ. अर्कादिव. । २६अ.शिरो.चि. ।

अर्ककान्ता । स्त्री । आदित्यभक्तायाम् । हुड़हुड़िया । रा.नि.व.४ । मद.व.१ ।

अर्कगन्धिका । स्त्री । क्षीरविदार्य्याम् । कृष्णभूमिकुष्माण्ड । प.मु. ।

अर्कचन्दनम् । क्ली । रक्तचन्दने । रा.नि.व.१२ ।

अर्कच्छदनम् । क्ली । अर्कमूले ।

अर्कतैलम् । क्ली। कुष्ठाधिकारे । अत्र कटुतैलं पलाष्टकं अर्कपत्ररसस्य पलाष्टकं निशाया: पलं मन:शिलायाश्च पलम् । च.द.कुष्ठ.चि. । सा.कौ. ।

अर्कदल: । पुं। आदित्यपत्रक्षुपे । रा.नि.व.४ । अर्कवृक्षे । [भा. ।

अर्कनामा । पुं । रक्तार्कें । লাল আকন্দ।

अर्कपत्र: । पुं । आदित्यपत्रक्षुपे । रा.नि.व.४ । च.द. । अर्कवृक्षे ।

अर्कपत्रा (त्री) (त्रिका) । स्त्री । ईश्वरमूलवृक्षे । ঈশের মূল । प.मु.र.मा. ।

अर्कपर्ण: । पुं । रक्तार्कवृक्षे । লাল আকন্দ । मं सूर्यमन्दार । भा.पू.१भ. । [माषाणी ।

अर्कपर्णिका (र्णी) । स्त्री । माषपर्ण्याम् ।

अर्कपाद: । पुं । सूर्यकान्तमणौ । निम्बवृक्षे । वै.निघ. । [क्षुपे ।

अर्कपादप: । पुं । निम्बवृक्षे । त्रिका. । अर्क-

अर्कपुष्पा । स्त्री । क्षीरकाकोल्याम् । ক্ষীর কাঁকলা । See क्षीरकाकोली ।

अर्कपुष्पिका } **अर्कपुष्पी** } स्त्री । (Gygandropsis centa-phylla, Syn, Cleome pentaphylla.) सूर्य्यवल्ल्याम् । শ্বেত হুড়হুড়িয়া । अर्कहुलीति भाषा । अर्कसदृशपुष्पीलता । हिं अन्धाहुली दधियार् क्षीरवृक्षम्। मं शिरदोड़ी । भा.४भ.बालरोग चि.। गुणा:—अर्कपुष्पी क्रमिश्लेष्म-मेहपित्तविकारनुत् । मद.व.१ । क्रमिकफमेहमनोविकारघ्नी । भा.पू.१भ.। रक्तापराजितायाम् । रत्ना. । क्षीरकाकोल्यां । र.मा. ।

अर्कप्रभागुड़िका । स्त्री । रसायनाधिकारे। अस्या: पाठ: यथा—रसं निष्कद्वयं शुद्धं निष्कैकं ताम्रचूर्णकं । चिञ्चामूलफलक्काथे यामं खल्ले विमर्द्दयेत् । तद्गोलं बन्धयेद्वस्त्रे दोलायन्त्रेषु तक्रके । चिञ्चाफलयुते पश्चाच्चतुर्यामात्समुद्धरेत् । वटिकार्कप्रभा नाम जरामृत्युविनाशिनी । संवत्सरप्रयोगेषु सूर्य्यतुल्यो भवेन्नर: । पलाशवीजतैलञ्च कर्षमेकं गवां पय: । अनुपानमिदं पाता दशनागबलो भवेत् ॥ प्रयोगा.रसायना. ।

अर्कप्रिया । स्त्री । आदित्यभक्तायाम् । হুড়হুড়িয়া গাছ । जवायाम् । रा.नि.व.१० ।

अर्कभक्ता । स्त्री । ब्राह्मयां। ব্রাহ্মীশাক । आदित्यभक्तायाम् । হুড়হুড়িয়া, শুল্টে इति च भाषा । हिं हुलहुल। मं सूर्य्यफुलवल्ली । रा.नि.व. ४ । र.मा. ।

अर्कभूति: । स्त्री । ताम्रभस्मनि । वै.निघ.२भ. क्षीरताम्ररसे, संग्रहणी-चि. ।

अर्कमूर्त्तिरस: । पुं । रसोऽयं सान्निपातिकज्वरे प्रयोज्य: । द्रव्याणि चास्य रसगन्धकलौहविषाणि । अत्र लौहस्याष्टौ भागा: पारदस्य भागद्वयं, गन्धको द्विगुण:,विषस्य च षोड़शांशो ग्राह्य: । अयमेव त्रिदोषदावानल: कथ्यते यदायं ताम्रपात्रस्थापित: पुन: निम्बुकरसपित्तवर्गकण्टकार्य्यार्द्रकरसैर्भाव्यते । भैष.ज्व.चि. ।

अर्कमूलम् । क्ली । तन्नामकवृक्षमूले । च.द. अग्निमा.चि.क्षारगुड़े ।

अर्कमूला । स्त्री ।(Aristolochia Indica.) ईश्वरमूल्याम् । ঈশের মূল । रत्ना. ।

अर्कलवणम् । क्ली । अर्कक्षारे । वै.निघ. ।

अर्कवल्लभ: । पुं । बन्धुजीववृक्षे । वान्धूलिवृक्ष, দুপুরে চণ্ডী । मं दुपारी । रा.नि.व.१० ।

अर्कवल्ली । स्त्री । आदित्यभक्तायां । হুড়হুড়ে । वै.निघ । [सु. । रा.नि.व.६ ।

अर्कवेदम् (धम्) । क्ली । तालीशपत्रे । प.

अर्कसुता । स्त्री। कृष्णापराजितायां । वै.निघ.।

अर्कसुधा । स्त्री । अर्कोत्थसुधायाम् । আকন্দের চূণ। गुण:—गुल्मरोगस्य नाशिनी। वै.निघ.।

अर्कहिता । स्त्री । आदित्यभक्तायाम् । হুড়হুড়িয়া । मं सूर्य्यफुलवल्ली । रा.नि.व.४ ।

अर्कक्षीरम् । क्ली । अर्कवृक्षनिर्यासे । আকন্দের আটা । गुणा:—क्रमिघ्नं व्रणघ्नं कुष्ठार्शोदरेषु च हितम् । राज. । तिक्तलवणमुष्णवीर्य्यं लघु स्निग्धं गुल्मोदरकुष्ठहरं विरेचने हितञ्च । भा.पू. १भ. । च.द.अर्श-चि. ।

अर्कादिगण: । पुं । अर्कालर्कनागदन्तीविशल्याभार्गीरास्नावृश्चिकालीप्रकीर्य्याप्रत्यक्पुष्पीपीत-

तेषीदकीर्य्याश्वेतायुग्मतापसवृत्ता इति । अर्कालर्क-करञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेता-महाश्वेताव्रश्चिकाल्यलवणातापसवृक्षश्चेति ॥ सु.सू. ३८अ. । गुणाः—कफमेदोविषघ्नः क्रमिकुष्ठघ्नः वि-शेषाद्व्रणशोधनश्च । वा.सू.१५अ. ।

अर्काश्मा । पुं । सूर्य्यकान्तमणौ । चुनी, पान्ना इति च लोके । हला. । [अर्कवृक्षे । अम. ।

अर्काह्वः । पुं । तालीशपत्रे । सूर्य्यकान्तमणौ ।

अर्की । पुं। मयूरे । मयूः । मं मोरी । वै.निघ.।

अर्केश्वररसः । पुं । रसोऽयं वातव्याध्युपशम-नो द्विविधश्च । तृतीयो रक्तपित्ते, चतुर्थश्च कुष्ठा-धिकारे । "रसस्य भागाश्चत्वारो गन्धकस्य दशैव तु । ताम्रस्य वाटिकायाश्च दत्त्वा चैनामधोमुखीम् । सम्यक् निरुध्य तस्याश्च दद्यादूर्द्धं शरावकं । भाण्डे निरुध्य यत्नेन भस्मनापूर्य्य भाण्डकम् । अग्निं प्र-ज्वालयेद्यामं मुखं तस्य निरुध्य च । स्वाङ्गशीतं समुद्धृत्य तत्ताम्रं चूर्णयेद्भृशम् । भावयेदर्कदुग्धेन पुटित्वा दशधा पुनः ॥" रसे.चि. । रसेन्द्रसार-संग्रहे अयमेव कुष्ठे धृतः । विशेषस्तु—तत्र गन्ध-कस्य ताम्रचक्रिकायाश्च १२ भागा उक्ताः । इति प्रथमः ॥ "रसेन गन्धं द्विगुणं विमर्द्य ताम्रस्य चक्रेण सुतापितेन। आच्छादयित्वाथ ततः प्रयत्नात् चक्रे विलग्नञ्च ततः प्रगृह्य । सञ्चूर्ण्य च द्वादश-धार्कदुग्धैः पुटेत वह्नित्रिफलाजलैश्च ।" मात्रा२र.। इति द्वितीयः ॥ रसे.चि. । "सूतार्कं मृतताम्रञ्च मृताभ्रञ्च समाक्षिकम् । अमृताम्बुरसैर्भाव्यं त्रिसप्त-कपुटे पचेत् । वासाक्षीरविदारीभ्यां चतुर्गुञ्जाप्रमा-णतः । भक्षणम् ।" अत्र अर्कः ताम्रम् । अमृता गुडूची । माक्षिकं स्वर्णमाक्षिकम् । र.सा.सं.रक्त-पित्तचि. । इति तृतीयः ॥ चतुर्थः कुष्ठाधिकारे । "पलानीशस्य चत्वारि बलेर्द्वादश तावती । ताम्रस्य चक्रिका देया रसस्योर्द्धं शरावकं । दत्त्वा विबद्ध-भाण्डस्थं पूरयेद्भस्मना दृढं । अग्निं प्रज्वालयेद्याम-द्वयं शीतं विचूर्णयेत् । पुटेद्द्वादशधा सूर्य्यदुग्धेना-लोड़ितं पुनः । वरापावकभृङ्गानां द्रवैस्त्रिभिर्वि-भावयेत् । अथमर्केश्वरो नाम्ना रक्तमण्डलकुष्ठजि-त् ॥" अत्र ईशः पारदः, तस्य चत्वारि पलानि । बलेर्गन्धकस्य च द्वादशपलानि । र.सा.सं. ।

अर्कोत्तमा । स्त्री । वर्व्वर्य्याम् । वाबुईतुलसी ।

अर्कोपलः । पुं । सूर्य्यकान्तमणौ । आतश पाथर इति लोके । रा.नि.व.१३ ।

अर्गटः । पुं । आर्त्तगल इति प्रसिद्धे कण्टकवृक्ष-विशेषे । नीलझाँटी । हिं आर्त्तगल । मं एरवणी । गुणाः—शीतः व्रणशोधनरोपणश्च । मद.व.५ । तथा । "अर्गटस्तुवरः शीतवीर्य्यो व्रणविशोधनः । व्रणरोपणकश्चैव पुष्पमस्य मधु स्मृतम् । तिक्तश्च ज्वरपित्तघ्नं कफरक्तरुजापहम् ।" वै.निघ. ।

अर्गलम् । क्ली । मांसे । वै.निघ. ।

अर्घटम् । क्ली । भस्मनि । हारा. ।

अर्घ्यम् । क्ली । आर्घ्यमधुनि । See मधु ।

अर्घ्याटः (लः) । पुं । शृकलायाम् । ওকড়া, চেঁচ্কো। शृकला चालुपत्रः स्यादर्घ्यातोऽर्घ्याटलो मतः, इति द्रव्याभि. ।

अर्घ्यातः । पुं अर्घ्याटे । ওকড়া । द्रव्याभि. ।

अर्घ्यार्हः । पुं । मुचुकुन्दवृक्षे । रा.नि.व.१० ।

अर्चिः । स्त्री, क्ली । कान्तौ । अग्निज्वालायाम् ।

अर्जकः । पुं । क्षुद्रतुलसीवृक्षभेदे । বাবুই তু-লসী । हिं वावरी । मं आजवला । कं गर्गेर । तें तेल्लगग्गेरचेट्टु । "वर्वरिकाकारो लघुमञ्जरीकः सूक्ष्मपत्रः निर्गन्धः श्वेतकुठेरकः (বাবুই) ।" सु.सू. ३८अ.सुरसादौ ड.। श्वेतवर्व्वर्य्याम् । শাদা বাবুই । भा.पू.१भ. । श्वेतपर्णास, তোকমারী इति लोके। सि.यो.विसूची-चि.वमनशान्तौ । अर्जकः श्वेतकृष्ण-रक्तभेदात्त्रिभेदः तुल्यगुणश्च । गुणाः—कटूष्णः वातकफरोगघ्नः नेत्ररोगहरः रुच्यः सुखप्रसवक-रश्च । रा.नि.व.१० । श्वेतपलाशवृक्षे । See वर्व्व-री । [शाल ।

अर्जकर्ज्जः । पुं । असनवृक्षे । আসনা, পিয়া-

अर्ज्जुनः । पुं । (Tarminalia Arjuna, or Pentaptera arjuna.) स्वनामख्यातवृक्षे । অ-র্জ্জুন গাছ । हिं कहु, कौह । मं अर्जुनसादड़ा । कं सारढ़ोल । तें मद्दिचेट्टु । गुणाः—कषायोष्णः कफघ्नः व्रणशोधनः पित्तश्रमतृष्णाहरः वातकोप-नश्च । रा.नि.व.६ । शीतलः हृद्यः क्षतक्षयविष-रक्तहरः मेदोमेहव्रणघ्नः तुवरः कफपित्तनश्च । भा. पू.१भ.वटादिव. । वा.सू.१५अ.न्यग्रोधादिः । "न-

ख्वूइयार्जुनकपीतनसोमवल्कः ।" मात्रा २ तो. । नेत्रशुक्लगतरोगे । लक्षणम्—"एको यः शशरुधिरोपमश्च विन्दुः शुक्लस्थो भवति तमर्जुनं वदन्ति ।" मा.नि. । मयूरे । मे.नत्रिकं । त्रि । श्वेतवर्णे ।

अर्जुनम् । क्ली । तृणमात्रे । हला. । सुवर्णे । मे.नत्रिकं । कासतृणे । र.मा. । दर्भभेदे ।

अर्जुनघृतम् । क्ली । हृद्रोगे हितम् । अत्र क्वाथार्थमर्जुनत्वक् ६४ प. पाकार्थं जलं ६४ श. शेषः १६श. कल्कः १ श. घृतं ४ श. । मूर्च्छितघृतं ४श. अर्जुनस्वरसः १६श. अर्जुनत्वक्कल्कः १श. एकत्र पाच्यम् । च.द.हृद्रोग-चि. । "पार्थस्य कल्कस्वरसेन सिद्धं शस्तं घृतं सर्व्वहृदामयेषु ।" घृतं ४ श. अर्जुनस्वरसः ४ श. कल्कार्थं अर्जुनत्वक् १ श. । सा.कौ. । भैष.भा.रस.र. ।

अर्जुनत्वक् । स्त्री । अर्जुनवल्कले । अर्ज्जुनछाल । च.द.अ.सा.चि.शल्लक्यादिः ।

अर्जुननामाख्यः । पुं । अर्जुनवृक्षे । भा. ।

अर्जुनसुधा । स्त्री । अर्जुनोत्थसुधायां । अर्ज्जुन काटेर चूर्ण । गुणाः—"सुधा ह्यर्जुनजा प्रोक्ता कफस्य च विनाशिनी ।" वै.निघ. । द्रव्यगुणे ।

अर्जुनाख्यः । पुं । काशतृणे । र.मा. । अर्जुनवृक्षे ।

अर्जुनादः । त्रि । दर्भकाशखादके । च.चि.२अ. ।

अर्जुनाद्यघृतम् । क्ली । प्रमेहे घृतम् यथा—"अर्जुनपटोलनिम्बैः सवचादीप्यकरसाममञ्जिष्ठैः । भल्लातकागुरुघनैः सगदानलचन्दनोशीरैः । गोक्षुरकसोमवल्कैः नवपटोलैर्हरिद्रया त्रिफलाः । अश्मन्तकार्जुनाभ्यां दीप्यकयुक्तेन चैव लोध्रेण । मञ्जिष्ठातिविषाभ्यां कल्ककषायैः पचेत्तैलम् । कफवातोत्थे मेहे पित्तकृते साधयेत्सर्पिः ॥" भा.म.३भ. मेह-चि. ।

अर्जुनी । स्त्री । गवि । गाईः । मे.नत्रिकं ।

अर्जुनोपमः । पुं । शाकद्रुमे । शेगुन गाछ । र.मा. । शालवृक्षे । रत्ना. ।

अर्णः । पुं । शाकवृक्षे । शेगुन । श.च. ।

अर्णः (स्) । क्ली । जले । रा.नि.व.१४ ।

अर्णभवः । पुं । शङ्खे । वै.निघ. ।

अर्णवः । पुं । समुद्रे । रत्ना. ।

अर्णवजः
अर्णवजमलः } पुं । समुद्रफेने . रत्ना. ।

अर्णवफेनः । पुं । समुद्रफेने । च.द. ।

अर्णवमलः । पुं । समुद्रफेने । रत्ना. ।

अर्णवोद्भवः । पुं । अग्निजारवृक्षे । रा.नि.व.६ ।

अर्णोदः । पुं । मुस्तके । रा.नि.व.६ ।

अर्णोभवः । पुं । शङ्खे । रा.नि.व.१३ ।

अर्त्तगलः । पुं । नीलझिण्ट्याम् । नीलझाँटी । सु.द्रव्यसं.अ. आगड इति ख्याते फलवृक्षे । रत्ना. ।

अर्त्तिः । स्त्री । रोगे । रा.नि.व.२० ।

अर्थः । पुं । विषये । धने । याचने । कारणे । वस्तुनि । अभिधेये । निवृत्तौ । प्रयोजने । मे.थद्विकं ।

अर्थचम्पिका । स्त्री । कर्कटशृङ्ग्याम् । काँकड़ा शृङ्गी । वै.निघ. ।

अर्थप्रसादनी । स्त्री । धामनवृक्षे । वै.निघ. ।

अर्थसाधकः । पुं । पुत्रजीववृक्षे । पूत्रजीवा । मद.व.१भा. । [रीठाकरञ्जे । मद.व.५ ।

अर्थसाधनः । पुं । पुत्रजीववृक्षे । मद.व.१ ।

अर्थसिद्धः (कः) । पुं । पुत्रजीववृक्षे । श्वेतनिर्गुण्ड्यां । कृष्णनिर्गुण्ड्याम् । रा.नि.व.४ ।

अर्थापत्तिः । स्त्री । 'यदकीर्त्तितमर्थादापद्यते ।' सा.सु.उ.६५अ. ।

अर्थ्यम् । क्ली । शिलाजतुनि । मे.यद्विकं ।

अर्दनिः । पुं । अग्निरोगे । अ.टी. ।

अर्दितम् । क्ली । तन्नामकवातव्याधौ । पक्षाघात विशेष । तस्य लक्षणम्—"उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि च । हसतो जृम्भतो भाराद्विषमाच्छयनाशनात् ॥ शिरोनासौष्ठचिवुकललाटेक्षणसन्धिगः । अर्द्दयत्यनिलो वक्त्रमर्दितं जनयेत्ततः ॥ वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते । शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम् । ग्रीवाचिवुकदन्तानां तस्मिन् पार्श्वे च वेदना । तमर्दितमिति प्राहुः ।" मा.नि. । अत्र रोगे यस्मिन् पार्श्वे अर्दितं तस्मिन्नेव पार्श्वे ग्रीवादीनां वेदना भवतीति बोध्यम् । त्रिवर्षातीते अतिक्षीणे निमेषशून्ये च रोगिणि तदसाध्यं भवति । अत्रौषधं—तिलक-

स्य गुरुरहीनकल्कादिकम्। "स्नेहपानानि नस्यञ्च भोज्यान्यनिलहन्ति च। उपनाहाश्च शस्यन्ते स्वेदमश्च तथार्द्दिते॥" "तन्नामकवातरोगविशेषे। लक्षणं—हनुद्वयस्य विक्षेपात् घोणाभेदाच्च बुद्धिमान्। नासापुटविकाराच्च अर्द्दितं रोगमादिशेत्॥" जयद.५५अ.।

अर्द्धम्। क्ली। समांशे। पुं। खण्डे। मे.।

अर्द्धकः। पुं। जलसर्पे। वै.निघ.।

अर्द्धकपाटसन्धिकः। पुं। वाह्यदीर्घैकपालीतराल्पपालिकर्णबन्धनाकृतिविशेषे। सु.सू.१६अ.।

अर्द्धकैशिकी। स्त्री। छेदनार्थं शस्त्रधाराविशेषे। सु.सू.८अ.।

अर्द्धखारी। स्त्री। खारीमानार्द्धे १२८ श.।

अर्द्धचन्द्रः। पुं। मयूरपिच्छे। ময়ূরপুচ্ছের চাঁদ। हे.च.।

अर्द्धचन्द्रम्। क्ली। अङ्गुलितोरणे। हारा.।

अर्द्धचन्द्रा। स्त्री। त्रिवृति। रा.नि.व.६। कृष्णत्रिवृति। কাল তেউড়ী। भा.पू.१भ.।

अर्द्धचन्द्राननः। पुं। अन्तर्मुखनामकविस्रावणास्त्रे। अम.।

अर्द्धचन्द्रिका। स्त्री। कर्णस्फोटालतायां। रा.नि.व.३। कृष्णत्रिवृति। मद.व.१।

अर्द्धलोचकः। पुं। कुर्पासे। কাঁচুলী। हारा.।

अर्द्धतिक्तः। पुं। किराततिक्तके। भा.पू.१भ.।

अर्द्धधारकम्। क्ली। अस्त्रविशेषे। तच्च छेदनभेदनार्थम्। सु.सू.८अ.।

अर्द्धनारीश्वररसः। पुं। रसोऽयं सान्निपातिकज्वरे गुञ्जामात्रं नस्यकर्म्मणि योज्यः। अपरे जीर्णविषमज्वरे नस्यमित्याहुः। तेन तत्क्षणमेव वामाङ्गज्वरो नश्यति। अस्य द्रव्याणि रसगन्धकविषटङ्कणानि समभागानि कज्जलीवत् कृत्वा कृष्णसर्पमुखाभ्यन्तरे स्थापयित्वा तन्मुखं मृदा संलिप्य मृद्भाण्डे स्थापयेत्। ऊर्द्धाधो लवणदानपूर्व्वकं ततो भाण्डमावृत्य तीव्राग्नौ ४ प्रहरं पचेत्। भैष.। अत्र "द्विकं ग्राह्यञ्च तत्सम"मिति मिलितरसगन्धकयोः समम्। "जैपालं तत्सममिति" विषतुल्यं जैपालं देयम्। "मरिचञ्च चतुर्गुणमिति" एकभागापेक्षया मरिचस्य चातुर्गुण्यम्। श्रीकण्ठः। सोमेश्वरस्तु मिलितरसगन्धकापेक्षया चातुर्गुण्यमित्याह। व्यवहारोऽप्यनेनैव। "रसगन्धौ समौ शुद्धौ विषं ग्राह्यञ्च तत्समं। जैपालं तत्समं ग्राह्यं मरिचञ्च चतुर्गुणम्। त्रिफलाया रसैर्मर्द्द्यं भावना पञ्चधा कृता॥" र.सा.सं.जीर्ण-विषम-ज्व.चि.। अन्यः पाठः शुद्धसूतं तथा गन्धं विषं ताम्रस्य भस्म च। समभागेन संगृह्य वारिणा पेषयेद्दृढं। चक्राकारसमं कृत्वा सर्पतुण्डेन संन्यसेत्। तत्तुण्डलेपनं कृत्वा रौद्रे दद्याद्विचक्षणः। स्थाल्यन्ते लवणं किञ्चित्तस्योपरि च गोलकं। ततो लवणकं दत्त्वा सिकताभिः प्रपूरयेत्। चतुर्भिः प्रहरैर्ज्वालामन्दमध्यखरक्रमात्। शीते तद्गोलकं नीत्वा दूरीकृत्य च लेपनं। भस्म संगृह्य यत्नेन खल्ले कुर्य्याद्विमर्द्दनं। यवमात्रन्तु तच्चूर्णं नस्ये दद्यात्सुरेश्वरि॥" प्रयोगा.ज्व.चि.।

अर्द्धपलम्। क्ली। कर्षद्वये। ४ तो.। स्यात्कर्षाभ्यामर्द्धपलम्। प.प्र.१ख.।

अर्द्धपादा। स्त्री। भूम्यामलक्याम्। वै.निघ.।

अर्द्धपारावतः। पुं। वनकुक्कुटे। चित्रकण्ठपारावते। মুক্তিপায়রা। तित्तिरपक्षिणि। अत्रि.।

अर्द्धपुष्पा। स्त्री। महाबलायाम्। পীতবেলেড়া। वै.निघ. [থাওয়া।

अर्द्धभोजनम्। क्ली। अर्द्धाशने। আদপেটা

अर्द्धमात्रिकः। पुं। निरूहणाधिकारे तन्नामक-वस्तौ। "दशमूलीकषायेण शताह्वाञ्च प्रपेषयेत्। सैन्धवाच्च मधुनो द्विपलं द्विपलं तथा। तैलस्य पलमेकन्तु फलस्यैकञ्च योजयेत्। अर्द्धमात्रिकसंज्ञोऽयं वस्तिर्देयो निरूहवत्। न च स्नेहो न च स्वेदः परिहारविधिर्न च। आत्रेयानुमतो ह्येष सर्व्वरोगनिवर्हणः॥ इति च.द.।

अर्द्धमासूरी। स्त्री। लेखनार्थमस्त्रधाराविशेषे। सु.सू.८अ.।

अर्द्धवीरच्छा। स्त्री। कृष्णदूर्व्वायाम्।

अर्द्धश(स)फरः। पुं। दण्डपालाख्यक्षुद्रमत्स्यविशेषे। দাঁড়িকা বা ডানকোণা মাছ। हारा.।

अर्द्धशरावः (कः)। पुं। प्रसृतिद्वये। ३२ तो.। प.प्र.१ख.। भा.। [वै.निघ.।

अर्द्धसहः पुं। पेचके। প্যাঁচা। मं. घुवड़।

अर्द्धांशोनजलम् । क्ली । अर्द्धांशेन हीने पक्वजले । इदं वातपित्तघ्नम् । रा.नि.व.१४ ।

अर्द्धालिग: । पुं । जलसर्पे । वै.निघ. ।

अर्द्धावभेदक: । पुं । शिरोरोगभेदे । আদ্ কপালে ধরা । निदानलक्षणे—"रूक्षाशनाध्यशनप्राग्वातावश्यायमैथुनैः। वेगसन्धारणायासव्यायामैः कुपितोऽनिलः। केवलः सकफो वार्द्धं गृहीत्वा शिरसो बली । मन्याभ्रूशङ्खकर्णाक्षिललाटार्द्धेऽतिवेदनां । शस्त्रारणिनिभां कुर्य्यात्तीव्रां सोऽर्द्धावभेदकः ॥" मा.नि.। अपिच यस्योत्तमाङ्गार्द्धमतीव जन्तोः सम्भेदतोदभ्रमशूलजुष्टं । पक्षाद्दशाहादथवाप्यकस्मात्तस्यार्द्धभेदं त्रितयाद्व्यवस्येत् ॥ सु.उ.२५अ. ।

अर्द्धाशनम् । क्ली । अर्द्धभोजने । श.च. ।

अर्द्धेन्दु: । पुं । अतिप्रौढ़स्त्रीयोनौ अङ्गुलियोजने । मे.दत्रिकं ।

अर्द्धेन्दुशकला । स्त्री । नासारोगविशेषे । कपालरोगभेदे । ओष्ठरोगे । अर्व्वुदरोगे । गलरोगे। तालुरोगे । कर्णरोगे । वै.निघ. ।

अर्द्धोदकक्षीरम् । क्ली । अर्द्धोदकशृतदुग्धे । অর্দ্ধজলে সিদ্ধ দুগ্ধ । "अर्द्धोदकं पयः शिष्टमामाल्लघुतरं शृतम् ।" हेमाद्रौ चारपाणिः ।

अर्भ: (क:) । पुं । बालके । रा.नि.व.१८ । कृशे । मे.कत्रिकं ! पञ्चजातशिशौ । रा.नि.व.१८।

अर्भा । स्त्री । गुग्गुलौ । গুগ্গুল । ' अर्भाचूर्णं सहयुतम् ।" प्रयोगा.भग्न चि. ।

अर्मण: । पुं । द्रोणपरिमाणे (३२ सेर) । प.प्र.१ख. । च.द.अ.सा.चि.कुटजावलेहे ।

अर्म्मन् । क्ली । नेत्ररोगविशेषे । চক্ষুরোগ । तच्च पञ्चविधम्—प्रस्तार्य्यर्म्म, शुक्लार्म्म, रक्तार्म्म, मांसार्म्म, स्नाय्वर्म्म चेति । लक्षणं स्वस्वपर्य्याये मृग्यम् ।

अर्यमा । पुं । अर्कवृक्षे । रा.नि.व.१० । सूर्य्ये ।

अर्व्वण:
अर्व्वा (न्) } पुं । अश्वे । भा.पू. ।

अर्व्वती । स्त्री । वड़वायाम् । कुम्भदास्याम् । मे.तत्रिकं ।

अर्व्वुद: । पुं,क्ली । पुरुषे । दशकोटिपरिमाणे । मे.दत्रिकं । मांसकीलकाकाररोगविशेषे । আব্ । হিং রসৌলী । वातजपित्तजकफजरक्तजमांसजमेदोजाध्यर्व्वुदद्विरर्व्वुदभेदेनाष्टौ । लक्षणं—गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदूष्य । वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकं । कुर्व्वन्ति मांसोच्छ्रयमत्यगाधं तदर्व्वुदं शास्त्रविदो वदन्ति । वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा वा। तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि तदा भवन्ति ॥ मा.नि. । सु.नि.११अ. । "दोषः प्रदुष्टो रुधिरं शिरास्तु सम्पीड्य सङ्कोच्य गतस्तु पाकम् । संस्रावमुन्नाह्यतिमांसपिण्डं मांसाङ्कुरैराचितमाशु वृद्धिं । स्रवत्यजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकं स्यात् ॥" इति दन्तरोगभेदे । नेत्ररोगभेदे । तालुरोगे तल्लक्षणं—तालुमध्ये रक्तजं पित्तलक्षणं पद्मकर्णिकावत्केसरैरिव पार्श्वतो दीर्घमांसाङ्कुरैर्वेष्टितं शोथं अर्व्वुदं विद्यात् । "पद्माकारं तालुमध्ये तु शोथं विद्याद्रक्तादर्व्वुदं पित्तलिङ्गम् ।" भा.म.४भ.मुखरो.चि. ।

अर्व्वुदाकार: । पुं । बहुवारवृक्षे । চালিতা গাছ । वै.निघ. ।

अर्व्वुदाद्रिज: । पुं । मेषशृङ्ग्याम् । মেড়াশিঙা । मं सुरदारशिंग । वै.निघ. ।

अर्व्वूरम् । क्ली । आहुल्यनामक्षुपे । काश्मीरे तड़वड़ु इति प्रसिद्धे । मं तड़वड़ । वै.निघ.२भ. संग्रहणी-चि.तालीशादिचूर्णे ।

अर्श: । क्ली । The piles or hoemorrhoids, स्वनामख्यातगुदरोगविशेषे । लक्षणम्—दोषास्त्वङ्मांसगुदमुखादभ्यन्तरतः सार्द्धचतुरङ्गुलिमिता या नाड़ी गुदमिति कथ्यते । सा गुदनाड़ी शङ्खावर्त्तनिभवलित्रययुक्ता । तस्याः सार्द्धाङ्गुलिमितांशो गुदौष्ठः । गुदौष्ठादङ्गुलिमितोऽंशः सम्वरणीनाम प्रथमा वलिः, तदुपरि सार्द्धाङ्गुलिमितोऽंशो विसर्ज्जनीनाम द्वितीया, तदूर्द्ध्वं सार्द्धाङ्गुलिमितोऽंशः प्रवाहनीनाम तृतीयावलिरुच्यते । तास्वेव मांसांकुरा जायन्ते । तच्चार्शः षड्विधं वातजादिभेदात् । प्रकरणमिदं गुदार्शःपरं बोध्यम् । तन्निदानं यथा—"दोषास्त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन् । मांसाङ्कुरानपानादौ कुर्व्वन्त्यर्शांसि तां जगुः ।" इति । "पृथग्दोषैः समस्तैश्च शोणितात्सहजानि च । अर्शांसि षट्प्रकाराणि विद्याद्गुद-

भलित्वये ।" साधारणचिकित्सा — अत्र तथान्नपानौषधादिकं सेव्यं येन वायोरनुलोमः अग्निबलहृद्धिश्च जायते । "दत्वाथ वेतनं योऽध्येत्यादायापि च वेतनं । अध्यापयेच्च जुहुयाज्जपेदार्शोयुतो भवेत् ॥" इति कर्म्मविपाकः । पथ्यं — "विरेचनं लेपनमश्मशमोचः चाराग्निशस्त्राचरितश्च कर्म्म । पुरातना लोहितशालयश्च सषष्टिकाश्चापि यवाः कुलत्थाः । गोधाखुसर्पानगजोष्ट्रकूर्म्मश्वाविन्नकुलिङ्गाजखरोतुकोश्चाः । तरत्तुचाषाश्वशृगालकाका येऽन्येऽपि मांसाः प्रसहाश्च तेऽपि ॥ पटोलपल्लूररसोनवस्त्रिपुनर्णवासूरणवालुकानि । जीवन्तिका दन्तशठा सुरा च त्रुटिर्वयस्था नवनीततक्रं । कक्कोलधात्रीरुचकं कपित्थमौण्ड्रादिमूत्राद्यपयांसि चापि । भल्लातकं सर्षपजश्च तैलं गोमूत्रसौवीरतुषोदकानि । वातापहं यच्च यदग्निकारि तदन्नपानं हितमर्शसेभ्यः ॥" इति । अपथ्यं — आनूपमामिषं मत्स्यं पिण्याकं दधिपिष्टकं । माषान् करीरं निष्पावं विल्वं तुम्बीमुपोदिकां । पक्वामं शालुकं सर्व्वं विष्टम्भीनि गुरूणि च । आतपं जलपानानि वमनं वस्तिकर्म्म च । विरुजानि च सर्व्वाणि मारुतं पूर्व्वदिग्भवम् । वेगरोधं स्त्रियं पृष्ठयानमुत्कटकासनं । यथास्वं दोषलञ्चान्नमर्शसः परिवर्ज्जयेत् । यत्पथ्यं यदपथ्यञ्च वक्ष्यते रक्तपित्तिनां । रक्तार्शोरोगिणां तत्तदपि विद्याद्विशेषतः ॥" इति ।

अर्शःकुठाररसः । पुं। रसोऽयं अर्शसि हितः। पाठः— "शुद्धसूतं पलञ्चैकं द्विपलं शुद्धगन्धकं । मृतताम्रञ्च लौहञ्च प्रत्येकञ्च पलत्रयम् । त्रिकटुं लाङ्गली दन्ती चित्रकं पुष्करं तथा । प्रत्येकं द्विपलं योज्यं यवक्षारञ्च टङ्कणं । उभौ पञ्चपलौ योज्यौ सैन्धवं पलपञ्चकं । द्वात्रिंशञ्च गवां मूत्रं स्नुहीक्षीरं तदर्द्धकं । सर्व्वं मृदग्निना पाच्यं यावन्नायाति पिण्डताम् ॥" इति मात्रा माषद्वयम् । रस.र.प्रयोगा. । रसेन्द्रचिन्तामणौ रसगन्धौ न घृतौ । स्नुहीक्षीरञ्च गोमूत्रसमं दत्तम् । पुष्करस्थाने पिलुकमिति उक्तम् । अन्यः — "शुद्धसूतं द्विधागन्धं मृतलौहञ्च ताम्रकं। प्रत्येकं द्विपलं दन्ती त्र्यूषणं सूरणं तथा । शुभाटङ्कयवक्षारसैन्धवं पलपञ्चकं । पलाष्टकं स्नुहीक्षीरं द्वात्रिंशञ्च गवां जलैः । आपिण्डितं पचेदग्नौ खादेन्माषद्वयं ततः ॥" र.सा.सं. । शुभा वंशलोचना ।

अर्शःसूदनः । पुं । सूरणे । ওল ।

अर्शम् । क्ली । अर्शोरोगे । श.र. ।

अर्शसः । त्रि । अर्शोयुक्ते ।

अर्शी । त्रि । अर्शोयुक्ते । श.र. ।

अर्शोघ्नः । पुं । सूरणे । ওল । रा.नि.व.७ । भल्लातके । ভেলা । सर्जिक्षारे । সাজিমাটী । तेजवले । তেজবল । श्वेतसर्षपे । শ্বেত সরিষা । कटुसूरणे । বুনো ওল । वै.निघ. ।

अर्शोघ्नवर्गः । पुं । कुटजबिल्वचित्रकनागरातिविषाभयाधन्वयासकदारुहरिद्रावचाचव्यानीति । अयं द्वादशदशकः प्रभावादर्शोघ्नः । च.सू.४ ।

अर्शोघ्नवल्कला । स्त्री । तेजवले । তেজবল। वै.निघ. । [कं । भल्लातके । वै.निघ. ।

अर्शोघ्नी । स्त्री । तालमूल्याम् । रत्ना.। मे.नत्रि-

अर्शोजः । पुं । भगन्दररोगे ।

अर्शोयन्त्रम् । क्ली। अर्शोदर्शनार्थं गोस्तनाकारयन्त्रे । "अर्शसां गोस्तनाकारं यन्त्रकं चतुरङ्गुलं । नाहे पञ्चाङ्गुलं पुंसां प्रमदानां षड़ङ्गुलं । द्विच्छिद्रं दर्शने व्याधेः कैचिच्छिद्रन्तु कर्म्मणि ।" अत्रि. । जयद.५३अ. ।

अर्शोवर्त्मन् । क्ली । नेत्रवर्त्मगतरोगविशेषे । नेत्रवर्त्मनि कर्कटीवीजवत् मन्दवेदनमश्लक्ष्णतीक्ष्णा या पिड़का भवति तत् । "एर्व्वारुवीजप्रमिताः पिड़का मन्दवेदनाः । श्लक्ष्णाः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते ॥" एषा सन्निपातजा । मा.नि. । तदुक्तं—पिड़का सन्निपातेन तदर्शोवर्त्म निर्दिशेत् । इति विजयरचिते—निमिः ।

अर्शोहररसः । पुं । रसोऽयं अर्शसि हितः । पाठो यथा— "रसवैक्रान्तशुद्धाभ्रकान्तभस्म सगन्धकं । तुल्यांशं मर्द्दयेच्चार्द्रदाड़िमोत्थैः रसैस्ततः । भक्षयेन्माषमेकन्तु अर्शसां नाशने रसः ॥" रस.र.।

अर्शोहितः । पुं । भल्लातकवृक्षे । त्रिका. ।

अर्हम् । क्ली । सुवर्णे । সোণা । वै.निघ. ।

अर्हा । स्त्री । त्रायमाणालतायाम् । বলালতা । वै.निघ. ।

अलम् (कम्) । क्ली । हरिताले । रा.नि.व. १३ । सि.यो.क्रास,चि,मनःशिलादिधूमपाने,वृन्द,।

"मनःशिलाले मरिच"इति । वृश्चिकपुच्छकण्टके । বিছের হুল । वै.च. । वङ्कोले । वै.निघ.२भ.वा. व्या.प्रत्यष्ठीला.चि. । भल्लीयुक्तकेशे ।

अलकप्रियः । पुं । कृष्णभल्लातके । কাল ভেলা । मं विवलाजटा । बीजकवृक्षे । हिं विजयसार । मद.व.५ ।

अलका । स्त्री । वसायाम् । চর্ব্বি । वै.निघ. ।

अलकाह्वयः । पुं । कटुनिम्बे । কটু নিম् । वै.निघ. ।

अलक्तः (कः) । पुं, क्ली । Lac, the red animal dye so called. लाक्षायाम् । আলতা, লাহা, জো, গালা । हिं लाही । मं अलिता । कं अलतगे । गुणाः—"तिक्तोष्णः कफवातामयघ्नः रुच्यो व्रणघ्नश्च । रा.नि.व.६।वर्णकरः हिमः बल्यः स्निग्धः लघुस्तुवरः अनुष्णः कफपित्तरक्तहिक्काकासज्वरघ्नः व्रणोरःक्षतवीसर्पकृमिकुष्ठहरः । अलक्तको विशेषेण व्यङ्गघ्नः ।" भा.पू.१भ.। अलक्तको रजोरोधी रक्तपित्तक्षयापहः । प्रदरश्चाप्यतीसारं सरक्तं क्षपयेद्‌ध्रुवम् ॥" अत्रि. ।

अलगणः । पुं । नेत्ररोगविशेषे । वै.निघ. ।

अलगर्द्दः । पुं । सर्पविशेषे । জলঢোঁড়া, জলবোড়া ।

अलगर्द्दा । स्त्री । सविषजलायुकायाम् । বিষাক্ত জোঁক । सा रोमशा महापार्श्वा कृष्णमुखी च । See जलायुका । सु.सू.१३अ. ।

अलगर्धः । पुं । अलगर्द्दे । अम. ।

अलङ्कारसुवर्णम् । क्ली। शृङ्गीकनके । हारा.।

अलजी । स्त्री । प्रमेहपिटिकारोगे। लक्षणम्—"रक्ता सिता स्फोटवती दारुणा त्वलजी भवेत् । सु.नि.प्रमेहचि.६अ.। नेत्रसन्धिजरोगे । स च नेत्रसन्धौ प्रमेहाधिकारोक्तालजीलक्षणः शोथः । लक्षणम्—"जाता सन्धौ कृष्णशुक्लेऽलजी स्यात् तस्मिन्नेव ख्यापिता पूर्व्वलिङ्गैः ।" मा.नि. । शूकदोषविशेषे । एषापि प्रमेहपिटकाया लक्षणयुक्ता । "अलजीलक्षणैर्युक्तामलजीञ्च वितर्कयेत् ॥" सु. नि.शू.दो.चि.१४अ. । [পারুল ।

अलम्बमुष्ककः । पुं । मुष्ककवृक्षे । घण्टा-

अलम्बा । स्त्री । तिक्तालाब्वाम् । তিৎলাউ । स्थावरविषान्तर्गतपत्रविषे । सु.कल्प.२अ. । See पत्रविषम् ।

अलम्बुजा । स्त्री । गोरक्षमुण्ड्यां । वै.निघ. ।

अलम्बुदम् । क्ली । बालके । বালা । वै.निघ. क्षय.चि.शिवगुटी. ।

अलम्बुषः । पुं । वान्तिरोगे । मे.षचतुष्कं । भूकदम्बे । কুকশিমে গাছ । र.मा.रत्ना. ।

अलम्बुषा (सा) । स्त्री । A sort of sensitive plant. लज्जालुकाभेदे । ফুল শোলা । गुणाः—मधुरा लघुः कृमिकफपित्तघ्नी च । भा.पू. १भ.गु.व. । अलम्बुषायाः स्वरसः पीतो द्विपलमात्रया । अपचीगण्डमालानां कामलायाश्च नाशनः । भूकदम्बे । কুকশিমে । महाश्रावण्याम् । বড় থুলকুড়ি । रा.नि.व.५ । वै.निघ.२भ.वा.व्या.षड़शीति.गुग्गुलौ, त्र्यूषणाद्यलौहे च । लौहमले । মণ্ডুর । च.द.१भ.आमवाते अलम्बुषाचूर्णे ।

अलम्बुषाद्यचूर्णम् । क्ली । आमवाते । पाठः—"अलम्बुषां गोक्षुरकं गुडूचीं वृद्धदारकम् । पिप्पलीं त्रिवृतां मुस्तं वरुणं सपुनर्णवम् । त्रिफलां नागरञ्चैव श्लक्ष्णचूर्णानि कारयेत् ॥" मण्डूरादिचूर्णं प्रत्येकं समभागमादाय एकत्र संमिश्रणीयं। अनुपानं—दधिमण्डं काञ्जिकं दुग्धं तक्रं मांसरसं वा यथालाभं दद्यात् । च द.आमवा.चि. । द्वितीयं यथा—अलम्बुषा गोक्षुरकं त्रिफलानागरामृताः । यथोत्तरं भागवृद्ध्या श्यामाचूर्णञ्च तत्समम् । इति । अलम्बुषा लौहमलं । मतान्तरे मुण्डीरी । श्यामाचूर्णं वृद्धदारकमूलचूर्णम् । च.द.भा.। तृतीयमपि आमवाते । "अलम्बुषा गोक्षुरकं मूलं वरुणकस्य च । गुड़ूची नागरञ्चेति समभागानि कारयेत् ॥" भा. । रस.र. ।

अलम्बोद्धस्तनी । त्रि । यस्याः स्तनौ न लम्बौ नोर्द्धमुखौ च । सु.शा.१०अ. ।

अलम्बोष्ठी । त्रि । यस्याः ओष्ठौ लम्बमानौ न भवति । सु.शा.१०अ. ।

अलमोसः । पुं । मत्स्यभेदे । वै.निघ. ।

अलर्कः । पुं । (Calotropis gigantea or Procera ; अर्क of white flowers.) श्वेतार्के । শ্বেত আকন্দ । हिं मादार । भा.पू.१भ. ।

मि.कचित्‌। मन्दार इति हेमा.अलर्कादिव.। मन्दारार्के। रा.नि.व.१०। अलर्कोमन्दारार्क: यस्य क्षीरं न विनश्यति। सु.सू.३८अ.अर्कादि.ड.। मन्दाराख्य: श्वेतपुष्प:। वा.सू.१५अ.अर्कादिव.अरुण:। "अर्कालर्कौ नागदन्ती विशल्या।" योगोन्मादितकुक्कुरे। मि.कचित्‌। कुकुरज्वरे। हा.चि. २स्था.२अ.।

अलवणा। स्त्री। ज्योतिष्मत्यां। লতাফট্‌কী। वर्तुलपक्वरक्तफला पीततैला काकमर्द्दनिका। सु.सू.३८अर्कादिव.ड.। गुणा:—तीव्रा चालवणा सा स्यात्‌ कफभेद: क्रिमिप्रणुत्‌। अचि.। हरीतक्याम्‌। मद.व.१।

अलस: (क:)। पुं। पादरोगविशेषे। পাঁকুই तल्लक्षणं—"क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुगन्वितौ। दुष्टकर्दमसंस्पर्शादलसं तं विनिर्दिशेत्‌॥" सु.नि.१३अ.। विसूचिकाया अवस्थाभेदे। स त्रिधा—विषाजीर्णं रसादेकं दोषै: स्यादलसस्त्रिधा। शार्ङ्ग.। प्रयाति नोर्द्धं नाधस्तात्‌ आहारो न विपच्यते। आमाशयेऽलसीभूत: तेनासौ लसको मत:॥ इति निरुक्ति:। वा.सू.८। तल्लक्षणं यथा—"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत्‌ परिकूजति। निरुद्धो मारुतश्चैव कुक्षावुपरि धावति॥" See अग्निमा.। क्ली। क्षुद्रकुष्ठरोगभेदे। लक्षणम्‌—"कण्डूमद्भि: सरागैश्च गण्डैरलसकं चितम्‌।" मा.नि.। व्यालजातिज्वरे। गज-वै.। जिह्वारोगे। वै.निघ.। वृक्षभेदे।

अलसा। स्त्री। हंसपदीलतायाम्‌। গোওয়ালে লতা। मि.सचित्‌। [वै.निघ.।

अलसी। स्त्री। अतस्याम्‌। তিসি, মশিনা।

अलसेलुका। स्त्री। रक्तलज्जालुकायाम्‌। ফুল সোলা। वै.निघ.।

अलातम्‌। क्ली। अङ्गारे। কয়লা। रत्ना.।

अलाबु। क्ली। (बु:,बू:)। स्त्री। (Cagenaria vulgaris, Syn,Cucurbita lagenaria.) स्वनामख्यातफलशाकलतायाम्‌। লাউ গাছ। हिं लौका, मिठितुम्बी, लवलौआ, गड्डलौआ। मं दुध्याभोप्ला। सा द्विधा दीर्घा वर्त्तुला च। तत्फलगुणा:—मिष्टं हृद्यं पित्तश्लेष्मघ्नं वृष्यं रुचिकरं धातुपुष्टिविवर्द्धनम्‌। भा.पू.१भ.। मिष्टतुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु। वृष्यं रुचिकरं प्रोक्तमिति च। द्रव्यगु.। कटुतुम्ब्यां। তিৎলাউ। श.र.।

अलाबुक:। पुं। अश्वस्य मुखरोगे। अत्र मुखदौर्गन्ध्यं तालुशोफ: ग्रासग्रहणे विद्वेषश्च भवति। ज.द.।

अलाबुका। स्त्री। कटुदुग्धालाबुनि। भा.।

अलाबुनी। स्त्री। कटुदुग्धालाबुनि। তেত শেতলাউ। कटुतुम्ब्याम्‌। তিৎলাউ। मिष्टतुम्बीलतायाम्‌। মিষ্টলাউ গাছ। हिं मीठितुम्बी। मद.व.७।

अलाबुविधि:। पुं। अलाब्वा रक्तमोक्षणे। "अलाबु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम्‌। तस्मात्‌ श्लेष्मोपसृष्टे तु हितं तदवसेचने।" सु.सू. १३अ.।

अलाबुसुहृत्‌। पुं। अम्लवेतसे। वै.निघ.।

अलाबूयन्त्रम्‌। क्ली। यन्त्रविशेषे। लक्षणं—"स्याद्द्वादशाङ्गुलाऽलाबुर्वाहे त्वष्टादशाङ्गुला। चतुस्त्र्यङ्गुलवृत्तास्था दीप्ताऽन्त:श्लेष्मरक्तहृत्‌॥" कश्चित्‌ अचि.।

अलास:। पुं। जिह्वास्फोटे। जिह्वागतमुखरोगे। अत्र दुष्टकफशोणितेन जिह्वातले दारुण: शोथो भवति। वृद्धिं गते जिह्वास्तम्भो जिह्वामूले पाकश्च भवति। लक्षणं - जिह्वातले य: श्वयथु: प्रगाढ़: सोऽलाससंज्ञ: कफरक्तमूर्त्ति:। जिह्वां स तु स्तम्भयति प्रवृद्धो मूले तु जिह्वा भृशमेति पाकम्‌॥ सु.नि.१६अ.।

अलि:। पुं। भ्रमरे। रत्ना.। मद्ये। मि.लद्दित्‌। वृश्चिके। हारा.। काके। कोकिले। श.र.।

अलिक:। पुं, क्ली। कपोले। रा.नि.व.१८। ललाटे। रत्ना.। [तैलभ्रष्टमांसे। पिष्टके।

अलिकमत्स्य:। पुं। अङ्गारे। भिन्नतिले।

अलिकुलप्रिया। स्त्री। काष्ठशेवत्यां। কাঠ গোলাপ। वै.निघ.।

अलिकुलसङ्कुला। स्त्री। कण्टकशेवत्यां। কাঁটাশেউতী। कुब्जकावृक्षे। কোকণদেশীয় পুষ্পবৃক্ষ। रा.नि.व.१०। भा.पू.१भ.।

अलिगर्द्द:। पुं। जलसर्पे। আলাধ, ধরা, গেঁড়িভাঙ্গা इति च लोके। श.र.।

अलिजिह्वा (ह्विका) । स्त्री । क्षुद्रजिह्विकायाम् । আল্‌জিব इति लोके । श.र. ।

अलिञ्जरम् । क्ली । फलविशेषे । फुटीविशेष । चिरफोटीति महाराष्ट्रे । गुणाः—अलिञ्जरं तु रुच्यं स्याच्छीतलं भेदकं मतं । तुवरं मधुरं चारं तिक्तं पाके कटु स्मृतं । स्वादिष्ठं वातकृच्छ्वासकासश्लेष्मविनाशनम् ॥ वै.निघ. ।

अलिता । स्त्री । अलक्तके । আলতা । गुणाः —"अलितोष्णा तिक्तका स्यात्कफवातव्रणापहा । व्यङ्गारुचीकण्ठरुजं व्रणदोषञ्च नाशयेत् । अन्ये गुणाश्च लाक्षावत्प्रोक्ताः पूर्व्वमहर्षिभिः ।" वै.निघ.।

अलिदूर्व्वा । स्त्री। मालादूर्व्वायां । रा.नि.व.८।

अलिपकः । पुं । भ्रमरे । कोकिले । कुक्कुरे । सर्व्वत्र मे.कचतुष्कं। [रा.नि.व.५ ।

अलिपत्रिका । स्त्री। वृश्चिकाल्यां । বিছাতী।

अलिपर्णिका (र्णी) । स्त्री । वृश्चिकाल्यां । বিছাতি, বিছুটী । रा.नि.व.६ ।

अलिप्रियम् । क्ली । रक्तोत्पले । त्रिका. । पुं । धाराकदम्बवृक्षे । आम्रवृक्षे । श.र. । कदम्बवृक्षे । भा.पू.१भ. ।

अलिप्रिया । स्त्री । पाटलावृक्षे । পারুল গাছ । प.मु. । भूजम्बूवृक्षे । वै.निघ. ।

अलिमकः । पुं । भेके । कोकिले । भ्रमरे । पद्मकेशरे । मधूकवृक्षे । मे.कचतुष्कं ।

अलिमोदा । स्त्री । गणिकारिकायां । গণিরি । रा.नि.व.६ ।

अलिमोहिनी । स्त्री । केविकापुष्पवृक्षे । रा.नि.व.१० । केविकां पश्य ।

अलिम्पकः (म्बकः) । पुं । कोकिले । मधुमक्षिकायाम् । कुक्कुरे । पद्मकेशरे । वै.निघ. ।

अलिवल्लभा । स्त्री। रक्तपाटलायां। भा.पू.१भ.।

अलिवाहिनी । स्त्री । कोकणदेशप्रसिद्धे केरिकावृक्षे । केवेर इति भाषा । रा.नि.व.१० ।

अलिसमाकुलः । पुं । पुष्पवृक्षविशेषे । दवणसेवन्तीति महाराष्ट्राद्रौ । वै.निघ. ।

अली (इन्) । पुं । वृश्चिके । भ्रमरे । मे. ।

अलीकम् । क्ली । ललाटे । हे.च. ।

अलीकमत्स्यः । पुं । अङ्गारखिन्नतिलतैलभ्रष्टमाषपिष्टके । यथा—"माषपिष्टिकया लिप्तं नागवल्लीदलैर्महत् । तत्तु संस्वेदयेद्युक्त्या स्थाल्यामङ्गारकोपरि । ततो निष्काशितं खण्डं तिलतैलेन भर्जयेत् । अलीकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः । तं वृन्ताकभटित्रेण वास्तूकेन च भक्षयेत् ॥ भा.पू.२भ.।

अलीनकम् । क्ली । वङ्गे । हे.च. । [निघ. ।

अलीष्टः । पुं । तिलकवृक्षे । তিল গাছ । वै.

अलुः । पुं, स्त्री । गलन्तिकायाम् । आली । तुलसीवृक्षे । क्ली । मूले । मे.कद्विकं ।

अलुकम् । क्ली । आलुकसाधारणे । আলু । गुणाः—आलुकं शीतलं आग्नेयं मलस्तम्भनं मधुरं जड़ं रुच्यं वृष्यं दुर्जरं बलवर्द्धनं स्तन्यवर्द्धनं मलमूत्रकफवातवृद्धिकरं रक्तपित्तघ्नञ्च । वै.निघ. । एतच्च राजालुरक्तराजालुश्वेतकृष्णवन्यकांस्यालुभेदेन बहुविधम् । विशेषः पर्य्याये द्रष्टव्यः । आलुबोखार इति प्रसिद्धे काबेलदेशीयफले । आमिषे ।

अलोमशः पुं । मत्स्यविशेषे । तल्लक्षणं—वितस्तिपरिमितः श्वेताङ्गः सूक्ष्मशल्कश्च । तन्मांसं बलकरं वीर्य्यकरं पुष्टिकरञ्च । रा.नि.व.१७ ।

अलोमशा । स्त्री । वृक्षविशेषे । मं कांगझाड़ । वै.निघ. ।

अलोहितम् । क्ली । रक्तपद्मे । ईषद्रक्तपद्मे ।

अल्कः । पुं। वृक्षविशेषे । शरीरावयवे । वै.निघ.।

अल्पकः । पुं । यासक्षुपे, दुरालभायाम् । रा.नि.व.४ । भूमिजम्बूवृक्षे । वै.निघ. ।

अल्पकेशिका } **अल्पकेशी** } स्त्री। भूतकेश्यां। চামরকষা। प.मु. । र.मा.रत्ना. ।

अल्पगन्धम् । क्ली । रक्तकैरवे । रक्तकमले । वै.निघ. । [व.१० ।

अल्पगोधूमः । पुं । वणगोधूमे । प.मु. । मद.

अल्पघण्टिका । क्ली । क्षुद्रशणपुष्प्याम् । লঘু শণগাছ । मं लघुताग ।

अल्पतनुः । त्रि । खर्व्वे । अम. ।

अल्पनायिकाचूर्णम् । क्ली । औषधसिद्धे

चक्षुष्यं हितम्। पाठः—"विशाखं पञ्चलवणं प्रत्येकं चूर्णयेत् पिचु। गन्धकान्माषकानष्टौ चतुरो माषकान् रसात्। इन्द्राशनात्पलं शाणवितयाधिकमिष्यते। खादेन्निम्बीकृताच्छाणमनुपेयञ्च काञ्चिकं॥" र.चि.। [वै.निघ.।

अल्पनिद्रता। स्त्री। पित्तजन्यनिद्राल्पतारोगे।

अल्पपत्रः। पुं। चुद्रपत्रतुलसीचुपे। र.मा.। क्ली। रक्तपद्मे। र.मा.।

अल्पपत्रकः। पुं। गिरिजमधूकवृक्षे। পাহাড়ে মৌল গাছ। रत्ना.। [नि.व.४।

अल्पपत्रिका। स्त्री। रक्तापामार्गचुपे। रा.

अल्पपत्री। स्त्री। मिश्रेयायाम्। मुषल्याम्। তালমূলী। वै.निघ.। [निघ.द्रव्यगु.।

अल्पपद्मम्। क्ली। रक्तपद्मे, रक्तोत्पले। वै.

अल्पपर्णिका } स्त्री। मुद्गपर्ण्याम्। মুগানী।
अल्पपर्णी } वै.निघ.।

अल्पपुष्पिका। स्त्री। पीतकरवीरे। পীত-পুষ্প করবী। वै.निघ.।

अल्पप्रमाणकः। पुं। लतापनसे। र.मा.। चेलानके। চেনা তরমুজ, থরমুজ इति भाषा। वै.निघ.।

अल्पमस्तकः। पुं। चित्रकचुपे। वै.निघ.।

अल्पमक्षिका। स्त्री। मक्षिकाविशेषे। ছোট মাছী। वै.निघ.।

अल्पमारिषः। पुं। चुद्रमारिषे। কাঁটানটিয়া, বা চাঁপানটিয়া। हिं अल्पमरषा। मं घोरतांडुलजा। अम.। तत्शाकगुणाः—लघुशीतवीर्य्यं रुचं पित्तघ्नं कफनाशनं। मलमूत्रनिःसारकं रुच्यं दीपनं विषघ्नञ्च। भा.पू.१भ.। See तण्डुलीयं।

अल्परसा। स्त्री। हैमवत्याम्। रा.नि.व.२३।

अल्पवर्त्तकः। पुं। तित्तिरपक्षिणि। मद.व.१२। [वै.निघ.।

अल्पशुक्रता। स्त्री। पित्तजन्यशुक्राल्पतारोगे।

अल्पशोफः। पुं। सर्व्वाक्षिरोगे। वै.निघ.।

अल्पक्षुपा। स्त्री। ह्रस्वलज्जालुकायां। वै.निघ.।

अल्पास्थि। क्ली। परूषकफले। ফলসা। रा.नि.व.११। भा.पू.१भ.।

अल्पिका। स्त्री। वनमक्षिकाजातौ। हे.च.४। मुद्गपर्ण्याम्। भा.पू.१भ.।

अल्लकः। पुं। कङ्कोलविशेषे। ককুথল। धान्यके। ধনে। वै.निघ.।

अल्लका। स्त्री। धान्यके। ধনে। वै.निघ.।

अल्ला। स्त्री। मातरि। धान्यके। ধনে।

अल्लु। क्ली। आलूके। আলুবোখারা इति लोके। मद.व.६।

अवकुम्यनम्। क्ली। आर्त्तनादे।

अवकुशः। पुं। गोलाङ्गूलवानरे। अयं पर्णमृगजातीयः। सु.सू.४६अ.।

अवकूलनम्। क्ली। अग्नावुष्णीकरणे। च.द. अतिसा-चि.। "अङ्गारेष्ववकूलयेत्।"

अवकेशी। त्रि। अफलवृक्षे। हे.च.।

अवक्रः। पुं। सरलवृक्षे। সরল গাছ।

अवगण्डः। पुं। गण्डदेशस्थव्रणे। বয়েস ফোঁড়া। मं पुटकुली। त्रिका.।

अवगथः। पुं। प्रातःस्नाने।

अवगाहः। पुं। स्नाने। स्नानगृहे। [स्नाने।

अवगाहनम्। क्ली। स्नाने। मज्जनपूर्व्वक-

अवगाहस्वेदः। पुं। अवगाहनेन स्वेदे। वा. सू.१७अ.।

अवगीर्णः। पुं। अपानान्निर्गते द्रव्ये।

अवगुण्ठनम्। क्ली। योषित्शिरःप्रावरणे, स्त्रीमुखाच्छादने। [का.

अवगुण्ठितम्। क्ली। चूर्णिते। গুঁড়া। त्रि-

अवग्रहः। पुं। गजललाटदेशे। हारा.। [के।

अवग्राहः। पुं। अवहारके। হাঙ্গর इति लो-

अवचूर्णम्। क्ली। स्थूलचूर्णे। মোটা গুঁড়া।

अवचूर्णितः। त्रि। चूर्णिते।

अवच्चकः। पुं। भक्तिमति रोगिणि। वै.निघ.।

अवटः (टी)। पुं। नाड़ीव्रणे। कूपे। मे.।

अवटीटः। त्रि। नतनासिके। থান্দা। अम.।

अवटुः। स्त्री। ग्रीवापश्चाद्भागे। रत्ना.। रा.नि. व.१८। पुं। वृक्षविशेषे।

अवड़: । पुं । मन्यापृष्ठभागे । वै.निघ. ।

अवताप: । पुं । अजाविज्वरे । गजवै. ।

अवतारणम् । क्ली । भूतादिग्रहे । वस्त्राञ्चले । मे.णपञ्चकं । [पतितगर्भायां गवि । हला. ।

अवतोका (दा) । स्त्री । स्रवद्गर्भायां गवि,

अवदन्त: । पुं । बालके । বালা । वै.निघ. ।

अवदंश: । पुं । सुरापानरुचिजनकभक्ष्यद्रव्ये । চাট । हला. । शिग्रुवृक्षे । कृष्णशिग्रौ । সজিনা । वै.निघ. ।

अवदानम् । क्ली । उशीरे । अ.टी. ।

अवदान्त: । पुं । शिग्रुवृक्षे । वै.निघ. ।

अवदाहं (कम्) । क्ली । लामज्जकतृणे । বেণার ন্যায় শাদা তৃণ । भा.पू.१व. । वीरणमूले । গন্ধবেণা । मं पिंवलावाला । वै.निघ. ।

अवदाहेष्टम् । क्ली । वीरणमूले । গন্ধবেণা । अ.टी. । [टी.भ. ।

अवदाहेष्टकापथम् । क्ली । उशीरे । अ.

अवदोह: । पुं । दुग्धे । त्रिका. । [मे. ।

अवध्वंस: । पुं । अवचूर्णने । গুঁড়া করণ ।

अवध्वस्त: । त्रि । अवचूर्णिते । मे.तचतुष्कं ।

अवना (नी) । स्त्री । त्रायमाणायां । গোওয়ালিয়া, বলা লতা । रा.नि.व.५ ।

अवनाट: । त्रि । नतनासिके । থান্দা । अम. ।

अवनीसारा । स्त्री । कदल्याम् । वै.निघ. ।

अवन्ति(न्ती)सोमम् । क्ली । काञ्जिके । प.मु. । हारा. । रा.नि.व.१५ ।

अवपाटिका । स्त्री । क्षुद्ररोगान्तर्गतशूकरोगे । अल्पीयःखां-यदा हर्षाद्बलाद्गच्छेत् स्त्रियं नरः । हस्ताभिघातादथवा चर्म्मण्युद्वर्त्तिते बलात् । यस्या वपाट्यते चर्म्म तां विद्यादवपाटिकां॥मा.नि.।

अवपीड़: । पुं । पञ्चविधनस्यकर्म्मान्यतमे शिरोनस्ये । स च शोधनस्तम्भनभेदेन द्विविधः । अवपीड्यते यस्मात् स अवपीड़ इति । "वपीड्य दीयते यस्मा[त्] अवपीड़स्ततः स्मृतः । कल्कीकृतादौषधाद्यः पीड़ितो निसृतोरसः । सोऽवपीड़ः समुद्दिष्टः तीक्ष्ण [illegible]

४ख. । "गलरोगे सन्निपाते निद्रायां विषमज्वरे । मनोविकारे कृमिषु युज्यते चावपीड़नम्॥" वै.निघ. नस्यवि. ।

अवबाहुक: । पुं । See अपबाहुक: ।

अवभासिका (नी) । स्त्री । वर्णच्छायाप्रकाशिकायां त्वचि । सा च व्रीहेरष्टादशभागप्रमाणा । শরীরের বাহিরের চর্ম্ম । सु.शा.५अ. ।

अवभ्रट: । त्रि । नतनासिके । থাঁদা इति लोके । अम. ।

अवमन्थ: (क:) । पुं । शूकरोगभेदे । लक्षणम्—"दीर्घा बह्वस्तु पिड़का दीर्य्यन्ते मध्यतस्तु याः । सोऽवमन्थः कफासृग्भ्यां वेदना रोमहर्षकृत् ॥ सु.नि.१४अ. । कर्णपालीरोगभेदे । सु.सू. १६अ. ।

अवमर्द्द: (नम्) । पुं, क्ली । पीड़ने । अम. ।

अवमोटनम् । क्ली । आमोटने । মোচ্ড়াওন । मा.नि.वा.व्या. ।

अवयव: । पुं । शरीरावयवे । रा.नि.व.१८ ।

अवयवस्थानम् । क्ली । शरीरे । वै.निघ. ।

अवयवी । पुं । पक्षिणि । वै.निघ. ।

अवरम् । क्ली । गजपश्चाज्जङ्घादौ । अम. ।

अवरदारुकम् । क्ली । तन्नामकस्थावरविषान्तर्गतपत्रविषे । सु.कल्प.२अ. । See पत्रविषम् ।

अवरिका । स्त्री । धन्याके । ধনে । रा.नि.व.६ ।

अवरोहक: । पुं । अश्वगन्धायां । मद.व.१ ।

अवरोहशाखी । पुं । प्लक्षवृक्षे । পাকুড় গাছ । रा.नि.व.११ ।

अवरोहिका । स्त्री । अश्वगन्धायां । रा.नि. ।

अवरोही (इन्) । पुं । वटवृक्षे । বটগাছ । रा.नि.व.११ ।

अवलग्न: । पुं । मध्यप्रदेशे । মাজা ।

अवलम्बन: (क:) । पुं । श्लेष्मविशेषे । तस्य स्थानं हृदयं, तत्कर्म्म च स्वशक्त्या हृदयालम्बनं त्रिकसन्धारणञ्च । भा. ।

अवला । स्त्री । नारी । रत्ना. । प्रियङ्गौ । प्रयो- [illegible]

अवलुञ्चनम् । क्ली । मुण्डने । शैथिल्ये । सु.सू. २५अ. । [चतुष्कं ।

अवलेपः । पुं । गर्व्वे । लेपने । भूषणे । मे.प

अवलेपनम् । क्ली । लेपने । मर्द्दने । লেপা, মাখান ।

अवलेहः / **अवलेहिका** } पुं, स्त्री । लेह्यौषधे । চাটিবার ঔষধ । जिह्वया आस्वादने । सायं स्वादवलेहिका । च.द.ज्वर-चि. । क्वाथादेः पुनः पाकात् घनत्वमवलेहः । "क्वाथादेर्यः पुनः पाकाद्घनत्वं सा रसक्रिया ।" प.प्र.१अ.। मात्रा च तस्य पलमिता । "सोऽवलेहश्च लेहः स्यात्तन्मात्रा स्यात्पलोन्मिता । सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुडः । द्रवं चतुर्गुणं दद्यात्··· । सुपक्वे तन्तुमत्त्वं स्यादवलेहोऽप्सु मज्जति । दुग्धमिक्षुरसं यूषं पञ्चमूलकषायजं । वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते ।" भा.। अयमूर्द्ध्वजत्रुगदहरः सायञ्च प्रयोज्यः । ऊर्द्ध्वजत्रुगदघ्नो या सा सायमवलेहिका । च.।

अवलेहनम् । क्ली । लेहने । চাটা ।

अवल्कः । पुं । मेषशृङ्ग्याम् । মেড়াশিঙে, গাড়লশিঙে । वै.निघ. ।

अवल्गुजा । स्त्री । कृष्णसोमराज्याम् । হাকুচ । भैष.भल्ला.गुड़. ।

अवल्गुजः (जा) । पुं,स्त्री । कृष्णसोमराज्यां । सु.चि.२५अ. । सोमराज्याम् । হাকুচ । भा.पू.१भ.भैष.कुष्ठ-चि. ।

अवल्गुजबीजम् । क्ली । सोमराजीबीजे ।

अवग्रकुथिका । स्त्री । जानुदेशे ।

अवश्यः / **अवश्या** } पुं, स्त्री । तुषारे । भा.म.४भ.शिरोरोग-अर्द्धावभेदके । प्राग्वातावश्यमैथुनैः । भल्ला.गुड़. ।

अवश्यायः । पुं । शिशिरे । च.द.पि.ज्व.महातिक्तादि. । "अवश्यायस्थितं पाक्यम् ।" तुषारे । भा.म.४भ.नासारो. । "अवश्यायकैर्मैथुनवाष्पसेकैः ।"

अवश्याया । स्त्री । कुज्झटिकायाम् ।

अवष्टम्भः । पुं । स्वर्णे । मे. ।

अवष्वाणम् । क्ली । भक्षणे । हे.च. ।

अवसादः । पुं । अवसन्नतायाम् ।

अवसादनम् । क्ली । उन्नतव्रणस्य निम्नीकरणे । सु.चि.१अ. ।

अवसादनी । स्त्री । महाकरञ्जे ।

अवसितम् । क्ली । मर्दितधान्ये ।

अवसेकः । पुं । रक्तमोक्षणे । च.चि.१अ. ।

अवसेकिमः । पुं । वटके । বড়া । वै.निघ. ।

अवसेचनम् । क्ली । जलसेचने । सु. ।

अवस्कन्दः । पुं । अवगाहनस्नाने ।

अवस्कयनी । स्त्री । बहुदिनानन्तरप्रसूतायां गवि । কেলেন গাই । [चतुष्कं ।

अवस्करः । पुं । विष्ठायाम् । गुह्यदेशे । मे.र-

अवहस्तः । पुं । हस्तपृष्ठे । হস্তোপরিভাগ । हे.च. । [হাঙ্গর, জলহস্তী । मे.रचतुष्कं ।

अवहारः (कः) । पुं । ग्राहाख्यजलजन्तौ ।

अवक्षिप्तसन्धिः । पुं । सन्धिविश्लेषे । सन्धिच्युतं सत् नीचमुखेनावस्थानम् । सन्ध्यस्थ्नोरतिकान्ततावेदना च । सु.नि.१५अ. । [हे.च. ।

अवक्षेपणी । स्त्री । वल्गायाम् । লাগাম ।

अवाक्पुष्पी । स्त्री । हेमपुष्पां । र.मा. । मधुरिकायाम् । মৌরী । रत्ना. । रा.नि-व.४ । शतपुष्पायाम् । শুল্ফা । मं बड़ीशोंक । रा.नि.व.४ । च.द.अर्श-चि.सुनिषण्ण.चाङ्गेरीघृते । चोरपुष्प्याम् । চোরহুলী,চোরখড়্কী । रत्ना. ।

अवाचीनः । त्रि । विपर्य्यस्ते । मे.नचतुष्कं ।

अवाच्यदेशः । पुं । योनौ । त्रिका. ।

अवानम् । क्ली । शुष्कफलादौ । श.र. ।

अविः । पुं । मेषे । भा.पू. । मूषिके । कम्बले । मे.। मत्स्यभेदे । स्त्री । कुलत्थिकायां । বনকুলথ । अविः कुलाली चक्षुष्या कुम्भकारी कुलत्थिका । र.मा. । मेष्याम् । त्रिका. । ऋतुमत्यां । अम. ।

अविकम् । क्ली । हीरके । रा.नि. ।

अविकमांसम् । क्ली । मेषमांसे । वै.निघ. ।

अविगन्धनी / **अविगन्धिका** / **अविगन्धी** } स्त्री । अजगन्धायाम् । বনযমান । तिलोणीवर्व्वरीति च लोके । रा.नि.व.४

अविघ्नः (घ्नः) । पुं । पानीयामलके । सा.सु.। करमर्द्दवृक्षे । करमचा गाछ । मं करवंद । अम.।

अवितक्रम् । क्ली । मेषीतक्रे । ভেড়ার দুধের ঘোল । गुणाः—अवितक्रमपथ्यं स्यादम्लं दुर्गन्धकारकं । दीपनं कटुकञ्चोष्णं लेखनं लघु पित्तकृत् । रक्तदोषकरञ्चैव कफवातविनाशकम् ॥ द्रव्यगु. ।

अवित्यजः । पुं । पारदे । शब्दकल्पद्रुमः । रा.नि.व.१३ । अत्र अचिन्त्यज इत्येवं पाठो राज निघण्टौ दृश्यते । [नि. ।

अविदग्धः । त्रि । अनले । विजयर.अजीर्ण-

अविदग्धम्
अविदुग्धम् } क्ली । मेषीदुग्धे । हला. । See आविकक्षीरम् ।

अविदु(दू)ष्यम् । क्ली । मेषीदुग्धे । ভেড়ার দুধ্ । हला. ।

अविद्धकर्णा । स्त्री । पाठायाम् । আকনাদি । अ.टी. । सा.कौ. । जातीफलावल्याम् । भृङ्गराजे । ভীমরাজ । अ.टी. ।

अविद्धकर्णिका (र्णी) । स्त्री । पाठायाम् । আকনাদি । अ.टी. । जातीफलावल्याम् ।

अविद्धा । स्त्री । दुष्टशिराव्यधने । "बहुशःचता हीनशस्त्रप्रणिधानेनोपविद्धा ।" सु.शा.८अ. ।

अविपत्ति(त्ति)करचूर्णम् । क्ली । अम्लपित्ताधिकारे । पाठः—"त्रिकटु त्रिफला मुस्तं वीजञ्चैव विड़ङ्गजम् । एलापत्रञ्च सर्व्वञ्च समभागं विचूर्णयेत् । यावन्त्येतानि चूर्णानि लवङ्गं तत्समं भवेत् । सर्व्वचूर्णद्विगुणितं त्रिवृच्चूर्णञ्च दापयेत् । सर्व्वमेकीकृतं यावत्तावच्छर्करयान्वितम् । सर्व्वमेकीकृतं पात्रे स्निग्धभाण्डे निधापयेत् । भोजनादौ ततोऽन्ते च मध्वाज्याभ्यामिदं शुभम् ॥" र.सा.सं.। भैष.। प्रयोगा.सा.कौ. । त्रिकट्वादि प्रत्येकं १ तो. लवङ्गचूर्णं ११ तो. त्रिवृन्मूलचूर्णं ४४ तो. शर्करा ६६ तो. ।

अविपटः । पुं । ऊर्णामयवस्त्रे, कम्बलादौ ।

अविपाकः । पुं । अपरिपाके । [रा.नि.व.१६

अविप्रियः । पुं । श्यामाकतृणे । শামা ঘাস ।

अविप्रिया । स्त्री । श्यामालतायाम् । रा.नि.। श्वेतालताक्षुपे । रा.नि.व.५ ।

अविभुक् । पुं । व्याघ्रे । मं लांड़गा । वै.निघ.।

अविमरीष(स)म् । क्ली । आविक्षीरे । ভেড়ীর দুদ্ । हला.है.च. ।

अविमुक्तकः । पुं । माधवीलतायां । वै.निघ.।

अविमुक्तका । स्त्री । तिन्दुकवृक्षे । তেঁদ । हिं केंदु । मं टेंभुरणी । काकतिन्दुके । वै.निघ. ।

अविमोचम् । क्ली । आविकक्षीरे । र.मा. ।

अविला । स्त्री । मेष्याम् । है.च. । [वै.निघ. ।

अविवृत्तः । पुं । मेषशृङ्ग्याम् । মেড়াশিঙে ।

अविशिरम् । क्ली । सूर्य्यावर्त्तफले । হুড়হুড়ের ফল । वै.निघ. ।

अविश्वासा । स्त्री । चिरप्रसूतगवि । श.च. ।

अविषा । स्त्री । अतिविषायाम् । रा.नि.व.६ । निर्व्विषतृणे । নির্ব্বিষী ঘাস । वै.निघ. । [हला.।

अविसोढ़म् । क्ली । अविक्षीरे । ভেড়ীর দুধ্ ।

अविस्रम् । त्रि । पूतिगन्धरहिते । च.चि.२अ.।

अवी । स्त्री । [वनकुलत्थे । र.मा. । ऋतुमत्यां स्त्रियाम् । है.च. । [सु.शा.१अ. ।

अवीजधर्म्मी । त्रि । यो वीजधर्म्मी न भवति

अवीजा । स्त्री । गोस्तनीसदृशगुणद्राक्षायाम् । কিস্‌মিস্ বেদানা इति लोके । "अवीजान्या स्वल्पगुणा गोस्तनीसदृशी गुणैः ।" भा. ।

अवीदुग्धम् । क्ली । मेषीदुग्धे । ध.द. ।

अवीमूत्रम् । क्ली । मेषीमूत्रे । च.द. ।

अवुकः । पुं । छागे । श.र. । [निघ. ।

अवृद्धः । पुं । पुष्पवृक्षभेदे । मं पत्थरफुल । वै.

अवेद्यः । पुं । गोवत्से । श.र. । [मे. ।

अवेला । स्त्री । पूगचर्व्विते । চিবন গুপারি ।

अवोदम् । क्ली । आर्द्रके । जटा. ।

अव्यक्तम् । क्ली । प्रकृतौ । "अखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम ।" सु.शा.१अ. । आत्मनि । है.च. ।

अव्यक्ता । स्त्री । कृष्णगोकर्ण्याम् । কাল অপরাজিতা । मं कालीगोकर्णी । वै.निघ. ।

अव्यङ्गः । त्रि । अविकलाङ्गे । स्त्री । शूकशि-म्ब्याम् । আলাকুশী ।

अव्यञ्जनः । त्रि । श्मश्रुहीने । हला. ।

अव्यण्डः (ण्डा) । पुं, स्त्री । भूम्यामलक्याम् । ভূঁই আমলা । कपिकच्छ्वां । আলাকুশী । च. चि.३अ. ।

अव्यथा । स्त्री । स्थलकमलिन्याम् । স্থলপদ্ম । भा.पू.१भ. । रा.नि.व.११ । हरीतक्याम् । महा-श्रावण्यां । মুণ্ডীরী । भा.पू.१भ.गु.व. । आमल-क्यां । लक्षणायां । লক্ষণামূল । [ख्या. ।

अव्यथिः (थी) । पुं । अश्वे । वा.सू.४अ.प्रजा-

अव्यथ्या । स्त्री । हरीतक्याम् । भा.पू.१भ. ।

अव्यधा । स्त्री । दुष्टशिरावेधने । "अशस्त्र-कृता अव्यधा ।" सु.शा.८अ. ।

अव्यया । स्त्री । गोरक्षमुण्ड्यां । গোরক্ষচাকু-লি । मं गोरखमुंडी । वै.निघ. ।

अव्रणशुक्रः । पुं । नेत्रस्य कृष्णभागगतरोगवि-शेषे । अयमभिष्यन्दजः ज्वालायुक्तः शङ्खेन्दुकुन्दस-दृशवर्णः नभस्थतनुमेघाकृतिश्च सुसाध्यः । लक्षणम् —दृष्टेः समीपे न भवेत्तु यच्च न चावगाढ़ं न संस्रवेद्धि । सवेदनावन्न च युग्मशुक्रं तत्सिद्धिमा-प्नोति कदाचिदेव । सितं यदा भात्यसितप्रदेशे स्यन्दात्मकं नातिरुगस्रयुक्तं । विहायसीवाभ्रदलानु-कारि तदव्रणं साध्यतमं वदन्ति ॥ सु.उ.५अ. । स्यन्दात्मकं कृष्णगतं सचोषं शङ्खेन्दुकुन्दप्रति-मावभासं । वैहायसाभ्रप्रतनुप्रकाशमथाव्रणं साध्य-तमं वदन्ति । गम्भीरजातं बहलञ्च शुक्रं चिरोत्थि-तञ्चापि वदन्ति कृच्छ्रम् । विच्छिन्नमध्यं पिशितावृतं वा चलं शिरासूक्ष्ममदृष्टिकृच्च । द्वित्वागतं लोहित-मन्ततश्च चिरोत्थितञ्चापि विवर्ज्जनीयम् ॥ मा.नि. ।

अशकुम्भी । स्त्री । पानीयोपरिजवृक्षे । পানা । र.मा. ।

अशनम् । क्ली । भोजने । अन्ने । रा.नि.व.२० । पुं । पीतशाले । च.सू.४अ.४३दशकं । चित्रकवृक्षे । भल्लातकवृक्षे । वै.निघ. । [षे । सु.सू.४६अ. ।

अश(स)नकः । पुं । असनपुष्पाकारधान्यविशे-

अशनपर्णी । पुं,स्त्री । विजयसार इति प्रसिद्धे वृक्षे । मराठी इति च पश्चिमदेशे । गोकर्णील-तायां । অপরাজিতা । अम. ।

अशनपुष्पः । पुं । अशनपुष्पाकारशालौ । ষ-ষ্টিক ধান্যবিশেষ । सु.सू.४६अ. ।

अशनमल्लिका । स्त्री । आस्फोतायाम् । হা-পরমালী । च.द. ।

अशना (या) । स्त्री । क्षुधायाम् । हला. । शुक्रनिष्पावे । শ্বেত বর্বটি বা শিম্ । रा.नि.व.७ ।

अशनिः । पुं,स्त्री । हीरके । হীরে । वै.निघ. ।

अशाका (खा) । स्त्री । शूलीतृणे । शाखा-शून्यलतायाम् । रा.नि.व.८ ।

अशान्तगन्धाख्या । स्त्री । आम्रहरिद्रायाम् । আম আদা । मं आंबेहलद । वै.निघ. ।

अशितम् । क्ली । भक्षणे । खादने । हे.च. ।

अशितलता । स्त्री । नीलदूर्व्वायाम् । নীল দুর্ব্বা । वै.निघ. । [वज्रम् ।

अशिरम् । क्ली । हीरके । रा.नि.व.१३ । See

अशिशिम्बी । स्त्री । स्वनामख्यातशिम्बीविशे-षे । শ্বেত শিম্ । मं थोरश्वेतआवे । गुणाः— मधुरा कषाया श्लेष्मपित्तघ्नी व्रणदोषघ्नी शीतला रुचिकरी च । रा.नि.व.७ ।

अशिश्विका । स्त्री । अनपत्यायाम् । যে স্ত্রীর সন্তান নাই । श.र. ।

अशीता }
अशुक्ला } स्त्री । भूमिकुष्माण्डे । वै.निघ. ।

अशुक्लजा । स्त्री । वीरोधान्ये । वै.निघ. ।

अशुचिः । त्रि । अपवित्रे । [व.१६ ।

अशूकजः (कः) । पुं । मुण्डशाली । रा.नि.

अशृतम् । क्ली । अपक्वे ।

अशोकः । पुं । (Saraca Indica, Jonesia Aśoka.) स्वनामख्यातवृक्षे । অশোকগাছ । मे. । हिं अशोगी । स लोहितकुसुम इति । सु. सू.३८ लोध्रादिः । अशोकवृक्षगुणाः—शीतलः हृद्यः पित्तदाहघ्नः गुल्मशूलोदराध्मानघ्नः कृमिघ्नश्च । रा.नि.व.१० । तिक्तः ग्राही वर्ण्यः कषायः अपची तृष्णादाहकृमिशोषविषरक्तघ्नश्च । भा.पू.१भ. । मा-

षा २ तो.। वेतसे । तिनिशे । वै.निघ.। क्ली। पारदे । मे.।

अशोकघृतम् । क्ली । प्रदराधिकारे प्रयोज्यं। पाठः—अशोकवल्कलप्रस्थं तोयाढ़कविपाचितम्। पादस्थेन घृतप्रस्थं जीरकक्वाथसंयुतम्। तण्डुलाम्बु लजाक्षीरं घृततुल्यं प्रदापयेत्। तथैव केशराजस्य प्रस्थमेकं भिषग्वरः। जीवनीयैः पियालैश्च परुषैः सरसाञ्जनैः। यष्ट्याह्वाशोकमूलञ्च मृद्वीका च श-तावरी। तण्डुलीयकमूलञ्च कल्कैरेभिः पलाइकैः। शर्करायाः पलान्यष्टौ सिद्धशीते प्रदापयेत्। जीव-कर्षभकौ मेदे काकोल्यौ सूर्पपर्णिके। जीवन्ती मधुकञ्चेति दशको जीवनी गणः॥ भैष.। प्रयोगा. असृग्दर-चि.। गव्यघृतं ४ श. क्वाथार्थम् अशोकमू-लत्वक् २ श. जलं १६ श. शेषः ४ श.। तथा जीरकं २ श. जलं १६ श. शेषः ४ श. केश-राजरसः ४श. तण्डुलोदकं ४ श. छागदुग्धं ४ श.। कल्कार्थं जीवकऋषभकं मेदा महामेदा काकोली क्षीरकाकोली मुद्गपर्णी माषपर्णी जीवन्ती यष्टि-मधु पियालबीजं परुषकफलं रसाञ्जनं यष्टिमधु अशोकमूलं द्राक्षा शतावरी तण्डुलीयकमूलञ्चेत्येषां प्रत्येकं ४ तो.। पाकान्ते शर्करा मिश्रणीया। भैष.। सा.कौ.।

अशोकरोहिणी । स्त्री। कटुतिक्तायाम्। कट्की। रा.नि.व.६। च.सू.४अ. संज्ञास्थापने। See कटुकी। लताशोके, स च अशोकदलसदृश-दलः। रत्ना.।

अशोका । स्त्री। कटुरोहिण्याम्। कट्की। मे.। भा.पू.१भ.। [मं कलम्ब। श.च.।

अशोकारिः । पुं।कदम्बवृक्षे। कदमगाछ।

अशोथनेत्रपाकः । पुं। विनाशोथं नेत्रपाके। लक्षणम्—शोथहीनानि लिङ्गानि नेत्रपाके त्वशो-थजे। मा.नि.। कण्डूपदेहाश्रुयुक्तः पक्वोदुम्बरनिभः संरम्भी च भवति।

अश्म । क्ली। स्वर्णमाक्षिके। वै.निघ.।

अश्मकदली । स्त्री। कदलीविशेषे। पाहा-ड़े कला। मं लोखंडकेल। रा.नि.व.११।

अश्मकरम् । क्ली। स्वर्णे। रत्ना.।

अश्मकृच्छ्रहा । स्त्री। वेल्लन्तरवृक्षे। मं वेल-तूर। वै.निघ.।

अश्मकेतुः । स्त्री। क्षुद्रपाषाणभेदक्षुपे। पाथर चुर। रा.नि.व.५।

अश्मगर्भः । पुं। हरिन्मणौ। पान्ना इति लो-के। भा.पू.१भ.। क्ली। मरकतमणौ। हे.च.।

अश्मगर्भकः । पुं। तिनिशवृक्षे। मद.व.५।

अश्मगर्भजम् । क्ली। मरकतमणौ। पान्ना। रा.नि.व.१३।

अश्मघ्नः । पुं। पाषाणभेदक्षुपे। पाथरकुचा। रा.नि.व.५। भा.पू.१भ.।

अश्मजम् । क्ली। मुण्डलौहे। रा.नि.व.१३। च.द.पाण्डुचि.। शिलाजतुनि। मद.व.४। हेमा. प.मु.। र.मा.। रा.नि.व.१३। गैरिके।

अश्मजतु (कम्) । क्ली। शिलाजतुनि। च. द.पाण्डु-चि.योगराजे। रा.नि.व.१३। सि.यो.र. पि.चि.खण्डखाद्ये। "शुभाश्मजतुकं त्वचम्।"

अश्मन् । पुं। प्रस्तरे।

अश्मन्तः (कः) । पुं। पाषाणभेदे। च.सू.१अ.। कोविदारवृक्षसदृशेऽम्लपत्रे अम्लोट इति लोकप्र-सिद्धे वृक्षे। भा.म.४भ.गर्भ-चि.। "अश्मन्तकस्ति-लाः कृष्णाः।" च.सू.४अ.। उद्दालकवृक्षे। भा.पू. १भ.। कोविदारवृक्षे। भा.पू.२भ.। चुक्रे। चूका। र.मा.। तृणविशेषे। अम्लकुचाइ। सु.चि.२५अ.। स्वनामख्यातवृक्षे। आवुटा इति च लोके प्रसिद्धे। मं अम्सर। गुणाः—मधुरकषायः शीतलः पित्तघ्नः मेहघ्नः दाहतृष्णाविषमज्वरविषघ्नः भूतनिवारणश्च। रा.नि.व.६।

अश्मन्त(क)म् । क्ली। चुल्ल्याम्। मे.नत्रिकं। दीपाधाराच्छादने। आच्छादिया। मे.।

अश्मपुष्पम् । क्ली। शैलजे। शिलारस। अम.।

अश्मभाण्डम् । क्ली। लौहभाण्डविशेषे। हा-मामदिस्ता। श.च.। खल्ले। खल इति भाषा।

अश्मभित् । पुं। पाषाणभेदे। पाथरकुचा। प.मु.रत्ना.। कवाटवक्रवृक्षे। कराड़िया इति लोके। र.मा.। कवाटचक्रमिति। रत्ना.।

अश्मभेदः (कः) । पुं।(Coleusamboinicus, Syn,Coleus aromaticus.) क्षुपवि-शेषे। पाथरकुचा, हिमसागर, हाताजो इति

भाषा। सु.सू.२८,२६अ.। हिं पाथरचुर। संशोधन। वा.सू.१५,२६अ.। "वेल्लन्तारणिक-वृकवृषाश्मभेद।" गुणाः—शीतलः तुवरः वस्तिशोधनः सारकः तिक्तः प्रमेहार्शःकृच्छ्राश्मरीघ्नश्च। मद.व.१। मधुरस्तिक्तः मेहतृष्णादाहमूत्रकृच्छ्राश्मरीहरः शीतलश्च। रा.नि.व.५।

अश्मयोनिः (नी)। पुं, स्त्री। नीलमणौ। श.टी.। अश्मन्तकवृक्षे। আপটা। मद.व.१०।

अश्मरी। स्त्री। Stone or Gravel. वस्तिपाषाणरोगे। ঝিলে, পাথুরী। मं मुतखड़ा। सा चतुर्विधा श्लेष्माधिष्ठाना च—श्लेष्मणा वातेन पित्तेन शुक्रेण चेति। तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसंपृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति। तासां पूर्व्वरूपाणि वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति। जातासु नाभिवस्तिसेवनीमेहनेष्वन्यतमस्मिन् मेहतो वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाशमनाविलं ससिकतं विसृजति धावनलङ्घनप्लवनपृष्ठयानाध्वगमनैश्चास्य वेदना भवति। अत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि। तस्य मूत्रप्रतीघाताद्दाल्यते भिद्यते निस्तुद्यत इव च वस्तिर्गुरुः शीतश्च भवति। अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डाभा मधूकपुष्पवर्णाभा च भवति। पित्ताश्मरी सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा। वाताश्मरी श्यामा परुषा विषमा खरा कदम्बपुष्पवत्कण्टकाचिता च भवति। शुक्राश्मरी शुक्रनिमित्ता भवति तेन सा मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति पीड़ितमात्रच्च तत्रैव विलयं गच्छति। प्रतिक्रिया, अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः। तरुणो भेषजैः साध्यः प्रवृद्धश्छेदमर्हति। तस्य पूर्व्वेषु रूपेषु स्नेहादिक्रम इष्यते। सु.नि.३अ.।

अश्मरीकृच्छ्रः। पुं। मूत्रकृच्छ्रे। वै.निघ.।

अश्मरीघ्नः। पुं। वरुणवृक्षे। বরুণ গাছ। मं वायवरणा। त्रिका.।

अश्मरीप्रियः। पुं। महाशालिधान्ये। प.मु.।

अश्मरीभेदः। पुं। पाषाणभेदवृक्षे। मद.व.१।

अश्मरीभेदनः। पुं। पाषाणभेदके। পাথর কুচী। वै.निघ.।

अश्मरीरिपुः। पुं। बृहच्चणके। বড় চণা। रत्ना.। चेचेची। জনার। हिं भुट्टा।

अश्मरीशर्करा। स्त्री। तन्नामकरोगविशेषे। शर्करा सिकता मेहो भस्माख्योऽश्मरिवैकृतम्। अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना। पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः। सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते। हृत्पीड़ासक्थिसदनं कुक्षिशूलः सवेपथुः। तृष्णोर्द्ध्वगोऽनिलः कार्श्यं दौर्ब्बल्यं पाण्डुगात्रता। अरोचकाविपाकौ तु शर्करार्त्तें भवन्ति च। मूत्रमार्गप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्॥ दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमरोचकं। इत्यादि। सु.नि.३अ.।

अश्मरीहरः। पुं। देवधान्ये। দেধান। वरुणवृक्षे। मं वायवरणा। र.मा.।

अश्मर्य्याहरणयन्त्रम्। क्ली। तदाहरणयन्त्रे। अश्मर्य्याहरणं सर्पफणावद्यन्त्रमग्रतः। कश्चिदृचिः। [रा.नि.व.१३।

अश्मलाक्षं (क्षा)। क्ली,स्त्री। शिलाजतुनि।

अश्मसम्भवम्। क्ली। शिलाजतुनि। र.सा.सं। [धातौ। सारलौहे। ইস্পাৎ।

अश्मसारः। पुं क्ली। लौहे। अम.। लौहादि-

अश्मसारा। स्त्री। काष्ठकदल्याम्। পাহাড়ে কলা। वै.निघ. [मं पहाड़मूल। वै.निघ.।

अश्मसुता। स्त्री। पाठायाम्। আকনাদি।

अश्महा (हन्)। पुं। पाषाणभेदके। পাথর কুচী। [श्रा। रत्ना.। शिलाजतुनि।

अश्महृत्। पुं,क्ली। कवाटवक्रक्षुपे। করাড়ি-

अश्मीरः। पुं। मूत्रकृच्छ्रे।ॢउणा.।

अश्मोत्थम्। क्ली। शिलाजतुनि। रा.नि.व.१३।

अश्यामा। स्त्री। श्वेतचिह्नतायाम्। [दके।

अश्रम्। क्ली। रुधिरे। রক্ত। श.टी.। नेत्रो-

अश्रद्धा। स्त्री। अरोचके। रा.नि.व.२०।

अश्रु। क्ली। नेत्रजले। চক্ষের জল। अम.।

अश्रुनाली। स्त्री। भगन्दररोगे। वै.निघ.।

अश्रुपातः । पुं । अश्वस्य चक्षुषोरधःप्रदेशे । "अश्रुपातः समुद्दिष्टः प्रदेशश्चक्षुषोरधः । तत्रावर्त्तो भवेद्योस्य स्वामिनः कुलनाशनः ।" जयद.३अ. ।

अश्वः । पुं । घोटके । (घोड़ा । तन्मांसगुणाः —उष्णं वातघ्नं लघु बलकरं पित्तदाहजनकमति-सेवनाद्भवति । रा.नि.व.१७ । लवणं वह्निकफपि-त्तकरं वातहृत् बृंहणं बल्यं चक्षुष्यं लघु मधुरञ्च । भा.पू. । "वाग्मी लुब्धो दयालुश्च विप्रः स परिकी-र्त्तितः । शूरश्च दृढमन्युश्च क्षत्रियस्तुरगः स्मृतः ॥ पापिनः कलषा रूक्षा दुष्टा वैश्याः प्रकीर्त्तिताः । विरूपा विषमाश्चैव शूद्राश्चण्डा उदाहृताः ॥" "उ-त्तमा मध्यमा नीचाः कनीयांसस्तथापरे । चतुर्धा वाजिनो भूमौ जायन्ते देशसंश्रयात् ॥ ताजिकाः खरशाणाश्च उत्तराश्चोत्तमा हयाः । गोजिकाणाश्च केकाणाः प्रौढ़ाहाराश्च मध्यमाः ॥ भाण्डजाश्चोत्त-मांसाश्च राजशूलाश्च मध्यमाः । गोह्वराः शावराश्चैव सिन्धुपाराः कनीयसः ॥ अन्यदेशोद्भवा ये च नीच-नीचाश्च ते स्मृताः । वाजिनो जलजाः केचिद्वह्नि-जातास्तथापरे ॥ समीरप्रभवाश्चान्ये उलूकमृगजा-स्तथा । जलोद्भवा द्विजातीयाः क्षत्रिया वह्निसम्भ-वाः ॥ समीरप्रभवा वैश्या एणोलूकाश्च शूद्रजाः । विवेकी सद्गुणी विप्रस्तेजस्वी क्षत्रियो बली ॥ दुष्ट-भावस्तथा वैश्यः शूद्रो निःसत्वकातरः । ब्राह्मणः सामवाही च भेदवाही च क्षत्रियः ॥ उपादानेन वैश्यः स्याच्छूद्रो दण्डेन ताड़ितः । पुष्पगन्धः सदा विप्रः क्षत्रियोऽगुरुगन्धकः ॥ घृतगन्धः सदा वैश्यो मीनामोदी च शूद्रकः । विप्रार्हा वाजिनः सर्व्वे क्षत्रियो भूपतेः सदा ॥ द्वौ वैश्यस्याथ शूद्रस्य शूद्र एव सुखावहः । केचिदिच्छन्ति भूपानां सर्व्वेऽश्वा वाहनोचिताः ॥ तदर्थं भूतले यस्माच्छालिहोत्रेण निर्म्मिताः । ब्राह्मणाः क्षेमकृत्येषु सिद्धिं गच्छन्ति वाजिनः ॥ क्षत्रिया युद्धकार्य्येषु वैश्या वित्तार्ज्जने सदा । शूद्राश्चान्येषु कृत्येषु ज्ञात्वैवं वाजिनः सदा ॥ आरोहेत्सर्व्वकार्य्येषु यदीच्छेच्छाश्वतीं श्रियम् ।" इति अश्वजातिः । नकुल.२अ. । "सप्त वर्णा भव-न्तीह सर्व्वेषां वाजिनां ध्रुवं । तानहं कीर्त्तयिष्यामि भेदैर्जातानेकधा ॥ सितो रक्तस्तथा पीतः सारङ्गः पिङ्ग एव च । नीलः कृष्णोऽथ सर्व्वेषां श्वेतः श्रेष्ठ-तमः स्मृतः ॥ पट्टार्हो भूपतेर्वाजी सर्व्वश्वेतः प्रश-स्यते । तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण च ॥ श्वेतः प्रालेयसङ्काशो रक्तः कुङ्कुमसन्निभः । हरिद्रा-सदृशः पीतः सारङ्गः कर्व्बुरः स्मृतः ॥ पिङ्गः कपि-लकाकारो नीलो दूर्व्वाग्रसन्निभः । कृष्णो जम्बूफला-कारः शास्त्रज्ञैः समुदाहृतः ॥ पीताभः श्वेतपादो यस्तथा स्यात्सितलोचनः । चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥ सर्व्वश्वेतो हयो यस्तु भवे-न्मेचककर्णकः । स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तितः ॥ मुखे चन्द्रकसम्भूतो जम्बूफलसमा-कृतिः । श्वेतपादः स विज्ञेयो मल्लिकाख्यः स पूजितः ॥" नकुल.३अ. । "साङ्गं यवत्रयं प्रोक्तमङ्गु-लस्य तपोधनैः । प्रमाणं शालिहोत्राद्यैर्वाजिशास्त्र-विशारदैः ॥ हस्तोऽङ्गुलानां विंशत्या चतुरुत्तरया स्मृतः । चतुर्हस्तैस्तु विख्यातः शास्त्रोक्तैरुत्तमो ह-यः ॥ अर्द्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः । मु-ष्टिन्यूनेन हस्तेन हीनश्चाप्यधमः स्मृतः ॥ ऊर्द्धमा-नप्रमाणन्तु परिणाहं विनिर्द्दिशेत् । उत्तमानां च मध्यानां हीनानाञ्चैव वाजिनाम् ॥ अर्द्धसप्तमहस्त-न्तु श्रेष्ठं दैर्घ्येण निर्द्दिशेत् । षड्भिर्मुष्टिविहीनैश्च मध्यमञ्च विचक्षणः ॥ पञ्चहस्तप्रमाणस्तु जघन्यः समुदाहृतः । द्वात्रिंशदङ्गुलं वक्त्रमुत्तमाश्वस्य कीर्त्तितम् ॥ पृष्ठं वक्षः कटिञ्चैव मुखतुल्यं समादिशे-त् । अङ्गुलद्वयहीनन्तु मुखादि मध्यमाधमम् ॥ नि-र्द्दिशेन्मतिमांश्चैव वाजिशास्त्रविशारदः । सप्ताङ्गुल-खुरश्चैव उत्तमाश्वस्य कीर्त्तितं ॥ षड़ङ्गुलो भवेन्मध्यो जघन्यश्चतुरङ्गुलः । षोड़शाङ्गुलदीर्घा तु जङ्घा चैवो-त्तमा स्मृता ॥ चतुर्द्दश तथा मध्ये हीने च द्वादशा-ङ्गुलः । एवंविधप्रमाणन्तु निर्द्दिष्टं शास्त्रशालिभिः ॥ अपाङ्गात्पुच्छमूलन्तु दैर्घ्येणाश्वं प्रमाणयेत् । खुरा-न्तात्ककुदं यावदूर्द्धमानेन बुद्धिमान् ॥" इति परि-माणादि । जयद.३अ. । "अश्वानां जन्मदेशांस्तु प्रवक्ष्याम्यनुपूर्व्वशः । उत्तमानाञ्च मध्यानां हीनानां यत्र सम्भवः ॥ उत्तमास्ताजिकाः प्रोक्तास्तथा पार-सिकाश्च ये । कैकाणाश्चैव ये वाहाः पृष्ठजा ये च कीर्त्तिताः ॥ तुरौ जाताश्च कौराश्च भूरुष्टामाण्ड-जाश्च ये । पार्व्वताः सैन्धवा मध्यास्तथा सारस्वता हयाः ॥ सम्भलाश्चाकुलाश्चैव जटदेशोद्भवाश्च ये । अधमाष्टङ्कणैः सार्द्धं हये प्राग्दक्षिणोद्भवाः ॥ वृत्त-दीर्घोच्चितग्रीवा ह्रस्वकर्णा महाजवाः । महाकाया महोरस्का निस्त्रासास्ताजिका मताः ॥ अत्यन्तविनतं येषां निर्म्मांसञ्च मुखं भवेत् । पीनेन कटिदेशेन मुखराश्च भवन्ति ते । अध्वन्याश्च महासाराः संग्रामे

चैव पूजिताः। अपि शस्त्रहताङ्गाश्च नैव मुञ्चन्ति सादिनम्॥ पारसीकाः ताजिकाभाः केङ्काणाः केचिदुन्नताः। स्थूलाः शस्त्रशरीराश्च प्रधाना दीर्घपृष्ठकाः॥ केङ्काणदेशजातानां मध्यमानाञ्च वाजिनाम्। ताजिकैः सदृशं वक्त्रं बाहुल्येन विनिर्द्दिशेत्॥ सुवृत्तदेहस्तीक्ष्णश्च सुप्रमाणेन मध्यमः। तुरुजातः समुद्दिष्टः किञ्चित्स्थूलो मनाग्जवः॥ अतिस्थूलोऽतितीक्ष्णश्च ह्रस्वग्रीवस्तुरुस्तथा। तुरुष्कः कीर्त्तितो वाजी स्थूलवक्त्रमुखश्च यः॥ केङ्काणाकारदेहस्तु भवेन्माण्डविको हयः। शान्त्या चैव प्रमाणेन केवलं नैव तत्समः॥ सिन्धुदेशोद्भवो वाजी पृष्ठन्यश्चारुकीरकः। आननञ्चापि दीर्घञ्च तस्य पृष्ठं प्रकीर्त्तितम्॥ शान्त्या चैव जवेनापि रणशूरस्तुजावनः। सादिभक्तिश्चलतो याति ताजिकादधिकस्तथा॥ परिमण्डलदेहास्तु तीक्ष्णकर्णमुखा हयाः। पञ्चदेशोद्भवा दृष्टास्तथा सारस्वताश्च ये॥ लम्बकर्णोऽजटश्चैव आकुलः परिकीर्त्तितः। साभलः श्लिष्टजानुश्च जटालश्चाकुलोपमः॥ वर्त्तुलश्चापि ह्रस्वश्च टङ्कणः परिकीर्त्तितः। दाक्षिणात्यो भवेद्रुण्डो योऽधमः सर्व्ववाजिनाम्॥ जवहीना महादुष्टाः पूर्व्वदेशसमुद्भवाः। वाजिवद्देशराणाञ्च देशं विन्द्याद्विचक्षणः॥" इति जन्मदेशः। "काकुदी कृष्णजिह्वश्च कृष्णशिफाण्डतालुकः। कराली हीनदन्तश्च शृङ्गी चाधिकदन्तकः॥ एकाण्डश्चैव जाताण्डः कञ्चुकी त्रिसरी तथा। मार्जारपादो व्याघ्राभस्त्रिकर्णो द्विखुरी स्तनी॥ यमजो वामनश्चैव कुक्लस्तित्तिरसन्निभः। (काकतित्तिरसन्निभः। इति वा पाठः)। वानराक्षो विड़ालाक्षो मुषली चेन्द्रवृद्धकः॥ येषां पृष्ठे हतो भर्त्ता जातदन्तस्तथैव च। एते दोषान्विता वाह्या न ग्राह्या भूतिमिच्छता॥ धनप्राणहरा ह्येते बन्धुविग्रहकारकाः। एषां चिह्नं प्रवक्ष्यामि येन जानन्ति सादिनः॥ पूर्व्वशास्त्रानुसारेण मुनीनां वचनं यथा। आवर्त्ता यस्य ककुदि काकुदी स उदाहृतः॥ कराली चाधरे दन्ती जायते यस्य चोत्तरा। चतुर्भिः पञ्चभिश्चैव हीनदन्तः प्रकीर्त्तितः॥ सप्तभिश्चाष्टनिर्दन्तैः ख्यातश्चाधिकदन्तकः। अङ्गुष्ठपर्व्वसङ्काशः कागस्तनोपमस्तथा॥ जम्बूबदररूपश्च तथाचामलकोपमः। आमाशिसदृशश्चापि हरीतक्याः फलोपमः॥ दग्धचर्म्मनिभश्चापि वालुसंस्थान एव च। कीलः कर्णान्तरे यस्य केशान्ते चापि दृश्यते॥ धौरेयः सर्व्वपापानां शृङ्गी वाहः स कीर्त्तितः। एवंविधेन शृङ्गेन शृङ्गी राष्ट्रे न वासयेत्॥ एकेन लम्बमानेन मुष्केणैकाण्डसंज्ञकः। अत्यन्तरोमशाभ्यान्तु ताभ्यां जाताण्ड उच्यते॥ स्कन्धे वक्षसि बाह्वोश्च अंसदेशे तथैव च। अन्यवर्णो भवेद्वाजी कञ्चुकी स प्रकीर्त्तितः॥ यस्यान्यवर्णरेखा स्यात् पादे कूर्चे च वाजिनः। मार्जारपादः प्रोक्तोऽसौ न धन्यः कुलनाशनः॥ अन्यवर्णस्य वाहस्य शिरः कृष्णं यदा भवेत्। त्रिसरी नाम सः प्रोक्तः भर्त्तुः कुलविनाशनः॥" इत्यादि। मुखरोगोऽक्षिरोगश्च शिरोरोगश्च लिङ्गितः। कर्णरोगश्च कासश्च श्वासो हिक्का व्रणस्तथा॥ ज.द.३अ.।

अश्वकः । पुं। कुलिङ्गपक्षिणि। वै.निघ.।

अश्वकन्दकः । पुं। अश्वगन्धायाम्। रत्ना.।

अश्वकन्दिका । स्त्री। वनस्पतिविशेषे। अश्वगन्धायाम्। र.मा.।

अश्वकर्णः (कः) (र्णिका) । पुं, स्त्री। (Shorea robusta.) शालवृक्षे। শাল গাছ। सु.सू.३८अ.। च.सू.४अ.। सर्जरसभेदे। সর্জশাল বিশেষ। रा.नि.व.२३। शाङ्गु इति च लोके। भा.म.४भ.रेवतीचि.। धवाश्वकर्णककुभः। गुणाः—कटुः तिक्तः स्निग्धः रक्तपित्तघ्नः ऊरोविस्फोटकण्डूघ्नः। रा.नि.व.९। कषायः व्रणस्वेदकफक्रमिघ्नः व्रध्नविद्रधिवाधिर्य्ययोनिकर्णरोगघ्नश्च। भा.पू.१भ. वटादिव.। मात्रा २ माषा। पलाशभेदे। सु.सू. ३९अ.। शरीरे। लताशाले। শিয়াড়ি লতা। प.मु.।

अश्वकर्णम् । क्ली। काण्डभग्ननामास्थिभङ्गविशेषे। यत्रास्थि अश्वकर्णवदुन्नतं तिष्ठति। सु.नि. १५अ.। See भग्नम्।

अश्वकातरा (रिका)
अश्वकाथरिवा } स्त्री। हयकातरायाम्। ঘোড়া কাথরা। मं घोड़ेकाथर। गुणाः—तिक्ता वातघ्नी दीपनी। कातरा हयपर्य्यायैः कातरा वै प्रकीर्त्तिता। रा.नि.। [नि.।

अश्वखरजः । पुं। अश्वतरे। খচ্চার। रा.

अश्वखुरः । पुं। नखीनामगन्धद्रव्ये। नखी। रत्ना.। घोटकखुरे। रा.नि.। [रा.नि.व.३।

अश्वखुरा (री) । स्त्री। श्वेतापराजितायाम्।

अश्वगन्धा (न्धिका)। स्त्री। (Withania somnifera or physalis flexuosa.) स्वनामख्यातक्षुपविशेषः। অশ্বগন্ধা। हिं असगन्ध, वाराहीगेठी। मं आसंध, आसांदु, असंगुर, आसंधिका। रा.नि.व.४। गुणाः—सा शुक्रवृद्धिकरत्वात् शुक्रला। तथा कटूष्णा तिक्ता बल्या वातहरी कासश्वासक्षयव्रणघ्नी च। रा.नि.व.४। रसायनीवातश्लेष्मश्वित्रशोथघ्नी च। भा.म.ख.१भ.। अश्वगन्धानिलश्लेष्मशोफश्वित्रक्षयापहा। बल्या रसायनी तिक्ता कषायोष्णातिशुक्रला॥ मद.व.१। वातकफघ्नी श्वित्रशोथक्षयरोगघ्नी बल्या रसायना तिक्ता कषाया उष्णा अतिशुक्रला च। भा.पू.१भ.। मात्रा २ तो.। तत्शोधनं यथा प्रयोगा.—पञ्चपल्लवतोयेन गन्धानां चालनं तथा। शोषणञ्चापि संस्कारो विशेषणात्र वक्ष्यते॥

अश्वगन्धाघृतम्। क्ली। प्रथमं बालरोगाधिकारे। पाठः—"पादकल्केऽश्वगन्धाया क्षीरे दशगुणे पचेत्।" घृतं ४श. अश्वगन्धाकल्कः १श. दुग्धं ४श. जलं१६ श.। सा.कौ.। मतान्तरे दुग्धं ४० श.। भैष.। द्वितीयं वातव्याधौ—"अश्वगन्धाकषाये च कल्के क्षीरे चतुर्गुणे। घृतं पक्वन्तु वातघ्नं।" अश्वगन्धा ६।० श. वारि ६४ श. शेषः १६ श. घृतं ४ श. दुग्धं १६ श. यथाविधि पाच्यम्। च.द.वा.व्या.चि.। मतान्तरे घृतं ४श. आर्द्राश्वगन्धामूलं ६४ प. जलं ६४श.शेषः १६श. दुग्धं १६श. अश्वगन्धाकल्कः ८ प.। प्रयोगा.वा.व्या.चि.। तृतीयचतुर्थे बृहदभिधाने वातव्याधौ वृष्ये च उक्ते। पाठौ—"अश्वगन्धापलशतं जलद्रोणे विपाचयेत्। अष्टांशशेषं गृह्णीयात् सुपूतं तं रसं तथा। जलद्रोणद्वये छागमांसात्पलशतद्वयं। पक्वैकाहेन कर्त्तव्यः क्वाथः पाकावशेषितः। क्वाथद्वये तथा गव्यक्षीरप्रस्थचतुष्टये। काकोल्यौ मधुकं मेदे जीवन्ती जीवकं बला। एला शतावरी द्राक्षा विदारी कृष्णजीरकं। मुद्गपर्णी शूकशिम्बी पिप्पल्यृषभकं तथा। एतेषां कार्षिकैर्भागैः घृतप्रस्थं विपाचयेत्। सिता चतुष्पलं शीते क्षिपेन्मधु पलाष्टकम्॥" प्रयोगा.। "अश्वगन्धापलशतं शुभदेशसमुत्थितं। पुष्येऽहनि समुद्धृत्य साधयेत् सूक्ष्मकुट्टितम्। द्रोणेऽम्भसि शनैस्तावत् यावत्पादावशेषितं। सर्पिःप्रस्थं पचेत्तेन गव्यं क्षीरं चतुर्गुणम्। कषायं छागमांसस्य दद्याच्छतद्वयस्य च। कल्कानि सूक्ष्मपिष्टानि कर्षमात्राणि दापयेत्। काकोलीयुग्मवृद्धी द्वे द्वे मेदे द्वे च जीरके। स्वयंगुप्ता ऋषभकौ एला मधुकमेव च। मृद्वीकाशूर्पपर्ण्यौ च जीवन्ती चपला बला। नारायणी विदारी च दत्त्वा सम्यग्विपाचयेत्। सितामाक्षिकयोः शीते गृह्णीयात् कुडवे पृथक्। लिह्यात्पाणितलम्……॥ अत्र छागमांसशतद्वये जलद्रोणद्वयं, तुलाद्रव्ये जलद्रोण इति वचनात्। घृतं ४ श. अश्वगन्धा १२॥० श. जलं ६४ श. पादशेषः १६ श. छागमांसं २५ श. जलं १२८ श. पादशेषः ३२ श. गव्यदुग्धं १६ श.। कल्कार्थं काकोल्यादिकस्य मिलितस्य शरावः। शूर्पपर्ण्यौ मुद्गपर्णी माषपर्णी च। पाकसिद्धे शीते च शर्करा ॥० श. मधुनश्च शरावः देयः। रस.र.। भैष.।

अश्वगन्धातैलम्। क्ली। प्रथमं वातव्याधौ हितम्। तिलतैलं ४श. क्वाथार्थमश्वगन्धा १२॥०श. वारि ६४श. शेषः १६श. दुग्धं १६श. मृणालादिकल्कद्रव्याणां मिलित्वा १श.यथाविधि पाच्यम्। च.द.प्रयोगा.। मिश्रभावेनेदं कार्श्याधिकारे उक्तम्। द्वितीयं रसायनाधिकारे—अत्र कल्कार्थाश्वगन्धादीनां मिलितशरावमितं, दुग्धं १६ श. तिलतैलं ४ श.। "अश्वगन्धावरीकुष्ठमांसीसिंहीफलान्वितं। चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत्॥" च.द.।

अश्वगन्धाद्यचूर्णम्। क्ली। स्वरभङ्गनाशनमिदं। यथा—"अश्वगन्धाजमोदा च पाठा त्रिकटुकं त्रिकं। शतपुष्पं ब्रह्मबीजं सैन्धवञ्च समं समम्। एतदर्द्धं वचा चैव चूर्णितं मधुसर्पिषा। भक्षयेत्कर्षमात्रन्तु जीर्णाग्निः क्षीरभोजनम्॥" अत्र ब्रह्मबीजं पलाशबीजं सर्व्वचूर्णार्द्धं ग्राह्यम्। रस.र.। [বল।

अश्वगोष्ठम्। क्ली। वाजिशालायाम्। আস্তা-

अश्वघ्नः। पुं। श्वेतकरवीरवृक्षे। শ্বেতকরবী গাছ। रा.नि.व.१०। [चना। वै.निघ.।

अश्वजीवनः। पुं। चणके। ছোলা। हिं

अश्वतरः। पुं। अश्वखरजे। स च अश्वायां गर्द्दभाज्जातः। খচ্চোর ঘোড়া। तन्मांसं बल्यं बृंहणं कफपित्तकरञ्च। मद.व.१२।

अश्वत्थः। पुं। (Ficus religiosa, Syn, Urustigmareligiosum.) स्वनामख्यातवृक्षे। আশোথ গাছ। हिं पिपर। मं पिंपल। एवि-

षेद्। तेँ कुत्तुत्व्विवेटु। प.सु.। सु.सू.३८अ. न्यग्रोधादिव.। गुणा:—मधुर: कषाय: शीतल: कफपित्तघ्न: रक्तदाहशमन: योनिदोषघ्न:। अश्वत्थस्य फलानि पक्वान्यतीव हृद्यानि च शीतलानि। कुर्व्वन्ति पित्तास्रविषार्त्तिदाहं विच्छर्द्दिशोषारुचिदोषनाशम्॥ रा.नि.व.११। दुर्जर: शीत:। मद.व.५। पित्तश्लेष्मव्रणास्रजित् गुरु: तुवरक: योनिशोधन: वर्ण्यश्च। भा.पू.१भ.वटादिव.।

अश्वत्थकम् । क्ली। मल्लिकापुष्पदले। मल्लिका फुलेर पापड़ा। वै.निघ.।

अश्वत्थफलका (ला) । स्त्री। हनुषायां। हवुष वृक्ष। हिं हौहवेर। मं लघुशिरणी। भा.पू. १भ.। [बालियापीपर। भा.पू.१भ.वटादिव.।

अश्वत्थभित् (भेद:) । पुं। नन्दीवृक्षे। हिं

अश्वत्थसन्निभा । स्त्री। अश्वत्थिकायाम्। गया अश्वथ। रा.नि.व.११।

अश्वत्था (त्थी) । स्त्री। क्षुद्राश्वत्थवृक्षे। गया अश्वथ। रा.नि.व.११। शीवल्लीवृक्षे। रा.नि.व.८।

अश्वत्थिका (त्थी) । स्त्री। क्षुद्रपत्राश्वत्थवृक्षे। गया अश्वथ। हिं पिप्ली। मं अश्वत्थी। कं हेनरलि। गुणा:—मधुरा कषाया रक्तपित्तघ्नी विषघ्नी दाहघ्नी गर्भिण्यां हिता च। रा.नि.व.११।

अश्वदंष्ट्रक: । पुं। गोक्षुरवृक्षे। वै.निघ.। हिंस्रजन्तुविशेषे। सु.।

अश्वदंष्ट्रा । स्त्री। गोक्षुरके। भा.पू.१भ.।

अश्वनाश: (क:) (न:) । पुं। श्वेतकरवीरे। रा.नि.व.१०।

अश्वपर्णिका (र्णी) । स्त्री। भूतकेशीलतायाम्। [भाषा।

अश्वपाल: । पुं। अश्वरक्षके। सहिस इति

अश्वपुच्छक: । पुं। खड्गलतायाम्। श.च.।

अश्वपुच्छा । स्त्री। पृश्निपर्ण्यां। चाकुलिया। माषपर्ण्याम्। रा.नि.व.।

अश्वपुच्छिका (च्छी) । स्त्री। माषपर्णीलतायाम्। माषाणी। रा.नि व.४।

अश्वपुटभावना । स्त्री। द्वात्रिंशत्पलपरिमितद्रव्यस्य भावनायाम्। वै.निघ.।

अश्वपुत्री । स्त्री। शल्लकीवृक्षे। रत्नां.। द्रवन्त्यां। इन्दुरकाणी। वै.निघ.।

अश्वबला । स्त्री। मेथिकायाम्। नारीशाके। नारीशाक। गुणा:—शाकमाश्वबलं रूक्षं बहुविण्मूत्रमारुतम्। सु.। See नारी।

अश्वबाल: । पुं। काशवृक्षे। त्रिका.।

अश्वमारक: । पुं। श्वेतकरवीरे। श्वेत करवी। उपोदिकायां। पुँइ। पालङ्गशाके। सु.चि.१अ.। करवीरे। सु.सू.३८। लाक्षादिव.। भा.पू.१भ.। श्वेतकरवीरमूले। इदञ्च स्थावरविषान्तर्गतमूलविषम्। एवं सुगन्धरोहिषमपि। सु. कल्प.२अ.। See मूलविषम्।

अश्वमाराख्य: । पुं।(Nerium odorum.) श्वेतकरवीरवृक्षे। श्वेतकरवी गाछ। रा.नि.व.१०।

अश्वमाल: । पुं। सर्पविशेषे। वै.निघ.।

अश्वमूत्रम् । क्ली। घोटकमूत्रे। घोड़ारमूत्। गुणा:—तिक्तोष्णं तीक्ष्णं विषघ्नं वातकोपशमनं पित्तकरं दीपनञ्च। रा.नि.व.१५। भेदि कफदद्रुकृमिघ्नञ्च। मद.व.८। [जटा.।

अश्वमूत्रिका (त्री) । स्त्री। शल्लकीवृक्षे।

अश्वमोहक: । पुं। श्वेतकरवीरे। वै.निघ.।

अश्वयानम् । क्ली। अश्वेन भ्रमणे। घोड़ाय चड़ा। गुणा:—घोटकारोहणं वातपित्ताग्निश्रमकृन्मतं। मेदोवर्णकफघ्नञ्च हितं तद्बलिनां वरम्॥ दिनचर्य्या।

अश्वयुज: । पुं। आश्विनमासि। सु.सू.६अ.।

अश्वरक्षक: । पुं। अश्वपाले। घोड़ार सहिस।

अश्वरिपु: । पुं। करवीरवृक्षे। महिषे। भा.।

अश्वरोधक: । पुं। श्वेतकरवीरवृक्षे। श्वेत करवी गाछ। रा.नि.व.१०।

अश्वरोहका (हा) । स्त्री। अश्वगन्धायां।

अश्वलम् । क्ली। क्षुद्रतृणविशेषे। घोड़ेसर। "अश्वलञ्च तृणं बल्यं रूक्षं पयुस्हितावहम्।" वै. निघ.।

अश्वलोमा । पुं। सर्पविशेषे। त्रिका.।

अश्ववराह: । पुं। वाराहीकन्दे। वै.निघ.।

अश्ववहः (वाहः) । पुं । अश्ववाहके । जटा. ।

अश्ववारणः । पुं । गवये । हे.च. । [वादौ ।

अश्ववैद्यः । पुं । अश्वशास्त्रप्रणेतरि शालिहो-

अश्ववैद्यकम् । क्ली । अश्वचिकित्साशास्त्रे । तच्च बहुविधं शालिहोत्रनकुलभोजजयदत्तादिप्रणीतम् ।

अश्वशाला । स्त्री । मन्दुरायाम् । हला. ।

अश्वहनः । पुं । करवीरवृक्षे । रत्ना. । भैष.भ-ग.चि.निशाद्यतैले ।

अश्वहा । पुं । श्वेतकरवीरवृक्षे । मद.व.१ ।

अश्वक्षुरा (रिका) (री) । स्त्री । श्वेतापराजितायाम् । कृष्णापराजितायाम् । वै.निघ. ।

अश्वा । स्त्री । अजमोदायां । अश्वगन्धायां । अपामार्गे । इन्द्रवारुण्यां । राथालशशा । घोटक्यां ।

अश्वातक्रम् । क्ली । घोटकीतक्रे । घोड़ार दुधेर घोल । गुणाः—अश्वातक्रन्तु तुवरं किञ्चिद्वातकरं मतं । अग्निदीप्तिकरं रुच्यं नेत्र्यं मूर्च्छाकफापहम् ॥ वै.निघ. ।

अश्वान्तकः । पुं । श्वेतकरवीरे । रा.नि.व.१० ।

अश्वारिः । पुं । करवीरवृक्षे । भैष.कुष्ठ-चि. मरिचाद्यतैले । महिषे । जटा. ।

अश्वारोहः (कः) । पुं । अश्वगन्धायां । रत्ना ।

अश्वारोहा । स्त्री । इन्द्रवारुण्यां । राथाल शशा । अश्वगन्धायां । मे. । [नि.व.८ ।

अश्वालः । पुं । उशीरे । क्षुद्रकासदर्ये । रा.

अश्वावरोहकः (हिका) । पुं,स्त्री । अश्वगन्धायां । र.मा. । [निघ. ।

अश्वासना । स्त्री । ऋद्धौ । घोटक्याम् । वै.

अश्वाह्वा । स्त्री । अश्वगन्धायाम् । वै-निघ.वा. व्या.शतावरीतैले, नारायणतैले ।

अश्वाह्वादिखुरा (री) । स्त्री । श्वेतापराजितायाम् । रा.नि.व.३ । [भेदे । रा.नि. ।

अश्वाक्षः । पुं । देवसर्षपवृक्षे । अम. । वृक्ष

अश्विजौ । पुं । अश्विनीकुमारौ ।

अश्विनी । स्त्री । जटामांस्याम् । वै.निघ. ।

अश्विनौ । पुं । अश्विनीकुमारद्वये । रत्ना. ।

अश्विभेषजम् । क्ली । लघुभेषज्यां । मेढ़ाशिङे । वै.निघ. ।

अश्वीघृतम् । क्ली । घोटकीक्षीरोत्थनवनीतजघृते । गुणाः-- कटु मधुरं कषायम् ईषद्दीपनं गुरु मूर्च्छाहरं वातात्यन्तकरञ्च । रा.नि.व.१५ ।

अश्वीदधि । क्ली । घोटकीदुग्धजातदधनि । घोड़ीर दई । मं घोड़िचेदहि । कं कुदिरेयमोसरु । गुणाः—"मधुरकषायरुच्यं कफरोगमूर्च्छाहरं ईषद्वातलं दीपनं नेत्रदोषघ्नञ्च।"रा.नि.व.१५ ।

अश्वीनवनीतम् । क्ली । घोटकीदुग्धजातनवनीते । घोड़ार दुधेर ननी । गुणाः— कषायं वातकफघ्नं चक्षुष्यं कटु उष्णं ईषद्वातलञ्च । रा.नि.व.१५ । [मे.यचिके ।

अश्वीयम् । क्ली । अश्वसमूहे । त्रि । अश्वहिते ।

अश्वीक्षीरम् । क्ली । घोटकीदुग्धे । गुणाः— उष्णं रुच्यं बल्यं वातकफघ्नं—एकशफक्षीरमात्रं लवणाम्लं लघु स्वादु च । मद.व.८ ।

अश्वेता । स्त्री । कृष्णापराजितायाम् । कृष्णातिविषायाम् । वै.निघ. । गाम्भारीवृक्षे । रा.नि. ।

अष्टकट्वरतैलम् । क्ली । तैलमिदं वातरक्ते ऊरुस्तम्भे च हितम् । तैलं ४ श. दधि ४ श. तक्रं ३२ श. पिप्पलीशुण्ठ्यौः प्रत्येकं पलद्वयं (मतान्तरे मिलितपलद्वयम्) । यथाविधि पाच्यम् । च.द.ऊ. स्त.चि. । अस्नेहदधि अष्टतक्रं ग्राह्यम् । रस.र. ।

अष्टकर्म्म । क्ली । अष्टादशरसकर्म्मणां मध्ये स्वेदनादिदीपनपर्य्यन्ते सूतस्याष्टविधसंस्कारे । स्वेदनं मर्द्दनञ्चैव मूर्च्छनोत्थापनन्तथा । पातनं बोधनञ्चैव नियामनमतःपरम् । दीपनञ्चेति संस्काराः सूतस्याष्टौ प्रकीर्त्तिताः ॥ र.सा.सं. । त्रिकटु-त्रिफला चित्रककन्यायुक्ते काञ्जिके चतुर्गुणवस्त्रे त्रिदिनं स्वेदनम् । गृहधूमेष्टकाजाजीदग्धोर्णागुड़सैन्धवैः षोड़शांशैः सकाञ्जिकैः त्रिदिनं मर्द्दयेत् । त्रिफला चित्रककन्या वा मूर्च्छना । इत्यादि ।

अष्टका । स्त्री । वृक्षभेदे । हे.च. । [शरसे ।

अष्टगाधः । पुं । ऊर्णनाभौ । माकड़शा ।

अष्टगुणमण्डः । पुं । भृष्टमुद्गतण्डुलान् चतुर्दशगुणे तोये पक्वा, तत्र हिङ्गुसैन्धवधान्यशुण्ठी-

मरिचपिप्पलीचूर्णानि संमिश्र अभिकृथवी गृ-हीते मक्के। गुणा:—क्षुधावर्द्धन: बलकर: बलि-शोधनश्च। वै.निघ.। अत्र तण्डुलस्याष्टभागा: शु-ह्रस्य च भलार:।

अष्टधातु: । पुं। स्वर्णरौप्यताम्रशीषपित्तलरङ्ग-कान्तलौहमुण्डलौहतीक्ष्णलौहेषु । र.सा.सं.टी.।

अष्टपदी । स्त्री। वेल इति ख्याते पुष्पक्षुपे। বেলফুলের গাছ। गुणा:—शीता लघु कफपित्त-विषघ्नी च। मद.व.३। [भा.।

अष्टपलम् । क्ली। शरावमाने। এক সের।

अष्टपलघृतम् । क्ली। ग्रहणीरोगे। पाकवि-धि:—मरिचादि १ प. गुडं १ प. घृतं ८ प. वा-रि ३२ प. एकत्र पाच्यम्। च.द.।

अष्टपात् (द:) । पुं। काश्मीरदेशीयशरभे। मद.व.१२। ऊर्णनाभे। हे.च.४का.।

अष्टपादप: । पुं। वृक्षभेदे। वै.निघ.।

अष्टपादिका । स्त्री। शारदमल्लिकायाम्। কাঠমল্লিকা। रत्ना.। भास्फोतायां। হাপর-মালী। प.मु.व.११।

अष्टभाव: । पुं। स्तम्भ-स्वेद-रोमाञ्च-स्वरभङ्ग-वैस्वर्य-कम्प-वैवर्ण्याश्रुपातेषु। वै.निघ.।

अष्टमङ्गल: । पुं। पुच्छोर:खुरकेशास्यै: शुक्ले वाजिनि। हे.च.। यस्य पादा: सिता: सर्व्वे पुच्छं वक्षो मुखं तथा। मूर्द्धजाश्च सिता यस्य तं विद्या-दष्टमङ्गलम्॥ ज.द.३अ.। क्ली। ब्राह्मणगवाग्नि स्वर्णघृतसूर्य्याप्नृपचारुचर्य्यासु। वै.निघ.।

अष्टमङ्गलघृतम् । क्ली। बालरोगशमने स-र्पिषि। तत्राष्टौषधिपक्कं बालानां हितम्। वचाकुष्ठ ब्राह्मीसर्षपशारिवासैन्धवपिप्पलीकल्केनाष्टमं घृतं घृतपाकविधिना पाच्यम्। घृतं ४ श. कल्कद्रव्य-वचादीनां मिलितशरावं दत्त्वा जलाढकेन पाच्यं। च.द.बाल.चि.। भा. रस.र.।

अष्टमधुजाति: । स्त्री। माक्षिक-भ्रामर-क्षौ-द्र-पौत्तिक-छात्रकार्घ्यौद्दालदालेषु। वै.निघ.।

अष्टमानम् । क्ली। प्रसृतिद्वये, ३२ तो.। আধ সের। प.प्र.१ख.। [प्र.१ख.।

अष्टमिका । स्त्री। तोलचतुष्टयपरिमाणे। प.

अष्टमी । स्त्री। क्षीरकाकोल्याम्। वै.निघ.।

अष्टमूत्रम् । क्ली। गोच्छागमेषमहिषाश्वहस्त्युष्ट्र-गर्द्दभीमूत्रेषु। वै.निघ.।

अष्टमूलम् । त्रि। त्वङ्मांसशिरास्नाय्वस्थिसन्धि-कोष्ठमर्म्ममूलेषु। सु.चि.१अ.।

अष्टमौक्तिकस्थानम् । क्ली। शङ्खहस्तिसर्प-मत्स्यमेघवंशशूकरशुक्तिषु। वै.निघ.।

अष्टलौहकम् । क्ली। स्वर्णरौप्यताम्ररङ्गशीष-पित्तलकान्तलौहमुण्डलौहतीक्ष्णलौहेषु। पञ्चलौह-समायुक्तं कान्तमुण्डकतीक्ष्णकम्। कल्पित: कथितो धीरैरष्टलौहाभिधो गण:॥ रा.नि.व.२२।

अष्टवर्ग: । पुं। A class of eight principal medicaments, Rishabhaka &c. मेदाद्यष्टौषधिगणे। यथा—मेदामहामेदाजीवकर्ष-भकर्द्धिवृद्धिकाकोलीक्षीरकाकोलीषु। प.मु.। जीवकर्षभकौ मेदे काकोल्यावृद्धिवृद्धिकौ। एकत्र मिलितैरेतैरष्टवर्ग: प्रकीर्त्तित:॥ रा.नि.व.२२। गुणा:—"शीतलोऽतिशुक्रल: बृंहण: दाहपित्तरक्त-शोषघ्न: स्तन्यकृत् गर्भदायकश्च।" मद.व.१। "रक्त-पित्तव्रणवायुपित्तनाशकश्च।"राज.। "हिम: स्वादु: बृंहण: गुरु: भग्नसन्धानकृत् कामबलासबलवर्द्धन: तृष्णादाहज्वरमेहक्षयहरश्च।" भा.पू.१भ.।

अष्टवर्गप्रतिनिधि: । पुं। मेदादीनामभावे तत्तुल्यगुणद्रव्यग्रहणे। तत्र मेदामहामेदाभावे श-तावरी, जीवकर्षभकस्थाने भूमिकुष्माण्डमूलं, का-कोलीक्षीरकाकोल्यभावे अश्वगन्धामूलं, ऋद्धिवृद्धि-स्थाने वाराहीकन्दं तत्तुल्यगुणं क्षिपेत्। भा.पू. १भ.। "मेदाभावे अश्वगन्धा महामेदे च शारिवा। जीवकर्षभकाभावे गुडूची वंशलोचना। ऋद्ध्यभावे बला देया वृद्ध्यभावे महाबला।" इति च मतान्त-रम्। [भोज्यभक्ष्यनिष्पेयरूपे भोजनद्रव्ये।

अष्टविधान्नम् । क्ली। चर्व्यचोष्यलेह्यपेयखाद्य-

अष्टाङ्गम् । क्ली। आयुर्व्वेदस्य स्थानाष्टके। त-द्यथा—शल्यं, शालाक्यं, कायचिकित्सा, भूतविद्या, कौमारभृत्यं, अगदतन्त्रं, रसायनं, वाजीकरण-ञ्चेति। कायबालग्रहोर्द्ध्वाङ्गशल्यदंष्ट्राजरावृषान्। अष्टावङ्गानि तस्याहु:। वा.सू.१अ.। द्रव्याभिधानग-दनिश्चय-शल्य-काय-भूतनिग्रह-विषनिग्रह रसायन-बालचिकित्सासु च। वैद्यकम्।

अष्टाङ्गघृतम् । क्ली । वाजीकरणमिदं घृतम्।

अष्टाङ्गधूपः । पुं । ज्वरघ्नोऽयं धूपः गुग्गुलुनिम्बपत्रवचाकुष्ठहरीतकीयवश्वेतसर्षपघृतकृतः। पलङ्कषा निम्बपत्रं वचा कुष्ठं हरीतकी । सर्षपाः स यवाः सर्पिर्धूपनं ज्वरनाशनम् ॥ च.द. ।

अष्टाङ्गयोगः । पुं । योगविशेषे । तद्यथा— कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी । इति संग्रहः ।

अष्टाङ्गरसः । पुं । अर्शोऽधिकारे । लौहकिट्टं मण्डूरं फलत्रयं त्रिफला । र.सा.सं. । गन्धं रसेन्द्रं मृतलौहकिट्टं पलत्रयं त्र्यूषणवह्निभृङ्गम् । कृत्वा समं शाल्मलिकागुडूचीरसेन यामंत्रितयं विमर्दः ॥ मात्रा निष्कमिता । र.सा.सं. ।

अष्टाङ्गलवणम् । क्ली। कफजन्यमदात्यये योगविशेषे । यथा—"सौवर्चलमजाजी च वृक्षाम्लं साम्लवेतसं । त्वगेलामरिचार्द्धांशं शर्कराभागयोजितम् । एतल्लवणमष्टाङ्गमग्निसन्दीपनं परं। मदात्यये कफप्राये दद्यात्स्रोतोविशोधनम्॥" चर.मदात्ययचि. । अजाजी जीरकं वृक्षाम्लं महार्द्रकम् । र.सा.सं. । सौवर्चलकृष्णजीरकाम्लवेतसाम्ललोणिकानां प्र. चूर्णं समं त्वगेलामरिचानां प्रत्येकमर्द्धभागः। शर्करायाः भागैकं एकत्र मिश्रयेत् । च.द.मदात्ययचि. ।

अष्टाङ्गवैद्यकम् । क्ली । शालाक्यकायभूतागदबालविषवाजीरसायनेषु अष्टाङ्गवैद्यकेषु ।

अष्टाङ्गहृदयम् । क्ली । वाभट विरचिते वैद्यकग्रन्थे।अष्टौ च तानि अङ्गानि तेषां प्रत्येकं हृदयं सारतरसंग्रहणात् । 'क्रियतेऽष्टाङ्गहृदयम् ।' वा. सू.१अ. ।

अष्टाङ्गावलेहः (हिक्का) पुं, स्त्री । सन्निपातज्वरहिक्काश्वासादौ हितः । कट्फलं कुष्ठं कर्कटशृङ्गी शुण्ठी पिप्पली मरिचं दुरालभा कृष्णजीरकं,एषां समभागचूर्णं आर्द्रकरसेन लेह्यं। भैष. ज्वर.चि. लेह्यो न मधुना तस्य शीतापचारित्वात् । "सन्निपातेषु सर्व्वेषु न क्षौद्रमवचारयेत् । शीतोपचारि क्षौद्रं स्याच्छीतश्चात्र विरुध्यते ॥" भा.म.१ भ. । सा.कौ. । च.द. ।

अष्टादशधान्यम् । क्ली। कलायगोधूमाढ़कीयवयावनालशालिचणकमसूरातसीमुद्गतिलकुलत्थश्यामाकमाषराजमाषवर्त्तुलहरिककङ्गुतेरणीषु । वै. निघ. ।

अष्टादशमूलम् । क्ली । बिल्वाग्निमन्थश्योणाकगाम्भारीपाठापुनर्णवावाट्यालकमाषपर्णीजीवकैरण्डर्षभकजीवन्तीशतावरीशरेक्षुदर्भकाशशालिधान्यमूलेषु । वै.निघ. ।

अष्टादशशतिकमहाप्रसारणीतैलम् । क्ली । वातव्याधौ । समूलपत्रप्रसारणी ३७॥० श. शतावरी १२॥० श. अश्वगन्धा १२॥० श. केतकी १२॥० श. दशमूलं प्रत्येकं १२॥० श. वाट्यालकं १२॥० श. झिण्टी १२॥० श. एकत्र शतद्रोणे जले पक्त्वा द्रोणावशेषे क्वाथोऽवतार्यः। काञ्जिकस्य द्रोणद्वयं। दधिदुग्धशुक्तेक्षुरसच्छागमांसानां प्रत्येकं ८ श. एकत्र कल्केन सह तैलद्रोणं ३२ श. पाच्यम् । कल्कद्रव्यं प्रत्येकं पलत्रयम् । श्रीवासो नवनीतखोटी । कुन्दुरुः कुन्दुरुखोटी । च.द.वा.व्या.चि.।

अष्टादशाङ्गः । पुं । सन्निपातज्वरे कषायविशेषे । स चतुर्विधः—दशमूल्यादिः भूनिम्बादिः द्राक्षादिः मुस्तकादिश्चेति । तत्र प्रथमः—"दशमूली शटी शृङ्गी पौष्करं सदुरालभा । भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी। अष्टादशाङ्ग इत्येषः सन्निपातज्वरापहः···॥"द्वितीयः यथा—"भूनिम्बदारुदशमूलमहौषधाब्दतिक्तेन्द्रबीजधनिकेभकणाकषायः । तन्द्राप्रलापकसनारुचिदाहमोहश्वासादिरुक्तमखिलं ज्वरमाशु हन्ति ॥" तृतीयः यथा— "द्राक्षामृता शटी शृङ्गी मुस्तकं रक्तचन्दनं । नागरं कटुका पाठा भूनिम्बं सदुरालभम् । उशीरं पद्मकं धान्यं बालकं कण्टकारिका । पुष्करं पिचुमर्दश्च सद्यो जीर्णज्वरापहः ॥" चतुर्थः यथा—"मुस्तापर्पटकोशीरदेवदारुमहौषधं । त्रिफला धन्वयासश्च नीली कम्पिल्लकं त्रिवृत् । किराततिक्तकं पाठा बला कटुकरोहिणी । मधूकपिप्पलीमूलं मुस्ताद्यो गण उच्यते ॥" च.द. । भैष. ।

अष्टादशाङ्गलौहम् । क्ली । पाण्ड्वधिकारे लौहम्।तस्य पाठः —"किराततिक्ता सुरदारु दार्वी मुस्ता गुडूची कटुका पटोलम् । दुरालभा पर्पटकं सनिम्बं कटुत्रिकं वह्निफलत्रिकञ्च। फलं विड़ङ्गस्य समांशिकानि सर्वैः समं चूर्णमथायसश्च । सर्पि-

र्मधुभ्यां वटिका विधेया तक्रानुपानाद्विषजा प्रयोज्या । निहन्ति पाण्डुत्वे"त्यादि । भा.म.२भ. ।

अष्टापदः । पुं । शरभे । मर्कटे । महासिंहे । धुस्तूरे । रा.नि.व.१९ । क्ली । सुवर्णे । रा.नि.व. १३ । स्त्री (दी) । चन्द्रमल्लिकायां ।

अष्टावक्ररसः । पुं । रसायनाधिकारे रसः—पारदस्य १ भ. गन्धकस्य २ भ. स्वर्णस्य १ भ. रौप्यस्य ॥० भ. शीषकस्य ।० भ. रङ्गस्य ।० भ. ताम्रस्य ।० भ. खर्परस्य च ।० भ. वटाङ्कुररसेन कुमारीरसेन च प्रहरं मर्द्दयित्वा रससिन्दूरवत् पाच्यः । मात्रा २ र. नागवल्लीरसेन सेव्यम् । भै.ष. ।

अष्टिः (ष्ठिः) । स्त्री । अष्ठायां । आँटी ।

अष्टौषधिः । स्त्री । ब्रह्मसुवर्चलादित्यपर्णीनारीकाष्ठगोधासर्पासोमपद्माजनीत्य इत्यष्टौ । च.चि. १अ. । इत्यासामष्टानामोषधीनां यां यामेवौषधिं लभेत तस्यास्तस्याः स्वरसस्य सौहित्यं गत्वा स्नेहभावितायामार्द्रपलाशद्रोण्यां सपिधानायां शयीत । तत्र प्रलीयते षण्मासेन पुनः पुनः सम्भवति । तस्याजं पयः प्रत्यवस्थापनम् । षण्मासेन देवतानुकारी भवति वयोवर्णस्वराकृतिबलप्रभाभिः । स्वयं चास्य सर्व्ववाचोगतानि प्रादुर्भवन्ति । दिव्यञ्चास्य चक्षुःश्रोत्रं भवति योजनसहस्रगति दशवर्षसहस्राण्यायुरनुपद्रवञ्च । च.चि.१अ. ।

अष्ठिला, अष्ठीला, अष्ठीलिका । स्त्री । वायुरोगविशेषे । उत्तरापथप्रसिद्धे वर्त्तुलाकारपाषाणखण्डे (जेञ्जरः) । कर्म्मकारादिर लोहदाण्डि वा (गयदासः) । नाभेरधस्तादाकारग्रन्थिभूतरोगे । स च चलो वाचलो वा ऊर्द्ध्वं विस्तृतोन्नतश्च । तेन च वातादिरोधो भवति । लक्षणम्—"नाभेरधस्तात्सञ्जातः सञ्चारी यदि वाचलः । अष्ठीलावद्घनो ग्रन्थिरूर्द्ध्वमायत उन्नतः । वाताष्ठीलां विजानीयाद्बहिर्मार्गावरोधिनीम् ॥" मा नि.वा.व्या. ।

अष्ठि(ष्ठी)वान् । पुं । शूकरोगविशेषे । लक्षणं यथा—"कठिना विषमैरखण्डैर्मारुतस्य प्रकोपतः । शूकैश्च विषसंयुक्तैः पिड़काष्ठीलिका भवेत् ॥" सु. नि.१४अ. । जानुनि । रा.नि.व.१८ ।

असंक्लिन्नः । त्रि । न सम्यगार्द्रे । भा.पू.१भ. । "पिण्डीकृतमसंक्लिन्नम् ।"

असनः । पुं । (Termenalia tomentosa Syn. Pentaptera tomentosa.) छागकर्णवत्पत्रशालवृक्षविशेषे । पीतशाल इति प्रसिद्धे । प. मु. । विजयसार इति प्रसिद्धे । भा पू.१भ.वटादिव. । असन इति प्रसिद्धे । र.मा.रत्ना. । पियाशाल । हिं असना । मं असणा, वड़िलुरिया । "असनौबीजकः कटाख्यः स्वनामख्यातः ।" सु.सू. ३८अ.ड. । गुणाः – कटूष्णः तिक्तः वातघ्नः सारकः गलदोषघ्नः रक्तमण्डलघ्नश्च । रा.नि.व.९।२३ । कुष्ठवीसर्पश्वित्रप्रमेहगुह्यकृमिकफरक्तपित्तघ्नः त्वच्यः केश्यः रसायनश्च । भा.पू.१भ.वटादिव. । सि.यो. रा.य.चि.एलादिमन्थे.वृन्दः । "निम्बासनशालसारान् ।" वा.सू.१५अ.असनादिव. । "असनतिनिशभूर्ज ।" भा.म.४भ.योनिरोग चि. । "खर्जिकोऽशासनं चाहम् ।" जीवकद्रुमे । मे.नत्रिकं । वकवृक्षे । वीरतर्व्वादौ । क्ली । चेपणे । मे.नत्रिकं ।

असनपर्णिका (र्णी) । स्त्री । अपराजितायाम् । अपराजिता । माराटीति अ.टी.भः ।

असनपुष्पः (कः) । पुं । षष्टिकधान्यजातिभेदे । सु.सू.४६अ. ।

असनादिगणः । पुं । असनतिनिशभूर्जश्वेतवाहप्रकीर्य्यखदिरकदरभण्डीशिंशपामेषशृङ्गीचन्दनत्रयतालपलाशजोङ्गशाकशालक्रमुकधवकुलिङ्गछागकर्णाश्वकर्णात्मको गणः । स श्वित्रकुष्ठकफकृमिहरः पाण्डुप्रमेहमेदोघ्नश्च । वा.सू.१५अ. ।

असरुः । पुं । भूकदम्बे । कुकुरशोँका । श.च. ।

असलम् । क्ली । लौहे । अस्त्रे । वै.निघ. ।

असात्म्यः । त्रि । प्रकृत्यसुखावहे । क्ली । सात्म्यवैपरीत्ये ।

असारम् । पुं, क्ली । काष्ठागुरुणि । रा.नि.व. १२ । अगुरुणि । जैपाले । एरण्डवृक्षे । श.च. ।

असारदधि । क्ली । गृहीतनवनीत-दधनि । गुणाः—असारं दधि संग्राहि शीतलं वातलं लघु । विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥ भा.पू. दधिव. ।

असारा । स्त्री । कदलीवृक्षे । वै.निघ. ।

असिक्नम् । क्ली । चिबुकौष्ठमध्यभागे । है.च.

असिक्निका (क्नी) । स्त्री । अवरुद्धान्तःपुरप्रेष्यायाम् । मे.नत्रिकं । दासाम् । जटा. ।

असिगण्डः । पुं । क्षुद्रोपाधाने । ছোট বালিস । जटा. ।

असितः । पुं । धवत्वचे । धाওয়া গাছ । र.मा. । रत्ना.। क्ली । काष्ठागुरुणि । वै.निघ. । त्रि । कृष्णवर्णे ।

असितजफलः । पुं । नारिकेलवृक्षे । वै.निघ.।

असिततिलः । पुं । कृष्णतिले । च.द.अर्शचि.।

असितद्रुमः । पुं । कृष्णताले । वै.निघ. ।

असितपल्लवा । स्त्री । भूमिजम्बाम् । नदीजम्बूवृक्षे ।

असितफलः । पुं । मधुनारिकेले ।

असितावलमोटा । स्त्री । कृष्णजयन्त्याम् । কাল জয়ন্তী। गुणाः—असितावलमोटा तु रसायनकरी मता । गुणाश्चान्ये जयन्तीवत्··· । वै.निघ. ।

असितवल्ली । स्त्री । नीलदूर्व्वायां । वै.निघ.।

असितवेत्रम् । क्ली । श्यामालतायाम् । वा.र. अमृतादिकषाये । [তেঁদ গাছ। वै.निघ. ।

असितसारः (कः) । पुं । तिन्दुकवृक्षे ।

असिता । स्त्री । हस्वनीलीवृक्षे । रा.नि.व.४ । See अक्निका । कालातिविषायाम् ।

असिताञ्जनी । स्त्री । कृष्णकार्पासाम् । रा.नि.व.४ । See कालाञ्जनी ।

असिताननः । पुं । कपौ । हे.च. । [का. ।

असिताभ्रशेखरः । पुं । नीलीवृक्षे । त्रि-

असितालता । स्त्री । नीलदूर्व्वायाम् । श्यामालतायाम् । वै.निघ. ।

असितालुः । पुं । नीलालौ । रा.नि.व.७ ।

असितोत्पलम् । क्ली । नीलोत्पले । नीলশুন্দি । রা.नि.व.१० ।

असिदंष्ट्रः (कः) । पुं । मकरे । त्रिका. ।

असिदन्तः । पुं । मकरे । कुम्भीरे । वै.निघ. ।

असिद्धः । त्रि । आमे । কাঁচা । अपक्वे । सिद्धकरा নয় । रत्ना. । [हे.च. ।

असिधेनुः (का) । स्त्री । छुरिकायां । हला.

असिपत्रः । पुं । सेहुण्डवृक्षे । মনসা গাছ । मद.व.१ । इक्षौ । আখ । प.मु. । त्रिका. । गुण्डतृणविशेषे । रा.नि.व.८ । (कः) श्वेतदर्भे । रा.नि.१४ ।

असिपत्रतृणम् । क्ली । गुण्डालके । তৃণবিশেষ । मं गुण्डागवत । रा.नि.व.८ । गुणाः—शीतं मधुरं कफवातनुत् । रक्तदोषातिसाराणां नाशकं दाहनुत्परं । द्विप्रकारं दीर्घलघुभेदैः दीर्घं गुणाधिकम् ॥ वै.निघ । [গুণ্ডক । हारा. ।

असिपुच्छः (कः) । पुं । जलचरविशेषे ।

असिमेदः । पुं । खदिरक्षुपे । विट्खदिरे । গুয়েবাব্‌লা । मं खैराचेझाड़ । श.र. । [आ.वा.।

असीतकम् । क्ली । काष्ठागुरुणि । भा.म.२भ.

असीतका । स्त्री । कृष्णापराजितायाम् । নীল অপরাজিতা । मं कालीगोकर्णी । वै.निघ. ।

असीतकादिचूर्णम् । क्ली। आमवाते चूर्णं । पाठः—"असीतकं मागधिका गुडूची श्यामा वराही गजकर्णगुण्ठी । समा धृताः कल्कमिदं तु चूर्णं पिबेत्तदुष्णोदकमण्डयूषैः ॥" भा.नि.म.२भ.।

असुः । पुं । प्राणे । अम.। क्ली । चित्ते । उणा.।

असुखम् । क्ली । दुःखे । हे.च. । [अम. ।

असुधारणम् । क्ली । जीवने, जीवनधारणे ।

असुभृत् । पुं । प्राणिमात्रे ।

असुरम् । क्ली । सामुद्रलवणे । मद.व.२ । पुं । देवदारुवृक्षे । वै.निघ.जीर्णज्व.लवङ्गादि. ।

असुरग्रहः । पुं । भूतग्रहविशेषे । मा.नि. ।

असुरसा । स्त्री । वर्वर्याम् । বাবুই তুলসী । र.मा. । [मे.रत्रिकं ।

असुरा । स्त्री । रजन्याम् । রাত্রি । हरिद्रायां।

असुराह्वम् (ह्वा) । क्ली,स्त्री । कांस्ये । हे.च.।

असुराह्वपतङ्गः । पुं । तैलपायिपतङ्गे । তেলা পোকা, আর্শোলা । "असुराह्वपतङ्गस्य विट्चूर्णं मधुसंयुतम् ।" वैद्यकम् ।

असुराह्वविट् । पुं । कांस्यमले । वै.निघ.२भ.

ज्व.अभुरायश्ने । [अ.टी.भ. ।

असुरी । स्त्री । राजिकायां । राईसरिषा ।

असुस्थः । त्रि । रोगयुक्ते ।

असृक् । क्ली । सृक्कानामगन्धद्रव्ये । कुङ्कुमे । रा.नि.व.१२ । रक्ते । रा.नि.व.१८ ।

असृक्करः । पुं । शरीरस्थरसधातौ । हे.च. ।

असृक्पः (पा) । पुं, स्त्री । जलौकायाम् । अ.टी.भ. ।

असृग्गुल्यः । पुं, क्ली । केसरे ।

असृग्ध्यदः । पुं । कोष्ठे । वै निघ. ।

आम्र: । पुं ।(Mangifera indica) Mango tree. स्वनामख्यातवृत्ते। আম্ গাছ। मं आंवाफल । कं माविनफल । तें माविड़ि । आम्र: पञ्चविध: साधारणाम्र-कोशाम्र-राजाम्र-महाराजाम्र-रसालाम्राश्च । एषां विशेषा: स्वस्वपर्य्याये ज्ञेया: । बालाम्रादिगुणा: यथा—कषायाम्लरसं सुगन्धि कण्ठरोगघ्नम् अग्निकरञ्च । ग्राहि मेहरक्तकफपित्तव्रणघ्नञ्च । मद.व.६। पित्तप्रकोपवातरक्तकरं लवणादिना रुचिकरञ्चेति । बद्धास्थि पित्तानिलकफकरं बालवदेव । पक्वं तत्त्रिदोषशमनं स्वादु पुष्टिकरं गुरु धातुवृद्धिकरं सन्तर्पणं कान्तिकारि तृष्णाश्रमघ्नञ्च । रा.नि.व.११ । वा.सू. १५अ.न्यग्रोधादि: । तरुपक्वाम्रं गुरुवातहरं मधुराम्लं पित्तप्रकोपनञ्च । क्रत्रिमपक्वं पित्तघ्नम् । पर्य्युषिताम्रं रुच्यं बल्यं वीर्य्यकरं लघु शीतलं वातपित्तहरं सारकञ्च । गालिताम्ररस: बल्य: गुरु: वातहर: सारक: अहृद्य: अतितर्पण: बृंहण: कफवर्द्धनश्च । आम्रखण्डं गुरु अतिरोचनं दुर्जरञ्च। दुग्धाम्रं वृष्यं वर्ण्यं स्वादु गुरुशीतलं रुच्यं बृंहणं बल्यञ्च। आमातियोगे मन्दाग्नित्वं विषमज्वरं रक्तामयं बद्धगुदोदरं नेत्रामयञ्च करोति । भा.पू.१भ.। आपक्वमाम्रं फलमेव शस्तं संग्राहि पित्तासृजि कोपनञ्च। तथा विपक्वं मधुरञ्च चाम्लं भेद्यं सपित्तामयनाशनञ्च ॥ अत्रि.१७अ.। क्ली। आम्रफले। पले, ८ तो. । प.प्र.१ख. ।

आम्रगन्धक: (ष्टत्) । पुं । समष्ठीलक्षुपे । मं कोतुंवा । रा.नि.व.४ ।

आम्रगन्धा । स्त्री । कर्पूरहरिद्रायाम् । আম্ আদা । हिं कर्पूरहर्द्दि । भा.पू.१भ. ।

आम्रगन्धिहरिद्रा । स्त्री । आम्रहरिद्रायां।

आम्रतैलम् । क्ली । आम्रास्थितैले । আমের কুশীর তৈল । गुणा:—ईषत्तिक्तं मधुरं नातिपित्तक्रत् वातकफहरं रुच्यं सुगन्धं विशदञ्च । मद.व.८ । सहकारतैलमीषत्तिक्तमतिसुगन्धि वातकफहरं सूक्ष्मं मधुरं कषायमेवंनातिरक्तपित्तकरञ्च । अत्रि:१४अ. ।

आम्रत्वचा । स्त्री । आम्रवल्कले । আমের ছাল । गुण:—कषाया । रा.नि.व.११ ।

आम्रनिशा । स्त्री। आम्रहरिद्रायां । वै.निघ.

आम्रपल्लव: । पुं, क्ली । आम्रकिसलये । च. सू.छर्द्यां। गुणा: —रुच्य: कफपित्तघ्नश्च। भा.पू.१भ.।

आम्रपुष्पम् । क्ली । आम्रमुकुले । আমের বোল । गुणा:—रुच्यं दीपनञ्च । रा.नि.व.११ । अतीसारकफपित्तप्रमेहघ्नं रक्तदुष्टिहरं शीतं वातलञ्च । भा.पू.१भ. ।

आम्रपेशिका (शी) । स्त्री । शुष्काम्रखण्डे । আম্চুর, আম্শী । मं आंबोशी । गुणा:—अम्लमधुरा कषायरसा भेदिका वातकफघ्नी च । भा.पू. १भ. ।

आम्रफलम् । क्ली । आम्रे ।

आम्रफलपानकम् । क्ली । आम्रफलक्रतपानकविशेषे । আমের পানা । "आममाम्रं जले स्विन्नं मर्द्दितं दृढ़पाणिना । सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितं । प्रपाणकमिदं श्रेष्ठं भीमसेनेन निर्म्मितं। सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम् ॥" भा.पू.१भ. ।

आम्रमय: । त्रि । आम्रक्रते ।

आम्रमूलम् । क्ली । आम्रशिफायां । আমের শিকড় । गुणा: –सुगन्धि रुच्यं संग्राहि शीतलञ्च । रा.नि.व.११ ।

आम्ररसाक्रति: । पुं । रसालाभेदे । किञ्चित्कुङ्कुमसंयुक्ता विमलदधिगालिता । सशर्करं भवेत्पीता पक्वाम्ररससन्निभा ॥ पीता शिखरिणी या सा लघ्वी वर्णवती हि सा । सुरुच्या मधुरा बल्या वातपित्तहरापरेति ॥

आम्रलेह: । पुं । आम्रक्रतलेहे । हिं रायते । আমের চাটি । "तरुणाम्रं भर्ज्जयित्वा मर्द्दयेद्गुड़शर्करे । सैन्धवं मरिचं हिङ्गु भर्जितं तत्र निःक्षिपेत् । रुचिक्रच्चाम्रलेहोऽयं मधुरस्त्वग्निकारक: ।

हृद्य: स्निग्धो गुरुशीत: पाकविद्याविशारदै: ॥" वै.निघ. ।

आम्रवन्द: । पुं । आम्रवन्दाबाम् । আম গাছের গান্দরা । वै.निघ.२भ.ज्व.चि. ।

आम्रव(वा)ट: । पुं । आम्रातके । मद.व.६।

आम्रवीजम् । क्ली । आम्रास्थिनि । আমের আটী বা কুশী । हिं कोइलीया । गुणा:—कषायं छर्द्यतीसारघ्नं ईषदम्लं मधुरं हृदयदाहघ्नञ्च । भा.।

आम्रवेतस: । पुं । अम्लवेतसे । रा.नि.व.६ ।

आम्रहरिद्रा । स्त्री । आम्रनिशायाम् । আম হলুদ । गुणा:—......"तिक्ता चाम्ला रुचिप्रदा। लघुरग्निदीपनी चोष्णा तुवरा च सरा मता । कफक्षीणव्रणं कासं श्वासं हिक्कां ज्वरं तथा । मुखरोगं रक्तदोषं नाशयेत् ।" वै.निघ. ।

आम्रात: (क:) । पुं । The hogplum (Spondias mangifera.) स्वनामप्रसिद्धे वृक्षविशेषे । আমড়া গাছ । हिं आम्बाड़ा । मं हरसालआंबा, आंबाड़े । फलगुणा:—"आम्रातमम्लवातघ्नं गुरूष्णं रुचिकृत्परं । पक्वन्तु तुवरं स्वादुरसपाकं हिमं स्मृतं । तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टम्भि बृंहणं । गुरु बल्यं मरुत्पित्तक्षतदाहक्षयापजित् । आमं फलं कषायाम्लं । पक्वं तत् मधुराम्लं स्निग्धं पित्तकफघ्नञ्च । रा.नि.व.११ । आम्रावर्त्ते । আমোট্, আমসত্ত্ব इति ख्याते । "पक्वस्य सहकारस्य कटे विस्तारितो रस: । घर्म्मशुष्को मुहुर्द्दत्त-आम्रातक इति स्मृत: ॥" क्ली । आम्रातकफले । আমড়া । राजाम्रे । भा.पू.१भ. ।

आम्रातक: । पुं । पलाशिकायाम् । रा.नि.व. २३ । च.सू.४अ. ।

आम्रावर्त्त: । पुं । Inspissated mango juice. आम्रातके । আমোট্, অমৌট, অমাবট इति च प्रसिद्धे । हिं अम्बट । मं आंबेरसाचौपोळी । विधि:—पक्वाम्ररस: पटे विस्तारित: सौद्रशुष्क: आम्रावर्त्त उच्यते । गुणा:—तृष्णाच्छर्द्दिवातपित्तघ्न: सारक: रुच्य: लघुश्च । भा.पू.१म. ।

आम्रास्थि । क्ली । आम्रवीजशस्ये । আমের আঁটী । च.सू.४अ. ।

आम्ल: । पुं । तिन्तिडाम् । তেঁতুল গাছ । अम्लवेतसे । मद.व.६ । वै.निघ.२भ.वा.व्या.प्रत्यष्ठीला चि. । त्रि । अम्लरसे । "अम्लस्तु पाचनो रुच्य: लघु: पित्तकफप्रद: । लेखनोष्ण: क्लेदनश्च वाह्ये शीतलताकर: । स्निग्धोष्ण: सारकश्च भूसङ्कोचनकारक: । द्विजरोमणां हर्षदश्च वातनाशकरो मत: । अत्यातिसेवनेनैव तिमिरं दाहतड्भ्रमा: । ज्वरकण्डूपाण्डुरोगविसर्पस्फोटकुष्ठहृत् ।" वै.निघ. ।

आम्लका । स्त्री । नागरदेशप्रसिद्ध-पलाशीलतायाम् । वै.निघ. ।

आम्लटक: । पुं । चुक्रक्षुपे । চুক । र.मा. ।

आम्लपञ्चकम् । क्ली । अम्लरसयुक्तफलपञ्चके यथा – कोल दाड़िम वृक्षाम्ल-चुक्रिकाम्लवेतसै: पञ्चाम्लफलम् । जम्बीर-नारिङ्गाम्लवेतस-तिन्तिड़ीवीजपूरकमिति वा फलाम्लपञ्चकम् । रा.नि.व.२२। पञ्चाम्लं । [वै.निघ. ।

आम्लपत्रक: । पुं । चुक्रायां । টক পালঙ্ ।

आम्लपत्री । स्त्री । पलाशीलतायां । वै.निघ. ।

आम्लपित्तम् । क्ली । स्वनामख्यातरोगविशेषे । See अम्लपित्तं ।

आम्लफलम् । क्ली । कपित्थफले । वै.निघ. ।

आम्ललोटिका । स्त्री । क्षुद्रचिञ्चायाम् । वै. निघ. । [আমরুল ।

आम्ललोणिका । स्त्री । अम्ललोणिकायाम् ।

आम्लवक्कलम् । क्ली । पित्तजन्यरोगविशेषे ।

आम्लवती । स्त्री । अम्ललोणिकायाम् । मं आंबवती । वै.निघ. ।

आम्लवर्ग: । पुं । अम्लवर्गे । See अम्लवर्ग: ।

आम्लवल्ली । स्त्री । आंबटवेल इति महाराष्ट्रप्रसिद्धलतायां । गुणा:—"आम्लवल्ली दीपनी स्यात्तीक्ष्णाम्ला रुचिदा मता । कफशूलगुल्मवातप्लीहनाशकरी मता ।" वै.निघ.। [বেতো । वै.निघ.।

आम्लवास्तुक: । पुं । चुक्रिकायां । চুকা

आम्लवेतस: । पुं । अम्लवेतसे । See अम्लवेतस: ।

आम्ला । स्त्री । तिन्तिड़िकायाम् । लिङ्गिनीलतायाम् । श.र. । श्रीवल्लयाम् । रा.नि.व.८ ।

आम्लातकः । पुं । आम्रातके । रत्ना. । [व.४।

आम्लातकी । स्त्री । पलाशीलतायां । रा.नि.

आम्लानीकः । पुं । पीतझिण्टीक्षुपे । र.मा. ।

आम्लि(म्ली)का । स्त्री । आम्लिकायाम् । তেঁতুল গাছ । अम्लोद्गारे । श.मा. ।

आयतः । त्रि । दीर्घे ।

आयतच्छदा । स्त्री । कदलीवृक्षे । मद.व.५।

आयतनम् । क्ली । अधिष्ठाने । आश्रये । हेतौ । भा. । [का. ।

आयतपत्रा (त्री) । स्त्री । कदलीवृक्षे । त्रि-

आयसम् । क्ली । तीक्ष्णलौहे । रा.नि.व.१३ । लौहसामान्ये । रत्ना. । [सु.चि. । लौहमले ।

आयसमलम् । क्ली । मण्डुरलौहे । च.द.पा-

आयस्तः । त्रि । तेजिते । क्षिप्ते । मे.तत्रिकं ।

आयामः । पुं । वातरोगभेदे । स द्विधा अभ्यन्तरायामः वाह्यान्तरायामश्चेति । दैर्घ्ये । अम. । सङ्कुचितायदेशस्य व्रणस्य दीर्घीकरणे। सु.चि.१अ.।

आयामकाञ्जिकम् । क्ली । ग्रहण्यधिकारे। निस्तुषदरदलितयवे चतुर्गुणजलसाधितयवमण्ड १६ श. (यवः ८ श. जलं ६४ श. शे. १६ श.) यवशक्तु ८ श. मध्यविधमूलकानि ६४ वारि ६४ श. एकत्र स्थापनीयम् । ततो यवक्षारादिकं प्रत्येकं पलद्वयं (१६ तो.) तथा पिप्पल्यादीनां प्रत्येकं पलमितं (८ तो.) तत्र दत्त्वा विशुद्धघटे पञ्चदशदिनं यावत् स्थापयेत् । च.द.ग्रह चि. । भैष. ।

आयासः । पुं । श्रान्तौ । हे.च. ।

आयुः । पुं,क्ली । जीवितकाले । जटा.। औषधे। घृते । रा.नि.व.१५ । वसायाम् । रा.नि.व.१८ ।

आयुःशेषः । पुं । मृत्यौ ।

आयुधदीर्घपृष्ठः । पु' । सर्पे । हारा. ।

आयुधधर्म्मिणी । स्त्री । जयन्तीक्षुपे । श.च.।

आयुर्द्रव्यम् । क्ली औषधे । र.मा. ।

आयुर्योगः । पुं । औषधे । रा.नि.व.२० ।

आयुर्व्वेदः । पुं । ऋग्वेदस्योपवेदविशेषे, अथर्व्ववेदोपाङ्गे शल्यादिस्थानाष्टकसम्पन्ने धन्वन्तर्यादिप्रणीतचिकित्साशास्त्रे । "इह खल्वायुर्व्वेदो नाम यदुपाङ्गमथर्व्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान् स्वयम्भूः ।" तन्निरुक्तिः यथा—आयुरस्मिन् विद्यते अनेन वा आयुर्विन्दतीत्यायुर्व्वेद इति । सु.सू.१अ. । आयुर्हिताहितं व्याधेः निदानं शमनं तथा । विद्यते यत्र विद्वद्भिः स आयुर्व्वेद उच्यते ॥ वैद्यशास्त्रे । हिताहितं सुखं दुःखमायुस्तस्य हिताहितं । मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते ॥ च.सू.१अ. ।

आयुर्व्वेदमयः । त्रि । आयुर्व्वेदाभिज्ञे ।

आयुर्व्वेदी । पुं । वैद्ये । रा.नि.व.२० ।

आयुष्करः । त्रि । परमायुर्जनके ।

आयुष्मान् । पुं। तृतीययोगे। जीवकमहाक्षुपे। रा.नि.व.५ । त्रि । दीर्घजीविनि । [व.२० ।

आयुष्यम् । त्रि । पथ्ये। आयुर्हितकरे । रा.नि.

आयुस् । क्ली । जीवितकाले । अम. ।

आरः (कः) । पुं । हरिताले । रैफल इति गौड़देशख्याते मधुराम्लफलवृक्षे । र.मा. । क्ली । सुण्डलौहे । रा.नि.व.१३।"आरं कांस्यं मृतं ताम्रं"। मेघनादरसे । पित्तले । भा. ।

आरकूटः । पुं, क्ली । ताम्रयशदयोरुपधातौ पित्तले । পিতল । हिं पीतरो । रा.नि.व.१३ ।

आरक्तम् । क्ली। रक्तचन्दने । त्रि । सम्यक्रक्तवर्णे । [इति लोके।

आरक्तपुष्पी । स्त्री । बन्धुजीवकवृक्षे । বান্ধুলী

आरग्वधः । पुं । (Cassia fistula.)आरग्वधवृक्षे । বড় শোন্দাল, সোণালু, রাখালনড়ী, বানরনড়ী । हिं आमलटास, धनवहेड़ा, शोणहाली । मं थोरवाहावा । तैं रेलचेट्ट । सुवर्णालुफले, वा पत्रे । तत्रान्तःपरिमार्ज्जने फलं, वहिःपरिमार्ज्जने कुष्ठादौ पत्रं ग्राह्यम् । सि.यो.पित्त. ज्व.द्राक्षादौ श्रीकण्ठः । सुवर्णालुफले । च.द.पित्त. ज्व.चि. । "द्राक्षारग्वधयोश्चापि ।" च.द.वात.श्लेष. ज्व.आरग्वधादिः । "आरग्वधग्रन्थिकमुस्ततिक्ता ।" आरग्वधः चिरमालकः । ड. सु.सू.३८अ. । आरग्वधपत्रे । च.सू.३अ.१म.प्रले. । See आरग्वधः ।

आरग्वधपञ्चकम् । क्ली । वातकफज्वरे क-

पायविशेषे। यथा—आरग्वधस्तिक्तकरोहिणी च हरीतकीपिप्पलिमूलमुस्ताः। हा.भचि.२स्थानं २भ.

आरग्वधादिः । पुं। आरग्वधेन्द्रयवपाटलकाकतिक्ता-निम्बामृता-मधुरसा-सुवच्चपाठाः।भूनिम्बसैर्य्येकपटोल-करञ्जयुग्मं सप्तच्छदाग्निसुषवीफलबाणघोण्टा इत्यामको गणः छर्द्दिकुष्ठविषमज्वरघ्नः कफकण्डूतिप्रमेहदुष्टव्रणशोधनः विशेषतो बलासघ्नश्च। वा.सू.१५अ.। सु.सू.३८अ.। आरग्वधादिपञ्चद्रव्यकृतकषाये वातश्लेष्मज्वरे। च.द.। आरग्वधग्रन्थिकमुस्ततिक्ताहरीतकीभिः क्वथितः कषायः···।

आरग्वधाद्यतैलम् । क्ली। योनिव्यापदधिकारे तैलम्। सर्षपतैलं ४श.गर्द्दभमूत्रं ४श. आरग्वधमूलत्वक् १ प. शङ्खचूर्णं २ प. हरितालं २ प. एकत्र पाच्यम्। च.द.योनिव्या.चि.। कुष्ठरोगे च तैलं। आरग्वधत्वक् वटत्वक् कुष्टं हरितालं मनःशिला हरिद्रा दारुहरिद्रा च, एषां मिलितपादिककल्केन तैलप्रस्थं विपचेत्। च.द.कुष्ठ.चि.।

आरट्टजः । पुं। तद्देशीयाश्वे। আরবী ঘোড়া। जटा.।

आरणालम् (कम्) । क्ली। काञ्जिके। আমানী, কাঁজি। यच्च निस्तुषीकृतैः आमैर्गोधूमैः संहितं तदारणालमुच्यते। प.प्र.३ख.। आरणालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः। पक्वैर्वासन्धितं तत्तु सौवीरसदृशं गुणैः॥ भा.पू.सन्धानव.।

आरणिः । पुं। कुलहण्डके आवर्त्ते। हारा.।

आरण्यगोमयः । पुं। वन्यगोमये। বনঘুঁটে। च.चि.१अ.।

आरण्यपशुः । पुं। वनजपशौ। स सप्तधा,—ऋक्ष-महिष-वानर-सरीसृप-रुरु-पृषत-मृगाः।

आरण्यमक्षिका । स्त्री। दंशके। ডাঁশমাছি। रत्ना.। [रा.नि.व.३।

आरण्यमुद्गा । स्त्री। मुद्गपर्ण्याम्। মুগানী।

आरण्यबिम्बिका । स्त्री। तुण्डिकायाम्। বুনো তেলাকুচা। रा.नि.व.२३।

आरण्योपलभस्म । क्ली। वनकरीषभस्मनि। বিলঘুঁটের ছাই। वै.निघ.१भ.ज्व.भक्षेश्वररसे।

आरतिः । स्त्री। स्वस्थचित्तत्वे।

आरभः । पुं। उद्यमे। वधे। दर्पे। मे.।

आरसम् । क्ली। विस्वादे।

आरक्षः । पुं। गजकुम्भाधोभागे। हला.।है.च.। गजकुम्भसन्धिभागे। त्रिका.।

आरा । स्त्री। चर्म्मभेदकास्त्रे। सा व्यधनप्रयोजना। लक्षणं—"आराऽर्द्धाङ्गुलवृत्ता स्यात्तत्प्रवेशान्तथोर्द्धतः। चतुरस्रा···॥ भचि.सु.चि.३अ.। आरामुखीनाम जलपक्षिणि। अम.।

आराग्रम् । क्ली। अर्द्धचन्द्राद्यस्त्रमुखे। "आराग्रन्तु मुखं तेषाम्। पुष्पपत्रादिभेदतः॥" हला.।

आराधनम् । क्ली। पचने। मे.नचतुष्कं।

आरामः । पुं। उपवने। "नगरान्नातिदूरेण यः सङ्गिरुपरोपितः। तरुषण्डः स आरामस्तथोपवनमुच्यते॥" हला.।

आरामघोलिः(लिका) । स्त्री। पत्रशाकविशेषे, पश्चिमदेशे प्रसिद्धे। गुणाः—"आरामघोलिका चाम्लरुचा रुच्यानिलापहा। पित्तश्लेष्मकरी चान्या सूक्ष्मा जीर्णज्वरापहा॥" रा.नि.व.७।

आरामवल्लिका । स्त्री। मल्लिकाविशेषे। रा.नि.व.२३।

आरामशीतला (ली) । स्त्री। रामशालीति महाराष्ट्रख्याते सुगन्धपत्रशाकविशेषे। आरामशीतलापि पश्चिमदेशे कथ्यते। वर्वर्य्यादिगणे धृता। गुणाः—तिक्ता शीतला पित्तघ्नी दाहशोषहरा व्रणविस्फोटकघ्नी च। रा.नि.व.१०। शीता कटुः पित्तकफास्रघ्नी च। मद.व.१। [सु.८अ.।

आरामुखम् । क्ली। व्यधनार्थशस्त्रविशेषे। सु.

आरालिकः । पुं। पाचके। अम.।

आरिः (री) । पुं। कण्टकवृक्षे। खदिरसारे। খয়ের। गुणाः—कटुः तिक्तोष्णः कफवातघ्नः व्रणकण्डरोगघ्नः रुच्यः दीपनश्च। रा.नि.व.८।

आरुः । पुं। (Lager stroemia rigia.) वृक्षविशेषे। कर्कटे। शूकरे। मे.रद्विकं। कुष्माण्डलतायाम्। अलाब्वाम्।

आरुकम् । क्ली। हिमालयदेशजाते स्वनामकौषधिविशेषे। आड़ इति भाषा। पत्रपुष्पादिभेदेन तस्य चातुर्जात्यं सर्व्वाण्येव गुणैः तुल्यानि। गुणाः—"आरुकं वातमेहार्शःकफघ्नञ्च। मद.व.६।

मधुरं हिमं अर्शःप्रमेहगुल्मरक्तदोषघ्नञ्च। रा.नि.व.११। पुं। काबिलदेशे आलुबुखार इति ख्याते खाद्यद्रव्ये। गुणाः—"आरुकी ग्राहितुवरी हृद्यः शीतो गुरुः स्मृतः। मलावष्टम्भकी ग्राही मेदी चीणः कफापहः। पित्तहृत्पाचकश्चाम्लो मधुरश्च सुखप्रियः। मुखखञ्जकरश्चैव मेहगुल्मार्शनुत्परः। रक्तवातरुजां हन्ता स पक्वो मधुरो गुरुः। कफपित्तकरश्चोष्णो रुच्यो धातुविवर्द्धकः। वै.निघ.।

आरुष्करः । पुं। भल्लातकवृक्षे। वै.निघ.।

आरूटषकः । पुं। वासायां। च.चि.३अ.।

आरेवतः । पुं। स्थूलारग्वधवृक्षे। বড় সোণালু। रा.नि.व.९। भा.म.१भ चित्तभ्रमज्व.चि.। "पथ्यारेवतरामसेनकरजो।" सु.सू.३८अ.लाचादिव.। क्ली। आरेवतवृक्षफले। খেজুরবিশেষ। अम.।

आरोग्यम् । क्ली। रोगनिर्मुक्तौ। आरोग्यं वह्निवर्द्धनं। रा.नि.व.२०। "बलाधिष्ठानमारोग्यं।" चर.।

आरोग्यपञ्चकम् । क्ली। पथ्यारग्वधतिक्ताचिन्नदामलकेषु। एतत्सिद्धं पाचनं सामे जीर्णज्वरे हितम्। भा.म.१भ.ज्व.चि.।

आरोग्यशाला । स्त्री। चिकित्सालये।

आरोग्यशिम्बी । स्त्री। आरग्वधवृक्षे। শোন্দাল। हिं धनवहेड़ा। मं लघुवाहावा। मद.व.१।

आरोग्याम्बु । क्ली। पादशेषोष्णजले। "पादशेषन्तु यत्तोयं आरोग्याम्बु तदुच्यते।" भा.।

आरोहः । पुं। अवरोहे। वरस्त्रियाः श्रोण्यां। रा.नि.व.१८। परिमाणविशेषे। हे.च.। गजाद्यारोहके। मे.हत्रिकं।

आर्ग्वधः । पुं। आरग्वधवृक्षे।

आर्घ्यम् । क्ली। तन्नामप्रसिद्धमधुभेदे। "मधूकवृचनिर्यासं जरत्कार्व्वाश्रमोद्भवाः। श्रवन्त्यार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः। तीक्ष्णतुण्डास्तु या पीता मक्षिकाः षट्पदोपमाः। आर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः।" गुणाः—"चक्षुष्यं कफपित्तघ्नं कटु कषायं पाके तिक्तं बलपुष्टिकरञ्च। अस्रदोषघ्न"मिति। भा.। मक्षिकास्तीक्ष्णतुण्डा यास्तथा षटपदसन्निभाः। तदुद्भूतं यदार्घ्याह्वं तदार्घ्यं मधु वर्ण्यते। एतत्पिङ्गलवर्णम्। रा.नि.व.१४।

आर्घ्यशर्करा । स्त्री। आर्घ्यमधुकृतशर्करायां। इयं गुणैरार्घ्यमधुतुल्या। रा.नि.व.१४।

आर्घ्या । स्त्री। मधुमक्षिकाविशेषे। सा च पीततुण्डा भ्रमरसदृशा। रा.नि.व.१४। See आर्घ्यं।

आर्त्तः । त्रि। पीड़िते।

आर्त्तगलः (ला) । पुं, स्त्री। (Barleria coerulea.) नीलझिण्ट्यां। नीलझाँटी। हिं कटसैरुया। मं कालाकोराण्टा। रा.नि.व.१०। च.द.अम्ल चि.कषायघृते। सु.सू.३८,३९संशोधने। See नीलाम्लानः। गुणाः—"उष्णः तिक्तः कटुः वातकफघ्नः शोथकण्डूशूलकुष्ठव्रणघ्नश्च।" वै.निघ.। भैष.मुखरो.चि.। रक्तझिण्टीवृक्षे। भा.पु.१भ.।

आर्त्तवम् । क्ली। स्त्रीपुष्पे। तस्य प्रवृत्तिनिवृत्तिकालः द्वादशवर्षादिपञ्चाशद्वर्षमितः। तच्च प्रतिमासमुपचितं वायुर्योनिमुखं नयेत् धमनीद्वयेन। सु.शा.३अ.। तत्स्वरूपं—"रसादेव रजः स्त्रीणां मासि मासि त्र्यहं स्रवेत्। तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः चयं॥ मासेनोपचितं काले धमनीभ्यां तदार्त्तवं। ईषद्विवर्णं कृष्णञ्च वायुर्योनिमुखं नयेत्॥ शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमं। तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत्॥" इति गर्भार्त्तवलक्षणम्। भा.। पुष्पे। त्रि। ऋतुजे। मे.रत्रिकं।

आर्त्तवी । स्त्री। घोटक्याम्। रा.नि.व.१९।

आर्त्तिः । स्त्री। पीड़ायां,वेदनायां। रा.नि.व.।

आर्द्रः । त्रि। सजले वस्तुनि। भिजा। हिं गीला। मं ओलें। तच्च सरसनीरसभेदेन द्विधा। तयोर्वालूकाद्यम् आर्द्रम्। नीरसमपि सदुग्धगुप्तरसभेदात् द्विधा। तयोः वटाश्वत्थाद्यं नीरसम्। सदुग्धमपि द्विधा मृदुतीक्ष्णभेदेन। तयोः शातलाद्यास्तीक्ष्णाः दुग्धिकाद्याः मृदव इति। यथा—"आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा। सदुग्धं गुप्तरसकं द्विधा नीरसमुच्यते। वालूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षरम्। धत्तूराद्यमिदं सर्व्वमार्द्रं स्वरसमुच्यते। वटाश्वत्थकरीराद्यं आर्द्रद्रव्यन्तु नीरसम्। सदुग्धन्तु द्विधा प्रोक्तं मृदुतीक्ष्णमिति क्रमात्। शातलावज्रशीहुण्डसीरिण्याद्यास्तु तीक्ष्णकाः। दुग्धिकार्कचीरिकाद्या मृदुदुग्धाः प्रकीर्त्तिताः।" प.प्र.। क्लिन्ने। मे.।

आर्द्रकम् । क्ली। (Zingiber officinale.) Common zinger. स्वनामख्यातकन्दशाकविशेषे । আদা । हिं आदरख । मं आले । कं अल्ल, अद्रका । गुणाः—शुण्ठीसमगुणं कटुकमपि पाके मधुरं प्राग्भोजनं सलवणं सेवितं अग्निदीपनं रुचिकरं जिह्वाकण्ठशोधनञ्च भवति । ग्रीष्मे शरदि च न सेव्यम् । भा.पू.१भ.,वा.। आर्द्रकं नागरगुणं भेदनं दीपनं गुरु । मद.व.२९ ।

आर्द्रकस्वरसः । पुं । आर्द्रकस्य स्वरसे । আদার রস । च.द.ज्व.चि.कवलधारणे ।

आर्द्रचिक्कणम् । क्ली । आमचिक्कणगुवाके । কাঁচা চিকিণসুপারি । रा.नि.व.२३ ।

आर्द्रजम् । क्ली । शुण्ठ्याम् । रा.नि.व.६ ।

आर्द्रदाड़िमनिर्यासः । पुं । आर्द्रदाड़िमफलस्वरसे । सि.यो अरोच.चि.श्रीकण्ठः ।

आर्द्रमरिचम् । क्ली । आममरिचे । কাঁচা মরিচ । गुणाः—"आर्द्रन्तु मरिचं किञ्चिज्जीर्णं पाके रसे मधु । अपित्तलञ्च कटुकं गुरु चाग्निप्रदीपनम् । तिक्तञ्च रुचकं स्वादु कफवातहरं परं । छर्द्दीगञ्च क्रमींश्चैव नाशयेत्··· ।" वै.निघ. ।

आर्द्रमाषा । स्त्री। Leguminus shrub, (Glicine debilis.) वनमुद्गे, माषपर्ण्याम्। रा.नि.व.३ ।

आर्द्रवटकः । पुं । আদাবড়া इति प्रसिद्धे भोज्यद्रव्ये । तत्प्रकरणं यथा—मुद्गपिष्टरचितान् वटकांस्तैलपाचितान् हस्तचूर्णितान् कृत्वा तत्र भ्रष्टहिङ्गुमरिचार्द्रकजीरकचूर्णं निम्बूरसं यवानीञ्च युक्त्या दत्त्वा मिश्रयेत् । अथ तद्द्रव्यसंपूरकं दत्त्वा मुद्गपिष्टानि पचेत् । तानि च पिष्टकानि क्वथितजले निमज्यानि । "मुद्गपिष्ट्या विरचितान् वटांस्तैलेन पाचितान् । हस्तेन चूर्णयेत्सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत् । भ्रष्टं हिङ्ग्वार्द्रकं सूक्ष्मं मरीचं जीरकं तथा । निम्बूरसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत् । मुद्गपिष्टिं पचेत्सम्यक् स्थाल्यामास्तारकोपरि । तस्यास्तु गोलकं कुर्य्यात् तन्मध्ये पूरणं क्षिपेत् । तैले तान् गोलकान् पक्त्वा क्वथितायां निमज्जयेत् । गुणाः—"गोलकाः पाचकाः प्रोक्तास्तेनार्द्रवटका अपि ।" भा.पू.१भ. ।

आर्द्रशाकम् । क्ली । आर्द्रके । रा.नि.व.६ ।

आर्द्रा । स्त्री । कृष्णातिविषायां । षष्ठनक्षत्रे । आर्द्रके । रा.नि.व.६ ।

आर्द्रास्यम् । क्ली । आर्द्रके ।

आर्द्रिका । स्त्री । क्षुद्रार्द्रके । भा.पू.१भ. । आर्द्रधनिकायां । কাঁচা ধনে । गुणाः—"तिक्तमधुरा मूत्रला पित्तञ्च न करोति ।" "आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी च सा । कटुका मधुरा पाके रुच्या वातकफापहा ।" वा.सू.६अ. ।

आर्षभी । स्त्री । कपिकच्छुलतायाम् । আলকুশী । रा.नि.व.३ । See आत्मगुप्ता । [शार्ङ्ग. ।

आलम् (कम्) क्ली । हरिताले । प.मु. ।

आलगर्द्दः । पुं । Species of cobra. अलगर्द्दे । जलसर्पे । [सु.सू.४६अ. ।

आलदूषकः । पुं । तन्नामकप्रतुदपक्षिणि ।

आलविषः । पुं । यस्य आले (হুল) विषमस्ति । ते च वृश्चिकविश्वम्भरराजीवमत्स्योच्चिचिङ्गाः समुद्रवृश्चिकाश्च । सु.कल्प.३अ. । [कल्प.८अ. ।

आलविषा । स्त्री । कृच्छ्रसाध्यलूताभेदे । सु.

आलस्यम् । क्ली । अलसतायां । सामर्थ्येऽपि कर्म्मण्यनुत्साहे । भा.म.१भ.ज्व.चि. । "आलस्यं मधुरास्यता ।"

आलातम् । क्ली । अङ्गारे । रा.नि.व.२० ।

आलानम् । क्ली । गजबन्धनस्तम्भे । हला. । रज्जौ । मे. । [গাছ । श.र. ।

आलाबुः (बूः) । स्त्री । अलाब्वाम् । লাউ

आलावर्त्तम् । क्ली । वस्त्रव्यजने । কাপড়ের পাখা । हे.च. ।

आलास्यः । पुं । कुम्भीरे । हे.च. ।

आलिः । पुं । वृश्चिके । भ्रमरे । मे.लविकं ।

आलिङ्गनम् । क्ली । आश्लेषे । रवा. ।

आलिञ्जरः । पुं । अलिञ्जरे । জালা । चिका. ।

आलिम्पना । स्त्री । दन्तौ । चिका. ।

आलिवङ्गा । स्त्री । हालिम् इति लोके । आम्रालवीज इति गुर्जरे । वै.निघ.२भ,वा.व्या. कटिवा.चि. ।

आली । स्त्री । कफोणौ । मे.लद्विकं ।

आलीढम् । क्ली । लेहने । अशिते ।

आलीनकम् । क्ली । रङ्गे । রাঙ্ । हे.च. ।

आलु: । पुं । कौङ्कणदेशप्रसिद्धकन्दविशेषे । কাসালু । मं कांसालु । शूरणे । आलुके । पेचके । रा.नि.व.७। स्त्री । क्षुद्रजलाधारे । गलन्तिकायां । त्रिका. । क्ली । भेलके । मूले । त्रिका. । গোল আলু इति ख्याते कन्दविशेषे । मे. । गुणाः— रक्तपित्तघ्नं गुरु स्वादु शीतलं स्तन्यं शुक्रकरञ्च । द्रव्याभि. ।

आलु(लू:)क: । पुं, क्ली । An esculent root, (Arum campanulatum.) कन्दशाकविशेषे । আলু গাছ । स बहुधा—काष्ठालुक-शङ्खालु-हस्त्यालु-रक्तालु-पिण्डालु-मध्वालुभेदात् । तत्र काष्ठालुकं काठिन्ययुक्तं (हिं कठारु), शङ्खालुकं श्वेततायुक्तं (शङ्खारु इति लोके), हस्त्यालुकं दीर्घतायुक्तं महाशरीरम्, रक्तालुकञ्च (रक्तारु-तण्डा), पिण्डालुकं (हिं वर्त्तुलसुथनी), मध्वालुकं मिष्टं रोमयुक्तं (हिं दीर्घसुथनी) इति च । गुणाः —मलमूत्रनि:सारकं रुचं दुर्जरं रक्तपित्तघ्नं वातकफघ्नं बल्यं वृष्यं स्तन्यवर्द्धनञ्च । भा.पू.१भ. । आलूकं शीतलं सर्व्वं विष्टम्भि मधुरं गुरु । राज. ।

आलुकी । स्त्री । रक्तालुभेदे । রাঙা আলু । हिं अरुइ । या दीर्घा कठिना तन्वी च । गुणाः— बलकृत् स्निग्धा गुर्व्वी हृदयकफघ्नी विष्टम्भिनी तैलभर्जितात्यन्तरुचिकरी च । भा.पू.१भ.,शा.व. ।

आलूकम् । क्ली । एलवालुके । आलुके । रा. नि.व.४ । [णादौ यथोक्तौषधलेपे । सु.चि.१अ.।

आलेप: (नम्) । पुं. क्ली । जातमात्रशोथव्र-

आलेयम् । क्ली । पद्मकाष्ठे । वै.निघ. ।

आलेश: । पुं । अश्वमुखरोगे । तत्र हनुदन्तौ न सम्यगुद्गच्छन् यन्त्रणामुत्पादयति, तेनाश्वोऽस्वस्थः अनिच्छया स्तोकं खादति भग्नकासी चीणबलश्च भवति । "हनुदेशे यदा दन्तौ भवत्यभ्यन्तराश्रयः । आलेश इति तं विद्यात् श्लेष्मरक्तसमुद्भवम् ॥ तेनाश्वो दुर्मनात्यर्थं मन्दं पिबति खादति । जर्जरं कासते चैव बलाच्च परिहीयते ॥" ज.द.२८अ. ।

आलोक: (नम्) । पुं, क्ली । दर्शने । দেখা । दीपे । मे. ।

आलोचक: । पुं । तन्नामकाग्नौ । तस्य स्थानं नेत्रं । स च रूपादि दर्शयति । सु.सू.२१अ.। क्ली । तन्नामकपित्ते । भा. ।

आलोचनम् । क्ली । दर्शने ।

आलोड़नम् । क्ली । मिश्रणे। उत्तेजने । [माने।

आलोल: । पुं । कम्पे । त्रि । कम्पिते । लम्ब-

आल्लूकम् । क्ली । आलुके । আলু । हिं अलु, आलुबोखार । गुणाः—रसतः शीतं स्वादिष्ठं वातपित्तकरञ्च । मद.व.६ । [तस्य ঘোড়া । त्रिका.।

आवट्टज: । पुं। उत्तमाश्वे । पारसीकाश्वे । पा-

आवपनम् । क्ली । भाण्डे । वीजवपने । अम.।

आवरक: । त्रि । आच्छादके ।

आवर्त्त: । पुं। भ्रमे । भा.म.३भ.उदा.चि.। राजावर्त्तमणौ । रा.नि.व.१३ । तन्नामकमर्म्मस्थाने । स्थानं च तस्य भ्रूद्वयोपरि निम्नदेशः । तत्रस्थे वैकल्यकारमर्म्मद्वये । सु.शा.६अ.। शुभाशुभसूचकेऽश्वस्य रोमावर्त्ते । ते च षट्त्रिंशतिप्रकाराः । तद्यथा— "विंशतिस्तु शुभाः प्रोक्ताः षट्सप्तत्यधिकाः स्मृताः । उत्तरोष्ठं प्रपाणं स्यात् तत्रावर्त्ताः शुभावहाः ॥ स्कन्धेश्च तथा प्रोक्ताः सर्व्वकामफलप्रदाः । त्रयश्चैवाथ चत्वारो वाजिनो यस्य रोमजाः । द्वौ वा ललाटजौ यस्य स तु धन्यतमः स्मृतः ॥ आनुपूर्व्व्या स्थिताश्चोर्द्धं ललाटे रोमजास्त्रयः । निःश्रेणी नाम सा ख्याता भर्त्तुः सर्व्वार्थसाधिनी ॥ शिरःकेशान्तयोर्मध्ये शवी नामाभिधीयते । तत्रावर्त्तः स्मृतोऽश्वस्य भर्त्तुर्जयविवर्द्धनः ॥ घण्टाबन्धसमीपस्थो निगालः कीर्त्तितो बुधैः । तस्मिन्देवमणिर्नाम रोमजः शुभकृत्स्मृतः ॥ कर्णमूले तथा बाह्वोः केशान्ते मस्तके तथा । आवर्त्ताः पूजिता नित्यं विशेषेण तु मस्तके ॥ आवर्त्ता यस्य चत्वारो वाजिनो वक्षसि स्थिताः । एकः कण्ठे भवेत्स्पष्टः स धन्यः सर्व्वकामदः ॥ रन्ध्रे चैव यदा भर्त्तुरीप्सितार्थप्रदो भवेत् । उपरन्ध्रे भवेच्चैव रोमजाश्चातिपूजितः ॥ शङ्खचक्रगदाबज्रशुक्तिपद्मोपमाश्च ये । विशेषेण शुभाः प्रोक्ता रोमजाः शुभदेशजाः ॥ अत ऊर्द्धं प्रवक्ष्यामि रोमजानतिनिन्दितान् ।

भर्त्तुः क्लेशावहान् सर्व्वान् धनप्राणापहारकान् ॥ नासिकापुटयोर्मध्ये प्रदेशः प्रोथ उच्यते । तत्र भर्त्तुर्विनाशाय रोमजश्च प्रकीर्त्तितः ॥ ऊर्द्धञ्च नासिकाच्छिद्रात् स्वामिनः क्लेशकारकः । गण्डयोश्चैव भर्त्तारं हन्त्यावर्त्तो दुरासदः ॥ अश्रुपातः समुद्दिष्टः प्रदेशश्चक्षुषोरधः । तत्रावर्त्तो भवेद्भीमः स्वामिनः कुलनाशनः ॥ अपाङ्गाद्द्व्यङ्गुले चैव प्रदेशः शङ्ख उच्यते । तस्मिन् भर्त्तुर्विनाशाय भवेद्वाहस्य रोमजः ॥ भ्रूप्रदेशसमुद्भूत आवर्त्तो नैव पूजितः । सुहृद्वियोगकृत् सः स्याद्भर्त्तुरर्थावसादकः ॥ मन्यां ग्रीवां शिरो विन्द्यात्तत्रावर्त्तस्तु कुत्सितः । कक्षयोश्चापि संग्रामे स्वामिनस्त्वाशु घातयेत् ॥ चिबुकस्य समीपस्थो वामदक्षिणभागतः । प्रदेशस्तु हनुर्नाम तत्रावर्त्तो हि दारुणः ॥ अधरौष्ठस्य वाधस्ताच्चिबुकं हि प्रसिद्धकम् । तस्मिन् पापो भवेद्भर्त्तुः कर्णयोश्चापि रोमजः ॥ कण्ठस्याथ निगालस्य मध्ये गलक उच्यते । तत्रावर्त्तः स्मृतः पापः स्कन्धसन्धिगतश्च यः ॥ अधस्ताज्जङ्घयोश्चैव ग्रन्थिः कूर्च इति स्मृतः । तत्रावर्त्तः स्मृतो भर्त्तुः संग्रामे जीवितान्तकृत् ॥ कूर्चादष्टाङ्गुलं चोर्द्ध्वं पार्श्वयोस्तु कला स्मृता । तत्र भर्त्तुः शराघातैर्जीवितान्तश्च रोमजः ॥ ककुदं वृषभस्येव सुव्यक्तमुपलक्षयेत् । वाजिनो यस्य तत्र स्यादावर्त्तः स्वामिनाशनः ॥ ककुदस्य पुरोभागे समीपे वह उच्यते । भर्त्तुः सुतसमेतस्य तस्मिन्नाशाय रोमजः ॥ कीकसे तु च यस्य स्यादावर्त्तस्तस्य दारुणः । रणे हतः समं भर्त्रा क्रव्याद्भिः स विलुप्यते ॥ क्रोड़े चैवासने चापि हृदये चैव जानुनि । आवर्त्ताः स्वामिघाताय भवन्त्येव न संशयः ॥ पार्श्वयो रोमजो यस्य स चाश्वो नयति क्षयम् । सपक्षञ्चाशु भर्त्तारं नीहाराम्बु यथा रविः ॥ कूर्चस्याधःप्रदेशस्तु कुष्ठिकः परिकीर्त्तितः । अधन्यस्तत्र वाहस्य जङ्घयोर्जानुनोश्च यः ॥ नाभिजो मुष्कजश्चैव त्रिकजश्च विशेषतः । पुच्छमूलस्थितश्चापि नैव धन्यः प्रकीर्त्तितः ॥ कुक्षौ व्याधिं नियच्छन्ति रोमजाः कुक्षिसम्भवाः । पायुसीवनिमध्यस्था नैव धन्यास्तु कीर्त्तिताः ॥ स्फिक्पिण्डे स्थूरके चैव यस्यावर्त्तो हि वाजिनः । लिङ्गावर्त्तः स विख्यातो भर्त्तुः सर्व्वार्थनाशकः ॥ शतपादीति विख्यातस्तथा वै मुकुलोऽपरः । आवर्त्तश्चैव सङ्घातः पादुकश्चार्द्धपादुकः ॥ शुक्तिश्चैवावलीढ़श्च आवर्त्तः कीर्त्तितोऽष्टधा । वाजिदेहगतः सम्यक् शुभाशुभनिवेदकः ॥ शतपादीसमाकारः शतपादीति कीर्त्तितः । जातीमुकुलसङ्काशो मुकुलः समुदाहृतः ॥ आवर्त्तो भ्रमितैर्वालैः सङ्घातो रोमपुञ्जकैः । शुक्तिश्च शुक्तिसंस्थानैः रोमभिर्व्यक्तलक्षणैः ॥ वत्सावलीढ़काकारोऽवलीढ़ः परिकीर्त्तितः । पादुकः पादुकाकारस्तथा चैवार्द्धपादुकः ॥ वाले विशेषसंस्थाने निर्द्दिशेन्मतिमान् भिषक् । शास्त्रमार्गानुसारेण यथा प्रोक्तं विचक्षणैः ॥ एतेषामेव सर्व्वेषामावर्त्तानां तपोधनैः । रोमजेति कृता संज्ञा वाजिलक्षणवेदिभिः ॥ शुभाशुभौ तु यत्र द्वौ तत्रैको न फलप्रदः । एको हेम्ना दहेत्पापं तेन दोषो न दुष्यति ॥ अथवा द्विजमुख्याय वेगादिगुणवान्हयः । दत्त्वा ग्राह्यः क्रयेणैव दुरावर्त्तस्तु काकुदी ॥ श्रीवृक्षो रोमजश्चैव रोचमानस्तथैव च । अङ्गदी मुषली चैव राज्यरत्नप्रदः सदा ॥ प्रपाणे मारुतं विन्द्याल्ललाटे च हुताशनम् । उरसि चाश्विनौ देवौ चन्द्रसूर्य्यौ च मूर्द्धनि ॥ रन्ध्रे स्कन्दविशाखौ च उपरन्ध्रे हरौ हरिः । इत्येवं पूजिता ह्येते दशावर्त्तास्तु वाजिनः ॥ अप्येकेन विहीनाश्चेद्भवेयुरशुभास्तदा ॥ क्ली । स्वर्णमाक्षिके । रा.नि.व.१३ ।

आवर्त्तकः । पुं । कीटविशेषे । तद्दृष्टे वायुजन्यरोगा जायन्ते । सु.कल्प.८अ. । राजावर्त्तमणौ । रा.नि.व.१३ । क्ली । स्थलपद्मे । रौप्यमाक्षिके । रा.नि.व.१३ ।

आवर्त्तकी । स्त्री । स्वनामख्यातलतायां कोकणादिदेशे आहुली तलाड़वल्ली भगतवल्ली इति च प्रसिद्धायां । সোণামুখী । गुणाः—कषायोष्णा सरा तिक्ता रसायनी वृष्या वातामवातरक्तशोथमेहघ्नी । मद.व.१ । कषायाम्ला शीतला पित्तहा । रा.नि.व.३ । वृहद्दन्त्याम्, भद्रदन्त्याम् । रा.नि.व.६ ।

आवर्त्तनम् । क्ली । आलोड़ने दुग्धादीनाम् । আওটান । धातुगालने । अ.टी. ।

आवर्त्तनी । स्त्री । (Helicteres Isora.) आँत्मोड़ा इति ख्याते द्रव्ये । আঁৎমোড়া । हिं मरफली । धातुगालनपात्रे । श.र. ।

आवर्त्तपूलिका । स्त्री । पूलिकाभेदे ।

आवर्त्तमणिः । पुं । राजावर्त्तनामकोपरत्ने । रा.नि.व.१३ ।

आवर्त्तिनी । स्त्री । अजशृङ्गीवृक्षे । र.मा. ।

आवलीकन्दः (कः) । पुं । मालाकन्दे । रा.नि.व.७ ।

आव(ब)ल्यम् । क्ली । दौर्ब्बल्ये ।

आवसथः । पुं, क्ली । गृहे । हे.च. ।

आवसितम् क्ली । निर्बुषीकृतधान्ये । बओलान धान । हे.च. । परिपक्कमर्द्दितधान्ये । भरत. । [अ. ।

आवस्थिकः । त्रि । अवस्थोचिते । सु.चि.३८

आवा(बा)धा । स्त्री । पीड़ायाम् । श.र. ।

आवापः पुं । आलवाले । कल्के । प.प्र.१अ. । निःक्षेपे । सु.चि.१अ. ।

आवारि । क्ली । हट्टगृहे । हाटचालि । उणा. ।

आवासः । पुं । गृहे । हे.च. ।

आविः । पुं । पक्षिणि । वै.निघ. ।

आविकः । पुं । कम्बले । हे.च. । हला. । त्रि । मेषसम्बन्धिनि । क्ली । मेषमांसादौ । मेषीदुग्धे ।

आविकघृतम् । क्ली । मेषीनवनीतजातघृते । ভেড়ার দুধের ঘি । गुणाः—लघुपाकं पित्तकोपनं योनिदोषे कफे वाते शोफे कम्पे च हितम् । रा.नि.व.१५ । पाके लघ्वाविकं सर्पिः सर्व्वरोगविषापहं । दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥ अत्रि.८अ. ।

आविकदधि । क्ली । मेषीदुग्धकृतदधनि । ভেড়ীর দই । हिं मेढ़ीकेदहि । गुणाः—गुरु सुस्निग्धं कफपित्तकरं वाते रक्तवाते च पथ्यं शोफव्रणघ्नञ्च । रा.नि.व.१५। मुखरोगे परं हितं, दुष्टफलं । आविकं पित्तकृद्वातशमनं कफकोपनं । गुल्मार्शःकुष्ठरोगे च रक्तपित्ते न शस्यते । अत्रि.८अ. ।

आविकनवनीतम् । क्ली । मेषीदुग्धजातनवनीते । ভেড়ীর দুধের ননি । गुणाः—पाके हिमं लघु सारकं योनिशूले कफे वाते अर्शसि च सदा हितम् । ऐडकं नवनीतं क्लिष्टगन्धं शीतलं मेधाहृत् गुरु पुष्टिस्थौल्यमन्दाग्निदीपनञ्च । रा.नि.व.१५ ।

आविकमांसम् । क्ली । मेषमांसे । ভেড়ার মাস । गुणाः—मधुरं ईषद्गुरु बलकरञ्च । आजमांसाद्विपरीतगुणं तेन अत्युष्णं स्निग्धं गुरु सदोषं अभिष्यन्दि च । वा.सू.६अ. ।

आविकमूत्रम् । क्ली । मेषीमूत्रे । ভেড়ীর মূৎ । गुणाः—तिक्तं कटुकम् उष्णं कुष्ठघ्नम् अर्शःशूलोदररक्तशोफमेहविषघ्नञ्च । रा.नि.व.१५ । शोफकुष्ठार्शोमेहवर्चोग्रहघ्नञ्च । मद.व.८ ।

आविकक्षीरम् । क्ली । मेषीदुग्धे । ভেড়ীর দুধ । मं मेंढ़िचेदुध् । गुणाः—स्वादु अम्लपाकं स्निग्धोष्णं गुरु पित्तकफोल्वणं बृंहणं हिक्काश्वासानिलघ्नञ्च । वा.टी.चारपाणिः । लोमशं गुरु कफपित्तहरं स्थौल्यघ्नं मेहघ्नं वातप्रकोपे पथ्यं अनिलजे कासे हितञ्च । रा.नि.व.१५ । वातव्याधिहरं हिध्मश्वासपित्तकफप्रदञ्च । वा.सू.५अ. । औरभ्रं मधुरं रुच्युष्णं वातकफापहं । न शस्तं रक्तपित्तानां वातिकानां हितं भवेत् । अत्रि.८अ. । [वै.निघ. ।

आविकी । स्त्री । कम्बले । শাল । शल्लकी ।

आविग्नः । पुं । करमर्द्दवृक्षे । পাণি আম্‌লা । श.र. । अ.टी.सा. । [टा ।

आविटः । वृक्षविशेषे । हिं आवुटा । मं आप-

आविधः । पुं । वेधनास्त्रे । ভোমর, তুরপুন । अम. । [गर्भ. ।

आविरः । पुं । प्रसववेदनायाम् । मा.नि.मूढ़-

आविलम् । क्ली । काबेलदेशीयफलविशेषे । सेओ इति लोके । मं थोरसेवफल । त्रि । कलुषे ।

आविलकन्दः । पुं । मालाकन्दे । रा.नि.व.१।

आविलमत्स्यः । पुं । मत्स्यविशेषे । तल्लक्षणं यथा—शुभाङ्गः ताम्रपक्षः स्थूलाङ्गश्च । गुणाः—अतिरुच्यः मधुरः बल्यः वीर्य्यपुष्टिवर्द्धनः गुणाढ्यश्च । रा.नि.व.१७ ।

आविला । स्त्री । मत्स्ये । चाङ्गेर्य्यां । আমরুল । मं आंबोली । अम. । [वै.निघ. ।

आविहृत्तः । पुं । मेषश्रृङ्ग्याम् । মেড়াশিঙে ।

आविष्टः । त्रि । प्रेतादिभिर्गृहीते । ভূতে পাওয়া । हारा. ।

आवी । स्त्री । प्रसववेदनायाम् । सु.नि.८अ. । प्रसवलिङ्गे मूत्रकफप्रसेकादौ । विज.र. ।

आवेगी । स्त्री । वृद्धदारुकलतायां । বীজতারক । रा.नि.व.३ । र.मा. । मद.व.१ ।

आवेशः । पुं । अपस्माररोगे । हे.च.। भूतसञ्चारे । रा.नि.व.२०।

आवेशनम् । क्ली । शिल्पशालायाम् । हला. । भूतावेशे । मे.नचतुष्कं । मन्त्रेण भूतमाकृष्य शिरसि सन्निवेशने । "वक्त्रावेशनताड़नैः ।" च.द.ज्व. चि. । क्रोधे । धरणिः ।

आवेशनमन्त्रः । पुं । येन मन्त्रेण भूतादयः शरीरे विशन्ति । अत्रि.३स्था.५अ. ।

आवेशिकः । त्रि । आगन्तुके । अम.।

आशनः । पुं । असनवृक्षे । द्विरूप-कोषः ।

आशयः । पुं । आधारे । अभिप्राये । पनसवृक्षे । मे. । अजीर्णे । Organs or receptacles. कोष्ठागारे । अजयपालः । आशयाः सप्त — वात-पित्त-कफ रक्त-पक्व-मूत्रामाशयाः, स्त्रीणामतिरिक्तो गर्भाशय इत्यष्टौ । सु.शा.५अ. । वायुः स्वस्थितिहेतोराशयं करोति । आशय्याभ्यासयोगेन करोत्याशयसम्भवम् । सु.शा.४अ. । तत्र उरो रक्ताशयः, तदधः श्लेष्माशयः,तदधः आमाशयः, तदधः पक्वाशयादूर्द्धं यद्रुणी नाम या कला सैव पाचकाशयः । नाभिरूर्द्धमग्न्याशयः मध्यभागे स्थितः । तस्योपरि तिलं, तदधो वाताशयः। तदधः पक्वाशयः स एव मलाशयः। तदधो वस्तिः स एव मूत्राशयः। भा.पू.। वाभटेस्तु नार्य्यास्त्रय आशया अधिका उक्ताः, ते च गर्भाशयः स्तनौ च । तत्र गर्भाशयः पित्तपक्वाशयान्तरे, प्रवृद्धौ स्तनौ स्तन्याशयौ च ।

आशयफलम् । क्ली । पनसे । विश्वः ।

आशयाशः । पुं । वायौ । अग्नौ । अ.टी.।

आशा । स्त्री । तृष्णायाम् । अम. ।

आशाढ़ः । पुं । तृतीयमासे । द्विरूप.अ.टी. ।

आशापुरसम्भवः । पुं । भूमिजगुग्गुलौ । আসাপুরী ধূপ इति लोके । रा.नि.व.१२ ।

आशाबन्धः । पुं । मर्कटजालके । মাকড়শার জাল । मे.धचतुष्कं । [भोजने ।

आशितः । त्रि । भुक्ते । अशिते । जटा.। क्ली ।

आशितम्भवम् । क्ली। अन्नादौ। पुं। तृप्तौ मे.

आशिता । त्रि। अतिशयभोक्तरि । हे.च. ।

आशी (शीः) । स्त्री । सर्पदन्ते । मे. । सर्पविषे । श.र. । आशी तालुगता दंष्ट्रा तया दष्टो न जीवति । विषविद्या । वृद्धिनामकौषधे । रा.नि. व.५ । [पुष्पवृक्षविशेषे । रत्ना. ।

आशीतः (कः) । पुं । अङ्कोलक इति ख्याते

आशीविषः । पुं । सर्पे । मद.व.१२ । अम.। दर्वीकरसर्पे । सु.कल्प.४अ. ।

आशुः । पुं, क्ली । धान्यसामान्ये । र.मा. । वर्षाभवषष्टिकादिव्रीहिविशेषे । আউশ ধান । मे, शद्विकं । "आशुभक्तोदकैः पिष्टम् ।" च.द.अ.पि. चि.अभयवृद्धौ । गुणाः—मधुरः पाकेऽम्लः पित्तकरः गुरुश्च । राज. ।

आशुकारी । पुं । पित्तोल्वणसन्निपातज्वरे । लक्षणं—"अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च । गात्रे च विन्दवो रक्ता दाहोऽतीव प्रजायते । पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत् ॥" भा.म.१भ. ।

आशुकोपितः । पुं। मध्यदेशजातवक्रकशार्ङ्गौ। धकोड़ धान इति प्रसिद्धः । रा.नि.व.१६ ।

आशुगः । पुं । वायौ । अम. ।

आशुतीक्ष्णकम् । क्ली । ताम्रे । [च. ।

आशुपः । पुं । वंशविशेषे । বেউড় বাঁশ । श.

आशुपत्री । स्त्री । शल्लकीलतायां । कुन्दुरुकीलता । रत्ना. ।

आशुमण्डः । पुं । आशुभक्तमण्डे । আউশ চালের মণ্ড । गुणाः—ग्राही मधुरः कफकरः तर्पणः त्रयदोषघ्नः शुक्रवर्द्धनश्च । अत्रि.१स्थान.२२ अ. । [धान्ये । अ.टी.भ. ।

आशुव्रीहिः । पुं । व्रीहिधान्ये । रत्ना. । आशु-

आशुशुक्षणिः । पुं । अग्नौ । रत्ना. ।

आशिकुटी । पुं । पर्व्वते । श.मा. ।

आश्चोतनम् । क्ली । नेत्रसेचने । वा.टी.हेमा. चक्षुःपूरणे । प्रयोगा. । तस्य लक्षणं—"अथ आश्चोतनं कार्य्यं निशायां न कथञ्चन । उन्मीलितेऽक्षिण्यक्षि विन्दुभिर्द्व्यङ्गुलाङ्कितम् । क्वाथक्षौद्रासवस्नेहविन्दूनां यत्तु पातनं । यद्द्व्यङ्गुलोन्मिते नेत्रे प्रोक्तमाश्चोतनं हि तत् ।" इति । मात्रा च लेखने ८ विन्दवः, स्नेहने १० विन्दवः, रोपणे १२ वि-

न्दव:, शीते चोष्णा ग्रीष्मे च शीता विन्दवो भवेयु: । तत्र वाते तिक्तं, पित्ते स्निग्धं, कफे च तीक्ष्णरुचं हितम् । वै.निघ. ।

आस्रय: । पुं । आधारे । जटा । गृहे । हे.च.।

आस्रयाश: । पुं । चित्रकवृक्षे । अग्नौ । अम.।

आस्रव: । पुं । क्लेशे । मे. ।

आस्लिष: । पुं । आलिङ्गने । रत्ना. ।

आश्वत्थम् । क्ली । अश्वत्थफले । अम. ।

आश्वयुज: } पुं । षष्ठमासे, आश्विने मासि । अत्र रवे: कन्याराशिस्थिति: । आश्विन मास । अम. ।
आश्विन: }

आश्विनेयौ । पुं । अश्विनीकुमारौ । अम. ।

आश्वीनम् । क्ली । एकेनाश्वेन एकदिनगम्ये पथि । अम. ।

आषाढ: । पुं । स्वनामख्याततृतीयमासे । यत्र रवेर्मिथुनराशिस्थिति: । अम. । पलाशदण्डे । मे.।

आषाढकम् । क्ली । पलाशबीजे । [व.१२ ।

आसङ्गा । स्त्री । सौराष्ट्रमृत्तिकायां । रा.नि.

आसङ्गिनी । स्त्री । चक्रवायौ । घूरुलि वातास । त्रिका. ।

आसङ्गिम: । पुं । कर्णबन्धनाकृतिविशेषे । स चाभ्यन्तरदीर्घैकपालि: । सु.सू.१६अ. ।

आसक्ति: । स्त्री । सङ्गमे । मे. ।

आसन: । पुं । जीवकद्रुमे । मे.नत्रिकं । क्ली । गजस्कन्धे । हला. । पीठिकायां । पिंड़ि ।

आसनपर्णी । स्त्री । अपराजितायां । मं गो कर्णीवल्ली । वै.निघ. ।

आसन्द: । पुं । खट्टाभेदे । मे.दत्रिकं ।

आसन्दी । स्त्री । लघुखट्टिकायाम् । हारा. ।

आसन्नकाल: । पुं । मृत्युकाले ।

आसव: । पुं । मद्यमात्रवचने । वा.टी.हेमा. । मद्यविशेषे । अपक्वौषधसिद्धमद्यम् आसव उच्यते । "यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसव: ।" शीधुरिक्षुरसै: पक्वैरपक्वैरासवो भवेत् । प.प्र.१ख.। गुणा:—"आसवस्य गुणा: ज्ञेया बीजद्रव्यगुणै: समा: । भा.पू.मद्यव.। द्रवेषु चिरकालस्थं यद्द्रव्यं सन्धितं भवेत् । आसवारिष्टभेदैस्तत्प्रोच्यते भेषजोचितम् ॥ वै.निघ.स्नेहविधि: । धान्याम्ले । वै.निघ.। See अरिष्ट: । [रा.नि.व.६ ।

आसवद्रु: (म:) । पुं । अश्मन्तवृक्षे । तालवृक्षे ।

आसारण: । पुं । वृक्षभेदे । भैष. ।

आसीनप्रचलायितम् । क्ली । निद्रावेशेनोपविश्य दोलने । ढुलुनि । राज. ।

आसुतम् । क्ली । चिरकालस्थिताम्लं कन्दादियुक्तमासुतमुच्यते । तदुक्तं कन्दमूलफलाद्यञ्च लवणोदकसंयुतं । सन्धानाच्चिरकालाम्लमासुतं परिकीर्त्तितम् ॥ वा.टी.हे. । [हे.च. ।

आसुति: । पुं । मद्यसन्धाने । मद चोयान ।

आसुतीबल: । पुं । शौण्डिके । हे.च. ।

आसुरम् । क्ली । विड़लवणे । रा.नि.व.६ । विट् लवण । भा.पू.१भ. सामुद्रलवणे । मद.व.२।

आसुरी । स्त्री । श्वेतसर्षपे । श्वेतसरिषा, कृष्ण राई । प.मु.। र.सा.सं. । च.द.ग्रह.चि.आयामकाञ्जिके । रक्तसर्षपे । राईसरिषा । रा.नि.व. १६ । छेदभेदात्मके चिकित्साविशेषे । आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता । श.च. ।

आसेक्य: । पुं । नपुंसकविशेषे । तल्लक्षणं— "पित्रोस्तु स्वल्पवीर्य्यत्वादासेक्य: पुरुषो भवेत् । स शुक्रं प्राश्य लभते ध्वजोत्थितिमसंशयम्"।सु.शा.२अ.।

आस्कन्दनम् । क्ली । संशोषणे । मे.नत्रिकं ।

आस्कन्दितम् (कम्) । क्ली। अश्वस्य पञ्चमगतिभेदे । हे.च.। सा च गति: सम्यग्गतिरित्यमर:।

आस्तर: । पुं । करिकम्बले । हे.च. ।

आस्तरणम् । क्ली । कुथे । हस्तिपृष्ठस्थविचित्रकम्बले । झूल् । हला. ।

आस्तिकमति: । पुं । उत्तमवैद्ये ।

आस्था । स्त्री । यत्ने । अपेक्षायाम् । आलम्बने । मे.थद्विकं । जले । हे.च. ।

आस्थागम: । पुं । जले । हे.च.। [निरूह: ।

आस्थापनम् । क्ली । निरूहवस्तौ । भा.। See

आस्थापनोपगवर्ग: । पुं । आस्थापनयोग्य-

पञ्चविंशमहाकषायवर्गे । यथा —“त्रिवृद्बिल्वपिप्पलीकुष्ठसर्षपवचावत्सकफलशतपुष्पामधुकमदनफलानी”ति दशेमानि आस्थापनोपगानि भवन्ति। তেউড়ী, বিল্ব,পিপুল,কুড়, সরিষা, বচ, ইন্দ্রযব শুলফা, যষ্টিমধু, ময়না ফল। च.सू.४अ.।

आस्पदम् । क्ली । स्थाने । हे.च. । प्रतिष्ठायां । अम. ।

आस्पन्दनम् । क्ली । अतिकम्पे । स्पन्दने ।

आस्फालः । पुं । करिकर्णास्फालने । हारा. ।

आस्फालनम् । क्ली । ताड़ने । आटोपे ।

आस्फोटः (कः) । पुं । अर्कवृक्षे । আকন্দ গাছ । गिरिजपीलुनि । আক্রোটবিশেষ । रा.नि.व.१० । श.र. । [अम. ।

आस्फोटनी । स्त्री । वेधनिकायां । ভোমর

आस्फोटा । स्त्री । नवमल्लिकायाम् । रा.नि.व.१० । নেয়ালি ফুল । भा. ।

आस्फोतः (कः) । पुं । स्वनामख्यातलतागुल्मे । হাপরমালী । र.मा. । रक्तार्कवृक्षे । भा.पू.१भ. । भैष.नेत्ररो.चि. । कोविदारवृक्षे । রক্তকাঞ্চন । हि कचनार । मद.व.१ । भूपलाशवृक्षे । प.मु. ।

आस्फोतका (ता) । स्त्री। (Clitoria ternatea.) अपराजितासामान्ये । प.मु.। भा.पू.१भ. विषतैले । भा.म.४भ.पूतनाग्रह.चि. । “आस्फोता चैव योज्याः स्युः” । लताविशेषे । হাপরমালী इति ख्याते । तैं षड़विमल्लेतीगे । गुणाः—कुष्ठविषरोगघ्नी । राज. । कन्दर्पसार-तैले । शारिवायाम् । सु.चि.६,१८अ. । वै.निघ.जीर्णज्व.चीरवृक्षादितैले । काष्ठमल्लिकायाम् । प.मु. । रा.नि.व.१२ । श्वेतसारिवायाम् । भा.पू.२भ. । नवमल्लिकायाम् । मे.तत्रिकं । [१८ ।

आस्यम् । क्ली । मुखे । मुखाभ्यन्तरे । रा.नि.व.

आस्यदेशः । पुं । मुखमध्ये ।

आस्यपत्रम् । क्ली । पद्मे । श.च. ।

आस्यपुष्पः । पुं । श्वेतकिनिहीवृक्षे । वै.निघ.।

आस्यफलः । पुं । श्वेतधुस्तूरवृक्षे । শ্বেত ধুতুরা । मं श्वेतधोत्रा । वै.निघ. । [हे.च. ।

आस्यलाङ्गलः । पुं । शूकरे । वन्यशूकरे ।

आस्यलोम । क्ली। श्मश्रुणि। দাড়ি,গোঁপ ।मे.।

आस्यवैरस्यम् । क्ली । मुखविस्वादे ।

आस्यशाखोटः । पुं । गुल्मविशेषे । আস্শ্যাওড়া । गुणाः—“वदद्गुश्चास्यशाखोटः स पित्तकफनाशनः । वातलश्च क्रमिं हन्ति पाण्डुताज्वरकामलाः ।” अत्रि. । [अम. ।

आस्या । स्त्री । उपवेशने । निरुद्योगोपवेशने ।

आस्यासवः । पुं । लालायां লাল,থূতু हे.च.।

आस्रवः । पुं । प्रस्रावे ।

आस्रावी । पुं । अश्वस्य पादरोगभेदे । लक्षणं —“आस्राविणं विजानीयात् क्लेदस्रवतलं हयम् ।” ज.द.३९अ. ।

आस्वादः (नम्) । पुं, क्ली । स्वादग्रहणे ।

आहकः (ज्वरः) । पुं । नासाज्वरे । নাসাজ্বর । तल्लक्षणं —“तनुना रक्तशोथेन युक्तो नासापुटान्तरे। गात्रशूलज्वरकरः श्लेष्मणा ह्याहकज्वरः।” वै.निघ. । [तत्रिकं ।

आहतम् । क्ली । पुरातनवस्त्रे । नववस्त्रे । मे.

आहरः । पुं। उच्छ्वासे। अन्तर्मुखनिश्वासे।हे.च.।

आहरणम् । क्ली । सञ्चयकरणे । मे. ।

आहलीवम् । क्ली । आसालवीज इति गुजराटे प्रसिद्धे । गुणाः—आहलीवं मतं चोष्णं तिक्तं त्वग्दोषनाशनं । वातं गुल्मं नाशयतीत्येवं प्रोक्तं चिकित्सकैः ॥ वै.निघ. ।

आहा । स्त्री । वणिकद्रव्यभेदे । च.द. ।

आहारः । पुं । द्रव्यगलाधःकरणे । গেলা, খাওয়া । भोजनद्रव्ये । द्रवाद्रवत्वात्स द्विधा, पुनश्च त्रिविधः—स्वभावगुरुर्मात्रागुरुः संस्कारगुरुश्चेति । वा. । “प्राणिनां पुनर्मूलमाहारः बलवर्णौजसाञ्च स षट्सु रसेष्वायत्तः ब्रह्मादेरपि च लोकस्याहारः स्थित्युत्पत्तिविनाशहेतुराहारादेवातिवृद्धिर्बलमारोग्यं वर्णेन्द्रियप्रसादश्च, तथाहारवैषम्यादस्वास्थ्यम् ।” सु.सू.४६अ. । गुणाः—बलकृत् सद्यः प्रीणनः देहधारकः । ओजस्तेजःस्वरोत्साहधृतिस्मृतिमतिप्रदश्च । मद.व.११ । तत्पाकप्रकारः—यात्यामाशयमाहारः पूर्व्वं प्राणानिलेरितः । माधुर्य्यं फेनभारञ्च षड्रसोऽपि लभेत सः । अथ पाचकपित्तेन

विदग्धश्चाम्लतां व्रजेत्। ततः समानमरुता ग्रहणीमभिनीयते॥ ग्रहण्यां पच्यते कोष्ठवह्निना जायते कटुः। रसो भवति सम्पक्वादपक्वादामसम्भवः। वह्नेर्बलेन माधुर्य्यं स्निग्धतां याति तत्र सः। पुष्णाति धातूनखिलान् सम्यक् पक्वोऽमृतोपमः। मन्दवह्निविदग्धश्च कटुरम्लो भवेद्रसः। विषभावं व्रजेद्वापि कुर्य्याद्वा रोगसङ्करम्॥ शार्ङ्ग.पू.६अ.। क्ली। अन्ने। प.मु.। अभ्यवहारे। विन्यादभ्यवहारमाहारसंज्ञम्। रा.नि.व.२०।

आहारशोषणः । पुं,क्ली। कृष्णजीरके। [च.।

आहारसम्भवः । पुं। शरीरस्थरसधातौ। है.

आहारस्थानम् । क्ली। निर्जनादिदेशे। "आहारनिर्हारविहारयोगाः सदैव सद्भिर्विजने विधेयाः।" भा.।

आहार्य्यः । पुं। अपालिकभयतो यः स आहार्य्यपालिर्नाम। तन्नामककर्णबन्धनाकृतौ। सु.सू. १६अ.। त्रि। आहरणार्हे (कर्णमलादौ)। आगन्तुके। त्रिका.।

आहावः । पुं। निपानजलाशये। (চৌবাচ্চা। है.च.। अम.।

आहुली । स्त्री। आहुल्ये।

आहुल्यम् । क्ली। काश्मीरदेशजे 'तरवट्' इति ख्याते क्षुपविशेषे। हिं भुञ्जितखड़।मं तरवड़, आवेर। गुणाः—आहुल्यं तिक्तशीतं चक्षुष्यं पित्तदाहघ्नं मुखरोगघ्नं कुष्ठकण्डूतिजन्तु-शूलव्रणघ्नञ्च। रा.नि.व.४।

आह्रफेनम् । क्ली। अहिफेने। भैष.शोथ-चि. चैत्रपालरसे।

आहेयम् । क्ली। विषे। त्रि। अहिसम्बन्धिनि।

आह्निकम् । क्ली। भोजने। हारा.। मे.।

आह्वारणा । स्त्री। मैथुनं प्रत्याक्रोशे। (ছেনালি অপবাদ। अम.।

आक्षिकः । पुं। आच्छुकवृक्षे। আচ্‌ফুলের গাছ। र.मा.। छागज्वरे। गज.वै.।

आक्षिकशीधुः । पुं। विभीतककगुड़कृते धातकीपुष्पकृततीक्ष्णमद्ये। गुणाः—आक्षिकः पाण्डुरोगघ्नः बल्यः संग्राहको लघुः। कषायमधुरः शीधुः पित्तघ्नोऽसृक्प्रसादनः॥ सु.सू.४५अ.।

आक्षिकी(सुरा)। स्त्री। विभीतकलकशालितण्डुलकृतसुरायाम्। सा च पाण्डुशोफार्शःपित्तासकफकुष्ठघ्नी किञ्चिद्वातकरी रुचा दीपनी रेचनी लघुश्च। मद.व.८। तिनिशकृतसुरेति केचित्।

आक्षीवः । पुं। शोभाञ्जनवृक्षे। সজিনা গাছ। अ.टी.रा.।

आक्षेपः (कः) । पुं। वातरोगविशेषे। कुपितो वायुर्धमनीं प्राप्य मुहुः सञ्चरणाद्देहं चालयन् आक्षेपकं जनयति। लक्षणम्—यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः। तदा क्षिपत्याशु मुहुः मुहुर्देहं मुहुश्चरः। मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः॥ मा.नि.वा.व्या.। स चतुर्धा—वातादिभेदेन। गदाधरस्तु आक्षेपकमेकमेव कारणभेदाच्चतुर्विधं कथयति। पित्तश्लेष्माचितो वायुर्वायुरेव च केवलः। कुर्य्यादाक्षेपकं चान्यश्चतुर्थमभिघातजः॥ आक्षेपके शिरां विध्येत् कुर्य्याद्वातहरीं क्रियां। तीक्ष्णैः प्रधमनैर्नस्यैस्तथा संज्ञां स विन्दति॥ इति। अश्वस्याक्षेपकलक्षणं यथा—"गत्वा यः पूर्व्वकायेन पुनः पश्चाच्च गच्छति। सम्भाङ्गो वेदनार्त्तश्च तस्याक्षेपकमादिशेत्॥" ज.द.५५अ.।

आक्षोटः । पुं। गिरिजाक्षोटवृक्षे। আক্‌রোট্ গাছ इति लोके। श.र.। See अक्षोटः।

आक्षोड़ः । पुं। आक्षोटवृक्षे। अ.टी.भ.।

इ

इः । पुं। पुरुषोत्तमे। हला.।

इकटः । पुं। वंशाङ्कुरे।

इक्कटः । पुं। तृणविशेषे। ইকড়। प.मु.। बदरवृक्षे। रत्ना.।

इङ्गः । त्रि। जङ्गमे। है.च.।

इङ्गलः । पुं। इङ्गुदीवृक्षे। জিয়াপুতা। हिं गणवेटे। वै.निघ.।

इङ्गुदः (दी) । पुं,स्त्री। स्वनामख्यातमदगन्धि

वृचे। জিয়াপুতা, ইঙ্গোট इति च प्रसिद्धे। सु.सू.३८अ.। कफशमने। "पुत्रजीवके पुत्रजीवकफले।" सि.यो.कास-चि.मन:शिलादिधूमपाने वृन्द:। "मुस्तेङ्गुदै: पिबेत्।" वृन्द:। गुणा:—मदगन्धि: कटुरुष्णा फेनिला लघु: रसायनी क्रमिवातकफव्रणघ्नी च। रा.नि.व.८। कुष्ठभूतग्रहव्रणविषक्रमिघ्न उष्ण: श्वित्रशूलघ्न: तिक्त: कटुश्च। भा.पू.१भ.वटादि:। मद.व.५। "अस्य पुष्पन्तु मधुरं स्निग्धञ्चोष्णञ्च तिक्तकं। वातं कफं नाशयति च।" वै.निघ.। तत्फलं—"स्निग्धोष्णं तिक्तमधुरं वातश्लेष्मघ्नमैङ्गुदम्।" सु.सू.४६अ.। पारावतपद्यां। লতাফট্কী। प.मु.।

इङ्गुदीतैलम् । क्ली। इङ्गुदीफलोत्थतैले। गुणा:—स्निग्धं मधुरं पित्तघ्नं शीतलं बल्यं कान्तिदं श्लेष्मलं केशवर्द्धनञ्च। रा.नि.व.१५। [१अ.।

इङ्गुदीचार: । पुं। तन्नामकवृचचारे। च.चि.

इङ्गुल: (ली) । पुं, स्त्री। इङ्गुदीवृचे। रा.नि.व.८। क्ली। हिङ्गुले। मा.नि.विज.र.।

इच्छाभेदी । पुं। भेदकरसविशेषे। "तुल्यं टङ्कणपारदं समरिचं तुल्यांशकं गन्धकं विश्वा च द्विगुणा ततो नवगुणं जैपालचूर्णं चिपेत्। गुञ्जैकप्रतिमो रसो हिमजलै: संसेवितो रेचयेत्।" अत्र प्रत्येकमेकभागतुल्यं जैपालचूर्णस्य नवगुणत्वं। द्वितीये पाठे जैपालस्याष्टौ भागा: गन्धकस्य द्वौ भागौ। स यथा—"जैपालाष्टौ द्विकौ गन्धस्त्रिशुण्ठी मरिचं द्विकं। एक: सूत: सोहगैका गुञ्जा मात्रा वटीकृता" इत्यादि॥ तृतीये गदमुरारीच्छाभेदिरसे बलिर्गन्धके, गगनमभ्रे, अर्कस्ताम्रे, जैपालचूर्णं सर्व्वचूर्णसमं भृङ्गराजरसै: दिनद्वयं मर्द्दम्। पाठो यथा—"रसबलिगगनार्कं शुद्धतालं विषञ्च त्रिकटुत्रिफलमेतत् टङ्कणं भृङ्गमेभि:। सममिह जयपालोद्भूतचूर्णं विमर्द्य द्विनिशमनिशमेतद्भृङ्गराजोत्थवारा॥" चतुर्थो यथा—"शुण्ठी मरिचसंयुक्तं रसगन्धकटङ्कणं। जैपालास्त्रिगुणा: प्रोक्ता: सर्व्वमेकत्र चूर्णयेत्। इच्छाभेदी द्विगुञ्ज: स्यात् सितया सह दापयेत्। यावन्त्युल्लका: पीतास्तावद्वारान् विरेचयेत्॥" तक्रौदनं खादितव्यम्। र.सा.सं.विरेकाधिकारे।

इच्छाभेदी(गुड़िका) । स्त्री। भेदकरसभेदे। अत्र जैपालचूर्णं सर्व्वतुल्यं ग्राह्यं। "पारदं गन्धकं कुर्य्यात्सौभाग्यं पिप्पलीसमं। समानि जयपालानि। क्रियन्ते रेचनाय च। शीतेन रेचयेत्कन्यगुणेनैव प्रशाम्यति।" र.सा.सं.। [गाछ्।।श.च.।

इच्छुक: । पुं। मातुलुङ्गवृचे। টাবা লেবু

इज्जल: । पुं। (Barringtonia acutangula, Syn. Euginia acutangula.) हिज्जलवृचे। হিজল। समुद्रफले इति च लोके। गुणा:—"शीतल: संग्राही वातकोपन: विशेषेण विषघ्नश्च। मद.व.५। कुष्ठहृत् वातकोपनश्च। भा.पू.१भ.। इज्जलिरिति। वै.च.। See हिज्जल:।

इञ्चाक: । पुं। मत्स्यविशेषे। এঁচ্ণো মাছ। त्रिका.।

इञ्चुक: । पुं। इञ्चाकमत्स्ये। हारा.।

इट्चर: । पुं। षण्डे। ষাঁড়। अम.।

इड्व: । पुं। गोपतौ। ষাঁড়। वै.च.।

इड़ा । स्त्री। शरीरवामभागस्थनाड्यां। वाममुष्काध:स्था धनुर्वक्रा वामनासिकापर्य्यन्तगता या नाड़ी सा इड़ा इत्युच्यते। वै.च.।

इड़ाचिका । स्त्री। वरटायाम्। বোল্তা। श.च.। गन्धोल्याम्।

इड़ाजात: । पुं। भूमिजगुग्गुलौ।

इड़िक: (क:) । पुं। वन्यच्छागे। वानरे। हारा.।

इडूर: । पुं। वृषे। अ.टी.। स्वामी।

इण्डरी । स्त्री। पक्वान्नविशेषे।

इत्कट: (र:) । पुं। स्वनामख्यातचुपविशेषे। ইৎকড়, ওকড়া, ইকড় इति च। र.मा.। च.सू.४अ.।

इत्कटा । स्त्री। सूक्ष्मपत्रिका-दीर्घलोहितयष्टिका-काष्ठविशेषे। वा.सू.१५अ.वैल्लन्तरादिव.। "गोकण्टकेत्कटसहाचरवाणकाशा:।"

इत्किला । स्त्री। गोरोचनाख्यगन्धद्रव्ये। श.च.।

इदङ्कार्य्या । स्त्री। दुरालभायाम्। श.च.।

इद्धम् । क्ली। रौद्रे। दीप्तौ। मे.। [अम.।

इध्मम् । क्ली। अग्निदीपनकाष्ठे। জ্বালানিকাঠ।

इनानी । स्त्री। वटपत्रीवृचे। পাথরকুচাবিশেষ। रा.नि.व.५।

इन्दम्बरम् । क्ली । (Nymphaea coerulea.) नीलकमले, नीलपद्मे । श.मा ।

इन्दिन्दिरः । पुं । भ्रमरे । त्रिका. ।

इन्दिरा । स्त्री । लक्ष्म्यां । त्रिका. ।

इन्दिरामन्दिरम् । क्ली । विष्णौ । राज. ।

इन्दिरालयः । पुं । (Nymphaea lotus.) पद्मे । श.र. ।

इन्दिरावरम् । क्ली । नीलपद्मे । प.मु.श.र. ।

इन्दि(न्दी)वरम् । क्ली । नीलपद्मे । नीलशुण्डि । प.मु.श.मा. । एतत् श्वेतपद्मादिगुणयुक्तं परं किञ्चिद्धीनगुणम् । भा.पू.१भ. । See नीलोत्पलम् ।

इन्दीवरः । पुं । स्थलपद्मवृक्षे । सु.सू.३८अ. । कुरुण्टकभेदे । "कुरुण्टिकाभेदः दीर्घपत्री बहुलपुष्पः ।" ड.सु.चि.७अ. ।

इन्दीवरा (री) । स्त्री । शतमूल्याम् । प.मु. रा.नि.व.१० । अजशृङ्ग्याम् । তিৎপুষ্পী । प.मु. । इन्द्रचिर्भट्याम् । রাখালশশা । रा.नि.व.३ । कदलीवृक्षे । वै.निघ. । See इन्द्रवारुणी ।

इन्दीवरिणी । स्त्री । उत्पलिन्याम् । কুমুদের ঝাড় । रा.नि.व.१० ।

इन्दीवारम् । क्ली । नीलपद्मे । मे.राज. ।

इन्दुः । पुं । कर्पूरे । अम.रा.नि.व.८ । भा.म.४भ.नेत्ररोग.चि. । "स्फटिकशङ्खनाभीन्दवः ।" भा.म.१भ.तण्लञ्ज.चि. । "तुरङ्गलालालवणोत्तमेन्दु । लवङ्गेन्दुसुवासितम् ।" भा.पू.पानकव. ।

इन्दुकः । पुं । अश्मन्तकवृक्षे । रा.नि.व.९ । केमुककन्दे । वै.निघ. ।

इन्दुकमलम् । क्ली । कुमुदे । শ্বেতোৎপল, শ্বেত শুন্দি ফুল । रा.नि.व.१० ।

इन्दुकलिका । स्त्री । केतकीवृक्षे । কেয়া গাছ । श्वेतकेतक्याम् । रा.नि.व.१० ।

इन्दुकान्तः । पुं । चन्द्रकान्तमणौ । रा.नि.व. १३ । स्त्री । रात्रौ । हे.च. । [रा.नि.व.९ः

इन्दुखण्डा । स्त्री । कर्कटशृङ्ग्यां । কাঁকড়াশৃঙ্গী ।

इन्दुचन्दनम् । क्ली । हरिचन्दने । वै.निघ. ।

इन्दुपत्रः । पुं । भूर्जवृक्षे । संग्रहः ।

इन्दुपुष्पिका (ष्पी) । स्त्री । लाङ्गलीवृक्षे । ইশলাঙ্গুলে । रा नि.व.३ । [सु रा.नि.व.२३ ।

इन्दुपोदकी । स्त्री । वेल्लिकायां । লতাবিশে-

इन्दुफलः । पुं, क्ली । आम्रातके । আমড়া গাছ, আমড়া । वै.निघ. । वै.निघ. ।

इन्दुमुखी । स्त्री । पद्मिन्याम् । পদ্মের ঝাড় ।

इन्दुरः । पुं । मूषिके । अयं विलेशयः, विलेशयत्वादेतन्मांसं वातघ्नं मधुरं बृंहणं बद्धविण्मूत्रं वीर्य्योष्णञ्च । भा.पू.१भ. ।

इन्दुरकर्णिका (र्णी) । स्त्री । आखुकर्णीलतायाम् । ইন্দুরকাণী । हिं मूषाकाणी । [१३।

इन्दुरत्नम् । क्ली । मुक्तायाम् । प.मु.रा.नि.व.

इन्दुरसा । स्त्री । पिष्टकभेदे । আঁদলসা । यथा—"षष्टिकानाञ्च शालीनां पिष्टं हंशाञ्च शर्करां । किञ्चिद्दध्ना च संमर्द्य द्वितीये दिवसे ततः । वर्त्तुलान् वटकान् कृत्वा घृते पक्का प्रयत्नतः । गुणाः —तेऽतिशीताश्च हृद्याश्च बलपुष्टिकरा मताः ।" वै.निघ. ।

इन्दुरा । स्त्री । सोमराज्याम् । वै.निघ. ।

इन्दुराजिः(जी) । स्त्री । सोमराज्यां । वै.निघ. ।

इन्दुलेखा । स्त्री । (Asclipias acida.) गुडूच्याम् । त्रिका. । सोमराज्याम् । वै.निघ. । सोमलतायाम् मे.खचतुष्कं । यमान्यां । श.मा. ।

इन्दुलोह(कम्) । क्ली । रौप्ये । रा.नि.व.१३।

इन्दुवल्लिका (ल्ली) । स्त्री । सोमलतायाम् । गुडूच्यां । जटा. । सोमराज्यां । यमान्यां । वै.निघं. ।

इन्दुशकला । स्त्री । सोमराज्यां । वै.निघ. ।

इन्दुशफरी । स्त्री । अश्मन्तकवृक्षे । रा.नि.व.९।

इन्दूरः । पुं । मूषिके । रा.नि.व.९ ।

इन्द्रः । पुं । देवराजे । मे. । कुटजवृक्षे । भा.पू. १भ. । इन्द्रयवे । भैष.भल्लात-गुडे. । च.द.पित्तश्लेष. ज्व.चि.कण्टकार्य्यादिः । "नागरेन्द्रयवासकं ।" भा. म.४भ.मसू.चि. । "त्रिफलेन्द्रयवासकम् ।" चन्द्रे । रत्ना. । योगभेदे । मे.रदिकं । अन्तरात्मनि । स्थावरविषभेदे । हे.च. । [illegible] । वै.निघ. ।

इन्द्रकर्णिकः । पुं। रक्तैरण्डे । लाल ভেরেণ্ডা।

इन्द्रकोषः । पुं। निर्यूहे । निर्यासे । तमङ्गके । গোঁজলা । है.च.हला. । [टी.भ. ।

इन्द्रगुप्तम् । क्ली । उशीरे । বেণার মূল । श.

इन्द्रगोपः । पुं। (Coccinella of various kinds.) शक्रगोपे । तीज वीरबहुटी इति च प्रसिद्धे । मखमली, ছোট কেন্নুই इति लोके । हारा. । रा.नि.व.१६ । [रा.नि.व १२ ।

इन्द्रचन्दनम् । क्ली । हरिचन्दने । रक्तचन्दने।

इन्द्रचिर्भिटा (टी) । स्त्री । इन्द्रवारुणील-तायां । युग्मफललतायां । রাখালশশা । मं लघु-कांवरल । गुणाः—कटुः शीता पित्तश्लेष्मकास-दोषव्रणक्रमिघ्नी चक्षुष्या च । रा.नि.व.३ ।

इन्द्रच्छन्दम् ।क्ली । सहस्रगुच्छहारे। है.च. ।

इन्द्रजः । पुं । इन्द्रयवे । वै.निघ.२भ.ज्व.चि.ग्र-न्थ्यादिकषाये । कुटजवृक्षे । वै.निघ.भ.सा.चि. कुटजचूर्णे ।

इन्द्रजतु । क्ली । शिलाजतुनि । वै.निघ. ।

इन्द्रजम्बूकवल्पाचा । स्त्री । कृष्णसारिवा-यां । भा.पू.१भ. । See कृष्णसारिवा अनन्ता च ।

इन्द्रजिह्वा । स्त्री । लाङ्गलीवृक्षे । ইশ্‌লাঙুলে।

इन्द्रतरुः । पुं । अर्जुनवृक्षे । वै.निघ. ।

इन्द्रतूल(क)म् । क्ली । आकाशे उड्डीयमान-सूत्रे । আকাশবুড়ির সূতা । कार्पासे । अर्कवृच-तूलके । त्रिका. । [चि । भा.पू.१भ. ।

इन्द्रदारुः । पुं । देवदारुवृक्षे । तैलदेवदारुवृ-

इन्द्रद्युति । क्ली । चन्दने । वै.निघ. ।

इन्द्रद्रुः (मः) । पुं । अर्जुनवृक्षे । श.र.। अम. । कुटजवृक्षे । रा.नि.व.८। देवदारुवृक्षे। भा.पू.अने.।

इन्द्रनीलः । पुं । मरकतमणौ । নীলকান্ত মণি, পান্না । है.च. । भा.पू.१भ. । "क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेन्नीलतां व्रजेत् । इन्द्रनीलमिति ख्यातम् ।" इति परीक्षा । (कः) श.र. ।

इन्द्रपर्णी । स्त्री। इन्द्रवारुण्यां । রাখালশশা। लाङ्गलिकायां । ইশলাঙুলে । सु.चि.१७अ. ।

इन्द्रपुष्पम् । क्ली। लवङ्गे । र.सा.सं.पूर्णचन्द्ररसे।

इन्द्रपुष्पा (ष्पिका) (ष्पी) । स्त्री। लाङ्गली-वृक्षे । ইশলাঙুলে । प.मु.रत्ना. । पूतीकरञ्जे । নাটা । कण्टकीकरञ्जपुष्पकरञ्जः,कलिकारिकेत्यन्ये । सु.सू.३७अ.अर्कादि.ड. ।

इन्द्रब्रह्मवटी । स्त्री । अपस्माराधिकारे । अत्र तारं रौप्यम् । ताप्यं स्वर्णमाक्षिकम् । पाठः— "मृतसूताभ्रकं तीक्ष्णं तारं ताप्यं विषं समं । पद्म-केशरसंयुक्तं दिनैकं मर्द्दयेद्द्रवैः । सुस्थग्निविजयैरण्ड-वचानिष्पावसूरणैः । निर्गुण्ड्याश्च द्रवैर्मर्द्य तद्गोलं पाचयेत्पुनः । कङ्गुणीसर्षपोत्थेन तैलेन गन्धसंयुतं । ततः पक्वा समुद्धृत्य चणमात्रा वटीकृता ।" अनु-पानमार्द्रकरसः । र.सा.सं. । রসসিন্দুর, অভ্র, লৌহ, রূপা, স্বর্ণমাক্ষিক, বিষ, পদ্মকেশর সমভাগ । মর্দনদ্রব্য—মনশাসিজু, চিতে, সিদ্ধি,এরণ্ড,বচ, শিম, ওল এবং ইক্ষুর রস।

इन्द्रभेषजम् । क्ली । शुण्ठ्याम् । श.र. ।

इन्द्रमदः । पुं । तरुगुल्मज्वरे । गजवै. ।

इन्द्रमहाकामुकः । पुं । कुक्कुरे । त्रिका. ।

इन्द्रयवः (वम्) । पुं, क्ली । (Seed of holarrhena antidysenterica.) कुटजवीजे । ইন্দ্রযব । हिं उत्. इन्द्रयव । मं इन्द्रयव, कुड्या-चेंवीं । कं कोड़सिगेयवीज । इन्द्रशब्दपर्य्यायमात्रं कुटजवाचकम् । धन्वन्तरिः । भा.पू.१भ. । वा.सू. १५अ.। "आरग्वधेन्द्रयवपाटलिकाकतिक्ता ।" च. द.पित्तज्व.चि. । "तिक्ताब्देन्द्रयवैः कृतम् ।" गुणाः —कटुः तिक्तः शीतलः कफवातरक्तपित्तहरः दा-हातीसारघ्नः नानाज्वरघ्नः शूलघ्नश्च । रा.नि.व.६ । त्रिदोषघ्नं धारकं कटुशीतं दीपनं ज्वरातीसार-रक्तार्शोवमिवीसर्पकुष्ठवातरक्तकफशूलघ्नञ्च । भा.पू. १भ. । इन्द्रयवा इति राजनिघण्टुः ।

इन्द्रलुप्त(क)म् । क्ली । Baldness. श्मश्रुके-शघ्नरोगे । টাক্ রোগ । मं चाइरोग। तस्य लक्ष-णम्—"रोमकूपानुगं पित्तं वातेन सह मूर्च्छितं । प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः । रु-णद्धि रोमकूपांश्च ततोऽन्येषामसम्भवः । तदिन्द्रलुप्तं खालित्यं रुज्येति च विभाव्यते। सु.नि.१३अ. । इन्द्रलुप्तं श्मश्रुणि भवति खालित्यं शिरोरुहेष्वेव रुज्या स्वेदनेति कार्त्तिककुण्डः । मा.नि.विज.र.। रुज्येति । विज.र.भोजः । पुं । रा.नि.व.२० ।

इन्द्रलोहकम् । क्ली । रीप्ये ।

इन्द्रवचा । स्त्री । इन्द्रयवे । रा.नि.व.६ ।

इन्द्रवटी । स्त्री । प्रमेहाधिकारे । पाठः—"मृतं सूतं मृतं वङ्गमर्जुनस्य त्वचान्वितं । तुल्यांशं मर्द्दयेत्खल्ले शाल्मल्या मूलजद्रवैः । मात्रा १ मा. । र.सा.सं. । सा.कौ. । রসসিন্দূর, বঙ্গ এবং অর্জ্জুনছাল সমভাগ ।

इन्द्रवल्लरी । स्त्री । इन्द्रवारुणीलतायां । রাখালশশা । रा.नि.व.३ । वै.निघ.२भ.कर्णक.सन्निपात रोहितकादिलिपे । [मलता । सु. ।

इन्द्रवल्लिका (ल्ली) । स्त्री । इन्दुवल्ल्यां । সো-

इन्द्रवस्तिः । पुं । तन्नामकमर्म्मस्थाने । পায়ের ডিম । तस्य स्थानं प्रतिपार्ष्णिजङ्घयोः सन्धिः । सु.शा.६अ. ।

इन्द्रवारुणिका (णी) । स्त्री । (Eucumis madraspatanus, cunnis melo. ऐन्द्रीनामलतायाम् । प.मु. । রাখাল নাড়ু, রাখাল শশা, কুঁদরুকী । हिं इन्द्रायण,वड़ी इन्द्रफला । मं इन्द्रवारुणी । गुणाः—तिक्ता कटुः शीता रेचनी गुल्मपित्तोदरश्लेष्मक्रमिकुष्ठज्वरघ्नी च । रा.नि.व.३ । सा ह्रस्वदीर्घभेदेन द्विधा । लघुः उष्णा कामलापित्तकफप्लीहोदरश्वासकासकुष्ठगुल्मग्रन्थिव्रणप्रमेहमूढ़गर्भगलगण्डविषघ्नी च । भा.पू.१भ. । "लघ्वीन्द्रवारुणी प्रोक्ता पाके कट्वी च तिक्तका । शीता सरोष्णवीर्य्या च लघ्वी चैव प्रकीर्त्तिता । ...... । अन्येन्द्रवारुणी कण्ठरुजश्च श्लीपदं तथा । नाशयेदिति संप्रोक्ता गुणाश्चान्ये तु पूर्व्ववत् । रसे वीर्य्ये च पाके चाधिका चोक्ता गुणैरियम् ॥" वै.निघ. । गोरक्षकर्कट्याम् । च.द.लाक्षातैले ।

इन्द्रवि(व्र)द्धा । स्त्री । वातपित्तजन्यक्षुद्ररोगान्तर्गतव्रणरोगविशेषे । लक्षणं—"पद्मकर्णिकवन्मध्ये पिड़काभिः पिड़काचिताम् । इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषगिति ॥" मा.नि. । तन्नामकाक्षरोगे । See इन्द्रवृद्धः ।

इन्द्रवीजम् । क्ली । इन्द्रयवे । च.द.सि.यो.सान्निपातिकज्व.चि.अष्टादशाङ्गे । "तिक्तेन्द्रवीजधनिकेभकणाकषायः ।"

इन्द्रवृद्धः । पुं । मुष्कवर्जितकुलक्षणाश्वविशेषे । लक्षणं यथा—"विरोधं नैव यो याति दृष्टाश्वं मुष्कवर्जितः । इन्द्रवृद्धः स विख्यातो भर्त्तुश्च कुलनाशनः ॥" ज.द.३अ. ।

इन्द्रवृक्षः । पुं । देवदारुवृक्षे । जटा. । श्वेतकुटजवृक्षे । अर्जुनवृक्षे । भा.म.४भ. । "सोमवल्लीमिन्द्रवृक्षम् ।"

इन्द्रसुतः । पुं । अर्जुनवृक्षे । रा.नि.व.९ ।

इन्द्रसुरसः (सा) । पुं, स्त्री । निर्गुण्डीवृक्षे । নিশিন্দা গাছ । रत्ना. । See निर्गुण्डी ।

इन्द्रसुरा । स्त्री । गोरक्षकर्कटिकायां । রাখাল শশা । सु.चि.३७अ. । "गुड़ूचीन्द्रसुरा ।"

इन्द्रसुरिषः (सः) । पुं । निर्गुण्डीवृक्षे । নিশিন্দা গাছ । मौण्डी इति काश्याम् । र.मा.अम. ।

इन्द्रसूनुः । पुं । अर्जुनवृक्षे । रा.नि.व.९ ।

इन्द्रस्वरसः । पुं । वृष्टिजले । च.द.अर्श.चि.नागार्जुनयोगे ।

इन्द्रा । स्त्री । फणिजभ्भकवृक्षे । কাঁটা জামীর । मे.रद्विकं । भा.म.३भ.मेद-चि. । इन्द्रवारुण्याम् । रा.नि.व.३ ।

इन्द्राग्निधूमः । पुं । हिमे । हारा. ।

इन्द्राणिका । स्त्री । निर्गुण्डीवृक्षे । प.मु. । नीलसिन्दुवारे । रा.नि.व.४ । जातीफलादिवटिकायां । [जातीफला.वटी. ।

इन्द्राणिकापत्रम् । क्ली । निर्गुण्डीपत्रे ।

इन्द्राणी । स्त्री । (Vitex nigundo.) कृष्णनिर्गुण्ड्याम् । কাল নিশিন্দা । हिं शम्भलु । स्त्रीन्द्रिये ।"इन्द्राणी करणं स्त्रीणां पौलोमीसिन्दुवारयोः ।" मे.णचिकं । सूक्ष्मेलायां, स्थूलैलायाम् । रा.नि.व.६ ।

इन्द्राभा । स्त्री । कङ्कपक्षिभेदे । वै.निघ. ।

इन्द्रायुधम् । क्ली । वज्रकमणौ । হীরক । रा.नि.व.१३ । स्थावरविषान्तर्गतकन्दविषे । वा.उ.३५अ. । च.चि.२६अ. । स्त्री । इन्द्रायुधवदूर्द्धराजि-सविषजलायुकायाम् । सु.सू.१३अ. । See जलायुका ।

इन्द्रार्घपादपः । पुं । क्रमुकवृक्षे । গুপারি গাছ । रा.नि.व.११ । See क्रमुकः ।

इन्द्राशनः (कः) । पुं । (Abrus precato-

rins.) संविदाख्ये। सिङ्किगाछ। जातीफला-दिवर्ग्यां। गुञ्जायाम्। कुँच। कुष्ठौषधे। कुड़। चारा। [व.१।

इन्द्राह्वा। स्त्री। इन्द्रवारुणीलतायाम्। मद.

इन्द्राक्षः। पुं। ऋषभकनामलताकन्दे। ऋषभक। भा.पू.१भ.ह.व.मद.व.१।

इन्द्रियम्। क्ली। (Organs of senses.) ज्ञानकर्म्मादिसाधनेषु चक्षुरादिषु। জ্ঞান ও কর্ম্ম-সাধনের উপায়ভূত চক্ষুঃ প্রভৃতি। इन्द्रियाणि विविधानि बुद्धीन्द्रियकर्म्मेन्द्रियान्तरिन्द्रियभेदेन, तेषु श्रोत्रत्वक्चक्षुरसनाघ्राणाभिधानानि ज्ञानेन्द्रियाणि, वाक्पाणिपायुपादोपस्थनामानि कर्म्मेन्द्रियाणि, एतदुभयात्मकं मनः, समष्ट्या एकादशेन्द्रियाणि। तथाहि—"वैकारिकादहङ्कारात्तैजससहायात्तल्लक्षणान्येकादशेन्द्रियाण्युत्पद्यन्ते। तद्यथा—श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्घस्तोपस्थपायुपादमनांसीति। तत्र पूर्व्वाणि पञ्च बुद्धीन्द्रियाणि। इतराणि पञ्च कर्म्मेन्द्रियाणि। उभयात्मकं मनः। भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चतन्मात्राण्युत्पद्यन्ते। तद्यथा—शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति। तेषां विशेषाः शब्दस्पर्शरूपरसगन्धास्तेभ्यो भूतानि व्योमानिलानलजलोर्व्व्यः। एवमेषा तत्त्वचतुर्विंशतिर्व्याख्याता। तत्र बुद्धीन्द्रियाणां शब्दादयो विषयाः। कर्म्मेन्द्रियाणां यथासंख्यं वचनादानानन्दविसर्गविहरणानि। अव्यक्तं महानहङ्कारः पञ्च तन्मात्राणि चेत्यष्टौ प्रकृतयः शेषाः षोड़श विकाराः। स्वः स्वश्चैषां विषयोऽधिभूतं। स्वयमध्यात्ममधिदैवतञ्च। अथ बुद्धेर्ब्रह्मा, अहङ्कारस्येश्वरः, मनसश्चन्द्रमाः, दिशः श्रोत्रस्य, त्वचो वायुः, सूर्य्यश्चक्षुषोः, रसनस्यापः, पृथ्वी घ्राणस्य, वचसोऽग्निः, हस्तयोरिन्द्रः, पादयोर्विष्णुः, पायोर्मित्रं, प्रजापतिरुपस्थस्येति। आयुर्व्वेदे भौतिकानीन्द्रियाणीन्द्रियार्थाश्च वर्ण्याः।" सु.शा.१अ.। अन्तरिन्द्रियाणि पुनः चत्वारि मनोबुद्ध्यहङ्कारचित्तानि। मनस्तावदिन्द्रियनियामकं। एवं चतुर्दशेन्द्रियाणां नियन्तारश्चतुर्दशदेवताः। तत्र कर्णस्य देवता दिक्, त्वचो वातः, नेत्रस्य सूर्य्यः, रसनाया वरुणः, घ्राणस्याश्विनौ, वाचो वह्निः, हस्तस्येन्द्रः, पादस्य विष्णुः, पायोर्मित्रः, उपस्थस्य प्रजापतिः, मनसश्चन्द्रः, बुद्धेश्चतुर्मुखः, अहङ्कारस्य शिवः, चित्तस्याच्युतः। इति वेदान्तः। रैतसि। रा.नि.व.१८। मे.यत्रिकं। त्रिका.। भा.म.१भ.ज.व.चि.।

इन्द्रियकर्म्म। क्ली। चक्षुरादीनां शब्दाकर्णनस्पर्शग्रहण-रूपदर्शन-रसग्रहण-गन्धग्रहणवचनादानविसर्गगमनानन्दाख्यानि। सु.शा.१अ.।

इन्द्रियगोचरः। त्रि। इन्द्रियविषये।

इन्द्रियग्रामः। पुं। शरीरे। वै.निघ.। इन्द्रियसमूहे। [छानी।

इन्द्रियघ्नः। पुं। चक्षूरोगविशेषे। চক্ষের

इन्द्रियज्ञानम्। क्ली। इन्द्रियजन्यज्ञाने।

इन्द्रियबुद्धिः। स्त्री। इन्द्रियजन्यज्ञाने।

इन्द्रियवर्गः। पुं। एकादशेन्द्रियेषु, इन्द्रियसमूहे। See इन्द्रियम्। [वै.निघ.।

इन्द्रियवैकल्यम् क्ली। इन्द्रियदुर्ब्बलतायां।

इन्द्रियसन्तापः। पुं। इन्द्रियवैकृते।

इन्द्रियस्वापः। पुं। प्रलये। निद्रायाम्। चैष्टानाशे। रा.नि.व.२०।

इन्द्रियागोचरः। त्रि। अतीन्द्रिये।

इन्द्रियायतनम्। क्ली। शरीरे। हे.च.।

इन्द्रियार्थः। पुं। इन्द्रियजन्यज्ञानविषयेषु। यथा—रूपरसगन्धस्पर्शशब्दाः। अम.।

इन्द्रोक्तरसायनम्। क्ली। इन्द्रकथितरसायनवर्गे। ऐन्द्र्यां। রাখালশশা। महाश्रावण्याम्। বড় থুলকুড়ি। च.चि.१अ.।

इन्द्रोपलम्। क्ली। नीलहीरके। प.मु.।

इन्धनम्। क्ली। काष्ठे। अग्निज्वालनार्थतृणकाष्ठे। अम.।

इभः। पुं। हस्तिनि। अम.। नागकेशरे। च.।

इभकणा। स्त्री। (Pothos officinalis.) गजपिप्पल्याम्। र.मा.। भा.पू.१भ.। च.द.सि.यो.सान्निपातिकज्व.अष्टाङ्गकषाये। 'धनिकेभकणाकषायः।'

इभकृष्णा: (ष्णा) पुं, स्त्री। गजपिप्पल्यां। भैष.च.द.ग्रहणी-चि,कल्याणगुड़े।

इभकेश(स)रः । पुं। नागकेशरवृक्षे । भैष.। क्ली। नागकेसरपुष्पे । चि.क्र.क.प्रदरचि.। सु.चि.३८अ.।

इभगन्धा (न्धिका) । स्त्री । स्थावरविषान्तर्गततन्नामकफलविषे । सु.कल्प.२अ.।

इभदन्ता । स्त्री । हस्तिशुण्डीवृक्षे । হাতিশুঁড়ে । रत्ना. । नागदन्त्याम् । र.मा. ।

इभदन्ताह्वा । स्त्री । नागदन्त्यां । र.मा.रत्ना.।

इभपत्रिका । स्त्री । चिल्लीशाके । वै.निघ. ।

इभपुष्पम् । क्ली । नागकेशरे । भैष.सु.री.चि. बृहत्खदिरवट्यां ।

इभपोटा । स्त्री । करिशावके । [वाचस्पत्ये ।

इभबला । स्त्री। नागबलायां। वै.निघ.चय-चि.

इभमज्जकः । पुं। पुत्रदात्रीलतायां । वै.निघ.।

इभमाचलः । पुं । सिंहे । [वै.निघ. ।

इभमूलकम् । क्ली। हस्तिमूलके । गन्धतृणे ।

इभशुण्डी । स्त्री । हस्तिशुण्ड्याम् । [र.मा. ।

इभषा । स्त्री । स्वर्णक्षीरीवृक्षे । সোণাথিরুই ।

इभाख्यः । पुं । (Musaferrea.) नागकेशरवृक्षे । त्रिका. ।

इभावती । स्त्री । वटपत्रीवृक्षे । পাথরকুচা ।

इभी । स्त्री । हस्तिन्याम् । হাতিনী ।

इभोषणा । स्त्री । गजपिप्पल्याम् । श.च. ।

इभ्या । स्त्री । (Boswellia thurifera or serrata.) शल्लकीवृक्षे । करिण्यां । मे.यद्विकं ।

इरणम् । क्ली। ऊषरभूमौ। अ.टी.र.।रा.नि.व.२।

इरा । स्त्री । सुरायाम् । जले । मे. । [त्रिका. ।

इराचरम् । क्ली । करकायाम्। বর্ষার শীল ।

इरावती । स्त्री । वटपत्रीपाषाणभेदे । বড় পাথরকুচা । रा.नि.व.५ । [इरिवेल्लिका ।

इरावेल्लिका । स्त्री । इरिवेल्लिकायाम् । See

इरिकीलः । पुं । अङ्कोलवृक्षे । আঁকোড় । वै.निघ. । [अजय. । रा.नि.व.२ ।

इरिणम् । क्ली । ऊषरभूमौ । লোণা ভূমি ।

इरिमेदः (कः) । पुं । अरिमेदे । বিট্‌খদির । रा.नि.व.८ । भा.पू.४भ.सु.री.चि. । "कल्क-रनन्ताखदिरेरिमेद···।" See अरिमेदः ।

इरिवेल्लिः (का) । स्त्री। सन्निपातजन्ये शिरोजातव्रणजन्यपीड़ाविशेषे। तस्य लक्षणम्—"पिड़कामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वरां । सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकां ॥" निदानम् ।

इर्म्म (म्) । क्ली । व्रणे । क्षते । अम. ।

इर्व्वारुः । पुं स्त्री । कर्कटीनामफलशाके । কাঁকুড় গাছ । प.मु. । रोमशकर्कटीति । ड. । सु.सू.४२अ.मधुरव. ।

इर्व्वारुशुक्तिः (का) । स्त्री । फुटीतिख्यातनिर्भिन्नकर्कव्याम् । फूटी । हारा. । [अ.टी.रा. ।

इर्व्वालुः । पुं,स्त्री । कर्कटिकायाम् । কাঁকুড় ।

इलि(ली)(ल्लि)शः । पुं । मत्स्यविशेषे । ইলীশ মাছ । हिं हीलसा । हारा.। गुणाः—"इल्लिशो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः । पित्तकृत्कफकृत्किञ्चिल्लघुर्बल्योऽनिलापहः ।" भा.पू.२भ.। पित्तश्लेष्माग्निवर्द्धकः मधुरः हृद्यश्च । राज. ।

इली । स्त्री । करबालिकायाम् । ছুরি, কাটারি । अ.टी.रा. ।

इल्ललः । पुं । पक्षिभेदे । श.च. ।

इल्वलः । पुं । मत्स्यभेदे । मे.लत्रिकं ।

इशि(षी)का । स्त्री । गजाक्षिगोलके । शरकाण्डे । শরকাটী । अ.टी.भ. ।

इषः । पुं । आश्विनमासि । अम. ।

इषिका । स्त्री । गजाक्षिगोलके । अ.टी.रा. ।

इषिरः । पुं । अग्नौ । [अ.टी.भ. ।

इषीका । स्त्री । काशतृणे । हला.। शरकाण्डे ।

इषुः (कः) । पुं । शरतृणे । प.मु. ।

इषुगोलकः । पुं । कोकिलाक्षवृक्षे ।

इषुपत्रिका (त्री) । स्त्री । अर्कमूलायाम् । ঈশের মূল । र.मा. ।

इषुपुङ्खा (ङ्खिका) । स्त्री । शरपुङ्खायाम् । বন নীল । हिं शरफोंका । रा.नि.व.४ ।

इष्टः । पुं । एरण्डवृक्षे । श.च. । क्ली । उशीरे । अ.टी.भ. ।

इष्टका । स्त्री । गृहादिनिर्म्माणार्थदग्धमृत्खण्डे । ইট্ । संग्रहे । [বেণার মূল । रा.नि.व.१२ ।

इष्टकापथम् । क्ली । लामज्जके, वीरणमूले ।

इष्ट(ष्टि)कापथकम् । क्ली । लामज्जके । भा.पू.१भ. । मद.व.३ । [लुके । मै.धचतुष्कं ।

इष्टगन्धः । त्रि । सुगन्धौ । अम. । क्ली । वा-

इष्टा । स्त्री । शमीवृक्षे । रा.नि.व.८ ।

इक्षवः । पुं । इक्षुसाधारणे । श.र. ।

इक्षुः । पुं । Sugarcane. (Saccharum officinarum.) स्वनामख्यातमधुरवृक्षे । আক গাছ । हिं गाण्डा. उख् । तैं चेरकु । प्रा.ऊंस् । स द्वादशविधः—पौण्ड्रकः, भीरुकः, वंशकः, शतपारकः, कान्तारः, तापसेक्षुः (काण्डेक्षुः), काष्ठेक्षुः, सूचिपत्रकः, नैपालः, दीर्घपत्रकः, नीलकः, कोशकृवेति । भा.पू.२भ. । श्वेतपुण्ड्रकरक्तकृष्णरक्तभेदात्पञ्चधा । रा.नि.व.१४ । स वर्णतः षड्भेदः, श्वेतकृष्णताम्ररसालिषत्कृष्णमिश्रवर्णः इति । स च पौण्ड्रकानुवासिकशतपर्व्वकान्तारनैपालदीर्घपत्रादिभेदाद्बहुविधः । वा.टी.हेमा. । एतद्विशेषास्तत्पर्य्याये द्रष्टव्याः । सा.गुणाः—"इक्षुदण्डो रसे पाके मधुरो वातकारकः । स्निग्धो गुरुर्मूत्रलश्च शीतो वृष्यो बलप्रदः । कफपुष्टिक्रिमिकान्त्यानन्दकरः सरः । रक्तरुग्वातपित्तानां नाशनो मुनिभिः स्मृतः ॥" वै.निघ. । "अभुक्ते पित्तहाश्चैते भुक्ते वातप्रकोपनाः । भुक्तमध्ये गुरुतरा इतीक्षूणां गुणास्त्रयः ॥ पित्तदाहहरो वृष्यस्तेजोबलविवर्द्धनः । वृष्यो रक्तास्रपित्तप्रशमनपटुः शीतलः श्लेष्मदोऽल्पस्निग्धो हृद्यश्च रुच्यो रचयति च मुदं मूत्रशुद्धिं विधत्ते । कान्तिं देहस्य दत्ते बलमतिकुरुते बृंहणस्त्वग्निदायी दन्तैर्निष्पीड्य काण्डं मृदुयति रसितो मोहनश्चेक्षुदण्डः ॥" रा.नि.व.१४ । इक्षुः मूले मध्ये च मधुरः, अग्रे ग्रन्थौ च लवणरसः । बालेक्षुः कफकरो मेदोमेहकरश्च । युवा च वातघ्नः स्वादुः पित्तघ्नः ईषत्तीक्ष्णश्च । भा.राज. । मूलादूर्द्ध्वं मधुरा मध्येऽतिमधुरास्तथा । इक्षवस्तेऽग्रभागेषु क्रमाल्लवणनीरसाः । इति क्षुद्रदण्डमूलमध्याग्रगुणाः । रा.नि.व.१४ कोकिलाक्षवृक्षे । কুলেখাড়া । रा.नि.व.४ ।

इक्षुकः । पुं । इक्षौ । इक्षुगन्धायां । কাশতৃণ । भूमिकुष्माण्डे । काकोल्यां । वै.निघ. ।

इक्षुकण्डिका । स्त्री । इक्षुकाण्डे । काकोल्यां । भूमिकुष्माण्डे । वै.निघ. । वा.टी. हेमा. ।

इक्षुकन्दा । स्त्री । श्वेतभूमिकुष्माण्डे । वै.निघ. ।

इक्षुकाण्डः । पुं । काशतृणे । কেশে । रा.नि.व.८ । मुञ्जायाम् । শরগাছা । श.च. ।

इक्षुकाशः । पुं । काशतृणे । मद.व.१ ।

इक्षुकीयः । त्रि । इक्षुयुक्तदेशे ।

इक्षुगण्डिका । स्त्री । काशतृणे । वै.निघ. ।

इक्षुगन्धः । पुं । काशतृणे । भा. । क्षुद्रगोक्षुरकवृक्षे । रा.नि.व.४ ।

इक्षुगन्धा (न्धिका) । स्त्री । कोकिलाक्षे । কুলেখাড়া । मद.व.१,मै. । गोक्षुरके । प.मु.भा. । क्षीरविदार्य्याम् । ভুঁইকুমড়া । मद.व.१ श.र., रा नि.व.७। वाराहीकन्दे, काशतृणे । भा.पू.१भ., मै. । शृगाल्याम् । भा.अने. । मै.धचतुष्कं । श्वेतभूमिकुष्माण्डे । अम.मै. । भूमिकुष्माण्डे । श.र. ।

इक्षुजटा । स्त्री । इक्षुमूले । चि.क्र.क.प्रदरचि. ।

इक्षुतुल्या । स्त्री । इक्षुवालिकायां । আনাথ, ইক্ষুবিশেষ, খাগড়া । प.मु. । काशतृणे । र.मा. । यावनाले । যোওয়ার, যনার ।

इक्षुदर्भा । स्त्री । स्वनामख्याततृणविशेषे । नटा । मं आम्बालु । गुणाः—मधुरा स्निग्धा ईषत्कषाया कफपित्तघ्नी रुच्या लघुः सन्तर्पणी च । रा.नि.व.८ ।

इक्षुनेत्रम् । क्ली । इक्षुमूले । येनेक्षुः पुनरुत्पद्यते । আকের মূল, আকের ডগা বা চোক । रा.नि.व.१४ ।

इक्षुपत्रः (कः) पुं । यावनाल इति शिम्बीधान्ये । जोओयारा इति लोके । रा.नि.व.१६ ।

इक्षुपत्री (र्णी) । स्त्री । वचायां । शुक्लभूमिकुष्माण्डे । वै.निघ. ।

इक्षुपाकः । पुं । गुड़े ।

इक्षुपुष्पा । स्त्री । शरपुष्पायाम् । रा.नि.व.४ ।

इक्षुप्रः । पुं । शरतृणे । रा.नि.व.८ ।

इक्षुबालिका । स्त्री । खागड़िकायां । খাগড়া । रा.नि,व.८,च.मू.४अ.शूल चि. । कोकिलाक्षे ।

कुलेखाड़ा। हिं तालमाखना। भा.पू.१भ.। मद.व.१। इक्षुतुल्यायाम्। र.मा.। काशतृणे। रा.नि.व.८।

इक्षुभक्षिका। स्त्री। इक्षुरसनिष्काशनयन्त्रे। आक् माड़ा कल। वै.निघ.।

इक्षुमद्यम्। क्ली। इक्षुविकारजमद्ये। "इक्षुदण्डं मरीचञ्च वदरञ्च तथा दधि। शेषे तु लवणं दत्त्वा इक्षुमद्यं प्रकीर्त्तितम्॥" वै.निघ.।

इक्षुमूलम्। क्ली। इक्षोर्मूले। आकेर मूल। राज.। च.सू.४अ.।

इक्षुमेदः। पुं। इक्षुवाटिकायां। आक्‌वाड़ी।

इक्षुमेहः। पुं। तन्नामककफजमूत्रदोषविशेषे। लक्षणं—"इक्षोरसमिवात्यर्थं मधुरञ्चेक्षुमेहतः।" मा.नि.। [मेचौ। अयं पुण्ड्रकभेदः। रा.नि.व.१४।

इक्षुयोनिः। पुं। पुण्ड्रकेक्षौ। करङ्कशालिना-

इक्षुरः (कः)। पुं। कोकिलाक्षे। कुलेखाड़ा। हिं तालमाखना। र.मा.भा.उ.ख.। "द्राक्षा सेक्षुरगोक्षुराश्च महती।" अत्र तद्बीजं ग्राह्यम्। सा. कौ.महाकामेश्वरमोदके। च.सू.४अ.। इक्षौ। गोक्षुरके। श.र.। काशतृणे। केसे। स्थूलशरे। रा. नि.व.८। "क्षयकुष्ठेक्षुरकयोः।" सु.चि.२६अ.। भा.म.३भ.मू.घा.चि.। शरतृणे। काशतृणे। रा. नि.व.८। कृष्णेक्षौ। रा.नि.व.१४। [ध्व.भ.चि.।

इक्षुरबीजम्। क्ली। कोकिलाक्षबीजे। भैष.।

इक्षुरसः। पुं। काशतृणे। भा.पू.१भ.गु.व.। इक्षोःरसे। आकेर रस। तद्गुणाः—स मधुरः वातं वर्द्धयति शीतवीर्य्यत्वात्। सु.सू.४०अ.। "इक्षो रसो गुरुः स्निग्धो बृंहणः कफमूत्रकृत्। वृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसः सरः।" चारपाणिः। एतदग्रभागरसगुणाः—"सोऽग्रे सलवणः। मध्यकाण्डेषु माधुर्य्यमिक्षोर्मूलाग्रपर्व्वसु। माधुर्य्ये साम्ललवणं विदाही तेन यान्त्रिकः।" हेमाद्रौ.चारपाणिः। दन्तपीड़ितरसगुणाः—दन्तपीड़ितः शर्करासमः दाहघ्नत्वादिभिर्गुणैः। वा.टी.हेमा.। यन्त्रपीड़ितरसगुणाः—"विदाही गुरुर्विष्टम्भी च।" वा.टी.हेमा.। "यन्त्रेण पीड़ितरसः कथितो गुरुश्च वृष्यः कफञ्च कुरुतेऽथ सुशीतलश्च। पाके विदाहिबलकृच्च सुशोभनश्च संसेवितो रुधिरपित्तरुजं निहन्ति॥ दन्तैर्निपीड़ितरसो रुचिकृद्गुरुश्च सन्तर्पणो बलकरः कफकृच्छ्रमघ्नः। विष्टम्भकारिरुधिरस्य तथैव पित्तदोषं निहन्ति सकलं वमनञ्च शोषम्॥" अथ पर्य्युषितरसगुणाः—रसः पर्य्युषितो नेष्टस्तापहैकमते गुरुः। कफपित्तकरः शोषी भेदनो वाय मूत्रलः॥ अथ पक्वरसगुणाः—पक्वो गुरुरतः स्निग्धः सुतीक्ष्णकफवातहा। पित्तघ्नोऽपि विशेषेण गुल्मातीसारकासहा॥ अथ फाणितरसगुणाः—फाणितं गुर्व्वभिष्यन्दि बृंहणं शुक्रलञ्च तत्। पित्तघ्नञ्च श्रमहरं रक्तदोषनिसूदनं॥" अत्रि.१०अ.। पीयूषोपमितस्त्रिदोषशमनः स्याद्दन्तनिष्पीड़ितः। यन्त्रजो रसः स्तोकं वान्तिहरः वातजननः जाड्यकरः प्रतिश्यायकरश्च। तथा पर्य्युषितः स कफवातकरश्च भवति। पक्व इक्षुरसः स्निग्धः कफवातघ्नः अतिगुरुः अविपाकेन विदाही। रा.नि.व.१४।

इक्षुरसक्वाथः। पुं। इक्षुगुड़े। हे.च.।

इक्षुरसविकारः। पुं। इक्षुगुड़े। इक्षुरसस्य समलत्वंशाद्दोद्भिन्नविकार फाणितगुड़मत्स्यण्डिकाशर्कराभेदात्पञ्चविधः। गुणाः—"क्षतक्षीणहिता वृष्या रक्तपित्तानिलापहाः। मत्स्यण्डिकाः खण्डसिताः क्रमेण गुणवत्तराः॥" वा.टी.हेमा.।

इक्षुरसशुक्तम्। क्ली। इक्षुरसेन सतैलेन कन्दशाकफलैराश्रतमस्तां गतमिक्षुरसशुक्तम्। प.प्र. १ख.। गुणाः—गुरु अनभिस्यन्दि च। सु.सू.४५अ.।

इक्षुरालिका। स्त्री। इक्ष्वालिकायाम्। आनाखू। रत्ना.। च.चि.२अ.बृंहणीवर्ग्यां।

इक्षुवल्लकी (री) (ल्ली)। स्त्री। कृष्णक्षीरविदार्य्याम्। काल भूँइकुमड़ा। रा.नि.व.७।

इक्षुवाटिका (टी)। स्त्री। पुण्ड्रकेक्षौ। पूँड़ि आख। करङ्कशालीक्षौ। रा.नि.व.१४।

इक्षुविकृतिः। स्त्री। खण्डे। खाँड़। रत्ना.।

इक्षुविदारिका (री)। स्त्री। भूमिकुष्माण्डे। प.मु.। [गु.व.।

इक्षुवेष्टः (लः)। पुं। मुञ्जतृणे। भा.पू.१भ.

इक्षुशाकट(किन)म्। क्ली। इक्षुक्षेत्रे।

इक्षुसारः। पुं। इक्षुगुड़े। आखेर गुड़। रा.नि.व.१८।

इत्त्वूरक(वीज)म् । क्ली । कोकिलाचवीजे । কুলিয়াখাড়ার বীজ। योगरत्न.केशरपाके महाकामेश्वरमोदके च ।

इक्ष्वाकुः । स्त्री । A bitter gourd emitic. तिक्ततुम्ब्याम् । তিৎলাউ । प.मु.सु.सू.४३ ग्र.। भा.म.४भ.यो.व्या.चि. । 'इक्ष्वाकुवीजदन्ती ।' See कटुतुम्बी ।

इक्ष्वादः । त्रि । इक्षुभक्षके । च.चि.२ग्र. ।

इक्ष्वारिः (कः) । पुं । काशतृणे । रा.नि.व.८ मद.व.१ ।

इक्ष्वालिः (कः)(का) । पुं,स्त्री । काशतृणे । मद.व.१। र.मा.। वै.निघ.कास.चि.इक्ष्वाद्यवलेहे । इक्षुविशेषे । আনাখু, খাগড়া इति केचित् । वनखड़िकायां । च.द.तथा.सि.यो.यक्ष्म.चि.बलाद्यघृते । 'इक्ष्वालिका विषग्रन्थि ।'

ई

ईज्या । स्त्री । भूमौ । गवि । वै.निघ. ।

ईड़ा । स्त्री । नाड्याम् । নাড়ীবিশেষ ।

ईड्या । स्त्री । भूम्यामलक्याम् । वै.निघ.ज्व.चि. । "गोपीड्यामलकी ।"

ईतिः । स्त्री । डिम्बे । मे. । राज्योपद्रवविशेषे । सा षड्विधा—अतिवृष्टिरनावृष्टिः शलभा मूषिकाः शुकाः। अत्यासन्नाश्च राजानः षड़ेते ईतयः स्मृताः॥

ईप्सितफलः । पुं । नारिकेलवृक्षे । वै.निघ. ।

ईरिणम् । क्ली । ऊषरक्षेत्रे । লোণা জায়গা । "ईरिणं तूषरे ।" मे.णत्रिकं ।

ईरितः । त्रि । कम्पिते । क्षिप्ते । अम. ।

ईर्मम् । क्ली । व्रणे । হারা.। चने । घा । अम.।

ईर्व्वारुः । पुं,स्त्री। कर्कट्याम् । কাঁকুড় গাছ । त्रपुष्याम् । फुटी । श.र. ।

ईर्व्वारुशुक्तिका । स्त्री । खर्म्मूज इति प्रसिद्धफललतायाम् । वै.निघ. ।

ईर्ष्यकः । पुं। दृष्टियोन्याख्यक्लीवे । लक्षणं—"दृष्टा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते । ईर्ष्यकः स तु विज्ञेयो दृष्टियोनिश्च स स्मृतः ॥" सु. ।

ईशः । पुं । पारदे । अञ्जनरसे । र.सा.सं. । पञ्चवक्त्ररसे । वै.निघ.ज्व.चि. ।

ईशलिङ्गिनी (ङ्गी) । स्त्री । भवलिङ्गीलतायां । पञ्चगुलि इति पाश्चात्ये। भा.म.४भ.यो.व्या. चि. । "विष्णुकान्तेशलिङ्गिनी ।"

ईशा । स्त्री । लाङ्गलदण्डे । मे.शद्विकं ।

ईशादन्तः । पुं। हस्तिदन्ते । श.र.। (न्तः,न्ती) उदग्रदन्तिनि । हे.च. । त्रिका. ।

ईशानः । पुं । शमीवृक्षे । रा.नि.व.२३ ।

ईशानवायुः । पुं । तद्दिग्भववाते । स च कटुकः । वै.निघ. ।

ईशाना (नी) । स्त्री । शमीवृक्षे । रा.नि.व.८।

ईशावसः । पुं। कर्पूरभेदे । गुणाः—"भेदी हृष्यो मदापहः । अतिशुभोन्मादतृष्णाश्रमकासक्लमिच्छयान् । खेदश्चैवाङ्गदाहश्च नाशयेत् ।" वै.निघ. ।

ईशिरः । पुं । अग्नौ । त्रिका. ।

ईश्वरः । पुं । पारदे । भैष.ध्व.भ.चि.चन्द्रोद. मकरध्वजे । पित्तले । रस.र.एकादशायसे ।

ईश्वरमल्लिका । स्त्री । वकवृक्षे । वै.निघ. ।

ईश्वरमूलकः । पुं,क्ली। तरुभेदे । ঈশের মূল। भैष.कुष्ठ-चि.कन्दर्पसारतैले ।

ईश्वरी । स्त्री । बन्ध्याकर्कोटकीलतायाम् । वै. निघ.२भ.वा.व्या.महाविषगर्भतैले । लिङ्गिन्याम् । जीवन्त्याम् । नागदमन्याम् । नाकुलीकन्दे । रुद्रजटायाम् । জটালক্ষা । रा.नि.व.३ ।

ईषः । पुं । आश्विने मासि । अ.टी.भ. ।

ईषत्पाण्डुः । पुं । धूसरवर्णे । अम. ।

ईषदुष्णः । त्रि । कवोष्णे । অল্প তপ্ত । हे.च.। वै.निघ. । [वै.निघ. ।

ईषद्दीर्घम् । क्ली । वातामफले । বাদাম ফল ।

ईषद्वीजा । स्त्री । वेदाना इति ख्यातफलवृक्षे ।
ईषादन्तः । पुं । दीर्घदन्तगजे । हे.च. ।
ईषिका । स्त्री । अक्षिकूटे । गजाक्षिगोलके । तूलिकायाम् । हे.च. ।
ईषिकास्त्रम् । क्ली । अस्त्रविशेषे । येन वासवीऽश्वानां पत्रच्छेदः कृतः । "ईषिकास्त्रं समुत्सृज्य पत्रच्छेदं व्यधादयम् ।" नकुलः १अ. ।
ईषीका । स्त्री । वीरणादिशलाकायाम् ।
ईष्मः । पुं । वसन्तकाले । उणा. ।
ईहा । स्त्री । चेष्टायां । वाञ्छायां । त्रिका. ।
ईहामृगः (वृकः) । पुं । कोके । रत्ना. । कुक्कुरवद्धरिणघातिकपिलवर्णजन्तुविशेषे । নেকড়ে বাঘ । रा.नि.व.१८। (वृकः) । श.र. ।
ईक्षणम् । क्ली । नेत्रे । रा.नि.व.१८ । दर्शने । मे.णत्रिकं ।
ईक्षणिकः । पुं, स्त्री । हस्तरेखाद्यवलोकनेन शुभाशुभकथनजीविनि । গণক ।
ईक्षा । स्त्री । दृष्टौ ।

उ

उकनाहः । पुं । पीतरक्तवर्णघोटके । हे.च.। लक्षणं—"रक्तपीतकषायोत्थवर्णजो यस्य दृश्यते । उकनाहः स विख्यातो वर्णो वाहस्य देहजः ॥" ज.द.३अ. ।
उकुणः । पुं । शिरःकीटे । মাথার উকুন ।
उक्लेदः । पुं । वमौ ।
उख(ष)रम् । क्ली। क्षारभूमौ । यत्रोप्तं वीजं न रोहति । क्षारमृत्तिकायाम् । সোরা । वै.निघ. । रा.नि.व.२ ।
उख(ष)रजम् । क्ली । पांशुलवणे । সোরা । रोमकनाम्नि अयस्कान्तभेदे । लवणे । रा.नि.व.२०।
उखर्व्वलः । पुं । तृणविशेषे । हिं उखल । गुणाः—बलदः रुचिजनकः । पशूनां सदा हितश्च । रा.नि.व.८ ।
उखलः । पुं । उखर्व्वलतृणे । रा.नि.व.८ ।
उखा । स्त्री । रन्धनस्थाल्याम् । রান্ধিবার হাঁড়ী । हिं भरथियाभाहृ । अम.। [कावाव । अम.।
उख्यः । त्रि। उखासंस्कृते,मांसादौ । हिं हाण्डि-
उग्रम् । क्ली । वत्सनाभनामकविषे । रा.नि.व.६। पुं। शोभाञ्जनवृक्षे । श.च.। पृष्ठग्रन्थौ । त्रि । उत्कटे । कटुके । तीक्ष्णे । रौद्रे । मे. ।
उग्रकाण्डः (कः) । पुं । कारवेल्लके । করেলা গাছ । रा.नि.व.३,मद.व.७। काण्डवल्ल्यां । See काण्डवल्ली ।
उग्रगन्धः । पुं । शुक्लरसोने । रा.नि.व.७ । कट्फलवृक्षे । रा.नि.व.६ । रक्तरसोने । अर्जकवृक्षे, क्षुद्रतुलसीवृक्षे । रा.नि.व.१०। रसोनमात्रे । भा.पू.१भ.हृ.व. । चम्पकवृक्षे । श.च. । क्ली । हिङ्गुनि । रा.नि.व.६ । त्रि । उत्कटगन्धयुक्ते ।
उग्रगन्धा (न्धिका) (न्धी) । स्त्री । वनयमान्याम् । বনযওয়ান । भा.पू.१भ.,मद.व.२ । अजमोदायाम् । রান্ধুনী । भा.पू.१भ.। वचायां। বচ । प.मु.,रा.नि.व.६,भा-अने.,वै.निघ.सा.ज्व. अर्कादौ । महाभरीवचायाम् । हिं कुलिञ्जन । भा.पू.१भ.हृ.व. । इयं सुगन्धवचाप्युच्यते । छिक्किकायां । হেঁচতা । मे. । अजगन्धायां । रा.नि. व.४ । (-गन्धिका) अजमोदायां । বন যওয়ান । रा नि.व.६। सि.यो.यक्ष्म-चि-एलादिमन्थे । (-गन्धी) शुक्लरसोने । मद.व.७ । [हे.च. ।
उग्रनासिकः । त्रि। दीर्घनासिके। নেকো।
उग्रपत्रकः । पुं । महानील्याम् । वै.निघ. ।
उग्रभा । स्त्री । गोणसवल्ल्याम् । वै.निघ. ।
उग्रवीर्य्यम् । क्ली । हिङ्गुनि । रा.नि.व.६ ।
उग्रा । स्त्री । धन्याके । ধনে । रत्ना.। यमान्यां । रा.नि.व.४ । संविदामञ्जर्य्याम् । গাঁজা । अचि. । वचायाम्। भा.म.१भ.कर्णकज्व.चि.। "कटुत्रिकोग्राघनकुष्ठलोभिः ।" वै.निघ.उ.चि.वचादिचूर्णे, कुटजलेहे । छिक्किकायाम् । হেঁচতা । हे.च. ।
उङ्कुणः । पुं । उत्कुणे । উকুণ । श.मा. ।

उचितः । त्रि । अभ्यस्ते । परिमिते । मे.तत्रिकं ।

उच्चः । पुं । नारिकेलवृक्षे । रा.नि.व.११ । सरलदेवदारौ । त्रि । उन्नते ।

उच्चटः । पुं । वह्नौ । वै.निघ. ।

उच्चटा । स्त्री । (Abrus precatorius.) स्वनामख्यातक्षुपे । ওকড়া,উচ্চটা মূল,কুঁচ গাছ इति च प्रसिद्धे । तैं गुंड़तुंगमुले । रत्ना. । महाभल्लातकगुडे । लशुनभेदे । हे.च.सु.चि.२६अ. । रक्तगुञ्जायाम् । रा.नि.व.३,वै.निघ.२भ.त्रय-चि. इत्यादिमोदके । भूधात्र्याम् । ভূঁই আম্‌লা । रा.नि.व.५ । नागरमुस्तायाम् । रा.नि.व.६ । श्वेतगुञ्जायां । "श्वेतगुञ्जोच्चटा प्रोक्ता ।" भा.म.१भ.गु.व. । तृणविशेषे । निर्विषी वा চেঁচুয়া । अ.टी.भ.। [क्ली । चिञ्चोटकपत्रे ।

उच्चटापत्रः । पुं । क्षुद्रतालीशपत्रे । वै.निघ. ।

उच्चटाफलम् । क्ली । रक्तगुञ्जायां । লালকুঁচ, ওকড়া ফল । भैष.कुष्ठ-चि.महाभल्लातकगुडे ।

उच्चटामूलम् । क्ली । चिञ्चोटकमूले । চেঁচকোর মূল, ওকড়ার মূল । सु.चि.२६अ. ।

उच्चतरुः । पुं । नारिकेलवृक्षे । रा.नि.व.११ ।

उच्चन्द्रः । पुं । निशाचतुर्थप्रहरे । श.र. ।

उच्चयः । पुं । परिधानवस्त्रग्रन्थौ । हे.च.। राशौ।

उच्चलम् । क्ली । मनसि । हे.च. ।

उच्चललाटा (टिका) । स्त्री । महत्वायां । हारा. । उच्चललाटविशिष्टायाम् । त्रिका. ।

उच्चाटनम् । क्ली । उत्खातने । উদাসকরণ। षट्कर्मान्तर्गताभिचारकर्मविशेषे । तन्त्रम् ।

उच्चारः । पुं । विष्ठायाम् । रत्ना. ।

उच्चिङ्गटः । पुं । उच्चिटिङ्गनामकीटे । উচ্চিংড়ে । दृणगड़मत्स्ये । मे.टचतुष्कं ।

उच्चिटिङ्गः । पुं । A sort of cricket. उच्चिङ्गटे । উচ্চিংড়ে । रा.नि.व.१९ । वातप्रकृतिकीटविशेषे । लक्षणम्—"हृष्टलोमोच्चिटिङ्गेन सम्भलिङ्गो भृशार्त्तिमान् । दष्टः शीतोदकेनैव सिक्तान्यङ्गानि मन्यते ॥" तद्दष्टे वातजन्यरोगा भवन्ति । सु.कल्प.८अ. ।

उच्चूलः । पुं । ध्वजोर्द्धमुखकूर्चे । हे.च. ।

उच्चैःश्रवाः । त्रि । वधिरे । पुं । घोटकभेदे ।

उच्छादनम् । क्ली । गन्धद्रव्येन शरीरमार्ज्जने । अ.टी. । [क छाती । भागवते ।

उच्छिलीन्ध्रम् । क्ली । गोमयच्छत्राके । কোঁড়-

उच्छिष्टमोदनम् । क्ली । सिक्थके।रा.नि.व.।

उच्छीर्षकम् । क्ली । उपधाने । তাকিয়া । हला. । पुं । शय्यादोषविशेषे । सु.चि.३६अ. ।

उच्छूनः । त्रि । स्फीते । वर्द्धिते ।

उच्छेदः । पुं । उन्मूलने ।

उच्छ्र(च्छ्रा)यः । पुं । उच्चतायां । अम. ।

उच्छ्रितः । पुं । सरलदेवदारुवृक्षे । वै.निघ. ।

उच्छ्वसितः । त्रि । प्रफुल्ले, विकसिते । हे.च.।

उच्छ्वासः । पुं । प्राणने । मे.सत्रिकं । अन्तर्मुखश्वासे । हे.च. ।

उज्जासनम् । क्ली । मारणे । अम. । [म. ।

उज्जृम्भितः । त्रि । प्रफुल्ले । क्ली। चेष्टायां । अ-

उज्ज्वल(न)म् । क्ली । सुवर्णे । रा.नि.व.१३ । पुं । धान्यभेदे । च. । [त्रि. ।

उज्ज्वला । स्त्री । कुमरिचे । लঙ্কামরিচ । अ-

उज्झटा । स्त्री। भूम्यामलक्यां । ভূঁই আম্‌লা।

उञ्छः । पुं । उञ्छशिले । जटा. ।

उटः । पुं । शुष्कतृणे । वै.निघ.। [वै.निघ. ।

उटजा । स्त्री । पानीयशालायां । पर्णशालायां।

उटिः(ड़िः)का । पुं,स्त्री। नीवारधान्ये । উড়ি ধান । मद.व.१० । गुणाः—"उड़िका तत्र कथिता बल्या श्लेष्मविवर्द्धनी ।" राज. ।

उट्टङ्कम् । क्ली । मूत्रे । अस्त्रभेदे ।

उड़ु । क्ली । उदके । अ.टी.भ. ।

उड़ुपतिः । पुं । सोमलताभेदे । सु.चि.२९अ। See सोमः । चन्द्रे । [ड़ । मद.व.३ ।

उड़ुपप्रिया । स्त्री । कमलिन्यां । পদ্মের ঝা-

उड़ुम्बरः । पुं, क्ली । उदुम्बरवृक्षे । যজ্ঞডুমুর গাছ । अम. । कुष्ठरोगविशेषे । मे. । लक्षणम्—

"उडुम्बरफलाभासं कुष्ठमौडुम्बरं वदेत् ॥" मा. नि.। ताम्रे। प.मु.। कर्षमाने (२ तो.)। प.प्र.।

उडुम्बरदला। स्त्री। दन्तीवृक्षे। रा.नि.व.६।

उडुम्बरपर्णी। स्त्री। दन्तीवृक्षे। श.च.।

उड्डामररसः। पुं। पित्तगुल्माधिकारे रसः। पाठः—"शुद्धसूतं समं गन्धं सूतांशं म्लताम्रकं। पञ्चांशं शाकवृक्षस्य द्रवैर्मर्द्यं दिनद्वयम्। सर्वाण्डो-र्थैर्द्रवैश्चाग्नि रुद्धा गजपुटे पचेत्। पञ्चधा भूधरे वाथ चूर्णं जैपालतुल्यकं। त्रिगुञ्जं भक्षयेच्चाज्यैः पित्तगुल्मप्रशान्तये। द्राक्षाहरीतकीक्काथमनुपानं प्रकल्पयेत् ॥" रस.र.गुल्म-चि.। পারা ১ ভ. গন্ধক ১ ভ. তাম্র।• সিকি ভ.। শেগুণ বা শিরীষ এবং নাগেশ্বরের রস মর্দনীয় দ্রব্যের পঞ্চমাংশ দ্বারা দুই দিন মর্দনপূর্ব্বক গজ-পুটে ভূধরযন্ত্রে পাক করিয়া দিবাভাগে চূর্ণ কর। শীতল হইলে পরে ঔষধ সমভাগ জয়-পাল চূর্ণের সহিত মিশ্রিত করিয়া ৩ কুঁচ ঘৃতে মাড়িয়া সেবন করিবে।

उड्डः(पुष्पः)। पुं, क्ली। जवापुष्पवृक्षे। जवा-पुष्पे। वै.निघ.। [চীনদেশীয় গোলাপ। Wil.

उड्रः। पुं, क्ली। जपापुष्पवृक्षे। जवापुष्पे। জবা,

उण्डुकः। पुं। मलाशये। सु.शा.४अ.। स चा-न्त्रदेशस्थः शोणितकिट्टप्रभवः। सु.शा.४अ.। "फु-स्फुसस्यावरणौ द्वे ऊर्द्धतस्तद्वयं तयोः। उण्डुकः शैशवे मध्ये मध्यान्ते महतां न हि ॥" अत्रि.।

उत्कटः। पुं। (Sachharum sara.) शर-काण्डे। শর গাছ। रा.नि.व.८। चुद्रचुपविशेषे। ওকড়া, কালিয়াবিষর। प.मु.। इचौ। रक्ते-चौ। रा.नि.व.१४। मदे। श.र.,भैष.ने.रो.चि.। मत्तहस्तिनि। हारा.। क्ली। Woody cassia or its bark. वृक्षभेदे। लताविशेषे। শালসা। Wil. गुड़त्वचि। দারচিনি। प.मु.,रा.नि.व.६, हारा.। गण्डकुसुमे। हारा.। तेजपत्रे। अ.टी. भ.। त्रि। उत्ताले। तीव्रे।

उत्कटा। स्त्री। सिंहलीपिप्पल्याम्। বন পি-পুল। हिं श्वेतवुघची। मं राणपिंपलि, उटक-टारा। गुणाः—"सैंहली कटुकोष्णा च जन्तुघ्नी दीपनी परा। कफश्वाससमीरार्त्तिशमनी कोष्ठशो-धनी ॥" रा.नि.व.६। "उत्कटा रुचिदा चौष्णा तिक्ता कृष्यास्युदाहृता। मूत्रकृच्छ्रं पित्तवातं मेहं तृष्णाञ्च हृद्रुजं। विस्फोटकं नाशयति वीजमस्यास्तु शीतलं। वृष्यं तृप्तिकरञ्चैव मधुरञ्च प्रकीर्त्तितम् ॥" वै.निघ.। [निरासनशिलौ। सु.चि.६अ.।

उत्कटा(टुका)सनम्। क्ली। कठिनासने।

उत्कण्टकम्। क्ली। ওকড়া इति ख्याते वृक्ष-भेदे। च.चि.३अ.। [यां। अम.।

उत्कण्ठा। स्त्री। इष्टलाभे कालक्षेपासहिष्णुता-

उत्कता। स्त्री। (Pothos officinalis.) गजपिप्पल्याम्। श.च.। उत्कण्ठायाम्।

उत्करः। पुं। रक्तेचौ। রক্ত ইক্ষু। रा.नि.व. १४। धान्यादिराशौ। अम.। उत्कारिकायाम्। পুল্টিশ্। भैष.शूल.चि.।

उत्कर्णः। पुं। वायुजन्यास्वरोगे। अत्रास्य क-र्णपुच्छगात्राणि लब्धीभवन्ति। "कर्णौ लब्धौ तथा पुच्छं लब्धं गात्रमकिञ्चनं। वातात्मकेन वाहस्य भवेदुत्कर्णकेन हि ॥" ज.द.५४अ.।

उत्कर्षणम्। क्ली। अधोगतस्य ऊर्द्धाकर्षणे। सु. चि.१५अ.। [कलिकायाम्। কুঁড়ি। त्रिका.।

उत्कलिका। स्त्री। उत्कण्ठायाम्। हारा.।

उत्काका। स्त्री। प्रतिवर्षप्रसूतायां गवि। श.च.।

उत्कारिका। स्त्री। रोटिकायां। রুটী। वा. टी.हेमा.। यवमाषैरण्डवीजातसीकुसुम्भवीजादिभिः पिष्टखिन्नैर्लप्सिकाकृतिर्यः खेदनीपायः स उत्का-रिका। পুল্টিশ। अरुणः,वा.सू.१७अ.। गुटिका-याम्। বড়ি। सु.चि.२६अ.। लप्सिकायां। কাই, মোহনভোগ। सु.चि.१४अ.। [च.द.यक्ष्म.चि.।

उत्कासः (नम्)। पुं,क्ली। कासे। উৎকাসি।

उत्कुञ्चिः (का)। पुं, स्त्री। (Nigela in-dica.) स्थूलकृष्णजीरके। মোটা কৃষ্ণজীরে। रवा.। कुलिञ्जनवृक्षे। মহাভরী বচ।

उत्कुटम्। क्ली। उत्तानशयने। চিৎ হইয়া শয়ন। हारा.।

उत्कुणः। पुं। केशकीटे। উকুণ। है.च.।

उत्कूटः। पुं। छत्रवारणे। हारा.।

उत्कोठः । पुं । कोठरोगभेदे । लक्षणं यथा — "असम्यग्वमनोदीर्णपित्तश्लेष्मानिलग्रहैः । मण्डलानि सकण्डूनि रागवन्ति बहूनि च । सानुबन्धस्तु स प्रोक्तस्तूत्कोठ इति कथ्यते ।" भा.म.४भ.शी.पि.चि.।

उत्क्रोशः । पुं । पेचके । वै.निघ. । मत्स्यघातिपक्षिणि । माछराङा पाखी । रत्ना. । गुणाः— रक्तपित्तघ्नः शीतलः स्निग्धः वृष्यः वातकरः रसे पाके च मधुरः । सु.सू.४६अ. । कुररपक्षिणि । कर्कटे पाखी । हला. । [See क्लिष्टवर्त्म ।

उत्क्लिष्टवर्त्म । क्ली । क्लिष्टवर्त्मनामरोगविशेषे ।

उत्क्लेशः (दः) । पुं । शरीरस्थदोषस्य उपस्थितवमनत्वमिव । वमनेच्छायां । च.द.ज्व.चि. । "उत्क्लेशश्चोपशाम्यति ।" वमनोपस्थितिरिव । भा.म.१भ श्लेष्म.ज्व.चि. । "गौरवं शीतमुत्क्लेशः ।" "उत्क्लिश्यान्नं न निर्गच्छेत्प्रसेकष्ठीवनेरितं । हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्द्दिशेत् ॥" सु.शा.४अ.।

उत्क्लेशकः । पुं । अग्निप्रकृतिकीटविशेषे । तेन दष्टे पित्तजन्यरोगा भवन्ति । सु.कल्प.८अ. ।

उत्क्लेशनवस्तिः । पुं, स्त्री । वस्तिभेदे । यः पूर्व्वम् एरण्डवीजादिकल्केन उत्क्लेशनार्थं दीयते । "दद्यादुत्क्लेशनं पूर्व्वम्—एरण्डवीजं मधुकं पिप्पली सैन्धवं वचा । हवुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥" वै.निघ.वस्तिविधिः । [श.च. ।

उत्खला । स्त्री । मुरानामगन्धद्रव्ये । मूरामांसी ।

उत्तः । त्रि । आर्द्रद्रव्ये । ভিজা দ্রব্য । अम. ।

उत्तप्तम् । क्ली । शुष्कमांसे । त्रि । तप्ते । स्नाते । मे. ।

उत्तमः । त्रि । उत्कृष्टे । पुं । अश्वविशेषे । लक्षणं — "अश्वाश्च महासाराः संग्रामे चैव पूजिताः । अपि शस्त्रहताङ्गाश्च नैव मुञ्चन्ति सादिनं ॥" ज.द.३अ. ।

उत्तमफलिनी । स्त्री । (Aclepias rasea.) दुग्धिकायाम् । ছোট থিরুই । प.मु. ।

उत्तमवारि । क्ली । तण्डुलोदके । च.द.मधुकादौ । उत्कृष्टजले ।

उत्तमवैद्यः । पुं । कृतसाङ्गवेदाध्ययने वैद्ये ।

उत्तमा । स्त्री । दुग्धिकायाम् । ছোটথিরুই । प.मु.,रत्ना, । मनःशिलायाम् । प.मु. । भूम्यामलक्याम् । वै.निघ. । त्रिफलायां । भा.म.१भ.सन्निकज्व.चि. । "शटीमुस्तकरुत्तमा ।" मुस्तायां । है.च. । तन्नामकशूकदोषविशेषे । "मुद्गमाषोपमा रक्ता पिडका रक्तपित्तजा । उत्तमैषा तु विज्ञेया शूकाजीर्णनिमित्तजा ॥" सु.नि.शू.दो.चि.१४अ. ।

उत्तमाङ्गम् । क्ली । मस्तके । रा.नि.व.१८ । त्रि । उत्कृष्टाङ्गे ।

उत्तमारणी । स्त्री । इन्दीवरालतायाम् । इन्द्रचिर्भिट्यां । रा.नि.व.३ । इन्द्रवारुण्याम् । वां.उ.३७अ. । योधामल्लिकायां । যুঁই । सु.चि.६अ. ।

उत्तरकालः । पुं । भाविकाले ।

उत्तरङ्गम् । क्ली । द्वारस्योपरितिर्य्यक्काष्ठविशेषे । "उत्तरङ्गं मतं तिर्य्यक् द्वारस्योपरि दारु यत् ।" हला. ।

उत्तरवस्तिः । स्त्री । निरूहोत्तरदेयवस्तौ । নিরূহের পর দেয় পিচ্কিরি । निरूहादुत्तरं दानादुत्तरवस्तिसंज्ञा । तत्र नेत्रपरिमाणं १२ अङ्गुलम् । तच्छिद्रं मालतीवृन्तच्छिद्रपरिमितं । स्नेहमात्रा पञ्चवर्षीये बाले अर्द्ध प. तदूर्द्ध्वं १ प. । स्त्रीणाञ्च कनिष्ठिकास्थूलं दशाङ्गुलं नेत्रं । स्नेहमात्रा च २ प. । तदुक्तं — "द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकं । मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमं । बालानां पञ्चवर्षाणामथो मात्रार्द्धपालिकी । तदूर्द्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः । अथास्थापनशुद्धस्य तृप्तस्य स्नानभोजनैः । स्थितस्य जानुमात्रेण चापि स्निग्धशलाकया । स्निग्धया मेढ्रमार्गञ्च ततो नेत्रं नियोजयेत् । शनैः शनैर्घृताभ्यक्तं मेढ्ररन्ध्राङ्गुलानि षट् । ततश्च पीडयेद्वस्तिं शनैर्नेत्रञ्च निर्हरेत् । ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः । स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्य्याद्दशाङ्गुलं । शनैर्निष्कम्पमाधेयं सूक्ष्मं नेत्रं विचक्षणैः । योनिमार्गेषु नारीणां स्नेहमात्रां द्विपालिकीं । उत्तानायै स्त्रियै दद्यादूर्द्ध्वजान्वै विचक्षणः । अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते । भूयो वस्तिर्विधातव्यः संयुक्तैः शोधनैर्गणैः । फलवर्त्तिं निदध्याद्वा योनिमार्गे दृढां भिषक् । मूत्रैर्विनिःसृतां स्निग्धां शोधनद्रव्यसंयुताम् । दह्यमाने तथा वस्तौ दद्याद्वस्तिविशारदः ॥" शार्ङ्ग. । पलार्द्धमुत्तरो वस्तिः मात्रावस्तिः पलद्वयं । स्थापनास्नेहवस्ती च द्वावेतौ षट्पल-

न्तितौ। पिच्छावलिर्भवेत्तस्य: पादीन: कीर्त्तितीऽपर: ॥ आनन्दखान:।

उत्तरवायु: । पुं। तद्दिग्भवमारुते। स च शीत: स्निग्ध: दोषप्रकोपकर: क्लेदन: प्रकृतिस्थानां बलद: मृदु: चतक्षीणविषार्त्तानां विशेषेण गुणकरश्च। मद.व.२३।

उत्तरवारुणी । स्त्री। इन्द्रवारुण्याम्। शृगालशशा। र.सा.सं.वैक्रान्तमारणे। भैष.कुष्ठ चि.। "शिला चोत्तरवारुणी।" ज्व.चि.कुलवधूरसे। उत्तमारणीति वा.उ.३७अ.,वै.निघ.२भ.कास-चि. वारुणीपञ्चधूमे।

उत्तरायणम् । क्ली। मकरसंक्रान्तितो मिथुनसंक्रान्तिसमाप्तिपर्य्यन्तकाले, सवितुरुत्तरमार्गगतिरूपे वा काले। तच्चादानं जानीयात्, यतस्तदा नृणां प्रतिदिनं सारमादत्ते, आदित्यपवनयोः भुव: सौम्यगुणहरत्वात्। वा.सू.३अ.। [अम.।

उत्तरासङ्ग: । पुं। उत्तरीयवस्त्रे। উড়ুনি।

उत्तरिणी । स्त्री। उत्तमारण्याम्। गुणा:— "उत्तरिणी तु कटुका शीता नेत्र्या लघु: स्मृता। उष्णा स्निग्धा सारका च तुवरा व्रणरोपणी। कासव्रणकृमिश्वासज्वरपित्तप्रमेहकान्। कफकुष्ठप्रलापांश्च वातं तन्द्राञ्च दद्रुकं। चयकासं मूत्रकृच्छ्रं योनिरोगञ्च शोथकं। नाशयेदिति सम्प्रोक्ता सुखप्रसवकारिणी। शाकास्तस्याश्चोष्णवीर्य्या तिक्ता कृम्यर्शःकुष्ठहृत्। कफवातहरा शीता फलं तस्या: पटु स्मृतं। तिक्तमुष्णञ्च कटुकं लघु चाग्निप्रदीपकं। पित्तकोपकरञ्चैव शिवदं विषनाशनम्॥" वै.निघ.।

उत्तान: । त्रि। ऊर्द्ध्वास्यशयिते। मे.नत्रिकं। क्ली। जले। हे.च.।

उत्तानक: । पुं। (Cyperus.) मुस्ताभेदे। नागरमुथा। उच्चटायां। চেঁচুয়া, निर्विषी। र.मा.। रत्ना.।

उत्तानपत्र:(क:) । पुं। रक्तैरण्डे। रा.नि. व.८। भा.पू.१भ.गु.व.। मद.व.१। श्वेतैरण्डे। वै.निघ.। [शौ। अम.।

उत्तानशय: । पुं। स्तन्यपायिशिशौ। अतिशि-

उत्तानशायी । त्रि। उत्तानशयिनि। वै.निघ.।

उत्ताप: । पुं। तेजसि। उष्णतायाम्।

उत्तापनम् । क्ली। उष्णताकरणे।

उत्तार: । पुं। वमने। [ल्कटे।

उत्ताल: । पुं। मर्कटे। मे.लत्रिकं। त्रि। उ

उत्तुण्डकी । स्त्री। करञ्जके। वै.निघ.।

उत्तुण्डित: । त्रि। निर्गते। सु.चि.२अ.।

उत्तुष: । पुं। लाजायाम्। थई। हारा.।

उत्तेजि(रि)तम् । क्ली। अश्वस्य मध्यवेगगतिविशेषे। इयं चतुर्थपञ्चमगति:। "उत्प्लुत्योत्प्लुत्य गमनं कोपादिवाखिलै: पदै:।" हे.च.।

उत्तोलनम् । क्ली। उत्क्षेपणे।

उत्थानम् । क्ली। मलोत्सर्गे। रत्ना.। मलरोगे। पौरुषे। हर्षे। हे.च.मे.नत्रिकं।

उत्थित: । पुं। सरलवृक्षे। रा.नि.व.१२। त्रि। उत्पन्ने। मे.तत्रिकं। [च.।

उत्थिताङ्गुलि: । पुं। चपटे। চাপড়। श

उत्पत: । पुं। पक्षिणि। त्रिका.।

उत्पतनम् (पत्ति:) । क्ली, स्त्री। उत्पत्तौ। ऊर्द्ध्वगमने। मे.नचतुष्कं। जन्मनि।

उत्पल(क)म् । क्ली। Blue lotus. नीलकमले। नीलपद्म। रा.नि.व.१०। सु.सू.३८अ. उत्पलादौ ङ.। च.सू.४अ.। च.द.र.पि.चि.। कुष्ठे। कुड़। तें चेंगलिकोष्टु। प.मु.विश्व.। प्र.कस्तूरीमोदके। र.सा.सं.। च.द.पि.ज्व.लोधादि:। "लोध्रोत्पलामृतापद्म।" लाक्षादितैले। वै.निघ. अर्श:-चि.क्षीवैरघृते। शालूके। प.मु.। स्वनामख्यातकमलजातीयपुष्पे। শুন্দি ফুল,হেলা ফুল। हिं कोञि। मं उत्पल। सु.चि.३अ.। गुणा:— कषायं मधुरं शीतलं पित्तकफरक्तघ्नञ्च। राज.। शीतलं स्वादु रक्तपित्तघ्नं दाहश्रमवमिभ्रान्तिकृमिहरञ्च। रा.नि.व.१०। सामान्येनोत्पलं शीतं स्वादुदाहहरं मतं। रक्तदोषं श्रमं वान्तिं भ्रान्तिं जूर्त्तिं कृमीन् जयेत्॥ द्रव्यगुण:। नीलोत्पले। নীলশুন্দি। सि.यो.र.पि.चि.सिद्धतमयोगे, श्रीकण्ठ:। "वासा कषायोत्पलमृत्प्रियङ्गु।" सि.यो.यक्ष्म-चि.च्यवनप्राशे। वा.सू.१५अ.,अञ्जनादि। पद्मकाष्ठे। "पथ्योत्पलधान्यरोहिणीविश्वै:।" च.द.ज्वराती.चि.घनजलादि:। पुष्पे। मे.। जलजातपुष्पमात्रे। अम.।

उत्पलः । त्रि । मांसशून्ये । हे.च. ।

उत्पलकः । पुं । चेत्रकरीषे । वनघुँटे । प्र. र.सा.सं. रूप्यमारणे । नीलोत्पले । नीलशुन्दि । रा.नि.व.१० ।

उत्पलकन्दः । पुं । शालूके । रत्ना. ।

उत्पलकुष्ठकः । पुं । कुष्ठौषधौ । वै.निघ ।

उत्पलकेसरम् । क्ली । पद्मकेशरे । भैष.चुद्र-रो.चि.कनकतैले । [विशेषे । श.मा. ।

उत्पलगन्धिकम् । क्ली । अतिसुरभिचन्दन-

उत्पलगोपा । स्त्री । श्वेतशारिवायाम् । শ্বেত শ্যামালতা । वै.निघ. ।

उत्पलदलम् । क्ली । तन्नामकास्त्रविशेषे । तच्च छेदने भेदने च प्रयुज्यते। लक्षणं यथा—"उत्पला-ध्यर्द्धधाराख्ये भेदने छेदने तथा ।" अत्रि. ।

उत्पलपत्र(क)म् । क्ली । वैद्यकास्त्रविशेषे छेदने भेदने च । तत्परिमाणं षड़ङ्गुलम् । सु.सू. ८अ. । मद.व.१४अ. । तिलके । धरणिः । कुव-लयपत्रे । हे.च. ।

उत्पलभेद्यकः । पुं । वृत्तायतसमोभयपालि-कर्णबन्धनाकृतिविशेषे । सु.सू.१६अ.। [र.पि.चि.।

उत्पलसृत् । स्त्री । सौराष्ट्रमृत्तिकायां । च.द.

उत्पलशारिवा । स्त्री। श्यामालतायाम् । प. सु.। र.मा.। अनन्तमूले । अम. । भैष.ज्व.भ.चि.।

उत्पलषट्कम् । क्ली । योगविशेषे । "उत्पलं धान्यकं शुण्ठी पृश्निपर्णी बलायुतं । बालबिल्वं गवां तक्रेणाप्युष्णेन च पेषयेत्। तेन लाजकृतं मण्डं देय-मानीय शीतलम् । ज्वरातिसारशमनं हुताशनबल-प्रदम् ॥" हा.अत्रि.३स्था.२अ. ।

उत्पलादिः । पुं । कषायवर्गविशेषे । उत्पलर-क्तोत्पलकुमुदसौगन्धिककुवलयपुण्डरीकानि मधुक-ञ्चेति । गुणाः—"उत्पलादिरयं दाहपित्तरक्तप्रणा-शनः । पिपासाविषहृद्रोगच्छर्द्दिमूर्च्छाहरो गणः" इति । सु.सू.३८अ.। भावप्रकाशे त्वन्यविधः । यथा —"उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा । श्वेताम्भोजञ्च मधुकमुत्पलादिरयं गणः ॥ सुशीतलो हरत्येवं दाहं तृष्णां हृदामयम् । रक्तपित्तञ्च मू-र्च्छाञ्च तथा छर्द्दिमरोचकम् ॥" इति ।

उत्पलिनी । स्त्री । कुमुदषण्डे । শুন্দিফুলের ঝাড় । लघुकमलिन्यां । हिं कोञ्जिकोटी । गुणाः —हिमा तिक्ता रक्तामयघ्नी पित्तघ्नी तापकफका-सतृष्णाश्रमवमिघ्नी च । तस्या बीजगुणाः—स्वादु रुच्यं हिमं गुरु च । रा.नि.व.१० । [मि.लचिकं ।

उत्पली । स्त्री । तुषचर्पट्याम्। তুষের চাপড়া।

उत्पाटः (तः) । पुं। कर्णपालीगतरोगे। तल्ल-क्षणं—"गुर्व्वाभरणसंयोगात्ताड़नाद्घर्षणादति। शो-थः पाल्यां भवेच्छ्यावः दाहपाकरुजान्वितः । रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदो मतः ॥" मा. नि. । कर्णपाल्या उपद्रवे । सु.उ.२०अ. ।

उत्पाटनम् । क्ली । वायुजन्यव्रणवेदनाविशेषे । उन्मूलने । सु.सू.२२अ. ।

उत्पादकः । पुं । शरभे । हे.च. ।

उत्पादशयनः । पुं। टिट्टिभपक्षिणि । हे.च.।

उत्पादिका । स्त्री । उपजिह्विकायाम् । हा-रा.। हिलमोचिकायाम् । शिग्रौ । उपोदिकायां। পূঁই । त्रिका.। देहिकानामकीटविशेषे । श.च. ।

उत्पारः । पुं । गुड़तृणे ।

उत्पाली । स्त्री । आरोग्ये । श.च. ।

उत्पिञ्जलः ।त्रि । भृशमाकुले । हे.च. ।

उत्पिष्टसन्धिः । पुं । सन्धेरुत्पेषणे, अस्थिसन्धौ घर्षणे । तेन सन्धावुभयतः शोफो वेदना च भव-ति । सु.नि.१५अ. । See भग्नम् ।

उत्पीड़ः । पुं । सुरामण्डे । फेने ।

उत्पुटकः । पुं । कर्णपालीगतरोगविशेषे । सु. सू.१६अ. । कर्णपालीवेधोपद्रवे । सु. ।

उत्प्राणः । पुं। श्वासे । वै.निघ.। [न्द्रिये । मे. ।

उत्फुल्लः । त्रि । विकसिते । हे.च.। क्ली । स्त्री-

उत्सङ्गः । पुं। क्रोड़े । रा.नि.व.१८। "क्रोड़मङ्क-स्तथोत्सङ्गः प्राग्भागो वपुषः स्मृतः ।" राज.। व्रण-वस्तुप्रदेशे । सु.चि.१अ. । पर्व्वतमध्यदेशाकारव्रण-बन्धविशेषे । वा.सू.२८अ. ।

उत्सङ्गपिड़का । स्त्री । लक्षणं—नेत्रवर्त्मगत-रोगविशेषे । नेत्राधोवर्त्मनि सञ्जातपिड़कायां। सा च स्थूला कण्डूमती, अधोवर्त्मनि सोत्सङ्गा वर्त्मा-

भ्यन्तरमुखी, बहिस्तामान्तःपूया च। "अभ्यन्तरमुखी ताम्रा बाह्यतो वर्त्मनश्च या। सोत्सङ्गोत्सङ्गपिड़का सर्व्वजा स्थूलकण्डुरा॥" मा.नि.।

उत्सङ्गी । पुं। नाड़ीव्रणविशेषे। नाली घा। सु.।

उत्सर्जनम् । क्ली। दाने। अम.।

उत्सर्जनी । स्त्री। गुदस्य द्वितीयवली। लक्षणं यथा—"उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता।" भा.।

उत्सर्य्या । स्त्री। प्राप्तप्रजननकालायां गवि। पाल लइबार योग्य गाभी। जटा.।

उत्सवः । पुं। इच्छाप्रसवे। उत्सेके। उत्साहे। क्रोधे। मे.वनिकं।

उत्सादनम् । क्ली। उद्वर्त्तने। भा.म.४भ.नेरो.चि.। "ताः प्रोक्षणोत्सादनलेपनादीन्।" "उत्सादनाद्भवेत्स्त्रीणां विशेषात्कान्तिमद्वपुः।" सु.चि.२४अ.। उत्सवे। रत्ना.अने.। समुल्लेखने। मे.नचतुष्कं। निम्नस्य व्रणस्य उन्नतीकरणे। सु.चि.१अ.।

उत्साहः । पुं। मनस उल्लासे। अम.।

उत्साहयुक्तः । पुं। शरभे। मद.व.१२।

उत्साही । पुं। भक्तरोगिणि। [वा.सू.।

उत्सिंहनम् । क्ली। नासया ऊर्द्ध्वश्वासधारणे।

उत्सुकः । त्रि। उत्कण्ठिते। व्यग्रे।

उत्सूरः । पुं। सन्ध्याकाले, दिनावसाने। हे.च.।

उत्सृष्टः । त्रि। त्यक्ते। अम.।

उत्सेधः । पुं। शरीरौन्नत्ये। देहे। अम.।

उत्स्मयः । पुं। मन्दहास्ये। वै.निघ.।

उत्क्षिप्तः । पुं। धुस्तूरफले। श.च.।

उत्क्षिप्तिका । स्त्री। आतङ्कविशेषे। हे.च.।

उत्क्षेपणम् । क्ली। व्यजने। धान्यमर्द्दनवस्तुनि। हे.च.।

उत्क्षेपमर्म्म । क्ली। शङ्खयोपरिकेशप्रान्तस्थमर्म्मणि। तत्र विशल्यमर्म्मणां युगलं तत्रात्मैव तिष्ठति। सु.शा.६अ.।

उद(क)म् । क्ली। जले। श.र.,रा.नि.व.१४। पुं। कटिस्टङ्गलायाम्। हला.।

उदकप्रक्षेपणम् । क्ली। जलप्रक्षेपेण जलस्य शीतीकरणोपाये। सु.सू.४५अ.।

उदकमञ्चिका । स्त्री। जलप्रसाधनार्थमाधारविशेषे। सु.सू.४५अ.।

उदकमञ्जरीरसः । पुं। रसोऽयं निरामज्वरे देयः। मात्रा २ र. अनुपानं आर्द्रकरसः। अत्र ऊषणं मरिचं शर्करा विषं। मतान्तरे शर्करा सर्व्वद्रव्यसमा। त्रिरात्रं २४ प्रहरपर्य्यन्तम्। पाठः—"सूती गन्धटङ्गणः सोषणः स्यादेतैस्तुल्या शर्करा मत्स्यपित्तैः। भूयो भूयो भावयेच्च त्रिरात्रं वल्लो देयः शृङ्गवेरस्य वारा॥" পারা ১ ভ. গন্ধক ১ ভ. সোহাগার খৈ ১ ভ. মরিচ ১ ভ. বিষ ৪ ভ। কেহ কেহ চিনি ৪ ভাগ বলেন। अत्र शर्करास्थाने मनःशिलादानेन चन्द्रशेखररसो भवति। र.सा.सं.।

उदकमेहः । पुं। कफोत्थमेहविशेषे। लक्षणं—"अच्छं बहुसितं शीतं निर्गन्धमुदकोपमं। मेहत्युदकमेहेन किञ्चिदाविलपिच्छिलम्।" मा.नि.।

उदकवहस्रोतः । क्ली। जलवहनाड्यां। ते च द्वे तयोर्मूलं तालु क्लोम च। सु.शा.६अ.।

उदकवहा । स्त्री। मूत्रवस्तिमभिप्रपन्ने धमनीद्वये। तयोर्मूलं तालु क्लोम च। सु.शा.६।

उदकषट्पल(घृत)म् । क्ली। अर्शोरोगे। तिलतैलं ४ श. वारि १२ श. दुग्धं ४ श. यवक्षारादीनां प्रत्येकं पलं कल्कं दत्त्वा पचेत्। पाठः—"सक्षारैः पञ्चकोलैस्तु पालिकैस्त्रिगुणोदके। समक्षीरं घृतप्रस्थं ज्वरार्शःप्लीहकासहृत्॥" ঘৃত ৪ শ. জল ১২ শ. দুগ্ধ ৪ শ. পঞ্চকোল, যবক্ষার প্রত্যেকে ১ প. (৮ তো.)। ইহা কল্ক। च.द.अर्शः-चि.। [रा.नि व.४।

उदकिका । स्त्री। बल्लानामक्षुपे। বেলেড়া।

उदकी । स्त्री। पाठायाम्। আকনাদি। वै.निघ.ग्रह.चि.२अतिविषादिः।

उदकीर्णः (र्य्यः) । पुं। महाकरञ्जे। डहरकरञ्ज। हिं अरारि। रा.नि.व.९। र.मा.भा.पू.१भ.गु.व.।

उदकीर्य्या । स्त्री। पूतीकरञ्जे। নাটাকরঞ্জ।

भा.टी.हेमा.। वा.सू.१५अ.अर्कादि:। "प्रत्यक्पुष्पी-पीततैलोदकीर्य्या।" च.सू.२अ.वमने, फलिनीव. १अ.। सु.सू.३९अ.कफशमने। [दकोदरम्।

उदकोदरम्। क्ली। जलोदरनामरोगे। See

उदक्या। स्त्री। रजःस्वलायाम्। अम.।

उदगयनम्। क्ली। उत्तरायणे। अम.।

उदग्रदन्। त्रि। महादन्तकरिणि। हे.च.।

उदञ्चनम्। क्ली। पिधाने। ঢাকনী। हला.।

उदण्डपाल:। पुं। मत्स्यविशेषे। দানকোণা মাছ। मे.लपञ्चकं। [পড়ে। रा.नि.व.१९।

उदद्या। स्त्री। तैलपिपीलिकायाम्। লালপি-

उदधि:। पुं। समुद्रे। रत्ना.। [अब्धिकफ:।

उदधिकफ:। पुं। समुद्रफेने। च.द.। See

उदधिफलम्। क्ली। समुद्रफेने। वै.निघ.।

उदधिफेन:। पुं। समुद्रफेने। च.द.रस.र. बाल.चि.। See अब्धिकफ:।

उदधिमल:। पुं। समुद्रफेने। राज.।

उदधिलवणम्। क्ली। सामुद्रलवणे। भा.।

उदधिशुक्ति:। स्त्री। मुक्तास्फोटे। সমুদ্রের ঝিনুক। [লবণ। भा.पू.१भ.।

उदधिसम्भवम्। क्ली। सामुद्रलवणे। পাঙ্গা

उदन्तिका। स्त्री। तृप्तौ। हारा.।

उदन्या। स्त्री। पिपासायाम्। रा.नि.व.२०। See तृष्णा।

उदपर्णी। पुं। कुधान्यविशेषे। सु.सू.३८अ.।

उदपान:। पुं, क्ली। कूपे। अम.।

उदमन्थ:। पुं। उदकप्रधानमन्थे। च.सू.६अ.। जलालोड़ितसक्तुशक्तौ। स च ग्रीष्मे सेव्य:। भा.। प.सु.।

उदमानम्। क्ली। वारिमानाढ़के।

उदम्बर:। पुं। शरीरजक्रिमिभेदे। शार्ङ्ग.७अ.। See क्रिमि:। क्ली। ताम्रे। তামা। भ.टी.।

उदय:। पुं। उत्पत्तौ।

उदयभास्करकर्पूर:। पुं। स्वनामख्यातकर्पूरे। स च पक्व:। सदलनिर्दलभेदेन द्विभेद:। गुणा:—'पीत: सर: स्वच्छक: सम्भोक्त: कठिन: कटु: समुदित: स्याद्दीपकोऽग्नेर्लघु:। शीद: पित्तकर: कफक्रिमिविषान् वातञ्च नासाश्रुतिं लालास्रावगलग्रहौ च शमयेत् जिह्वाजड़त्वापह:।" वै.निघ.।

उदयभास्कररस:। पुं। कुष्ठाधिकारे रस:। अत्र केवलं गन्धकेन मृतं ताम्रं दशभागम्। अमृतं विषं, तस्य द्वौ भागौ। र.सा.सं.। पाठ:—"गन्धकेन मृतं ताम्रं दशभागं समुद्धरेत्। उषणं (षा) पञ्चभागं (गा) स्यादमृतञ्च द्विभागिकं। श्लक्ष्णचूर्णीकृतं सर्व्वं रक्तिकैकप्रमाणत:। दातव्यं कुष्ठिने··· ···॥ उषणं स्थाने चूषणमिति। रसे.चि.। "पिप्पली पञ्चभागा स्यादिति।" सा.कौ.। তামা ১০ তো. পিপুল ৫ তো. শৃঙ্গ.বিষ ২ তো. जलेन पिष्ट्वा रक्तिप्रमाणा वटी कार्य्या। মতান্তরে পিপুলমূল ৫ তো. অন্যমতে ত্রিকটু ৫ তো.। अन्य: हिक्काश्वासे। पाठ:—"धान्याभ्रं सूतकं गन्धं श्वेतापामार्गजद्रवै:। तुल्यांशं मर्द्दयेच्चाग्नियन्त्रे पातालके पचेत्। ऊर्द्धलग्नस्तु संग्राह्यो रसो ह्युदयभास्कर:। श्वासं पञ्चविधं हन्ति द्विगुञ्जमनुपानत:॥ रस.र.। অভ্র, পারা, গন্ধক সমানভাগে শ্বেত আপাংরসে মাড়িয়া পাতালযন্ত্রে পাক করিলে যন্ত্রের উর্দ্ধভাগে যে বস্তু লাগে, তাহা উদয়ভাস্কর-রস।

उदरम्। क्ली। नाभिस्तनमध्यभागे। পেট। रा.नि.व.१८। तन्नामकरोगे। উদরি রোগ। तदष्टविधम्—वातपित्तकफसन्निपातै: चतुर्विधं प्लीहजन्यं मलसञ्चयजन्यं क्षतजन्यं जलसञ्चयजन्यञ्चेति। अस्य निदानं—अग्निमान्द्याजीर्णमलसञ्चयादिकम्। कुपितवातादिभि: स्वेदवहाम्बुवहस्रोतसि रुद्धे, तथा प्राणापानाभ्यामग्नौ दूषिते तदुत्पद्यते। साधारणलक्षणं—"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता। शोफ: सदनमङ्गानां सङ्गो वातपुरीषयो:। दाहतृष्णा च सर्व्वेषु जठरेषु भवन्ति हि॥" सु.नि.७अ.। "सर्व्वमेवोदरं प्रायो दोषसंहतिजं मतं। अतो वातादिशमनी क्रिया सर्व्वा प्रशस्यते॥ वह्निर्मन्दत्वमायाति कुक्षौ दोषप्रपूरिते। अजीर्णाम्लमलिनैश्चान्नैर्मन्दाग्नौ मलसञ्चयात्॥ रुद्धा: स्वेदा-

मुत्राहिन्यो जनयन्त्युदरं नृणां। आध्मानमामताऽबलं गतिरल्पा कृशाङ्गता ॥ शोथ: सदनमङ्गानां दाहस्तन्द्रा विवर्णता। विड्वातसङ्ग: पादाभ्यां शोथश्चाग्रभलक्षणम् ॥ पूर्व्वरूपम्। औदकानुपजं मांसं शाकं पिष्टकृतं तिला:। व्यायामाध्वदिवास्वप्रयानपानं विवर्ज्जयेत् ॥ तथोष्णलवणाम्लानि विदाहीनि गुरूणि च। नाद्यादन्नानि जठरी तोयपानं विवर्ज्जयेत् ॥ रस.र.।

उदरग्रन्थि: । पुं। अश्मरीरोगे। गुल्मरोगे। हे.च.। अन्त्रे। आँ(?)ड़ी। स्नीहि। Wil.

उदरनाड़ी । स्त्री। अन्त्रनाड्याम्।

उदरपरीक्षा । स्त्री। जठरपरीक्षायाम्।

उदरपिशाच: । पुं। सर्व्वान्नभक्षके। हे.च.।

उदरपीड़ा । स्त्री। उदरामये।

उदरभङ्ग: । पुं। अतिसाररोगे।

उदररस: । पुं। उदरस्थपाचकरसे।

उदरव्याधि: । पुं। उदरामये।

उदरस्फुटा । स्त्री। नागवल्ल्याम्। वै.निघ.।

उदराग्नि: । पुं। जठराग्नौ। [निघ.।

उदरानलपचक: । पुं। लघुतालीशपत्रे। वै.

उदरामय: । पुं। अतिसाररोगे। See अतीसार:।

उदरामयकुम्भकेशरी । पुं। प्लीहाधिकारे रस:। अत्र शुल्वं ताम्रं, कटुकं त्रिकटुकम्, लवणानि पञ्चलवणानि, कणामूलं पिप्पलीमूलम्। अत्र वृद्धा: चव्यं चित्रकचूर्णञ्च न प्रयच्छन्ति। पाठ: —"रसगन्धकभस्मताम्रकं कटुकक्षारयुतं सटङ्कणं। कणमूलकचव्यचित्रकं यमानीलवणानि रामठं। समभागमिदं विभावयेत् खरतापे त्वथ जम्बुवारिणा। उदरामयकुम्भकेशरी रस एष प्रथितोऽस्य माषक: ॥ सुरवार्य्यनु दापयेद्भिषक्……। र.सा.सं.। পারা, গন্ধক, তামা, ত্রিকটু, যবক্ষার, সোহাগার খৈ, পিপুলমূল, চই, চিতেরমূল, পঞ্চলবণ,যমান এবং হিং প্রত্যেক সমান ভাগ। লেবুর রসে মর্দ্দন। মাত্রা ১মাষা।

उदरारिरस: । पुं। उदराधिकारे रस:। वज्रीक्षीरेण स्नुहीक्षीरेण। पाठ: —"पारदं शुद्धितुत्थञ्च जैपालं पिप्पलीसमं। आरग्वधफलान्मज्जा वज्रीक्षीरेण मर्द्दयेत् ॥ माषमात्रां वटीं खादेत् स्त्रीणां जलोदरं जयेत्। चिञ्चाकखरसञ्चानु पथ्यं दध्योदनं हितम् ॥" र.सा.सं.।

उदरावर्त्त: । पुं। नाभौ। रा.नि.व.१८।

उदरावेष्ट: । पुं। शरीरकृमिभेदे। पाटाकृमि। शार्ङ्ग.७अ.। See कृमि:।

उदरिणी । स्त्री। गर्भवत्यां। हे.च.। [हे.च.।

उदरिल: । त्रि। महोदरयुक्ते। ভুঁড়িযুক্ত।

उदरी । त्रि। उदरिले। हे.च.।

उदर्क: । पुं। धुस्तूरवृक्षे। मदनकण्टके। ময়না কাঁটা। मे.कचिकं।

उदर्चि: । पुं। अग्नौ। मे.।

उदर्द: । पुं। Erysipelas. रोगविशेषे। तल्लक्षणं यथा— "वरटीदष्टसंस्थान: शोथ: सञ्जायते वहि:। सकण्डूस्तोदबहुल: छर्द्दिज्वरविदाहवान्। उदर्द्दमिति तं विद्याच्छीतपित्तमथापरे। वाताधिकं शीतपित्तमुदर्द्दञ्च कफाधिकम् ॥" मा.नि.।

उदर्दप्रशमनवर्ग: । पुं। उदर्दप्रशमनयोगविशेषे। यथा —तिन्दुकपियालबदरखदिरकदरसप्तपर्णाश्वकर्णार्जुनासनारिमेदा इति दश। তেঁদ, পেয়াল, কুল, খদির, শ্বেতখদির, ছাতিম, শাল, অর্জ্জুন, পীতশাল, বিট্‌খদির। च.सू. ४अ.। [Wil.

उदर्द्द: । पुं। Scarlet fever. ज्वरविशेषे।

उदलावणिक: । त्रि। लवणोदकसिद्धव्यञ्जने। हला.।

उदश्वित् । क्ली। अर्द्धजलतक्रे। অর্দ্ধেক জল ঘোল। र.मा.अम.। "दश्नाम्भसी यदि समे तदुदश्विदाह:।" रा.नि.व.१५। प.प्र.३ख.। गुणा:— लेपेन कुष्ठनाशनं तृष्णादाहसुखशोषघ्नञ्च। राज.। पित्तश्लेष्मघ्नम्। रा.नि.व.१५। [वै निघ.।

उदात्यूह: । पुं। जलकाके। পানকৌড়ী।

उदान: । पुं। कण्ठस्थवायौ। "उदान: कण्ठदेशस्थ:।" भा.। "उदानस्य पुन: स्थानं नाभ्युर:कण्ठ एव च। वाक्प्रवृत्ति: प्रयत्नोर्ज्जोबलवर्णादिकर्म्म च ॥" च.। "उदानो नाम यस्तूर्द्ध्वमुपैति

प्रवर्त्तनम् । तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते । ऊर्द्ध्वजत्रुगतान् रोगान् करोति च विशेषत: ॥" सु.नि.१अ.। "तत्कर्म ऊर्द्ध्वनयनम् ।" वा. सू.११अ.। उदरावर्त्ते। सर्पे। नाभौ। मे.नत्रिकं। पद्मणि। श.र.।

उदार: । पुं । दीर्घशालौ । शस्यविशेष ।

उदावर्त्त: । पुं । नाभौ । सर्पविशेषे । Disease of the bowells, iliac passion: रोगविशेषे । गुदग्रहे । मे.। हे.च.। रोगेणानेन मलमूत्रवायुरोधो भवति । तस्य निदानं सम्प्राप्तिश्च । "वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियशुक्रतृण्णोच्छ्वासनिद्राणां धृत्योदावर्त्तसम्भव: ॥" क्रमेण लक्षणं यथा — वातमूत्रपुरीषाणां सङ्गोध्मानं क्लमोरुजा । जठरे वातजाश्चान्ये रोगा: स्यु: वातनिग्रहात् ॥ आटोपशूलौ परिकर्त्तिका च सङ्ग: पुरीषस्य तथोर्द्ध्ववात: । पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥ वस्तिमेहनयो: शूलं मूत्रकृच्छ्रं शिरोरुजा । विनामो वङ्क्षणानाह: स्याल्लिङ्गं मूत्रनिग्रहे ॥ मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात् पवनात्मका: स्यु: । तथाक्षिनासावदनामयाश्च भवन्ति तीव्रा: सहकर्णरोगै: ॥ आनन्दजं वाप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि । शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्रा: सह पीनसेन ॥ मन्यास्तम्भ: शिर:शूलं अर्दितार्द्धावभेदकौ । इन्द्रियाणाञ्च दौर्ब्बल्यं क्षवथो: स्याद्विधारणात् ॥ कण्ठास्यपूर्णत्वमतीव तोद: कूजश्च वायोरथवा प्रवृत्ति: । उद्गारवेगेऽभिहते भवन्ति घोरा विकारा: पवनप्रसूता: ॥ कण्डूकोठारुचिव्यङ्गशोथपाण्ड्वामयज्वरा: । कुष्ठवीसर्पहृल्लासा: छर्द्दिनिग्रहजा गदा: ॥ मूत्राशये वै गुदमुष्कयोश्च शोथोरुजा मूत्रविनिग्रहश्च । शुक्राश्मरी तत्स्रवणं भवेद्वा ते ते विकारा विहते च शुक्रे ॥ तन्द्राङ्गमर्द्दावरुचि: श्रमश्च क्षुधाभिघातात् कृशता च दृष्टे: । कण्ठास्यशोष: श्रवणावरोध: तृष्णाभिघातात् हृदये व्यथा च ॥ श्रान्तस्य निश्वासविनिग्रहेण हृद्रोगमोहावथवापि गुल्म: । जृम्भाङ्गमर्द्दोऽक्षिशिरोऽतिजाड्यं निद्राभिघातादथवापि तन्द्रा ॥ वायु: कोष्ठानुगो रुक्षै: कषायकटुतिक्तकै: । भोजनै: कुपित: सद्य उदावर्त्तं करोति च ॥ वातमूत्रपुरीषासृक्कफमेदोवहानि वै । स्रोतांस्युदावर्त्तयति पुरीषं चातिवर्त्तयेत् ॥ ततो हृद्वस्तिशूलार्त: हृल्लासारतिपीड़ित: । वातमूत्रपुरीषाणि कृच्छ्रेण लभते नर: ॥ इति । मा.नि.। "त्रिवृत्सुधापत्रतिलादिशाकग्राम्यौदकानूपरसैर्यवान्नं । अन्यैश्च सृष्टानिलविड्भिरद्यात् तथा प्रसन्ना गुड़शीधुपायी ॥ रस.र.।

उदावर्त्ता (वृत्ता) । स्त्री । Difficult menstruation. वायुजन्यस्त्रीयोनिरोगविशेषे । सा कष्टेन सफेनिलं रजो मुञ्चति । "सफेनिलमुदावृत्ता रज: कृच्छ्रेण मुञ्चति ।" भा.म.४भ.यो. रो.चि. ।

उदित: । पुं । नीवारे । উড়িধান । प.मु. ।

उदीच्यम् । क्ली । ह्रीवेरे । सुगन्ध वाला । प. मु. । रा.नि.व.१० । तें कुरुवेरु । सि.यो.ज्व.चि. षड़ङ्गपानीये । "चन्दनोदीच्यनागरै: ।" सि.यो. ज्व.चि.किराताद्यौ । "चन्दनोदीच्यवत्सकै: ।"

उदीच्यकाष्ठम् । क्ली । तोपचिनीतिख्यातद्रव्ये। वै.निघ. ।

उदीक्षणम् । क्ली । दर्शने ।

उदु(दू)खलम् । क्ली । गुग्गुलौ । मे. । लौहभाण्डे । হামান্‌দিস্তে इति लोके । तण्डुलकण्डनार्थपात्रे । উখ্‌লী इति च लोके । अम. ।

उदुम्बर: । पुं । Glomerous fig tree, (Ficus glomerata.) यज्ञाङ्गवृक्षे । যজ্ঞডুমুর গাছ । गुर्ज. हिं गुलार । मं उम्बराचेझाड़ । उत्. उदुम्बर । ज.द. । सु.सू.३८अ.न्यग्रोधादि: । गुणा: — "उदुम्बर: शीतल: स्याद्गर्भसन्धानकारक:। व्रणरोपणकृद्रुक्षो मधुरस्तुवरो गुरु: । अस्थिसन्धानकृद्वर्ण्यो कफपित्तातिसारकान् । योनिरोगं नाशयति वल्कञ्चैवास्य शीतलं । दुग्धदं तुवरं गर्भ्यं व्रणनाशकरं स्मृतं । कोमलञ्चास्य च फलं स्तम्भकृत्तुवरं मतं । हितकारि तृषापित्तकफरक्तरुजापहं । मध्यमं कोमलं स्वादु शीतलं तुवरं मतम् । पित्ततृषामोदकरं रक्तस्रुतिवमीहरम् ॥ वै.निघ.। व्रण्य: गुरु: कफपित्तरक्तघ्नश्च । हिम: रुक्ष: पित्तकफास्रजित् मधुर: वर्ण्य: व्रणशोधनरोपणश्च । मद.व.१। भा.पू.१भ.वटादिव. । तथा अस्य पक्वफलगुणा: मधुरं हिमं क्रमिकरं रक्तपित्ततृष्णादाहमूर्च्छाघ्नञ्च। सुपक्वफलगुणा: — अतिशीतलं मधुरं पित्तश्रमशोषघ्नञ्च । अपक्वफलगुणा: — कषायत्वं दीपनत्वं रु-

चिकरत्वं मांसकरत्वं शोणितविकारजननत्वञ्च। अस्य वल्कलगुणाः—शीतं कषायं व्रणघ्नं गर्भसंरक्षणं स्तन्यजनकञ्च। रा.नि.व.११। कुष्ठविशेषे। ताम्रे। रा.नि.व.१३। जन्तुफले। भा.पू.अने.। क्ली। कर्षे, २ तो.। प.प्र.१ख.। ताम्रे। मद.व.४। तोलमात्रे। वै.निघ.पाना.चि.त्रिफलादिलेहे। मेढ्रे। त्रिका। [व.१।

उदुम्बरच्छदा। स्त्री। क्षुद्रदन्तीवृक्षे। मद.

उदुम्बरदला। स्त्री। क्षुद्रदन्तीवृक्षे। रा.नि.व.६। [भा.। लघुदन्तीवृक्षे। भा.पू.१भ.।

उदुम्बरपर्णी। स्त्री। दन्तीवृक्षे। प.मु.। र.

उदुम्बरमशकः। पुं। मूषिके। वै.निघ.।

उदुम्बरी। स्त्री। काकोदुम्बरिकायाम्। मं कालाउंबर। रा.नि.व.११।

उदूखलम्। क्ली। तण्डुलादिकण्डनार्थं काष्ठपात्रे। উখ্লি। गुग्गुलौ। मे.लत्रिकं।

उदूखलसन्धिः। पुं। उदूखलाकारग्रीवोर्द्ध्वगतसन्धौ। भा.। कचावकृणदशनसन्धिः। सु.शा.५अ.।

उद्गमः। पुं। वान्तौ। वमि। वै.निघ.।

उद्गमनीयम्। क्ली। धौतवस्त्रे। ধোওয়া কাপড়। अम.।

उद्गारः। पुं। उद्गमने। कण्ठगर्जने। ঢেকুর इति भाषा। जटा.। "ग्लानेरोजःक्षयाद्दुःखादजीर्णाच्च श्रमोद्भवात्। उदानकोपादाहारस्यास्थिरत्वाच्च यद्भवेत्। पवनस्योर्द्ध्वगमनं तमुद्गारं प्रचक्षते॥" शार्ङ्ग.२६अ.। कर्याम्। रा.नि.व.२०।

उद्गारकर्मणिः। पुं। प्रवाले। পলা। मं पोंवले। रा.नि.व.१३।

उद्गारणम्। क्ली। उद्गारकरणे।

उद्गारशुद्धिः। स्त्री। उद्गारानवरोधे, सधूमास्त्रोद्गाराभावे। [जीरके। भा.पू.१भ.।

उद्गारशोधनः। पुं, क्ली। श्वेतजीरके, कृष्ण-

उद्गारशोधिनी। स्त्री। जीरके। वै.निघ.।

उद्गि(द्गी)रणम्। क्ली। उद्गारे। वमने। विज.र.।

उद्ग्राहः। पुं। उद्गारे। ঢেকুর। वै.निघ.।

उद्घः। पुं। देहस्थवायौ। मे.घद्विकं। हस्तपुटे। हे.च.।

उद्घटम्। क्ली। वार्ताकुपुष्पे। वै.निघ.।

उद्घर्षणम्। क्ली। गात्रादिघर्षणे। इष्टकखण्डेनोद्घर्षणे कण्डूकोठनाशः शिरासुखकारकत्वञ्च। राज.।

उद्घसम्। क्ली। मांसे। हारा.।

उद्घाटकम्। क्ली। घटीयन्त्रे। हे.च.।

उद्घातः। पुं। पादस्खलने। कालभेदे। मे.तत्रिकं। पवनाभ्यासयोगाय कुम्भकादित्रये। विश्व.तत्रिकं। अस्त्रे। त्रिका.। [कीटे। डाँश।

उद्दंशः। पुं। मत्कुणे। উকুণ। हे.च.। दंश-

उद्दण्डपालः। पुं। मत्स्यविशेषे। দাঁড়িকা মাছ। सर्पविशेषे। मे.।

उद्दानकः। पुं। शिरीषवृक्षे। रा.नि.व.८। तें कोंडगोगुपुव्वु। चुल्ल्यां। विश्व.।

उद्दन्तुरः। त्रि। उत्कटदन्ते, करालदन्ते। मे.।

उद्दारदा। स्त्री। शाकतरौ। শেগুন। मं साग। वै.निघ.।

उद्दारा (री)। स्त्री। गुडूच्याम्। श.च.।

उद्दालः (कः)। पुं। (Cordia myxa or Latifolia.) बहुवारवृक्षे। চালিতা গাছ। हिं बहुआरि, लसोड़ा। प.मु.। अम.रा.नि.व.११। See बहुवारः। आरण्यकोद्रवे। मद.व.१०।

उद्दाला। स्त्री। आरी इति महाराष्ट्रे।

उद्दिष्टः। पुं। वदरवृक्षे।

उद्दीपः (प्रः)। पुं। गुग्गुलौ। अ.टी.भ.।

उद्देशः। पुं। गिरिगण्डकूपे। हारा.। समासकथने। "समासकथनमुद्देशः, यथा शल्यमिति।" सु.उ.६५अ.। उपदेशे। हारा.।

उद्देहिका। स्त्री। उत्पादिकायां। वालवी इति ख्याते महाराष्ट्रीयकीटविशेषे। পেদোপোকা। हारा.।

उद्धमः। पुं। कष्टश्वासे।

उद्धर्षणम्। क्ली। रोमाञ्चे।

उद्दान्तः । पुं । निर्मदकरिणि । चम. ।
उद्दारा । स्त्री । गुडूच्याम् । श.च. ।
उद्दूलनम् । क्ली । सतैलवङ्गकर्पूरकस्तूरीमरिचलवङ्गचूर्णेषु । पाकराजः ।
उद्धूषणम् । क्ली । रोमाञ्चे । हला. ।
उद्धृतः । त्रि । परिभुक्तोज्झिते । मे.तत्रिकं ।
उद्भटः । पुं । कच्छपे । शूर्पे । मे.टत्रिकं ।
उद्भवः । पुं । उत्पत्तौ । चम. ।
उद्भावः । पुं । उत्पत्ति ।
उद्भिजः । त्रि । उद्भिज्जे । च.टी.र. ।
उद्भिज्जः । त्रि । उद्भिदो जाते । इन्द्रगोपमण्डूकादौ । चम. ।
उद्भित् (द्) । त्रि । गुल्मादौ । तत्र पञ्चधा—तरुः गुल्मः लता वल्ली तृणञ्च । चम. ।
उद्भिदम् । क्ली । भूमिमुद्भिद्य उद्गमज्जलस्थाने । चा.टी.हेमा.। सामुद्रलवणे । পাঙা লবণ । र.मा.। Culinary salt. साम्बिलवणे । रस.र.अर्श:-चि.। त्रि । तर्वादौ ।
उद्भूतः । त्रि । उत्पन्ने, जाते ।
उद्भेदः । पुं । अङ्कुरे । रा.नि.व.२ ।
उद्भ्रमः । पुं । उद्वेगे । चम. ।
उद्यमः । पुं । उद्योगे ।
उद्यानम् । क्ली । उपवने । उद्यानं स्वयमपरैः समन्तु लोकैरन्येषां विभववताञ्च पुष्पवाटी । हला.।
उद्यावः । पुं । मिश्रणे । संयोजने ।
उद्योगः । पुं । चेष्टायाम् ।
उद्रः । पुं । जलमार्जारे । উদ্বিড়াল । हारा. । जलनकुले । ঢেঁড়ে इति भाषा । त्रिका. ।
उद्रथः । पुं । ब्रचविशेषे । कुकुरशौंका । ताम्रचूडे । कुकुड़ा । मे.। पाचके ।
उद्राङ्गः । पुं । रक्तचित्रके । वै.निघ. ।
उद्रिक्तचित्तता । स्त्री । पानात्ययरोगे । मत्ततायाम् । रा.नि.व.२० ।
उद्रेकः । पुं । रजोगुणे । रा.नि.व.२१ । महानिम्बे । भा.म.१भ. ।

उद्वत्सरः । पुं । संवत्सरे । हे.च. । [करो ।
उद्वमनम् । क्ली । उद्गिरणे, वान्तौ । वमि
उद्वर्त्तनम् । क्ली । विलेपने । घर्षणे । मे.नचतुष्कं । तद्गुणाः—"उद्वर्त्तनं वातहरं कफमेदोऽनिलापहम् । स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परं । उद्वर्त्तनं हरिद्राद्यैः कण्डूवैवर्ण्यरौक्ष्यजित् । तिलैर्नोद्वर्त्तनं कण्डूरौक्ष्यत्वग्दोषनाशनम् ॥" राज. । "उद्वर्त्तनं कफहरं मेदसः प्रविलापनम् । स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम् ।" वा.सू.२ष.। "उद्वर्त्तनं वातहरं भ्राजकानलदीपनं । गात्रस्थिरत्वसुखितात्वक्प्रसादमृदुत्वकृत् ॥" मद.व.१२ । मर्द्दने । च.द.विसूचि.। [याम् ।
उद्वहः । पुं । पुत्रे । उदानवायौ । स्त्री । कन्या-
उद्वान्तः । पुं । निर्मदगजे । त्रि । उद्वमिते । मे.तत्रिकं ।
उद्वाहनी । स्त्री । वराटके ।
उद्विड़ालः । पुं । जलविड़ाले । उद्वेताल इति भाषा । ढेँड़े इत्यपि क्वचित् ।
उद्वृत्तः । त्रि । उत्थिते । [त्रिका. । चाञ्चल्ये ।
उद्वेगम् । क्ली । गुवाकफले । रा.नि.व.११ ।
उधस् । क्ली । आपीने । গাভীর পালান । हला. ।
उध्मान(र)म् । क्ली । चुल्ल्याम् । श.टी.भ. ।
उन्दकः । पुं । धवलयावनाले । শাদা জনার, যওয়ারা । रा.नि.व.१६ ।
उन्दरः । पुं । मूषिके ।
उन्दिरमारी । स्त्री । मूषिकार्य्यां, तन्नाम्ना कोङ्कणे प्रसिद्धायां । ইন্দুরমারী । गुणाः—"मूषकारी तु कटुका नेत्र्या चाखुविषापहा । व्रणदोषं नेत्ररोगं नाशयेदिति च स्मृतम् ॥" रा.नि.व.४ ।
उन्दुकः । पुं । शरीरैकदेशे । भा. ।
उन्दुरः । पुं । मूषिके । [बा. ।
उन्दुरुः (कः) । पुं । मूषिके । वन्यमूषिके । श-
उन्दुरुकर्णी (र्णिका) (र्णी) । स्त्री । आखुकर्णीलतायाम् । ইন্দুরকাণী । रा.नि.व.२ । दन्तीभेदे । उन्दुरुकर्णी द्रवन्तीति ड. ।

उन्दुरुपर्णी । स्त्री । आखुकर्णी । रा.नि.व.४।

उन्दूवरम् । क्ली । ताम्रे । भा. ।

उन्द्रः । पुं । कूलचरपशुभेदे । উদ্বিড়াল । सु.शा.३८अ. । See कूलेचरः ।

उन्नम् । क्ली । सुरते । त्रि । क्लिन्ने । मे.नद्विकं ।

उन्नाहम् । क्ली । काञ्जिके । अम. ।

उन्मत्तः । पुं । श्वेतधुस्तूरे । শ্বেত ধুতুরা । धुस्तूरवृक्षे । प.मु. । र.मा.,रा.नि.व.१० । मुचुकुन्दवृक्षे । त्रि । उन्मादविशिष्टे । मे. ।

उन्मत्तकारिणी
उन्मत्ता } स्त्री । दुग्धिकायाम् । हिं दुधियार ।

उन्मत्तरसः । पुं । शीताङ्गसन्निपाते रसः । "रसगन्धकतुल्यांशं धुस्तूरफलजद्रवैः । मर्द्दयेद्दिनमेकन्तु तुल्यांशं त्रिकटुं क्षिपेत् ॥" त्रिकटुमिति त्रिकटुचूर्णं प्रत्येकं रसतुल्यं । र.सा.सं.शीताङ्ग.सान्निपात-ज्व. ।

उन्मनः । पुं । उन्मादवायौ । द्रोणपरिमाणे (१६ श.) । प.प्र.१भ. । [२०।

उन्मनायितम् । क्ली । उन्मादे । रा.नि.व.

उन्मन्थकः । पुं । कर्णपालीगतरोगविशेषे । तल्लक्षणं—"कर्णं बलाद्वर्द्धयतः पाल्यां वायुः प्रकुप्यति । कफं संगृह्य कुरुते शोथं सस्तम्भवेदनम् । उन्मन्थकः सकण्डूको विकारः कफवातजः ॥ मा.नि. । सु.चि.२५अ. ।

उन्मादः । पुं । (Mania.) वायुरोगे । পাগল রোগ । स च मानसिको व्याधिः षड्विधश्च वातपित्तकफसन्निपातदुःखविषसेवनाद्भवति । सम्प्राप्तिः —मदयन्त्युद्धता दोषा यस्मादुन्मार्गगामिनः । मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः ॥ एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः । मानसेन च दुःखेन स पञ्चविध उच्यते ॥ विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजं । स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च ॥ विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानां । उन्मादहेतुर्भयहर्षपूर्व्वो मनोविघातो विषमाश्च चेष्टाः ॥ इति तद्भेदनिदानम् । मा.नि. । यद्युन्मादः समुद्दिष्टः श्लेष्मपित्तसमुद्भवः । तथापि न विना वातादुन्मादो जायते ध्रुवम् ॥ पथ्यं यथा— अभ्यञ्जनं स्नापनमासनञ्च निद्रा सुशीतान्यनुलेपनानि । गोधूममुद्गारुणशालयश्च धारोष्णदुग्धं शतधौतसर्पिः ॥ घृतं नवीनञ्च पुरातनञ्च कूर्म्मामिषं धन्वरसा रसालं । पुराणकुष्माण्डफलं पटोलं ब्राह्मीदलं वास्तुकतण्डुलीयं ॥ खराश्वमूत्रं गगनाम्बु पथ्या सुवर्णचूर्णानि च नारिकेलं । द्राक्षा कपित्थं पनसश्च वैद्यैः विधेयमुन्मादगदेषु पथ्यम् ॥ राज. । अपस्मोन्मादरोगे । लक्षणं यथा—"प्रकोपकारणैः प्रोक्तैः कुपिते मातरिश्वनि । उन्मादी जायतेऽवश्यं तस्य रूपञ्च वक्ष्यते । यातुमिच्छति यः स्थित्वा ऊर्द्ध्वं दन्तैश्च खादति । खादत्यकस्मात्यवसं पुनश्चैव न खादति । कदाचिद्बुध्यते संज्ञां कदाचिच्च न बुध्यते ॥" ज.द.५६अ. । उन्मादग्रस्ते । श.टी. ।

उन्मादगजाङ्कुशः । पुं । उन्मादाधिकारे रसः । अत्र महाराष्ट्री ब्रह्मयष्टिः । বামুনহাটী । विषमुष्टिः । কুচিলা । अर्कचक्रिका, ताम्रचक्रिकायां । पाठः—त्रिदिनं कनकद्रावैः महाराष्ट्रीद्रवैः पुनः । विषमुष्टिजलैः सूतं समुत्थाप्यार्कचक्रिकां । कृत्वा तस्यां सगन्धां तां युक्त्या बन्धनमाचरेत् । तत्समं कानकं बीजमभ्रकं गन्धकं विषं । मर्द्दयेत्त्रिदिनं सर्व्वं वल्लमात्रं प्रयोजयेत् ॥…… । পারা যথেচ্ছ পরিমাণে লইয়া ধুতুরা, বামনহাটী এবং কুচিলার রসে এক এক দিন উর্দ্ধপাতন করিবে । পরে তাহার সহিত সমভাগ গন্ধক মিশাইয়া বন্ধনার্থ অর্কচক্রিকায় রাখিয়া অল্প পুট দিবে । পরে উহার সহিত সমভাগ ধুতুরাবীজ, অভ্র, গন্ধক এবং বিষ দিয়া একত্র জলে মর্দ্দন করিবে । र.सा.सं. ।

उन्मादपर्पटीरसः । पुं । उन्मादाधिकारे रसः । अत्र पर्पटीरसः क्षेत्रपर्पटीरसः । ক্ষেৎ-পাপড়ার রস । "कृष्णधुस्तूरजैर्बीजैः पञ्चभिः पर्पटीरसः । सम्प्रयोज्यः प्रशान्त्यर्थमुन्मादं भूतसम्भवम् ॥" र.सा.सं. ।

उन्मादभञ्जनरसः । पुं । उन्मादाधिकारे । अत्र किरातं भूनिम्बं । इन्द्रवारुणी गोरक्षकर्कटी । রাখালশশা । पाठः—त्रिकटु त्रिफला चैव गजपिप्पलिका तथा । विडङ्गञ्च देवदारु किरातं कटुकी तथा । कण्टकारी च यष्टीन्द्रयवं चित्रकमेव च । बला च पिप्पलीमूलं मूलञ्च वीरणस्य

च । शोभाञ्जनस्य बीजानि त्रिवृता चेन्द्रवारुणी । वङ्गं रूप्यमभ्रकञ्च प्रवालं समभागिकं । सर्व्वचूर्णसमं लौहं सलिलेन विमर्द्दयेत् ॥...... । र.सा.सं.।

उन्मादभञ्जिनी । स्त्री । उन्मादाधिकारे रसविशेषे । अत्र कटुरोहिणी कटुकी । गिरिमल्लीबीजं कुटजबीजं । पाठः—"शुद्धं मनःशिलाचूर्णं सैन्धवं कटुरोहिणी । वचा शिरीषबीजञ्च हिङ्गु च श्वेतसर्षपं। करञ्जबीजं त्रिकटु मलं पारावतस्य च । एतानि समभागानि गोमूत्रैर्वटिकां कुरु । गिरिमल्लीबीजसमां छायाशुष्काञ्च कारयेत् । प्रातःसन्ध्यानिशाकाले चक्षुषोरञ्जनं हितम् । मधुरादिरसे चाञ्जं रावावपि जलेन च ॥"...... । र.सा.सं.।

उन्मादाङ्कुशरसः । पुं । उन्मादे रसः । पाठः—त्रिदिनं कनकद्रावैर्महाराष्ट्रीरसैः पुनः । विषमुष्टिद्रवैः सूतं समुत्थाप्यार्कचक्रिकां । कृत्वा तप्तां सगन्धान्तां युक्त्या बन्धनमाचरेत् । तत्समं कानकं बीजमभ्रकं गन्धकं विषं । मर्द्दयेत्त्रिदिनं सर्व्वं वल्लमात्रं प्रयोजयेत्। कनकं धुस्तूरबीजं । महाराष्ट्री जलपिप्पली भार्गी वा । विषमुष्टिः कुचेलकं। एभिरूर्द्ध्वपातनं कार्य्यं । पारदादिकं समभागं ग्राह्यम् । उन्मादगजाङ्कुश इति नामान्तरम् । भैष.रसे.चि.।

उन्मादिनी । विजयायाम् । सिद्धि ।

उन्मानम् । क्ली । द्रव्यतोलकपरिमाणे । पुं । द्रोणपरिमाणे । प.प्र.१ख.।

उन्मार्गी । पुं । पञ्चविधभगन्दरान्यतमभगन्दररोगविशेषे । अर्शभगन्दर । तस्य लक्षणम्—"मूढेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदावगाढ़पुरीषोन्मिश्रमपानेनाधःप्रेरितं असम्यगागतं गुदं क्षिणोति, तदा क्षतनिमित्तः कोथ उपजायते । तस्मिंश्च क्षते पूयरुधिरावकीर्णमांसकोथं भूमाविव जलप्रक्लिन्नायां क्रिमयः सञ्जायन्ते । ते भक्षयन्तो गुदमनेकधा पार्श्वतो दारयन्ति,तस्य तैर्मार्गैः क्रिमिकृतैः वातमूत्रपुरीषरेतांसि अतिनिःसरन्ति तं भगन्दरं उन्मार्गिणमित्याचक्षते ।" सु. नि.४अ.।

उन्मीलनम् । क्ली । उन्मेषे । हे.च.।

उन्मेषः । पुं । नेत्रोन्मीलने । हे.च.।

उपकण्ठम् । क्ली । अश्वस्यास्कन्दिते । कण्ठसमीपे । हे.च.।

उपकरणम् । क्ली । उपादाने ।

उपकर्णिका । स्त्री । मूषकर्णिकायाम् । वै. निघ.२भ.अर्श-चि.विड़ङ्गादिचूर्णलेहे ।

उपकारिका । स्त्री । पिष्टकभेदे । मे.कपञ्चकं।

उपकालिका । स्त्री । जीरकभेदे । श्वेतजीरके । कलौञ्जीजीरके । मद.व.२ । कृष्णजीरके । भा.पू.१भ. । पिप्पल्याम् ।

उपकुञ्चः (कः) । पुं । कृष्णजीरके । वै.निघ.।

उपकुञ्चिः (का) (ञ्ची) । स्त्री । कलौञ्जीजीरके । वृहज्जीरके । सूक्ष्मैलायाम् । अम.। कृष्णजीरके । स्वल्पजीरके। ছোট জীরা । भा.पू.१भ. रत्ना.। गुणाः—"तिक्ता कट्वी चोष्णा च दीपनी । वृष्या चाजीर्णशमनी गर्भाशयविशोधिनी । आध्मानवातगुल्मञ्च रक्तपित्तं कृमींस्तथा । कफं पित्तं चामदोषं वातं शूलञ्च नाशयेत् ॥" वै.निघ.।

उपकुम्भा । स्त्री । दन्तीवृक्षे । वै.निघ.।

उपकुल्या (का) । स्त्री । पिप्पल्याम् । प. मु.,रा.नि.व.६ । च.द.,अर्श.चि.एलादौ ।

उपकुशः । पुं । Gum-boil. तन्नामकदन्तवेष्टजपित्तरक्तजरोगविशेषे । तत्र वेष्टदाहपाकदन्तचलनं आघट्टिते रक्तस्रावविदने, स्रुते च रक्ते स्फीतिर्मुखपूतिता च जायन्ते । लक्षणं—"वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च । आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनं । आध्मायन्ते स्रुते रक्ते मुखं पूतिः च जायते । भा.म.४भ.मु.रो.चि. । अश्वमुखरोगे, तत्र दन्तमांसाद्रुधिरस्रावः दन्तचलनञ्च भवति । ज.द.।

उपकूपः । पुं । दीर्घिकायाम् । हे.च.।

उपकोलिका । स्त्री । कृष्णजीरके । भा.।

उपक्रमः । पुं । चिकित्सायाम् । रा.नि.व.२०। आरम्भे । मे.मचतुष्कं ।

उपक्रोष्टा । पुं, स्त्री । गर्द्दभे ।

उपघातः । पुं । रोगे । रा.नि.व.२० ।

उपघातकः । पुं । आरग्वधवृक्षे । वै.निघ.।

उपघ्नः । पुं । निकटाश्रये । अम.।

उपचक्रः । पुं । हंसविशेषे । চকোর । "चक्रो-

रानुपचक्रकान् ।" च.चि.३अ.। गुणाः—"कषायः स्वादुलवणस्त्वच्यः केश्यो रुचिप्रदः ।" सु.सू.४६अ.। हृद्यं लघु उष्णवीर्य्यं कटुपाकि बलाग्निवर्द्धकञ्च । राज.। See चक्रवाकः । [रा.नि.व.२०। हला.।

उपचर्य्या । स्त्री । चिकित्सायाम् । सेवायाम् ।

उपचक्षुः । क्ली । चक्षुःप्रतिनिधौ । चश्मा इति भाषा । [नि.व.२० । हे.च.।

उपचारः । पुं । चिकित्सायां । सेवायाम् । रा.

उपचार्य्यः । पुं । चिकित्सायाम् । हे.च. ।

उपचितः । त्रि । दग्धे । मे. ।

उपचित्रः(त्रा) । पुं, स्त्री । उपचित्रः इति म-द.व.१। पृश्निपर्णीक्षुपे। চাকুলিয়া । रा.नि.व.४ । दन्तीवृक्षे । प.मु.। र.मा.। आखुकर्ण्याम् । ইন্দুর-কাণী পানা । मे. । वृहद्दन्त्यां । भा.पू.१भ. । वै. निघ.वा.व्या.विषगर्भतैले ।

उपचित्रका । स्त्री । ह्रस्वदन्त्याम् ।

उपचिल्ली । स्त्री । श्वेतचिल्लीशाके । শ্বেত চি-ল্লী (বেতোশাক)। रा.नि.व.७ ।

उपजिह्वा (ह्विका) । स्त्री । जिह्वागतमुखरोगे । दुष्टकफरक्ते जिह्वामुन्नमय्य निम्नतो लालास्रावकण्डूदाहशोथानुत्पादयतः । मा.नि.। लक्षणम्—"जिह्वाग्ररूढ़ः श्वयथुर्हि जिह्वामुन्नम्यजातः कफरक्तयोनिः । प्रसेककण्डूपरिदाहयुक्ता प्रकथ्यतेऽसावुपजिह्विकेति॥" सु.नि.१६अ.। कीटविशेषे । পে-দো পোকা । हे.च. । मूलजिह्वायाम् । আল-জিব । रा.नि.व.१८ । अश्वस्य मुखरोगभेदे । अत्र जिह्वाधःस्फीतिः । लक्षणम्—"अधस्तादथ जिह्वायाः श्वयथुर्यस्य जायते। तं विन्द्यादुपजिह्वाख्यं मुखरोगन्तु वाजिनाम् ॥" ज.द.२६अ.।

उपतप्ता । पुं । रोगे । अ.टी.भ. ।

उपतापः । पुं । रोगे । उत्तापे । मे.पचतुष्कं ।

उपदग्धः । त्रि। ईषद्दग्धे। আঁকা। सु.सू.४६अ.।

उपदन्तः । पुं । कुस्तुम्बुरौ । কাঁচা ধনে ।

उपदंशः । पुं । The venereal disease. समष्ठीलक्षुपे । रा.नि.व.४ । शिग्रौ वृक्षे । সজিনা গাছ। रा.नि.व.७ । चर्वणे । চাট্ । हला. । सि. यो.मदा.चि.। "स्रग्वी सभक्तां पिशितोपदंशाम् ।" व्यञ्जने । रा.नि.व.२० । मेढ्ररोगे । বাও রোগ । निदानादि—"हस्ताभिघातान्नखदन्तपातादधावनादत्युपसेवनाद्वा । योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधाप्रचारैः॥" स च वातादिभेदात्पञ्चधा। तल्लक्षणं—"सतोदभेदैः स्फुरणैः सकृष्णैः स्फोटैर्व्यवस्येत्पवनोपदंशं। पीतैर्बहुक्लेदयुतैः सदाहैः पित्तेन रक्तात्पिशितावभासैः। स्फोटैः सकृष्णै रुधिरं स्रवन्तं रक्तात्मकं पित्तसमानलिङ्गं । सकण्डुरैः शोथयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः कफेन । नानाविधस्रावरुजोपपन्नमसाध्यमाहुस्त्रिमलोपदंशम् ॥" मा. नि. । "अतिमैथुनादतिब्रह्मचर्य्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढ़रोमामल्पद्वारां महाद्वाराम-प्रियामकामां अचौक्ष्यसलिलप्रक्षालितयोनिमप्रक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करजदशनविषशूकनिपातनादर्द्दनाद्धस्ताभिघाताच्चतुष्पदीगमनादचौक्ष्यसलिलप्रक्षालनादवपीड़नाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाप्रक्षालनादिभिर्मेढ्रमार्गस्य प्रकुपिता दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति तमुपदंशमाचक्षते ।" सु.नि.१२ । विशीर्णमांसं कृमिभिः प्रजग्धं मुष्कावशेषं परिवर्ज्जयेत्तम्...... । असाध्यलक्षणं। पथ्यं यथा—छर्द्दिर्विरेको ध्वजमध्यनाड़ीवेधो जलौका परिपातनञ्च । सेकः प्रलेपो यवशालयश्च धन्वामिषं मुद्गरसो घृतानि । कठिल्लकं शिग्रुफलं पटोलं शालिञ्चशाकं वनमूलकञ्च । तिक्तं कषायं मधु कूपवारि तैलञ्च हन्यादुपदंशरोगम्" इति । अपथ्यं यथा—"दिवानिद्रां मूत्रवेगं गुर्व्वन्नं मैथुनं गुड़म् । आयासमम्लं तक्रञ्च वर्ज्जयेदुपदंशवान् ॥" पथ्यापथ्यम् ।

उपदंशक्षमः । पुं । शिग्रुवृक्षे । वै.निघ. ।

उपदलम् । क्ली । पुष्पदले । ফুলের পাপড়ী।

उपदा । स्त्री । वन्दाके । মান্দড়া । मं वादांगुल । रा.नि.व.५ ।

उपदीका । स्त्री । उपजिह्वाख्यकीटे । हे.च. ।

उपदेवता । स्त्री । यक्षभूतपिशाचादौ ।

उपदेशः । पुं । मुस्तके । हे.च.। स्थितकथने । एवमित्युपदेशः यथा—"तथा न जागर्यादात्रौ

दिवास्वप्नञ्च वर्ज्जयेत् ।” सु.उ.६५अ. । [निघ. ।

उपदेहः । पुं । उपलेपे । প্রলেপ, মলম্ । वै.

उपदेहिका । स्त्री । उपजिह्वाकीटे । हे.च. ।

उपद्रवः । पुं । उपसर्गे । तल्लक्षणम्—“रोगारम्भकदोषस्य प्रकोपादुपजायते । योऽन्यो विकारः स बुधैरुपद्रव इहोदितः ॥” भा. ।

उपधातुः । पुं । Secondary secretion. देहस्थसप्तविधधातुषु । यथा—“स्तन्यं रजो वसा स्वेदो दन्ताः केशास्तथैव च । ओजश्च सप्तधातूनां क्रमात्सप्तोपधातवः ॥” भा. । स्तन्यरजोवसास्वेददन्तकेशौजांसि धातूनां सप्तोपधातव इति शार्ङ्ग. । A semi-metal. स्वर्णमाक्षिकादिगौणधातुषु । ते च सप्तविधाः—स्वर्णमाक्षिकं, तारमाक्षिकं, तुत्थं, कांस्यं, पित्तलं, सिन्दूरं, शिलाजतु चेति । तत्र स्वर्णमाक्षिकं स्वर्णस्य, तारमाक्षिकं रौप्यस्य, तुत्थं ताम्रस्य, कांस्यं ताम्ररङ्गयोः, पित्तलं ताम्रयशदयोः, सिन्दूरं शीषकस्य, शिलाजतु च लौहस्योपधातुः । मतान्तरे तु माक्षिकतुल्यकाभ्रनीलाञ्जनरसाञ्जनमनःशिलाहरितालेषु । गुणाः—“उपधातुषु सर्व्वेषु तत्तद्धातुगुणा अपि । सन्ति किं तेषु तेऽन्यूनास्तत्तदंशाल्पभावतः ॥” भा.म.१भ.धातुव. ।

उपधानम् । क्ली । विषे । उपबर्हे । বালিশ । मे.नचतुष्कं । [आसन्नमरणे । मे. ।

उपधूपितः । त्रि । आसन्नात्समये । हारा. ।

उपनखम् । क्ली । क्षिप्यतुल्यरोगे । আঙুলহাড়া । लक्षणं—“नखमांसमधिष्ठाय पित्तं वातश्च वेदनां । करोति दाहपाकौ च तं व्याधिं क्षिप्यमादिशेत् । तदेव क्षतरोगाख्यं तथोपनखमित्यपि ॥” सु.नि.१३अ. ।

उपनयनम् । क्ली । वर्णत्रयाणां यज्ञसूत्रधारणरूपसंस्कारविशेषे । পৈতে দেওয়া । त्रिका. ।

उपनाहः । पुं । स्वेदविशेषे (शाल्वणादौ) । সেক । वचाकिण्वशताह्वादेवदार्व्वादिभिः यः क्रियते स्वेदः स उपनाहः । वा.टी.हेमा. । लेपे । विश्व.हचतुष्कं । नेत्रसन्धिरोगे । कृष्णमण्डलदृष्टिमण्डलसन्धौ ईषत्पाकी स्वल्पवेदनः कण्डूबहुलो ग्रन्थिर्जायते ॥ लक्षणम्—“ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकी कण्डूप्रायो नीरुजस्तूपनाहः ॥” मा.नि. । हरिद्रायाम् । विश्वः ।

उपनाहनम् । क्ली । लेपने । च.द.वा.व्या.चि. ।

उपनाहस्वेदः । पुं । उपनाहजन्यघर्म्मे । वातकफजन्यशोफयोरुपक्रमभेदे । “अथोपनाहस्वेदञ्च कुर्य्याद्वातहरौषधैः । प्रदिह्य देहं वातार्त्तं क्षीरमांसरसान्वितैः ॥ आम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ।” एवमेव महाशाल्वणादिर्ज्ञेयः । सु. चि.१अ. । [हारा. ।

उपपुष्पिका । स्त्री । हाफिकायाम् । হাই ।

उपप्लुता । स्त्री । Morbid sensibility of the uterus. योनिरोगे । लक्षणं यथा—“गर्भिण्याः श्लेष्मलाभ्यासात् छर्द्दिश्वासविनिग्रहात् । वायुः क्रुद्धः कफं योनिमुपनीय प्रदूषयेत् ॥ पाण्डुं सतोदमास्रावं श्वेतं स्रवति वा कफम् । कफवातामयव्याप्ता सा स्याद्योनिरुपप्लुता ॥” चर. ।

उपभूती । स्त्री । महानील्यां । वै.निघ. । [म. ।

उपभोगः । पुं । भोगे । भोजनाधिकभोगे । श-

उपमाता । स्त्री । धात्र्यां । ধাই ।

उपमितः । पुं । शालवृक्षे । श.च. ।

उपयन्त्रम् । क्ली । पञ्चविंशतिविधशल्याहरणोपाययन्त्रभेदेषु । तानि प्रायशो लौहानि भवन्ति । तानि च रज्जुवेणिकापट्टचर्म्मान्तवल्कललतावस्त्राष्ठीलाश्ममुद्गरपाणिपादतलाङ्गुलिजिह्वादन्तनखमुखबालाश्वकटकशाखाष्ठीवनप्रवाहणहर्षायस्कान्तमयानि क्षाराग्निभेषजानि । सु.सू.७अ. । [आनुकूल्ये ।

उपयोगः । पुं । औषधक्रियायां । औषधसेवने ।

उपरत्नम् । क्ली । गौणरत्ने । भा. । गोमेद-पद्मराग-वैदूर्य्यप्रवालेषु । प.मु. । काच स्फटिक-शुक्ति-शङ्खेषु । “उपरत्नानि काचश्च कर्पूराश्मा तथैव च । मुक्ताशुक्तिस्तथा शङ्खः इत्यादीनि बहून्यपि ॥” गुणाः—रत्नतुल्याः किन्तु किञ्चिद्धीनाः । भा.पू.१भ. ।

उपरन्ध्रम् । क्ली । अश्वस्य उदरगह्वरोपरिभागे । ज.द.३अ. ।

उपरसः । पुं । A secondary mineral. गौणरसेषु, उपधातुगणे । ते च हिङ्गुलाभ्रतालकशिलास्रोतोऽञ्जनटङ्कणराजावर्त्तकचुम्बक-स्फटिक-शङ्ख-खटी-गैरिक-कासीसरसक-कपर्द्द-सिकता-बोलाः कङ्कुष्ठकं-सौराष्ट्री च । गुणैः सूतस्य किञ्चि-

हुणयुता: । भा.पू.१भ.धातुव. । यथा – "खचराञ्जनकङ्कुष्ठगन्धालं गैरिकं क्षिति: । शैलेयाञ्जनसमिश्रा: संशन्त्युपरसा बुधा: ॥ कम्पिल्लगौरीचपलाकपर्दसशैलसिन्दूरकवङ्गिजारान् । पाषाणिनीवादरशृङ्गयुक्तानित्यष्टकं सूतसमानमाहु: ॥ रा.नि.व.२२ । गन्धकं वज्रवैक्रान्तं (हीरकं दग्धहीरकञ्च) वज्राभं तालकं शिला । खर्परं शिखितुण्डञ्च विमलं हेममाक्षिकम् । काशीशं कान्तपाषाणं वराटाञ्जनहिङ्गुलम् ॥ गैरिकं शङ्खभूनागं टङ्कणञ्च शिलाजतु । एते चोपरसा: प्रोक्ता:··· । र.सा.सं.।

उपरोधकम् । क्ली । गर्भगृहे । श.च. ।

उपल: । पुं । पाषाणे । रत्ना. । मे. ।

उपलभित् । पुं । पाषाणभेदके । रा.नि.व.५ ।

उपलभेद: (दी) । पुं । करज्योड़िपाषाणभेदके । रा.नि.व.५ ।

उपलवीरुत् । स्त्री । गुल्मिन्याम् । हे.च. ।

उपला । स्त्री । शर्करायां । बालुकायाम् । मे. ।

उपलाख्यक: । पुं । दद्रुघ्नवृक्षे । दादमर्दनी ।

उपलालिका । स्त्री । तृष्णायाम् । वै.निघ. ।

उपलासिता । स्त्री । खटीशर्करायां । वै.निघ. ।

उपलिङ्गम् । क्ली । उपद्रवे । अरिष्टे । हे.च. ।

उपलेप: । पुं । चन्दनादिलेपने । मुखलिप्ततायाम् । सु.चि.३३अ. ।

उपलेपनम् । क्ली । गोमयादिलिपने । त्रिका. ।

उपलोहम् । क्ली । स्वर्णादिधातुविशेषेषु । यथा –"स्वर्णं तारं ताम्रनागं रसं कान्तञ्च तीक्ष्णकं । मुण्डान्तमष्टधा लौहं कांस्यारं घोषकं तथा । उपलोहा: समाख्याता:··· ॥ वै.संग्रहे ।

उपवट: । पुं । पियालवृक्षे । चारवृक्षे । रा.नि.व.११ । See अखट: ।

उपवनम् । क्ली । वहिरुद्याने । अम. ।

उपवनस्थ: । पुं । तुरुष्के ।

उपवल्लिका (ल्ली) । स्त्री । अमृतस्रवालतायाम् । रा.नि.व.३ । [लिश्, ताकिया । हला. ।

उपवर्ह: (णम्) । पुं, क्ली । उपधाने । बा-

उपवस्तम् । क्ली । उपवासे । अम. ।

उपवास: । पुं । लङ्घने । क्रोधादिपरित्यागे । "उपावृत्तस्य पापेभ्य: सहवासो गुणै हि य: । उपवास: सविज्ञेयो न शरीरस्य शोषणं ॥" च.सू.१अ.।

उपवाह्य: । पुं । राजवाहकहस्तिनि । हे.च.।

उपविषम् । क्ली । कृत्रिमविषे । हे.च. । गौणविषमिति । भा. । तच्च अष्टविधं ।

उपविषपञ्चकम् । क्ली । स्नुह्यर्ककरवीरलाङ्गलिकुचेलकेषु । रा.नि.व.१२ । करवीरार्कधुस्तूरलाङ्गलीगुञ्जाहिफेनं वज्रञ्च । प.मु.। अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरक: । गुञ्जाहिफेनधुस्तूरश्चेति सप्त । भा. । दुग्धपूर्णपात्रे दोलायन्त्रेण तत्सर्व्वं शोधितं भवति । र.सा.सं. । [षायाम् । रा.नि.व.६ ।

उपविषा । स्त्री । रक्तातिविषायाम् । अतिवि-

उपविषाणिका । स्त्री । कृष्णातिविषायाम् । मद.व.१ ।

उपविष्टक: । पुं । गर्भजरोगे ।

उपवीतम् । क्ली । यज्ञसूत्रे । अम. ।

उपवेद: । पुं । आयुर्व्वेदे ।

उपवेश: । पुं । उपवेशने ।

उपवेशनम् । क्ली । स्थितौ । वसा । गुणा:— मेदोदोषश्लेष्मसौकुमार्य्यसुखकरम् । राज. ।

उपव्याघ्र: । पुं । चित्रके । চিতে বাঘ । रा.नि.व.१९ ।

उपशम: । पुं । शान्तौ । हे.च. ।

उपशमक्रम: । पुं । साधारणौषधे । वै.निघ. ।

उपशय: । पुं । व्याधिज्ञानहेतौ । लक्षणं— "हेतुव्याधिविपर्य्यस्त-विपर्य्यस्तार्थकारिणाम् । औषधान्नविहाराणामुपयोगं सुखावहं । नृणामुपशयं विद्यात् स हि सात्म्यमिति स्मृत: ॥" मा.नि.।

उपशान्ति: । स्त्री । आरोग्ये ।

उपशायिता । स्त्री । रोगमुक्तिसाधनभूतपथ्ये।

उपशीर्षक: । पुं । बालरोगे । कपालरोगे ।

उपसन्नवर्त्तनम् । क्ली । दुष्टव्रणविशेषे । च.

उपसम्पन्नम् । क्ली । हते । हला. । त्रि । निहते । सुसंस्कृते । "उपसम्पन्नमुद्दिष्टं निहते च सुसंस्कृते ।" मे.नपञ्चकं ।

उपसंव्यानम् । क्ली । परिधानवस्त्रे । अम. ।

उपसत्तिः । स्त्री सेवायाम् । मे.तचतुष्कं ।

उपसरः । पुं । प्रथमगर्भधारणे । [मे.रचतुष्कं ।

उपसर्गः । पुं। पिशाचादिबाधायां । भिन्नरोगे।

उपसर्य्या । स्त्री । वर्षप्रसविन्यां गवि । बछर-बिउनी गाभी । हला. ।

उपसृष्टम् । क्ली । मैथुने । त्रिका. ।

उपसेकः । पुं । व्यञ्जने । येनौदनं भुज्यते । वा.।

उपस्करः । पुं । वेसवारे । बाट्ना । हला. ।

उपस्थः । पुं । शिश्ने । योनौ । रा.नि.व.१८ । मलद्वारे । श.र. । क्रोड़े । मे. ।

उपस्थपत्रम् । क्ली। अश्वत्थपत्रके । "पित्तश्लेष्मणि प्रसन्ने सूपे वा लेपेषु चेति ।" चर. ।

उपस्थाता । पुं । परिचारके । रत्ना. ।

उपस्नेहः । पुं । उपलेपे । स्नेहयुक्ततायां । स्नेहयुक्तान्नरसे । सु.नि.६,७अ. ।

उपस्पर्शः । पुं। स्नाने । आचमने । मे.शचतुष्कं।

उपाङ्गः । पुं । चित्रके । जटा. ।

उपाङ्गचिकित्सा । स्त्री । छिन्नादिप्रतीकारे। यथा—"छिन्नं भिन्नं तथा भग्नं चतं पिच्चितमेव च। तेषां दग्धप्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः ॥" वै.निघ. । अवि.१स्था.२अ. ।

उपाञ्जनम् । क्ली । अनुलेपने ।

उपात्तः । पुं । अमदगजे । हला. ।

उपाधानम् । क्ली । उपधाने । बालिश ।

उपानद्धारणम् । क्ली । चर्मादिपादुकाधारणे। जूता परा। गुणाः—"उपानद्धारणं नेत्र्यमायुष्यं पादरोगहृत् । सुखप्रचारमोजस्यं वृष्यञ्च परिकीर्त्तितम्। पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणां । अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिदम् ॥" वै.निघ. ।

उपाश्रयः । पुं । मत्तहस्तिनि । हला. ।

उपासः । पुं । उपवासे । [मे । मे. ।

उपासनम् । क्ली । शुश्रूषायाम् । अम. । आस-

उपासना । स्त्री । सेवायां । अम. ।

उपास्तिः । स्त्री । सेवायां । हे.च. । [अम. ।

उपास्थि । क्ली । कोमलास्थिनि। कचि हाड़ ।

उपेचा । स्त्री । त्यागे । अनादरे ।

उपोती (दका) (दकी) । स्त्री । A pot-herb. (Basella rubra or lucida.) पूतीकायाम् । बड़ पूँई शाक । मं राजगिरा, माड़वी, रुदवेलि, मयाला खण्डपालक्येति च ख्याता । गुणाः—गुर्व्वी सरा मदघ्नी च । वा.सू.६अ. । कषायोष्णा कटुका मधुरा निद्रालस्यकरी रुच्या विष्टम्भश्लेष्मकरी च । रा.नि.व.७ । स्वादुपाकरसा वृष्या वातपित्तमदापहा । उपोदिका सरा स्निग्धा बल्या श्लेष्मकरी हिमा ॥ सु.सू.४५अ.। उपोदकी त्रिधा सामान्या चुद्रपत्रा वनजा चेति । द्वितीया रसवीर्य्यविपाकेषु पूर्व्वसमा । तृतीया तिक्ता कटूष्णा रोचनी च । रा.नि.व.७ । "सारकत्वं स्निग्धत्वं बल्यत्वं श्लेष्मकरत्वं हिमत्वञ्च ।" राज. ।

उपोदि(दी)का । स्त्री । उपोदक्याम् । बड़ पूँई । पुदिनेति च ख्याता । च.सू.२अ. । See उपोदकी ।

उपोदिकातैलम् । क्ली । चुद्ररोगे हितं । उपोदकीनां चारः २ श. वारि १६ श. एकविंशतिवारं विस्राव्य चारोदकं कार्य्यम् । तैलं ४ श. लवणं १ श. एकत्र पाच्यम् । च.द.चुद्ररो.चि. ।

उपोषः । पुं । उपवासे ।

उपोषणम् । क्ली । उपवासे ।

उप्यम् । क्ली । वपनचेत्रे । रा.नि.व.२।

उप्तः । त्रि । कृतवपने । [भा. ।

उभयकण्टका । स्त्री । बदरवृचे । कुलगाछ।

उभयभागहरम् । क्ली । ऊर्द्धाधोभागहरौषधे । वामक ও রেচক ঔষধ । सु.सू.४१अ. ।

उभयलिङ्गिनी । स्त्री । लिङ्गिन्याम् । पञ्चगुड़ियेति लोके प्रसिद्धा । चि.क.क.बन्ध्या.चि. ।

उमा । स्त्री । अतस्याम् । मशिना । रा.नि.व. १६ । हरिद्रायाम् । कान्तौ । मे.मद्विकं ।

उमाकटः । पुं । उमाधूली । मशिनार धूलि ।

उम्पा(म्पिका)(शालिः) । स्त्री । शालिधान्यविशेषे । गुणाः—मधुरा स्निग्धा सुगन्धा कषाया पित्तश्लेष्मघ्नी रूक्षा वातघ्नी च । रा.नि.व.१६ ।

उम्बरः । पुं । उदुम्बरवृक्षे । यज्ञडुमुर गाछ । है.च. । गुणाः—स्निग्धः स्वाद्वादिगुणयुक्तः उष्णवीर्य्यः कफपित्तकरो गुरुश्च । वा. ।

उम्बिका (म्बी) । स्त्री । यमान्याम् । अर्द्धपक्वतृणानलसंभृष्टयवगोधूमसञ्जर्य्याम् । गुणाः—"कफकरत्वं बलकरत्वं लघुत्वं पित्तानिलापहारित्वञ्च ।" भा. ।

उम्यम् । क्ली । Field of linseed. (Linum utila tissimum.) अतसीक्षेत्रे । हरिद्राक्षेत्रे । भ.द्विरूपाचरकोषश्च ।

उरः । क्ली । वक्षसि । अम. ।

उरःक्षतम् । क्ली । उरोव्रणे । क्षयरोगे ।

उरःक्षतकासः । पुं । क्षयकासरोगे । हृदये क्षत कास । "अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः । रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत् ॥" निदानम् ।

उरगः (ङ्गः) (ङ्गमः) । पुं । सर्पे । क्ली । शीषके । मद.व.१४ । रस.र.ह.चि.एकादशायसे । नागकेशरवृक्षे ।

उरगगृहम् । क्ली । सर्पगृहे ।

उरगारिः । पुं । क्रौञ्चपक्षिणि ।

उरगाशनः । पुं । गरुड़े । जटा. ।

उरगेन्द्रसुमनः । क्ली । नागकेशरे । भा.म.४ भ. । "व्योषाम्बुदलोरगेन्द्रसुमनः ।"

उरच्छः । पुं । गुन्द्रे । गोंदपटेर इति पाश्चात्यभाषा । भा.पू.१भ. ।

उरणः । पुं । मेषे । अम. । क्ली । रौप्ये ।

उरणा । स्त्री । मेष्याम् । ভেড়ী ।

उरणाख्यः(क्षः)कः । पुं । दद्रुघ्नवृक्षे । दादमर्द्दन । हिं एड़ाँचि । চাকন্দা গাছ इति च केचित् । च.टी.स्वा. । अ.र. । आरग्वधवृक्षे ।

उरभ्रः । पुं । मेषपशौ । प.मु. ।

उरभ्रमारिका । स्त्री । वातप्रकृतिकीटविशेषे । तद्दष्टे वायुजरोगा भवन्ति । सु.कल्प.८ष्ठ. ।

उरसिजः । पुं । स्तने । रा.नि.व.१८ ।

उराहः । पुं । कृष्णजान्वीषत्पाण्डुवर्णाश्वे । लक्षणं—"उराहः कृष्णजानुस्तु मनाक्पाण्डुस्तु यो भवेत् ।" ज.द.३अ. ।

उरीहा । स्त्री । कारवेल्लके । করলা, উচ্ছে ।

उरुकालः (कः) । पुं । महाकाललतायाम् । মাকালফলের গাছ । त्रिका. ।

उरुमालः । पुं । फलशाकविशेषे । मायीफल इति पाश्चात्यभाषा । फलगुणाः—"उरुमालं मियालञ्च बृंहणं गुरुशीतलं । स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत् ॥" वा. ।

उरुबुकः / **उरुबूकः** / **उरुवुकः** } पुं । श्वेतैरण्डे । एरण्डवृक्षे । अम. । र.सा.सं. । उदरवृद्धौ । रक्तैरण्डे । रा.नि.व.८ ।

उरुस्तम्भा । स्त्री । कदलीवृक्षे ।

उरोग्रहः । पुं । हृदयरोगविशेषे । অগ্রমাস इति भाषा । लक्षणं यथा—"अत्यभिष्यन्दिगुर्व्वम्बुशुष्कपूत्यामिषाशनात् । सान्द्रं मांसं यकृत्प्लीह्नोः सद्यो वृद्धिर्यदा भवेत् । उरोग्रहं तदा कुर्य्यौ कुपितः कफमारुतौ ॥ न वामपार्श्वे न च दक्षिणांशे वृक्कस्य मध्ये परिवृद्धिमेति । उरोग्रहं तं प्रवदन्ति रोगं वृक्कायतस्तस्य शिरातलत्वं ॥ दौर्ब्बल्यं दुर्ब्बलाग्निश्च कार्श्यं मांसाभिकाङ्क्षितम् । जायते कृष्णवर्णत्वं पीतकश्चापि जायते । द्विजिह्वसदृशः कश्चित् कश्चित्कच्छपसन्निभः । ज्वरोऽरुचिः पिपासा च शोथश्चातिप्रकोपने ॥" नि. । हृदयवेदनायां ।

उरोजः । पुं । स्तने । है.च. ।

उरोघातः । पुं । हृद्रोगे । च.द. ।

उर्णनाभः । पुं । See ऊर्णनाभः ।

उर्णा । स्त्री । See ऊर्णा ।

उर्णायुः । पुं । See ऊर्णायुः ।

उर्द्रः । पुं । जलबिड़ाले । উদ্বিড়াল । श.र. ।

उर्म्मीकफ: । पुं । समुद्रफेने ।

उर्व्वा । स्त्री । मीषके ।

उर्व्वारु: । पुं । इर्व्वारुके । काँकुड़ । भरत:द्वि-रूपकोषश्च । भा.म.२भ.श्मम.चि.वरुणगुडे ।

उर्व्वी । स्त्री । तन्नामकमर्म्मस्थाने । तच्च स्थान-मूरुमध्यदेश: । सु.शा.६अ. । वैकल्यकारमर्म्मान्य-तममर्म्मद्वये । सु.शा.५अ. ।

उल(लु)प: । पुं । प्रतानवत्यां लतायां । सा तु त्रपुषीद्राक्षाताम्बुलीप्रभृति: । अ.टी.सा. । क्ली । तृणविशेषे । উলুথড় । विश्व. । मे. ।

उलु(लू)पी । पुं । शिशुके । शुशोक । अम. । तदाकारमीने । श.र.। उपल इति ख्याते मत्स्ये । शिशुमाराकृतिमत्स्यभेदे,स कलिङ्गादिदेशेषु दृश्यते। शोष इति ख्यातमत्स्ये । भाँगल इति च केचित् । शिशुमार इति सर्व्वस्वे । "चुलप: शिशुमार: स्यात् उलुपी शिशुकस्तथा ।" अ.टी.भ. ।

उलुम्बा । स्त्री । यमान्याम् । वै.निघ. ।

उलूक: । पुं । पेचके । পেঁচা । मे.कत्रिकं । प.मु. । र.मा. । तन्मांसं—"उलूकजन्तु यन्मांसं पित्तलं शान्तिकारकं। वातप्रकोपनञ्चैव...... ।" वै.निघ. । क्ली । स्वनामख्याततृणे । উলুথড় ।

उलूकपाद: । पुं । अश्वस्य पादरोगविशेषे । लक्षणं—"कूर्चमावृत्य य: शोथो जङ्घायामुपजायते। उलूकपादो विज्ञेय: ।" ज.द.३६अ. ।

उलूखल(क)म् । क्ली । उदूखले । भर. । गुग्गुलौ । अम. । [भिषु । सु.शा.५अ. ।

उलूखलसन्धि: । पुं । कक्षावङ्क्षणदशनस

उल्कामुखी । स्त्री । शृगालीविशेषे । हारा. ।

उल्मुकम् । क्ली । ज्वलदङ्गारे । हारा. ।

उल्लस:(नकम्) । पुं,क्ली । रोमाञ्चे । हे.च. ।

उल्लाघ: । पुं । रोगमुक्तौ । रा.नि.व.२० । म-रिचे ।

उल्ली । स्त्री । पलाण्डौ । रा.नि.व.७ ।

उल्लुप्तम् । त्रि । निरन्तरं छेदनातिशयेनानुप-च्छिन्नत्वात् पिष्टमिवोल्लुप्तपिष्टम् । सु.उ.६४अ. ।

उल्लेखनम् । क्ली । वमने । र.मा. ।

उल्लोच: । पुं । चन्द्रातपे । हला.। [शा.१०अ.।

उल्बम् । क्ली । जरायौ । अम. । कलले । सु-

उल्वणम् । क्ली । वातादिजन्यविकारे ।

उशिक् । पुं । घृते ।

उशीर: (क:) । पुं, क्ली । The root of a fragrant grass. (Andropogon muricatum.) स्वनामख्यातसुगन्धतृणमूले । वीरण-मूले । खस् वा लामज्जक इति पाश्चात्ये । गन्ध-বেণার মূল । मं वाला । तैं वट्टिवेलु । च.सू. । गुणा:—शीतलं तिक्तं दाहहरं श्रमघ्नं पित्तज्वरघ्नं जलसौगन्ध्यकरञ्च । रा.नि.व.१२ । उशीरं स्वेद-दौर्गन्ध्य-दाहपित्तास्ररोगजित् । राज. । पाचनं शीतलं स्तम्भनं तिक्तं मधुरं ज्वरघ्नं वान्तिघ्नं उन्म-त्तताहरं कफपित्ततृष्णाघ्नं रक्तघ्नं विषघ्नं वीसर्प-दाहमूत्रकृच्छ्रव्रणघ्नञ्च । भा.पू.१भ. । मद.व.३ । बा-लके । বালা । मुक्ताद्यष्टादशाङ्गे ।

उशीरादि: । पुं। तृतीयकज्वरे कषाय: । "उ-शीरं चन्दनं मुस्तं गुडूचीधान्यनागरं । अम्भसा क-थितं पेयं शर्करामधुयोजितं ॥ भैष.जीर्णज्व.चि. । द्वितीय: ज्वरातीसारे । तस्य द्रव्याणि—उशीरं बालकं मुस्तं धन्याकं शुण्ठी वराहक्रान्ता धातकी रोध्रं बिल्वपेशी च । सा.कौ. ।

उशीरी । स्त्री । क्षुद्रकाशतृणे । ছোট কেশে। गुणा:—मधुरशीता पित्तदाहक्षयघ्नी च।रा.नि.व.८।

उष: । पुं । गुग्गुलौ । रात्रिशेषे । मे.षद्विकं। चारमृत्तिकायाम् । श.र. । क्ली । पांशुजलवणे । পাঙা ফুলা লবণ । प.मु. ।

उषक: । पुं । टङ्कणक्षारे । সোহাগা । रत्ना. । मृत्तिकालवणे । प.मु. ।

उषणम् । क्ली । शुण्ठ्याम् । मरिचे । रत्ना.। भा. पू.१भ.। उदकमञ्जरी । च.द.अ.सा.चि.। "विलो-षणादि: ।" सि.यो.अग्निमा.चि.वृह.चुक्रसन्धाने । पिप्पलीमूले। रा.नि.व.६।"वचोषणकणा: समा:।" त्रिकटुके । वै.नि.घ.२भ.ज्व.चि.सैन्धवाद्यञ्जने ।

उषणा । स्त्री । पिप्पल्याम् । कणायामुषण-स्त्रियाम् । मे.णत्रिकं । शुण्ठ्याम् । चविकायाम् । र.मा. । गजपिप्पलीमूले । अम. । भा.पू.१भ. । कट्फले । मरिचे । सान्निपात्ज्व., चण्डकाद्युद्धलने ।

गजपिप्पल्याम्। वै.निघ.२भ.जिह्वकसन्निपा.ज्व. चि.। [रत्ना.।

उषरा। स्त्री। चारमृत्तिकायाम्। ক্ষারিমাটী।

उषर्बुधः। पुं। रक्तचित्रके। রাংচিত্রে। श.च.।

उषस्। क्ली, स्त्री। प्रत्यूषे। मे.सत्रिकं।

उषा। स्त्री। गवि। গাই। है.च.।

उषाकलः। पुं। कुक्कुटे। त्रिका.।

उषाचारः। पुं। टङ्कणे। সোহাগা। चार-मृत्तिकायाम्। रत्ना.।

उषितः। त्रि। दग्धे। व्युषिते। मे.तत्रिकं।

उषीरः। पुं, क्ली। वीरणमूले। अ.टी.रा.। च.द.र.पि.चि.दूर्व्वाद्यतैले।

उष्ट्रः। पुं। स्वनामख्यातपशुविशेषे। উট। हिं ऊँट्। तन्मांसगुणाः—त्रिदोषशमनं बलपुष्टिप्रदं रुच्यं मधुरं वीर्य्यवर्द्धनञ्च। रा.नि.व.१७। शीतलत्वं लघुत्वं त्रिदोषहरत्वं पुष्टिकरत्वं रुच्यं वीर्य्यवर्द्धनत्वञ्च। रा.नि.व.१५। कटु शोषक्रमिविषहरं दीपनं वातकफघ्नं कुष्ठगुल्मोदरघ्नञ्च। भा.पू.१भ.।

उष्ट्रकण्टकः। पुं। सकण्टकगुल्मविशेषे। ঠাকুরকাঁটা। च.द.। गोक्षुरे। भैष.मसूवा.चि."उष्ट्रकण्टकमूलं।"

उष्ट्रकाण्डिका (ण्डी)। स्त्री। पुष्पवृक्षविशेषे। উঁটাটী इति भाषा। मं उट्कटारा, उटांटी। गुणाः—तिक्ता उष्णा रुच्या हृद्रोगहरी। तद्बीजं मधुरं शीतं वृष्यं सन्तर्पणञ्च। रा.नि.व.१०।

उष्ट्रग्रीवः। पुं,क्ली। पित्तजन्यभगन्दररोगभेदे। "पित्तन्तु प्रकुपितं अनिलेनाधःप्रणुन्नं पूर्व्ववदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति। सास्य कण्ड्वादीन् वेदनाविशेषान् जनयति। अप्रतिक्रियमाणा च पाकमुपैति। व्रणश्च कठिनः संरम्भी कण्डूप्रायः पिच्छिलमजस्रमास्रावं स्रवति। उपेक्षितश्च वातमूत्रपुरीषरेतांसि विसृजति। तं भगन्दरं परिस्राविणमित्याचक्षते।" सु.नि.४अ.। प्रकोपणैः पित्तमतिप्रकोपितं करोति रक्तां पिड़कां गुदागताम्। तदाशुपाकां हिमपूतिवाहिनीं भगन्दरं तूष्ट्रशिरोधरं वदेत्॥ नि.।

उष्ट्रधूसरपुच्छिका। स्त्री। वृश्चिकाल्याम्। বিছাতি। र.मा.।

उष्ट्रपादिका। स्त्री। मदनमालत्याम्। मदनमाली, शापरमाली च इति लोके। र.मा.।

उष्ट्रप्रमाणः। पुं। काश्मीरदेशीयशरभे। मद. व.१२।

उष्ट्रप्रियः। पुं। मरुभूमिजातकण्टकवृक्षविशेषे। টাকুরকাঁটা গাছ। हिं करील्, टाउर। गुणाः करीरशब्दे मृग्याः। भा.पू.१भ.। [नि व ४।

उष्ट्रभक्षिका। स्त्री। क्षुद्रदुरालभायां। रा.

उष्ट्रभक्ष्यः। पुं। वंशकरीरे। বাঁশের কোঁড়। प.मु.।

उष्ट्रमूत्रम्। क्ली। उष्ट्रस्य मूत्रे। गुणाः—कटु तिक्तोष्णं लवणं पित्तकोपनं बल्यम् उदररोगघ्नं वातदोषघ्नञ्च। रा.नि.व.१५।

उष्ट्रशिरोधरम्। क्ली। उष्ट्रग्रीवभगन्दरे।

उष्ट्रिका (ष्ट्री)। स्त्री। वृश्चिकालिक्षुपे। বিছাতি। रा.नि.व.६। मृद्भाण्डविशेषे। हारा.। उष्ट्रभार्य्यायाम्। উটনী। मे.कत्रिकं। तत्क्षीरगुणाः—कुष्ठशोथपित्तार्शःकफाटोपानाहोदरस्थजन्तुगुल्मश्वासनाशित्वम्, ईषद्रूक्षोष्णलवणं, कुष्ठशोफघ्नं पित्तघ्नं अर्शोघ्नं कफाटोपघ्नं आनाहहरं क्रमिगुल्मोदरश्वासघ्नञ्च। रा.नि.व.१५। लघु स्वादु लवणं दीपनं तथा क्रमिकुष्ठकफानाहशोथोदरहरं परम्। भा.पू.१भ.। रुच्यं तथोष्णं लवणं कफस्य निवारणं वातविकारहारि। लघु प्रशस्तं कटुकं। दधिगुणाः—अर्शःकुष्ठक्रमिशूलोदररोगनाशित्वं कटुत्वं स्वादुत्वञ्च। नवनीतगुणाः—विपाके शीतलत्वं लघुत्वं व्रणक्रमिकफकासवातविषघ्नत्वञ्च। घृतगुणाः—शीतमधुरत्वं विपाके कटुत्वं क्रमिकुष्ठगुल्मोदरनाशित्वञ्च। पाके कटु शोषक्रमिविषघ्नं दीपनं वातकफघ्नं कुष्ठगुल्मोदरघ्नञ्च। अत्रि.८अ.।

उष्ट्रीक्षीरम्। क्ली। उष्ट्रीदुग्धे। See उष्ट्री।

उष्णः। पुं। ग्रीष्मे। त्रि। उष्णस्पर्शे, उष्णवीर्य्ये। पलाण्डौ। रा.नि व.। क्ली। शूरणविशेषे। उष्णं वातकफौ हन्यात्। भा.। [आतुरे। धर.। मे.।

उष्णकः। पुं। पूगवृक्षे। ज्वरे। ग्रीष्मर्त्तौ। त्रि।

उष्णगणः। पुं। भद्रदार्व्वादौ। पिप्पल्यादौ। सु.चि.१७अ.।

उष्णगन्धा । स्त्री । कुलिञ्जनवृत्ते । मङ्गावन्नी वच । वै.निघ. ।

उष्णजलम् । क्ली । See उष्णोदकं ।

उष्णफला । स्त्री । लताविशेषे । कुन्दूरुकी । मं गोड़िर्तोडली । वै.निघ. ।

उष्णमल(मूत्र)त्वम् । क्ली । पित्तजन्यरोगे ।

उष्णरश्मिः । पुं । अर्कवृत्ते । अम. ।

उष्णवल्ली । स्त्री । सारिवायाम् । अनन्तमूल ।

उष्णवातः । पुं । मूत्राघातविशेषे । लक्षणं यथा —"व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिलावृतं । वस्तिं मेढ्रं गुदञ्चैव प्रदहन् स्रावयेदधः । मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा । कृच्छ्रात्पुनः पुनर्जन्तोरुष्णवातं वदन्ति तम् ॥" भा. ।

उष्णवारणम् । क्ली । छत्रे । हारा. ।

उष्णवाष्पः । पुं । नेत्रजले । स्वेदे । वै.निघ. ।

उष्णविदग्धदृष्टिः । पुं । दृष्टिगतरोगविशेषे ।

उष्णवीर्य्यः । पुं । शिशुमारे । हे.च. । क्ली । कटुस्वद्रव्याश्रयधर्म्मे । गुणाः —"लघु कफवातघ्नं पित्तकरं हृष्यं भ्रमतृड्ग्लानिस्वेददाहाशुपाकतां करोति । सु.सू.४१अ. । त्रि । तीक्ष्णवीर्य्ये । [तके ।

उष्णसुन्दरः । पुं, क्ली । विभीतकवृक्षे । विभी-

उष्णस्निग्धः । त्रि । तत् यद्वातघ्नं वस्तु । सु. सू.४१अ. । [वै.निघ. । रा.नि.व.२० ।

उष्णा(ष्मा) । स्त्री । क्षयरोगे । सन्तापे । पित्ते ।

उष्णा(भि)गमः । पुं । ग्रीष्मकाले । अम. ।

उष्णाङ्गत्वम् । क्ली । पित्तजन्यरोगे ।

उष्णान्नम् । क्ली । उष्णभक्ते । See अन्नम् ।

उष्णाम्बु । क्ली । सुखोदके । "उष्णाम्बु च सुखोदकम् ।" प.प्र.२ख. । See उष्णोदकम् ।

उष्णासहः । पुं । शरत्काले ।

उष्णिका । स्त्री । यवाग्वाम् । थाउ । रत्ना. ।

उष्णीषः । पुं, क्ली । शिरस्त्राणे । पागड़ी । हिं पाग । धारणगुणाः—शुचिदं केश्यं रजोवातातपघ्नञ्च । मद.व.१३ । चक्षुष्यमायुर्वर्द्धकत्वं शीतोष्णादिनिवारकञ्च ॥ राज. ।

उष्णोदकम् । क्ली । अष्टमांशावशिष्टे, चतुर्भागावशिष्टे, अर्द्धशिष्टे वा पक्वजले । प.प्र.१ख. । तत्र त्रिविधं पादहीनार्द्धहीनत्रिभागहीनत्वात् । "तत्पादहीनं वातघ्नमर्द्धहीनन्तु पित्तनुत् । कफघ्नं पादशेषस्थं पानीयं लघु दीपनम् ॥" पादहीनं हेमन्ते, पादार्द्धोनं शरदि, तथार्द्धावशेषितं प्रावृड्वसन्तग्रीष्मेषु हितं पथ्यञ्च । विशेषाः स्वस्वपर्य्यायेषु मृग्याः । गुणाः— सदापथ्यं कासज्वरविबन्धकफवातघ्नं दीपनं वस्तिशोधनञ्च । रात्रौ तप्तं श्लेष्मघ्नत्वं वातकर्षित्वं अजीर्णजारकत्वञ्च । दिवातप्तं वारि नक्तं जाड्यं गच्छति अतस्तन्न रात्रौ पेयं । एवं रात्रितप्तमपि दिवा गुरु स्यात्, अतस्तदपि दिवा न पेयं । तदात्वमेव तप्तं जलं सदा पेयम् । रा.नि.व.१४ ।

उष्णोपगमः । पुं । ग्रीष्मकाले । अम. ।

उष्मः (कः) । पुं । चारे । र.मा. । क्षयरोगे । रा.नि.व.२० । ग्रीष्मर्त्तौ । अम । वसन्तकाले । उष्णतायां । आतुरे । मे.कत्रिकं ।

उष्मजम् । क्ली । लवणसाधारणे । रत्ना. ।

उष्मस्वेदः । पुं । उष्मजन्यघर्म्मे । यथा—"उष्मस्वेदः प्रयोक्तव्यः लौहपिण्डेष्टिकादिभिः । प्रतप्तैरम्लसिक्तैश्च काये रल्लकवेष्टिते ॥ अथवा वातनिर्णाशी द्रव्यक्वाथरसादिभिः । उष्णैर्घटं पूरयित्वा पार्श्वे छिद्रं निधाय च । विमुद्यास्यं त्रिखण्डाञ्च धातुनां काष्ठवंशजाम् । ...... । सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतं । हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥ अत्र वातघ्नद्रव्यभागाः— शालपर्णी १ भ. पृश्निपर्णी २ भ. कण्टकारी ३ भ. वृहती ४ भ. गोक्षुरं ५ भ. विल्वं ६ भ. गणिकारी ७ भ. श्योणाकः ८ भ. पाटलिः ९ भ. गाम्भारी १० भ. । वै.निघ.स्वेद. ।

उष्मा (अन्) । पुं । सन्तापे । पित्ते । क्षयव्याधौ । रा.नि.व.२० । ग्रीष्मर्त्तौ । अ.टी.नीलकण्ठः ।

उष्मागमः । पुं । ग्रीष्मकाले । उत्तापे ।

उस्रः (स्रा) । पुं, स्त्री । वृषे । अर्ज्जुन्यां । गाई । उपचित्रायाम् । आखुकर्ण्याम् । इन्दुरकाणी । मे.रद्विकं ।

उच्चः । त्रि । धौते । सिक्ते ।

उच्चणम् । क्ली । सेचने ।

उत्ततरः । पुं । महावृषे । हे.च. ।

उत्ता (न्) । पुं । वृषभे । भा.पू.१भ. । ऋषभकौषधे । रा.नि.व.५ ।

उत्ताभद्रः । पुं । वृषे । वै.निघ. ।

उत्तालः । पुं । वानरे । वै.निघ. ।

ऊ

ऊची । स्त्री । भ्रष्टद्रव्ये । हुरापोड़ा इति लोके । See ऊम्बी ।

ऊज्जः । पुं । बले । चर. ।

ऊधः । क्ली । आपीने । अम. ।

ऊधस्यम् । क्ली । दुग्धे । रा.नि.व.१५ ।

ऊम्बी । स्त्री । यवगोधूमयोरर्द्धपक्वमञ्जरी तृणाग्निना भर्जिता ऊम्बीत्युच्यते । "मञ्जरी त्वर्द्धपक्वा या यवगोधूमयोर्भवेत् । तृणानलेन संभ्रष्टा बुधैरुम्बीति सा स्मृता ॥" गुणाः—कफदा बल्या लघ्वी पित्तानिलघ्नी च । भा.पू.१भ. ।

ऊरणः । पुं । मेषे । प.मु. । [१८ ।

ऊरुः । पुं । जानूपरिभागे । ऊँरुर । रा.नि.व.

ऊरुपर्व्वा । पुं, क्ली । जानौ । हाँटु । अम. ।

ऊरुमाणः । पुं । मायीफले । सु.सू.४६अ. । See उरुमालः ।

ऊरुसन्धिः । पुं । जानूपरिस्थसन्धिस्थाने । सु. ।

ऊरुस्तम्भः । पुं । Paralysis of the lower extremities. वायुजन्यस्फोटकरोगविशेषे । आढ्यवात इति केचित् । निदानं सम्प्राप्तिः यथा—"शीतोष्णद्रव्यसंशुष्कगुरुस्निग्धैः निषेवितैः । जीर्णाजीर्णे तथायाससङ्क्षोभस्वप्नजागरैः । —सश्लेष्ममेदः पवनः साममत्यर्थसञ्चितम् । अभिभूयेतरं दोषमूरू चेत्प्रतिपद्यते । सक्थ्यस्थिनी प्रपूर्य्यान्तःश्लेष्मणा स्तिमितेन च । तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ ॥ इति । परकीयाविव गुरू स्यातामतिभृशव्यथौ । ध्यानाङ्गमर्द्दस्तैमित्यतन्द्राच्छर्द्दरुचिज्वरैः । संयुक्तौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः । तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ॥" इति रूपम् । मा.नि. । ऊरुस्तम्भे विधिः कार्य्यो वातकोपो कफापहः । युक्त्या जित्वा कफं रुक्षैः पश्चाद्वातं जयेद्भिषक् । पुराणशालिश्यामाकयवकोद्रवमोदनं । अघृतैर्जाङ्गलैर्मांसैः तथाचालवणैर्हितम् । वास्तूकवायसीनिम्बवेत्राग्रकुलकादिभिः । शुष्कमूलकयूषेण पटोलस्य रसेन वा । कफक्षयार्थं व्यायामेष्वेनं शक्येषु योजयेत् । स्थानान्याक्रामयेत् प्रातः प्रतिस्रोतो नदीन्तरेत् ॥ पथ्यम् । रस.र. ।

ऊरुस्तम्भा । स्त्री । कदलीवृक्षे । रा.नि.व.११ ।

ऊर्ज्जः (कः) । पुं । कार्त्तिकमासे । हे.च. । क्ली । जले । श.र. ।

ऊर्ज्जाः । पुं । उत्साहे । वा.सू.२अ. ।

ऊर्णनाभः । पुं । मर्कटके । माकड़शा । अम. ।

ऊर्णनाभिः । पुं । ऊर्णनाभे । श.र. ।

ऊर्णा । स्त्री । मेषलोम्नि । "ऊर्णा मेषादिलोम्नि स्यात् ।" भ्रूमध्यावर्त्ते । "अन्तरावर्त्तके भ्रुवोः ।" मे.णद्विकं । [नाभौ । हे.च. ।

ऊर्णायुः । पुं । कम्बले । मेषे । प.मु. । ऊर्ण-

ऊर्द्धकण्टा (ण्टिका) (ण्टी) । स्त्री । महाशतावर्य्याम् । रा.नि.व.४ ।

ऊर्द्धका । स्त्री । वायुजन्यरोगविशेषे । ऊर्द्धक् ।

ऊर्द्धगः । पुं । अस्थिभङ्गरोगे । [सु.सू.४१अ. ।

ऊर्द्धगुणभूयिष्ठः । त्रि । वमनद्रव्यमात्रे ।

ऊर्द्धगुदः । पुं । गुदोर्द्धगरोगे ।

ऊर्द्धग्रहः । पुं । अश्वस्य ग्रहदोषजन्यरोगविशेषे । तस्य लक्षणं—जिह्वास्यकृष्णत्वं दर्शनस्मरणनाशश्चेति । "श्यामं जिह्वामुखं यस्य नष्टदृष्टिस्मृतिर्भवेत् । ऊर्द्धग्रहकृतं दोषं तस्य दीनस्य निर्द्दिशेत् ॥" ज.द.५७अ. ।

ऊर्द्धजत्रु । क्ली । स्कन्धसन्धेरूर्द्धभागः । स्कन्धसन्धिर ऊर्द्धभाग । "ऊर्द्धजत्रुगरोगघ्नी । तत्र रोगेषु ।" च.द.ज्व.चि. । [जानुके । भा. ।

ऊर्द्धजानुः (ज्ञुः) । त्रि । ऊर्द्धज्ञौ । उपरिस्थ-

ऊर्द्धतिक्तः (कः) । पुं । नेपालनिम्बे ।

ऊर्द्धनाड़ी । स्त्री । नाड़ीविशेषे ।

ऊर्द्धपातनम् । क्ली । रसस्योर्द्धोत्क्षेपणकर्म्मणि यथा—रस ३ भ. ताम्र १ भ. जम्बीररसेन तावन्मर्द्दयेत्, यावन्न पिण्डतां गच्छति । अथ ऊर्द्धपातनायन्त्रं विद्याधरयन्त्रं वा परिकल्प्य तं पिण्डं तलस्थभाण्डे संस्थाप्य तदुपरिस्थभाण्डे जलं दत्त्वा यन्त्रसन्धिं सम्यक् निरोधयेत् । अथ तदधः वह्निं ज्वालयेत् । "स्थालीमूर्द्ध्नि जलं दत्त्वा वह्निं प्रज्वालयेदधः । एतद्विद्याधरं यन्त्रं पातनायन्त्रमित्यपि॥" पातनायन्त्रमित्यूर्द्धपातनायन्त्रम् । "हण्डिकोपरिस्थलभागेऽन्यां हण्डिकाञ्चोर्द्धमुखीं विन्यस्याधोहण्डिकाभ्यन्तरे पाच्यसूतादिकं निवेश्य च द्वयोः सन्धिं निरोधयेत् । ततः उपरितलस्थाल्यां जलं दत्त्वा अधो वह्निं प्रज्वालयेदिति ।" र.सा.सं. । একটী হাঁড়ির ভিতর পিণ্ডিত সতাম্র রস রাখিয়া তাহার মুখে আর একটী হাঁড়ি বসাইয়া উভয়ের সন্ধিমুখ উত্তমরূপে লেপিয়া শুষ্ক করিবে। পরে উপরিস্থ হণ্ডিকায় জল পূরণ করিয়া জ্বাল দিবে। সিদ্ধ হইলে নামাইয়া হাঁড়ির গায়ে যে ভূষা লাগিয়াছে,তাহা যত্নে লইয়া তাহা হইতে পারা বাহির করিবে।

ऊर्द्धपादः । पुं । काश्मीरदेशीयशरभमृगे । अष्टपादपशुविशेषे । [See वमनं ।

ऊर्द्धभागहरः । त्रि । वमनद्रव्ये । सु.सू.६अ. ।

ऊर्द्धवर्त्तिः । पुं । तन्नामकाश्वशूलरोगे । लक्षणं यथा—"यवसञ्चादनञ्चैव यो वाजी खादितं पुनः । मुखेन प्रोद्गिरत्याशु तं विद्यादूर्द्धवर्त्तिनम् ॥" ज.द. ४३अ. ।

ऊर्द्धवातः । पुं । वायुरोगभेदे । उद्गारे । ঢেকুর । लक्षणं—"अधःप्रतिहतो वायुः श्लेष्मणा मारुतेन च । करोत्युद्गारबाहुल्यमूर्द्धवातः स उच्यते ॥" निदानम् । [श्वासरोगे । भा.ज्व.चि. ।

ऊर्द्धवायुः । पुं । ऊर्द्धगतवायौ । उद्गारबाहुल्ये ।

ऊर्द्धशोधनम् । क्ली । अरिष्टकफले । রীঠা ফল । वमने ।

ऊर्द्धश्वासः । पुं । श्वासरोगभेदे । "ऊर्द्धं श्वसिति यो दीर्घं न च प्रत्याहरत्यधः । श्लेष्मावृतमुखस्रोता क्रुद्धगन्धवहार्दितः ॥ ऊर्द्धदृष्टिर्विपश्यंश्च विभ्रान्ताक्ष इतस्ततः । प्रमुह्यन् वेदनार्त्तश्च शुष्कास्योऽरतिपीड़ितः । ऊर्द्धश्वासे प्रकुपिते ह्यधःश्वासो निरुध्यते । मुह्यतस्ताम्यतश्चोर्द्धं श्वासस्तस्यैव हन्त्यसून्॥" मा.नि.। See श्वासः ।

ऊर्द्धस्थितिः । पुं । अश्वस्योर्द्धावर्त्ते । त्रिका. ।

ऊर्द्धासितः । पुं । कारवेल्ले । করলা উচ্ছে । त्रिका. ।

ऊर्म्मणः । पुं । द्रोणपरिमाणे ।

ऊर्म्मिः । पुं, स्त्री । तरङ्गे । दुःखे । वेदनायां । पीड़ायां । वेगे । भङ्गे । मे.मद्विकं ।

ऊर्म्मिकः । पुं । अश्वस्य पादरोगभेदे । लक्षणं —"ऊर्म्मिकश्चोर्म्मिसंस्थानैर्वलिभिः खुरसम्भवैः ।" ज.द.३६अ. ।

ऊर्व्वः । पुं । वाड़वाग्नौ ।

ऊर्व्वी । स्त्री । ऊरुस्थमर्म्मभेदे । सु. ।

ऊर्व्यङ्गम् । क्ली । गोमयच्छत्रिकायाम् । গুবরে ছাতা । हारा. ।

ऊर्षा । स्त्री । देवताड़कवृक्षे । श.च. ।

ऊलुपी । पुं । शिशुमारे । अ.टी. ।

ऊलूकः । पुं । पेचके । अयं प्रसहजातीयः । एतन्मांसम् उष्णवीर्य्यम् । एतद्भक्षणात् शोषभयकोन्मादाः क्षीणशुक्रता च जायन्ते । भा.पू.१भ. । "उलूकपललं भ्रान्तिकरं वातप्रकोपकरञ्च ।" मद.व. । [रश्मौ । मे. । क्ली । प्रभाते । श.र. ।

ऊषः । पुं । क्षारमृत्तिकायां । अम. । सन्ध्यायां ।

ऊषकः । पुं । कल्लर इति प्रसिद्धे द्रव्यकन्दे । वा.सू.१५अ.ऊषकादि. । "ऊषकस्तुत्थकं हिङ्गु ।" क्षारमृत्तिकायाम् । "ऊषकः क्षारमृत्तिका, वाराणसीसमीपे वभदरदेशे बाहुल्येन भवति । अन्ये तद्भवं द्रव्यान्तरमाहुः ।" सु.सू.३८अ.ड. । क्ली । प्रत्यूषे । श.र. ।

ऊषकादिगणः । पुं । ऊषकतुत्थकहिङ्गुकासीसद्वयसैन्धवशिलाजतूनीति गणः । गुणाः—मूत्रकृच्छ्राश्मरीगुल्ममेदःकफघ्नः । "ऊषकस्तुत्थकौ हिङ्गुकाशीशद्वयसैन्धवं सशिलाजतु ।" वा.सू.१५अ. । च.द.कषायघृते ।

ऊषणम् । क्ली । मरिचे । "ऊषणं मरिचे क्लीवम् ।" मे.णत्रिकं । प.मु.। भा.पू.१भ.ह.व.। पिप्पल्यां । च.द.कफज्व.चि.सिन्दुवारादिः । "सिन्दुवारदलक्वाथः सोषणः कफजे ज्वरे ।" शुण्ठ्याम् । भा.पू.१भ.ह.व.। पिप्पलीमूले । भा.पू.१भ.ह.व.। पुं । चित्रकवृक्षे । भा.पू.१भ.ह.व. ।

ऊषणा । स्त्री । पिप्पल्याम् । रा.नि.व.६ । भा.पू.१भ.ह.व. । चविकायाम् । प.मु. । See चव्यम् । शुण्ठ्यां । वै.निघ. ।

ऊषरः । पुं । क्षारभूमौ । रा.नि.व.२ ।

ऊषरक(ज)म् । क्ली । औषरके । पांशुलवणे । औषरलवणे। रोमकनामायस्कान्तभेदे। रा.नि.व.१३।

ऊषरतृणम् । क्ली । स्वनामख्याततृणे, घासविशेषे । गुणाः—बलदं रुच्यं पशूनां हितञ्च । रा.नि.व.८ ।

ऊषवान् । त्रि । ऊषरे । अम. ।

ऊषसूतम् । क्ली । मृत्तिकालवणे । "ऊषसूतं बालुकेलं शैलमूलाकरोद्भवं । लवणं कटुकं छेदि विहितं कटु चोच्यते ॥" सु.सू.४६अ. ।

ऊषक्षारः । पुं । क्षारमृत्तिकायाम् । लोणामाटी । गुणाः—"उष्णोऽनिलघ्नः प्रक्लेदी ऊषक्षारो बलापहः ।" सु.सू.४६अ. ।

ऊषाकरः । पुं । कुक्कुटे । श.र. ।

ऊषापानम् । क्ली । प्रत्यूषजलपाने । तस्य विधिगुणाः—"अम्भसः प्रसृतीरष्टौ रवावनुदिते पिबेत् । वातपित्तकफान् जित्वा जीवेद्वर्षशतं सुखीति ॥ तथा—अर्शःशोथग्रहण्यो ज्वरजठरजराकुष्ठमेदोविकाराः मूत्राघातास्तु पित्तश्रवणगलशिरःश्रोणिशूलाक्षिरोगाः । ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जन्तोस्तांस्तानभ्यासयोगादपहरति पयः पीतमन्ते निशायाः ॥ विगतघननिशीथे प्रातरुत्थाय नित्यं पिबति खलु नरोयो नासरन्ध्रेण वारि । स भवति मतिपूर्णश्चक्षुषातार्क्ष्यतुल्यो बलिपलितविहीनः सर्व्वगात्रैर्विमुक्तः॥"भा.।

ऊष्मकः । पुं । पित्ते । रा.नि.व. । ग्रीष्मऋतौ । ज्यैष्ठाषाढ़ौ ग्रीष्मऋतुः ।

ऊष्मा । पुं । उष्णतायाम् । क्षयरोगे । वै.निघ.।

ऊष्मापहः । पुं । हेमन्तऋतौ । वै.निघ. ।

ऊहः । पुं । तर्के ।

ऊहिनी । स्त्री । सम्मार्ज्जन्याम् । झाँटा ।

ऊह्यम् । क्ली। "यदनिर्द्दिष्टं बुद्धिमता तदूह्यं ।" सु.उ.६५अ. ।

ऋ

ऋक्थम् । क्ली । स्वर्णे । धने । अम. । सु.सू. ३८अ. । [च. ।

ऋची(जी)षम् । क्ली । भ्राष्टे । ताओया । हे.

ऋजीकः । पुं । धूमे ।

ऋजुश्रेणी । स्त्री । मूर्वायां । रत्ना. ।

ऋजुसर्पः । पुं । सर्पविशेषे । दर्व्वीकरसर्पे । सु.कल्प.४अ. । See सर्पः ।

ऋतम् । क्ली । जले । मे. ।

ऋतुः । पुं । वसन्तादिषड्विधकाले । रवे राशिसंक्रमात् यत्र दोषाणां चयकोपसमा भवन्ति ते ऋतव उच्यन्ते । "चयकोपसमा यस्मिन् दोषाणां सम्भवन्ति हि । ऋतुषट्कं तदाख्यातं रवे राशिषु संक्रमात् ।" भा.पू.१भ.ऋतुचर्य्या । ते च शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्तसंज्ञाः दोषोपचयप्रकोपोपशमननिमित्तानि भवन्ति । तदुक्तं—"माघादयो द्वादशमासा द्विमासिकमृतुङ्कृत्वा षडृतवो भवन्ति । ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः । तेषां तपस्तपस्यौ शिशिरः, मधुमाधवौ वसन्तः, शुचिशुक्रौ ग्रीष्मः, नभोनभस्यौ वर्षाः, इषोर्जौ शरत्, सहःसहस्यौ हेमन्तः इति । भाद्रपदाश्वयुजौ शरत्, कार्त्तिकमार्गशीर्षौ हेमन्तः, पौषमाघौ शीतः, फाल्गुनचैत्रौ वसन्तः, वैशाखज्यैष्ठौ ग्रीष्मः, आषाढ़श्रावणौ प्रावृड़िति" च मतान्तरं । सु.सू.६अ. । ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृण्मिथुनकर्कटौ । सिंहकन्ये स्मृता वर्षाः तुला वृश्चिकयोः शरत्। धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनयोः । भा. ।

भृतौ तु तस्य भेदत्रयं स्वीकुर्व्वन्ति यथा — शीतग्रीष्मवर्षाः । तत्र फाल्गुनादिज्यैष्ठान्ताः ग्रीष्मः, आषाढ़ाद्याश्विनान्ता वर्षाः, कार्त्तिकादिमाघान्ताः शीत इति । ऋतुलक्षणादिकं यथा—"तत्र वर्षास्वोषधयस्तरुण्योऽल्पवीर्य्या आपश्चाप्रसन्नाः क्षितिमलप्रायास्ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टब्धाग्नीनां विदह्यन्ते, विदाहात्पित्तसञ्चयमापादयन्ति, स सञ्चयः शरदि प्रविरलमेघे वियत्युपशुष्यति पङ्केऽर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति । ता एवौषधयः कालपरिणामात्परिणतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्यस्ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छैत्याद्गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयति, स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति । ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्वी भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति, स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षेरितो वातिकान् व्याधीन् जनयति ।···तत्र पूर्व्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्यापराह्णे प्रावृषः प्रदोषे वार्षिकं शारदमर्द्धरात्रे प्रत्यूषसि हैमन्तमुपलक्षयेत् । एवमहोरात्रमपि वर्षमिव शीतोष्णलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयात् । ऋतूनामत ऊर्द्ध्वमव्यापन्नानां लक्षणानि यथा—वायुर्व्वात्युत्तरः शीतो रजोधूमाकुला दिशः । छन्नस्तुषारैः सविता हिमानद्धा जलाशयाः ॥ दर्पिताध्वाङ्क्षखड्गाह्वमहिषोरभ्रकुञ्जराः । रोध्रप्रियङ्गुपुन्नागाः पुष्पिता हिमसाह्वये ॥ शिशिरे शीतमधिकं वातवृष्ट्याकुला दिशः । शेषं हेमन्तवत्सर्व्वं विज्ञेयं लक्षणं बुधैः ॥ दिशो वसन्ते विमलाः काननैरुपशोभिताः । किंशुकाम्भोजवकुलचूताशोकादिपुष्पितैः ॥ कोकिलाषट्पदगणैरुपगीता मनोहराः । दक्षिणानिलसंवीताः सुमुखाः पल्लवोज्ज्वलाः ॥ ग्रीष्मे तीक्ष्णांशुरादित्यो मारुतो नैरृतोऽसुखः । भूस्तप्ता सरितस्तन्व्यो दिशः प्रज्वलिता इव ॥ भ्रान्तचक्राह्वयुगलाः पयःपानाकुला मृगाः । ध्वस्तवीरुत्तृणलता विपर्णाङ्कितपादपाः ॥ प्रावृष्यम्बरमानद्धं पश्चिमानिलकर्षितैः । अम्बुदैर्विद्युदुद्योतप्रस्रुतैस्तुमुलस्वनैः ॥ कोमलश्यामशस्याढ्या शक्रगोपोज्ज्वला मही । कदम्बनीपकुटजसर्ज्जकेतकिभूषिता ॥ तत्र वर्षासु नद्यम्भःपूरोद्भग्नतटद्रुमाः । वाप्यः प्रोत्फुल्लकुमुदनीलोत्पलविराजिताः ॥ भूरव्यक्तस्थलश्वभ्रा बहुशस्योपशोभिता । नातिगर्जत्स्रवन्मेघनिरुद्धार्कग्रहं नभः ॥ बभ्रुरुष्णः शरद्यर्कः श्वेताभ्रविमलं नभः । तथा सरांस्यम्बुरुहैर्भान्ति हंसांसघट्टितैः ॥ पङ्कशुष्कद्रुमाकीर्णा निम्नोन्नतसमेषु भूः । बाणसमाह्वबन्धूककाशासनविराजिता ॥ स्वगुणैरतियुक्तेषु विपरीतेषु वा पुनः । विषमेष्वपि वा दोषाः कुप्यन्त्यृतुषु देहिनां ॥ हरेद्वसन्ते श्लेष्माणं पित्तं शरदि निर्हरेत् । वर्षासु शमयेद्वायुं प्राग्विकारसमुच्छ्रयात् ॥" सु.सू.६अ.। स्त्रीकुसुमे । अम. । See पुष्पं, आर्त्तवञ्च ।

ऋतुजन्मा । स्त्री । पुनर्नवायाम् ।

ऋतुपरीक्षा । स्त्री । आर्त्तवपरीक्षायाम् । तद्यथा—"ऋतौ कण्डूयनं योनौ क्वचिदङ्गे च वेदना । बाहुल्यं स्वल्पता वापि चानुबन्धित्वमस्य वा । संरोधः सर्व्वथा वापि वेद्यान्येतानि यत्नतः । आमयेष्वखिलेष्वेव भिषग्भिर्योषितां सदा ॥" अत्रि. ।

ऋतुमती । त्रि । रजःस्वलायां स्त्रियाम् । तल्लक्षणं यथा—"पीनप्रसन्नवदनां प्रक्लिन्नात्ममुखद्विजां । नरकाम्यां प्रियकथां स्रस्तकुक्ष्यक्षिमूर्द्धजाम् ॥ स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचं । हर्षौत्सुक्यपराञ्चापि विद्यादृतुमतीमिति॥ नियतं दिवसेऽतीते सङ्कुचत्यम्बुजं यथा । ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा ॥ मासेनोपचितं काले धमनीभ्यां तदार्त्तवम् । ईषत्कृष्णं विदग्धञ्च वायुर्योनिमुखं नयेत् ॥ तद्वर्षाद्द्वादशात्काले वर्त्तमानमसृक् पुनः । जरापक्वशरीराणां याति पञ्चाशतः क्षयम् ॥" सु. शा.२।३अ. ।

ऋतुराजः । पुं । वसन्तऋतौ । रा.नि.व.२१ ।

ऋतुविपर्य्ययः । पुं । ऋतुव्यापदि । वसन्तादिस्थाने शरदादिधर्म्मप्रवृत्तौ ।

ऋतुवैषम्यम् । क्ली । ऋतुचर्य्याविपरीताचरणे । भा.म.४भ. । "क्रोधर्त्तुवैषम्यशिरोभितापैः ।"

ऋतुशूलम् । क्ली । ऋतुकाले रजोरोधजन्यशूलरोगे । "पुष्पस्य वातादिभिर्हतत्वं तस्य कारणं ।

बहुलं पिच्छिलं स्निग्धं घनं स्रवति शोणितं । योनौ नाभौ तु शूलानि ऋतौ परमदारुणम्॥" रस.र.यो.व्या.चि. ।

ऋतुषट्कम् । क्ली । हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु । "चयकोपसमा यस्मिन् दोषाणां सम्भवन्ति हि । ऋतुषट्कं तदाख्यातं रवेराशिषु संक्रमात् ॥" भा. ।

ऋतुसन्धिः । पुं । ऋतुद्वयसंश्लेषसमये । स च ऋतुद्वयस्याद्यन्तसप्ताहरूपः । तदुक्तं "ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः । तत्र पूर्व्वोविधिस्त्याज्यः सेवनीयः परो विधिरिति ॥" वा. ।

ऋतुसम्मिता । स्त्री । मुनिखर्जूरिकायाम् । वै.निघ. ।

ऋतुस्नाता । स्त्री । रजोदर्शनाच्चतुर्थेऽह्नि स्नातायाम् । "पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना । तादृशं जनयेत्पुत्रं ततः पश्येत्पतिं प्रियं ॥" सु.शा.२अ. ।

ऋतुहरीतकी । स्त्री । ऋतौ ऋतौ हरीतकीभक्षणविधौ । यथा—"सिन्धूत्थशर्कराशुण्ठीकणामधुगुड़ैः क्रमात् । वर्षादिष्वभया सेव्या रसायनगुणैषिणा॥" च.द.। भट्टारस्तु ग्रीष्ममधिकृत्याह । ग्रीष्मे तुल्यगुड़ां सुसैन्धवयुतां मेघावनद्धाम्बरे सार्द्धं शर्करया शरत्यमलया शुण्ठ्या तुषारागमे । पिप्पल्या शिशिरे वसन्तसमये चौद्रेण संयोजितामित्थं प्राश्य हरीतकीमिव रुजो नश्यन्तु ते शत्रवः ॥ प्रयोगा.वाजी.। [धान्ये । निर्वुषीकृतधान्ये । अ.टी.।

ऋदम् । क्ली । सम्पक्वधान्ये । अम. । पक्वमर्द्दित-

ऋद्धिः । स्त्री । कोशयामलप्रसिद्धे ऋद्धिवृद्धीति च गौड़प्रसिद्धे स्वनामख्यातलताकन्दे। तदुक्तं "ऋद्धिर्वृद्धिश्च द्वौ कन्दौ भवतः कोशयामले । श्वेतरोमान्वितः कन्दो लताजातः सरन्ध्रकः। तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा। प्रयोगेष्वनयोरेकं यथालाभं प्रयोजयेत् ॥ रा.नि.व.५ । गुणाः—वृद्धिगुणतुल्या बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः बलैश्वर्य्यकरी मूर्च्छारक्तपित्तहरी च । भा.पू.१भ. । महाश्रावण्यां । वा.सू.१५अ.पद्मकादौ अरुणः। "पद्मकपुण्ड्रौवृद्धितुगर्द्ध्यः। एतदभावे वाराही योज्या ।"

ऋद्धिजा । स्त्री । सर्पगन्धायां । गन्धरास्नायां । प.मु. । अस्याः कन्दोग्राह्यः । भा.म.१भ. ।

ऋश्यः (ष्यः) । मृगे। रुरुमृगे।"ऋष्यो नीलाङ्गको लोके स रोरु इति कीर्त्तितः।" भा.म.१भ.। तन्मांसगुणाः—कषायं मधुरं वातघ्नं पित्तघ्नं हृद्यं तीक्ष्णं वह्निशोधनञ्च । सु.सू.४६अ. ।

ऋषभः । पुं । ऋषभके । कर्णरन्ध्रे । कुम्भीरपुच्छे। मे.। सु.चि.१७अ. बलीवर्द्दे । वृष । मांसगुणाः—अतिगुरु स्निग्धं पित्तश्लेष्मवर्द्धनं बृंहणं वातघ्नं बल्यं पीनसघ्नञ्च । भा.पू.१भ. ।

ऋषभकः । पुं । One of the eight medicaments,carpopogon pruriens. स्वनामख्यातौषधे । ऋषभ इति गौड़े काश्मीरे च प्रसिद्धः। श्वषभक । जीवकर्षभकयोरुत्पत्तिमाह मिश्रभावः—"जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ। जीवकः कूर्चकाकारः ऋषभो वृषशृङ्गवत् ॥" गुणाः—जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ । एतदभावे विदारीमूलं प्रयोज्यम् । भा.पू.१भ. । मधुरः शीतः पित्तरक्तविरेकनुत् । शुक्रश्लेष्मकरो दाहचयज्वरहरश्च सः । रा.नि.व.५ । "ऋषभको वृषभकः ।" सु.चि.८अ. ।

ऋषभी । स्त्री । कपिकच्छुलतायाम् । आलाकुशी । र.मा. । नराकारयोषिति । शिरालायाम् । विधवायाम् । मे.भचिकं ।

ऋषिः । पुं । गोरोचनायां । वै.निघ. । [प.मु.।

ऋषिकम् । क्ली। लताविशेषे । सियाड़िलता ।

ऋषिजाङ्गलकः (ला) (लिका,की) । स्त्री । ऋक्षगन्धायाम् । सर्पगन्धा । रत्ना. ।

ऋषिपुत्रकः । पुं । दमनकवृक्षे । वै.निघ. ।

ऋषिप्रोक्ता । स्त्री । माषपर्णीलतायां । प.मु.।

ऋषिश्रेष्ठः । पुं । पुण्डरीकवृक्षे । ऋद्धौ ।

ऋषिश्रेष्ठा । स्त्री । ऋद्धौ । वृद्धौ । वै.निघ. ।

ऋषिसृष्टा । स्त्री । ऋद्धौ । मद.व.१ ।

ऋषीकः । पुं । काशतृणे । मद.व.१ ।

ऋष्यः । पुं । हरिणे । श्वेतकुष्ठे । गवयघ्ने ।

नीलहरिते । एतन्मांसं कफघ्नं पित्तघ्नं किञ्चिदा-
नवर्द्धकं लघु बल्यञ्च । भा.पू.१भ. ।

ऋक्षगता । स्त्री। माषपर्ण्यां। माषाणी । श.र.।

ऋक्षगन्धा (न्धिका) । स्त्री । ऋषिजाङ्ग-
लायां । र.मा. । श्वतिबलायाम् । चीरविदार्य्यां ।
श.र. । श्वेतशर्करकन्दे, रक्तशर्करकन्दे । वै.निघ.।

ऋक्षजिह्व(क)म् । क्ली । महाकुष्ठभेदे । तस्य
कनकासवः । पुं । हिक्काश्वासे आसवः । पाठः "संचुद्य कनकं शाखामूलपत्रफलैः सह। ततश्चतुष्पलं ग्राह्यं वृषमूलत्वचस्तथा। मधुकं मागधी व्याघ्री केशरं विश्वभेषजं । भार्गी तालीशपत्रञ्च सचूर्णैर्षां पलद्वयम् । संगृह्य धातकीप्रस्थं द्राक्षायाः पलविंशतिम् । जलद्रोणद्वयं दत्त्वा शर्करायास्तुलां तथा । चौद्रस्यार्द्धतुलाञ्चापि सर्व्वं संमिश्रं यत्नतः । भाण्डे निक्षिप्य चावृत्य निदध्यान्मासमात्रकम्..."॥ ধুতুরার ফল মূল পত্র শাখা মিলিত ৪প.বাসকমূলের ছাল ৪ প. পিপুল, যষ্টিমধু,কণ্টিকারী, নাগেশ্বর, শুঁট্, বামুনহাটী, তালীশপত্র প্রত্যেকে চূর্ণ ২ প. ধাইফুল ১৬ প. দ্রাক্ষা ২০ প. জল ১২৮ শ. শর্করা ১২॥০ শ. মধু ৬।০ সের একত্র কলসে ১ মাস রাখিয়া ছাঁকিয়া লইবে । भैष. ।

कनकाह्वः (यः) । पुं, क्ली । श्वेतधुस्तूरे । तण्डुलीयशाके । वै.निघ. । जैपालवृक्षे । प.मु. । धुस्तूरवृक्षे । रा.नि.व.१० । नागकेशरवृक्षे । रा.नि.व.६ । र.मा. ।

कनकोद्भवः । पुं । महासर्जवृक्षे । वै.निघ. ।

कननः । त्रि । काणे । কাণা । श.च. ।

कनिका । स्त्री । समितायाम् । श.चि. ।

कनिचिः । स्त्री । शूरणे । ওল । प.मु. । गुञ्जायां । কুঁচ ।

कनिष्ठकम् । क्ली । शूकतृणे । श.च. ।

कनिष्ठा । स्त्री । अङ्गुष्ठात्पञ्चमाङ्गुली । কড়ে আঙুল । रा.नि.व.१८ ।

कनी । स्त्री । कन्यायाम् । हे.च. ।

कनीचिः । स्त्री । गुञ्जालतायां । কুঁচ গাছ । श.र. । सपुष्पलतायां । उणादिकोषः ।

कनीनिका (नी) । स्त्री । अक्षितारके । रा.नि.व्र.१८ । अश्वस्य नासासमीपभागे । ज.द.२अ. । कनिष्ठाङ्गुली । मे.कचतुष्कं ।

कनीयसम् । क्ली । ताम्रे । हे.च. ।

कनीयान् । पुं । सोमलताभेदे । सु.चि.२९ अ. । See सोमः । त्रि । अनुजे । त्रिका. । अत्यल्पे । मे. ।

कनीयःपञ्चमूलम् । क्ली । त्रिकण्टकबृहतीद्वयपृथक्पर्णीविदारिगन्धासु । त्रिकण्टकं गोक्षुरे । विदारिगन्धा शालपर्णी । सु.सू.३८अ. ।

कनेरा । स्त्री । हस्तिन्याम् । वै.निघ. ।

कन्तुः । पुं । हृदये । वै.निघ. ।

कन्था । स्त्री । स्यूतकर्पटे । কাঁথা । अम. । चीरे । तूलपूर्णगात्रवस्त्रे । লেপ ।

कन्थारी । स्त्री । स्वनामख्यातवृक्षे । फणिमनसा । मं कं कांथारी, कांतरु, फणीनिवडुंग कोङ्कणे । गुणाः—कटुस्तिक्तोष्णा वातकफघ्नी शोथघ्नी दीपनी

रुचिकरी रक्तग्रन्थिरुजाघ्नी ज्वरघ्नी च। रा.नि.व.८।

कन्दः । पुं, क्ली। (Arum campanulatum.) A bulbous or tuberous root. फलहीनौषधिमूले। योनिरोगविशेषे। যোনিকন্দ রোগ। See कन्दरोगः। इन्दीवरे। रा.नि.व.२३। रक्तमूलके। कासालुके। श्वेतश्लक्ष्णबहुपुटकन्दविशेषे। सर्पच्छत्रकमिति लोके। ड। सु.सू.३९अ.पित्तशमने। हस्तिकन्दे। वै.निघ.अलस.चि.हस्तिकर्णयोग.। शूरणकन्दे। र.सा.सं.। सि.यो.बाहुशालगुड़े। च.द.अ.पि.चि.अभयशुद्धिः। शालूके। प.मु.। शलगम इति प्रसिद्धे मूलविशेषे। शृङ्गने। रा.नि.व.७। सुगन्धितृणविशेषे। রাম-কর্পূর। प.मु.। गुड़े, शर्करायां। দলো, ভুরো। च.द.अर्शः-चि.काङ्कायनमोदके। पिण्डालुके। सुखनीति ख्याते कन्दे। शस्यमूले। मे.दद्विकं।

कन्दकः । पुं। सुखालौ। रा.नि.व.७। वनशूरणे। বন ওল। भैष.कुष्ठ.चि.कन्दर्पसारतैले।

कन्दगुड़ूची । स्त्री। गुड़ूचीविशेषे। गुणाः—"कन्दोद्भवा गुड़ूची च कटूष्णा सन्निपातहा। विषघ्नी ज्वरभूतघ्नी बलीपलितनाशिनी॥" रा.नि.व.३।

कन्दग्रन्थिः । पुं। पिण्डालुनामकन्दशाके। रा.नि.व.७। श्वेतराजालुके। वै.निघ.।

कन्दजविषम् । क्ली। कन्दजातविषे। तच्चाष्टविधम्। यथा—"शक्तुकं मुस्तकं कौर्म्मं दर्व्वीकं सर्षपं तथा। सैकतं वत्सनाभञ्च शृङ्गी चैव विशेषतः॥ इति। एतानि औषधार्थं ग्राह्याणि। अपराणि च दश नामानुरूपाणि न भैषज्यरसायने प्रयोज्यानि। तच्छुद्धिः—"विषभागांश्चणकवत् स्थूलान् कृत्वा तु भाजने। तत्र गोमूत्रकं क्षिप्ना प्रत्यहं नित्यनूतनं। शोषयेत्त्रिदिनं पूर्व्वं धृत्वातीवातपे ततः। प्रयोगेषु प्रयुञ्जीत भागमानेन तद्विषम्॥" इति। [कौञ्जी इति पश्चिमदेशे। श.र.।

कन्दटम् । क्ली। शुक्लोत्पले। শ্বেতশুন্দি।

कन्दतृणम् । क्ली। तृणविशेषे। গুণ্ঠতৃণ। वै.निघ.।

कन्दनालका । स्त्री। गोजिह्वायां। वै.निघ.।

कन्दपञ्चकम् । क्ली। तैलकन्दाहिनेत्रकन्दसुकन्दक्रोड़कन्दरुदन्तीकन्देषु। गुणाः—"कन्दस पञ्चकं प्रोक्तं तामादिरसमारकं। सर्व्वरोगहरं प्रोक्तमेतद्वै स्निग्धपञ्चकम्॥" वै.निघ.।

कन्दपत्रः । पुं। महातालीशपत्रे। वै.निघ.।

कन्दफला । स्त्री। क्षुद्रकारवेल्लके। উচ্ছে গাছ। विदार्य्यां। ভূঁইকুমড়া। रा.नि.व.७।

कन्दबहुला । स्त्री। त्रिपर्णीनामकन्दे। বন কাপাসী। रा.नि.व.७। [रा.नि.व.७।

कन्दमूलम् । क्ली। मूलके। মূলা। हिं मूलि।

कन्दरः । पुं। श्वेतखदिरे। क्षुद्ररोगविशेषे। See कदरः। क्ली। आर्द्रके। शुण्ठ्यां। रा.नि.व.६। गिरिगुहायाम्।

कन्दरालः (कः) । पुं। प्लक्षवृक्षे। পাকুড় গাছ। गर्द्दभाण्डवृक्षे। गाम्भीभाट इति भाषा।

कन्दरूलः । पुं। कटुशूरणे। वै.निघ.।

कन्दरोगः । पुं। An affection of the feminine organ considered as a fleshy excrescence, but apparently prolapsus uteri. योनिरोगविशेषे। যোনিকন্দ। स च वातादिभेदेन चतुर्विधः। तस्य निदानलक्षणे—दिवानिद्रातिमैथुनादिकारणैः दोषाः प्रकुपिताः पूयरक्ताभं मन्दारफलसदृशं कन्दमुत्पादयन्ति। "दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात्। क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा॥ पूयशोणितसङ्काशं लकुचाकृतिसन्निभं। उत्पद्यते तदा योनौ नाम्ना कन्दः स योनिजः॥ रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत्। दाहरागज्वरयुतं विद्यात्पित्तात्मकन्तु तम्॥ नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकं। सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः॥ मा.नि.।

कन्दरोद्भवा । स्त्री। क्षुद्रपाषाणभेदवृक्षे। পাথরচুর। रा.नि.व.५। [व.३।

कन्दरोहिणी । स्त्री। कन्दगुड़ूच्यां। रा.नि.

कन्दर्पकूपः । पुं। योनौ।

कन्दर्पजीवः । पुं। कामजवृक्षे। रा.नि.व.५।

कन्दर्पज्वरः । पुं। कामे। [लिङ्गे। त्रिकां.।

कन्दर्पमुशलः । पुं। Membrum virile.

कन्दर्पसारतैलम् । क्ली। कुष्ठाधिकारे तै-

ষম্। যথা—কটু তৈল ৪ শ.। ক্কাথার্থ—ছাতিমছাল, কালিয়াকড়া, গুলুঞ্চ, নিম্‌ছাল, শিরীষছাল, ঘোড়ানিম্ বা তিৎপলতা, জয়ন্তীপত্র, তিৎলাউ, রাথালশশার মূল বা গোরক্ষচাকুলে, হরিদ্রা প্রত্যেকে ১০ প. জল ৬৪ শ. শে. ১৬শ.। গোমূত্র ১৬ শ. শোণালুপাতা, ভীমরাজ, জয়ন্তীপত্র, ধুতুরাপাতা, হরিদ্রা বা আম্‌লা, সিদ্ধি, খর্জ্জূরপত্র, গোময়, আকন্দপত্র, সিজুরপাতা প্রত্যেকে স্বরস ৪ শ.। কল্কার্থ—মাকালফল, বচ, ব্রহ্মীশাক, তিৎলাউ, চিতামূল, গোয়ালিয়া, কুঁচিলা, মনছাল, আম্‌লা, খুদে নটে, গেঁটেলা, শোণালি, আকন্দ-আটা, কালকাসন্দা, ঈশের মূল,আউচ, মঞ্জিষ্ঠা, ঘোড়া নিম্ বা তিৎপলতা, রাথালশশামূল, বিছাতিমূল, গন্ধভাদুলিয়া, হাপরমালী, মূর্ব্বা, ছাতিমছাল, কুড়চিছাল, নিম্‌ছাল, ঘোড়ানিম্, গুলুঞ্চ, সোমরাজীমূল, হাকুচবীজ, চাকন্দাবীজ, ধনে, ভীমরাজ, যষ্টিমধু, কুন্দুরুখোটী (कन्दकमिति पाठ) বন ওল, শটী, কট্‌কী, দারুহরিদ্রা, তেউড়ী, পদ্মকাষ্ঠ, পিপুলমূল, অগুরু, কুড়, কট্‌ফল, জটামাংসী, কর্পূর, সিদ্ধির পাতা, এলাচ, গুড়ত্বক্, টুয়রিফল, হরীতকী, বহেড়া প্রত্যেকে ২ তোলা। सा.कौ.भैष.पाठःसंग्रहे मृग्यः।

कन्दलः । पुं । कपालि । कनके । धरणिः । क्रमसारङ्गे । हे.च.। क्ली । शिलीन्ध्रपुष्पे । त्रिका.। कमलवीजे । कदलीपुष्पे । आर्द्रके । रा.नि.व.६ । शूरणे । भा.पू.१भ.शा.व. । गण्डस्थले । अङ्कुरे । कोमलशाखायाम् ।

कन्दलता । स्त्री । मालाकन्दे । रा.नि.व.७ । चुद्रकारवल्लयाम् । वै.निघ. ।

कन्दलिन् (ली) । पुं, स्त्री । पद्मवीजे । পদ্মের বীজ । রা.নি.ব.১০ । सु.सू.३८अ.पित्तशमने । मृगविशेषे । गुल्मभेदे । मे.लत्रिकं ।

कन्दलीकुसुमम् । क्ली । शिलीन्ध्रे । কোড়কছাতা । श.च. ।

कन्दवर्गः । पुं । कन्दजातिमात्रे । গেঁড়ো, গেঁড়্। यथा—विदारीकन्दशतावरीमृणालविसकशेरुशृङ्गाटपिण्डालुमध्वालुहस्त्यालुकाष्ठालुशङ्खालुरक्तालुकेन्दीवरोत्पलकन्दादिषु । गुणाः—रक्तपित्तहराणि शीतानि मधुराणि गुरुणि बहुशुक्रकराणि स्तन्यवृद्धिकराणि च । सु.सू.४६अ. । "शूरणः पिण्डपिण्डालू पलाण्डुर्गृञ्जनस्तथा । ताम्बूलपर्णकन्दः स्यात् हस्तिकन्दस्तथा परः। वराहकन्दः अथान्यः कन्दसाङ्गा इमे स्मृताः ॥" अत्रि.१६अ. ।

कन्दवर्द्धनः । पुं । Esculent root. शूरणे । रा.नि.व.७ । कटुशूरणे । वै.निघ. ।

कन्दवल्ली । स्त्री । बन्ध्याकर्कोटक्याम् । रा.नि.व.३ । भूमिकुष्माण्डे । वै.निघ. ।

कन्दविषम् । क्ली । यस्य कन्दे विषं वर्त्तते । कालकूट-वत्सनाभ सर्षप पालक-कर्द्दम-वैराटक-मुस्तक शृङ्गी-पुण्डरीक-मूलक हलाहल महाविष-कर्कटकानीति त्रयोदश कन्दविषाणि । एषु वत्सनाभानि चत्वारि, मुस्तके द्वे, सर्षपानि षट्, शिष्टानि एकैकमेवेति। "गुणाः—कन्दजानि तु तीक्ष्णाणि तेषां वक्ष्यामि विस्तरं । स्पर्शाज्ञानं कालकूटे वेपथुः स्तम्भ एव च । ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता । सर्षपे वातवैगुण्यमानाहो ग्रन्थिजन्म च । ग्रीवादौर्ब्बल्यवाक्सङ्गौ पालकेऽनुमताविह। प्रसेकः कर्द्दमाख्ये तु विड्भेदो नेत्रपीतता । वैराटकेनाङ्गदुःखं शिरोरोगश्च जायते । गात्रस्तम्भो वेपथुश्च जायते मुस्तकेन तु । शृङ्गीविषेणाङ्गसाददाहोदरविवृद्धयः । पुण्डरीकेण रक्तत्वमक्ष्णोर्वृद्धिस्तथोदरे । वैवर्ण्यं मूलकैश्छर्द्दिर्हिक्काशोफप्रमूढताः। चिरेणोच्छ्वसिति श्यावो नरो हलाहलेन वै। महाविषेण हृदये ग्रन्थिशूलोद्गमौ भृशम् । कर्कटेनोत्पतत्यूर्द्ध्वं हसन्दन्तान्दशत्यपि । कन्दजान्युग्रवीर्य्याणि प्रयुक्तानि त्रयोदश । रुक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशुव्यवायि च । विकाशि विशदञ्चैव लघुपाकि च तत्स्मृतं । सर्व्वाणि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः ॥" सु.कल्प.२अ. ।

कन्दशाकः । पुं । See कन्दवर्गः। [वै.निघ.।

कन्दशालिनी । स्त्री । बन्ध्याकर्कोटक्याम् ।

कन्दशूरणः । पुं। शूरणकन्दे। ওল,কটুওল। रा.नि.व.७ ।

कन्दसंज्ञम् । क्ली । (Prolapsus uteri.) योन्यर्शसि । যোনিরক্তরোগ । त्रिका. । See

कन्दः and कन्दरोगः ।

कन्दा । स्त्री । कन्दगुड़ूच्याम् । वै.निघ. ।

कन्दाढ्यः । पुं । धारणीनाममहाकन्दशाके । धरनीकन्द । रा.नि.व.७ । वै.निघ. ।

कन्दामृता । स्त्री । कन्दगुड़ूच्यां । रा.नि.व.३।

कन्दार्हः । पुं । कन्दशूरणे । रा.नि.व.७ ।

कन्दालुः । पुं । त्रिपर्णीलतायां । कासालुके । धारणीनाममहाकन्दशाके । रा.नि.व.७ ।

कन्दिरी । स्त्री । लज्जालुकायाम् । श.चि. ।

कन्दी । पुं । कटुशूरणे । रा.नि.व.७ ।

कन्दुः । पुं, स्त्री । लौहमयन्युब्जपात्रे । তাওয়া । हला. । सुराकरणपात्रे । गेण्डुके ।

कन्दुकम् । क्ली । पूगफले । अङ्कुरे । वै.निघ. ।

कन्दुपक्वः । त्रि । जलोपसेकं विना केवलपात्रे अग्निना भृष्टतण्डुलादौ। यथा —"कन्दुपक्वानि तैलानि पायसं दधि शक्तवः । द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपीति" स्मृतिः ।

कन्देचुः । पुं । काशभेदे । কেশে । वै.निघ. ।

कन्दोटः । पुं, क्ली । शुक्लोत्पले । कुमुदे । नीलोत्पले । श.र. । [र. ।

कन्दोतः । पुं । कुमुदे । त्रिका. । श्वेतपद्मे । श.र. ।

कन्दोत्थम् । क्ली । नीलोत्पले । নীলশুন্দি । रा.नि.व.१० ।

कन्दोद्भवा । स्त्री । कन्दगुड़ूच्यां । रा.नि.व.३। चुद्रपाषाणभेदायाम् । रा.नि.व.५ ।

कन्दोषधम् । क्ली । आर्द्रके । वै.निघ. ।

कन्धरः । पुं । मारिषशाके । मेघे । क्ली । ससारस्य दध्नः तक्रं कन्धरमिष्यते । कु.टी. श्रीकण्ठः । ससेहं दधि कन्धरं । सि.यो.षट्कन्धरतैले ।

कन्धरा । स्त्री । मानविशेषे । वै.निघ. । ग्रीवायाम् । रा.नि.व. १८ ।

कन्धिः । स्त्री । ग्रीवायाम् । हारा. ।

कन्धुकः(कः) । पुं। भूमिवदरे । आरण्यवदरे । वन कुल । वै.निघ. ।

कन्नम् । क्ली । मूर्च्छायाम् । श.मा. ।

कन्यका । स्त्री । गृहकन्यायाम् । घृतकुमारी । रा.नि.व.५ । कन्यायाम् । हृष्टौ ।

कन्यसा । स्त्री । कनिष्ठाङ्गुलौ ।

कन्या । स्त्री । घृतकुमार्यां । घृतकुमारी । रा.नि.व.५ । स्थूलैलायाम् । रा.नि.व.६ । वाराहीनाममहाकन्दशाके । रा.नि.व.७ । कुमार्यां । रा.नि.व.१८ । नार्याम्। महौषधिविशेषे । See ओषधिः। बन्ध्याकर्कोटक्यां । रा.नि.व.३। (Aloes perpoliata.) मुसब्बर इति ख्यातद्रव्ये । बन्दायां । मान्दरा । कन्दगुड़ूच्यां । वै.निघ. ।

कन्याटः । पुं । लम्पटे । কামুক । हारा. । आभ्यन्तरगृहे ।

कन्युषम् । क्ली । वस्तपुच्छे । हारा. । बन्ध्याकर्कोटकीफले । भा.पू.१भ. ।

कपटम् । क्ली । चौड़ादिवदारुणि ।

कपटचौड़ा । स्त्री । चौड़ानामदेवदारुविशेषे। रा.नि.व.१२ ।

कपटा । स्त्री । क्षुद्रबृहत्याम् ।

कपटिनी । स्त्री । चौड़ानामगन्धद्रव्ये देवदारौ वा । रा.नि.व.१२ । [श.र. ।

कपटी । स्त्री । परिमाणभेदे । এক আঁকাড় ।

कपटेश्वरी । स्त्री । श्वेतकण्टकार्यां । रा.नि.व.४ । क्षुद्रबृहत्याम् । वै.निघ. ।

कपर्दः । पुं । वराटके । কড়ি । तद्भेदा यथा —सुवर्णवर्णा सिंही धूम्रवर्णा व्याघ्री पीतपृष्ठा सितोदरा मृगी श्वेतवर्णा हंसी विदला नातिदीर्घा च । गुणाः —कटुतिक्तोष्णकर्णशूलव्रणगुल्मशूलनेत्रदोषनाशिलानि । रा.नि.व.१३ । "कपर्दः कटुकश्चोष्णो वृष्यश्चाग्निप्रदीपनः । तिक्तः शीतः कर्णशूलव्रणनेत्ररुजापहः । ग्रहणी गुल्मशूलानि परिणामं चयं तथा । वातं कफं नाशयतीत्येवं प्रोक्तो मनीषिभिः ॥" वै.निघ. । शोधनं शङ्खशब्दे दृष्यम् ।

कपर्दकरसः । पुं । रक्तपित्ताधिकारे रसः । "मृतं वा मूर्च्छितं सूतं कार्पासपुष्पजैर्द्रवैः । मर्द्दयेद्दिनमेकन्तु तेन पूर्य्या वराटिका। निरुध्य चान्धमूषायां भाण्डे रुद्ध्वा पुटे पचेत् । उद्धृत्य चूर्णयि-

कूनां मरिचद्विगुणैः सह। गुञ्जैकैकं घृतैर्लेह्यं रक्तपित्तं नियच्छति। कपर्द्दकरसो नाम असाध्यं साधयत्यलम्। उदुम्बरफलं पक्वं घृतैः पाच्यं सितायुतं। भक्षयेन्मरिचैर्युक्तमनु स्याद्रक्तपित्तनुत्॥" रस.र.। কাপাস ফুলের রসে একদিন মর্দ্দিত মূর্চ্ছিত পারদ ২ তো. কড়ির ভিতর ভরিয়া কড়ির মুখ রুদ্ধ করিবে। পরে সেই কড়ি অন্ধমূষাযন্ত্রে রাখিয়া পুটপাক করিবে। শীতল হইলে তুলিয়া ৪ তো. মরিচের সঙ্গে একত্র চূর্ণ করিবে। মাত্রা ১ কুঁচ।

कपर्द्दी । स्त्री । वराटके । वै.निघ.।

कपर्द्दिः । पुं । कपर्द्दके । रा.नि.व.१३ ।

कपर्द्दिका । स्त्री । वराटिकायाम्। [श्ब.।

कपाटशयनम् । क्ली । उत्तानशयने । सु.चि.

कपाटसन्धिकः । पुं । अभ्यन्तरदीर्घैकपालिरितराल्पपालिरित्येवं कर्णबन्धनाकृतिविशेषे। सु. सू.१६अ.। [गन्धकाष्ठविशेष। रा.नि.व.१२।

कपाटिनी । स्त्री । चीड़ानामदेवदारुभेदे।

कपालः । पुं, क्ली । मृन्मयघटादिखण्डे। খাপড়া, খোলাকুচি। रा.नि.व.१८। भा.म.४भ. सु.रो.चि.। मस्तकाद्यस्थिषु। तानि च नितम्बतालुदेशांसदेश-मस्तक-गण्डस्थल जानु-शङ्खवङ्कण-शिरोऽस्थीनि। सु.शा.५अ.।

कपालकुष्ठम् । क्ली। महाकुष्ठभेदे। अस्य लक्षणम्—"कृष्णकपालिकाप्रकाशानि कपालकुष्ठानि।" सु.नि.५अ.। "कृष्णारुणं कपालाभं यद्रुक्षं परुषं तनु। कपालं तोदबाहुल्यं तत्कुष्ठं विषमं स्मृतम्॥" भा.। [चिका.।

कपालनालिका । स्त्री। तर्कुण्यां। টেকো।

कपालरोगः । पुं । शिरोरोगे।

कपालास्थि । क्ली । स्वनामख्यातशरीरमध्यस्थ कर्परसदृशास्थिनि। "जानुनितम्बांसतालुगण्डशङ्खशिरोऽस्थीनि तन्नाम्नाभिधीयन्ते" । सु.शा.५अ.।

कपालिका । स्त्री । दन्तरोगविशेषे । तल्लक्षणं —कपालेष्विव दीर्यन्तु दन्तानां सैव शर्करा। कपालिकेति पठिता सदा दन्तविनाशिनी॥ मा.नि. सु.नि.१६। शवकर्परिकायाम्। सु.चि.१अ.।

कपाली । स्त्री । विड़ङ्गायाम्। रा.नि.व.६ ।

कपिः । पुं, स्त्री । वानरे । रत्ना.। सिह्लके। শিলারস। रा.नि.व.१२। आम्रातके। शुकशिम्ब्याम्। करञ्जविशेषे। श.च.।

कपिकच्छुः (च्छूः) । स्त्री । शुकशिम्ब्याम्। আলাকুশী। सि.यो.उन्मा.चि.। 'कपिकच्छुाथवा तथा।' See आत्मगुप्ता।

कपिकच्छुफलम् । क्ली । शुकशिम्ब्याः फले। আলাকুশীর বীজ।

कपिकच्छुफलोपमा । स्त्री । जन्तुकायां। जन्तुकारीति मालवे। रा.नि व.३ ।

कपिकच्छुरा । स्त्री । शुकशिम्ब्यां। प.मु.। See आत्मगुप्ता। [खुली। श.च.।

कपिकन्दुकम् । क्ली । शिरोऽस्थिनि। মাথার

कपिका । स्त्री । नीलसिन्धुवारवृक्षे। रा.नि.व. ४। अर्कवृक्षे। रत्ना.। [আকুল। र.मा.।

कपिकोलिः । पुं । शृगालकोलिकायां। শে-

कपिचूड़ः (ड़ा) । पुं, स्त्री । आम्रातकवृक्षे। আমড়া গাছ। रा.नि.व.११।

कपिचूतः । पुं । अश्वत्थभेदे। পলাশপিপুল। गजहुण्डसहोरा इति। भा.पू.१भ.वटा.व.। आम्रातकवृक्षे। चिका.। [१२।

कपिजः । पुं । सिह्लके। শিলারস। रा.नि.व.

कपिजङ्घिका । स्त्री । तैलपिपीलिकायाम्। श.च.।

कपिञ्जलः । पुं । A bird, the francoline partridge. चातकपक्षिणि। ফটিকজল পাখি। गौरतित्तिरी। পাছানাড়া পাখি। कपिञ्जल इति प्राच्यैः कथितो गौरतित्तिरिः। भा.। मांसगुणाः—शीतलं मधुरं लघु अतएव रक्तपित्ते रक्तश्लेष्मविकारे मन्दवातविकारे च प्रशस्तं। चक्र. द.। तथा एतस्य मांसं चटकमांसाच्छीतलं। हृद्यं रोचकञ्च। रा.नि.व.१७। शिलारसे। শিলারস। ककातुया इति ख्याते पक्षिणि। केचित्।

कपिञ्जला । स्त्री । शालिधान्यविशेषे। सा श्लेष्मकरी। अत्रि,१५अ.।

कपितैलम् । क्ली । शिलारसे । रत्ना. । तुरु-ष्कनामकगन्धद्रव्ये । भा. ।

कपि(वि)त्थः (कः)। पुं। (Feronia elephantum.)स्वनामख्याततरौ । কয়েৎ গাছ । हिं कोइथ् । मं कंविठ । कं वेलल । तें वेलगचेट्ट। प.मु. । गुणाः—मधुराम्लः कषायः तिक्तः शीतलः ब्रष्यः पित्तानिलघ्नः संग्राही व्रणघ्नः । आमं कपित्थमस्त्रीयं कफघ्नं ग्राहि वातलं। दोषत्रयहरं पक्कं मधुराम्लरसं गुरु । अपिच । आमं जिह्वाजाड्यकरं त्रिदोषवर्द्धनं विषघ्नं रोचकं संग्राहि । पक्कं श्वासवमिश्रमक्लमहरं हिक्कापनोदनम् । रा.नि.व.११ । "कपित्थमम्लं मधुरं कषायं विशदं गुरु। कासातिसारहृद्रोगच्छर्द्दिकफरुजापहम् । कपित्थं मधुरं शीतं कषायं ग्राहकं लघु" ॥ अत्रि.सू.१७अ. । तत्फलमम्लं श्लेष्माणं शमयति रूचवीर्य्यत्वात् । सु. सू ४०अ.। अपिच—"कपित्थमामं संग्राहि कषायं लघु लेखनं । पक्कं गुरु तृषाहिक्काशमनं वातपित्तजित् । स्वादम्लं तुवरं कण्ठशोधनं ग्राहि दुर्ज्जरम्" ॥ भा. । अश्वत्थतरौ ।

कपित्थतैलम् । क्ली। कपित्थबीजतैले । गुणाः —"कपित्थतैलं तुवरं स्वादु चाखुविषापहम् ।" वै.निघ. ।

कपित्थत्वक् । क्ली । एलवालुके । रा.नि.व.४ ।

कपित्थपत्रा (र्णी) । स्त्री । वृक्षविशेषे । कपित्थालीति कंवटपत्रीति महाराष्ट्रे । गन्धविरजार গাছ । रत्ना. । गुणाः —"कपित्थपत्रा तीक्ष्णोष्णा पाके कट्वी च तूवरा । रसे तिक्ता क्रमिकफमेदमेहविषं जयेत् । स्नायुरोगं नाशयति···।" वै.निघ.

कपित्थानी । स्त्री । कपित्थपत्राम् ।

कपित्थाम्रः । पुं । आम्रभेदे । वै.निघ. ।

कपित्थार्ज्जकः । पुं। श्वेतार्ज्जके । तुलसीभेदे । मद.व.३ । [मुथपोड़ा । त्रिका. ।

कपित्थास्यः । पुं । वानरविशेषे, गोलाङ्गूले ।

कपित्थाष्टकचूर्णम् । क्ली । ग्रहण्यधिकारे । अत्र यमान्यादीनां प्रत्येकमेकैकं भागं, मद्राद्रकादिदाड़िमान्तानां प्रत्येकं भागत्रयम्, शर्करायाः षड्भागान् कपित्थशुण्ठचूर्णस्य चाष्टभागानेकत्र मेलयेत् । शर्करायाः अष्टोत्तरशतभागा इति वा.टी. । कश्चित्त "षड्गुणसिते कपित्थाष्टगणे" पठति। सुतरां तन्मते यमान्यादीनामेकैकभागस्थले कपित्थस्याष्टौ भागाः कपित्थाच्च षड्गुणाः सिता भवन्ति । अपरे च सर्व्वचूर्णापेक्षया षड्गुणसिता अष्टगुणकपित्थचूर्णं ददति । च.द. । अग्निः चित्रके । जलं बालके । যমানী, পিপুলমূল, গুড়ত্বক, তেজপত্র, এলাইচ, নাগেশ্বর, শুঁট, মরিচ, চিতের মূল, বালা, জীরক, ধনে, সৌবর্চললবণ প্রত্যেকে ১ ভাগ, তিন্তিড়ী, ধাইফুল, পিপুল, বেলশুঁটা, পাটিয়া লোধ, দাড়িমছাল প্রত্যেকে ৩ ভ. চিনি ৬ ভ. কপিথচূর্ণ ৮ ভ. ।

कपिनामा । पुं । शिलारसे । रत्ना. ।

कपिपिप्पली । स्त्री । रक्तापामार्गे । भा.पू. १भ. । वानरपिप्पल्यां । वै.निघ.। सूर्य्यावर्त्तक्षुपे । र.मा. । [श.र. ।

कपिप्रभा । स्त्री । शुकशिम्ब्यां । আলকুশী ।

कपिप्रियः । पुं। आम्रातकवृक्षे । रा.नि.व.११। कपित्थवृक्षे । भा. ।

कपिभूतः । पुं । पारिशाश्वत्थे । वै.निघ. ।

कपिरसः । पुं । शिलारसे । [व.११ ।

कपिरसाढ्यः । पुं । आम्रातकवृक्षे । रा.नि.

कपिरोमफला । स्त्री । कपिकच्छ्वां । रा.नि. व.३ । [रा.नि.व.६ ।

कपिरोमा । स्त्री । कपिकच्छ्वां । रेणुकायां ।

कपिलः । पुं । शिलारसे । रत्ना. । कुक्कुरे । हारा. । पित्तले । मूषिकभेदे । तद्दष्टे व्रणकोथः ज्वरः ग्रन्थ्युद्भवः । सु.कल्प.६अ.। त्रि । पिङ्गलवर्णे।

कपिलच्छाया । स्त्री। मृगनाभौ । भा.म. । See कस्तुरिका ।

कपिलद्राक्षा । स्त्री । कपिलवर्णवृहद्द्राक्षाविशेषे । आङ्गुर इति यस्याः प्रसिद्धिः । আঙুর। गुणाः—मधुरा शीतला हृद्या मदहर्षदा दाहमूर्च्छाज्वरश्वासतृष्णाहृल्लासघ्नी च। रा.नि.व.३। अम्लतरसे । [श.च. ।

कपिलद्रुमः । पुं । काचीनामसुगन्धकाष्ठे ।

कपिलफला । स्त्री । कपिलद्राक्षायाम् । আঙুর । रा.नि.व.३ ।

कपिललोहम् । क्ली । पित्तले । हे.च.वै.निघ. ।

कपिलशिंशपा । स्त्री । Tawny-leaved śisu. (Dalbergia śiśu.) कपिलपत्रशिंशपावृक्षे । कपिलपत्र शिशु गाछ । मं कं पिवलाशिशव । हींवदवीड । गुणाः—तिक्ता शीतवीर्य्या श्रमघ्नी वातपित्तज्वरघ्नी छर्द्दिहिक्कानिवारणी च । रा.नि.व.९ । कटुका तिक्ता कषाया शोषघ्नी उष्णवीर्य्या मेदःकुष्ठश्वित्रवमिक्रमिहरी वस्तिरुजाव्रणदाहरक्तबलासघ्नी गर्भपातिनी च । भा.पू.१भ. वटा.व. ।

कपिला । स्त्री । पित्तले । भा.म.१भ. । राजरीती । पितलविशेष । गृहकन्यायाम् । रा.नि.व.५ । रेणुकायाम् । रेणूकबीज । रा.नि.व.६ । कपिलशिंशपायां । काल शिशु । रा.नि.व.९ । निर्विषजलायुकायाम् । निर्विषजोंक । सु.सू.१३ अ. । See जलायुका । स्वर्णवर्णकामधेनुभेदे । मे.लत्रिकं । कृच्छ्रसाध्यलूताभेदे । See लूता ।

कपिलाधिका । स्त्री । तैलपिपीलिकायाम् ।

कपिलार्ज्जकः । पुं । कपिलवर्णतुलसीवृक्षे । पाण्डुपत्र तुलसीवृक्ष । वै.निघ. ।

कपिलाक्षी । स्त्री । कपिलशिंशपायाम् । रा.नि.व.९ । मृगेर्वारुके । रा.नि.व.७ ।

कपिलिका । स्त्री । शतपदीभेदे । पिपीलिकाविशेषे । सु.कल्प.८अ. । See शतपदी, पिपीलिका । [लाकूशी । रा.नि.व.३ ।

कपिलोमफला । स्त्री । कपिकच्छ्वाम् । आ-

कपिलोमा (ला) । स्त्री । रेणुकबीजे । रेणूक । रा.नि.व.६ । [रीती । भाल पितल ।

कपिलोहम् । क्ली । पित्तले । हे.च. । राज-

कपिल्लकः । पुं । कम्पिल्लके । कमलागुँड़ि । वै.निघ. ।

कपिल्लिका । स्त्री । औषधिविशेषे । गजपिपूल वा कमलागुँड़ि । र.मा. । [गाछ ।

कपिवक्त्रः । पुं । आम्रातकवृक्षे । आमड़ा-

कपिवल्लिका (ल्ली) । स्त्री । गजपिप्पल्यां । भा.पू.१भ. । कपित्थवृक्षे । [पूल ।

कपिवासः । पुं । पारिशाश्वत्थे । पलाशपि-

कपिविरोचनम् (विरोधि) । क्ली । मरिचे । रा.नि.व.६ ।

कपिबीजम् । क्ली । शूकशिम्बीबीजे । आलाकूशीबीज । भैष.कामेश्वरमोदके ।

कपिवृक्षः । पुं । पारीशाश्वत्थे । वै.निघ. ।

कपिशः । पुं । सिल्हकनामगन्धद्रव्ये । शिलारस । द्राक्षामद्ये । वै.निघ. । त्रि । श्याववर्णे । मे.शत्रिकं । [माधवीलतायाम् । मे.शत्रिकं ।

कपिशा(शी,शिका) । स्त्री । सुरायां । त्रिका. ।

कपिशायनम् । क्ली । मद्यविशेषे । त्रिका. ।

कपिशीर्षकम् । क्ली । हिङ्गुले । श.च. ।

कपिहस्तकः । पुं । कपिकच्छ्वां । रस.र. ।

कपीकच्छुः । पुं कपिकच्छुलतायां । आलाकूशी । श.र. ।

कपीज्यः । पुं । क्षीरिकावृक्षे । जटा. ।

कपीतः । पुं । श्वेतकुञ्जावृक्षे । र.मा. ।

कपीतकः । पुं । प्लक्षवृक्षे । रा.नि.व.११ ।

कपीतनः । पुं । उदुम्बरवृक्षे । यज्ञडुमुर । हिं गुलार । अ.द. । आम्रातके । आमड़ा । वा.सू. १५अ.न्यग्रोधादौ । च.सू.४अ. । शिरीषवृक्षे । रा. नि.व.९ । अश्वत्थवृक्षे । मे.नचतुष्कं । गुवाकवृक्षे । विल्ववृक्षे । श.र. । गन्धमुण्डे । गन्धभाद्दलि । रत्ना. । प्लक्षवृक्षे । रा.नि.व.२३ ।

कपीन्द्रः । पुं । हनुमति । श.र. ।

कपीष्टः । पुं । राजादनीवृक्षे । वै.निघ । कपित्थवृक्षे । रा.नि.व.११ ।

कपोतः । पुं । पारावतपक्षिणि । गृहकपोते । पायरा, कइतर । मं परेवा । हिं कबुतर । तन्मांसगुणाः—बलवीर्य्यवर्द्धनं स्वादुकफपित्तास्रदोषजिच्च । रा.नि.व.१७ । कपोतमांसं पाण्डौ वर्ज्यं । च.द.पाण्डु-चि.योगराजे । पारावतो गुरुः स्निग्धः रक्तपित्तानिलापहः । संग्राही शीतलस्तज्ज्ञैः कथितो वीर्य्यवर्द्धनः ॥ भा.पू.२भ. । रसे पाके च स्वादु कषायं विषदश्च । राज. । कपोतो बृंहणो बल्यो वातपित्तविनाशनः । तर्पणः शुक्रजनो हितो नृणां गुणप्रदः ॥ अत्रि.२१अ. । See पारावतः ।

पक्षिविशेषे । घुघू । मे.विश्व.तत्रिकं । मूषिकभेदे । सु.कल्प.६अ. । कपोतसमूहे । पारदे । सर्जिक्षारे । पक्षिमात्रे । पारीशवृक्षे । पलाशपिप्पल । भा. ।

कपोत(क)म् । क्ली । Antimony. सौवीराञ्जने । रा.नि.व.१३ । कपोताञ्जने । मे.तत्रिकं ।

कपोतकनिषादी । पुं । अश्वस्य वातव्याधिभेदे । लक्षणं यथा—"कृच्छ्रादुत्थापितश्चापि पुनर्याति मेदिनीं । कपोतकनिषादीति स ज्ञेयः कृच्छ्रजीवनः ॥" ज.द.५५अ. ।

कपोतचक्रः । पुं । कवाटचक्रवृक्षे । रत्ना. ।

कपोतचरणा । स्त्री । नलीनामगन्धद्रव्ये । नलुका । जटा । [गाछ । रा.नि.व.१२ ।

कपोतपर्णी । स्त्री । एलायाम् । এলাইচ

कपोतपुटम् । क्ली । औषधपुटविशेषे । लक्षणं यथा—"यत्पुटं दीयते खाते अष्टसङ्ख्यैर्वनोपलैः । कपोतपुटमेतत्तु कथितम्···॥" भा.म.१भ. ।

कपोतपुरीषः । पुं । पारावतविष्ठायां । एष व्रणदारणः ।

कपोतवक्रा (क्रा) । स्त्री । काकमाच्याम् । কেউআঠুঁঠী । कड़ू । च.द.अरी.चि.कषायतैले ।

कपोतवङ्का । स्त्री । ब्राह्म्यां । भा.म.४भ.पूतना.ग्रह.चि. । "कपोतवङ्काश्योणाकः ।" लताफट्कीति प्रसिद्धायां लतायां । सु.सू.३८अ. । "कपोतवङ्कासुवर्चला । अन्ये "शिरीषसदृशपत्रस्वल्पविटपवृक्षे" इति द्रव्यान्तरमाहुः । ड. । सु.चि.७अ. ।

कपोतवर्णा (र्णी) । स्त्री । सूक्ष्मैलायां । रा.नि.व.६ । [व.१२ ।

कपोतवाणा । स्त्री । नलुकायाम् । रा.नि.

कपोतविष्ठा । स्त्री । पारावतपुरीषे । इयं व्रणदारणी । सु.सू.३६अ. । [नि.व.५ ।

कपोतवेगा । स्त्री । ब्राह्मीनामसदृशक्षुपे । रा.

कपोतसारम् । क्ली । स्रोतोऽञ्जने । रा.नि.व.१३ । [विशेषे । अम. ।

कपोताङ्घ्रिः । स्त्री । नलिकायाम्, गन्धद्रव्य-

कपोताञ्जनम् । क्ली । नीलाञ्जने । [वै.निघ.।

कपोताण्डोपमफलम् । क्ली । निम्बूभेदे ।

कपोतारिः । पुं । श्येनपक्षिणि । अ.र. ।

कपोतिका । स्त्री । चाणक्यमूलके । कोमलमूलके । वै.निघ. ।

कपोलः । पुं,क्ली । मस्तके । गण्डस्थले । गाल । रा.नि.व.१८ । स्त्री (ली) । जान्वग्रभागे ।

कपोलफलकम् । क्ली । प्रशस्तगण्डस्थले ।

कप्याख्यः । पुं । सिह्लके । শিলারস ।

कप्यासः । पुं । वानरगुदे ।

कफः । पुं । Phlegm. शरीरस्थसौम्यधातुविशेषे । श्लेष्मा । गुणाः—"श्लेष्मा गुरुः श्लक्ष्णमृदुः मृत्स्नकः स्निग्धः पटुः शीतजड़श्च गौल्यवान् । शीते वसन्ते च भृशं निशामुखे पूर्व्वेऽह्नि भुक्तोपरि च प्रकुप्यति ॥ रा.नि.व.२१ । तत्प्रकोपकारणम् यथा—"गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मणः सम्प्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते॥ इति । तत्कर्म्म यथा—स्तैमित्यं मधुरास्यता शिशिरता शौक्ल्यं प्रसेको मलप्राचुर्य्यं स्थिरता रसश्च लवणं कण्डूयतिस्वल्पता । आलस्यं चिरकारिता कठिनता शोथारुचिस्निग्धताः । तन्द्रात्मगुरुप्रदेहकासगुरुता एताः कफोत्था रुजः॥ इति । तच्छान्तिहेतुर्यथा—"गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः । श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः॥ इति । माधुर्य्यात्पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च । आमाशये सम्भवति श्लेष्मा मधुरशीतलः । श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च । मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः ॥ सु.सू.२१अ. । श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा । तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् ॥ इति स्वरूपम् । तस्य स्थानभेदेन तस्य नामानि यथा—क्लेदन आलम्बनो रसनः स्नेहनश्चेति स्थानभेदेन । तानि च स्थानानि यथाक्रमं आमाशयहृदयकण्ठशिरःसन्धयः। तत्स्थानगतानाञ्च तेषां कर्म्माणि यथा—क्लेदनः क्लेदयत्यन्नमन्यानि च श्लेष्मस्थानानि उदककर्म्मणानुगृह्णाति । रसयुक्तात्मवीर्य्येण हृदयस्यावलम्बनम् । त्रिकसन्धारणञ्चापि विदधात्यवलम्बनः॥ उभावपि ततः सौम्यौ तिष्ठतश्चान्तिके यतः। यतो रसान्विजानीतो रसनारसनौ समौ ॥ स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः ।

श्लेष्मणः सर्व्वसन्धीनां संश्लेषं विदधात्यसौ ॥ भा.म.१भ.। अवलम्बक इत्येकः क्लेदकः श्लेष्मकोऽपरः। बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः इति ॥ तेषां लक्षणानि—कफधाम्नान्तु श्लेषाणां यत्करीत्यवलम्बनं। ततोऽवलम्बनमाख्यातिं श्लेष्मा प्राग्रोत्युरःस्थितः। आमाशयाश्रितः सोऽन्नक्लेदनात्क्लेदकः स्मृतः। श्लेषकः श्लेष्मणाक्सन्धेः स च सन्धौ व्यवस्थितः। रसनावस्थितस्त्वेषु बोधको रसबोधनात्। शिरसि प्रस्थितश्चासौ तर्पकः। वा.टी.। श्लेष्मधाम्नाञ्च शेषाणां यत्करीत्यवलम्बनं। अतोऽवलम्बकः श्लेष्मा यस्त्वामाशयसंश्रितः। क्लेदकः सोऽन्नसङ्घातक्लेदनाद्रसबोधनात्। बोधको रसनास्थायी शिरःसंस्थोऽचितर्पणात्। तर्पकः सन्धिसंश्लेषात् श्लेषकः सन्धिषु स्थितः॥ वा.। कपित्थवृक्षे। रा.नि.व.११। समुद्रफेने। च.द.अर्श.चि.प्रलेपे।

कफकूर्चिका। स्त्री। लालायाम्। मुखेर लाल, थुतु। हे.च.।

कफकेतुरसः। पुं। कफरोगाधिकारे रसः। मागधी पिप्पली। र.सा.सं.। पाठः—"टङ्कणं मागधी शङ्खं वत्सनाभं समं समं। आर्द्रकस्वरसेनाथ दापयेद्भावनात्रयम्। गुञ्जामात्रं प्रदातव्यम्...॥" द्वितीये यथा—"दग्धशङ्खं त्रिकटुकं टङ्कणं समभागिकं। विषञ्च पञ्चभिस्तुल्यमार्द्रतोयेन मर्द्दयेत्। वारत्रयं रक्तिकाञ्च वटीं कुर्य्याद्विचक्षणः।" सायं प्रातरार्द्रकरसेन देयं। भैष.कफज्व.चि.।

कफगण्डः। पुं। गलरोगे। तस्य लक्षणम्—"स्थिरः सवर्णो गुरुरुग्रकण्डूः शीतो महांश्चापि कफात्मकस्तु। पारुष्ययुक्तश्चिरवृद्धिपाको मदच्छया पाकमियात् कदाचित्। वैरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः॥" मा.नि.।

कफगुल्मः। पुं। श्लेष्मजगुल्मे। तस्य रूपं—"स्तैमित्यशीतज्वरगात्रसादहृल्लासकासारुचिगौरवाणि। शैत्यं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य।" शीतं गुरुस्निग्धमचेष्टनञ्च सम्पूरणं प्रस्वपनं दिवा च। गुल्मस्य हेतुः कफसम्भवस्य सर्व्वस्तु दृष्टो निचयात्मकस्य।" च.चि.५ष.।

कफघ्नः। त्रि। श्लेष्मनाशके। [नि.व.४।

कफघ्नी। स्त्री। शुकनासायाम्। हवुषाभेदे। रा.

कफज्वरः। पुं। श्लेष्मजन्यज्वरे। See ज्वरः।

कफ(फो)णिः (णी)। पुं, स्त्री। भुजमध्यग्रन्थौ। कनुइ। रा.नि.व.१८।

कफनाड़ी। स्त्री। दन्तमूलगतरोगविशेषे। दाँतेर गोड़ार कफजन्य नाली। यथा—"दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः। ज्ञेया कफाद्दन्तघनार्जुनपिच्छिलास्रा लस्या सकण्डुरुगल्परजनीप्रवृद्धा।" मा.नि.। [त्वादौ। कफोधात।

कफप्रकृतिः। स्त्री। स्थिरचित्ततास्निग्धकेश-

कफमन्दिरम्। मत्स्यभेदे। माड़, फेन।

कफरुहा। स्त्री। नागरमुस्तायाम्।

कफरोगः। पुं। कफजन्यरोगमात्रे।

कफरोहिणी। स्त्री। कफजन्यगलरोगविशेषे। तस्य लक्षणं यथा—"स्रोतोनिरोधिन्यपि मन्दपाका स्थिराङ्कुरा या कफसम्भवा सा। मा.नि.। See गलरोहिणी।

कफवर्द्धकः। त्रि। श्लेष्मवर्द्धके।

कफवर्द्धनः। पुं। पिण्डीतगरवृक्षे। त्रिका.। त्रि। कफवर्द्धके। [त्रि। श्लेष्मरोधके।

कफविरोधि। क्ली। मरिचे। रा.नि.व.६।

कफसंशमनवर्गः। पुं। कफशान्तिकरद्रव्यगणेषु यथा—"रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनं धूमाद्युष्णशिरोविरेकवमनस्वेदोपवासादिकम्। स्त्रीसेवाध्वनियुद्धजागरजलक्रीडाङ्गनासेवनं पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत्॥" भा.पू.२भ.।

कफसम्भवः। त्रि। कफोत्थे।

कफस्थानम्। क्ली। कफाशयेषु, आमाशयोरःकण्ठशिरःसन्धिषु। सु.सू. २१ अ.।

कफस्रावः। पुं। नेत्रसन्धिगतरोगविशेषे। लक्षणं यथा—"पाकः सन्धौ संस्रवेद्यस्तु पूयं पूयास्रावोऽसौ गदः सर्व्वजस्तु। श्वेतं सान्द्रं पिच्छिलं संस्रवेद्धि श्लेष्मास्रावोऽसौ विकारो मतस्तु॥" मा.नि.।

कफातिसारः। पुं। कफजन्यातिसारे। स्व.चिकित्सा—"श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनं। योज्यश्चामातिसारघ्नो यथोक्तो दीपनो गणः॥" तस्य लक्षणं यथा—शुक्लं सान्द्रं सकफं श्लेष्मयुक्तं

विषं शीतं हरेरोमा मनुषः । मा.नि. ।

कफान्तकः । पुं । बर्बूरकवृचे । बाब्ला गाछ । रा.नि.व.८ ।

कफापहा । स्त्री । जीरके ।

कफारिः । पुं । आर्द्रके । शुण्ठ्यां । रा.नि.व.६ ।

कफी (इन्) । त्रि । कफयुक्ते । अम. । पुं । गजे । हाती ।

कफेलुः । त्रि । कफयुक्ते । उणा. ।

कफोल्कटः । त्रि । कफप्रधाने । च.द.सान्निपातिकज्व.चि. । "कणया च कफोल्कटे ।"

कफोत्क्लिष्टः । पुं । नेत्ररोगभेदे । लक्षणम्—"कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च । सलिलप्लावितानीव परिजाड्यानि मानवः ॥ मा.नि.।

कफोत्क्लेशः । पुं । कफस्य वमनायोपस्थितौ ।

कफोदरम् । क्ली । कफजन्योदररोगे । लक्षणं—"यच्छीतलं शुक्लशिरावनद्धं गुरु स्थिरं शुक्लनखाननस्य । स्निग्धं महच्छोफयुतं ससादं कफोदरं तच्च चिराभिवृद्धि ॥" सु.नि.७अ. । [दरे । मे. ।

कबन्धम् । क्ली । जले । रा.नि.व.१४ । पुं । उ

कबित्थः । पुं । कपित्थवृचे । अ.टी. ।

कम् । अव्ययं । मस्तके । श.चि. ।

कमठः । पुं, क्ली । कच्छपे । भाण्डविशेषे । मे.ठत्रिकं । शल्लक्यां । शजारु । धरणिः । वंशे । श.र. ।

कमठी । स्त्री । कच्छप्याम् । अम. ।

कमण्डलुः (तरुः) । पुं प्लक्षवृचे । पाकुड़ गाछ । प.मु. । करके । सन्न्यासीर पात्र । मे. लचतुष्कं । अश्वत्थभेदे । गजहस्तसद्दोरा । पलाशपिप्पुल । भा.पू.१भ.वटा.व. ।

कमनः । पुं । अशोकवृचे । मे.नत्रिकं । मदने । त्रि । कामुके । [क्रौञ्चपचिणि ।

कमनच्छदः । पुं । कङ्कपचिणि । हे.च. ।

कमन्धम् । क्ली । जले । अ.टी.रा. ।

कमलम् । क्ली । Nelumbium speciosum or Nymphaea nelumbo. पद्मसामान्ये । पद्म । तें तामर । तच्च श्वेतरक्तनीलभेदेन त्रिविधम् । कमलगुणाः—शीतलं वर्णकरं मधुरं पित्तकफघ्नं तृष्णादाहरक्तविस्फोटकविषविसर्पहरं । श्वेतं शीतलं मधुरं कफपित्तघ्नम् । रक्तनीले तु तस्मादल्पगुणे भवतः । भा.पू.१भ. । पुं । मृगविशेषे । मे. लत्रिकं । सारसविहङ्गमे । अम. । ताम्रे । क्लोमि । भेषजे । मे.लत्रिकं । पद्मकाष्ठे । कुङ्कुमे । मूत्राशये । जले । रा.नि.व.१४ ।

कमलकन्दः । पुं । शालूके । पद्मेर गेंड़ो । गुणाः—"शालूकः कटुकश्चोक्तः तुवरो मधुरो गुरुः । मलस्तम्भकरो रुची नेत्र्यो वृष्यश्च शीतलः । दुर्जरो य हरो रक्तपित्तं दाहं तृषां कफं । पित्तवातश्च गुल्मश्च पित्तं कासं-कृमींस्तथा । मुखरोगं रक्तदोषं नाशयेदिति च स्मृतः ।" वै.निघ. ।

कमलकर्णिका । स्त्री । पद्मबीजकोशे । पद्मेर चाकि । गुणाः—"बीजकोशस्तु मधुरः तुवरः शीतलो लघुः । तिक्तो मुखस्वच्छकारी रक्तदोषतृषाहरः ॥" वै.निघ. ।

कमलकेसरः । पुं, क्ली । पद्मकिञ्जल्के । पद्मकेसर । गुणाः—"शीतलः ग्राही मधुरः कटुः रुचः गर्भस्थैर्यकरः रुच्यश्च ।" वै.निघ. ।

कमलच्छदः । पुं । कङ्कपचिणि । पद्मदले ।

कमलनालम् । क्ली । पद्मनालायाम् । पद्मेर डाँटा । वै.निघ. । See मृणालम् ।

कमला । स्त्री । वरस्त्रियि । मे.लत्रिकं । निम्बुकविशेषे । कम्ला लेबु, सरबती लेबु । तत्सारः ।

कमलाक्षः । पुं । कमलबीजे ; पद्मबीज । गुणाः—"स्वादुरुच्यः पाचनः कटुकः स्मृतः । शीतलस्तुवरस्तिक्तो गुरुर्विष्टम्भकारकः । गर्भस्थितिकरो रुची वृष्यो वातकरो मतः । कफकृल्लेखनो ग्राही बल्यः पित्तविनाशनः । रक्तरुग्वमिदाहास्रपत्यनाशकरो मतः ।" वै.निघ.छर्दि.चि.वमनास्रतयोगे ।

कमलिनी । स्त्री । पद्मिन्याम् । गुणाः—शीतला गुरुः मधुरा लवणा रुचा पित्तासृक्कफघ्नी वातविष्टम्भकारिणी च । भा.पू.१भ.पुष्पव. । तत्कन्दः—"शीतस्तुवरो मधुरो मतः । तिक्तः पाकेऽतिकटुकः लघुर्वै ग्राहको मतः । वातकृत्कफपित्तानां नाशको मुनिभिः स्मृतः ॥" वै.निघ. ।

कमलोत्तरम् । क्ली । कुसुम्भपुष्पे । हे.च. ।

कमोदपुष्पम् । क्ली । जलपुष्पविशेषे ।

कम्पः । पुं । वेपथौ । रा.नि.व.२० ।

कम्पनः । पुं, क्ली । कम्पे । मे.नत्रिकं । शिशिरकाले । रा.नि.व.२१ । तन्नामकश्लेष्मोल्वणसन्निपातज्वरे । लक्षणम्—"जड़ता गद्गदा वाणी रात्रौ निद्रा भवत्यपि । प्रस्तब्धे नयने चैव सुखमाधुर्य्यमेव च । कफोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत् ।···कम्पनसंज्ञकः ॥" भा.म.ख.१भा. ।

कम्पलक्ष्मा । स्त्री । वायौ । श.र. ।

कम्पवायुः । पुं । वायुरोगविशेषे । "सर्व्वाङ्गकम्पः शिरसो वायुर्वेपथुसंज्ञकः ।" मा.नि. ।

कम्पाकः । पुं । वायौ । हे.च. । [युक्ते ।

कम्पितम् । क्ली । चलने । श.र. । त्रि । कम्प-

कम्पिलः । पुं । श्वेतत्रिवृतायाम् । वै.निघ.२भ.

कम्पिला । स्त्री । कुमार्य्याम् । घृतकुमारी ।

कम्पिल्लः (कः) । पुं । रेणुवद्गुण्डारोचन्याम् । कमलागुँड़ि । र.मा । रा.नि.व.१३ । रञ्जनके । वा.सू.१५अ विरेचने । कुङ्कुमे । च.द.ज्व.चि.मुस्तादिगणे । "नीलीकम्पिल्लकं त्रिवृत् । कम्पिल्लको रोचनिकः स्वनामख्यातः" । ड. ।

कम्पिल्लमालकः । पुं । वकुलभेदे ।

कम्प्रः । त्रि । कम्पयुक्ते । अम. ।

कम्बलः । पुं । लोणिकाशाके । वनलुनिया । प.मु. । मेषादिरोमजातवस्त्रादौ । कम्बल । अम. । सास्नायाम् । रत्ना. । नागराजे । कृमौ । उत्तरासङ्गे । मे.लत्रिकं । मृगभेदे । जटा. क्ली । जले । मे.लत्रिकं ।

कम्बलिवाह्यकम् । क्ली । वृषवाह्यशकटे । गरुर गाड़ी । अम. ।

कम्बिः । स्त्री । दर्व्याम् । श.च. । वंशांशे । वाँशेर पाब । मे.वत्रिकं । वंशाङ्कुरे ।

कम्बुः (कः) । पुं, क्ली । शङ्खे । शाँक । रा.नि.व.१३ । शम्बूके । वलये । गजे । मे.वत्रिकं । शोणितवहनाड्याम् । ग्रीवायां । नलके । नलि, हाड़ । हे.च. । मानभेदे ।

कम्बुककुसुमा । स्त्री । शङ्खपुष्प्याम् ।

कम्बुका । स्त्री । अश्वगन्धावृक्षे । र.मा. ।

कम्बुकाष्ठा । स्त्री । अश्वगन्धाक्षुपे । रा.नि.व.४ ।

कम्बुग्रीवा स्त्री । शङ्खाकृतिरेखात्रयाढ्यग्रीवायाम् । रा.नि.व.१८ । [व.३ ।

कम्बुपुष्पी । स्त्री । शङ्खपुष्पीलतायां । रा.नि.

कम्बुमालिनी । स्त्री । शङ्खपुष्पीलतायाम् । रा.नि.व.३ ।

कम्बूः स्त्री । शङ्खे । वलये ।

कम्बूतः । पुं । शङ्खे । शाँक । रा.नि.व.१३ ।

कम्बोजः । पुं । शङ्खविशेषे । हस्तिविशेषे मे.जत्रिकं ।

कम्बोतायी(इन्) । पुं । शङ्खचिल्ले ।

कम्भारी । स्त्री । गाम्भार्य्यां । गामर गाछ । रा.नि.व.६ ।

कम्भु क्ली । उशीरे । रा.नि.व.१२ ।

कम्रः । त्रि । मैथुनेच्छायुक्ते । अम. ।

कयस्था । स्त्री । हरीतक्यां । काकोल्यां । अ.टी.स्वा. । सूक्ष्मैलायां । च.द.उन्मा.चि.महापैशाचघृते ।

कयाहः । पुं । पक्वतालसदृशवर्णाश्वे । लक्षणं यथा—"पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः ।" ज.द.३अ. ।

करः । पुं । आहुल्यक्षुपे । तवरड़ इति काश्मीरे रा.नि.व.४ । वर्षोपले । रश्मौ । पाणौ । शुण्डादण्डे । मे.रद्विकं । हस्ते । रा.नि.व.१८ ।

करकः । पुं । दाड़िम्बवृक्षे । रा.नि.व.११ । पलाशवृक्षे । हारा. । वकुलवृक्षे । कोविदारवृक्षे । रक्तकाञ्चनवृक्ष । रा.नि.व.१० । See काञ्चनारः । करवीरवृक्षे । रा.नि.व.८ । नारिकेलास्थिनि । माला । रा.नि.व.११ । नाटा इति प्रसिद्धे करञ्जवृक्षे । हे.च. । कुसुम्भवृक्षे । पक्षिविशेषे । मे.कत्रिकं । क्ली । करके । गोमयच्छत्रे । त्रिका. ।

करकचः । पुं । नखे । वै.निघ. ।

करकटः । पुं । भरद्वाजपक्षिणि । वै.निघ. ।

करकण्टकः । पुं । नखे । त्रिका. ।

करकशालिः । पुं । रसालेचौ ।

करका । स्त्री । कारवल्लाम् । करला । रा.नि. व ७ । वर्षोपले । अम. ।

करकाजलम् । क्ली । दिव्यजलभेदे । "दिव्य-वायुग्निसंयोगात्संहताः खात्पतन्ति याः । पाषाण-खण्डवच्चापत्ताः कारकोऽमृतोपमाः ॥ करकाजं जलं रूचं विशदं गुरु च स्थिरं । दारुणं शीतलं सान्द्रं पित्तहृत्कफवायुकृत् ॥" वैद्यके ।

करकाम्बु । क्ली । करकजले । वै.निघ. ।

करकाम्भाः । पुं । नारिकेलवृचे । त्रिका. । क्ली । करकजले ।

करकुड्मलम् । क्ली । कराङ्गुली ।

करकृष्णा । स्त्री । जीरके । वै.निघ. ।

करग्रहः । पुं । विवाहे । त्रिका. । करग्रहणे ।

करघर्षणः । पुं । दधिमन्थनदण्डे । श.च. ।

करघर्षी । पुं । चुद्रमन्थानदण्डे । छोट मउ-नि । हिं छोटीरयी ।

करघाटः । पुं । तन्नामकस्थावरविषभेदे यस्य त्वचि निर्यासे च विषं वर्त्तते । अयं मूलविषोऽप्यु-च्यते । सु.कल्प.२अ. ।

करङ्कः । पुं । मस्तके । विश्व.क्वचित्कं । अशस्त-नारिकेलफलास्थिनि । नारिकेलेर खोल, मा-ला । श.च. । कङ्काले । रा.नि.व.१८ ।

करङ्कशालिः । पुं । करङ्कनामेचौ । मं रस दालि । कं रसालउंस । गुणाः —मधुरः शीतलः रुचिकृत् मृदुः पित्तघ्नः दाहहरः वृष्यः तेजो-बलवर्द्धनश्च । रा.नि.व.१४ ।

करङ्कीभूतः । त्रि । अस्थिमात्रेण स्थितः । भा. म.४भ.गर्भ.चि. । "करङ्कीभूतगीमूर्द्धा ।"

करच्छदः । पुं । शाखोटवृचे । शेओड़ा गाछ । हिं शिहोड़ा । भा. । [शाकतरौ ।

करच्छदा । स्त्री । सिन्दूरपुष्प्यां । रा.नि.व.१० ।

करजः । पुं । करञ्जवृचे । डहरकरञ्ज गाछ । नखे । क्ली । व्याघ्रनखे । नखी । मे.जत्रिकं । [रत्ना.

करजाख्यः । पुं । नखीनामगन्धद्रव्ये । नखी ।

करज्योड़िः । पुं । हस्तज्योड़िमहाकन्दशाकें । हाड़जोड़ी । रा.नि.व.७ । काष्ठपाषाणभेदे ।

करज्योड़िकन्दः । पुं । तन्नामकहस्तचकन्दे । एषां गुणः रसबन्धकृत्पथ्यकृच्च । रा.नि.व.७ ।

करञ्जः (कः) । पुं । (Pangamia glabra Syn. galedupa Indica.) स्वनामख्यातवृचे । बृहत् करञ्ज गाछ, डहरकरञ्ज गाछ । हिं करं-जुवा करोदा । कण्टकरेञ्जो । तें कानुगचेट्टु । स च षड्विधः—तत्रैकः डहरकरञ्ज, द्वितीयः नाटा-करञ्ज. तृतीयः काँटा वा गेँटेकरञ्ज, चतुर्थः माकड़ाकरञ्ज, पञ्चमः विषकरञ्ज, शेषः अम्लक-रञ्ज इति वङ्गे कथ्यते । कण्टकरेजाकरञ्जः । घी-राकरञ्जः । भा. । तत्र प्रथमस्य पर्य्यायः—चिर-बिल्वो नक्तमालः करजश्च करञ्जके । द्वितीयस्य यथा —प्रकीर्य्यः पूतिकरञ्जः पूतिकः कलिकारकः । तृतीयस्य -- षड्ग्रन्थः । चतुर्थस्य —मर्कटी । पञ्चमस्य —अङ्गारवल्लरी । षष्ठस्य – करमर्द्दी वनेचुद्रा का-राम्लः करमर्द्दकः इति । गुणाः—कटुकः तीक्ष्णः वीर्य्योष्णः अनिलघ्नः कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमि-कफघ्नः । करञ्जपत्रं कफवातार्शःकृमिशोथहरं भेदनं पाककटुकं वीर्य्योष्णं पित्तलं लघु च । तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठघ्नञ्च । घृत-पूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः । भा.पू.१भ.गु. व. । तत्पुष्पं—उष्णवीर्य्यं पित्तवातकफघ्नञ्च । तद-ङ्कुराः —अग्निदीपना रसे पाके च कटुकाः पाच-नाः कफवातार्शःकुष्ठकृमिविषघ्नाः शोथहराश्च । वै. निघ. । केचित्तु महाकरञ्जघृतकरञ्जपूतिकरञ्जगु-च्छकरञ्जकराञ्जकादिभेदानाह । तेषां गुणाः स्व-स्वपर्य्याये ज्ञेयाः । भृङ्गराजे । जटा. । करञ्जफले । सि.यो.वृहदग्निमुखचूर्णे ।

करञ्जतैलम् । क्ली । तन्नामकफलोत्थतैले । करञ्जतेल । गुणाः—तिक्तं नात्युष्णञ्च । वा.टी. । नेत्ररोगघ्नं वातरोगघ्नं तीक्ष्णमुष्णं कुष्ठकण्डूतिवि-चर्च्चिकाहरं लेपेन नानाविधचर्म्मरोगघ्नञ्च । रा.नि. व.१५ । क्रिटिमघ्नं क्रमिघ्नं रुचिपित्तदोषकरञ्च । राज. ।

करञ्जद्वय(युग्म)म् । क्ली । डहरकरञ्ज, ना-टाकरञ्ज इति द्वये । "एकश्चिरबिल्वः, द्वितीयः कण्टकीविटपकरञ्जः ।" वृत्तविटपकरञ्जौ । सु.सू.

१८अ.ड.श्यामादि: । सि.यो.उमा.चि. । "कर-
ञ्जौ देवदारु च।" (एक: पूतिकरञ्जश्चिरबिल्वाख्य:,
द्वितीय: नक्तमालाख्य:।) वा.सू.१५अ.आरग्वधादि:।
"भूनिम्बसैर्य्यकपटोलकरञ्जयुग्मम् ।" [नि.व.११ ।

करञ्जफल:(क:) । पुं । कपित्थवृक्षे । रा.

करञ्जस्नेह: । पुं । करञ्जतैले । रा.नि.व.९ ।
See करञ्जतैलम् ।

करञ्जाद्यघृतम् । क्ली । उपदंशे । पाठ: —
"करञ्जनिम्बार्जुनशालजम्बूवटादिभि: कल्ककषा-
यसिद्धं । सर्पिर्निहन्यादुपदंशदोषं सदाहपाकं स्रु-
तिरागयुक्तम् ।" वटादीनां त्वक्कषायेन तेषामेव
कल्केन तैलं पाच्यं । तैलं ४ श. क्वाथ्यद्रव्यं ४ श.
जलं ६४ श. शे. १६ श. कल्क: १ श. । च.द. ।

करञ्जिका । स्त्री । কাঁটাকরঞ্জ इति लोके ।
गुणा:—कण्टयुक्त: करञ्जस्तु पाके कटुश्च तूवर: ।
ग्राहकश्चोष्णवीर्य्यश्च स्यात्तिक्त: शीतकश्च मेहहा । कु-
ष्ठार्शोव्रणवातानां कृमीणां नाशन: पर: । पुष्पन्तु
वीर्य्ये चोष्णं स्यात्तिक्तं वातकफापहम् ॥ वै.निघ. ।
नक्तमालफले । सु.चि.२अ.सद्योव्रणे ।

करञ्जी । स्त्री । महाकरञ्जे । श.च. । ডহর-
করঞ্জ । हिं अरारि । गुणा: —स्तम्भनी तिक्ता
तुवरी कटुपाका वीर्य्योष्णा पित्तार्शोवमिकृमिकु-
ष्ठप्रमेहघ्नी च । भा.पू.१भ. । करञ्जवल्लाम् ।

करट: (क:) । पुं । कुसुम्भवृक्षे । रत्ना. । क-
रिगण्डस्थले । हला. । वायसे । मे. । [वृद्धि.चि. ।

करटवी । स्त्री । वृक्षमूषिकायाम् । रस.र.अन्त्र

करटा । स्त्री । दु:खदोह्यायां गवि । हे.च. ।

करटी(टिनी) । पुं, स्त्री । हस्तिनि । ह-
स्तिन्याम् । हे.च. । [हे.च. ।

करटु: । पुं । कर्करेटुपक्षिणि । কর্কটিয়া পক্ষী।

करण: । पुं । जम्बीरवृक्षे । हला. । क्ली । हेतौ।
गात्रे । विषयेन्द्रिये । "क्रियाभेदेन्द्रियक्षेत्रकायसंवे-
शनेषु च । कायस्थे साधने क्लीवम् ।" मे.णत्रिकं ।

करणत्राणम् । क्ली । मस्तके । हे.च. ।

करणाधिप: । पुं । जीवे ।

करण्टक: । पुं । पद्मकन्दे । [सु. ।

करण्डु: । पुं । लोणिकाशाके । বনলুনিয়া। प.

करण्ड: । पुं । मधुकोषे । মৌচাক । दलाढके ।
करण्ड्यां । ফুলের সাজি । मे.डत्रिकं । कारण्ड-
वपक्षिणि । हारा. । [नि.व.११ ।

करण्डफल: (क:) । पुं । कपित्थवृक्षे । रा.

करण्डा । स्त्री । यकृति । कालखण्डे ।

करण्डी (इन्) । पुं । मत्स्ये । त्रिका. ।

करतल: । पुं । हस्ततले । হাতের তেলো ।
हिं हथेली । "ऊर्द्धं करतले सृतं।" रा.नि.व.१८।

करतृणम् । क्ली । श्वेतकेतके ।

करतोयम् । क्ली। वर्षोपलजले । শীলের জল।

करद्रुम: । पुं । कारस्करवृक्षे । কুঁচিলা । रा.
नि.व.९ ।

करपत्रम् । क्ली। क्रकचास्त्रे । করাত, কাঁচি।
सु.सू.८अ. । तत्र छेदनलेखनकर्म्मणि प्रयुज्यते ।
यथा—"भेदेऽस्मिन् करपत्रन्तु खरसारं दशाङ्गुलं ।
विस्तारे द्व्यङ्गुलं सूक्ष्मदण्डमत्सरवत्स्मनम्" ॥ अचि. ।

करपत्रवान् । पुं । तालवृक्षे । श.च. ।

करपत्रिका । स्त्री । जलक्रीड़ायाम् । जटा. ।
तिलपर्ण्याम् । [ण्डे । रा.नि.व.८ ।

करपर्ण: । पुं । भिण्डावृक्षे । रा.नि.व४। रक्तैर-

करपल्लव: । पुं । अङ्गुलौ ।-शब्दकल्प. ।

करपात्रम् (त्रिका) । क्ली, स्त्री । जलक्री-
ड़ायाम् । हारा. । [अ.टी.सा. ।

करपा(बा)लिका । स्त्री । एकधारास्त्रे ।

करबडावल्ली । स्त्री । अत्यम्लपर्ण्याम् । हिं
वल्लीपूरण । रा.नि.व.३ ।

करवाल: । पुं । नखे । श.मा. । खड्गे ।

करभ: । पुं । गजपिप्पल्यां । प.मु. । उष्ट्रे ।
रत्ना । उष्ट्रशावके । सूर्य्यावर्त्ते । गजशिशौ । अ.टी.
सा.। करिशुण्डे । नखीनामगन्धद्रव्ये । रा.नि.व.१२।
See नख: । मणिबन्धात् कनिष्ठाङ्गुलिपर्य्यन्तहस्त-
बहिर्भागे । मे. भत्रिकं । [रा.नि.व.१० ।

करभकाण्डिका । स्त्री । उष्ट्रकाण्डिवृक्षे ।

करभञ्जि(ण्ड)का । स्त्री । महाकरञ्जे ।
ডহরকরঞ্জ । हिं अरारि । भा.पू.१भ. । लताक-
रञ्जे ।

करभप्रियः । पुं । क्षुद्रपीलुवृक्षे ।

करभप्रिया । स्त्री । दुरालभायां । क्षुद्रदुरालभायां । रा.नि.व.४ । [रा.नि.व.११ ।

करभवल्लभः । पुं। कपित्थवृक्षे । क्षुद्रपीलुवृक्षे ।

करभवारुणी । स्त्री। उष्ट्रकण्टकगुल्मे। "स्थितं करभवारुणी ।" रस.र.वाजी. ।

करभा । स्त्री । वृश्चिकाल्यां । विछाति गाछ । रा.नि.व.६ । [भार्यां । रा.नि.व.४ ।

करभादनिका (नी) । स्त्री । क्षुद्रदुराल-

करभी(इन्)। पुं,स्त्री(भी) । हस्तिनि । उष्ट्रां । भा.म ३भ.सू.घा.चि. । ह्रस्वमेवग्रह्याम् । श्वेतापराजितायां ।

करभीरः । पुं । सिंहे । श.र. ।

करमट्टः । पुं । गुवाकवृक्षे । त्रिका. ।

करमध्यम् । क्ली । कर्षे, २ तो. । प.प्र.१ख. ।

करमर्दः । पाणीयामलकवृक्षे । पाणीयामला । ष्टी.सा.। करम्चा । हिं करौंदा इति च भाषा । मं कं करवन्दे, करिजिगे । रा.नि.व.११ । स द्विविधो महाक्षुद्रभेदेन । गुणाः—"करमर्द्दफलश्चामं तिक्तञ्चाग्निप्रदीपकं । गुरु पित्तकरं ग्राहि चाम्लमुष्णं रुचिप्रदं। रक्तपित्तं कफञ्चैव वर्द्धयेत्तृड्नाशकम् । तत्पक्वं मधुरं रुच्यं लघुशीतञ्च पित्तहं । रक्तपित्तं त्रिदोषञ्च विषं वातञ्च नाशयेत् । तत्क्षुद्रं पक्वसदृशं गुणैर्ज्ञेयं विचक्षणैः । अत्यम्लस्य गुणाश्चैव ज्ञेयामकरवन्दवत्" ॥ वै.निघ. । "पिपासाघ्नं गुरु रुचिकरं पित्तकरञ्च । राज. । "करमर्द्दद्वयं त्वाममम्लं गुरु तृषापहं । उष्णं रुचिकरम्प्रोक्तं रक्तपित्तकफप्रदम् । तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित्" ॥ भा. । च.सू.४अ. ।

करमर्द्दकः (का) । पुं, स्त्री । करमर्द्दवृक्षे । लताविशेषे ।

करमर्द्दिका । स्त्री । पर्व्वतजद्राक्षासदृश्याम् । करौंदीति लोके ख्यातायाम् । द्राक्षा पर्व्वतजा यादृक् तादृशी करमर्द्दिका । भा.पू.१भ.आम्रादिव. ।

करमर्द्दी । पुं, स्त्री । करञ्जवृक्षे । करमर्द्दवृक्षे । रत्ना. ।

करमालः । पुं । खतमाले । धूमे । हे.च. ।

करमूलम् । क्ली । मणिबन्धे । रा.नि.व.१८ ।

करम्बी । स्त्री । कलम्बीशाके । See कलम्बी ।

करम्भः । पुं दधिसक्तुनि । प.मु. उत्तमारणीति । वा.सू.१५अ.वीरतरादिः अरुणः । "भल्लूकमीरटकुरण्टकरम्भपार्थाः ।" क्ली । तन्नामकलक्षारनिर्यासस्थावरविषे । प्रियङ्गुफले । इदं स्थावरविषान्तर्गतफलविषं । पुष्पविशेषश्च । सु.कल्प.२अ. । See फलविषम् । [मिश्रितसक्तुनि । हारा.।

करम्भकः । पुं । श्वेतकिणिह्याम् । क्ली । दधि-

करम्भा । स्त्री । शतावर्य्याम्। प्रियङ्गौ । रा.नि.व.१२ । इन्दीवरायां । रा.नि.व.३ ।

कररी । स्त्री । करिदन्तमूले । हला. ।

कररुहः । पुं । नखे । रा.नि.व.१८ । नखीनामगन्धद्रव्ये । नखीति भाषा । रा.नि.व.१२ । See नखः । अगर्व्वादिधूपे । वै.निघ.२भ. ।

कररेखा । स्त्री । करस्थरेखायाम् । "रेखाः सामुद्रिके ज्ञेयाः शुभाशुभनिवेदकाः ।" रा.नि.व.१८ ।

करलः । पुं । कपित्थवृक्षे ।

करवालिका । स्त्री । करपालिकायाम् ।

करवी । स्त्री । हिङ्गुपत्राम् । तें कोप्पु । भा.पू.१भ.गु.व.। यमान्यां। राजिकायां । सु.सू.४६अ.।

करवी(र)भुजा । स्त्री । आढ़कीवृक्षे । आड़ी । रा.नि.व.१६ ।

करवीरः । पुं । (Nerium odorum.) Sweet-scented oleander. उपविषजातीयस्वनामख्यातवृक्षे । करवी गाछ । हिं कनेली । मं कणेरु, कह्लेर । कं वाफणलिंगे । तें गन्नेरु । स चतुर्धा श्वेतरक्तपीतकृष्णभेदेन । तत्र श्वेतकरवीरगुणाः—कटुः तीक्ष्णः कुष्ठकण्डूघ्नः व्रणविषविस्फोटघ्नः हयवृद्धिप्रदश्च । रा.नि.व.१० । सु.सू.३९अ. शिरोविरेचने । रक्तवर्णः शोधकः स्यात्कटुः पाके च तिक्तकः । कुष्ठादिनाशको लेपात् इति रक्तगुणाः । निघण्टौ पाटलभेद उक्तः—अथ पाटलवर्णकः । शीर्षपीड़ां कफं वातं नाशयेदिति कीर्त्तितः । रक्तादिचतुर्भेदगुणाः श्वेतहयारिवत् । वै.निघ. । अर्जुनवृक्षे । भुजाढ़कीवृक्षे । টোভোর

कन्नार गाछ। प.मु.। हिङ्गुपत्रे। सोमलताभेदे। सु.चि.२९अ.। See सोमः।

करवीरकः । पुं। श्वेतकरवीरवृक्षे। तन्मूलविषे। हे.च.। अर्जुनवृक्षे। रा.नि.व.९।

करवीरकन्दसंज्ञः । पुं, क्ली। A species of onion or bulb. तैलकन्दे। পলাণ্ডুবিশেষ। रा.नि.व.७।

करवीरका । स्त्री। मनःशिलायां। वै.निघ.।

करवीरणी । स्त्री। करवीरणी ककरखिरणी इति कोङ्कणदेशप्रसिद्धे पुष्पवृक्षविशेषे। या रक्तपुष्पा शीघ्रे जायते। गुणाः—"तिक्ता चोष्णा च कटी च कफवातविषापहा। आध्मानवातं छर्दिं च ऊर्ध्वश्वासहमीश्चयेत्। इत्येवं करवीरण्या गुणाः प्रोक्ताः"… । वै.निघ.। रा.नि.व.१०।

करवीरभुजा । स्त्री। आढ़क्याम्। हिं रहर। रा.नि.व.१६।

करवीराद्यतैलम् । क्ली। भंगन्दराधिकारे तैलम्। पाठः—"करवीरनिशादन्तीलाङ्गलीलवणाग्निभिः। मातुलुङ्गार्कवत्साह्वैः पचेत्तैलं भगन्दरे॥" तिलतैलं ४श. करवीरादिकल्कः १श. वारि १६ श. एकत्र पाच्यम्। च.द., रस.र.। अन्यत् नासारोगे—"रक्तकरवीरपुष्पं जात्यास्तथाश्नमल्लिकायाश्च। एतैः समन्तु तैलं नासार्शोनाशनं श्रेष्ठम्॥" च.द.। अशनः पीतशाले (পিয়াশাল)। पाकः पूर्ब्ववत्। [वै.निघ.।

करवीरानुजा । स्त्री। आढक्यां। हिं रहर।

करवीरिका । स्त्री। मनःशिलायां। र.सा.सं.।

करवीर्य्यः । पुं। चिकित्सकविशेषे।

करशाखा । स्त्री। अङ्गुली। रा.नि.व.१८।

करशीकरः । पुं। वमने। करिशुण्डनिर्गतजलकणे। हला.।

करशूकः । पुं। नखे। त्रिका.।

करशोथः । पुं। (Oedematous swelling of hand.) हस्तशोथे। হাতের কজা ফোলা। [लवण। रत्ना.।

करसम्भवम् । क्ली। रोमकलवणे। সাম্ভরি

करसादः । पुं। हस्तदौर्ब्बल्ये।

करहाटः (कः) । पुं। मदनवृक्षे। प.मु.; रा.नि.व.८। शीगरव.उ.ख.केशरपाके.सु.कल्प७अ.। महापिण्डीतरौ। रा.नि.व.९। सु.चि.१८अ.। पद्मकन्दे। मे.। अकर्क्करायां। আকরকরা। श्वेतमदने। वै.निघ.।

कराग्रम् । क्ली। करिपुष्करे। हला.।

कराग्रपल्लवः । पुं। अङ्गुली।

काराघातः । पुं। वज्राङ्गुली।

कराङ्गणम् । क्ली। हट्टे। हारा.।

कराचीनः । पुं। खञ्जने। द्विरूपकोषः।

करामर्द्दः । पुं। करमर्द्दकवृक्षे। श.र.।

कराम्बुकः । पुं। पानीयामलकवृक्षे। श.च.।

कराम्लः (कः) । पुं। करमर्द्दकवृक्षे। प.मु.।

करायिका । स्त्री। पक्षिभेदे। क्षुद्रवके। वै.निघ.।

करालः (कः) । पुं,क्ली। पर्णासे। कृष्णतुलसी। प.मु। भा.पू.१भ.। त्रि। दन्तुरे, तुङ्गे, भीषणे। पुं। सर्ज्जरसतैले। গর্জ্জনতেল। मे.लत्रिकं। तन्नामकदन्तरोगे दन्तोपरिदन्तोद्भेदनरूपे। দাঁতের উপর দাঁত ওঠা। तल्लक्षणम्—शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः। करालान् विकटान् दन्तान् कराली न च सिध्यति॥ मा.नि.। कस्तूरीमृगे। सु.सू.४६अ.। गुणाः—जङ्गालवत्। क्ली। कृष्णार्जके। कृष्णवर्व्वूरके। तैलेन घृतेन वा कृते वेसवारे। इति पाकराजः।

करालकलिकः । पुं। कुन्दपुष्पवृक्षे। प.मु.।

करालाङ्गम् । क्ली। विड़ङ्गे। वै.निघ.।

करालत्रिपुटा । स्त्री। लङ्कानामशिम्बीधान्ये। তেওড়া ধান। रा.नि.व.१६।

कराला । स्त्री। अनन्तमूले। অনন্তমূল। प.मु.। विड़ङ्गायाम्।

करालास्यः । त्रि। दन्तुरवदने।

करालिकः । पुं। वृक्षे। हे.च.।

कराली । स्त्री। अग्निजिह्वायाम्। पुं। (लिङ्) महादोषान्वितास्थि। यस्य नीचत ऊर्द्धे वा एको दन्तुरो दन्तो जायते स कराली। ज.द.३अ.।

करिकः । पुं। विट्खदिरे।

करिकणा । स्त्री । गजपिप्पल्याम् । भैष. वाजी.कामेश्वरमोदके । [চই গাছ । रा.नि.व.६ ।

करिकणावल्ली । स्त्री । चविकालतायाम् ।

करिकर्णपलाश: । पुं । हस्तिकर्णपलाशे । भैष.श्व.पि.सर्व्वतोभद्ररसे ।

करिकवल: । पुं । विधाने । हारा. ।

करिका । स्त्री । कारीहचे । কণ্টিকারী । रा.नि.व.८ । नखक्षते ।

करिकुम्भ: । पुं । गजकुम्भे ।

करिकुम्भक: । पुं । नागकेशरचूर्णे । हारा. ।

करिकुसुम्भ: । पुं । नागकेशरवृक्षे । नागकेशर-चूर्णे । हारा. ।

करिकृष्णा । स्त्री । गजपिप्पल्याम् ।

करिकेसरम् । क्ली । नागकेसरे । वै.निघ.श्वास-चि.क्षुद्रावलेहे ।

करिचर्म्म । क्ली । गजचर्म्मणि ।

करिज: । पुं । गजशावके । श.मा. ।

करिणी । स्त्री । हस्तिन्याम् । अम. ।

करिदन्त: । पुं । गजदन्ते ।

करिदन्ताभम् । क्ली । मूलके ।

करिदमन: । पुं । नागदमने । নাগদনা । भैष.स्त्रीरोगचि. ।

करिदारक: । पुं । सिंहे । श.र. ।

करिनासिका । स्त्री । यन्त्रविशेषे ।

करिपत्र(क)म् । क्ली । तालीशपत्रे । তালী-শপত্র । रा.नि.व.६ ।

करिपिप्पली । स्त्री । गजपिप्पल्याम् । গজ-পিঁপুল । प.मु. । भा.पू.१भ. ।

करिपोत: । पुं । करिशावके । हला. ।

करिभ: । पुं । अश्वत्थवृक्षे । चैत्यवृक्षे । त्रिका. ।

करिमाचल: । पुं । गजमाचले । सिंहे । त्रिका. ।

करियाद: । क्ली । जलहस्तिनि ।

करिर: । पुं,क्ली । वंशाङ्कुरे । বাঁশের কোঁড় । मरुजगुल्मे ।

करिशावक: । पुं । दशवर्षपर्य्यन्तहस्तिशिशौ । श.मा. ।

करिस्कन्ध: । पुं । गजांसस्थले ।

करी (इन्) **।** पुं । हस्तिनि । रत्ना. ।

करीर: । पुं, क्ली । वंशाङ्कुरे । বাঁশের কোঁড় । गुणा:—कटुतिक्ताम्लं कषायं लघु शीतलं पित्त-रक्तदाहकृच्छ्रघ्नं रुचिकृच्च । एतत्पर्व्व निर्गुणं । रा. नि.व.७ । (Capparisaphylla.)मरुजे उष्ट्रप्रि-यवृक्षे । करील, कचड़ा इति लोके । मं नेपती । कं निष्पतिमे । तें एनुगदन्तमुशोदतु । रा.नि.व. ८ । गुणा:—"करीरमाध्मानकरं कषायं कटूष्ण-मेतत्कफकारि भूरि । श्वासानिलारोचकसर्व्वशूल-हृदर्त्तिखर्जूव्रणदोषहारि ।" रा.नि.व.८ । गुरु भेदि श्लेष्मलञ्च । मद.व.७ । श्लेष्मनाशित्वं कषायत्वं दाहजनकत्वञ्च । राज. । घटे । मे. । क्ली । करी-रफले ।

करीरकुण: । पुं । करीरफलकाले । [ख्यातफले ।

करीरफलम् । क्ली । करीरबीजे, टेँट् इति

करीरा । स्त्री । हस्तिदन्तमूले । चीरिकायाम् । ঝিঁঝিঁ পোকা । उणा. । मन:शिलायाम् । हे.च. ।

करीरिका । स्त्री । हस्तिदन्तमूले । त्रिका. ।

करीरी । स्त्री । हस्तिदन्तमूले । चीरिकायाम् । मे.रत्रिकं ।

करीष: । पुं, क्ली । शुष्कगोमये । वनभवकरीषे वा । বিলঘ্যাটা । सि.यो.मदा.चि. । "वन्यकरी-षघ्राणात् जलपानात् ।" [শুন । हारा. ।

करीषाग्नि: । पुं । गोमयाग्नौ । ঘুঁটের আ-

करुण: । फलितवृक्षे । करुणस्तु रसे वृक्षे । मे. । मल्लिकावृक्षे । हे.च. । (Citrus Decumana.) स्वनामख्यातनिम्बुकवृक्षे । করুণালেবুর গাছ । प.मु. । गुणा:—कफवायुामभेदोघ्नं पित्तकोपनञ्च । राज.३प. ।

करुण(णा)मल्ली । स्त्री । The plant Jasminum Sambac. नवमल्लिकायाम् । श.च. ।

करुणा । स्त्री । दयायाम् । छगलाचे । वै.निघ. ।

करुणी । स्त्री । ग्रीष्मपुष्प्याम् । पुष्पवृक्षविशेषे । रा.नि.व.१० । See करवीरणी ।

करुषकम् । क्ली । फलविशेषे ।

करेटः । पुं । नखे । त्रिका. । [त्रिका. ।

करेटव्या । स्त्री । धनच्छूपक्षिणि । धानसपक्षी ।

करेटुः (कः) । पुं । कर्कटेरौ । कर्कटिया पाखी । रवा. । नखे । त्रिका. ।

करेडुकः । पुं । करेटुपक्षिणि । कर्कटे ।

करेणुः(कः) । पुं । गजे । स्त्री । हस्तिन्यां । मे.णत्रिकं । कर्णिकारवृक्षे । विश्व. । महौषधिविशेषे । सक्षीरगजाकारकन्दवृक्षविशेषे । यथा—करेणुः सदृक्षीरा कन्देन गजरूपिणी । हस्तिकर्णपलाशस्य तुल्यपर्णा द्विपर्णिनी ॥ सा च सोमरसतुल्यगुणा । सु.चि.३०अ. । See औषधिः ।

करेणुजन् । क्ली । कर्णिकारफले । तच्च विषमयमिति ज्ञेयम् ।

करेणुभूः । पुं । पालकाव्यमुनौ । त्रिका. ।

करेणुसुतः । पुं । पालकमुनौ । त्रिका. ।

करेनरः (वरः) । पुं । मूषिके । सिह्लके । शिलारस । वै.निघ. । रा.नि.व.१२ ।

करोटः (टिः,का,टी) । पुं, स्त्री । शिरोऽस्थिनि । रा.नि.व.१८ ।

करोद्दिजनः । पुं । कृष्णसर्षपे । वै.निघ. ।

कर्कः । पुं । शुक्लवर्णाश्वे । ज.द. । कुलीरके । दर्पणे । घटे । मे.कद्विकं । कर्कटवृक्षे । कांकरोल । रा.नि.व.११ । कङ्कपक्षिणि । मानभेदे । वृक्षविशेषे । काके । शिरोऽवचालने । हे.च. । कङ्करे । वदरीवृक्षे । विल्ववृक्षे । गन्धके । वै.निघ.२भ.ग्रहणीकवाटरसे । अग्नौ ।

कर्कचिर्भिटिका (टी) । स्त्री । Small cocumber. चिर्भिटायाम् । कर्कटीभेदे । रा.नि.व.७ । [टकम् ।

कर्कटम् । क्ली । विषभेदे । प.मु. । See कर्कटकम् ।

कर्कटः । पुं । The Numidian crane. कर्करेटौ । कर्कटि पाखी । गुणाः—वातघ्नः शुक्रमदः श्रमघ्नश्च । चचि.२२अ. । स्वनामख्यातवृक्षे । काँकरोल । तत्फलगुणाः—रुच्यं कषायं अतिदीपनं कफपित्तकरं ग्राहि चक्षुष्यं लघु शीतलञ्च । रा.नि.व.११ । शाल्मलीफले । वालुक्याम् । मे.टत्रिकं । कुलीरके । सामुद्रकर्कटे । च.द.वा.व्या. एलादितैले । सन्निपातविशेषे । See कर्कटकः । पद्मकन्दे । जटा. । विल्ववृक्षे । रस.र.वालचि. । गोक्षुरे । कर्कटशृङ्गे । काँकड़ाशृङ्गी । च.द.वा. व्या.एकादशशतिकमहाप्रसारणीतैले ।

कर्कटकम् । क्ली । काण्डभग्ननामास्थिभङ्गविशेषे । तत्र "संमूढमुभयतोऽस्थि मध्यभग्नं ग्रन्थिरिवोन्नतम् ।" सु.नि.१५अ. । See भग्नम् । त्रयोदशविधस्थावरकन्दविषान्यतमविषे । सु.कल्प.२अ. । See कन्दविषम् ।

कर्कटकः । पुं । हस्ते । रा.नि.व.१४ । कर्कटे । काँकड़ा । रवा. । गुणाः—कर्कटः सृष्टविण्मूत्रः सन्धतानिलपित्तजित् । राज. । ताम्रेचौ । वै.निघ. २भ.वा.व्या.एलादितैले । पक्षिविशेषे । कर्कटे । काष्ठामलके । मध्यहीनप्रवृद्धवातादिजन्यसन्निपातज्वरे । तेन व्यथावेपथुदिष्टशादाहादिगौरवाग्निमान्द्यादिरोगा जायन्ते तथालदीर्हवाक्यनिरोधादयश्च भवन्ति । भा.म.१भ. । कर्कटशृङ्गे । काँकड़ाशृङ्गी । भैष.अ.पि.चि.बृहल्लशुणावतीगुड़िकायां ।

कर्कटकास्थि । क्ली । कुलीरकास्थिनि । काँकड़ार खोला । [कर्कटस्त्रियाम् ।

कर्कटकी । स्त्री । कर्कटशृङ्ग्याम् । वा.चि.३अ. ।

कर्कटचरणः । पुं । कुलीरकपादे । काँकड़ार पा । रस.र.वाल.चि. ।

कर्कटच्छदा । स्त्री । पीतकोषायाम् । पीतघोषा । वै.निघ. [ग्याम् । अपामार्गे । वै.निघ. ।

कर्कटवल्ली । स्त्री । गजपिप्पल्याम् । शुकशि-

कर्कटशृङ्गिका । स्त्री । कर्कटशृङ्ग्याम् । मद. व.१ ।

कर्कटशृङ्गी । स्त्री ।(Rhus succedanea. Syn. Acuminata.) स्वनामख्यातकर्कटदंशाकारौषधौ । काँकड़ाशृङ्गी । हिं ककड़ाशृङ्गी, ककरशिं । मं काकड़ासिंगी । कं तें कर्काटशृंगी । गुणाः—गुरूष्णा तिक्ता वातघ्नी हिक्कातीसारकासघ्नी श्वासरक्तपित्तघ्नी च । रा.नि.व.६ । कषाया वमिघ्नी ज्वरघ्नी वृष्या चयकासघ्नी ऊर्द्धवातघ्नी च । मद.व.१ । तृष्णारुचिघ्नी । भा.पू.१भ. । महाघोषायाम् । वड़ घोषा ।

कर्कटा । स्त्री । कर्कटशृङ्ग्याम् । भैष.बालचि. कर्कटादि. ।

कर्कटाख्यः (क्षः) । पु' । कर्कटिकालतायां ।

कर्कटाख्या (ङ्गा) । स्त्री । कर्कटिकायां । काँकुड़ । र.मा. । रा.नि.व.६ । सि.यो.हि-श्वा. चि.द्राक्षालेहे । वै.निघ.ज्व.चि.कुलत्याद्यघृते । कर्कटशृङ्ग्यां । वै.निघ.क्षय.चि.लघुशिवगुटी. । सु. चि.२अ. । वा.चि.४अ. । भैष.शिलाजतुवटी. ।

कर्कटादिलेहः । पुं । बालरोगे । "कर्कटातिविषाशुण्ठीधातकीविल्वबालकं । मुस्तं मज्जा च कोलस्य मधुना सह लेहयेत् ॥ हन्ति ज्वरमतीसारं दुर्वारं ग्रहणीगदम् ।" रस.र.बाल.चि.भैष. । কর্কটশৃঙ্গী, আতইচ, শুঁট, ধাইফুল, বেলশুঁট, বালা, মুতা, কুল আঁটির শস্য চূর্ণ সমভাগ ।

कर्कटाह्वः । पुं । विल्वद्रुमे । रा.नि.व.११ ।

कर्कटाह्वा । स्त्री । कर्कटशृङ्ग्यां । रा.नि.व.६।

कर्कटिः (का) । स्त्री । A kind of cucumber (Cucumisutilatissimus Rox.) स्वनामख्यातलतायां । काँकुड़ গাছ । तें नक्कदोस । हिं काँकड़ि । उत्. फुटिकाँकड़ी । सा द्विधा ह्रस्वदीर्घभेदेन । गुणाः—स्वादुः गुरुः अजीर्णकरी शीतला च। तत्पक्वफलं दाहच्छर्द्दितृष्णाक्लान्तिघ्नञ्च । राज.३प. । त्वचायां कटुका तिक्ता पाचकाग्निप्रदीपनी । अन्नथ्या ग्राहिणी प्रोक्ता मूत्रदोषाश्मरीहरा ॥ मूत्रकृच्छ्रं वमिं दाहं श्रमञ्चैव विनाशयेत् । सा पक्वा रक्तदोषस्य कारिण्युष्णा बलप्रदा ॥ इति प्रथमा । द्वितीया त्रपुषी कर्कटी (तौंहिकांकड़ी) । गुणाः—रुच्या मधुरा वातकरी शीता मूत्रप्रदा गुर्व्वी कफकृद्दाहनाशिनी । वमिं पित्तं भमं मूत्रकृच्छ्रं मूत्राश्मरीं हरेत् ॥ वै.निघ. । सर्व्वाः कर्कटिका वर्षाशरदि जाता न हिताः । परन्तु हेमन्तजा रुचिकरी पित्तघ्नी च भोज्या । सा चार्द्धपक्वा न भक्ष्या तेन पीनसं जनयति । सम्यक्पक्वा मधुरा कफघ्नी च । भा.म.१भ.अश्म. चि. । See एर्वारुः । [प्रा । रा.नि.व.६ ।

कर्कटिनी । स्त्री । दारुहरिद्रायां । দারুহরি

कर्कटी । स्त्री । कर्कटस्त्रियाम् । वनकर्कटिकायाम् । रा.नि.व.२३ । कर्कटिकालतायां । रा.नि. व.७ । हे.च. । वालुकीति हला. । वदर्य्याम् । কুল গাছ । मद.व.५। घण्टावदरे । पद्मकर्णिकायाम् । कोमलश्रीफले। वै.निघ. । देवदाल्यां । भा.पू.१भ.गु.व.। गौरचकर्कटिकायाम् । र.सा.सं. रसशोधने । शाल्मलीफले । मे. । कर्कटशृङ्ग्यां । रा.नि.व.६ । सर्पे । श.र. ।

कर्कटीवीजम् । क्ली । कर्कटीफलवीजे । ফুটির বীজ । च.द.अश्म.चि.कुशावलेहे । [श.र. ।

कर्कटुः । पुं । करेटुपक्षिणि । কর্কটে পাখী ।

कर्कड़ः । पुं । खटिकायां । খড়িমাটী । र.मा.।

कर्कन्दुः (न्धुः, न्धूः) । पुं, स्त्री । (Zizyphus jujuba.) क्षुद्रबदरवृक्षे । रा.नि.व.२३ । सि.यो.कास.चि.नवाङ्गयूषे वचादियूषे च । 'यवामलकदाड़िमकर्कन्धुमूलकशुण्ठकैः ।' शृगालकोल्यां । শিয়াকুল । च.सू.४अ. ।

कर्कन्धु(क)म् । क्ली। वदरीफले । ছোট কুল। गुणाः—मधुरं स्निग्धं गुरु पित्तानिलघ्नं वातपित्तहरञ्च । मद.व.६ । विल्वफले । বেল । वै.निघ. ।

कर्कन्धुकी । स्त्री । वदरीभेदे । मद.व.६ । क्षुद्रवदरवृक्षे । ছোট কুল । र.मा.रा.नि.व.२३ ।

कर्कफलः । पुं । कर्कटवृक्षे । কাঁক্রোল । रा.नि.व.११ ।

कर्करः । पुं। कङ्करे। কাঁকর । मुद्गरे । हारा.। अस्थिनि । क्ली । चूर्णजनकपाषाणखण्डे । घुटिं । दर्पणे । हारा. । तरुणे पशौ । हला. ।

कर्करटः । पुं । पक्षिविशेषे । কর্কটে ।

कर्कराङ्गः । पुं । कालकण्ठपक्षिणि । श.मा. ।

कर्करादुः (कः) । पु' । कटाक्षे । जटा. । कर्करेटुपक्षिणि । श.र. ।

कर्करान्ध(न्धु)कः । पु' । अन्धकूपे । त्रिका.।

कर्करालः । पु' । चूर्णकुन्तले । हे.च. ।

कर्कराक्षः । पुं । खञ्जनपक्षिणि । हारा. ।

कर्करिका । स्त्री । चक्षुःखर्व्वाम् । চোক্ কর্কর করা ।

कर्करी(रिका) । स्त्री । सनालजलपात्रे ।

थाली । अम. । उखा. । तण्डुलधावनपात्रे । गलन्तिकायां । भाण्डविशेषे । घटी । दर्पणे । मे.रत्रिकं ।

कर्कारेटुः । पुं । करेटुपक्षिणि । कर्केटে পাখী । रवा. । [त्याम् । शुकशिम्ब्याम् । वै.निघ. ।

कर्कवल्ली । स्त्री । अपामार्गवृक्षे । गजपिप्प-

कर्कशः । पुं । इक्षुभेदे । मे.शत्रिकं । काम्पिल्ले । কমলাগুঁড়ি । अम. । कासमर्दे । पटोले । प.मु. रवा. । गुड़त्वचि । वै.निघ. । त्रि । अमसृणे । निर्दये । मे.शत्रिकं ।

कर्कशच्छदः । पुं । पटोले । रा.नि.व.३ । पाटलवृक्षे । পারুল গাছ শাখোটবৃক্ষে । त्रिका. वनौ. । शाकवृक्षे । कृष्णकुष्माण्डे । वै.निघ. ।

कर्कशच्छदा । स्त्री । घोषायां । ঝিঙা গাছ । हिं तोरई । दग्धावृक्षे । रा.नि.व.६ ।

कर्कशदलः । पुं । पटोलफलवृक्षे । र.मा. ।

कर्कशदला । स्त्री । दग्धिकायाम् । कौड़गे कुरुहीति ख्याता । रा.नि.व.६ ।

कर्कशा । स्त्री । वृश्चिकालीवृक्षे । বিছাতি গাছ । रा.नि.व.६ । क्षुद्रमेषशृङ्ग्याम् । वनवदरे । वै.निघ. । [र.मा. ।

कर्कशिका । स्त्री । वनकोल्यां । বুনো কুল ।

कर्कसारम् । क्ली । दधिशक्तौ । हारा. ।

कर्काकः । पुं । कर्कटिकायाम् । কাঁকুড় । पथ्यापथ्ये ।

कर्कारुः । पुं । (Beninkasa cerifera.) कुष्माण्डभेदे । বিলাতি কুমড়া । उत्. कखाड़ु । कुष्माण्डीबीजं कुष्मावलेहे । कलिङ्गलतायाम् । তরমুজ বা থর্মুজ । रवा. । अतिक्षुद्रकुष्माण्डे । हिं कोहड़ी, कोहण्डी । तें गुम्मडितीगे । कुष्माण्डो तु भृशं लघ्वी कर्कारुः परिकीर्त्तिता । गुणाः—कर्कारुः ग्राहिणी शीतला रक्तपित्तघ्नी गुरुः पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत् । भा.पू.१भ. शाकव. । तैलगुणाः विभीतकतैलवत् । स्त्री । कुष्माण्डीलतायाम् । हला. ।

कर्कारुकः । पुं । (Convolvulus Paniculatus.)कालिन्दवृक्षे । তরমুজ । मं खड़ुया । रवा. । कुष्माण्डे । प.मु. । सु.चि.१८ अ. ।

कर्कारुः । स्त्री । कुष्माण्डीलतायाम् ।

कर्केतनः (रः) । पुं । रत्नविशेषे । "कर्केतनाख्ये परमाः पवित्राः ।" गारुड़े । विषमान्यथ वीर्य्यवद्विषभेदे । "कर्केतनं मरकतं ।" वा.उ.३६अ. ।

कर्कोधुकी । स्त्री । भूवदर्य्याम् । वै.निघ. ।

कर्कोटः (कः) । पुं । बिल्ववृक्षे । मे.कचतुष्कं । काँकरोल इति प्रसिद्धफलशाकलतायाम् । च.द.ज्व.चि.शाकविधौ । "कर्कोटकं पर्पटकम् ।" एतत्फलञ्च स्थावरविषान्तर्गतफलविषे वर्त्तते । सु. कल्प.२अ. । See फलविषम् । एतदुभयगुणाः—कफपित्तघ्नं शुक्रनाशनं रुचिकरञ्च । 'कर्कोटकं फलं ज्ञेयं कारवेल्लकवद्गुणैः ।" राज.३प. । कर्कोटकं त्रिदोषघ्नं रुचिकृन्मधुरं तथा । अत्रि.१६अ. । इक्षुदण्डे । रा.नि.व.१४ । सर्पविशेषे । मे. ।

कर्कोटका (की) । स्त्री । फलशाकविशेषे । গোল কুমড়া । मं कोहले । गुणाः—मूत्राघातहरं प्रमेहघ्नं कृच्छ्राश्मरीभेदनं विण्मूत्रस्तपनं तृषातिशमनं पुष्टिकरं वृष्यं स्वादु अरोचकघ्नं बल्यं पित्तघ्नञ्च । रा.नि.व.७ । कर्कोटकी रुचिकरी कटुः दीपनी तिक्तोष्णा वातकफघ्नी विषपित्तघ्नी च । वै.निघ. । पीतघोषायाम् । পীতঘোষা বা ঝিঙা । मं कर्टोली, काकली । रवा. । कोशातक्याम् ।

कर्कोटकीफलम् । क्ली । घोषाफले । ब्रह्मकुष्माण्डे । भिङ्गाफले । वै.निघ. । कर्कोटफले । কাঁকরোল ।

कर्कोटपत्रम् । क्ली । कर्कोटदले । কাঁকরোলপাতা । एतद्वमने हितम् । वा.ज्व.चि.१अ. ।

कर्कोटमूलम् । क्ली । कर्कोटकमूले । কাঁকরোলমূল । सि.यो.कास.चि. । "नस्यं कर्कोटमूलं स्यात् ।" च.द.पाण्डु.चि. ।

कर्कोटिका । स्त्री । कुष्माण्डीलतायां । বিলাতিকুমড়া । कर्कोटके । কাঁকরোল । रा.नि.व.७ ।

कर्कोटिकाकन्दरजः । क्ली । खेकसामूलचूर्णम् । भा.म.१भ.शीतलाङ्ग.स.ज्व.चि. । "कर्कोटिकाकन्दरजः कुलत्थः ।"

कर्कोटी । स्त्री । कर्कोटिकायां । কাঁকরোল । देवताड़वृक्षे । দেয়াতাড়া । वै.निघ. ।

कर्कोलम् । क्ली । कङ्कोले । কক্কোল । रा.नि.व.१२ ।

कर्चरिका (री) । स्त्री । कचुड़ीति प्रसिद्धे पिष्टकभेदे । पाकराजः । [तालविशेषे ।

कर्चु(र्चू)रम् । क्ली । सुवर्णे । मे.रत्रिकं । हरि-

कर्चूरः (कः) । पुं । एकाङ्गीनामवणिग्द्रव्ये । একাঙ্গী । हिं कचूरा । तें औकानीकचेट्टा । मं कं कचीरा । योग.रत्ना.वाजीक. । गुणाः—कटुः तिक्तोष्णः कफकासघ्नः मुखवैशद्यकरः गलगण्डघ्नः । रा.नि.व.६ । दीपनः रुच्यः सुगन्धी कटुपाकः कुष्ठार्शोव्रणकासघ्नः लघुः श्वासगुल्मक्रिमिघ्नश्च । भा.पू.१भ । कर्चूरकन्दे । (कः) आमहरिद्रायाम् । কাঁচাহলুদ । अ.टी.स्वा. । शट्याम् । मे.रत्रिकं । वै.निघ.२भ.ज्व.चि. । See शटी ।

कर्णः । पुं । स्वनामप्रसिद्धदीर्घपत्रवृक्षे । কান্‌-থোড়া গাছ । च.द.वि.ज्व.चि. । "दीर्घपत्रकर्णाख्यनेत्रं खदिरसंयुतम् ।" श्रवणेन्द्रिये । रा.नि.व.१८ । सुवर्णालौ । শোণালু । "सुवर्णालौ शुतावपि ।" मे.णद्विकं । मधुरत्वचि । দারচিনি । अर्कमन्दारे । वै.निघ. ।

कर्णकः । पुं । मत्स्यविशेषे । तन्नामकसन्निपातविशेषे । কর্ণমূলী । लक्षणं—"दोषत्रयेण जनिता किल कर्णमूले तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च । कण्ठग्रहो वधिरता श्वसनं प्रलाप प्रस्वेदमोहदहनानि च कर्णिकाख्ये ॥" भा.ज्व.चि. ।

कर्णकण्डुः(ण्डूः) । पुं, स्त्री । कर्णस्रोतोगतरोगविशेषे । तस्य निदानं यथा—"मारुतः कफसंयुक्तः कर्णकण्डुं करोति च ।" मा.नि. ।

कर्णकिट्टम् । क्ली । कर्णमले ।

कर्णकीटा (टी) । स्त्री । (Julus cornifex.) कर्णजलौकायाम् । शतपद्याम् । কাণ-কোটারী, কেন্নুই । हिं काणसलाइ । है.च. ।

कर्णक्ष्वेड़ः । पुं । कर्णरोगविशेषे । কাণের ভিতর সর্ব্বদা ভোঁ ভোঁ শব্দ । तस्य लक्षणं—"वायुः पित्तादिभिर्युक्तः वेणुघोषसमं स्वनम् । करोति कर्णयोः क्ष्वेड़ं कर्णक्ष्वेड़ः स उच्यते ।" मा.नि. । अत्र वायुः पित्तादिसहितः कर्णे वेणुघोषवच्छब्दमुत्पादयति ।

कर्णगूथः । पुं । कर्णमले । কাণের খোল । हारा. ।

कर्णगूथकः । पुं । कर्णरोगविशेषे । यथा—"पित्तोष्मशोषितः श्लेष्मा जायते कर्णगूथकः ।" मा नि. ।

कर्णच्छिद्रम् । क्ली । कर्णरन्ध्रे ।

कर्णजलूका । स्त्री । (Julus.) कर्णजलौकायाम् । श.र. ।

कर्णजलौका (काः) । स्त्री,पुं । शतपद्याम् । কাণকোটারী । हिं काणखजूरा । है.च. । अ.टी.भ. ।

कर्णजार्शः । क्ली । कर्णार्शोरोगे । কাণের অর্শ । "प्रकुपिता दोषाः श्रोत्राक्षिघ्राणवदनेषु अर्शांस्युपनिवर्त्तयन्ति । तत्र कर्णजेषु वाधिर्य्यं पूतिकर्णता च ।" सु.नि.२अ. ।

कर्णजाहम् । क्ली । कर्णमूले ।

कर्णजित् । पुं । गुड़ाकेशे ।

कर्णजीरकम् । क्ली । क्षुद्रजीरके । रत्ना. ।

कर्णज्योतिः । स्त्री । कर्णस्फोटायाम् । वै.निघ. । [श.मा. ।

कर्णदुन्दुभिः । स्त्री । शतपद्याम् । কেন্নুই ।

कर्णधारिणी । स्त्री । हस्तिन्यां । হাতিনী ।

कर्णनादः । पुं । कर्णस्रोतोगतरोगे । কাণ শোঁ শোঁ রোগ । कर्णस्रोतोगतवायुः कर्णे भेरीमृदङ्गशङ्खवन्नादमहर्निशमुत्पादयति । मा.नि. । "यदा तु नाड़ीषु विमार्गमागतः स एव शब्दाभिवहासु तिष्ठति । शृणोति शब्दान् विविधान् तदा नरः प्रणादमेनं कथयन्ति चामयम् ॥" सु.उ.२०अ. ।

कर्णपाकः । पुं । कर्णस्रोतोगतरोगविशेषे । কাণপাকা । "कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत् ।" मा.नि. । [কাণের পাতা ।

कर्णपात्रकः । पुं । कर्णवाह्यभागविशेषे ।

कर्णपाली । स्त्री । कर्णपालीगतरोगे । কাণের পাতার রোগ । स पञ्चविधः—परिपोटोत्पातोन्मन्थदुःखवर्द्धनपरिलेहिभेदेन, एषां लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि । सु.चि.२५अ. ।

कर्णपुत्रिका । स्त्री । कर्णस्फुल्याम् । मोरट-लतायाम् । [रटे । रा.नि.व.३ ।

कर्ण(कीर्ण)पुष्पः । पुं । नीलझिण्ट्याम् । मो-

कर्णपूरः । पुं । बालपत्रे । र.मा.। शिरीषवृक्षे । नीलोत्पले । मे. । अशोकवृक्षे । रा.नि.व.१० । नन्दीवृक्षे । त्रिका. ।

कर्णपूरकः । पुं । कदम्बवृक्षे । কদম গাছ । रा.नि.व.८। अशोकवृक्षे । रा.नि.व.१० । तिलके । वै.निघ. ।

कर्णपूरणम् । क्ली । तैलादिभिः कर्णपूरणे । কাণে তেল দেওয়া । "कर्णं प्रपूरयेत्सम्यक् स्ने-हाद्यैर्मात्रया भिषक् । नोच्चैः श्रुतिर्न बाधिर्य्यं स्या-न्नित्यं कर्णपूरणात् ॥ रसाद्यैः पूरणङ्कर्णे भोजना-त्प्राक् प्रशस्यते । तैलाद्यैः पूरणङ्कर्णे भास्करेऽस्तमु-पागते ॥ स्वेदयेत्कर्णदेशन्तु परिवर्त्तनशायिनः । मूत्रैः स्नेहरसैः कोष्णैः पूरयेच्च ततो भिषक् ॥ स्वस्थस्य पूरितं रक्षेत् मात्राशतमवेदने । शतपत्रं श्रोत्रगदे शिरोरोगे तथैव च ॥" वैद्यकम् ।

कर्णप्रतिनाहः । पुं । कर्णरोगविशेषे । "स-कर्णगूथो द्रवतां यदा गतो विलायितो घ्राणमुखं प्रपद्यते । तदा स कर्णप्रतिनाहसंज्ञितो भवेद्विका-रो शिरसोऽर्द्धभेदकृत् । मा.नि. ।

कर्णफलः । पुं । (Ophiocephalus kur-rawey.) मत्स्यविशेषे । কাণলি মাছ। गुणाः —अजीर्णकफकरः । राज.३प. ।

कर्णबन्धनाकृतिः । स्त्री । कर्णवेधनानन्तरं तद्बन्धनाकृतौ । सा पञ्चदशविधा । यथा—नेमिस-न्धानकः, उत्पलभेद्यकः, वल्लूरकः, आसङ्गिमः, गण्डकर्णः, आहार्य्यः, निर्वेधिमः, व्यायोजिमः, कपाटसन्धिकः, अर्द्धकपाटसन्धिकः, सङ्क्षिप्तः, हीनकर्णः, वल्लीकर्णः, यष्टिकर्णः, काकौष्ठक इति । सु.सू.१६अ. । विशेषाः स्वस्वपर्य्याये लभ्याः ।

कर्णभूषणम् । क्ली, पुं । अशोकवृक्षे । नाग-केशरे । प.मु. ।

कर्णमद्गुरः । पुं । (Silurus unitus.) मत्स्य-भेदे । কাণমাগুর । वै.निघ. ।

कर्णमलम् । क्ली । कर्णगूथे । हारा. ।

कर्णमूलम् । क्ली । कर्णस्य मूलदेशे । कर्णमूली। मा.ज्व.नि. ।

कर्णमोचकः । पुं । कर्णस्फोटायाम् । কাণছি-ড়া । वै.निघ.२भ.र.पि.चि.दूर्व्वाद्यतैले ।

कर्णमोटा । स्त्री । वर्व्वूरवृक्षे । वै.निघ. ।

कर्णमोरटः । पुं। कर्णस्फोटायां । কাণছিড়ে, কান্দড়া । रसेन्द्र.चि.सूर्य्यपातकतार्क्ष । काणछि-ड़ाहयं, "जलस्थलभवः कर्णमोरटः ।" सा.कौ.दू-र्व्वाद्यतैले ।

कर्णरोगः । पुं । कर्णजव्याधौ । কাণের রো-গ । तस्य निदानादि ।—नादोऽतिरुक् कर्णमलस्य शोषः स्रावस्तनुश्चाश्रवणञ्च वातात् । शोथः सरा-गोदरणं विदाहः सपीतपूतिस्रवणञ्च पित्तात् । वैश्रुत्यकण्डूस्थिरशोथशुक्लस्निग्धश्रुतिस्वल्परुजः क-फाच्च । सर्व्वाणि रूपाणि च सन्निपातात् स्रावश्च तत्राधिकदोषवर्णः ।" मा.नि. । कर्णरोगाः साक-ल्येनाष्टाविंशतिविधाः । यथा—"कर्णशूलं प्रणा-दश्च बाधिर्य्यं क्ष्वेड़ एव च । कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च । कृमिकर्णप्रतिनाहौ विद्रधिर्द्वि-विधस्तथा । कर्णपाकः पूतिकर्णः तथैवार्शश्चतुर्वि-धम् । तथार्व्वुदं सप्तविधं शोफश्चापि चतुर्विधः । एते कर्णगतारोगा अष्टाविंशतिरीरिताः ॥" वै. निघ. । [कर्णपालौ । কাণের পাতা । हे.च. ।

कर्णलतिका । स्त्री । Lobe of the ear.

कर्णवंशः । पुं । मञ्चे । हारा. । [र्णहीने ।

कर्णवर्ज्जितः । पुं । सर्पे । श.च. । त्रि । क-

कर्णवशः । पुं । मत्स्यविशेषे । কালবশ । तस्य लक्षणं—वृत्तः गोलः कृष्णः शल्कवांश्च । तन्मांस-गुणाः—दीपनं पाचनं पथ्यं हृद्यं बलपुष्टिकरञ्च । वैद्यकम् ।

कर्णविद्रधिः । पुं । Ulceration of the ear. कर्णस्रोतोगतस्फोटके । स द्विविधः दोष-जागन्तुजभेदेन । तेन तोदधूमनिर्गमवत्पीड़ा दाह-सन्तापा अरुणस्रावाश्च भवन्ति । मा.नि. । अपिच "क्षताभिघातप्रभवस्तु विद्रधिः भवेत्तथा दोषकृतो-ऽपरः पुनः । सरक्तपीतारुणमस्रमास्रवं प्रतोदधू-मायनदाहचोषवान् ।" सु.उ.२०अ. ।

कर्णविधिः । पुं । कर्णच्छेदनादौ । तद्विधिः

यथा —“स्वेदयेत् कर्णदेशन्तु कित्त्विनः पार्श्वशायिनः। मूत्रैः स्नेहैरसैरुष्णैः श्रोत्ररन्ध्रं प्रपूरयेत्। कर्णञ्च पूरितं रक्षेत् शतं पञ्चशतानि वा। सहस्रं वापि मात्राणां श्रोत्रकण्ठशिरोगदे। मूत्राद्यैः पूरणङ्कर्णे भोजनात्प्राक् प्रशस्यते। तैलाद्यैः पूरणङ्कर्णे भास्करेऽस्तमुपागते॥” भा.।

कर्णवेधनिका (नी)। स्त्री। करिकर्णवेधनास्त्रे। हारा.। कर्णवेधनास्त्रे। यथा—“कर्णपालीश्च बहुलां बहुलायाश्च शस्यते। सूचिविभागसुषिरा त्र्यङ्गुला कर्णवेधनी॥” अत्रि.।

कर्णव्यधः। पुं। कर्णवेधने। কাণবেঁধা। “स च रक्षाभूषणनिमित्तः, षष्ठे सप्तमे वा मासि कर्त्तव्यः। अयञ्च न जन्मकालादूर्द्ध्वं किन्तु संवत्सरादिभाद्रपदाद्यः षष्ठः माघः सप्तमो वा फाल्गुनस्तस्मिन् वेध्यः।” सु.सू.१६अ.।

कर्णशष्कुली। स्त्री। कर्णगोलके। कर्णमध्यवर्त्तिनि आकाशे। हे.च.।

कर्णशूलम्। पुं, क्ली। Ear ache. कर्णस्रोतोगतरोगविशेषे। কাণ শূলন, কাণ কামড়ান। तत्र श्रोत्रमारुतः प्रतिलोमं विचरन् दारुणशूलमुत्पादयति। कुपितरक्तं कफेन पित्तेन वा येन केनचिदावृतं भवेत, तल्लक्षणमपि प्रदर्शयति। मा.नि.। तदुक्तं—“समीरणः श्रोत्रगतोऽन्यथाचरः समन्ततः शूलमतीव कर्णयोः। करोति दोषैश्च यथास्वमावृतः स कर्णशूलः कथितो दुराचरः॥ सु.उ.२०अ.। हनुशङ्खशिरोग्रीवं यस्य भिन्दन्निवानिलः। कर्णयोः कुरुते शूलं कर्णशूलं तदुच्यते॥” सु.नि.१अ.।

कर्णशूली। त्रि। कर्णशूलयुक्ते।

कर्णशेखरः। पुं। शालवृक्षे। रत्ना.।

कर्णशोथः (कः)। पुं। कर्णस्रोतोगतरोगविशेषे। “कर्णशोथार्वुदार्शांसि जानीयादुक्तलक्षणैः।” मा.नि.। “तेषु रुक्पूतिकर्णत्वं वधिरत्वञ्च बाधते।” वा.उ.१७अ.।

कर्णसंस्रावः। पुं। The discharge of pus from the ear. कर्णस्रोतोगतरोगविशेषे। কাণের পূয। तस्य निदानरूपाणि—“शिरोऽभिघातादथवा निमज्जतो जले प्रपाकादथवापि विद्रधेः। स्रवेद्धि पूयं श्रवणोऽनिलावृतः स कर्णसंस्राव इति प्रकीर्त्तितः॥” मा.नि.।

कर्णसमीपः। पुं। शङ्खदेशे। रा.नि.व.१८।

कर्णसूटी। स्त्री। कीटविशेषे।

कर्णस्फोटा। स्त्री। स्वनामख्यातलतायाम्। কাণছিড়া, কাণফোটা। मं काणफोड़ी। गुणाः— कटुतिक्तहिमा विषघ्नी ग्रहभूतादिदोषघ्नी। रा.नि.व.३। “कर्णस्फोटा तु कटुका चोष्णा चाग्निप्रदीपनी। वातगुल्मोदरप्लीहकर्णव्रणविषापहा। कफपित्तज्वरानाहकफशूलविनाशिनी। सा तु पीता बुधैर्ज्ञेया चाञ्जने च प्रशस्तिका॥” वै.निघ.।

कर्णस्रावः। पुं। कर्णसंस्रावे।

कर्णाख्यः। पुं। श्वेतभिण्ट्याम्। वै.निघ.।

कर्णाञ्जलिः। पुं। कर्णशष्कुल्याम्।

कर्णाटी। स्त्री। हंसपादीक्षुपे। रा.नि.व.५।

कर्णान्दुः (न्दूः)। स्त्री। कर्णपाल्याम्। কাণ তড়কা इति भाषा। हे.च.।

कर्णाभरणकः। पुं। आरग्वधवृक्षे। বড় সোঁদালু। रा.नि.व.९।

कर्णारा। स्त्री। कर्णवेधन्याम्। त्रिका.।

कर्णारिः। पुं। अर्ज्जुनवृक्षे। नदीसर्ज्जवृक्षे। আজন্ इति लोके। रा.नि.व.९।

कर्णार्वुदः (र्शः)। पुं। कर्णस्रोतोगतरोगविशेषे। “कर्णशोथार्वुदार्शांसि जानीयादुक्तलक्षणैः।” मा.नि.।

कर्णिकः। पुं। गणिकारिकायाम्। पद्मकोषे। सन्निपातज्वरविशेषे। लक्षणं—“दोषत्रयेण जनिता किल कर्णमूले तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च। कण्ठग्रहो वधिरता श्वसनं प्रलापः प्रस्वेदमोहदहनानि च कर्णिकाख्ये।” भा.म.१भ.।

कर्णिका। स्त्री। दारुणपीड़ायां। वा.उ.३८अ.। महाग्निमन्थवृक्षे। বড় আগ্‌গন্ত। रा.नि.व.९। वै.निघ-२भ.कासरोग.रुद्रपर्ण्याम्। करिशुण्डाग्रभागरूपाङ्गुलौ। करमध्याङ्गुलौ। हे.च.। क्रमुकादिकण्टांशे। বোঁটা। मे.कत्रिकं। पद्मिनीनाले। हे.च.। स्त्रीयोनौ कर्णिकाकारे मांसग्रन्थिरूपरोगे। भा.म.४भ,योनिरो.। लक्षणं—“कु

र्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्याञ्च जायते ।" मा.नि. । कठिन्याम् । शतपत्र्याम् । সেউতি ফুলের । बोजमातृका । बीजकोषे । बीजकोषमध्य कर्णिका । পদ্মাদির বীজকোষ । हारा. । गुणाः—तिक्ता कषाया मधुरा हिमा मुखवैशद्यकृत् लघ्वी तृष्णासकफपित्तघ्नी च । भा.पू.१भ. ।

कर्णिकारः (कः) । पुं । A sort of cassia (Cassia fistula.) क्षुद्रस्वर्णालुवृक्षे । ছোট সোণালু গাছ । मं लघुवाहवा । तैं किरमङ्गे । गुणाः—तिक्तरसः कटूष्णः कफशूलघ्नः उदरकृमिमेहघ्नः व्रणघ्नः गुल्मघ्नश्च । रा.नि.व.६ । (Pterospermum acerifolium.) द्रुमोत्पले । ওলট্ কম্বল । हिं कनियार, कनियार । मैं देवचैद्दु, कोंड़गोगुचैट्टु, गोगुचैट्टु । गुणाः—कटुतिक्तः लघुः शोधनस्तुवरः रञ्जनः सुखदः शोथश्लेष्मरक्तव्रणकुष्ठहरश्च । रा.नि.व.६ । स्थलपद्मे । र.मा. । उड़के । उड़्या । रवा. ।

कर्णिकारिका । स्त्री । हारिद्रावृक्षे । वै.निघ. ।

कर्णिकी (इन्) । पुं । गजे । जटा. ।

कर्णिनः । त्रि । विद्धकर्णे ।

कर्णिनी । स्त्री । Disease of the Uterus or Polypus uteri. श्लेष्मजन्यस्त्रीयोनिरोगविशेषे । यत्र योनौ श्लेष्मासृग्भ्यां कर्णिकाकारग्रन्थिर्जायते । भा म.४भ.योनिरो.चि. । "कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते ॥" सु. उ.३८च. । "अकाले वाहमानाया गर्भेण पिहितोऽनिलः । कर्णिकां जनयेद्योनौ श्लेष्मरक्तेन मूर्च्छितः । रक्तमार्गविरोधिन्या सा तया कर्णिनी मता ॥" च. ।

कर्णी । पुं । आरग्वधवृक्षे । रा.नि.व.२३ । ग्रीवापार्श्वभागे । गणिकारिकायाम् । वै.निघ. । त्रि । प्रशस्तकर्णे । कर्णयुक्ते । [थर्थरि,डुली । च.टी.भ. ।

कर्णीरथः । पुं । स्कन्धवाह्ययाने । চোপালা,

कर्णीवान् । पु । आरग्वधवृक्षे ।

कर्णेजपमन्त्रः । पुं । विषनाशनमन्त्रविशेषे । "ओं हर हर नीलग्रीवश्वेताङ्गसङ्गजटायमण्डितखण्डेन्दुमूर्त्तमलरूपाय विषमुपसंहर उपसंहर हर हर हर नास्ति विषं नास्ति विषं नास्ति विषं उच्छिरे उच्छिरे उच्छिरे । इति कर्णेजपमन्त्रेण वारं वारं तालुमुखं सिञ्चेत् शीतवारिणा वारषट्कम् ।" चि.श्मशान.५६च. ।

कर्णेन्द्रियम् । क्ली । श्रवणेन्द्रिये । কাণ । "अत आकाशतन्मात्रनिर्म्मितम् ।" सु.शा.१च. ।

कर्णोर्णम् (र्णा) । क्ली, स्त्री । कर्णरोम्णि ।

कर्त्तनम् । क्ली । छेदने । मे.नत्रिकं । तर्कूटे । त्रिका. ।

कर्त्तरी । स्त्री । कृपाण्याम् । কাতারি । शस्त्रकर्त्तनोपयुक्ते शस्त्रे । কাঁচী, ক্ষুর প্রভৃতি । सु. चि.१च. यथा च "वायुस्त्रिगर्भशल्यानां केशादीनाञ्च कर्त्तने । विविधाकृतयो योज्याः कर्त्तर्य्यः कर्त्तरीनिभाः ॥" चि. ।

कर्त्तरीयम् । क्ली । स्थावरविषान्तर्गतत्वक्सारनिर्यासविषभेदे । सु.कल्प.२च. । [वश्र ।

कर्त्तरीयुगम् । क्ली । सिन्धुवारद्वये । निशिन्दा-

कर्दः । पुं । कर्द्दमे । श.र. ।

कर्दटः । पुं । करहाटे । पङ्के । मे.टत्रिकं । अञ्जलि । जलजतृणमात्रे । [हे.च. ।

कर्दनम् । क्ली । कुक्षिशब्दे । পেটের ডাক ।

कर्दमम् । क्ली । गन्धराजे । रा.नि.व.१२ । सु. चि.२५च. । मांसे । श.च. । त्रयोदशविधकन्दविषान्यतमविषभेदे । प.सु.सु.कल्प.२च. । See कन्दविषं । वर्त्मकर्द्दमाख्यनेत्ररोगे । See वर्त्मकर्द्दमः ।

कर्दमः (कः) । पुं । पङ्के । কাদা । गुणाः—"कर्द्दमो दाहपित्तार्त्तिशोथघ्नः शीतलः सरः ।" भा. । शालिधान्यविशेषे । भा.पू.१भ.शाकव. । See शालिः । पद्मिनीकर्द्दमे । "पुनर्नवा कर्द्दमकण्टकार्य्यौ ।" सु.चि.२५च. । राजिमत्सर्पविशेषे । सु.कल्प.४च. । See सर्पः । अन्ने । वै.निघ. ।

कर्दमविसर्पः । पुं । विसर्परोगभेदे । लक्षणं यथा—"कफपित्ताज्ज्वरस्तम्भो निद्रा तन्द्रा शिरोरुजा । अङ्गावसादविक्षेपौ प्रलेपारोचकभ्रमाः । मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ॥ आमोपवेशनं लेपः स्रोतसाञ्च विसर्पति । प्रायेणामाशयं गृह्णन्नेकदेशं न चातिरुक् । पीड़कैरवकीर्णोऽतिपीतलोहितपाण्डुरैः । स्निग्धोऽसितो मेच-

कामी मलिनः शोफवान् गुरुः । गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्य्यते । पक्कवच्छीर्णमांसश्च स्पष्टस्नायुशिरागणः । शवगन्धी च वीसर्पः कर्द्दमाख्यमुशन्ति तम् ॥" मा.नि. । [र. ।

कर्द्दमाटकः । पुं । विष्ठादिनिक्षेपस्थाने । श.

कर्द्रमी । स्त्री । मुद्गरवृक्षे । मुग्‌गरफूलेर गाछ । रा.नि.व.१० । [नेता, लेकृड़ा । अम. ।

कर्पटः(कः) । पुं । लक्तके । लत्ता इति लोके ।

कर्परः । पुं । खर्परे । मृद्घटखण्डे । ज्वालातप्तकपाले । तप्त काटिखोला । वा चि.१अ. । "स्वभाकारमपूपपचनपात्रं न्युब्जं कर्पर इत्युच्यते ।" ताओया वा चाटु । वा.टी.हेमा.। कपोले । त्रिका.। शर्करायां । उदुम्बरवृक्षे । श.च.। मस्तकास्थिनि । माथार खुलि । कटाहे । अस्त्रभेदे । मे.रत्रिकं ।

कर्परांशः । पुं । मृत्कपालखण्डे । खोलाकुची । श.र. । [खाकरीट इति भाषा । भा. ।

कर्परालः । पुं । अक्षोटवृक्षे, गिरिजपीलुवृक्षे ।

कर्परिकातुत्थम् । क्ली । खर्परे । थापर । वै.निघ. । तुत्थविशेषे । तुँते । हे.च. ।

कर्परी । स्त्री । A collyrium extracted from the Amomum anthorhiza. काष्ठोद्भवतुत्थे, तुत्थाञ्जने । दारुहरिद्रार काठेर तुँतिया ।

कर्परीतुत्थम् । क्ली । खर्परे । कर्परिकातुत्थे, रसके । तुँतियाविशेष । हिं खपरियाघोथा । "कर्परीतुत्थकं तुत्थादन्यत् तद्रसकं स्मृतं । ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः ॥" वैद्यकं ।

कर्पासः (कः) । पुं । स्वनामख्यातवृक्षे । कापास गाछ । हे.च. । मद.व.१ ।

कर्पासफलम् । क्ली । कार्पासवीजे । कापासेर वीज । "कर्पासफलमित्युक्तं कषायं मधुरं गुरु । वातश्लेष्महरं रुच्यं विशेषेणास्थिवर्ज्जितम् ॥"

कर्पासी । स्त्री । कार्पासवृक्षे । मद.व.१ ।

कर्पूरः (कः) । पुं, क्ली । (Cinamomum, camphora,) Camphor. स्वनामख्यातपण्यद्रव्ये शुभ्रतरुनिर्यासरूपे । कर्पूर । हिं कापुर । -मैं कर्पूरमु । स पक्वापक्वभेदाद्द्विविधः । तयोरपक्कं गुणवत्तरं भवति । स च पोतास-भीमसेन-सितकर-शङ्करावास-पांशु-पिञ्जा ब्दसार-हिमबालुक जूतिक-तुषार-हिम शीतल-पक्किकाख्य इति बहुभेदाः । गुणाः —शीतलः तिक्तः स्निग्धोष्णः कटुः श्लेष्मरक्तपित्तघ्नः तृष्णादाहकण्ठदोषघ्नः । स तिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः । तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः ॥ सु.सू.४६अ. । तत्र नूतनकर्पूरः स्निग्धस्तिक्त उष्णास्रदाहप्रदः । पुरातनः दाहशीतघ्नः । धौतः स शुभदः, इति । स पुनः शिरोमध्यतलजभेदेन त्रिविधः । तत्र शिरोजातः कर्पूरः स्तम्भाग्रजातः । मध्यजः पर्णजातः । तलजः तलजातः । तथा स्तम्भगर्भस्थितः श्रेष्ठः । स्तम्भवाह्यस्थितो मध्यमः । तथा शिरोजो भास्वान् विदर्शपुलकः । मध्यजः सामान्यपुलकः स्वच्छश्च । तलजः गौरवर्णः । यस्तम्भमध्यजः स स्वच्छः शुभ्रईषत् हरिद्राभश्च स्यात् । यो वाह्यजातः स सुदृढः शुभ्ररुचः पुलकञ्च जनयेत् । इति कर्पूरलक्षणम् । तदुक्तं पोतासो-भीमसेनस्तदनुसितकरः शङ्करावाससंज्ञः, पांशुः पिञ्जोऽब्दसारस्तदनु हिमयुता बालुका जूतिका च। पश्चादस्मात्तुषारस्तदुपरि सहिमः शीतलः पक्किकाख्या (पक्किकान्या) कर्पूरस्येति भेदा गुणरसमहसा वैद्यदृष्ट्येन दृश्याः। इति कर्पूरभेदः । अपिच कर्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णास्रदाहदः । चिरस्थो दाहशोषघ्नः स धौतः शुभकृत्परः । शिरो मध्यं तलञ्चेति कर्पूरन्त्रिविधं स्मृतम् । शिरस्तम्भाग्रसञ्जातं मध्यं पर्णदले तलं । भास्वद्विदर्शपुलकं शिरोजातन्तु मध्यमं । सामान्यपुलकं स्वच्छं तले चूर्णन्तु गौरकं । स्तम्भगर्भस्थितं श्रेष्ठं स्तम्भवाह्ये च मध्यमम्। स्वच्छमीषत् हरिद्राभं शुभ्रं तन्मध्यजं स्मृतम्। सुदृढं शुभ्ररुचश्च पुलकं वाह्यजं वदेत् । अपि च स्वच्छं भृङ्गारपत्रं लघुतरविशदं तोलने तिक्तकं चेत्, स्वादे शैत्यं सुहृद्यं बहलपरिमलामोदसौरभ्यदायि । निःस्नेहं दार्ढ्यपत्रं शुभतरमिति चेत् राजयोग्यं प्रशस्तम् । कर्पूरं चान्यथा चेत् बहुतरशमने स्फोटदायि व्रणाय ॥ रा.नि.व.१२ । कर्चूरकन्दे । शठी । आर्द्रहरिद्रायाम् । काँचाहलुद । श.च. ।

कर्पूरतुलसी । स्त्री । कर्पूरगन्धितुलसीभेदे । कर्पूरमाली तुलसी । वै.निघ. ।

कर्पूरतैलम् । क्ली । कर्पूरस्नेहे । कर्पूरेर तैल । गुणाः—कटूष्णत्वं वातरोगघ्नत्वं कफामय-

रत्वं दन्तदार्ढ्यकरत्वं पित्तहरत्वञ्च । रा.नि.व.१५। ह्रीवेरे । বালা ।

कर्पूरनालिका । स्त्री । पक्वान्नविशेषे । কর্পূরনাড়ী, নেওয়ালা इति च ख्याता । यथा— "घृताक्तया समितया कृत्वा लम्बपुटं ततः। लवङ्गी-मरिचकर्पूरयुतया सितयान्वितं । पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका । संयावसदृशी ज्ञेया गुणैः कर्पूरनालिका ॥" भा. ।

कर्पूरमणिः । पुं । पाषाणभेदे । প্রস্তরবিশেষ । गुणाः—"मणिः कर्पूरकस्फिकः कटुश्चोष्णो व्रणापहः । त्वग्दोषवातदोषादीन् नाशयेत् ।" रा. नि.व.१३ ।

कर्पूररसः । पुं । रसविशेषेऽतिसाराधिकारे । "हिङ्गुलम् चाहिफेनञ्च मुस्तकेन्द्रयवं तथा । जातीफलञ्च कर्पूरं सर्व्वं संमर्द्य यत्नतः । जलेन वटिका कार्य्या द्विगुञ्जापरिमाणतः ॥" इत्यादि । भैष.अतिसा.चि. । रसकर्पूरे । রসকর্পূর । तत्करणविधिः—"शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः । पुष्टिकां खटिकां तद्वत् स्फटिकां सिन्धुजन्म च । वल्मीकं क्षारलवणं भाण्डरञ्जकमृत्तिकां । सर्व्वाण्येतानि सञ्चूर्ण्य वाससा चापि शोधयेत् । एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्द्दयेत् । तच्च चूर्णं ससूतञ्च स्थालीमध्ये परिक्षिपेत् । तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत्समाम् । ततस्तं कुट्टितमृदा मुद्रयेदनयोर्मुखं । संशोष्य मुद्रयेद्भूयो भूयः संशोष्य मुद्रयेत् । सम्यग्विशोष्य मुद्रां तां स्थालीं चुल्ल्यां विधारयेत् । वह्निं निरन्तरं दद्यात् यावद्दिनचतुष्टयं । चाङ्गारोपरि तद्यत्नं रचेद्बादहर्निशं । शनैरुद्घाटयेद्यन्त्रमूर्द्धस्थालीगतं रसं । कर्पूरवत्सुविमलं गृह्णीयाद्गुणवत्तरम् । तदेव कुसुमचन्दनकस्तूरीकुङ्कुमैर्युतं । खादन्हरति फिरङ्गं व्याधिं सोपद्रवं सपदि । विन्दति वह्नेर्दीप्तिं पुष्टिं वीर्य्यं बलं विपुलं । रमयति रमणीशतकं रसकर्पूरसेवकः सततम् ॥" भा. । গিরিমাটী, ঝিণুক, ফুলখড়ি, ফট্‌কিরি, সৈন্ধবলবণ, উইমাটী, খারিলবণ, রাঙামাটী প্রত্যেক চূর্ণ এক এক ভাগ, এক ভাগ পারার সহিত ১ প্রহর মাড়িয়া স্থালীমধ্যে পাক করিবে ।

कर्पूरहरिद्रा । स्त्री । स्वनामख्यातद्रव्ये । আম আদা । हिं कर्पूरहलदी । तैं कर्पूरहरिद्रमजी-वस्तुविशेष । गुणाः—शीतला वातला मधुरा पित्तघ्नी तिक्ता सर्व्वकण्डूघ्नी च । भा.पू.१भ. ।

कर्पूरा । स्त्री । तरुण्यां ।

कर्पूरादितैलम् । क्ली । योनिरोगे हितम् । पाठः—"कर्पूरभल्लातकशङ्खचूर्णं क्षारो यवानाञ्च मनःशिला च । तैलं विपक्वं हरितालमिश्रं रोमाणि निर्मूलयति क्षणेन" । कर्पूरादिभिः कल्कः । सिद्धे हरितालचूर्णं पादिकं प्रक्षेप्यम् । তিলতৈল ১ শ. কল্ক—কর্পূর, ভেলার সুটী, শঙ্খচূর্ণ, যবক্ষার এবং মনছাল প্রত্যেকে ৪ তো. জল ৪ শ.। পাক সিদ্ধ হইলে হরিতাল চূর্ণ এক পোয়া বা ২০ তোলা প্রক্ষেপ দিবে ।

कर्पूराश्मा । पुं । उपरत्नविशेषे । हिं कर्पूरचीनिया । स्फटिके । वै.निघ. ।

कर्बः । पुं । मूषिके ।

कर्बरः । पुं, क्ली । पुण्ड्रेक्षौ । পুঁড়িইক্ষু । रा.नि.व.१४ । स्वर्णे । धुस्तूरवृक्षे । व्याघ्रे । मे.रत्रिकं ।

कर्बरी । स्त्री । शृगाल्यां । व्याघ्र्यां । मे.रत्रिकं । हिङ्गुपत्र्याम् । जटा. ।

कर्बुदारः (कः) । पुं । नीलझिण्ट्याम् । श.च. । श्वेतकाञ्चने । च.सु., च.सू.४अ. । गुणाः— ग्राहित्वं रक्तपित्ते हितत्वं । राज.। श्वेतस्तु काञ्चनी ग्राही तुवरो मधुरः स्मृतः। रुच्यो रुक्षः श्वासकासपित्तरक्तविकारहा । क्षतप्रदरगुल्मघ्नो गुणाश्चान्ये तु रक्तवत् ॥" वै.निघ.। च.। (कः) श्लेष्मान्तकवृक्षे । চালতাগাছ । सु.सू.४३अ. ।

कर्बुरम् । क्ली, पुं । स्वर्णे । है.च. । हरिताले । अम. । (रः) धुस्तूरवृक्षे । गन्धशट्यां । च.सु. । आमहरिद्रायां । কাঁচা হলুদ । वै.निघ.। जले । मे. ।

कर्बु(र्बू)रः (कः) । पुं (Curcuma Zerumbet Rox.) गन्धशट्यां । अम.। आमहरिद्रायां । हिं कच्चीहलदी । अ.टी.भ.श.र. । नदीनिष्पावधान्ये । रा.नि.व.१६ ।

कर्बुरफलः । पुं । साकुरुण्डवृक्षे । रा.नि.व.६ ।

कर्बुरा । स्त्री । सविषजलायुकाभेदे । सु.सू.१३ अ. । See जलायुका । पाटलावृक्षे । वर्व्वर्य्याम् । বাবুইতুলসী । मे.रत्रिकं ।

कर्बूरम् । क्ली । स्वर्णे । हरितालै । त्रिका. ।

कर्म्म । क्ली । यत् कुर्व्वन्ति, तत्कर्म्म । सु.सू.४१ अ. । तच्च त्रिविधं पूर्व्वकर्म्म प्रधानकर्म्म पश्चात्कर्म्म चेति । सु.सू.५अ. । [कालतायां । मे.रचतुष्कं ।

कर्म्मकरी । स्त्री । मूर्व्वायां । वै.निघ । बिम्बि-

कर्म्मजः । पुं । वटवृक्षे । जटा. ।

कर्म्मपुरुषः । पुं । जीवे, "यस्मिन् चिकित्सा वर्त्तते स एव कर्म्मपुरुषश्चिकित्सिताधिकृत: ।" सु.शा.१अ. ।

कर्म्मफलम् । क्ली । कर्म्मरङ्गफले । रत्ना. । कर्म्मविपाके । मे.लचतुष्कं । सुखे । दुःखे । त्रिका. ।

कर्म्ममूलम् । क्ली । कुशे । कुश । श.च. । शरणे ।

कर्म्मरङ्गः । पुं । (Averrhoa arambola.) स्वनामख्यातवृक्षे । कामराङ्गा गाछ । मं कर्मराचें झाड़ । फलगुणाः—अम्लत्वम् उष्णत्वं वातहरत्वं पित्तजनकत्वं । पक्वस्य मधुराम्लत्वं बलपुष्टिरुचिकरत्वञ्च । रा.नि.व.११ । कटुपाकित्वं अम्लपित्तकारित्वं तीक्ष्णत्वञ्च । राज.३प.। "कर्मारस्य फलञ्चामं ग्राह्यम्लं वातनाशनं । उष्णं पित्तकरञ्चैव तत्पक्वं मधुरं मतं । अम्लञ्च बलपुष्टीनां रुचेश्चैव तु वर्द्धकम् ॥" वै.निघ. । "कर्म्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातहृत् ।" भा. ।

कर्म्मरी । स्त्री । The manna of the bamboo. वंशलोचनायाम् । वै.निघ. ।

कर्म्मविपाकः । पुं । पूर्व्वजन्मकृतशुभाशुभफलभूते रोगादौ ।

कर्म्मारः । पुं । वंशे । कर्म्मरङ्गे । रा.नि.व.७।११ ।

कर्म्मारकः । पुं । कर्म्मरङ्गवृक्षे । वै.निघ. ।

कर्म्मार्हः । पुं । मनुष्ये ।

कर्म्मीरकः । पुं । शाखोटवृक्षे ।

कर्म्मेन्द्रियम् । क्ली । कर्म्मसाधनेन्द्रिये पाय्वादिपञ्चके व्यस्ते समस्ते च ।

कर्वः । पुं । मूषके । कामे । उणा. ।

कर्वरः । पुं । व्याघ्रे । मे. ।

कर्वरी । स्त्री । हिङ्गुपत्राम् ।

कार्श्यः । पुं । कर्चूरे । आम आदा । हिं कचूर । रा.नि.व.६ ।

कर्षः । पुं । औषधभक्षणादौ मागधीमाने । स च षोड़शमाषात्मकः । १६० र. । च । तोलकद्वयात्मकपरिमाणादिमाने । "तोलद्वयन्तु कर्षः स्यात् ।" प.प्र.१ख. । दशमाषकात्मकक्कालिङ्गमाने । "कर्षः स्याद्दशमाषकः ।" शार्ङ्ग.पू.१भ. । सुश्रुतस्तु पञ्चरत्तिकमाषमुक्त्वा १६माषात्मकं, कर्षं कथयति । धरणद्वयात्मकत्रीह्यादिमाने ८०र.। विभीतकवृक्षे । श.र. । क्ली । सुवर्णे ।

कर्षकः । पुं । अयस्कान्तमणौ ।

कर्षणम् । क्ली । कृषीकरणे । हे. च. ।

कर्षणिः । स्त्री । श्वतसीवृक्षे । मसिना गाछ । उणा. । [श्वेतवचायां । वै.निघ. ।

कर्षणी । स्त्री । चौरिणीक्षुपे । रा.नि.व.५ ।

कर्षणीया । स्त्री । कामवृणबीजे । वै.निघ. ।

कर्षफलः । पुं । विभीतकवृक्षे । बहेड़ा वृक्ष । रा.नि.व.११ । भा.पू.१भ.। भल्लातकवृक्षे । वै.निघ.।

कर्षफला । स्त्री । आमलकवृक्षे । आमला गाछ । रत्ना. ।

कर्षार्द्धम् । क्ली । तोलकपरिमाणे । प.प्र.१ख.।

कर्षिका । स्त्री । कामबीजे । वै.निघ. ।

कर्षिणी । स्त्री । चौरिणीक्षुपे । क्षीरुई गाछ । रा.नि.व.५ । वै.निघ. । [हिक्कं ।

कर्षुः । पुं । करीषाग्नौ । जीविकायाम् । मे.ष-

कर्षूः । स्त्री । अभ्यन्तरप्रशस्ते सङ्कीर्णमुखे खातविशेषे । च.सू.१४अ. । करीषाग्नौ । वै.निघ. ।

कर्षूस्वेदः । स्वेदविशेषे । लक्षणं यथा—"खानयेच्छयनस्याधः कर्षूं स्थानविभागवित् । दीप्तैरधूमैरङ्गारैः तां कर्षूं पूरयेत्ततः। तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम् ॥" च.सू.१४अ. ।

कलः । पुं । शालवृक्षे । शालगाछ । रा.नि.व.६। क्ली । शुक्रे, रेतसि । मे.लद्विकं । बदरीगुल्मे । वै.निघ.२भ.संग्रहणी.चि.व्योषादिचूर्णे । त्रि । अजीर्णे । मे. ।

कलकः । पुं । शकुलमत्स्ये । हे.च. । वेतसवृक्षे ।

कलकण्ठः । पुं । हंसे । पारावते । कोकिले । मे.ठचतुष्कं । शब्दरत्नावलि । টেশ্রা পাখী । प.मु.।

कलकफलः । पुं । दाड़िमवृक्षे । [चतुष्कं ।

कलकलः । पुं । सर्ज्जनिर्यासे । धूना । मे.ल-

कलघण्टिका । स्त्री । कृष्णसारिवायाम् । শ্যামা লতা । भा.पू.१भ. । See अनन्ता ।

कलघोषः । पुं । कोकिले । श.र. ।

कलङ्कः । पुं । लौहमले । क्रोड़े । अपवादे । मे.कत्रिकं । मत्स्यभेदे । वै.निघ. ।

कलङ्कषः । पुं । सिंहे । श.मा. ।

कलङ्की । त्रि । लौहमलयुक्ते ।

कलजः । पुं । कुक्कुटे । वै.निघ. ।

कलजातः । पुं । कलमशाली । কল্মা ধান।

कलञ्जः । पुं । ताम्रकूटे । দোক্তা তামাক, থর্ষান তামাক । हिं तामाकू, सुरती । धूमपर्णी-धूमपानगुणाः—"कलञ्जसंवेष्टनधूमपानात् स्याद्द न्तग्रजिर्मुखरोगहानिः । कफघ्नमामज्वरहानिकृच्च गान्धर्व्वविद्याप्रवणैकसेव्यम् ॥ इति विश्वसिद्धान्त-सारावली । संख्याविशेषे यथा —"सव्राली प्रोच्यते गुञ्जा सा तिस्रोरूपकं भवेत् । रूपकैर्दशभिः प्रोक्तः कलञ्जो नाम नामतः ।" युक्तिकल्पद्रुमः । वेत्तल-तायाम् । विषास्त्रहतमृगपक्षिणोः । त्रिका० ।

कलत्रम् । क्ली । श्रोणौ । रा.नि.व.१८ । भा-र्य्यायाम् । मे.रत्रिकं । भगे । त्रिका. । [१२ ।

कलधूतम् । क्ली । रौप्ये । रूपा । रा.नि.व.

कलधौतम् । क्ली । रजते । रूपा । स्वर्णे । সোনা । रा.नि.व.१२ । [मे.नचतुष्कं ।

कलध्वनिः । पुं । मयूरे । पारावते । कोकिले।

कलनः । पुं। वेतसे । বেতগাছ । रा.नि.व.८। क्ली । एकमासिकगर्भे । गर्भवेष्टने । हला. ।

कलनादः । पुं । कलहंसे । वै.निघ. ।

कलम्बुः । पुं । घोलीशाके । रा.नि.व.७ ।

कलभः । पुं । पञ्चवर्षपर्य्यन्तकरिशावके । उ-ष्ट्रे । हला. । धुस्तूरवृक्षे । रा.नि.व.१० ।

कलभवल्लभः । पुं । पीलुवृक्षे । रा.नि.व.११।

कलभवल्लभा । स्त्री । पिक्वां । रा.नि.व.११।

कलभी । स्त्री । चञ्चुपे । रा.नि.व.४ ।

कलमः (शालिः) । पुं । शालिधान्यविशेषे । রোওয়া ধান । रा.नि.व.१६ । मगधादिषु प्रसि-द्धे धान्यविशेषे । কলমা ধান । स एव महातण्डु-ल इति काश्मीरदेशे ख्यातः । "कलमः कालवि-ख्यातः जायते स हहदने । काश्मीरदेशे एवोक्तो महातण्डुल एव च ॥" भा. । गुणाः—अयं महतो हीनगुणः स्वादुपाकरसत्वादियुक्तश्च । वा.सू.६अ. हेमाद्रि.धान्यवर्गे । पित्तश्लेष्मकरः वृष्यः मधुरश्च । रा.नि.व.१६ । कलमोऽसृक्पित्तदोषघ्नश्चक्षुष्यश्च क-षायवान् । राज.३प. ।

कलमा । स्त्री । शालिधान्ये । सा च श्लेष्मपित्त-हा । चक्ष्या च लघुः पथ्या वातश्लेष्मवर्द्धिनी च । अत्रि.१६अ. । [रा.नि.व.१६ ।

कलमोत्तमः (मा) । पुं,स्त्री । सुगन्धशालौ।

कलम्बः (कः) । पुं। कदम्बवृक्षे । विशः । शा-कनाड़िकायाम् । अम.। शरे । मे.वत्रिकं । सर्षपे । धाराकदम्बे । কেলিকদম্ । रा.नि.व.६ ।

कलम्बशालिः । पुं । शालिधान्यविशेषे । क-ल्मा धान । [वै.निघ. ।

कलम्बिकः । पुं। पक्षिविशेषे । চটক পক্ষী ।

कलम्बिका । स्त्री । कलम्बीशाके । কলমী-শাক । श.र. । ग्रीवापश्चान्नाड्याम् । हे.च. ।

कलम्बिकी । स्त्री। पक्षिणीभेदे ।

कलम्बी । स्त्री । Convolvulus repens. स्वनामख्यातजलजशाकविशेषे । কলমীশাক। हिं करेंबु । तें तोमिवञ्चलिचेट्टु । प.मु. । गुणाः—स्तन्यदुग्धशुक्रश्लेष्मकरत्वं मधुरत्वं कषायत्वं गुरुतर-त्वञ्च । राज.३प. । "कलम्बी स्तन्यदा प्रोक्ता म-धुरा शुक्रकारिणी ॥" भा. । उपोदकायाम् । পূঁই-শাক रा.नि.व.७ । [र. । See कलम्बी ।

कलम्बुः (म्बूः) । पुं, स्त्री । कलम्बीशाके । श.

कलम्बुका । स्त्री । जलजशाकविशेषे। কলমী শাক । भैष.शूलचि.शम्बुकादिगुड़ी । [हारा. ।

कलम्बुटम् । क्ली । हैयङ्गवीने । नवनीते ।

कलयज्ञः । पुं । सर्जरसे । धूना । वै.निघ. ।

कलरवः । पुं । गृहपारावते । अम. । कोकिले । रा.नि.व.१९ । वनकपोते । वै.निघ. ।

कललः । पुं । जरायौ । अम. ।

कललजः । पुं । राले । धूना । रा.नि.व.१२ ।

कललजोद्भवः । पुं । शालवृक्षे । रा.नि.व.९ ।

कलविङ्कः । पुं । चटकपक्षिणि । अम.रत्ना.६। कलिङ्गकवृक्षे । पारावते । ग्रामचटके । मे.कचतुष्कं । कृष्णचटके । सु.सू.४६अ. ।

कलशः (सः) । पुं। द्रोणपरिमाणे । ७२८सेर। घटे । प.प्र.१ख.। [लिया । रत्ना. ।

कलशिः (शी) । स्त्री । पृश्निपर्ण्याम् । चाकु-

कलसिः (सी) । स्त्री । Hemionitis cordifolia. पृश्निपर्ण्याम् । चाकुलिया । प.मु.। रा.नि.व.४सु.सू.३८अ.सि.यो.च.द.ज्व.चि.किरातादौ. यक्ष्म.चि.बलाद्यघृते । वा.चि.१अ. । "कोलमूक्मामलकलसी ।" [सुरसादिव. ।

कलहः । पुं । मुखाम् । हिं मुख्डीरी । वा.सू.

कलहंसः । पुं । राजहंसे । कादम्बे । वालिहाँस । रत्ना. । "पक्षैराधूसरैर्हंसाः कलहंसा इति स्मृताः ।" हला. । पीतवर्णहंसे । जलकुक्कुटे । वै.निघ. ।

कलहंसकम् । क्ली । अरोचकाधिकारे कवलमात्रम् । अस्य कवले धृते मुखवैशद्यं रुचिश्च भवति । च.द.अरो.चि.। "अष्टादशमियुपलानि दशमरिचानि विंशतिश्च पिप्पल्यः । आर्द्रकपलं गुड़पलं प्रस्थत्रयमारणालस्य । विड़लवणसहितमेतत् खजाहतं सुरभिगन्धाढ्यं । व्यञ्जनसहस्रघाति श्रेयं श्लेष्मघ्नं मुखशुद्धिकृत् ।" रस.र. ।

कलहनाशनः । पुं । कुटजवृक्षे । पूतीकरञ्जे। नाटा । श.मा. । [पाथी । रा.नि.व.१९।

कलहप्रिया । स्त्री । सारिकायां । शालिक

कलहाकुला । स्त्री। शारिकायाम्। वै.निघ.।

कला । स्त्री । त्रिंशत्काष्ठात्मके कालपरिमाणे । सु.सू.६अ.। स्त्रीरजसि। Cellular tissue and fascia of the body. शरीरप्रत्यङ्गविशेषे । ताः सप्त—मांसधरा (शिरास्नायुदिस्थाने), रक्तधरा (मांसान्तःशिराः यकृत्प्लीहानौ च), मेदोधरा (सूक्ष्मास्थ्युपरिसरकपिच्छिलपदार्थे), श्लेष्मधरा (सन्धिस्थानेषु श्लेष्मवत्पिच्छिलपदार्थेषु), पुरीषधरा (या पक्वाशयस्थाहारजन्यमलरचिणी), पित्तधरा (यत्र भुक्तद्रव्याणि आमाशयात्पक्वाशयं प्राप्य तिष्ठति), शुक्रधरा (सर्व्वकायव्यापिनी) । सु.शा.५अ.। कलास्वरूपं —"स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुना । श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान् विदुः । धात्वाशयान्तरे धातीयः क्लेदस्त्वधितिष्ठति । देहोष्मणाभिपक्वश्च सा कलेत्यभिधीयते ॥" भा.म १भ. । वाजिनी जङ्घापार्श्वभागे । ज.द.२अ. मनःशिलायाम् । चन्द्रषोड़शांशे । वृद्धौ । त्रिका. । अंशे । मे.लद्विकं ।

कलाकुलम् । क्ली । विषे । रा.नि.व.६ ।

कलाङ्कुरः । पुं। The bird Ardea Sibirica. सारसपक्षिणि । त्रिका. । [२७अ. ।

कलाङ्गुलिः । पुं । शालिधान्यविशेषे । च.सू.

कलाचिका (ची) । स्त्री । प्रकोष्ठे । कफोणेरधो मणिबन्धपर्यन्ते । हे.च. । अश्वस्य जानुनोऽग्रिमे भागे । ज.द.२अ. ।

कलाजाजी । स्त्री। कारव्याम् । कृष्णजीरके । कालजीरे । हिं कलौंजी मंगरैला ।

कलाटकः । पुं । गरुड़शाली । रा.नि.व.१६।

कलाटीनः । पुं । The white water-wagtail. खञ्जनपक्षिणि । हारा. ।

कलादः । पुं । स्वर्णकारे । त्रिका. ।

कलाधिकः । पुं । कुक्कुटे ।

कलानुनादी । पुं । कलविङ्के । चटके । चातके । भ्रमरे । मे.नषट्कं ।

कलापः । पुं । मयूरपुच्छे । हला. । संहतौ । काञ्च्याम् । मे.पत्रिकं । क्ली । पद्मबीजे । वंशबीजे। वै.निघ. ।

कलापकः । पुं । करिकण्ठबन्धे । हे.च. ।

कलापिन् (पी) । पुं । मयूरे । हला. । कोकिले । प्लक्षवृक्षे । पाकुड़ गाछ । मे.नचतुष्कं ।

कलापिनी । स्त्री । नागरमुस्तायाम् । नागरमुता । रा.नि.व.६ । रात्रौ ।

कलामकः । पुं । कलमधान्ये । हे.च. ।

कलाय: । पुं। (Pisum sativum.) Name of various leguminous seeds. मटर इति ख्याते शिम्बीधान्ये । र.मा. । माषकापरनामधेये शिम्बीधान्यविशेषे । বাঁটুলা মটর,তেওড়া মটর । हि केराव । तैं पेइडर्व्वं । स द्विविध:—त्रिपुटो वर्त्तुलश्च । गुणा:—अतिवातल: । वा.सू. शिम्बीधान्यव. । पित्तदाहकफघ्न: शीत: कषाय: रुचिपुष्टिप्रद: आमदोषकरश्च । रा.नि.व.१६ ।

कलायक: । पुं । कलमशाली । কলমা ধান । रा.नि.व.१६ । गुणा:—"किञ्चित्कषाया मधुरा: प्रदिष्टा रक्तप्रशान्तिं जनयन्ति बल्या: । किञ्चित् सवातं विनिघ्नन्ति पित्तं कलायका मुद्गसमानरूपा: ।" अत्रि.१५अ. । [दूर्व्वायां । वै.निघ. ।

कलायका । स्त्री । मत्स्याच्यां । হিঞ্চে । गण्ड-

कलायखञ्ज:(खण्ड:) । पुं । वायुरोगभेदे । लक्षणम्—"कम्पते गमनारम्भे खञ्जन्निव च लक्ष्यते । कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम्॥" सु.नि.१अ. । "क्रम: कलायखञ्जस्य खञ्जपङ्गोरिव स्मृत: । विशेषात्स्नेहनं कर्म्म कार्य्यमत्र विचक्षणै:॥"

कलायशाकम् । क्ली । शाकविशेषे । हिं केराउशाक । गुणा:—"कलायशाकं भेदि स्याल्लघु तिक्तं त्रिदोषजित्" । भा.पू.१भ.शाकव. । "कलायशाकं पित्तघ्नं कफघ्नं वातलं गुरु । कषायानुरसञ्चैव विपाके मधुरञ्च तत् ॥" सु.सू.४६अ. ।

कलायसूप: । पुं । कलायकृतयूषे । गुणा:—"कलायसूप: कथितो लघु ग्राही सुशीतल: । रूक्षो मेध्य: पाककाले स्वादुस्तगदपित्तनुत् । अरोचकहरश्वासी कफनाशकरो मत: ॥ वै.निघ. ।

कलाया । स्त्री । गण्डदूर्व्वायाम्। श्वेतदूर्व्वायाम्। শ্বেতদূর্ব্বা । रा.नि.व.८ । कृष्णचणके । কাল ছোলা । प.मु. । [व.१० ।

कलारुहा । स्त्री । स्वर्णकेतकीवृक्षे । रा.नि.

कलालाप: । पुं । भ्रमरे । रा.नि.व.६ ।

कलाविक: । पुं । कुक्कुटे । त्रिका. ।

कलाविकल: । पुं । चटके । श.र. ।

कलि: । पुं । विभीतकवृक्षे । भा.म.२भ.मेद. चि. । स्त्री । कलिकायाम् । मे.लद्विकं । श्वेतधुस्तूरके । भल्लातकवृक्षे । वै.निघ. ।

कलिक: । पुं । क्रौञ्चपक्षिणि । কোঁচবক । वंशधान्यभेदे । বাঁশের ধান ।

कलिका । स्त्री । वृश्चिकाल्यां । বিছাতিগাছ। रा.नि.व.६ । शरपुङ्खायाम् । पुष्पकोरके । कृष्णनीलिकायाम्। वै.निघ.।पुष्पविशेषे । কলকে ফুল।

कलिकार: । पुं । धूम्याटपक्षिणि । ফিঙে । पीतमस्तकपक्षिणि । करञ्जवृक्षे । मे.। जलपिप्पल्याम् । वै.निघ. । [ञ्ज । নাটাকরঞ্জ । अम. ।

कलिकारक: । पुं । पूतिकरञ्जे । लट्टाकर-

कलिकारिका । स्त्री । लाङ्गलीवृक्षे । বিষলাঙ্গলিয়া । वै.निघ. ।

कलिकोत्तम: । क्ली, पुं। लवङ्गे। गन्धशाली ।

कलिङ्ग(क)म् । क्ली । इन्द्रयवे । च.द.पि.ज्व. कलिङ्गादि. । "कलिङ्गं कट्फलं मुस्तं पाठातिक्तकरोहिणी ।" च.द.ज्वराति.चि.श.र. । "दारुपाठाकलिङ्गकम् ।"

कलिङ्ग: (क:)। पुं। प्लक्षवृक्षे । পাকুড় গাছ। कुटजवृक्षे । কুড়চি গাছ । शिरीषवृक्षे । रा.नि. व.६ । इन्द्रयवे । रत्ना.६ । र.सा.सं. सि.यो.रात्रिज्वरे । कलिङ्गकल्कामलको । सि.यो.पिप्पल्यादिघृते । पूतिकरञ्जे । पक्षिविशेषे । ফিঙা । मे. गत्रिकं । वा.चि.१अ. । तरम्बुजे । তরমুজ । गुणा:—मधुर: शीतलो वृष्यो बल्य: पित्तदाहघ्न: सन्तर्पण: वीर्य्यकरश्च । रा.नि.व.७ । चातकपक्षिणि । हला. । विभीतके वृक्षे । त्रिका. ।

कलिङ्गज: । पुं । इन्द्रयवे । वै.निघ. ।

कलिङ्गद्रु: । पुं । कुटजवृक्षे । भा.म.१भ.कास. चि. । "कलिङ्गद्रुफलं रज: ।"

कलिङ्गयव: । पुं । इन्द्रयवे । च.द. । सि.यो. लवणोत्तमाद्यचूर्णे ।

कलिङ्गवीजम् । क्ली । इन्द्रयवे । रा.नि.व.६।

कलिङ्गशुण्ठी । स्त्री। तद्देशज-शुण्ठीविशेषे । गुणा:—तिक्ता बलकरी अग्निदीपनी अजीर्णहरी बालकातिसारघ्नी । सा यवक्षारयुक्ता गर्भिण्या वान्तिं हरेत् । अत्रि. । [त्रिवृतायां । श.च. ।

कलिङ्गा । स्त्री । कर्कटशृङ्ग्याम् । र.मा.। श्वेत-

कलिङ्गाद्रिकषाय: । पुं । "कलिङ्गका: प-

टीलस पत्रं कटुकरीहिणी" इत्येतद्द्रव्यक्षतकषाये। स च सन्ततादीनां शमनः। वा. चि.१अ.। कषायोऽयं पित्तज्वरघ्नः। च.द.पित्तज्व.चि.।

कलिङ्गाद्यगुडिका । स्त्री। ज्वरातिसारे। पाठः—"कलिङ्गबिल्व(निम्ब)जम्ब्वाम्रकपित्थं सरसाञ्जनं। लज्जां हरिद्रे ह्रीवेरं कट्फलं शुकनासिका। लोध्रं मोचरसं शङ्खं धातकी वटशुङ्गकं। पिष्टा तण्डुलतोयेन वटकानक्षसम्मितान्। छायाशुष्कान् पिबेत्...॥" इन्द्रयवादीनां प्रत्येकं समभागं गृहीत्वा तण्डुलोदकेन विमर्द्य वटी कार्या छायायां शोषणीया च। शुकनासिका श्योणाकत्वक्। च. द.भैष.। चर्म्मकषेति केचित्। "जलमष्टगुणं दत्त्वा पलं कण्डिततण्डुलात्। भावयित्वा ततो ग्राह्यं तण्डुलोदककर्म्मणि॥" प.प्र.३प.। [ह्लकज्व.चि.।

कलिञ्जः । पुं। कुलिञ्जने। वै.निघ.२भ.जि-

कलितरुः । पुं। विभीतकवृक्षे। वै.निघ.स्वरभेदचि.।

कलिद्रुः (मः) । पुं। सरलदेवदारौ। भल्लातकवृक्षे विभीतकवृक्षे। रा.नि.व.११,भा.म.१भ. कण्ठकुब्ज.ज्व.चि.। "किरातकटुकाकणाः कुटजकट्फारीशटीकलिद्रुकिलिमाभयाः।"

कलिन्दः । पुं। सूर्य्ये। विभीतकवृक्षे। रा.नि. व.२३। भेलकवृक्षे। सरलदेवदारौ। वै.निघ.।

कलिन्दकः । पुं। कर्कारौ। तरम्बुजे। वै.निघ.।

कलिप्रदः । पुं। मद्यशालायाम्। वै.निघ.।

कलिप्रियः । पुं। वानरे। श.र.।

कलिफलम् । क्ली। विभीतकफले। च.द.।

कलिमः । पुं। शिरीषवृक्षे। वै.निघ.।

कलिमारः(कः) । पुं। पूतिकरञ्जे। कण्टकवति करञ्जे। अ.टी.र.।

कलिमालः,(ल्यः)कः । पुं। पूतीकरञ्जे। नाटाकरञ्ज। रा.नि.व.९। [पू.१भ.।

कलियुगालयः । पुं। विभीतकवृक्षे। भा.

कलियुगावासः । पुं। विभीतकतरौ। भा.।

कलिवृक्षः । पुं विभीतकवृक्षे। हे.च.।

कलिहारी । स्त्री। लाङ्गल्याम्। विषलाङ्गलिया। हिं करिहारी। भा.पू.१भ.। वै.निघ.वा. व्या.महाविषगर्भतैले।

कली । स्त्री। कलिकायाम्। अ.टी.भ.।

कलुः । पुं। गरुड़शाली। पक्षिराज धान्य। रा.नि.व.१६।

कलुष:(षा) । पुं,स्त्री। महिषे। रा.नि.व.१९। मण्डलिसर्पे। सु.कल्प.४अ.। See सर्पः।

कलुषमञ्जरी । स्त्री। जिङ्गिन्याम्। वै.निघ.।

कलेवरम् । क्ली। शरीरे। रा.नि.व.१८।

कलोद्भवः । पुं। कलमशाली। कलमा धान। रा.नि.व.१६।

कल्कः (ल्कम्) । पुं, क्ली। रसपिष्टद्रव्यपिण्डे। জলে বাটা দ্রব্য। यत्पिण्डं रसपिष्टानां तत्कल्कं परिकीर्त्तितम्। च.। मध्वादिपेषितद्रव्ये। "कल्को मध्वादिपेषितैः।" रा.नि.व.२०। तस्य मात्रा कर्षमिता। तत्र मधुघृततैलमात्रा द्विगुणा, सितागुडं समं, द्रवाश्च चतुर्गुणाः ग्राह्याः। प.प्र.१ख.। घृततैलादिशेषे। मै.कहिकं। घृततैलादिपाके दृषदि पेषिते देयद्रव्ये। "द्रव्यमात्रं शिलापिष्टं शुष्कं वा जलमिश्रितं। तदेव सुरभिः पूर्व्वैः कल्क इत्यभिधीयते॥" प.प्र.१ख.। द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलम्भवेत्। प्रक्षिप्य गालयेदस्त्रे तन्माषकर्षसम्मितम्॥ भा.। "यः पिण्डश्चार्द्रपिष्टानां स कल्क इति कीर्त्तितः। वृद्धवैद्यवचः साक्षात्कल्को दृषदि पेषितः॥ मात्रा पिचुमिता तत्र द्विगुणं माक्षिकादिकम्। सितां गुडं समं दद्याद्द्रवा देयाश्चतुर्गुणाः॥" इति कल्कविधिः। कर्णमले। श.र.। तुरुष्कनामगन्धद्रव्ये। শিলারস। रा.नि.व.१२। See सिह्लकः। विष्ठायां। किट्टे। मै.कहिकं। करिदन्ते। वै.निघ.।

कल्कफलः । पुं। दाड़िमवृक्षे। रा.नि.व.११।

कल्कलोध्रः । पुं। पट्टिकालोध्रे। रा.नि.व.६।

कल्किवृक्षः (धर्म्मघ्नः) पुं। विभीतकवृक्षे। रा.नि.व.११। [नि.व.२०।

कल्पः । पुं। विधौ। रोगमुक्तौ। कल्पवृक्षे। रा.

कल्पकः । पुं। नापिते। श.मा.। कर्चूरे। भा. पू.१भ.।

कल्पतरु: । पुं । कल्पवृक्षे । क्रमुकवृक्षे । रा.नि.व.११। तन्नामकज्वरघ्नरसे । पाठ:—"रसं गन्धं विषं ताम्रं समभागं विचूर्णयेत् । भावयेत्पञ्चभि: पित्तै: क्रमशः पञ्चवासरम् ॥ निर्गुण्डी स्वरसेनैव मर्द्दयेत्सप्तवासरम् । आर्द्रकस्य रसेनैव भावयेच्च त्रिधा पुन: ॥ सर्षपाभा वटी कार्य्या छायया परिशोषिता ।" जीर्णज्वरे विषमज्वरे च २१ वट्य: प्रयोज्या: । कज्जलीपिप्पलीयुतमुष्णजलं पाययेत् । शर्करया दधि देयं स्नापयेच्च । भैष.ज्व.चि. ।

कल्पद्रु: (म:) । पुं । कल्पतरौ । इन्द्रारग्वधवृक्षे । সোণালু গাছ । वै.निघ. ।

कल्पनम् । क्ली । कृत्तौ । कर्त्तने । त्रिका. ।

कल्पना । स्त्री । हस्तिसज्जायाम् । अम. । रचनायाम् ।

कल्पनी । स्त्री । कर्त्तर्य्याम् । কাঁচি । हे.च. ।

कल्पपादप: । पुं । कल्पवृक्षे । विभीतकवृक्षे ।

कल्पवृक्ष: । पुं । विभीतकवृक्षे । कल्पपादपे । अम. । रत्ना. । [मद्ये । वै.निघ. ।

कल्या । स्त्री । श्वेतजातीवृक्षे । শ্বেতচামেলী ।

कल्पान्त: । पुं । प्रलयकाले । अम. ।

कल्मषम् । क्ली । पापे । करपुच्छे । त्रिका. ।

कल्माष: । पुं । सुगन्धशालौ । रा.नि.व.१६ ।

कल्यम् । क्ली । सुरायाम् । हला. । प्रभाते । मे.यद्विकं । मधुनि । हे.च. । त्रि । वाक्श्रुतिरहिते । नीरोगे । सु.चि.२६अ. । "कल्यस्योदग्रवयस: ।" दक्षे । मे.यद्विकं ।

कल्यजग्धि: । स्त्री । प्रातर्भोजने । जटा. ।

कल्यद्रुम: । पुं । विभीतकवृक्षे । वै.निघ. ।

कल्यवर्त्त: । पुं । प्रातराशे । त्रिका. । [श.र.।

कल्या । स्त्री । मद्ये । मे.यद्विकं । हरीतक्याम् ।

कल्याङ्ग: । पुं । पर्पटवृक्षे । ক্ষেৎপাপড়া । रा.नि.व.५ ।

कल्याणम् । क्ली । सुवर्णे । सुखे । रा.नि.व.१२ । पुं । लघुसर्ज्जवृक्षे । শাল গাছ । [वै.निघ.।

कल्याणक: । पुं । पर्पटके । ক্ষেৎপাবড়া ।

कल्याणगुड: । पुं । ग्रहण्यधिकारे । पाठ:—"प्रस्थत्रयेणामलकीरसस्य शुद्धस्य दत्त्वार्द्धतुलां गुडस्य । चूर्णीकृतैर्ग्रन्थिकजीरचव्यव्योषेभकृष्णाहवुषाजमोदै: । विडङ्गसिन्धुत्रिफलायमानीपाठाग्निधान्यैश्च पलप्रमाणै: । दत्त्वा त्रिवृच्चूर्णपलानि चाष्टावष्टौ च तैलस्य पचेद्यथावत् । तं भक्षयेदक्षफलप्रमाणं यथेष्टचेष्टं त्रिसुगन्धियुक्तम् ।" पाकनियम:—आमलकीस्वरसा: १२श. इक्षुगुडा: ६।०श. यथाविधि एकत्र पचेत् । शिष्टप्राये पाके पिप्पलीमूलादीनां प्रत्येकं पलं (८ तो.), त्रिवृच्चूर्णस्य शरावं (८ तो.) तैलस्य च शरावं (८ तो.) प्रक्षिपेत् । तथा त्रिसुगन्धस्य पृथक् पलं मिश्रयेत् । तथा त्रिवृता तैलभर्ज्जिता देया इति वृद्धा: । प्रक्षेपद्रव्याणि—पिप्पलीमूलं जीरकं चव्यं त्रिकटु गजपिप्पली हवुषा वनयमानी विडङ्गं सैन्धवं त्रिफला यमानी पाठा चित्रकमूलं धान्यकञ्च । च.द.ग्रह.चि. । रस.र. । भैष. ।

कल्याणघृत(पानीय)म् । क्ली । विषघ्नघृते उन्मादे च । पाठ:—"विडङ्गत्रिफलादन्तीभद्रदारुहरेणव: । तालीशपत्रमञ्जिष्ठाकेसरोत्पलपद्मकं। दाडिमं मालतीपुष्पं रजन्यौ शारिवे स्थिरे। प्रियङ्गुस्तगरं कुष्ठं बृहत्यौ चैलवालुकं । सचन्दनगवाक्षीभिरेतै: सिद्धं विषापहं । सर्पि: कल्याणकं··· । রাখালশশা, ত্রিফলা, রেণুক, দেবদারু, এলবালুক, শালপাণি, তগরপাদুকা, হরিদ্রা, দারুহরিদ্রা, অনন্তমূল, শ্যামালতা, প্রিয়ঙ্গু, নীলোৎপল, এলাচ, মঞ্জিষ্ঠা, দন্তী, দাড়িম, নাগেশ্বর, তালীশপত্র, বৃহতী, মালতীপুষ্প, বিড়ঙ্গ, চাকুলিয়া, কুড়, রক্তচন্দন, পদ্মকাষ্ঠ প্রত্যেকে ২ তো. ঘৃত ৩২ প. জল ১৬ শ. । एतच्च घृतं द्विगुणं जलं चतुर्गुणञ्च दुग्धं दत्त्वा यदा पचेत् तदा क्षीरकल्याणमुच्यते । सा.कौ.उन्मा. चि.। सु.कल्प.७अ. । भैष. । अन्यत् दाहाधिकारे महत् कल्याणकं घृतम् । पाठ:—"चतुर्गुणे शतावर्य्या रसे क्षीरं चतुर्गुणं । सर्पि: प्रस्थं बलाजाजी मञ्जिष्ठा पीवरी निशा । काकोल्यौ मधुमेदे द्वे ऋद्धी द्वे देवदारु च । एषामष्टपलै: कल्कै: पचेत्कल्याणकं महत् ॥ ঘৃত ৪ শ. শতমূলীরস ১৬ শ. দুগ্ধ ১৬ শ. । কল্ক—জীরা, শ্বেত বেলেড়া, মঞ্জিষ্ঠা, অশ্বগন্ধা, হরিদ্রা, কাকোলী, ক্ষীরকাকোলী, যষ্টিমধু, মেদা, মহামেদা, ঋদ্ধি,

বৃদ্ধি, দেবদারু। প্রত্যেকে ৮ তো.। रस.र.।

कल्याणलेहः । पुं । वातव्याध्यधिकारे हिक्काश्वासे च । पाठः—"सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजं । अजाजी चाजमोदा च यष्टीमधुकसैन्धवं । एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् । तच्चूर्णं सर्पिषालोड्य प्रत्यहं भक्षयेन्नरः । एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः ॥" अजाजी जीरके, अजमोदा यमान्याम्, यष्टी यष्टीमधु, मधुकं मधुकपुष्पे । মউল ফুল । च.द.वा.व्या.चि. । रस.र. । भैष. ।

कल्याणवीजः । पुं । मसूरवृक्षे । रा.नि.व.१६ ।

कल्याणसुन्दराभ्रम् । क्ली । राजयक्ष्मणि रसः । पाठः—"वज्राभ्रमेकपलिकं पुटनैः सुजीर्णं धात्रीपयोदबृहतीशतमूलकेक्षु । विल्वाग्निमन्थजलवासककण्टकारीश्योणाकपाटलिबलाश्च रसैरमीषां । सम्मर्द्दितं पलमितैः पृथगेकशश्च । गुञ्जासमा सुवलिता वटिका कृता च ।"……জারিত অভ্র ৮ তোলা, আম্‌লা, মুতা, বৃহতী, শতমূলী, ইক্ষু, বিল্বপত্র, গণিরি, বালা, বাসকপত্র, কণ্টকারী, শোণা, পারুল, বেলেড়া প্রত্যেকের ১ পলমিত রসে মর্দ্দন । भैष. । [व.१२ ।

कल्याणिका । स्त्री । मनःशिलायाम् । रा.नि.

कल्याणिनी । स्त्री । बलानामक्षुपे । বেলেড়া । रा.नि.व.४ ।

कल्याणी । स्त्री । शालवृक्षे । सर्जवृक्षे । वै.निघ.। गवि । रा.नि.व.१९ । माषपर्ण्यां । रा.नि.व.३ ।

कल्लः । त्रि । वधिरे । त्रिका. । [है.च. ।

कल्लता (त्वम्) । क्ली । वाधिर्य्ये । स्वरभेदे ।

कवकः । पुं । ग्रासे । कवले । है.च.। क्ली । छत्राके ।

कवचः । पुं, क्ली । पर्पटके । "कवचः स्यात् पर्पटके ।" रा.नि.व.५।२३ । वचा कवचकच्छुरा…।" गर्द्दभाण्डवृक्षे । गाञ्जीभाँट इति लोके । त्वचि । দারচিনি । भूर्जवृक्षे । नन्दीवृक्षे । मे.चत्रिकं ।

कवचपत्रम् । क्ली । भूर्जपत्रे । श.च. ।

कवचीयन्त्रम् । क्ली । औषधपाकार्थं यन्त्रविशेषे । तद्यथा—"नातिह्रस्वां काचकूपीं न चातिमहतीं दृढ़ां । वाससा कर्द्दमाक्तेन परिवृत्य समन्ततः । संलिप्य मृदुमृत्स्नाभिः शोषयेद्रातुरश्मिना । निधाय भेषजं तत्र मुखमाच्छादयेत्ततः । कठिन्या दृढ़या वापि पचेद्यन्त्रे विधानतः । कवचीयन्त्रमेतद्धि रसादिपचने मतम् ॥" आत्रेयः ।

कवड़ः । पुं । कवले । गण्डूषे । रत्ना. ।

कवड़ग्रहः । पुं । कर्षे । २ তোলা । प.प्र. १ख. । प.द.खदिरवटी ।

कवयिः (यी) । स्त्री । (Coius coboius.) मत्स्यविशेषे । কই মাছ । गुणाः—मधुरा स्निग्धा कषाया रूक्षा ईषत्पित्तकरी बल्या वातघ्नी च । भा. । हारा. ।

कवरः । पुं, क्ली । कवर्य्याम् । বনতুলসী । त्रिका.। लवणे । अम्ले । मे. । है.च. । सामुद्रलवणे । र.मा. ।

कवरा (री) । स्त्री । वर्वरायाम् । বাবুই इति भाषा । श.र.। वनतुलस्याम् । अम. । वर्वूरकवृक्षे । বাবলা গাছ । रक्तकरवीरे । मनःशिलायाम् । हिङ्गुपत्र्याम् । रा.नि.व.६ ।

कवरीकः । पुं । सुगन्धपत्रवृक्षविशेषे । ডুলাল তুলসী । यथा—"कस्तूरिकाच्छेड़गन्धः कवरीकः स्वनामकः ।" इति द्रव्याभिधानम् ।

कवरीकला । स्त्री । मनःशिलायाम् ।

कवरीकूटकः । पुं । कवर्य्याम् । त्रिका. ।

कवलः । पुं । चिलिचिममत्स्ये । বেলে মাছ । श.च. । ग्रासे । रत्ना. । गण्डूषग्रहणे । কুলকুচা, কুল্লি করা । सा मात्रा या मुखे धृता सुखं सञ्चार्य्यते । "सुखं सञ्चार्य्यते या तु सा मात्रा कवले हिता ॥" भैष. । See गण्डूषः ।

कवलग्रहः । पुं । कर्षपरिमाणे । सु. । मुखे कवलस्य ग्रहो धारणम् । तस्य विधिर्यथा—"तत्र त्रिकटुकवचासर्षपहरीतकीकल्कमालोड्य तैलसुक्तसुरामूत्रक्षारमधूनामन्यतमेन सलवणमभिप्रतप्तमुपस्विन्नमृदितं गलकपोलललाटप्रदेशे धारयेत् । तावच्च धारयितव्योऽनन्यमनसोन्नतदेहेन यावद्दोषपरिपूर्णकपोलत्वं नासास्रोतोनयनपरिस्रावश्च भवति, तदा विमोक्तव्यः पुनश्चान्यो ग्रहीतव्य"

ष्टति । सु.चि ४०अ. । गुणाः—"कवलः कुरुते काङ्क्षां भवेत् हरते कफम् । तृषां तोषञ्च वैरस्यं दन्तवालञ्च नाशयेत् ॥" वै.निघ. । स चतुर्विधः—स्नेही प्रसादी शोधी रोपणश्चेति । तत्र वाते स्नेही स्निग्धोष्णैर्द्रव्यैः, प्रसादनो पित्ते स्वादुशीतैः । शोधनः कफे कट्वम्ललवणैः रूक्षोष्णैश्च । रोपणो व्रणे कषायतिक्तमधुरैः कटूष्णैश्च । तस्य मात्रा सा या सुखसञ्चारिणी भवेत् । "चतुर्धा कवलः स्नेही प्रसादी शोधिरोपणौ । स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः। पित्ते कट्वम्ललवणैः रूक्षोष्णैः शोधनः कफे । कषायतिक्तमधुरैः कटूष्णैः रोपणो व्रणे । तथा सुखं सञ्चार्य्यते या तु मात्रा सा कवले स्मृता ॥" सु.चि.४०अ. ।

कवलिका । स्त्री । Bandage. व्रणबन्धनार्थम् उदुम्बरादिवल्कले । सु.सू.१८अ. । चि.२अ. ।

कवली । स्त्री । बदरीवृक्षे । हला. ।

कवसः । पुं । कण्टकगुल्मे ।

कवाटच(व)क्रम् । क्ली । स्वनामख्यातवृक्षे । तैं कराड़िया, कवाटवेट्टु । वेण्टुआ इति च भाषा। र.मा. ।

कवारम् । क्ली । पद्मे । त्रिका. । पुं । (Tantalus falcinellus.) पक्षिविशेषे । करात्र पाथी । वै.निघ. । [हला ।

कविः (कम्) । स्त्री,क्ली । खलीने । লাগাম ।

कविका । स्त्री । केविकापुष्पवृक्षे । कैरव इति कोङ्कणदेशे प्रसिद्धे । रा.नि.व.१० । तैं पुष्पविशेषमु, खलिने । हिं कड़िआली । লাগাম । कवयीमत्स्ये । तैं मत्स्यविशेषमु । त्रिका. ।

कविञ्जकः । पुं । पक्षिविशेषे ।

कवि(गि)त्थः । पुं । कपित्थवृक्षे । अ.टी. ।

कवेलम् । क्ली । उत्पले । नीलपद्मे । श.च. ।

कवोड़वक्रः । पुं । कवाटवक्रवृक्षे । र.मा. ।

कवोष्णम् । त्रि । ईषदुष्णे । अम. । क्ली । उष्णतायाम् । [सरोष्णिकाम् । भा.पू.१भ.गु.व. ।

कशा । स्त्री । अश्वादिताड़न्याम् । हे.च. । मां-

कशिका । स्त्री । चर्मकषायां । চামরকশা ।

च.द.शू.चि.लौहामृते ।

कशिपुः । पुं । भक्ते । वस्त्रे । रा.नि.व.२० ।

कशेरुः(रूः)कः । पुं,क्ली । पृष्ठकीकसे । पृष्ठास्थिनि । পিঠের দাঁড়া । हला. । स्त्री । स्वनामख्यातघासे । কেশুর । र.मा. । See कसेरुः ।

कशेरु(रू)कम् । क्ली । कशेरुणि । কেশুর । प.मु. ।

कशेरु(रू)का । स्त्री । पृष्ठास्थिनि । पृष्ठवंशे । रत्ना. । वै.निघ. । कशेरौ । কেশুর । अम. ।

कश्मलम् । क्ली । मूर्च्छायाम् । मोहे । अम. ।

कश्मीरजम् (न्म) । क्ली, पुं । कुङ्कुमे । अ.टी., रा. ।

कश्यम् । क्ली । मद्ये । पुं । अश्वे । मे.यद्विकं । कषाढ्येऽश्वे । हे.च. । अश्वमध्यभागे । वै.निघ. ।

कश्यपः । पुं । मत्स्यभेदे । विश्वः । मृगविशेषे । मे. । [अपक्षे । श.च. ।

कषणः । पुं । शलाटौ । क्ली । कण्डूयने । त्रि ।

कषपाषाणः । पुं । स्वर्णमणौ ।

कषायः । पुं । कपित्थवृक्षे । महासर्जवृक्षे । वै.निघ. । मण्डलिसर्पे । सु.कल्प.४अ. । Decoction of infusion. क्वथितैर्वस्तुभिः कृते क्वाथमात्रे । षोड़शगुणाम्भसा पक्वः चतुर्भागावशिष्टक्वाथः कषाय उच्यते । र.मा. । "पादशिष्टः कषायः स्याद् यः षोड़शगुणाम्भसा ।" भा. । अष्टभागावशिष्ट इति । शार्ङ्ग.१अ. । कषायाः पञ्चविधाः स्वरसकल्कक्वाथहिमफाण्टभेदेन यथोत्तरं लघवश्च भवन्ति । श्योणाकवृक्षे । শোণা গাছ । धरणिः । धववृक्षे । ধাওয়া গাছ । लकुचवृक्षे । ডেলো গাছ । रा.नि.व.८ । निर्यासे । विलेपने । अङ्गरागे । मे. । पुं, क्ली । An astringent flavour. षड्रसान्यतमरसविशेषे । कषा । स पूगीफलादौ स्वाद्यः । रा.नि.व.२० । स च भूम्यग्निगुणबहुलः हिमगुरुरूक्षः, स्तम्भी शमनः ग्राही मुखशुद्धिजिह्वास्तम्भादिकृत् तद्विपाकोऽपि कटुः, तद्विपाकगुणश्च वातकृत् कफपित्तघ्नश्च । दीपनः पाचनः शोफरोधकः शैथिल्यकरः अतिसेवितः पाण्डुं करोति च । यो वक्त्रं शोधयति जिह्वां स्तम्भयति कण्ठं बध्नाति हृदयं कर्षति पीड़यति स कषायकः । सु.सू.४२अ. । अन्यच्च । कषायः शोषणः स्तम्भी व्रणपाकार्त्तिनाशनः ।

कफशोणितपित्तघ्नो रुच: शीतो गुरुस्तथा ॥ राज.। वैषद्यं स्तम्भजाड्यैर्या रसनं योजयेद्रस: । बध्नातीव च य: कण्ठं कषाय: स विकास्यपि ॥ च. । अतियुक्तस्य गुण: —सोऽतियुक्त: शूलाध्मानहृत्पीड़ाचिपणादिकृत् । भा. । कषायस्य कल्पनं पञ्चविधम् —स्वरसकल्कशृतशीतफाण्टभेदेन । एषाञ्च यथापूर्व्वं बलाधिक्यम् । च.सू.४अ. । "क्षोररः स्वरस: प्रो: कल्को द्दशादिपेषित: । क्वथितस्तु शृत: शीत: शर्व्वरीमुषितो मत: । चिप्तोष्णतोये मृदित: फाण्ट इत्यभिधीयते । पञ्चैतास्तु समुद्दिष्टा: कषायाणां प्रकल्पना: ॥" प.प्र.१ख. । कषायपाकविधि: । "तत्र केचिदाहु: त्वक्पत्रमूलादीनां भागस्तच्चतुर्गुणजलमावाप्य चतुर्भागावशेषं नि:क्राथ्यापहरेत् । अथवा तत्रोदकद्रोणे त्वक्पत्रमूलादीनां तुलामावाप्य चतुर्भागावशिष्टं नि:क्राथ्यापहरेत् ।" सु.चि.३१अ. । त्रि । सुगन्धि । त्रिका. ।

कषायकृत् । पुं । रक्तलोध्रे । जटा. ।

कषायजलम् । क्ली । अश्वत्थोदुम्बरशिरीषवटसिद्धे जले ।

कषायदन्त: (दशन:) । पुं । मूषिकभेदे । अस्य शुक्रं यत्र पतति तत्र शोथकोषादयो जायन्ते । वा.उ.३८अ. । सु.कल्प.६अ. ।

कषायनित्य: । त्रि । नित्यमतिमात्रकषायरससेविनि । च. ।

कषायफलम् । क्ली । पूगफले । वै.निघ. ।

कषाययावनाल: । पुं । तुवरयावनालधान्ये । जनारविशेष । रा.नि.व.१६ ।

कषाययोनि: । स्त्री । कषायाधिकरणे । सा च पञ्चधा—मधुरकषाय: अम्लकषाय: कटुकषाय: तिक्तकषाय: कषायकषायश्चेति । च.सू.४अ. ।

कषायवर्ग: । पुं । कषायरसद्रव्यगणे । कषाजिनिषेर वर्ग । त्रिफला शल्लकी जम्बाम्रबकुलतिन्दुकफलानि न्यग्रोधादाम्बष्ठादिप्रियङ्ग्वादिलोध्रादिशालसारादीनि कतकशाकपाषाणभेदकवनस्पतिफलानि कुरवककोविदारकजीवन्तीचिल्लोपालङ्क्यासुनिषण्णादिनीवारकादय: मुद्गादयश्च समासेन कषायवर्ग:। सु.सू.४२अ.। [फलवृक्षे । च.चि.४अ ।

कषायवृक्ष: । पुं । वटामलकादिकषायत्वक्-

कषायस्कन्ध: । पुं । प्रियङ्ग्वादिकषायद्रव्यकृतस्थापनविशेषे । च.चि.८अ. ।

कषाया । स्त्री । रक्तदुरालभायाम् । क्षुद्रदुरालभायाम् । रा.नि.व.४ । आम्रातके । खर्जूरीवृक्षे । वै.निघ. ।

कषायी (इन्) । पुं । सर्जवृक्षे । धूनार गाछ । शालवृक्षे । रा.नि.व.९। जटा. । खर्जूरीवृक्षे । खेजूर गाछ । लकुचवृक्षे । रा.नि.व.११। शाकवृक्षे । क्षुद्रपनसे । वै.निघ. ।

कषिका । स्त्री । पक्षिजातौ । उणा.। [टी.रा.।

कषेरुका । स्त्री । कशेरुकायां । पृष्ठास्थि । श.

कष्टम् । क्ली । पीड़ायाम् । है.च. ।

कष्टकारक: । त्रि । पीड़ाकरे । त्रिका. ।

कष्टस्थानम् । क्ली। पीड़ाजनकस्थाने । हारा.।

कष्टि: । स्त्री । पीड़ायाम् । वै.निघ. ।

कष्ठीरम् । क्ली । रङ्गे । वङ्ग । रत्ना. ।

कसका । स्त्री । कासमर्द्दे । वै.निघ.२भ.कुलत्थाद्यघृते । [र.पि.चि. ।

कसनम् । क्ली । कासे । वेदनादिविशेषे । च.द.

कसनमर्द्दन: । पुं । कासमर्द्दवृक्षे । कालकासन्दा । वै.निघ. । [लूता ।

कसना । स्त्री । कृष्णसाध्यलूताविशेषे । See

कसनोत्पाटन: । पुं । वासकवृक्षे । वाकस् गाछ । श.च. ।

कसिपु: । पुं । अन्ने । जटा. ।

कसेरु: । पुं,स्त्री। Back bone. पृष्ठास्थिनि । মেরুদণ্ড । रा.नि.व.१८ । मुस्तायाम् । 'कसेरुर्भद्रमुस्तके'।रा.नि.व.६।२३ (Scirpus kysoor.) स्वनामख्याततृणविशेषे । কেশুর। मं कं कसेरुवा । सेकिनगड़े । तुंगगडु । तें दुंपि, कोति । तच्च द्विविधं राजकसेरुकं चिञ्चोढ़ञ्च । तयो: चिञ्चोढ़ं मुस्ताकृति लघु च । सा. गुणा:—"कसेरुकद्वयं शीतं मधुरं तुवरं गुरु । पित्तशोणितदाहघ्नं नयनामयनाशनम् ॥" भा. । कषाय: अल्पमधुर: कटुतिक्तक: रक्तपित्तघ्न: शीत: दाहश्रमघ्न: । रा.नि. व.८ । पुष्पञ्चास्य कामलाहरं पित्तनाशकरञ्च । रै.

निघ. । गुरु विष्टम्भि शीतलञ्च । राज.३प. । च.
क. । [१७अ. ।

कसेरुकः । पुं । कसेरौ । नागरमुस्तके । सु.चि.

कसेरुका । स्त्री । कसेरौ । केशुर । रा.नि.
व.८ । पृश्निपर्णि । पृष्ठदण्ड । रा.नि.व.१८ ।

कस्तीरम् । क्ली । पित्तटे । पिटुली । वङ्गे ।
हे.च. ।

कस्तीर्णम् । क्ली । रङ्गे । राङ् । प.मु. ।

कसु(स्तू)रिका (री) । स्त्री । मृगनाभौ ।
मृगनाभि । हिं कस्तूरी । तें कस्तूरिपिल्लि । सा
त्रिधा—कामरूपोद्भवा, नैपाली, काश्मीरी च ।
तत्र प्रथमा कृष्णा श्रेष्ठा च, द्वितीया नीलवर्णा म-
ध्यमा च, शेषा अधमा । भा. । गुणाः—"कस्तूरी
छर्द्दिदौर्गन्ध्यरक्तपित्तकफापहा । राज. । कटुः ति-
क्ता उष्णा शुक्रला गुरुः शीतघ्नी वातशोषहा सचा-
रा चेति ।" भा. । "चक्षुष्या मुखदोषघ्नी किला-
सकुष्ठघ्नी च ।" मद. । तथा "कपिला पिङ्गटा कृ-
ष्णा कस्तूरी त्रिविधा क्रमात् । नेपालेऽपि च का-
श्मीरे कामरूपे च जायते ॥ साष्येका खरिका त-
तश्च तिलका शेया कुलित्थापरा पिण्डान्यापि च
नायिकेति च परा या पञ्चभेदाभिधा । सा शुद्धा
मृगनाभितः क्रमवशादेषा चितीशोचिता पञ्च
त्यादिदिनत्रयेषु जनिता कस्तूरिका सूयते ॥ चू-
र्णाकृतिस्तु खरिका तिलकानिलाभा कौलित्थवी-
जसदृशी च कुलित्थिका च । स्थूला ततः किय-
दियं किल पिण्डिकाख्या तस्माच्च किञ्चिदधिका
यदि नायिका सा ॥" इति कस्तूरीनिकरलक्षणं ।
"स्वादे तिक्ता पिञ्जरा केतकीनां गन्धं धत्ते लाघवं
तोलने च । याप्सु न्यस्ता नैव वैवर्ण्यमीयात् कस्तूरी
सा राजभोग्या प्रशस्ता । अपिच या गन्धं केतकी-
नामपहरति मदं सिन्दुराणाच्च वर्णे स्वादे तिक्ता
कटुर्वा लघुरथ तुलिता मर्हिता चिक्कणा स्यात् ।
दाहं वा नैति वह्नौ शिमिशिमिति चिरं चर्मगन्धा
हुताशे सा कस्तूरी प्रशस्ता वरमृगतनुजा राजते
राजभोग्या ।" इति कस्तूरीपरीक्षालक्षणम् । अ-
न्यच्च "बाले जरति च हरिणे क्षीणे रोगिणि च
मन्दगन्धयुता । कामातुरे च तरुणे कस्तूरी बहुल-
परिमला भवति ।" कस्तूरीमृगलक्षणम् । या स्नि-
ग्धा धूमगन्धा वहति विनिहिता पीततां पावके-
ऽस्मिन्निःशेषं या निविष्टा भवति हुतवहे भस्मसादेव
सद्यः । या च न्यस्ता तुलायां कलयति गुरुतां
मर्हिता रूक्षताञ्च ज्ञेया कस्तूरिकेयं खलु कृतम-
तिभिः कृत्रिमा नैव सेव्या ॥" कृत्रिमकस्तूरील-
क्षणम् । रा.नि.व.१२। (री) धुस्तूरवृक्षे । वै.निघ.।

कस्तूरि(री)कः । पुं । करवीरवृक्षे ।

कस्तूरिमृगाण्डजः । पुं। मृगनाभौ । रत्ना.।

कस्तूरीभैरवरसः । पुं । शीताङ्गसन्निपाते
रसः । "हिङ्गुलञ्च विषं टङ्कं जातीकोषफलं तथा ।
मरिचं पिप्पली चैव कस्तूरी च समांशिका··· ॥
रक्तिद्वयं खादेत् ।" হিঙ্গুল, বিষ, সোহাগার
খৈ, জায়ফল, জয়িত্রী, মরিচ, পিপুল, মৃগ-
নাভি সমভাগ । জলে মর্দন । र.सा.सं. । भैष.
ज्व.चि. । वृहत् यथा—' मृगमदशशिसूर्य्यौ धा-
तकी शुक्रशिम्बी रजतकनकमुक्ता विद्रुमौ लौह-
पाठाः । क्रिमिरिपुघनविश्वा वारितालाभ्रधात्र्यः
रविदलरसपिष्टं कस्तुरीभैरवोऽयम् । आर्द्रकस्य
रसैः पेयो विषमज्वरनाशनः । মৃগনাভি, ক-
র্পূর, তামা, ধাইফুল, আলকুশীবীজ, রূ-
পা, সোণা, মুক্তা, প্রবাল, লোহ, আকনাদি
মূল, বিড়ঙ্গ, মুতা, শুঁট, বালা, হরিতাল,
অভ্র এবং আমলা সমভাগ । আকন্দপত্ররসে
মর্দন । মাত্রা ১ রতি। रस.र.ज्व.चि. । भैष. ।

कस्तूरीमल्लिका । स्त्री । मृगनाभौ । वै.नि-
घ.। मल्लिकापुष्पवृक्षभेदे (या मृगमदवासा भवति)।
गुणैः वार्षिकादितुल्या । रा.नि.व.१० ।

कस्तूरीमृगः । पुं । Musk deer. मृगवि-
शेषे । यस्याण्डे कस्तूरी जायते । वै.निघ. ।

कस्तूरीमोदकः । पुं । प्रमेहाधिकारे । पाठः
—' कस्तूरी वनिता क्षुद्रा त्रिफला जीरकद्वयम् ।
कदलीनां फलं पक्कं खर्जूरं कृष्णतीलकं । कोकि-
लाक्षस्य वीजञ्च माषमात्रं समं समं । यावन्त्येतानि
चूर्णानि द्विगुणा सितशर्करा । धात्रीरसेन पयसा
कुष्माण्डस्वरसेन च । विपचेत्पाकविद्वैद्यो मन्दमन्दे-
न वह्निना ।········· । मात्रा अक्षमिता । अत्र
वनिता प्रियङ्गुः, क्षुद्रा कण्टकारी, जीरकद्वयं जी-
रकं कृष्णजीरकं । सर्व्वचूर्णात् चतुर्गुणेन धात्र्या-
दिरसेन पचेत् । र.सा.सं. । [निघ. ।

कस्तूरीहरिणः । पुं । मृगनाभिहरिणे । वै.

कल्यम् । क्ली । सुरायाम् । हला. ।

कल्हकम् । क्ली । कह्लारे । শুন্দি ফুল । भा.पू. १भ.गु व. ।

कह्लारम् । क्ली । (Nymphaea lotus.) कुमुदपुष्पे । শ্বেতশুন্দি, শাদা নাল, নীলশুন্দি, লালশুন্দি। तें कोह्विगाएरगावुंड़ि वासनगलकलुव । रा.नि.व.१० । चि.क्र.क.केशरपाके । "कह्लारपद्मोत्पलचन्दनाम्बु ।" गुणा:—शीतलं ग्राहि विष्टम्भि गुरु रूक्षञ्च । भा.पू.१भ.पु.व. । कषायमधुरं शीतलं कफपित्तरक्तघ्नञ्च । राज. । "कह्लारं ग्राहि विष्टम्भि चातिशीतं तथा मतं । गुरु रूक्षं समुद्दिष्टम् ।" वै.निघ.। रक्तोत्पले इहल्पचके इति लोके । अन्ये तु सौगन्धिकोत्पलमाहु:। सु.सू.३८अ.। ईषत् श्वेतरक्तकमले । कमलसाधारणे । वै.निघ. ।

कह्लाराद्यघृतम् । क्ली । हृद्रोगाधिकारे । पाठ: —"कह्लारमुत्पलं पद्मं कुमुदं मधुयष्टिका । पक्त्वाम्बुनाथ तत्क्वाथे जीवनीयोपकल्पिते । घृतं पक्वं नवं पीतं रक्तपित्तास्रगुल्मनुत् ।" रस.र. ।

कह्व: । पुं । वकपक्षिणि । अम. ।

कक्ष: । पुं । अङ्गाध:कोटरे । কাঁকবগল । रबा. । महिषे । लतायां । अम. । मे.षद्विकं । गुग्गुलौ । वै.निघ. ।

कक्षधरमर्म्म । क्ली । मर्म्मस्थानविशेषे । यत्र वैकल्यकारमर्म्मणां द्वयमधिवसति । यस्य च स्थानं वक्ष:कक्षयोर्मध्यभाग: । सु.शा.६अ. ।

कक्षरुहा (चोत्था) । स्त्री । नागरमुस्तायां । रा.नि.व.६ ।

कक्षशय: । पुं । कुक्कुरे । वै.निघ. ।

कक्षा । स्त्री । बाह्वोर्मूले । रा.नि.व.१८ । पित्तकोपजन्यक्षुद्ररोगविशेषे । কাঁক্‌বিড়ালি । लक्षणम्—"बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनां । पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्द्दिशेत् ।" मा.नि.क्षुद्ररोग.चि. । तथा यज्ञोपवीतप्रतिमा: प्रभूता: पित्तानिलाल्लाजनिभास्तु कक्षा: ।" च. । कक्षेति कक्षासन्नेषु प्रायोदेशेषु सानिलात् । वा.उ. ३१अ. । [र । वै.निघ. ।

कक्षाफलु: । पुं । कृष्णोदुम्बरफले । काकडूमु-

कक्ष्या । स्त्री । बृहतिकायां । हे.च. । काञ्च्यां ।

हर्म्म्यप्रकोष्ठे । अम. । मद्ये । करिबन्धने । भ.टी. भ. । मे.यद्विकं । गुञ्जालतायाम् ।

कांश्य(स्य)नील: । पुं । मूषातुत्थे । हे.च. । तुत्थे । তুঁতে । प.मु. । तुत्थाञ्जने ।

कांसपात्रम् । क्ली । आढ़कपरिमाणे । भा.।

कांसिका । स्त्री । मुद्गपर्ण्याम् । रा.नि.व.३ ।

कांसी । स्त्री । सौराष्ट्रमृत्तिकायां । प.मु. । कांस्यधातौ ।

कांसीयम् । क्ली । कांस्यधातौ । रा.नि.व.१३।

कांस्य(क)म् । क्ली । पानपात्रे । मे.यद्विकं । White copper or brass, Queen's metal. ताम्ररङ्गयोरुपधातौ । কাঁসা । हिं कांसा । मं कं कंसे कंचु । भा. । "ताम्रं त्रपुजमाख्यातं कांस्यं घोषञ्च कंसकम् । उपधातुर्भवेत्कांस्यं द्वयोस्तरणिरङ्गयो: । कांस्यस्य तु गुणा: ज्ञेया: स्वयोनिसदृशा जनै: । संयोगजप्रभावेन तस्यान्येऽपि गुणा: स्मृता: । कांस्यं कषायं तिक्तोष्णं लेखनं विशदं सरं। गुरु नेत्रहितं रूक्षं कफपित्तहरं परं ॥" तच्छोधनम्—"पत्तलीकृत्य पत्राणि कांस्यस्याग्नौ प्रतापयेत्। निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके । गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा । एवं कांस्यस्य रीतेश्च विशुद्धि: सम्प्रजायते ॥" मारणविधि: —"अर्कक्षीरेण सम्पिष्टो गन्धकस्तेन लेपयेत्। समेन कांस्यपत्राणि शुद्धान्यम्लद्रवै: मुहु: । ततो मूषापुटे धृत्वा पचेद्गजपुटेन च। एवं पुटद्वयात्कांस्यं रीतिश्च म्रियते ध्रुवम् ॥" भा.पू. १भ. । शुद्धस्य गुणा:—"कांस्यन्तु तिक्तमुष्णञ्चक्षुष्यं वातकफविकारघ्नं । रूक्षं कषायरुच्यं लघुदीपनपाचनं पथ्यम् ॥ श्वेतं दीप्तं मृदुज्योति: शब्दाढ्यं स्निग्धनिर्म्मलं । घनाग्निसहमूताङ्गं कांस्यमुत्तममीरितम् ॥" रा.नि.व.१३ ।

कांस्यपिष्टीरस: । पुं । पाण्डुधिकारे । पाठ: —"सूतात्पञ्चार्कतश्चैकं कृत्वा पिष्टिं सगन्धकां । सूतांशै: नागवल्लयाश्च द्रवै: पिष्ट्वा प्रलेपयेत् । ताम्रपत्रीं प्रलिप्यैतां रुद्ध्वा गजपुटे पचेत् ।" द्विगुञ्जं मूत्रषणेन सेव्यम् । र.चि.८अ.। পারা ৫ ভ. তামা ১ ভ. গন্ধক ৫ ভ. । [सालु ।

कांस्यालुकम् । क्ली । कासालुके । See का-

काकः । पुं। वायसे । वायसभेदे । ডোমকাক। एतौ प्रसहजातीयौ । तन्मांसगुणाः — क्षयहरं च- चुष्यं बृंहणं लघु दीपनञ्च । रा.नि.व.७ । शोषरोगे हितः रसवीर्य्यविपाकेषु सिंहादिभिः समः । सु.सू. ४६अ. । काकजङ्घायां । কাঁটা গুড়কাঁউলী । ज्योतिष्मत्याम् । লতাফট্কী । काकोल्यां । गु- ञ्जायाम् । कोकिले । वै.निघ. । पीठसर्पिणि । খোঁড়া । परिमाणभेदे । शिरःचालने । काको- दुम्बरवृक्षे । क्ली । काकसमूहे । मे.कद्विकं । का- कमांसन्तु चक्षुष्यं लघु चाग्निप्रदीपनम् । धातुवृ- द्धिकरं बल्यं क्षतरोगं क्षयं हरेत् । कृष्णकाकस्य मांसन्तु ज्ञेयं काकसमं गुणैः ॥ वै.निघ. ।

काककङ्गुः । पुं । चीनक इति प्रसिद्धधान्ये । हे.च. । सर्ज्जरसे । वै.निघ. ।

काककर्कटी । स्त्री । खर्जूरीवृक्षे । भा. ।

काककण्टकः । पुं । जलचरपक्षिविशेषे । পানকৌড়ি । वै.निघ. । [ঠেঙা । जटा. ।

काककला । स्त्री । काकजङ्घावृक्षे । কেউয়া

काककुड्मलम् । क्ली । नीलपद्मे । वै.निघ. ।

काककुष्ठम् । क्ली । कङ्कुष्ठे ।

काकघ्नी । स्त्री । महाकरञ्जवृक्षे । रा.नि.व.८।

काकचिञ्चा (ञ्चिः, ञ्ची) । स्त्री । गुञ्जायां। কুঁচ । त्रिका. । रक्तगुञ्जायां । भा.पू.१भ.गु.व. ।

काकच्छदः (दिः, र्दिः) । पुं । खञ्जनप- क्षिणि । श.र. । चाषपक्षिणि । নীলকণ্ঠপাখী । त्रिका. ।

काकजङ्घा । स्त्री । गुञ्जायां । र.मा. । (Leea hirta.) स्वनामख्यातक्षुपे । কেউয়াঠেঙা, কাঁটা গুড়কাঁউলী । मसीति पाश्चात्ये । र.मा. । सा क्षतोपयोगिनी च । गुणाः—तिक्तोष्णा कृमिव्रण- कफापहा बाधिर्य्यघ्नी अजीर्णघ्नी जीर्णविषमज्वर- नाशिनी । रा.नि.व.४ । "काकजङ्घा जटा निद्रां जनयेच्छिरसि स्थिता । हिमा कषाया तिक्ता क- फपित्तघ्नी ज्वरपित्तास्रव्रणकण्डूविषकृमिघ्नी च ।" भा.पू.१भ. । "एतद्बन्धनं एकाहिकज्वरे हितम् ।" च.द.ज्व.चि. ।

काकजम्बुः (म्बूः) । स्त्री । (Ardisia so- lanacea.) स्वनामख्यातजम्बूवृक्षविशेषे । भूमि- जम्बूवृक्षे । ভুঁইজাম, বনজাম, ছোট জাম গাছ । मं नदीतीरजांबू । कं तीरेनेरिलु । गुणाः —कषाया अम्ला गुरुः पाके मधुरा दाहश्रमाति- सारघ्नी वीर्य्यपुष्टिबलदा च । रा.नि.व.११ । र. मा. । नागरङ्गवृक्षे । वै.निघ. ।

काकजानुका । स्त्री । काकजङ्घायाम् । भैष. स्त्रीरोग.चि. । रस.र.प्रदरे ।

काकडुम्बुरः । पुं । कृष्णडुम्बुरे । ক্ষুদ্রডুমুর ।

काकणम् । क्ली। A leprosy with black and red spot. महाकुष्ठरोगविशेषे । तल्लक्ष- णं यथा—काकणन्तिकाफलसदृशानि अतीव रक्त- कृष्णानि काकणकानि । ओषचोषादीनि सामान्य- लिङ्गानि । त्वक्कोचभेदस्वपनाङ्गसादाश्च भवन्ति । सु.नि.५अ. ।

काकणघ्नवटी । स्त्री । कुष्ठघ्नौषधे । पाठः— लौहभस्म विषं वह्निं कटुका त्रिकटुत्रयं । तुल्यांशं चूर्णितं भाव्यं क्वाथेनानेन तद्दिनं । पथ्यानिम्बवि- डङ्गानि खदिरं वासकोऽमृता । जलैरष्टावशेषं त- त्कषायं भावने हितं । मासमात्रं लिहेत्क्षौद्रैः का- कणं हन्ति तद्वटी ॥ रस.र. । লৌহ, বিষ, চি- তার মূল বা ভেলা, কট্‌কী, ত্রিফলা, ত্রিক- টু এবং ত্রিমদ প্রত্যেকে সমান ভাগ । ভা- বনা দ্রব্য—হরীতকী, নিমছাল, বিড়ঙ্গ, খ- দির, বাসাছাল, গুলঞ্চ ।

काकणन्तिका (न्ती) । स्त्री। रक्तगुञ्जायां । गुञ्जायां । सु.चि.१८अ. । प.सु. । रक्तकम्बलवृक्षे । वै.निघ. ।

काकणान्तकः । पुं । सिन्दूरे । वै.निघ. ।

काकण्डा । स्त्री । काकनासायां । ক্ষুদ্র শ্বে- ত কুঁচ । रा.नि.व.३ ।

काकतिक्तका (क्ता) । स्त्री । लताकरञ्जे । वै.निघ. । वा.सू.१५अ. । काकजङ्घायाम् । भा.पू. १भ. । श्वेतगुञ्जायां । শ্বেত কুঁচ গাছ । र.मा. ।

काकतिन्दुः (कः) । पुं । (Diospyros tomentosa.) तिन्दुकविशेषे । মাকড়া গাব, কুচিলা গাছ, তেঁদ, মাকড়া তেঁদ । भा. । फ- लगुणाः—गुरु कषायाम्लं वातविकारघ्नं मधुरम् । पक्वः वमिपित्तघ्नमीषत्कफकरश्च । रा.नि.व.११ ।

काकतुण्डः । पुं । कृष्णागुरुणि । हे.च. । जलपक्षिविशेषे । वै.निघ. । च.सू.२७अ. । ग्रीवोर्द्ध्वगतकफतुण्डाकारसन्धौ। स च हनुद्वयसन्धिः भा.।

काकतुण्डफला । स्त्री । काकनासायाम् । क्षुদ্র শ্বেত কুঁচ, শ্বেত কেউয়া ঠুঁটী বা রক্তকম্বল, বড় শ্বেত গুড়কাউলী । भा.पू.१भ. ।

काकतुण्डा (ण्डिका) । स्त्री । श्वेतगुञ्जायाम् । শ্বেত কুঁচ । महाश्वेतकाकमाच्याम् । বড় শ্বেত গুড়কাউলী । वै.निघ. । काकचिञ्चायाम् । কুঁচ গাছ । हला. ।

काकतुण्डी । स्त्री । गुञ्जायां । वै.निघ. । राजरीतौ । পিত্তলবিশেষ । रा.नि.व.१३ । लघुरक्तकाकमाच्याम् । वै.निघ.२भ.भूतज्व.चि. । स्वनामख्यातलतायाम् । কেউয়াঠুঁটী, শ্বেত কুঁচ । र.सा.सं. ।गुणाः—कटुतिक्तोष्णा रसायनी वातदोषघ्नी रुच्या पलितघ्नी च । रा.नि.व.३ ।

काकदन्तिका । स्त्री । काकादनीलतायाम् । শ্বেত বা রক্তকুঁচ । दन्तीवृक्षे । रक्तकाकमाच्यां । রক্ত গুড়কাউলী। वै.निघ. । [र.मा. ।

काकनामा । पुं। वकवृक्षे । বকফুলের গাছ।

काकनासः । पुं। विकङ्कतवृक्षे। रा.नि.व.११।

काकनासा । स्त्री । (Solanum indicum.) महाश्वेतकाकमाच्याम् । বড় শ্বেত গুড়কাঁউলী । हिं केउयाठुँटी, केउयाढोँडी । मं वड़िलिकहड़लि, हिड़ियाकागेदोंडे । तें वेलुमसन्दिचेट्टु, पुसगुलिविन्दचेट्टु, काकिदोंडचेट्टु । गुणाः—मधुरा शीतला पित्तघ्नी रसायनी दार्ढ्यकरी विशेषतः पलितघ्नी । रा.नि.व.३ । कषाया उष्णा रसपाकयोः कटुः कफघ्नी वान्तिकरी तिक्ता शोथार्शःश्वित्रकुष्ठहृच्च । भा.पू.१भ. । (श्रा) वकवृक्षे । रत्ना. । काकजङ्घायाम् । जटा. ।

काकनासिका । स्त्री । रक्तत्रिवृतायाम् । रा.नि.व.६ । काकजङ्घायाम् । কাঁটা গুড়কাঁউলী । अम. । रा.नि.व.४ । गलनाफली । जेन्जटैस्तु वासाफलवदुच्यते । सि.यो.यक्ष्म.चि.च्यवनप्राश. । सा.कौ. । "काकोलीकाकनासिका ।"

काकनीला । स्त्री। काकजम्बूवृक्षे । বনজাম। रा.नि.व.११ ।

काकन्ती । स्त्री । कृष्णशिम्ब्याम् । কালশিম্বী र.मा. ।

काकन्दी । स्त्री । चिञ्चायाम् । তেঁতুল ।

काकपदम् । क्ली । कपालीपरिशिरःपर्यन्तं मुण्डनं काकपदमुच्यते । "मूर्ध्नि काकपदङ्कला ।" सु.कल्प.२अ. ।

काकपर्णी । स्त्री । मुद्गपर्ण्यां । মুগানী । भा.।

काकपक्षः । पुं । शिखण्डके । जुल्फि । बालानान्तु शिखा प्रोक्ता काकपक्षः शिखण्डकः । अम.।

काकपीलुः (कः) । पुं । काकादनीलतायां । রক্ত গুড়কাঁউলী । श्वेतगुञ्जायाम् । শ্বেত কুঁচ । रा.नि.व.३ । रक्तगुञ्जायां । भा.पू.१भ. । काकतिन्दुके । মাকড়া গাব, কুচিলা, মাকড়া কেন্দ । भा. । अम. । [हे.च. ।

काकपुच्छः (ष्टः) । पुं । कोकिले । श.र. ।

काकपुष्पम् । क्ली । ग्रन्थिपर्णे । सुगन्धतृणे । वै.निघ. ।

काकप्राणा । स्त्री । काकनासायाम्। महाश्वेतकाकमाच्याम् । বড় শ্বেতগুড়কাঁউলী । रा.नि.व.३ ।

काकफलः । पुं । निम्बवृक्षे । काकजम्बाम् । বনজাম । रा.नि.व.६।११ । [११ ।

काकफला । स्त्री । काकजम्बूवृक्षे । रा.नि.व.

काकबन्ध्या । स्त्री। एकमात्रप्रसवायां नार्य्यां।

काकभण्डी । स्त्री । श्वेतगुञ्जायाम् । वै.निघ. ।

काकभाण्डी । स्त्री । महाकरञ्जवृक्षे । रा.नि.व.६ । लघुरक्तमाचिकायां । লাল গুড়কাঁউলী । वै.निघ. ।

काकभीरुः । पुं । पेचके । रत्ना. । त्रिका. ।

काकमद्गुः । पुं । दात्यूहपक्षिणि । ডাহুক । हारा. । त्रिका. । "काकमद्गुर्जलरङ्कः ।"

काकमर्द्दः (कः) । पुं । महाकाललतायाम् । মাকালফলের লতা । प.मु. । [कः ।

काकमांसम् । क्ली । वायसमांसे । See का-

काकमाचिका (ची) । स्त्री । स्वनामख्यातपत्रशाकविशेषे । কেউয়াঠুঁটী, কাঁটা গুড়কাঁউ-

ली ।। हारा.। हिं कवैया कावइ । काकि । मं कं कवच्या । रा.नि.व.४ । तिक्ता रसोष्णा कफघ्नी शूलार्शःशोफघ्नी कुष्ठघ्नी कण्डूघ्नी त्रिदोषघ्नी स्निग्धोष्णा स्वरदा शुक्रदा रसायनी शोथगुल्मार्शोज्वरमेहघ्नी कटुः चक्षुष्या हिक्काच्छर्दिहृद्रोगघ्नी च । भा.पू.१भ. । तिक्ता सा पित्तं वर्द्धयति उष्णवीर्य्यत्वात् । सु.सू.४०अ. । काकमाची श्वेतरक्तभेदेन द्विधा । तयोः श्वेता महाश्वेता काकमाची (मं काइंडीची थोरश्वेतकावली),द्वितीया लघुरक्तकाकमाची, रक्तकाइण्डची लघुरक्तकावलीति महाराष्ट्रादौ ख्याता । तयोः श्वेता—"मधुरा च रसायनी । शीता कषाया कट्वी च तिक्ता चोष्णा वमिप्रदा । तनौदार्ढ्यकरी प्रोक्ता कफशोथार्शनाशिनी । वलीपलितपित्तघ्नी श्वेतकुष्ठापहा मता" इति । "तुवरोष्णा रसायनी । कट्वी तिक्ता रुचिकरी वातकुष्ठविनाशिनी । पाण्डुप्रमेहकफहा छर्दिकृमिज्वरापहा । पलितस्य च हन्त्री स्यात्…।" रक्तकाकमाचीगुणाः । वै.निघ. । जीवन्ती वातकफकृत् पित्तसंशमनी तथा । त्रिदोषशमनी हृष्या काकमाची रसायनी ॥ भचि.१६अ. । च.द.यक्ष्म.चि. । मष्टफला । सु.सू.२७सुरसादि.ड. । गुड़फला । वा.सू.१५अ. । चवकमुरसि भार्गी कासुका काकमाची। काणकिड़ा इति ख्याते शाके । काणछिड़े । प.मु. ।

काकमाचीतैलम् । क्ली। षडंघिकादौ हितम् । पाठः—"काकमाचीरसे सिद्धं कटुतैलं चतुष्पलम्। मनःशिलासीमराजीवीजसिन्दूरगन्धकैः । प्रागमात्रैस्तदभ्यङ्गाद्धन्त्यवश्यमडंघिकान् ।" रस.र.।

काकमाता । स्त्री। काकमाचीक्षुपे । गुड़कौंउली । रा.नि.व.४ । [रा.नि.व.३ ।

काकमुद्गा । स्त्री । मुद्गपर्ण्याम् । मुगानी ।

काकयवः । पुं । शस्यहीनधान्ये । आगड़ा । महाभा. । [नामवृक्षविशेषे । वै.निघ. ।

काकयानम् । क्ली । कौङ्कणदेशख्याते हासा-

काकरिपुः । पुं । उलूके । पेँचा । [त्रिका. ।

काकरुहा । स्त्री । वन्दावृक्षे । परगाछा ।

काकरुकः । पुं । उलूके । निम्बवृक्षे । त्रि। भीते । स्त्रीजिते । मे.कचतुष्कं ।

काकलम् । क्ली । कण्ठमणौ । त्रिका. । पुं। द्रोणकाके ।

काकलकः । पुं । कण्ठमणौ । ग्रीवाया उन्नतप्रदेशे । षष्टिकधान्यजातिभेदे । गुणाः शालिवत् कटुकवच्च । सु.सू.४६अ. ।

काकलीद्राक्षा । स्त्री । द्राक्षाविशेषे । बेदाना, किस्मिस् प्रभृति । गुणाः—मधुरा अम्ला रसाला रुचिकरी श्वासहृल्लासघ्नी ।रा.नि.व.११ ।

काकलीरवः । पुं । कोकिले । रा.नि.व.१९।

काकवल्लभा । स्त्री। काकजम्बूवृक्षे । वनजाम्। रा.नि.व.११ । [पीतकाञ्चने । वै.निघ. ।

काकवल्लरी । स्त्री । स्वर्णवल्ल्यां । भा.पू.१भ.।

काकविष्ठा । स्त्री । काकमले ।

काकवृन्ता । स्त्री । रक्तकुलत्थके । वै.निघ. ।

काकशालिः । पुं। कृष्णशालिधान्ये । वै.निघ.।

काकशिम्बी । स्त्री। रक्तगुञ्जायाम् । रक्तकाकमाच्याम् । लालगुड़काँउली । रा.नि.व.३ ।

काकशीर्षः । पुं । वकवृक्षे । वासना गाछ । प.मु.। See अगस्तिः । [तुड पाथी । वै.निघ.।

काकसख्यः । पुं। तन्नामकपक्षिविशेषे । काक-

काकसादी । पुं । अशुभलक्षणाश्वे । शाश्वे ।

काकस्फूर्जः । पुं। काकतिन्दुकवृक्षे । माकड़ा गाब । मं काकटेम्भुर्णी । वै.निघ. ।

काका । स्त्री । श्वेतत्रिवृति । काकोदुम्बरिकायाम् । काकडुमुर । काकोलीवृक्षे । काँकलां गाछ । काकजङ्घायां । गुञ्जालतायां । मलपूवृक्षे । निर्म्माल्य । काकमाच्यां । श्वेत गुड़काँउली । मे.कद्विकं ।

काकाङ्गा (ङ्गी) । स्त्री। काकनासायां । केउयाठूँटी, श्वेत गुड़काँउली । भा.पू.१भ. । काकजङ्घायाम् । वै.निघ. ।

काकाञ्ची । स्त्री । काकजङ्घायाम् । श.र. ।

काकाण्डः । पुं। काकतिन्दुके । माकड़ा गाब। महानिम्बे । घोड़ानिम् । रा.नि.व.९ ।

काकाण्डफलम् । क्ली । शूकरशिम्बीफले ।

আলাকুশী ফল। काकतिन्दुकफले। মাকড়া গাব। सु.सू.४६अ.। कपिकच्छुगुण:।

काकाण्डा (ण्डी) । स्त्री। कोलशिम्ब्याम्। रा.नि.व.७। महाज्योतिष्मतीलतायाम्। বড় লতাফট্কী। रा.नि.व.३। असाध्यलूताविशेषे। सु.कल्प.८अ.। See लूता।

काकाण्डोला । स्त्री। कोलशिम्ब्यां। আলাকুশী। रा.नि.व.७। कटभ्याम्। লতাফট্কী। इयञ्च माषवद्गुणविशिष्टा। अरुण:।

काकादनक: (नी) । पुं, स्त्री। (Ardisia solanacca.) श्वेतगुञ्जायां। শ্বেতকুঁচ। भा.म. पूतना.चि.। रक्तगुञ्जायाम्। রক্তকুঁচ। सु.चि. ३८अ.। र.मा.। उत्. काउथोण्टिया। मं कं साङ्गीकहुड़नि। किरियकागेदोंड़े। गुणा:—कटूष्णा तिक्ता रसायनी वातदोषहरी रुच्या पलितनाशिनी च। रा.नि.व.३। विषरोगघ्नी शोथघ्नी च। राज.। कण्टकपालीलतायाम्। কালিয়াকড়া। कुमिरके इति च भाषा। प.मु.। सु.सू. ३८अ.कफशमने। रक्तकाकमाच्याम्। লাল গুড়কাঁউলী। रत्ना.। काकतिन्दुकायां। सु.चि. १४।१८अ.। [१भ.।

काकानन्ती । स्त्री। रक्तगुञ्जायाम्। भा.पू.

काकाम्र: । पुं। समष्ठीलवृपे। रा.नि.व.४।

काकायु: । पुं। स्वर्णवल्ल्याम्। স্বর্ণলতা। भा. पू.१भ.। See स्वर्णवल्ली।

काकारि: । पुं। पेचके। हे.च.।

काकाल: । पुं। द्रोणकाके। श.र.। वत्सनाभविषे। हे.च.। [শ্বেত গুড়কাঁউলী। वै.निघ.।

काकाख्या । स्त्री। महाश्वेतकाकमाच्याम्।

काकाह्वा (ह्वाना) । स्त्री। काकमाच्याम्। रा.नि.व.४। सु.चि.६अ.। वनमुद्गे। वै.निघ.।

काकाचा । काकनासायां। रा.नि.व.३।

काकिणी । स्त्री। रक्तिकायाम्। কুঁচ। एकवराटिकायाम्। এককড়া। पणचतुर्थांशे। ৫ গণ্ডা। मानदण्डे। "काकिणी पणतुर्य्यांशे मानदण्डेऽपि दृश्यते। कृष्णलैकवराट्यो: स्यात्।" मे.णत्रिकं।

काकी । स्त्री। वायस्याम्। काकोल्याम्। रा. नि.व.३। श्वेतकाकमाच्याम्। শ্বেত গুড়কাঁউলী। वै.निघ.।

काकु: । स्त्री। जिह्वायां। त्रिका.।

काकुद (दम्) । क्ली। तालुनि। रा.नि.व.१८।

काकुदी । पुं। ककुदावर्त्ते महादोषान्विताश्वे। "आवर्त्तो यस्य ककुदि काकुदी स उदाहृत:।" ज.द.३अ.।

काकुरुतम् । क्ली। विकृतशब्दे। [वै.निघ.।

काकुलीमृग: । पुं। चतुर्विधविलेशयमृगे।

काकेचि(चु)क: । पुं। इक्षुगन्धतृणे। खागड़े। খাগড়া। र.मा.। त्रिका.। काशतृणे। কেসে। रा.नि.व.८। कोकिलाक्षवृपे। भा.पू.१भ.।

काकेन्दु: (क:,की) । पुं। (Diospyros melanoxylon.) काकतिन्दुके। মাকড়া কেন্দ। अम.। कटुतिन्दुके। কুচিলা। प.मु.।

काकेष्ट: । पुं। निम्बवृक्षे। रा.नि.व.९।

काकेष्टा । स्त्री। रेणुकायाम्। काकमाच्याम्। वै.निघ.।

काकोचिक: (ची) । पुं, स्त्री। काउचीति प्रसिद्धे मत्स्यविशेषे। কাউচ মাছ। हारा.।

काकोडु(दु)म्बर: । पुं। काकोदुम्बरिकायां। কাকডুমুর। प.मु.।

काकोडु(दु)म्बरिका । स्त्री।(Ficus hispida, opposite-leaved figtree, Syn. Ficus oppositifolia.) स्वनामख्यातवृक्षे। কাকডুমুর। हिं तटमिला,(गोउडुम्बरा। र.मा.।) (कटुम्भरी। भा.।) मं कालाउंब। तें ब्रह्मेड़िचेट्टु। गुणा:—छिन्नघ्नी उदुम्बरगुणा च। मद.व.५। पक्वफलं शीतलं गौल्यं अम्लं कटु लग्दोषघ्नं रक्तपित्तघ्नञ्च। तद्वल्कलं अतिसारघ्नम्। तथा—उदुम्बरत्वक् शीतला कषाया व्रणघ्नी गर्भरक्षणे हिता स्तन्यदा च। रा.नि.व.११। तिक्ता शीतला तुवरा स्तम्भनकरी कफपित्तव्रणश्वित्रकुष्टपाण्डुर्श:कामलाहरी च। गुरु: ग्राहिणी शीतला स्वादु: हृप्तिकरी च। राज.। फलगुणा:—विष्टम्भि मधुरं स्निग्धं तर्पणं गुरु च। सु.सू.४६अ.।

काकोदर: । पुं। सर्पे। अम.।

काकोदुम्बरिकाफलम् । क्ली । अञ्जीरे । वै.निघ. । [गुणा: अस्यवत् ।

काकोनालकः । पुं । अवजातीयपक्षिणि ।

काकोलः । पुं,क्ली । द्रोणकाके । दाँड़काक । इला. । काकोल्याम् । धरणि. । कृष्णवर्णस्थावरविषभेदे । रवा. । काकोलमुग्रतेजः स्यात् कृष्णच्छवि महाविषम् । वै.निघ. । सर्पे । वनशूकरे । श.र. ।

काकोली । स्त्री । Berry of the calculus indicus. It is brought from Napal and Morung. Tizyphus napeca. क्षीरकाकोलीसदृशकन्दविशेषे कक्कोलतो भिन्ने । भेदस्तु केवलं क्षीरकाकोल्याः किञ्चित्कृष्णता । काँकला । मं कटवतिगे, काउली । तें तेलुमणिचेट्टु । उत्. कांकोलि । एषा क्षीरकाकोल्युत्पत्तिस्थान एव जायते । “जायते क्षीरकाकोली महामेदोद्भवस्थले । यत्र स्यात् क्षीरकाकोली काकोली तत्र जायते । पीवरीसदृशः कन्दः स क्षीरप्रियगन्धवान् । सा प्रोक्ता क्षीरकाकोली काकोलीलिङ्गमुच्यते । यथा स्यात् क्षीरकाकोली काकोल्यपि तथा भवेत् । एषा किञ्चिद्भवेत् कृष्णा भेदोऽयमुभयोरपि ॥ भा. । गुणाः—शीता मधुरा स्निग्धा क्षयपित्तानिलार्त्तिनुत् । रक्तदाहज्वरघ्नी कफशुक्रवर्द्धिनी च । रा.नि.व.३ । क्षीरकाकोल्याम् । फलघ्ते ।

काकोलीद्वयम् । क्ली । काकोली क्षीरकाकोली च । “एका काकोली कवड़ीसंज्ञा, अन्या क्षीरकाकोली पयस्विनीसंज्ञा ।” वा.सू.१५अ.जीवन्त्यादि । जीवन्तीकाकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ । एतद्द्वयाभावे अश्वगन्धामूलं द्विगुणं ग्राह्यम् । भा.म. ४भ.कर्णरोग.चि. ।

काकोल्यादिः । पुं । तन्नामकौषधद्रव्यगणे । अयं नाष्टवर्गसंज्ञितः । सि.यो.शाल्यपरच्छेदे । “काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदामहामेदाच्छिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्च । काकोल्यादिरयं पित्तशोणितानिलनाशनः । जीवनो बृंहणो वृष्यः स्तन्यः श्लेष्मकरस्तथा॥” सु.सू.३८अ. । अपि च । “काकोली क्षीरकाकोली जीवकर्षभकौ तथा । ऋद्धिर्वृद्धिस्तथा मेदा महामेदा गुडूचिका । मुद्गपर्णी माषपर्णी पद्मकं वंशलोचना । शृङ्गी प्रपौण्डरीकञ्च जीवन्ती मधुयष्टिका । द्राक्षा चेति गणो नाम्ना काकोल्यादिरुदीरितः ॥” गुणाः—“स्तन्यकृद्बृंहणो वृष्यः पित्तरक्तानिलापहः ।” भा. ।

काकोल्यादिघृतम् । क्ली । वातरक्ते घृतम् । काकोलीयुग्ममधुकं सशिवा च धात्री जीवन्ती मेदयुगलावपि पृश्निपर्ण्यौ । द्राक्षा सपद्मकतुगा च कुलीरशृङ्गी द्वौ क्षीरकावपि समस्तचतुष्पलांशौ षष्टौं विचूर्ण्य विपचेत्त शनैर्घटेऽपां प्रस्थं घृतस्य च तथा सरसं गुडूच्याः । घृतस्य पादं पुरमेव दत्त्वा पुनः पचेत् वैद्यवरो विधिज्ञः । रस.र. ।

काको(कौ)ष्ठः (कः) । पुं । कर्णबन्धनाकृतिविशेषे । स च निर्मांससङ्क्षिप्ताग्राल्पशोणितपालिः । सु.सू.१६अ. ।

कागः । पुं । काके । जटा. । [शणपत्रे । कागच ।

कागदः । पुं । कागज इत्यारवीयभाषाप्रसिद्धे

काङ्कायनगुड़िका । स्त्री । गुल्मरोगे इष्टफलौषधि । प्रक्रिया स्पष्टा । अम्लवेतसः अम्ललोण्यामिति केचित् । শটী, কুড়, দন্তী, চিতামূল, টুমুরি, শুঁট, বচ, তেউড়ী প্রত্যেকে ১ প. হিঙ্গু ৩ প. যবক্ষার ২ প. অম্লবেতস বা আমরুল ২ প. ধনে, যমান, জীরা, মরিচ প্রত্যেকে ২ তো. কৃষ্ণজীরা ৪ তো. বনযমান ৪ তো. टावारसेन कोलास्थिमाना वटी कार्य्या । च.द. । सा.कौ. । रस.र. ।

काङ्कायनमोदकः । पुं । अर्शोरोगे । पथ्यादीनां द्रव्याणां चूर्णानि यथाभागमेकत्र सम्मिश्रयेत् । हरीतकी ५ प. जीरक १ प. मरिच १ प. पिप्पली १ प. पिप्पलीमूल २ प. चविका ३ प. चित्रकमूल ४ प. शुण्ठी ५ प. यवक्षार २ प. भल्लातक ८ प. गुड़कन्द (খাঁড়) १६ प. (अभावे शर्करा वा मत्स्यण्डी) । सर्व्वचूर्णद्विगुणो गुड़ः । च.द.अर्श.चि. ।

काङ्गा । स्त्री । वचायाम् । श.च. ।

काङ्गुकः । पुं, क्ली । षष्टिकधान्यभेदे । কাংনী ধেটে ধানবিশেষ । गुणाः—रसे पाके च मधुरः वातपित्तशमनः शालिवद्गुणश्च । सु.सू.४६अ. ।

काङ्क्ष्त् । पुं । क्रौञ्चपक्षिणि । वै.निघ. ।

काङ्क्षा । स्त्री । आहारेच्छायाम् । सु.नि.६अ. ।

काङ्गेरुः । पुं । कङ्कपक्षिणि ।

काचः । पुं । Affection of optic nerve or gutta serena. नराश्वयोः तृतीयपटलगतनेत्ररोगविशेषे। নেত্রে মুক্তার ন্যায় বিন্দু। हिं मोतियाविन्दु । दोषे तृतीयपटलं गते काचसंज्ञको नेत्ररोगः जायते । लक्षणं यथा—"प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते । तेनोर्द्ध्वमीक्षते नाधः तनु चैलावृतोपमं । यथावर्णञ्च रज्येत दृष्टिर्हीयेत च क्रमात् ॥" वा.उ.१२अ.। अस्मिन्नपि तमोभूते नातिरूढ़े महागदे। चन्द्रादित्यौ सनक्षत्रावन्तरिक्षे च विद्युतः । निर्म्मलानि च तेजांसि भ्राजिष्णून्यथ पश्यति । स एव चतुर्थपटलगतः लिङ्गनाशः नीलिकासंज्ञां धत्ते । "स एव लिङ्गनाशस्तु नीलिका काचसंज्ञितः ॥" वातेन चापि रूपाणि भ्रमन्तीव च पश्यति । आविलान्यरुणाभानि व्याविद्धानीव मानवः । पित्तेनादित्यखद्योतचक्रचापतड़िद्गुणान् । नृत्यतश्चैव शिखिनः सर्व्वं नीलञ्च पश्यति । कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च । पश्येदसूक्ष्माण्यत्यर्थं व्यभ्रमेवाभ्रसंप्लवम् ॥ इत्यादि । सलिलप्लावितानीव परिजाड्यानि मानवः । पश्येद्रक्तेन रक्तानि तमांसि विविधानि च । सलिलान्यथ कृष्णानि पीतान्यपि च मानवः । सन्निपातेन चित्राणि विप्लुतानि च पश्यति । बहुधा च द्विधा वापि सर्व्वाण्येव समन्ततः । हीनाङ्गान्यधिकाङ्गानि ज्योतींष्यपि च पश्यति ॥ मा.नि. । शिक्ये । मणौ । मे.चद्विकं । मृत्तिकाविशेषे । কাচ। गुणाः—क्षाररसः उष्णवीर्य्यः अञ्जनादृष्टिकरश्च । राज.। अश्वस्य पैत्तिकाक्षिरोगे। "श्लेष्माभिष्यन्दिनोऽश्वस्य शूलं सास्रुविलोचनं । काचः सञ्जायतेऽश्वस्य पाण्डुता चापि चक्षुषः ॥" ज.द.३०अ. । कच्चटभेदे । श.च.। क्षारे । हे.च.। क्ली । सिक्थके। काचलवणे। বিট্‌লবণ। रा.नि.व.२३।

काचकम् । क्ली, पुं । काचलवणे । स्फटिके । काचमणौ । वै.निघ. ।

काचकूपी (घटी) । स्त्री । काचनिर्म्मितस्थाल्याम् । কাচের শিশি । भैष. ।

काचजः । पुं । काचलवणे । वै.निघ. ।

काचतिन्तिड़ी । स्त्री । आमतिन्तिड्याम् । কাঁচা তেঁতুল । भा.पू.१भ.फलव. । [व.६ ।

काचतिलकम् । क्ली । काचलवणे । रा.नि.

काचभवः । पुं । काचलवणे । वै.निघ. ।

काचभाजनम् । क्ली । काचनिर्म्मितपात्रे । কাচের বাসন । त्रिका. ।

काचमणिः । पुं । काचे । च.शा.८अ. ।

काचमलम् । क्ली काचलवणे । কাল লবণ । रा.नि.व.६ । काकचलवणे । করকচ লবণ ।

काचमालिका । स्त्री । मद्ये । त्रिका. ।

काचलवणम् । क्ली । Black salt, a medicinal salt prepared by calcining fossile salt and the fruit of the emblic myrobalan together. It consists of muriate of soda with a proportion of sulphur, iron and lime. स्वनामख्यातलवणे । काचलवण इति महाराष्ट्रकर्णाटदेशे ख्यातम् । কৃষ্ণ লবণ, কালা লবণ। সোরা इति मद. । मं बांगड़खार । गुणाः—रूक्षं ईषत् क्षारं पित्तलं दाहकं कफवातघ्नं दीपनं गुल्मशूलनुच । रा.नि.व.६ ।

काचवकयन्त्रम् । क्ली । अर्कादिनिष्काशनार्थं काचनिर्म्मितवकयन्त्रे । [च: ।

काचविन्दुः । पुं । नेत्ररोगविशेषे । See का-

काचसम्भव(सौवर्चल)म् । क्ली । काचलवणे । रा.नि.व.६ ।

काचस्थाली । स्त्री । काचपात्रे । पाटलावृक्षे । পারুল গাছ । अम.।प.सु.। श्वेतपाटले । वै.निघ.।

काचा । स्त्री । काचमणौ । "काचा तु सारका लघ्वी व्रणनेत्रहितावहा। लेखनी शूलहृत्प्रोक्ता···।" वै.निघ. । वयोनिरूपिका अश्वस्य दन्तेषु पञ्चदशाब्दादारभ्य सप्तदशपर्य्यन्तं जाताः सर्षपाकाराः शुभ्ररेखाः । ज.द.४अ. । [अप.चि. ।

काचाह्वा । स्त्री । हरिद्रायां । वै.निघ.२भ.

काचाक्षः । पुं । बृहद्बके । गुणाः—मद्गुवत्। पद्मकन्दे । वै.निघ. ।

काचि(जि)घः । पुं । काञ्चने । मूषिके । मे. घत्रिकं । शिम्बीधान्यादौ । वै.निघ. ।

काचिञ्चिकः (लिन्दिः) । पुं । काकचिञ्चायाम् । কুঁচ গাছ ।

काचितः । त्रि । शिक्यारोपिते (पदार्थे) । শিকায় তোলা (দ্রব্য) । अम. ।

काचिमः । पुं । देवकुलोद्भववृक्षे । त्रिका. ।

काचोत्थम् । क्ली । काचलवणे । रा.नि.व.६ ।

काजूतः । पुं । जांबोखपे महाराष्ट्रादौ ख्याते । गुणाः—"तुवरः मधुरोष्णो लघुः स्मृतः । धातुवृद्धिकरो वातकफगुल्मोदरज्वरान् । क्रमिव्रणाग्निमान्द्यानि कुष्ठञ्च श्वेतकुष्ठकं । संग्रहण्यर्शमानाहान् नाशयेत्··· ।" वै.निघ. ।

काञ्चजम् । क्ली । काचलवणे । वै.निघ. ।

काञ्चन(क)म् । क्ली । पुन्नागपुष्पे । वै.निघ. । पद्मकेशरे । मे.नत्रिकं । स्वर्णे । नागकेसरपुष्पे । रा.नि.व.६ । वै.निघ.२भ.हिक्का.चि. । हरिताले । रा.नि.व.१३ ।

काञ्चनः (कः) । पुं । (Bauhinia variegata &c.) स्वनामख्यातवृक्षे । কাঞ্চন বৃক্ষ । प.मु.। हिं कचनार । मं कं कांचन,कोचाले । तें देवकांचन । स त्रिविधः पीतरक्तश्वेतभेदेन । गुणाः—ग्राही रक्तपित्ते पथ्यश्च । राज. । See कोविदारः काञ्चनारः कर्वुदारश्च । चम्पकवृक्षे । नागकेशरवृक्षे । उदुम्बरवृक्षे । धुस्तूरवृक्षे । मे. । वै. निघ.शीतज्व.चि.शीतारिरसे । सु.सू.३८अ. । शालिजातिविशेषे । সুবর্ণশালি । भा.पू.१भ.धान्यव. । See शालिः । श्वेतकाञ्चनवृक्षे । रत्ना. । कोविदारवृक्षे । मद.व.१ । शम्यां । सु.सू.३८अ. । पुन्नागवृक्षे । वै.निघ. ।

काञ्चनकदली । स्वर्णकदल्याम् । চাঁপা কলা । मं सोणकेल । कदलीविशेषे । কাঁচ্ কলা । रा.नि.व.११ ।

काञ्चनकारिणी । स्त्री। शतमूल्यां । श.च.।

काञ्चनगुड़िका । स्त्री । गलगण्डाधिकारे । पाठः—"त्रिफलायास्त्रयो भागाः व्योषाच्च द्विगुणो मतः । तस्माच्च द्विगुणं ज्ञेयं काञ्चनारस्य वल्कलम् । एकीकृते तु चूर्णेऽस्मिन् समो देयोऽथ गुग्गुलुः । क्षौद्रं दशगुणन्दद्याच्चिफलाचूर्णतो भिषक् । सर्व्वासु गण्डमालासु गलगण्डे तथैव च ।" ত্রিফলা প্রত্যেকে ১ তো. করিয়া চূর্ণ ৩ তো., ত্রিকটু প্রত্যেকে ২ তো. করিয়া চূর্ণ ৬ তো., রক্তকাঞ্চনছাল চূর্ণ ১২ তো. গুগ্গুল সর্ব্ব সমান । रस.र. ।

काञ्चनगैरिकम् । क्ली । सुवर्णगैरिकधातौ । সোণা গেরি । सि.यो.हिक्का.श्वास.चि. । "तिक्ताकाञ्चनगैरिकम् ।" [निघ. ।

काञ्चनपत्रिका । स्त्री । कृष्णमुषल्याम् । वै.

काञ्चनपुष्पकम् । क्ली । आढल्यक्षुपे । रा. नि.व.४ ।

काञ्चनपुष्पिका । स्त्री । पीताजात्याम् ।

काञ्चनपुष्पी । स्त्री । गणिकारिकायां । गणिकारीपुष्पवृक्षे स्वनाम्ना कोङ्कणे प्रसिद्धे । मं गणेरी। रा.नि.व.१० ।

काञ्चनभूषा । स्त्री । स्वर्णगैरिके । वै.निघ. ।

काञ्चनमाक्षिकः । पुं । स्वर्णमाक्षिके । महाद्रावके ।

काञ्चनमोहनरसः । पुं । गुल्माधिकारे रसः । पाठः—"मृतं सूतं मृतं ताम्रं काञ्चनं मर्द्दयेत्समं । अर्कवज्रीरसेनैव दिनान्ते वटकीकृतं । गुञ्जैकं गुड़संयुक्तं तथा गन्धसुवर्च्चलं । निष्कैकं गुल्मशान्त्यर्थं रसः काञ्चनमोहनः । विशाला कटुका मुस्तं कुष्ठमिन्द्रयवं समं । चूर्णयेद्देवदारुञ्च कर्षैकं मधुना लिहेत् ॥" রসসিন্দূর, তাম্রভস্ম ও স্বর্ণভস্ম সমভাগ । আকন্দরস ও সিজুর রসে মর্দ্দন । মাত্রা ১ রতি । रस.र. । [गोदन्तम् ।

काञ्चनरसम् । क्ली । हरितालविशेषे । See

काञ्चनसूपः । पुं । काञ्चननामक-द्विदलधान्यसाधितसूपे । तद्धान्यं सार्षपतैलेन उद्दर्त्य उष्णशुष्कात्तस्मात्त्वग्धीनां दालिकामादाय शीतोदकेन मन्दाग्नौ पचेत । वै.निघ. ।

काञ्चनक्षीरी । स्त्री । स्वर्णक्षीरिणीक्षुपे । क्षीरिण्यां । থিরুই, সোণাথিরুই । हिं चोक । मं पिसोरा । रा.नि.व.५ । पीतदुग्धवृहत्पत्रयवतिक्तायां । सु.चि.८अ. । कङ्कुष्ठे । গিরিমাটীবিশেষ । च.द.गुल्म.चि.। "त्रिफला काञ्चनक्षीरी ।"

काञ्चनाभ्ररसः । पुं । यक्ष्माधिकारे रसः । र.सा.सं. । पाठः—काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकं । विद्रुममभया तारं कस्तूरी च मनःशिला । प्रत्येकं बिन्दुमात्रञ्च सर्व्वं मर्द्यं प्रयत्नतः ॥ वारिणा वटिका कार्य्या द्विगुञ्जाफलमानतः । अनुपानं प्रयोक्तव्यं यथादोषानुसारतः ॥ नानारोगप्रशमनं सर्व्वोपद्रवसंयुतं । क्षयं हन्ति तथा कासं श्लेष्मपित्तहरं तथा ॥ बिन्दुमात्रं कर्षमितं । স্বর্ণভস্ম, রসসিন্দুর, মুক্তাভস্ম, লৌহ, অভ্র, প্রবাল, হরীতকী, রৌপ্য, মৃগনাভি, মনছাল প্রত্যেকে ২ তোলা । জলে মর্দ্দন । रस.सं. । बृहत्काञ्चनाभ्रः यथा – काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकं । विद्रुमं मृतवैक्रान्तं तारं ताम्रञ्च वङ्गकम् ॥ कस्तूरिका लवङ्गञ्च जातिकोषैलवालुकाः । प्रत्येकं बिन्दुमात्रञ्च सर्व्वं मर्द्यं प्रयत्नतः ॥ कन्यानीरे तु सम्मर्द्य केशराजरसेन च । अजाक्षीरेण सम्भाव्य प्रत्येकं दिवसत्रयम् ॥ चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् । अनुपानं प्रदातव्यं यथादोषानुसारतः ॥ স্বর্ণভস্ম, রসসিন্দুর, মুক্তাভস্ম, লৌহভস্ম, অভ্রভস্ম, প্রবালভস্ম, বৈক্রান্তভস্ম, রৌপ্য, তামা, বঙ্গ, মৃগনাভি, লবঙ্গ, জয়িত্রী, এলবালুক প্রত্যেকে ২তো. । ঘৃতকুমারী, কেশুরের রস, ছাগদুগ্ধ প্রত্যেকে ৩ দিন মর্দ্দন । মাত্রা ৪ রতি । रस.र. ।

काञ्चनारः (कः) । पुं । (Bauhinia variegata &c.) Mountain ebony. रक्तकाञ्चनवृक्षे । हिं कचनार । मं कांचनु । कं कोचालि । गुणाः – कषायः संग्राही व्रणरोपणः दीपनः कफवातघ्नः मूत्रकृच्छ्रघ्नश्च । रा.नि.व.१० । काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत् । कृमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः । पुष्पं लघु रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत् । भा.पू.१भ. । च.द.र.पि.चि. । See कोविदारः । श्वेतकाञ्चनवृक्षे । रत्ना. ।

काञ्चनारगुग्गुलुः । पुं । गण्डमालागलगण्डापच्यर्व्वुदादौ हितः । पाठः—"काञ्चनारस्य गृह्णीयात् त्वचं पञ्चपलोन्मितां । नागरस्य कणायाश्च मरिचस्य पलं पलं । पथ्याविभीतधात्रीणां पलमर्द्धं पृथक् पृथक् । वरुणस्याचमेकञ्च पत्रैलात्वचां पुनः । टङ्कं टङ्कं समादाय सर्व्वाण्येकत्र चूर्णयेत् । यावच्चूर्णमिदं सर्व्वं तावानेवात्र गुग्गुलुः । संकुट्य सर्व्वमेकत्र पिण्डं कृत्वा विधारयेत् ॥ मात्रा शाणमिता ।" রক্তকাঞ্চনছালচূর্ণ ৫ প. শুঁট, পিপুল, মরিচচূর্ণ প্রত্যেকে ১ প. হরীতকী, আমলা, বহেড়াচূর্ণ প্রত্যেকে ৪ তো. বরুণছালচূর্ণ ২ তো. গুড়ত্বক্, তেজপত্র, এলাচূর্ণ প্রত্যেকে ১ তো. । সর্ব্বচূর্ণ সমান গুগ্গুল একত্র মর্দ্দন করিবে । মাত্রা ॥• তো. পর্য্যন্ত । भा. । [आरग्वधवृक्षे । वै.निघ. ।

काञ्चनालः । पुं । श्वेतकाञ्चनवृक्षे । र.मा. ।

काञ्चनाह्वयः । पुं । नागचम्पकवृक्षे । নাগেশ্বর চাঁপা । नागकेशरवृक्षे । अम. । पद्मकेसरे । वै.निघ. । [स्ना कोङ्कणे प्रसिद्धे । रा.नि.व.१० ।

काञ्चनिका । स्त्री । गणिकारीपुष्पवृक्षे स्वना-

काञ्चनी । स्त्री । हरिद्रायां । मे. । वै.निघ. अर्श.चि. । गोरोचनायाम् । रा.नि.व.१२ । स्वर्णक्षीरिण्याम् । থিরুই । रा.नि.व.५।२३ ।

काञ्चनीया । स्त्री । हरिताले । श.चि. । गोरोचनायां । रा.नि.व.१२। [गुञ्जायां । वै.निघ. ।

काञ्चिः । स्त्री । रसनायां । চন্দ্রহার । उणा. ।

काञ्चिकम् । क्ली । काञ्जिके । কাঁজি । हे.च. ।

काञ्ची । स्त्री। गुञ्जायां। हे.च.। रसनायां। अम.।

काञ्चीपदम् । क्ली । जघनदेशे । हला. ।

काञ्जिकम् । क्ली । Sour gruel, the water of boiled rice in a state of spontaneous fermentation. स्वनामख्यातधान्याम्ले । কাঁজি । हिं मं कांजी । कुल्माषधान्यमण्डादिसंहितं काञ्जिकम् । शार्ङ्ग. । "आमधान्यं चोदितञ्च बालमूलन्तु खण्डशः । कृतं प्रस्थमितं पात्रं जलं तत्राढकं क्षिपेत् । तावत्सन्धाय संरक्षेद्यावदम्लत्वमागतम् । काञ्जिकं तत्तु विज्ञेयमेतत्सर्व्वत्र पूजितम् ॥" चर. । "तुलामितं षष्टिकतण्डुलस्य प्रगृह्य चान्नं विधिवद्विधाय । द्रोणेऽम्भसि क्षिप्तमथ त्रियामन्तत्पत्र रक्षेत् पिहितं प्रयत्नात् । तत्रैव कल्कं सकलं निरस्येत् तत्काञ्जिकं कथ्यते आरणालम् ।" अत्रि.११अ. । तत्र चुक्रसन्धानतुषोदकसौवीरकसुवीराम्लवङ्किकगोधूमसौवीरयवसौवीरतुषसौवीरारणालधान्याम्लभेदेन बहुधा । गु-

णाः—भेदकं तीक्ष्णोष्णं पित्तशोधकं वस्तिशोधकं रुचिकरमाग्नेयं स्पर्शशीतलं श्रमक्लमहरञ्च। पुरातनं तत् ह्यत्याण्डक्लमिरोगघ्नं दीपनञ्चेति। राज.। तच्च भेदि लघु पाचनञ्च। अभि.११अ.। तीक्ष्णोष्णं भेदि पित्तहृत् स्पर्शशीतलं श्रमघ्नं रुच्यं दीपनं वास्तिशूलघ्नं वस्तिशूलघ्नं आस्थापनं हृद्यं लघु वातकफघ्नञ्च। वा.सू.। "काञ्जिकं वातशोफघ्नं पित्तघ्नं ज्वरनाशनं। दाहमूर्च्छाश्रमघ्नञ्च शूलाध्मानविबन्धनुत्॥" रा.नि.व.१५। "काञ्जिकं भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु। दाहज्वरहरं स्पर्शात्पानाद्वातकफापहं। माषादिवटकैर्यत्तु क्रियते तद्गुणाधिकम्। लघु वातहरं तत्तु रोचनं पाचनं परं। शूलाजीर्णविबन्धामनाशनं वस्तिशोधनं। शोषमूर्च्छाभ्रमार्त्तानां मदकण्डूविशोषिणां। कुष्ठिनां रक्तपित्तीनां काञ्जिकं न प्रशस्यते। पाण्डुरोगे यक्ष्मणि च तथा शोथातुरेषु च। क्षतक्षीणे तथा श्रान्ते मन्दज्वरनिपीड़िते। एतेषान्तु हितं प्रोक्तं काञ्जिकं दोषहारकम्॥" भा.। अचि.।

काञ्जिकवटकः। पुं। खाद्यद्रव्यविशेषे। কাঁজীবড়া। तत्पाकप्रणाली यथा—"मन्थनी नूतना धार्य्या कटुतैलेन लेपिता। निर्म्मलेनाम्बुना पूर्य्या तस्यां चूर्णं विनिक्षिपेत्। राजिकाजीरलवणहिङ्गुशुण्ठीनिशाक्ततं। निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत्। ततो दिनत्रयादूर्द्धमम्लाः स्युर्वटका ध्रुवम्।" अयं रुच्यो वातघ्नः श्लेष्मकरश्च। भा.।

काञ्जिकषट्पलघृतम्। क्ली। आमवाते घृतम्। पाठः—"हिङ्गु त्रिकटुकं चव्यं माणिमन्थं तथैव च। कल्कान् कृत्वा च पलिकान् घृतप्रस्थं विपाचयेत्। आरणालाढ़कं दत्त्वा तत्सर्पिर्जठरापहं।......। घृत ৪ শ. কাঁজি ১৬শ.। কল্ক—হিং, শুঁট, পিপুল, মরিচ, চই এবং সৈন্ধব-লবণ প্রত্যেকে ১ প.। একত্র পাক। च.द.।

काञ्जिका। स्त्री। काञ्जिके। रा.नि.व.१५। लघुजीवन्त्याम्। पलाशीलतायाम्। रा.नि.व.३।

काञ्जितैलम्। क्ली। काञ्जिकविशेषे। गुणाः—"काञ्जिकं काञ्जितैलञ्च पलितं वातकारकं। दाहकं गात्रशैथिल्यं भक्षणान्न च मर्द्दनात्॥" रा.नि.व.१५। [ल दन्ती। र.मा.।

काञ्जिपत्रिका। स्त्री। कृष्णदन्तीक्षुपे। का-

काञ्जी। स्त्री। महाद्रोणपुष्प्याम्। বড় ঘল-ঘাসা। रा.नि.व.५। काञ्जिके। अ.टी.। भार्ग्यां। বামুনহাটী। र.मा.।

काटुकम्। क्ली। कटुतायाम्।

काठः। पुं। पाषाणे। त्रिका.।

काठिनः। पुं। खर्ज्जूरवृक्षे। [११।

काठिन्यफलः। पुं। कपित्थवृक्षे। रा.नि.व.

काठोडुम्बरः। पुं। काष्ठोदुम्बरिकायाम्। কাকডুমুর। र.सा.सं.कुष्ठ.चि.।

काणः। पुं। काके। त्रि। एकचक्षुषि। "काणः काकैकचक्षुषि।" मे.णद्विकं।

काणकपोतः। पुं। कपोतभेदे प्रतुदजातीये। गुणाः—"कषायः स्वादुलवणः गुरुः काणकपोतकः।" सु.सू.४६अ.। [रवरसे।

काणभागः। पुं। त्रिभागे। भैष.कालाग्निभै-

काणा। स्त्री। काकोल्याम्। काकिन्याम्। पिप्पल्यां। च.द.दार्व्वादौ। "काणाह्वकरकिरात।"

काण(णू)कः। पुं। करटे। বাবুই। हंसभेदे। कुक्कुटे। वायसे। उणा.। [स्त्रियः पुत्रे।

काणेयः (रः)। त्रि। काणे। पुं। एकनेत्र-

काण्डः। पुं,क्ली। तरुप्रकाण्डे। গাছের গুঁড়ি। रा.नि.व.२। दीर्घास्थिनि। লম্বা হাড়। शरे। प.मु.। जले। मे.डद्विकं। धान्यनाले। है.च.।

काण्डकः। पुं। बालुककर्कट्याम्। वै.निघ.।

काण्डकटुकः। पुं। कारवेल्लके। উচ্ছেগাছ। रा.नि.व.३। [नि.व.४। श्वेतापामार्गे। वै.निघ.।

काण्डकण्टः (कः) पुं। अपामार्गक्षुपे। रा.

काण्डक(का)ण्डकः। पुं। वदरीवृक्षे। वै.निघ.। काशतृणे। কেশে। रा नि.व.८।

काण्डका। स्त्री।(Cucumis utilissimus.) करालत्रिपुटायाम्। তেওড়া। वालुकीनामकर्कट्याम्। अलाव्वाम्। रा.नि.व.१६।

काण्डका(की)रम्। क्ली। गुवाके। श.मा.।

काण्डकीलकः। पुं। The tree called symplocos Recemosa. लोध्रद्रुमे। रा.नि.व.६।

काण्डखेटः । त्रि । अधमे । हला. ।
काण्डगुड़ः (ण्डः) । पुं । गुण्डतृणे । रा.नि.व.८ । त्रिधारातृणे । वै.निघ. । [२६अ. ।
काण्डचित्रा । स्त्री । सर्पजातिभेदे । वा.उ.
काण्डणी । स्त्री । सूक्ष्मपर्णीलतायाम् । রামদূতী । श.च. ।
काण्डतिक्तः (क्तः) । पुं । A kind of gentian. (Gentiana cheraytr.) किरातत्तिक्ते । চিরেতা । रा.नि.व.६ । [याम् ।
काण्डनी । स्त्री । रामदूत्याम् । नागवल्लीलता-
काण्डनीलः । पुं । लोध्रे । रा.नि.व.६ ।
काण्डपटः । पुं । तिरस्करिण्याम् । हे.च. ।
काण्डपुङ्खा । स्त्री । शरपुङ्खायाम् । रा.नि.व.४ ।
काण्डपुष्पम् । क्ली । (Artemisia Indica.) दौना इति प्रसिद्धे सुगन्धपुष्पविशेषे । দোনাপুষ্প । श.च. ।
काण्डभग्नः । पुं, क्ली । A fracture or dislocation of the bones or limbs. A fracture of either of the extremities. अस्थिभङ्गविशेषे । तद्द्वादशविधं—कर्कटकाश्वकर्णचूर्णितपिच्चितास्थिच्छलितकाण्डभग्नमज्जानुगतातिपातितवक्रच्छिन्नपाटितस्फुटितभेदेन । तेषां विशेषं पर्य्याये द्रष्टव्यम् । 'खल्लेत प्रकम्पमानं काण्डभग्नत्वम् । श्वयथुबाहुल्यं स्पन्दनविवर्त्तनस्पर्शासहिष्णुत्वमवपीड्यमाने शब्दः स्रस्ताङ्गता विविधवेदनाप्रादुर्भावः सर्व्वास्ववस्थासु न शर्म्मलाभश्च ।' सु.नि. १५अ. ।
काण्डभङ्गः । पुं । अस्थिभङ्गे ।
काण्डमध्या । स्त्री । काण्डवल्ल्याम् । वै.निघ. ।
काण्डरुहा । स्त्री । कटुक्याम् । प.मु. ।
काण्डवः । पुं । केमुकवृक्षकन्दे । वै.निघ. ।
काण्डवल्ली । स्त्री । कारवेल्लीलतायां । করলা, উচ্ছে গাছ । काण्डवेलि इति महाराष्ट्रादौ ख्याता । हिं काण्डवेल । मं काण्डवेलि, मणिगुड़वल्लि । सा त्रिधारा चतुर्धारा चेति द्विभेदा । सा. गुणाः—"कटुका तिक्ता चोष्णा सरा मता । पित्तला च कफं गुल्मं लूतां दुष्टव्रणं तथा । श्लीहोदराग्निमान्द्यानि शूलं वातञ्च नाशयेत् । मलस्तम्भहरा चैव… ॥" त्रिधारागुणाः—"सरा लघ्व्यग्निदीपनी । रूक्षोष्णा मधुरा वातश्लेष्मार्शःकफनाशिनी । गुणास्त्वन्ये तु विज्ञेयाः पूर्व्वोक्तकाण्डवल्लिवत् ॥" चतुर्द्धारगुणाः—"भूतोपद्रवशूलघ्ना । अत्युष्णाध्मानवातञ्च तिमिरं वातरक्तकं । अपस्मारं वातरोगं नाशयेत् ।" वै.निघ. । रा.नि.व.३ । See कारवेल्लः । [व.३ । सोमवल्ल्याम् । वै.निघ. ।
काण्डशाखा । स्त्री । मद्दिषवल्ल्यां । रा.नि.
काण्डसन्धिः । पुं । ग्रन्थौ । পাব, গিঁট् । रा.नि.व.७ ।
काण्डहिता । स्त्री । लोध्रवृक्षे । वै.निघ. ।
काण्डहीनः । पुं । लोध्रे । रा.नि.व.६ । क्ली । भद्रमुस्तायाम् । श.च. ।
काण्डा । स्त्री । मुषल्यां । তালমূলী । प.मु. ।
काण्डिकः (का) । पुं, स्त्री । लङ्कानामधान्यविशेषे । তেওড়া । रा.नि.व.१६ । अलाव्वाम् । (का) पलाशीलतायाम् । वै.निघ. ।
काण्डिनी । स्त्री । हस्तिशुण्डीलतायां । হাতিশুঁড়ে । प.मु. ।
काण्डीरः । पुं । अपामार्गे । कारवल्लीलतायां । উচ্ছে লতা । रा.नि.व.३ । च.चि.८अ. ।
काण्डीरा (री) । मञ्जिष्ठायाम् । र.मा. । कारवेल्लके । अमृतस्रवायाम् । वै.निघ. ।
काण्डेरः । पुं । तण्डुलीयशाके । নটে, কাঁটানটে । भा.पू.१भ.शाकव. । [লের গাছ । र.मा. ।
काण्डेरी । स्त्री । नागदन्तीवृक्षे । মাকাল ফ-
काण्डेरुहा । स्त्री । कटुक्याम् । र.मा. ।
काण्डेक्षुः । पुं । श्वेतेक्षौ । रा.नि.व.१४ । अयं तापसेक्षुगुणः वातकोपनश्च । भा. । कृष्णेक्षौ । কাঁজলে ইক্ষু । सु.सू.२८अ. । काशतृणभेदे । र.मा. । खगगड़े । খাগড়া । प.मु. । कोकिलाक्षवृक्षे । কুলেখাড়া । हिं तालमाखना । अम. । लटा इति । च.सू.४अ. ।
काण्डोलः । पुं । उष्ट्रे ।
कातरः (लः) । पुं । (Cyprinus catla.) मत्स्यविशेषे । কাৎলা মাছ । श.र. । गुणाः—

मधुरो गुरु: त्रिदोषघ्नश्च । रा.नि.व.१६ । उष्णो मधुर: गुरुपाक: त्रिदोषघ्नश्च । राज. ।

कान्टषम् । क्ली । कत्तृणे । रोहिषतृणे । सुगन्धतृण, রামকর্পূর । रा.नि.व.८ ।

कातोली । स्त्री । कोहलसुरायां । "यवमाषादिपिष्टोत्था कातोली कोहला सुरा।" वाचस्पति:।

कात्यायनी । स्त्री। काषायवस्त्रे । मे.नचतुष्कं।

कादम्ब: । पुं। कदम्बवृक्षे । वै.निघ.। कलहंसे । स च अवधर्गीव: कृष्णधूसरपच: । বালহাঁস । हिं करवा । मांसगुणा: —शीतं स्निग्धं रक्तपित्तघ्नं वृष्यं वातघ्नश्च । सु.सू.४६ष. । वातरक्तपित्तघ्नं मेदकं शुक्रलश्च । राज. । स्थावरविषान्तर्गततन्नामकपुष्पविषे । सु.कल्प.२ष. । See पुष्पविषम् । क्ली । कदम्बपुष्पे ।

कादम्बकर: । पुं । कदम्बवृक्षे । वै.निघ. ।

कादम्बर: । पुं,क्ली। नानाद्रव्यकदम्बकृते मद्ये । "नानाद्रव्यकदम्बेन मद्यं कादम्बरं स्मृतं ।" राज.। गुणा: —मधुरं पित्तभ्रममदघ्नञ्च । रा.नि.व.१४ । कदम्बपुष्पोत्थमद्ये । मे.। क्ली । दधिसारे । हे.च. । शीधौ । विश्व. ।

कादम्बरी । स्त्री । नानाद्रव्योत्पन्नमद्यसामान्ये । रा.नि.व.१४ । प्रसन्नाया: सुराया घनतरा कादम्बरी । यथा —"कादम्बरी तु कथिता नानाद्रव्यकदम्बजा । कादम्बरी सुमधुरा श्रमपित्तप्रणाशिनी॥" अत्रि.। "तत्र कादम्बरी घना ।" प.प्र.३ख.। वारुणीसुरायाम् । कोकिलायाम् । शारिकापच्चिण्याम्। मे.रचतुष्कं । कदम्बपुष्पोत्थमद्ये । सपुष्पकदम्बतरुकोटरस्थवृष्टिजले । [মেতা । र.मा. ।

कादम्बरीवीजम् । क्ली । सुरावीजे । মদের

कादम्बर्य्य: । पुं । धाराकदम्बे । वै.निघ. । कदम्बवृक्षे। रा.नि.व.६ । जटा. । क्ली। पद्मे ।

कादम्बा । स्त्री । कदम्बपुष्प्याम् । মুণ্ডীরী । श.च. ।

कादम्बिक: । त्रि । भोज्यद्रव्यकारके ।

कादिरम् । क्ली । खदिरसारे । रा.नि.व.८ ।

काद्रवेय: । पुं । सर्पे । रङ्गे । मे. ।

कानकम् । क्ली । जैपालवीजे । জয়পাল । धुस्तूरवीजे । द्रव्याभिधानम् ।

कानकचूर्णम् । क्ली । मुखरोगे हितं । गृहधूमो यवचार: पाठा व्योषं रसाञ्जनं। तेजोह्वा त्रिफला लौहं चित्रकश्चेति चूर्णितं । सचौद्रं धारयेदास्ये··· । ঝুল, যবক্ষার, আকনাদিমূল, ত্রিকটু, রসাঞ্জন, চই, ত্রিফলা, জারিতলোহ বা অগুরু, চিতামূল সমভাগ । सा.कौ. ।

काननम् । क्ली । वने ।

काननारि: । शमीवृक्षे । শাঁই গাছ । श.च.।

काननौका: । पुं । कपौ । वानरे ।

कानीन: । पुं । लोध्रवृक्षे । श.च. ।

कान्तम् । क्ली । कुङ्कुमे । कान्तलौहे । रा.नि.व.१२।१३ । पुं । नन्दीवृक्षे । তুন্ গাছ । रा.नि.व.१२ । चक्रवाके । रा.नि.व.१६ । चुम्बकलौहे । চুম্বকলোহ। भा.। वर्षावसन्तयो: । रा.नि.व.२१। हिज्जलवृक्षे । रा.नि.व.८ । चन्द्रे । श.र. । चन्द्रकान्तमणौ । सूर्य्यकान्तमणौ । मे. ।

कान्त: । पुं, क्ली । चन्द्रे । श.र. । चन्द्रकान्तसूर्य्यकान्तायस्कान्तेषु । मे. । कृष्णलौहे । कुङ्कुमे । रा.नि.व.१२ । लौहे । रा.नि.व.१३ ।

कान्तपक्षी (क्षिन्) । पुं । मयूरे । श.च. ।

कान्तपाषाण: । पुं । Load stone. चुम्बकनामप्रस्तरे । চুম্বক পাথর । गुणा: —शीतो लेखनो विषदोषहा । मेदं पाण्डुं चयं कण्डूं मोहं मूर्च्छाञ्च नाशयेत् । वै.निघ. । तच्छुद्धि: यथा—कान्तपाषाणं चूर्णीकृत्य महिषीदुग्धेन गव्यघृतेन च लौहपात्रे पचेत् । विपाच्य लवणे चारे शोभाञ्जनरसे च चिपेत् । अथ दोलायन्त्रे महिषीचीरादिभि: वारद्वयं पचेत् । अथाम्लरसेन रौद्रे दिनैकं भावयेत् । "चूर्णितं कान्तपाषाणं महिषीचीरसंयुतं । विपचेदायसे पात्रे गोघृतेन समाहितं । लवणे च तथा चारे शोभाञ्जनरसे चिपेत् । अम्लवर्गस्य तोयेन दिने घर्म्मे विभावयेत् । तथैव दोलिकायन्त्रे द्विवारं पाचयेत्सुधी: । कान्तपाषाणशुद्धौ तु रसकर्म्म उपाचरेत् ॥" चन्द्रिका । र.सा.सं. ।

कान्तपुष्प: । पुं । कोविदारवृक्षे । রক্তকাঞ্চন বৃক্ষ । रा.नि.व.१० । See काञ्चनार: ।

कान्तलक: । पुं । (Cedrela Toona.) तुन्नवृक्षे । তুঁদ । नन्दीवृक्षे । গয়া অশ্বত্থ । प.मु.।

कान्तलो(लौ)हः । पुं, क्ली । स्वनामप्रसिद्ध-लौहे । কান্তিলোহ । तच्च भ्रामकचुम्बकरोमक-स्वेदजभेदेन चतुर्द्धा । तस्य लक्षणम्—"यत्पात्रे न प्रसरति जले तैलविन्दुः प्रतप्ते हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः । तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं कृष्णाङ्गः स्यात् सजल-चणकः कान्तलौहं तदुक्तम् ॥" रा.नि.व.१३ । "स्वादुर्यच्च भवेन्निम्बकल्को रात्रिन्दिवोषितः। कान्तं तदुत्तमं यत्र रूप्येणावर्त्तितं मिलेत् ॥ पात्रे यस्मिन् विसरति जले तैलविन्दुर्न सिक्तो हिङ्गुर्गन्धं विसृजति निजं रुषितं निम्बकल्कैः । पाच्यं दुग्धं भजति शिखराकारतां नैति भूमौ कान्तं लौहं तदिदमुदितं लक्षणोक्तं न चान्यत् ॥" इति परीक्षा । सुखबोधः। गुणाः—"गुल्मोदरार्शः शूलाममामवातं भगन्दरं । कामलाशोथकुष्ठानि क्षयं कान्तमयी हरेत् । प्लीहानमम्लपित्तञ्च यकृच्चापि शिरोरुजम् । सर्व्वान् रोगान् विजयते कान्तलौहं न संशयः । बलं वीर्य्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत् ॥" भा. पू.१भ.धातुव. ।

कान्ता । स्त्री । त्रिसन्धिपुष्पवृक्षे । কৃষ্ণকেলি । रा.नि.व.१० । श्वेतदूर्व्वायाम् । वाराहीकन्दे । आकाशवल्ल्याम् । আলোকলতা । मूषिकपर्ण्याम् । মূষাকাণী । वै.निघ. । प्रियङ्गौ । मे.तद्विकं । रेणुकायाम् । রেণুক । नागरमुस्तायाम् । स्थूलैलायां । रा.नि.व.६ । नार्य्यां । अम. ।

कान्ताङ्घ्रि(चरण)दोहदः । पुं । अशोकवृक्षे । त्रिका. । [रा.नि.व.१३ ।

कान्तायसम् । क्ली । कान्तलौहे । अयस्कान्ते ।

कान्तारः (कः) । पुं, क्ली । रक्तकाञ्चनवृक्षे । रा.नि.व.१० । रक्तेक्षुविशेषे । কাজলী আখ্ । हिं कातारे । प.मु. । इक्षुसाधारणे । वंशे । रा. नि.व.१४ । आरग्वधवृक्षे । वै.निघ. । क्ली । विले । छिद्रे । मे. । औपसर्गिकरोगे । पथि । हे.च. ।

कान्ताराश्मजम् । क्ली । कान्तलौहे । वै. निघ. ।

कान्तारिः (रिका) (री) । पुं, स्त्री । मक्षिकाविशेषे । सु.कल्प.८अ. । See मक्षिका । इक्षुविशेषे । কাজলী ইক্ষু । राज. ।

कान्तारेक्षुः । पुं । इक्षुविशेषे । কাজলী ইক্ষু । हिं कातारे । तें गोप्पयडवि । गुणाः—कषायरसः शतपर्व्वकाद्दीनगुणः । गुरुः हृष्यः शुक्रलः श्लेष्मलः बृंहणः सरश्च । भा. । वंशकेक्षुगुणः इति । सु.सू.४६अ. । मधुरः लघुः क्षाररसः कफवातकरश्च । राज. । वा. । [अश्वत्थ । वै.निघ. ।

कान्तालकः । पुं । नन्दीवृक्षे । तुन्द, गया ।

कान्तिः । स्त्री । वाराहीकन्दे । महासर्जवृक्षे । वै.निघ. ।

कान्तिदम् । क्ली । पित्ते । श.च. ।

कान्तिदा । स्त्री । सोमराज्याम् । শাকুচ । रा.नि.व.४ । See वाकुची ।

कान्तिदायकम् । क्ली। कालीयकचन्दनवृक्षे । जटा. । त्रि । शोभादायके ।

कान्तिवृक्षः । पुं । महासर्ज्जवृक्षे । वै.निघ. ।

कान्तोली । स्त्री। कुष्माण्डसुरायाम् । वै.निघ. ।

कान्दम् । क्ली। पक्वान्नविशेषे । মিঠাই । श.च. ।

कान्दर्पिकम् । क्ली । वाजीकरणे । श.च. ।

कान्दविकः । त्रि । आपूपिके । अम. ।

कान्दाविषम् । क्ली । विषभेदे । श.चि. ।

कान्यजा । स्त्री । नलीनामगन्धद्रव्ये । श.च. ।

कापथम् । क्ली । उशीरे । अ.टी.भ. ।

कापालम् । क्ली । अष्टादशकुष्ठान्तर्गतवातिककुष्ठे । See कपालकुष्ठं । पुं । कण्टकलतायाम् । कालियाकड़ा इति लोके । र.मा. । कपालास्थनि । कर्कटीभेदे । वै.निघ. ।

कापाला । स्त्री । रक्तत्रिसन्धिकायाम् । লাল দোপাটী । वै.निघ. । [গুড়কাঁউলী । रत्ना. ।

कापालिः । पुं, स्त्री । अहिंस्रायाम् । কাঁটা

कापालिकम् । क्ली । कुष्ठरोगविशेषे । See कपालकुष्ठं ।

कापाली । स्त्री । विड़ङ्गे । रा.नि.व.६ । कण्टकपाल्याम् । কাঁটা গুড়কাঁউলী । प.मु. ।

कापिकेक्षणः । पुं । कोकिलाक्षक्षुपे । কুলেথাড়া । रा.नि.व.५ ।

कापित्थम् । क्ली । कपित्थफले ।

कापिशम् । क्ली । द्राक्षामद्यविशेषे । हे.च. ।

कापिशायनम् । क्ली । मद्यविशेषे । मधुनि । रत्ना. । जटा. । द्राक्षाकृतमद्ये । वै.निघ. ।

कापिशायनः । त्रि । द्राक्षानिर्म्मिते ।

कापिशायनी । स्त्री । द्राक्षायाम् । वै.निघ. ।

कापोतः । पुं । सर्ज्जिक्षारे । সাচিক্ষার । र. मा.। क्ली । रुचकलवणे । সচল লবণ । मे.तत्रिकं । स्रोतोऽञ्जने । नीलाञ्जने । সুর্মা । हे.च. ।

कापोतवक्रकः । पुं । कपोतवङ्कायां । अयं शिरीषसदृशस्वल्पपत्रः । ब्रह्मीशाक । च.द.शीर तरादौ ।

कापोताञ्जनम् । क्ली । सौवीराञ्जने । स्रोतोऽञ्जने । নীলসুর্মা । भा. । अम. । [स्थान.२अ.।

काफलः । पुं । कट्फलवृक्षे । श.र. । अत्रि.२

कावावशर्करा । स्त्री । विड़ङ्गवत् फलविशेषे । কাবাবচিনি । मुस्तकादिमोदके ।

कामः । पुं । मदने । इच्छायाम् । रत्ना. । दमनकवृक्षे । দনা । प.मु. । महाराजचूतवृक्षे । रा. नि.व.११। वनितापरिष्वङ्गादौ । च.सू.१अ.। क्ली । शुक्रे । मे.मद्विकं ।

कामकला (वटी) । स्त्री । वातरक्ते हिता । पाठः—"अङ्कोलमूलं त्रिफला कुण्डली मरिचं निशा। सप्तच्छदा कुटी कुष्ठं प्रत्येकं कार्षिकम्भवेत्॥ विड़ङ्गं मुस्तकं काचं तालकं टङ्कणं त्रिवृत् । रसगन्धकलौहानां प्रत्येकार्द्धपलं क्षिपेत् ॥ गुग्गुलुं त्रिपलं दत्त्वा घृतेन परिपेषितम् । वटी कामकला नाम गहनानन्दभाषिता । चतुर्माषा वटी खाद्या गोमूत्रेण जड़ीकृता ॥" अङ्कोलमूलादिचूर्णं प्र. २ तो. विड़ङ्गादिचूर्णं प्र. ४ तो. शोधितगुग्गुलुः २४ तो. एकत्र घृतेन मर्द्दनम् । कुण्डली गुड़ूची, कुटी मुरामांसी, काचः कृष्णलवणं ।:रस.र. ।

कामकलाख्यरसः । पुं । वाजीकरणौषधे । पाठः—"मृतसूताभ्रकं स्वर्णं वाजिगन्धामृतारसैः । मुषलीकदलीकन्दद्रवैस्तत् मर्द्दयेद्दिनम् । रुद्ध्वा लघुग्निना पश्चात् मर्द्यं पूर्व्वोक्तकैर्द्रवैः । पुनर्देयं पुनर्मर्द्यमेवमष्टपुटैः पचेत् । शाल्मलीजातनिर्यासैर्युतं माषञ्च भक्षयेत् । गोक्षीरैर्मर्कटीवीजैः पलार्द्धं पाययेदनु ॥" रस.र.वाजी.चि. ।

कामकान्ता । स्त्री। राजनैपाल्यां । মনছাল।

मल्लिकापुष्पवृक्षे । মল্লিকাবিশেষ । वै.निघ. ।

कामकाली । स्त्री । जलपक्षिविशेषे । च.सू. २७अ. । [नि.व.१० ।

कामखङ्गदला । स्त्री । सुवर्णकेतक्याम् । रा.

कामगा । स्त्री । कोकिलायाम् । वै.निघ. ।

कामचारिणी । स्त्री । सुगन्धलताविशेषे । রাস্না । वै.निघ. ।

कामचारी (इन्) । पुं । कलविङ्के । वै.निघ.।

कामज्वरः । पुं । कामजन्यज्वरे । लक्षणं— "कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् ।" मा. नि.ज्व. ।

कामजननी । स्त्री । नागवल्ल्याम् । वै.निघ. ।

कामजा । स्त्री । कर्णाटकान्तःप्रसिद्धमहाक्षुपे । तस्या वीजे च । गुणाः—"कामजा मधुरा बल्या कामवृद्धिकरी मता । इन्द्रियाणां तृप्तिकरी रुच्या चैव प्रकीर्त्तिता ॥" वै निघ.। तद्वीजमपि तद्गुणम्। रा.नि.व.५ ।

कामजानः (निः) । पुं । कोकिले । श.र.।

कामतरुः । पुं । वन्दाकवृक्षे । পরগাছা । वै. निघ. ।

कामतालः । पुं । कोकिले । त्रिका. ।

कामदा । स्त्री । कामधेनौ । नागवल्लीलतायाम् । हरीतक्याम् । मे. ।

कामदीपकरसः । पुं । वाजीकरणौषधविशेषे । तस्य पाठः—"सितपुनर्नवामूलं शाल्मलीसत्त्वभावितं । शाल्मलीसत्त्वनिर्यासं दद्यादत्र रसं समं । गन्धकं तत्समं दद्याद्भक्षयेत्तुर्य्यमानकं । अनुपानं प्रकुर्व्वीत गवां क्षीरपलद्वयम् । अयं चाण्डालिको योगोऽप्यगम्यापि च गम्यते ॥" শ্বেতপুনর্ন্যার মূল, মোচরস, পারা, গন্ধক সমভাগ শাল্মলীর ছালের রসে মাড়িয়া বটী করিবে। रस.र. ।

कामदूतरसः । पुं । वाजीकरणे हितः । पाठः—"सूतं गन्धं कान्तभस्मापि तुल्यं यामं नीरैः शाल्मलीसम्भवोत्थैः । गोलङ्कृत्वा वेष्टयित्वान्धमूषे राज्यं पक्त्वा काचकूप्यां निधाय । भूकुष्माण्डं नागवल्लीञ्च पिष्ट्वा तोयं दद्याद्भक्तिमेकान्तु यत्नात् । सिद्धः सूतः कामदेवस्य वज्रं मध्वाज्याभ्यां योजयेत्तत्रिसत्रं॥

खण्ड दुग्धञ्चानुपाने च दद्यात् ।''... । रस.र. ।

कामदूता । स्त्री । मनःशिलायाम् । वै.निघ. ।

कामदूतिः (का) (ती) । स्त्री । मनःशिलायां । पाटलवृचे । श.र.। कोकिलायाम् । (का) नागदन्तीवृचे । प.मु. ।

कामदेवघृतम् । क्ली । रक्तपित्ते । क्वाथ्यद्रव्यं —अश्वगन्धा १००प. गोचुरं ५० प. शतावरीभूमिकुष्माण्डशालपर्णीबलाश्वत्थशुङ्गापद्मवीजपुनर्नवागाम्भारीफलमाषवीजानीति नव द्रव्याणि प्रत्येकं१० प. वारि २५६ श. पाकशेषः ६४ श. । पुण्ड्रकेचुरसः १६ श. दुग्धं १६ श. । कल्कद्रव्यं—द्राचादिजीवनीयान्तानां प्रत्येकं २ तो. शर्करा २ प. एभिर्यथावत् घृतप्रस्थं (४ श.) पाच्यम् । जीवनीयं जीवनीयदशकम् । यथा – जीवक-ऋषभक मेदा-महामेदा-काकोली-चीरकाकोली जीवन्ती मधुक-ऋद्धि-वृद्धयः । द्राचा पद्मकाष्ठ-कुष्ठ-पिप्पली रक्त-चन्दन बालक-नागकेसर-शुकशिम्बीवीज नीलोत्पल-श्यामानन्तमूलानि च । च.द.र.पि.चि. । रस.र. ।

कामदेवरसः । पुं । वाजीकरणौषधि । রস-সিন্দুর ৩ তো. স্বর্ণভস্ম ১ তো. শিমুলমূলের রস ও কলার এটের রসে এক দিন মাড়িবে ; পরে উহার সহিত চিনি, দ্রাক্ষা, তালমূলী, গোক্ষুরবীজচূর্ণ প্রত্যেকে ৩ তো. মিশাইয়া মধু, দুগ্ধ ও ইক্ষুরসে মাড়িয়া তাপে শুষ্ক করিবে ; কুলেখড়াবীজচূর্ণ, আমলার রস ও মধু মিলিত ১২ তোলা মিশাইয়া সমস্ত শিমুলের রসে একত্র মর্দন করিবে। মাত্রা ৮ মা. । অনুপান গব্যদুগ্ধ ।

कामना । स्त्री । वन्दाके । वै.निघ.। [वै.निघ.।

कामनीड़ा । स्त्री। कस्तूरिकायां । मृगनाभि ।

कामपर्णिका (र्णी) । स्त्री । आहल्यक्षुपे । हिं आहल्य । वै.निघ. । [नि.व.११ ।

कामपा(फ)लः । पुं । महाराजचूते । रा.

कामप्रियकरी । स्त्री । अश्वगन्धायाम् । वै. निघ. ।

कामफला । स्त्री । कदलीवृचे । वै.निघ. ।

काममलोलुपः (भः) । पुं। सद्वैद्ये। वै.निघ.।

काममोदी । स्त्री । कस्तूर्याम् । मृगनाभि ।

रा.नि.व.१२ । अत्र स्थाने मोदिनीति पुस्तकान्तरे दृश्यते ।

कामयाना । स्त्री । गर्भिण्याम् ।

कामराजमोदकः । पुं । वाजीकरणौषधि । দুগ্ধ শোধিত সবীজ সিদ্ধিচূর্ণ ॥০ শ. ঘৃত ॥০ শ. মহিষদুগ্ধ ৪ শ. চিনি ২ শ. একত্র পাক করিয়া পাক শেষ হইলে জীরক, শুঠী, ধনে, গুড়ত্বক্, তেজপত্র, এলাইচ, মরিচ, জায়ফল, জয়িত্রী, লবঙ্গ, মউরী, পিপুলচূর্ণ মিলিত ৩২ তো. বিকড়কবীজচূর্ণ ৬ তো. লৌহ, অভ্র, পারা ও গন্ধক (কজ্জলি) প্রত্যেকে ২ তো. প্রক্ষেপ দিয়া মধুর সহিত মাখিয়া রাখিবে । प्रयोगा. ।

कामरूपिणी । स्त्री। अश्वगन्धायां। रा.नि.व.४।

कामरूपी (इन्) । पुं । शूकरे ।

कामरूपोद्भवा । स्त्री। कृष्णकस्तूर्याम्। কাল কস্তুরী । वै.निघ. ।

कामलः (ला) । पुं, स्त्री । A complaint called jaundice. रोगविशेषे । ন্যাবা, কাঁওল । हिं मं कावील । पाण्डुरोगिणोऽतिपित्तकरद्रव्यसेवनं बाहुल्येन कारणम् । नेत्रत्वक्नखादिहारिद्रं लक्षणञ्च । सा द्विधा कोष्ठाश्रया रक्तादिधात्वाश्रया च । तन्निदानसम्प्राप्तिलक्षणं—"पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते । तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते । हारिद्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः । रक्तपित्तशकृन्मूत्रो भेकवर्णो हतेन्द्रियः । दाहाविपाकदौर्बल्य-सदनारुचिकर्षितः । कामला बहुपित्तैषा कोष्ठशाखाश्रया मता। कालान्तरात् खरीभूता कृच्छ्रा स्यात्कुम्भकामला ॥" मा.नि. । "यवगोधूमशाल्यन्नैरस्त्रैर्जाङ्गलजैर्हितैः । मुद्गाढ़कीमसूराद्यैरेषु भोजनमिष्यते ॥" पथ्यम् । पुं । वसन्तकाले । मरुदेशे । मे. ।

कामलता । स्त्री। लताविशेषे । शिश्ने। ह.च.।

कामलाव्याधिहन्त्री । स्त्री । नागदन्तीवृचे । नागदुलीति लोके । হাতিশুঁড় । वै.निघ.।

कामलिका । स्त्री । कङ्गुधान्ये । श.चि. ।

कामली (इन्) । त्रि । कामलारोगवति ।

कामवती । स्त्री। दारुहरिद्रायां । रा.नि.व.६।

कामवल्लभः । पुं । आम्रवृक्षे । আম গাছ । रा.नि.व ११ । सारसपक्षिणि । रा.नि.व.१९ ।

कामवल्लभा । स्त्री । ज्योत्स्नायां । रा.नि.व.२१ ।

कामवृक्षः । पुं । वन्दाके । গান্দরা । रा.नि.व.५ ।

कामवृद्धिः । पुं, स्त्री । कामजानामसहाक्षुपे । See कामजा ।

कामवृन्ता । स्त्री । पाटलवृक्षे । श.मा. ।

कामशरः । पुं । आम्रवृक्षे । আম গাছ । रा. नि.व.११ । [आम्रवृक्षे । वै.निघ. ।

कामसखः । पुं । वसन्तकाले । रा.नि.व.२१ ।

कामाग्निसन्दीपनरसः । पुं । वृष्याधिकारे रसः । पाठः—"कर्षौ रसो गन्धकमभ्रकञ्च द्विक्षारचित्रं लवणानि पञ्च । शटीयमानीद्वयकीटहारितालीशपत्राण्यपरं द्विकर्षं । जीरं चतुर्जातलवङ्गजातीफलञ्च कर्षत्रयमेव चान्यत् । सहङ्गदारं कटुकत्रयञ्च तथा चतुष्कर्षमितं विबोध । धन्याकयष्टीमधुरी कशेरु फलं पृथक् पञ्च वरी विदारी । बलेभकर्णेभवलात्मगुप्ताफलं तथा गोक्षुरकस्य वीजं । सवीजपत्रेन्द्ररजः समानं समा सिता चौद्रघृतञ्च तुल्यम् । कर्षैकमिन्दोरपि मोदकञ्च कामाग्निसन्दीपनमेतदुक्तम् । वृष्यात्परं वृष्यतमं प्रदिष्टमेतन्निषेव्य मनुजः प्रमदासहस्रं । गच्छेन्न मेढ्रशिथिलत्वमवाप्नुयाच्च नागाधिपं विजयते बलतः प्रमत्तं॥" इत्यादि । রস, গন্ধক, অভ্র, যবক্ষার, সাচিক্ষার, চিতামূল, পঞ্চলবণ, শটী, যমানী, বনযমানী, বিড়ঙ্গ, তালীশপত্র, প্রত্যেকে ২ তো. জীরা, নাগেশ্বর, গুড়ত্বক্, তেজপত্র, এলাইচ, লবঙ্গ, জায়ফল প্রত্যেকে ৪ তো. বীজতাড়কবীজ, ত্রিকটু প্রত্যেকে ৬ তো. ধনে, যষ্টিমধু, মৌরী, কেশুরিয়া, ত্রিফলা প্রত্যেকে ৮ তো. (মতান্তরে ত্রিফলা ১০ তো.) শতমূলী, ভূমিকুষ্মাণ্ড, বেলেড়া, হস্তিকর্ণপলাশ, গোরক্ষচাকুলে, আলাকুশী এবং গোক্ষুরবীজ প্রত্যেকে ১০ তো. সবীজসিদ্ধি চূর্ণ সর্ব্বচূর্ণ সমান । চিনি, ঘৃত ও মধু প্রত্যেকে সর্ব্বচূর্ণ সমান । কর্পূর ২ তো. । कशेरुमूलमिति २यपाठः । प्रयोगा. । सा.कौ. । भैषु. । रस.र. ।

कामाङ्कुशः । पुं । नखे । शिश्ने । त्रिका. ।

कामाङ्गः । पुं । महाराजचूते । जटा. । आम्रवृक्षे । रा.नि.व.११ । श्येनपक्षिणि । বাজ পাখী । वै.निघ. ।

कामाङ्गनाशकरसः । पुं । वाजीकरणौषधे । "शुद्धसूतं समं गन्धं रक्तोत्पलदलद्रवैः । यामं मर्द्यं पुनर्गन्धं पूर्व्वादर्द्धं विनिक्षिपेत् । पञ्चगुञ्जामितं खादेद् रसोऽयं मदनोदयः । समूलं शक्रवीजञ्च मुषली शर्करा समं । गवाक्षीरेण तत्पेयं पलार्द्धमनुपानकं ॥" रस.र. ।

कामाक्षी । स्त्री । लघुकाकमाच्याम् । वै.निघ. ।

कामाता । स्त्री । वन्दायाम् । গান্দড়া । काकमाच्याम् । वै.निघ. ।

कामान्धः । पुं । कोकिले । रा.नि.व.१९ ।

कामान्धा । स्त्री । कस्तूर्य्याम् । মৃগনাভি । रा.नि.व.१२ ।

कामायुः । पुं । गृध्रे वै.निघ. ।

कामायुधः । पुं । महाराजचूतवृक्षे । रा.नि. व.११ । क्ली । शिश्ने ।

कामारिः । पुं । विद्याचीकधातौ । हे.च. ।

कामालिका । स्त्री । मद्ये । वै.निघ. ।

कामालुः । पुं । रक्तकाञ्चने । श.च. ।

कामाह्वः । पुं । राजाम्रे । भा. ।

कामिकः । पुं । कारण्डवपक्षिणि । श.र. ।

कामिनी । स्त्री । स्त्रियाम् । वन्दाकनामक्षुपे । रा.नि.व.५ । दारुहरिद्रायाम् । मदिरायाम् । रा. नि.व.६।१४ ।

कामिनीदर्पघ्नः । पुं । ध्वजभङ्गे रसः । पारदः १ तो. गन्धकः १ तो. कज्जलीकृत्य तथा धुस्तूरवीजचूर्णं १ तो. मिश्रयित्वा धुस्तूरतैलेन मर्द्दयेत् । भैष.ध्वजभ. । [ফুলের গাছ ।

कामिनीपुष्पः । पुं । वृक्षविशेषे । কামিনী

कामिनीप्रिया । स्त्री । मद्यसामान्ये । रा.नि. व.१४ ।

कामिनीशः । पुं । शोभाञ्जनवृक्षे । श.च. ।

कामी (इन्) । पुं । ऋषभकक्षुपे । रा.नि.व.५ ।

चक्रवाके। पारावते। मे.नत्रिकं। सारसविहङ्गमे। रा.नि.व.१८। माधवीलतायाम्। वै.निघ.। चटकपक्षिणि। श.र.। चन्द्रे। त्रिका.। त्रि। कामुके।

कामीकजीव: । पुं। कामजवृक्षे। वै.निघ.।

कामीन: (ल:) । पुं। रामपूगे। त्रिका.।

कामुक: । पुं। अशोकवृक्षे। पुन्नागवृक्षे। माधवीलतायां। मे.। चटके। रा.नि.व.१८। चक्रवाके। कपोते। वै.निघ.। त्रि। कामातुरे।

कामुककान्ता । स्त्री। अतिमुक्तकलतायाम्। মাধবী লতা। रा.नि.व.१०।

कामुका (की) । स्त्री। रक्तमञ्जर्य्यां, अतिमुक्तकलतायाम्। वा.सू.१५अ.। "श्ववकसरसिभार्गी कामुका काकमाची।" वके। त्रि। वृषस्यन्त्याम्। अम.।

कामुद्रा । स्त्री। मुद्गपर्ण्यां। মুগানী। रत्ना.।

कामेश्वरमोदक: । पुं। ग्रहण्यधिकारे। पाठ: —"धात्रीसैन्धवकुष्ठकट्फलकणाशुण्ठीयमानीद्वयं यष्टीजीरकयुग्मधान्यकशठीशृङ्गीवचा (यवा) केशरम्। तालीशं त्रिसुगन्धिकं समरिचं पथ्याक्षमेभि: समं। चूर्णीकृत्य मनाक् स्ववीजसहितं भृष्टा तु शक्राशनं॥ सर्व्वेषां द्विगुणां सितां सुविमलां यत्नाद्भिषङ्क्षिपेत्। क्षौद्रञ्चापि घृतं प्रशस्तदिवसे कुर्य्यात् शुभान् मोदकान्॥ कर्पूरैरवचूर्णितानपि हितान् दत्वा तिलान् भर्ज्जितान्। गोप्योऽयं क्षितिमण्डले मितधियां पाषण्डिनामग्रत:।" रसरत्नाकरे अयं वाजीकरणे उक्त:। আমলকী, সৈন্ধব, কুড়, কট্‌ফল, পিপুল, শুঁট, যমানী, বনযমানী, যষ্টিমধু, ধনে, জীরক, কৃষ্ণজীরক, শটী, কাঁকড়াশৃঙ্গী, বচ, নাগেশ্বর, তেজপত্র, এলা, তালিশপত্র, গুড়ত্বক্, মরিচ, হরীতকী, বহেড়া প্রত্যেকে চূর্ণ সমভাগ। ভর্জিত বীজ সহিত সিদ্ধি চূর্ণ সর্ব্ব চূর্ণ সমান। ঐ সকলের দ্বিগুণ চিনি। জল পাকযোগ্য দিবে। পাকশেষে ঘৃত ও মধু কিঞ্চিৎ মাখিবে। বটী ॥০ তো.। বাসনার্থ ভাজা তিল চূর্ণ ও কর্পূর দিবে। अन्य: वाजीकरणाधिकारे। "चूर्णांशं गगनं घनार्द्धविमलं गन्धञ्च कुष्ठामृता मेथी मोचरसी विदारिमुषलीगोक्षूरकक्षेक्षुर:। भीरुश्चैव कशेरुकं यमानिका (?) तालाङ्कुरं धान्यकं यष्टीनागबलातिला मधुरिका जातीफलं सैन्धवम्॥ भार्गी कर्कटशृङ्गकं त्रिकटुकं जीरद्वयं चित्रकं चातुर्जातपुनर्नवाकरिकणाद्राक्षाशठीकट्फलम्। शाल्मल्यङ्घ्रिफलत्रिकं कपिभवं वीजं समं चूर्णयेत् चूर्णार्द्धा विजया सिता द्विगुणिता मध्वाज्यमिश्रन्तु तत्। कर्षार्द्धा गुड़िकाथ कर्षमथवा सेव्या सता सर्व्वदा॥" কুড়, গুলঞ্চ, মেতি, মোচরস, ভুঁইকুম্‌ড়া, তালমূলী, গোক্ষুরবীজ, কুলেখাড়াবীজ, শতমূলী, কেশুর, যমানী, তালাঙ্কুর, ধনে, যষ্টিমধু, গোরক্ষচাকুলিয়া, তিলতণ্ডুল, মৌরী, জায়ফল, সৈন্ধব, বামনহাটী, কাঁকড়াশৃঙ্গী, শুঁট, মরিচ, পিপুল, জীরা, কৃষ্ণজীরা, চিতামূল, গুড়ত্বক্, তেজপত্র, এলা, নাগেশ্বর, পুনর্নবা, গজপিপুল, দ্রাক্ষা, কট্‌ফল, শটী, শিমুলমূল, ত্রিফলা, আলাকুশীবীজ প্রত্যেকে চূর্ণ সমভাগ। সর্ব্বচূর্ণ চতুর্থাংশ অভ্র। অভ্রের অর্দ্ধেক গন্ধক। এই চূর্ণ সমষ্টির অর্দ্ধেক সিদ্ধি চূর্ণ এবং সর্ব্ব দ্বিগুণ চিনি। মাত্রা ১ তো.। भैष.।

कामेश्वररस: । पुं। पाण्डुरोगे। पाठ:— "पलं सूतं पलं गन्धं पथ्याचित्रकयो: पलं। सुस्तेलापत्रकाणाञ्च प्रति सार्द्ध पलं क्षिपेत्। त्र्यूषणं पिप्पलीमूलं विषञ्चैव पलम्पलम्। नागकेसरकर्षैकं एरण्डस्य पलं तथा। पुरातनगुड़ेनैव तुल्येनैव विमर्द्दयेत्। मर्द्दयेत्कनकद्रावै: यामैकं वा घृतान्वितं। गुड़िकां वदरास्थ्याभां कारयेद्भक्षयेन्निशि। शोथपाण्डुहर: सोऽयं रस: कामेश्वर: स्वयं।" अत्र वह्नि: चित्रक: पत्रं तेजपत्रम्। तुल्येन सर्व्वचूर्णसमेन। कनकद्रावै: धुस्तूररसै:। र.सा.सं.। रस.र.।

कामेष्ट: । पुं। राजाम्रवृक्षे। रा.नि.व.११।

कामोपजीव: । पुं। कामवृद्धिनाममहाक्षुपे। रा.नि.व.५।

काम्पिल्य: (ल्ल:) । पुं, क्ली। (Malotus philippensis.) A perfume called Gundarochani. Syn. Rottlera tinctoria. गुण्डारोचनीनामसुगन्धद्रव्ये। কমলাগুঁড়ি। हिं कंवीला। मं कमिला, कपीला। गुणा: —कफपित्तरक्तदोषकृमिगुल्मोदरव्रणप्रमेहानाहवि-

षाश्मरीरोगघ्न: । रेचक: कटुरुष्णवीर्य्यश्च । भा.पू. १भ.। रेचक: कटु: उष्ण: व्रणकफकासघ्न: क्रमिघ्न: लघुश्च । रा.नि.व.१३ । "गुञ्जापित्तास्रदाहघ्नी च-क्षुष्या मूत्रकृच्छ्रजित् ।" राज. । तैलं मूलकतैलगु-णवत् । सु.सू.४५अ. ।

काम्पिल्लक: । पुं, क्ली । गुण्डारोचनिकायां । कमलागुँड़ि । सु.सू.३८अ. । काकमाच्याम् । गुड़काँउली । ज्व.चि.मुस्तादाष्टादशाङ्गपाचने ।

काम्पिल्लिका । स्त्री । गुण्डारोचनिकायां । हारा. । [कमलागुँड़ि । श.र. । र.मा. ।

काम्पील: (क:) । पुं । गुण्डारोचन्याम् ।

काम्बलिक: (यूष:) । पुं । फलमूलै: तिल-कल्काम्लप्राये खड़यूषापरनामधेये सन्धानविशेषे । काँजिविशेष । दधिमस्त्वम्लपिष्टयूषे । "दधिमस्त्व-म्लसिद्धस्तु यूष: काम्बलिक: स्मृत: ।" सु.सू.४६अ.। अपिच "पिशितेन रसस्तत्र यूषो धान्यै: खल: फ-लै: । मूलैश्च तिलकल्काम्लप्राय: काम्बलिक: स्मृ-त: ॥" च.द.अतीसा.चि. । तक्रं कपित्थचाङ्गेरी-मरिचाजाजिचित्रकै: । सुपक्कं खरयूषोऽयमयं का-म्बलिकोऽपर: । दध्यम्ली लवणस्नेहतिलमाषसम-न्वित: ॥ तत्पाकविधानम्—तक्रस्य प्रस्थ: (४ श.) कपित्थचाङ्गेरीशाकमरिचकृष्णजीरकचित्रकाणां प्र त्येकं पलं (८ तो.) । एभिर्मुद्गयूष: पाच्य: । एष खड़यूष: । खड़यूषे दध्नाम्लीकृते तत्र सैन्धवतिल-माषचूर्णप्रक्षेपेण काम्बलिको भवति ।

काम्बुका । स्त्री । अश्वगन्धायाम् । र.मा. ।

काम्बोज: । पुं । तद्देशजघोटके । ज.द. । श्वेतखदिरे । पुन्नागवृक्षे । कटफले । मे.जत्रिकं । वरुणवृक्षे । क्ली । पद्मकाष्ठे । वै.निघ. ।

काम्बोजिका । स्त्री । श्वेतगुञ्जायां । वै.निघ.।

काम्बो(म्भो)जी । स्त्री । रक्तगुञ्जालतायाम् । बलचखदिरे । पापड़ि थयेर । रा.नि.व.८ । (-म्भोजी) श्वेतगुञ्जायाम् । वै.निघ. । वाकुच्याम् । सोमराज, शाकुच् । रा.नि.व.३।४ । विट्खदि-रे । माषपर्ण्याम् । अम. । सु.चि.१८अ. । गन्धसु-ण्डे । रत्ना. ।

काम्य: । पुं । असनवृक्षे । वै.निघ. । [वै.निघ.।

काम्यकम् । क्ली। काष्ठविशेषे । आसन काठ ।

काम्ल: । त्रि । ईषदम्ले ।

काय: । पुं । शरीरे । रा.नि.व.१८ । स च सात्विक-राजस-तामसा इति त्रिविध: । तत्र सा-त्विक: सप्तभेद: —ब्राह्मणमाहेन्द्रवारुणकौवेरगा-न्धर्व्वयाम्यर्षिभेदेन । राजस: षड्भेद:— आसुरसार्प-शाकुनराक्षसपैशाचप्रेतभेदात् । तामसा: त्रिविधा: —पाशवमात्स्यवानस्पत्यभेदेन । सु.शा.४अ. । स्व-भावे । मूर्त्तौ । मे. । तरुप्रकाण्डे । क्ली । मनुष्य-तीर्थे । मे.यद्विकं ।

कायचिकित्सा । स्त्री । चिकित्साशास्त्राङ्गवि-शेषे । "कायचिकित्सा नाम सर्व्वाङ्गसंसृष्टानां व्या-धीनां ज्वरातीसाररक्तपित्तशोषोन्मादापस्मारकुष्ठ-मेहादीनामुपशमनार्थम् ।" सु.सू.१अ. । अपि च "कषायचूर्णगुटिका: पचानां शोधनानि च । को-ष्ठामयानां शमनी क्रिया कायचिकित्सितम् ॥" अचि.२अ. । शारीरचिकित्सायाम् ।

कायफलम् । क्ली । कट्फले । वै.निघ. ।

कायमानम् । क्ली । तृणकुट्याम् । त्रिका. । देहपरिमाणे ।

कायवाल: । पुं । कृकलासे । वै.निघ. ।

कायसौख्यम् । क्ली । शरीरसुखे ।

कायस्था । स्त्री । काकोल्यां । अ.टी.वा.चि.६ अ. । आमलक्यां । जटा. । स्थूलैलायाम् । सूक्ष्मै-लायाम् । रा.नि.व.६ । हरीतक्याम् । भा.ज्व.चि. कायस्थादिधूपे । तुलसीवृक्षे । रा.नि.व.१० । सि-न्दुवारवृक्षे । निशिन्दा । सि.यो.उन्मा.चि.अप. चि.महापैशाचघृते । "कायस्थाशूकरीच्छ्वा ।"

कायस्थादिधूपनम् । क्ली । शीतज्वरे हितं । हरीतकी रास्ना कटुकी गुड़ूची गुग्गुलु: चोरक-नामगन्धद्रव्यं वाप्यालकं वचा कुष्ठमित्येषां समभा-गेन धूप: लेपो वा देय: । अथ अनेनैव कल्केन स-यवक्षारलवणेन सकाञ्जिकं तैलं यथाविधि पक्कं शीतज्वरघ्नञ्च । भा.म.१भ.ज्व.चि. ।

कायस्थाली । स्त्री। रक्तपाटलवृक्षे । वै.निघ.।

कायस्थिका । स्त्री। काकोल्यां । भा.पू.१भ.।

कायाग्नि: । पुं । पाचकाग्नौ । वैद्यकम् ।

कायिक: । त्रि । शारीरे ।

कारः । पुं । हिमशिलायाम् । मे. ।

कारकम् । क्ली । यमान्याम् । वै.निघ.२भ.कास.चि.पिप्पल्यादिकषाये । बदरे । वै.निघ. । वर्षोपलोद्भवजले । रा.नि.व.१४ ।

कारजः । पुं । गजबालके । वै.निघ. ।

कारञ्जसुधा । स्त्री । करञ्जचूर्णे । कराञ्जेर चून । गुणाः—कारञ्जा तु रुचिप्रदा । वै.निघ. ।

कारणम् । क्ली । हेतौ । रोगहेतौ । तच्च सन्निकृष्टविप्रकृष्टभेदेन द्विविधं । तयोः सन्निकृष्टं वातादि, विप्रकृष्टं विरुद्धाहारादि । मा.नि. । वधे । इन्द्रिये । देहे । स्वकोषः । ज्ञानेन्द्रिये । वै.निघ. ।

कारणशरीरम् । क्ली । सत्वप्रधाने अज्ञाने ।

कारणा । स्त्री । गाढ़वेदनायां । दुःखे । अम. ।

कारण्डवः । पुं । हंसविशेषे । धड़ा हाँस । दीर्घचरणकृष्णवर्णपक्षिणि । जलपिपि । मांसगुणाः प्लवजातीयपक्षिमांसवत् । सु.सू.४६अ. ।

कारन्धमी (इन्) । त्रि । धातुपरीक्षके । हारा. ।

कारमिहिका । स्त्री । कर्पूरे । रा.नि.व.१२ ।

कारम्भा । स्त्री । प्रियङ्गौ । अम. ।

कारवः । पुं । काके । त्रिका. ।

कारवल्ली । स्त्री । (Momordica, charantia.) क्षुद्रकारवेल्लके । छोट करला, उच्छे । हिं छोटीकरेली । मं लघुकारली । गुणाः—तिक्ता उष्णा दीपनी कफवातघ्नी अरोचकघ्नी रक्तदोषघ्नी च । रा.नि.व.७ । अन्यच्च रुच्या कफपित्तघ्नी च । राज. । फलगुणाः—हिमं भेदि लघु तिक्तं अवातलं पित्तरक्तकामलापाण्डुकफमेहक्रिमिघ्नम् । मद. । लघुः दीपनी च । भा.पू.१भ. । कटुहुञ्चायाम् । उच्छे । रा.नि.व.२३ । तद्गुणा कारवल्ली स्याद्विशेषाद्दीपनी लघुः ।

कारवारि । क्ली । करकाजले । शिलेर जल । गुणाः—"कारोदकन्तु विशदं गुरु रुचं स्थिरं घनं । कफकृद्वातलं चातिशीतं पित्तविनाशकं ॥" वै.निघ. ।

कारवी । स्त्री । कृष्णजीरके । रत्ना. । कालजीरा । हिं कलोञ्जीजीरक । भा.पू.१भ. । "व्योषं यासश्च कारवी ।" च.द.अभिन्या.ज्व.चि. । मधुरिकायाम् । मौरी । तेजपत्रे । गुड़त्वचि । मे.वर्णिकं । शताह्वायाम् । शुल्फा । प.मु. । रा.नि.व.४ । अजमोदायाम् । वनयमानी, राङ्गुनी । रा.नि.व.२२ । चन्द्रशूरे । भा.पू.१भ. । मेथिकायाम् । सूक्ष्मकृष्णजीरके । च.द.ग्रह.चि.आयामकाञ्जिके । हिङ्गुपत्र्याम् । अ.टी.भ. । क्षुद्रकारवल्याम् । रा.नि.व.७ ।

कारवेल्लः (कः) । पुं । (Momordica charantia. Syn. M. muricata.) स्वनामख्यातफलशाकलतायाम् । बड़ करेला उच्छे गाछ । हिं करेली । तें काकरचेट्टु । उत्. शलरा । तत्फलगुणाः—"कारवेल्लञ्चातितिक्तमग्निदीप्तिकरं लघु । उष्णं शीतं भेदकञ्च स्वादु पथ्यं समीरितम् । अरुचिञ्च कफं वातं रक्तदोषं ज्वरक्रमीन् । पित्तं पाण्डुञ्च कुष्ठञ्च नाशयेत्…। वृहदुक्तं कारवेल्लं कटु तिक्तञ्च दीपकं । अह्रद्यं भेदकं स्वादु रुच्यं चारं लघु स्मृतम् । अवातलं पित्तहरं रक्तरुक्पाण्डुरोगहृत्"…… । वै.निघ. । तद्गुणे धारके रक्तपित्ते हिते च । "कारवेल्लं हिमं भेदि लघुतिक्तमवातलं । ज्वरपित्तकफास्रघ्नं पाण्डुमेहक्रमीन्हरेत् ।" कारवेल्लश्च वातघ्नः कफघ्नः पित्तहारकः । उष्णो रुचिकरः प्रोक्तो रक्तदोषकरो नृणाम् ॥" अत्रि. १६अ. । [भा.पू.१भ.शाकव. ।

कारवेल्ली । स्त्री । क्षुद्रकारवेल्ले । छोट उच्छे ।

कारव्यादिः । पुं । कषायभेदे । कषायोऽयमभिन्यासज्वरे हितः । "कारवीपुष्करैरण्डत्रायन्तीनागरामृताः । दशमूलीशटीशृङ्गीयासभार्गीपुनर्नवाः । तुल्या मूत्रेण निष्काथ्य"… । भैष. । कृष्णजीरकं कुष्ठं एरण्डमूलं त्रायन्ती (बलाडुमुर) शुण्ठी गुड़ुची दशमूलं शटी कर्कटशृङ्गी दुरालभा भार्गी पुनर्नवा प्र. ८र. गोमूत्रं ३२तो. शे. ८तो. ।

कारस्करः । पुं । कुपीलुवृक्षे । विषतिन्दुके । कुँचिला । मं काजरा । कं कांजिवार, मकरतेंदुआ, माकड़ाकेंद । गुणाः—कटुरुष्णः तिक्तः कुष्ठघ्नः वातरक्तघ्नः कण्डूतिकफामार्शोव्रणघ्नश्च । रा.नि.व.९ । "अस्य चामफलं ग्राहि तूवरं वातकृल्लघु । शीतलञ्च समुद्दिष्टं तत्पक्वं विषदं गुरु । पाके च मधुरं प्रोक्तं कफं वातं प्रमेहकं । पित्तं रक्तविकारञ्च नाशयेत् ।" वै.निघ. । त्रिदिनं काञ्जिके

चिरं गुडं स्यादिषमिन्दुकम्। इति शुद्धिः। शीतवल्लिकः वातमदकरः लघुः वेदनाहरः ग्राही कफपित्तरक्तघ्नश्च। भा.। द्रवसामान्ये। त्रिका.।

कारस्करटिका। स्त्री। कर्णजलौकायाम्। काणकोटारी, केन्‌डाइ। त्रिका.।

कारा। स्त्री। पीड़ायाम्। दुःखे। हारा.।

कारायिका। स्त्री। सारस्यां। बलाकायाम्। जटा.।

कारिका। स्त्री। यातनायाम्। मे.। [हे.च.।

कारवेल्लः। पुं। कठिल्लकवृक्षे। करला।

कारी। स्त्री। स्वनामख्यातक्षुपे। कण्टकारी भाकर्षकारीति द्विधा। मं कं करीकारे। गुणाः—कषाया मधुरा पित्तघ्नी दीपनी सग्राहिणी रुच्या गुरुः। कण्ठशोधनी। रा.नि.व.८। एतत्फलन्तु तुवरं पटुघ्नं दोषघ्नञ्च। वै.निघ.।

कारीरम्। क्ली। टीँट इति प्रसिद्धे करीरफले, तत्पुष्पे च। गुणाः—"कारीरं कटुकं ग्राहि फलमुष्णं रुचिप्रदं। कफपित्तकरं किञ्चित्कषायं वातहृद्धरम्। कारीरं कुसुमं भेदि कटुकं कफनाशनं। पित्तकृद्रुचिरं भव्यं कषायं पथ्यदं भृशं।" वै.निघ.।

कारुकः। पुं। कर्म्मरङ्गवृक्षे। श.चि.।

कारुककर्म्म। क्ली। सूपकारकर्म्मणि। रन्धन।

कारुजः। पुं। हस्तिशिशौ। वामलूरे। मे.। नागकेशरे। फेने। गैरिके। हे.च.।

कारुण्डिका (ण्डी)। स्त्री। जलौकायाम्। हारा.। श.च.।

कारुण्यसागरः। पुं। ज्वरातिसाराधिकारे रसः। गन्धको द्विगुणः। रसभस्मनोऽभावे शुद्धसूतस्य भागैकम्। विपाचयेत् बालुकायन्त्रे मृत्कर्पटे वा पाचयेत्। मार्कवमूलं भृङ्गराजमूलम्। समभागानि त्रिःक्षारादिविड़ङ्गान्तानि पञ्चदशद्रव्याणि प्रत्येकं मिलितरसादीनां समानि मिश्रयेदित्यर्थः। पारदभस्म १ तो. (अभावे शुद्धपारा १ तो.)गन्धक २ तो. अभ्र २ तो. सर्षपतैले मर्दन करिया भृङ्गराजरसे पेषण करिया प्रहर काल पाक करिबे। परे ताहाते यवक्षार, साचिक्षार, सोहागा, बिट, सैन्धव, सचल, साम्भर, करकचलवण, त्रिकटु, चितेर मूल, विष, जीरा, विड़ङ्ग मिलित ८ तो. दिबे। र.सा.सं.।

कारोत(त्त)रः। पुं। सुरामण्डे। अम.।

कार्कटः (कः)। पुं। कर्कटवृक्षे। काँकरोल। रा.नि.व.११।

कार्कणः। पुं। वनकुक्कुटे। वै.निघ.।

कार्णम्। क्ली। कर्णमले। त्रि। कर्णसम्बन्धीये।

कार्त्तस्वरम्। क्ली। सुवर्णे। धुस्तूरफले। अम.।

कार्त्तिकः। पुं। स्कन्दे। कृत्तिकायुक्तमासि।

कार्त्तिकशालिः। पुं। कार्त्तिकपक्वे शालिधान्यभेदे। कार्तिकशाल धान।

कार्त्तिकिकः। पुं। कार्त्तिके मासि। वै.निघ.।

कार्पटः। पुं। Lac. जतुनि। জৌ,গালা। मे.।

कार्पासः (कः)। पुं। कार्पासीक्षुपे। कापास गाछ। गुणाः—कार्पासी लघुपाकोष्णः मधुरः वातघ्नः। तत्पलाशं वातघ्नं रक्तकृत् मूत्रवर्द्धनं कर्णपिण्डिकानादपूयस्रावविनाशकृत्। तद्बीजं स्तन्यदं वृष्यं गुरु च। भा.पू.१भ.। वनकार्पास्यां। सु.सू. ३८अ.।

कार्पासकी। स्त्री। कार्पास्यां। भा.पू.१भ.।

कार्पासतैलम्। क्ली। नाड़ीव्रणे हितम्। पाठः—"कार्पासमूलरजनीकल्कं दत्त्वा जले शृतं तैलम्। पूरणमात्राच्चिरजं नाड़ीव्रणमाशु नाशयति॥" तिलतैल, ४ श, जल १६ श.। कल्क कापासमूल ओ हरिद्रा १ श.। रस.र.। [श.र.।

कार्पासनासिका। स्त्री। तर्कौ। टेको।

कार्पासास्थि। स्त्री। कार्पासबीजे।

कार्पासी (सिका)। स्त्री।(Gossypium, hirsutum,herbaceum.)Cotton plant. रक्तकार्पासक्षुपे। रक्त कापास। मं रक्तकापुसी। कं हत्ति। तें पत्ति। गुणाः—"कार्पासी मधुरा शीता स्तन्यवृद्धिकरी मता। किञ्चिदुष्णा च बल्या च कषाया च लघुः स्मृता। कफपित्ततृषादाहभ्रमश्रमवमीहरा। सूर्च्छाहरी च सम्प्रोक्ता चायुर्व्वेदविशारदैः॥ कार्पासिकाफलम्प्रोक्तं मूत्रस्य च विवर्द्धकम्। वातं रक्तरुजङ्कर्णपिटिकां कर्णनादकं। कर्णपूयञ्च शमयेत्।" रा.नि.व.४।

कार्म्म(र्म्मु)कः । पुं । श्वेतखदिरे । हिज्जलवृक्षे । रा.नि.व.८ । महानिम्बवृक्षे । रा.नि.व.९ । चोपचिनीतिख्यातद्रव्ये । वै.निघ.। माधवीलतायां। वंशे । मे. । हे.च. । [मे.णत्रिकं ।

कार्म्मणः । त्रि । मन्त्रतन्त्रादियोजने कर्म्मठे च ।

कार्म्मरी । स्त्री । वंशरोचनायाम् । रा.नि.व.६।

कार्य्यम् । क्ली । हेतौ । प्रयोजने । मे. ।

कार्य्य(प्र)द्वेषः । पुं । आलस्ये । रा.नि.व.२०।

कार्य्यपुटः (ध्वनिः) । पुं । क्षपणके । त्रि । उन्मत्ते । अनर्थकरे । हारा. ।

कार्य्या । स्त्री । कारीवृक्षे । रा.नि.व.८ ।

कार्श्मरी । स्त्री। काश्मरीवृक्षे । গাগার গাছ। अ.टी.भ. ।

कार्श्म(र्ष्म)र्य्यः । पुं । गाम्भारीवृक्षे ।

कार्श्यः (र्ष्यः) । पुं । कर्च्चूरके । शटी । रा.नि.व.६। गाम्भारीवृक्षे । लकुचवृक्षे । ডেলো, ডহুয়া গাছ। रा.नि.व.९ । क्षुद्रपर्णासे । शालवृक्षे । अ.टी.भ. । शाकवृक्षे । वै.निघ. । क्ली । कृशतारोगे । तल्लक्षणं यथा—"वातो रूक्षान्नपानानि लङ्घनं प्रमिताशनं । क्रियातियोगः शोकश्च वेगनिद्रा विनिग्रहः। नित्यं रोगोऽरतिर्नित्यं व्यायामो भोजनाल्पता । भीतिर्धनादिध्वंसश्च कार्श्यकारणमीरितं ॥" भा. ।

कार्श्यहरलोहः । पुं । रसायनाधिकारे । अत्र सर्व्वद्रव्यं समभागं, सर्व्वसमं लौहञ्च । শ্বেতপুঙ্খা, দন্তীমূল, অশ্বগন্ধামূল, ত্রিফলা, ত্রিকটু, ত্রিমদ, শতমূলী, শ্বেতবেলেড়া প্রত্যেকে সমভাগ। সর্ব্ব সমান লৌহ। ভীমরাজরসে মর্দন ও ঔষধ সেবন করিবে। र.सा.सं.।

कार्षापणः । पुं, क्ली । कर्षपरिमाणे । स्वर्णे १६ माषकाः । रौप्ये १६ पणानि । ताम्रे ८० रक्तिकाः । १६ पणे । मे. । [र्म्मणि । वै.निघ. ।

कार्ष्णः पुं । कृष्णसारमृगे । क्ली । कृष्णमृगच-

कार्ष्णा । स्त्री । लघुशतावर्य्याम् । वै.निघ. ।

कार्ष्णायसम् । क्ली । कृष्णायसो विकारे ।

कार्ष्णी । स्त्री । शतावर्य्यां । रा.नि.व.४ । अम.।

कार्ष्णर(र्ष्णर)म् । क्ली। लौहमले। মণ্ডুর লৌহ। रा.नि.व.१३ । त्रि । कृष्णसारचर्म्मनिर्म्मिते ।

कार्ष्णायसः । त्रि। कृष्णायसनिर्म्मिते। क्ली। लौहे ।

कार्ष्यवनम् । क्ली । शालवने।

कार्ष्युः । पुं । (Sohoria robusta.) सर्ज्जतरौ । अम. । कृष्णसारमृगे ।

कालम् । क्ली । लौहे । अ.टी.भ. । कक्कोलफले । रा.नि.व.१२ । कृष्णागुरुणि । श.च. ।

कालः । पुं । कोकिले । रा.नि.व.१९ । रक्तचित्रकवृक्षे । कासमर्द्दवृक्षे । रा.नि.व.६ । व्याघ्रनखे । रा.नि.व.१२ । मृत्यौ । मे. । राले । ধুনো । द्रोणकाके । कृष्णगोरोचनायाम् । कृष्णाञ्जने । अस्थिपञ्जरे । वै.निघ.। सम्प्राप्तेरौपाधिकभेदे । "नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम् ।" मा.नि. । समये । সময় । क्षणदण्डादौ, द्रव्याणि यदा कुर्व्वन्ति स काल इति । सु.सू.४१अ. । चक्रवद्भ्रमणेनाविरतगमनशीलत्वस्वभावः सर्व्वभावपरिणतिहेतुः कालः। च.द.। अतीतानागतवर्त्तमानरूपस्त्रिविधः, वर्षाहिमोष्णरूपः तथा उदयास्तमध्यमरूपः प्रवर्त्तकरूपः पालकरूपः संहारकरूपश्च कालः । यथा —"यः कर्म्माणि प्रपश्येत प्रकर्षे वर्त्तमानके । कालः कालयते लोकं कालः कालयते जगत् । कालः कालयते विश्वं तेन कालो विधीयते । कालस्य वशगाः सर्व्वे देवर्षिसिद्धकिन्नराः । कालो हि भगवान्देवः स साक्षात्परमेश्वरः । सर्गपालनसंहर्त्ता स कालः सर्व्वतः समः । येन मृत्युवशं याति कृतं येन लयं व्रजेत् । संहर्त्ता सोऽपि विज्ञेयः कालः स्यात्कलनापरः । कालः सृजति भूतानि कालः संहरते प्रजाः । कालः स्वपिति जागर्त्ति कालो हि दुरतिक्रमः ।........तथा वर्षाहिमोष्णाख्यास्त्रयः काला इमे मताः । तथा त्रयोऽन्ये विज्ञेया उदयमध्यास्तमेव च ॥" अत्रि.४अ. ।

कालकः । पुं, क्ली । जलसर्पे । জলঢোড়া, জলবোড়া। श.र. । जतुके । জডুল । अम. । क्ली । कालशाके । भा.शाकव. । यकृति । हे.च. । नेत्रतारके । शस्यभेदे । [४२अ. ।

कालकङ्कटः । पुं । गिलोड्यफलवृक्षे । सु.सू.

कालकचुः । स्त्री । (Arum colocasia.) कचुभेदे । কালকচু ।

कालकचूर्णम् । क्ली । मुखरोगे । पाठः—"गृहधूमो यवक्षारः पाठा व्योषरसाञ्जनं । तेजोह्वा त्रिफला लौहश्चित्रकश्चेति चूर्णितं ॥ सक्षौद्रं धारयेदास्ये गलरोगविनाशनम् । कालकं नाम तच्चूर्णं दन्तास्यगलरोगनुत् ॥" च.द. ।

कालकण्टकरसः । पुं । वातव्याधौ रसः । पाठः—"वज्रसूताभ्रहेमार्कतीक्ष्णमुण्डं क्रमोत्तरं । मारितं मर्द्दयेदम्लवर्गेण दिवसत्रयम् । त्रिक्षारं पञ्चलवणं मर्द्दितस्य समं मतं । दत्त्वा निर्गुण्डिकाद्रावं मर्द्दयेद्दिवसत्रयं । शुष्कमेतद्विचूर्ण्याथ विषञ्चास्याष्टमांशतः टङ्कणं विषतुल्यांशं दत्त्वा जम्बीरजद्रवैः । भावयेद्दिनमेकन्तु रसोऽयं कालकण्टकः ॥" মাত্রা ২ গুঞ্জা আর্দ্রকরসেন পেয়ঃ । হীরক ভস্ম ১ ভ. পারা ২ ভ. অভ্র ৩ ভ. স্বর্ণ ৪ ভ. তামা ৫ ভ. তীক্ষ্ণ লৌহকিট্ট ৬ ভ. অম্লবর্গে ৩দিন মর্দ্দন । যবক্ষার, সর্জিক্ষার, সোহাগা, পঞ্চলবণ উক্ত মর্দ্দিত দ্রব্যের সমান লইয়া ইঙ্গুরার রসে একত্র ৩ দিন মাড়িবে । শুষ্ক হইলে চূর্ণ করিয়া চূর্ণের অষ্টমাংশ বিষচূর্ণ, সোহাগার খৈ বিষের সমান, ইহাতে মিশ্রিত করিয়া লেবুর রসে ১ দিন মর্দ্দন করিবে । र.चि.६ष. ।

कालकण्ठः (कः) । पुं । (Terminalia Tomentosa.) पीतशाले । मयूरे । खञ्जने । कलविङ्के । চড়াই । मे. । जलकुक्कुटे । कासमर्द्दवृचे । अस्थकाके । वै.निघ. । (कः) दात्यूहे । अम. ।

कालकन्दः । पुं । महाकन्दे । रत्ना. ।

कालकन्दकः । पुं । जलसर्पे । জলঢোড়া, জলবোড়া । श.र. ।

कालकन्या । स्त्री । जरायाम् ।

कालकमुष्कः । पुं । कृष्णपुष्पघण्टापाटलिकायाम् । च.द.अर्श.चि.क्षारविधाने ।

कालकर्म्म (क्रिया) । क्ली, स्त्री । मृत्यौ ।

कालकलायः । पुं । (Phaseolus max.) कृष्णकलाये । কালিকলায় ।

कालकस्तूरी । स्त्री । (Hibiscus abelmoschus.) कस्तूरीवृचविशेषे । কালকস্তুরী ।

कालकुष्ठम् । क्ली । पार्व्वतीयमृत्तिकाविशेषे । रा.नि.व.१३ । See कङ्कुष्ठम् ।

कालकूटः । पुं । Kind of poison. त्रयोदशविधकन्दविषान्यतमविषे । स मधुवर्णः इति । चचि.३स्था.५६अ. । কাটবিষ । तं कर्कोटकविषम् । प.मु. । सु.कल्प.२अ. । See कन्दविषम् । तत्स्वरूपं यथा—"देवासुररणे देवैर्हतस्य पृथुमालिनः । दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः । निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः । सोऽहिक्षेत्रे शृङ्गवेरे कोङ्कणे मलये भवेत् ॥" भा.पू.१भ.विषव. । क्ली । विषसामान्ये । वोले । गन्धবোল । वत्सनाभविषे । है.च. ।

कालकूटकः । पुं, क्ली । कारस्करवृचे फले च । কুচিলা গাছ । रा.नि.व.६ । [वै.निघ. ।

कालकूटरजोद्भवः । पुं । राले । রজন ।

कालकृत् (तः) । पुं । सूर्य्ये । त्रिका. । श.र. ।

कालकेशी । स्त्री । नील्याम् । ছোট নীল । भा.पू.१भ. ।

कालकोठः । पुं । पानशाक इति प्रसिद्धे कन्दशाकविशेषे । কোমরভোগ কচু । प.मु. ।

कालक्लीतकः । पुं । नीलीवृचे ।

कालखञ्ज(न)म् । क्ली । यकृति । है.च. ।

कालखण्डम् । क्ली । यकृति । रा.नि.व.१८ । यकृद्रोगभेदे । वै.निघ. । [capella. सर्पविशेषे ।

कालगन्धः । पुं । Kind of cobra de-

कालग्रन्थिः । पुं । संवत्सरे । हारा. ।

कालङ्कतः । सुवर्णमुख्याम् । वै.निघ. । कासमर्द्दे । কালকাসন্দা । रत्ना. ।

कालचक्रम् । क्ली । निमेषादियुगपर्य्यन्तः कालश्चक्रवत्परिवर्त्तमानः कालचक्रमुच्यते । अथवा भाद्रपदाश्वयुजौ वर्षाः, कार्त्तिकमार्गशीर्षौ शरत्, पौषमाघौ हेमन्तः, फाल्गुनचैत्रौ वसन्तः, वैशाखज्यैष्ठौ ग्रीष्मः, आषाढ़श्रावणौ प्रावृड़िति च । सु.सू.६अ. ।

कालज्ञः । पुं । कुक्कुटे । रा.नि.व.१९ ।

कालज्ञानम् । क्ली । चिकित्साशास्त्रविशेषे येन

काली जायते । इन्द्रिनिश्चयशास्त्रविशेषे शम्भुनाथकृते ।

कालतालः । पुं । तमालवृक्षे । रा.नि.व.६।

कालतिन्दुकः । पुं । कुपीलौ । কেন্দু বা আবলুষ ।

कालतुण्डम् । क्ली । कृष्णागुरुणि । वै.निघ. ।

कालत्रयम् । क्ली । वर्त्तमानभूतभविष्येषु ।

कालदोला । स्त्री । नीलीवृक्षे । भा. ।

कालधर्म्मः (र्म्मन्) । पुं । मृत्यौ । अम. ।

कालनिर्यासः । पुं । गुग्गुलौ । গুগ্গুল । रा.नि.व.१२ ।

कालपत्री । स्त्री । तालीशपत्रे । वै.निघ. ।

कालपर्णः । पुं । तगरवृक्षे । श.र. ।

कालपर्णिका (र्णी) । स्त्री । कृष्णत्रिवृति । কাল তেউড়ী । भा.पू.१भ. । [रा.नि.व.१३ ।

कालपालकम् । क्ली । कङ्कुष्ठमृत्तिकायाम् ।

कालपाशी । स्त्री । श्यामालतायां । रत्ना. ।

कालपीलुकः । पुं । कुपीलौ । भा. ।

कालपुच्छः (कः) । पुं । कूलचरमृगविशेषे । च.चि.३अ. । अयं कूलचरगुणः । सु.सू.४६अ. । कृष्णचटके । वै.निघ. ।

कालपुष्पम् । क्ली । कलायवृक्षे ।

कालपृष्ठः । पुं । मृगविशेषे । কৃষ্ণসার হরিণ । हे.च. । कङ्कपक्षिणि । मे.ठचतुष्कं ।

कालपेशिका । स्त्री । मञ्जिष्ठायाम् । कृष्णजीरके । वै.निघ. । श्यामालतायाम् । रत्ना. ।

कालपेषी । स्त्री । श्यामालतायाम् । শ্যামা লতা । रत्ना. ।

कालप्रभातम् । क्ली । शरदृतौ । त्रिका. ।

कालप्रिया । स्त्री । अश्वगन्धायां । रा.नि.व.४।

कालबलप्रवृत्तः । पुं। आधिदैविकरोगमात्रे। ये शीतोष्णवातवर्षादिनिमित्ताः, तेऽपि च द्विधा व्यापन्नर्त्तुकृताः, अव्यापन्नर्त्तुकृताश्च । सु.सू.२४अ. ।

कालबालः(लुकः) । पुं । कङ्कुष्ठे । प.मु. ।

कालभण्डी । स्त्री । श्वेतगुञ्जायाम् । वै.निघ. ।

कालभाण्डिका । स्त्री । मञ्जिष्ठायाम् । रा.नि.व.६ ।

कालभृत् । पुं । सूर्य्ये । [निघ. ।

कालमल्लिका (ल्ली) । स्त्री। कृष्णार्जके । वै.

कालमानम् । क्ली।कालविषयिणि परिमाणे। यथा—१८ निमे १ का॰ा ३० का. १ कला, ३० कलाः १ क्षणः,१२ क्ष. १ मुहूर्त्तम्, ३० मु. १ अहोरात्रः (दिनं), १५ दि. १ पक्षः, २ पक्षौ १ मासः, २ मा. १ ऋतुः, ३ ऋ. १ अयनम्, २ अय. १ वर्षः ।

कालमानः (लः, कः) । पुं । कृष्णपत्रक्षुद्रतुलस्याम् । কাল পাতা ছোট তুলসী । प.मु. । कृष्णमल्लिकायाम् वर्वरिकेति लोके । বাবুই । सु.सू.२७अ.। भा.पू.१भ.।च.चि.३अ । वा.सुरसादि:।

कालमारिषः । पुं । वृहत्पत्रतण्डुलीयशाके । क्षुद्रमारिषे । বড় চাঁপানটিয়া, কাঁটানটিয়া, ছোট নটিয়া । भैष. । च.द.अम्लपित्त.चि.अभयाद्यौ । र.मा. ।

कालमाला । स्त्री । कृष्णार्ज्जके । वा.सू.१५अ. । "सुरसयुगफणिज्झककालमालाविडङ्गम् ।"

कालमुखः । पुं । वानरे । रा.नि.व.१९ ।

कालमुष्कः (कः) । पुं । (Bignonia indica.) घण्टापाटलवृक्षे । प.मु. । कृष्णपुष्पघण्टायाम् । च.द.सि.यो.क्षारविधिः । "तोये कालमुष्ककस्य विपचेत् ।" श्वेतपुष्पः कृष्णपुष्पः पीतपुष्पस्तथैव च । पीतो रम्यो वरस्तेषु कालमुष्काः प्रकीर्त्तिताः ॥" क्रु.टी. । विश्वामित्रः ।

कालमूलः । पुं । रक्तचित्रके । রক্তচিতে । रा.नि.व.६ । [रा. ।

कालमेशिका । स्त्री । मञ्जिष्ठायाम् । अ.टी.

कालमेषिका (षी) । स्त्री । श्यामात्रिवृतायाम् । भा.पू.१भ. । मञ्जिष्ठायाम् । वै.निघ.२भ. उन्मा.चि. । कृष्णजीरके । त्रिवृतायाम् । रा.नि. व.६ । वाकुच्याम् । रा.नि.व.४ । हरिद्रायाम् । रा.नि.व.२३ । श्वेतजीरके । वै.निघ. । श्यामालतायाम् । प.मु. । [निभं मेहति । मा.नि.।

कालमेही । पुं । तन्नामकमेहरोगे । तेन मसी-

कालरात्रिः । स्त्री । भीमरथिनि । हारा. ।

काललवणम् । क्ली । काचलवणे । সচল লবণ । रा.नि.व.६ । बिड़लवणे । বিট্‌লবণ । प.मु. । च.शा.८ष. । [लोह । र.मा. ।

काललोहम् । क्ली । तीक्ष्णलोहे । তীথা

कालवङ्गः । पुं । कालियाकड़ा इति ख्याते क्षुपे । रसेन्द्र.चि.सुधावतीगुड़ी. ।

कालवस्तिः । पुं । वर्षादौ वातायुपशमार्थं बस्तौ । स च पञ्चदशविधः —आदौ स्नेहवस्तिरेकः, ततो निरूहवस्तिरेकः पुनः स्नेहवस्तिः ततः निरूहवस्तिः, एवं द्वादशवस्तीनन्यतरक्रमेण कृत्वा अन्ते त्रयः स्नेहवस्तयः कार्य्याः । च.सिद्धि.१अ. ।

कालवानरः । पुं । कृष्णमुखवानरे । रा.नि.व.१९ ।

कालवाहनः । पुं । महिषे । वै.निघ. ।

कालविध्वंसनरसः । पुं । पाण्डुरोगे हितः । पाठः—"शुद्धसूतं हेम तारं ताम्रं तालञ्च मर्द्दयेत् । जम्बीरनीरसंयुक्तं आतपे मर्द्दयेद्दिनं । सर्व्वतुल्यं पुनः सूतं चिञ्चा पिष्टिं प्रकल्पयेत् । धुस्तूरफलमध्यस्थं दोलायन्त्रे त्र्यहं पचेत् । धुस्तूराम्बुद्रवैरेव भाण्डे चूर्णं प्रपाचयेत् । आदाय बन्धयेद्वस्त्रे इष्टिकायन्त्रगं पचेत् । जाम्बीरैर्गन्धकं पिष्ट्वा अध ऊर्द्ध्वं प्रदापयेत् । तुल्यं तुल्यं पुनर्देयं रुद्ध्वा लघुपुटे पचेत् । शतधा गन्धकैः जीर्णे तदुद्धृत्य विचूर्णयेत् । लौहभस्म समांशञ्च दत्त्वा मर्द्यं द्रवैर्दिनम् । कण्टकार्य्या हंस्याश्च तथाग्नीनां द्रवैरपि । प्रतिद्रवैर्दिनं मर्द्यं पुटेत्पञ्चभिरुत्पलैः । एवं नवपुटं देयं द्रावे द्रावे त्रिधा त्रिधा । वज्रार्कचित्रविन्नानां द्रवैस्त्रिस्त्रिपुटैः पचेत् । अन्धमूषागतं पश्चात् आदाय चूर्णयेत्पुनः । दशांशेन विषं योज्यं गुञ्जामात्रं प्रयोजयेत् । कालविध्वंसनो नाम रसः पाण्ड्वामयापहः ॥" शुद्धपारदं स्वर्णं रौप्यं ताम्रं हरितालं समभागं सम्मर्द्य सर्व्वसमं पारदं पुनर्दत्त्वा जम्बीररसैः आतपे दिनं पेषयित्वा पिष्टिं कुरु । पिष्टिञ्च धुस्तूरफलमध्ये संस्थाप्य दोलायां त्र्यहः पक्त्वा चूर्णयेत् । तच्च चूर्णं धुस्तूररसेन भाण्डे पक्त्वा वस्त्रवद्धं कृत्वा पुनरिष्टिकायन्त्रेण पचेत् । ततः जम्बीररसपिष्टं गन्धं प्रतिवारं सर्व्वसमं ऊर्द्ध्वाधो दत्त्वा शतवारं लघुपुटे पचेत् । तथा चूर्णयित्वा सर्व्वसमं लौहभस्म दत्त्वा कण्टकार्य्यादीनां प्रत्येकं रसेन त्रिधा सम्मर्द्य पञ्चकरीषैः ९ पुटा देयाः । पुनश्च प्रत्येकं चित्रकादिरसेन मर्द्दयित्वा ९ पुटा देयाः । अन्धमूषासमदशमांशविषं संमिश्र्य १ गुञ्जां प्रयोजयेत् । रस.र. ।

कालविषाणिके । स्त्री । काकोलीक्षीरकाकोल्यौ । वा.उ. । [वै.निघ. ।

कालवीजकः । पुं । महानिम्बे । काकतिन्दुके ।

कालवृन्तः (न्ती:) । पुं । कुलत्थवृक्षे । কুর্তি কলায়ের গাছ । "कुलत्थकः कालवृन्तः ।" हे.च. ।

कालवृन्ता (न्तिका) । स्त्री । रक्तपाटलवृक्षे । राज. । पेटिकायां । পেটারি গাছ । रत्ना. । See कुबेराक्षी ।

कालवृन्ताकः । पुं । पेटिकायां । পেটারি ।

कालवृन्ती । स्त्री । पाटलावृक्षे । পারুল গাছ । रा.नि.व.१० ।

कालवेला । स्त्री । शनैश्चरवेलायाम् ।

कालशाकम् । क्ली, पुं । A sort of potherb. चुञ्चुशाके । हिं नरिचा । तें करिवेपचेट्टु । गुणा —आग्नेयं गुरु शोथघ्नञ्च । राज.३प. । "कालशाकः कटुस्तिक्तः पटुरग्निप्रदीपनः । पाचको भेदको रुच्यो वातलोष्णः सरः स्मृतः । कफशोषविषार्शानां नाशनः परिकीर्त्तितः ।" शरपुङ्खायाम् । वै.निघ.२भ.उन्मा.चि. । कुलत्थशाके । तुलसीवृक्षे । [रा.नि.व.१६ ।

कालशालिः । पुं । कृष्णशालौ । কাল ধান ।

कालशे(से)यम् । क्ली । पादजलेन त्रिभागदधिकृते तक्रे । ঘোল । रा॰नि.व.१५ । आलि । হরিতাল ।

कालसङ्कर्षा । स्त्री । नववर्षीयकन्यायाम् ।

कालसर्पः । पुं । कृष्णसर्पे । त्रिका. ।

कालसारम् । क्ली । पीतचन्दने । कलंवक इति लोके । भा.पू.१भ. । पुं । कृष्णसारमृगे । कृष्णागुरुणि । तिन्दुके । वै.निघ. । हरितालके ।

कालस्कन्धः । पुं । (Diospyros embryopteris.) तिन्दुकवृक्षे । গেঁদ গাছ, গাব গাছ । र.मा. । गुणाः—"कालस्कन्धश्च मधुरो बल्यो वृष्यो गुरुः स्मृतः । धातुवृद्धिकरः शीतः श्रमदाह-

कफापहः । पित्तशोथञ्च विस्फोटं पित्तञ्चैव विनाशयेत् ॥" वै.निघ. । विट्खदिरे । গুয়েবাবলা । उदुम्बरवृक्षे । रा.नि.व.८।११ । जीवकद्रुमे । तमालपत्रवृक्षे । তেজপাতের গাছ । वै.निघ. । कालताले । मे. ।

कालस्कन्धः । पुं । तिन्दुकवृक्षे । अम. । तमालवृक्षे । তমাল গাছ । रा.नि.व.६ ।

कालस्थाली । स्त्री । पाटलवृक्षे । भा.पू.१भ.।

कालहीनः पुं । लोध्रवृक्षे ।

काला । स्त्री । त्रिवृति । रा.नि.व.६ । कृष्णत्रिवृति । मे. । पिप्पल्याम् । नागबलायाम् । वै.निघ.२भ.वा.व्या. । नीलिन्याम् । च.चि.३अ. । मञ्जिष्ठायाम् । क्षुद्रकृष्णजीरके । सु.सू.मिश्र.अ. । अहिंस्रायाम् । কালিয়াকড়া । रत्ना. । भैष.नाड़ीव्रणचि. । अश्वगन्धायाम् । पाटलायाम् । भा. ।

कालाग(गु)रु । क्ली । कृष्णागुरुणि । रा.नि.व.१२ ।

कालाग्निभैरवः । पुं। ज्वरे रसः । अत्र पारद १ भ. गन्धक २ भ. कज्जलीं विधाय गोक्षुरक्वाथेन भावयेत् । शुष्के चूर्णयित्वा चूर्णसमं ताम्रचूर्णं, ताम्रस्याष्टांशं विषं, हिङ्गुलं १ भ. धुस्तूरबीजं २ भ. हरितालं ५ भ. मनःशिला ३ भ. टङ्कणं ३ भ. खर्परं ३ भ. जैपालं ३ भ. स्वर्णमाक्षिकं ३ भ. लौहं १ भ. वङ्गञ्च १ भ. सर्व्वमर्कक्षीरेण मर्द्दयेत् । पश्चाद्दशमूलपञ्चमूलयोः क्वाथेन यथाक्रमम्प्रहरैकं सम्मर्द्य चणकाभा वटी कार्य्या । भैष.ज्व.चि. । रस.कौ. ।

कालाग्निरसः । पुं । भगन्दरे रसः । पाठः—"शुद्धसूतं समं गन्धं मृतनागं सतुल्यकं । जीरकं सैन्धवं तुल्यं तिक्ताकोशातकीद्रवैः । पिष्टं तल्लेपनाद्धन्ति भक्षणाच्च भगन्दरम् ॥" मात्रा २ गुञ्जा । रस.र. ।

कालाग्निरुद्ररसः । पुं । कुष्ठाधिकारे रसः। पाठः—"सूतकान्ताभ्रतीक्ष्णानां भस्ममाक्षिकगन्धकं। बन्ध्याकर्कोटकीकन्दे क्षिप्त्वा लिप्त्वा मृदा बहिः । भूधराख्ये पुटे पच्याद्दिनैकं तद्विचूर्णयेत् । दशमांशं विषं योज्यं माषमात्रन्तु भक्षयेत् । रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत् । पिप्पलीमधुसंयुक्तमनुपानं प्रकल्पयेत् ॥" अन्यः ज्वरे । यथा—"मरिचं गन्धतुल्यञ्च क्षिप्त्वा पित्तैर्विभावयेत् । मायूरमत्स्यवाराहच्छागमाहिषजैरपि। समस्तैरथवा व्यस्तैः दिनैकं भावयेद्रसं । संयोज्यं गरलञ्चापि वटिकां कारयेद्बुधः । रस. कालाग्निरुद्रोऽयं द्विगुञ्जं भक्षयेत्ततः ॥" स्नानं पथ्यं । रस.र.ज्व.चि. ।

कालाजाजी । स्त्री। कृष्णजीरके, मङ्गरैलायां च । भा.म.१.आगन्तुज्व.चि. । "कालाजाजी तु सगुड़ा ।"

कालाञ्जनी । स्त्री । कृष्णकार्पासक्षुपे । कालाञ्जनीति सर्व्वत्र प्रसिद्धा । কাল কাপাস । गुणाः—कटुः उष्णा अम्ला आमकृमिघ्नी अपानभवर्त्मशमनी जठरामयघ्नी च । रा.नि.व.४ । कृष्णकार्पासिका प्रोक्ता कट्वी हृद्रोगनाशिनी। मलञ्चामकृमींश्चैव उदरञ्चार्शकं हरेत्॥" नील्यां । वै.निघ.।

कालाण्डजः । पुं । कोकिले। [२१ ।

कालादिकः । पुं । वैशाखमासे । रा.नि.व.

कालानुनादी । पुं । कलविङ्के । চড়াই । कपिञ्जले । चातके मे. । वनकुक्कुटे । वै.निघ. । बृहत्कृष्णमक्षिकायाम् ।

कालानुशा(सा)रिवा । स्त्री । कृष्णशारिवायाम् । सु.चि.२०अ. । तगरपादिके । তগরপাদুকা । शीतलीजटायां । শিউলী ছোপ । च.द.मूत्राघात.चि. । "बलाकालानुसारिवा ।"

कालानुसारकम् । क्ली । तगरपुष्पे । रा.नि.व.१० । पीतचन्दने । भा.पू.१भ. ।

कालानुसारिः (री) । पुं । शिंशपावृक्षे । मूषिके । वै.निघ. । शैलजे । रा.नि.व.१२ । अगुरुणि । सु.चि.१अ. ।

कालानुसारिणी । स्त्री । पिण्डीतगरे । श्वेतशारिवायाम् । कृष्णशारिवायाम् । वै.निघ. ।

कालानुसार्य्य(क)म् । क्ली, पुं । शिंशपावृक्षे । শিশু । मे.। कृष्णचन्दने । मे.। च.चि.२।३अ.। (कम्) शैलजे । रा.नि.व.१२। अम. । पीतचन्दने । सु.सू.३६अ.। तगरे । भा.। पिण्डीतगरे । वै.निघ. ।

कालानुसार्य्या । स्त्री । तगरे । सु.चि.२अ.।

कालान्तकरसः । पुं । कासाधिकारे रसः। पाठः—"हिङ्गुलं मरिचं व्योषं टङ्कणं गन्धकं समं। जम्बीररससंयुक्तं मर्द्दयेद्याममात्रकम् ।.........।

गुञ्जामात्रप्रदानेन सर्व्वं नाशाय तत्क्षणात्॥” इति। द्वितीयः यक्ष्माधिकारे ध्रृतः यथा—“कुर्य्याल्लौहमयीं मूषां अर्द्धतो द्वादशाङ्गुलां। मर्द्दितं स्वर्णधाराहीरस्टङ्कण्यारसैः समम्। लघुनैर्यामममात्रश्च पिष्टङ्कृत्वा निवेशयेत्। पूर्व्वोक्तायाश्च मूषायां मृतपादश्च गन्धकम्। निर्गुण्डीरससम्पिष्टं मूषायां तं विनिक्षिपेत्। चाच्छाद्य लौहवक्रेण वकयन्त्रेण जारयेत्। एवमष्टपुटैः जीर्णे समुद्धृत्य विचूर्णयेत्। पञ्चगुञ्जामितं खादेदनुपानं मृगाङ्कवत्। देयः कालान्तको नाम्ना रसोऽयं राजयक्ष्मनुत्॥” रस.र.।

कालान्तरप्राणहरमर्म्म। क्ली। तन्मर्म्मस्थानं यत्राहते पक्षान्ते वा मासान्ते वा मरणं भवेत्। तानि च सौम्याग्नेयानि अग्निगुणेषु आशु क्षीणेषु क्रमेण च सोमगुणेषु कालान्तरेण क्षपयन्ति। तानि ३३। तेषां वक्षसि ८, (स्तनमूले २, स्तनरोहिते २, अपलापे २, अपस्तम्भे २,) सीमन्ते ५, तलहृदये ४, क्षिप्रे ४, इन्द्रवस्तौ ४, कटितरुणे २, पार्श्वयोः २, वृहत्यां २, नितम्बे च २। सु.शा.६अ.।

कालान्तरविषः। पुं, क्ली। मूषिकादौ। लूतादौ च। हे.च.। [र्पफणायाम्। धरणिः।

कालापः। पुं। शिरःकेशे। माथार चुल। स-

कालाम्लम्। क्ली। शुक्ते। वै.निघ.।

कालायसम्। क्ली। कान्तलौहे। प.मु.।

कालाह्वः। पुं। काकतुण्ड्यां। काकतिन्दुके। वै.निघ.।

कालि(ली)कः। पुं। जलकुक्कुटे। पानकौड़ि। (कः) क्रौञ्चपक्षिणि। श.र.। क्ली। कृष्णचन्दने। श.च.।

कालिका। स्त्री। वयोनिरूपके वाजिदन्ताग्ररेखाविशेषे। सा वक्रा कृष्णा च। षष्ठे सप्तमेऽष्टमे वाब्दे क्रमाद्भवति। “वक्रा तु कालिका रेखा कृष्णा दन्ताग्रसंस्थिता। षष्ठे च सप्तमे वर्षे चाष्टमे च भवेत् क्रमात्॥” ज.द.। हिमान्यां। काकोल्याम्। रा.नि.व.३। कर्कटशृङ्ग्याम्। रा.नि.व.६। यकृत्खण्डे। कृष्णजीरके। भा.पू.१भ.। स्वर्णदोषे। जटा.। क्षीरकीटे। रोमावल्याम्। हारा.। वृश्चिकपत्रवृक्षे। एलायां। वै.निघ.। पटोलशाखायां। मांस्यां। काकायां। शिवायां। मे.। सौराष्ट्रमृत्तिकायाम्। कर्कटीलतायाम्। कालशाके। वै.निघ.। मद्यविशेषे। हे.च.। कृष्णचटके। शामा पाखी। रा.नि.व.१९। नीलोवृक्षे। मद.। कुज्झटिकायां। अटी.भ.। त्रिशिरीहरीतक्यां। सा गन्धयोगकरणे प्रशस्ता। राज.। कर्णस्रोतोविशेषे।

कालिकाशाकः। पुं। कालशाके। वै.निघ.।

कालिकास्थि। क्ली। नेत्रास्थिविशेषे। वै.निघ.।

कालिङ्गः। पुं। कासमर्द्दवृक्षे। प.मु.।

कालिङ्गः (ङ्गिन्)। पुं, क्ली। Water melon. कालिङ्गफले। तरमुज। अत्रि.। इन्द्रयवे। गजे। वै.निघ.। भूमिकर्कारौ। बिलाति कुमड़ा। उत्. वैताड़ु। सर्पे। मे.। अङ्कोल्लसारे। हे.च.। कुटजवृक्षे। भा.पू.१भ.। लौहभेदे यथा—“कालिङ्गो लिङ्गवान् यः स्याद्घनः सूक्ष्माङ्को मतः।” सुखबोधः।

कालिङ्गमानम्। क्ली। कलिङ्गदेशप्रचलिते मागधादवरे औषधादिभक्षणविषयिणि मानभेदे। यथा—१२ सर्षपः १ यवः, ३ य. १ गुञ्जा, ३ गु. १ वल्लः, ८ गुञ्जा १ माषः, ४ मा. १ शाणः निष्कः टङ्को वा, ६ मा. १ गद्याणः, १० मा. १ कर्षः, ४ क. १ पलम्। यवौ द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः। यवद्वयेन गुञ्जा स्यात् त्रिगुञ्जो वल्ल उच्यते। माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्। स्याच्चतुर्माषकैः शाणः इत्यादि। भा.पू.१भ.।

सर्षपादिमानम्।

८ सर्षपाः = १ यवः।	२ यवौ = १ रक्तिः।
२ रक्ती = १ वल्लः।	४ वल्लाः = १ माषः।
४ माषाः = १ शाणः।	२ शाणौ = १ कर्षः।
२ कर्षौ = १ शुक्तिः।	२ शुक्ती = १ पलं।
२ पले = १ प्रसृतिः।	२ प्रसृती = १ कुड़वः।
२ कुड़वौ = १ मानिका।	२ मानिके = १प्रस्थः।
४ प्रस्थाः = १ आढ़कः।	४ आढ़काः = १द्रोणः।
२ द्रोणौ = १ शूर्पः।	२ शूर्पौ = १खारिका।
१०० पलानि = १ तुला।	२० तुलाः = १ भारः।

परमाण्वादिमानम्।

३०परमाणवः = १त्रसरेणुः।	६ त्र. = १ मरीचिः।
६ मरीचयः = १राजिका।	३ रा. = १ सर्षपः।
८ सर्षपाः = १ यवः।	४ यवाः = १ गुञ्जा।
५ गुञ्जाः = १ पणः।	६ गुञ्जाः = १ माषा।

४ माषाः = १ शाणः = ॥० तो. ।
२ शाणौ = १ कोलः = १ तो. ।
२ कोलौ = १ कर्षः ।
२ कर्षौ = १ अर्द्धपः = २ तो. ।
२ अर्द्धपौ = १ पलं = ४ तो. ।
२ पले = १ प्रसृतिः = ८ तो. ।
२ प्रसृती = १ कुड़वः = १६ तो. ।
२ कुड़वौ = १ मानिका = ३२ तो. ।
२ मानिके = १ प्रस्थः = ६४ तो. ।
४ प्रस्थाः = १ आढ़कः = २५६ तो. ।
४ आढ़काः = १ कलसः = १०२४ तो. ।
२ कलसौ = १ शूर्पः = २०४८ शे. ।
२ शूर्पौ = १द्रोणी = ४०९६ शे. ।
४ द्रोण्यः = १ खारी = १६३८४ शे. ।
१०० पलानि = १ तुला = ४०० तो. ।
२००० पलानि = १ भारः = ८००० शे. ।

व्रीह्यादिमानम् ।

४ व्रीहयः = १ गुञ्जा । ५ गुञ्जाः = १ पणः ।
८ पणाः = १ धरणः । २ धरणौ = १ कर्षः ।
४ कर्षाः = १ पलं । १०० पलानि = १तुला ।
२० तुलाः = १भारः ।

कालिङ्गिका (ङ्गी) । स्त्री । त्रिवृति । (তেউড়ী । रा.नि.व.६ । राजकर्कट्याम् । मे.गत्रिकं ।

कालिन्द(क)म् । क्ली ।(Cucumis utilatissimus) Water melon. कालिङ्गे । कलीँदा इति ख्याते फलविशेषे । তরমুজ । हिं तरबूज । उत्. तरपुज । सु.सू.४६अ. । गुणाः—शीतलं ग्राहि स्वादुपाकरसं गुरु विष्टम्भि । मद.। तस्य पक्वस्य गुणाः --पित्तवृद्धिकरम् उष्णं कफवातनाशनं । वै.निघ.। कालिङ्गं ग्राहि कफपित्तशुक्रहृच्छीतलं गुरु । अत्रि. । दृष्टिशुक्रपित्तनाशि कफवातकारित्वं । तत्पत्रगुणाः—रुधिरस्थापनं तिक्तञ्च । "पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित् ।" भा. ।

कालिन्दिका (न्दी) । स्त्री । अरुणत्रिवृति । रा.नि.व.६ । श्वेतकटभीवृक्षे । रा.नि.व.९ । See कटभी ।

कालिन्दीसूः । पुं । सूर्ये । त्रिका. ।

कालि(ली)य(क)म् । पुं, क्ली । (यः) कृष्णसर्पविशेषे । (यकः) कृष्णागुरुणि । কালাগুরু । र.मा. । च.चि.३अ.। पीतचन्दने । कलम्बक इति लोके । गुणैः रक्तचन्दनसदृशगुणम् विशेषेण व्यङ्गनाशनम् । भा.पू.१भ. । रक्तदोषहरं विशेषेण वातघ्नञ्च । मद.व.२ । भा.म.४भ.नीलिकाव्यङ्ग.चि.। दारुहरिद्रायां । श.र. । वै.निघ.२भ.अप.चि.वा.व्या.एलादितैले । मलेन्द्रीकाष्ठे । মলঙ্গা (দেবদারু । "कालीयकरसोपेतम् ।" सि.यो.,च.द.वा.व्या.एलादितैले । सु.सू.३८अ. । शिलाजतुनि । वै.निघ. । लौहे ।

काली । स्त्री । नीलिन्यां । रात्रौ । पाटलायां । कृष्णत्रिवृतायां । मञ्जिष्ठायां । कृष्णवेत्रे । वै.निघ.। कृष्णकार्पास्याम् । रा.नि.व.४ । कृष्णजीरके । पृथ्वीकायां । त्रिवृति । रा.नि.व.६ । वृश्चिकाल्याम् । रत्ना. । चीरकीटे । मे.लद्विकं । श्वेतजीरके । कण्टकपाल्याम्। (কেলেকড়া । भैष.अम्लपि.चि.वृह.सुधावत्यां.कन्दर्पसारतैले । [বক । श.र. ।

कालीकः । पुं । Heron. क्रौञ्चे । (কোঁচ

कालीची । स्त्री । यमविचारभूमौ । त्रिका. ।

कालीतनयः । पुं । महिषे । हे.च. ।

कालीयका । स्त्री । दारुहरिद्रायाम् । भैष. ।

कालीयकचोदः । पुं । कुङ्कुमे ।

कालीयागुरु । क्ली । कृष्णागुरुणि । कलम्बकटु इति लोके । भा.उ.वाजी.चि.चन्दनादितैले।

कालीरसा । स्त्री । कदलीवृक्षे । वै.निघ. ।

कालुष्यम् । क्ली । रजोगुणकर्म्मकलुषतायाम् । रा.नि.व.२१ ।

कालेय(क)म् । क्ली । कुङ्कुमे । पीतचन्दने । मलेच्छीचन्दनमिति लोके । रा.नि.व.१२ । सु.सू.३९अ. । कृष्णचन्दने । কৃষ্ণাগুরু । प.मु. । च.द.पित्तज्व.चि. । यकृति । मे.। हरिचन्दने । रा.नि.व.२३ । पुं । दारुहरिद्रायां । रा.नि.व.६ । कुक्कुरे । रा.नि.व.१९। कामलरोगभेदे । কুম্ভকামলা। पीतवर्णसुगन्धिकाष्ठे । नीलकमले । शिलाजतुनि । वै.निघ. ।

कालोद्यम् । क्ली । कमलवीजे ।

कालोलः । पुं । द्रोणकाके । विषभेदे । मे. ।

काल्प: (ल्य:) (क:) । पुं । (Curcuma zerumbet.) गन्धशथ्यां । प.मु. । व्याघ्रनखे । नखी । वै.निघ.। आमहरिद्रायां । आम आदा । षम. । श.र. ।

काल्यम् । क्ली । प्रत्यूषे । हे.च. ।

काल्या । स्त्री । गर्भग्रहणप्राप्तकालायां रजःस्वलायां गवि । বাতান গাই । प्रतिवर्षप्रसवशीलायां गवि । বছর বিউনী গাই । हला. ।

कावारम् । क्ली । An aquatic plant. (Vallisnaria.) शैवले । শেওলা । हारा. ।

कावारी । स्त्री । छत्रादिच्छत्रे । টোকা । त्रिका. । [कौकपक्षिणि । मे.कत्रिकं ।

कावृक: । पुं । कुक्कुटे । पीतमस्तकपक्षिणि ।

कावेरम् । क्ली । कुङ्कुमे । जटा. ।

कावेरी । स्त्री । हरिद्रायां । হলুদ । मे.रत्रिकं। स्वनामप्रसिद्धभारतवर्षीयदाक्षिणात्यनद्याम् । एतज्जलं स्वादु श्रमघ्नं लघु दीपनं दद्रुकुष्ठघ्नं मेधाबुद्धिरुचिप्रदञ्च । रा.नि.व.१४ ।

काश: (क:) । पुं, क्ली । A species of grass. (Saccharum spontaneum.) स्वनामख्याततृणविशेषे । "चामरपुष्प:" इति । सु. सू.३८अ.। "श्वेतचामरक: इति ।" वा.सू.१५अ. । "गोकण्टकोत्कटसहाचरबाणकाशा: ।" কেশে ঘাস । हिं कास । मं कं काउंसु, काजलु । तें रेलु । कों कसाड़ । स द्विविध:, तत्र प्रथम: उशीरीति कशाड़ इति च लोके ख्यात: । गुणा:—मधुर: तिक्त: स्वादुपाक: हिम: सर: मूत्रकृच्छ्राश्मरीदाहरक्तदोषक्षयपित्तरोगघ्नश्च । भा.पू.१भ.। शीतल: गौल्य: रुचिजनक: वृष्य: पित्तदाहघ्न: तृप्तिकर: बल्य: शुक्रल: श्रमशोथकफघ्नश्च । द्वितीय:—मधुर: शीत: पित्तदाहक्षयघ्नश्च । रा.नि.व.८। पुं । कण्ठकण्डूयने । क्षुते । श.र. । रोगविशेषे । See कास: । काशिराजपितरि सुहोत्रे ।

काशनाशन: । पुं । कर्कटशृङ्ग्याम् । रत्ना. ।

काशपुष्पकम् । क्ली । स्थावरविषान्तर्गतकन्दविषे । वा.उ.३५अ. । [अ.टी.रा. ।

काशमर्द: । पुं । कासमर्दक्षुपे । कालकामन्द॥

काशा (शी) । स्त्री । काशतृणे । अ.टी.भ. ।

काशाल्मलि: । स्त्री । A kind of silk cotton tree. (Bombax hepta phyllum.) कूटशाल्मल्याम् । কুশিমূল । जटा. ।

काशि: । पुं । धन्वन्तरिपितरि सुहोत्रे ।

काशिकन्या । स्त्री । काशितनयायाम् ।

काशि(शी)काप्रिय: । पुं । दिवोदासे, धन्वन्तरौ । श.र. ।

काशिग्रह: । पुं । अश्वस्य दुष्टग्रहविशेषे । लक्षणं यथा—"अकस्मादस्य लोमानि शीर्य्यन्ते यस्य लङ्घति । शूनपश्चिमपादस्य तस्य काशिग्रहं वदेत्॥ ज.द.५७अ. ।

काशि(शी)राज: । पुं । धन्वन्तरौ । त्रिका.।

काशिल: । त्रि । काशतृणमये । काशनिर्म्मिते।

काशी । त्रि । कासरोगिणि । राज. ।

काशीश(ष)(स)म् । क्ली । Green sulphate of iron. स्वनामख्यातौषधातुविशेषे । হিরেকস । हिं मांगफूल, कौशीश । प्रयोगा. बृहच्चिन्तामणिरसे । काशीषं द्विविधं धातुपुष्पभेदात् । धातुकाशीशं हरितं लोहितञ्च, अन्यत् शुक्लं कृष्णञ्च । र.मा. । पुष्पकाशीषं किञ्चित्पीतं, भस्मवत् मृत्तिकाम्लं धातुकाशीशं । गुणा:—"काशीशं धातुकाशीसं पांशुकाशीशमित्यपि। तदेव किञ्चित्पीतन्तु पुष्पकाशीशमुच्यते । काशीशमुष्णमम्लञ्च तिक्तञ्च तुवरं तथा । वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत् । मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम् ॥" भा. । "शीतलं स्निग्धं पित्तनेत्ररुजापहं । पित्तापस्मारशमनं रसवद्गुणकारकम् ॥" संग्रह:। कषायत्वं विषकुष्ठकृमिखर्ज्जूनाशित्वं चक्षुष्यं कान्तिकरञ्च । रा.नि.व.१३ । तच्छुद्धिश्च भृङ्गराजरसेन सकृत् स्वेदेन भवति । तच्च निर्म्मलं स्निग्धं चित्तनेत्ररोगहरं पित्तापस्मारघ्नं रसवद्गुणकरञ्च । र.सा.सं.।

काशीशत्रितयम् । क्ली । काशीशधातु-काशीशपुष्प-काशीशेषु । भैष.लौहचि.महाद्रावके ।

काशीशाद्यतैलम् । क्ली । स्त्रीरोगे हितम् । "काशीशतुरगगन्धाशावरगजपिप्पलीविपक्वेन। तैलेन यान्ति वृद्धिं स्तनकर्णवराङ्गलिङ्गानि ।" का-

शीर्ष (হিরেকস)। तुरगगन्धाश्वगन्धा। शावरी रोध्रः। अत्र तैलस्य शरावः। कल्कस्य च तैलपादांशः। च.द.। [न्तीरसे।

काशीसम्भूतः । पुं। पारदे। र.सा.सं.। पा-

काशूकारः । पुं। गुवाकवृक्षे। वै.निघ.।

काशेक्षुः । पुं। काशे। भा.पू.१भ.।

काश्मरी । स्त्री। कपिलद्राक्षायाम्। रा.नि.व.३। मृगनाभौ। মৃগনাভি। भा.। गाम्भारीवृक्षे। रा.नि.व.९। गाम्भारीफले। च.द.वातपित्तज्व.चि.। "काश्मरीपत्रकं लोध्रम्।" पुष्करमूले। वै.निघ.।

काश्मरीफलम् । क्ली। गाम्भारीफलमज्जायां। सि.यो.पित्तज्व.चि.।

काश्मर्य्यः । पुं, क्ली। गाम्भारीवृक्षे। গামার গাছ। रा.नि.व.९। "सारिवीशीरकाश्मर्य्यः।" कायफलवृक्षे। पुष्करमूले। वै.निघ.। क्ली। गाम्भारीफले। গামার ফল। गुणाः—हृद्यं मूत्रविबन्धघ्नं पित्तासृग्वातनाशनं। केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते॥ सु.सू.४६अ.। सि.यो.वा.ज्व.चि.द्राक्षादौ। "द्राक्षागुडूचीकाश्मर्य्यत्रायमाणाः।" च.सू.४अ.।

काश्मर्य्यफलक्काथः । पुं। गाम्भारीफलकषाये। च.द.पि.ज्व.चि.। "काश्मर्य्यक्काथवा पुनः।"

काश्मर्य्या । स्त्री। ह्रस्वगाम्भारीवृक्षे। वै.निघ.।

काश्मर्य्योद्भवपर्णिका । स्त्री। ह्रस्वगाम्भारीवृक्षे। ছোট গামার গাছ। वै.निघ.।

काश्मीरम् । क्ली। (Costus speciosus.) कुष्ठभेदे, पुष्करमूले। পদ্মমূল বা কুড়বিশেষ। कुङ्कुमे। च.द.एकादशशती.महाप्रसारणीतैले। कस्तूर्य्याम्। रा.नि.व.२३। पुं। गाम्भारीवृक्षे।

काश्मीरजम् । क्ली। कुङ्कुमे। रा.नि.व.१२। कुष्ठभेदे। मे.जचतुष्कं। पुष्करमूले। विश्वः। अतिविषायाम्। वै.निघ.।

काश्मीरजन्म । क्ली। कुङ्कुमे। प.मु.। [मे.।

काश्मीरजा । स्त्री। अतिविषायां। আতইচ।

काश्मीरजीरकम् (का) । क्ली, स्त्री। शुक्लजीरके। रा.नि.व.६। [चि.२५अ.।

काश्मीरपुष्पम् । क्ली। गाम्भारीकुसुमे। सु.

काश्मीरफलम् । क्ली। गाम्भारीफले। च.द.र.पि.चि.शतावरीघृते।

काश्मीरा । स्त्री। कपिलद्राक्षायां। আঙুর। रा.नि.व.११। अतिविषायां। আতইচ। प.मु.। स्थलपद्मिन्याम्। वै.निघ.।

काश्मीरी । स्त्री। गाम्भारीवृक्षे। हे.च.। भा.। कपिलमृगनाभौ। वै.निघ.। [व.१४।

काश्यः । पुं। काशिराजे। क्ली। मद्ये। रा.नि.

काश्यपः । पुं। मृगविशेषे। मे.। मत्स्यविशेषे। क्ली। मांसे। हे.च.। [षः। भरतः।

काश्वरी । स्त्री। ह्रस्वगाम्भारीवृक्षे। त्रिकण्टकी-

काषायवासिकः । पुं। सविषसौम्यकीटभेदे। तेन दष्टे श्लेष्मजन्यरोगा जायन्ते। सु.कल्प.८अ.।

काषायी । स्त्री। सविषमक्षिकाविशेषे। सु.कल्प.८। See मक्षिका। [दारुहरिद्रायां। वै.निघ.।

काष्ठम् । क्ली। दारुणि। কাঠ। मे.ठद्विकं।

काष्ठकम् । क्ली। कृष्णागुरुणि। वै.निघ.। अगुरुणि। काष्ठागुरुणि। रा.नि.व.१२।

काष्ठकदली । स्त्री। Wild plantain, (Musa sapientum.) वन्यकदलीविशेषे। বুনো কলা। मं काष्ठकेलि। गुणाः—रुच्या रक्तपित्तघ्नी शीतला गुरुः मन्दाग्निकरी दुर्ज्जरा अतिमधुरा च। रा.नि.व.११। तृष्णादाहमूत्रकृच्छ्ररक्तपित्तघ्नी विस्फोटकास्थिरोगहरी च। वै.निघ.।

काष्ठकीटः । पुं। घुणे। हे.च.।

काष्ठकु(कूटः)टकः (कुट्टः) । पुं। A sort of woodpecker, (Picus Bengalensis.) पक्षिविशेषे। কাঠঠোকরা পাখী। त्रिका.। गुणाः—"तथा लघुर्वातहरः काष्ठकूटोऽग्निवर्द्धनः। वातश्लेष्माधिको ज्ञेयः शीतलः शुक्रवर्द्धनः। अश्मरीं हन्ति विशदो बलकृन्मांसतर्पणः॥" अत्रि.२१अ.।

काष्ठगोधा । स्त्री। तन्नामकौषधिविशेषे। काष्ठाकारगोधाकृती। च.चि.१अ.।

काष्ठजम्बुः (म्बूः) । स्त्री। भूमिजम्बूवृक्षे। বনজাম। रा.नि.व.११। [हारा.।

काष्ठतन्तुः । पुं। काष्ठकृमौ। গুটীপোকা।

काष्ठतक्षकः । पुं । काष्ठतक्षी । श.र. ।

काष्ठदारुः । पुं, क्ली । The tree Pinus Deodar. (Uvaria longifolia.) देवदारुभेदे । দেবদারুবিশেষ । रा.नि.व.१२ । See देवदारुः ।

काष्ठद्रुः । पुं । A tree called Butea Frondosa. पलाशवृक्षे । रा.नि.व.१० ।

काष्ठधात्री । स्त्री । काष्ठामलकीवृक्षे, क्षुद्रामलकी । भा.पू.१भ. ।

काष्ठधात्रीफलम् । क्ली । The fruit of the plant (Emblica officinalis.) क्षुद्रामलकफले । गुणाः—कषायं कटु शीतलं रक्तपित्तघ्नञ्च । रा.नि.व.११ ।

काष्ठपाटला (लिः) । स्त्री । सितपाटलिकायाम् । শ্বেত পারুল গাছ । रा.नि.व.१० ।

काष्ठपुष्पः । पुं । केतकीवृक्षे । কেয়া গাছ । प.मु. ।

काष्ठमल्लिका । स्त्री । स्वनामख्यातपुष्पवृक्षे । [কাঠ মল্লিকা । प.मु. ।

काष्ठमार्जारिका । स्त्री । काष्ठविड़ालिकायाम् । কাটবিড়ালি । भैष. ।

काष्ठरजनी । स्त्री । दारुहरिद्रायां । वै.निघ.।

काष्ठलेखकः । पुं । घुणे । हारा. ।

काष्ठवल्लिका (ल्ली) । स्त्री । कटुकायां । कटुकी । कटुकवल्ल्यां । লতাবিশেষ । रा.नि.व.३।

काष्ठवास्तुकः । पुं। वास्तुकशाकभेदे। वै.निघ.।

काष्ठविवरम् । क्ली । तरुकोटरे । श.चि. ।

काष्ठशारिवा । स्त्री । उत्तरापथप्रसिद्धे शारिवाभेदे, श्वेतशारिवायां, अनन्तायाम् । অনন্তমূল । मद.व.१। See शारिवा । [रा.नि.व.१६।

काष्ठशालिः । पुं। रक्तशाली । রাঙী ধান ।

काष्ठसारिवा । स्त्री । श्वेतशारिवायाम् । मद. व.१ । [लाः) । मे.ठद्विकं ।

काष्ठा (ष्ठी) । स्त्री । कालपरिमाणे (३० क-

काष्ठागुरु । क्ली । पीतवर्णागुरुणि । পীত অগরু । गुणाः—कटूष्णं लेपे रूक्षं कफघ्नञ्च । रा. नि.व.१२ ।

काष्ठामलकी । स्त्री । काष्ठधात्र्यां ।

काष्ठालुः । पुं । शुभ्रालुके । वै.निघ. ।

काष्ठालुकम् । क्ली। काष्ठवत्कठिने कन्दविशेषे । কাট আলু । वै.निघ. ।

काष्ठाशनः । पुं । घुणे । रत्ना. ।

काष्ठिका । स्त्री । काष्ठकदलीवृक्षे । বনকদলী । रा.नि.व.११ ।

काष्ठिरसा । स्त्री । कदलीवृक्षे । वै.निघ. ।

काष्ठिला । स्त्री । कदलीवृक्षे । राजार्के । वै. निघ. ।

काष्ठीलः । पुं । राजार्के । রাজাকন্দ । रा. नि.व.१०। See राजार्कः। कुलिशमर्क्ष । चिका.।

काष्ठीला (लिका) । स्त्री । राजार्के । वै. निघ.। कदलीवृक्षे । কলা গাছ । रा.नि.व.११ ।

काष्ठेक्षुः । पुं । श्वेतेक्षौ । रा.नि.व.१४ । गुणाः—कान्तारतुल्यगुणः वातकोपनश्च । सु.सू.४५ष. ।

काष्ठोदुम्बरिका । स्त्री । काकोदुम्बरिकायां।

कासः । पुं । तन्नामकरोगे । কাসি । हिं खाँसि । तस्य निदानलक्षणं—मुखनासिकाधूलिप्रवेशादिना दुष्टोदानवायुनुगतप्राणवायोः कफपित्तेन मेलनम् । स दोषत्रयजः क्षतजः धातुक्षयजश्चेति पञ्चविधः । तदुक्तं "धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च । विमार्गगत्वादपि भोजनस्य वेगावरोधात् क्षवथोस्तथैव । प्राणो ह्युदानानुगतः प्रदिष्टः सम्भिन्नकांस्यस्वनतुल्यघोषः । निरेति वक्त्रात्सहसा सदोषो मनीषिभिः कास इति प्रदिष्टः। पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः । क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरमिति ॥ तेषां भविष्यतां रूपङ्कण्ठे कण्डूररोचकः । शूकपूर्णाभकण्ठत्वं तत्राधो विहतोऽनिलः । ऊर्द्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसृजन् । शिरःस्रोतांसि सम्पूर्य ततोऽङ्गान्युत्क्षिपन्ति च ॥" इत्यादि पूर्व्वरूपम् । भा. । शेषाणां लक्षणानि स्वस्वपर्य्याये द्रष्टव्याणि । कफे । काशतृणे । কেসে ঘাস । भ.टी. भ. । शोभाञ्जनवृक्षे । श.च. । [रा.नि.व.७ ।

कासकन्दः । पुं । कोङ्कणप्रसिद्धकासालुके ।

कासघ्नः । पुं । हरीतकीकणाशुण्ठीमरिचगुड़-

क्कते मोदकविशेषे। विभीतकवृत्ते। रा.नि.व.११। कासमर्द्दे। कण्टकार्य्याम्। वै.निघ.।

कासघ्नधूमः । पुं। पञ्चविधधूमपानान्यतमे धूमे, येन पीतेन कासो नश्यति। तस्योपकरणं, बृहतीकण्टकारीत्रिकटुकासमर्द्दहिङ्गुङ्गुदीत्वक्मनःशिला प्रभृतीनि कासहराणि द्रव्याणि, तैः कल्कीक्कतैः धूमपानं। सु.चि.४०अ.। [वंशलोचनायां। प.मु।

कासघ्नी । स्त्री। भार्ग्याम्। कण्टकार्य्याम्।

कासजित् । स्त्री। (Clerodendrum siphomanthus.) भार्ग्याम्। वामनहाटी। रा.नि.व.६।

कासनाशिका । स्त्री। अरुणवित्ति। लाल तेउड़ि। रा.नि.व.६। कर्कटशृङ्ग्याम्। र.मा.।

कासनाशिनी । स्त्री। कर्कटशृङ्ग्याम्। काँकड़ाशृङ्गी। प.मु.।

कासन्दीवटिका । स्त्री। कफघ्नौषधे, वेशवारविशेषे। कासुन्दि। गुणाः—हृद्या रुच्याग्निजननी वातमलानुलोमनी वातश्लेष्मघ्नी च। राज.।

कासभञ्जनः । पुं। पटोले। भा.पू.१भ.।

कासमर्द्दः (कः) । पुं। (Cassia or senna esculenta. Cassia sophora.) स्वनामख्यातपत्रशाकविशेषे। कालकासन्दा। हिं कसौदी, कासिंदा। मं कं कासविंदा। तै कसिविंदचेट्टु। प्रयोगः—अञ्जनरसे। गुणाः—अग्निदीपनः स्वादुश्च। राज.। तिक्तोष्णः मधुरः कफवातघ्नः अजीर्णघ्नः कासपित्तघ्नः कण्ठशोधनश्च। रा.नि.व.४। "विविधवातविट्हन्ता मूत्रवातकफे हितः। मधुरः कफवातघ्नः पाचनः कण्ठशोधनः। विशेषतः पित्तहरः इत्युक्तः कासमर्द्दकः॥" अत्रि. १६अ.। "मधुरः कफवातघ्नः पाचनः कण्ठशोधनः। विशेषतः पित्तहरः सतिक्तः कासमर्द्दकः॥" सु.सू. ४६अ.। पर्णं—पाके कटु वृष्यमुष्णं लघु श्वासकासारुचिघ्नं। पुष्पन्तु श्वासकासघ्नमूर्द्ववातविनाशनं॥ वै.निघ.। वेशवारविशेषे। कासुन्दी। अ.टी.भ.। भा.म.४भ.। पटोले। हारा.। कासघ्नौषधे।

कासमर्द्दकपत्रम् } क्ली। कासमर्द्ददले।
कासमर्द्ददलम् } कालकासन्दार पाता।

कासमर्द्दनः । पुं। पटोलवृत्ते। रा.नि.व.३।

कासमर्द्दिका । स्त्री। कासमर्द्दे। वै.निघ.।

कासरः । पुं। महिषे। हारा.।

कासरोगः । पुं। रोगविशेषे। See कासः।

कासमंहारभैरवः । पुं। कासाधिकारे। "रसगन्धकताम्राभ्रवङ्गटङ्कणलौहकं। मरिचं कुष्ठतालीशं जातीफललवङ्गकम्। कार्षिकं चूर्णमादाय द्रवैरेषाञ्च मर्द्दयेत्। भेकपर्णीकेशराजनिर्गुण्डीकाकमाचिकाः। द्रोणपुष्पी च शालञ्ची ग्रीष्मसुन्दरं एव च। भार्गी हरीतकी वासा कार्षिकैः पञ्चभिः रसैः। वटिकां कारयेद्वैद्यः पञ्चगुञ्जाप्रमाणकाम्। .... । वासाशुण्ठीकण्टकारीक्वाथेन पाचयेद्बुधः॥" रस.र.। अत्र भेकपर्ण्यादीनां स्वरसः प्रत्येकं कर्षपरिमितः। भेकपर्णी=थानकुनि, थूलकुड़ि। र.सा.सं.।

कासहरवर्गः । पुं। द्राक्षाभयामलकपिप्पलीदुरालभाशृङ्गीकण्टकारिकावृश्चीरपुनर्नवातामलक्य इति दशद्रव्ये। च.सू.४अ.।

कासहा । पुं। कण्टकारीकृते पिप्पलीचूर्णसहिते कासहरक्वाथे। तन्नामकधूमपाने। तत्र धूमनाड़ी १६ अङ्गुलिमिता। धूमद्रव्यञ्च क्षुद्रकोषर्ण भाव्यम्। भा.।

कासान्तकरसः । पुं। कासाधिकारे। पारदगन्धक-शुद्धविष-शालपर्णी-धान्यकानां चूर्णं प्रत्येकं समभागं, सर्व्वचूर्णसमं मरिचचूर्णम्। ४ गुञ्जा मधुना सेव्यम्। र.सा.सं.। [पुं। सरोवरे। वै.निघ.।

कासारम् । क्ली। स्वनामख्यातपक्वान्नविशेषे।

कासारिः । पुं। कासमर्द्दक्षुपे। रा.नि.व.४।

कासालुः । पुं, क्ली। An esculent root, a sort of yam. खंवरे इति कोङ्कणदेशप्रसिद्धे आलुकविशेषे। अस्मदीये च खामआलु इति कथ्यते। मं कांसालु। गुणाः—कण्डूघ्नः विषघ्नः श्लेष्मघ्नः अरोचकघ्नः स्वादुः पथ्यः दीपनश्च। रा.नि. व.७।

कासिका । स्त्री। कफे। वनमुद्गे। वै.निघ.।

कासी । त्रि। कासरोगवति। वै.निघ.।

कासीमृत्तिका । स्त्री। सौराष्ट्रमृत्तिकायाम्। पङ्कपर्पटी। रा.नि.व.१३।

कासीयम् । क्ली । कांस्ये । কাঁসা । वै.निघ. ।

कासीसम् । क्ली । काशीसे । হিরেকস । मा-विकसुराविशेषे । तुत्थके । वै.निघ. । कासीसं भस्म-सदृशं किञ्चिदम्लं लवणरसं । ड. । See काशीसम् ।

कासीसद्वयम् । क्ली । धातुकासीसपुष्पकासी-सयोः । धातुकासीस ও পুষ্পকাসীস । वा.सू. १५अ. । एकं पांशुधातुसंज्ञं, अपरं पुष्पकासीसा-ख्यम् । एकं भस्मसदृशं किञ्चिदम्लं लवणरसं, द्वि-तीयं पुष्पकासीसमीषत्पीतं तुवररसम् । ड. ।

कासु(स्त)न्दः । पुं । कासमर्द्दे । কালকাসন্দা । भैष.कुष्ठचि.कन्दर्पसारतैले ।

कासुम्भी । पुं । कौसुम्भीशाली । रा.नि.व.१६ ।

कासुरः । पुं । महिषे । हला. । [है.च. ।

कासूः । स्त्री । विकलवाक्ये । मे.सद्विकं । रोगे ।

कासेक्षुः । पुं । क्षुद्रकासतृणे । वै.निघ. ।

कासोली । स्त्री । अतिबलायाम् । গোরক্ষ চাকুলে । वै.निघ. ।

कास्तीरम् । क्ली । तीक्ष्णलौहे । ঊীথা । र.मा. ।

काहलः । पुं । कुक्कुटे । हारा. । विड़ाले । श. मा. । क्ली । अव्यक्तवाक्ये । है.च. । त्रि । शुष्के । मे. ।

काहलापुष्पः । पुं । श्वेतधुस्तूरवृक्षे । रा.नि. व.१० ।

काही । स्त्री । कुटजवृक्षे । रा.नि.व.८ ।

काक्षः । पुं, क्ली । अपाङ्गदर्शने । त्रिका. ।

काक्षी । स्त्री । गोपीचन्दने । सौराष्ट्रमृत्तिका-याम् । र.मा. । तुवरिकायाम् । রহর । है.च. ।

काक्षीरी । स्त्री । वंशलोचनाभेदे । रवा. ।

काक्षीवः (कः) । पुं । शोभाञ्जनवृक्षे । अम. । श.र. ।

किंशा(सा)रुः । पुं, क्ली । शस्यशूके । শুঁয়া । अम. । रोटके । वाणे । कङ्कपक्षिणि । मे.रत्रिकं ।

किंशुकः । पुं, क्ली । (Butea frondosa.) पलाशवृक्षे । পলাশ গাছ । हिं ढाक । तें मोदुग । रा.नि.व.१० । च.द.गुल्म.चि. । "व्याघ्रीकिंशु-कपारिभद्र ।" नन्दीवृक्षे । रा.नि.व.१० । शाल्म-लीवृक्षे । प.मु. ।

किंशुकतैलम् । क्ली । पित्तश्लेष्मघ्ने पलाशवी-जतैले । পলাশবীজের তৈল । वा. ।

किंशुकक्षारः । पुं । पलाशक्षारे । च.चि.१अ. ।

किंशुका । स्त्री । पलाशवृक्षे । ज्योतिष्मत्याम् । नन्दीवृक्षे । रा.नि.व.२३ ।

किंशुकादिगणः । पुं । त्रिदोषहरद्रव्यसमू-है । यथा—"किंशुकः काश्मरी विश्वमग्निमन्थं त्रिकण्टकः । श्योणाकः शालपर्णी च सिंहपुच्छी-द्वयं स्थिरा । पाटला कण्टकारी च बृहती विल्व एव च ॥" रसा.सं. । [नीलकण्ठपक्षिणि । वै.निघ. ।

किंशुलुकः । पुं । हस्तिकर्णपलाशे । श.र. ।

किकिः । पुं । Blue Jay. चाषपक्षिणि । श.मा. । नारिकेलवृक्षे । रा.नि.व.११ ।

किकि(की)दि(दी)वः (विः) । पुं । चा-षपक्षिणि । सुवर्णचातके । সোণা চড়া, নীলকণ্ঠ পক্ষী । भरत. । श.मा. । अम. ।

किकिदीधितिः । पुं । कुक्कुटे । हला. ।

किकिरः । पुं । कोकिले । पक्षिणि । अश्वे । वै.निघ. ।

किकी (इन्) । चाषपक्षिणि । वै.निघ. ।

किक्किशः (सः) । पुं । केशादिघ्नकीटविशेषे । টাক্ পোকা, দাঁতের পোকা প্রভৃতি । मांस-दारणरोगे । च.शा.८अ. । [त्त्य.४अ. । See सर्पः ।

किक्किसादः । पुं । राजिमत्सर्पविशेषे । सु.क-

किखिः । पुं । वानरे । स्त्री । लघुशृगाले । খ্যাকশিয়ালী । है.च. । त्रिका. ।

किङ्किनिः (नी) । पुं, स्त्री । विकङ्कतवृक्षे । বঁইচি গাছ । रा.नि.व.८ । भैष.शिरोरोग.चि. किङ्किनीतैले । आम्लद्राक्षायाम् । वै.निघ. ।

किङ्किरः । पुं । विकङ्कतवृक्षे । বঁইচি গাছ । रा.नि.व.८ । कोकिले । घोटके । क्ली । करिकु-म्भे । बृहत्कृष्णमक्षिकायाम् । ভ্রমর । शब्दकल्प. ।

किङ्किरा (री) । स्त्री । रक्ते । सारस्वतः । विकङ्कतवृक्षे । বঁইচি গাছ ।

किङ्किराटः । पुं । वर्बूरकवृक्षे । বাবলা গাছ । गुणाः—"किङ्किराटो भवेच्छीतो भेदको ग्राहको

मतः। कफकुष्ठक्रमिविषनाशकः समुदाहृतः।” वै.निघ.।

किङ्किरातः । पुं। (Barleria prionites) Lin, A species of Amaranth. सकण्टकपीतपुष्पारण्यभिण्टीक्षुपे। পীতঝাঁটী, কাঁটা-ঝাঁটী। हे.च.। वाणपुष्प इति गौड़े। हिं कट्सरैया। मं पीवलागीरटा। कं होवणदगीरटे। तैं कींड्गौगु। गुणाः—कषायोष्णः तिक्तः कफवातघ्नः दीपनः शोफकण्डूत्वग्दोषरक्तघ्नश्च। रा.नि.व.१०। हिमः तिक्तः कषायः कफपित्तघ्नः रक्तदोषवमिक्रमीन्हन्ति। भा.पू.१भ.। रक्ताम्लाने। লালঝাঁটী। जटा.। वर्व्वूरकवृचे। বাবলা গাছ। भा.। अशोकवृचे। অশোক গাছ। रक्तमृत्तिकायाम्। লাল মাটী। कोकिले। शुकपच्चिणि। টেয়া পাখী सारस्वतः।

किङ्किरालः (यः) । पुं। वर्व्वूरवृचे। [जटा.।

किङ्किरी । पुं। विकङ्कतवृचे। বঁইচি গাছ।

किङ्किलासः । पुं। अशोकवृचे। प.मु.।

किञ्चनः । पुं। हस्तिकर्णपलाशे। श.र.। व्य। वस्तुनि। वै.निघ.। [शिषे। পালংশাক। वै निघ.।

किञ्चिच्चीरितपत्रिका । स्त्री। शाकवृचवि-

किञ्चित् । त्रि। चतुर्थांशे। वै.निघ.।

किञ्चित्पाणिः । पुं। कर्षमितमाने। २ तोला। प.प्र.१ख.।

किञ्चिदुष्णः । त्रि। ईषदुष्णे।

किञ्चिलिकः **किञ्चुलिकः** **किञ्चुलुकः** } पुं। Earth worm. गण्डूपदे। কেঁচো। त्रिका.।

किञ्जम् । क्ली। किञ्जल्के। रा.नि.व.१०। मृणाले। नागकेसरपुष्पे। पद्मकेशरे। वै.निघ.।

किञ्जलः । पुं। पद्मकेसरे। श.च.। किञ्जल्कमात्रे।

किञ्जल्कः । पुं, क्ली। कुष्ठे। नागकेशरवृचे तत्पुष्पे च। वै.निघ.। च.द.अर्शः.चि.चाङ्गेरीघृते। हे.च.। पद्मकेशरे। “किञ्जल्कः केसरः प्रोक्तः।” केशाकारस्वर्णाभवेष्टने, पद्मवराटे। च.द.वा.व्या. अश्वगन्धाद्यतैले। गुणाः—शीतलो हृद्यः कषायो ग्राही कफपित्ततृष्णादाहरक्तार्शोविषशोथघ्नो च। भा.पू.१भ.। मधुरः रुचः कटुः मुखव्रणहरः शीतलो रुच्यः पित्ततृष्णादाहहरश्च। रा.नि.व.१०।

किञ्जबालुकम् । क्ली। कङ्कुष्ठे, पर्व्वतीयमृत्तिकाविशेषे। वै.निघ.। [राङ्गीकन्दे। वै.निघ.।

किटिः (टी) । पुं। वनशूकरे। अम.। वा-

किटिदंष्ट्रा । स्त्री। शूकरदंष्ट्रायां। वै.निघ.।

किटिभः । पुं। केशकीटे। निथि। हे.च.। कुष्ठरोगभेदे। क्ली। तुत्थके। वै.निघ.।

किटिमः । पुं। सौम्यकीटविशेषे। तेन दष्टे श्लेष्मजन्यरोगा भवन्ति। सु.कल्प.८अ.। क्ली। चुद्रकुष्ठभेदे। तल्लक्षणम्—“श्यावङ्किणखरस्पर्शं परुषं किटिमं स्मृतम्।” मा.नि.। “यत्स्रावि वृत्तं घनमुग्रकण्डु तत्स्निग्धकृष्णं किटिमं वदन्ति।” सु.नि.५अ.। [न्दे, शूकरकन्दे। वै.निघ.।

किटिमूलकः (लाभः) । पुं। वाराहीक-

किट्ट(क)म् । क्ली। पुरीषे। रा.नि.व.१८। कर्णमले। शुक्रे। लौहमले। মণ্ডুর। तत्र किट्टं शतवर्षोद्भमुत्तमं अशीतिवार्षिकं मध्यमं षष्टिवार्षिकमधमं ततो हीनं विषतुल्यम्। “ध्मायमानस्य लौहस्य मलं मण्डुरमुच्यते। यल्लौहं यद्गुणश्रोक्तं तत्किट्टमपि तद्गुणम्॥” भा.पू.१भ.धातुव.। तस्य शोधनं यथा—किट्टं विभीतककाष्ठानलैः दग्धव्यं। यदाग्निवर्णं भवति तदा गोमूत्रे निर्व्वापयेत्। एवं सप्तवारङ्कृत्वा शोधयेत्। “अचाङ्गारैर्धमेत्किट्टं लौहजं तद्गवां जलैः। स्वेदयेत्तप्ततप्तञ्च सप्तवारं पुनः पुनः॥ चूर्णयित्वा ततः क्वाथे द्विगुणे त्रैफलोद्भवे। आलोड्य भर्ज्जयेद्वह्नौ मण्डुरं जायते वरम्॥” सा.कौ.। गुणाः—“ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके। तस्मात्सर्व्वत्र मण्डुरं रोगशान्त्यै प्रयोजयेत्॥ विचूर्ण्य लौहं मधुना चिरेण कुम्भाह्वयं पाण्डुगदं निहन्ति।” र.सा.सं.। मधुरं कटु उष्णं क्रमिवातघ्नं पक्तिशूलवायुशूलमेहगुल्मशोफघ्नञ्च। रा.नि.व.१३।

किट्टवर्ज्जितम् । क्ली। शुक्रे। हे.च.।

किट्टालः । पुं। लौहगूथे। মণ্ডুর। ताम्रकलशे। मे.लत्रिकं। क्ली। ताम्रे। वै.निघ.।

किट्टिमम् । क्ली। द्रवद्रव्यविशेषे।

किण: । पुं । मांसग्रन्थी । कड़ा, ঘেঁটা । श्रम.। घुणे । स्त्री । करीरे । कोश्राङ्के । हारा. । मधितीपरिस्थफेनाभवस्तुनि । वा.उ.३७श. । चर्मस्य बाह्येरभ्यन्तरभागे । ज.द.२श. । योनिकन्दरोगे । वै.निघ. । त्रिका. ।

किणि: । स्त्री । अपामार्गक्षुपे । श.र. ।

किणिहि: (ही) । स्त्री । Achyranthes aspeaa. श्वेतापामार्गे, अपामार्गे । हिं चिरचटा । रा.नि.व.४ । च.सू.४श. । कृष्णकटभीवृक्षे । रा.नि.व.६ । सु.सू.३८श. । श्वेतगोकर्ण्याम् । শ্বেতাপরাজিতা । वै.निघ. ।

किख(क)म् । क्ली, पुं । सुरावीजे । মদের গেতা । प.प्र.१ख. । पक्की हृतसार: मेदक: किख: । सु.सू.२६श. । भा.म.४भ.योनिरोगे । तस्यावशिष्टं तत्प्रोक्तं सुरावीजन्तु किखकम्॥ वैद्यकम् । पिण्याके । रवा. ।

किखमूलक: । पुं । बकुलवृक्षे । वै.निघ. ।

किखी । पुं । अश्वे ।

कितव: । पुं । रोचनानामगन्धद्रव्ये । रा.नि.व.१२।२३ । धुस्तूरवृक्षे । रा.नि.व.१०।२३ । ग्रन्थिपर्णे । वै.निघ. । [लशा.चि. ।

कितवराज: । पुं । धुस्तूरवृक्षे । वै.निघ.२भ.

किनी । स्त्री । कृष्णवृहत्यां । वै.निघ. । [का. ।

किन्तनु: । पुं । ऊर्णनाभे । মাকড়শা । त्रि-

किन्दी (न्धी) (इन्) । पुं । घोटके । त्रिका. ।

किम्पाक: । पुं । महाकाललतायां । মাকাল লতা । र.मा. । विषतिन्दुकवृक्षे । কুচিলা । रा.नि.व.६ । See कारस्कर: । रोगे । ज्वरे । मलादिनिर्गमे । रवा. । त्रि । अपक्के । क्ली । महाकालफले ।

किम्भरा । स्त्री । नलीनामगन्धद्रव्ये । श.च. ।

कियाह: । पुं । शृगाले । रक्तवर्णाश्वे । "पक्कतालनिभो वाजी कियाह: परिकीर्त्तित: ।" ज.द.३श. । हे.च. ।

किर: । पुं । वराहे । श्रम. ।

किरटा । स्त्री । कुसुम्भवीजे । वै.निघ. ।

किरमाल: । पुं । श्रारग्वधवृक्षे । सु.चि.८श.।

किराटिका । स्त्री । शारिकापक्षिणि ।

किरात: (क:)
किराततिक्त: (क:) } पुं, क्ली । The plant Agathotes chirayta. भूनिम्बे । চিরেতা । हिं चिरायता । तैं नेलवेमु । "किराततिक्तममृता ।" च.द.पि.ज्व.चि. । गुणा:—वातिक: तिक्त: कफपित्तज्वरघ्न: व्रणरोपण: पथ्य: कुष्ठकण्डूशोषघ्नश्च । रा.नि.व.६ । सारक: रूक्ष: शीतस्तिक्त: लघु: सन्निपातज्वरश्वासकफपित्तरक्तदाहकासशोथतृष्णाकुष्ठज्वरव्रणकृमिघ्नश्च । भा.पू.१भ. । सि.यो.,च.द.ज्व.चि. । "किराताब्दामृतोदीच्य ।" हारीत.। "किरातं विश्वभेषजम् ।" त्रि । अल्पशरीरे । "स्यात्किरातस्तु भूनिम्बे म्लेच्छे चाल्पतनावपि ।" विश्व.। अश्वरचके । [रचन्दने । रा.नि.व.१२ ।

किरातकान्तम् । क्ली । कोङ्कणप्रसिद्धे श्वव-

किराततिक्तादि:
किरातादि: } पुं । वातपित्तज्वरे कषायविशेषे । "किराततिक्तममृता द्राक्षामामलकीं शटीं । निष्क्वाथ्य पित्तानिलजे क्वाथन्तं सगुड़म्पिबेत् । अयं चतुर्भद्रकोऽप्युच्यते ।" भा.म.१भ.। अपिच—"किरातको महानिम्ब: कुस्तुम्बुरु: शतावरी । पटोलं चन्दनं पद्मं शाल्मल्यौदुम्बरीजटा॥" रस.च. । अन्य:—"किरातं नागरं मुस्ता गुड़ूची चेति।" सि.यो.सा. ज्व.चि. । भा.। "किराताब्दामृतोदीच्य वृहतीद्वयगोक्षुरं । शालपर्णी पृश्निपर्णी शुण्ठीति ।" कषायोऽयं वातज्वरे—চিরেতা, মুতা, গুলঞ্চ,বালা, বৃহতী,কণ্টকারী, গোক্ষুর,শালপাণি, চাকুলে,শুঁট্ প্রত্যেকে ১৬ রতি,জল ৩২তোলা, শেষ ৮ তোলা । अन्यश्च कण्ठकुब्जसन्निपाते हित: । चिरायिताकटुकीपिप्पलीकुटजकण्टकारीशटीविभीतकदेवदारुहरीतकीमरिचमुस्ताकट्फलातिविषामलकीपुष्करमूलचित्रककर्कटशृङ्गीवासानां तोलकद्वयं कषायङ्कृत्वा शुण्ठीचूर्णं॥० तो. प्रक्षिप्य भक्षयेत् । भा.म.२भ.ज्व.चि. ।

किरातादिचूर्णम् । क्ली । दुर्जलदोषजज्वरे हितम् । चिरायिता त्रिवृता वाय्यालकं पिप्पली विड़ङ्गं कटुकी शुण्ठी चेति द्रव्याणि । एषां समभागचूर्णं मधुना लेह्यम् । भा.म.१भ.ज्व.चि. ।

किरातादितैलम् । क्ली । ज्वरे सन्ततसततादौ हितम् । मूर्च्छितकटुतैलं ४ श. दधिमस्तु ४ श. काञ्जिकं ४ श. किराततिक्तक्काथः (চিরেতার ক্বাথ) ४ श. । कल्कार्थं—मूर्व्वामूलं लाचा हरिद्रा दारुहरिद्रा मञ्जिष्ठा इन्द्रवारुणी (রাখালশশার মূল) कुष्ठं बालकं (বালা) रास्ना गजपिप्पली त्रिकटु पाठा इन्द्रयवः सैन्धवं सचललवणं विट्लवणं वासात्वक् श्वेतार्कमूलत्वक् श्यामालता देवदारु महाकालफलञ्च (মাকাল ফল) मिलितं १ श. । भैष.ज्व.चि. ।

किराततिनी । स्त्री । जटामांस्यां । श.र. ।

किरिः । पुं । शूकरे । रत्ना. । वाराहीकन्दे । वै.निघ. ।

किरिटिः (टी) । पुं । अर्ज्जुनवृत्ते । रा.नि. व.६ । खर्ज्जूरवृक्षे । शङ्खपुष्प्याम् । অপরাজিতা । क्ली । हिन्तालफले । त्रिका. ।

किरीटः । पुं । कुसुम्भवृक्षे । वै.निघ. ।

किर्म्मी । स्त्री । पलाशवृक्षे । मे.मद्विकं ।

किर्म्मीरः (त्वक्) । पुं । कर्व्वुरे । नागरङ्गवृक्षे । লেবু গাছ । मे., त्रिका. ।

किर्य्याणी । स्त्री । वनशूकरे । [वै.निघ. ।

किलपादिका । स्त्री । क्षुद्रलज्जालुकायाम् ।

किलाटः । पुं । Inspissated milk. शोषितक्षीरपिण्ड़े । हारा. । ছানা । गिजरी इति प्रसिद्धे दुग्धविकारे । र.मा. । कूर्च्चिकाभूतस्य क्षीरस्य घनभागे । सु.सू.४५अ. । कूर्च्चिकाक्षीरशाकयोर्घनभागः पृथग्भूतः किलाटः । वा.क्षीरव. । तथा "नष्टदुग्धस्य पक्कस्य पिण्डः प्रोक्तः किलाटकः । अपक्कमेव यन्नष्टं क्षीरशाकं हि तत्पयः ॥" भा.। "पक्कं दध्ना समं क्षीरं विज्ञेया दधिकूर्च्चिका । तक्रेण तक्रकूर्च्चा स्यात्तयोः पिण्डः किलाटकः । गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः ॥"

किलाटी (इन्) । पुं । वंशे । বাঁশ । एरण्डवृक्षे । हारा. । स्त्री । क्षीरविकृतौ । हे.च. ।

किलातः । त्रि । वामने, ह्रस्वे ।

किलालम् । क्ली । गोमूत्रे । वै.निघ. ।

किलासम् । क्ली,पुं । A blotch, a white leprous spot. क्षुद्रकुष्ठरोगविशेषे । छूली, धवल, लालपाकड़ । रा.नि.व.२० । तच्चिविधं वातादिभेदेन । लक्षणम्—"कुष्ठैकसम्भवं श्वित्रं किलासं वारुणं भवेत् । निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयं । वाताद्रुक्षारुणं पित्तात्ताम्रं कमलपत्रवत् । सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥" मा.नि. । [हे.च. ।

किलासघ्नः । पुं । कर्कोटके । কাঁকরোল ।

किलासनाशनः । त्रि । किलासघ्ने । [अम.।

किलासी (इन्) । त्रि । किलासरोगिणि ।

किलि । व्य । कण्ठकूजिते ।

किलिञ्चम् । क्ली । सूक्ष्मकाष्ठे । जटा. ।

किलिञ्चनः । पुं । राले । রজন । मीनभेदे । वै.निघ. ।

किलिञ्जः (कः) । पुं, क्ली । वीरणादिकटे । सूक्ष्मकाष्ठे । त्रिका. । सु.चि.१०अ.महाकुष्ठे ।

किलिमः । पुं, क्ली । A kind of Fir or Pine. देवदारुवृक्षे । দেবদারু গাছ । भा.म. १भ.ज्व.चि. । च.श्रा.८अ. । "कलिद्रुकिलिमाभया ।" धूनके । वै.निघ. । वैलदेवदारुणि । च.द. वा.व्या.प्रसारणीतैले ।

किल्विषम् । क्ली । रोगे । पापे । मे.षत्रिकं ।

किल्वी । पुं । घोटके । त्रिका. ।

किशरा । स्त्री । कशरायाम् । द्विरूपकोषः ।

किशरोमा । पुं । शुकशिम्ब्याम् । वै.निघ. ।

किशलः (यः) । पुं,क्ली।कोमलपल्लवे। त्रिका.।

किशोरः । पुं । घोटकशिशौ । रत्ना. । तरुणावस्थायाम् । शिशौ । तैलपर्ण्यां । मे.रत्रिकं। सूर्य्ये ।

किष्कुः । पुं, स्त्री । (Arundo Tibialis.) द्वादशाङ्गुलपरिमाणे । हस्ते । वितस्तौ । रत्ना. । प्रकोष्ठे । मे.कद्विकं । शालवृक्षे । वंशे । इक्षुभेदे ।

किष्कुपर्व्वा । पुं । इक्षौ । वंशे । नले । मे. ।

किसरम् । क्ली । सुगन्धिद्रव्यविशेषे ।

किसलः (यः) । पुं,क्ली । कोमलपल्लवे । अम.।

कीकटः (कः) । पुं । घोटके । विश्व. । तद्देशजाश्वे । विश्वः ।

कीकटी (इन्) । पुं । वन्यवराहे । वै.निघ. ।

कीकशः (सः) । पुं, क्ली । क्रमिजातौ । मे. । चण्डालि । रा.नि.व.१८ । [हारा. ।

कीकसमुखः (सास्यः) । पुं । पक्षिणि ।

कीकिः । पुं । चाषपक्षिणि । च.टी. ।

कीचकः (काह्वयः) । पुं । रन्ध्रवंशे । फाँपा वाँश । नले । नलखागड़ा । रा.नि व.७.८ ।

कीटः (कः) । पुं । लौहकिट्टे । विष्ठायाम् । क्रमिजातौ । श.र. । ते सर्पाणां शुक्रविण्मूत्रशव-पूत्यण्डसम्भवत्वाद्विविधाः वायुग्न्यम्बुप्रकृतयः । तत्र चतुर्विधाः सुघोराः । "कुम्भीनसस्तुण्डिकेरी शृङ्गी शतकुलीरकः ! उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गी मयूरिका । आवर्त्तकस्तथोरभ्रसारिका सुखवैदलौ । शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः । शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः । अष्टादशेति वायव्याः कीटाः पवनकोपनाः । इति । कौण्डिल्यकः कणभको वरटी पत्रवृश्चिकः । विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा । वाह्यकी पिच्चिटः कुम्भी वर्चःकीटोऽरिमेदकः । पद्मकीटो दुन्दुभिको मकरः शतपादकः । पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी । क्लीतः क्रमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः । एते ह्यग्निप्रकृतयः चतुर्विंशः प्रकीर्त्तिताः । तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः ॥ इति । विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः । सैरेयकः प्रचलको वलभः किटिमस्तथा । सूचीमुखः कृष्णगोधा यश्च काषायवासिकः । कीटगर्द्दभकश्चैव तथा चोटक एव च । त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः । तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः । इति। तुङ्गीनासो विचिलकस्तालको वाहकस्तथा । कोष्ठागारी क्रमिकरो यश्च मण्डलपुच्छकः । तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा । अग्निकीटश्च घोराः स्युः द्वादश प्राणनाशकाः । तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् । सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च ।...इति । त्रिकण्टकः कुणी चापि हस्तिकचोऽपराजितः । चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः । तैर्दष्टस्य श्वयथुरङ्गमर्द्दो गुरुता गात्राणां दंशः कृष्णश्च भवति । प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः । तथा निरुपमश्चापि पञ्च गौधेरकाः स्मृताः ॥" इत्यादि। सु.कल्प. ८अ. ।

कीटगर्द्दभकः । पुं । सौम्यकीटविशेषे । तेन दष्टे श्लेष्मजन्यरोगा जायन्ते । सु.कल्प.८अ. ।

कीटघ्नः । पुं । गन्धके । रा.नि.व.१३ । [द्रव्ये ।

कीटजम् । क्ली । रेशम्, तसर इति ख्याते

कीटजा । स्त्री । लाक्षायां । लाहा । र.मा. ।

कीटनामा । स्त्री । रक्तलज्जालुकायाम् । वै.निघ. ।

कीटपादिका (दी) । स्त्री । The plant (Cissus Pedata.) हंसपादीलतायाम् । गोशाले लता । रा.नि.व.५ । रक्तलज्जालुकायाम् । वै.निघ. । [प्रजापति । खद्योते ।

कीटमणिः । पुं । Butterfly. पतङ्गभेदे ।

कीटमर्द्दरसः । पुं । क्रम्यधिकारे रसः । अत्र ब्रह्मदण्डी भार्गी तद्बीजम् । र.सा.सं. । विषमुष्टिः कुचिला । "शुद्धसूतं शुद्धगन्धमजमोदा विडङ्गकं । विषमुष्टी ब्रह्मदण्डी यथाक्रमगुणोत्तरं । चूर्णयेत् मधुना मिश्रं निष्कैकं क्रमिजिल्लिहेत् ॥ मुस्ताक्वाथमनुपिबेत्...... ।" भैष. ।

कीटमाता (री) । स्त्री । हंसपादीलतायां । भा. । रा.नि.व.५ । (री) रक्तलज्जालुकायाम् । वै.निघ. । [अयं नदीतीरे सिकतामध्ये जायते ।

कीटमेषः । पुं । मृगचिरा इति प्रसिद्धे कीटे ।

कीटरिपुः (शत्रुः) (हारिः) (टारिः) । पुं,क्ली। विडङ्गे। वै.निघ.संग्रहणी.चि.कल्याणगुड़े ।

कीटारिरसः । पुं । क्रमिघ्नौषधे । पाठः— "शुद्धसूतमिन्द्रयवञ्चाजमोदा मनःशिला । पलाशबीजं गन्धञ्च देवदाल्या द्रवैर्दिनं। सम्मर्द्य भक्षयेन्नित्यं मुद्गपर्णीरसैः सह । सितायुक्तं पिबेच्चानु क्रमिपाती भवत्यलम् ।" भैष. ।

कीटारिष्टम् । क्ली । अश्वस्य कीटवेधरोगे । "कीटवेधं प्रवक्ष्यामि यथाशास्त्रं समासतः । शरन्निदाघयोश्चैव वाहानां घर्म्मसेवनात् ॥ वाजिनां कीटवेधस्तु भवेन्निरुपचारतः । घनकाले च तोयानां सेवनाच्छाखया विना ॥ कीटकाण्डास्तदाश्वानां भवन्ति जठरे स्थिराः । ज्यैष्ठशुक्लद्वितीयायां तेभ्यः

कीटा भवन्ति च ॥" ज.द्र.२५अ. । [भा. ।

कीडेरः । पुं । तण्डुलीयशाके । काँटानटिया ।

कीतनिका । स्त्री । यष्टीमधुनि । वै.निघ. ।

कीनम् । क्ली । मांसधातौ । वै.निघ. ।

कीनाशः । पुं । वानरविशेषे । अ.टी.स्वा. ।

कीरम् । क्ली । मांसे । रा.नि.व.१६ । पुं । शुकपक्षिणि । हला. ।

कीरकः । पुं । वृक्षभेदे । धरणिः ।

कीरटः (टा) । पुं,स्त्री। वङ्गधातौ। वै.निघ.।

कीरतनूफला । स्त्री । तूलकवृक्षे । आकन्द। वै.निघ. ।

कीरनासा । स्त्री । शुकनासायाम् । वै.निघ. ।

कीरमणिः । पुं । धूम्याटपक्षिणि । फिङे । वै.निघ. । [गाँठियाला । रा.नि.व.१२ ।

कीरवर्णकम् । क्ली । स्थौणेयकनामगन्धद्रव्ये ।

कीरेष्टः । पुं । निम्बवृक्षे । रा.नि.व.६ । आम्रवृक्षे । आखोटवृक्षे । जलमधूके । रा.नि.व.११ ।

कीर्णपुष्पः । पुं । चीरमोरटे । लताकड़ार । रा.नि.व.३ ।

कीर्त्तनी । नीलीवृक्षे । वै.निघ. ।

कीर्त्तिः । स्त्री । यशसि । पङ्के । विश्वः ।

कीर्त्तिशेषः । पुं । मरणे । जटा. ।

कीलः (काख्यः) । पुं । योनौ संसक्ते मूढगर्भविशेषे । भा.म.४भ.गर्भ.चि. । "सङ्गी च यो भवति कीलकवत्स कीलः ।" मा.नि. । शस्त्रज्वालायाम् । कफोणौ । शङ्कौ । मे. । भग्नसन्धानार्थे काष्ठफलके ।

कीलकः । पुं । कक्कोले । वै.निघ.। [नि.व.५।

कीलपादिका । स्त्री । हंसपादीक्षुपे । रा.

कीलशायी । पुं। कुक्कुरे । हे.च.। [छ । श.च.।

कीलसंस्पर्शः । पुं । तिन्दुकवृक्षे । गाव गा-

कीलाटः । पुं । शोधितक्षीरपिण्डे । हारा. ।

कीलालम् । क्ली, पुं । शस्त्रकीरसे । "कुन्दुरुस्रोतागन्धः स्यात्कीलालः शस्त्रकीरस" इति शब्दार्णवः । मधुनि । श.र.। जले । रक्ते । रा.नि.व.१८।

कीशः । पुं । वानरे । हला. । पक्षिणि । श.र. । सूर्य्ये । वै.निघ. । [श.र. । अम. ।

कीशपर्णः (र्णी) । पुं, स्त्री । अपामार्गवृक्षे ।

कीशफलम् । क्ली । कक्कोले । वै.निघ. ।

कीशरोमा । स्त्री । कपिकच्छ्वां । आलाकुशी। रा.नि.व.३ ।

कुकः । पुं । चक्रवाकपक्षिणि । वै.निघ. ।

कुकभम् । क्ली । मद्यविशेषे । श.च. ।

कुक(कु)रः । पुं । ग्रन्थिपर्णीलतायाम् । त्रि । रोगादिना कुञ्चितहस्ते । त्रिका. । अम. । पुं । (कुरः) । कुक्कुरे । उणा. ।

कुकाञ्चनम् । क्ली । पित्तले । प.मु. ।

कुकुटः । पुं । (Marsilea quadrifolia.) सितावरक्षुपे । शुषनिशाक । शाल्मलीवृक्षे । रा. नि.व.४ । [रा.नि.व.८ ।

कुकु(कू)टी । स्त्री । ऋषभके । शाल्मलीवृक्षे ।

कुकु(र)द्रुः । पुं । कुकुरद्रुमे । कुकुरशोँका । वै.निघ. ।

कुकुन्दः (रः) । पुं । कुकुरद्रुमे । कुकुरशोँका, कुकुरमुता । हिं कुकुरौंदा । भा.पू.१भ. । क्ली । The cavities of the loins. पार्श्वजघनयोः वहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने मर्म्मद्वये, नितम्बस्थकूपकद्वये, पृष्ठवंशाधो गर्त्तद्वये । सु.शा.६अ. । अम. । [निघ. ।

कुकुन्दनी । स्त्री । ज्योतिष्मतीलतायाम् । वै.

कुकुन्दरमेचकः । पुं। गौरचतण्डुल्यां । গোরক্ষচাকুলিয়া । रस.र.स्तनरोगचि. ।

कुकुभः । पुं । कुकुभपक्षिणि । वै.निघ. ।

कुकुरजिह्वा । स्त्री । Acheiris Kookor zibha. मत्स्यविशेषे । [वै.निघ. ।

कुकुरन्दः । पुं । कुकुरद्रुमे । कुकुरशोँका ।

कुकुवाक् । पुं । कुकुभपक्षिणि । वै.निघ. ।

कुकूटम् । क्ली । मयूरपुच्छे । वै.निघ. ।

कुकूणकः । पुं। Weakness of the eyes in infants. शिशूनां नेत्रवर्त्मगतरोगे । কোতো। हिं कोथआह । भा.म.४भ.। "कुकूणकस्त्रीरदोषा-

क्रियतामिव वर्त्तनि। जायते सरुजं नैव कण्डूं प्रस्रवेदत्र। स्त्रियः कुर्य्याल्ललाटाचिकूटनामाप्रघर्षणं। मत्तो नार्कप्रभां द्रष्टुं न चात्युत्नीलमवमः॥" मा.नि.। पादरोगभेदे। [द्वारा.।

कुकूलः । पुं। तुषानले। रवा.। क्ली। वर्मे।

कुकोलम् । क्ली। कोलीवृचे। कुल गाछ। श.च.।

कुक्कुटः (कः) । पुं। ताम्रचूड़पचिणि। कूकड़ा। हिं मुर्गा। तें कोड़ि, कुक। भा.पू.१भ.। See चघ्रिचूड़ः। कुक्कुभपक्षिणि। कूटका पाखी। मे.। श.र.। चग्निकणे। हे.च.। (कः) सुनिषण्णशाके। भा.पू.१भ.शाकव.। सुषसुषा रान्माठ इति कोङ्कणे। प्रा. कुक्कडु, देवकुक्कडु। गुणाः—"कुक्कुटश्चोक्तस्तुवरो ग्राहको चरसायनः। मेधारुचिकरः शीतः रुचयाग्निप्रदीपकः। चविदाही लघुः स्वादुः हृद्यो त्र्यस्त्रिदोषजित्। ज्वरमेहश्वासदाहभेदःकुष्ठभ्रमापहः। चरोचकं नाशयतीत्येवमुक्तं पुरातनैः॥" वै.निघ.। See सुनिषण्णः। शाल्मलिवृचे।

कुक्कुटपादपः (पादी) । पुं,स्त्री। देवसर्षपे। गुणाः—"सरा कुक्कुटपाद्युक्ता मूले रक्ता च रुचदा। गन्धे चोग्रा सन्निपातकफवातविनाशिनी॥" वै.निघ.। कटूष्णः कफघ्नः क्रमिदोषघ्नः रुच्यः सुखरोगघ्नश्च। रा.नि.व.९।

कुक्कुटपुटः । पुं। हस्तप्रमाणखाते दशवनकरीषकृतौषधपुटे। मतान्तरे लचणं यथा—"वितस्तिमात्रके खाते कथितः कौक्कुटं पुटम्।" मतान्तरे तु, "षोड़शाङ्गुलके खाते कस्यचित्कौक्कुटं पुटम्" इति भा.। चपरे तु, "चधः षड़ङ्गुलं खातं चतुर्दिक्षु च तादृशं। एतत्कुक्कुटनामानं पुटं विद्याद्भिषग्वरैः॥" वैद्यकान्तरं।

कुक्कुटपुटभावना । स्त्री। मिलितपलद्वयरसेन भावनां दत्वा कुक्कुटपुटेन शोषणे। वैद्यकम्।

कुक्कुटपेटकः । पुं। कुक्कुटपिच्छे। वै.निघ.।

कुक्कुटमञ्जरी । स्त्री। चविकायाम्। चई। रा.नि.व.६। [वै.निघ.।

कुक्कुटमर्द्दका । स्त्री। चारामशीतलायाम्।

कुक्कुटमस्तकम् । क्ली। चव्ये। रा.नि.व.६। मरिचभेदे। वै.निघ.।

कुक्कुटशिखः । पुं। कुसुम्भवृचे। श.च.।

कुक्कुटा । स्त्री। पीतझिण्ट्याम्। वै.निघ.।

कुक्कुटाण्डः (कः) । पुं। तदण्डतुल्यतण्डुले व्रीहिधान्ये। कुक्कुटाण्डाकृतिव्रीहिः कुक्कुटाण्डक उच्यते। भा.पू.१भ.धान्यव.। क्ली। कुक्कुटडिम्बे।

कुक्कुटाण्डसमः । पुं। तदाकारवर्णवार्त्ताकौ। वै.निघ.।

कुक्कुटाभः (हिः) । पुं। कुक्कुटसदृशवर्णचरणसर्पभेदे। कुक्कुटाहिरिति लोके। हे.च.। क्ली। कुक्कुटडिम्बकपाले। कुक्‌ड़ार डिमेर खोला। व्रणोत्सादने हितम्। सु.सू.२१च.।

कुक्कुटी (इन्)। पुं। कुक्कुटे। कुक्कुभपक्षिणि। तदण्डाकारकन्दे। मे.। स्त्री। Silk cotton tree. शाल्मलिवृचे। रा.नि.व.८, भा.पू.४भ.सूचाष्टकतैले। शितिवारके। वा.उ.५च.। कुक्कुटपल्याम्। मुरगी। क्षुद्रगृहगोधिकायाम्। टिक्‌टिकि। श.र.। उत्कटवृचे। श्वेत ओकड़ा, कालिशाविषर। प.मु.। उच्चटामूले। "उच्चटा बहुलिङ्गी स्यात्सैवोक्ता कुक्कुटी क्वचित्।" रवा.।

कुक्कुटीमूलम् । क्ली। शाल्मलिमूले। ज.द.।

कुक्कुटोरगः । पुं। गोनससर्पे।

कुक्कुभः । पुं। A wild cock. (Phasianus Gallus.) पचिविशेषे। कूटका पाखी वा पात्‌कुका। चम.। वनकुक्कुटे। द्वारा.।

कुक्कुरः । पुं। सारमेये। कुकुर। हिं कुत्ता। रवा.। क्ली। ग्रन्थिपर्णे। गेँठेला। मे.।

कुक्कुरद्रुः । पुं। वृचविशेषे। कुकुरशोँका। गुणाः—कटुत्वं तिक्तत्वं ज्वरशोणितकफघ्नत्वं। मद.। तन्मूलमार्द्रं मुखे धृतं मुखशोषहृच्च। भा.।

कुक्कुरमेचुका (ण्डुकः) । स्त्री। गोरचतण्डुलायाम्। गोरक्षचाकुलिया। भैष.स्त्रीरोग.चि.। "कुक्कुरमेण्डुकमूलम्।"

कुक्कुरी । स्त्री। कुक्कुरपत्न्याम्। श.र.।

कुक्कुवाक् । पुं। सारङ्गमृगे। रा.नि.व.१९।

कुग्रामः । पुं। कुत्सितग्रामे। "धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः। पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्॥"

कुङ्कुमम् । क्ली । Saffron. (Crocus sativus.) तन्नामकद्रव्ये । स्वनामख्यातगन्धद्रव्ये । कूङ्कुम् । हिं जाफरान् । मं कुमकुमकेसर । तें कुंकुम । कुङ्कुमं काश्मीरजमेव सूक्ष्मकेशरं रक्तवर्णं पद्मसुगन्धि श्रेष्ठम् । यच्च वाह्लीकदेशजातं तत्पाण्डुवर्णं केतकीगन्धं सुगन्धञ्च तन्मध्यमम् । पारस्यजञ्च मधुगन्धमीषत्पाण्डुवर्णं स्थूलकेशरञ्च तदधमम् । गुणा:—कटुकं तिक्तं स्निग्धं शिरोरोगव्रणकृमिहरं वर्णकरं वमिहरं व्यङ्गघ्नं त्रिदोषघ्नञ्च । भा.पू.१भ.। रेचकं वैवर्ण्यकण्डूघ्नञ्च । राज. । हास्यकरमुष्णं बल्यञ्च । मद.व.३ । सुरभितिक्तकटूष्णं कासवातकफकण्ठरोगघ्नं । शिरःशूलविषदोषघ्नं रोचनं कान्तिकरञ्च । रा.नि.व.१२ ।

कुङ्कुमरेणुः । पुं, स्त्री । कुङ्कुमगुण्डके ।

कुङ्कुमशालिः । पुं । स्वनामख्यातशालिधान्यविशेषे । गुणा:—मधुरः शीतलः रक्तपित्तातिसारघ्नश्च । रा.नि.व.१६ ।

कुङ्कुमा । स्त्री । शाल्मलिवृक्षे । वै.निघ. ।

कुङ्कुमागुरुकः । पुं । पीतरक्ते हरिचन्दने । गुणा:—"शीतस्तिक्तः पित्तश्रमापहः । शोषञ्च दवथुञ्चैव नाशयेदिति कीर्त्तितः । स्वर्गिभोग्यो मनुष्याणां दुर्लभः परिकीर्त्तितः ।" वै.निघ. ।

कुङ्कुमाद्यतैलम् । क्ली । नीलिकापिड़कादौ हितम् । तैलं १ श.। क्वाथार्थं—कुङ्कुम-रक्तचन्दन-लाक्षा-मञ्जिष्ठा-यष्टिमधु-कृष्णागुरु-वीरणमूल-पद्म-काष्ठ-नीलोत्पल-वटाङ्कुर-पर्कटीशुङ्गा-पद्मकेशर-दशमूलानां प्रत्येकं पलं, वारि १६ श. शे. ४ श. । क्वाथेन, मञ्जिष्ठायष्टिमधुमधुकलाक्षारक्तचन्दनानां प्रत्येकं कर्षमितेन कल्केन छागदुग्धेन शरावद्वयेन च पचेत् । कषायोक्तमपि कुङ्कुमं पाकसिद्धे प्रक्षिपन्ति केचित्। अन्यद्यथा—"कुङ्कुमं किंशुकं लाक्षा मञ्जिष्ठा रक्तचन्दनं । कालीयकं पद्मकञ्च मातुलुङ्गस्य केशरम् । कुसुम्भं मधुयष्टी च फलिनी मदयन्तिका । निशे गोरोचना पद्ममुत्पलञ्च मनःशिला । काकोल्यादिसमायुक्तैरेतैरक्षमितैर्भिषक् । लाक्षारसपयोभ्याञ्च तैलप्रस्थं विपाचयेत् । कुङ्कुमाद्यमिदं तैलमभ्यङ्गात्काञ्चनोपमं । करोति··· ॥" च.द. । रस.र. ।

कुङ्गनी । स्त्री । महाज्योतिष्मतीलतायां । बड़ लताफट्की । रा.नि.व.३ । [नि.व.१८ ।

कुचः । पुं । स्तने । स्तनाग्रभागे, चूचके । रा.

कुचण्डिका (ण्डी) । स्त्री । मूर्वायां । मूर्गा । श.च. ।

कुचतटाग्रम् । क्ली । चूचके ।

कुचन्दनम् । क्ली । (Pterocarpus santalinus. रक्तचन्दनविशेषे । र.मा. । Sappan or long wood. पत्राङ्गे । वकम् काठ । मे. । कुङ्कुमे । श.च. । Leguminus Pavonina. मलेन्द्रीचन्दने । सु.सू.३८अ. । प्रियङ्ग्वादि ।

कुचफलः । पुं । Pomegranate. कपित्थवृक्षे । दाड़िम्बवृक्षे । रा.नि.व.११। क्ली । तत्फले।

कुचमुख(चाग्र)म् । क्ली । चूचके । अम. ।

कुचाङ्गेरी । स्त्री । A kind of wood sorrel. (Rumex Vesicarius.) चुक्रे । চুকাপালং । र.मा. ।

कुचिः । पुं । अष्टमुष्टिपरिमितमाने । वै.निघ. ।

कुचिकः । पुं । (Unibranchapertura cuchiya.) मत्स्यविशेषे । কুঁচিয়া মাছ । एतद्दृष्टे गौर्म्रियते ।

कुचिकर्णः । पुं । तन्नामकर्णरोगभेदे । तत्र वातादभ्यन्तरे शष्कुली सङ्कुचिता भवति । वा.उ. १७अ. । [२भ.वा.व्या.समीरगजकेशरीरसे ।

कुचिलम् । क्ली । कुचेले । কুঁচলে । वै.निघ.

कुचुटकः । पुं । जलशाकविशेषे । वै.निघ. ।

कुचेलः (ला) । पुं, स्त्री । कनकफलवृक्षे । কুঁচলে গাছ । कुष्ठ.चि.कन्दर्पसारतैले । त्रि । कुत्सितवस्त्रे । मे. । [नादि । प.मु. । रा.नि.व.६ ।

कुचेलिका (ली) । स्त्री । पाठायाम् । আক্-

कुच्छम् । क्ली । कुमुदे । श.च. । श्वेतपद्मे ।

कुच्छायम् । क्ली । शरीरे । वै.निघ. ।

कुच्छुटः । पुं । वब्बूलकवृक्षे । वै.निघ. ।

कुजः । पुं । वृक्षे । रा.नि.व.२ । क्ली । पद्मे ।

कुञ्जि(ज्झ)शः । पुं । कुड़िशमत्स्ये । কুড়চী মাছ । See कुड़िशः ।

कुज्झटिः (का) (टी) } स्त्री। कुज्झटिकायां।
कुज्झिका (ज्झी) } कुश्, कुश्रामा।
श.र.।

कुञ्चनम् । क्ली। नेत्रवर्त्मजरोगविशेषे। तस्य लक्षणं यथा—"वाताद्या वर्त्मसङ्कोचं जनयन्ति यदा मलाः। तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः॥" मा.नि.। पादरोगभेदे।

कुञ्चिः । पुं। अष्टमुष्टिपरिमाणे। "अष्टमुष्टिर्भवेत्कुञ्चिः।" प.प्र.।

कुञ्चिका । स्त्री। मेथिकायाम्। रा.नि.व.६। वै.निघ.अर्श.चि.हवुषा.तक्रारिष्टे। कृष्णजीरके। जटा.। गुञ्जायाम्। कञ्चिकायाम्। कञ्चि। श.च.। वचायाम्। मत्स्यभेदे। कूँचे माछ।

कुञ्चितम् । क्ली। तगरपुष्पे। तगरपाडुका। रा.नि.व.१०। पिण्डीतगरे। त्रि। वक्रे। अम.।

कुञ्ची । स्त्री। जीरके। वृहज्जीरके। भा.पू.१भ.।

कुञ्जः । पुं,क्ली। निकुञ्जे। हनुदेशे। हस्तिदन्ते। मे.जद्विकं।

कुञ्जप्रियः । पुं। जवावृक्षे। वै.निघ.।

कुञ्जरः । पुं। हस्तिनि। कण्टकुचाइ इति विख्याते वृक्षे। रत्ना.। अश्वत्थवृक्षे। त्रिका.। केशे। मे.।

कुञ्जरपादपः । पुं। कुन्दरुकवृक्षे। वै.निघ.।

कुञ्जरपिप्पली । स्त्री। गजपिप्पल्यां। श.मा.।

कुञ्जरपुटः । पुं। गजपुटे। र.सा.सं.।

कुञ्जरक्षारमूलम् । क्ली। मूलके। मूलो। रा.नि.व.७।

कुञ्जरा (री) । स्त्री। धातकीवृक्षे। धाईफुल गाछ। र.मा.। पाटलवृक्षे। पारुल गाछ। मे.रत्रिकं। (री) हस्तिन्याम्। श.च.।

कुञ्जराराति: । पुं। शरभे। हे.च.।

कुञ्जरालुकम् । क्ली। आलुकविशेषे। हस्त्यालू। श.च.।

कुञ्जराशनः । पुं। अश्वत्थवृक्षे। अम.।

कुञ्जरिका । स्त्री। सल्लकीवृक्षे। वै.निघ.।

कुञ्जलः । पुं। रसुनभेदे। क्ली। काञ्जिके। प.मु.।

कुञ्जवल्लरी । स्त्री। निकुञ्जिकाम्लवृक्षे। रा.नि.व.८।

कुञ्जिका । स्त्री। कृष्णजीरके। जटा.। निकुञ्जिकाम्लवृक्षे। रा.नि.व.८। [वकवृक्षे। हे.च.।

कुटः । पुं,क्ली। कोटे। गड़। घटे। मे.। चि-

कुटङ्गः (कः) । पुं। गृहाच्छादने। चाल। (कः) कुटीरे। कुँड़े। तरुलतागहने। भ.टी.।

कुटजः (जः) । पुं। (Wrightia antidysenterica,) (Holarrhena antidysenterica,) (Echites antidysenterica,) स्वनामख्यातवृक्षे। कुड़चि गाछ। हिं मं कवैश्रा, कुड़ा। कं कोड़सिगेयमरनु। तें अंकुडुचेट्टु, अगिरचेट्टु, तुम्मिकचेट्टु। उत. कुड़िया। श.र.। स द्विविधः सितासितभेदेन। (चः) गुणाः—कटुतिक्तोष्णः कषायः अतिसारघ्नः। तत्र असितः पित्तघ्नः त्वग्दोषार्शोघ्नश्च। रा.नि.व.९। कफघ्न इति। राज.। "कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः। अर्शोऽतीसारपित्तास्रकफतृष्णामकुष्ठनुत्। तत्पुष्पं वातलं शीतं तिक्तं पित्तातिसारजित्।" भा पू.१भ.। तथा, "पुष्पन्तु वत्सकस्योक्तं तुवरञ्चाग्निदीपनम्। तिक्तं शीतं वातलञ्च लघु पित्तातिसारनुत्। रक्तदोषङ्कफं पित्तं कुष्ठञ्चैवातिसारकं। क्रमीँश्चैव हरेदेतदुक्तं पूर्व्वैश्च सूरिभिः॥ कृष्णस्तु कुटजश्शीतो रक्तदोषार्शनाशनः। त्वग्दोषपित्तशमनो गुणास्त्वन्ये तु पूर्व्ववत्॥" वै.निघ.। तैलं मूलकतैलगुणं। क्ली। इन्द्रयवे। सि.यो.अतिसा.चि.। कमले। वै.निघ.।

कुटजत्वक् (फलम्) । स्त्री, क्ली। कुटजमूलत्वचि। कुड़चिर मूलेर छाल। च.द.ज्वरातिसा.चि.। "कुटजत्वक्फलैः शृतम्।" इन्द्रयवे। सि.यो.अर्श.चि.कुटजाद्यघृते।

कुटजपुटपाकः । पुं। सन्निपातरक्तातीसारे हितः। कुटजमूलत्वक् १२ तो. तण्डुलोदकेन सम्पिष्य तद्गोलकं जम्बूपत्रेणावेष्ट्य सूत्रेणावेष्टयेत्। अथ तत्पिष्टगोधूमेनालिप्य तदुपरि मृत्तिकालेपनं दत्त्वा करीषाग्नौ पचेत्। यावल्लेपो रक्तवर्णः तावद्दवतार्य्य रसं गालयेत् मधुना च पलमितो रसो हितः। भा.म.१भ.रक्तातिसा.चि.। शा.कौ.। भैष.। "स्निग्धं घनं कुटजवल्कमजन्तुजग्धमादाय

त्वचमतीव च पीषयित्वा । जम्बूपलाशपुटतण्डुलतोयसिक्तं वद्धं कुशेन च वह्निघनपङ्कलिप्तम्। सुस्विन्नमेतदवपीड्य रसं गृहीत्वा क्षौद्रेण युक्तमतिसारवते प्रदद्यात्। তাজাকুড়চির মূলের ছাল কুটিয়া চেলুনীর জলে মাথিয়া জামপাতায় কুশ দ্বারা বান্ধিয়া মৃত্তিকা লেপনপূর্ব্বক পাক করিবে। লেপনমৃত্তিকা লাল হইলে পাক শেষ হইবে।

কুটজমল্লী । स्त्री। वृक्षविशेषे। কুড়চিমল্লিকা।

কুটজরসক্রিয়া । स्त्री। अर्शोरोगे। कुटजत्वक् १०० प. आकाशवारि (अभावे भौमवारि) ६४ श. शे. १६ श. (मतान्तरे अष्टभागशिष्टः)। क्वाथे पुनः पक्वा लेहीभूते तत्र मोचरस-वराहक्रान्ता-प्रियङ्गिन्द्रयवानां प्रत्येकं चूर्णं त्रिपलिकं दत्त्वा पुनः पचेत्, पक्वा च दर्व्वीलेपयोग्ये सञ्जाते पाकशेषन्त्वावतारयेत्। কুড়চিছাল ১২॥० শ. জল ৬৪ শ. শেষ ১৬ শ. বা ৮ শ.। পাক করিয়া লেহবৎ হইলে মোচরস, বরাক্রান্তা, প্রিয়ঙ্গু, ইন্দ্রযব প্রত্যেকে ৩ পল প্রক্ষেপ দিবে।

কুটজলেহঃ ।पुं। अर्शोरोगे। कुटजत्वक् १२॥० श. वारि ६४ श. शे. क्वाथः ८ श.। वस्त्रपूतं क्वाथं सपुराणगुड़ (२ प.) पक्वा लेहीभूतं, अवतार्य्य तत्र भेलकादीनां चूर्णं प्रत्येकं १ प. प्रक्षिप्य यथाविधि पाकशेषं कुर्य्यात्। चूर्णानि यथा—रक्तचन्दनं विड़ङ्गं त्रिकटु त्रिफला रसाञ्जनं चित्रकमूलं इन्द्रयवः वचा अतिविषा बिल्वपेशी च। च.द. अर्श.चि.।

কুটজবীজম্ । क्ली। इन्द्रयवे। रा.नि.व.६।

কুটজসুধা । स्त्री। कुटजचूर्णे। কুড়চির চূর্ণ। "कौटजा शोषनाशिनी।" वै.निघ.।

কুটজক্ষীরম্ । क्ली। रक्तातीसारे प्रशस्तम्। कुट्टितकुटजमूलत्वक् १६ तो. वारि ४ श. शे. १ श. छानयित्वा तत्र क्वाथे छागीपयः पलद्वयं दत्त्वा पक्वा च क्षीरशेषमवतारयेत्। भा.म.१भ.अतिसा. चि.। [रा.नि.व.६।

কুটজা (ভিধম্) । स्त्री, क्ली। इन्द्रयवे।

কুটজাদিক্বাথঃ ।पुं। रक्तातीसारे हितः। "कुटजातिविषा मुस्ता बालकं लोध्रचन्दनं। धातकी दाड़िमं पाठा क्वाथमेषां समाचिकं। पिबेद्रक्तातिसारेषु दाहशूलप्रशान्तये।" भा.म.१भ.रक्तातिसारः। द्वितीयः—"कुटजं दाड़िमं मुस्तं धातकी बिल्वबालकं। लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत्॥" কুড়চিছাল, আতইচ, মুতা, বালা, লোধ, রক্তচন্দন, ধাইফুল, দাড়িমছাল, আকনাদিমূল প্রত্যেকে ১৭৮০ রতি। জল ॥০ শ. শে. ৵ অর্দ্ধ পোওয়া। দ্বিতীয় পূর্ব্ববৎ কেবল আতইচ স্থানে বেলশুঁট। भैष.।

কুটজাদ্যঘৃতম্ । क्ली। अर्शोरोगे। घृतं ४ श. कल्कद्रव्याणां समष्टिरष्टपलं, वारि ४ श. एकत्र पचेत्। द्रवानुक्तौ जलदानविधानात्। अनुक्तौ द्रवकार्य्ये तु सर्व्वत्र सलिलं मतम्। प.प्र.। ঘৃত ৪ শ. জল ৪ শ.। কল্কদ্রব্য কুড়চির ছাল, ইন্দ্রযব, নাগেশ্বর, নীলোৎপল, লোধকাষ্ঠ, ধাইফুল প্রত্যেকে ১০॥৵ তো. একত্র পাক করিবে। च.द.अर्श.चि.।

কুটজাবলেহঃ । पुं। अतीसारे हितः। कुटजमूलत्वक् पलशतं वारि ६४ श. शे. १६ श. पादशिष्टक्वाथः पुनर्लेहवत् पाच्यः। पाकशेषे जाते अवतार्य्य सौवर्चलादीनां चूर्णं पलद्वयं प्रक्षेप्यम्। "शतं कुटजमूलस्य क्षुण्णं तोयार्मणे पचेत्। क्वाथे पादावशेषेऽस्मिन् लेहं पूते पुनः पचेत्। सौवर्चलयवक्षारविड़सैन्धवपिप्पली। धातकीन्द्रयवाजाजीचूर्णं दत्त्वा पलद्वयं। लिह्याद्बदरमात्रन्तु शीतं क्षौद्रेण संयुतम्॥" কুটজত্বক্ ১২॥० শ. জল ৬৪ শ. শে. ১৬ শ.। ছাঁকিয়া ঐ ক্বাথ পুনঃ পাক করিয়া লেহের মত হইলে, তাহাতে সচল, বিট্, সৈন্ধব, যবক্ষার, পিপুল, ধাইফুল, ইন্দ্রযব ও জীরা উহাদের চূর্ণ একত্র ১৬ তোলা দিয়া নামাইবে। মাত্রা ১তোলা, মধুর সহিত। च.द.अतीसा.चि.।

কুটজাষ্টকম্ । क्ली। अतिसारे औषधम्। कुटजमूलत्वक् १०० प. वारि ६४ श. शे. १६ श.। अथ शाल्मल्यादीनां प्रत्येकं पलं गृहीत्वा एकत्र सम्पिष्य तत्र क्वाथे दापयेत्। अथ पुनः पक्वा पाकशेषः कार्य्यः। केचित्तु शाल्मल्यादीनां चूर्णम्प्रक्षिपन्ति। अन्ये च पाठादिकं दत्त्वा यावद्दर्व्वीलग्नं न भवति तावत्पचन्ति। पाकशेषे मोचरसचूर्णं प्रक्षिपन्ति। प्रक्षेप्यद्रव्यं यथा—আকনাদি, বরাক্রান্তা, আতইচ, মুতা, বেলশুঁটা, ধাই-

फूल, মোচরস প্রত্যেকে ৮ তোলা। च द.।

कुटजाष्टकावलेहः । पुं । अतिसारे हितः। कुटजत्वक् ५० प. वारि ६४ श. शे. १६ श.। अथ क्वाथं वस्त्रपूतं कृत्वा पुनः पचेत्। पाकशेषप्राये अवतार्य लज्जालुका धातकी बिल्वशलाटुः पाठा (আকনাদি) मुस्तकमोचरसौ अतिविषा चेति द्रव्याणां चूर्णं प्रत्येकं पलं प्रक्षेप्तव्यम्। भा.म.१भ.।

कुटजीवः । पुं । पुत्रजीववृक्षे । वै.निघ.।

कुटजोद्भवः (वा) । पुं, स्त्री । इन्द्रयवे । वा.टी.। हे.च.।

कुटनी । स्त्री । महाज्योतिष्मतीलतायाम् । मे.।

कुटन्नक(ट)म् । क्ली,पुं । भद्रमुस्तायां । নাগরমূতা । प.म.। केशराजे । কেশুর । अ.टी.। पुं । विकङ्कतवृक्षे । বঁইচি গাছ । श्योणाकवृक्षे । रा.नि.व.९ । सु.सू.३८अ.। कैवर्त्तमुस्तके । वितुन्नकनाम्नो वृक्षविशेषस्य त्वचि (गुड़तजी इति लोके)। भा.। स्त्री (टा) । पालङ्क्याके । सु.चि.२०अ.।

कुटपः । पुं । कुड़वमानभेदे । गृहसमीपोद्याने । कुड़वाईमाने । हे.च.। क्ली । पद्मे । रा.नि.व.१०।

कुटपिनी । स्त्री । पद्मिन्याम् । পদ্মের ঝাড় । रा.नि.व.१० ।

कुटम्बकम् । क्ली। सुगन्धरोहिषतृणे । वै.निघ।

कुटर(रि)(रु)णा (र(रि)णी) । स्त्री । त्रिवृतायां । তেউড়ী । प.मु.। अरुणमूलत्रिवृति । शुक्लत्रिवृति । वा.सू.१५अ.। "क्रमुककुटरणी शङ्खिनी चर्मसाह्वा।"

कुटरवाहिनी । स्त्री। श्वेतत्रिवृति । वै.निघ.।

कुटरुः । पुं । पटगृहे । कानात् । उणा.।

कुटलम् । क्ली । पटले । ঘরের চাল । हारा.।

कुटामोदः । पुं । गन्धमार्जाराख्ये । वै.निघ.।

कुटिः । पुं । वृक्षे । श.र.। शरीरे । उणा.। स्त्री । मुरामांस्यां । मद.व.३ । गृहे । अ.टी.भ.।

कुटिकः । पुं। स्मरफल्यां, कुष्ठे । কুড় । हारा.।

कुटिचरः । पुं । जलशूकरे । শুশুক । श.र.।

कुटि(ठि)ञ्जरः । पुं । पत्रशाकविशेषे, वनवास्तुके । गुणाः—"कुटिञ्जरः स्वादुपाकः क्षारो रुक्ष शीतलः । गुरुर्मलस्तम्भकरो दीप्योत्पादनकारकः ॥" वै.निघ.।

कुटि(टी)रम् । क्ली । क्षुद्रगृहे । जटा.।

कुटिलम् । क्ली । वनवास्तूके । वै.निघ.। पिण्डीतगरे, तगरपादिकायां । তগরপাদুকা । प.मु.। पुं । शङ्खे । शम्बूके । रा.नि.व.१३ ।

कुटिलपुष्पिका । स्त्री। तगरपादिके । प.मु.। सृक्कानामगन्धद्रव्ये । रा.नि.व.१२ ।

कुटिला । स्त्री । See कुटिलपुष्पिका ।

कुटी । मुरानामगन्धद्रव्ये । মুরামাংসী । रा.नि.व.१२ । अन्नादिरहितभिक्षुके । प.प्र.२ख । श्वेतकुटजवृक्षे । मरुवकवृक्षे । वै.निघ.।

कुटीका । स्त्री । भूशयमृगे । च.सू.४अ.।

कुटीप्रावेशिकम् । क्ली । कुटी गृहं, तत्प्रवेशयोग्ये (द्विविधरसायनान्यतमे) । च.चि.१अ.। सु.चि.४अ.। वा.उ.३९अ.।

कुटीस्वेदः । पुं । स्वेदविशेषे । च.सू.१४अ.।

कुटुम्बकः । पुं । भूतृणे । গন্ধতৃণবিশেষ । रा.नि.व.८ ।

कुटुम्बिनी । स्त्री । स्वनामख्यातमहाक्षुपे । गुणाः—मधुरा ग्राहिणी कफपित्तघ्नी व्रणरक्तदोषकण्डूघ्नी रसायनी च । रा.नि.व.५ ।

कुट्टकः । पुं । पानीयकाके । পানকৌড়ী । वै.निघ.।

कुट्टनम् । क्ली । छेदने । কোটা । कुत्सने । तापने । रा.नि.व.१० ।

कुट्टल(क)म् । क्ली । नीलोत्पले । নীলশুন্দি ।

कुट्टारम् । क्ली। सुरते । मे.।

कुट्टितमांसम् । क्ली । मांसव्यञ्जनभेदे । মাংস-কাবাব্ । श.चि.।

कुट्टिमः । पुं । दाड़िम्बवृक्षे । দাড়িম গাছ । रा.नि.व.११। बद्धभूमौ। বাঁধান মেজে । हला.।

कुड्मलः । पुं । मुकुले । अम.। कोषे । जटा.।

कुठः । पुं। चित्रकक्षुपे । रा.नि.व.६। वृक्षे। अम.।

कुठरः । पुं । दण्डविष्कम्भे । अम.।

कुठाकुः । पुं। Wild pecker. पक्षिविशेषे । কাঠঠোকরা । हिं खटकवढ़ैया । उणा., विश्व.।

कुठाटङ्कः । पुं । कुठारे । जटा. । [विशेषे ।

कुठारः । पुं । कुठेरकवृक्षे । र.मा.सं. । अस्त्र-

कुठारकतैलम् । क्ली । शारीरव्रणादौ तैले । पाठः—"कुठारकात्पलशतं क्वाथयेदुल्वणेऽम्भसि । तेन पादावशेषेण तैलप्रस्थं विपाचयेत् । कल्कैः कुठारापामार्गप्रोष्ठिकामचिकासु च । एतत्कुठारकं नाम व्रणशोधनरोपणम् । नाड़ीषु परमोऽभ्यङ्गः··· ··· ।" अत्र मचिकेत्यत्र चिञ्चड़ीमत्स्य इति केचिद्वदन्ति। कुचाचिकामत्स्य इति। श्रीकण्ठ.। रस.र.।

कुठारच्छिन्ना । स्त्री । कन्दगुड़ूच्याम् । हिं कुरैया । वै.निघ.चयरोग.लौहरसायने ।

कुठारिका (री) । स्त्री । कुठारे । कुड़ूल । हिं कुलहाड़ी । शस्त्रकर्मयोग्यव्यधनास्त्रविशेषे । यथा—"पृथुः कुठारी गोदन्तसदृशार्द्धाङ्गुलानना । तयोर्द्दन्तया विध्येदुपर्य्यस्थां शिरां स्थिताम् ॥" सु.शा.,सू.८अ. । [नरे ।

कुठारुः । पुं । कुठेरकवृक्षे । कीशे । मे. । वा-

कुठिः । पुं । वृक्षे । उणा. ।

कुठिकः । पुं । कुष्ठौषधौ । कुड़् । हारा. ।

कुठिल्लकः । पुं । रक्तपुनर्नवायाम् । वै.निघ. ।

कुठेरः (कः) । पुं । A kind of Basilicum. सितार्जकवृक्षे । क्षुद्रपत्र श्वेत तुलसी, बाबुई तुलसी । रा.नि.व.१०। भैष.अग्निदग्ध.चि. रुद्रतैले । पर्णासे । काल बाबुई, काल तुलसी । रा.नि.व.१० । च.सू.२अ. । भा. । नन्दीवृक्षे । रा.नि.व.२३ । तुलसीवृक्षे । उणा. । अम. ।

कुठेरजः । पुं। (Ocimum Gratissicum.) श्वेततुलस्यां । बाबुई तुलसी । श.र. । [चिका. ।

कुठेरुः । पुं । चामरवाते । चामरेर बातास ।

कुड़पः (वः) । पुं। परिमाणविशेषे । द्वात्रिंशत्तोलके ८ वा ४ प.। प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः । प.प्र.१ख. । मृद्वंशवेणुलौहादेर्भाण्डं यच्चतुरङ्गुलं । विस्तीर्णञ्च तथोर्द्धञ्च तन्मानं कुड़वं स्मृतम्॥ कुड़वादूर्द्ध्वं शरावादिमानानां द्वैगुण्यं ग्राह्यम् । निश्चलकरमते तु कुड़वस्यापि द्वैगुण्यम् । तत्र दन्तोष्टते कुङ्कुमाद्यतैले दृश्यते न नारिकेलखण्डे । "आर्द्रद्रव्यस्य कुड़वः पलैरष्टाभिरेव च । शुष्कद्रव्यचतुष्केण कुड़वः समुदाहृतः ॥" हारीतः ।

कुड़ली । पुं । काञ्चनारभेदे । मद.व.१ ।

कुड़िः । पुं । देहे । उणा. ।

कुड़िशः । पुं। (Cyprinus curchius.) मत्स्यविशेषे । कुड़ची माछ, बाटा माछ । गुणाः—मधुरो हृद्यः कषायोऽग्निदीपनः लघुः स्निग्धः वाते पथ्यः रोचनो बल्यः कोष्ठबन्धकरश्च । राज. ।

कुड़ुच्ची । स्त्री । चुद्रकारवेल्लके । छोट उच्छे । लताफलगुणाः—कटुः उष्णातिरुच्या दीपनी वातरक्तकरी च । तत्कन्दः अर्शोहरः मलशोधनः योनिदोषघ्नश्च । रा.नि.व.७ ।

कुड्मलः । पुं । मुकुले । मे.। क्ली । नीलोत्पले ।

कुड्यम् । क्ली । विलेपने । मे. ।

कुड्यकीटकः } पुं,स्त्री। गृहगोधिकायां ।
कुड्यमत्सी (त्स्यः) } टिक्टिकी । हे.च. । श.र. । च॰शा.८अ. ।

कुणकः । पुं। बालके, सद्योजातशिशौ। श.चि.।

कुण(णि)ञ्जः (रः) । पुं । A kind of chenopodium.) अरण्यवास्तुकविशेषे । बनबेतूया । मं कुणजिरु, गोरजे । गुणाः—मधुरः रुच्यः दीपनः पाचनश्च । रा.नि.व.५ । तच्छाकं त्रिदोषघ्नं मधुरं रुच्यं दीपनं ईषत्कषायं संग्राहि लघु । रा.नि.व.७ । [व.५ ।

कुणञ्जा (ञ्जी) । स्त्री । कुणञ्जरत्नपे । रा.नि.

कुणटी । स्त्री । मनःशिलाविशेषे । मनछाल-विशेष। कुणटी तु मनःशिला। रा.नि.व.१३।२३। धानके । भा.पू.१भ. ।

कुणपः । त्रि । शवगन्धौ । 'मज्जप्रकाशङ्कुणपं त्रिदोषम् ।' भा.म.४भ. । दुर्गन्धे । पुं, क्ली । शुक्रदोषे, आर्त्तवदोषे । मृतशरीरे । अम. ।

कुणपगन्धः । पुं । शवगन्धे ।

कुणपा (पी) । स्त्री । विट्शारिकायां । गुये शालिक, गुयेल्याकड़ा । हारा. ।

कुणारी । स्त्री। कुष्ठरोगविहितभचद्रव्ये, यवपर्पटीति ख्याते । सु.चि.१०अ. । कोणाड़िकेति कश्चित्पठति ।

कुणाल: । पुं । पक्षिविशेषे ।

कुणि: । पुं । The tree cedrela Toona. तुन्नवृक्षे । তুঁদ গাছ । अम. । मे. । त्रि । कुत्सितकरे । "कुणिस्तुन्नकवृक्षे । कुकरे ।" मे. । तन्नामकमर्मस्थाने, कूर्परे । सु.शा.६अ. ।

कुणी । पुं । कणभजातीयकीटे । सु.कल्प.८अ.। See कणभ: ।

कुण्टम् । क्ली । चर्व्वके । गुण्ठतृणे । वै.निघ. ।

कुण्टक: । त्रि । स्थूले । মোটা । श.मा. ।

कुण्टकुरण्ट: । पुं । झिण्ट्याम् । ঝাঁটী । वै. निघ. ।

कुण्डम् । क्ली । मानभेदे । हला. । जलाशयविशेषे । ইন্দারা, চৌবাচ্চা । जलगुणा: —रुचमग्निकरं कफकरं मधुरं लघु च । रा.नि.व.१४ । स्थाल्याम् । थालो । अम. । पुं । क्लीबे । हला. । जारजपुत्रे । वारिपात्रे । [हे.च. ।

कुण्डगोलकम् । क्ली । काञ्जिके । কাঁজি ।

कुण्डङ्ग: (**क:**) । पुं । कुञ्जे । हे.च. ।

कुण्डल: । पुं । रक्तकाञ्चनवृक्षे । र.मा. । क्ली । कर्णभूषणे । पाशे । वलये । मे.लत्रिकं । [निघ. ।

कुण्डलपत्र: । पुं । दना इति ख्यातवृक्षे । वै.

कुण्डलिका (**नी**) । स्त्री। जिलेवी इति ख्याते मिष्टान्ने। तन्निर्म्माणविधि: यथा —"गोधूमप्रस्थद्वितयस्य कृत्वा सूक्ष्मा: कणा: प्रस्थमिता: सुनिस्तुषा:। दुग्धेन क्लिन्नास्तु तथैव भाण्डे यावत्सदम्लत्वमुपेयुरीषत् । उद्धृत्य दुग्धेन द्रवं सुघृष्य सच्छिद्रपात्रेण च श्रीफलस्य । धारां घृते कुण्डलिकाकृतिं सृजन् पचेदथोद्धृत्य सुशर्करायाः । पाके निमज्जितामाहुः सर्व्वे कुण्डलिकाभिधाम् । सा शुक्रला हृद्यतृष्णा इन्द्रियाणां सुखप्रदा । पुष्टिकान्तिकरी बल्या द्वितीयास्याकृतिर्मता ॥" वै.निघ.। गुडूच्याम् । रा. नि.व.३ ।

कुण्डलिनायक: । पुं । पिङ्गलसर्पे ।

कुण्डली (इन्) । पुं । सर्पे । हारा. । वरुणे । मयूरे । मे. । मृगविशेषे । इति अजयपाल: । काञ्चनवृक्षे । स्त्री (ला, ली) । गुडूच्यां । भा.म.१भ. । कर्णकज्व.चि. । "कटुत्रिकौषधनकुण्डलीभि: ।" काञ्चनवृक्षे । मे.। सर्पिणीवृक्षे । গড়গড়ে শাক । रा.नि.व.५। कपिकच्छ्वां । रा.नि.व.३ । कुमार्य्यां । घृतकुमारी । कुण्डलिकायां । জিলেবী । भा. ।

कुण्डलीचालन: । पुं । सर्पिणीवृक्षे ।

कुण्डिका । स्त्री । कमण्डलौ । हे.च. । पिठरे । श.च. । [(इन्) पुं । अश्वे ।

कुण्ड्डी । स्त्री । शुक्लयूथिकायाम् । वै.निघ. ।

कुण्डीर: । पुं । मनुष्ये । धरणौ ।

कुतकम् । क्ली । रसाञ्जने । प.मु. ।

कुतप: । पुं, क्ली । Poa Cynosuroides. दर्भविशेषे । কুশ । छागकम्बले । मे. । वृषे । अग्नौ । सूर्य्ये । हे.च. । दिवसस्याष्टममुहूर्त्ते । त्रि । ईषदुष्णे । [मे । ऊर्णावस्त्रे । वै.निघ. ।

कुतपसप्तकम् । क्ली । कृष्णतिले । रौप्ये । द-

कुतित्तिरि: । पुं । तित्तिरपक्षिविशेषे । सु. सू.४६अ. । [अम. ।

कुतु: (**प:**) । पुं, क्ली । चर्म्मपात्रे । কুপো ।

कुतुम्बा (**म्बिका**) । स्त्री । द्रोणपुष्पीक्षुपे । रा.नि.व.६ । [श.च. ।

कुतुम्बुरु । क्ली । कुत्सिततिन्दुकीफले । তেঁদ ।

कुतूणक: । पुं । बालरोगविशेषे । See कुकूणक: । [८ । कुम्भिकायाम् । हारा. ।

कुतृणम् । क्ली । कातृणे । গন্ধতৃণ । रा.नि.व.

कुलम् । क्ली, पुं । कुष्ठौषधौ । रा.नि.व.१२ । लवके । हारे । त्रिका. ।

कुत्सला । स्त्री। नीलीवृक्षे । নীল গাছ । श.च.।

कुत्सशिम्बी, कुत्सा । स्त्री । शिम्बीभेदे । दुष्टशिम्बी । वै.निघ. ।

कुत्सितम् । क्ली । दीर्घरोहिषे । বড় গন্ধতৃণ। वै.निघ. । कुष्ठौषधौ । रा.नि.व.१२ ।

कुत्सितशाल्मली । स्त्री । कृष्णशाल्मल्याम् ।

कुत्सिताम्ब: । पुं। कदम्बवृक्षे । वा.सू.१५अ.।

कुथ: (**था**) । पुं, स्त्री । कुशतृणे । কুশ । प. मु.। शुक्लदर्भे । वै.निघ.। (था) हस्तिपृष्ठस्थकम्बले । হাতির পিঠের ঝুল । अम. । [अ. ।

कुथित: । त्रि । पूतियुक्ते । পচা । सु.चि.१९

कुदलिः } पुं। अश्मन्तकवृक्षे। চালিতা।
कुद्दारः (लः) } कोविदारवृक्षे। রক্তকাঞ্চন।
र.मा.। रा.नि.व.९।१०। आरग्वधवृक्षे। वै.निघ.। कोद्रवधान्ये। কদো ধান। प.मु.। [वै.निघ.।

कुदेहः (कः)। पुं। कुत्सितदेहे। महाशालवृक्षे।

कुद्दलः। पुं। गिरिकाञ्चने। [वै.निघ.।

कुद्रवः (वलः)। पुं। कोद्रवे। কদো ধান।

कुधरः। पुं। पर्व्वते। रा.नि.व.२।

कुधान्यम्। क्ली। तृणधान्ये, क्षुद्रधान्ये। कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधुलिकानन्दीमुखकुरुविन्दगवेधुकवरुकोदपर्णीसुकुन्दवेणुजप्रभृतयस्तद्वर्गाः। गुणाः—उष्णाः कषाया मधुरा रूक्षाः कटुपाकाः श्लेष्मघ्नाः स्तावरोधकाः वातपित्तप्रकोपकराश्च। सु.सू.४६अ.। वातात्मकं शीतलञ्च। रा.नि व.१५।

कुनखः। पुं, क्ली। क्षुद्ररोगविशेषे। तल्लक्षणं यथा—"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनां। कुर्व्वीत दाहपाकौ च तं व्याधिं चिप्पमादिशेत्। तदेवाल्पतरैर्दोषैः परुषं कुनखं वदे"दिति॥ मा.नि.। त्रि। कुत्सितनखयुक्ते।

कुनखी। त्रि। कुनखरोगयुक्ते। सङ्कुचितनखे।

कुनटः। पुं। पृथुशिम्बश्योणाकवृक्षे। বড় শোঁটা শ্যোণা গাছ। रा.नि.व.९। पीतलोध्रे। वै.निघ.।

कुनटी। स्त्री। Red arsenic (Coriandrum Sativum.) मनःशिलायाम्। মনছাল। र.मा.। धान्याके। भा.पू.१भ.। नेपालदेशजमनःशिलायाम्। भरत.। [গাছ। त्रिका.।

कुनली (इन्)। पुं। वकवृक्षे। বড় বাকস

कुनाभिः। पुं। निधौ। हे.च.। वातसङ्घ्याम्। त्रिका.।

कुनालः } पुं। कोकिले।
कुनालिकः }

कुनाशकः। पुं।दुरालभायां,रक्तयवासे। अम.।

कुनासः। पुं। उष्ट्रे। वै.निघ.।

कुनीली। स्त्री। तेरणे। रा.नि.व.४।

कुन्तः। पुं। (Coix Barbata.) गवेधुकायां। গড়গড়ে। मे.। क्षुद्रजन्तौ। विश्व.।

कुन्तलः। पुं। केशे। रा.नि.व.१८। चषके। यवे। मे.लत्रिकं। ह्रीवेरे। বালা। अम.।

कुन्तलवर्द्धनः। पुं। भृङ्गराजवृक्षे। ভীমরাজ। रा.नि.व.४।

कुन्तलिका (ली)। स्त्री। दध्यादिच्छेदन्यां। দৈ কাটা ছুরী। हारा.। वृक्षभेदे। আবুটা। वै.निघ.। [नि.व.१०।

कुन्तलोशीरम्। क्ली। ह्रीवेरे। বালা। रा.

कुन्ती। स्त्री। गुग्गुलुवृक्षे। "गुग्गुलुपृथयोश्च शालुकाम्।" मे.तद्धिकं। शल्लकीवृक्षे।

कुन्दः (कः)। पुं। (Jasminum Multiflorum.) स्वनामख्यातपुष्पवृक्षे। কুন্দফুলের গাছ। मं कुन्दे। कं सुरगि। तें मोल्ल। मे.। क्ली। तत्पुष्पे। गुणाः—अतिमधुरः शीतः कषायः केशभावनः कफपित्तहरः सरः दीपनः पाचनश्च। रा.नि.व.१०। पुष्पं शीतं लघु श्लेष्मशिरोवेदनाविषपित्तघ्नञ्च। भा.पू.१भ.। श्लेष्मलं ग्राहि च। राज.। कुन्दुरुखोट्यां। भा.पू.१भ.। रा.नि.व.१२। श्वेतकरवीरवृक्षे। रा.नि.व.१०। मदनवृक्षविशेषे। কাঁটা ময়না। प.मु.। See पिचुकः। निधिविशेषे। यन्त्रभेदे। मे.। (कः) कुन्दुरुके। रा.नि.व.८।

कुन्दमः। पुं। मार्जारे। त्रिका.।

कुन्दरः। पुं। तन्नामकतृणे। কুন্দরা। गुणाः—"गौल्यकुन्दरमूलञ्च शीतं पित्तातिसारनुत्। प्रशस्तं शोधनानाञ्च बलपुष्टिविवर्द्धनं॥" रा.नि.व.८।

कुन्दरिका। स्त्री। सल्लक्याम्। रा.नि.व.११।

कुन्दसाह्वा, कुन्दा। स्त्री। श्वेतयूथिकायां। वै.निघ.।

कुन्दालः। पुं। महारग्वधवृक्षे। वै.निघ.।

कुन्दिनी। स्त्री। पद्मसमूहे। त्रिका.।

कुन्दुः। स्त्री। कुन्दुरुखोट्याम्, कन्दुरुनामगन्धद्रव्ये। रा.नि.व.१२। च.द.वा.व्या.एकादशशतीप्रसारणीतैले। पुं। मूषिके। श.र.।

कुन्दकुन्दुकः। पुं। कुन्दुरुखोट्यां रा.नि.व.१२

कुन्दुखोटी । स्त्री । कुन्दुरुखोट्यां । भैष.वृह विषतैले ।

कुन्दुर: (रु:, क:) । पुं, स्त्री (की) । स्वनामख्याम् । धूपभेदे, गुग्गुलभेदे । हिं वेरोजा । वै.निघ. । कुन्दरतृणे । रा.नि.व.२२ । The resin of the plant (Boswellia thurifera.) स्वनामख्यातगन्धद्रव्ये, शल्लकीनिर्यासे । कुन्दुरु-খোটী । गुणा:—मधुर: तिक्त: कफपित्तदाहघ्न: प्रदरघ्न: पाने लेपे च शीतल: । मधुरतिक्ततीक्ष्णकटुक: लघ्व: ज्वरस्वेदग्रहदोषमुखरोगकफवातघ्नश । भा.पू.१भ. । रा.नि.व.१२ । स्वेदवातश्लेष्मब्रणज्वरहर: । मद.व.३ । [निर्यासे । वै.निघ. ।

कुन्दुरुकी । स्त्री । शल्लकीवृक्षे । श्रम. । शल्लकी-

कुन्दुरुखोटी । स्त्री । स्वनामख्यातगन्धद्रव्ये, कुन्दुरौ । प.मु. । सा.कौ शतावरीमोदके ।

कुप: । पुं । भारद्वाजपक्षिणि । वै.निघ. ।

कुपथ्यम् । क्ली । अस्वास्थ्यकरे पथ्ये । [मु. ।

कुपनस: । पुं । पनसवृक्षे । কাঁঠাল গাছ । प.

कुपाक: । पुं । कुपीलौ । वै.निघ. ।

कुपाणि: । त्रि । कुकरे, वक्रहस्ते । কোপা । हिं टुण्डा । जटा. ।

कुपिनी । स्त्री । खालुइ इति गौड़भाषाप्रसिद्धायां स्वल्पमत्स्यधान्याम् । श.र. ।

कुपिन्द: । पुं । वस्त्रनिर्मातरि । वै.निघ. ।

कुपि(पी)लु: । पुं । काकपीलौ, कारस्करवृक्षे । মাকড়া গাব, মধুর গাব, কুচিলা । रा.नि.व. ६ । See कारस्कर: ।

कुप्य(क)म् । क्ली । Tutenag. सीसरङ्गमिश्रधातौ, अष्टधातुमध्ये दस्ता इति ख्याते धातौ । सुवर्णरजतभिन्नधातौ । रत्ना. ।

कुप्यधौतम् । क्ली । रौप्ये । रा.नि.व.१३ ।

कुप्यलवणम् । क्ली । लवणविशेषे । च.वि.८अ. ।

कुप्यशाला । स्त्री । धातुद्रव्यनिर्माणशालायां ।

कुबाहुल: । पुं । उष्ट्रे । श.च. ।

कुबे(वे)र: (क:) । पुं । नन्दिवृक्षे, तूनवृक्षे । তূণ বা গন্ধা অশ্বথ । श्रम. । प.मु. । वै.निघ. २भ.वा.व्या.कुवेरपाके । त्रि । कुशरीरे । त्रिका. ।

कुवेरनेत्र: (राक्ष:) । पुं । पाटलवृक्षे । लताकरञ्जे । वै.निघ. । [णी.चि. ।

कुवेराह्वय: । पुं । नन्दीवृक्षे । वै.निघ.२भ.ग्रह-

कुवेराक्षी । स्त्री । पाटलावृक्षे । प.मु. । काष्ठपाटलायाम् । सितपाटलायाम् । শ্বেত পারুল । रा.नि.व.१० । पेटिकायां । পেটারি । रत्ना. । सु.सू.३८अ. । भा.म.४भ.बाल.चि. । "कुवेराक्षी च योज्या: स्यु: ।" लताकरञ्जे । वै.निघ. ।

कुब्ज: । पुं । वनचटके । (Bola cuja.) मत्स्यविशेषे । अपामार्गे । रा.नि.व.४ । तन्नामकवातव्याधिविशेषे । কুঁজ । लक्षणं—"हृदयं यदि वा पृष्ठमुन्नतं क्रमश: सरुक् । क्रुद्धोवायुर्यदा कुर्यात्तदा तङ्कुब्जमादिशेत् ॥" मा.नि. । "वातघ्नैर्दशमूल्या च नरं कुब्जमुपाचरेत् । स्नेहैर्मांसरसैश्चापि प्रवृद्धं तं विवर्जयेत् ॥" त्रि । उन्नतपृष्ठे । কুঁজো । हे.च. ।

कुब्जक: । पुं । An aquatic plant, (Trapa bispinosa.) कौङ्कणदेशख्यातपुष्पवृक्षविशेषे । শ্বেত গোলাপ । हिं कूजा । मं कांटेशेवती । गुणा:—सुरभि: शीतल: रक्तपित्तहरश्च । पुष्पं शीतलं वल्यं दाहघ्नं वातपित्तघ्नञ्च । रा.नि. व.१० । "कुब्जक: सुरभि: स्वादु: कषाय: सुरस: सर: । त्रिदोषशमनो वृष्य: शीतहर्त्ता च स स्मृत: ॥" भा. । शृङ्गाटके । त्रिका. । पीतझिण्ट्यां । र.मा. । [श्वेतखदिरे । रा.नि.व.८ ।

कुब्जकण्टक: । पुं । White mimosa.

कुब्जका । स्त्री । कुब्जकवृक्षे । गुल्लाव । रा.नि. व.१० । मद. ।

कुब्जकिरात:
कुब्जवामन: } पुं । कुब्जे ।

कुब्जत्वम् । क्ली । वायुरोगभेदे । কুঁজ ।

कुब्जपुष्प: । पुं । पीतझिण्टीक्षुपे । পীতপুষ্প ঝাঁটী । र.मा. ।

कुब्जप्रसारणीतैलम् । क्ली । वातव्याध्यधिकारे । तिलतैलम् १६ श. क्वाथार्थं—प्रसारणी-क्वाथ: १०० प. जल ६४ श. शे. १६ श. । दधि १६ श. काञ्जिकं १६ श. दुग्धं ३२ श. । कल्कार्थं —चित्रकमूलपिप्पलीमूलयष्टिमधुसैन्धववचाशुल-

फाटैवदारुरास्नागजपिप्पलीगन्धभादुलिमूलजटामांसीभिलक(अभावे)रक्तचन्दनानां प्रत्येकं २ प.। गन्धद्रव्यं यथालाभं देयम्। च.द.।

कुञ्जा । स्त्री । वनचटकायाम् । वै.निघ.।

कुभुक्तम् । क्ली । कदर्य्यान्ने ।

कुमरिचः । पुं। (Capsicum.) मरिचवृक्षविशेषे । लङ्कामरिच । हिं लालमिरिच । उत्. नीकीमरिच ।

कुमारः (कः) । पुं। सप्तदशाब्दः विंशद्वर्षपर्य्यन्तं पुरुषे । रा.नि.व.१८ । पञ्चवर्षीयबालके । हे.च.। (कः) वरुणवृक्षे । वरुण गाछ । रा.नि.व.९ । समुद्रवृक्षे । मशानमुद्रा । रत्ना.। शुकपक्षिणि । अश्ववारके । मे.। क्ली । जात्यकाञ्चने । थाँटिसोणा । मे. । नेत्रतारके ।

कुमारकल्याणकघृतम् । क्ली। बालरोगाधिकारे । पाठः—"शङ्खपुष्पी वचा ब्राह्मी कुष्ठं त्रिफलया सह। द्राक्षा सशर्करा शुण्ठी जीवन्ती जीरकं बला। शटी दुरालभा विल्वं दाड़िमं सुरसः स्थिरा। मुस्तं पुष्करमूलञ्च सूक्ष्मैला गजपिप्पली। एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्। कषाये कण्टकार्य्याश्च क्षीरे तस्माच्चतुर्गुणे। एतत्कुमारकल्याणम्॥ घृतं ४ श. कल्कानां शङ्खपुष्प्यादीनां प्रत्येकं २ तो. । कण्टकारी १२॥० श. जलं ६४ श. शे. क्काथः १६ श. दुग्धं १६ श. । च.द.।

कुमारजीवः (रञ्जीवसंज्ञः) । पुं। पुत्रञ्जीवकवृक्षे । पुतञ्जिया गाछ । र.मा. ।

कुमारतन्त्रम् । क्ली। रावणकृते बालरोगप्रबन्धे । प्रथमे दिवसे मासि वर्षे वा नन्दा मातृका, द्वितीये दिवसे मासि वर्षे वा सुनन्दा, तृतीये दिवसे मासि वर्षे वा पूतना, चतुर्थे दिवसे मासि वर्षे वा मुखमुण्डितिका, पञ्चमे…कटपूतना, षष्ठे…शकुनिका, सप्तमे…शुष्करेवती, अष्टमे…आर्य्यका, नवमे…सूतिका, दशमे…निर्ऋता, एकादशे…पिलिपिच्छिका, द्वादशे च दिने मासि वर्षे वा कामुका नाम मातृका शिशुं गृह्णाति । सर्व्वाभिरेव गृहीतमात्रस्य च ज्वरोदयो भवति । च.द.।

कुमारभृत्या । स्त्री । गर्भिण्याः परिचर्य्यायां, बालतन्त्रे । त्रिका. ।

कुमारललिता । स्त्री । शिशुक्रीड़ायाम् ।

कुमारवाही (हिन्) । पुं। मयूरे । श.र. ।

कुमारा । स्त्री । त्रिसन्धिपुष्पवृक्षे । वै.निघ. ।

कूलेचरः । पुं । पञ्चविधानूपान्तर्गतपशुवर्गे । स च वर्गः लुलायादिपशुपरः । यथा—"लुलायगण्डवाराहचमरीवारणादयः । एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यपाम् ॥ गुणाः—कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः । मधुराः शीतलाः स्निग्धाः मूत्रलाः श्लेष्मवर्द्धना" इति ॥ भा. । "गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोद्रन्यङ्कुवनगवयप्रभृतयः ।" "वातपित्तहरा वृष्या मधुरा रसपाकयोः । शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः ॥" सु.सू.४६अ. ।
कूवरः । पुं । कुब्जके । मे. ।
कूष्माण्डः (कः) । पुं । कुष्माण्डलतायाम् । কুমড়া গাছ । हे.च. । [लतायाम् । वै.निघ. ।
कूष्माण्डकी । स्त्री । भूमिकुष्माण्डे । कुष्माण्ड-
कूष्माण्डवटिका । स्त्री । कलायकुष्माण्डशस्यकृते वटीविशेषे । কুমড়াবড়ি । "कुष्माण्डवटिका ज्ञेया पूर्व्वोक्तवटिकागुणा । विशेषात्पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥" [वै.निघ. ।
कूष्माण्डिका (की) । स्त्री । पीतालाब्वाम् ।
कूष्माण्डी । स्त्री । कर्कारौ। "कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता ।" हे.च. ।
कूहा । स्त्री । कुज्झटिकायाम् । কুয়াসা । हिं कुहासा । श.र. ।
कृकः । पुं । गले । গলা । हे.च. ।
कृकणः । पुं। क्रकरपक्षिणि । कयार इति लोके । अम. । क्रमौ । हारा. ।
कृकरः (लः) । पुं । चव्यनामक्षुपे । চই । रा.नि.व.६। (Perdix Sylvatica.) पक्षिविशेषे । कर्कटे পাখী । हिं कुवार । मं करढ़ोंक । गुणाः—"लघुश्च क्रकरो ज्ञेयः कायाग्निवर्द्धनो भ्रमम् ।" अत्रि.। करवीरवृक्षे । रा.नि.व.१०। (लः) जृम्भाकरे शरीरस्थवायुविशेषे । तन्त्रम् ।
कृकरा (ला) । स्त्री। पिप्पल्यां । रा.नि.व.६।
कृक(कु)लासः (सः) । पुं । सरटे । গিরগিটে, কাঁকলাস । रत्ना. । गृहगोधायाम् ।

कृकवाकुः । पुं । Gallinaceous fowl. कुक्कुटे । रत्ना. । मयूरे । त्रिका.। सरटे । हारा.। स्त्री । गृहगोधिकायाम् ।

कृकषा । स्त्री । कड़कहारिकपक्षिणि ।

कृकाटिका । स्त्री । ग्रीवापश्चाद्भागे । घाड़ । रा.नि.व.१८ । तत्स्थानस्थतन्नामकवैकल्यकारमर्मदये । सु.शा.६अ. ।

कृकालिका । स्त्री । पक्षिभेदे ।

कृकुवत्सा । स्त्री । मर्कटे । वै.निघ. ।

कृकरः । पुं । करीरे । रा.नि.व.८ ।

कृच्छ्रम् । क्ली । कष्टे । मूत्रकृच्छ्ररोगे । रा.नि.व.२० । सन्तापे । मे. ।

कृच्छ्रसाध्यः । त्रि । कष्टसाध्ये ।

कृच्छ्रहरः । पुं । पाषाणभेदे । वै.निघ. ।

कृच्छ्रारिः । पुं । विल्वान्तरवृक्षे । रा.नि.व.८।

कृच्छ्रोन्मीलः । पुं । वर्त्मरोगविशेषे । तस्य लक्षणं यथा—"चलन्तु गरलस्तत्र प्राप्य वर्त्माश्रयाः शिराः । सुप्तोत्थितस्य कुरुते वर्त्मस्तम्भं सवेदनं । पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनमश्रु च । विमर्द्दनासहाच समः कृच्छ्रोन्मीलं वदन्ति तम् ॥" वा. ।

कृणज्वरः । पुं । कृणज्वरे ।

कृतम् । क्ली । फले । है.च. । हिंसिते । मे. ।

कृतक(एटक)म् । क्ली । रसाञ्जने । रा.नि.व. १३ । विड़लवणे । विट्लवण । रा.नि.व.६ ।

कृतकः । त्रि । कृत्रिमे । उणा. ।

कृतच्छाया । स्त्री । श्वेतकोषातक्यां । रत्ना. ।

कृतच्छिद्रा । स्त्री । कोषातकीलतायाम् । झिङा, घोषालता । रा.नि.व.३ ।

कृतघ्नः । पुं । कुक्कुरे । मे. ।

कृतत्राणा । स्त्री । त्रायमाणायाम् । গোস্রালে লতা । रा.नि.व.५ । [निघ. ।

कृतपिण्डीतः (कः) । पुं । शिलारसे । वै.

कृतफलम् । क्ली। कक्कोलफले । रा.नि.व.१२।

कृतफला । स्त्री । कोलशिम्ब्यां । आलाकुशी । रा.नि.व.७ ।

कृतबन्धनम् । क्ली । कोशातकफले । घोषा । भा.म.४भ.प्रमृता.चि. । "कृतबन्धनसर्षपैः ।"

कृतमालः । पुं । आरग्वधे, कर्णिकारवृक्षे । সোণালু, সোন্দাল । च.सू.४अ. । तत्फलं संसनं (अथात् कोष्ठस्थं श्लिष्टमलादिकमपक्वैव अधो नयति) । सङ्घातचारिपक्षिविशेषे । सङ्घातचारिमृगेषु । सु.सू.४६अ. ।

कृतयूषः । पुं । प्रमथ्यायाम् । वा.चि.१अ. ।

कृतरसः । पुं । स्नेहगुण्ठ्यादियुक्ते कृते तद्विपरीते च अकृते मांसरसे । तदुक्तं—"छागलं सकृथिजं मांसं निरस्थि तैत्तिरं तथा । चतुष्पलान्वितं सूक्ष्मं कल्पितं क्षालितं जले । पिप्पलीपिप्पलीमूलशुण्ठीचित्रकधान्यकैः । द्विशाणैः संयुते तोये क्वाथ्यं सार्द्धाढ़कोन्मिते । मांसेऽस्मिन्द्विपलं तत्र दाड़िमान् कुट्टितान् क्षिपेत् । तं रसं मर्द्दितं पूतं हिङ्गुसैन्धवजीरकैः । युक्तं प्रधूपितमप्यं शुद्धानां शुद्धिकाङ्क्षिणाम् ॥" वा.टी. । [ঘোষা । र.मा. ।

कृतवेधः (कः) । पुं । कोषातक्याम् । শ্বেত

कृतवेधनः । पुं । श्वेतपुष्पकोषातके । শ্বেত ঘোষা । आरग्वधवृक्षे । सु.सू.३८,४५अ. । ज्योत्स्निकायाम् । লতাফট্কী । च.सू.२अ. । च.द. गर्भाधि. ।

कृतवेधना । स्त्री । Plant with white flowers, Emitics. राजकोषातकीलतायाम् । ঝিঙা, ঘোষালতা । प.मु । श्वेतघोषायां, कटुघोषायाम् । रत्ना. ।

कृताख्ययूषः । पुं । लवणस्नेहकटुकादिकृतयूषे । अयं गुरुगुणः । वैद्यकम् ।

कृताञ्जलिः । स्त्री । लज्जावतीलतायाम् । धरणि. । ' ब्रह्मदण्डीकृताञ्जलिः ।" च.द.ज्व.चि. । एतद्बन्धनं एकाहिकज्वरघ्नम् । "रक्तसूत्रेण संवेष्ट्य बध्नादेकाहिकं जयेत् ।" भैष.स्त्रीरोग.चि. । रस. र.ज्वरी.चि. ।

कृतान्तः । पुं । यमे । अम. । [श.च. ।

कृतान्ता । स्त्री। रेणुकनामगन्धद्रव्ये । রেণুক ।

कृतान्नम् । क्ली । लड्डुकादौ ।

कृतालयः । पुं । भेके, मण्डूके । त्रिका. ।

कृतिः । स्त्री । करणे । हिंसायाम् । मे. । (का) स्त्री । भूर्ज्जवृक्षे । नकुल.१२अ. ।
कृती (इन्) । त्रि । कुशले ।
कृत्तम् । क्ली । छिन्ने । वेष्टिते । हे.च. ।
कृत्तिः (का) । स्त्री । कृष्णसारादिचर्म्मणि । त्वचि । भूर्जे । "कृत्तिश्चर्म्मत्वचोर्भूर्जे ।" मे. ।
कृत्तिवासाः । पुं । शिवे । अम. ।
कृत्या । स्त्री । आभिचारिकदेवतायाम् । सि. यो.उन्मा.चि. । "कृत्यालक्ष्मीज्वरापहम् ।" क्रियायाम् । मे. । [शार्ङ्ग. ।
कृत्योन्मादः । पुं । कृत्याजातभूतोन्मादरोगे ।
कृत्रिम(क)म् । क्ली । विड्लवणे । रा.नि.व. ६२३ । रसाञ्जने, कृत्रिमरसाञ्जने । रत्ना. । चीनकर्पूरे । गन्धराजे । कस्तूरिकायां । रा.नि.व.१२ । पुं । सिह्लके । शिलारस । मे. । पीतचन्दने । वै. निघ. ।
कृत्रिमधूपकः । पुं । षोड़शाङ्गधूपे । अम. ।
कृत्रिमरत्नम् । क्ली । काचे । वै.निघ. ।
कृत्रिमविषम् । क्ली । विषदोषे । वै.निघ ।
कृत्स(त्स्न)म् । क्ली । जले । कुक्षौ । मे. ।
कृन्तनम् । क्ली । छेदने । [मे. ।
कृपणः । पुं । कृमौ । "कृपणस्तु कृमौ पुंसि ।"
कृपणा । स्त्री। सविषकीटविशेषे । सु.कल्प.८अ.।
कृपाणिका (णी) । स्त्री। कर्त्तर्यां । कातारि । छुरिकायाम् । मे. । [काष्ठे । श.र. ।
कृपीटम् । क्ली । उदरे । तोये । मे. । वने ।
कृपीटपालः । पुं । वायौ । श.र. ।
कृपीटयोनिः । पुं । अग्नौ । हे.च. ।
कृमिः । पुं । कीटे । কেঁচো, পোকা । अम. । पतङ्गमात्रे । पिपीलिकायाम् । कीटात्सूक्ष्मे लाक्षायाम् । "कृमिर्ना कृमिवत्कीटे लाक्षायां कृमिले खरे ।" मे. । ऊर्णनाभे । हे.च. ।
कृमिकम् । क्ली । पूगफले । पुं । क्षुद्रकृमौ ।
कृमिकण्टकम् । क्ली । विड़ङ्गे । उदुम्बरे । यज्ञडुमुर । मे. । चित्रायां । ইন্দুরকাণী । हे.च. ।
कृमिकरः । पुं । सविषकीटभेदे ।
कृमिकर्णः (कः) । पुं । कीटविशेषे । कानकोटারি । कर्णरोगविशेषे । কাণে কাণকোটার । "यदा तु मूर्च्छन्त्यथवापि जन्तवः सृजन्त्यपत्यान्यथवापि मक्षिकाः । तदञ्जनत्वाच्छ्रवणे निरुच्यते, भिषग्भिराद्यैः कृमिकर्णकस्तु सः ॥" सु.उ. २०अ. । वा.उ.१७अ. ।
कृमिका । स्त्री। ग्रन्थिपर्ण्याम् । राजिकायां । রাই বা কাল সরিষা । शोथे । वै.निघ. ।
कृमिकालानलरसः । पुं । कृम्यधिकारे । विड़ङ्ग २ प. विषचूर्ण १ प. लौह ४ तो. पारद २ तो. गन्धक २ तो. छागदुग्धे मर्द्दनं । र सा.सं. ।
कृमिकुम्भा । स्त्री । महाकाललतायाम् ।
कृमिकोशः (षः) । पुं । फलविशेषे । গাজুফল । तच्च संग्राहि तिक्तं रक्तशोधनं ज्वरार्शःप्रदरातीसारघ्नं कण्ठरोगघ्नञ्च । वै.चन्द्रिका ।
कृमिकोष्ठकः । पुं । अश्वस्य रोगविशेषे । लक्षणं यथा—"कृशस्य यस्य वाहस्य जन्तुभिः परिवेष्टितम् । पुरीषं जायते भिन्नं तं विद्यात् कृमिकोष्ठकम् ॥" ज.द.४६अ. । [व.१ ।
कृमिगुहा । स्त्री । इन्द्रवारुणीलतायां । मद.
कृमिग्रन्थिः । पुं । नेत्रसन्धिगतरोगे । लक्षणं —"कृमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्य्युः कृमयः सन्धिजाताः । नानारूपा वर्त्मशुक्लस्य सन्धौ चरन्तोऽन्तर्नयनं दूषयन्ति ॥" सु.उ.२अ. ।
कृमिघातिनी (गुड़ी) । स्त्री । कृमौ रसे । पाठः—"रसगन्धाजमोदानां कृमिघ्नब्रह्मबीजयोः । एक द्वि त्रि चतुः पञ्च तिन्दोर्बीजस्य षट् क्रमात् । सच्चूर्ण्य मधुना सर्व्वं गुड़िकाङ्कृमिघातिनीं । खादन् पिपासुर्लोयञ्च मुस्तानाङ्कृमिशान्तये । आखुपर्णीकषायञ्च पिबेच्चानु सशर्करम् ॥" পারা ১ ভ. गन्धक २ ভ. বনযমানী ৩ ভ. বিড়ঙ্গ ৪ ভ. पलाशपावड़া ৫ ভ. তেঁদবীজ ৬ ভ. । र.चि. ।
कृमिघाती । पुं । विड़ङ्गे । त्रि । कृमिनाशके ।
कृमिघ्नः । पुं । पारिभद्रवृक्षे । পালদে মান্দার । रा.नि.व.८ । कटुनिम्बे । पलाण्डौ । कोलकन्दे । वदरमूले । रा.नि.व.७ । भल्लातकवृक्षे । रत्ना.

नि.व.११। विड़ङ्गे। प.मु.। हरिद्रायाम्। भा.। त्रि। कृमिनाशके।

कृमिघ्नरसः। पुं। कृम्यधिकारे रसः। विड़ङ्गं पलाशबीजं निम्बबीजं रससिन्दूरं, एषां चूर्णं समं। र.सा.सं.।

कृमिघ्ना (घ्नी)। स्त्री। हरिद्रायाम्। लाक्षायाम्। विड़ङ्गायाम्। वै.निघ.। धूम्रपत्रायाम्। তামাক। रा.नि.व.५। सोमराज्याम्। श.च.।

कृमिज(ग्ध)म्। क्ली। अगुरुकाष्ठे। अम.। लाक्षायाम्। त्रि। कृमिजाते।

कृमिजलजः। पुं। कृमिशङ्खे। रा.नि.व.१३।

कृमिजा (जाह्वा)। स्त्री। लाक्षायाम्। লাহা, আলতা। र.मा.। [हारावल्यादौ।

कृमिजित्। क्ली। विड़ङ्गे। वै.निघ.वा.व्या.म-

कृमिदन्तः (कः)। पुं। दन्तरोगविशेषे। लक्षणं—"कृष्णच्छिद्रश्चलः स्रावी ससंरम्भो महारुजः। अनिमित्तरुजो वाताम् ज्ञेयः कृमिदन्तकः॥" सु.नि.१६अ.। वा.उ.२२अ.।

कृमिद्रवः। पुं। लाक्षायाम्। वै.निघ.।

कृमिनाशनम्। क्ली। विड़ङ्गे। वै.निघ.। त्रि। कृमिहरे। [निघ.।

कृमिनाशिनी। स्त्री। अजमोदायाम्। वै.

कृमिपाना (मा)। स्त्री। लाक्षायां। वै.निघ.।

कृमिफलः। पुं। उदुम्बरवृक्षे। मद.व.५।

कृमिमक्षिका। स्त्री। कृमितुल्यमक्षिकायाम्। वै.निघ.।

कृमिमुद्गरः। पुं। कृमौ रसः। "क्रमेण वृद्धं रसगन्धकाजमोदाविड़ङ्गं विषमुष्टिका च। पलाशबीजञ्च विचूर्णमस्य निष्कप्रमाणं मधुनावलीढ़ं॥" পারা ১ ভ. গন্ধক ২ ভ. বনযমানী ৩ ভ. বিড়ঙ্গ ৪ ভ. কুচিলা বা নিম ৫ ভ. পলাশবীজ ৬ ভ.। মাত্রা ৪ মাষা। भैष.।

कृमिरिपुः। पुं। विड़ङ्गे। श.र.।

कृमिरोगः। पुं। उदरजकृमिजन्यरोगे। কৃমিরোগ। कृमिर्द्विविधः बहिरभ्यन्तरभेदेन। जन्मभेदेन चतुर्धा। नामतो विंशतिः। मा.नि.। एकविंशतिः। शार्ङ्ग.। तदुत्पत्तिकारणं जीर्णभोजनादि। "बाह्यास्तथाभ्यन्तराः स्युस्तेषु यूका बहिश्चराः। लिक्षाश्चान्येऽन्तरचराः कफाचे हृदयादकाः। अन्नादा उदरावेष्टाश्चरवश्च महान्नदाः। सुगन्धा दर्भकुसुमास्तथा रक्ताश्च मातरः। सौरसा लोमविध्वंसा लोमद्वीपा उदुम्बराः। केशादाश्च तथैवान्ये शकृज्जाता मकेरुकाः। लेलिहाश्च सशूलाश्च सौसुरादाः ककेरुकाः। तथान्यः कफरक्ताभ्यां सञ्जातः स्नायुकः स्मृतः॥" शार्ङ्ग.पू.७अ.।

कृमिलकः। त्रि। कृमिविशिष्टे।

कृमिला। स्त्री। अनेकप्रस्वाम्, बहुसन्तानप्रसवायाम्। हे.च.। त्रि। कृमियुक्ते। [व.१३।

कृमिवारिरुहः। पुं। कृमिशङ्खे। रा.नि.

कृमिविनाशरसः। पुं। कृम्यधिकारे रसः। पारद-गन्धक-अभ्र-लौह-मनःशिला-धातकी-त्रिफला-लोध्र-विड़ङ्ग-हरिद्रा-दारुहरिद्राः, एषां प्रतिसमभागः आर्द्रकरसेन ७धा भाव्यः। र.सा.सं.।

कृमिवृक्षः। पुं। कोषाम्रे। জলপাই। भा.।

कृमिशङ्खः। पुं,क्ली। Fish of the conch. जीवशङ्खे। কৃমিশঙ্খ। अयं रसवीर्य्याद्यैः शङ्खसदृशः। रा.नि.व.१३।

कृमिशत्रुः। पुं। विड़ङ्गे। प.मु.। वै.निघ.२भ.ज्व.चि.। पारिजातवृक्षे। পালুদে মান্দার।

कृमिशात्रवः। पुं। विट्खदिरे।

कृमिशुक्तिः (स्तुः)। स्त्री। जलशुक्तौ। ঝিনুক। रा.नि.व.१३। मत्स्यभेदे। वै.निघ.।

कृमिशैलः (कः)। पुं। वल्मीके। श.र.।

कृमिसरारी। पुं। अग्निप्रकृतिकीटे। तेन दष्टे पित्तजन्यरोगा जायन्ते। सु.कल्प.८अ.। [निघ.।

कृमिहन्त्री (हा)। स्त्री। विड़ङ्गायाम्। वै.

कृमिहरम्। क्ली। विड़ङ्गे। भा.म.१भ.तन्द्रिज्व.चि.। विड़लवणे। मरिचे। वै.निघ.। त्रि। कृमिघ्ने।

कृमिहररसः। पुं। कृम्यधिकारे। अत्र देवदाली हस्तिघोषाफलम्। पारद-गन्धक-इन्द्रयव-यमानी-मनःशिला पलाशबीजानि प्र, समभागः इ-

निम्बीषाफलरसेन दिनं सम्मर्द्य वटी कार्य्या । अनुपानं शालपर्णीरसः । र.सा.सं. ।

कृमी (इन्) । त्रि । कृमिविशिष्टे ।

कृमीलकः । पुं । वनमुद्गे । मुगानी । रा.नि.व.१६ । See मकुष्ठकः ।

कृशः । त्रि । दुर्ब्बले । सूक्ष्मे । अम. ।

कृशरः । पुं । कृसरे तिलतण्डुलमाषकृते मण्डविशेषे । रत्ना.यवाग्वादिव.। तिलमिश्रौदने, तुल्यतिलान्ने । हे.च. ।

कृश(स)रा । स्त्री । तिलौदने । हारा. । खेचरान्ने । खिचुड़ि,थरमा। "तिलतण्डुलमाषैश्च कृसरा त्रिसरेति ।" प.प्र.३ख.। तल्लक्षणं —"तण्डुला दालिसंमिश्रा लवणार्द्रकहिङ्गुभिः । संयुक्ताः सलिलैः सिद्धाः कृशराः कथिता बुधैः ॥" भा. । गुणाः— "कृशरा शुक्रला बल्या गुरुः पित्तकफप्रदा । दुर्ज्जरा बुद्धिविष्टम्भमलमूत्रकरी स्मृता ॥" वै.निघ. । यवागूपाकविधिना पाकः कार्य्यः ।

कृशरोमा । स्त्री । शुकशिम्ब्याम् । वै.निघ. ।

कृशला । स्त्री । शिरःकेशे । श.च. ।

कृशशाकः (खः) । पुं । पर्पटके । ক্ষেৎপা-প্ড়া । रा.नि.व.५ ।

कृशाकुः । पुं । उष्णकरणे । वै.निघ. ।

कृशाङ्गी । स्त्री । प्रियङ्गुलतायाम् । श.च. ।

कृशाणुः (नुः) । पुं। चित्रकक्षुपे। रा.नि.व.६।

कृशाचः । पुं । ऊर्णनाभौ । वै.निघ. ।

कृशि(षि)का । स्त्री । आखुकर्णीलतायाम् । ইন্দুরকাণী । रा.नि.व.३ ।

कृशीवलः । पुं । काकजङ्घागुल्मे । কেউয়া-ঠেঙা। र.मा. । [भ. । See अनन्ता ।

कृशोदरी । स्त्री । श्वेतसारिवायाम् । भा.पू.१

कृषः । पुं । अरण्ये । हे.च. । [श.च. ।

कृषकः । पुं । फालकर्षके । त्रिका. । वृषे ।

कृषिलौहम् । क्ली। मुण्डलौहे । रा.नि.व.१३।

कृष्णम् । क्ली । सौवीराञ्जने । रा.नि.व.१३ । मरिचे । प.मु. । यवनाले । কাল জনার । सौवीरोऽञ्जने । সুরমাঞ্জন । र.मा. । लौहे । जटा. । नीलाञ्जने । रा.नि.व.२३ । कृष्णागुरुणि । रा.नि.व.१२ । भा. । अगुरुणि । रत्ना.। लौहकिट्टे । विड़लवणे । शीसके । सौवर्चललवणे । तुत्थके । वै.निघ.। नेत्रतारके । पुं । राजसर्षपे । কাল সরিষা । रा.नि.व.१६। कृष्णसारमृगे । रत्ना. । वायसे । मे.। मन्दविषवृश्चिके । मण्डूकाख्यकीटभेदे । सु.कल्प.८ अ. । कोकिले । विश्व.। करमर्द्दवृक्षे। श.र.। "कृष्णे प्रवरवासन्तहरिमत्यजशिम्बिकाः ।" हे.च. ।

कृष्णकः । पुं । कृष्णमुद्गे । कृष्णतण्डुलायाम् । वै.निघ. ।

कृष्णकञ्चुकः । पुं । कृष्णचणके । वै.निघ. ।

कृष्णकदली । स्त्री । महाराष्ट्रप्रसिद्धे कदलीविशेषे । गुणाः—"कृष्णा तु कदली रुच्या तुवरा मधुरा लघुः । वातोर्ध्वातोर्द्धहृद्धिकरी मेहपित्तदृषाहरा ॥" वै.निघ. । [त्रिका. ।

कृष्णकन्दम् । क्ली । रक्तोत्पले । রক্তকমল ।

कृष्णकरवीरः । पुं । कृष्णपुष्पकरवीरवृक्षे । কাল করবীর গাছ । गुणैः करवीरतुल्यः । रा.नि.व.१० ।

कृष्णकर्कटकः । पुं । कृष्णवर्णकर्कटविशेषे । কাল কাঁকড়া । गुणाः--"कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः । शुक्रः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहः ॥" सु.सू.४६अ. ।

कृष्णकर्म्म । क्ली । शुक्लस्य व्रणरीपणस्थानस्य कृष्णीकरणे । सु.चि.१अ. ।

कृष्णक(के)लिः । पुं । (Mirabilis Jalapa.) स्वनामख्यातपुष्पवृक्षे । कृष्णकलि, সন্ধ্যামণি । गुलालफुल इति गौड़ीयाः। तस्याः शाखा रक्ततण्डुलीयनालवत् ग्रन्थियुक्ता च । पत्रं ताम्बूलवत् परं क्षुद्रं भवति, तत्पुष्पं श्वेतरक्तपाटलपीताभं युक्तपञ्चदलं षट्केसरमध्यमीषद्दन्वं सायाह्ने विकसति प्रायेण सुलभं । वीजञ्च तस्य कृष्णं मरिचाभञ्च । वै.निघ. । [प.मु. ।

कृष्णका । स्त्री । राजिकायां । রাইসরিষা ।

कृष्णकाकः । पुं । द्रोणकाके । हला. ।

कृष्णकातरा । स्त्री । रक्तगुञ्जायां । वै.निघ. ।

कृष्णकापो(तिः)ती । स्त्री। महौषधिविशेषे।

"सवीरा रोमशा मर्दौ रसेनेक्षुरसोपमां । एवं रूपरसाञ्चापि कृष्णकापोतिमादिशेत् ॥" सु.चि. ३०अ. । See चोषधि: ।

कृष्णकाय: । पुं । महिषे । वै.निघ. ।

कृष्णकाष्ठ(क)म् । क्ली । कृष्णागुरुणि । रा.नि.व.१२ । [निघ.अतिसा.चि.कुटजपुटपाके ।

कृष्णकुटज: । पुं । कृष्णपुष्पकुटजवृक्षे । वै.

कृष्णकुलत्थ: (क:) । पुं । कुलत्थभेदे । काल कुर्त्तिकलाय। गुणा: —"कृष्णकुलत्थको ग्राही रक्तपित्तकरो मत:। रसे च तुवर: पाके कटु: कफहरो मत: । वातगुल्माश्मरीगुल्मपीनसश्वासकासजित् । आनाहगुदकीलार्शोमेदधातुविनाशक:॥" वै निघ.।

कृष्णकुलत्थिका । स्त्री। वनकुलत्थके। वै.निघ.।

कृष्णकुसुम: । पुं। कृष्णकरवीरे। रा.नि.व.१०।

कृष्णगन्ध: (न्धा) । पुं, स्त्री । शोभाञ्जनवृक्षे । सजिना गाछ । र.मा. । मद. । च.सू.१,३अ. । वा.चि.५अ. ।

कृष्णगर्भ: । पुं । कट्फलवृक्षे । रा.नि.व.९ ।

कृष्णगल: । पुं । कुक्कुभपक्षिणि । कूको पाखी । वै.निघ. ।

कृष्णगोकर्णी । स्त्री । Black kind of Múrvá. (Sansevieria Zeylanica.) कृष्णकुसुममूर्व्वालतायाम् । काल मूर्गा । हिं कालासुरहरा । मं सुपली । गुणा:—"कृष्णा गोकर्णिका विक्ता रसे स्निग्धा त्रिदोषहा । शीतवीर्य्या वातपित्तज्वरदाहश्रमापहा । पिशाचबाधारक्तातिसारोन्मादमदापहा । श्वतिकासश्वासकफकुष्ठजन्यक्षयापहा । अन्ये गुणास्तु सुश्वेतगोकर्णीसदृशा मता: ॥" वै.निघ. ।

कृष्णगोधा । स्त्री । सविषसौम्यकीटभेदे । तद्दष्टस्य श्लेष्मजन्यरोगा जायन्ते । सु.कल्प.८अ. ।

कृष्णचणक: । पुं । कृष्णवर्णचणकक्षुपे । काल छोला । मं करियाचणा । कं करियकड़ले । गुणा: —मधुर: कासपित्तघ्न: पित्तातिसारकासघ्न: बल्य: रसायनश्च । रा.नि.व.१६ ।

कृष्णचञ्चुक: । पुं । चणकवृक्षे । छोला गाछ । रा.नि.व.१६ ।

कृष्णचटक: । पुं । श्यामाकपक्षिणि । शामा पाखी । [नि । काल चन्दन । प.मु. ।

कृष्णचन्दनम् । क्ली । पीतचन्दने । हरिचन्द-

कृष्णचूड़ा । स्त्री । The plant Caesalpinia Pulcherrima. स्वनामप्रसिद्धपुष्पवृक्षे । कृष्णचूड़ गाछ । गुलतुरा इति यवना: । तत्पुष्पं पीतरक्तवर्णं दीर्घवृन्तं दशदलमीषत्सुगन्धं वर्षास्विव प्रचुरं भवति । काञ्चनशिम्बीतुल्यमिति । कल्पद्रुम: । रक्तगुञ्जायां । रा.नि.व.३ । [व.३ ।

कृष्णचूड़िका । स्त्री । गुञ्जालतायाम् । रा.नि.

कृष्णचूरक: । पुं । चणकवृक्षे । छोला गाछ । प.मु. । [व.१३ ।

कृष्णचूर्णम् । क्ली । लौहमले । मण्डूर । रा.नि.

कृष्णजग्धम् । क्ली । कृष्णागुरुणि । वै.निघ. ।

कृष्णजटा । स्त्री । सुगन्धजटामांस्याम् । जटामांसी । रत्ना. । वा.अञ्जनादिव. ।

कृष्णजयन्ती । स्त्री । कृष्णवर्णजयन्तीक्षुपे । काल जन्ती । सा रसायनी । रा.नि.व.४ ।

कृष्णजिह्व: । पुं । अश्वभार्ये । अ.द.३अ. ।

कृष्णजीर: (क:) । पुं ।(Nigella sativa or Indica.) स्वनामप्रसिद्धे जीरकवृक्षे । काल जीरे । हिं मङ्गरइल । मं कालेजीरें । तें नल्लजीर । तद्द्विविधं स्थूलसूक्ष्मभेदेन । गुणा:—"कृष्णजीरश्च चक्षुष्यं रुच्योष्णं सुगन्धिकं । ग्राहकं कटुकं रुच्यं दीपकं जीर्णजूर्त्तिनुत् । कफं शोथं शिरोरोगकुष्ठञ्चैव विनाशयेत् ॥" वै.निघ. । "जरणा कटुरुष्णा च कफशोफनिकृन्तनी । रुच्या जीर्णज्वरघ्नी च चक्षुष्या ग्राहिणी परा ॥" रा.नि. व.६ । तैलं मूलकतैलवत् । जीरकभेदे । हिं साहाजीरा, कलौंजी । भा.म.४भ.नासारो.चि. ।

कृष्णतण्डुला । स्त्री । विड़ङ्गायां । वै.निघ. । कर्णस्फोटालतायाम् । रा.नि.व.३ । पिप्पल्याम् ।

कृष्णताम्बूलवल्ली । स्त्री । कृष्णनागवल्ल्यां । काल पान । गुणा: —"तिक्तोष्णा कटुका मता । कषाया च मलस्तम्भकारिणी दाहकारिणी । मुखजाड्यकरी प्रोक्ता"... ॥ वै.निघ. ।

कृष्णताम्रम् । क्ली । गोशीर्षचन्दने । श मा. ।

कृष्णतारः । पुं । हरिणे । रा.नि.व.१९ ।

कृष्णतिलः । पुं । Black Sesamum. स्वनामख्याततरुवृक्षे । कृष्णतिल गाछ । रा.नि.व.१६। See तिलः । [ट्रे । वै.निघ. ।

कृष्णतीक्ष्णा । स्त्री । कृष्णजीरके । काल जी-

कृष्णतुण्डः । पुं । अग्निप्रकृतिकीटे । तेन दष्टस्य पित्तजन्यरोगा जायन्ते । सु.कल्प.८अ. ।

कृष्णतुलसी । स्त्री । कृष्णपत्रतुलसीवृक्षे । राम तुलसी वा काल तुलसी । गुणाः—कासवातकृ-मिवमिभूतघ्नी । रा.नि.व.१० ।

कृष्णत्रिवृत् (ता) । स्त्री । कृष्णमूलत्रिवृतायां। काल তেউড়ী । हिं श्यामपनिलर, कालानिशि-थोर । गुणाः—श्वेताया ईषद्धीनगुणा, विशेषतस्तु तीव्रविरेचनी मूर्च्छादाहमत्तताभ्रान्तिकण्ठोत्कर्षता-जननी च । भा.पू.१भ. ।

कृष्णत्वक् । पुं । वकुलवृक्षे । वै.निघ. ।

कृष्णदन्ता । स्त्री । काश्मरीवृक्षे । গামার গাছ । रा.नि.व.९ ।

कृष्णदेहः । पुं । भ्रमरे ।

कृष्णधान्यम् । क्ली । कृष्णवर्णषष्टिकधान्ये । कालिन्दी धान। श्यामाके। वै.निघ.। च.सू.२७अ.।

कृष्णधुत्तूरकः । पुं । (Datura fastuosa.) कृष्णपुष्पधुत्तूरवृक्षे । काल धुतुरा, कनक धुतुरा । मं कालाधत्तूर । कं करियमदकुणिगे । अयं गुणैर्धुत्तूरतुल्यः परं गुणाढ्यः ।…"कटुरुष्णश्च कान्तिकारी व्रणार्त्तिनुत् । त्वग्दोषखर्ज्जुकण्डूतिज्वरहारी भ्रमप्रदः ।" रा.नि.व.१० ।

कृष्णपर्णी । स्त्री । कृष्णतुलस्याम् । काल तुलसी । र.मा. ।

कृष्णपल्लवा । स्त्री । कृष्णकलम्ब्याम् । काल कलमी । प.मु.। [वृक्षे । करञ्जा गाछ । श.र.।

कृष्णपाकः (पाकफलः) । पुं । करमर्द्दक-

कृष्णपिण्डारः (रुः) । पुं । पियारा इति प्रसिद्धे फलवृक्षे । रत्ना. ।

कृष्णपिण्डीतकः (ण्डीरः) । पुं । कृष्णपिण्डारी । পেয়ারা গাছ । रत्ना.। कृष्णमदनवृक्षे । काल मयना गाछ । प.मु. ।

कृष्णपिपीलिका (ली) । स्त्री । कृष्णवर्णपिपीलिकायां । काल पिंपड़े, ডেয়ো । रा. नि.व.१९ ।

कृष्णपुच्छः । पुं । मञ्जरीने हरिणतुल्यवन्यजन्तुविशेषे कोङ्कणप्रसिद्धे । हिं लोमड़ी । वै.निघ. ।

कृष्णपुष्पः । पुं । कृष्णधुत्तूरके । रा.नि.व.१० ।

कृष्णपुष्पी । स्त्री । प्रियङ्गुवृक्षे । श.च. ।

कृष्णपूतिफला । स्त्री । सोमराज्यां । रत्ना. ।

कृष्णप्रियः । पुं । कदम्बवृक्षे । वै.निघ. ।

कृष्णफलः (फलपाकः) । पुं। करमर्द्दवृक्षे । करञ्जा । हिं करौन्दा । भ.टी.भ. । हि.कोषः ।

कृष्णफला । स्त्री । श्वेतशूकशिम्ब्याम् । শ্বেত আলাকুশী । भा.पू.१भ.शाकव.। सोमराज्याम् । अम. । प.मु. । क्षुद्रकरञ्जे । वै.निघ. ।

कृष्णवर्व्वरः । पुं। कृष्णवर्व्वरके । काल वावुई । रा.नि.व.१०, वैजयन्तीनामतुलसीवृक्षे । वै.निघ.।

कृष्णवालुकम् । क्ली । कङ्कुष्ठे । वै.निघ. ।

कृष्णभस्म । क्ली । Black sulphide of mercury. पारदस्य भस्मीकरणेन कृष्णतापादने । धान्याभ्रकं १ प. पारदः १ प. मारकद्रव्यरसैः दिनं मर्द्दयित्वा, ततो मारकद्रव्यकल्केन वस्त्रखण्डं लिप्त्वा तेन वर्त्तिं कुर्य्यात् । अथ तां वर्त्तिं एरण्डतैलेनाप्लाव्य पुनः पुनः प्रज्वाल्य च यदधः पतति, तद्धृतभाण्डे गृह्णीयात् । तदेव कृष्णभस्मेत्युच्यते । तच्च पुनर्नियामकैः गणैः मर्द्दयित्वा कन्दुकाख्ये यन्त्रे दिनैकं पातयेत् । एतत्प्रणाली र.सा.सं. द्रष्टव्या । [ण्डे । श.चि. ।

कृष्णभूकुष्माण्डः । पुं । कृष्णवन्तपत्रभूमिकु-

कृष्णभूभवा । स्त्री । कारवेल्लिकायाम् । वै.निघ. । [देशे । है.च. । रा.नि.व.२ ।

कृष्णभूमः (मिः) । पुं, स्त्री । कृष्णमृण्मये

कृष्णभूमिजा । स्त्री । गोमूत्रिकातृणे । रा. नि.व.८ ।

कृष्णभूषणम् । क्ली । मरिचे । वै.निघ. ।

कृष्णभेदा (दी) । स्त्री । कटुकायाम् । रा. नि.व.६ ।

कृष्णमणिः । पुं । राजावर्त्तमणौ । वै.निघ. ।

कृष्णमत्स्यः । पुं । कण्टकयुक्तमत्स्यभेदे । सु.सू.४६अ. ।

कृष्णमदनः । पुं । कृष्णवर्णमदनवृक्षे । काल मयना गाछ । गुणाः—"कृष्णः श्वेतस्तु मदनः शीतलो मधुरः स्मृतः । कटुस्तिक्तश्च तुवरः वान्तिकृत् कफनाशनः । पक्वामाशयशुद्धेश्च कारकः पित्तनाशकः ॥" वै.निघ. । [निघ- ।

कृष्णमधुरज्वरः । पुं । मधुरज्वरभेदे । वै.

कृष्णमल्लिका (ल्ली) । स्त्री । कृष्णार्ज्जकवृक्षे । कृष्णपत्र क्षुद्र तुलसी । रा.नि.व.१० । See पर्ण्णास. । पर्णासि । काल बाबूई । भा.पू.१भ. । See बर्बरी । वनबर्ब्बर्य्याम् । काल तुलसी । वै.निघ. । [माछि । वै.निघ. ।

कृष्णमक्षिका । स्त्री । मक्षिकाविशेषे । काल

कृष्णमालुकः । पुं । कृष्णार्ज्जके । कृष्णपत्र क्षुद्र तुलसी । रा.नि.व.१० ।

कृष्णमाषः । पुं । कृष्णकलाये । कालकलाय । गुणाः—"कृष्णमाषो बलकरो रुच्यो दोषत्रयापहः ।" वै.निघ. । [नि.व.१८ ।

कृष्णमुखः । पुं । वानरे । मुखपोड़ा । रा.

कृष्णमुखा । स्त्री । कृष्णशारिवायां । वै.निघ. ।

कृष्णमुखी । स्त्री । अलगर्दजलौकायाम् । सु.सू.१३अ. ।

कृष्णमुद्गः । पुं । (Phaseolus max.) स्वनामख्यातशिम्बीधान्ये, मुद्गविशेषे । वसन्तज काल मुग । मं करियामुंग । कं करियहेसरु । गुणाः—त्रिदोषघ्नः मधुरः वातघ्नः लघुः दीपनः पथ्यः बलवीर्य्याङ्गपुष्टिदश्च । रा.नि.व.१६ ।

कृष्णमुष्कः । पुं । कृष्णघण्टापाटलिकायाम् । काल घण्टापारुल । गुणाः—"कटुश्चाम्लो रुचित्वपाचकः स्मृतः । यकृद्गुल्मोदरहरो गुणाश्चान्ये च श्वेतवत् ॥" वै.निघ. । [विशेषे । रा.नि.व.१२ ।

कृष्णमूला (ली) । स्त्री । कृष्णमूलशारिवा-

कृष्णमूषिकः । पुं । मूषिकभेदे । "कृष्णेनास्रक् छर्द्दयति दुर्द्दिनेषु विशेषतः । शिरीषफलकुष्ठन्तु पिबेत्किंशुकभस्मना ॥" सु.कल्प.६अ. ।

कृष्णमृगः । पुं । कृष्णहरिणे । कालसार हरिण । वै.निघ. ।

कृष्णमृत् (त्तिका) (त्स्ना) । स्त्री । कृष्णवर्णसुरभिमृत्तिकायाम् । सुगन्ध काल माटी । हिं करियामाटी । मं कालीमाती । गुणाः—"कृष्णमृत्स्ना रक्तदोषप्रदरक्षतदाहहा । मूत्रकृच्छ्रग्रन्थिपित्तं नाशयेदिति कीर्त्तितम् ॥" वै.निघ. । "कृष्णमृत्क्षतदाहासृग्प्रदरश्लेष्मपित्तनुत् ।" रा.नि.व.२ । च.चि.१अ. । वा.चि.९अ. । कृष्णभूमौ । वै.निघ. ।

कृष्णमृत्तिकः । पुं । कृष्णभूमौ । हे.च. ।

कृष्णमेहः । पुं । तन्नामकप्रमेहरोगे । "कालमेही मसीनिभम् ।" भा. । मा.नि. ।

कृष्णरङ्गम् । क्ली । शीसधातौ । वै.निघ. ।

कृष्णरम्भा । स्त्री । रम्भाविशेषे । काल कला । वै.निघ. ।

कृष्णरसः । पुं । पारदस्य कृष्णीकरणे । तत्प्रकरणं—"लौहपात्रेऽथवा ताम्रे पलैकं शुद्धगन्धकं । मृद्वग्निना द्रुते तस्मिन् शुद्धसूतं पलत्रयं । क्षिप्त्वा च चालयेत्किञ्चिल्लौहदर्व्व्या पुनः पुनः । गोमये कदलीपत्रं तस्योपरि च ढालयेत् । इत्येवङ्गन्धबद्धन्तु सर्व्वरोगेषु योजयेत् ॥" अचि. । [ना गाछ ।

कृष्णराजः । पुं । कृष्णशिग्रुवृक्षे । काल सज-

कृष्णराजिका । स्त्री । कृष्णसर्षपे । काल सरिषा । वै.निघ. । [व.३ ।

कृष्णरुहा । स्त्री । जतुकालतायाम् । रा.नि.

कृष्णलः (कः) । पुं । रक्तिकायाम् । रति । घुंघुंटी, चिरमटी इति च पाश्चात्ये । गुञ्जायाम् । कूँच । कृष्णगुञ्जायाम् । वै.निघ. ।

कृष्णलवणम् । क्ली । Muriate of soda with a proportion of sulphur and iron. काचलवणे । सौवर्चललवणे । सचल लवण । रा.नि.व.६ ।

कृष्णला । स्त्री । श्वेतगुञ्जालतायां । भा.पू.१भ. । गुञ्जालतायाम् । रा.नि.व.३ । भुजाढ़क्यां । ঢোঁঢোর কলায় । प.मु. । कृष्णगुञ्जायां । वै.निघ. ।

कृष्णलो(लौ)हम् । क्ली । काललौहे । रा.नि.व.१३ । तीक्ष्णलौहे । सु.सू.२८अ. ।

कृष्णवक्त्रः । पुं । श्याममुखे वानरे । हला ।

कृष्णवनालुकम् । क्ली । वनजकृष्णालुकविशेषे । बुनो काल आलू । गुणाः —"कृष्णं वनालुकं हृद्यं महासिद्धिकरं परं। सुखजाड्यहरम्प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः ॥" वै.निघ. ।

कृष्णवर्णः । पुं । वाराहमदनवृक्षे । काल मयना गाछ । रा.नि.व.८ । कस्तूरिकायां । मुस्तायाम् । रीठाकरञ्जे । कालशाके । मत्स्यभेदे । क्ली । जले । लवङ्गे । कृष्णागुरुणि । वै.निघ.। स्त्री(र्णा)। असाध्यसविषलूताविशेषे । सु.कल्प.८अ. ।

कृष्णवर्त्मा । पुं । अग्नौ । चित्रकवृक्षे । चिते गाछ । अम. । भल्लातकवृक्षे । वै.निघ. ।

कृष्णवल्मीकः । पुं, क्ली । कृष्णवर्णवल्मीके । सु.कल्प.८अ. । [नि.व.३ ।

कृष्णवल्लिका । स्त्री । जतुकालतायाम् । रा.

कृष्णवल्ली । स्त्री । (Ocymum pilosum.) कृष्णतुलस्याम् । काल बाबुई । प.मु. । कृष्णसारिवायाम् । रा.नि.व.१२ ।

कृष्णवानरः । पुं । नीलाङ्गूले वानरे । मुखपोड़ा वानर । रा.नि.व.१९ ।

कृष्णवार्त्ताकुः । पुं । कृष्णवर्णवार्त्ताकौ । काल बेगुन । रस.र.ज्वराति.ग्रह.कवाटरसे ।

कृष्णवीजः । पुं । रक्तशिग्रौ । लाल सजना गाछ । जटा. । क्ली । कालिङ्गे । तरमुज । रा.नि.व.७ ।

कृष्णवृन्ता (न्तिका) । स्त्री । पाटलावृक्षे । गाम्भारीवृक्षे । रा.नि.व.२३ । माषपर्णीलतायाम् । प.मु. । कुबेराक्षीक्षुपे । पेटारि गाछ । र.मा. ।

कृष्णवेत्रः । पुं । केलिलता इति प्रसिद्धलतायां । भैष.महाभल्लातकगुड़े । "कृष्णवेत्रोवटाफलम् ।" रस.र.वज्रकघृते ।

कृष्णवोलः । पुं। कृष्णवर्णवोलभेदे। मुशब्बर, काल गन्धबोल । गुणाः—"कृष्णवोलः कटुः शीतः भेदकी रसशोधनः । शूलाध्मानकफाज्वातक्रमिगुल्मौ च नाशयेत् ॥" वै.निघ. ।

कृष्णव्रीहिः । पुं । कृष्णवर्णतुषतण्डुले व्रीहिधान्यविशेषे । काल धान, आउशकेले । स च सर्व्वव्रीहिश्रेष्ठ इति । सु.। "कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः" इति । भा.पू.१भ. ।

कृष्णशठः । पुं । दुर्लभशाके । ज.द. ।

कृष्णशणः । पुं । कृष्णपुष्पशणवृक्षे । काल शण। भैष.क्षुद्र.रो.चि.महानीलतैले । च.चि.२७अ.।

कृष्णसारः । पुं । Black antilope. स्वनामप्रसिद्धे मृगे । कालसार हरिण । अ.टी.र. ।

कृष्णसारिवा । स्त्री । कृष्णसारिवायाम् । श्यामा लता । See कृष्णसारिवा ।

कृष्णशालिः । पुं । स्वनामख्यातशालिधान्ये, कृष्णधान्ये । काल हेमन्त धान । गुणाः—मधुरः बलकृत् पुष्टिवीर्य्यवर्द्धनः वर्णदः कान्तिदः त्रिदोषघ्नश्च । रा.नि.व.१६ ।

कृष्णशिंशपा । स्त्री । कालागुर्व्वपरनामशिंशपावृक्षे । काल शिशु गाछ । मं कालासिंसपा । कं करियद्दवीडु । गुणाः—तिक्ता कटुरुष्णा कफवातघ्नी दीपनी शोथातिसारघ्नी च । रा.नि.व.९। "तिक्ता कट्वी चोष्णाग्निदीपनी । तुवरा कफवातघ्नी शोफातीसारकुष्ठहा । श्वित्रं मेदश्छर्दिं वस्तिरोगम्प्रमेहकं । रक्तदोषं त्रिदोषञ्च व्रणपीनसगर्भनुत् । अजीर्णनाशिनी प्रोक्ता"... ॥ वै.निघ. । "शिंशपा कृष्णसारा ।" सु.सू.३८अ. ।

कृष्णशिखिकम् । क्ली। अगुरुकाष्ठे । वै.निघ.।

कृष्णशिग्रुः । पुं । शोभाञ्जनवृक्षे । काल सजिना गाछ । रा.नि.व.७ । [थ । वै.निघ. ।

कृष्णशिम्बा । स्त्री । कुलत्थभेदे । काल कुल-

कृष्णशिम्बिका (म्बी) । स्त्री। (Dolichos virosus.) कृष्णवर्णायां शिम्बिकायाम् । काल शीम । र.मा. ।

कृष्णशृङ्गः । पुं । महिषे । हे.च. ।

कृष्णशैरीयकः । पुं । कृष्णपुष्पझिण्टीक्षुपे । काल झाँटी । भैष.क्षुद्ररोगचि.महानीलतैले ।

कृष्णश्वेता । स्त्री। पाटलवृक्षे । गाम्भारीवृक्षे । वै.निघ. ।

कृष्णसंज्ञकम् । क्ली। सौवर्च्चललवणे । वै.निघ.।

कृष्णसखः । पुं । अर्ज्जुनवृक्षे ।

कृष्णसखी । स्त्री । जीरके । श.च. । [निघ. ।

कृष्णसर्ज्जनः । पुं । अश्वकर्णशालवृक्षे । वै.

कृष्णसर्पः । पुं । दर्व्वीकरसर्पविशेषे । কেউটে সাপ । सु.कल्प.४अ. । See सर्पः ।

कृष्णसर्पा । स्त्री । कृष्णकापोतिकायाम् ।

कृष्णसर्षपः (पा) । पुं, स्त्री । राजसर्षपे, राजिकायाम् । কাল সরিষা । गुणाः—"कृष्णा तु राजिका चातितीक्ष्णा ज्ञेया बुधैः सदा । गुणास्तस्ये राजिकावत् ।" वै.निघ. । रा.नि.व.१६ । See राजिका ।

कृष्णसारः । पुं । हरिणविशेषे । কালসার হরিণ । रत्ना. । स्नुहीवृक्षे । शिंशपावृक्षे । मे. । खदिरवृक्षे । श.र. । वृक्षविशेषे । আবলুষ । वै.निघ. ।

कृष्णसारका । स्त्री । कृष्णशिंशपावृक्षे । हारा. ।

कृष्णसारथिः । पुं । अर्ज्जुनवृक्षे । रा.नि.व.९ ।

कृष्णसारमांसम् । क्ली । स्वनामख्यातमृगमांसे । কালসার হরিণের মাংস । सि.यो.रक्तपि.चि.खण्डकाद्ये । गुणाः—रक्तपित्ते हितम् । संग्राहि रुचिकरं बलकरं ज्वरघ्नञ्च । राज. ।

कृष्णसारा । स्त्री । कृष्णशिंशपावृक्षे । কাল শিশু গাছ । हिं सीसव । र.मा. ।

कृष्णसारिवा । स्त्री । श्यामालतायां । শ্যামালতা । हिं कारिश्रासांवा । मं कालीउपलसरी । उत्. शीबाल । कलड़ैएटापचसदृशच्छदा चन्दनगन्धा कालवेखि इति लोके । सु.चि.८अ. । ड. । इन्द्रजम्बूवल्याः कृष्णसारिवेति । भा.पू.१भ. । गुणाः—"कृष्णा तु सारिवा शीता वृष्या तु मधुरा तथा । कफघ्नी चैव सम्प्रोक्ता गुणाश्चान्ये तु पूर्व्ववत् ॥" वै.निघ. । See अनन्ता ।

कृष्णसूक्ष्मफला । स्त्री । शारिवाभेदे । गुणाः—स्वादुः स्निग्धा गुरुः शुक्रजननी अग्निमान्द्यारुचिश्वासकासामविषनाशिनी दोषत्रयघ्नी रक्तदोषप्रदरज्वरातीसारघ्नी च । वै.निघ. । [अ.टी.भ. ।

कृष्णस्कन्धः । पुं । तमालवृक्षे । তমাল গাছ ।

कृष्णस्रोतः । क्ली । रसाञ्जने । रत्ना. ।

कृष्णा । स्त्री । कृष्णवेणी कृष्णगङ्गेति स्वनामप्रसिद्धायां भारतवर्षीयनद्यां । तज्जलगुणाः— आश्याकरं स्वादु पवित्रं पित्तासकोपनञ्च । रा.नि.व.१४ । सविषजलौकाभेदे । सु.सू.१३अ. । See जलायुका । कृष्णशतपादीभेदे । सु.कल्प.८अ. । सू.१३अ. । See शतपदी । मरिचे । च.द.वातरक्त.चि. । "पिबेत्कृष्णां कफाधिके ।" पिप्पल्याम् । प.मु. । "कृष्णा च मधुना सह ।" "आमलक्यभया कृष्णा ।" च.द.कफज्व.चि.आमलक्यादिः । इक्षुके । नीलीवृक्षे । रा.नि.व.४ । द्राक्षालतायाम् । रा.नि.व.११ । नीलपुनर्नवायाम् । रा.नि.व.५ । गाम्भारीवृक्षे । रा.नि.व.९ । कृष्णजीरके । कटुकायाम् । इन्द्रयवे । रा.नि.व.६ । राजसर्षपे । रा.नि.व.१६ । सोमराज्याम् । रा.नि.व.२३ । कृष्णशारिवाविशेषे । रा.नि.व.१२ । च.द.यक्ष्मा.चि. । कृष्णतुलसीवृक्षे । रा.नि.व.१० । शिरीषवृक्षे । पटोले । पर्प्पट्याम् । भा. । शतपत्र्यां । সেউতী । भा.पू.१भ. । जटामांस्यां । वै.निघ.अर्शः चि.कृष्णाशिरीषलेपे । कुटजवृक्षे । दूर्व्वायाम् । कृष्णनिर्गुण्ड्याम् । वनकुलत्थे । कस्तूर्य्याम् । कृष्णचटकायां । वै.निघ. । काकोल्याम् । जटा. । [व.५ ।

कृष्णाख्या । स्त्री । नीलपुनर्नवाक्षुपे । रा.नि.

कृष्णागुरु । क्ली । स्वनामख्यातकृष्णवर्णसुगन्धिकाष्ठे । কৃষ্ণাগুরু । हिं कालागर । प.मु. । गुणाः—कटूष्णं तिक्तं कषायं लेपे शीतलं पाने पित्तहरं त्रिदोषघ्नं मुखरोगवान्तिवातहरञ्च । रा.नि.व.१२ । [वै.निघ. ।

कृष्णाङ्गम् । क्ली । जीरकभेदे । हिं कलौञ्जी ।

कृष्णाजटा । स्त्री । पिप्पलीमूले । वै.निघ. २भ.वा.व्या.पक्षवध.चि. । [यो.चि. ।

कृष्णाजाजी । स्त्री । कृष्णजीरके । च.द.संग्र

कृष्णाजिनम् । क्ली । कृष्णसारचर्म्मणि ।

कृष्णाञ्जनी । स्त्री । कालाञ्जनीक्षुपे, कृष्णकार्पासे । रा.नि.व.४ । वै.निघ. ।

कृष्णाढ़की । स्त्री । कृष्णपुष्पाढ़क्याम् । কাল অড়হর । गुणाः—"कृष्णा तु तुवरी बल्या चाग्निदीप्तिकरी मता । पित्तदाहप्रशमनी ऋषिभिः परिकीर्त्तिता ॥" वै.निघ. ।

कृष्णातण्डुलम् । क्ली । पिप्पलीवीजे । सि.

थी.छर्द्दि.चि. । "सकृष्णातण्डुली लेहः ।" [र्षौ ।

कृष्णात्रेयः । पुं । वैद्यकसंहिताप्रणेतरि मह-

कृष्णादिगणः । पुं । पिप्पल्यादिद्रव्यवर्गे । यथा—"कृष्णा चित्रकषड्ग्रन्था वासकं विकसा घनं । ग्रन्थिकैले चातिविषा रेणुकञ्च कटुत्रिकम् । यमानी गोस्तनी ब्राह्मी भूनिम्बं बिल्वचन्दनं । भार्गी श्यामा शिवा धात्री स्थिरा मूर्व्वा सजीरका ॥" वा.।

कृष्णाद्यतैलम् । क्ली । नेत्ररोगे हितम् । "कृष्णाविड़ङ्गमधुयष्टिकसिन्धुजन्मविश्वौषधैः पयसि सिद्धमिदं छगल्याः । तैलं नृणां तिमिरशुक्रशिरोऽक्षिशूलपाकात्ययान् जयति नस्यविधौ प्रयुक्तम् ।" तिलतैलं १ श. पिप्पल्यादिकल्क ।० पी. वारि ४ श. छागदुग्धं १ श. । च.द. ।

कृष्णाद्यमोदकः । पुं । श्लीपदाधिकारे । अत्र पिप्पलीमूलचूर्णं २ तो. चित्रकमूलचूर्णं ४ तो. दन्तीमूलचूर्णं ८ तो. हरीतकीचूर्णं २० तो. तच्चूर्णमेकत्र पलद्वयगुड़ेन मोदकः कार्य्यः । मोदको मधुना लेह्यः । पाठः—"कृष्णाचित्रकदन्तीनां कर्षमर्द्धपलम्पलम् । विंशतिश्च हरीतक्याः गुड़स्य च पलद्वयम् ॥" रस.र. । सा.कौ. ।

कृष्णाद्यलौहम् । क्ली । शूले लौहम् । पाठः —"कृष्णाभयालौहचूर्णं लेहयेन्मधुसर्पिषा । परिणामद्रवं शूलं सर्व्वं हन्ति त्रिदोषजम् ॥" र.चि. ६अ. । रस.र. । रा.नि.व.४ ।

कृष्णाभा । स्त्री । कालाञ्जन्यां, कृष्णकार्पासे ।

कृष्णाभ्रम् । क्ली । नीलाभ्रे । काल अभ्र । See अभ्रकम् ।

कृष्णामिषम् । क्ली । लौहे । हे.च. ।

कृष्णामूलम् । क्ली । पिप्पलीमूले । वै.निघ. ।

कृष्णायः । पुं । कान्तलौहे । रा.नि.व.१३ ।

कृष्णायसम् । कृष्णवर्णलौहे, पिण्डीवज्रादिव्यतिरिक्तलौहे । कान्तलोह, इस्पात । रत्ना. । तीक्ष्णलौहे । तीथा लोह । र.मा. । मुण्डलौहे । रा.नि.व.१३ ।

कृष्णार्च्चिः । अग्नौ । चित्रकवृक्षे । वै.निघ. ।

कृष्णार्ज्जकः । पुं । कृष्णपत्रक्षुद्रतुलस्यां । कालो तुलसी । मं कालाम्राजवला । रा.नि.व.१० ।

कृष्णालुः । पुं । केन्दुवृक्षे । कृष्णवर्णालुके । वै.निघ. ।

कृष्णालुकः । पुं, क्ली । नीलालौ । गुणाः— "कृष्णालुकन्तु मधुरं शीतवीर्य्यं श्रमापहं । पित्तदाहहरञ्चैव ऋषिभिः परिकीर्त्तितम् ॥ एतदेव बल्यं रुचिकरं मुखजाड्यहरञ्च ।" वै.निघ. । मधुरः शीतः पित्तदाहश्रमापहश्च । रा.नि.व ७ ।

कृष्णावासः । पुं । अश्वत्थवृक्षे । हे.च. । [अम. ।

कृष्णिका । स्त्री । राजिकायां । राईसरिषा ।

कृष्णी । स्त्री । रात्रौ । [दने । सु.चि.१अ. ।

कृष्णीकरणम् । क्ली । श्वेतादेः कृष्णतासम्पा-

कृष्णेन्द्रियम् । क्ली । कदम्बे । वै.निघ. ।

कृष्णेक्षुः । पुं । श्यामेक्षौ । काजलि आख् । मं कालाउंस । कं करियकबु । गुणाः—पाके मधुरः स्वादुः रसबहुलः कटुकः त्रिदोषघ्नः बलकरः वीर्य्यप्रदश्च । रा.नि.व.१४। "तद्वत्सुकृष्णो भवते गुणानां वृष्यो भवेत्तर्पणदाहहन्ता, चारः स किञ्चिन्मधुरो रसेन शोषापहर्त्ता व्रणशोफकारी ।" अत्रि.१०अ. । तच्छर्करागुणाः—वृष्या तृप्तिजननी बलदा श्रमहरा जीवनी च । च.द.प्रमेहचि. ।

कृष्णोदरः । पुं । दर्व्वीकरसर्पे । फणायुक्त सर्प । सु.कल्प.८अ. । See सर्पः ।

कृष्णोदुम्बरः (रिका) । पुं, स्त्री । काकोदुम्बरिकायाम् । काकडुमुर । रा.नि.व.११ ।

कृसरः । पुं । तुल्यतिलान्ने । "तिलतण्डुलसम्पकः कृसरः सोऽभिधीयते ।" हे.च. ।

कृसरा (यवागूः) । स्त्री । यवागूभेदे । याउविशेष । लक्षणगुणाः—"तिलतण्डुलमाषाणामथवा तिलतण्डुलात् । षड्गुणञ्च जलं दत्त्वा साधनीया यवागुका ॥ सा जरा दुर्जरा बल्या मदपुष्टिप्रदा मता । कफपित्तमलस्तम्भशुक्रक्षतनाशिनी ॥" वै.निघ. ।

कृमधूपः । पुं । सिह्लके । शिलारस । जटा. ।

केकरः । पुं । निम्नोन्नताक्षिपुरुषे । टेरा, गजाहिं ऐञ्चाताना । अम. ।

केका । स्त्री । मयूरवाण्याम् । अम. । [अश्वः ।

केका(क,का)णः । पुं । तद्देशजाताश्वे । See

केकावलः । पुं । मयूरे । श.च. ।

केकिकः (की) । पुं, स्त्री । मयूरे । रत्ना. ।

केकिशिखा । स्त्री । मयूरशिखायाम् । रा.नि. व.५ । भैष.बाल.चि. ।

केचुकः । पुं,क्ली । (Colocasia Antiquorum.) तन्नामकवृक्षे । कचु गाछ । शाकविशेषे । कचुर शाक । चिका. । केमुके । केँउ ।

केचुकाकन्दः । पुं । केचुके । कचु । सु.चि.८ श्र. । "केचुकाकन्दनिर्यासं ।"

केतकः (की) । पुं, स्त्री । (Pandanus odoratissimus.) स्वनामख्यातसुगन्धपुष्पवृक्षे । केया गाछ । हिं केवड़ा । मं केतकी । तें मोगलिचेट्टु । कं केदगे । केतकी द्विधा श्वेतस्वर्णभेदेन । गुणाः—मधुरत्वं तिक्तत्वं कफघ्नत्वं कटुत्वं लघुत्वञ्च । तत्पुष्पं वर्ण्यं केशदौर्गन्ध्यघ्नं । सुवर्णा—तिक्तोष्णा लघुः नेत्रहिता कटुः मधुरा विषरोगकफघ्नी च । तत्पुष्पं सुखकरं कामोद्दीपकं बृंहणं किञ्चिदुष्णं कटुतिक्तं सुगन्धं नेत्रहितञ्च । स्तनः—अतिशीतलः देहदार्ढ्यकरः कटुः रसायनो वर्ण्यः पित्तकफघ्नश्च । रा.नि.व.१० । फलं केशरञ्च पूर्व्वोक्तगुणम् । "श्वेतश्च कटुकः स्वादुः लघुः तिक्तः कफापहः । उष्णा तिक्तरसा ज्ञेया चक्षुष्या हेमकेतकी ॥" भा.पू.१भ. । श्वेतकेतकीफलं किञ्चिदुष्णं स्वादु मेहवातकफघ्नञ्च । वै.नि.घ. । "केतकी वातला वृष्या तन्द्रा निद्राकरी मता ।" अत्रि.१६अ. । जातीपुष्पवृक्षे । चामिलीपुष्प वृक्ष । रा.नि.व.१० ।

केतकफलम् । क्ली । कुचेलके । कुँचिला । च. द.अग्नरीचि.कषा.घृते । केतकीफले । तच्च त्रिदोषविषघ्नम् । च.सू.२७अ. ।

केतकाद्यतैलम् । क्ली । वातव्याध्यधिकारे । तैलं ४ श. क्वाथार्थं—केतकीमूलं वाट्यालकातिबलानां प्र. ४२ प. २ कर्ष १० मा. पाकार्थं जलं १२८ श. शी. १६ श. काञ्जिकं १६ श. यथाविधि तैलं पचेत् । तैलमिदमकल्कत्वात् तुल्येन क्वाथेन तुषोदके साध्यं भवति । च.द.वा.व्या.चि. ।

केतनम् । क्ली । चिह्ने । स्थाने । हे.च. ।

केतुः । पुं । अग्निमन्थे । र.मा. । रोगे । पीड़ायाम् । उत्पाते । चिह्ने । मे. ।

केतुग्रहवल्लभम् । क्ली । वैदूर्य्यरत्ने । भा.पू.१भ. ।

केतुरत्नम् । क्ली । वैदूर्य्यमणौ । प.मु. ।

केदरः त्रि । काणे । टेरके । श.र. । पुं । वनस्पतिविशेषे । अम. ।

केदारः । पुं । षट्टौ । कृष्टक्षेत्रे । চষা ক্ষেত । मालभूमिविशेषे । आलवाले । मे. । केदारशालौ । আমন । वै.निघ. ।

केदारकः । पुं । केदारजातषष्टिकधान्यजातिभेदे । सु.सू.४६अ. । गुणाः—कङ्कुकवत् । See केदारशालिः ।

केदारकटुका । स्त्री । कटुकायां । रा.नि.व.६ ।

केदारजम् । क्ली । पद्मकाष्ठे । रा.नि.व.१२ ।

केदारजलम् । क्ली । तद्देशस्थजले । गुणाः—विपाके स्वादु गुरु दोषदञ्च । तदेव बहुमुक्तं विशेषेण दोषदं भवेत् । रा.नि.व.१४ ।

केदारभूमिः । स्त्री । मालक्षेत्रे ।

केदारशालिः । पुं । केदारक्षेत्रजशालिधान्ये । উন্নতভূমিজ শালি ধান্য, আমন ধান, ষেটে ধান । गुणाः—मधुरा वृष्या बल्याः पित्तवर्द्धनाः ईषत्कषाया अल्पमला गुरवः कफघ्नाश्च । रा.नि. व.१६ । धान्यं—मधुरं शीतलं रुचिकरं स्तन्यवर्द्धनम् । वै.निघ. । "केदारप्रभवा रूक्षा वातपित्तविनाशिनः । रक्तपित्तविकारघ्नाः वातलाः कफकारकाः ॥" अत्रि.१५अ. ।

केना (नी) । स्त्री । पत्रशाकविशेषे । गुणाः—मधुरा शीता रूक्षा स्तन्यवर्द्धनी च । वै.निघ. ।

केनारः । पुं । शिरःकपोलसन्धिषु । मे. ।

केन्दुः (कः) (रः) । पुं । (Diospyros Glutinosa.) तिन्दुके । গেঁদ, গাব । श.र. । श.च. ।

केमुकः (का) । त्रि । केचुककन्दे उत्तरदेशख्याते । কেঁউ গাছ । हिं कीवी, केमुआ । प्र. त्रिकट्वाद्यमोदके । गुणाः—मधुरा वृष्या कटुपाका तिक्ता शीता लघुः पाचिका दीपनी ग्राहिणी हृद्या वातला कफपित्तज्वरघ्नी प्रमेहकुष्ठकासघ्नी रक्तरोगघ्नी पित्तभमं पिपासाञ्च नाशयेत् । वै.निघ. । मूलं—"केमुककटुकं पाके तिक्तं ग्राहि हिमं ल-

षु। दीपनं पाचनं हृद्यं कफपित्तज्वरापहं। कुष्ठकासप्रमेहास्रनाशनं वातखङ्गदु॥'' भा.पू.१भ.। कफपित्तघ्नं रोचनं अग्निदीपनञ्च। राज.। मधुरं रुचमच्छं शीतलं मेदकं ग्राहकं रुच्यं गुरुपित्तकफघ्नं वातघ्नञ्च। वै.निघ.।

केम्बुकम् । क्ली। पूगे। भा.म.३भ.मू.क्व.चि.।

केलटम् । क्ली। कुसुम्भवीजे। वै.निघ.।

केलटकः । पुं। केमुककन्दे। वै.निघ.।

केलासः । पुं। स्फटिकमणौ वै.निघ.। [घ.।

केलिकः (किलः) । पुं। अशोकवृक्षे। वै.निघ.।

केलिकिणः (कीर्णः) । पुं। उष्ट्रे। वै.निघ.। हे.च.।

केलिपिकः । पुं। कोकिले। [श.र.।

केलिवृक्षः । पुं। केलिकदम्बे। কেলিকদম্।

केलूट(क)म् । क्ली, पुं। कन्दशाकविशेषे। কেমুককন্দ। जलोदुम्बरे। वै.निघ.।

केवलद्रव्यम् । क्ली। मरिचे। श.र.।

केवा (विका) । स्त्री। केवार् इति कोङ्कणदेशे ख्याते पुष्पवृक्षविशेषे। गुणाः—मधुरा शीतला दाहपित्तश्रमघ्नी वातश्लेष्मघ्नी छर्दिघ्नी च। रा नि. व.१०।

केवु(वू)कः (का) । पुं,स्त्री। पत्तूरे। शालिञ्चे। सि.यो.कृमि.चि.। केमुके। কাঁউ, কেউতারা। च.सू.४अ.कृमिघ्नगणे।

केशः । पुं। ह्रीवेरे। বালা। प.मु.। कुन्तले। मे.। बाले। চুল। रा.नि.व.१८। स तु गर्भस्य शिरोरष्टाभिर्मासैः जायते। सुखबोधः।

केशकारः । पुं। इक्षुविशेषे। हिं कुशियार। गुणाः—गुरुः शीतः रक्तपित्तक्षयघ्नश्च। भा.।

केशकारी । स्त्री। रोहिण्याम्। वै.निघ.।

केशकीटः । पुं। Louse. उकुणे।

केशगर्भकः । पुं। कवर्य्याम्। त्रिका.।

केशघ्नम् । क्ली। इन्द्रलुप्तरोगे। টাক পোকা। रा.नि.व.२०।

केशच्छित् । पुं। नापिते। श.मा.।

केशटः । पुं। उकुणे। छागे। मे.। शोणाकवृक्षे। त्रिका.।

केशधृत् । पुं। मस्तके। भूतकेशे। श.च.।

केशनाम । क्ली। ह्रीवेरे। বালা। अम.।

केशपक्षः । पुं। केशसमूहे। अम.।

केशपर्णी । स्त्री। अपामार्गवृक्षे, रक्तापामार्गे। भा.पू.१भ.।

केशपाशः । पुं। केशभारे। अम.। [अम.।

केशपाशी । स्त्री। शिरोमध्यस्थशिखायां। চূড়া।

केशभूः (भृत्) स्त्री, पुं। मस्तके। रा.नि. व.१८। [रा.नि.व.८।

केशमथनी । स्त्री। शमीवृक्षे। শাঁই গাছ।

केशमार्ज्जक(न)म् । क्ली। कङ्कतिकायाम्। কাঁকুই, চিরুণী। हला.।

केशमुष्टिः (कः) । पुं। विषमुष्टिनामपत्रशाकक्षुपे, महानिम्बे। ঘোড়ানিম্। मं बकानीनिंब। रा.नि.व.४।९।

केशयन्त्रम् । क्ली। उपविषादिशोधनार्थे यन्त्रविशेषे। लक्षणं यथा—"धान्यपूरितसुस्थाल्यां सुसुधायां मुखोपरि। मुदुग्धैर्नारिकेलस्य खर्परे विसमर्दयेत्। केशो दुग्धे मुतो यस्मात्केशयन्त्रं तथा स्मृतम्॥'' वै.चन्द्रिका।

केशरः । पुं, क्ली। नागकेशरवृक्षे। मे.। च.सू. ५अ.। वकुलवृक्षे। सु.सू.३८अ.एलादि.। पुन्नागवृक्षे। हारा.। किञ्जल्के। भा.पू.१भ। सिंहकेशे। मे.। हिङ्गुवृक्षे। अ.टी.भ.।

केशरङ्गिनी । स्त्री। सहदेवीलतायाम्।

केशरञ्जनः । पुं। भृङ्गराजे। ভীমরাজ। रा. नि.व.४। नीलझिण्ट्याम्। वै.निघ.।

केशरपाकः । पुं। वाजीकरणपाकविशेषे।

केशरा । स्त्री। नागरमुस्तायाम्। रा.नि.व.६।

केशरागः । पुं। भृङ्गराजवृक्षे। भा.गण्डमा.चि.।

केशराजः । पुं। स्वनामख्याते शाकविशेषे। কেশুত্তে। हिं भेंगरिया। उत्. कलाकेशदुरा। सा.कौ.। गुणाः—तिक्तोष्णः चक्षुष्यः केशरञ्जनः कफामशोथश्वित्रघ्नः, तत्र नीलो रसायनः। रा.नि.

व.४। आग्नेयः केशः चक्षुर्हितः पाण्डुकफघ्नः रसायनश्च। राज.। भृङ्गराजे। भीमराज। र.मा.।

केश(स)राम्लः । पुं। मातुलुङ्गवृक्षे। जटा.।

केशराह्वयम् । क्ली। बालके। वाला। सु.चि.२ष.।

केश(स)री (इन्) । पुं। पुन्नागवृक्षे। नागकेशरे। घोटके। मे.। जलचरपक्षिविशेषे। च.सू.२७अ.। रक्तशिग्रौ। रा.नि.व.७। मातुलुङ्गवृक्षे। मद.व.६। सिंहे। रत्ना.। वानरभेदे। वै.निघ.।

केशरुहा । स्त्री। भद्रदन्तीवृक्षे। बड़ दन्ती गाछ। रा.नि.व.६। महाबलायाम्। गोरक्षचाकुलिया। महानील्याम्। वै.निघ.।

केशरूढ़कः । पुं। कासमर्दवृक्षे। वै.निघ.।

केशरूपा । स्त्री। वन्दाकनामक्षुपे परगाछा। रा.नि.व.५।

केशवः । पुं। सुरपुन्नागवृक्षे। वायसे। "वायसे केशवेऽर्जुने।" मे.। नागकेसरवृक्षे। प.मु.।

केशवप्रिया । स्त्री। गोरोचनायाम्। प.मु.।

केशवर्द्धिनी । स्त्री। महाबलालतायाम्। रा.नि.व.४।

केशवायुधः । पुं। आम्रवृक्षे। श.मा.।

केशवालयः (वासः) । पुं। अश्वत्थवृक्षे। त्रिका.। जटा.।

केशशौक्लम् । क्ली। पलिते। रा.नि.व.१८।

केशसीमन्तकज्वरः । पुं। असाध्यज्वरविशेषे। यस्मिन् ज्वरे केशाः सीमन्तीकृता भवन्ति स ज्वरः। "ज्वरः चोषस्य शूनस्य गम्भीरो दैर्घरात्रिकः। असाध्यो बलवान् यश्च केशसीमन्तकज्वरः॥" मा.नि। "केशाः सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ। लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे॥" तन्त्रान्तरात्। विज.र.। [वै.निघ.।

केशहन्त्रि(हृत्)फला । स्त्री। महाशमीवृक्षे।

केशहन्त्री । स्त्री। शमीवृक्षे। रा.नि.व.८।

केशा । स्त्री। जटामांस्याम्। वै.निघ.।

केशाख्यम् । क्ली। ह्रीवेरे। वाला। रत्ना.। "भृङ्गकेशाख्यनिर्गुण्डी।" भैष.अचिन्त्यशक्तिरसे।

केशाद्‌ः । पुं। क्रमी। वै.निघ.।

केशापहा । स्त्री। शमीवृक्षे। वै.निघ.।

केशारिः । पुं। नागकेशरे। वै.निघ.।

केशारुहा । स्त्री। महाबलाक्षुपे। रा.नि.व.४।

केशार्हा । स्त्री। महानीलीक्षुपे। बड़ नील। रा.नि.व.४। [निघ.।

केशालिः । पुं। भृङ्गराजे। भीमराज। वै.

केशाह्वम् । क्ली। बालके। वाला। वै.निघ.।

केशिकः । पुं। कशेरौ। केशुर प.मु.। त्रि। प्रशस्तकेशयुक्ते। अम.।

केशिका । स्त्री। शतावर्य्याम्। रा.नि.व.४।

केशिनी । स्त्री। जटामांस्याम्। रा.नि.व.१२। वन्ध्यायाम्। वै.निघ.।

केशी । स्त्री। पर्कशिम्ब्याम्। आलाकुशी। र.मा.। जटामांस्याम्। भूकेश। रा.नि.व.१२। च.द.। सि.यो.महापैशाचघृते। वा.उ.६अ.। महाशतावर्य्याम्। आम्रातके। वै.निघ.। नीलीवृक्षे। रा.नि.व.९। चौरपुष्प्याम्। अम.।

केश्यः । पुं। मार्कवक्षुपे। भीमराज। रा.नि.व.४। असनशाले। वै.निघ.। क्ली। कृष्णागुरुणि। रा.नि.व.१२। ह्रीवेरे। वाला। रा.नि.व.१०।

केसरम् । क्ली, पुं। नागकेसरपुष्पे। रा.नि.व.६। वै.निघ.वा.व्या.षड्शीतिगुग्गुलौ। किञ्जल्के। पद्मकेसर। सि.यो.कल्याणघृते। बकुलवृक्षे। रा.नि.व.१०। कासीसे। स्वर्णे। रा.नि.व.१३। पुन्नागवृक्षे। अम.। मातुलुङ्गवृक्षे। लेबु गाछ। रा.नि.व.११। हिङ्गुनि। सिंहच्छटायाम्। मे.।

केसरवरम् । क्ली। कुङ्कुमे। रा.नि.व.१२।

केसरिका । स्त्री। महाबलाक्षुपे। रा.नि.व.४।

केसरिसुतः । पुं। हनूमति। हे.च.।

केसरोच्चटा । स्त्री। मुस्तायां। नागरमुस्तायां। वै.निघ.। [गँठा। सु.सू.३६अ.।

कैङ्कुकः । पुं। गरगस्त इति ख्याते वृक्षे। गर-

कैटजः । पुं। कुटजवृक्षे। कुड़चि गाछ। भा.पू.१भ.।

कैट(ड़)र्य्यः । पुं। स्वनामप्रसिद्धे महानिम्बवि-

श्रेषे। ফলিত মহানিম্‌বিশেষ, ঘোড়াশুণ্ঠী। मं फलितमहानिंब, गौरानिम्ब। कं कयाहेब्बिउ। वै.निघ.अपस्मा.चि.वचाद्यघृते। गुणाः—कटुतिक्तकषायः शीतलो लघुः तापघ्नः शोषकुष्ठरक्तक्रिमिभूतविषघ्नश्च। रा.नि.व.९। शीतलस्तिक्तः कटुः तुवरः लघुः दाहार्शःक्रिमिशूलघ्नः सन्तापविषघ्नश्च। श्वेतपाटलवृक्षे। वै.निघ.। कट्फलवृक्षे। रा.नि.व.९। च.सू.४अ.। भा.म.बाल चि.। मदनवृक्षे। रा.नि.व.८ महाभल्लातकगुड़े। पूतीकरञ्जे। कृष्णकटभीवृक्षे रा.नि.व.९। घृतकरञ्जे। कामुके। लघुकाश्मर्य्याम्। रा.नि.व.२३।

कैतकम्। क्ली। केतकीपुष्पे। राज.। शृगालकोल्याम्। শেয়াকুল।

कैतवम्। क्ली। कुमुदे। वैदूर्य्यमणौ। रा.नि.व.१३। राजिकायाम्। রাই। त्रिका०।

कैदारः। पुं। केदारशालिधान्ये। আমন ধান। षष्टिकधान्ये। বেটে ধান। गुणाः—कैदारा मधुरा वृष्या बल्याः पित्तनिवर्हणाः। ईषत्कषायाल्परसा गुरवः कफशुक्रलाः॥ सु.सू.४६अ.। क्ली। पद्मकाष्ठे। प.मु.।

कैपीला। स्त्री। कृष्णत्रिवृतायाम्। वै.निघ.।

कैरली। स्त्री। विड़ङ्गायाम्। रा.नि.व.६।

कैरवम्। क्ली। विड़ङ्गे। कुमुदे। হেলা ফুল, শালুক ফুল। रत्ना.। श्वेतपद्मे। हे.च.। श्वेतकुमुदे। শ্বেত শুন্দি। भा.पू.१भ.। रा.नि.व.१०।

कैरविका। स्त्री। कुमुदिन्यां। ছোট শুন্দীর ঝাড়। भा.पू.१भ.।

कैरविणी। स्त्री। उत्पलिन्याम्। শুন্দী বা কুমুদফুলের ঝাড়। रा.नि.व.१०।

कैरविणीफलम्। क्ली। कुमुदवीजे। তেলো বীচি, ভেট। हिं भेट। भा.।

कैरवी। स्त्री। मेथिकायाम्। মেতি। प.मु.। चन्द्रिकायाम्। मे.। (विन्) पुं। चन्द्रे।

कैरवीकन्दः। पुं। तैलकन्दे। रा.नि.व.७।

कैराटः (कः)। पुं। करवीरवृक्षे, स्थावरविषभेदे। हे.च.।

कैरातः (कः)। पुं। जलपक्षिविशेषे। च.सू.२७अ.। भूनिम्बे। চিরেতা। रा.नि.व.९। बलवति पुरुषे। हारा.। क्ली शवरचन्दने। रा.नि.व.१२।

कैरातचन्दनम्। क्ली, पुं। नातिपीतचन्दने कोङ्कणे ख्याते। শবরচন্দন। गुणाः—"शीतलश्च तिक्तः कान्तिकरो मतः। विचर्च्चिकाकुष्ठकण्डूकफदद्रुविषापहः। रक्तपित्तक्रिमिव्यङ्गपित्ततृट्ज्वरदाहदः॥" वै.नि.घ.। See शवरचन्दनम्।

कैरालम्। क्ली। विड़ङ्गे। वै.निघ.। [नि.व.६।

कैराली। स्त्री। भूनिम्बे। विड़ङ्गायाम्। रा.

कैवर्त्तः। पुं। महानिम्बे। वै.निघ.।

कैवर्त्तम(मु)स्त(क)म्। क्ली। कैवर्त्तिकायां, जलजमुस्ताभेदे। কেওটমুতা, কেশুরমুতা। श.र.। गुणाः—हिमं तिक्तं कषायं कटु कान्तिकरं कफघ्नं पित्तघ्नं रक्तदोषवीसर्पकुष्ठकण्डूघ्नञ्च। इदन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्तकाकृतिः। "मुस्तावत्पेलवपुटं शुक्राभं स्याद्वितुन्नकमिति।" भा.पू.१भ.।

कैवर्त्तिका (र्त्ती)। स्त्री। (Cyperus rotundus.) A kind of fragrant grass. मालवे स्वनामख्यातजलजमुस्तायां। কেওটামুতা, কেশুরমুতা। अ.टी.भ.। गुणाः—लघुः वृष्या कषाया कफघ्नी कासश्वासघ्नी मन्दाग्निहरी च। रा.नि.व.२। [कायाम्। भा.पू.१भ.।

कैवर्त्ति(र्त्ती)मुस्त(क)म्। क्ली। कैवर्त्ति-

कैवलम्। क्ली। विड़ङ्गे। र.मा.।

कैशिकी। स्त्री। व्यधनोपयोग्यस्त्रधारायाम्। सु.सू.८अ.। [वयसि। रा.नि.व.१८।

कैशोरम्। क्ली। एकादशाब्दात्पञ्चदशपर्य्यन्ते

कैशोरको (गुग्गुलुः)। पुं। वातरक्ते हितः। पोट्टलीबद्धगुग्गुलुः २ श. त्रिफला २ श. गुड़ूची ४ श. (एकत्र) वारि ९६श. अर्द्धशिष्टः क्वाथः (४८ श.) कर्त्तव्यः। क्वाथं वस्त्रपूतङ्कृत्वा तेन घृतमर्द्दितगुग्गुलुं गोलयित्वा पुनः पाकं कुर्य्यात्। घनीभूते पाके अवतार्य्य तत्र त्रिफलाचूर्णं प्र. ४ तो. त्रिकटुचूर्णं प्र. ४ तो. विड़ङ्गचूर्णं ४ तो. त्रिवृच्चूर्णं २ तो. दन्तीमूलचूर्णं २ तो. गुड़ूचीचूर्णं ८ तो. प्रक्षेपो देयः। च.द.। सा.कौ.। [केचित्। च.चि.३अ.।

कैषि(षी)का। स्त्री। आम्रातके। शरमूलमिति

कोषी । स्त्री । पाठायां । आकनादि । वै.निघ. ।

कोकः । पुं । खर्ज्जूरीवृचे । ज्येष्ठिकायां । भेके । मे. । ईहामृगे । ধেগে, ধোর । रा.नि.व.१९ । चक्रवाके । त्रिका. ।

कोकड़ः } पुं । चमरपुच्छे विलेशयमृगे । क-
कोकवाचः } इण्डार इति भाषा । तन्मांसगुणाः—श्वासानिलकासहरः पित्तदाहकरश्च । रा. नि.व.१९ ।

कोकदेवः । पुं । कपोते । रा.नि.व.१९ ।

कोकनदम् । क्ली । (Nelumbium speciosum.) रक्तपद्मे । रक्तपद्म । रत्ना. । गुणाः—कटु तिक्तं मधुरं शीतलं रक्तदोषघ्नं कफपित्तवातशमनं सन्तर्पणं वृष्यञ्च। रा.नि.व.१०। "कोकनदमुक्तं मधुरं शीतं वर्ण्यं कटुतिक्तकं । वृष्यं तृप्तेः करणं विस्फोटकरक्तदोषदाहहरं । तृट्कफपित्तविसर्पविषसन्तापवातनाशकरम् ॥" वै.निघ. ।

कोकाहः । पुं । पाण्डुवर्णघोटके । कर्कोत्यपरनामधेये शुक्लाश्वे । "श्वेतः कोकाह इत्युक्तः ।" ज. द.३अ. । "सिते तु कर्ककोकाहौ ।" हे.च. ।

कोकिलः । पुं । (Cuculus Indicus.) स्वनामख्यातपक्षिणि । কোকিল । हिं कोइला । रत्ना. । गुणाः—"कोकिलः श्लेष्मलो ज्ञेयः पित्तसंशमनो मतः ।" अत्रि.२१अ. । सविषसौम्यकीटभेदे । तद्दष्टस्य कफनिमित्तजा रोगा भवन्ति । सु.कल्प.८अ. । क्ली । बदरीफले । जटा. ।

कोकिलनयनः । पुं । कोकिलाक्षक्षुपे । कुलियाखाड़ा । अ.टी.र. । [वै.निघ. ।

कोकिला । स्त्री । काकोल्यां । कोकिलस्त्रियां ।

कोकिलानन्दः (वासः) । पुं । राजाम्रवृक्षे । रा.नि.व.११ ।

कोकिलावर्त्तिः (र्त्ती) । स्त्री । नेत्ररोगे वर्त्तिविशेषे । "व्योषायश्चूर्णसिन्धूत्थत्रिफलाञ्जनसंयुता । गुड़िका जलपिष्टेयङ्कोकिला तिमिरापहा॥" च.द. ।

कोकिलाक्षः (कः) । पुं । (Hygrophila spinosa, Syn. Ruellia longifolia.) स्वनामख्यातवृक्षे । কুলেখাড়া, কুলেকাঁটা, শৃগালদন্দন । हिं कोलिसाखिखर्, कैलया ; तद्बीजं तालमाखना । मं कोलिसा । कं कुलुगीलिके । तैं गोलिमिड़िचेट्टु, गोब्बिचेट्टु । उत्. कुइलिरखा, माखुरेण। मद.। गुणाः—आमवातरक्तघ्नः। राज.। मधुरः शीतः पित्तातिसारजित् वृष्यः कफघ्नः बल्यः रुच्यः सन्तर्पणश्च। रा.नि.व.५। शीतलः वृष्यः स्वादुस्पित्तलः तिक्तः आमवातशोथाश्मरीतृष्णावातरक्तघ्नश्च । भा.पू.१भ. । तद्बीजगुणाः—शीतलं स्वादु कषायं तिक्तं गुरु गर्भस्थापनं वृष्यञ्च । वै. निघ. ।

कोकिलाक्षी । स्त्री । कोकिलाक्षबीजे । কুলেখাড়াবীজ । हिं तालमाखना । श.र. ।

कोकिलेष्टा । स्त्री । महाजम्बूवृक्षे । বড় জাম গাছ । रा.नि व.११ ।

कोकिलेक्षुः (कः) । पुं । कृष्णेक्षौ । কাজলা ইক্ষু । कोकिलाक्षक्षुपे । रा.नि.व.१४।५ ।

कोकिलोत्सवः । पुं। आम्रवृक्षे। रा.नि.व.११।

कोकुराहः । पुं। मुखपुण्ड्रकयुक्तश्वेताश्वे । "कोकाहः पुण्ड्रकेणाश्वः कोकुराहः ।" ज.द.३अ. ।

कोङ्क(ङ्का)णः । पुं । कोङ्कणदेशजोत्तमाश्वे । ज.द.६अ. । [त्रि.पानीयवल्यां ।

कोचिला । स्त्री। कुचेलके । কুঁচ্‌লে । भैष.ज्व.

कोटः । पुं । कौठरोगे । गुवाकवृक्षे । त्रिका. ।

कोटजः । पुं । कुटजवृक्षे । কুড়চি গাছ । रा. नि.व.९। [त्र । अम. ।

कोटरः । पुं, क्ली । वृक्षगह्वरे । গাছের কোটর ।

कोट(ठ)रपुष्पी । स्त्री। वृद्धदारकलतायाम् । বীজতারক । रा.नि.व.३ । [निघ. ।

कोटरवासिनी । स्त्री । श्वेतचित्रतायां । वै.

कोट(ट्ट)वी । स्त्री । नग्नस्त्रियां । নেংটা মেয়ে । अम. । [শাক । रा.नि.व.१२ ।

कोटिः (का) । स्त्री । स्पृक्कायाम् । পিড়িং

कोटिकः । पुं । मण्डूकजातीयसविषकीटभेदे । सु.कल्प.८अ. । See मण्डूकः । इन्द्रगोपकीटे । আষাঢ়ে পোকা । जटा. ।

कोटिबालिका । स्त्री । सरटे । वै.निघ. ।

कोटिरः । पुं । नकुले । इन्द्रगोपकीटे । मे. ।

कोटि(टी)वर्षा । स्त्री । पिड़िङ्गशाके । पिड़िं शाक । श.र. ।

कोटिवृक्षकः । पुं । कुटजवृक्षे । मद.व.१ ।

कोटिशः । पुं । लोष्टभेदने । टैश । भरत. ।

कोटी । स्त्री । कुटजवृक्षे । कुड़चि गाछ । वै.निघ. । स्पृक्कायाम् । श.र. शस्त्राग्रभागे । अ.टी.।

कोटीरः । पुं । जटायाम् । त्रिका. । [चि. ।

कोटोडुम्बरः । पुं । यज्ञोदुम्बरे । भैष.स्त्रीरो.

कोट्टारः । पुं । कूपे । हारा. । पुष्करिण्याः पाटके । मे. ।

कोठः । पुं । A species of leprosy. Ringworm. क्षुद्ररोगान्तर्गतचर्म्मरोगविशेषे । तस्य लक्षणं यथा—"असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः । मण्डलानि सकण्डूनि रागवन्ति बहूनि च । उत्कोठः सानुबन्धस्तु कोठ इत्यभिधीयते ॥" मा.नि. । "वरटीदष्टकण्डूमांल्लोहितोऽस्त्रकफपित्तात्। क्षणिकोत्पादविनाशः कोठ इति विगद्यते ॥" भलुकोतन्त्रात् । [रा.नि.व.६ ।

कोठरः । पुं । अङ्कोलवृक्षे । आँकोड़ गाछ ।

कोणः । पुं । अस्त्राद्यग्रभागे । अम. ।

कोणकुणः । पुं । उत्कुणे । उकुण । हे.च. ।

कोथः । पुं । पूतीभावः । पूय । भा.म.४भ.नासारो.चि.। "विक्लिदकोथावयवापि यत्र ।" नेत्ररोगभेदे । कोठा । मे. । दुर्गन्धक्लेदे । पाके । सु.नि. ४अ. । त्रि । मथिते । शठिते । हे.च. ।

कोदकारः । पुं । अश्वाकारमृगभेदे । वै.निघ.।

कोदण्डः । पुं, क्ली । भुवि । भुरू । मे. ।

कोद्दालकः
कोद्रवः } पुं । (Paspalum scrobiculatum.) कोरदूषकापरनामधेयधान्यविशेषे । कदो धान। मं कोद्रव । कं हारक । देशविशेषे तस्य नाना भेदाः कृताः । गुणाः —वातलो ग्राही हिमः पित्तकफघ्नश्च । भा. । अतिग्राहि वातलञ्च । राज. । "कोद्रवो रूक्षो ग्राही स्यात् रक्तपित्तविशोधनः । नात्यन्तकफकृच्छीतो रुच्यः स्वादुः प्रकीर्त्तितः ॥" अत्रि. ५अ. । सन्धिबन्धशिथिलकरत्वात् विकाशी ग्राही स्पर्शशीतलो विषापहश्च । वा.धान्यव. । मधुरः तिक्तः व्रणिनां पथ्यः कफपित्तहरः रूक्षः वातलः गुरुः मोहकृच्च । रा.नि.व.१६ । "ग्लानिमूर्च्छाकरं सद्यः कौद्रवं न हितं मतम् ।" अत्रि.१२अ. ।

कोद्रवमण्डः । पुं, क्ली । कोद्रवधान्यकृतमण्डे । कदो धानेर मण्ड । गुणाः— मूर्च्छाग्लानिजननः । वै.निघ. ।

कोद्रविकम् । क्ली। सौवर्च्चललवणे । वै.निघ.।

कोद्रुभक्तः । पुं, क्ली । कोद्रवान्ने । कदोर भात । मं हरकाचाभात । गुणाः—"कोद्रुभक्तो रुचिकरो मधुरस्तु प्रमेहहा । मूत्रदोषतृषाच्छर्द्दिकफवातामदाहनुत् ॥" वै.निघ. ।

कोनफलम् । क्ली । रक्तालो । वै.निघ. ।

कोना(नी)लः । पुं। वर्त्तिकाख्ये जलपक्षिणि । वै.निघ. । [चि.१०अ. ।

कोनालिः । स्त्री । कुष्ठविहितभस्यद्रव्ये । सु.

कोपः । पुं । क्रोधे । अम. ।

कोपनः । पुं । ग्रन्थिपर्णे । गेँठेला । त्रि । क्रुद्धे । जटा. । वै.निघ. ।

कोपनकः । पुं। चोराख्यगन्धद्रव्ये । गेँठेला । हिं चोरा । रा.नि.व.१२ ।

कोपना । स्त्री । रक्तकरवीरे । वै.निघ. ।

कोपलता । स्त्री । कर्णस्फोटलतायाम् । काणछिड़े, काणफोड़ा । रा.नि.व.३ । [व.१६ ।

कोपिनः (पी) । पुं । जलकपोते । रा नि.

कोमम् । क्ली । पिपासास्थाने । अ.टी. ।

कोमलम् । क्ली । जले । मे. ।

कोमलकम् । क्ली । मृणाले । पद्मेर डाँटा । श.र. । पद्मकाष्ठे । वै.निघ. ।

कोमलकदलम् । क्ली । बालकदलफले । कचि कला । मं कोंवलीकेलें । गुणाः—शीतमधुरकषायरुच्यास्रं पित्तघ्नञ्च । वै.निघ. ।

कोमलदलम् । क्ली । पद्मे । वै.निघ. ।

कोमलनारिकेलम् । क्ली । बालनारिकेले ।

कोमलपत्रकः । पुं। शिग्रौ। सजिना गाछ। रा.नि.व.७ ।

कोमलप्रसवः । पुं। श्वेतझिण्ट्यां । वै.निघ.।

कोमलवल्कला (ली) । स्त्री । कदलीवृक्षे । লোওয়াড় । भा. ।

कोमला । स्त्री । क्षीरिकायाम् । क्षीरुई । श. च.। खीरिण्यां । खिर्नी । खर्ज्जूरिकायां । वै.निघ.।

कोमलेक्षुः । पुं । इक्षुविशेषे । कचि ইক্ষু । गुणाः —"कोमलेक्षुर्मेदकफमेहकारी च कीर्त्तितः। तरुणस्तु मधुः प्रोक्तः किञ्चित्कटुश्च वातहा । पित्तं नाशयतीत्येवं स वृष्यो वीर्य्यवर्द्धकः । रक्तपित्तहरो बल्यो क्षतनाशकरो मतः ॥" वै.निघ. ।

कोमासिका । स्त्री । जालिकायां । फलের জালি । हारा. ।

कोयष्टिः (कः) । पुं । जलकुक्कुभे । কোঁড়া পাখী। अयं प्रतुदगणः। सु.सू.४६अ.। च.सू.२७अ.।

कोरसन्धिः । पुं। गर्त्ते । गर्त्ताकारसन्धौ। "अङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोरसन्धयः।" सु. शा.५अ. ।

कोरकः । पुं, क्ली। काकोल्याम् । काँकला । कुड्मले । कुँड़ि। अम. । मृणाले । मे. । चकोरपक्षिणि । वै.निघ.। चोरनामगन्धद्रव्ये । जटा. ।

कोरकवृक्षः । पुं । इङ्गुदीवृक्षे । वै.निघ. ।

कोरङ्गी । स्त्री । सूक्ष्मैलायाम् । रा.नि.व.२३ । पिप्पल्याम् । रा.नि.व.६ । [म् । वै.निघ. ।

कोरञ्जी । स्त्री । सौराष्टिकायां । काँচড়া दा-

कोरण्टी । स्त्री । वदरीवृक्षे । मद.व.६ ।

खर्ज्जूरिका (री) । स्त्री। खर्ज्जूरवृक्षे । प मु.। খেজুর গাছ। मं सिंधी । कं इचिलु । गुणाः—अपक्वा कषाया, पक्वा शीत्या कषाया पित्तघ्नी कफकरी क्रमिजननी वृष्या वृंहणी च । रा.नि. व.११। सा मधु-भू-पिण्ड-राजखर्ज्जूरीभेदेन चतुर्धा भवति । एषां गुणाः स्वस्वपर्य्याये ज्ञेयाः । यथा—"भूमिखर्ज्जूरिका स्वाद्वी दुरारोहा मृदुच्छदा । तथा स्कन्धफला काककर्कटी स्वादुमस्तका ॥ पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् । खर्ज्जूरी गोस्तनाकारा पराद्वीपादिहागता । जायन्ते

पश्चिमे देशे सा क्षोहारेति कीर्त्त्यते ॥" भा. गुणाः —"खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः। स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ॥ तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदं। कोष्ठमारुतजिद्बल्यं वान्तिवातकफापहम्। ज्वरातिसारक्षुत्तृष्णाश्वासकासनिवारकम्। मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत्। खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत्। वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥" भा.। मस्तिष्कगुणाः—स्वादुः तिक्तः कषायः मूत्ररोगघ्नः बलप्राणशुक्रवृद्धिकरश्च। राज। "अपक्वं खर्ज्जूरफलं त्रिदोषशमनं मतम्। पक्वमेव हितं श्रेष्ठं त्रिदोषशमनं परम् ॥" अत्रि.१७अ। मधुरं शीतलं गुरु चयाभिघातदाहवातपित्तेषु हितं वृंहणं शुक्रकरञ्च। च.सू.२७अ.। कृष्णमुशल्याम्। वै.निघ.।

खर्पतुत्थम् । क्ली। खर्परीतुत्थे। वै.निघ.।

खर्परम् । क्ली। स्वनामख्यातोपधातुविशेषे। थापर। हिं खापरिया। मं कलखापरी। प.मु.। तस्य शोधनं यथा—"पुष्पाणां रक्तपीतानां रसैः पिष्टैश्च भावयेत्। नरमूत्रैश्च गोमूत्रैः यवाम्लेन ससैन्धवैः। सप्ताहं त्रिदिनं वापि पश्चाच्छुध्यति खर्परम्। तन्मारणं वङ्गवत् ज्ञेयम्। खर्परं पारदेनैव वालुकायन्त्रगं पचेत्। चूर्णयित्वा दिनं यावत् शोभनं भस्म जायते।" अथवा पत्तलीकृतं खर्परं लवणान्तर्निधाय पचेत् ॥ मतान्तरे गुणाः—खर्परं कटु क्षारं कषायं वामकं लघु लेखनं भेदनं शीतलं चक्षुष्यं रक्तपित्तहरं विषाश्मरीकुष्ठकण्डूघ्नञ्च। भा.। पुं। मत्पात्रभेदे। थापरा। प.मु.। स्वभाकारापूपपचनादिपात्रे। তাওয়া, চাটু। बा.टी.हेमा.। कपालास्थनि। মাথার খুলি। रा.नि.व.१८। नेत्राञ्जनभेदे। कवे। त्रिका.।

खर्परवटिका । स्त्री। ग्रहण्यधिकारे। "पक्वेष्टका हरिद्राभ्यामागारधूमकेन च। शोधितं पारदञ्चैव कर्षार्द्धं तुलया धृतम्। भृङ्गराजरसैः शुद्धगन्धकं रससम्मितं। द्वाभ्यां कज्जलिकाङ्कत्वा भावयेत्तत्तु भेषजैः। सिन्धुवारदलरसे मण्डूकपर्णिकारसे (मधूकपुष्पजे रसे इति वा पाठः)। केशराजरसे चापि ग्रीष्मसुन्दरजे रसे। रसेऽपराजितायाश्च सोमराजरसे तथा। रक्तचित्रकपत्रोत्थे रसे च परिभावितम्। रसमानसमानेन छायायां शोषयेद्भिषक् ॥" वटी सर्षपाभा, अनु. दधिमस्तु। ইষ্টকচূর্ণ, হরিদ্রাচূর্ণ ও ঝুলের সহিত শুদ্ধ পারা ১ তো. ভীমরাজরসে শুদ্ধ গন্ধক ১ তো. কজ্জলি করিবে। পরে নিশিন্দাপাতার রস, থুলকুড়ির রস, বা মৌলফুলের রস বা কাথ, কেশুরের রস, গিমে শাকের রস, অপরাজিতাপাতার রস, সোমরাজকাথ এবং রক্তচিত্রকপত্ররস প্রত্যেকে ১ তোলা দ্বারা মাড়িয়া সর্ষপতুল্য বটী করিবে। रस.कौ.। भैष.।

खर्परालः । पुं। अश्वत्थविशेषे। मं लाखीपिंपरी। वै.निघ.।

खर्परिका(री)तुत्थकम् । क्ली। A sort of collyrium. नेत्रप्रसाधनविशेषे। तुत्थाञ्जने, कृत्रिमरसाञ्जने। गुणाः – कटु तिक्तं चक्षुष्यं रसायनं त्वग्दोषघ्नं दीपनं बलपुष्टिकरञ्च। रा नि व. १३। खर्परे। থাপর। मं कलखापरी।

खर्परीयकम् । क्ली। खर्परीतुत्थे। खर्परे। वै.निघ.।

खर्परीरसकम् । क्ली। खर्परीतुत्थे। কৃত্রিম রসাঞ্জন। रा.नि.व.१३। खर्परे। वै निघ.।

खर्व्वः (र्व्वः) । पुं। कुब्जकपुष्पवृक्षे। रा.नि.व. १०। त्रि। ह्रस्वे। अम.।

खर्व्वशाखः । त्रि। वामने। हे.च.।

खर्व्वा । स्त्री। नागबलायाम्। रा.नि.व.४।

खर्व्वु(र्व्वू)रः । पुं, क्ली। नदीनिष्पावे। रा.नि. व.१६।

खर्वु(र्वू)रा । स्त्री। नरदीवृक्षे। रा.नि.व.८।

खर्वूजम् । क्ली। तन्नामकफलविशेषे। খরমুজ। गुणाः —"मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु। स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहम्। तेषु यच्चाम्लमधुरं सक्षारञ्च रसाद्भवेत्। रक्तपित्तकरं तत्तु मूत्रकृच्छ्रकरम्परम् ॥" भा.।

खर्म्मम् । क्ली। पट्टवस्त्रे। पौरुषे। मे.।

खलम् । क्ली। कल्के। मे.। शस्यस्थाने। त्रिका.।

खलः (कः) । पुं। सूर्य्ये। धुस्तूरवृक्षे। रा.नि. व.१०। मालवे व्यञ्जनविशेषे। "मालुधानीयपुर्णैर्योऽतिगुणः स खल इत्युच्यते। फलमूलैर्घनादाम्

व्यञ्जनं पाकतो घनं। लेहवरखल इत्यन्ये दोषघ्नाः खलयोनिवत्। कल्को बिल्वशलाटूनां तिलकल्कश्च तत्समः। दध्नः सरोऽम्लः सस्नेहः खलो हन्ति प्रवाहिकाम्॥" शौकुकुटः अपराजितश्च नामापरौ खलावपि। वा.चि.८।१२श.मग्यः। तमालवृक्षे। श.च.। त्रि। नीचे। अधमे। मे.।

खलकाम्बलिकः। पुं। तिलकल्के। वै निघ.।

खल(लि)तिः। पुं। इन्द्रलुप्तरोगिणि। টে-কো। हे.च.। त्रिका.।

खलमूर्त्तिः। पुं। पारदे। श.च.।

खलयूषः। पुं। खड़यूषे।

खलाधारा। स्त्री। तैलपायिकायाम्। তেলা পোকা। जटा.। [इत्यपि पाठोऽस्ति।

खलिः। पुं। तिलकिट्टे। रा.नि.व.१६। खल

खलिद्रुमः। पुं। सरलदेवदारौ। वै.निघ.।

खलि(ली)नः। पुं, क्ली। खलीने। লাগাম। भ.टी.रा.। [खलसमूहे। अम.।

खलिनी। स्त्री। कृष्णतालमूल्याम्। वै.निघ.।

खलिशः } **खलेशयः** } पुं। (Tricopodus colisa.) मत्स्यविशेषे। খলশে মাছ। हारा.। ग्राहित्वं कषायत्वं वायुकोपनत्वं रुचत्वं लघुत्वं शूलहरत्वं किञ्चिदामघ्नत्वञ्च। राज.२प.। रा.नि.व.१८।

खलुरेषः। पुं। मृगविशेषे। श.च.। [जटा.।

खलेधानी। स्त्री। खले पशुबन्धनदारुणि।

खलेवाली। स्त्री। खले गोबन्धनकाष्ठे। মেই কাঠ। हे.च.।

खल्लः। पुं। चातकपक्षिणि। मे.। चर्म्मणि। থাল। त्रिका.। औषधमर्द्दनपात्रे। খল। क्ली। वाजिदन्तायस्य निम्नकपाले। "निम्नकृष्णश्च दन्ताग्रं खल्लमित्यभिधीयते।" ज.द.४श.।

खल्लकी। स्त्री। शर्करायां। খাঁড়। वै.निघ.।

खल्लिका। स्त्री। पिष्टकादिभर्ज्जनपात्रे। श.च.।

खल्लि(ल्ली)टः। त्रि। खलतौ। श.र.। त्रिका.।

खल्ली। स्त्री। हस्तादौ शिरामोटने। খালধরা। सि.यो.विसूची.चि.। "खल्ली तु पादजङ्घोरुकरमूलावमोटनी।" सरलदेवदारौ। वै.निघ.वा.व्या.चि.।

खल्लीवर्द्धनः। पुं। दन्तवेष्टजरोगविशेषे। मारुतेनाधिको दन्तो जायते तीव्रवेदनः। खल्लीवर्द्धनसंज्ञोऽसौ सञ्जाते रुक् प्रशाम्यति॥ भा.म.४भ. मुखरो.चि.। [निघ.।

खल्वटः। पुं। कासरोगे। मं खोकला। वै.

खल्वाटः। पुं। खलतौ। हे.च.।

खल्वुका। स्त्री। नाभिशङ्खे। र.सा.सं.।

खवल्ली। स्त्री। आकाशवल्ल्याम्। रा.नि.व.३।

खवारि। क्ली। आन्तरिक्षोदके। रा.नि.व.१४।

खवाष्पः। पुं। हिमे। हारा.। [व.१३।

खशब्दाङ्कुरः। पुं, क्ली। वैदूर्य्यमणौ। रा.नि.

खशा। स्त्री। मुरामांस्याम्। मं मरवा। श.च.।

खशेटः। पुं। खलिसमत्स्ये। त्रिका.।

खश्वासः। पुं। वायौ। त्रिका.।

खसः। पुं। पामायाम्। খোস্ রোগ। वीरणमूले। वै.निघ.वा.व्या.चि.।

खसकन्दः। पुं। वाराहीकन्दे। वै.निघ.। क्षीरीशवृक्षे। ক্ষীরীশ গাছ। प.मु.। चीरकञ्चुकीवृक्षे। र.मा.। [ড়ার। र.मा.।

खसगन्धः। पुं। चीरकञ्चुक्याम्। ক্ষীরক-

खसतिलः। पुं। खखसे। পোস্তা গাছ। गुणाः—"तिलभेदः खसतिलः कासश्वासहरः स्मृतः। स्यात्तु खसफलोद्भूतं वल्कलं शीतलं लघु। ग्राहि तिक्तकषायञ्च वातकृत्कफकासहृत्। धातूनां शोषकं रुक्षं मदकृद्वाग्विवर्द्धनम्। मुहुर्मोहकरं रुच्यं सेवनात्पुंस्त्वनाशनम्॥" भा.।

खसफलम्। क्ली। खखसे। পোস্ত, ঢেঁড়ি। वै.निघ.। [টামাংসী। रा.नि.व.१२।

खसम्भवा। स्त्री। आकाशमांस्याम्। সূক্ষ্ম জ-

खसर्पणवटी। स्त्री। ग्रहण्यधिकारे। See खर्परवटिका।

खसबीजम्। क्ली। खखसे। পোস্তদানা। हिं खाखसदाना। गुणाः—बल्यं वृष्यं सुगुरु कफकरं वातशमनञ्च। भा.।

खखसः। पुं। स्वनाम्ना मालवदेशे प्रसिद्धः।

খাকৃনী, পোস্তদানার গাছ। गुणाः—पाके मधुरः कान्तिवीर्य्यबलप्रदश्च। रा.नि.व.४।

खखसरसः (सारः) (चीरं)। पुं,क्ली। अहिफेने। वै.निघ.। [मणौ। वै.निघ.।

खस्फटिकः। पुं। चन्द्रकान्तमणौ। सूर्य्यकान्त-

खाखसः (तिलः)। पुं। खसतिले। খাকৃনী, পোস্ত গাছ। See खसतिलः।

खाखसतिलोद्भूतम्। क्ली। खखसे। পোস্ত। वै.निघ.।

खाजिकः। पुं। लाजायाम्। থৈ। हारा.।

खाटिः। स्त्री। किणे। मे.।

खाड़(ण्ड)वः। पुं। मधुराम्ललवणनानासुगन्धिद्रव्यकृतखाद्यविशेषे। "खाड़वाः फलमधुराम्ललवणाः सुगन्धिद्रव्यजाः नानाविधा" इति। शिवदासः। द्वीपान्तरखर्ज्जूरे। वै.निघ.।

खात(त्र)म्। क्ली। पुष्करिण्याम्। अम.।

खादनः। पुं। दन्ते। हे.च.। क्ली। आहारे। वै.निघ.। [तभोजनपात्रे। नकु.१८अ.।

खादनकोष्ठकम्। क्ली। अश्वस्य विहस्तोन्न-

खादिरः। पुं। विट्खदिरे। खदिरसारे। रा.नि.व.१८।

खादिरसारः। पुं। खदिरे। খয়ের। गुणाः—कटुत्वं तिक्तत्वं उष्णत्वं कफवातव्रणकण्ठामयनाशित्वं रुचिकरत्वं दीपनत्वञ्च। रा.नि.व.८।

खाद्यम्। क्ली। अष्टविधाहारान्यतमाहारे। খাবার জিনিষ। रा.नि.व.२०।

खाद्यपत्री। स्त्री। खदिरवृक्षे। रा.नि.व.८।

खानिः। स्त्री। खनौ। हे.च.।

खानिकम्। क्ली। कुड्यच्छेदे। দেওয়ালের গর্ত্ত। त्रिका.। रत्ने। वै.निघ.।

खानिष्कम्। क्ली। अतिशुष्कमांसे। वै.निघ.।

खानोदकः। पुं। नारिकेले। त्रिका.।

खापगा। स्त्री। गङ्गायाम्। हे.च.।

खारः। पुं। खारीपरिमाणे।

खारिः (री)। स्त्री। परिमाणविशेषे। स च द्रोणचतुष्टयपरिमाणे, शताधिकाष्टाविंशतिशरावपरिमाणे वा (१२८ श.)। "चतुराढ़को भवेद्द्रोणः खारी द्रोणचतुष्टयम्।" वै.निघ.।

खारिकः। पुं, क्ली। पुष्करतीर्थसमीपे प्रसिद्धे महापारेवतफले वृक्षे च। বড় খেজুর। रा.नि.व.११।

खार्ज्जूरसुरा। स्त्री। खर्ज्जूरधातकीपुष्पकृतसुराविशेषे। वै.निघ.। खर्ज्जूरमद्ये। খেজুররসের মদ। गुणाः—"माद्वीकाल्पान्तरं किञ्चित् खार्ज्जूरं वातकोपनं। तदेव विशदं रुच्यङ्कफघ्नङ्कर्षणं लघु। कषायं मधुरं हृद्यं सुगन्धेन्द्रियबोधनम्॥" सु.सू.४६अ.। पिण्डखर्ज्जूरविकृतिभवं खार्ज्जूरमुच्यते। मतान्तरम्। "तालसिन्दीलखर्ज्जूरमुद्वान्युक्तिच्य गच्छते। यद्रसं तत्तदाख्यं हि विज्ञेयं तत्परायणैः॥" तीड़.वृद्धशौनकः।

खालित्यम्। क्ली। कपालरोगे। টাকরোগ। लक्षणं यथा—"तेजोऽनिलाद्यैः सह केशभूमिं दग्ध्वाशु कुर्य्यात् खलतिन्नरस्य। किञ्चित्तु दग्ध्वा पलितानि कुर्य्याद्धरिप्रलुप्तञ्च शिरोरुहाणां॥" च.।

खाश्मरी। स्त्री। गाम्भारीवृक्षे। वै.निघ.।

खिखिः। पुं। शृगालविशेषे। খ্যাক্‌শিয়ালী। मं कोह्ला। मे.।

खिङ्कि(ङ्खि)रः। पुं। खिखौ। খ্যাক্‌শিয়ালী। मे.। वारिबालके। गन्धद्रव्यविशेष, জলবালা। विश्व.हे.च.।

खिच्चा। स्त्री। खेचरिकान्ने। वै.निघ.।

खिदिरः। पुं। चन्द्रे। वै.निघ.।

खिद्रः। पुं। रोगे। उणा.। [नि.व.४।

खिरहिट्टी। पुं। महासमङ्गानामक्षुपे। रा.

खिलः। त्रि। अप्रहते (भूम्यादौ)। रा.नि.व.२।

खिलाहः। पुं। पाण्डुकेसरपुच्छे कपिलवर्णाश्वे। "खिलाहः कपिलो वाजी पाण्डुकेसरवालधिः।" ज.द.३अ.। [श्वेतपीतकः।" ज.द.३अ.।

खुङ्गाहः। पुं। श्वेतपीतवर्णाश्वे। "खुङ्गाहः

खुज्ज(ज्जा)कः। पुं। देवताड़वृक्षे। र.मा.।

खुड़ः। पुं। वातरक्तरोगे। वै.निघ.।

खुड़कः । पुं । गुल्फे । सु.नि १ अ. ।
खुड़वातः । पुं । वायुरोगभेदे । वै.निघ. ।
खुड्डाकः । त्रि । क्षुद्रे । ह्रस्वे । कनिष्ठे । च. ।
खुड्डाकपद्मकतैलम् । क्ली । वातरक्ते तैलम् । पाठः—"पद्मकोशीरयष्ट्याह्वरजनीक्वाथसाधितम् । स्यात्पिष्टैः सर्ज्जमञ्जिष्ठावीराकाकोलिचन्दनैः । खुड्डाकपद्मकमिदं तैलं वातासदाहनुत् ॥" रस.र. । च.चि.२९अ. ।
खु(क्षु)रः । पुं । शफे । पश्वादिर खुर । स्मश्रुच्छेदास्त्रे । क्षुर । श.र. । कोलदले । कुलपाता । नखीनामगन्धद्रव्ये । मे. । खट्वादिपादुके । खुरो । धरणि. ।
खु(क्षु)रकः । पुं । तिलवृक्षे । श.च. । कोकिलाक्षवृक्षे । कुलेखाड़ा । क्ली । उत्तमवस्त्रे । वै. निघ.१भ.जीर्णज्व.चि. । [कयुक्त । अम. ।
खुरणसः । त्रि । चिपिटनासिके । চেপ্টা-না-
खुरसाना । स्त्री । खोरासनीयमान्याम् । वै. निघ. । पुं । खोरसानदेशीयोत्तमाश्वे । "ताजिकाः खुरसानाश्च तुषाराश्चोत्तमा हयाः ।" नकुलः ।
खुराकः । पुं । यवनाले । জনার । पशौ । वै. निघ. । [্তের ভাঁড় । उपधाने । मे. ।
खुरालिकः । पुं । नापितभाण्डयाम् । नापि-
खुरासनी-वचा । स्त्री । तद्देशीयवचायाम् । শ্বেত বচ । मं श्वेतवेखण्ड । वै.निघ. ।
खुरासानी-यमानी । स्त्री । यमानीभेदे खुरसाण इति महाराष्ट्रादौ । गुणाः—"खुरासानीयमानी तु कटुः रुचा च पाचिका । ग्राहिकोष्णा मादिका च गुर्व्वी वातकरी मता । कफनाशकरी प्रोक्ता गुणास्त्वन्ये यमानिवत् ॥" वै.निघ. ।
खुरिकापत्रः । पुं । केनीनामपत्रशाके । मं केनी । वै.निघ. । [अ. ।
खुलकः । पुं । जङ्घापादयोः सन्धौ । सु.चि.१८
खुल(ल्व)का । स्त्री । नाभिशङ्के । र.सा.सं. ।

खुल्लम् । क्ली । नखीनामगन्धद्रव्ये । श.च. ।
खुल्लकः । त्रि । खल्वे । भ.टी. ।
खेगमनः । पुं । कालकण्ठपक्षिणि । श.मा. ।
खेचरः । पुं । पारदे । पक्षिणि । क्ली । खेचरान्ने । वै.निघ. । काशीषे । হিরেকস । र.सा.सं. ।
खेचरा । स्त्री । आकाशवल्ल्याम् । वै.निघ. ।
खेचराञ्जनम् । क्ली । काशीषे । হিরেকস । वै.निघ. । [पाकराज. ।
खेचरान्नम् । क्ली । खेचरिकायाम् । থিচুড়ী ।
खेटः । पुं । कफे । मे. । अश्वे । क्ली । तृणे । श.र. ।
खेदिनी । स्त्री । अश्मनपर्णीवृक्षे । श.च. ।
खेला । स्त्री । स्वनामख्यातक्षुपे । কেনা । गुणाः—मधुरा शीता स्तन्यदा रुचिकृत्च । रा.नि.व.५ ।
खेसरः । पुं । अश्वतरे । খচ্চোর । रा.नि.व.१९ ।
खोङ्गा(ङ्गा)हः । पुं । श्वेतपिङ्गलवर्णाश्वे । है.च. ।
खोटः (कं) । पुं, क्ली । यमक, फुट इति ख्याते रसजारणद्रव्ये । तल्लक्षणं यथा—"खोटकं स्वर्णसंतुल्यं समावर्त्तच कारयेत् । कुक्कुटाण्डनिभं सूतं पटु भेदि भवेद्यदा । आवर्ज्जितं पुनस्तद्वत् खोटबद्धरसाकृति । अक्षयं कठिनं श्वेतं शिखिना मृदुना पचेत् । श्वेतपीतगुरुत्वञ्च मृदुसिक्थकसन्निभम् । अग्निमध्ये यदा तिष्ठेत्पोटबद्धस्य लक्षणम् । नानावर्णस्तथा स्वच्छो धृतो योऽसौ जलौकावत् । वर्द्धते सूतको यत्र जलौकाबद्धलक्षणम् ॥"
खोटिः (टी) । पुं, स्त्री । कन्दुरुखोटौ । च.द. वा.व्या.चि. । पालङ्कीवृक्षे । श.च. ।
खोड़ः (रः) (लः) । त्रि । खञ्जे । अम. ।
खोरकः । पुं । गर्द्दभज्वरे । गजवै. ।
खोलकः । पुं । वल्मीके । উইঢিপি । शिरस्त्राणे । পাগ্ড়ী । त्रिका. । पूगकोषे । গুপারির খোলা । मे. ।
खोलिः । स्त्री । तूणे । श.मा. ।

ग

गगनम् । क्ली । अभ्रधातौ । অভ্র । मेघे । रा. नि.व.२२ कनकसुन्दररसे । [See अभ्रम् ।

गगनमारकगणः । पुं । अभ्रमारकद्रव्येषु ।

गगनसुन्दरः । पुं । ग्रहण्यां रसः । रसः १ तो. गन्धकं २ तो. अभ्रं ८ तो. जलेन वटी कार्य्या । मा.२ – ४ र. । र.चि. । अन्यः ज्वरातिसारे—टङ्कणहिङ्गुलगन्धकाभ्रं प्र. समम् । चौरिचीरसेन (থিরুই) २ भावनाः । भैष. ।

गगनस्पर्शः । पुं । वायौ । वै.निघ. ।

गगनादिलौहम् । क्ली । सोमरोगे । "गगनं त्रिफला लौहं कुटजङ्कटुकात्रयम् । पारदो गन्धकश्चैव विषटङ्कणसर्जिकाः । त्वगेला तेजपत्रञ्च वङ्गं जीरकयुग्मकं । एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् । तदर्द्धं चित्रकं चूर्णं…॥" অভ্র, ত্রিফলা, লৌহ, কুড়চি, ত্রিকটু, পারা, গন্ধক, বিষ, সোহাগার খৈ, সাজিমাটী, গুড়ত্বক্, এলা, তেজপত্র, বঙ্গ, জীরা, কৃষ্ণজীরা প্রত্যেকে সমভাগ চূর্ণ। সর্ব্বচূর্ণার্দ্ধ চিত্রকমূলচূর্ণ। র.সা.সং. ।

गगनादिवटी । स्त्री । वातरोगे । अभ्रकपारदगन्धकताम्रकमुण्डलौहतीक्ष्णलौहस्वर्णमाक्षिकं एषां प्र. समभागं यष्टीवासकद्राक्षाभूकुष्माण्डक्काथेन मर्द्दयेत्। मा. २ र.। অভ্র,পারা, গন্ধক, তামা, মুণ্ড ও তীক্ষ্ণলৌহ, স্বর্ণমাক্ষিক প্রত্যেকে সমভাগ ; যষ্টিমধুর ক্বাথ, বাসাক্বাথ, কিস্মিসের ক্বাথ ও ভূমিকুষ্মাণ্ডক্বাথে মর্দ্দন। মাত্রা ২রতি। অনুপান ঘৃত ও মধু। র.সা.সং.।

गगनाम्बु (नोदकम्) । क्ली। नीहारजले । आकाशवारिणि । गुणाः—त्रिदोषघ्नं बल्यं रसायनं मेध्यं रुचीघ्नं शीतलम् आह्लादकं ज्वरदाहविषघ्नञ्च । सु.सू.४६अ. ।

गङ्गका (ङ्गा, का) । स्त्री । स्वनामख्यातनद्याम् । तज्जलगुणाः—शीतं स्वच्छं स्वादु अतिरोचकं पथ्यं पाचकं पावनं तृष्णामोहघ्नं दीपनं प्रज्ञाकरञ्च । रा.नि.व.१४। लज्जालुकायां। वै.निघ.।

गङ्गाचिल्ली । स्त्री । चिल्लविशेषे । গাংচীল। हारा. । [त्रिका. । See चिङ्गटः ।

गङ्गाटेयः । पुं। चिङ्गटमत्स्ये । চিংড়ি মাছ।

गङ्गाधरक्काथः । पुं। अतीसारे कच्चटाद्यपरनामकषाये। "कच्चटदाड़िमजम्बूशृङ्गाटकपत्रवर्हिष्ठं। जलधरनागरसहितं गङ्गामपि वेगवाहिनीं रुन्ध्यात् ॥" কাঁচড়া, দাড়িম, জাম, শিঙ্গাড়া (ইহাদের) পাতা, বালা, মুতা, শুঁট প্রত্যেকে ২২॥০ র. । भा. ।

गङ्गाधरचूर्णम् (वृहत्) । क्ली । अतीसारे औषधम् । मुस्ताश्योणाकशुण्ठीधातकीपुष्पलोध्रबालकविल्वशलाटुमोचरसपाठेन्द्रयवकुटजत्वगाम्रास्थिवराहक्रान्तातिविषाणां प्र. चूर्णं समभागम् । মুতা, শ্যোণা, শুঁট, ধাইফুল, লোধ, বালা, বেলশুঁটা, মোচরস, আকনাদি, ইন্দ্রযব, কুড়চিছাল, আম্রাস্থি, বরাহক্রান্তা, আতইচ প্রত্যেকে চূর্ণ সমভাগ । अन्यद्यथा—मुस्तेन्द्रयवमोचरसविल्वशलाटुधातकीलोध्राणि प्र. समभागानि । गुड़ेन सेव्यम् । মুতা, ইন্দ্রযব, মোচরস, বেলশুঁটা, ধাইফুল, লোধচূর্ণ প্রত্যেকে সমভাগ। अपरं यथा—मोचरसमुस्तकशुण्ठीपाठाश्योणाकधातकीपुष्पाणि प्र. समभागानि। दधिमस्तुना सेव्यम् । মোচরস, মুতা, শুঁট, আকনাদি, শ্যোণা, ধাইফুলচূর্ণ প্রত্যেকে সমভাগ। भा.म.१भ. ।

गङ्गापत्री । स्त्री। स्वनामख्यातपत्रशाकविशेषे । मं गङ्गावती । कं वट्टगांधारी । गुणाः—कटुः उष्णा वातघ्नी व्रणरोपणी च । रा.नि.व.१० । र.सा.सं.अभ्रमारणे । लज्जालुकायां । वै.निघ. ।

गच्छः । पुं । वृक्षे । है.च. ।

गजः । पुं । हस्तिनि । अयं कूलचरत्वात्तद्गुणः। नागकेशरवृक्षे । নাগেশ্বর গাছ । वै.निघ. । गजपिप्पल्याम् । पञ्चतिक्तघृतम् । गजपुटे । प्रयोगा. ।

गजकणा । स्त्री । गजपिप्पल्याम् । र.मा. । सा.कौ.बाहुशालगुड़े । [रा.नि.व.७ ।

गजकन्दः । पुं । हस्तिकन्दनाममहाकन्दशाके ।

गजकर्णा (र्णी) । स्त्री। करिकर्णवत्पत्रे कन्दशाकविशेषे। हिं हस्तिकर्णा। मं वडस्वीकन्द। गुणाः—तिक्ता उष्णा वातकफहरा पाके स्वादुः शीतज्वरघ्नी पाण्डुशोफकृमिप्लीहगुल्मानाहोदरघ्नी वनशूरणवत् ग्रहण्यर्शोघ्नी च। भा.पू.१भ.शाकव.। भाखुकर्णीलतायाम्। रा.नि.व.३।

गजकर्णिका । स्त्री। कर्कटिकायाम्। কাঁকুড়। वै.निघ.। इन्द्रवारुणीलतायाम्। রাখালশশা। रा.नि.व.३।

गजकुसुमः । पुं, क्ली। नागकेशरवृक्षे तत्पुष्पे च। নাগেশ্বর গাছ বা তাহার ফুল। भैष. मुखरो.चि.खरिमेदा.गु.डी.।

गजकृष्णा । स्त्री। गजपिप्पल्याम्। भा.वृद्धतैले। "गजकृष्णा कटुर्वातश्लेष्मनुद्वह्निवर्द्धनी। उष्णा निहन्त्यतीसारं श्वासकण्ठामयक्रिमीन्॥" भा.।

गजकेश(स)रः । पुं। नागकेशरे। নাগেশ্বর। सि.यो.कर्हि.चि.एलादिगुड़ी.। "लवङ्गगजकेशरकोलमज्जाः।"

गजकेश(स)रीरसः । पुं। आमज्वरादौ रसः। "शुद्धसूतं विषङ्गन्धं व्योषं त्रिफलमेव च। जयपालसमहत्वा भृङ्गतोयेन मर्द्दयेत्॥" भा. १र.। रस.कौ.।

गजचिर्भ(र्भि)टः (टा) । स्त्री। इन्द्रवारुण्याम्। রাখালশশা, গোরক্ষলাড়ু। प.मु.। रा.नि.व ३। च.द.गुल्म.चि.। (टः) गोडुम्बायां। গোমক। चिका.।

गजजातिः । स्त्री। हस्तिजातौ। सा त्रिधा भद्रः मन्द्रः मृगश्चेति। रा.नि व.१९।

गजदन्तः । पुं। करिदन्ते। হাতির দাঁত। वै.निघ.। एतन्मसी श्वित्रघ्नी।

गजदन्तफला । स्त्री। डङ्गरीनामफलशाकलतायाम्। रा.नि.व.७।

गजदन्तवत् । क्ली। मूलके। वै.निघ.।

गजदन्तिका । स्त्री। हस्तिदन्तायाम्। वा.उ.२६अ.। [अश्वत्थ। हिं बालियापिपल। भा.।

गजद्रुमः (पादपः) । पुं। नन्दीवृक्षे। গয়া

गजपिप्पली । स्त्री। (Scindapsus officinalis.) Syn. Pothos officinalis. स्वनामख्यातवृक्षे। গজপিপুল। तें गजपिप्पलु। सा चविकायाः फलमिति केचित्। "चविकायाः फलम्प्राज्ञैः कथिता गजपिप्पली।" इति। गुणाः—दीपनी पाचनी उष्णत्वाद्रसशोधनी ग्राहिणी कटूष्णा रूक्षा स्तन्यविवर्द्धिनी च। रा.नि.व.६। तत्फलं विष्टम्भि दुर्जरं रूक्षं शीतलं वातकोपनं विपाके मधुरं रक्तपित्तघ्नञ्च। सु.सू.४६अ.।

गजपुटम् । क्ली। औषधपुटनार्थं सपादहस्तपरिमितनिम्नायतहस्तखाते। ঊর্দ্ধে ১।০ হাত, আয়ত ১৷০ হাত। "सपादहस्तमानेन कुण्डे निम्ने तथायते। वनोपलसहस्रेण पूर्णे मध्ये विधारयेत्। पुटनद्रव्यसंयुक्ताङ्कोष्ठिकां मुद्रितां मुखे। अथार्द्धानि करण्डानि अर्द्धान्युपरि निःक्षिपेत्। एतद्गजपुटम्प्रोक्तं ख्यातं सर्व्वपुटोत्तमम्॥" भा.। "गजप्रमाणगम्भीरं शुषिरं क्रमशस्ततं। वितस्तिद्वितयमुखं त्रिवितस्तितलं तथा। एवं विधाय यत्नेन विशिरस्ककरीरवत्। तस्य पादत्रयं सम्यक् पूरयित्वा वनोपलैः। भैषज्यकोष्ठिकां तत्र स्थापयित्वा ततः पुनः। वनोपलैः संवृणुयादेतद्गजपुटं स्मृतम्॥" গভীর ২ হাত বা ১৷০ হাত; ৩ বিগত তলা, ২ বিগত মুখের ফাঁড় গর্ত্ত। अत्रि.। हस्तप्रमाणगर्त्तो यः पुटः स तु गजाह्वयः। इति प्रयोगा.। [है.च.।

गजप्रिया । स्त्री। शल्लकीवृक्षे। শালবিশেষ।

गजबला । स्त्री। गोरक्षयाम्। গোরক্ষচাকুলিয়া। "नयति गजबलामूलं।" च.द.कास.चि.।

गजभक्षः (क्ष्यः) (कः) । पुं। तालवृक्षे। अश्वत्थवृक्षे। रा.नि.व.९।११।

गजभक्षा (क्ष्या) । स्त्री। The gum olibanum tree. शल्लकीवृक्षे। प.मु.।

गजमदः । पुं। हस्तिमदे। वै.निघ।

गजमदहरणी । स्त्री। शिवलिङ्गिनीलतायाम्। वै.निघ.। [रा.। श.मा.।

गजमाचलः (मोटनः) । पुं। सिंहे। हा-

गजमुक्ता । स्त्री। करिगण्डस्थमुक्तायाम्। वै.निघ.। [नाद। भैष.कुष्ठ.चि.। सु.चि.९अ.।

गजल(ले)ण्डः । पुं। हस्तिविष्ठायां। হাতীর

गजवल्लभा । स्त्री । गिरिकदलीवृक्षे । बूनो कला । शल्लकीवृक्षे । रा.नि.व.११ ।

गजवाजिप्रिया । स्त्री । भूमिकुष्माण्डे । भूँइकुमड़ा । वै.निघ. । [चिकित्साशास्त्रे । चर. ।

गजवैद्यकम् । क्ली । पालकाप्य(व्य)कृतगज-

गजाख्यः । पुं । चक्रमर्द्दक्षुपे । चाकन्दा गाछ । रा.नि.व.४ ।

गजाण्डम् । क्ली । पिण्डमूलके । रा.नि.व.७ ।

गजादनः । पुं । अश्वत्थवृक्षे । र.मा. ।

गजादिनामा । स्त्री । गजपिप्पल्याम् । "गजादिनामाकरहाटकुष्ठैः ।" सु.चि.१८अ. ।

गजारिः । पुं । गजमादनशल्लकीवृक्षे । "गजारिसलकसिंहयोः ।" हड्डचन्द्रः ।

गजाशनः । पुं । कमलकन्दे । वै.निघ. । अश्वत्थवृक्षे । मद.व.५ । शालवृक्षे । र.मा. ।

गजाशना । स्त्री । भङ्गायाम् । भाङ, सिद्धि । श.च. । शल्लकीवृक्षे । पद्ममूले । र.मा. । शणवृक्षे । वै.निघ. । [च.द.अर्श.चि.बहुशालगुडे ।

गजाह्वः । पुं, क्ली । नागकेशरवृक्षे तत्पुष्पे च ।

गजाह्वया । स्त्री । यूथिकाक्षुपे । श्वेत यूँइ । रा.नि.व.१० । गजपिप्पल्याम् । भा.पू.१भ. ।

गजाह्वा । स्त्री । गजपिप्पल्याम् । "गजाह्वा व्याधिघातका ।" भा.पू.१भ. ।

गजेष्टा । स्त्री । भूमिकुष्माण्डे । रा.नि.व.७ ।

गजोपकुल्या । स्त्री । गजपिप्पल्याम् । वै.निघ. २भ.ग्रहणी.चि. । भैष.कुष्ठचि. । [निघ. ।

गजोपमः । पुं । कुमार्य्यां । घृतकुमारी । वै.

गजोषणा । स्त्री । गजपिप्पल्यां । रा.नि.व.५ ।

गञ्जा (ञ्ज्वा) (ञ्जिका) । स्त्री । मद्यभाण्डे । श.र. । मदिरागृहे । अम. । रत्नखनौ । मे. । गाँजा इति प्रसिद्धे वणिग्द्रव्ये । गुञ्जायाम् । वै.निघ. ।

गञ्जायिका । स्त्री । शक्राशने । सिद्धि, भाङ ।

गठो(ड़ो)त्थम् । क्ली । साम्भरापरपर्य्याये लवणे । सामर लवण । रा.नि.व.६ ।

गड़ः (कः) । पुं । मत्स्यभेदे । गड़ूई माछ । मे. । गुणाः—मधुरः रुचः कषायः शीतः लघुश्च । राज.३प. । क्ली । साम्भरलवणे । रा.नि.व.६ ।

गड़देशजम् । क्ली । साम्भरलवणे । रा.नि.व.६ ।

गड़लवणम् । क्ली । साम्भरदेशजलवणे । साम्र लवण । गुणाः—लवणं ईषदम्लं मलघ्नम् उष्णं दीपनं कफवातार्शोघ्नं कोष्ठशोधनञ्च । रा.नि.व.६ ।

गड़ाख्य(दिलवण)म् । क्ली । साम्भरलवणे । रा.नि.व.६ । [१६ ।

गड़िः । पुं । तरुणवृषे । युवा षाँड़ । रा.नि.व.

गड़िशः । पुं । तन्नामकमत्स्यविशेषे । गुणाः—गड़िशो मधुरो ग्राही बल्यो वह्निप्रदो गुरुः । राज.३प. ।

गड़ुः (ड़ूः) । पुं । पृष्ठग्रन्थौ । कुँज । रा.नि.व.२० । गलगण्डे । पृष्ठगुड़े, स च घाटामस्तकयोर्मध्ये मांसवृद्धिः । अ.म. । शल्यास्त्रे । श.र. । किञ्चुलुके । त्रिका. । मन्यास्तम्भरोगे । वै.निघ. । त्रि । कुब्जे । मे. ।

गड़ुरः (लः) । त्रि । कुब्जे । कुँजो । श.र. ।

गड़ु(ण्डू)पदः । पुं । किञ्चुलुके । केँचो । मंदाणा । अम. । [शर्करायाम् । वै.निघ. ।

गड़ोलः । पुं । गुड़े । उणा. । ग्रासे । हे.च. ।

गड्डु(ड्डू)कः । पुं । सौवर्णभृङ्गारे । सोणार गाड़ु । श.र. ।

गद्या(द्या)ण(ल)कम् । क्ली । ४८ अथवा ६४ रक्तिकमाने । लीलावती । वैद्यकम् । शाणषट्के, शताधिकद्विनवतिरक्तिकासु वा । २ तोला । "गद्याणोमाषकैः षड्भिः··· । त्रिभिः शाणैर्भवेत्तोला षड्भिर्गद्याणकं विदुः ॥" तोड़रानन्द. ।

गणः । पुं । अजमोदायाम् । राँधुनी । मं किरमाणीओँवा । वै.निघ. । चौरनामगन्धद्रव्ये । मे. ।

गणकर्णिका । स्त्री । इन्द्रवारुण्यां । रा.नि.व.३ ।

गणपीठकम् । क्ली । वक्षसि । श.च. ।

गणरूपः (कः) । पुं । अर्कवृक्षे । आकन्द गाछ । अम. । श्वेतार्कवृक्षे । र.मा. । मन्दारार्के । रक्तार्के । रा.नि.व.१० । See राजार्कः ।

गणरूपी (इन्) । पुं । श्वेतार्के । श्वेत आक-

ना । र.मा. । अर्कवृक्षे । वै.निघ. । रक्तार्के । रा.नि.व.१० ।

गणवतीसुतः । पुं । दिवोदासे । "धन्वन्तरिर्दिवोदासः काशिराजः सुधीद्भवः । पालिकाख्या गणवती करेणुरचिरासुतः ।" पालकाप्ये । त्रिका. ।

गणहासः (कः) । पुं । चोरनामकगन्धद्रव्ये । चोरा इति पश्चिमदेशे । গেঁঠেলা । मं गटौला । रा.नि.व.१२ । चण्डालकन्दे । अजमोदायाम् । व्राकूनौ । वै.निघ. ।

गणिका । स्त्री । यूथिकापुष्पवृक्षे । যূঁইফুলের গাছ । र.मा. । श्वेतयूथिकायाम् । শ্বেত যূঁই গাছ । रा.नि.व.१० । पीतयूथिकायां । वै.निघ. । गणिकारिकायाम् । গণিরি । श.र. । हस्तिन्यां । जटा. ।

गणिकारिका । स्त्री । (Premna serratifolia. Syn. P. Spinosa.) क्षुद्राग्निमन्थे । ছোট গণিরি । तै चिरिनेल्लिचेट्टु । गुणाः --कटूष्णतिक्तवातकफशोफश्लेष्माग्निमान्द्यार्शोमलविष्टम्भश्रमहरी । रा.नि.व.९ । See अग्निमन्थः । गणिकारीपुष्पवृक्षे । वै.निघ. ।

गणिकारी । स्त्री । पुष्पवृक्षविशेषे, कौङ्कणदेशे स्वनाम्ना प्रसिद्धे । বাসন্তীফুলের গাছ । मं गणेरी । गुणाः—अतिसुरभिः त्रिदोषघ्नी दाहशोषहरा कामोद्दीपनी च । रा.नि.व.१० । गणिकारिकायाम् ।

गणेरुः । पुं । कर्णिकारवृक्षे । কনিকাফুলের গাছ । पारिभद्रवृक्षे । वै.निघ. । स्त्री । हस्तिन्यां । मे. । [क्षे । वै.निघ. ।

गणेरुकः (का) । पुं. स्त्री । गणिकारिपुष्पवृ-

गणेशः (कुसुमः) । पुं । रक्तकरवीरवृक्षे । रा.नि.व.१० । [मूलानि ।" अर्कप्रकाशः ।

गणेशप्रियः । पुं । रक्तकरवीरे । "गणेशप्रिय-

गणेशभूषणम् । क्ली । सिन्दूरे । रा.नि.व.१३ ।

गणोत्साहः । पुं । गण्डके । গণ্ডার । त्रिका. ।

गण्डः (कः) । पुं । खड्गिनि । গণ্ডার । मे. । कपोलदेशे । গাল । रा.नि.व.१८ । रोगविशेषे । "निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले । महान्वा यदि वा ह्रस्वं गण्डमिति निर्दिशेत् ॥" सु.नि. ११अ. । करिकपोले । अम. । ग्रन्थौ । चिह्ने । पिटके । मे. । [१९अ. ।

गण्डकर्णः । पुं । वाद्यदीर्घैकपालिकर्णे । सु.सू.

गण्डकारी । स्त्री । वराहक्रान्तायाम् । বরাক্রান্তা । श्वेतलज्जालुकायाम् । লজ্জাবতী । र.मा. । खदिरीवृक्षे । अम. । श.च. ।

गण्डकाली । स्त्री । खदिरीवृक्षे । अम. । काकजङ्घायां । কেয়োঠেঙা । शल्लकीवृक्षे । वै.निघ. ।

गण्डकी । स्त्री । इक्षुदण्डे । আখ । नकुल. १२अ. ।

गण्डकुसुमम् । क्ली । गजमदे । हारा. ।

गण्डगात्रम् । क्ली । (Annona squamosa.) आतापिफले । আতা, নোনা । हिं शरीफा । मं शीताफल । गुणाः—"गण्डगात्रं हिमं हृद्यं वातपित्तनिसूदनं । श्लेष्मलं तर्षशमनं वान्त्युत्क्लेशनिपीड़नम् ॥" अत्रि. । श.च. ।

गण्डगोपालिका । स्त्री । आम्रवाटिकास्थकीटविशेषे । আম্‌পোকা। हिं गण्डगुयारि। भा. ।

गण्डदूर्व्वा । स्त्री । जलोपरिजायमानदूर्व्वाविशेषे । দূর্ব্বাবিশেষ, গেঁটে দূর্ব্বা । हिं गाण्डरिदुविपाच । मं गण्डरदूर्वा गाढ़ीहरियाली । कं मौनगत्ते । गुणाः—मधुरा शीतला वातपित्तज्वरघ्नी द्वन्द्वदोषघ्नी भ्रमतृष्णाश्रमघ्नी च । रा.नि.व.८ । "गण्डदूर्व्वा हिमा लोहद्राविणी ग्राहिणी लघुः । तिक्ता कषाया मधुरा वातकृत्कटुपाकिनी । दाहतृष्णा बलासास्रकुष्ठपित्तज्वरापहा ॥" भा. ।

गण्डफलकः । पुं । प्रशस्तगण्डस्थले । প্রশস্ত গাল । वै.निघ. ।

गण्डमाला । स्त्री । Inflamation of the glands of the necks &c. स्वनामख्यातगलरोगविशेषे । গণ্ডমালা । तस्य सम्प्राप्तिरूपे—"कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु । मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिश्च गण्डैः ॥" मा.नि. । "मेदस्थाः कण्ठमन्याक्षकक्षावङ्क्षणगा मलाः । सवर्णान् कठिनान् स्निग्धान्वार्त्ताकामलकाकृतीन् । अवगाढ़ान् बहून् गण्डान् चिरपाकांश्च कुर्व्वते । पच्यन्तेऽल्परुजस्त्वन्ये स्रवन्त्यन्येऽतिकण्डुराः । नश्यन्त्यन्ये भवन्त्यन्ये दीर्घ-

कालानुबन्धिनः। गण्डमालापची चेयं दूर्व्वैव त्वयरुद्विभाक्। तां त्यजेत्सज्वरच्छर्द्दिपार्श्वरुक्कासपीनसां ॥" वा.उ.२९अ.। "छर्द्दिर्विरेचनं स्वेदो नस्यं धूमः शिराव्यधः। अग्निकर्म्म क्षारयोगः प्रलेपो लङ्घनानि च। पुराणघृतपानञ्च जीर्णलोहितशालयः॥" इति पथ्यापथ्यम्।

गण्डमालिका। स्त्री। गण्डमालायाम्। लज्जालुकायाम्। रा.नि.व.५।

गण्डरोगः। पुं। अश्वस्य मुखरोगभेदे। "गण्डाभ्यन्तरगो गण्डः गण्डरोग इति स्मृतः।" ज.द.२९अ.।

गण्डशैलः। पुं। ललाटे। हे.च.।

गण्डस्थलम्। क्ली। कपोलदेशे। वै.निघ.।

गण्डाङ्गः। पुं। खड्गिनि। गণ্ডার। श च.।

गण्डारिः। पुं। कोविदारवृक्षे। रक्तकाञ्चन গাছ। भा.। मत्स्यविशेषे। वै.निघ.।

गण्डालजी। स्त्री। गण्डजरोगे। लक्षणं— "गण्डालजी स्थिरः शोफः गण्डे दाहज्वरान्वितः॥" वा.उ.२१अ.।

गण्डालिनी (ली)। स्त्री। गण्डदूर्व्वायाम्। रा.नि.व.८। श्वेतदूर्व्वायाम्। अम.। सर्पाक्ष्याम्। সুগন্ধ রাস্না। भा.। [सु.शा.५अ.।

गण्डास्थि। क्ली। कपोलास्थिद्वये। च.शा.७अ.।

गण्डिः। पुं। त्रपुषे। कण्ठमणौ। तरुशाखायाम्। वै.निघ.। तरुकाण्डे। हे.च.।

गण्डीरः। पुं। शाकविशेषे। গণ্ডিনী, শালিঞ্চ, শমঠ শাক, শুনষ্ঠিয়া। अ टी.भ.। च.सू.४अ.। मञ्जिष्ठायाम्। सुहीवृक्षे। रा.नि.व.८। कटुसूरणे। वै निघ.।

गण्डीराद्यतैलम्। क्ली। मण्डलकिटिमादिकुष्ठरोगेषु हितम्। "गण्डीरिकाचित्रकमार्कवार्ककुष्ठद्रुमलम्लवणैः समूत्रैः। तैलम्पचेत्"......। তৈল ৪ শ. গোমূত্র ১৬ শ.। কল্ক—মনসীক্ষীর বা মঞ্জিষ্ঠা, চিত্রকমূল, ভৃঙ্গরাজ, আকন্দ-আটা, কুড়, কুটজত্বক্ বা সোণালুছাল এবং সৈন্ধব লবণ মিলিত ১ শ.। च.द.।

गण्डीरिका (री)। स्त्री। सुहीवृक्षे। মনসা সিজুর, তেকাঁটা সিজু। रा.नि.व.८। च.द.गण्डीराद्यतैले। मञ्जिष्ठायाम्। प.मु.। शाकविशेषे। भा.म.प्रमेह.चि.। इचौ। रक्तकाञ्चनवृक्षे। वै.निघ.संग्रहणी.चि.चाङ्गेरीघृते। [जटा०।

गण्डुः। पुं, स्त्री। ग्रन्थौ। वै.निघ.। उपधाने।

गण्डूपदः। पुं। किञ्चुलुके। কেঁচো। अम.।

गण्डूपदभवम्। क्ली। शीषके। हे.च.।

गण्डूपदाद्यतैलम्। क्ली। व्रणरोगे हितम्। कटुतैलं ४ श. पाकार्थजलं १६ श. कल्कार्थगण्डूपदः (কেঁচো) १ श.। अथवा कटुतैलं १ श. कल्कार्थगण्डूपदद्शकं (কেঁচো ১০টা)। च.द.।

गण्डूपदी। स्त्री। जलपिप्पल्याम्। वै.निघ.। क्षुद्रकिञ्चुलुकायाम्। अम.।

गण्डूली। स्त्री। गण्डदूर्व्वायाम्। वै.निघ.।

गण्डूषः (धारणं)। पुं, क्ली। चुलुके। গণ্ডূষ। स्नेहक्षीरकषायादिद्रवैर्मुखापूरणं गण्डूषः। आपूर्य च मुखेन धारणं गण्डूषधारणमुच्यते। तस्य द्रव्यमात्रा द्रवद्रव्यं पलमात्रं सूक्ष्मचूर्णस्य च कोलपरिमाणम्। तद्धारणमात्रा—"असञ्चार्य्या तु या मात्रा गण्डूषे सा प्रकीर्त्तिता।" च.द.। तच्च गण्डूषधारणं तावत्कार्य्यं यावत्कफपूर्णास्यता दोषच्छेदः नेत्रघ्राणस्रुतिश्च भवेत्। गण्डूषश्चतुर्विधः स्नेहनशमनशोधनरोपणभेदेन। "स्निग्धोष्णैः स्नेहिको वाते स्वादुशीतैः प्रसादनः। पित्ते कट्वम्ललवणैरुष्णैः संशोधनः कफे। कषायतिक्तमधुरैः कटूष्णो रोपणो व्रणे। इति। दद्याद्द्रवेषु चूर्णञ्च गण्डूषे कोलमात्रकम्। कर्षप्रमाणः कल्कश्च कवले दीयते बुधैः। धार्य्यन्ते पञ्चमाद्वर्षाद्गण्डूषाः कवलादयः। व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवं। इन्द्रियाणां प्रसादश्च गण्डूषे विहिते भवेत्॥" भा.। असञ्चारी मुखे पूर्णे गण्डूषः कवलोऽन्यथा। द्रवेषु दद्याच्चूर्णं हि गण्डूषे कर्षमात्रकम्॥ पलमात्रं द्रवं सर्व्वं गण्डूषे दापयेद्बुधः। द्रवेण कार्य्यो गण्डूषः कल्केन कवलः स्मृतः। कल्कः शकलरूपः स्यान्न तु सूक्ष्मं प्रदापयेत्॥ एकद्वित्रिचतुःपञ्चवारान् कुर्य्यादनालसः।" करिशुण्डाग्रभागे। प्रसृतिपरिमिते। मे.।

गण्डोलः। पुं, क्ली। गुड़े। चिका.। शर्करायाम्। ग्रासे। वै.निघ.। [रोभादि.।

गतशोकः। पुं। अशोकवृक्षे। वा.सू.१५अ.

गतार्त्तवा । स्त्री । निवृत्तरजस्कायां वृद्धायां स्त्रियाम् । रा.नि.व.१८ ।

गतिः (कः) । स्त्री, पुं । नाड़ीभेदे । नाली । नाड़ीव्रणे । मे. । अश्वस्य गतिविशेषे । ঘোড়ার চাল, কদম । प्र. । तद्यथा—"सङ्कीर्णा विकटभ्रष्टा वक्रा सौष्ठववर्ज्जिता । अत्युद्धा वलिता चैव वाजिनां निन्दिता गतिः ॥ घोड़श्चकोटिकाभिस्तु करवेष्टितजानुभिः । शतं द्विगुणितङ्कृत्वा हस्तानां पुनरेति यः ॥ स शीघ्रगतिरित्युक्तो वाजी धन्यसपोषनैः । दशहीना भवन्त्येते मध्यमाधमगा हयाः ॥ दूरमुरिचप्य यः पादांस्तप्ताङ्गारान् स्पृशन्निव । पुनर्याति सुसंहृष्टो वाजी भद्रगतिस्तु सः ॥ पूजिता वृषमातङ्गसिंहशार्दूलगामिनः । अतोऽन्यगतयो नेष्टाः सर्व्वदैव तुरङ्गमाः ॥" ज.द.७अ. । "गतयः षड्विधा धाराः स्कन्दितं रेचितं मुतम् । धौरितकं वल्गितञ्च तासां लक्ष्म पृथक् पृथक् ॥" इति शुक्रः । "धौरितं वलितं मुत्युत्तेजितोत्तेजितानि च । गतयः पञ्च धाराख्यास्तुरङ्गानां क्रमादिमाः ॥" हे.च. । "गतिः मुता चतुष्का च तद्वन्मध्यजवापरा । पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः ॥" "गतिरेका मुता चास्य चातुरीया द्वितीयका । वेगसम्भिस्तृतीया च धारा वेगवती तुरी ॥ धारा तु पञ्चमी प्रोक्ता न शृणोति न पश्यति । सर्व्वकर्म्मकृतो वाजी तस्मात्तां परिवर्ज्जयेत् ॥" नकुल. ।

गदम् । क्ली, पुं । विषे । कुष्ठौषधौ । কুড় । रा.नि.व.६।१२ । वै.निघ.अन्तकसन्निपात.चि. । रोगे । रा.नि.व.२० ।

गदघ्नः । पुं । नन्दीवृक्षे । वै.निघ. ।

गदनिश्चयः । पुं । माधवीयरोगनिश्चायकग्रन्थे ।

गदमुरारिः । पुं । प्रौढ़ामज्वरे रसः । "रसबलिशिललौहव्योषताम्राणि तुल्यान्यथ सदरदनागं भागमेतत्प्रदिष्टं,भवति गदमुरारिश्चास्यगुञ्जाद्वयं ।" রস, গন্ধক, মনছাল, লৌহ, ত্রিকটু, তাম্র, হিঙ্গুল, শীষ প্রত্যেকে সমভাগ । र.सा.सं. ।

गदविनोदनिघण्टुः । पुं । वैद्यकनिघण्टुभेदे ।

गदहरः (री (इन्)) । पुं । वैद्ये । वै.निघ. ।

गदा । स्त्री । पाटलवृक्षे । श.च. ।

गदाख्यम् । क्ली । कुष्ठे । কুড় । र.मा. ।

गदागदौ । पुं द्वि. । अश्विनीकुमारौ । त्रिका.।

गदाग्रणीः । पुं । क्षयरोगे । रा.नि.व.२० ।

गदारातिः । पुं । औषधे । रा.नि.व.२० ।

गदार्त्तिका । स्त्री । गोजिह्वायाम् । পাথরকুচি । वै.निघ. ।

गदाह्व(य)म् । क्ली । कुष्ठे । কুড় । श.र. ।

गदी (इन्) । त्रि । रोगिणि । वै.निघ. ।

गद्गदः । पुं । वातव्याधिविशेषे । তোৎলা । सु.सू.१५. । See मिन्मिनः ।

गन्ता । त्रि । संवरणशीले । सु.शा.३अ. ।

गन्धम् । क्ली । अगुरुणि । कृष्णागुरुणि । रा.नि.व.१२ ।

गन्धः (कः) । पुं । Sulphur. स्वनामख्यातखनिजोपधातौ । গন্ধক । हिं गन्धक । फार्सि गोगिर्द । "श्वेतद्वीपे पुरा देव्या क्रीड़न्त्या रजसाप्लुतं । दुकूलं तेन वस्त्रेण स्नातायां क्षीरनीरधौ । प्रसृतं यद्रजस्तस्माद्गन्धकः समजायत ॥" भा. । स च रक्तपीतश्वेतकृष्णत्वात् चतुर्विधः । पीतः औषधेषु, श्वेतः चर्म्मरोगेषु वाह्यप्रयोगेषु च व्यवहार्य्यः । र.सा.सं. । "चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः । रक्तो हेमक्रियासूक्तः पीतश्वेतौ रसायने । व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः सुदुर्लभः ॥ गुणाः—कटुकः वीर्य्योष्णस्तुवरः सरः । पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् । हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥ अशोधितो गन्धक एष कुष्ठं करोति तापं विषमं शरीरे । शौख्यञ्च रूपञ्च बलं तथौजः शुक्रं निहन्त्येव करोति चास्रम् ॥" भा.पू.१भ.। तच्छुद्धिः—"लौहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत् । तस्मिं तस्य समानञ्च निःक्षिपेद्गन्धकं रजः । विद्रुतङ्गन्धकं ज्ञात्वा दुग्धमध्ये निधापयेत् । एवं गन्धकशुद्धिः स्यात्सर्व्वकार्य्येषु योजयेत् ॥" एवं त्रिफलाजलभृङ्गराजस्वरसादौ निःक्षिपेदिति मतान्तरम् । सा.कौ. । शुद्धगन्धकगुणाः—"शुद्धगन्धो हरेद्रोगान् कुष्ठमृत्युज्वरादिकान् । अग्निकारी महानुष्णो वीर्य्यवृद्धिं करोति

च ॥" र.सा.सं.५अ. । आमोदे । विश्व. । चुद्ररोगे । वै.निघ. । शोभाञ्जनवृक्षे । श.र. । गन्धरसे । वै.निघ. ।

गन्धककज्जलिः । पुं । सन्निपातज्वरे देयः । पाठः—"कण्टकारी सिन्धुवारस्तथा नाटकरञ्जकं । अमीषां रसमादाय कृत्वा खर्परखण्डके । प्रक्षिप्य गन्धकं तत्र ज्वालां मृद्वग्निना दहेत् । गन्धके स्नेहतापन्ने पारदं तत्समङ्क्षिपेत् । मिश्रीकृत्य ततो द्वाभ्यां द्रवं तमवतारयेत् । आमर्दयेत्तथा तत्तु यथा स्यात्कज्जलप्रभम् । ततस्तु रक्तिकामस्य जीरकस्य च माषकं । माषकं लवणस्यापि पर्णे कृत्वा प्रदापयेत् । ज्वरे त्रिदोषजे घोरे जलमुष्णं पिबेदनु ॥" रस.र. ।

गन्धकतैलम् । क्ली । कर्णनाड्यां हितम् । "निशागन्धपले द्वे तु कटुतैलं पलाष्टकं । धूर्त्तपत्ररसे सिद्धं कर्णनाड़ीजिदुत्तमम् ॥" कटुतैलं ८ प. धुस्तूरपत्ररसः ८ प. । कल्कः—हरिद्रा १ प. गन्धकः १ प. एकत्र पचेत् । रस.र. ।

गन्धकन्दकः । पुं । कशेरौ । रा.नि.व.८ ।

गन्धकली । स्त्री । प्रियङ्गौ । च.द.विष.चि. । चम्पककलिकायाम् । [वै.निघ. ।

गन्धकारी । स्त्री । श्वेतलज्जालुके । शल्लकीवृक्षे ।

गन्धकाष्ठम् । क्ली । अगुरुकाष्ठे । त्रिका. । शबरचन्दने, ईषत्पीतचन्दने । रा.नि.व.१२ । कृष्णागुरुणि वै.निघ. । [व्या.एकादशशती.प्र.तैले ।

गन्धकी । स्त्री । सल्लक्याम् । शालूई । च.द.वा.

गन्धकुटी । स्त्री । मुरामांस्याम् । रा.नि.व.१२।

गन्धकुसुमा । स्त्री । कोङ्कणदेशे ख्याते गणिकारीपुष्पवृक्षे । रा.नि.व.१० ।

गन्धकेलिका । स्त्री । कस्तुर्य्याम् । रा.नि.व. १२ । गन्धमालत्याम् । वै.निघ. ।

गन्धकोलिका । स्त्री । गन्धमालतीतुल्ये गन्धद्रव्यविशेषे । गुणाः —"स्निग्धोष्णा कफहृत्तिक्ता सुगन्धा गन्धकोलिका । गन्धकोलिकया तुल्या विज्ञेया गन्धमालती ॥" भा.क.व. ।

गन्धखेड़(क)म् । क्ली । गन्धवीरणे । गन्ध ८वेणा । एतच्च सुगन्धि ईषत्तिक्तं रसायनं स्निग्धं मधुरं शीतलं कफपित्तश्रमहरञ्च । रा.नि.व.८ ।

गन्धगर्भः । पुं । बिल्ववृक्षे । वै.निघ. ।

गन्धगृहा । स्त्री । मुरामांस्याम् । वै.निघ. ।

गन्धग्राही । स्त्री । नासिकायाम् । वै.निघ. ।

गन्धचेलिका (ली) । स्त्री । लताकस्तुर्य्याम् । प.मु. । कस्तूर्य्याम् । मृगनाभि । त्रिका. । जवादिकस्तूर्य्याम् । खाटाशी । वै.निघ. ।

गन्धजातम् । क्ली । तेजपत्रे । श.र. ।

गन्धज्ञा । स्त्री । नासायाम् । हे.च. ।

गन्धतण्डुलः । पुं । सुगन्धशालौ । रा.नि.व.१६ ।

गन्धतुलसी । स्त्री । सुगन्धतुलसीक्षुपे । फुलतुलसी, গোলাপতুলসী । प.मु. ।

गन्धतृणम् । क्ली । Andropogon schoenanthus.) स्वनामख्याततृणे सुगन्धभूतृणे वा । गन्धतृण, সুগন্ধি তৃণ । गुणाः--सुगन्धि ईषत्तिक्तं रसायनं मधुरशीतं कफपित्तश्रमघ्नञ्च । रा.नि.व. ८ । बालके । वै.निघ. ।

गन्धतैलम् । क्ली । पक्वतैलविशेषे । आवर्त्तमानदुग्धे गन्धकरजो दत्त्वा तज्जातदधिजं घृतं गन्धतैलमुच्यते । इदं गलत्कुष्ठे लेपनभक्षणाद्धितम् । "आवर्त्तमाने पयसि दत्त्वा गन्धकजं रजः । तज्जातदधिजं सर्पिर्गन्धतैलं वदन्ति हि । गन्धतैलं गलत्कुष्ठं हन्ति लेपाच्च भक्षणात् ॥" अत्रि. । मतान्तरं यथा—"अर्कक्षीरैः स्नुहीक्षीरैर्वस्त्रं लिप्यन्तु सप्तधा । गन्धकं नवनीतेन पिष्ट्वा वस्त्रं प्रलेपयेत् । तद्वर्त्तिर्ज्वालिता दण्डे धृता धार्य्या त्वधोमुखी । तैलं पतत्यधः पात्रे ग्राह्यं योगेषु योजयेत् ॥" भैष. । अन्यत् भग्नरोगे हितम् । सु.चि.३अ.मृग्यं । अपरं सव्रणभग्नाधिकारे । चतुःशरावोन्मितकृष्णतिलान् गृहीत्वा वस्त्रेण पोट्टलीबद्धान् कृत्वा स्रोतोजले निमज्ज्य रात्रौ स्थापयेत् । ततो दिवसे आतपे शोषयेद्दिनसप्तकं यावत् । तत्तिलतुल्यपरिमाणे गव्यदुग्धे रात्रौ तिलान् प्रक्षिप्य दिवा प्रसार्य्य आतपे शोषयेत् । तदनुभाव्यद्रव्यसमयष्टिमधुक्वाथेन ततः पुनः क्षीरेण विभाव्य शोषयित्वा चूर्णयेत् । अथ काकोल्यादिचूर्णं तिलचूर्णचतुर्थांशं वा समं वा गृहीत्वा तिलचूर्णेन मेलयेत् । ततः एलादिगन्धद्रव्यशृतं क्षीरं तावन्मानं ग्राह्यं यावता पीड़नार्थं समस्तं तिलादिचूर्णम् आर्द्रं भवेत् । (इति वृद्धोपदेशः ।)

एवंविधं निष्पीड़ितं तैलं काकोल्यादिशतपुष्पान्तेन तथा एलादिशृङ्गाटकान्तैः कल्कद्रव्यैः तैलचतुर्गुणजलेन यथाविधि पाच्यं। चीरशुक्ला चीरविदारी, अनन्ता दूर्व्वा, मधूलिकं नर्कटहस्तितृणम्। च.द.।

गन्धत्वक् । स्त्री । एलवालुके । रा.नि.व.४ ।

गन्धदला । स्त्री । अजमोदायाम् । वनयमानी। रा.नि.व ६ ।

गन्धद्रव्यम् । क्ली । पक्वतैलसुवासनद्रव्ये । गन्ध मशला । तानि यथा—"एलाचन्दनकुङ्कुमागुरुमुराकक्कोलमांसीशटीश्रीवासत्वक्दयग्रन्थिपर्णशशभृच्चोचोश्वजोशेरकम्। कस्तूरीनखपूतिगन्धजलमुस्त्रैशैलजाद्यादिकं गन्धद्रव्यमिदं प्रदेशमखिलं श्रीविष्णुतैलादिषु॥" च.द.। अपर यथा—"कुष्ठञ्च नलिका पूतिकशरं श्वेतचन्दनं। जटामांसी तेजपत्रं नखी मृगमदः फलं। कक्कोलकुङ्कुमचोचं लताकस्तूरिका वचा। सूक्ष्मैलागुरुमुस्तञ्च कर्पूरं ग्रन्थिपर्णकं। श्रीवासः कुन्दुरुर्देवकुसुमङ्कस्ममालका। सिह्लकी मिषिका मेथी भद्रमुस्तं तथा शटी। जातीकोषः शैलजञ्च देवदारु सजीवकम्। एतानि गन्धद्रव्याणि॥" तच्छुक्लादिकं पञ्चपल्लवतोयेन भवति। "आमजम्बूकपित्थानां वीजपूरकविल्वयोः। गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम्॥" भैष.। गुणाः—रुच्यं दीपनं पाचनं मुखदौर्गन्ध्यहरं मेदःश्रमघ्नञ्च। रा.नि.व.।

गन्धद्रावकम् । क्ली । अर्कीक्षतौषधविशेषे। द्रावकविशेष। साधनविधिः यथा—'काशीषं गन्धकं वापि सन्दद्येयत्नयोगतः। सोरकञ्चापि (সোরা) सन्दह्य द्वयोर्धूमं विमिश्रयेत्। शीषपात्रेऽम्बुवाष्पेण द्रावकं तेन जायते॥ निर्ज्जलं तत्र सेवेत परं दाहकरं हि तत्। चतुर्दशगुणैस्तोयैर्युतं विन्दुमितं पिबेत्॥' अचि.।

गन्धधूमजः । पुं । स्वादुनि अगुरुसारे । স্বাদু অগুরু । रा.नि.व.१२ ।

गन्धधूलिः (ली) । स्त्री । कस्तूर्य्यां । है.च. ।

गन्धनकुलः । पुं । छुच्छुन्दर्य्याम् । ছুঁচো। हारा. ।

गन्धनाकुली । स्त्री । रास्नायाम् । अम. । (Ophioxylon serpentinum.) नाकुलीनामकन्दशाकभेदे, गन्धरास्नायाम्। সুগন্ধ নাকুলী, গন্ধরাস্না। हिं नाइ। गुणाः—"नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्। भोगिलूतावृश्चिकाखुविषज्वरक्रमिव्रणान्॥" भा.। कटुतिक्तोष्णा त्रिदोषघ्नी विषघ्नी नाकुल्या ईषच्छ्रेष्ठा च। रा.नि.व ६ ।

गन्धनामा (म्नी) । पुं । रक्तपुष्पतुलस्याम् । मं सुवासिक औषधिविशेष। र.मा.। स्त्री (म्नी)। तन्नामकक्षुद्ररोगभेदे। কুগত ফোড়া। "तादृशी महती लेका गन्धनामेति कीर्त्तिता।" वा.उ.३१ अ.। लक्षणं यथा—"एकामेतादृशीं दृष्टा पिड़कां स्फोटसन्निभां। त्वग्जातां पित्तकोपेन गन्धनाम्नीं प्रचक्षते॥" मा नि.। भा.म.४भ.। [त्रिका.।

गन्धनालिका (ली) । स्त्री। नासिकायाम्।

गन्धनिलया । स्त्री । नवमल्लिकायाम्। मं वटमोगरी। श.च.।

गन्धनिशा । स्त्री । गन्धहरिद्रायाम्। আমআদা। मं आंबेहलद। रा.नि.व.६ ।

गन्धपत्र(क)म् । क्ली। तेजपत्रे। वै.निघ.अर्शः. चि.कनकार्णवरसे। सुगन्धपत्रविशेषे। পচাপাত। "गन्धाढ्या सौरभेयी च गन्धपत्रं नपुंसकं।" गुणाः—गन्धपत्रं वातहरं शीतलं वह्निवर्द्धनम्। रा.नि. व.१०। प्रसारणीपत्रे। গন্ধভাদুলের পাতা। सुदर्शनचूर्ण.ज्व.चि.। पुं। श्वेततुलस्याम्। मरुवकवृक्षे। গন্ধতুলসী, নাগদনা इति केचित्। वर्व्वरे। কাল বাবুই। रा.नि.व.१०। नागरङ्गवृक्षे। विल्ववृक्षे। रा.नि.व.११।

गन्धपत्रा (त्रिका) (त्री) । स्त्री। मालवे प्रसिद्धगन्धपलाश्याम्। पलाशनाश इति दाक्षिणात्याः। শটীবিশেষ, গন্ধশটী, আম আদা। अजमोदायाम्। वनयमानी। रा.नि.व.६। गङ्गापत्र्यां। পত্রশাকবিশেষ। रा.नि.व.१०। अश्वगन्धायां। अम्बष्ठायाम्। আকনাদি। रा.नि.व.४।

गन्धपर्णम् । क्ली । काकपुष्पे।

गन्धपलाशजा (शिनी) । स्त्री। वंशलोचनभेदे। वै.निघ.।

गन्धपलाशिका (शी) । स्त्री। (Curcuma amhaldi zerumbet.) गन्धशट्याम्,

तन्नामकसुगन्धद्रव्ये । गन्धपलाशीति काश्मीरे प्रसिद्धा । गन्धशटी, आम आदा । मं कापूरकाचरी, आंबेहलद । गुणाः —"भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः । तिक्ता तीक्ष्णा च कटुकानुष्णास्य-मलनाशिनी । शोथकासव्रणश्वासशूलहिक्काग्रहापहा ॥" भा. । कटुः स्वादुः तीक्ष्णोष्णा वातकफघ्नी कासच्छर्दिघ्नी पित्तकोपनी च । रा.नि.व.६ । (का) हरिद्रायां ; हारा. । [८भेद । वै.निघ. ।

गन्धपल्लवा । स्त्री । गन्धपलाश्याम् । शटी-

गन्धपाषाणः । पुं । गन्धके । र.मा.। भैष.कुष्ठ. चि. ।

गन्धपिण्डिका । स्त्री । गन्धकजारणमारणार्थं सगन्धकपिष्टी । "शुद्धसूतपलैकन्तु कर्षैकं गन्धकस्य च । खिन्नखल्ले विनिक्षिप्य देवदालीरसप्लुतम् । मर्द्दयेच्च कराङ्गुल्या जायते गन्धपिण्डिका ॥" र.चि. ५अ. ।

गन्धपिण्डीरः । पुं । कृष्णमदनवृक्षे । काल मयना गाछ । मं कालेगैँल । वै.निघ. ।

गन्धपिशाचिका । स्त्री । धूपे । हे.च. । कुन्दुरुर्याम् । वै.निघ. ।

गन्धपीता । स्त्री । गन्धपत्रायाम् । रा.नि.व. ६ । गन्धशट्याम् । वै.निघ. ।

गन्धपुष्पः (कः) । पुं । (Calarpus Rotang.) वेतसवृक्षे । বেত গাছ । बहुवारवृक्षे । रा.नि.व.६।११ । अङ्कोटवृक्षे । আঁকোড় গাছ । जटा. । अशोकवृक्षे । नीलीवृक्षे । वै.निघ. ।

गन्धपुष्पा । स्त्री । गणिकारिकापुष्पवृक्षे । केतक्याम् । কেয়া গাছ । रा.नि.व.१० । नील्यां । रा.नि.व.४ ।

गन्धपूतना । स्त्री । पूतनाभेदे ।

गन्धप्रियङ्गुः । पुं, स्त्री । प्रियङ्गुभेदे । প্রিয়ঙ্গু লতা । हिं फुलप्रियङ्गु । मं गहूला । गुणाः— तीक्ष्णः तिक्तः वृष्यः शीतलः केश्यः वान्तिभ्रान्तिदाहपित्तरक्तज्वरमोहस्वेदकुष्ठमुखजाड्यतृष्णाहरः वातं गुल्मं विषं मेदं मेहञ्च नाशयेत् । बीजं—कषायं मधुरं शीतलं रुच्यं ग्राहि गुरु रक्तपित्तघ्नं मलविष्टम्भि बल्यं पित्तघ्नं कफघ्नम् आध्मानकरञ्च । वै.निघ. ।

गन्धफणिज्झकः । पुं । रक्ततुलसीवृक्षे । र.मा. ।

गन्धफलः । पुं । कपित्थवृक्षे । बिल्ववृक्षे । तेजःफलवृक्षे । रा.नि.व.११ ।

गन्धफला । स्त्री । प्रियङ्गुवृक्षे । श.र. । मेथिकायाम् । शल्लकीवृक्षे । रा.नि.व.६।११ । मुरामांस्याम् । वै.निघ. । [व.६ ।

गन्धफलिका । स्त्री । स्थूलैलायाम् । रा.नि.

गन्धफली । स्त्री । प्रियङ्गौ । वै.निघ. । चम्पककलिकायाम् । চাঁপার কলি । रा.नि.व.१० ।

गन्धवधूः । स्त्री । शट्याम् । मं कापूरकाचरी, कचोरा । चिरानामगन्धद्रव्ये, चीड़ानामदेवदारुभेदे । रा.नि.व.१२ ।

गन्धबन्धुः । पुं । आम्रवृक्षे । रा.नि.व.२३ ।

गन्धबह(हु)लः । पुं । सुगन्धशालिधान्ये । वै.निघ. । सितार्ज्जकवृक्षे । শ্বেতপত্র ক্ষুদ্র তুলসী । रा.नि.व.१० । स्त्री । श्वेतार्ज्जके । বাবুই । मं श्वेतआजवला । गोरक्षचिञ्चायाम् । रा.नि.व.५ ।

गन्धभद्रा । स्त्री । प्रसारण्यां । গন্ধভাদুলিয়া । मं गंधलीलता । श.च. ।

गन्धभाण्डः । पुं । गर्द्दभाण्डवृक्षे । श.र. । आम्रातके । আমড়া । च.सू.४अ. ।

गन्धभेदकः । पुं । कटके । काचके । लौहे । तिलके । रा.नि.व.२३ ।

गन्धमांसी । स्त्री । A kind of Indian spikenard. सुगन्धजटामांस्याम् । मं कं बहुलगन्धजटामांसी । गुणाः—तिक्ता शीता कफघ्नी कण्ठरोगघ्नी रक्तपित्तहरी विषघ्नी भूतज्वरघ्नी । रा.नि.व.१२ ।

गन्धमातृका । स्त्री । गन्धमात्रेति प्रसिद्धे वणिग्द्रव्ये । भैष.स्त्रीरोग.उत्पलादिः ।

गन्धमादनः । पुं। गन्धके । भ्रमरे । वानरविशेषे । मे. । लूतादिकीटविषघ्नागदविशेषे । "नतरीध्रवचाकट्वीपाठेलापत्रकुङ्कुमैः ।" वा.उ.३७अ. ।

गन्धमाद(दि)नी । स्त्री । चीड़ानामदेवदारुभेदे । आम्रवृक्षे । रा.नि.व.१२।२३। लाक्षायां । रा.नि.व.६ । वन्दाके । मुरामांस्याम् । रा.नि.व. १२ । सुराविशेषे । त्रिका. ।

गन्धमार्ज्जारः । पुं । The civet cat.

लीमगमार्ज्जारे। গন্ধগোকুল। जटा.। मार्ज्जारीनामौषधी।

गन्धमार्ज्जारवीर्य्यम्। क्ली। गन्धमार्ज्जारा-ण्डोद्भवकस्तूर्य्याम्। খাটাসী। गौरासाखभेदे। हिं खांड़ी। गुणाः—"वीर्य्यंशत्वाफवातहृत्। कण्डूकुष्ठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत्॥" भा.।

गन्धमालती। स्त्री। गन्धकोकिलानामगन्धद्रव्यविशेषे। भा.। [नाम्नी।

गन्धमाला। स्त्री। क्षुद्ररोगभेदे। See गन्ध-

गन्धमालिनी (ल्या)। स्त्री। मुरामांस्याः। जटा.। सुगन्धशाली। रा नि.व.१६।

गन्धमुण्डः। पुं। पारीषाश्वत्थे। পলাশপিপুল, গন্ধভাদুলিবিশেষ, গন্ধমুণ্ডবেঁটু। हिं गन्धियाभांट्. गजहुण्ड। भा.। See पारीषाः।

गन्धमूलः (कः)। पुं। कुलञ्जनवृक्षे। रा.नि.व.६। बालके। বালা। वै.निघ.। शठ्याम्। श.र.।

गन्धमूला। स्त्री। शठ्याम्। शल्लकीवृक्षे। रा.नि.व.११। स्थलकमलिन्यां। रास्नायां। वै.निघ.।

गन्धमूलिका (ली)। स्त्री। गन्धशठ्याम्। माकन्द्याम्। रा.नि.व.६।७। अम.।

गन्धमूषिकः (षिका) (षी)। पुं, स्त्री। छुच्छुन्दरे। ছুঁচা। त्रिका.। हे.च.।

गन्धमृगः। पुं। खट्टाशे। গন্ধগোকুল, খাটাশ। मं जवादीमांजार। श.मा.। [वै.निघ.।

गन्धमृत्पुष्पः। पुं। कदम्बवृक्षे। কদম গাছ।

गन्धमेदिनी। स्त्री। चम्पककलिकायाम्। চাঁপার কলি। वन्दाके। মান্দরা। रा.नि.व.१०।

गन्धमैथुनः। पुं। वृषभे। ষাঁড়। त्रिका.।

गन्धमोदनः। पुं। गन्धके। रा.नि.व.१३।

गन्धमोहिनी। स्त्री। चम्पककलिकायाम्। वै.निघ.। वन्दायाम्। रा.नि.व.१२।

गन्धरसः। पुं, क्ली। सुगन्धबोले। খুনখারাপি, ফুলসড় গন্ধবোল। त्रिका.। खाट्टासिकायाम्। খাটাশী। च.द.वा.व्या.एलादितैले। (सा) स्त्री। मुरामांस्याम्। वै.निघ.।

गन्धराजः (कः)। पुं, क्ली। मुद्गरपुष्पवृक्षे। গন্ধরাজ ফুলের গাছ। रा.नि.व.१०। स्वनामख्यातद्रव्ये। খাটাশী, গন্ধরাজ। See नवादिः। कणगुग्गुलौ। श्रीखण्डचन्दने। শ্বেত চন্দন। कृष्णागुरुणि। रा.नि.व.१२। नखीनामगन्धद्रव्ये। वै.निघ.।

गन्धराजतैलम्। क्ली। वातव्याधौ तैले। पाठः—"तिलतैलाढ़के क्षिप्वा तक्रं तत्परिमाणकं। वचाचतुष्पलं दत्त्वा शुक्तं तत्र चतुर्गुणम्॥ त्रिफलायाः पलान्यष्टौ मञ्जिष्ठायास्तथैव च। पुनरष्टपलान्यस्या अर्द्धदग्धानि दापयेत्॥ पूगचेलशठीपत्रशरणाम्बुददारुणः। पलान्यष्टौ विनिक्षिप्य छ्वस्य तु पलद्वयम्॥ आद्ये पाके पचेदित्थं तैलं यावच्चतुर्गुणं। गालयित्वापरङ्कुर्य्यात्तत्र पाकत्रयम्बुधः॥ चण्डादलमरुच्चत्वालकपत्रीकोलशैलजं। विषाणवीरणग्रन्थिदेवताकुसुमानि च॥ प्रत्येकमेषाञ्चत्वारि पलान्यादाय गान्धिकः। पाकं द्वितीयं तैलस्य कारयेत्क्रमयोगतः॥ पृक्कामांसी मुरा बालं मदनं कल्लिकामली। न गुरु काष्ठखोटी च चम्पकुन्दप्रियङ्गवः॥ एषां खट्टासिकायाश्च प्रत्येकञ्च पलद्वयम्। आदाय कारयेत्पाकं तृतीयङ्गन्धकोविदः॥ फणिलावल्लताकोलफलैलागुरुसिह्लकैः। त्वक्क्षीषाकैर्हिंपलिकैरिति पाकश्चतुर्थकः॥ वेधः पलयुगेनेन्दोर्मदस्य त्वष्टभिः पलैः। गन्धराजाह्वयं तैलमिदं नृपमनोहरम्॥" তিলতৈল ১৬ শ. তক্র ১৬ শ. কাঁজি ৬০ শ. কল্কার্থ—যথাবিধি বচ ৪ প. ত্রিফলা, মঞ্জিষ্ঠা, অর্দ্ধভৃষ্ট মঞ্জিষ্ঠা প্রত্যেকে ৮ প. গুবাকপুষ্পত্বক্, তেজপত্র, শটী, সরলকাষ্ঠ, মুতা, দেবদারু মিলিত ৮ প. কুন্দুরুখোটী ২ প. ইহা দ্বারা প্রথম গন্ধপাক করিবে। শোধিত চোরহুলী, তেজপত্র, মরুবা মৌরী, গুড়ত্বক্, দনা, শিলারস, এলা, কুড়, দেবহুলী, গেঁঠেলা, উশীর প্রত্যেকে ৪ প. পূর্ব্বকল্ক ছাঁকিয়া ইহা দ্বারা ২য় গন্ধপাক করিবে। শুদ্ধ পিড়িং, জটামাংসী, মুরামাংসী, বালা, লবঙ্গ, ছল্লীপুষ্প (ছলনা), ভুঁই আমলা, অগুরু, লবণখোটী, চম্পকপুষ্প, কুন্দপুষ্প, প্রিয়ঙ্গু, খাটাশী প্রত্যেকে ২ প. ৩য় গন্ধপাক। শ্বেত চন্দন, লবঙ্গলতা, কস্তূরী, কক্কোল, জায়ফল, এলা, অগুরু, শিলারস, গুড়ত্বক্, জয়িত্রী, কুঙ্কুম প্রত্যে-

কে ২ প. ৪র্থ গন্ধপাক। ছাঁকিয়া কর্পূর ১৬ তো. মৃগনাভি ৬৪ তো. মিশাইবে। रस.र.।

गन्धराजी । स्त्री । नख्याम् । नखी । श.च. ।

गन्धर्व्वः । पुं । श्वेतकरवीरे । श्वेतैरण्डे । च.द. वा.रक्त.चि.अमृताद्यष्टते । कस्तूरीमृगे । अश्वे । अम. । कोकिले । रा.नि.व.२३ ।

गन्धर्व्वगन्धः (न्धा) । पुं,स्त्री । अश्वगन्धायां । भा.म.४भ.स्नायुरोगे । उ.ख.वाजी. ।

गन्धर्व्वग्रहः । पुं । उन्मादविशेषे । "हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियगीतगन्धमाल्यः । नृत्यन् वै प्रहसति चारु चाल्पशब्दं गन्धर्व्वग्रहपरिपीड़ितो मनुष्यः ।" मा.नि. ।

गन्धर्व्वतैलम् । क्ली । एरण्डतैले । भा. ।

गन्धर्व्वभूषणम् । क्ली । सिन्दूरे । वै.निघ. ।

गन्धर्व्वशाका । स्त्री । भार्ग्यां । বামনহাটী । र.मा. ।

गन्धर्व्वहस्तः (कः) । पुं । एरण्डवृक्षे । हारा. ।

गन्धर्व्वहस्तकतैलम् । क्ली । ब्रध्नवृद्ध्यधिकारे तैलम् । पाठः—"शतमेरण्डमूलस्य पले शुण्ठ्या य वाढ़कम् । जलद्रोणे विपक्तव्यं यावत्पादावशेषितं । तेन पादावशेषेण पयसा तत्समेन च । प्रस्थमेरण्डतैलस्य तन्मूलाच्च चतुष्पलम् । त्रिपलं शृङ्गवेरञ्च सर्व्वं दत्त्वा विपाचयेत् ॥" रस.र. ।

गन्धर्व्वा । स्त्री । कोकिलायाम् । वै.निघ. ।

गन्धलता । स्त्री । प्रियङ्गौ । भा.म.१भ.रक्तष्ठी.चि. ।

गन्धलोलुपा । स्त्री । मक्षिकायाम् । श.र. ।

गन्धवती । स्त्री । त्रिपुरमल्लिकायाम् । प.मु. । वनमल्लिकायाम् । সেউতী । र.मा.। मुरामांस्यां । रा.नि.व.१२ । सुरायाम् । मे. । तालीशपत्रे । वनयमान्याम् । वै.निघ. ।

गन्धवर्णा । स्त्री । महाबलायाम् । वै.निघ. ।

गन्धवल्कलम् । क्ली । गुड़त्वङ्नामगन्धद्रव्ये । দারচিনি । रा.नि.व.६ ।

गन्धवल्लरी (वल्ली) । स्त्री । महाबलायाम् । सु.सु. । पीतपुष्पदण्डोत्पलायाम् । ডানিপোলা । र.मा.। [चन्दने । हे.च. । वायौ । रा.नि.व.२१।

गन्धवहः (वाहः, कः) । पुं । कस्तूरीमृगे ।

गन्धव(वा)हा । स्त्री । नासिकायां । रा.नि. व.१८ । हे.च. ।

गन्धवासिनी । स्त्री । मुरामांस्याम् । वै.निघ.।

गन्धवाही (इन्) । पुं । वायौ । रा.नि.व.२१।

गन्धविह्वलः । पुं । गोधूमे । वै.निघ. ।

गन्धवीजः । पुं । कुलिञ्जनवृक्षे । वै.निघ. । (जा) स्त्री । मेथिकायाम् । रा.नि.व.६ ।

गन्धवीरा । स्त्री । सल्लकीवृक्षे । वै.निघ. ।

गन्धवृक्षः (कः) । पुं । शालवृक्षे । सर्ज्जवृक्षे । रा.नि.व.९ । शाकतरौ । वरुणवृक्षे । वै.निघ. ।

गन्धवेधिका । स्त्री । कस्तूर्य्याम् । वै.निघ. ।

गन्धव्याकुलम् । क्ली । कक्कोले । श.च. ।

गन्धशटी । स्त्री। स्वनामख्यातौषधौ। गन्धपलाश्याम् । গন্ধশটী, গন্ধপলাশী । श.र. । See गन्धपलाशी । [व.७ ।

गन्धशाकम् । क्ली । गौरसुवर्णशाके । रा.नि.

गन्धशालिः । पुं । सुगन्धशालिधान्यविशेषे । সুগন্ধ ধান, কলমাশালি । प.मु. । गुणाः—मधुरः अतिरुच्यः पित्तदाहारुचिश्रमरक्तशान्तिकरः स्तन्यकरः गर्भस्थिरतादायकः ईषद्वातकरः पुष्टिकरः ईषत्कफकरः बलदश्च । रा.नि.व.१६ ।

गन्धशुण्डिनी । स्त्री । छुच्छुन्दर्य्याम् । रा.नि. व.१९ । [हारा. ।

गन्धशेखरः । पुं । कस्तूर्य्याम् । মৃগনাভি ।

गन्धसम्भवा । स्त्री। सुगन्धशालौ। रा.नि.व.१६।

गन्धसारः । पुं । चन्दनसामान्ये । प.मु. । श्रीखण्डचन्दने । শ্বেত চন্দন । रा.नि.व.१२ । "घनसारो गन्धसारः ।" सा.कौ. । गन्धशट्याम् । रा. नि.व.६ । मुद्गरपुष्पवृक्षे । रा.नि.व.१० । गन्धके । वै.निघ. ।

गन्धसारणः । पुं । वृहन्नख्याम् । र.मा. ।

गन्धसूची । स्त्री । आम्रातके । मं आंवाड़ी । वै.निघ. ।

गन्धसूयी । स्त्री । क्षुद्रकुच्छुन्दर्य्याम् । वै.निघ.।

गन्धसेवि । क्ली । रौहिषतृणे । রামকর্পূর । वै.निघ. । [বামলী । বিকা. ।

गन्धसोमम् । क्ली । कुमुदे । নালফুল । শ্বেত-

गन्धा । स्त्री । मङ्गल्यागुरुणि । शल्याम् । रा.नि.व.१२ । अजमोदायाम् । रा.नि.व.६ । शालपर्ण्याम् । अ.टी.भ. । वनतुलस्याम् । वंशलोचनाभेदे । कुकुन्दर्याम् । प्रियङ्गौ । वै.निघ. । सुवर्णचम्पककलिकायाम् । श.र. ।

गन्धाखुः । पुं । कुकुन्दर्याम् । ছুঁচা । हारा. ।

गन्धागुरु । क्ली । मङ्गल्यागुरुणि । वै.निघ. ।

गन्धाजीवः । पुं । गन्धवणिजि । जटा. ।

गन्धाज्ञता । स्त्री । गन्धाननुभवे । वै.निघ. ।

गन्धाढ्यम् । क्ली । चन्दने । श्रीखण्डचन्दने । শ্বেত চন্দন । गन्धराजे । থাটাশী । रा.नि.व.१२ । वकुलपुष्पे । वै.निघ. । पुं । नागरङ्गके । रा.नि.व.११ ।

गन्धाढ्या । स्त्री । स्वर्णयूथिकायाम् । तरणीपुष्पवृक्षे । आरामशीतलायाम् । পত্রশাকবিশেষ । रा.नि.व.१० । वनबीजपूरवृक्षे । বুনো লেবু । सुरामांस्याम् । रा.नि.व.११।१२ । सुगन्धशाल्यौ । रा.नि.व.१६ । गन्धाल्याम् । গাঁধালি । श.च. । कस्तूर्यां । मृगनाभि । जवादिकस्तूर्यां । अरण्यशेवत्यां । फूलविशेष । जातीपत्र्याम् । वै.निघ. ।

गन्धादि । क्ली । व्रणकेशरे । वै.निघ. ।

गन्धाधिकम् । क्ली । व्रणकुङ्कुमे । रा.नि.व.१२ ।

गन्धाधि(रि)का । स्त्री । महाशतावर्याम् । গুল্ফা, বড়িশোপ । रा.नि.व.४ ।

गन्धानी । स्त्री । सुगन्धशाल्यौ । धूम्रपत्रायाम् । रा.नि.व.१६।२१ ।

गन्धान्नः । पुं । गन्धशाल्यौ । प.मु. ।

गन्धामृतरसः । पुं । वाजीकरणाधिकारे । "भस्मसूतं द्विधा गन्धं चणकाम्लां विमर्दयेत् । रुद्ध्वा लघुपुटे पश्चाल्लेहयेन्मधुसर्पिषा । निष्कमात्रं जरामृत्यू हन्ति गन्धामृतो रसः ॥" रस.र. ।

गन्धारिः (री) । स्त्री । दुरालभायाम् । रक्तदुरालभायाम् । गन्धपलाश्याम् । आमहरिद्रायां । वै.निघ. ।

गन्धालः (लुः) । पुं । गन्धशाली । रा.नि.व.१६ । दग्धालुके ।

गन्धाला । स्त्री । अग्निमन्थक्षुपे । वै.निघ. ।

गन्धालिः (लिका) (ली) । स्त्री । गन्धप्रसार्याम् । प.मु. । (ली) प्रसारण्याम् । গন্ধভাদুলে । सा.कौ. । जातीफलायाम् । कीटविशेषे । কুমীরে পোকা । वै.निघ. ।

गन्धालीगर्भः । पुं । सूक्ष्मैलायां । रा.नि.व.१२ ।

गन्धाश्मा पुं । गन्धके । গন্ধক । रा.नि.व.१२ । यक्ष्मणीकवाटरसे । च.द.रसमञ्जूरे ।

गन्धाश्वः । पुं । अश्वगन्धायां । भैष.कुष्ठ.चि. ।

गन्धाष्टकम् । क्ली । सुगन्धाष्टद्रव्यगणे । तच्च नानाविधम् । तत्र मांसादियूषसुगन्धीकरणार्थं यथा —जातीपत्रलवङ्गत्वगेलानागकेसरमरिचमृगनाभयः । रावण. । देवतादितुष्ट्यर्थं यथा —चन्दनकर्पूर नागकेशर बालक नागरमुस्ता देवदारु गोरोचना कुसुमानि । तथा चन्दनागुरुकर्पूररोचनाकुङ्कुममृगमदचन्दनह्रीवेराणि गणपतिप्रीत्यर्थम् । चन्दनागुरुकर्पूरतमालह्रीवेरकुङ्कुमकुशीदकुष्ठानि शिवस्य । "चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः । जटामांसी कपियुता शक्तेर्गन्धाष्टकं विदुः ॥" "चन्दनागुरुह्रीवेरकुष्ठकुङ्कुमसंज्ञकाः । जटामांसी मुरा चेति विष्णोर्गन्धाष्टकं विदुः ॥"

गन्धाह्वा । स्त्री । प्रियङ्गौ । सु.चि.८अ. ।

गन्धि । क्ली । व्रणकुङ्कुमे । रा.नि.व.११ ।

गन्धिकः । पुं । गन्धके । भा. ।

गन्धिनी । स्त्री । मुरामांस्याम् । अम. । पीतमूल्याम् । रेउचिनीति केचित् । रुसीमस्तुरीति च अन्यः ।

गन्धिपर्णः । पुं । सप्तपर्णवृक्षे । रा.नि.व.१२ ।

गन्धिरसः । पुं । गोपके । निशादल ।

गन्धिला । स्त्री । मुस्तायाम् । रा.नि.व.६ ।

गन्धी (इन्) । पुं । कस्तूरीमृगे । वै.निघ. ।

गन्धोग्रा । स्त्री । वचायाम् । च.द.वा.व्या.चि. ।

गन्धोतुः । पुं । सुगन्धमार्जारे । গন্ধ গোকুল । त्रिका. ।

गन्धोत्कटः (टा) । पुं, स्त्री । दमनकवृक्षे । दना गाछ । रा.नि.व.१०। सुरामांस्याम् । वै.निघ.।

गन्धोत्तमा । स्त्री । मदिरायाम् । अम. ।

गन्धोपला । स्त्री । गन्धके । वै.निघ. ।

गन्धोलिः (ली) । स्त्री । शठ्याम् । श.र. । वरटायाम् । বোলতা । अम. । मक्षिकाविशेषे । কুমীরা মাছি । कर्कटीभेदे । वै.निघ. ।

गन्धौषधम् (धिः) । क्ली, पुं । सुगन्धिद्रव्यरूपौषधौ अगुरुकुष्ठादौ । सि.यो.वा.व्या.चि. । च. सू.३अ. ।

गभोलिकः । पुं । मयूरे । हारा. ।

गमूर्च्छा । स्त्री। मरुया इति ख्यातवृक्षे । र.मा.।

गम्भारिका (री) । स्त्री । वृक्षविशेषे । গাম্ভার গাছ । गुणाः—कटुत्वं तिक्तत्वं उष्णत्वं गुरुत्वं भ्रमशोथज्वरतृष्णाविषदाहनाशित्वञ्च । रा.नि.व.६। तुवरा तिक्ता वीर्य्योष्णा मधुरा गुरुः दीपनी पाचनी मेध्या भेदिनी भ्रमशोषघ्नी तृष्णामशूलार्शोविषदाहज्वरघ्नी च । भा.। फलगुणाः—तिक्तं गुरु मधुरं ग्राहि केश्यं रसायनं मेध्यं शीतलं पित्तदाहघ्नं । राज. । बृंहणं वृष्यं गुरु केश्यं रसायणं वातपित्ततृष्णारक्तक्षयमूत्रविबन्धहरं स्वादुपाकं हिमं स्निग्धं तुवराम्लं दाहतृष्णावातरक्तपित्तक्षतक्षयघ्नञ्च । तद्बीजतैलं—मधुरं कषायं कफपित्तघ्नञ्च । सु.सू.४५अ. । मूलं—अत्युष्णं चित्तरोगे हितञ्च । राज. ।

गम्भीरः । पुं । पक्वजम्बीरे । उणा.। शाकुरुण्डवृक्षे । मातुलुङ्गवृक्षे । शिरीषवृक्षे । वै.निघ.। क्ली । पङ्कजे । वत्सनाभविषे ।

गम्भीरकः । पुं । फणिज्झकवृक्षे । वै.निघ. ।

गम्भीरज्वरः । पुं । अन्तर्वेगान्तर्दाहयुक्तज्वरे । "गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया । आनद्धत्वेन दोषाणां श्वासकासोद्गमेन च ॥" निदान. ।

गम्भीरदृष्टिः । पुं। नेत्ररोगविशेषे । वै.निघ. । See गम्भीरिका ।

गम्भीरपाकः । पुं । अन्तःपाके । वै.निघ. ।

गम्भीरा । स्त्री । तन्नामकहिक्कायाम् । "नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी । तृष्णासकण्ठजिह्वा स्वात्श्वासकासरुजाकरी । अनेकोपद्रववती गम्भीरा नाम सा स्मृता ॥" निदान. ।

गम्भीरिका । स्त्री । वातजन्यनेत्ररोगभेदे । लक्षणं यथा—"दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कुच्यतेऽभ्यन्तरतः प्रयाति । रुजावगाढ़ा च तमक्षिरोगं गम्भीरिकेति प्रवदन्ति धीराः ॥" भा. ।

गरः । पुं । उपविषे । वत्सनाभविषे । रोगे । हे.च. । विषघ्नौषधे । निर्विषद्रव्ययोगजे कृत्रिमविषे । तेनान्तःपाण्डुः कृशोऽल्पाग्निः कासश्वासज्वरार्द्दितश्च भवति । वा. । यथा—"संयोगजन्तु द्विविधं तृतीयं विषमुच्यते । गरः स्यादविषन्तत्र सविषङ्कृत्रिमं यतः ॥" वृद्धकाश्यप. । "दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे ।" च. । "नानाप्राण्यङ्गशमलविरुद्धौषधभस्मणां । विषाणाञ्चाल्पवीर्य्याणां योगो गर इति स्मृतः ॥" वा.उ.३५अ. ।

गरघ्नः । पुं । कृष्णार्ज्जके । कृष्णपत्र क्षुद्र तुलसी । कृष्णपत्रवर्व्वरे । কাল বাবুই । रा.नि.व. १० । टङ्कणक्षारे । वैजयन्तीतुलस्याम् । वै निघ. ।

गरघ्नी । स्त्री । मत्स्यविशेषे । গরই মাছ । गुणाः—मधुरा कषाया वातपित्तकफघ्नी रुचिबलवीर्य्यकरी दीपनी लघुश्च । भा. ।

गरजध्वजम् । क्ली । अभ्रके । वाचस्पतिः ।

गरणम् । क्ली । निगरणे, वमने ।

गरदम् । क्ली । विषे, गरले । रा.नि.व.६ । त्रि । विषदायिनि । [२अ. ।

गरदिग्धः । त्रि । कृत्रिमविषलिप्ते । च.सि.स्था.

गरद्रुमः । पुं । कारस्करवृक्षे । কুঁচিলা গাছ । रा.नि.व.६ ।

गरनाशिनी । स्त्री । देवदालिकायाम् । দেয়াতাড় । मं देवडङ्गरी । वै.निघ. ।

गरभः । पुं । गर्भे । हे.च. ।

गरलम् । क्ली । अहिफेने । वै.निघ. । विषे । अम. । सर्पविषे । तृणपुलके । ঘাসের আটি । हे.च. । जङ्गमविषे । त्रिका. ।

गरला । स्त्री । मधुमक्षिकायाम् । वै.निघ. ।

गरलारिः । पुं । मरकतमणौ । रा.नि.व.१३।

गरव्रतः । पुं । मयूरे । श.र. ।

गरहा । पुं । कालशाके । चिका. ।
गरा (री) । स्त्री। देवताड़वृक्षे । পীতঘোষা। च.टी.ख्या. । निगरणे । धरणी. । [च । श.च. ।
गरात्मकः । पुं, क्ली । शीभाञ्जनवृक्षे, तद्वीजे
गराधिका । स्त्री। लाक्षायाम् । र.मा. ।
गराविवटिका । स्त्री । कासे हिता । पाठः —भागैकः त्रिफलाचूर्णात् द्विभागस्तु कटुत्रयात् । तालीशस्य त्रिभागः स्यादभयायाश्चतुष्टयः । यावन्त्येतानि चूर्णानि तावानेव गुड़ो मतः । मधुना वटिका कार्य्या द्विमाषा मुखधारिणी ॥ प्रयोगा. कास चि. ।
गरुड़ः । पुं । स्वनामख्यातपक्षिणि । स्वर्णमाक्षिके । স্বর্ণমাক্ষিক । र.सा.सं. । गरुड़शाली । रा.नि.व.१६ ।
गरुड़वलिः । पुं । बालरोगशान्त्यर्थं बलिविशेषे । ओं नमो भगवते गरुड़ाय त्र्यम्बकाय··· स्वाहा । च.द.बाल.चि. ।
गरुड़शालिः । पुं । स्वनामख्यातशालिधान्यविशेषे। পক্ষিরাজ ধান। गुणाः—गन्धकारी लघुपाककरः कफपित्तहरः स्वादशूलश्वासनिवारणः ग्रहणी गुल्मकुष्ठघ्नः गुल्मशोधनः ॥ रा.नि.व. १६। "गरुड़ाख्या च वातघ्नो पित्तमूत्रमदापहा ।" चवि.१५ष. । [व.१३ ।
गरुड़ाङ्कितम् । क्ली । मरकतमणौ । रा.नि.
गरुड़ाश्मा पुं । मरकतमणौ । जटा । [ष.।
गरुड़ाहृतः । पुं । सोमलताभेदे । सु.चि.२९
गरुड़ी । स्त्री । गुड़ूच्याम् । रस.र.विष.चि. ।
गरुड़ोत्तो(द्गी)र्णम् । क्ली । मरकतमणौ । रा.नि.व.१३ ।
गरुत् । पुं । पक्षणि । পাখা । अम. ।
गरुत्मान् । पुं । स्वर्णमाक्षिके । रसको. । भैष. वा.रक्त.चि.द्वादशायसे । पक्षिणि । मे. । गरुडे । वे.निघ. ।
गरुद्योधी (इन्) । पुं । भारतीपक्षिणि । ভাক্রুই । चिका. । लावपक्षिणि । वै.निघ. ।
गर्गरः । पुं । A kind of fish, (Pimelodus gagora.) मत्स्यविशेषे । গাগর মাছ । स पीतवर्णः पिच्छिलाङ्गः पृष्ठे बहुरेखायुक्तः शल्कयुक्तः, तथा गर्गरशब्देन वशीकरणीयत्वात् गर्गर इत्युच्यते । गुणाः—शीतलः कफवातकरश्च । रा. नि.व.१७ । मधुरः स्निग्धः वातपित्तघ्नश्च । राज. १प. । "गर्गरः पित्तलः किञ्चिद्वातजित्कफकोपनः ।" भा. ।
गर्गरकम् । क्ली । स्थावरविषान्तर्गतस्वनामकमूलविषभेदे सु कल्प.२अ. । [म. । कलसे ।
गर्गरी । स्त्री । मन्थन्याम्, दधिमन्थनपात्रे । अ·
गर्गाटः । पुं । गर्गरमत्स्ये । हारा. ।
गर्ज्जकः । पुं । मत्स्यविशेषे । গজাড়, শাল মাছ । श.र. ।
गर्ज्जरम् । क्ली । A carrot. स्वनामख्यातमूलशाके । গাজরমূল । मं कं वाटुलामूला । बहुमूलं गि । गुणाः—मधुरं रुच्यं ईषत्कटु कफघ्नं आध्मानक्रिमिशूलघ्नं दाहपित्ततृष्णाघ्नञ्च । रा.नि.व. ७ । रक्तरसोने ।
गर्ज्जरी । स्त्री । रक्तलशुने । वै.निघ. ।
गर्ज्जाफलः । पुं। विकङ्कतवृक्षे । रा.नि.व.११।
गर्त्तः । पुं । श्वभ्रे । গাড় । जटा. । कुकुन्दरे । मे. । रोगविशेषे । श.र. ।
गर्त्तकलम्बुका । स्त्री । गण्डदूर्व्वायाम् । मत्स्याक्ष्याम् । वै.निघ. ।
गर्त्ताटकः । पुं । वनमूषिके । वै.निघ. ।
गर्त्तिका । स्त्री । तन्तुशालायाम् । তাঁৎঘর । हे.च. ।
गर्द्दभः । पुं । स्वनामख्यातपशौ । গাধা । मांसगुणाः—किञ्चिद्गुरु बलप्रदञ्च । वनगर्द्दभमांसं रुच्यं शैत्यकरं बहुवीर्य्यबलकरञ्च । मूत्रगुणाः—कटुत्वं तिक्तत्वम् उष्णत्वं चीरत्वं कफमहावातभूतकम्पोन्मादहरत्वञ्च । रा.नि.व.१७। विकारघ्नं तीक्ष्णं ग्रहणीरोगनुत् । "दीपनं गार्द्दभं मूत्रं क्रमिवातकफापहम् ।" सु.सू.४५ष.। गरभेदोगन्धे । हे.च.। क्ली । कुमुदे । प.मु. । श्वेतकुमुदे । हे.च. । विड़ङ्गे । र.मा. । [च. ।
गर्द्दभकम् । क्ली । श्वेतोत्पले । শ্বেত পদ্ম । हे.

गर्द्दभगदः । पुं । ज्वालागर्द्दभरोगे । लक्षणं नालगर्द्दभशब्दे द्रष्टव्यम् । रा.नि.व.२० ।

गर्द्दभगन्धिका । स्त्री । भार्ग्याम् । वामनहाटी । वै.निघ. । [नि.व.१७ ।

गर्द्दभमांसम् । क्ली । गर्द्दभस्य पिशिते । रा.

गर्द्दभमूत्रम् । क्ली । खरमूत्रे । See गर्द्दभः ।

गर्द्दभशाकः (का, खा) । पुं, स्त्री । भार्ग्याम् । वामनहाटी । जटा. । रा.नि.व.६ ।

गर्द्दभाण्डः । पुं । (Thespesia populnea. Syn. Hibiscus populnes.) प्लक्षवृक्षे । পাকুড় গাছ । रा.नि.व.११ । (Thespesia populneoides.) पारीषाश्वत्थे । গয়া অশ্বথ, পলাশ পিপুল । अम. । स च पत्रकाण्डफलादिभिरश्वत्थवृक्षाकारः । गन्धपिप्पल इति च केचित् भः । गर्द्दपिप्पलीति सारसुन्दरी । मं पारसपिंपल पिंपरी । गन्धमुण्ड इति गन्धीभाट इति सा. कौ. ।

गर्द्दभाह्वयः । पुं । कुमुदे । षण्डे । हे.च. ।

गर्द्दभिका । स्त्री । वातपित्तजक्षुद्ररोगविशेषे । तल्लक्षणं —"मण्डलं वृत्तमुत्सन्नं सरक्तं पिड़काचितं । रुजाकरीं गर्द्दभिकां तां विद्याद्वातपित्तजां ॥" भा. ।

गर्द्दभी । स्त्री । कटभ्याम् । रा.नि.व.२३ । श्वेतापराजितायाम् । श्वेतकण्टकार्य्याम् । रा.नि.व.३।४ । गर्द्दभस्त्रियाम् । दुग्धगुणाः—बलकरत्वं वातश्वासहरत्वं मधुराम्लरसत्वं रुचत्वं दीपनत्वञ्च । दधिगुणाः—रुच्योष्णत्वं लघुत्वं दीपनत्वं पाचनत्वं मधुराम्लरसत्वं रुचिकरत्वं वातघ्नत्वञ्च । नवनीतगुणाः—कषायत्वं वातकफनाशित्वं बलकरत्वं दीपनत्वं लघुपाकित्वं मूत्रदोषकरत्वम् उष्णत्वञ्च । घृतगुणाः—बल्यं दीपनं मूत्रदोषघ्नं लघुपाकम् उष्णवीर्य्यं कषायं कफघ्नञ्च । रा.नि.व.१५ ।

गर्द्धः । पुं । गर्द्दभाण्डवृक्षे । श.च. ।

गर्भः । पुं । भ्रूणे । तेजःसंयोगात् शुक्रं तरलीभूतं च्युतं सत् अनिलसंयोगात् योनिमुखं पतितम् आर्त्तवेन युक्तं गर्भसंज्ञां लभते । ततोऽग्निसोमसंयोगात् संहन्यमानो गर्भो गर्भाशयमनुप्रतिपद्यते । लक्षणं यथा—"गर्भाशयगतं शुक्रमार्त्तवं जीवसंश्रकं । प्रकृतिः सविकारा च तत्सर्व्वं गर्भसंज्ञकं । कालेन वर्द्धितो गर्भः यदाङ्गोपाङ्गसंयुतः । भवेत्तदा स मुनिभिः शरीरीति निगद्यते ॥" भा. । कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः । गर्भः सञ्जायते नार्य्याः सञ्जातो बाल उच्यते ॥ शार्ङ्ग.६अ. । आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत् । नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ॥ भा. । "प्रथमे मासि द्रवीभूतं शुक्रार्त्तवं तिष्ठति, द्वितीये घनः, तृतीये हस्तपादशिरसां पञ्च पिण्डका निर्वर्त्तन्ते अङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति, चतुर्थे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति । गर्भहृदयप्रव्यक्तभावाच्चेतनाधातुरभिव्यक्तो भवति कस्मात्तत्स्थानत्वात्तस्माद्गर्भश्चतुर्थे मास्यभिप्रायमिन्द्रियार्थेषु करोति, पञ्चमे मनः प्रतिबुद्धतरं भवति, षष्ठे बुद्धिः, सप्तमे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरः, अष्टमेऽस्थिरीभवति ओजस्तच्च जातश्चेन्न जीवेन्निरोजस्त्वान्नैर्ऋतभागत्वाच्च, ततो बलिं मांसौदनमस्मै दापयेत्. नवमदशमैकादशद्वादशानामन्यतमस्मिन् जायते । अतोऽन्यथा विकारी भवति । मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाड़ी प्रतिबद्धा, सास्य मातुराहाररसवीर्य्यमभिवहति । तेनोपस्नेहेनास्याभिवृद्धिर्भवति ।...गर्भस्य हि सम्भवतः पूर्व्वं शिरः सम्भवतीति शौनकः, हृदयमिति कृतवीर्य्यः बुद्धेर्मनसश्च स्थानत्वात् । नाभिरिति पाराशर्य्यस्ततो हि वर्द्धते देहो देहिनः । पाणिपादमिति मार्कण्डेयः तन्मूलत्वाच्चेष्टाया गर्भस्य । मध्यशरीरमिति सुभूतिर्गौतमस्तन्निबद्धत्वात् सर्व्वगात्रसम्भवस्य, तत्तु न सम्यक्सर्व्वाङ्गप्रत्यङ्गानि युगपत्सम्भवन्तीत्याह धन्वन्तरिः गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवत् चूतफलवच्च । तद्यथा चूतफले परिपक्के केशरमांसास्थिमज्जानः पृथग्दृश्यन्ते कालप्रकर्षात्तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति । एवं गर्भस्य तारुण्ये सर्व्वेष्वङ्गप्रत्यङ्गेषु सत्स्वपि सौक्ष्म्यादनुपलब्धिः । तान्येव कालप्रकर्षात्प्रव्यक्तानि भवन्ति ।...गर्भस्य केशश्मश्रुलोमास्थिनखदन्तशिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि । मांसशोणितमेदोमज्जहृन्नाभियकृत्प्लीहान्त्रगुदप्रभृतीनि मृदूनि मातृजानि । शरीरोपचयो बलं वर्णः स्थितिर्हानिश्च रसजानि । इन्द्रियाणि ज्ञानं विज्ञानमायुः सुखदुःखादिकञ्चात्मजानि । वीर्य्यमारोग्यं बलवर्णौ मेधा

च तान्यजानि । तत्र यस्या दक्षिणे स्तने प्राक् पयोदर्शनं भवति दक्षिणाक्षिमहत्त्वञ्च पूर्व्वञ्च दक्षिणं सक्थ्युत्कर्षति बाहुल्याच्च पुन्नामधेयेषु द्रव्येषु दौहृदमभिध्यायति । स्वप्नेषु चोपलभते पद्मोत्पलकुमुदाम्रातकादीनि पुन्नामान्येव प्रसन्नमुखवर्णा च भवति तां ब्रूयात् पुत्त्रमियं जनयिष्यतीति तद्विपर्य्यये कन्यां । यस्याः पार्श्वद्वयमुन्नतं पुरस्तान्निर्गतमुदरं प्रागभिहितलक्षणञ्च तस्या नपुंसकमिति विद्यात् । यस्या मध्ये निम्नं द्रोणीप्रभूतमुदरं सा युग्मं प्रसूयते । सु.शा.३अ । तस्य खल्वेवं प्रवृत्तस्य शुक्रशोणितस्याभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्त त्वचो भवन्ति। तासां प्रथमा अवभासिनी नाम सर्व्ववर्णानवभासयति, द्वितीया लोहिता नाम षोड़शभागप्रमाणा तिलकालकाद्यधिष्ठाना, तृतीया श्वेता नाम द्वादशभागप्रमाणा चर्म्मदलाद्यधिष्ठाना, चतुर्थी ताम्राष्टभागप्रमाणा कुष्ठाद्यधिष्ठाना, पञ्चमी वेदिनी नाम व्रीहिप्रमाणा ग्रन्थ्याद्यधिष्ठाना, सप्तमी मांसधरा नाम व्रीहिद्वयप्रमाणा भगन्दराद्यधिष्ठाना । कलाः खल्वपि सप्त धात्वाशयान्तरमर्य्यादाः । ततश्च गृहीतगर्भाणामार्त्तववहानां स्रोतसां वर्त्मान्यवरुध्यन्ते गर्भेण तस्माद्गृहीतगर्भाणामार्त्तवं न दृश्यते । ततस्तदधः प्रतिहतमूर्द्धमागतमपरञ्चोपचीयमानमपरेत्यभिधीयते । शेषञ्चोर्द्धतरमागतं पयोधरावभिप्रतिपद्यते । तस्माद्गर्भिण्यः पीनोन्नतपयोधरा भवन्ति । गर्भस्य यकृत्प्लीहानौ शोणितजौ शोणितफेनप्रभवः फुप्फुसः शोणितकिट्टप्रभव उण्डुकः । असृजः श्लेष्मणश्चापि यः प्रसादः परो मतः । तं पच्यमानं पित्तेन वायुश्चाप्यनुधावति । ततोऽस्यान्त्राणि जायन्ते गुदं वस्तिश्च देहिनः उदरे पच्यमानानामाध्मानाद्रुक्मसारवत् । कफशोणितमांसानां सारो जिह्वा प्रजायते । यथार्थमुष्मणा युक्तो वायुः स्रोतांसि दारयेत् । अनुप्रविश्य पिशितं पेशीर्विभजते तथा । मेदसः स्नेहमादाय शिरास्नायुत्वमाप्नुयात् । शिराणाञ्च मृदुः पाकः स्नायूनाञ्च ततः खरः । आशय्याभ्यासयोगेन करोत्याशयसम्भवम् ॥ रक्तमेदःप्रसादाद्वृक्कौ, मांसासृक्कफमेदःप्रसादाद्वृषणौ, शोणितकफप्रसादजं हृदयं यदाश्रया हि धमन्यः प्राणवहाः, तस्याधो वामतः प्लीहा फुप्फुसश्च दक्षिणतो यकृत् क्लोम च । तद्धृदयं विशेषेण चेतनास्थानमतस्तस्मिंस्तमसावृते सर्व्वप्राणिनः स्वपन्ति । सु.शा,४अ. ।

सद्यो गृहीतगर्भाया लिङ्गानि श्रमो ग्लानिः पिपासा सक्थिसदनं शुक्रशोणितयोरवबन्धः स्फुरणञ्च योनेः । स्तनयोः कृष्णमुखता रोमराज्युद्गमस्तथा । अक्षिपक्ष्माणि चाप्यस्याः सम्मील्यन्ते विशेषतः । अकामतश्छर्द्दयति गन्धादुद्विजते शुभात् । प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते ॥ तदा प्रभृत्येव व्यायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयमुत्कटकासनञ्चैकान्ततः स्नेहादिक्रियां शोणितमोक्षणं चाकाले वेगविधारणञ्च न सेवेत । दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते । स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते ॥ सु.शा.३अ. । आभुग्नोऽभिमुखः शेते गर्भो गर्भाशये स्त्रियाः । स योनिं शिरसा याति स्वभावात्प्रसवम्प्रति ॥” सु.शा.५अ.। शिशौ । सन्धौ । पणसकण्टके । कुक्षौ । (পেট । मे. । अश्वाया गर्भज्ञानलक्षणे—योन्यां वीजग्रहे दृप्तिः लोचनाविलता तथा । सगर्भा ताड़येदश्वं गर्भस्य परिलक्षणम् ॥ काचिन्मूका जड़ीभूता निर्विकारा त्यजेद्वृषम् । काचित्कण्डूयमानाश्वा गर्भिण्यपि प्रहर्षति ॥ काचिद्रागवशाद्वापि समूत्रा ताड़येद्वृषम् । रुणद्धि परुषा काचित् अश्वा पुच्छेन योनिकाम् ॥ विन्यस्तकर्णौ क्रोधाद्वा वृथं दुष्टापसर्पिणी । शूनाधोयोनिभागा च सदा कान्तिविधारिणी ॥ प्रशस्तरम्भा स्निग्धाङ्गी निविड़ोदरबन्धना । गर्भोपलिप्तपार्श्वा च बड़वा गर्भिणी मता ॥ ज.द.१४. ।

गर्भकम् । क्ली। रजनीद्वये। (দুই রাত্রি। है.च.।

गर्भकण्टकः । पुं । पनसवृक्षे । वै.निघ. ।

गर्भकरः । पुं । पुत्रजीववृक्षे । भा. ।

गर्भकोशः (षः) । पुं । गर्भाशये । वै.निघ. ।

गर्भगृहम् । क्ली । अन्तर्गृहे ।

गर्भघातिनी । स्त्री । लाङ्गलीनामक्षुपे । (ই-শলাঙ্গুলি । रा.नि.व.४ ।

गर्भचिन्तामणिः । पुं । गर्भाधिकारे रसः । स चतुर्विधः । १मः—सूतिकाविनोदरसे तुल्यस्थाने स्वर्णदानेन चिन्तामणिर्भवति । र.सा.सं. । २यः—जातीफलं टङ्कणं (সোহাগা) त्रिकटु हिङ्गुल प्र. समभागः । जम्बीररसेन वटी कार्य्या । ३यः—रसः रौप्यं लौहं प्र. २ तो. अभ्रं ६ तो. (मतान्तरे ४ तो.) कर्पूरं वङ्गं ताम्रं जाती-

फलं जयित्री गोक्षुरबीजं शतावरी बला (শ্বেতবলা) गोरक्षतण्डुला (গোরক্ষচাকুলিয়া) प्र. १ तो. जलेन वटी कार्य्या । भा. २र. । ४र्थः—रसः गन्धकः स्वर्णं लौहं रौप्यमाक्षिकं हरितालं वङ्गं अभ्रं प्र. समभागः । ब्रह्मी-वासा-भृङ्गराज-क्षेत्रपर्पटी-दशमूलानां प्रत्येकं रसेन ७ भावना देयाः । वटी १ र. । बृहच्चिन्तामणिः ।

गर्भचर्य्या । स्त्री । गर्भोपचारकर्म्मणि ।

गर्भजरोगः । पुं । स्त्रीरोगे । त्रिका. ।

गर्भण्डः । पुं । नाभिगुड़के । নায়ের গোঁড় । त्रिका. । [नि.व.६ ।

गर्भदः (दा) । पुं, स्त्री । पुत्रजीवद्वक्षे । रा.

गर्भदात्री । स्त्री । पुष्पदात्रीक्षुपे । गुणाः—मधुरा शीता स्त्रीपुष्पदोषपित्तदाहश्रमघ्नी गर्भदा च । रा.नि.व.४ ।

गर्भद्रुतिः । स्त्री । वह्निव्यतिरेकेऽपि रसग्रासीकृतानां लोहानां द्रवत्वे । গ্রাসানন্তর পারার সহিত স্বর্ণাদির দ্রবত্ব । "जम्बीरबीजपूरकचाङ्गेरीवेतसाम्लसंयोगात् । क्षारा भवन्ति सुतरां गर्भद्रुतिजारणे शस्ताः ॥" र.चि.३श्च ।

गर्भदृक् । त्रि । गर्भधारिण्याम् । वै.निघ. ।

गर्भनाड़ी । स्त्री । Umbilical cord. गर्भप्रणाल्याम् । वै.निघ. ।

गर्भनाशः । पुं । गर्भपाते ।

गर्भनाशना । स्त्री । अरिष्टकवृक्षे । রিঠা গাছ । वै.निघ. । [मं कललावी । भा. ।

गर्भनुत् । पुं । लाङ्गलिकायां । विषलाङ्गुलि ।

गर्भपरिस्रवः । पुं । (Secondines.) गर्भवेष्टने । গর্ভপুষ্প । वै.निघ. । [धान । हे.च. ।

गर्भपाकी (इन्) । पुं । षष्टिकव्रीहौ । ষেটে

गर्भपातः । पुं । गर्भजरोगविशेषे । येन पञ्चमषष्ठमासिकगर्भस्य पतनं भवेत् । "ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः ।" सु.नि.२७श्च. । See गर्भस्रावः ।

गर्भपातकः । पुं । रक्तशोभाञ्जनवृक्षे । जटा. ।

गर्भपातनः । पुं । रीठाकरञ्जे । রিঠা । भा. ।

गर्भपात(ति)नी । स्त्री । कलिकारीवृक्षे । विषलाङ्गुलिया । रा.नि.व.४ ।

गर्भपीयूषवल्लीरसः । पुं । स्त्रीरोगाधिकारे रसः । "सूतो गन्धं तथा स्वर्णं लौहं रजतमाक्षिके । हरितालं वङ्गमभ्राप्यभ्रकं समभागिकं । भावना खलु दातव्या रसैरेषां पृथक् पृथक् । ब्रह्मी वासा भृङ्गराजपर्पटं दशमूलकं । सप्तधा भावयेदेयः गुञ्जामानां वटीश्चरेत् ॥" रौप्यं स्वर्णमाक्षिकञ्च । भैष. । See बृहद्गर्भचिन्तामणिः ।

गर्भपोषणम् । त्रि । गर्भपुष्टिकरणे ।

गर्भभाण्डकः । पुं । मदवृक्षे । मद.व.५ ।

गर्भवती । स्त्री । ससत्त्वायां स्त्रियाम् । পোয়াতি স্ত্রী । पुत्रगर्भवतीलक्षणं—पुत्रगर्भयुतायाः नार्य्या द्वितीये मासि गर्भाशयमध्ये गर्भः पिण्डाकारो लक्ष्यते, दक्षिणाक्षिमहत्त्वं प्राग्दक्षिणस्तने स्तन्यं प्रसन्नमुखवर्णता दक्षिणोरोः पुष्टिः, निद्रायां पुन्नामधेयद्रव्येष्वभिलाषः आम्रादिफललाभः इति । कन्यागर्भलक्षणं उक्तविपरीतलक्षणं ज्ञेयम् । नपुंसकगर्भे गर्भोऽर्व्वुदाकृतिः पार्श्वद्वयमुन्नतं पुरस्ताच्च महदिति । भा. । See गर्भिणी ।

गर्भविच्युतिः । स्त्री । रोगादिना गर्भस्य अकालपतने, गर्भस्रावादौ । "कृमिवाताभिघातैस्तु तदेवोपद्रुतं फलं । पतत्यकालेऽपि यथा तथा स्याद्गर्भविच्युतिः ॥" सु.नि.८श्च. ।

गर्भविनोदरसः । पुं । सूतिकाधिकारे रसः । त्रिकटु ३ तो. हिङ्गुलं ४ तो. जयित्री लवङ्गञ्च प्र. ३ तो. स्वर्णमाक्षिकं २ तो. जलेन चणकाकारा वटी कार्य्या । र.सा.सं. ।

गर्भविलासतैलम् । क्ली । गर्भाधिकारे गर्भस्थापनतैले । तिलतैलं मूर्च्छितं १ श. कल्कार्थं—भूकुष्माण्डं दाड़िमपत्रं आमहरिद्रा (কাঁচা হলুদ) शृङ्गाटकपत्रं त्रिफला जातीपुष्पं शतावरी नीलोत्पलं पद्मपुष्पञ्च प्र. १॥० तो. (वा मिलितं १६ तो.) पाकार्थं वारि ८ श. । भैष. ।

गर्भविलासरसः । पुं । गर्भिणीज्वरे रसः । रसगन्धकतुल्यकानां प्र. समं जम्बीरत्रिकटुरसाभ्यां प्र. दिनत्रयं भावयेत् । পারা, গন্ধক, তুঁতে ভস্ম প্রত্যেকে সমান । জম্বীররসে (গোঁড়া লেবু)

৩ দিন ও ত্রিকটুরসে ৩ দিন ভাবনা দিবে। र.चि.८ष.।

गर्भविस्राविणी । स्त्री । एलायां । वै.निघ.।

गर्भशङ्कुः । पुं। मृतगर्भनिःसारणास्त्रे । वै.निघ.।

गर्भशय्या । स्त्री। Uterus. पक्वाशयमध्यवर्त्तिगर्भोत्पत्त्याशये । ययावेष्टितो गर्भः कुक्षौ तिष्ठति । গর্ভাশয়। तस्य रूपम्—"शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता। तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रकीर्त्तिता। यथा रोहितमत्स्यस्य मुखम्भवति रूपतः। तत्संस्थाच तथारूपां गर्भशय्यां विदुर्बुधाः॥" भा.। [च.शा.८ष.।

गर्भशल्यम् । क्ली। गर्भवेदनायाम्, गर्भशूले।

गर्भशातनम् । क्ली। भेषजेन गर्भपातने। পেট খসান। "शातनप्रभृतिभिः विशेषैः बन्धनान्मुच्यते गर्भः।" सु.नि.८ष.।

गर्भशोषः । पुं। गर्भस्य शुष्कतारोगे।

गर्भसम्भवा । स्त्री। स्थूलैलायां। वै.निघ.।

गर्भस्थानम् । क्ली। गर्भाशये। अन्तःपुरे। वै.निघ.। [भरचणयोगे। च.शा.८ष.।

गर्भ(र्भा)स्थापनम् । क्ली। गर्भरक्षणे। ग-

गर्भस्फुरणम् । क्ली। गर्भस्पन्दने सु.शा.१०ष.।

गर्भस्रावः पुं। Abortion. गर्भविद्रवे। चतुर्थमासपर्यन्तं शोणितरूपस्य गर्भस्य विच्युतौ। গা খসা, পেট খসা। स च भयाभिघाततीक्ष्णोष्णपानाशनसेवनादिभिर्भवति। गर्भस्रावनिदानलक्षणे यथा—"भयाभिघाततीक्ष्णोष्णपानाशननिषेवणात्। गर्भे पतति रक्तस्य सशूलं दर्शनम्भवेत्। ग्राम्यधर्म्माध्वगमनयानायासप्रपीडनैः। ज्वरोपवासपतनप्रहाराजीर्णधावनैः। वमनाच्च विरेकाच्च कुन्यनाद्गर्भपातनात्। तीक्ष्णधारोष्णकटुकतिक्तरूक्षनिषेवणात्। वेगाभिघाताद्विषमादासनाच्छमनाद्भयात्। आचतुर्थात्ततो मासात्प्रस्रवेद्गर्भविद्रवः॥" भा.। [তাল গাছ। रा.नि.व.८।

गर्भस्रावी (इन्) । पुं। हिन्तालवृक्षे। श-

गर्भागारम् । क्ली, पुं। शयनगृहे। अन्तर्गृहे। गर्भाशये। रा.नि.व.१८।

गर्भाधानम् । क्ली। प्रथमऋतुस्नानादूर्द्ध्वमनुष्ठेये दशसंस्कारान्तर्गतप्रथमसंस्कारे। तत्क्रमः—"अथास्मै पञ्चविंशतिवर्षाय द्वादशवर्षां पत्नीमावहेत् पित्र्यधर्म्मार्थकामप्रजाः प्राप्स्यतीति। ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिं। यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥ जातो वा न चिरञ्जीवेज्जीवेद्वा दुर्बलेन्द्रियः। तस्मादत्यन्तबालायां गर्भाधानं न कारयेत्॥" सु.शा.१०ष.। [उ.१ष.।

गर्भाम्भः । पुं। गर्भस्थजले। পানভূক্তি। वा.

गर्भारिः । पुं। सूक्ष्मैलायाम्। रा.नि.व.६।

गर्भावक्रान्तिः । स्त्री। गर्भावतरणक्रियायाम्। सु.शा.३ष.। See गर्भः।

गर्भाशयः । पुं। गर्भशय्यायाम्। जरायौ। See गर्भशय्या। [त्रिका.।

गर्भाष्टमः । पुं। गर्भजननमासादष्टममासे।

गर्भिणी । स्त्री। क्षीरावीवृक्षे। ক্ষীরুই গাছ। श.च.। गर्भवत्याम्। लिङ्गं यथा—"स्तनयोर्मुखकार्ष्ण्यं स्याद्रोमराज्युद्गमस्तथा। अक्षिपक्ष्माणि चाप्यस्याः सम्मीलन्ते विशेषतः। छर्द्दयेत्पथ्यं भुक्तापि गन्धादुद्विजते शुभात्। प्रसेकः सदनञ्चैव गर्भिण्या लिङ्गमुच्यते॥" भा.। See गर्भः। तत्कृत्यं यथा—"गर्भिणी प्रथमदिवसात्प्रभृति नित्यम्प्रहृष्टा शुच्यलङ्कृता शुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिनविकृतहीनगात्राणि न स्पृशेत् दुर्गन्धदुर्द्दर्शनानि परिहरेदुद्वेजनीयाश्च कथाः, शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपभुञ्जीत। वहिर्निष्क्रमणं शून्यागारचैत्यश्मशानवृक्षाश्रयान् क्रोधभयशङ्करांश्च भावानुच्चैर्भाष्यादिकं परिहरेत् यानि च गर्भं व्यापादयन्ति। न चाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत। न चायासेच्छरीरं पूर्व्वोक्तानि च परिहरेत्। शयनासनं मृद्वास्तरणं नात्युच्चमपाश्रयोपेतमसम्बाधं विदध्यात्। हृद्यं द्रव्यं मधुरप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत्। सामान्यमेतदाप्रसवात्। विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत, चतुर्थे पयोनवनीतसंसृष्टमाहारयेज्जाङ्गलमांससहितं हृद्यमन्नं भोजयेत्, पञ्चमे क्षीरसर्पिःसंसृष्टं, षष्ठे श्वदंष्ट्रासिद्धस्य सर्पिषो मात्रां पाययेत् यवागूं वा, सप्तमे सर्पिः पृथक्पर्ण्यादिसिद्धमेवमाप्यायते गर्भः, अष्टमे वदरोदकेन बला-

तिवलाशतपुष्पपललपयोदधिमस्तुतैललवणमदनफलमधुघृतमिश्रेणास्थापयेत् पुराणपुरीषशुद्ध्यर्थम् अनुलोमनार्थञ्च वायोः, ततः पयोमधुरकषायसिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखमनुपद्रवा प्रसूयते, नवमे मासि सूतिकागारमेनां प्रवेशयेत् । प्राप्तप्रसवालक्षणं—"जाते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने । सशूले जघने नारी ज्ञेया सा तु प्रजायिनी ॥ ततोपस्थितप्रसवायाः कटीपृष्ठम्प्रति समन्ताद्वेदना भवन्त्यभीक्ष्णं पुरीषप्रवृत्तिः मूत्रं प्रसिच्यते योनिमुखात् श्लेष्मा च ।" सु.शा.१०अ. ।

गर्भिण्यवेक्षणम् । क्ली । कुमारभृत्यायाम् । Midwifery. गर्भिणीपरिचर्य्यायाम् । त्रिका. ।

गर्भी (इन्) । पुं । पुत्रजीववृक्षे । वै.निघ. ।

गर्भपाकणिकः । पुं । षष्टिकधान्ये । रा.नि. व.१६ ।

गर्म्मु(र्म्मो)टिका (टी) । स्त्री । लवणतृणविशेषे । মাড়ুয়া ঘাসবিশেষ বা ধান । हिं जरड़ि । मं गोड़ालवणतृण । गुणाः—मधुरा शीता सारणी दाहघ्नी रक्तदोषघ्नी रुच्या पशूनां दुग्धदायिनी । रा.नि.व.८ । र.मा. ।

गर्म्मुत् । स्त्री । तृणधान्यविशेषे । গড়গড়, মশনা । अम. । सुवर्णे । नले । मे. ।

गलः । पुं । कण्ठे । গলা । रा.नि.व.१८ । सर्ज्जरसे । धूनो । मे. । गड़कमीने । श.र. ।

गलकः । पुं । गड़कमत्स्ये । श.र. ।

गलकम्बलः । पुं । सास्रायाम् । গরুর গলস্থিত কম্বলাকৃতি মাংস । अम. ।

गलकीलः । पुं । गलशुण्डीनामरोगे । वै.निघ. ।

गलगण्डः । पुं । Goitre. गलरोगविशेषे । গলগণ্ড । तस्य निदानं—"वातः कफश्चापि गले प्रदुष्टो मन्ये तु संसृत्य तथैव मेदः । कुर्व्वन्ति गण्डं क्रमशः स्वलिङ्गैः समाचितं तं गलगण्डमाहुः ॥ लक्षणं—निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले । महान्वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ॥" मा.नि. । पक्षिविशेषे । হাড়গিলে ।

गलगोड़ि(लि)का (ली) । स्त्री । सविषकीटविशेषे । यस्य दंशनात् दाहस्वेदतोदशोफा भवन्ति । "दाहतोदस्वेदशोफकरी तु गलगोड़िका ।" च. । निर्विषसर्पविशेषे । सु.कल्प.४अ. ।

गलग्रहः । पुं । मत्स्यघण्टापरनामधेये व्यञ्जने । মাছের ঘণ্ট । श.च. । गलरोगविशेषे । গলাধরা । "यस्य श्लेष्मा प्रकुपितः तिष्ठत्यन्तर्गले स्थिरः । आशु सञ्जनयेच्छोफं जायतेऽस्य गलग्रहः ॥" च.सू.१८अ. । अश्वस्य गलरोगविशेषे । ज.द २९अ. ।

गलग्राहः । पुं । मकरे । वै.निघ. ।

गलत्कुष्ठारिरसः । पुं । तत्कुष्ठे रसः । पारदगन्धकताम्रलौहगुग्गुलुचित्रकशिलाजतुकुचेलावचानां (पाठान्तरे वचास्थाने त्रिफला) प्र. समभागः । अभ्रं ४ भ. करञ्जबीजं ४ भ. घृतमधुभ्यां वटी कार्य्या । পারা, গন্ধক, তামা, লোহ, গুগ্গুল, চিতামূলচূর্ণ, শিলাজতু, কুচিলা, বচ (পাঠান্তরে ত্রিফলা) প্রত্যেকে ১ ভ. অভ্র ৪ ভ. করঞ্জবীজ ৪ ভ. ঘৃত ও মধু দ্বারা মর্দ্দন । মা. ১ তো. । भा. । र.सा.सं. ।

गलन्तिका । स्त्री । कर्कर्य्याम् । বদ্নারা । अम. ।

गलमेखला । स्त्री । गलसूत्रे । हारा. ।

गलरोगः (गिणी) । पुं, स्त्री । कण्ठगतसप्तदशरोगभेदे । तत्र वातपित्तकफसन्निपातशोणितजभेदेन रोहिणी पञ्चधा भवति । अपरे गलशालूक-तुण्डिकेरिका गलौघ-वलय-गलायुक शतघ्नी-गलविद्रधि गलार्व्वुदाः वहिर्गलगण्डः वातज कफज-मेदोजभेदेन स्वरघ्नश्चेति द्वादश । रोहिण्यः पञ्च कण्ठशालूकाधिजिह्ववलयबलासैकवृन्दवृन्दशतघ्नीगिलायुगलविद्रधिगलौघस्वरघ्नमांसतानविदार्य्य इति अष्टादश । लक्षणं—"गलेऽनिलः पित्तकफौ च मूर्च्छितौ पृथक्समस्ताश्च तथैव शोणितं । प्रदूष्य मांसं गलरोधिनोऽङ्कुरान् सृजन्ति यान् सासुहरा तु रोहिणी ॥" सु.नि.१६अ. । कण्ठास्यशोषकृद्वातात् सा हनुश्रोत्ररुक्करी । पित्ताज्ज्वरोषातृण्मोह कण्ठधूमायनान्विता । कफेन पिच्छिला पाण्डुः असृजा स्फोटकाचिता । गम्भीरपाकानिचयात्सर्व्वलिङ्गसमन्विता ॥ वा.उ.२१अ. । लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि ।

गलविद्रधिः । पुं । गलरोगभेदे । কণ্ঠবিদ্রধি । लक्षणं—"सर्व्वङ्गलं व्याप्य समुत्थितो यः शोफो रुजो यत्र वसन्ति सर्व्वाः । स सर्व्वदोषो

गलविद्रधिस्तु तस्यैव तुल्यः खलु सर्व्वजस्य ॥" सु.नि.१६अ. ।

गलव्रतः । पुं । मयूरे । त्रिका.। [ज.द.२८अ.।

गलशालूकः । पुं । अस्य मुखरोगविशेषे ।

गलशुण्डिका (ण्डी) । स्त्री। The uvula. अलिजिह्विकायां । আলজিব, গলার শুঁড়ি । रा.नि.व.१८ । च.शा.७अ. । जिह्वाप्रबन्धजाः वा स्युः दारुणा मार्गरोधिनः । मांसाङ्कुराः शीघ्रचया रोहिणी शीघ्रकारिणी ॥ कण्ठशुण्डीत्यपरनामधेये तालुजरोगविशेषे। लक्षणं यथा—"श्लेष्मासृग्भ्यां तालुमूलात्प्रवृद्धो दीर्घः शोथो ध्मातवस्तिप्रकाशः । तृष्णाश्वासकासकृतं वदन्ति व्याधिं वैद्याः कण्ठशुण्डीति नाम्ना ॥" भा.म.४भ.मुखरो.चि. ।

गलशोथः । पुं । गलस्फीतौ । গলাফোলা । "सनागरं देवदारु चव्यचित्रकपेषितं । प्रलेपनमिदं श्रेष्ठं गलश्वयथुनाशनम् ॥" भैष.ज्व.चि. ।

गलस्तनः । पुं । गलगण्डरोगे । रा.नि.व.२० । छागगलस्थस्तने । वै.निघ. ।

गल(ले)स्तनी । स्त्री। छाग्याम् । हे.च. ।

गला । स्त्री । अलम्बुषायाम् । भा. ।

गलाङ्कुरः । पुं । A disease of the throat. रोहिणीत्यपरपर्य्याये गलरोगविशेषे । गण्डमालायाम् । গণ্ডমালা । हे.च. ।

गलानि(वि)लः । पुं । गङ्गाटेयमत्स्ये । গঙ্গাচিংড়ি । त्रिका. ।

गलायुकः । पुं । गलरोगभेदे। लक्षणं—"मांसकीलो गले दोषैरेकोऽनेकोऽथवाल्परुक् । कृच्छ्रोच्छ्वासाभ्यवहृतिः पृथुमूलो गलायुकः ॥" वा.उ. २१अ. ।

गलार्व्वुदम् । क्ली । गलरोगभेदे । গলার আব্ । लक्षणम्—"जिह्वावसाने कण्ठादावपाकं श्वयथुं मलाः । जनयन्ति स्थिरं रक्तं नीरुजं तद्गलार्व्वुदम् ॥" वा.उ.२१अ. । [rosy. गलत्कुष्ठे ।

गलितकुष्ठम् । क्ली । Incurable lep-

गलितदन्तः । त्रि । दन्तहीने।

गलेगण्डः । पुं । मर्कटपक्षिणि । त्रिका. । गलगण्डरोगे । रा.नि.व,२० ।

गलोद्भवः । पुं । रोचमानाश्वे । त्रिका. ।

गलोघः । पुं । गलरोगविशेषे । तस्य लक्षणं यथा—"शोफो महानन्नजलावरोधी तीव्रज्वरो वातगतेर्निहन्ता । कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्त्यतेऽसौ ॥" सु.नि.१६अ. ।

गल्लः (कः) । पुं । गण्डे । গাল । हे.च. ।

गल्लचातुरी । स्त्री । उपधानविशेषे । গালবালিশ । जटा. ।

गल्लिरः । पुं । उन्मन्थनामककर्णपालीगतरोगे।

गल्वर्कः । पुं । वैदूर्य्यमणौ । इन्द्रनीलमणौ । त्रिका. । सुरापानपात्रे ।

गवयः । पुं । गलकम्बलशून्ये गोसदृशे कूलचरपशौ । तन्मांसगुणाः—बृंहणं बल्यं रुच्यं वृष्यञ्च । रा.नि.व.१७ । स्निग्धं मधुरं कासघ्नं विपाके मधुरं व्यवायवर्द्धनञ्च । सु.सू.४६अ. । [नि.व.१९ ।

गवयी । स्त्री । गवयपत्न्यां । বুনো গাই । रा.

गवयोद्भवः । पुं । तवक्षीरे । वै.निघ. ।

गवराजः । पुं । महावृषे । श.च. ।

गवलम् । क्ली । महिषशृङ्गे । अम. । पुं । वनमहिषे । हे.च. ।

गवाची (टी) । स्त्री । (Macrognathus pancalus.) पङ्कालमत्स्ये । পাঁকাল মাছ । अस्य गुणाः—अजीर्णकारित्वं गुरुत्वं श्लेष्मकोपनत्वञ्च । राज.३प. ।

गवादनम् । क्ली । घासे । श.च. ।

गवादनी । स्त्री । इन्द्रवारुणीलतायाम् । রাখালশশা । वै.निघ.अपस्मा.चि. । श्वेतापराजितायाम् । अक्षीटवृक्षे । वै.निघ. । अपराजितायाम् । नीलापराजितायाम् । रा.नि.व.३ ।

गवालूकः । पुं । गवये । त्रिका. ।

गवाविका । स्त्री । लाक्षायाम् । र.मा. ।

गवाक्षः । पुं । गोक्षुरके । वै.निघ. । वातायने । अम. । [তা । र.मा. ।

गवाक्षिका । स्त्री। गवाक्ष्याम् । অপরাজি-

गवाचितः । त्रि । विरचिते । "येर्गवाचितमिदं शरीरम् ।" भा. ।

गवाक्षी । स्त्री। शाखीटवृक्षे। শ্যাওড়া গাছ। रा.नि.व.८। महाबलायाम्। रा.नि.व.२२। इन्द्रवारुणीलतायाम्। রাখালশশার গাছ। सु.कल्प.७अ.। भा.म.१भ.तन्द्रिकज्व.चि.। "निकुम्भकुम्भत्रिफलागवाक्षी।" गोडुम्बायाम्। রাজগোমুক। च.सू.२अ.। गोरक्षकर्कट्यां। রাখালশশা। सि.यो.कास.चि.। अपराजितायाम्। प.मु.। सु.सू.३९अ.। श्वेतपुष्पेन्द्रवारुण्याम्। सु.सू.३९अ.अधःसंशमने।

गविनः । पुं। कौकड़नामकविलेशयमृगे। जविन इत्यपि पाठः। रा.नि व.१९। [अम.।

गवेड़ुः । स्त्री। धान्यविशेषे। গড়গড়,দেধান।

गवेधुः (कः) । पुं। धुलुधवृक्षे। দেধান। च.सू.२अ.। गोरक्षतण्डुलायाम्। গোরক্ষচাকুলিয়া। च.द.। सि.यो.छर्द्दि.चि.विष्णुतैले, महानारायणतैले। क्ली (कम्)। गैरिके। গিরিমাটী। रा.नि.व.१३।

गवेधुका । स्त्री। (Coixbarbata.) गवेड़ी। দেধান। हिं गरहेडुआ। च.सू.२अ.यवाग्वाम्। गुणाः—गवेधुः कटुका स्वाद्वी कार्श्यकृत्कफनाशिनी। भा.पू.१भ.धान्यव.। नागबलायाम्। গোরক্ষচাকুলে। रा.नि.व.४। भैष.वा.व्या.चि.स्वल्पविष्णुतैले। कासमूले। वा.व्या.शता.नारायणतैले।

गवेरि(रु)कम् । क्ली। गैरिके। গিরিমাটী। त्रिका.।

गवेश(षि)का । स्त्री। गोरक्षीवृक्षे। श.च.।

गव्यम् । क्ली। गोघृते। गोरोचनायाम्। गव्यदधि। गोदुग्धे। त्रिका.। त्रि। गोसम्बन्धीये।

गव्यघृतम् । क्ली। गव्यनवनीतजातघृते। গাওয়া ঘি। गुणाः—बुद्धिकान्तिस्मृतिदं बलमेधावर्द्धकं पुष्टिकरं वातश्लेष्मघ्नं श्रमहरं पित्तघ्नं हृद्यम् अग्निकरं पाकमधुरं वृष्यं देहस्थैर्यकरञ्च। रा.नि.व.१५।

गव्यतक्रम् । क्ली। गोदुग्धभवघोले। গরুর ঘোল। गुणाः—"गव्यं त्रिदोषशमनं पथ्ये श्रेष्ठं तदुच्यते। दीपनं रुचिकृन्मेध्यं अर्शोदरविकारजित्॥" अत्रि.८अ.।

गव्यदधि । क्ली। गोदुग्धजातदध्नि। गुणाः—अतिपवित्रं शीतलं स्निग्धं दीपनं बल्यं मधुरम् अरोचकघ्नं ग्राहि वातरोगघ्नञ्च। रा.नि.व.१५। आम्लं स्वादुरसं ग्राहि गुरूष्णं वातरोगजित्। मेदःशुक्रबलश्लेष्मरक्तपित्ताग्निशोफकृत्। स्निग्धं विपाके मधुरं दीपनं रुचिवर्द्धनं। वातापहं पवित्रञ्च दधि गव्यं रुजाकरम्॥" अत्रि.८अ.।

गव्यनवनीतम् । क्ली। गोदुग्धजनवनीते। গাওয়া ননী। सर्व्वदोषघ्नं बलकृत् पुष्टिवर्द्धनञ्च। रा.नि.व.१५।

गव्यमांसम् । क्ली। गोमांसे। सु.सू.४६अ.।

गव्या । स्त्री। गोरोचनायाम्। रा.नि.व.१२।

गव्यूतिः । पुं, स्त्री। क्रोशद्वये। हे.च.।

गहनम् । क्ली। वने। दुःखे। पीड़ायाम्। वै.निघ.।

गह्वरम् । क्ली, स्त्री। विड़ङ्गे। प.मु.।

गाङ्गम् । क्ली। गङ्गोदके। वै.निघ.।

गाङ्गटः (कः) । पुं। मत्स्यविशेषे। চিংড়ি মাছ। श.र.।

गाङ्गटेयः । पुं। गाङ्गटमत्स्ये। श.र.।

गाङ्गेयम् । क्ली। भद्रमुस्तायाम्। মুতা। सुवर्णे। रा.नि.व.१३। र.चि.६अ.। धुस्तूरे। कशेरौ। अम.। पुं। इल्लीशमत्स्ये। त्रिका.। स्त्री (यी)। मुस्तके। "अथवा वृषगाङ्गेयी।" वा.चि.१अ.।

गाङ्गेरिका । स्त्री। नागबलायाम्। গোরক্ষচাউলী। वै.निघ.।

गाङ्गेरः (कः) । पुं। काकाण्डोक्षुपे। লতাফট্কী, আলাকুশী। वै.निघ.।

गाङ्गेरुकी । स्त्री। गुड़शर्करके। प.मु.। गोरक्षतण्डुलायां। গোরক্ষচাউলি। अम.। "गाङ्गेरुकीमूलरसैर्जायते गतवेदनः।" भा.म.१भ.। तत्फलङ्कषायं हिमं स्वादु कफवातघ्नञ्च। सु.सू.४६अ.।

गाङ्गेष्ठी । स्त्री। कटशर्करालतायाम्। নটা। हारा.।

गाजरम् । क्ली। गृञ्जने। শালগম। भा.पू.१भ.शाकव.। [रा.नि.व.१९.।

गाञ्जि(ञ्जी)कायः । पुं। वर्त्तिकपक्षिणि।

गाढ़म् । त्रि । बहुकालजाते । बद्धमूले । सान्द्रे । सु.नि.६अ. । [सम्भर लवण । रा.नि.व.६ ।

गाढ़लवणम् । क्ली । सम्भरदेशजलवणविशेषे ।

गाण्डीरम् । क्ली । शाकविशेषे । शमठ शाक । सु.सू.४६अ. । [६ ।

गाण्डीवी (इन्) । पुं । अर्ज्जुनवृक्षे । रा.नि.व.

गातुः । पुं । कोकिले । भ्रमरे । मे. ।

गात्रम् । क्ली । देहे, शरीरावयवे । रा.नि.व. १८ । करिणः पूर्व्वजङ्घादिप्रदेशे, अग्रपादादिसम्मुखभागे । मे. ।

गात्रघर्षणम् । क्ली । शरीरमार्ज्जने ।

गात्रभङ्गा । स्त्री । शूकशिम्ब्याम् । श.च. । गन्धशट्याम् । वै.निघ. । [गामछा ।

गात्रमार्ज्जनी । स्त्री । अङ्गमार्ज्जनार्थवस्त्रे ।

गात्रविक्षेपः । पुं । अङ्गचालने, अङ्गविक्षेपणे । वै निघ. । [पूँये पाओया । वै.निघ. ।

गात्रशोषः । पुं । पूतनामबालरोगविशेषे ।

गात्रसङ्कोची (इन्) । पुं । जाहकजन्तौ । कृकलासे । काँकलास, बहुरूपी । रा.नि.व. १९ । गोनसमर्पे । वै.निघ. ।

गात्रसम्प्लवः । पुं । प्लवजातीयपक्षिणि, हंसादौ । हे.च. । [वै निघ. ।

गात्रसादः । पुं । शरीरावसादे । पित्तरोगे ।

गात्रानुलेपनी । स्त्री । गात्रानुलेपनयोग्ये घृष्टपिष्टे सुगन्धिद्रव्ये । अम. ।

गाधः । पुं । स्थाने । लाभेच्छायाम् । हे.च. ।

गानिनी । स्त्री । वचायाम् । वै.निघ. ।

गान्धारम् । क्ली । गन्धरसे । गन्धबोल । त्रिका. । पुं । सिन्दूरे । मे. ।

गान्धारी । स्त्री । कण्टकार्य्याम् । वै.निघ. । दुरालभायाम् । भा. । रा.नि.व.४ ।

गान्धिकः । पुं । कीटविशेषे । गाँधि पोका । श.र. । लेखके । नाना. ।

गाम्भारिका (री) । स्त्री । गम्भारीवृक्षे । गांमार गाछ । मं कं सीवनी । तें गम्भारि । प.मु. ।

गाम्भीर्य्यम् । क्ली । गम्भीरतायाम् ।

गायत्री (इन्) । पुं, स्त्री । खदिरवृक्षे । भ. । अम. । च.द., सि.यो.रक्त.पि.चि.खण्डकाद्यलौहे । "तालमूली च गायत्री ।" खदिरकाष्ठसारे । च.द.यक्ष्म.चि.एलादिमन्थे ।

गायत्रः । पुं । सोमलताभेदे । "गायत्रस्त्रैष्टुभः ।" सु.चि.२९अ. । [ओदने । उणा. ।

गारित्रम् । क्ली । धान्यविशेषे । वै.निघ. ।

गारुड़म् । क्ली । स्वर्णे । मे. । मरकतमणौ । रा.नि.व.१३ । तन्नामविषमन्त्रे । जटा. ।

गारुड़िकः । पुं । विषवैद्ये । श.र. ।

गारुड़ी । स्त्री । पातालगरुड़ीवृक्षे । रा.नि.व.३ ।

गारुत्मतम् । क्ली । मरकतमणौ । रा.नि.व. १३ । वै.निघ.क्षय.चि. । नवरत्नराजमृगाङ्के ।

गारुत्मतपत्रिका । स्त्री । गङ्गापत्र्यां । पाटीलता । रा.नि.व.१० । [रा.नि.व.७ ।

गार्ज्जरम् । क्ली । गर्जरमूलके । गाजर मूला ।

गार्द्धः । त्रि । आयूने । क्ली (र्द्धं) । आयूनतायां ।

गार्भः (र्भिकः) । त्रि । गर्भसम्बन्धिनि ।

गालः । पुं । मदनवृक्षे । प मु. । वा.ज्व.चि.१ अ. । "पिप्पलीभिर्युतान् गालान् ।"

गालनम् । क्ली । वस्त्रपूतकरणे । छाँका ।

गालफलम् । क्ली । मदनफले । वै.निघ. ।

गालवः । पुं । लोध्रवृक्षे । मे. । श्वेतलोध्रे । अ. टी.भ. । केन्दुकवृक्षे । केँद गाछ । श.च. ।

गालोद्यम् । क्ली । पद्मबीजे । रा.नि.व.१० ।

गाहितः । त्रि । कम्पिते । स्नाते । वै.निघ. ।

गाक्षीरी । स्त्री । क्षीरशुक्लायाम् । प.मु. ।

गिरणम् । क्ली । भक्षणे । वै.निघ. ।

गिरिः । पुं । चक्षूरोगविशेषे । मे. । पर्व्वते । रा.नि.व.२ । स्त्री । गिलने । अम. । बालमूषिकायाम् । अ.टी.र. । पारददोषविशेषे । रवा. ।

गिरिकः । पुं । गिरिनिम्बे । महानिम्ब । वै. निघ. ! [६ । वा.उ.२अ. ।

गिरिकदम्बः । पुं । धाराकदम्बे । रा.नि.व.

गिरिकदली । स्त्री । पार्व्वतीयकदलीवृचे । गुणाः—मधुरा हिमा बल्या वीर्य्यवर्द्धनी रुच्या तृष्णापित्तदाहशोषहरी गुरुः दुर्ज्जरा च । रा.नि.व.११ ।

गिरिकर्णि: (र्णी) । स्त्री । इन्द्रवारुण्याम् । रा.नि.व.२३ । पाण्डुरापराजितायाम् । रा.नि.व.३ । See श्वेतापराजिता । कृष्णापराजितायाम् । काल अपराजिता । गुणाः—शीतला तिक्ता पित्तोपद्रवघ्नी चक्षुष्या विषदोषघ्नी त्रिदोषघ्नी । भा. । अस्फोतायाम् । शापरमाली । र.मा. । दुरालभायाम् । श च. ।

गिरिकर्णिका । स्त्री । अपराजितायाम् । अपराजिता । सु.सू.३९अ. । श्वेतकटभीवृचे । रा.नि.व.९। श्वेतकिणिह्याम् । आरग्वधवृचे । रा.नि.व.२३ । [श्रम. ।

गिरिका । स्त्री । बालमूषिकायाम् । छुँचो ।

गिरिकाण: । त्रि । गिरिरोगेणैकचक्षुर्हीने । उणा. । [निघ.२भ.अतिसा.चि.मुक्तादिचूर्णे ।

गिरिकौटजफलम् । क्ली । इन्द्रयवे । वै.

गिरिगोचर: । पुं । श्वेतमर्कटे । वै.निघ. ।

गिरिजम् । क्ली । शिलाजतुनि । भा. । अभ्रधातौ । लौहे । मे.। गैरिके । रा.नि.व.१३ । पुं । गिरिजमधूकवृचे । पाहाड़े मौल गाछ । र.मा. । काञ्चनारवृचे । रक्त काञ्चन गाछ । रा.नि.व.१० ।

गिरिजतु (त्व) । क्ली। शिलाजतुनि । रा.नि.व.१३। वै.निघ.चय.चि.सूर्य्यप्रभागुड़ी । [वै.निघ.।

गिरिजधातु: । पुं । गैरिके । गिरिमाटी ।

गिरिजा । स्त्री । मल्लिकापुष्पवृचे । मल्लिका फुलेर गाछ । रा.नि.व.१० । मातुलुङ्गवृचे । प.मु. । श्वेतवुङ्गायाम् । त्रायमाणालतायाम् । रा.नि.व.५ । गिरिकदलीवृचे । लघुपाषाणभेदे । लौहे । रा.नि.व.२३ । रास्नायां । कुन्दपुष्पवृचे । वै.निघ.।

गिरिजातेज: । क्ली । अभ्रधातौ । वै.निघ. ।

गिरिजामलम् । क्ली। अभ्रधातौ। श.टी.रा.।

गिरिजावीजम् । क्ली । गन्धके । भैष.ग्रहणी-कवाटरसे । अभ्रके ।

गिरिजाह्वयम् । क्ली । शिलाजतुनि । वै.निघ. ।

गिरिज्वर: । पुं । वज्रे । श.र. ।

गिरिधातु: । पुं। गैरिकधातौ। रा.नि.व.१३।

गिरिनिम्ब: । पुं । महानिम्बवृचे, कैटर्य्यनिम्बे । रा.नि.व.९ । [वकाणनिम्ब । वै.निघ. ।

गिरिपत्र: । पुं। गिरिनिम्बे । महानिम । हिं

गिरिपादिका । स्त्री । कपिकच्छ्वां । आलाकुशी । मं गोड़ीकुहिड़ी । वै.निघ. ।

गिरिपीलु: । पुं । परुषकवृचे । रा.नि.व.११।

गिरिपुष्प(क)म् । क्ली । शैलजे । शैलज । मं दगड़फूल । रा.नि.व.१२ । [१९ ।

गिरिप्रिया । स्त्री। चमरीगव्याम्। रा.नि.व.

गिरिभित् । पुं । पाषाणभेदचुपे । भा. ।

गिरिभू: । स्त्री। चुद्रपाषाणभेदे । रा.नि.व.५।

गिरिमनोहर: । पुं । आरग्वधवृचे । वै.निघ. । [श्रम. । सि.यो.रक्तातिसा.चि.(कुटजाष्टके) ।

गिरिमल्लिका (ल्ली) । स्त्री । कुटजवृचे ।

गिरिमान: । पुं । गजे । श.र. ।

गिरिमाल: । पुं । आरग्वधवृचे । वै.निघ. ।

गिरिमालपञ्चकम् । क्ली । आरग्वधाद्यपरनामयोगविशेषे । आरग्वधादि पाचन । "आरग्वधग्रन्थिकमुस्ततिक्ताहरीतकीभिः क्वथितः कषायः ।" सि.यो.वातकफज्व.चि. ।

गिरिमृत् (द्भवम्) । स्त्री, क्ली । गैरिके । चिका. । रा.नि.व.१३ । [मेद इत्यपि पाठः ।

गिरिमेद: । पुं । विट्खदिरे । र.मा. । इरि-

गिरिरम्भा । स्त्री । गिरिकदल्याम् । वीचे कला । रा.नि.व.११ । [मि । वै.निघ. ।

गिरिवर्त्तिका । स्त्री । पार्श्वततित्तिरिपचि-

गिरिवासी (इन्) । पुं । हस्तिकन्दनाममहाकन्दशाके । रा.नि.व.७ । [गणे । र.सा.सं. ।

गिरिशाल्तक: । पुं । लौहमारकत्रिफलादि-

गिरिशायी (इन्) । पुं । पार्व्वतपचिविशेषे । वै.निघ. ।

गिरिशालाह्वः । पुं । प्रतुदपक्षिणि । सु.सू. ४६ष. । [पुराणं ।

गिरि(श)शालिनी । स्त्री । अपराजितायां ।

गिरिशेखरः । पुं । महावकुले । वै.निघ. ।

गिरिसर्पः । पुं । दर्व्वीकरसर्पविशेषे । सु.कल्प.४ष. । See सर्पः । [निघ. ।

गिरिसानुजा । स्त्री । त्रायमाणायाम् । वै.

गिरिसारः । पुं । लौहे · वङ्गे । मे. । [निघ.।

गिरिसिन्दु(न्धु)कः । पुं। कृष्णनिर्गुण्ड्यां । वै.

गिरिस्वेदः । पुं । शिलाजतुनि । वै.निघ. ।

गिरिह्वा । स्त्री । बालमूषिकायां । अ.टी.र. । सु.कल्प.५ष. ।

गिलः । पुं । जम्बीरवृक्षे । श.च. ।

गिलग्राहः । पुं । नक्रे । वै.निघ. ।

गिलनम् (**लिः**) । क्ली, स्त्री । गलाधःकरणे, भक्षणे । अ.टी. ।

गिलायुः । पुं । गलरोगे । तल्लक्षणं यथा— "ग्रन्थिर्गले त्वामलकास्थिमात्रः स्थिरोऽल्परुक् स्यात्कफरक्तमूर्त्तिः । संलक्ष्यते सक्तमिवाशनञ्च स शस्त्रसाध्यस्तु गिलायुसंज्ञः ॥" सु.नि.१६ष. ।

गिलोद्यः । पुं । शणपत्राकारावयवयुक्तफलविशेषे । गिलोट इति लोके । सु.सू.४२ष. ।

गीर्लता । स्त्री । महाज्योतिष्मतीलतायाम् । रा.नि.व.३ । [१२ ।

गीर्व्वाणकुसुमम् । क्ली । लवङ्गे । रा.नि.व.

गुग्गुलुः । पुं । (Burseraceae. Balsamodendron mukul.) स्वनामख्यातपण्यद्रव्ये । গুগ্‌গুল । तें गुग्गिलमुचेट्टु । वा.सू.१५ष. । स त्रिविधः—साधारणगुग्गुलुः, कणगुग्गुलुः, भूमिजगुग्गुलुश्च । विशेषाः पर्य्याये द्रष्टव्याः । रा.नि.व.१२ । महिषाक्ष-महानील-कुमुद-पद्म-हिरण्या इति पञ्चभेदमिच्छन्ति भावमिश्रादयः । तेषु भृङ्गाञ्जनसवर्णः महिषाक्षः, महानीलवर्णो महानीलः, कुमुदाभः कुमुदः, माणिक्यसवर्णः पद्मः, हेमाभश्च हिरण्य इति । तत्र प्रथमौ द्वितीयश्च हस्तिनां, कुमुदो हयानां, पद्म आरोग्ये, कनकश्च नरस्य हितः । भा. । शुद्धिः—उष्णे पूते च दशमूलक्काथे गुग्गुलुं प्रक्षिप्यालोड्य वस्त्रपूतं विधाय पश्चाद्विशोष्य घृतं दत्त्वा पेषितो ग्राह्यः । सा.कौ. । गुणाः—जराव्याधिहरत्वाद्रसायनः । कटुतिक्तोष्णः कफवातकासघ्नः कृमिवातोदरप्लीहशोफार्शोघ्नः । रा.नि.व.१२ । नवो वृष्यो बृंहणः सुगन्धः पिच्छलः शुष्को दुर्गन्धः । पुराणश्च अतिलेखनो वीर्य्यहीनश्च । भा.। गुग्गुलुपाकः गुड़पाकवत् । See गुड़पाकः।

गुग्गुलुवटकः (**आदित्यपाकः**) । पुं । वातव्याधौ । त्रिफलाचूर्णं प्र. ४ तो. पिप्पलीचूर्णं ४ तो. गुड़त्वगेलाचूर्णं प्र. २ तो. शोधितगुग्गुलुः २० तो. एकत्र दशमूलाम्बुना भाव्यम् (दशमूल ४० तो. वारि ६० तो. शे. २० तो.) । "भाव्यद्रव्यसमं क्काथ्यं क्काथोऽर्द्धांशस्तु तेन च ।" च.द. । प.प्र. ।

गुच्छः । पुं । स्तवके । त्रिका. । भूतृणे । गुण्डासिनीतृणे । वै.निघ. । मयूरपुच्छे । मे. ।

गुच्छकः । पुं । गुच्छकन्दे । तैलशाक इति लोके । गज.वै. । रीठाकरञ्जवृक्षे । रा.नि.व.६ । क्ली । ग्रन्थिपर्णे । भा. ।

गुच्छकच्छदः । पुं । ग्रन्थिपर्ण्णाम् । वै.निघ. ।

गुच्छकणिशः । पुं। रागीधान्ये । रा.नि.व.१६।

गुच्छकन्दः । पुं । कन्दशाके । तैलसाक इति लोके । मं कुलीहालु । कं मुकुलियागड्डे । गुणाः —मधुरः शीतलः वृष्यः दाहघ्नः तर्पणः । रा.नि.व.७ ।

गुच्छकरञ्जः । पुं । करञ्जवृक्षविशेषे । गुणाः —कटुतिक्तोष्णः विषवातकण्डूविचर्च्चिकाकुष्ठस्वग्त्वग्दोषघ्नश्च । रा.नि.व.६ ।

गुच्छगुल्मिका । स्त्री । सुहीवृक्षविशेषे । ফণিমনসাবিশেষ । वै.निघ. । [व.११ ।

गुच्छदन्तिका । स्त्री । कदलीवृक्षे । रा.नि.

गुच्छपत्रः । पुं। तालवृक्षे । তাল গাছ । रा.नि.व.६ । [नि.व.६ ।

गुच्छपुच्छः (**कः**) । पुं । गुच्छकरञ्जे । रा.

गुच्छपुष्पः (**कः**) । पुं । सप्तपर्णवृक्षे । अशोकवृक्षे । रा.नि.व.१० । (कः) रीठाकरञ्जे । रा.नि.व.६ ।

गुच्छपुष्पी । स्त्री । शिगूड़ीनामक्षुपे । धातकीवृक्षे । रा.नि.व.४।६ ।

गुच्छफलः । पुं । रीठाकरञ्जे । रा.नि.व.६ । कतकवृक्षे । राजादनवृक्षे । क्षीरी वृक्ष । रा नि.व.११ । जलवेतसे । वै.निघ. ।

गुच्छफला । स्त्री । अग्निदमनीनामक्षुपे । काकमाच्याम् । रा.नि.व.४ । द्राक्षायाम् । कदलीवृक्षे । रा.नि.व.११ । निष्पाव्याम् । रा.नि.व.७ ।

गुच्छबुध्ना । स्त्री । गुण्डालाक्षुपे । रा.नि.व.५।

गुच्छमूल(लि)का (ला) । स्त्री । गुण्डासिनीतृणे । रा.नि.व.८ । गुण्डालाक्षुपे । वै.निघ.।

गुच्छसङ्गा । स्त्री । क्षुद्रधातक्याम् । वै.निघ. ।

गुच्छालः । पुं । भूतृणे । रा.नि.व.८ । भूकदम्बे । प.मु. । [व.७ ।

गुच्छाह्वकन्दः । पुं । गुलुच्छकन्दे । रा.नि.

गुच्छी । स्त्री । गुच्छकरञ्जवृक्षे । रा.नि.व.६ ।

गुञ्जः । पुं । गुच्छे । श.र. ।

गुञ्जकृत् । पुं । भ्रमरे । श.र. ।

गुञ्जरत्नमाला । स्त्री । वैद्यकग्रन्थभेदे ।

गुञ्जा । स्त्री। (Abrus precatorius.) स्वनामख्यातोपविषजातीयमूलविषलतायाम् । कुँच गाछ । हिं घोणकाँढ़च चिरमिति । मं कं गुलुगुञ्जे, एरडु । उत्. रुञ्ज । सु.कल्प.२अ. । गुञ्जा द्विधा श्वेतरक्तभेदात् । द्वयगुणाः—फलं तिक्तोष्णं वमकरं शिरोऽर्त्तिनाशनञ्च । शिफा वान्तिकरी । पत्रं शूलघ्नं विषहृत् । वश्ये श्वेतञ्च शस्यते । रा. नि.व.३। "गुञ्जाद्वयन्तु केश्यं स्याद्वातपित्तज्वरापहं । मुखशोषभ्रमश्वासतृष्णामदविनाशिनं । नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत् । क्रमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च ॥" भा. । श्वेतगुञ्जायाम् । र. सा.सं. । मुक्तायाम् । रा.नि.व.६ । मद्यशालायां । श.र. । यवचतुष्टयात्मके माने । गुञ्जा स्यात्तच्चतुष्टयम् । प.प्र.१ख. । यवत्रयमाने । क्वचिद्वैद्यके । गोधूमद्वयमाने । रा.नि.व.२१अ. ।

गुञ्जाकिनी । स्त्री । गुञ्जायाम् । भैष.ज्व.चि. पानीयभक्तवट्याम् ।

गुञ्जागर्भरसः । पुं । हृद्रोगे रसः । पाठः—"निष्कत्रयं रसस्य स्याद्गन्धकस्तुर्य्यभागिकः । गन्धकेन जयाचूर्णं निम्बुवीजं समानकम् । गुञ्जावीजं तदर्द्धं स्यात्तदर्द्धं जयपालकं । निम्बुद्रवेण सम्मर्द्य काकमाच्या दिनान्तकम् । धुस्तूरकजयन्तीभ्यां गुड़िकां कारयेत्सुधीः । गुञ्जागर्भरसो नाम्ना दातव्यो घृतसंयुतः । हिङ्गुसैन्धवसंयुक्तं मण्डं पथ्याय दापयेत्॥" পারা ১॥০ তো. গন্ধক, জয়ন্তীবীজ বা হরীতকী, নিম্বুবীজ প্রত্যেকে ৬ তো. কুঁচের বীজ ৩ তো. জয়পাল ১॥০ তো. নিম্বু, কাকমাচী, ধুতুরা এবং জয়ন্তী রসে মাড়িয়া বটী করিবে । र.चि. ।

गुञ्जातैलम् । क्ली। कुष्ठे, गण्डमालायां तैलम् । "गुञ्जामूलफलैः तैलं विपक्वं द्विगुणाम्भसा ।" कटुतैलं ४ श. गुञ्जामूलं फलञ्च प्र. ४ प. वारि ८ श. । भा. । अन्यत्—"गुञ्जाफलैः शृतं तैलं भृङ्गराजरसेन च ।" কটুতৈল ৪ শ. কুঁচফল ৮ প. ভীমরাজরস ৮ শ. । शा.कौ. ।

गुञ्जाद्यतैलम् । क्ली । गलगण्डाधिकारे । गुञ्जामूलं करवीरमूलं वीजताड़कमूलं, अर्कमूलं वा निर्यासः, सर्षपं । एषां प्र. ४ तो. तैलं १ श. (८० तो.) गोमूत्रं ८ श.पक्वा शेषयेत् । तत्र पिप्पलीपञ्चलवणमरिचचूर्णं २०तो. प्रक्षेपः । रस.र.।

गुञ्जाभद्ररसः । पुं । उरुस्तम्भे हृद्रोगे च हितः । पारदः १॥० तो. गन्धकं ६ तो. गुञ्जवीजं ३ तो. जयन्तीवीजं निम्बुवीजं जैपालवीजं प्र. अर्द्धतोलकं । जयन्तीधुस्तूरपत्रजम्बीरकाकमाचीरसेन प्रत्येकं विभाव्य घृतेन मर्द्दयित्वा वटी कार्य्या । भा. ४ र. । र.सा.सं. । भैषज्यरत्नावल्यां जयन्तीनिम्बं नास्ति । [परिमाणे । श.च. ।

गुञ्जिका । स्त्री । गुञ्जायाम् । কুঁচ । त्रियव-

गुटिकः । पुं । मत्स्यखण्डाम् । মিছরি । ज.द. १२अ. । [याम् । কুঁচ । ज.द. ।

गुटिका । स्त्री । वटिकायाम् । গুলি । गुञ्जा-

गुटिकाञ्जनम् । क्ली । त्रिविधाञ्जनान्यतमेऽञ्जने । See अञ्जनम् ।

गुण्ठः । पुं। तृणविशेषे । কেশুর । रा.नि.व.८। सुगन्धरोहिषतृणे । वै.निघ. । दाक्षिणात्याश्वे । "दाक्षिणात्यो भवेद्गुण्ठो योऽधमः सर्व्ववाजिनां ।" ज.द,६अ. ।

गुड़ः । पुं । इक्ष्वादिरसविकारे । गुड़ । स सामान्यतश्चतुर्भेदः धौताधौतपुराणनवभेदात् । तेषु धौतो नातिश्लेष्मलः मलानुलोमनश्च, अधौतः प्रभूतक्रमिमज्जासृङ्मेदोमांसकरः, पुराणो हृद्यः स्वस्थहितश्च, नवश्च श्लेष्माग्निमान्द्यकृत् । वा.टी.हेमा. । सा. गुणाः —वृष्यो गुरुः स्निग्धः वातघ्नः मूत्रशोधनः नातिपित्तहरः मेदःकफक्रमिबलदश्च । भा. । पुरातनस्य गुणाः—अधिकगुणः रक्तपित्तप्रसन्नबलकारी च । राज. । "गुड़ो जीर्णो लघुः पथ्यो नाभिष्यन्द्यग्निपुष्टिकृत् । पित्तघ्नो मधुरो वृष्यो वातघ्नोऽसृक्प्रसादनः ॥" भा. । यावनालगुड़श्च कटुः क्षारो मधुरः वातकफघ्नः पित्तजनकः नित्यसेवनेन कण्डूकुष्ठं जनयति अस्रविदाहञ्च करोति॥ रा.नि.व.१४ । "बल्यो वृष्यो गुरुः स्निग्धः वातघ्नो मूत्रशोधनः । स पुराणोऽधिकगुणो गुल्मार्शोऽरोचकापहः । क्षये कासे क्षतक्षीणे पाण्डुरोगेऽस्रजः क्षये । हितो योग्येन संयुक्तो गुड़ः पथ्यतमो मतः ॥" "गुदामये कामलशोथमेहे गुल्मामये पाण्डुहलीमके च । वाते सपित्तासृजि राजरोगे रुचिप्रदो रोगहरो गुड़ः स्यात् ॥ कासे शोषे गुड़ो नेष्टः अन्यत्रापि हितो मतः । योगयुक्तोऽपि सर्व्वत्र हितो गुणगणालयः ॥ श्वासश्वासक्षतरुजाश्वासमूर्च्छातुरोगिणाम् । अध्वश्रान्तिश्रममदविषमूत्रकृच्छ्राश्मरीणाम् । जीर्णवामज्वरविषमगे रक्तपित्तप्रकोपे तृष्णादाहक्षयरुधिरगे सर्व्वरोगान् निहन्ति ॥" अत्रि.१०अ. । गुडीत्वे । मनसासिजू । प.मु. । कार्पास्याम् । कापास । अ.टी. । ग्रासे । हे च. । [प.प्र. ।

गुड़कः । पुं । गुड़पक्वौषधमात्रे । मोदक ।

गुड़काष्ठः । पुं । इक्षौ । वै.निघ. ।

गुड़कुष्माण्डकम् । क्ली । वाजीकरणाधिकारे प्रशस्तम् । त्वगादिहीनं किञ्चिज्जलोत्स्विन्नं शिलापिष्टं किञ्चिदातपशोषितं पुष्टकुष्माण्डपलशतं तैलघृतेन भर्ज्जयेत् यथा मधुवर्णं भवति । खिन्नगालितकुष्माण्डद्रवे पुराणगुड़ं दत्त्वालोड्य पूत्वा च तेन जलेन कुष्माण्डकं पचेत् । बाहुशालोक्तगुड़पाकचिह्नेनावतारिते कोष्णे त्वक्पत्रादिचूर्णं प्रक्षेप्यम् । कुष्माण्डं १०० प. घृत ८ प. तिलतैलं ८ प. गुड़ १०० प. त्वक्तेजपत्रं धान्यं त्रिकटु जीरकद्वयं एलाद्वयं चित्रकं पिप्पलीमूलं चव्यं गजपिप्पली शुण्ठी शृङ्गाटकं कशेरु तालाङ्कुरं तालमस्तकञ्च एषां प्र. चूर्णं ८ प. मधु ८ प. । रस.र. ।

गुड़खण्डः । पुं । गुड़कृतखण्डे । थाँड़गुड़, पाटालि । गुणाः—"गुड़खण्डश्च मधुरः सितश्च वातपित्तहा । किञ्चिच्छीतगुणोपेतो बल्यो वृष्यो रुचिप्रदः ॥" [व.१४ ।

गुड़गुड़ा । स्त्री । यावनालशर्करायाम् । रा.नि.

गुड़ची । स्त्री । गुडूच्याम् । अ.टी.भ. ।

गुड़चुक्रम् । क्ली । गुड़कृतचुक्रविशेषे । गुड़कृत सिर्का । यथा—"गुड़ाम्बुना सतैलेन कन्दशाकफलैस्तथा । सन्धितञ्चाम्लतां यातङ्गुड़चुक्रं तदुच्यते ॥" भा. । [व.१४ । गुड़त्वचि । श.र. ।

गुड़तृणः (त्रिणं) । पुं, क्ली । इक्षौ । रा.नि.

गुड़त्वक् । क्ली । स्वनामख्यातगन्धद्रव्ये । दारचिनि । तच्च लघूष्णं स्वादु तिक्तं रुच्यं पित्तवर्द्धकं अरुचिकण्डूहृद्वस्तिवातार्शःक्रमिपीनसघ्नञ्च । भा. । कफघ्नामवातघ्नं मधुरं कटु चेति । राज. ।

गुड़त्वचम् । क्ली । गुड़त्वचि । जातीकोषे । जयित्री । श.च. ।

गुड़दारुः । क्ली । इक्षौ । त्रिका. ।

गुड़पाकः । पुं । औषधस्य गुड़पाके । तल्लक्षणम्—"यदा दर्व्वीप्रलेपः स्यात् यदा वा तन्तुलीभवेत् । तोयपूर्णे च पात्रे तु क्षिप्तो न प्लवते गुड़ः । क्षिप्तस्तु निश्चलस्तिष्ठेत्पतितस्तु न शीर्य्यति । एष पाको गुड़ादीनां सर्व्वेषां परिकीर्त्तितः । सुखमर्द्दः सुखस्पर्शो गन्धवर्णरसान्वितः । पीड़ितो भजते मुद्रां गुड़पाकः सुपाकतः । गुड़वद्गुग्गुलोः पाकः रसगन्धविशेषतः । श्रेष्ठमध्यमहीनेषु द्वादशाष्टचतुष्टयैः । माषकैः गुग्गुलोर्मात्रां व्याधिं वीक्ष्य प्रयोजयेत् ॥ रसक्रियाद्या ये लेहा गुड़ाश्चैव प्रकीर्त्तिताः । तेषां विन्दुर्जले न्यस्तो न शीर्य्येत्पाकलक्षणं ॥" प.प्र.३ख. ।

गुड़पाचकः । पुं । इक्षौ । वै.निघ. ।

गुड़पिप्पली । स्त्री । पिप्पलीचूर्णं १ भ. गुड़स्य च भागद्वयं जीर्णज्वरे शस्तम् । अन्या यथा—विड़ङ्गं त्रिकटु कुष्ठं हिङ्गु पञ्चलवणं यवक्षारः सर्ज्जिक्षारः टङ्कणक्षारः समुद्रफेनः चित्रकमूलचूर्णं

गजपिप्पली कृष्णजीरकं तालजटाक्षारः कुष्माण्ड-नालभस्म अपामार्गक्षारः तिन्तिड़ीक्षारः प्र. सम-भागः। सर्व्वचूर्णसमं पिप्पलीचूर्णं। पुनः सर्व्व-चूर्णद्विगुणः पुरातनगुड़ः एकत्र सम्मर्द्दम्। मा. ॥० तो.। भैष.। [मद्दया। र.मा.।

गुड़पुष्पः। पुं। मधूकवृक्षे। मउल गाछ। हिं

गुड़पुष्पसारः। पुं। मधूकपुष्पसारे। च.द.।

गुड़फलः। पुं। पीलुवृक्षे। भा.। बदरवृक्षे। रा.नि.व.११।

गुड़फला। स्त्री। कृष्णकाकमाच्यां। वै.निघ.।

गुड़भल्लातकम्। क्ली। अर्शोरोगे। क्वाथार्थ —दशमूल, गुलञ्च, वामनहाटी, गोक्षुर, चिता, शटी प्रत्येके १ प. भल्लातक १०० टा, जल ६४ श. शे. १६ श.। प्रक्षेपार्थ—मधु ८ प. पिपुल ४ प. एरण्डतैल ८ प. गुड़त्वक्, एला, मरिच प्रत्येके १ पोओया। च.द.।

गुड़मञ्जरी। स्त्री। जिङ्गिन्याम्। वै.निघ.। कृष्णशाल्मल्याम्। एतन्निर्यासनस्येन स्कन्धांसरुक् नश्यति। वा.उ.४०अ.।

गुड़मण्डूरम्। क्ली। अन्नद्रवशूले। पुराणगुड़: १ प. आमलकचूर्णं १ प. हरीतकीचूर्णं १ प. शुद्धमण्डूर ३ प. घृतमधुभ्यां सम्मर्द्य २ तो. भोजनाद्यमध्यावसानेषु सेव्यम्। रस.र.।

गुड़मूलः। पुं। स्वल्पमारिषशाके। श.च.। इची। भा.।

गुड़योगफला। स्त्री। मधुरालाब्वां। वै.निघ.।

गुड़लम्। क्ली। गौड़ीमदिरायाम्। श.च.।

गुड़वीजः। पुं। मसूरे। रा.नि.व.१६।

गुड़शर्करा। स्त्री। शर्करायाम्। त्रिका.। गुणाः—"वृष्याः क्षीणक्षतहिताः सस्नेहा गुड़शर्कराः।" च.सू.२७अ.।

गुड़शिग्रुः। पुं। रक्तशोभाञ्जने। श.च.।

गुड़शुक्तम्। क्ली। सतैलगुड़ाम्बुना कन्दशाकादि एकत्र संहितमम्लरसं गुड़शुक्तमुच्यते। प.प्र.३ख.। गुड़ाम्बुना सतैलेन सन्धानञ्चाम्लिकन्तु यत्। कन्दशाकफलैर्युक्तङ्गुड़शुक्तं तदुच्यते॥" शार्ङ्ग.।

गुड़ा। स्त्री। स्नुहीवृक्षे। र.मा.। गुड़िकायां। मे.। उशीर्य्याम्। रा.नि.व.८। गुड़ूच्याम्। वै.निघ.।

गुड़ाका। स्त्री। निद्रायाम्।

गुड़ाख्यः। पुं। स्नुहीवृक्षे। रा.नि.व.८।

गुड़ादिवटिका। स्त्री। शोथे रसः। शुण्ठीचूर्णं ३ प. पिप्पलीचूर्णं ३ प. शुद्धमण्डूरं १ प. तिलं १ प. पलत्रयगुड़ेन वटी कार्य्या। गुड़ ७ प. शुँटचूर्ण ७ प. पिपुलचूर्ण ७ प. शुद्धमण्डूर १ प. तिल १ प.। भा.।

गुड़ाम्बु। क्ली। गुड़कृतजले। "गुड़योगाद्गुड़ाम्बु स्याद्गुड़वर्णरसान्वितम्।" प.प्र.३ख.। वा.चि. ६अ.।

गुड़ाशयः। पुं। अक्षोटवृक्षे। रा.नि.व.११।

गुड़ाष्टकम्। क्ली। उदावर्त्ते अजीर्णे च। त्रिकटु पिप्पलीमूलं त्रिवृन्मूलं दन्तीमूलं चित्रकमूलं एषां प्रति चूर्णं तुल्यभागं गुड़ेन प्रातर्भक्षयेत्। मात्रा यथाग्निबला देया।

गुड़ासवः। पुं। गुड़कृतासवे। गुणाः—"सृष्टो भिन्नशकृद्वातो गौड़स्तर्पणदीपनः।" च.सू.२७अ.।

गुड़िका। स्त्री। गुटिकायाम्। प.प्र.।

गुड़ी। स्त्री। स्नुहीवृक्षे। गुड़ूच्यां। वै.निघ.।

गुड़ूची। स्त्री। (Tinospora cordifolia, Syn. Menispermum cordifolium.) स्वनामख्यातपत्रशाकलतायाम्। गुलञ्चलता। हिं गुड़च, घड़च। मं गुलवेलि। कं अमरदवेलि। तें तिप्पतीगे। कान्यकुब्जे गुरुची। गुर्जरे गलो। गुणाः—"गुड़ूची कटुका तिक्ता स्वादुपाका रसायनी। संग्राहिणी कषायोष्णा लघ्वी बल्याग्निदीपनी। दोषत्रयामतृड्दाहमेदःकासांश्च पाण्डुतां। कामलाकुष्ठवातास्रगज्वरक्रिमिवमीन्हरेत्। प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत्॥" तदुत्पत्तिः—पुरा यदा राक्षसपरिवृतो रामः सीतापहारिणं रावणं जघान तदा हतान् वानरानिन्द्रोऽमृतवर्षेण जीवयामास। तद्गात्रच्युतामृतबिन्दवः गुड़ूची जाताः। भा.।

गुड़ूचीघृतम्। क्ली। वातरक्ते। गव्यघृतं ४ श. क्वाथार्थं—गुड़ूची १२॥० श. जलं ६४ श. शे. १६ श. कल्कार्थं—गुड़ूची १ श.। अन्यत् आम-

वाते — गव्यघृतं ४ श. क्काथार्थे — गुडूची ६४ प. जलं ६४ श. शे. १६ श. कल्कार्थे शुण्ठी १ श. । च.द. ।

गुडूचीतैलम् । क्ली । वातरक्ते तैलम् । स्वल्पं यथा — तिलतैलं ४ श. क्काथार्थे — गुडूची १०० प. जलं ६४ श. शे. १६ श. । मतान्तरे गुडूची ४ श. जल १६ श शे. ४ श. । सा.कौ. । भैष. । मध्यमं यथा — तिलतैलं ४ श. गुडूचीक्काथः १६ श. दुग्ध ४ श. । भैष. । वृहत् यथा — तिलतैलं ८ श. क्काथार्थे — गुडूची १०० प. जलं ६४ श. शे. १६ श. कल्कार्थे — शलका हरीतकी त्रिकटु रास्ना मुस्ता वनयमानी हरिद्रा दारुहरिद्रा कुष्ठं धान्यं पद्मकाष्ठं विड़ङ्गं तेजपत्रं वचा जटामांसी, एषां प्रति ४ तो. रक्तचन्दनं ८ तो. । अपरं यथा — तिलतैलं १६ श. गुडूची १२॥० श जलं ६४ श. शे. १६ श. दुग्धं ६४ श. कल्कार्थे — यष्टिमधु मञ्जिष्ठा ऋद्धिः (अभावे वला) वृद्धिः (अभावे गोरचचाउली) मेदा (अभावे अश्वगन्धा) महामेदा (अभावे अनन्ता) जीवकः (गुडूची) ऋषभकः (अभावे वंशरोचना) काकोली चीरकाकोली जीवन्ती कुष्ठम् एला अगुरु द्राचा जटामांसी पद्मनखी शटी रेणुकं विकङ्कतजटा (वँइछिर चुर्गरि) शुण्ठी पिप्पली मरिचं शुलुफा श्यामालता अनन्तमूलं गुड़त्वक् तेजपत्रं चव्यं वराहक्रान्ता भूम्यामली शालपर्णी तगरपादुका नागेश्वरं पद्मकाष्ठं सौगन्धिकं (गन्धी) रक्तचन्दनं एषां प्रति २ तो. । सा.कौ. ।

गुडूचीपत्रम् । क्ली । पत्रं गुडूच्याः शाकार्थे । गुणाः — आग्नेयं सर्व्वज्वरहरं लघु कटु कषायं तिक्तं स्वादुपाकं रसायनं बल्यमुष्णं संग्राहि तृष्णाघ्नं प्रमेहघ्नं दाहघ्नं कामलाकुष्ठपाण्डुघ्नञ्च । भा. ।

गुडूचीसत्वम् । क्ली । गुडूचीसारे । गुलूञ्चपालो । भैष. ।

गुडूच्यादिगणः (कषायः) । पुं । गुडूचीपद्मकारिष्टधानकारक्तचन्दनात्मके गणे । स च पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नः अग्निकृच्च । वा.सू. १५अ. । गुडूचीशारिवाद्राचाशतपुष्पापुनर्नवाभिः कृते कषाये । च.द. । अन्यः — "गुडूच्यतिविषाधान्यशुण्ठीविल्वाब्दवालकैः । पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः । कषायः शीतलः पेयः ज्वरातीसारशान्तये ॥" भैष. ।

गुडूच्यादिलौहः । पुं । वातरक्ते रसः । पाठः — "गुडूचीसारसंयुक्तं त्रिकत्रययुतन्त्वयः । वातरक्तं निहन्त्याशु···। गुडूचीसारः (गुलूञ्चपालो) त्रिकटु त्रिफला विड़ङ्गं मुस्ता चित्रकमूलं — एषां प्र. १ तो. लौहं १० तो. माषप्रमाणा वटी कार्य्या । र.चि. ।

गुड़ेरः (कः) । पुं । घासे । ग्रासे । उणा. ।

गुड़ोदकम् । क्ली । गुड़ाम्बुनि ।

गुड़ोद्भवा । स्त्री । शर्करायाम् । रा.नि.व.१४ ।

गुण्डकः । पुं । गरुड़शाली । रा.नि.व.१६ ।

गुणः (कः) । पुं । इन्द्रिये । मे. । लघ्वादौ धर्म्मे । ते च लघुगुरुस्निग्धरूक्षतीक्ष्णा इति यथाक्रमम् आकाशचितिजलाग्नीनां गुणाः । तत्र लघु — पथ्यं कफघ्नं चिप्रपाकि । गुरु — वातघ्नं पुष्टिश्लेष्मकृच्चिरपाकि च । स्निग्धं — वातघ्नं श्लेष्मकारि वृष्यं बल्यञ्च । रूक्षं वातकरं कफघ्नञ्च । तीक्ष्णं — पित्तकरं लेखनं कफवातघ्नञ्च । सुश्रुतस्तु विंशतिगुणानाह यथा — लघुगुरुस्निग्धरूक्षतीक्ष्णश्लक्ष्णस्थिरसरपिच्छिलविशदशीतोष्णमृदुकर्कशस्थूलसूक्ष्मद्रवशुष्कालर्मदा इति । [रा.नि.व.३ ।

गुणकर्णिका । स्त्री । इन्द्रवारुणीलतायाम् ।

गुणत्रयम् । क्ली । सत्वरजस्तमःसु । लक्षणं — "सत्वं रजस्तमश्चेति पुंसामुक्तास्त्रयो गुणाः । तत्र सत्त्वं श्लेष्मा रजः पित्तं तमश्च वायुः । सत्त्वं श्लेष्मा रजः पित्तं तमश्चापि समीरणः । द्रव्यस्य मानमुद्रिक्तं पुंसि पुंस्यनुवर्त्तते ॥" रा.नि.व.२१ ।

गुणमहोदधिः । पुं । कासाधिकारे । पारदः गन्धकं लौहं विषं त्वक् (गुड़त्वक्) ताम्रं वङ्गं अभ्रं — एषां प्रति १ तो. त्रिकटु तेजपत्रं मुस्तकं विड़ङ्गं नागकेशरं रेणुकं एला पिप्पलीमूलञ्च एषां प्र. २ तो. वालकपिप्पलीक्काथेन जम्वीररसेन च भावना दातव्या । मात्रा चणकाभा । रस.कौ. ।

गुणवतीवर्त्तिः । स्त्री । व्रणरोगे हिता । धूनकं लोध्रं सिन्दूरम् अतिविषा हरिद्रा विभीतकफलं कम्पिल्लकं श्रीवासः गुग्गुलुश्च, एषां प्र. समभागं घृततैलाभ्यां सम्पिष्य तं पिण्डं तुल्यसिक्थकं

(যোগ) मृदग्निना पक्ता सम्मिश्रितं शाला उद्धरेत्। रस.र.।

गुणवत्तरा। स्त्री। जीवन्तीशाके। प.मु.।

गुणसूः। स्त्री। कार्पासीचुपे। रा.नि.व.४।

गुणा। स्त्री। दूर्व्वायाम्। मांसरोहिण्याम्। मध्यसामान्ये। रा.नि.व.८।१२।१४।

गुणाढ्यकः। पुं। अङ्कोलवृचे। वै.निघ.।

गुणी (इन्)। पुं। आवर्त्तक्याम्। আপটা। वै.निघ.। त्रि। शब्दाद्याधारे आकाशादौ। च.।

गुणोज्ज्वला। स्त्री। चुद्रश्वेतयूथिकायाम्। वै.निघ.।

गुण्ठः। पुं। तृणविशेषे। वा.सू.१५अ.। "वचादनीनलकुशद्वयगुण्ठगुन्द्राः।" दाक्षिणात्यघोटकभेदे। See अश्वः।

गुण्ड्रः। पुं। (Scirpus kysoor.) कसेरुतृणे। अस्य कन्दः कसेरुरिति। কেশুর ঘাস, গেঁর কেশুর। केउटीति लोके। मं बलद्यातीनि। कं सूरुगेरु। गुण्ड्रस्त्रिविधः—वृत्तगुण्ड्रः लघुस्थूलगुण्ड्रौ च। सा. गुणाः—मधुराः शीताः कफपित्तातिसारघ्नाः दाहरक्तहराश्च। मध्ये स्थूलतरोऽधिकगुणश्च। रा.नि.व.८। सुगन्धरोहिषतृणे। वै.निघ.।

गुण्ड्रकः। पुं। चूर्णे। भैष.। [व.८।

गुण्ड्रकन्दः। पुं। कशेरौ। কেশুর। रा.नि.

गुण्ड्रता। स्त्री। यावनालशर्करायां। रा.नि.व.१४।

गुण्ड्रसः। पुं। सर्पजातिभेदे। अत्रि.३स्थान.।

गुण्ड्रा। स्त्री। काशतृणभेदे। ছোট কেশে। रा.नि.व.८। [वै.निघ.।

गुण्ड्राफली। स्त्री। देवदाल्यां। পীতঘোষা।

गुण्ड्रारोचनिका (नी)। स्त्री। स्वनामख्यातगन्धद्रव्ये। কমলাগুড়ি। र.मा.।

गुण्ड्राला। स्त्री। स्वनामख्यातचुद्रचुपे। गुंड़ाला, गोंड़ाल। गुणाः—कटुतिक्तोष्णा शोथव्रणघ्नी च। रा.नि.व.५। गुण्ड्रासिनीतृणे। रा.नि.व.८।

गुण्ड्रासिनी। स्त्री। स्वनामख्याततृणविशेषे। गुणाः—स्वादुकटुः तिक्तोष्णा पित्तदाहश्रमघ्नी वशुघ्नी व्रणदोषघ्नी च। रा.नि.व.८।

गुण्ड्रिकः। पुं। तण्डुलादिचूर्णे। গুঁড়া।

गुत्थः। पुं। गवेधुकायाम्। र.मा.। भा.म. अश्म.चि.। गुड़्च्याम्। च.द.अतिसा.चि.।

गुत्थकम्। क्ली। ग्रन्थिपर्णे। গেঁঠেলা। र.मा.।

गुत्सः। पुं। ग्रन्थिपर्णवृचे। मे.। गुच्छे।

गुत्सपुष्पः। पुं। सप्तच्छदवृचे। जटा.।

गुदम्। क्ली। The anus. मलत्यागद्वारे। मलद्वार। जटा.। स्थूलान्त्रप्रतिबद्धसार्द्धपञ्चाङ्गुलं गुदपरिमाणम्। तत्र वलयः तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः…। चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः…। सु.नि.२अ.। भावप्रकाशस्तु सार्द्धचतुरङ्गुलमाह। तल्लक्षणं यथा—"गुदस्य मानं सर्व्वस्य सार्द्धं स्याच्चतुरङ्गुलं। तत्र स्युर्बलयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः। प्रवाहिणी भवेत्पूर्व्वा सार्द्धाङ्गुलमिता मता। उत्सर्ज्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता। तस्याधः सम्वरणी स्यादेकाङ्गुलसमामिता। अर्द्धाङ्गुलप्रमाणन्तु बुधैर्गुदमुखं मतम्। मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्म्मितः॥" भा.। तदुत्पत्तिरन्त्रशब्दे द्रष्टव्या। [व २०।

गुदकीलः (कः)। पुं। अर्शोरोगे। रा.नि.

गुदकुट्ट(न्दः)कः। पुं। शिशोर्गुदजताम्रवर्णव्रणविशेषे। लक्षणम्—"मलोपलेपात् स्वेदाद्वा गुदे रक्तकफोद्भवः। ताम्रवर्णोऽन्तःकण्डूमान् जायते भूर्य्युपद्रवः। केचित्तं मातृकादोषं वदन्त्यन्येऽपि पूतनम्। प्रष्टारुर्गुदकुन्दश्च केचिच्च तमनासिकम्॥" वा.उ.२अ.। [वेदनायाम्। च.इन्द्रिय.१०अ.।

गुदग्रहः। पुं। उदावर्त्तरोगे। है.च.। पायु-

गुदजघ्नः। पुं। कटुसूरणे। वै.निघ.।

गुदजारिः। पुं। देवताड़वृचे। वै.निघ.।

गुदपाकः। पुं। गुदकुन्दरोगे। वै.निघ.।

गुदबलिः। स्त्री। शङ्खावर्त्तवत् गजतालुसवर्णाः पायुस्थबलित्रये। See गुदम्।

गुदभ्रंशः। पुं। (Prolapsus ani.) गुदनिर्गमरोगविशेषे। হারিষ। तस्य लक्षणं यथा—"प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः। रु-

चदुर्ब्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥" मा.नि.।

गुदाङ्कुरः । पुं । अर्शोरोगे । हे.च. । म.नि.।

गुदामयः । पुं । अर्शसि । र.सा.सं.।

गुदामयहरः । पुं । कटुशूरणे । बुनो ओल । वै.निघ.।

गुदास्थि । क्ली । पायुस्थनि । च.शा.७अ.।

गुदौष्ठः । पुं । मलद्वारमुखे । "रोमान्तेभ्यो यवाध्यर्द्धो गुदौष्ठः परिकीर्त्तितः ।" सु.नि.२अ.।

गुन्थफलः । पुं । नारिकेलवृक्षे । वै.निघ.।

गुन्दगुच्छकः । पुं । गुच्छकरञ्जे । वै.निघ.।

गुन्दा(न्द्रा)लः । पुं । जीवञ्जीवपक्षिणि । चकोर । हे.च.।

गुन्द्रः । पुं । पाटरकाख्यशरे । शर गाछ । हिं गंदपटेर । गुणाः—कषायत्वं मधुरत्वं हिमत्वं रक्तपित्तमूत्रकृच्छ्रनाशित्वं स्तन्यमूत्ररजःशोधकत्वञ्च । भा.। शरतृणे । अम.। मुस्तकतृणे । वै.निघ.।

गुन्द्रकः । पुं । गुन्द्रशरे । प.मु. । भा.म.अश्मरी.चि.। [तृणे । वै.निघ.।

गुन्द्रमूला । स्त्री । एरकातृणे । भा.। मुस्तक-

गुन्द्रा । स्त्री । गवेधुकायाम् । पटेरके, गोंदर इति लोके । गड़गड़ । सु.सू.३८अ.। देवधान्ये । र.मा.। रोचनिकायाम् । सि.यो.क्रमि.चि.। भद्रमुस्तके । त्रिका.। प्रियङ्गौ । अम.। गुड़ूच्याम् । च.सू.४अ.। चि.३अ.। एरण्डवृक्षे । शिरीषवृक्षे । दर्भे । वै.निघ.। एरकातृणे । भा.।

गुप्तगन्धिः । स्त्री । एलवालुके । रा.नि.व.४ ।

गुप्तपत्रकः । पुं । मध्वालुके । मौ आलू । प.मु.।

गुप्तपुष्पः । पुं । सप्तपर्णवृक्षे । वै.निघ.।

गुप्तफला । स्त्री । काकजङ्घायाम् । शुड़कांउलि । वै.निघ.।

गुप्तबीजम् । क्ली । तृणे । वै.निघ.।

गुप्तस्नेहः (ही (हन्)) । पुं । अङ्कोटवृक्षे । आँकोड़ गाछ । रा.नि.व.११ ।

गुप्ता । स्त्री । कपिकच्छ्वां । रा.नि.व.३ । चन्दनविशेषे । चूया । वै.निघ.।

गुप्ताफलम् । क्ली । शूकशिम्बीबीजे । आलकुशीर बीज । सु.चि.२६अ.।

गुप्तिः । स्त्री । अवकरस्थाने । रक्षणे । मे.। यमे । हे.च.।

गुम्टी । स्त्री । तृणधान्यभेदे । गड़गड़ । गुणाः श्यामाकवत् । च.सू.२७अ.।

गुम्फः । पुं । श्मश्रुणि । गोंफ । श.र.।

गुरवकः । पुं । गरुड़शाली । रा.नि.व.१६ ।

गुरुः । पुं । पिष्टाली । प.मु.। स्त्री । कपिकच्छ्वां । रा.नि.व.३ । त्रि । अलघुद्रव्ये, दुष्पचद्रव्ये पृथिवीसोमगुणभूयिष्ठे । तच्च त्रिविधं—स्वभावगुरु, मात्रागुरु, संस्कारगुरु चेति । स्वभावगुरु तत् यत्प्रकृत्या गुरु तच्च माषादिकं, तन्मात्रागुरु यत् मुद्गादिकं, संस्कारगुरु च पिष्टान्नादि । यथा—"मन्दानलकरं द्रव्यं मात्रागुरु विवर्ज्जयेत् । स्वभावतश्च गुरु यत्तत्तु संस्कारतो गुरु । मात्रागुरु तु मुद्गादि माषादि प्रकृतेर्गुरु । संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम् ॥ गुरु वातहरं पुष्टिश्लेष्मकृच्चिरपाकि चे"ति भा.। शौसधातौ । वै.निघ.।

गुरुकोष्ठः । त्रि । गुरुपाकिकोष्ठे ।

गुरुगन्धिकम् । क्ली । अगुरुणि । वै.निघ.।

गुरुगुणः । त्रि । यच्चिरेण पक्वं तद्गुरुगुणं । वा.टी.हेमा.।

गुरुघ्नः । पुं । गौरसर्षपे । रा.नि.व.१६ ।

गुरुण्टकः । पुं । तिलमयूरे । त्रिका.। [१६ ।

गुरुतण्डुला । स्त्री । उम्पाशाली । रा.नि.व.

गुरुता । स्त्री । गौरवे । जाड्ये । मा.नि.।

गुरुपञ्चमूली । स्त्री । बृहत्पञ्चमूली, सा बिल्वश्योणाक-गाम्भारी-पाटला-गणिकारिका इति पञ्चमूलात्मिका वातकफे हिता । च.द.ज्व.चि.। "पञ्चमूल्या लघीयस्या गुर्व्या वाभ्यां सधान्यया ।"

गुरुपत्रम् । क्ली । वङ्गे । हे.च.।

गुरुपत्रा । स्त्री । तिन्तिड़ीवृक्षे । श.र.।

गुरुपाकः । त्रि । यः पक्वः विष्टभ्य सृजति श्लेष्माणञ्च करोति स गुरुपाकः । वा.टी.हेमा.। स्पष्टविण्मूत्रतया करोत्क्लेशेनानुमेयम् । सु.सू.४१अ.।

गुरुपुष्पः । पुं । क्रमुकवृक्षे । গুপারি গাছ । वै.निघ. ।

गुरुरत्नम् । क्ली । पुष्परागमणौ । रा.नि.व.१३।

गुरुवर्चोघ्नः । पुं । लिम्पाकवृक्षे । কাগজী বা পাতিলেবুর গাছ । श.च. ।

गुरुवीजः । पुं । मसूरे । रा.नि.व.१६ ।

गुरुशिंशपा । स्त्री । शिंशपावृक्षे । वै.निघ. ।

गुरुश्रेष्ठम् । क्ली । वङ्गधातौ । রাঙ্গ । वै.निघ. ।

गुरुसः । पुं । गरुड़शालौ । रा.नि.व.१६ ।

गुरुस्कन्धः । पुं । चौरिणीवृक्षे । वै.निघ. ।

गुरुस्वेदः । पुं । अश्वस्य स्वेदविशेषे । लक्षणं—"यत्र क्वाथेन यः स्वेदः गुरुस्वेदः स उच्यते ।" ज.द.१८अ. ।

गुर्व्वर्च्चनम् । क्ली । पूज्यार्च्चने । गुणाः—"स्वर्ग्यं यशस्यमायुष्यम् अलक्ष्मीकविनाशनम्। धनधान्यकरं नित्यं गुरुदेवद्विजार्च्चनम् ॥" राज.२प. ।

गुर्व्विणी । स्त्री । गर्भवत्याम् । रा.नि.व.१८ ।

गुर्व्वी । स्त्री । गुवाकवृक्षे । गर्भिण्याम् । मे. ।

गुलः । पुं । गुड़े । मे. ।

गुलकः । पुं । गुग्गुलुवृक्षे । वै.निघ. ।

गुलच्चकन्दः । पुं । गुच्छकन्दे । कुली । मं कुलीहाल । गुणाः—मधुरत्वं शीतलत्वं वृष्यत्वं तर्पणत्वं दाहघ्नत्वञ्च । रा.नि.व.७ ।

गुला । स्त्री । स्नुहीवृक्षे । मे. । [नि.व.८ ।

गुलालः । पुं । भूतृणे । গন্ধতৃণবিশেষ । रा.

गुलिका (स्त्री) । स्त्री । गुड़िकायाम् । रोगविशेषे । বসন্ত রোগ । मे. । [निघ. ।

गुलिकालवणम् । क्ली । गुटिकालवणे । वै.

गुलुच्छः (च्छ.) । पुं । पुष्पस्तवके । त्रिका. ।

गुलुच्छकन्दः । पुं । गुच्छकन्दे । वै.निघ. ।

गुलोरिका । स्त्री । गुम्फे । वै.निघ. ।

गुल्फः । पुं । पादग्रन्थौ । পায়ের গুল্লে, গোড়ালী । हे.च. । "जङ्घाङ्घ्रिसन्धिग्रन्थौ तु घुटिका गुल्फ इत्यपि ।" रा.नि.व.१८। जङ्घास्थमर्म्मविशेषे । सु. ।

गुल्फास्थि । क्ली । पादघुटिकास्थनि । গুল্লের হাড় । च.शा.७अ. ।

गुल्मः । पुं । प्लीहायाम् । रोगविशेषे । स च पञ्चस्थानेषु पञ्चविधः वातादिभेदेन । कारणपूर्व्वकं सा.लक्षणं यथा—"दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः । कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणं ॥" सा.लक्षणं—"हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः । वृत्तश्चयापचयवान् स गुल्म इति कीर्त्तितः । स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः । पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥" आर्त्तवजमाह—"आर्त्तवादपि गुल्मः स्यात् स तु स्त्रीणां प्रजायते । अन्यस्त्वसम्भवः पुंसां तथा स्त्रीणां प्रजायते । तत्स्थानमाह—तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवस्तयः ।" पूर्व्वरूपं—"उद्गारबाहुल्यपुरीषबन्धतृप्त्यक्षमत्वान्त्रविकूजनानि । आटोपमाध्मानमपक्तिशक्तिमासन्नगुल्मस्य वदन्ति चिह्नम् ॥ अरुचिकृच्छ्रविण्मूत्रवातत्वञ्चान्त्रकूजनं । आनाहश्चोर्द्ध्ववातश्च सर्व्वगुल्मेषु लक्षयेत् ॥" भा. । तस्य चापक्वताकारणे सुश्रुतः । "तुल्यदोषसमुत्थानात् विद्रधेर्गुल्मकस्य च । कस्मान्न पच्यते गुल्मो विद्रधिः पाकमेति च । गुल्मरूपाः स्वयं दोषा विद्रधिर्मांसशोणिते । तस्मान्न पच्यते गुल्मो विद्रधिः पाकमेति च ॥" इति । ग्रन्थिपर्णवृक्षे । গেঁঠেলা । काण्डशून्यवृक्षजातौ । ঝোপ, ঝাড়ি বন । चमूभेदे । त्रिका. ।

गुल्मकः । पुं । रक्तकरवीरवृक्षे । वै.निघ. ।

गुल्मकालानलरसः । पुं । गुल्माधिकारे रसः । पारदं गन्धकं तालं ताम्रकं टङ्कणं यवक्षारं प्र. तोलकद्वयमितं मुस्तकं पिप्पली शुण्ठी हरीतकी वचा कुष्ठं प्र. तोलकं चूर्णयेत् सर्व्वमेकीकृत्य पर्पटमुस्तकशुण्ठ्यपामार्गपाठाक्वाथेन भावयित्वा शुष्कङ्कृत्वा चूर्णयेत् । मात्रा गुञ्जाचतुष्टयं । भैष. । टङ्कणस्थाने लौहमिति रसेन्द्रसारः । महान् यथा—गन्धकं तालकं ताम्रं तथैव तीक्ष्णलौहकं समांशं गृहीत्वा घृतकुमारीरसेन दृढं मर्द्दयित्वा गजपुटे पचेत् । शीते च समुद्धरेत् । मात्रा. २ र. । र.सा.सं. ।

गुल्मकेतुः । पुं । अम्लवेतसे । रा.नि.व.६ ।

गुल्मगणः । पुं । गुल्मवृक्षाणां वर्गे । यथा—

"बलाचतुष्टयं पर्णी पञ्चकञ्चाग्निमन्थकः। पाठायासावार्त्ताकी कोकिलाक्षो गणो द्विधा। अपामार्गद्वयं मूर्व्वा चाह्निमान् शरपुङ्खिका। काकनासा काकजङ्घा मेषशृङ्गी च भङ्गकम्। बन्ध्याककर्कोटकी चैव बर्व्वरीतुलसी द्विधा। वज्रदन्ती द्विधा आली नाम्ना गुल्मगणस्त्वयम्॥" चर्कः।

गुल्मगवेधुका । स्त्री। गवेधुकायाम्। गड़गड़े। प.मु.। देवधान्ये। र.मा.।

गुल्मघ्नम् । क्ली। हिङ्गुनि। रा.नि.व.६।

गुल्ममूलम् । क्ली। आर्द्रके। रा.नि.व.६।

गुल्मवज्रिणी (वटिका) । स्त्री। रक्तगुल्मे हिता। "रसगन्धकताम्रञ्च कांस्यं टङ्कणतालकं। प्रत्येकं पलिकं ग्राह्यं मर्द्दयेदतियत्नतः। तद्यथाग्निबलं खादेत् रक्तगुल्मप्रशान्तये॥" রস, গন্ধক, তামা, কাঁসা, সোহাগা, হরিতাল প্রত্যেকে ৮ তো. জলে মর্দ্দন। र.सा.सं.।

गुल्मवल्ली । स्त्री। सोमलतायाम्। रा.नि.व.३।

गुल्मशार्द्दूलरसः । पुं। गुल्मे रसः। रसगन्धकलौहगुग्गुलुत्रिवृतापिप्पलीशुण्ठीशटीधन्याकजीरकानि प्र. ८ तो. जैपालवीजं ४ तो. सञ्चूर्ण्य घृतेन वटी कार्य्या। मात्रा २ र.। र.सा.सं.।

गुल्मिकः । पुं। रक्तकरवीरे। वै.निघ.।

गुल्मिनी । स्त्री। उलुपे। উলু। विस्तृतलतायाम्। अम.।

गुल्मी (इन्) । पुं। कण्टकपालीवृत्ते। प.मु.। स्त्री। आमलक्याम्। एलायाम्। मे.। गृध्रनखीवृत्ते। গুড়কাঁউলী। श.च.।

गुल्यः । त्रि। मधुरे। है.च.।

गुवाकः । पुं। The betel-nut tree. स्वनामख्यातवृत्ते। গুয়া গাছ। हिं सुपारि। गुणाः—कषायत्वं शीतलत्वं दीपनत्वं गुरुपाकित्वञ्च। राज.। See अक्षोटः।

गु(गू)ष्टिः । स्त्री। गाम्भारीवृत्ते। वै.निघ.।

गुहः । पुं। चपलघोटके। श.र.। कङ्गुधान्ये। वै.निघ.२भ.अतिसा.चि.गोकण्टकादिकषाये।

गुहा । स्त्री। सिंहपुच्छीनामपृश्निपर्ण्याम्। সিংহপুচ্ছী চাকুলিয়া। रा.नि.व.४। नकुलः१२अ.। चा.सू.२९अ.। शालपर्णीनामक्षुपे। भा.पू.१भ.।

गुहाशयः । पुं। गुहाशयमृगमात्रे। सिंहव्याघ्रवृकतरक्षुद्वीपृग्रचमार्ज्जारशृगालमृगेर्वारुकप्रभृतिषु। तन्मांसगुणाः—मधुरं गुरु स्निग्धं बल्यं वातघ्नमुष्णवीर्य्यं नेत्राशंसां हितम्। सु.सू.४६अ.। "सिंहव्याघ्रवृकऋक्षतरक्षुद्वीपिनस्तथा। बभ्रुजम्बूकमार्ज्जारा इत्याद्याः स्युर्गुहाशयाः॥" भा.। वनमूषिके। सप्तपर्णवृत्ते। चक्रवाके। वै.निघ.। व्याघ्रे। रा.नि.व.१९। त्रि। गुहाशायिनि।

गुहिनम् । क्ली। वने। श.र.।

गुहिलम् । क्ली। धने। उणा.।

गुहेरः । पुं। लौहकारे। उणा.।

गुह्यम् । क्ली, पुं। कमठे। मे.। पायौ। भगे। त्रिका.। लिङ्गे। अम.।

गुह्यदीपकः । पुं। खद्योते। श.च.।

गुह्यनिष्यन्दः । पुं। मूत्रे। रा.नि.व.१८।

गुह्यपत्रः (पुष्पः) । पुं। अश्वत्थवृत्ते। रा.नि.व.११।

गुह्यरोगः । पुं। शूकदोषापरनामसु उपदंशादित्रयोविंशतिविधरोगेषु। तत्र उपदंशाः पञ्च। सर्षपिकादय अष्टादश। See शूकदोषः। निदानम्—"स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा। दोषाध्युषितसङ्कीर्णमलिनानुरजःपथाम्। अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकां। दूषितं स्पृशतस्तोयं रतान्तेष्वपि नैव वा। विवर्द्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः। मुष्टिदन्तनखोत्पीड़ाविषवच्छुकपातनैः। वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः। दोषा दुष्टा गता गुह्यं त्रयोविंशतिमामयान्। जनयन्त्युपदंशादीन्॥" वा.उ.३३अ.।

गुह्यवीजः । पुं। भूतृणे। गन्धतृणविशेष। रा.नि.व.८। तृणमात्रे। वै.निघ.।

गूः । पुं। विष्ठायाम्।

गूढ़म् । क्ली। गुह्ये। मे.। त्रि। संवृते। अम.।

गूढ़कामी (इन्) । पुं। काके। वै.निघ.।

गूढ़गर्भकः । पुं। गर्भजरोगविशेषे। वै.निघ.।

गूढ़नीड़ः । पुं। खञ्जरीटपक्षिणि। श.मा.।

गूढ़पत्रः (त्रा) । पुं, स्त्री । अङ्कोलवृक्षे । करीरवृक्षे । रा.नि.व.८ ।

गूढ़पथः । पुं । अन्तरात्मनि । हे.च. ।

गूढ़पात् (दः) । पुं । सर्पे । अम. । श.र. । कच्छपे । वै.निघ. । [१० ।

गूढ़पुष्पः (कः) । पुं । वकुलवृक्षे । रा.नि.व.

गूढ़फला । स्त्री । गृध्रनख्याम् । গুড়কাঁউলী, কালিয়াকড়া । वै.निघ. ।

गूढ़मल्लिका । स्त्री । अङ्कोलवृक्षे । "अङ्कोले गूढ़मल्लिका ।" रा.नि.व.२३ ।

गूढ़मैथुनः । पुं । काके । त्रिका. ।

गूढ़वर्चाः । पुं । भेके । त्रिका. । [नि.व.२३ ।

गूढ़वल्लिका (ल्ली) । स्त्री । अङ्कोलवृक्षे । रा.

गूढ़ाङ्गः । पुं । कच्छपे । रा.नि.व.१९ । उपस्थे । वै.निघ. ।

गूढ़ाङ्घ्रिः । पुं । सर्पे । रा.नि.व.१९ ।

गूथम् । क्ली । विष्ठायाम् । अम. । [श.च. ।

गूथलक्तः । पुं । पक्षिविशेषे । গুয়েশালিক ।

गूनः । त्रि । कृतपुरीषोत्सर्गे । अम. ।

गूवाकः । पुं । गुवाके । श.र. ।

गूषणा । स्त्री । मयूरपिच्छचन्द्रके । श.च. ।

गृञ्जन(क)म् । क्ली । रक्तमूलकविशेषे । শালগম । हिं गाजर । मं सेठीमूल । कं चण्डिकेयमूलंगि । गुणाः—कटूष्णं कफवातघ्नं रुच्यं दीपनं हृद्यं दुर्गन्धगुल्मघ्नञ्च । रा.नि.व ७ । विषदिग्धपशोर्मांसे । मे. । वा.चि.४अ. । (कम्) हरीतकीभेदे । वा.चि.६अ. । "यूषं गृञ्जनकस्य वा ।" पुं । Garlic. रसोने । रक्तरसोने । লাল রশুন । हिं लसुण । रा.नि.व.७ । गुणाः—रसोनवदुष्णकटुपिच्छिलस्निग्धगुरुस्वादुतिबल्यवृष्यत्वं मेधास्वरवर्णचक्षुर्भग्नास्थिसन्धानकरत्वं तीक्ष्णत्वं हृद्रोगजीर्णज्वरकुक्षिशूलविबन्धगुल्मारुचिमूत्रकृच्छ्रघ्नत्वं अर्शःकुष्ठवातकृमिकफरोगघ्नत्वञ्च । रा.नि.व.७ । रक्तशिग्रौ । गञ्जायाम् । वै.निघ. ।

गृञ्जरः । पुं । गर्ज्जरे । গাজর । वै.निघ. ।

गृध्रजीवः । पुं । महाशृगाले । বড় শেয়াল । हे.च. ।

गृधूः । पुं । अपाने । उणा. ।

गृध्रः । पुं । पक्षिविशेषे । শকুনি, গৃধিনী । रा.नि.व.१९ । प्रसहवर्गीयः काकसमगुणश्च । सु.सू.४६अ. । त्रि । लोभयुक्ते । त्रिका. ।

गृध्रनखी । स्त्री । कण्टकपालीवृक्षे । গুড়কাঁউলী, কেলেকড়া । तें गेहगेरुचेट्टु । र.मा. । कोलिवृक्षे । কুলগাছ । त्रिका. । वै.निघ.२भ.वा.व्या.चि.महाराजाद्यौ । नखीनामगन्धद्रव्ये । वै.निघ. ।

गृध्रनखीद्वयम् । क्ली । श्वेतलोहितपुष्पभेदात् अहिंस्राद्वये, कालीयकद्वये । শ্বেত রক্ত কেলেকড়া, গুড়কাঁউলী । "द्वे गृध्रनख्यौ रास्ना च ।" सि.यो.च.द.वा.व्या.वाजिगन्धादिकषाये । वदरीद्वये, वदरी वनवदरी चेति । त्रिका. । वै.निघ. २भ.ज्व.चि.दशमूलादिकषाये । [नि.व.५ ।

गृध्रपत्रा । स्त्री । धूम्रपत्रानामकक्षुद्रक्षुपे । रा.

गृध्रपुरीषः । पुं । गृध्रपक्षिविष्ठायाम् । गुणाः—व्रणदारुणत्वम् । सु.सू.३६अ. ।

गृध्रसी । स्त्री । Rheumatism, affecting the loins. वातरोगविशेषे । চোরঙ্গী বাত । तल्लक्षणम्—"स्फिक्पूर्व्वा कटिपृष्ठोरुजानुजङ्घापदक्रमात् । गृध्रसी स्तम्भरुक्तोदैः गृह्णाति स्पन्दते मुहुः । वाताद्वातकफात्तन्द्रागौरवारोचकान्विता ॥" मा.नि. । "वाताद्वातकफाभ्यां सा विज्ञेया द्विविधा पुनः । वातजायां भवेत्तोदो देहस्यातीव वक्रता । जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता भृशं । वातश्लेष्मोद्भवायान्तु गौरवं वह्निवर्द्धनं । तन्द्रामुखप्रसेकश्च भक्तद्वेषस्तथैव च ॥" भा. । "पार्ष्णिप्रत्यङ्गुलीनान्तु कण्डरा यानिलार्दिता । सक्थ्नोः क्षेपं निगृह्णीयात् गृध्रसीति हि सा स्मृता ॥" सु.नि.१अ. । गृध्रस्यान्तु नरं सम्यक्रेकेण वमनेन वा । ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत् ॥

गृध्राकारः । पुं । भाषपक्षिणि । वै.निघ. ।

गृध्राणी । स्त्री । धूम्रपत्रानामक्षुद्रक्षुपे । रा.नि.व.५ ।

गृष्टिः (ष्टिका) । स्त्री । वाराहीनाममहाक-

न्दाके। শুয়ার আলু। रा.नि.व.७। गृकर्ष्या। सु.चि.२६।१७ष.। सकृत्प्रसूतायां गवि। हे.च.। गान्धारीवृचे। रा.नि.व.८। वराहक्रान्तायाम्। ष्म.। गृकभूकुष्माण्डे। वै.निघ.। बदरवृचे। मे.।

गृष्टिचीरम्। क्ली। सकृत्प्रसवादुग्धे।भा.म.३भ.।

गृहम्। क्ली। निकेतने। घर।

गृहकच्छप:। पुं। पेषणशिलायाम्। श.र.।

गृहकन्या। स्त्री। कुमार्य्यां। घृतकुमारी। रा.नि.व.५। [रा। त्रिका.।

गृहकपोत: (क:)। पुं। पारावते। পায়-

गृहकर्त्ता। पुं। धूसरवर्णोऽतिसूक्ष्मचटके। বা-বুই। रा.नि.व.१८। [পোকা।

गृहकारी (इन्)। पुं। कीटविशेषे। কুমীরা

गृहकुलिङ्ग:। पुं। गृहचटके।

गृहकूलक:। पुं। चिचिण्डायाम्। চিচি-ঙ্গা। भा.पू.१भ.।

गृहगोधा (धिका)। स्त्री। ज्येष्ठ्याम्। টিকটিকি। हिं छिपकली, बिषखापरा। र.मा.। तद्विषलक्षणम्—"विदाहं श्वयथुं तोदं स्वेदञ्च गृहगोधिका...जनयेत्।" मा.नि.। (लिका) इति हे.च.।

गृहचटक:। पुं। गृहपालितचटके। গ্রাম্য চড়া। गुणा:—"गृहस्य चटको वृष्य: बलशुक्रविवर्द्धन:। सर्व्वदोषहरश्चापि दीपनो मांसवर्द्धन:॥" अत्रि २१अ.। "रक्तपित्तहरी वेश्मकुलिङ्गस्त्वतिशुक्रल:।" सु.सू.४६अ.।

गृहचूल्लिमृत्। स्त्री। चुल्लीमृत्तिकायाम्। উননের মাটী। चि.क्र.क.। [के। त्रिका.।

गृहणी। स्त्री। पलाण्डी। वै.निघ.। काञ्जि-

गृहद्रुम:। पुं। मेषशृङ्गीनामवृचे। प.मु.। शाकवृचे। শেগুন গাছ। रा.नि.व.८।

गृहधूम:। पुं। आगारधूमे। ঝুল। सा.कौ. ग्रहणी.चि.।

गृहधूमाद्यतैलम्। क्ली। नासारोगे तैलम्। "गृहधूमकणादारुचारनक्ताह्वसैन्धवै:। सिद्धं शिग्रुरवीजैश्च तैलं नासार्शसां हितम्॥" তিলতৈল ১ শ. ঝুল, পিপুল, দারুহরিদ্রা, যবক্ষার, করঞ্জবীজ, সৈন্ধব, বামুনহাটীবীজ প্রত্যেকে ২ তো. ৪ মা. ৬ র.। सा.कौ.। अन्यत् उपदंशव्रते—गृहधूमनिशाकिट्टैरेकद्वित्र्यंशकै: क्रमात्...। ঝুল ১ প. ২ তো. ৫ মা. ৩ র. হরিদ্রা ২ প. ৫ তো. ২ মা. ৩ র. মুরাবীজ ৩ প. ১ তো. ১ মা. ৯ র. তৈল ৪ শ. জল চতুর্গুণ। रस.र.। See आगारधूमाद्यतैलं।

गृहनाशन:। पुं। कपोते। रा.नि.व.१८।

गृहनीड़:। पुं। चटकपक्षिणि। हारा.।

गृहपुत्रिका। स्त्री। घृतकुमार्य्याम्। भैष.कुष्ठ.चि.कन्दर्पसा.तैले। त्रायमाणायां। গোয়ালে। सा.कौ.।

गृहबलिप्रिय: / **गृहबलिभुक्** } पुं। चटके। काके। वै.निघ.। वके। श.र.।

गृहमणि:। पुं। प्रदीपे। त्रिका.।

गृहमाचिका। स्त्री। चर्म्मचट्याम्। চামচিকি। त्रिका.।

गृहमृग:। पुं। कुक्कुरे। हे.च.। [वै.निघ.।

गृहशायी (इन्)। पुं। पारावते। পায়রা।

गृहाम्बु (म्लं)। क्ली। काञ्जिके। त्रिका.। च.द.गर्भ.चि.। [हे.च.।

गृहा(हो)लिका। स्त्री। ज्येष्ठ्याम्। हारा.।

गृहाशया। स्त्री। ताम्बूलीलतायाम्। श.च.। पूगीवृचे। वै.निघ.। [र.।

गृहाश्मा। पुं। पेषणशिलायाम्। শিল। श.

गृहिणी। स्त्री। काञ्जिके। त्रिका.। भार्य्यायाम्। हे.च.।

गृह्यम्। क्ली। गुदे। मे.।

गृह्यक:। पुं। गृहासक्तमृगादौ। अम.।

गेयप्रिय:। पुं। सुन्दरपुष्पवृचे। গন্ধরাজ গাছ। रा.नि.व.१०।

गेहधूम:। पुं। गृहधूमे। ঝুল। च.द.।

गेहपची। पुं। पारावते। वै.निघ.।

गैरिक(रेय)म्। क्ली। सुवर्णे। रा.नि.व.१३।

वै.निघ.हिक्का.चि.। शिलाजतुनि । गिरिमृत्तिकायाम् । গেরিমাটী । हिं गेरु, सुवर्णगेरु । तच्च गैरिकस्वर्णगैरिकभेदेन द्विविधम् । तयोः गैरिकं स्वर्णगैरिकात् रक्ततरं । गुणाः—"गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमं । चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम् ॥" भा.पू.१भ. । निर्म्मलं स्निग्धं नेत्रतेजस्करम् । राज. । शोधनं शङ्खशोधनवत् । भा.४भ.पादस्फोट.चि.मधुसिक्थकगैरिकघृत··· ।

गैरिकाक्षः । पुं । जलमधूकवृक्षे । रा.नि.व. ११ । [मा. ।

गैरी । स्त्री । लाङ्गलिकवृक्षे । विषलाङ्गुलि । र.

गोकण्टः (कः) । पुं । क्षुद्रगोक्षुरक्षुपे । रा.नि.व.४ । च.द.वा.व्या.माषतैले । विकण्टकवृक्षे । रा.नि.व.११ ।

गोकण्टी । स्त्री । गोपघोण्टायाम् । वै.निघ. ।

गोकर्णः । पुं । अश्वगन्धायाम् । मद.व.१ । अश्वतरे । मे. । कूलचरमृगभेदे । अम. । गुणाः—गोकर्णमांसं मधुरं स्निग्धं मृदु कफघ्नं विपाके मधुरं रक्तपित्तघ्नञ्च । सु.सू.४६अ.। सर्पविशेषे । मे.।

गोकर्णा । स्त्री । अश्वगन्धायाम् । वै.निघ. ।

गोकर्णिका (र्णी) । स्त्री । वाजिवल्गाभेदे । ज.द.७अ. । मूर्व्वायाम् । रा.नि.व.३ । तृणविशेषे । কাল অপরাজিতাবিশেষ । गुणाः—कट्वी शीता तिक्ता बुद्धिदा चक्षुष्या तुवरा सरा विषघ्नी त्रिदोषघ्नी शिरःशूलदाहकुष्ठशूलघ्नी आमं पित्तरोगशोथक्रिमिकफव्रणकफग्रहपीड़ासर्पविषहरी च । वै.निघ. ।

गोकिरा(री)टिका (टी) । स्त्री । सारिकायां ।শালিক পাখী । हे.च. । रा.नि.व.१९ ।

गोकि(की)लः । पुं । मुषले । हारा. ।

गोकुलिकः । स्त्री । काणे । কাণা । वै.निघ.।

गोकृतम् । क्ली । गोमये । श.च. ।

गोखरी (खुरः) । पुं । गोक्षुरक्षुपे । श.र. । क्ली । गोशफे । श.च. ।

गोग्रन्थिः । पुं । गोजिह्विकौषधौ । मे. । करीषे, शुष्कगोमये । त्रिका. ।

गोघृतम् । क्ली । गव्यघृते । গাওয়া ঘি । गुणाः—विपाके मधुरं शीतलं वातपित्तविषघ्नं चक्षुष्यं बल्यं श्रेष्ठञ्च । सु.सू.४६अ. । See गव्यघृतम् । वर्षोपले । त्रिका. ।

गोचन्दना । स्त्री । सविषजलायुकाभेदे । জোঁক । सु.सू.१३अ. । सु.चि.२८अ. ।

गोचरविभ्रमः । पुं । रूपस्यायथाग्रहणे । भा.म.४भ.नेत्ररो.चि. ।

गोचर्म्म । क्ली । गोत्वचि ।

गोचर्म्मकण्टकः । पुं । पर्पटके । वै.निघ. ।

गोच्छगलः । पुं, क्ली । गोमये । वै.निघ. ।

गोच्छालः । पुं । अलम्बुषक्षुपे । কুক্শিমে গাছ । र.मा. ।

गोच्छाला । स्त्री । गोरक्षमुण्ड्याम् । वै.निघ.।

गोजलम् । क्ली । गोमूत्रे । रा.नि.व.१५ ।

गोजा । स्त्री । गोलोमिकायाम् । रा.नि.व.५ । भा.म.३भ.मू.घा.चि. ।

गोजागरिकः । पुं । कण्टकारीक्षुपे । मे. ।

गोजापर्णी । स्त्री । दुग्धफेनीवृक्षे । वृदिशा । रा.नि.व.५ । [सु.चि.१८।२२अ. । भा. ।

गोजिः (जी) । स्त्री । गोजिह्वालतायाम् ।

गोजिकाणः । पुं । मध्यमाश्वे । See अश्वः ।

गोजिह्वा । स्त्री । Elephantopus scaber. स्वनामख्यातपत्रशाकक्षुपे । দাড়ি শাক । हिं पाथरी, गोभी, दाड़ीशाक, गोजियालता । तैं येट्टुनालुकचेट्टु, भरिलिकचेट्टु । च.द. । "गोजिह्वां बालमूलकम् ।" गुणाः—लघुः कुष्ठमेहास्रकृच्छ्रज्वरघ्नी । भा.पू.१भ.शा.व. । कटुका तीव्रा शीतला पित्तघ्नी व्रणरोपणी । सर्व्वदन्तविषापहा च । रा.नि.व.४ । "गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् । हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः । कोमला तुवरा तिक्ता स्वादुपाकरसा मृता ॥" सु. । गुन्द्रायाम् । গড়্গড়ে । द्रवधान्ये । দেধান । र.मा. ।

गोजिह्विका । स्त्री । गोजिह्वायाम् । श.र. । जिह्वारूपकायप्रत्यङ्गविशेषे । च.शा.७अ. । [मे. ।

गोड़ः । पुं । नाभौ संवृद्धमांसगुड़के । গোঁড় ।

गोड़म्बी । स्त्री । भल्लातकवीजे । वै.निघ. ।

गोड़वास्तुकः । पुं । वास्तुकशाकविशेषे । वै. निघ. । [गाछ । मे. ।

गोड़म्बः । पुं । कालिङ्गलतायाम् । তরমুজ

गोड़ुम्बा (म्बिका) । स्त्री । (Cucumis madraspatanus. Cucumis melo.) फलशाकलताविशेषे । গোমুক, রাজগোমুক । र.मा. ।

गोणा । स्त्री । मनःशिलायाम् । रा.नि.व.१३ ।

गोणी । स्त्री । द्रोणीपरिमाणे । प.प्र. ।

गोण्डः । पुं । गोड़े । গোঁড় । अम. ।

गोतीर्थकः (च्छेदः) । पुं । गोर्थोन्याकारच्छेदने । सु चि.८अ. । काव्यगतगोमूत्रिकाकारच्छेदे । वा.उ.२८अ. । "पार्श्वादागतशस्त्रेण छेदो गोतीर्थको मतः ।" भा.म.भगन्दरे ।

गोतैलम् । क्ली । गोवसायां । भैष.क्षुद्ररो.चि.।

गोत्रम् । क्ली । कुलेः। गव्ये । त्रिका. । शरीरे। छत्रे । वै.निघ. ।

गोत्रद्रुमः (पुष्पः,कः) (विटपी)(वृक्षः)। पुं । धन्वनवृक्षे । भा. । वै.निघ. ।

गोत्रभृत् । पुं । पर्व्वते । रा.नि.व.२ ।

गोत्रेष्टम् । क्ली । शीषके ।

गोदः । पुं । मस्तकस्नेहे, मस्तिष्के । हे.च. ।

गोदधि । क्ली । गव्यदधनि । See गव्यदधि।

गोदन्तम् । क्ली, पुं । हरिताले । रा.नि.व.१३। तन्नामकहरितालविशेषे । গোদন্ত হরিতাল । भैष.ज्व.चि.कालाग्निभै.रसे ।

गोदन्ता । स्त्री । दारुमोचभेदे । দার্মুজ । प. सु.। तन्नामकहरिताले । भैष.प्लीह.चि.शङ्खद्रावके ।

गोदावरी । स्त्री । विन्ध्यस्य दक्षिणप्रसिद्धभारतीयनद्याम् । तज्जलगुणाः—पित्तरोगहरं रक्तदोषहरं वातहरं पथ्यम् अतिदीपनं पापघ्नं कुष्ठादिदुष्टरोगघ्नं तृष्णाहरञ्च । रा.नि.व.१४ ।

गोदुग्धम् । क्ली । गोक्षीरे । গাই দুধ । तत्प्रशस्तता—"निर्वत्सावालवत्सायाः पयो दोषलमीरितं । वत्सैकवर्णयोः शस्तं धवलीकृष्णयोरपि । ऊस्वादा माषपर्णादा ऊर्ध्वशृङ्गी च या भवेत् । तासां गवां हितक्षीरम् ।" राज३प. । गुणाः—पथ्यं चतिरुच्यं स्वादु स्निग्धं वातपित्तरोगघ्नं कान्तिकरं प्रज्ञाजनकं बुद्धिमेधाङ्गपुष्टिदं वीर्य्यवर्द्धकञ्च । रा. नि.व.१५ । "गव्यं पवित्रञ्च रसायनञ्च पथ्यञ्च हृद्यं बलपुष्टिदं स्यात् । आयुःप्रदं रक्तविकारपित्तत्रिदोषहृद्रोगविषापहं स्यात् ॥" अत्रि.८अ. । गोदुग्धग्रहणकालनिर्णयः—"गव्यं प्रत्यूषसि क्षीरं गुरु विष्टम्भि दुर्जरं । तस्मादभ्युदिते सूर्य्ये यामं यामार्द्धमेव वा । समुत्ताप्य ततो ग्राह्यं तत्पथ्यं दीपनं लघु ॥" राज.३प. । [व.८ ।

गोदुग्धदा । स्त्री । चणिकाख्यतृणे । रा.नि.

गोदुग्धा । स्त्री । गोड़ुम्बायाम् । রাজগোমুক। इन्द्रवारुणीलतायाम् । चिर्भटिकायाम् । वै.निघ।

गोद्रवः । पुं । गोमूत्रे । रा.नि.व.१५ ।

गोधजः । पुं । गोधायाम् । वै.निघ. ।

गोधना । स्त्री । ऋद्ध्योषधौ । वै.निघ. ।

गोधा । स्त्री । स्वनामख्यातजन्तुविशेषे । গোসাপ । हिं गोहो । सा द्विधा जलजस्थलजभेदात् । अस्या मांसगुणाः—वातकासश्वासनाशित्वं । रा.नि.व.१७ । पाकमधुरत्वं कषायत्वं कटुत्वं पित्तघ्नत्वं रक्तशुक्रबलकरत्वञ्च । राज.३प. । "रक्तपित्तहरा वृष्या स्निग्धा मधुरशीतला । श्वासकासहरा प्रोक्ता गोधा चार्शोहिता तथा ॥" अत्रि-२०अ. । च.सू.२७अ. । वटपत्रीपाषाणभेदे । वै.निघ. । मनःशिलायाम् । भा. ।

गोधापदिका (दी) । स्त्री । (Vitis pedata. Syn. Cissus pedatus.) हंसपद्यां । গোয়ালে লতা । तैं हंसपादिचेट्टु । गुणाः—कटुरुष्णा विषघ्नी भूतघ्नी भ्रान्तिघ्नी अपस्मारहरी रसायनी च । रा.नि.व.५। र.चि.वृह.पानीयभक्तगुड्याम् । "हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् । विसर्पदाहातीसारलूताभूताग्निरोहिणीः॥" भा. । तालमूल्याम् । रा.नि.व.७ । रक्तलज्जालुकायाम् । वै.निघ. ।

गोधामांसम् । क्ली । गोधायां मांसे । গোসাপের মাংস। See गोधा ।

गोधावती । स्त्री । वटपत्रीनामपाषाणभेदवि-

श्वेते । वै.निघ.। गोधापर्णा । গোয়ালে । च.द. ।

गोधावल्ली । स्त्री । हंसपदीलतायाम् । प.मु. ।

गोधासुतः । पुं । गौधेरे । अयं चतुष्पात् । वा.उ.३६अ. ।

गोधास्कन्दः (न्धः) । पुं । अरिमेदवृक्षे । विट्‌थदिर । रा.नि.व.८ । [याम् । श.र. ।

गोधिः । पुं । ललाटे । रा.नि.व.१८ । गोधा-

गोधिका । स्त्री । गोधायाम् । अम. ।

गोधिकात्मजः (सुतः) । पुं । गोधाशिशुवदाकारकोटरस्थस्थलगोधायाम् । शा.सु. ।

गोधिकासूदनः । पुं । गौधेरके । জলগোধা । वै.निघ. । [नि.व.४ ।

गोधिनी । स्त्री । चविकानामवृहत्याम् । रा.

गोधु(धू)मः । पुं । (Triticum vulgare.) Common wheat. स्वनामख्यातशूकधान्ये । গম । हिं गेँहुं । तैं गोधुमतु । स त्रिधा—महागोधूम-मधूली-निःशूकभेदेन । "महागोधूम इत्याख्यः पश्चाद्देशात्समागतः । मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा । निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ॥" "मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः । शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः ॥" भा.पू.१भ.धान्यव. । गुणाः—वृष्यः शीतो गुरुः स्निग्धः जीवनः वातपित्तघ्नः सन्धानकारी मधुरः स्थैर्य्यकृत् सरश्च । वा.सू. । मधुरो गुरु विष्टम्भी वृष्यो बल्योऽथ बृंहणः । ईषत्कषायमधुरो गोधूमः स्यात्त्रिदोषहा ॥ अत्रि.१५अ. । सन्धानकृद्वातहरः गोधूमः स्वादु शीतलः । जीवनो बृंहणो वृष्यः स्निग्धः स्थैर्य्यकरो गुरुः ॥ च.सू.२७अ. । पित्तदाहकृत् श्लेष्मामजनकः रुचिकरश्च । रा.नि.व.१६। तत्काञ्जिकगुणाः—"सन्दीपनं शूलहरं रुचिप्रदं गोधूमजातं कथितं कषायं। सन्दीपनं स्याज्जरणं कफघ्नं समीरदोषं हरते ततोऽपि । पीतं जरयते चामं वाह्यदाह्यश्रमापहं । स्याच्च तत् कुष्ठकण्डूघ्नं तैलयुक्तं समीरजित् ॥" अत्रि.११अ. । [दौ । गोधूमगुणम् ।

गोधूमचूर्णम् । क्ली । चूर्णीकृतगोधूमे । मय-

गोधूमकः । पुं । राजिमत्सर्पविशेषे । सु.कल्प. ४अ. । See सर्पः ।

गोधूमजः । पुं । तवक्षीरे । वै.निघ. ।

गोधूमफलं । क्ली । गोधूमे । वै.निघ. ।

गोधूममण्डः । पुं, क्ली । गोधूमकृतमण्डे । গমের মণ্ড । गुणाः—"तद्वद्गोधूमसम्भूतं मधुरं पित्तवारणम् ।" अत्रि.१२अ. । [नि.व.१५ ।

गोधूमसम्भवम् । क्ली । सौवीरकाञ्जिके । रा.

गोधूमसौवीरम् । क्ली । गोधूमजातकाञ्जिके । वै.निघ. ।

गोधूमक्षीरिका । स्त्री । गोधूमपायसे । গুজির পায়স । गुणाः—"गोधूमपायसी बल्यः कफमेदकरो गुरुः। शीतलः पित्तशमनो वातकृच्छुक्रवर्द्धनः ॥" वैद्यकम् ।

गोधूमाद्यघृतम् । क्ली । रसायनाधिकारे । घृतं ४ श. दुग्धं १६ श. क्वाथार्थं—गोधूमः १०० प. वारि ३२ श. शे. ८ श. । कल्कार्थं—गोधूमः मुञ्जाफलं (अभावे तालमस्तकं) माषकलायः द्राक्षा परूषफलं काकोली क्षीरकाकोली जीवन्ती शतमूली अश्वगन्धा पिण्डीखर्ज्जुरं मधूकफलं (মউল) त्रिकटु शर्करा भल्लातकं (अभावे रक्तचन्दनं) आत्मगुप्ताफलं मूलं वा (আলাকুশী) एषां प्रति ३॥० तो. ४॥० र. । प्रक्षेपद्रव्यं—गुड़त्वक् एला पिप्पली धान्यकं कर्पूरं नागकेसरं एषां प्रति १०॥৶१० तो. शर्करा ८ प. मधु ८ प. इक्षुकाण्डेन आलोड़येत् । मात्रा १—२ प. च.द. । [रा.नि.व.५ ।

गोधूमिका (मी) । स्त्री । गोलोमिकायां ।

गोधेरकः । पुं । गौधेरके । वै.च. ।

गोनन्दी । स्त्री । सारसपक्षिणि । हारा. ।

गोनर्दम् । क्ली । कैवर्त्तमुस्तके । मे. । परिपेलवृणे । रा.नि.व.८ । पुं । तन्नामकपक्षिणि । मे. । च.सू. २७ अ ।

गोन(ना)सः । पुं, क्ली । वैक्रान्तमणौ । रा. नि.व.१३ । तन्नामकसर्पे । मण्डलीवोड़े । বোড়া সাপ, মণ্ডলী বোড়া । विक्रमादित्यः । मण्डलिसर्पे । গোখুরা সাপ । इति केचित् । [धिः ।

गोनसी । स्त्री । महौषधिविशेषे । See ओष-

गोनिष्यन्दः (न्दं) । पुं,क्ली । गोमूत्रे । रा. नि.व.१५ ।

गोपः (कः) । पुं । वणिग्द्रव्यभेदे. रक्तबोले । खम.। शारिवायाम् । वै.निघ. । सारजवर्गीयौषधि नरसारे । निशादल । श.र. ।[त्रि] । उपकारके । श.च. ।

गोपकन्या । स्त्री । काष्ठसारिवायाम् । रा.नि.व.१२ । श्वेतशारिवायाम् । भा.पू.१भ. । वा.उ.३७अ., चि.२अ. ।

गोपकर्कटिका । स्त्री । गोपालकर्कटिलतायाम् । कुन्दुरु, माठकाँकुड़ । रा.नि.व.३ ।

गोपघण्टा । स्त्री । गोपघोण्टायां । वै.निघ.।

गोपघोण्टा (ण्टिका) । स्त्री । विकङ्कतवृक्षे । वँइची गाछ । रा.नि.व.९ । कर्कोट्याम् । শেয়াকুল । ভামকোলী । श.र.सु.सू.३८अ. । पूगभेदे । सु.चि.८अ. । [इषे । मे. ।

गोपतिः । पुं । ऋषभकौषधौ । रा.नि.व.५ ।

गोपदलः । पुं । गुवाकवृक्षे । त्रिका. ।

गोपनम् । क्ली। तेजपत्रे । ग्रन्थिपर्णे । वै.निघ.।

गोपवधूः । स्त्री । शारिवायाम्, कृष्णशारिवायाम् । भा.पू.१भ. ।

गोपभद्रम् । क्ली । शालूके । श.च. ।

गोपभद्रा (द्रिका) । स्त्री । गाम्भारीवृक्षे । গামার গাছ । प.मु. ।

गोपरसः । पुं । बोले । निशादल । श.र. ।

गोपवल्लिः (ल्ली) । स्त्री । मूर्व्वायाम् । अनन्तायाम् । অনন্তমূল । प.मु. । श्यामालतायां । रा.नि.व.११ ।

गोपसुता । स्त्री । सारिवायाम् । वा.सू.१५अ।

गोपा (पी) । स्त्री । श्यामालतायाम् । भैष. कुष्ठ.चि.महाभल्लातगुड़े । अनन्तायाम् । प.मु. । काष्ठशारिवायाम् । नि.व.१२ ।

गोपाङ्गना । स्त्री । श्वेतशारिवायाम् ।

गोपानीयम् । क्ली । गोमूत्रे । वै.निघ. ।

गोपालकर्कटिका (टी) । स्त्री । स्वनामख्यातारण्यकर्कटीलतायां । कुन्दरुकी,কেহুড়া । हिं गोरुभा, गोयालकाँकड़ी । गुणाः—शीतला मधुरा पित्तघ्नी मूत्रकृच्छ्राश्मरीमेहदाहशोषघ्नी च । रा.नि.व.३ ।

गोपालप(पु)त्रिका । स्त्री । चिर्भिटायां । "गोपालपत्रिकामूलम्।"वै.निघ.२भ.विषमज्व.चि.।

गोपालिका । स्त्री। इन्द्रगोपकीटभेदे । हे.च.।

गोपाली । स्त्री । गोरक्षीनाममहाक्षुपे । গোরক্ষচাকুলে । रा.नि.व.५ । गोपालकर्कटीलतायाम् । रा.नि.व.३ ।

गोपिका । स्त्री । कृष्णशारिवायाम् । वै.निघ.।

गोपित्तम् । क्ली । गोरोचनायाम् । प.मु. ।

गोपित्तजा । स्त्री । गोरोचनायाम् । वै.निघ.।

गोपिनी । स्त्री । श्यामालतायाम् । श.च. ।

गोपीचन्दनम् । क्ली । सौराष्ट्रमृत्तिकायाम् । शुभ्रमृत्तिकायाम् । वै.निघ. ।

गोपीजलः । पुं । गुल्माधिकारे रसः । "जैपालाष्टौ द्विकौ गन्धः शुण्ठीमरिचचित्रकं । एकः सूतः ससौभाग्यः गोपीजल इति स्मृतः॥"र.सा.सं.।

गोपीवल्लभः । पुं । प्रवाले । পলা । प.मु. ।

गोपुच्छः । पुं । वानरविशेषे । गवां लाङ्गूले । वै.निघ. ।

गोपुटः । पुं । क्षुद्रमुस्तायाम् । वै.निघ. ।

गोपुटा (टी) । स्त्री । स्थूलैलायाम् । बड़ एलাচ । रा.नि.व.६ ।

गोपुरम् । क्ली । कैवर्त्तमुस्तके । मे. ।

गोपुरकः । पुं । कुन्दुरौ । कुन्दूरुखोटी । रा.नि.व.१२ ।

गोपुरीषम् । क्ली । गोमये । रा.नि.व.१५ ।

गोपुष्टम् । क्ली । परिपेलवणे । रा.नि.व.८ ।

गोप्रियं । क्ली । पलाले । পোয়াল খড় । वै.निघ. । [महाराष्ट्रे । वै.निघ. ।

गोप्रेरकः । पुं । पक्षिविशेषे । कालवट इति

गोफणा । स्त्री । यन्त्रभेदे फिङ्गा इति लोके, यया पाषाणगुड़िका दूरे क्षिप्यन्ते । तदाकारे चिबुकनासौष्ठादिगतव्रणबन्धनविशेषे । सु.सू.१८अ. । चि.२अ.। वा.चि.६अ. । "पाषाणगुड़िकोत्क्षेपकारिणीं गोफणां विदुः ।" इति ।

गोबन्धना (नी) । स्त्री । गोवल्लाम्, पीतपुष्पदण्डोत्पलायाम् । डानकुनी । र.मा. ।

गोब्रल्थः । पुं । श्वेतयावनाले । वै.निघ. ।

गोबालधी । स्त्री । चमरीमृगी । वै.निघ. ।

गोभण्डीरः । पुं। जलकुक्कुभपक्षिणि । त्रिका.।

गोभिरामा । स्त्री । रामतरण्याम् । वै.निघ. ।

गोभी । स्त्री । गोजिह्वायाम् । वै. निघ. ।

गोमतम् । क्ली । रक्तवोले । वै.निघ. ।

गोमतल्लिका । स्त्री । सुशीलायां गवि, गोश्रेष्ठे । हला. । [कतैले ।

गोमती । स्त्री । गोरोचनायाम् । वै.निघ.कन-

गोमत्स्यः । पुं । नादेयगोमीने । See मत्स्यः ।

गोमयः । पुं, क्ली । गोशकृति । গোবর । रा. नि.व.१५ ।

गोमयचूर्णीयः । त्रि । गोमयचूर्णमधिकृत्य कृते चरकीयाध्याये । च.इन्द्रिय.१२अ. ।

गोमयच्छत्रम् । क्ली । करके । কোঁড়ক-ছাতা । त्रिका. । [हारा. ।

गोमयच्छत्रिका । स्त्री । गोमयच्छत्रे ।

गोमयतैलम् । क्ली । नेत्ररोगे तिमिरे च तैलम् । "गवां शकृत्क्वाथविपक्वमुत्तमं हितञ्च तैलं तिमिरेषु नस्यतः ।" তিল তৈল ১ শ. গোময়-রস ১ শ. । भैष. ।

गोमयप्रियम् । क्ली । भूतृणे । গন্ধথড় । र. मा. । बालके । বালা । वै.नि.घ. ।

गोमयाद्यघृतम् । क्ली । तिमिराख्यनेत्ररोगे घृतम्। पाठः—"गवां शकृत्क्वाथविपक्वमुत्तमं हितञ्च तैलं तिमिरेषु नस्यतः । घृतं हितं केवलमेव पैत्तिके छागाविकं यन्मधुरैर्विपाचितम् ॥" ছাগ-ঘৃত ৪শ. গোময়রস ৪শ.। কল্কার্থ কাকোলী, ক্ষীরকাকোলী, জীবক, ঋষভক, মুদ্গপর্ণী, মাষাণী, মেদা, মহামেদা, গুলুঞ্চ, কাঁকড়া-শৃঙ্গী, বংশলোচন, পদ্মকাষ্ঠ, পুণ্ডরিয়া, ঋদ্ধি, বৃদ্ধি, কিস্‌মিস্, জীবন্তী, যষ্টিমধু মিলিত ১ শ. জল ১৬ শ. । रस.र. । [পোকা । हे.च. ।

गोमयोत्था । स्त्री । गोमयजातकीटे । গুবরে

गोमयोद्भवः । पुं । आरग्वधे । श.च. ।

गोमर्दः । पुं । सारसपक्षिणि । त्रिका. ।

गोमलम् । क्ली । गोमये । रा.नि.व.१५ ।

गोमक्षिका । स्त्री । मक्षिकाविशेषे । ডাঁশ-মাছি । श.र. ।

गोमांसम् । क्ली । गोभवमांसे । গোরুর মাংস । तच्च पवित्रं गुरु वातकफजनकञ्च । रा.नि.व. १७ । "गव्यं पवित्रमायुष्यं श्रमघ्नमनिलापहम् ।" राज.३प. । "गव्यं केवलवातेषु पीनसे विषमज्वरे । शुष्ककासश्रमात्यग्निमांसक्षयहितञ्च यत् ॥" च.सू.२७अ. । "कासश्वासप्रतिश्यायविषमज्वरनाशनं । श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम्॥" सु.सू.४६अ. ।

गोमायुः । पुं । शृगाले । শেয়াল । प.मु. । (युस्) क्ली । वंशलोचनायाम् । वै.निघ. ।

गोमाची । स्त्री । कर्णस्फोटायाम् । वै.निघ.

गोमी (इन्) । पुं । शृगाले । मे. ।

गोमीनः । पुं । मत्स्यविशेषे । [त्रिका. ।

गोमुखः । पुं । नक्रे । हे.च. । क्ली । लेपने ।

गोमूत्रम् । क्ली । गोजले । চোনা । गुणाः—कटु तिक्तम् उष्णं कफवातहरं लघु पित्तकरं दीपनं लग्दोषहरं मेध्यञ्च । रा.नि.व.१५ ।

गोमूत्रवीजकः । पुं। रक्तवीजासनवृक्षे । रा. नि.व.६ । [कल्प.८अ. ।

गोमूत्राभः । पुं । मन्दविषवृश्चिकभेदे । सु.

गोमूत्रिका । स्त्री । स्वनामख्याततृणे । तांवड़ु, गोढ़वि इति पश्चिमदेशे । गुणाः—मधुरा वृष्या गोदुग्धदा । रा.नि.व.८ ।

गोमूत्री । स्त्री । रक्तकुलत्थिकायाम् । वै.निघ.।

गोमेदः (कः) । पुं । स्वनामख्यातोपरत्नविशेषे, लोहितमणौ । গোমেদ । वै.निघ.२भ.चय. चि.नवरत्नराजमृगाङ्के । सु.नि.३अ. । गुणाः—अम्ल उष्णः वातकोपहरः दीपनः पाचनः धार्यो पापघ्नश्च । रा.नि.व.१३। See माणिक्यम् । क्ली । तेजपत्रे । भा.व्रध्नरोगे । "पत्रं दलाह्वयं वासो गोमेदं वसनाह्वयम् ।" धन्वन्तरिः ।

गोमेदसन्निभा । स्त्री । दुग्धपाषाणे । फूलखड़ि । प.मु. ।

गोऽम्बु (म्भः) । क्ली । गोमूत्रे । रा.नि.व.१५ ।

गोरकः । पुं । विषधरसर्पविशेषे । सचि.३स्थान।

गोरङ्कुः । पुं । जलकुक्कुटे । पानकौड़ि । मे. ।

गोरटः । पुं । विट्खदिरवृक्षे । रा.नि.व.८ ।

गोरण्टकः । पुं । कौङ्कणदेशप्रसिद्धविकण्टकवृक्षे । रा.नि.व.११ ।

गोरसः । पुं । दुग्धे । चतुर्थांशजलतक्रे । पादजल घोल । दधनि । हे.च. ।

गोरसजम् । क्ली । पादजलेन विभागदधिकृते तक्रे । रा.नि.व.१५ । [नागरङ्गवृक्षे । मे. ।

गोरचः । पुं । ऋषभकौषधौ । रा.नि.व.५ ।

गोरचकर्कटी । स्त्री । इन्द्रवारुण्यां । राखाल शसा । चिर्भटिकायाम् । काँकुड़ । भा. ।

गोरचजम्बूः । स्त्री । घोण्टावदरीवृक्षे । शेयाकुल । जटा. । बलायाम् । वै.निघ.। गोधूमे । गोरक्षतण्डुलायां । विश्व.।

गोरचतण्डुला । स्त्री । (Hedysarum lagopodioides.)नागबलायां । गोरक्षचाकुलिया । प.मु. ।

गोरचतुम्बी । स्त्री । स्वनामख्यातफलशाकविशेषे । कुम्भतुम्ब्याम् । गोरवतुम्बी, गोरखदुद्धिके इति च देशविशेषख्याते। गोल लाउ। गुणाः—मधुरा शीतला पित्तहा गुरुः सन्तर्पणी रुच्या वीर्य्यपुष्टिबलदा । रा.नि.व.७ ।

गोरचदुग्धा (ग्धी) । स्त्री । गोरचीनामचुद्रचुपे । गुणाः—मधुरा शीतला ग्राह्या वश्यकरी रसे सिद्धिदा । रा.नि.व.५ ।

गोरची । स्त्री । स्वनामख्यातमहाचुपे । तत्रा सैव मालवदेशे प्रसिद्धा । गुणाः—मधुरा तिक्ता शीता दाहपित्तघ्नी विस्फोटवान्तिज्वरातीसारघ्नी च । रा.नि.व.५ । ऋषभके । कुम्भतुम्ब्याम् । रा.नि.व.७ । गोरचदुग्धायां । रा.नि.व.५ ।

गोराटी (ण्टिका) (रिका) । स्त्री । शारिकापक्षिणि । शालिक पाखी । हे.च. । रा.नि.व.१६ ।

गोरुची । स्त्री । गोरोचनायाम् । वै.निघ. ।

गोरोचम् । क्ली । हरिताले । रा.नि.व.१३ ।

गोरोचनम् (ना) । क्ली, स्त्री । स्वनामख्यातसारजवर्गीयद्रव्ये । सा च न गोशाधारणहृदयाधारा गोविशेषेषु कदाचिल्लभ्यते । प.मु.। गोमस्तकस्थशुष्कपित्तमिति माधवः । गोमूत्रनिर्म्मितमिति केचित् । गुणाः—शीतला विषदोषघ्नी रुच्या पाचनी क्रमिकुष्ठघ्नी भूतग्रहशान्तिकरी मङ्गलकरी जनमोहनी च । रा.नि.व.१२ । "गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा । विषालक्ष्मीग्रहोन्मादगर्भस्रावचतास्रहृत् ॥" भा. । वै. निघ.२भ.सर्व्वज्व.चि.गोरोचनादिचूर्ण ।

गोर्दम् । क्ली । शिरोमले । मस्तिष्के । माथार घि । अम. ।

गोलः । पुं । सुगन्धवोले । गन्धबोल । जटा. । मदनवृक्षे । र.मा. । मणौ । त्रिका. ।

गोलकः । पुं। कालमुष्ककवृक्षे । घण्टापारुल । मणौ । त्रिका.। रक्तसुगन्धवोले । र.मा.। कलाये । मटर । श.च. । गुड़े । हे.च. । सुगन्धरोहिषतृणे । वै.निघ. । पिण्डे । हे.च. । [रा.नि.व.८ ।

गोलफलः । पुं । मदनवृक्षे । मयना गाछ ।

गोलवत् । क्ली । पुष्पप्रियङ्गौ । हिं फुलप्रियङ्गु । वै.निघ. ।

गोला । स्त्री । मनःशिलायाम् । मे. ।

गोलाङ्गूलः । पुं। कपौ । मुखपोड़ा। त्रिका.।

गोलासः । पुं । गोमयच्छत्रके । कोड़कछाता । हारा. । [रा.नि.व.८ ।

गोलिका । स्त्री । घोण्टायाम् । शेयाकुल ।

गोलिहः (लीढ़ः) । पुं । कालमुष्ककवृक्षे । घण्टापारुल । अम. ।

गोली । स्त्री । गोजिह्वायां । गजिया। वै.निघ.।

गोलोमिका (मी) । स्त्री । (Corydalis govaniana.) स्वनामख्यातमहाचुपे । गन्धल । हिं पाथरी । हटगिरे । गुणाः—कटुः तिक्ता हिमा त्रिदोषघ्नी मूलदोषामदोषघ्नी दीपनी ग्राहिणी च । रा.नि.व.५ । वचायाम् । रा.नि.व.६ । श्वेतदूर्व्वायाम् । रा.नि.व.८ । भा.स्कन्दापस्मा.चि. ।

भूतकेश्याम्। भूँइकेश। प.मु.च.सू.४अ.। महौषधिविशेषे। See ओषधिः। नीलदूर्व्वायां। जटामांस्याम्। अकर्क्करायाम्। वै.निघ.।

गोवत्सारिः। पुं। ईहामृगे। ঘোগ। रा.नि.व.१९।

गोवन्दनी। स्त्री। प्रियङ्गुवृक्षे। अम.। पीतदण्डोत्पलायाम्। পীত ডানকুনী। र.मा.।

गोवरपुटम्। क्ली। औषधस्य पुटविशेषे। "गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं चूर्णितगोमयम्। गोवरं तत्समाख्यातं वरिष्ठं रससाधने। वृहद्भाण्डस्थिते यत्र गोवरैर्दीयते पुटम्। तद्गोवरपुटम्प्रोक्तं भिषग्भिः सूतभस्मनि॥" भा.।

गोवर्णी। अश्वगन्धायाम्। वै.निघ.।

गोवशा। स्त्री। वन्ध्यायां गवि। वै.निघ.।

गोवारि। क्ली। गोमूत्रे। वा.उ.३६अ.।

गोविट्। स्त्री। गोमये। अम.।

गोविन्दः। पुं। गोमेदमणौ। वै.निघ.।

गोविन्दिनी। स्त्री। प्रियङ्गौ। रा.नि.व.१२।

गोविराटी। स्त्री। शारिकापक्षिणि। वै.निघ.।

गोविषाणाह्वा। स्त्री। वव्वूलवृक्षे। বাবলা গাছ। वै.निघ. हिक्का.चि.धूमे.।

गोविष्ठा। स्त्री। गोमये। रा.नि.व.१५।

गोवृषः। पुं। वृषे। श.र.।

गोवेष्टम्। क्ली। श्रीवके। শীষা। प.मु.।

गोशकृत्। क्ली। गोमये। जटा.। [वै.निघ.।

गोशाड्वलः। पुं। ग्रन्थिपर्ण्याम्। গেঁটেলা।

गोशीर्षः (कः)। पुं। (र्षः) प.मु.। (कः) र.मा.। द्रोणपुष्प्याम्। ঘলঘসিয়া। क्ली। श्रीखण्डचन्दने। শ্বেত চন্দন। प.मु.। गोमस्तके। चन्दने। रा.नि.व.१२।

गोशृङ्गः। पुं। वर्व्वूरकवृक्षे। বাবলা গাছ। रा.नि.व.८। वै.निघ.ग्रहणी.चि.। क्ली। गोशृङ्गे।

गोष्ठकुक्कुटः (गोचरः)। पुं। भासपक्षिणि। काकविशेषे। वै.निघ.।

गोष्ठीश्वरः। पुं। उद्रज्वरे। गज-वै.।

गोसः। पुं। रक्तगन्धवोले। খুনখারাপী। श.

गोसङ्गः (र्गः)। पुं। प्रभाते। तारा.। च.इन्द्रिय.८अ.।

गोसदृक्षः। पुं। गवयमृगे। हे.च.।

गोसम्भवा। स्त्री। गोजीमिकायाम्। শ্বেত দূর্ব্বা। रा.नि.व.५। [अ.टी.रा.।

गोसम्भ्रमः। पुं। रक्तवोले। খুনখারাপী।

गोस्तना। स्त्री। द्राक्षायाम्। अ.टी.च.द सि.यो.रक्त.पि.चि.। "पथ्याखर्ज्जूरगोस्तनाः।" [निघ.।

गोस्तनाकारा। स्त्री। मधुखर्ज्जूरीवृक्षे। वै.

गोस्तनिका (नी)। स्त्री। द्राक्षायाम्। मनक्का। वै.निघ.२भ.पाण्डु.चि.आमलक्यवलेहे। गुणाः—वृष्या गुर्व्वी कफपित्तघ्नी च। भा.।

गोस्तनीभवः। पुं। द्राक्षासवे। দ্রাক্ষার আসব। वै.निघ.।

गोस्रवः। पुं। अनामिकाङ्गुष्ठयुतकरविस्तारे। रा.नि.व.१८। गोमूत्रे। रा.नि.व.१५।

गोहन(ल)म्। क्ली। गोमये। र.मा.।

गोहरीतकी। स्त्री। विल्ववृक्षे। प.मु.।

गोहितः। पुं। घोषालतायां। विल्ववृक्षे। श.च.। [क्ली। पादमूले। हे.च.।

गोहिरः। पुं। अधमजातीयाश्वे। नकुल.।

गोक्षीरः। पुं। गोक्षुरके। গোখ্রী। रा.नि.व.४। क्ली। गोदुग्धे।

गोक्षुरः (कः)। पुं। (Zygophylleæ. Tribulus terestris. Syn. T. Lanuginosus.) स्वनामख्यातक्षुपे। গোখ্রী। क्षुद्रक्षुपविशेषे। हिं गोक्षुरखूल। उत्. गोखुरा। वेड़िलीसराटी। गोखरू इति च प्रसिद्धः। स च महाक्षुद्रभेदाद्द्विधा। सा.गुणाः—शीतलं मधुरत्वं बल्यत्वं वृंहणत्वं कृच्छ्राश्मरीमेहविदाहघ्नत्वं रसायनत्वञ्च। "गोक्षुरः शीतलः स्वादुः बलकृद्बस्तिशोधनः। मधुरो दीपनो वृष्यः पुष्टिदश्चाश्मरीहरः। प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत्॥" भा.। क्षारगुणाः—"क्षारस्तु गोक्षुराणान्तु मधुरः शीतलो मतः। स्रोतोविशोधनश्चैव वातघ्नो वृष्य एव च॥" वै.निघ.। तच्छाकगुणाः—तिक्तं वृष्यं स्रोतोविशो-

धनच । राज.३प. । बीजगुणाः—बीजं गोक्षुरजं शीतं मूत्रलं शोथवारणम् । हृष्यमायुष्करं शुक्रमेहनुत्कृच्छनाशनं ॥ वै. निघ. ।

गोक्षुरादिगणः । पुं । लोहमारकवर्गभेदे । यथा—"गोक्षुरः क्षुरको व्याघ्री सिंहपुच्छी कुशिम्बिका । गोक्षुरादिरिति प्रोक्तो वातश्लेष्महरो गणः ॥" रस.च. ।

गोक्षुराद्यघृतम् । क्ली । मूत्राघाते घृतम् । "धान्यगोक्षुरकक्वाथकल्कसिद्धं घृतं हितम् ।" घृतं ४श. क्वाथार्थं धन्याकं २श. जलं १६ श. शे.४ श.। कल्कार्थं धन्याकं ४ प. गोक्षुरः ४ प.। घৃত ৪ শ. কাথার্থ ধনে ২ শ. জল ১৬ শ. শে. ৪ শ. কল্কার্থ ধনে ৪ প. গোক্ষুর ৪ প.। सा.कौ. । अन्यत् राजयक्ष्मणि । गव्यघृतं ४ श. क्वाथार्थं दुरालभा गोक्षुरः शालपर्णी पृश्निपर्णी (চাকুলে) मुद्गपर्णी माषपर्णी श्वेतवाट्यालकं चेत्रपर्पटी एषां प्र. १ प. जल ४० श. शे. ४ श. । कल्कार्थं शटी पुष्करमूलं पिप्पली बला भूम्यामलकी चिरायता इन्द्रयवः अनन्तमूलं एषां प्र. २ तो. दुग्धं ८ श. । च.चि.८अ. । [व.४ ।

गोक्षुरी । स्त्री । गोक्षुरे । গোখরী । रा.नि.

गोक्षुरुः । पुं । गोक्षुरे । कृकलासे ।

गोचो(च्वे)ड़ः (कः) । पुं । गोनर्दपक्षिणि । সারস পাখী । सु.सू.४६अ. ।

गौः । पुं, स्त्री । स्वनामख्यातपशौ । গরু । अम. । पुं । स्वर्गे । मे. । अणिकाद्रव्ये । रा.नि.व.८। ऋषभके । रा.नि.व.५ । क्ली । लोम्नि । अ.टी. भानु. । स्त्री । नेत्रे । वाक्ये । रोहिण्यां । जले । मे. । भूमौ । त्रिका. । [पाचनो दीपनश्च । सु. ।

गौड़ः । पुं । गुड़विकारे । গুড়ের মদ । स च

गौड़(र)वास्तुकः । पुं, क्ली । चिल्लीशाके । वृहत्पत्ररक्तवास्तुके । रा.नि.व.७। লাল বেতো শাক । "तदेव तु वृहत्पत्रं रक्तं स्याद्गौरवास्तुकं ।" भा.पू.१भ.शाकव. । See वास्तुकम् ।

गौड़सीधुः । पुं । गुड़कृततीक्ष्णमद्ये । गुणाः—"कषायो मधुरः सीधुर्गौड़ः पाचनदीपनः ।" सु.सू.४५अ. ।

गौड़ारसः । पुं । शूले रसः । रससिन्दूरं ५ भ. मृतलौहं ५ भ. शतावरी आमलकी गुड़ूचीक्वाथे मर्दयेत् । রসসিন্দূর ৫ ভ. মৃতলৌহ ৫ ভ. শতাবরী,আমলকী এবং গুড়ূচীক্বাথে ৩ দিন ভাবনা দিবে। মাত্রা ৪ র.। অনুপান ঘৃত ও মধু। रस.र. ।

गौड़ासवः । पुं । गुड़कृतासवे । গুড়েমদ । गुणाः—सृष्टमूत्रशकृत् तर्पणो दीपनश्च । वा.टी. हेमाद्रिः। धातकीसगुड़ैर्मद्यभेदे गौड़ः प्रकीर्त्तितः । तौड़ः द्रव्यगुणमाला ।

गौड़िकम् । क्ली । गुड़कृतमद्यविशेषे । त्रि । गुड़संस्कृते । भा.उदावर्त्त.चि. ।

गौड़ी । स्त्री । गुड़कृतमद्ये । त्रिका. । धातकीरसगुड़ादिकृताम्लमद्ये । गुणाः—तीक्ष्णा उष्णा मधुरा वातघ्नी पित्तजननी बलकरी दीपनी पथ्या कान्तिजननी तर्पणी च । रा.नि.व.१४ । "गौड़ी कषाया मधुराम्लशीता सन्दीपनी शूलमलापहन्त्री। हृद्या त्रिदोषं शमयत्यजीर्णं पाण्डामयार्शःश्वसनं निहन्ति ॥" अत्रि.१८अ. ।

गौणविम्बी । स्त्री । विम्बीभेदे । वै.निघ. ।

गौणी । स्त्री । लोणिकाशाके । নুনিয়াশাক। प.मु । मनःशिलायाम् । र.सा.स. ।

गौण्ड्रः । पुं । कशेरुके । কেশুর ।

गौतमः । पुं । स्थावरविषभेदे । हे.च. ।

गौतमी । स्त्री । गोरोचनायां । रा.नि.व.१२ ।

गौधारः (धेयः) (धेरः, कः) । पुं । गोधिकात्मजे । गोधा इति ख्याते । स च दर्व्वीकरैर्विषेण तुल्यस्तैरेव जातत्वात् । "गोधासुतस्तु गौधेरो विषे दर्व्वीकरैः समः । चतुष्पात् व्यन्तरान् विद्यार्द्दतेषामेव सङ्करात् ।" वा उ.३६अ. । स पञ्चविधः—"प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः । तथा निरुपमश्चापि पञ्च गौधेरकाः स्मृताः । तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् । रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः ।" सु.कल्प.८अ. । "तदुत्पत्तिर्यथा—कृष्णसर्पेण गोधायां भवेज्जन्तुश्चतुष्पदः । सर्पो गौधेरकोनाम तेन दष्टो न जीवति । सर्पो गौधेरकोनाम गोधाख्यः स्याच्चतुष्पदः । कृष्णसर्पेण तुल्यः स्यात् नाना सुर्मिश्रजातयः ।" च. ।

गौरः । पुं । श्वेतसर्षपे । रा.नि व.१६ । See सिद्धार्थः । धवहचे । धाओयागाछ । रा.नि.व.९ । कर्पूरे । रा.नि.व.१२ । करञ्जहचे । खदिरे । वै. निघ. । गौरधान्ये । च.सू.२७अ. । क्ली । सौगन्धिकहणे । रामकर्पूर । रा.नि.व.८। हरिताले । रा.नि.व.१३ । पद्मकेशरे । मे. । कुङ्कुमे । रा.नि. व.१२ । स्वर्णे । रा.नि.व.१३ । गौरसुवर्णशाके । वै.निघ. ।

गौरकः । पुं । गिरिमृत्तिकायां । গেরিমাটী । वै.निघ.ज्व.चि.लाचातैले । लावपचिणि। वै.निघ.।

गौरकदम्बः (कः) । पुं । हारिद्रके। हर्दुआ कदम्ब इति लोके। भा.म.४भ.रेवती.ग्र.चि. ।

गौरखटी । स्त्री । श्वेतखटिकायाम् । শ্বেত খড়ি । वै.निघ. ।

गौरचणकः । पुं । धवलचणकहचे । শাদা ছোলা । मं श्वेतचणा । कं विलियकड़ले । गुणाः —मधुरः बल्यः रोचनः वातकरः पित्तघ्नः शीतलः गुरुश्च । रा.नि.व.१६ ।

गौरजीरकः । पुं । श्वेतजीरके । শাদা জীরে । गुणाः—हिमो रुचिकरः कटुमधुरः दीपनः क्रमिविषाध्मानहरः चक्षुष्यश्च। रा.नि.व.६ ।

गौरतित्तिरः(रिः) । पुं । तित्तिरपचिणि । তিতির পাখী । वै.निघ. । See तित्तिरिः ।

गौरत्वक् । पुं । इङ्गुदीहचे । জীয়াপুতা । रा. नि.व.८ ।

गौरद्रुः । पुं । हरिद्राहचे । वै.निघ. ।

गौरधान्यम् । क्ली । शालिधान्यविशेषे । শাদা ধান । च.सू.२७अ. । [খড়ি । वै.निघ. ।

गौरपाषाणम् । क्ली । श्वेतखटिकायां । ফুল-

गौरमाल्यः । पुं । गिरिजमधूकहचे । পাহাড়ে মউল গাছ । [কলা । रा.नि.व.११ ।

गौररम्भा । स्त्री । सुवर्णकदलीहचे । চাঁপা

गौरवम् । क्ली । कफजरोगे, गुरुत्वे । लक्षणं यथा—"आर्द्रचर्म्मविबद्धं हि यो गात्रमभिमन्यते। तथा गुरुशिरोऽत्यर्थं गौरवं तद्विनिर्द्दिशेत् ॥" सु. शा.४अ. ।

गौरवर्णवती । स्त्री । हरिद्रायाम् । वै.निघ. ।

गौरवल्ली । स्त्री । प्रियङ्गुलतायां। रा.नि.व.१२।

गौरव्रीहिः । पुं । गौरशाली । वै.निघ. ।

गौरशाकः । पुं । मधूकहचभेदे । গিরিজ মউলবিশেষ । र.मा. ।

गौरशाखी (इन्) । पुं। जलमधूके । वै.निघ. ।

गौरषष्टिकः । पुं । षष्टिकशालिधान्यभेदे । শ্বেতবর্ণ ষেটে ধান । गुणाः—रुच्यः शीतलः दोषघ्नः बल्यः पथ्यः दीपनः वीर्य्यवृद्धिकरश्च । रा. नि.व.१६ ।

गौरसर्षपः । पुं । (Brassica juncea. Syn. Sinapis romasa.) श्वेतसर्षपे । শ্বেত সরিষা । हिं राइ । तें तेल्लावालु । प.मु. । गुणाः —कटुतिक्तोष्णः वातरक्तघ्नः ग्रहदोषलग्दोषविषभूतव्रणहरः हृद्यस्तीक्ष्णकफकण्डूकुष्ठकीठक्रिमिघ्नः रक्तपित्ताग्निवर्द्धकश्च । भा. ।

गौरसुवर्णशाकः । पुं,क्ली । चित्रकूटदेशे स्वनामप्रसिद्धशाकविशेषे । নটিয়াবিশেষ । गुणाः —शीतलं कफपित्तज्वरघ्नं दाहारुचिश्रान्तिरक्तश्रमघ्नञ्च । रा.नि.व.७ ।

गौरा । स्त्री । सुवर्णकदलीहचे । চাঁপা কলা । रा.नि.व.११ । श्वेतसर्षपहचे । गोरोचनायाम् । वै.निघ. । [रा.नि.व.६ ।

गौराङ्गी । स्त्री । सूक्ष्मैलायाम् । গুজরুটী ।

गौराजाजी । स्त्री । श्वेतजीरके । শাদা জীরে । रा.नि.व.६ ।

गौराटः । पुं । श्वेतखदिरे । वै.निघ. ।

गौराटिका । स्त्री । शारिकापचिणि । শালিক পাখী । वै.निघ. ।

गौराद्यं घृतं(तैलञ्च) । क्ली । गव्यघृतं तिलतैलं वा ४ श. क्वाथार्थं—अश्वत्थः वटोदुम्बरप्लक्षवेतसानां मिलित्वा त्वक् ६४ प. वारि ६४ श. शे. १६ श. । कल्कार्थं—हरिद्रा दारुहरिद्रा मञ्जिष्ठा पुण्डरीकं जटामांसी यष्टिमधु बालकं मुस्तकं रक्तचन्दनं जातीपत्रं निम्बपत्रं पटोलपत्रं करञ्जबीजं कटुकी सिक्थकं यष्टिमधु अनन्तमूलम् एषां मिलित्वा ८ प. । গব্যঘৃত বা তিলতৈল ৪ শ. কাথার্থ অশ্বথ, বট, যজ্ঞডুমুর, প্লক্ষ, বেত,

বেতস মিলিয়া ৬৪ প. জল ৬৪ শ. শে. ১৬ শ.। কল্কার্থ—হরিদ্রা, দারুহরিদ্রা, মঞ্জিষ্ঠা, পুণ্ডরিয়া, জটামাংসী, যষ্টিমধু, বালা, মুতা, রক্তচন্দন, জাতীপত্র, নিম্বপত্র, পটোলপত্র, করঞ্জবীজ, কট্কী, মম, যষ্টিমধু, অনন্তমূল এই সকল মিলিয়া ৮ প.। च.द.।

गौरार्द्रकः । पुं । स्थावरविषभेदे । ह.च.।

गौराभः । पुं । हरिद्राद्रुचे । वै.निघ.।

गौरामलकम् । क्ली । परिणतामलके । পাকা আমলা । रस.र.। प्राचीनामलके । পানি আমলা।

गौरास्यः । पुं । नीलवानरे । रा.नि.व.१९ ।

गौराहिकः । निर्विषसर्पविशेषे । सु.कल्प.।

गौरिका । स्त्री। जलमधूके । जलज मौउया । "यवान्नगौरिकोन्मिश्रैः।" सु.चि.२०अ.चलस.चि.। शारिकापचिषि । वै.निघ.। अष्टवर्षीयकन्यायां। श.र.।

गौरिणी । स्त्री । तेरणक्षुपे । वै.निघ.।

गौरि(री)लः । पुं । राजिकायाम् । শ্বেত সরিষা । लौहकिट्टे, लौहचूर्णे । मे.।

गौरी । स्त्री । मञ्जिष्ठायाम् । रा.नि.व.२३ । हरिद्रायाम् । रा.नि.व.६ । सु.चि.१७अ.। प्रियङ्गौ । रा.नि.व.१२ । दारुहरिद्रायाम् । प.मु। नीलदूर्व्वायां । श्वेतदूर्व्वायां । रा.नि.व.८। मल्लिकापुष्पक्षुपे ।रा.नि.व.१०।२३ । तुलसीद्रुचे । रा.नि.व.१० । गौरोचनायाम् । रा.नि.व.१२ । सु.चि.१७अ.। आकाशमांस्यां । सूक्ष्मजटामांस्याम् । रा.नि.व.१२।२३ । अनागतार्त्तवायां कन्यायाम् । रा.नि.व.१८। स्वर्णकदल्याम् । कुमुम्बुर्य्याम् । रा.नि.व.२३ ।

गौरीकेशः । पुं, क्ली । अभ्रधाती । प.मु.।

गौरीजम् । क्ली। गन्धके । प.मु.। अभ्रकधाती । रा.नि.व.१२ ।

गौरीजेयम् । क्ली । अभ्रधाती । रा.नि.व.१३ ।

गौरीतेजः । क्ली । अभ्रधाती । प.मु.।

गौरीपाषाणम् । क्ली । शुक्लपाषाणे । वै.निघ.२भ.अर्शः-चि.।

गौरीपुष्पः । पुं । प्रियङ्गुवृचे । रा.नि.व.१२ । श्वेतकरवीरद्रुचे । रा.नि.व.१० ।

गौरीरजः । क्ली । गन्धके । चि.क्र.कल्प.।

गौरीललितं । क्ली। हरिताले। रा.नि.व.१३।

गौर्जरः । पुं । मेषशृङ्ग्याम् । মেড়াশিঙে । वै.निघ.। [संख्याशतके ।

गौर्य्यम् ।क्ली। तमालपत्रे । वै.निघ अर्कचि.गण.

गौर्य्यश्मा । पुं । शुक्लपाषाणे । ফুলখড়ি । वै.निघ.।

गौर्य्यामलम् । क्ली । अभ्रके । অভ্র । भ.टी.खा.। [कुल । रा.नि.व.११ ।

गौलिकः । पुं। कालमुष्ककद्रुचे । घण्टापा-

गौल्यम् । क्ली। चिक्कणपूगफले । চিকিণ-পারী । हिं चिकणीसुपारी । रा.नि.व.११। See अकोटः । क्ली । मद्यविशेषे । रा.नि.व.२०। स्त्री । बिम्बीलतायां । তেলাকুচা,কুঁদরুকী । वै.निघ.।

ग्रथितम् । क्ली । लवङ्गे । वै.निघ.जीर्णज्व.चि. लवङ्गादिकषाये । शूकदोषभेदे । लक्षणं—तल्कफोत्थितं ग्रन्थत् शूकपूरितच भवेत् । सु.नि१४अ.।

ग्रन्थिः । पुं । वंशादेः सन्धौ । গাঁইট । अम.। भद्रमुस्तायाम् । रा.नि.व.६ । पिण्डालौ । रा.नि.व.७ । ग्रन्थिपर्णद्रुचे । গেঁটেলা । मे.। पिप्पलीमूले । वै.निघ.२भ.ज्व.चि.ग्रन्थ्यादिकषाये । पादग्रन्थौ । आर्त्तवदोषे । वै.निघ.। तन्नामकशोथरोगे । निदानसम्प्राप्ती यथा—"वातादयो मांसमसृक् प्रदुष्टाः सन्दूष्य मेदश्च कफानुविद्धं। वृत्तोन्नतं विग्रथितन्तु शोथं कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥ आयम्यते व्यध्यत एति तोदं प्रत्यस्यते कृत्यत एति भेदं । कृष्णो मृदुर्वस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छम् । दन्दह्यते धूप्यति चातिमात्रं पापच्यते प्रज्वलतीव चापि । रक्तः सपीतोऽप्यथवापि पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रं । शीतो विवर्णोऽल्परुजोऽतिकण्डुः पाषाणवत् संहननोपपन्नः । चिराभिवृद्धिश्च कफप्रकोपात् भिन्नः स्रवेच्छुक्लघनञ्च पूयं । शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महानल्परुजोऽतिकण्डुः । मेदःकृतो गच्छति चातिभिन्ने पिण्याकसर्पिःप्रतिमन्तु मेदः" । सु.नि.११अ.। स नवधा भवति दोषासृङ्मांसमेदोऽस्थि-

शिराव्रणभवः । वा.उ.२९अ । तेषां रक्तमांसशिरास्थिव्रणभवानां लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि । तत्र दोषासमेदोजाः साध्याः । मर्म्मकण्ठोदरस्थाः स्थूलाः खराः चलाश्च न साध्याः ।

ग्रन्थि(न्थी)कम् । क्ली । पिप्पलीमूले रा.नि.व.६ । च.द कामला.चि.मण्डूरवटके । गुग्गुलौ । मे. । पुं । कर्णपालीगतरोगे । सु.सू.१६अ. । ग्रन्थिपर्णे । গেঁটেলা । भैष.कुष्ठ.चि.कन्दर्पसारतैले । अर्ज्जुनवृक्षे । त्रिका. । करीरे । मे. ।

ग्रन्थिका । स्त्री । ग्रन्थिपर्णे । গেঁটেলা । वचायाम् । वै.निघ. ।

ग्रन्थिकोषः । पुं । ग्रन्थिपर्णे । গেঁটেলা । च.द.वा.व्या.चि. । "ग्रन्थिकोषो मरुवकम् ।"

ग्रन्थिखेटी । स्त्री । गन्धमात्रायाम् ।

ग्रन्थितकः । पुं । शूकरोगे । वै.निघ. । See ग्रथितं । [चोरके, ग्रन्थिपर्णे । वै.निघ. ।

ग्रन्थिदला । स्त्री । मालकन्दे । रा.नि.व.७ ।

ग्रन्थिदूर्व्वा । स्त्री । वल्लीदूर्व्वायां । গাঁটাদূর্ব্বা । रा.नि.व.८ । [मुण्डीरी । रा.नि.व.५ ।

ग्रन्थिनिका । स्त्री । महाश्रावणिकायाम् ।

ग्रन्थिनी । स्त्री । कदलीवृक्षे । वै.निघ. ।

ग्रन्थिपत्रः । पुं, क्ली । चोरकनामगन्धद्रव्ये । গেঁটেলা । रा.नि.व.१२ ।

ग्रन्थिपर्णः । पुं, क्ली । चोरकनामगन्धद्रव्ये । গেঁটেলা । रा.नि.व.१२ । स्वनामख्यात-वणिग्द्रव्ये । গেঁটেলা । हिं (गण्ठिवण) । मद. । "ग्रन्थिकः पाण्डुरः किञ्चित् कनिष्ठः सर्व्वसम्मतः । उत्तमः कृष्णवर्णो यः स्थूलोऽतीव च निन्दितः ॥" भैष.ग्रहणी.चि.शतावरीमोदके । गुणाः—तिक्तं तीक्ष्णं कटूष्णं लघुदीपनं कफवातविषश्वासकण्डूघ्नञ्च । भा. । शोधनं गोमूत्रेण । (र्णा, र्णी) स्त्री । जतुकालतायाम् । रा.नि.व.३ । गण्डदूर्व्वायाम् । रा.नि.व ८ । ग्रन्थिपर्णे । वै.निघ. ।

ग्रन्थिफलः । पुं । मदनवृक्षे । ময়না গাছ । रा.नि.व.८। कपित्थवृक्षे । কয়েৎ বেলের গাছ । रा.नि.व.११ । साकुरुण्डवृक्षे । रा.नि.व.६ ।

ग्रन्थिभा । स्त्री । अस्थिसंहारवृक्षे । হাড়জোড়া । वै.निघ. ।

ग्रन्थिमत्फलः । पुं । क्षुद्रकण्टालिकायाम् । वै.निघ. । लकुचवृक्षे । रा.नि.व.९ ।

ग्रन्थिमान् । पुं । अस्थिसंहारवृक्षे । হাড়জোড়া । प.मु. । भा. ।

ग्रन्थिमूलम् । क्ली । तालमूल्याम् । लशुने । वै.निघ. । गृञ्जने । গাজর । रा.नि.व.७ ।

ग्रन्थिमूला । स्त्री । वल्लिदूर्व्वायां । গাঁটাদূর্ব্বা । रा.नि.व.८ ।

ग्रन्थिलः । पुं । विकण्टकवृक्षे । रा.नि.व.११ । विकङ्कतवृक्षे । বঁইচি বৃক্ষ । रा.नि.व.९ । करवीरवृक्षे । अम. । तण्डुलीयक्षुपे । কাঁটানটিয়া । रा.नि.व.५ । चोरकनामगन्धद्रव्ये । গেঁটেলা । रा.नि.व.१२ । पिण्डालौ । रा.नि.व.७ । वंशकरीरे । বাঁশের কোঁড় । प.मु. । क्ली । पिप्पलीमूले । रा.नि.व.६ । आर्द्रके । श.च. । करीरास्थीश्वप्रियगुञ्जे । रा.नि.व.८ । गन्धमात्रायाम् । प.मु. । विल्ववृक्षे । शूकदोषभेदे । वै.निघ. ।

ग्रन्थिला । स्त्री । भद्रमुस्तायाम् । रा.नि.व.६ । वल्लीदूर्व्वायाम् । গণ্ডদূর্ব্বা । रा.नि.व.८ ।

ग्रन्थिवर्ह्नी (न्) । पुं । ग्रन्थिपर्णवृक्षे । श.च. ।

ग्रन्थिवि(वी)सर्पः । पुं । विसर्परोगभेदे । लक्षणं यथा—"कफेन रुद्धः पवनो भित्वा तं बहुधा कफं । रक्तञ्च वृद्धरक्तस्य त्वक्शिरास्नायुमांसगं । दूषयित्वा तु दीर्घाणुवृत्तस्थूलसरात्मनां । ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वरां । श्वासकासातिसारांश्च शोषहिक्कावमिभ्रमैः । मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतः । इत्ययं ग्रन्थिवीसर्पो वातश्लेष्मप्रकोपजः ॥" मा.नि. ।

ग्रन्थिसंहता । स्त्री । नलुकायाम् । वै.निघ. ।

ग्रहजित् । पुं । चीड़ानामदेवदारुभेदे । गन्धद्रव्यविशेष । रा.नि.व.१२ ।

ग्रहणम् । क्ली । नेत्रे । इन्द्रिये । रा.नि.व.१८ ।

ग्रहणी । स्त्री । अग्निवहधमन्याम् । प.प्र.४ख. । तस्याः स्थानं यथा—"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता । पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता । ग्रहणीबलमग्निर्हि स चापि ग्रहणी मतः । तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि प्रदुष्यति ॥" सु.शा. । तथा—"अन्यधिष्ठानमन्नस ग्रहणाद्ग्रहणी

मता। नाभेरुपरि सा ह्यग्निवलोपस्तम्भवृंहिता। अपक्वं धारयत्यन्नं पक्वं त्यजति चाप्यधः” । च.। तन्नामकोदरामयरोगविशेषे। तस्य सम्प्राप्तिर्यथा —“अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः। भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ।” सामान्यलक्षणं यथा—“एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः। सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति। पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवं। ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः। पूर्व्वरूपन्तु तस्येदं तृष्णालस्यं बलक्षयः। विदाहोऽन्नस्य पाकश्च चिरात्कायस्य गौरवं॥” निदानं यथा—कटुतिक्तकषायातिरूक्षसंदुष्टभोजनैः। प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः। मारुतः कुपितो वह्निं संछाद्य कुरुते गदान्। वातजारूपं यथा—“तस्यान्नं पच्यते दुःखं शुक्तपाकः खराङ्गता। कण्ठास्यशोषः क्षुत्तृष्णा तिमिरं कर्णयोः स्वनः। पार्श्वोरुवङ्क्षणग्रीवारुगभीक्ष्णं विसूचिका। हृत्पीड़ा कार्श्यदौर्ब्बल्यं वैरस्यं परिकर्त्तिका। गृद्धिः सर्व्वरसानाञ्च मनसः सदनन्तथा। जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च। सवातगुल्महृद्रोगप्लीहाशङ्की च मानवः। चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत्। पुनः पुनः सृजेद्वर्च्चः कासश्वासार्द्दितोऽनिलात् ॥” पित्तजालक्षणं—“कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्वणं। आप्लावयद्धन्त्यनलं जलमुष्णमिवानलम्। सोऽजीर्णं नीलपीताभं पीताभः सार्य्यते द्रवः। पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृड़र्द्दितः। कफजोत्पत्तिः—गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात्। भुक्तमात्रस्य च स्वप्नात् हन्त्यग्निं कुपितः कफः॥” इत्यादि। मा.नि.। “ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत्। लङ्घनैर्दीपनीयैश्च सदातीसारभेषजैः” । ग्रहण्याम् आहारो ग्रहणीस्थितपाचकपित्तस्थेन वह्निना पच्यते। पच्यमानः स ग्रहणीस्थितस्य कटुरसस्य पित्तस्य संयोगात् कटुर्भवति।

ग्रहणीकपाटरसः। पुं। रसोऽयं ग्रहण्यां हितः। स षड़्विधः। प्रथमो यथा—पारद-गन्धक-टङ्गण-यवक्षार जातीफल-खदिर-जीरक-शुक्लधूनकमर्कटीवीज विल्वशलाटु-वकपुष्पानां प्र.॥० तो. विल्वपत्र-कार्पास-शालिञ्च-चीरिणी-कचट-कुटजपत्राणां रसेन मर्द्दयेत्। वटी १र.। পারা, গন্ধক, সোহাগা, যবক্ষার, জায়ফল, খদির, জীরা, শ্বেতধূনা, আলাকুশীর বীজ, বেলশুঁটা, বকপুষ্প প্রত্যেকে চূর্ণ ॥০ তোলা, বিল্বপত্র, কাপাসফল, শালিঞ্চশাক, থিরুই, কাঁচ্ড়াপাতা, কুড়্চিছাল বা পত্র ইহাদের রসে মর্দ্দন। বটী. ১র.। রস.র.। ভৈষ.। द्वितीयो यथा —पारदगन्धकयोः प्र.१तो. कज्जलिः कार्य्या। कुटजत्वक्भस्म ४ तो. सर्व्वमेकत्र आर्द्रकरसेन मर्द्दयेत्। मात्रा ४ गुञ्जा। পারা ১তো. গন্ধক ১ তো. কজ্জলি করিবে। পরে কুড়্চির ছাল ভস্ম ৪ তো. মিশাইয়া আদার রসে মাড়িবে। ছাগদুগ্ধ বা কুড়্চির ক্বাথের সহিত ৪ রতি সেবন করাইবে। तृतीयो यथा—पारदगन्धकजातीफललवङ्गानां चूर्णं प्र. ॥० तोलकं विल्वपत्रसूर्य्यावर्त्तशृङ्गाटकपत्राणां प्र. पलमानरसेन यथाक्रमं मर्द्दयेत्। मात्रा २ गुञ्जा। পারা, গন্ধক, জায়ফল, লবঙ্গ প্র. ॥০ তো. একত্র চূর্ণ করিয়া বিল্বপত্র, হুড়হুড়িয়া, পাণিফল পাতা ইহাদের প্রত্যেকের রস ১ পল দ্বারা যথাক্রমে মর্দ্দন করিবে। মাত্রা ২ রতি। অনুপান দধি। चतुर्थो यथा—शुक्लधूनकरसगन्धकानां प्र. ४ मा. सूर्य्यावर्त्तविल्वशृङ्गाटकपत्ररसेन प्र. पलमितेन यथाक्रमं मर्द्दयेत्। मात्रा १ गुञ्जा। শ্বেতধুনা, পারা, গন্ধক প্রত্যেকে ৪মাষা একত্র চূর্ণকরত হুড়হুড়িয়া, বিল্বপত্র এবং পাণিফল পত্র ইহাদের প্র. ১ পল রসে মর্দ্দন করিবে। মাত্রা ১ রতি। पञ्चमो यथा संग्रहण्यां—मुक्ताभस्म-स्वर्णभस्म-गन्धक-पारद-टङ्गणाभ्रक कपर्द्दकभस्म-विषाणां प्र.१ तो. शङ्खभस्म ८ तो. अतिविषाक्वाथेन मर्द्दयित्वा गोलकं विधाय पुटपाकेन प्रहरद्वयं पचेत्। उद्धृत्य धुस्तूरचित्रकतालमूलीरसेन भावयेत्। मात्रा २ गुञ्जा। মুক্তাভস্ম, স্বর্ণভস্ম, গন্ধক, পারা, সোহাগা, অভ্র, কড়িভস্ম, বিষ প্র. ১ তো. শঙ্খভস্ম ৮ তো. আতইচের ক্বাথে মাড়িয়া গোলা করিয়া ২ প্রহর পুটপাক করিবে। শীতল হইলে তুলিয়া লোহপাত্রে ধুতুরা, চিতা এবং তালমূলীর রসে ভাবনা দিয়া ২ রতি বটী করিবে। ভৈষ.। षष्ठो यथा—रौप्यभस्म १ भ. मुक्ताभस्म १ भ. स्वर्णभस्म १ भ. गन्धकं २ भ. पारदः ३ भ. सर्व्वं कपित्थरसेन सम्मर्द्य मृगशृङ्गे

दिवा पचेत् । अथ बलारसै ७, अपामार्गरसै ३, धातकीन्द्रयवगुडूचीनां रसै प्र. २ भावना: देया: । রৌপ্যভস্ম ১ ভ. মুক্তাভস্ম ১ ভ. স্বর্ণভস্ম ১ ভ. গন্ধক ২ ভ. পারদ ৩ ভ. কপিত্থরসে মর্দ্দন করিয়া মৃগশৃঙ্গে ভরিয়া পাক করিবে। পরে বলারসে ৭, অপামার্গরসে ৩, লোধ্র, অতিবিষা, মুস্তা, ধাতকী, ইন্দ্রযব, গুড়ূচীর রসে প্র. ৩ ভাবনা দিবে। रस.चि. ।

ग्रहणीगजेन्द्रवटिका । स्त्री । ग्रहण्यधिकारे रस: । रस-गन्धक-लौह-शङ्खभस्म-टङ्कणक्षार-हिङ्गु-शटी-तालीश मुस्त-धान्यक जीरक-सैन्धव धातकी-प्रतिविषा-शुण्ठी-गृहधूम हरीतकी-भल्लातकास्थि (अभावे रक्तचन्दनं) तेजपत्र-जातीफल लवङ्ग-त्वगेला-बालक-बिल्वशलाटु मेथिका भङ्गानां प्र. समीभाग: । छागदुग्धेन मर्द्दनम् । রস, গন্ধক, লোহ, শঙ্খভস্ম, সোহাগার খই, হিং, শটী, তালীশপত্র, মুতা, ধনে, জীরে, সৈন্ধব লবণ, ধাইফুল, আতইচ, শুঁট, ঝুল, হরীতকী, ভেলারমুটী, (অভাবে রক্তচন্দন) তেজপত্র, জায়ফল, লবঙ্গ, গুড়ত্বক্, এলাইচ, বালা, বেলশুঁটা, মেতি, সিদ্ধি প্রত্যেকে সমভাগ। ছাগদুগ্ধের সহিত মর্দ্দন। रस.र. ।

ग्रहणीमिहिरतैलम् । क्ली । ग्रहणीरोगे तैलम् । तिलतैलं ४ श. तक्रं १६ श. । कुटजत्वक् २ श. वारि १६ श. शे. ४श.; धान्यकं २ श. वारि १६ श. शे. ४ श. । मतान्तरे कुटजत्वक् १२॥० श. वारि ६४ श. शे. १६ श. धान्यकं १२॥० श. वारि ६४ श. शे. १६ श. तक्रं १६ श. एवं ग्रहणीहरद्रव्याणामन्येषां यथालब्धं क्वाथ: १६ श. । कल्कार्थं—धान्यक-धातकी लोध्र-वराहक्रान्ता-अतिविषा-हरीतकी-वीरणमूल मुस्त-बालक-मोचरस-रसाञ्जन बिल्वशलाटु नीलोत्पलपत्र-नागकेशर-पद्मकेशर-गुडूचीन्द्रयव-श्यामालता-पद्मकाष्ठ-कटुकी-तगर-जटामांसी-भृङ्गराज केशराज-पुनर्नवाम्र-जम्बू-कदम्ब-कुटजत्वक्-यमानी-जीरकाणां प्र. २ तो. । তিলতৈল ৪ শ. ঘোল ১৬ শ. কুড়চিছাল ২ শ. জল ১৬ শ. শে. ৪ শ. ধনে ২ শ. জল ১৬ শ. শে. ৪ শ.। মতান্তরে কুড়চিছাল ১২॥০ শ. জল ৬৪ শ. শে. ১৬ শ.; ধনিয়া ১২॥০ শ. জল ৬৪ শ. শে. ১৬ শ.; ঘোল ১৬ শ. এইরূপ গ্রহণীহর অন্যান্য যে কোন দ্রব্যের কাথ ১৬ শ. দিবে। কল্কার্থ—ধনিয়া, ধাইফুল, লোধ, বরাক্রান্তা, আতইচ, হরীতকী, বেণার মূল, মুতা, বালা, মোচরস, রসাঞ্জন, বেলশুঁটা, নীলোৎপল, তেজপত্র, নাগেশ্বর, পদ্মকেশর, গুলঞ্চ, ইন্দ্রযব, শ্যামালতা, পদ্মকাষ্ঠ, কট্‌কী, তগর, জটামাংসী, ভীমরাজ (বা দারুচিনি), কেশুত্তে, পুনর্নবা, আমছাল, জামছাল, কদমছাল, কুড়চিছাল, যমানী, জীরা প্রত্যেকে ২ তো.। बृहती यथा—तिलतैलं ४ श. तक्रं १६ श.। क्वाथार्थं—कुटजमूलत्वक् धान्यकं प्र. १०० प. जलं प्र. ६४ श. शे. १६ श. । कल्कार्थं—धनीयकं धातकीपुष्पं लोध्रं वराहक्रान्ता अतिविषा हरीतकी लवङ्गं बालकं शृङ्गाटकपत्रं रसाञ्जनं नागकेशरपुष्पं पद्मकाष्ठं गुडूची इन्द्रयवं प्रियङ्गुकं कटुकी पद्मकेशरं तगरं शरमूलं भृङ्गराज: केशराज: पुनर्नवा आमत्वक् जम्बूत्वक् कदम्बत्वक् एषां मिलित्वा १ श. स्नेहपाकविधिना पाच्यम् । रस.र. । भैष. ।

ग्रहणीरुक् । स्त्री । संग्रहग्रहण्याम् । अम. ।

ग्रहणीवज्रकवाट: । पुं । ग्रहण्यां रस: । "मृतसूताभ्रकं गन्धं यवक्षारं सटङ्कणं । अग्निमन्थं वचां कुर्य्यात्सूततुल्यानिमान् सुधी: । ततो जयन्ती-जम्बीरभृङ्गद्रावैर्विमर्दयेत् । त्रिवासरं ततो गोलं कृत्वा संशोष्य धारयेत् । लौहपात्रे शरावञ्च दत्त्वोपरि विमुद्रयेत् । अधो वह्निं शनै: कुर्य्यात् यामाद्धं तत उद्धरेत् । रसतुल्यामतिविषां दद्यान्मोचरसं तथा । कपित्थविजयाद्रावै: भावयेत् सप्तधा पृथक् । धातकीन्द्रयवामुस्तालोध्रप्रतिविषाम्बुता: । एतद्द्रवैर्भावयित्वा दिनैकञ्च विशोषयेत् । रसं वज्रकवाटाख्यं माषैकं मधुना लिहेत् । वह्निं शुण्ठीं विड़ं विल्वं लवणं चूर्णयेत् समम् । पिबेदुष्णाम्बुना चानु सर्व्वजां ग्रहणीं जयेत् ॥" र.चि. ।

ग्रहणीशार्दूलवटिका । स्त्री । ग्रहण्याम् । जातीफलं लवङ्गं कुष्ठं टङ्कणं विड़लवणं जीरकं त्वक् एला धुस्तूरबीजं अहिफेनञ्च प्र. समभागं आदाय प्रसारणीरसेन मर्द्दयेत् । জায়ফল, লবঙ্গ, কুড়, সোহাগার খই, বিট্‌লবণ, জীরা,

गुड़त्वक्, एला, धुतुराबीज, आफिम् प्र. स. समभाग. गन्धभाइलिरार रसे मर्द्दन । भैष. ।

ग्रहणीहरम् । क्ली । लवङ्गे । ज.च. । त्रि । ग्रहणीहरद्रव्यमात्रे ।

ग्रहद्रुमः । पुं । शाकतरौ । रा.नि.व.९ ।

ग्रहनाश: (शनः) । पुं। सप्तपर्णवृक्षे । र.मा.।

ग्रहपतिः । पुं । अर्कवृक्षे । आकन्द गाछ । अम. । [द्रव्ये । रा.नि.व.१२ ।

ग्रहभीतिजित् । पुं. क्ली । चोड़ानामगन्ध-

ग्रहागमः । पुं । भूतसञ्चारे । रा.नि.व.२० ।

ग्रहाङ्गम् । क्ली । स्वर्णरजततामवङ्गकृष्णलौहेषु । रा.नि व. २२ । See पञ्चलौहम् ।

ग्रहापहा । स्त्री । गोरोचनायाम् । वै.निघ. ।

ग्रहामयः । पुं । ग्रहपीड़ायां । रा.नि.व.२० ।

ग्रहाशी (शन्) । पुं । सप्तपर्णवृक्षे । श.र. ।

ग्रहाह्वयः । पुं । भूताङ्कुशवृक्षे । टेँचेता । रा.नि.व.९ ।

ग्राम(म्य)कन्दः । पुं । ग्रामजौलि । ओल । कंतुरिति ख्याते कन्दशाके । कचु । र.मा. ।

ग्रामकोलः । पुं । ग्रामशूकरे । वै.निघ. ।

ग्रामक्रोड़ः । पुं । ग्रामशूकरे । वै.निघ. ।

ग्रामजनिष्पावी । स्त्री । नखनिष्पाव्याम् । बर्वटी । रा.नि.व.७ ।

ग्रामजा । स्त्री । खर्जूरवृक्षे । प.मु. ।

ग्रामणीः । पुं । नील्यां । नील गाछ । है.च.।

ग्राम(म्य)मद्गुरिका । स्त्री । शृङ्गीमत्स्ये । शिङि माछ । मे. । हारा. ।

ग्राम(म्य)मृगः । पुं । कुक्कुरे । श.र. । गवादिग्रामवासिपशुवर्गे । यथा—अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छप्रभृतयः । तन्मांसं वातसंयङ्घं कफपित्तघ्नं रसे पाके च मधुरकं दीपनं बलवर्द्धनञ्च । सु.सू.४६अ. । [जटा. ।

ग्रामिणी । स्त्री । नीलीवृक्षे । नील गाछ ।

ग्रामीणः । पुं । ग्राम्यशूकरे । रा.नि.व.१९ । काके । कुक्कुरे । मे. ।

ग्रामीणा । स्त्री । नीलीवृक्षे । भा.पू.१भ. । पालङ्कशाके । रा.नि.व.७ ।

ग्राम्यकर्कटी । स्त्री । कुष्माण्डे । त्रिका. ।

ग्राम्यकुक्कुटः । पुं । प्रतुदजातीयपक्षिविशेषे। ग्रामकुक्ड़ा। तन्मांसं स्निग्धं वातघ्नं दीपनं गुरु। रा.नि.व.१७ । [त्रिका. ।

ग्राम्यकुङ्कुमम् । क्ली । कुसुम्भे । कुसुमफुल ।

ग्राम्यकोशा । स्त्री । हस्तिकोशातक्याम् । धुन्दुल । रा.नि.व.७ ।

ग्राम्यधर्म्मः । पुं । मैथुने । अम. ।

ग्राम्यपशुः । पुं । गवादिग्रामवासिपशुषु । See ग्राममृगः ।

ग्राम्यवराहः । पुं । ग्रामजशूकरे । गेँयो शुयार । तन्मांसं मेदोबलवीर्य्यवर्द्धकं वनवराहमांसाद्गुरु च । रा.नि.व.१७ ।

ग्राम्यवल्लभा । स्त्री । पालङ्कशाके । प.मु. ।

ग्राम्यशूकरः । पुं। ग्राम्यवराहे । रा.नि.व.१७।

ग्राम्या । स्त्री । नीलीवृक्षे । नील गाछ । निष्पावे । मटर। रा.नि.व.७। तुलसीवृक्षे । वै.निघ.।

ग्राम्याश्वः । पुं । गर्दभे । त्रिका. ।

ग्राम्योदकम् । क्ली । ग्राम्यजले । वै.निघ. ।

ग्रावा(न्) । पुं । प्रस्तरे । अम. । [प.मु. ।

ग्रावारिः । पुं । पाषाणभेदे । पाथरकुचि ।

ग्रासः । पुं । घासे । कवले । कल । अम. । पारदस्य धातुग्रसनयोग्यजारणे । पारार स्वर्णग्रास । स चतुर्विधः—"चतुःषष्ट्यंशकग्रासात् दण्डधारी भवेद्रसः । जलौका च द्वितीयेन ग्रासयोगे सुरेश्वरि। ग्रासेन तु तृतीयेन काकविष्ठासमो भवेत् । ग्रासेन तु चतुर्थेन दधिमण्डसमो भवेत् ।" र.चि.३अ. । (विवरणं पारदशब्दे द्रष्टव्यम्) ।

ग्राहः । पुं । शिशुमारे । शुशोक । रा.नि.व. १९। नक्रे । हाङ्गर; जलहस्ती । अ.टी.भ. ।

ग्राहकः । पुं । सितावरक्षुपे । शुशुनि शाक । रा.नि.व.४ । घातकपक्षिणि । बाज पाखी । श.र. । [नि.व.६ ।

ग्राहलोमशा । स्त्री । वचायाम् । वच । सं.

ग्राहिणी । स्त्री । क्षुद्रदुरालभायाम् । क्षुद्र दुरालভা । प.मु. । चौरिण्यां । थिरुই । र.मा. । शुक्ललज्जालुकायां । শ্বেত লজ্জাবতী । वै.निघ. ।

ग्राहिफलम् । क्ली । कपित्थफले । কয়েৎ বেল । रा.नि.व.११ ।

ग्राहिवस्तिः । पुं । निरूहवस्तिभेदे । পিচকারিবিশেষ । स च अम्बष्ठादिप्रियङ्ग्वादिक्वाथेन चौद्रघृतयुक्तेन साध्यते । यथा—"प्रियङ्ग्वादिगणक्वाथे अम्बष्ठाद्येन संयुताः । सचौद्राः सघृताश्चैव ग्राहिणो वस्तयः स्मृताः । एतेष्वेव च योगेषु स्नेहाः सिद्धाः पृथक् तथा । समस्तेष्वथवा सम्यक् विज्ञेयाः स्नेहवस्तयः ॥" सु. ।

ग्राही (इन्) **।** पुं । कपित्थवृक्षे । प.मु. । रक्तकार्पासे । त्रि । स्तम्भने । वा.टी.हेमा. । धारके । मलबन्धकरे । यदग्निदीप्तिकरं पाचकं तत् ग्राहीत्युच्यते । यथा—"दीपनं पाचनं यत्स्यादुष्णत्वाद्द्रवशोषकं । ग्राहि तच्च यथा शुण्ठी जीरकं गजपिप्पलीति ॥" भा. ।

ग्राह्यः । पुं । अम्लवेतसे । प.मु. ।

ग्रीवा । स्त्री । कृकाटिकायाम् । घाড় । अम. । भा.म.४भ क्षुद्ररोग-चि. । मन्यायाम् । घाड़ेর শিরা । मे. । [भादौ । च.नि.२অ. ।

ग्रीवारोगः । पुं । ग्रीवाजातरोगे ग्रीवास्त-

ग्रीवास्थि । क्ली । कसेरुकोर्द्ध्वस्थतदाकारास्थनि । घाড়ের হাড় । तानि१५श. । च.शा.७अ. ।

ग्रीवी (इन्) **।** पुं, स्त्री (विनी) । उष्ट्रे । जटा. ।

ग्रीष्मः । पुं । घर्म्मे ऋतौ । গর্ম্মিকাল । स वैशाखज्यैष्ठमासयोः भवति । ग्रीष्मो मेषवृषौ प्रोक्तः । गुणाः—ग्रीष्मोरूक्षोऽतिकटुकः पित्तकृत्कफनाशनः । उष्णतायाम् । मे. । तात्कालिकं जलम् पनभिष्यन्दि । रा.नि.व.१४ । [वै.निघ. ।

ग्रीष्मकर्कटी । स्त्री । ग्रीष्मजकर्कटीविशेषे ।

ग्रीष्मका । स्त्री । पुष्पविशेषे । মল্লিকা, বনমল্লিকা । वै.निघ. । [श.च. ।

ग्रीष्मजा । स्त्री । लवणीवृक्षे । লোণা গাছ ।

ग्रीष्मपुष्पी । स्त्री । कोङ्कणदेशे करवीरुणीति प्रसिद्धे पुष्पवृक्षे । रा नि.व.१० ।

ग्रीष्मभ(षोद्भ)वा । स्त्री । नवमल्लिकायाम् । সেউতি । रा नि व.१० ।

ग्रीष्मसुन्दरकः । पुं । सूक्ष्मपत्रशाकविशेषे । গীমা শাক । गुणाः—तिक्तं रुचिकरं कफपित्तदोषघ्नञ्च । राज.३प. ।

ग्रीष्महासा । स्त्री । इन्द्रतूलके । त्रिका. ।

ग्रीष्मा । स्त्री । लोध्रवृक्षे । वै.निघ. । नवमल्लिकायाम् । रा.नि.व.१० । [উতি । प.मु. ।

ग्रैष्मिका (ष्मी) । स्त्री । नवमल्लिकायाम् । সে-

ग्लानः । त्रि । रोगिणि । रा.नि.व.२० ।

ग्लाना । स्त्री । बलदीनतायां । हे.च. । रोगे । राज. ।

ग्लानिः । स्त्री । व्याधौ । रा.नि.व.२० । ओजःक्षयादिजन्यदेहजाड्ये । "ग्लानिरोजःक्षयाद्दुःखादजीर्णाच्च श्रमाद्भवेत् ।" शार्ङ्ग.पू.६अ. । "वक्त्रे मधुरता तन्द्रा हृदयोद्वेष्टनं भ्रमः । नचान्नं रोचते यस्मै ग्लानिं तस्य विनिर्दिशेत् ।" भा. । सु.शा.४ अ. । [अम. ।

ग्लास्नुः । त्रि । रोगिणि । रा.नि.व.२० । ग्लाने ।

ग्लौः । पुं । कर्पूरे । अम. ।

घ

घटः । पुं । कलसे । अम. । द्रोणपरिमाणे । ६४ श. । प.प. । करिगण्डस्थले । मे. । कुम्भपरिमाणे, द्रोणविंशतौ । [म्बरादौ ।

घटकः । पुं । विना पुष्पं फलवति वृक्षे, उदु-

घटदेशजम् । क्ली । गड़लवणे । रा.नि.व.६ ।

घटा । स्त्री । मधुरकर्कटिकायाम् । মিষ্ট লেবু । मद.व.६ ।

घटाभिधा । स्त्री । घटाकारयुक्तालाबूभेदे, कुम्भतुम्ब्याम् । গোল লাউ । वै.निघ. । [व.७ ।

घटालाबुः (बूः) । स्त्री । कुम्भतुम्ब्यां । रा.नि.

घटालिका। स्त्री। मधुरकर्कट्याम्। मिष्ट लेबू। मद.व.६।

घटिकम्। क्ली। नितम्बे। श.च.।

घटिका। स्त्री। मुहूर्त्तपरिमाणे। दुईदण्ड। जटा। पादग्रन्थौ। श.र.। [वण। वै.निघ.।

घटिकालवणम्। क्ली। विड्लवणे। विट्‌ल-

घटीयन्त्रग्रहणी। स्त्री। ग्रहणीरोगभेदे। लक्षणं यथा—"प्रसुप्तिः पार्श्वयोः शूलं तथा जल-घटीध्वनिः। तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणी-गदम्॥" मा.नि.।

घट्टगा। स्त्री। दाक्षिणात्यनदीविशेषे। एतज्जलं गुणैः कृष्णासदृशम्। स्वादुतरं पथ्यं कान्तिदञ्च। रा.नि.व.१४।

घण्टः। पुं। शाकादिसिद्धव्यञ्जनविशेषे। शाकेर घण्ट, नेब्रेर घण्ट। गुणाः—बल्यः रुचिकरः वातघ्नश्च। राज.।

घण्टकः। पुं। क्षुद्रक्षुपविशेषे। घेटकुल, घेँटु गाछ। घेँटुकाण। सा.कौ.। तस्य मूलगुणाः—कफघ्नं कटुपाकि पित्तकरञ्च। राज.। घण्टा-पाटलवृक्षे। ज.द.। [भैष.अम्लपित्तचि.।

घण्टकर्णः। पुं। क्षुद्रक्षुपविशेषे। घेँटुकोल।

घण्टा। स्त्री। अतिबलायाम्। रा.नि.व.४। जवापुष्पवृक्षे। जवा गाछ। र.मा.।

घण्टाकः। पुं। घण्टापाटलिवृक्षे। घण्टापा-रुल। ज.द.। जालिन्याम्। झिङे। वै.निघ.।

घण्टाकर्णः। पुं। घण्टकक्षुपे। घेँटु गाछ। घेँटुकाण। प.मु.ग्रहणी.चि.नित्यानन्दरसे।

घण्टापाटलिः। स्त्री। स्वनामख्यातवृक्षे। घण्टापारुल। हिं मोखा। प.मु.। See मुष्कक:।

घण्टारवा। स्त्री। वनशणवृक्षे। शण गाछ। हिं झन्झनिया। भ.। [नि.व.८।

घण्टालः। पुं। मदनवृक्षे। मयना गाछ। रा.

घण्टालिका। स्त्री। मधुरमातुलुङ्गवृक्षे। म-द.व.६। [रा.नि.व.३।

घण्टाली। स्त्री। कोषातक्याम्। घोषा।

घण्टावीजः। पुं। जैपालवृक्षे। जयपाल गाछ। रा.नि.व.६। शणवृक्षे। वै.निघ.। क्ली। शणवीजे। [है.च.।

घण्टाशब्दम्। क्ली। कांस्यधातौ। काँसा।

घण्टाशीता। स्त्री। अतिबलायां। रा.नि.व.४।

घण्टाशीला। स्त्री। महाशणवृक्षे। वै.निघ.।

घण्टिकः। पुं। पादिजलजन्तुविशेषे। अर्क.चि.।

घण्टिका। स्त्री। सूक्ष्मजिह्वायाम्। आलजि-वि। रा.नि.व.१८। गलशुण्डिकारोगे। रा.नि. व.२०। शणपुष्प्यां। शणफुल। वै.निघ.२भ.अप-स्मा.चि.द्राक्षावलेहे। कुमरिचे। लङ्कामरीच। वै.निघ.। [नि.व.६।

घण्टिनीवीजम्। क्ली। जैपालवीजे। रा.

घण्टुः। पुं। करिकण्ठभूषणे। उणा.। उष्ण-तायाम्। वै.निघ.।

घण्डः। पुं। मधुमक्षिकायाम्। भमरे। उणा.।

घनः। पुं। मुस्तायाम्। मुता। रा.नि.व.२३। सि.यो.कास चि.पथ्यादिगुडी। नागरमुस्तायाम्। च.द.पित्त-चि.विश्वादि। शरीरे। रा.नि.व.१८। अभ्रके। मेघे। रा.नि.व.२१। कफे। रा.नि.व. २१। त्वचि। गुड्त्वक्। रा.नि.व.१२। वङ्गे। गुडे। वै.निघ.। क्ली। लौहे। हे.च.। वल्कले। रा.नि.व.२। त्रि। निविडे। अम.।

घनकफः। पुं। करकायाम्। शिल। त्रिका.।

घनकालः। पुं। वर्षर्तौ। श.र.।

घनगोलकः। पुं। स्वर्णे, रौप्ये च। संश्लि-ष्टरजतसुवर्णे। हे.च.।

घनचन्दनादिः। पुं। वातपित्तज्वरे कषाये। "घनचन्दनपर्पटकं कटुकं समृणालपटोलदलं स-जलं। श्रतशीतसितायुतपित्तहरं ज्वरछर्दितृषा-रुचिदाहहरम्।" मुता, रक्तचन्दन, क्षेत्पाव-ड़ा, कट्की, वेणार मूल, पल्‌ता, बाला प्र-त्येके १४ रति। जल ॥० श. शे. ⁄० पो-ओया। प्रक्षेप—चिनि ४ माषा। सा.कौ.।

घनच्छदम्। क्ली। तालीशपत्रे। रा.नि.व.६। शिग्रुवृक्षे। सजिना गाछ। वै.निघ.।

घनजम्बालः। पुं। चुलुके। गण्डूष। त्रिका.।

घनता(तो)लः । पुं । चातकपक्षिणि । सा-रङ्गपक्षिणि । जटा. । त्रिका. ।

घनत्वक् । पुं । शुक्लरोध्रे । শ্বেত লোধ । वै. निघ. । [नियामके ।

घनध्वनिः । पुं । मुस्तायाम् । र.सा.सं.रस-

घनपल्लवः । पुं । शिग्रुवृक्षे । সজিনা গাছ । वै.निघ. ।

घनपाषण्डः । पुं । मयूरे । श.मा. ।

घनपाषाणः । पुं । कान्तपाषाणे । अभ्रके । रस.र.महाज्वराङ्कुशे ।

घनप्रभः । पुं । राजावर्त्तमणौ । वै.निघ. ।

घनप्रिया । स्त्री । काकजम्बूवृक्षे । বনজাম । रा.नि.व.११ । नदीजम्ब्वाम् । वै निघ. ।

घनफलः । पुं । विकण्टकवृक्षे । रा.नि.व.११। तरम्बुजे । তরমুজ গাছ । वै.निघ. । [वै.निघ. ।

घनफेनिला । स्त्री।काकमाच्यां। গুড়কামাই।

घनमूलः । पुं । मोरटलतायां । লতাকড়ার। रा.नि.व.३ । [विशेषे । वै.निघ. ।

घनमूला । स्त्री । काकमाच्याम् । चीरमूर्व्वा-

घनरवः । पुं । मयूरे । वै.निघ. ।

घनरसः । पुं । मोरटे । লতাকরাড় । मे. । मूर्व्वायां । মুগ্রা । र.मा. । जले । कर्पूरे । पी-लुपर्ण्याम् । कषाये । सान्द्रनिर्यासे । सम्यक्सिद्ध-रसे । मे. । रा नि.व.१४ । [वै.निघ. ।

घनरूपा । स्त्री । खटीशर्करायां । ফুলখড়ি ।

घनवल्लिका (ल्ली) । स्त्री । अमृतस्रवालता-याम् । रा.नि.व.३ ।

घनवासः । पुं । कुष्माण्डे । हारा. ।

घनशृङ्गी । स्त्री । मेषशृङ्ग्याम् । वै.निघ. ।

घनसंज्ञा । स्त्री । मुस्तायाम् । वै.निघ. ।

घनसारः (कः) । पुं । कर्पूरे । रा.नि.व. १२ । र.सा.सं. । वसन्ततिलकरसे । भा.उं.वाजी. । ज्व.चि.अगर्व्वादिधूपे । वै.निघ.दाह.चि.रसादिगु-ल्याम् । भा.म.३भ.मू.घा.चि. । जले । धरणि. । दक्षिणावर्त्तपारदे । मे. । चन्दने । वै.निघ. ।

घनसूनः । पुं । मोरटलतायाम् । লতাকরা-ড় । रा.नि.व.३ । [क्याओड़ा । रा.नि.व.११।

घनस्कन्धः । पुं । कोशाम्रवृक्षे । জলপাই,

घनस्वनः । पुं । तण्डुलीयशाकभेदे । কাঁটা-নটের ঝাড় । रा.नि व.५ । [रा.नि.व.३ ।

घना । स्त्री । माषपर्णीलतायाम् । रुद्रजटायाम् ।

घनाकरः । पुं । वर्षायाम् । वै.निघ. ।

घनाग्निसहम् । क्ली। उत्तमकाष्ठे । वै.निघ.।

घनाघटा । स्त्री । काकजङ्घायाम् । কেউয়া ঠোঁড়ী । श.च. ।

घनाघनः । पुं । मत्तहस्तिनि । अम. ।

घनाघना । स्त्री । काकमाच्यां । श.च. ।

घनात्ययः । पुं । शरदृतौ । हे.च. ।

घनामयः । पुं । खर्ज्जूरवृक्षे । त्रिका. ।

घनामलः । पुं । पुनर्नवायाम् । चन्दनवटे । वै.निघ. । (Chenopodium album.) वा-स्तूकशाके । त्रिका. ।

घनारावः । पुं । चातकपक्षिणि । वै.निघ. ।

घनावहा । स्त्री । काकमाच्याम् । कर्णस्फो-टायां । কাণছিড়া । प.मु. ।

घनाश्रयः । पुं । (Aether.) आकाशे ।

घनाह्वम् । क्ली । अभ्रधातौ । प.मु. ।

घनोद्भवम् । क्ली । लौहकिट्टे । मण्डूरे । वै. निघ. ।

घनोपलः । पुं । करकायाम् । हे.च. ।

घरट्टः । पुं । पेषणयन्त्रे । যাঁতা ।

घर्घटः । पुं (Pimelodus gagora or P. tengara.) मत्स्यभेदे । ট্যাংরা মাছ । श.र. ।

घर्घरः । पुं । पेचके । পেঁচা । त्रिका. । तुषा-नले । हे.च.। (कः) नदविशेषे । तज्जलं रुच्यं शी-तलं दीपनं पथ्यं बल्यं. चीणाङ्गपुष्टिकरञ्च । रा. नि.व.१४ । त्रि । स्वरविशेषे । मे.। [हे । हे.च.।

घर्घरिका । स्त्री । घर्घरनदे । भृष्टधान्ये । ध-

घर्घूर्घा (षा) । स्त्री। तन्नामककीटे, यमकीटे। ঘুরঘুরিয়া পোকা । र.मा. ।

घर्म्मः । पुं । स्वेदे । घाम । रा.नि.व.१८। आतपे । उष्णत्वे । त्रिका । ग्रीष्मर्त्तौ । हे.च. ।

घर्म्मचर्च्चिका । स्त्री । घर्म्मचिकायाम् । घामाचि । यथा—"स्वेदवाहीनि दुष्यन्ति क्रोधश्री कभयैस्तथा । ततः स्वेदः प्रवर्त्तेत दुर्गन्धा घर्म्मचर्च्चिका । राजिकाकृतिरुत्पोत्था यतो घर्म्मविचर्च्चिका ॥" प्रयोगा. । [टीनी । वै.निघ. ।

घर्म्मजः । पुं । नवादिकस्तूरिकायाम् । था·

घर्म्मपयः । क्ली। घर्म्मजले। उष्णोदके। वै.निघ.।

घर्म्मविचर्च्चिका । स्त्री । घर्म्मचर्च्चिकायाम् ।

घर्म्मान्तः । पुं । वर्षर्त्तौ । रा.नि.व.२१ ।

घर्म्मान्तकामुकी । स्त्री । पक्षिविशेषे ।

घर्म्माम्बु (म्भः) । क्ली । घर्म्मे । घाम । रा.नि.व.१८। [च.द.आश्च्योतने ।

घर्षः । पुं । कर्करिकायाम् । कर्कर् करा ।

घर्षणम् । क्ली । घर्षकर्म्मणि । घसा । "घर्षणादभिघाताद्वा ।" नि. । [त्रिका. ।

घर्षणालः । पुं । मुषले, शिलापुत्रे । নোড়া ।

घर्षणी । स्त्री । हरिद्रायाम् । त्रिका. ।

घसिः । पुं । अन्ने । आहारे । हे.च. ।

घस्मरः । पुं । अस्मरे । ভক্ষক । अम. । [नि. ।

घस्त्रम् । क्ली । कुङ्कुमे । त्रिका. । पुं । दिवसे ।

घाटः । पुं । घाटायाम् । घाड़ । श.र. ।

घाटा । स्त्री । नागबलायाम् । रा.नि.व.४ । शिरःपश्चाद्भागे । घाड़ । रा.नि.व.१८ ।

घाटालः । त्रि । बन्धुरे । सु.नि.९अ. ।

घाटिका । स्त्री । घाटायाम् । घाड़ । श.च. ।

घाण्टिकः । पुं । (Datura metel, also fastuosa.) धुस्तूरवृक्षे । हारा. ।

घातकृच्छ्रम् । क्ली । मूत्रकृच्छ्ररोगे । नि. ।

घात(ति)पक्षी (क्षिन्) । पुं । A hawk or falcon. श्येनपक्षिणि। বাজ পাখী। हारा.।

घारः । पुं । सेचने । हे.च. ।

घार्त्तिकः । पुं । घृतपूरे । घिওড় । हे.च. ।

घासः । पुं । तृणे । भक्षे । घास । अम. ।

घुः । स्त्री । नासायाम् । वै.निघ. ।

घुघुकृत् । पुं । वनकपोते । घुघू । वै.निघ. ।

घुघुलारवः । पुं । पारावते । वै.निघ. ।

घुटः । पुं । पादग्रन्थौ । পায়ের গাঁট । हे.च. ।

घुटिः (टी) (कः, का) । पुं, स्त्री । जङ्घाङ्घ्रिसन्धिग्रन्थौ । গুল্ফ । "जङ्घाङ्घ्रिसन्धिग्रन्थौ तु घुटिका गुल्फ इत्यपि ।" हे.च. । रा.नि.व.१८ ।

घुणः । पुं । काष्ठक्रिमौ । घुণ । लिङ्गसंग्रहे भरतः । भ्रमरे । वै.निघ. ।

घुणदयिता । स्त्री । अतिविषायाम् । আতইচ । वै.निघ.ज्व.चि.अर्कादिः । "पद्मीषणघुणदयिता ।"

घुणप्रिया । स्त्री । अतिविषायाम् । कृष्णातिविषायाम् । (भन्तार्णवरसे) । वा.मू.३५अ । "कटुका मरिचं घुणप्रिया च गण्डीरम् ।" च.द. पाण्डु.चि. । क्षुद्रदन्तीवृक्षे । वै.निघ. ।

घुणवल्लभा । स्त्री । कृष्णातिविषायाम् । কাল আতইচ । भा. ।

घुणा । स्त्री । कालातिविषायाम् । वै.निघ. ।

घुण्टः (कः) । पुं । गुल्फे । श.मा. । हे.च. ।

घुण्टा । स्त्री । क्षुद्रबदरे । वै.निघ. । [श.च. ।

घुण्टिकम् । क्ली । वनकरीषे । বিলঘুঁটে ।

घुण्डः । पुं । भ्रमरे । उणा. ।

घुर्घुरः (कः) (री) । पुं, स्त्री । भ्रमरे । कीटविशेषे । ঘুরঘুরিয়া পোকা । त्रिका. । (कः) । शब्दविशेषे । গলা ঘড় ঘড় করা । च.इ.१०अ.।

घुलञ्चः । पुं । गवेधुकायां । গড়গড় । र.मा. ।

घुलघुलारवः । पुं । पारावतभेदे । रा.नि.व. १९ । [वा.व्या.चि. । "घुसृणैः पलार्द्धैः ।"

घुसृणम् । क्ली । कुङ्कुमे । त्रिका.। सि.यो.च.द.

घूकः । पुं । उलूके । हे.च. ।

घूकारिः । पुं । काके । हे.च. ।

घूकावासः । पुं । शाकभेदे । वै.निघ. । शाखोटवृक्षे । শ্যাওড়া গাছ । रा.नि.व.९ ।

घूर्णः । पुं । ग्रीष्मसुन्दरके । गीमा । श.च. ।

घूर्णिः । स्त्री । घूर्णने । घूरुनि । हे.च. ।

घृणावासः । पुं । कुषाण्डे । त्रिका. ।

घृणिः(णी) । पुं । वनशूकरे । वै.निघ. । अश्वरोगविशेषे । तेनाश्वस्य नासाभ्यन्तरे व्रणपिड़काशोफा भवन्ति । "नासिकाभ्यन्तरे यस्य पिड़कानां समुद्भवः । व्रणं वा यदि वा शोथः तस्य विद्याद् घोरुजम् ॥" ज.द.२८अ. ।

घृतम् । क्ली । नवनीतजपदार्थे । घि,घृत । घृतं दशविधं गव्यमाहिषाजाश्वगार्दभीष्ट्राविकेड़कमानुष्यहास्तिकभेदेन । तेषां गुणादिकं तत्तत्पर्यायेषु द्रष्टव्यम् । सा. घृतगुणाः—"आयुर्वर्द्धकं देहदार्ढ्यकरं सौकुमार्य्यकान्तिबुद्धिस्मृतिबलकरं शीतघ्नं बाल्ययौवनवार्द्धक्येषु प्रधानबलकरं पथ्यञ्च । रा.नि.व.१५ । पुराणघृतगुणाः—"सर्पिर्जीर्णञ्चैव सन्धुवणे च मूर्च्छाकुष्ठोन्मादकर्णाचिशूले । शोफाशंसोर्योनिदोषव्रणेषु शस्तं सर्पिर्जीर्णमेव नृणां स्यात् ॥" नवस्य गुणाः —"बलक्षये तर्पणभोजनेषु श्रमे च पित्तास्रजि रेणयुक्ते । नेत्रामये कामलपाण्डुरोगे चये नवं सर्पिरुदाहरन्ति ॥ ज्वरे विबन्धेषु विसूचिकायामरोचके वा शटिते तथाग्नौ । पानात्यये वापि मदात्यये वा शस्तं न सर्पिर्वहुमन्यते च ॥" अत्रि.८अ. । पक्वघृतं—वर्षात्परं हीनवीर्यं ॥ भा. । तर्पणं नेत्ररोगघ्नं दाहनुत्पयसा घृतम् । यथा—घृतप्रस्थमग्निपक्वं निष्फेनं स्थिरच्छोत्ताय्य किञ्चित् शीतं हरिद्रामातुलुङ्गरसमुस्तामलकीहरीतकीविभीतकानां कल्कीकृतानां यथाक्रमं प्रत्येकं पलेन मूर्च्छयेत् । यथा—"धात्रीपथ्याविभीतैर्जलधररजनीमातुलुङ्गद्रवैस्तु सर्व्वैरेतैः सुपिष्टैः पलकपरिमितैर्मन्दमन्दानलेन । आज्यप्रस्थं निफेनं परिपचनशतं मूर्च्छयेद्वैदविज्ञः तस्मादामोपदोषं त्यजति च सहसा वीर्यवत्सौख्यदायि ॥" भैष. ।

घृतकरञ्जः । पुं । करञ्जविशेषे । घियां करमचा । गुणाः—कटूष्णः वातघ्नः व्रणनाशनः त्वग्दोषघ्नः अर्शोघ्नश्च । रा.नि.व.९ ।

घृतका । स्त्री । घृतकुमार्य्याम् । वै.निघ. ।

घृतकुमारिका (री) । स्त्री । स्वनामख्यातक्षुपे । घृतकुमारी । See गृहकन्या ।

घृतपर्णकः । पुं । घृतकरञ्जे । रा.नि.व.९ ।

घृतपशुः । पुं । घृते । वै.निघ. ।

घृतपूरः (कः) । पुं । चन्द्रपुलीति घियौड़ इति च ख्याते पिष्टकविशेषे । तत्प्रणाली—"मर्दितां समितां चीरनारिकेलघृतादिभिः । अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते । घृतपूरो गुरुर्वृष्यः कफकृत् रक्तमांसदः । रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽग्निदः ॥" भा. । प्रकारान्तरं यथा—"गोधूमचूर्णं सूक्ष्मञ्च स्वच्छं तस्मिन् घृतं चिपेत् । यावत्तत् पिच्छतां गच्छेत् पश्चाद्दुग्धे विमर्दयेत् । फेलयित्वा द्रवीभूते ततः पात्रे घृतं न्यसेत् । सशब्दे सुघृते तप्ते तस्य धारामपास्त्रजेत् । यावच्च व्याप्य तत्पात्रं प्रसरेद्घृतपूरकः । यत्किञ्चित्ताम्रतां याते खण्डपङ्के निमज्जयेत्॥" गुणाः—"स वृष्यो गुरुहृद्यश्च बलकृद्धातुवर्द्धनः । कफास्रमांसलकरो वातपित्तचयं हरेत् ॥" वै.निघ. ।

घृतमण्डः । पुं । अन्ने, भक्ते । वै.निघ. । सर्पिर्मण्डे । गुणाः—मधुरः सरः योनिश्रोत्राचिशिरसां शूलघ्नः वस्तिनस्याचिप्रपूरणेषूपदिश्यते । सु.सू. ४५अ. ।

घृतमण्डलिका । स्त्री । हंसपादीक्षुपे । रा.नि.व.५ । रक्तलज्जालुकायाम् । काकजङ्घायाम् । वै निघ. ।

घृतमण्डा । स्त्री । मधूली । मालकाँक्ड़ी, माकड़शाता । र.मा.श.च. । रक्तलज्जालुकायाम् । वै.निघ. ।

घृतवरः । पुं । घृतपूरे । मोहनभोगे । हे.च. ।

घृतहेतुः । पुं । नवनीते । ननि । वै.निघ. ।

घृता । स्त्री । काकजङ्घायाम् । श.च. । काकतुण्डिकायाम् । केयोठुँटी । वै.निघ. । त्रिका. ।

घृताङ्कः । पुं । सरलद्रवे । সরলগাছের আটা।

घृताची । स्त्री । एलायाम् । वै.निघ. ।

घृताची(गर्भ)सम्भवा । स्त्री । स्थूलैलायां । বড় এলাইচ । रा.नि.व.६ ।

घृताभ्यङ्गः । पुं । घृतमर्दने । घृतमर्दन । तत्र विधिनिषेधौ—"वाते पित्ते कफे रक्ते सन्निपाते क्षताङ्कके । मदमूर्च्छाप्रलापेषु तृष्णादाहज्वरेषु च । सन्तप्ते सन्तते जीर्णे ह्यध्वश्रान्ते विशेषतः । बालमध्यमजीर्णानां घृताभ्यङ्गः प्रशस्यते ॥ गुल्मलीहा-

विसूदनकामलासातिसारिषु । श्वासकासोदरच्छर्द्दिपाण्डुसर्व्वाङ्गशोषिषु ॥ विद्रधौ पार्श्वशूलेषु गण्डमालार्व्वुदादिषु । शीतज्वरे प्रमेहे च घृताभ्यङ्गो न शस्यते ॥" इत्यादि ।

घृताह्वः । पुं । श्रीवासे. कृत्रिमधूपे । त्रिका. ।

घृतिला । स्त्री । पृश्निपर्ण्याम् । চাকুলিয়া । प.मु. । [क्री । हे.च. ।

घृतेली । स्त्री । तैलपायिकायाम् । তেলাপো-

घृष्टम् । क्ली । सद्योव्रणविशेषे । ঘেসর লাগিয়া ঘা বা ক্ষত । "विगतत्वक् यदङ्गं हि सङ्घर्षादन्यथापि वा । उष्मास्रावान्वितं तत्तु घृष्टमित्युपदिश्यते ॥" सु.चि.२श. । पुं । गोधूमे । वै.निघ. ।

घृष्टतलः । पुं । अश्वस्य पादरोगविशेषे । लक्षणं यथा—"घृष्टं भूमौ तलं यस्य तास्रीभवति वाजिनः । तस्य घृष्टतलो नाम पादरोगः प्रकीर्त्तितः ॥" ज.द.२६श. ।

घृष्टिः । पुं । शूकरे । प.मु. । (ष्टी) स्त्री । वराहक्रान्तायां । वाराहीकन्दे । চামর আলু । अम. । घर्षणे । अपराजितायाम् । मे. । [र.मा. ।

घृष्टिला । स्त्री । पृश्निपर्ण्याम् । চাকুলিয়া ।

घृष्विः । पुं । वनवराहे । वै.निघ. ।

घेञ्जुलिका । स्त्री । (Arumorinense.) कोषादने । ঘেঁচু । र.मा. ।

घोटः (कः) । पुं । अश्वे । प.मु. See अश्वः ।

घोटकारिः । पुं । महिषे । वै.निघ. ।

घोटकीदुग्धम् । क्ली । अश्वीदुग्धे । ঘুড়ীর দুধ । गुणाः—रूक्षमम्लं लवणं दीपनं लघु देहस्थैर्यकरं बल्यं गौरवकान्तिकृच्च । रा.नि.व.१५ । See अश्वीक्षीरं ।

घोटगलः । पुं । कासतृणे । वै.निघ. ।

घोटिका । स्त्री । वड़वायाम् । हस्वलोणीशाके । বড় নুনী । गुणाः—कटूष्णं मधुरं वातव्रणकण्डूकुष्ठरक्तशोथघ्नञ्च । रा.नि.व.५ । See लोणी ।

घोटी । स्त्री । घोण्टायाम् । শেয়াকুল । रा.नि.व.८ । हस्वबदरवृक्षे । वै.निघ. ।

घोणकः । पुं । गोनासर्पे । वै.निघ. ।

घोणसा । स्त्री । लताविशेषे । वै.निघ. ।

घोणा । स्त्री । नासिकायाम् । रा.नि.व.१८ । अश्वस्य नासाच्छिद्राग्रिममध्यभागे । ज.द.२श. । किङ्किन्याम् । ঘেঁচেতা । वै.निघ. ।

घोणान्तभेदनः । पुं । आरण्यशूकरे । বন শূকর । वै.निघ. ।

घोणी (इन्) । पुं । शूकरे । वनशूकरे । प.मु. ।

घोण्टा । स्त्री । (Zizyphus jujuba.) गोपघण्टायाम् । শেয়াকুল গাছ । मं कं घोंटी । गोइयो । गुणाः—कटुः उष्णा मधुरा वातघ्नी व्रणकच्छूतिकुष्ठश्वयथुघ्नी च । रा.नि.व.८ । पूगीवृक्षे । গুপারি গাছ । रा.नि.व.११ । वा.सू.१५श. । मदनवृक्षे । नागबलायाम् । शाकवृक्षे । শেগুন গাছ । वै.निघ. । [गाछ । रा.नि.व.८ ।

घोण्टाख्यः (ख्यः) । पुं । मदनवृक्षे । ময়না

घोण्टाफलम् । क्ली । पूगफले । গুপারি । वै.निघ. । बदरीफले । सु.चि.१७श. । [च. ।

घोनसः । पुं । गोनससर्पे । तिलित्ससर्पे । हे.

घोरम् । क्ली । विषे । रा.नि.व.६ । पुं । वस्तिकुण्डले । নাইকুণ্ডল । त्रि । मारके । भा. ।

घोरकुष्ठहा । स्त्री । हितालीति ख्यातलतायाम् । वै.निघ. ।

घोरण्टः । पुं । पूगवृक्षे । গুপারি গাছ । मद. व.६ । [वाघ । रा.नि.व.१६ ।

घोरदर्शनः । पुं । उलूके । तरक्षौ । ঠেঁদো

घोरनृसिंहरसः । पुं । सन्निपातज्वरे रसः । "भागैकं मृततास्रस्य द्विभागं मृतलौहकं । त्रिभागञ्च मृतरसः चतुर्भागं मृताभ्रकम् । माक्षिकं रसगन्धौ च तथा शुद्धा मनःशिला । चलार्य्येतानि तास्रस्य प्रत्येकं तुल्यमेव च । गरलञ्चाभ्रतुल्यं स्यात् त्रिकटुश्चाभ्रतुल्यकः । एतत्सर्व्वसमं देयं विषमाख्यं तथैव च । एतत्सर्व्वस्य द्रव्यस्य द्विगुणं कालकूटकं । मात्स्यमाहिषमायूरछागपित्तैर्विभावयेत् । चित्रकस्य द्रवेणैव प्रत्येकं याममात्रकम् । सर्षपाभा वटी कार्य्या...... । दापयेद्वटिकामेकां पयःपेटीरसेन च ॥" भैष. । विषमाख्यं कुचेलके । [निघ. ।

घोरप्रदा । स्त्री । गोधायाम् । গোসাপ । वै.

घोररासनः(रासी) । पुं । शृगाले । त्रिका. ।

घोरा । स्त्री । देवदाल्याम् । দেবতাড়া । रा. नि व.३ ।

घोलम् । क्ली । सस्नेहजलमथिते दधनि । ঘোল । सु.सू.४५अ. । विजलमथिते दधनि । र. मा.। पादजलत्रिभागदधिकृते तक्रे। रा.नि.व.१५।

घोलवटकः । पुं । घोलकृतवटके । ঘোলবড়া । वै.निघ. ।

घोलिः (ली) । स्त्री । पत्रशाकविशेषे । শাকবিশেষ । हिं घोली, तोंडघोलि, किर्ड्गोलि । घोली द्विधा चेत्रजारामघोलिभेदात् । गुणाः— चेत्रशाकं लवणं रुच्यम् अम्लं वातकफघ्नञ्च । आरामघोलिशाकम् अम्लं रुच्यं रुच्यं वातघ्नं पित्तश्लेष्मकरं जीर्णज्वरापहम् । रा.नि.व.६ ।

घोलिका । स्त्री । घोलि । वै.निघ. ।

घोषः । पुं। कांस्ये । তামা ও দস্তার নির্ম্মিত ধাতু । प.मु. । घोषालतायाम् । मे. । मशके । प्रटोले । भ्रमरे । त्रिका. ।

घोषकः । पुं । कोशातक्याम् । हस्तिघोषालतायाम् । ঘোষা, মধুলতা । भा.पू.१भ.शाकव. । See कोशातकी ।

घोषका । स्त्री । घोषालतायाम् । वै.निघ. ।

घोषकाकृतिः । पुं । घोषायाम् । ঘোষা লতা । र.मा. ।

घोषणः । पुं । कोकिले । श.र. ।

घोषपुष्पम् । क्ली । कांस्ये । रा.नि.व.१३ ।

घोषयित्नुः । पुं । कोकिले । त्रिका.। [निघ.।

घोषवती । स्त्री । शताह्वायाम् । শুল্ফা । वै.

घोषा । स्त्री । (Anethum sowa.) शताह्वाख्यक्षुपे । মউরী, শুল্ফা । रा.नि.व.४ । कर्कटशृङ्ग्यां । रा.नि.व.६। विडङ्गे । वै.निघ. ।

घोषातकी । स्त्री । श्वेतकोशातक्यां । শ্বেত ঘোষা । र.मा. ।

घोषितः । पुं। शिशुमारे। শুশোক । वै.निघ.।

घोषिलः । पुं । वनशूकरे । वै.निघ. ।

घ्राणम् । क्ली । स्वनामख्यातेन्द्रिये । নাসিকা । रा.नि.व.१८ । आघ्राणे । मा.नि. । [अम. ।

घ्राणतर्पणः । त्रि । घ्राणेन्द्रियतृप्तिजनके ।

घ्राणदुःखदा । स्त्री । छिक्किन्यां । হেঁচেতা । भा. । नासारोगे । হাঁচি । वै.निघ. ।

घ्राणपाकः । पुं । नासापाके । वा.उ.१९अ. ।

घ्राणेन्द्रियम् । क्ली । नासिकायाम् । वै.निघ. ।

घ्राणोदकम् । क्ली । नासारन्ध्रेण प्रातर्निशीथोदकपाने । নাকে জল খাওয়া । गुणाः— तार्क्ष्यनेत्रत्वं खगाचार्यसदृशबलशालित्वं बुद्धिमत्त्वमश्विनीकुमारसदृशत्वं शिरोरोगनाशित्वं बलिपलितविहीनत्वञ्च । रा.नि.व.१४ ।

घ्रातिः । स्त्री । नासिकायाम् । श.च. ।

च

चः । पुं । कच्छपे । मे. ।

चकोरः (कः) । पुं । चातकपक्षिणि । চাতক পাখী । रा.नि.व.१९ ।

चक्रम् । क्ली । तगरपादिके । তগরপাদুকা । नकुल.१२अ.।सु.कल्प.५अ.।अचि.२स्थान२अ.। विषभेदे । प.मु. । रक्तकुलत्थे । काञ्जीभेदे । কাঁজি । वै.निघ. पुं। चक्रवाकपक्षिणि । চকাচকি । अम.।

चक्रकः । पुं । राजिमत्सर्पविशेषे । सु.कल्प.४अ.। See सर्पः । [वै.निघ. ।

चक्रकरः । पुं । स्थलचक्रवाके । ভূচক্রবাক ।

चक्रका । स्त्री । स्वनामख्यातमहौषधौ । सु.चि. ३०अ. । See औषधिगणः ।

चक्रकारकः । पुं, क्ली । नखीनामगन्धद्रव्ये । नखी । वै.निघ. ।

चक्रकुल्या । स्त्री । पृश्निपर्ण्याम् । চাকুলিয়া । श,च. । कृष्णतुलस्याम् । वै.निघ. ।

चक्रगजः । पुं । चक्रमर्दक्षुपे । চাকন্দা । रा. नि.व.४ ।

चक्रगुच्छः । पुं । अशोकवृक्षे । श.च. ।

चक्रगुल्मः । पुं । उष्ट्रे । वै.निघ. ।

चक्रदन्ता (न्ती) । स्त्री । जैपालवृक्षे । जय-पाल । प.मु. । [पालविचि । रा.नि.व.६ ।

चक्रदन्तीबीजम् । क्ली । जैपालबीजे । जय

चक्रधरः । पुं । सर्पे । त्रिका. ।

चक्रधारम् । क्ली । अर्द्धधारास्त्रविशेषे । तच्चा-ष्टाङ्गुलायतम् उरसि चतुरङ्गुलविस्तारं द्व्यङ्गुलफलञ्च । सु.सू.टी.उ.८अ. । [द्रव्ये । नखी । रा.नि.व.१२ ।

चक्रनखः (नायकः) । पुं । नखीनामगन्ध-

चक्रनामा(न्) । पुं । माक्षिकधातौ । स्वर्ण-माक्षिक । नखीभेदे । नखी । प.मु. । [श.र. ।

चक्रपद्माटः । पुं । चक्रमर्द्दक्षुपे । চাকন্দা ।

चक्रपरिव्याधः । पुं । आरग्वधवृक्षे । শোঁ-দাল গাছ ।

चक्रपर्णा (र्णी) । स्त्री । कृष्णतुलस्याम् । কাল তুলসী । वै.निघ. । पृश्निपर्ण्याम् । চাকুলিয়া । श.च. ।

चक्रपाणिः । पुं । स्वनामख्यातप्रकृष्टसंग्रहादि-कारे । स गौड़राजस्य पाकशालाध्यक्ष आसीत् । "गौड़ाधिनाथरसवत्यधिकारिपत्नम्" । च.द. ।

चक्रबन्धना । स्त्री । वनमल्लिकायां । वै.निघ. ।

चक्रबाला । स्त्री । आम्रातकवृक्षे । আমড়া গাছ । वै.निघ. ।

चक्रवालिकः । पुं । अश्वस्य पादरोगभेदे । "क्षियन्ते वलयो यस्य खुरमध्विसमुद्भवाः। अक्षिन्ना वाथ सरुजः तं विद्याच्चक्रवालिकम् ॥" ज.द. ।

चक्रमण्डली (इन्) । पुं । मण्डलिसर्पजाति-भेदे । हे.च. ।

चक्रमर्द्दः (कः) । पुं । (Cassiatora.) स्व-नामख्यातक्षुपे । চাকন্দা, চাট্কাটা, এড়াঞ্চী । हिं चकवड़् । मं तरवटा । कं चगचे । तें क्षुपवि-शेषम् । गुणाः—कटुः तीव्रः मेदोवातकफघ्नः व्र-कण्डूकुष्ठदद्रुपामादिहरश्च । रा.नि.व.४ । लघुः स्वादुः रुचः वातपित्तघ्नः हृद्यः हिमः कफश्वास-दद्रुकुष्ठकृमिहरश्च । तत्फलं उष्णं कुष्ठकण्डूदद्रुवि-षवातघ्नं गुल्मकासकृमिश्वासघ्नं कटु च । तत्पत्रम् —अम्लं दद्रुघ्नं वातकफघ्नं कण्डूकासकृमिश्वासकुष्ठघ्नञ्च।

भा. । (र्द्दः) कर्कटभेदे । श.च. । स्त्री (मर्द्दिनी) । अलक्तके । रा.नि.व.६ ।

चक्रमुखः । पुं । शूकरे । वै.निघ. ।

चक्रयन्त्रम् । क्ली । औषधपाकार्थयन्त्रविशेषे । लक्षणं यथा—"गर्त्तवाह्ये भवेद्वर्त्ती मध्यगर्त्ते रसं कुरु । चक्रयन्त्रमिदं सिद्धं वाह्ये गर्त्ते हृदपुटम्" ॥ अचि. ।

चक्ररथः । पुं । चक्रवाकपक्षिणि । वै.निघ. ।

चक्ररदः (दंष्ट्रः) । पुं । शूकरे, वनशूकरे । वै.निघ. । [वै.निघ. ।

चक्ररेणुका । स्त्री। रक्तकरवीरे । রক্তকরবী।

चक्रलः । पुं, क्ली । रक्तकुलत्थे । লাল কুলথ । वै.निघ. । [नि.व.११ ।

चक्रलताम्रः । पुं । बहुरसालवृक्षे । रा.

चक्रलक्षणा (णिका) । स्त्री । गुडूच्याम् । र.मा. । [नागरमुस्तायाम् । वै.निघ. ।

चक्रला । स्त्री । उच्चटायाम् । ওকড়া । अम. ।

चक्रवर्त्तिः (र्त्ती, र्त्तिनी) । पुं, स्त्री । वा-स्तुकशाके । বেতো শাক । प.मु. । लाक्षायाम् । जटामांस्याम् । रा.नि.व.१२ । [वै.निघ. ।

चक्रवल्लरी । स्त्री । स्नुहीभेदे । ফণিমনসা ।

चक्रवाकः । पुं । (Anas casarca.) Rudy-goose. स्वनामख्यातसवजातीयपक्षिविशेषे । চ-কাচকী, রামচকা । तन्मांसं लघु स्निग्धं बलदं अग्निकरं सर्व्वशूलघ्नमुष्णं वातरोगघ्नञ्च । रा.नि.व. १९ । कटु हृद्यम् उष्णवीर्य्यं कटुपाकि बलवृद्धि-करञ्च । राज. । अश्वविशेषे । नकुल. । (का, की) स्त्री । चक्रवाकपत्न्याम् । চক্রবাকী । बृहत्याम् । विकृतौ । प.मु. ।

चक्रवीजम् । क्ली । जैपालवीजे । रा.नि.व.६ ।

चक्रवेधकम् । क्ली । शुक्रनामककाञ्जिके । सि-र्काय । रा.नि.व.१५ । [र.मा. ।

चक्रश्रेणी । स्त्री । अजशृङ्ग्याम् । মেড়াশৃঙ্গী ।

चक्रसंज्ञम् । क्ली । वङ्गे । हे.च. ।

चक्रा । स्त्री । कर्कटशृङ्ग्याम् । কাঁকড়াশৃঙ্গী । नागरमुस्तायाम् । নাগরমুতা । रा.नि.व.६ ।

चक्राङ्का । स्त्री । नागरमुस्तायाम् । रा.नि.व.६ । सुदर्शनायाम् । উরতীপুরতী । पद्मगुड़्च्याम् । পদ্ম গুলঞ্চ । वै.निघ. । (ङ्गी) हंसपद्याम् । श.र. ।

चक्राङ्गः । पुं । हंसे । अम. ।

चक्राङ्गा (ङ्गी (इन्)) । स्त्री, पुं । सुदर्शनलतायाम् । উরতীপুরতী । हिं दहशति । कटुक्यां । কটকী । रा.नि.व.६ । कर्कटशृङ्ग्याम् । কাঁকড়াশৃঙ্গী । प.मु. । हिलमोचिकायाम् । হিঞ্চে । चिका. । हंस्याम् । श.र. । मञ्जिष्ठायां । रा.नि.व.६ । वालुके । वै.निघ. ।

चक्राटः । पुं । विषवैद्ये । मे. ।

चक्राधिवासी । पुं । नागरङ्गवृक्षे । টাবা বৃক্ষ । चिका. । [वै.निघ. ।

चक्रालुः । पुं । महाराजाम्रे । থাস আম ।

चक्राह्वः (यः) । पुं । चक्रमर्द्दक्षुपे । চাকন্দা । रा.नि.व.४ । भैष.कुष्ठ-चि. । चक्रवाकपक्षिणि । रा.नि.व.१९ ।

चक्रिकः । पुं । रक्तकुलत्थे । वै.निघ. ।

चक्रिका । स्त्री । जानुनि । হাঁটু । रा.नि.व.१८ । श्वेतगुञ्जायाम् । সাদা কুঁচ । रक्तकार्पास्याम् । লালকাপাস । चक्रमर्द्दे । চাকন্দা । वै.निघ. ।

चक्रिपत्नी । स्त्री । चक्रवाकस्त्रियाम् । চক্রবাকী । श्वेततुलस्याम् । वै.निघ. ।

चक्री (इन्) । पुं । कोकपक्षिणि । চক্রবাক । चक्रमर्द्दे । চাকন্দা । तिनिशवृक्षे । সাদন গাছ । काके । गर्द्दभे । व्याघ्रनखे । নখীবিশেষ । দধনি । रा.नि.व.२३ । स्त्री । त्वचि । দারুচিনি । वै.निघ. ।

चक्रीवान् । पुं । गर्द्दभे । अम. । चक्रवाके । চকা । वै.निघ. ।

चक्रेन्द्रकः । पुं । देवसर्षपवृक्षे । রাই । वै.निघ. ।

चक्रेश्वरी । स्त्री । वत्सनाड़िकायां । वै.निघ. ।

चक्रोत्थः । पुं । कुक्कुटपादीलतायां । লতা ফটকী । वै.निघ. ।

चङ्क(ङ्कु)रः । पुं । वृक्षे । मे. ।

चङ्क्रमणम् । क्ली । भ्रमणे । পুনঃপুনর্ভ্রমণ । गुणाः—"अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत् । पादाभ्यामनुपानद्भ्यां सदा चङ्क्रमणं नृणाम् ॥" सु. चि.२४अ. । "यत्तु चङ्क्रमणं नातिदेहपीड़ाकरं भवेत् । तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ॥ अध्वमेदःकफस्थौल्यसौकुमार्य्यविनाशनम् ।" राज. २प. । [वै.निघ. ।

चचण्डी । स्त्री । क्षुद्रजिह्वायाम् । আলজিভ ।

चचेण्डा । स्त्री । चिचिण्डायाम् । চিচিঙ্গা, চেঁপা । गुणाः—शोषरोगे हितं पटोलादीनगुणञ्च । मद. ।

चञ्चत्कुठाररसः । पुं । अर्शसि रसः । रसः गन्धकः लौहं प्र. २ भ. । त्रिकटु दन्तीमूलं कुष्ठं प्र. १ भ. विषलाङ्गलिकामूलं ६ भ. यवक्षारः सैन्धवं टङ्कणक्षारः प्र. ५ भ. गोमूत्रं स्नुहीक्षीरं प्र.३२भ. । यावत्पिण्डं मृदग्निना पचेत् । र.सा.सं. ।

चञ्चरी (इन्) । पुं,स्त्री (री) । मधुमक्षिकायां । भ्रमरे । ভ্রমর । वै.निघ. ।

चञ्चरीकः । पुं । भ्रमरे । चिका. ।

चञ्चलतैलम् । क्ली । शिलारसे । चिका. ।

चञ्चला । स्त्री । पिप्पल्याम् । श.च. ।

चञ्चिमूचिः । पुं । कारण्डवपक्षिणि । সারস। থড়া হাঁস । चिका. ।

चञ्चुः । पुं, स्त्री । क्षुद्रचुञ्चुक्षुपे । চেচড়া শাক । गोनाड़ीचे । নাড়ীচ শাক । रा.नि.व.४ । रक्तैरण्डे । रा.नि-व.८ । एरण्डसामान्ये । मे. । मृगे । श.र. । पक्षिणः ओष्ठे । পাখির ঠোঁট । अम. ।

चञ्चुकः (का, की) । पुं, स्त्री । चुञ्चुक्षुपे । চেঁচকো । भा.रा.नि.व.४ । स्त्री (का, की) । पक्षिचञ्चौ । श.र. । [न.व.४ ।

चञ्चुपत्रः (पत्राख्यः) । पुं । चुञ्चुशाके । रा.

चञ्चुरः । पुं । चुञ्चुशाके । रा.नि.व.४ ।

चञ्चुलः । पुं । रक्तैरण्डे । वै.निघ. ।

चञ्चुसूचिः (कः) । पुं । पक्षिविशेषे । কাদা খোঁচা । कारण्डवपक्षिणि । चिका. । हे.च. ।

चञ्चूः । स्त्री । पक्षितुण्डे । পাখির ঠোঁট । हे.च. ।

चटकः । पुं । Sparrow. क्षुद्रपक्षिविशेषे । চড়াই পাখী । हिं चवुड़िया । मं चिमणा । स द्विविधः गृहारण्यभेदात् । प्रथमस्य मांसगुणाः—

शीतं लघु हृद्यं बलदञ्च । द्वितीयस्य मांसगुणाः—लघु पथ्यदञ्च । रा.नि.व.१७ तदण्डगुणः—हंसीवत् ज्ञेयः । अश्वचटके । श्यामा पाखी । राज. । स्त्री (का) । पिप्पलीमूले । श.टी. । चटकस्त्रियां । अम. ।

चट(कि)का । स्त्री । चटकपत्न्याम् । मादि चड़ाइ । इला. । रक्तगुञ्जायाम् । लाल कुँच । च. द.उन्मा.चि. । [रा.नि.व.६ ।

चट(टि)काशि(शी)रः । पुं । पिप्पलीमूले ।

चटाफलः । पुं । नारिकेलवृक्षे । श.र. ।

चटि(टी)का । स्त्री । चटकस्त्रियाम् । पिप्पलीमूले । वै.निघ. ।

चटुः । पुं । उदरे । मे. । [निघ. ।

चट्टिका । स्त्री । जलौकायाम् । जोँक । वै.-

चट्टुः । पुं । लौहपात्रविशेषे । चाटु ।

चणः (कः) । पुं । (Cicerariatinum.) Gram or chick pea. स्वनामख्यातशिम्बीधान्ये । छोलार गाछ । हिं चणा, चाणा । मं चणा । कं कडले । गुणाः—रक्तपित्ते हितं । सि.यो.र.पि.चि. । "रक्ते कफे पीनसके च कण्ठे गलामये वातरुजे सपित्ते । शीतप्रतिश्यायकृमीन् निहन्ति शुष्कस्तथार्द्रश्चणकः प्रशस्तः ।" अचि.१५अ. । मधुरः रूक्षः मेहघ्नः वातपित्तकरः दीप्तिवर्णकरः बलकरः रुच्यः आध्मानकरश्च । तद्यूषगुणाः—मधुरः कषायः कफघ्नः वातविकारकरः श्वासोर्द्धकासपीनसघ्नः बलदीपनश्च । रा.नि. व.१६ । कषायः कटुकशोषी वातघ्नः कफदोषकृत् । रक्तपित्तं निहन्त्याशु चणानां यूष उच्यते ॥ अङ्गारभ्रष्टतैलभ्रष्टश्च तद्गुण एव । आर्द्रभ्रष्टः बल्यो रुचिकरश्च । शुष्कभ्रष्टस्तु रूक्षो वातकुष्ठप्रकोपनः । स्विन्नः पित्तघ्नः कफघ्नश्च । तत्सूपः क्षोभकरः । आर्द्रोऽतिकोमलः रुच्यः पित्तशुक्रहरः शीतलश्च । भा.पू १भ.धान्यव. । तच्छाकं रुच्यं दुर्जरं कफवातकृत् अम्लं विष्टम्भजनकं पित्तघ्नं दन्तशोथहरञ्च । भा.शाक.व. । पर्युषितचणकजलगुणाः—शीतं प्रातः पीतं पित्तरसहरं पुष्टिदं सन्तर्पणञ्च । रा.नि.व.१६ ।

चणकरोटिका । स्त्री । चणकचूर्णकृतरोटिकायाम् । छोलार रुटी । गुणाः—रूक्षा विष्टम्भकरी गुरुः श्लेष्मपित्तरक्तघ्नी च । भा. ।

चणकलोणी । स्त्री । चणकाम्ले । गाछ छोला । चाणाशाक । वै.निघ. । [छातु ।

चणकसक्तुः । पुं । चणककृतसक्तौ । छोलार

चणकक्षारः । पुं । चणकपुष्पे । रसको.क्रव्यादरसे ।

चणका । स्त्री । अतस्याम् । मशिना । र.सा.सं. ।

चणकाम्लकम् । क्ली । पिप्पलीमूले । चणकक्षारे । छोलार शाक, गाछ छोला । हिं चणकलोणी । गुणाः—"चणकाम्लकमत्यम्लं दीपनं दन्तहर्षणं लवणानुरसं रुच्यं शूलाजीर्णविबन्धनुत् ।" भा.र.सा.सं.अम्लवर्गे । [शीतलजले । रवा. ।

चणकाम्लवाः । क्ली । चेतस्थफलवचणकपत्र-

चणक्यम् । क्ली । चाणक्यमूलके । वैद्यकम् ।

चणद्रुमः । पुं । क्षुद्रगोक्षुरे । छोट गोखुरी । रा.नि.व.४ ।

चणपत्रकः (पत्री) । पुं, स्त्री । रुदन्तीवृक्षे । रोदन्तीति उत्कले । रा.नि.व.५ । गोक्षुरके । गोखुरी । वै.निघ. ।

चणिका । स्त्री । तृणविशेषे । चोणार शाक । गुणाः—वृष्या बल्या मधुरा वीजैस्तृणैश्च पशुहिता । रा.नि.व.८ ।

चण्डः । पुं । तिन्तिड़ीवृक्षे । मे. । रक्तकरवीरे । आरण्यशूकरे । वै.निघ. । ग्रन्थिपर्णे । गेँठेला । हिं चौरा । रा.नि.व.१२ । [मयूरे । वै.निघ. ।

चण्डकः (की (इन्)) । पुं । रक्तकरवीरे ।

चण्डका । स्त्री । वचायाम् । वै.निघ. ।

चण्डचुक्रा । स्त्री । तिन्तिड़्याम् । वै.निघ. ।

चण्डरुद्रिका । स्त्री । रसजारणादिज्ञाने । वैद्यकम् ।

चण्डहासा । स्त्री । गुडूच्याम् । रा.नि.व.१ ।

चण्डा । स्त्री । (Andropogon aciculatum.) चोरनामगन्धद्रव्ये । चोरा । तें लिंमिटोंड़ । अम. । अजमोदायाम् । वै.निघ. । शङ्खपुष्प्याम् । चोरपुष्प्याम् । भाटुइ, डानकुनी । मे. । लिङ्गिन्याम् । हिं पचगुड़िया । कपिकच्छ्वाम् ।

-आलाकुशी। आखुकर्ण्याम्। ইন্দুরকাণী। रा.नि.व.३। श्वेतदूर्व्वायाम्। रा.नि.व.८।

चण्डाख्या । स्त्री। दारुहरिद्रायाम्। वै.निघ.।

चण्डातः (कः) । पुं। करवीरे। अम.। रुद्रन्तीवृचे। वै.निघ.।

चण्डालः (कः) । पुं। रक्तकरवीरे। तण्डुलीयशाके। চাঁপানটিয়া,কাঁটানটিয়া। वै.निघ.।

चण्डालकन्दः । पुं। स्वनामख्यातमहाकन्दशाके। চণ্ডালকন্দ। मं चण्डालकान्द। कं मादगेगड्डे। स एकपत्रद्विपत्रत्रिपत्रचतुष्पत्रपञ्चपत्रभेदेन बहुधा। गुणाः—मधुरः कफपित्तरक्तदोषघ्नः विषभूतादिदोषघ्नः रसायनश्च। रा.नि.व.७।

चण्डालिका । स्त्री। करवीरे। चण्डालवल्लक्याम्। বনচাঁড়াল। मे.।

चण्डाली । स्त्री। शिवलिङ्गिन्याम्। লিঙ্গিনী লতা। रा.नि.व.१३। रस.र.प्रमेह-चि.मेहहिरदसिंहरसे।

चण्डिका । स्त्री। अतस्यां। মশিনা। त्रिका।

चण्डी । स्त्री। चिड़ाइवदारी। शिवलिङ्गिन्यां। শিবলিঙ্গিনী লতা। रा.नि.व.३। [नि.व.१०।

चण्डीकुसुमः । पुं। रक्तकरवीरवृचे। रा.

चण्डीलता । स्त्री। ग्रन्थिपर्णभेदे। গেঁটেলা। हिं चीरा। वै.निघ.।

चण्डुः । पुं। मूषिके। श.च.।

चण्डेश्वररसः । पुं। नवज्वरे रसः। "रसं गन्धं विषं ताम्रं मर्द्दयेदेकयामकं। आर्द्रकस्वरसेनैव मर्द्दयेत्सप्तवारकम्। निर्गुण्ड्याः स्वरसे पश्चात् मर्द्दयेत्सप्तवारकम्। गुञ्जैकार्द्ररसेनैव दत्ता हन्ति ज्वरं चणात्॥" রস, গন্ধক, বিষ, তাম্র প্রত্যেকে সমভাগ প্রতিদিন আদার রসে ১প্রহর মর্দ্দন করিয়া ৭ ভাবনা দিবে। ঐরূপ নিশিন্দা রসে ৭ ভাবনা দিবে। মাত্রা ১ র. অনুপান আদার রস। रसकौ.।

चतुरः । पुं। काके। हे.च.। [निघ.।

चतुरङ्गः । पुं। कलायभेदे। তেওড়া। वै.

चतुरङ्गा । स्त्री। घोटिकावृचे। শেয়াকুল। रा.नि.व.८।

चतुरङ्गावलेहः । पुं। ज्वरे अवलेहः। स च समभागद्राचामलकशुण्ठीमधुकृतः। भा.।

चतुरङ्गुलः । पुं। आरग्वधविशेषे। বড় সোণালু। हिं धनबहेड़ा। प.मु.। पटोलसदृशफललतायाम्। তিৎপল্তা। सु.सू.३८अ.।

चतुरम्लम् । क्ली। अम्लचतुष्टये। यथा—कोलदाड़िमवेतसवृचाम्लेषु। कपित्थदाड़िमतिन्तिड़ीफलवृचाम्लेषु। (वृचाम्लं आम्रातके।) अम्लवेतसवृचाम्लबृहज्जम्बीरनिम्बुकेषु। অম্লবেতস, আম্‌ড়া, গোঁড়া লেবু, কাগজী নেবু। भा.।

चतुरूर्द्ध्वपातः । पुं। शरभमृगे। वै.निघ.।

चतुरूषणम् । क्ली। कणामूलसहिते त्र्यूषणे। "त्र्यूषणं सकणामूलं कथितं चतुरूषणम्। त्र्योषस्यैव गुणाः प्रोक्ता अधिकाश्चतुरूषणे॥" वैद्यकम्।

चतुर्गतिः । पुं। कच्छपे। हे.च.।

चतुर्जातम् । क्ली। चातुर्जातके। গুড়ত্বক্ তেজপত্র এলাইচ নাগেশ্বর। वै.निघ.२भ. वा.व्या.लशुनपाके। [দুই দিন অন্তর জ্বর।

चतुर्थकः । पुं। विषमज्वरभेदे, चातुर्थिकज्वरे।

चतुर्थिका । स्त्री। पलमाने ४ वा ८ तो.। प.प्र.। [निघ.।

चतुर्दंष्ट्रा । स्त्री। गोक्षुरक्षुपे। গোখ্রী। वै.

चतुर्दलः । पुं। सुनिषण्णशाके। শুশুনিশাক। भा.।

चतुर्दशाङ्गः । पुं। सान्निपातिकज्वरे कषायभेदे। सदशमूलकिराततिक्तादिगणे। दशमूलं चिरायता गुड़ूची मुस्ता शुण्ठी मिलिता २ तो.। प्रचेपः ढवचूर्णं ४ माषा। দশমূল, চিরেতা, গুলঞ্চ, মুতা,শুঁট মিলিত ২ তো.। প্রক্ষেপ তেউড়ীচূর্ণ ৪ মাষা। सा.कौ.।

चतुर्दंशी । स्त्री। श्वेतनिर्गुण्ड्याम्। শ্বেত নিশিন্দা। वै.निघ.।

चतुर्द्रवः । पुं। चतुर्गुणद्रवद्रव्ये। सि.यो.।

चतुर्द्धारी । स्त्री। चतुर्धारकाण्डवल्ल्याम्। ক-রলাবিশেষ। वै.निघ.। [তাড়ক। वै.निघ.।

चतुर्भङ्गा । स्त्री। शुक्लवृद्धदारके। শ্বেতবীজ

चतुर्भद्रः । पुं । समभागेषु सुलकातिविषागुडूची शुण्ठीषु । वैद्यकम् ।

चतुर्भद्रिकावलेहः । पुं । चातुर्भद्रावलेहे ।

चतुर्मुखः । पुं । वातव्याधौ रसविशेषे । रसगन्धकलौहाभ्राणि प्र. समभागानि स्वर्णभस्म सूततुल्यं कुमारीरसेन मर्द्दयित्वा एरण्डपत्रैः वेष्टयित्वा धान्यराशौ दिनत्रयं स्थापयेत् । र.सा.सं. ।

चतुर्वर्णः । पुं । कलायभेदे । তেওড়া । वै. निघ. ।

चतुर्विंशतिकः । पुं । पुरुषे । च.शा.१अ. ।

चतुर्विधान्नम् । क्ली । चर्व्यचोष्यलेह्यपेयेषु । See अन्नम् ।

चतुर्वीजम् । क्ली । मेथिकादिवीजचतुष्टये । "मेथिका चन्द्रसूरश्च कालाजाजी यवानिका । एतच्चतुष्टयं युक्तं चतुर्वीजमिति स्मृतम् । तच्चूर्णं भक्षितं नित्यं निहन्ति नयनामयं । अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथाम् ॥" भा. ।

चतुश्छदः (दा) । पुं, स्त्री । चाङ्गेर्य्याम् । আমরুল । सुनिषण्णके । শুশুনি । वै.निघ. ।

चतुष्की । स्त्री । मशहर्य्याम् । মশারি । मे. ।

चतुष्कुवलयम् । क्ली । कुवलयस्य नालकन्ददलकेसरेषु । পদ্মের ডাঁটা, মূল, পাতা ও কেসর । वा.उ.३९अ., सिद्धरसायनघृते ।

चतुष्पत्रः (त्री (त्रन्)) । पुं । अण्डालकन्दे । रा.नि.व.७ । क्षुद्रपाषाणभेदक्षुपे । ছোট পাথরকুচি । रा.नि.व.५ । सुनिषण्णकशाके । শুশুনি শাক । हिं चौपत्तिशाक । "चाङ्गेरीसदृशः पत्रैः चतुर्दल इति स्मृतः । शाको जलान्विते देशे चतुष्पत्रीति चोच्यते ॥" भिण्टाम् । ঝাঁটী । श.टी. ।

चतुष्पदः (पात्) । पुं । भिण्डाक्षुपे । रा. नि.व.४ । पशौ गजाश्वादौ । मे. ।

चतुष्पदा । स्त्री । भेण्डायाम् । वै.निघ. । जलजपुष्पविशेषे । अर्कचि. । [रा.नि.व.५ ।

चतुष्पर्णी । स्त्री । क्षुद्राम्लिकायां । আমরুল ।

चतुष्पादः । पुं । चिकित्सायाः पादचतुष्टये । "भिषग्द्रव्याण्युपस्थाता रोगी पादचतुष्टयम् ।" वैद्यकम् ।

चतुष्पुटोदरा । स्त्री । पीतपुष्पकरवीरवृक्षे । वै.निघ. ।

चतुष्पुण्ड्रः । पुं । भिण्डाक्षुपे । रा.नि.व.४ ।

चतुष्फला । स्त्री । नागबलायां । গোরক্ষ চাকুলিয়া । रा.नि.व.५ ।

चतुस्समः । पुं । आमज्वरे योगविशेषे । যোগবিশেষ । हरीतकीलवङ्गसैन्धवयवानीसमभागेषु । मिलितचन्दनागुरुकस्तूरीकुङ्कुमेषु । हे.च. । जातीफललवङ्गजीरकटङ्कणेषु । गुणाः—"आमशूलविबन्धघ्नं पाचनं दोषशोषणत् ।" च. । आमातिसारशूले जातीफलं लवङ्गं जीरकं टङ्कणं समभागचूर्णं माक्षिकसितासहितं लिह्यात् ।

चत्वालः । पुं । दर्भभेदे । गर्भाशये । वै निघ. ।

चदिरः । पुं । हस्तिनि । कर्पूरे । सर्पे । उणा. ।

चनः । क्ली । भक्ते । ভাত । वै.निघ. ।

चन्दकः । पुं । मत्स्यविशेषे । চান্দা মাছ । तन्मांसम् अनभिष्यन्दि मधुरं बलकरञ्च । रा.नि. व.१९ ।

चन्दनः । पुं, क्ली । Sandal. (Sirium myrtifolium.) स्वनामख्यातवृक्षे । यस्य काष्ठं परमसुगन्धि । চন্দন গাছ । स सप्तभेदः—श्रीखण्डशबरपीतपत्तङ्गरक्तचन्दनबर्बरहरिगन्धभेदेन । श्रेष्ठचन्दनलक्षणं—"स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितं । ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥" भा. । सा. गुणाः—"चन्दनानि च सर्व्वाणि सदृशानि रसादिभिः । गन्धेन तु विशेषोऽस्ति पूर्व्वं श्रेष्ठतमं गुणैः । चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ॥" रा.नि.व.१२ । "हृद्यं बल्यं विषश्लेष्मतृष्णापित्तास्रदाहजित् ॥" म.द. । क्ली । रक्तचन्दने । मे. । पुं । वानरविशेषे । हे.च. ।

चन्दनगोपा (पी) । स्त्री । शारिवाविशेषे । কৃষ্ণ শারিবা, শ্যামা লতা । रा.नि.व.१२ ।

चन्दनद्रुमः । पुं । रक्तचन्दनवृक्षे । सर्ज्जतरौ । वै.निघ. ।

चन्दनपुष्पम् । क्ली । लवङ्गे । रा.नि.व.१२ ।

चन्दनमूलम् । क्ली । चन्दनतरुमूले । इदं जङ्गमविषघ्नम् । नकुल.१६अ. ।

चन्दनमूलिका । स्त्री । कृष्णशारिवायाम् । श্যামালতা । वै.निघ. ।

चन्दनशारिवा । स्त्री । गोपीचन्दने । তিল-কমাটী । कृष्णशारिवायाम् । रा.नि.व.१२ ।

चन्दनसारः । पुं । वज्रक्षारे । रा.नि.व.६ ।

चन्दना । स्त्री । कृष्णशारिवायाम् । रा.नि.व. १२ । श्वेतशारिवायाम् । भा. ।

चन्दनादितैलम् । क्ली । राजयक्ष्माधिकारे । तिलतैलं ४ श. दधिमस्तु १६ श. लाक्षारसः ४ श. (लाक्षा १६ प. वारि १६ श. शे. ४ श.) । कल्कार्थं—रक्तचन्दनं बालकं नखी कुष्ठं यष्टिमधु शैलजं पद्मकाष्ठं मञ्जिष्ठा सरलकाष्ठं देवदारु श-टी एला खाट्टाशी नागकेशरं तेजपत्रं शिलारसः मुरामांसी जटामांसी काकोली प्रियङ्गुः मुस्ता ह-रिद्रा दारुहरिद्रा श्यामालता अनन्ता लताकस्तूरी लवङ्गं अगुरु कुङ्कुमं गुड़त्वक् रेणुकं नलुका प्र. २ तो.। তিলতৈল ৪ শ. দধিমস্তু ১৬শ. লাক্ষারস ৪ শ. (লাক্ষা ১৬ প. জল ১৬ শ. শে. ৪ শ) । কল্কার্থ—রক্তচন্দন, বালা, নখী, কুড়, যষ্টি-মধু, শৈলজ, পদ্মকাষ্ঠ, মঞ্জিষ্ঠা, সরলকাষ্ঠ, দেবদারু, শটী, এলাইচ, খাটাশী, নাগেশ্বর, তেজপত্র, শিলারস, মুরামাংসী, জটামাংসী, কাকোলী, প্রিয়ঙ্গু, মুতা, হরিদ্রা, দারুহরি-দ্রা, শ্যামালতা, অনন্তমূল,লতাকস্তুরী, লবঙ্গ, অগুরু, কুঙ্কুম, গুড়ত্বক্, রেণুক, নালুকা প্র-ত্যেকে ২ তোলা । च.द. ।

चन्दनादिलौहम् । क्ली । जीर्णज्वरे । "रक्त-चन्दनह्रीवेरपाठोशीरकणाशिवाः । नागरोत्पलधा-त्रीभिस्त्रिमदैन समन्वितं । लौहं निहन्ति विवि-धान् समस्तान् विषमज्वरान् ॥" রক্তচন্দন, বা-লা, আকনাদিমূল, বেণার মূল, পিপুল, হ-রীতকী, শুঁট, নীলোৎপল, আমলা, মুতা, চিতার মূল, বিড়ঙ্গ প্রত্যেকে সমভাগ । সর্ব্বসমান লৌহ একত্র জলে মাড়িবে । र.सा.सं. ।

चन्दनाम्बु । क्ली । सुगन्धजलभेदे । वैद्यकम् ।

चन्दिरः । पुं । कर्पूरे । उणा. । हस्तिनि । मे. ।

चन्द्रः । पुं । निशाकरे । अम. । कर्पूरे । जले । मे. । काम्पिल्लके । কমলাগুঁড়ি । रा.नि.व.१२ । भा.म.१म.सन्ततज्वर चि. । रौप्ये । स्वर्णे । रा.नि. व.१३ । रक्तमुक्ताफले । र.चि.३अ. । हीरके । भा. । गैरिके । शुक्लचित्रतायाम् । वै.निघ. ।

चन्द्रकः । पुं । मत्स्यविशेषे । চাঁদা মাছ । गु-णाः—"चन्द्रकस्त्वनभिष्यन्दी मधुरो बलवर्द्धनः ।" राज.३प. । मेचके । ময়ূরপুচ্ছের চাঁদ । अम. । नखे । श.च. । क्ली । श्वेतमरीचे । रा.नि.व.६ । चन्दने । स्त्री। मेथिकायां । মেথি । कपिकच्छ्वां । আলাকুশী । वै.निघ. । [श.र. ।

चन्द्रकला । स्त्री । वाचामत्स्ये । বাচা মাছ ।

चन्द्रकवान् । पुं । मयूरे । वै.निघ. ।

चन्द्रकान्तः । पुं । स्वनामख्यातमणौ । চন্দ্র-কান্ত মণি । गुणाः—शीतलः स्निग्धः रक्तपित्त-तापहरः शिवप्रीतिकरः ग्रहालक्ष्मीदूरकृत् स्वच्छ-श्च । तत्परीक्षा—"स्निग्धं श्वेतं पीतमाभासमं तद्व-त्ते चित्ते स्वच्छतां यन्मुनीनां । यच्च स्रावं याति च-न्द्रांशुसङ्गाज्जात्यं रत्नं चन्द्रकान्ताख्यमेतत् ॥" रा. नि व.१३ । तदुत्थजलगुणाः—लघु गङ्गाम्बुसदृशं पित्तघ्नं निर्म्मलं मूर्च्छादाहरक्तपित्तकासमदात्ययेषु हितञ्च । रा.नि.व.१४ । क्ली । श्रीखण्डचन्दने । कैरवे । प.मु. । स्त्री । निर्गुण्ड्यां । वै.निघ. । रा-त्रौ । श.च. ।

चन्द्रकान्ति । क्ली । रूप्ये । রূপা । वै.निघ. ।

चन्द्रकी (इन्) । पुं । मयूरे । चिका. । स्त्री । लिङ्गनाशरोगे, दृष्ट्युपसर्गविशेषे । यथा—"दृष्टिः कांस्यसमच्छाया चन्द्रकी चन्द्रकाकृतिः ।" वा.उ. १४अ. ।

चन्द्रगन्धा । स्त्री । शट्याम् । শটী । वै.निघ. ।

चन्द्रगोलिका । स्त्री । चन्द्रकमीने । চাঁদা মাছ । वै.निघ. । [त्रि । सु.चि.८अ. ।

चन्द्रचक्रम् । क्ली । चन्द्रवच्चक्राकारच्छेदकर्म्म-

चन्द्रचञ्चलः । पुं । खलिशमत्स्ये । থলশিয়া মাছ । चिका. । चन्द्रकमत्स्ये । চাঁদা মাছ । जटा. । [निघ. ।

चन्द्रचन्दनम् । क्ली । कुङ्कुमागुरुचन्दने । वै.

चन्द्रजोपलः । पुं । चन्द्रकान्तमणौ । रा.नि. व.१३ ।

चन्द्रटः । पुं । चिप्रक्षीकौव्याख्याकारे ।

चन्द्रतरुः । पुं । महासोमवल्ल्याम् । वै.निघ. ।

चन्द्रद्युति । क्ली । चन्दने । वै.निघ. ।

चन्द्रनामा(न्) । पुं । कर्पूरे । रा.नि.व.१२ ।

चन्द्रपुष्पम् । क्ली । रौप्ये । वै.निघ. । (पा, पी) स्त्री । श्वेतकण्टकार्य्याम् । रा.नि.व.४ ।

चन्द्रप्रभा । स्त्री । वाकुच्याम् । সোমরাজ । रा.नि.व.४ । कर्चूरके । शटी । वै.निघ. । पायस विशेषे । পায়স বিশেষ । लक्षणं —"घातमतण्डुलौ धौतौ परिभृष्टौ घृतेन च । खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत् । भृष्टजीरचतुर्जातचन्द्रबिन्दुसुरोचनः ॥" राज.३प. । अर्शसि प्रमेहे च औषधविशेषे —विडङ्गं चित्रकमूलं त्रिकटु त्रिफला देवदारु चवी किराततिक्तकं पिप्पलीमूलं मुस्ता शटी वचा शुद्धस्वर्णमाक्षिकं सैन्धवं यवक्षारः सर्ज्जिक्षारः हरिद्रा दार्व्वी धान्यकं गजपिप्पली अतिविषा प्र. २ तो. शुद्धशिलाजतु ८ प. (३२ तो.) शुद्धगुग्गुलुः २ प. शर्करा ४ प. वंशरोचनात्रिवृद्दन्तीमूलत्वगेलापत्राणां प्र. १ प.। अत्र पलप्रमाणं रसगन्धकयोरपि केचिद्वदति । मात्रा बदरास्थिसमा । रस.र. । [ইচ । अम. ।

चन्द्रबाला । स्त्री । स्थूलैलायाम् । বড় এলা-

चन्द्रभस्म । क्ली । कर्पूरे । त्रिका. ।

चन्द्रभा । स्त्री । श्वेतकण्टकार्य्याम् । वै.निघ. ।

चन्द्रभागा । स्त्री । भारतवर्षीयनदीविशेषे । तज्जलगुणाः—सुशीतलं पित्तदाहघ्नं वातकरञ्च । रा.नि.व.१४ ।

चन्द्रभूतिः । स्त्री । रौप्ये । रा.नि.व.१३ ।

चन्द्रमणिः । पुं । चन्द्रकान्तमणौ । हे.च. ।

चन्द्रमल्लिका (ल्ली) । स्त्री । मल्लिकाभेदे । চন্দ্রমল্লিকা ।

चन्द्रमसी । स्त्री । योनिमध्यस्थनाड़ीविशेषे । यथा—"या चापरा चान्द्रमसी च नाड़ी कन्दर्पगर्भे भवति प्रधाना । सा सुन्दरी यौषितमेव सूते ••• ॥" भा. ।

चन्द्रमा । पुं । सोमलताभेदे । सु.चि.२९अ. ।

चन्द्ररश्मिनः । पुं । चकोरपक्षिणि । वै.निघ. ।

चन्द्रराजी । स्त्री । वाकुच्याम् । হাকুচ । रा.नि.व.४ । [वै.निघ. ।

चन्द्ररुक् । क्ली । चन्द्रकमत्स्ये । চাঁদা মাছ ।

चन्द्ररे(ले)खा । स्त्री । सोमराज्याम् । प.मु. । वाकुचीवीजे । হাকুচ। वा.चि.२अ.कन्दर्पसारतैले।

चन्द्रलता । स्त्री । एलालतायाम् । वै.निघ. ।

चन्द्रलोह(क)म्, **चन्द्रवपुः** } क्ली । रौप्ये । रा.नि.व.१३ ।

चन्द्रवल्लभा (वल्लरी)(वल्ली) । स्त्री । (री) सोमलतायाम् । रा.नि.व.१३ । ब्राह्मीक्षुपे । ব্রাহ্মী শাক । अ.टी.भ. । (भा, ल्ली) प्रसारण्याम् । গন্ধভাদুলী । माधवीलतायाम् । रा.नि.व.५।१०। चन्द्रमल्लिकायाम् । वै.निघ. ।

चन्द्रविहङ्गमः । पुं । वकपक्षिणि । त्रिका. । सारसपक्षिणि । वै.निघ. ।

चन्द्रशकला । स्त्री । वाकुच्याम् । হাকুচ । वै.निघ. । [हारा. ।

चन्द्रशालिका । स्त्री । प्रासादशिरोगृहे ।

छच्छिका । स्त्री । सनवनीततक्रे । ননি তুলিবার ঘোল । वै.निघ. ।

छटाफलः । पुं । नारिकेलवृक्षे । तालवृक्षे । वै.निघ. । गुवाकवृक्षे । त्रिका. ।

छत्रम् । क्ली । आतपत्रे । ছাতা । तत्र वृध्यात-

पनिवारणार्थं व्यवह्रियते । छत्रधारणगुणाः—छ-त्त्रमातपधूलिवायुहिमनाशि वर्णकरं चक्षुष्यं गुप्त्या-वरणमङ्गलकारि च । राज.२प. । "वर्षानिलरजो-घर्म्महिमादीनां निवारणम् । वल्यं चक्षुष्यमौजस्यं शड्करं छत्रधारणम् ॥" सु.चि.२४अ. ।

छत्त्रः (कः) । पुं । रक्तकोकिलाक्षवृक्षे । लाल कुलियाखाड़ा । मूलेन पत्रेण वचाकारवृक्षे । छा-तारिया विष । र.मा. । मत्स्यकाके । मत्स्यरङ्गप-क्षिणि । माछराङा पाखी । श.च. । भूतृणे । ग-न्धतृण । रा.नि.व.८ ।

छत्त्रकी । स्त्री । शिल्पनाडरोगे, इच्युपसर्गविशे षे । यथा—"छत्राभा नैकवर्णा च छत्रकी नाम नौलिका ।" वा.उ.१४अ. । [नि.व.८ ।

छत्त्रगुच्छः । पुं । गुच्छवृक्षे । हिं बलहा । रा.

छत्त्रधान्यम् । क्ली । धन्याके । धनिया । वै.निघ. ।

छत्त्रपत्त्र(क)म् । क्ली । स्थलपद्मे । त्रिका. । पुं । भूर्ज्जपत्रवृक्षे । भूर्जपत्र गाछ । र.मा. । स-प्तपर्णवृक्षे । मानके । कश्चित् ।

छत्त्रपर्णः । पुं । सप्तपर्णवृक्षे । रा.नि.व.२३ ।

छत्त्रपर्पटी । स्त्री । सौराष्ट्रमृत्तिकायां । पङ्क-पर्पटी । प.मु. ।

छत्त्रपुष्प(क)म् । क्ली । तिलकपुष्पे । वै.निघ. ।

छत्त्रपुष्पी । स्त्री । स्थूलशताह्वायां । वै.निघ. ।

छत्त्रवृक्षः । पुं । स्वनामख्यातवृक्षे । छातारिया विष । र.मा. ।

छत्त्रा । स्त्री । स्वनामप्रसिद्धौषधौ । सु.चि.३० अ. । See औषधिगणः । शताह्वाख्यक्षुपे । शुल्-फा । रा.नि.व.४ । वा सू.२६अ. । अजाज्यां । मधु-रिकायाम् । मौरी । रा.नि.व.४ । च.वि.८अ. । "अजाजी मधुरिका वा ।" च.द. । सि.यो.उन्मा. चि.महापैशाचघृते । "कायस्था शूकरी छत्रा ।" भूतृणे । गन्धतृण । शिलीन्ध्रे । कोँड़कछाता । मे. । धन्याके । धनिया । "छत्रा धान्यं वितुन्न-कम् ।" मद.व.२ । मञ्जिष्ठायाम् । रा.नि.व.६ । आमलक्यां । वै.निघ.२भ.मरीच.चि.छत्रादिचूर्णे ।

छत्त्राकः । पुं । जालवर्ब्बुरकवृक्षे । बाब्लाविशेष । रा.नि.व.८ । आमलकवृक्षे । वै.निघ. ।

छत्त्राकी (ची) । स्त्री । रास्नायाम् । अम. ।

छत्त्राङ्गम् । क्ली । हरितालविशेषे । गोंदन्त हरिताल । प.मु. । See गोदन्तम् ।

छत्त्रातिच्छत्त्रः (त्रा) । पुं, स्त्री । सुगन्धा-ख्यतृणविशेषे । स जलजः छत्राकारश्च भवति काश्मीरस्थदिव्यसरसि दृश्यते । श.र. । (त्रे) द्रो-णपुष्पीद्वये । छोट बड़ घल्घसिया । सि.यो. उन्मा.चि.पैशाचघृते । श्रीकण्ठः ।

छत्त्रिका । स्त्री । शिलीन्ध्रे । कोँड़कछाता, पातालफोड़, भूँइ फोड़ । सा नानास्थानज-भेदेन बहुधा । सा. गुणाः—शीता कषाया स्वादुः पिच्छिला छर्द्यतीसारज्वरकफरोगकरी गुरुश्च । पलालजा तु स्वादुपाका रूक्षा च । तथा रेणुज-गोष्ठजशुचिस्थानजकाष्ठजश्वेतछत्रिकाश्च दोषकर्थ्यः निन्दिताश्च । राज. ।

छत्त्री (त्रिन्) । पुं । सप्तपर्णवृक्षे । वै.निघ. । ना-पिते । श.र. । त्रि । छत्रविशिष्टे ।

छदः । पुं । ग्रन्थिपर्णवृक्षे । गेँठेला । तमाल-वृक्षे । पत्रे । पाता । मे. । तेजपत्रवृक्षे । भैष.वा. व्या.गन्धकघृते ।

छदनम् । क्ली । तमालपत्रे । तेजपत्र । रा. नि.व.६ । त्वचि । गुड़त्वक् । वै.निघ. । पत्रे । पक्षे । मे. ।

छदपत्त्रः । पुं । भूर्ज्जवृक्षे । र.मा. ।

छदवल्लभः । पुं । ग्रन्थिपर्णमूले । गेँठेलार मूल । वै.निघ. । [मे. ।

छद्मद्विजः । पुं । कङ्कपक्षिणि । काँक पक्षी ।

छद्मा । स्त्री । मञ्जिष्ठायाम् । रा.नि.व.६ ।

छद्मिका । स्त्री । गुडूच्याम् । रा.नि.व.३ । म-ञ्जिष्ठायाम् । वै.निघ. ।

छद्वरः । पुं । दन्ते । वै.निघ. ।

छन्दः । पुं । विषे । श.र. ।

छमिः । पुं । ऊर्णनाभौ । माकड़शा । वै.निघ. ।

छरिषा । स्त्री । दारुहरिद्रायाम् । वै.निघ. ।

छर्द्दम् । क्ली । वमनवेगे, वमने । हे.च. ।

छर्द्दनः । पुं । निम्बवृक्षे । मदनवृक्षे । मयना गाछ । प.मु. । क्ली । वान्तौ । मा.नि. ।

छर्द्दिः (र्द्दी) । स्त्री, क्ली । वान्ती । वमन । रा.नि.व.२० । सा पञ्चधा । यथा—"दुष्टैर्दोषैः पृथक्सर्वैः बीभत्सालोकनादिभिः । छर्द्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते । अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि । अकाले चातिमात्रैश्च तथासात्म्यैश्च भोजनैः । श्रमाद्भयात्तथोद्वेगादजीर्णात् क्रमिदोषतः । नार्य्याश्चापन्नसत्वायास्तथातिद्रुतमश्नतः । बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् । छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः । निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः । हृल्लासोद्गारसंरोधैः प्रसेको लवणस्तनुः । द्वेषोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणम् ॥" मा.नि. ।

छर्द्दिका । स्त्री । विष्णुक्रान्तायाम् । अपराजिता । रा.नि.व.५ । वान्ती ।

छर्द्दिकारिपुः }
छर्द्दिघ्नरिपुः } पुं । सूक्ष्मैलायाम् । श.च. । वै.निघ. ।

छर्द्दिघ्नः । पुं । निम्बवृक्षे । र.मा. ।

छर्द्दायनिका (नी) । स्त्री । कर्कटिकायां । काँकुड़ । वै.निघ. ।

छल्लिः (ल्ली) । स्त्री । चर्म्मणि । छाल । श.र. । वृक्षविशेषे । भवरसालीति महाराष्ट्रे । वै.निघ.२भ. अतिसा.चि.जम्ब्वादिचूर्णे । पुष्पविशेषे । मे. ।

छविपत्रकः । पुं । वृश्चिकाल्याम् । विछाति । भैष.कुष्ठ-चि.कन्दर्पसारतैले ।

छागः । पुं । स्वनामख्यातपशौ । छागल । गुणाः—"नातिशीतो गुरुः स्निग्धः मन्दपित्तकफः स्मृतः । छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः ॥" सु.सू.४६अ. ।

छागकर्णः । पुं । सर्ज्जतरौ । शाल गाछ । शाकतरौ । শেগুন গাছ । वै.निघ. ।

छागघृतम् । क्ली । छागीनवनीतजघृते । छागघृत । गुणाः—चक्षुष्यं दीपनं बलवर्द्धनं कासश्वासकफरोगराजयक्ष्मसु हितञ्च । रा.नि.व.१५ ।

छागणः । पुं । करीषाग्नौ । घुँटेर आगुन । त्रिका. ।

छागदधि । क्ली । छागीदुग्धकृतदधनि । छागदुधेर दई । गुणाः—वातकफघ्नं लघु उष्णं नेत्ररोगे हितं अर्शःश्वासकासघ्नं रुच्यं दीपनं पाचनञ्च । रा.नि.व.१५ । "आजं दधि भवेच्छ्रेष्ठं क्षयवातविनाशनं । दुर्नामश्वासकासेषु हितमग्निप्रदीपनम् ॥ विपाके मधुरं वृष्यं रक्तपित्तप्रसादनं । शस्तं प्राभातिकं प्रोक्तं वातपित्तनिबर्हणम् ॥" अत्रि.८अ. ।

छागदुग्धम् । क्ली । अजादुग्धे । छागलदुध । मं शेलीदुध । कं पुट्टआड़िनहालु । गुणाः—कषायं मधुरं शीतं ग्राहि लघु पित्तक्षयापहारि कासज्वरघ्नं रुधिरातिसारे हितं त्रिदोषघ्नञ्च । अत्रि.८अ. । लघुकायत्वात् नानाद्रव्यनिषेवणात् नात्यम्बुपानात् व्यायामात् सर्व्वव्याधिहरं क्षीणाजदुग्धं गोदुग्धवीर्य्यादधिकगुणं क्षीणदेहेषु पथ्यतमञ्च । स्थूलाजदुग्धं गुणैः किञ्चिदूनम् । रा.नि.व.१५ ।

छागनवनीतम् । क्ली । छागीदुग्धोत्थनवनीते । छागलदुधेर ननी । गुणाः—लघु मधुरं कषायं त्रिदोषघ्नं चक्षुष्यं दीपनं बल्यं सदाहितञ्च । प्रत्यग्रनवनीतं क्षयकासनेत्ररोगकफघ्नं बल्यम् अतिदीपनञ्च । रा.नि.व.१५ ।

छागभोजी (इन्) । पुं । ईहामृगे । वृके । रा.नि.व.१९ । त्रि । छागभक्षके ।

छागमांसम् । क्ली । छागलमांसे । सि.यो. । गुणाः—लघु स्निग्धं नातिशीतं रुचिप्रदं निर्द्दोषवातपित्तघ्नं मधुरं बलदं पुष्टिदञ्च । छागपोतभवं मांसं लघु शीतलं प्रमेहघ्नञ्च । तृणचारिच्छागपोतमासम् ईषल्लघु बलदञ्च । रा.नि.व.१७ । "छागमांसं परं हृद्यं बृंहणं बलवर्द्धनं । स्निग्धं स्वदनभिष्यन्दि नात्युष्णं धातुसाम्यकृत् ॥" राज. । निष्कासिताण्डच्छागमांसगुणाः—कफकृत् गुरु स्रोतःशुद्धिकरं बलकरं मांसवर्द्धकं वातपित्तघ्नञ्च । वृद्धच्छागमांसगुणाः—वातलं रूक्षञ्च । तदण्डं रुचिप्रदम् । भा. । शुक्रवर्द्धकमिति दृष्टफलम् ।

छागलः (कः) । पुं । छागे । रा.नि.व.१९ । मत्स्यविशेषे । আড় মাছ । तस्य लक्षणं—"श्वेतं सुकायं समदीर्घवृत्तं निःशल्ककं छागलकं वदन्ति । गले द्विकण्टः किल तस्य पृष्ठे कण्टः ।" तन्मांसगुणाः—सुपथ्यः रुचिदः बलप्रदश्च । रा.नि.व.१७ ।

छागला (न्त्रिका, न्त्री) । स्त्री । वृद्धदारकलतायाम् । प.मु. । रा.नि.व.३ ।

छागलान्तः (रिः) । पुं । ईहामृगे । रा.नि. [व.१९ ।

छागलाद्यः । पुं । मल्लिकाकुसुमवृक्षे । प.मु. ।

छागशकृत् । क्ली । छागविष्ठायाम् । ছাগল-নাদি ।

छागशत्रुः । पुं । ईहामृगे । वै.निघ. ।

छागशृङ्गी । स्त्री । मेषशृङ्ग्याम् । भा.म.२भ. मूत्रकृच्छ चि. ।

छागाद्यघृतम् । क्ली । यक्ष्मरोगे हितम् । पाठः —"छागमांसतुलां गृह्य साधयेद्द्रोणतोयतः । पादशेषेण तेनैव सर्पिःप्रस्थं विपाचयेत् । ऋद्धि-र्वृद्धिश्च मेदे द्वे जीवकर्षभकौ तथा । काकोली क्षीरकाकोली पृथक् कल्कैः पलोन्मितैः । सम्यक् सिद्धे चावतार्य्य शीते तस्मिन् प्रदापयेत् । शर्करा-याः पलान्यष्टौ मधुनः कुड़वं क्षिपेत् ॥" छागमांसं १०० प. वारि ६४ श. शे. १६ श. घृतं ३२ प. । कल्कार्थं—ऋद्धिः वृद्धिः मेदा महामेदा जीवकः ऋषभकः (उक्तद्रव्याणामभावे बला गोरक्षतण्डुला अश्वगन्धा अनन्तमूलं गुड़ूची वंशरोचना) काकोली क्षीरकाकोली प्र. १ प. । ছাগমাংস ১০০ প. জল ৬৪ শ. শে. ১৬ শ. ঘৃত ৩২ প. । কল্কার্থ—ঋদ্ধি (অভাবে বেলেড়া), বৃদ্ধি (অভাবে গোরক্ষ চাকুলিয়া), মেদ, মহামেদ (অভাবে অশ্বগন্ধা, অনন্তমূল), জীবক, ঋষভক (অভাবে গুলঞ্চ, বংশলোচন), কাকোলী, ক্ষীরকাকোলী প্রত্যেকে ১ প. । सा. कौ. । च.द. । बृहद्यथा—"छागमांसतुलाञ्चैव दशमूल्याः शतं पलं । अश्वगन्धापलशतं वाट्या-लकशतन्तथा । जलद्रोणे विपक्तव्यं प्रत्येकं पादशे-षितं । घृताढ़कं पचेत्तेन क्षीरं सर्पिःसमं ततः । शतावरीरसस्तत्र दातव्यो घृततुल्यकः । ताम्रपात्रे दृढे चैव शनैर्मृद्वग्निना पचेत् । अस्यौषधस्य सिद्ध-स्य कल्कः स्याच्छुक्तिसम्मितः । जीवन्ती मधुकं द्रा-क्षा काकोल्यौ नीलमुत्पलं । मुस्तञ्च चन्दनं रास्ना पर्णिनीद्वयशारिवे । मेदे द्वे च तथा कुष्ठं जीवक-र्षभकौ शटी । दार्व्वी प्रियङ्गुः त्रिफला नतं तालीशपद्मकौ । एला पत्रं वरी नागं जातीकुसुमधान्य-के । मञ्जिष्ठा दाड़िमं दारु एलवालुकरेणुके । विड़ङ्गं जीरकञ्चैव पेषयित्वा विनिक्षिपेत् । वस्त्र-पूते सुशीते च शर्कराप्रस्थसंयुतम् ॥"...... । মূর্চ্ছিত গব্য ঘৃত ১৬ শ. নপুংসক ছাগের মাংস ১০০ প. ক্বাথার্থ দশমূল প্রত্যেকে ১০ প. অশ্বগন্ধা ১০০ প. বেলেড়া ১০০ প. জল প্র. ৬৪ শ. শে. ১৬ শ. । উক্ত ছাগ-মাংসাদির প্রত্যেক ক্বাথ ঘৃতের সঙ্গে পাক করিবে । দুগ্ধ ১৬ শ. শতমূলীরস ১৬ শ. । কল্কার্থ—জীবন্তী, যষ্টিমধু, দ্রাক্ষা, কাকোলী, ক্ষীরকাকোলী, নীলোৎপল, মুতা, রক্তচন্দন, রাস্না, শালপাণি, চাকুলে, শ্যামা লতা, অনন্তমূল, মেদ, মহামেদ (অভাবে অশ্বগন্ধা, অনন্তমূল), কুড়, জীবক, ঋষভক (অভাবে গুলঞ্চ, বংশলোচন), শটী, দারুহরিদ্রা, প্রিয়ঙ্গু, ত্রিফলা, তগরপাদুকা, তালীশপত্র, পদ্মকাষ্ঠ, এলাইচ, তেজপত্র, শতমূলী, নাগেশ্বর, জাতীপুষ্প, ধনিয়া, মঞ্জিষ্ঠা, দাড়িম, দেবদারু, এলবালুক, রেণুক, বিড়ঙ্গ, জীরা প্রত্যেকে চূর্ণ ৪ তো. বস্ত্রে ছাঁকিয়া প্রক্ষেপ শর্করা ১৬ প. । सा.कौ. । रस.र. । अन्यत् वातव्याधौ । "आजं चर्म्मविनिर्म्मुक्तं त्यक्तशृङ्ग-खुरादिकम् । पञ्चमूलीद्वयञ्चैव जलद्रोणे विपाच-येत् । तेन पादावशेषेण घृतप्रस्थं विपाचयेत् । जीवनीयैः सयष्ट्याह्वैः क्षीरञ्चैव शतावरीं । छाग-लाद्यमिदं नाम्ना सर्व्ववातविकारनुत् । द्रोणे द्रव्य-तुला शुल्या स्याच्छागदशमूलयोः । पृथक् तुलार्द्धे यष्ट्याह्वयं देयं द्विधीक्षितः ॥" ছাগমাংস ৫০ প. দশমূল ৫০ প. জীবনীয়াদি দশক প্র. ৪ তো. ১ মা. ১ র. যষ্টিমধু ১০ তো. ১ মা. ১৩ র. । च.द.वा.व्या. । छागलक्षणं यथा—"नातिबाला न सूताश्च न वृद्धा न च रोगिणः । मध्यस्थास्तरुणा ग्राह्या कृशा हृष्या विशेषतः ॥ तु-लाद्रव्ये जलद्रोण इति वाक्यबलादिह । पृथक् तुलार्द्धं चक्रेष्टं दशमूलाजमांसयोः ॥" तुलार्द्धं प-ञ्चाशत्पलानि । छागमांसं ५० प. दशमूलं ५० प. जलं ६४ श. शे. १६ श. । "क्वाथ्याच्चतुर्गुणं वारी-त्यादिवाक्यबलात् पुनः । चतुःषष्टिपलं क्वाथ्यं वृन्द-कुण्डस्य सम्मतम् ॥" एतन्मतेन छागमांसं ३२ प. । एतच्चाकृतिलाभादिति बकुलः । दशमूलस्य प्रत्ये-कमष्टरक्तिकोपेतद्वादशमाषाधिकपलत्रयम् । यत्र दशमूलस्य प्र. ३ प. १२ मा. ८ र. । जलं पूर्व्व-वत् । चक्रमतेन प्रायः प्रचारः । पृथगेव जलद्रो-णार्द्धेन मांसक्वाथमेकाहेन कृत्वा व्यवहरन्ति वृद्धाः । दशमूलेन सह क्वाथकरणे तु व्युषितोऽपि मांस-क्वाथो न दोषलः । यदुक्तं "केवलत्रीहिशाल्यङ्गक्वा-

श्री व्युष्टस्तु दीपन” इति। चीरं घृतसमं। चीरसाहचर्य्यात् शतावर्य्या रसोऽपि घृतसम:। जीवनीयं जीवनीयदशकं। अत्र प्रविष्टमपि यष्टिमधु पुनरुक्तं भागद्वयग्रहणार्थं। यदुक्तं “घृततैले च योगे च यद्द्रव्यं पुनरुच्यते। तज्ज्ञातव्यमिहार्य्येण भागतो द्विगुणेन च॥” इति। जलस्थलजभेदात् यष्टिमधुद्वयग्रहणमिति तु चक्र:। रस.र.।

छागिका (गी) । स्त्री। छागस्त्रियाम्। धाड़ि छागल। मांसगुणा:—मधुरं शीतलं ग्राहि दीपनं रक्तपित्तहरं चयकासहरं कषायं लघु अतिसारज्वरघ्नञ्च। अप्रसूतामांसं पीनसघ्नं शुष्ककासेऽरुचौ शोषे च हितम् अग्निदीपनञ्च। भा.।

छागीतक्रम् । क्ली। छागीघोले। छागलदुधेर घोल। गुणा:—“छागलं लघु सस्निग्धं त्रिदोषशमनं परं। गुल्मार्शोग्रहणीशूलपाण्ड्वामयविनाशनम्॥” अत्रि.८अ.। See अजातक्रम्।

छागीमूत्रम् । क्ली। अजामूत्रे। See अजामूत्रम्। [शाँओड़ा गाछ। वै.निघ.।

छागीचीरविनाशन: । पुं। शाखोटवृक्षे।

छात्र(क)म् । क्ली। सरघाभि: वरटाभिर्वा कृते छत्राकारपटलसञ्चिते मधुनि। बोल्‌ताचाकेर मधु। तच्च आपीतवर्णम्। “छत्राकारन्तु पटलं सरघा: पीतपिङ्गला:। यत्कुर्व्वन्ति तदुत्पन्नं मधु छात्रकमीरितम्॥” गुणा:—विविधमेहक्रमिहरं गुणोत्तरञ्च पौत्तिकात्। रा.नि.व.१४। क्रमिश्वित्ररक्तपित्तहरं गुरु च। राज.। “वरटा: कपिला: शीता: प्रायो हिमवती वने। कुर्व्वन्ति छत्रकाकारं तज्जं छात्रमधु स्मृतम्। छात्रकं स्याच्च कपिलं पिच्छिलं शीतलं गुरु। स्वादुपाकं क्रमिश्वित्ररक्तपित्तप्रमेहजित्। भ्रमतृन्मोहविषकृत् तर्पणञ्च गुणाधिकम्॥” भा.। [ति। टाट्‌का घृत। श.च.।

छात्रदर्शनम् । क्ली। प्रत्यग्रघृते, हैयङ्गवीनघृ-

छात्रशर्करा । स्त्री। छात्रमधुकृतशर्करायाम्। गुणैश्छात्रमधुसदृशा। रा.नि.व.१४।

छादनम् । क्ली। पत्रे। अ.टी.भ.। पुं। नीलाम्लानवृक्षे। नील झाँटी। रा.नि.व.१०।

छाया । स्त्री। प्रभायाम्। वर्णप्रभाश्रिता या सा छाया। सा विल्याद्याश्रयभेदेन पञ्च भवति। च. इ.७अ.। छाया: श्यावलोहितनीलपीतादयो रोगिणो मरणसूचका: भवन्ति। सु.सू.३१अ.। रौद्रशून्यतायां। छाया। सा. गुणा:—शीतला मधुरा दाहश्रमहरा। वा.। श्रमभ्रममूर्च्छासन्तापघ्नीति मेघच्छाया। राज.२प.। वटच्छाया बलवर्णप्रसादनी। च.। [त्रिका.।

छायातरु: । पुं। छायाप्रधानवृक्षे, वटादौ।

छायामित्रम् । क्ली। छत्रे। श.र.।

छायावृक्ष: । पुं। अश्वत्थवृक्षे। वै.निघ.।

छिक्कक(ण)म् (का) । क्ली, स्त्री। क्षवथौ। हाँचि। वै.निघ.। [भा.।

छिक्कणी । स्त्री। छिक्किन्याम्। हेँचेता गाछ।

छिक्कर: । पुं। जाङ्गलजीवविशेषे। गुणा:—“छिक्करो लघु हृद्यो च मधुरो दोषनाशन:। तुल्यो हरिणमांसेन ज्वरेष्वपि प्रशस्यते॥” अत्रि.२०अ.।

छिक्किका (नी) । स्त्री। (Artemisia sternutatoria.) स्वनामख्यातलतायां। हेँचेता गाछ। हिं नाक्‌छिकनी। गुणा:—कटुका रुच्या तीक्ष्णोष्णा वह्निपित्तकृत् वातरक्तहरी कुष्ठक्रमिवातकफापहा च। भा.। [वै.निघ.।

छिक्किपत्रा । स्त्री। छिक्किन्याम्। हेँचेता।

छित्ति: । पुं। करञ्जवृक्षे। श.च.।

छिद्रम् । क्ली। स्रोतसि। रा.नि.व.१८। रन्ध्रे।

छिद्रवैदेही । स्त्री। गजपिप्पल्याम्। गजपिपुल। रा.नि.व.६।

छिद्रान्त: । पुं। नले। नल गाछ। रा.नि.व.८

छिद्राफल: । पुं। मायाफलवृक्षे। वै.निघ.।

छिद्रोदरम् । क्ली। चतोदररोगे। क्षत जन्य उदरी। तस्य लक्षणं चरके यथा—“तदधो नाभ्या: प्रायोऽभिनिवर्त्तमानमुदकोदरस्य च यथावलञ्च दोषाणां रूपाणि दर्शयति। अपिचातुर: सलोहितपीतपिच्छिलकुणपगन्धमवर्च्च उपवेशते हिक्काश्वासकासतृष्णाप्रमेहारोचकाविपाकदौर्ब्बल्यपरीतश्च भवति। एतच्छिद्रोदरं विद्यात्।”

छिन्नम् । क्ली। सद्योव्रणविशेषे। “तिरश्चीनऋजुर्वापि यो व्रणश्चायतो भवेत्। गात्रस्य पातनं चापि छिन्नमित्युपदिश्यते॥” सु.चि.२अ.। क्ली।

काण्डभग्नाख्यनामभङ्गरोगभेदे। अन्यतरपार्श्वविश्लिष्टमिति तल्लक्षणम्। सुनि.१५अ.। तत्र द्विधा एकं विदीर्णं संलग्नञ्च। अन्यत् विदीर्णं द्विधाभूतञ्च। भा.म.२भ.।

छिन्नग्रन्थिनिका। स्त्री। विपर्णिकायाम्। रा.नि.व.७। गोरचमुण्डग्राम्। वै.निघ.।

छिन्नपत्रा (त्री)। स्त्री। अम्बष्ठायाम्। पूदिना। रा.नि.व.४। [वै.निघ.।

छिन्नपत्रिका (त्री)। स्त्री। आम्रातकवृक्षे।

छिन्नपुष्पा। स्त्री। तिलकवृक्षे। তিল গাছ। वै.निघ.।

छिन्नरुहः। पुं। तिलकक्षुपे। रा.नि.व.१०।

छिन्नरुहा। सल्लकीवृक्षे। रा.नि.व.११। गुडूच्याम्। रा.नि.व.३। "छिन्नरुहातिक्तरोहिणी।" सि.यो.कफज्व.चि.। स्वर्णकेतकीवृक्षे। रा.नि.व.१०। [ওগ্রা ধান। See शालिः।

छिन्नरूढ़शालिः। पुं। रोपितशाली। রো-

छिन्नरोहा। स्त्री। गुडूच्याम्। वा.सू.श्यामाक.व.। [काशचि.त्रिकटुकादिचूर्णे।

छिन्नलता। स्त्री। गुडूच्याम्। वै.निघ.२भ.

छिन्नवेशिका। स्त्री। पाठायाम्। আকনাদি। श.च.।

छिन्नश्वासः। पुं। पञ्चविधश्वासान्यतमे श्वासरोगे। छिन्न श्वासरोग। लक्षणं—"यस्तु श्वसिति विच्छिन्नं सर्व्वप्राणेन पीड़ितः। न वा श्वसिति दुःखार्त्तो मर्म्मच्छेदरुगर्द्दितः। आनाहस्वेदमूर्च्छार्त्तो दह्यमानेन वस्तिना। विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः। विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः। छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्॥" मा.नि.।

छिन्नांशुका। स्त्री। लिङ्गनाशरोगे, दृष्ट्युपसर्गविशेषे। "विषमच्छिन्नदग्धाभा सरुक् छिन्नांशुका स्मृता।" वा.उ.१४अ.।

छिन्ना। स्त्री। गुडूच्याम्। रा.नि.व.३। महानीलकण्ठरसे। महाश्रावणिकायाम्। रा.नि.व.५। सल्लकीवृक्षे। रा.नि.व.११। कन्दगुडूच्याम्। वै.निघ.।

छिन्नाङ्गी। स्त्री। गुडूच्याम्। वै.निघ.।

छिन्नोद्भवा। स्त्री। गुडूच्याम्। रा.नि.व.३। सि.यो.,जीर्णज्वरे।

छिन्नोन्नतकुक्षिः। स्त्री। सविषजलौकाभेदे। ছিনে জোঁক। सु.सू.१३अ.।

छिलिहिण्टः (ण्डः) (ण्टी)। पुं, स्त्री। पातालगरुड़ीलतायाम्। हिं छिरिहिटा। मद.। भा.।

छिल्ली। स्त्री। छिलिहिण्टायाम्। वै.निघ.।

छुछुन्दरः (री)। पुं, स्त्री। चुचुन्दर्य्याम्। ছুঁচো। हिं छुछुन्दर। तद्दष्टे विड्दंशः ग्रीवास्तम्भो तृष्णनञ्च भवति। सु.कल्प.६अ.। [मूल। वै.निघ।

छुरम्। क्ली। कपिकच्छुमूले। আলাকুশীর

छुरा। स्त्री। सुधायाम्। চূণ। हारा.।

छुरिकः। पुं। सप्तपर्णवृक्षे। प.मु.।

छुरिका। स्त्री। वन्ध्यायां गवि। पालङ्कशाके। भा.। अस्त्रभेदे। छुरि। [व.५।

छुरिकापत्री। स्त्री। श्वेतानामक्षुपे। रा.नि.

छेकः। पुं। गृहासक्तपक्षिणि। मृगे। मे.।

छेदः। पुं। खण्डे। त्रिका.। व्रणादिच्छेदने। स चतुर्व्विधः गोतीर्थकः सर्व्वतोभद्रः दललाङ्गलकः लाङ्गलकाख्यश्च। "पार्श्वं गतेन शस्त्रेण छेदो गोतीर्थको मतः। सर्व्वतः सर्व्वतोभद्रः पार्श्वच्छेदोऽर्द्धलाङ्गलः। पार्श्वद्वये लाङ्गलकः॥" तत्र गोतीर्थकः काव्यगत-गोमूत्रिकाकारः। सर्व्वतोभद्रः भद्रकाव्याकारः। य एकस्मिन् पार्श्वे छेदः स दललाङ्गलकः। कुटासहितहलाकारः पार्श्वद्वये यश्छेदः स लाङ्गलकाख्यः सम्पूर्णहलाकारः। वा.उ.२८अ.अरुणः।

छेदकम्। क्ली। कान्तलौहे। रा.नि.व.१३।

छेदनम्। क्ली। द्विधाकरणे, कर्त्तने। वायुजन्यव्रणवेदनायाम्। सु.सू.२२अ.। कफादिनाशकौषधवर्गे। यथा त्रिकटु। [नि.व.११।

छेदनीयः। पुं। कतकवृक्षे। নির্মালি। रा.

छेदी। त्रि। विश्लेषकरे। वा.सू.टी.हेमा.। पुं। कतकवृक्षे। वै.निघ.।

छेद्य: । त्रि। नि:शेषं छेदार्हे। ते च भगन्दरादयो रोगा: । सु.सू.५श्र. ।

छेलु: । पुं। सोमराज्याम् । श.च.।

छोटिका । स्त्री। अङ्गुलिध्वनौ। तुड़ि। हिं चुटकी। भा.। [नच्छोदवारिणा।”

छोद: । पुं। चूर्णे। सि.यो.दाह.चि.। “चन्द-

छोलङ्ग: । पुं। मातुलुङ्गवृक्षे। টাবা নেবু। प.मु. ।

छोहारा । स्त्री। शुष्कमहाखर्ज्जूरे। “खर्ज्जूरी गोस्तनाकारा परद्वीपादिहागता। जायते पश्चिमे देशे सा छोहारेति कीर्त्यते ॥” भा.। See खर्ज्जूरी।

ज

ज: । पुं। मृत्युञ्जये। मे.। विषे। तेजसि। श.र.।

जकुटम् । क्ली। वार्त्ताकुपुष्पे। বেগুনফুল। अत्रि.३स्थान.५६श्र.। पुं। कुकुरे। मे.।

जगत् । क्ली। सौराष्ट्रमृत्तिकायाम्। পঙ্ক পর্পটী। भैष.ज्व.चि.प्राणेश्वररसे।

जगदुन्मादका । स्त्री। सुरायाम्। वै.निघ.।

जगनु: । पुं। अग्नौ। कीटभेदे। विश्व.। श.र.।

जगल: । पुं। कादम्बर्य्या: सुराया घनतरभागे। ভেতো বা পঁচী মদ। शार्ङ्ग.। गुणा: —पाचनो ग्राही रूक्ष: मेद:कृत् विष्टम्भी दोषपाचनश्च। वा.टी.हेमा.। सुराकल्के। মদের মেতা। गुणा: — “ग्राह्युष्णो जगल: शोक्तो रूक्षस्तट्कफशोफहृत्। हृद्य: प्रवाहिकाटोपदुर्नामानिलशोषहृत् ॥” सु.सू.४६श्र.। मदनवृक्षे। ময়না গাছ। पिष्टकसुरायाम्। मे.। क्ली। गोमये। र.मा.।

जग्धि: । स्त्री। भोजने। रा.नि.व.२०।

जघन: । पुं। शरीरावयवे, कटिप्रदेशे। “नितम्बश्चरमं श्रोणि: स्त्रीणां जघनमग्रत:।” रा.नि.व.१८। कट्यध:स्थाने। वै.निघ.।

जघनकूपकौ । पुं। सन्धिखल्लद्वये। हला.।

जघनेफला । स्त्री। काकोदुम्बरिकायाम्। কাকডুমুর। अम.। ज.द.१२श्र.।

जघन्यम् । क्ली। शिश्ने। मे.।

जङ्गमकुटी । स्त्री। छत्रादिच्छत्रे। त्रिका.।

जङ्गमविषम् । क्ली। सर्पादिविषे। तच्चाश्रयभेदेन षोड़शधा। ते चाश्रया: दृष्टिनि:श्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्त्तवमुखसन्दंशविशर्द्धितगुदास्थिपित्तशूकशवादय:। तत्र दृष्टिनि:श्वासविषा: दिव्या: सर्पा:, भौमा दंष्ट्राविषा:, मार्ज्जारश्ववानरादयो दंष्ट्रानखविषा:, चिपिटादयो मूत्रविषा:, मूषिका: शुक्रविषा:, लूताश्च लालामूत्रपुरीषशुक्रार्त्तवादिविषा:, वृश्चिकादय आलविषा:, विषहृतास्थिसर्पकण्टकवरटामत्स्यास्थीनि चेति अस्थिविषाणि, शकुलीमत्स्यादय: पित्तविषा:। सु.कल्प.३श्र.।

जङ्गलम् । क्ली। मांसे। निर्ज्जनदेशे। त्रिका.।

जङ्गालम् । क्ली। रञ्जनद्रव्यभेदे। জাঙ্গাল রং। अर्क-चि.८शतकं। [श.र.।

जङ्गुलम् । क्ली। विषे। त्रिका.। जालिनीफले।

जङ्घा । स्त्री। गुल्फोर्द्ध्वजान्वधोभागे। জাঙ্। रा.नि.व.१८। काकजङ्घायाम्। च.चि.६श्र.।

जङ्घापर्व्व । क्ली। ऊरुमध्यस्थपर्व्वणि। वै.निघ.।

जङ्घापिण्डिका । स्त्री। जङ्घाद्वये। উভয় জঙ্ঘা। च.शा.७श्र.। इन्द्रवस्तौ। পায়ের ডিম্।

जङ्घाल: । पुं। जाङ्गलमृगभेदे, एणहरिणर्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रपृषतचारुष्करमृगमातृकाप्रभृतिषु मृगेषु। तन्मांसञ्च कषायं मधुरं लघु वातपित्तघ्नं तीक्ष्णं हृद्यं वस्तिशोधनञ्च। सु.सू.४६श्र.।

जङ्घाशूलम् । क्ली। वातव्याधिभेदे। नि.।

जङ्घास्थि । क्ली। जङ्घानलकास्थनि, ते च द्वे। জঙ্ঘার নলা। च.शा.७श्र.।

जटर: । पुं। उदरे। द्वि.कोष:।

जटा । स्त्री। भूम्यामलक्याम्। रा.नि.व.५। रुद्रजटालतायाम्। रा.नि.व.३। जटामांस्याम्। रा.नि.व.१२। शतावर्य्याम्। रा.नि.व.४। वा.उ.५श्र.। तरुमूले। वै.निघ.। कपिकच्छ्वौ। र.मा.।

जटान्ता । स्त्री । जटामांसी । भूम्यामलक्यां । वै.निघ. ।

जटामांसी । स्त्री । (Valeriana jatámámsí.) स्वनामख्यातगन्धद्रव्यविशेषे । জটা-মাংসী । सा त्रिधा — साधारणजटामांसी सुगन्ध-जटामांसी सूक्ष्मजटामांसी चेति । विशेषाः पर्य्याये मृग्याः । सा. गुणाः — सुरभिः कषाया कटुः शीतला कफहृत् भूतघ्नी दाहघ्नी पित्तघ्नी च । रा.नि.व.१२ । तदनुलेपनं ज्वरघ्नं क्षयताघ्नञ्च । राज. । तिक्ता कषाया मेध्या कान्तिदा बल्या स्वादुर्हिमा त्रिदोषरक्तदाहवीसर्पकुष्ठघ्नी च । भा. । रूपं यथा —"सूक्ष्मकेसरा स्निग्धा मांसी पिङ्गजटाकृतिः।" भैष. ।

जटामांस्यादिः । पुं । कफरोगे तदादिसुरभिद्रव्यगणे । जटामांसी-नखी-पत्री-लवङ्ग-तगर-शिलारस-गन्धपाषाणेषु । रा.नि.व. ।

जटामूला । स्त्री । शतमूल्याम् । শতমূলী । रा नि.व.४ ।

जटायुः । पुं । गुग्गुलौ । গুগ্‌গুল । प.मु. ।

जटारुद्रा । स्त्री । रुद्रजटायाम् । रा.नि.व.३ । सुगन्धजटामांस्याम् । গন্ধমাংসী । रा.नि.व.१२ ।

जटालः । पुं । कर्चूरे । गुग्गुलौ । रा नि.व.१२ । मुष्ककवृक्षे । ঘণ্টাপারুল । वटवृक्षे । रा.नि.व.११ ।

जटाला । स्त्री । जटामांस्याम्, गन्धमांस्याम् । সুগন্ধ জটামাংসী । रा.नि.व.१२ ।

जटावती । स्त्री । जटामांस्यां । रा.नि.व.१२ ।

जटावल्ली । स्त्री । रुद्रजटायाम् । रा.नि.व.३ ।

जटिः (टी (इन्)) । स्त्री, पुं । प्लक्षद्रुमे । পাকুড় গাছ । श.र. । मतुदपचिविशेषे । জটায়ু । च.सू.२७अ. । स्त्री । जटामांस्याम् । प.मु. ।

जटिका । स्त्री । गुञ्जालतायाम् । वै.निघ. ।

जटिलः । पुं । वटवृक्षे । प्लक्षवृक्षे । गुग्गुलौ । वै.निघ. । कर्चूरे । रा.नि.व.६ । दमनकक्षुपे । रा.नि.व.१० । तिले । रा.नि.व.१६ । सिंहे । श.च. । स्त्री । पिप्पल्याम् । मे. । उच्चटायाम् । र.मा. । शुक्लवचायाम् । वचायाम् । रा.नि.व.६ । श्वेतपुनर्नवायाम् । सुगन्धजटामांस्याम् । वै.निघ. । जटा-मांस्याम् । रा.नि.व.१२ । वा.उ.६अ.महापैशाचघृते । च.सू.४अ. । [च. ।

जटु(ड़ु)लः । पुं । पिप्लौ । জড়ুল । अम. । हे.

जठरः । पुं, क्ली । कुक्षौ, उदरे । रा.नि.व.१८ । कर्कटे । मे. । उदररोगे । त्रि । बद्धे । मे. ।

जठरघ्नः । पुं । जलोदरे । रा.नि.व.२० ।

जठरज्वाला । स्त्री । उदरशूले । পেটজ্বালা । वै.निघ. । [छ । श.च. ।

जठरनुत् । पुं । आरग्वधवृक्षे । শোন্দাল গা-

जठरव्यथा । स्त्री । उदरशूले । উদর-বেদনা । वै.निघ. । [জল উদরী, উদরী । रा.नि.व.२० ।

जठरामयः । पुं । जलोदररोगे. उदररोगे ।

जठ(ड़)री । स्त्री । गर्भौटिकाहवे । তৃণবিশেষ । रा.नि.व.८ ।

जड़म् । क्ली । शीषके । रा.नि.व.१२ । जले । भ.टी.रा. । पुं । शरदि । वै.निघ. ।

जड़ता । स्त्री । जाड्ये । रा.नि.व.२० ।

जड़सम्भवम् । क्ली । शीतलजले । वै.निघ. ।

जड़ा । स्त्री । शूकशिम्ब्याम् । আলকুশী । प.मु. । भूम्यामलक्याम् । र.मा. ।

जतु(क)म् । क्ली । जतुके । জৌ । लाक्षायाम् । লাহা । मे. । वै.निघ.२भ.चय.चि लक्ष्मीविलासतैले । शिलाजतुनि । (कम्) हिङ्गुनि । হিং । भा. ।

जतुका । स्त्री । लाक्षायाम् । हारा. । वाल्गुके । वै.निघ. । चर्मचट्याम् । চামচিকে । श.र. । च.द.अपस्मा.चि. । जनीनामगन्धद्रव्ये । भ.टी. । पर्पटीनामगन्धद्रव्ये । भा. । मालवे प्रसिद्धलताविशेषे । रा.नि.व.३ । See जन्तुका । [निघ. ।

जतुकाजननी । स्त्री । मक्षिकाविशेषे । वै.

जतुकारी । स्त्री । जन्तुकालतायाम् । रा.नि.व.३ । अलक्तके । আলতা । वै.निघ. ।

जतुकाश्मीरम् । क्ली । कुङ्कुमे । वै.निघ. ।

जतुकाह्वा । स्त्री । लाक्षायाम् । वै.निघ. ।

जतु(न्तु)कृत् । स्त्री । जनीनामगन्धद्रव्ये । अम. । लाक्षायाम् । वै.निघ. । [कालतायाम् । भा. ।

जतुकृष्णा । स्त्री । पर्पटीनामगन्धद्रव्ये, जन्तु-

जतुनी । स्त्री । चर्म्मचटिकायाम् । त्रिका. ।

जतुपत्रिका । स्त्री । चाङ्गेर्य्याम् । क्षुद्रपाषाणभेदे । वै.निघ. ।

जतु(न्तु)मणिः । पुं । क्षुद्ररोगविशेषे । জতুক, জরুড় । लक्षणं यथा—"नीरुजं सममुत्पन्नं मण्डलं कफरक्तजम् । सहजं रक्तमीषच्च श्लक्ष्णं जतुमणिं विदुः ॥" सु.नि.१३अ. ।

जतुमुखः । पुं । रक्तमुखशालिधान्यविशेषे । लक्षणं यथा—"लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः ।" भा.पू.१भ.धान्यव. । अयं व्रीहेर्हीनगुणः । [व.६ ।

जतुरसः । पुं । अलक्तके । আল্‌তা । रा.नि.

जतुशिला । स्त्री । शिलाजतुनि । वै.निघ.२भ. क्रमि चि.विड़ङ्गादितैले ।

जतूकर्णः । पुं । तन्त्रकारभेदे । [পাখী ।

जतूका । स्त्री । अजिनपत्रायाम् । চামচিকা शब्द र. । जनीवृक्षे । अम. । वास्तूकभेदे । वै.निघ. ।

जत्रु(क)म् । क्ली । स्कन्धकक्षयोः सन्धौ । পাথুরা । रा.नि.व.१८ ।

जत्र्वस्थि । क्ली । स्कन्धकक्षासन्ध्यस्थनि । পাথুরার হাড় । ते च द्वे । च.शा.७अ. ।

जत्वश्मक(ज)म् । क्ली । शिलाजतुनि । रा.नि.व.१३ । मनःशिलायाम् । वै.निघ. ।

जनः । पुं । लोके । मनुष्ये । अम. ।

जनकम् । क्ली । पत्राङ्गचन्दने । বকমভেদ । रा.नि.व.१२ ।

जनकारी (इन्) । पुं । अलक्तके । रा.नि.व.६ ।

जनत्रा । स्त्री । छत्रे । वै.निघ. ।

जननम् । क्ली । जन्मनि, उत्पत्तौ । मे. ।

जननिः (नी) । स्त्री । मञ्जिष्ठायाम् । कटुकायाम् । अलक्तके । रा.नि.व.६ । जटामांस्याम् । रा.नि.व.१२ । जन्तुकालतायाम् । रा.नि.व.३ । जनीनामकगन्धद्रव्ये, पर्पटीनामकगन्धद्रव्ये, पपरीति उत्तरदेशे । जटा. । शब्द र. । चर्म्मचट्याम् । চামচিকা । त्रिका. । वास्तूके । मल्लिकायाम् । वै.निघ. । यूथिकायाम् । যূঁই ফুলের গাছ । श.च. ।

जनप्रियः । पुं । शोभाञ्जनवृक्षे । সজিনা গাছ । रा.नि.व.७ । गोधूमे । नागरङ्गवृक्षे । নারঙ্গা লেবু । वै.निघ. । धान्यके । ধনে । रा.नि.व.६ ।

जनप्रिया । स्त्री । कुस्तुम्बुर्य्यां । কাঁচা ধনে । हिं कोथम्बीर । रा.नि.व.२२ ।

जनरञ्जकः । पुं । वनवास्तूके । वै.निघ. ।

जनरञ्जनी । स्त्री । जन्तुकालतायाम् । जनीनामसुगन्धद्रव्ये । वै.निघ. ।

जनवल्लभः । पुं । श्वेतरोहितकवृक्षे । শ্বেত রোড়া । रा.नि.व.८ ।

जनाश्रनः । पुं । ईहामृगे, वृके । रा.नि.व.१९ ।

जनिः (नी) । स्त्री । वास्तूके । বেতো । वै.निघ. । उत्पत्तौ । अम. । स्वनामख्यातगन्धद्रव्ये । अ.टी.रा. । जन्तुकायाम् । कटुकायाम् । कटुकी । रा.नि.व.६ । (नी) सातलायाम् । वै.निघ. ।

जनिनीलिका । स्त्री । महानील्याम् । বড় নীল । रा.नि.व.४ ।

जनिष्ठा (नेष्टा) । स्त्री । हरिद्रायाम् । रा.नि.व.६ । जातीपुष्पवृक्षे । रा.नि.व.१० । जटायाम् । रा.नि.व.५ । जन्तुकालतायाम् । रा.नि.व.३ ।

जनेष्टः । पुं । गन्धराजपुष्पवृक्षे । গন্ধরাজ ফুলের গাছ । रा.नि.व.१० ।

जनोत्तमः । पुं । शाकवृक्षे । শেগুন । प.मु. ।

जन्तवम् । क्ली । विड़ङ्गे । वै.निघ.२भ.अर्शः-चि. ।

जन्तुः । पुं । वाह्याभ्यन्तरक्रिमौ । वा.टी.हेमा. । प्राणिमात्रे । अम. । [याम् । वै.निघ. ।

जन्तुकः । पुं । हिङ्गौ । ज.द.१२अ. । जन्तुका-

जन्तुकम्बुः (कः) । पुं । क्रमिशङ्खे । रा.नि.व.१९ ।

जन्तुका । स्त्री । लाक्षायाम् । रा.नि.व.६ । मालवदेशप्रसिद्धस्वनामख्यातलतायाम् । हिं पापड़ी । गुणाः—शिशिरा तिक्ता रक्तपित्तकफघ्नी दाहतृष्णावमिहरा रुचिकृत् दीपनी च । रा.नि.व.३ । नाड़ीहिङ्गौ । पत्रदात्र्याम् । भ्रमर्य्याम् । त्वचि । रा.नि.व.२३ ।

जन्तुकारी । स्त्री । जन्तुकालतायाम् । रा.नि.व.३ । नाड़ीहिङ्गौ । अलक्तके । रा.नि.व.६ ।

जन्तुघ्नम् । क्ली । हिङ्गुनि । विड़ङ्गे । प.मु. । पुं । वीजपूरवृक्षे । টাবা গাছ । रा.नि.व.११ । (घ्नो: स्त्री । विड़ङ्गायाम् । रा.नि.व.६ । जन्तुकालतायाम् । वै.निघ. । [रा.नि.व.११ ।

जन्तुजित् । पुं । जम्बीरवृक्षे । জামীর গাছ ।

जन्तुतन्तुः । पुं । यववीजे । वै.निघ. ।

जन्तुनाशनम् । क्ली । हिङ्गुनि । হিং । रा.नि.व.६ । विड़ङ्गे । पारसीकयमान्याम् । वै.निघ.।

जन्तुपादपः । पुं । कोषाम्रवृक्षे । জলপাই । रा.नि.व.११ ।

जन्तुफलः । पुं । उदुम्बरवृक्षे । যজ্ঞডুমুর । रा.नि.व.११ । क्ली । उदम्बरफले । चि.क्र.क. चर्द्दावभेद चि. । [वै.निघ. ।

जन्तुमत्फलः । पुं। उदुम्बरवृक्षे । যজ্ঞডুমুর ।

जन्तुमाता । स्त्री । लाक्षायाम् । वै.निघ. । रक्तजक्रमिभेदे । च.वि.७अ. ।

जन्तुमारी । स्त्री । निम्बुकवृक्षे । গোঁড়ালেবু গাছ । रा.नि.व.११ । [व.६ ।

जन्तुरसः । पुं । अलक्तके । আল্তা । रा.नि.

जन्तुला । स्त्री । जन्तुकालतायां । জনীলতা । वै.निघ. । काशतृणे । त्रिका. ।

जन्तुवृक्षः । पुं । कोषाम्रवृक्षे । জলপাই । उदुम्बरवृक्षे । वै.निघ. ।

जन्तुशत्रुः । पुं । विड़ङ्गे । चि.क्र.क.केशरञ्जने।

जन्तुहनन(रण)म् । क्ली। विड़ङ्गे । वै.निघ.।

जन्तुहन्त्री । स्त्री । विड़ङ्गायाम् । रा.नि.व.६।

जन्मबलप्रवृत्तः । पुं । असौ रोगविशेषो यो मातुरुपचारात्पङ्गुजात्यन्धबधिरमूकमिन्मिणवामनप्रभृतयो जायन्ते । स पुनर्द्विविधो रसकृतो दौहृदापचारकृतश्चेति । सु.सू.२४अ. । एष आध्यात्मिकः ।

जन्मवर्त्म । क्ली । भगे । त्रिका. ।

जपा (ख्या) । स्त्री । ओड्रपुष्पवृक्षे । জবা ফুলের গাছ । सा द्विधा श्वेतरक्तभेदेन । गुणाः —कटूष्णा इन्द्रलुप्तघ्नी क्रमिच्छर्दिकरी च । रा.नि.व.१० ।

जपाकुसुमसन्निभम् । क्ली । हिङ्गुले । वै.निघ. ।

जपापुष्प(प्रसून)म् । क्ली । जवायाम् । জবা ফুল । तच्च अगर्भसम्पादनगुणं । चि.क्र.क.गर्भ-चि.।

जपारक्तम् । क्ली । जवापुष्पे । पुं । जपावृक्षे ।

जमनम् । क्ली । भोजने । अ.टी.भ. ।

जम्बः । पुं । जम्बीरवृक्षे । জামীর গাছ । र. सा.सं ।

जम्बा । स्त्री । जम्बूफले । জাম । अम. ।

जम्बालः । पुं। केतकवृक्षे । श.र.। शैवाले । पङ्के । त्रिका.। हारा. । क्ली । सुगन्धतृणे । वै.निघ.।

जम्बि(म्बी,म्भी)रः (कः) । पुं । (Citrus medica. Citrus acida.) स्वनामख्यातफलवृक्षे । গোঁড়ালেবু গাছ, জামীর । हिं जम्बीरी, निम्बू । मं इड़ । कं कंचिलि । तैं निम्मचेट्टु । मद.व.६ । स द्विविधः जम्बीरस्वल्पजम्बीरभेदेन । गुणाः—"जम्बीरः पाचनस्तीक्ष्णः क्रमिवातकफापहः । सुरभिर्दीपनो रुच्यः मुखवैशद्यकारकः । कफानिलविषश्वासकासदौर्गन्ध्यनाशनः । पित्तकृत् पार्श्वशूलघ्नः सुरसः समुदाहृतः ॥" सु.सू.४६अ. । "स्वल्पजम्बीरिका तद्वत् तृष्णाच्छर्द्दिनिवारणी।" भा.। तत्फलमम्लमधुरं वातघ्नं पित्तकृत् पथ्यं पाचनं रोचनं बल्यमाग्नेयं । पक्वं तत् मधुरं कफदमनं पित्तरक्तदोषघ्नं वर्ण्यं वीर्यवर्द्धनं रुचिकृत् पुष्टिकृत् तर्पनञ्च । रा.नि.व.११ । अत्यम्लं गुरु सुगन्धि दुर्ज्जरञ्च । राज. । मरुवकवृक्षे । গন্ধ তুলসী, নাগদনা । अर्ज्जकवृक्षे । ক্ষুদ্র তুলসী । सितार्ज्जके । শ্বেতপত্র ক্ষুদ্র তুলসী । रा.नि.व.१० । च.द.बाल.चि. ।

जम्बुः । पुं, स्त्री । जम्बूवृक्षे । জাম গাছ । क्षुद्रजम्बूवृक्षे । বন জাম গাছ । र.सा.सं. । नागदमन्याम् । 'गोलापजाम' इति ख्याते वृक्षे । वै.निघ. । क्ली । जम्बूफले । জাম । अम. ।

जम्बुकः । पुं। 'गोलापजाम' इति ख्याते वृक्षे । श.र. । केतकवृक्षे । प.मु. । शृगाले । रा.नि.व.१९ । श्योणाकभेदे । रा.नि.व.९ । [तन्त्रे ।

जम्बुड़िका । स्त्री । स्विन्नमाषे । रावणकुमार-

जम्बु(म्बू)लः । पुं। केतकवृक्षे । কেয়া গাছ ।

र.मा. । जम्बूवृक्षे । জামরুল । मे. । कर्णपाली-गतरोगविशेषे । सु.सू.१६अ. ।

जम्बुवनजम् । क्ली । श्वेतजवापुष्पे ।

जम्बूः । पुं, स्त्री । (Ugenia jambolana. Syn. Syzigium jambolanum.) स्वनामख्यातमहातरौ । জাম গাছ । हिं जामू । मं जाम्बुल । कं नेरिलुसा । तैं नेरड़चेट्टु । राजजम्बूकाकजम्बूभूमिजम्बूभेदेन त्रिधा । आसां विशेषास्तत्पर्य्याये द्रष्टव्याः । सा. गुणाः—कषायमधुरा श्रमपित्तदाहकण्ठशोषघ्नी क्रमिघ्नी श्वासातिसारकफकासघ्नी विष्टम्भिनी पाचनी च । रा.नि.व. ११ । तत्फलगुणाः—"अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित् ।" सु.सू.४६अ. । गुरु स्वादु शीतलम् अग्निदुष्टिकरं रुचं वातलञ्च । राज. । "जम्बूर्ग्राही मधुरकफहा रोचनी वातहारी ।" अत्रि.१७अ. । च.द.ज्वरातीसा.चि.कलिङ्गाद्य-गु. जम्बुस्थिशब्दे । पृथुशिम्बश्योणाकवृक्षे । বড়শোণা গাছ । रा.नि.व.१०। नागदमन्याम् । रा.नि.व.५।

जम्बूकः । पुं । शृगाले । ब्राह्म्यां । ब्रह्मी शाक । मत्स्याक्ष्यां । वाराहीकन्दे । रा.नि.व.२२ । पीतलोध्रे । वै.निघ. । (का) स्त्री । कपिलद्राक्षायां । रा.नि.व.११ ।

जम्बूद्वयम् । क्ली । महाजम्बूः राजजम्बूरिति द्वे । अरुणस्तु एका जम्बूर्ह्रस्वफला अन्या ह्रस्वफला काकजम्बूश्च । "जम्बूद्वयार्ज्जुनकपीतनसोमवल्काः ।" वा.सू.१५अ. । सु.सू.३८अ.न्यग्रोधादिः ।

जम्भः (कः) । पुं । जम्बीरवृक्षे । জামীর গাছ । रा.नि.व.११ । श.च. । वै.निघ.कास-चि. लोकनाथपोटलीरसे । शक्रसरवके । हनुदेशे । हे. च. । दन्ते । त्रिका. । मे. । क्ली । अन्ने । पुं (कः) पीतलोध्रे । वै.निघ. । [रा.नि.व.२० ।

जम्भका । स्त्री । जृम्भायाम् । হাই তোলা ।

जम्भनः (लः) । पुं । अर्कवृक्षे । আকন্দ গাছ । रा.नि.व.१० । मरुवकवृक्षे । তুলসীভেদ । वै. निघ. । (लः) जम्बीरवृक्षविशेषे । प.मु. । त्रिका. । मद. । रा.नि.व.११ ।

जम्भला । स्त्री । सुखप्रसवकारकराक्षसीविशेषे । यथा—"समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ।" राजमार्त्तण्डः । तूलके । তূলা । वै.निघ. ।

जम्भा । स्त्री । जृम्भायाम् । হাই তোলা । कश्चित् । रा.नि.व.११ ।

जम्भी (इन्) । पुं । जम्बीरवृक्षे । श.च. ।

जयः । पुं । अग्निमन्थक्षुपे । গণিরি । भा. । पीतमुद्गे । সোণা মুগ । वै.निघ. ।

जयकारिका । स्त्री । लज्जालुकायाम् । लज्जावती লতা । वै.निघ. ।

जयतरुः । पुं । नन्दीवृक्षे । वै.निघ. ।

जयदेवः । पुं । रसामृतसंग्रहकारे ।

जयद्रुमः । पुं । वन्दायां । মন্দড়া । वै.निघ.।

जयनालः । पुं। यावनाले । জনার। वै.निघ.।

जयन्तिका । स्त्री । हरिद्रायां । रा.नि.व.६।

जयन्ती । स्त्री । (Eachynomene sesban or Sesbania aculeatia.) स्वनामख्याततिक्तशाकौषधिक्षुपे । জন্তির গাছ, ধন্চে গাছ । मं कं सौरेरि, तौगरसे । गुणाः—गलगण्डानिलभूतघ्नी तिक्ता कटुः उष्णा च । रा.नि.व. ४। तत्पत्रं गरदोषघ्नं चक्षुष्यं मधुरं हिमञ्च । राज. ३प. । See बलमोटा । (कन्दर्पसारतैले, महाभवघ्न्याम्) । सा.कौ.। कपिकच्छ्वां । আলাকুশী । रा.नि.व.३ । हरिद्रायाम् । जयायाम् । विजयायाम् । रा.नि.व.२३ । अग्निमन्थे । আগগন্ত । भा. । श्वेतरक्तकाञ्चनद्वये । वचायां । मञ्जिष्ठायां । काञ्जिके । हरीतक्यां । श्वेतनिर्गुण्ड्याम् । श्वेतजयन्तीमूलस्य शिरसि धारणात् सर्व्वज्वरनाशो भवति । च.द.ज्वर.चि. । "मूलं जयन्त्याः शिरसि धृतं सर्व्वज्वरापहम् ।"

जयपालः । पुं । स्वनामख्यातवृक्षे । জয়পাল বৃক্ষ । जैपाल, जमालगोटा इति च भाषा । बीजगुणाः—तीक्ष्णमुष्णं सारकम् उत्क्लेदकरम् । कटुरुक्षः क्रमिघ्नः विरेचनः दीपनः कफवातघ्नः उदरामयघ्नश्च । रा.नि.व.६ । "जयपालबीजशस्यं तप्ते श्वयगोतयखरसे च । सत्वापितमुच्छूनं विदादनवध्यतां तदेवास्य ।" अनवध्यतां शुद्धलम्, उच्छूनं सिद्धमित्यर्थः । सा.कौ.। अपि च । "खिन्नं गोमयतोये वा दुग्धे वा जयपालकं । खर्परे मृदु भृष्टं तत् निःस्नेहं शुद्धिमृच्छति ।" अत्रि. ।

जयपालतैलं निस्तुषं द्विधाकृत्य बीजमध्यस्थपत्रञ्च परित्यज्य अष्टमांशटङ्कणचूर्णेन विमिश्र्य च कैमय्येण दुग्धसंभृतं त्रिवारं भाव्यम्। तत्तैलं सार्षपादितैलवत् तैलपीड़नयन्त्रे निष्कास्यम्। गुणाः—अथुग्रेवकम् आनाहोदरघ्नं धनुस्तम्भसंन्यासशिरोरोगघ्नं ज्वरघ्नमुन्मादहरमामवातशोथमेकाङ्गरोगञ्च मर्दनात् हन्ति कासञ्च हरति। अचि.। एरण्डवृक्षे।

जयमङ्गलरसः। पुं। विषमज्वरघ्ने औषधविशेषे। पाठः—हिङ्गुलसम्भवं सूतं गन्धकं टङ्कणं तथा। ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचं तथा। एतत्समांशमाहृत्य द्विगुणं स्वर्णभस्मकं। तदर्द्धं कान्तलौहञ्च रूप्यभस्म च तत्समं। एतत्सर्व्वं विचूर्ण्याथ भावयेत्कनकद्रवैः। शेफालिकादलैर्वापि दशमूलरसेन च। किराततिक्तकैः क्वाथैस्त्रिवारं भावयेत् सुधीः। भावयित्वा ततः पश्चात् गुञ्जाद्वयवटीकृता। अनु.मधु जीरकचूर्णञ्च। सा.कौ.। अन्यः—हिङ्गुलोत्थपारदः गन्धकः टङ्कणक्षारः ताम्रं वङ्गं स्वर्णमाक्षिकं सैन्धवलवणं मरिचचूर्णं प्र. समं, स्वर्णभस्म एतत्सर्व्वद्विगुणं, स्वर्णभस्मार्द्धं कान्तलौहं, तदर्द्धं रौप्यञ्च। एकत्र धुस्तूरपत्ररसेन शेफालिकापत्ररसेन दशमूलक्वाथेन किराततिक्तकादिगणक्वाथेन च प्र. वारत्रयं भावयेत्। दशमूलं भाव्यद्रव्यपारदादिसमं वारि अष्टगुणम् अष्टमांशशिष्टं ग्राह्यम्। एवं किराततिक्तकादेरपि। अपरः—रससिन्दूरं अभ्रं रौप्यं मुण्डलौहं तीक्ष्णलौहं हरितालं स्वर्णमाक्षिकं चित्रकमूलं टङ्कणक्षारं त्रिकटुकं प्र. समभागं। पाठानिर्गुण्डीयष्टिमधुविल्वमूलकषायेण दिनं मर्दयित्वा मूषया भूधरे पुटे पचेत्। अनु. दशमूलक्वाथः। अस्याञ्जनं नस्यनपि हितम्। र.चि.रस.कौ.।

जया। स्त्री। विजयायाम्। सिद्धि। भा.नासारोगचि. जवापुष्पवृक्षे। ब्राह्म्यां। महादन्तीवृक्षे। कपिकच्छ्वाम्। वै.निघ.। अग्निमन्थवृक्षे। रा.नि.व.६। भा.कर्णकज्व.चि.। वा.उ.६अ.। शमीवृक्षे। रा.नि.व.८। नीलदूर्व्वायाम्। जयन्तीवृक्षे। रा.नि.व.४। भैष.कुष्ठ.चि.कन्दर्पसारतैले। च.द.यक्ष्म.चि.रसेन्द्रगुड़ी। हरीतक्याम्। रा.नि.व.११। वै.निघ.संग्रहणी.चि.तालीशचूर्णे। अपराजितायाम्। मद.व.१। शाल्मलीवृक्षे। वै.निघ.२भ.यक्ष्म.चि.कनकसिन्दूरे।

जयाञ्जन(मल)म्। क्ली। स्रोतोऽञ्जनविशेषे। जहरपाथर इति पश्चिमदेशे। "स्रोतोऽञ्जनं नदीजञ्च कृष्णस्रोतो जयाञ्जनम्।" प.मु.।

जयाद्वयम्। क्लीं। तकारी हरीतकी चेति द्वये। वा.सू.१५अ.।

जयापुष्पम्। क्ली। जपापुष्पे। वै.निघ.।

जयावटी। स्त्री ज्वराधिकारे। "विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपत्रकं। विड़ङ्गमष्टमं चूर्णं छागमूत्रैः समं समम्। चणकाभा वटी कार्य्या स्याज्जया योगवाहिका॥" अत्र जयन्तीमूलचूर्णं तुल्यांशं देयं योगवाहिकत्वात्। र.सा.सं.।

जयावहा। स्त्री। नीलदूर्व्वायां। रा.नि.व.८। भद्रदन्तीवृक्षे। दन्ती। रा.नि.व.६।

जयाश्रया। स्त्री। गर्मूटिकातृणे। रा.नि.व.८।

जयाह्वा। स्त्री। भद्रदन्तीवृक्षे। रा.नि.व.६।

जरकम्। क्ली, पुं। हिङ्गुनि। वै.निघ.।

जरठः। त्रि। पाण्डौ। कठिने। मे.। जीर्णे। है.च.। [हिं जहर्। रा.नि.व.८।

जरड़ी। स्त्री। गर्मूटिकातृणे। घासविशेष।

जरणः। पुं, क्ली। स्थूलजीरके। बड़ जीरा। रा.नि.व.६। च.द.वातश्लेष्मज्व.चि.। कृष्णजीरके। कासमर्द्दे। कालकासन्दा। हिङ्गुनि। रा.नि.व.२३। सौवर्च्चललवणे। सचल लवण। श.र.। कुष्ठौषधौ। कुड़। र.मा.। पीतजीरके। च.द.ज्व.चि.। स्त्री। कृष्णजीरके। रा.नि.व.६।

जरणद्रुमः। पुं। अश्वकर्णनामलताशाले। लता शाल। रा.नि.व ६।

जरती। स्त्री। वृद्धायाम्। रा.नि.व.१८।

जरत्पित्तशूलम्। क्ली। परिणामशूले। "वान्तमात्रे जरत्पित्ते शूलमाशु प्रशाम्यति।" रस.र.।

जरन्तः। पुं। महिषे। त्रिका.।

जरमानः। पुं। मनुष्ये। उणा.।

जरा। स्त्री। वार्द्धक्ये। अम.।

जराक्लैव्यम्। क्ली। जराजन्यक्लैव्यरोगविशेषे।

तस्य निदानलक्षणं यथा—"अथ प्रवयसां शुक्रं प्रायशः क्षीयते नृणां। रसादीनां क्षयाच्चैव तथैवा-न्नस्य सेवनात्। बलवीर्य्येन्द्रियाणाञ्च क्रमेणैव परि-क्षयात्। परिक्षयादायुषश्चाप्यनाहाराच्छ्रमात्क्लमा-त्। जरासम्भवजं क्लैव्यमित्येतैर्हेतुभिर्नृणाम्। जा-यते तेन सोऽत्यर्थं क्षीणधातुः सुदुर्ब्बलः। विवर्णो विह्वलो दीनः क्षिप्रं व्याधिमथाश्नुते॥" च.।

जरायुः। पुं। अग्निजारवृक्षे। रा.नि.व.६। गर्भाशये। গর্ভথলি বা আঁওল। रा.नि.व.१८। स चर्म्माकारः सूक्ष्मश्च। तस्य स्थानञ्च गुदमूत्राशय-मध्यभागः। यथा—"गुदमूत्राशयान्तःस्थो जरायु-र्गर्भमन्दिरं। जरायुपार्श्वे नाड्यौ द्वे डिम्बनाड्यौ प्रकीर्त्तिते॥" अचि.। "या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते।" तन्त्रान्तरम्।

जरायुजः। त्रि। जरायुजाते प्राणिमात्रे, पशुमनुष्यव्यालादौ। अम.। "शुक्रशोणितयोर्योगस्त-स्मिन् सञ्जायते यतः। तत्र गर्भो भवेद्यस्मात्तेन प्रो-क्तो जरायुजः॥" तन्त्रान्तरम्।

जरायुदोषः। पुं। गर्भजरोगभेदे। वै.निघ.।

जरालक्ष्म। क्ली। पलिते। रा.नि.व.१८।

जराशोषः। पुं। वार्द्धक्यजन्यक्षीणतारोगे। लक्षणं—"जराशोषी कृशो मन्दवीर्य्यबुद्धिबलेन्द्रि-यः। कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः। ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीड़ितः। सम्प्र-स्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः॥" मा.नि.।

जरूथम्। क्ली। मांसे। त्रिका.।

जर्ज्जरः। पुं। रक्तरसोने। मद.व.७। क्ली। शैवाले। शैलजे। मे। त्रि। वृद्धे। रा.नि.व.१८।

जर्ज्जरीकः। त्रि। बहुच्छिद्रद्रव्ये। ঝাঁঝরী। मे.।

जर्णः। त्रि। जीर्णे। हे.च.।

जर्त्तः (र्त्तुः)। पुं। करिणि। योनौ। उणा.।

जर्त्ति(र्ह्नि)लः। पुं। आरण्यतिलके। বুনো তিল। हे.च.। रा.नि.व.२३।

जलम्। क्ली। वालके। বালা। च.सू.३अ.। भा.बालज्व.चि.। वा.सू.१५अ.एलादौ। जलवेत-से। उदके। জল। जलस्य षड्दोषा भवन्ति—स्पर्श-रूप-रस-गन्ध-वीर्य्य-विपाकाख्याः। तत्र स्पर्श-दोषे खरता पैच्छिल्यमुष्णता, रूपदोषे पङ्कसिकता-शैवालबहुवर्णता च, रसदोषे व्यक्तरसता, गन्धदोषे अनिष्टगन्धता, वीर्य्यदोषे तृष्णादिकं सेवनात्, विपाकदोषे च विष्टम्भादिकं जनयति। जलस्य कलुषताप्रसाधनं सप्त—कतक-गोमेद बिसग्रन्थि-शैवालमूल-वस्त्र-मुक्ता-मणय इति। जलस्य निक्षे-पणं पञ्च। फलादिशीतीकरणञ्च सप्त प्रवातस्थाप-नादि। सु.सू.४५अ.। सा. गुणाः—मधुरं शीतलं तृष्णाघ्नं शोषमोहभ्रान्तिघ्नं भुक्तान्नपाचकं निद्रा-लस्यहरं विषघ्नं श्रमहरं रुचिजनकं धीबलवीर्य्य-तुष्टिपुष्टिकरणञ्च। "साधारणं जलं रुच्यं दीपनं पाचनं लघु। श्रमतृष्णापहं वातकफमेदघ्नपुष्टि-दम्॥ पात्रदेशादिभेदेन जलगुणाः यथा—"जातं ताम्रमृदस्तदेव सलिलं वातादिदोषप्रदं देशा-ज्जाड्यकरञ्च दुर्जरतरं दोषावहं धूसरम्। वातघ्न-न्तु शिलाशिरोत्थममलं पथ्यं लघु स्वादु च श्रेष्ठं श्याममृदस्त्रिदोषशमनं सर्व्वामयघ्नं पयः।" रा. नि.व.१४। "तत्रादौ द्विविधमान्तरीक्षभौमभेदेन। तयोरान्तरिक्षं जलमनिर्द्देश्यरसम् एकान्ततः पथ्य-तमञ्च। तदेवावनिपतितमन्यतमं रसमुपलभते स्थानविशेषान्नद्यादिष्ववस्थितमिति। तत्र स पृथि-व्यादीनामन्योन्यानुप्रवेशकृतः सलिलरसः भवत्युत्क-र्षापकर्षेण, तत्र स्वगुणभूयिष्ठायां भूमौ लवणम-म्लञ्च भवति, अम्बुगुणभूयिष्ठायां मधुरं, तेजोगुण-भूयिष्ठायां कटुकं तिक्तञ्च, वायुगुणभूयिष्ठायां क-षायं, आकाशगुणभूयिष्ठायामव्यक्तरसञ्चेति।" सु. सू.४५अ.। अन्तरीक्षोद्भवं जलं पुनः धारं कारकं तौषारं हैममिति चतुर्धा। तत्र धारमष्टविधम्—"धारं पृथिव्यां पतितं पयस्तु तत्रैव जातं गुणभे-दभिन्नं। नानाविधैर्भेदगुणैश्च सम्यक् जातं जल-ञ्चाष्टविधं वदन्ति। नद्यौद्भिदं प्रास्रवणञ्च चौण्ड्यं कौपं तड़ागं सरसीभवञ्च वाप्युद्भवं तत्प्रवदन्ति धी-राः।" नदीजलम् औद्भिदादिकञ्च पर्य्याये द्रष्टव्यम्। तत्र कारं जलं यथा—"स्वर्णद्याः शीतवातेन मे-घविस्फूर्ज्जसङ्कुलम्। शीताम्बु कठिनं भूत्वा शिलं जातं हिमेन तु। पश्चात् सुसूर्य्यसन्तापात्किञ्चिद्वै द्रवते जलम्। वमन्ति मेघाः सलिलं शकलं शीत-लं मतम्॥ गुणाः—कारं शीतगुणैः अमोपशमनं शोषार्त्तिनिर्नाशनम् मूर्च्छामोहशिरोऽर्त्तिनाशनकरं हिक्कावमीवारणं। शीफानां व्रणिनान्तु दोषशमनं पित्तात्मिकानां हितं संस्त्रु प्रवरं गुणैः प्रतिदिनं

तस्मात् दूरे क्षतम् ॥" इति। "तीयारं लघु शीतलं श्रमहरं पित्तार्त्तिशान्तिप्रदं दोषाणां शमनं जलातिहननं सर्व्वामयघ्नं परं। कुष्ठश्लीपदवर्म्मिकाविषहरं पामाविसर्पापहं चीणानां क्षतशोषिणां हितकरं संसेव्यते मानवैः॥" हैमजलगुणाः—"हैमं घनञ्च मधुरञ्च कफात्मकञ्च मूर्च्छार्त्तिसंभ्रमनमामविनाशनञ्च। पित्तास्रजः प्रशमनं रुधिरञ्च तञ्च शान्तङ्करोति हिमसम्भववारि सद्यः॥" भूमिविशेषे जलगुणाः—"भूमिः पञ्चविधा ज्ञेया क्षणा रक्ता तथा सिता। पीता नीला भवेच्चान्या गुणास्तासां प्रकीर्त्तिताः। सघनं मधुरं नीरं कृष्णभूमिपरिश्रुतं। पीताश्रितकषायञ्च रक्तायाः चारमाधुरम्। सितायामम्लमधुरं भूमिभागेन लचयेत्॥" गुणाः—"ताड़ागं वातलं स्वादु कषायं कटुपाकि च। कौष्ट्याद्याग्निकरं रुचं मधुरं कफकारकं। नैर्झरं लघुपाकञ्च दीपनं कफनाशनं। सारसं लघु तृष्णाघ्नं बल्यं स्वादु कषायवत्। पाल्वलं गुर्व्वभिष्यन्दि विष्टम्भि दोषलं परं॥" इति। अथ स्वच्छजलगुणाः—लघु हृद्यं गुणवच्च। अथाविलजलगुणाः—पिच्छिलं क्रमिलं विवर्णं क्लिन्नं सान्द्रं विरसं दुर्गन्धं अहितञ्च। अथ शरदादिजलगुणाः—शारदं लघु अनभिष्यन्दि च। हैमन्तं स्निग्धं वृष्यं बल्यं गुरु हितञ्च। शैशिरं वातकफघ्नं हैमन्तादौ पथ्यञ्च च। वासन्तं मधुरं कषायं बल्यं रुचञ्च। ग्रैष्मञ्च अनभिष्यन्दीति। सुगन्धजलगुणाः—तृष्णाघ्नं सुशीतलम् अव्यक्तरसञ्च। शीतलजलगुणाः—मदघ्नं मूर्च्छाहरं छर्द्दिनाशनं पित्तज्वरश्रमक्लमतृष्णादाहमदात्ययविषघ्नञ्च। शृतशीतजलगुणाः—त्रिदोषघ्नम्। सुवासितमृत्पात्रस्थितजलं रुचिकरं अजीर्णे औषधतुल्यं जीर्णे बलदं भोजनकाले आयुष्यम्। रात्रौ च भुक्तान्नोपरि अहितम्। राज.। हेमन्तादौ जलपानविधिः—हेमन्ते ताड़ागं सारसं वा हितं। इदमेव शिशिरे प्रशस्तम्। ग्रीष्मवसन्तयोः वाप्यं वा कौपं वा नैर्झरं वा प्रशस्तम्. नादेयञ्च साकल्यतो वर्ज्यम्। औद्भिदं वान्तरीचं वा कौपं वा प्रावट्काले। शरदि नादेयम् अंशूदकञ्च हितम्, तथागस्त्योदयात् स्वच्छं जलं प्रशस्तम्। "पौषे वारि सरो जातं माघे तत्तु तड़ागजं। फाल्गुने कूपसम्भूतं चैत्रे चौण्ट्यं हितं मतम्। वैशाखे नैर्झरं नीरं ज्यैष्ठे शस्तं तथौद्भिदं। आषाढ़े शस्यते कौपं श्रावणे दिव्यमेव च। भाद्रे कौपं पयः शस्तमाश्विने चौण्ट्यमेव च। कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते॥" वारिग्रहणकालः—भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते। शीतलं निर्म्मलत्वञ्च यतस्तेषां महान् गुणः॥ वृहत्सुश्रुतः। पुनश्च जलं चतुर्व्विधम्। पापोदकं रोगोदकम् अंशूदकम् आरोग्योदकञ्च। पापोदकं यथा—"विष्ठायुक्तं याहि नीरं क्रमिकीटसमाकुलम्। समलं नीलशैवालं पापन्तु नहितञ्च यत्। स्नाने पाने च तच्छस्तं नराणां वाहवेषु च। स्नानेन लभवान् रोगान् कण्डूकुष्ठविसर्पकृत्। पानेन कफगुल्मानां क्रमीणां वरसम्भवान्। करोति विविधान् रोगान् तस्मात्तत्परिवर्ज्जयेत्॥" रोगोदकं—"बहुवृचलताकुञ्जे छायाकूपोऽथवा सरः। अव्ययश्चेदधोऽप्येवं क्रमिशैवालसंयुतम्। क्लिन्नं सपिच्छिलकृष्णं वृचमूलाश्रितं भवेत्। बहुवृचपर्णयुतं दुर्गन्धं मूत्रगन्धवत्। रोगोदकं विजानीयात्करोति विषमान् गदान्। शूलकुष्ठञ्च कण्डूञ्च सेवितेन करोति हि॥" अंशूदकं पर्य्याये द्रष्टव्यम्। आरोग्योदकं—"पादशेषन्तु क्वथितं तच्चारोग्यजलं विदुः। कासश्वासहरं पथ्यं मारुतञ्चापकर्षति। सद्योज्वरं हरत्याशु सभेदकफनाशनम्। प्रतिश्यायं पाचयति शूलगुल्मार्शनाशनम्। दीपनञ्च हुताशस्य पाण्डुशोफोदरापहम्। अजीर्णञ्च जरत्याशु पीतमुष्णोदकं निशि॥" अत्रि.७अ.। गवीगर्भाशये। वै.निघ.।

जलकण्टकः । पुं। शृङ्गाटके। पाणिफल। प.मु.। कुम्भीरे। हारा.।

जलकदली । स्त्री। स्वनामख्यातजलजकन्दविशेषे। जलकदली। प.मु.।

जलकन्दः । पुं। शृङ्गाटके। पाणिफल। वै.निघ.। (न्दा) स्त्री। जलकदल्याम्। प.मु.।

जलकपिः । पुं। शिशुमारे। শুশুক। हारा.।

जलकपोतः (कः) । पुं। जलपचिविशेषे। जलपिपि। वै.निघ.।

जलकरङ्कः । पुं। नारिकेलफले। पद्मे। शङ्खे। विका.। हारा.। जललतायाम्। मे.।

जलकर्णा । स्त्री। कर्णमोटायां। काणछिड़ा, कान्दड़िया। च.द.यक्ष्म.चि.रसेन्द्रगुड़ी।

जलकल्कः । पुं। जम्बाले। শেওলা, शाँजि। हारा.।

जलकाकः । पुं । जलपक्षिविशेषे । পানকৌড়ী । तन्मांसगुणाः—स्निग्धं गुरु हिमं वातहरम् । रा.नि.व.१७ । [हारा. ।

जलकाङ्कः (ङ्किः) । पुं, स्त्री । हस्तिनि ।

जलकामः । पुं । जलवेतसे । ज.द.१२अ. ।

जलकामा । स्त्री । अम्बाहल्याम् । वै.निघ ।

जलकामुकः । पुं, स्त्री (का, की) । कुटुम्बिनीनामक्षुपे । रा.नि.व.५ ।

जलकिराटः । पुं । नक्रे । शिशुमारे । हारा. ।

जलकुक्कुटः । पुं । डहुके । ডাক পাখী । कारण्डवे । वै.निघ. । [थी । हे.च. ।

जलकुक्कुभः । पुं । जलकुक्कुटे । কোড়া পা

जलकुक्कुटी । स्त्री । गङ्गाचिल्लीपक्षिणि । গাংচীল । हारा. ।

जलकुण्डलः । पुं । शैवाले । भूरिप्र. ।

जलकुम्भका । स्त्री । शृङ्गाटके । পাণিফল । कुम्भीरे । वै.निघ. ।

जलकूपी । स्त्री । पुष्करिण्यां । हारा. ।

जलकूर्मः । पुं । शिशुमारे শুশুক । त्रिका. ।

जलकेशः । पुं । शैवाले । हारा. । [हारा. ।

जलगुल्मः । पुं । क्षुद्रसरोवरे । मे. । कच्छपे ।

जलगोजकम् । क्ली । पिस्ता इति ख्याते काबेलदेशजफले । वै.निघ. ।

जलङ्गः । पुं । महाकाले । रा.नि.व. ।

जलचरः (चारी (इन्)) । पुं । शङ्खे । मत्स्ये । श.च. । पुं, स्त्री । जलचरप्राणिमात्रे हंससारसकादम्बवकक्रौञ्चादौ । प.मु. । "कुररवकमकराः कङ्कचटकपिकभङ्गसारसाः । आड़िदात्यूहहंसा जलकरटिकपिङ्गटिट्टिभाद्याश्च । जले चराविहङ्गास्ते ॥" अत्रि.२०अ. । मांसगुणाः—गुरुर्णं स्निग्धं मधुरं वातघ्नं शुक्रलञ्च । रा.नि.व.१७ ।

जलजः । त्रि । जलवासिजन्तुमात्रे । पुं । हिज्जलवृक्षे । रा.नि.व.८ । मत्स्ये । श.च. । शैवाले । जलवेतसे । कुचेलके । काकतिन्दुके । जलमधूके । रा.नि.व.२३ । क्ली । मौक्तिके । चारे । लवणे । लवङ्गे । दैवधान्ये । वै.निघ. । पद्मे । शङ्खे । नवरत्नराजमृगाङ्के । वै.निघ.२भ.चय.चि. ।

जलजन्तुः । पुं । जलवासिप्राणिमात्रे । अम. ।

जलजन्तुका । स्त्री । जलौकायां । भ. ।

जलजन्म । क्ली । पद्मे । हे.च. ।

जलजम्बूका । स्त्री । भूमिजम्बूवृक्षे । বনজাম । भा. । See क्षुद्रजम्बूः ।

जलजसुमना: । स्त्री । शङ्खपुष्प्यां । वै.निघ. ।

जलजा । स्त्री । वल्लीयष्टिमधुनि । रा.नि.व.६ । सोमराज्याम् । वै.निघ. ।

जलजातः । पुं । जलवेतसे । वै.निघ. ।

जलजाता । स्त्री । कुङ्कुमशालौ । শালিধান্য-বিশেষ । रा.नि.व.१६ ।

जलजिह्वः । पुं । शिशुमारे । कुम्भीरे । हारा. ।

जलजीविनी । स्त्री । जलौकायां । জোঁক । वै.निघ. । [শামুক । हारा. ।

जलडिम्बः । पुं । शुक्तौ । ঝিনুক । शम्बूके ।

जलतण्डुलीयम् । क्ली । कच्चटे । কাঁচড়াদাম । भा. ।

जलतापिकः (तापी) । पुं । मत्स्यविशेषे । ইলিশ মাছ । काचकमत्स्य । श.र. ।

जलतालः । पुं । इल्लीशमत्स्य । त्रिका. ।

जलतिक्त(क्ति)का । स्त्री । शल्लकीवृक्षे । रा.नि.व.११ ।

जलत्रा । स्त्री छत्रे । ছাতা । हारा. ।

जलदः । पुं । मुस्तके । च.द.वा.व्या.चि.एलादितैले । पीतबालके । পীত বালা । कारस्करवृक्षे কুচিলা গাছ । भा. ।

जलदागमः । पुं । वर्षाकाले । रा.नि.व.२१ ।

जलदाशनः । पुं । शाके । शालवृक्षे । श.च. ।

जलधरः । पुं । मुस्तायां । अम. । च.द.अतिसा.चि.कच्चटादिः । तिनिशवृक्षे । रा.नि.व.८ ।

जलधराधारः । पुं । पीतोशीरे । वै.निघ. ।

जलनकुलः । पुं । जलमार्जारे । উদ্বিড়াল । त्रिका. ।

जलनीलिका (ली) । स्त्री । शैवाले । रा.नि.व.८ । भा.४भ.नाड़ीव्रणे ।

जलनेत्रः । पुं । जलमधूके । वै.निघ. ।

जलपत्रिका । स्त्री । पद्मिन्याम् । পদ্মের ঝাড় । वै.निघ. ।

जलपक्षी । पुं । हंसादिजलचरपक्षिषु । तन्मांसं स्निग्धं हिमं गुरु वृष्यं वातहरञ्च । रा.नि.व.१७ ।

जलपाकः । पुं । वारिपाके । সিদ্ধ জল । "कर्षं गृहीत्वा द्रव्यस्य क्वाथयेत्प्रास्थिकेऽम्भसि । अर्द्धं शृतं प्रयोक्तव्यं जलपाके त्वयं विधिः ॥" वा. चि.२५. ।

जलपादपः । पुं । हंसे । वै.निघ. । [१६ ।

जलपारावतः । पुं । जलकपोते । रा.नि.व.

जलपिप्पली । स्त्री । महाराष्ट्रीक्षुपे । কাঁচ্ড়া ঘাস । हिं पाणिसगा, जलपिपरी । र.ानि.व.४ । गुणाः—जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः । संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा । कटुपाकरसा रुच्या कषाया वह्निवर्द्धिनी ॥" भा पू.गुणव. । कटुः तीक्ष्णा कषाया मलशुद्धिकरी व्रणकीटादिदोषरसदोषघ्नी च । रा.नि.व.४ ।

जलपुष्पम् । क्ली । जलजातपुष्पे । यथा—"षट्पथा कमलानि स्युर्जलवासी चतुष्पदा । जलनीवी च कुम्भीका जलपुष्पगणस्त्वयम् ॥" अर्क. ।

जलपृष्ठजा । स्त्री । शैवाले । श.च. ।

जलप्रदः । पुं,क्ली । पीतबालके । वै.निघ. ।

जलप्राणी । पुं । जलजन्तौ । वै.निघ. ।

जलप्रायम् । क्ली । अनूपदेशे । अम. ।

जलप्रियः । पुं । धन्याके । रा.नि.व.६ । चातकपक्षिणि । श.र. । मत्स्ये । श.च. । स्त्री । हिलमोचिकायां । হিঞ্চে । प.मु. । [हारा. ।

जलप्लवः । पुं । जलमार्ज्जारे । উদ্বিড়াল ।

जलफलम् । क्ली । शृङ्गाटके । পাণিফল । भा. ।

जलफेनः । पुं । समुद्रफेने । वै.निघ. ।

जलबन्धः (बन्धुः) । पुं । मत्स्ये । श.च. ।

जलब्राह्मी । स्त्री । ब्राह्म्याम् । সোমরাজ । वै.निघ. । हिलमोचिकायां । হিঞ্চে । त्रिका. । हारा. ।

जलभूः । पुं, स्त्री । कच्चटे । কাঁচড়া । श.च. ।

जलमण्डपिका (पी) । स्त्री । शैवाले । वै.निघ. । वारिपर्ण्याम् । পাণা । रस.कौ.ज्वालामुखरसे । [हारा. ।

जलमद्गुः । पुं । मत्स्यरङ्गपक्षिणि । মাছরাঙা ।

जलमधु(धू)कः । पुं । जलजातमधूकवृक्षे । জলমউয়া । गुणाः – मधुरः व्रणघ्नः वान्तिघ्नः बलशुक्रवर्द्धनः रसायनः शीतलश्च । रा.नि.व.११ । "मधूकपुष्पं मधुरं शीतलं गुरु बृंहणं । बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् । फलगुणाः—शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् । अहृद्यं हन्ति पिपासादाहश्वासक्षतक्षयान् ॥" भा. ।

जलमक्षिका । स्त्री । वारिमक्षिकायाम् । जलकृमौ । त्रिका. । [त्रिका. ।

जलमार्जारः । जलबिड़ाले । উদ্বিড়াল ।

जलमूर्त्तिका । स्त्री । करकायाम् । श.च. ।

जलमीनः । पुं । मत्स्यभेदे । वै.निघ. ।

जलमुस्तम् । क्ली । जलजमुस्तायाम् । वै.निघ. ।

जलमोदम् । क्ली । उशीरे । रा.नि.व.१२ ।

जलयष्टिः । पुं । वल्लीयष्टिमधुनि । वै.निघ. ।

जलरङ्कः (ङ्गः) । पुं । वकपक्षिणि । বক পাখী । हे.च. ।

जलरङ्कुः । पुं । हरिणे । वै.निघ. । दात्यूहपक्षिणि । ডাক পাখী । हारा. ।

जलरण्डः । पुं । जलसर्पभेदे । जलबिन्दौ । हे.च. । श.र. । [वणे । क्षारलवणे । हारा. ।

जलरसः । पुं । लवणे । हारा. । सौवर्चलल-

जलरुट् (हम्) । क्ली । पद्मे । हे.च. ।

जलरुहा । स्त्री । कुङ्कुमशालौ । হৈমন্তিক ধান্যবিশেষ । रा.नि.व.१६ ।

जलरूपः । पुं । मकरे । त्रिका. ।

जलवरण्टः । पुं । जलवसन्तरोगे । পানবসন্ত । हारा. । [हारा. ।

जलवल्कलः । पुं । कुम्भिकायां । পানা ।

जलवल्ली । स्त्री । शृङ्गाटके । পাণিফল । रा.नि.व.७ ।

जलवायसः । पुं । जलकाके । পানকৌড়ি । हे.च. ।

जलवासः (साः) । पुं । विष्णुकन्दे । रा.नि.व.७ । गुण्डासिनीतृणे । रा.नि.व.८ । क्ली । उशीरे । रा.नि.व.१२ । [११ ।

जलविक्रमा । स्त्री । सल्लकीवृक्षे । रा.नि.व.

जलविड़ालः । पुं । जलमार्ज्जारे । উদ্বিড়াল । हारा. । [रा.नि.व.१४ ।

जलविन्दुजा । स्त्री । यावनालीशर्करायाम् ।

जलविल्वः । पुं । कर्कटे । पद्माङ्के । जलवल्कले । পানা । हारा. । [মাছ । हारा. ।

जलवृश्चिकः । पुं । इच्चाकमत्स्ये । এঁচলা

जलवेतसः । पुं । जलजातवेतसविशेषे । জলবেত । मं वञ्जालु । कं वैसैयमरगु । प.मु.। गुणाः—तिक्तशीतलः व्रणशोधनः कफरक्तपित्तघ्नः संग्राही कषायी रक्षोघ्नश्च । रा.नि.व.९ ।

जलव्यधः । पुं । कङ्कोटमत्स्यभेदे । কাঁকিলা মাছ বা গান্দাড়া । हारा. ।

जलव्यालः । पुं । जलसर्पे । अम. ।

जलशिरीषः (षिका) । पुं, स्त्री । शिरीषभेदे । हिं टिंटिनी । "त्रिदोषविषकुष्ठार्शोहरी वारिशिरीषिका ।" भा. ।

जलशुक्तिः । स्त्री । शम्बूके । শামুক, ঝিণুক। जलसिंपी इति च ख्याते । गुणाः—"कटुः स्निग्धा दीपनी गुल्मशूलविषदोषहरी रुच्या पाचनी बल्या च ।" रा.नि.व.१३ ।

जलशुचिः । पुं । शृङ्गाटके । পাণিফল ।

जलशूकम् । क्ली । शैवाले । हे.च. ।

जलशूकरः । पुं । शिशुमारे । শুশুক । हारा. । कुम्भीरे । हे.च. । [—श्यामाकवत् ।

जलश्यामाकः । पुं । तृणधान्यविशेषे । गुणाः

जलसर्पिणी । स्त्री । जलौकायाम् । জোঁক। हे.च. । [येन जलं दृष्ट्वा त्रसति । वा.चि. ।

जलसन्त्रासः । पुं । कुकुरदंशजरोगविशेषे ।

जलसम्भवः । पुं । जलवेतसे । रा.नि.व.९ ।

जलसूकरः । पुं । कुम्भीरे । वनसूकरे । वै.निघ. ।

जलसूचिः । पुं । क्रौञ्चपक्षिणि । कङ्कोटमत्स्ये । जटा. । शृङ्गाटके । शिशुमारे । मे. । काके । हे.च. । स्त्री । जलौकायाम् । জোঁক ।

जलस्था । स्त्री । गण्डदुर्व्वायां । रा.नि.व.८ ।

जलहासः । पुं । समुद्रफेने । त्रिका. । [श्र.र.।

जलाका । स्त्री । जलौकायाम् । জোঁক ।

जलाखुः । पुं । जलमूषके । त्रिका. ।

जलाख्या । स्त्री । जलमधूकवृक्षे । वै.निघ. ।

जलाञ्चलम् । क्ली । शैवाले । শেওলা । मे. ।

जलाटनः । पुं । कङ्कपक्षिणि । কাঁক পাখী । स्त्री (नी) । जलौकायाम् । मे. । रा. ।

जलाण्टकः । पुं । शिशुमारे । नक्रराजे । हारा.

जलाण्डकम् । क्ली । रोहितादिशिशौ । মাছের পোণা । हारा. ।

जलाम्बिका । स्त्री । जलौकायाम् । श्र.र. ।

जलाधारम् । क्ली, पुं । पीतोशीरे । वै.निघ.। जलाशये । अम. ।

जलाबु(म्बु)का । स्त्री। जलौकायां । वै.निघ.।

जलामोदम् । क्ली । उशीरे । रा.नि.व.१२ ।

जलायु(वु)का । स्त्री । जलमस्या आयुरिति जलौकायाम् । জোঁক । मं जलू । सु.सू.१३अ. । सा द्वादशविधा । सविषाः षट्, तावत्य एव निर्व्विषाः । तत्र सविषाः कृष्णा कर्व्वुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तासु अञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्व्वुरा । रोमशा महापार्श्वा कृष्णमुखी अलगर्दा । इन्द्रायुधवदूर्द्धराजिभिश्चित्रिता इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका । गोवृषणवदधोभागे द्विधाभूताकृतिः अणुमुखी गोचन्दनेति । ताभिर्दष्टे ज्वरादिर्भवति । निर्व्विषाः—कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिका चेति । तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धमुद्गवर्णा कपिला । किञ्चिद्रक्ता वृत्तकाया पिङ्गाशुगा च पिङ्गला । यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी । मूषिकाकृतिवर्णा अनिष्टगन्धा च मूषिका । मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा

पुण्डरीकमुखी। स्निग्धा पद्मपत्रवर्णोष्टादशाङ्गुलप्रमाणा सावरिका पञ्चमे। सु.सू.१३अ.।

जलार्द्रः (र्द्रा) । पुं. स्त्री । आर्द्रवस्त्रे । ভিজে কাপড় । त्रिका.। हे.च. । आर्द्रतालवृन्ते । माघ.।

जलार्व्वुदः । पुं । वातकफत्रोष्ठरोगे । "जलवुद्वुदवद्वातकफादोष्ठे जलार्व्वुदम् ।" वा.उ.२१अ. ।

जलालुः । पुं । पानीयालुके । रा.नि.व.७.।

जलालुकम् । क्ली । पद्मकन्दे । भा.पू.१भ.शाक व. । [च.टी.भ. ।

जलालु(लो)का । स्त्री । जलौकायाम् । श.र.।

जलाशयः । पुं । सरोवरे । शृङ्गाटके । क्ली । उशीरे । अम. । लामज्जके । গন্ধ বেণা । रा.नि.व.८ । स्त्री । गुण्डालायाम् । रा.नि.व.५ ।

जलाश्रयः । पुं । शृङ्गाटके । रा.नि.व.७ । गुण्डतृणे । रा.नि.व.८ । ईहामृगे । रा.नि.व.१६। स्त्री । गर्म्मोटिकातृणे शूलीतृणे । रा.नि.व.८ । क्ली । लामज्जके । रा.नि.व.१२ ।

जलाष्ठीला । स्त्री । पुष्करिण्याम् । हारा. ।

जलाह्व(य)म् । क्ली । वालके । বালা । उत्पले । শুন্দি ফুল । रा.नि.व.१० । [श.र. ।

जलाञ्ची । स्त्री । जलपिप्पल्याम् । পাণিসগা ।

जलिः (का) । स्त्री । जलौकायां । च.टी.भ.।

जलु(लू)का । स्त्री । जलौकायाम् । श.र. । हे.च. । चर्म्मचटिकायाम् । वा.उ.६अ. ।

जलेच्छया । स्त्री । हस्तिशुण्डीवृत्ते । श.र. ।

जलेजा(त(रुह)म् । क्ली । पद्मे । श.र. ।

जलेरुहा । स्त्री । कुटुम्बिनीक्षुपे । रा.नि.व.५।

जलेवाहः । पुं । जलकुक्कुटे । वै.निघ. ।

जलेशयः । पुं । जलचारिमत्स्यादौ ।

जलोका । स्त्री । जलायुकायां । हारा.। अम.।

जलोदरः । पुं, क्ली । तन्नामकोदररोगभेदे । জল উদরী । निदानलक्षणं यथा—"यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढः। पिवेज्जलं शीतलमाशु तस्य स्रोतांसि दूष्यन्ति हि तद्वहानि। स्नेहोपलिप्तेष्वथवापि तेषूदकोदरं पूर्व्ववदभ्युपैति। स्निग्धं महत्तत्परिवृत्तनाभि समाततं पूर्णमिवाम्बुना च। यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत् ॥ जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतं। बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम् ॥" इति । मा.नि. ।

जलोदरारिरसः । पुं । जलोदराधिकारे रसः । रसगन्धकौ प्र. २ तो. (मतान्तरे गन्धकः ४ तो.) मनःशिला हरिद्रा जयपालवीजं त्रिफला त्रिकटु चित्रकमूलं एषां प्रति १ तो. दन्तीरसेन स्नुहीक्षीरेण (সিজুর আঠা) भृङ्गराजरसेन च पृथक् ७ भावयित्वा संशोष्य च वटीं कुर्य्यात्। मात्रा २ र. ।

जलोद्भवः । पुं । शङ्खे । শাঁক । वै.निघ.। स्त्री। लघुब्राह्मीशाके । कुङ्कुमशाली । रा.नि.व.५।१६ ।

जलोद्भूता । स्त्री । मुण्डालायाम् । रा.नि.व.५।

जलोरगी । स्त्री । जलौकायाम्। জোঁক । च.टी. ।

जलोलूका । स्त्री । पद्मवीजे । रा.नि.व.१० ।

जलौकः । पुं । जलवेतसे । वै.निघ.। स्त्री(का)। जलायुकायाम् । हारा. ।

जलौकाविधिः । पुं । तया रक्तमोक्षणकार्य्ये। জোঁক ধরান । "अथ जलौकावसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात् । गृहीतास्ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तस्थिता विगतक्लमा ज्ञात्वा ताभी रोगं ग्राहयेत् । सूक्ष्मशुक्लार्द्रपिचुप्लोतावच्छन्नां कृत्वा मुखमपावृणुयादगृह्णन्त्यै क्षीरबिन्दुं शोणितबिन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत । यद्येवमपि न गृह्णीयात् तदान्यां ग्राहयेत् । यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्नमय्य च स्कन्धं तदा जानीयात् गृह्णातीति गृह्णन्तीञ्चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च ।" इत्यादि । तस्य गुणाः—"शीताधिवासा मधुरा जलौका वारिसम्भवा। तस्मात्पित्तोपसृष्टे तु हिता सा त्ववसेचने ॥" सु.सू.१३अ.।

जलौदनम् । क्ली । सजलान्ने । भा.कुष्ठ-चि. ।

जवनः । पुं । अश्वे । शीकारिहरिणे । रा.नि.व.१६ ।

जवनालः । पुं, क्ली । धान्यविशेषे । জনার ।

तद्बीजगुणाः—स्वादु शीतलं वातलं कफपित्तघ्नञ्च । राज. ।

जवली । स्त्री । कषायफलवृक्षे । জওয়ার । तस्याः फलगुणाः—"कषायं कफपित्तघ्नं किञ्चिद्वित्तं रुचिप्रदम् । हृद्यं सुगन्धि विशदं जवलीफलमुच्यते ॥" सु. ।

जवसम् । क्ली । तृणे । घासे । श.र. ।

जवसाह्वा । स्त्री । यमान्याम् । मद.व.२ ।

जवा । स्त्री। ओड्रपुष्पवृक्षे । জবাফুলের গাছ । रा.नि.व.१०। घृतभर्ज्जितजवापुष्पम् आर्त्तवकरम् । च.द. ।

जवादि । क्ली । गन्धराजे । গন্ধরাজ, খাটাশী। मं जवादीकस्तूरी । गुणाः—स्निग्धमुष्णं सुखकरं वातहितञ्च । तल्लक्षणं—"जवादि नीलं सुस्निग्धमीषत्पीतं सुगन्धिदं । आतपे बहुलामोदं राज्ञां योग्यं न चान्यथा ॥" रा.नि.व.१२।

जवानी । स्त्री । यमान्याम् । मद.व.२ ।

जवापुष्पम् । क्ली । ओड्रपुष्पे । জবা ফুল । श.र. ।

जवाह्वा । स्त्री । यमान्याम् । मद.व.२ ।

जविनः । पुं । विलेशयमृगविशेषे, कोकड़मृगे । रा.नि.व.१९ ।

जवी (इन्) । पुं । अश्वे । उष्ट्रे । रा.नि.व.१९ ।

जसदम् । क्ली । यशदे । দস্তা । वै.निघ. ।

जहा । स्त्री । मुण्डितिकायां । মুণ্ডীরী । श.च.।

जक्षणम् । क्ली । भक्षणे । रा.नि.व.२० ।

जक्ष्मः (क्ष्मा (न्)) । पुं । क्षयरोगे । যক্ষ্মা রোগ । अ.टी.भ. । See यक्ष्मा ।

जागतः । पुं । सोमलताभेदे । सु.चि.२९अ. ।

जागरः (णम्) (री) । पुं, क्ली, स्त्री । निद्राभावे । জাগিয়া থাকা । अम. ।

जागुड़म् । क्ली । कुङ्कुमे । रा.नि.व.१२ ।

जाघनी । स्त्री । उरौ । त्रिका. ।

जाङ्गमद्रव्यम् । क्ली । जङ्गमजातद्रव्यगणेषु, मधुगोमूत्रपित्तवसामज्जासृङ्मांसविण्मूत्रचर्म्मरेतोऽस्थिस्नायुशृङ्गनखखुरकेशरोचनालोमसु । च.सू.१अ. ।

जाङ्गलः । पुं । कपिञ्जलपक्षिणि । গৌর তিতির পাখী । मे.। मरुप्रायवातलदेशे । মরু-প্রায় বেতো দেশ । "मरुप्रायस्तु यो देशः स चोक्तो जाङ्गलाभिधः ।" रा.नि.व.२ । "अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः । ज्ञातव्यो जाङ्गलो देशः ॥" गुणाः—वातपित्तकरः उष्णः रूक्षश्च । राज. । अपिच—"आकाशशुभ्र उच्चश्च तनश्च स्वल्पपादपः। शमीकरीरविल्वार्कपीलुकर्कन्धुसङ्कुलः । हरिणैणर्क्षपृषतगोकर्णखरसङ्कुलः । सुस्वादुफलवान्देशो वातलो जाङ्गलः स्मृतः ॥" भा. । तज्जलगुणाः—स्वादु त्रिदोषघ्नं रूच्यं पथ्यम् आयुर्बलवीर्य्यपुष्टिकान्तिकरञ्च । रा.नि.व.१४ । स्थलजपशुवर्गे । सोऽष्टविधः यथा—जङ्घाला विष्किराः प्रतुदा गुहाशयाः प्रसहाः पर्णमृगा विलेशया ग्राम्याश्च । तत्र जङ्घालविष्किरौ प्रधानतमौ तावेणहरिणर्क्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करमृगमातृकाप्रभृतयो जङ्घालाः कषाया मधुरा लघवश्च। "शशलावकवाताटा गोधा हरिणकूटकाः । छिक्कराद्यास्तथाचान्ये तित्तिराद्याश्च कूर्चकाः । भारद्वाजास्तथा श्येना मूषका वरवारणाः । इत्येते जाङ्गला जीवा ये जलेन विना स्थिताः ॥" अत्रि.२०अ. । क्ली । मांसे । रा.नि.व.१७ ।

जाङ्गलमांसम् । क्ली । शिखिखरादिजन्तुमांसे । रा.नि.व.१७ ।

जाङ्गलयकृत् । क्ली । जाङ्गलपशुयकृति । तच्च रक्तपित्तहरम् । वा.चि.२अ. ।

जाङ्गला (ली) । स्त्री । शूकशिम्ब्याम् । আলাকুশী । मे. ।

जाङ्गुड़म् । क्ली । कुङ्कुमे । त्रिका. ।

जाङ्गुलिः । पुं । विषवैद्ये । সাপুড়ে । श.र. । (ली) स्त्री । विषविद्यायाम् । हे.च. ।

जाङ्घिकः (काह्वयः) । पुं । शीकारिवृक्षे । मे. । उष्ट्रे । रा.नि.व.१९ । त्रि । जङ्घाजीविनि ।

जाजी । स्त्री । जीरके । भा.म.४भ.प्रद.चि. । "दध्ना सौवर्च्चलं जाजी ।"

जाटलिः । पुं । पटोललतायाम् । अम. ।

जाठरः । पुं । जठरानले । वै.निघ. ।

जाठरग्रन्थिः । पुं । गुल्मरोगे । रा.नि.व.२० ।

जाड्यम् । क्ली । अङ्गजड़तायाम् । रा.नि.व.२० ।

जाम्बरिः । पुं । जम्बीरवृक्षे । গোঁড়া নেবুর গাছ । रा.नि.व.११ ।

जातकध्वनिः । पुं । जलौकायाम् । वै.निघ. ।

जातकर्म्म । क्ली । शिशौ भूमिष्ठे कर्त्तव्ये कर्म्मणि । नाड़ीच्छेद । सूतिकापूजादौ ।

जातघ्नी । स्त्री । पुत्रघ्नीनामयोनिदोषे । वा.उ. ३३श. । See पुत्रघ्नी । [सूरे । श्म. ।

जातरूपम् । क्ली । सुवर्णे । रा.नि.व.१३ । धु-

जातरूपप्रभम् । क्ली । हरिताले । वै.निघ. ।

जातवेदाः । पुं । अग्नौ । चित्रकवृक्षे । श्म. ।

जातसारा । स्त्री । जिह्विन्याम् । वै.निघ. ।

जातापत्या । स्त्री । प्रसूतायां स्त्रियि । श्म. ।

जातिः । स्त्री । जन्मनि । आमलक्याम् । मालतीपुष्पलतायाम् । जातीफले । मे. । च.चि.३श. गुञ्जारोचन्याम् । काम्पिल्लके । কমলাগুঁড়ি । विश्व. । रोगसम्प्राप्तौ । मा.नि. । जातीपुष्पवृक्षे । च.द.वा.व्या.चि. ।

जातिकोश(ष)म् । क्ली । जातीपत्रां । जयित्री । जातीफले । भा. । सु.सू.४६श. । हे.च. ।

जाति(ती)कोशा (षी) । स्त्री । जातीपत्राम् । जयित्री । रा.नि.व.१२ । वै.निघ.२भ. सुदर्शनचूर्णे ।

जातिजम् । क्ली । जातीफले । वै.निघ. ।

जाति(ती)पत्र(क)म् । क्ली । जातीफले । "जातीपत्रसुपत्रपत्रकयुतं ।" भा.उ.वाजी.चि. । वै.निघ.२भ.वा.व्या.चि.एरण्डपाके । जातीवृक्षपत्रे । চামিলীর পাতা । रस.र.बाल.चि. ।

जातिपत्रिका (त्री) (र्णी) । स्त्री । जातीफलत्वचि । जयित्री । हिं जावत्री । कं जाइपत्री । गुणाः— कटुतिक्तसुरभिः कफजाड्यहरी मुखवैशद्यजननी च । रा.नि.व.१२ । दुर्गन्धहरी । राज. । "जातीफलस्य त्वक् प्रोक्ता जातीपत्री भिषग्वरैः । जातीपत्री लघुः स्वादुः कटूष्णा रुचिवर्णकृत् । कफकासवमिश्वासतृष्णाकृमिविषापहा ॥" भा. ।

जाति(ती)प्रवालः । पुं । जातिकिसलये । জাতিপাতা । च.सू.४श. ।

जातिफलम् । क्ली । जातीफले । জায়ফল । हे.च. ।

जाति(ती)फलत्वक् । स्त्री । जातीपत्राम् । जयित्री । वै.निघ. । [न । वै.निघ. ।

जाति(ती)रसः । पुं । रक्तबोले । निशाद-

जाति(ती)शस्यम् । क्ली । जातीफले । জায়ফল । रा.नि.व.१२ । वै.निघ.२भ.अतिसा.चि. मोचरसपुटपाके । [नि.व.१२ ।

जाति(ती)सारम् । क्ली । जातीफले । रा.

जाति(ती)सुतः । पुं । जातीफले । वै.निघ. ।

जातिहिङ्गुलकम् । क्ली । हिङ्गुले । वै.निघ. ।

जाती । स्त्री । (Jasminum Grandiflorum.) स्वनामख्यातपुष्पवृक्षे । জাতি বা চামিলী ফুলের গাছ । हिं चम्बेली, स्वर्णजाती । मं जाइ । कं जाजि । गुणाः—शीता तिक्ता कफघ्नी मुखपाकघ्नी च । तत्कुसुमं नेत्ररोगघ्नं व्रणविस्फोटकघ्नं कुष्ठघ्नञ्च । रा.नि.व.१० । "जातीयुगं तिक्तमुष्णं तुवरं लघु दोषजित् । शिरोऽक्षिमुखदन्तार्त्तिविषकुष्ठानिलास्रजित् ॥" भा. । मालत्याम् । सु.सू.३८श. । जातीफलवृक्षे । वै.निघ. ।

जातीकन्दः । पुं । जातीमूले । सु.सू.मिश्र.श. ।

जातीको(श)षम् । क्ली । जातीफले । हे.च. ।

जातीकोषफलम् । क्ली । जातीपत्राम् जातीफले च । জৈত্রী, জায়ফল । वै.निघ.अजीर्णचि.वह्निरसे । [निघ. ।

जातीजातम् । क्ली । जातीकोषफले । वै.

जातीतैलम् । क्ली । कर्णरोगाधिकारे । "जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ।" कटुतैलं ४ श. जातीपत्ररसः १६ श. (वृद्धोपदेशात्) कल्कार्थं जातीपत्रं १ श. । शा.कौ. ।

जातीदलम् । क्ली । जातीकोषे । জৈত্রী । वै.निघ.२भ.रक्तपि.चि.कर्पूरादिचूर्णे । जातीपत्रे ।

जातीद्वयम् । क्ली । जातीकोषफले । জায়ফল, জয়িত্রী । जीवकद्वयमिति तालीशादिचूर्णे वृद्धोपदेशः । [कोषे । भा.उ.वाजीकरणे ।

जातीपत्रिका (त्री) (र्णी) । स्त्री । जाती-

जातीफलम् । क्ली । स्वनामख्यातसुगन्धफले । जायफल। "जातीफलं समदञ्च स्निग्धं गुरु च शस्यते । लघुकं मन्दहीनञ्च रुचाङ्गमतिनिन्दितम् ॥" भैष. । गुणाः—तिक्तं कटु कफघ्नं लघु तृष्णाघ्नं मुखक्लेददौर्गन्ध्यघ्नञ्च । सु.सू.४६अ. । कषायोष्णं कटु कण्ठामयघ्नं वातातिसारमेहघ्नं वृष्यं लघु दीपनञ्च । रा.नि.व.१२ । तृष्णाशूलघ्नम् । राज. । रसे तिक्तं तीक्ष्णं रोचनं ग्राहि स्वरकरं श्लेष्मवातमुखवैरस्यमलदौर्गन्ध्यघ्नं क्रमिकासवमिश्वासशोषपीनसहृद्रोगहरञ्च । भा. । "तैलं जातीफलोद्भूतं समुत्तेजनमग्रिदम् । जीर्णातिसारशमनम् आध्मानाक्षेपशूलहृत् । आमवातहरं बल्यं दन्तवेष्टव्रणार्त्तिनुत् ॥" अत्रि. । जातीकोषवद्गुणम् । सु.सू ४६अ. ।

जातीफला । स्त्री । आमलकीवृक्षे । आमला गाछ । रा.नि.व.११ ।

जातीफलादिवटी । स्त्री । अजीर्णे वटी । जातीफलं लवङ्गं पिप्पली निर्गुण्डी (निशिन्दा) विषं शुण्ठी धुस्तूरबीजं हिङ्गुलं टङ्कणक्षारः (सोहागार खइ) एषां प्र. समभागः जम्बीररसेन वटी कार्य्या । मा. २।३ रक्तिः । र.सा.सं. ।

जातीफलाद्या (वटिका) । स्त्री । ग्रहण्यधिकारे । शुद्धपारदः ४मा. गन्धकः ४मा. कज्जली कार्य्या । जातीफलं मोचरसः मुस्तकं टङ्कणक्षारः (सोहागार खइ) अतिविषा जीरकं मरिचं एषां प्र. ४ मा. विषं १ मा. एकत्र सचूर्ण्य, वंश आम्रः कञ्चटः(काँचड़ा) प्रसारणी (गन्धभादुलि) निर्गुण्डी विजया (सिद्धि) जम्बू (जाम) जयन्ती (जन्ति) दाड़िमः केशराजः(केशुते) पाठा(आकनादि) भृङ्गराजः एषां पत्ररसैर्भावयित्वा सम्मर्द्य च कोलास्थिमात्रा वटी कार्य्या । अन्या यथा—जातीफलं टङ्कणक्षारः अभ्रं धुस्तूरबीजं एषां प्र. १ तो. अहिफेनं २ तो. प्रसारणीरसेन सम्मर्द्य वटी चणकाभा कार्य्या । प्रथमे अभ्रकस्यापि माषचतुष्टयं दीयते । र.सा.सं. ।

जातुकम् । क्ली । हिङ्गौ । श.च. ।

जात्यन्धः । त्रि । जन्मान्धे । जन्मकाणा ।

जात्युत्पलम् । क्ली । श्वेतरक्तकमले । वै.निघ.।

जानु । क्ली । जङ्घोरुमध्यभागे, चक्रिकायां, अष्ठीवद्भागे वा । हाँटु । "जान्वष्ठीवच्च चक्रिका ।" रा.नि.व.१८ । [हाड़ । ते च द्वे । च.शा.७अ. ।

जान्वस्थि । क्ली । जानुदेशास्थनि । हाँटुर

जामाता । पुं । गजपिप्पल्याम् । प.मु. । सूर्य्यावर्त्ते । हुड़हुड़े । मे. । भैष.अम्लपि.चि.सुधावल्यां ।

जाम्बवम् । क्ली । स्वर्णे । रा.नि.व.१३ । जम्बूफले । जाम फल । अम. । पुं । जम्ब्वासवे । जामेर आसव । "जाम्बवः क्षौद्रसहितो जम्बूरसगुड़ोद्भवः ।" तोड़.वृद्धसु. । गुणाः —"जाम्बवो बद्धनिस्यन्दस्तुवरो वातकोपनः ।" सु. ।

जाम्बवती (वी) । स्त्री । नागदमन्याम् । नागदना । रा.नि.व.५ ।

जाम्बवौष्ठम् । क्ली । व्रतविशोधनशलाकाविशेषे । "जम्बूफलाग्रसदृशमुखाग्राकृष्टपाषाणरचितवर्त्तौ ।" सु.सू.५अ. ।

जाम्बौष्ठम् । क्ली । जाम्बवौष्ठे । सु.चि.१६अ.।

जाम्बूनदम् । क्ली । सुवर्णे । रा.नि.व.१३ । धुस्तूरे । रा.नि.व.१० । [स्विचन्दने । अम. ।

जायकम् । क्ली । कलिया इति ख्यातपीतसुग-

जाया । स्त्री । शमीवृक्षे । वै.निघ.२भ.कर्णकज्व.चि. ।

जायाघ्नम् । क्ली । तिलकालके । वै.निघ. ।

जायानुजीवी (इन्) । बकपक्षिणि । मे. ।

जायुः । पुं । औषधे । रा.नि.व.२० ।

जारगर्भा । स्त्री । क्षुद्ररोगविशेषे । वै.निघ. ।

जारणः । पुं । कासमर्दक्षुपे । कालकासन्दा । रा.नि.व.४ । जीरके । वै.निघ. । स्त्री । स्थूलजीरके । मोटा जीरे । रा.नि.व.६ ।

जारणबीजम् । क्ली । रसजारणार्थं बीजद्रव्यभेदे । र.चि. । [झाड़ि । मे. ।

जारी । स्त्री । जाड़ीतिख्याते औषधविशेषे ।

जालः । पुं । कदम्बवृक्षे । मे. । (कः) शुक्लगतनेत्ररोगभेदे । See जालसंज्ञितः । सु.उ.४अ. । क्ली । लोचकपित्ते । शरीरस्थजालवत् पदार्थे । तानि च शिरास्नायुस्थिमांसेभ्यः सम्भवन्ति । तथा

प्रत्येकं चत्वारि चत्वारि संख्यया षोड़श भवन्ति । भा. । चारके । জালি কুমী । मे. ।

जालकम् । क्ली । कुष्माण्डायतिहृद्रफले । জালি । सा.सु. । कुटुम्बिनीक्षुपे । वै.निघ. । मोचकफले । मे. । [हे.च. ।

जालकारकः । पुं । मर्कटे । মাকড়শা ।

जालकिनी । स्त्री । मेष्याम् । त्रिका. ।

जालगर्द्दभः । पुं । क्षुद्ररोगविशेषे । অগ্নি-বাত । तस्य लक्षणं यथा—"विसर्पवत्सर्पति यो दाहज्वरकरस्तनुः । अपाकः श्वयथुः पित्तात्स ज्ञेयो जालगर्द्दभः ॥" सु. ।

जालपात् । पुं । हंसे । त्रिका. ।

जालमोटा । स्त्री । शुक्लयूथिकायां । वै.निघ. ।

जालवर्व्वूरकः । पुं । वर्व्वूरकवृक्षभेदे । বাব্লা বিশেষ । पुलष्, जालि । गुणाः—रुच्य. वातरोगघ्नः पित्तकृत्कषायोष्णः कफहृत् दाहकरश्च । रा.नि.व.८ । [निघ. ।

जालवब्बूलिका । स्त्री । बब्बूलविशेषे । वै.

जालविन्दुजा । स्त्री । यावनालीशर्करायां । रा.नि.व.१४ ।

जालसंज्ञकः । पुं । शुक्लगतनेत्ररोगविशेषे । চখে জালি পড়া । लक्षणं —"जालाभः कठिनशिरोमहान् सरक्तः सन्तानः स्मृत इह जालसंज्ञितस्तु ।" सु.उ.४अ. ।

जालक्षीरम् । क्ली । तन्नामकवृक्षस्य क्षीररूपविषे । सु.कल्प.२अ. । See क्षीरविषं ।

जालिः । स्त्री । खाद्यद्रव्यविशेषे । জালি । हिंजारी । "आममाम्रफलं पिष्टं राजिकालवणान्वितं । भृष्टहिङ्गुयुतं पूतं घोलितं जालिरुच्यते ॥" गुणाः—जिह्वाकण्डूघ्नी कण्ठशोधनी रोचनी दीपनी च । भा. । [शा । हे.च. ।

जालिकः (कारः) । पुं । मर्कटे । মাকড়-

जालिका (की) । स्त्री । कोषातक्यां । ঝিঙা । रा.नि.व.३ । जलौकायां । लौहे । वस्त्रभिदि । मे. ।

जालिनी । स्त्री । महाकोषातक्यां । ঝিঙা । रा.नि.व.१ । वै.निघ.कामला-चि. । घोषालता-याम् । ঘোষালতা । र.मा. । सु.चि.१अ. । देवदाल्याम् । দেয়াতাড়া । दारुहरिद्रायाम् । वै.निघ. । प्रमेहपिटिकाभेदे । लक्षणं—"जालिनी तीव्रदाहा तु मांसजालसमावृता ।" सु.नि.६अ. । असाध्यलूताभेदे । सु.कल्प.८अ. । See लूता ।

जालिनीफलम् । क्ली । घोषाफले । ঘোষাফলের বীচি বা ঝিঙের বীচি । च.द.पाण्डु-चि. । गुणाः—शिरोरोगपाण्डुरोगहरं वमकरञ्च । अत्रि. ।

जाली । स्त्री । पटोललतायाम् । रा.नि.व.७ । घोषायाम् । प.मु. । ज्योत्स्नायाम् । ঝিঙা । अम. ।

जावकः । पुं । अलक्तके । वै.निघ. ।

जाषकम् । क्ली । कालीयचन्दने । পীত চন্দন । अ.टी.सा. ।

जाहकः । पुं । कृष्णसरटे । কাল গিরগিট্ । रा.नि.व.१९ । गोनासमर्पे । जलौकायाम् । वै.निघ. । विड़ाले । श.र. । त्रिका. । घोङ्गे । ঘোগ্ । मे. । [कायां । জোঁক । हारा. ।

जाहकध्वनिः । पुं । घोङ्गे । ঘোগ । जलौ-

जिगतुः । पुं । उच्छ्वासे । प्राणवायौ । उणा. ।

जिघत्सा । स्त्री । क्षुधायाम् । हे.च. ।

जिङ्गिनी । स्त्री । गुड़मञ्जनिकायाम्, गुलदुली इति ख्याता । भैष.योनिव्यापत्चि. । सु.सू. लोध्रादि. । "जिङ्गिनी कृष्णशाल्मली ।" वा.सू.१५अ.रोध्रादिः, च.वि.८अ. । गुणाः—"मधुरा शीतला कषाया योनिशोधनी । कटुका व्रणहृद्रोगवातातीसारहृत्पटुः । तमालशालवद्देद्यो दाहविस्फोटहृत् पुनः ॥" भा.वटादिः ।

जिङ्गिः (ङ्गी) । स्त्री । मञ्जिष्ठायाम् । प.मु. कन्दर्पसारतैले । च.द.मेह.चि. । गुड़मञ्जनिकायाम् । सु.सू.३८अ. ।

जिज्ञासा । स्त्री । परीक्षायां । यथा—"भेषजपरीक्षोत्तरकालमुपदेक्ष्यते ।" च.वि.८अ. ।

जितेन्द्रियाह्वः । पुं । कामवृद्धिनामक्षुपे । रा.नि.व.४ ।

जिनयोनिः । पुं । हरिणे । श.र. ।

जिभमोहनः । पुं । भेके । श.र. ।

जिभशल्यः । पुं । खदिरे । रा.नि.व.८ ।

जिम्भा (म्भिका) । स्त्री । जृम्भिकायाम् । हाई । रा.नि.व.२० ।

जिवाजिवः । पुं । जीवञ्जीवपक्षिणि । श.र. ।

जिविः । पुं । पक्षिणि । उणा. ।

जिह्मम् । क्ली । तगरपादुके । प.मु. । रा.नि.व.१० । ज.द.१२अ. । पिण्डीतगरे । वै.निघ. । पुं. स्त्री । जिह्वायाम् । अटी.भ. ।

जिह्मगः । पुं । सर्पे । जिह्वकसन्निपाते ।

जिह्वकः । पुं । तन्नामकसन्निपातज्वरविशेषे । लक्षणम्—"श्वसनकासपरितापविह्वलः कठिनकण्टकवृतोऽतिजिह्वकः । बधिरमूकबलहीनलक्षणो भवति कष्टतरसाध्य एष वै ।" वै.निघ. । अस्य तल्लान्तरीक्तलक्षणं भावप्रकाशे मृग्यम् ।

जिह्वा । स्त्री । रसनेन्द्रिये । জিভ্ । रा.नि.व. १८ । सा च उदरे पच्यमानकफशोणितमांससारभूता । सु.शा.४अ. । तत्परीक्षा यथा—वातेन—शाकपत्रनिभा रुक्षा स्फुटना च । पित्तेन—रक्ता श्यावा च । कफेन–लिप्ता आर्द्रा धवला च । त्रिदोषेण—परिदग्धा खरस्पर्शा कृष्णा च । दोषद्वयाधिक्येन–दोषद्वितयलक्षणा च । भा. ।

जिह्वानिर्लेखनम् । क्ली । जिह्वामलहरदशाङ्गुलकाष्ठिकायाम् । চিয়ড়ি জিহ্বছোলা इति लोके । "जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च । तन्मलापहरं शस्तं मृदुश्लक्ष्णं दशाङ्गुलम् ॥" सु.चि.२४अ. । "निहन्ति वक्त्रवैरस्यं जिह्वादन्ताश्रितं मलम् । आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम् ॥" राज.१प. ।

जिह्वापः । पुं । विड़ाले । कुकुरे । भल्लूके । श.र. । चित्रकव्याघ्रे । विश्व. ।

जिह्वाप्रबन्धः । पुं । जिह्वामूले । वा.उ.२१अ. ।

जिह्वामलम् । क्ली । रसनामले । चिका. ।

जिह्वारदः । पुं । पक्षिणि । हारा. ।

जिह्वारोगः । पुं । जिह्वागतरोगे । জিবের ঘা প্রভৃতি । नि. । स पञ्चधा—"वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः । उपजिह्विका च गदा जिह्वायाः पञ्च कीर्त्तिताः ॥ जिह्वानिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा । पित्तात्सदाहैरुपचीयते च दीर्घैः सरक्तैरपि कण्टकैश्च । कफेन गुर्व्वी बहुलाचिता च मांसोच्छ्रयैः शाल्मलिकण्टकाभैः । जिह्वातले यः श्वयथुः प्रगाढ़ः सोऽलाससंज्ञः कफरक्तमूर्त्तिः ॥" इत्यादि । मा.नि. । अधिजिह्विकोऽपीति षड्विधमाह वाभटः । यथा—"शाकपत्रखरा सुप्ता स्फुटिता वातदूषिता । जिह्वा पित्तात्सदाहोषा रक्तैर्मांसाङ्कुरैश्चिताः । शाल्मलीकण्टकाभैस्तु कफेन बहुला गुरुः । कफपित्तादधःशोफो जिह्वास्तम्भकृदुन्नतः । मत्स्यगन्धिर्भवेत्पक्वः सोऽलसो मांसशातनः । प्रबन्धनेऽधो जिह्वायाः शोफो जिह्वाग्रसन्निभः । साङ्कुरः कफपित्तास्रैः लालोषास्तम्भवान् खरः । अधिजिह्वः सरुकण्डूर्वाक्याहारविघातकृत् । तादृगेवोपजिह्वस्तु जिह्वाया उपरिस्थितः ॥" वा.उ.२१अ. ।

जिह्वालिट् । पुं । कुकुरे । वै.निघ. ।

जिह्वास्तम्भः । पुं । स्वनामख्यातवातव्याधौ । জিভ্ এড়াইয়া যাওয়া । "वाग्वाहिनीशिरासंस्थो जिह्वां स्तम्भयतेऽनिलः । जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता । जिह्वास्तम्भे यथावस्थं वातव्याधिचिकित्सितम् । सामान्योक्ताः क्रियाश्चाद्दितस्यापि हिता मताः ॥" अस्य मुखरोगे । ज.द.२६अ. । See मुखरोगः ।

जीनः । पुं । वृद्धे । रा.नि.व.१८ ।

जीमूतः (कः) । पुं । मुस्तायाम् । मुता । रा.नि.व.६ । पीतदेवदाल्याम् । भा. । देवदाल्याम् । দেয়াতাড়া । रा.नि.व.३ । घोषकलतायाम् । ঘোষা লতা । हे.च. । क्ली घोषाफले । च.सू.२अ. ।

जीमूतकतैलम् । क्ली । कोशातकीतैले ।

जीमूतमूलम् । क्ली । शट्याम् । प.मु. ।

जीमूताह्वा । स्त्री । देवदाल्याम् । দেয়াতাড়া । जलमुस्तायाम् । वै.निघ. ।

जीरः (कः) (णः) । पुं,क्ली । (Cuminum cyminum.) Cumin seed. स्वनामख्यातक्षुपे । বড় জীরে, শাদা জীরে । हिं जीरा । तें जीलकर्र । गुणाः—कटुरुष्णः वातघ्नः दीपनः गुल्माध्मानातिसारघ्नः ग्रहणीकृमिहृच्च । रा.नि.व.६ । जीरकाः पञ्च तत्र श्वेतकृष्णस्थूलसूक्ष्मभेदाच्चतुर्धा, वनजीरकश्च इति पञ्च । भावप्रकाशस्तु

त्रिभेदानाह शुक्लकृष्णकालीभिभेदेन। गुणाः—दीपनं पाचनम् उष्णत्वाद्वद्यशोषकं ग्राहि च। शार्ङ्ग.। लघु संग्राहि गर्भाशयशुद्धिकरं ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफघ्नं चक्षुष्यमतिसारघ्नञ्च। भा.। विशेषाः पर्य्याये द्रष्टव्याः। एतत्तैलं मिषितैलगुणं ज्ञेयम्। चचि.।

जीरकद्वयम्। क्ली। शुक्लपीतजीरके। गुणाः—"तीक्ष्णोष्णं कटुकं पाके रुच्यं पित्ताग्निवर्द्धनम्। कटु श्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयम्॥" सु.सू. ४६अ.। [वातपित्तघ्नी। चचि.१५।

जीरका। स्त्री। शालिधान्यविशेषे। सा च

जीरकादिमोदकः। पुं। ग्रहण्यधिकारे। जीरकचूर्णं ८ प. घृतभर्जितसिद्धिवीजचूर्णं ४ प. लौहम् अभ्रं वङ्गं मधुरिका तालीशपत्रं जयित्री जातीफलं धान्यकं आमलकी हरीतकी विभीतकं गुड़त्वक् तेजपत्रम् एला नागकेशरं लवङ्गं शैलजं सारचन्दनं रक्तचन्दनं जटामांसी द्राक्षा शटी टङ्कणक्षारः कुन्दुरुखोटी यष्टिमधु वंशरोचना काकोली बालकं गोरची शृङ्गी पिप्पली मरिचं धातकीपुष्पं विल्वपेशी अर्ज्जुनत्वक् शलुका देवदारु कर्पूरं प्रियङ्गुः जीरकं मोचरसः कटुकी पद्मकाष्ठं नलिका एषां प्रतिचूर्णं २ तो. सर्व्वचूर्णद्विगुणा शर्करा एकत्र पचेत्। मात्रा १ तो.।

जीरकाद्यघृतम्। क्ली। व्रणशोथाधिकारे। "जीरकपक्वं घृतं सिक्थसर्ज्जरससमिश्रितं हन्ति। घृतमभ्यङ्गात्पावकदग्धजदुःखं क्षणार्द्धेन॥" गव्यघृतं ४ श. पाकार्थजलं १६ श.। कल्कार्थजीरकं ८ प.। सिद्धे सिक्थसर्ज्जरसयोः (मम ও धुना) ४ प. प्रक्षेपः। अन्यत् अम्लपित्ताधिकारे—"पिष्टाजाजीं सधान्याकां घृतप्रस्थं विपाचयेत्।" गव्यघृतं ४ श. कल्कः १ श. जलं १६ श.। च.द.।

जीरिका। स्त्री। वंशपत्रीतृणे। रा.नि.व.८।

जीर्णः। पुं। जीरके। रा.नि.व.६। क्ली। शैलजे। रा.नि.व.१२। त्रि। वृद्धे। पक्वे। रा.नि.व.१८।

जीर्णज्वरः। पुं। पुरातनज्वरे। পুরাতন জ্বর। द्वादशदिवसातीते वा तद्द्विगुणातीते वा एकविंशदिवसातीते वा तनुभावं गतो यो ज्वरः काये तिष्ठति। तत्र द्वादशदिवसातीते ज्वरः जीर्णः इति जातूकर्णः। एकविंशदिवसातीते इति सि. यो.। र.सा.सं.। "त्रिसप्ताहे व्यतीते तु ज्वरोयस्तनुतां गतः। प्लीहाग्निसादं कुरुते स जीर्णज्वर उच्यते॥" "यो द्वादशभ्यो दिवसेभ्य ऊर्द्ध्वं दोषत्रयस्तद्द्विगुणेभ्य ऊर्द्ध्वं। नृणां तनौ तिष्ठति मन्दवेगो भिषग्भिरुक्तो ज्वर एष जीर्णः॥" भा.।

जीर्णदारुः। पुं। वृद्धदारकविशेषे। কাল বিচতাড়ক। वीजगुणाः—गौल्यं पिच्छिलं कफवातकासामदोषघ्नं बल्यञ्च। रा.नि व.३।

जीर्णपत्रः। पुं। पट्टिकारोध्रे। रा.नि.व.६।

जीर्णपत्रिका। स्त्री। वंशपत्रीतृणे। रा.नि. व.८। [त्रिका.। पुरातनपत्रे।

जीर्णपर्णः। पुं। पट्टिकारोध्रे। कदम्बवृक्षे।

जीर्णफञ्जी। स्त्री। कृष्णवृद्धदारके। रा.नि.व.३।

जीर्णवालः (लुकः)। पुं। कृष्णवृद्धदारके। रा.नि.व३। स्थूलजीरके। रा.नि.व.६।

जीर्णबु(ब्र)ध्नः। पुं। पट्टिकारोध्रे। পাটিয়ালোধ। रा.नि.व.६। मुस्तायाम्। वै.निघ.।

जीर्णबुध्नकम्। क्ली। परिपेलवतृणे। কেওটে মুতা। रा.नि.व.८।

जीर्णवज्रम्। क्ली। वैक्रान्तमणौ। रा.नि.व.१३।

जीर्णा। स्त्री। स्थूलजीरके। रा.नि.व.६।

जीर्णाहारः। पुं। आहारस्य जीर्णावस्थायां। আহার পরিপাক অবস্থা। लक्षणं—"उद्गारशुद्धिरुत्साहो वेगोत्सर्गौ यथोचितः। लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम्॥" भा.।

जीर्विः। पुं। शरीरे, काये। सङ्क्षिप्त-उणा.।

जीवः। पुं। जीवकक्षुपे। शिशूक्षटि। प.मु.। प्राणिनि, जन्तौ। त्रिका.। कर्णे। धरणिः। जीविते। मे.।

जीवकः। पुं। (Pentaptera tomentosa.) A medicinal plant, commonly called jívaka, अष्टवर्गान्तर्गतस्वनामख्यातक्षुपे। জীবক। हिं जीवक। तें वेगिसपुचेट्टु। गुणाः—मधुरः शीतः रक्तपित्तघ्नः वातघ्नः क्षयदाहज्वरघ्नः शुक्रश्लेष्मवर्द्धनश्च। रा.नि.व.५। See ऋषभकः। एतदभावे गुडूची ग्राह्या। असनवृक्षे। পেয়াশাল। तन्नामकपक्षिणि। मे.।

जीवकद्रुमः । पुं । जियत्षष्टीतिख्याते द्रुमे । प.मु. ।

जीवकादिः । पुं । जीवनीयगणे । स च जीवकर्षभकमेदामहामेदर्द्धिवृद्धिकाकोलीचीरकाकोलीमूर्पपर्णीद्वयात्मकः । रा.नि.व.२२ । जीवकर्षभककाकोलीचीरकाकोलीमुद्गपर्णीमाषपर्णीमेदावृचरुहाजटिलाकुलिङ्गाः । एतानि शुक्रजननानि प्रभावात् । च.सू.४अ. ।

जीवजी(ञ्जी)वः । पुं । स्वजातीये चकोरपक्षिणि । त्रिका. । वृक्षभेदे । मे. ।

जीवत्तोका । स्त्री । जीवत्पुत्रिकायाम् । हे.च. ।

जीवथः । पुं । मयूरे । कच्छपे । प्राणे । उणा. ।

जीवदः । पुं । वैद्ये । जीवके । वै.निघ. ।

जीवदा (त्री) । स्त्री । जीवन्त्याम् । रा.नि.व. ३ । ऋद्धौ । रा.नि.व.५ ।

जीवद्वन्द्वम् । क्ली । जीवके ऋषभके च । "जीवद्वन्द्वविश्वमूषणम् ।" । भैष.वाजी. ।

जीवनः । पुं । वाते । जीवकक्षुपे । रा.नि.व. ४ । वैद्ये । क्ली । अन्ने । रा.नि.व.२० । जले । प्राणधारणे । मे. । मज्जायाम् । रा.नि.व.१८ । सद्योघृते । श.च. । दुग्धे । शरीरजीवयोः संयोगे । त्रि । आयुर्वर्द्धने ।

जीवनकम् । क्ली । अन्ने । हे.च. ।

जीवनदशकम् । क्ली । जीवनीयगणोक्तदशद्रव्येषु । वा.सू.१५अ. ।

जीवनपञ्चमूलम् । क्ली । अभीरुर्वीरा जीवन्ती जीवकर्षभकौ चेति । वा.सू.१५अ. ।

जीवना । स्त्री । सिंहपिप्पल्याम् । रा.नि.व.६ । मेदायाम् । मे. । जीवन्तीलतायाम् । जिय्राती । अम. । [च. ।

जीवनाघातम् । क्ली । वत्सनाभे विषे । श.

जीवनार्हम् । क्ली । दुग्धे । धान्ये । वै.निघ. ।

जीवनिका । स्त्री । जीवन्त्याम् । हरीतक्यां । काकोल्याम् । रा.नि.व.११ ।

जीव(वि)नी । स्त्री । मेदायां । মেদা । महामेदायां । মহামেদা । रा.नि.व.५ । काकोल्याम् । जीवन्तीशाके । रा.नि.व.३ । डोड़ीक्षुपे । रा.नि. व.४ । यूथिकायां । यूँई । श.च. ।

जीवनीयम् । क्ली । घृते । जले । हे.च. । त्रि । प्राणधारणे । वा.टी.हे. ।

जीवनीयगणः । पुं । जीवन्त्यादिगणे । स च जीवन्ती काकोली चीरकाकोली मेदा महामेदा मुद्गपर्णी माषपर्णी जीवकः ऋषभकः मधुकश्चेति । च.सू.४अ. । "अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकं तथा । जीवनीयगणः प्रोक्तो जीवनश्च पुनस्ततः ॥" प.प्र.३ख. । गुणाः—स्वादुः गर्भसन्धानकृत् गुरुः स्तन्यकृत् बृंहणः वृष्यः स्निग्धः शीतः तृष्णाघ्नः रक्तपित्तक्षयशोषज्वरदाहवातघ्नश्च । शार्ङ्ग.म.६अ. ।

जीवनीया । स्त्री । स्वर्णजीवन्त्यां । रा.नि.व. ३ । हरीतक्याम् । मद.व.१ । [रा.नि.व.६ ।

जीवनेत्रा (त्री) । स्त्री । सैंहलीपिप्पल्याम् ।

जीवनौषधम् । क्ली । जीवनीयौषधे । अम. । अन्ने । वै.निघ. । [औषधे । प्राणे । उणा. ।

जीवन्तः (कः) । पुं । जीवशाके मालवदेशप्रसिद्धे । गुणाः—मधुरः बृंहणः वस्तिशोधनः दीपनः पाचनः बल्यः वृष्यः पित्तहरश्च । रा.नि.व.७ ।

जीवन्तिका । स्त्री । वृक्षोपरिजातवृक्षे । মান্দড়া । गुड़ूच्याम् । जीवशाके । मे. । भा.शिरोरोग-चि. । हरीतकीभेदे । रा.नि.व.११ । "जीवन्तिका स्यादथ जीर्णरोगजित् ।"

जीवन्ती । स्त्री । स्वनामख्यातशाकविशेषे, जीवशाक इति लोके । या शर्करावन्मधुरपुष्पा व्रततिः, "जियत्षष्टी" सा रक्तपित्ते वर्ज्या इति । भा. । स्वर्णनाड़ इति चक्रपाणिः । तन्मते मधुरामधुरभेदेन द्विविधा, तत्र मधुरायाः त्रिदोषहन्तृत्वम् अमधुरायाः सञ्जातपित्तहरत्वम् । आद्यस्य रसो मधुरः वीर्य्यं शीतलं तथा पाकोऽपि मधुर एव । प्रभावश्चक्षुष्यः सर्व्वदोषघ्नश्च । एषा शाकेषु श्रेष्ठा 'वरा शाकेषु जीवन्ती' इति । वा.सू.१५अ. । वै.निघ.श्वास.चि.शुण्ठ्यादिचूर्णे । गुड़ूच्यां । रा.नि.व.३।२३ । वन्दायाम् । हरीतक्यां । भा. । डोड़ीशाकक्षुपे । रा.नि.व.४ । मेदायां । काकोल्यां । हरिद्रायां । रा.नि.व.२३ । मधूकवृक्षे । शमीवृक्षे । वै.निघ. । (Celtis orientalis.) लताविशेषे ।

जीवन्ती, जीवई, जियाती। मं कं लाहानिह-रिणबेलि, किरियहाले। सा ह्रस्वदीर्घस्वर्णवर्ण-भेदेन त्रिधा। "जीवन्ती स्वर्णवर्णाभा सुराष्ट्रजा च। जीवनोद्योगात् जीवन्ती नाम।" मद.व१.। गुणाः—मधुरा शीता रक्तपित्तवातक्षयदाहज्वरघ्नी कफवर्द्धनी वीर्य्यवर्द्धनी च। अन्या रसवीर्य्ययोः क्र-मतुल्या भूतविद्रावणी रसनियामिका च। स्वर्ण-वर्णा तथा चक्षुष्या मधुरा शीतला वातपित्तरक्त-दाहघ्नी बलवर्द्धनी च। रा.नि.व.३। अपिच श्वास-कासधातुक्षयघ्नी स्वरकरी च। राज.। "जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा। रसायना बलकरी चक्षुष्या ग्राहिणी लघुः।" भा.। "चक्षुष्या सर्व्वदोषघ्नी जीवन्ती मधुरा हिमा।" अत्रि.१६ अ.। तैलगुणः विभीतकतैलवत्। जीवनीयाख्ये गणे। वा.सू.१५अ.। See जीवनीयगणः।

जीवन्त्यादिवर्गः । पुं। जीवनीयगणे। वा. सू.१५अ.। [इङ्गुदीवृक्षे। वै.निघ.।

जीवपुत्रकः । पुं। इङ्गुदीवृक्षे। श.र.। हि-

जीवपुष्पा । स्त्री। वृहज्जीवन्त्यां। रा.नि.व.७।

जीवपृष्ठा । स्त्री। जीवन्तीशाके। वृहज्जीवन्त्यां। रा.नि.व.३।

जीवप्रिया । स्त्री। हरीतक्याम्। रा.नि.व.१२।

जीवभद्रा । स्त्री। वृद्ध्यौषधी। रा.नि.व.५। जीवशाके, जीवन्तीलतायाम्। रा.नि.व.३।

जीवमन्दिरम् । क्ली। शरीरे। श.र.।

जीवरत्नम् । क्ली। पुष्परागमणौ। प.मु.।

जीववती । स्त्री। क्षीरकाकोल्याम्। वै.निघ.।

जीववत्सा । त्रि। जीवत्पुत्रायाम्। च.शा.८अ.।

जीववर्द्धिनी । स्त्री। ऋद्धौ। शक्ति। वै.निघ.।

जीववल्ली । स्त्री। क्षीरकाकोल्याम्। रा.नि. व.३। काकोल्याम्। वै.निघ.।

जीववृक्षः । पुं। जीवकवृक्षे। जियापुता इति लोके। द्रव्याभिधानम्।

जीवशाकः । पुं। शाकविशेषे। खोषरा इति लोके। प.मु.। जीवशाक इति मालवदेशे। गु णाः—बल्यः मधुरः दीपनः पाचनः बृंहणः व-स्तिशोधनः पित्तघ्नश्च। रा.नि.व.७।

जीवशुक्ला । स्त्री। क्षीरकाकोल्यां। रा.नि. व.३।

जीवशोणितम् । क्ली। जीवनपोषकशुद्धशो-णिते। जीवनपोषक विशुद्ध रक्त। जीवशो-णितरक्तपित्तयोः जिज्ञासार्थं पिचुलोतं वा क्षिपे-त्, यद्युष्णोदकप्रक्षालितमपि वस्त्रं रञ्जयति त-ज्जीवशोणितमवगन्तव्यम्। सभक्तञ्च शुने दद्यात् शक्तुमिश्रं वा, स यद्युपभुञ्जीत तज्जीवशोणितमव-गन्तव्यम्। सु.।

जीवश्रेष्ठा । स्त्री। ऋद्धौ। रा.नि.व.५।

जीवसंज्ञः । पुं। कामवृद्धिक्षुपे। रा.नि.व.४।

जीवसाधनम् । क्ली। धान्ये। धनिया। रा. नि.व.६। [रा नि.व.१८। हृदये। वै.निघ.।

जीवस्थानम् । क्ली। मर्म्मणि। मर्म्मस्थान।

जीवा । स्त्री। जीवन्तीलतायां। रा.नि.व.३। ऋद्धौ। प.मु.। वचायां। मे.। जीवके। रा.नि. व.२३। हरीतक्याम्। वै.निघ.।

जीवागारम् । क्ली। मर्म्मस्थाने। रा.नि.व.१८।

जीवातुः । पुं। जीवनीयौषधे। अन्ने। मे.।

जीवात्मा । पुं। देहिनि। हे.च.।

जीवादानम् । क्ली। जीवशोणितनिर्गमे। च. सू.१५अ.।

जीवाधारः । पुं। चेत्रे। हे.च.। [४अ.।

जीवापगमः । पुं। षड्धातुविभागे। च.शा.

जीवाला । स्त्री। सैंहलीपिप्पल्यां। रा.नि.व.५।

जीविका । स्त्री। जीवन्त्यां। मे.।

जीवितम् । क्ली। जीवने। प्राणधारणे। हे. च.। च.सू.१अ.।

जीवितकालः । पुं। आयुषि। अम.।

जीवितज्ञा । स्त्री। शरीरान्तःस्पन्दनाड्यां, शि-रायाम्। रा.नि.व.१८।

जीविता । स्त्री। जलपिप्पल्याम्। वै.निघ.।

जीविताभिसरः । त्रि। जीवनरक्षाकर्त्तरि (वैद्ये)। च.सू.११अ.। [डोड़ीक्षुपे। रा.नि.व.४।

जीविनी । स्त्री। काकोल्यां। रा.नि.व.३।

जीव्यः । पुं । जीवकौषधौ । रा.नि.व.५ ।

जीव्या । स्त्री । जीवन्त्यां । रा.नि व.३ । हरीतक्याम् । गौरचदुग्धायाम् । रा.नि.व.११।५ ।

जुगुप्सितम् । क्ली । श्वेतलशुने । वै.निघ. ।

जुन्धम् । पुं,क्ली । यवनाले । जनार । वै.निघ. ।

जुङ्गः (कः) । पुं । वृद्धदारकलतायां । रा.नि.व.३ ।

जुङ्गा । स्त्री । वृद्धदारकलतायां । प.मु. ।

जुष्ककः । पुं । यूषे । ঝোল । श.च. ।

जूटिका । स्त्री । कर्पूरविशेषे । ভীমসেনী । रा.नि.व.१२ । [न्ये । দেধান । रा.नि.व.१६ ।

जून(र्णू)लः । पुं । धवलयावनालाख्यशिम्बीधा-

जूनाख्यः । पुं । उलूकतृणे । উলু । प.मु. ।

जूर्णाह्वः (यः) । पुं । धवलयावनाले । দেধান । रा.नि.व.१६ । हे.च. । च.सू.२७अ. ।

जूर्णिः (र्त्तिः) । पुं । शरीरे । उणा. । ज्वरे । अम. ।

जूषः । पुं, क्ली । क्वाथे । भ. ।

जूषणम् । क्ली । धातकीपुष्पे । श.च. ।

जृम्भः (णम्) । पुं, क्ली । जृम्भायाम् । হাই । श.र. । मा.ज्व.नि. ।

जृम्भा (म्भिका, णी) । स्त्री । जृम्भकायां । হাই । रा.नि.व.२० । "चैतन्यशिथिलत्वाद्यत्पीत्वैकं श्वाससुद्गमेत् । विदीर्णवदनः श्वासं जृम्भा सा कथ्यते बुधैः ॥" शार्ङ्ग.पू.६अ. । "पीत्वैकमनिलोच्छ्वासमुद्वेष्टन् विवृताननः । यन्मुञ्चति सनेत्रास्रं सा जृम्भा इति संज्ञितः ॥" सु.शा.४अ. । एलापर्ण्यां । श.च. ।

जेन्ताकः । पुं । स्वेदविशेषे । च.सू.१४अ. ।

जेमनम् । क्ली । लेपे । वै.निघ. । आहारे । अम. ।

जैत्रः । पुं । पारदे । रा.नि.व.१३ । क्ली । औषधे । रा.नि.व.२० ।

जैत्री । स्त्री । जयन्तीवृक्षे । श.र. ।

जैपालः । पुं । जयपालवृक्षे । द्विरूपकोषः ।

जैवातृकः । पुं । कर्पूरे । चन्द्रे । अम. । दर्भे । औषधे । हे.च. । त्रि । कृशे । दीर्घायुषि । त्रिका. ।

जोङ्गकम् । क्ली । अगुरुणि । त्रिका. । वा.चि.६अ. । काकमाच्याम् । च.चि.१अ. ।

जोङ्गटः । पुं । गर्भिण्यभिलाषे । সাধ । हारा. ।

जोङ्गलः । पुं । कृष्णवृद्धदारके । वै.निघ. ।

जोन्ताला । स्त्री,पुं(लः) । देवधान्ये । দেধান । हे.च. । [लिकायाम् । কসি, জালি । श.र. ।

जोषिका । स्त्री । नवाङ्कुरे । वै.निघ. । जा-

ज्ञानेन्द्रियम् । क्ली । नेत्रादिषड्बुद्धीन्द्रिये ।

ज्येष्ठतोयाम्लम् । क्ली । काञ्जिके ।

ज्येष्ठबला । स्त्री । महाबलायाम्, सहदेव्याम् । रा.नि.व.४ ।

ज्येष्ठा । स्त्री । कदलीवृक्षे । गृहगोधिकायाम् । টিকটিকি । त्रिका. । तर्जन्याम् । वै.निघ. ।

ज्येष्ठामलकः । पुं । निम्बवृक्षे । रा.नि.व ९ ।

ज्येष्ठामूलीयः । पुं । ज्येष्ठमासे । वै.निघ. ।

ज्येष्ठाम्बु (म्भः) । क्ली । तण्डुलोदके । চেলুনির জল । च.द.उन्मा.चि. । "श्वेताज्येष्ठाम्बुनिर्मितम् ।" मध्ये । त्रिका. । वा.उ.३६अ. ।

ज्येष्ठी । स्त्री । गृहगोधायां । টিকটিকি । त्रिका. ।

ज्येष्ठीमधु । क्ली । यष्टिमधुनि । वै.निघ. ।

ज्योतिः (स्) । पुं । चित्रकवृक्षे । क्ली । रक्तचन्दने । वै.निघ. । मेथिकायाम् । रा.नि.व.६ ।

ज्योतिःसोमम् । क्ली । रक्तचन्दने । मद. ।

ज्योतिरिङ्गः (णः) । पुं । खद्योते । श.र. । धूम्राटपक्षिणि । वै.निघ. ।

ज्योतिर्लता । स्त्री । ज्योतिष्मतीलतायाम् । লতাফট্কী । रा.नि.व.३ ।

ज्योतिर्वीजम् । क्ली । खद्योते । त्रिका. ।

ज्योतिष्कः । पुं । अग्निमन्थे । গণিরি । र.मा. । चित्रकवृक्षे । मेथिकाबीजे । रा.नि.व.६ । स्त्री (का) । ज्योतिष्मत्याम् । अ.टी.स्वा. । सु.चि.९अ. । वचायाम् । वै.निघ. ।

ज्योतिष्मती । स्त्री । (Cardiospermum halicacabum.) स्वनामख्यातलतायाम् । ने-

लताफटकी. वन उच्छे। तें वेकडुलीगे। हिं म मालकंगुणी, काकमर्द्दनिका। ककुन्दलीति ख:। सु.सू.३८ष.। सा द्विधा लघुदीर्घभेदेन। सा. गुणा:—अतितिक्ता किञ्चित्कटु: रुचा वातकफघ्नी दाहप्रदा दीपनी च। विशेषेण द्वितीया मेधाप्रज्ञावृद्धिकरी। रा.नि.व.७। तीक्ष्णा व्रणविस्फोटघ्नी। राज.। "ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित्। अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा॥" भा.।

ज्योतिष्मतीतैलम्। क्ली। तत्फलोत्थतैले। लताफटकीर तैल। गुणा:—तिक्तोष्णं वातघ्नं पित्तघ्नं मेधाप्रज्ञाबुद्धिवर्द्धनञ्च। रा.नि.व.१५।

ज्योतीरथ:। पुं। निर्विषसर्पविशेषे। सु.कल्प. ४ष.। See सर्प:।

ज्योत्स्ना (त्स्निका) (त्स्नी)। स्त्री। ज्योतिष्मत्याम्। लताफटकी। रेणुकबीजे। श.च.। चन्द्रिकायाम्। चन्द्रकिरण। गुणा:—त्रिदोषघ्नी दाहास्रकपित्तनाशिनी। राज.। कोषातक्याम्। श्वेत घोषा। र.मा.। पटोलिकायां। झिङ्गा। अम.।

ज्योत्स्नाप्रिय:। पुं। चकोरे। हे.च.।

ज्वर:। पुं। सर्व्वरोगप्रधानरोगविशेषे। ज्वर। हिं बोखार, ज्वर। ज्वरोत्पत्ति:—दच्चापमानसंक्रुद्धरुद्रनि:श्वासेन सम्भूतत्वात् ज्वर: स्वभावात् पैत्तिक इति बोद्धव्य:, यत उक्तं चरकेण। "क्रोधात्पित्त"मित्यादि। तेन सर्व्वज्वरेषु पित्तोपशमनी चिकित्सा कर्त्तव्या। भा.। ज्वरस्य मूर्त्ति:—सर्व्वभूततापन: त्रिपात् त्रिशिरा: महोदर: कपिलवर्णो व्याघ्रचर्म्मवासा माल्यधारी पिङ्गलनेत्र: चुद्रतरजङ्घ: विकृताकारी भस्मभूषिताङ्गो महाबलवान् लोकनाशाय लोकेऽवतिष्ठते। सु.। तस्य प्रकृति:—"तस्य प्रकृतिरुद्दिष्टा दोषा: शारीरमानसा:। देहिनं न हि निर्द्दोषं ज्वर: समुपसेवते॥" ज्वरस्य संख्यारूपसम्प्राप्ति:—ज्वरोऽष्टधा, वातिक: पैत्तिक: श्लैष्मिकश्चेति त्रय:, द्वन्द्वजाश्च त्रय:—वातपैत्तिक: वातश्लैष्मिक: पित्तश्लैष्मिकश्चेति, सान्निपातिक: आगन्तुकश्चेति साकल्येन अष्टधा। सान्निपातिकज्वर: त्रयोदशविध इति। चर.। See सन्निपातज्वर:। शार्ङ्गधरस्तु पञ्चविंशतिभेदानाह यथा—पृथग्दोषैस्त्रिधा, द्वन्द्वभेदेन च तथा, सन्निपातेन चैक: ; विषमज्वर: पञ्चधा—सन्ततसतताऽन्येद्युष्कतृतीयकचातुर्थकभेदेन ; आगन्तुरेक एवेति त्रयोदशविध: ; आगन्तु: पुनस्त्रिधा, अभिघातज: चतुर्धा, अभिषङ्गजश्च पञ्चविध इति पञ्चविंशतिधा। शार्ङ्ग.पू.ख.७ष.। ज्वरस्य विप्रकृष्टकारणं—मिथ्याहारविहारादि—तेन वातादय आमाशयगता ज्वरं जनयन्तीति सम्प्राप्ति:। तस्य रूपं—श्रमारतिविवर्णतामुखवैरस्यनेत्रप्लवताजृम्भाङ्गमर्द्दगुरुतारोमहर्षारुचितमोऽप्रहर्षशीतादिकं शीतवातातपेषु मुहुरिच्छाद्वेषौ च भवन्ति। तस्य सामान्यलक्षणं—खेदावरोधादि। सामान्यतो ज्वरचिकित्सा—सामान्यतो ज्वरे पूर्व्वं निवातनिलये वास:। व्यजनानिल: तालपत्रवात: वंशव्यजनजवायु: चामर-वस्त्र-मयूरपुच्छ-वेतसव्यजनवायुश्च। तथा गुरुणावसनावरणं यथर्त्तु पक्कपानीयव्यवहारश्च। ज्वरे वर्ज्यं स्नानप्रदेहादिकम्। भा.म.१भ.। ज्वरादौ लङ्घनं मध्ये पाचनं अन्ते च भेषजं प्रयोक्तव्यम्। प्राणिभेदे तदसाध्यता—"असाध्योऽयं ज्वरो व्याधि: गोमहिषाश्वकुञ्जरे। किञ्चित्क्लच्छ्तमो नृणामन्येषां जीवघातक:॥ यथा मृगाणां मृगयुर्बलिष्ठ: तथा गदानां प्रबलो ज्वरोऽयम्। नान्योऽपि शक्तो मनुजं विहाय सोढुं भुवि प्राणभृत: सुराद्या:॥" नरस्य ज्वरसहत्वे कारणं—"कर्म्मणा लभते यस्माद्देवत्वं मानुषो दिवि। ततश्चैवाच्युत: स्वर्गान्मानुष्यमभिवर्त्तते। तस्मात्स देवभावात्तु सहते मानुषो ज्वरमिति॥" अत्रि.। प्राणिविशेषे ज्वरनाम यथा—"पातक: स तु नागानामभितापस्तु वाजिनाम्। गवामीश्वरसंज्ञस्तु मानवानां ज्वरो मत:। दारिद्रो महिषाणाञ्च मृगरोगो मृगेषु च। अजावीनां प्रलापाख्य: करभे त्वलसो भवेत्। शुनोऽलर्क: समाख्यातो मत्स्येष्विन्द्रमतो मत:। पक्षिणामभिघातस्तु व्यालेष्वेचितसंज्ञित:। गुल्मस्य नलिका प्रायो भूमेरुषरनामत:। वृक्षस्य कोटराख्यस्तु ज्वर: सर्व्वत्र दृश्यते॥" अत्रि.२स्थान.२अ.।

ज्वरकुञ्जरपारीन्द्ररस:। पुं। विषमज्वरे रस:। यथा—"मूर्च्छितं रसकर्षैकं तदर्द्धं जारिताभ्रकं। तारं ताम्रञ्च रजतं रसकं वासकं तथा। मौक्तिकं विद्रुमं लौहं गिरिजं गैरिकं शिला।

गन्धकं हेमसारञ्च पलार्द्धञ्च पृथक् पृथक्। चीरायी सुरवल्ली च शोथघ्नी गणिकारिका। झाटामला ज्योत्स्निका च सतिक्ता च सुदर्शना। अग्निजिह्वा पूतितैला सूर्पपर्णी प्रसारणी। प्रत्येकं स्व रसं दत्त्वा मर्द्दयेच्चिदिनावधि। भक्षयेत्पर्णखण्डेन चतुर्गुञ्जाप्रमाणतः॥"……। মূর্চ্ছিত রস ২ তো. জারিত অভ্র ১ তো. স্বর্ণমাক্ষিক, স্বর্ণ, রৌপ্য, খাপর, তাম্র, মুক্তাভস্ম, প্রবালভস্ম, লৌহভস্ম, শিলাজতু, গিরিমাটী, মনছাল, গন্ধক, তুঁতেভস্ম প্র. ২ তো.। থিরুই, তুলসী, শ্বেতপুন্যা, গণিরি, ভূঁই আমলা, চিরাতা, পদ্মগুলঞ্চ, ঈশলাঙ্গুলিয়া, লতাফট্‌কী, পটোল, মুগানী, গন্ধভাদুলিয়া প্রত্যেকের রসে ৩ দিন মাড়িবে। र.सा.सं.।

ज्वरघ्नः। पुं। वास्तूकभेदे। स्त्री। गुडूच्याम्। रा.नि.व.७१२३। मञ्जिष्ठायां। वास्तूके। वै.निघ।

ज्वरघ्नी(वटिका)। स्त्री। ज्वरे रसः। शुद्धजैपालबीजं १ तो. कटुकी २ तो. गैरिकक १ तो. घृतकुमारीरसेन मर्द्दयेत्। শুদ্ধ জয়পালবীজ ১ তো. কট্‌কী ২ তো. গেরিমাটী ১ তো. ঘৃতকুমারীরসে মর্দ্দন। বটী ১ কলায়। भा.। अन्या—रसः १ तो. शिलाजतु पिप्पली हरीतकी अककर्करा(वचा) कटुतैलशुद्धगन्धकं इन्द्रवारुणीफलं प्र. ४ तो. इन्द्रवारुणीरसेन मर्द्दयेत्। পারা ১ তো. শিলাজতু, পিপুল, হরীতকী, আকরকরা বচ, কটুতৈলে শুদ্ধ গন্ধক এবং রাখালশশার ফল প্রত্যেকে ৪ তো. রাখালশশামূলের রসে মর্দ্দন। বটী ১ মাষকড়াই। शार्ङ्ग.। अपरा—पारदः १ तो. गन्धकः २ तो. हिङ्गुलं ३ तो. जैपालबीजं ४ तो. दन्तीक्वाथेन मर्द्दयेत्। পারা ১ তো. গন্ধক ২ তো. হিঙ্গুল ৩ তো. জয়পালবীজ ৪ তো. দন্তীকাথে মর্দ্দন। रस.र.। [शइ शार्ङ्गधरकृते।

ज्वरचिंशती। स्त्री। ज्वरनिदानचिकित्सासं-

ज्वरनाशनः। पुं। पर्पटके। ক্ষেৎপাবড়া। स्त्री (शिनी)। मञ्जिष्ठायाम्। गुडूच्याम्। वै.निघ.।

ज्वरहन्त्री। स्त्री। मञ्जिष्ठायाम्। रा.नि.व.६।

ज्वराङ्गी। स्त्री। भद्रदन्त्याम्। दन्ती। रा.नि. व.६।

ज्वरातङ्कः। पुं। ज्वररोगे। रा.नि.व.२०।

ज्वराधिष्ठानम्। क्ली। शरीरे मनसि च। "केवलं समनस्कञ्च ज्वराधिष्ठानमुच्यते।" च.चि. ३अ.।

ज्वरान्तकः। पुं। किराततिक्तके। চিরেতা। आरग्वधवृक्षे। रा.नि.व.६।

ज्वरान्तकरसः। पुं। ज्वरे रसः। ताम्रं गन्धकः पारदः सौराष्ट्रजत् (পঙ্কপর্পটী) लौहं स्वर्णमाक्षिकं हिङ्गुलं टङ्कणक्षारः (সোহাগার খৈ) रसाञ्जनं स्वर्णभस्म प्र. समभागं चित्रकादीनां (चित्रक-गुडूची-मुस्ता-शुण्ठीनां प्र ॥० तोलं वारि ॥० श.) पादावशिष्टेन क्वाथेन मर्द्दयेत्। रस.कौ.।

ज्वरारिः। पुं। गुडूच्याम्। रा.नि.व.२३। ज्वरे रसविशेषः। पारदः गन्धकः हिङ्गुलं ताम्रं शीषं टङ्कणं (সোহাগার খই) विड़लवणं मनःशिला एषां प्र. समभागः। आरग्वधपत्ररसेन १० भावना देयाः। भैष.। अन्यः—पारदः १ भ. गन्धकः २ भ. हिङ्गुलं ३ भ. धुस्तूरबीजं ४ भ. दन्तीक्वाथेन मर्द्दयेत्। रस.कौ.।

ज्वरारि (अभ्रम्)। क्ली। जीर्णज्वरे रसः। अभ्रं ताम्रं पारदः गन्धकः विषं, एषां समभागः। धुस्तूरबीजम् एकभागापेक्षया द्विगुणं त्रिकटु मिलित पञ्चगुणं। जलेन वटी कार्य्या। অভ্র, তামা, পারা, গন্ধক, বিষ প্রত্যেকে সমভাগ ধুতুরার বীজ ২ ভ. ত্রিকটু মিলিত ৫ ভ. জলে মাড়িবে। र.सा.सं.।

ज्वराशनिः। पुं। विषमज्वरे रसः। रसः गन्धकः सैन्धवं विषं ताम्रं प्र. समभागः, सर्व्वसमं लौहचूर्णं लौहसमम् अभ्रम्। लौहपात्रे लौहदण्डेन निर्गुण्डीरसेन सम्मर्द्य तेन सह पारदसमभागं मरिचचूर्णं मिश्रयेत्। রস, গন্ধক, সৈন্ধব, বিষ, তামা প্রত্যেকে সমভাগ। সর্ব্বসমান লৌহচূর্ণ, লৌহসমান অভ্রভস্ম। লৌহপাত্রে লৌহদণ্ডে নিশিন্দারসে মাড়িয়া তাহার সহিত পারার সমান মরিচচূর্ণ মিশ্রিত করিবে। र.सा.सं.।

ज्वरी (इन्)। त्रि। ज्वरयुक्ते। [निघ.।

ज्वलत्प्रभा (न्ती)। स्त्री। कृष्णसर्षपे। वै.

ज्वलनः । पुं । चित्रकवृक्षे । श्रम. । भा.४भ. नाड़ीव्रण-चि. । [प.मु. । रा.नि.व.१२ ।

ज्वलनाश्मा (श्मा) । पुं । सूर्य्यकान्तमणौ ।

ज्वलनाभः । पुं । गन्धतृणे । वै.निघ. ।

ज्वल(लि)नी । स्त्री । मूर्व्वायां । मूर्गा । रा. नि.व.३ । [निघ. । दग्धायां । श.च. ।

ज्वाला । स्त्री । धातकीवृक्षे । चित्रकवृक्षे । वै.

ज्वालाखरगदः । पुं । जालगर्द्दभकरोगे । रा.नि.व.२० ।

ज्वालागर्द्दभकः । पुं । जालगर्द्दभकरोगे ।

ज्वालानलरसः । पुं । अजीर्णाधिकारे । सर्ज्जिक्षारः यवक्षारः पारदः गन्धकः पञ्चकोलम् इति नवद्रव्यं प्र. समं, सर्व्वतुल्या जया (সিদ্ধি) জয়াই শিগ্রুত্বক্ (সজিনার ছাল) চূর্ণ। জয়া-शिग्रुचित्रकभृङ्गराजरसेन प्र. दिनत्रयं भावयित्वा शुष्कः लघुपुटेन पाच्यः। उद्धृत्य आर्द्रकरसेन ७ भावना देयाः । र.सा.सं. । मतान्तरे टङ्कणमपि ग्राह्यम् । भावप्रकाशे क्षारत्रयं पाठः ।

ज्वालामरिचकः । पुं । कटुवीरायां । গাছ মরিচ । See कटुवीरा ।

ज्वालामुखरसः । पुं । ग्रहण्यधिकारे । "शुद्धसूतं समङ्गन्धं सुवर्णं मरिचं समं । रक्तचित्रकजैर्द्रावैः जलमण्डपिकाद्रवैः । दिनैकं मर्द्दयेत् खल्वे चतुर्गुञ्जाश्च भक्षयेत् ॥" পারা, গন্ধক, স্বর্ণ, মরিচ প্রত্যেকে সমভাগ রক্তচিতের রস ও পানার রসে ১ দিন মর্দ্দন করিবে। रस.कौ.।

ज्वालारासभकः । पुं । जालगर्द्दभकरोगे । रा.नि.व.२० ।

झ

झटा (आमला) । स्त्री । भूम्यामलक्याम् । ভূঁই আমলা । मा.नि. । वै.निघ. ।

झण्टी । स्त्री । कुन्दवृक्षे । वै.निघ. ।

झम्पाकः (रुः) । पुं । वानरे । मर्कटे । वै. निघ. । श.र. ।

झम्पाशी (इन्) । पुं । जलकाके । পানকৌড়ী । वै.निघ. । मत्स्यरङ्के । जटा. ।

झम्पी (इन्) । पुं । वानरे । श.र. ।

झर्झरिका । स्त्री । धूमस्याम् । দালে রুটী । गुणाः धूमसीशब्दे मन्त्याः ।

झर्झरीकः । पुं । शरीरे । उणा. ।

झला । स्त्री । झिल्लिकायाम् । वै.निघ. ।

झलिः । स्त्री । क्रमुके । গুপারি । वै.निघ. ।

झल्लकण्ठः । पुं । पारावते । हारा. ।

झल्लिका । स्त्री । उद्वर्त्तनपटे मले च । मे. ।

झषः । पुं । मत्स्ये । श्रम. । जलचरभेदे । वा. उ.पूव. ।

झषलोचना । स्त्री । मत्स्याक्ष्याम् । वै.निघ. ।

झषा (सा) । स्त्री । गोरक्षतण्डुलायाम्, नागबलायाम् । प.मु. । श्रम. ।

झषाशनः । पुं । शिशुमारे । त्रिका. ।

झाटः । पुं । व्रणमार्ज्जने । मे. । [ल । श्रम. ।

झाटलः । पुं । घण्टापाटलायाम् । ঘণ্টাপারু-

झाटा (आमला) । स्त्री । भूम्यामलक्याम् । श्रम. । ज्वरकुञ्जरपारीन्द्ररसे मन्त्या । यूथिकायां । যূঁই । श.च. ।

झाटिका (टी) । स्त्री । भूम्यामलक्याम् । श.च. । जातीपुष्पवृक्षे । वै.निघ. । [টি । हारा. ।

झामकम् । क्ली । दग्धेष्टकायाम् । ঝামা ই-

झालिः । स्त्री । व्यञ्जनभेदे, झारीति भाषा । तत्साधनं यथा—"आममाम्रफलं पिष्टं राजिकालवणान्वितं । भृष्टं हिङ्गुयुतं पूतं घोलितं झालिरुच्यते । झालिर्हरति जिह्वाया कुण्ठत्वं कण्ठशोधनी । मन्दं मन्दं निपीता सा रोचनी वह्निबोधनी ॥" भा. । [ঝাউ গাছ । श.र. ।

झावुः (कः, का) । पुं, स्त्री । वृक्षविशेषे ।

झिङ्गाकम् । क्ली । कर्कटीभेदे । फलशाकवि-

श्टे। ঝিঙা গাছ। खटर, झिमनीति पाश्चात्ये। गुणाः—तिक्तं मधुरम् आमवातमन्दाग्निकरञ्च। राज.२प.। [ঝিঙে। भा.। वै.निघ.।

झिङ्गिनी (ङ्गी) (ल्ली)। स्त्री। जिङ्गिन्यां।

झिञ्झिनी। स्त्री। जिङ्गिन्याम्। ঝিঙে। वै.निघ.।

झिञ्झिरिण्टिका (ण्टा) (रीटा)। स्त्री स्वनामख्यातक्षुपविशेषे। झिंझिरीटा इति लोके। गुणाः—शीता कषाया रक्तातिसारघ्नी सन्तर्पणी वृष्या बल्या महिषीदुग्धवर्द्धनी च। रा.नि.व.४।

झिण्टिका (ण्टी) (रीटिका)। स्त्री। (Barlaria cristata, or B. Prionitis.) पुष्पवृक्षविशेषे। ঝাঁটী গাছ, কুলঝাঁটী। हिं कटसरैया। सा. गुणाः—कटुकाः तिक्ता दन्तरोगघ्नाः शूलघ्नाः वातकफशोफकासत्वग्दोषशमन्यश्च। रा.नि.व.१०। "सैरेयः कुष्ठवातास्रकफकण्डूविषापहः। तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः॥" भा.। तृणधान्यभेदे। गुणाः श्यामाकवत्। च.सू.२७अ.।

झिल्लिकण्ठः। पुं। पारावते। त्रिका.।

झूनिः। पुं। क्रमुके। গুবাক গাছ। मे.।

झेण्डूः। स्त्री। तन्नामकक्षुपे। रा.नि.व.५।

झोड़ः। पुं। क्रमुकवृक्षे। গুবাক গাছ। भूरिप्र.।

ट

टगरः। पुं। टङ्कणक्षारे। সোহাগা। त्रि। केकराक्षे। मे.।

टङ्कः (कः)। पुं। धरणे. शाणमाने, २४ रक्तिके वा। प.प्र.१ख.। क्ली। नीलकपित्थे। मे.। गुणाः—"शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु।" सु.सू.४६अ.। टङ्कणक्षारे। मे.। ज्व.चि.पञ्चवक्त्ररसे। जङ्घायाम्। हे.च.। राजाम्रे। থাস আম। भा.। रजतमुद्रायाम्। पाषाणदारणे।

टङ्कणः। पुं। टङ्कणक्षारे। সোহাগা। हे.च.। वै.निघ.ज्व.चि.मृतसञ्जीवन्याम्।

टङ्कदेशजः (शीयः)। पुं क्ली। वालुकशाकविशेषे। ঐ নামীয় বেতো। प.मु.।

टङ्कनलः। पुं। शाके। वै.निघ.।

टङ्का। स्त्री। जङ्घायाम्। मे.।

टङ्कानकः। पुं। वृक्षविशेषे। ब्रह्मदारुवृक्षे। তুঁত গাছ। श.च.।

टङ्कारी। स्त्री। स्वनाम्नैव प्रसिद्धे क्षुपविशेषे टेकारीति भाषा। गुणाः—"टङ्कारी वातजित्तिक्ता श्लेष्मघ्नी दीपनी लघुः। शोथोदरव्यथाहन्त्री हिता पीठविसर्पिणाम्॥" भा.।

टङ्कणः (नः)। पुं, क्ली। खनिजोपरसविशेषे। সোহাগা। हिं सं टङ्कणचार। रस.र.ग्रहणीकवाटरसे। स द्विविधः साधारणश्वेतभेदेन। प्रथमगुणाः—अग्निकारी रूक्षः कफघ्नः वातपित्तकृच्च। भा.पू.१भ.धातुव.। कटुः उष्णः कफघ्नः स्थावरादिविषघ्नः कासश्वासघ्नश्च। द्वितीयगुणाः—स्निग्धः कटुरूक्षः वातकफघ्नः आमक्षयहरः श्वासविषकासमलहरश्च। रा नि.व.६। श्लेष्मवातघ्नः क्षाररसः तीक्ष्णः उष्णः अग्निवर्द्धकः रूक्षः भेदकः बलवर्द्धनश्च। "टङ्कणः क्षारमण्टङ्कः सम्यक् क्षारश्च पाचनः। सुभगो मालतीजातो द्रवो लौहविशुद्धिदः॥" तच्छुद्धिः—"आदौ टङ्कणमादाय काञ्जिकासु विनिःक्षिपेत्। एकरात्रात् समुद्धृत्य रौद्रयन्त्रे विभावयेत्। नरमूत्रगतं टङ्कं गवां मूत्रगतं तथा। दिनान्ते तत्समुद्धृत्य जम्बीराम्बुगतं ततः। जम्बीराम्लात्समुद्धृत्य नारिकेलस्य पात्रके। मरीचचूर्णसंयुक्तं चालयेच्छीतलाम्बुना॥" र.सा.सं.।

टङ्काणः (कः)। पुं। वृक्षविशेषे। তুন গাছ। श.र.।

टङ्गिणी। स्त्री। पाठायाम्। श.च.। [त्रिका.।

टट्टनी। स्त्री। गृहगोधिकायाम्। টিকটিকি।

टण्टुकः। पुं। पीतलोध्रे। वै.निघ.।

टलनम्। क्ली। हृद्रोगे। वै.निघ.।

टारः। पुं। अश्वे। हे.च.।

टिटि(ट्टि)भः (कः) । पुं । पक्षिविशेषे । তিতির পাখী । অ.টী. । [भा. ।

टिप्टिनिका (नी) । स्त्री । जलशिरीषे ।

टिण्टुकः । पुं । श्योणाकवृक्षे । वा.उ.३७अ. । पीतलोध्रे । वै.निघ. । [ढेड़शी । भा. ।

टिण्डिशः । पुं । डिण्डिशे । ঢেঁড়শ । हिं

टीटिभकः । पुं । टिट्टिभपक्षिणि । श.र. ।

टुण्टु(ण्ठु)कः । पुं । श्योणाकवृक्षे । अम. । श्योणाकभेदे । रा.नि.व.२३ । न.द.१२अ. । च.द.माषतैले । स्वर्णलोध्रवृक्षे । সোণালু । वै.निघ. । पक्षिविशेषे । টুন্টুনী পাখী । श.र. । कृष्णखदिरे । श.च. । [क्षिणीवृक्षे । श.च. ।

टुण्टुका । स्त्री । पाठायाम् । आकनादि । ट-

टुनाका । स्त्री । तालमूल्याम् । श.च. ।

टेन्टुकः । पुं । श्योणाकवृक्षे । শোণা, সোণালু । वैद्यकम् । [श.र. ।

टेरः (कः) । त्रि । काणे । वक्रनेत्रे । ঢেরা ।

टोलाफलः । पुं । मधूकवृक्षे । वै.निघ. ।

ठ

ठः । पुं । शिवे ।

ठक्कदेशीयः । पुं । वास्तूके । त्रिका. ।

ड

डङ्ग(ङ्गा)रिः (री) । स्त्री । फलशाकलताविशेषे । ঢেঁপা, চিচিঙ্গা । मं डांगर । कं डंगर । गुणाः—शीतला रुच्या वातपित्तरक्तदोषघ्नी शोषघ्नी जाड्यमूत्ररोधहरी तर्पणी गौल्या । बालफलगुणाः—सुमधुरं शीतलं पित्तघ्नं तृष्णादाहघ्नं रुच्यं सन्तर्पणं पुष्टिकरं वीर्य्यवृद्धिकरं बलकरं श्रमघ्नं श्रमहरं । पक्वं तत् गुरु तृष्णादाहरक्तञ्च कुरुते । रा.नि.व.७ । See चिचिण्डः ।

डण्डमत्स्यः । पुं । मत्स्यविशेषे । দাঁড়িকা মাছ । वै.निघ. । [कारयन्त्रविशेषे ।

डमरुयन्त्रम् । क्ली । औषधपाकार्थं डमरुका-

डल्लकम् । क्ली । वंशनिर्म्मितपात्रे । ডালা ।

डल्वणः । पुं । निबन्धसंग्रहकारे ।

डहुः (हूः) । पुं । लकुचवृक्षे । ডেহুয়া কল, ডেলো মান্দার । श.र. । फलगुणाः—गुरु विष्टम्भि त्रिदोषशुक्रदोषकरञ्च । राज. ।

डाङ्गरः (री) । पुं, स्त्री । अलाबूविशेषे । वै.निघ. । डङ्गरीफले । ঢেঁপা । रा.नि.व.७ ।

डालिमः । पुं । दालिम्बवृक्षे । দাড়িম গাছ । अ.टी.भ. । [लूहपक्षिणि । जटा. ।

डाहुकः । पुं । हरिणविशेषे । वै.निघ. । दा-

डिडि(ण्डि)माणकः । पुं । प्रतुदपक्षिजातौ । सु.सू.४६अ. । च.सू.२७अ. ।

डिण्डः (ण्डिकः) पुं । रक्तैरण्डे । वै.निघ. ।

डिण्डिमः । पुं । करञ्जवृक्षे । वै.निघ. ।

डिण्डि(ण्डी)रः । पुं । समुद्रफेने । हे.च. । नकुल.१३अ. ।

डिण्डिशः । पुं । फलशाकविशेषे । ঢেঁড়শ । मं ढेड़शफल । वै निघ.२भ.अतिसा.पथ्य. । गुणाः—रुचिकृत् भेदनः पित्तश्लेष्मघ्नः शीतलो वातलः मूत्रलः अश्मरीहरो रुच्यश्च । भा.पू.१भ.शाकव. ।

डिण्डीरमोदकम् । क्ली । गृञ्जने । গাজর । रा.नि.व.७ । लशुने । रक्तमूलके । वै.निघ. ।

डितिका । स्त्री । बालरोगे । वै.निघ. ।

डिम्बः (म्भः) । पुं । शिशौ । रा.नि.व.१८ । उदररोगे । मूत्राशये । गर्भाशये । वै.निघ. । क्ली । फुस्फुसे । हारा. । अण्डे । प्लीह्नि । পিলে । मे. ।

डिम्बिका । स्त्री । जलमक्षिकायां । वै.निघ. । श्योणाकवृक्षे । कामुकायाम् । श.र. ।

डिम्भा । स्त्री । अतिबालिकायां । रा.नि.व.१८ ।

डुङ्गरी । स्त्री । अलाबूभेदे । ঢেঁড়শ । वै.निघ. ।

डुण्डु: । पुं । द्विमुखसर्पे । त्रिका. ।

डुण्डुभ: । पुं। जलसर्पे । ढोंड़ा साप । अम.।

डुण्डुल: । पुं । क्षुद्रपेचके । रा.नि.व.१९ ।

डुन्दुक: । पुं । हरिणभेदे । पक्षिभेदे । डाक पाखी । वै.निघ. ।

डुलि: । स्त्री । कच्छप्याम् । अम. । [जटा. ।

डुलिका । स्त्री । खञ्जरीटाकारपक्षिविशेषे ।

डुली । स्त्री । चिल्लीशाके । रा.नि.व.७ ।

डोड़ी । स्त्री । जीवन्तीक्षुपे । गुणा:—मलबद्ध-करी वातला रुच्या दुर्ज्जरा च । राज. ।

डोड़ि(ण्डि)का । स्त्री । फलशाकविशेषे । हिं करेरुका । मं हरणदोड़ी । गुणा:—पुष्टि-करी रुच्या दीपनी लघु: पित्तकफार्शोघ्नी क्रमिगु-ल्मघ्नी च । भा.पू.१भ.शाकव. ।

डोरड़ी । स्त्री । वृहत्याम् । रा.नि.व.४ ।

डोलाफलम् । क्ली । फलविशेषे । वै.निघ.२ भ.वा.व्या. ।

ढ

ढक्क: । पुं । अभिलाषे । वै.निघ. ।

ढङ्कणम् । क्ली । शैवाले । वै.निघ. ।

ढ(ढा)मरा । स्त्री । हंसे ।

ढिण्ढिणिका (णी) । स्त्री । जलशिरीषे । वै.निघ. ।

ढोलसमुद्रिका । स्त्री। ढोलसमुद्र इति ख्या-ते वृक्षविशेषे । सा कीटादिविषहरी । अचि. ।

त

तक्किलम् (ला) । क्ली, स्त्री । औषधे । वै. निघ. । उणा. ।

तक्कोलम् । क्ली। कक्कोले । काँकला । वै.निघ.।

तक्रम् । क्ली । पादजलघोले । र.मा. । प.प्र.३ ख. । रा.नि.व.१५ । घोलसामान्ये । घोल । तक्रं चतुर्विधं मस्तुमथितोदश्विद्घोलभेदेन । छच्छिका चे-ति पञ्च । तेषां नामगुणा:—"ससरं निर्ज्जलं घोलं मथितं त्वसरोदकं । तक्रं पादजलम्प्रोक्तमुदश्विद-र्द्धवारिकं । छच्छिका सरहीनं स्यादच्छा प्रचुरवारि-का ॥" तक्रगुणा:—"तक्रं त्रिदोषशमनं रुचि दीपनीयं रुच्यं वमिश्रमहरं क्लमहारि मस्तु । वर्ण-प्रदं पवननाशमुदश्विदाख्यं शस्तं कफश्रमहरं शमनेषु घोलम् । अम्लेन वातं मधुरेण पित्तं कफं कषायेण निहन्ति सद्य: । आमातिसारे च विसूचिकायां वातज्वरे पाण्डुषु कामलेषु । प्रमेहगुल्मोदरवातशूले नित्यं पिबेत्तक्रमरोचके च ॥ शीतकालेऽग्निमान्द्ये च कफे पाण्ड्वामयेषु च । मार्गोपरोधे कुष्ठादिव्या-धौ तक्रं प्रशस्यते । वातोदरी पिबेत्तक्रं पिप्पली-लवणान्वितं । शर्करामरिचोपेतं स्वादु पित्तोदरी पिबेत् । जवानीसैन्धवाजाजीव्योषयुक्तं कफोदरे । सन्निपातोदरे तक्रं त्रिकटु क्षारसैन्धवम् ॥ इति त-क्रसेवनस्थानम् । तक्रं दद्यान्न क्षते नोष्णकाले नो दौर्ब्बल्ये नो तृषामूर्च्छिते च । नैव भ्रान्तौ नैव पित्तास्रदोषे नैतद्दद्यात् सूतिकायां विशेषात् ॥" इति वर्ज्यस्थानम् । "तक्रं स्नेहान्वितं तुन्दनिद्राजा-ड्यप्रदं गुरु । अर्द्धावशिष्टं सामान्यं नि:शेषं लघु पथ्यदम् ॥" रा.नि.व.१५ । "समुद्धृतघृतं तक्रं पथ्यं लघु विशेषत: । बल्यं स्तोकोद्धृतघृतं गुरु वृष्यं क-फावहम्। अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम्॥" इति उद्धृतानुद्धृतस्वल्पोद्धृतघृततक्रगुणा: । आमप-क्वतक्रगुणा:—"तक्रमामङ्कफङ्कोष्ठे हन्ति कण्ठे क-रोति च । पीनसश्वासकासादौ पक्वमेव प्रयुज्यते॥" गव्यादितक्रविशिष्टगुणा:—"यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत् ।" भा. ।

तक्रकूर्चिका (र्ची) । स्त्री । दुग्धविकारवि-शेषे । छाना । गुणा:—ग्राहिणी वातला रुच्या दुर्ज्जरा च । सु.सू.४५अ.दधिव. । "तक्रेण पक्वं य-त्क्षीरं सा भवेत्तक्रकूर्चिका ।" प.प्र.३ख. ।

तक्रजननी । स्त्री । घोले । वै.निघ. ।

तक्रजन्म । क्ली । दधनि । वै.निघ. ।

तक्रपर्य्याया । स्त्री । तक्राह्वये । रा.नि.व.४ ।

तक्रपिण्डः (ण्डिका) । पुं, स्त्री । तक्रकूर्च्चिकायाम् । छाना । नष्टदधिपिण्डे । नट् दुध इति देशभेदे । लक्षणं यथा—"दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा । द्रवभावेन रहितं तक्रपिण्डः स उच्यते ॥" गुणाः—वृष्यः बृंहणः बलवर्द्धनश्च । भा. ।

तक्रभक्षा । स्त्री । तक्रायाम् । रा.नि.व.४ ।

तक्रभित् । पुं । कपित्थवृक्षे । वै.निघ. ।

तक्रमांसम् । क्ली । यवनदेशप्रसिद्धव्यञ्जनविशेषे । 'एस्नी' इति पारस्यभाषा । तत्साधनविधिः—"पाकपात्रे घृतं दत्त्वा हरिद्राहिङ्गु भर्ज्जयेत् । छागादेः सकलस्यापि खण्डान्यष्टौ च भर्ज्जयेत् । सिद्धयोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा । जीरकादियुते तक्रे मांसखण्डानि धारयेत् ॥" गुणाः—"तक्रमांसन्तु वातघ्नं लघु रुच्यं बलप्रदं । कफघ्नं पित्तलञ्चैवसर्व्वाहारस्य पाचनम् ॥" भा. ।

तक्रा । स्त्री । स्वनामख्यातक्षुपे । गुणाः—कटुः क्रिमिघ्नी व्रणघ्नी च । रा.नि.व.४ ।

तक्रारिष्टम् । क्ली । यहणयामरिष्टौषधम् । "यमानी आमलकं हरीतकी मरिचानि प्र. त्रिपलांशकानि पञ्चलवणानि पलांशानि एकत्र चूर्णयित्वा तक्राढ़कयुतानि तक्रारिष्टं भवति ।" च.द. ।

तक्राह्वा । स्त्री । तक्राह्वये । रा.नि.व.४ ।

तगर(पादिक)म् । क्ली, पुं । (Tabernaemontana coronaria.) जलजातद्रव्यक्षुपे । তগরপাদুকা, শিউলি ঝোপ । हिं तगरचण्डी । तैं नन्दिवर्द्धनचेट्टु, गंधितगरपुचेट्टु । उत्. पाणिफलरा । तच्च द्विविधं तगरं पिण्डीतगरञ्च । पिण्डीतगरं कोङ्कणदेशे प्रसिद्धम् । गुणाः—उष्णं स्निग्धं स्वादु लघु विषापस्मारमूर्द्धाक्षिरोगविदोषघ्नञ्च । शीतलं तिक्तं दृष्टिदोषघ्नं पथ्यञ्च । रा.नि.व.१० । तगराभावे कुष्ठं ग्राह्यम् । च.सू.४ अ. । च.द.एलादितैले । वा.सू.१५अ. । बाहुल्यक्षुपे । मदनवृक्षे । रा.नि.व.४।८ । पुष्पवृक्षविशेषे । টগর গাছ । श.र. ।

तन्वी । स्त्री । हिङ्गुपत्र्याम् । रा.नि.व.६ ।

तड़ाकः (गः) । पुं, क्ली । पुरुषकृतसरोवरे । श.र. । तल्लक्षणं—"प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः । जलाशयस्तडागः स्यात् ताड़ागं तज्जलं स्मृतम् ॥" भा. । जलं स्वादु कषायं वातकरञ्च । रा.नि.व.१४ । पाके कटु शीतलं हेमन्ते प्रशस्तञ्च । राज. । यन्त्रकूटके । मे. । [कटु । प.मु. ।

तड़ागजः । पुं । कालकोठे । কোমরভোগ

तड़िद्वान् । पुं । मुस्तके । मूता । अम. ।

तण्डकः । पुं । फेने । खञ्जनपक्षिणि । मे. । रोगे । वै.निघ. । [तण्डुलजले । मे. ।

तण्डुरीणः । पुं । कीटसामान्ये । वै.निघ. ।

तण्डु(न्दु)लः (कः) । पुं । तण्डुलीयशाके । কাঁটানটে । श.र.। भा.म.४भ.प्रद.चि.। विडङ्गे । मे. । (Oryza sativa.) Rice. धान्यनिकरे । চাল । हिं चावल । मं तान्दुल । तैं बियम । गु. चोखा । द्रा. चम्पीयल । ता. अविशि । गुणाः—मेहघ्नः क्रिमिघ्नः । नवः सोऽतिदुर्ज्जरश्च । भा. । भृष्टं तत् सुस्निग्धं कफघ्नं रुच्यं पित्तकरञ्च । राज. । अष्टसर्षपमितमाने । च.कल्प.१२अ. ।

तण्डु(न्दु)लधावनम् । क्ली । तण्डुलोदके । চেলুনি জল । रा.नि.व.१५ । वै.निघ. ।

तण्डु(न्दु)ला । स्त्री । विडङ्गायाम् । रा.नि.व.६ । महासमङ्गायाम् । [व.१५ ।

तण्डु(न्दु)लाम्बु । क्ली । तण्डुलोदके । रा.नि.

तण्डु(न्दु)ली । स्त्री । तण्डुलीयशाके । চাঁপা নটিয়া । रा.नि.व.५ । यवतिक्तायाम् । यवेची इति लोके । रा.नि.व.३ । शशाण्डुलीकर्कट्याम् । रा.नि.व.७ ।

तण्डु(न्दु)लीयः (कः) । पुं, क्ली । विडङ्गे । मे. । (Amarantus(thus) spinosus or Amblogina polygonoides) Prickly Amaranth. स्वनामख्यातपत्रशाकक्षुपे । वनतण्डुलीयके । কাঁটানটে, গোয়াল নটে, ক্ষুদে নটে । हिं अल्पमरुसा, चवड़ाइ । मं तांदुलिजा । कं किरुकुशाले । द्रा. काण्टेमाट । ता. मुल्लुक्किरइ । गुणाः—शिशिरमधुरविषघ्नः रुचिकृद्दीपनः पित्तदाहश्रमघ्नश्च । रा.नि.व.५ । सृष्टमलमूत्री विषहारकश्च । भा.पू.१भ.शाकव. । रसे मधुरः, वीर्य्ये शीतपाकी मधुरः, प्रभावश्च रक्तपित्त-

विषहरः। च.द.। "मधुरो रसपाकाभ्यां रक्तपित्तमदापहः। तेषां शीततमो रुक्षस्तण्डुलीयो विषापहः॥" सु.सू.४६अ.। तन्मूलगुणाः—"तण्डुलीयकमूलं स्वादुष्णं श्लेष्मविनाशनं। रजोरोधकरं रक्तपित्तप्रदरसंहरम्॥" भ्रचि.। विशेषतः शूलघ्नम्। तच्छाकगुणाः—हिमम् अर्शःपित्तरक्तविषकासघ्नं ग्राहि मधुरं दाहशोषघ्नं रुच्यञ्च। रा.नि.व.७। "स्वादुपाकमसृक्पित्तविषघ्नं तण्डुलीयकम्।" भ्रचि.१६अ.। [ङ्ग। रा.नि.व.६।

तण्डु(न्दु)लीयका । स्त्री। विडङ्गायाम्। वि-

तण्डुलीयदलम् । क्ली। तण्डुलीयशाके। रा.नि.व.७। [কাঁটানটের শিকড়। भ्रचि.।

तण्डुलीयमूलम् । क्ली। तण्डुलीयकजटायां।

तण्डु(न्दु)लीबीजः । पुं। तण्डुलीयशाके। भा.पू.शाकव.।

तण्डुलीयशाकम् । क्ली। शाकभेदे। কাঁটানটিয়ার শাক। रा.नि.व.७। सि.यो.र.पि.चि.।

तण्डुलुः । स्त्री। विडङ्गे। श.र.।

तण्डु(न्दु)लेरः (कः) । पुं। तण्डुलीयशाके। भा.पू.१भ.शाकव.।

तिमिरः (रोगः)। पुं, क्ली। लिङ्गनाशापरनामधेये नेत्ररोगविशेषे। রাতকাণা। हिं नजला। तच्च षड्विधं वातपित्तकफरक्तसंसर्गसन्निपातभेदेन। निदानादि यथा—दोषाश्चतुर्थपटलमाश्रित्य तिमिरमुत्पादयन्ति। तेन साकल्येन दृष्टिरोधो भवति। गाढ़े च तस्मिन् तेजःपदार्थमपि न दृश्यते। "तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः। रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतःपरम्। अस्मिन्नपि तमोभूते नातिरूढ़े महागदे। चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतं। निर्म्मलानि च तेजांसि भ्राजिष्णून्यथ पश्यति॥ शिरानुसारिणि मले प्रथमं पटलं स्थिते। अव्यक्तमीक्षते रूपं व्यक्तमप्यनिमित्ततः। प्राप्ते द्वितीयं पटलमभूतमपि पश्यति। भूतन्तु यत्नादासन्नं दूरे सूक्ष्मञ्च नेक्षते। दूरान्तिकस्थं रूपञ्च विपर्य्यासेन मन्यते। दोषे मण्डलसंस्थाने मण्डलानीव पश्यति। द्विधैकदृष्टिमध्यस्थे बहुधा बहुधास्थिते। दृष्टेरभ्यन्तरगते ह्रस्ववृद्धविपर्य्ययम्। नान्तिकस्थमधःसंस्थे दूरगं नोपरिस्थितं। पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः॥" वातजे यथा—"...वाते तु सङ्कोचयति दृक्शिराः। दृङ्मण्डलं विशन्तो गम्भीरा दृगसौ मता॥" पित्तजे यथा—"पित्तजे तिमिरे विद्युत्खद्योतोद्योतदीपितम्। शिखितित्तिरपिच्छाभं प्रायो नीलञ्च पश्यति॥" कफजे यथा—"कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति। शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम्। रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति। संसर्गसन्निपातेषु विद्यात्सङ्कीर्णलक्षणम्॥" वा.उ.१२अ.। अन्यस्य नेत्ररोगविशेषे। ঝাপ্সা। लक्षणं—"कदाचिद्दीक्षते रूपं कदाचिन्न न वीक्ष्यते। तिमिरं तं विजानीयात् लिङ्गेनानेन बुद्धिमान्॥" ज.द.३०अ.। लौहकिट्टे। ताम्रे। त्रिका.। [चि.विषतिन्दुकतैले।

तिमिरा। स्त्री। हरिद्रायाम्। भैष.वातरक्त-

तिमिरिः। पुं। मत्स्यभेदे। वै.निघ.।

तिमिरी (इन्)। पुं। इन्द्रगोपकीटे। वै.निघ.।

तिमिषः। पुं। कुष्माण्डलतायाम्। কুমড়া গাছ। त्रिका.। ग्राम्यकर्कटिकायाम्। त्रिका.। तरम्बुजलतायाम्, নাটাসে। हारा.।

तिमी । स्त्री । तिमिमत्स्ये । त्रिकाण्डशेषः ।

तिमीरकः । पुं । नखरञ्जकवृक्षे । মেহেদি গাছ । प.मु. ।

तिरश्ची । स्त्री । पशुपक्षिस्त्रियाम् । মাদি ।

तिरिजिह्विकः । पुं । पारिजातवृक्षे । পালিতে । वै.निघ. ।

तिरिटः । पुं । इन्द्रदण्डे । वै.निघ. ।

तिरिटिः । पुं । इन्द्रयष्टौ । श.मा. ।

तिरिणीकण्टः । पुं । पारिजातवृक्षे । পালিতে মান্দার । वै निघ. ।

तिरिमः (रियः) । पुं । शालिधान्यभेदे । गुणाः - मधुरः स्निग्धः शीतलः दाहपित्तघ्नः त्रिदोषघ्नः रुच्यः पथ्यश्च । रा.नि.व.१६ ।

तिरीटः । पुं.क्ली । लोध्रवृक्षे । प.मु. । रा.नि.व.६ । भैष.नेत्ररो.चि. ।

तिरीटकः । पुं । पट्टिकालोध्रे । सि.यो.रक्तार्शः-चि. । भा.म.४भ. । [न्यभेदे । वै.निघ. ।

तिरीपशालिः । पुं । मासत्रयपक्वे शालिधा-

तिर्य्यक् । पुं । चञ्चलधातौ । পারা । पक्षिजातौ । वै.निघ. ।

तिर्य्यक्पातनम् । क्ली । पारदस्य पातनक्रियाविशेषे । तत्साधनविधिः—"घटे रसं विनिःक्षिप्य सजलं घटमन्यकम् । तिर्य्यङ्मुखं द्वयोः कृत्वा तन्मुखं रोधयेत् सुधीः । रसाधो ज्वालयेदग्निं यावत् सूतो जलं विशेत् । तिर्य्यक्पातनमित्युक्तं सिद्धैर्नागार्जुनादिभिः ॥" र.सा.सं. ।

तिर्य्यक्फला । स्त्री । जतुकालतायाम् । আঁতমোড়া । रा.नि.व.१ । [See भद्रम् ।

तिर्य्यक्चिस्नम् । क्ली । अस्थिभङ्गविशेषे ।

तिर्य्यग्गतः । त्रि । सन्धिस्थानं त्यक्त्वा वक्रं गते । भा.म.२भ.भग्न.चि. ।

तिर्य्यग्गा । स्त्री । पूतनीशाके । पूदिना । प.मु. ।

तिर्य्यग्गामी (इन्) । पुं । कर्कटे । वै.निघ. ।

तिर्य्यग्यन्त्रम् । क्ली । पारदस्य तिर्य्यक्पातनार्थं यन्त्रविशेषे । "अधःपाते लघौभाण्डे विभागजलपूरिते । तीव्रमन्यद्भाण्डस्य तन्नाण्डञ्चोर्द्धवि- स्तृतं । विपेटं ज्वालयेदग्निं तस्योपरि च गोमयैः । तिर्य्यक्कृतश्च तद्यन्त्रं तिर्य्यग्यन्त्रमुदीरितम् ॥" रस.चि. ।

तिर्य्यग्यवोदरम् । क्ली । यवधान्ये । वै.निघ. ।

तिर्य्यग्यानः । पुं । कर्कटे । त्रिका. ।

तिलः (कः) । पुं, क्ली । (Sesamum Indicum.) स्वनामख्यातक्षुपे । তিল গাছ । प.मु. । हिं मिठातिल । मं तिल । कं एलु । तें नुव्वुलु, मञ्चिनूने नुव्वुलु । ता. वाल्लिन्नेय । फा. कुञ्जद । दा. वारिक तिल । श्वेतकृष्णरक्तवन्यभेदेन चतुर्धा । सा.गुणाः—स्निग्धः वर्णबलाग्निवृद्धिकरः स्तन्यघ्नः वातघ्नः गुरुः उष्णः पित्तकरः मूत्राल्पकरः व्रणे हितः पथ्यः । संग्राही मधुरः कषायः तिक्तः कटुविपाकः पथ्यतमश्च । इति कृष्णतिलगुणाः । सितः अल्पगुणदः । रा.नि.व.१६ । "कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः । अन्ये हीनतराः प्रोक्तास्तज्ज्ञैः रक्तादयस्तिलाः ॥" भा.पू.१भ.धान्यव. । "तिलो विपाके मधुरो बलिष्ठः स्निग्धो व्रणालेपनपथ्य उक्तः । बल्योऽग्निमेधाजननो वरेण्यो मूत्रस्य दोषाहरणो गुरुश्च । तिलेषु सर्व्वेष्वसितः प्रधानो मध्यः सितो हीनतरास्तथान्ये ॥" अत्रि.१५अ. । तत्क्षारगुणाः—"वातलं कटु तिक्ताम्लमधोमार्गप्रवर्त्तकम् ।" च.सू.२७अ. । (कः) लोध्रवृक्षे । লোধ গাছ । रा.नि.व.६ । मरुवकवृक्षे । মরুয়া ফুলের গাছ । गुणाः—मधुरः शीतः वातपित्तकफघ्नः बलपुष्टिकरः हृद्यः लघुः मेदोवृद्धिकरश्च । रा.नि.व.१० । कटुपाकः उष्णः रसायनः कफकुष्ठक्रिमिघ्नः वस्तिदन्तमुखरोगघ्नश्च । भा. । केतकीवृक्षे । गुडूच्याम् । सुषव्याम् । উচ্ছে । रा.नि.व.२३ । मूत्राशये । अन्त्रविशेषे । मे. । तिलकालकरोगे । अम. । (कम्) क्ली । सौवर्च्चललवणे । रा.नि.व.६ । कान्तलौहे । गुड़े । कृष्णतिले । वै.निघ. । मस्तिष्के । क्लोम्नि । रा.नि.व.१८ । कृष्णसौवर्च्चललवणे । काचलवणे । चित्रके । त्रिका. । [वै.निघ. ।

तिलकटः । पुं । तिलपुष्परेणौ । तिलचूर्णे ।

तिलकणः । पुं । मार्ज्जिततिले । মাজা তিল । च.सू.४अ. ।

तिलकल्कः । स्त्री । तिलवल्कले । তিলের

छाल। गुणाः—कषाया उष्णा पुंस्त्वघ्नी दन्तदोषहरी क्रमिशोफव्रणघ्नी रक्तदोषघ्नी। रा.नि.व.१०।

तिलकन्दः। पुं। त्रिपर्णीकन्दे। रा.नि.व.७।

तिलकल्कः (जः)। पुं, क्ली। पीड़िततिलपिण्याके। তিলের খোল। रा.नि.व.१६।

तिलकालकः। पुं। क्षुद्ररोगभेदे। তিল। लक्षणं—"कृष्णानि तिलमात्राणि नीरुजानि समानि च। वातपित्तकफोद्रेकात्तान् विद्यात्तिलकालकान्॥" मा.नि.। शूकरोगभेदे। "कृष्णानि चित्राण्यथवा शूकानि सविषाणि च। पातितानि पचन्त्याशु मेढ्रं निरवशेषतः॥ कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः। सन्निपातसमुत्थानं तं विद्यात्तिलकालकम्॥" सु.नि.१४अ.।

तिलकाश्रयः। पुं। ललाटे। ললাট। शब्दार्थकल्पतरुः।

तिलकिट्टम्। क्ली। तिलकल्के। তিলের খইল। गुणाः—लेखनं रूक्षं विष्टम्भि दृष्टिदोषकरञ्च। भा.पू.१भ.।

तिलकी (इन्)। त्रि। तिलकालकयुक्ते।

तिलचित्रपत्रकः। पुं। तैलकन्दनामककन्दशाके। रा.नि.व.७।

तिलचूर्णम्। क्ली। तिलकल्के। তিলকুটো। गुणाः—मधुरं रूच्यं रक्तपित्तबलपुष्टिकरञ्च। रा.नि.व.१६।

तिलच्छकः। पुं। ईहामृगे। वै.निघ.।

तिलजम्। क्ली। तैले। वै.निघ.।

तिलजटा। स्त्री। तिलमञ्जर्य्याम्। दुग्धेनैतत्क्वाथः आखुविषहरः। वा.उ.३८अ.।

तिलजा। स्त्री। तिलवासिनीशालौ। হৈমন্তিকধান্য বিশেষ। रा.नि.व.१६।

तिलतण्डुलकम्। क्ली। आलिङ्गने। श.मा.।

तिलतैलम्। क्ली। तिलभवतैले। তিলের তেল। गुणाः—तीक्ष्णं त्वग्दोषहृत् चक्षुष्यं सूक्ष्मोष्णं कफकृत् बद्धविटकं क्रमिघ्नं स्रोतःशोधकं कृशस्य धातुपुष्टिकरञ्च। वा.तैलव.। केश्यं मधुरं तिक्तं कषायम् उष्णं तीक्ष्णं बल्यं कफवातजन्तुखर्जूव्रणकण्डूतिहरं कान्तिकरञ्च। रा.नि.व.१५। "कषायानुरसं स्वादु सूक्ष्ममुष्णं व्यवायि च। पित्तकृद्वातश्लेष्मरोगादिवर्द्धनं। अल्पं रुचिकरं मेध्यं कण्डूकुष्ठविकारनुत्। वृष्यं श्रमापहं ज्ञेयं तिलतैलं विदुर्बुधाः। छिन्ने भिन्ने च्युते दृष्टे भग्नेऽग्निदाहके,पि च। वाताभिष्यन्दिस्फुटने चाभ्यङ्गे तिलतैलकम्। विषे व्यालमुनः सर्पे सेकेऽभ्यङ्गावगाहने। पाने वस्तौ बलासे च तिलतैलं विधीयते। तिलतैलं विधेयं स्यात् सर्व्वरोगनिवारणे॥" अत्रि.१४अ.।

तिलनामा। स्त्री। तिलवासिनीशालौ। रा.नि.व.१६।

तिलनालभूतिः। स्त्री। तिलनालक्षारे। তিলের ক্ষার। गुणः—अश्मरीघ्नः। च द.अश्म.चि.। [व.१६।

तिलनी। स्त्री। तिलवासिनीशालौ। रा.नि.

तिलपर्णः। पुं, क्ली। श्रीवेष्टे। দেবদারুনির্যাস। रा.नि.व.१२।

तिलपर्ण(क)म्। क्ली। रक्तचन्दने। भा.। श्रीखण्डचन्दने। শ্বেতচন্দন। रा.नि.व.१२।

तिलपर्णिका। स्त्री। श्रीखण्डचन्दने, श्रीवेष्टके। अजगन्धायाम्। রাস্লা। रा.नि.व.२३। रक्तचन्दनवृक्षे। हे.च.।

तिलपर्णी। स्त्री। रक्तचन्दने। प.मु.। वै.निघ.२भ.ज्व.भैरवीगुड्याम्। तिलवासिनीशालौ। रा.नि.व.१६। "तिलीनी"नामकशाकभेदे। र.मा.सं.रसमारणे। गुणाः—लघुः कफशोथहरी च। सु.सू.४६अ.। चन्दने। वै.निघ.।

तिलपिच्चटम्। क्ली। तिलपिष्टके। তিলকুটো। कश्चित्।

तिलपिञ्जः। पुं। श्वेततिलवृक्षे। শাদা তিল। निष्फलतिलवृक्षे। अम.। वन्यतिले। কাটতিল। वै.निघ.। [ल। प.मु.।

तिलपिण्डी। स्त्री। तिलकल्के। তিল খই-

तिलपिष्टकम्। क्ली। पललै, कुट्टिततिलकृतपिष्टके। তিলকুটো, তিলে সন্দেশ। गुणाः—"पललन्तु समाख्यातं सैचवं तिलपिष्टकम्। पललं मलकृद्बल्यं वातघ्नं कफपित्तकृत्। बृंहणं गुरु वृष्यञ्च स्निग्धं मूत्रनिवर्त्तकम्॥" भा.।

तिलपुष्पकः। पुं। विभीतकवृक्षे। वै.निघ.।

तिलपेजः । पुं । तिलपिञ्जे । শ্বেত তিল, নিষ্ফল তিল । वै.निघ. । [नि.व.१० ।

तिलभाविनी । स्त्री । जातीपुष्पवृक्षे । रा.

तिलभेदः । पुं । खाखसवृक्षे । পোস্ত গাছ । वै.निघ. । [त्रिका. ।

तिलमयूरः । पुं । पक्षिभेदे । তিলে ময়ূর ।

तिलमोदकः । पुं । तिललड्डुके । वै.निघ. ।

तिलरसः । पुं । तिलतैले । वै.निघ. ।

तिलवासिनी (सी) । स्त्री,पुं । स्वनामख्यातसुगन्धिधान्यविशेषे । হৈমন্তিক ধান্যবিশেষ । गुणाः – पित्तकफघ्नी स्निग्धा कासश्वासहरा शीघ्रपाककारी लघुः हृद्या शुक्रवर्द्धना महागुणा पाण्डुशूलामवातेषु प्रशस्ता च । रा.नि.व.१६ ।

तिलशालिः । पुं, स्त्री । तिलवासिशाली । रा.नि व.१६ । [प.मु. ।

तिलशाणा । स्त्री । कृषरायाम् । খিচুড়ি ।

तिलसम्भवम् । क्ली । तैले । वै.निघ. ।

तिलस्नेहः । पुं । तिलतैले । (शब्दकल्पतरुः) ।

तिलाङ्कितदलः । पुं । तैलकन्दे । रा.नि. व.७ ।

तिलापत्त्या । स्त्री । कृष्णजीरके । श.च. ।

तिलित्सः । पुं । गोनाससर्पे । अम. ।

तिलौदनम् । क्ली । तिलान्ने । हारा. ।

तिल्यम् । क्ली । तिलक्षेत्रे । रा.नि.व.२ ।

तिल्वः (ल्वः) (कः) । पुं । मरुवकवृक्षे । মরুয়া ফুলের গাছ । र.मा. । रोध्रवृक्षे । अम. । श्वेतरोध्रे । रक्तरोध्रे । अ.टी.सभूति.स्वा. । रोध्राकारे वृहत्पत्रे रक्तवैरेचनिकवृक्षे । सु.सू.३८अ. श्यामादिः ष. । वा.सू.१५अ. । स्वल्परोध्रे । सु.सू. ३९अ. । अधःसंशमने । इङ्गुदीवृक्षे । वै.निघ.विषमज्व.कोलादिघृते ।

तिल्वकतरुः । पुं । लोध्रवृक्षे । वै.निघ. ।

तिल्वनी । स्त्री । कर्णस्फोटायाम् । কাণছিড়া । वै.निघ. ।

तिष्यः (कः) । पुं । पौषमासे । श.र. । आमलकवृक्षे । असनवृक्षे । वै.निघ. ।

तिष्यपुष्पा (फला) । स्त्री । आमलकीवृक्षे । श.च. । अम. ।

तिष्या । स्त्री । आमलकीवृक्षे । श.र. ।

तिस्रा । स्त्री । शङ्खपुष्पीलतायाम् । वै.निघ. ।

तिहा(न्) । पुं । तण्डुले । त्रि । रोगिणि । उणा. ।

तीरः । पुं, क्ली । वङ्गे । मे. ।

तीरणः । पुं । करञ्जिकायाम् । वै.निघ. ।

तीर्णपदी । स्त्री । मुषलीकन्दे । তালমূলী । श.च. ।

तीर्थम् । क्ली । स्त्रीरजसि । मे. । योनौ । हे. च. । अग्नौ । निदाने । उणा. । स्त्री । कदलीवृक्षे । रा.नि.व.११ ।

तीर्थवाकः । पुं । केशे । हे.च. । [व.१६ ।

तीर्थसेवी (इन्) । पुं । वकपक्षिणि । रा.नि.

तीव्रम् । क्ली । लौहे । तीक्ष्णलौहे । रा.नि.व. १३ । वङ्गे । उणा. । त्रि । तीक्ष्णे । कटुनि । त्रिका. । [বুনো ওল । रा.नि.व.७ ।

तीव्रकन्दः । पुं । शूरणे । ওল । कटुशूरणे ।

तीव्रगन्धा । स्त्री । यमान्याम् । रा.नि.व.६ ।

तीव्रज्वाला । स्त्री । धातकीवृक्षे । रा.नि.व.६ ।

तीव्रवेदना । स्त्री । अतिवेदनायाम् ।

तीव्रसन्तापः । पुं । श्येनपक्षिणि । বাজ পাখী । वै.निघ. ।

तीव्रा । स्त्री । महाज्योतिष्मतीलतायाम् । বড় লতাফট্কী । तरटीवृक्षे । तुलसीवृक्षे । रा.नि. व.६।८।१० । धातकीवृक्षे । पाण्डुशिंशपायाम् । वै. निघ. । गण्डदूर्व्वायाम् । राजिकायाम् । রাই । कटुकायाम् । मे. ।

तीक्ष्णः । पुं । कृष्णसर्षपे । विषे । अम. । तिक्तायाम् । यवक्षारे । चाणक्यमूलके । रेचनधूमपानविशेषे । तत्र धूमनाड़ी २४अङ्गुलयः,धूपद्रव्याणि च तीक्ष्णानि भाव्यानि । शल्लकीवृक्षे । श्वेतशिग्रौ । किङ्किण्यां श्वेतमरुवके । कृष्णशिंशपायां । पुंरोगे । वै.निघ. । सितदर्भे । कुन्दुरौ । কুন্দুরুখোটী । रा.नि.व.८।१२ । क्ली । मृत्तिकालवणे । तीक्ष्णवस्तुनि । हीरकादौ । खर्परधातौ । वै.निघ. । लव-

ङ्गे । लौहे । प.मु.। तीक्ष्णलौहे । र.मा. । लवणे । मुष्कके । मे. । मरिचे । वै.निघ.२भ.भतिसा.चि. देवदार्व्यादिः । चविकायां । रा.नि.व.६। मूलके । अम. । त्रि । तीव्रगुणभूयिष्ठे । तदाश्रयद्रव्यं पित्तकरं वातकफघ्नं लेखनञ्च । सु. । [नि.व.१६ ।

तीक्ष्णकः । पुं । सिद्धार्थे । শ্বেত সরিষা । रा.

तीक्ष्णकण्टः (कः) । पुं । यासवृपे । क्षुद्र দুরালভা । रा.नि.व.४। इङ्गुदीवृचे । करीरवृचे । वर्वूरकवृचे । रा.नि.व.८ । धुस्तूरवृचे । जटा. । स्नुहीवृचे । वै.निघ. । क्ली । धुस्तूरफले ।

तीक्ष्णकण्टका । स्त्री । कन्थारीवृचे । रा.नि. व.८ । फणवज्रीवृचे । ফণিমনসা । वै.निघं. ।

तीक्ष्णकन्दः । पुं । पलाण्डौ । रा.नि.व.७ ।

तीक्ष्णकल्कः । पुं । रेचनाख्यधूमपानकल्के । स च चूर्णणादिः । भा. । कुस्तुम्बुरुवृचे । তাম্বুল ফল, নেপালি ধনে । रा.नि.व.६ ।

तीक्ष्णकीलः (कः) । पुं । अकर्करे । शुक्लमदनवृचे । वै.निघ. ।

तीक्ष्णगन्धः (कः) । पुं । पलाण्डौ । भैरवीवचायां । शोभाञ्जनवृचे । गन्धतुलस्यां । प.मु. । चवकवृचे । ঠেঁচেতা । रा.नि.व.९ । कृष्णशिग्रौ । एलायां । कृष्णार्ज्जके । फणिज्झकवृचे । वै. निघ. । कुन्दुरुखोटी । शब्दार्णवः । महाराजप्रसा.तैले ।

तीक्ष्णगन्धा । स्त्री । सूक्ष्मैलायां । र.मा. । श्वेतवचायां । कन्थारिवृचे । रक्तसर्षपे । রাই । रा. नि.व.६।८।१६ । वचायां । मे.। भा.म.४भ.चुद्ररो. चि.। जीवन्त्याम् । श.च. । श्वेतजीरके । वै.निघ.।

तीक्ष्णगन्धोग्रा । स्त्री । शुक्लवचायां। वै.निघ.।

तीक्ष्णगुणकर्म्म । क्ली । तीक्ष्णद्रव्यगुणक्रियायाम् । तत् दाहपाककरं स्रावणं मृदु च । सु. ।

तीक्ष्णतण्डुला । स्त्री । पिप्पल्याम् । प.मु. । रा.नि.व.६ । भा.पू.१भ. ।

तीक्ष्णतरुः । पुं । पीलुवृचे । वै.निघ. ।

तीक्ष्णतैलम् । क्ली । मद्ये । सर्जरसे । स्नुहीचीरे । श.र. । ज्योतिष्मतीतैले । লতাফট্‌কীর তৈল । रस.र. ।

तीक्ष्णत्वक् । पुं । तुम्बुरौ । নেপালি ধনে । वै.निघ. ।

तीक्ष्णदंष्ट्रः (कः) । पुं । व्याघ्रे, चित्रकव्याघ्रे । रा नि व.१९ । [लवृचे । वै.निघ. ।

तीक्ष्णदग्धा । स्त्री । कोङ्कणे ख्याते यावना-

तीक्ष्णद्रुः । पुं । पीलुवृचे । वै.निघ. ।

तीक्ष्णपत्रः । पुं । कुमरिचे । লঙ্কামরিচ । प मु. । तुम्बुरुवृचे । रा.नि.व.११ । रक्तोचौ । इङ्गुदीवृचे । वै.निघ. ।

तीक्ष्णपुष्पम् (ष्पा) । क्ली,स्त्री । लवङ्गे । रा. नि.व.१२ । (ष्पा) श्वेतकेतकीवृचे । रा.नि.व.१०।

तीक्ष्णप्रियः । पुं । यवे । वै.निघ. ।

तीक्ष्णफलः । पुं । तुम्बुरुवृचे । रा.नि.व.११। क्ली । तेजःफले । वै.निघ. ।

तीक्ष्णफला । स्त्री । राजसर्षपे । কাল সরিষা । रा.नि.व.१६ ।

तीक्ष्णमञ्जरी । स्त्री । नागवल्लीलतायाम् । পানের গাছ । वै.निघ. ।

तीक्ष्णमूलः । पुं । कुलञ्जनवृचे । रा.नि.व.६। शिग्रुवृचे । সজিনে গাছ । रा.नि.व.७ ।

तीक्ष्णरसः । पुं । यवचारे । र.मा. ।

तीक्ष्णलौहम् । क्ली । कान्तलौहे । इस्पात, विदरीति भाषा । गुणाः—रुचम् उष्णं तिक्तं वातपित्तकफप्रमेहपाण्डुशूलघ्नं सुखाधिकगुणञ्च। रा. नि.व.१३ ।

तीक्ष्णवल्कः । पुं । तुम्बुरुवृचे । रा.नि.व.११।

तीक्ष्णवृचः । पुं । पीलुवृचे । वा.टी.हेमा., अरुणश्च । सू.१५अ.श्यामादिः ।

तीक्ष्णशूकः । पुं । यवे । प.मु.। रा.नि.व.१६।

तीक्ष्णसारः । पुं । मधूकवृचे। মউল গাছ। कृष्णशिंशपायाम् । घण्टापाटलायाम् । ঘণ্টাপারুল । लौहे । वै.निघ. । स्त्री । कृष्णशिंशपायां । কাল শিশু বা অগুরু । रा.नि.व.९ ।

तीक्ष्णा । स्त्री । अत्यम्लपर्ण्याम् । वचायाम् । सर्पकङ्कालिकालतायाम् । प.मु. । चविकायाम् । रा.नि.व.६ । महाज्योतिष्मतीलतायाम् । লতাফ-

ष्टकी । कपिकच्छौ । आलाकुशी । रा.नि.व.३ । शिशिम्बाम् । ষেঁচেতা । वै.निघ. ।

तीक्ष्णाग्निः । पुं । जाठराग्न्यन्यतमे अग्नौ । পাচক অগ্নিবিশেষ । "मात्रातिमात्राप्यशिता तीक्ष्णाग्निः पच्यते सुखं । अतएव हि केनापि मन्दतीक्ष्णाग्निरुत्तमः ॥" भा. । See अग्निः ।

तीक्ष्णायसम् । क्ली । तीक्ष्णलौहे । তিখা বা ইস্পাৎ । रा.नि.व.१३ ।

तुका(गा)चीरी । स्त्री । वंशलोचनायाम् । हे.च. । रा.नि.व.६ । च.द.यक्ष्म.चि.सितोपलादिचूर्णे ।

तुगा (क्षा) । स्त्री । वंशलोचनायाम् । বংশলোচন । रा.नि.व.६ । च.द.सि.यो.ख.मे.चि. । वा.सू.१५अ. ।

तुङ्गः । पुं । पुन्नागवृक्षे । পুন্নাগ গাছ । र.मा. । च.सू.४अ. । वृद्धदारकवृक्षे । सु.कल्प.८अ. । नारिकेलवृक्षे । भा. । गण्डके । গণ্ডার । रा.नि.व.१९ । पद्मकेसरे । वै.निघ. । त्रि । उच्चे । प्रधाने । उच्चे ।

तुङ्गकः । पुं । पुन्नागवृक्षे । श.र. । वृद्धदारकवृक्षे । पद्मकेसरे । वै.निघ. ।

तुङ्गकेशरः । पुं । पुन्नागवृक्षे । प.मु. ।

तुङ्गभद्रा । स्त्री । दक्षिणदेशप्रसिद्धनद्यां । तज्जलं स्निग्धं निर्मलं स्वादु गुरु कण्डूपित्तजनकं सात्म्यं पथ्यकरञ्च । रा.नि.व.१४ ।

तुङ्गवृक्षः । पुं । नारिकेलवृक्षे । वै.निघ. ।

तुङ्गस्कन्धफलः । पुं । नारिकेलवृक्षे । भा.अ-मवर्गे ।

तुङ्गा । स्त्री । वंशलोचनायाम् । रा.नि.व.६ । वै.निघ.अ.सा.चि.वृहल्लवङ्गादिचूर्णे । शमीवृक्षे । रा.नि.व.८ । अल्पशमीवृक्षे । च.वि.८अ. ।

तुङ्गाचीरी । स्त्री । वंशलोचनायां । वै.निघ. ।

तुङ्गिनी । स्त्री । महाशतावर्य्यां । रा.नि.व.४ ।

तुङ्गी । स्त्री । कर्णस्फोटायां । কাণছিড়া । वै.निघ. । वनतुलस्यां । हरिद्रायाम् । मे. ।

तुङ्गीनसः । पुं । प्राणनाशककीटविशेषे । सु.कल्प.८अ. ।

तुच्छम् । क्ली । पुलाकजे, तुषे । ভূষি । उणा. ।

तुच्छद्रुः । पुं । एरण्डवृक्षे । श.च. ।

तुच्छधान्यकम् । क्ली । नीवारधान्ये । উড়িধান । पुलाके । আগড়া । र.मा. ।

तुच्छा । स्त्री । नीलीवृक्षे । तुत्थके । भा. ।

तुटुमः । पुं । मूषके । त्रिका. ।

तुड़ी । स्त्री । आढ़क्यां । অরহর । र.मा. ।

तुणः (णिः) कः । पुं । नन्दिवृक्षे । তুণ গাছ । अ.टी.स्वा. ।

तुण्डम् । क्ली । मुखे । रा.नि.व.१८ ।

तुण्डकी । स्त्री । करञ्जवल्ल्यां । वै निघ. ।

तुण्ड(ण्डि)केरिः (रिका) (री) । स्त्री, पुं । कार्पास्याम् । কাপাস গাছ । बिम्बिकायां । তেলাকুচা । अ.टी.स्वा. । रा.नि.व.४ । वनकार्पासीफले । (कः, का) तन्नामकतालुरोगविशेषे, शिरोगलरोगभेदे । लक्षणम्—"शोथः स्थूलस्तोददाहप्रपाकी श्लेष्मासृग्भ्यां कीर्त्तिता तुण्डिकेरी ।" भा. । सु. । "हनुसन्ध्याश्रितः कण्ठे कार्पासीफलसन्निभः । पिच्छिलो मन्दरुक् शोफः कठिनस्तुण्डिकेरिकः ॥" वा.उ.२१अ. । वायव्यकीटविशेषे । तद्दष्टे वातजन्यरोगा भवन्ति । सु.कल्प.८अ. ।

तुण्डाहतदष्टकम् । क्ली । अदंष्ट्राकृतदंशे । ছোব্লান । "यत्र लालापरिक्लेदमात्रं गात्रे प्रदृश्यते । न तु दंष्ट्राकृतो दंशः तत्तुण्डाहतमादिशेत् ॥" वा.उ.३६अ. ।

तुण्डिः (ण्डी) । पुं, स्त्री । मुखे । पक्षिचञ्चौ । পাখীর ঠোঁট । उणा. । स्त्री । शिशोर्नाभिगण्डरोगे । গোঁড় । लक्षणं यथा—"वातेनाध्मापिता नाभिः सरुजा तुण्डिरुच्यते ।" भा. । सु.शा.१०अ. । नाभौ । श.र. । अरण्यबिम्बिकायाम् । रा.नि.व.२३ । देवधान्ये । वै.निघ. ।

तुण्डिका । स्त्री । पीलुपर्ण्याम् । रा.नि.व.२३ । बिम्बिकायाम् । তেলাকুচা । नाभौ । श.र. । कार्पास्याम् । काकजङ्घायाम् । कुन्दुरुलतायाम् । কুন্দুরুকী । वै.निघ. ।

तुण्डिकेरि(री)फला । स्त्री । कुन्दुरुलतायाम्, मधुरबिम्ब्याम् । কুন্দুরুকী । वै.निघ. ।

तुण्डिकेरुफला । स्त्री । तन्नामगलरोगविशेषे । वै.निघ. ।

तुण्डिकेरी । स्त्री । विम्बिकायां । अ.टी. ।

तुण्डिभः (लः) । त्रि । पुष्टे । वृहन्नाभियुक्ते । अम. ।

तुत्थ(क)म् । क्ली । Sulphate of copper. ताम्रस्योपधातौ स्वनामख्यातपरवद्रव्ये । तूँतिया । र.मा. । तुत्थं द्विविधं मयूरं खर्परीतुत्थञ्च । गुणाः —“तुत्थं कटु कषायोष्णं श्वित्रनेत्रामयापहं । विषदोषेषु सर्व्वेषु प्रशस्तं वान्तिकारकं । खर्परी कटुका तिक्ता चक्षुष्या च रसायनी । त्वग्दोषशमनी रुच्या दीप्या पुष्टिविवर्द्धनी ॥” रा.नि.व. १३। “तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत् । किञ्चित्ताम्रगुणं तस्मात् वक्ष्यमाणगुणञ्च तत् ॥” भा.पू.१भ. । क्षारं निर्म्मलं लघु भेदकं क्रमिकण्डूकुष्ठकफपित्तघ्नम् । राज. । “गन्धकेन पचेत्तुत्थं तुल्यार्द्धेनार्द्धयामकं । वान्तिभ्रान्ती यदा न स्तः तदा शुद्धिं विनिर्द्दिशेत् ॥” इति शुद्धिः । सा.कौ. । अन्यच्च—“विष्ठया मर्द्दयेत्तुत्थं मार्ज्जारककपोतयोः । दशांशं टङ्कणं दत्त्वा पचेल्लघुपुटे ततः । पुटं दध्ना पुटक्षौद्रैः देयं तुत्थविशुद्धये ॥” भा. । कृत्रिमरसाञ्जने । उणा. ।

तुत्थखर्परिका (री) । स्त्री । खर्परिकायां । थापर । वै.निघ. । [निघ. ।

तुत्थनी । स्त्री । एलायां । शिवलिङ्गिन्यां । वै.

तुत्था । स्त्री । नीलीवृक्षे, महानील्यां । रा.नि.व.४ । क्षुद्रैलायां । अम. ।

तुत्थाञ्जनम् । क्ली । तुत्थे । अम. ।

तुन्तुभः । पुं । सर्षपवृक्षे । भा.पू.१भ.धान्यव. ।

तुन्दम् । क्ली । उदरे । रा.नि.व.१८ । [त्रिका. ।

तुन्दः । पुं । स्थविरे । रा.नि.व.२० । नाभौ ।

तुन्दकूपिका (पी) । स्त्री । नाभ्याम् । हे.च. । त्रिका. । [अ.टी.र. ।

तुन्दपरिमार्जः (मृजः) । त्रि । अलसे ।

तुन्दि । क्ली । उदरे । हे.च. । स्त्री । नाभौ । त्रिका. । [श.र. ।

तुन्दिकः । पुं । पृथूदरमानुषे । स्त्री । नाभौ ।

तुन्दिकरः । पुं । नाभौ । त्रिका. । [श.र. ।

तुन्दिभः (लः) । त्रि । हृष्टपुष्टे । भुँड़ो ।

तुन्दिलफला । स्त्री । त्रपुषीलतायाम् । रा.नि.व.७ ।

तुन्दी । स्त्री । नाभौ । श.र. ।

तुन्नः (कः) । पुं । (Cedrela Toona.) वृक्षविशेषे, तूणीवृक्षे । তুন্দ গাছ । हिं महानिम्, तुन् । उत्. महालिम्बु । पं. द्रावी । अ.म. । त्रि । पीड़िते ।

तुन्नकारिका । स्त्री । भूम्यामलक्याम् । वै.निघ. । [सु । सु.शा.५अ. ।

तुन्नसेवनी । स्त्री । शिरःकटीकपालसन्धिदेशे ।

तुभः । पुं । वर्करे । বোকা ছাগল । वै.निघ. ।

तुमुलः । पुं । विभीतकवृक्षे । मे. । [श.र. ।

तुम्बः (कः) । पुं । अलाव्वाम् । লাউ । प.मु. ।

तुम्बकम् । क्ली । धन्याके । धनिया । कन्दर्पसा. तैले । [निघ. ।

तुम्बरुः । पुं । तुम्बुरी । নেপালি ধনে । वै.

तुम्बा । स्त्री । अलाव्वाम् । प.मु. । तिक्ततुम्ब्याम् । वै.निघ. । [श.र. ।

तुम्बिः । स्त्री । तिक्ततुम्ब्याम् । अलाव्वाम् ।

तुम्बिका । स्त्री । कटुतुम्ब्याम् । रा.नि.व.३ ।

तुम्बिनी । स्त्री । कटुतुम्ब्याम् । रा.नि.व.३ ।

तुम्बी । स्त्री । अलाव्वाम् । प.मु. । कटुतुम्ब्यां । তিৎলাউ । भा. । पुं (इन्) । सरलवृक्षे । रा.नि.व.१२ ।

तुम्बीतैलम् । क्ली । गलगण्डाधिकारे तैलम् । कटुतैलं ४ श. पुराणतिक्तालावूरसः १६ श. । कल्कार्थं—विड़ङ्गं यवक्षारः सैन्धवं वचा रास्ना चित्रकमूलं त्रिकटु देवदारु एषां प्रति ८ तो. । भैष. । च.द. । [हारा. ।

तुम्बीपुष्पम् । क्ली । अलावुपुष्पे । लताम्बुजे ।

तुम्बुकः । पुं,क्ली । अलाव्वाम् । লাউ । हड्डचन्द्रः ।

तुम्बुरः (री) । पुं, स्त्री । तुम्बुरुवृक्षे । र.मा. । धाईधान्यके । त्रिका. । कुक्कुरस्त्रियां । मे. ।

तुम्बुरुः । पुं, क्ली । (Xanthoxylon alatum. Syn. Z. hostile.) स्वनामख्यातफलवृक्षविशेषे । তেজবলের গাছ, নেপালি ধনে, তাম্বূল ফল । हिं तेजबल, तुम्रु । मं तेन्दु । कं तुम्बुरु । तत्फलं मरिचवत् । च.सू.२७. । एतदभावे धान्यकं ग्राह्यम् । गुणाः—मधुरः तिक्तः कटूष्णः वातकफघ्नः शूलगुल्मोदराध्मानकृमिघ्नः अग्निदीपनश्च । रा.नि.व.११ । "तुम्बुरु प्रथितं तिक्तं कटु पाकेऽपि तत्कटु । रुच्योष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च । वातश्लेष्माक्षिकर्णौष्ठशिरोरुग्गुरुताकृमीन् । कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥" भा. ।

तुर(ग,ङ्ग)गन्धा । स्त्री । अश्वगन्धायां । प.मु.।

तुरग(ङ्ग)द्विष(द्वेषि)णी । स्त्री । महिष्यां । रा.नि.व.१९ । वै.निघ. ।

तुरग(ङ्ग)प्रियः । पुं । यवे । रा.नि.व.१६ ।

तुरगशिफा । स्त्री । अश्वगन्धामूले । च.द.वा.व्या.चि. ।

तुरगाह्वा । स्त्री । अश्वगन्धायाम् । मद.व.१ । घोण्टायां । শেয়াকুল । रा.नि.व.८ ।

तुरगी (इन्) । त्रि । अश्वारोहे । हे.च.। स्त्री । अश्वगन्धायां । घोण्टायां । रा.नि.व.४।८ । अश्वयां।

तुरङ्गः (मः) । पुं । घोटके । अम. । चित्ते । श.र. । क्ली । गन्धके । र.सा.सं. ।

तुरङ्गकः । पुं । हस्तिघोषायां । र.मा. ।

तुरङ्गरिपुः (ङ्गारिः) । पुं । करवीरवृक्षे । र.मा. । वै.निघ.१भ.विषमज्व.चि. । महिषे ।

तुरङ्गा (ह्वा) (ङ्गी) । स्त्री । अश्वगन्धायां । वै.निघ. । मद.व.१ । प.मु. । घोण्टायाम् । ঘোণ্টাবদর । रा.नि.व.८ ।

तुरङ्गिका । स्त्री । देवदालीलतायां । দেয়াতাড়া । रा.नि.व.३ । See अगरी ।

तुरुष्कः । पुं । शिह्लके । শিলারস । प.मु. । सु.सू.३८अ. । वा.टी.हेमा. । अरुणस्तु कृत्रिमनिर्यासविशेषमाह । वै.निघ.शतावरीनारायणतैले । च.द.वा.व्या.चि.१८श.शतिकमहाराजप्रसारणीतैले । तद्देशीयाश्वे । ज.द.६अ. । घण्टापाटलवृक्षे । घण्टापारुल गाछ । श्रीवासे। তার্পিন তেলের গাছ । प्राच्यक्षे । त्रिका. ।

तुलसी । स्त्री । (Oci(y)mum sanctum.) Holy basil. स्वनामख्यातक्षुपे । তুলসী গাছ । हिं बरण्डा, तुलसी । मं तुलसीचेझाड़ । तैं कुश, गग्गेरचेट्टु, श्रुतुलसी, तुलसीचेट्टु । ता. तुलशी । दा. तुल्सी । बम्. तुलस । अन्या—(O. gratissimum.) রামতুলসী । हिं रामतुलसी । तैं निम्मतुलसी । ता. एलुमिच्छम्तोलसी । दा. रामतुलसी । अपरा—(Ocimum Basilicum.) See विश्वतुलसी । क्षुद्रपत्रतुलसी-गन्धतुलसी-कृष्णतुलसी-विल्व(श्व)गन्धतुलसी-श्वेततुलसी-वर्व्वरीतुलस्य इति षड्भेदा तुलसी । सा. गुणाः—कटुः तिक्तोष्णा वातश्लेष्मघ्नी सुरभिः क्रिमिघ्नी भूतघ्नी रुच्या वातग्रन्थिकरी । "तुलसी उभया च कासवातकृमिवमिभूतापहारिणी पूता ।" इति श्वेतकृष्णगुणाः । रा.नि.व.१० । "तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् । दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ॥" श्वेतकृष्णगुणाः—"शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता ।" भा. ।

तुलसीच्छद(पत्र)म् । क्ली । हरित्तालीशपत्रे । वै.निघ. । [सी । र.मा. ।

तुलसीद्वेषा । स्त्री । वर्व्वर्याम् । বাবুই তুল-

तुला । स्त्री । ४०० तोलकपरिमाणे, पलशतमाने । तुलामाने । निघ्नि। मे.। सादृश्ये । त्रिका.।

तुलाकोटिः (टी) । स्त्री । परिमाणभेदे । अर्व्वुदे । हे.च. । कोटिसंख्यायाम् । वै.निघ. ।

तुलावीजम् । क्ली । गुञ्जायाम् । त्रिका. ।

तुलिका । स्त्री । हापुत्रिकापक्षिणि । খঞ্জন পাখী । त्रिका. । [तायां । च.सू.१अ. ।

तुल्यार्थता । स्त्री । एकसामान्यरूपार्थानुयोगि-

तुवरः (कः) । पुं। तुवरयवनाले । লাল কাল জনার । रा.नि.व.१६ । आढक्याम् । অরহর । (कः) कुधान्यभेदे । "पत्रैस्तु केशराकारैः कलायसदृशैः फलैः । वृक्षस्तुवरको नाम पश्चिमार्णवतीरजः ॥ आरुष्करं तौवरकं कषायं कटुपाकि च । उष्णकृमिज्वरानाहमेहोदावर्त्तनाशनम् ॥" सु.सू.

४६अ. । वा.उ.३६अ. । अश्मपुष्पके । ८थोषा । अजातशृङ्गगवि । अम. । त्रि । कषाये । मे. । तिक्ते । सु.सू.४५अ. ।

तुवरयावनालः । पुं । स्वनामख्यातरक्तकृष्ण-शिम्बीधान्ये । रक्त कृष्ण जनार । मं तूरैजोंधले । कं ओङ्गरजाल । गुणाः—कषायः उष्णः शोफघ्नः संग्राही वातशमनः विदाही शोषजनकश्च । रा.नि.व.१६ ।

तु(तू)वरिका (री) । स्त्री । (Cajanus Indicus.) आढक्याम् । अडहर । रा.नि.व.१६। भुजाढक्याम् । तोरिसेति लोके । ८टोटेगार कलाय । हिं तोरी । प.मु. । गुणाः—कटुतिक्तकषाया उष्णा ग्राहिणी चक्षुष्या छर्दिपित्तजृम्भानाशिनी च । रा.नि.व.१६। ग्राहिणी लघुः कफविषरक्तघ्नी तीक्ष्णा उष्णा दीपनी कण्डूकुष्ठकोष्ठकृमिहरी च । भा.पू.१भ.धा.व. । A kind of lentil (Cytisus Cajan.) मसूरकलाये । सौराष्ट्रमृत्तिकायां । मे. । गोपीचन्दने । तिलकमाटी । भा. । राजिकायाम् । ८श्वेत सरिषा । वै.निघ. ।

तुवरीमृत् । स्त्री । सौराष्ट्रमृत्तिकायाम् । तिलकमाटी । पङ्कपर्पटी । रा.नि.व.१३ ।

तुवरीशिम्बः । पुं । चक्रमर्दवृक्षे । श.च. ।

तुविः । स्त्री । तुम्बाम् । लाउ । श.मा. ।

तुषः । पुं । विभीतकवृक्षे । तुसे । तूष । अम. ।

तुषजलम् । क्ली । तुषोदके । काँजिविशेष । अभावे काञ्जिकम् । सि.यो.बृहच्चुक्रसन्धाने ।

तुषधान्यम् । क्ली । तुषे । तूष । र.मा. । रक्तशाल्यादौ । वै.निघ. । कङ्ग्वादिक्षुधान्यवर्गे । यथा—"कङ्गुश्चीनः कोद्रवश्च श्यामाको वनकोद्रवः । शणवीजं वंशवीजं गवेधुश्च प्रसाधिका । तावन्त्येतानि चोक्तानि तुषधान्यानि वै नव ॥"

तुषसौवीरकम् । क्ली । सतुषयवकाञ्जिके, तुषोदके । वै.निघ. ।

तुषस्वेदः । पुं । वातव्याधौ अश्वस्य स्वेदविशेषे । "सुतप्तकाञ्जिकैः स्विन्नं तुषं बद्धा पु(पू)तं भिषक् । तुषस्वेदं तुरङ्गस्य धान्यैर्वापि प्रदापयेत् ॥" ज.द. १८अ. ।

तुषानलः । पुं । तुषाग्नौ । हे.च. ।

तुषाम्बु । क्ली । तुषोदके । विदलितामयवैः संहिते अम्लतां गते तुषाम्बुनि । "तुषाम्बु सन्धितं ज्ञेयमामैर्विदलितैर्यवैः । शार्ङ्ग. ।

तुषाम्बुवटम् । क्ली । तुषाम्बुपक्वान्ने । वै.निघ.।

तुषाम्भः । क्ली । तुषाम्बुनि । भैष.र.पि.शूलचि. । "अम्लतुषाम्भसा ।"

तुषारः । पुं । कर्पूरे । चीनकर्पूरे । रा.नि.व. १२ । जलकणायां । मे. । "अपि नद्याः समुद्रान्ते वह्निरापस्तदुद्भवाः । धूमावयवनिर्मुक्ताः तुषाराख्यास्तु ताः स्मृताः ॥" भा. । त्रि । शीतले । हिमे । मे. ।

तुषारकालः । पुं । शरत्काले । वै.निघ. ।

तुषारगौरः । पुं । कर्पूरे । भीमसेनीकर्पूरे । चीनकर्पूरे । वै.निघ. ।

तुषाराम्बु । क्ली । नीहारजले ।

तुषोत्थम् । क्ली । तुषोदके । सौवीरकाञ्जिके । रा.नि.व.१५ ।

तुषोदकम् । क्ली । सतुषयवकाञ्जिके । हारा. । सौवीरकाञ्जिके । रा.नि.व.१५ । च.सू.२अ. । तल्लक्षणं—"भृष्टान् माषतुषान् सिद्धान् यवांस्तु चूर्णसंयुतान् । आप्लुतानम्भसा तद्ज्जातं तच्च तुषोदकम् ॥" च. । "तुषोदकं यवैरामैः सतुषैः शकलीकृतैः ।" गुणाः—"तुषाम्बु दीपनं हृद्यं पाण्डुक्रिमिगदापहम् । तीक्ष्णोष्णं पाचनं पित्तरक्तकृत् वस्तिशूलनुत् ॥" भा. । "तुषोदकं वातपित्ताहरन्तु प्रभेदकं रक्तपित्ताहरञ्च । विपाचकं स्याज्जरणं क्रिमिघ्नम् अजीर्णहन्तृ कटुकं विपाके ॥" अत्रि.११ अ. । "तुषाम्बु दीपनं हृद्यं हन्त्याण्डुपार्श्वरोगनुत् । ग्रहण्यर्शोविकारघ्नं भेदि सौवीरकं तथा ॥" सु. ।

तुष्टिः । स्त्री । वृद्धौषधे । वै.निघ. ।

तुसः । पुं । तुषे । अ.टी.र. ।

तुहिनः । पुं । कर्पूरे । क्ली । हिमे । अम. । स्त्री । शुकनासायाम् । ८शोणा । वै.निघ. ।

तुहिनांशुः । पुं । कर्पूरे । रा.नि.व.१२ ।

तुहिनांशुतैलम् । क्ली । कर्पूरतैले । रा.नि. व.१५ ।

तूण: । पुं । तूणीकवृक्षे । তূণ গাছ ।

तूणि(णी)क: । पुं । (Cedrela Toona.) कोङ्गणे नन्दीवृक्ष इति ख्याते वृक्षे । তূণ গাছ । हिं तूणि, महानिम् । उत्. महालिम्ब । पं द्रवी । गुणा:—कटु: तिक्त: पीत: रक्तपित्तदाहघ्न: शिरोवेदनाघ्न: श्वेतकुष्ठघ्न: सुगन्धि: पुष्टिकर: वीर्य्यकरश्च । रा.नि.व.१२ ।

तूणी (इन्) । पुं । नन्दीवृक्षे । তূণ গাছ । रा.नि.व.१२ । "तूणी रक्त: कटु: पाके कषायो मधुरो लघु: । तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित् ॥" भा. । नीलीवृक्षे । वै.निघ. । स्त्री । वातव्याधिविशेषे । लक्षणं यथा—"अधो या वेदना याति वर्चोमूत्राशयोत्थिता । भिन्दतीव गुदोपस्थं सा तूणीत्युपदिश्यते ॥" सु.नि.१अ. ।

तूत: (द:) । पुं,क्ली । तूलकाष्ठे । गुणा:—"तूतं पक्वं गुरु स्वादु हिमं पित्तानिलापहम् । तदेवामं गुरु सरमम्लोष्णं रक्तपित्तकृत् ॥" भा.आम्रव. । ब्रह्मवृक्षे । रा.नि.व.९ ।

तूतकम् । क्ली । तुत्थे । श.च. ।

तूरी । स्त्री । शुक्लधुस्तूरके । भा. ।

तूर्णक: । पुं । शालिधान्यविशेषे । काश्मीरे आजव इति प्रसिद्धे । वा.सू.६अ. । [निघ. ।

तूर्णि: । स्त्री । विष्ठायां । उणा. । मनसि । वै.

तूल: । पुं, क्ली । (Morus Indica or Morus Nigra.) स्वनामख्यातकाष्ठविशेषे । তুঁত, পলাশ পিপুল, আবলুষ ইতি কশ্চিত् । हिं तूतरी, साइड । मं पारिसपिंपलु, वंगरलि । तैं कम्बलिचेट्टु । ता. मधुकट्टइचेड़ि । गुणा:—मधुराम्लं वातपित्तघ्नं सरं दाहघ्नं कषायं वृष्यं कफघ्नञ्च । रा.नि.व.९ । मधुराम्लं वृष्यं दाहघ्नं कषायं कफघ्नं गुरु सारकम् अम्लम् उष्णं रक्तपित्तकरञ्च । भा. । कार्पासे । श्वेतधुस्तूरके । गयाशल्यें । अम. ।

तूलकम् । क्ली । कार्पासे । हे.च. ।

तूलग्रन्थिसमा । स्त्री । ऋद्धिनामकौषधौ । वै.निघ. । [পাঁইজ । चिका. ।

तूलनालिका (ली) । स्त्री । पिञ्जिकायां ।

तूलपिचु: । पुं । कार्पासे, तूले । তুলা । अ. टी.भ. । [रा.नि.व.१० ।

तूलफल: । पुं । अर्कवृक्षे । আকন্দ গাছ ।

तूल(लि)फला । स्त्री । शाल्मलीवृक्षे । र.मा. ।

तूलवती (शय्या) । स्त्री । तूलशय्यायाम् । তোষক । भा. ।

तूलवृक्ष: । पुं । शाल्मलीवृक्षे । रा.नि.व.७ ।

तूलशर्करा । स्त्री । कार्पासबीजे । श.मा. ।

तूला (ली) । स्त्री । रक्तकार्पासाम् । रा.नि.व.४ । नीलीवृक्षे । भा. । वर्त्याम् । श.र. ।

तूलि: (लि(ली)का) । स्त्री । नील्यां । रक्तकार्पास्यां । वै.निघ. । चित्रलेखन्यां । তুলি । अम. । वीरणादिशलाकायां । शय्योपकरणे । তোষক । मे. । वर्त्तौ । श.र. ।

तूल(लि)नी (फला) । स्त्री । शाल्मलीवृक्षे । শিমুল গাছ । प.मु. । र.मा. । भा. । लक्ष्मणाकन्दे । रा.नि.व.७ ।

तूवर: । See तुवर: । [श.र. ।

तूस्तम् । क्ली । धूलौ । ধূলা । मे. । सूक्ष्मे ।

तृखम् । क्ली । जातीफले । श.च. ।

तृट् । स्त्री । तृष्णायां । इच्छायां । मे. ।

तृणम् । क्ली । कत्तृणे । গন্ধতৃণ । रा.नि.व.८ । खटे । नड़ादौ तृणवर्गे । "त्रिधा वंश: कुश: काशस्त्रिधा......नल: । गुन्द्री मुञ्जो दर्भमेषीचणकादिगणस्तृणम् ॥" अर्क. ।

तृणकतैलम् । क्ली । कुष्ठाधिकारे तैलम् । पाठ:—"मञ्जिष्ठाकुष्ठशाचक्रमर्दारग्वधपल्लवै: । तृणकस्वरसे सिद्धं तैलं कुष्ठहरं कटु ॥" कटुतैलं ४ श. चीनघासस्वरस: ४ श. जलं १६ श. । कल्कार्थे—मञ्जिष्ठा कुष्ठं (कुड़) हरिद्रा चक्रमर्दपत्रं (চাকন্দার পাতা) सोनालुपत्रं (সোন্দালপাতা) एषां मिलित्वा शराव: (১ সের) । रस.र. ।

तृणकुङ्कुमम् । क्ली । काश्मीरदेशे स्वनाम्ना प्रसिद्धे सुगन्धतृणे । कुङ्कुमघास् इति भाषा । मं तृणकेशर । गुणा:—कटूष्णं वातकफशोथघ्नं कण्डूतिपामाकुष्ठामदोषघ्नं दीप्तिकरञ्च । रा.नि.व. १२ ।

तृणकूर्म्मः । पुं । श्वेतालाव्वां । वै.निघ.। श.मा.।
तृणकेतकी । स्त्री । वंशलोचनविशेषे । वै.निघ.। [व.७ ।
तृणकेतुः (कः) । पुं । वंशे । বাঁশ । रा.नि.
तृणकेसरम् । क्ली। तृणकुङ्कुमे । रा.नि.व.१२।
तृणगन्धा । स्त्री । वृद्धदारकलतायां । वै.निघ.।
तृणगोधा । स्त्री । सरटे । গিরগিটে । कृकलासे । मे. । तृणजलौकायाम् । शब्दकल्प. ।
तृणगोधूमः । पुं । स्वनामख्यातगोधूमे । घानि गम । प.मु. ।
तृणगौरम् । क्ली । तृणकुङ्कुमे । रा.नि.व.१२ ।
तृणग्रन्थिः । पुं । स्वर्णजीवन्त्यां । रा.नि.व.३ ।
तृणग्राही (इन्) । पुं, क्ली । नीलहीरके । प.मु. । नीलमणौ । কাফুরদানা । रा.नि.व.१३ ।
तृणचरः । पुं । गोमेदमणौ । वै.निघ. ।
तृणद्रुमः । पुं । तालवृक्षे । केतकीवृक्षे । पूगवृक्षे । खर्ज्जूरीवृक्षे । ताड़ीद्रुमे । তেড়েৎ গাছ । नारिकेलवृक्षे । हिन्तालवृक्षे । হেঁতাল গাছ । एषां मज्जनिर्यासाः लघवः शीतला बल्या मोहना हृद्या तृषातापहराश्च । रा.नि.व.९ ।
तृणधान्यम् । क्ली । तृणोद्भवश्यामाकादौ । শ্যামা ধান প্রভৃতি । गुणाः—"श्यामाकः शोषणो रुचः वातलः श्लेष्मपित्तहा । ऊड़िका कोद्रवश्चैव हस्तिश्यामाकचीनकौ । पीनसश्वासकासोरुस्तम्भकण्ठगदान् जयेत् । कङ्गुकांश्चापि जानीयात् एतान् श्यामाकवद्गुणैः । ऊड़िका तत्र कथिता बलासस्य विवर्द्धिनी । कोद्रवश्च परं ग्राही वातलः कफनाशनः ॥" राज.३प. । See कुधान्यम् ।
तृणध्वजः । पुं । वल्वजायां । উলু । रा.नि.व.८ । वंशे । श्वम. । [रा.नि.व.९ ।
तृणनिम्बः । पुं । नेपालनिम्बे । চিরেতা ।
तृणपञ्चमूलम् (ली) । क्ली, स्त्री । कुशकाशशरेक्षुदर्भेषु । दर्भ उलपः । शरेक्षुदर्भकाशशालय इति चरकः । "श्वेतचीरं पिबेद्वापि पञ्चमूल्या तृणाख्यया ।" सि.यो.र.पि.चि.। गुणाः —तृणाख्यं पित्तरक्तमूत्रसङ्गहरी । "कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवं । पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनम् ॥" भा.मू.क्र.चि. ।
तृणपञ्चमूलाद्यघृतम् । क्ली । अश्मर्य्यधिकारे घृतम् । गव्यघृतं ४ श. । क्वाथार्थं—कुशः काशः शरः इक्षुः दर्भमूलं गोक्षुरः एषां प्र. १० प. वारि ६४ श. शे. १६ श. । कल्कार्थं—गुड़गोक्षुरबीजे प्र. ४ प. । भा. ।
तृणपत्रिका (त्री) । स्त्री । इक्षुदर्भायाम् । ইক্ষুদর্ভা তৃণ । (त्री) गुण्डासिनीतृणे । रा.नि.व.८ । [तृणे । रस.र.महाभल्लातकगुड़े ।
तृणपर्णम् । क्ली, पुं । चीनाखड़ इति प्रसिद्ध-
तृणपुष्पम् । क्ली । तृणकुङ्कुमे । रा.नि.व.१२ ।
तृणपुष्पी । स्त्री । सिन्दूरपुष्पीवृक्षे । रा.नि.व.१० । [चि.२श. ।
तृणपूली । स्त्री । चट्टाम् । চাঁচ । हारा. । च.
तृणमणिः । पुं । नीलहीरके । हारा. ।
तृणमुद्गः । पुं । श्यामाकधान्ये । শ্যামা ধান । प.मु. । [रस.र.रसमारणे ।
तृणमुस्तिका । स्त्री । मुस्ततृणे । मुस्तायाम् ।
तृणमूलम् । क्ली । गन्धतृणमूले । भा.म.३भ.मू.क्र.चि. ।
तृणराजः (कः) । पुं । तालवृक्षे । তাল গাছ । नारिकेलवृक्षे । वंशे । रा.नि.व.९।११।२३ । इक्षुवृक्षे । वल्वजायाम् । वै.निघ. । [नि.व.११ ।
तृणराजाह्वः (यः) । पुं । तालवृक्षे । रा.
तृणवल्ल(ल्व)जा । स्त्री । वल्वजायां । উলু । रा.नि.व.८ । [শামা ঘাস । र.मा. ।
तृणवीजः (जोत्तमः) । पुं । श्यामाकतृणे ।
तृणवृक्षः । पुं । नारिकेलवृक्षे । तालवृक्षे । पूगवृक्षे । केतकीवृक्षे । खर्ज्जूरीवृक्षे । रा.नि.व.९ । वै.निघ. । [प.मु. ।
तृणशिम्बी । स्त्री । निष्पावे । শীম গাছ ।
तृणशीतः । पुं । देवताड़वृक्षे । वै.निघ. । क्ली । कत्तृणे । गन्धतृणे । र.मा. । स्त्री । महाराष्ट्रीलतायां, जलपिप्पल्यां । কাঁচড়া । रा.नि.व.४।
तृणशून्यम् । क्ली,पुं । नागदमनक्षुपे । प.मु.।

च चि.१ष. । सु.चि.१८ष. । केतकीतरुयां । च.सू. २५ष. । मल्लिकायां । केतकीफले । मे. । [१२ ।

तृणशोणितम् । क्ली । तृणकुङ्कुमे । रा.नि.व.

तृणशोषकः । पुं । राजिमत्सर्पविशेषे । सु. कल्प. ४ष. । See सर्पः । [मङ्गल । त्रिका. ।

तृणषट्पदः । पुं । कीटविशेषे, बरोले । भो-

तृणसारा । स्त्री । कदल्यां । हारा. । [व.८ ।

तृणाख्य(ढ्य)म् । क्ली । पर्व्वततृणे । रा.नि.

तृणाधिपः । पुं । मन्थानकतृणे । रा.नि.व.८।

तृणाञ्जनः । पुं । कृकलासे । কাঁকলাস । त्रिका. ।

तृणाधिपः । पुं । मन्थानकतृणे । रा.नि.व.८।

तृणान्नम् । क्ली । देवधान्ये । नीवारधान्ये । भा. पू.१म.धा.व. ।

तृणाम्लम् । क्ली । लवणतृणे । रा.नि.व.८ ।

तृणारिः । पुं । पर्पटके । ক্ষেৎপাপড়া । वै. निघ. ।

तृणावर्त्तः । पुं । गुण्डासिनीतृणे । वै.निघ. ।

तृणासृक् । क्ली । तृणकुङ्कुमे । रा.नि.व.१२ ।

तृणी । स्त्री । आम्रहरिद्रायाम् । वै.निघ.

तृणेक्षुः । पुं । वल्वजायाम् । উলু । रा.नि.व.८।

तृणोत्तमः । पुं । ऊषरतृणे । रा.नि.व.८ ।

तृणोत्थम् । क्ली । तृणकुङ्कुमे । । रा.नि.व.१२ ।

तृणोद्भवः । पुं । नीवारे । বোরো ধান । रा. नि.व.१६ । [वा.उ.३७ष. ।

तृणोलुपम् । क्ली । उलपतृणे । উলুখড় ।

तृणौकः । पुं । तृणच्छादितगृहे । খড়ো ঘর । हे.च. ।

तृणौषधम् । क्ली । एलवालुके । श.च. ।

तृण्मान् । त्रि । तृणायुक्ते । वा.चि.६ष. ।

तृतीयकः । पुं । विषमज्वरविशेषे । একদিন অন্তর জ্বর । "दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः ।" भा.। "कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः । वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः ।" मा.नि.ज्व. ।

तृतीयकविपर्य्ययः । पुं । तृतीयकस्य ज्वरस्य भेदे । প্রথম ও শেষ দিনে ছাড়িয়া দ্বিতীয় দিনের জ্বর । यथा—आद्यावन्ते च मुञ्चति मध्ये एकं दिनं ज्वरयति । भा. ।

तृतीय(या)प्रकृतिः । पुं । नपुंसके । च.टी.।

तृप(फ)ला । स्त्री । लतायाम् । त्रिफलायाम् । उणा. । त्रिका. ।

तृप्तिः । स्त्री । सत्यपि भोजनसामर्थ्ये अनन्नाभिलाषे । भा.म.१भ.ज्व.चि. । "लभस्तृप्तिरथापि वा ।"

तृप्तिघ्नः । त्रि । तृप्तिजनके । क्षुधामान्द्यकरे ।

तृप्तिघ्नवर्गः । पुं । नागरचित्रकचव्यविडङ्गमूर्व्वागुडूचीवचामुस्तपिप्पलीपटोलेषु । च.सू.४ष. ।

तृप्रः । पुं । घृते । उणा. ।

तृफुः । पुं । सर्पे । उणा. ।

तृवृता । स्त्री । त्रिवृति । তেউড়ী । शुक्लत्रिवृतायां । শ্বেত তেউড়ী । वा.चि.२ष. । [प.मु.।

तृषती । स्त्री । शुकशिम्ब्याम् । আলাকুশী ।

तृषा । स्त्री । तृष्णायाम् । रा.नि.व.२० । लाङ्गलिकलतायाम् । श.च. ।

तृषाभूः । स्त्री । मूत्राशये । क्लोम्नि । श.च. ।

तृषाह(क)म् । क्ली । जले । श.च.। वै.निघ.।

तृषाह्वा । स्त्री । शताह्वायाम्, मधुरिकायाम् । श.च. ।

तृषितोत्तरा । स्त्री । गोकर्णीनामवल्ल्याम् । वै.निघ. । अश्मनपर्णीलतायाम् । श.च. ।

तृष्णक् । त्रि । तृष्णावति । वा.ज्व.चि.१ष. । लुब्धे । अम. ।

तृष्णा । स्त्री । पानेच्छायां । পিপাসা । मे. । तर्षे । जटा. । पिपासारोगे । रा.नि.व.२० । "भयश्रमाभ्यां बलसङ्क्षयाद्वा ऊर्द्ध्वं चितं पित्तविवर्द्धनैश्च । पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासाम् ॥" "सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति । पुनः काङ्क्षति तोयञ्च तं तृष्णार्दितमादिशेत् ॥" "क्षीणःखपांवाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः । तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्यामसमुद्भवा च । भक्तोद्भवा सप्त-

मित्येति तासां निबोध लिङ्गान्यनुपूर्व्वशस्तु । क्षामास्यता मारुतसम्भवायां तोदस्तथा शङ्खशिरःसु चापि । स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति । मूर्च्छाभ्रमविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततश्च शोषः । शीताभिनन्दा मुखतिक्तता च पित्तात्मिकायां परिदूषणञ्च । वाष्पावरोधात् कफसंवृतेऽग्नौ तृषा बलासेन भवेत्तथा तु । निद्रागुरुत्वं मधुरास्यता च तृष्णार्दितः शुष्यति चातिमात्रम् । क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु । रसक्षयाद्या क्षयसम्भवा सा तयाभिभूतश्च निशादिनेषु । पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः ॥" इत्यादि । मा.नि.। पथ्यं—"शोधनं वमनं निद्रा स्नानं कवलधारणं । कोद्रवाः शालयः पेया विलेपी लाजसक्तवः । अम्लमण्डो धन्वरसाः सितामुद्गादिजा रसाः । खर्ज्जूरं दाड़िमं धात्री कक्कोलं नलदम्बु च । जम्बीरं करमर्द्दञ्च वीजपूरं गवां पयः । मधूकपुष्पं तिक्तानि मधुराणि विशेषतः । बालतालकशीताम्बु माक्षिकं सरसीजलं । घनसारो गन्धसारः कौमुदी शिशिराणि च । एला जातीकपत्रञ्च कुलुम्बुरु च टङ्कणम् । चन्दनार्द्रप्रियाश्लेषो रत्नाभरणधारणं । हिमानुलेपनञ्च स्यात्पथ्यमेतत् तृषातुरे ॥" पथ्यापथ्यम् । [नि.व.५ ।

तृष्णारिः । पुं । पर्पटके । ক্ষেৎপাপড়া । रा.

तेजः । क्ली । मज्जायां । रा.नि.व.१८ । गुणाः—तृट्क्षुधानिद्रालस्यमैथुनेषु । रस.र.ज्व.चि.। पित्ते । रा.नि.व.२१ । घृते । कान्तौ । स्वर्णे । रा.नि.व.१३ । शुक्रे । मे. । नवनीते । अग्नौ । हे.च. ।

तेजःफलः । पुं । तेजफलवृक्षे । তেজবল । रा.नि.व.११ ।

तेजनः (कः) । पुं । शरे । प.मु. । वंशे । भा. । मुञ्जातृणे । उलपतृणे । ज.द.१२अ. । रा.नि.व.८ । क्ली । भोजने । रा.नि.व.२० । [व.८ ।

तेजनाह्वयः । पुं । मुञ्जतृणे । মুজ । रा.नि.

तेजनी । स्त्री । मूर्वायां । अम. । चीरमूर्व्वायां । कङ्गुधान्ये । वै.निघ. । वचायां । भैष.मु.रो.चि. । ज्योतिष्मतीलतायां । श.र. ।

तेजपत्रम् । क्ली । स्वनामख्यातपत्रे । তেজপাত । प.मु. । See त्वक्पत्रम् ।

तेजफलः । पुं । हिमालयादौ ख्याते स्वनामख्यातवृक्षे । मं काइफल । कं गावटे । गुणाः—कटुः तीक्ष्णः सुगन्धः दीपनः वातश्लेष्मारुचिघ्नः बालरक्षाकारकः । "तेजफलः कटुस्तीक्ष्णः सुगन्धिर्दीपनः परः । वातश्लेष्मारुचिघ्नश्च बालरक्षाकरः परः ॥" रा.नि.व.११ ।

तेजलः । पुं । कपिञ्जलपक्षिणि । তিতির পাখী । रा.नि.व.१६ ।

तेजवती । स्त्री । जलपिप्पल्यां । কাঁচড়া । वै.निघ.२भ.श्व.क.चि. । गजपिप्पल्यां । श.र. । तेजवल्कल, तेजबल इति च ख्याते द्रव्ये । गुणाः—"तेजस्विनी कफश्वासकासास्यामयवातहृत् । पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥" भा. । वचायां । বচ । भैष.क्षुद्ररो.चि. ।

तेजसाह्वयः । क्ली । मुञ्जतृणे । वै.निघ. ।

तेजस्करः । त्रि । तेजोवर्द्धके ।

तेजस्विनी (जिनी) । स्त्री । मूर्वायाम् । चविकायाम् । महाज्योतिष्मतीलतायाम् । रा.नि.व.३ । च.वि.८अ. । तेजोबलवृक्षे । वै.निघ. । ज्योतिष्मतीलतायाम् । লতাফট্কী । श.र. ।

तेजोद्वेषः । पुं । पित्तज्वरोगे । भा. ।

तेजोधातुः । पुं । पित्ते । वै.निघ. ।

तेजोमन्थः । पुं । क्षुद्राग्निमन्थक्षुपे । ছোট গণিরি । प.मु. । गुणाः—"तेजोमन्थगुणाः प्रोक्ताश्चाग्निमन्थसमा बुधैः । विशेषाद्वातशोफे च प्रोक्ताः पूर्व्वैश्च सूरिभिः ॥" वै.निघ. ।

तेजोमयम् । क्ली । पित्ते । वै.निघ. ।

तेजोवती । स्त्री । महाज्योतिष्मतीलतायाम् । বড় লতাফট্কী । हिं उमिजिनि । भैष.कुष्ठ.चि.पञ्चतिक्तघृते । वै.निघ.२भ.जीर्णज्व.चि. । चविकायाम् । চই । प.मु. । भा. । सा.कौ.अर्श-चि.बाहुशालगुड़े । गजपिप्पल्यां । श.र. । वचायां । सि.यो.हि.श्वास.चि.बाहुशालगुड़े । "द्रवन्ती जीवती दन्ती ।" यत्र चवी तेजोवती चास्ति तत्र तेजोवती ज्योतिष्मती ग्राह्या । श्रीकण्ठः । तेजोवल्कले । তেজবল । स्वर्णजीवन्त्याम् । भा.म.४भ.मु.रो.चि. । सु.चि.२२अ. । मरिचे । वै.निघ. ।

तेजोवीजम् । क्ली । मज्जायाम् । मज्जा । वै. निघ. ।

तेजोह्वः । पुं । क्षुद्राग्निमन्थे । ছোট গণিরি । रा.नि.व.६ ।

तेजोह्वा । स्त्री । तेजोवत्याम् । তেজবল । भा. म.४भ.मु.रो.चि. । सु.चि.२थ. । वै.निघ.अर्शः-चि.बाहुशालगुड़े । वचायाम् । বচ । सुद्री.चि. कालकचूर्णे ।

तेमनम् । क्ली । आर्द्रीकरणे । मे. । व्यञ्जने । "व्यञ्जनं सूपशाकादिमिष्टान्नं तेमनं स्मृतम् ।" रा. नि.व.२० ।

तेमनी । स्त्री । चुल्लीभेदे । हे चं. ।

तेरः (रणः) । पुं । स्वनामख्यातक्षुपे । তেরড়া গাছ । मं तेरणा । कं वेवत्तिगे । गुणाः—शीतलः तिक्तः व्रणघ्नः अरुणरक्तदः । रा.नि.व.४ ।

तैजवल्ली । स्त्री । शतावर्य्याम् । रा.नि.व.४ ।

तैजसम् । क्ली । घृते । रा.नि.व.१५ ।

तैजसावर्त्तिनी । स्त्री । स्वर्णादिपाकमूषायां । मूचि । अम. ।

तैजसी । स्त्री । गजपिप्पल्याम् । रा.नि.व.६ ।

तैतिलः । पुं । खड्गिनि । গণ্ডার । मे. ।

तैत्तिरः । पुं । तित्तिरपक्षिणि । रा.नि.व.१८ । गण्डके । গণ্ডার । मे. ।

तैरणी(रिणी) । स्त्री । तेरणक्षुपे । रा.नि.व.४ ।

तैलम् । क्ली । सिह्लके । শিলারস । च.द. । सि.यो.रा.य.चि.चन्दनादितैले । तिलादिसम्भूत स्नेहे, तैलसामान्ये । তেল । तच्चाष्टादशविधम् । तद्यथा—तिलजं सार्षपं कौसुम्भम् अतसीजं धान्यजम् एरण्डजं कारञ्जम् ऐङ्गुदं नैम्बं विभीतकजं निर्गुण्डजं ज्योतिष्मतीजम् अभयाजं मधुरिकोत्थं कोशाम्रजं चित्राभवं कर्पूरजं त्रपुषवीजजञ्चेति । एषां विशेषगुणाः स्वस्वपर्य्यायेषु ज्ञेयाः । "तैलं न सेवयेद्धीमान् यस्य कस्य च यद्भवेत् । विषसाम्यगुणत्वाच्च योगे तन्न प्रयोजयेत् । उक्तञ्च, विषस्य तैलस्य न किञ्चिदन्तरं स्नेहस्य सुप्तस्य न किञ्चिदन्तरम् ।" रा.नि.व.१५। तैलसामान्यगुणाः स्वरूपञ्च । "तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् । तत्तु वातहरं सर्व्वं विशेषात्तिलसम्भवम् । तैलं स्वयोनिगुणकृत् वाग्भटेनाखिलं मतं । अतः शेषस्य तैलस्य गुणाः ज्ञेयाः स्वयोनिवत् । तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकं ॥" भा.पू.२भ तैलव. । "आनाहाष्ठीलवातासृक्गुल्मोदावर्त्तशूलिनां । हन्ति वातविकाराणां विदध्याच्च प्रशान्तये । यावन्तः स्थावराः स्नेहाः समासेन प्रकीर्त्तिताः । सर्व्वे तैलगुणाः ज्ञेयाः सर्व्वे चानिलनाशनाः ॥" अचि. १४ष. । तैलन्त्वाग्नेयमुष्णं तीक्ष्णं मधुरं मधुरविपाकं बृंहणं प्रीणनं व्यवायि सूक्ष्मं विशदं गुरु सरं विकाशि वृष्यं त्वक्प्रसादनं मेधामार्दवमांसस्थैर्य्यवर्णबलकरं चक्षुष्यं बद्धमूत्रं लेखनं तिक्तकषायानुरसं पाचनमनिलबलासक्षयकरं क्रिमिघ्नमशीतपित्तजननं योनिशिरःकर्णशूलप्रशमनं गर्भाशयशोधनञ्च । सु.सू.४५ष. । कटाहपक्वतैलगुणाः —"तैलद्रोणी प्रशस्ता विविधगदमये वातरोगार्दितेषु व्याकुल्ये पङ्गुभूते सविषमवधिरे मिञ्मिने पद्गदे च । धन्वङ्गे स्तब्धपृष्ठे प्रचलितपवने गात्रकम्पे कपाल्यां ग्रीवाभङ्गेऽपतन्त्रे क्षयरुधिरभवे मूत्रकृच्छ्रे च वस्तौ ।" राज.२प. । सर्व्वदा शिरस्तैलदानगुणाः—शिरःशूलखालित्यपालित्यहरं केशदार्ढ्यकरं केशस्थापवनदीर्घतासान्द्रताकरम्, इन्द्रियप्रसादकं वह्निशुद्धिकरञ्चेति । सदाकर्णपूरणगुणाः—मन्याहनुसंग्रहोच्चैःश्रुतिवाधिर्य्यकर्णवातजरोगाजनकञ्च । "सौवर्चलेङ्गुदीपीलुशिंशपासारसम्भवं । सरलागुरुदेवादिपादपैः सम्भवन्तु यत् । तुम्बुरूत्थं करञ्जोत्थं ज्योतिष्मत्युद्भवं तथा । अर्शः-कुष्ठक्रिमिश्लेष्मशुक्रमेदोऽनिलापहम् । करञ्जारिष्टजे तिक्ते नात्युष्णे च विनिर्द्दिशेत् । कषायं मधुरं तिक्तं सारणं व्रणशोधनं । अक्षातिमुक्तकाचोड़नारिकेरमधूकजम् । त्रपुषैर्वारुकुष्माण्डश्लेष्मान्तकपिलूद्भवं । वातपित्तहृदर्शोघ्नं शैवलं गुरु शीतलं । पित्तश्लेष्मप्रशमनं श्रीपर्णीकिंशुकोद्भवम् ।" अचि. १४ष. ।

तैलकम् । क्ली । अल्पपरिमाणतैले ।

तैलकन्दः । पुं । स्वनामख्यातमहाकन्दशाके । तैलकन्द इति भाषा । मं कं सूजिमुर्दिगड्डे । गुणाः—कटुरुष्णः वातापस्मारघ्नः विषघ्नः लौहद्रावी शोफघ्नः रसबन्धकारी च । तल्लक्षणं यथा—"अश्वारिपत्रसङ्काशः तिलविन्दुसमन्वितः । सस्नि-

ऽधःस्थभूमिस्थसिलकन्दोऽतिविस्तृतः ॥" रा.नि. व.७। [व.१६।

तैलकल्कजः । पुं । तैलकिट्टे । शब्द । रा.नि.

तैलकिट्टम् । क्ली । पिण्याके । शब्द । गुणाः—कटुकं गौल्यं कफवातप्रमेहघ्नञ्च । रा.नि.व.१६ ।

तैलचो(चौ)रिका । स्त्री । तैलपायिकायां । श.र. ।

तैलद्रोणी । स्त्री । तैलमानपात्रे । তেলের দোণা । तैलपूर्णकाष्ठपात्रे । आकण्ठमज्जनार्थं तैलपूर्णकाष्ठादिपात्रे । তেলের ডুনী । तत्र स्थितिगुणाः—वातव्याकुलरोगपङ्गुवाधिर्य्यमिथ्मिनगद्भदधन्वङ्गस्तम्भपृष्ठप्रचलितपवनगात्रकम्पग्रीवाभङ्गापतन्तकचयरुधिरजमूत्रकृच्छ्रवस्तिरोगेषु प्रशस्ता । राज. ।

तैलधान्यम् । क्ली । तिलादिबीजवर्गे । यथा—तिलातसी च तोरी च त्रिविधश्चापि सर्षपः । द्विधा राजी खाखसञ्च बीजं कौसुम्भसम्भवम् । एतानि तैलधान्यानि पठितानि च पूर्व्ववत् ॥ शर्कः।

तैलनिर्यासः । पुं । गन्धराजे । रा.नि.व.१२।

तैलनी । स्त्री । तिलकिट्टे । वै.निघ. ।

तैलपञ्चकम् । क्ली । द्रव्यपञ्चकसिद्धतैले । यथा—"तैलं प्रसन्नागोमूत्रमारनालं यवाग्रजः । गुलजाठरमानाह्पीतमेकत्र साधयेत् ॥" च. ।

तैलपर्णः (कः) । पुं, क्ली । ग्रन्थिपर्णवृक्षे । গেঁটেলা । भा. । चन्दनवृक्षे । वै.निघ. ।

तैलपर्णिकम् । क्ली । तैलचन्दने । तत्तु शीतलं धवलं तिलपर्णतरुजातञ्च । भ. । हरिचन्दने । श्रम. ।

तैलपर्णी । स्त्री । लवणखोच्याम्, देवदारुनिर्यासे । प.मु. । रक्तचन्दने । चन्दने । शिलारसे । मे. । [পোকা । रा.नि.व.१९ ।

तैलपा । स्त्री । पेचके । तैलपायिनि । তেলা-

तैलपाकः । पुं । तैलसाधने । তৈল পাক করা । See स्नेहपाकविधिः ।

तैलपातनम् । क्ली। सर्व्वबीजात्तैलनिःसारणे । यथा—"सुपक्वतालपत्राणां रसमादाय भावयेत् । समस्तबीजचूर्णं यदुक्तानुक्तं पृथक् पृथक् । आतपे मुञ्चते तैलं साध्यासाध्यं न संशयः ॥" र.चि.७अ।

तैलपायिका । स्त्री । तैलपायाम् । তেলাপোকা, আরশোলা । श्रम. ।

तैलपिञ्जः । पुं । श्वेतारण्यतिलकवृक्षे । वै.निघ ।

तैलपिपीलिका । स्त्री । तैलपायिपिपीलिकाभेदे । रा.नि.व.११ ।

तैलपोतः । पुं । तैलपिची । च.द. ।

तैलफलः । पुं । इङ्गुदीवृक्षे । रा.नि.व.८। विभीतकवृक्षे । रा.नि.व.११ । तिलवृक्षे । वै.निघ.।

तैलभाविनी । स्त्री । जातीपुष्पवृक्षे । रा.नि. व.१० । [श.मा. ।

तैलमाली । स्त्री । वर्त्याम् । শল্তে, বাতি ।

तैलमूर्च्छा । स्त्री । तैलस्य मूर्च्छनायां । তেল মূর্চ্ছা করা । यथा—"तैलं कृत्वा कटाहे दृढतरविमले मन्दमन्दानलैस्तत् तैलं निष्फेनभावं गतमिह हि यदा शैत्ययुक्तं तदैव । मञ्जिष्ठारात्रिलोध्रैर्जलधरनलिकैः सामलैःसाक्षपथ्यैः, सूचीपुष्पाङ्घ्रिनीरैरुपहितमथितैर्गन्धयोगं जहाति ॥ तथा—तैलस्येन्दुकलांशिकी विकसिकाभागस्तु मूर्च्छाविधौ ये चान्ये त्रिफलापयोदरजनीह्रीवेरलोध्रान्विताः। सूचीपुष्पवटावरोहनलिकास्तस्यास्य पादांशिका दुर्गन्धं विनिहन्ति तैलमरुणं सौरभ्यमाकुर्व्वते ॥" भैष. । मूर्च्छाद्रव्यमानं यथा—मञ्जिष्ठा ५ तो. । अन्येषाञ्च मात्रा मञ्जिष्ठाचतुर्थांशा इति ।

तैलबीजः । पुं । भल्लातकवृक्षे । रा.नि.व.११।

तैलसाधनम् । क्ली । कस्तूरिकायां । वै.निघ. । काकोल्यां । কাঁকলা । श.च. ।

तैलस्फटिकः । पुं । रुणमणौ । हे.च. ।

तैलस्यन्दा । स्त्री। भूमिकुष्माण्डे । काकोल्यां । श्वेतापराजितायाम् । वै.निघ. । [व.१२ ।

तैलाग(गु)रु । क्ली । दाहागुरुणि । रा.नि.

तैलाङ्गः । पुं । वकुलवृक्षे । प.मु. ।

तैलाटी । स्त्री । वरषट्पदे । वरटायां । বোল্তা। हे.च. । [শোলা । जटा. ।

तैलाम्बुका । स्त्री । तैलचौरिकायां । আর্-

तैलिनी । स्त्री । तैलपायिकायाम् । रा.नि.व. १९ । दशावर्त्याम् । श.मा. ।

तैलिशाला । स्त्री । तैलिकगृहे । घानिघर । श.च. ।

तैलीनम् । क्ली । तिलक्षेत्रे । रा.नि.व.२ ।

तैलु(ल्व)कः । पुं । कीटे । च.द.पाण्डु-चि. । वा.चि.१अ. ।

तैल्वणपूगम् । क्ली । पूगफलविशेषे । नैलवत् इति भाषा । रा.नि.व.११ । See चक्रीटः ।

तैषः । पुं । पौषमासे अम. ।

तोकः । पुं । बालके । त्रिका. ।

तोककः । पुं । चाषपक्षिणि । नीलकण्ठ । वै. निघ. । चातकपक्षिणि । श.म. ।

तोक्मः (क्मः) । पुं । अपक्वयवे । हरितनिः-शूकसद्यवे । जई । "तोक्मस्तत्सहरितः सतः स्वल्पश्च कीर्तितः ।" सोऽतियवाद्धीनगुणः । भा. पू.१भ.धा.व. । पल्लवाङ्कुरे । भागवतम् ।

तोड़िमत्स्यः । पुं । मत्स्यविशेषे । ताड़ई मा-छ । वै.निघ. ।

तोदः (नम्) । पुं, क्ली । सूचीव्यधनेनेव शूले-नेव वा व्यथायाम् । र.मा । भा.म.१भ.आगन्तुज्व. । तीव्रवेदनायाम् । पुं । वायौ । वै.निघ. ।

तोदनः । पुं । फलशाकविशेषे । तत्फलं कषायं रूक्षं वातकफघ्नं । सु.सू.४६अ. । अम्लोष्णं लघु सं-ग्राहि स्निग्धं पित्ताग्निकरञ्च । च.सू.२७अ. ।

तोदपर्णी । स्त्री । तोयपर्णाम् । पाना । कु-धान्यभेदे । सु.सू.४६अ. ।

तोमरधरः । पुं । अग्नौ । वै.निघ. ।

तोमरिका । स्त्री । सौराष्ट्रमृत्तिकायां । श.र. ।

तोयम् । क्ली । जले । रा.नि.व.१४ । बालके । वाला । वै.निघ. ।

तोयकामः । पुं । जलवेतसे । मद.व.५ ।

तोयकुम्भा । शैवाले । वै.निघ. ।

तोयगर्भः । पुं । नारिकेलवृक्षे । वै.निघ. ।

तोयजः । पुं । उशीरे । लामज्जके । वै.निघ. ।

तोयडिम्भः । पुं । घनोपले । हारा. ।

तोयदः । पुं । उशीरे । नागरमुस्तायाम् । वै. निघ. । मेघे । क्ली । घृते । मे. ।

तोयधरः । पुं । मुस्तायां । नागरमुस्तायाम् । सुनिषण्णकशाके । मेघे । मे. ।

तोयधिप्रियम् । क्ली । लवङ्गे । श.च. ।

तोयपर्णी । स्त्री । तृणधान्यविशेषे । गुणाः श्यामाकवत् । च.सू.२७अ. । वारिपर्णां । पाना ।

तोयपाषाणजमलम् । क्ली । खर्परे । था-पर । वै.निघ. । [नि.व.४ ।

तोयपिप्पली । स्त्री । कचटे । काँचड़ा । रा.

तोयपुष्पी । स्त्री । पाटलवृक्षे । श.मा. ।

तोयप्रष्ठा । स्त्री । पाटलवृक्षे । वै.निघ. ।

तोयप्रसादन(फल)म् । क्ली । कतकफले । निर्म्मालि । र.मा. । [कुड़ । रा.नि.व.७ ।

तोयफला । स्त्री । वालकर्कटिकायाम् । काँ-

तोयमञ्जरी । स्त्री । जलापामार्गे । वै निघ. ।

तोयमलम् । क्ली । समुद्रफेने । वै.निघ. ।

तोयवती । स्त्री । अमृतवल्ल्याम् । वै.निघ. ।

तोयवल्लिका (ल्ली) । स्त्री । अमृतस्रवाल-तायाम् । चित्रकूटे रुदन्तीति ख्यातायाम् । अमृ-तवल्ली लता । कारवेल्लके । उच्छे । रा.नि.व.३ । महादुग्धायाम् । रा.नि.व.२३ ।

तोयवृत्तिः । पुं । जलापामार्गे । वै.नघ. ।

तोयवृक्षः । पुं । शैवाले । वै.निघ. ।

तोयशाला । स्त्री । वारिशालायाम् ।

तोयशुक्तिका । स्त्री । जलशुक्ती । जल झिं-टाई । रा.नि.व.१६ ।

तोयशूकः । शैवाले । वै.निघ. ।

तोयसर्पिका । स्त्री । भेक्याम् । वै.निघ. ।

तोयसूचकः । पुं । मण्डूके । शब्दार्थकल्पः ।

तोयस्रावः । पुं । अश्रस्य नेत्रतो जलस्रावरो-गे । "अजस्रं पश्यतां व्यग्रं स्वच्छं स्रवति चक्षुषः । तोयस्रावीति तं विद्याद्विकारं मारुतात्मकम् ॥" अ.द.२०अ. । जलस्रावे ।

तोयाधिवासिनी । स्त्री । पाटलवृक्षे । प.मु. ।

तोयापामार्गः । पुं । जलापामार्गे । वै.निघ. ।

तोयोद्भवा । स्त्री । जलापामार्गे । वै.निघ. ।

तीरणम् । क्ली । तीवायाम् । धारा ।
तौल: (क:) । पुं, क्ली । टङ्कपरिमाणे । ১ তোলা । षष्टीविरक्तिकमाने । ८६ रक्तिकमाने । प.म. । माषकद्वयमाने । श.मा. ।
तौचम् । क्ली । कर्णमले । त्रिका. ।
तौतिक: । पुं, क्ली । शुक्तौ । झिनुक । प.मु. मुक्तायाम् । रा.नि.व.१२ ।
तौषारम् । क्ली । तुषारजले । रा.नि.व.१४ ।
त्रपुकर्कटी । स्त्री । कर्कटिकाभेदे, त्रपुषाम् । शशा । रा.नि.व.७ । [र.मा. ।
त्रपुटी । स्त्री । सूक्ष्मैलायाम् । ছোট এলাচ ।
त्रपुलम् । क्ली । वङ्गे । रङ्गे । श.चि. ।
त्रपुष(स)म् । क्ली । कर्कष्वाम् । কাঁকুড় । प.मु. । क्षयचिहति । কান তেউড়ী । र.मा. । वङ्गे । रा.नि.व.१३ । त्रपुषीफले । শশা । भा. ।
त्रपुषतैलम् । क्ली । त्रपुषबीजोत्थतैले । শসা-বীজের তৈল । गुणा:—वातपित्तहरं केश्यं श्लेष्मलं गुरु शीतलञ्च । वा.टी.हेमा. । मधुरं गुरु शीतलं केश्यं कफपित्तघ्नं कान्तिजनकञ्च । रा.नि. व.१३ ।
त्रपुषा (षी) (सा, सी) । स्त्री । (Cucumis sativus. Syn. C. Hardwickii.) The cucumber. स्वनामख्यातफलशाकविशेषे । शशा गाछ । हिं खीरै, लघुखीरा, बालमखीरा । मं तौसीककंटी । कं तसेंयकाथि । तैं दोसकाय । उत्. कष्टकारि काकुडि । ता. मधैवेहरि कीहवे । फलगुणा:— रुच्यं मधुरं शीतलं गुरु सत्रपित्तविदाहवान्तिघ्नं बहुमूत्रकरम् । रा.नि.व.७ । "त्रपुषं लघु नीलञ्च बलवट्स्नमदाहहृत् । स्वादु पित्तापहं शीतं रक्तपित्तहरं परम् । तत्पाक्तु कफकृज्जीर्णमर्षं वातकफापहम् । तत्-हमवमुखं स्वादिपत्तलं कफवातनुत् । तद्बीजं मूत्रलं शीतं रुच्यं पित्ताक्षकृच्छ्रजित् ॥" भा.श्चावत.। क्षयचिहति । কান তেউড়ী । र.मा. । महेन्द्रवारुण्याम् । रा.नि.व.३ । कर्कटिकायाम् । हे.च.।
त्रपुसिनी । कर्कटिकायां । वै.निघ. ।
त्रपुस् । क्ली । वङ्गे । भा,म,४भ.क्षर्वरी.चि.मु.सू. २८ष.त्रप्वादि: । शीषके । रा.नि.व.१३ । मै. । प.मु. । पुं । त्रपुषलतायां । শসা গাছ ।
त्रप्वादि: । पुं । रङ्गादिसप्तधातुषु । त्रपुसीसताम्ररजतकृष्णलौहसुवर्णलौहमलानि । गुणा:— गरकृमिहर: तथा विषहृद्रोगपाण्डुमेहहरश्च । सु.सू. ३८ष. ।
त्रयी । स्त्री । सोमराज्यां । श.च. ।
त्रयोदशाङ्गगुग्गुलु: । पुं । वातव्याधौ । भाग(भा)वा इति ख्यातं वषिन्द्र्यं (अभावे मुस्ता लशुनं बिल्वफलं वा) अश्वगन्धा हबुषा (হবুষফল) गुडूची (গুলঞ্চ) शतावरी गोक्षुरबीजं वौजतारकबीजं रास्ना शुलुफा शटी यमानी शुण्ठी एषां प्र. चूर्ण १ प. शुद्धगुग्गुलु: १२ प. घृतं ६ प. । रस.र. । सा.कौ. । "भाहस्य लशुने शीत: भार्ही बिल्वफले तथा ।" विश. ।
त्रसरेणु: । पुं । त्रिंशत्परमाणवात्मकमानविशेषमाने । स जालान्तरगतरविकिरणेषु दृश्यते । "त्रसरेणु विज्ञेय: त्रिंशता परमाणुभि: ।" प.म.१ख. ।
त्राणम् । क्ली । त्रायमाणालतायाम् । मे. ।
त्राणा (णी) । स्त्री । त्रायमाणालतायां । बला लता वा डुमुर । रा.नि.व.५ । मे. ।
त्रायन्ती । स्त्री । त्रायमाणायां । বন ডুমুর । বন ভাঃলিয়া । रा.नि.व.५ । भैष.कुष्ठ चि.महाभल्लातकगुडे । सि.यो.सुवर्णाद्यघृते । "त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा । ज्वरहृद्रोगगुल्मार्शोभ्रमशूलविषप्रणुत् ।" भा. । च.द.सश्रा.ज्व. चि. । सि.यो.च.द.यक्ष्म.चि.जीवन्त्याद्यघृते । वात, ज्व.द्राक्षादि: । च.द.ज्वर.चि.पिप्पल्यादिघृते । गजकरण्डके । मेहद्रीति लोके । वै.निघ.बदरी.चि, भल्लाद्यघृते । च.द.मूल चि. ।
त्रायमाणा (णिका) । स्त्री । हिमवत्प्रसिद्धस्वनामख्यातमहाक्षुपे । বনডুমুর, বনলতা, বহুলা, বন ভাঃলিয়া । हिं त्रायमाणा । गुणा: —शीतमधुरा गुल्मज्वरकफरक्तघ्नी । भ्रमतृष्णाक्षयविषच्छर्दिघ्नी च । रा.नि.व.५ ।
त्रायमाणादि: । पुं । पित्तज्वरहरसिद्धकषायभेदे । च.द.ज्व.चि. । "त्रायमाणा च मधुकं पिप्पलीमूलमेव च । किराततिक्तकं मुस्तं मधुकं सविभीतकम् ॥"

शामदष्टः । पुं । कुक्कुरदष्टरोगभेदे । यथा—"कोऽप्यलर्केदष्टोऽपि शब्दमस्पर्शदर्शनैः । जल-स्यात्रसनामाग्नं दृष्टं तदपि वर्जयेत् ॥" वा.उ.३८ अ. । [अ.ना. ।

त्रिंशत्पत्रम् । क्ली । कुमुदपुष्पे । नालि फूल ।

त्रिकम् । क्ली । त्रिफलायां । त्रिकटुनि । त्रिम-दे । (सुखबोधः) । कटिप्रान्तभागे । रा.नि.व.१८ "त्रिकसन्धी: पृष्ठवंशास्थीयं: सन्धित्रिकं म-तम् ।" पुं । गोक्षुरके । शृङ्गाटके । वै.निघ. ।

त्रिकग्रहः । पुं । वातरोगभेदे । त्रिकवेदनं । च नृ.२०अ. । [भा.नि. ।

त्रिकग्राही । त्रि । वेदनया त्रिकव्यापिनि ।

त्रिकटः । पुं । शृङ्गाटके । गोक्षुरके । श.र. ।

त्रिकटु । क्ली । शुण्ठीपिप्पलीमरिचेषु । तें शु-ण्ठि पिप्पलि मिरिचात्‌ । गुणाः—दीपनं श्वास-कासघ्नं चर्मरोगगुल्मप्रमेहकफस्थौल्यमेदःश्लीपदपीन-सादिकं हन्ति । भा. ।

त्रिकटुगुड़िका । स्त्री । प्रमेहपिड़कायाम् । त्रिकटु त्रिफला गुग्गुलु प्रत्येकं समभागः । गोक्षु-रक्वाथेन मर्द्यं ।

त्रिकट्वादिवर्त्तिः । स्त्री । नेत्ररोगाधिकारे वर्त्तिः । "त्रीणि कटूनि करञ्जफलानि द्वे रजनी सह सैन्धव । बिल्वतरोर्वरुणस्य च मूलं वारिचरं दशमं वदन्ति ॥" वारिचरः शङ्खनाभिः । रस.र. ।

त्रिकण्ट(क)म् । क्ली । कण्टकारी दुरालभा गोक्षुरकश्चेति क्षुपत्रये । सि यो.सन्निपातज्वरे । उ-त्पलोत्पलिकारोदुरालभासु । रा.नि.व.२२ । गुणाः—"त्रिकण्टकानां क्वाथः स्यात्त्रिदोषज्वरविनाशनः । विपरीतं वनितैव नलकस्य वज्रं तथा ॥" वै. निघ. । पुं । मत्स्यविशेषे । टांगरा माछ, गागर माछ । त्रिकां. । गुणाः—पिच्छलः कफदः वृष्यः लघुः दीपनश्च । राज.व्य. । गोक्षुरके । र.मा. । च.द.ज्व.चि.तन्त्र.चि.नागबलाघृते । शृङ्गाटके । गुड़ूच्याम् । कण्टकार्य्याम् । वचायाम् । वै.निघ. । स्नुहीवृक्षे । डेकांटा सिज् । श.च. । जलज-जातीयकीटविशेषे । सु.कल्प.८अ. ।

त्रिकण्टका । स्त्री । विष्णुक्रान्तायां । तेउड़ी । अ.द.१८ ।

त्रिकण्टकादिघृतम् । क्ली । मूत्रकृच्छ्राधि-कारे घृतम् । गोक्षुरः एरण्डमूलं कुशमूलं काश-मूलं शरमूलं इक्षुमूलं उलुपमूलं शतमूली कर्क-टिबीजं एषां प्र. स्वरसः ४ श. । स्वरसाभावे गो-क्षुरैरण्डमूलकुशादिपञ्चमूलं प्र. १४ प. ५ तो. २ मा. ० र. । जलं ४४ श. शे. ११ श. । शतमू-लीरसः कर्कटीरसः इक्षुरसः प्र. १२ प. २ तो. ५ मा. २ र. घृतं ४ श. । पाके सिद्धे प्रक्षेपः पु-रातनगुडः । भा.कौ. । त्रिकण्टकादीनां मिलित्वा ४४ प. वारि ४४ श. शे ११ श. शतावर्य्यादीनां रसः मिलितः ४ श. । रस.र. । भा. । गव्यघृतं ४ श. गोक्षुरादीनां प्र. २ श. क्वाथार्थजलं प्र. १६ श. शे. ४ श. । शतावरीक्षुकुष्माण्डानां स्वरसः प्र. ४ श. । प्रक्षेपः शर्करा २ श. । भैष. । [निघ. ।

त्रिकण्टाख्यः (कः) । पुं । शृङ्गाटके । वै.

त्रिकत्रयम् । क्ली । समत्रिकटुत्रिफलात्रिमदे ।

त्रिकत्रयादिलौहम् । क्ली । पाण्डुरोगे हि-तम् । शोधितमण्डूरं १ प. गव्यघृतं १ प. शर्करा १ प. मधु १ प. कान्तलौहं १ तो. त्रिकटु त्रिफ-ला मुस्तं चित्रकमूलं विड़ङ्गं एषां प्र. १ तो. एषां क्वाथेन लौहपात्रे ताम्रपात्रे वा सप्त भावयित्वा ततः घृतेन च सप्त भावयित्वा रौद्रे शिशिरे च स्थाप्यम् । भा.कौ. ।

त्रिकर्ष(र्षिक)म् । क्ली । नागरातिविषामु-स्तासु । शुंठ, आतइच, मुथा । "नागरातिवि-षामुस्ता त्रयमेतत्त्रिकर्षिकम् ।" रा.नि.व.२२ ।

त्रिकशूलम् । क्ली । वातव्याधिभेदे । कटि-प्रान्ते शूल । तदुक्तं—"त्रिकसन्धी: पृष्ठवंशा-स्थीयं: सन्धित्रिकं स्मृतं । तत्र वातेन या पीड़ा त्रिकशूलं तदुच्यते ॥ वारंवारानुकारीदं त्रिकशू-ली प्रयत्नतः । हट्टाघ्नाल्करोधार्थं धारयेत्ततो नरः ॥" भा.म.२भ. ।

त्रिकसन्धिः । पुं । त्रिकस्थपृष्ठवंशास्थि-सन्धिस्थाने । च.शा.७अ. । [भ्व. ।

त्रिकसन्ध्यस्थि । क्ली । त्रिकास्थनि । च.शा.

त्रिकूट(लवण)म् । क्ली । सामुद्रलवणे । क-रकच लवण । प सु । र.मा. । द्रोणीलवणे । रा. नि.व.६ ।

त्रिकूटाह्वयम् । क्ली । काचलवणे । वै.निघ.।
त्रिकूर्चकम् । क्ली । व्रणविस्रावणार्थम् षडङ्गुलशस्त्रविशेषे । सु.सू.८अ. । "षडङ्गुलानि तथाष्टैव शस्त्राङ्गार्थं त्रिकूर्चकं । फलैस्त्वर्मुखाकारैरङ्गुलैरन्वितं त्रिभिः । एकैकस्य फलस्यैषामन्तरं व्रीहिसम्मितं । वृन्तं पञ्चाङ्गुलायामङ्गार्थं रुचकभूषितं ॥" सु.टी.ड. । [विधारवृक्षे । वै.निघ. ।
त्रिकोणम् । क्ली । योनौ । शृङ्गाटके । पुं ।
त्रिकोणकः । पुं । मुष्कवृक्षे । रा.नि.व.८ ।
त्रिकोणफलम् । क्ली । शृङ्गाटके । पाणिफल । भा. पुं । विधारवृक्षे । वै.निघ. ।
त्रिकोणा । स्त्री । योनौ । शृङ्गाटकवृक्षे । वै.निघ. । [पुष्पे । श.च. ।
त्रिखम् । क्ली । कर्कटिकायाम् । वै.निघ. । त्र-
त्रिगन्ध(क)म् । क्ली । त्वगेलापत्रेषु । वै.निघ. २भ.ग्रह.चि.दाड़िमाष्टके । [रिकायां । श्रै. ।
त्रिगर्त्ता । स्त्री । मुक्तायाम् । वै.निघ. । घुघु-
त्रिगुणम् । क्ली । सत्त्वरजस्तमःसु ।
त्रिगुणाख्यरसः । पुं । वातव्याधौ रसः । गन्धकः १ भ. पारदः ८ भ. (मतान्तरे गन्धकः १ भ. पारदः २ भ.) स्वह्निना पक्वावतार्य सञ्चूर्ण्य च तेन समभागं हरीतकीचूर्णं मिश्रयेत् । रस.कौ. । अन्यः शूले—टङ्गणं (সোহাগার খই) मृगशृङ्गस्वर्णगन्धकरससिन्दूरं समभागं आर्द्रकरसेन पिष्ट्वा दत्त्वा गजपुटे पचेत् । मात्रा १ मा. अनु. मधु । र.सा.सं. ।
त्रिजटा । स्त्री । बिल्ववृक्षे । तन्त्रम् ।
त्रिजात(क)म् । क्ली । मिलिततुल्यत्वगेलापत्रेषु । दारुचिनि, এলাচ, তেজপত্র সমভাগ । रा.नि.व.२२ । तें दचिणीचक्क, एलकुलु, आकुपचौंक । "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशरसंयुक्तं चातुर्जातकमुच्यते ॥" प.प्र.३ख. । गुणाः—"तद्द्वयं रोचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् । लघु पित्ताग्निकृद्वर्ण्यं कफवातविषापहम् ॥" भा. ।
त्रिणम् । क्ली । तृणे । श.र. । [रोरी.चि. ।
त्रितयन् । क्ली । सन्निपाते । भा.म.४भ.शि-

त्रिदला । स्त्री । गोधापदीलतायाम् । গোঁয়ালিয়া লতা । प.मु. । रक्तलज्जालुकायाम् । वै.निघ. । वष्टिमधुनि । ज.द.१२अ. । [च. ।
त्रिद(दा)लिका । स्त्री । चर्मकषायाम् । श.
त्रिदशगोपः । पुं । इन्द्रगोपकीटे । वै.निघ.।
त्रिदशदारु । क्ली । देवदारुकाष्ठे । चि.क.क. स्त्रीरी.चि. । [व.१० ।
त्रिदशमञ्जरी । स्त्री । तुलसीवृक्षे । रा.नि.
त्रिदशवरभोज्यम् । क्ली । अमृते । चि.क. क.केशररसे ।
त्रिदशसर्षपः । पुं । देवसर्षपवृक्षे । वै.निघ. ।
त्रिदशाहारः । पुं । अमृते । हला. ।
त्रिदिवा । स्त्री । एलायां । गङ्गायां । वै.निघ.।
त्रिदिवोद्भवा । स्त्री । स्थूलैलायाम् । বড় এলাচ । रा.नि.व.६ ।
त्रिदिवोद्भूता । स्त्री सूक्ष्मैलायाम् । वै.निघ.।
त्रिदीप्यम् । क्ली । यमानीत्रये, यमानी खोरासानी अजमोदा च । वै.निघ.२भ.अर्शः चि.भल्लातकावल्याम् ।
त्रिदोषजः । त्रि । त्रिदोषजनिते ।
त्रिदोषदावानलकालमेघः । पुं । सन्निपातज्वरे रसः । हरितालपुटितवङ्गं मनःशिलापुटितशीषं शीषपुटितस्वर्णरौप्यताम्राणि प्रत्येकं पुनः हिङ्गुलपुटितानि कृत्वा प्र. समभागी यास्याः एतत्समष्टितुल्यः पारदः गन्धकः तुल्यकश्च द्विगुणः (मतान्तरे उक्तद्रव्याणां प्र. एकैको भागः, गन्धकतुल्ययोः द्वौ भागौ) एकत्र निम्बुकरसेन सम्मर्द्य गोलकञ्च कृत्वा यथाविधि पुटेत् । अथ तत्र तुल्यभागं पुनः गन्धकं दत्त्वा चित्रकरसेन मर्दयेत् । तदनु षोड़शांशं विषं सम्मिश्र्य पुनः तद्रससिक्तं कृत्वा पचेत् । अथ रोहितमत्स्यपित्तेन भावयित्वा रक्तिद्वयमिता वटी कार्य्या ।
त्रिदोषदावानलरसः । पुं । ज्वराधिकारे रसः । अर्कमूर्त्तिरसः यदि ताम्रपात्रे जम्बीरादिरसैः पुनरपि भावितः स्यात् तदा त्रिदोषदावानलो भवति । भैष. । [विशिषे । वै.निघ. ।
त्रिदोषरोहिणी । स्त्री । त्रैदोषिकगलरोग-

त्रिदोषसमम् । क्ली । समदोषत्रये । रा.नि. व.२२ ।

त्रिदोषसम्भवः । पुं । सन्निपाते । वै.निघ. ।

त्रिदोषहारी (रसः) । पुं । ज्वराधिकारे रसः । "बलिशिलातालताम्यतुल्योदधिमलटङ्कनिकुम्भजाद्यताख्यं । दलितं मरिचपित्ततस्त्रिधा स्याद्गुधिरगतः शिरसि त्रिदोषहारी ॥" र.चि.९स. ।

त्रिधातुः । पुं । गणपतौ । त्रिका. । क्ली । धातुत्रये ।

त्रिधारकः । पुं । सुह्मीभेदे । তেকাঁটা মনসা । गुणाः—सुह्मीसमो विशेषात् रससिद्धिकरः । गुण्डत्वे । रा.नि.व.८ ।

त्रिधारकाण्डवल्ली । स्त्री । त्रिधारकारवेल्लाम् । তেশিরে উচ্ছে । वै.निघ. ।

त्रिधारस्नुही । स्त्री । त्रिधारवज्रीवृक्षे তেকাঁটা সিজ্ । रा.नि.व.८ ।

त्रिनेत्ररसः । पुं । पित्तकासे रसः । ताम्रभस्म अभ्रभस्म तीक्ष्णलौहभस्म समभागम् । कासमर्दतालाम्लवेतसरसैः दिनैकं मर्द्दयित्वा द्विगुञ्जा वटी कार्या । रस.र. । अपरः परिणामशूले—टङ्कणं (সোহাগার খই) मगयङ्गं स्वर्णं रससिन्दूरम् एषां प्र. समभागं दिवा आर्द्रकरसेन पिष्टा गजपुटेन पचेत् । घृतमधुभ्यां सेव्यम् । रस.र. अन्यः शोथे—पारदः गन्धकः भृष्टटङ्कणं ताम्रं लौहम् एषां प्र. समभागं आर्द्रकरसेन मर्दयित्वा लघुपुटे पचेत् । अनुपानं—एरण्डरसः अपामार्गरसः । अन्यः ज्वराधिकारे—पारदगन्धकताम्राणि समभागानि निर्गुण्डीरसैः दिनैकं मर्दयित्वा शुष्कीकृत्य मूषामध्यगतं वालुकायन्त्रे प्रहरत्रयं पचेत् । पर्णखण्डेन सेव्यः । र.चि.९स. । अपरः सन्निपातज्वरे—पारदगन्धकताम्राणि समभागानि द्रव्यत्रयतुल्यैः गव्यदुग्धैः शिग्रुरसैश्च दिनं सम्मर्द्य गोलकं कृत्वा खरातपे शुष्कीकृत्य च अन्धमूषागतं वालुकायन्त्रे प्रहरत्रयं पचेत् । र.चि.९स. । अन्यश्च सन्निपातज्वरे—रसः १ भ. गन्धकः १ भ. ताम्रं चतुर्थांशं सर्व्वतुल्येन गव्यदुग्धेन निर्गुण्डीरसेन शिग्रुरसेन च खरातपे दिनैकं मर्दयित्वा शोषयेत् । भा. । अपरः उदरसभे—जारितस्वर्णमाक्षिकं हिङ्गुलं लौहं पारदः वङ्गं गन्धकः ताम्रम् अभ्रं समुद्रफेनः गिरिसिन्दूरका स्वर्णं शीसं चित्रकमूलं हिङ्गु त्रिकटु त्रिफला शिग्रुबीजम् अजमोदा (রাঁধুনী) यमानी पिप्पलीमूलं भार्गी (বামনহাটী) लवणं जीरकद्वयजीरके एषां प्र. समभागः आर्द्रकरसेन मर्द्यः । रस.र. । अपरः मूत्रकृच्छ्रे रसगन्धकवङ्गानां प्र. समभागः । दूर्व्वायष्टिमधुगोक्षुरशाल्मलिरसैर्भावयित्वा भूधरयन्त्रे पक्वा च पुनस्तैर्भावयेत् । मा. २ र. । र.सा.सं. ।

त्रिनेत्रा (त्री) । स्त्री । वाराहीनाममहाकन्दशाके । रा.नि.व.७ ।

त्रिपटु । क्ली । विड़सैन्धवकाचलवणेषु । वै.निघ. ।

त्रिपत्रः । पुं । चण्डालकन्दभेदे । रा.नि.व.७ । त्रिदलबिल्ववृक्षे । रा.नि.व.११ । क्ली । त्रिदलबिल्वपत्रे ।

त्रिपत्रकः । पुं । पलाशवृक्षे । हे.च. ।

त्रिपदा । स्त्री । हंसपदीलतायाम् । रा.नि.व. ५ । रक्तलज्जालुकायाम् । वै.निघ. ।

त्रिपदी । स्त्री । हंसपदीलतायाम् । ছোট গোয়ালিয়া লতা । प.मु. । रा.नि.व.५ ।

त्रिपर्णः । पुं । पलाशवृक्षे । रा.नि.व.१० ।

त्रिपर्णा । स्त्री । वनकार्पासाम् । বন কাপাস । पृश्निपर्ण्यां । চাকুলিয়া । र.मा. । वनगन्धायाम् । वै.निघ. । तिलपर्णिकाकन्दे । रा.नि.व.७ । शालपर्ण्याम् । भा.म.ख.१भ. ।

त्रिपर्णिका । स्त्री । यासक्षुपे । দুরালভা । रा.नि.व.४ । स्वनामख्यातकन्दशाकविशेषे । तिलपर्णी मूरेङ्गल इति कौङ्कणदेशे अनूपदेशे च प्रसिद्धा । তিলকন্দ । तल्लक्षणं यथा—"अश्वारिपत्रसङ्काशः तिलविन्दुसमन्वितः । सुस्निग्धाधस्थभूमिस्थः तिलकन्दोऽतिविश्रुतः ॥" गुणाः—मधुरा शीता श्वासकासघ्नी पित्तशमनी विषघ्नी व्रणघ्नी च । रा.नि.व.७ । तच्छाकगुणाः—शाकं गुरु च रूक्षञ्च प्रायो विष्टभ्य जीर्य्यति । मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम् ॥ च.सू २७अ. ।

त्रिपर्णी । स्त्री । शालपर्ण्याम् । भा. । वनकार्पासाम् । प.मु. । "त्रिपर्णी कलसीविल्वैः ।" मूर्व्वायाम् । रा.नि.व.२ । आरण्यगर्भिकायाम् । वै.

निघ. । त्रिपर्णीकन्दे । তিনকন্দ । रा.नि.व.७ ।

त्रिपला । स्त्री । त्रिफलायाम् । भ.द्वि. ।

त्रिपात् । पुं । ज्वरे । वैद्यकम् ।

त्रिपादः । पुं । ग्रन्थिपर्णमूले । वै.निघ. ।

त्रिपादिका । स्त्री । हंसपादीलतायाम् । रा.नि.व.५ ।

त्रिपादी । स्त्री । हंसपादीलतायां, कीटमारिकायाम् । वा.सू.१५अ.विदार्य्यादिः । "हे पञ्चके गोपसुता त्रिपादी ।" रक्तलज्जालुकायां। वै निघ.।

त्रिपिवा (न्) । पुं। लम्बकर्णे छागे । वै.निघ.।

त्रिपुटः (कः) । पुं । तालके । श.र. । गोक्षुरक्षुपे । प.मु. । मटर इति ख्यातद्विदलक्षुपे । र.मा. । शिम्बीधान्यभेदे । খেসারি কলাই । हिं खेसारि । गुणाः—"त्रिपुटी मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् । कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा । किन्तु खञ्जलपङ्गुलकारी वातातिकोपनः ॥" भ.पू.१भ.धा.व । "रुची विशोषी मधुरः प्रदिष्टः स्नायुं करोत्यस्थिगतं बलिष्ठं । विबन्धशूलभ्रमशोककर्त्ता दाहार्शहृद्रोगविकारकारी ॥" अ.चि.१५अ. । तत्सूपगुणाः —"त्रिपुटानां कलायानां सूपः स्वादुश्च वातलः । आध्मानशूलजनकः पित्तासृक्चिवान्तिहा ॥" द्रव्यगुणः ।

त्रिपुटकी । स्त्री । श्वेतत्रिवृति । वै.निघ. ।

त्रिपुटा । स्त्री। अरुणत्रिवृति । रा.नि.व.६ । कर्णास्फोटालतायाम् । रा.नि.व.३ । त्रिकन्याके । कृष्णचणके । प.मु. । स्थूलैलायाम् । सूक्ष्मैलायाम् । रा.नि.व.६।२२ । वार्षिकमल्लिकायाम् । মল্লিকা বিশেষ । रा.नि.व.१०।२३ । जातीवृक्षे । गोक्षुरके । कुलत्थिकायाम् । वै.निघ. ।

त्रिपुटी (इन्) । पुं । एरण्डे । श.मा. । स्त्री । त्रिवृति । তেউড়ি । अ.टी.भ. ।

त्रिपुटीफलः । पुं । एरण्डवृक्षे । हारा. ।

त्रिपुरभण्डिका । स्त्री । रुद्रजटायाम् । भांट् इति भाषा । भैष.पानीयभक्तवव्याम् ।

त्रिपुरभैरवरसः । पुं । ज्वरे रसः । शुद्धविषं १ भ. टङ्कणक्षारः (সোহাগার খই) २ भ. गन्धकः ३ भ. हिङ्गुल (মত্যান্তরে সাম্) ४ भ. दन्तीवीजं ५ भ. । दन्तीक्वाथेन मर्द्दयेत् । मात्रा १ र. । अनु. आर्द्रकरसः । रस.र. । रस.कौ. । अन्यः यथा—विषं १ भ. पिप्पली ३ भ. मरिचं ४ भ. ताम्रं ५ भ. हिङ्गुलं ६ भ. आर्द्रकरसेन मर्द्दयेत् । मात्रा ॥० र. । भा.म.ज्व.चि. ।

त्रिपुरमल्लिका (मालिका) । स्त्री । वनमल्लिकायाम् । रा.नि.व.१० । त्रिका. ।

त्रिपुषा । स्त्री । त्रपुषायाम् । कृष्णत्रिवृति । श. च. । क्ली । त्रपुषफले । त्रपुषीवीजे । कुशावलेहे ।

त्रिपुष्पा । स्त्री । अतिबलायाम् । वै.निघ. ।

त्रिफला (ली) । स्त्री । Three myrobalans. फलत्रये । ত্রিফলা । सा चतुर्धा - महती क्षुद्रा सुगन्धा मधुरा च । तत्रमहती आमलकादीनां प्रत्येकमत्त्रभागाः । तदुक्तं —"पथ्या विभीतकं धात्री त्रिफला महती स्मृता ।" सि.यो.पानीयकल्याणघृते । आमलकहरीतकीविभीतकेषु । रा.नि.व.२२ । द्वितीया—काश्मर्य्यमृद्वीकापरूषकफलेषु । গাম্ভার ফল, কিস্মিস্, পরুষ ফল । "क्षुद्रा काश्मर्य्यमृद्वीकापरुषकफलानि च ।" श्रीकण्ठः । त्रिफलायां द्रव्यत्रयं समभागं देयम् । एषा योगेषु प्रधाना । गुणाः—दीपनी पित्तकफघ्नी दृष्टिवर्द्धनी रुच्या मलशोधनी मेहकुष्ठविषमज्वरनाशिनी च । भा.पू.१भ. । महाकुष्ठविषमज्वरपित्तघ्नी च । रावणः । सुगन्धत्रिफला यथा—जातीफललवङ्गपूगेषु । मधुरत्रिफला यथा —द्राक्षादाड़िमखर्ज्जूरेषु ।

त्रिफलाघृतम् । क्ली । पाण्डुरोगे । गव्यघृतं ४ श. । पाकार्थं गोमूत्रं १६ श. । कल्कार्थं त्रिफला दन्तीत्रिवृत्मूलवचाकम्पिल्ल (কমলাগুঁড়ি) मिलित शरावः । रस.र. । इदं स्वल्पम् ।

त्रिफलाद्यघृतम् । क्ली । नेत्ररोगाधिकारे घृतम् । गव्यघृतं ४ श. । क्वाथार्थं—त्रिफलारसः १२ श. स्वरसाभावे त्रिफला २ श. जलं ४८ श. शे. १२ श. । दुग्धं ४ श. । कल्कार्थं—त्रिफला त्रिकटु यष्टिमधु कटुकी पुण्डरीकं छुद्रैला विड़ङ्गं नागेश्वरं नीलोत्पलम् अनन्तमूलं श्यामालता रक्तचन्दनं हरिद्रा दारुहरिद्रा एषां प्र. २तो. । सा.कौ. । भा. । इदं मध्यमम् । अपरं—गव्यघृतं ४ श. । क्वाथार्थं—त्रिफला २ श. वारि १६ श. शे. ४श । भृङ्गराजरसः ४ श. वासारसः ४ श. । स्वरसाभावे

वासामूलं २ श. वारि १६ श. शे. ४ श.। शतमूलीरसः ४ श. छागदुग्धं ४ श. गुडूचीरसः ४ श. अभावे क्वाथः आमलकीरसः ४ श.। कल्कार्थं— पिप्पली शर्करा द्राक्षा हरीतकी आमलकी विभीतकं नीलोत्पलं यष्टिमधु काकोली गाम्भारीत्वक् कण्टकारी एषां मिलित्वा शरावः (১ সের)। शेष.। रस र.। वृद्धं वहत्। स्वल्पं यथा— घृतं ४ श.। क्वाथार्थं—त्रिफला ८ श. वारि ६४ श. शे. १६ श.। गव्यदुग्धं ४ श.। सन्ध्यायां तिमिरनाशार्थं पेयम्। अन्यत्—घृतं ४ श. शतावरीक्वाथः १६ श.। कल्कार्थं—त्रिफला यष्टिमधु १ श.। पाकशेषे मधु प्रक्षेपः १ श.। अन्यत् योनिरोगे—घृतं ४ श.। कल्कार्थं—त्रिफला झिण्टीद्वयं गुडूची पुनर्नवा श्योणाकः हरिद्रा दार्वी रास्ना अश्वगन्धा शतावरी एषां मिलितशरावः (১ সের)। गव्यदुग्धं १६ श.। भा.। [वड़। भूरिम.।

त्रिवलिः । स्त्री । जठरावयवविशेषे । পেটের

त्रिवलीकम् । क्ली । गुदद्वारे, पायौ । हे.च.।

त्रिभङ्गी (ण्टी) (ण्डी) । स्त्री। त्रिवृतायां । তেউড়ী। प.मु.। "सशर्करा कामलिनां त्रिभण्डी हिता।" सि.यो.कास-चि.। व.द.कास-चि.। सु.सू.४४अ.। चि.१७अ.।

त्रिभण्ड(द्र)म् । क्ली । मैथुने, सुरते । त्रिका.।

त्रिमण्डला । स्त्री । कृच्छ्रसाध्यलूताविशेषे ।

त्रिमदः । पुं । विड़ङ्गमुस्तचित्रकेषु । "विड़ङ्गमुस्तचित्रैश्च त्रिमदः ।" प.प्र.२ख.त्रिकत्रयलौहे ।

त्रिमदद्वितयम् । क्ली । त्रिमदस्त्रिफला चेति द्वये । प्रयोगा.ग्रह-चि.कणादिलौहे ।

त्रिमधु । क्ली। मधुरत्रये, मधुघृतशर्करासु । रा.नि.व.२१। गुणाः—"मधुरत्रितयञ्चाग्निदीपनं कान्तिदायकं । विषदोषं रक्तपित्तं तृष्णाञ्चैव विनाशयेत् ॥" वै.निघ.।

त्रिमल्लभट्टः । पुं । योगतरङ्गिणीकारे । [मु.।

त्रियष्टिः । स्त्री । पर्पटके । ক্ষেৎপাবড়া । प्र.

त्रियामा । स्त्री । हरिद्रायाम् । रा.नि.व.६ । नील्यां । कृष्णत्रिवृति । उत्पा.।

त्रिलवणम् । क्ली । सौवर्चलसैन्धवविड़ानीति लवणत्रये । सि.यो.सान्निपातिकज्व.। "मातुलुङ्गाद्र्वरसं कैश्चित्त्रिलवणान्वितम् ।" च.द.ज्व.चि. नस्ये । रा.नि.व.२१ ।

त्रिलिङ्गगतिः । स्त्री । त्रिदोषजनाड्यां । भा.म.४भ.मु.रो.चि. । "त्रिलिङ्गगतिसौषिरी ।"

त्रिलोहकम् । क्ली । स्वर्णरजतताम्रेषु । सुवर्णं रजतं ताम्रं त्रयमेतत्त्रिलोहकं । रा.नि.व.२२। गुणाः—त्रिलोहस्य गुणाः प्रोक्ताः पञ्चलोहसमा गुणैः । वै.निघ. । [च । सु.चि.२अ. ।

त्रिवर्गः । पुं । त्रिकटुनि, त्रिफलायां, त्रिमदे

त्रिवर्गद्वितयम् । क्ली । त्रिफलात्रिमदे । ত্রিফলা ও ত্রিমদ । रस.र.कणाद्यलौहे ।

त्रिवर्णकम् । क्ली । गोक्षुरके । त्रिफलायां । त्रिकटुके । मे. । त्रिजातके । सु.सू.४४अ. ।

त्रिवर्णकृत् । पुं। शरटे। কাঁকলাস। वै.निघ.।

त्रिवल्ली । स्त्री । इन्दीवरायां । वै.निघ. ।

त्रिविक्रमरसः । पुं । अश्मर्य्यधिकारे रसः । ताम्रभस्म तुल्येन छागदुग्धेन पक्वा, छागदुग्धपक्वताम्रभस्म १ तो. पारदः १ तो. गन्धकः १ तो. निर्गुण्डी(নিশিন্দা)रसेन दिनं मर्द्दयित्वा गोलकं कृत्वा बालुकायन्त्रे दिनैकं पचेत्। शीते उद्धृत्य द्विगुञ्जा मात्रा देया । रस.र. ।

त्रिविधायतनम् । क्ली । इन्द्रियार्थातियोगकर्म्मातियोगकालातियोगरूपेषु रोगाणां त्रिविधकारणेषु । च.सू.११अ. । [नि.व.१६ ।

त्रिवीजः । पुं । श्यामाके । শ্যামা ধান । रा.

त्रिवृतादिगणः । पुं । तदाद्यधोभागहरद्रव्यसमूहे । यथा—"त्रिवृता श्यामा दन्ती द्रवन्ती (ইন্দুরকাণী) सप्तला (চামরকষা) शङ्खिनी (শ্বেত বুহ্ণা) विषाणिका (কর্কটশৃঙ্গী, মেড়াশিঙে) गवाक्षी (গোমুক, রাখালশশা) छगलाण्त्री (বিদ্ধতাড়ক) स्नुक् (মনসা সিজু) सुवर्णक्षीरी (ওষধিবিশেষ বা শিয়ালকাঁটা) चित्रकः किणिही (আপাং) कुशः काशः तिल्वकः कम्पिल्लकः (কমলাগুঁড়ী) पाटला पूगः हरीतक्यामलकी विभीतकं नीलिनी (নীল) चतुरङ्गुलः (সোন্দাল) एरण्डः पूतिकः (করঞ্জ) महावृक्षः (তেকাঁটা সিজু) सप्तच्छदार्कज्योतिष्मत्यश्चेति अधोभागहराणि ।" सु.सू.३८अ. ।

त्रिवृतिका । स्त्री । त्रिवृतायां । रा.नि.व.६ ।

त्रिवृत् (ता, वृया) । स्त्री । (Ipomœa turpethum. Syn. Convolvulus turpethum.) Turpeth Root. स्वनामख्यातलतायाम् । ठेउड़ी । हिं तरबद, निशोत, नकपतर, पिथोरी । मं तियड़ । कं तिगड़े । तें आखतेगड़ । ता. शिवदइ । वम्. फुट्कुरी, निशोथी र । सा. गुणाः —कटुरुक्षा क्रमिश्लेष्मोदरार्त्तिकुष्ठकण्डूव्रणघ्नी विरेचने प्रशस्ता च । रा.नि.व.६। अरुणागुणाः—स्वादुः कषाया मृदुः रेचनी रुक्षा कटुका पित्तकफापहा च । राज । च.द.विरज्व. चि. । कृष्णागुणाः—श्वेतायाः हीनगुणा विरेचनी तीव्रा मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षकारिणी च । श्वेतागुणाः—विरेचनी स्वादुः उष्णा वातला रुक्षा पित्तज्वरश्लेष्मपित्तशोफोदरघ्नी च । भा. । रेचनी अर्थात् विपक्कमविपक्कं वा मलादि द्रवतां नयेत् रेचयति च । शार्ङ्ग. । एषा रक्तमूलैव ग्राह्या । सु. सू.३८।३९अ. । सि.यो.च.द.र.पि.चि. । त्रिवृतामोदके ।

त्रिवृत्पत्रम् । क्ली । वटपत्रे । रस.र. । वह्निभल्लातके ।

त्रिवृत्पर्णी । स्त्री । हिलमोचिकायां । श.च. ।

त्रिवृन्तः । पुं । पलाशवृक्षे । वै.निघ. ।

त्रिवेला (ली) । स्त्री । त्रिवृतायां । ठेउड़ी । रा.नि.व.६ ।

त्रिशङ्कुः । पुं । चातकपक्षिणि । त्रिका. । मृगसमार्ज्जारे । गन्धनकुल । वैनिघ. । विड़ाले । शलभे । मे. । खद्योते । श.मा. । [निघ. ।

त्रिशतपत्रम् । क्ली । पुण्डरीके । पद्म । वै.

त्रिशर्करा । स्त्री । गुड़ोत्पन्ना हिमोत्था मधुरा चेति मिलितशर्करायाम् । "गुड़ोत्पन्ना हिमोत्पन्ना मधुरा चेति मिश्रिता, त्रिशर्करा ।" रा.नि.व.२२।

त्रिशाखपत्रः । पुं । विल्ववृक्षे । रा.नि.व.११।

त्रिशिखः । पुं । विल्ववृक्षे । रा.नि.व.११ ।

त्रिशिखिदला । स्त्री । मालाकन्दे । रा.नि. व.७ ।

त्रिशिरा । स्त्री । पाठायां । रा.नि.व.६ ।

त्रिशूली (इन्) । पुं । पारदे । रस.र.उन्मा. चि.चण्डभैरवरसे । [छ । शब्दकल्पतरुः ।

त्रिशृङ्गी (इन्) । पुं । रोहितमत्स्ये । रुई मा-

त्रिसन्धिः । स्त्री । पुष्पवृक्षविशेषे । कृष्ण केलि । मं. त्रिसन्धि । कं त्रिसञ्जि । यस्य कुसुमानि सन्धिकाले एव विकसन्ति । सा रक्तसिताशितकुसुमभेदात् त्रिधा । परन्तु गुणैस्तुल्या । गुणाः— कफकासहरा रुच्या त्वग्दोषघ्नी च । रा.नि.व.१०।

त्रिसन्धिपुष्पदा । स्त्री। त्रिसन्धिवृक्षे । वै.निघ.।

त्रिसन्धी । स्त्री । शुक्लत्रिसन्धौ । वै.निघ. ।

त्रिसन्ध्यम् । क्ली । त्रिसन्धिपुष्पे ।

त्रिसन्ध्यकुसुमा । स्त्री । त्रिसन्धिपुष्पवृक्षे । रा.नि.व.१० ।

त्रिसन्ध्या । स्त्री । त्रिसन्धिपुष्पवृक्षे । वै.निघ. ।

त्रिसमम् । क्ली । समभागा हरीतकी शुण्ठी गुड़ूची च । रा.नि.व.२२ । गुणाः—"समचयं रुचिकरं चक्षुष्यं मलशोधनम् । वातं पित्तं नाशयति ॥" वै.निघ. ।

त्रिसरः । पुं । तिलौदने । वै.निघ. । हे.च. ।

त्रिसरा । स्त्री । कृसरायाम् । "तिलतण्डुलमाषैश्च कृसरा त्रिसरेति ।" प.प्र.३ख. ।

त्रिसरी । पुं । यस्याश्वस्य सर्व्वाङ्गं भिन्नवर्णं केवलं शिरः कृष्णं स त्रिसरी । "अन्यवर्णस्य वाहस्य शिरः कृष्णं यदा भवेत् । त्रिसरी नाम स प्रोक्तः भर्त्तुः कुलविनाशनः ॥" ज.द.३अ. ।

त्रिसवनम् । क्ली। त्रिसन्ध्यस्नाने । च.शा.५अ.।

त्रिसिता । स्त्री । त्रिशर्करायां । रा.नि.व.२२।

त्रिसुगन्धम् (न्धि) । क्ली। मिलितसमभागत्वगेलापत्रेषु । रा.नि.व.२२ । च.द.वासाखण्डकुष्माण्डे। गुणाः—"तदर्कं मुखदुर्गन्धच्छेदनी मलभेदनः ।" अर्कः ।

त्रिसूत्रः (स्कन्धः) । त्रि । हेतुलिङ्गौषधज्ञानरूपे (आयुर्व्वेदे) । त्रीणि हेत्वादीनि सूत्राणि यस्मिन् । त्रयो हेत्वादयः स्कन्धरूपा यस्य इति । च. सू.१अ. ।

त्रिचारम् । क्ली । चारत्रये । रा.नि.व.२१ ।

समगन्धचारसर्जिचारटङ्कणचारेषु । कामाग्निसन्दीपनरसे । च.द. । [(नेथाड़ा गाछ । र.मा. ।

त्रिजुरः । पुं । श्वेतकोकिलाचवृक्षे । (श्वेत कु-

त्रिजुरी । स्त्री । गोक्षुरे । वै.निघ.२भ.र.पि.चि.कुष्माण्डावलेहे ।

त्रुटिः (टी) । स्त्री । सूक्ष्मैलायाम् । (छोट एलाच । रा.नि.व.६। वा.सू.१५च.मुस्तादिः । "कुष्ठं त्रुटी हैमवती ।" चि.क्र.क.चर्ष्णा.चि. । च.द.रा.य,चि,लवङ्गादिचूर्णे । "त्रुटिसक्षण ।" कट्फले । वै.निघ. । [मा. ।

त्रुटिवीजः । पुं । कच्चीवृक्षे । कचू गाछ । ग्र.

त्रुटीद्वयम् । क्ली । सूक्ष्मैलायां स्थूलैलायाञ्च । वा.सू.१५च. शिरोविरेचने । "त्रुट्यौ पृथ्वीका शोधयत्युत्तमाङ्गम् ।" [क्रमपूले ।

त्रैकटु । क्ली । त्रिकटुके । चि.क्र.क.स्त्री.चि.म-

त्रैफलम् । क्ली । त्रिफलायाम् । ग्र.चि. ।

त्रैलोक्यचिन्तामणिरसः । पुं। ज्वराधिकारे रसः । पारदः हीरकं स्वर्णं रौप्यं ताम्रं लौहम् अभ्रं मुक्ता गन्धकः मल्लभस्म प्रवालं हरितालं मनःशिला प्र. समभागं चित्रकमूलक्वाथेन ७ दिनानि भावयेत् । अर्कनिर्यासेन (आकन्दर आठा) निर्गुण्डीरसेन चाङ्गेरसेन स्नुहीचीरेण (मनसार आठा) च प्र. ३ दिवानि भावयित्वा पीतकपर्द्दकाभ्यन्तरे दत्त्वा अर्कचीरेण टङ्कनं सम्मर्द्य तेन कपर्द्दकमुखानि संलिप्य अथ कपर्द्दकानि भाण्डमध्ये संस्थाप्य भाण्डमुखं रुद्ध्वा बालुकायन्त्रेण पचेत् । शीते समुद्धृत्य चूर्णतुल्यं रससिन्दूरं तच्चतुर्थांशं वैक्रान्तञ्च सम्मिश्य त्रिवृद्रसेन ७ चित्रकमूलरसेन च भावनात्रयं देयम् । मात्रा ४ र. । भैष. ।

त्रैलोक्यडम्बररसः । पुं । नवज्वरे हितः । पारदः गन्धकः ताम्रं पिप्पली जैपालं कटुकी हरीतकी त्रिवृत् मधुरतिन्दुकफलं, एषां प्र. समभागं स्नुहीचीरेण मर्द्दयेत् । मात्रा २ गुञ्जा । अनुपानं मधु । अन्यः—रसः २ भ. गन्धकः ४ भ. अभ्रचित्रकविडङ्गगुड़ूचीसारशोषकक्षणजीरकत्रिकटुसैन्धवयवचाराणां प्र. १भ. निर्गुण्डीवीजपूररसेन मर्द्दयेत् । मात्रा ३ र. । घृतेन देयः । अन्यः वातव्याधौ—हीरकभस्म स्वर्णं विषं शुद्धमुक्ता कान्तलौहं, एषां प्र. १ तो. अभ्रभस्म ४ तो. रससिन्दूरं ७ तो. कुमारीरसेन मर्द्यः । र.सा.सं. ।

त्रैलोक्यविजया । स्त्री । शक्राशनवृक्षे । सिद्धि गाछ । श.च. ।

त्रैलोक्यविजयापत्रम् । क्ली । विजयापत्रे। सिद्धि । (मदनमोदके, लक्ष्मीविलासरसे) ।

त्रैलोक्यसुन्दररसः । पुं । उदररोगे रसः । पारदः १ तो. गन्धकः २ तो. अभ्रं सैन्धवं विषं कृष्णजीरकं विड़ङ्गं गुड़ूचीसारः वचा यवचारः प्रत्येकं ॥० तो. निर्गुण्डीरसेन वीजपूररसेन च दिनं मर्दयित्वा शोषयेत् । मात्रा २ गुञ्जा । घृतेन सेव्यः । रस.चि.८प.। अन्यः—रसः १ मा. गन्धकः २ मा. कज्जलीकृत्य कुटजतालमूलीधुस्तूरकेशराज (केशुडे)हस्तिघोषक(धुन्दुल)जयन्तीमण्डूकपर्णीनां (थुलकुड़ि) प्र. प्राणमितपत्ररसेन खल्लयेत् । र.सा.सं. । [See श्रीमः ।

त्रैष्टुभः । पुं । सोमलताभेदे । सु.चि.२९च. ।

त्रोटकः । पुं । श्लेष्मप्रकृतिकीटविशेषे । See कीटः । सु.कल्प.८च. ।

त्रोटिः (टी) । स्त्री । पक्षिचञ्चौ । कट्फले । पक्षिणि । मत्स्यभेदे । मे. । [रा.नि.व.२२ ।

त्र्यञ्जनम् । क्ली । अञ्जनत्रितये । शूर्पात्रय ।

त्र्यम्बकम् । क्ली । ताम्रे । तामा । रा.नि.व.१३ । [व.११ ।

त्र्यम्बकफलः । पुं । नारिकेलवृक्षे । रा.नि,

त्र्यष्टकम् । क्ली । प्रसाधनार्थं जलरचणाधारविशेषे । सु.सू.४५च.। पुं । राजिकायाम् । (श्वेत सरिषा । रस.र.सू.चि. ।

त्र्यस्रः । पुं । त्रिपुटवृक्षे । मटर गाछ । र.मा.। व्याघ्रनखे । नदीविशेष । रा.नि.व.१२ । स्त्री । शक्रचित्रति । वै.निघ. । वार्षिकमल्लिकायाम् । मल्लिका । रा.नि.व.१० ।

त्र्यस्रफला । स्त्री । मल्लकीवृक्षे । वै.निघ, ।

त्र्याहिकः । पुं । ज्वरविशेषे । यो ज्वरः तृतीये दिने भवति । "तृतीयेऽह्नि तृतीयकः" इति । मा.नि. । [वै.निघ. ।

त्र्यूचफलः (ला) । पुं, स्त्री । नारिकेलवृक्षे ।

त्र्यूत्तर: । पुं । मागवीटे । त्रिका. ।

त्रु(त्र्यू)ष(ण)म् । क्ली । त्रिकटुनि । शुँठ पिपुल मरिच । रा.नि.व.२२ । "पिप्पली शृङ्गवेरञ्च मरिचं त्र्यूषणं विदुः ।" प.प्र.३ख. ।

त्र्यूषणाद्यघृतम् । क्ली । ग्रहण्यां घृतम् । गव्यघृतं ८ प. । कल्कार्थं—त्रिकटु-त्रिफला-मिलितं पलं गुड़पलं जलं ३२ प. । "त्र्यूषणत्रिफलाकल्के विल्वमात्रे गुड़ात् पलं । सर्पिषोऽष्टपलं पक्का मात्रां मन्दानिलः पिबेत् ॥" च.चि.१९अ. । अन्यस्कासे—"त्र्यूषणं त्रिफलां द्राक्षां काश्मर्याणि परूषकम् । द्वे पाठे सरलं व्याघ्रीं स्वगुप्तां चित्रकं शटीं । ब्राह्मीं तामलकीं मेदां काकनासां शतावरीं । त्रिकण्टकां विदारीञ्च पिष्टा कर्षसमं घृतात् । प्रस्थं चतुर्गुणक्षीरं सिद्धं कासहरं पिबेत् ॥" कल्कार्थं—त्रिकट्वादीनां प्र.२ तो.दुग्धं १६श.घृतं ४ श. । च.चि.२२अ. ।

त्र्यूषणाद्यमण्डुरम् । क्ली । पाण्डुरोगे । त्रिकटु त्रिफला मुस्ता विड़ङ्गं चवी (चई) चित्रकमूलं दारुहरिद्रा गुड़त्वक् स्वर्णमाक्षी पिप्पलीमूलं देवदारु, एषां प्र.चूर्णं २ प. चूर्णसमष्टिद्विगुणं शुद्धमण्डुरं गोमूत्रं मण्डुरात् ८ गुणम् । गोमूत्रे मण्डुरं पक्का घनीभूते चूर्णप्रक्षेपो देयः । भैष. ।

त्र्यूषणाद्यलौहम् । क्ली । स्थौल्याधिकारे । त्रिकटु त्रिफला चव्यं काचलवणं (कर्कच्) सैन्धवलवणं विट्लवणं सौवर्चललवणम् (सचल) अभ्रं सोमराजी लौहभस्म, एषां प्र.समभागः । रस.र. ।

त्र्यूषणम् । क्ली । त्र्यूषणे । वै.निघ. ।

त्वक् । स्त्री । वल्कले । छाल । मे. । इन्द्रियविशेषे । स्पर्शेन्द्रिय । गुड़त्वचि । दारुचिनि । रा.नि.व.६ । तालीशपत्रे । वै.निघ. । चर्म्मणि । चामड़ा । यथा—"क्षीरस्य पच्यमानस्य यथा सन्तानिका भवेत् । पच्यमानस्य शुक्रस्य रजसश्च तथा त्वचः । पूर्व्वावभासिनी तासां सिध्मस्थानञ्च सा स्मृता ॥ शरीरे षट् त्वचः—तद्यथा—उदकधरा असृग्धरा सिध्मकिलाससम्भवाधिष्ठाना कुष्ठसम्भवाधिष्ठाना अलजीविद्रधिसम्भवाधिष्ठाना यस्यां छिन्नायां ताम्यत्यन्ध इव च तमः प्रविशति यां चाप्यधिष्ठाय अरूंषि जायन्ते पर्व्वसन्धिषु कृष्णरक्तानि स्थूलमूलानि दुश्चिकित्स्यतमानीति षट् त्वचः एताः षडङ्गं शरीरमवतत्य तिष्ठन्ति ।" च.शा.७अ. । सुश्रुतस्तु सप्त त्वच आह । १अवभासिनी २ लोहिता ३ श्वेता ४ ताम्रा ५ वेदिनी ६ रोहिणी ७ मांसधरा चेति । तत्र १मा सर्व्ववर्णानवभासयति, व्रीहेः अष्टादशभागप्रमाणा सिध्मपद्मकाधिष्ठाना । २या व्रीहेः षोड़शभागप्रमाणा तिलकालकन्यच्छव्यङ्गाधिष्ठाना । ३या द्वादशभागप्रमाणा चर्म्मदलाधिष्ठाना । ४र्थी अष्टभागप्रमाणा किलासकुष्ठाद्यधिष्ठाना । ५मी पञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना । ६ष्ठी व्रीहिप्रमाणा ग्रन्थ्याद्यधिष्ठाना । ७मी व्रीहिद्वयप्रमाणा भगन्दरविद्रध्यधिष्ठाना च । सु.शा.४अ. ।

त्वक्कण्डुर: । पुं । व्रणे । हारा. । [अरु.चि. ।

त्वक्कन्द: । पुं । वनशूरणे । बुनो ओल । भैष.

त्वक्छद: । पुं । क्षीरीशब्दे । क्षीरकञ्चुकी । र.मा. । [चर्म्मकीले । वै.निघ. ।

त्वक्तरङ्ग: (क:) । पुं । वल्याम् । रा.नि.व.१८

त्वक्पञ्चकम् । क्ली । न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलेषु । रा.नि.व.२२ ।

त्वक्पत्रम् । क्ली । दारुचिनीविशेषे । कलमि दारुचिनि । तेजपत्रे । मे. । पुं । हिङ्गुवृक्षे । वै.निघ. ।

त्वक्पत्री । स्त्री । हिङ्गुपत्र्याम् । हिङ्गुवृक्षे । तमालपत्रे । वै.निघ. । कारव्याम् । कृष्णजीरा । मे. ।

त्वक्पाक: । पुं । शूकरोगे । तल्लक्षणं यथा—"पित्तरक्तकृतो ज्ञेयः त्वक्पाको ज्वरदाहवान् ।" सु.नि.१४अ. । [से । छुली । हे.च. ।

त्वक्पुष्पम् । क्ली । रोमाञ्चे । त्रिका. । किला-

त्वक्पुष्पिका । स्त्री । शिम्ब्याम् । शिम् । श्वित्रकुष्ठे । किलासे । धवल, छुली । त्रिका. ।

त्वक्पुष्पी । स्त्री । श्वित्ररोगे । किलासे । धवल, छुली । जटा. ।

त्वक्शून्यता । स्त्री । स्पर्शाज्ञतायाम् । "स्पृश्यमाना त्वचा या तु शीतोष्णं मृदु कर्कशं । न जानाति बुधैस्त्वक्सा शून्येति परिकीर्त्यते ॥" निदा. ।

त्वक्सार: । पुं । शणवृक्षे । शणगाछ । रा.नि.

व.४ । रम्भूवंशे । रा.नि.व.७ । वंशलोचनायाम् । বংশলোচন । गुड़त्वचि । सु.सू.४४श. । वंशे । चम. ।

त्वक्सारनिर्यासविषम् । क्ली । स्थावरविषभेदे । यस्य त्वक्सारः निर्यासश्च विषम् । तानि सप्त यथा—चम्मपाचककर्त्तरीयसौरीयककरघाटकरम्भनन्दनवराटकानीति । "त्वक्सारनिर्यासविषैश्चपयुक्तैर्भवन्ति हि । आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः ॥" सु.कल्प.२श. । [नि.व.४ ।

त्वक्सारभेदिनी । स्त्री । क्षुद्रचुञ्चुपे । रा.

त्वक्सारा । स्त्री । वंशरोचनायाम् । रा.नि.व.६ । [লেবুর গাছ । भा. ।

त्वक्सुगन्धः । पुं । नागरङ्गवृक्षे । নারাঙ্গা

त्वक्सुगन्धा (न्धिका) । स्त्री । सूक्ष्मैलायाम् । एलवालुके । वै.निघ. । जटा. । [निघ. ।

त्वक्स्वादी । स्त्री । त्वक्सारे । দারুচিনি । वै.

त्वक्स्वापः । पुं । स्पर्शाज्ञतायाम् । निदा. ।

त्वक्चीरम् । क्ली । तवचीरे, वंशलोचनायां । वै.निघ.२भ.कास-चि. । [याम् । रा.नि.व.६ ।

त्वक्चीरी । स्त्री । चीरशुक्लायां, वंशरोचना-

त्वगङ्कुरः । पुं । रोमाञ्चे । त्रिका. ।

त्वगाचीरा (री) । स्त्री । वंशलोचनायाम् । जटा. । चम. । [रा.नि.व.१८ ।

त्वगूर्म्मिः । स्त्री । वल्याम्, मांसलोलतायाम् ।

त्वग्गन्धः । पुं । नागरङ्गवृक्षे । নারেঙ্গা । रा. नि,व.११ । [षि । रा नि.व.१८ ।

त्वग्जम् । क्ली । रक्तधातौ । রক্ত । केशे, रो-

त्वग्दोषः । पुं । चर्म्मरोगे, शीतपित्तोदर्दकुष्ठकोठादौ । চর্ম্ম রোগ, কোঠাদি । निदा. ।

त्वग्दोषापहा । स्त्री । सोमराज्याम् । रा.नि. व.४ ।

त्वग्दोषारिः । पुं । हस्तिकन्दे । रा.नि.व.७ ।

त्वग्भी । स्त्री । चर्म्मचटके । চামচিকি । वै.निघ. ।

त्वग्भेदः । पुं । व्रणे । वै.निघ. ।

त्वचम् । क्ली । गुड़त्वचि । দারুচিনি । गुणाः —गुरु शीतं कफकासघ्नं शुक्रामशमनं कण्ठशोधनञ्च । रा.नि.व.६ । सि.यो.र.पि.चि.खण्डखाद्यलौहे ।

त्वचा । स्त्री । मिष्टवल्कले । দারুচিনি । श.र. ।

त्वचाङ्गः । पुं । नागरङ्गवृक्षे । रा.नि.व.११ ।

त्वचापत्रः । पुं । हिङ्गुवृक्षे । क्ली । त्वचायाम् । দারুচিনি । श.र. ।

त्वचिसारः । पुं । वंशे । मद.व.७ ।

त्वचिसुगन्धा । स्त्री । चुद्रैलायाम् । हारा. ।

त्वच्यगणः । पुं । त्वक्प्रसाधनवर्गे तैलादौ । यथा—"तैलन्तु नवधा प्रोक्तं वाकुची चक्रमर्दकं । स्थौणेयं पर्पटी सूक्ता त्वच्योऽयं गण उच्यते ॥" चर्क. ।

त्वरारोहः । पुं । पारावते । वै.निघ. ।

त्वरितका । स्त्री, पुं (कः) । शीघ्रपाकिशालिधान्यभेदे । सु.सू.४६श. ।

त्वष्ट(ष्ट्र)म् । क्ली । ताम्रे । वै.निघ. ।

त्वष्टा (ष्ट्री) । स्त्री । ब्राह्मीशाके । वै.निघ. ।

त्वाचम् । क्ली । त्वक्तैले । দারুচিনির তেল । गुणाः—"वह्निमद्यानिलहरमाध्मानाक्षेपनाशनम् । वान्त्युत्क्लेशप्रशमनं संग्राहि दशनार्त्तिभित् । त्वाचं तैलं रजःस्रावि तीये चित्रं निमज्जति ।" अत्रि. ।

थ

थः । पुं । पर्व्वते । मे. । रोगविशेषे । भक्षणे । श.र. ।

थुत्कारः । पुं । निष्ठीवनत्यागानुकरणशब्दे ।

थुथुक्रत् । पुं । पक्षिविशेषे । ধুতুলি পাখী । वै.निघ. ।

थोड़नम् । क्ली । आच्छादने । वै.निघ. ।

थौनेयकः । पुं । ग्रन्थिपर्णे । গাঁটিয়ালা । च.चि.३अ.भगतैले । च.द.विष.चि. ।

द

दंशः । पुं । दन्ते । हे.च. । मक्षिकाविशेषे । ডাঁশ । अम. । शोभाञ्जनवृक्षे । मर्हिषे । सर्पक्षते । मर्म्मणि । विश्व. । त्रिका. । वै.निघ. । दंशने । मे. ।

दंशकः । पुं । कर्कटे । कुक्कुरे । वै.निघ. । मक्षिकायाम् । ডাঁশ । हारा. ।

दंशनम् । क्ली । दन्तेन कर्त्तने । কামড়ান । हे.च. ।

दंशनाशिनी । स्त्री । तैलकीटे । वै.निघ. ।

दंशभीरुः (कः) । पुं, स्त्री । मत्कुणे । महिषे । त्रिका. । [रा नि.व.७ ।

दंशमूलः । पुं । शिग्रुवृक्षे । সজিনা গাছ ।

दंशवदनः । पुं । कङ्कपक्षिणि । वै.निघ. ।

दंशिका । स्त्री । वनमक्षिकाविशेषे । ডাঁশ মাছী, রোঁয়ানী । वै.निघ. ।

दंशी (इन्) । पुं, स्त्री । कुक्कुरे । वै.निघ. । वनमक्षिकायाम् । क्षुद्रदंशे । রোঁয়ানী । अम. ।

दंष्ट्रः । पुं । शूकरे । प.मु. ।

दंष्ट्रकम् । क्ली । सर्पदंशविशेषे ।

दंष्ट्रा । स्त्री । इढ़दन्ते । দাড়া । हे.च. । विषदन्ते । वै.निघ. । [निघ. ।

दंष्ट्रायुधः (ष्ट्रास्त्रः) । पुं । वनशूकरे । वै.

दंष्ट्रिका । स्त्री । दाढ़िकायाम् । हे.च. ।

दंष्ट्री (इन्) । पुं,स्त्री । वन्यशूकरे । अम. । सर्पे । श.र. ।

दकम् । क्ली । जले । त्रिका. । वा.चि.२अ. ।

दकलावणिकः । पुं । यूषविशेषे । "नातिमांसास्तनुवसा दकलावणिकाः स्मृताः" । अन्यच्च "अल्पमांसपटुस्नेहा दकलावणिकाः स्मृताः ।" वा. टी.१अ.अरुणः ।

दकोदरम् । क्ली । उदररोगभेदे । জলোদরী । "यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढः । पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि । स्नेहोपलिप्तेष्वथवापि तेषु दकोदरं पूर्व्ववदभ्युपैति । स्निग्धं महत् सम्परिवृत्तनाभि भृशोन्नतं पूर्णमिवाम्बुना च । यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत् ॥" सु.नि.७अ. ।

दग्धकः । पुं । महाशतावर्य्याम् । रा.नि.व.४ ।

दग्धकाकः । पुं । डोमकाके । ডোম কাক । हे.च. ।

दग्धभूमिजशालिः । पुं । दग्धक्षेत्रजशाली । गुणाः—"दग्धायामवनौ जाताः शालयो लघुपाकिनः । किञ्चित्सतिक्ता मधुराः पाचना बलवर्द्धनाः ॥" रा.नि व.१६ । "दग्धग्रामाचले जाताः शालयो लघुपाकिनः । सुपथ्या बद्धविण्मूत्रा रूक्षाः श्लेष्मापकर्षिणः ॥" अत्रि.१५अ. ।

दग्धमत्स्यः । पुं । अग्निदग्धमीने । পোড়া মাছ । तस्य विवरणम् । "पलाशैर्वेष्टितो मत्स्यः कर्द्दमेन च लेपितः । दग्धोऽङ्गारे सलवणो दग्धमत्स्यः प्रकीर्त्तितः ॥" वैद्यकम् । गुणाः—"दग्धमत्स्यो गुरुर्वृष्यो बृंहणः प्राणवर्द्धनः । क्षीणशुक्राश्च ये केचित् भग्नजर्ज्जरिताश्च ये । नित्यं स्त्रीसेविनो ये च क्षीणतेजस एव च । दग्धमत्स्यो हितस्तेषां सतैलवणान्वितः । तस्माद्धीनगुणः किञ्चिद्भ्रष्टमत्स्य उदाहृतः ॥" राज. । [रा.नि.व.१० ।

दग्धरुहः । पुं । तिलकवृक्षे । তিল গাছ ।

दग्धरुहा । स्त्री । दग्धावृक्षे । हिं कुरुही । रा.नि.व.९ । [वै.निघ. ।

दग्धवर्णकः । पुं । रौहिषतृणे । রামকর্পূর ।

दग्धक्षीरम् । क्ली । वैक्रान्तमणौ । भैष.ज्व.पानीयभक्तवट्याम् ।

दग्धा । स्त्री । कुरुही इति कोङ्कणे प्रसिद्धे वृक्षविशेषे । गुणाः—कषाया उष्णा वातकफघ्नी अग्निदीपनी पित्तकोपनी च । रा.नि.व.९ ।

दग्धास्यः (स्याङ्गः) । पुं । कुमरिचवृक्षे । লঙ্কামরিচ গাছ । प.मु. ।

दग्धाङ्गः । पुं । तिलकपुष्पवृक्षे । वै.निघ. ।

दग्धिका । स्त्री । दग्धायाम् । कुरुहीति कोङ्कणे । रा.नि.व.९ । दग्धान्ने । धरा वा. আঁকা ভাত+ চাঁচীতি केचित् । भ. ।

दण्डेष्टका । स्त्री । अग्निदग्धेष्टकायाम् । পাকা ইট, ঝামা । हारा. ।

दण्डः । पुं । ४ दत्तमाने । अत्ये । यष्टिकायाम् । লাঠী, ছড়ি ।

दण्डकः । पुं । वातव्याधिविशेषे । तल्लक्षणं — "पाणिपादशिरःपृष्ठश्रोणिस्तम्भातिमारुतः । दण्डवत् स्तब्धगात्रस्य दण्डकः सोऽनुपक्रमः ॥" भा. । मरे । सु.कल्प.७अ. । वा.उ.५.अ. ।

दण्डकन्दः (कः) । पुं । धरणीकन्दे । रा.नि.व.७ । [काक । हे.च. ।

दण्डकाकः । पुं । स्वनामख्यातकाके । দাঁড়

दण्डधारणम् । क्ली । यष्टिधारणे । गुणाः — "श्वनः सरीसृपव्यालविषाणिभ्यो भयापहं । श्रमस्खलनदोषघ्नं स्थविरे च प्रशस्यते । सत्वोत्साहबलस्थैर्य्यधैर्य्यवीर्य्यविवर्द्धनं । अवष्टम्भकरश्चापि भयघ्नम् ॥" सु.चि.२४अ. । स्खलतः सम्प्रतिष्ठानम् अवष्टम्भनं शत्रुवारणं भयघ्नमायुष्यञ्च । राज. ।

दण्डपातः (ती) (इन्) । पुं । सन्निपातज्वरविशेषे । लक्षणं — "नक्तं दिवा न निद्रामुपैति यस्माति मूढ़धीर्नभसः । उत्थाय दण्डपाती भ्रमातुरः सर्व्वतो भ्रमति ॥" भा.म.१भ. ।

दण्डपालः । पुं । षड्शफरमत्स्यविशेषे । ডানকোণা মাছ । हारा. ।

दण्डपालकः । पुं । दण्डमत्स्ये । ডানকোণা মাছ । शकुलमत्स्ये । শউল মাছ । हारा. ।

दण्डपाली । स्त्री । तुलायन्त्रे । দাঁড়িপাল্লা । च.सू.१५अ. ।

दण्डबालाधः । पुं । हस्तिनि । श.र. ।

दण्डमत्स्यः । पुं । स्वनामख्यातमत्स्ये । দাঁড়িকা মাছ । हिं दण्डारी । गुणाः — "दण्डमत्स्यो रुक्षो तिक्तः पित्तरक्तकफं हरेत् । वातसाधारणः प्रोक्तः शुक्रलो बलवर्द्धनः ॥" भा. । कफवायुपित्तघ्नः तिक्तः लघुश्च । राज.१प. । [वै.निघ. ।

दण्डमातङ्गः । पुं । तगरे, पिण्डीतगरे ।

दण्डयामः । पुं । दिवसे । वै.निघ. ।

दण्डवृक्षः (कः) । पुं । स्नुहीवृक्षे । সিজু গাছ । रा.नि.व.८ ।

दण्डहस्तः (स्ती) (इन्) । पुं । तगरपुष्पे । টগর ফুল । रा.नि.व.१०।२३ । पिण्डीतगरे । তগরপাদুকা । वै.निघ. ।

दण्डा । स्त्री । नागबलायाम् । वै.निघ. ।

दण्डापतानकः । पुं । वातव्याधिभेदे । लक्षणम् — "कफान्वितो यदा वायुर्धमनीष्वेव तिष्ठति । स दण्डवत्स्तम्भयति कृच्छ्रो दण्डापतानकः ॥" सु.नि.१अ. ।

दण्डालुः । पुं । स्वनामख्यातालुविशेषे । থাম আলু । प.मु. । "ताम्बूलपाता दण्डालु"रिति द्रव्याभिधानम् । [क्रते तक्रे । रा.नि.व.१५ ।

दण्डाहतम् । क्ली । पादजलेन त्रिभागदधि-

दण्डिकः । पुं । दण्डमत्स्ये । ডানকোণা মাছ ।

दण्डिका । स्त्री । श्रोणाकवृक्षे । वै.निघ. ।

दण्डी (इन्) । पुं । दमनकक्षुपे । দনা । रा.नि.व.१० ।

दण्डोत्पलम् । क्ली । वृक्षविशेषे । দণ্ডকলস, ডানকুনি, ডানপোলা । हिं डानिकुनहे । म सहदेवी । तच्च पीतश्वेतरक्तपुष्पभेदेन त्रिधा भवति । र.मा. । गुणाः—श्वासकासक्षयघ्नम् अग्निदीप्तिकरञ्च । राज. ।

दण्डोत्पला । स्त्री । पीतपुष्पदण्डोत्पले । ডানপালা, ডানকুনী । र.मा. । भैष.अ.पि.चि.वृहत् सुवतीगुग्गुल्याम् । "दण्डोत्पलाया मूलानि ।" सा.कौ.दूर्व्वाद्यतैले । वै.निघ.अजी.चि.भल्लातकलेहे ।

दत् । पुं । दन्ते । श.च. ।

दद्रुः (कः) पुं । क्षुद्रकुष्ठभेदे । দাদ । लक्षणं यथा — "सकण्डूरागपिड़कं दद्रुमण्डलमुन्नतम् ।" मा.नि. । (कः) कच्छपे । श.र. ।

दद्रु(द्रू)घ्नः । पुं । चक्रमर्द्दक्षुपे । চাকন্দা গাছ । रा.नि.व.४ । भा.कुष्ठ.चि. ।

दद्रुघ्नपत्रम् । क्ली । दद्रुमर्द्दपत्रे । श.चि. ।

दद्रु(द्रू)णः । त्रि । दद्रुरोगिणि । अम. । अ.टी.र. । [नी । तैलिनीकीटे । रा.नि.व.१८ ।

दद्रुनाशिनी । स्त्री । वृक्षविशेषे । দাদমর্দ্দ-

दद्रुमर्द्दी (इन्) । पुं । (Cassia alata.)

ददुघ्नवृक्षविशेषे । दादमर्द्दनी ओषधिविशेष । हिं दादमर्दन । तें सिमश्रविसि । उत्. जादुमारि । ता. सिमङ्ग्रगति । "अगदो ददुमर्द्दी स्यात् कीटारिश्चाङ्गसुन्दरः ।" इति किञ्चित्तन्त्रम् ।

दद्रुरोगी (इन्) । त्रि. । दद्रुरोगयुक्ते ।

दद्रूः । पुं । दद्रुरोगे । भ.टी.भ. ।

दधि । क्ली । श्रीवासे । सरल निर्यास । वसने । श.र. । कपित्थे । वै.निघ. । दुग्धविकारे । दई । हिं दही । मं दहिं । कं मोसरु । तद्भेदाः —मन्दकदधि मधुरदधि मधुराम्लदधि अम्लदधि अत्यम्लदधि चेति । "आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परं । अम्लं चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा ॥" तत्स्वरूपगुणाः—"मन्दं दुग्धं यदव्यक्तरसं किञ्चिद्घनं भवेत् । मन्दं स्यात्सृष्टविण्मूत्रं दोषत्रयविदाहकृत् । यत्सम्यक् घनतां यातं व्यक्तस्वादुरसं भवेत् । अव्यक्ताम्लरसं तत्तु स्वादु विज्ञेयदाहतम् । स्वादु स्यादत्यभिष्यन्दि वृष्यं मेदःकफापहं । वातघ्नं मधुरं पाके रक्तपित्तप्रसादनं । स्वाद्वम्लं सान्द्रमधुरं कषायानुरसं भवेत् । स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवर्जनैः। यत्तिरोहितमाधुर्य्यं व्यक्ताम्लत्वं तदम्लकम् । अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनं । तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत् । अत्यम्लं दीपनं रक्तवातपित्तकरं परम्॥" इति। निःसारदुग्धदधिगुणाः—"असारं दधि संग्राहि शीतलं वातलं गुरु । विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् । दधि पक्वं दुग्धभवं रुच्यं स्निग्धं गुणोत्तमं । पित्तानिलापहं सर्व्वधात्वग्निबलवर्द्धनम् । सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित् । सगुड़ं वातनुद्वृष्यं बृंहणं तर्पणं गुरु ॥" भा.पू.२भ.द.व. । भा. । "न नक्तं दधि भुञ्जीत न चाप्यधिकशर्करं (अघृतशर्करम्) । नामुद्गसूपं नाक्षौद्रं नोष्णं नामलकैर्विना ।" इति । रात्रिदधिसेवननिषेधविधौ ।भा. पू.२भ. । चर.। सु. । "पीनसे चातिसारे च शीतके विषमज्वरे । अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते । रक्तपित्तविकारेषु कफोत्थेषु न तद्धितं । ज्वरांस्तकपित्तवीसर्पकुष्ठपाण्डामयान् क्रमात् । प्राप्नुयात् कामलाञ्चापि विधिं हित्वा दधिप्रियः ॥" राज.३प. । दधिविशेषगुणाः—स्वस्वपर्य्यायेषु स्याः । सुजातात्यम्लमन्दजातभेदेन त्रिधेति शिवदासकृतभेदाः । सा. गुणाः —अम्लविपाकं संग्राहि गुरु उष्णगुणं वातघ्नं शुक्रमेदोबलश्लेष्मपित्तरक्ताग्निवर्द्धकं मुखरोचकं शोथकरम् अरुचिघ्नं विषमज्वरमूत्रकृच्छ्रपीनसघ्नञ्च । मन्दकम् अनभिव्यक्ताम्लं दधि, मलमूत्रनिःसारकं विदग्धपाकं त्रिदोषवर्द्धकञ्च । मधुरदधि कफकरं बलकरं मेदोवर्द्धकञ्च । तृतीयं दधिसामान्यगुणम् । चतुर्थमाग्नेयं पित्तरक्तकफवर्द्धकञ्च । पञ्चमं दन्तहर्षरोमाञ्चकण्ठदाहकरञ्च । वा.सू.५अ. । शारददधिगुणाः—"शारदं दधि गुल्मघ्नं रक्तपित्तविवर्द्धनं । शीफलृष्णाज्वराणां करोति विषमज्वरम् ।" हैमन्तदधिगुणाः —"गुरु स्निग्धं सुमधुरं कफकृद्बलवर्द्धनं । वृष्यं मेध्यञ्च हैमन्तं पुष्टिदं तुष्टिवृद्धिदम्॥" वसन्तदधिगुणाः—"वातलं मधुरं स्निग्धं किञ्चिदम्लं कफात्मकं । बलकृद्वीर्य्यकृत्प्रोक्तं वसन्ते न प्रशस्यते ॥" ग्रीष्मदधिगुणाः—"लघु चाम्लं भवेद्ग्रीष्मे चात्युष्णं रक्तपित्तकृत् । शोषभ्रमपिपासाकृत् दधि प्रोक्तं न ग्रैष्मिके ॥" तथा – "दध्यम्लं गुरुवातदोषशमनं संग्राहि मूत्रावहं बल्यं शोफकरञ्च रुच्यशमनं वह्नेश्च शान्तिप्रदं । कासे श्वास अपीनसेषु विषमे शीतज्वरे स्याद्धितं रक्तोद्रेककरं करोति सततं शुक्रस्य वृद्धिं पराम्॥" रा.नि.व.१५ । स्वादु हृद्यं रोचनं माङ्गल्यञ्च । राज. । दधिसरः । दइयेर माथा । "दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः । स लोके सर इत्युक्तः······ । सरः स्वादुगुरुर्वृष्यो वातवह्निप्रणाशनः । साम्लो वस्तिप्रशमनः पित्तश्लेष्मविवर्द्धनः ॥" भा. । दधि नवधा गव्यादिभेदेन—अग्निमान्द्यकरं कासश्वासशीतज्वरेषु हितञ्च । लवणमरिचघृतशर्करामुद्गामलकपुष्परसहीनं न नित्यमश्नीयात् । तथा शरदि वसन्ते ग्रीष्मे रात्रौ कफविकारे पित्तदोषे च नाद्यात् । इति दधिवर्ज्यस्थानम् । त्रिकटुयुतं सर्षपचूर्णमिश्रं दधि कफघ्नं वातघ्नमग्निदीपनञ्च । तुहिनशिशिरकाले चातिपथ्यं देहदार्ढ्यं कान्तिञ्च करोति । इति संयोगदधिसेवनकालः । "दधि मधुरमोषदम्लं मधुराम्लं वा हितं न चात्यम्लं । यावद्यावन्मधुरं दोषहरं तावदुक्तमिदम् ।" रा.नि.व.१५ ।

दधिकः । पुं । श्रीवेष्टकवृक्षे । सरल,शालाइ । हिं शलाइ । ज.द.१२अ. ।

दधिकूर्चिका । स्त्री । दध्ना सह पक्वे पयसि ।

ছানা । र.मा. । "दध्ना सह पयः पक्कं सा भवेद्दधिकूर्चिका ।" प.प्र.२ख. । अत्र दधि दुग्धं समानं भाव्यम् । गुणाः—"वातघ्नी ग्राहिणी रुचा दुर्जरा दधिकूर्चिका ।" राज. ।

दधिचारः । पुं । दधिमन्थनदण्डे । हारा. ।

दधिजम् । क्ली । दधनि । नवनीते । रा.नि.व.१५ । [रा.नि.व.१५ ।

दधिजलम् । क्ली । मस्तुनि । দয়ের মাৎ ।

दधित्थः । पुं । कपित्थवृक्षे । र.मा. । च.सू.४ष. । क्ली । कपित्थफले । अ.द.१२ष. । सि.यो.रक्तदाह-चि. । च.द.विदार्य्यादिलेपे । "दधित्थं बीजपूरकम् ।"

दधित्थाख्यः (ह्वः) । पुं । धूपविशेषे, सरलद्रवे । लोवान् इति लोके । र.मा. ।

दधिनाम (कम्) । क्ली । कपित्थफले । কয়েৎ বেল । सि.यो.हिक्काश्वास-चि. । "काश्मीरं दधिनाम च ।" पुं (मा) । कपित्थवृक्षे । च.द. ।

दधिपुष्पिका (ष्पी) । स्त्री । कटभीवृक्षे । कटुम्याम् । रा.नि.व.२३ । श्वेतापराजितायाम् । रा.नि.व.३ । शूकशिम्ब्याम् । আলাকুশী । वै.निघ. । तन्नामकफलशाकविशेषे । চিচিঙা, হেঁপা । हिं कुहिरी । मं गोड़ीकुहिली । कं काकखीला, कुगरी । गुणाः—कटुः मधुरा शीतला सन्तापपित्तघ्नी वातकरी गुरुः अरोचकघ्नी च । रा.नि.व.७ । बीजगुणाः—गुरु हृद्यं रुच्यं मलस्तम्भकं कफाग्निमान्द्यकरणं वातपित्तहरञ्च । वै.निघ. ।

दधिपूपः (कः) । पुं । दधिवटके । দয়ের বড়া । वै.निघ. ।

दधिफलः । पुं । कपित्थवृक्षे । रा.नि.व.११ ।

दधिभवम् । क्ली । नवनीते । ननि । वै.निघ. ।

दधिमण्डः (ण्डु) । पुं, क्ली । दधिजले । দধির মাৎ । र.मा. । गुणाः—"मस्तु क्लमहरम्बल्यं लघु भक्ताभिलाषकृत् । स्रोतोविशोधनं ह्लादि कफतृष्णानिलापहं । अवष्टम्भीणनं शीघ्रम्भिनत्ति मलसञ्चयम् ॥" भा. । "उष्णाम्लं रुचिपक्तिदं क्लमहरं बल्यं कषायं सरं भुक्तिच्छेदकरं तृषोदरगदप्लीहाऽर्शसां नाशनं । स्रोतःशुद्धिकरं कफानिलहरं विष्टम्भलापहं पाण्डुश्वासविकारगुल्मशमनं मस्तु प्रसन्नं लघु ॥" रा.नि.व.१५ ।

दधिमण्डातकम् । क्ली । दधिमस्तुनि । च.चि.१८ष.पञ्चकोलघृते । [वै.निघ. ।

दधिमण्डोद्भवम् । क्ली । नवनीते । ननि ।

दधिलेहः । पुं । दधिसरे । দয়ের সর, মাথা । र.मा. ।

दधिवटी । स्त्री । औषधि । ইটের গুঁড়া, হরিদ্রার গুঁড়া, ও ঝুলে পারা, ভীমরাজরসে গন্ধক, শোধন করিবে । পারা ১ তো. গন্ধক ১ তো. ইহার কজ্জলি, হরিতাল, বিষ, তুঁতে, এলবালুক, অভ্র, খাপর, স্বর্ণমাক্ষী, কান্তলৌহ প্রত্যেকে ॥০ তো. নিসিন্দা, লতাফট্কী, অপরাজিতা, জয়ন্তী ও চিতার মূল, ইহাদের রসে ভাবনা । বটী ১ সরিষা । भैष. । कज्जलिः २तो. हरितालं, विषं तुत्थम् एलवालुकम्, अभ्रकम्, खर्परं स्वर्णमाक्षिकं लौहं एषां प्रति ॥० तो. । निर्गुण्डीजयन्तीज्योतिष्मतीचित्रकरसेन क्वाथेन वा भावयेत् ।

दधिवालुका । स्त्री । गोदन्तहरिताले । दुरालभाभेदे । वै.निघ. ।

दधिशोणः । पुं । शुक्लवानरे । दर्व्वीकरसर्पविशेषे । सु.कल्प.४ष. । See सर्पः । गोलाङ्गूलवानरे । মুখ পোড়া । त्रिका. ।

दधिसक्तवः । पुं (बहु) । दध्युपसिक्तसक्तुषु । দইমাথা ছাতু বা রসালা । अम. ।

दधिसक्तुः । पुं । रसालायाम् । प.मु. ।

दधिसरः । पुं । दध्यग्रभागे । দধির সর । वै.निघ. । See दधि ।

दधिसारम् । क्ली । नवनीते । हे.च. ।

दधिस्नेहः । पुं । दध्नः स्नेहभागे, दधिसरे । त्रिका. । [See तैलपर्णी ।

दधिस्वदा । स्त्री । लवणखोट्याम् । श.चि. ।

दधिस्वेदः । पुं । तक्रे । ঘোল । जटा. ।

दधीचा(च)स्थि । क्ली । हीरके । त्रिका. ।

दध्यग्रम् । क्ली । दधिसरे । वै.निघ. ।

दध्यङ्गः । पुं । सरलद्रवे । त्रिका. ।

दध्यानी । स्त्री । कटुक्यां । कट्‌की । वै.निघ. ।

दध्याली । स्त्री । सुदर्शनालतायाम् । দয়েথয়ে, উরতিপুরতি । हिं मदनमस्तु । र.मा. ।

दध्याह्वः । पुं । कपित्थवृक्षे । वै.निघ. ।

दध्युत्तर(क)म् । क्ली । दधिसारे । र.मा. । सु.सू.४३अ. ।

दन्तः । पुं । तरुप्रकाण्डे । रा.नि.व.२ । चर्व्वण-साधनास्थनि, दशने । দাঁত । स च शिशोः षष्ठे मासि जायते । सुखबोधः ।

दन्तकड़मड़िः । पुं । तन्नामकबालरोगे । यत्र बालकः निद्रितोऽपि दन्तशब्दं करोति । रस.र. बाल.चि. ।

दन्तकरालः । पुं । दन्तरोगभेदे । "करालः सुकुमाराणां दशनानां समुद्भवः ।" वा.उ २१अ. ।

दन्तकर्षणः । पुं । निम्बूवृक्षे । লেবুগাছ । श.र. ।

दन्तकाष्ठः । पुं । अर्कवृक्षे । खदिरवृक्षे । अ-र्ज्जुनवृक्षे । करञ्जवृक्षे । वै.निघ. । विकङ्कतवृक्षे । বঁইচী গাছ । रा.नि.व.९ । क्ली । दन्तधावनकाष्ठे । দাঁতন কাঠি । तच्च द्वादशाङ्गुलं कनिष्ठाङ्गुलिस्थूलम् ऋजु अग्रन्थि कीटाद्यक्षतं ग्राह्यम् । त-दुक्तं —"द्वादशाङ्गुलमायतम् । कनिष्ठिकापरीणा-हमृज्वग्रथितमव्रणम् । निम्बखदिरयष्टिमधुकरञ्ज-भवम् ऋतुवीर्य्यरसदोषविशेषेषु प्रशस्तम् । अवेक्ष्य-र्त्तुञ्च दोषञ्च रसं वीर्य्यञ्च योजयेत् ।" सु.चि.२४ अ. । "कषायं मधुरं तिक्तं कटुकम्प्रातरुत्थितः । निम्बश्च तिक्तके श्रेष्ठः कषाये खादिरस्तथा । मधुको मधुरे श्रेष्ठः करञ्जः कटुके तथा ।" च.सू.५ अ. । "केऽप्यत्र करवीरार्कमकरञ्जवकुलासनान् । दन्तकाष्ठार्थमन्ये तु सर्व्वान् कण्टकिनोऽभ्यधुः । गु-वाकतालहिन्तालखर्ज्जूरैः केतकीयुतैः । नारिके-लेन ताड्या च न कुर्य्याद्दन्तधावनम् । अर्द्दितो क-र्णशूली च दन्तरोगी नवज्वरी । शोथी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्ज्जयेत् ।" राज.१प. ।

दन्तकाष्ठकम् । क्ली । बाहुल्यक्षुपे । रा.नि. व.४ । दन्तधावनकाष्ठे । [वै.निघ. ।

दन्तकेतुः । पुं । लघुनिम्बूवृक्षे । লেবুর গাছ ।

दन्तघर्षणम् । क्ली । दन्तमार्ज्जने । দাঁতমাজা ।

दन्तघातः । पुं । निम्बूवृक्षे । शिशोर्दन्तकड़म-ड़िरोगे । वै.निघ. ।

दन्तचालः (नः) । पुं । दन्तरोगविशेषे । দাঁ-ত নড়া । "चालश्चलद्भिर्दशनैः भक्षणादधिकव्य-थैः ।" वा.उ.२१अ. ।

दन्तच्छदः । पुं । ओष्ठे । हला. ।

दन्तच्छदा । स्त्री । मधुरविम्बयां । विम्बयाम् । कुन्दुरु । তেলাকুচা । वै.निघ. ।

दन्तच्छदोपमा । स्त्री । कुन्दुरी । विम्बयाम् । रा.नि.व.७ ।

दन्तध(धा,प)वनम् । क्ली । दन्तमार्ज्जने । দাঁত মাজা বা দাঁতন করা । दन्तधावनकाष्ठे । দাঁতন কাঠী । दन्तधावनविधिः—"प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम् । भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन् । केऽप्यत्र करवीरार्कमकरञ्ज-वकुलासनान् । दन्तकाष्ठार्थमन्ये तु सर्व्वान् कण्ट-किनोऽभ्यधुः । निषिद्धं यथा—गुवाकतालहिन्ताल-खर्जूरैः केतकीयुतैः । नारिकेलेन ताड्या च न कु-र्य्याद्दन्तधावनम् ॥ इति । दन्तधावने दिक्—"म-त्युः स्याद्दक्षिणास्येन पश्चिमास्येन चामयः । पूर्व्वा-स्येनोत्तरास्येन सम्पदो दन्तधावनात् ॥" इति । द-न्तकाष्ठव्यवहारे निषिद्धजनाः यथा—"अर्दितो कर्णशूली च दन्तरोगी नवज्वरी । शोथी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्जयेत् ॥" इति । राज.१प. ।

दन्तधावनः । पुं । खदिरवृक्षे । ज.द.१२अ. । रा.नि.व.८ । गुच्छकरञ्जे । रा.नि.व.९ । वकुल-वृक्षे । श.च. ।

दन्तनाड़ी । स्त्री । दन्तमूलगतनाड़ीनामरोगे । দন্তনালী । सा पञ्चविधा वातपित्तकफसन्निपाता-गन्तुजनिमित्ता । "दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।" भा.म.४भ.मु.रो.चि. ।

दन्तपत्रकम् । क्ली । कुन्दपुष्पे । श.च. ।

दन्तपातनयन्त्रम् । क्ली । दन्तोत्पाटनयन्त्रे । দাঁততোলা শাঁড়াশি । "शरपुङ्खमुखं यन्त्रं दन्त-पातनमुच्यते ।" अत्रि. ।

दन्तपाली । स्त्री । शिशोर्दन्तरोगे । वा.उ.२अ. ।

दन्तपीठकम् । क्ली । दन्तवेष्टे । দাঁতের মাড়ি । ज.द.२ष. ।

दन्तपुप्पुटः (कः) । पुं । दन्तरोगविशेषे । দাঁতের মাড়ি ফোলা বা দাঁতের গোড়া ফোলা । "दन्तयोस्त्रिषु वाप्यत्र श्वयथुर्जायते महान् । दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ।" भा.म.४भ.मु.रो.चि. । "दन्तयोस्त्रिषु वा यस्य श्वयथुः सरुजो महान् । दन्तपुप्पुटको ज्ञेयः कफमारुतपित्तजः ।" सु. । "दन्तयोस्त्रिषु वा शोफो वदरास्थिनिभो घनः । कफास्रात्तीव्ररुक् शीघ्रं पच्यते दन्तपुप्पुटः ॥" वा.उ.२१ष. ।

दन्तपुष्पः । पुं । अश्वत्थवृक्षे । वै.निघ. । क्ली । कतकफले । श्र.च. ।

दन्त(न्ता फलः । पुं । पिप्पल्याम् । "दन्तफलन्तु पिप्पल्याम् ।" रा.नि.व.२२ । क्ली । कतकफले । निर्म्माला फल । श्र.च. ।

दन्त(न्ता)फला । स्त्री । पिप्पल्याम् । रा.नि.व.६ । अश्वत्थिकावृक्षे । वै.निघ. ।

दन्तभागः । पुं । हस्त्यग्रभागे । अम. ।

दन्तभेदः । पुं । दन्तरोगविशेषे । लक्षणम्—"दन्तभेदे द्विजास्तोदभेदरुक्स्फुटनान्विताः ।" वा.उ.२ष. । [লা বা পাথুরি । হারা. ।

दन्तमलम् । क्ली । दशनमले । দাঁতের ময়-

दन्तमूलम् । क्ली । दन्तार्ब्बुदरोगे । रा.नि.व. २० ।

दन्तमूलिका । स्त्री । दन्तीवृक्षे । श्र.र. ।

दन्तरञ्जनम् । क्ली । काशीषे । হিরেকস্ । र.सा.सं. ।

दन्तरोगः । पुं । दन्तगतमुखरोगे । स अष्टविधः । यथा—दालनः क्रमिदन्तः भञ्जनकः दन्तहर्षः दन्तविद्रधिः दन्तशर्करा कपालिका श्यावदन्तकश्चेति । भा. । दन्तविद्रधिमगणय्य हनुमोचमाह सु.नि.१६ष. । अथास्य दन्तगतरोगे । ज.द.२८ष. । See मुखरोगः ।

दन्तरोगी (इन्) । त्रि । दन्तरोगयुक्ते ।

दन्तलेखनम् । क्ली । अस्त्रविशेषे । দাঁতের পাথুরি ছোলা । यथा—"एकधारं चतुष्कोणं मकुलाकृति चैकतः । दन्तलेखनकं तेन शोधयेद्दन्तशर्कराम् ॥" अत्रि. ।

दन्तवलः । पुं । हस्तिनि । वै.निघ. ।

दन्तवस्त्रम् (वासः) । क्ली, पुं । ओष्ठे । रा.नि.व.१८ ।

दन्तविद्रधिः । पुं । दन्तवेष्टगतरोगविशेषे । দাঁতের গোড়া ফোলা, দাঁৎকড়া । यत्र दन्तवेष्टगतदोषेण सरक्तेन हेतुना वाह्यतो दाहरुजायुक्तः महान् श्वयथुः भिन्नः पूयं स्रवेत् स दन्तविद्रधिः । "दन्तमांसमलैः सास्रैः वाह्यतः श्वयथुर्महान् । सदाहरुक् स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥" भा.म.४भ.मु.रो.चि. ।

दन्तवीजः (कः) (जा) । पुं, स्त्री । दाडिम्बवृक्षे । भा. । रा.नि.व.११ । (जा) अलाव्वाम् । वै.निघ. ।

दन्तवेष्टः । पुं । दन्तवेष्टनमांसे, दन्तमाढ़िकायाम् । দাঁতের মাড়ি । दुष्टशोणितजे तन्नामकदन्तवेष्टजरोगे । यदि पूयरुधिरं स्रवेत् दन्ताश्च चला भवन्ति तदा दन्तवेष्ट इत्यभिधीयते । "स्रवन्ति पूयं रुधिरं चला दन्ता भवन्ति च । दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥" भा.म.४भ.मु.रो.चि. ।

दन्तवेष्टजरोगः । पुं । दन्तवेष्टनमांसगतमुखरोगे । स षोड़शविधः (দাঁতের মাড়ির ১৭ রোগ) यथा—दन्तवेष्टः सौषिरः महासौषिरः परिदरोपकुशौ वैदर्भः खलि(ल्ली)वर्द्धनः (আক্কেল দন্ত) अधिमांसकः करालकः, पञ्चदन्तनाड्यः वातादिभेदेन, शीतादः दन्तपुप्पुट इति । "शीतादो गदितः पूर्व्वं दन्तपुप्पुटकस्तथा । सुरुष्टावीष्ठयोर्दन्तमूले तु दश षट् तथा । दन्तवेष्टः सौषिरश्च महासौषिर एव च । ततः परिदरः प्रोक्तस्ततस्तूपकुशः स्मृतः । वैदर्भश्च ततः प्रोक्तः खलि(ल्ली)वर्द्धन एव च । अधिमांसकनामा च दन्तनाड्यश्च पञ्च च । दन्त्वविद्रधिरप्यत्र दन्तवेष्टेषु षोड़श ॥" भा.म.४भ.मु.रो.चि. । मा.नि.। करालस्थाने दन्तविद्रधिमाह भावमिश्रः । सुश्रुतस्तु करालकं न गणयति । एषां लक्षणानि तत्तत्पर्य्याये द्रष्टव्यानि ।

दन्तवैदर्भः । पुं। दन्तमूलगतमुखरोगे । See वैदर्भः ।

दन्तशङ्कुः । पुं । तीक्ष्णाग्रैकप्रथमयवपत्रमुखे दन्ताहरणार्थं शस्त्रभेदे । "शङ्कुवच्च मुखं तस्य कार्य्यमष्टाङ्गुलायतम् । चतुरस्रं समञ्चैव तीक्ष्णधारं समाहितम् । दन्ताग्रं तस्य कर्त्तव्यं शस्त्रं व्रीहिमुखाकृति । कपालिकां शर्कराञ्च दन्तानां तेन शोधयेत् ॥" सु.सू.८अ. । सु.टी.ड. ।

दन्तशटः । पुं । दन्तशठे । अ.टी.म. ।

दन्तशठः । पुं । कपित्थवृक्षे । जम्बीरवृक्षे । रा.नि.व.११।२२ । चाङ्गेर्य्याम् । आम्रातकवृक्षे । कर्म्मरङ्गवृक्षे । मे. । तिन्तिड़ीवृक्षे । वै.निघ. ।

दन्तशठा (ठी) । स्त्री । चाङ्गेर्य्याम् । आमरुल । रा.नि.व.५ । तिन्तिड्याम् । भा. ।

दन्तशब्दः । पुं । ग्रहजुष्टबालकस्य दन्तपीड़नरोगे । দাঁত কড়মড় রোগ । लक्षणम्—"ऊर्द्धं निरीक्षते दन्तान् खादेत्कूजति जृम्भते ।" मा.नि. ।

दन्तशर्करा । स्त्री । दन्तगतमुखरोगे । দাঁতের পাথুরি । लक्षणं यथा—"मलो दन्तगतो यस्तु पित्तमारुतशोषितः । शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥" मा.नि. ।

दन्तशाणम् । क्ली । दन्तघर्षणे, दन्तनिशुद्धिद्रव्ये । মাজন, মিশি । त्रिका. । [श.र. ।

दन्तशिरा । स्त्री । दन्तवेष्टे । দাঁতের মাড়ি ।

दन्तशूलम् । क्ली । दन्तरोगे । दन्तार्व्वुदे । দাঁতের শূলনি । रा.नि.व.२० ।

दन्तशैथिल्यम् । क्ली । वातजदन्तरोगविशेषे । দাঁত আল্‌গা । च.सू.२०अ. ।

दन्तशोफः । पुं । दन्तार्व्वुदरोगे । रा.नि.व.२० ।

दन्तहर्षः । पुं । दन्तगतमुखरोगे । দাঁত শিহরা, টকা । लक्षणं—"शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः । पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥" मा.नि. । "दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च । यस्य तं दन्तहर्षन्तु व्याधिं विद्यात्समीरणात् ॥" सु. । "शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः । तत्र सुवातपित्ताभ्यां दन्तहर्षः स कीर्त्तितः ॥" भा. । [का. । जटा. ।

दन्तहर्षकः (णः) । पुं । जम्बीरवृक्षे । त्रिका. ।

दन्ताघातः । पुं । निम्बूकवृक्षे । গোঁড়া লেবুর গাছ । रा.नि.व.११ ।

दन्तायुधः । पुं । वनशूकरे । त्रिका. ।

दन्तार्व्वुदः । पुं,क्ली । दन्तरोगविशेषे । দাঁতের গোড়ার আব । रा.नि.व.२० ।

दन्तावलः । पुं । करिणि । अम. । [श.र. ।

दन्तिका (जा) । स्त्री । दन्तीवृक्षे । अम. ।

दन्तिनी । स्त्री । दन्तीक्षुपे । रा.नि.व.६ । वै.निघ.२भ.क्रिमि-चि.चित्रकादितैले ।

दन्तिनीबीजम् । क्ली । जैपालबीजे । जयपाल । रा.नि.व.६ । [सु.सू.३७अ. ।

दन्तिला । स्त्री । नागदन्त्यां । হাতিশুঁড় ।

दन्ती । स्त्री । (Baliospermum montanum. Syn. Croton polyandrum.) स्वनामख्यातक्षुद्रक्षुपे । দন্তী গাছ । हिं दन्ती । मं दान्ति । कं दन्ति । तें दन्तिचेट्टु, कोष्ठशमदुम् । वम्. जामालगोटा । क्षुद्रदीर्घभेदेन दन्ती द्विधा । तयोरेका उदुम्बरदलाकारा, अन्या एरण्डदला । सा. गुणाः—कटूष्णा शूलघ्नी अर्शोव्रणाश्मरीघ्नी दीपनी च । अन्या कटूष्णा रोचनी क्रिमिघ्नी शूलकुष्ठामघ्नी गुदामयघ्नी च । रा.नि.व.६ । "दन्तीद्वयं सरं पाके रसे च कटु दीपनं । गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठविदाहनुत् । तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् । क्षुद्रदन्तीफलं तु स्यात् मधुरं रसपाकयोः । शीतलं स्रष्टविण्मूत्रगरशोथकफापहम् ॥" भा. । वा.सू.१५अ.श्यामादिः । "श्यामा दन्ती द्रवन्ती ।" सु.सू.३९अ. । च.सू.२अ.वमने । जैपालबीजे । वै.निघ.२भ.शीतज्व.चि. । "क्वाथेन दन्तीत्रिवृतोद्भवेन ।" वा.व्या.चि.महानाराचरसे । ४र्थ विषगर्भतैले । पुं (इन्) । हस्तिनि । प.मु. । [वै.निघ. ।

दन्तीफलम् । क्ली । पिप्पल्याम् । दन्तीबीजे ।

दन्तीफलसमाकृतिः । पुं । पिस्तावृक्षे । পেস্তা গাছ । वै.निघ. ।

दन्तीबीजम् । क्ली । जैपालबीजे । रा.नि.व.६ । वै.निघ.२भ.अर्श.चि.महोदधिवट्याम् । वा.व्या. मृतसञ्जीवनीरसे, वातगजकेशरीरसे ।

दन्तीहरीतकीगुड़ः । पुं । गुल्माधिकारे । पाठः—"जलद्रोणे विपक्तव्यं विंशतिः पञ्च चाभयाः । दन्त्याः पलानि तावन्ति चित्रकस्य तथैव

च । तेनाष्टभागशेषेण पचेद्दन्तीसमं गुड़ं । तत्तीभं विड़चूर्णतैलाचापि चतुष्पलं । पलमेकं कणागुरुयोः सिद्धे लेहे च शीतले । चौद्रं तैलसमं दद्याच्चातुर्जातपलन्तथा। ततो लेहपलं लिढ्वा जग्ध्वा चैकां हरीतकीम् ॥" पोटलीबद्धहरीतकी २५, दन्तीमूलं २५ प. चित्रकमूलं २५ प. जलं ६४ श. शे. ८ श. । पुरातनगुड़स्य २५ प. क्वाथेन गुड़ं गोलयित्वा पचेत् । पाके सिद्धे अवतार्य्य स्निग्धे सति त्रिवृचूर्णं ४ प. कणागुरुयोः प्र. पलं तिलतैलं ४ प. प्रक्षेप्यम् । शीते मधु ४ प. गुड़त्वक् एलातेजपत्रनागकेसराणां प्र. २ तो. मिश्रणीयम् । मात्रा २ तो. हरीतकी ।० श. । रस.र. ।

दन्तुरः । त्रि । उन्नदन्ते । नतानते । मे. ।

दन्तुरच्छदः (त्वक्) । पुं । मातुलुङ्गवृक्षे । टाबा गाछ । रा.नि.व.११ । [निघ. ।

दन्तोज्ज्वला । स्त्री । श्वेतजातीपुष्पवृक्षे । वै.

दन्तोद्भेदः । पुं। बालदन्तोद्गमे । दाँत उठा । "दन्तोद्भेदः शिशोः सर्व्वरोगाणां कारणं मतं । विशेषाज्ज्वरविड्भेदकासच्छर्द्दिशिरोरुजाम् । अभिष्यन्दस्य पोथक्या विसर्पस्य च जायते ॥" भा.म. ख.४अ. । [तानि २० । च.शा.७अ. ।

दन्तोलूखलम् । क्ली । दन्ताधिष्ठानास्थनि ।

दन्दशः । पुं । दन्ते । वै.निघ. ।

दन्दशूकः । पुं । सर्पे । वै.निघ. ।

दमः । पुं । दमनकक्षुपे । वै.निघ. ।

दमनम् । क्ली । दमनपुष्पे । दना फुल । सि. यो.च.द.वा.व्या.चि.महाराजप्र.तैले । पुं । कुन्दपुष्पवृक्षे । कुँदफुलेर गाछ । रा.नि.व.१० । दमनकवृक्षे । त्रिका. । "दमनस्तुवरस्तिक्तो हृद्यो वृष्यः सुगन्धिकः । ग्रहणात् विषकुष्ठास्रक्लेदकण्डूविदोषजित् ॥" भा. ।

दमनकः । पुं । (Artemisia Scoparia or A. Indica.) दना इति ख्याते पुष्पक्षुपे । दना गाछ । प.मु. । हिं दवणा । पं दोणा । गुणाः—शीतलः तिक्तः कषायः कटुकः द्वन्द्वदोषत्रिदोषघ्नः विषविस्फोटघ्नश्च । अन्यश्च वन्यदमनः शैथिल्यस्तम्भनकारी बलदायी आमदोषहारी च । रा.नि.व.१० ।

दमनी । स्त्री । अग्निदमनीनामक्षुपे । (शोला) रा.नि.व.४। नागदमन्याम् । नागदना । वै.निघ.।

दमयन्ती । स्त्री । भद्रमल्लिकापुष्पवृक्षे । मल्लिका फुलेर गाछ । रा.नि.व.१० । कर्कटिकायाम् । वै.निघ. ।

दम्पती । पुं (द्वि.) । जायापत्योः । वै.निघ. ।

दम्भः । पुं । अतीसाररोगे दाहकर्म्मविशेषे । "नाभेर्द्व्यङ्गुलकादधोर्द्धंशशिवर्द्धंशास्थिमूले तथा दाहः प्रज्वलितायसस्य कथितो दम्भो ग्रहण्यातुरे ॥" तन्त्रान्तरम् ।

दम्भफलः । पुं । सेवऋक्षे । सेव । वै.निघ. ।

दम्भीरः । पुं । लावपक्षिणि । (भरुः) महिषे । वै.निघ. ।

दम्यः । पुं । वत्से । वृषे । वै.निघ. ।

दरः । पुं । शङ्खे । वै.निघ.२अ.मधुरज्ज.विषसचिकादिकषाये । विषे । वै.निघ. । [४ ।

दरकण्टिका । स्त्री । शतावर्य्याम् । रा.नि.व,

दरदः । पुं । ब्रुतपत्रशाके । नटे शाक । प. मु. । क्ली । हिङ्गुलधातौ । रा.नि.व.१३ । र मा ।

दर्द्दराम्लः । पुं । मीनाम्लीने, व्यञ्जनविशेषे । श.मा. ।

दर्द्दरीकः । पुं । भेके । मेघे । उणा. ।

दर्द्दुरः । पुं । पुनर्नवायाम् । इन्द्रगोपकीटे । वर्षाभ्वाम् । रा.नि.व.२३। कृष्णाभ्रे । नीलाभ्रभेदे । रा.नि.व.१३ । र.चि.३अ. । "बलिदर्द्दुरपूतिलौहतापम् ।" भेके । मे. । शालिधान्यभेदे । अयं षष्टिकाद्दीनगुणः । च.सू.२७अ. ।

दर्द्दुरच्छदा । स्त्री । ब्राह्मीक्षुपे । वै.निघ. ।

दर्द्दुरदला । स्त्री । मण्डूकपर्ण्याम्, सा च ब्राह्मी, ब्रह्मी, वरम्मीति महाराष्ट्रे ख्याता । थुलकुड़िभेद । भा.म.१म.चित्तभ्रम.ज्व.चि. । "इन्दुशिखण्डजोऽथ दर्द्दुरदला ।"

दर्द्दुरपर्णी । स्त्री । ब्राह्मीक्षुपे । वै.निघ. ।

दर्द्दुः (र्द्रूः) । पुं । लकुचवृक्षे । डेलो गाछ । रा.नि.व.९। महाकुष्ठभेदे । दाद । भा.नि.। स्त्री । दद्रुरोगे । उणा. ।

दर्द्दुघ्नः । पुं । चक्रमर्द्दवृक्षे । চাকন্দা গাছ । श.र. ।

दर्द्दुघ्नपत्रम् । क्ली । पत्रशाकविशेषे । দাদমর্দ্দিনী । चक्रमर्द्दपत्रे । চাকন্দা পাতা । हिं चकवड़ । गुणाः—दोषहरम् अम्लं वातकफघ्नं कण्डूकासकृमिश्वासदद्रुकुष्ठघ्नं लघु च । भा.पू.१भ. शा.व. । See दद्रुघ्नी ।

दर्द्दु(र्द्दू)णः । त्रि । दद्रुरोगिणि । श.टी.भ. ।

दर्द्दु(र्द्दू)रोगी (इन्) । त्रि । दद्रुरोगयुक्ते । श.टी.भ. । [त्रिका.

दर्पः । पुं । कस्तूरिकावृक्षे । मे. । उष्मणि ।

दर्पणम् । क्ली, पुं । नेत्रे । जटा. । आदर्शे । আর্শি । गुणाः—आयुःश्रीकारित्वं पापशमनत्वञ्च । राज.२प. ।

दर्पपत्रकः । पुं । काशतृणे । वै.निघ. ।

दर्पा । स्त्री । कस्तूर्य्याम् । वै.निघ. ।

दर्भः । पुं । (Poa cynosuroides. Syn. Eragrostis cynosuroides.) कुशतृणे । কুশ তৃণ । हिं दाभ् । तें दुभ । अम. । सु.सू. ३८अ. । (Imperata cylindrica. Syn. Saccharum cylindricum.) उलुके । উলু, খাগড়া । प.सु. । वा.सू.१५अ. वरुणादिः । "बहलपल्लवदर्भरुजाकराः ।" च.सू ४अ. । काशतृणे । श.र. ।

दर्भकः । पुं । अश्वस्य पादरोगविशेषे । लक्षणं —"मण्डूका विवरं यस्य दर्भसूत्रकरं भवेत् । तस्य दर्भक इत्युक्तो व्याधिः कष्टचिकित्सितः ॥" ज.द.३९अ. । [कृमिजाति । वै.निघ. ।

दर्भकुसुमः । पुं । कृमिजातौ । তদাকার

दर्भपत्रः । पुं । कासतृणे । रा.नि.व.८ ।

दर्भपुष्पः । पुं । तन्नामकदर्वीकरसर्पविशेषे । राजिमत्सर्पविशेषे । वैकरञ्जजातीयसर्पे । सु.कल्प. ४अ. । See सर्पः । कफजकृमिभेदे । च.वि.७अ. ।

दर्भमूलम् । क्ली । कुशमूले । उलुमूले । च.द.हृद्रो.चि. ।

दर्भरः । पुं । लावपक्षिणि । वै.निघ. ।

दर्भवटम् । क्ली । अन्तर्गृहे । त्रिका. ।

दर्भाह्वयः । पुं । मुञ्जतृणे । मूञ्ज । रा.नि.व.८

दर्व्विः (र्व्वी) (कः) । स्त्री । सर्पफणायाम् । दर्व्विकायाम् । হাতা । अम. । श.र. ।

दर्व्विका । स्त्री । दर्व्याम् । হাতা । श.टी. रा. । कज्जलभेदे । কাজল । तत्र सौवीरजाम्बलतुल्यमयूरश्रीकरदर्व्विकासिवानीलभेदेन षट् भवन्ति । तल्लक्षणम् अञ्जनशब्दे द्रष्टव्यम् । पुराणम् । गोजिह्वायाम् । वै.निघ. ।

दर्व्विपत्रिका । स्त्री । गोजिह्वायां । দাড়িয়া শাক । ज.द.१२अ. ।

दर्वीकरः । पुं । सर्पजातिविशेषे । ফণধর সর্প । लक्षणं यथा—"रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः । फणिनः शीघ्रगतयः सर्पा दर्व्वीकरा मताः ॥" वा.उ.३६अ. । दर्वीकरभेदाः—कृष्णसर्पमहाकृष्णकृष्णोदरश्वेतकपोतवलाहकमहासर्पशङ्खपाललोहिताचगवेधुकपरिसर्पखण्डफणककुदपद्ममहापद्मदर्भपुष्पदधिमुखपुण्डरीकभ्रुकुटीमुखविष्किरपुष्पाभिकीर्णगिरिसर्पऋजुसर्पश्वेतोदरमहाशिरालगर्दाशीविषाश्चेति । दर्वीकरस्य प्रथमे विषवेगे श्यावत्वं दुष्टञ्च रक्तं स्यात् । तथा मुखादौ श्यावता स्यात् । द्वितीये ग्रन्थयः, तृतीये शिरोगुरुत्वादयः, चतुर्थे ष्ठीवनादयः, पञ्चमे सन्धिविश्लेषणं तन्द्रा पर्व्वभेदः दाहः हिक्का च, षष्ठे हृत्पीड़ाद्याः, सप्तमे च शुक्रं प्राप्य स्कन्धादिभङ्गः सर्व्वचेष्टानिवृत्तिश्च स्यात् । वा.टी.अरुणः ।

दर्शः । पुं । अवलोकने । मे. ।

दर्शतः । पुं । सूर्य्ये । चन्द्रे । उणा. ।

दर्शनम् । क्ली । नेत्रे । रा.नि.व१८ । दर्पणे । स्वप्ने । मे. ।

दर्शनी । स्त्री । तैलकीटके । वै.निघ. ।

दर्शनीयः । पुं । अर्कवृक्षे । श्वेतार्के । वै.निघ. ।

दर्शनोज्ज्वला । स्त्री । श्वेतजातीवृक्षे । वै. निघ. ।

दर्शविपत् । पुं । चन्द्रे । हारा. ।

दलम् । क्ली । तेजपत्रे । रा.नि.व.६ । वा.उ.५अ. । च.द.सि.शी,सप्तशर्करचूर्णे । "शुण्ठीकणा-

भरित्वनागदलत्वगीला ।" पत्रे । पाता । त्रिका. ।

दलकोमलम् । क्ली । पद्मे । वै.निघ. ।

दलकोषः । पुं । मल्लिकापुष्पवृक्षे । वै.निघ. । कुन्दपुष्पवृक्षे । श.मा. ।

दलनिर्म्मोकः । पुं । भूर्जवृक्षे । श.मा. ।

दलपः । पुं । सुवर्णे । उणा. ।

दलपुष्पा । स्त्री । केतकीवृक्षे । केया गाछ । रा.नि.व.१० । श्वेतकेतक्याम् । श्वेत केया । वै. निघ. ।

दल(अर्द्ध)लाङ्गलकः । पुं । तदाकारच्छेदविशेषे । य एकस्मिन् पार्श्वे छेदः स दललाङ्गलकाख्यः । वा.उ.२८श. । "इस्वमेकतरं यत्र सोऽर्द्धलाङ्गलकः स्मृतः ॥" सु.चि.८श. ।

दलशालिनी । स्त्री । कञ्चुकशाके । कचु शाक । वै.निघ. ।

दलसायसी । स्त्री । श्वेततुलसीवृक्षे । वै.निघ.।

दलसारिणी । स्त्री । केसुकवृक्षे । केउ गाछ । र.मा. । [कण्टके । काँटा । हारा. ।

दलसूचिः । पुं । कण्टकवृक्षे । काँटा गाछ ।

दलस्नसा । स्त्री । पत्रशिरायाम् । पाताय शिरा । हे.च. । [भा. ।

दलहीनफला । स्त्री । सुलेमानीखर्जूर्य्याम् ।

दला । स्त्री । नगवल्ल्याम् । नालिता । प.मु. । अजमोदायाम् । ब्राकुनी, वनयमानी । रा.नि. व.६ ।

दलाग्रलोहिता । स्त्री । चिल्लीनामपत्रशाके । रा.नि.व.७ । पलाग्रलोहितापि पच्यते ।

दलाढ़कः । पुं । नागकेशरवृक्षे । नागेश्वर गाछ । गैरिके । गेरिमाटी । समुद्रफेने । आरग्वतिलकवृक्षे । वन तिल । काके । पृश्निपर्ण्यां । चाकुले । चक्रवाके । मे. । करिकर्णे । कुन्दवृक्षे । शिरीषवृक्षे । हे.च. ।

दलाढ़की । स्त्री । फणिज्झकवृक्षे । वै.निघ. । पृश्निपर्ण्याम् । चाकुले । मे. ।

दलाढ्यः (कः) । पुं । कुन्दपुष्पवृक्षे । वै.निघ. । पङ्कर्कटे । दल्दलिया कादा । त्रिका. ।

दलामलम् । क्ली । मूर्व्वायाम् । मुर्गा । मरुवकवृक्षे । मरुया । दमनकवृक्षे । दना । मे. । मदनवृक्षे । मयना गाछ । श.र. ।

दलाम्लम् । क्ली । चुक्रनामपत्रशाके । चूका शाक । रा.नि.व.७ । [व.इ ।

दलाह्वम् । क्ली । तमालपत्रे । तेजपत्र । मद.

दलिकम् । क्ली । काष्ठे । हे.च. । [त्रिका. ।

दलेगन्धः । पुं । सप्तपर्णवृक्षे । छातिम् गाछ ।

दवः । पुं । अग्नौ । भ.टी.नी. । उपतापे । दवथौ, मुखताल्वोष्ठानां दाहे । वै.निघ. ।

दवदग्धकम् । क्ली । कत्तृणे । गन्धतृण वा रामकर्पूर । रा.नि.व.८ ।

दवथुः । पुं । दवे, चक्षुरादिभ्यस्तीव्रोष्मप्रवृत्तौ । वा.ज्व.चि.१अ. । "उद्रिक्तपित्ते दवथुः ।"

दशजटा । स्त्री । दशमूले । वै.निघ.२भ.वा. वग्रा.चि.रास्नादिचूर्णे ।

दशनः । पुं । दन्ते । भ.टी.भ. ।

दशनवासः । क्ली । ओष्ठे । अम. ।

दशनवीजः । पुं । दाड़िम्बवृक्षे । वै.निघ. ।

दशनाढ्या । स्त्री । चाङ्गेर्य्याम् । आमरुल । चुक्रशाके । चूकापालं । श.च. ।

दशनोच्छिष्टः । पुं । निःश्वासे । मे. ।

दशपु(पू)रम् । क्ली । जलमुस्तायाम्, कैवर्त्तमुस्तके । अम. । भ.टी.भ. ।

दशमूत्रकम् । क्ली । दशविधमूत्रे । हस्तिमहिषोष्ट्रगवाजमेषाश्वगर्दभनरनारीणां मूत्रे । रा. नि.व.२२ ।

दशमूलम् । क्ली । विल्वादिदशविधवृक्षमूले, पञ्चमूलीद्वये वा । "विल्वश्योणाकगाम्भारीपाटलागणिकारिकाः । शालपर्णी पृश्निपर्णी वृहतीद्वयगोक्षुरम् ॥" रा.नि.व.२२ । वर्गोऽयं वातघ्नः । वा.सू.१५अ.भद्रदार्व्वादौ । गुणाः—दशमूलं त्रिदोषघ्नं श्वासकासशिरोरुजः । तन्द्राशोथज्वरानाहपार्श्वपीड़ारुचीर्हरेत् ॥" भा. । सूतिकारोगहरम् । चर्क. ।

दशमूलघृतम् । क्ली । गुल्मे घृतम् । गव्यघृतं

४ श. । क्वाथार्थं—दशमूलं ६४ प. वारि ६४ श. शे. १६ श. । कल्कार्थं—शुण्ठी पिप्पली मरिचं यवक्षारः सैन्धवलवणम्, एषां प्र. २ प. । च. चि.५अ. ।

दशमूलतैलम् । क्ली । कर्णरोगे तैलम् । पाठः—"दशमूलीकषायेन तैलप्रस्थं विपाचयेत् । एतत्कल्कं प्रदायैव बाधिर्य्ये परमौषधम् ॥" तिलतैलं ४ श. दशमूलं ४ श. वारि १६ श. शे. ४ श. । क्वाथार्थं—दशमूलं १ श. । च.द. । सा.कौ. । अन्यत् शिरोरोगे—दशमूलं प्र. ६ प. करञ्जनिर्गुण्डी जयन्ती धुस्तूराणां प्र. ६ प. जलं ६४ श. शे. १६ श. । कटुतैलं ४ श. । कल्कार्थं—दशमूलधुस्तूरकरञ्जनिर्गुण्डीजयन्तीनां प्र. ६ तो. । अत्राष्टाङ्गावलेहकल्कमपि ददति वृद्धाः । सा.कौ. ।

दशरथः । पुं । शरीरे । वै.निघ. ।

दशशतकरदुग्धम् । क्ली । अर्कक्षीरे । आकन्द आटा । वै.निघ.२भ.कर्णक.ज्व.चि. ।

दशशताङ्घ्रिः । स्त्री । शतावर्य्याम् । शतमूली । वै.निघ. । [पर्कापिकच्छूपर्पटककुमारीषु ।

दशशाकः । पुं । त्वक्पत्रमूलफलदण्डाङ्कुरपु-

दशसारवटी । स्त्री । वातव्याधौ वटी । "यष्टि धात्री बला द्राक्षा एला चन्दनबालुकं । मधूकपुष्पं खर्ज्जूरं दाड़िमं पेषयेत्समं । सर्व्वतुल्या सिता योज्या पलार्द्धं भक्षयेत्सदा । दशसारवटी ख्याता…… ।" र.सा.सं. ।

दशा । स्त्री । बाल्याद्यवस्थायाम्, बाल्ययौवनप्रौढवार्द्धक्येषु । अश्वस्य चेचफलदशविधकालपरिमाणे । सा च समाद्वयं सप्तादशदिनं वर्षत्रयं ज्ञेयम् । "वासराः सप्ततिः द्वौ च वर्षाणाञ्च तथात्रयं । दशाप्रमाणं वाहानां शालिहोत्रेण कीर्त्तितम् ॥" ज.द.५अ. ।

दशाङ्गगुग्गुलुः । पुं । मेदोरोगे । त्रिकटु चित्रकमूलं त्रिफला मुस्ता विड़ङ्गं एषां प्र. चूर्णं १ तो. गुग्गुलु ८ तो. । भा. ।

दशाङ्गधूपः । पुं । दशविधद्रव्यकृतधूपविशेषे । यथा—"पञ्चाशज्जस्यपाषाणात्तावान्माहिषगुग्गुलुः । चतुरंशं चन्दनञ्च जटामांसी च तावती । त्रिभागः सार्ज्जकः सारः तावदेव हि बालकं । उशीरन्तु त्रिभागं स्याद्गुग्गुलभष्टनखं समम् । कर्पूरो मृगनाभिश्च एकभागो प्रकीर्त्तितो ॥" अन्यः—"वचाहिङ्गुविड़ङ्गानि सैन्धवं गजपिप्पली । पाठा प्रतिविषा व्योषं दशाङ्गः कश्यपोदितः ॥" अयं धूपः सर्व्वग्रहजित् । वा.उ.३अ. । [गाछ । भा. ।

दशाङ्गुलः । पुं, क्ली । खर्व्वूजायाम् । थर्मूजा

दशाङ्घ्रिः । पुं । दशमूले । वा.व्या.महारास्नादौ ।

दशानिकः । पुं । दन्तीवृक्षे । श.च. ।

दशारुहा । स्त्री । कैवर्त्तमुस्तायां । रा.नि.व.६ ।

दष्टपीड़ितम् । क्ली । दंशनविशेषे । "दंष्ट्रापदानि चत्वारि तद्दष्टनिपीड़ितम् ।" वा.उ.३५अ. । [तुहिने । उणा. ।

दस्रः । पुं । अश्विनीकुमारे । गर्दभे । मे. । क्ली ।

दस्रौ । पुं (द्वि०) । अश्विनीकुमारौ । अम. ।

दहनः । पुं । चित्रकवृक्षे । रा.नि.व.६।२३ । वा.सू.१५अ. । भल्लातकवृक्षे । रा.नि.व.११ । सि.यो.स्व.मे.चि.चव्यादिलेहे । "तालीशजीरकतुगादहनैः ।" वा.सू.१५अ.वरुणादिः । "दहनमोरटबिल्वविषाणिकाः ।" च.द.प्र.च.चि. । वृश्चिकाल्याम् । विछाती । रा.नि.व.२३ । गुग्गुलौ । पक्षिविशेषे । पायरा । रा.नि.व.१८ । क्ली । दाहे । अगुरुणि । काञ्जिकभेदे । वै.निघ. ।

दहनकेतनः । पुं । धूमे । हे.च. । [व.१२ ।

दहनाग(गु)रु । क्ली । दाहागुरुणि । रा.नि.

दहनारातिः । पुं । जले । रा.नि.व.१४ ।

दहनी । स्त्री । मूर्व्वायां । मुर्गा । रा.नि.व.३ ।

दहनोपलः । पुं । सूर्य्यकान्तमणौ । हे.च. ।

दहरः । पुं । कुक्कुटे । बालके । मूषिके । मे. ।

दक्षः । पुं । कुक्कुटे । त्रिका । सि.यो.कास चि. दशमूलघृते । वृक्षभेदे । विश्व. ।

दक्षाण्डत्वक् । स्त्री । कुक्कुटाण्डत्वचि । कुक्ड़ार ডিমের খোলা । भैष.नेत्र.चि. । भा.म.४भ. कर्णरो.चि. । "दक्षाण्डत्वक् च सा ।"

दक्षाय्यः । पुं । गृध्रे । वै.निघ. ।

दक्षिणदेशजा । स्त्री । लताकस्तूर्य्याम् । लताकस्तूरी । श.चि. ।

दक्षिणवायुः । पुं । मलयमारुते । दक्षिणवायु । गुणाः—“मधुरश्चाविदाही च कषायानुरसो लघुः । दक्षिणो मारुतः श्रेष्ठः चक्षुष्यो बलवर्द्धनः । रक्तपित्तप्रशमनो न च वातप्रकोपनः ॥” सु.सू. ।

दक्षिणायनम् । क्ली । रवेर्दक्षिणतो गतौ । यदा रविः कर्कटराशावस्थितो भवति तदा तदारभते । तच्च श्रावणादिमासषट्के भवति । “कर्कटावस्थिते भानौ दक्षिणायनमुच्यते ।” सु.सू. ।

दक्षिणावर्त्तकी । स्त्री । वृश्चिकाल्यां । विछाति गाछ । रा.नि.व.८ । मेषशृङ्ग्यां । वै.निघ. ।

दक्षिणावर्त्तफला । स्त्री । वृद्धौषधे । वै.निघ. ।

दक्षिणावर्त्ता । स्त्री । मेषशृङ्ग्यां । रा.नि.व.६ ।

दक्षेयः । पुं । गृध्रे । वै.निघ. ।

दाड़कः । पुं । दन्ते । शब्दार्थकल्पतरुः ।

दाड़िमः । पुं । एलायाम् । मे. । (Punica Granatum.) The Pomegrauate. स्वनामख्यातफलवृक्षे । दाड़िम गाछ । हिं आनार । मं दाड़िन । कं दाड़िम्ब । तें डानिम्मचेट्टु । उत्. दालिम्ब । ता. मादलइचेडिड । गुर्ज. डालम । फलगुणाः—मधुराम्लकषायं कासवातकफपित्तघ्नं ग्राहि दीपनं लघूष्णं शीतलं श्रमघ्नं रुचिकरम् । दाड़िमम् अम्लमधुरभेदेन द्विविधं, तयोः प्रथमं वातकफहारि, द्वितीयं तापहारि लघु पथ्यञ्च । रा.नि.व.११ । स्वादुस्वादम्लकेवलाम्लभेदेन त्रिभेदमिच्छति भावप्रकाशः—स्वादु तत्त्रिदोषहरं तृष्णादाहज्वरघ्नं हृत्कण्ठमुखदुर्गन्धघ्नं तर्पणं शुक्रलं लघु कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् । स्वादम्लं—दीपनं रुच्यं लघु किञ्चित्पित्तकरञ्च । अम्लन्तु—पित्तजनकं वातकफघ्नञ्च । तन्मूलञ्च क्रिमिहरम् । भा. । इदम् अम्लं श्वासरुचितृष्णाहरं कण्ठशोधनं पित्तकफविशोषकम् । राज. । “श्रेष्ठं वातादिकरुजहरं दाड़िमञ्चामयघ्नम् ।” अत्रि.१७अ. । क्ली । दाड़िमफले । सि.यो.तृड्दाहज्व.चि. ।

दाड़िमत्वक् । स्त्री । दाड़िमफलवल्कले । दाड़िमेर खोला । सि.यो.अ.सा.चि.उत्पलादिः ।

दाड़िमपत्र(पुष्पः)कः । पुं । रोहितकवृक्षे । রোড়া, রয়না गाछ । रा.नि.व.८ ।

दाड़िमप्रियः । पुं । कीरे । शुक पक्षी । श.र. ।

दाड़िमभक्षणः । पुं । शुकपक्षिणि । श.च. ।

दाड़िमाष्टकम् । क्ली । ग्रहण्यां हितम् । “कर्षोन्मिता तुगाक्षीरी चातुर्जातं द्विकार्षिकम् । यमानीधान्यकाजाजीग्रन्थिव्योषं पलांशिकं । पलानि दाड़िमादष्टौ सितायाश्चैकतः कृतम् ॥” च.द. ।

दाड़िमी । स्त्री । दाड़िमवृक्षे । वै.निघ. ।

दाड़िमीरसः । पुं । दाड़िमाम्बुनि । च.द. ।

दाड़िमीविषम् । क्ली । दारुमोचनामकविषभेदे । दार्व्वक । प.मु. । [११ ।

दाड़िमीसारः । पुं । दाड़िमवृक्षे । रा.नि.व.

दाड़ि(ड़ी)म्बः । पुं । दाड़िमवृक्षे । प.मु. ।

दाढ़ा । स्त्री । दंष्ट्राभेदे । दाड़ा । हे.च. ।

दाढ़िका । स्त्री । दाड़ी इति ख्याते मुखावयवे । हे.च. ।

दात्यूहः । पुं । शुकपक्षिणि । प.मु. । डहुकपक्षिणि । डाक पाखी । गुणाः—वातघ्नः वृष्यः बलदः शुक्रदः श्रमघ्नश्च । अत्रि.२२अ. । चातकपक्षिणि । त्रिका. ।

दात्यौहः । पुं । जलकाके, दातूहे । श.र. ।

दात्रम् । क्ली । अस्त्रविशेषे । दा ।

दाधिकः । त्रि । दधिसम्बन्धिनि । क्ली । दधिसंस्कृतभक्ते । भा.म.१भ.अन्नद्र.शू.चि. ।

दानम् । क्ली । कुङ्कुमे । च.द.वा.व्या.चि.१८अशती.प्रसारणीतैले । गजमदे । मे. । तरुकोटरजमधुनि । कुटुरे मधु । गुणाः—रुच्यं दीपनं कफच्छर्दिमेहघ्नञ्च । राज. । [निघ. ।

दानवप्रिया । स्त्री । नागवल्लीलतायाम् । वै.

दान्तः । पुं । दमनकक्षुपे । दना गाछ । रा. नि.व.१० ।

दामनः । पुं । दमनकवृक्षे । वै.निघ. ।

दामबन्धः (नः) । क्ली । व्रणबन्धनविशेषे । लक्षणं—“दामाकृतिश्चतुष्पादो बन्धः स्याद्दामसंज्ञितः ।” इति । सु.सू.१८अ. । दाम अनेकगोबन्धनीरज्जुः । দোঁকা । तदाकारः चतुष्पादयुक्तः दामबन्धः । च.द. ।

दामाञ्चलम् । क्ली । अश्वादेः पादबन्धनरज्ज्वौ । हे.च. ।

दामोदरः । पुं । व्याघ्रगलाख्यवैद्यकग्रन्थप्रणेतरि । [नि.व.१६ ।

दाम्भिकः । त्रि । वाचाले । पुं । वके । रा.

दायकः । पुं । बालके । मे. । पुत्रे । हे.च. ।

दारकः । पुं । ग्राम्यशूकरे । रा.नि.व.१६ । त्रि । विदारके । वै.निघ. । हरिद्दर्णस्थावरविषभेदे । अत्रि.३स्थान ५६अ. ।

दारकर्म्म । क्ली । विवाहे । त्रिका. ।

दारणम् । क्ली । कतकफले । निर्म्माली । श्र. चू. । व्रणविदारणद्रव्ये । ফোড়া গলান দ্রব্য । यथा—"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः । कपोतगृध्रकङ्कानां पुरीषाणि च दारणम् । क्षारद्रव्याणि यानीह क्षारो वा दारणम्परम् ॥" सु. । पुं । कतकवृक्षे । वै.निघ. ।

दारदः । पुं । हिङ्गुले । त्रिका. । पारदे । मे. । दरददेशीयविषे । विषमात्रे । अम. । [१६ ।

दारवलिभुक् । पुं । वकपक्षिणि । रा.नि.व.

दारी । स्त्री । पाददारिनामक्षुद्ररोगे । "परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः । पादयोः कुरुते दारीं सरुजां तलसंश्रिताम् ॥" सु.नि.१३अ. ।

दारु । पुं,क्ली । काष्ठे । अम. । क्ली । दार्व्याम् । দারুহরিদ্রা । र.सा.सं.मेहमुद्गररसे । च.द.पाण्डु.चि. । वै.निघ.२भ.अ.सा.चि.पाठादिकषाये । वा.व्या.स्वल्पनारायणतैले । देवदारुणि । प.मु. । सि.यो.सा.ज्व.चि.अष्टादशाङ्गे । "भूनिम्बदारुदशमूल··· ।" च.द.ज्व.चि.अपराजिताधूपे । वा.ज्व.रास्नादिः । "रास्नाह्वचादनीदारु ।" दारुमूषे । দামুজ । र.सा.सं. । पित्तले । मे. ।

दारुकम् । क्ली । देवदारुणि । रा.नि.व.१२ । वा.व्या.चि. । तैलदेवदारुणि । शीणपित्तले । वै. निघ. । [कला । रा.नि.व.११ ।

दारुकदली । स्त्री । काष्ठकदल्याम् । वन

दारुगन्धा । स्त्री । चीड़ानामकदेवदारुभेदे । रा.नि.व.१२ । [दारुणकरोगे ।

दारुणः । पुं । चित्रकक्षुपे । रा.नि.व.६।२३ ।

दारुणकः । पुं । क्षुद्रोगभेदे । वरुणवृक्षे । वै. निघ.२भ.मूर्च्छा-चि. । क्ली । तन्नामकक्षुद्ररोगे । रूसी खुसकी । लक्षणं यथा—"दारुणा कण्डुरा रूक्षा केशभूमिः प्रपाट्यते । कफमारुतकोपेन विद्याद्दारुणकन्तु तम् ॥" सु.नि.१३अ. । [सु. ।

दारुणकर्म्म । क्ली । मृदुव्रणानां कठिनीकरणे ।

दारुनिशा । स्त्री । दारुहरिद्रायाम् । দারুহরিদ্রা । रा.नि.व.६ । वै.निघ.२भ.मध्यमलाक्षातैले । च.द.वा.र.चि.,मेह.चि. । "वत्सादनीदारुनिशा ।"

दारुपत्री । स्त्री । हिङ्गुपत्र्याम् । रा.नि.व.६ ।

दारुपीता । स्त्री । दारुहरिद्रायां । रा.नि.व.६।

दारुफलम् । क्ली । पेस्ता इति ख्याते फले । वै.निघ. । [গোসাপ । रा.नि.व.१६ ।

दारुमत्स्या (ह्वया,ह्वा) । स्त्री । गोधायाम् ।

दारुमूषा । स्त्री । दार्मुज इति प्रसिद्धे स्थावरविषभेदे । দামুজ । भा.म.१भ.ज्व.चि. ।

दारुमोचः । पुं । स्वनामख्यातविषभेदे । দামুজ । प.मु. ।

दारुविषम् । क्ली । दारुमोचविषे । "भवेदाखुविषं दारुविषं पाषाणसंज्ञकम् । तद्भेदाः शृङ्गीदन्तदाड़िमीस्फटिकादयः॥" प.मु. ।

दारुसिता । स्त्री । (Cinnamomum zeylanicum.) दारुचिनीतिख्यातायां मधुरत्वचि । দারুচিনি । हिं डालचिनि । तें सनलिंगु । ता. करुवा । गुणाः—"उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् । सुरभिः शुक्रला वर्ण्या मुखशोषतृषापहा ॥" भा.उ.वाजी.चि. ।

दारुहरिद्रा । स्त्री । (Coscinium fenestratum. [Berberideae] Berberis Asiatica and other species.) स्वनामख्यातपीतकाष्ठविशेषे । দারুহরিদ্রা । हिं दारुहलदि, जारकेहलदि । कं मरनरिसिन । तें मनिपसुपु । ता. मरमञ्जिल । गुणाः—तिक्ता कटूष्णा व्रणघ्नी मेहघ्नी कण्डुविसर्पत्वग्दोषकर्णाक्षिरोगघ्नी च । रा.नि.व.६ । "दार्व्वीनिशागुणाः किन्तु नेत्रकर्णास्यरोगनुत् ।" भा. । कफपित्तशोफघ्नी विशेषेण कफाभिष्यन्दहरी च । राज. ।

दारुहस्तकः । पुं । दर्व्वी । काठेर हाता । सु.सू.७अ. । [अलि । शब्दार्थकल्पतरुः ।

दार्दुरः । पुं । दक्षिणमुखशङ्खे । खाबाबाम् ।

दार्व्वण्डः । पुं । मयूरे । वै.निघ. ।

दार्व्वाघाटः (तः) । पुं । काष्ठकुट्टपक्षिणि । काठठोकरा पाखी । अम. । श.र. ।

दार्व्विका । स्त्री । खर्परधातौ । खापर । प. मु. । गोजिह्वाक्षुपे । रा.नि.व.४ । रसाञ्जने । वै. निघ. । [क्षिग्ना शाक । र.मा. ।

दार्व्विपत्रिका । स्त्री । दार्व्वीशाके । ((गा-

दार्व्वी । स्त्री । दारुहरिद्रायाम् । प.मु. ।

दार्व्वीक्वाथसमुद्भवम् । क्ली । कृत्रिमरसाञ्जने । रा.नि.व.१३ ।

दार्व्वीक्वाथोद्भवम् । क्ली । कृत्रिमाञ्जने । रसौत् इति पारस्यभाषा । प.मु. ।

दार्व्वीत्वक् । स्त्री । दारुहरिद्रात्वचि । सि.यो. काम.चि.मस्तुरवटके । "दार्व्वीत्वक्त्रिफलाव्योष ।" त्वच एव प्राशस्त्यम् । अभावे काष्ठम् । श्रीकण्ठः ।

दार्व्यम् । क्ली । रसाञ्जने । वै.निघ. ।

दार्व्यादिः । पुं । कषायविशेषे । "दार्व्वीरसाञ्जनकिरातवृषाब्दविल्वभल्लातकैरवकृतो मधुना कषायः । क्वाथः कृतो मधुयुतो विधिना विनीतः रक्तं सितञ्च सरुजं प्रदरं निहन्ति ।" भा. । "दार्व्वी रसाञ्जनवृषाब्दकिरातविल्वभल्लातकैरवकृतो मधुना कषायः ।" च.द. ।

दालम् । क्ली । अष्टविधमध्यन्यतममधुविशेषे । कुट्टिरे मधु । एतदापीतवर्णं सूक्ष्ममक्षिकाभिः इन्द्रनीलवर्णाभिः तरुकोटरादौ उत्पाद्यते । "इन्द्रनीलदलाकाराः सूक्ष्माश्चिन्वन्ति मक्षिकाः । यद्वृक्षकोटरान्तःस्थं मधु दालमिदं स्मृतम् ॥" गुणाः— कटु कषायमम्लं मधुरं पित्तकरञ्च । रा.नि.व.१४ । पुं । कोद्रवे । हे.च. ।

दालकशर्करा । स्त्री । दालकमधुकृतशर्करायाम् । दालमधुर चिनि । सा तन्मधुतुल्यगुणा । रा.नि.व.१४ ।

दालनः । पुं । वायुजन्यदन्तगतमुखरोगे । "दीर्य्यमाणेष्विव रुजा यस्य दन्तेषु जायते । दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥" मा. नि. । तथा "दाल्यन्ते बहुधा दन्ता यस्मिन् तीव्ररुगन्विताः । दालनः स इति ज्ञेयः सदागतिनिमित्तजः ॥" सु.सू.४५अ. ।

दालवः । पुं । स्थावरविषभेदे । हे.च. ।

दाला । स्त्री । आरिखदिरे । रा.नि.व.८ । इन्द्रवारुण्याम् । वै.निघ. । महाकाले । माकाल । भा. ।

दालिः । स्त्री । द्विदले । दाल । "स्फोटस्तु चणकादीनां दालिस्तु परिकीर्त्तिता ।" रा.नि.व.१६ ।

दालिका । स्त्री । दाल्याम् । डाल । महाकाले । माकाल । भा. ।

दालिमः । पुं । दाड़िम्बवृक्षे । अ.टी.भ. ।

दाली । स्त्री । देवदालीलतायाम् । पीत घोषालता । हिं घघरबेल । रा.नि.व.३ । See अगरी । द्विदले । दाल । "दलितन्तु शमीधान्यं दालिर्दाली स्त्रियामुभे ।" तत्पाकविधिः—"दाली तु सलिले सिद्धा लवणार्द्रकहिङ्गुभिः । संयुक्ता सूपनाम्नी स्यात्कथ्यन्ते तद्गुणा अथ । सूपो विष्टम्भको रुक्षः शीतस्तु स विशेषतः । निस्तुषो भृष्टसंसिद्धो लाघवं सुतरां व्रजेत् ॥" भा. । विट्खदिरवृक्षे । गुयेबावला । रा.नि.व.८ ।

दासः । पुं । नीलझिण्ट्याम् । उष्ट्रे । वै.निघ. ।

दासपु(पू)रम् । क्ली । जलमुस्तके, परिपेलवणे । नागरमुता । श.र. । रा.नि.व.८ ।

दासिका । स्त्री । दासीकुरुण्टके । नीलपुष्प झाँटी । श.चि. ।

दासी । स्त्री । पीतपुष्पझिण्टीक्षुपे । पीतझाँटी । नीलझिण्ट्यां । कुलझुटी, नीलझाँटी । रा.नि.व. १० । काकजङ्घायाम् । ((कओआका । रा.नि.व.४ । See नीलाम्लानः ।

दासीकुरुण्टकः । पुं । नीलपुष्पझिण्टीक्षुपे । नीलझाँटी । सु.सू.३८अ. । See नीलाम्लानः । "नीलपुष्पः स एव दासीकुरुण्टकः ।" डल्लणः ।

दासेरः (कः) । पुं । उष्ट्रे । मे. ।

दास्यादिः । पुं । विषमज्वरे कषायभेदे । "दासीदारुकलिङ्गलोहितलताश्यामाकपाठाशठीश-

स्थूलशीरकिराततक्तकरकणाजायन्तिकापद्मकैः । वचीधान्यकनागराब्दसरलैः शिग्रुम्बुसिंहीशिवाव्याघ्रीपर्पटदर्भमूलकटुकानन्तामृतापुष्करैः । धातुस्थं विषमं त्रिदोषजनितं...... ।" भैष. ।

दाहः । पुं । भस्मीकरणे । "सर्व्वाङ्गीणस्तीव्र उष्मा दाहः ।" अरुणः । वा.ज्व.चि.१अ. । तन्नामकपित्तजरोगे । জ্বলুনি রোগ । "त्वचं प्राप्य समानीषा पित्तरक्ताभिमूर्च्छितः । दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥" दाहः तृष्णारोधजरक्तपूर्णकोष्टजधातुक्षयजपित्तजक्षतजरक्तजभेदेन षड्विधः, मर्म्माभिघातजश्चैक इति सप्तविधः । [नि.व.६ ।

दाहकः । पुं । चित्रके । रक्तचित्रकवृक्षे । रा.

दाहकर्षितः । त्रि । दाहपीड़िते ।

दाहकाष्ठम् । क्ली । दाहागुरुणि । वै.निघ.।

दाहग(गु)रु । क्ली । अगुरुविशेषे गुर्जरदेशप्रसिद्धे । অগুরুবিশেষ । गुणाः—दाहागुरु कटूष्णं केशवर्द्धनं वर्णकरं केशदोषघ्नं सौगन्ध्यप्रदञ्च । रा.नि.व.१२ ।

दाहज्वरः । पुं । दाहपूर्व्वके ज्वरे । দাহপূর্ব্বক জ্বর । "करोत्यादौ तथा पित्तं त्वकृस्थं दाहमतीव च । तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥" मा.नि. ।

दाहदा । स्त्री । नागवल्लीलतायाम् । वै.निघ.।

दाहनिःश्वासः । पुं । सुगन्धार्जकवृक्षे । वै.निघ. ।

दाहसरः । क्ली । श्मशाने । त्रिका. ।

दाहहरणम् । क्ली । उशीरे । श.च. ।

दाक्षायणम् । क्ली । स्वर्णे । वै.निघ. ।

दाक्षाय(या)णी । स्त्री । दन्तीक्षुपे । र.मा. ।

दाक्षिणात्यः । पुं । नारिकेलवृक्षे । रा.नि.व.११ ।

दिक् । स्त्री । रीतौ । পিতল । सु.सू.४३अ. ।

दिक्कः । पुं । करिशावके । श.र. ।

दिक्पालसङ्ख्या । स्त्री । अष्टसंख्यायाम् । আট । भा.ज्व.कल्पतरौ । [विष.चि. ।

दिग्धविद्धः । त्रि । विषाक्तबाणविद्धे । च.द.

दिङ्कः । पुं । लिख्यायां । ४ वा ८ त्रसरेणुः । शब्दार्थकल्पतरुः ।

दितः । त्रि । छिन्ने । अम. ।

दिनम् । क्ली । दिवसे । रा.नि.व.२१ ।

दिनकरः । पुं । सूर्य्ये । हे.च. ।

दिनकेशान्तकः । पुं । वटपत्रपाषाणभेदे । বড় পাথরকুচা । वै.निघ. ।

दिनचर्य्या । स्त्री । दिवसे यौविधिः स्वास्थ्यकरस्तथाचरणे । तत्र ब्राह्ममुहूर्त्तोत्थानाभीष्टदेवतास्मरणम्, दध्याज्यादर्शविल्वगोरोचनादिदर्शनस्पर्शनादि, इति स्वमुखदर्शनम्, उषसि मलादिविसर्ज्जनम्, दन्तधावनजिह्वानिर्लेखनमुखप्रक्षालनतैलाभ्यङ्गस्नानभोजनादि च । भा.च.द. ।

दिनदुःखितः । पुं । चक्रवाके । स्त्री । तत्पत्न्याम् । श.र. ।

दिनमणिः । पुं । सूर्य्ये । त्रिका. ।

दिनादिः । पुं । प्रभाते । रा.नि.व.२१ ।

दिनान्तः । पुं । सायंकाले । अम. ।

दिनान्धः । पुं । पेचके । वै.निघ. ।

दिनेशः । पुं । सूर्य्ये । अर्कवृक्षे । वै.निघ.२भ. वा.व्या.चि.शतपुष्पालेपे ।

दिनेशपुष्पम् । क्ली । कैरवपुष्पे । নীলশুন্দী পুষ্প । चि.क.क.प्रदरचि. ।

दिलीरम् । क्ली । शिलीन्ध्रे । কোঁড়ক ছাতা । हारा. ।

दिवसः । पुं, क्ली । दिने ।

दिवसमुखम् । क्ली । प्रभाते । हला. ।

दिवा । अव्य, पुं (न्) । दिवसे । अम. ।

दिवाकरः । पुं । काके । सूर्य्यपद्मे । श.च. । अर्कवृक्षे । अम. ।

दिवाकीर्त्तिः । पुं । पेचके । नापिते । हे.च.

दिवाटनः । पुं । काके । शब्दार्थकल्प. ।

दिवान्धः । पुं । पेचके । रा.नि.व.२३ । त्रि । दृष्टिरोगयुक्ते । দিনকাণা । लक्षणं—"प्राप्ते तृतीयं पटलन्तु दोषे दिवा न पश्येत् निशि वीक्षते

सः । रात्रौ स शीतानुगृहीतदृष्टिः पित्तात्मभावादपि तानि पश्येत् ॥" मा.नि. । (न्धा) स्त्री । वल्गुलापक्षिणि । रा.नि.व.१९ ।

दिवान्धकी (न्धिका) । स्त्री । कुकुन्दर्य्यां । छुँचो । वै.निघ. ।

दिवाभीतः (तिः) । पुं । पेचके । त्रिका । श.र. । क्ली । श्वेतपद्मे । वै.निघ. ।

दिवामध्यम् । क्ली । मध्याह्ने । हे.च. ।

दिवास्वापः । पुं । दिवानिद्रायाम् । दिनेघुमान । तस्य विधिः—"सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धः अन्यत्र ग्रीष्मात् ।" सु.शा.४अ. । "दिवा स्वप्नीकृतं येन रात्रौ वा यदि वा दिवा । न तेषां स्वपतां दोषो जाग्रतां वा विधीयते ॥" "दिवास्वापं न कुर्व्वीत यतोऽसौ स्यात्कफावहः । ग्रीष्मवर्षासु कालेषु दिवास्वप्नो निषिध्यति ॥" भा. ।

दिवास्वापा । स्त्री । पक्षिविशेषे, वल्गुला इति लोके । रा.नि.व.१९ ।

दिविः । पुं । चाषपक्षिणि । श.मा. ।

दिविजम् । क्ली । कुङ्कुमागुरुचन्दने । वै.निघ. ।

दिवी । स्त्री । उपजिह्विकाकीटे । हारा. ।

दिवौकाः । पुं । चातके । मे. । हरिणे । वै. निघ. ।

दिवोदासः । पुं । काशीराजधन्वन्तरौ । यः चन्द्रवंशीयभीमरथनरपतेः पुत्र आसीत् । त्रिका. ।

दिवोद्भवा । स्त्री । एलायां । शब्दार्थकल्पतरुः ।

दिव्यः । गुग्गुलौ । रा.नि.व.१२ । यवे । रा.नि.व.१६ । अर्ज्जुनवृक्षे । वै.निघ. । क्ली । कान्तलौहे । प.मु. । लवङ्गे । रा.नि.व.१२ । चन्दने । वै.निघ. । बालके । बाला । ज.द.१२अ. । [४अ. ।

दिव्यकः । पुं । विविधसर्पविशेषे । सु.कल्प.

दिव्यगन्धः । पुं । गन्धके । रा.नि.व.१३ । क्ली । लवङ्गे । रा.नि.व.१२ ।

दिव्यगन्धा । स्त्री । स्थूलैलायाम् । बड़ एलाइच । रा.नि.व.६ । महाचुञ्चुक्षुपे । रा.नि.व. ४ । लवङ्गलतायाम् । श.चि. । [वै.निघ. ।

दिव्यचन्दनम् । क्ली । हरिचन्दने । लवङ्गे ।

दिव्यचक्षुः । पुं । वानरे । श.मा. । उपचक्षुषि । চশমা । सुगन्धभेदे । मे. ।

दिव्यतुम्बी । स्त्री । अलाबूभेदे । वै.निघ. ।

दिव्यतेजाः । स्त्री । ब्राह्मीनाममहाक्षुपे । रा.नि.व.५ ।

दिव्यपञ्चामृतम् । क्ली । समभागगव्यघृतदधिदुग्धमधुशर्करासु । "गव्यमाज्यं दधि क्षीरं माक्षिकं शर्करान्वितम् । एकत्र मिलितम् ।" रा.नि.व.२२ । [व.१० ।

दिव्यपुष्पः । पुं । श्वेतकरवीरवृक्षे । रा.नि.

दिव्यपुष्पा (ष्पी) । स्त्री । देवद्रोणाम् । बड़ घलघसा । रा.नि.व.५ ।

दिव्यपुष्पिका । स्त्री । देवद्रोणक्षुपे, महाद्रोणाम् । बड़ घलघसा । वै.निघ. । रक्तार्कवृक्षे । र.मा. ।

दिव्यरसः । पुं । पारदे । रा.नि.व.१३ ।

दिव्यलता । स्त्री । मूर्व्वायाम् । रा.नि.व.३ ।

दिव्यसारः । पुं । सर्ज्जवृक्षे । शाल वा धूनार गाछ । रा.नि.व.९ ।

दिव्या । स्त्री । महामेदायाम् । ब्राह्म्याम् । विंची शाक । वन्ध्याकर्कोटक्यां । शतावर्य्यां । स्थूलजीरके । बड़ जीरा । रा.नि व.५ । श्वेतदूर्व्वायां । रा.नि.व.८। आमलक्यां । मे. । हरीतक्याम् । रा.नि.व.११ ।

दिव्यान्नम् । क्ली । उत्तमान्ने । वै.निघ. ।

दिव्येलकः । पुं । राजिलवदेकरूपसर्पविशेषे । सु.कल्प.४अ. ।

दिव्यौषधिः (धी) । स्त्री । मनःशिलायां । च.द. । मतलौहे । भा. । च.द.शि.यो.र.पि.चि. खण्डखाद्यलौहे । "दिव्यौषधिहतस्यापि ।" शमीमूले ।

दिष्टम् । क्ली । दारुहरिद्रायाम् । श.मा. ।

दिष्टान्तः । पुं । मृत्यौ । अम. ।

दिष्टिः । स्त्री । परिमाणे । मे. ।

दीर्घिका । स्त्री । विंशतधनुःपरिमितजलाशये । दिघि । "पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका ।" त्रिका. ।

दीदिवि । क्ली । अन्ने । प.मु. ।

दीनम् । क्ली । तगरपादिके । रा.नि.व१० ।

दीना । स्त्री । कुकुन्दर्याम् । वै.निघ. । मूषिकायां । त्रिका. ।

दीनारः । पुं । माषचतुष्टयमाने । ४ मासा अन. । स्वर्णमुद्रायां । মোহর । स्वर्णकर्षद्वये । अ.टी.सा. ।

दीपकः । पुं । कासमर्दक्षुपे । চাকন্দা । रा.नि.व.४ । चित्रकवृक्षे । वै.निघ.२भ.वा.व्या । यमान्यां । र.मा. । अजमोदायाम् । जीरके । वै.निघ. । श्येनपक्षिणि । বাজ পাখী । हे.च. । क्ली । कुङ्कुमे । शर. ।

दीपकर्पूरजः । पुं । कर्पूरे । वै.निघ. ।

दीपकिट्टम् । क्ली । दीपकज्जले । श.मा. ।

दीपकूपी (खोरी) । स्त्री । दीपवर्त्याम् । শল্তে । श.मा. । [रा.नि.व.१२ ।

दीपतरुः । पुं । सरलतरौ, सरलदेवदारौ ।

दीपध्वजः । पुं । कज्जले । जटा. ।

दीपनम् । क्ली । रसस्य संस्कारविशेषे । तन्नामकरससाधनकार्यविशेषे । तद्यथा—"कासीसं पञ्चलवणं राजिका मरिचानि च । भूशिग्रुवीजमेकत्र टङ्कणेन समन्वितं । आलोड्य काञ्जिके दोलायन्त्रे पाकाद्दिनैस्त्रिभिः । दीपनं जायते सम्यक् सूतराजस्य जारणे ॥" अथवा चित्रकद्रावैः काञ्जिके त्रिदिनं पचेत् । र.सा.सं । मज्जोदके । त्रिका. । See पारदः । कुङ्कुमे । त्रिका. । तगरमूले । र.मा. । पुं । पलाण्डौ । रा.नि.व.१७ । शालिञ्चशाके । সাঞ্চে শাক । श.च. । षष्ठांशावशिष्टकषाये । "दीपनस्तु षड़ंशस्य ।" रा.नि.व.२०। चक्रमर्दवृक्षे । कासमर्दवृक्षे । रा.नि.व.४ । अग्निगुणभूयिष्ठे द्रव्यमात्रे । "पचेन्नामं वह्निकृद्दीपनं तद्यथा मिसिः ।" भा. । त्रि । पाचने । अग्निगुणभूयिष्ठे । सु.सू.४१अ. ।

दीपनी । स्त्री । मेथिकायां । মেতি । पाठायां । আকনাদি । यमान्याम् । रा.नि.व.६ । कर्कटिकायाम् । কাঁকড়ী । वै.निघ. ।

दीपनीयः । पुं । यमान्याम् । रा.नि.व.६ । हरितपलाण्डौ । वै.निघ. । त्रि । अग्निदीप्तिकरे ।

दीपनीयवर्गः । पुं । तन्नामकाग्नेयमहाकषायवर्गे । यथा—"पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेराम्लवेतसमरिचाजमोदाभल्लातकास्थिहिङ्गुनिर्यासा इति दशेमानि दीपनीयानि भवन्ति ।" পিপুল, পিপুলমূল, চই, চিতা, শুঁট,অম্লবেতস বা থৈকল, মরিচ, যমানী,ভেলার মূটী, হিঙ্গু । च.सू.४अ. । "द्विविधश्चित्रकोधान्यमजमोदा च जीरकम् । चतुर्ध्दा द्वयुषा द्वेधा गणोऽयं दीपनः स्मृतः ॥" अर्क.चि. ।

दीपनीया । स्त्री । यमान्याम् । मद.व.२ ।

दीपनीयौषधम् । क्ली । आग्नेयौषधे, पञ्चकोलादौ । शि.यो.मदा.चि । च.द. ।

दीपपुष्पः । पुं । चम्पकवृक्षे । रा.नि.व.१० ।

दीपवृक्षः (कः) । पुं । सरलदेवदारुवृक्षे । वै.निघ. ।

दीपशिखा । स्त्री । कज्जले । शब्दार्थकल्प. ।

दीपसंज्ञः । पुं । चित्रकवृक्षे । वै.निघ. ।

दीपास्यभस्म । क्ली । दग्धदीपशिखायाम् । প্রদীপের পোড়া শীষ । रस.र.समरी.चि. ।

दीपिका । स्त्री । वचायाम् । वै.निघ. ।

दीप्त(क)म् । क्ली । हिङ्गुनि । হিং । रा.नि.व.६। कांस्यधातौ । কাঁসা । सुवर्णे । रा.नि.व.१३। जम्बीरे । वै.निघ. । पुं । सिंहे । रा.नि.व.१९ । नासारोगविशेषे । নাকজ্বালা । लक्षणं यथा—"घ्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः । नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु तं दीप्तमुदाहरन्ति ॥" सु. । निम्बूकवृक्षे । रा.नि.व.११ । [কাঁসা । रा.नि.व.१३ ।

दीप्तकांसम् । क्ली । शुद्धकांस्यधातौ । খাঁটী

दीप्तजिह्वा । स्त्री । उल्कामुखीशृगाल्यां । त्रिका. ।

दीप्तपिङ्गलः । पुं । सिंहे । रा.नि.व.१९ ।

दीप्तपुष्पा । स्त्री । लाङ्गलीवृक्षे । বিষলাঙ্গলিয়া । वै.निघ. ।

दीप्तरसः । पुं । किञ्चुलुके । কেঁচো । श.च.।

दीप्तलोचनः । पुं । विड़ाले । रा.नि.व.१९ ।

दीप्तलोहम् । क्ली । कांस्यधातौ । प.मु. ।
दीप्ता (प्ता:) । स्त्री । लाङ्गलिकाक्षुपे । विष-लाङ्गलिया । रा.नि.व.४। ज्योतिष्मतीलतायाम् । लताकटकी । रा.नि.व.३ । लाचायाम् । रा.नि. व.६ । मनःशिलायाम् । वै.निघ. । कांस्यधातौ । रा.नि.व.१३ । दीप्तनामनासारोगभेदे । वा.उ. १६श. । See दीप्तः ।
दीप्ताग्नि: । त्रि । दीप्तजठराग्नौ । मा.नि. ।
दीप्ताङ्ग: (ङ्ग:) । पुं । मयूरे । श.र. । विड़ाले । श.र. ।
दीप्तानलम् । क्ली । सुवर्णे । रा.नि.व.१३ ।
दीप्ताच: । पुं । विड़ाले । त्रिका. । मयूरे । वै.निघ. । [निघ. ।
दीप्तिक: । पुं । दुग्धपाषाणे । फून थड़ि । वै.
दीप्तोपल: । पुं । सूर्यकान्तमणौ । प.मु. ।
दीप्य: (क:) । पुं,क्ली । मयूरशिखायां । रुद्र-जटायाम् । श्रम- । रक्तचित्रके । कुङ्कुमे । तगरे । लिम्बूकवृचे । श्वेतपर्चिणि । भ. । । जीरके । रा. नि.व.६ । रस.र.सूतिका.चि.पञ्चजीरकगुड़े । भैष. कुष्ठ.चि. । च.द.पञ्चतिक्तघृतगुग्गुलौ । उन्मा.चि. लशुनाद्यघृते । अजमोदायाम् । राङ्कुनि । भा.पू. २भ. । यमान्यां । च.द.शि.यो.कास.चि.दशमूल-षट्पलकघृते । "तालीशवह्निदीप्यकम् ।"
दीप्यका । स्त्री । यमान्याम् । अजमोदायाम् । राङ्कुनि । भा.पू.१भ. ।
दीप्यवल्ली । स्त्री । अजमोदायाम् । वै.निघ. ।
दीप्या । स्त्री । कृष्णजीरकभेदे । ছোটো कृष्ण-जीरে । रा.नि.व.६ । यमान्याम् । भा. ।
दीर्घ: । पुं । रामशरे । रा.नि.व.८। लताशाले । र.मा. । कोङ्कणदेशप्रसिद्धे माड़वृचे । रा.नि.व. ६ । रक्तकशाली । रा.नि.व.१६। इत्कटे । र.मा.। उष्ट्रे । रा.नि.व.१८ । त्रि । आयते ।
दीर्घकम् । क्ली, पुं । कृष्णजीरके । मद.व.२ । शरवृचे । श्वेतजीरके । उशीरे । उष्ट्रे । शाकवृचे । শেগুন গাছ । वै.निघ. ।
दीर्घकणा । स्त्री । गौरजीरके । শাদা জীরা । रा.नि.व.६ ।
दीर्घकण्ट: (क:) । पुं । वर्बूरवृचे । বাবলা গাছ । रा.नि.व.८ ।
दीर्घकण्ठ: (क:) । पुं। वकपक्षिणि । श.च.।
दीर्घकन्द: (क:) । पुं । मालाकन्दे । वै. निघ. । मुखालौ । মৌ আলু । (कम्) क्ली । मूलके । मूला । रा.नि.व.७ ।
दीर्घकन्दिका । स्त्री। तालमूल्याम् । रा.नि. व.७ । कृष्णतालमूल्याम् । वै.निघ. ।
दीर्घकन्धर: । पुं । वकपक्षिणि । रा.नि.व. १६ । स्त्री । वकस्त्रियाम् । वै निघ. ।
दीर्घकाण्ड: । पुं । गुण्डतृणे । रा.नि.व.८ ।
दीर्घकाण्डा । स्त्री । वत्सादनीलतायाम् । পাতাল গরুড়ী । रा.नि.व.३ ।
दीर्घकील: (क:) । पुं । अङ्कोल्लवृचे । ধল আঁকোড় আঁকোড় গাছ । रा नि.व.६ । जटा. । "अङ्कोल्ले दीर्घकीलक: ।" रा.नि.व.२३ ।
दीर्घकूरकम् । क्ली । नृपान्ननामकशालिधान्यभेदे । রাজ অন্ন । रा.नि.व.१६ । [नि.व.१६ ।
दीर्घकृष्णा । स्त्री । तिलवासिनीशाली । रा.
दीर्घकेश: (शी) । पुं। भल्लूके । रा.नि.व.१६।
दीर्घकोशा (षा) । स्त्री। पङ्गशुक्तौ । গুগলি, ঝিনুক । हारा.। गण्डूपद्याम् । কেঁচো। वै.निघ.।
दीर्घकोशि(षि)का (शी) । स्त्री । पङ्कशुक्तौ । हारा. । गण्डूपद्यां । वै.निघ. । [प.मु. ।
दीर्घखरच्छद: । पुं । इत्कटे । ইৎকড় ।
दीर्घगति: । पुं । उष्ट्रे । रा.नि.व.१८ ।
दीर्घगोधूम: । पुं । महागोधूमे । वै.निघ. ।
दीर्घग्रन्थि: । पुं । गजपिप्पल्यां । रा.नि.व.६।
दीर्घग्रीव: । पुं । उष्ट्रे । हे.च. । नीलक्रौञ्च-पक्षिणि । रा.नि.व.१९ ।
दीर्घघाटिक: । पुं । उष्ट्रे । वके । वै.निघ. ।
दीर्घचञ्चु: । पुं । पक्षिविशेषे । वम्. कखौड़ा । वै.निघ. । [इचौ । भा. ।
दीर्घच्छद: । पुं । शाकवृचे । শেগুন গাছ ।
दीर्घजङ्गल: । पुं । मत्स्यविशेषे । ভাঙন মাছ । म.मा. ।

दीर्घजङ्घः । पुं । उष्ट्रे । जटा. । बकपक्षिणि । त्रिका. ।

दीर्घजिह्वः । पुं । सर्पे । हे.च. ।

दीर्घजीरकः । पुं । स्थूलजीरके । भा.पू.१भ. ।

दीर्घतन्वी । स्त्री । आलुकभेदे । वै.निघ. ।

दीर्घतरुः । पुं । तालवृक्षे । शब्दार्थकल्प. ।

दीर्घतिमिषा । स्त्री । कर्कटिकायाम् । क्षुद्र তেতো কাঁকুড় । श.मा. । [छूँचो । वै.निघ. ।

दीर्घतुण्डा (ण्डी) । स्त्री । कुकुन्दर्य्याम् ।

दीर्घतृणः । पुं । पल्लिवाहतृणे । वम्. पीकल-तृण । रा.नि.व.८ ।

दीर्घदण्डः (कः) । पुं । श्वेतैरण्डे । रा.नि.व.८। जटा. । तालवृक्षे । रोहीतकविशेषे । वै.निघ. ।

दीर्घदण्डी । स्त्री । गोरक्ष्यां । গোরক্ষ চাকুলে । रा.नि.व.५ । [निघ. ।

दीर्घदलः । पुं । मालाकन्दे । श्यामाके । वै.

दीर्घदर्शी (दृष्टिः) । पुं । गृध्रे । श.र. । भल्लूके । रा.नि.व.१९ ।

दीर्घद्रुः । पुं । तालवृक्षे । श.च. ।

दीर्घद्रुमः । पुं । शाल्मलिवृक्षे । शिमूल गाछ । रा.नि.व.८ । [१९ ।

दीर्घनादः । पुं । शङ्खे । शाँक । रा.नि.व.

दीर्घनालः । पुं । दीर्घरोहिषे । वड़ गन्ध-तृण । गुण्डतृणे । रा.नि.व.८ । आलुके । शालिधान्यभेदे । वै.निघ. । यावनालनामशिम्बीधान्ये । रा.नि.व.१६ ।

दीर्घनिस्वनः । पुं । शङ्खे । वै.निघ. ।

दीर्घपटोलिका । स्त्री । पटोलाकारदीर्घफलशाकविशेषे । धुन्दुल । वम्. गोड़परवल । गुणाः—गुरु स्निग्धं विष्टम्भि कटुकं मधुरं शीतलं वातपित्तश्लेष्मारुचिकरञ्च । राज.३प. ।

दीर्घपत्रः (कः) । पुं । पुनर्नवायाम् । শ্বেত পুন্না । रा.नि.व.५ । राजपलाण्डौ । विष्णुकन्दे । रा.नि.व.७ । शरपत्रदर्भे । कुन्दुरुतृणे । रा.नि.व.८ । तालवृक्षे । रा.नि.व.९ । हरितकुशे । रक्तपुनर्नवायाम् । सर्ज्जवृक्षे । मिश्रवर्णेक्षौ । हिं वड़ीषा । गुणाः—सुकठिनः सक्षारश्च । भा. । वातकरः कफपित्तघ्नः कषायः विदाही च । सु.सू.४५ अ. । कुपीलौ । कुँचिला । भा. । मधूकवृक्षे । वै.निघ. । (कः) वेतसवृक्षे । मद.व.५ । रक्तरसोने । लाल रशुन । रा.नि.व.७ । एरण्डवृक्षे । हिज्जलवृक्षे । रा.नि.व.८ । शुक्लरसोने । শ্বেত রশুন । हे.च. । जलमधूके । जटा. । करीरवृक्षे । श.च. ।

दीर्घपत्रा । स्त्री । वृहतीक्षुपे । द्रोणपुष्प्याम् । घलघसा । रा.नि व.४।५ । शालपर्ण्याम् । भा. । क्षुद्रजम्बूवृक्षे । বন জাম গাছ । र.मा. । केतकीवृक्षे । रा.नि.व.१० । घृतकुमार्य्याम् । श्वेतपुनर्नवायाम् । आम्रहरिद्रायां । कदलीवृक्षे । शीषाकवृक्षे । कुम्भतुम्ब्यां । গোল লাউ । वै.निघ. । चिञ्चायां । চেঁচড়া । भा.पू.१भ.शा.व. ।

दीर्घपत्रिका । स्त्री । श्वेतवचायाम् । শ্বেত বচ । रा.नि.व.६ । घृतकुमार्य्याम् । घृतकुमारी । रा.नि.व.५।२३ । शालपर्ण्याम् । শালপাণি । रा.नि.व.४ । भा. । केतक्यां । रा.नि.व.२३ । आटरूषके । বাসক । मातुलुङ्गवृक्षे । ছোলঙ্গ লেবু । कृष्णतालमूल्याम् । कदलीवृक्षे । वै.निघ. ।

दीर्घपत्री । स्त्री । पलाशीलतायाम् । হাপরমালী । रा.नि.व.३ । महाचुञ्चुक्षुपे । চুঞ্চু শাক । रा.नि.व.४ ।

दीर्घपर्णः । पुं । अश्वकर्णनामकशाले । লতা-শাল । रा.नि.व.९ । 'तोपचिनी' इतिख्याते द्रव्ये । वै.निघ. ।

दीर्घपर्णी । स्त्री । पृश्निपर्ण्याम् । চাকুলিয়া । रा.नि.व.४ । शालपर्ण्याम् । শালপাণি । वै.निघ. ।

दीर्घपर्व्वा । पुं । इक्षौ । वै निघ. ।

दीर्घपलाण्डुः । पुं । विष्णुकन्दे । राजपलाण्डौ । तालवृक्षे । रा.नि.व.७।९ । हरितकुशतृणे । कुचेलवृक्षे । কুঁচিলা গাছ । भा. । [नि.व.४ ।

दीर्घपल्लवः । पुं । शणक्षुपे । শণ গাছ । रा.

दीर्घपक्षः । पुं । मत्स्यविशेषे । वै.निघ. ।

दीर्घपात् (दः) । पुं । क्रौञ्चवके । কোঁচ বক । कङ्कपक्षिणि । কাঁক পাখী । त्रिका. । हे.च. ।

दीर्घपादपः । पुं । तालवृक्षे । रा.नि.व.९ । गुवाकवृक्षे । रा.नि.व.११ । See क्रकोटः ।

दीर्घपुष्पः । पुं । मुचुकुन्दवृक्षे । मुचकुन्द । प. मु. । श्वेतमन्दारार्के । रा.नि.व.१० ।

दीर्घपृष्ठः । पुं । सर्पे । अम. ।

दीर्घफलः (कः) । पुं । स्थूलारग्वधवृक्षे । बड़ सोणालू । रा.नि.व.९ । पलाशवृक्षे । अर्कवृक्षे । वै.निघ. । (कः) अगस्तिपुष्पवृक्षे । बामना फुलेर गाछ । रा.नि.व.१० ।

दीर्घफला । स्त्री । कोषातक्याम् । झिङे प्रभृति । रा.नि.व.७। जतुकालतायाम् । रा.नि.व.३ । कपिलद्राक्षायाम् । रा.नि.व.११ । मेषशृङ्ग्याम् । तिक्ताळाब्वाम् । वै.निघ. ।

दीर्घबाला । स्त्री । चमरीमृगे । वै.निघ. ।

दीर्घबालुकः । पुं । वृद्धदारकलतायाम् । बीजताड़क । रा.नि.व.३ ।

दीर्घमारुतः । पुं । हस्तिनि । त्रिका. ।

दीर्घमूलः । पुं । मोरटलतायाम् । रा.नि.व.३ । यासक्षुपे । दुरालभा । रा.नि.व.४।२३ । बेल्लन्तरवृक्षे । रा.नि.व.८।२३ । विल्ववृक्षे । लज्जालुकायाम् । लामज्जके । रा.नि.व.१२। २३ । विभीतकवृक्षे । देवसर्षपे । इन्द्रयवे । क्ली । मूलके । वै.निघ. ।

दीर्घमूलकम् । क्ली । मूलके । मूला । रा.नि.व.७ । पुं । स्थूलशरे । रा.नि.व.८ ।

दीर्घमूला (लिका) । स्त्री । शालपर्णीक्षुपे । वै.निघ. । श्यामालतायाम् । प.मु. । (ला) दुरालभायाम् । सु.सू.३८अ. । शरतृणे । शर गाछ । क्षीरमूर्व्वायां । मेषशृङ्ग्यां । वेल्लन्तरवृक्षे । वै.निघ.।

दीर्घमूली । स्त्री । दुरालभायाम् । श मा. । काकमाच्याम् । काकजङ्घायाम् । वै.निघ. ।

दीर्घरङ्गा । स्त्री । हरिद्रायाम् । वै.निघ. ।

दीर्घरतः (दः) । पुं । शूकरे । त्रिका. ।

दीर्घरसनः । पुं । सर्पे । श.च. ।

दीर्घरागा । स्त्री । हरिद्रायां । रा.नि.व.६ ।

दीर्घरोमा । पुं । भल्लूके । वै.निघ. ।

दीर्घरोहिष(क)म् । क्ली । रोहिषभेदे । बड़ गन्धतृण । गुणाः—तिक्तं कटूष्णं कफवातजित् अश्वतरीपयश्च । रा.नि.व.८ ।

दीर्घलता । स्त्री । व्याघ्रघण्टायाम् । शिराड़ि लता । वै.निघ. । [वै.निघ. ।

दीर्घलोहितयष्टिका । स्त्री । रक्तेक्षौ ।

दीर्घवंशः । पुं । नले । नल । रा.नि.व.८ ।

दीर्घवक्त्रः । पुं । हस्तिनि । श.मा. ।

दीर्घवच्छिका । स्त्री । कुम्भीरे । शब्दार्थकल्प. ।

दीर्घवर्षाभूः । स्त्री । श्वेतपुनर्नवायां । वै.निघ. ।

दीर्घवल्ली । स्त्री । महेन्द्रवारुणीलतायां । बड़ माकाल । वत्सादनीलतायां । पाताल गरुड़ी । पलाशीलतायां । हापरमाली । रा.नि.व.३ । [प.मु. ।

दीर्घवीजा । स्त्री । चलाव्याम् । शिम्बीभेदे ।

दीर्घवृन्तः (कः) । पुं । पृथुशिम्बश्योणाकवृक्षे । शोणापाठा । प.मु. । पीतलोध्रे । वै.निघ. ।

दीर्घवृन्तफला । स्त्री । दुग्धालाब्वां । वै.निघ. ।

दीर्घवृन्ता (न्तिका) । स्त्री । इन्दीवरालतायां । इन्द्रचिर्भटी । रा.नि.व.३ । कपर्दकभेदे । र.सा.सं. । एलापर्ण्यां । श.च. । [वै.निघ. ।

दीर्घवृक्षः । पुं । तालवृक्षे । लताशालवृक्षे ।

दीर्घशरः । पुं । यावनालनामकशिम्बीधान्ये । जनार गाछ । रा.नि.व.१६ ।

दीर्घशाखः । पुं । शणवृक्षे । शण गाछ । रा.नि.व.४ । शाकतरौ । शेगुन गाछ । वै.निघ. । शालवृक्षे । श.च. । [लाम्लीक्षुपे । रा.नि.व.४।

दीर्घशाखिका । स्त्री । कृष्णपीठीजीवृक्षे, नौ-

दीर्घशिम्बा । स्त्री । शिम्बीविशेषे । प.मु. ।

दीर्घशिम्बिकः । पुं । राजमाषे । बरबटी । रा.नि.व.१६ ।

दीर्घशूकः (कः) । पुं,क्ली । शुक्लाकारशालिधान्यविशेषे । स सारामुखाद्वीनगुणः स्वादुपाकरसत्वादियुक्तः । च.सू.२७अ. । राजान्ने । रा.नि.व. २३ ।

दीर्घसमुच्चयः । पुं । नलतृणे । प.मु. ।

दीर्घसस्यः । पुं । तिन्दुकवृक्षे । तेँद गाछ । वै.निघ. ।

दीर्घसुरतः । पुं । कुक्कुरे । शूकरे । त्रिका. ।

दीर्घस्कन्धः । पुं । तालवृक्षे । रा.नि.व.९ ।

दीर्घा । स्त्री । पृश्निपर्ण्याम् । रा.नि.व ४ ।

दीर्घाङ्कुरः । पुं । राजशाली । ब्रीहि अन्न । वै.निघ. ।

दीर्घाङ्गी । स्त्री । शालपर्ण्याम् । भा.पू.१भ. ।

दीर्घाङ्घ्रिः । स्त्री । शालपर्ण्याम् । वै.निघ. ।

दीर्घाध्वगः । पुं । उष्ट्रे । त्रिका. ।

दीर्घायुः । पुं । शाल्मलिवृक्षे । शिमुल गाछ । रा.नि.व.८ । जीवकौषधौ । काके । मे. । रा.नि. व.५ । त्रिका. ।

दीर्घायुधः । पुं । वनशूकरे । श.मा. ।

दीर्घायुष्यः । पुं । जीवके । मे. । श्वेतमन्दारार्के । रा.नि.व.१० । [१०

दीर्घालर्कः । पुं । महाश्वेतार्कवृक्षे । रा.नि.व.

दीर्घिका । स्त्री । हिङ्गुपत्र्याम् । रा.नि.व.६ । गोजिह्वायाम् । वै.निघ. । त्रिशतधनुःपरिमितजलाशये । तज्जलं गुरु कटु क्षारं पित्तकरं कफवातघ्नञ्च । रा.नि.व.१४ ।

दीर्घेर्वारुः । पुं । महालाव्वाम् । दीर्घकर्कटिकायाम् । रा.नि.व.७ ।

दीविः । पुं । चाषपक्षिणि । श.मा. । [१२

दुःकूलः । पुं । चोरनामकगन्धद्रव्ये । रा.नि.व.

दुःखम् । क्ली । रोगे । मानसधर्म्मभेदे । दुःथ । तत्तु सप्तविधं व्याधावुपनिपतति । सु.सू.२४अ. । See व्याधिः ।

दुःखकोद्रवा । स्त्री । मसूरिकाभेदे । "किञ्चिदुष्मनिमित्तेन जायते राजिकाकृतिः । एषा भवति बालानां सुखं शुष्यति च स्वयम् ॥" भा. ।

दुःखत्रयम् । क्ली । आध्यात्मिकमाधिभौतिकमाधिदैविकञ्चेति त्रिविधदुःखे । सु.सू.२४अ. ।

दुःखदमनः । पुं । गृध्रपक्षिणि । शकुनि । वै. निघ. ।

दुःखदिरः । पुं । विट्खदिरे । रा.नि.व.८ ।

दुःखवर्द्धनः । पुं । कर्णपालीरोगे । लक्षणम् —"वर्द्धमाने यदा कर्णे कण्डूदाहरुगन्वितः । शोफो भवति पाकश्च त्वक्स्थोऽसौ दुःखवर्द्धनः ॥" सु.चि.२५अ. ।

दुःसहा । स्त्री । नागदमन्याम् । रा.नि.व.५ ।

दुकू(गू)लम् । क्ली । सूक्ष्मवस्त्रे । त्रिका. । है.च. ।

दुग्धम् । क्ली । कतृणे । ब्रीमकर्पूर । र.मा. । क्षीरे । दुध । रा.नि.व.१५ । तदुत्पादि—"क्षीरं स्निग्धं तथा रक्तं पित्तेन पाकतां गतं । रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत् । क्षीरनाडी कुमारीणां वन्ध्यानाञ्च कथं भवेत् । अल्पधातुबलं यस्मात् तस्मात् क्षीरं न जायते । वन्ध्यानां क्षीरनाड्यस्तु वातेन परिपूरिताः । क्षीरञ्च न भवेत्तस्मात् आर्त्तवञ्चाधिकं यतः । प्रसूतासु च नारीषु बलेन सह सूयते । तेन स्रोतोविशुद्धिः स्यात् क्षीरमाशु प्रवर्त्तते । तस्मात् सद्यः प्रसूतायां जायते श्लैष्मिकं पयः । तेन कठिनतां याति तस्मात्तत् परिवर्ज्जयेत् । स्रोतोविशुद्धिकरणं बलकृद्दोषनाशनं । पयस्त्रिदोषशमनं वृष्यञ्चाग्निप्रवर्द्धनम् ॥" तत्र श्वेतादुग्धं श्लेष्मकरं, रक्ताया वातलं, पीतायाः पित्तसंशमनं विशिष्टं, कृष्णायाश्च पित्तलम् । अत्रि. ८अ. । दुग्धं बहुविधं गव्यादिभेदात् यथा—गावस्तु दशधा काली त्रिधाजी त्रिविधा मता । स्त्र-ग्य एडास्त्रिधा मेषी त्रिधोष्ट्री दशधा हयी । पञ्चधा करिणी नारी दशधा शूकरी द्विधा । व्याघ्री शुनी श्वदंष्ट्री च रासभी पञ्चधा पृथक् । त्रिधा वकाष्टधा मत्स्यी गवयी खड्गिनी कड़ी । दुग्धं घृतञ्च तक्रञ्च दधि ताभ्यः प्रजायते ॥ अर्क. । गवादिदुग्धगुणाः स्वस्वपर्य्यायेषु मृग्याः । दुग्धमात्रगुणाः —आमं गुरु कासश्वासप्रकोपकं रोगजनकञ्च । तप्तमावर्त्तितञ्च तत् पथ्यम् । नारीक्षीरन्तु आममेव रोगघ्नं भवति । धारोष्णं गव्यादिदुग्धम् अमृतोपमं सर्व्वरोगघ्नं । चिरसंस्थं दोषदञ्च । तथा—"केऽप्याविकं पथ्यतमं शृतोष्णं क्षीरं त्वजानां शृतशीतमाहुः । दोहान्तशीतं महिषीपयश्च गव्यन्तु धारोष्णमिदं प्रशस्तम् ॥" पूर्व्वाह्णपीतं दुग्धं वृष्यं बृंहणमाग्नेयञ्च, मध्याह्नपीतं बलदं कफघ्नं कृच्छ्रघ्नञ्च । बाल्ये अग्निकरं यौवने बल्यं वीर्य्यदञ्च वार्द्धके भवति । रात्रौ नानादोषशमनं अतः क्षीरं सदा सेव्यम् । मुहूर्त्तत्रयपर्य्युषितमतप्तं न सेवेत । यत्नोषितं दोषकरं तदूर्द्ध्वञ्च विषोपमं ज्ञेयम् । ज्वरे तद्गुणाः—"जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतो-

धनम् । तदेव तद्वत् पीतं विषवद्धन्ति मानवम् । चतुर्थभागं सलिलं विधाय यवादयदावर्त्तितमुत्तमं तत् । सर्व्वामयघ्नं बलपुष्टिकारि वीर्य्यप्रदं क्षीरमतिप्रशस्तम् ।" इति दुग्धक्वाथः । "गव्यम्पूर्व्वाह्नकाले स्यादपराह्णे तु माहिषम् । क्षीरं सशर्करं पथ्यं यद्वा सात्म्यं च सर्व्वदा । पित्तघ्नं शृतशीतलं कफहरं पक्वं तदुष्णं भवेत्क्षीतं यत्तु न पाचितं तदखिलं विष्टम्भदोषप्रदं । धारोष्णं त्वमृतं पयः श्रमहरं निद्राकरं कान्तिदं हृद्यं बृंहणमग्निवर्द्धनमतिस्वादु त्रिदोषापहम् ॥" शृतशीतादिक्षीरगुणाः ।—"क्षीरं न भुञ्जीत कदाप्यतप्तं तप्तं न चैतल्लवणेन सार्द्धम् । पिष्टान्नसन्धानकमाषमुद्गकोशातकीकन्दफलादिकैश्च ।" तथाच "मत्स्यमांसगुड़मुद्गमूलकैः कुष्ठमावहति सेवितं पयः । शाकजाम्बवरसैस्तु सेवितं मारयत्यबुधमाशु सर्पवत् ॥" इति क्षीरवर्ज्जनस्थानम् । "स्निग्धं शीतं गुरु क्षीरं सर्व्वकालं न सेवयेत् । दोषाग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च । नित्यं तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः । पुष्यन्ति धातवः सर्व्वे बलपुष्टिविवर्द्धनम् ॥" इति क्षीरसेवनस्थानम् । "क्षीरं गवाजकादेर्मधुरं क्षारं नवप्रसूतानाम् । रूक्षं न पित्तदाहं करोति रक्तामयं कुरुते ॥ मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम् । लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम् ॥ गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानां । मेध्यञ्च सरसायनमुक्तमिदं दुर्व्वलन्तु वृद्धानाम् ॥ तासां मासत्रयादूर्द्ध्वं गुर्व्विणीनाञ्च यत्पयः । यद्वाहि लवणं क्षीरं मधुरं पित्तदोषकृत् ॥ गवादीनां वर्णभेदाद्गुणा दुग्धादिके पृथक् । कैश्चिदुक्तो विशेषाच्च विशेषो देशभेदतः ॥" यथा उक्तञ्च । देशेषु देशेषु च तेषु तेषु तृणाम्बुनी यादृशदोषयुक्ते । तत्सेवनादेव गवादिकानां गुणा हि दुग्धादिषु तादृशत्वम् । शीतं स्निग्धं गुरु गौल्यं हृष्यं पित्तापहं परं । श्रेयश्चैवाभिधीतस्य कोलाटस्तु पयस्करः ॥" रा.नि.व.१५ । प्रभातदुग्धं—"निशाशीतांशुसंशीतं निद्रालस्यश्रमातुरं । सघनं शीतकफकृत् क्षीरं प्राभातिकं भवेत् ॥" अत्रि.८ष. ।

दुग्धकन्दगणः । पुं । दुग्धप्रधाने अश्वगन्धादिद्रव्यगणे । यथा—"अश्वगन्धा च मुशली विदारी च शतावरी । क्षीरवाराहिका चेति दुग्धकन्दगणस्त्वयम् ॥" गुणाः—"बालकी वर्द्धते वीर्य्यैरिरं सुवालया सह । एतद्वर्गस्य पानेन कन्या षोड़शवार्षिकी ॥" अर्क. ।

दुग्धकूपिका । स्त्री । घृतदुग्धमिश्रिततण्डुलचूर्णकृतपिष्टकविशेषे । तन्निर्माणविधिः यथा—"तण्डुलचूर्णविमिश्रितनष्टक्षीरेण सान्द्रशिष्टेन । दृढ़कूपिका विदध्यात्तास्र पचेत् सर्पिषा सम्यक् । अथ तां कीरितमध्यां घनपयसा पूर्णगर्भाञ्च । सदृकमुद्रितवदनां सर्पिषि सपक्ववदनाञ्च । अथ पाण्डुखण्डपाके स्नापयेत् कर्पूरवासिते कुशलः ॥" गुणाः—"अथ दुग्धकूपिका सा बल्या पित्तानिलापहा । हृष्या शीता गुर्व्वी शुक्रकरी बृंहणी रुच्या । विदधाति कायपुष्टिं दूरप्रसारिणीं सुचिरम् ॥" भा. । [ग्धाम्ले । क्षीरफेने । मे. ।

दुग्धतालीयम् । क्ली । दुग्धसारे । हे.च. । दु-

दुग्धतुम्बी । स्त्री । क्षीरालाव्वाम् । वै.निघ. ।

दुग्धत्रयम् । क्ली । गोमहिषच्छागदुग्धेषु । र.सा.सं. ।

दुग्धदा । स्त्री । चणिकाहये । रा.नि.व.८ ।

दुग्धनिका । स्त्री । रक्तापामार्गे । अर्कवृक्षे । वै.निघ. । [ग्धपाकपात्रे । हारा. ।

दुग्धपाचनः । त्रि । दुग्धपाककरे । क्ली । दु-

दुग्धपाषाणः (कः) । पुं । खटिकाविशेषे । फूलखड़ि, खड़िमाटी । हिं शिरगीला । गुणाः—रुच्य ईषदुष्णः ज्वरपित्तहृद्रोगकासशूलाध्मानहरश्च । रा.नि.व.१३ । [लखड़ि । रा.नि.व.३ ।

दुग्धपाषाणिका । स्त्री । दुग्धपाषाणे । फू-

दुग्धपुच्छी । स्त्री । वृक्षविशेषे । दुध्पेय्रा । श.च. ।

दुग्धफेनः (कः) । पुं,क्ली । क्षीरफेने । দুধের ফেনা । रा.नि.व.१५ । गुणाः—"कृष्णगोऽश्वपयःफेनमजानां वेति शस्यते । मन्दाग्नीनाङ्कृशानाञ्च विशेषादतिसारिणां । उत्साहदीपनम्बल्यं मधुरं वातनाशनं । सद्यो बलकरश्चैव तच्च क्षीरविलोड़ितं । क्षीणज्वरातिसारे च सामे च विषमज्वरे । मन्दाग्नौ कफमाश्रित्य पयःफेनम्प्रशस्यते । क्षीरं गवाङ्क्षीरफेनं तक्रं वा हितमेव च । पक्वाम्रभक्षणाद्दापि ग्रहणी तस्य नश्यति । ताम्बूलं नैव सेवेत क्षीरम्पीत्वा तु मानवः । यावत्तच्च द्रवेत्क्षीरम्भुक्तान्नादापि शस्यते ॥" अत्रि. ।

दुग्धफेनी । स्त्री । स्वनामख्यातक्षुपे । मं कं दुधफेनी, हालुगोलवि । गुणाः—कटुः तिक्ता हिमा विषघ्नी व्रणघ्नी रुच्या । रा.नि.व.५ । पक्वान्नविशेषे । वै निघ. ।

दुग्धवटी । स्त्री । शोथे वटी । विषं हिङ्गुलं धुस्तूरबीजं समभागं गृहीत्वा धुस्तूरपत्ररसेन प्रहरं मर्द्दयित्वा मुद्गमाना वटी कार्य्या । भैष. ।

दुग्धबीजः (जा) । पुं,स्त्री । यावनालादिकृतचिपीटके । जनार वा জোয়ারের চিঁড়ে। “ये चान्ये यावनालाद्यास्त्रिपिटास्तत्तण्डुलाः । अतप्ततण्डुलास्ते तु दुग्धबीजाः प्रकीर्त्तिताः ॥” गुणाः —“दुग्धबीजा सुमधुरा दुर्ज्जरा वीर्य्यपुष्टिदा । शालेययावनालाद्याः चिपिटाः पुष्टिवर्द्धनाः ॥” रा.नि.व.१६ ।

दुग्धसन्तानिका । स्त्री । दुग्धसरे । वै.निघ.।

दुग्धहरणी । स्त्री । दुग्धवहनाड्याम् । रस.र. स्तनरो.चि. ।

दुग्धक्षीरिका । स्त्री । दुग्धतण्डुलघृतशर्कराकृतपायसे । यथा—“दुग्धाष्टमांशभागेन तण्डुलान् घृतसंस्कृतान् । शृतेऽर्द्धपक्वे दुग्धे तु क्षिप्ता सिद्धा हि क्षीरिका । पायसं शर्करायुक्तघृतप्रक्षेपणाद्भवेत् ॥” गुणाः—“सा गुर्व्वी तर्पणी बल्या मलावष्टम्भका तथा । अरुचिं मेदवृद्धिञ्च कफमग्नेश्च मन्दताम् । कृत्वा च रक्तपित्तं हि वातपित्तञ्च नाशयेत् ॥” द्रव्यगुणः ।

दुग्धा (ग्धी) । स्त्री । क्षीरिकायां । ক্ষিরাই । र.मा. । भैष.क्षुद्ररो.चि. । काकोल्याम् । पलाशीलतायाम् । शारिवायाम् । वै.निघ. । दुग्धपाषाणे । ফুলখড়ি । रा.नि.व.१३ ।

दुग्धाम्रम् । क्ली । दुग्धतालीये । আঁবের সঙ্গে দুধ । गुणाः—“दुग्धाम्रं शीतलं स्वादु वृष्यं वर्णकरं गुरु । वातपित्तापहं रुच्यं बृंहणम्बलवर्द्धनम् ॥” रा.नि.व.१५ । [रा.नि.व.१३ ।

दुग्धाश्मा । पुं । दुग्धपाषाणे । ফুলখড়ি ।

दुग्धाच्छः । पुं । क्षीरस्फटिके । शब्दार्थकल्पतरुः।

दुग्धिका । स्त्री । क्षुद्रक्षीरिकायाम् । ছোট খিরাই । मं दुधि । कं दुधली । तें पिन्नपालचेट्टु । गुणाः—“दुग्धिकोष्णा गुरु रुक्षा वातला गर्भकारिणी । स्वादुक्षीरा कटुस्तिक्ता सृष्टमूत्रमलापहा । स्वादुर्विष्टम्भिनी वृष्या कफकुष्ठकृमिप्रणुत् ॥” भा.। चि.क्र.क.प्रदर-चि. । रस.र.ज्वराति.चि. । इन्द्रीवरायाम् । ইন্দ্রচির্ভটী । शुक्लकटुकालाब्वाम् । তিৎ লাউ । वै.निघ. । वृक्षभेदे । থির্ণী গাছ । र.मा. ।

दुग्धिनि(नी)का (नी) । स्त्री । रक्तापामार्गक्षुपे । रा.नि.व.४ । शुक्लदुग्धालाब्वाम् । वा. उ.३७अ. । [वैं । वै.निघ. ।

दुच्छकः । पुं । सुरामांसाम् । मे. । तालीशपत्रे ।

दुड़िः (लिः) । स्त्री । कच्छपिकायां । अ.टी. रा. । मे. ।

दुण्डुभः । पुं। सर्पभेदे । ঢোঁড়া সাপ । उज्ज्वल.।

दुण्डुभा । स्त्री । सर्षपवृक्षे । वै.निघ. ।

दुद्रुमः । पुं। कन्दविशेषे, हरितपलाण्डौ । अम.।

दुन्दुभिः । पुं । सर्पदष्टेन्दुरादौ, दन्दुर इति लोके । सु.कल्प.७अ. । प्रतुदपक्षिविशेषे । च.सू. २७अ. । विषे । है.च. ।

दुन्दुमारः । पुं । विड़ाले । वै.निघ. ।

दुम्बकः । पुं। स्वनामख्यातमेषे । দুম্বা । वै.निघ.।

दुरभिग्रहः । पुं । अपामार्गक्षुपे । रा.नि.व.४।

दुरभिग्रहा । स्त्री। दुरालभायां। कपिकच्छ्वाम्। अपामार्गे । रा.नि.व.२३ । अलाब्वां । वै.निघ. ।

दुराधर्षः (र्षा) । पुं, स्त्री । सिद्धार्थे । শ্বেত সরিষা । कुटुम्बिनीक्षुपे । रा.नि.व.५ ।

दुरारुहः । पुं । नारिकेलवृक्षे । विल्ववृक्षे । रा.नि.व.११ ।

दुरारुहा । स्त्री । खर्ज्जूरीवृक्षे । খেজুর গাছ। नारिकेलवृक्षे । तालवृक्षे । वंशे । रा.नि.व.२३ ।

दुरारोहः । पुं । तालवृक्षे । शाल्मलीवृक्षे । खर्ज्जूरीवृक्षे । वै.निघ. । शरटे । रा.नि.व.१९ ।

दुरारोहा । स्त्री । श्रीवल्लीवृक्षे । रा.नि.व.८ । शरटे । গিরগিটে । रा.नि.व.२३ । पिण्डीखर्ज्जूर्य्याम् । भा. । शाल्मलीवृक्षे । त्रिका. ।

दुरालभा (लम्भा) । स्त्री । (Alhagi maurorun. Syn. Hedysarum Al-

hagi.) स्वनामख्यातक्षुपे । हिङ्गुया इति ख्याता। छुताल(ला)भा । हिं वम्. जवासा दुराला, धमासा । मं वेलिकामूली । कं बल्लिदुरवे । तें पिलरिगटि टुलगोंड़ि । सा द्विधा स्थूलसूक्ष्मभेदात् । गुणा: कटु: तिक्ता उष्णा चाराम्लिका मधुरा वातपित्तघ्नी ज्वरगुल्मप्रमेहघ्नी च। रा.नि.व.४। "यवासस्य गुणैस्तुल्या बुधैर्लुक्ता दुरालभा।" भा. । वा.चि.१७.। सि.यो.कास.चि. । "दुरालभाम्लवेतसै:।" कार्पासक्षुपे । स्त्रकायां । पिड़िং শাক । श.चि. ।

दुरालभादिः । पुं । दुरालभास्तताम्लतानागरक्तत: कषाय: वातज्वरे हित: । दुरालभादिरयं पित्तज्वरतृष्णारक्तपित्तदाहघ्न: । वा.चि.१७.। "दुरालभापर्पटकप्रियङ्गुभूनिम्बवासाकटुरोहिणीनाम्। जलं पिबेत् शर्करयावगाढ़म् ।" च.द.पि.ज्व.चि.।

दुरितद(श)मनी । स्त्री। शमीवृचे । रा.नि. व.८ ।

दुरिष्टकृत् । पुं । अभिचारकर्मणि ।

दुरुराहः । पुं । पुण्डकयुक्तदुष्कुलाहाश्वे । "दुष्कुलाहो दुरुराहः पुण्ड्रकैश्चैव कीर्त्तित: ।" ज.द. १७. ।

दुरोहः । पुं । नागकेशरवृचे । वै.निघ. ।

दुर्गः । पुं । गुग्गुलौ । रा.नि.व.१२ ।

दुर्गकारकः । पुं । तरुभेदे । श.मा. ।

दुर्गन्धम् । क्ली । सौवर्चललवणे । हे.च. ।

दुर्गन्धः । पुं । आम्रवृचे । श.च. । पलाण्डौ । भा. । त्रि । पूतिगन्धयुक्ते । [निघ. ।

दुर्गन्धा । स्त्री । वाकुच्याम् । সোমরাজ । वै.

दुर्गन्धास्यः । पुं । मुखरोगभेदे । মুখে দুর্গন্ধ হওয়া । [र्चललवणे । वै.निघ. ।

दुर्गन्धिः । पुं । आम्रवृचे । दुर्गन्धे । क्ली । सौव-

दुर्गपुष्पी (इन्) । पुं । वनस्पतिभेदे । केशपुष्टा इति लोके । श.च. ।

दुर्गलङ्घनः । पुं । उष्ट्रे । हे.च. ।

दुर्गा । स्त्री । श्यामपचिणि । শামাপাখি । रा. नि.व.२१ । कृष्णचटके । कृष्णशारिकायाम् । শ্যামা লতা । नील्यां । मे. । कोकिलायाम् । वै.निघ. । अपराजितायां । श.च. ।

दुर्गाह्लादः । पुं । भूमिजगुग्गुलौ । वै.निघ. ।

दुर्गाह्वः । पुं । भूमिजगुग्गुलौ । रा.नि.व.१२ ।

दुर्ग्रहः । पुं । अपामार्गक्षुपे । रा.नि.व.४।२३ ।

दुर्ग्रहा । स्त्री । मुसलायाम् । रा.नि.व.२३ । अपामार्गे । भा.पू.१भ. ।

दुर्घटा । स्त्री । पृष्ठपर्ण्यां । वै.निघ. ।

दुर्घोषः । पुं । भल्लूके । रा.नि.व.१९ ।

दुर्जरः । त्रि । दुष्पचे । वै.निघ. ।

दुर्जरफलम् । क्ली । कर्कटिकायाम् । वै.निघ.।

दुर्जरा । स्त्री । ज्योतिष्मतीलतायाम् । লতাফট্কী । रा.नि.व.३ । घीले । वै.निघ. ।

धन्या । स्त्री । धन्याके । धने । हे.च. । उपमातरि । वै.निघ. । आमलक्याम् । मे. । निर्जलप्रदेशे । वै.निघ. ।

धन्याकम् । क्ली । (Coriandrum sativum.) Coriander plant. स्वनामख्यातपण्यद्रव्ये । प.मु. । धने । हिं धनिया । तें कोत्तिमिरचेट्टु, धनियलु । ता. कोटमल्लि । च.द.सन्निपातज्व.चि.नागरादिः । "धन्याकं बृहतीद्वयम् ।" पि.ज्व.चि. । "व्युषितं धन्याकजलम् ।" पि.श्लेष्मज्व.चि.गुडूच्यादिः । गुणाः—तुवरं स्निग्धम् अवृष्यं मूत्रलं लघु तिक्तं कटूष्णवीर्य्यं दीपनं पाचनं ज्वरघ्नं रोचकं ग्राहि स्वादुपाकं त्रिदोषघ्नं तृष्णादाहवमिश्वासकासकार्श्यकृमिघ्नञ्च । आर्द्रं तत् तद्गुणसम्पन्नं स्वादु विशेषतः पित्तघ्नञ्च । भा.पू.१भ. । मद.व.२ ।

धन्वः । पुं । दुरालभायाम् । वै.निघ. ।

धन्वकः । पुं । धामनवृक्षे । च.द.मेह-चि. । "पाठार्ज्जुनधन्वकानां ।"

धन्वङ्गः । पुं । धामनवृक्षे । धामना गाछ । गुणाः—"धन्वङ्गः कफपित्तास्रकासहृत्तुवरो लघुः । बृंहणो बलकृद्रुक्षः सन्धिकृद्व्रणरोपणः ॥" भा.म.३भ.प्रमे.चि. । वंशे । वै.निघ. ।

धन्वचारी । त्रि । निर्जलदेशचारिणि । वा.चि.७अ. ।

धन्वतरुः । पुं । सोमवल्ल्याम् । वै.निघ. ।

धन्वदुर्गम् । क्ली । निर्जलदेशे । पुराणम् ।

धन्वनः । पुं । धामनवृक्षे । धामना गाछ । र.मा. । हिं धामिनी । मं धमानु । कं उदुवे । गुणाः—कटुः उष्णः कषायः कफघ्नः दाहशोषकरः संग्राही कण्ठदोषघ्नश्च । रा.नि.व.९ । एतत्फलं कषायं हिमं स्वादु वातकफघ्नञ्च । सु.सू.४६अ. ।

धन्वन्तरिः । पुं । वैद्ये । क्षितौ आयुर्व्वेदप्रणेतरि देवतावैद्ये । तत्प्रादुर्भावः—"एकदा देवराजस्य दृष्टिर्निपतिता भुवि । तत्र तेन नरा दृष्टा व्याधिभिः परिपीड़िताः ॥ तान् दृष्ट्वा हृदयं तस्य दयया परिपीड़ितम् । दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह ॥ धन्वन्तरे सुरश्रेष्ठ भगवन् किञ्चिदुच्यते । योग्यो भवसि भूतानामुपकारपरो भव ॥ उपकाराय लोकानां केन किं न कृतम्पुरा । त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् ॥ तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव । प्रतीकाराय रोगाणामायुर्व्वेदम्प्रकाशय ॥ इत्युक्त्वा सुरशार्दूलः सर्व्वभूतहितेप्सया । समस्तमायुषो वेदं धन्वन्तरिमुपादिशत् ॥ अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा । आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥ नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ । बाल एव विरक्तोऽभूच्चचार सुमहत्तपः ॥ यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम् । ततो धन्वन्तरिर्लोकैः काशिराजोऽभिधीयते ॥ हिताय देहिनां स्वीया संहिता विहितामुना । अयं विद्यार्थिनो लोकान् संहितान्तामपाठयत् ॥" भा. । चिकित्सादीपकनिदाननिघण्ट्वादिप्रणेतरि । [श.च. ।

धन्वन्तरिग्रस्ता । स्त्री । कटुक्यां । कटकी ।

धन्वन्तरिपञ्चकम् । क्ली । धन्वन्तरिकृतग्रन्थविशेषे ।

धन्वन्तरिभागः । पुं । औषधकरणार्थं वैद्यलभ्यौषधादिभागे । सिद्धरसानां १० भ. तैलघृतलौहानां ८ भ. लेहवटिकानां ७ भ. । वै.निघ. ।

धन्वमांसम् । क्ली । निर्जलदेशपशुमांसे । वा.चि.१२भ. । See जाङ्गलमांसम् ।

धन्वयवासः (कः) / **धन्वयासः** } पुं । दुरालभायाम् । रा.नि.व.४ । सि.यो.रक्तार्श.-चि. । "धन्वयवासा: सनागरा: क्वथिता: ।" च.सू.४भ. । सि.यो.सन्निपात-ज्व.चि.अष्टादशाङ्गकषाये । [चि.१भ. ।

धन्वा (न्) । पुं । मरुभूमौ । रा.नि.व.२ । च.

धन्वामिषम् । क्ली । जाङ्गलपशुमांसे ।

धन्वी (इन्) । पुं । दुरालभायाम् । रा.नि.व.४। अर्जुनवृक्षे । रा.नि.व.९ । वकुलवृक्षे । रा.नि.व.१० ।

धमनः । पुं । नलतृणे । नल गाछ । रा.नि.व.८ । निम्बवृक्षे । निम् गाछ । रा.नि.व.९ ।

धमनिः (नी) । स्त्री । पृश्निपर्ण्याम् । চাকুলে । रा.नि.व.४ । उत्तरापथप्रसिद्धनलिकानामगन्धद्रव्ये । भा. । हे.च. । नखीनामगन्धद्रव्ये । हरिद्रायाम् । शिरायाम् । रा.नि.व.१८ । शिराविकार एव धमनी । धमन्यश्च नाभिजाः, तत्संख्या च २४ । तेषु दशोर्द्धगाः, शेषास्तिर्य्यगाश्च । तेषूर्द्धगाः रूपरसगन्धस्पर्शशब्दप्रश्वासोच्छ्वासजृम्भक्षुतहासभाषणरोदनगानादिकर्म्म सम्पादयन्तो देहं धारयन्ति । ताश्च हृदयं गत्वा प्रत्येकं शाखात्रयं विस्तारयन्त्यः ३०संख्या भवन्ति । तासु प्रत्येकं द्वे द्वे कृत्वा दश धमन्यो वातपित्तकफशोणितरसान् वहन्ति । अष्टौ च रूपादीनि गृह्णन्ति । शिष्टासु द्वादशसु द्वाभ्यां वाङ्निष्पत्तिः, द्वाभ्यां घोषणं, द्वाभ्यां निद्रा, द्वाभ्यां जागरणं, द्वाभ्याञ्च रक्तवहनं भवति । शिष्टेन स्तनसंश्रितेन द्वयेन च स्त्रियाः स्तन्यवहनं पुंसश्च शुक्रवहनं स्तनाभ्यां भवति । अधोगास्तु दश पित्ताशयमधिगम्य त्रिंशत्सम्पन्नाः । तासु द्वे द्वे वातपित्तकफरक्तरसावहतः । शिष्टाभ्यश्च द्वे अन्नमाश्रित्यान्नं वहतः । द्वे जलं वहतः, द्वे वस्तिमाश्रित्य मूत्रं वहतः, द्वाभ्यां पुरुषस्य शुक्रं स्त्रिय आर्त्तवञ्च प्रादुर्भवति, द्वे च तद्द्वयं निःसारयतः । द्वे स्थूलान्त्रनिबद्धे भूत्वा पुरीषं निःसारयतः । अवशिष्टाश्चाष्टौ तिर्य्यग्गामिन्यो स्वेदं निःसारयन्ति । एताश्चाधोगा धमन्यः पक्वाशयकटिमूत्रपुरीषगुह्यवस्तिमेढ्रपादप्रभृतीन्याश्रित्य तेषां पोषणं सम्पादयन्ति । तिर्य्यगाश्च धमनीचतुष्टयं प्रत्येकमसंख्यशाखाविभक्तं देहं रश्मिभूषितं करोति । एतासाञ्च मुखानि प्रतिलोमकूपं संलग्नानि । तेभ्यश्च मुखेभ्यः स्वेदा निर्गच्छन्ति, देहरसो वहिरन्तश्च सन्तर्पयति । अभ्यङ्गादिना च तैलादिवीर्य्यमन्तःशरीरं प्रविश्य त्वक्पाकादिकं करोति तेनैव च शुभाशुभस्पर्शज्ञानं भवति ।" सु.शा.९भ. । भा. ।

धमिः । स्त्री । अन्ते । धमन्याम् । हारा. ।

धयनम् । क्ली । पाने । रा.नि.व.२० ।

धरः । पुं । कार्पासतूलके । मे. ।

धरणः । पुं । तुलायां । स्तने । धान्ये । हे.च. । तण्डुले । वै.निघ. । क्ली । कालिङ्गचतुर्माषमितमाने । प.प्र.१ख. । पलदशमांशे । २४ रक्तिकामाने । रौप्यषोड़शमाषे । वै.निघ. ।

धरणी । धारणीकन्दे । रा.नि.व.७ । शिरायां । रा.नि.व.१८ । खदिरवृक्षे । रा.नि.व.२३ । पुनर्नवायाम् । मेदायाम् । वै.निघ. । शाल्मलिवृक्षे । श.च. ।

धरणीकन्दः । पुं । धारणीकन्दे । रा.नि.व.७।

धरणीधरः । पुं । पर्व्वते । कच्छपे । रा.नि.व.१९ ।

धरणीबन्धः । पुं । अरिष्टबन्धने । सर्पाघाते दंशनविशेष । स शाखादष्टस्य दंशदेशाच्चतुरङ्गुले न्याय्यः । यदाह वाभटः—"दंशस्योपरि बध्नीयादरिष्टां चतुरङ्गुले । क्षौमादिभिर्वेणिकया सिद्धैर्मन्त्रैश्च मन्त्रवित् ॥" च.द.विष.चि. ।

धरा । स्त्री । शिरायाम् । नाड्याम् । रा.नि.व.१८ । वसायाम् । गर्भाशये । मे. ।

धराकदम्बः (कः) । पुं । कदम्बवृक्षे । हारा. ।

धराङ्कुरः । पुं । भूच्छत्राके । वै.निघ.।

धराजकुष्माण्डः । पुं । भूमिकुष्माण्डे । ভূঁই কুমড়া । चि.क्र.क.खीरी.चि. ।

धरिमा (न्) । पुं । तुलायाम् । তরাজু । आकारे । वै.निघ. ।

धवः । पुं । जले । मे. ।

धर्त्तूरः । पुं । शुक्लधुस्तूरे । वै.निघ. ।

धर्म्मः । पुं । स्वभावे । आचारे । गुणे । मे. ।

धर्म्मघ्नः । पुं । विभीतकवृक्षे । वै.निघ. ।

धर्म्मणः । पुं । धमन्यवृक्षे । धामना गाछ । र.मा. । सर्पभेदे । ঢেমনা সাপ । मे. ।

धर्म्मद्वेषी (इन्) । पुं । विभीतकवृक्षे । वै.निघ. ।

धर्म्मपत्तनम् । क्ली । मरिचे । रा.नि.व.६ ।

धर्म्मपत्रः । पुं, क्ली । उदुम्बरवृक्षे । श.च. ।

धर्म्मवृक्षः । पुं । अश्वत्थवृक्षे । रा.नि.व.११ ।

धर्म्मसूः । पुं । धूम्याटपक्षिणि । श.र. ।

धर्म्मिणी । स्त्री । रेणुकायाम् । রেণুক । रा.नि.व.६ । [আঁকোড় । श.च. ।

धलण्डः (कः) । पुं । स्वनामख्यातवृक्षे । धला

धर्षः (र्षितम्) । पुं, क्ली । मैथुने । त्रिका. । जाड्ये ।

धवः । पुं । (Anogeissus latifolia. Syn. Conocarpus latifolia.) स्वनामख्यातवृक्षे । धाओया गाछ । र.मा. । मं धामोड़ा । कं बिरिवक । तें नारिंजचेट्टु । गुणाः—कटुः कषायः कफघ्नः वातघ्नः पित्तकोपनः रुच्यः दीपनश्च । राज. । "धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहः । मधुरस्तुवरस्तस्य फलञ्च मधुरं मनाक् ॥" भा. । अन्यच्च —"धवः कषायः कटुकः कफघ्नोऽनिलनाशनः । पित्तप्रकोपनो रुच्यो विशेषो दीपनः परः ॥" फलमीषन्मधुरम् । रा.नि.व.८ । काके । त्रिका. । मनुष्ये । अम. । खदिरे । र.सा.सं.मृत्युञ्जयलौहे ।

धवनी । स्त्री । पृश्निपर्ण्याम् । চাকুলিয়া । वै.निघ. ।

धवलः । पुं । धववृक्षे । धाओया गाछ । रा.नि.व.८ । शङ्खे । चीनकर्पूरे । रा.नि.व.१२। धातकीवृक्षे । वै.निघ.। क्ली । श्वेतमरिचे । रा.नि.व.६ । त्रि । शुक्ले । सुन्दरे । त्रिका. ।

धवलपक्षः (क्षी (इन्)) । पुं । हंसे । रा.नि.व.१९ । [पाक्कल । रा.नि.व.१० ।

धवलपाटली । स्त्री । शुक्लपाटल्याम् । শ্বেত

धवलमृत्तिका । स्त्री । खटिकायाम् । फुलखड़ि । रा.नि.व.१३ ।

धवलयावनालः । पुं । श्वेतवर्णयावनालवृक्षे । শাদা জনার । मं श्वेतजुवारी । कं बिलियजोल । अयं शिम्बीधान्ये वर्त्तते । गुणाः— शैत्यः बल्यः त्रिदोषघ्नः हृद्यः रुचिप्रदः अर्शोघ्नः पथ्यः गुल्मव्रणघ्नश्च । रा.नि.व.१६ ।

धवलशारिवा । स्त्री । शुक्लशारिवायाम् । অনন্তমূল । वै.निघ. ।

धवला । स्त्री । श्वेतशारिवायाम् । See अनन्ता श्वेतसारिवा च । भा.पू.१भ. । गवि । গাই গরু । त्रिका. । वचायाम् । श्वेतापराजितायाम् । र.चि. पापरोगान्तकरसे ।

धवली । स्त्री । शुक्लगवि । अम. ।

धवलेक्षुः । पुं । श्वेतेक्षौ । रा.नि.व.१४ ।

धवलोत्पलम् । क्ली । कुमुदपुष्पे । नालफूल, হালা ফুল । रा.नि.व.१० ।

धवित्रम् । क्ली । मृगचर्म्मनिर्म्मितव्यजने । अम. ।

धाकः । पुं । वृषे । क्ली । अन्ने । उणा. ।

धातकी । स्त्री । (Woodfordia floribunda. Grislea tomentosa.) स्वनामख्यातपुष्पवृक्षे । धाइ फुलेर गाछ । हिं धावइ, धाओला । मं धायटी । तें आरेपुब्बु, जार्गि । उत्. जातिको । गुणाः — कटुः उष्णा मदकृद्विषघ्नी प्रवाहिकातिसारघ्नी विसर्पव्रणघ्नी च । रा.नि.व.६। "धातकी कटुका शीता मृदुकृत्तुवरा लघुः । तृष्णातिसारपित्तास्रविषक्रिमिविसर्पजित् ॥" भा. । शीता रक्तपित्तघ्नी च । राज. ।

धातकीकुसुम(पुष्प)म् । क्ली । धातकीपुष्पे । धाइ फूल । सु.सू ३८अ.अम्बष्ठादिः । च.सू. ४अ. ।

धातक्यभिषुतम् । क्ली । धातकीपुष्पकृतसुराभेदे । गुणाः—हृद्यं रुच्यं रोचनं दीपनञ्च । च.सू.२७अ. ।

धातक्यादिचूर्णम् । क्ली । बालरोगाधिकारे औषधम् । पाठः—"धातकीबिल्वधन्याकलोध्रेन्द्रयवबालकम् । लेहः क्षौद्रेण बालानां ज्वरातीसारवान्निजित् ॥" धाइफुल, বেলশুঁটা, ধনে, লোধ, ইন্দ্রযব, বালা প্রত্যেক চূর্ণ সমভাগ মধু দ্বারা লেহন । भा.क्षी. ।

धाता । पुं । स्रष्टरि । शरीरादिसंयोगस्य धारणहेतौ । सु.शा.१अ. ।

धातुः । पुं । खनिजेषु स्वर्णादिसप्तविधाष्टविधनवविधपदार्थेषु । ধাত । यथा—काञ्चनं रजतं ताम्रं कांस्यं पित्तलं नागं वङ्गं लौहश्चेत्यष्टौ । रा.नि.व.१८ । स्वर्णरौप्यताम्रवङ्गयशदसीसलौहानीति सप्त । भा. । तथा—"हेमताराऽऽरनागाश्च ताम्रवङ्गे च तीक्ष्णकम् । कांस्यकङ्कान्तलौहञ्च धातवो नव कीर्त्तिताः ॥" सुखबोधः । "त्रिविधन्तु सुवर्णं स्यादष्टधा रजतं भवेत् । पञ्च प्रकारकं ताम्रं वङ्गन्तु द्विविधं स्मृतम् । यशदं त्रिविधं प्रोक्तं भवेन्नागस्तु षड्विधः । अष्टधा लौहमुद्दिष्टमेते सप्तैव धातवः ॥" अर्क.चि. । गुणाः—"वलीपलितखालित्यकार्श्याबल्यज्वरामयान् । निवार्य्य देहं दधति नृणां तज्ज्ञातवो मताः ॥" भा.पू.१भ.धातुव. । देहधारकवस्तुविशेषे । स च वातपित्तकफरूपः देहस्य धारणात्तस्य धातुशब्दवाच्यता । यथा—"धारणाद्धातवस्ते स्युर्वातपित्तकफास्त्रयः ।" वैद्यकम् । गैरिकमनःशिलाद्यश्मविकारे । प.मु. । शरीरस्थसप्तधातुषु रसरक्तमांसमेदोऽस्थिमज्जशुक्रेषु । "रसादसृं ततो मांसं मांसान्मेदोऽस्थि तद्भवं । अस्थ्नोर्मज्जा ततः शुक्रमित्यमेषां विनिष्क्रमः ॥" रा.नि.व.१८। धातूनाञ्च कर्म्माणि प्रीणनजीवनलेपस्नेहधारणपूरणगर्भोत्पादनानि । गिरिमृत्तिकायां । रा.नि.व.१३।

धातुक(ज)म् । क्ली। शिलाजतुनि । वै.निघ.।

धातुकाशीष(सीस)म् । क्ली । कासीसे । হিরেকস্ । रा.नि.व.१३ ।

धातुकी । स्त्री । धातकीवृक्षे । वै.निघ. ।

धातुग्राही (इन्) । पुं । खर्परे । वै.निघ. ।

धातुघ्नम् । क्ली । काञ्जिके । हे.च. ।

धातुचेतनकरम् । क्ली । दुग्धे । आमलके । त्रिदले । वै.निघ. ।

धातुद्रावकम् । क्ली । टङ्कणक्षारे । সোহাগা । वै.निघ. ।

धातुनाशनम् । क्ली । काञ्जिके । त्रिका. ।

धातुपः । पुं । शुक्रे । रसे । श.च. ।

धातुपाकः । पुं । रसादिधातुक्षये । तल्लक्षणम्—"निद्रानाशो हृदिस्तम्भो विष्टम्भो गौरवारुची । अरतिर्बलहानिश्च धातूनाम्पाकलक्षणम् ।" वैद्यकम् । [प.मु. । भा. ।

धातुपुष्पिका (ष्पी) । स्त्री । धातकीवृक्षे ।

धातुमलः । पुं । शीषके । रसादिमलेषु । রসরক্তাদির মল । "मलिनीकरणान्मलाः ॥" वैद्यकम् । "कफः पित्तं मलः खेषु प्रस्वेदो नखलोम च । नेत्रविट् त्वक्षु च स्नेहो धातूनां क्रमशो मलाः ॥" भा. ।

धातुमारिणी । स्त्री । टङ्कणक्षारे । श.च. ।

धातुमारी (इन्) । पुं । गन्धके । वै.निघ. ।

धातुमाक्षिकम् । क्ली । स्वर्णमाक्षिके । रा.नि.व.१३ । धातुकाशीषे । হিরেকস্ । वै.निघ.।

धातुराजः (कम्) । पुं, क्ली । वीर्य्ये । शुक्र । वै.निघ. । श.च. । [प.मु. ।

धातुवल्लभम् । क्ली । टङ्कणे । সোহাগা ।

धातुवादी (इन्) । पुं । खनिजविद्याभिज्ञः ।

धातुविट् । स्त्री । शीषके । वै.निघ. ।

धातुविषम् । क्ली । हरितालादौ । र.सा.सं. ।

धातुवृद्धिः । स्त्री । रसादिवृद्धौ, रसादिधातुसाम्ये । च.सू.१३अ. । [श्मश्रुपलीशवर्ण्यादौ ।

धातुवृद्धिकरः । पुं । धातुवर्द्धकद्रव्ये, अश्वगं-

धातुवैरी (इन्) । पुं । गन्धके । श.च. ।

धातुवैषम्यम् । क्ली । विकारागमरूपकार्य्ययोनौ । च.वि.८अ. ।

धातुशेखरम् । क्ली । Green sulphate of Iron. धातुकाशीषे । হিরেকস্ । हे.च. ।

धातुशोधनम् । क्ली । शीषके । वै.निघ. ।

धातुशोधनकरी । स्त्री । हरीतक्याम् । वै.निघ. ।

धातुसम्भवम् । क्ली । सीसके । वै.निघ. ।

धातुसाम्यम् । क्ली । विकारोपशमरूपकार्य्ये । च.वि.८अ. । आरोग्ये । च.सू.१अ. । [निघ. ।

धातुस्तम्भनकरम् । क्ली । जातीफले । वै.

धातुहा (न्) । पुं । गन्धके । वै.निघ. ।

धातुचयकासः । पुं। धातुचयकरकासरोगे । क्षयकास । निदा. । [निघ. ।

धातूपलः । पुं । खड़िकायाम् । खड़ि । वै.

धात्रिका । स्त्री । आमलक्याम् । रा.नि.व.११।

धात्री । स्त्री । आमलक्याम् । আমলা । रा. नि.व.११ । भा.पू.१भ. । See अकरा । उपमातरि । দাই । तल्लक्षणं—"पीताय यदि बालस्य विदध्यादुपमातरम् । सुविचार्य्य गुणान् दोषान् कुर्य्याद्धात्रीं तदीदृशीम् । सवर्णां मध्यवयसां सःक्षीरां मुदितां सदा । शुद्धदुग्धां बहुक्षीरां वत्सामतिवत्सलाम् । स्वाधीनामल्पसन्तुष्टां कुलीनां सज्जनात्मजाम् । कैतवेन परित्यक्तां निजपुत्रद्वयं त्रिशी ॥" भा. । धात्रीकर्म्म । यथा—"धात्री तु यदा स्वादु बहुलशुद्धदुग्धा स्यात्, तदा स्नातानुलिप्ता शुक्लवस्त्रं परिधाय ब्राह्म्याद्यौषधं धारयन्ती कुमारं प्राङ्मुखं प्रथमं दक्षिणं स्तनं पाययेत् ।" इत्यादि । च.शा.८अ. । [आमलकीपत्रे ।

धात्रीपत्रम् । क्ली । तालीशपत्रे । रा.नि.व.६।

धात्रीफलम् । क्ली। आमलकफले । আম্‌লা । मद.व.१ । (ला) स्त्री । आमलक्याम् । আমলা গাছ । रा.नि.व.११ ।

धात्रीलौहम् । क्ली । शूलाधिकारे । प्रथमः पाठः—शुद्धमण्डूरं ६ प. यवः ४ प. पाकार्थजलं २ श. शे. ॥०श. । शतावरीरसः ८ प. आमलकीस्वरसः ८ प. दधि ८प. दुग्धं ८प. भूमिकुष्माण्डस्वरसः ४ प. घृतं ४ प. इक्षुरसः ४ प. । एकत्र पक्वा पाके सिद्धे प्रक्षेपः—जीरकचूर्णं धान्यकचूर्णं त्वक्चूर्णं तेजपत्रचूर्णम् एलाचूर्णं गजपिप्पलीचूर्णं मुस्ताचूर्णं हरीतकीचूर्णम् अभ्रभस्म लौहभस्म रेणुकचूर्णं त्रिफलाचूर्णं तालीशचूर्णं नागकेसरचूर्णं प्र. २तो.। শুদ্ধমণ্ডুর ৬প. যব ৪প. পাকার্থ জল ২শ.শে.॥০ শ.। শতমূলীরস ৮প.আমলকীরস ৮ প. দধি ৮ প. দুগ্ধ ৮ প. ভূমিকুষ্মাণ্ডের রস ৪ প. ঘৃত ৪ প. ইক্ষুরস ৪প. । একত্র পাক সিদ্ধ হইলে প্রক্ষেপ—জীরা, ধনে, গুড়ত্বক্, তেজপত্র, এলাইচ, গজপিপুল, মুতা.হরীতকী, অভ্র, লৌহ, রেণুক, ত্রিফলা, তালীশপত্র, নাগেশ্বর প্রত্যেক চূর্ণ ২তো. । र.सा.सं. । सा.कौ. । द्वितीयः—धात्रीचूर्णं ८ प. मण्डूरचूर्णं ४ प. यष्टिमधुचूर्णं २ प. गुडूचीक्वाथे सप्तवारं भावयेत् । भावनाक्वाथार्थं क्वाथ्यद्रव्यम् औषधतुल्यमादाय ८गुणे वारिणि साधयेत् । আমলকীচূর্ণ ৮ প. মণ্ডুরলৌহচূর্ণ ৪প. যষ্টিমধুচূর্ণ ২ প. । গুলুঞ্চক্বাথে সপ্তাহ ভাবনানন্তর শুষ্ক করিয়া ঘৃতভাণ্ডে রাখিবে । ভাবনার কাথ ঔষধের তুল্য লইয়া ৮ গুণ জলে প্রস্তুত করিবে। तृतीयः पाण्डौ—आमलकलौहत्रिकटुमनःशिलाचूर्णं मधु घृतं शर्करा प्र. समम् । আমলাচূর্ণ, লৌহ, ত্রিকটু, মনছাল, মধু, ঘৃত, চিনি প্রত্যেকে সমান । चतुर्थः वाजीकरणे—आमलकचूर्णं ८ प. त्रिफलाक्वाथेन २१ भावयित्वा अथ मृतलौहमधुघृतशर्कराः प्र. २ प. मिश्रयेत् । আমলাচূর্ণ ৮ প. ত্রিফলাকাথে ২১ ভাবনা দিবে । মৃতলৌহ ২ প. মধু ২ প. ঘৃত ২ প. শর্করা ২ প. একত্র মিশ্রিত করিবে । रस.र.। अन्यः पित्तरोगे—"धात्रीचूर्णस्याष्टौ पलानि चत्वारि लौहचूर्णस्य । यष्टीमधुकरजश्च द्विपलं दद्यात् पुटे दृष्टम् । धात्र्याश्च क्वाथेन तच्चूर्णं भाव्यञ्च सप्ताहं । चण्डातपेन संशुष्कं भूयः पिष्टं घटे स्थितं । घृतेन मधुना युक्तं भोजनादन्मध्यतः । त्रीन् वारान् भक्षयेन्नित्यं...... ।" र. सा.सं ।

धात्रीषट्पलकघृतम् । क्ली । गुल्मे घृतम् । "धात्रीफलानां स्वरसैः षट्पलं विपचेद्घृतम् । शर्करा सैन्धवोपेतं तद्धितं सर्व्वगुल्मिनाम् ॥" धात्रीरसः घृतसमः । रस.र. । भैष. ।

धात्रेयि(यी)का । स्त्री । आमलक्याम् । रा. नि.व.११ । उपमातरि ।

धात्र्यरिष्टम् । क्ली । पाण्डुरोगे । "धात्रीफलसहस्रे द्वे पीड़यित्वा रसन्तु तं । क्षौद्राष्टांशेन संयुक्तं कृष्णार्द्धकुड़वेन च । शर्करार्द्धतुलोन्मिश्रं पक्वं स्निग्धे घटे स्थितं । प्रपिबेन्मात्रया प्रातः...... ।" च.चि.२०अ. ।

धात्रयादिः । पुं । चातुर्थिकज्वरघ्ने धात्रीमुस्तामृतक्षौद्रकृते कषाये । वा.चि.१अ. ।

धानकः । पुं । माषपरिमाणे । च.कल्प.१२अ.। क्ली । धन्याके । मद.व.२ ।

धाना (नाः) । स्त्री । चिपीटके । চিড়ে । प.मु.। भृष्टयवादौ। ভাজা যবাদি । हिं बहुड़ा । गुणाः—विष्टम्भिनी रुचा तर्पणी लेखनी गुरुश्च । भा. । "यवादयश्च ये भृष्टा धानास्ते परिकीर्त्तिताः ।" रा.नि.व.६ । "धानाः सुदुर्ज्जरा रुचाश्च-टप्रदा गुरवस्तु ताः । तथा मेहकफच्छर्द्दिनाशिन्यः सम्प्रकीर्त्तिताः ॥" धन्याके । ধনিয়া । भा. । शुष्कभृष्टयवे । सु.चि.१०अ. ।

धानाकाः । स्त्री । धान्याके । ধনে । वा सू.१५अ.गुडूच्यादिः । "धानाकारक्तचन्दनम् ।" (बहुवचनान्ताः) । [दिर छातु । हे.च. ।

धानाचूर्णम् । क्ली । भृष्टयवादिचूर्णे । यवा-

धानिका । स्त्री । धान्यके । ধনে । वै.निघ. अ.सा.चि.यवान्यादौ । [लुञ्चे । रा.नि.व.११ ।

धानी । स्त्री । धान्यके । ধনে । मद.व.२ । पी-

धानुष्का । स्त्री । अपामार्गवृत्ते । আপাং গাছ । श.च. ।

धानुष्यः । पुं । वंशे । रा.नि.व.८ ।

धानेय(क)म् । क्ली । धन्याके । रा.नि.व.६ । आर्द्रधान्यके । কাঁচা ধনিয়া । वै.निघ. ।

धान्या । स्त्री । एलायाम् । श.च. ।

धान्यम् । क्ली । ४ तिलमाने । ६ गुञ्जामाने । धान्याके । ধনে । रा.नि.व.६।२३ । भूम्यामलक्यां । रा.नि.व.२३ । (Oryza sativa.) Common rice plant. शाल्यादिवृत्ते । सतुषतण्डुले । ধান । धान्यं त्रिधा शालिषष्टिकव्रीहिभेदतः । यथा—"शालयो हैमनास्तत्र षष्टिका ग्रैष्मिका अपि । व्रीहयस्त्वाशवः ख्याता प्रावृट्कालसमुद्भवाः ॥" राज.३प. । शूकशिम्बीतृणधान्यभेदेन त्रिधा । रा.नि.व.१६ । शालिव्रीहिशूकशिम्बीक्षुद्रधान्यभेदेन पञ्चविधम् । "शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः । यवादिकं शूकधान्यं मुद्गाद्यं शिम्बिधान्यकम् । कङ्ग्वादिकक्षुद्रधान्यं तृणधान्यञ्च तत्स्मृतमिति ॥" भा.पू.१भ.धा.व. । अष्टादशविधम् । यथा—"रक्तशालिर्महाशालिः कलमा षष्टिकापरा । खञ्जरीटीपसाही च नीरकान्या कपिञ्जला । सौगन्धी शूकला चान्या तिलवासी कचोरका । गरुड़ा रुक्मवल्ली च कलमान्या तथापरा । विल्वजा मागधी पीता ता अष्टादश शालयः ॥ कङ्गुश्चतुर्विधः प्रोक्तः श्यामाकश्चीनकः कटः । कोद्रवो द्विविधः प्रोक्तो वंशवीजं शरोद्भवं । कुसुम्भवीजं तीली च यीनरी च गवेधुकः । द्विजाङ्गला राजनी च क्षुद्रधान्यगणस्त्वयम् ॥" क्षुद्रधान्यम् । त्रिधा यवश्च गोधूमो मुद्गः षड्विध ईरितः । द्विविधः प्रोच्यते माषो राजमाषस्त्रिधा मतः । मकुष्ठस्तुवरी त्रेधा निष्पावकमसूरकौ । त्रिधा चणक उद्दिष्टः कलायश्च त्रिपुण्ड्रकः ॥"अत्रि.। एषां गुणाः स्वस्वपर्य्याये मृग्याः । शरद्ग्रीष्मोद्भवधान्यगुणाः—"धान्यं शरद्ग्रीष्मभवं पाकेऽम्लं पित्तकृद्गुरु ।" ऋतुसन्धिजधान्यगुणाः—"ऋतुसन्धिभवक्षीणं पित्तलं कफनाशनम् ॥" राज.३प. । स्थलजधान्यगुणाः—"स्थलजं कफपित्तघ्नं कषायं कटुपाकि च । किञ्चित्तु तिक्तमधुरं पवनानलवर्द्धनम् ॥" वापितावापितधान्यगुणाः—"वापितं गुरु तद्धान्यं किञ्चिद्धीनमवापितम् ।" रोप्यातिरोप्यधान्यगुणाः—"रोप्यातिरोप्ये लघुनी शीघ्रपाके गुणोत्तरे । अदाहिनी दोषहरे बल्ये मूत्रविवर्द्धने ॥" यच्छूकसमन्वितं व्रीह्यादिकं तच्छूकधान्यम्, शिम्बीनिगूढ़ं मुद्गमकुष्ठकादि शिम्बीधान्यम् । तृणोद्भवतया तृणधान्यम् । इति । "पक्वं हरितलूनञ्च धान्यं सर्व्वगुणावहम् । शुष्कं लूनन्तु निःसारं रुचं तत्सत्त्वनाशनम् ॥" इति हरितलूनान्नशुष्कलूनान्नगुणाः । "कोशधान्यं नवम्बल्यं मधुरं वत्सरोषितं । निर्द्दोषं लघु पथ्यञ्च तद्वर्षाद्चिरम्भवेत् । नवं धान्यमभिष्यन्दि लघु संवत्सरोषितं । द्व्यब्दोषितं लघु पथ्यं त्रिवर्षाद्बलम्भवेत् ॥" इति नवधान्यजीर्णधान्यगुणाः । धान्यं वापितम् उत्तमं, तदेव छिन्नोद्भवं मध्यमम् । दग्धभूमौ वने वा वापितं छिन्नोद्भवं धान्यं विण्मूत्रबन्धकरम् । चारोदकसमुत्पन्नं श्लेष्मरोगघ्नम् । सुस्निग्धभूमिजम् ओजोबलकरम् । वालुकाभूमिजम्बलपुष्टिहरञ्च । रा.नि.व.१६ ।

धान्यकम् । क्ली । स्वनामख्यातपण्यद्रव्ये । ধনে । हिं कोथुम्बुरि । धनिया । मद.व.२ । गु-

णाः—मधुरं शीतलं कषायं पित्तघ्नं ज्वरकासतृ-
ष्णाच्छर्दिकफघ्नं दीपनञ्च । रा.नि.व.६ । च.सू.४
अ. । च.द.ज्वराति.चि. । "बिल्वधान्यकनागरैः ।"
पुं । माषमितमाने । ७ कुँच । प.प्र.१ख. ।

धान्यकञ्चुकी (इन्) । पुं । धान्यत्वचि । धा-
नेर খোসা । गुणाः—धान्यगुणयुक्तः । रा.नि.
व.१६ ।

धान्यकतण्डुलः । पुं । कञ्चितधन्याकतण्डु-
ले । धनेर চাল । भा.म.१भ.अन्नकज्व.चि.धान्य-
कक्काथे । "प्रातर्धान्यकतण्डुलक्काथः ।"

धान्यकल्कः । पुं । तुषे ।

धान्यचतुष्कम् । क्ली । अतीसारे धान्यमुस्तक-
बालकबिल्वकृतकषायविशेषे । वैद्यकसं. । [का. ।

धान्यचमसः । पुं । चिपीटके । চিঁড়ে । चि-

धान्यजम् । क्ली । धान्ये । रा.नि.व.६ ।

धान्यतुषोदम् । क्ली । धान्यतुषकृतसन्धानवि-
शेषे । एतदभावे काञ्जिकम् । सि.यो.अजी.चि. ।

धान्यतैलम् । क्ली । गोधूमयावनालव्रीहियवा-
दिजतैले । गुणाः—त्रिदोषशमनं कण्डूकुष्ठादिह-
रं चक्षुष्यञ्च । रा.नि.व.१५ ।

धान्यपञ्चकम् । क्ली । आमशूलादौ कषाये ।
"धान्यकं नागरं मुस्तं बालकं बिल्वमेव वा । आ-
मशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥" वैद्यकसं.।
पञ्चविधधान्येषु शालिव्रीहिशूकशिम्बीक्षुद्राख्येषु ।
"शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकं । शि-
म्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम् ॥" भा. ।

धान्यपटोलः । पुं, क्ली । पित्तश्लेष्मज्वरे योग-
विशेषे । अत्र धान्यस्य १० माषाः पटोलस्य च ६
माषाः । सि.यो.ज्व.चि. ।

धान्यपानकम् । क्ली । धान्यकृतपानकविशे-
षे । धनेर পানা । तस्य साधनविधिः—"शिला-
यां साधु सम्पिष्टं धान्यकं वस्त्रगालितं । शर्करो-
दकसंयुक्तं कर्पूरादिसुसंस्कृतं । नूतने मृण्मये पात्रे
स्थितं पित्तहरं परम् ॥" भा. ।

धान्यपिप्पली । स्त्री । आमज्वरे । ज्वरे दीप-
नी पाचनी च । धान्यादीनां प्रत्येकं ६ माषा ४
रतिः । यो.रत्ना. ।

धान्यमण्डः । पुं,क्ली । धान्यकृतमण्डे । धानेर
মণ্ড । गुणाः—"धान्यमण्डं पित्तहरं श्रमघ्नञ्चाश्म-
रीहरं । वातलं रक्तशमनं ग्राहि सन्दीपनम्परम् ॥"
अचि.१२अ. ।

धान्यमद्यम् । क्ली । धान्यकृतमद्ये । ধেনো
মদ । गुणाः—गुरु विष्टम्भि च । रा.नि.व.१४ ।

धान्यमाषः । पुं । कलाये, माषे । वै.निघ. ।
षोड़शसर्षपपरिमाणे । च.कल्प.१२अ. ।

धान्यराजः । पुं । यवे । रा.नि.व.१६।२३ ।

धान्यवीजम् । क्ली । धन्याके । रा.नि.व.६ ।

धान्यवीरः । पुं । माषे । মাষ কলায় বা
বিরি কলায় । रा.नि.व.१६ ।

धान्यशाकम् । क्ली । धन्याकशाके । ধনের
শাক । र.चि.८अ. । [শুঙ বা শীষ । जटा. ।

धान्यशीर्षकम् । क्ली । धान्यकणिशे । ধানের

धान्यश्रेष्ठम् । क्ली । हैमन्तशालिधान्यभेदे, कृ-
पान्ने । হৈমন্তিক ধান্যবিশেষ । रा.नि.व.१५ ।

धान्यस्वेदः । पुं । धान्याद्यैः स्वेदे । माषादि-
कोषधान्यैः स्वेदे । सु.चि.२अ. ।

धान्या । स्त्री । धान्यके । अचि.२स्थान.१अ. ।

धान्याकम् । क्ली । धान्यके । मद.२व. । वै.
निघ.२भ.छर्दि.चि. ।

धान्याग्रम् । क्ली । धान्यकणिशे ।

धान्याभ्र(क)म् । क्ली । अभ्रकविशेषे । কৃত্রি-
ম অভ্রবিশেষ । तत्करणप्रणाली भावप्रकाशे—
"पादांशं शालिसंयुक्तमभ्रं बद्धा च कम्बले । त्रिरा-
त्रं स्थापयेन्नीरे तत् क्लिन्नं मर्दयेत्करैः । कम्बला-
द्गालितं सूक्ष्मं बालुकारहितञ्च यत् । तद्धान्याभ्र-
मिति प्रोक्तमभ्रमारणसिद्धये ॥" इति । तद्भस्म-
प्रकरणम्—"वज्राभ्रञ्च धमेदग्नौ ततः क्षीरे वि-
निक्षिपेत् । भिन्नपत्रन्तु तत् कृत्वा तण्डुलीयाम्ल-
योर्द्रवैः । भावयेदष्टयामन्तदेवं शुध्यति चाभ्रकम् ।
कृत्वा धान्याभ्रकं तत्तु शोषयित्वा तु मर्दयेत् । अ-
र्कक्षीरैर्दिनं मर्द्यमर्कमूलद्रवेण वा । वेष्टयेदर्कपत्रैस्तु
सम्यग्गजपुटे पचेत् । पुनर्मर्द्यं पुनः पाच्यं सप्तवारं
प्रयत्नतः । ततो वटजटाक्काथैस्तद्देयं पुटत्रयम् ॥"
र.चि.४अ. ।

धान्यासवम् । क्ली । मधुजम्बीरकृतसन्धान-

विशेषे। লেবুর আরক। मधुभाण्डं जम्बीररसेरापूर्य धान्यराशौ मासं स्थापयेत्। वै.निघ.।

धान्याम्बु । क्ली। धान्योदके। वा.चि.६ अ.।

धान्याम्ल(क)म् । क्ली। रससेदनकाञ्जिकविशेषे। यथालब्धनिस्तुषधान्यानि जलेन भाण्डमध्ये तावद्रक्षेत् यावदम्लत्वं नायान्ति। ततश्च तन्मध्ये भृङ्गराजमुण्डापराजितामत्स्याक्षीसर्पाक्षीसहदेवीत्रिफलानीलापराजिताहंसपादीचित्रकं समूलं यथालाभं कुट्टयित्वा देयम्। "नानाधान्यैर्यथाप्राप्तैस्तुषवर्जैर्जलान्वितैः। मृद्भाण्डं पूरितं रक्षेत् यावदम्लत्वमाप्नुयात्। तन्मध्ये भृङ्गरा मुण्डी विष्णुक्रान्ता पुनर्नवा। मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी। त्रिफला गिरिकर्णी च हंसपादी च चित्रकं। समूलं कुट्टयित्वा तु यथालाभं विनिःक्षिपेत्। पूर्व्वाम्लभाण्डमध्ये तु धान्याम्लकमिदं स्मृतम्। स्वेदनादिषु सर्व्वत्र रसराजस्य योजयेत्॥" भा.२भ.। च.द.तृष्णा-चि.। काञ्जिके। কাঁজি। रा.नि.व. १५। तत्साधनप्रणाली यथा—"धान्याम्लं शालिचूर्णञ्च कोद्रवादिकृतं भवेत्। धान्याम्लं धान्ययोनित्वात्प्रीणनं लघु दीपनं। अरुचौ वातरोगेषु सर्व्वेष्वास्थापनेषु च॥" भा.पू.२भ.।

धान्यारिः । पुं। वनमूषके। रा.नि.व.१९।

धान्यासवः । पुं। धान्यकृतासवे। गुड़धातकीधातकीसुरासौवीरकसैरेयमेदकधान्याम्लेषु षट्सु। च.सू.२५ अ.। [व.१६।

धान्योत्तमम् । क्ली, पुं। शालिधान्ये। रा.नि.

धान्वः । त्रि। जाङ्गले। वा.चि.३ अ.।

धान्वन्तरघृतम् । क्ली। प्रमेहाधिकारे घृतम्। गव्यघृतं १६ श.। क्वाथार्थं—दन्तीमूलं चित्रकमूलम् एषां प्र. ८ प. हरीतकी २० प. देवदारु-कदम्ब-केलिकदम्बत्वक्-वरुणत्वक्-आरग्वधत्वक्-आमलक-पुनर्नवा-करञ्जत्वक् प्र. ६ प. दशमूलं मिलित्वा ६४ प. वारि चतुर्गुणं शे. चतुर्थांशः। कल्कः—पञ्चलवणं पञ्चकोलं प्र. २ तो.। इति वृहद्धान्वन्तरम्। सा.कौ.। ঘৃত ১৬ শ.। কাথার্থ—দন্তীমূল, চিতামূল প্রত্যেকে ৮ প. হরীতকী ২০ প. দেবদারু ৬ প. কদম্ব, কেলিকদম্ব, বরুণ, শোঁদাল, অস্র, পুনর্নবা, করঞ্জ প্রত্যেকের ছাল ৬ প. দশমূল মিলিত ৬৪ প. জল চতুর্গুণ শে. চতুর্থাংশ। কল্কার্থ—পঞ্চলবণ, পিপুল, পিপুলমূল, চই, চিতামূল, শুঁট প্রত্যেকে ২ তো.। द्वितीयम्—गव्यघृतं ४ श.। क्वाथार्थं—दशमूलं करञ्जद्वयस्य फलं (तदभावे त्वक्) देवदारु हरीतकी शुक्लपुनर्नवा वरुणमूलं दन्तीमूलं चित्रकमूलं पुनर्नवा कदम्बत्वक् केलिकदम्बत्वक् सुहीत्वक् विल्वत्वक् भल्लातकं शटी पुष्करमूलं कणामूलम् एषां प्र. १० प. यवकोलकुलत्थानां प्र. १६ प. वारि २१० श. शे. ५४ श. ४ प.। कल्कार्थं—हिज्जलमूलं त्रिफला भार्गी रोहितकमूलं गजपिप्पली शुण्ठी वचा विडङ्गं गुञ्जारोचनी एषां प्र. ५॥० तो.। च.द.। ঘৃত ৪ শ.। কাথার্থ—দশমূল, করঞ্জ, রক্তকরঞ্জ, দেবদারু, হরীতকী, শ্বেতপুনর্নবা, বরুণ, দন্তী, চিতা, পুনর্নবা, কদম্ব, কেলিকদম্ব, সিজু, বিল্ব, ভেলা, শঠী, পুষ্করমূল, পিপুলমূল প্রত্যেকে ১০ প. যব, কুল, কুলথ প্রত্যেকে ১৬ প. জল ২১০ শ. শে. ৫৪ শ. ৪ প.। কল্কার্থ—হিজলমূল, ত্রিফলা, বামুনহাটী, রয়নামূল, গজপিপুল, শুঁট, বচ, বিড়ঙ্গ, কমলাগুঁড়ি প্রত্যেকে ৫॥০ তো.। रस.र.। [मे.।

धाम (न्) । क्ली। शरीरे। अम.। जन्मनि।

धामकम् । क्ली। कतृणे। গন্ধতৃণ বা রাম কর্পূর। रा.नि.व.८। पुं। माषपरिमाणे। "हेमश्च धामकश्चैव।" प.प्र.।

धामनी । स्त्री। शोणितवाहिशिरायां। श.च.।

धामार्गवः । पुं। पीतघोषायाम्। পীত ঘোষা। धुन्दुल। हिं नेनुआ। प.मु.। सु.सू.३९अ.। च.सू.१।२अ.। अपामार्गे। रक्तापामार्गे। भा.पू.१भ.। महाकोशातक्याम्। ঝিঙে। हिं तोरइ। तैं उत्तरेणि, चेतिवीर। रा.नि.व.७। राजकोशातक्याम्। वा.टी.हेमा.।

धारः । पुं। पाषाणविशेषे। सन्तती। द्रवद्रव्यमात्रे। क्ली। वृष्ट्युदके। বৃষ্টির জল। तच्च द्विविधं गाङ्गं सामुद्रञ्चेति। "धाराभिः पतितं तोयं गृहीतं स्फीतवाससा। शिलायां वसुधायां वा धौतायां पतितञ्च यत्। सौवर्णे राजते ताम्रे स्फटिके काच

निर्म्मिते। भाजने ह्लण्मये वापि स्थापितं धारमुच्यते॥" गुणाः जलशब्दे द्रष्टव्याः। भा.।

धारकः (णः)। त्रि। संग्राहिद्रव्यमात्रे। सु.सू.४५अ.।

धारणी (या)। स्त्री। स्वनामख्यातमहाकन्दशाकविशेषे। धारणीकन्द, मैलगड़े इति च अनूपदेशे ख्याता। धरणीकन्द। गुणाः—मधुरः कफपित्तघ्नः मुखदोषघ्नः कण्डूकुष्ठघ्नश्च। रा.नि.व.७। शाखाग्राम्। शरीरान्तर्नाड़ीविशेषे। मे.।

धारा। स्त्री। द्रवद्रव्यस्य सन्ततरक्षणे। गुड़ूच्यां। वै.निघ.२भ.जीर्णज्व.चि.सेवन्तीपाके। हरिद्रायां। त्रिका.। आमलक्याम्। क्षीरकाकोल्याम्। वै.निघ.। शस्त्राणां शाणतीक्ष्णतायाम्। धार। हिं तेज। सा च शस्त्रधारा मासूर्य्यर्द्धमासूरी कैशिक्य र्द्धकैशिकी चेति चतुर्धा शस्त्रकर्म्मविशेषेषु भिन्नप्रकृतिका। तत्र भेदनानामस्त्राणां मासूरी (मसूरधारातन्वी) मण्डलाग्रादिलेखनानाम् अर्द्धमासूरी (मसूरदलधारार्द्धतन्वी), सूचीकुशपत्रादिव्यधनानां विस्रावणानाञ्च कैशिकी (केशप्रमाणतन्वी), वृद्धिपत्रादिच्छेदनानामर्द्धकैशिकी (अर्द्धकेशप्रमाणतन्वी) चेति। सु.सू.८अ.।

धाराकदम्बः। पुं। (Adina cordifolia. Syn. Nauclea cordifolia.) स्वनामख्यातवृक्षविशेषे। केलिकदम्। हिं हलदु। मं धाराकलंब। कं धारेयकड़ब। तें मोगुलुकड़िमि। गुणाः—कटुः वर्ण्यः हिमः कषायः तिक्तः पित्तघ्नः वीर्य्यवृद्धिकरः विषशोषहरश्च। रा.नि.व.६।

धाराङ्कुरः। पुं। जलवृष्टौ। शीकरे। घनोपले। मे.।

धाराटः। पुं। चातकविहङ्गे। घोटके। श.र.।

धाराफलः। पुं। मदनवृक्षे। मयना गाछ। रा.नि.व.८। (ला) स्त्री। कोषातक्याम्। झिङ्गे। रा.नि.व.७।

धारायन्त्रम्। क्ली। वारिसेचनयन्त्रे। फोयारा। सुगन्धवारिक्षरणपात्रे। गोलाब पाश। अत्रि.।

धारासत्त्वम्। क्ली। गुड़ूचीस्वरसे। गुलञ्चेर रस। वै.निघ.२भ.क्षय.चि.सेवन्तीपाके।

धारास्नुही। स्त्री। त्रिधारस्नुहीभेदे। तेकाँटा सिजु। रा.नि.व.८।

धारि। क्ली। आयुषि। (धारयति शरीरं पूतितां गन्तुं न ददातीति)। च.सू.१अ.।

धारिणी। स्त्री। शाल्मलीवृक्षे। श.च.।

धारी (इन्)। पुं। पीलुवृक्षे। आक्‌रोट। जटा.।

धारुः। त्रि। स्तन्यपायिनि। जटा.।

धारोष्णम्। क्ली। दोहनेनोष्णधारया पतिते दुग्धे। धारोष्ण दुध। गुणाः—"धारोष्णम् अमृतमयो श्रमहरं निद्राकरं कान्तिदं वृष्यं बृंहणमग्निवर्द्धनमतिस्वादु त्रिदोषापहम्।" रा.नि.व १५। त्रि। धारया उष्णं, यस्य मुखमेव पात्रम्। "धारोष्णममृतोपमम्।" वा.टी.हेमा.।

धार्त्तराष्ट्रः। पुं। ईषच्छुक्लराजहंसे। कृष्णचञ्चुचरणहंसे। गेंड़ि हाँस। अम.। सर्पभेदे। मे.।

धार्त्तराष्ट्रपदी। स्त्री। हंसपादीलतायाम्। रा.नि.व.५। रक्तलज्जालुकायाम्। वै.निघ.।

धाव(वि)निः (नी)। स्त्री। पृश्निपर्ण्याम्। चाकुलिया। प.मु.। वा.चि.१अ.। "धाविनीश्रीफलैः कृताम्।" कण्टकार्य्याम्। धातकीवृक्षे। रा.नि.व.४।६। कपिकच्छ्वाम्। आलाकुशी। च.द.सि.यो.यक्ष्म.चि.। शणवृक्षे। वै.निघ.।

धावनिका। स्त्री। कण्टकार्य्याम्। प.मु.। वै.निघ.२भ.भुग्ननेत्रसन्निपातज्व.चि.। [वा.।

धीः। स्त्री। बुद्धौ। अम.। उपदिष्टग्रहणे शक्तौ।

धीतिः। स्त्री। पिपासायाम्। हे.च.।

धीन्द्रियम्। क्ली। ज्ञानेन्द्रिये। तच्च मनः नेत्रं श्रोत्रं त्वक् रसना घ्राणञ्चेति षट्। अम.।

धीमोदिनी। स्त्री। मद्ये। रा.नि.व.१४।

धीरः। पुं। ऋषभके। रा.नि.व.५। क्ली। कुङ्कुमे। त्रिका.। पुष्करमूले। वै निघ.।

धीरस्कन्धः। पुं। वनशूकरे। वै.निघ.। महिषे। हे.च.।

धीरा। स्त्री। मेदायाम्। प.मु.। महाज्योति-

पर्तीलतायाम्। बड़ लताफट्की। काकोल्याम्। रा.नि.व.३। चीरकाकोल्याम्। वै.निघ.। शिंशपाहचे। शिशु गाछ। प.मु.। कृष्णशिंशपायां, कालशिशु वा काल अगुरु। रा.नि.व.६। शल्लकचायाम्। कण्टकसेवत्याम्। वै.निघ.। मद्यविशेषे। रा.नि.व.१४।

धीरावी। स्त्री। पीतशिंशपायाम्। वै.निघ.।

धीवरी। स्त्री। शतमूल्याम्। रा.नि.व.४।

धीहरा। स्त्री। कुन्दुरौ। वै.निघ.।

धुकः (का)। पुं, स्त्री। भूमिवदरवृचे। वै.निघ.।

धुकन्धुकम्। क्ली। वदरीफले। मद.व.६।

धुकी। स्त्री। भूवदरे, हस्तिकोल्याम्। श्याम-ऽकोली। मद.व.६। [गृहधूमे। झूल। मे.।

धुन्धुमारः। पुं। इन्द्रगोपनामकीटविशेषे।

धुरणीफलः। पुं। मुद्गवृचे। प.मु.।

धुरन्धरः। पुं। धवहचे। प.मु.। र.मा.।

धुर्य्यः, धुर्य्यः। पुं। ऋषभके। रा.नि.व.५।

धुस्(स्तू)रः। पुं। (Datura fastuosa) कृष्णधुस्तूरे। (Datura elba.) श्वेतधुस्तूरे। (Datura metel.) उपविषपर्य्यायस्वनामख्यातरुस्वरूपे। धुतुरागाछ। र.मा.। हिं धातुरा। मं धतूर। कं मदकुणिगे। तें उम्मेत्तचेट्टु नल उम्मेत। ता. कारुउमते। गुणाः—कटुरुष्णः कान्तिकारी व्रणघ्नः त्वग्दोषखर्जूकण्डूज्वरघ्नः भ्रमजनकश्च। रा.नि.व.१०। मूर्च्छाजनकः अग्निघ्नः पित्तघ्नश्च। राज.। "धुस्तूरादेश्च यद्वीजमन्यच्चोपविषञ्च यत्। चीरेण पाचयेद्दोलायन्त्रेण शुद्धिमाप्नुयात्।" इति शोधनम्। सा.कौ.। घण्टाकर्णरूपे। ঘেঁটু গাছ। रुद्रतैले। सा.कौ.।

धुस्तूरतैलम्। क्ली। कर्णरोगाधिकारे पक्कतैलम्। "निशागन्धपले पक्वं कटु तैलं पलाष्टकं। धुस्तूरपत्रजरसे कर्णनाड़ीनिदुत्तमम्।" कटुतैलं ८ प. धुस्तूरपत्ररसः १६ प.। कल्कार्थे—हरिद्रागन्धकयोः प्रत्येकं १ प.। सा.कौ.। इदमेव रसरत्नाकरे गन्धकतैलम्। [निघ.।

धूकः। पुं। वायौ। वकुलवृचे। विड़ाले। वै.

धूनकः (नः)। पुं। शालनिर्य्यासे। धूना। त्रिका.। क्ली। कम्पने।

धूनराजः। पुं। वृचविशेषे। हर्मिमनुवीति पश्चिमदेशे। गुणाः—मूत्रलः ग्राही कफघ्नः दन्तरोगघ्नो बल्यः मेहास्रग्दरघ्नश्च। चवि.।

धूनिः। स्त्री। कम्पने। व्याक.।

धूपः। पुं। उष्णस्वेदे। ভাপরা। सुगन्धीकरणे गन्धद्रव्योत्थधूमे तद्वर्त्तौ च। हे.च.। माहेश्वरादौ। धूपार्थे द्रव्यगणो यथा—"द्विधागुर्देवदारुश्च गन्धपाषाणकस्त्रिधा। गुग्गुलुः पञ्चधा सर्जो निर्य्यासः सरलस्य च। पद्मकाष्ठं मोचरसो निर्य्यासः सल्लकस्य च। रालं नेपालकञ्चेति गणोऽयं धूपसंज्ञकः॥" चर्क.चि.।

धूपकम्। क्ली। तूलकाष्ठे। रा.नि.व.६।

धूपद्रुमः। पुं। रक्तखदिरे। रा.नि.व.८।

धूपनम्। क्ली। धूपाधिवासने। धूपेन घर्माकर्षणे। ভাপরা। Fumigation. व्रणादीनां क्रियाविशेषे। শুকো দলন্। स च व्रणशोधनानन्तरं विधेयः। तद्द्रव्यं यथा—"श्रीवेष्टके सर्जरसे सरले देवदारुणि। सारेष्वपि च कुर्व्वीत मतिमान् व्रणधूपनम्॥" सु.।

धूपनः। पुं। धूनके। धूना। श.मा.।

धूपवृक्षः (कः)। पुं। रक्तखदिरवृचे। रा.नि.व.८। देवदारुवृचे। सरलवृचे। त्रिका.। श.र.।

धूपसरला। स्त्री। धूपाङ्गसरलवृचविशेषे। वै.निघ.। [१२।

धूपाग(गु)रु। क्ली। दाहागुरुणि। रा.नि.व.

धूपाङ्गः। पुं। श्रीवेष्टनामकसुगन्धकाष्ठे। টার্পেণ্টাইন্ গাছ। रा.नि.व.१२।

धूपार्हम्। क्ली। कृष्णागुरुणि। रा.नि.व.१२।

धूप्यः। पुं। नखीनामगन्धद्रव्ये। रा.नि.व.१२।

धूमः। पुं। शिलारसे। गृहधूमे। झूल। मेचके। ধোঁওয়া। गुणाः—"सद्यः श्लेष्मकरो धूमो नेत्रयोरहितो भ्रमम्। शिरोगौरवकञ्चापि वातपित्तञ्च कोपयेत्॥" भा.। वातपित्तवर्द्धकः। राज.१प.। अन्यः पानार्थे पञ्चविधः—प्रायोगिकः स्नेहनः रेचनः कासघ्नः वामनीयश्चेति। पञ्चविधा एव धू-

मवर्त्तयः । तत्रैलादिना कुष्ठतगरवर्ज्जेन श्लक्ष्णपिष्टेन द्वादशाङ्गुलं शरकाण्डं चौमेणाष्टाङ्गुलं परिवेष्ट्यालेपयेत् । एषा प्रायोगिकधूमवर्त्तिः । स्नेहफलसारमधूच्छिष्टसर्ज्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नैहने । शिरोविरेचनद्रव्यैर्वैरेचने । कासघ्ने कासहरैर्बृहतीकण्टकारिकात्रिकटुकासमर्दहिङ्गुङ्गुदीत्वङ्मनःशिलाच्छिन्नरुहाकर्कटशृङ्गीप्रभृतिभिः । वामनीये वामनीयैः स्नायुचर्म्मखुरशृङ्गकर्कटकास्थिशुष्कमत्स्यवल्लूरकृमिप्रभृतिभिर्द्रव्यैश्च वर्त्तिः कार्य्या । तत्र प्रायोगिकनेत्रं कनिष्ठिकापरिणाहमग्रे कलायमात्रं स्रोतो मूलेऽङ्गुष्ठपरिणाहं धूमवर्त्तिप्रवेशस्रोतोऽङ्गुलान्यष्टचत्वारिंशत् । द्वात्रिंशत् स्नैहने । चतुर्व्विंशतिर्वैरेचने । षोड़शाङ्गुलं कासघ्ने वामनीये च । एते अपि कोलास्थिमात्रच्छिद्रे भवतः । व्रणनेत्रमष्टाङ्गुलं व्रणधूपनार्थं कलायपरिमण्डलं कुलत्थवाहिस्रोत इति । सु.चि.४०अ. । See धूमपानम् । [পূর । भा. ।

धूमगन्धिकम् । क्ली । रौहिषतृणे । রামক-

धूमजाङ्गजम् । क्ली। वज्रकक्षारे । रा.नि.व.६।

धूमदर्शी । पुं । नेत्ररोगविशेषे । "शोकज्वरायासशिरोऽभितापैरभ्याहता यस्य नरस्य दृष्टिः । धूमांस्तथा पश्यति सर्व्वभावान् स धूमदर्शीति नरः प्रदिष्टः ॥" मा.नि. ।

धूमनाड़ी । स्त्री । प्रायोगिकादिधूमप्रयोगार्थं नलाकारयन्त्रे । ধূমপানের নল । लक्षणं —"धूमनाड़ी भवेत्तत्र त्रिखण्डा च त्रिपर्व्विका । कनिष्ठिकापरीणाहा राजमाषागमान्तरा ॥" भा. ।

धूमपानम् । क्ली । धूमसेवायाम् । চুরট খাওয়া বা ধূমপান । तच्च षड्विधं शमनबृंहणरेचनकासहावामनव्रणधूपनानीति । एषां विशेषाः स्वस्वपर्य्याये मृग्याः । तद्विधिः—अत्र सर्व्वासामेव धूमनाड़ीनां छिद्राणि कलायस्थूलानि भाव्यानि । द्वादशाङ्गुलामीषिकां यथास्वधूमद्रव्यकर्षमितकल्केनालिप्याष्टाङ्गुलपर्य्यन्तं छायाशुष्कां कारयेत् । अथ तां स्नेहाक्तामङ्गारदीपितां कृत्वा नेत्ररन्ध्रे धृत्वा च वदनेन धूमं पिबन् तेनैव सन्त्यजेत् । ततो नासिकाभ्यां पीत्वा वदनेन वमेत् । तथा शरावसंपुटे कल्कं निधायाङ्गारदीपितं कृत्वा छिद्रे नेत्रं निवेश्य व्रणञ्च धूपयेदिति । भा. । अथ सुखोपविष्टः सुमना ऋज्वधोदृष्टिरतन्द्रितः स्नेहाक्तां प्रदीप्ताग्रां वर्त्तिं नेत्रस्रोतसि प्रणिधाय धूमं पिबेत् । "मुखेन तं पिबेत्पूर्व्वं नासिकाभ्यां ततः पिबेत् । मुखपीतं मुखेनैव वमेत् पीतञ्च नासया । मुखेन धूममादाय नासिकाभ्यां न निर्हरेत् । तेन हि प्रतिलोमेन दृष्टिश्च विहन्यते ।" विशेषतस्तु प्रायोगिकं घ्राणेनाददीत. स्नैहनं मुखनासाभ्यां । नासिकया वैरेचनं मुखेनैवेतरे । तत्र प्रायोगिके वर्त्तिं व्यपगतशरकाण्डां निवातातपशुष्काम् अङ्गारेष्ववदीप्य नेत्रमूलस्रोतसि प्रयुज्य धूममाहरेति ब्रूयात् । एवं स्नैहनं वैरेचनिकञ्च कुर्य्यादिति । इतरयोर्व्यपगतधूमेऽङ्गारस्थिरे समाहिते शरावे प्रक्षिप्य वर्त्तिं मूलच्छिद्रेणान्येन शरावेण पिधाय तस्मिन् छिद्रे नेत्रमूलं संयोज्य धूममासेवेत । प्रशान्ते धूमे वर्त्तिमवशिष्टां प्रक्षिप्य पुनरपि धूमं पाययेदादोषविशुद्धेः । एष धूमपानोपायविधिः । गुणाः—दन्तप्रक्षालननस्यस्नानभोजनशस्त्रकर्म्मान्तेषु प्रायोगिक इति । तत्र स्नैहनो वातं शमयति, स्नेहादुपलेपाच्च वैरेचनः श्लेष्माणमुत्क्लेश्यापकर्षति, रौक्ष्यात्तैक्ष्ण्याद्वैशद्याच्च प्रायोगिकः श्लेष्माणमुत्क्लेशयत्युत्क्लिष्टं चापकर्षति साधारणत्वात् पूर्व्वाभ्यामिति । भवति चात्र—"नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः । दृढ़केशद्विजश्मश्रुसुगन्धिविशदाननः ।" कासश्वासारोचकास्योपलेपस्वरभेदमुखास्रावक्षवथुतन्द्रानिद्राहनुमन्यास्तम्भपीनसशिरोरोगकर्णाक्षिशूलवातकफनिमित्ताश्चास्य मुखरोगा न भवन्ति । प्रायोगिकं त्रींस्त्रीनुच्छ्वासानाददीत मुखनासिकाभ्याञ्च पर्य्यायात्त्रींश्चतुरो वेति स्नैहिकं यावदश्रुप्रवृत्तिः । वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पातव्यो वामनीयः । ग्रासान्तरेषु कासघ्न इति । सु.चि.४०अ. । [त्रिका. ।

धूममहिषी । स्त्री । नीहारे । কুয়াশা ।

धूममृत्तिका । स्त्री स्वर्णशोधनयोग्यकृष्णमृत्तिकायाम् । श.चि. ।

धूमयोनिः । पुं । मुस्तके । अम. ।

धूमरः । पुं । दृष्टिमण्डलगतरोगविशेषे । ধোঁয়া দেখা । लक्षणं—"शोकज्वरशिरोरोगसन्तप्तस्यानिलादयः । धूमाविलां धूमदर्शां दृशं कुर्य्युः स धूमरः ॥" वा.उ.१२अ. ।

धूमरज: । क्ली । गृहधूमे । झूल । भैष.कर्ण री. चि. ।
धूमस: । पुं । शाकतरौ । वै.निघ. ।
धूमसार: । पुं । गृहधूमे । झूल । र.सा.सं. ।
धूमसी । स्त्री । मुद्गविदलादिकृतरोटिकायाम् । পাপড়, ডালবড়ি, চুকুনি । प्रणाली यथा— "माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः । आतपे शोषिता पात्रे पिष्टास्ता धूमसी स्मृता । धूमसीरुचिरा सैव प्रोक्ता मुर्मुरिका बुधैः । मुर्मुरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ।" भा. ।
धूमा(म्रः) । स्त्री, पुं । कृष्णशिंशपायाम् । वै. निघ. । [सहजातीयपत्निषि । च. ।
धूमिका । स्त्री । कुज्झटिकायां । त्रिका. । प्र-
धूमोत्थम् । क्ली । वज्रक्षारे । रा.नि.व.६ ।
धूमोद्गार: । पुं । पित्तजरोगभेदे । भा. ।
धूम्या(म्रा)ट: । पुं । कुलिङ्गपक्षिणि । ফিঙে । अम. । [नि.व.१२ । उष्ट्रे । जटा. ।
धूम्र: (क:) । पुं । सिह्लके । शिलारस । रा.
धूम्रपत्रा । स्त्री । स्वनामख्यातक्षुपे । তামাক । मं गांधानी । कं कत्तगिरि । उत्. धूयापतर । गुणाः—तिक्ता शोफघ्नी कृमिघ्नी उष्णा कासघ्नी वश्या दीपनी च । रा.नि.व.५ ।
धूम्रपत्रिका । स्त्री । धूम्रपत्रायाम् । रा.नि. व.२१ । गन्धतृणे । गन्धतृणभेदे । वै.निघ. ।
धूम्रमूलिका । स्त्री । शूलीतृणे । रा.नि.व.८ ।
धूम्रलोचन: । पुं । कपोते । रा.नि.व.१९ ।
धूम्रवर्ण: (क:) । पुं । सिह्लके । शिलारस । रा.नि.व.१२ । कौकड़नामविलेशयमृगे । रा.नि. व.१९ ।
धूम्रवर्णा । स्त्री । वराटिकाभेदे । रा.नि.व.१३ ।
धूम्रशूल: । पुं । उष्ट्रे । वै.निघ. ।
धूम्रा । स्त्री । शशाण्डुल्यां । रा.नि.व.७ ।
धूम्राह्वा । स्त्री । धूम्रपत्रायाम् । रा.नि.व.५ ।
धूम्रार्चि: । स्त्री । धूमशुक्तायाम् । वै.निघ. ।
धूम्रिका । स्त्री । कृष्णशिंशपावृक्षे । কালশিশু । वा अगुरु । रा.नि.व.९ ।

धूर्त्त: । पुं । श्वेतकृष्णधुस्तूरवृक्षे । प.मु. । कर्त्तु-गवृक्षे । कुष्माण्डे । वै.निघ. । चोरक नामगन्ध-द्रव्ये । গেঁটেলা । रा.नि.व.१२ । क्ली । लौहकि-ट्टे । हे.च. । विड़लवणे । रा.नि.व.६ । [श.र. ।
धूर्त्तक: । पुं । कैलिकदम्बे । प.मु. । शृगाले ।
धूर्त्तकृत् । पुं । धुस्तूरवृक्षे । श.मा. ।
धूर्त्तजन्तु: । पुं । मनुष्ये । श.च. ।
धूर्त्तमानुषा । स्त्री । रास्नायाम् । श.च. ।
धूर्त्तर: । पुं । पारदे । रा.नि.व.१३ ।
धूर्त्ता । स्त्री । शुक्लकण्टकार्य्याम् । वै.निघ. ।
धूर्द्दर:, धूर्य्य: । पुं । ऋषभके । वै.निघ. ।
धूलकम् । क्ली । विषे । श.च. । [अम. ।
धूलि: । पुं । परागे । गर्द्दभे । पार्थिवरजसि ।
धूलिका । स्त्री । धूली । पुष्पपरागे । वै.निघ. । कुज्झटिकायाम् । श.र. । [र । त्रिका. ।
धूलिगुच्छ: (क:) । पुं । पिष्टातके । आबी-
धूलिजङ्घ: । पुं । काके । কাক । वै.निघ. ।
धूलिपुष्पिका । स्त्री । केतकीवृक्षे । কেয়া গাছ । रा.नि.व.१० । श्वेतकेतकी । वै.निघ. ।
धूलीकदम्ब: (क:) । पुं । कदम्बवृक्षविशेषे । धाराकदम्ब । मं धूलिकदंबु । कं धूलिगड़ड । गु-णैः धाराकदम्बतुल्यः । रा.नि.व.१० । तिनिशवृ-क्षे । वरुणवृक्षे । मे. ।
धूसर: । पुं । गर्द्दभे । उष्ट्रे । वनचटके । कपो-ते । रा.नि.व.१९ । मुद्गे । वै.निघ. । त्रि । पाण्डु-वर्णे । मे. । [शुक्लपुष्परास्नायाम् । वै.निघ. ।
धूसरच्छदा । स्त्री । श्वेतबुह्नायाम् । प.मु. ।
धूसरपत्रिका (त्री) । स्त्री । हस्तिकाल्याम् । বিছাতি । शिवब्रह्मीशाके । प.मु. । हस्तिशुण्डी-नामक्षुपे । হাতিশুঁড় । रा.नि.व.५ ।
धूसरमुद्ग: । पुं । धूसरवर्णमुद्गविशेषे । मं धू-सरमुङ्ग । कं पीयरमुङ्ग । गुणाः—रसवीर्य्यविपाकेषु हरिन्मुद्गसमः कषायः मधुरः रुच्यः पित्तकृत् वा-तविष्टम्भकृच्च । रा.नि.व.१६ ।
धूसरा । स्त्री । पाण्डुरफलीनामक्षुपे । रा.नि.व.५ ।

धूसराह्वयः । पुं । गर्दभे । वै.निघ. ।

धूसरी । स्त्री । गर्दभ्यां ।

धूस्तूरः । पुं । धुस्तूरवृक्षे । प.मु. । [हि.च. ।

धृतराष्ट्रः । पुं। हंसभेदे । हंसजातीयपक्षिणि ।

धृतराष्ट्री । स्त्री । हंसविशेषपत्न्याम् । मे. ।

धृतिः । स्त्री । धैर्य्ये । वेगविघाते । भा.म.३भ. उदा.चि. ।

धृष्णुः । स्त्री । कच्चिकायां । कश्चि । श्र.च. ।

धेनिका । स्त्री । धान्याके । धने । भा. ।

धेनुः । स्त्री । दुग्धवत्यां गवि । अम. ।

धेनुका । स्त्री । धान्यके । धने । मद.व.२ । हस्तिन्यां । गवि । मे. ।

धेनुकारिः । पुं । नागकेसरवृक्षे । वै.निघ. ।

धेनुजिह्वा । स्त्री । गोजिह्वानामक्षुपे । रा.नि. व.४ । [गोदुग्धे ।

धेनु(का)दुग्धम् । क्ली । चिर्भट्याम् । भा. ।

धेनुदुग्धकरः । पुं । मज्जरटणे । रा.नि.व.८।

धेनुमक्षिका । स्त्री । गोमक्षिकायाम् । डाँश माछि । वै.निघ. ।

धोड़ः । पुं । डुण्डुभे । ঢোড়াসাপ । श्र.र.।

धौतम् । क्ली । रौप्यधातौ । रा.नि.व.१३ । नीलकाशीसे । নীল হিরেকস্ । वै.निघ. ।

धौतकौशेयम् । क्ली। धौतकोषजे । पत्तोर्णे। श्र.र. ।

धौतखण्डी । स्त्री। खण्डशर्करायां । वै.निघ.।

धौतशिलम् । क्ली । स्फटिके । चिका. ।

धौमतम् । क्ली । रक्तबोले । খুনখারাপি । वै. निघ. ।

धौरः । पुं । धवतृक्षे । ধাওয়া গাছ । भा. ।

ध्माङ्क्षः । पुं । काके । वके । जलकाके । পান-কৌড়ী। अम.। जलपक्षिमात्रे । तक्षके । वै.निघ.।

ध्मा(ध्वा)ङ्क्षजङ्घा । स्त्री । काकजङ्घायाम् । रा.नि.व.४ । [लक्ष्मणा । रा.नि.व.११ ।

ध्मा(ध्वा)ङ्क्षजम्बूः । पुं । काकजम्बूवृक्षे । ज-

ध्मा(ध्वा)ङ्क्षतण्डुलफला । स्त्री । काकज-ङ्घायाम् । वै.निघ. ।

ध्मा(ध्वा)ङ्क्षतुण्डा (ण्डी) । स्त्री । काका-दनीलतायाम् । काकनासालतायां । কুঁচ গাছ। रा.नि.व.३ ।

ध्मा(ध्वा)ङ्क्षदन्ती (नखी) । स्त्री । काका-दनीलतायाम्। काकनासालतायाम्। रा.नि.व.३।

ध्मा(ध्वा)ङ्क्षनामा (नाम्नी) । स्त्री । का-कोदुम्बरिकायाम् । रा.नि.व.११ ।

ध्मा(ध्वा)ङ्क्षनाशिनी । स्त्री। हवुषाभेदे। হবুষ ফল । रा.नि.व.४ । भा. ।

ध्मा(ध्वा)ङ्क्षनासा (सिका) । स्त्री । का-कनासालतायाम् । কুঁচ গাছ । रा.नि.व.३ ।

ध्मा(ध्वा)ङ्क्षपुष्टः । पुं । कोकिले । हारा. ।

ध्मा(ध्वा)ङ्क्षमाची । स्त्री। काकमाचीक्षुपे । रा.नि.व.४ । [रा.नि.व.४ ।

ध्मा(ध्वा)ङ्क्षवल्ली । स्त्री। काकजङ्घायाम् ।

ध्मा(ध्वा)ङ्क्षादनी । स्त्री। काकादनीलता-याम् । रा.नि.व.३ ।

ध्मा(ध्वा)ङ्क्षारातिः । पुं । पेचके । हला. ।

ध्मा(ध्वा)ङ्क्षी । स्त्री । काकोल्याम् । কাঁক্লা । मे. । काकजङ्घायाम् । वै.निघ. ।

ध्मा(ध्वा)ङ्क्षोली । स्त्री । काकोल्याम् । কাঁক্-লা । प.मु. । रा.नि.व.३ ।

ध्मापनम् । क्ली । अग्निसन्धुक्षणे ।

ध्यामम् । क्ली । दमनकवृक्षे । मे. । कत्तृणे । রামকর্পূর । प.मु. । सु.चि.२२श्र. । च.द.सन्नि-पातज्व.चि.अपराजिताधूपे । च.द.वा.व्या.१८श्र-ती-प्रसारणीतैले । वै.निघ.२भ.गुग्गुल्वादिधूपे। तूलके । सु.सू.२५श्र. ।

ध्यामकम् । क्ली । कत्तृणे । রামকর্পূর । प.मु.। च.सू.५श्र. । सु.सू.३८श्र.एलादिः । रोहिषे । वा.सू.१५श्र.हेमा. (श्रभावे उशीरं) । भा.म.४भ. विष.चि. । "पिप्पली ध्यामकं मांसी ।" भा.म.१ भ.ज्व.चि. । [वटवृक्षे । मद.व.५ । चिका. ।

ध्रुवः । पुं । धववृक्षे । ধাওয়া গাছ । र.मा. ।

ध्रुवा । स्त्री । शालपर्ण्याम् । रा.नि.व.४ । मूर्व्वायाम् । मे. ।

ध्वंसः । पुं । मद्यविकाररोगे । लक्षणं यथा—"श्लेष्मप्रसेकः कण्ठास्यशोषः शब्दासहिष्णुता । सन्द्रानिद्राभियोगश्च ज्ञेयं ध्वंसकलक्षणम् ॥" च. ।

ध्वंसी । स्त्री । मानविशेषे, त्रसरेणुपरपर्य्याये मागधमाने । "त्रसरेणुस्तु पर्य्यायनाम्ना ध्वंसी निगद्यते ।" प.प्र.१ख. । पुं (इन्) । गिरिजपीलौ । श.र. ।

ध्वजः । पुं, क्ली । शिश्ने । भा.म.उ. । "ध्वजः पतत्यतो नृणां क्लैब्यं समुपजायते ।" "ध्वजं चिह्ने पताकायां मेहने ।" विश्व. । तालवृक्षे । रा.नि.व.६ ।

ध्वजद्रुमः । पुं । तालवृक्षे । रा.नि.व.६ ।

ध्वजप्रहरणः । पुं । वायौ । श.र. ।

ध्वजभङ्गः । पुं । लिङ्गपातकृतक्लैब्यरोगविशेषे । ধ্বজভঙ্গ রোগ । निदानलक्षणे यथा—"अतिव्यवायशीलो यो न च वाजीक्रियारतः । ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकः । अत्यम्ललवणक्षारविरुद्धाजीर्णभोजनात् । अत्यम्बुपानाद्विषमात् पिष्टान्नगुरुभोजनात् । दधिक्षीरानूपमांससेवनाद्व्याधिकर्षणात् । कन्यानीगमनाच्चापि विद्योनिगमनादपि । दीर्घरोगां चिरोत्सृष्टां तथैव च रजःस्वलां । दुर्गन्धां दुष्टयोनिञ्च तथैव च परिस्रुतां । ईदृशीं प्रमदां मोहात् यो गच्छेत् कामहर्षितः । चतुष्पदादिगमनाच्छेफसश्चाभिघाततः । अधावनाद्वा मेढ्रस्य शस्त्रदन्तनखक्षतात् । काष्ठप्रहारनिष्पेषशूकानाञ्च निषेवणात् । रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते ॥" च. । See क्लैव्यम् ।

ध्वजवृक्षः । पुं । माड़ इति कोङ्कणदेशख्यातवृक्षे । रा.नि.व.६ । [पिं । मे. ।

ध्वजी (इन्) । पुं । मयूरे । रा.नि.व.१६ । स-

ध्वनिग्रहः । पुं । कर्णे । त्रिका. ।

ध्वनिबोधक(न)म् । क्ली । सुगन्धरोहिषतृणे । वै.निघ. । [श्म. । जलपक्षिमात्रे ।

ध्वाङ्क्षः । पुं । काके । बके । मत्स्यादपक्षिणि ।

ध्वान्तवित्तः । पुं । खद्योते । श.र. ।

ध्वान्तशात्रवः । पुं । श्योणाकवृक्षे । श.च. ।

ध्वान्तोन्मेषः । पुं । खद्योते । জনাকি পোকা । त्रिका. ।

न

नः । पुं । रवौ । ए.को. ।

नःक्षुद्रः । त्रि । क्षुद्रनासिके । थान्दा । हे.च. ।

नकुटम् । क्ली । नासिकायाम् । श.मा. ।

नकुलः । पुं । (The bengal mungoose, Viverra ichneumon.) स्वनामख्यातजन्तौ । নেউল । हिं वेजी । मं नेउरा । कं मंगुल । लक्षणं—यः स्थूलपुच्छो रक्तनेत्रो बभ्रुदेहः स नकुलः । शालिहोत्र. । नकुलमांसगुणाः—पिच्छिलं वातघ्नं श्लेष्मपित्तघ्नञ्च । रा.नि.व.१७ । "गुरूष्णस्निग्धमधुरबलोपचयवर्द्धनम् । वृष्यं परं वातहरम्······ ॥" च.सू.२७अ. । [स्ना । रा.नि.व.७ ।

नकुलाढ्या । स्त्री । गन्धनाकुल्याम् । गन्ध रा-

नकुलान्ध्यम् । क्ली । नेत्ररोगभेदे । लक्षणं—"विद्योतते यस्य नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत् । चित्राणि रूपाणि दिवा च पश्येत् स वै विकारो नकुलान्ध्यसंज्ञः ॥" भा.म.४भ. । नकुलान्धो दिवा चित्रं पश्यति न तु निशि । अरुण. ।

नकुलारिः । पुं । विड़ाले । वै.निघ. ।

नकुली । स्त्री । शाल्मलीवृक्षे । वै.निघ. । शङ्खिन्याम् । धरणि. । कुङ्कुमे । हे.च. । नकुलपत्राम् । मांस्यां । জটামাংসী । कुक्कुट्याम् । মুর্গি । मे. ।

नकुलेष्टका (ष्टा) । स्त्री । रास्नायाम् । अम. ।

नक्तकः । पुं । नेत्रपटले । वै.निघ. । कर्पटे । লেকড়া । भ.टी.भ. । [त्रिका. ।

नक्तचारी (इन्) । पुं । पेचके । विड़ाले ।

नक्तञ्चरः । पुं । गुग्गुलौ । গুগ্গুল । पेचके । जटा. । सीमराज्यां । दुन्दुभे । रा.नि.व.२३ ।

नक्तमालः । पुं । वृहत्करञ्जवृक्षे । ডহরকরঞ্জ । रा.नि.व.६ । सु.सू.३८अ.वृहन्मरिचाद्यतैले । सि.यो.उन्मा.चि. ।

नक्तमूलकम् । क्ली । करञ्जमूले । पुं । महाकरञ्जे । वै.निघ. ।

नक्ता । स्त्री । लाङ्गलीक्षुपे । বিষলাঙ্গুলিয়া। रा.नि.व.४ । तृणविशेषे । गुलवास इति लोके । गुणाः—वातला शीता गलगण्डहरी च । अपक्वा स्या अर्शोघ्नी । वै.निघ. ।

नक्तान्धः । त्रि । रात्र्यन्धे । রাতকাণা। रात्र्यान्ध्यस्य लक्षणं यथा—"दिवा पश्यति यः स्वच्छं रात्रौ नैव च पश्यति । नक्तान्ध इति तं विद्यात् विकारं पवनोद्भवम् ॥" ज.द.३०अ. ।

नक्तान्ध्यम् । क्ली । रात्र्यन्धतारोगे । निदा. ।

नक्ताह्वः । पुं । करञ्जवृक्षे । भैष.नै.रो.चि. । "नक्ताह्वबीजवर्त्तिः ।" च.द.व्र.शो.चि. । भा.वा.र.चि.त्रिफलागुग्गुलौ ।

नक्रम् । क्ली । नासिकायाम् । मे. ।

नक्रः । पुं । ग्राहे । वै.निघ. । कुम्भीरे । अम. ।

नक्रराजः (ट्) । पुं । महाशिशुमारे, ग्राहे । হাঙ্গর । त्रिका. । [याम् । श.र. ।

नक्रा । स्त्री । मक्षिकादंशसूच्याम् । नासिका-

नक्राण्डम् । क्ली । कुम्भीराण्डे । च.चि.२अ. ।

नखम् । क्ली, पुं । शरीरोपधातुविशेषे, करजे । নখ। रा.नि.व.१८ । तत् गर्भस्थस्य षष्ठे मासि भवति । सुखबोधः । नखीनामगन्धद्रव्ये । नखी । तैं नखसुचिप्प । च.द.चन्दनाद्यतैले । नखीभेदे । प.सु. । च.सू.५अ. । क्षुद्रनिष्पावे । বর্বটী, ছোট শিম্ । वै.निघ. ।

नखकुट्टः । पुं । नापिते । त्रिका. ।

नखगु(पु)च्छ[ञ्ज]फला । स्त्री । वृत्तनिष्पाविकायाम् । শ্বেত সিম্, শ্বেত বর্বটী । रा.नि.व.७ ।

नखच्छेदनम् । क्ली । नखस्य कर्त्तने । নখকাটা । गुणाः—"पौष्टिकं बल्यमायुष्यं शौचरूपविराजनम् । केशश्मश्रुनखादीनां कर्त्तनं सम्प्रसाधनम् ॥" राज.१प. ।

नखच्छेद्या । स्त्री । मेदायाम् । रा.नि.व.५ ।

नखनामा । पुं । नीलवृक्षे । वै.निघ. ।

नखनिकृन्तनम् । क्ली । नखच्छेदनास्त्रे । নরুন । श.चि. ।

नखनिष्पावः (विका) । पुं,स्त्री । शिम्बीभेदे । ছোট শিম্, শ্বেত বর্বটী । रा.नि.व.७ । See निष्पावी । [रा.नि.व.५ ।

नखपर्णी । स्त्री । वृश्चिकालीक्षुपे । বিছাতি ।

नखपुङ्खी (ष्पी) । स्त्री । स्पृक्कायां । পিড়িং । रा.नि.व.१२ ।

नखपूर्व्विका । स्त्री । शिम्बीधान्यविशेषे । হরিত বর্বটী । रा.नि.व.७ । [च.सू.२०अ. ।

नखभेदः । पुं । वातरोगभेदे । कुलत्थादौ ।

नखरः । पुं । नखे । अम. ।

नखरञ्जकः । पुं । नखरञ्जिनीवृक्षे । মেহেদী গাছ । "तिमिरः कोकदन्ता च विहन्ती नखरञ्जकः ।" वै.द्रव्याभि. ।

नखरञ्ज(ञ्जि)नी । स्त्री (Myrtus communis.) वृक्षविशेषे । মেহেদী গাছ । वै.द्रव्याभि. । नखकृन्तन्यां । নরুন । उइटः ।

नखरायुधः / **नखायुधः** } पुं । नखशस्त्रजन्तुमात्रे । सिंहे । ताम्रचूड़े । व्याघ्रे । रा.नि.व.१९ । "शशकशल्लकीगोधामार्जाराद्याः ।" अचि.२०अ. ।

नखराह्वः । पुं । श्वेतकरवीरवृक्षे । रा.नि.व.१० ।

नखरी । स्त्री । नखीनामगन्धद्रव्ये । श.मा. । लघुशिम्ब्याम् । वै.निघ. । [चि. ।

नखविष्किरः । पुं । नखायुधपक्षिमात्रे । श.

नखवृक्षः । पुं । नीलवृक्षे । रा.नि.व.९ ।

नखशङ्खः । पुं । क्षुद्रशङ्खे । श.र. ।

नखशस्त्रम् । क्ली । नखच्छेदनार्थम् अर्द्धकैशिकीधारायुक्ताष्टाङ्गुलशस्त्रविशेषे । নরুন প্রভৃতি । "वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च ।" सु.सू.८अ. । तस्य फलं द्व्यङ्गुलायामम् एकाङ्गुलविस्तृतम् । सु.टी.ड. । तच्च छेदनभेदनयोः प्रशस्तं नवाङ्गुलम् । तत्राचिः । "वक्रर्जुधारं द्विमुखं नखशस्त्रं नवाङ्गुलं । सूच्यशल्योद्धृतिच्छेदभेदप्रच्छादलेखने ॥" इति ।

नखाङ्कम् । क्ली । नखीनामगन्धद्रव्ये । श.र. । नखक्षते ।

नखाङ्कुरः । पुं । नखे । वै.निघ. ।

नखाङ्गम् । क्ली । नखीनामगन्धद्रव्ये । र.मा. ।

नखाभ्यङ्गः । पुं । नखे तैलमर्द्दने । "तद्विशेषो नखाभ्यङ्गः शिरोनासाक्षि(चि)तापजित् ।" प्रयोगपारिजातः ।

नखाशिः । पुं । पुद्रगत्रे । श.च. ।

नखालुः । पुं । नीलीवृक्षे । रा.नि.व.८ ।

नखायुधी (इन्) । पुं । पेचके । त्रिका. ।

नखी । स्त्री । स्वल्पनखाख्यगन्धद्रव्ये । छोट नखी। "नखं स्वल्पं नखी प्रोक्ता ।" भा. । सा रक्षोघ्नीति राजवल्लभः । नखीमात्रे । "नखी पञ्चविधा प्रोक्ता गन्धाख्या गन्धवत् परैः । काचिद्दरपत्राभा तथोत्पलदलोपमा । काचिदश्वखुराभा च गजकर्णसमा तथा । वराहकर्णसङ्काशा पञ्चमी परिकीर्त्तिता ॥" च.द.टी. । तत्र वराहकर्णाभा न ग्राह्या । सा द्विधा एका शङ्खनखा अन्या शुक्त्याख्या वदरीच्छदा । र.मा. । सा. गुणाः—ग्रहश्लेष्मवातासज्वरकुष्ठघ्नी लघुः उष्णा वर्ण्या शुक्रला स्वादुः व्रणविषालक्ष्मीमुखदौर्गन्ध्यहरी पाके रसे च कटुः । भा. । उष्णा कटुः विषघ्नी कुष्ठकण्डूव्रणघ्नी भूतविद्रावणी च । रा.नि.व.१२ । शुद्धिः यथा—गोविट्काञ्जिककिञ्चसुस्विन्ना मधुपाचिता नखी शुध्यति । सङ्क्षेपात् यथालाभं गोमयादिषु गोमयजले वा पक्त्वा । वृद्धोपदेशेन घृतेन भर्ज्जयित्वा चूर्णीकर्त्तव्या । ततः कुङ्कुमादिगन्धद्रव्येण भावना कार्य्या । सर्व्वेषां गन्धद्रव्याणां गन्धतोयेन प्रक्षालनभावने कृत्वा रौद्रशुष्कं कर्त्तव्यम् । सा.कौ. । च.द. ।

नखीत्रयम् । क्ली । त्रिविधनख्यां । नखी, उत्पलपत्राभा, अश्वखुराभा चेति । च.द.वा.व्या.चि. महाराजप्रसारणीतैले ।

नखीद्वयम् । क्ली । कानागड़, कुरकराणो, इति द्वये । च.द.वा.ज्व.चि. । "विश्वग्रन्थनखीद्वयम् ।"

नगः । पुं । वृक्षे । पर्व्वते । अम. ।

नगकर्णी । स्त्री । श्वेतापराजितायां । वै.निघ. ।

नगगन्धा । स्त्री । रास्नायाम् । वै.निघ. ।

नगजः । पुं । हस्तिनि । च.टी.सा. ।

नगजा । स्त्री । क्षुद्रपाषाणभेदे । रा.नि.व.५ ।

नगजित् । पुं । पाषाणभेदके । रा.नि.व.५ ।

नगणा । स्त्री । पारावतपद्याम् । वनउच्छे वा लताफटकी । र.मा. ।

नगपतिः । पुं । तालवृक्षे । वै.निघ. ।

नगपर्य्यायकर्णी । स्त्री । अपराजितायाम् । वै.निघ. ।

नगभित् । पुं । पाषाणभेदे । पाथरकुचि । रा.नि.व.५ । करञ्जोड़िपाषाणभेदे । वै.निघ. ।

नगभूः । पुं । पाषाणभेदे । रा.नि.व.५ ।

नगभेदनः । पुं । करञ्जोड़िपाषाणभेदे । वै.निघ. । [लिवत् । अर्क.चि. ।

नगमालः । पुं । शालिधान्यभेदे । गुणाः शा-

नगरघातः । पुं । हस्तिनि । व्याकरणम् ।

नगराह्वम् । क्ली । शुण्ठ्याम् । शुँट । रा.नि.व.६ ।

नगरीवकः । पुं । काके । त्रिका. ।

नगरोत्था । स्त्री । नागरमुस्तायां । रा.नि.व.६।

नगरौषधिः । स्त्री । कदलीवृक्षे । श.च. ।

नगवृत्तिकः । पुं । गुड़मज्जनिकायां वृश्चिकाल्यां वा । सु.चि.२०अ. ।

नगवृत्तिका । स्त्री । सल्लकीवृक्षे । सु.चि.१५अ. । कल्प.५अ. ।

नगाटनः । पुं । वानरे । त्रिका. ।

नगाश्रयः । पुं । हस्तिकन्दनामके महाकन्दशाके । रा.नि.व.७ । [पचिपिण । अम. ।

नगौकाः । पुं । सिंहे । मे. । काके । श.च. ।

नग्नहूः । पुं । किण्वे । नानाद्रव्यकृतसुरावीजे । वाखर इति लोके । भ. । [नि.व.१८ ।

नग्निका । स्त्री । अनागतार्त्तवकन्यायाम् । रा.

नटः । पुं । अशोकवृक्षे । रा.नि.व.१०।२३। श्योणाकवृक्षे । अम. । लोध्रवृक्षे । देवनाले । जटा. । क्ली । परिपेलवृक्षे । रा.नि.व.८ ।

नटपत्रिका । स्त्री । वार्त्ताकुवृक्षे । वै.निघ. ।

नटपर्णम् । क्ली । त्वचि । चाम्ड़ा । वै.निघ. ।

नटभूषणम् । क्ली । हरिताले । र.मा. ।

नटमण्डनम् । क्ली । हरितालविशेषे । (गोदन्ता । प.मु. । हरिताले । रा.नि.व.१३ ।

नटसंज्ञकः । पुं । हरिताले । त्रिका. ।

नटी । स्त्री । नलिकानामगन्धद्रव्ये । रा.नि.व. १२ । अशोकवृक्षे । वै.निघ. ।

नड़ः । पुं । नले । नलखागड़ा । रा.नि.व.८ ।

नड़कीयः(प्रायः) । त्रि। नलमयदेशे। हे.च.।

नड़मीनः । पुं । चिलिचिममत्स्ये । अम. ।

नतम् । क्ली । तगरपादिके । तगरपादुका । प.मु.। रा.नि.व.१०। वा.सू.१५अ.भद्रदार्व्वादिः । "भद्रदारु नतं कुष्ठं ।" च.द.सि.यो.यक्ष.चि.शतपुष्पादिलेपे । "शणपुष्पं नतं कुष्ठम् ।" सि.यो. पानीयकल्याणघृते । "स्थिरा नतं हरिद्रे द्वे ।" भा.म.४भ. । "नतवार्त्ताकिनीकुष्ठ...... ।"

नतद्रुमः । पुं । लताशाले । र.मा. ।

नतनाड़िका । स्त्री । प्रहरद्वयात् मध्यरात्रिपर्य्यन्तं काले । वै.निघ. । [अम. ।

नतनासिकः । त्रि । क्षुद्रनासायुक्ते । खाँदा ।

नताङ्गी । स्त्री । कर्कटशृङ्ग्याम् । मद.व.१ ।

नदनुः । पुं । सिंहे । श.मा. ।

नदीकदम्बः (म्बा) । पुं, स्त्री । गोरक्षमुण्ड्यां, महाश्रावणिकायाम् । रा.नि.व.५ ।

नदीकान्तः । पुं। हिज्जलवृक्षे। हिज्जल गाछ। रा.नि.व.८। जलवेतसे । वै.निघ.। सिन्धुवारवृक्षे । मे. ।

नदीकान्ता । स्त्री । काकजङ्घाक्षुपे। रा.नि.व. ४ । क्षुद्रकारवेल्लके । छोट उच्छे । जम्बूवृक्षे । जाम गाछ । मे. ।

नदीकुठेरकः । पुं । नन्दीवृक्षे । रा.नि.व.१२।

नदीकूलप्रियः । पुं । जलवेतसे । जटा. ।

नदीजम् । क्ली । सौवीराञ्जने । पुं । अर्ज्जुनवृक्षे । प.मु. । यावनाले । हिज्जलवृक्षे । रा.नि.व.८ । नदीनिष्पावे । रा.नि.व.१६ । खर्ज्जूरीवृक्षे । वै. निघ. ।

नदीजलम् । क्ली । नद्या जले । नदीर जल । सर्व्वा एव नद्यः प्राङ्मुखगा गुरुजलाः पश्चिममुखगा लघुसलिलाः, देशविशेषगुणानुसारेण गुरुलघुजलाश्च भवन्ति । तथा विन्ध्यान्निर्गत्य पूर्व्वमुखगा वाताटोपं पश्चिममुखगा पित्तश्लेष्मनाशं दक्षिणमुखगा पित्तोद्रेकम् उत्तरमुखगाः पथ्यपाकञ्च कुर्व्वन्ति । हिमवद्विन्ध्यमलयसह्यादिप्रभवा नद्यः शिरोरोगादीन् जनयन्ति । पारियात्रप्रभवाश्च तान् नाशयन्ति । इति देशविशेषान्नदीजलगुणाः । सामान्यनदीजलगुणाः—स्वच्छं लघु पाचनं दीपनं रुच्यं तृष्णाघ्नं पथ्यं मधुरम् ईषदुष्णञ्च । कालभेदान्नदीजलगुणाः—यथा प्रावृट्कालीननदीजलसेवनात् पीनसकफश्वासकासा जायन्ते, शारदीयनदीजलपानं पथ्यं वातकफघ्नञ्च, हैमन्तनदीजलपानं बुद्धिप्रदम्, शिशिरवसन्तकालीननदीजलं सन्तापशमनं तृष्णादाहवमिश्रमप्रशमनं, तथा ग्रीष्मनदीजलं सद्गुणमेव करोति । रा.नि.व.१४ । "तथा प्राच्यङ्गमाश्चान्याः पश्चिमानुगमास्तथा । ससैकता सपाषाणा द्विविधा चाम्बुवाहिनी । एवं चतुर्व्विधा नद्यो वातपित्तकफात्मिकाः ॥" अथ पाषाणनदीगुणाः—"घनविमलशिलानां स्फालनाज्जातफेनं बहलसजलवीचीक्षुब्धसङ्गीभङ्गमम् । ननु लघु च सुशीतं नाति चीणं घनञ्च हरति पवनपित्तं श्लेष्मकृद्वारि सम्यक् ॥" सबालुकनदीगुणाः—"न घनविमलतोयं सैकतायाः प्रवाहो न च भवति लघुत्वं श्लेष्मकृद्धन्ति पित्तम् । भवति मधुरमेवं किञ्चिदुष्णं कषायं भवति पवनकारी शोषमूर्च्छां निहन्ति ॥ गङ्गा सरस्वती शोणो यमुना सरयूः सची । वेणा सरावती नीला उत्तरा पूर्व्ववाहिनी । हिमवत्प्रभवा ह्येता हिमसम्भवशीतलाः । समाः सर्व्वगुणैर्नद्यो वातश्लेष्महरा नृणाम् ॥ आसां नवशतैर्युक्ता गङ्गा प्रोक्ता मनीषिभिः । तथा चर्म्मण्वती वेत्रावती पारावती तथा । क्षिप्रा महानदी पीता मूलकन्या मनस्विनी । शिवती शैवलिन्यश्च सिन्धुयुक्ताः समुद्रगाः । वातपित्तहरं नीरं त्रिदोषघ्नं मतं परम् । श्रमग्लानिहरं वृष्यमुत्तराशानुगामि च ।" इति नद्य उत्तरानुगाः । "तापी तापा च गोखोमी गोमती सलिला मही । सरस्वतीयुता नद्यो नर्म्मदापश्चिमानुगाः । आसां जलं घनं पीतं पित्तघ्नं कफकारणा । वातदोषहरं हृद्यं कण्डूकुष्ठविनाशनम् । स-

हिमाद्रिसमुद्भूता गौतमी पुण्यभावना। आसां शीतं जलं वापि कफवातविकारनुत्। पित्तदं श्रमनं बल्यं मूत्रदोषविकारनुत्। पूर्णा पयस्विनी वेता प्रणीता च वरानना। टोष्णा गोवर्द्धनी याम्या शीतम्नुगता इमाः। कावेरी वीरकान्ता च भीमा चैव पयःस्विनी। विभावरी विशाला च गोविन्दी मदनस्खशा। पार्व्वत्यश्चापरा नद्यो दक्षिणोदिग्गमा इमाः॥" चनि.७अ.।

नदीजा। स्त्री। जलयष्ट्याम्। झिंगूक। वै.निघ.। अग्निमन्थवृक्षे। रा.नि.व.९।

नदीनिष्पावः। पुं। शिम्बीधान्यविशेषे, कटुशिम्बयाम्। मं नदीचेवर्णे। कं तीरे आवरे। गुणाः—तिक्तः कटुः गुरुः रक्तकरः वातकफदः बलः कषायः विषदोषहरश्च। रा.नि.व.१६।

नदीवहलः। पुं। मेषशृङ्ग्याम्। वै.निघ.।

नदीभल्लातकः। पुं। भल्लातकविशेषे, पानीयभल्लातके। प.मु.।

नदीभवः। पुं। चुद्रशङ्खे। वै.निघ.।

नदीमातृकः। पुं। देशभेदे। यो नद्यम्बुभिः पाल्यते। "नद्यम्बुभिर्नताधान्यैः नदीमातृक उच्यते।" रा.नि.व.२।

नदीमाषकम्। क्ली। शाकभेदे। गुणाः—"विषदं गुरु शीतञ्च समभिष्यन्दि चोच्यते।" च.सू.२७अ.। [व.९।

नदीया। स्त्री। अग्निमन्थे। गणिरि। रा.नि.

नदीवटः। पुं। वटीवृक्षे, ह्रस्वपत्रवटवृक्षविशेषे। नदीवट। मं दुंजावरु। कं गालिआल। गुणाः—कषायः मधुरः शीतलः पित्तघ्नः तृष्णादाहश्रमश्वासच्छर्द्दिहरश्च। रा.नि.व.११।

नदीसर्ज्जः। पुं। अर्ज्जुनवृक्षे। रा.नि.व.९।

नदेयी। स्त्री। जलवेतसे। वै.निघ.। भूमिजम्बाम्। श.च.।

नद्यम्। क्ली। कृष्णाञ्जने। वै.निघ.।

नद्याम्रः। पुं। समष्ठीलच्छुपे। मं कोतुम्बा। रा.नि.व.४।२१। गुणाः—कटुः उष्णः रुच्यः सुखशोधनः। दाही दीपनः कफवातघ्नश्च। वै.निघ.।

नद्यावर्त्तः। पुं। मत्स्यभेदे। वै.निघ.।

नध्री। स्त्री। चर्म्मवस्त्र्यां, चर्म्मरज्जौ। श.च.।

नन्दकः। पुं। नन्दीवृक्षे। कुन्दुरौ। भेके। चिका.।

नन्दकिः। स्त्री। पिप्पल्याम्। श.च.।

नन्दगोपिता। स्त्री। रास्नायाम्। श.च.।

नन्दनः। पुं। मधुनिष्पावे। मुकुटशिम्। प.मु.। भेके। श.र.। क्ली। सरलदेवदारौ। रक्ताञ्जने। वै.निघ.।

नन्दनजम्। क्ली। हरिचन्दने। रा.नि.व.१२।

नन्दनविषम्। क्ली। तन्नामकवृक्षस्य त्वक्सारनिर्यासविषे। सु.कल्प.२अ.। See त्वक्सारनिर्यासविषम्।

नन्दा। स्त्री। सुरसायाम्। बाबुईतुलसी। प.मु.। योनिरोगविशेषे। बालस्य तन्नामकमातृकाग्रहे। तया च प्रथमे दिने मासि वर्षे वा बाल आक्रान्तो भवति। तेन च ज्वरादिर्भवति। च.द.।

नन्दा(न्द्या)वर्त्तः। पुं। तगरपुष्पवृक्षे। तगर फुलेर गाछ। र.मा.। मत्स्यविशेषे। गुणाः—नन्दावर्त्तस्तु संग्राही कफपित्तविनाशनः। राज.३प.।

नन्दिकः। पुं। नन्दिवृक्षे। श.र.।

नन्दितरुः (द्रुः)। पुं। धववृक्षे। भा.।

नन्दिनकः। पुं। धववृक्षे। वै.निघ.।

नन्दिनी। स्त्री। जटामांस्याम्। रेणुकायाम्। (रेणूक। रा.नि.व.६। हरीतक्याम्। मद.व.१। नन्दिवृक्षे। प्रियङ्गौ। गुच्छकरञ्जे। शुक्लापामार्गे। वै.निघ.। चन्द्रशूरे। (तोकमारी। भा.।

नन्दिपादपः। पुं। नन्दिवृक्षे। वै.निघ.।

नन्दिवृक्षः। पुं। कलाये। वै.निघ.।

नन्दिवृक्षः। पुं। नन्दिके। मेषशृङ्ग्यां। प.मु.।

नन्दी (इन्)। पुं, स्त्री (न्दी)। नन्दिवृक्षे। वटवृक्षे। अश्वत्थवृक्षे। मे.। गुच्छकरञ्जे। रा.नि.व.९। शुक्लापामार्गे। रा.नि.व.४।

नन्दीकामुकः। पुं। पानीयामलके। वै.निघ.।

नन्दीमुखः। पुं। वंशधान्यविशेषे। दीर्घगोधूमे। वै.निघ.। शकजातीयपक्षिविशेषे। व्रीहिजातिभेदे। सु.सू.४६अ.। गुणाः—"निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः।"

नन्दीमुखा (खी) । स्त्री । शूकशून्ययवे । निद्रायाम् । गोधूमे । वै.निघ. । जलचरपक्षिविशेषे । च.सू.२७अ. । निःशूकगोधूमे । "शुक्रला बृंहणी पथ्या तद्वत् नन्दीमुखा स्मृता ।" भा. ।

नन्दीवरलः । पुं । सागरशृङ्गकमत्स्ये । वै.निघ. ।

नन्दीवर्त्तः । पुं । तगरे । वै.निघ. ।

नन्दीवृक्षः । पुं । अधोमुखपत्रशाखे अश्वत्थविशेषे । गय़া অশ্বথ । प.मु. । कोङ्कणदेशप्रसिद्धे सुगन्धवृक्षविशेषे । তূণ গাছ । हिं वेलियापिपर । तें वद्दिचेट्टु । वा.सू.३५अ.अम्बष्ठादिव. । "नन्दीवृक्षपलाशकक्कुराः ।" सु.सू.३८अ.न्यग्रोधादिव. । गुणाः—"नन्दीवृक्षो लघुः स्वादुः तिक्तस्तुवर उष्णकः । कटुपाकरसो ग्राही विषपित्तकफास्रजित् ॥" भा. । कटुस्तिक्तः शीतः पित्तास्रदाहघ्नः शिरःपीड़াघ्नः कुष्ठघ्नः सुगन्धिः पुष्टिवीर्य्यकरश्च । रा.नि.व.१२ । गाम्भार्य्याम्, गर्द्दभाण्डे वा । सु.सू.३८अ.अम्बष्ठादिव. । मेषशृङ्ग्याम् । र.मा. ।

नपुंसकम् । क्ली, पुं । षण्डपुरुषे । क्लीवे । হিজড়ে । तत्र शुक्रबाहुल्यात् पुमान्, आर्त्तवबाहुल्यात् स्त्री । साम्यादुभयोः नपुंसकमिति कारणम् । नपुंसके जाते गर्भचिह्नं यथा—यस्याः पार्श्वद्वयमुन्नतं पुरस्तान्निर्गतमुदरं प्रागभिहितलक्षणञ्च तस्या नपुंसकमिति विद्यात् । नपुंसकं चतुर्विधम् । यथा—आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा । सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः । सु.शा.२अ. । तेषां लक्षणादिकं तत्तत्शब्दे मृग्यम् ।

नप्तृका । स्त्री । चटकविशेषे । सु.सू.४६अ. । गुड़ूचिकायाम् । वै.निघ. ।

नभम् । क्ली । कमले । रा.नि.व.१० ।

नभः । पुं । श्रावणमासे । श.र. । अम. । (स्) क्ली । आकाशे । पद्मे । अभ्रधातौ । वै.निघ. ।

नभःक्रान्ती (इन्) । पुं । सिंहे । श.मा. ।

नभःसङ्गमः । पुं । पक्षिणि । अम. ।

नभश्चमसः । पुं । चित्रापूपे । मे. ।

नभस्यः । पुं । भाद्रपदे मासि । अम. ।

नभाः । पुं । श्रावणमासि । घ्राणे । विसतन्तौ । मे. । पलितशीर्षे । धरणि. ।

नभोऽम्बुपः । पुं । चातकपक्षिणि । हे.च. ।

नभोरेणुः । पुं । नीहारे । त्रिका. ।

नभोलयः । पुं । धूमे । श.र. ।

नमस्कारी । स्त्री । खदिरिकाशाके, वराहक्रान्तायाम् । বরাক্রান্তা । प.मु. । शुक्लज्जालुकायाम् । रा.नि.व.५ । वा.सू.३५अ.अम्बष्ठादिव. । "अम्बष्ठामधुकं नमस्कारी ।" नीलदूर्व्वायाम् । वै.निघ. ।

नमेरुः । पुं । सुरपुन्नागवृक्षे । সুরপুনাং । छलना । रा.नि.व.१० । सरलदेवदारौ । वै.निघ. । रुद्राक्षे । भूरिप. । [भा. ।

नम्रः (कः) । पुं । वेतसवृक्षे । मद.व.५ ।

नयनम् । क्ली । नेत्रे । रा.नि.व.१८ ।

नयनचन्द्रलौहः । पुं । नेत्ररोगे लौहः । त्रिकटु त्रिफला शृङ्गी शटी रास्ना शुण्ठी द्राक्षा नीलोत्पलं काकोली यष्टिमधुकं बला नागकेशरं बृहती कण्टकारी एषां प्र. २ प. कान्तलौहं १ प. अभ्रं १ प. । आदौ त्रिफलाक्वाथेन तदनु तिलतैलेन अन्ते भृङ्गराजरसेन भावयेत् । वटी वदरास्थिवत् । ত্রিকটু, ত্রিফলা, কাঁকড়াশৃঙ্গী, শটী, রাস্না, শুণ্ঠী, দ্রাক্ষা, নীলোৎপল, কাঁকলা, যষ্টিমধু, বেলেড়া, নাগেশ্বর, বৃহতী, কণ্টিকারী প্রত্যেকে ২ প. কান্তলোহ ১ প. অভ্র ১ প. । অগ্রে ত্রিফলাক্বাথ তৎপরে তিলতৈল এবং ভীমরাজরসে ভাবনা দিবে । বটী কুল-আঁটীর ন্যায় । भैष. ।

नयनचिन्तकः । त्रि । दृष्टिविज्ञानकुशले । भा.नै.रो.चि. ।

नयनप्रसादः । पुं । कतकवृक्षे । वै.निघ. ।

नयनप्लवः । पुं । नेत्रयोरश्रुपूर्णत्वे । मा.नि. ।

नयनबुद्बुदः । पुं । नेत्रबुद्बुदे । "विद्याद्व्यङ्गुलबाहल्यं स्वाङ्गुष्ठोदरसम्मितं । द्व्यङ्गुलं सर्व्वतः सार्द्धं भिषङ्नयनबुद्बुदम् ॥" सु.उ.१अ. ।

नयनशाणाञ्जनम् । क्ली । नेत्ररोगे अञ्जनम् । पिप्पलीतण्डुलं सैन्धवलवणं मरिचं रसाञ्जनं कृष्णाञ्जनं समुद्रफेनः शर्करा पुनर्नवा हरिद्रा रक्तचन्दनं यष्टिमधु तुल्यं हरीतकी मनःशिला नि-

श्वपत्रं रौप्यं फटिकारी शङ्खनाभिः कर्पूरं एषां चूर्णं प्र. समं लौहपात्रे ताम्रखण्डेन मधुना मर्द्दयेत् । পিপুলদানা, সৈন্ধব, মরিচ, রসাঞ্জন, শুর্মা, সমুদ্রফেনা, চিনি, শ্বেতপুন্থা, হরিদ্রা, রক্তচন্দন, যষ্টিমধু, তুঁতে, হরীতকী, মনছাল, নিমপাতা, লোধ, ফট্‌কিরি, শঙ্খনাভি, কর্পূর—সমভাগ সূক্ষ্মচূর্ণ করিয়া লৌহপাত্রে তাম্র খণ্ড দ্বারা মধুর সহিত মর্দ্দন করিবে। भा. ।

नयनापाङ्गः । पुं । नेत्रप्रान्ते । अम. ।

नयनी । स्त्री । कनीनिकायां । श.च. ।

नयनोपान्तः । पुं । अपाङ्गे । रा.नि.व.१८ ।

नयनोर्द्ध्वगरोमराजिः । स्त्री । भ्रुवि । भ्रूः । रा.नि.व.१८ ।

नयनौषधम् । क्ली । श्वेतधातुकाशीषे । हे.च. ।

नरः । पुं । मनुष्ये । नीलवृक्षे । रा.नि.व.९ । क्ली । गन्धद्रव्ये । রামকর্পূর । मे. ।

नरङ्गम् । क्ली । शिश्ने । पुं । वरण्डके । নারাঙ্গা । उणा. । [याम् । श.र. । त्रिका. ।

नरनामिका (नी) । स्त्री । रुग्मुमत्यां स्त्रि-

नरप्रियः । पुं । नीलीवृक्षे । रा.नि.व.९ । पारावते । वै.निघ. । [याम् । हे.च. ।

नरमालि(नि)नी । स्त्री । रुग्मुमत्यां स्त्रि-

नरमूत्रम् । क्ली । मानुषमूत्रे । মানুষের মূত্র । गुणाः—"आमघ्नं क्रिमिविषघ्नं तिक्तोष्णं लवणं रूक्षं भूतघ्नं त्वग्दोषहरं वातहरञ्च । रा.नि.व.१५। "मानुषं क्षारकटुकं तिक्तोष्णं लघु चोच्यते। चक्षूरोगहरं बल्यं दीपनं कफनाशनम् ॥" "अप्रसूताया घनं मूत्रं प्रसूताया द्रवं लघु । न किं गुणविशेषः स्यात् समता पाकवीर्य्ययोः ॥" अत्रि.९अ. ।

नरवल्लभः । पुं । कपोते । वै.निघ. ।

नरवृक्षः । पुं । नीलीवृक्षे । रा.नि.व.९ ।

नरषण्डः । पुं । गर्भविकारजन्यपुरुषभेदे । পুংনপুংসক । यथा—'मन्दाल्पवीजाल्पबलावहर्षौ क्लीवे च हेतुर्विकृतद्वयस्य ।" च.शा.२अ. ।

नरसादरः । पुं । नरसारे । নিষাদল । भैष. महाशङ्खद्रावके ।

नरसारः । पुं । निशादल इति ख्याते द्रव्ये । हिं नौसादर । तत्करणविधिः—"चौद्रं वा माहिषं गव्यं पुरीषं भस्मतां गतं । क्षारपाकविधानेन नृसारसिद्धिरुच्यते ॥" गुणाः—"पटुप्रकृतिशीलानां स्रावणः शोधनक्षमः । यकृद्दोषे ज्वरे लीह्नि शिरःशूलेऽर्व्वुदादिषु । स्तनरोगे रक्तपित्ते कासे भग्नामये तथा । योनिव्यापत्सु च ज्ञेयो नरसारः सुखावहः ॥" र.सा.सं. । तच्छुद्धिः—"नरसारो भवेच्छुद्धस्सूर्णतोये विपाचितः । दोलायन्त्रेण यत्नेन भिषग्भिर्योगसिद्धये ॥" अत्रि. । सा.कौ. ।

नरसिंहरूपज्वरः । पुं । विषमज्वरभेदे । "विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते । तेनार्द्धं शीतलं देहमर्द्धमुष्णं प्रजायते ॥" निदा. ।

नरहरिः । पुं । राजनिघण्टुकारे ।

नराधिपः । पुं । महारग्वधवृक्षे । सु.चि.३७अ. ।

नरी । स्त्री । मानुष्याम् । जटा. । त्वचायाम् । চামড়া । वै.निघ. ।

नरेन्द्रः । पुं । आरग्वधे । काष्टागुरुवृक्षे । सु. चि.१६अ. । विषवैद्ये । मे. । राजिके । त्रिका. ।

नरेन्द्रद्रुमः । पुं । आरग्वधवृक्षे । সোন্দাল গাছ । भैष.कुष्ठ-चि. । "पूतीकार्कस्नुक्नरेन्द्रद्रुमाणाम् ।" च.द.कुष्ठ-चि. ।

नरेन्द्राह्वः । पुं, क्ली । काष्ठागुरुणि । वै.निघ. ।

नर्कुटकम् । क्ली । नासिकायाम् । हे.च. ।

नर्त्तकः । पुं । मयूरे । करिणि । हे.च. । देवनले । श.र. । [रा.नि.व.१२ ।

नर्त्तका (की) । स्त्री । नलिकानामगन्धद्रव्ये ।

नर्त्तनप्रियः । पुं । मयूरे । वै.निघ. ।

नर्त्तापहारकः । पुं । धूलीकदम्बे । वै.निघ. ।

नर्म्मटः । पुं । खर्परे । খাপর । हारा. ।

नर्म्मठः । पुं । कुचाग्रे । श.र. । मैथुने । वै.निघ. ।

नर्म्मदा । स्त्री । भारतवर्षीयनदीविशेषे । सा विन्ध्यपादवाहिनी । तज्जलगुणाः—लघु शीतलं पथ्यं कफपित्तप्रकोपकरं सर्व्वरोगघ्नं रूक्षं मधुरञ्च । रा.नि.व.१४ । सृक्कायाम् । हे.च. ।

नर्म्मरा । स्त्री । सरलायाम् । निष्फलायाम् । भस्त्रायाम् । मे. ।

नलः । पुं । (Phragmites karka. Syn. Arundo karka.) स्वनामख्याततृणे । दूर्व्वाकाराङ्कुरोऽन्तःशुषिरः स्वनामख्यातः । सु.सू.३८अ.ड. । नल । मं देवनलु । कं देवनाल । तें किक्किशगड्डि । अयं द्विविधः क्षुद्रदीर्घभेदात् । तयोः प्रथमः शीतकषायः मधुरः रुचिकरः रक्तपित्तघ्नः दीपनः बलदश्च । देवनलः मधुरः वृष्यः ईषत्कषायः वीर्य्याधिकः रसकर्म्मणि प्रशस्तश्च । रा.नि.व.८ । वा.सू.१५अ.वीरतरादिः । "वृक्षादनीनलकुशद्वयगुण्ठगुन्द्राः ।" खग्गड़े । खागड़ा । सु.सू.३८अ.तृणपञ्चमूले । तालीशपत्रे । वै.निघ. वा.व्या.दशमूलादितैले । कदम्बवृक्षे । मातुलुङ्गवृक्षे । देवधान्ये । सुगन्धे । वै.निघ. । क्ली । पद्मे । रा.नि.व.१० ।

नलकम् । क्ली । शाखास्थनि । हे.च. । पृष्ठास्थनि । পিঠের হাড় । रा.नि.व.१८ । पद्माक्षे । पद्मबीज । वै.निघ. । [भा.म.३भ. ।

नलकास्थि । क्ली । नाड़ीवत्सरन्ध्रास्थिपर्व्वसु ।

नलकिनी । स्त्री । जानुदेशे । जान्वस्थनि । जङ्घायाम् । हे.च. ।

नलकीलः । पुं । जानुदेशे । हे.च. ।

नलदम् । क्ली । उशीरवत्पीतक्ष्वविलामज्जके । उशीरभेदे । भा.रेवतीग.चि. । "पलङ्कषायं नलदे ।" प्रलापकज्व.चि. । "नलदतुरगगन्धा ।" पुष्परसे । उशीरे । मे. । वै.निघ.दाह.चि.रसादिगुड्याम् । वा.व्या.चि.दशमूलादितैले । जटामांस्यां । सु.सू.३८अ. । च.सू.४अ.अञ्जनादिः । वै. निघ.र.पि.चि.चन्दनादिचूर्णे । च.द.यक्ष्म.चि. लवङ्गाद्यचूर्णे । वा.व्या.एलादितैले ।

नलदम्बुः । पुं । निम्बवृक्षे । भूरिप्र. ।

नलदा । स्त्री । जटामांस्याम् । रा.नि.व.१२ । उशीरे । परागे । वै.निघ. ।

नलदाम्बु । क्ली । उशीरजले । वै.निघ. ।

नलपट्टिका । स्त्री । नलनिर्म्मितपट्टिकायाम् । নলের পাটী, চেটা, মাদুর । हारा. ।

नलमीनः । पुं । चिलिचिममत्स्ये । अम. । गुणः—कफकरत्वम् । अत्रि.२२अ. ।

नलमूलम् । क्ली । वीरणमूले । বেণার মূল । सु.सू.३६अ. ।

नलिकः । पुं । नले । वै.निघ. ।

नलिका । स्त्री । इन्दीवरालतायाम् । रा.नि.व.३ । सि.यो.यक्ष्म.चि.चन्दनादितैले । नाड़ीशाके । वै.निघ. । स्वनामख्यातसुगन्धवल्कले । सा च उत्तरापथे तन्नाम्ना प्रसिद्धा सुगन्धा प्रबालाकृतिः प्रबाली इति क्वचित् प्रसिद्धा, पवारी इति च क्वचित् ख्याता । নালুকা । मं नलिकाजाई । कं वेतललिके । तें पक्किसुक, सुगन्धिद्रव्यमु । लक्षणम्—"मध्ये सारविहीना या सरला कीटवर्ज्जिता । नलिका सा भवेद्भद्रा··· ॥" भैष. । गुणाः—तिक्ता कटुका तीक्ष्णा मधुरा हिमा क्रमिघ्नी वातोदरघ्नी अर्शःशूलघ्नी मलशोधनी च । रा.नि. व.१२ । "नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत् । कृच्छ्राश्मवाततृष्णास्रकुष्ठकण्डूज्वरापहा ॥" भा. । तन्नामके उदररोगशमनार्थयन्त्रविशेषे । लक्षणं यथा—"द्विद्वारा नलिका पिच्छनलिका वा दकोदरे ।" अत्रि. ।

नलितः । पुं । तिक्तपट्टशाके । তেতো পাট বা নালিতা পাতা । तत्पत्रं तिक्तं पित्तघ्नं शुक्रलञ्च । राज. ।

नलिनः । पुं । सारसपक्षिणि । अम. । पानीयामलके । श.च. । क्ली । कमले । रा.नि.व.१० । श्वेतसौगन्धिके । শ্বেত শুন্দি । च.सू.४अ. । नील्याम् । जले । हे.च. । पद्मकिञ्जल्के । च.सू.३अ. ।

नलिनकेशरम् । क्ली । पद्मकेशरे । सु.सू.३८ अ.अञ्जनादिः ।

नलिनी । स्त्री । पद्मिन्याम् । পদ্মের ঝাড় । रा.नि.व.१० । नलिकायाम् । নালুকা । वै. निघ.२भ.अर्शः-चि.विड़ङ्गादिचूर्णलेहे । नारिकेलासवे । चिका. । [टी । रा.नि.व.१० ।

नलिनीरुहम् । क्ली । मृणाले । পদ্মের ডাঁ-

नली । स्त्री । नलिकानामके गन्धद्रव्ये । रा.नि. व.१२ । मनःशिलायां । विश्व. ।

नलुका । स्त्री । नलिकायाम् । নালুকা । जातीवृक्षे । वै.निघ. ।

नलोत्तमः । पुं । देवनले । रा.नि.व.८ ।

नल्वकी (इन्) । पुं । नले । नल । भैष.शी. व्या.चि. । [१ख. । वा.उ.३८अ. ।

नल्वण: । पुं । द्रोणपरिमाणे । १६ शे. । प.प्र.

नल्ववर्त्मगा । स्त्री । काकनासायां । श.च. ।

नव: । त्रि । नूतने । पुं । रक्तपुनर्नवायाम् । रा.नि.व.५ ।

नवकार्षिकगुग्गुलु: । पुं । भगन्दरे हित: । "त्रिफलापुरकृष्णाभिस्त्रिपञ्चैकांशयोजिता । गुड़िका शोथगुल्मार्शोभगन्दरवतां हिता ।" रस.र.। भा.।

नवज्वरहरी(वटी) । स्त्री । नवज्वरे रस: । पारद-गन्धक-विष-त्रिकटु-त्रिफला-शुद्धदन्तीवीजानि प्र. समानि । द्रोणपुष्पीरसे मर्द्दनं गजपुटे पाकश्च । পারা, গন্ধক, বিষ, শুঁট, পিপুল, মরিচ, হরিতকী, বহেড়া, আমলা, শুদ্ধ দন্তীবীজ প্রত্যেকে সমাংশ, হলকষার রসে মর্দ্দন ও গজপুটে পাক করিবে। মাত্রা মাষবৎ। भा. ।

नवज्वरेभसिंह: । पुं । नवज्वरे रस: । "शुद्धसूतं तथा गन्धं लौहं ताम्रञ्च सीसकम् । मरिचं पिप्पली विश्वं समभागं विचूर्णयेत् । अर्द्धभागं विषं दद्यात् मर्द्दयेद्वासरद्वयम् ।" পারা, গন্ধক, লৌহ, তামা,সীষ, মরিচ, পিপুল, শুঁট প্রত্যেকে ১ তো. বিষ ।০ তো. জল দিয়া ২ দিন মাড়িবে । र.सा.सं. ।

नवदलम् । क्ली । कोमलपत्रे । हड्डचन्द्र: । पद्मकेशरसमीपस्थदले । अम. ।

नवधान्यम् । क्ली। प्रत्यग्रधान्ये । নূতন ধান্য । गुणा:—तच्च मालिन्यात् स्रोतसां स्नुतिरूपश्लेष्माणं करोति गुरु च । वा.सू.६अ. । चरक: । "चणास्तु यवगोधूमतिलमाषा नवा हिता: ।" रा.नि.व.१६।

नवनी(तम्) । स्त्री,क्ली। दुग्धजसारे। টাট্কা ননি, মাখন্ । तन्नानादुग्धजत्वात् दशविधं । गव्यं माहिषमाजमाविकं गर्द्दभजमौष्ट्रम् ऐड़कं हास्तिकं मानुषमश्वीजञ्चेति। विशेषा: स्वस्वपर्य्याये द्रष्टव्या: । सा. गुणा:—शीतं वर्णदं बलदं मधुरं वृष्यं संग्राहकं वातघ्नं कफघ्नं रुच्यं सर्व्वाङ्गशूलघ्नं कासघ्नं श्रमघ्नं सुखजनकं कान्तिप्रदं पुष्टिकरं चक्षुष्यञ्च । गव्यं नवनीतं—सर्व्वदोषघ्नम् । नवोद्धृतं—शीतलं रुच्यं मधुरं वृष्यं वातघ्नं कासघ्नं क्रमिहरं कफजनकं संग्राहि शूलघ्नं । दधिजं नवनीतं—बलपुष्टिकरं तृष्णासन्तापहरं चक्षुष्यं श्रमघ्नं तर्पणं पित्तघ्नञ्च। तथा—"एकाहाद्युषितं प्रोक्तमुत्तरोत्तरगन्धदम् । अहृद्यं सर्व्वरोगाढ्यं दधिजं तद्घृतं सममिति ॥" रा.नि.व.१५ । (नीतम्) कुन्दुरुखोटी । भैष.ग्रह.चि.बृहज्जीरकाद्यमोदके ।

नवनीतकम् । क्ली, पुं । गन्धके । আমলাসার গন্ধক । र.सा.सं. ।

नवनीतजम् । क्ली । घृते । रा.नि.व.१५ ।

नवनीताह्वयगन्ध: । पुं । আমলাসার, বা লাউয়া গন্ধক ইতি লোকে খ্যাতে গন্ধকে । र.सा. सं.नेत्राग्निरसे । [निघ. ।

नवनीतोद्भवम् । क्ली । दधनि । घृते । वै.

नवपल्लव: । पुं । कोमलपल्लवे । भूरिप्र. ।

नवफलिका । स्त्री । अचिरजातरजस्कायां स्त्रियि । मे. ।

नवमल्लिका (ल्ली) (मालिका) । स्त्री । (J. Zambac floribus multiplicatis.) स्वनामख्याते पुष्पवृक्षविशेषे । सा ग्रीष्मोद्भवा । वासन्ती नेपाली सेउती नेवारी इति लोके । বাসন্তী গাছ । मं रोमाली । कं विरवन्तिभेद । बम्. मोगरा । गुणा:—अतिशीता सुरभि: सर्व्वरोगघ्नी च । रा.नि.व.१० ।

नवयौवना । स्त्री । युवत्याम् । हारा. ।

नवरत्नम् । क्ली । वज्र-मौक्तिक-माणिक्य-नील-मरकत-गोमेद-पद्मराग-वैदुर्य्य-प्रवालेषु नवमणिषु। प.मु. । तद्दैवतानि सूर्य्यादय: । तद्धारणविधि:—"वैदूर्य्यं धारयेत् सूर्य्ये नीलञ्च मृगलाञ्छने । भावनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे । गुरौ मुक्ता भृगौ वज्रं शनौ नीलं विदुर्बुधा: ॥" दीपिका । तच्छुद्धि:—"विद्रुमं क्षारवर्गेण तार्क्ष्यं गोदुग्धतस्तथा । पुष्परागञ्च सन्धानै: कुलत्थक्वाथसंयुतै: । तण्डुलीयजलैर्व्वज्रं नीलं नीलीरसेन वा । रोचनाभिश्च गोमेदं वैदूर्य्यं त्रिफलाजलै: ॥" मारणं यथा—"लकुचक्षारसम्पिष्टै: शिलागन्धकतालकै: । वज्रं विनान्यरत्नानि म्रियन्तेऽष्टपुटै: खलु ॥" र. चि.७अ. । [त्नदैवते । See नवरत्नम् ।

नवरत्नदेवता । त्रि । वज्रादिरत्नानामधिष्ठा-

नवपल्लवम् । क्ली । दारुहरिद्रायाम् । रा.नि.व. १२ ।

नवविधानम् । क्ली । सूपशाकव्यञ्जनमिष्टौदनीपदंशवितर्दिशस्म्यानरोचनेषु । वै.निघ. ।

नवशस्यम् । क्ली । नवीनधान्ये । वै.निघ. ।

नवसागरम् । क्ली । वज्रक्षारे । वै.निघ.२भ. क्षय.चि.चयकेसरिरसे । [भ. ।

नवसूतिका । त्रि । नवप्रसूतायां । वा.उ.३३

नवाङ्गम् । क्ली । वातपित्तज्वरे विश्वादिनवद्रव्यजकषाये । "विश्वामृताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः । कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम् ॥" शुँठ, गुलञ्च, मुता, चिराता, शालपानि, चाकुलिया, बृहती, कण्टिकारी, गोक्षुर । सा.कौ. । अन्यत्—त्रिकटुत्रिफलाचित्रकमुस्तविडङ्गकृतकषाये । च.द.द्वन्द्व.ज्व.चि. ।

नवान्नम् । क्ली । नूतनान्ने । See अन्नम् ।

नवाम्बरम् । क्ली । नूतनवस्त्रे । अम. ।

नवायसचूर्णम् (लौहम्) । क्ली । पाण्डुरोगे । "त्र्यूषणत्रिफलामुस्तविड़ङ्गचित्रकाः समाः । नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा । भक्षयेत् पाण्डुहृद्रोगकुष्ठार्शःकामलापहम् । शुँठ, पिपुल, मरिच, त्रिफला, मुता, विड़ङ्ग, चिता प्रत्येके १ तो. जारितलौह ९ तो. मात्रा १ मा. । सा.कौ. ।

नवोद्धृतम् । क्ली । सद्योजातनवनीते । अम. ।

नव्यः । पुं । रक्तपुनर्नवायाम् । रा.नि.व.५ ।

नशाकः । पुं। काकसदृशपक्षिविशेषे । वै.निघ.। काकभेदे । उणा. । [च. ।

नष्टप्रसूतिका । स्त्री । मृतवत्सायाम् । हे.

नष्टचेष्टता । स्त्री । मूर्च्छायाम् । [त्रिका. ।

नस् (सा) । स्त्री । नासिकायाम् । नाड्याम् ।

नसखलर्कः । पुं । मत्स्यजातिज्वरे । गजवै. ।

नस्तः । पुं । नासिकायाम् । भा.म.४भ.शि.रो. चि. । "सर्पिर्व्वा नस्ततस्तयोः ।" क्ली । नस्ये । र. मा. ।

नस्तकर्म्म । क्ली । प्रतिमर्षावपीड़नस्यप्रधमनशिरोविरेचनेषु पञ्चसु । "नावनञ्चावपीड़श्च ध्मानं धूम एव च । प्रतिमर्षश्च विज्ञेयं नस्तकर्म्म च पञ्चधा ॥" च.सिद्धिस्था. । [नेषु । च.सू.१अ. ।

नस्तप्रच्छर्द्दनम् । क्ली । पञ्चशिरोविरेच-

नस्तो(स्यो)तः । पुं । सनासारज्जुवृषे । नाकफोँड़ा बलद । अ.टी.र. ।

नस्यम् । क्ली । नासाग्राह्यौषधे । नास, नश्य । नासयोर्न्यस्य आक्रम्यते यत् । "नस्यं तत्कथ्यते धीरैः नासाग्राह्यं यदौषधम् ॥" नस्यं रेचनस्नेहनभेदेन द्विविधम् । तयो रेचनं कर्षणं, स्नेहनं बृंहणञ्च । तस्य कालः—"कफपित्तानिलध्वंसे पूर्व्वे मध्येऽपराह्णिके । दिनस्य गृह्यते नस्यं रात्री वानुत्कृष्टे गदे ॥" तत्र नस्यं प्रतिमर्षावपीड़नस्यप्रधमनशिरोविरेचनभेदेन पञ्चधा । ऊर्द्धजत्रुादिरोगे अरोचकादौ च वैरेचनिकं नस्यं हितम् । भीरुस्त्रीकृशबालानां स्नेहननस्यं देयम् । बालरोगादौ अवपीड़नम् अत्युत्कटदोषादौ प्रधमनम् । स्नेहिकनस्यमानम् अष्टबिन्दवः । निषेधकालः—"नस्यं त्यजेद्भोजनान्ते दुर्द्दिने चावतर्पितः । तथा नवप्रतिश्यायी गर्भिणी गरदूषितः । अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः । क्रुद्धः शोकाभिभूतश्च तृषार्त्तो वृद्धबालकौ । वेगावधारी श्रान्तश्च स्नातुकामश्च वर्ज्जयेत् ॥" अष्टवर्षात् पूर्व्वं अशीतेरुर्द्ध्वं च न देयम् । भा. । [सर्पे । वै.निघ. ।

नहुषम् । क्ली । तगरपुष्पे । रा.नि.व.१०। पुं ।

नहुषाख्यम् । क्ली। तगरपुष्पे। रा.नि.व.१०।

नक्षत्रम् । क्ली । अश्विन्यादिसप्तविंशतितारकासु । सु.सू.५अ. । मौक्तिके । रा.नि.व.१३ ।

नक्षत्रकान्तिविस्तारः । पुं । धवलयावनालाख्यशिम्बीधान्यभेदे । रा.नि.व.१६ । [निघ. ।

नक्षत्रमालिनी । स्त्री । जातीपुष्पवृक्षे । वै.

नक्षत्रेशः । पुं। कर्पूरे । अम.। शशी । त्रिका.। खण्डे । हे.च. ।

नाकनः । पुं । वंशधान्यविशेषे । प.मु.।

नाकुः । पुं । वल्मीकमृत्तिकायाम् । उइमाटि । भैष.अा.वा.चि.स्वेदे ।

नाकुली । स्त्री । (Vanda roxburghii.) A variety of rásná. खनामख्यातमहाकन्द-

मावविशेषे, रास्नाद्वये । রাস্না,গন্ধরাস্না । प.मु.। नाकुली नाथि विषमुंगरौति च लोके। हिं चन्द्रा। तें सर्पाक्षिचेट्टु,पत्रचेट्टु। नाकुली द्विधा—नाकुली गन्धनाकुली च। गुणा:—नाकुलीयुगलं तिक्तं कटूष्णं त्रिदोषघ्नं नानाविषघ्नञ्च । द्वितीया तु किञ्चित्कंदा । रा.नि.व.७ । यवतिक्तालतायाम् । श्वेतकण्टकार्य्याम् । रा.नि.व.४ । चव्ये । प.मु । मरिचे । मात्र्यलिङ्गवृक्षे । मे. ।

नाकुलीद्वयम् । क्ली । गन्धरास्नायां रास्नायाञ्च । सि.यो.उन्मा.चि.महापैशाचघृते । "वयस्था नाकुलीद्वयम् ।"

नाग: । पुं, क्ली (गं) । सौषधातौ । वत्सनाभे । কাটবিষ । नागकेशरवृक्षे । प.मु. । वङ्गे । अर्द्धवायौ । नागवल्लायाम् । मेदायाम् । करिदन्ते । मुस्तके । सुरपुन्नागवृक्षे। रक्ताभके । मे.। हस्तिनि । नागवल्लीलतायाम् । च.टी.भ. । सि.यो.समशर्करचूर्णे । भैष.क्ष.पि.चि.पिप्पलीखण्डे। सर्पे । निक्ता.। बीजद्रुमे । অসন বৃক্ষ । रा.नि.व.२३ ।

नागकन्द: । पुं । हस्तिकन्दाख्यमहाकन्दशाके । रा.नि.व.७ ।

नागकर्ण: । पुं । रक्तैरण्डे । रा.नि.व.८ ।

नागकर्णी । स्त्री । आखुकर्णीलतायाम् । रा. नि.व.३ । श्वेतापराजितायाम् । श.चि. ।

नागकिञ्जल्कम् । क्ली । नागकेशरपुष्पे । रा. नि.व.८ ।

नागकुमारिका (री) । स्त्री । गुड़्च्याम् । रा.नि.व.३ । मञ्जिष्ठायाम् । रा.नि.व.६ ।

नागकुसुमम् । क्ली। नागकेशरपुष्पे । वै.निघ. २भ.ज्व.चि.चन्दनबलातैले ।

नागकृष्णा । स्त्री । गजपिप्पल्याम् । वै.निघ.।

नागकेश(स)र: (क:) । पुं । (Mesuaferrea.) स्वनामख्यातपुष्पवृक्षे । নাগেশ্বর চাঁপা ফুলের গাছ । हिं कावावचिनी । तें नागकेसरालु । ता. नांगल । वम्. नागचम्प । गुणा:—दीपन: पाचन: आमपाचन: अग्निमान्द्यकरश्च । तत्कुसुमं बस्तिवातघ्नं कण्ठशिरोरुजाघ्नञ्च । रा. नि.व.६ । "नागपुष्पङ्कषायोष्णं रुक्षं लघ्वामपाचनम्। ज्वरकण्डूतृषास्वेदच्छर्द्दिहृल्लासनाशनम् । दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥" भा.। "कीटादिकेन रहितमभिनवमिह केवलं ग्राह्यम् ।" भैष. । [नागदमन्यां । নাগদনা । वै.निघ ।

नागगन्धा । स्त्री । नाकुलीकन्दे । रा.नि.व.७

नागगर्भम् । क्ली । सिन्दूरे । रा.नि.व.१३ ।

नागचम्पक: । पुं । वनचम्पकवृक्षे । নাগেশ্বর চাঁপা, বুনো চাঁপার গাছ । रा.नि.व.१० ।

नागच्छत्र: (त्रा) । पुं, स्त्री । नागदन्त्याम् । रा.नि.व.५ । (त्रा) नागवल्ल्याम् । वै.निघ. ।

नागजम् । क्ली। सिन्दूरे । प.मु.। वङ्गे । हे.च.।

नागजिह्वा । स्त्री । अनन्तायां । অনন্তমূল । भैष वा.व्या.चि. । र.मा. । मन:शिलायाम् । रा. नि.व.१३ ।

नागजिह्विका । स्त्री। मन:शिलायां । प.मु.।

नागजीवनम् । क्ली । वङ्गे । हे.च. ।

नागजीवनशत्रु: । पुं। हरिताले । वै.निघ.।

नागतुम्बी । स्त्री । तुम्ब्याम् । वै.निघ. ।

नागदन्त: (क:) । पुं । हस्तिदन्ते । मे. ।

नागदन्तिका (न्ती) । स्त्री । महाराष्ट्रकर्णाटयो: स्वनामख्यातमहाक्षुपे । হাতিশুঁড় । गुणा:—कटु: तिक्ता रुचा वातकफघ्नी विषघ्नी मेधाकरी पाचनी गुल्मशूलोदरघ्नी च । रा.नि.व. ५ । स्थूलमूलदन्त्याम् । च.द. । भैष.ना.व्र.चि. । सु.चि.१७अ. । च.वि.८अ. । (का) वृश्चिकाल्यां । বিছাতি । र.मा. ।

नागदमनी । स्त्री । (Artemisia vulgaris. Syn. A. ludica.) Indian worm wood. स्वनामख्यातक्षुपे। নাগদনা । हिं नागदुनी, नागदवन । तें ईश्वरिचेट्टु, दरणम । ता. माचिपत्री । वम्. दवणा । नेपाले तितापात । गुणा:—"बलामोटा कटुस्तिक्ता लघु: पित्तकफापहा । मूत्रकृच्छ्रव्रणान् रक्षो नाशयेज्जालगर्द्दभम् । सर्व्वग्रहप्रशमनी विशेषविषनाशिनी । जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा ॥" भा. । त्रिदोषघ्नी तीक्ष्णोष्णा कटु: तिक्ता उदराध्मानघ्नी कोष्ठशोधनी च । रा.नि.व.५। वन्ध्याकर्कोटक्याम् । वै.निघ. । [भैष.तम्रराजतैले । पर्ण्यं । পাণ ।

नागदलम् । क्ली । नागदमन्यां । নাগদনা ।

नागदलोपमः । पुं । परुषकवृक्षे । পরুষ ফল বা ফলসা গাছ । प.मु. । [भैरवरसे ।

नागदा । स्त्री । हरीतक्यां । र.सा.सं.सच्छन्द-

नागद्रुः । पुं । वृक्षविशेषे । তেকাঁটা সিজু গাছ । वम्. गेरचिकाड़ा । श.च. ।

नागनामकम् । क्ली । सीसके । भा. ।

नागनामा (न्) । पुं । श्वेततुलसीवृक्षे । कृष्ण-तुलसीवृक्षे । वै.निघ. । [रा.नि.व.७ ।

नागपत्नी । स्त्री । लक्ष्मणाकन्दे । লক্ষ্মণামূল ।

नागपत्रम् । क्ली । ताम्बूलदले । পাণ । वै.निघ.श्वास-चि.त्रिकटुवटी ।

नागपत्रा । स्त्री । नागदमन्याम् । भा. ।

नागपत्री । स्त्री । नागदमन्याम् । वै.निघ. ।

नागपर्णी । स्त्री । नागवल्लीलतायाम् । वै. निघ. ।

नागपर्य्यायकर्णी । स्त्री । श्वेतापराजिता-याम् । रा.नि.व.३ । [नायाम् । वै.निघ. ।

नागपुटभावना । स्त्री । षोड़शपलेन भाव-

नागपुरगम् । क्ली । सीसधातौ । रा.नि.व.१३ ।

नागपुरीषच्छत्रम् । क्ली । गजपुरीषजाते छत्राके । वा.उ.३७अ. ।

नागपुष्पः । पुं । पुन्नागवृक्षे । मे. । नागकेशर-वृक्षे । प.मु. । नागकेसरपुष्पसमपुष्पे महातरौ । सु.सू.३८अ.एलादि. । क्ली । नागकेसरपुष्पे । च.द.र.पि.चि.कामदेवघृते । सु.कल्प.५अ. । भा.फ-रङ्गरोगे । च.चि.३अ. । नागचम्पके । मे. ।

नागपुष्पकः । पुं । कपित्थवृक्षे । स्वर्णयूथिका-याम् । कुष्माण्डे । रा.नि.व.२३ । पुन्नागवृक्षे । नाग-केसरवृक्षे । वै.निघ. । [रा.नि.व.७ ।

नागपुष्पफला । स्त्री । कुष्माण्डीलतायाम् ।

नागपुष्पा । स्त्री । नागदमन्याम् । मनःशिला-याम् । वै.निघ. । [नि.व.१० ।

नागपुष्पिका । स्त्री । स्वर्णयूथिकायां । रा.

नागपुष्पी । स्त्री । नागदमन्याम् । भा. । स्व-र्णयूथिकायाम् । रा.नि.व.१० । पुष्पवृक्षविशेषे । गुणाः—"नागिनी रेचनी तिक्ता तीक्ष्णोष्णा कफ-पित्तनुत् । विनिहन्ति विषं शूलं योनिदोषवमि-क्रिमीन् ॥" भा.अर्क.चि. ।

नागफणः । पुं । (Opuntia Dillenii. Syn. Cactus Indicus.) वृक्षविशेषे । ফ-ণিমনসা । तें ता. नागदलि ।

नागफलः । पुं । पटोले । रा.नि.व.३ । कटु-पटोले । वै.निघ. । [अ.सा.चि.कुङ्कुमवटी ।

नागफेनम् । क्ली । अहिफेने । वै.निघ.२भ.

नागवधूप्रियः । पुं । सल्लकीनिर्यासे । धूना । वै.निघ. । [त्थवृक्षे । श.च. ।

नागबन्धुः । पुं । उदुम्बरवृक्षे । श.चि. । अश्व-

नागबला । स्त्री । (Sida spinosa. Syn. Sida alba.) गोरक्षतण्डुलायाम् । গোরক্ষ-চাকুলিয়া । हिं गुलशकरी ककही । च.द. यक्ष्म.चि.शृङ्ग्याद्यचूर्णे । च.चि.१अ.नागरसायने । सा.कौ.महाकामेश्वरमोदके । नागानामिव बलं यस्याः सा । सि.यो.यक्ष्म.चि.बलाद्यघृते । भा.मू. कृ.चि.नागबलातैले । योगरत्न.उ.ख. । गुणाः— मधुराम्ला कषाया उष्णा गुरुः कण्डूकुष्ठवातव्रणपि-त्तघ्नी च । स्निग्धा आयुष्या ग्राहिणी वृष्या मूत्रकृ-च्छ्रक्षीणक्षयरोगेषु हिता च । भा. । मधुराम्ला कषाया उष्णा गुरुः कण्डूकुष्ठवातव्रणपित्तघ्नी वा-जीकरणी च । रा.नि.व.४ ।

नागबलातैलम् । क्ली । वातरक्ते तैलम् । तिलतैलं १६ श. । क्वाथार्थं—गोरक्षतण्डुलामूलं १२॥० श. वारि ६४ श. शे. १६ श. छागदुग्धं १६ श. । कल्कार्थं—तगरं यष्टिमधु प्र. ५ प. वा २ श. । तुलाद्रव्ये जलद्रोणाः इति । प.प्र. । তিলতৈল ১৬ শ. । কাথার্থ—গোরক্ষচাকু-লিয়া ১২॥০ শ. জল ৬৪ শ. শে. ১৬ শ. ছা-গদুগ্ধ ১৬ শ. । কল্কার্থ—তগরপাদুকা, যষ্টি-মধু প্রত্যেকে ৫ প. বা ২ শ. । च.द. ।

नागभूः । स्त्री । क्षुद्रपाषाणभेदायाम् । ছোট পাথরকুচা । रा.नि.व.५ ।

नागभृत् । पुं । डुण्डुभसर्पे । त्रिका. ।

नागमती । स्त्री । कृष्णतुलस्याम् । वै.निघ. ।

नागमाता । स्त्री । शारिवायाम् । वै.निघ. । मनःशिलायाम् । हे.च. । मनसादेव्याम् । श.र. ।

नागमारः । पुं । भङ्गराजे क्षीरराजे । (क-
ण्टक)। चिका. । चि । हस्तिमारके ।

नागरम् । क्ली । मुस्तायां । शि. । च.सू.२अ. ।
शुण्ठ्याम् । रा.नि.व.६ । भा. । वा.सू.१५अ.वचा-
दिव. । "नागरातिविषाभयाः ।" वा.चि.१अ.दु-
रालभादिः । शुण्ठ्यां । हरीतक्यां । च.द.सन्निपा-
तज्व.चि.षडङ्गपानीये । च.सू.४अ. । पुं । नागर-
ङ्गवृक्षे । श.र. ।

नागरकः । पुं । नागरङ्गवृक्षे । वै.निघ. ।

नागरक्तम् । क्ली । सिन्दूरे । हे.च. ।

नागरघनः । पुं । नागरमुस्तायाम् । नागर-
मूता । रा.नि.व.६ ।

नागरङ्गः । पुं । (Citrus aurantium.)
Orange. जम्बीरविशेषे । कमला (लबू । हिं
नारङ्गी, संत्रा । मं नारङ्ग । तें गंजनिम्म, नारं-
जिचेट्टु । ता. किचिलिचेट्टु । उत्. नारिङ्गी । गु-
णाः—तत्फलम् अम्लम् अत्युष्णं वातपित्तहरं सर-
ञ्च । पक्वं स्वाद्वम्लं हृद्यं दुर्जरं वातघ्नञ्च । मद.व.६।
मधुरमम्लं गुरु उष्णं रोचनम् आमवातक्रमिशूलघ्नं
श्रमघ्नं बलकरं रुच्यञ्च । रा.नि.व.११ । सुरभि
पाके गुरु दुर्जरम् अत्यम्लं मधुरकल्पं हृद्यं वातघ्न-
ञ्च । तत्कोशरं रुच्यं वातहरञ्च । राज. । वातघ्नं
दुर्जरं गुरु च । सु.सू.४६अ. ।

नागरमुस्तकम् (स्ता) । क्ली,स्त्री । (Cy-
perus pertenuis. Syn. Mariscus
cyperus.) नागरदेशप्रसिद्धमुस्तायाम् । नागर-
मूता । हिं नागरमोथा । तें तुङ्गगड्डलविम् । ता.
मुट्टक्काच । द्रा. गरमोटा । गुणाः—तिक्ता कटुः
कषाया शीतला कफघ्नी पित्तज्वरातिसारारुचि-
तृषादाहघ्नी श्रमघ्नी च । रा.नि.व.६ ।

नागरा । स्त्री । पानीयामलके । वै.निघ. ।

नागरादिः । पुं । कषायभेदे । "नागराति-
विषामुस्तभूनिम्बामृतवत्सकैः । सर्व्वज्वरहरः क्वाथः
सर्व्वातीसारनाशनः ॥" च.द.अ.सा.चि. । अन्यः
—"नागरं देवकाष्ठञ्च धन्याकं बृहतीद्वयम् ।"
च.द.सामान्यज्व चि. । शुण्ठ्यादीनां प्रत्येकं रक्ति-
द्वयाधिकमाषकत्रयं चतुष्पलजलेन पक्त्वा पलमवशे-
षयेत् । शा,कौ, । अपरः—"नागरं सुरतरुञ्च धा-
न्यकं कुण्डली बृहतिकायुगं निशि ।" अत्रि.ज्व.
चि. । नागरमुस्तायाम् । वै.निघ. ।

नागराह्वम् । क्ली । शुण्ठ्याम् । रा.नि.व.६ ।

नागरी । स्त्री । स्नुहीवृक्षे । मनसा गाछ । श.
च. । [निघ. ।

नागरीकन्या । स्त्री । वन्ध्याकर्कोटक्याम् । वै.

नागरुकः । पुं । नागरङ्गवृक्षे । कमला (लबुर
गाछ । श.र. ।

नागरूपप्रभम् । क्ली । हरिताले । वै.निघ. ।

नागरेणुः (कः) । पुं । सिन्दूरे । रा.नि.व.
१३ । (कः) नागकेसरवृक्षे । वै.निघ. ।

नागरोत्था । स्त्री । नागरमुस्तायाम् । "नाग-
रोत्था कच्छरुहा ।" रा.नि.व.६ ।

नागलता । स्त्री । शिश्ने । त्रिका. ।

नागवल्लरी । स्त्री । नागवल्ल्याम् । भा. ।

नागवल्लिका (ल्ली) । स्त्री । पत्रशाकविशे-
षे । नागिता गाछ । ताम्बूलीलतायाम् । पाण
गाछ । गुणाः—कटुस्तीक्ष्णा तिक्ता पीनसवातघ्नी
कफकासहरा रुच्या दाहकृद्दीपनी च । सा स्थान-
विशेषजातत्वात् बहुधा भिन्नगुणा । तत्र श्रीवाट्य-
म्लवाटीसातसीसदाशिराम्लसरादयः प्रसिद्धाः । तत्र
अम्लसरा मालवे अंगरापर्ण इति ख्याता, आन्ध्रे
पीट्टकुलिपर्ण हेसनीया च, क्षीरसमुद्रदेशे क्षीरस-
मुद्रदेशपर्ण इति प्रसिद्धा । श्रीवाटीगुणाः—मधु-
रा तीक्ष्णा रसाढ्या सरसा रुच्या च । अम्लवाटी—
कटुकाम्लतीक्ष्णतिक्ता उष्णा विष्टम्भकरी वातघ्नी च ।
सातसी—मधुरा तीक्ष्णा कटुरुष्णा पाचनी रुच्या
दीपनी च । सदाशिरा—अतिरसा सुगन्धिः रुच्या
तीक्ष्णा मधुरा दीपनी पुंस्त्वकरी अतिबल्या विरे-
चनी मुखसौगन्ध्यकरी च । अम्लसरा—तीक्ष्णा म-
धुरा रुच्या हिमा दीपनी बल्या मुखामोदिनी
गुल्माध्मानादिजिच्च । पटुलिका—कषाया उष्णा
कटुः मलकर्षिणी पित्तहृत् वातघ्नी च । हेसनीया
—कटुस्तीक्ष्णा हृद्या दीर्घपत्रा रुच्या दीपनी पा-
चनी च । ताम्बूलं सद्यस्त्रोटितं मुखरोगादिजननं
दाहारोचकरक्तदं मलकरं विष्टम्भि वान्तिजननम् ।
चिरत्रोटितं ताम्बूलदलं जलपोषितं गुणकरं रुच्यं
बल्यञ्च । कृष्णं पर्णं तिक्तमुष्णं कषायं दाहजनकं

मुखजाड्यकरं मलजननञ्च । शुभ्रं पर्णं वातश्लेष्मरोगघ्नं रुच्यं पथ्यं दीपनं पाचनञ्च । शिरापर्णं रक्तहृत् शैथिल्यजनकञ्च । रा.नि.व.११ । नागवल्लीफलं हृद्यं सुगन्धि कफवातजिच्च । अत्रि.१७अ. ।

नागवारिकः । पुं । मयूरे । करीन्द्रे । मे. ।

नागविन्ना । स्त्री । नागच्छत्रायाम् । नागदन्त्यां । वा.उ.६अ. ।

नागवीजम् । क्ली । शीसकृतरसवेधकवीजविशेषे । यथा —"माक्षिकेण हतं ताम्रं नागञ्च रञ्जयेन्मुहुः । तं नागं वाहयेद्वीजे द्विषोडशगुणानिह । वीजन्त्विदं वरं श्रेष्ठं नागवीजमप्रकीर्त्तितम् ॥" र.चि.३अ. । [छुपे । प.मु. ।

नागवृन्ता (न्तिका) । स्त्री । वृश्चिकाली-

नागशुण्डी । स्त्री । हस्तिशुण्ड्याम् । वै.निघ.। तामालाव्वाम्, डङ्गरीफले । रा.नि.व.७। [निघ.।

नागश्रीवल्लभः । पुं । सल्लकीनिर्यासे । वै.

नागसत्त्वः । पुं । मेषशृङ्ग्याम् । वै.निघ. ।

नागसम्भवम् । क्ली । सिन्दूरे । अम. ।

नागसिन्दूरम् । क्ली । सीसकृतसिन्दूरे । तत्प्रकरणं यथा —"भुजङ्गममगस्त्यञ्च पिष्टा पत्रम्प्रलेपयेत् । तत्र संविद्रुते नागे वासामार्गसमुद्भवम् । क्षारं वा मिश्रयेत्तत्र चतुर्थांशं गुरूक्तितः । प्रहरं पाचयेच्चुल्ल्यां वासादर्व्यावघट्टितं । तत उद्धृत्य तच्चूर्णं वासानीरैर्विमर्द्दयेत् । पुटेत् पुनः समुद्धृत्य तेनैव परिमर्दयेत् । एवं सप्तपुटैर्नागः सिन्दूरं जायते ध्रुवम् । तारस्य रञ्जनो नागः वातपित्तकफापहः । ग्रहणीकुष्ठगुल्मार्शःशोथव्रणविषापहः ॥" र-स.चि.६अ. । [अ.टी.भ.खा. ।

नागसुगन्धा । स्त्री। रास्नायाम्, सर्पगन्धायां ।

नागस्फोता । स्त्री । दन्तीक्षुपे । रा.नि.व.६ । नागदन्तीक्षुपे । रा.नि.व.५ । [व.१२ ।

नागहनुः । पुं । नखीनामगन्धद्रव्ये । रा.नि.

नागहन्त्री । स्त्री । बन्ध्याकर्कोटक्याम् । रा.नि.व.७ । [ह्रलीवृक्षे । वै.निघ. ।

नागा । स्त्री । नाकुल्याम् । पुत्रदात्र्याम् । ला-

नागाख्यः । पुं । नागकेसरे । त्रिका. । अत्रि. २स्थान.२अ. ।

नागान्तकः । पुं । मयूरे । गरुडे । अम. ।

नागारातिः । पुं । बन्ध्याकर्कोटिकायाम् । रा.नि.व.७ ।

नागारिः । पुं । देवदालीलतायाम् । वै.निघ.। बन्ध्याकर्कोटिक्याम् । रा.नि.व.३ ।

नागार्जुनयोगः । पुं अर्शःप्रभृतिरोगेषु योगविशेषे । त्रिफला पञ्चलवणं कुष्ठं कटुकी देवदारु विड़ङ्गं निम्बफलं बला गोरचतण्डुला हरिद्रा दारुहरिद्रा सौवर्च्चललवणं प्र. समम् । करञ्जत्वग्रसेन पिष्टा वदरास्थिप्रमाणा गुड़ी कार्य्या । उष्णजलेनाग्नेयः तक्रेणार्शः काञ्जिकेन गुल्मं खदिरजलेन लग्रोगं जलेन मूत्रकृच्छ्रं तैलेन हृद्रोगं निर्गुण्ड्या सर्व्वज्वरञ्च हन्ति। ত্রিফলা, পঞ্চলবণ, কুড়, কটুকী, দেবদারু, বিড়ঙ্গ, নিমফল, বেলেড়া, গোরক্ষচাকুলি, হরিদ্রা, দারুহরিদ্রা, সচললবণ প্রত্যেকে সমভাগ। করঞ্জছালের রসে মর্দ্দন। কুলপ্রমাণ গুলী হইবে। च.द. ।

नागार्जुनवटिका । स्त्री। नेत्ररोगे हिता। "त्रिफलाव्योषसिन्धूत्थयष्टीतुत्थरसाञ्जनं । प्रपौण्डरीकं जन्तुघ्नं लोध्रं ताम्रं चतुर्दश । द्रव्याण्येतानि संचुद्य वर्त्तिः कार्य्या नताम्बुना ॥" रस.र. । नताम्बु तगरवारि ।

नागार्जुनाभ्रम् । क्ली। हृद्रोगे औषधम्। "सहस्रपुटनैः शुद्धं वज्राभ्रमर्ज्जुनत्वचः । सत्वैर्विमर्दितं सप्तदिनं खल्ले विशोषितं । छायाशुष्का वटी कार्य्या नाम्नेदमर्ज्जुनाह्वयम् ॥" रसा.स. ।

नागार्जुनी । स्त्री । दुग्धिकायाम्। थिरुई । वै.निघ. । [व.७ ।

नागालावुः । स्त्री,क्ली । कुम्भतुम्ब्यां । रा.नि.

नागाह्वः । पुं। वनचम्पकवृक्षे । रा.नि.व.१०। क्ली । नागकेसरपुष्पे । वा.सू.१५अ.अञ्जनादिः । "सैलामधुकनागाह्वम् ।" सि.यो.बाहुशालगुड़े । "नागाह्वञ्चापि षट्पलम् ।" च.द.मू.कृ.चि. ।

नागाह्वयम् । क्ली । नागकेसरपुष्पे । वा.सू. १५अ.एलादिः । "पुन्नागनागाह्वयम् ।"

नागाह्वा । स्त्री । लक्ष्मणाकन्दे । रा.नि.व.७ । नागवल्लीलतायाम् । नागदमन्याम् । वै.निघ. ।

नागिनी । स्त्री । नागदन्तीवृक्षे । रा.नि.व.६। लक्ष्मणाकन्दे । रा.नि.व.७ ।

नागी । स्त्री । बन्ध्याकर्कोटिकायाम् । वै.निघ.२भ. जीर्णज्व.चि.कल्याणघृते ।

नागीयः । पुं । नागकेशरे । रा.नि.व.६ ।

नागेश्वररसः । पुं । गुल्मे रसः । पारदः गन्धकः सीषः रङ्गं मनःशिला टङ्कणं यवक्षारः सर्जिक्षारः टङ्कणं लौहं ताम्रम् अभ्रं प्र. समम् । वज्रीक्षीरेण मर्द्दनं । पश्चात् वासाचित्रकदन्तीमूलक्वाथेन दिवसं मर्द्दयेत् । मात्रा माषप्रमाणा । পারা, গন্ধক, সীষ, রঙ্গ, মনছাল, নিশাদল, যবক্ষার, সাচিক্ষার, সোহাগা, লৌহ, তাম্র, অভ্র সমভাগ । সিজুর আঠায় মর্দ্দন । পরে বাসক, চিতা ও দন্তীর মূল সমভাগ লইয়া একত্র কাথ করিয়া ১ দিন মর্দ্দন করিবে । মাত্রা ১ মাষ কলায় । ভৈষ. ।

नागोद(र)म् । क्ली । गर्भजरोगविशेषे । "शुक्रशोणितं वायुनाभिप्रपन्नम् अवक्रान्तजीवमाध्मापयत्युदरम्, तत्कदाचिद्यदृच्छयोपशान्तं नैगमेषापहृतमिति भाषन्ते । तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुः ।" सु.शा.१०अ. ।

नाटाम्रः । पुं । कालिङ्गकलतायाम् । तरमूज । त्रिका. ।

नाड़ः । पुं । नले । नल গাছ । रा.नि.व.८ । नाड़ीवल्लतायाम् । च.सू.१अ. ।

नाड़िः । स्त्री । शरीरान्तर्नाड़िकायाम् । अ.टी. भ. । सिंहपिप्पल्याम् । कालशाके । दूर्व्वाभेदे । नाड़ीव्रणे । नालि घा । वै.निघ. ।

नाड़िकम् । क्ली । कालशाके । कालन्दा शाक । भा.पू.१भ.शा.व. । [वै.निघ. ।

नाड़िका । स्त्री । कालशाके । घटपरिमाणे ।

नाड़िकायन्त्रम् । क्ली । यन्त्रविशेषे । বকযন্ত্র, ভাটীযন্ত্র । तस्य लक्षणं यथा—"विनिधाय घटे द्रव्यं कनीयांसमधोमुखं । घटमन्यमुखे तस्य स्थापयित्वोभयोर्मुखं । मृद्‌मृद्भिः समालिप्य नाड़िकां विनिवेशयेत् । यन्त्रात् कुण्डलिताङ्गित्वा जलद्रोण्यां महोत्तमां । आधारभाण्डपर्य्यन्तं ततसुक्ष्मां विधारयेत् । अधस्ताज्ज्वालयेदग्निं यावद्दाष्पो विशेदधः । गृह्णीयादाधारगतं निर्म्मलं रसमुत्तमम् । नाड़िकायन्त्रमेतद्धि मुनिभिः परिकीर्त्तितम् ॥" इति । अचि. । [टी.भ. ।

नाड़िकेरः (लः) । पुं । नालिकेरवृक्षे । अ.

नाड़िचीरम् । क्ली। निर्वेष्टने । नली । हारा.।

नाड़िन्धमः । पुं । स्वर्णकारे । त्रिका. ।

नाड़िपत्रम् । क्ली । नाड़ीचशाके । श.मा. ।

नाड़ी । स्त्री । शिरायाम् । रा.नि.व.१८ । नासायाम् । नच्ञे । रा.नि.व.२३ । नाले । गण्डदूर्व्वायां । मे. । नाड़ीव्रणे । रा.नि.व.२० । ६० पलात्मककाले ।

नाड़ीकः । पुं । पट्टशाके । পাটশাক । কোষ্ঠার শাক । हिं पटुया । भा.पू.१भ.शा.व. । तत्पत्रं तिक्तमधुरभेदेन द्विविधं, तयोस्तिक्तं क्रिमिकुष्ठहरं ; मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृच्च । शुष्कपत्रं—नलितमित्युच्यते । নালিতা । ज्वरघ्नं पित्तकफज्वरघ्नञ्च । तज्जलञ्च पित्तघ्नं रोचनं व्यञ्जने हितञ्च । राज. । क्ली । कालशाके । हिं कालशाक । गुणाः—"कालशाकं सरं रुच्यं वातकृत्कफशोथहृत् । बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम् ॥" भा. ।

नाड़ीकलापकः । पुं । सर्पाक्ष्यां । भा. ।

नाड़ीकल्पनविधिः । पुं । भूमिष्ठस्य नाड़ीच्छेदनविधौ । "नाभिबन्धनात् प्रभृति हि लष्टाङ्गुलमभिज्ञानं कृत्वा छेदनावकाशस्य द्वयोरन्तरयोः शनैर्गृहीत्वा तीक्ष्णेन रौप्यराजतायसानां छेदनानामन्यतमेन ऊर्द्धधारेण छेदयेत् । तामग्रे सूत्रेणोपनिबध्य कण्ठे चास्य शिथिलमवसृजेत् । तस्य चेन्नाभिः पच्येतां लोध्रमधुकप्रियङ्गुदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यञ्ज्यात् एषामेव तैलौषधानां चूर्णेनावचूर्णयेदिति ।" च.शा.८अ. ।

नाड़ीकेरः(लः) । पुं । नारिकेलवृक्षे । श.र.।

नाड़ीचः । पुं । तिक्तपट्टशाके । নালিতা পাতা । "नाड़ीचवीजकल्कः ।" भैष.क्षुद्ररो.चि. । पेचुके । कचू । त्रिका. ।

नाड़ीचक्रम् । क्ली । नाड़ीनिर्णायकग्रन्थे ।

नाड़ीचरणः । पुं । पक्षिणि । त्रिका. ।

नाड़ीचबीजम् । क्ली । नालितावीजे । भैष. पृथ्वीसारतैले ।

नाड़ीजङ्घः । पुं । काके । त्रिका. ।

नाड़ीतरङ्गः । पुं । काकोलविषे । मे. ।

नाड़ीतिक्तः । पुं । नेपालनिम्बे । चिरेता । रा.नि.व.९ ।

नाड़ीनक्षत्रम् । क्ली । जन्मनक्षत्रे । वै.निघ. ।

नाड़ीनिदानम् । क्ली । नाड़ीज्ञानसंग्रहभेदे ।

नाड़ीपरीक्षा । स्त्री । शङ्करसेनकृतनाड़ीज्ञानशास्त्रे, नाड़ीप्रकाशे ।

नाड़ीयन्त्रम् । क्ली । तन्नामकविंशतिविधयन्त्रेषु । यथा —एकच्छिद्रभेदेन भगन्दरयन्त्रे द्वे । अर्शोयन्त्रे अपि द्वे । व्रणयन्त्रमेकं । वस्तिनेत्रयन्त्रं चत्वारि । उत्तरवस्तिनेत्रं द्विविधं । मूत्रवृद्धियन्त्रमेकं । दकोदरयन्त्रमेकं । धूमनेत्राणि चौणि वैरेचनिकस्नैहिकप्रायोगिकभेदेन । निरुद्धप्रकशमेकं । सन्निरुद्धगुदयन्त्रमेकं । अलाबूयन्त्रमेकं । अर्बुदयन्त्रमेकम् इति । तानि चानेकप्रकाराणि अनेकप्रयोजनानि, एकतोमुखानि, उभयतोमुखानि, स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थम् आचूषणार्थं क्रियासौकर्य्यार्थञ्चेति । तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च । सु.सू.७अ. । "यन्त्रे नाड़ी व्रणाभ्यन्तःक्षालनाय षड़ङ्गुला । वस्तियन्त्राकृतिर्मूलमुखेऽङ्गुष्ठकलायखे । अग्रतः कर्णिके मूले निबद्धस्तदुचर्म्मणि ।" अत्रि. ।

नाड़ीव्रणः । पुं । तन्नामकरोगे । नालीघा । तस्य निदानं यथा—"यः शोथमाममतिपक्कमुपेक्षतेऽज्ञो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः । अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य स्थानानि पूर्व्वविहितानि ततः सपूयः । तस्यातिमात्रगमनाद्गतिरिष्यते तु नाड़ीव यद्वहति तेन मता तु नाड़ी ।" मा.नि. । "दोषैस्त्रिभिर्भवति सा पृथगेकशश्च संमूर्च्छितैरपि च शल्यनिमित्ततोऽन्या ।" सु.नि.१०अ. । अभेदात् पक्वशोफस्य व्रणे चापथ्यसेविनः । अनुप्रविश्य मांसादीन् दूरं पूयोऽभिधावति । गतिः सा दूरगमनात् नाड़ी नाड़ीव संस्रुतेः । नाड्येकानृजुरन्येषां सैवानेकगतिर्गतिः । सा दोषैः पृथगेकस्थैः शल्यहेतुश्च पञ्चमी । वातात् सरुकसूक्ष्ममुखी विवर्णा फेनिलोद्वमा । स्रवत्यभ्यधिकं रात्रौ पित्तात्तृड्ज्वरदाहकृत् । पीतोष्णपूतिपूयास्रं दिवा चातिनिषिञ्चति । घनपिच्छिलसंस्रावा कण्डूला कठिना कफात् । निशि चाभ्यधिकक्लेदा सर्वैः सर्व्वाकृतिं त्यजेत् ॥" वा.उ.२९अ. ।

नाड़ीशाकः । पुं. क्ली (कम्) । पट्टशाके । पाटशाक । नालिता । गुणाः—"कोठक्रिमिविनाशनम् । मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृत् । तच्छुष्कं जलदोषघ्नम्पित्तश्लेष्मामवातकृत् ॥" राज.३प.कुष्माण्डादौ ।

नाड़ीस्वेदः । पुं । स्वेदविशेषे । वा.उ.२८अ. । "स्वेदनद्रव्याणां पुनर्मूलफलपत्रशुङ्गादीनां मृगशकुनिपिशितशिरःपादानामुष्णस्वभावानां यथार्हम् अम्ललवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां वाष्पमनुद्वमन्त्यामुत्क्वथितानां नाड्या शरैषीकावंशदलकरञ्जार्कपत्रान्यतमकृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्व्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विनमितया वातहरसिग्धस्नेहाभ्यक्तगात्रस्य वाष्पमुपहरेत् । वाष्पो ह्यनृजुगामी विहतचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाड़ीस्वेदः ।" च.सू.१४अ. ।

नाड़ीहिङ्गुः । पुं, क्ली । हिङ्गुभेदे । हिङ्गुविशेष । हिं कलःपतिहिङ्गु । मं नाड़ीहिङ्गु । कं कलहत्ति । गुणाः—कटूष्णः कफवातशान्तिकृत् विबन्धघ्नः आनाहघ्नश्च । रा.नि.व.६ । हिङ्गुपत्र्यां । प.मु. ।

नाथहरिः । पुं । पशौ । व्याक. ।

नादेयः । पुं । जलवेतसे । मद.व.५ । काशतृणे । रा.नि.व.८ । तज्जातीयानुपरीक्षितपाठीनादिमीनवर्गे । तन्मांसगुणाः—मधुरं गुरु वातघ्नमुष्णं रक्तपित्तकरं वृष्यं स्निग्धञ्च । क्ली । सौवर्च्चललवणे । रा.नि.व.६ । सामुद्रलवणे । काशतृणे । रा.नि.व.२२ । सैन्धवलवणे । र.मा. । कृष्णाञ्जने । नदीजलादौ । भा. ।

नादेयिका (यी) । स्त्री । नागरमुस्तायाम् । रा.नि.व.६ । नागरिकायाम् । भा. । भूमिजम्ब्वां । र.मा. । नागरङ्गवृक्षे । जयन्त्याम् । प.मु. । जलवेतसे । काशतृणे । वाराहीकन्दे । वञ्जुले । रा.

नि.व.२२। भूम्यामलक्याम् । एरण्डवृक्षे । वै.निघ.।

नानाकन्दः । पुं । पिण्डालौ । रा.नि.व.७ ।

नान्दीमुखी । स्त्री । कुधान्यभेदे । यव । सा स्निग्धा । सु.सू.४६अ. । "नान्दीमुखी मधूली च मधुरा स्निग्धशीतला ।" च.र. ।

नापाकम् । क्ली । पद्मबीजे । वै.निघ. ।

नापितशाला (लिका) । स्त्री । नापित-भवने । त्रिका. ।

नाभकः । पुं । हरीतकीवृक्षे । वै.निघ. ।

नाभिः । पुं, स्त्री । उदरावर्त्ते । নাই । रा.नि.व.१८ । तन्नामकमर्म्मस्थाने । सु.शा.६अ.। स्त्री। कस्तूरिकामदे । मे. । [श.र. ।

नाभिकण्टकः पुं । नाभिरोगे । গোঁড় ।

नाभिका । स्त्री । कण्टकभीवृक्षे । रा.नि.व.८।

नाभिगुड़कः । पुं । नाभौ गुड़कवदग्रन्थौ । নাইয়ের গোঁড় । त्रिका. ।

नाभिगोलकः । पुं । नाभिगुड़के । जटा. ।

नाभिच्छेदनम् । क्ली। नाड़िकाच्छेदने । च.।

नाभिनाड़ी । स्त्री । अमलानामनाभिनाड्यां । নাভিনাড়ী । च. ।

नाभिपाकः । पुं नाभिशोथे । নাই পাকা।

नाभिनाला । स्त्री । नाभिनाड्यां । त्रिका. ।

नाभिलाषः । पुं । अनिच्छायाम् । वै.निघ. ।

नाभी । स्त्री । नाभौ । श.र. ।

नाभीलम् । । क्ली । स्त्रीकटिसन्धौ । नाभिगुड़के । मे. । पीड़ायाम् । नाभिकूपे । हे.च. । अङ्कसन्धौ । वै.निघ. ।

नाभ्यभ्यङ्गः । पुं । नाभौ तैलमर्दने ।

नायिका । स्त्री । पिण्डिकातः किञ्चित्स्थूले कस्तूरीभेदे । মৃগনাভিবিশেষ । यथा—"चूर्णाकृतिस्तु खरिका तिलका तिलाभा कौलत्थबीजसदृशी च कुलत्थिकाख्या । स्थूला ततः कियदियं किल पिण्डिका स्यात् तस्याश्च किञ्चिदधिकापि च नायिकैषा ॥" रा.नि.व.१२ । [त्रिका. ।

नारः । पुं । गोवत्से । जले । मे. । अश्वत्थां ।

नारकीटः । पुं । अश्मकीटविशेषे । मे. ।

नारकेरः । पुं । नारिकेलवृक्षे । जटा. ।

नारङ्गम् । क्ली । गर्जरमूलके । গাজরমূলা । रा.नि.व.७ ।

नारङ्गः । पुं । नागरङ्गवृक्षे । কমলা লেবুর গাছ । फलगुणाः—मधुराम्लं गुरु उष्णं रोचनं वातामक्रमिशूलश्रमघ्नं बल्यं हृद्यञ्च । रा.नि.व.११। मद.व.६ । "नारङ्गजं स्वादुगुणोपपन्नं सन्दीपनं रोचकमर्शसाञ्च । त्रिदोषहृत् शूलक्रमीन्निहन्ति मन्दाग्निकाश्वसनापहारि ॥" अत्रि.१७अ. । मरिचयूषे । पिप्पलीरसे । मे. ।

नारङ्गवर्णकम् । क्ली । गृञ्जने । শালগম । भा.पू.१भ.शा.व. ।

नारदा । स्त्री । इक्षुमूले । मूर्व्वायां । वै.निघ.।

नारा । स्त्री । जले । श.र. ।

नाराचचूर्णम् । क्ली। उदावर्त्ताधिकारे चूर्णम् । पाठः—"त्रिवृत्कृष्णाहरीतक्यो द्विचतुःपञ्चभागिकाः । गुड़िका गुड़तुल्या सा विड्विबन्धगदापहा ॥" তেউড়ী ২ তো. পিপুল ৪ তো. হরীতকী ৫ তো. সর্ব্বসম গুড় । अन्यत्—त्रिवृच्चूर्णं पिप्पलीचूर्णं प्र. २ तो. शर्करा १ प. । तोलकद्वयं मधुना लिह्यात् । एतद्गाढ़पुरीषे पित्तकफे देयम् । তেউড়ীচূর্ণ, পিপুলচূর্ণ প্রত্যেকে ২ তো. চিনি ১ প. । ২ তো. মধুর সহিত সেব্য । सा.कौ. । [क्ति । श.र. ।

नाराचिका । स्त्री । स्वर्णतोलनयन्त्रे । नि-

नारायणः । पुं । वैद्यवृन्दनामवैद्यकग्रन्थकारे, वैद्यामृतकारे ।

नारायणतैलम् । क्ली । वातव्याधौ तैलविशेषे । पाठः—"बिल्वोऽग्निमन्थः श्योणाकः पाटला पारिभद्रकः । प्रसारण्यश्वगन्धा च बृहती कण्टकारिका । बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा । एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत् । पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत् । शतपुष्पा देवदारु मांसी शैलेयकं वचा । चन्दनं तगरं कुष्ठं एला पर्णिचतुष्टयं । रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवं । एषां द्विपलिकान् भागान् पेषयित्वा विनिक्षिपेत् । शतावरीरसञ्चैव तैलतुल्यं प्रदापये-

त्। आजं वा यदि वा गव्यं क्षीरं दद्याच्चतुर्गुणम्॥" इति स्वल्पम्। शीते गन्धद्रव्यं देयम्। বেল, গণিরি, শোণা, পারুল নিমছাল, গন্ধভাদুলিয়া, অশ্বগন্ধা, বৃহতী, কণ্টিকারী, বেলেড়া, শ্বেত বেলেড়া বা (গোরক্ষচাকুলিয়া) গোক্ষুর, পুনর্নবা প্রত্যেকে ১০ প.। কাথার্থ—জল ২৫৬ শ. শে. ৬৪ শ. তিলতৈল ১৬ শ.। কল্কার্থ—শুলফা, দেবদারু, জটামাংসী, শৈলজ, বচ, রক্তচন্দন, তগরপাদুকা, কুড়, এলাইচ, শালপাণি, চাকুলি, মুগানী, মাষাণী, রাস্না, অশ্বগন্ধা, সৈন্ধব, শ্বেতপুনা প্রত্যেকে ২ প. শতমূলীরস ১৬ শ. ছাগ বা গব্য দুগ্ধ ৬৪ শ.। শীতল হইলে গন্ধদ্রব্য দিবে। রস.র।

नारायणप्रियम् । क्ली। पीतचन्दने। मद.।

नारायणी । स्त्री। शतमूल्याम्। रा.नि.व.४। शा.कौ.लक्ष्मीविलासे। भैष.।

नारिकेरः (लः) । पुं। (Cocos nucifera.) The cocoanut tree. स्वनामख्यातवृक्षे। নারিকেল গাছ। শ.র.। প.মু.। हिं नेरियल्। मं कं नारियल। तें नारिकादम्। उत्. नड़िया। बम्. नारली। ता. टेन्न, टेङ्गा। सा. गुणाः—गुरुः स्निग्धः शीतलः पित्तघ्नश्च। अर्द्धपक्वफलं तृष्णाशोषघ्नं दुर्ज्जरञ्च। तद्बालसलिलं लघु बल्यं शीतलं रसपाके मधुरं पित्तशमनं पीनसशमनं तृषाघ्नं दाहघ्नं शोषशमनं सुखदञ्च। तत्पक्वजलं किञ्चित्पित्तकारि मधुरं रुचिकरं दीपनं बलकरं गुरु वृष्यं बलवर्द्धनञ्च। नारिकेलखर्ज्जूरं स्निग्धं गुरु दुर्ज्जरं दाहविष्टम्भकरं रुच्यं बलवीर्य्यवर्द्धनञ्च। रा.नि.व.११। "दुग्धन्तु नारिकेलस्य बल्यं रुच्यं गुरु स्मृतम्। पाके स्वादु समुद्दिष्टं स्निग्धं वृष्यञ्च दाहकम्। किञ्चिदुष्णं वातकफगुल्मकासविनाशकम्॥ नारिकेलघृतं नाम बृंहणं बलवर्द्धनम्। केश्यं रसे च पाके च मधुरञ्च रुचिप्रदम्। हृद्यञ्च वातपित्तघ्नं तज्जीर्णं गुरु वातहम्॥ नारिकेलस्य पुष्पन्तु शीतं रक्तातिसारहम्। रक्तपित्तप्रमेहञ्च सोमरोगञ्च नाशयेत्। मलस्तम्भकरञ्चापि प्रोक्तम् ·····॥ नारिकेलशिरोमज्जा रसे पाके मधुः स्मृता। नारिकेलपुष्पजलं गुरु वृष्यमकीर्त्तितम्॥" वै.निघ.। "बालस्य नारिकेलस्य जलमग्यो विरेचनम्।" राज.। "स्निग्धं स्वादु हिमं हृद्यं दीपनं वस्तिशोधनम्। वृष्यं पित्तपिपासाघ्नं नारिकेलोदकं गुरु॥" सु.। तन्मस्तकगुणाः—"नारिकेलस्य तालस्य खर्ज्जूरस्य शिरांसि तु। कषायस्निग्धमधुरबृंहणानि गुरूणि च॥ नारिकेलफलं शीतं दुर्ज्जरं वस्तिशोधनम्। विष्टम्भि बृंहणम्बल्यं वातपित्तास्रदाहनुत्। विशेषतः कोमलनारिकेलं निहन्ति पित्तज्वरमूत्रदोषान्। तदेव जीर्णं गुरु पित्तकारि विदाहि विष्टम्भि मतं भिषग्भिः॥ तस्याम्बु (तदङ्कुरः) शीतलं हृद्यं दीपनं शुक्रलं लघु। पिपासापित्तजित् स्वादु वस्तिशुद्धिकरम्परम्॥" भा.। तस्य तैलं गुरु वाजीकरं क्षीणधातुपोषणं वातपित्तघ्नं मूत्राघातप्रमेहश्वासकासक्षयघ्नं हितं मेधाकरं क्षतनाशनञ्च। "नारिकेलं सुमधुरं गुरु स्निग्धञ्च शीतलम्। हृद्यं संबृंहणं वस्तिशोधनं रक्तपित्तनुत्॥ विष्टम्भि पक्वं मतिमन्नपक्वं कफवातलम्। बृंहणं शीतलं वृष्यं नारिकेलफलं विदुः॥" अत्रि. १७अ.। [य्याम्।

नारिकेरक्षीरिका । स्त्री। नारिकेलक्षी-

नारिकेलखण्डम् । क्ली। शूलाधिकारे औषधम्। पाठः—"कुड़वमितमिह स्यान्नारिकेलं सुपिष्टं पलपरिमितसर्पिःपाचितं खण्डतुल्यम्। निजपयसि तदेतत् प्रस्थमात्रे विपक्वं गुड़वदथ सुशीते शाणभागान् क्षिपेच्च। धन्याकपिप्पलिपयोदतुगाद्विजीरान्. शाणं त्रिजातकमथापि च केसरञ्च। हन्त्यम्लपित्तमरुचिं क्षयमस्रपित्तं शूलं वमिं सकलपौरुषकारि हारि।" सुपिष्टनारिकेलशस्यं ४ प. भर्ज्जनार्थघृतं १ प. शर्करा ४ प. नारिकेलजलं ४ श.। पाकसिद्धौ प्रक्षेपः—धन्याकं पिप्पली मुस्ता वंशरोचनी जीरकं कृष्णजीरकं गुड़त्वक् तेजपत्रम् एला नागकेसरपुष्पम् एषां प्र. चूर्णं ४ मा.। इदं पित्तशूले। शा.कौ.। रस.र.। भैष.। अन्यत्—कोमलनारिकेलशस्यं ८ प. शर्करा २ श. नारिकेलजलं ८ श. घृतं ५ प. शुण्ठीचूर्णं २ प. दुग्धं १ श. एकत्र पचेत्। पाकसिद्धौ वंशलोचना कटुकी मुस्ता गुड़त्वक् एला तेजपत्रं नागकेशरं धान्यकं पिप्पली गजपिप्पली प्र. चूर्णं ४ तो. प्रक्षेप्यम्। रस.र.। इदमम्लपित्ते।

नारिकेलजलम् । क्ली। प्रसिद्धं, रक्तपित्ते हितम्। चि.यौ.रक्तपि.चि.।

नारिकेलतैलम् । क्ली । तत्फलोत्थतैले ।

नारिकेललवणम् । क्ली । सजलनारिकेलमध्ये सैन्धवलवणं पूरयित्वा तन्नारिकेलं मृदावेष्ट्य शोषयेत् । अथ दग्ध्वा तन्मध्याल्लवणं ग्राह्यं । मात्रा ४ माषाः । भैष. ।

नारिकेलक्षीरी । स्त्री । नारिकेलदुग्धशर्करादिकृतमिष्टान्ने । यथा —"नारिकेलं तनूकृत्य छिन्नभ्यथसि गोः क्षिपेत् । सितागव्याज्यसंयुक्तं तत्पचेन्मृदुनाग्निना ॥" गुणाः—"नारिकेलोद्भवा क्षीरी स्निग्धा पित्तातिपुष्टिदा । गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहा ॥" भा. ।

नारिकेलामृतम् । क्ली । अम्लपित्ताधिकारे औषधम् । "नारिकेलफलप्रस्थं सुपिष्टं घृतभर्जितं । प्रस्थं प्रस्थं समादाय ग्रन्थ्याश्चूर्णस्य तद्युतं । द्विपात्रं नारिकेलाम्बु तत्समं क्षीरमेव च । धात्र्याश्च स्वरसप्रस्थं खण्डस्यापि तुलां न्यसेत् । एकीकृत्य पचेत्सर्वं शनैर्मृद्वग्निना भिषक् । सिद्धशीते प्रदातव्यं चूर्णं तत्र सुगुम्फितं । त्रिकटीः सचतुर्जातं प्रत्येकन्तु पलोन्मितं । धात्रीजीरकयुग्मञ्च धन्याकं ग्रन्थिपर्णकं । तुगापयोदचूर्णानि त्रिकर्षञ्च पृथक् पृथक् । मधुनः पलचत्वारि स्निग्धे भाण्डे निधापयेत् ॥" रस.र. । भैष. ।

नारिकेलिः (ली) । स्त्री, पुं (इन्) । नारिकेलवृक्षे । भा. । श.र. ।

नारिकेलोदकम् । क्ली । नारिकेलजले ।

नारी । स्त्री । तन्नामकौषधिविशेषे । या अश्वबलेति कथ्यते । यस्याः पत्रम् अश्वसदृशञ्च । च. चि.१अ. । रमण्यां । মেয়ে মানুষ । सा मातृशोणितोत्तरा विषमतिथौ जाता च । मुखबोधः ।

नारीघृतम् । क्ली । नारीदुग्धोत्थघृते । মেয়ে মানুষের দুধের ঘি । गुणाः—कफेऽनिले योनिदोषे रोगेष्वन्येषु तद्धितम् । चक्षुष्यमार्त्तं स्त्रीणाञ्च सर्पिः स्यादमृतोपमम् ॥" अत्रि.८अ. । चक्षुष्यं पथ्यं सर्व्वरोगघ्नं मन्दाग्निदीपनं वृष्यं पाके लघु विषघ्नञ्च । रा.नि.व.१५ ।

नारीचम् । क्ली । शाकविशेषे । নালিতা । तद्द्विविधं तिक्तं मधुरञ्च । तिक्तं रक्तपित्तघ्नं कृमिकुष्ठहरञ्च । मधुरं पिच्छिलं शीतलं विष्टम्भि कफवातकरञ्च । राज. ।

नारीदुग्धम् । क्ली । मानुषीदुग्धे । See मानुषीक्षीरम् ।

नारीपयः । क्ली । नारीदुग्धे ।

नारीवल्लभा । स्त्री । गन्धप्रियङ्गौ । वै.निघ. ।

नारीषण्डः । पुं । स्त्रीनपुंसके । च.शा.२अ. ।

नारीष्टा । स्त्री । मल्लिकापुष्पवृक्षे । মল্লিকা ফুলের গাছ । रा.नि.व.१० ।

नारीक्षीरम् । क्ली । मानुषीक्षीरे ।

नार्य्यङ्गः । पुं । नागरङ्गवृक्षे । কমলা লেবুর গাছ । श.र. । [वै.निघ. ।

नार्य्यतिक्तः । पुं । किराततिक्तके । চিরাতা ।

नालः । पुं, क्ली । पद्मदण्डे । अम. । हरिताले । स्वामी. । नेत्रे । পিচ্‌কিরি । पुं । नले । रा.नि. व.८ । मेढ्रे । भा.म.३भ.मूत्रोत्सङ्गे ।

नालकः । पुं । कलाये । মটর । रा.नि.व.१६। नलक इति पाठोऽपि पुस्तकान्तरे दृश्यते । [८ ।

नालवंशः । पुं । नले । নল গাছ । रा.नि.व.

नाला । स्त्री । नले । स्तम्बे । ডাঁটা, নাড়া । अम.भ. ।

नालावती । स्त्री । नागवल्लीलतायां । प.मु. ।

नालिः । स्त्री । नलकास्थनि । नलि । नाड्यां, शिरायां । वि.क्री. ।

नालिकः । पुं । खड्गके । গণ্ডার । महिषे । त्रिका. । रक्तगन्धबोले । नाडीशाके । चर्मकषायाम् । वै.निघ. । क्ली । पद्मे । श.र. ।

नालिका । स्त्री । नालायाम् । श.र. । नाड्यां । अ.टी. । चर्मकषायाम् । जटा. । करिकर्णवेधनास्त्रे । हारा. । नलाकारतरुमात्रे । नलिकानामगन्धद्रव्ये । शेहुण्डे । वै.निघ. । मिष्टपत्रनालितायाम् । श.मा. । [ঝাড় । वै.निघ. ।

नालिकिनी । स्त्री । कमलिन्याम् । পদ্মের

नालिकेरः (कः) । पुं । नारिकेलवृक्षे । अ. टी.र. ।

नालिजङ्घः । पुं । द्रोणकाके । हारा. ।

नालिता । स्त्री । (Arum colocasia.)

स्वनामख्यातपत्रशाके । নালিতা গাছ । प.मु. । गुणाः—नाड़ीचवत् ।

नाली । स्त्री । मनःशिलायाम् । नलिकायाम् । वै.निघ. । शाककड़म्बके । ডাঁটা । मे. । नाड्यां, शिरायाम् । अ.टी.भ. । पद्मे । श.र. ।

नालीकः । पुं । पद्मे । मृणाले । शरे । क्ली । पद्मषण्डे । मे. ।

नालीकिनी । स्त्री । पद्मसमूहे । श.र. ।

नालीव्रणः । पुं । नाड़ीव्रणे । श.र. ।

नाल्पपुष्पी । स्त्री । महाशणक्षुपे । प.मु. ।

नावनम् । क्ली । नस्ये । सु. ।

नासत्यौ । पुं । अश्विनीकुमारौ । अम. ।

नासा । स्त्री । नासिकायाम् । वासकवृक्षे । रा. नि.व.४।१९ । [षि । त्रिका. ।

नासाच्छिन्नी । स्त्री । पूर्णिकानामपक्षिविशे-

नासा(प्रती)नाहः । पुं । नासारोगविशेषे । लक्षणं यथा—"कफावृतो वायुरुदानसंज्ञो यदा स्वमार्गे विगुणः स्थितः स्यात् । घ्राणं वृणोतीव यदा स रोगो नासाप्रतीनाह इति प्रदिष्टः ॥" सु. उ.२२अ. ।

नासापरिशोषः । पुं । नासारोगविशेषे । लक्षणं यथा—"घ्राणाश्रिते श्लेष्मणि मारुतेन पित्तेन गाढ़ं परिशोषिते च । समुच्छ्वसित्यूर्द्ध्वमधश्च कृच्छ्राद्यस्तस्य नासापरिशोष उक्तः ॥ सु.उ.२२अ. ।

नासा(सिका)पाकः । पुं । नासारोगविशेषे । लक्षणं यथा—"घ्राणाश्रितं पित्तमरूंषि कुर्य्याद् यस्मिन् विकारे बलवांश्च पाकः । तं नासिकापाकमिति व्यवस्येत् विक्लेदकोथावपि यत्र दृष्टौ ॥" सु.उ.२२अ. ।

नासायन्त्रम् । क्ली । घ्राणार्बुदादिदर्शनार्थं यन्त्रविशेषे । लक्षणं यथा—"घ्राणार्बुदार्शसामेकच्छिद्रा नाड्यङ्गुलद्वया । प्रदेशिनीपरीणाहा स्याद्भगन्दरयन्त्रवत् ॥" अत्रि. ।

नैपाली । स्त्री । मनःशिलाभेदे । নেপালি মন ছাল । मे. । सु.चि.२अ. । मनःशिलायां । र.मा. । रा.नि.व.१२ । नील्यां । श.र. । नवमल्लिकायाम् । সেউতী । वसन्ती नेवारीति लोके । भा. । रा.नि.व.१० । शेफालिकायाम् । मे. । इक्षुभेदे, नेपालेक्षौ । गुणाः—वातकरः कफपित्तघ्नः कषायो विदाही च । सु.सू.४५अ. । [म. ।
नैयग्रोधम् । क्ली। वटवृक्षफले। বটফল । अ-
नैर्झरजलम् । क्ली। निर्झरवारिणि । ঝর্ণার জল । "शैलसानुस्रवद्वारिप्रवाहे निर्झरो झरः । स तु प्रस्रवणश्चापि तत्त्वं नैर्झरं जलम् ।" भा. ।
नैषधकः । पुं । निषधदेशीये शालिधान्यभेदे । गुणाः—शालिवत् । च.सू २७अ. ।
नोदयन्ती । स्त्री । नवमल्लिकायां । र.मा. ।

न्यक्षारुका । स्त्री । पतङ्गविशेषे, विष्ठाकीटे । हारा. ।
न्यग्रोधः । पुं । वटवृक्षे । বট গাছ । रा.नि.व.२३।११ । सु.सू.३८अ.न्यग्रोधादिः । शृतश्रेण्यां, आखुकर्णीलतायाम् । मूषाकाणी । रा.नि.व.२३। शमीवृक्षे । मे. । विषपर्ण्यां । मोहननामौषधी । विश्व. । [याम् । श.मा. ।
न्यग्रोधपरिमण्डला । स्त्री । सुन्दरस्त्रि-
न्यग्रोधपुटपाकः । पुं । वटकल्कादिसाध्यपुटपाके । यथा—"न्यग्रोधादेश्च कल्केन पूरयेद्गौरतित्तिरिः । निरन्त्रमुदरं सम्यक् पुटपाकेन तत्पचेत् ॥" अस्य रसो मधुना सर्व्वातिसारे हितः । शार्ङ्ग.म.ख.१अ. ।
न्यग्रोधादिगणः । पुं । वटादिद्रव्यवर्गे । यथा—"न्यग्रोधपिप्पलसदाफलरोध्रयुग्म जम्बुद्वयार्ज्जुनकपीतनसोमवल्क-प्लक्षाम्रवञ्जुलपियालपलाशनन्दि-कोलीकदम्बविरलामधुकं मधूकम् ।" इति द्रव्याणि । अन्यः—"न्यग्रोधोदुम्बराश्वत्थप्लक्षमधुककपीतनककुभकोशाम्रचोरकपत्रजम्बूद्वयपियालमधूकरोहिणीवञ्जुलकदम्बबदरीतिन्दुकीशल्लकीरोध्रसावरोध्रभल्लातकपलाशनन्दिवृक्षाश्चेति । गुणाः—"न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः । रक्तपित्तहरो दाहमेदघ्नो योनिदोषहृत् ॥" वा.सू.१५अ. । सु.सू.३८अ. । [रा.नि.व.३ ।
न्यग्रोधिका । स्त्री । आखुकर्णीलतायाम् ।
न्यग्रोधी । स्त्री । द्रवन्त्याम् । বড় দন্তী । रा.नि.व.५ । आखुकर्णीलतायाम् । शृतश्रेण्याम् । रा.नि.व.४ । थुलकुड़ीति कश्चित् । अम.भ. ।
न्यङ्कुः । पुं । शम्बरमृगे । शाम्बर इति भाषा । हिं बराहशिङ्गा । मांसगुणाः - स्वादु लघु बल्यं वृष्यं त्रिदोषघ्नञ्च । भा.मांसव. । मणिविशेषे । मे.।
न्यङ्कुभूरुहः । पुं । आरग्वधवृक्षे । वै.निघ. । श्योणाकवृक्षे। শোণাপাঠা । त्रिका. ।
न्यच्छम् । क्ली । क्षुद्ररोगभेदे । तल्लक्षणं—"मण्डलं महदल्पं वा श्यामं वा यदि वा सितं । सहजं नीरुजं गात्रे न्यच्छमित्यभिधीयते ॥" सु.नि.१३अ. । [हिषे । क्ली । घासे, तृणे । मे. ।
न्यचः । पुं । गण्डके । গণ্ডার। वै.निघ. । म-

न्याकम् । क्ली। भर्ज्जिततण्डुले। मुड़ि । श.च.।
न्यादः । पुं । भोजने । आहारे । अम. ।
न्युब्जः । पुं। रोगे । व्यथायाम् । कुशे । वै.निघ । हे.च. । त्रि । कुब्जे । कुँजो । मे. । रुजाभुग्ने । अम. । क्ली। कर्म्मरङ्गे । कामराङा । मे. ।
न्यूनपञ्चाशद्भावः । पुं । जन्मन उन्मादग्रस्ते । पागल । का.पुराणं ।
न्यूनाङ्गः । त्रि । हीनाङ्गे । खञ्जे ।
न्यूनेन्द्रियः । त्रि । असम्पूर्णेन्द्रिये, खञ्जादौ । श.चि. ।

प

पक्कटी । स्त्री । प्लक्षवृक्षे । पाकुड़ गाछ । वै. निघ. ।
पक्क(क्ता)पीड़ः । पुं । वर्द्धनवृक्षे । हिं पखौड़ा । गुणाः—हृष्यञ्जनविधौ शस्तः कटुः जीर्णज्वरघ्नश्च । रा.नि.व.८ ।
पक्ता । त्रि । स्वयं पाककर्त्तरि । पुं । अग्नौ ।
पक्तिः । स्त्री। गौरवे । पाके । मे. । पाकशक्तौ। च.द.शिराव्यधे ।
पक्तिशूलः । पुं, क्ली । परिणामशूलरोगे । रा. नि.व.२० । See अन्नद्रवशूलः ।
पक्वः । त्रि । क्वथिते शृते वा (वस्तुनि) । र.मा. । परिणते । पाका । अम.भ. । क्ली । खिन्नतण्डुलादौ । पुराणम् । [चक्रे । वै.निघ. ।
पक्वकृत् । पुं । निम्बवृक्षे । श.च. । त्रि । पा-
पक्वपात्रम् । क्ली । पक्वशरावे । वा.उ.५अ. ।
पक्वमांसम् । क्ली । पाकसिद्धमांसे । पाक करा मांस । गुणाः—हितं बलवर्द्धनं वीर्य्यवर्द्धनञ्च । रा.नि.व.१७ । हृद्व्रदरे । मद.व.६ ।
पक्वरसः (सिक्तः) । पुं । मद्ये । श.र. । तीक्ष्णमद्यभेदे, शीधौ । गुणाः—बलवर्णकरः सरः शोफघ्नः वातघ्नः पाके मधुरः हृद्यः इन्द्रियबोधनश्च। सु.सू.४५अ. । "रोचनो दीपनो हृद्यः शोषशोफार्शसां हितः । स्नेहश्लेष्मविकारघ्नो वर्ण्यः पक्वरसो मतः ॥" च.सू.२७अ. ।
पक्ववारि । क्ली। उष्णजले । काञ्जिके । श.च.।
पक्वशस्यसमोन्नतिः । पुं । राजकदम्बे । वै.निघ. । [द्रव्ये ।
पक्वान्नम् । क्ली । पाचितान्ने । घृतादिपक्वभक्ष्य-
पक्वाशयः । पुं । नाभेरधोभागे । पाकाशय । "पक्वाशयो ह्यधो नाभेः ।" रा.नि.व.१८ । अपिच "नाभिस्तनान्तरं जन्तोराहुरामाशयम्बुधाः । आमाशयादधः पक्वाशयादूर्द्धन्तु पाकला ॥" भा. ।
पक्वेष्टका । स्त्री । दग्धेष्टकायाम् । वै.संग्रहः ।
पखोण्डः (पीड़ः) । पुं । पक्वपीड़वृक्षे । पखोड़ । रा.नि.व.८ ।
पङ्कः । पुं । कर्द्दमे । कादा । गुणाः—पङ्कस्य दाहनाशित्वं भग्नचयहितत्वं हिमत्वञ्च । राज. । शोथघ्नत्वं सरत्वञ्च । भा. ।
पङ्ककर्व्वटः । पुं । कोमलकर्द्दमे । थितन पलि । त्रिका. । [पाशौ । त्रिका. ।
पङ्ककीरः । पुं । कोयष्टिकपक्षिणि । टिटिभ
पङ्कक्रीड़ः । पुं । ग्राम्यशूकरे । वै.निघ. ।
पङ्कगड़कः । पुं । (Magrognathus.) पङ्कालमत्स्ये, क्षुद्रमत्स्यभेदे । पाँकाल माछ । त्रिका. ।
पङ्कगतिः । पुं । पङ्कालमत्स्ये । श.मा. ।
पङ्कग्राहः । पुं । शिशुमारे । वै.निघ.। मकरे । हारा. ।
पङ्कजम् (न्म) । क्ली । पद्मे । प.मु. ।
पङ्कजातः । पुं । भृङ्गराजक्षुपे । भीमराज । वै.निघ. । [पद्मेर झाड़ । वै.निघ. ।
पङ्कजिनी । स्त्री । पद्मालये, कमलिन्याम् ।
पङ्कपर्पटी । स्त्री। सौराष्ट्रमृत्तिकायां । र.मा. ।
पङ्कमण्डूकः । पुं । जलशुक्तौ । वै.निघ. । शम्बूके । शामुक । हारा. ।

पङ्कवट् (कम्) । क्ली । पद्मे । रा.नि.व.१०।

पङ्कवारि । क्ली । काञ्जिके । वै.निघ. ।

पङ्कवासः । पुं । कर्कटे । रा.नि.व.१९ ।

पङ्कशुक्तिः । स्त्री । शुक्तौ । झिणुक । त्रिका. ।

पङ्कशू(षू,सू)रणः । पुं। पद्मकन्दे । शालूक । त्रिका. ।

पङ्कारः । पुं । (Vallisneria, or Tropa bispinosa.) जलजवृक्षविशेषे, कण्टकसेवत्यां । मे. ।

पङ्किलः । त्रि । पङ्कमये । मलिने ।

पङ्कीरः । पुं । टिट्टिभपक्षिणि । टिटिर पाखी । वै.निघ. ।

पङ्केज(रुह)म् । क्ली । कमले । रा.नि.व.१०।

पङ्क्तिकण्टकः । पुं । अपामार्गक्षुपे । रा. नि.व.४ ।

पङ्क्तिकन्दः । मालाकन्दे । रा.नि.व.७।

पङ्क्तिचरः । पुं । कुररपक्षिणि । रा.नि.व. १९ । क्रौञ्चपक्षिणि । श.चि. ।

पङ्क्तिवीजः (कः) । पुं । वर्वूरकवृक्षे । बाव्ला गाछ । रा.नि.व.८ । आरग्वधवृक्षे । कर्णिकारवृक्षे । शोन्दाल, चीनेर करवी गाछ । रा.नि.व.९ ।

पङ्क्तिशूलः । पुं,क्ली । परिणामशूले । निदानलक्षणे । "स्वैर्निदानैः प्रकुपितो वातः सन्निहितो यदा । कफपित्ते समावृत्य शूलकारी भवेद्बली । भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् । तस्य लक्षणमप्येतत् समासेनाभिधीयते । आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः । स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् । तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तमम् । शूलं शीतशमप्रायं पैत्तिकं तद्वदेद्भिषक् । छर्दिहृल्लाससम्मोहस्वल्परुग्दीर्घसन्ततिः । कटुतिक्तोपशान्ती च विज्ञेयञ्च कफात्मकम् ॥" इत्यादि । [योर्वधात् ।" सु.नि.१अ. ।

पङ्गुः । पुं । वातव्याधिविशेषे । "पङ्गुः सक्थ्नो-

पङ्गुल्व(ल्य)हारिणी । स्त्री । झिण्टीक्षुपे । रा.नि.व.४ । [र्थादिः । शुक्लाश्मे ।

पङ्गुलः । पुं । एरण्डवृक्षे । वा.सू.१५अ.विदा-

पङ्गुल्यम् । क्ली । पङ्गुभावे । रा.नि.व.४ ।

पचनम् । क्ली । पाके । पुं । अग्नौ । श.च. । स्त्री (नी) । वनवीजपूरे । रा.नि.व.११ ।

पचम्पचा । स्त्री । दारुहरिद्रायाम् । प.मु. । भा.म.१भ.तन्द्रिकज्व.चि. । "मरिचकचपचम्पचावचाकक् ।"

पचा । स्त्री । पाके । अम. ।

पचेलुकः । पुं । पाचके । त्रिका. ।

पच्यमानज्वरः । पुं । ज्वरविशेषे । परिणत ज्वर । लक्षणम्—"ज्वरवेगोऽधिकस्तृष्णा कर्द्धतीसारविड्ग्रहाः । मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥" मा.नि. ।

पञ्चः । पुं । तिक्तपटोले । वै.निघ. ।

पञ्चकट्यम् । क्ली । जीवनपञ्चमूले ह्रस्वपञ्चमूले च । वा.सू.१५अ. ।

पञ्चकन्दाः । पुं । पञ्चसिद्धौषधिविशेषेषु । ते च तैलकन्दक्रौड़कन्दसुधाकन्दरुदन्तीसर्पाख्यात्मकाः । रा.नि.व.२२ । See सिद्धौषधिः ।

पञ्चकपित्थम् । क्ली । कपित्थस्य मूलत्वक्पत्रफलपुष्पेषु । वा.उ.३८अ. ।

पञ्चकर्म्म । क्ली । वमनविरेकनस्यनिरूहानुवासनेषु । वमनादि पाँचप्रकार क्रिया । "प्रथमं वमनं पश्चात् विरेकश्चानुवासनं । एतानि पञ्चकर्म्माणि निरूहो नावनं तथा ॥" भा. । तेषु न्यूनसप्ताब्दे अतीताशीत्यब्दे च नस्यं, ऊनद्वादशे धूमः, ऊनपञ्चमे कवलः, ऊनदशमे अतिक्रान्तसप्ततौ च शोधनं, न्यूनषोड़शे सप्ततिवार्षिके च रक्तमोक्षणं न देयम् । एतानि दोषनिर्हरणार्थं यथाकालं प्रयोज्यानि । प.प्र.४ख.। विशेषास्तत्तच्छब्दे मृग्याः ।

पञ्चकषायः । पुं । वचावासापटोलप्रियङ्गुनिम्बात्मकद्रव्यवर्गे । भा.म.४भ.यो.व्या.चि. । "चूर्णैः पञ्चकषायजैः ।" भैष.कर्णरो.चि. ।

पञ्चकोरः । पुं । जलकुक्कुभे । त्रिका. ।

पञ्चक्षत् (त्यः) । पुं । पर्कटीवृक्षे, पखौड़वृक्षे। रा.नि.व.८ ।

पञ्चकृष्णः । पुं। सौम्यकीटभेदे । सु.कल्प.८अ.। See कीटः ।

पञ्चकोलम् । क्ली । पिप्पल्यादिपञ्चद्रव्यक्वतकषाये । পিপুল, পিপুলমূল, চই, চিত্রকমূল, শুঁট সমভাগ । "पिप्पलीपिप्पलीमूलचव्यचित्रकनागरम् । कोलमात्रोपयोगित्वात् पञ्चकोलकसंज्ञितम् ॥" सि.यो.च.द.वा.कफज्व.चि. । गुणाः—रसे पाके कटुकं रुच्यं तीक्ष्णोष्णं पाचनं दीपनं वातकफघ्नं गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनञ्च । भा.पू.१भ. ।

पञ्चकोलघृतम् । क्ली । गुल्मे घृतम् । "पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः । पलिकैः सयवक्षारैः घृतप्रस्थं विपाचयेत् । क्षीरप्रस्थञ्च तत्सर्पिर्हन्ति गुल्मङ्कफात्मकम् ॥" গব্যঘৃত ৪শ. । কল্কার্থ—পঞ্চকোল যবক্ষার প্রত্যেকে ১প. । দুগ্ধ ৪শ । च.चि.५अ. ।

पञ्चगणः । पुं । विदारीकन्दः बृहती पृश्निपर्णी निदिग्धिका श्वदंष्ट्रा चेति गणविशेषे । ভুঁই কুম্ড়া, বৃহতী, চাকুলে, কণ্টিকারী, গোক্ষুর । रा.नि.व.२२ ।

पञ्चगव्यम् । क्ली । समभागगोमूत्रगोमयदधिदुग्धघृतेषु । গোময়, গোমূত্র, দধি, দুগ্ধ, ঘৃত সমান । "गोमूत्रङ्गोमयङ्क्षीरं गव्यमाज्यं दधीति च । युक्तमेतद्यथायोगं पञ्चगव्यमुदाहृतम् ॥" रा.नि.व.२२ । अत्र दुग्धगोजलघृतानां प्र. १ प. गोमयं ३ तो. दधि २ प. । गारुड़म् ।

पञ्चगव्यघृतम् । क्ली । अपस्मारे घृतम् । गव्यघृतं ४ श. गोमयरसः अम्लदधि दुग्धं गोमूत्रं प्र.४श. यथाविधि पचेत् । बृहद्यथा—गव्यघृतं ४ श. क्वाथार्थं—दशमूलं प्र.२प. त्रिफला प्र. २ प. हरिद्रा दारुहरिद्रा कुटजत्वक् सप्तपर्णत्वक् अपामार्गमूलं नीलीमूलं कटुकी आरग्वधफलमज्जा काकोदुम्बरिकामूलं कुष्ठं दुरालभा च, एषां प्र. २प. वारि ६४ श. शे. १६ श. । कल्कार्थं—भार्गीमूलं पाठामूलं त्रिकटु त्रिवृता हिज्जलबीजं गजपिप्पली तुवरीमूलं (অরহরমূল) मूर्व्वामूलं दन्तीमूलं भूनिम्बं चित्रकमूलं श्यामालता अनन्तमूलं मञ्जिष्ठा गन्धतृणं (রামকর্পূর) मदनफलम्, एषां प्र. २ तो. गोमयरसः गोमूत्रम् अम्लदधि दुग्धम् एषां प्र.४श. यथाविधि पचेत् । च.द. । च.चि.२५अ. ।

पञ्चगुप्तः । पुं । कच्छपे । श.र. ।

पञ्चगुप्ता (प्तिः, रसा) । स्त्री । स्पृक्कायाम् । পিড়িং শাক । रा.नि.व.१२ ।

पञ्चजटा । स्त्री । पञ्चमूले । च.द. । "पञ्चजटा स्ततदुग्धजननस्यम् ।"

पञ्चजनः । पुं । पुरुषे । वै.निघ. ।

पञ्चतत्त्वम् । क्ली । क्षित्यप्तेजोमरुद्व्योमसु पञ्चभूतेषु । मद्यमांसमत्स्यमुद्रामैथुनेषु । तन्त्रम् ।

पञ्चता (त्वम्) । स्त्री, क्ली । मृत्यौ । अम. ।

पञ्चतिक्तः (क्तः) । पुं । पञ्चविधतिक्तद्रव्यगणे, तत्कषाये वा । तद्विधा—कण्टकारी गुड़ूची शुण्ठी कुष्ठं किराततिक्तञ्च । च.द.पि.श्लेष.ज्व.चि. । अन्यः—निम्बमूलत्वक् पटोलपत्रं वासात्वक् कण्टकारी गुड़ूची चेति । भा. ।

पञ्चतिक्तघृतम् । क्ली । कुष्ठाधिकारे घृतम् । गव्यघृतं ४ श. । क्वाथार्थं—निम्बमूलत्वक् पटोलपत्रं कण्टकारी गुड़ूची वासामूलम्, एषां प्र. १० प. वारि ६४ श. शे. १६ श. । कल्कार्थं—त्रिफला १ श. यथाविधि पचेत् । भैष. । अन्यत् विस्फोटाधिकारे—गव्यघृतं ४ श. । क्वाथार्थं—पटोलपत्रं सप्तपर्णमूलत्वक् निम्बमूलत्वक् वासामूलत्वक् गुड़ूची त्रिफला, एषां प्र. ६ प. २ तो. वारि ६४ श. शे. १६ श. । कल्कार्थं त्रिफला १ श. यथावत्पाच्यम् । रस.र. ।

पञ्चतिक्तघृतगुग्गुलुः । पुं । कुष्ठाधिकारे । गव्यघृतं ४ श. । क्वाथार्थं—निम्बत्वक् (নিমছাল) गुड़ूची (গুলঞ্চ) वासामूलं (বাসকমূল) पटोलपत्रं कण्टकारी, एषां प्र.१० प. जलं ६४ श. शे. ८श. । कल्कार्थं—पाकनादीमूलं विड़ङ्गं देवदारु गजपिप्पली यवक्षारः सर्ज्जिक्षारः (সাজিমাটী) शुण्ठी हरिद्रा शुलफा चव्यं (চই) कुष्ठं (কুড়) ज्योतिष्मती (লতাফট্কী) मरिचम् इन्द्रयवः यमानी चित्रकमूलं (চিতামূল) कटुकी भल्लातकं (ভেলা মুটী) वचा पिप्पलीमूलं मञ्जिष्ठा अतिविषा (আতইচ) त्रिफला वनयमानी, एषां प्र. २ तो. शुद्धगुग्गुलुः ५ प. । (गुग्गुलोः पोटलं बद्ध्वा दोलायन्त्रेण कल्कैः सह घृतं पक्तव्यम्) । पाके सति कल्कं छानयित्वा पुनर्गुग्गुलुना सह पक्त्वा गृहीतव्यम् । सा.कौ. ।

पञ्चतृणम् । क्ली । कुशकाशशरदर्भेक्षुस्वरूपतृणपञ्चमूले । "कुशः काशः शरो दर्भ इक्षुश्चेव तृणोद्भवम् । पञ्चतृणमिदं ख्यातं तृणजम्पञ्चमूलकम् ॥" -प.प्र.२ख. । अन्यच्च—"शालीक्षुकुशकाशौ स्यात् शरेण तृणपञ्चकम् । एषां मूलं तृषादाहपित्तास्रमूत्रसङ्गहृत् ॥" भा. ।

पञ्चथः । पुं । कोकिले । वै.निघ. ।

पञ्चनखः । पुं । व्याघ्रे । रा.नि.व.१९ । कच्छपे । जटा. । गजे । त्रिका. । व्याघ्रशरभशार्दूलगोधाकच्छपशरटसिंहेषु । भक्ष्यपञ्चनखाः—"शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः ।" स्मृतिः ।

पञ्चनखरः । पुं । गोधायाम् । গোসাপ । वै.निघ. ।

पञ्चनिदानम् । क्ली । रोगज्ञानस्य पञ्चविधोपायेषु । यथा—"निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा । सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥" मा.नि. ।

पञ्चनिम्बम् । क्ली । समभागत्वक्पत्रफलपुष्पमूलरूपे निम्बपञ्चके । "निम्बस्य पत्रत्वक्पुष्पफलमूलैर्विमिश्रितैः । पञ्चनिम्बं समाख्यातं तत्तिक्तं निम्बपञ्चकम् ॥" रा.नि.व.२२ ।

पञ्चपत्रः । पुं । चण्डालकन्दे । रा.नि.व.७ ।

पञ्चपत्रिका । स्त्री । गोरक्ष्याम् । रा.नि.व.५ ।

पञ्चपर्णि(र्णी)का । स्त्री । गोरक्ष्यां, गोरक्षचिञ्चायाम् । रा.नि.व.५ ।

पञ्चपल्लवम् । क्ली । आम्रजम्बूकपित्थवीजपूरविल्वपल्लवेषु । আম, জাম, কয়েৎ, টাবা ও বিল্বপত্র । "आम्रजम्बूकपित्थानां वीजपूरकविल्वयोः । गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम् ॥" प.प्र.२ख. ।

पञ्चपित्तम् । क्ली । मत्स्यमहिषवराहमयूरच्छागपित्तेषु । মাছ, মহিষ, শূকর, ময়ূর, ছাগ ইহাদের পিত্ত । "वराहच्छागमहिषमत्स्यमायूरपित्तकं । पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु ॥" वै.संग्रहः । तेषां शुद्धिः—मत्स्यादिपित्तं निम्बद्रावैर्विभावितं शुद्धिमायाति । सा.कौ. ।

पञ्चप्राणाः । पुं । प्राणापानव्यानोदानसमानाख्येषु पञ्चविधदेहान्तर्वायुषु । सु. ।

पञ्चबला । स्त्री । बलातिबलानागबलाराजबलामहाबलासु । वै.निघ. ।

पञ्चबुद्धीन्द्रियम् । क्ली । पञ्चज्ञानेन्द्रियेषु । स्पर्शनं रसनं घ्राणं दर्शनं श्रोत्रञ्चेति । च. ।

पञ्चभद्रम् । क्ली, पुं । गुडूचीपर्पटमुस्तकिरातविश्वभेषजेषु । গুলঞ্চ, ক্ষেৎপাপড়া, মুতা, চিরাতা ও শুঁট । "गुडूची पर्पटं मुस्तं किरातं विश्वभेषजम् । पञ्चभद्रम् ।" सि.यो.च.द.ज्व.चि. ।

पञ्चभूतम् । क्ली । क्षित्यप्तेजोमरुद्व्योमसु । च. ।

पञ्चभृङ्गम् । क्ली । देवताड़शमीभङ्गातालीशनिर्गुण्डीषु । দেয়াতাড়া, শাঁই, সিদ্ধি, তালীশপত্র ও নিশিন্দা । वै निघ. ।

पञ्चमम् । क्ली । मैथुने । तन्त्रम् ।

पञ्चमकारम् । क्ली । मद्यमांसमत्स्यमुद्रामैथुनरूपे मकारपञ्चके । तन्त्रम् ।

पञ्चमास्यः । पुं । कोकिले । श.र. । [व.१९।

पञ्चमुखः । पुं । सिंहे । पिङ्गलसिंहे । रा.नि.

पञ्चमुखी । स्त्री । वासकक्षुपे । বাসক গাছ । रा.नि.व.४ ।

पञ्चमुष्टिः (कः) (ष्टी) । पुं,स्त्री । सान्निपातिकज्वरे यूषविशेषे । আহার দ্রব্যবিশেষ । स च यववदरीफलकुलत्थमुद्गकाशामलकानामेकैकां मुष्टिं गृहीत्वाष्टगुणतोये पक्वः । च.द.सन्निपातज्व.चि.। "यवकोलकुलत्थानां मुद्गमूलकशुण्ठयोः । एकैकमुष्टिमाहृत्य पचेदष्टगुणे जले । पञ्चमुष्टिक इत्येष वातपित्तकफापहः । शूले प्रशस्यते गुल्मे कासे श्वासे क्षये ज्वरे ॥" ८ तोलके । वै.निघ.२ भ.क्षय.चि.सूर्य्यप्रभायां । स्वल्पायाम् । वै.निघ. ।

पञ्चमूत्रम् । क्ली । मूत्रपञ्चके, तच्च गर्द्दभीगोमेषीच्छागीमहिषीजमिश्रितमूत्रे । "गवाजानां मेषीणां महिषीणाञ्च मिश्रितम् । मूत्रेण गर्द्दभीनाञ्च तन्मतं मूत्रपञ्चकम् ॥" रा.नि.व.२२ । गुणास्तत्तच्छब्दे द्रष्टव्याः ।

पञ्चमूलम् (ली) । क्ली,स्त्री । पञ्चानां मूलानां समष्टौ । तानि च बृहत्स्वल्पतृण-शतावरी-जीवन-बला-गोक्षुर-गुड़ूच्यादिकानि नवविधानि प्रत्येकं पञ्चपञ्चमूलात्मकानि भवन्ति । १ । "विल्वश्योणा-

कगाम्भारीपाटलागणिकारिका ।” इति बृहत्पञ्चमूलम् । च.द. । सु.सू.३८अ. । २ । शालपर्णी पृश्निपर्णी बृहती कण्टकारिका गोक्षुरश्च । स्वल्पपञ्चमूलम् । गुणाः—अश्मरीहरम् अत्यग्निदीपनम् । चर्क.चि.। See लघुपञ्चमूलं । ३ । कुशकासदर्भशरेक्षुमूलात्मकं तृणपञ्चमूलं पित्तकासक्षीरपाने चाक्षम् । सि.यो.कास चि.श्रीकण्ठः । ४ । शतावरी-विदारीकन्द-जीवन्ती-विषाणी-जीवकात्मकं शतावर्य्यादिपञ्चमूलं । गुणाः—स्तन्यकरं गुरु वृष्यं बल्यं शीतलं कान्तिदमाग्नेयञ्च । ५ । जीवकर्षभकमेदामहामेदाजीवन्तीषु । जीवकादिपञ्चमूलं । गुणाः – वृष्यं चक्षुष्यं धातुवर्द्धनं बल्यं दाहपित्तज्वरतृष्णाघ्नञ्च । ६ । बलापुनर्नवैरण्डमुद्गपर्णीमाषपर्णीषु । बलादिपञ्चमूलं । गुणाः – भेदकं शोफघ्नं ज्वरघ्नञ्च । वै.निघ. । ७ । गोक्षुरबदरीन्द्रवारुणीकासमर्द्दसर्पेषु । गोक्षुरादिपञ्चमूलं । ८ । गुड़ूचीमेषशृङ्गीशारिवाविदारीहरिद्रासु । वल्लीपञ्चमूलं । ९ । करमर्द्दत्रिकण्टकसैरीयक (झाँटी) शतावरीगृध्रनखीषु । इति कण्टकपञ्चमूलं । सु.सू.३८अ. । गुणाः तत्तत्पर्य्याये द्रष्टव्याः ।

पञ्चमूल्यादिः । पुं । ज्वरातिसारे कषायः । “पञ्चमूलीबलाबिल्वगुड़ूचीमुस्तनागरैः । पाठाभूनिम्बह्रीवेरकुटजत्वक्फलैः शृतम् ॥” च.द. ।

पञ्चरत्नम् । क्ली । स्वर्णमौक्तिकमाणिक्यहीरकराजपट्टेषु । अन्यच्च—“कनकं हीरकं नीलं पद्मरागञ्च मौक्तिकम् । पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्व्वदर्शिभिः ॥” हेमा. ।

पञ्चरसलोहम् । क्ली । वर्त्तलौहे । वै.निघ. ।

पञ्चरसा । स्त्री । हरीतक्याम् । मद.व.१ । आमलक्याम् । हारा. ।

पञ्चरत्नकः । पुं । पखौड़वृक्षे । रा.नि.व.८ ।

पञ्चराजिफलः । पुं । पटोललतायाम् । रा.नि.व.४ ।

पञ्चलवणम् । क्ली। काचसैन्धवसामुद्र (कर्कच) विड़सौवर्चललवणेषु समभागेषु । “काचसैन्धवसामुद्रविड़सौवर्चलैः समैः । स्यात्पञ्चलवणम् ।” रा.नि.व.२२ । “सौवर्चलं सैन्धवञ्च विड़मौद्भिदमेव च । सामुद्रेण सहैतानि पञ्च स्युर्लवणानि च ॥” शा.म.३अ. । तद्गुणाः—“मधुरं सृष्टविण्मूत्रं स्निग्धं सूक्ष्मं बलापहम् । वीर्य्योष्णं दीपनं तीक्ष्णं कफपित्तविवर्द्धनम् ॥” शार्ङ्ग.म.६अ. ।

पञ्चलक्षणः । त्रि । वातपित्तकफसन्निपातागन्तूनां लक्षणयुक्ते । व्रणस्य गन्धवर्णस्राववेदनाकृतिरूपलक्षणयुक्ते । सु.चि.१अ. ।

पञ्चलोह(क)म् । क्ली । सौराष्ट्रकलौहे । हे.च. । सुवर्णरजतताम्रवङ्गनागरूपेषु पञ्चसु धातुषु । “सुवर्णं रजतं ताम्रं त्रयमेतत्त्रिलौहकम् । वङ्गनागसमायुक्तं तत्प्राहुः पञ्चलौहकम् ।” इति प्रथमम् । समभागस्वर्णरजतताम्रत्रपुकृष्णायसेषु । “सुवर्णं रजतं ताम्रं त्रपु कृष्णायसं समम् । शृङ्गाङ्गमिति वा द्रव्यं द्वितीयं पञ्चलौहकम् ॥” इति द्वितीयम् । रा.नि.व.२२ । वा.उ.३९अ. ।

पञ्चवक्त्रः । पुं । पञ्चमुखरुद्राक्षे । स्मृतिः ।

पञ्चवक्त्ररसः । पुं । रसोऽयं सन्निपातज्वरे हितः । “गन्धेशटङ्कमरिचं विषं धत्तूरजैर्द्रवैः । दिनं सम्मर्द्दितं शुष्कं पञ्चवक्त्रो रसो भवेत् । आर्द्रकस्य रसेनैष दातव्यो रक्तिकामितः ॥” भा. ।

पञ्चवटी । स्त्री । बिल्वाश्वत्थवटाशोकोदुम्बरेषु । वै.निघ. ।

पञ्चवर्णकः । पुं । धुस्तूरवृक्षे । वै.निघ. ।

पञ्चवर्द्धनः । पुं । पखौड़वृक्षे । रा.नि.व.८ ।

पञ्चवल्कलम् / **पञ्चवेतसम्** } क्ली । वटाश्वत्थोदुम्बरप्लक्षवेतसवल्कलेषु । বট, অশ্বত্থ, যজ্ঞডুমুর, পাকুড় ও বেতস ছাল । “न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः । सर्व्वैरेकत्र मिलितैः पञ्चवेतसमुच्यते ।” रा.नि.व.२२ । शिरीषपिप्पलवटप्लक्षवेतसेषु । वा.उ.३६अ. । गुणाः—“त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ।” भा. ।

पञ्चवीजम् । क्ली । कर्कटीत्रपुषदाड़िमपद्मकपिकच्छुजेषु पञ्चवीजेषु । কাঁকুড়, শশা, দাড়িম, পদ্ম ও আলকুশীর বীজ । राजिकाजमोदाजीरकतिलखसखसेषु । রাইশরিষা, যমানী, জীরা, তিল ও পোস্ত ।

पञ्चशस्यम् । क्ली । धान्यतिलमुद्गयवश्वेतसर्षपेषु ।

पञ्चशाखः । पुं । हस्ते । रा.नि.व.१८ ।

पञ्चशिखः । पुं । सिंहे । त्रिका. ।

पञ्चशूकः । पुं । सौम्यकीटजातौ । सु.कल्प.८अ. । See कीटः ।

पञ्चशूरणम् । क्ली । शूरणपञ्चके अत्यम्लपर्णीकाण्डीरमालाकन्दशूरणारण्यशूरणात्मके । "अत्यम्लपर्णीकाण्डीरमालाकन्दद्विशूरणैः । प्रोक्तो भवति योगोऽयं पञ्चशूरणसंज्ञकः ॥" रा.नि.व.२१।

पञ्चशैरीषम् । क्ली । शिरीषवृक्षस्य फलपत्त्रत्वङ्मूलपुष्पेषु समभागेषु । "शैरीषं कुसुमं मूलं फलं पत्त्रं त्वगित्ययं । कीटारिः कथितो योगः पञ्चशैरीषकाभिधः ॥" रा.नि.व.२२ ।

पञ्चसर्पिणी । स्त्री । औषधिविशेषे । लक्षणं— "मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चसर्पिणी । पञ्चारत्निप्रमाणा ।" सु.चि.३०अ. ।

पञ्चसार(राख्य)पानकम् । क्ली, पुं । पानकभेदे । पानाविशेष । स चाभिनवमृत्पात्रस्थः कदलीपनसमिश्रोऽम्लरसमिश्रश्च । तदुक्तं —"द्राक्षामधूकखर्ज्जूरकाश्मर्यैः सपरूषकैः । तुल्यांशैः कल्पितं पूतं शीतं कर्पूरवासितम् ।" वा.सू.५अ. । काश्मीरमधुखर्ज्जूरमृद्वीकाफालसाफलं । तेषां जलं गृहीत्वा तु एकीकृत्य विपेदमून् । चातुर्जातेन्दुमरिचशर्कराशार्द्रकादिकान् । वस्त्रेण गालयित्वा तत् पञ्चसाराख्यपानकम् । गुरु हृद्यं धातुकरं पित्तहृट्श्रमदाहनुत् ॥" वै.द्रव्यगुण. ।

पञ्चसाराम्बु । क्ली । खर्ज्जूराद्यम्बुनि । "मधुखर्ज्जूरमृद्वीकापरूषकसिताम्भसा ।" वा.चि.२अ. ।

पञ्चसिद्धौषधी । स्त्री । पञ्चकन्दात्मकसिद्धौषधिषु । रा.नि.व.२१ । See सिद्धौषधी ।

पञ्चसुगन्धिकम् । क्ली । कर्पूरकङ्कोललवङ्गजातीफलपूगेषु । "कर्पूरकङ्कोललवङ्गपुष्पगुवाकजातीफलपञ्चकेन । समांशभागेन च योजितेन मनोहरं पञ्चसुगन्धिकं स्यात् ॥" रा.नि.व.२२ ।

पञ्चक्षारम् । क्ली । यवपलाशसर्ज्जतिलमुष्ककजक्षारेषु । "यवमुष्ककसर्जानां पलाशतिलयोस्तथा । क्षारैश्च पञ्चभिः प्रोक्तः पञ्चक्षाराभिधो गणः ॥" रा.नि.व.२२ । पञ्चलवणे । वै.निघ. ।

पञ्चक्षीरवृक्षः । पुं । वटाश्वत्थोदुम्बरपर्कटीगर्दभाण्डेषु । বট, অশ্বথ, যজ্ঞডুমুর, পাকুড়, গন্ধপুণ্ড । सि.यो.यक्ष्म.चि.सर्पिर्गुडे । अन्यः –उदुम्बरवटाश्वत्थवेतसप्लक्षेषु वर्त्तते । "उदुम्बरो वटोऽश्वत्थो वेतसः प्लक्ष एव च ।" प.प्र.३अ. । वेतसोऽत्र गन्धमुख इति उत्तरदेशे प्रसिद्धः । प्लक्ष इति वटः । अथवा पर्कटीत्यश्वत्थभेदः । प.प्र.३अ.। See क्षीरवृक्षः ।

पञ्चाङ्गम् । क्ली । योगविशेषः । स चैकस्य वृक्षस्य समभागमिलितत्वक्पत्त्रफलमूलपुष्पात्मकः । "त्वक्पत्त्रकुसुमं मूलं फलमेकस्य शाखिनः । एकत्र मिलितं तद्वेत् पञ्चाङ्गमिति संज्ञितम् ॥" रा.नि.व.२२ । पुं । कच्छपे । श.मा. ।

पञ्चाङ्गगुप्तः । पुं । कच्छपे । त्रिका. ।

पञ्चाङ्गिकपञ्चगणः । पुं । स्वल्पमहत्तृणवल्लीकण्टकसंज्ञकेषु पञ्चमूलेषु । सि.यो.तृष्णा.चि. ।

पञ्चाङ्गीबन्धः । पुं । पञ्चाङ्गुलाकारव्रणबन्धविशेषे । "चिबुके चापि पञ्चाङ्गी हनुसन्धौ विसश्लिते । स्वेदयित्वा स्थिते सन्धौ कुर्य्यात्पञ्चाङ्गुलाकृतिम् ॥" सु.शा.ड. । सु.चि.३अ. ।

पञ्चाङ्गुलः । पुं । श्वेतैरण्डे । एरण्डवृक्षे । रा.नि.व.८ । क्ली । तेजपत्रे । वै.निघ. ।

पञ्चाङ्गुली । स्त्री । तक्रावृक्षे । रा.नि.व.४ । ऊर्द्ध्वजत्रुजव्रणस्य बन्धनविशेषे । सु.सू.१८अ. ।

पञ्चाज्यम् । क्ली । छागदध्यादिपञ्चके । वै.निघ.२भ.जीर्णज्व.चि. ।

पञ्चात्मा । पुं । शरीरान्तर्वायौ । यथा—"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।" निदा.।

पञ्चाननः । पुं । शिवे । सिंहे । मे. ।

पञ्चाननरसः । पुं । हृद्रोगाधिकारे रसः । पाठः—"सूतगन्धौ द्रवैर्धात्र्या मर्दयेन्नीलनीद्रवैः । यष्टिखर्ज्जूरसलिलैर्दिनं हृद्रोगजिद्रसः । धात्रीचूर्णं सिताक्षौद्र पिबेद्रोगापनुत्तये ॥" रस.चि. ।

पञ्चामृतम् । क्ली । दुग्धादिपञ्चविधद्रव्यसमवाये । गुडूचीगोक्षुरतालमूलीमुण्डिकाशतावरीणां मिलितसमभागे । "गुडूची गोक्षुरश्चैव मुषली मुण्डिका तथा । शतावरीति पञ्चानां योगः पञ्चामृताभिधः ॥" গুলঞ্চ, গোক্ষুর, তালমূলী, মুণ্ডীরী, শতমূলী। रा.नि.व.२२ । इदमौषधं पञ्चामृतमुच्यते । द्वितीयं देवपूजनार्थम् । घृतमधुशर्करादधिदुग्धेषु । দুগ্ধ, দধি, ঘৃত, চিনি, মধু ।

पञ्चामृतपर्पटी । स्त्री । यकृदधिकारे । गन्धकं ८ तो. रसः २ तो. लौहं १ तो. अभ्रं ४ मा. ताम्रं ४ मा. पर्पटीवत् पाकः । रस.र. ।

पञ्चामृतपिण्डः । पुं । अश्वस्य बलपुष्टिकरपिण्डविशेषे । "कटुका च जयन्ती च भामरी सुरसा घनः । पञ्चामृतमयः पिण्डः...... ॥" नकुल. १३अ. ।

पञ्चामृतयूषः । पुं । कुलत्थादिपञ्चद्रव्यकृतयूषविशेषे । कुलथ, मुग, अरहर, मासकलाय, वर्वटी (वा राजशिम्बीर वीज) । यथा—"कुलित्थमुद्गाढ़कमाषकाणां निष्पावयुक्तश्च कृतोहि यूषः । सन्दीपनः पाचनधातुवृद्धिकरो लघुः स्याद्रुचिप्रणाशः । ज्वरं बलासं चयमङ्गमर्दं वीर्यंत पञ्चामृतयूषकोऽयम् ॥" वै.निघ. ।

पञ्चाम्ल(फल)म् । क्ली । १ । समभागमिश्रितकोलदाड़िमतिन्तिड़ीचुक्रकाम्लवेतसेषु । कुल, दाड़िम, तेँतुल, चुक्र, अम्लवेतस । २ । समभागमिलितजम्बीरनारङ्गाम्लवेतसतिन्तिड़ीवीजपूरकेषु । गोँड़ा, नारङ्गा, अम्लवेतस, तेँतुल, टाबालेबु । ३ । "कोलदाड़िम्बवृचाम्लचुक्रकः साम्लवेतसाः । फलम्पञ्चाम्लमुद्दिष्टमम्लपञ्चफलं स्मृतम् ॥" ४ । "जम्बीरनारङ्गसहाम्लवेतसैः सतिन्तिड़ीकैश्च सवीजपूरकैः । समांशभागेन तु सेवितैरिदं द्वितीयमुक्तञ्च फलाम्लपञ्चकम् ॥" रा.नि.व.२२ । भा. । ५ । "कोलदाड़िमवृचाम्लचुक्रीकाचुक्रिकारसः । पञ्चाम्लको मुखे लेपः सदा तृष्णां नियच्छति ॥" सा.कौ. ।

पञ्चारविन्दम् । क्ली । अरविन्दस्य मृणालविसकेसरपत्रवीजेषु । वा.उ.३९अ. ।

पञ्चालकः । पुं । अग्निप्रकृतिकीटविशेषे । सु.कल्प.८अ. । See कीटः ।

पञ्चावस्थः । त्रि । मृते ।

पञ्चाविकम् । क्ली । मेषीदधिदुग्धघृतमूत्रमलेषु । वै.निघ.२भ.जीर्णज्व.चि. ।

पञ्चास्यः । पुं । सिंहे । अम. ।

पञ्चेन्द्रियम् । क्ली । इन्द्रियपञ्चके । चक्षुः, कर्ण, नासा, जिह्वा, त्वक् । वाक्पाणिपादपायूपस्थेषु ।

पञ्चोपविषम् । क्ली । स्नुह्यर्ककरवीरलाङ्गलिविषमुष्टिकेषु । मनसा, अर्क, करवी, विषलाङ्गलि, विषमुष्टि । "स्नुह्यर्ककरवीराणि लाङ्गली विषमुष्टिकं । एतान्युपविषाख्याहुः ।" रा.नि.व.२२ ।

पञ्चोषणम् । क्ली । पञ्चकोले । पिप्पलीपिप्पलीमूलचव्यचित्रकशुण्ठीषु । वै.निघ.ज्व.चि.भर्कादिः ।

पञ्चोष्माणः । पुं । शरीरान्तःपञ्चविधपाचकाग्निषु । यथा—"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः । पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यमी । पार्थिवाः पार्थिवानेवं शेषाः शेषांश्च देहगान् ॥" सा.कौ. ।

पञ्जरः (लः) । पुं । कोलकन्दे । रा.नि.व.७। क्ली । शरीरे । शरीरास्थिसमूहे । त्रिका. ।

पञ्जरास्थि । क्ली । पञ्जरस्य चतुर्विंशत्यस्थिषु । च.शा.७अ. ।

पटम् । क्ली । भूतृणे । गन्धतृण । र.मा. । पुं । कार्पासे । वै.निघ. । प्रियालवृचे । मे. । रस.र. बाल.चि. ।

पटच्चरम् । क्ली । जीर्णवस्त्रे । वै.निघ. ।

पटदः । पुं, स्त्री (दा) । कार्पासचुपे । रमा. ।

पटरकः । पुं । गुन्द्रतृणे । रा.नि.व.८ ।

पटलः । पुं । कासमर्दवृचे । कार्पासवृचे । वै.निघ. । पटोलवृचे । त्वचि । त्वक् । भा. । क्ली । दृष्ट्यावरकच्छदिरूपे नेत्ररोगे, तिमिरादौ । भा.नि. । तच्चतुर्विधम् । तत्र प्रथमं वाह्यं पटलं रसरक्ताश्रयम्, द्वितीयं मांसाश्रयं, तृतीयं मेदःसंश्रयं, चतुर्थञ्च कालकास्थिसंश्रयम् । "अधस्तादुपरिष्टाद्वा पटलं यस्य जायते । रुणद्धि नयने सद्यः ...... ॥" अ.द.३०अ. । See तिमिरः ।

पटालुका । स्त्री । जलौकायाम् । त्रिका. ।

पटिः । स्त्री । कुम्भिकावृचे । मे. ।

पटीरम् । क्ली । मूलके । भा.म.३भ.अर्श.चि. । चन्दने । प.मु. । पुं । खदिरवृचे । उदरे । उणा. । वंशलोचने । सन्धिवायौ । वै.निघ. ।

पटुः (कः) । पुं । पटोललतायाम् । प.मु. । कारवेल्लयां । উচ্ছে গাছ । रा.नि.व.३। शिम्बी ।

रा.नि.व.१८। चीनकर्पूरे। चीरकनामगन्धद्रव्ये। रा.नि.व.१२। लवणे। मे। क्ली। पटोलपत्रे। विश्व.। पांशुजलवणे। प.मु.। जीरके। वचायां। वच। छिक्कन्याम्। (हाँचिता। वै.निघ.। (कं) पटोलविशेषे। त्रि। रोगमुक्ते। रा.नि.व.२०।

पटुतृणकम् । क्ली। लवणतृणे। रा.नि.व.८।

पटुत्रयम् । क्ली। लवणत्रये, विट्सैन्धवसौवर्च्चललवणेषु। वै.निघ.२भ.संग्रहणीचि.।

पटुपञ्चकम् । क्ली। लवणपञ्चके। पञ्चलवण। See पञ्चलवणम्। [रा.नि.व.४।

पटुपत्रिका । स्त्री। चीरिकायां। क्षुद्रचुञ्चुपे।

पटुपर्णिका । स्त्री। चीरिणीक्षुपे। शिकुई। रा.नि.व.४। [শেয়ালকাঁটা। अम.।

पटुपर्णी । स्त्री। स्वर्णक्षीर्याम्। সোণাখিরুই,

पटुभेदनिका । स्त्री। कृष्णजीरके। रा.नि.व.६।

पटुलिका । स्त्री। नागवल्लीभेदे। पोटकुलिकेति ख्याते। रा.नि.व.११। See नागवल्ली।

पटूत्तमम् । क्ली। सैन्धवलवणे। रा.नि.व.६।

पटेरकम् । क्ली। मुस्तकतृणे। वै.सं.।

पटोटजम् । क्ली। छत्राके। श.र.।

पटोलः । पुं। (Trichosanthes dioica Roxb.) स्वनामख्यातफलशाकविशेषे। পলতা লতা। हिं परवल। मं कडुपड़वल, कतुपड़ोल। कं सोगवल्ली। तें कोम्मुपोटल। गुर्ज. चुरनिहारकपिलवर्णी। ता. कोम्बुपुड़लै। कान्यकुब्जे नोरहड़ी। गुणाः—"पटोलः कटुतिक्तोष्णः रसपित्तबलासजित्। कफकण्डूतिकुष्ठास्रज्वरदाहार्त्तिनाशनः॥" रा.नि.व.३। तन्मूलादिगुणाः—"पटोलस्य भवेन्मूलं विरेचनकरं सुखात्। नालं श्लेष्महरम्पत्रम्पित्तहारि फलं पुनः। दोषत्रयहरम्प्रोक्तं तद्वत्तिक्ता पटोलिका॥" भा.। फलं रक्तपित्तघ्नम्। सि.यो.र.पि.चि.। पत्रं पित्तघ्नं नालं कफघ्नं, फलं त्रिदोषघ्नं. मूलं विरेचनम्। रा.नि.व.७। क्ली। पाण्डुफले। পটোল। वा.सू.१५ अ.।

पटोलकः । पुं। शुक्तौ। श.मा.।

पटोलपत्रम् । क्ली। वल्लीशाकभेदे। পলতা নতি। रा.नि.व.७। See पटोलः।

पटोलादिः । पुं। पटोलचन्दनकुचन्दनमूर्व्वागुडूचीपाठाकटुरोहिणीकृते पञ्चद्रव्यकषाये। गुणाः—"पटोलादिर्गणः पित्तकफारोचकनाशनः। ज्वरोपशमनो वल्यः छर्द्दिकण्डूविनाशनः॥" सु.। अन्यः—पटोलसारिवामुस्तपाठाकटुकरोहिणीसाधितकषाये। अयं सततकज्वरशमनः। वा.चि.१ अ.। अन्यश्च—पटोलनिम्बत्रिफलामृद्वीकामुस्तवत्सकक्कृते कषाये। अयं अन्येद्युष्के हितः। अपरः—पटोलरक्तचन्दनमूर्व्वातिक्तापाठाश्वगन्धासु। च.द.।

पटोलिका (ली) । स्त्री। स्वादुपटोलनामफलशाकविशेषे। শাঁড়পটোল। हिं भिङ्गपौड़लि। मे.। गुणाः—स्वादुः पित्तघ्नी रुचिकृत् ज्वरघ्नी बलकरी दीपनी पाचनी च। रा.नि.व.७। च.द.व्रण-चि.।

पट्टः । पुं। पेषणशिलायाम्। व्रणबन्धनद्रव्ये। পটী। सु.सू.५ अ। पट्टशाके। পাটশাক। श.मा.।

पट्टर(ङ्ग)म्(रञ्जक[न,क]म्) (रागम्) । क्ली, पुं। पत्राङ्गचन्दने। বকম কাঠ। रा.नि.व.१२।

पट्टशाकः । पुं। (Corchorus capsularis or C. olitorius.) शाकविशेषे। পাটশাক, নালিতাপাতা। हिं पटुया। गुणाः—रक्तपित्तहरः विष्टम्भी वातकोपनश्च। भा.।

पट्टिकः । पुं। ताम्रवर्णरोध्रे। अ.टी.रा.।

पट्टिका (ख्यः) । स्त्री पुं। ताम्ररोध्रे। रक्तवर्ण লোধ। अम.।

पट्टिकारो(लो)ध्रः । पुं। स्वनामख्यातलोध्रे, रक्तरोध्रे। পাটিয়া লোধ। गुणाः—ग्राही लघुः पित्तरक्तपित्तातिसारशोथघ्नश्च। भा.। कषायः शीतलः वातकफरक्तविषघ्नः चक्षुष्यः। तत्र कल्करोध्र एव श्रेष्ठः। रा.नि.व.६।

पट्टिलः । पुं। (Coesalpinia bonduccella.) वृक्षविशेषे। पूतिकरञ्ज। जटा.।

पट्टिलोध्रः (कः) । पुं। पट्टिकालोध्रे। श.र.।

पट्टी (इन्) । पुं, स्त्री । लोध्रवृक्षे । च.टी.भ. । रक्तरोध्रे । रा.नि.व.६ ।

पणः । पुं । कपर्द्दे । वै.निघ.२भ.मधुरज्व.चि. विसूचिकाकषाये । ५गुञ्जामाने । प.प्र. ।

पणदा । स्त्री । पण्यान्धायाम् । रा.नि.व.२३ ।

पणसः (सः) । पुं । (Artocarpus integrifolia.) कण्टालुफलवृक्षे । काँटाल गाछ । हिं कटहर । मं फणस । कं हलसिन । तें उत्. पणस । ता. पिल्ला । गुणाः—फलं मधुरं पिच्छिलं गुरु हृद्यं बलवीर्य्यवृद्धिकरं श्रमदाहशोषघ्नं रुचिकरं ग्राहि दुर्ज्जरञ्च । तद्बीजम् ईषत्कषायं मधुरं वातलं गुरु तत्फलविकारघ्नं त्वग्दोषघ्नञ्च । बालपणसफलन्तु नीरसं हृद्यञ्च । मध्यपक्कं तत् दीपनं रुचिदं लवणादियुक्तञ्च । रा.नि.व.११ । पक्कफलं रक्तवर्द्धकं मधुरं शीतलं दुर्जरं वातपित्तघ्नं श्लेष्मशुक्रबलकरञ्च । तद्बीजं रक्तपित्तघ्नं स्वादु फलतुल्यगुणञ्च । तदपक्कफलं कषायं स्वादु वातलं शीतलञ्च । राज. । तन्मज्ज(भूँति)गुणाः—शुक्रलं त्रिदोषघ्नं विशेषेण गुल्मिनां न हितम् । रा.नि.व. ११ । अस्य क्वाथः मांसग्रन्थिशोफे, तन्मज्ज(भूँति) अण्डवृद्धौ, कोमलपल्लवः चर्म्मरोगे च हितः ।

पणास्थिकम् । क्ली । वराटके । कड़ि । चि-का. । है.च. । [See आवर्त्तः ।

पणिकावर्त्तः । पुं । राजावर्त्तमणौ । प.मु. ।

पण्डः (कः) । पुं । नपुंसके । अम. ।

पण्यविलासिनी । स्त्री । नखीनामगन्धद्रव्ये । रा.नि.व.१२ । [ट्‌की । वै.निघ. ।

पण्या । स्त्री । ज्योतिष्मतीलतायाम् । नताफ-

पण्यान्धः (न्धा) । पुं, स्त्री । स्वनामख्याततृणे । मं पणधि । कं हनजेमूरु । सा दीर्घा मध्या ह्रस्वा च इति त्रिधा । एतासु मध्यमा रसवीर्य्य-विपाकेषु गुणाधिका । अपरद्वयं समवीर्य्यं, तिक्तं क्षारं सारणञ्च, तत्कालशस्त्रघातव्रणरोपणञ्च । रा.नि.व.८ ।

पतगः । पुं । पक्षिणि । अम. ।

पतङ्गः (मः) । पुं । पक्षिणि । अम.। तण्डुले । जलमधूकवृक्षे । रा.नि.व.१६ । रक्तशालौ । मे. । वा.सू.६अ. । च.सू.२७अ. । क्ली । पारदे । मे. । पत्तङ्गचन्दने । वकम काठ । श.च. ।

पतङ्गमः । पुं । पक्षिणि । व्याकरणम् ।

पतङ्गिका । स्त्री । पुत्तिकानाममधुमक्षिकायाम् । अम. ।

पतत्रम् । क्ली । पक्षे । अम. ।

पतत्रिः (त्री) । पुं । पक्षिणि । अम. ।

पतत्रीरः । पुं । श्येनपक्षिणि । बाज । श.र.

पतमः (सः) । पुं । पक्षिणि । पतङ्गे । उणा. ।

पताका । स्त्री । चिह्ने । जटा. ।

पतिः । पुं । मूले । गतौ । अम. ।

पतिम्वरा । स्त्री । कृष्णजीरके । श.च. ।

पतिश्यायः । पुं । प्रतिश्याये । हि. ।

पतेरः । पुं । पक्षिणि । आड़के । उणा. ।

पत् । पुं । पादे । रा.नि.व.१८ ।

पत्त(त्र)ङ्गम् । क्ली । (Caesalpinia sappan.) रक्तकाष्ठविशेषे, पत्राङ्गे । वकम् काठ । हिं पतङ्ग । तें चोकनुकट्टु । उत्. वकमो । गुर्ज्ज. पारस्य. ता. वट्टङ्गी । र.मा. । भा.उ.वाजी. । गुणाः —"पत्तङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रणुत् । हरिचन्दनवद्वेद्यं विशेषाद्दाहनाशनम् । चन्दनानि च सर्व्वाणि सदृशानि रसादिभिः । गन्धेन तु विशेषोऽस्ति पूर्व्वः श्रेष्ठतमो गुणैः । भा. । रक्तचन्दने । श.र. । सु.चि.२१अ. । "पत्तङ्गं रक्तचन्दनम् ।" भा.क्षुद्र.रो.चि.कुङ्कुमाद्यतैले । काष्ठक्वाथः रजोबाहुल्यकारी मलसंग्राही च । पुं । भृङ्गराजे । भीमराज । र.मा. । केशराजे । केशुत्ते ।

पत्तूरः (रा) । पुं,स्त्री । शालिञ्चशाके । र.मा. । च.द.सि.यो.क्रमि चि. । सु.चि.१८अ. । जलपिप्पल्याम् । पर्कटीवृक्षे । वै.निघ. । शमीवृक्षे । भैष. ने.रो.चि. । क्ली । कुचन्दने । भा. । सु.सू.३८अ. । वातशमने । पत्तङ्गे । वै.निघ. ।

पत्रम् । क्ली । छदे । पाता । अम. । तेजपत्रे । रा.नि.व.६ । सु.सू.३८अ एलादिः । वा.चि.१अ. । "पत्रं कटुकरोहिणी ।" पक्षिपक्षे । मे. ।

पत्रकः । पुं । पलाशवृक्षे । रा.नि.व.२३ ।

पत्रकल्कम् । क्ली । गन्धग्रहणार्थम् उष्ण एव स-म्पिष्य पक्वतैले यत् कर्पूरसगनाभ्यादिकं दीयते । গন্ধ মশলা দেওয়া । "पक्वमुतेऽप्युष्ण एव सम्यग्यत् पेष्य वर्तितम् । दीयते गन्धग्रहार्थं पत्रकल्कं तदुच्यते ॥" च.द.वा.व्या.चि.महासुगन्धितैले ।

पत्रगुप्तः । पुं । गुडूचीक्षुपभेदे । তেকাঁটাসিজু । श.च. । [মনসা গাছ । रा.नि.व.८ ।

पत्रघ(ध)ना । स्त्री । सातलायाम्, सेहुण्डे ।

पत्रजासवः । पुं । पटोलतालपत्रोत्थासवे । च.सू.२५च. । [रा.नि.व.७ ।

पत्रतण्डुला (ली) । स्त्री । यवतिक्तायाम् ।

पत्रतरुः । पुं । विट्खदिरवृक्षे । रा.नि.व.८ ।

पत्रतालकम् । क्ली । वंशपत्रहरिताले । वै.निघ. ।

पत्रदारकः । पुं । क्रकचे । করাত । त्रिका.।

पत्रनाड़िका । स्त्री । ताम्बूलीशिरायाम्, पत्रशिरायां । जटा. ।

पत्रनामकम् । तेजपत्रे । वै.निघ. ।

पत्रपरशुः । पुं । अस्त्रविशेषे । ছেনী ।

पत्रपालः । पुं । हस्वछुरिकायाम् । है.च. ।

पत्रपाली । स्त्री । अस्त्रविशेषे । কাঁচি । हला.।

पत्रपिशाचिका । स्त्री । वारित्रायां । টোকা, পেকে । त्रिका. । हारा. ।

पत्रपुष्पः । पुं । (Ocymum pilosum.) रक्ततुलसीवृक्षे । श.च. ।

पत्रपुष्पकः । पुं । भूर्जवृक्षे । श.मा. ।

पत्रपुष्पा । स्त्री । (Ocymum Sanctum.) तुलसीवृक्षविशेषे । श.मा.। क्षुद्रपत्रतुलस्यां । र.मा.।

पत्रमालः । पुं । वेतसवृक्षे । वै.निघ. ।

पत्रयौवनम् । क्ली । नवाङ्कुरे । जटा. ।

पत्ररथः । पुं । पक्षिणि । अम. ।

पत्रलम् । क्ली । पत्तलदुग्धे । वै.निघ. । दध्नि । পাতলা দই । है.च. ।

पत्रवर्णः । पुं । सप्तपर्णवृक्षे । रा.नि.व.१२ ।

पत्रवल्ली । स्त्री । पत्ररषनायाम् । है.च. । रुद्रजटायाम् । पलाशीलतायाम् । रा.नि.व.१ ।

पत्रविषम् । क्ली । विषपत्रिकादौ । तानि च विषपत्रिकालम्बावरदारुककरम्भमहाकरम्भानीति पञ्च । गुणाः —"जृम्भाङ्गोद्वेष्टनश्वासा ज्ञेयाः पत्रविषेण तु ।" सु.कल्प २च । "जृम्भणं वेपनं श्वासः नृणां पत्रविषैर्भवेत् ।" भा. ।

पत्रवृश्चिकः । पुं । तन्नामकाग्निप्रकृतिककीटे । सु.कल्प.८च । See कीटः ।

पत्रशाकः । पुं,क्ली । भक्ष्यशाकवृक्षमात्रे । तच्च षड्विधम् । "पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा । शाकं षड्विधमुद्दिष्टङ्गुरु विद्याद्यथोत्तरम् ॥" राज. । पत्रशाकगणो यथा—काकमाचीकासमर्द्दपुनर्नवापूतिकापटोलपत्रमेघनादशालिञ्चहिलमोचिकापालङ्कसुनिषण्णकमिति । "द्विर्वास्तूकं द्विःपीतकी त्रिर्मर्षस्तण्डुलीयकं । द्विधा पालक्यपि द्वेधा पटुया-कालशाककम् । करवी लोणिका घोली चुचुशाङ्गेरिचुक्रिका । सुनिषण्णकगोजिह्वाद्रोणपुष्पीपटोलकम् । शतपुष्पा मेथिका च कुञ्जरलोंणकण्टकः । धान्यकं दिव्यक्रवर्त्ती जीवन्ती काकमाचिका । पर्पटः कासमर्द्दश्च द्विधा राजगिरीतकः । ······द्विधा कोष्ठः पत्रशाकगणस्त्वयम् ॥" चर्क. । [हारा. ।

पत्रशिरा । स्त्री । पर्णनाड्यां । পাতের শিরা।

पत्रशृङ्गी । स्त्री । मूषिककर्णिकायाम् । इन्दूरकाणी । वै.निघ. । [रा.नि.व.२ ।

पत्रश्रेणी । स्त्री । मूषिकपर्ण्याम् । द्रवन्त्याम् ।

पत्रश्रेष्ठः । पुं । विल्ववृक्षे । रा.नि.व.११ ।

पत्रसूचिः । पुं । कण्टके । त्रिका. ।

पत्रहिमम् । क्ली । हिमे । दुर्दिने । त्रिका. ।

पत्राख्यम् । क्ली । तेजपत्रे । श.च. । तालीशपत्रे । रा.नि.व.६ ।

पत्राङ्गम् । क्ली । (Soymida febrifuga or Caesalpinia Sappan. Syn. Swietenia febrifuga.) Rohan tree. स्वनामख्यातसप्तविधचन्दनान्यतमचन्दने । पत्तङ्गे । रक्तम्, রোহন্ । हिं वम्. पत्तङ् । तैं चेवमतु । गुणाः —कटुकषाम्लशीतं वातपित्तज्वरोन्मादविस्फोटकघ्नंच । रा.नि.व.१२ । अस्य लकक्षाथः उ-

ज्वरामये रक्तातिसारे च परिणते हितः । रक्तचन्दने । अम. । भूर्जपत्रे । पद्मकाष्ठे । मे. । See पत्तङ्गम् ।

पत्राढ्यम् । क्ली । तृणाख्यद्रव्ये । गन्धतृणविशेष । पर्वततृणे । रा.नि.व.८ । पत्राङ्गचन्दने । रा.नि.व.१२ । पिप्पलीमूले । रा.नि.व.६ । वंशपत्रहरिताले । तालीशपत्रे । वै.निघ. ।

पत्राम्ला । स्त्री । चुक्रिकायाम् । चूका पालङ्ग । भा. । See चुक्रा । [कासालौ । रा.नि.व.७ ।

पत्रालुः । पुं । इक्षुदर्भतृणे । रा.नि.व.८ ।

पत्रावलिः (ली) । स्त्री । गैरिके । श.च. । ईश्वरीलतायाम् । वै.निघ. ।

पत्रिकम् । क्ली । तेजपत्रे ।

पत्रिका (त्रा) । स्त्री । जातीपत्र्याम् । जन्त्रित्री । वै.निघ.२भ.क्रमि.चि.सुवर्चिकादिचूर्णे ।

पत्रिकाख्यः । पुं । कर्पूरभेदे । रा.नि.व.१२ ।

पत्रिकापत्रम् । क्ली । तालीशपत्रे । वै.निघ. ।

पत्रिणी । स्त्री । नवाङ्कुरे । पल्लवे । श.च. ।

पत्री (इन्) । पुं । शालवृक्षे । र.मा. । पक्षिणि । वृक्षे । श्येनपक्षिणि । मे. । स्त्री । दमनकक्षुपे । दमना । च.द.महासुगन्धतैले । गङ्गापत्र्यां । रा.नि.व.१० । दुरालभायाम् । खदिरवृक्षे । तालवृक्षे । जातीपत्र्याम् । वै.निघ. । महातेजपत्रे । च.द.वा.व्या.चि.महाराजप्रसारणीतैले ।

पत्रैला । स्त्री । एलायाम् । वै.निघ. ।

पत्रोपस्करः । पुं । कासमर्दक्षुपे । हारा. ।

पत्रोर्णः । पुं । श्योनाकवृक्षे । अम. । पीतलोध्रे । वै.निघ. । अशोकवृक्षे । क्ली । धौतकौशेये । अम. ।

पत्रोल्लासः । पुं । पुष्पकलिकायाम् । वै.निघ. ।

पथिका । स्त्री । कृष्णद्राक्षायाम् । रा.नि.व.११ ।

पथिद्रुमः । पुं । शुक्लखदिरे । रा.नि.व.८ । खदिरवृक्षे । जटा. ।

पथ्यम् । क्ली । पादाहारे । "पादाहारं पथ्यमाहुः ।" रा.नि.व.२० । सैन्धवे । वै.निघ. । सामुद्रलवणे । हितभोजने । श.च. । पुं । हरीतकीवृक्षे । प.मा. । तण्डुलीयशाके । वै.निघ. ।

पथ्यकरी । स्त्री । रक्तकशालौ । रा.नि.व.१६ ।

पथ्यका । स्त्री । मेथिकायाम् । वै.निघ. ।

पथ्यकारी (इन्) । पुं । षष्टिकधान्ये । रा.नि.व.१६ ।

पथ्यभोजनम् । क्ली । हितभोजने । भा. ।

पथ्यशाकः । पुं । तण्डुलीयशाके । नटिया शाक । रा.नि.व.५ ।

पथ्या । स्त्री । हरीतक्याम् । भा.पू.१भ. । रा.नि.व.११ । च.द.वि.ज्व.चातुर्थके । चिर्भटायाम् । वन्ध्याकर्कोटक्याम् । मृगादन्याम् । रा.नि.व.२३ ।

पथ्यापथ्यम् । क्ली । रोगाणां हिताहितद्रव्ये ।

पथ्यापथ्यविधिः । पुं । रोगाणां पथ्यापथ्यनिर्णयग्रन्थे । [सुनि । मे. ।

पदम् । क्ली । पादे । रा.नि.व.१८ । वाक्ये । व-

पदकम् । क्ली । निष्कमितस्वर्णे । वै.निघ. ।

पदन्यासः । पुं । गोक्षुरक्षुपे । श.च. ।

पदरथी (इन्) । पुं । पादुकायाम् । चिका. ।

पदरोहिणी । स्त्री । वन्दाके । बान्दरा । वै.निघ. । [याम् । वै.निघ. ।

पदवी । स्त्री । भिण्डीक्षुपे । भाँटी । नागवल्ला-

पदाकः । पुं । सर्पे । वै.निघ. ।

पदाङ्गी । स्त्री । रक्तलज्जालुकायाम् । वै.निघ. । हंसपाद्याम् । रा.नि.व.५ ।

पदारोही (इन्) । पुं । वटवृक्षे । मद.५व. ।

पदार्थः । पुं । द्रव्यगतरसवीर्यादौ । स पञ्चविधः—"द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च । पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म च ॥" भा. । "योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः ।" सु.उ.६५अ. ।

पदिका । स्त्री । रक्तलज्जालुकायाम् । हंसपाद्याम् । लज्जालुकायाम् । रा.नि.व.५ । [२७अ. ।

पदेन्द्राभः । पुं । विष्किरपक्षिविशेषे । च.सू.

पद्धिमम् । क्ली । पादशीतलतायाम् । व्याक. ।

पद्मम् । पुं, क्ली । (Nelumbium Speciosum, Salvadora Indica.) कमले । पद्म ।

रा.नि.व.१०। हिं कनेल। तें तम्बिपुष्प। ता. चम्मल। गुणाः—बीजं वान्तिहरं। पत्रमथ्या शीतला ज्वरे दाहहरं। पुष्पं गुदभ्रंशहरं। "यत्र तु पद्ममित्युक्ति तत्र प्रायः पद्मकेशरं ग्राह्यम्।" सि.कौ.चि.त्रैफल.चि.श्रीकण्ठः। सि.यो.सन्निपातज्व. चमत्के। च.द.वा.पि.ज्व.चि.। See कमलम्। श्वेतकमले। च.सू.४च.। शीषधातौ। रा.नि.व. ११। पुष्करमूले। रा.नि.व.६। मा.नि.। वै.निघ.२भ.ज्व.चि.गुडूच्यादिः। जले। वै.निघ.। पद्मकाष्ठे। चरचि.। वै.निघ.च.सा.चि.पद्मादिचूर्णे। भैष. कुष्ठ चि.कन्दर्पसारतैले। धुस्तूरवृक्षे। पद्मकेसरे। च.द.गर्भाधिकारे मधुकादिः। दर्वीकरसर्पभेदे। सु.कल्प.४च.।

पद्मकम्। क्ली। पद्मकाष्ठे। পদ্মকাষ্ঠ। चरचि.। हिं पद्माक। तें एलगुसहदेवि। गुणाः—"पद्मकं तुवरं तिक्तं शीतलं वातलं लघु। विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत्। गर्भसंस्थापनं रुच्यं वमित्रणतृषापहृत्॥" भा.। शीतलं तिक्तं रक्तपित्तघ्नं मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटघ्नञ्च। रा.नि.व.१२। तत्प्रशस्तं यथा—"पद्मकं सरलं भद्रं कीटदोषविवर्ज्जितम्।" भैष.। कुष्ठे। कुड़्। रा. नि.व.१२। च.सू.४च.। तन्नामकलूतादिकीटविषघ्नागदे। वा.उ.३७च.।

पद्मकण्टकः। पुं। तन्नामकक्षुद्ररोगभेदे। পদ্মকাঁটা রোগ। लक्षणम्—"वै पद्मकण्टका ज्ञेया यैः पद्ममिव कण्टकैः। चीयते नीरुजैश्वेतैः शरीरं कफवातजैः॥" वा.उ.३१च.।

पद्मकन्दः। पुं। कमलकन्दे। পদ্মের গেঁড়ো বা শালুক। हिं कमलकन्द। गुणाः—कटुः विष्टम्भी रूक्षः रुच्यः कफघ्नः कषायः कासपित्तघ्नः तृषादाहघ्नश्च। रा.नि.व.१०। शालूकं शीतलं वृष्यं पित्तदाहास्रगुरु। दुर्ज्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्। संग्राहि मधुरं रूक्षं भिषाख्यमपि तद्गुणम्॥" भा.। स्त्री (न्दा)। जलपक्षिविशेषे। वै.निघ.।

पद्मकर्कटः (टी)। पुं,स्त्री। कमलाक्षे। পদ্মবীজ। वै.निघ.। रा.नि.व.१०। [निघ.।

पद्मकर्णिका। स्त्री। कमलकर्णिकायाम्। वै·

पद्मकादिगणः। पुं। पद्मकपुण्ड्रवृद्धितुगर्द्धिश्रृङ्ग्यमृतादशजीवनसंज्ञके। गुणाः—स्तन्यकराः वातपित्तघ्नाः प्राणनादिगुणयुक्ताश्च। वा सू.१४। १५च.। [পদ্মকাষ্ঠ। रा.नि.व.१२।

पद्मकाष्ठम्। क्ली। स्वनामख्यातसुगन्धकाष्ठे।

पद्मकाह्वयम्। क्ली। पद्मकाष्ठे। च.द.वा.व्या, चि.एकादशशतीमहाप्रसारणीतैले। "फलिनीबिल्वशावौद्रसर्पिर्भिः पद्मकाह्वयम्।"

पद्मकिञ्जल्कः। पुं। पद्मकेसरे। वै.निघ.।

पद्मकी (इन्)। पुं। भूर्ज्जवृक्षे। श.मा.।

पद्मकीटः। पुं। अग्निप्रकृतिकीटविशेषे। सु. कल्प.८च.। See कीटः।

पद्मकेश(स)रः। पुं, क्ली। पद्मकिञ्जल्के। পদ্মরেণু। रा.नि.व.१०। च.द.वा.पि.ज्व.चि.। "त्रिफलां पद्मकेशरम्।" सु सू.३८च.प्रियङ्ग्वादिः। च.सू.४च.। गुणाः—मलसंग्राहि शीतलं दाहघ्नम् अर्शसः स्रावहरञ्च। राज.। [भा.।

पद्मगन्धकम् (गन्धि)। क्ली। पद्मकाष्ठे।

पद्मचारटी। स्त्री। स्थलकमलिन्याम्। স্থলপদ্ম। वै·निघ.। नवनीतखोट्याम्। च.द.विष चि.।

पद्मचारिणी। स्त्री। भार्ग्याम्। বামনহাটী। प.मु.। शमीवृक्षे। हरिद्रायाम्। लाक्षायाम्। ऋद्धौ। मे.। रा.नि.व.२३। (Hibiscus mutabilis.) स्थलपद्मायाम्। या उत्तरापथे स्वनाम्ना ख्याता। गुणाः—"पद्मानुणा कटुस्तिक्ता कषाया कफवातजित्। मूत्रकृच्छ्राश्मशूलघ्नी श्वासकासविषापहा।" भा.।

पद्मतन्तुः। पुं। मृणाले। रा.नि.व.१०।

पद्मतीर्थम्। क्ली। पुष्करमूले। वै.निघ.।

पद्मदर्शनः। पुं। सर्ज्जरसे। वै.निघ.। श्रीवासे। लोबान् इति भाषा। श.च.।

पद्मनाड़िका। स्त्री। स्थलपद्मिन्यां। वै.निघ.।

पद्मनालम्। क्ली। कमलनाले। পদ্মের ডাঁটা। रा.नि.व.१०। [१६।

पद्मनेत्रः। पुं। जलचरपक्षिभेदे। रा.नि.व.

पद्मपत्रम्। क्ली। कामखे। रा.नि.व.२३। पुष्करमूले। रा.नि.व.६। पद्मदले। পদ্মের পাতা। वै.निघ.।

पद्मपत्रा । स्त्री । स्थलपद्मिन्याम् । वै.निघ. ।

पद्मपर्णम् । क्ली । पद्मपत्रे । वै.निघ. । पुष्करमूले । अ.टी. ।

पद्मपुष्करजम् । क्ली। पुष्करमूले । रा.नि.व.६।

पद्मपुष्पः । पुं। पारिभद्रकवृक्षे । पिकाङ्गपक्षिणि । वै.निघ. । (Webera Corymbosa.) कर्णिकारवृक्षे। কলকে ফুল। श.च. ।

पद्ममुखी । स्त्री । कण्टकार्य्याम् । वै.निघ. । दुरालभायाम् । श.च. ।

पद्ममूलम् । क्ली । पद्मकन्दे । শালুক । रा.नि.व.१० । चि.क्र.क.गर्भ.चि. ।

पद्मरजः । क्ली । पद्मकेसरे । वा.सू.३अ.प्रियङ्ग्वादिः । "पद्माद्रजो योजनवल्लयनन्ता ।"

पद्मरागः । पुं । रक्तवर्णे माणिक्यभेदे । See माणिक्यम् ।

पद्मरेणुः । पुं । पद्मकेसरे । वै.निघ. ।

पद्मलाञ्छनः । पुं । सूर्य्ये । मे. ।

पद्मवती । स्त्री । स्थलपद्मिन्यां । वै.निघ. । कमलिन्यां । পদ্মের ঝাড় । रा.नि.व.५ ।

पद्मवर्णः । त्रि । लोहितवर्णे । भा.४भ. । "पद्मवर्णो महापद्मः ।" [पुष्करमूले । जटा. ।

पद्मवर्ण(क)म् । क्ली । पद्मकाष्ठे । वै.निघ. ।

पद्मवीजम् । क्ली। कमलवीजे । পদ্মের বীচি। हिं कमलगट्टा । पद्माच इति महाराष्ट्रकर्णाटयोः ख्यातम् । गुणाः—कटु स्वादु पित्तकरं छर्दिकरं दाहरक्तशमनं पाचनं रुच्यञ्च । रा.नि.व.१० । "विष्टम्भि वृष्यं रुच्यञ्च गर्भसंस्थापकं परम् । कफवातकरं बल्यं ग्राहि पित्तास्रजित्··· ॥" भा. ।

पद्मवीजाभम् । क्ली । मखान्नफले । माखना इति भाषा । भा. । [नन्दीवृक्षे । रा.नि.व.२३ ।

पद्मवृक्षः । पुं । पद्मकाष्ठतरौ । रा.नि.व.१२ ।

पद्मशायिनी । स्त्री । जलचरपक्षिभेदे । वै.निघ. ।

पद्मा । स्त्री । पद्मचारिण्याम् । স্থলপদ্ম । रा.नि.व.२३। च.वि.८अ. । वा.सू.१५अ.। भार्ग्याम् । বামনহাটী । च.सू.४अ. । चि.२अ. । च.द.गर्भस्रावे । भा.म.४भ गर्भ-चि. । सु.चि.२भ. । "समङ्गा रजनी पद्मा ।" तन्नामकौषधौ । या पद्माकारा पद्मगन्धा पद्मवद्रक्ता च । "पद्माकारा पद्मरक्ता पद्मगन्धा ।" च.चि.१अ.कन्दर्पसारतैले । मञ्जिष्ठायाम् । मृणाले । वै.निघ. । लवङ्गे । अम. । मनसादेव्यां । मे. । फञ्जिकायां । श.र. । कुसुम्भपुष्पे । र.मा. ।

पद्माकरः । पुं । तडागे । अम. ।

पद्माटः । पुं । चक्रमर्दक्षुपे । চাকন্দা । अम.। भैष.मु.रो.चि.वृ.खदिरवट्यां । क्ली । तद्बीजे । महाभल्लातकगुडे ।

पद्मान्तरम् । क्ली । पद्मपत्रे । वै.निघ. ।

पद्मालया । स्त्री । लवङ्गलतायाम् । अम. ।

पद्मावती । स्त्री । स्थलपद्मिन्याम् । जटा. । मनसादेव्यां । श.र. ।

पद्माह्व(य)म् । क्ली । पद्मकाष्ठे। भा. । वै.निघ.२भ.सर्व्वज्व.चि.सुदर्शनचूर्णे। च.द.मु.रो.चि.वृहत्खदिरवट्यां । [नि.व.५ ।

पद्माह्वया (ह्वा) । स्त्री । स्थलपद्मिन्यां । रा.

पद्माक्षम् । क्ली । पद्मवीजे । रा.नि.व.१० ।

पद्मिनी । स्त्री। पद्मषण्डे, कमलिन्यां । পদ্মের ঝাড় । गुणाः—मधुरा तिक्ता कषाया शिशिरा पित्तघ्नी क्रिमिघ्नी शोषवान्तिभ्रान्तितापक्लान्तिहृच्च। रा.नि.व.१०। "मूलनालदलोत्फुल्लफलैः समुदिता पुनः । पद्मिनी प्रोच्यते ।" भा.पु.व. । पद्मे । विश्व । मृणाले । श.मा. । हस्तिन्यां । धरणि. ।

पद्मिनीकण्टकः । पुं। क्षुद्ररोगे । পদ্মকাঁটা । "कण्टकैराचितं वृत्तं कण्डूमत्पाण्डुमण्डलं । पद्मिनीकण्टकप्रख्यैस्तदाख्यं कफवातजम् ॥" सु.नि.१३अ.।

पद्मी (इन्) । पुं । गजे । अम. । [र.मा. ।

पद्मोत्तम(र)विकासः । पुं। कुसुम्भपुष्पवृक्षे।

पद्मोत्तरः । पुं, क्ली। कुसुम्भवृक्षे, तत्पुष्पे । रा.नि.व.४ । स्त्री । कुसुम्भवीजे । वै.निघ. ।

पद्मोद्भवा । स्त्री । मनसादेव्याम् । पुराणम् ।

पनशः (सः) । पुं । वहिःकण्टकमहाफलवृक्षे, पणसवृक्षे । কাঁটাল গাছ । हिं कट्हल । भा. । मण्डलिसर्पविशेषे । सु.कल्प.४अ. ।

पनसतालिका । स्त्री । कण्टकीफलवृक्षे । কাঁটাল গাছ । শ মা. ।

पनसा (सिका) । स्त्री । कर्णजक्षुद्ररोगभेदे । কাণের ফোড়া । यथा –"कर्णस्याभ्यन्तरे जातां पिड़कामुग्रवेदनाम् । स्थिरां पनसिकां तान्तु विद्याद्वातकफोत्थिताम् ॥" भा. । [मि. ।

पन्नगः । पुं । सर्पे । पद्मकाष्ठे । औषधिविशेषे ।

पन्नगकेशरः । पुं । नागकेशरवृक्षे । रा.नि.व.६ ।

पन्नगी । स्त्री । सर्पिण्याम् । मनसादेव्याम् । सर्पिणीक्षुपे । रा.नि.व.५ । [च. । त्रिका. ।

पन्नद्धा (ध्री) । स्त्री । चर्म्मपादुकायाम् । है.

पन्नूरः । पुं । शालिञ्चशाके । वा.चि.१५ ।

पपोता । स्त्री । (Carica Papaya.) स्वनामख्यातफलविशेषे । পেঁপে । हिं पपया । तें बप्पयि । ता. पप्पयी । गुणः – प्लीहघ्नी ।

पपुः । स्त्री । उपमातरि, धात्राम् । उणा. ।

पमरा । स्त्री । सन्नकीनामगन्धद्रव्ये । राज. ।

पयः । क्ली । जले । दुग्धे । मे. । बालके । বালা । भा.म.१भ.वित्तभ्रमज्वर.चि. । "पाठा पटोली पयः ।" [ड़ा । रा.नि.व.७ ।

पयःकन्दा । स्त्री । क्षीरविदार्य्यां । भूँई कुमपयःपालिनी । स्त्री । बालके । उशीरे । वै.निघ.२भ.वि.ज्व.चि. ।

पयःपेटी । स्त्री । नारिकेले । प.मु. ।

पयःप्रसादम् (दि) । क्ली । निर्म्मलीबीजे । निर्म्माल्य । भा. । [नि.व.५ ।

पयःफेना (नी) । स्त्री । दुग्धफेनीक्षुपे । रा.

पयःसात्म्यम् । क्ली । तक्रे । वै.निघ. ।

पयस्यः । पुं । विड़ाले । श.च. । क्ली । पयोविकारे घृतादौ । अम. ।

पयस्या । क्ली । क्षीरकाकोल्याम् । रा.नि.व.२२ । सु.सू.३८भ.पित्तशमने । भा.कर्णरो.चि.योनिरो.चि. । श्वेतविदारीकन्दे । শুক্ল ভূঁই কুমড়া । च.सू.४भ.बृंहणे । सु.चि.१७भ. । कुटुम्बिनीक्षुपे । भा.४भ.पूतना-चि. । "नवा पयस्या गोक्षीरी ।" स्वर्णक्षीर्य्याम् । मे. । च.वि.८भ. । अर्कपुष्प्याम् । र.मा. । सु.चि.१७भ. । दुग्धिकायाम् । मे. । आमिक्षायाम् । है.च. ।

पयस्थलः । पुं । छागे । रा.नि.व.१९ ।

पयस्विनी । स्त्री । रात्रौ । मे. । क्षीरकाकोल्याम् । प.मु. । रा.नि.व.३ । दुग्धफेनीक्षुपे । रा.नि.व.५ । क्षीरविदार्य्याम् । रा.नि.व.७ । काकोल्याम् । रा.नि.व.३ । जीवन्त्याम् । भा. । ज्योतिष्मतीलतायाम् । शुक्लालाव्याम् । महिष्याम् । वै.निघ. । छाग्याम् । रा.नि.व.१९ ।

पयस्वी । स्त्री । क्षीरकाकोल्याम् । वै.निघ. ।

पया । स्त्री । शुण्ठ्याम् । वै.निघ. ।

पयोदः । पुं । मुस्तके । भैष वृहत्किङ्किणीतैले । च.द.शूल.चि.नारिकेलखण्डे ।

पयोधरः । पुं । स्तने । रा.नि.व.१८ । नागरमुस्तके । दृचौ । वै.निघ. । नारिकेलवृक्षे । कशेरौ । मे. ।

पयोधि(ब्धि)क[ज]म् । क्ली । लवणे । "लवणन्तु पयोधिजम् ।" रा.नि.व.२२ । समुद्रफेने । वै.निघ. ।

पयोरः । पुं । खदिरवृक्षे । श.च. ।

पयोलता
पयोविदारिका (री) } स्त्री । क्षीरविदार्य्याम् । শুক্ল ভূঁই কুমড়া । रा.नि.व.७ ।

पयोष्णिः । पुं । पेचके । वै.निघ. ।

पयोष्णी । स्त्री । भारतवर्षीयनदीविशेषे । सा च विन्ध्याचलदक्षिणे प्रसिद्धा । जलगुणाः – सर्व्वरोगघ्नं रुच्यं पवित्रं लघु बलकान्तिजनकं पापघ्नं सुखदञ्च । रा.नि.व.१४ ।

पयोहेतु । क्ली । दधनि । वै.निघ. ।

परकः । पुं । केशराजे । वै.निघ. ।

परग्रन्थिः । पुं । सन्धौ, सन्धिस्थाने, अङ्गुलिपर्व्वणि, पर्व्वावधौ । शारा. ।

परञ्जः । पुं । फेने । तैलनिष्पेषणयन्त्रे । घानि । क्षुरिकाफले । मे. ।

परट्टक् । पुं । काके । वै.निघ. । [निघ. ।

परद्रव्यहा । स्त्री । ग्रन्थिपर्णे । গেঁঠেলা । वै.

परपत्रिका । स्त्री। क्षुद्रक्षुपे । रा.नि.व.४।

परपुष्टः । पुं । कोकिले । रा.नि.व.१६ ।

परपुष्टमहोत्सवः । पुं । आम्रवृक्षे । श.मा. ।

परपुष्टा । स्त्री । कोकिलायाम् । वै.निघ. ।

परभृतः (त्) । पुं। कोकिले । काके । अम.।

परमदः । पुं। सुरापानजन्यरोगभेदे । लक्षणम् —"श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च । लिङ्गं परस्य च मदस्य वदन्ति तज्ज्ञाः तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥" मा.नि. ।

परमपूतिकः । पुं । अहिफेने । प.मु. ।

परमा । स्त्री । सुगन्धद्रव्यविशेषे, गन्धशठ्याम् । तदालेपनं ज्वरघ्नं रक्षोघ्नञ्च । राज.। च.द.वा.व्या. चि.महाराजप्रसारणीतैले ।

परमाणुः । पुं । रजसस्त्रिंशत्तमे भागे । "जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः । तस्य त्रिंशत्तमोभागः ।" प.प्र.१अ. ।

परमान्नम् । क्ली। क्षीरिकायाम्, पायसे। পায়েস,পরমান্ন। तत्साधनप्रणाली यथा—"शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् क्षिपेत् । ते सिद्धा क्षीरिका ख्याता सा सिताज्ययुतोत्तमा ॥ गुणाः— क्षीरिका दुर्जरा बल्या धातुपुष्टिप्रदा गुरुः । विष्टम्भिनी हरेत् पित्तरक्तपित्ताग्निमारुतान् ॥" भा.।

परमायुः । क्ली । जीवितकाले । यथा—"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह । परमायुरिदम्प्रोक्तं नराणां करिणामिह ॥" श.मा. ।

परमायुधः । पुं । असनवृक्षे । श.च. ।

परमृत्युः । पुं । काके । त्रिका. ।

परमेष्टः । पुं । महानिम्बवृक्षे । र.मा. ।

परमेष्ठिनी । स्त्री । ब्राह्मीक्षुपे । বামনহাটী । रा.नि.व.४ ।

परलः । पुं । (Eclipta prostrata.) नीलभृङ्गराजे । কেশরাজ । त्रिका. । [सि ।

परला । स्त्री । पटोलवृक्षे । रस.र कुष्ठशैलेन्द्ररपरलोकैषणा । स्त्री। परलोकस्य गवेषणायां। च.सू.११अ. ।

परश्रम् । क्ली । प्रस्तरविशेषे । পরশ পাথর । पुराणम् ।

परशुच्छिन्नः । पुं,स्त्री । कुठारिया इति ख्याते वृक्षे । কোদালে, কুড়লে । संग्रहः लौहचालने । कन्दगुडूच्याम् ।

परशुरामः । पुं । रसराजशिरोमणिकारे ।

पराक्पुष्पः (ष्पी) । पुं । धूलीकदम्बवृक्षे । रा.नि.व.९ । श्वेतापामार्गे । रा.नि.व.४ ।

परागः । पुं । पद्मकेसरे । कर्पूररजसि । वै. निघ. । पुष्परेणौ । अम. । चन्दने । मे. ।

परागपुष्पः । पुं । धूलीकदम्बे । वै.निघ. ।

पराचीनः । त्रि । पराङ्मुखे । वा.उ.२८अ. ।

पराञ्जः । पुं। तैलनिष्पीड़नयन्त्रे । फेने । श.र.।

पराप्रियः । उलुपतृणे । উলু । श.च. । कासतृणे । वै.निघ. ।

परादिगुणाः । पुं । परापरत्वादौ । यथा— "परापरत्वे युक्तिश्च संख्या संयोग एव च । विभागश्च पृथक्त्वञ्च परिमाणमथापि च । संस्कारोऽभ्यास इत्येते गुणाः ज्ञेयाः परादयः ॥" च. । [श.च. ।

परानसा । स्त्री । औषधप्रयोगे, चिकित्सायां ।

परान्नम् । क्ली । पलान्ने । पाकराजः ।

परापरम् । क्ली । परुषकफले । भा. ।

पराभिधम् । क्ली । कुङ्कुमे । वै.निघ. ।

परामृतम् । क्ली । वर्षोपले । त्रिका. ।

परारुः । पुं । कारवेल्लके । त्रिका. ।

परारुकः । पुं । पाषाणे । त्रिका. । [निघ. ।

परार्द्धम् । क्ली । चन्दने । कुङ्कुमे । उशीरे । वै.

परावतम् । क्ली । परुषकफले । रा.नि.व.११।

परावरम् । क्ली । परुषकफले । रा.नि.व.११।

परावेदी । स्त्री । बृहत्याम् । ব্যাকুড় । कोषान्तरम् । [तन्त्रकारः ।

पराशरः । पुं। तन्नामकायुर्व्वेदतन्त्रकारे । See

पराश्रया । स्त्री । माधवीलतायाम् । वै.निघ.। वन्दायां । পরসাড়া । श.च. । [सु.सू.३३अ. ।

परासङ्गः । पुं । अवरोधे । शोणितरोधे ।

परिकर्त्तनम् । क्ली । च्छेदे । सु.सू.८अ. । छेदनवदनुभवे । वा.टी.चि.१अ. ।

परिकर्त्तिका । स्त्री । कर्त्तनवत्पीड़ायां । च. चि.३अ.। वमनविरेचनव्यापद्विशेषे। सु.चि.३४अ.।

परिकर्म्म । क्ली । अभ्यङ्गे । परिचर्य्याकरणे । वै.निघ. । कुङ्कुमादिना कायप्रसाधने । अम.भ. ।

परिकर्म्मी । त्रि । सर्व्वकर्म्मकर्त्तृषु, परिचारकेषु । सु.सू.५अ. ।

परिक्रमसहः । पुं । छागे । त्रिका. ।

परिगर्भिकः (भवः) । पुं। बालरोगविशेषे । এড়ঁ।। নাগা । हिं अहीड़ौति लोके । "मातुः कुमारी गर्भिण्याः स्तन्यं प्रायः पिबन्नपि । कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः । युज्यते कोष्ठवृद्धा च तमाहुः परिगर्भिकम् । रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम् ॥" भा. । [भ. ।

परिग्रहः । पुं। स्त्रियाम् । मूले । कन्दे । अम.

परिघः । पुं । तन्नामकमूढ़गर्भविशेषे, यत्र गर्भः परिघ इव योनिमुखमावृत्य तिष्ठेत् । यथा— "योनौ स्थितः स परिघः परिघेन तुल्यः ।" सु. नि.८अ. ।

परिचरः । पुं । भृत्ये, सेवके । र.मा. ।

परिचरकर्म्म । क्ली । सेवाकार्य्ये ।

परिचर्य्या । स्त्री । सेवायाम् । अम. । श.र. ।

परिचारकः । पुं । सेवके । अम. । लक्षणं —"स्निग्धो जुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे । वैद्यवाक्यकृदश्रान्तो युज्यते परिचारकः ॥" भा. ।

परिच्छदः । पुं । परिधानवस्त्रे, आच्छादने । भागवतं । परिवारे । हे.च. ।

परिणतः । त्रि । परिपक्वे । अम. ।

परिणामः । पुं। परिपाके। विकारे । वै.निघ.।

परिणामज(शूल)म् । क्ली । पक्तिशूले । रा. नि.व.२० । [विस्तारे । अम. ।

परिणाहः । पुं । वर्त्तुलतायाम् । सु.सू.७अ. ।

परितापः । पुं । रोगे । वै.निघ. । कम्पे । विश्वः । उष्णतायाम् । च. ।

परितिक्तः । पुं । निम्बवृक्षे । वै.निघ. ।

परिदरः । पुं । दन्तमूलगतमुखरोगे । लक्षणं —"दन्तमांसानि शीर्य्यन्ते यस्मिंष्ठीवति चाप्यसृक् । पित्तासृक्कफजो व्याधिः ज्ञेयः परिदरो हि सः ॥" सु.नि.१६अ. ।

परिधूमायनम् । क्ली । धूमोद्गारे । ঢোঁওয়া ঢেকুর । सु.नि.६अ. । [सु.१५अ. ।

परिपचनम् । क्ली । तैलपाचनिकायां । अ.

परिपाकः । पुं । परिणामे । भा. ।

परिपाकिनी । स्त्री । त्रिवृतायां । श.च. ।

परिपिष्ट(क)म् । क्ली। सीसके । रा.नि.व.१३।

परिपुटनम् । क्ली । पाककरणे । वै.निघ. ।

परिपुष्करा । स्त्री । कर्कटीभेदे, गोडुम्बायां । গোঅগোমুক । श.च. । [पवित्रीकृते ।

परिपूतम् । क्ली । अपतुषधान्ये । मनुः । त्रि ।

परिपेलम् । क्ली । कैवर्त्तिमुस्तके । प.मु.च.वि. ८अ. ।

परिपेलवम् । क्ली । कुटन्नटे, जलमुस्तायाम् । কেওট মুতা । वा.सू.१५अ.रोध्रादिः । "शैलवालपरिपेलवमोचाः ।" मुस्तायां । ज.द.१२अ. ।

परिपेल्लम् । क्ली। जलजाततृणविशेषे, जलमुस्तायाम् । জলের মুতা, কেওট মুতা । मं जलमंडवी । कं वलिगड्ड । गुणाः — कटूष्णं कफवातघ्नं व्रणघ्नं दाहघ्नम् आमशूलघ्नं रक्तदोषघ्नञ्च । रा.नि.व.६ ।

परिपोटः (कः) । पुं । कर्णपालीगतरोगे । কাণের পাতার রোগ। लक्षणं —"सौकुमार्य्याच्चिरोत्सृष्टसहसाभिप्रवर्द्धिते । कर्णशोफो भवेत् पाल्यां सरुजः परिपोटवान् ॥" सु.चि.२५अ. । लग्भेदे । वा.उ.२८अ. ।

परिपोषणम् । क्ली। हिङ्गुनि । ज.द.१२अ.।

परिप्लुता । स्त्री । योनिरोगविशेषे । लक्षणं यथा—"परिप्लुतायां भवति ग्राम्यधर्मे रुजा भृशम् ।" सु. । तथा —"पित्तलाया नृसंवासे क्षवथूद्गारधारणात् । पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रियाः । शूनाः स्पर्शाक्षमाः सर्त्तिनीलपीतमसृक् स्रवेत् । श्रोणिवङ्क्षणपृष्ठार्त्तिज्वरार्त्तायाः

पापनाशिनी । स्त्री। शमीवृक्षे । रा.नि.व.८। कृष्णतुलसीवृक्षे । वै.निघ. । [त्रिका. ।

पापरोगः । पुं। मसूरिकायाम् । বসন্তরোগ ।

पापशमनी । स्त्री । शमीवृक्षे । रा.नि.व.८ ।

पापोदकम् । क्ली । विष्ठाकृमिकीटादियुक्तजले । अत्रि. । See जलम् । [रोगे । वै.निघ. ।

पामा । पुं । ज्वरे । रस.र.ज्व.चि.वाड़वरसे ।

पामघ्नः । पुं । गन्धके । र.मा. । [व.६ ।

पामघ्नी । स्त्री । कटुक्यां । কট্কী । रा.नि.

पामनः । त्रि । कच्छूरोगिणि । खसो । अम. ।

पामन् । क्ली । पामरोगे । खस्, पाँचड़ा । अम. ।

पामरोद्वारा । स्त्री । गुडूच्याम् । श.च. ।

पामा (न्) । स्त्री । क्षुद्रकुष्ठरोगविशेषे । खस्‌रोग, पाँचड़ा । लक्षणम्—"सूक्ष्मा बह्व्यः स्राववत्यः प्रदाहाः पामेत्युक्ताः पिड़काः कण्डुमत्यः ॥" मा.नि. । सु.नि.१२अ. ।

पामारिः । पुं । गन्धके । हे.च. । र.सा.सं. ।

पाय(य्य)म् । क्ली । जले । विश्व. । परिमाणे । अम. । पाने । उणा. ।

पायना । स्त्री । शस्त्रधारायाः मृदुमध्यतीक्ष्णीकरणप्रक्रियायाम् । पेनोना । सा च क्षारोदकतैलनिमज्जनभेदेन त्रिधा । तत्र क्षारपायितं शल्यादिच्छेदने । उदकपायितं मांसादिपाटने । तैलपायितं शिराव्यधनादौ च । सु.सू.८अ. ।

पायसः । पुं, क्ली । पयःसिद्धयवाग्वाम् । परमान्न । प.मु. । पायसपाकप्रकारगुणाः यथा—"अक्षततण्डुलो धौतः परिभ्रष्टो घृतेन च । खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत् ॥" पुराणम् । श्रीवासे । तार्पिण । अम. ।

पायुः । पुं । गुदे, मलद्वारे । रा.नि.व.१८ । स गर्भस्थशिशोः सप्तमे मासि भवति । सुखबोधः ।

पारः । पुं । पारदे । अ.टी.सा. ।

पारक् (ज्) । पुं । सुवर्णे । उणा. ।

पारटीटः । पुं । प्रस्तरे । त्रिका. ।

पारतः । पारदे । हे.च. ।

पारतन्त्र्यम् । क्ली । पराधीनतायां । मा.नि. ।

पारदः । पुं । (Hydrargyrum.) स्वनामख्यातखनिजतरलधातुविशेषे । पारा । स अन्तर्नीलो बाह्योज्ज्वल औषधयोग्यः श्रेष्ठश्च । "असाध्येष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते ।" र.सा.सं. । केवलः पारदस्त्रिदोषघ्नः प्रधानतो बलदश्च । द्रव्यान्तरमिश्रितश्च स सर्व्वरोगघ्नो बलदायुष्यश्च । रोगमोचकत्वात्पारद उच्यते । तल्लक्षणं—"अन्तःसुनीलो बहिरुज्ज्वलो यो मध्याह्नसूर्य्यप्रतिमप्रकाशः । शस्तोऽथ धूम्रः परिपाण्डुरश्च चित्रो न योग्यो रसकर्म्मसिद्धौ ॥" रसदोषः यथा—"नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः । असह्याग्निर्महादोषा निसर्गात् पारदे स्थिता इति । दोषहीनो यदा सूतस्तदा मृत्युज्वरापहः । शुद्धोऽयममृतं साक्षात् दोषयुक्तो रसो विषम् ॥" र.सा.सं. । "शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले । तद्देहसारजातत्वाच्छुक्लमच्छमभूच्च तत् ।" पारदभस्म चतुर्धा कृष्णश्वेतपीतरक्तभेदात् । तेषु रक्तभस्म रससिन्दूरं, कृष्णभस्म कज्जलिश्च प्रधानतो व्यवहार्य्यः, शर्म्मोऽयुद्धः । "क्षेत्रभेदेन विज्ञेयं शिववीर्य्यं चतुर्विधम् । श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ।............श्वेतं शस्तं रुजां नाशे रक्तं किल रसायनम् । धातुवादे च तत्पीतं खेगतौ कृष्णमेव च ॥" गुणाः—"योगवाही महावृष्यः सदा दृष्टिबलप्रदः । सर्व्वामयहरः प्रोक्तो विशेषात् सर्व्वकुष्ठनुत् । संस्कारहीनं खलु सूतराजं यः सेवते तस्य करोति बाधाम् । देहस्य नाशं विदधाति नूनं कष्टांश्च रोगान् जनयेन्नराणाम् ॥" भा.पू.१भ.धा.व. । धान्याम्लेन एतदभावे अत्यम्लारणालेन वा रसं स्वेदयेत् । द्वितीयं यथा—त्रिकटुलवणराजिकारजनीत्रिफलार्द्रकमहाबलानागबलामेघनादपुनर्नवामेषशृङ्गीचित्रकाणि समभागानि, समस्तानि व्यस्तानि वा पूर्व्वाम्लेनैव पिष्ट्वा तेन कल्केनाङ्गुलमात्रं वस्त्रमालिप्य तन्मध्ये सूतं दत्त्वा बद्ध्वा च दिनत्रयं दोलायन्त्रेण काञ्जिके पचेत् । इति स्वेदः । रसमर्दनम्—इष्टकाचूर्णचूर्णाभ्यामादौ मर्द्यः । ततो दध्ना गुड़ेन सिन्धूत्थराजिकागृहधूमैर्मर्द्यः ॥ अथवा बृहतीकुमारिकाचित्रकरक्तसर्षपसाधितैः कषायैर्मर्द्यः । "रक्तेष्टकानिशाधूमसारोर्णाभस्मतुम्बिकैः । जम्बीरद्रवसंयुक्तैर्नागदोषापनुत्तये ।" र.चि.३अ. । "त्रिफलाकन्यकातोयैः विषदोषोपशान्तये ।" अथ मूर्च्छना—"त्र्यूषणत्रिफलाबन्ध्याकन्दैः क्षुद्राद्वयान्वितैः । चित्रकोर्णानिशाक्षारकन्यार्ककनकद्रवैः । सूतं कृतेन यूषेण वारान्सप्ताभिमर्दयेत् । इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकम् ॥" इति । "अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् । तत्सम्पुटे क्षिपेत् सूतमलाबूदुग्धमिश्रितम् । द्रोणपुष्पीप्रसूनानि विड़ङ्गमरिमेदकः । एतच्चूर्णमधश्चोर्द्ध्वं दत्त्वा मुद्रां प्रदीयते । तद्गोलं स्थापयेत्सम्यक् मृन्मूषासंपुटे पचेत् । एवमेकपुटेनैव सूतकं भस्मतां व्रजेत् ॥" इति सूतभस्म । भा. ।

एतत्साधकानि ऊनविंशकर्म्माणि भवन्ति, तद्यथा —स्वेदनमर्दनमूर्च्छनोत्थापनपातनबोधननियमनदीपनानुवासनगगनादिग्रासप्रमाणचारणगर्भद्रुतिवाह्यद्रुतियोगजारणरञ्जनसारणक्रामणवेधभक्षणानि। ऊर्द्धपातनाधःपातने पर्य्याये द्रष्टव्ये। "घटे रसं विनिक्षिप्य सजलं घटमन्यकम्। तिर्य्यङ्मुखं द्वयं कृत्वा तन्मुखं रोधयेत् सुधीः। रसाधो ज्वालयेदग्निं यावत् सूतो जलं विशेत्। तिर्य्यक्पातनमित्युक्तम्··· ॥" इति तिर्य्यक्पातनम्। "लवणेनाम्लपिष्टेन हण्डिकान्तर्गतं रसं। आच्छाद्याम्लजलं किञ्चित् क्षिप्त्वा स्रावेण रोधयेत्। ऊर्द्धं लघुपुटो देयो लब्धश्वासो भवेद्रसः ॥" इति बोधनम्। "सर्पाक्षी चिञ्चिका कन्या भृङ्गारकनकाम्बुभिः। दिनं संस्वेदितः सूतो नियमात् स्थिरतां व्रजेत् ॥" इति नियमनं। "काशीसं पञ्चलवणं राजिकामरिचानि च। शिग्रुवीजमेकत्र टङ्गणेन समन्वितम्। आलोड्य काञ्जिके दोलायन्त्रे पाकाद्दिनैस्त्रिभिः। दीपनं जायते सम्यक् सूतराजस्य जारणे॥" इति दीपनम्। "दीपितं रसराजन्तु जम्बीररससंयुतम्। दिनैकं धारयेद्घर्म्मे मृत्पात्रे वासितो भवेत् ॥" इत्यनुवासनम् ॥ रसजारणाद्धि पातनगालनव्यतिरेकेण घनहेमादिग्रासपूर्व्वकं पूर्व्वावस्थापन्नत्वम्। जारणा। र.चि.३अ.। जारितरसगुणाः —"शुद्धगन्धेषु जीर्णस्तु शुद्धाच्छतगुणाधिकः। षड्गुणे गन्धके जीर्णो रसो भवति रोगहा। तस्माच्छतगुणो व्योमसत्त्वे जीर्णस्तु तत्समे। ताप्यखर्परतालादिसत्त्वे जीर्णो गुणावहः। हेम्नि जीर्णे सहस्रैकगुणसङ्घप्रदायकः।" इति। अथ ग्रासयोग्यरसः—मूर्च्छाध्यायोक्तषड्गुणबलिजीर्णपिष्टिकोत्थितो रसः खल्लेऽत्यन्तबुभुक्षितो घनहेमवज्रादि त्वरितमेव ग्रसति॥ इति। मूर्च्छना यथा —व्यवहारिकतोलकद्वयप्रमाणेनापि परिशुद्धो रसो मूर्च्छयितव्यः। मूर्च्छनाप्रकारस्तु बहुविधः। तत्र षड्गुणगन्धकजारणप्रक्रिया साधीयसी। रसगुणबलिजारणं विनायं न खलु रुजाहरणक्षमो रसेन्द्रः। न जलदकलधौतपाकहीनः स्पृशति रसायनतामिति प्रसिद्धिः॥ तन्निमित्तकं सिकतायन्त्रद्वयं कथ्यते। यथा —निरवधिनिपीड़ितमृच्छरावादिपरिलिप्तामतिकठिनकाचघटीमध्ये वक्ष्यमाणप्रकाररसगर्भिणीमधस्त्र्यङ्गुलिप्रमाणितांच्छद्रायामनुरूपस्थालिकायामारोप्य पारतस्तां द्विव्यङ्गुलिमितेन निरन्तरालीकरणपुरःसरं सिकताभिरापूर्य्य वर्द्धमानकमारोपणीयम्। क्रमतश्च त्रिचतुराणि पञ्च वापि वासराणि ज्वलनज्वालया पचनीयमित्येकं यन्त्रम्। र.चि.३अ.। रसभक्षणमात्रा—"गुञ्जामात्रं रसं देवि हेमजीर्णन्तु भक्षयेत्। द्विगुणं तारजीर्णस्य रविजीर्णस्य च त्रयम्। तीक्ष्णाभ्रकान्तमाषैका प्रायोमात्रेति कीर्त्तिता।" र.चि.। (आभ्यन्तरिकप्रयोगे)—परिवर्त्तकः लालानिःसारकः रजोनिःसारकः पित्तनिःसारकः घर्म्मकारकः मूत्रकारकः विरेचकः अवसादकः शोषकः प्रदाहनाशकः। (वाह्यप्रयोगे)—परिवर्त्तकः लालानिःसारकः शोषकः पचननिवारकः प्रत्युग्रतासाधकः दाहकश्च।

पारदबन्धनम्। क्ली। सारलौहे। वै.निघ.।

पारशवम्। क्ली। लौहे। वै.निघ.।

पारश्रयः। क्ली। सुवर्णे। वै.निघ.।

पारसीकयमानी। स्त्री। वदेशीययमानीविशेषे, खोरासानीयमान्यां। किरमानी ओम्बा इति महाराष्ट्रादौ। सि.यो.च.द.कृमि.चि.। गुणाः—"पारसीकयमानी तु यमानीसदृशी गुणैः। विशेषात्पाचनी रुच्या ग्राहिणी मादिनी गुरुः ॥" भा.। "पारसीकयमानी तु विक्तोष्णा कटुचोषणा। अग्निदीप्तिकरी हृष्या लघ्वी चैव प्रकीर्त्तिता। त्रिदोषाजीर्णकृमितुच्छूलामस्य च नाशिनी ॥" वै.निघ.।

पारसीकवचा। स्त्री। श्वेतवचायाम्, खोरासानीवचायाम्। শ্বেত বচ। गुणाः—"हैमवत्युदिता तद्वत् वातं हन्ति विशेषतः।" भा.।

पारसीकाश्वः। पुं। वदेशजघोटके।

पारापतः। पुं। कपोते। अ.टी.र.।

पारारुकः। पुं। प्रस्तरे। श.र.।

पारावतम्। क्ली। परूषकफले। পরুষ ফল। পেয়ারা ফল। गुणाः—"पारावतं सुमधुरं रुच्यमत्यग्निवातनुत्।" सु.सू.४६अ.। "द्विविधं शीतमुष्णञ्च मधुरञ्चाम्लमेव च। गुरु पारावतं ज्ञेयमरुच्यत्यग्निनाशनम् ॥" च.सू.२७अ.।

पारावतः। पुं। कपोतजातिभेदे। गृहकपोते। পায়রা। तें पारुवापिट्ट। तन्मांसगुणाः —स्निग्धं मधुरं गुरु शीतलं रक्तपित्तदाहघ्नं बल्य-

च । रा.नि.व.१७ । विपाके मधुरं गुरु च । सु.सू.४६च. । "तथा पारावती श्रेयो वातश्लेष्मकरी गुरुः ।" चचि.२१च.। See कपोतः । पद्मकाष्ठे । च.सू.२७च. । स्रोहे । नीलाञ्जने । सारामे । वै.निघ.। वृक्षविशेषे । পেয়ারা । सु.सू.४६च.। तिन्दुके । আব্‌লুষ, কেন্দ । मे.। मण्डलिसर्पविशेषे । सु.कल्प.४च. । [४६च. ।

पारावतकः । पुं । व्रीहिधान्यविशेषे । सु.सू.

पारावतकलिका । स्त्री । महाज्योतिष्मतीलतायाम् । বড় লতাকট্‌কী । वै.निघ. ।

पारावतपदी । स्त्री । ज्योतिष्मतीलतायाम् । লতাফট্‌কী । र.मा.। काकजङ्घायां । रा.नि.व.४।

पारावतशकृत् । क्ली.। कपोतविष्ठायाम् । পায়রার গু । गुणः —वर्धितरक्तदोषघ्नम् । वा.चि.२च. ।

पारावताङ्घ्रिः । स्त्री । ज्योतिष्मतीलतायां । লতাকট্‌কী । বন উচ্ছে । प.मु. । र.सा.सं. । महाज्योतिष्मतीलतायाम् । रा.नि.व.३ । काकजङ्घायाम् । रा.नि.व.४ ।

पारावताङ्घ्रिपिच्छः । पुं । वन्देशीयपारावते । বোম্বাদী পায়রা । रा.नि.व.१९ ।

पारावती । स्त्री । लवलीफले । मे. ।

पारावरः । पुं । भूधामनवृक्षे । वै.निघ. ।

पारि । क्ली । सुरापानपात्रे । त्रिका. ।

पारिगर्भिकः । पुं । कपोते । परिगर्भिकरोगे । वै.निघ. ।

पारिजातः । पुं । पारिभद्रकवृक्षे । পালতে মান্দার । रा.नि.व.८ । र.मा.सु.चि११च. ।

पारिजातकः । पुं । श्वेतजवावृक्षे । শাদা জবা । प.मु. । रोहितकवृक्षे । निम्बवृक्षे । सुरदारौ । वै.निघ. । कण्टकपारिजाते । পারিভদ্র গাছ । सु.चि.११च. ।

पारिजाता । स्त्री । तेजोवत्याम् । তেজবল। वै.निघ.। [उ.३९च. ।

पारिणामः । त्रि । वयःपरिणतिजन्ये । वा.

पारि(री)न्द्रः । पुं । सिंहे । अजगरसर्पे । हे.च. । त्रिका. ।

पारिभद्रः । पुं । निम्बवृक्षे । रा.नि.व.९ । वै.निघ.२भ.वा.व्या.चि. कण्टकनादेयादिकषाये । (Erithrina Indica.) The Indian coral tree. पारिजातवृक्षे । পাল্‌তে মান্দার গাছ । हिं फरहद । मं दा. पाङ्गरा, पङ्गीर । कं हरिवाल । तें मोदुगु, बारिदेचेट्टु । ता. मुरुक्क । गुणाः—कटूष्णः कफवातघ्नः अरोचकघ्नः पथ्यः दीपनश्च । रा.नि.व.८ । पित्तरोगघ्नः कर्णरोगघ्नश्च भा. । प्रलेपोऽस्य सन्धिवातघ्नः नेत्ररोगे च हितः । कज्जलं चक्षुष्यं । पत्रं बहिःप्रयोगात् सन्धिवेदनाघ्नञ्च । देवदारुणि । मे. । सु.सू.११च.। सरलदेवदारौ । श.च. ।

पारिभद्रकः । पुं । पर्वतनिम्बे । सि.यो.क्रिमि चि. । निम्बवृक्षे । रा.नि.व.९ । वै.निघ.वा.व्या.चि.नारायणतैले । पारिभद्रवृक्षे । শ্বেত আকন্দ গাছ । राजार्कवृक्षे । देवदारौ । अम. । क्ली । कुष्ठौषधौ । কুড় । रा.नि.व.१२ ।

पारिभद्रकजटा । स्त्री । पालिधामूले । পালিতামান্দারের শিকড় । च.द.गुल्म.चि.। "व्याघ्रीकिंशुकपारिभद्रकजटा ॥"

पारिभद्ररसः । पुं । दद्रुकुष्ठे हितः । "मूर्च्छितं सूतकं धात्रीफलं निम्बस्य चाहरेत् । तुल्यांशं खदिरक्वाथैः दिनं मर्द्यञ्च भक्षयेत् ॥" मात्रा निष्कमिता । रस.चि. । [सु. ।

पारिभ(भा)व्यम् । क्ली । कुष्ठे । কুড় । प.

पारिशः (सः) । पुं । अश्वत्थविशेषे । পলাশপিপুল । हिं गजहण्ड । भा. । वै.निघ. । See पारीशः । [निघ. ।

पारिहार्य्यम् । क्ली । कुष्ठौषधौ । কুড় । वै.

पारिक्षिः । पुं । ऋषिविशेषे । च. ।

पारी । स्त्री । जातीपत्राम् । जयित्री । वै.निघ. । दोहन्याम् । पानपात्रे । त्रिका. । परागे । विश्व. ।

पारीशः (षः) । पुं। (Thespesia populneoides, or populnea.) The tulip tree. प्लक्षवृक्षे । পাকুড় গাছ । गर्दभाण्डवृक्षे । গাব্দীভাঁট্ । ह्रस्वप्लक्षभेदे । अश्वत्थविशेषे । গয়া অশ্বথ । পরেশপিপুল, পলাশপিপুল । गजद-

नसहीरा इति च लोके । हिं परशपिपुल, पर्शि-पु । तें गङ्गरय । वम्. भेन्दि । ता. पोरिश । गुणा:—"पारीषो दुर्जर: स्निग्ध: क्रमिशुक्रकफप्रद: । फलेऽम्लो मधुरो मूले कषायस्वादुमज्जक: ॥" भा. ।

पारुष: । पुं । नखे । वै.निघ. ।

पारु(रू)षकतैलम् । क्ली । वातरक्ते तैलम् । तिलतैलं परुषकफलरस: द्राक्षारस: गाम्भारीरस: इक्षुरस: भूमिकुष्माण्डरस:, एषां प्र. ४ श. दुग्धं १६ श. । पाच्यम् ।

पारुष्यम् । क्ली । अगुरुणि । श.च. ।

पारेवत: । पुं, क्ली । फलवृक्षभेदे । পেস্তারা । उत्. प्याड़ा । वृक्षविशेषे, कामरूपे रैवात इति ख्याते, यस्य फलं महाकालफलवद्भवति । तच्च द्विविधं सामान्यं महापारेवतं स्वर्णपारेवतं वेति । सामान्यगुणा:—मधुरं क्रमिहरं वातहरं वृष्यं तृष्णाज्वरविदाहहरं हृद्यं मूर्च्छाभ्रमश्रमशोषहरं स्निग्धं रुच्यं बहुवीर्य्यकरञ्च । महापारेवतं गौल्यं बल्यं पुष्टिवर्द्धनं वृष्यं मूर्च्छाज्वरहरं पूर्व्वोक्तात् गुणाधिकञ्च । रा.नि.व.११ । स्वादम्लं शीतलमुष्णञ्च । वा.सू. । द्वीपान्तरखर्ज्जूरे । वै.निघ. ।

पार्घटम् । क्ली । भस्मनि । छाई । हारा. ।

पार्थ: । पुं । अर्ज्जुनवृक्षे । प.मु. । भा.हृद्रो.चि. ।

पार्थकी । स्त्री । चीरशुक्लायाम् । পাঁড়কুমড়া । श.चि. । [अर्ज्जुनस्थाने प्रयोज्य: ।

पार्थवल्क: । पुं । अर्ज्जुनत्वचि । অর্জ্জুনছাল ।

पार्था । स्त्री । सुवर्चलायाम् । হুড়হুড়িয়া । वा.सू.१५अ.वीरतर्वादि: । "भल्लूकमोरटकुरण्टकरम्भपार्था: ।" ब्राह्मीक्षुपे । वै.निघ. ।

पार्थिवम् । क्ली । तगरपुष्पे । তগরপাদুক । कोङ्कणे पिण्डीतगर । रा.नि.व.१०।२३ । पुं । शरावे । শরা । घटादौ । त्रिका. । अर्ज्जुनवृक्षे । त्रि । मृद्विनिर्म्मिते । पृथ्वीगुणभूयिष्ठे । सु.सू.४१अ. ।

पार्थिवजम् । क्ली । अर्ज्जुनत्वचि । অর্জ্জুন ছাল । च.द.हृद्रो.चि. ।

पार्थिवा (वी) । स्त्री । सौराष्ट्रमृत्तिकायाम् । পঙ্কপর্পটী । मन:शिलायाम् । वै.निघ. । वाजि-देहगतच्छायाविशेषे । "सुस्निग्धा पार्थिवी छाया नानाज्योति:समन्विता ।" न.द.३अ. ।

पार्व्वण: । पुं । हरिणभेदे । श.च. ।

पार्व्वत: । पुं । निम्बवृक्षे । प.मु. । महानिम्बवृक्षे । ঘোড়ানিম্ । र.मा. । क्ली । हिङ्गुले । शिलाजतुके । शीषके । वै.निघ. ।

पार्व्वतपीलु: । पुं । अक्षोटवृक्षे ।

पार्व्वती । स्त्री । क्षुद्रपाषाणभेदायाम् । ছোট পাথরকুচা । रा.नि.व.५ । सौराष्ट्रमृत्तिकायाम् । पङ्कपर्पटी, বেঙা মাটী । हे.च. । र.मा. । भैष. भग.चि.व्रणगजाङ्कुशे । पिप्पल्याम् । धातकीवृक्षे । सिंहपिप्पल्याम् । रा.नि.व.६ । गजपिप्पल्याम् । रा.नि.व.२३ । शतव्याम् । भा. । शल्लकीवृक्षे । मे. ।

पार्व्वतीय: । पुं । अक्षोटवृक्षे । আখরোট গাছ । वै.निघ. । मशकजातिविशेषे । सु.कल्प.८अ. । शालिधान्यभेदे । अर्क.चि. । क्ली । नीलाञ्जने । वै.निघ. । [र्व्वतीरसे ।

पार्व्वतीसम्भूत: । पुं । गन्धके । र.सा.सं.पा-

पार्व्वतेय: । पुं । गजपिप्पल्याम् । प.मु. । चित्रकक्षुपे । रा.नि.व.६ । सूर्य्यावर्त्तवृक्षे । হুড়হুড়িয়া । र.मा. । क्ली । सौवीराञ्जने । सुर्म्मा इति लोके । र.मा.श.च. । स्त्री । धातकीवृक्षे । जिङ्गिन्याम् । वै.निघ. ।

पार्श्व: । पुं, क्ली । कक्षाया अधोभागे । পাশ । रा.नि.व.१८ । क्ली । पार्श्वास्थिसमूहे । পাঁজরার হাড় । मे. । [হাড় । रा.नि.व.१८ ।

पार्श्वकम् । क्ली । पार्श्वास्थनि । পাঁজরার

पार्श्वपिप्पलम् । क्ली, पुं । हरीतकीभेदे, पारीषवृक्षे । गजहड़ इति पश्चिमदेशे । भा.म. ४भ.योनिरो.चि. । चि.क्र.क.वन्ध्याप्रतीकारे ।

पार्श्वशूल: । पुं, क्ली । शूलरोगभेदे, पार्श्वदेशस्थशूलरोगे । পার্শ্ববেদনা বা পার্শ্বশূল । तस्य निदानलक्षणे—"कफं निगृह्य पवन: सूचीभिरिव निस्तुदन् । पार्श्वस्थ: पार्श्वयो: शूलं कुर्य्यादाध्मातसंयुतम् । तेन श्वसिति वक्त्रेण नरोऽन्नञ्च न काङ्क्षति । निद्राञ्च प्राप्नुयादेव पार्श्वशूल: प्रकीर्त्तित: ॥" भा.म.३भ. ।

पार्श्वसंहतिः । स्त्री । पार्श्वभागे । भा. ।

पार्श्वसन्धिः । स्त्री । जघनानिर्य्यगूर्द्धमधःपार्श्वान्तरप्रतिबद्धपृष्ठमर्म्मणि । सु.शा.६अ. ।

पार्श्वारुणः । पुं । बालरोगभेदे । वै.निघ. ।

पार्श्वास्थि (कास्थि) । क्ली । चतुर्विंशतिपञ्जरास्थनि । रा.नि.व.१८ । च.शा.७अ. ।

पार्श्वोदरप्रियः । पुं । कर्कटे । है.च. ।

पार्षतः । त्रि । मृगसम्बन्धिनि । श्वेतविन्दुहरिणसम्बन्धिनि । सु.कल्प.१अ. ।

पार्ष्णिः । पुं, स्त्री । गुल्फस्याधोभागे । গোড়মুড়া, গোড়ালি । रा.नि.व.१८ । स गर्भस्थस्य मासद्वयेन भवति । सुखबोधः । पृष्ठभागे । हला. ।

पार्ष्ण्यस्थि । क्ली । गुल्फाधोभागास्थनि । ते च द्वे । च.शा.७अ. । [पात्रे । है.च. ।

पालः । पुं । चित्रकवृक्षे । वै.निघ. । निष्ठीवन-

पालकः । पुं,क्ली । चित्रकवृक्षे । रा.नि.व.६ । गजज्वरे । गजवै. । कुष्ठे । কুড় । र.सा.सं.प्रदरारिरसे । हिङ्गुले । वै.निघ. ।

पालकविषम् । क्ली । तन्नामकस्थावरकन्दविषे । सु.कल्प.२अ. । See कन्दविषं ।

पालकाख्यः । पुं । गजवैद्यकप्रणेतरि ऋषौ । त्रिका. । [च. । धन्वन्तरौ । त्रिका. ।

पालकाप्यः । पुं । चरकोक्ते, मुनिविशेषे ।

पालक्या (क्वा) । पुं । वास्तूकाकारपालङ्कशाके । পালং শাক । प.मु. । गुणाः—वातला शीता श्लेष्मला भेदिनी गुरुः विष्टम्भिनी मदघ्नी श्वासपित्तरक्तकफघ्नी च । भा.पू.१भ.शा.व. । कफपित्तवातविबन्धघ्नी रुचा च । राज. । कुन्दुरुखोटी । अम. ।

पालङ्कः (ङ्क्यः) । पुं,क्ली । (Beta bengolensis.) A sort of Beet root. स्वनामख्यातपत्रशाके । पालक्यशाक इति दाक्षिणात्यभाषा । পালং শাক । हिं पलकी । पालं शाक इति चित्रकूटे प्रसिद्धम् । गुणाः—ईषत् कटुकं मधुरं पथ्यं शीतलं रक्तपित्तघ्नं ग्राहि सन्तर्पणम् । रा.नि.व.७ । शल्लकीवृक्षे । श्राजिपक्षिणि । বাজ পাখী । मे. ।

पालङ्की । स्त्री । कुन्दुरौ । কুন্দুরুখোটী । ष.टी.भ. । उपोदिकायां । পুঁই । पालङ्के । পালং শাক ।

पालघ्नः (घ्नाः) । पुं । छत्राके । ছাতা, কেঁড়ক । अम. । जलहये, छत्रातिच्छत्रे । श.र. ।

पालनम् । क्ली । नवप्रसूतायाः गोः दुग्धे । শাঁজলা দুধ । श.च. ।

पालनिका (ल[लि]नी) । स्त्री । त्रायमाणायाम् । বলা লতা । रा.नि.व.५ । वा.चि.१अ. ।

पालाग्रम् । क्ली । तेजपत्रे । रा.नि.व.६ ।

पालाशी । स्त्री । चीरीवृक्षे । र.मा. ।

पालासः । पुं । पलाशवृक्षे । वै.निघ. ।

पालिंहिरः । पुं । मण्डलिसर्पभेदे । सु.कल्प.४अ. ।

पालिः (ली) । स्त्री । कर्णलताग्रभागे । मे. । जलौकायाम् । कल्पितभोजने । है.च. । कर्णरोगविशेषे । কাণের পাতার রোগ । पाली पञ्चविधा । "परिपोटस्तथोत्पात उन्मन्थो दुःखवर्द्धनः । पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः ॥" तेषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि । चिकित्सा—अभ्यङ्गपरिषेकप्रदेहरक्तमोक्षणानि । (ली) श्मश्रुयुक्तस्त्रियाम् । हारा. । पाकपात्रे । चित्रकवृक्षे । वै.निघ. । परिमाणभेदे । পালি । त्रिका. । प्रस्थपरिमाणे । है.च. । आलवाले । च.द. । "यवमाषमयीं पालीं ।"

पालिका । स्त्री । पाल्याम् । श.च. ।

पालिधा । स्त्री । पारिभद्रवृक्षे । (जयमङ्गलरसे) ।

पालिन्दः । पुं । कुन्दुरुखोटौ, सल्लकीनिर्यासे । वै.निघ. ।

पालिन्दा (न्दिः,न्दी) (न्धा,न्धिः,न्धी) । स्त्री । श्यामालतायाम् । प.मु. । च सू ४अ । कृष्णत्रिवृति । अम. । सु.कल्प.१अ. । कुन्दुरुखोटी । रा.नि.व.१२ । अम. । भार्ग्याम् । বামনহাটী । श्वेतापराजितायाम् । त्रायमाणालतायाम् । বলা লতা । वै.निघ । मालविकात्रिवृतायां । वा.उ.३८अ. । कारवेल्लां । করলা । सु चि.१७अ. ।

पालि(ली)शोषः । पुं । कर्णरोगविशेषे ।

लक्षणं—"शिरास्थः कुरुते वायुः पालीशोषं तदाह्वयम्।" वा.उ.१७अ.।

पालीकुटः। पुं। चित्रकवृक्षे। वै.निघ.।

पालेवतः। पुं। द्वीपान्तरखर्जूरीवृक्षे। वै.निघ.

पावकः। पुं। रक्तचित्रके। चित्रके। रा.नि.व.६। मे.। वै.निघ.२भ.ज्व.चि.। शुक्लाञ्जने। सूर्यकान्तमणौ। वै.निघ.। कुसुम्भवृक्षे। रा.नि.व.४। अग्निमन्थवृक्षे। भल्लातकवृक्षे। विडङ्गे। सदाचारे। मे.। वैद्युताग्नौ।

पावकमणिः। पुं। सूर्यकान्तमणौ। वै.निघ.।

पावकमन्थनः। पुं। अग्निमन्थक्षुपे। वै.निघ.।

पावकारणिः। पुं। अग्निमन्थक्षुपे। प.मु.।

पावकाह्वः। पुं। अग्निमन्थे। वै.निघ.।

पावकोष्मा (न्)। पुं। सूर्यकान्तमणौ। वै.निघ.।

पावनम्। क्ली। कुष्ठौषधे। कूड़। रा.नि.व.१२। रुद्राक्षे। रा.नि.व.११। जले। मे.। चन्दने। वै.निघ.। गोमये। श.च.। पुं। चित्रके। सिह्लके। शिलारस। विश्व.। पीतभृङ्गराजे। रा.नि.व.४। शङ्खे। वै.निघ.।

पावनध्वनिः। पुं। शङ्खे। रा.नि.व.८।

पावनी। स्त्री। तुलसीवृक्षे। रा.नि.व.१०। हरीतक्याम्। विश्व.। गोरोचनायाम्। नागवल्लीलतायाम्। वै.निघ.।

पावासः। पुं। क्षुद्रपनसे। वै.निघ.।

पाशः। पुं। कचे। जाले। त्रिका.।

पाशवपालनम्। क्ली। घासे। श.च.।

पाशी (इन्)। पुं। वरुणवृक्षे। अम.। रस.र. उद.चि.वह्निभल्लातकरसे।

पाशुपतः (कः)। पुं। श्वेतरक्तवकपुष्पवृक्षे। रा.नि.व.५। मे.। अगस्तिपुष्पवृक्षे। प.मु.। रा.नि.व.१०। महावकुलवृक्षे। वै.निघ.। [र.मा.।

पाश्चात्याकरसम्भवम्। क्ली। शाम्भरलवणे।

पाषाणः। पुं। गन्धके। प.मु.। करञ्जोड़ि पाषाणभेदे। वै.निघ.२भ.अ.सा.चि.धातक्यादिमोदके। च.द.अ.अ.चि.। प्रस्तरे। अम.।

पाषाणकदली। स्त्री। कदलीभेदे। काठेकदली। वै.निघ.।

पाषाणकुट्ट(न्द)कः। पुं। पाषाणभेदके। पाथरकुचा। वै.निघ.।

पाषाणगर्दभः। पुं। हनुसन्धिजक्षुद्ररोगे। गालटा। निदानलक्षणं—"वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः। स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः॥" मा.नि.। भा.म.४भ.। "हनुसन्धौ समुद्भूतं शोफमल्परुजं स्थिरं। पाषाणगर्दभं विद्यात् बलासपवनात्मकम्॥" सु.नि.१३अ.।

पाषाणगैरिकम्। क्ली। गिरिमृत्तिकायाम्। गेरिमाटी। वै.निघ.। [चि.रसाभ्रमण्डूरे।

पाषाणजतु। क्ली। शिलाजतुनि। भैष.शोथ-

पाषाणभित्। पुं। पाषाणभेदे। पाथरचूर। र.मा.। कुलत्थे। (एरण्डसप्तके)। करञ्जोड़िपाषाणभेदे। वै.निघ.।

पाषाणभेदः (कः) (नः) (दी (इन्))। पुं। (Coleus amboinicus. Syn. Coleus aromaticus.) स्वनामख्यातक्षुपे। पाथरचुनीति लोके। च.सू.४अ.। पाथरकुचा, हिमसागर। हिं पाथरचुर। मं कं पाषाणभेदि। तें पिंड़िचेट्टु। स त्रिधा वटपत्रीशिलावल्कक्षुद्रभेदेन। स. गुणाः—मधुरः तिक्तः मेहघ्नः हृद्दाहमूत्रकृच्छ्रघ्नः शीतलः अश्मरीघ्नश्च। रा.नि.व.५। "अश्मभेदो हिमस्तिक्तः कषायो वस्तिशोधनः। भेदनो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः। योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च॥" भा.पू. १भ.ह.व.। श्वासहरः सचितश्लेष्मणि अपस्मारे आक्षेपके हितः वातशान्तिकरश्च। अवशिष्टयोगुणाः स्वस्वपर्याये गम्याः। [श्ल.चि.।

पाषाणरोगः। पुं। अश्मरीरोगे। च.द.अ-

पाषाणवज्रकरसः। पुं। अश्मर्य्यधिकारे रसः। पारदः १भ. गन्धकः २भ. श्वेतपुनर्नवारसैः दिनं मर्दयित्वा भूधरयन्त्रे पचेत्। उद्धृत्य श्लक्ष्णं चूर्णयेत्। तुल्येन पाषाणभेदचूर्णेन यथाबलं मात्रा देया। रस.र.।

पाषाणविषम्। क्ली। दारुमोचभेदे। दारुमूज। प.मु.।

पाषाणसम्भववल्ली । स्त्री । प्रवाले । वै.निघ. । [इति लोके । रा.नि.व.९ ।

पाषाणान्तकः । पुं । अश्मन्तकवृक्षे । आपटा

पाहाड़ः (तः) । पुं । ब्रह्मदारुवृक्षे । श.च. ।

पिकः । पुं । कोकिले । स्त्री । कोकिलायाम् । अम. ।

पिकदेवः / **पिकप्रियः** } पुं । आम्रवृक्षे । वै.निघ. ।

पिकप्रिया । स्त्री । महाजम्बूवृक्षे । रा.नि.व. ११ ।

पिकबन्धुः । पुं । आम्रवृक्षे । त्रिका. ।

पिकभक्षका (क्ष्या) । स्त्री । भूमिजम्बूवृक्षे । वन जाम । रा.नि.व.११ ।

पिकमहोत्सवः । पुं । आम्रवृक्षे । वै.निघ. ।

पिकरागः । पुं । आम्रवृक्षे । रा.नि.व.११ ।

पिकवल्लभः । पुं । आम्रवृक्षे । भा. ।

पिकाङ्गः । पुं । चातकपक्षिणि । श.च. ।

पिकाक्षः । पुं । कोकिलाक्षे । कुलियाखाड़ा। रा.नि.व.२३ । रोचनीवनस्पतौ । श.च. ।

पिकुरसः । पुं । मद्ये । वै.निघ. ।

पिकेक्षणा । स्त्री । कोकिलाक्षक्षुपे । कुलेखाड़ा । रा.नि.व.४ ।

पिक्कः । पुं । करिपोते । श.मा. ।

पिङ्गम् । क्ली । श्रोणपिप्पल्ये । वै.निघ. । बालके । बाला । हरिताले । पुं । वनमूषिके । रा.नि.व. १०।१३।१९ । त्रि । पिङ्गलवर्णे ।

पिङ्गकपिशा । स्त्री । तैलपायिकायां । তেলা পোকা । हे.च. ।

पिङ्गचक्षुः । पुं । कुम्भीरे । हे.च. ।

पिङ्गभासः । पुं । गौधेरकजातिभेदे । सु.कल्प. ८अ. । See कीटः । [रा.नि.व.७ ।

पिङ्ग(ल)मूलम् । क्ली । गर्ज्जरे । গাজর ।

पिङ्गलम् । क्ली । रीतौ । পিতল । रा.नि.व. १२ । हरिताले । पुं । नकुले । स्थावरविषभेदे । हे.च. । पेचके । कुटुरে পেঁচা । रा.नि.व.१९ । उशीरे । रालायाम् । वै.निघ. । मण्डलिसर्पविशेषे । सु कल्प.४अ. । वानरे । त्रिका. ।

पिङ्गलनामकः । पुं । शिलारसे । वै.निघ. ।

पिङ्गललोहम् । क्ली । रीतौ । পিতল । रा. नि.व.१३ ।

पिङ्गला । स्त्री । शिंशपावृक्षे । শিশু গাছ । र.मा. । गोरोचनायाम् । रा.नि.व.१२ । नकुल. १४अ. । राजरीतौ । পিতলবিশেষ । रा.नि.व. १३ । ज्योतिष्मतीलतायाम् । वै.निघ. । निर्विष-जलौकायाम् । सु.सू.१३अ. । पक्षिभेदे । পিঙ্গলা পাখী । रा.नि.व.१९ । कर्णिकायाम् । নাড়ীবিশেষ । हे.च. । सा च दक्षिणाङ्गाधःस्था धनुर्वक्रा दक्षिणनासान्तं गता । (सारदातिलके)। "पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता ।" योगार्णवः ।

पिङ्गलाक्षः । पुं । पिङ्गलापक्षिणि । वै.निघ. ।

पिङ्गलिका । स्त्री । वकपक्षिणि । जटा. । मक्षिकाविशेषे । सु.कल्प.८अ. । [वै.निघ. ।

पिङ्गवर्णकम् । क्ली । गर्जरमूले । গাজরমূল ।

पिङ्गसारः । पुं । हरिताले । रा.नि.व.१३ ।

पिङ्गस्फटिकः । पुं । गोमेदमणौ । रा.नि. व.१३ ।

पिङ्गा । स्त्री । वंशे । वंशलोचने । रा.नि.व.६ । शमीवृक्षे । र.मा. । हिङ्गुनि । मे. । गोरोचनायाम् । रा.नि.व.१२। हरिद्रायाम् । रा.नि.व.२३। रक्तवाहिनाड्याम् । वै.निघ. ।

पिङ्गाण: । पुं । काचे । वै.निघ. ।

पिङ्गाशः । पुं । मत्स्यविशेषे । পাঙ্গাশ মাছ । क्ली । स्वर्णे । পাকা সোণা । मे. ।

पिङ्गाशी । स्त्री । नीलीवृक्षे । मे. ।

पिङ्गास्यः । पुं । पिङ्गाशमत्स्ये । श.र. ।

पिङ्गाह्वः । पुं । पक्षिविशेषे । वम्. कालवट-पक्षी । वै.निघ. ।

पिङ्गाक्षः । पुं । विड़ाले । वै.निघ. ।

पिङ्गी । स्त्री । शमीवृक्षे । प.मु. ।

पिच(चि)ण्डः । पुं । उदरे । रा.नि.व.१८ । पशुपृष्ठभागे । हे.च. ।

पिचव्यः (व्या) । पुं,स्त्री । कार्पासे । हे.च.।

पिचिण्डिका । स्त्री । इन्द्रवस्ती । পায়ের ডিম । हे.च. ।

पिचिण्डिलः । त्रि । लम्बोदरे । हे.च. ।

पिचुः । पुं । कार्पासाम् । रा.नि.व.४ । कार्पासतूलके । अम. । तोलकद्वये । प.प्र.१ख. । कुष्ठरोगभेदे । मे. । सूईतैलविधिभेदे तैलाक्तपिचुधारणरूपे । तैलाक्तं तूलफाहा इति । भा.म.४भ. योनिरो.चि. । क्ली । तूले । তূলা । सु.सू.५अ. ।

पिचुकः । पुं । मदनवृक्षे । কাঁটা ময়না । प.मु. । पक्वकरीरजफलकार्पासे । कर्षपुष्पाख्यमहापुष्पे । नीलोत्पले । सु.चि.७अ. । साकुरुण्डवृक्षे । वै.निघ. ।

पिचुतु(तू)लम् । क्ली । कार्पासे । त्रिका. ।

पिचुमन्दः (मर्दः) । पुं । निम्बवृक्षे । নিম্ গাছ । रा.नि.व.९ । सि.यो.सन्निपातज्व.चि. ।

पिचुलः । पुं । झावुकवृक्षे । ঝাউ গাছ । अम. । कार्पासवृक्षे । जलकाके । तिलकवृक्षे । हिज्जलवृक्षे । मे. । तूले । अ.टी.सा. ।

पिचुवर्त्तिः । स्त्री । तूलवर्त्याम् । তূলার বাতি । च.द.आद्योताधिकारे ।

पिच्चक(ट)म् । क्ली । वङ्गे । রাঙ্ । प.मु. । रा.नि.व.१३ । सीसके । मे. ।

पिच्चटकः । पुं । नेत्ररोगे । পিচুটী রোগ ।

पिच्चिटः । पुं । अग्निप्रकृतिकीटविशेषे । सु.कल्प.८अ. । See कीटः ।

पिच्चितम् । क्ली । अस्थिभङ्गविशेषे । হাড় চেপ্টে যাওয়া । तच्च पृथुतां गतमल्पशोफम् । सु.नि.१५अ. । सद्योव्रणभेदे । "प्रहारपीड़नाभ्यान्तु यदङ्गं पृथुतां गतम् । सास्थि तत्पिच्चितं विद्यात् मज्जरक्तपरिप्लुतम् ॥" सु.चि.२अ. ।

पिच्छः (कः) । पुं । मोचरसे । अम. । लाङ्गूले । मे. । क्ली । मयूरपुच्छे । अम. ।

पिच्छनम् । क्ली । अत्यन्तपीड़ने । च.सू.१८अ.।

पिच्छपादी । त्रि । तन्नामकपादरोगाक्रान्ते (अश्वे)। "रोमान्तः सूयते यस्य समन्तान्नैव पच्यते । क्लेदश्च पिच्छिलो यस्य पिच्छपादीति तं विदुः ॥" ज.द.३९अ. ।

पिच्छभारः । पुं । मयूरपुच्छे । वै.निघ. ।

पिच्छलः । पुं । मोचरसे । आकाशवल्ल्याम् । बहुवारवृक्षे । वै.निघ. ।

पिच्छलच्छदा (दला) । स्त्री । उपोदिकायां । পুঁই গাছ । बदरीवृक्षे । त्रिका. ।

पिच्छलत्वक् । पुं । नागरङ्गवृक्षे । स्त्री । नागरङ्गवल्कले । वै.निघ. ।

पिच्छलवीजः । पुं । वनपणसे । আনারস । [वै.निघ. ।

पिच्छला । स्त्री । शूलीतृणे । रा.नि.व.८ । शाल्मलीवृक्षे । आकाशवल्ल्याम् । वै.निघ. । उपोदिकायां । त्रिका. । [रा.नि.व.१९ ।

पिच्छवाणः । पुं । श्येनपक्षिणि । শ্যেন পাখী ।

पिच्छा । स्त्री । मोचरसे । प.मु. । भैष.स्त्रीरो.चि.मधुकादिलेहः । वा.उ.३४अ.पुष्यानगचूर्णे । शिंशपावृक्षे । श.च. । मण्डे । भक्तमण्डे । कोषे । पूगवृक्षे । कदलीवृक्षे । मे.। सर्पविषे। लालायाम् । शाल्मलीवृक्षे । घोले । वै.निघ. । अश्वपादरोगे । ज.द.। कतकवृक्षे । अकाशलतायाम् । वै.निघ. ।

पिच्छावस्तिः । स्त्री । पिच्छिलवस्ती । वा.चि.६अ. । [গাছ । श.च. ।

पिच्छितिका । स्त्री । शिंशपावृक्षे । শিশু

पिच्छिलः । पुं । पिण्डालुके । प.मु. । बहुवारवृक्षे । भा. । क्ली । समण्डदधनि । वै.निघ. । सरसव्यञ्जनादौ । भ.। स्निग्धसूपादौ । भानुदत्तः । समण्डभक्ते । सजलव्यञ्जने । नीलकण्ठः । त्रि । भक्तमण्डयुक्ते । अम.रा. ।

पिच्छिलकः । पुं। धन्वनवृक्षे । धामना गाछ । रा.नि.व.९ । शाल्मलीवृक्षे । वै.निघ. ।

पिच्छिलगुणकर्म्म । क्ली । पिच्छिलद्रव्यस्य गुणकर्म्मणि । तच्च बल्यं सन्धानं श्लेष्मलं गुरु । सु. ।

पिच्छिलच्छदा । स्त्री । उपोदकायाम् । পুঁই শাক । प.मु. ।

पिच्छिलत्वक् । पुं । धन्वनवृक्षे । धामना गाछ । प.मु. । र.मा. । नागरङ्गवृक्षे । त्रिका. ।

पिच्छिलवस्तिः । स्त्री । निरूहवस्तिभेदे ।

"बदरैरावतीशैलुशाल्मलीपुष्पजाङ्कुराः । क्षीरसिक्ताः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः । अजौरभैणरुधिरैर्युक्ता देया विचक्षणैः । मात्रा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता ॥" भा. ।

पिच्छिलसारः । पुं । मोचरसे । रा.नि.व.८।

पिच्छिला । स्त्री । वृश्चिकाल्याम् । বিছাতী। रा.नि.व.५ । पीतशिंशपावृक्षे । শিশু গাছ । र.मा.। कच्वां । কচু । श.च.। अतस्याम् । মশিনা । रा.नि.व.१६ । शाल्मलीवृक्षे । उपोदिकायाम् । मे. । शल्लीवृक्षे । रा.नि.व.४ । वृक्षभेदे । विच्छिदाना इति केचित् । कोकिलाक्षे । কুলেখাড়া । रा.नि.व.४ ।

पिञ्जः । पुं । कर्पूरे । ভীমসেনী কর্পূর । रा.नि.व.१२ । क्ली । बले । मे. ।

पिञ्जकम् । क्ली । हरिताले । र.सा.सं. ।

पिञ्जटः । पुं । पिच्चटरोगे । পিচুটী । श.र.।

पिञ्जनम् । क्ली । तूलधनुषि । তুলো ধোনা। त्रिका. ।

पिञ्जरम् । क्ली । नागकेशरपुष्पे । रा.नि.व.६। अस्थिपञ्जरे। अ.टी.। श्यामाके। हरिताले । अम.। स्वर्णे । मे. । त्रि । पीतवर्णे ।

पिञ्जरकम् । क्ली । अतस्याम् । মশিনা । प.मु. । हरिताले । रा.नि.व.१३ ।

पिञ्जलम् । क्ली। हरिताले । प.मु. । कुशपत्रे। धरणी. । पुं । जलवेतसे । वै.निघ. ।

पिञ्जा । स्त्री । हरिद्रायाम् । तूलके । मे. ।

पिञ्जानम् । क्ली । सुवर्णे । रा.नि.व.१३ ।

पिञ्जिका । स्त्री । तूलनालिकायां । পাঁইজ । त्रिका. ।

पिञ्जूलम् । क्ली । तूलवर्त्तिकायाम् । वै.निघ.।

पिञ्जूषः । पुं । कर्णगूथे । हे.च. ।

पिञ्जेटः । पुं । नेत्रमले । পিচুটী । श.र. ।

पिटकः । पुं । विस्फोटके । मे. ।

पिट(टि)का । स्त्री । पिड़कायाम् । रा.नि.व.२० । मसूरिकायाम् । वैद्यकम् ।

पिटङ्काकी । स्त्री । कटुवृन्दावने । वै.निघ. ।

पिटङ्काशः । पुं । मत्स्यभेदे, पर्व्वतोर्म्मिमत्स्ये । श.कल्प. ।

पिटङ्कोटिः (की) । स्त्री । इन्द्रवारुणीलतायाम् । प.मु. । [र. ।

पिट्टकम् (का) । क्ली, स्त्री । दन्तकिट्टके । श.

पिठः । पुं । पीड़ायाम् । देवनले । वै.निघ. ।

पिठरम् । क्ली । नागरमुस्तके । मन्थनदण्डे । मे. । पुं । स्थाल्याम् । अम. । च.सू.१५अ. ।

पिड़कः (का) । पुं, स्त्री । व्रणविशेषे । ফুস্কুড়ি । लक्षणं—"उत्पद्यतेऽल्पवक्शोफा क्षिप्रश्चाप्युपशाम्यति । पायुन्तदेशे पिड़का सा ज्ञेयान्या भगन्दरात् ॥ भगन्दरा तु विज्ञेया पिड़कातो विपर्य्ययात् । पायोः स्याद्द्व्यङ्गुले देशे गूढ़मूला सरुग्ज्वरा ॥" सु.नि.४अ. । प्रमेहजन्यविस्फोटकभेदे, प्रमेहपिड़कायां। शराविकादौ । सा दशधा । See प्रमेहपिड़का । क्षुद्रपिड़कायाम्, यवप्रख्यादौ । ताः षोड़श । मा.नि. । तासां लक्षणानि पर्य्याये मृग्याणि ।

पिड़कालिका । स्त्री। नेत्रमले । च.र.पि.नि.।

पिण्डः । पुं । गोपके । নিশাদল । प.मु. । गर्भे । करिगण्डमूले । अम. । शरीरैकदेशे । त्रिका. । देहे । जवावृक्षे । सिह्लके । बले । मे. । मदनवृक्षे । रा.नि.व.११ । क्ली । लौहे । प.मु. । बोलनामगन्धद्रव्ये । গন্ধবোল । रा.नि.व.६ । शरीरे । रा.नि.व.८ ।

पिण्डकः । पुं । पिण्डमूलके । पिण्डालौ । रा.नि.व.७ । गुणाः—"पिण्डको वातलः श्लेष्मी ग्राही वृष्यो महागुरुः ।" अत्रि.१६अ. । शिलारसे । अम. । क्ली । गन्धबोले । तीक्ष्णलौहे । रा.नि.व.६।१३ । नवनीते । अन्ने ।

पिण्डकन्दः । पुं । पिण्डालौ । रा.नि.व.७ ।

पिण्डका । स्त्री । मसूरिकायाम् । वै.निघ. ।

पिण्डखर्ज्जूरः । पुं । स्वनामख्यातवृक्षे । পিণ্ডিখেজুর গাছ । प.मु. ।

पिण्डखर्ज्जूरिका (री) । स्त्री । द्वीपादिविदेशजातपृथुमिष्टफलखर्ज्जूरीवृक्षे । পিণ্ডিখেজুর । मे.। सा द्विधा पिण्डी राजपिण्डी चेति । त-

वीर्गुणाः—फलं गौल्यं हिमं स्वादु गुरु दाहपित्तश्वासघ्नं श्रमघ्नं वीर्य्यवृद्धिकरम् अग्निमान्द्यकरं विषघ्नञ्च । रा.नि.व.११ । See खर्ज्जूरी ।

पिण्डगुडूचिका (ची) । स्त्री । कन्दगुडूच्याम् । रा.नि.व.३ ॥ [टी.र. ।

पिण्डगो(ड़)सः । पुं । गन्धबोले । भा. । अ.

पिण्डतगरः । पुं । तगरपुष्पे । वै.निघ. ।

पिण्डतैलम् । क्ली । वातरक्ताधिकारे तैलम् । "समधूच्छिष्टमञ्जिष्ठं ससर्ज्जरसशारिवम् । पिण्डतैलं तदभ्यङ्गाद्वातरक्तरुजापहम् ॥" কটুতৈল ১ শ. মম, মঞ্জিষ্ঠা, ধূনা, অনন্তমূল প্রত্যেকে ১ ছটাক্ । रस.र. । [रा.नि.व.१२ ।

पिण्डतैलकः । पुं । सिह्लके । শিলারস ।

पिण्डपादः (द्यः) । पुं । हस्तिनि । त्रिका. ।

पिण्डपुष्पम् । क्ली । अशोकपुष्पे । जवापुष्पे । वै.निघ. । पद्मपुष्पे । मे. । तगरपुष्पे । श.र. । पुं । दाड़िमवृक्षे । त्रिका. । [श.मा. ।

पिण्डपुष्पकः । पुं । शाकविशेषे, वास्तूके ।

पिण्डफला । स्त्री । अलाब्वाम् । प.मु. । सु. चि.१८अ. । "आलेपयेत्पिण्डफलार्कभार्गीः ।" कटुतुम्ब्याम् । তিৎলাউ । जटा. ।

पिण्डमुस्तकः (का) । पुं, स्त्री । नागरमुस्तायाम् । रा.नि.व.६ ।

पिण्डमूल(क)म् । क्ली । पञ्चविधमूलकान्यतममूलके । गर्ज्जरमूलके । বাটুলা মূলা । गुणाः—कटूष्णं गुल्मवातघ्नञ्च । रा.नि.व.७ ।

पिण्डयोनिः । स्त्री । योनिरोगभेदे । च.द. योनिरो.चि. । [চি গাছ । रा.नि.व.९ ।

पिण्डरोहिणकः । पुं । विकङ्कतवृक्षे । বঁই-

पिण्डबीजः । पुं । (Oleander odorum.) कर्णिकारवृक्षे । रा.नि.व.९ । [ড়ি । वै.निघ. ।

पिण्डशर्करा । स्त्री । खटीशर्करायां । ফুলখ-

पिण्डस्वेदः । पुं । पिण्डेन स्वेदे । वा.उ.२८अ. ।

पिण्डहरिद्रा । स्त्री । ग्रन्थिहरिद्रायाम् । গিঁঠা হরিদ্রা । वै.निघ. ।

पिण्डा । स्त्री । कस्तूरीभेदे । মৃগনাভিবিশে-ष । सा कुलत्थिकाभाः किञ्चित् स्थूला । रा.नि.व. १२ । हरिद्रायाम् । वंशपत्रीवृक्षे । भा. । खर्ज्जूरीवृक्षे । पिण्डायसे । পিণ্ডলোহ । रा.नि.व.१३ ।

पिण्डाञ्जनम् । क्ली । अञ्जनविशेषे । वा.उ. १४अ. ।

पिण्डातः । पुं । सिह्लके । শিলারস । र.मा. । गन्धरसे । रस.र.पिप्पल्याद्यलौहे ।

पिण्डापा । स्त्री । नाड़ीहिङ्गौ ।

पिण्डाभा । स्त्री । शर्कराभेदे । वै.निघ. ।

पिण्डाभ्रम् । क्ली । करकायाम् । श.मा. ।

पिण्डामृता । स्त्री । कन्दगुडूच्याम् । वै.निघ. ।

पिण्डाम्लम् । क्ली । चाङ्गेरीलिकुचाम्लवेतसजम्बीरकर्पूरनारङ्गफलषाड़वसमभागमिश्रिते । "चाङ्गेरीलिकुचाम्लवेतसयुतं जम्बीरकर्पूरकं नारङ्गं फलशाड़वञ्चेति तु पिण्डाम्लञ्च बीजाम्लकम् ।" रा. नि.व.२२ । [१३ ।

पिण्डायसम् । क्ली । तीक्ष्णलौहे । रा.नि.व.

पिण्डारः । पुं । विकङ्कतवृक्षे । বঁইচি গাছ । वै.निघ.२भ.ज्व. । वृक्षविशेषे । পিটুলি গাছ । मे. । क्षपमदनवृक्षे । क्ली । (Trewia mudiflora.) फलशाकविशेषे । हिं पिण्डारा । फलगुणाः—"पिण्डारं शीतलं बल्यं पित्तघ्नं रुचिकारकं । पाके लघु विशेषेण विषशान्तिकरं लघु ॥" भा.पू.१भ.शा.व.ज्योतिष्मतीनखे ।

पिण्डालः (लुः) । पुं । स्वनामख्यातकन्दशाकविशेषे । চুবড়ি আলু, গোল আলু, হাতিখোজা আলু । मं पेंडालु । कं विलियहेण्डल । उत्. घरा अलु । गुणाः—मधुरः शीतः मूत्रकृच्छ्रघ्नः दाहशोषप्रमेहघ्नः वृष्यः गुरुः सन्तर्पणः । रा. नि.व.७ । "पिण्डालुकः श्लेषकरः शुक्रवृद्धिकरो मृदुः ।" अत्रि.१६अ. । कन्दगुडूच्यां । रा.नि.व.३ ।

पिण्डालु(लू)कम् । क्ली । रक्तालुके । গোল আলু । মৌ আলু । हिं सुथनी । गुणाः—गुरु कफघ्नं वातकोपनञ्च । राज. । शाकं सर्षपशाकगुणम् । च.सू.२७अ. ।

पिण्डासवः । पुं । मद्यख्यामासवविशेषे । तत्साधनविधिः—"प्रास्थिकीं पिप्पलीं पिष्ट्वा गुड़ं

मध्ये विभीतकाम्। उदकप्रस्थसंयुक्तं यवपल्ले नि-धापयेत्। तस्मात्पलं सुजातात् सलिलाञ्जलिसंयुतं। पिबेत्पिण्डासवो ह्येष:...... ।" च.चि.१८अ.। पिप्पलीकल्क: २ श. गुड़: २ श. मधु २श. वारि ४ श. एकत्र कलसस्थं कृत्वा नि:सप्तकं मासं वा यवपल्लमध्ये स्थाप्यम्।

पिण्डाह्वम्। क्ली। तगरपादुके। र.सा.सं.।

पिण्डाह्वा। स्त्री। नाड़ीहिङ्गौ। रा.नि.व.६।

पिण्डि:। स्त्री। पिण्डिकायाम्। পায়ের ডিম। श.टी.र.।

पिण्डिका (ण्डी)। स्त्री। श्वेताम्लिकायाम्। रा.नि.व.४। इन्द्रवल्लौ। "तन्मध्ये पिण्डिका तथा।" रा.नि.व.१८। तालवृक्षे। वै.निघ.। भ-स्त्राख्याम्। पिण्डीतगरे। पिण्डीखर्ज्जूरे। मे.। नेत्राभिष्यन्दरोगे नेत्रकर्म्मभेदे। तदुक्तं—"युक्तमेष-जकल्कस्य पिण्डी कवलमात्रया। वस्त्रखण्डेन स-म्बद्धा नेत्राभिष्यन्दनाशिनी। स्निग्धोष्णा पिण्डिका वाते पित्ते सा शीतला मता। रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरुक्तो बुधैरयमिति॥" भा.। पिण्डे। सा.कौ.अभ्रमारणे।

पिण्डिकोद्वेष्टनम्। क्ली। जान्वधो जङ्घामांसपिण्डस्य दण्डादिपीड़नेनेव वेदनायां। পায়ের ডিম ওঠা। मा.नि.।

पिण्डित: (कल्क:)। पुं। शिलारसे। प.मु.। See सिह्लक:। रा.नि.व.१२। क्ली। कांस्यधातौ। वै.निघ.।

पिण्डितैलम्। क्ली। शिलारसे। वै.निघ.।

पिण्डिनी। स्त्री। गिरिकर्णिकायाम्। অপরাজিতা। रा.नि.व.२३। [यकै। वै.निघ.।

पिण्डिरिका। स्त्री। मञ्जिष्ठायाम्। तण्डुली-

पिण्डिला। स्त्री। कर्कटीभेदे, गोडुम्बायां। গোমুক। श.च.।

पिण्डीतक:। पुं। कृष्णमदने। কাল ময়না। सु.चि.१७.२५अ.। मदनवृक्षे। रा.नि.व.८। सि.यो.छर्दि.चि.। भा.म.४भ.गर्भचि.। फणिजभक-वृक्षे। विश्व.। क्ली। पिण्डीतगरे। তগরপাদুকা। विश्व.।

पिण्डीतकफलम्। क्ली। कृष्णमदनफले। पाण्डुवर्णमदनफले। सु.चि.२५अ.। मरुवकफले। वै.निघ.।

पिण्डीतगर: (क:)। पुं, क्ली। तगरपुष्पविशेषे। তগরপাদুকা। कोङ्कणे पिण्डीतगरनाम्ना प्रसिद्ध:। त्रिका.। रा.नि.व.१०। रस.र.विष.चि.। [६।

पिण्डीतरु:। पुं। महापिण्डीवृक्षे। रा.नि.व.

पिण्डीपुष्प:। पुं। अशोकवृक्षे। रा.नि.व.१०।

पिण्डीर:। पुं। दाड़िमवृक्षे। त्रिका.। समुद्रफेने। श.टी.रा.। नकुल.१३अ.।

पिण्डोद्भवा। स्त्री। सुरायाम्। वै.निघ.।

पिण्डोलि:। पुं। उष्ट्रे। वै.निघ.। त्रि। भुक्तसमुज्झिते। हे.च.।

पिण्या (का)। स्त्री। ज्योतिष्मतीलतायाम्। লতা ফট্কী। वन उच्छे। प.मु.। वै.निघ.।

पिण्याक:। पुं, क्ली। तिलकल्के। খলি। तैलकिट्टे। তিলকুটা। रा.नि.व.१६। "तिलादीनां निष्पीड़ित: कल्क उद्धृततैलस्तिलादिपिण्ड:।" हेमाद्रि:। च.सू.२अ.तैलव्यापदयवाग्वाम्। गुणा: —ग्लानिकरो रूक्ष: विष्टम्भी दृष्टिविकारकृच्च। वा.सू.६अ.। सिह्लके। শিলারস। रा.नि.व.१२। हिङ्गौ। कुङ्कुमे। तैलपर्ण्याम्। লবণথোটী। पीलुकन्दे। च.द.ग्रन्थि.चि.।

पितामह:। पुं। मुञ्जतृणे। মুঁজ। पितु: पितरि। वै.निघ.।

पितृग्रह:। पुं। बालरोगभेदे। ভূতোন্মাদ-ग्रहविशेष। तज्जुष्टलक्षणं—"प्रेतानां स दिशति संस्तरेषु पिण्डान् शान्तात्मा जलमपि चापसव्यवस्त्र:। मांसेप्सुस्तिलगुड़पायसाभिकामस्तद्भक्तो भवति पितृग्रहाभिजुष्ट:॥" मा.नि.। "रोमहर्षो मुहुर्भ्रमि:।" वा.उ.३अ.।

पितृज:। त्रि। शरीरे पितुर्जातेषु केशश्मश्रु-नखदन्तास्थिलोमशिरास्नायुधमनीषु। च.शा.३अ.।

पितृतर्पणम्। क्ली। तिले। रा.नि.व.१६।

पितृप्रसू:। स्त्री। सायङ्काले। अम.।

पितृप्रिय:। पुं। मार्कवे। ভীমরাজ। रा.

नि.व.४ । स्त्री । अगस्त्यवृक्षे । भृङ्गराजे । कालशाके । रा.नि.व.२३ । [रा.नि.व.१६ ।

पितृभोजनः । पुं । माषे । माष कलाय ।

पित्तम् । क्ली । गोरोचनायां । च.द.उन्मा.चि.। "सपित्तं स्थितमञ्जनं ।" (Fel.) Gall or bile. पाचकाद्यपरनामकशरीरस्थतेजोधातौ । पित्त । हिं पीत् । शफ्रा । तत्स्वरूपं यथा—"पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तमम् । सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाकतः ॥" भा. । प्रकोपगुणः—"पित्तञ्च तिक्ताम्लरसञ्च सारकं चोष्णं द्रवं तीक्ष्णमिदं मधौ बहु । वर्षान्तकाले भृशमर्द्धरात्रके मध्यन्दिनेऽन्नस्य जरे च कुप्यति ॥" रा.नि.व.२१ । "पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च । उष्णं कटुरसञ्चैव विदग्धञ्चाम्लमेव च । तदुष्णैरुष्णकाले च मेघान्ते च विशेषतः । मध्याह्ने चार्द्धरात्रे च जीर्य्यत्यन्ने च कुप्यति ॥" सु.सू.२१अ. । "सर्व्वं पित्तमपस्मारकुष्ठदुष्टव्रणापहम् । चक्षुष्यं कटुतीक्ष्णोष्णमुन्मादकृमिनाशनम् ॥" राज. । तच्च पाचकरञ्जकसाधकलोचकभ्राजकभेदेन पञ्चविधमधिष्ठानभेदतः यथाक्रमं अन्त्याशययकृत्प्लीहनेत्रहृयत्वक्स्वेषुशरीरेषु तिष्ठति । एतेषाञ्च कर्म्माणि—"पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम् । रसमूत्रपुरीषाणि विरेचयति नित्यशः । रञ्जकं नाम यत्पित्तं तद्रसं शोणितं नयेत् । यत्तु साधकसंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम् । यदा लोचकसंज्ञं तत् रूपग्रहणकारणम् । भ्राजकं कान्तिकारि स्याल्लेपाभ्यङ्गादिपाचकम् ॥" भा. । "पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगं । पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् । त्यक्तं द्रवत्वं पाकादिकर्म्मणानलसंज्ञितं । पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा । तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहं । करोति बलदानेन पाचकं नामतः स्मृतम् । आमाशयाश्रितं पित्तं रञ्जकं रसरञ्जनात् । बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् । साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम् । दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचम् ॥" वा. । See अग्निः । पित्तप्रकृतिलक्षणम्—अकाले केशशुक्लतागौरवर्णतावर्म्मादिषु । यथा—"गौरातिपिङ्गः सुकुमारमूर्त्तिः प्रीतः सुशीतो मधुपिङ्गनेत्रः । तीक्ष्णोऽपि कोऽपि क्षणभङ्गुरश्च वासौ मृदुर्गात्रमलोमकं स्यात् । शैत्यप्रियस्तिक्तरसानुभोजी द्वेषी च तीक्ष्णेच नवीनसेवी । स्तुतिप्रियो दन्तविशुद्धवर्णो ज्ञातः स पित्तप्रकृतिर्मनुष्यः ॥" अत्रि.५अ. । "पित्तप्रकृतिको लोको यादृशोऽथ निगद्यते । अकालपलितो गौरः क्रोधी खेदी च बुद्धिमान् । बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति । एवंविधो भवेद्यस्तु पित्तप्रकृतिको नरः ॥" भा.पू.१भ. ।

पित्तकफज्वरः । पुं । पित्तश्लेष्मज्वरे ।

पित्तकरः (कृत्) । त्रि । पित्तजनकद्रव्ये, वंशकरीरादौ ।

पित्तकासः । पुं । पित्तजन्यकासरोगे । लक्षणं—"उरो विदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः । पित्तेन पीतानि वमेत्कटूनि कासेत् स पाण्डुः परिदह्यमानः ॥" मा.नि. ।

पित्तघ्नम् । क्ली । घृते । मधुरतिक्तकषायद्रव्यमात्रे । त्रि । पित्तनाशके शीतमृदुपिच्छिलगुणत्वात् । सु.सू.४२अ. ।

पित्तघ्नी । स्त्री । गुडूच्याम् । श.च. ।

पित्तज्वरः । पुं । पित्तजन्यज्वरे । लक्षणं—"वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः । कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते । प्रलापो वक्त्रकटुता मूर्च्छादाहौ मदस्तृषा । पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥" निदा. ।

पित्तद्रावी (इन्) । पुं । मधुरजम्बीरवृक्षे । रा.नि.व.११ । त्रि । पित्तद्रवकारिणि ।

पित्तधरा । स्त्री । षष्ठ्यां शारीरकलायां, ग्रहण्याम् । ग्रहणी । "या चतुर्विधमन्नपानमुपयुक्तमामाशयात् प्रच्युतं पक्वाशयोपस्थितं धारयति । सु.शा.४अ. । एषैव ग्रहणीत्युच्यते । "षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता । पक्वामाशयमध्यस्था ग्रहणी परिकीर्त्तिता ॥" सु.उ.४०अ. ।

पित्तनाड़ी । स्त्री । दन्तमूलगतरोगे । पित्तजन्यनाड़ीव्रणे । उभयलक्षणम्—"पित्तात्तृषाज्वरकरी परिदाहयुक्ता पीतं स्रवत्यधिकमुष्णमहःसु चापि ।" मा.नि. ।

पित्तपाण्डुः । पुं । पित्तजन्यपाण्डुरोगे । लक्षणं—"पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ।

भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥" मा.नि. ।

पित्तप्रकोपी । त्रि । पित्तकर्इके पानेऽन्ने च, यथाक्रमं तक्रसुरादिके मांसादिके चेति । भा.पश्च. पि.चि. । "क्रोधशोकभयश्रमायासोपवासविदग्धमैथुनोपगमनकट्वम्ललवणतीक्ष्णोष्णलघुविदाहितिलतैलपिण्याककुलत्थसर्षपातसीहरितशाकगोधामत्स्याजाविकमांसदधितक्रकूर्चिकामस्तुसौवीरकसुराविकाराम्लफलकट्वराकप्रभृतिभिः पित्तप्रकोपमापद्यते ।" सु.सू.२१अ. । [निर्गमे ।

पित्तप्रवर्त्तनम् । क्ली । ऊर्द्ध्वाधोमार्गेण पित्त

पित्तभेषजम् । क्ली । मसूरे । वै.निघ. ।

पित्तरक्तम् (शोणितम्) (त्तास्रम्) । क्ली । रक्तपित्तरोगे । रा.नि.व.२० । [धा.चि. ।

पित्तरेताः । त्रि । पित्तभूयिष्ठशुक्रे । रस.र.मू.

पित्तरोगः । पुं । पित्तकोपरोगे ।

पित्तरोहिणी । स्त्री । पित्तजन्यगलरोगे । लक्षणम्—"क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजा स्यात् ।" सु.नि.१६अ. ।

पित्तलम् । क्ली । हरिताले । प.मु. । भूर्ज्जपत्रे । श.मा. । स्वनामख्याततामयशदयोरुपधातौ । पितल, काँचा पितल । हिं पीतरी, काँचीपीतरी । "राजरीतिः ब्रह्मरीतिः कपिला पिङ्गलापि च । रीतिरप्युपधातुः स्यात् ताम्रस्य यशदस्य च ॥ पित्तलस्य गुणा ज्ञेया स्वयोनिसदृशा जनैः । संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ॥" गुणाः—"रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे । शोधनं पाण्डुरोगघ्नं क्रमिघ्नं नातिलेखनम् ॥" भा.पू. १भ.धा.व. । अस्य मारणं शोधनञ्च ताम्रवत् ज्ञेयम् । र.सा.सं. । त्रि । पित्तयुक्ते । स्त्री । शालपर्ण्याम् । रा.नि.व.४ । जलपिप्पल्याम् । मे. ।

पित्तवर्गः । पुं । पञ्चविधपित्तेषु । तानि च मत्स्यगवाश्वरुरुवर्हिजानि । मतान्तरे वाराहच्छागमाहिषमात्स्यमायूरजानि । "पित्तं पञ्चविधं मत्स्यगवाश्वरुरुवर्हिजम् ।" इति । र.सा.सं. । "वाराहच्छागमाहिषमात्स्यमायूरपित्तकमिति ।" मतान्तरम् । [निघ. ।

पित्तवल्लभा । स्त्री । कृष्णातिविषायाम् । वै.

पित्तविदग्धदृष्टिः । पुं । दृष्टिरोगविशेषे । लक्षणं यथा—"पित्तेन दुष्टेन गतेन दृष्टिं पीता भवेद्यस्य नरस्य दृष्टिः । पीतानि रूपाणि च तेन पश्येत् स वै नरः पित्तविदग्धदृष्टिः ॥ प्राप्ते तृतीयं पटलन्तु दोषे दिवा न पश्येन्निशि वीक्षते च । रात्री स शीतानुगृहीतदृष्टिः पित्ताल्पभावात् सकलानि पश्येत् ॥" मा.नि. ।

पित्तवि(वी)सर्पः । पुं । पित्तजन्यविसर्परोगे । भा. । लक्षणं—"पित्ताद्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ।" मा.नि. ।

पित्तव्याधिः । पुं । पित्तजन्यरोगे । भा. ।

पित्तशूलम् । क्ली । पित्तजन्यशूलरोगे । लक्षणं—"तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तरम् । शूलं शीतसमप्रायं पैत्तिकं लक्षयेद्बुधः ॥" मा.नि. । "पैत्ते तु शूले वमनं पयोऽम्बु रसैस्तथेक्षोः सपटोलनिम्बैः । शीतावगाहाः पुलिनाः सवाताः कांस्यादिपात्राणि जलप्लुतानि ॥ गुड़ः शालिर्यवाः क्षीरं सर्पिःपानं विरेचनं । जाङ्गलाणि च मांसाणि भेषजं पित्तशूलिनाम् ॥" च.द. ।

पित्तश्लेष्मज्वरः । पुं । पित्तकफाधिकज्वरभेदे । लक्षणं—"लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा । मुहुर्दाहो मुहुः शीतः पित्तश्लेष्मज्वराकृतिः ॥" मा.नि. ।

पित्तसंशमनवर्गः । पुं । पित्तशान्तिकरद्रव्यगणे । यथा—चन्दनकुचन्दनोशीरह्रीवेरमञ्जिष्ठापयस्याविदारिशतावरीगुन्द्राशैवालकह्लारकुमुदोत्पलकदलीकन्दलीदूर्व्वामूर्व्वाप्रभृतीनि, काकोल्यादिन्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्गः । सु.सू.३९अ. ।

पित्तस्रावः । पुं । नेत्रसन्धिगतरोगे । लक्षणं यथा—"पीतभासं नीलमुष्णं जलाभं पित्तस्रावं स स्रवेत् सन्धिमध्यात् ।" सु.उ.२अ. । [निघ. ।

पित्तहा । पुं । पर्पटके । त्रि । पित्तघ्ने । वै.

पित्तहरः । पुं । काकोल्यादिगणे । सि.यो. तृष्णा चि. । च.द.छर्द्दि चि. । उशीरे । वै.निघ. ।

पित्तातिसारः । पुं । पित्तजन्यातिसाररोगे । See अतीसारः । [भ. ।

पित्तानुबन्धः । पुं । पित्तानुबन्धे । वा.चि.२

पित्ताण्डः । पुं । अश्वस्य अण्डस्कन्दरोगे । ज. द.५०अ. ।

पित्ताभिष्यन्दः । पुं । सर्व्वगताक्षिरोगभेदे । পিত্তজন্য চোক্ উঠা । यथा—"दाहो धूमायनं शोफः श्यावता वर्त्मनो बहिः । अन्तःक्लेदोऽश्रु पीतोष्णं रागः पीताभदर्शनम् । चारोक्षितक्षताक्षित्वं पित्ताभिष्यन्दलक्षणम् ॥" वा.उ.१५अ. ।

पित्तारिः । पुं । पर्पटे । ক্ষেৎপাপড়া । रा. नि.व.५ । लाक्षायाम् । লাহা । रा.नि.व.६ । बर्व्वरचन्दने । रा.नि.व.१२ ।

पित्तिका । स्त्री । शतपदीभेदे । কেন্নুইবিশেষ । सु.कल्प.८अ. ।

पित्तोत्क्लिष्टम् । क्ली । नेत्रवर्त्माश्रयरोगे । लक्षणं यथा—"सदाहक्लेदनिस्तोदं रक्ताभं स्पर्शनाक्षमं । पित्तेन जायते वर्त्म पित्तात्क्लिष्टमुशन्ति तत् ॥" वा.उ.८अ. ।

पित्तोदरम् । क्ली । पित्तजन्योदररोगे । तस्य लक्षणं यथा—"यस्योषतृष्णाज्वरदाहयुक्तं पीतं शिरा यत्र भवन्ति पीताः । पीताक्षिविण्मूत्रनखाननस्य पित्तोदरं तत्त्वचिराभिवृद्धि ॥" सु.नि.७अ. । पुं । मध्यविषवृश्चिकजातौ । सु.कल्प.८अ. ।

पित्तोल्बणः । त्रि । पित्ताधिके । वा.चि.७अ. ।

पित्तोल्बणसन्निपातः । पुं । आशुकारिसन्निपातज्वरे । तस्य लक्षणं—"अतीसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च । गात्रे च विन्दवो रक्ता दाहोऽतीव प्रजायते । पित्तोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत् ॥" भा.म.१भ. ।

पित्रर्हः । पुं । माषकलाये । मे. ।

पित्र्यम् । क्ली । मधुनि । रा.नि.व.१४ । पुं । माषे । মাষকলায় । रा.नि.व.१६ ।

पिनसः । पुं । नासारोगे, अपीनसे । निदा. ।

पिनाकः । पुं, क्ली । तन्नामकनीलाभ्रभेदे । वै.निघ. । See अभ्रम् ।

पिन्यासः । पुं । हिङ्गुनि । जटा. ।

पिपासा । स्त्री । तृष्णायाम् । रा.नि.व.२० । अत्र यवागूः मृद्वीकादिसिद्धा प्रशस्ता । च.सू.२अ. ।

पिपासुः । त्रि । तृष्णातुरे ।

पिपिली । स्त्री । पिपीलिकायाम् । वै.निघ. ।

पिपीलकः । पुं । कृष्णवर्णमहापिपीलिकायाम् । বড় ডেয়ো পিপড়ে । हे.च. ।

पिपीलिका (ली) । स्त्री । पिपिल्याम् । পিপড়া। ताः षड्विधाः—स्थूलशीर्षा संवाहिका ब्राह्मणिका अङ्गुलिका कपिलिका चित्रवर्णेति । ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः । सु.कल्प.८अ. । [शर्करायां । त्रिका. ।

पिप्पटा । स्त्री । शर्करायाम् । वै.निघ. । गुड़-

पिप्पलः । पुं । अश्वत्थवृक्षे । र.मा. । वा.सू. १५अ.न्यग्रोधादिः । पक्षिविशेषे । मे. । क्ली । जले । त्रिका. । [८अ. । सीवनसूत्रे । मे. ।

पिप्पलकः । पुं, क्ली । स्तनाग्रे । मे. । च.शा.

पिप्पलपर्णी । स्त्री । मेषशृङ्ग्याम् । वै.निघ. ।

पिप्पलिः (ली) । स्त्री। (Piper longum. Syn. Chavica Roxburghii.) Long pepper. स्वनामख्यातपण्यद्रव्ये । পিপুল গাছ । हिं पीपर । मं पिप्पली । कं हिप्पली । तें पिप्पलिचेट्टु । वम्. वङ्गालिपिंपरि । ता. पिपिलि । पिप्पली वनपिप्पली गजपिप्पली सिंहपिप्पली चेति बहुधा । गुणाः स्वस्वपर्य्याये मृग्याः । सा. गुणाः—ज्वरघ्नी वृष्या तिक्तोष्णा कटुः तिक्ता दीपनी मारुतश्वासकासश्लेष्मक्षयघ्नी च । रा.नि.व. ६। आर्द्रपिप्पली कफकरी स्निग्धा शीतला मधुरा गुरुः पित्तघ्नी च। शुष्का सा पित्तकोपनी। मधुना सा मेदोवृद्धिकफश्वासकासज्वरघ्नी मेधाग्निवृद्धिकरी च । गुड़ेन सा जीर्णज्वराग्निमान्द्यहरी । तत्र भागैकं पिप्पल्या भागद्वयञ्च गुड़स्येति वृद्धाः । भा. पू.१भ. । कटुका पित्तं शमयति मृदुशीतवीर्य्यत्वात् । सु.सू.४०।४६अ. । प्लक्षवृक्षे । मद.व.५ । अश्वत्थिकायाम् । গয়া অশথ । रा.नि.व.११ । कर्णगतरोगे । लक्षणं—"एको नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः । पिप्पली पिप्पलीमानः…… … ॥" वा.उ.१७अ. ।

पिप्पलीखण्डः । पुं । See खण्डपिप्पली ।

पिप्पलीद्वयम् । क्ली । पिप्पली गजपिप्पली चेति द्वये । च.द.कफज्व.चि.निम्बादिः ।

पिप्पलीमूलम् । क्ली । स्वनामख्यातवृक्षलता-

मूले। पिपूलमूल। मं पिंपलीमूल। कं हिप्पलि यवेरु। तें पिप्पलीदुम्प। गुणाः—कटूष्णं श्लेष्मक्रिमिघ्नं दीपनं वातरोगघ्नं रोचनं पित्तकोपनञ्च। रा.नि.व.६। रोचनं कटूष्णं लघु भेदि कफवातोदरघ्नम् आनाहप्लीहगुल्मघ्नं श्वासक्षयहरञ्च। भा.। च.द.। "मरीचापिप्पलीमूलचव्यचित्रकनागरैः।"

पिप्पलीरसायनम् । क्ली। मेधाकररसायनविशेषे। "तिस्रस्तिस्रस्तु पूर्व्वाह्णे भुक्त्वाग्रे भोजनस्य च। पिप्पल्यः किंशुकक्षारभाविता घृतभर्ज्जिताः। प्रयोज्या मधुसर्पिर्भ्यां रसायनगुणैषिणा॥" च.चि.१अ.।

पिप्पलीवर्द्धमानम् । क्ली। रसायनविशेषे। यथा—प्रथमदिने दश पिप्पलीतण्डुलं दुग्धेनारभ्य प्रतिदिनं दश दश दशाहपर्य्यन्तं वर्द्धयेत्। अथ क्रमेण प्रत्यहं दश दश ह्रासयित्वा पुनर्नवाह्निकं यावत् पूर्व्ववत् दुग्धेन सेवेत, प्रतिदिनञ्च औषधपाके सति सघृतदुग्धं षष्टिकान्नं भक्षयेत्। इति उत्तमस्य मात्रा। मध्यस्य षट्, हीनस्य त्रीणि च मात्रा। च.चि.१अ.।

पिप्पल्यादिकषायः । पुं। पिप्पल्यादिगणसिद्धे कफपाचनकषाये। सु.। १। पिप्पलीमूलगुडूचीविश्वभेषजसिद्धे कषाये वातज्वरे हिते। वा.चि.१अ.। २। पिप्पलीशारिवाद्राक्षाशतपुष्पाहरेणुभिः कृते कषाये वातज्वरे हिते। च.द.।

पिप्पल्यादिगणः । पुं। गणोऽयं वातकफहरः दीपनश्च। "पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बमदनफलहिङ्गुभार्गीमूर्व्वातिविषावचाविड़ङ्गानि कुटुरोहिणी चेति।" सु.सू.३८अ.।

पिप्पल्याद्यघृतम् । क्ली। शूले घृतम्। गव्यघृतं ४ श.। क्वाथार्थं—पिप्पली ४ श. वारि ६४ श. शे. १६ श.। कल्कार्थं—पिप्पली १ श.। अन्यत्सन्निपातज्वरे—गव्यघृतं ४ श.। कल्कार्थं—पिप्पली रक्तचन्दनं मुस्तम् उशीरं कटुकी इन्द्रयवः भूम्यामलकी अनन्तमूलम् अतिविषा शालपर्णी द्राक्षा आमलकं बिल्वमूलत्वक् त्रायमाणा (बनाडुमुर) फटिकारी, एषां प्रति २ तो. वारि १६ श.। रस.र.।

पिप्पल्याद्यलेहः । पुं। हिक्कायाम् कासे च लेहः। "पिप्पल्यामलकीद्राक्षाकोलास्थिमधुशर्करा—विड़ङ्गपुष्करैर्युक्तो लेहो हन्ति सुदुर्ज्जयम्॥" रस.चि.। रस.र.। अन्यः उदरे—"पिप्पलीमूलपिप्पलाभत्रिकत्रयेन्दुसैन्धवैः। योजितो नियतं हन्ति लेहः सर्व्वोदरामयम्॥" पिप्पलाभः गन्धरसः। इन्दुः कर्पूरं। सर्व्वसमं लौहचूर्णं ग्राह्यम्। रस.र.।

पिप्पिका । स्त्री। दन्तमले। त्रिका.।

पिप्लुः । पुं। जतुमणौ। जड़ुल। च.इ.१अ.।

पिम्परिः । पुं। प्लक्षभेदे। रा.नि.व.११।

पियारकम् । क्ली। स्वनामख्यातफले। (पेयारा फल। अर्क.।

पियालः । पुं। (Buchanania latifolia.) स्वनामख्यातमहातरौ। अस्य बीजं चिरौञ्जीति लोके। पियाशाल। हिं नियवेरु। मं चारोली। पञ्जा. चिरौली। उत्. चरु। ता. काटमरा। सु.सू.३८अ.। वा.सू.१५अ.न्यग्रोधादिः। बीजगुणाः—गुरु सरं दाहज्वरतृष्णाघ्नं। रा.नि.व.११। मधुरं स्निग्धं बृंहणं वातपित्तघ्नञ्च। राज.। च.सू.२४अ.। तैलं विभीतकतैलगुणं। पियालमज्जा मधुरो वृष्यः वातपित्तघ्नश्च। सु.सू.४६अ.। अस्य निर्यासः उदरामयघ्नः ग्रीवामांसग्रन्थिशोफे च हितः। See अखहः।

पियालास्थिजः । पुं। पियालफलमज्जायां। पियाल आँटीर शस्य। भैष.शूलचि.पूगखण्डे।

पिलिपिच्छिका । स्त्री। शिशोर्मातृकाग्रहभेदे। या एकादशे दिने मासि वर्षे वा गृह्णाति। तेन बालस्य ज्वरगात्रभङ्गादिर्भवति। च.द.बाल.चि.।

पिलुकः । पुं। पीलुवृक्षे। श.र.।

पिलुनी (पर्णी) । स्त्री। मूर्व्वायां। र.मा.।

पिल्लः । पुं। क्लिन्ननेत्ररोगे। अम। वा.उ.१६अ.।

पिल्लका । स्त्री। करेणुकायाम्। श.मा.।

पिशाचः (ग्रहः) । पुं। भूतग्रहविशेषे। पिशाचग्रहलक्षणं यथा—"उद्धस्तः कृशपरुषोऽचिरप्रलापी दुर्गन्धो भृशमशुचिस्तथातिलोलः। बह्वाशी विजनवनान्तरोपसेवी व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः॥" मा.नि.।

पिशाचघ्नः । पुं । श्वेतसर्षपे । प.मु. ।

पिशाचद्रुः (वृक्षः) । पुं। शाखोटवृक्षे । ८शे-ओड़ा गाछ । त्रिका. । र.मा. ।

पिशाचिका (ची) । स्त्री । सूक्ष्मजटामांस्याम् । See आकाशमांसी ।

पिशितम् । क्ली । मांसे । रा.नि.व.१८। स्त्री। जटामांस्याम् । रा.नि.व.१२ । [वै.निघ. ।

पिशितरोहिणी । स्त्री । मांसरोहिण्याम् ।

पिशितोदकम् । क्ली । कुङ्कुमे । वै.निघ. ।

पिशिनी, पिशी । स्त्री । जटामांस्याम् । रा नि.व.१२ ।

पिशीतकः । पुं । गोधूमे । वै.निघ. ।

पिशुः (ना) । स्त्री । स्पृक्कायाम् । गन्धद्रव्य । रा.नि.व.१२ । (ना) ग्रन्थिपर्णे । ८गेँटेला । वै. निघ. ।

पिशुनम् । क्ली । कुङ्कुमे । रा.नि.व.१२ । मे. । पुं । तगरे । काके । कार्पासे । वै.निघ. ।

पिष्ट(क)म् । क्ली । सीसके । शीष । अक्षिभङ्गविशेषे । सु. । पुं । नन्दिवृक्षे । वै.निघ. । तिलकल्के । तिलकुटा । रा.नि.व.१६ । पुं, क्ली । शुक्लगताक्षिरोगभेदे । लक्षणम्—"उत्सन्नः सलिलनिभोऽथ पिष्टशुक्ले बिन्दुर्यः स भवति पिष्टकः सुवृत्तः ।" सु.उ.४अ. । "श्लेष्ममारुतकोपेन शुक्ले मांसं समुन्नतं । पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम् ॥" भा.म.४भ. । तण्डुलचूर्णादिकृतभक्ष्यद्रव्यविशेषे । पिटे । सा. गुणाः—"पिष्टं प्राणकरं रूक्षं विदाहि गुरु दुर्जरम् ।" शालितण्डुलपिष्टकगुणाः—"शालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः ।" वैदलकृतपिष्टगुणाः—"वैदला गुरवो भक्ष्या विष्टम्भिस्पृष्टमारुताः ।" गुड़ादिकृतपिष्टगुणाः—"सगुड़ाः सतिलाश्चैव सक्षौद्रक्षीरशर्कराः । भक्ष्या हृद्याश्च बल्याश्च गुरवो बृंहणाः पराः ॥" स्नेहसिद्धगोधूमकृतभक्ष्यगुणाः—"सस्नेहाः स्नेहसिद्धाश्च भक्ष्या गोधूमसम्भवाः । गुरवस्तर्पणा हृद्या बलोपचयवर्द्धनाः ॥" राज.३प. ।

पिष्टपचनम् / **पिष्टपाकभृत्** } क्ली । पिष्टकपचनपात्रे । ८तेलानी । अम. । हे.च. ।

पिष्टपाचकः । त्रि । पिष्टकपाककारिणि ।

पिष्टपायसः । पुं, क्ली । कृशराद्यम् । खिर्सा । प.मु. ।

पिष्टपूरः । पुं । घृतभर्जितगोधूमकृतखाद्यद्रव्ये । पूरपिटे । वटके । वड़ा । त्रिका. ।

पिष्टमेहः । पुं । प्रमेहरोगविशेषे । अत्र नरः सपुलकं पिष्टरसतुल्यं मेहति । लक्षणं—"संहृष्टरोमा पिष्टेन पिष्टवद्बहुलं सृतम् ।" मा.नि. ।

पिष्टयोनिः । स्त्री । खर्परपीलिकायाम् । वै. निघ. । [मौ, रूटी । हे.च. ।

पिष्टवर्त्तिः । पुं । मुद्गादिकृतपिष्टकभेदे । चम-

पिष्टवान् । त्रि । शुक्ले । भा.ने.री.चि. ।

पिष्टवैकृतम् । क्ली । पिष्टान्ने । वै.निघ. ।

पिष्टसौरभम् । क्ली । चन्दने । हारा. ।

पिष्टातः । पुं। किङ्किराते । आबीर। त्रिका.।

पिष्टिकम् । क्ली । तण्डुलजतक्षीरे । आस्के । रा.नि.व.१६ ।

पिष्टिका । स्त्री। पिष्टकभेदे। डालपिटे। हिं पिवी । तत्करणविधिः—"दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका । शिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः ॥" भा.पू.२भ.कृतान्न.व. ।

पिष्टो(ष्टौ)ड़ी (ण्डी) । स्त्री । श्वेताम्लीक्षुपे । रा.नि.व.४ ।

पिस्तम् । क्ली । (Pistacia vera.) The pistachio nut tree. पेस्ता इति प्रसिद्धे काबेलदेशीयफले । ८पेस्ता। गुणाः—उष्णं दौर्ब्बल्यहरं । अस्य वल्कलं अजीर्णे हितम् ।

पीचः । पुं । अधरचिबुके । ८चोयाल । वै.निघ.।

पीठः । पुं, क्ली । चित्रकवृक्षे । भा. । देवनले । यावनालादिचूर्णे । वै.निघ. । आसने । पिड़ि, ८चौकी, कुशासन । श.र. ।

पीठसर्पी (इन्) । पुं । पङ्गौ । खञ्जे । हारा.।

पीड़नम् । क्ली । पीड़ायाम् । चापन, टिपन । मा.नि. । वायुजन्यव्रणवेदनायाम् । सु.सू.२२अ. । व्रणस्य पूयनिर्गमार्थम् अङ्गुल्यादिना पीड़ायाम्। टिपा । सु.सू.७अ. ।

पीड़ा । स्त्री । पीड़ने । अम. । शरीरादिकष्ट विषरोगे । सु. ।

पीड़ाभञ्जीरसः । पुं । शूलाधिकारे रसः । अभ्रभस्म २ भ. पारदः १ भ. गन्धकः १ भ. जैपालबीजं २ भ. टङ्कणक्षारः ३ भ. । जम्बीररसेन मर्द्यम् । मात्रा कोलमिता । अनु. गुड़काञ्जिके । रस.चि. ।

पीतः । पुं । वेतसलतायां । বেত গাছ । र.मा. । अङ्कोठवृक्षे । আঁকোড় গাছ । रा.नि.व.९ । शाखोटवृक्षे । শ্যাওড়া গাছ । रा.नि.व ९ । पुष्परागमणौ । रा.नि.व.१३ । शालिधान्यविशेषे । नन्दिवृक्षे । सोमलताभेदे । पीतझिण्ट्यां । वै.निघ. । हरिद्रावर्णे । अम. । क्ली । पद्मकाष्ठे । रा.नि.व. १२ । हरिताले । रा.नि.व.१३ । पीतोशीरे । कुङ्कुमे । कुसुम्भे । प्रवाले । पद्मकेसरे । पीतचन्दने । वै.निघ. । पाने । मे. ।

पीतकम् । क्ली । पीतचन्दने । कुङ्कुमे । काष्ठागुरुणि । पद्मकाष्ठे । रा.नि.व.१२ । वर्व्वूरभेदे । मधुनि । गर्ज्जरमूले । पीतजीरके । पीतलोध्रे । किराततिक्ते । চিরাতা । वै.निघ. । सुवर्णे । रीतौ । পিতল । स्वर्णमाक्षिके । रा.नि.व.१३ । हरिताले । अम. । पुं । पीतशालवृक्षे । পিয়াশাল । र.मा. । पृथुशिम्बश्योणाकवृक्षे । हरिद्रुवृक्षे । रा.नि.व.९ । चिरविल्वे । सु.सू ३८अ. । नन्दिवृक्षे । रा.नि.व.१२ ।

पीतकचूर्णम् । क्ली । मुखरोगे चूर्णम् । "मनःशिला यवक्षारो हरितालं ससैन्धवं । दार्व्वीत्वक् चेति तच्चूर्णं माक्षिकेण समायुतं । मूर्च्छितं घृतमण्डेन कण्ठरोगेषु धारयेत् ॥" च.चि.२६अ. ।

पीतकटुकी । स्त्री । पीतरोहिण्याम् । पीतवर्ण कटकी । प.मु. । [कला । वै.निघ. ।

पीतकदली । स्त्री । स्वर्णकदल्याम् । চাঁপা

पीतकद्रुः (मः) । पुं । हरिद्रुवृक्षे । रा.नि. व.९ । [रा.नि.व.७ ।

पीतकन्दम् । क्ली,पुं । गर्ज्जरमूलके । গাজর ।

पीतकरवीरः । पुं । पीतपुष्पकरवीरवृक्षे । পীতপুষ্প করবীবৃক্ষ । गुणैः साधारणकरवीरतुल्यः । रा.नि.व.१० । See करवीरः ।

पीत(ति)का । स्त्री । हरिद्रायाम् । प.मु. । दारुहरिद्रायाम् । रा.नि.व.६ । भैष मुख.रो.चि. । स्वर्णयूथिकायाम् । रा.नि.व.१० । कुष्माण्डे । घोषालतायाम् । वै.निघ. । स्नुकायां । পিড়িংশাক । वा.व्या.चि.हिमसागरतैले । शतपदीनामकीटभेदे । सु.कल्प.८अ । कृच्छ्रसाध्यलूताविशेषे ।

पीतकाञ्चनः । पुं । पीतपुष्पकाञ्चनभेदे । गुणाः—"पीतस्तु काञ्चनो ग्राही दीपनो व्रणरोपणः । तुवरो मूत्रकृच्छ्रस्य कफवायोश्च नाशनः ॥" वै.निघ. ।

पीतकायता । स्त्री । पित्तजरोगे ।

पीतकावेरम् । क्ली । कुङ्कुमे । पित्तले । मे. ।

पीतकाष्ठम् । क्ली । पद्मकाष्ठे । পদ্মকাষ্ঠ । पीतचन्दने । रा.नि.व.१२ । पुं । हरिद्रुवृक्षे । रा.नि व ९ । [तायाम् । रा.नि.व.३ ।

पीतकीलका (ला) । स्त्री । आवर्त्तकीलपीतकुरवः (कः) । पुं । पीतझिण्टीक्षुपे । পীত ঝাঁটী । रा.नि.व.१० । See किङ्किरातः ।

पीतकुष्माण्डम् । क्ली । वैदेशिककुष्माण्डे । বিলাতি কুমড়া । गुणाः—"अपरं पीतकुष्माण्डं गुरु पित्तकरं परं । अग्निमान्द्यकरं स्वादु श्लेष्मघ्नं वातकोपनम् ॥" आत्रेयः ।

पीतकुसुमः । पुं । पीतझिण्टीक्षुपे । পীত ঝাঁটী । रा.नि.व.१० । See किङ्किरातः ।

पीतगन्धम् । क्ली । पीतचन्दने । रा.नि.व.१२ ।

पीतगन्धकः । पुं । गन्धके । वै.निघ. ।

पीतघोषा । स्त्री । पीतपुष्पघोषालतायाम् । ঝিঙে । পীত ঘোষা । प.मु ।

पीतचन्दनम् । क्ली । कलम्बक इति द्राविड़देशप्रसिद्धे पीतवर्णचन्दनकाष्ठे । हलेन्द्रीति मद. । गुणाः—रक्तचन्दनतुल्यगुणं व्यङ्गनाशनम् । भा. । वातघ्नं । मद. । शीतलं तिक्तं कुष्ठकण्डूविचर्चिकादद्रुक्रमिहरं कान्तिकरञ्च । रा.नि.व.१२ । कुङ्कुमे । दारुहरिद्रायाम् । हरिद्रायाम् । वै.निघ. ।

पीतचम्पकः । पुं । स्वर्णचम्पके । जटा. ।

पीतजातिः । स्त्री । स्वर्णजातिवृक्षे । वै.निघ. ।

पीतझिण्टी । स्त्री । पीतपुष्पझिण्टीक्षुपे ।

पीत ঝাঁটী। चुरिकाहहयाम्। रा.नि.व.४।

पीततण्डुलः । पुं। कङ्गुणीधान्ये। কাংনী ধান। रा.नि.व.१६। सर्जतरौ। শাল গাছ। वै.निघ.। स्त्री। चुरिकाहहयाम्। रा.नि.व.४।

पीततण्डुलिका । स्त्री। सर्ज्जवृक्षे। শাল গাছ। वै.निघ.। [शि। विका.।

पीततुण्डः । पुं। पक्षिविशेषे, कारण्डवपक्षि

पीततैला । स्त्री। ज्योतिष्मतीलतायाम्। লতাফট্কী। रा.नि.व.३। वा.सू.१५अ.अर्कादिः। "प्रत्यक्पुष्पी पीततैलोदकीर्य्या।"

पीतदन्तता । स्त्री। पित्तजन्यदन्तरोगे।

पीतदारुः । पुं, क्ली। दारुहरिद्रायाम्। रा.नि.व.६। सु.चि.१८अ.। सरलायाम्। সরল কাষ্ঠ। र.मा.। हरिद्रायाम्। वै.निघ.। देवदारुणि। र.मा.। हरिद्रुवृक्षे। रा.नि.व.९। किराततिक्तके। पूतिकरञ्जे। वै.निघ.।

पीतदुग्धा । स्त्री। स्वर्णक्षीर्य्याम्। শেয়ালকাঁটা। हिं चोक। चोरिण्याम्। थिकुई। रा.नि.व.५। सातलायाम्। वै.निघ.।

पीतद्रुः । पुं। देवदारुभेदे, सरले। प.मु.। दारुहरिद्रायाम्। रा.नि.व.६।

पीतद्रुमः । पुं। हरिद्रावृक्षे। वा.चि.६अ.। सरलदेवदारुणि। दारुहरिद्रायाम्। अम.।

पीतनः (कः) । पुं। आम्रातकवृक्षे। আমড়া গাছ। प्लक्षवृक्षे। रा.नि.व.११।२३। क्ली। कुङ्कुमे। हरिताले। पीतदारुणि। आम्रातकफले। वै.निघ.। [निघ.।

पीतनखता । स्त्री। पित्तजन्यनखरोगे। वै.

पीतनाशः । पुं। चुद्रपणसे। আনারস। वै.निघ.।

पीतनी । स्त्री। शालपर्ण्याम्। मद.।

पीतनेत्रता । स्त्री। पित्तजनेत्ररोगे। भा.।

पीतपरागः । पुं। पद्मकेसरे। वै.निघ.।

पीतपर्णी । स्त्री। वृश्चिकाल्यां। বিছাতী। श.च.। [चि.८अ.।

पीतपाकी (इन्) । पुं। वाच्यालकभेदे। च.

पीतपाठी (इन्) । पुं। चित्रकवृक्षे। वै.निघ.।

पीतपादपः । पुं। पृथुशिम्बश्योणाकवृक्षे। বড় শ্যোণা গাছ। रा.नि.व.८। पीतलोध्रवृक्षे। वै.निघ.। [পাথী। है.च.।

पीतपादा । स्त्री। सारिकायाम्। শালিক

पीतपिष्टम् । क्ली। सीसके। वै.निघ.।

पीतपुष्पः । पुं। पीतझिण्ट्याम्। कण्टाशेलया इति लोके। कृष्णपिण्डारी। ময়নাবিশেষ। प.मु.। इङ्गुदीवृक्षे। र.मा.। कर्णिकारवृक्षे। श.च.। काञ्चनारवृक्षे। রক্ত কাঞ্চন বৃক্ষ চম্পকवृक्षे। रा.नि.व.१०। क्ली। आहुल्यक्षुपे। रा.नि.व.४। कुष्माण्डे। भा.पू.१भ.। पीतवर्णपुष्पमात्रे।

पीतपुष्पकः । पुं। वर्व्वूरवृक्षे। वै.निघ.।

पीतपुष्पका । स्त्री। कर्कटीभेदे। বন কাঁক্ড়ী। वै.निघ.।

पीतपुष्पा । स्त्री। श्वेतवाच्यालके। प.मु.। इन्द्रवारुणीलतायाम्। रा.नि.व.३। कोषातकीलतायाम्। ঝিঙ্গা। प.मु.। पीतपुष्पवाच्यालके। পীত বেড়েলা। पीतझिण्ट्याम्। পীত ঝাঁটী। र.मा.। झिञ्झिरीटायां। रा.नि.व.४। आढ़क्याम्। रा.नि.व.१६। पीतकरवीरे। स्वर्णयूथिकायाम्। गणिकारिकायाम्। वै.निघ.।

पीतपुष्पिका (ष्पी) । स्त्री। महाबलायाम्। रा.नि.व.४। त्रपुष्यां। শশা। रा.नि.व.७। इन्द्रवारुणीलतायाम्। রাখালশশা। शङ्खपुष्प्यां। শ্বেত অপরাজিতা। महाकोषातक्याम्। रा.नि.व.३। पीतयूथिकायाम्। अतिबलायाम्। महाशणवृक्षे। वै.निघ.।

पीतपृष्ठा । स्त्री। वराटिकाभेदे। रा.नि.व.१३। [করবী। रा.नि.व.१०।

पीतप्रसवः । पुं। पीतकरवीरवृक्षे। পীত

पीतफलः (कः) । पुं। शाखोटवृक्षे। শেওড়া গাছ। विका.। धववृक्षे। ধাওয়া গাছ। विका.। कर्मरङ्गवृक्षे। কামরাঙা গাছ। रा.नि.व.११।

पीतफेनः । पुं। अरिष्टकवृक्षे। রীঠা গাছ। वै.निघ.।

पीतबलि: । पुं । गन्धके । वै.निघ. ।

पीतवालुका । स्त्री । हरिद्रायाम् । त्रिका. ।

पीतभद्रक: । पुं । देवबर्ब्बूरवृक्षे । वै.निघ. ।

पीतभस्म । क्ली । भस्मीकरणेन पारदस्य पीतीकरणे । यत् सर्व्वाङ्गसुन्दर इति चन्द्रिकाकार: स्याह । तत्प्रकरणं —"मर्दयेत् रसगन्धौ च हस्तिशुण्डीरसैर्दृढं । भूधात्रीकरसै: पिष्टा पर्य्यन्तं दिनसप्तत: । विष्टभ्य वालुकायन्त्रे मूषायां सन्निवेशयेत् । दिनमेकं दद्देद्वह्निं मन्दं मन्दं निशावधि । एवं निष्पद्यते पीत: शीत: सूतस्तु गृह्यते । पर्णखण्डेन तद्गुञ्जां भक्षयेत् श्रूयतां मया । सुबोधं कुरुते पूर्व्वमुदराणि विनाशयेत् । ज्वराणां नाशन: श्रेष्ठ: सतत् स्त्रीसुखकारक: । बलप्रद: सदा देहे जरानाशनतत्पर: । चक्षुर्भङ्गादिकं दोषं सर्व्वं नाशयति क्षणात् । एतस्मान्नापर: सूतो रसात् सर्व्वाङ्गसुन्दरात् ।" र.सा.सं. ।

पीतभृङ्गराज: । पुं । पीतपुष्पभृङ्गराजक्षुपे । হলদে ভীমরাজ । কেশুতে । गुणा: —तिक्तोष्ण: चक्षुष्य: केशरञ्जन: कफामशोफघ्न: नीलपुष्पश्च रसायन: । रा.नि.व.४ ।

पीतमणि: । पुं । पुष्परागमणौ । रा.नि.व.१३ ।

पीतमण्डलदर्शन: । पुं । पित्तजन्यरोगे । निदा. ।

[ব্যাঙ । वै.निघ. ।

पीतमण्डूक: । पुं । स्वर्णमण्डूके । সোণা

पीतमस्तक: । पुं । वृन्तश्येनपक्षिणि । वै.निघ. ।

पीतमाक्षिकम् । क्ली । स्वर्णमाक्षिके । रा. नि.व.१३ ।

पीतमुण्ड: । पुं । हरिणभेदे । वै.निघ. । [मा. ।

पीतमुद्ग: । पुं । सुवर्णमुद्गे । সোণা মুগ । र.

पीतमूत्रता (त्वम्) । स्त्री, क्ली । पित्तजमूत्ररोगे । भा. ।

[মূল । रा.नि.व.७ ।

पीतमूल(क)म् । क्ली । गर्जरमूलके । গাজর

पीतमूली । स्त्री । रेवकमूलविशेषे । रेउचिनि इति लोके । यथा—"गन्धिनी पीतमूली च बल्या सा मृदुरेचनी । हन्त्यजीर्णमतीसारं वह्निमान्द्यमरोचकम् । विट्सङ्गं शीतपित्तञ्च दुष्टव्रणविरोहनी ।" (अर्वाचीना:) ।

पीतयूथी (थिका) । स्त्री । स्वर्णयूथिकायाम् । स्वर्ण जुइ । रा.नि.व.१० ।

पीतरक्त: (क:) । क्ली । पुष्परागमणौ । रा.नि.व.१३ । पद्मकाष्ठे । वै.निघ. ।

पीतरत्न(क)म् । क्ली । मणिविशेषे । पोखराज इति लोके । भा.पू.१भ.रत्न.व. ।

पीतरम्भा । स्त्री । सुवर्णकदलीवृक्षे । চাঁপাকলার গাছ । रा.नि.व.११ ।

पीतरस: । पुं । कशेरौ । কেশুর । प.मु. ।

पीतरागम् । क्ली । सिक्थके । মম । पद्मकेसरे । रा.नि.व.१३ । पुं । पीतवर्णे । वै.निघ. ।

पीतरोहिणी । स्त्री । पीतकटुक्याम् । পীতকটকী । प.मु. । काश्मर्य्याम् । গাম্ভার । भा. ।

पीतल(क)म् । क्ली । रीतौ । পিতল । रा. नि.व.१३ । पुं । पीतवर्णे । वै.निघ. ।

पीतलोहम् । क्ली । पित्तले । है.च. ।

पीतवर्ण: (क:) । पुं । स्वर्णमण्डूके । तालवृक्षे । कदम्बवृक्षे । हरिद्रुवृक्षे । काञ्चनवृक्षे । वै. निघ. । क्ली । मन:शिलायाम् । पीतचन्दने । कुङ्कुमे ।

[লতা । वै.निघ. ।

पीतवल्ली । स्त्री । आकाशलतायाम् । আলোক্

पीतविट्कता । स्त्री । पित्तविकारजरोगे ।

पीतवीजा । स्त्री । मेथिकायाम् । रा.नि.व.६ ।

पीतवृक्ष: । पुं । पृथुशिम्बश्योणाकवृक्षे । বড় শোণা গাছ । रा.नि.व.९ । पीतलोध्रवृक्षे । सरलदेवदारौ । रा.नि.व १२ ।

पीतशा(सा)ल: (क:) । पुं । असनवृक्षे । पियालवृक्षे । পিয়াশাল । हिं असन, असना । मं बिबला । तें मद्दि । बम्. अइन् । अम. । अस्य त्वक्क्वाथ: उदरामयघ्न:, प्रलेप: नाड़ीव्रणे हित: ।

पीतशालि: । पुं । सूक्ष्मशालौ । সরু ধান । रा.नि.व.१६ ।

पीतसहाचर: । पुं । पीतझिण्ट्याम् । च.द. वा.व्या.महाराजप्रसारणीतैले ।

पीतसार: । पुं । अङ्कोलवृक्षे । আঁকোড় গাছ । रा.नि.व.९ । सिह्लके । শিলারস । रा.

नि.व.१२ । वै.निघ.ज्व.चि.चन्दनबलातैले । गी-मेदमणौ । मे. । क्ली । हरिचन्दने । प.मु. ।

पीतसारकः । पुं । निम्बवृक्षे । निम्गाछ । रा.नि.व.९ । अङ्कोलवृक्षे । रा.नि.व.९ । असनवृक्षे । वै.निघ. । [च. ।

पीतसारि । क्ली । स्रोतोऽञ्जने । सुर्मा । श.

पीतस्कन्धः । पुं । शूकरे । वै.निघ. ।

पीतस्फटिकः । पुं । पुष्परागमणौ । प.मु. ।

पीतस्फोटः (टा) । पुं, स्त्री । पीतवर्णस्फोटके । वै.निघ. । पामायाम् । रा.नि.व.२० ।

पीता । स्त्री । हरिद्रायाम् । प.मु. । वै.निघ. क्षय.चि.सूर्य्यप्रभायाम् । दारुहरिद्रायाम् । रा.नि.व.६ । महाज्योतिष्मतीलतायाम् । बड़ लताफट्की । रा.नि.व.३। गोरोचनायाम् । प्रियङ्गौ । रा.नि.व.१२ । वनबीजपूरके । वन मातुलुङ्ग । रा.नि.व.११ । कपिलशिंशपायाम् । रा.नि.व.९ । अतिविषायां । आतइच । श.च.। स्वर्णकदल्यां । चाँपा कला। हरिताले । पीतजात्यां। पीत जाति फूलेर गाछ । धूनके । देवदारुणि । शालपर्ण्याम् । अश्वगन्धायां । आकाशलतायां । वै.निघ.।

पीताङ्गः । पुं । पृथुशिम्बश्योणाकवृक्षे । बड़ श्योणागाछ । रा.नि.व.९ । पीतलोध्रवृक्षे । पीतमण्डूके । सोणाबेङ् । नागरङ्गवृक्षे । स्त्री । हरिद्रायाम् । वै निघ. ।

पीताभः । पुं,क्ली । पीतचन्दने । वै.निघ. ।

पीताभ्रम् । क्ली । पीतवर्णाभ्रभेदे । रा.नि.व.१३ । See अभ्रकम् ।

पीताम्लानः । पुं । पीतझिण्टीक्षुपे । पीतझाँटी । रा.नि.व.१० । See किङ्किरातः ।

पीतावलोकनः । पुं । पित्तजन्यदृष्टिरोगे ।

पीताश्मा (न्) । पुं । पुष्परागमणौ । रा.नि.व.१३ ।

पीताह्वः । पुं । सर्जरसे । धूना । वै.निघ. ।

पीतिः । स्त्री । पाने । रा.नि.व.२० । पुं । अश्वे । अम. । करियुण्डायाम् । श.च. ।

पीतिनी । स्त्री । शालपर्णीक्षुपे । रा.नि.व.४।

पीती (इन्) । पुं । अश्वे । अम. ।

पीथम् । क्ली । घृते । उणा. । जले । हे.च. ।

पीथिः (थी(इन्)) । पुं । अश्वे । अ.टी.स्वा. ।

पीनद्रुः । पुं । सरलवृक्षे । रा.नि.व.१२ ।

पीनसः । पुं । अपीनसनामनासारोगे । पीनास रोग । रा.नि.व.२० । See अपीनसः । [व.७ ।

पीनसा । स्त्री । कर्कट्यां । काँकुड़ । रा.नि.

पीनसी (इन्) । त्रि । पीनसरोगिणि । निदा.।

पीनस्कन्धः । पुं। वनशूकरे । महिषे । वै.निघ.।

पीपरिः । पुं । क्षुद्रप्लक्षवृक्षे । छोट पाकुड़ । रा.नि.व.११ । [स्वर्ण ।

पीयुः । पुं । काके । पेचके । चिका. । क्ली ।

पीयूषम् । क्ली । दुग्धे । रा.नि.व.१५ । चि.क्र.क.सोमरो.चि । अमृते । अम.। नवप्रसूताया गोः सप्तदिनाभ्यन्तरीणदुग्धे । गाँजला दुध । यथा—"आसप्तरात्रप्रभवं क्षीरं पीयूषमुच्यते ।" गुणाः—मधुरं बृंहणं वृष्यं । सु.सू.४५अ.द.व. । च.सू. २७अ. ।

पीयूषसिन्धुरसः । पुं । अर्शोऽधिकारे रसः । षड्गुणगन्धकैर्बालुकायन्त्रे भस्मीकृतपारदः स्वर्णं लौहभस्म अभ्रभस्म गन्धकम् एषां प्र. समभागः, शूरणं (ओल) दन्तीमूलं मुण्डी (मुण्डीरी) काकमाची भृङ्गराजः (भीमराज) अर्कः (आकन्द) चित्रकम् एषां रसेन ७धा मर्द्यः । रस.चि. ।

पीयूषोत्था । स्त्री । (Eulophia campestris.) शालुम्मिश्रि इति ख्याते द्रव्ये । इयं बल्या।

पीलकः । पुं । पिपीलिकायाम् । हे.च. ।

पीला । स्त्री । पिपीलिकायाम् । वै.निघ. ।

पीलुः । पुं । (Salvadora persica ; or S. Olesides. Syn. S. Indica.) Tooth-brush tree. कोङ्कणदेशे स्वनामख्यातफलवृक्षे । पीलु गाछ । हिं झल । मं पिलु । तें गोलुगुचेट्टु, पिन्नवरगोण्ड । वम्. ककहन् । ता. कोकु । भूमिजामि आखरोट इति लोके । च.सू.२ अ.शिरोविरेचने । फलगुणाः—"पीलु श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत् । स्वादु तिक्तञ्च यत्पीलु

तत्रागुणं त्रिदोषहृत् ॥" भा.पवर.। भेदपित्त-कफवातघ्नम्। चरि.१०प.। स्वादुतिक्तकटूष्णं कफवातहरञ्च। "तिक्तं पित्तकरं तेषां सरं कटुविपाकि च। तीक्ष्णोष्णं कटुकं पीलु सस्नेहं कफवातजित्॥" सु.सू.४६।२८प.शिरोविरेचने। अस्य तैलं मूलकतैलगुणं। कचुकशाके। शरदृण पुष्पे। किङ्किरातवृक्षे। अक्षोटवृक्षे। करतले। वै निघ. अस्थिखण्डविशेषे। हस्तिनि। पुष्पे। मे.। परमाणौ। त्रिका.। पियालवृक्षे। च.सू.४प.। क्ली। पीलुफले। च.सू.२प.वमने। काननदेशो-द्भगिरिजाक्षोड़फले। च.सू.३प.कुष्ठादिप्रलेपे।

पीलुनी । स्त्री। मूर्व्वायाम्। रा.नि.व.३। च.द.परिणामशूले। "पीलुनी त्रिवृता तथा।" कचुकशाके। वै.निघ.।

पीलुपत्रः । पुं। चम्मलकवृक्षे। চালিতা গাছ। रा.नि.व.६। मोरटायाम्। লতাকরাড়। रा.नि व.३।

पीलुपत्रा । स्त्री। चोरमोरटायाम्। वै निघ.।

पीलुपर्णिका (र्णी) । स्त्री। औषधिविशेषे। मे.। मूर्व्वायां। मुरगा। र.मा.। वै.निघ.२भ. च.शा.चि.। तुण्डिकायाम्। তেলাকুচা। रा.नि.व.२२। मोरटे। লতাকরার। तच्छाकगुणाः —गुरु रुक्षं विष्टम्भाजीर्णकरं मधुरं शीतं मलभेदनञ्च। च.सू.२७प.।

पीलूषणा । स्त्री। पीलुफले। वै.निघ.।

पीवरः । पुं। कच्छपे। जटा.। त्रि। स्थूले।

पीवरा (री) । स्त्री। शालपर्ण्याम्। শালপাণি। भा.पू.१भ.। अश्वगन्धायाम्। रा.नि.व.४। रस.र.वृहत्कल्याणघृते। शतावर्य्याम्। र.मा.।

पीवा । स्त्री। जले। उणा.। [हारा.।

पुंजातुकः । पुं। जीवनवृक्षे। जीवन गाछ।

पुंध्वजः । पुं। मूषिके। वै.निघ.।

पुंलक्षणा । स्त्री। पुरुषलक्षणायाम् नपुंसकस्त्रियाम्। वै.निघ.।

पुंलिङ्गम् । क्ली। शिश्ने। हे.च.।

पुंवत्सा । स्त्री। पुरुषप्रसविन्याम्। च.शा.८प.।

पुंवृषः । पुं। गन्धमूषिके। छुँचो। त्रिका.।

पुंषलः । त्रि। कस्तूरीगन्धि। থসো। मे.।

पुंचिह्नम् । क्ली। शिश्ने। [का.।

पुंसवनम् । क्ली। दुग्धे। संस्कारविशेषे। त्रि-

पुंस्त्वम् । क्ली। शुक्रे। हे.च.। पुं। भूतृणे। গন্ধতৃণ। रा.नि.व.८।

पुंस्त्वदा । स्त्री। लक्ष्मणाकन्दे। वै.निघ.।

पुंस्त्वनाशनः । पुं। तृणभेदे। वै.निघ.।

पुंस्त्वविग्रहः । पुं। भूतृणे। সুগন্ধ তৃণ বিশেষ। रा.नि.व.८। [कायाम्। मे.।

पुक्कसी । स्त्री। नील्याम्। श.र.। पुष्पकलि-

पुङ्खः (कः) । पुं। शरमूले। (कः) शरपुङ्खामूले। বন নীলের মূল। रस.चि.।

पुङ्खिका । स्त्री। शरपुङ्खायाम्। वै.निघ.।

पुङ्गवः । पुं। ऋषभके। रा.नि.व.५। [उणा.।

पुच्छः । पुं, क्ली। लाङ्गूले। अम.। पिच्छे।

पुच्छटी । स्त्री। अङ्गुलिमोटने। त्रिका.।

पुच्छदा । स्त्री। लक्ष्मणाकन्दे। रा.नि.व.८।

पुच्छफलः । पुं। वदरीवृक्षे। प.मु.।

पुच्छमूलम् । क्ली। पुच्छमूलतो मांसलभागे। ज.द.२प.। [षाणी। वै.निघ.।

पुच्छा (च्छिका) । स्त्री। माषपर्ण्याम्। मा-

पुच्छाधोभागलोहितः । पुं। पेचके। वै.निघ.। [रा.नि.व.१०। कुक्कुटे। श.च.।

पुच्छी (इन्) । पुं। अर्कवृक्षे। আকন্দ গাছ।

पुञ्जदलम् । क्ली। सुनिषण्णकशाके। प.मु.।

पुटम् । क्ली। परिवेष्टने। रा.नि.व.८। जातीफले। रा.नि.व.१२। कैवर्त्तमुस्तके। नेत्रपक्ष्मणि। पात्रे। छादने। अ.टी.भ.। पत्रपुटके। पात्रद्वयोभयमुखसंयोजने। पुं। अश्वखुरे। श.र.। लुण्ठने। त्रिका.। औषधपाकयन्त्रभेदे। तत्प्रभेदं —महापुटगजपुटवराहपुटकौक्कुटपुटकपोतपुटगोवरपुटभाण्डपुटभेदेन। एषां विशेषाः स्वस्वपर्य्याये ज्ञेयाः। "वृहद्भाण्डे तुषैः पूर्णे मध्ये मूषां विधारयेत्। पिधायान्यं मुद्रयेद्भाण्डं तद्भाण्डं पुटमुच्यते॥" भा.।

पुटकम् । क्ली। पद्मे । श.र.। नासारोगविशेषे । लक्षणं —"पित्तश्लेष्मावरुद्धोऽन्तर्नासायां शोषयेन्मरुत् । कफं सशुष्कपुटतां प्राप्नोति पुटकन्तु तत् ॥" वा.उ.१९अ. ।

पुटकन्दः । पुं । कोलकन्दे । रा.नि.व.७ ।

पुटकिनी । स्त्री । पद्मिन्याम् । हे.च. ।

पुटग्रीवः । पुं । ताम्रकुण्डे । मे. ।

पुटपत्री । स्त्री। पत्रशाकभेदे। भैष.उपदंश.चि.

पुटपाकः । पुं। पत्रपुटेन स्वरसद्रव्यकल्कपाके । जम्ब्वादिपत्रैः कुड़वमितद्रव्यकल्कं वेष्टयित्वा रज्ज्वादिना बद्ध्वा द्व्यङ्गुलम् एकाङ्गुलं वा द्व्यङ्गुष्ठपर्य्यन्तं वा मृल्लेपं कृत्वा अग्नौ दहेत् लेपस्य रक्ततादर्शनपर्य्यन्तम् । शार्ङ्ग.म.१अ. । "पुटपक्वस्य द्रव्यस्य स्वरसो गृह्यते यतः । अतोऽयं पुटपाकः स्यात् विधानं तस्य कथ्यते । द्रव्यमापोथितं जम्बूवटपत्रादिसम्पुटे । वेष्टयित्वा ततो बद्ध्वा दृढ़ं रज्ज्वादिना तथा । मृल्लेपं द्व्यङ्गुलं कुर्य्यादथवाङ्गुलिमात्रकम् । दहेत् पुटान्तरादग्नौ यावल्लेपस्य रक्तता।" प.प्र.१ख. । मात्रा—पलमितो रसः कर्षमितमधुना पेयः । "पुटेन पच्यते यस्मात् पुटपाकस्ततो मतः । सुपिष्टं कुड़वं द्रव्यं वारिणा काञ्जिकेन च । पुटकान्तर्गतं बद्धं सान्द्रपङ्केन लेपितं । अङ्गुष्ठमानतः पश्चाद्गोमयेनाग्निना बुधः ॥ सिन्दूरवर्णतां प्राप्तं ग्राहयेत्तद्रसं शुभम् । शीतलेन रसावाप्तिर्भवेदिति विनिश्चितम् ॥ पुटपाकस्य पाकोऽयं बहिरारक्तवर्णता । पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् । कल्कचूर्णद्रवाद्याश्च देयाः स्वरसवद् बुधैः ॥" नेत्रप्रसाधनभेदे । "द्वे बिल्वे स्निग्धमांसस्य परद्रव्यपलं मतम् । द्रव्यस्य कुड़वोन्मानं सर्व्वमेकत्र पेषयेत् । तदेकत्र समालोड्य पत्रैः सुपरिवेष्टितम् । पुटपाकविधानेन तत्पश्चात्तद्रसं बुधः । तर्पणोक्तेन विधिना यथावदवधारयेत् ॥" भा. ।

पुटरागम् । क्ली। पत्राङ्गचन्दने । বকম্ কাঠ। रा.नि.व.१२ । [प.मु. ।

पुटलोहम् । क्ली । रुचकलौहे । (বিড়রী) ।

पुटस्रावः । पुं । नासास्रावरोगे । वै.निघ. ।

पुटस्वेदः । पुं । बालुकापुटकैः स्वेदे । পূড়ি স্বেদ । "बालुकापुटकैः स्वेदः…।" ज.द.१८अ.।

पुटा (टिका) । स्त्री । एलायाम् । हारा. । कौपीने । ड: ।

पुटालुः । पुं । कोलकन्दे । रा.नि.व.७ ।

पुटोदकः । पुं । नारिकेलवृक्षे । हारा. ।

पुण्डः (कः) । पुं । तिलकवृक्षे । जटा. ।

पुण्डराक्षः । पुं । पुण्डरीकवृक्षे । পুণ্ডরিয়া । वै.निघ. । [वै.निघ ।

पुण्डरी (इन्) । पुं । पुण्डरीके । পুণ্ডরিয়া ।

पुण्डरीकम् । क्ली । A white lotus. श्वेतकमले । শ্বেতপদ্ম । मं पाण्डरे कमल। कं बिलियतावरे । तें तेल्लतामर । गुणाः—हिमं तिक्तं मधुरं पित्तघ्नं दाहघ्नं श्रमघ्नं रक्तघ्नं पिपासाघ्नञ्च । रा.नि.व.१० । "पुण्डरीकं स्वादु शीतं तिक्तं रक्तरुजापहम् । कफं दाहं श्रमं पित्तं नाशयेत्…।" द्रव्य.गु.। भा.म.१भ.ज्व.चि.सुदर्शनचूर्णे । सु.सू.३८अ.उत्पलादिः । सहस्रदलश्वेतकमले । च.सू.४अ. । शालितण्डुले। श्वेतच्छत्रे । मे. । पुं । दमनकक्षुपे । দনা । रा.नि.व.१० । दर्व्वीकरसर्पभेदे । राजिमत्सर्पविशेषे । सु.कल्प.४अ. । व्याघ्रे । रा.नि.व.१९ । शर्करायां । आज्ये । रा.नि.व.२३ । श्वेतकुष्ठरोगे, श्वित्रे । "तच्छ्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमं । सरागञ्चैव सोत्सेधं पुण्डरीकं कफोल्वणम् ॥" मा.नि. । गजज्वरे । शालपर्णीपत्रवत्पत्रे स्वनामख्यातवृक्षे । পুণ্ডরিয়া গাছ । गुणः—नेत्रहितत्वम् । आम्रवृक्षे । हे.च.। कृष्णौ । वै.निघ.। शालिधान्यभेदे । गुणाः—शालिवत्। सु.सू.४६अ.। व्याघ्रे । कोशकारे । मे. ।

पुण्डरीकमुखी । स्त्री । निर्व्विषजलौकाभेदे। জোঁক । सु.सू.१३अ. । See जलायुका ।

पुण्डरीकाक्षः । पुं । प्लवजातीयजलपक्षिभेदे । मांसगुणाः प्लवशब्दे मृग्याः । सु.सू.४६अ. ।

पुण्डरीयकम् । क्ली । स्थलपद्मे । श.मा. । प्रपौण्डरीकवृक्षे । পুণ্ডরিয়া । रा.नि.व.१२ ।

पुण्डर्य्यम् । क्ली । प्रपौण्डरीके । পুণ্ডরিয়া । रा.नि.व.१२ ।

पुण्ड्रः (कः) । पुं । तिलकक्षुपे । তিলগাছ । रा.नि.व.१० । अतिमुक्तके । माधवी लता । रा॰

नि.व.२३। अखमचटचे। रा.नि.व.८। प्रपौण्ड रीके। পুণ্ডরিয়া। क्रमिभेदे। मे.। चित्रवर्ण ए-क्षुविशेषे। পুঁড়ো আক্, ছাঁচি ইক্ষু। मं पु-ण्ड्राउस्। कं वासरकवु। गुणाः—अतिमधुरः शीतलः कफकरः पित्तघ्नः दाहहरः श्रमहरः क्षयः अतिसन्तर्पणश्च। रा.नि.व.१४।

पुण्ड्रका। स्त्री। माधवीलतायाम्। तिलकवृक्षे, शुक्लजातीपुष्पवृक्षे। वै.निघ.।

पुण्ड्रशर्करा। स्त्री। पुण्ड्रकेक्षुभवशर्करायाम्। পুঁড়ি আকের চিনি। गुणाः—स्निग्धा वीर्यो चार्थ्ये रोचकी च हिता। रा.नि.व.१४। पञ्चविधेक्षु शर्करायाम्। वै.निघ.। [वै.निघ.।

पुण्ड्रसाह्वः। पुं। पुण्डरीकवृक्षे। পুণ্ডরিয়া।

पुण्यगन्धः। पुं। महानागकेशरचम्पकवृक्षे। त्रिका.। स्त्री। स्वर्णयूथिकायाम्। वै.निघ.।

पुण्यतृणम्। क्ली। सितदर्भे। শ্বেত কুশ। रा.नि.व.८। [रा.नि.व.१८।

पुण्यदर्शनः। पुं। चाषपक्षिणि। নীলকণ্ঠ।

पुण्यफलः। पुं। उद्याने। श.मा.।

पुण्यसागरः। पुं। पुष्करमूले। वै.निघ.।

पुण्या। स्त्री। अश्वगन्धायां। वै.निघ.। तुलसीवृक्षे। श.मा.।

पुत्ति(त्रि)का। स्त्री। पिङ्गलवर्णपृथुमधुमक्षिकाविशेषे। পিঙ্গলবর্ণ মৌমাছি। अम.। यथा —"अत्रजा मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः।" रा.नि.व.१४।

पुत्रः (कः)। पुं। दमनकवृक्षे। पुत्रे। सिंहभेदे। मे.। मूषिकभेदे। तद्दष्टे—"पुत्रकेणाङ्गसादश्च पाण्डुवर्णश्च जायते। चीयते ग्रन्थिभिश्चाङ्गमाखुशावकसन्निभैः। शिरीषेङ्गुदकल्कन्तु लिह्यात्तत्र समाक्षिकम्।" सु.कल्प.६ अ.।

पुत्रकन्दा। स्त्री। लक्ष्मणाकन्दे। रा.नि.व.७।

पुत्रघ्नी। स्त्री। योनिरोगविशेषे। लक्षणं यथा —"स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्।" सु.उ.। "रौक्ष्याद्वायुर्यदा गर्भं यातं जातं विनाशयेत्। दुष्टशोणितजं नार्य्याः पुत्रघ्नी नाम सा मता॥" च।

पुत्रजननी। स्त्री। पुत्रदात्रीलतायाम्। वै. निघ.।

पुत्रजी(ञ्जी)वः (कः)। पुं। (Putranjiva Roxburghii. Syn. Nagera putranjiva.) कोलापुरदेशे तन्नाम्ना प्रसिद्धे वृक्षविशेषे। জিয়াপুতা, পুত্রজিয়া। हिं पितौंजिया, जितापुटज, पुत्रजीव। मं जिवन्पुत्र। तें कद्रजुवि। तम्. जीवनपुतर। गुणाः—हिमः वृष्यः गर्भजीवदः चक्षुष्यः पित्तशमनः दाहतृष्णाघ्नश्च। रा.नि.व.६। रूक्षः स्वादुः गुरुः कटुः पटुः वातश्लेष्मघ्नः सृष्टमलमूत्रश्च। भा.। तत्फलगुणाः— "पुत्रञ्जीवफलमज्ज शीततोयेन पेषयेत्। भोजने चाञ्जने पाने लेपः सर्व्वविषापहः॥" रस.र.विष. चि.।

पुत्रदा। स्त्री। वन्ध्याकर्कोट्यां। लक्ष्मणामूले, पुत्रदात्रीलतायां। रा.नि.व.२३। श्वेतकण्टकारिकायाम्। जीवन्त्याम्। वै.निघ.।

पुत्रदात्री। स्त्री। वन्ध्याकर्कोटिकायाम्। मालवदेशे स्वनाम्ना प्रसिद्धे लताविशेषे। পুত্রদাত্রী, পুত্রদাত্রী লতা। गणाः— कटूष्णा वातकफघ्नी सुरभिः सदा पथ्या वन्ध्यादोषहरी च। रा.नि.व.३।

पुत्रपिचटम्। क्ली। रङ्गे। রাঙ্। र.मा.।

पुत्रप्रदा। स्त्री। क्षुरिकावृक्षल्याम्। वन्ध्याकर्कटिकायाम्। वै.निघ.। [नि.व.३।

पुत्रभद्रा। स्त्री। वृहज्जीवन्तीलतायाम्। रा.

पुत्रमञ्जरिः (री)। स्त्री। पुत्रदात्र्याम्। भा.म ४भ.योनि.रो.चि.। "पुत्रमञ्जरिमूलम्।"

पुत्रशृङ्गी। स्त्री। अजशृङ्ग्यां। মেড়াশিঙী। रा.नि.व.६। [निघ.।

पुत्रश्रेणिका। स्त्री। भूम्यामलकाम्। वै.

पुत्रश्रेणी। स्त्री। कृष्णदन्तीक्षुपे। কাল দন্তী। र.मा.। अजशृङ्ग्याम्। কাঁকড়াশৃঙ্গী। रा.नि.व.६। मूषिकपर्ण्याम्। ইন্দুরকাণী। रा.नि.व.३। सु. कल्प.७अ.।

पुत्रिणी। स्त्री। वन्ध्यायाम्। বান্দরা। नकुल. १२अ.। प्रमेहपिडकाविशेषे। तस्या लक्षणं—"महत्यल्पाचिता ज्ञेया पिड़का सा तु पुत्रिणी।" सु. नि.६अ.।

पुद्गलम् । क्ली । गन्धतृणे । गन्धतृण. রাসকর্পূর । रा.नि.व.८। पुं । शरीरे । आत्मनि । त्रिका.।

पुनःखुरी (रन्) । पुं । अश्वस्य पादरोगभेदे । लक्षणं —"प्रसरन्ति खुरा यस्य अथवा पादकोपमाः । पुनःखुरीति तं विद्यादश्वं विह्वलगामिनं ॥" ज द.३८अ. ।

पुनर्नवः । पुं । नखे । नथ । रा.नि.व.१८ ।

पुनर्नवा । स्त्री । (Boerhaavia diffusa. Syn. Procumbens anderecta. or B. Diandra.) स्वनामख्यातपत्रशाकभेदे । শ্বেত পুণ্যা, গাদাপুণ্যা । हिं शान्त । मं पाण्डरीवेण्टुली, रक्तवेण्टुली । कं विलियदुवेल्लड़किलु, केंपिनवेल्लड़किलु । तें अतिकममैदि । ता. मुक्करत्तिकिरै । वम्. पुनर्नरा । च.सू.२८अ. । सा त्रिधा श्वेता रक्ता नीला चेति । तत्र श्वेतागुणाः—"श्वेता पुनर्नवा सोष्णा तिक्ता कफविषापहा । कासहृद्रोगशूलास्रपाण्डुशोफानिलार्त्तिनुत् ॥ रक्ता पुनर्नवा तिक्ता सारिणी शोफनाशिनी । रक्तप्रदरदोषघ्नी पाण्डुपित्तप्रमर्दिनी ॥" रा.नि.व.५ । "पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका । कटुः कषायोऽनुष्णाः पाण्डुहृद्दीपनी परा । शोफानिलगरश्लेष्महरी ब्रध्नोदरप्रणुत् । पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः । वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥" भा.पू. । तच्छाकगुणाः—"पुनर्नवा तु वीर्य्योष्णा भेदिनी च रसायनी ।" राज.३ प. । मूलक्वाथः भेदकः उदरामयघ्नः शीतलः विशेषेण श्वासे हितः अधिकमात्रया वान्तिकरः । पत्रप्रदेहः व्रणनाद्यां हितश्च ।

पुनर्नवागुग्गुलुः । पुं । वातरक्ते गुग्गुलौ । शुक्लपुनर्नवामूलं १०० प. एरण्डमूलं १०० प. शुण्ठी १६ प. गुग्गुलुः ८ प. एकत्र कुट्टयेत् । क्वाथार्थं—जलं ३२ वा ६४ श. शे. ८ श. । गालयित्वा तत्र एरण्डतैलं ॥० श. दत्त्वा पुनः पचन् पाकसिद्धे अवतार्य्य त्रिवृच्चूर्णं ५ प. दन्तीमूलचूर्णं १ प. गुडूचीचूर्णं २ प. त्रिफला त्रिकटु चित्रकसैन्धवभल्लातकविड़ङ्गानां प्र. चूर्णं १॥० प. स्वर्णमाक्षिकं २तो. पुनर्नवाचूर्णं १प. प्रक्षेप्यम् । শ্বেত পুণ্যার মূল ১০০ প. এরণ্ডমূল ১০০প. শুঁট ১৬প. গুগ্‌গুলু ৮প. একত্র কুটিবে । ক্বাথার্থ —জল ৩২ শ. শে. ৮ শ. । ছাঁকিয়া এরণ্ডতৈল ॥০ শ. দিয়া পুনঃ পাককরত পাক শেষ হইলে নামাইয়া তেউড়ীচূর্ণ ৫ প. দন্তীমূলচূর্ণ ১ প. গুলঞ্চচূর্ণ ২ প. ত্রিফলা ১॥০ প. ত্রিকটুচূর্ণ, ১॥০ প. চিতামূলচূর্ণ ১॥০ প. সৈন্ধব, ভেলা, বিড়ঙ্গচূর্ণ প্রত্যেকে ১॥০ প. স্বর্ণমাক্ষিক ২ তো. পুনর্নবামূলচূর্ণ ১ প. প্রক্ষেপ দিবে । भा. ।

पुनर्नवाद्यघृतम् । क्ली । शोथाधिकारे घृतम् । पाठः—"पुनर्नवाचित्रकदेवदारुपञ्चोषणक्षारहरीतकीनाम् । कल्केन पक्वं दशमूलतोये घृतोत्तमं शोथनिसूदनञ्च ॥" दशमूलं मिलित्वा ६० प. जलं ५१२ प. शे. १२८ प. घृतं ३२ प. । कल्कार्थं—पुनर्नवामूलं चित्रकमूलं देवदारु पञ्चकोलं यवक्षारः हरीतकी प्र. ८ तो. । रस.र. ।

पुनर्नवाष्टकः । पुं । शोथे कषायः । पाठः—"पुनर्नवानिम्बपटोलशुण्ठीतिक्तामृतादार्व्वभयाकषायः । सर्व्वाङ्गशोथोदरपार्श्वशूलश्वासान्वितं पाण्डुगदं निहन्ति ॥" भैष.शोथ.चि. ।

पुनर्भवः । पुं । नखे । रा.नि.व.१८ । रक्तपुनर्नवायाम् । रा.नि.व.५ ।

पुनर्भूः । स्त्री । पुनर्नवायाम् । घौले । वै.निघ.।

पुन्नागम् । क्ली । पुन्नागपुष्पे । देववल्लभं राजचम्पकमिति लोके । सु.सू.३८अ.एलादिः । ड. ।

पुन्नागः । पुं । (Calophyllum inophyllum.) Alexandrian Laurel. स्वनामख्यातपुष्पवृक्षे । दक्षिणापथे सुरपत्तिनाम्ना प्रतीतः । सु.सू.३८अ.एलादिः। পুনাগ গাছ, রাজচম্পক । हिं सुलतानचम्पक । मं पुन्नाग । कं सुरहोन्नेरमेद । तें सुरपोन्नचेट्टु । उत्. पुणां । वम्. ऊदि । ता. पिन्नय । गुणाः—कषायः कफरक्तघ्नश्च । राज. । मधुरः शीतः सुगन्धिः पित्तघ्नः भूतविद्रावणः । रा.नि.व.१० । वा.सू.१५अ. । जातीफले । शुक्लपद्मे । श्वेतहस्तिनि । मे. । [सु.सू.३८अ.एलादिः ।

पुन्नागकेशरम् । क्ली । पुन्नागपुष्पकिञ्जल्के ।

पुन्नागपुष्पम् । क्ली । पुन्नागकुसुमे । वै.निघ. ।

पुन्नाटः (ड़ः) । पुं । चक्रमर्द्दे । रा.नि.व.४ ।

पुन्नामा (न्) । पुं । पुन्नागवृक्षे । रा.नि.व.१० ।

पुप्पुटः । पुं । दन्तपुटगतरोगे । तालुरोगे । निदा. ।

पुप्फुलः । पुं । जठरवाते । निदा. ।

पुप्फुसः । पुं । वामपार्श्वस्थमलाशये, कोष्ठे । फुस्फुस, फोंफड़ा, फुल घड़ा । श.च. ।

पुमान् । पुं । पुन्नागवृक्षे । रा.नि.व.१० । पुरुषे । च. ।

पुरम् । क्ली । दाहागुरुणि । रा.नि.व.१२ । शरीरे । रा.नि.व.१८ । नागरमुस्तायाम् । र.मा. । चर्म्मणि । श.र. । पुं । गुग्गुलौ । गुग्गुल । रा.नि.व.१२ । च.द.ज्व.चि.अपराजिताधूपे, चन्द्रप्रभागुड्याम् । शल्लकीनिर्यासे । वै.निघ. । पीतझिण्ट्याम् । श.च. । [वै.निघ. ।

पुरच्छदः । पुं । उलपे । उलू खड़ । स्तनाग्रे ।

पुरटम् । क्ली । सुवर्णे । विदग्धमाधवः ।

पुरन्दरम् । क्ली । चविकायाम् । श.च. । मरिचे । वै.निघ. ।

पुरमथनवल्लभः । पुं । दाहागुरुणि । रा.नि.व.१२ । [व.१२ ।

पुरा । स्त्री । सुगन्धद्रव्ये, मुरामांस्याम् । रा.नि.

पुराणः (तनः) । त्रिं । प्राचीने ।

पुराणकिट्टम् । क्ली । लौहमले । मण्डूर । वै.निघ. । पाण्डु.चि. मदेभसिंहसूते ।

पुराणघृतम् । क्ली । दशाब्दिककौम्भघृते । र.मा. । गुणाः—"सदापस्मारमूर्च्छादिशिरःकर्णाक्षिगारुजः । सर्पिः पुराणं जयति व्रणशोधनरोपणम् ॥" रा.नि.व.५ । "उग्रगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम् ।" अन्ये पुनर्वर्षातीतं पुराणमुच्यते । "अल्पाभिष्यन्दि मधुरं बल्यं संवत्सरोषितं । अल्पक्लेदञ्च दोषाणां पुराणं सम्प्रकीर्त्तितम् ॥" सि.यो.उ.चि. ।

पुरातनगुड़ः । पुं । प्राचीनगुड़े । पूराण गुड़ । गुणाः—पित्तघ्नः वातरोगघ्नः त्रिदोषघ्नः रुच्यः हृद्यः संयोगेन ज्वरहरः तापघ्नः विण्मूत्रशोधनः अग्निकरः पाण्डुप्रमेहघ्नः स्निग्धः स्वादुतरः लघुः श्रमघ्नः पथ्यश्च । रा.नि.व.१४ ।

पुरातनधान्यम् । क्ली । संवत्सराद्युषिते धान्ये । पूराण धान । तच्च लघु अनभिष्यन्दि । उक्तञ्च "वर्षातीतं सर्व्वमन्नं परित्यजति गौरवम् ।" वा.सू.६अ.हेमाद्रिः शिम्बीधान्यवर्गे । [नि.व.४ ।

पुरास(सि)णी । स्त्री । महाबलायाम् । रा.

पुरीतत् । क्ली । अन्त्रे । रा.नि.व.१८ ।

पुरीमोहः । धुस्तूरवृक्षे । श.मा. ।

पुरीषम् । क्ली । विष्ठायाम् । रा.नि.व.१८ । यथा—"शेषं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते । समानवायुना नीतं तत्तिष्ठति मलाशये । मूत्रश्चोपस्थमार्गेण पुरीषं गुदमार्गतः । अपानवायुना क्षिप्तं वहिर्याति शरीरतः ॥' भा. ।

पुरीषकृमिः । पुं । विष्ठाजातकृमौ । मा.नि. ।

पुरीषणः । पुं । विष्ठायां । त्रिका. ।

पुरीषधरा । स्त्री । तन्नामकपञ्चमकलायाम् । यान्तःकोष्ठे मलमभिविभजते पक्वाशयस्था । सु.शा.४अ. ।

पुरीषधानम् (षाधारः) । क्ली, पुं । मलाधारनाड्याम् । मलाधाररूपकोष्ठाङ्गे । उण्डुके । च.शा.७अ. ।

पुरीषमः । पुं । माषे । माष कलाय । त्रिका. ।

पुरीषवहस्रोतः । क्ली । मलवहनाड्याम् । तस्य मूलं पक्वाशयः स्थूलगुदश्च । च.वि.५अ. ।

पुरीषसङ्गः । पुं । मलरोधे । च.सिद्धि.२अ. ।

पुरीषोष्णता । स्त्री । पित्तजन्यरोगे । भा. ।

पुरुदम् । क्ली । स्वर्णे । भैष.भग.चि.व्रणगजाङ्कुशे ।

पुरुदंशकः । पुं । हंसे । त्रिका. ।

पुरुषः । पुं । चेतनाधातौ । आकाशादिपञ्चकं चेतनाधातवश्चेति तन्मयः पुरुषसङ्गः । चित्यादिचतुर्विंशतितत्त्वात्मकः पुरुषसंज्ञः । च.शा.१अ. । "अत्र कर्म्मफलञ्चात्र ज्ञानञ्चात्र प्रतिष्ठितं । अत्र मोहः सुखं दुःखं जीवितं मरणं तथा । एवं यो वेद तत्त्वेन स वेद प्रलयोदयौ ॥" च. । "चेतनावान् निर्गुणः अप्रसवधर्म्मी वीजधर्म्मी मध्यस्थधर्म्मी चेति ।" भा.पू.१भ. । पुन्नागवृक्षे । पूनाङ् । रा.नि.व.१० । पारदे । रस.र.वृद्धि.चि. एकादशायसे । गुग्गुलौ । रस.र.व्रणगजाङ्कुशे । तिलके ।

क्षीरमोरटभेदे । वै.निघ. । पञ्चमहाभूतशरीरिसमवाये । सु.सू.१अ. । चेतनायुक्तात्मनि । सु.शा.१अ. ।

पुरुषदन्तिका । स्त्री मेदायाम्। रा.नि.व.४।

पुरुषव्याधिः । पुं । उपदंशे । भा. ।

पुरुषक्षीरमोरटः । पुं । मोरटायाम् । वै.निघ. ।

पुरुहूतः । पुं । इन्द्रयवे । वै.निघ. ।

पुरोगतिः । पुं । कुक्कुरे । धरणिः ।

पुरोडास् (ड़ाशः) । पुं । घृते । त्रिका. । पिष्टकचमस्यां । सोमलतारसे । हे.च. ।

पुरोद्भवा । स्त्री । महामेदायाम् । र.मा. ।

पुलकः । पुं । रोमाञ्चे । त्रिका. । मणिदोषे । शिलाभेदे । हरिताले । मे.। सर्षपभेदे । वै.निघ.। क्ली । कङ्कुष्ठे । गिरिमाटीविशेष । रा.नि.व.१३।

पुलकी (इन्) । पुं। धाराकदम्बे। केलि कदम । रा.नि.व.९ ।

पुलाकः । पुं। तुषे। र.मा.। तुच्छधान्ये। आगड़ा। अन्नसिक्थके । अम.भ. ।

पुलाकी (इन्) । पुं । वृक्षे । हे.च. ।

पुलिकिरः । पुं । सर्पे । वै.निघ. ।

पुलोमा । पुं । वचायाम् । वै.निघ. ।

पुलोमही । स्त्री । अहिफेने । वै.निघ. ।

पुषा । स्त्री । लाङ्गलीवृक्षे । श.च. ।

पुष्करम् । क्ली। पुष्करमूले। अभावे कुष्ठं ग्राह्यं। सि.यो.सा.ज्व.अभ्यङ्गे । भा.म.ज्व.चि.विश्वादियोगे । जले । रा.नि.व.१४ । कुष्ठे । कूड़ । अम. ।

पुष्करः । पुं । पद्मकन्दे । वै.निघ.श्वास.चि. शुण्ठ्यादिचूर्णे । सारसपक्षिणि । मे. । सर्पे । कुष्ठभेदे । वै.निघ. । [वकः ।

पुष्करकम् । क्ली । पुष्करमूले । चि.क्र.क.१स-

पुष्करजटा । स्त्री । पुष्करमूले। सि.यो.हि.श्वास.चि. । च.द.कास.चि. ।

पुष्करणी । स्त्री । क्षुद्रजलाशये । वै.निघ. ।

पुष्करनाड़ी । स्त्री । स्थलपद्मिन्याम् । रा.नि.व.५ ।

पुष्करपर्णिका (र्णी) । स्त्री। स्थलपद्मिन्याम् । रा.नि.व.५ ।

पुष्करमूल(क)म् । क्ली । The root of Alpotaxis auriculata. कुष्ठभेदे । कूड़विशेष । च.सू.४अ. । पुष्करदेशे स्वनाम्ना प्रसिद्धे मूले । पातालपद्मिनीति ख्याते काश्मीरदेशप्रसिद्धे कन्दविशेषे । पुष्करमूल । हिं पोहोकरमूली । तें पुष्करदेशंलोप्रसिद्धमैन औषधिविशेषमु । गुणाः —कटुतिक्तोष्णं कफवातज्वरापहं श्वासकासारोचकघ्नं शोफपाण्डुहरञ्च । रा.नि.व.६ । "पुष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् । हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ।...पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥" भा.पू १भ.ह.व.। वीजगुणाः—रसपाकयोर्मधुरम् । च.सू.२७अ. । पद्ममूले । च.द.शय्यादौ । च.द.गुल्म.चि.हिक्कादौ ।

पुष्करवीजम् । क्ली । पुष्करमूले । रा.नि.व.६।

पुष्करव्याघ्रः । पुं । नक्रे । वै.निघ. ।

पुष्करशायिका । स्त्री । प्लवजातीयजलविहङ्गमभेदे। वै.निघ. ।

पुष्करशिफा । स्त्री। पुष्करमूले। रा.नि.व.६।

पुष्करसागरः । पुं । पुष्करमूले । वै.निघ. ।

पुष्करस्रजौ । पुं । अश्विनीकुमारयोः । श.र.।

पुष्कराङ्घ्रिज(क)म् । क्ली । पुष्करमूले । वै.निघ. ।

पुष्कराद्यम् । क्ली । पुष्करमूले । वै.निघ. ।

पुष्कराख्या । स्त्री। स्थलपद्मिन्यां । रा.नि.व.५।

पुष्कराह्वम् । क्ली । पुष्करमूले । सि.यो.काश.चि दशमूलघृते ।

पुष्कराह्वः (यः) । पुं । सारसपक्षिणि । अम. । च.सू.२७अ. । क्ली । पुष्करमूले । रा.नि.व.६ । (कम्) च.द.मद.व.११ ।

पुष्करिका । स्त्री । शूकरोगविशेषे । लक्षणं यथा—"पित्तशोणितसम्भूता पिड़का पिड़काचिता । पद्मपुष्करसंस्थाना ज्ञेया पुष्करिकेति सा ॥" सु.नि.१४अ. । वा.उ.३३अ. ।

पुष्करिणी । स्त्री । स्थलपद्मिन्याम् । स्थलपद्म ।

रा.नि.व.५ । पुष्करमूले । स्वल्पजलाशये । चम. । हलिन्धा । पद्मिन्यां । मे. ।

पुष्करद्रुम् । क्ली । पुष्करमूले । वै.निघ. ।

पुष्कलकः । पुं । गन्धमृगे । कस्तुरी मृग । गन्ध गोकुल । मे. ।

पुष्टिः (ष्टा) । स्त्री । अश्वगन्धायाम् । रा.नि.व.७ । वृद्धौ । वृद्धिनामक ओषधि । मे. । रा.नि.व.५ । [व.१२ । र.सा.सं.रसकर्पूरे ।

पुष्टिका । स्त्री । मुक्ताशुक्तौ । कस्तुरी । रा.नि.

पुष्प(क)म् । क्ली । कुसुमे । फूल । मरणरीरे पुष्पगन्धरूपारिष्टविशेषे । च.इ.२ष. । तिलकपुष्पे । पुष्परेणौ । पुष्पमधुनि । मदनकुसुमे । मयनाफूल । पूगफले । वै.निघ. । नेत्ररोगभेदे । फूलौ । हे.च.। स्त्रीरजसि । तच्च शुद्धाशुद्धत्वाद्विविधं—तयोः शुद्धं फलति अशुद्धञ्च न फलति । तयोर्लक्षणे—"शशासृक् प्रतिमं यत्तु यद्वा लाचारसोपमं । तदार्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् । तदेवातिप्रसङ्गेन प्रवृत्तमनृतावपि । असृग्दरं विजानीयादतोऽन्यद्रक्तलक्षणात् ।" "तथार्तवमपि त्रिभिर्दोषैः शोणित-चतुर्थैः पृथग्द्वन्द्वसमवेतैरुपसृष्टमबीजं भवति तदेव दोषवर्णवेदनादिभिर्ज्ञेयम् ।" सु.शा.२ष. । "यस्या वातहतं पुष्पं फलं तस्या न विद्यते । अतः शुष्कञ्च कुसुमं भेदांदकसमन्वित । कटीशूलं योनिशूलं बहुरक्तञ्च दृश्यते । यस्याः पित्तहतं पुष्पं फलं तस्या न विद्यते । जम्बूफलसमच्छायं तस्या वहति शोणितं । कटीशूलं महच्चैव उदरे शूलमेव च । यस्याः श्लेष्महतं पुष्पं फलं तस्या न विद्यते । बहुलं पिच्छिलं स्निग्धं घनं स्रवति शोणितं । योनौ नाभौ तु शूलानि कुर्वती परमदारुणम् ॥" इति । रस.र. । पुष्पाञ्जने । भैष.भग.चि.व्रणगजाङ्कुशे । रसाञ्जने । हे.च.। सु.सू.३६ष. । रस.र.व्रणगजाङ्कुशे । पुष्करमूले । वै.निघ.हिक्काचि. । लवङ्गे । वै.निघ.२भ.ष.च.चि.शुण्ठ्यादिचूर्णे । (कम्) लौहकांसे । मे. । कासीसे । हिरेकस् । हे.च. । पुं (कः) । निर्विषसर्पविशेषे । सु.कल्प.४ष. ।

पुष्पकासीश(क)म् । क्ली । किञ्चित्पीतकासीसे । हिरेकसविशेष, ईषत् पीतवर्ण हिरेकस् । "द्वितीयं पुष्पकाशीषमसितञ्च सितञ्च तत् ।" र.मा.। "काशीशं धातुकाशीशं पांशुकाशीशमित्यपि । तदेव किञ्चित्पीतन्तु पुष्पकाशीशमुच्यते ॥" गुणाः—"काशीसमस्तमुष्णञ्च तिक्तञ्च तुवरं तथा । वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत् । मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्तितम् ॥" भा.पू.१भ.धा.व.४भ.उपदंशचि. । "पुष्पकाशीषकं तिक्तं शीतं नेत्रामयापहं । लेपेनाल्पामकुष्ठादिनाशनाल्पदोषनाशनम् ॥" रा.नि.व.१३ ।

पुष्पकीटः । पुं । भ्रमरे । त्रिका. ।

पुष्पकेतुः । पुं । पुष्पाञ्जने । रा.नि.व.१३ ।

पुष्पगणः । पुं । पुष्पवर्गे । यथा—"चतुर्धा स्थलपद्मानि सेवती गुलदावती । नेपाली च गुलाबश्च गुलाबासश्च दक्षिनी । जाती यूथी राजवल्ली चुद्रयूथी त्रिधा मता । चम्पकी नागचम्पश्च बकुलश्च कदम्बकः । कुन्दश्च शिवमल्ली च द्विकुञ्जः केतकी द्विधा । किङ्किरातः कर्णिकारी हाशीकी वासपुष्पकम् । कुरण्टकश्चतुर्धा च तिलकी मुचुकुन्दकः । बन्धूकश्च चतुर्धा स्याज्जपा द्वेधा वसुन्धरी । अगस्तिर्दमनो मारुः पपरी बहुवर्णिका । द्विःपाटलः सूर्यमुखी हाशः पुष्पगणस्त्वयम् ॥" अर्क.चि.।

पुष्पगन्धः । पुं । यवनालवृक्षे । वेतसवृक्षे । वै.निघ. ।

पुष्पगन्धा । स्त्री। शुक्लयूथिकायाम् । वै.निघ.।

पुष्पगवेधुका । स्त्री। नागबलायाम्। वै.निघ.।

पुष्पघातकः । पुं । वंशे । श.मा. ।

पुष्पचामरः । पुं । दमनवृक्षे । त्रिका. । केतकवृक्षे । श.मा. ।

पुष्पजः । पुं। पुष्पद्रवे । फूलेर रस, गोलाप जल आदि । रा.नि.व.१० । पुष्पमधुनि । स्त्री । पुष्पशर्करायाम् । वै.निघ. । [च.सू.२५ष. ।

पुष्पजासवः । पुं। पञ्चाशेकादशपुष्पोत्थासवेषु । "पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्त्रमधूकप्रियङ्गुधातकीपुष्पदशमाः पुष्पासवा भवन्ति ।"

पुष्पदः । पुं । वृक्षे । हे.च. ।

पुष्पदर्शनम् । क्ली । रजोदर्शने । च.शा.८ष. ।

पुष्पद्रवः । पुं । पुष्पजातरसे । फूलेर रस, गोलाप जल प्रभृति वा मधु । गुणाः—सुरभिः शीतः कषायः शैत्यः दाहश्रमवमिमोहमुखरोगघ्नश्च । रा.नि.व.१० ।

पुष्पनिर्यासः (कः) । पुं । पुष्पोत्थद्रवे । फूलेर रस, गोलाप जल प्रभृति वा मधु । रा.नि.व.१० ।

पुष्पनि(लि)चः । पुं । भ्रमरे । भ्रमर । श.च. ।

पुष्पन्धयः । पुं । भ्रमरे । रा.नि.व.१९ ।

पुष्पपथः । पुं । योनौ, भगे । त्रिका. । [अ. ।

पुष्पपाण्डुः । पुं । मण्डलिसर्पभेदे । सु.कल्प.४

पुष्पपिण्डः । पुं । अशोकवृक्षे । वै.निघ. ।

पुष्पफलः । पुं । कपित्थवृक्षे । भा. । स्त्री । अर्ज्जुनवृक्षे । कुष्माण्डादौ । भा.पू.शा.व. ।

पुष्पफलशाकः । पुं । पुष्पशाकफलशाकमात्रे अलाब्वादौ । गुणाः—"पित्तघ्नान्यनिलं कुर्य्युस्तथा मन्दकफानि च । सृष्टमूत्रपुरीषाणि स्वादुपाकरसानि च ॥"

पुष्पफला । स्त्री । कुष्माण्डलतायाम् । वै.निघ. ।

पुष्पमञ्जरिका । स्त्री । इन्दीवरालतायाम् । नीलपद्मिन्याम् । वै.निघ. । [वै.निघ. ।

पुष्पमञ्जरी । स्त्री । घृतकरञ्जे । घोड़ाकरञ्ज ।

पुष्पमासः । पुं । वसन्तसमये । रा.नि.व.२१ ।

पुष्पमृत्युः । पुं । देवनलवृक्षे । वै.निघ. ।

पुष्परक्तः । पुं । सूर्य्यमणिवृक्षे । श.च. ।

पुष्परजः । क्ली । मकरन्दे । पुष्पपरागे । वै.निघ. ।

पुष्परसः । पुं । मधुनि । मउ । रा.नि.व.१४ । च.द.कास-चि. अगस्त्यहरीतक्याम् । मकरन्दे । अम. । [१४ ।

पुष्परसाह्व(य)म् । क्ली । मधुनि । रा.नि.व.

पुष्परसोद्भवम् । क्ली । मधुनि । वै.निघ. ।

पुष्परागः । पुं । पीतवर्णस्फटिकविशेषे । पीगराज इति लोके । वै.निघ.२भ.चय.चि.नवरत्नराजमृगाङ्के । गुणाः—अम्लः शीतलः वातघ्नो दीपनः । धारणात् आयुः श्रियं प्रज्ञाञ्च करोति । रा.नि.व.१३ । रसाञ्जने । रस.र.एकादशयसे ।

पुष्परेणुः । पुं । पुष्पपरागे । श.र. ।

पुष्परोचनः । पुं । नागकेसरवृक्षे । त्रिका. ।

पुष्पवती । स्त्री । रजस्वलायाम् । अम. ।

पुष्पवर्षिणी । स्त्री । निर्गुण्ड्याम् । वै.निघ. ।

पुष्पवल्लभः । पुं । मल्लिकापुष्पवृक्षे । प.मु. ।

पुष्पविषम् । क्ली । वेत्रादिपुष्पेषु । "वेत्रकादम्बवल्लिजकरम्भमहाकरम्भानीति पञ्च ।" सु.कल्प. २अ. । गुणाः—छर्द्दिराध्मानं मूर्च्छनञ्च । "भवेत्पुष्पविषैश्छर्द्दिराध्मानं मूर्च्छनं तथा ।" भा.म.४भ. विष.चि. । [कल्प.४अ. ।

पुष्पशकली । पुं । निर्विषसर्पविशेषे । सु.

पुष्पशर्करा । स्त्री । पुष्पोद्भूतशर्करायाम् । फूलेर चिनि । गुणाः—स्वादुः रूक्षा शीतला गुरुः पित्तरक्तघ्नी च । वै.निघ. ।

पुष्पशून्यः । पुं । उदुम्बरवृक्षे । रा.नि.व.११ ।

पुष्पसमयः । पुं । वसन्तकाले । अम. ।

पुष्पसारः । पुं । पुष्पद्रवे । फूलेर रस, गोलाप जल आदि वा मधु । रा.नि.व.१० ।

पुष्पसिता । स्त्री । सितशर्करायाम् । वै.निघ. ।

पुष्पसौरभा । स्त्री । कलिकारिक्षुपे । विषलाङ्गुलिया । रा.नि.व.४ ।

पुष्पस्वेदः । पुं । पुष्पद्रवे । फूलेर रस, वा मधु । रा.नि.व.१० ।

पुष्पहासा । स्त्री । ऋतुमत्यां स्त्रियाम् । श.च. ।

पुष्पहीना । स्त्री । उदुम्बरवृक्षे । श.च. । रजःशून्यायाम् । है.च. ।

पुष्पा (ह्वा) । स्त्री । वृहच्छत्रपुष्पायाम् । शुल्फा । वै.निघ. । रा.नि.व.४ ।

पुष्पाञ्जनम् । क्ली । कृत्रिमाञ्जने । गुणाः—"पुष्पाञ्जनं हिमं प्रोक्तं पित्तहिक्काप्रदाहनुत् । नाशयेद्विषकासार्त्तिं सर्व्वनेत्रामयापहम् ॥" रा.नि.व. १३ । वा.सू.१५अ.प्रियङ्ग्वादि.व. ।

पुष्पाण्डकम् । क्ली । अन्ने । तण्डुले । पुं । पुष्पसुकुमारतण्डुले, शालिधान्यभेदे । भा.पू.१भ. धा.व. ।

पुष्पान्ता । स्त्री । धातकीवृक्षे । वै.निघ. ।

पुष्पाभिकीर्णः । पुं । दर्व्वीकरसर्पविशेषे । सु.कल्प.४अ. ।

पुष्पाम्बुजः । पुं । पुष्पद्रवे । मधु, फूलेर रस

वा सार, গোলাপ জল আদি। रा.नि.व.१०।

पुष्पाम्लः (र्कः) । क्ली, पुं । सेवत्यादिपुष्पोत्थार्के। সেউতী আদি ফুলের আরক। यथा—"सेवन्ती शतपत्री च वासन्ती गुलदावदी। चाम्ला यूथिका चम्पा बकुलश्च कदम्बकः। द्रावयेत् केतकीपत्रैः यावोऽर्को गृह्यमार्गतः। पुष्पार्क इति विख्यातो मरिचैः सहितं पिबेत्। गुणाः—मस्तिष्कमर्यादेऽपि क्लीबोऽपि पुरुषायते। रोगानीकम्न यथाणं हन्यात्।" अर्क.चि.। [व.१४।

पुष्पासवम् । क्ली। मधुनि। पुष्पमद्ये। रा.नि.

पुष्पिका । स्त्री। दन्तमले। हारा.। मूत्रमार्गे। रक्तार्कवृक्षे। र मा.। लिङ्गमले। हे.च.।

पुष्पिणी । स्त्री। धातकीवृक्षे। तूलके। स्वर्णकेतक्याम्। वै.निघ.। [च.इ.२अ.।

पुष्पितः । त्रि। पुष्पगन्धरूपादिप्रलक्षणयुक्ते।

पुष्पिता । स्त्री। रजस्वलायाम्। रा.नि.व.१८।

पुष्पी । स्त्री। स्वर्णकेतकीवृक्षे। रा.नि.व.१६।

पुष्पेन्द्रा । स्त्री। माधवीलतायाम्। वै.निघ.।

पुष्पेभः । पुं। नागकेसरवृक्षे। वै.निघ.।

पुष्पोद्भवा । स्त्री। पुष्पशर्करायाम्। वै.निघ.।

पुष्यलकः । पुं। कस्तूरीमृगे। मे.।

पुष्यानगचूर्णम् । क्ली। प्रदराधिकारे चूर्णौषधम्। पाठः—"पाठां जम्ब्वाम्रयोर्मध्यं शिलोद्भेदं रसाञ्जनम्। अम्बष्ठकां मोचरसं समङ्गां पद्मकेशरं। बाह्लीकातिविषामुस्तं विल्वं रोध्रं सगैरिकम्। कट्फलं मरिचं शुण्ठीं माचीकं रक्तचन्दनम्। कट्वङ्गं वासकानन्ता(श्यीणाकवल्कानन्ता,भैष.)धातकीमधुकार्जुनम्। पुष्येणोद्धृत्य तुल्यानि श्लक्ष्णचूर्णानि कारयेत्। तानि चौद्रेण संयोज्य पाचयेत्तण्डुलाम्बुना।...चूर्णं पुष्यानगं नाम हितमात्रेयभाषितम्।" शिलोद्भेदः पाषाणभेदः। পাথরকুচি। अम्बष्ठकेति दाक्षिणात्ये ख्याता, तदभावे पाठा द्विगुणा। बाह्लीकं कुंकुमं। माचीकं देवदारु। रस. र.। अम्बष्ठकी लज्जा। च.द.। च.चि.३०अ.। माचीकस्थाने मद्दीकापि पाठः। আকৃনাদি २ ভ. আমের আঁটীর শস্য, জামের আঁটীর শস্য, পাথরকুচি, রসাঞ্জন, মোচরস, বরাক্রান্তা, পদ্মকেসর, কুঙ্কুম, আতইচ, মুতা, বেলশুঁটা, লোধকাষ্ঠ, গেরিমাটী, কট্ফল, মরিচ, শুঁট, দেবদারু বা কিস্‌মিস্, রক্তচন্দন, শ্যোণাছাল, ইন্দ্রযব, অনন্তমূল, ধাইফুল, যষ্টিমধু, অর্জ্জুনছাল, প্রত্যেক চূর্ণ এক এক ভাগ। মধুযোগে চেলুনিদ্বারা পাককরিবে।

पुस्तकशिम्बिका / **पुस्तकाख्या** } स्त्री। पुस्तशिम्बयाम्। वै.निघ.।

पुस्तमयः । त्रि। वस्त्ररचिते। सु.सू.६अ.।

पुस्तशिम्बी । स्त्री। शिम्बीलताभेदे। See शिम्बिः।

पुस्फुसः । पुं। फुस्फुसरोगे।

पूग(फल)म् । क्ली। गुवाकफले। रा.नि.व.११। गुणाः—"कफपित्तहरं रुच्यं वक्त्रक्लेदमलापहम्। कषायमीषन्मधुरं किञ्चित् पूगफलं सरम्॥" सु.सू. ४६अ.। "कषायमधुरं भेदि पूगं पित्तकफापहं।" अचि.१७अ.। "पक्वन्तु वातलं रुच्यं भेदनं कफनाशनं। गुर्वभिष्यन्दि मधुरं तोयधृक् वह्निनाशनम्। आदौ पूगं विषं घोरं द्वितीये भेदि दुर्जरं। तृतीयादिषु पातव्यं सुधातुल्यं रसायनम्।" इति पूगस्य बालमध्यादिभेदगुणाः। राज.३प.।

पूगः । पुं। क्रमुकवृक्षे। रा.नि.व.११। See अक्षोटः। पनसवृक्षे। श.र.। तूदवृक्षे। তুঁৎ গাছ। भा.।

पूगपीठम् । क्ली। निष्ठीवनपात्रे। त्रिका.।

पूगपुष्पिका । स्त्री। विवाहपुष्पे। त्रिका.।

पूगमण्डः । पुं। प्लक्षवृक्षे। পাকুড় গাছ। वै.निघ.।

पूगरोटः (कः) । पुं। हिन्तालवृक्षे। হেঁতাল গাছ। त्रिका.। खर्ज्जूरविशेषे। একজাতি খেজুর। वै.निघ.। "-बोट" इत्यपि पाठो दृश्यते।

पूगवृक्षः । पुं.। क्रमुकवृक्षे। শুপারি গাছ। रा.नि.व.११। [स्त्री। गुवाके।

पूगी (इन्) । पुं.। गुवाकवृक्षे। मद.व.१। (गी)

पूगीफलम् । क्ली। गुवाके। वै.निघ.।

पूजनी । स्त्री। चटकायाम्। চড়াই। भ.।

पूज्यमानम् । क्ली। श्वेतजीरके। वै.निघ.।

पूतः । पुं । सितदर्भे । श्वेत कुश । रा.नि.व.८। विकङ्कतवृक्षे । बँइचि गाछ । रा.नि.व.९। प्लक्षवृक्षे । तिलकवृक्षे । शङ्खे । रा.नि.व.११।१३। १६ । क्ली । निर्वुषधान्ये । अम. ।

पूतगन्धः । पुं । बर्बरके । काल बाबुई शाक। रा.नि.व.१० । [कुश । रा.नि.व.८ ।

पूततृण: (दर्भः) । पुं । सितदर्भे । श्वेत

पूतद्रुः । पुं । पलाशवृक्षे । रा.नि.व.१० ।

पूतधान्यम् । क्ली । तिले । रा.नि.व.१६ ।

पूतनः । पुं । गुदकुन्दरोगे । वा.उ.२अ. । See गुदकुन्दः ।

पूतना । स्त्री । गन्धमांस्यां । सुगन्धजटामांसी। रा.नि.व.१२ । खल्पत्वचि हरीतक्याम् । रा.नि.व. ११ । भा.पू. । च.द. । सि.यो.अ.ग्या.चि.महापैशाचघृते । इयं सिन्धुदेशजा लिपे शस्ता च । राज.। बालग्रहविशेषे । [तकेशीति लोके । च.द. ।

पूतनाकेशी । स्त्री । सुगन्धजटामांस्याम् । भू-

पूतनी । स्त्री । (Metha arvensis. Syn. M. Sativa.) Marshmint. स्वनामख्यातसुगन्धशाके । पुदिना इति सर्व्वत्र । पुदिना शाक । प.मु.। गुणाः—कामलाहरी अरोचकघ्नी मूर्च्छाघ्नी वमिघ्नी । शुष्कवृत्तः स्निग्धताकरः आग्नेयः उत्तेजकश्च । बालरोगविशेषे । पूतनाग्रह । लक्षणं यथा—"स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ विड्भिन्नं सृजति च काकतुल्यगन्धिः । छर्द्यार्त्तो हृषिततनूरुहः कुमारः तृष्णालुर्भवति च पूतनागृहीतः ॥" सु.उ.२७अ. । तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति स्तन्यं न गृह्णाति दृष्टिं बध्नाति क्रन्दति ऊर्द्धं निरीक्षते च । च.द. ।

पूतपत्री । स्त्री । तुलसीवृक्षे । रा.नि.व.१० ।

पूतफलः । पुं । पनसवृक्षे । काँटाल गाछ । रा.नि.व.११ । [लसीवृक्षे । वै.निघ. ।

पूता । स्त्री । नीलदूर्व्वायाम् । रा.नि.व.८ । तु-

पूतिः । स्त्री । गन्धमार्जाराण्डे । खाटाशी । भैष. मज्जी, श्रीगोपालतैले । सि.यो.यक्ष्म.चि.चन्दनाद्यतैले । क्ली । कुतृणे । गन्ध तृण । रा.नि.व.८ । दुर्गन्धे । अ.टी.रा. ।

पूतिकम् । क्ली । पुरीषे । रा.नि.व.१८ ।

पूति(ती)कः । पुं । करञ्जविशेषे । नाटा करञ्ज । रा.नि.व.९ । च.द.वा.व्या.चि.विष्णुतैले । हि.श्वास चि.हिंस्राद्यघृते । वै.निघ.२भ.अ.सा.चि. पूतिकादिकल्के, कन्दर्पसारतैले । सु.कुष्ठ.चि.९अ. । भा.४भ.कर्णकण्ड.चि. । नैगमेषग्रहचि. । प्रसारण्यां । सा.कौ.शालासारादिः । घृतकरञ्जे । वै.निघ. । गन्धमार्जाराण्डे । खाटाशी । रा.नि.व. १९ । क्ली । विष्ठायाम् । रा.नि.व.१८ ।

पूतिकजा । स्त्री। गन्धमार्जाराण्डे । खाटाशी। वै.निघ. ।

पूतिकण्टकः । पुं । इङ्गुदीवृक्षे । वै.निघ. ।

पूतिकन्या । स्त्री । पूतिकायां । पुदिना शाक । प.मु. ।

पूति(ती)करजः (ञ्जः) । पुं। (Guilandina Bonduc or Caesalpinia bonducella.) करञ्जवृक्षविशेषे। नाटा करञ्जा गाछ । हिं कंटकरेजा । बम्. सागरगोटा । ता. पेत्ताककय । गुणाः—"करञ्जः कटुतिक्तोष्णः विषवातार्त्तिकृन्तनः । कण्डूविचर्चिकाकुष्ठशर्मत्वग्दोषनाशनः ॥" रा.नि.व.९ । तत्पत्रगुणाः—"शोफघ्नमुष्णवीर्य्यन्तु पत्रं पूतिकरञ्जजम् ।" सु.सू. । अस्य वीजं—बल्यम् । तन्मज्जा—ज्वरघ्नं बल्यं लेपनेन अण्डवृद्धौ हितं शोथहरं रक्तस्रावरोधकम् उष्णं नीरसं कुष्ठघ्नञ्च । पत्रमपि तद्गुणं । केचित् । कण्टकीकरञ्जे । काँटाकरमचा । च.द.श्ली.चि. ।

पूतिकर्णः (कः) (र्णिकः) । पुं। पूतिकरञ्जे । नाटा करञ्जा । रा.नि.व.९ । कर्णरोगविशेषे, कर्णपाकेन पूतिगन्धकर्णरोगे । काण पाका वा पचा । लक्षणं—"अवेदनो वाप्यथवा सवेदनो घनं स्रवेत् पूति स पूतिकर्णकः ।" सु.उ.२०अ. । "कर्णविद्रधिपाकेन कर्णे वा वारिपूरणात् । पूयं स्रवति यत् पूति स ज्ञेयः पूतिकर्णकः ।" भा. ४भ. । [वै.निघ. ।

पूतिकर्णी । स्त्री । वाकुच्याम् । सोमराज ।

पूति(ती)का । स्त्री । करञ्जवृक्षे । नाटा क-

रक्षा। वै.निघ.२भ.सर्व्वज्व.चि.महाषट्पलकघृते। भैष.महारुद्रतैले। उपोदिकायाम्। পুঁইগাছ। श.टी.भ.। जवादिकस्तूरिकायाम्। খাটাশী। भैष.वा.व्या.चि.हिमसागरतैले।

पूतिकामक्षिका । स्त्री। पृथुमधुमक्षिकाविशेषे। ডাঁশ মাছি। वै.निघ.।

पूतिकामुखः । पुं। शम्बूके। श.मा.।

पूतिकाष्ठ(क)म् । क्ली। देवदारुणि। দেবদারু। रा.नि.व.१२। सरलकाष्ठे। श.च.।

पूतिकाह्वः । पुं। पूतिकरञ्जे। वै.निघ.।

पूतिकीटः । पुं। कीटविशेषे। পেদো পোকা। भैष.कुष्ठ.चि.। "पूतिकीटविलेपनात्।"

पूतिकेसरः । पुं। गन्धमार्जारे। खाटासीति लोके। খাটাশী। चन्दनादितैले प्रयोज्यः।

पूतिगन्धः । पुं। इङ्गुदीवृक्षे। रा.नि.व.८। गन्धके। क्ली। रङ्गधातौ। रा.नि.व.१३। सुगन्धतृणे। वै.निघ.।

पूतिगन्धा । स्त्री। सोमराज्याम्। प्रसारण्यां। भादालियेति प्रयोगामृते मानकथने। "ताः पूतिगन्धामृतः।" [रा.नि.व.४।

पूतिगन्धिका । स्त्री। पूतिकायाम्। वाकुच्यां।

पूतिघसः । सुगन्धमार्जारे। गन्ध গোকুল। सु.सू.४६अ.। अयं पर्णमृगगुणः। See पर्णमृगः।

पूतितैला । स्त्री। ज्योतिष्मतीलतायाम्। বন উচ্ছে। লতা ফট্কী। र.सा.सं। See पारावतपदी। भैष.ज्वरकुञ्जरपारीन्द्ररसे।

पूतिदः । पुं। तरुविड़ाले। গেছো বিড়াল, কাষ্ঠ বিড়াল। वै.निघ.।

पूतिदला । स्त्री। तेजपत्रे। তেজপাত। च.द.वा.व्या.चि.एलातैले।

पूतिनस्यम् (नासः) । क्ली, पुं। नासारोगभेदे। लक्षणं यथा—"दोषैर्विदग्धैर्गलतालुमूले संवासितो यस्य समीरणस्तु। निरेति पूतिर्मुखनासिकाभ्यां तत् पूतिनस्यं प्रवदन्ति रोगम्॥" सु.उ.२२अ.। "तालुमूले मलैर्दुष्टैर्मारुतो मुखनासिकात्। श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनासं वदन्ति तम्॥" वा.उ.१९अ.।

पूतिपत्रः । पुं। पृथुशिम्बश्योणाकवृक्षे। বড় শোণা গাছ। रा.नि.व.९। पीतलोध्रे। वै.निघ.।

पूतिपर्णः । पुं। करञ्जवृक्षे। ডহরকরঞ্জ গাছ। रा.नि.व.९। इङ्गुदीवृक्षे। वै.निघ.।

पूतिपल्लवा । स्त्री। राजसुषव्याम्। গয়াকরলা। प.मु.। [प.मु.।

पूतिपुष्पः । पुं। इङ्गुदीवृक्षे। জিয়াপুতা।

पूतिपुष्पिका । स्त्री। मधुमातुलुङ्गवृक्षे। গোঁড়াবা। प.मु.। [ज्याम्। प.मु.। अम.।

पूतिफलः (ला) (ली) । पुं,स्त्री। सोमरा-

पूतिमज्जा । स्त्री। इङ्गुदीवृक्षे। वै.निघ.।

पूतिमयूर(रि)का । स्त्री। अजगन्धायाम्। रा.नि.व.४। वन्यतुलस्याम्। वै.निघ.।

पूतिमारुतः । पुं। कर्कन्धौ। रा.नि.व.२३। विल्ववृक्षे। वै.निघ.।

पूतिमांसम् । क्ली। दुर्गन्धमांसे, पर्य्युषितमांसे। गुणाः—सद्यः प्राणहरम्। राज.४प.।

पूतिमूषिका । स्त्री। कुकुन्दर्य्यां। वै.निघ.।

पूतिमेदः । पुं। अरिमेदे। বিট্খদির। रा.नि.व.८। [वै.निघ.।

पूतियुग्दला । स्त्री। गन्धतृणे, रोहिषतृणे।

पूतियोनिः । पुं। उपप्लुतानामके योनिरोगे। च.द.।

पूतिरक्तः । पुं। नासारोगभेदे। निदा.।

पूतिवर्व्वरी । स्त्री। वनतुलस्याम्। वै.निघ.।

पूतिवातः । पुं। विल्ववृक्षे। र.मा.।

पूतिवृक्षः । पुं। श्योणाकवृक्षे। प.मु.।

पूतिशाकः । पुं। वकवृक्षे। प.मु.। [त्रिका.।

पूतिशारिजा । स्त्री। गन्धखट्टासे। খাটাশী।

पूती । स्त्री। पूतीकरञ्जे। वा.उ.३अ.।

पूतीकद्वयम् । क्ली। करञ्जद्वये। করঞ্জা, নাটাকরঞ্জা। भैष.शोथ.चि.वृहच्छुष्कमूलाद्यतैले।

पूतीकपत्रम् । क्ली। करञ्जपत्रे। च.द.गुल्म.चि.। [करञ्जपल्लवे। सु.सू.११अ.।

पूतीकप्रवालः । पुं। करञ्जपल्लवे। कण्टकि-

पूत्यण्ड: । पुं । कस्तूरीमृगे । मे. । गन्धकीटे । गं:दा:पोका । मे. । [रत्न । वै.निघ. ।

पूप: । पुं । पिष्टके । अम. । चुद्रपनसे । आता-

पूपला । स्त्री । पिष्टकविशेषे । बड़ा । हे.च ।

पूपलिका । स्त्री । पिष्टकविशेषे । पुलीविशे-ष । सा गुरु: पुष्टिकरी च । च.चि.२अ. । च.सू. २७अ. ।

पूपालिका (ली) (पि[लि]का) । स्त्री। पिष्टकविशेषे । त्रिका. । हे.च. । सु.चि.२६अ. रावणकृतकुमारतन्त्रे ।

पूय(न)म् । क्ली । पुँजइतिख्याते क्लेदे । पूँज्। श.च. । पूयकरगण: यथा– "तक्रान्नैर्नवधान्यादि-र्योऽयं वर्ग उदाहृत: । दोषसंजननो ह्येषो विज्ञेय: पूयवर्द्धन: ॥" सु. ।

पूयरक्त: । पुं, क्ली । नासारोगविशेषे । तल्लचणं यथा—"दोषैर्विदग्धैरथवापि जन्तोर्ललाटदेशेऽभि-हतस्य तैस्तु । नासा स्रवेत् पूयमसृग्विमिश्रं तं पू-यरक्तं प्रवदन्ति रोगम् ॥" सु.उ.२२अ. । "निच-यादभिघाताद्वा पूयासृङ्नासिका स्रवेत् । तत्पूयर-क्तमाख्यातं शिरोदाहरुजाकरम् ॥" वा.उ.१९अ. ।

पूय(या)स्राव: । पुं । नेत्रसन्धिगतरोगविशे-षे । চক্ষে পূঁজ পড়া । तल्लचणं—"पाक: सन्धौ संस्रवेद्यश्च पूयं पूयास्रावो नैकरूप: प्रदिष्ट: ।" सु. उ.२अ. । अश्वस्य नेत्ररोगविशेषे । ज.द.३०अ. ।

पूयारि: । पुं । निम्बवृत्ते । श.च. ।

पूयालस: । पुं । नेत्रसन्धिगतरोगे । लचणं यथा—"पक्व: शोफ: सन्धिज: संस्रवेद्य: सान्द्रं पू-यं पूति पूयालस: स: ।" सु.उ.२अ. ।

पूयासम् । क्ली । पूये । वै निघ. ।

पूर: । पुं । मातुलुङ्गवृत्ते, वीजपूरवृत्ते । টাবা লেবুর গাছ । प.मु. । खाद्यद्रव्यभेदे । पूर । त्रि-का. । क्ली । दाहागुरुणि । रा.नि.व.१२ ।

पूरक: (काह्व:) । पुं । मातुलुङ्गवृत्ते । "मा तुलुङ्गे तु पूरक: ।" रा.नि.व.११।२३ । वै.निघ. । क्ली । वीजपूरकफले । सि.यो.मदा.चि. ।

पूरणम् । क्ली । वस्तिनेत्रप्रभृतिभिर्यन्त्रै: कर्णादौ तैलादिपूरणकर्म्मणि । सु.सू.७अ. । सुगन्धवृणे । नागरमुस्तायाम् । श.मा. । पूरणार्थं पक्वतैले । वा-युजन्यव्रणवेदनाविशेषे । सु.सू.२२अ. । पुं । पुन-र्नवायाम् । रस.चि.९अ.सिद्धिसारलौहे । विष्णुतै-ले । धरणि ।

पूर(रि)णी । स्त्री । शाल्मलीवृत्ते । अम. ।

पूराम्लम् । क्ली । वृत्ताम्ले । তেঁতুল । रा.नि. व.६ ।

पूरि(लि)का । स्त्री । पूरभरितापूपे । বড়া, কচুরী প্রভৃতি । तत्साधनं यथा—"माषाणां पि-ष्टिकां युञ्ज्यात् लवणार्द्रकहिङ्गुभि: । तया पि-ष्टिकया पूर्णा समिता कृतपोलिका । ततस्तैलेन पक्वा सा पूरिका कथिता बुधै: ॥" गुणा:—"रु-च्या स्वाद्वी गुरु: स्निग्धा बल्या पित्तास्रदूषिका । चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी । तथैव घृतपक्वापि चक्षुष्या रक्तपित्तहृत् ॥" भा.पू.२भ. ।

पूरितम् । क्ली । अर्ले । वै.निघ. ।

पूरुष: । पुं । मनुष्ये, पुरुषे । वै.निघ. ।

पूर्णक: । पुं । ताम्रचूड़े । মোরগ । मे. ।

पूर्णकोषा । स्त्री । यवपिष्टमयभक्ष्यद्रव्ये । पू-रपুলি । सु.चि.१०अ. । [रा.नि.व.६ ।

पूर्णकोष्टा (ष्ठा) । स्त्री । नागरमुस्तायाम् ।

पूर्णगर्भा । स्त्री । पूरणपोलिकायाम् । पূর-পিটে । वै.निघ. ।

पूर्णचन्द्र(णाभ्र)रस: । पुं । ग्रहण्यां रस: । पाठ:—"सूतङ्गन्धञ्चाश्वगन्धां गुडूचीं यष्टीतोयैर्म-र्द्दयेदेकघस्रम् । चुद्रं शङ्खं मौक्तिकं लौहकिट्टं भ-स्मीभूतं सूततुल्यञ्च दद्यात् । भूकुष्माण्डैर्वासरं त-द्विमर्द्याद्गोलङ्कृत्वा भूधरे तं पुटेत्तु । चूर्णङ्कृत्वा ना-गवल्लीरसेन दद्यादेवं मर्द्दयित्वैकमाषम् । मध्वाज्या-भ्यां पूर्णचन्द्रं रसेन्द्रम्…… ॥" रस.चि. । अन्य: पूर्णचन्द्ररसायने—कज्जलि: लौहं अभ्रं प्र. ८ तो. रौप्यभस्म २ तो. वङ्गं ४ तो. स्वर्णं ताम्रं कांस्यञ्च प्र. १ तो. जातीफलं लवङ्गं त्वक् एला जीरकं कर्पूरं प्रियङ्गु: मुस्तकं प्र. २ तो. । कुमारीत्रिफलै-रण्डरसैर्भावयित्वा एरण्डपत्रैरावेष्ट्य धान्यराशौ ३ दिनं स्थाप्यम् । वटी चणाभा । भैष. ।

पूर्णवीज: । पुं । मातुलुङ्गवृत्ते । रा.नि.व.११ ।

पूर्णिका । स्त्री । नासाच्छिन्नीपक्षिणि । त्रिका. ।

पूर्थः (र्व्वः) । पुं । तूतद्रवे । वै.निघ. ।

पूर्व्वकर्म्म । क्ली । रोगोत्पत्तेः प्राक् तत्तद्व्याधिं मत्त्वा यदादौ क्रियते कर्म्म तस्मिन् । त्रिविधकर्म्मात्मकर्म्मणि । तानि च पूर्व्वपश्चात्प्रधानरूपाणि त्रीणि । तत्र प्रत्यतन्त्रे शस्त्रकर्म्म, कार्य्ये लङ्घनादिविरेकान्तं कर्म्म, संशोध्यस्य पाचनं स्नेहनं स्वेदनञ्चेति । सु.सू.५अ. ।

पूर्व्वरूपम् । क्ली । भाव्यामयसूचके न तु दोषविशेषसूचके चिह्ने । तच्च द्विविधं सामान्यविशेषभेदेन । "पूर्व्वरूपन्तु तद्येन विद्याद्भाविनमामयम् । सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितं । विशिष्टमौषधाङ्कं स्यात् विशेषैश्च समन्वितम् । पूर्व्वरूपं विशिष्टं स्यात् व्यक्तं तल्लक्षणं स्मृतम् ।" भा. । "प्रागूपं येन लक्ष्यते । उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः । लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम् ॥" मा.नि. ।

पूर्व्ववायुः । पुं । पूर्व्वदिग्भवमारुते । পূবে হাওয়া । गुणाः—"पूर्व्वः सुमधुरः स्निग्धो लवणश्चैव मारुतः । गुरुर्विदाहजननो रक्तपित्ताभिवर्द्धनः । क्षतानां विषजुष्टानां व्रणिनः श्लेष्मलाश्च ये । तेषामेव विशेषेण सदा रोगविवर्द्धनः । वातलानां प्रशस्तश्च श्रान्तानां कफशोषिणाम् । तेषामेव विशेषेण व्रणक्लेदविवर्द्धनः ॥" सु.सू.२०अ. ।

पूर्व्वसन्ध्या । स्त्री । प्रातःकाले ।

पूर्व्वाग्रः । पुं । लाजायाम् । খই । श.चि. ।

पूर्व्वाह्णः । पुं, क्ली । अह्नः पूर्व्वभागे, अयञ्च भागः वसन्तलक्षणसूचकः । सु.सू.६अ.। [रभसः ।

पूलकः । पुं । कटिप्रोथे । পোঁদের পেলো ।

पूषः । पुं । पौषे मासि । ब्रह्मदारुवृक्षे । তূঁত গাছ । अम. । [पूल । रा.नि.व.६ ।

पूषकः । पुं । पारिशवृक्षे । তূঁত, পলাশ পি-

पूषा । स्त्री । पाठायाम् । रा.नि.व.६ ।

पृक्का । स्त्री । पिड़िङ्गनामकशाके । পিড়িং শাক । प.मु.। हिं पुरी । उत्. फिरिकिशाक । गुणाः—"पृक्का स्वाद्वी हिमा वृष्या तिक्ता निखिलदोषनुत् । कुष्ठकण्डूविषस्वेददाहाश्रज्वररक्तहृत् ।" भा.पू.१भ. । सु.सू.३८अ.एलादिः । पृक्कापुष्पे । च.द.वा.व्या.चि महाराजप्रसारणीतैले, अष्टादशशतिकप्रसारणीतैले । लताकस्तूर्य्याम् । वै.निघ. ।

पृथक्छदः । पुं । अक्षोटवृक्षे । वै.निघ ।

पृथक्त्वचा । स्त्री । मूर्वायां । र.मा. ।

पृथक्पत्रः । पुं । सप्तपर्णवृक्षे । वै.निघ. ।

पृथक्पर्णिका (र्णी) । स्त्री । पृश्निपर्णीवृक्षे । रा.नि.व.४ वै.निघ.२भ.जीर्णज्व.चि.। मूर्वायाम् । मुर्गा । रा.नि.व.३ ।

पृथगालुः । पुं । पिण्डालौ । চুবড়ি আলু । হাতি খোজা আলু । प.मु. ।

पृथग्बीजः । पुं । भल्लातकवृक्षे । रा.नि.व.११।

पृथाजः । पुं । अर्ज्जुनवृक्षे । रा.नि.व.९ ।

पृथिका । स्त्री । शतपद्याम् । श.मा. ।

पृथिवीकन्दः । पुं । भूकन्दे । वै.निघ. ।

पृथिवीगुणाः । पुं । अस्थिचर्म्मनखमांसरोमसु । रस.र.ज्व.चि. ।

पृथिवीपतिः । पुं । ऋषभकौषधे । मे. ।

पृथिवीभवम् । क्ली । मृत्तिकाक्षारे । সোরা । वै.निघ. ।

पृथुः । स्त्री । हिङ्गुपत्र्याम् । रा.नि.व.६ । कृष्णजीरके । प.मु.भा. । स्थूलकृष्णजीरके । মোটা কৃষ্ণ জীরে । गुणाः—कटुतिक्तोष्णा वातगुल्मघ्नी आध्मानहरी दीपनी च । पुनर्नवायाम् । मेदायां । धारिण्याम् । रा.नि.व.२३ । तरुभुजे । रा.नि.व.२ । अहिफेने । श.र. ।

पृथुकः । पुं, क्ली । चिपिटके । চিড়ে । हिं चूड़ा । प.मु. । "हरितधान्यानि निस्तुषभ्रष्टमुषलहतानि पृथुकाश्चिपिटसंज्ञाः ।" अरुण.। "व्रीहयोऽप्यर्द्धपक्वास्तु तप्तास्ते पृथुकाः स्मृताः ।" रा.नि.व. १६ । गुणाः—बल्याः कफविष्टम्भकराश्च । वा.सू. ६अ. । स्वादवः स्निग्धा हृद्या कामवर्द्धनाश्च । रा.नि.व.१६ । सदुग्धस्य तस्य गुणाः—"सक्षीरा वृंहणा वृष्या बल्या भिन्नमलाश्च ते ।" भा. । एकवर्षीये शिशौ । अर्द्धवर्षीये शिशौ । ७ মাসের শিশু । रा.नि.व.१८ । [वै.निघ. । विश्व. ।

पृथुकन्दकम् । क्ली । तृणविशेषे । গুণ্ঠতৃণ ।

पृथुका । स्त्री । बालिकायां । हिङ्गुपत्र्याम् । श.च. । भृष्टतण्डुलायाम् । চিড়ে । वै.निघ. ।

पृथुकालुकी । स्त्री । रक्तालुभेदे । लाल आ-लू । भा.पू.१भ. ।

पृथुकोल: । पुं । राजवदरे । रा.नि.व.११ ।

पृथुकृष्ण: । पुं । जीरके । वै.निघ. ।

पृथुगन्धा । स्त्री । गन्धशव्याम् । वै.निघ. ।

पृथुच्छद: । पुं । शरपत्रकुशे । रा.नि.व.८ । अचोटवृचे । वै.निघ. ।

पृथुपत्र: (क:) । पुं । रक्तरसोने । रा.नि.व.७

पृथुपलाशिका । स्त्री । शट्याम् । रा.नि.व.६ ।

पृथुरोमा (न्) । पुं । मत्स्यभेदे । अर्क.चि. ।

पृथुल: । पुं । दर्भे । गुन्द्रातृणे । वै.निघ. ।

पृथुला । स्त्री । गुण्डासिनीतृणे । रा.नि.व.८ । हिङ्गुपत्राम् । जटा. ।

पृथुवीज: (क:) । पुं । मसूरे । मुगुरिकलाय। प.मु. । रा.नि.व.१६ । विकङ्कतवृचे । वै.निघ. ।

पृथुशिम्ब: (म्बा) (म्बी) । स्त्री । श्योणाकभेदे । रा.नि.व.६। पीतलोध्रे । असिशिम्बग्राम् । वै.निघ. । [अ. ।

पृथुशिरा । स्त्री। कृष्णजलौकायाम् । सु.सू.१३

पृथुशृङ्गक: । पुं । मेषविशेषे । दुम्बा । वै.निघ. ।

पृथुस्कन्ध: । पुं । वनशूकरे । रा.नि.व.१६ ।

पृथूदर: । पुं । मेषे । हारा. ।

पृथ्वि(थ्वी)का । स्त्री । जीरके । मद.व.२ । हिङ्गुपत्राम् । सु.चि.२अ. । स्थूलैलायाम् । रा.नि.व.२३ । कृष्णजीरकभेदे । शुक्लपुनर्नवायाम् । रा.नि.व.६ । कृष्णजीरके । च.सू.५अ. । च.द.र.पि.चि. । अर्कवृचे । एलायाम् । अम. । आदित्यभक्तायाम् । हुड़हुड़िया । वै.निघ. । [व.१० ।

पृथ्वीकुरवक: । पुं । श्वेतमन्दारार्के । रा.नि.

पृथ्वीजम् । क्ली । गड़लवणे । रा.नि.व.६ ।

पृदाकु: । पुं । हस्तिनि । वृचे । उणा. । सर्पे । अम. । वृश्चिके । व्याघ्रे । मे. ।

पृश्नि: (श्नी) । स्त्री। पृश्निपर्ण्याम् । चाकुलिया। श.र. । सु.चि.१७अ. । [मा. ।

पृश्निका । स्त्री । जलवृचविशेषे । पाना । श.

पृश्निपर्णिका (र्णी) । स्त्री । (Hemionites cordifolia. Uraria lagopoides. Syn. Doodia lagopodioides.) स्वनामख्याततिक्तशाकचुपे । चाकुलिया। हिं पीठवन, पीतवन, पठौनी । मं सेवरा । कं नवियलवीने । तें कोलाकुपोन्ना । उत्. क्रष्टपर्णि । सु.चि.८अ. । गुणा: —"·· त्रिदोषघ्नी वृष्योष्णा मधुरा सरा । हन्ति दाहज्वरश्वासरक्तातिसारतृड्वमी: । भा.पू.१भ.गु.व. । कटु: उष्णा कासातीसारघ्नी वातरोगज्वरदाहव्रणोन्मादघ्नी च । रा.नि.व.४ । च.द.ज्व.चि. । एतद्वन्धनमैकाहिकज्वरे हितम् । च.द.ज्व.चि. । सु.सू.३८अ. ।

पृषत: । पुं । श्वेतबिन्दुहरिणविशेषे । एतन्मांसगुणा: —"स्वादु शीतलं धारकं लघु दीपनं रुच्यं श्वासज्वरत्रिदोषघ्नम् ।" भा. । रोहितमत्स्ये । मण्डलिसर्पविशेषे । सु.कल्प.४अ. । स्त्री । हरिणीभेदे । मे. ।

पृषन्ति: । पुं । जलबिन्दौ । [द.चि. ।

पृष्टिपर्णी । स्त्री । पृश्निपर्ण्याम् । चि.क्र.क.प्र-

पृष्ठम् । क्ली। तनुपश्चाद्भागे । रा.नि.व.८। [२०।

पृष्ठग्रन्थि: । पुं । गड्डरोगे । कुँज । रा.नि.व.

पृष्ठग्रह: । पुं । अस्य वातव्याधौ । लचणं यथा—"स्तब्धं पृष्ठोन्नतञ्चैव रुग्भी चिमस्य यस्य च । तस्य पृष्ठग्रहं रोगमूर्द्धग्रीवस्य निर्दिशेत् ॥" ज.द.५५अ. ।

पृष्ठचचु: । पुं । कर्कटे । वै.निघ. ।

पृष्ठदृष्टि: । पुं । भल्लूके । रा.नि.व.१६ ।

पृष्ठमर्म्म । क्ली । पृष्ठवंशगतचतुर्दशमर्म्मसु । तद्यथा—कटीकतरुणे, कुकुन्दरे, नितम्बौ, पार्श्वसन्धी, वृहती, अंसफलके, अंसौ । सु.शा.६अ. ।

पृष्ठरुचम् । क्ली । मरिचे । वै.निघ. ।

पृष्ठवंश: । पुं । मेरुदण्डे, पृष्ठास्थनि । पीठेर शिरदाँड़ा । है.च. । स शिशो: मासमात्रेण भवति । सुखबोध: ।

पृष्ठशृङ्ग: । पुं । आरण्यच्छागे । है.च. ।

पृष्ठशृङ्गी (इन्) । पुं । महिषे । श.र. । नपुंसके । मे. । मेषे । वै.निघ. ।

पृष्ठचिति: । पुं । नन्दिवृक्षे । वै.निघ. ।

पृष्ठास्थि । क्ली । कशेरौ । মেরুদণ্ড । रा.नि.व.१८ । तानि च ३५ । च.शा.७अ. ।

पृष्ठा: । पुं । चर्म्मे । अम. । क्ली । पृष्ठास्थिसमूहे । वै.निघ. ।

पृष्णि: । स्त्री । पार्ष्णिभागे । उणा. ।

पेच: (क:) । पुं । उलूकपक्षिणि । পেঁচা । श.र. । अम. ।

पेचकी (इन्) । पुं । करिणि । श.र. ।

पेचिल: । पुं । हिरदे । হাতী । त्रिका. ।

पेचु: (क:) । पुं । मुचुकुन्दवृक्षे । মুচুকুন্দ গাছ । केमुकवृक्षे । কেঁউ গাছ । र.मा. । नाड़ीचशाके । पेचुके । কচু । त्रिका. ।

पेचुका । स्त्री । पेचुके । কচুর শাক । केमुके । কেঁউ । र.मा. ।

पेचुनी (ली) । स्त्री । पेचुकशाके । কচুর শাক । त्रिका. । केमुके । কেঁউ । र.मा. ।

पेटक: (टिका, टी) । पुं, स्त्री । (Abutilon Indicum.) कुबेराख्याम् । পেটারি । र.मा. । हिं कङ्गनी । पारस्य.दरखते शैरा । आर. मस्तुलघौर । ता. टट्टी । भैष.बाल.चि. । च.द. । "पेटी पाठामूलात् ।"

पेड़म् । क्ली । घृते । अमृते । उणा. ।

पेड़ा । स्त्री । पेटिकायाम् । পেটারি । वनालुके । वै.निघ. ।

पेयम् । क्ली । षड्विधान्नान्तर्गतान्ने । रा.नि.व.२० । जले । मे. । दुग्धे । श.च. ।

पेया । स्त्री । अल्पसिक्थपेयद्रव्ये । सा च पञ्चदशगुणैर्जलै: सिध्यति । মণ্ডবিশেষ । "तोये पञ्चदशगुणे सिद्धा पेयाल्पसिक्थका ।" प.सु. । सिक्थसमन्विता पेया । "पेया सिक्थसमन्विता ।" प.प्र.२ख. । तण्डुलापेक्षया एकादशगुणे वारिणि सिद्धा । च.द.ज्व.चि. । "निर्द्रव्या माकृता पेया तक्रदाड़िमतण्डुलै: ।" इति च लक्षणम् । हेमाद्रि: । गुणा:—मलानुलोमनी पथ्या दीपनी पाचनी क्षुत्तृष्णाग्लानिदौर्ब्बल्यकुक्षिरोगज्वरघ्नी च । वा.सू.१५अ. । "द्रवाधिका घना सिक्था चतुर्दशगुणे जले । सिद्धा पेया बुधैर्ज्ञेया... ।" "पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा ।" प.प्र.२ख. । आर्द्रके । আদা । प.मु. । शतपुष्पायाम् । श.च. । खञ्जमर्ष्ठे । मे. । कषाये । वै.निघ. ।

पेयु(यू)ष: । पुं, क्ली । नवप्रसूताया: गो: सप्तदिनाभ्यन्तरीणदुग्धे । গাঁজলা দুধ । "आसप्तरात्रप्रसवात् क्षीरं पेयुषमुच्यते ।" र.मा. । प्रत्यग्रघृते । वै.निघ. ।

पेर(रो)जम् । क्ली । स्वनामख्यातोपरत्नविशेषे । पेरोजा इति पारस्ये । तच्च भस्माङ्गहरितभेदेन द्विविधम् । गुणा:—अतिकषायं मधुरम् अतिदीपनं शूलादिहरं तत्संयोगेन स्थावरजङ्गमोभयविषविषं हन्यात्त । रा.नि.व.१३ ।

पेलम् । क्ली । अण्डकोषे । হোল । हे.च. । सूक्ष्मांशे । वै.निघ. ।

पेली (इन्) । पुं । घोटके । वै.निघ. ।

पेलुवास: । पुं । काखसरटे । वै.निघ. ।

पेशस्कृत् । पुं । कीटविशेषे । কুমীরে পোকা । वै.निघ. । पेशस्कृत् इति शब्दकल्पद्रुम: ।

पेशि: । स्त्री । डिम्बे । अम. । आढ़कादिद्विदले । वै.निघ. । आमादिशलाटौ । আমচুর আদি । खण्डीकृतार्द्रकशलाटौ । "हरितार्द्रकस्य शस्त्रकृत्तात्मा दीर्घाकारा अवयवा: पेशय: उच्यन्ते ।" वा.चि.७अ. ।

पेशी (षी) । स्त्री । जटामांस्याम् । रा.नि.व.१२ । मांसपिण्ड्याम् । মাংসপেশী । साकल्येन पञ्च पेशीशतानि भवन्ति । तासां चत्वारि शतानि शाखासु । कोष्ठे षट्षष्टि:, ग्रीवां प्रत्यूर्द्ध्वं चतुस्त्रिंशच्चेति । तत्र पादाङ्गुलिषु १५ । पदे १० । पादोपरिकूर्च्चसन्निविष्टा: १० । गुल्फयो: १० । गुल्फजान्वन्तरे २० । जानुनि ५ । ऊरौ २० । वङ्क्षणे १० । शतम् एवमेकस्मिन् सक्थनि भवन्ति । एतेनेतरसक्थिवाहू व्याख्यातौ । पायौ ३ । मेढ्रे १ । सेवन्यां १ । वृषणयो: २ । स्फिचो: १० । वस्तिशिरसि २ । उदरे ५ । नाभ्यां १ । पृष्ठोर्द्ध्वसन्निविष्टा: ५+५ । पार्श्वयो: ६ । वक्षसि १० । अक्षकांसौ प्रति समन्तात् ७ । हृदयामाशययो:

-१। यकृत्प्लीहोण्डुकेषु ६। ग्रीवायां ४। हन्वोः ८। काकलक-गलयोः २। तालुनि २। जिह्वायां १। ओष्ठयोः २। घोणायां २। नेत्रयोः २। कर्णयोः २। गण्डयोः ४। ललाटे ४। शिरसि १। इत्येवमेतानि पञ्च पेशीशतानि। "शिरास्नायुस्थिपर्व्वाणि सन्धयश्च शरीरिणां। पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः॥" स्त्रीणाञ्च विंशतिरधिकाः। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च, यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रः तासां प्रसृतेऽभ्यन्तरतो द्वे मुखाश्रिते वाह्ये च प्रवृत्ते द्वे। गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। सु.शा.५अ.। "यथार्थमुषणा युक्तो वायुः स्रोतांसि दारयेत्। अनुप्रविश्य पिशितं पेशीर्विभजते तथा। स्त्रीणामपि भवन्त्येताः किन्तु विंशतिरुत्तराः। गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि॥" भा.। पचिडिम्बे। अम.।

पेशीकोषः । पुं। अण्डे। डिम। अ.टी.।

पेश्यण्डम् । क्ली। मांसगोलके। वै.निघ.।

पेषणः । पुं, क्ली। त्रिधारस्नुहीवृचे। ৫তেকাঁটা সিজ্। खल्ले। क्ली। पीड़ने। चूर्णने। श.च.।

पेहिता । स्त्री। प्रसारण्यां। গন্ধভাদুলিয়া। वै.निघ.।

पैङ्गिः । पुं। ऋषिविशेषे। च.।

पैज(ञ्जु)षः । पुं। कर्णे। हे.च.।

पैठरम् । क्ली। स्थालीपक्वमांसादौ। अम.।

पैत्तः (त्तिकः) । पुं। तिलचुपे। তিল গাছ। प.सु.। पित्तसम्भवे रोगे। रा.नि.व.२०।

पैत्तिकी । स्त्री। योनिव्यापद्विशेषे। लक्षणं यथा—"यथास्वैर्दूषणैर्दुष्टं पित्तं योनिमुपाश्रितम्। करोति दाहपाकोषापूतिगन्धज्वरान्विताम्। भृशोष्णभूरिकुणपनीलपीतासितार्त्तवाम्। सा व्यापत् पैत्तिकी॥" वा.उ.३३अ.।

पैष्टी । स्त्री। विविधधान्यविकारजाते अस्लमद्ये। ৫ধনো মদ। एषा मादकत्वे हीनतमा। "पैष्टी पुनर्विविधधान्यविकारजाता ख्याता मदाधिकतयात्र च पूर्व्वपूर्व्वा।" गुणाः—कटूष्णा तीक्ष्णा मधुरा अतिदीपनी च। रा.नि.व.१४। "पैष्टी सन्दीपनी रुच्याकफक्लदातनाशिनी। पित्तला पाण्डुरोगाणां कारिणी बहुधा मता॥" अत्रि.१९अ.।

पैष्टिकम् । क्ली। पैष्टीमद्ये। वि.र.।

पोगण्डः । पुं। अपोगण्डे। दशवर्षीय बालक। इला.।

पोटगलः । पुं। नले। नल। रा.नि.व.८। खागड़े। थागड़ा। र.मा.। वदरवृचे। मत्स्यभेदे। मे.। वैकरञ्जजातीयसर्पविशेषे। अयं राजिलेन गोनस्यां वैपरीत्येन वा जातः। सु.कल्प.४अ.। काशतृणे। चिका.।

पोटा । स्त्री। स्त्रीपुंसलक्षणायां नार्य्याम्। हारा.। चुक्रिकायाम्। भा.।

पोटाहिका । स्त्री। गुञ्जायाम्। वै.निघ.।

पोटिकः । पुं। विस्फोटके। कश्चित्।

पोडुः । पुं। कपालास्थितले। रा.नि.व.१८।

पोतः (कः) । पुं। शिशौ। त्रैमासिकशिशौ। रा.नि.व.१८। दशवार्षिककरिणि। हे.च.।

पोतकी । स्त्री। उपोदिकायाम्। पूतौ, पूँई। भा.मि.४भ.गर्भ.चि.। श्यामाकपचिणि। रा.नि.व.१९।

पोताण्डः । पुं। अश्वस्य मुष्करोगभेदे। लक्षणं—"शूनौ पक्वौ तुरङ्गस्य मुष्कौ यस्य सवेदनौ। त्रिकस्तम्भेन युक्तस्य तस्य पोताण्डमादिशेत्॥" ज.द.५०अ.।

पोताधानम् । पुं। शिशुमीनपुञ्जे। মাছের পোনার ঝাঁক্। गुणाः—"पोताधानन्तु सर्व्वेषां सुस्निग्धं लघुरोचनम्।" राज.३प.।

पोतासः । पुं। कर्पूरविशेषे। ভীমসেনী। रा.नि.व.१२।

पोतिका । स्त्री। शताह्वाचुपे। रा.नि.व.४। मलवारदेशीयोपोदिकाविशेषे। मूलपोतिकायां। रा.नि.व.७।

पोत्रम् । क्ली। वज्रे। शूकरमुखाग्रभागे। ৫থোপ্না। मे.।

पोत्रायुधः । पुं। शूकरे। रा.नि.व.१९।

पौत्रिदंष्ट्राजम् । क्ली । शूकरदन्तजरवे । वै. निघ. ।

पौत्री (इन्) । पुं । शूकरे । अम. ।

पोथकी । क्ली । बालानां नेत्रवर्त्मजरोगविशेषे । लक्षणं—"कण्डूस्रावान्विता गुर्व्यो रक्तसर्षपसन्निभाः । पिडकाश्च रुजावत्यः पोथक्य इति संज्ञिताः ॥" सु.उ.३अ. ।

पोदिका । स्त्री । कलम्बीशाके । प.मु. ।

पोलः (कः) । पुं । कटिभेदे । পাছার পেলো । अ.टी.भ. ।

पोलिका (ली) । स्त्री । पिष्टकभेदे । পাংলা রুটী । त्रिका. । यथा—"कुर्यात् समितयातीव तन्वीं पर्पटिका ततः । स्वेदयेत्तनके तान्तु पोलिकां तां जगुर्बुधाः ।" गुणाः—मण्डकवत् । भाः ।

पोषयित्नुः । पुं । कोकिले । उणा. ।

पोष्टा (ष्टृ) । पुं । मूतिकरञ्जे । श.च. ।

पौगण्डम् । क्ली । पौगण्डावस्थायाम् । तच्च पञ्चाब्दात् दशमाब्दपर्य्यन्तम् । रा.नि.व.१८ ।

पौण्डरीयः (कः) । पुं, क्ली । प्रपौण्डरीकवृक्षे । পুণ্ডরিয়া গাছ । रा.नि.व.१२ ।

पौण्ड्र्यम् । क्ली । प्रपौण्डरीके । পুণ্ডরিয়া । रा.नि.व.१२ । स्थलपद्मे । वै.निघ. ।

पौण्ड्र(ण्ड्रि)कः । पुं । पुण्ड्रके । পুঁড়ি আখ । र.मा. । श.मा. । लावपर्ण्णिनि । वै.निघ. ।

पौतवम् । क्ली । परिमाणे । अ.टी.भ. ।

पौतिनासिक्यम् । क्ली । नासिकारोगे । पीनसे । পীনস রোগ । निदा. ।

पौत्तिकम् । क्ली । पुत्तिकानाममक्षिकाभिरायोजिते घृतवर्णमधुनि । পৌত্তিক মধু । जटा. । "अत्रजा मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः । तज्जातं मधु धीमद्भिः पौत्तिकं समुदाहृतम् ॥" गुणाः—रूक्षम् उष्णं रक्तपित्तदाहघ्नं घृतवर्णञ्च । रा.नि.व.१४ ।

पौत्तिकशर्करा । स्त्री । पौत्तिकमधुकृतशर्करायाम् । गुणाः—तन्मधुतुल्याः । रा.नि.व.१४ ।

पौनर्णवः । पुं । सन्निपातज्वरभेदे । लक्षणं—"उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तात् नितान्तमुत्क्षिपति । तं पौनर्णवजुष्टं विचित्रकष्टं विजानीयात् ॥" भलुकीतन्त्रम् । [१अ. ।

पौपिकः । त्रि । अपूपनिर्म्माणदक्षे । सु.कल्प.

पौरम् । क्ली । सुगन्धतृणे । রামকর্পূর । अम. । पुं । बोले । नखीनामगन्धद्रव्ये । वै.निघ. ।

पौरसः । पुं । नखीनामगन्धद्रव्ये । वै.निघ. ।

पौरुषम् । क्ली । शुक्रधातौ । रा.नि.व.१८ । मेहने । सु.नि.३अ. । ऊर्द्धविस्तृतदोःपाणिपुरुषपरिमाणे । त्रिका. । इह जगति कृते कर्म्मणि । "तत् पौरुषं यदिह कर्म्म दृष्टम् ।" च.शा.२अ. ।

पौरुषः । पुं । नरे । पुन्नागवृक्षे । त्रिका. ।

पौरोगवः । पुं । पाकशालाध्यक्षे । अम. ।

पौलिः । स्त्री । पोलिकायाम् । पाकावस्थागतयवादौ । अम. ।

पौषः । पुं । वर्षस्य नवमे मासे । अम. ।

पौष्करम् । क्ली । पुष्करमूले । পুষ্করমূল । कुष्ठभेदे । কুড়বিশেষ । रा.नि.व.६ । मद.व.१ । सि.यो.यक्ष्म.चि.त्रयोदशाङ्गगुग्गुलौ । "पौष्करातिविषे ।" सि.यो.कफज्वरावलेहे । "कट्फलं पौष्करं शृङ्गी ।" च.द.कफज्व.चि.निम्बादिः । "शटीभूनिम्बपौष्करम् ।" पद्ममूले । वृहज्जीरकाद्यमोदके । एरण्डमूले । वै.निघ.श्वास.चि.दशमूलयवागूवाम् । स्थलपद्मे । वै.निघ. ।

पौष्करमूलम्, **पौष्कराह्वयम्** } क्ली । पुष्करमूले । मद.व.१ ।

पौष्टिकम् । क्ली । पुष्टिकरौषधे । पुष्टिकरद्रव्यगणे । यथा—"चतुर्द्धा तु तुगाक्षीरी चन्द्रशूरोऽष्टवर्गकः । द्वीपान्तरवचा विल्वं त्वक् पत्रं नागकेशरम् । तालीशपत्रं त्वक्क्षीरी त्वचा गोक्षुररोहिणी । कपिकच्छूतोयवल्लीभूफलं पौष्टिको गणः ॥" अर्क.चि. । चौरकाले गात्राच्छादनवस्त्रभेदे । কাবাই । गुणाः—आयुष्यत्वं धनचिह्नत्वं शुचित्वं रूपविराजनत्वञ्च । राज. ।

पौष्पम् । क्ली । पुष्परेणौ । वै.निघ. ।

पौष्प(ष्पि)कम् । क्ली । पुष्पाञ्जने । रा.नि.व. १३ । वै.निघ. ।

प्रकरम् । क्ली । अगुरुकाष्ठे । मे. ।

प्रकर्षी । स्त्री । शूकरोगे । निदानम् ।

प्रकाण्डः । पुं । तरोः स्कन्धपर्य्यन्तभागे । गुँड़ि । रा.नि.व.२ ।

प्रकाण्डरः । पुं । वृचे । श.च. ।

प्रकाश(क)म् । क्ली । कांस्ये । काँसा । हे.च. ।

प्रकाश(क)ज्ञाता । पुं । कुक्कुटे । श.च. ।

प्रकीर्णः । पुं,क्ली । पूतिकरञ्जे । नाटा करञ्जा । रा.नि.व.६ । चामरे । त्रिका. । [मे. ।

प्रकीर्णकम् । क्ली । चामरे । अम. । पुं । अश्वे ।

प्रकीर्य्यः (कः) । पुं, स्त्री । पूतिकरञ्जे । नाटा करञ्जा । र.मा. । वा सू.१५अ. । "श्वेतवाहप्रकीर्य्या ।" रीठाकरञ्जे । रिठा । रा.नि.व.६।२३ । कण्टकीकरञ्जे । "कण्टकीविटपकरञ्जे ।" सु.सू.३६अ.कफशमने । ड. । च.सू.१अ. फलिनीव. ।

प्रकुञ्चः । पुं । पले । ८ तो. । प.प्र.१ख. ।

प्रकुलम् । क्ली । सुन्दरदेहे । त्रिका. ।

प्रकृतिः । स्त्री । शक्तौ । शिश्ने । योनौ । त्रिका. । आहारौषधद्रव्याणां स्वाभाविके गुर्व्वादिगुणयोगे । च.चि.१अ. । आकाशादिपञ्चतन्मात्रं बुद्धिः मूलप्रकृतिरहङ्कारश्चेत्यष्टमहाभूतसमुदायरूपे कारणे । च.शा.१अ. । अष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम । महत्तत्त्वादयः सप्त महानहङ्कारः पञ्चतन्मात्रञ्चेति । प्रकृतिर्महानहङ्कारः पञ्च तन्मात्राणीति अष्ट प्रकृतयः । प्रकृतिपुरुषसाधर्म्यम्—अनादित्वम् अनन्तत्वम् अलिङ्गत्वं नित्यत्वं सर्व्वगतत्वञ्च । वैधर्म्यं यथा—सा च अचेतना त्रिगुणा वीजधर्म्मिणी प्रसवधर्म्मिणी अमध्यस्थधर्म्मिणी चेति । पुरुषस्तु तद्विपरीतधर्म्मेति । तस्या गुणाः—सत्त्वरजस्तमांसीति । भा.पू.१भ. । स्वभावे । वातादिभेदेन प्रकृतयः सप्त । "शुक्रशोणितसंयोगे यो दोषस्तूत्कटो भवेत् । प्रकृतिर्जायते तेन...... ॥" सु.शा.४अ. । "शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयान्तरे । यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता ॥" तेषु—जागरूकोऽल्पकेशश्च वातप्रकृतिः । अकालपलितादिः पित्तप्रकृतिः । श्यामकेशादिः श्लेष्मप्रकृतिः । एवं द्विरूपादिदर्शने द्विप्रकृतिः । वा. । [च.सू.१५अ. ।

प्रकृतिभोजनम् । क्ली । स्वाभाविकाहारे ।

प्रकृतिवर्णः । त्रि । गात्रसवर्णे । च.सू.१८अ. ।

प्रकृतिविघातः । पुं । प्रकृतेर्विकृतिजनकोपयोगे । स च कटुतिक्तकषायचारोष्णानां द्रव्याणामुपयोगरूपः । यच्चान्यदपि किञ्चित् श्लेष्मपुरीषप्रत्यनीकभूतं तत्स्यादिति । च.वि.७अ. ।

प्रकोथः । त्रि । पूतिभावापन्ने । पचा । "प्रकोथोदकावगाहनात् ।" सु.चि.२२अ. ।

प्रकोपः (नम्) । पुं, क्ली । क्षोभे । चाञ्चल्ये । वै.निघ. । वातादीनां सङ्क्षोभहेतौ । ते च बहुधा तत्र वातस्य प्रकोपनं बलवद्विग्रहादि । पित्तस्य क्रोधशोकभयादि । कफस्य दिवास्वप्नादि । पित्तप्रकोपनमेव पित्तस्येति । ऋतुभेदे वातादिप्रकोपः यथा—"वर्षात्रायुः कुप्यतेऽन्तः शरत्सु लीनो वायुः कुप्यते पित्तरोगे । लीयेत् पित्तं शैशिरे श्लेष्मकुञ्जे हेमन्ते वा चीयमानस्तथापि । कोपं याति श्लेष्मरोगो वसन्ते तस्माच्छान्तिः श्लेष्मरोगस्य चोष्णे । पित्तं याति कोपितां ग्रीष्मकाले दृष्टा शान्तिः पैत्तिकी वार्षिके च ॥" अथ वायुप्रकोपः—"तथा वातमूत्रपुरीषस्य रोधात् कषायातिशीतान्निशाजागरेषु । व्यवायेऽथ वाहश्रमाद्यातिभुक्त्याध्वनि प्रायशो भाषणेनातिभीत्या । सुरुक्षैरतिचारतिक्तैः कटुभिस्तथा दोलाश्वकोष्ट्रकैर्यानमात्रे । रथे वा खरे कुञ्जरे मन्दिरे वा भवेन्मारुतस्य प्रकोपो नरस्य । सुशीते दिने दुर्द्दिने स्नानपीते पराह्णे निशाजागरे वासरे च । वर्षासु वै केवलं याति कोपं मरुत्सेविते याति वै भुक्तजीर्णे । मसूराः कलायाश्च निष्पावकाश्च महामाषशुभ्रा यवाश्चामलाः स्युः । सहा चामला कृष्णकाद्याः प्रदिष्टा हिमाः कङ्गुनीवारकाश्च शाल्याः । तथा कोरदूषश्च श्यामाक एतैः कृतं चौदनञ्च यवागूस्तं वा । कलिङ्गानि वालूकचिल्लीकपूत्यः पलाण्डुस्तथा गृञ्जनं कन्दशाकम् । इमान् सेवितात्यर्थमेति प्रकोपं समीरस्य चोक्तः सुरासम्भवस्तु । अतो यत्नतो रक्षणीयं मनुष्यैः शुभं वेहसे त्वं सदा रोगशान्तिम् ॥" अथ पित्तप्रकोपः—"अत्युष्णकट्वम्लरूक्षैर्विदाहैः द्रव्यैः ससिन्धुसुरासेवनेन । घर्म्मेण क्रोधेन वा स्वेदनेन व्यवायेन वा

याति कोपञ्च पित्तम्। कुलत्थाढ़कीयूषमूलार्कशिग्रुमटीसर्षपाराजिकाशाकमेर। निशाजागरेणापि युक्ते श्रमे वा घनान्ते शरत्सु प्रकोपः प्रदिष्टः। अ-ह्नेन वा चोष्णकाले शरत्सु भृशं वासरे मध्यमे वा निशीथे। जीर्णे रसे भुक्तमात्रे प्रकोपः प्रदिष्टः कोविदैः स्यात्पित्तकोपः॥" अथ कफप्रकोपः—"निशाजागरे वासरे वातिनिद्रासुशीतोदकासेवने शीतले वा। पयःपानपीयूषैक्षुभिस्तिलैस्तु तथा गरश्रनैः कन्दशाकैरथापि। अतिस्निग्धसंसेवने भोजने च प्रदिष्टः कफस्य प्रकोपो वसन्ते। दिनान्ते प्रभाते निशान्ते नरस्य प्रकोपः प्रदिष्टोऽप भुक्ते न जीर्णे। प्रदिष्टो बुधैः कोविदैरेव रोगः कफोत्पत्तिजन्यो हि कष्टप्रयुक्तः। सशीतेऽथवा शीतकाले निशान्ते नरस्य प्रकोपः प्रदिष्टोऽपि भुक्तेः। न जीर्णे प्रदिष्टः सुधी रोगवेगः निदानं कफस्येति चोक्तं सुधीभिः॥" अथ द्वन्द्वजप्रकोपः—"यदा विपर्य्यासगते ऋतौ च प्रकोपनं यस्य यथा प्रदिष्टं। तत्सेवमानस्य नरस्य रोगः स्याद्द्वन्द्वजो नाम विकारकारी। यस्मिन् ऋतौ वातविकार उक्तस्तस्मिन् यदि श्लेष्मविकोपनानि। संसेवते वा मनुजस्तदास्य भवेत् प्रकोपः कफपित्तयोश्च॥ यस्मिन् मरुत्कुप्यति सेवते यः पित्तस्य कोपप्रकराणि यानि। विपर्य्ययो वा ऋतुधान्ययोश्च स पित्तवातप्रभवस्तदा स्यात्॥" अथ सन्निपातोत्पत्तिः—"विपर्य्यासगते काले रसे विपरिसेविते। तदा स्यात् सन्निपातो हि रोगोपद्रवकारकः॥" इति। अत्रि.५अ। [१८।

प्रकोष्ठः । पुं। कूर्परपाणिमध्यभागे। रा.नि.व.

प्रक्रिया । स्त्री। औषधादिक्रियायाम्। चिकित्सायाम्।

प्रक्लिन्नः । त्रि। अतिक्लेदयुक्ते। [रोगे। भा.।

प्रक्लिन्नवर्त्मा । पुं। नेत्ररोगविशेषे, क्लिन्नवर्त्म-

प्रक्लेदः । पुं। आर्द्रतायाम्। भा.४भ.ना.रो.चि.। "प्रक्लेदमायाति च धूप्यते च।" [वा.चि.६अ.।

प्रक्वथितः । त्रि। शृते। प्रमथ्यारूपेण शृते।

प्रखरः । पुं। सन्नाहे। त्रिका.। कुक्कुरे। अश्वतरे। मे.।

प्रगण्डः । पुं। कूर्परांसमध्यभागे। कनुई हइते बगल पर्य्यन्त। रा.नि.व.१८।

प्रगतजानुः (कः) । त्रि। दूरगतजानौ।

प्रगन्धः । पुं। पर्पटके। रा.नि.व.५।

प्रग्रहः । पुं। कृतमालवृक्षे। मे.। सु.कल्प.७ अ.। तुलासूत्रे। अम.। हस्ते। सुवर्णे। वै.निघ.। कर्णिकारवृक्षे। रा.नि.व ६।

प्रग्राहः । पुं। तुलासूत्रे। मे.।

प्रघणः । पुं। ताम्रपात्रे। लौहमुद्गरे। मे.।

प्रघनः । पुं। मुद्गजातिभेदे। वै.निघ.।

प्रचण्डः । पुं। शुक्लकरवीरे। मे.। त्रि। अत्युष्णे।

प्रचण्डमूर्त्तिः । पुं। वरुणवृक्षे। श.च.।

प्रचण्डा । स्त्री। श्वेतदूर्व्वायाम्। रा.नि.व.८।

प्रचयः । पुं। उच्चये। भा.।

प्रचलः । पुं। मयूरे। वै.निघ.। (कः)। सौम्यकीटविशेषे। सु.कल्प.८अ.।

प्रचला । स्त्री। सरटे। गिरगिटा। वै.निघ.।

प्रचलाकः । पुं। सर्पे। मयूरपुच्छे। मे.। सु.चि.१८अ.।

प्रचलाकी (इन्) । पुं। सर्पे। मयूरे। त्रिका.।

प्रचलाङ्गः । पुं। मयूरशिखायाम्। वै.निघ.।

प्रचलितः । पुं। सद्योव्रणविशेषे। वै.निघ.।

प्रचारः । पुं। अश्वस्य श्लैष्मिकाक्षिरोगे। लक्षणं—"प्रच्छादयति यद्दृष्टिं मांसं पर्य्यन्तवर्द्धितम्। प्रचारकाख्यं तं विद्यान्नेत्ररोगं कफान्वितम्।" ज.द.३० अ.।

प्रचेतसी । स्त्री। कट्फलवृक्षे। रा.नि.व.६।

प्रचेलम् । क्ली। पीतचन्दने। श.च.। पीतमुद्गे। वै.निघ.।

प्रचेलकः । पुं। अश्वे। श.मा.।

प्रचेलुकः । पुं। मानभेदे। पालि। त्रिका.।

प्रचोद(दि)नी । स्त्री। कण्टकार्य्याम्। अम.। दुरालभायाम्। वै.निघ.।

प्रच्छर्द्दनम् । क्ली। वमने। भैष.।

प्रच्छर्द्दिका । स्त्री। वान्तौ। हे.च.।

प्रच्छादनम् । क्ली। नेत्रच्छदे। ज.द.२अ.। उत्तरीयवस्त्रे। हे.च.।

प्रच्छानम् । क्ली । छेदने, रक्तस्रावे । सु.कल्प. १अ.। सु.चि.क्षुद्री.चि. "प्रच्छानैर्वा जलौकाभिः।"

प्रजननम् । क्ली । गर्भधारणे । योनौ । मे. ।

प्रजल्पः । पुं । अतिभाषणे । वै.निघ. ।

प्रजाता । स्त्री । प्रसूतायाम् । अम. ।

प्रजादा । स्त्री। पुत्रदात्रीलतायाम्। रा.नि.व.४।

प्रजादानम् । क्ली । रौप्ये । श.च. ।

प्रजाहितम् । क्ली । जले । श.मा. । [१६ ।

प्रज्ञविप्रियः । पुं । षष्टिकधान्ये । रा.नि.व.

प्रज्ञापराधः । पुं । अहितसेवनातिव्यवाया दौ । तदुक्तं —"धीधृतिस्मृतिविभ्रष्टः कर्म्म यत् कुरुतेऽशुभम् । प्रज्ञापराधं तं विद्यात् सर्व्वदोष-प्रकोपनम् । कर्म्मकालातिपातश्च मिथ्यारम्भश्च क-र्म्मणाम् । ज्ञातानां स्वयमर्थानामहितानां निषेव-णम् ।" च. । [प.मु. ।

प्रणा(ना)लसः । पुं । जीवशाके । वास्तूके ।

प्रणालिका (ली) । स्त्री । जलनिर्गममार्गे । द्वारा. । नस्यनलिकायां । नस्य दिवार नलि । च.द.नस्याधिकारे ।

प्रतना (नी) । स्त्री। गोजिह्वायाम् । गोजि-ह्वा शाक । रा.नि.व.४ । वाय्यालके । वै.निघ. ।

प्रतमकः । पुं । श्वासरोगभेदे । तमकश्वास । लक्षणं—"ज्वरमूर्च्छापरीतस्य विद्यात्प्रतमकन्तु तम् । उदावर्त्तरजोजीर्णक्लिन्नकायनिरोधजः । तमसा वर्द्धतेऽर्थं शीतैश्चाशु प्रशाम्यति । मज्जतस्त-मसीवास्य विद्यात् प्रतमकं तु तम् ॥" मा.नि. ।

प्रतरः (सन्धिः) । पुं । ग्रीवोर्द्धगतसन्धौ । स च ग्रीवापृष्ठदण्डयोः सन्धिः । भा. । सु.शा.५अ. ।

प्रतलः । पुं । संहतविस्तृताङ्गुलिकरे रा.नि.व. १८ । [अ. । See सोमः ।

प्रतानवान् । पुं । सोमलताभेदे । सु.चि.२६

प्रतानिका (निनी) । स्त्री । प्रसारण्याम् । गन्धभादालिया । शारिवायाम् । अनन्तमूल । रा. नि.व.५।१२ । [रा.नि.व.१० ।

प्रतापः (वान्) । पुं । अर्कवृक्षे । शुक्लार्के ।

प्रतापतपनः (रसः) । पुं । सन्निपातज्वरा-धिकारे रसः । "गन्धकं हिङ्गुलं सूतं तालकं लौह-टङ्कणे । खर्परं माचिकाचारं मञ्जिष्ठां हिज्जलं समं । रसेन मर्द्दितम्पिण्डं निर्गुण्डीहस्तिशुण्डयोः । अष्टयामम्पचेत्कूप्यां निरुध्य सिकताह्वये । ततः सिद्धं समादाय रक्तिकामार्द्रकेण च । सेवेत ...... ॥" रस.कौ. । [अम. ।

प्रतापसः । पुं । श्वेतार्के । শ্বেত আকন্দ ।

प्रतिकर्म्म । क्ली । प्रतिक्रियायाम् । उपाये । सु.कल्प.५अ. । प्रसाधने । अम. ।

प्रतिकीर्णः । त्रि । मलादिव्याप्ते । च.इ. ।

प्रतिखुरः । पुं । मूढ़गर्भभेदे । "निःसृतहस्त-पादशिराः कायसङ्गी प्रतिखुरः ।" सु.शा.८अ. ।

प्रतिगन्धा । स्त्री । सोमराज्याम् । रा.नि.व.४

प्रतिघः । पुं । मूर्च्छायाम् । श.र. ।

प्रतिघ्नम् । क्ली । अङ्गे । श.च. ।

प्रतिच्छाया । स्त्री । जलादर्शातपादिषु प्रति-फलितशरीरच्छायायाम् । প্রতিবিম্বিত শরীরের ছায়া । "प्रतिप्रमाणसंस्थाना जलादर्शातपादि-षु । छाया या सा प्रतिच्छाया या च वर्णप्रभाश्र-या ॥" च.इ.७अ. ।

प्रतिजिह्वा (ह्विका) । स्त्री । मूलजिह्वा-याम् । আল জিহ্বা । रा.नि.व.१८ । त्रिका. ।

प्रतिज्ञा । स्त्री । साध्यवचने । "प्रतिज्ञा नाम साध्यवचनं, यथा नित्यः पुरुष इति ।" च.वि. ८अ. ।

प्रतिज्ञाहानिः । पुं । पूर्व्वप्रतिगृहीतायाः प्रतिज्ञायाः पर्य्यनुयोगेन परित्यागे । च.वि.८अ ।

प्रतितन्त्रसिद्धान्तः । पुं । सिद्धान्तविशेषे । See सिद्धान्तः ।

प्रतितूणी । स्त्री । वातव्याधिविशेषे । लक्षणं —"गुदोपस्थोत्थिता सैव प्रतिलोमं विधाविता । वेगैः पक्वाशयं याति प्रतूणी चेह सोच्यते ॥" मा.नि । "तूण्याञ्च प्रतितूण्याञ्च प्रशस्ताः स्नेहव-स्तयः । पिबेद्वा स्नेहलवणं पिप्पल्यादिमथाम्बुना । उष्णेन रामठक्षारप्रगाढ़मथवा घृतम् ॥" सु.नि. १अ. । [रा.नि.व.७।

प्रतिपत्त्रफला । स्त्री । क्षुद्रकारवेल्लिकायाम् ।

प्रतिपर्णशिफा । स्त्री। द्रवन्त्याम् । रा.नि.व.५।

प्रतिपिष्टः । त्रि। अस्थिद्वयपिष्टे, उत्पिष्टे। भा म.१भ.। [प्रद.चि.।

प्रतिबला । स्त्री। अतिबलायाम् । चि.क्र.क.

प्रतिमर्षः । पुं। शिरोवस्तिविशेषे। स चा बालं प्रयोज्यः। "जन्मप्रभृति बालस्य प्रतिमर्षो विधीयते।" रत्नमालासंग्रहः। "ईषदुच्छिङ्घनात् स्नेहो यावद्वक्त्रं प्रपद्यते। नस्ये निषिक्तन्तं विद्यात्प्रतिमर्षं प्रमाणतः। प्रतिमर्षश्च नस्यार्थं करोति न च दोषभाक्॥" प.प्र.४ख.। तत्र चत्वारः षट् अष्टौ वा बिन्दवः यथाबलं शिरोविरेकस्नेहस्य मात्रा। सु.चि.४०अ.वा.उ.२अ.। स चतुर्दशसु कालेषूपादेयः। तद्यथा—"तल्पोत्थितेन प्रचालितदन्तेन गृहान्निर्गच्छता व्यायामव्यवायाध्वपरिश्रान्तेन मूत्रोच्चारकवलाञ्जनान्ते भुक्तवता छर्द्दितवता दिवास्वप्नोत्थितेन सायञ्चेति। तल्पोत्थितादौ यथाक्रमं गुणाः—तल्पोत्थितेनासेवितः प्रतिमर्षः रात्रावुपचितनासास्रोतोगतं मलमुपहन्ति मनःप्रसादञ्च करोति। प्रचालितदन्तेनासेवितः दन्तानां दृढ़तां वदनसौगन्ध्यञ्चापादयति। गृहान्निर्गच्छता सेवितः नासास्रोतसः क्लिन्नतया रजोधूमो वा नाबाधते। व्यायाममैथुनात्परिश्रान्तेन सेवितः श्रममुपहन्ति। मूत्रोच्चारान्ते वा सेवितः दृष्टिगुरुत्वमपनयति। कवलाञ्जनान्ते दृष्टिं प्रसादयति। अभुक्तवता सेवितः स्रोतसां विशुद्धिं लघुताञ्चापादयति। वान्तेनासेवितः स्रोतोविलग्नं श्लेष्माणमपोह्य भक्तकाङ्क्षामापादयति। दिवास्वप्नोत्थितेनासेवितः निद्राशेषं गुरुत्वं मलञ्चापोह्य चित्तैकाग्र्यं जनयति। सायञ्चासेवितः सुखनिद्राप्रबोधञ्चेति।" सु.चि.४०अ.।

प्रतिमा (नम्) । स्त्री, क्ली। करिणो दन्तद्वयमध्यवर्त्तिशुण्डाभागे। गजदन्तबन्धे। त्रिका.।

प्रतिमूषिका । स्त्री। छुछुन्दर्य्याम् । वै.निघ.।

प्रतियत्नः । पुं। रचनायाम् । त्रिका.।

प्रतिरम्भः । पुं। सन्तापे। निदा.।

प्रतिलोमः । पुं। विलोमे।

प्रति(ती)वापः । पुं। कषाये चूर्णादिप्रक्षेपे। र.चि.३अ.। कल्के। सु.चि.२३अ.। धातुभस्मीकरणे। गलितस्य धातोः द्रव्यान्तरेणावचूर्णने। अ टी.स्वा.। पानीयौषधविशेषे। च.द.विद्र.चि.।

प्रतिविम्बदर्शकः । पुं। दर्पणे। वै.निघ.।

प्रतिविषा । स्त्री। अतिविषायाम् । আতইচ। च.द.अ.सा.चि.। "हिङ्गुप्रतिविषाभयाः।"

प्रतिविष्णुकः । पुं। मुचुकुन्दवृक्षे। रा.नि.व.१०। क्षीरिणीभेदे। वै.निघ.।

प्रतिवीजम् । क्ली। तारनागाभ्रहेमकृतपारदनिबन्धनद्रव्ये। "नागाभ्रं वाहयेत्तारे हेम्नि च द्वादशे गुणे। प्रतिवीजमिदं श्रेष्ठं पारदस्य निबन्धनं॥" र.चि.३अ.।

प्रतिश्या (श्या) (यः) । स्त्री,पुं। नासारोगविशेषे। तस्य निदानम् —"अवश्यायानिलरजोभाष्यातिस्वप्नजागरैः। नीचात्युच्चोपधानेन पीतेनान्येन वारिणा। अत्यम्बुपानरमणच्छर्दिवाष्पग्रहादिभिः। क्रुद्धा वातोल्वणा दोषा नासायां स्यानतां गताः। जनयन्ति प्रतिश्यायं वर्द्धमानं क्षयप्रदम्। तत्र वातात् प्रतिश्याये मुखशोषो भृशक्षवः। घ्राणोपरोधनिस्तोदन्तशङ्खशिरोव्यथाः। कीटका इव सर्पन्ति मन्यते परितो भ्रुवौ। स्वरसादश्चिरात् पाकः शिशिराच्छकफस्रुतिः। पित्तात्तृष्णाज्वरघ्राणपिटिकासम्भवभ्रमाः। नासाग्रपाको रूक्षोष्णताम्रपीतकफस्रुतिः। कफात्कासोऽरुचिः श्वासो वमथुर्गात्रगौरवम्। माधुर्य्यं वदने कण्डूः स्निग्धशुक्लघना स्रुतिः। सर्व्वजो लक्षणैः सर्व्वैरकस्माद्वृद्धिशान्तिमान्। दुष्टं नासाशिरो प्राप्य प्रतिश्यायं करोत्यसृक्। उरसः सुप्तता ताम्रनेत्रत्वं श्वासपूरिता। सर्व्व एव प्रतिश्याया दुष्टतां यान्त्युपेक्षिताः।" वा.उ.१९अ.। रस.र.बाल.चि.। "प्रतिश्याश्वासकासके।" भा.म.१भ.श्लेष्म.ज्व.चि.। "प्रतिश्यायोऽरुचिः कासः।" पीनसरोगे। निदा.।

प्रतिष्ठा । स्त्री। जनोपादेयतयावस्थाने। च.सू.१अ.।

प्रतिष्ठापना । स्त्री। परप्रतिज्ञायाः प्रतिविपरीतार्थायाः स्थापनायाम्। यथा—अनित्यः पुरुष इति। च.वि.८अ.। [वै.निघ.।

प्रतिसमाधानम् । क्ली। रोगमुक्तकरणे।

प्रतिसरः । पुं । व्रणयुङ्गौ । प्रभातकाले । वै. निघ. ।

प्रतिसारः (णम्) । पुं, क्ली । लवणैः कटुचूर्णैश्च व्रणघर्षणे । "लवणैः कटुचूर्णैश्च घृष्यते यत्नवं बुधैः । प्रतिसारस्ततः प्रोक्तः······॥" ज.द. १२अ. । घर्षणे । सु.चि.२२अ. । दन्तजिह्वामुखानां चूर्णकल्कावलेहैरङ्गुल्या शनैः घर्षणे । "वैरस्यं मुखदौर्गन्ध्यं मुखशोषं तथा तृषाम् । अरुचिं दन्तपीड़ाञ्च निहन्ति प्रतिसारणम् ॥" भा. ।

प्रतिसारी (इन्) । त्रि । सारकद्रव्यमात्रे । वै. निघ. ।

प्रतिसूर्य्यः (कः) । पुं । सरटे । त्रिका. । विश्व. । तन्नामकगोधिरकजातौ । सु.कल्प.८अ. ।

प्रतिसोमा । स्त्री । महिषवल्लीलतायाम् । रा. नि.व.३ । लघुसोमलतायाम् । वै.निघ. ।

प्रति(ती)हासः । पुं । करवीरवृक्षे । करवीरश्छ । रा.नि.व.१० । अम. । शुक्लकरवीरे । वै. निघ. ।

प्रतिक्षुत् । स्त्री । छिक्कायां । हेंचि । वै.निघ.।

प्रतीकः । पुं । शरीरावयवे । रा.नि.व.१८ । पटोले । भा.पू.१भ.शा.व. । विलंभे । मे. ।

प्रतीकारः । पुं । चिकित्सायाम् । श.मा. ।

प्रतीनाहः । पुं । कर्णरोगे । लक्षणम्—"वातेन शोषितः श्लेष्मा स्रोतो लिम्पेत्ततो भवेत् । रुग्गौरवं पिधानञ्च स प्रतीनाहसंज्ञकः ॥" वा.उ. १७अ. ।

प्रतुण्डकः । पुं । जीवकशाके । वै.निघ. ।

प्रतुदः । पुं । श्येनकाकादिपक्षिजातौ । ते प्रतुद्य निष्कृष्य भक्षयन्तीति प्रतुदसंज्ञां प्राप्ताः । तन्मांसगुणाः—सद्यःस्वादु गुरूष्णं स्निग्धं बल्यं पित्तदाहरक्तकरञ्च । रा.नि.व.१७। एतदर्कगुणाः: —"कफपित्तहरो ग्राही बद्धविण्मूत्रको भवेत् ।" अर्क.चि. ।

प्रतूणी । स्त्री । See प्रतितूणी।

प्रतोली । स्त्री । ग्रीवाभिद्वयोर्व्रणबन्धनभेदे । सु. सू.१८अ. । लक्षणं—"सुतोली पुटिका प्रोक्ता जालवद्बहुरन्ध्रका ।" इति भानुमती,टी. । "कोपीनाकारा मत्स्यधारणजालयन्त्रवत् बहुच्छिद्रा सुतोली प्रतोली वा ।" वा. ।

प्रत्यक्पर्णी । स्त्री । रक्तापामार्गे । भा.पू.१भ. । द्रवन्त्याम् । रा.नि.व ५ ।

प्रत्यक्पुष्पी । स्त्री । अपामार्गक्षुपे । रा.नि.व. ४ । सु.सू ४३अ । च.सू.१४अ. । वा.सू १५अ. अर्कादिः । "प्रत्यक्पुष्पी पीततैलोदकीर्य्या ।"

प्रत्यक्श्रेणी । स्त्री । दन्त्याम् । अम. । च.सू.१अ. । मुतश्रेणीक्षुपे । रा.नि.व.४ । द्रवन्तीक्षुपे । रा.नि.व.५ । आखुकर्ण्याम् । इन्दूरकाणी । हिं मूषाकाणी । रा.नि.व.३ । क्षणदन्तीक्षुपे । र.मा.।

प्रत्यग्गन्धा । स्त्री । स्वर्णयूथिकायाम् । वै. निघ. ।

प्रत्यङ्गम् । क्ली । अङ्गावयवेषु । तानि मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तिग्रीवाः इत्येता एकैकाः । कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनवृषणपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विंशतिरङ्गुलयः । एष प्रत्यङ्गविभागः । तस्य पुनः सङ्ख्यानम् । यथा—त्वचः कलाः धातवः मलाः दोषाः यकृत् प्लीहा फुसफुसः उण्डुकः हृदयम् आशयाः अन्त्राणि वृक्कद्वयं स्रोतांसि कण्डराः जालानि कूर्चाः रज्जवः सेवन्यः सङ्घाताः सीमन्ताः अस्थीनि सन्धयः स्नायवः पेश्यः मर्म्माणि शिराः धमन्यः योगवहानि च । विशेषाः पर्य्यायेषु द्रष्टव्याः । सु.शा.५अ. ।

प्रत्यङ्गिरा । स्त्री । कण्टकशिरीषवृक्षे । "पिबति यः प्रत्यङ्गिरासम्भवम् ।" च.द.भैष.विष.चि. ।

प्रत्यञ्जनम् । क्ली । अञ्जनेन नेत्रप्रसाधने । च.द. । [निघ. ।

प्रत्यनीकः । त्रि । प्रतिकूले । असाध्ये । वै.

प्रत्यनुयोगः । पुं । अनुयोगस्यानुयोगे । यथा —"अनुयोगस्य पुनः को हेतुः इति।" च.वि.८अ.।

प्रत्ययः । पुं । हेतौ । भा.। रन्ध्रे । शब्दे। अम.। त्रि । स्वादौ । हे.च. । [नि.व.२० ।

प्रत्यवसानम् । क्ली । भोजने । र.मा. । रा.

प्रत्यश्मा (न्) । पुं । गिरिमृत्तिकायाम् । गेरिमाटी । त्रिका. ।

प्रत्यष्ठीला । स्त्री । वातव्याधिविशेषे । लक्षणं यथा — "एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीं । प्रत्यष्ठीलामिति वदेत् जठरे तिर्य्यगुत्थिताम् ॥" मा.नि. । सु.नि.१अ. । "प्रत्यष्ठीलाष्ठीलकयोः गुल्मेऽभ्यन्तरविद्रधौ । क्रियाहिङ्ग्वादिचूर्णञ्च शस्यतेऽत्र विशेषतः ॥"

प्रत्यक्षम् । क्ली । इन्द्रियग्राह्ये । प्रम. । तत्र चतुर्विधं चाक्षुषादिभेदेन । "प्रत्यक्षं नाम तद्यदात्मना पञ्चेन्द्रियैश्च स्वयमुपलभ्यते । तत्रात्मप्रत्यक्षाः सुखदुःखेच्छाद्वेषादयः । शब्दादयस्तु इन्द्रियप्रत्यक्षाः ।" च.वि.८अ. ।

प्रत्याध्मानः । पुं । वातव्याधिविशेषे । लक्षणम् — "विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितं । प्रत्याध्मानं विजानीयात्कफव्याकुलितानिलम् ॥" मा.नि. । सा. चिकित्सा — "प्रत्याध्माने समुत्पन्ने कुर्य्याद्वमनलङ्घने । दीपनादि प्रयुञ्जीत पूर्व्ववद्वस्तिकर्म्म च ॥"

प्रत्यानाहः । पुं । आनाहभेदे । विदा. ।

प्रत्युद्गारः । पुं । वायुजन्यरोगभेदे । वै.निघ. ।

प्रत्यु(त्यू)षः । पुं, क्ली । प्रभाते । अ.टी.भ. ।

प्रथमकुसुमः । पुं । शुक्लमरुवकवृक्षे । वै.निघ. ।

प्रथमनवनीतम् । क्ली । प्रसवात् शतदिनान्तरजातनवनीते । वै.निघ. ।

प्रथितालुकी । स्त्री । रक्तालुभेदे । भा. ।

प्रदरः । पुं । (Fluor albus.) तन्नामकस्त्रीरक्तादिस्रावरोगे । প্রদর, পরদন । निदानादि — "विरुद्धमद्याध्यशनादजीर्णाद्गर्भप्रपातादतिमैथुनाच्च । यानाध्वशोकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च । तं श्लेष्मपित्तानिलसन्निपातैश्चतुःप्रकारं प्रदरं वदन्ति ।" इति । लक्षणं यथा — "असृग्दरं भवेत्सर्व्वं साङ्गमर्द्दं सवेदनम् । शश्वत्स्रवन्तीमास्रावं तृष्णादाहज्वरान्वितां । दुर्ब्बलां क्षीणरक्ताञ्च तामसाध्यां विवर्ज्जयेत् ॥" कफाद्यथा — आमं पिच्छं पाण्डु तुषोदकाभं स्रवति । पित्तात् पीतनीलमुष्णं सवेगं रक्तं स्रवति । वातात् रूक्षम् अरुणं फेनिलमल्पमल्पञ्च स्रवति । अन्यच्च — मधौद्रसर्पिर्हरितालवर्णं कुणपं मज्जप्रकाशञ्च स्रवेत् । मा.नि. ।

प्रदरान्तकलौहम् । क्ली । प्रदराधिकारे लौहे । "लौहं ताम्रं हरीतालं वङ्गमभ्रं वराटिका । त्रिकटु त्रिफला चित्रं विडङ्गं पटुपञ्चकम् । चविका पिप्पली शङ्खं वचाहबुषपाकलम् । शटी पाठा देवदारु एला च वृद्धदारकम् । एतानि समभागानि संचूर्ण्य वटिकां कुरु । शर्करामधुसंयुक्तं घृतेन भावयेत् पुनः । रक्तं श्वेतं तथा नीलं पीतं प्रदरदुस्तरम्...।" লৌহ, তামা, হরিতাল, বঙ্গ, অভ্র, কড়িভস্ম, ত্রিকটু, ত্রিফলা, চিতারমূল, বিড়ঙ্গ, পঞ্চলবণ, চই, পিপুল, শঙ্খভস্ম, বচ, হবুষফল, কুড়, শটী, আকনাদি, দেবদারু, এলাইচ, বীজতাড়কের বীজ, প্রত্যেকে চূর্ণ সমভাগ মধু ও চিনি সংযোগে ঘৃতের সহিত ভাবনা দিয়া বটী করিবে । রস.র. ।

प्रदिग्धमांसम् । क्ली । पक्वमांसव्यञ्जनविशेषे । See मांसम् ।

प्रदीपनः । पुं । चित्रकवृक्षे । वै.निघ.२भ.अर्शः-चि.राजवल्लभरसे । स्थावरविषभेदे । लक्षणं यथा — "वर्णतो लोहितो यः स्याद्दीप्तिमान्दहनप्रभः । महादाहकरः पूर्व्वैः कथितः स प्रदीपनः ॥" भा. ।

प्रदीप्ता । स्त्री । लाङ्गलिकायाम् । विषलाङ्गलियां । वै.निघ. ।

प्रदेशः । पुं । आरब्धस्यातीतेन सम्पादने । "प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः । यथा देवदत्तस्यानेन शल्यमुद्धृतं तस्माद्यज्ञदत्तस्याप्ययमेव उद्धरिष्यतीति ।" सु.उ.६५अ. ।

प्रदेश(शि)नी । स्त्री । तर्ज्जन्यङ्गुलौ । रा.निं. व.१८ । शस्त्रविशेषे । सा च अग्रपर्व्वप्रदेशप्रमाणा मुद्रिका दशाङ्गुला च कर्त्तरीति कथ्यते । सु.सू. ८अ. ।

प्रदेहः । पुं । अनुलेपनाभ्यङ्गादौ । सु.सू.१८अ. ।

प्रधमनम् । क्ली । नस्यविशेषे । "षडङ्गुला द्विवक्त्रा या नाड़ी चूर्णं तया धमेत् । तीक्ष्णद्रोलमितं वक्त्रवातैः प्रधमनं हितम् ॥" भा. । "घ्राणमार्गेण यच्चूर्णमेर्य्यते मुखवायुना । प्रधमनं तदिख्यातम् ।" ज.द.१२अ. । सु.सू.७अ.मूर्च्छाचि.त्रिकट्वादिनस्ये ।

प्रधानकर्म्म । क्ली । रोगोत्पत्तौ यत्क्रियते द्वितीयं कर्म्म तत्र । व्रणपाचनरोपणादौ वा । वमनविरेचनवस्तिनस्यशिरामोक्षणेषु वा । आतङ्कोत्पत्तौ यत् क्रियते कर्म्म तत्र वा । सु.सू.५अ. ।

प्रनाल(ग्र)कः । पुं । वास्तुकशाके । जीवशाके । वै.निघ. ।

प्रपथ्या । स्त्री । हरीतक्याम् । रा.नि.व.११ ।

प्रपदम् । क्ली । पादाग्रभागे । "पादाग्रं प्रपदं मतम् ।" रा.नि.व.१८ । [अम. ।

प्रपा । स्त्री । पानीयशालायाम् । জলের ঘর ।

प्रपाणम् । क्ली । उत्तरोष्ठे । "उत्तरौष्ठं प्रपाणं स्यात् ।" ज द.३अ. ।

प्रपाणिः (कः) । पुं । करस्याधोभागे, पाणितले । হাতের তেলো । "करस्याधः प्रपाणिः स्यात् ।" रा.नि.व.१८ । च.वि.८अ. । (कः) मणिबन्धात्कफोणिपर्य्यन्ते करभागे । च.द.८अ. ।

प्रपातः । पुं । भृगौ, प्रपतनस्थाने । सु.कल्प.५अ. ।

प्रपादिकः । पुं । मयूरे । वै.निघ. ।

प्रपानकम् । क्ली । पाना इति शरवत् इति च ख्याते नानारसपेयद्रव्ये । यथाम्रपानकादि । পানা, শরবৎ । भा. ।

प्रपुण्डरीकम् । क्ली । प्रपौण्डरीके । পুণ্ডরিয়া । च.चि.४अ. ।

प्रपुना(न्न,न्ना)टः (ड़ः) । पुं । (Cassia Tora.) चक्रमर्द्दक्षुपे । চাকন্দা । तें तगरिशचेट्टु । ता. उषित्तगरयी । दा. टरोट । रा.नि.व.४।

प्रपुन्नाटच्छदः । पुं । चणकवृक्षे । वै.निघ. । चक्रमर्द्दपत्रे ।

प्रपुराणघृतम् । क्ली । अतिपुरातनघृते । খুব পুরাণ ঘৃত । "लाक्षारसनिभं शीतं प्रपुराणमतःपरम् ।" सि.यो.उन्माद.चि. ।

प्रपुराणधान्यम् । क्ली । पुराणधान्यके । অতি পুরাতন ধান । च.चि.५अ. ।

प्रपूरिका । स्त्री । कण्टकार्य्याम् । श.च. ।

प्रपोटकः । पुं । अश्वस्य पादरोगभेदे । लक्षणं यथा—"प्रपोटकं विजानीयात् ग्रन्थिभिः कूर्चसम्भवैः । आमखण्डकास्थिसङ्काशैः ग्रन्थिभिश्चातिकण्टकैः ॥" ज.द.२९अ. ।

प्रपौण्डरी(ण्ड्र)कम् । क्ली। (Root stock of nymphaea lotus.) शालपर्णीपत्रतुल्यपत्रे क्षुद्रविटपिनि । পুণ্ডরিয়া । हिं पुंड़ेरी । मं पुण्डरीक । तें पुंड़रीकमनुगेविध्यानमु । गुणाः—मधुरं कटिनरचक्षुष्यं तिक्तं शीतलं रक्तपित्तव्रणघ्नं ज्वरदाहतृष्णाघ्नञ्च । रा.नि.व.१२ । च.द.छागाद्यघृते । तन्नामककन्दविषे । सु.कल्प.२अ. । See कन्दविषम् ।

प्रबलः । त्रि । बलवति । पुं । पल्लवे । श.मा. । स्त्री । प्रसारणीलतायाम् । वै.निघ. ।

प्रबला । स्त्री । प्रसारण्याम् । रा.नि.व.५ ।

प्रबलाकी (इन्) । पुं । सर्पे । विश्व. ।

प्रबालः । पुं. क्ली । स्वनामख्याते रत्नभेदे । পলা, মুঙ্গা । अम. । गुणाः—मधुरः अम्लः कफपित्तादिदोषघ्नः स्त्रीवीर्य्यकान्तिकरः धारणात् माङ्गल्यश्च । सूक्ष्मः घनः शिराहीनः वृत्तः—शुभकरः । गौरः कृष्णरुचः श्वेतः वक्रसूक्ष्मः—अशुभकरः । रा.नि.व.१३ । सारकः शीतलः कषायः स्वादुः वान्तिकरः चक्षुष्यश्च । राज. । किशलये । मे. ।

प्रबालफलम् । क्ली । रक्तचन्दने । भा. ।

प्रबालिकः । पुं । जीवशाके । रा.नि.व.७ ।

प्रबोधनी । स्त्री । दुरालभायाम् । रा.नि.व.४।

प्रबोधिका । स्त्री । कुकुन्याम् । कुकुड़ा । वै.निघ. ।

प्रभद्रः (कः) । पुं । निम्बवृक्षे । নিম গাছ। रा.नि.व.९ । पारिभद्रवृक्षे । পালিদা মান্দার গাছ । स्त्री । प्रसारण्याम् । গন্ধভাদুলিয়া । रा.नि.व.५ ।

प्रभवः । पुं । कारणे । जन्महेतौ । अम. । जन्मनि । श.र. । [अम. ।

प्रभाकरः । पुं । अर्कवृक्षे । আকন্দ গাছ ।

प्रभाकरक्षीरम् । क्ली । अर्कक्षीरे । আকন্দ আঠা । वै.निघ.२भ.कर्णकज्व.चि. ।

प्रभाकीटः । पुं । खद्योते । रा.नि.व.१९ ।

प्रभाञ्जनः । पुं । शोभाञ्जनवृक्षे । সজিনা গাছ । चिका. ।

प्रभातम् । क्ली । प्रातःकाले । तत्र द्रष्टव्यं यथा—"वैद्यः पुरोहितो मन्त्री दैवज्ञोऽत्र चतुर्थकः ।

प्रभातकाले द्रष्टव्यो नित्यं स्वश्रियमिच्छता॥" राज.१प.।

प्रभाभासः । पुं । काकविशेषे । वै.निघ.।

प्रभावः । पुं । स्वभावे । सामर्थ्ये। "रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम् । दन्तीरसाद्यैस्तुल्यापि चित्रकस्य विरेचनी । मधूकस्य च मृद्वीकाघृतं क्षीरस्य दीपनम् ॥" इत्यादि । "क्वचित्तु केवलं द्रव्यं कर्म कुर्य्यात्प्रभावतः । ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथा ॥" भा.।

प्रभुः । पुं । पारदे । रा.नि.व.१३ ।

प्रभूततीक्ष्णगन्धा । स्त्री । राजिकायाम् । सरिषा । वै.निघ.।

प्रभृतिः । स्त्री । प्रकृष्टायोजने । च.सू.१६च.।

प्रभेषजा । स्त्री । काकोदुम्बरिकायाम् । रा.नि.व.११ ।

प्रमत्तः । पुं भासपक्षिणि । काकविशेषे । स्त्री। लाङ्गलीवृक्षे । विषलाङ्गलिशा । वै.निघ.।

प्रमथः । पुं । घोटके । श.र. । स्त्री (था) । हरीतक्याम् । मद.व.१ । पीड़ायाम् ।

प्रमथितम् । क्ली । नवनीते । निर्जलतक्रे । रा.नि.व.१५ ।

प्रमथ्या । स्त्री। मन्थभेदे । "शृतः कषायो निर्य्यूहः क्वाथो यूषः कृतश्च यः । कृतयूषः प्रमथ्या च द्रव्यात्कल्कीकृतात् शृता॥" इति प्रमथ्यालक्षणम् । वा.चि.९ऋ. । अरुण. । "प्रमथ्या प्रोच्यते द्रव्यं पलमात्रं सुकल्कितम् । किञ्चिदन्येन संयुक्तमथवान्यविवर्ज्जितम् । तोये चाष्टगुणे साध्यं पानमाहुः पलद्वयम् ।" शेषं मन्थवत् । तोड़लानन्दे । हारीतः । गुणाः—"प्रमथ्या मध्यदोषेभ्यो दद्याद्दीपनपाचनम् ।" वा. ।

प्रमदः । पुं, क्ली । धत्तूरवृक्षे, तत्फले च । श.च. । त्रि । मत्ते । स्त्री । प्रियङ्गौ । चि.क.क.४सवकः ।

प्रमदिनी । स्त्री । धातकीवृक्षे । वै.निघ.।

प्रमाणम् । क्ली । परिमाणे । मे. । देहपरिमाणे । तच्च मध्याल्पमहद्भेदेन त्रिधा भवति । च.इ.७अ. । शास्त्रे । मे. ।

प्रमाथी (न्) । त्रि । सूक्ष्मतीक्ष्णभावात् स्रावकधर्म्मिणि । "स्रोतांसि दोषलिप्तानि प्रमथ्य विवृणोति यत् । प्रविश्य सौक्ष्म्यात्तैक्ष्ण्याच्च तत्प्रमाथीति संज्ञितम् ॥" खरनादः ।

प्रमार्ज्जनम् । क्ली । प्रोञ्छने । बालाङ्गुलिवस्त्रैः चक्षिरजःशल्यादिषु प्रोञ्छने । सु.सू.७अ. ।

प्रमितः । त्रि । अन्यूनातिरिक्ते । वै.निघ. ।

प्रमिताशनम् । क्ली । अत्यल्पमात्रभोजने । অত্যল্প ভোজন । च.शा.८अ. ।

प्रमीलकः । पुं । तन्द्रायाम् । शरीरालस्ये । শরীরের আবল্য । भा.म.१भ. ।

प्रमीला । स्त्री । तन्द्रायाम् । रा.नि.व.२० ।

प्रमीलिका । स्त्री । तन्द्रायां । विसूच्यां शिरोरोगादौ । सि.यो.विसूचि.श्रीकण्ठः ।

प्रमुखः । पुं । पुन्नागवृक्षे । श.च. ।

प्रमेहः । पुं । स्वनामख्यातरोगे । মেহরোগ । निदानं यथा—"आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसाः पयांसि । नवान्नपानं गुड़वैकृतञ्च प्रमेहहेतुः कफकृच्च सर्व्वम् ॥ मेदश्च मांसञ्च शरीरजञ्च क्लेदं कफो वस्तिगतः प्रदूष्य । करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि ॥ क्षीणेषु दोषेष्ववकृष्य धातून् संदूष्य मेहान् कुरुतेऽनिलश्च ॥ साध्याः कफोत्था दश पित्तजाः षट् याप्या न साध्यः पवनाच्चतुष्कः । समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वाच्च यथाक्रमं ते ॥ कफः सपित्तः पवनश्च दोषा मेदोऽसृक्शुक्राम्बुवसालसीकाः । मज्जा रसौजः पिशितञ्च दूष्याः प्रमेहिणां विंशतिरेव मेहाः ॥ दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः । दाहश्चिक्कणता देहे तृट् स्वाद्वास्यञ्च जायते ॥ सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता । दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः...... ॥ अविपाकोऽरुचिश्छर्द्दिर्निद्रा कासः सपीनसः । उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥ वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः । दाहस्तृष्णाम्लिका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥ वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः । शूलमुन्निद्रता शोषः कासः श्वासश्च जायते ॥ यथोक्तोपद्रवाविष्टमतिप्रस्रुतमेव च । पिड़कापीड़ितं गाढ़

प्रमेही हन्ति मानवम् ॥" इत्यादि। मा.नि.।
प्रमेहपिड़(पीटि)का। स्त्री। प्रमेहोपेक्षाजन्यस्फोटके। ता दश, यथा—"शराविका कच्छपिका जालिनी विनताऽलजी। मसूरिका सर्षपिका पुत्रिणी सविदारिका। विद्रधिश्चेति पिड़काः प्रमेहोपेक्षया दश॥" सु.नि.६अ.। आसां विशेषाः स्वस्वपर्य्याये मृग्याः।
प्रमेही (इन्)। पुं। नन्दिवृक्षे। त्रि। प्रमेहरोगिणि। "किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत्।" सु.नि.६अ.। [जटा.।
प्रमोचनी। स्त्री। गोडुम्बायाम्। গোমক।
प्रमोदः (कः)। पुं। षष्टिकधान्ये। वै.निघ.। शालिधान्यविशेषे। ঘেটে ধান। च.सू.२७अ.।
प्रमोदसट्टकम्। क्ली। कृतान्नभेदे। यथा—"सान्द्रे दध्नि मरीचं पिप्पलिशुण्ठीलवङ्गकर्पूरम्। एषां चूर्णं साकं शर्करयामर्द्य शुद्धवस्त्रेण॥ गालयित्वा क्षिपेत्तस्मिन् पक्वदाड़िमवीजकं। प्रमोदसट्टकं ह्येतद्वर्द्धमानगुणैः समम्॥" वै.निघ.द्रव्यगुणः।
प्रमोदिनी। स्त्री। जिङ्गिन्याम्। भा.।
प्रमोहः (कः)। पुं। मूर्च्छायाम्। इन्द्रियापटुत्वे। च.सू.२अ.।
प्रयत्नः। पुं। गुणविशेषे। स चात्मन इच्छाजन्या प्रवृत्तिर्द्वेषजन्या निवृत्तिश्च। च.सू.१अ.।
प्रयस्तः। त्रि। सुसंस्कृते। त्रिका.।
प्रयोगवस्तिः। पुं। रसायने वाजीकर्म्मणि च प्रयोज्ये वस्तौ। सः अष्टविधः। तद्विधिः यथा—आदावेकः स्नेहवस्तिः, ततः त्रयो निरूहवस्तयः, ततश्च चत्वारः स्नेहवस्तयः कार्य्याः। च.सिद्धि.१अ.।
प्रयोजनम्। क्ली। कार्य्ये। प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भाः। यथा—"यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुष्यैरुपचरिष्याम्यनायुष्यैः परिहरिष्यामि कथं न मामकालमृत्युः प्रसहेतेति।" च.वि.८अ.। हेतौ। मे.।
प्ररूढ़ः। पुं। जठरे। मे.। त्रि। बद्धमूले। जाते। श.र.।
प्ररोहः। पुं। अङ्कुरे। रा.नि.व.२। स्त्री। सिंहल्याम्। শিউলি ঝোপ। प.मु.।

प्ररोही (इन्)। पुं। नन्दिवृक्षे। भा.।
प्रलम्बः। पुं। नारीस्तने। अङ्कुरे। तरुशाखायाम्। वङ्गे। वै.निघ.। लताङ्कुरे। मे.। तालाङ्कुरे। र.चि.८अ.। तालस्कन्धे। তালের শোঁটা। च.द.व्रणाधिकारे। क्ली। त्रपुषवीजे। শশার বীজ। मे.। भैष.वाजी.गुड़कुष्माण्डे। [निघ.।
प्रलम्बकः। पुं। सुगन्धतृणे। गन्ध थड़। वै.
प्रलम्बाण्डः। त्रि। लम्बमानकोषे। हे.च.।
प्रलयः। इन्द्रियस्वापे। रा.नि.व.२०। ध्वंसे।
प्रलापः। पुं। अनर्थकवचसि। मा.नि.। भा.म.१भ.ज्व.चि.। "प्रलापो वक्त्रकटुता।" "स्वहेतुकुपिताद्वातादसम्बद्धं निरर्थकं। वचनं यन्नरो ब्रूते स प्रलापः प्रकीर्त्तितः॥" वै.निघ.।
प्रलापकः (पी (इन्))। पुं। तन्नामकसन्निपातज्वरे। लक्षणम्—"कम्पप्रलापपरितापनशीर्षपीड़ा-प्रौढ़प्रभावपवमानपरोऽन्यचिन्ता। प्रज्ञाप्रणाशविकलप्रचुरप्रवादः क्षिप्रं प्रयाति पितृपालपदं प्रलापी॥" वै.निघ.। "स्वेदभ्रमाङ्गमर्दाः कम्पो दवथुर्वमी व्यथा कण्ठे। गात्रञ्च गुर्वतीव प्रलापिजुष्टस्य जायते लिङ्गम्॥" भा.। आविकज्वरे।
प्रलापहा (न्)। पुं। कुलत्थाञ्जने। रा.नि.व.१३। [नि.व.२०।
प्रलीनता। स्त्री। प्रलये। इन्द्रियस्वापे। रा.
प्रलेपः (कः)। पुं। जीर्णज्वरभेदे। लक्षणं—"प्रलिम्पन्निव गात्राणि घर्म्मेण गौरवेण च। मन्दज्वरविलेपी च सशीतः स्यात् प्रलेपकः॥"
प्रलेहः। पुं। व्यञ्जनविशेषे। কোরমা। पाकराजः।
प्रलोभनी। स्त्री। वालुकायाम्। वै.निघ.। प्रलेहे। कोरमा, दम्पोखता। पाकराजः।
प्रवटः। पुं। गोधूमे। वै.निघ.।
प्रवणः। पुं। उदरे। मे.।
प्रवयाः। पुं, स्त्री। वृद्धे। रा.नि.व.१८।
प्रवरम्। क्ली। अगुरुकाष्ठे। भा.। पुं। सुहीवृक्षे। कृष्णमुद्गे। वै.निघ.।
प्रवरसत्त्वः। त्रि। प्रकृष्टसत्वपुरुषे। "सत्व-

कायोऽपि यो निजागन्तुनिमित्तासु महतीष्वपि पीड़ासु अव्यथो दृश्यते।" च.वि.८अ.।

प्रवरा । स्त्री । पलाशवृक्षे । वै.निघ.।

प्रवात: । पुं. क्ली। प्रबलवायौ। गुणा:—प्रवातं रौक्ष्यवैवर्ण्यस्तम्भकृद्दाहपक्तिनुत्। सु.चि.२४अ.।

प्रवातस्थापनम् । क्ली। प्रवातरक्षणेन जलस्य शीतीकरणोपाये। सु.सू.४५अ.। प्रवातरक्षणे।

प्रवाल: । पुं. क्ली। See प्रबाल:।

प्रवालफलम् । क्ली। See प्रबालफलम्।

प्रवासिनी । स्त्री। तिलवासिनीशालौ। रा.नि.व.१६। [सु.शा.१०अ.।

प्रवाहनम् । क्ली। कुन्थने। কোঁথ দেওয়া।

प्रवाहिका । स्त्री। ग्रहणीरोगे। रा.नि.व.२०। अतीसारभेदे। আমাশা রোগ। निदानलक्षणे—"वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य। प्रवाहतोऽल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः। प्रवाहिका वातकृता सशूला पित्तात् सदाहा सकफा कफाच। सशोणिता शोणितसम्भवा च ताः स्नेहरूक्षप्रभवा मतास्तु। तासामतीसारवदादिशेत लिङ्गं क्रमश्चामविपक्वताञ्च॥" मा.नि.। "सुते रक्तं पुरीषे च वायुना विड्विवर्जितं। प्रवाहिकेति विख्यातं यत् फेनाभं प्रवर्त्तते॥" इत्यपि लक्षणम्। वा.चि. ६अ.।

प्रवाही । स्त्री। बालुकायाम्। रा.नि.व.१३।

प्रवाहु: (क:) । पुं। कूर्परस्योर्द्धभागे। प्रवाहिकायाम्। वै.निघ.।

प्रवाहोत्था । स्त्री। बालुकायाम्। वै.निघ.।

प्रविचार: । त्रि। प्रकृष्टसञ्चरणयोग्ये। च.सू.१५अ.।

प्रविरम् । क्ली। पीतचन्दने। श.च.।

प्रविलम्बि । क्ली। सद्योव्रणभेदे। "प्रविलम्बि समेपेऽस्थ्नि।" वा.उ.२६अ.।

प्रविलयनम् । क्ली। द्रवीभावे। च.सू.१५अ.।

प्रविषा । स्त्री। अतिविषायाम्। अम.।

प्रवृत्ति: । स्त्री। प्रवर्त्तने। च.सू.१अ.। "प्रवृत्तिस्तु खलु चेष्टा कार्य्यार्था सैव क्रिया कर्म्म यत्नः कार्य्यसमारम्भश्च।" च.वि.८अ.।

प्रवेट: । पुं। यवे। त्रिका.।

प्रवेणी । स्त्री। आस्तरणे। अम.।

प्रवेल: । पुं। पीतमुद्गे। সোণা মুগ। हे.च.।

प्रवेष्ट: । पुं। बाहौ। रा.नि.व.१८। बाहुनिम्नभागे। श.च.। करिदन्तमांसे। हारा.।

प्रव्रजिता । स्त्री। श्रावण्याम्। মুণ্ডীরী। रा.नि.व.५। जटामांस्याम्। मे.।

प्रशम: । पुं। शान्तौ, विरामे। मा.ज्व.नि.।

प्रशमन: । त्रि। शान्तिकरे। सु.।

प्रशस्त: । पुं। करज्योड़िपाषाणभेदे। वै.निघ.।

प्रशस्या । स्त्री। आढ़क्याम्। অড়হর। वै.निघ.।

प्रशा(षा,सा)ति[धि]क: । पुं, स्त्री(का)। रक्तनीवारे। च.द.र.पि.चि.। स्थलजतृणधान्यभेदे। অড়া। गुणा:—श्यामाकवत्। च.सू.२७अ.। अणुव्रीहिधान्ये। সরু ধান। र.मा.। देवधान्ये। नीवारे। উড়ি ধান। भा.पू.१भ.धा.व.। "कौरदूषप्रसाधिका:।"

प्रश्नि: (श्नी) । स्त्री। पृश्निपर्ण्यां। চাকুলিয়া। हिकोष:। कुम्भिकायाम्। त्रिका.।

प्रष्टा(ष्ठा)रु: । पुं। गुदकुन्दरोगे। वा.उ.१अ.।

प्रष्ठौही । स्त्री। प्रथमगर्भिण्यां गवि। भ.।

प्रसक्तम् । क्ली। नूतनधान्ये। वै.निघ.।

प्रसङ्ग: । पुं। प्रस्तावे। प्रकरणान्तरेण समापने। सु.उ.६५अ.। सन्ततसेवायां। मैथुने। भा.म.कुष्ठ.चि.।

प्रसन्ना । स्त्री। मद्यविशेषे, सुरामण्डे। सा च सुरामण्डोपर्य्यच्छो भाग:। रा.नि.व.१४। "सुरामण्ड: प्रसन्ना स्यात्" प.प्र.३ख.। सा.कौ.उदावर्त्ते। गुणा:—"प्रसन्ना कफवातार्शोविबन्धानाहनाशिनी। पित्तलाल्पकफा रूक्षा यवैर्वातप्रकोपनी॥" सु.सू.४६अ.। "प्रसन्ना स्यात्सुरामण्ड: तस्मात्कादम्बरी घना। मद्यस्याद्यविभागोऽसौ प्रसन्ना प्रोच्यते बुधै:॥" तौड़.ढड.सु.।

प्रसन्नान्ध: । पुं। अन्धस्य नेत्ररोगविशेषे। लक्षणं यथा—'शुद्धस्तु चक्षुषा रूपं नैव पश्यति यो

श्यः । प्रसन्नाक्षः स विज्ञेयो नैव शक्यश्चिकित्सितुम् ।” ज.द.३०अ. ।

प्रसन्नेरा । स्त्री । मद्यविशेषे । अ टी.भ. ।

प्रसरः । पुं, क्ली । एलवालुके । रा.नि.व.४ । विसर्पे । अ.टी.भ. । वेगे । मे. ।

प्रसवः । पुं । रक्ताम्लानवृक्षे । राङ्गाकाँटी । रा. नि.व.१० । सर्ज्जतरौ । वै.निघ. । गर्भत्यागे । थालाव हওया । अम. । तस्य मासः—नवमदशमैकादशान्यतमः । ततोऽन्यत्र विकारः । भा.। सुखप्रसवमन्त्रो यथा—“अस्ति गोदावरीतीरे जम्भला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥” अपत्ये । फले । पुष्पे । मे. ।

प्रसवकः । पुं । पियालवृक्षे । श.मा. ।

प्रसवबन्धनम् । क्ली । पुष्पवृन्ते । अम. ।

प्रसवस्थली । स्त्री । मातरि । नाटकम् ।

प्रसहः । पुं। प्रसह्यभक्षणशीलमृगपक्षिषु । “गोखराश्वतरोष्ट्राश्वद्वीपिसिंहर्क्षवानराः । वृकोव्याघ्रतरक्षुश्च बभ्रुमार्जारमूषिकाः । लोपाको जम्बुकः श्येनो वान्तादश्चाषवायसौ ॥ शशघ्नी मधुहा भासगृध्रोलूककुलिङ्गकाः । धूमिको कुररश्चेति प्रसहा मृगपक्षिणः ॥” च.सू.२७अ. । ते च प्रसह्य विनिहत्य भक्षयन्तीति तथोक्ताः । तन्मांसगुणाः—अर्श्रःप्रमेहोदरामयजाड्यहरम् । रा.नि.व १७ । एतज्जातीयाश्च गुहाशयसिंहादिभिस्तुल्यगुणाः, विशेषेण शोषरोगे हिताः । सु.सू.४६अ. । “गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः ।” राज.३प.।

प्रसहनः । पुं । प्रसहपक्षौ । रा.नि.व.१९ ।

प्रसहा । स्त्री । लतावृहतिकायां । र.मा. ।

प्रसादः । पुं । प्रसन्नतायां । अम.। स्वास्थ्ये । शुभ्रता । मे. । [বেতো শাক । वै.निघ. ।

प्रसादकः । पुं । देवधान्ये । দেধান । वास्तुके।

प्रसादधातुः । पुं । गुर्व्वादिद्रवान्तगुणसमुदायेषु, रसादिशुक्रान्तद्रवधातुसमुदायेषु च । च. शा.६अ. ।

प्रसादनम् । क्ली । अन्ने,भक्ते । त्रिका.। स्त्री । (ना) सेवायां, परिचर्य्यायाम् । हे.च. । (नी) महाबलायाम् । वै.निघ. ।

प्रसादनाञ्जनम् । क्ली । नेत्राञ्जनविशेषे ॥ “मधुरस्नेहसम्पन्नमञ्जनन्तु प्रसादनम् ।” तोड़. ।

प्रसाधनी । स्त्री । कङ्कतिकायाम् । अम. । भङ्गायाम् । सिद्धि । मे. ।

प्रसादमन्त्रः । पुं । माहेश्वरमन्त्रे । यथा—क्लीं ह्रां ह्रीं ह्रैं ह्रौं शिवाय स्वाहा । रस.र. विपरीतमल्लतैले ।

प्रसारः (णम्) । पुं, क्ली । विसर्पणे । हे.च. । आकुञ्चनादिपञ्चविधकर्म्मान्यतमे, करपादादिविस्तारे । सु.सू. ।

प्रसार(रि)णी । स्त्री । (Poederia foetida) स्वनामख्यातलतायाम् । गन्ध भादुलिया । हिं गान्धालि, गन्धालि, गन्धप्रसारणी । मं चांदवेलि । कं हेसरणे । तें गोन्तेमगोरुचेट्टु, सविरेलचेट्टु । गुणाः—गुरूष्णा तिक्ता वातघ्नी अर्शःश्वयथुघ्नी मलविष्टम्भहरी च । रा.नि.व.५। “प्रसारणी गुरुर्वृष्या बलसन्धानकृत्सरा । वीर्य्योष्णा वातहृत् तिक्ता वातरक्तकफापहा ॥” भा. । देवधान्ये । वै.निघ. । लज्जालुकायाम् । रा.नि.व.५ ।

प्रसितम् । क्ली । पूये । श.च. ।

प्रसुप्तिः । स्त्री । प्रगाढ़निद्रायाम् । नेत्रादीनां रूपदर्शनाद्यसक्ततायाम् । “श्रुतौ नेत्रे प्रसुप्तिः स्यात्”। मा.ज्व.नि.। क्षुद्ररोगविशेषे । लक्षणं यथा —“वायुनोदीरितः श्लेष्मा त्वचं प्राप्य विशुष्यति । ततस्त्वग्जायते पाण्डुः क्रमेण च विचेतना । अल्पकण्डुरविक्लेदा सा प्रसुप्तिः प्रसुप्तितः ॥” वा.उ. ३१अ. । [घोटक्याम् । अम. ।

प्रसूः । स्त्री । कदलीवृक्षे । लतायाम् । मे. ।

प्रसूका । स्त्री । अश्वायाम् । रा.नि.व.१९ ।

प्रसूतम् । क्ली । पुष्पे । मे. । [अम. ।

प्रसूता । स्त्री । घोटक्याम् । क्षतप्रसवायाम् ।

प्रसूतिः (का) । स्त्री । उत्पत्तौ । अपत्ये । (का) प्रसवकारिण्याम् । अम. ।

प्रसूनम् । क्ली । पुष्पे । फले । अम. । पुं । अर्कवृक्षे । अश्वस्य मुखरोगभेदे । ज.द.२९अ. ।

प्रसूनरससम्भवा । स्त्री । पुष्पशर्करायाम् । वै.निघ. ।

प्रसृतम् । क्ली । पलद्वये । प.प्र.१ख. । पुं । अर्द्धाञ्जलौ । अम. । त्रि । वेगिते । मे. । प्रवृद्धे । प्रसारिते । अम. । स्त्री । जङ्घायाम् । "जङ्घा तु प्रसृता ज्ञेया ।" रा.नि.व.१८ ।

प्रसृतिः । स्त्री । पलद्वये । १६तो. । "पलाभ्यां प्रसृतिर्ज्ञेया ।" प.प्र.१ख. । मुष्टौ । मूटे । रा.नि.व.१८ । [अ. । सेके । मे. ।

प्रसेकः । पुं । कफजन्यलालादिस्रावे । च.शा.८

प्रसेवकः । पुं । चर्म्मखल्लपुटे । सु.सू.८अ. ।

प्रस्कन्दनम् । क्ली । विरेचने । জোলাপ । र.मा. । पुं । अतीसारे । वै.निघ. ।

प्रस्कन्दिका । स्त्री । संग्रहग्रहणीरोगे । निदा. ।

प्रस्कन्नः । पुं । अश्वस्य रोगविशेषे । लक्षणं— "गुरु यस्य भवेद्वक्त्रः स्तब्धगात्रपरिक्रमः । कुब्जीभूतेन पृष्ठेन यो वाजी याति वक्रवत्॥" ज.द.४५अ. ।

प्रस्तरः । पुं । पाषाणे । मणौ । मे. । पल्लवादिशय्यायाम् । अ.र. ।

प्रस्तर(रि)णी । स्त्री । गोलोमिकायाम् । শ্বেত দূর্ব্বা । रा.नि.व.५ । गोजिह्वायाम् । वै.निघ. ।

प्रस्तरभेदः । पुं । पाषाणभेदे । পাথর কুচা । भैष.मु.क्ल.चि. त्रिकण्टकादिचूर्णे ।

प्रस्तरस्वेदः । पुं । वातादौ स्वेदविशेषे । शूकशमीधान्यपुलकानां वेशवारपायसोत्कारिकादीनां वा प्रस्तरे कौषेयाविकोत्तरप्रच्छदे पञ्चाङ्गुलोरुबुकार्कपत्रप्रच्छदे वा स्वभ्यक्तसर्व्वगात्रस्य शयानस्योपरि स्वेदने । च.सू.१४अ. ।

प्रस्तरोद्भूतम् । क्ली । प्रस्तरजले । वै.निघ. ।

प्रस्तरोपलः । पुं । चन्द्रकान्तमणौ । प.मु. ।

प्रस्तर्य्यम् । क्ली । प्रस्तरोदके । वै.निघ. ।

प्रस्तावम् । क्ली । पुरातनतण्डुले । वै.निघ. ।

प्रस्तारः । पुं । शय्यायाम् । तृणवने । हे.च. ।

प्रस्तार्म(र्य्य)म् । क्ली । शुक्लभागगतनेत्ररोगविशेषे । लक्षणं यथा—"प्रस्तारि प्रथितमिहार्म्म शुक्लभागे विस्तीर्णं तनु रुधिरप्रभं सनीलम् ।" सु.उ.४अ. ।

प्रस्थः । पुं । शरावद्वयपरिमाणे । २श. । १२० तो. । "शरावाभ्यां भवेत्प्रस्थः ।" वमनादौ सार्द्धत्रयोदशपलपरिमाणे । "वमने च विरेके च तथा शोणितमोक्षणे । सार्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥" प.प्र.१ख. । पाल्यां । त्रिका. ।

प्रस्थकुसुमः । पुं । मरुवकवृक्षे । গন্ধ তুলসী । रा.नि.व.१० ।

प्रस्थपुष्पः । पुं । श्वेतमरुवकवृक्षे । क्षुद्रपत्रकृष्णमरुवके । अम. । जम्बीरवृक्षे । अ.टी.भ. ।

प्रस्थवान् । पुं । पर्व्वते । रा.नि.व.२ ।

प्रस्थिका । स्त्री । आम्रातकवृक्षे । वै.निघ. । माचिकायां । পুদিনা । भा. । [अम. ।

प्रस्फोटनम् । क्ली । पवने । हे.च. । सूर्पे ।

प्रस्नवः । पुं । दुग्धे । वै.निघ. ।

प्रस्नवणम् । क्ली । मूत्रे । दुग्धे । प्रकर्षेण स्रावे । वै.निघ. । पुं । घर्म्मे । त्रिका. ।

प्रस्नवणजलम् । क्ली । निर्झरसलिले । गुणाः —स्वच्छं मधुरं लघु रोचनं दीपनञ्च । रा.नि.व.१४ ।

प्रस्रावः । पुं । मूत्रे । रा.नि.व.१८ । [निघ. ।

प्रस्रुतदधि । क्ली । वस्त्रगालितदधनि । वै.

प्रस्वेदः । पुं । अतिघर्म्मे । वै.निघ. ।

प्रहरः । पुं । दिवसाष्टमभागे । প্রহর । अम. ।

प्रहरकुटुम्बी । स्त्री । कुटुम्बिनीक्षुपे । रा.नि.व.५ ।

प्रहर्ष(र्षि)णी । स्त्री । हरिद्रायाम् । हारा. ।

प्रहसन्तिका (न्ती) । स्त्री । शुक्लयूथिकायाम् । त्रिका. । वासन्तीपुष्पवृक्षे । रा.नि.व.१० ।

प्रहस्तः । पुं । संहतविस्तृताङ्गुलिकरे । चपेटे । रा.नि.व.१८ ।

प्रहारवल्ली । स्त्री । मांसरोहिण्याम् । भा. ।

प्रहिता । स्त्री । प्रसारण्याम् । গন্ধভাদুলিয়া । वै.निघ. ।

प्रहीरजा । स्त्री । कुटुम्बिनीक्षुपे । रा.नि.व.५ ।

प्रहृष्टकः । पुं । काके । वै.निघ. ।

प्रहेण(ल)कम् । क्ली । पिष्टकभेदे । हारा. ।

प्रह्लादः । पुं । कामकृतहर्षे । भा.म.१भ.चन्तकज्व.चि. । "प्रह्लादं चास्य विज्ञाय ।"

प्रह्लादिनी (दी) । स्त्री । रक्तवज्यालुकायां । वै.निघ. । रा.नि.व.५ । [र्थने ।

प्रक्षालनम् । क्ली । धावने । सु.सू.७अ. । मा-

प्रक्षेपः । पुं । कषायादौ चूर्णादिक्षेपणे । कल्के तस्य मात्रा कर्षमिता । "प्रक्षेपः पादिकः क्वाथात् स्नेहे कल्कसमो मतः । षोड़शाष्टचतुर्भागं वातपित्तकफार्त्तिषु । क्षौद्रङ्कषाये दातव्यं विपरीता तु शर्करा । मात्रा क्षौद्रघृतादीनां स्नेहे क्वाथे च चूर्णवत् । माषिकं हिङ्गु सिन्धूत्थं जरणाद्यास्तु शाणिकाः । परिभाषामिमामन्यः प्रक्षेपोऽप्याचिरे परम् ॥" पातव्यघृततैलादिषु प्रक्षेपः कल्कसमो मतः । प. प्र.१ख. । प्रक्षेपकालश्च—"अवतार्य्य यदा दर्व्या परिघट्य पुनः पुनः । यदा पाणिसहो भूतो निक्षिपेदौषधन्तदा ॥" योगरत्नाकरसमुच्चये ।

प्राकृतः । त्रि । प्रकृतिसम्पन्ने । सुखसाध्ये । मा. ज्व.नि. ।

प्राकृतज्वरः । पुं । वसन्तशरदुद्भवे ज्वरे । "कालप्रकृतिमुद्दिश्य प्रोच्यते प्राकृतज्वरः ।" च.चि.३ अ. "वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ।" "प्राकृतश्चानिलोद्भवः ।" मा.नि. ।

प्राकृतदोषः । पुं । प्रकृतिसम्पन्नवातादौ । यथा—वर्षाशिशिरयोर्वायुकोपः, ग्रीष्मशरदोः पित्तकोपः, हेमन्तवसन्तयोः कफकोपः । इति । च.सू.१०अ. ।

प्राक्चरणा । स्त्री । योनिरोगविशेषे ।

प्राक्फलः । पुं । पनसवृक्षे । जटा. ।

प्राग्भागः । पुं । कायपूर्व्वभागे । वै.निघ. ।

प्राग्राटम् । क्ली । अघनदधनि । পাতলা দই । त्रिका. । [वायुः ।

प्राग्वातः । पुं । पूर्व्वदिग्भववायौ । See पूर्व्व

प्राचिका । स्त्री । श्येनपक्षिण्याम् । वै.निघ. । वनमक्षिकायाम् । ডাঁশ । अम.भ. ।

प्राची । स्त्री । पानीयामलके । वै.निघ. ।

प्राचीनपनसः । पुं । बिल्ववृक्षे । त्रिका. ।

प्राचीना । स्त्री । पाठायाम् । रा.नि.व.६ । रास्नायां । श.च. । [नि.व.११ ।

प्राचीनाकरकः । पुं । मधुरजम्बीरवृक्षे । रा.

प्राचीनामलकम् । क्ली । पानीयामलके । পানি আম্লা । प.मु. । गुणः—गरदोषहरा । सु.सू.४६अ. ।

प्राचीबलः । पुं । काकतुण्ड्याम् । কেউঠুঁটী । काकजङ्घायां । नदीपिप्पल्यां । गण्डदूर्व्वायां । सु. सू.३८अ. सुरसादिः । [श.चि. ।

प्राच्यकशेरुः (कः) । पुं । कशेरौ । কেশুর ।

प्राणः । पुं । तन्नामकदेहस्थवायौ । "वायुर्यो वक्त्रसञ्चारी स प्राणोनाम देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।" सु.नि.१अ. । जीवने । "अग्निः सोमो वायुः सत्त्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मा इति प्राणाः ।" सु.सू.शा.३अ. । बोले । भा. ।

प्राणकः । जीवकौषधौ । मे. ।

प्राणथः । पुं । बलवति पुरुषे । वायौ । उणा. ।

प्राणदः । पुं । जीवकक्षुपे । रा.नि.व.५ । क्ली । रक्तधातौ । जले । हे.च. ।

प्राणदा (-प्रदा) । स्त्री । ऋद्धौ । रा.नि.व.५ । महाराष्ट्रीक्षुपे । जलपिप्पल्याम् । रा.नि.व.४ । वै.निघ.२.सन्निकज्व.चि । हरीतक्याम् । रा.नि.व. ११ । वा.चि.१अ. । "प्राणदामधुकैः कृता ।"

प्राणदा (गुड़िका) । स्त्री । अर्शसि गुड़िकायां । पाठः—"त्रिपलं शृङ्गवेरस्य चतुर्थं मरिचस्य च । पिप्पल्याः कुड़वार्द्धञ्च चव्यायाः पलमेव च । तालीशपत्रस्य पलं पलार्द्धं केशरस्य च । द्वे पले पिप्पलीमूलादर्द्धकर्षञ्च पत्रकात् । सूक्ष्मैलाकर्षमेकन्तु कर्षं त्वगन्त्वणालयोः । गुड़ात् पलानि त्रिंशच्च चूर्णमेकत्र कारयेत् । अक्षप्रमाणा गुड़िका प्राणदेति च सा स्मृता । पूर्व्वं भक्ष्याच्च पश्चाच्च भोजनस्य यथाबलं । मद्यं मांसरसं यूषं क्षीरं तोयं पिबेदनु । केशरं नागकेशरं, चतुर्थं पलमेकमित्यर्थः ॥" च.द. । শুঁট ৩প. মরিচ ৪প. পিপুল ২প. চই ১প. তালীশপত্র ১প. নাগেশ্বর ৪তো. পিপুলমূল ২প. তেজপত্র ১তো. ছোট এলাচ ২তো.

গুড়ত্বক্ ২তো. বেনার মূল ২তো. পুরাতন গুড় ১০প.। এই সমস্ত চূর্ণ ও গুড় একত্র মাড়িয়া গুড়িকা বান্ধিবে। মা. ॥০ তো.। অনুপান দুগ্ধ বা জল। বদ্ধকোষ্ঠতায় শুঁট না দিয়া হরীতকী। পিত্তার্শে গুড়ের পরিবর্ত্তে চূর্ণ। সমষ্টির ৪গুণ চিনি দিবে।

প্রাণনম্। क्ली। जीवने। जटा.। पुं। गले। श.च.।

प्राणना। स्त्री। हरीतक्याम्। चट्टी। वै.निघ.।

प्राणन्तः। पुं। रसाञ्जने। उणा.।

प्राणन्ती। स्त्री। हिक्कायाम्। चवथौ। उणा.।

प्राणपिण्डः। पुं। सुगन्धजीवे। वै.निघ.।

प्राणप्रिया। स्त्री। चट्टी। प.मु.।

प्राणवहस्रोतः। क्ली। प्राणवायुनेतरि स्रोतसि। ते च वे तयोर्मूलं हृदयं। सु.शा.९अ.। "हृदयं महास्रोतश्च।" च.वि.५अ.।

प्राणवायुः। पुं। हृदयस्थवायौ। वै.निघ.।

प्राणसंयमः। पुं। श्वासनिरोधे। वै.निघ.।

प्राणसद्म। क्ली। शरीरे। वै.निघ.।

प्राणहारकम्। क्ली। वत्सनाभे। रा.नि.व.६।

प्राणाचार्य्यः। पुं। चिकित्सके। वै.निघ.।

प्राणापानौ। पुं द्वि.। अश्विनीकुमारयोः।

प्राणाभिसरः। त्रि। प्राणायतनेन्द्रियरोगनिदानाद्यभिज्ञे। च.सू.२९अ.।

प्राणायतनम्। क्ली। नाभ्यादिषु प्राणस्थित्याधारेषु। तच्च दश—'नाभिरोजो गुदं शुक्रं शोणितं शङ्खकौ तथा। मूर्द्धांसकण्ठहृदयं प्राणस्यायतनं दश॥' रस.र. ज्व.चि.।

प्राणायामः। पुं। प्राणवायुरोधे। [व.४।

प्राणिमाता। स्त्री। पुत्रदात्रीक्षुपे। रा.नि.

प्राणिहिता। स्त्री। पादुकायां। त्रिका.।

प्राणी (इन्)। पुं। जन्तौ। त्रि। प्राणविशिष्टे। अम.।

प्राणेश्वररसः। पुं। सन्निपातज्वरे रसः। पाठः—"शुद्धसूतं तथा गन्धं सूतार्द्धं विषसंयुतम्। समस्तं मर्द्दयेत्तालमूलीनीरैस्त्र्यहं बुधः। पूरयेत् कूपिकान्ते च सन्निरुध्य विशोषयेत्। सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा तु शोषयेत्। पुटेत् कुम्भीप्रमाणेन स्वाङ्गशीतं समुद्धरेत्। गृहीत्वा कूपिकामध्यान्मर्द्दयेच्च दिनन्ततः। कृष्णाजी जीरकं हिङ्गु सर्ज्जिकाटङ्कणैर्युतम्। गुग्गुलुः पञ्चलवणं यवक्षारो यमानिका। मरिचं पिप्पली चैव प्रत्येकञ्च समांशतः। एषां कषायेण पुनः भावयेत् सप्तधातपे। नागवल्लीदलयुक्तं पञ्चगुञ्जं रसेश्वरम्। दद्यात्त्रिदोषज्वरे तीव्रे कोष्णं वारि पिबेदनु……॥" পারা, গন্ধক প্রত্যেকে ১ তো. মিঠা ॥০ তো. তালমূলীর রসে ৩ দিন মাড়িয়া কাচকূপীর মধ্যে ভরিয়া কূপীর মুখ রুদ্ধ করিয়া শুকাইবে। পরে সেই কূপী মৃত্তিকার সহিত সাতপুরু নেকড়া দ্বারা লিপ্ত ও শুষ্ক করিবে। পরে ঐ কূপী কুম্ভীপুটে পাক করিয়া শীতল হইলে কূপী হইতে ঔষধ বাহির করিয়া ১ দিন মাড়িবে। পরে ঔষধ যত হইবে কৃষ্ণজীরাদি সমভাগে তত লইয়া দশগুণ জলে অষ্টমাংশ ক্বাথ করিয়া তদ্দ্বারা ৭ বার ভাবনা দিবে। ক্বাথের দ্রব্য—কৃষ্ণজীরা, জীরা, হিং, সাজিমাটী, সোহাগা, গুগ্গুল, পঞ্চলবণ, যবক্ষার, যমানী, মরিচ, পিপুল। র.সা.সং.।

प्राणैषणा। स्त्री। जीवनरक्षणोपायगवेषणायाम्। सा च स्वस्थस्य स्वस्थवृत्तिरूपा आतुरस्य च विकारप्रशमनेऽनवधानतारूपा प्राणानुपालनस्य दीर्घायुष्ट्वावाप्तेः। च.सू.११अ.।

प्राण्यङ्गम्। क्ली। प्राणिनो अङ्गमात्रे मांसास्थ्यादौ। सि.कौ.गद.चि.।

प्रातः। क्ली। प्रभाते। अम.।

प्रातःकृत्यम्। क्ली। प्रातरनुष्ठेयकर्म्मणि। च.।

प्रातःस्नानम्। क्ली। प्राभातिकावगाहने।

प्रातरशनम् } **प्रातराशः** } क्ली, पुं। प्रातर्भोजने। त्रिका.।

प्रातर्भोक्ता। पुं। काके। श.च.।

प्रातर्भोजनम्। क्ली। प्रातःकालीनभोजने। जटा.। त्रिका.।

प्रातर्विकस्वरा। स्त्री। मल्लिकाभेदे, या प्रा-

नर्विकसति, गुणैर्वार्षिकातुल्या । रा.नि.व.१० ।

प्रातिका । स्त्री । वाईक्ये । जपापुष्पवृक्षे । रा.नि.व.१० । [नि.व.१८ ।

प्रादेश: । पुं । तर्जन्यङ्गुष्ठयुतकरविस्तारे । रा.

प्राधान्यम् । क्ली । स्वातन्त्र्यपारतन्त्र्यरूपे सन्याप्तेरौपाधिकनामभेदे । यथा—दोषत्रयेषु य: कोऽपि दोष: स्वहेतुभि: कुपितो रोगमुत्पादयेत् तस्यैव प्राधान्यं स्वतन्त्रता, तदधीनयो: प्रकुपितयोर्दोषयोरप्राधान्यं पारतन्त्र्यमिति ज्ञेयम् । "स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधे: प्राधान्यमादिशेत् ।" मा.पञ्चनि. ।

प्राप्ति: । स्त्री । प्रवृत्तौ । "प्राप्तिश्च विट्पित्तकफानिलानाम् ।" च.द.विरेके । [१६अ. ।

प्राभृतम् । क्ली । उपढौकने । अम. । च.सू.

प्रामाद्य: । पुं । वासकवृक्षे । श.च. ।

प्राय: । क्ली । वयसि । हे.च. ।

प्रायोगिक: । पुं । शमनधूमपाने । भा. । स्नैहिकधूमे । वा.चि.५अ. ।

प्रालेयम् । क्ली । हिमे । अम. ।

प्रावट: । पुं । यवे । जटा. । [हे.च. ।

प्रावरणम् । क्ली । उष्णवस्त्रे । उत्तरीयवस्त्रे ।

प्रावार: । पुं । उत्तरीयवस्त्रे । अम. ।

प्रावारकीट: । पुं । कीटविशेषे । जटा. ।

प्रावृज्ज: । पुं । पुनर्नवायां । र.चि.६अ. ।

प्रावृट् । स्त्री । वर्षाकाले । पुनर्नवायां । च.द. अम्लसारलौहे ।

प्रावृड़त्यय: । पुं । शरत्समये । रा.नि.व.२१ ।

प्रावृतम् । क्ली । प्रकृष्टावरणे । भ. ।

प्रावृषा । स्त्री । वर्षाकाले । त्रिका. ।

प्रावृषायणी । स्त्री । रक्तपुनर्नवायाम् । प.मु. । कपिकच्छ्वां । आलाकुशी । अम. ।

प्रावृषिक: । पुं । मयूरे । धरणि: ।

प्रावृषेण्य: । पुं । कदम्बवृक्षे । र.मा. । कुटजवृक्षे । कुड़चि गाछ । धाराकदम्बे । (केलि कदम । रा.नि.व.९ । स्त्री । कपिकच्छ्वां । रा.नि.व.३ । रक्तपुनर्नवायाम् । गादापुण्या । रा.नि.व.५ ।

प्रावृष्य: । पुं । कुटजवृक्षे । कुड़चि गाछ । धाराकदम्बे । (केलि कदम । रा.नि.व.९ । विकङ्कतवृक्षे । रा.नि.व.११ । क्ली । वैदूर्य्यमणौ । रा.नि.व.१३ ।

प्राश: । पुं । अवलेहे । प.प्र.१ख. ।

प्राशनम् । क्ली । भक्षणे । लेहने । अन्ने । रा.नि.व.२० ।

प्राशित: । त्रि । भक्षिते । जटा. ।

प्रासादकुक्कुट: । पुं । कपोते । त्रिका. ।

प्रासादमण्डना । स्त्री । हरिताले । वै.निघ. ।

प्राह्ण: । पुं । प्रात:काले, पूर्वाह्णे । अम. ।

प्रियंवदा । स्त्री । जातीपुष्पवृक्षे । वै.निघ. ।

प्रिय: । पुं । जीवके (अभावे गुड़ूची) । रा.नि.व.५ । वेतसलतायां । र.मा. । धाराकदम्बे । (केलि कदम । रा.नि.व.९ । ऋषभके (अभावे वंशलोचनम्) । हरिताले । प्रियङ्गौ । कदम्बवृक्षे । असनवृक्षे । दारुचिन्याम् । वै.निघ. । मृगविशेषे । जटा. । ऋद्धौ (अभावे बला) । मे. ।

प्रियक: । पुं । केलिकदम्बे, महाकदम्बे । प.मु. । तिन्दुकवृक्षे । (गँद गाछ । र.मा. । पीतशालवृक्षे । पियाशाल । र.मा. । च.सू.२५अ. । विलेशयमृगविशेषे । मे. । सु.चि.८अ. । अयं वाते पथ्य: । प्रियङ्गौ । भ्रमरे । कुङ्कुमे । मे. । असनवृक्षे । रा.नि.व.९ ।

प्रियकाम्य: । पुं । पीतशालवृक्षे । वै.निघ. ।

प्रियकोशल: । पुं । पियालवृक्षे, भल्लिकावृक्षे । प.मु. ।

प्रियङ्करी । स्त्री । बृहज्जीवन्त्यां । रा.नि.व.३ । अश्वगन्धायां । श्वेतकण्टकार्य्याम् । रा.नि.व.४ ।

प्रियङ्गु: (ङ्गू:) (क:) । स्त्री, पुं । (Aglaia Roxburghiana.) स्वनामख्यातसुगन्धलतायां । प्रियङ्गु, गन्धप्रियङ्गु । हिं प्रियंग, गन्धप्रियंग, प्रियङ्गु । कं नेर्विलगु । बम्.गहला । तैं प्रेंकणपुचेट्टु । गुणा:—शीतला तिक्ता दाहरक्तपित्तघ्नी वान्तिभ्रान्तिज्वरघ्नी मुखजाड्यहरी च । रा.नि.व.१२ । तुवरा वातघ्नी रक्तातियोगदौर्गन्ध्यस्वेदगुल्मतृषा-

विषमोष्णघ्नी च । भा. । "या किञ्चित्पाण्डुरा श्यामा कीटदोषविवर्ज्जिता । सा प्रियङ्गुर्मता भद्रा विपरीता तु निन्दिता ॥" भैष. । च.सू.४अ. । च.द.पि.ज्व.दुरालभादि: । "पर्पटकप्रियङ्गुश्यामा ।" वा.सू.१५अ. । भा.म.४भ.गर्भ.चि. । "प्रियङ्ग्वेलसारिवा: ।" धातक्याम् । वै.निघ.उन्मा.चि.कल्याणघृते । कटुकां । कट्की । धरणि. । वै.निघ.२भ.र.पि.चि.मरीचादिचूर्णे । कृष्णसर्षपे । मे. । श्यामायाम् । वै.निघ.र.पि.चि.वासादिकषाये । राले । वै.निघ.र.पि.चि.उशीरादिचूर्णे । (क:) स्वनामख्याततृणधान्ये । कामिनी धान । हिं कुंयाधान, प्रियङ्गु । मं वरगु । गुणा: —मधुर: कषाय: रूक्ष: वातपित्तकृच्च । रा.नि.व.१६ । प्रियङ्गुक: चतुर्धा स्यात् कृष्णरक्तपीतश्वेतभेदेन । ते च यथोत्तरं गुणाधिका: रूक्षा: कफघ्नाश्च । सु.सू.४५अ. । वै.निघ.२भ.छर्दि.चि.एलाद्यचूर्णे । See कङ्गु: ।

प्रियङ्ग्वम्बष्ठादिवर्ग: । पुं । प्रियङ्गुपुष्पाञ्जनयुग्मपद्मापद्मरजोयोजनवल्ल्यनन्तामानद्रुममोचरससमङ्गापुन्नागशीतपाक्य: । अम्बष्ठामधुकनमस्कारीनन्दिवृक्षपलाशकच्छुरालोध्रधातकिबिल्वपेशिकाकट्वङ्गकमलोद्भवरजांसि च । गुणा: —पक्वातीसारघ्न: सन्धानीय: पित्ते हितो व्रणरोपणश्च । वा.सू.१५अ. ।

प्रियजीव: (क:) । पुं । श्योणाकवृक्षे । शोणा गाछ । रा.नि.व.६ । लोध्रवृक्षे । वै.निघ. ।

प्रियतम: । पुं । मयूरशिखायाम् । श.च. ।

प्रियदर्शन: । पुं । चीरिकावृक्षे । थीर्नी । श.कपिचिणि । जटा. । पीतशाले । पियाशाल । वै.निघ. ।

प्रियदर्शनी । स्त्री । शारिकापक्षिणि । वै.निघ. ।

प्रियदा । स्त्री । स्वर्णजात्याम् । वै.निघ. ।

प्रियवर्णा (र्णी) । स्त्री । प्रियङ्गुलतायाम् । जटा. ।

प्रियवल्ली । स्त्री । प्रियङ्गौ । रा.नि.व.१२ ।

प्रियवादिनी । स्त्री । शारिकायाम् । वै.निघ. ।

प्रियवादी (इन्) । पुं । शारिकानायके । चातके । च.द.१२अ. ।

प्रियशा(सा)ल: । पुं । निम्बवृक्षे । प.मु. । असनवृक्षे । पियाशाल । रा.नि.व.६ ।

प्रियशा(सा)लक: । पुं । असनवृक्षे । रा.नि.व.६ ।

प्रियसख: । पुं । खदिरवृक्षे । श.च. ।

प्रियसन्देश: । पुं । चम्पकवृक्षे । श.च. ।

प्रिया । स्त्री । भार्य्यायाम् । हे.च. । हस्तिनामौषधौ । वृद्धि । र.मा. । मल्लिकापुष्पवृक्षे । मल्लिका फुलेर गाछ । रा.नि.व.१० । वार्षिकीमल्लिकाभेदे । रा.नि.व.१० । प्रियङ्गौ । रा.नि.व.२३ । एलायां । श.च. । मदिरायाम् । रा.नि.व.१४ ।

प्रियात्मज: । पुं । स्वनामख्याते प्रसहजातीयपक्षिभेदे । च.सू.२७अ. ।

प्रियाम्बु: । पुं । आम्रवृक्षे । रा.नि.व.११ ।

प्रियाल: । पुं । प्रियङ्गौ । प.मु. । चारवृक्षे । पियाल गाछ । रा.नि.व.११ । क्ली । पक्वप्रियालफले । भा.म.१भ.ज्व.चि. । "द्राक्षादाड़िमखर्जूरप्रियालै: ।"

प्रियाला । स्त्री । द्राक्षायाम् । रा.नि.व.११ ।

प्रियाह्वा । स्त्री । कङ्गुणिकायाम् । का॰नि । वा.उ.५अ. ।

प्रीणनम् । क्ली । तृप्तिकरणे । अम. । [१६ ।

प्रीणन: । पुं । खड्गिमृगे । गण्डार । रा.नि.व.

प्रीति: । स्त्री । तृप्तौ । अम. ।

प्रीहा (न्) । पुं, स्त्री । प्लीहायां । वि.कोष: ।

प्रुष्ठम् । क्ली । दुग्धे । वै.निघ. ।

प्रेङ्खितम् । क्ली । कम्पिते । अम. ।

प्रेतग्रह: । पुं । भूतग्रहविशेषे । लक्षणं—"प्रेताकृतिक्रियागन्धं भीतमाहारविद्विषं । तृणाच्छिदञ्च प्रेतेन गृहीतं नरमादिशेत् ॥" वा.उ. ।

प्रेतजिह्वा । स्त्री । स्तब्धतादिलक्षणयुक्तायां जिह्वायाम्, अरिष्टलक्षणभेदे । यथा —"स्तब्धा निश्चेतना गुर्व्वी कण्टकोपचिता भृशं । श्यावा शुष्काथवा शून्या प्रेतजिह्वा विसर्पिणी" ॥ च.इ.८अ. ।

प्रेतराक्षसी । स्त्री । सुरसायां । बाबुई तुलसी । प.मु. ।

प्रेतलक्षणम् । क्ली । अरिष्टलक्षणे । च.इ.१अ.।
प्रेमपातनम् । क्ली । नेत्रजले । श.च. ।
प्रेयोपत्य: । पुं । क्रौञ्चपक्षिणि । वै.निघ. ।
प्रेष्ठा । स्त्री । जङ्घायाम् । श.च. ।
प्रेक्षणम् । क्ली । चक्षुषि । श.र. । [स्त्री ।
प्रेक्षणकूट: । पुं । चक्षुर्गोलके । मा.नि. पा-
प्रेक्षा । स्त्री । तरुशाखायाम् । श.र. ।
प्रोज्ज्वासनम् । क्ली । मारणे । हे.च. ।
प्रोञ्छनम् । क्ली । लोपने । মোছা । तन्नम् ।
प्रोत्प(फ)ल: । पुं । तालवृक्षभेदे । श.मा. ।
प्रोथ: । पुं । प्रपाणीर्द्धभागे । থোৎনা । ज.द. २अ. । कट्यां । मे. । स्फिचि । उणा. ।
प्रोर्णनाव: । पुं । सन्निपातज्वरविशेषे । लक्षणं यथा—"उत्क्षिप्य य: स्वमङ्गं क्षिपत्यधस्तान्निता-न्तमुत्क्षिपति । तं प्रोर्णुनावजुष्टं विचित्रकष्टं वि-जानीयात् ॥" भा.म.१भ. ।
प्रोल्लाघित: । त्रि । रोगमुक्ते । वै.निघ. ।
प्रोष: । पुं । सन्तापे । रा.नि.व.२० ।
प्रोषितप्रिया । स्त्री । कुब्जकवृक्षे। পীতঝাঁটী। रा.नि.व.२३ । फलिन्यां, प्रियङ्गौ । वार्षिकमल्लि-कायाम् । रा.नि.व.२३ ।
प्रोष्ठ: । पुं । प्रोष्ठीमत्स्ये । अ.टी.रा. ।
प्रो(प्रौ)ष्ठपद: । पुं । भाद्रपदमासि । अम. ।
प्रोष्ठी । स्त्री । (Cyprinus sophore.) क्षु-द्रशफरीमत्स्ये । পুঁটিমাছ । गुणा: —"प्रोष्ठी ति-क्ता कटु: स्वादु: शुक्रला कफवातजित्।"राज.३प.।
प्रोह: । पुं । गजचरणपर्व्वणि । त्रिका. ।
प्रौढ़ा । स्त्री । दृष्टार्त्तवस्त्रियि । रा.नि.व.१८ ।
प्लव: । पुं । सङ्घातचारिपक्षिमात्रे । ते च हंससा-रसक्रौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीवक-वकबलाकापुण्डरीकप्लवशरारिमुखनन्दिमुखमद्गुत्-क्रोशकाचाचमल्लिकाक्षशुक्लाक्षपुष्करशायिकाकोना-लकाम्बुकुक्कुटिकामेघरावश्वेतचरणप्रभृतय: प्लवा: सङ्घातचारिणश्च । गुणा: —"रक्तपित्तहरा: शी-ता: स्निग्धा वृष्या मरुज्जित: । सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयो: ॥" सु.सू.४६अ । कैवर्त्तमुस्ता-याम् । हिं केवटीमोथा, गुड़तजी । भा.म.४भ. सु.रो.चि. । च.चि.१अ.ब्रह्मरसायने । र०.र. प्रमेह.चि. । च.द.छर्दिचि.विष-चि. । प्लक्षवृक्षे । मद.व.५ । गन्धतृणे । मे. । हंसिन्यां । विकङ्कत-वृक्षे । वै.निघ. । सारसपक्षिणि । मे. । च.सू.२७ अ. । वकवृक्षे । च. । क्रौञ्चे । चुचुशाकविशेषे । भेके । गजे । अङ्गे । कपौ । त्रिका. । जलकाके । मे. । गोपालकरञ्जे । सु.चि.११अ. ।
प्लवक: (ग:) । पुं । प्लक्षवृक्षे । रा.नि.व.११ । भेके । मे. । (ग:) । वानरे । मे. । प्लवपक्षिणि । श.च. । शिरीषवृक्षे । रा.नि.व.९ ।
प्लवगति: । पुं । भेके । श.च. ।
प्लवङ्ग: । पुं । वानरे । अम. । प्लक्षवृक्षे । रा.नि. व.११ । मृगे । श.च. ।
प्लवङ्गम: । पुं । वानरे । प.मु. । भेके । अम. ।
प्लवधान्यम् । क्ली । परिपेलवृणे । रा.नि.व.८।
प्लवनम् । क्ली । सन्तरणे । सु.नि.३अ. ।
प्लक्ष: । पुं । (Thespesia populnea. Syn. Hibiscus populnes, or Ficus infectoria.) Waved-leaf fig tree. पर्क-टीवृक्षे । পাকুড়গাছ । গাব্জীভাঁট । र.मा.। हिं पाकड़ि,पखर,गजदन्तसहोरा । तें गङ्गरयजुव्वि । ता. पोरिश्रवि । सु.सू.३८अ.न्यग्रोधादि: । महा-क्षुद्रभेदेन द्वौ भेदौ । सा. गुणा: — कटु: कषाय: शीतल: रक्तदोषजित् मूर्च्छाभ्रमप्रलापहरश्च । क्षु-द्रोऽपि महतीगुणं लभते । रा.नि.व.११। व्रणघ्न:, श्लेष्मपित्तशोषशोथविसर्पघ्नश्च । मद.व.५ । अश्वत्थ-वृक्षे । मे. ।
प्लावग: । पुं । मर्कटे । वै.निघ. ।
प्लावी (इन्) । पुं । पक्षिणि । वै.निघ. ।
प्लाक्षम् । क्ली । प्लक्षफले । अम. ।
प्लि(प्ली)ह: (हा) । पुं, स्त्री । जाठररोगविशे-षे । পিলে । निदानलक्षणे—"वात: प्लीहानमुद्धूय कुपितो यस्य तिष्ठति । शनै: परितुदन् पार्श्वं प्लीहा तस्याभिवर्द्धते॥" च.सू.१८अ.। स चतुर्विध:। "विदाह्यभिष्यन्दिरतस्य जन्तो: प्रदुष्टमत्यर्थमसृक् कफश्च । प्लीहाभिवृद्धिं कुरुत: प्रवृद्धौ प्लीहोत्थमेत-

जठरं वदन्ति । तद्वामपार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः ।" मा.नि. । "श्रमोभ्रमोविदाहश्च वैवर्ण्यं गात्रगौरवम् । मोहो रक्तोदरत्वञ्च ज्ञेयं रक्तजलक्षणम् ॥ सज्वरः सपिपासश्च सदाहो मोहसंयुतः । पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते॥ प्लीहा मन्दव्यथः स्थूलः कठिनो गौरवान्वितः । अरोचकयुतः शीतः प्लीहा कफज उच्यते ॥ नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीड़ितः । वेदनाभिः परीतश्च प्लीहा वातिक उच्यते ॥" भा. । [श.च. ।

प्लीहघ्नः । पुं । रक्तरोहितकवृक्षे । রক্তরোড়া ।

प्लीहशत्रुः । पुं । रोहितकवृक्षे । प.मु. । स्नुषावृक्षभेदे । रा.नि.व.४ । [ह्रायाम् । वै.निघ. ।

प्लीहारिः । पुं । अश्वत्थवृक्षे । श.च. । शरपु-

प्लीहोदरम् । क्ली । उदररोगविशेषे । लक्षणम् —"विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च । प्लीहाभिवृद्धिं सततं करोति प्लीहोदरं तत्प्रवदन्ति तज्ज्ञाः ॥" सु.नि.७अ. । अन्यच्च यथा—"वर्णान्यत्वं महत्त्वञ्च काठिन्यञ्च विशेषतः । प्लीहोदरे विजानीयाद्दैहे च कृशतां तथा ॥" ज.द.५२अ.।

प्लुतगतिः । पुं । शशके । খরগোশ । वै.निघ.।

प्लुषः । पुं । अग्निदाहे । व्याकरणम् ।

प्लुष्टः । पुं । अग्निदग्धे । अम. ।

प्लोतः । पुं । कर्पटे । सु.सू.५अ. ।

प्लोषः । पुं । दाहे । अम. ।

प्सा । स्त्री । भक्षणे । त्रिका. ।

प्सानम् । क्ली । भक्षणे । भक्ते । हे.च. ।

फ

फः । पुं । जृम्भानिस्कारे । विश्व. । झञ्झावाते । मे. ।

फञ्जिका । स्त्री । भार्ग्याम् । বামুনহাটী । प.मु. । सु.सू.३८अ. । दन्तिवृक्षे । वै.निघ. । देवताड़वृक्षे । दुरालभायां । श.च. ।

फञ्जिप(पु)त्रिका । स्त्री । आखुपर्ण्याम् । प.मु. । (पुत्रिका) । वनस्पतिभेदे । वै.निघ. ।

फञ्जी । स्त्री । भार्ग्याम् । বামুনহাটী । रा.नि.व.६ । च.द.सि.यो.हिक्काश्वास.चि. । एतत्पत्रं कफघ्नम् । अत्रि. । वृद्धदारकविशेषे । रा.नि.व.२ । दन्तिवृक्षे । योजनवल्ल्याम् । वै.निघ. ।

फञ्जीकरः । पुं । फञ्ज्याम् । वै.निघ. ।

फञ्ज्यादिपञ्चकम् । क्ली । फञ्जिका जीवनी पद्मा तर्कारी चुञ्चुक इति वनजपत्रशाकवर्गे । गुणाः—वातहारित्वं ग्राहित्वं दीपनत्वं रुच्यत्वञ्च । मेघ्ना कुणञ्जरः त्रिपुटश्च इत्यपि तद्वर्गमध्ये गण्यते । वर्गोऽयं दीपनः पाचनः रुच्यः बलवर्णकरश्च। त्रिदोषशमनः पथ्यः ग्राही लघुश्च। रा.नि.व.७।

फटः (टा) । पुं,स्त्री । अहिफणायाम् । अम.। जटा. ।

फटकी । स्त्री । स्फटिकार्य्याम् । ফট্কিরি । वै.निघ.२भ.चक्ष.चि. चक्षकेशरिरसे ।

फटिकारी । स्त्री । (Alumen.) Alum. स्वनामख्यातक्षारविशेषे । ফট্কিরি । हिं फिटुकरी । तें पतिकूराम । ता. पतिकारम । दा. फटकी । गुर्ज. फर्करी । बम्. फटिकी । गुणाः—संग्राहिणी सङ्कोचकरी अपूतिकरी बालविसूच्याम् उदरामये नासारक्तस्रावे च हिता । "फटी च कटुका स्निग्धा कषाया प्रदरापहा । मेहकृच्छ्रवमीशोषदोषघ्नी दृढ़रङ्गदा ॥" रा.नि.व.१३ ।

फड़िङ्गा । स्त्री । झिल्लीकीटे । ফড়িঙ্ । श.च.।

फणः (णा) । पुं, स्त्री । सर्पफणायाम् । अम. भ. । घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिबद्धे मर्म्मद्वये । सु.शा.६अ. ।

फण(णा)क[ध]रः । पुं । सर्पे । श.र. ।

फणभृत् । पुं । सर्पे । हे.च. । [र. ।

फणाभरः (वान्) । पुं । सर्पे । हारा. । श.

फणिः । पुं । विषे । र.मा.सं.गदमुरारिरसे ।

फणिका । स्त्री। कृष्णोदुम्बरिकायां । वै.निघ.।

फणिके(श)सरम् । क्ली । नागकेसरपुष्पे । रा.नि.व.६ ।

फणिखेलः । पुं । लावपक्षिणि । वै.निघ. । भारतीपक्षिणि । ভারুই পাখী । त्रिका. ।

फणिचम्पकः । पुं । वनचम्पकवृक्षे । বনজ চাঁপা গাছ । रा.नि.व.१० ।

फणिजिह्वा । स्त्री । महासमङ्गायां । महाशतावर्य्याम् । रा.नि.व.४ ।

फणिजिह्विका । स्त्री । श्वेतशारिवायाम् । महाशतावर्य्याम् । वै.निघ. ।

फणिज्ज(ज्झ)कः । पुं । क्षुद्रपत्रतुलसीभेदे, गन्धतुलस्याम् । रा.नि.व.१० । वा.सू.१५अ. । मधुरजम्बीरे । महुर इति लोके । च.सू.२अ.वि.८अ. । पलाशवृक्षे । भैष.ने.रो.चि. ।

फणिप्रियः । पुं । वायौ । श.र. ।

फणिफेनः । पुं । अहिफेने । আফিম । रत्ना. ।

फणिभारिका । स्त्री । कृष्णोदुम्बरवृक्षे । কাকডুমুর । वै.निघ. ।

फणिलता । स्त्री । नागवल्लीलतायाम् । পাণ [গাছ । रा.नि.व.११ ।

फणिवल्ली । स्त्री । नागवल्ल्याम् । পাণ গাছ । रा.नि.व.११ । वै.निघ.२भ.क्षय.चि.नवरत्नराजमृगाङ्के । [वै.निघ. ।

फणिसम्भारा । स्त्री । कृष्णोदुम्बरिकायाम् ।

फणिहन्त्री । स्त्री । गन्धनाकुल्याम् । গন্ধরাস্না । रा.नि व.७ ।

फणिहारी (इन्) । पुं । कपिकच्छौ । वै. [निघ. ।

फणिहृत् । स्त्री । क्षुद्रदुरालभायाम् । रा.नि.व.४ ।

फणी (इन्) । पुं । मरुवकवृक्षे, क्षुद्रपत्रतुलस्यां । श्वेतचन्दने । च.द.वा.व्या.चि.महासुगन्धतैले । सर्पे । स्त्री (नी) । सर्पिण्याम् । সর্পগন্ধা । सर्पाक्षियाम् । रा.नि.व.५ ।

फणीयम् । क्ली । पद्मकाष्ठे । वै.निघ. ।

फल्कारी (इन्) । पुं । पक्षिणि । श.च. ।

फम्फणः । पुं । सन्निपाते । वै.निघ. ।

फरङ्गरोगः । पुं । See फिरङ्गरोगः ।

फरेन्द्रः । पुं । जम्बूवृक्षे । वै.निघ. ।

फर्फरी । स्त्री । कराग्रे । পাঞ্জা । वै.निघ. ।

फलम् । क्ली । आम्रादौ प्रसिद्धम् । ফল । "फलेषु परिपक्वं यत् गुणवत्तदुदाहृतम् । बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम् । फलेषु सरसं यत् स्यात् गुणवत्तदुदाहृतम् । द्राक्षाबिल्वशिवादीनां फलं शुष्कं गुणाधिकम् । फलतुल्यगुणं सर्वं मज्जानमपि निर्दिशेत् ।" भा. । इन्द्रयवे । रा.नि.व.६ । वै.निघ.कृमि.चि.मुस्तादिः । वा.सू.१५अ.वत्सकादिव. । त्रिफलायाम् । मे. । सा.कौ.दूर्व्वाद्यतैले । भैष.अरिमेदा.तैले । च.द.अजी.चि. । वृषणग्रन्थौ । अम. । स्त्रीरजसि । श.र. । जातीफले । त्रिका. । र.सा.सं.सर्व्वतोभद्ररसे । भैष.वा.व्या.चि.गन्धद्रव्यकथने । च.द.योनिरो.चि. । भैष.मु.रो.चि. स्वल्पखदिरवट्यां । शस्त्रे । अम. । कक्कोलके । কাঁকলা । मे. । फाले । हे.च. । मदनफले । प.मु. । च.द.वमने । च.द.वा.व्या.चि.एकादशशतिकमहाप्रसारणीतैले । पुं । कुटजवृक्षे । श.र. ।

फलकः । पुं । अस्थिखण्डे । जटा. । नागकेशरवृक्षे । श.च. । नितम्बे । क्ली । प्रसाधनार्थं जलरक्षणाधारविशेषे । কলসী বসাইবার ঘড়াঞ্চে । सु.सू.४५अ. ।

फलकण्टकः । पुं । पर्पटके । ক্ষেৎপাপড়া । वै.निघ. । स्त्री (का) । इन्दीवरायाम् । वै.निघ. ।

फलककर्कशा । स्त्री वनबदरवृक्षे । संग्रह. ।

फलकी (इन्) । पुं । मत्स्यविशेषे । চিতল, ফলুই মাছ । त्रिका. ।

फलकृष्णः । पुं । करञ्जवृक्षे । वै.निघ. । पा[नीयामलके । श.च. ।

फलकेशरः । पुं । नारिकेलवृक्षे । जटा. ।

फलकोशः (षः) (कः) । पुं । वृषणे । शिश्ने । त्रिका. ।

फलङ्घा । स्त्री । महाश्रावणिकायाम् । रा.[नि.व.५ ।

फलग्रहिः । पुं । फलितवृक्षे । अ.टी.भ. ।

फलग्राही (इन्) । पुं । वृक्षे । धरणिः ।

फलघृतम् । क्ली । पक्वघृतविशेषे । तत् योनिरोगमात्रे हितम् । अत्र मेदामहामेदयोरभावे शतावरी द्विगुणा, काकोलीक्षीरकाकोल्यभावे अ-

श्वगन्धा द्विगुणा। काकोल्यौ प्रति द्वैगुण्यार्थंप्रयोग:। जीवकर्षभकयोरभावे विदारीकन्दौ द्विगुणौ देय:। भा.म.४भ.यो.रो.चि.। पाठ:—"मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला। मेदा पयस्या काकोली मूलचैवाश्वगन्धजम्। अजमोदा हरिद्रे द्वे हिङ्गु कटुकरोहिणी। उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयम्। एतेषां कार्षिकैर्भागैः घृतप्रस्थं विपाचयेत्। शतावरीरस: क्षीरं घृताद्देयं चतुर्गुणम्।" च.द.योनि.व्या.चि.। अन्यत्र—"सहाचरे द्वे त्रिफलां गुडूचीं सपुनर्नवां। शुकनासां हरिद्रे द्वे रास्नां मेदां शतावरीं। कल्कीकृत्य घृतप्रस्थं पचेत् क्षीरचतुर्गुणं।" च.द.योनि.व्या.चि.। जीवद्वत्सैकवत्साया गो: घृतं ४ श.। शतमूलीरस: १६ श. दुग्धं १६ श.। कल्कार्थं मेदा अभावे (गुडूची) मञ्जिष्ठा यष्टिमधु कुष्ठं त्रिफला शर्करा बला (বেলেড়া) शुक्लभूमिकुष्माण्ड: काकोली अश्वगन्धामूलं यमानी हरिद्रा दारुहरिद्रा हिङ्गु कटुकी उत्पलं (নীলশুন্দী) द्राक्षा क्षीरकाकोली चन्दनं रक्तचन्दनं एषां प्र.२तो.। अन्यत्— कल्कार्थं—श्वेतपीतझिण्टीमूलं त्रिफला गडूची पुनर्नवा (শ্বেতপুন্যা) चर्मचटक: (চামচিকে)। हरिद्रा दारुहरिद्रा रास्ना मेदा शतावरी, एषां मिलित्वा १ श.। जीवद्वत्साघृतं ४ श.। दुग्धं १६ श.।

फलचमसम् । क्ली । वटवृक्षवल्कले । वै.निघ.।

फलचोरक: । पुं । चोरकनामगन्धद्रव्ये । रा.नि.व.१२ । [श.र. ।

फलज्जाति: (ती) । स्त्री । जातीफलवृक्षे ।

फलत्रय(त्रिक)म् । क्ली । त्रिफलायाम् । रा.नि.व.२२ ।

फलत्रिकादि: । पुं । पाण्डौ कषाये । फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बज:। क्वाथ: क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम् ॥ रस.र. ।

फलद: । पुं । वृक्षे । धरणि: ।

फलद्रुम: । पुं । फलितवृक्षे । वै.निघ. ।

फलपञ्चाम्लम् । क्ली । अम्लफलपञ्चके । रा.नि.व.२२ ।

फलपाक: । पुं । करमर्दवृक्षे । अ.टी.भ. । पानीयामलके । श.च. ।

फलपाकान्ता । स्त्री । ओषध्याम्, धान्यादौ । अम. ।

फलपाकी (इन्) । पुं । गर्द्दभाण्डवृक्षे । र.मा.।

फलपिप्पली । स्त्री फलबीजे । सु.सू.४२अ.।

फलपुच्छ: । पुं । कन्दशाकविशेषे, वरण्डालीत्रिका. । [रा.नि.व.११ ।

फलपुष्पा (ष्पी) । स्त्री । पिण्डीखर्ज्जूरीवृक्षे ।

फलपूर: (क:) । पुं । मातुलुङ्गवृक्षे । प.मु. । मद.व.६ । वै.निघ.२भ.भाकल्लकादिचूर्णे । च.द. र.पि.चि. ।

फलप्रिय: । पुं । द्रोणकाके । रा.नि.व.१९ ।

फलप्रिया । स्त्री । प्रियङ्गौ । रा.नि.व.१२ ।

फलमत्स्या । स्त्री । गृहकन्यायाम् । घृतकुमार्यौ । वै.निघ. । [व.६ ।

फलमुख्या । स्त्री । अजमोदायाम् । रा.नि.

फलमुण्ड: । पुं । नारिकेलवृक्षे । श.र. । [मा.।

फलमुद्गरिका । स्त्री । खर्ज्जूरवृक्षविशेषे । श.

फलयुग्मा । स्त्री । इन्दीवरायाम् । वै.निघ. ।

फलराज: । पुं । खर्व्वूजेति ख्याते फलशाके । थर्मुजा । वै.निघ. ।

फलवर्ग: । पुं । फलगणे । दाड़िमामलकबदरकोलकर्कन्धुसौवीरशिम्बितिकाफलकपित्थमातुलुङ्गाम्राम्रातककरमर्द्दपियालकुचभव्यपारावतवेत्रफलप्राचीनामलकतिन्तिड़ीकनीपकोशाम्राम्लीकानारङ्गजम्बीरप्रभृतिषु । एषां गुणा:—स्वस्वपर्य्याये मृग्या: ।

फलवर्त्ति: (र्त्ती) । स्त्री । मलशोधिन्यां वर्त्तौ । भैष.व.शूल.चि. । "घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा स्वाङ्गुष्ठसन्निभा । मलप्रवर्त्तिनी वर्त्ति: फलवर्त्तिश्च सा स्मृता ॥" भा. ।

फलवर्त्तुल: । पुं । तरम्बुजवृक्षे । रा.नि.व.७ ।

फलवान् । त्रि । फलिते । अम. ।

फलविरेचनम् । क्ली । हरीतक्यादौ । तदुक्तं—"मृद्वीकाथ विड़ङ्गानि खर्ज्जूराणि परुषकम् । आरग्वधोऽथामलकं हरीतक्यो विभीतकम् । काम्पिल्लकोपचित्रे च त्रपुषश्च मुकूलकम् । नीलिका

अङ्कुलं पीलु भवेत् फलविरेचनम् ॥" वा.चि.६अ. अरुण. ।

फलविषम् । क्ली । यस्य फले विषं वर्त्तते । तच्च द्वादशविधम् — कुमुद्वतीवेणुकाकरम्भमहाकरम्भककर्कोटकरेणुकखद्योतकचर्म्मरीभगन्धासर्पघातिनन्दनसारपाकानीति । तद्दूषणे—"मुष्कशोफ: फलविषै: दाहोऽन्नद्वेष एव च ।" सु.कल्प.२अ. ।

फलवृक्ष: (क:) । पुं । पनसवृक्षे । কাঁটাল গাছ । रा.नि.व.११ ।

फलशाकम् । क्ली । फलप्रधानशाकवर्गे । यथा —"कुष्माण्डकालिङ्गकलिङ्गचिर्भटं पटोलयुग्मञ्च तथाच तुम्बी । वीजाख्यकर्कोटककारवेल्लं कोषातकी वालुफलानि चैव ॥" अत्रि.१६अ. । एषां गुणादिकं पर्य्याये मृग्यम् । [त्रिका. ।

फलषाड़व: । पुं । दाड़िमवृक्षे । रा.नि.व.११।

फलशैशिर: । पुं । वदरवृक्षे । रा.नि.व.११ ।

फलश्रेष्ठ: । पुं । आम्रवृक्षे । श.च. ।

फलश्रेष्ठा । स्त्री । त्रिफलायाम् । वै.निघ. ।

फलस: । पुं । पणसवृक्षे । अ.टी.भ. ।

फलसम्बद्ध: । पुं । उदुम्बरवृक्षे । वै.निघ. ।

फलसम्भारा । स्त्री । कृष्णोदुम्बरिकायाम् । वै. निघ. ।

फलस्नेह: । पुं । अक्षोटवृक्षे । रा.नि.व.११ ।

फला । स्त्री। इन्दीवरायाम् । झिञ्झिरीटाक्षुपे । रा.नि.व.४ । [रा.नि.व.११ ।

फलाढ्या । स्त्री । काष्ठकदल्यां । বন কলা ।

फलात्मिका । स्त्री । कारवेल्लयाम् । করলা, উচ্ছে । वै.निघ. ।

फलादन: । पुं । लकुचवृक्षे । মান্দার গাছ । प.मु. । शुकपक्षिणि । है.च. । त्रि । फलभक्षके ।

फलाध्यक्ष: (क्षा) । त्रि। राजादनवृक्षे । क्षिर्णी । भा. ।

फलानालु: । पुं । पानशाक इति प्रसिद्धे कन्दशाके । प.मु. । वृक्षाम्ले । रा.नि.व.६ ।

फलान्त: । पुं । वंशे । श.मा. ।

फलान्नम् । क्ली । फलोपकरणकृतान्ने । गुणा: —"फलान्नं स्वादुचिकरं गुरु फलसमं गुणै: ।" वै.निघ. । वृक्षाम्ले । रा.नि.व.११ । [२अ. ।

फलाम्बु । क्ली । द्राक्षादिसिद्धजले । वा.चि.

फलाम्ल: । पुं । अम्लवेतसे । रा.नि.व.६ । च.चि.२अ.वृष्यरसे । क्ली। अम्लरसविशिष्टफलमात्रे । च.चि.२अ. मातुलुङ्गरसदाड़िमरसादौ, महाषट्कट्वरतैले ।

फलाम्लपञ्चकम् । क्ली। जम्बीरनागरङ्गाम्लवेतसचिञ्चामातुलुङ्गेषु । গোঁড়া, নারাঙ্গা, অম্লবেতস, তেঁতুল, টাবা ।

फलारिष्ट: । पुं । अर्शोऽधिकारे अरिष्टभेदे । —"हरीतकीफलप्रस्थं प्रस्थमामलकस्य च । विशालाया दधित्थस्य पाठाचित्रकमूलयो: । द्वे द्वे पले समापोथ्य द्विद्रोणे साधयेदपां । पादावशेषे पूते च रसे तस्मिन् प्रदापयेत् । गुड़स्यैकां तुलां वैद्य: संस्थाप्य घृतभाजने । पक्षस्थितं पिबेदेनं ग्रहण्यर्शोविकारवान्…।" च.चि.८अ. ।

फलासव: । पुं । द्राक्षाखर्ज्जूरादिफलोद्भवषड़्विंशत्यासवेषु । च.सू.२५अ. ।

फलास्थि: । पुं । नारिकेलवृक्षे । वै.निघ. ।

फलाक्षी । स्त्री । क्षीरिणीवृक्षे । वै.निघ. ।

फलि: (ली) (इन्) । पुं । मत्स्यविशेषे । फलुई গাছ । गुणा: —"फलि: स्वादुर्गुरु: स्निग्ध: बलकृच्छुक्रवर्द्धन: ।" राज.३प. ।

फलिका । स्त्री । पारिषाश्वल्ये । निष्पावे । वर्वटी । रा.नि.व.१६ । [खलायाम् ।

फलित: । पुं । वृक्षे । धरणि: । स्त्री । रज-

फलिन: । पुं । क्षीणाकवृक्षे । पणसवृक्षे । रा. नि.व.११ । अरिष्टकवृक्षे । রোঠা । वै.निघ. ।

फलिनी । स्त्री । प्रयोगे प्रशस्ततमफलायामुद्भिदि । च.सू.१अ.। मुषल्याम् । तालमूली । प्रियङ्गौ । रा.नि.व.१२ । लक्ष्मणाकन्दे । रा.नि.व.७। वै.निघ.कल्याणघृते । गन्धप्रियङ्गौ । वा.सू.१५अ. एलादि: । त्रायमाणायां । वै.निघ.२भ.चयचि.द्राक्षासवे । नखरञ्जकवृक्षे । মেহেদী । वै.निघ.२भ. दाह.चि.प्रलेपे । लाङ्गलीवृक्षे । विषलाङ्गूलिन्या । अम. । वै.निघ.२भ.वा.व्या.चि.विषगर्भतैले । क्षीणाकवृक्षे । दुग्धिकायां । थिकुई । र.मा. ।

फली । स्त्री । सुषल्याम् । तालमूली । प्रियङ्गुवृक्षे । प.मु.। चक्कनासायां । चर्म्मकषा । वै.निघ.। आम्रातकवृक्षे । फलिमत्स्ये । श.मा. ।

फलीयः । पुं। पारिशपिप्पले । अश्वत्थविशेष, পলাশপিপুল । वै.निघ. ।

फलूषः । पुं । लताविशेषे । उणा. । [श.र. ।

फलेग्राहिः (ही(इन)) । पुं । फलितवृक्षे ।

फलेन्द्रः । पुं,स्त्री । राजजम्बूवृक्षे । বড় জাম । भा. । [বিশেষ । प.मु. ।

फलेपाकी । स्त्री । गन्धमुखे । গন্ধভাদুলিয়া-

फलेपुष्पा । स्त्री । द्रोणपुष्प्याम् । घलघসা । भा. । [प मु. ।

फलेरुहा । स्त्री । पाटलवृक्षे । পারুল গাছ ।

फलेलाङ्कः । पुं । जीवनवृक्षे । हारा. ।

फलोत्तमा । स्त्री । दुग्धिकायां । ক্ষীরুই । र.मा. । कपिलद्राक्षायाम् । त्रिफलायां । रा.नि. व.११ ।

फलोत्पत्तिः । पुं । आम्रवृक्षे । श.च. ।

फलोनिः । स्त्री । स्त्रीयोनौ । वै.निघ. ।

फल्गुः । स्त्री । काकोदुम्बरिकायाम् । কাক ডুমুর । र.मा. । "तर्पणं बृंहणं फल्गु गुरु विष्टम्भि शीतलम् ।" च.सू.२७अ. । यज्ञडुम्बरे । च.सू.४ अ. । पुं । वसन्ततौं । पित्तश्लेष्मोल्वणसन्निपातज्वरे । भा. । त्रि । अनर्थके । त्रिका. । [टी.भ. ।

फल्गुनः (नालः) । पुं । फाल्गुनमासे । अ.

फल्गुनी । स्त्री । काकोदुम्बरिकायाम् । रा.नि. व.११ । च.चि.२अ. ।

फल्गुफलम् । क्ली । काकोदुम्बरिकाफले । सि. यो.र.पि.चि.सिद्धतमयोगे ।

फल्गुमूलम् । क्ली । काकोदुम्बरिकामूले । च. द.सि.यो.मूर्च्छा.चि.वृहत्पञ्चगव्यघृते ।

फल्गुवाटिका (टी) । स्त्री । काकोदुम्बरिकायाम् । रा.नि.व.११ ।

फल्गुवृन्तः (न्ता) (कः) । पुं, स्त्री । पीतलोध्रवृक्षे । श्योणाकविशेषे । रा.नि.व.९ ।

फल्यम् । पुष्पे । पुष्पकलिकायाम् । श.च. ।

फल्लकिन् । पुं । मत्स्यविशेषे । ফলুই মাছ । श.मा. । [व.१२ ।

फाटकी । स्त्री । स्फट्यां । ফট্‌কিরি । रा.नि.

फाणिः । स्त्री । गुड़े । उणा. ।

फाणितम् । क्ली । अर्द्धावर्त्तितेक्षुरसे । गुड़विशेषे । ঝোলাগুড় । सु.सू.४४अ. । लक्षणम्— "इक्षो रसस्तु यः पक्वः किञ्चिद्गाढ़ो बहुद्रवः । स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥" गुणाः— "फाणितं गुर्व्वभिष्यन्दि बृंहणं कफपित्तकृत् । वातपित्तश्रमान् हन्ति मूत्रवस्तिविशोधनम् ॥" भा. ।

फाण्टः । पुं । कषायभेदे । कल्कितद्रव्यपलं चतुष्पले उष्णतोये क्षिप्त्वा क्षणकालं शरावावृतं संस्थाप्य अथ मृदितं वस्त्रपूतञ्च फाण्ट उच्यते । কুট্টিত দ্রব্য ১ প. ৪ পল উষ্ণ জলে মৃৎপাত্রে বা প্রস্তরপাত্রে ক্ষিপ্ত করিয়া ক্ষণকাল ঢাকিয়া পরে মৃদিত ও বস্ত্রপূত করিবে । क्षुण्णद्रव्यस्य पलं पलचतुष्टयमितमुष्णोदकञ्च एकत्र स्रावयेत् । "क्षुण्णद्रव्यपले सम्यक् जलमष्टगुणङ्क्षिपेत् । पात्रे चतुष्पलमितं ततस्तु स्रावयेज्जलम् । सोऽयं पूतो द्रव्यफाण्टः······॥" प.प्र.१ख. । शार्ङ्ग. ३अ. । "फाण्टः सद्यो धृतो ज्ञेयः स्वल्पदोषबलान्वितः । अष्टावशेषितेऽत्युष्णजले क्वाथ्य पलं क्षिपेत् । विमृद्य पटपूतं तज्जलं फाण्ट इति स्मृतः । कुड़वञ्च जलन्नीतं कथितं वह्निसन्निभम् ॥" अत्रि. ।

फालः । पुं । कार्पासवस्त्रे । मे. ।

फालखला । स्त्री । भारतीपक्षिणि । त्रिका. ।

फाल्गुनः । पुं । अर्ज्जुनवृक्षे । रा.नि.व.९ । तन्नामकमासे । मे. ।

फाल्गुनप्रियः । पुं । शङ्खे । শাঁক । वै.निघ.।

फाल्गुनानुजः । पुं । वसन्तर्त्तौ । हारा. ।

फाल्गुनिकः । पुं । फाल्गुनमासे । अम. ।

फिङ्गकः । पुं । नक्रे । पक्षिविशेषे । ফিঙ্গা । श.मा. ।

फिरङ्गः । पुं । स्वनामकरोगे । भा. ।

फिरङ्गरोगः । पुं । आगन्तुजसंक्रामकरोगविशेषे, गन्धरोगे । स फिरङ्गदेशे एव बाहुल्ये-

न जायते। "फिरङ्गसञ्ज्ञके देशे बाहुल्येनैव यद्भवेत्। तस्मात् फिरङ्ग इत्युक्तः··· ॥" निदानं यथा —"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवं। फिरङ्गिनोऽङ्गसंसर्गात् फिरङ्गिन्याः प्रसङ्गतः। व्याधिरागन्तुजो ह्येष दोषाणामस्य संक्रमः। भवेत्तं लचयेत्तेषां लचणैर्भिषजां वरः ॥" रूपं यथा— "फिरङ्गस्त्रिविधो ज्ञेयो बाह्य आभ्यन्तरस्तथा। बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रुवे। तत्र बाह्यः फिरङ्गः स्यात् विस्फोटसदृशोऽल्परुक्। स्फुटितो व्रणवद्वेद्यः सुखसाध्योऽपि स स्मृतः। सन्धिष्वाभ्यन्तरः स स्यात् आमवात इव व्यथां। शोथञ्च जनयेदेष कष्टसाध्यो बुधैः स्मृतः ॥" भा.म.४भ.।

फिरङ्गरोटी। स्त्री। रोटिकाभेदे। পাঁউরুটী। सा तु तालस्याथवा खर्ज्जूरस्य रसेन मधुरिकाजलेन वा मिश्रिता गोधूमकणिका अधिककालमुत्तमं सम्मर्द्दिता स्थूलगोलाकारेण निर्म्मिता तन्दूरपाकेन निष्पादिता भवति। पाकराजः.।

फिरङ्गिणी। स्त्री। तद्देशीयस्त्रियां। ফিরিঙ্গি মেয়ে। भा.।

फुक्कः। पुं। पच्चिणि। श.च.।

फुटः। पुं। सर्पफणायाम्। हे.च.।

फुप्फु(स्फु)सः। पुं। रोगविशेषे। शोणितफेनप्रभवे वामतो हृदयनाड़िकालग्ने स्वनामख्यातयन्त्रे। ফুস্‌ফুস্, ফুক্কা, কাবাসে। सु.शा.४अ.। "हृदुक्कः फुस्फुसश्च ॥" मा.नि.। [निघ.।

फुल्लतुवरी। स्त्री। स्फटिकारिकायाम्। वै.

फुल्लफालः। पुं। सूर्पवाते। त्रिका.।

फुल्लरीकः। पुं। सर्पे। उणा.।

फुल्ललोचनः। पुं। हरिणविशेषे। श.च.।

फेणः (नः) (कः)। पुं। फेने। समुद्रफेने। प.मु.। त्रिका.। भैष.वा.र चि.द्वादशायसे। अहिफेने। वाष्पे। वै.निघ.। (कः) गोधूमचूर्णकृतपिष्टकविशेषे। থাজা। गुणाः—"फेनका लघवो रुच्या वृष्याः पित्तानिलापहाः।" राज.३प.।

फेण(न)का। स्त्री। अरिष्टकवृच्चे। রীঠা গাছ। वै.निघ.। जलपक्वतण्डुलचूर्णे। পিটে। श.च.। [नि.व.५।

फेण(न)दुग्धा। स्त्री। दुग्धफेनीचुपे। रा.

फेण(न)मेहः। पुं। प्रमेहभेदे। तत्र रोगी स्तोकं स्तोकं सफेनं मेहति। सु.नि.६अ.।

फेण(न)वाही (हिन्)। पुं। वस्त्रे। श.मा.।

फेणा (ना)। स्त्री। सातलाचुपे। चर्म्मकषा। रा.नि.व.४। शेहुण्डभेदे। भा.।

फेणा(ना)ग्रम्। क्ली। बुद्बुदे। हारा.।

फेणा(ना)श्मभस्म। क्ली। तन्नामकधातुविषे, शृङ्गीविषे। সেঁকো বিষ। सु.कल्प.२अ.।

फेणि(नि)का (णी,नी)। स्त्री। पक्वान्नविशेषे। থাজা। तत्करणविधिः—"समितायाघृताढ्याया वर्त्तीर्दीर्घाः समाचरेत्। तास्तु सन्निहिता दीर्घाः पीठस्योपरि धारयेत्। वेल्लयेद्वेल्लनेनैता यथैका पर्पटी भवेत्। ततश्छुरिकया तास्तु संलग्ना एव कर्त्तयेत्। ततस्तु वेल्लयेद्भूयः सद्दकेन च लेपयेत्। शालिचूर्णं घृतं तोयं मिश्रितं सट्टकं भवेत्। ततः संवृत्य तां लोप्त्रीं विदधीत पृथक् पृथक्। पुनस्तां वेल्लयेल्लोप्त्रीं यथा स्यान्मण्डलाकृतिः। ततस्तां सुपचेदाज्ये भवेयुश्च पुटाः स्फुटाः। सुगन्धया शर्करया तदुद्धूलनमाचरेत्। सिद्धैषा फेनिका नाम्नी मण्डकेन समा गुणैः। ततः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः ॥" भा.।

फेणि(नि)लः। पुं। (Sapindus trofoliatus, or S. Trifoliatus or S. Detergens, Rox.) Soapnut tree. रीठाकरञ्जे। रा.नि. व.९। রীঠা। हिं रिठा। तें कुक्कुदुकयलु। बदरवृच्चे। रा.नि.व.११। क्ली। बदरीफले। भा.म.१भ.ज्व.चि.मह्ालाचादितैले। "फेनिलं मधुकं बला।" रीठाफले। त्रिका.। मदनफले। मे.।

फेणि(नि)ला। स्त्री। सोमराज्याम्। वै.निघ.।

फेरः (रुः)। पुं। शालावृके। শেয়াল। रा.नि.व.१९।

फेरवः। पुं। शृगाले। रा.नि.व.१९।

फेरुः। पुं। शृगाले। रा.नि.व.१८।

फेलः (कः)। त्रि। उच्छिष्टे। श.र.।

फेला (लिः,ली)। स्त्री। भुक्तावशिष्टे। मे.। जटा.। श.र.।

फोग: । पुं । शाकविशेषे । वै.निघ. ।
फोण्डालु: । पुं । आलुकविशेषे । फोण्डालुकी इति कोङ्कणदेशे प्रसिद्धा । गुणा:—वातश्लेष्मघ्न: कटूष्ण: दीपनश्च । रा.नि.व.७ ।

ब

बक: । पुं । प्रसिद्धजलचरपक्षिणि । बक पाखी । बगलिहवे । बककुलेर गाछ । रा.नि.व.१८ ।
बकदर्शी (र्शिन्) । पुं । पारावते । पायरा । वै.निघ. ।
बकपुष्पा । स्त्री । शिवलिङ्गिन्याम् । वै.निघ. ।
बकुल: । पुं । स्वनामख्यातवृक्षे । बकुल गाछ । हिं बौलसरी । गुणा:—"बकुलस्तुवरोऽनुष्ण: कटुपाकरसो गुरु: । कफपित्तविषश्वित्रकृमिदन्तगदापह: ।" भा. । स्त्री । कटुकायाम् । रा.नि.व ६ ।
बकेरुका । स्त्री । बलाकायाम् । त्रिका. ।
बकोट: । पुं । बकपक्षिणि त्रिका. ।
बटु: । पुं । चिवर्षभिण्डी । रा.नि.व.१८ ।
बड़वा । स्त्री । घोटक्याम् । अम. ।
बड़वासुतौ । पुं । अश्विनीकुमारौ । श.च. ।
बड़िश: । पुं । मत्स्यवेधनयन्त्रे । बड़िश इवाहरणार्थशस्त्रविशेषे । सचानताग्र: तीक्ष्णकण्टकप्रथमयवपत्रमुखश्च । सु.सू.८अ. । "बड़िशौ चापि कर्तव्यौ प्रमाणेन षड़ङ्गुलौ । स्वानतस्तु तयोरेक: एको नात्याननतो भवेत् । अर्द्धपञ्चाङ्गुलं वृत्तं शेषं कार्य्यं मुखं तयो: । अर्द्धचन्द्राकृतिमुखं कार्य्यं नात्यानतस्य तु । स्वानतस्यानतं तस्मात् बड़िशस्य भिषग्वरै: । कलाग्रयोरन्तरं स्यात् यावदर्द्धाङ्गुलं यत: ॥" तन्त्रान्तरम् । सु.टी.ड. ।
बणिग्बन्धु: । पुं । नीलीवृक्षे । श.च. ।
बणिग्वह: । पुं । उष्ट्रे । श.च. ।
बदर: (**क:**) । पुं,क्ली । Fruit of the jujube. वृहत्कोलीवृक्षे, राजबदरे । बड़ कुल गाछ । हिं बैरी, बेर, बयेर । तें रेगुचेट्टु, रेंघ । उत्. कुड़ि । बम्. बीर । ता. रेयल्नि । च.द.पित्त्व.चि.शिरोलेपे । क्षुद्रकोल्यां । छोट कुल । इ.च. । च.सू.४अ.विरेचने । देवसर्षपवृक्षे । रा.नि.व.८ । कोलिसाधारणे । कुलगाछ । मं साधारणबोर । कं येरइ । बदरञ्च सौवीरकोलकर्कन्धुभेदेन त्रिविधम् । लक्षणगुणा:—"पच्यमानं सुमधुरं सौवीरबदरं महत् । सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् । बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ॥" इति । सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते । कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातलम् । कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥" इति । "कर्कन्धु: क्षुद्रबदरम्··· । अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् । स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ॥" भा. । सा: गुणा:—बदरं मधुरं कषायमम्लं परिपक्वं मधुराम्लम् उष्णं रुच्यं कफकरम् अतीसाररक्तश्रमशोषघ्नम् अपाचकञ्च । बदरस्य पत्रलेप: ज्वरदाहघ्न: । त्वक् विस्फोटशमन: । बीजं नेत्ररोगे हितम् । रा.नि.व.११ । अम्लं मधुरं श्लेष्मलं ग्राहि प्रशस्तञ्च । अत्रि.१७अ. । लघु संग्राहि रुच्युमुष्णञ्च । शुष्कं भेदि अग्निकृत् लघु तृष्णावातघ्नञ्च । मद.व.६ । "पुराणं तृट्प्रशमनं श्रमघ्नं दीपनं लघु ।" राज. ३प. । सेवफले । कश्चिद्राजनिघण्टु: । शृगालकोल्यां । शेयाकुल । अम । कुक्कुटीपादपे । कार्पासबीजे । मे. । द्विशाणमाने । वा.कल्प.६अ. ।
बदरत्रयम् । क्ली । वृहद्बदरक्षुद्रबदरशृगालकोलिकासु । च.सू.४अ.विरेचने । सौवीरकोलकर्कन्धुषु । भा. । [टो] कुल । रा.नि.व.११ ।
बदरफली (**वल्ली**) । स्त्री । भूबदर्य्याम् । मे-
बदरबीजम् । क्ली । बदरास्थनि । कुलेर आँटि । च.सू.४अ. ।
बदरा । स्त्री । आदित्यभक्तायाम् । हुड़हुड़िया । रा.नि.व.४ । कार्पास्याम् । प.मु. । वराहक्रान्तायाम् । वराक्रान्ता । एलापर्ण्यां । मे. । वाराहीकन्दे । श्वेतविदार्य्याम् । श्वेत भूँइकुमड़ा । वै.निघ. । विष्णुक्रान्तायां । विश्व. ।
बदरामलकम् । क्ली । (Flacourtia cataphracta.) पानीयामलके । हारा. ।

बदराम्थि । क्ली । बदरबीजे । কুলের আঁটি । संग्रहः ।

बदरास्थिमज्जा । पुं, स्त्री । तन्मज्जायाम् । কুল আঁটির শস্য । गुणाः—वृष्यः वीर्य्यबलप्रदश्च । मद.व.६ ।

बदरिः । स्त्री । बदरीवृक्षे । श.च. ।

बदरिका । स्त्री । घोण्टायाम् । শেয়াকুল । रा.नि.व.८ ।

बदरि(री)पत्र[क]म् । क्ली, पुं । नखीनामगन्धद्रव्ये । रा.नि.व.१२ । जटा. । बदरपत्रे ।

बदरी । स्त्री । बदरवृक्षे । বড় কুল গাছ । मद.व.६ । कपिकच्छौ । घोण्टाबदरे । रा.नि.व. ३।८ । कार्पास्याम् । रा.नि.व.४ । [वै.निघ. ।

बदरीच्छदः । पुं, क्ली । नखीनामगन्धद्रव्ये ।

बदरीच्छदा । स्त्री । हस्तिकोलिवृक्षे । শেয়াকুল । शङ्खनख्यां । र.मा. ।

बदरीपल्लवः । पुं, क्ली । कोलिकोमलपल्लवे । কুলের কচি পাতা । च.द.पि.ज्व.शिरोलेपे ।

बदरीफला । स्त्री । नीलशेफालिकायां । श.मा. ।

बद्धगुदः । पुं । उदररोगविशेषे । लक्षणम्—"यस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा सहितैः पृथग्वा । सञ्चीयते तत्र मलः सदोषः क्रमेण नाड्यामिव सङ्करो हि । निरुध्यते चास्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पं । हृन्नाभिमध्ये परिवृद्धिमेति यच्चोदरं विट्समगन्धिकञ्च । प्रच्छर्दयन् बद्धगुदी विभाव्यः......॥" सु.नि.७अ. । अश्वस्य यथा—"अल्पमल्पं पुरीषन्तु कृच्छ्राद्वातं प्रमुञ्चति । अभातकुक्षिर्यो वाजी तस्य बद्धगुदं वदेत् ॥" ज.द.५२अ. ।

बद्धमूलकः । पुं । क्षीरमूर्व्वायाम् । वै.निघ. ।

बद्धरसाम्रः (लः) । पुं । राजाम्रवृक्षविशेषे । कोमलफलगुणाः—अम्लं कटु पित्तदाहकरञ्च । पक्कस्य गुणाः—स्वादु मधुरं पुष्टिवीर्य्यबलप्रदञ्च । रा.नि.व.११ । [स्त्रि । वै.निघ. ।

बद्धवल्कः । पुं । दारुचिनीति ख्याते मधुरद्र

बद्धविट्कता । स्त्री । वायुजन्यरोगे । मलबद्धता । वै.निघ. ।

बद्धशिखा । स्त्री । लशुने । वै.निघ. । उच्चटायां । पुं । शिशौ । मे. ।

बद्धामयपतिः । पुं । ऋषभकौषधौ । वै.निघ. ।

बद्धोदरः । पुं । बद्धगुदे उदररोगे । च.सिद्धि. २अ. ।

बधिरः । पुं । वृषे । सुगन्धवृणे । রামকর্পূর । वै.निघ. । त्रि । श्रवणेन्द्रियरहिते । কালা । बधिरत्वनिदानलक्षणे यथा—"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति । शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥" मा.नि. । असाध्यता—"बाधिर्य्यम्बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत् ।" भा. । "श्लेष्मणानुगतो वायुः नादो वा समुपेक्षितः । उच्चैः कृच्छ्रात् श्रुतिं कुर्य्यात् बधिरत्वं क्रमेण च ॥" वा.उ.१७अ. ।

बधूः । स्त्री । नार्य्यां । पृक्कायां । কর্পূরশাক, পিঁড়ং । अम. । शारिवायाम् । অনন্তমূল । शट्यां । শটী । मे. । [नि.व.१० ।

बधूत्सवप्रसवः । पुं । रक्तझिण्ट्याम् । रा.

बध्रम् । क्ली । शीषके । अम. ।

बन्दफलः । पुं । करञ्जवृक्षे । श.चि. ।

बन्दूकम् । क्ली । बन्धुजीवपुष्पे । गुणाः—बन्दूकं श्लेष्मलं ग्राहि च । राज.५प. ।

बन्धः । पुं । शरीरे । हे.च. । आधौ । মনোব্যথা । मे. । [मे. ।

बन्धकी । स्त्री । पुंश्चल्याम् । अम. । करिण्यां ।

बन्धनम् । क्ली । संयमने । বাঁধা । अम. ।

बन्धुः (न्धूः) (कः) । पुं, स्त्री । बन्धुजीवक्षुपे । বান্ধুলি ফুলের গাছ । र.मा. । रा.नि.व. १० । मा.म.४भ.उ.चि. । (कः) पीतशाले । পিয়াশাল । मे. ।

बन्धुकपुष्पः (कः) । पुं । बीजकवृक्षे । পিয়াশাল । रा.नि.व.६ । श्योणाकवृक्षे । শোণা গাছ । च.द.अपकादौ ।

बन्धुजीवः (कः) । पुं । (Pentapetes Phoenicea. Wil.) पुष्पवृक्षविशेषे । यस्य पुष्पं मध्याह्ने विकसति, पराह्ने च सूर्य्योदये शुष्यति । বান্ধুলি ফুলের গাছ । र.मा. । हिं दुपह-

रिया, গেঁজুলিয়া । मं वांदुजा । कं बंदुरे । तें मक्किनचेट्टु वेगसिनचेट्टु । वम्. दुपारि । पञ्जा. गुलदुफरिया । सोऽसितसितपीतलोहितपुष्पविशेषाच्चतुर्विधः । गुणाः—ज्वरघ्नः श्वहपिशाचघ्नः सूर्य्यप्रसादनश्च । रा.नि.व.१० । कफहृत् ग्राही लघुः वातपित्तघ्नश्च । भा. । सु.सू.३८अ.संशमने ।

बन्धुरः । पुं । ऋषभके । रा.नि.व.५ । स्त्रौचिक्रे । हंसे । तिलकल्के । बन्धूकवृक्षे । बधिरे । मे. । विड़ङ्गे । हे.च. । वकपक्षिणि । श.र. । सारसपक्षिणि । वै.निघ. । त्रि । उन्नतानते । अम. ।

बन्धुराः । पुं बहु. । शक्तुषु । ছাতু । मे. ।

बन्धुलः । पुं । बन्धुजीववृक्षे । श.र. ।

बन्धुवेतसः । पुं । जलवेतसे । वै.निघ. ।

बन्धूकपुष्पः । पुं । बन्धुजीवपुष्पवृक्षे । वै.निघ.। पीतशाले । अम. । असनवृक्षे । আসন গাছ । रा.नि.व.६ । क्ली । तत्पुष्पे ।

बन्धूलिः । पुं । बन्धुजीववृक्षे । বান্ধুলি । श.र. ।

बन्ध्या । स्त्री । बन्ध्याकर्कोटक्याम् । रा.नि.व.३ । अप्रजस्त्रियाम् । বাঁজা । मे.। वायुजन्ये स्त्रीयोनिरोगविशेषे । तस्यां नारी नष्टार्त्तवा भवति । "बन्ध्या नष्टार्त्तवा ज्ञेया ।" भा.म.४भ. । ह्रीवेरे । বালা । श.च. ।

बन्ध्याकर्कोटकी । स्त्री । तिक्तकर्कोटक्यां । তিৎকাঁকুড়ী, তিৎকাকরোল । हिं बाँझखखासा, बाभूखसा, बाँझकाँकरील । मं वंझाकर्कोटोली । कं बजेमडुवागलु । वम्. वंझाकर्टोली । रा.नि.व.३ । सा.कौ.विषाधिकारे । गुणाः—लघ्वी कफनुत् व्रणशोधिनी सर्पदमनी तीक्ष्णा विसर्पविषघ्नी च । भा.पू.गु.व. । तिक्ता कटुः उष्णा कफघ्नी स्थावरादिविषहरी च । रा.नि.व.३ ।

बन्ध्याकार्पासी । स्त्री । वनकार्पास्याम् । वै. निघ. ।

बब्बु(ब्बू)रः (लः) (कः) । पुं । बर्ब्बूरवृक्षे । [বাব্লা গাছ । उत्. गुरड़ा ।

बब्बु(ब्बू)र[ल]निर्य्यासः । पुं । बर्ब्बूरनिर्य्यासे । বাব্লার আটা । वै.निघ. ।

बभ्रः (भ्रुः) । पुं । नकुले । নেউল । मे. । च.सू.२७अ. । रास्नायाम् । वै.निघ. । वातपित्तोल्बणसन्निपातज्वरे । निदानलक्षणे—"वातपित्ताधिको यत्र सन्निपातः प्रकुप्यति । तस्य ज्वरो मदुष्णा मुखशोषः प्रमीलकः ॥ आध्मानारुचितन्द्राश्च कासश्वासभ्रमश्रमाः । मुनिभिर्बभ्रुनामाऽयं सन्निपात उदाहृतः ॥" भा.म.१भ. । चातकपक्षिणि । त्रिका. । सुनिषण्णकशाके । रा.नि.व.४ । त्रि । खलतौ । हे.च. ।

बभ्रुधातुः । पुं । स्वर्णगैरिके । रा.नि.व.१३ ।

बभ्रराली । स्त्री । मक्षिकायाम् । ভ্রমর । वै. निघ. ।

बरम् । क्ली, पुं । कुङ्कुमे । बालके । বালা । त्वचि । গুড়ত্বক্ । आर्द्रके । रा.नि.व.६।१२ ।

बर्ब्बु(र्ब्बू)रः (लः) (कः) । पुं । वर्ब्बरवृक्षे । বাবলা গাছ । बाबुर इति भाषा । गुणाः—"बर्ब्बुरस्तु कषायोष्णः कफकासामयापहः । आमरक्तातिसारघ्नः पित्तार्शोदाहनाशनः ॥" रा.नि.व.८ ।

बर्ब्बु(र्ब्बू)र[ल]निर्य्यासः । पुं । वर्ब्बूरनिर्य्यासे । বাবলার আটা ।

बर्हिशिखा । स्त्री । मयूरशिखायाम् । वै. निघ.अर्शः चि.गोजिह्वादिकषाये । लघुधातक्यां । भा. ।

बर्हिष्ट(ष्ठ)म् । क्ली । बालके । বালা । वै. निघ.अ.सा.चि.पञ्चमूलीबलादिकषाये । उशीरे ।

बलम् । क्ली । स्थौल्ये । अम. । जटामांस्याम् । लाक्षायाम् । रा.नि.व.२३ । सामर्थ्ये । लक्षणं—"रसादिशुक्रपर्य्यन्तं पुष्टधातुनिमित्तकम् । चेष्टासु पाटवं यत्तु बलं तदभिधीयते ॥" सुश्रुतम् । "तत्तु गर्भस्थस्य षष्ठे मासि जायते ।" सुखबोधः । बलं त्रिविधं सहजं कालजं युक्तिकृतञ्चेति । तत्र सहजं यच्छरीरसत्वयोः प्राकृतं । कालजम् ऋतुविभागजं वयस्कृतम् । युक्तिकृतम् आहारचेष्टायोगजम् । च. सू.११अ.। शरीरे । रूपे । कांस्ये । बोले । त्रिका.। रुधिरे । श.च. । शुक्रे । हे.च. । पल्लवे । श.र. । सम्प्राप्तिरौपाधिकनामभेदे । "हेत्वादिकार्त्स्न्यावयवैर्बलकालविशेषणमिति ।" मा.नि. ।

बलः । पुं । काके । अम. । वरुणवृक्षे । श.च. । हस्तिनि । धातौ । वै.निघ. । नखीनामगन्धद्रव्ये । रा.नि.व.१२ ।

बलकन्दः । पुं । मालाकन्दे । रा.नि.व.७ ।

बलकरम् । क्ली । अस्थनि । वै.निघ. । त्रि । बलजनके । [वै.निघ. ।

बलजम् । क्ली । फले । मे. । पुं । मज्जधातौ ।

बलजा । स्त्री । Arabian Jasmine. आरवीयमल्लिकायाम् । यूथिकायाम् । यूँई । मे. ।

बलदः । पुं । पर्पटके । ক্ষেৎপাপড়া । रा.नि.व.४ । जीवके । वै.निघ.। स्त्री । अश्वगन्धायां । रा.नि.व.४ ।

बलदेवः । पुं । वायौ । मे. ।

बलदेवा (वी) । स्त्री । त्रायमाणालतायाम् । বলা লতা । मे. । [रा.नि.व.१२ ।

बलनखः । पुं । व्याघ्रनखे । নখীবিশেষ ।

बलपाण्डुरः । पुं । कुन्दवृक्षे । वै.निघ. ।

बलपुच्छकः । पुं । काके । वै.निघ. ।

बलपृष्ठकः । पुं । रोहितमत्स्ये । वै.निघ. ।

बलभद्रः । पुं । क्षुद्रकदम्बवृक्षे । रा.नि.व.२३। लोध्रवृक्षे । श.च. । गवयमृगे । रा.नि.व.१९ । त्रि । बलवति । [व.१९ ।

बलभद्रसंज्ञकः । पुं । धूलीकदम्बे । रा.नि.

बलभद्रा (द्रिका) । स्त्री । त्रायमाणायाम् । বলা লতা । रा.नि.व.५ । वनजातायां गवि । वै.निघ. । कुमार्य्याम् । मे. ।

बलमोटा । स्त्री। वृक्षविशेषे, बलामोटायाम् । জয়ন্তী গাছ । शेवरीति लोके । गुणाः—कटुः तिक्ता शीता जयदा कण्ठशोधनी लघुः कफघ्नी मदगन्धिः मूत्रकृच्छ्रविषपित्तवातभूतघ्नी च । रा.नि.व.४ । वै.निघ. ।

बलवती । स्त्री । एलायाम् । वै.निघ. ।

बलवर्द्धिनी । स्त्री । जीवके । जटा. ।

बलवल्लभा । स्त्री । सुरायाम् । वै.निघ. ।

बलवसा । स्त्री । गन्धके । भा. ।

बलवान् । पुं । आहारे । कफे । क्ली । शणवीजे । त्रि । बलिष्ठे ।

बलव्यापत् (त्तिः) । स्त्री । बलक्षये । लक्षणं —"गौरवं स्तम्भता गात्रे मुखम्लानिर्विवर्णता । तन्द्रा निद्रा वातशोथो बलव्यापत्तिलक्षणम् ॥" भा.म.१भ.ज्व.चि. ।

बलसम्भवः । पुं। षष्टिकधान्ये । रा.नि.व.१६।

बलहा (न्) । पुं । कफे । श.र. ।

बलक्षयः । पुं । वायौ । वै.निघ. ।

बला । स्त्री । (Sida cordifolia.) स्वनामख्यातक्षुपविशेषे । বেলেড়া । हिं बिजबन्द । मं बल्. चिकणा । कं बेणगरग बबियारा । तें पाचितोगे, मुत्तुवपुलगमु, करिवेपचेट्टु । सा चतुर्धा बलामहाबलातिबलानागबलाभेदेन । गुणाः —अतितिक्ता मधुरा पित्तातिसारघ्नी बलवीर्य्यदा पुष्टिदा कफरोधशोधनी च । रा.नि.व.४ । "बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् । स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥" भा.म.१भ. । विडङ्गायाम् । जयन्त्याम् । रा.नि.व.२३ । महासमङ्गायाम् । वनजशणवृक्षे । वै.निघ.। स्थूलवाल्यालके । त्रिका. ।

बलाका । स्त्री । वकपङ्क्तौ । त्रिका. । प्लवजातीयसङ्घातचारिपक्षिविशेषे । বকবিশেষ । एतद्गुणाः प्लवमांसवत् । सु.सू.४६अ. ।

बलाटः । पुं । मुद्गविशेषे । হারি মুগ । हे.च.।

बलाढ्यः । पुं । माषे । মাষ কলাই । रा.नि.व.१६ । स्त्री । बलाक्षुपे । रा.नि.व.४ ।

बलात्मिका । स्त्री । हस्तिशुण्डीक्षुपे । হাতিশুঁড়ে । श.र.। सूर्य्यकमले । রাধাপদ্ম । वै.निघ.।

बलाद्यघृतम् । क्ली । हृद्रोगे घृतम् । "घृतं बलानागबलार्ज्जुनानां क्वाथेन कल्केन च यष्टिकायाः । सिद्ध ...... ।" भा. ।

बलाधिष्ठानम् । क्ली । बलाधाने । "बलाधिष्ठानमारोग्यम् ।" च.सू.१अ. ।

बलापञ्चकम् । क्ली । बलातिबलानागबलामहाबलाराजबलासु । वै.निघ. ।

बलामोटा । स्त्री । जयन्त्याम् । रा.नि.व.४ । ब्राह्म्याम् । वै.निघ. । नागदमन्याम् । भा. ।

बलायः । पुं । वरुणवृक्षे । श.च. ।

बलालकः । पुं । पानीयामलके । श.च. ।

बलाग्र: । पुं । कफे । है.च. ।

बलास: । पुं । कफे । तन्नामककफगतमुखरोगे। निदानलचणे—"गले च शोफं कुरुत: प्रवृद्धौ श्लेष्मानिलौ श्वासरुजोपपन्नम् । मर्म्मच्छिदं दुस्तरमेनमाहुर्बलाससंज्ञं निपुणा विकारम्॥" सु.नि.१६ ष.।

बलासक: । पुं । शुक्लगतनेत्ररोगे । लचणं यथा—"कांस्याभो भवति सिराहत: सितो यो बिन्दुर्वा स तु नीरुजो बलासकाख्य: ।" सु.उ.४ ष. । [वै.निघ. ।

बलासघ्नी । स्त्री । तेजोवत्याम् । তেজবল ।

बलाहम् । क्ली । जले । वै.निघ. । [ज्वरे।

बलाहक: । पुं । मुस्तके । र.सा.सं.पिपासा

बलाह्वया । स्त्री । वाट्यालके । वा.उ.२ष. ।

बलि: । पुं । गन्धके । र.सा.सं.गदमुरारिरसे । स्त्री । त्रिवल्याम् । रा.नि.व.१८ । मलद्वारान्तर्वल्याम् । গোগল । सा त्रिविधा अर्द्धाङ्गुलान्तरभूता, यथाक्रमं प्रवाहणी विसर्जनी संवरणी चेति कथ्यते । चतुरङ्गुलायता: सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिता: । "शंखावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिता: । गजतालुनिभाश्चापि वर्णत: संप्रकीर्त्तिता: ॥" सु.नि.२ष. ।

बलिका । स्त्री । अतिबलायाम् । रा.नि.व.४।

बलिचन्दनम् । क्ली । रक्तचन्दने । वै.निघ. ।

बलिनी । स्त्री । वाट्यालके । श.च. ।

बलिपुष्ट: । पुं । काके । अम. ।

बलिप्रिय: । पुं । लोध्रवृचे । श.च. । कदम्बवृचे । वै.निघ. ।

बलिभ: । पुं । वृद्धपुरुषे । अम. ।

बलिभुक् । पुं। चटके । काके । बके । त्रिका.।

बलिमान् । त्रि। जराजन्यबलियुक्ते। अ.टी.भ.।

बलिमुख: । पुं । वानरे । अ.टी.र. ।

बलिवत्स: (त्सा) । पुं,स्त्री। गन्धके। वै.निघ.।

बलिष्ठ: । पुं । उष्ट्रे । रा.नि.व.१६ ।

बली (इन्) । पुं । सिंहे । रा.नि.व.१६ । उष्ट्रे । मेषे । वनशूकरे । कफे । महिषे । कुन्दपुष्पवृचे। जटा, । माषे । মাষ কলাই । है.च. । पारिशाश्वत्थे । शल्लकीनिर्य्यासे । गन्धके । वै.निघ.। स्त्री (ली) । बली, मांसाङ्कुरे । अ.टी.भ. ।

बलीन: । पुं । वृश्चिके । वै.निघ. ।

बलीमुख: । पुं । मर्कटे । अम. ।

बलीयान् (स्) । पुं । गर्द्दभे । वै.निघ. ।

बलीवर्द्द: । पुं । वृषे । अम. ।

बलीशक: । पुं । आम्रातकवृचे । वै.निघ. ।

बलोत्तमा (त्तरा) । स्त्री । बलायाम् । रा.नि.व.४ । वै.निघ. ।

बल्य: । त्रि । बलकरे । मे. । क्ली । हृदये । पार्श्वस्थनि । पार्श्वभागे । वै.निघ. । शुक्रे, प्रधानधातौ । मे. ।

बल्यवर्ग: । पुं । बलकरमहाकषायवर्गे । स चतुष्कस्य प्रथमो दशक: । यथा—"ऐन्द्रयर्षभ्यतिरसर्ष्यप्रोक्तापयस्याश्वगन्धास्थिरारोहिणीबलातिबला इति दशेमानि बल्यानि भवन्ति ।" রাখালশসা, আলাকুশী, শতমূলী, মাষাণী, ভূমিকুষ্মাণ্ড, অশ্বগন্ধা, শালপাণি, কট্কী, পীত বেলেড়া, শ্বেত বেলেড়া । च.सू.४ष. ।

बल्या । स्त्री । शिगुड़ीचुपे । अतिबलायाम् । रा.नि.व.४ । अश्वगन्धायाम् । प.मु. । बलायाम् । वै.निघ.२भ.संग्रह.चि.तालीशादिचूर्णे । प्रसारण्याम् । গন্ধভাদুলি । रा.नि.व.५ । पाषाणभेदे । পাথরকুচা । वै.निघ. ।

बल्याख्यपञ्चमूलम् । क्ली । बलाश्वगन्धाशिगुड़ीपाषाणभेदातिबलासु । अन्या—हरिद्रागुड़ूचीविदारीशारिवामेषशृङ्गीषु । वै.निघ. ।

बल्लव: । पुं । पाचके । त्रिका. ।

बल्वजा । स्त्री । तृणविशेषे । উলু । मं बग्. मोलु । कं मोदे । गुणा:—मधुरा शीता पित्तदाहतृष्णाघ्नी वातला रुच्या कण्ठशोधनी च । रा.नि.व.८ ।

बष्कय: । पुं । एकवर्षदेशीयवत्से । वै.निघ. ।

बष्कय(यि)नी । स्त्री। बहुदिनप्रसूतायां गवि । अम.टी.भ. ।

बस्त: । पुं । छागे । त्रिका. ।

बस्तकम् । क्ली । शाकम्भरलवणे । वै.निघ. ।

बस्तकर्णः (र्णी(इन्)) । पुं । अजकर्णशालवृक्षे । धूनोर गाछ । रा.नि.व.९.२२ ।

बस्तगन्धकः । पुं । अरण्यतुलसीवृक्षे । रा.नि.व.४ । वै.निघ.२भ.वर.व्या.चि. ।

बस्तगन्धा । स्त्री । अजगन्धायाम् । रा.नि.व.४ । सु.चि.३७अ. । वै.निघ.२भ.वा.व्या.चि.षड्शीतिगुग्गुलौ । चेत्रयमान्याम् । राकुनी । च.द.ग्रहणी.चि.कल्याणगुडे । [वै.निघ. ।

बस्तगन्धाकृतिः । स्त्री । पुत्रदात्रीलतायां ।

बस्तमोदा । स्त्री । अजगन्धायाम्, वनयमान्याम् । रा.नि.व.६ ।

बस्ताण्डम् । क्ली । छागाण्डे ।

बस्तान्त्री । स्त्री । अजान्त्रीलतायाम् । रा.नि.व.३ । सु.चि.२६अ. । च.द.वृष्य-चि. ।

बस्ताम्बु । क्ली । छागमूत्रे । भा.म.चित्तविभ्रम.चि. । "बस्ताम्बुविमिश्रितानि ।"

बहलः । पुं । इक्षौ । वै.निघ. । त्रि । स्थूले । भा.म.कुष्ठ.चि. ।

बहलगन्धकृत् । पुं । पक्षिराजशालिधान्ये । पक्षिराज धान । रा.नि.व.१६ । [निघ. ।

बहलत्वक् । पुं । भूर्जवृक्षे । शुक्ललोध्रे । वै.

बहलदलः । पुं । कृष्णशोभाञ्जने । काल सजिना । वै.निघ. ।

बहलवर्त्म । क्ली । नेत्रवर्त्मगतरोगे । लक्षणं— "वर्त्मोपचीयते यस्य पिड़काभिः समन्ततः । सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म तत् ॥" सु.उ.३अ. ।

बहलाङ्गः । पुं । मेषशृङ्ग्याम् । वै.निघ. ।

बहिः । अ. । बहिर्भागे । बाहिरे । वै.निघ. ।

बहिःकुटीचरः । पुं । कुलीरके । त्रिका. ।

बहिर्गलगण्डः । पुं । गलरोगभेदे । स त्रिविधः वातजकफजमेदोजभेदात् । लक्षणं यथा— "पवनश्लेष्ममेदोभिः गलगण्डो भवेद्बहिः । वर्द्धमानः स कालेन मुष्कवल्लम्बते निरुक्॥ कृष्णोऽरुणो वा तोदाढ्यः स वातात् कृष्णराजिमान् । वृद्धस्तालुगले शोषं कुर्य्याच्च विरसास्यताम् ॥ इति । स्थिरः सवर्णः कण्डूमान् शीतस्पर्शो गुरुः कफात् । वृद्धस्तालुगले लेपं कुर्य्याच्च मधुरास्यताम् ॥ इति मेदसः श्लेष्मवद्धानि वृद्धौः सोऽनुविधीयते । देहं वृद्धश्च कुरुते गले शब्दं स्वरेऽल्पताम् ॥" वा.उ.२१अ. ।

बहिर्मृजा । स्त्री । स्नानादिना बहिःशुद्धौ । वा.चि.५अ. । [वै.निघ. ।

बहुः । त्रि । अधिके । अधिक । पुष्कले । पुष्टे ।

बहुकः । पुं । हरिणविशेषे । वै.निघ. । अर्के । दात्यूहे । जलखातके । कर्कटे । मे. ।

बहुकण्टकः । पुं । क्षुद्रगोक्षुरे । यवासक्षुपे । दुरालभा । क्षिगुड़ीक्षुपे । रा.नि.व.४ । कुब्जपुष्पक्षुपे । र.मा. । हिन्तालवृक्षे । रा.नि.व.९ । कुण्टकतालवृक्षे । स्नुहीवृक्षे । मनसा गाछ । पाटलावृक्षविशेषे । श्वेत पारुल। खर्ज्जूरीवृक्षे । वै.निघ.।

बहुकण्ट(ण्टि)का । स्त्री । अग्निदमनीक्षुपे । रा.नि.व.४ ।

बहुकण्टा । स्त्री । कण्टकार्य्याम् । रा.नि.व.४ । कर्कटिकायाम् । काँकुड़ गाछ । वै.निघ. ।

बहुकन्दः । पुं । शूरणे । ओल । कटुशूरणे । बुनो ओल । स्त्री । कर्कर्ण्यां । रा.नि.व.७ ।

बहुकन्या । स्त्री । गृहकन्यायाम् । घृतकुमारी । रा.नि.व.५ ।

बहुकरः । पुं । उष्ट्रे । त्रिका. । त्रि । सम्मार्जके । अम. । स्त्री । सम्मार्ज्जन्याम् । है.च. ।

बहुकर्णिका । स्त्री । आखुकर्ण्याम् । मूषाकाणी लता । रा.नि.व.३ । [११ ।

बहुकूर्च्चः । पुं । मधुनारिकेलवृक्षे । रा.नि.व.

बहुगन्धः । पुं । कुन्दुरौ । कुन्दुरुखोटी । रा.नि.व.१२ । क्ली । त्वचि । गुड़त्वक् । रा.नि.व.६। पीतचन्दने । वै.निघ. । [रा.नि.व.१२ ।

बहुगन्धदा । स्त्री । कस्तूर्य्याम् । मृगनाभि ।

भार्गवप्रियः । पुं । हीरके । शब्दकल्पद्रुमः ।

भार्गवाग्रणी । स्त्री । भार्ग्याम् । वै.निघ. ।

भार्गवी । स्त्री । दूर्व्वायां । र.मा. । श्वेतदूर्व्वायां । रा.नि.व.८ । नीलदूर्व्वायाम् । श.र. ।

भार्गी (र्ङ्गी) । स्त्री । (Clerodendron siphonanthus or C. serratum.) स्वनामख्यातक्षुपे । वामनहाटी । प.मु. । हिं वरङ्गी । मं भारङ्गी । तें भरङ्गमारङ्गि । नेपा. चूया । एषा श्वेतनीलपुष्पा इति द्विधा । गुणाः—"भार्गी तु कटुतिक्तोष्णा कासश्वासविनाशिनी । शोफव्रणकृमिघ्नी च दाहज्वरनिवारिणी ॥" रा.नि.व.६ । ईषत्कटुः संग्राहिणी उपदंशजे वाते च हिता । च. ।

भार्गीगुड़ः । पुं। श्वासाधिकारे औषधम् । भार्गीमूलं १०० प. दशमूलं प्र. १० प. स्वथपोटलीबद्धा पुष्टहरीतकी १०० संख्या । क्वाथार्थं—वारि ११६ श. शे. २९ श. । पुरातनगुड़ः (अभावे शुष्कखण्डं) १०० प.। प्रक्षेपार्थचूर्णं—त्रिकटु गुड़त्वक् तेजपत्रम् एला प्र. १प. (८तो.) यवक्षारः ४तो. मधु ६ प. । वामनहाटीर मूल १०० प. दशमूल प्रत्येके १० प. पुटुलीबद्ध हरीतकी १०० टा । क्वाथार्थ—जल ११६ श. शे. २९ श. पुरातन गुड़ १०० प. । प्रक्षेप—त्रिकटु, गुड़त्वक्, तेजपत्र, एलाइच प्रत्येके चूर्ण १ प. यवक्षार ४ तो. मधु ६ प. । भा. । भैष. ।

भार्ग्यादिः । पुं । विषमज्वरे कषायभेदे ।

"भार्ग्यब्दपर्पटकपुष्करशृङ्गवेरपथ्याकणाह्वदग्रमूल--क्कत: कषाय:। सद्यो निहन्ति विषमज्वर···।" भैष.ज्व.चि.।

भार्द्दीजी। स्त्री। वनकार्पास्यां। श.र.।

भार्य्या। स्त्री। पत्न्याम्। श.र.।

भार्य्याटिक:। पुं। हरिणविशेषे। मे.।

भार्य्यारु:। पुं। मृगभेदे। मे.। [व.१२।

भार्य्यावृक्ष:। पुं। पत्राङ्गचन्दनवृक्षे। रा.नि.

भालम्। क्ली। गण्डस्थले। रा.नि.व.१८। तेजसि। मे.।

भालदर्शनम्। क्ली। सिन्दूरे। श.च.।

भालविभूषणसंज्ञ:। पुं। तिलकवृक्षे। तिलगाछ। रा.नि.व.१०।

भालाङ्क:। पुं। रोहितमत्स्ये। चिका.। शाकविशेषे। कच्छपे। मे.। [शृगाले। वै.निघ.।

भालु(लू,लु,लू)क: पुं। भल्लुके। अ.टी.भ.।

भाव:। पुं। सत्तायां। भवति सत्तामनुभावयतीति भाव:। गुणद्रव्यकर्म्मणि। च.सू.१अ.च.द.टी.। पदार्थे। चिका.। योनौ। धरणि.। जन्तौ। मे.।

भावन:। पुं. क्ली। आम्रातकवृक्षे। औषधस्य अग्निसम्पुटनादिसंस्कारे। वै.निघ.। भव्यफले। चाल्ता। रा.नि.व.११। क्ली। भावनायाम्। मे.।

भावना। स्त्री। द्रवपदार्थेन पुन: पुन: औषधमारणे शोषणे च। परिमाणं—"द्रवेण यावता सम्यक् चूर्णं सर्व्वं प्लुतं भवेत्। भावनाया: प्रमाणन्तु चूर्णे प्रोक्तम्···॥" शार्ङ्ग.म.ख.६अ.। "द्रवेण यावता द्रव्यमेकीभूयार्द्रतां व्रजेत्। तावत्प्रमाणं निर्द्दिष्टं भिषग्भिर्भावनाविधौ। भाव्यद्रव्यसमं क्वाथ्यमष्टमांशन्तु तेन हि। आर्द्रं यावद्धि तद्भाव्यं सप्ताहं भावनाविधौ॥" तोड़.।

भास:। पुं। कुक्कुटे। गृध्रे। विश्व:। गोकुलचारिपक्षिविशेषे। सु.सू.७अ.। पानीयकाके। पानकौड़ि। हे.च.। प्रसहजातीयपक्षिविशेषे। नीलकण्ठगुण: काकसदृश:। सु.सू.४६अ.।

भासन्त:। पुं। काकभेदे, भासपक्षिणि। मे.।

भासा। स्त्री। कुमार्य्याम्। वै.निघ.।

भासुरम्। क्ली। कुष्ठे। कुड़। जटा.। वंशपत्रहरिताले। वै.निघ.। पुं। स्फटिके। चिका.।

भासु(स्क)रपुष्पा (ष्पिका)। स्त्री। वृश्चिकालीलतायां। विछाति गाछ। रा.नि.व.६।

भास्कर:। पुं। अर्कवृक्षे। आकन्द गाछ। रा.नि.व.१०। उदयभास्करनामकर्पूरविशेषे। वै.निघ.। क्ली। स्वर्णे। रा.नि.व.१३। ताम्रे। धरणि.। प्रयोगा ज्वरान्तकरसे।

भास्करप्रिय:। पुं। माणिक्यविशेषे। पद्मरागमणि, चुनि। रस.चि.।

भास्करलवणम्। क्ली। ग्रहण्यधिकारे औषधम्। "पिप्पली पिप्पलीमूलं धान्यकं कृष्णजीरकं। सैन्धवञ्च विड़ञ्चैव पत्रं तालीशकेशरम्। एषां द्विपलिकान् भागान् पञ्च सौवर्च्चलस्य च। मरिचाजाजिशुण्ठीनामेकैकस्य पलं पलं। त्वगेलाकार्द्धभागेन सामुद्रात् कुड़वद्वयं। दाड़िमात् कुड़वञ्चैव द्वे पले चाम्लवेतसात्। एतच्चूर्णीकृतं सूक्ष्मं गन्धाढ्यममृतोपमं। लवणं भास्करं नाम भास्करेण विनिर्म्मितं॥"···रस.र.। भा.।

भास्करशिफा। स्त्री। अर्कमूले। वै.निघ.। वा.व्या.चि.विषगर्भतैले। [ड़िश। रा.नि.व.४।

भास्करेष्टा। स्त्री। आदित्यभक्तायां। हुड़हु-

भास्वन्मूलम्। क्ली। अर्कमूले। भा.म.१भ.शीताङ्गसन्निपातज्व.चि.।

भास्वान्। पुं। ताम्रे। र.चि.३अ.। "तथा शुद्धस्य भास्वत:।" अर्कवृक्षे। अम.।

भिण्ड: (क:) }
भिण्डातिक: } पुं। भेण्डाक्षुपे। रा.नि.व.४।

भिण्डा (ण्डी)। स्त्री। भेण्डाक्षुपे। रा.नि.व.४।

भिण्डीतक:। पुं। भेण्डाक्षुपे। रा.नि.व.४।

भित्तिखा(पा)तन:। पुं। महामूषिके। रा.नि.व.१९।

भिदा। स्त्री। धान्यकविशेषे। श.च.।

भिदि: (रम्) (दु:,द्र:)। पुं, क्ली। वज्रे। अ.टी.भ.। चिका.। रा.नि.व.१३। वधरी.चि. त्रैलोक्यचिन्तामणिरसे।

भिदुरः । पुं । प्लक्षवृक्षे । रा.नि.व.११ । स्त्री । पिप्पल्याम् । ছোট পিপুল । वै.निघ. ।

भिन्नम् । क्ली । सद्योव्रणविशेषे । "कुन्तशक्तीषु खड्गाग्रविषाणादिभिराशयः । हतः किञ्चित्स्रवेत्तद्धि भिन्नलक्षणमुच्यते ॥" सु.चि.२अ. । वा.उ.२६अ. । त्रि । भेदविशिष्टे । अम. ।

भिन्नखुरः । पुं । अश्वस्य पादरोगभेदे । लक्षणं यथा—"विन्द्यात्भिन्नखुरश्चैव यस्यान्यो जायते खुरः ।" ज.द.२८अ. । [कुड़ । श.च. ।

भिन्नगात्रिका । स्त्री । कर्कटिकायाम् । कैं ।

भिन्नदला । स्त्री । मूर्व्वालतायां । रा.नि.व.३ ।

भिन्नभिन्नात्मा (न्) । पुं । चणकवृक्षे । श.च. ।

भिन्नयोजनी । स्त्री । पाषाणभेदकवृक्षे । पाथरकूचा । भा. ।

भिन्नवर्त्तिः । पुं । अश्वस्य शूलरोगभेदे । लक्षणं यथा—"अतीसारेण संयुक्तं शूलं यस्योपजायते । भिन्नवर्त्तिन्तु तं विद्यात्तुरङ्गं दीनचेष्टितम् ।" ज.द.४३अ. । [ख्याते कन्दशाके । प.मु. ।

भिन्नवल्कलः । पुं । गुच्छकन्दे, तैलमाद इति

भिन्नविट्कता । स्त्री । पित्तजन्यमलभेदरोगे । निदानम् ।

भिरिटिकः । पुं । श्वेतशृगाले । वै.निघ. ।

भिरिण्टि(ण्डि)का । स्त्री । श्वेतगुञ्जालतायां । रा.नि.व.३ । अम्लाहुल्याम् । वै.निघ. ।

भिल्लः (तरुः) । पुं । लोध्रवृक्षे । रा.नि.व.६ । "भिल्लोदककषायेण ।" सु.चि.२४अ. ।

भिल्लगवी । स्त्री । वन्यायां गवि । वनगाई । गवयीमृगे । रा.नि.व.१९ । [व.३ ।

भिल्लभूषणा । स्त्री । गुञ्जालतायां । रा.नि.

भिल्ली । स्त्री । लोध्रवृक्षे । रा.नि.व.६ । [व.६ ।

भिल्लीशावरकः । पुं । चम्पकरोध्रे । रा.नि.

भिषक् । पुं । वैद्ये, चिकित्सके । रा.नि.व.२० ।

भिषक्प्रिया । स्त्री । गुडूच्यां । रा.नि.व.३ ।

भिषग्जितम् । क्ली । औषधे । त्रिका. । च. ।

भिषग्जिता । स्त्री । कन्दगुडूच्याम् । वै.निघ. ।

भिषग्भद्रा । स्त्री । भद्रदन्तिकायाम् । रा.नि.व.६ ।

भिषग्वरा । स्त्री । हरीतक्यां । रा.नि.व.११ ।

भिषङ्माता । स्त्री । आटरूषके । বাসক । रा.नि.व.२३ । [टी.सा. ।

भिषिका (टा) (ष्टा) । स्त्री । दग्धान्ने । अ-

भिस्सटः । पुं । पद्मकन्दे । वै.निघ. ।

भिस्स(स्सि)टा । स्त्री । भिषिकायाम् । अम. अ.टी.सा. ।

भिस्सा । स्त्री । अन्ने । अम. ।

भिस्साण्डम् । क्ली । शालूके । पद्मगেঁড়ো । भा.पू.१भ.शा.व. ।

भिक्षुः । पुं । श्रावणीक्षुपे । মুণ্ডীরী । रा.नि.व.५ । गोक्षुरे । वै.निघ. । कोकिलाक्षक्षुपे । কুলিয়াখাড়া । भा. । ऋषिविशेषे । च.सू.१अ. ।

भिक्षुकः । पुं । गोक्षुरे । रा.नि.व.२३ । "भिक्षुको गोक्षुरे ।"

भीमः । पुं । अम्लवेतसे । प.मु. ।

भीमनादः । पुं । सिंहे । श.च. ।

भीमरथी । स्त्री । कृष्णसंज्ञका काचिन्नदी । तज्जलं कृष्णाजलतुल्यम् । लोकानां वयःकालभेदे । स च कालः सप्तसप्ततितमवर्षस्य सप्तममासिकसप्तमरात्रिरिति । ভীমরথী । यथा—"सप्तसप्ततिके वर्षे सप्तमे मासि सप्तमी । रात्रिर्भीमरथी नाम नराणां दुरतिक्रमा ।" श.सा. ।

भीमविक्रान्तम् । क्ली । द्राक्षामद्ये । वै.निघ. । पुं । सिंहे । त्रिका. ।

भीमसेनः । पुं । (Drybalanops camphora.) Borneo camphor. तन्नामककर्पूरे । ভীমসেনী কর্পূর । यथा—"पोतासो भीमसेनस्तदनु शितकरः…।" गुणाः—वातपित्तघ्नः रसे पाके च मधुरः शीतलः बृंहणः बल्यश्च । भा. । रा.नि.व.१२ ।

भीमा । स्त्री । रोचनाख्यसुगन्धद्रव्ये । श.च. ।

भीरुः । स्त्री । शतावर्य्यां । प.मु. । भा.म.१भ सन्निकज्व.चि. । च.द.कास.चि. । मल्लिकापुष्प-

क्षुपे। मल्लिका फुलेर गाछ। रा.नि.व.१०। कण्टकार्य्यां। श.च.। छाग्याम्। रा.नि.व.१९। शतपद्यां। श.र.। पुं। व्याघ्रे। रा.नि.व.१९। शृगाले। श.मा.। इक्षुभेदे। र.मा.। मत्स्यविशेषे। मं अहिरु। कं हेमलग। तस्य लक्षणम्—"पृष्ठे पक्षौ द्वौ गले पुच्छके चेत् सर्पाभः स्यात् सर्व्वतो वृत्ततुण्डः। ज्ञेयः शल्की मत्स्यकी भीरुरुक्तः स्निग्धो वृष्यो दुर्ज्जरो वातकारी॥" रा.नि.व.१७।

भीरुकः। पुं। भल्लुके। शुक्लेक्षौ। वै.निघ.। पेचके। श.र.। मत्स्यविशेषे। कृष्णेक्षौ। अयं पुण्ड्रकगुणः। भा.। त्रि। भयशीले।

भीरुचेताः (स्) । पुं। हरिणे। वै.निघ.।

भीरुपत्त्रिका (त्त्री)। स्त्री। शतावर्य्यां। शतमूली। प.मु.।

भीरुहृदयः। पुं। मृगे। जटा.।

भीलभूषणा। स्त्री। गुञ्जायाम्। रा.नि.व.७।

भीलुकः। पुं। भल्लुके। श.र.।

भीषणः (णा)। पुं, स्त्री। कपोते। रा.नि.व.१९। स्त्री। सल्लक्यां। मे.। कुन्दुरौ। कुन्दुरु थोटौ। रा.नि.व.१२। हिन्ताले। रा.नि.व.९।

भीष्मम्। क्ली। अन्ने। प.मु.। [निघ.।

भीष्मगन्धकः। पुं। माधवीलतायाम्। वै.

भुक्तम्। क्ली। भक्षणे। त्रिका.। त्रि। भक्षिते। अम.।

भुक्तशेषः। त्रि। उच्छिष्टे। वै.निघ.।

भुक्ता। स्त्री। भूखर्ज्जूरीवृक्षे। छोट थेजुर। रा.नि.व.११। जने। श.र.।

भुक्तिः। स्त्री। उपभोगे। नखे। वै.निघ.। भी-

भुक्तिप्रदः। पुं। मुद्गे। मुग। रा.नि.व.१६।

भुग्नः। त्रि। रोगादिना वक्रीकृते। अम.।

भुग्नदृक् (नेत्रः)। पुं। तन्नामकसन्निपातज्वरविशेषे। लक्षणं यथा—"ज्वरबलापचयस्मृतिशून्यताश्वसनभुग्नविलोचनमोहितः। प्रलपनभ्रमवेपथुशोथवान् त्यजति जीवितमाशु स भुग्नदृक्॥" भा. ज्व.चि.। तन्त्रान्तरोक्तलक्षणं भावप्रकाशे मृग्यम्।

भुग्नी। स्त्री। भूनागे। शैष। रा.नि.व.१२।

भुजः। पुं। बाहौ। रा.नि.व.१८। भूर्जपत्रवृक्षे। वै.निघ.।

भुजकोटरः। पुं। कक्षदेशे। हे.च.।

भुजगः। पुं। शीषके। सीसा। भैष.ध्वजभङ्गचि.पुष्पधन्वरसे। र.सा.सं.वसन्तकुसुमाकरे। सर्पे। ढोड़ा साप। त्रिका.। [नि.व.११।

भुजगलता। स्त्री। नागवल्लीलतायाम्। रा.

भुजगी। स्त्री। सर्पिण्याम्। रा.नि.व.५।

भुजगोपभोजी (इन्)। पुं। मयूरे। रा.नि.व.१९।

भुजङ्गः। पुं। शीषके। सर्पे। अम.।

भुजङ्गघातिनी। स्त्री। सर्पकङ्कालिकायाम्। रा.नि.व.७। [नि.व.४।

भुजङ्गजिह्वा। स्त्री। महासमङ्गाक्षुपे। रा.

भुजङ्गदमनी। स्त्री। नाकुलीकन्दे। नागदमन्याम्। वै.निघ.। [दमनी। वै.निघ.।

भुजङ्गदर्शिनी। स्त्री। नागदमन्याम्। नाकु-

भुजङ्गदारणः। पुं। मयूरे। रास्नायाम्। वै.निघ.।

भुजङ्गभुक् (ज्)। पुं। मयूरे। अम.।

भुजङ्गभोजी (इन्)। पुं। राजसर्पे। हे.च.।

भुजङ्गमः। पुं। सर्पे। अम.। क्ली। शीषके। रा.नि.व.१३। [११।

भुजङ्गलता। स्त्री। नागवल्ल्याम्। रा.नि.व.

भुजङ्गवल्ली। स्त्री। नागवल्लीलतायां। पाण गाछ। र.सा.सं.। भैष.चिन्तामणिरसे।

भुजङ्गाख्यः। पुं। नागकेशरवृक्षे। श.मा.।

भुजङ्गान्तकः (शनः)। पुं। मयूरे। गरुडे। वै.निघ.। [अम.।

भुजङ्गाक्षी। स्त्री। सर्पाक्ष्याम्। रास्नायां।

भुजङ्गी। स्त्री। सर्पिण्याम्। वै.निघ.।

भुजमध्यम्। क्ली। कूर्परे। रा.नि.व.१८।

भुजमस्तकम्। क्ली। स्कन्धदेशे। वै.निघ.।

भुजशिरः। क्ली। स्कन्धदेशे। अम.।

भुजा । स्त्री । बाहौ । रा.नि.व.१८ । त्रिका. ।

भुजाकण्टः । पुं । हस्तनखे । हे.च. ।

भुजागमः । पुं । ह्रदे । वै.निघ. ।

भुजाढ़की । स्त्री । कलायविशेषे । টোঙর কলায় । रमा.। नीलनिर्गुण्ड्यां । शेफालिकायां । रा.नि.व.४ । [त्रिका. ।

भुजादलः । पुं । करे । হাতের পাতা ।

भुजान्तरम् । क्ली । वक्षसि । रा.नि.व.१८ । क्रोड़ । अम. ।

भुजिष्यः । पुं । रोगे । उणा. ।

भुर्जः । पुं। भूर्जपत्रवृक्षे । भूर्जवृक्ष । रा.नि.व.८।

भुवनम् । क्ली । जले । रा.नि.व.१४ । जने । मे. ।

भूकः । पुं,क्ली। छिद्रे । अन्धकारे । मे.। श.मा.।

भूकदम्बः । पुं । भूमिकदम्बक्षुपे । কুকশিমা । हिं कौटिमुण्डी, भुँइकदम्ब । मद.व.२। प.मु.। महाश्रावणिकायां । रा.नि.व.५। भैष.क्षुद्ररी.चि. । यमान्याम् । रा.नि.व.६ । [मद व.२ ।

भूकदम्बकः । पुं । यवानीक्षुपे । रा.नि.व.६ ।

भूकदम्बा (म्बिका) । स्त्री। गोरक्षमुण्ड्यां। वै.निघ. ।

भूकन्दः । पुं । महाश्रावणिकायाम् । रा.नि.व.५। शूरणे। ওল । भैष.कुष्ठ.चि.महाभल्लातकगुड़े।

भूकर्वुदारः (कः) । पुं। श्वेतभूकाञ्चने । हिं कोटालसीड़ा । गुणाः – संग्राही रक्तपित्तहरः मधुरः क्रमिशूलघ्नः वातकोपनः ईषच्छीतः स्वर्णमारकश्च । रा.नि.व.५ । [कौंकपक्षी । श.र. ।

भूकाकः । पुं । नीलकपोते । क्षुद्रकङ्के ।

भूकुम्बकः । पुं । कुलहले । কুকশিমা । वा.सू.१५अ.सुरसादिः ।

भूकुष्मी । स्त्री । भूपाटल्याम् । रा.नि.व.५ ।

भूकुष्माण्डम् । क्ली । भूमिकुष्माण्डे । भुँइ कुम्ड़ा । भैष.ध्वजभङ्ग.चि. ।

भूकुष्माण्डी । स्त्री । विदारीकन्दे । भुँइ कुम्ड़ा । रा.नि.व.७ ।

भूकेशः । पुं । वटवृक्षे । शैवाले । मे. ।

भूकेशी । स्त्री । अवल्गुजनामके वृक्षविशेषे । সোমরাজ । मे. ।

भूखर्जु(र्जू)रिका (री) । स्त्री । क्षुद्रखर्जूरीवृक्षे । ছোট খেজুরের গাছ । मं.लघुसिंधी । कं किरिइंचुलि । गुणाः – मधुरा शीतला दाहपित्तघ्नी च । रा.नि.व.११ । See खर्जूरी ।

भूगन्धा । स्त्री । मुरानामगन्धद्रव्ये । মুরামাংসী । श.चि. ।

भूगरम् । क्ली । विषे । रा.नि.व.६ ।

भूघ्नी । स्त्री । फटिकारिकायां । वै.निघ. ।

भूचणकः । पुं । (Arachis hypogaea.) वृक्षभेदे । চীনার বাদাম, মাটি কলায় । हिं मुंफली । तें वरणसनगकय । ता.वार्कदलइ । एतत्तैलं कोशाम्रतैलगुणम् ।

भूचम्पकः । पुं । भूमिचम्पकक्षुपे । भुँइ चाँपा । वै.निघ. ।

भूच्छत्रम् । छत्राके । পোয়াল ছাতু, ভুরকুণ্ড ছাতু । वै.निघ. ।

भूजन्तुः । पुं । भूनागे । शीष । रा.नि.व.१३ ।

भूजम्बुः (म्बूः) । स्त्री । गोधूमे । গম । विकङ्कतवृक्षे । বঁইচীগাছ । मे. । भूमिजम्बूवृक्षे । বনজাম । रा.नि.व.११ ।

भूतः । पुं । मुस्तायाम् । रा.नि.व.२३ । देवयोनिविशेषे । बालग्रहे । च.टी.भ. । लोध्रे । वै.निघ.। जन्तौ । मे.। प्राणिमात्रे । च.टी.भ.। क्ली । क्षित्यादिपञ्चके । च.टी.भ. ।

भूतकेशः (शी) । पुं, स्त्री । (Corydalis govoniana.) स्वनामख्यातक्षुपविशेषे । गोलोम्यां । শ্বেতদূর্বা । हिं भूतकेश । तें बाविलिचेट्टु । प.मु.र.मा. । नीलनिर्गुण्ड्यां । वै.निघ.२भ.ज्व.चि. । शेफालिकायां । रा.नि.व.४ । पुत्रजीवायाम् । वा.सू.१५अ.सुरसादिः । जटामांस्याम् । भा.म.१भ.सन्ततादिज्व.चि.माहेश्वरधूपे । गन्धमांस्यां । সুগন্ধ জটামাংসী । रा.नि.व.१२ । इन्द्रवारुण्याम् । রাখাল শশা । श्वेततुलसीवृक्षे । वै.निघ. ।

भूतकेसरा । स्त्री । मेथिकायाम् । মেতি । वै.निघ. । [भूतावेश । रा.नि.व.२० ।

भूतक्रान्तिः । स्त्री। भूतोन्मादे । भूतसञ्चारे ।

भूतगन्धा । स्त्री । मुरामांस्याम् । जटा. ।

भूतगुणः । पुं । शब्दादौ । च.सू.१अ. ।

भूतग्रामः । पुं । प्राणिसमूहे । स चतुर्विधः स्वेदजाण्डजोद्भिज्जजरायुजभेदतः । सु.सू.१अ. ।

भूतघ्नः । पुं । श्वेतरसोने । শুক্লরশুন । रा.नि. व.७ । भूर्जवृक्षे । ভূর্জপত্র । रा.नि.व.९ । सर्षपवृक्षे । उष्ट्रे । हे.च. ।

भूतघ्नी । स्त्री । प्रपौण्डरीके । পুণ্ডরিয়া । प.मु. । मुण्डीरीभेदे । प.मु. । तुलसीवृक्षे । रा.नि. व.१० । शङ्खपुष्प्याम् । वै.निघ. ।

भूतजटा । स्त्री । जटामांस्यां । गन्धमांस्यां । সুগন্ধ জটামাংসী । रा.नि.व.१२ ।

भूतदृणः । पुं। विषभेदे । ছাতারিয়া বিষ । र.मा. । गन्धतृणविशेषे । रा.नि.व.८ ।

भूतद्रावी (इन्) । पुं । रक्तकरवीरवृक्षे । रा.नि.व१०। चवकवृक्षे । হেঁচেতা । रा.नि.व.९।

भूतद्रुमः । पुं । श्लेष्मान्तकवृक्षे । रा.नि.व.११।

भूतनाशनः । पुं,क्ली । सिद्धार्थे । শ্বেত সরিষা । रा.नि.व.१६ । पुं । भल्लातकवृक्षे । र.मा.। हिङ्गुवृक्षे । वै.निघ. । रुद्राक्षवृक्षे । রুদ্রাক্ষ । रा. नि.व.११ ।

भूतपतिः । पुं । कृष्णतुलसीवृक्षे । वै.निघ. ।

भूतपत्री । स्त्री । तुलसीवृक्षे । रा.नि.व.१० ।

भूतपादपः । पुं । भव्यफलवृक्षे । চাল্তা গাছ । वै.निघ. ।

भूत(ति)पुष्पः । पुं । श्योणाकवृक्षे । र.मा. ।

भूत(ति)प्रिया । स्त्री । कृष्णतुलसीवृक्षे । वै. निघ. ।

भूतबन्धः । पुं । पिशाचबन्धने । वै.निघ. ।

भूतभैरवरसः । पुं । अपस्माराधिकारे रसः । पाठः—"मृतसूताभ्रलौहञ्च शिलागन्धञ्च तालकं । रसाञ्जनञ्च तुल्यांशं नरमूत्रेण मर्दयेत्। तद्गोलद्विगुणं गन्धं लौहपात्रे चणं पचेत् । पञ्चगुञ्जोन्मितं भक्ष्यम् ··। व्योषं सौवर्चलं हिङ्गु नरमूत्रेण सर्पिषा । पिबेत् कर्षमितम्··· ।" भा.म.२भ. ।

भूतमारी । स्त्री । चीड़ानामगन्धद्रव्ये, देवदारुभेदे । रा.नि.व.१२ ।

भूतयज्ञः । पुं । भूतेभ्यो बलिहरणे । हारीत.।

भूतलिका । स्त्री । मुक्कानामगन्धद्रव्ये । रा. नि.व.१२ ।

भूतवासः । पुं। विभीतकवृक्षे । रा.नि.व.११।

भूतविक्रिया । स्त्री । अपस्माररोगे । रा.नि. व.२० ।

भूतविद्या । स्त्री । अष्टविधतन्त्रान्यतमतन्त्रे । सा देवासुरगन्धर्व्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्म्मबलिहरणादिग्रहोपशमनार्थम् । सु.सू.१अ. । अपि च—"ग्रहभूतपिशाचाश्च शाकिनीडाकिनीग्रहाः । एतेषां निग्रहः सम्यक् भूतविद्या निगद्यते ॥" वैद्य.सं.२अ. । "लक्षयेद् ज्ञानविज्ञानवाक्चेष्टाबलपौरुषम् । पुरुषेऽपौरुषं यत्र तत्र भूतग्रहं वदेत् । भूतस्य रूपप्रकृतिभाषागत्यादिचेष्टितैः । यस्यानुकारं कुरुते तेनाविष्टं तमादिशेत् । सोऽष्टादशविधो देवदानवादिविभेदतः । ग्रह्णन्ति शुक्लप्रतिपत्त्रयोदश्योः सुरा नरम् । शुक्लत्रयोदशीकृष्णद्वादश्योर्दानवा ग्रहाः । गन्धर्वास्तु चतुर्दश्यां द्वादश्यां चोरगाः पुनः । पञ्चम्यां शुक्लसप्तम्येकादश्योस्तु धनेश्वराः । शुक्लाष्टपञ्चमीपूर्णमासीषु ब्रह्मराक्षसाः । कृष्णे रक्षःपिशाचाद्या नवद्वादशपर्व्वसु । दर्शामावास्ययोरष्टनवम्योः पितरोऽपरे । गुरुवृद्धादयः प्रायः कालं सन्ध्यासु लक्षयेत् ।" वा.उ.४अ. ।

भूतवृक्षः । पुं । शाखोटवृक्षे । শ্যাওড়া গাছ। रा नि.व.९ । श्योणाकवृक्षे । मे. । अक्षोटवृक्षे । (कः) श्लेष्मान्तकवृक्षे । চাল্তা গাছ । भा. ।

भूतवेशी (श्या) । स्त्री । श्वेतशेफालिकावृक्षे। प.मु. । निर्गुण्ड्याम् । वै.निघ. । [वै.निघ. ।

भूतशिखाग्रणी । स्त्री। सुगन्धजटामांस्याम् ।

भूतशिखी । स्त्री । सुगन्धजटामांस्याम् । वै. निघ. । [निघ. ।

भूतशिफा । स्त्री । सुगन्धजटामांस्याम् । वै.

भूतसञ्चारः । पुं । ग्रहावेशे । भूतोन्मादे । रा.नि.व.२० ।

भूतसारः । पुं । खदिरसारे । रा.नि.व.८ । पृथुशिम्बश्योणाकवृक्षे । रा.नि.व.६ ।

भूतहन्त्री । स्त्री । वन्ध्याकर्कोटक्यां । नीलदूर्व्वायां । रा.नि.व.३।८ ।

भूतहरः । पुं । गुग्गुलौ । रा.नि.व.१२ ।

भूतहा (न्) । पुं । भूर्जवृक्षे । वै.निघ. ।

भूतहारि (न्) । क्ली । देवदारुकाष्ठे । रा.नि.व.१२ । पुं । रक्तकरवीरे । वै.निघ. ।

भूतहासः । पुं । सन्निपातज्वरविशेषे । लक्षणं —"शब्दादीनधिगच्छति न स्वान् विषयान् यदीन्द्रियग्रामैः । हसति प्रलपति परुषं स ज्ञेयो भूतहासार्त्तः ॥" भा.म.१भ. ।

भूताङ्कुशः । पुं । (Anisomelis malabarica.) वृक्षविशेषे । हिं गवोजुवान । तैं मभिरी, किनरणगिरि । चवकवृक्षे । (इंटेचटा । रा.नि.व.६ । वै.निघ.२भ कास.चि.भूतांकुशरसे । अपामार्गे । सुकुमारेचौ । पूँड़ा ईक्षू । राजिकायाम् । रा.नि.व.२३ । तिलकक्षुपे ।

भूताङ्कुशरसः । पुं । कासाधिकारे रसः । शुद्धपारदः १ भ. गन्धः २ भ. ताम्रं ३ भ. मरिचं १० भ. अभ्रकं ४ भ. विषं १ भ. श्वेतसर्षपं १ भ. । अम्लरसेन भावयेत् । अन्य उन्मादे—पारदः लौहभस्म रौप्यभस्म ताम्रभस्म मुक्ताभस्म प्रं. समं । हीरं हरितालं गन्धकं मनःशिला तुत्थं शिलाजतु रसाञ्जनं अहिफेनं टङ्कणक्षारः प्र.पारदचतुर्थांशः, पञ्चलवणं प्र. पारदसमभागं । भृङ्गराजदन्तीवज्रीरसैः मर्द्दयित्वा पिण्डितं कृत्वा दिनान्ते गजपुटे पचेत् । रस.कौ. ।

भूतात्मा । पुं । शरीरे । प्राणिन आत्मनि । मे. ।

भूताभिषङ्गः । पुं । पिशाचकृतपराभवे । भूतावेशजन्यज्वरे । "कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः । भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणम् । भूताभिषङ्गादुद्वेगो हास्यरोदनकम्पनम् ॥" च. । मा.नि. ।

भूतारि । क्ली । हिङ्गुनि । रा.नि.व.६ ।

भूताली । स्त्री । भूपाटल्यां । रा.नि.व.५ । मुशल्यां । तालमूली । रा.नि.व.७ ।

भूतावासः । पुं । विभीतकवृक्षे । रा.नि.व.११ । शरीरे । वै.निघ. ।

भूताविष्टः । त्रि । पिशाचग्रस्ते ।

भूतावेशः । पुं । भूतसञ्चारे ।

भूतावेशा (शी) । स्त्री । निर्गुण्डीवृक्षे । निशिन्दा गाछ । वै.निघ. । [निघ. ।

भूतावेशालता स्त्री । श्वेततुलसीवृक्षे । वै.

भूतिः । स्त्री वृद्धौ । रा.नि.व.५ । रोहिषतृणे । भूतृणे । गन्धतृणविशेष । रा.नि.व.८ । पक्वमांसे । वै.निघ. ।

भूति(ती)कः । पुं, क्ली । यमान्यां । हे.च. । च.द.अ.सा.चि. धान्यपञ्चके । सु.चि.२७अ. । भूनिम्बे । চিরেতা । अम. । कट्फले । हे.च. । कातृणे । गन्धतृण । रा.नि.व.८ । च.द हिक्काश्वास. चि.तेजोवतीघृते । कर्पूरे । हे.च. । [घ. ।

भूतिपुष्पिका । स्त्री । शुक्लकेतकवृक्षे । वै.नि-

भूतिसितम् । क्ली । रौप्यधातौ । रा.नि.व.१३ ।

भूतुम्बी । स्त्री । स्वनामख्यातफलशाकविशेषे । अलाबुभेदे । মেটো লাউ । हिं भूतुम्बी, तेलसार । गुणाः—कटुरुष्णा सन्निपातघ्नी दन्तार्मलदन्तरोधधनुर्वातादिदोषघ्नी च । रा.नि.व.७ ।

भूतृणम् । क्ली, पुं । अस्मद्देशप्रसिद्धगन्धतृणे । গন্ধতৃণ, রামকর্পূর । मं सुगन्धिरोहिसु । कं परिमलदगंजाणि । तैं चिप्पगड्डि । गुणाः—कटुतिक्तं वातसन्तापघ्नं भूतग्रहावेशघ्नं विषदोषघ्नञ्च । रा.नि.व.८ । च.सू.२७अ. । सुरसादिगणश्च । सु.सू.४६अ. ।

भूतेष्टा । स्त्री । कृष्णतुलस्याम् । वै.निघ. ।

भूतौदनम् । क्ली । ओदनविशेषे । यथा— "तिललाजादधियवहरिद्रायुक्तमोदनं । भूतौदनन्तु संप्रोक्तं गुणाः सर्व्वे पदार्थवत् ॥" वै.निघ. ।

भूतोन्मादः । पुं । भूतावेशजन्योन्मादे । निदानम् ।

भूत्तमम् । क्ली । स्वर्णे । हे.च. । [घ. ।

भूदराश्रया । स्त्री । मूषिककर्ण्याम् । वै.नि

भूदरी(रोद्)भवा । स्त्री । आखुकर्णीलतायाम् । भा. ।

भूदर्या । स्त्री । मूषिककर्ण्याम् । वै.निघ. ।

भूदारः (कः) । पुं । शूकरे । अम. । प.मु. । वनशूकरे ।

भूधरयन्त्रम् । क्ली । औषधपाकार्थयन्त्रविशेषे । लक्षणम्—"बालुकाभिः समन्ताङ्गं गर्त्ते मूषां रसान्विताम् । दीप्तोपलैः संवृणुयात् यन्त्रं भूधरनामकम् ।" भा. । "ज्वलकच्छपपातालदोलाभूधरबालुकाः । वकाद्या यन्त्रभेदाः स्युः वज्राम्बाद्याश्च मूषकाः ॥" श.च. ।

भूधात्री । स्त्री भूम्यामलक्यां । भूँइ आमला । मं भूयांवली । कं आर्दुनेल्लि । हिं भद्रआंवरा । तैं नेलवुसिरिकचेट्टु । गुणाः—कषाया अम्ला शीता मूत्ररोगदाहघ्नी पित्तमेहघ्नी च । रा.नि.व.५ ।

भूनागः । पं । गण्डूपद्याम् । शीषके । रा.नि. व.१३।१९ ।

भूनिम्बः । पुं । (Swertia chirata. Syn. gentiana chirayta.) किराततिक्तके । चिरेता । हिं चिरायता । तैं नेलवेमु । मं चिराइता । रा.नि.व.९ । गुणाः—तिक्तः ज्वरघ्नः दीपनः पित्तप्रसादनः क्रमिचर्म्मरोगघ्नः । अस्य मूलमधिकगुणम् ।

भूनिम्बादिकषायः । पुं । भूनिम्बगुडूचीमुस्तनागरकृते कषाये । गुणाः—ज्वरे दोषपाचनः ज्वरादिघ्नश्च । वा.चि.१अ. । [५ ।

भूनीपः । पुं । भूकदम्बे । भुँइ नौरी । रा.नि.व.

भूपतिः । पुं । वृद्ध्यौषधे । वै.निघ. । ऋषभके । रा.नि.व.५ । [घ. ।

भूपत्रम् । क्ली । मृत्तिकाचारे । सोरा । वै.नि-

भूपदः । पुं । वृक्षे । श.च. ।

भूपदी । स्त्री । शतदलमल्लिकायाम् । प.मु. । श्वेतनिर्गुण्ड्याम् । वै.निघ. ।

भूपर्णी । स्त्री । भूपिठरिकायां । वै.निघ. ।

भूपलाशः । पुं । भाण्डीतगुल्मे । शांपरमाली । र.मा. ।

भूपाटली । स्त्री । स्वनामख्यातक्षुद्रक्षुपे । टीका पाना । मं भूयपाड़लि । कं नेलवादरि । गुणाः—कटूष्णा पारदे प्रयोज्या च । रा.नि.व.५ ।

भूपाला (ली) । स्त्री । घोषायाम् । वै.निघ. ।

भूपिठरिका (री) । स्त्री । शोनामुखीतिख्यातलतायाम् । वै.निघ. ।

भूपुत्री स्त्री । भूपिठर्यां । वै.निघ. ।

भूपुष्पा । स्त्री । भूमिचम्पकवृक्षे । वै.निघ. ।

भूपेष्टः । पुं । राजादनीवृक्षे । खिर्नी गाछ । रा.नि.व.११ ।

भूफलः । पुं । मुद्गे । हरितमुद्गे । रा.नि.व.१६ ।

भूबदरी । स्त्री । क्षुद्रबदरीविशेषे । भूबोरीति कोलापुरप्रान्ते प्रसिद्धा । मेटो कुल । हिं झड़बेर । गुणाः मधुराम्ला कफवातहरी रुच्या पथ्या दीपनी पाचनी किञ्चित्पित्तास्रजननी च । रा.नि. व.११ । [११ ।

भूभुक्ता । स्त्री । भूमिखर्ज्जूरिकायाम् । रा.नि.व.

भूभृत् । पुं । पर्व्वते । रा.नि.व.२ ।

भूमण्डली । स्त्री । मल्लिकावृक्षे । वेन मल्लिका । वनस्पतिभेदे । वै.निघ. ।

भूमण्डिनी । स्त्री । मल्लिकायाम् । वै.निघ. ।

भूमिः । स्त्री । जिह्वायाम् । उणा. । क्षितौ । भूँइ । सा गुणतः पञ्चधा । काचित् स्वगुणभूयिष्ठा, काचिदम्बुगुणभूयिष्ठा, काचिदाकाशगुणभूयिष्ठा, काचिदग्निगुणभूयिष्ठा, काचिच्चानिलगुणभूयिष्ठा । तत्र १मा अश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया च । २या स्निग्धा शीतला स्वल्पोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्ला च । ३या मृद्वी समा स्वभ्रवती अव्यक्तरसजला सर्व्वतोऽसारवृक्षा महापर्व्वतवृक्षप्राया श्यामा च । ४र्थी नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहा च । ५मी रूक्षा भस्मरासभवर्णा तनुरूक्षकोटराल्परसवृक्षप्राया च । तत्राम्बुगुणभूयिष्ठायां विरेचनद्रव्याणि, अग्निगुणभूयिष्ठायां वमनद्रव्याणि, आकाशगुणभूयिष्ठायां संशमनानि,

चभग्रमणभूयिष्ठायामुभयती भागान् चाददीत। भूमि: सम्प्रवर्षरसोपेतत्वात् षड्विधा। षड्रसयुक्तत्वाच स्वभावतएव सर्व्ववीजवती च। सु.सू.२७अ.।

भूमि(मी)कदम्बः । पुं । कदम्बविशेषे, भूकदम्बे । मं भूमिकदम्ब । कं नेलगड़व । गुणाः—कटूष्णः ग्राह्यः दोषघ्नः हिमः कषायतिक्तः पित्तघ्नः वीर्य्यवर्द्धकश्च । रा.नि.व.६ ।

भूमिकदम्बिका । स्त्री । मुण्डीर्य्याम्, गोरक्षमुण्ड्याम् । मुण्ढीरी । रा.नि.व.५ । [निघ. ।

भूमिकालिका । स्त्री । गोधूमिकाशाके । वै.

भूमिकुष्माण्डः । पुं । विदारीकन्दे । भुँइकुमड़ा । प.मु. ।

भूमिखर्ज्जु(र्ज्जू)रिका (री) । स्त्री । क्षुद्रखर्ज्जूरीवृक्षे, भूखर्ज्जूरिकायाम् । छोट खेजूर । रा.नि.व.११ । See खर्ज्जूरी ।

भूमिगमः । पुं । उष्ट्रे । वै.निघ. ।

भूमिचम्पकः । पुं । (Koemferia rotunda.) भूचम्पके । भुँइचाँपा । हिं चखमुल । श.च. । अस्य मूलं व्रणपाककरम् ।

भूमिच(चा)री । स्त्री । आखुकर्णीलतायां । मुषाकाणी । रा.नि.व.३ ।

भूमिच्छत्र(त्र)म् । क्ली । भूस्थितच्छत्राके, संस्वेदजशाके । भूकुण्ड छाता । वै.निघ. । भा.पू.१भ.शा.व. ।

भूमिजः । पुं । भूमिकदम्बे । रा.नि.व.६ । भूमिजगुग्गुलौ । भूनागे । शीष । रा.नि.व.१२। १३ । यवक्षारे । सोरा । वै.निघ.। क्ली । स्वर्णे । गौरसुवर्णशाके । रा.नि.व.७।१३ ।

भूमिजगुग्गुलुः । पुं । आशापुरगुग्गुलौ । महिषाक्षगुग्गुल । भूमिजगुग्गुलुः काश्मीरदेशे प्रसिद्धः । गुणाः—सौरभ्यदः तिक्तकटूष्णः कफवातघ्नः भूतघ्नः मेध्यः सुगन्धिश्च । रा.नि.व.१२ ।

भूमिजम्बुः (म्बूः) । स्त्री । क्षुद्रजम्बूविशेषे । वनजाम, भुँइजाम । र.मा. । मं क्षुद्रजम्बू । कं किरुनेरिलु । गुणाः—कषाया मधुरा श्लेष्मपित्तघ्नी ग्राह्या संग्राहिणी हृत्कण्ठदोषघ्नी वीर्य्यपुष्टिदा च । रा.नि.व.११ ।

भूमिजम्बूका । स्त्री । नागरङ्गवृक्षे । नारङ्गलेबू गाछ । क्षुद्रजम्बूवृक्षे । अम. ।

भूमिदण्डा । स्त्री। मल्लिकापुष्पवृक्षे । वै.निघ.।

भूमिपिशाचः । पुं । तालवृक्षे । हारा. ।

भूमिपुत्रः । पुं । स्नोणाके । वै.निघ. ।

भूमिमण्डः । पुं । आस्फोतकलतायां । अष्टपादिकाइति लोके । मदनमाली, शापरमाली । र.मा. । [याम् । रा.नि.व.१० ।

भूमिमण्डपभूषणा । स्त्री । माधवीलता-

भूमिमण्डा । स्त्री । शारदमल्लिकायां । र.मा.।

भूमिलग्ना । स्त्री । शुक्लगोकर्ण्याम् । शुक्लापराजिता । वै.निघ. ।

भूमिलता । स्त्री । शङ्खपुष्पीलतायां । वै.निघ.। किञ्चुलुकायाम् । केँचो । भैष.वीर्य्यस्तम्भे । च.द. ग्रप्य.चि. । [वै.निघ. ।

भूमिलवणम् । क्ली । मृत्तिकालवणे । सोरा।

भूमिलेपनम् । क्ली । गोमये । हे.च. ।

भूमिवल्ली । स्त्री । मार्कण्डिकालतायाम्। भुँइआमला, काँकरोलविशेष । भा. । See मार्कण्डिका। [व.१६ ।

भूमिशयः । पुं । वनचटके । छातार । रा.नि.

भूमिसम्पुटः । पुं । शरावादौ । वै.निघ, कास.चि. ।

भूमिसरः । पुं । श्यामाकतृणे । वै.निघ. ।

भूमि(मी)सहः । पुं । शाकवृक्षे । हिं भूँरसह । गुणौ—शीतलः रक्तपित्तघ्नः । भा. ।

भूमिस्पृक् । पुं । मानुषे । मे. । अन्धे । खञ्जे । श.र. । [वै.निघ. ।

भूमिस्फोटः । पुं । भूच्छत्राके । भुँइछातु ।

भूमिषण्डः । पुं । शारदमल्लिकायाम् । काठमाल्लिका । रत्ना. ।

भूम्याह्व(ह्वा)ल्यम् । क्ली । स्वनामख्यातक्षुपे । हिं भूँइतखड़ । कासवदा, एलहुड़ि इति देशविशेषे ख्यातम् । गुणाः—तिक्तरसं ज्वरकुष्ठामसिध्महरश्च । रा.नि.व.४ ।

भूम्यामलकी (की) । स्त्री । भूधात्र्याम् । भुँइ आमला । रा.नि.व.५ । मुषल्यां । ताल-मूली । प.मु. । [व.२२ ।

भूम्याहुली । स्त्री । अपराजितायाम् । रा.नि

भूम्युदराश्रया । स्त्री । मूषिककर्णीलतायाम् । मूषाकाणीलता । वै निघ. ।

भूरि । क्ली । सुवर्णे । अम. ।

भूरिगन्धा । स्त्री । मुरानामगन्धद्रव्ये । मूरा मांसी । रा.नि.व.१२ ।

भूरिगः (मः) । पुं । गर्द्दभे । रा.नि.व.१९ ।

भूरिचन्द्रः (तेजाः) । पुं । सुवर्णे । रा.नि.व. १२ । [गाछ । रा नि.व.६ ।

भूरिदुग्धा । स्त्री । वृश्चिकालीवृक्षे । विछाति

भूरिधरः । पुं । गर्द्दभे । रा.नि.व.१९ ।

भूरिनिष्कम् । क्ली । स्वर्णे । रा.नि.व.१२ ।

भूरिपत्रः । पुं । ऊषरतृणे । উষরতৃণ । रा. नि.व.८ । [नि.व.४ ।

भूरिपुष्पा । स्त्री । शताह्वाक्षुपे । শুল্ফা । रा.

भूरिप्रेमा (न्) । पुं । चक्रवाकपक्षिणि । रा. नि.व.१९ ।

भूरिफली । स्त्री । पाण्डुरफल्यां । रा.नि.व.५।

भूरिफेना । स्त्री । चर्म्मकषायां । र.मा.। सा-गुडूची । वै.निघ. ।

भूरिबला । स्त्री। अतिबलायाम् । रा.नि.व.४।

भूरिमञ्जरी । स्त्री । श्वेततुलसीवृक्षे । रा.नि. व.१० ।

भूरिमल्ली । स्त्री । अम्बष्ठायां । रा.नि.व.४ ।

भूरिमायः (युः) । पुं । शृगाले । अम. । स्त्री (या,युः) । शृगाल्याम् । रा.नि.व.१९ ।

भूरिमूलिका । स्त्री । अम्बष्ठायां । वै.निघ.।

भूरिरसः । पुं । इक्षुवृक्षे । भा. । [निघ.

भूरिलग्ना । स्त्री । श्वेतापराजितायाम् । वै.

भूरुण्डी । स्त्री। हस्तिशुण्डीवृक्षे । হাতিশুঁড়ে । अम. । महाकरञ्जे । आदित्यभक्तायाम् । वै.निघ.।

भूरुहः । पुं । वृक्षे । श.मा. । अर्ज्जुनवृक्षे । शालवृक्षे । वै.निघ. । [वै.निघ. ।

भूरुहा । स्त्री । मांसरोहिण्याम् । दूर्व्वायाम् ।

भूरोहः । पुं । किञ्चुलुके । কেঁচো । भैष.भग. चि. ।

भूर्ज्जः (पत्रः,वृक्षः) । पुं।(Betula bhojpattra.) The birch. स्वनामख्यातवृक्षे । शाकपादः, फटक इति हिमाचलदेशे प्रसिद्धः । ভুর্জ্জপত্র, ভোজপত্র । हिं भूजपत्र । वम्. भूर्ज्जपत्र । र.मा. । गुणाः — कटुकषायोष्णः भूतरक्षाकरः त्रिदोषघ्नः पथ्यश्च । रा.नि.व.९ । कर्णरुक्पित्तरक्तघ्नः मेदोविषहरश्च । भा. ।

भूर्ज्जग्रन्थिः । पुं । तरुचग्रन्थौ । च.सू.३अ.२ प्रदेहः । "ग्रन्थिश्च भौर्ज्जः ।"

भूर्ज्जपत्रकः । पुं । शाखोटवृक्षे । শ্যাওড়াগাছ । रा.नि.व ६ ।

भूलग्ना । स्त्री । शङ्खपुष्प्यां । रा.नि.व.३ ।

भूलता । स्त्री । किञ्चुलुके । हे.च. ।

भूशमी । स्त्री । ह्रस्वशमीवृक्षे । वै.निघ. ।

भूशयः । पुं । विलवासिजन्तुमात्रे, गोधानकुलादौ । गुणाः— गुरुः उष्णः मधुरः स्निग्धः वातघ्नः शुक्रलश्च । राज. । [नि.व.११ ।

भूशेलुः । पुं । भूकर्बुदारे । ভুঁইচাল্তা । रा.

भूषणार्हम् । क्ली। स्वर्णे । मौक्तिके । प्रवाले । वै.निघ. । [गाछ । वै.निघ. ।

भूषि(सु)ता । स्त्री । अङ्कोलवृक्षे । আঁকোড়

भूस्तृणः । पुं, क्ली । गन्धतृणे । गन्धमात्रेति मुक्ता. । গন্ধতৃণ । "सौगन्धिकं भूस्तृणकः ।" गुणाः—"भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रेचनं लघु । विदाहि दीपनं रुचमनेत्रं मुखशोधनम् । अहृद्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम् ॥" भा.सू. ३भ.सू.घा.चि. ।

भूस्थः । पुं । गण्डूपदाम् । मनुष्ये । वै.निघ. ।

भूस्पृक् । पुं । मानुषे । हे.च. ।

भूस्वेदः । पुं । घनाश्मना स्वेदविशेषे । প্রস্তর-স্বেদ । विधिः—"शयानस्य प्रमाणेन घनामश्ममं-

णौं शिलां । तापयित्वा मारुतघ्नैः दारुभिः संप्रदीपितैः । व्यपोह्य सर्व्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा । तां शिलामथ कुर्व्वीत कौशेयारिकसंस्तरान् । तस्यां स्वभ्यक्तसर्व्वाङ्गः स्वपन् स्विद्यति ना सुखम् ॥" च.सू.१४अ. ।

भृचित् । पुं । शूकरे । त्रिका. ।

भृकुटी । स्त्री । मण्डूकजातीयकीटे । सु.कल्प.८अ. । See कीटः ।

भृगु(ङ्ग)जा । स्त्री । भार्ग्याम् । रा.नि.व.६ । वै.निघ.जीर्णज्व.चि.लवङ्गादिकषाये, श्वास.चि.सिंह्यादिकषाये ।

भृगुभवा । स्त्री । भार्ग्याम् । रा.नि.व.६ ।

भृगूद्भवा । स्त्री । भार्ग्याम् । रा.नि.व.६ ।

भृङ्गम् । क्ली । त्वचि । गुड़त्वक् । प.मु. । सि.यो.अर्श.चि. । भैष.बाल.चि. । "मुस्तीभृङ्गनिशाकरः ।" अभ्रके । रा.नि.व.१३ । च.द.रा.य.चि.लवङ्गाद्यचूर्णे ।

भृङ्गः । पुं । भृङ्गराजे । भीमराज । रा.नि.व.६। च.द.वाल.रो.चि. । र.सा.सं.सुधावतीगुट्यां । भ्रमरे । र.मा. । पक्षिविशेषे । फिङा वा भीमराज पाखी । रा.नि.व.२१ । मांसगुणाः—मधुरं स्निग्धं कफशुक्रवर्द्धनञ्च । रा.नि.व.१७ । भृङ्गरीले । भीमरुल । श.र. ।

भृङ्गकः । पुं । धूम्याटपक्षिणि । भृङ्गराजपक्षिणि । फिङा वा भीमराज पाखी । श.र. ।

भृङ्गजुली । स्त्री । भृङ्गाह्वायाम् । मं भमरमालि । कं उप्पुशक्के । गुणाः—कटूष्णा तिक्ता दीपनरोचनी च । रा.नि.व.७।

भृङ्गजम् । क्ली । अगुरुकाष्ठे । र.मा. ।

भृङ्गजा । स्त्री । भार्ग्याम् । रा.नि.व.६ ।

भृङ्गपर्णिका । स्त्री । सूक्ष्मैलायाम् । श.च. ।

भृङ्गप्रियः । पुं । धूलीकदम्बे । रा.नि.व.६ ।

भृङ्गप्रिया । स्त्री । माधवीलतायां । रा.नि.व.१० । [निघ. ।

भृङ्गबन्धुः । पुं । कुन्दवृक्षे । कदम्बवृक्षे । वै.

भृङ्गमारि(री) । स्त्री । केविकापुष्पवृक्षे । रा.नि.व.१० । See केविका ।

भृङ्गमूलिका । स्त्री । भृङ्गाह्वायां । भ्रमरमाली । रा.नि.व.७ ।

भृङ्गमोही (हिन्) । पुं । चम्पकवृक्षे । रा.नि.व.१० । स्वर्णचम्पके । वै.निघ. ।

भृङ्गरजः (जाः) । पुं । भृङ्गराजे । भा.म.४भ.कर्णरो.चि.। "प्रस्थं भृङ्गरजस च ।" च.टी.भ.।

भृङ्गरा । स्त्री । भृङ्गराजे । केशराजे । हिं भांगरा । भा.२भ. ।

भृङ्गराजः । पुं । (Wedelia calendulacea. Syn. C. Verbesina.) स्वनामख्यातपत्रशाकविशेषे । भीमराज । हिं भाङ्गरा, भेंगरिया । मं पिवलमाका । तें गुण्टकलगरचेट्टु । वम्. पिवलभांरा । गुणाः—कटुस्तिक्तः रूक्ष उष्णः वातकफघ्नः केश्यः त्वच्यः क्रिमिश्वासकासशोथामपाण्डुघ्नः रसायनो दन्त्यः बल्यः कुष्ठनेत्रशिरोरोगघ्नश्च । भा. । भ्रमरे । भीमराजपक्षिणि । मे. । अयं प्रतुदः कषायः मधुरः रूक्षो वातजनकश्च । सु.सू.४६अ. । केशराजे । केशराज । नीलभृङ्गराजे । धूम्याटपक्षिणि । फिङे । दारुचिनीति ख्याते सुगन्धद्रव्ये । वै.निघ. ।

भृङ्गरि(री)टः । पुं । लौहे । रस.र.रसायने ।

भृङ्गरोलः । पुं । कीटविशेषे । भीमरुल । त्रिका. ।

भृङ्गवल्लभः । पुं । धाराकदम्बे । केलिकदम । भूकदम्बे । कुकशिमा । रा.नि.व.६ ।

भृङ्गवल्लभा । स्त्री । भूमिजम्बूवृक्षे । वनजाम । रा.नि.व.११ । तरणीपुष्पवृक्षे । रा.नि.व.१० ।

भृङ्गवृक्षः । पुं । भृङ्गराजवृक्षे । भीमराज । भा.म.४भ.मुखमुण्डितिका.चि. । "स्वरसैर्भृङ्गवृक्षाणाम् ।"

भृङ्गसुहृत् । पुं । कुन्दपुष्पवृक्षे । वै.निघ. ।

भृङ्गसोदरः । पुं । केशराजे । केशुते । [वै.निघ. । त्रिका. ।

भृङ्गा । स्त्री । भृङ्गराजे । त्वचि । दारुचिनि ।

भृङ्गानन्दा । स्त्री । यूथिकायां । श्वेतजुई । रा.नि.व.१० । [लि । आम्रफले । रा.नि.व.११ ।

भृङ्गाभीष्टः । पुं । आम्रवृक्षे । क्ली । आम्रमुकु-

भृङ्गारम् । क्ली । लवङ्गे । स्वर्णे । रा.नि.व.१२।१३ । पुं । भृङ्गराजे । जटा. । नालमुखजलपात्र-विशेषे । গাড়ু । च.सू.१५अ. ।

भृङ्गारकः । पुं । भृङ्गराजवृक्षे । वै.निघ. ।

भृङ्गारिः । स्त्री । केतकीपुष्पवृक्षे । भ्रमरमारिवृक्षे । रा.नि.व.१० । पुं । भृङ्गराजे । क्ली । लवङ्गे । [हे.च. ।

भृङ्गारिका (री) । स्त्री। झिल्लीकीटे । अम.।

भृङ्गार्कः । पुं । भृङ्गराजवृक्षे । वै.निघ. ।

भृङ्गाह्वः । पुं । भृङ्गराजक्षुपे । ভীমরাজ । जीवके । रा.नि.व.४।५ । लवङ्गे । वै.निघ. ।

भृङ्गाह्वा । स्त्री । मूलशाकविशेषे । मं भ्रमरमाली । कं उप्पुशक्के । अड़वीश्रील इति कोङ्कणे । गुणाः—कटूष्णा तिक्ता दीपनरोचनी च । रा.नि.व.७ । [महारसे ।

भृङ्गिः । पुं । भृङ्गराजे । वै.निघ.२भ.अ.सा.चि.

भृङ्गिका । स्त्री । इन्द्रगोपकीटे । वै.निघ. ।

भृङ्गिणी । स्त्री । वटीवृक्षे । रा.नि.व.११ ।

भृङ्गि(ङ्गी)रिटिः । स्त्री । भृङ्गाम् । त्रिका. ।

भृङ्गी । स्त्री । अतिविषायां । আতইচ । वटीवृक्षे । रा.नि.व.११। भङ्गायाम् । ভাঙ্ । वै.निघ.२भ.अल्पकज्व.चि.शुण्ठ्यादिः । तन्नामकमक्षिकायां । কুমিরে পোকা। इन्द्रगोपकीटे । वै.निघ.। पुं (इन्) । वटवृक्षे । रा.नि.व.११ ।

भृङ्गीगृहम् । क्ली । भृङ्गीमक्षिकागृहे । কুমিরে চাক । वै.निघ.२भ.र.पि.चि.नस्ये । [११ ।

भृङ्गीफलः । पुं । आम्रातकवृक्षे । रा.नि.व.

भृङ्गेष्टः । पुं । आम्रवृक्षे । वै.निघ. ।

भृङ्गेष्टा । स्त्री । घृतकुमार्य्यां । रा.नि.व.५ । भार्ग्यां । रा.नि.व.६। काकजम्बूवृक्षे । रा.नि.व.११ । तरणीपुष्पवृक्षे । रा.नि.व.१० । [उणा. ।

भृज्जनः । पुं । भर्ज्जनपात्रे । ভাজনা খোলা ।

भृशङ्कवः । पुं । नासारोगभेदे । लक्षणम्—"तीक्ष्णघ्राणोपयोगार्करश्मिसूत्रतृणादिभिः । वातकोपिभिरन्यैर्वा नासिकातरुणास्थनि । विघट्टितेऽनिलः क्रुद्धो रुद्धः शृङ्गाटकं व्रजेत् । निवृत्तः कुरुतेऽत्यर्थं क्षवथुं स भृशङ्कवः ॥" वा.उ.१९अ. ।

भृशपत्रिका । स्त्री। महानील्यां । रा.नि.व.४।

भृषत् । पुं, स्त्री । पाषाणे । श.र. ।

भृष्टः । त्रि । भर्ज्जिते । ভাজা । हे.च. ।

भृष्टकुलत्थः । पुं । भर्ज्जितकुलत्थके । ভাজা কুলতি কলায়। स ज्वरे स्वेदोद्गमहरः । सा.कौ. ज्व.चि. ।

भृष्टचणकः । पुं । भर्ज्जितचणके । ছোলা ভাজা । मं फुटाभुंजा । कं हुरुकड़ले । गुणाः—रुच्यः वातघ्नः रक्तदोषकृत् वीर्य्योष्णः लघुः कफघ्नः शैत्यापहारकश्च । रा.नि.व.१६ ।

भृष्टतण्डुलः । पुं । भर्ज्जिततण्डुले । সিদ্ধ চাউল । गुणाः—"सुगन्धिः कफहा रुच्यः पित्तलो भृष्टतण्डुलः ।" राज.३प. ।

भृष्टतण्डुलान्नम् । क्ली । भर्ज्जिततण्डुलस्यान्ने । সিদ্ধ চাউলের ভাত । চালভাজা । মুড়ি । गुणाः—"भृष्टतण्डुलजञ्चान्नं लघु वह्निप्रदीपनम् ।" राज.३प. । [गुणाः मत्स्यशब्दे ज्ञेयाः ।

भृष्टमत्स्यः । पुं। भर्ज्जितमत्स्ये । ভাজা মাছ।

भृष्टमांसम् । क्ली । घृतादिभर्ज्जितमांसे । ভাজা মাংস । गुणाः—विदाहि रक्तवातादिदोषकृच्च । रा.नि.व.१७ ।

भृष्टमृत् । स्त्री । अग्निभर्ज्जनेन दग्धमृत्तिकायाम् । পোড়া মাটী । च.सू.४अ. ।

भृष्टयवः । पुं । भर्ज्जितयवे, धानायाम् । ভাজা যব, ছাতু । चिपिटके । চিঁড়ে । प.मु. ।

भृष्टान्नम् । क्ली । भृष्टतण्डुले । মুড়ি । श.च. ।

भेकः । पुं । कृष्णाभ्रे । रस.चि.३अ. । मण्डूके । ব্যাঙ্ । तन्मांसगुणाः—सद्योबलकरं श्रमदृष्णादाहप्रमेहचयकुष्ठच्छर्द्दिघ्नञ्च । राज. । [हि. ।

भेकटः । पुं । मत्स्यभेदे । ভেট্কী মাছ । भ.

भेकनिः (नी) । स्त्री । मत्स्यभेदे । ভাঙন মাছ । मांसगुणाः—मधुरं शीतलं वृष्यं श्लेष्मकरं गुरु च । राज. ।

भेकपर्णी । स्त्री। मण्डूकपर्ण्याम् । থুলকুড়ি । उड़्. थालकुड़ि । सा.कौ.रास्नादिलौहे । मञ्जिष्ठेति वृद्धाः ।

भेकभुक् । पुं । सर्पे । त्रिका ।

भेकमूत्रम् । क्ली । मण्डूकमूत्रे । ব্যাঙের মূত । र.सा.सं.वज्रशोधने । [घ. ।

भेकराजः । पुं । महाभेके । भृङ्गराजे । वै.नि-

भेकी । स्त्री । मण्डूकपर्ण्यां । थूल्कुड़ि । र.मा.। भेकपर्णी । श्म. ।

भेटुलिः । पुं । वामनकेशे । सु.सू.७श. ।

भेड्रः । पुं । मेषे । त्रिका. ।

भेड़ः (कः) । पुं । मेषे । हे.च.। पद्मबीजे । तन्त्रामकतन्त्रकारे । See तन्त्रकारः ।

भेड़ा (ण्डा) । स्त्री । स्वनामख्यातक्षुपे । बं भेडु । कं वेंडे । गुणाः—अम्लरसा उष्णा ग्राहिणी अरुचिकारिणी च । रा.नि.व.४ । पद्मबीजे । रा.नि.व.१० ।

भेड़ी । स्त्री । मेष्यां । ভেড়ী ।

भेदः । पुं । भञ्जने । भञ्जनवत्पीड़ायाम् । विदारणेनेव व्यथायां । मा.नि. । विरेके । জোলাপ ।

भेदकः । त्रि । विरेचके । पुं । अम्लवेतसे । वै.निघ. ।

भेदनम् । क्ली । हिङ्गुनि । रा.नि.व.६ । वायुजन्यव्रणवेदनायाम् । सु.सू.२२श. । त्रि । भेदके, अबद्धं बद्धं वा मलादिकं पिण्डितम् भित्वाधः पातयति,यथा कटुक्यादि । आग्रयावदारणे । च.सू. १८ श. । पुं । अम्लवेतसे । प सु. । रा.नि.व.६ । शूकरे । रा.नि.व.१८ । भल्लातके ।

भेदन(नि)कः । पुं । जीरके । वै.निघ. ।

भेदनीयवर्गः । पुं । भेदकमहाकषायवर्गे । यथा—"सुवहार्कोरुवुकाग्निमुखीचित्राचित्रकचिरविल्वशङ्खिनीशकुलादनीस्वर्णक्षीरिण्य इति दशेमानि भेदनीयानि भवन्ति ।" তেউড়ী, শ্বেতার্ক বা রক্তার্ক, এরণ্ড, বিষলাঙ্গলি, দন্তী, চিত্রক, করঞ্জ, শ্বেতবুহ্মা, কটুকী, সোণাথিরুই । च.सू.४श. ।

भेदाशी (इन्) । पुं । प्रतुदपक्षिविशेषे । गुणाः—"सर्व्वदोषकरस्तेषां भेदाशी मलदूषकः ।" सु.सू.४६श. ।

भेदिज्वराङ्कुशः । पुं । ज्वराधिकारे रसः । 'रसस्य द्विगुणं गन्धं गन्धतुल्यञ्च टङ्कणं । रसतुल्यं विषं योज्यं मरिचं पञ्चधा विषात् । कट्फलं दन्तिबीजञ्च प्रत्येकं मरिचान्वितं । ज्वराङ्कुशो रसो ह्येषः चूर्णयेद्याममात्रकं । वटिकां कारयेद्धीमान् एकगुञ्जाप्रमाणिकाम् ।" रस.कौ. ।

भेदिनी । स्त्री । कृष्णजीरके । रा.नि.व.६ ।

भेदी (इन्) । पुं । अम्लवेतसे । रा.नि.व.६ । त्रि । भेदकारके । [रोगे) । सु.सू.५श. ।

भेद्यम् । क्ली । भेदार्हे, भेदनीये (विद्रध्यादौ

भेरण्डम् । क्ली । गर्भधारणे । श.र. । त्रि । भयानके ।

भेषजम् । क्ली । औषधे । रा नि व.२० । तच्च द्विविधं—"स्वस्थस्योजस्करं किञ्चित् किञ्चिदार्त्तस्य रोगनुत् ।" च.सू.१श. । कृष्णजीरके । लावपक्षिणि । जटा. ।

भेषजकल्पः । पुं । औषधयोजनायां । ते च कल्पा मदनादयः । वा.कल्प.६श. ।

भेषजाङ्गम् । क्ली । औषधानुपाने । श.च. ।

भैरवीवचा । स्त्री। स्वनामख्यातवचायां । শুক্ল বচ । प.मु. ।

भैषजम् । क्ली । औषधे । रा.नि.व.२० ।

भैषज्यसारः । पुं । उपेन्द्रमिश्रकृतसंग्रहे ।

भोगः । पुं । शालिधान्ये । प.मु. । सम्पूर्णाहारे। रा.नि.व.२० । अहिफणायाम् । सर्पशरीरे । पालने । त्रिका. । क्रोड़े । रा.नि.व.१८ । सर्पे । देहे । माने । श.र. ।

भोगगृहम् । क्ली । वासगृहे । हे.च. ।

भोगधरः । पुं । सर्पे । वै.निघ. ।

भोगपिशाचिका । स्त्री। क्षुधायाम् । हारा.।

भोगवती । स्त्री । शुक्लवचायाम् । वै.निघ. ।

भोगवान् । पुं । सर्पे । मे. ।

भोगावासः । पुं । वासगृहे । हारा. ।

भोगिगन्धिका । स्त्री। सर्पगन्धायां। वै.निघ.।

भोगिभुक् । पुं । गरुड़े । मयूरे । वै.निघ. ।

भोगिवल्लभम् । क्ली । श्रीखण्डचन्दने । प.मु.।

भोगी । स्त्री । सर्पिण्यां । सर्पकङ्कालिका । रा.नि.व.५ । गी (इन्) पुं । सर्पे । अम. ।

भोजनम् । क्ली । कठिनद्रव्यस्य गलाधःकरणे । अम. । पादोनाहारे । "पादोनं स्याद्भोजनम् ।" रा.नि.व.२० । भोजनान्तकर्त्तव्यता —"भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते । अचिरेणैव तद्वारि तिमिराणि व्यपोहति । भुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत् । भुक्तं माहेन्द्रहस्तेन वैश्वानरमुखेन च । गरुड़स्य च कण्ठेन समुद्रस्य च वह्निना । वातापिर्भक्षितो येन पीतो येन महोदधिः । यन्मया खादितं पीतं तदगस्त्यो जरिष्यति । सुखासीनः क्षणं तिष्ठेत् यावन्न लभते सुखं । भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् । एवञ्चाधोगतं चान्नं सुखं तिष्ठति जीर्य्यति ॥" राज.३प. । See आहारः, अन्नञ्च ।

भोजनकः । पुं । नदीभल्लातके । प.मु. ।

भोजनपात्रम् । क्ली । स्वर्णादिनिर्म्मिताहारपात्रे । पाकराजः ।

भोजनार्हम् । क्ली । शालिधान्ये । प.मु. ।

भोजनीयम् । क्ली । भोज्यद्रव्यमात्रे ।

भोजराजः । पुं । अश्वशास्त्रकारे ।

भोजराजशुक्लः । पुं । रससुधानिधिकारे ।

भोज्यम् । क्ली । अष्टविधान्नान्यतमे अन्ने । रा.नि.व.२० ।

भोज्यसम्भवः । पुं। शरीरस्थरसधातौ । श.च.।

भोग्यम् । क्ली । धान्ये । रा.नि.व.१६ ।

भोग्यार्हम् । क्ली । शालिधान्ये । रा.नि.व.१६।

भोलिः । पुं । उष्ट्रे । त्रिका. ।

भौतिकम् । क्ली । मुक्तायां । रा.नि.व.१३ ।

भौमजलम् । क्ली। पृथ्वीजले । जाङ्गलानूपसाधारणभेदेन तेषां गुणाः जलशब्दे मृग्याः ।

भौमरत्नम् । क्ली । प्रवाले । पला । रा.नि. व.१३ । [सु.कल्प.३अ. ।

भौमसर्पः । पुं । पृथ्वीजातसर्पे, दंष्ट्राविषे ।

भौमौषधम् । क्ली । पार्थिवौषधे । "सुवर्णं समला पञ्च लौहाः ससिकताः सुधा । मनःशिलाले मण्यो लवणं गैरिकाञ्जने ॥" च.सू.१अ. ।

भौर्जग्रन्थिः । पुं । भूर्जग्रन्थौ । "ग्रन्थिश्च भौर्जः ।" च.सू.३अ. । [ज्व.चि. ।

भ्रंशः । पुं । उच्चादिभ्यः पतने । भा.आगन्तु.

भ्रमः । पुं । चक्रारूढ़स्येव ज्ञाने । भा.म.१भ. ज्व.चि. । "रजःपित्तानिलाद्भ्रमः ।" वै.निघ.मूर्च्छा.चि. । मूर्च्छायाम् । भ्रान्तौ । कुन्दयन्त्रे । कुँद । त्रिका. ।

भ्रमणम् । क्ली । पर्य्यटने । हस्त्यादिभ्रमणगुणाः —वातकोपनत्वम् अङ्गस्थैर्य्यकरत्वं बलाग्निवर्द्धनत्वञ्च । राज. ।

भ्रमणी । स्त्री । जलौकायाम् । वै.निघ. ।

भ्रमत्कुटी । स्त्री । तृणादिच्छत्रे । त्रिका. ।

भ्रमरः (कः) । पुं । भृङ्गे । अम. । बालमूषिके । मे. ।

भ्रमरकीटः । पुं । कुम्भीरकीटे, अग्निप्रकृतिकीटे । सु.कल्प.८अ. । [रा.नि.व.७ ।

भ्रमरच्छल्ली । स्त्री । भृङ्गच्छल्लीलतायाम् ।

भ्रमरत्वचा । स्त्री । भ्रमरच्छल्ल्याम् । वम्. भवरसाली । वै.निघ. ।

भ्रमरप्रियः । पुं । धाराकदम्बे । र.मा. ।

भ्रमरबान्धवा । स्त्री । शुक्लजातीवृक्षे । वै. निघ. । [नि.व.१० ।

भ्रमरमारी । स्त्री । भ्रमरारिपुष्पवृक्षे । रा.

भ्रमरा । स्त्री। भृङ्गच्छल्लीलतायां । रा.नि.व.७

भ्रमरातिथिः । पुं । चम्पकवृक्षे । रा.नि.व. १० ।

भ्रमरानन्दः । पुं । वकुलवृक्षे । रक्ताम्लानवृक्षे । रक्तआँटी । स्त्री । अतिमुक्तकपुष्पवृक्षे । रा. नि.व.१० ।

भ्रमरारिः । पुं । पुष्पवृक्षविशेषे । भ्रमरमारी इति मालवे प्रसिद्धः । गुणाः—तिक्तः वात(पित्त)-श्लेष्मज्वरापहः शोथकण्डूकुष्ठव्रणत्रिदोषघ्नश्च । रा. नि.व.१० । [नि.व.८ ।

भ्रमरालम्बः । पुं । भूतृणे । गन्धतृण । रा.

भ्रमरी । स्त्री । जतुकायाम् । पुत्रदात्र्याम् । भ्रमर्य्याम् । गुडत्वचायाम् । रा.नि.व.२१ । भ्रमरारिपुष्पवृक्षे । रा.नि.व.१० ।

भ्रमरेष्टः । पुं । पृथुशिम्बश्योणाकवृक्षे । বড় সৌটা শ্যোণা গাছ । रा.नि.व.९ । स्त्री । भार्ग्यां । रा.नि.व.११ । [नि.व.१० ।

भ्रमरोत्सवा । स्त्री । माधवीलतायाम् । रा.

भ्रमिः । स्त्री । मूर्च्छायाम् ।

भ्रमिका । स्त्री । धातकीवृक्षे । वै.निघ. ।

भ्रष्टगुदः । त्रि । गुदभ्रंशरोगिणि । च.द. ।

भ्रस्थुः । पुं । नासारोगभेदे । निदा. ।

भ्राजकः । पुं, क्ली । तन्नामकपित्ते । পিত্তবিশেষ । श.च. । तस्य स्थानं त्वक् । तस्य कर्म्म छायाप्रकाशकत्वम् अभ्यङ्गादिक्रियाणाञ्च पाचकत्वम् । सु.सू.२१अ. ।

भ्रान्तः । पुं । पीतधुस्तूरवृक्षे । रा.नि.व.१० ।

भ्रान्तिः । स्त्री । भ्रमे । सा च रजःपित्तानिलजा भवति । "रजःपित्तानिलैर्भ्रान्तिः ।" शार्ङ्ग. पु.६अ. ।

भ्राम(मि)कः । पुं । सूर्य्यावर्त्ते । शृगाले । चुम्बकप्रस्तरे । मे. । कान्तलौहविशेषे । रा.नि.व.१३ ।

भ्रामरम् । क्ली । भ्रमराहृतमधुनि । नकुल.१३ अ. । वृहत्सप्राम्तलौहे । तदुक्तं ये स्निग्धाञ्जनगोलाभाः पुष्पासवपरायणाः । भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते ॥ गुणाः—मधुरं पिच्छिलं रुच्यं मुखजाड्यहरं श्वेतवर्णञ्च । रा.नि.व.१४ । "शीतं कषायं मधुरं लघु स्यात् सन्दीपनं लेहनमेव शस्तं । संशोधनञ्च व्रणशोधनञ्च संरोपणं हृद्यतमञ्च वर्ण्यं । त्रिदोषनाशं कुरुते च पुष्टिं कासे क्षये वा श्वसने च छर्द्दौ । हिक्काभ्रमे शोषणपीनसानां रक्तप्रमेहे सरक्तातिसारे । रक्तातिसारे च सपित्तरक्ते व्रणोद्भवत्वार्म्मगदेऽपि शस्तम् । नेत्रामये वा ग्रहणीगदे वा विषे प्रशस्तं भ्रमरैश्चितं यत् । भ्रामरं सघनं जाड्यभूयिष्ठं मधुरञ्च यत् । क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेहनम् । भ्रामरं वृक्षसंस्थाने विटपे सारघं भवेत् । रन्ध्रे तु कोटरे वापि क्षौद्रं तच्च प्रशस्यते ॥" अत्रि.१८अ. । पुं । प्रस्तरभेदे । চুম্বক পাথর । मे. ।

भ्रामरशर्करा । स्त्री । भ्रामरमधुकृतशर्करायाम् । गुणाः—भ्रामरमधुतुल्याः । रा.नि.व.१४ ।

भ्रामरी । स्त्री । पुत्रदात्रीलतायां । रा.नि.व.३ । नकुल.१३अ. ।

भ्रामितः । त्रि । रोगिणि । रा.नि.व.२० ।

भ्रामिताक्षः । पुं । अश्वस्य वातव्याधिविशेषे । लक्षणं यथा—"वक्रः पश्चिमकायेन मण्डलैर्यो विचेष्टते । मन्दश्वासश्च दीनश्च भ्रामिताक्षो रजोद्भतः ॥" ज.द.५५अ. । [अम. ।

भ्राष्टः । पुं, क्ली । भर्ज्जनपात्रे । ভাজনাখোলা ।

भ्राष्ट्रजा । स्त्री । खर्परपोलिकायां । वै.निघ. ।

भ्रुकुटिः । स्त्री । भ्रुवि । वै.निघ. ।

भ्रुकुटीमुखः । पुं । दर्व्वीकरसर्पविशेषे । सु.कल्प.४अ. । See सर्पः ।

भ्रूः । स्त्री । भ्रूदेशे । ভুরু । वै.निघ. ।

भ्रूणः (कः) । पुं । बालके । गर्भे । अम. । ह्रीवेरे । বালা । रस.र.तिक्तकष्टते ।

म

मः । पुं । ब्रह्मणि । एका.कोषः । विषे । मे. ।

मकरः । पुं । मत्स्यविशेषे । মকর । "मत्स्यानां मकरः श्रेष्ठो दीपनो वातनाशनः । रुचिप्रदः शुक्रकरश्चाश्मरीदोषनाशनः ॥" अत्रि.२२अ. । तन्नामकाग्निप्रकृतिकीटे । सु.कल्प.८अ. ।

मकरध्वजः । पुं । रसायनाधिकारे औषधविशेषे । "स्वर्णस्य भागौ वङ्गञ्च मौक्तिकं कान्तलौहकं । जातीकोषफले रूप्यं कांस्यकं रससिन्दुरम् । प्रवालं कस्तुरी चन्द्रमभ्रकञ्चैकभागिकम् । स्वर्णसिन्दूरतो भागाश्चत्वारः कल्पयेद्बुधः ॥" সুবর্ণ ২ ভ. বঙ্গ ১ ভ. মুক্তা ১ ভ. লৌহ ১ ভ. জায়ফল ১ভ. জয়িত্রী ১ভ. রূপা ১ভ. কাঁসা ১ভ. রস-সিন্দুর ১ ভ. প্রবাল ১ ভ. মৃগনাভি ১ ভ.

कर्पूर १ भ. अभ्र १ भ. स्वर्णसिन्दूर ४ भ. । र.सा.सं. ।

मकरन्दः । पुं । मधुनि । प.मु. । कुन्दपुष्पे । कुन्दफुलेर गाछ । पद्मकेसरे । रा.नि.व.१ । क्ली । किञ्जल्के । रा.नि.व.१० । आम्रभेदे । कोकिले । वै.निघ. । पुष्परसे । भा. ।

मकरन्दजम् । क्ली । ह्रीवेरे । वाला । प.मु. ।

मकरन्दवती । स्त्री । पाटलपुष्पवृक्षे । श.च. ।

मकरन्दवासः । पुं । धूलीकदम्बे । रा.नि.व.६ ।

मकराकरः । पुं । कण्टककरञ्जे । श.च. ।

मकरी । पुं । सन्निपातज्वरविशेषे ।

मकुरः (लः) । पुं । वकुलवृक्षे । कोरके । है.च. । श.र. । [च.सू.२७अ. ।

मकु(कू)लकः । पुं । दन्तीवृक्षे । भ.टी.र. ।

मकुष्टः (ष्ठः) (कः) । पुं । (Phaseolus aconitifolius.) वनमुद्गे । वनमुग । हिं मुह-ट, मोट, मुगानी । वें वनमुद्गचेंड़् । मकुष्ठक इति मालवदेशे प्रसिद्धः । गुणाः – कषायः मधुरः रक्त-पित्तघ्नः ज्वरदाहघ्नः पथ्यः रुचिकृत् त्रिदोषहरश्च। रा.नि.व.१६ । "सरक्तपित्तकफवातहन्ता चोष्णः कषायो मधुरः प्रदिष्टः । ग्राही सुशीतो गुदकील-गुल्मं मकुष्ठकः सर्व्वगदान् निहन्ति ॥" अत्रि.१५ अ. । वत्सूपगुणाः—"मकुष्ठसूपोऽल्पबलः पाचनो दीपनो लघुः । चक्षुष्यो बृंहणो वृष्यः पित्तश्लेष्मास-रोगनुत् ॥" द्रव्यगुणः । [च.वि.७अ. ।

मकेरुकः । पुं । कृमिरोगे, पुरीषजकृमिविशेषे ।

मक्कलः (ल्लः) । पुं । वातजशूलरोगे । गर्भ-मोचनान्ते वातशोणितजशूलार्त्तिविशेषे । হেঁতাল ব্যথা । लक्षणं—"वायुः प्रकुपितः कुर्य्यात्संरुध्य रुधिरं सुतम् । सूताया हृच्छिरोवस्तिशूलं मक्कल-संज्ञकम् ॥" मा.नि. ।

मक्कुलम् । क्ली । शिलाजतुनि । श.र. ।

मक्कोलः । पुं । खटिकायाम् । खड़ि । त्रिका. ।

मखप्रभुः । पुं । बृहत्सोमलतायाम् । वै.निघ. ।

मखान्नम् । क्ली । पद्मबीजसदृशबीजे । हिं म-खाना । "मखान्नं पद्मबीजाभं पानीयफलमित्य-पि ।" गुणाः—"मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत् ।" भा. । [चि.सूतादिगुल्मां ।

मगधम् । क्ली । पिप्पलीमूले । वै.निघ.ज्वरी.

मगधजा । स्त्री । पिप्पल्याम् । পিপুল গাছ । वै.निघ.वि.ज्व.चि. ।

मगधजाफलम् । क्ली । पिप्पल्यां । পিপুল । च.द.गुल्म.चि.भार्गीषट्पलकघृते ।

मगधा । स्त्री । पिप्पल्यां । प.मु. । वै.निघ.२ भ.कर्णकज्व.चि. । [सि.यो अग्निमान्द्यचि. ।

मगधोद्भवा । स्त्री । पिप्पल्यां । रा.नि.व.६ ।

मघम् । क्ली । औषधे । पुष्पविशेषे । श.र. ।

मघा (घी) । स्त्री । औषधविशेषे । धरणिः । धान्यविशेषे । मे. ।

मङ्गलच्छदा (च्छायः) । स्त्री, पुं । प्लक्ष-वृक्षे । পাকুড় গাছ । रा.नि.व.११ । [निघ. ।

मङ्गलप्रदा । स्त्री । हरिद्रायां । शमीवृक्षे । वै.

मङ्गला । स्त्री । शुक्लदूर्व्वायां । श.र. । हरिद्रा-यां । रा.नि.व.६ । नीलदूर्व्वायां । रा.नि.व.८ । करञ्जभेदे । श.च. । मङ्गलागुरुणि । रा.नि.व.१२ । ऋद्धौ । वृद्धौ । त्रायमाणायाम् । वै.निघ. । [१२ ।

मङ्गलागुरु । क्ली । मङ्गल्यागुरुणि । रा.नि.व.

मङ्गल्यम् । क्ली । दधनि । अम्लदधनि । मे. । स्वर्णे । सिन्दूरे । रा.नि.व.१३ । कृष्णागुरुकाष्ठे । प.मु. । श्रीखण्डचन्दने । শ্বেত চন্দন । रा.नि.व.१२ । पुं । विल्ववृक्षे । र.मा. । मसूरके । रा.नि.व.१६ । जीवकक्षुपे । रा.नि.व.५ । नारि-केलवृक्षे । कपित्थवृक्षे । रा.नि.व.११ । रीठाकर-ञ्जे । रा.नि.व.९ । अश्वत्थवृक्षे । मे. । जलमधूक-वृक्षे । वै.निघ. । [धा.व. ।

मङ्गल्यकः । पुं । मसूरकलाये । भा.पू.१भ.

मङ्गल्यकुसुमा । स्त्री । शङ्खपुष्प्यां । भा. । [टा. ।

मङ्गल्यनामधेया । स्त्री । जीवन्तीवृक्षे । ज-

मङ्गल्यपुष्पी । स्त्री । शङ्खपुष्प्याम् । वै.निघ. ।

मङ्गल्या । स्त्री । चोड़ानामदेवदारुभेदे । प्रि-यङ्गौ । मङ्गलागुरुणि । रा.नि.व.१२ । हेमपुष्प्यां । मसूरे । मूर्व्वायां । मूर्गा । र.मा. । वृद्धौ । रा.नि.

व.५।२१। मनोहवे। रा.नि.व.८।२३। अधःपुष्पां। চোর কাঁটকি। गोरोचनायां। हरिद्रायां दूर्व्वायां। प.मु.। गुञ्जवचायां। रा.नि.व. ८। माषपर्ण्यां। रा.नि.व.३।२३। जीवन्तीलतायां। वचायां। यष्ट्यौ। रा.नि.व.३।५।६।२३। महाबलायां रा.नि.व.२३। मल्लिकापुष्पवृक्षे। मुद्गपर्ण्याम्। वै.निघ.।

मङ्गल्यागुरु। क्लो। खनाम्ना केदारदेशे प्रसिद्धागुरुणि। गुणाः—शीतलं गन्धाढ्यं योगवाहिकञ्च। रा.नि.व.१२। [नि.व.५।

मङ्गल्याह्वा। स्त्री। त्रायमाणालतायां। रा.

मङ्गुरः। पुं। मत्स्यविशेषे। মাগুর মাছ। वै.निघ.। [हारा.।

मङ्कु(ङ्क)णम्। क्लो। जङ्घात्राणे। জাঙ্গিয়া।

मच्छः। पुं। मत्स्यसामान्ये। श.र.।

मज्जकृत्। क्लो। अस्थनि। है.च.।

मज्जगतज्वरः। पुं। तदाश्रितज्वरविशेषे। মজ্জাগতজ্বর। लक्षणं यथा—"तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा। अन्तर्दाहो महाश्वासः मर्म्मच्छेदश्च मज्जगे। मज्जगते क्रिया नोक्ता मरणं तत्र भाषितम्॥" वै.निघ.। [निघ.।

मज्जदमनी। स्त्री। वन्ध्याकर्कोटक्याम्। वै.

मज्जनम्। क्लो। स्नाने। जटा.। मज्जायां। श.च.। [विष्ट्रव्ये। भैष.वाजी.।

मज्जफलम्। क्लो। माजूफलमिति प्रसिद्धे व-

मज्जरः। पुं। तृणविशेषे। মাজুর তৃণ। मं पवना। कं नले। गुणाः—मधुरः धेनुदुग्धकरश्च। रा.नि.व.८।

मज्जसमुद्भवम्। क्लो। शुक्रे। है.च.।

मज्जा (न्)। पुं, स्त्री। हृचादेरन्तःसारभागे। সার। अम.। अस्थ्नः शुद्धस्नेहभागे। स च जान्वस्थिमध्यग. तस्य कर्म्म पूरणम्। "स्नेहोऽस्थ्नः शुचिरेव स्यात् स मज्जा कथितो बुधैः।" भा.पाददारीचि.। "अस्थि यत् स्वाग्निना पक्वं तस्य सारो भवेन्नः। यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते॥" इति स्वरूपम्। मज्जस्थानं यथा—"स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः।" भा.। तृतीया मेदोधरा नाम, मेदोहि सर्व्वभूतानामुदरस्थमण्वस्थिषु महत्सु मज्जा भवति। सु.शा.४अ.। अस्थिसारे। অাঁটির শাঁস। रा.नि.व.१८। गुणाः:—"यस्य यस्य फलस्येह वीर्य्यं भवति याद्दशं। तस्य तस्यैव वीर्य्येण मज्जानमपि निर्द्दिशेत्॥" सु.सू. ४६अ.। मज्जगुणाः—"बलशुक्ररसश्लेष्ममेदोमज्जविवर्द्धनः। मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः॥" च.। वातघ्नी पित्तकफबलकरी मांसतुल्यगन्धरूपा च। कुम्भीरमहिषमज्जगुणाः—मधुरा बृंहणी बल्या च। मज्जसत्त्वगुणौ—शैत्यमुष्णत्वञ्च। राज.।

मज्जा(नु)गतम्। क्लो। काण्डभग्ननामास्थिभङ्गरोगे। "अस्थ्यवयवोऽस्थिमध्यमनुप्रविश्य मज्जानमुन्नह्यति।" सु.नि.१५अ.।

मज्जाजः। पुं। भूमिजगुग्गुलौ। रा.नि.व.१२।

मज्जामेहः। पुं। मज्जगतप्रमेहे। निदा.।

मज्जारजाः। पुं। गुग्गुलौ। वै.निघ.।

मज्जावहस्रोतः। पुं। मज्जधातुवाहकनाड्याम्। तस्य मूलम् अस्थीनि सन्धयश्च। च.वि. ५अ.।

मज्जारसः (सारः)। पुं। शुक्रे। रा.नि.व. १८। समलायाम्। মনসাবিশেষ। वै.निघ.।

मज्जासारम्। क्लो। जातीफले। रा.नि.व.१२।

मज्जिका। स्त्री। लवणाकन्दे। वकस्त्रियाम्। वै.निघ.।

मञ्चकपत्री / **मञ्चिपत्रम् (त्री)** } स्त्री, क्लो। सुरपत्राम्। रा.नि.व.१०। गुणाः—तिक्ता उष्णा पित्तला विषघ्नी कफवातज्वरकासक्रमिघ्नी। वै.निघ.। [रा.नि.व.१६।

मञ्चकाश्रयः। पुं। मचिकायाम्। मत्कुणे।

मञ्जरम्। क्लो। मुक्तायां। श.र.। तिलकवृक्षे। श.र.। मञ्जर्य्यां। त्रिका.।

मञ्जरिः। पुं। वल्लर्य्यां। अम.।

मञ्जरी (कः)। स्त्री,पुं। गन्धतुलस्यां। प.मु.। मुक्तायां। तिलकवृक्षे। श.र.। तुलस्यां। रा.नि. व.१०। वेत्रलतायाम्। अशोकवृक्षे। वै.निघ.।

मञ्जरीनम्रः। पुं। वेतसे। বেত। रा.नि. व.६।

मञ्जा । स्त्री । वर्त्ते । छाग्याम् । हे.च. ।
मञ्जिः (ञ्जी) । स्त्री । मञ्जर्य्यां । त्रिका. ।
मञ्जिफला । स्त्री । कदलीवृक्षे । त्रिका. ।
मञ्जिष्ठः (ष्ठा, ष्ठिका) । पुं, स्त्री । (Rubia cordifolia. Syn. R. Mañjishṭhá.) Indian madder. स्वनामख्याततलतायां । मञ्जिष्ठा । प.मु. । हिं वम्. मञ्जीठ, जिञ्जिनि । तें मञ्जिष्ठतीठी, ताम्रवल्ली । ता. मञ्जिट्टी । फा. रनास । गुणाः—मधुरा कषाया उष्णा गुरुः व्रणमेहज्वरश्लेष्मविषनेत्ररोगघ्नी च । चीलयोजनी कौञ्जी सिंहली चेति तद्भेदाः । एताः सर्व्वा विलोमेन गुणोत्तरा ज्ञेयाः । रा.नि.व.६ । सू.चि.१७ अ. । च.द.वि.ज्व.चि.लाक्षादितैले । "मञ्जिष्ठा सेन्द्रवारुणी ।" पक्षाघातकामलासु हिता मूत्रस्रोतोविशोधनी च । फलं यकृद्दोषहरं मूलं चर्म्मविवर्णताहरं तिलकालकघ्नञ्च । कश्चिद्व्यगुणः ।
मञ्जिष्ठमेहः । क्ली । पित्तजन्यप्रमेहरोगे । अत्र रोगी मञ्जिष्ठोदकप्रकाशं मेहति । सु.नि.६अ. ।
मञ्जिष्ठाद्यघृतम् । क्ली । शारीरव्रणाधिकारे घृतं । "मञ्जिष्ठां चन्दनं मूर्व्वां पिष्ट्वा सर्पिर्विपाचयेत् । सर्व्वेषामग्निदग्धानामेतद्रोपणमिष्यते ॥" रस.र. ।
मञ्जिष्ठाद्यतैलम् । क्ली । क्षुद्ररोगाधिकारे तैलम् । "मञ्जिष्ठा मधुकं लाक्षा मातुलुङ्गं सयष्टिकं । कर्षप्रमाणैरेतैस्तु तैलस्य कुड़वं पचेत् । आजं पयस्तद्द्विगुणं शनैर्मृदग्निना पचेत् । नीलिकापिड़काव्यङ्गानभ्यङ्गादेव नाशयेत् ॥" तिलतैलं ॥० श. । कल्कार्थं—मञ्जिष्ठा मधुकपुष्पं (मउल फूल) लाक्षा (लाहा) मातुलुङ्गमूलं (टोवामूल) यष्टिमधु प्र. २ तो. छागदुग्धं १ श. । रस.र. ।
मञ्जुगमना । स्त्री । हंस्याम् । रा.नि.व.१९ ।
मञ्जुघोषः । पुं । कपोते । वै.निघ. । [१९ ।
मञ्जुपाठकः । पुं । शुकपक्षिणि । रा.नि.व.
मञ्जुलः । पुं । जलरङ्कपक्षिणि । मे. । तित्तिरपक्षिणि । हरिणभेदे । अञ्जीरवृक्षे । वै.निघ. । क्ली । अञ्जीरे । आँजीर । राज. । स्त्री । मञ्जिष्ठायाम् ।
मञ्जूषा । स्त्री । मञ्जिष्ठायां । रा.नि.व.६ ।

मट्ट(ड़)कः । पुं । शस्यविशेषे । माड़ुया जटा ।
मणिः (णी) । पुं, स्त्री । स्फटिकादिरत्ने, मुक्तादौ । त्रिका. । गुणाः—"मणिरत्नं सरं शीतं कषायं स्वादु लेखनं । चक्षुष्यञ्च...... ।" राज. । अजागलस्तने । मे. । शिश्नाग्रग्रन्थौ । सि.यो.मूर्च्छा. चि. । अंशे, भागे । भा.म.३भ.मूत्रोत्सङ्ग.चि. । मणिबन्धे । हे.च. । योन्यग्रभागे । श.र. ।
मणिकण्ठः । पुं । चासपक्षिणि । वै.निघ. ।
मणिकाननम् । क्ली । माने । कण्ठे । श.र. ।
मणिच्छिद्रा । स्त्री । मेदायां । प.मु. । रा.नि.व.५ । महामेदायाम् । मञ्जायाम् । वै.निघ. । ऋषभकौषधे । मे. । [व.१९ ।
मणितारकः । पुं । सारसपक्षिणि । रा.नि.
मणितुण्डः । पुं । तृषायाम् । वै.निघ. ।
मणिपूरम् । क्ली । आमाशयकुक्षे ।
मणिबन्धः । पुं । करमूले । হাতের কব্জি । रा.नि.व.१८ । भा.मसूरी.चि. ।
मणिभावरः । पुं । सारसपक्षिणि । वै.निघ. ।
मणिमन्थम् । क्ली । सैन्धवलवणे । रा.नि.व.६ । वै.निघ.श्वास.चि.शिलाद्यवलेहे । [वै.निघ. ।
मणिमन्दिरम् । क्ली । मुक्तागृहे । झिनुक ।
मणिरत्नम् । क्ली । हीरके । वै.निघ. । [१३ ।
मणिराग(ज)म् । क्ली । हिङ्गुले । रा.नि.व.
मणिरामः । पुं । ग्रन्थरत्नमालाकर्त्तरि ।
मणिवरः । पुं । हीरकमणौ । হীরে । भा. ।
मणिवीजः । पुं । दाड़िमवृक्षे । रा.नि.व.११ । जीरके । वै.निघ. ।
मणीचकम् । क्ली । चन्द्रवर्णरौप्ये । চান্দি রূপা । त्रिका. । पुं । चन्द्रकान्तमणौ । वै.निघ. । मत्स्यरङ्कपक्षिणि । মাছরাঙা পাখী । हारा. ।
मणीवकम् । क्ली । पुष्पे । हे.च. ।
मण्टपी । स्त्री । क्षुद्रोपोदिकायां । रा.नि.व.७ ।
मण्डूरम् । क्ली । मण्डूरे । মণ্ডুর । वै.निघ. ।
मण्डः (कः) । पुं । वटकाकारपिष्टकविशेषे । हिं माँड़ा । यथा—"समितां मर्द्दयेदाज्यैर्जलेनापि

च मर्द्दयेत् । पश्चात्तु घटकर्परात् पचेत्सर्पिषि नीरसम् । एलालवङ्गकर्पूरमरिचाद्यैरलङ्कृते । मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत् । अयम्प्रकारः संसिद्धो मण्ड इत्यभिधीयते ॥" गुणाः—"मण्डन्तु बृंहणो वृष्यो बल्यः सुमधुरो गुरुः । पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥" रा.नि.व.१७ ।

मण्डन् । क्ली, पुं । सारे । पिच्छे । दध्याद्यग्रसरे । माड़, দধির মাং । क्ली । मस्तुनि । मे. ।

मण्डः । पुं । एरण्डवृक्षे । प.मु. । यवादिसाधितसिक्थकरहितद्रव्यविशेषे । मण्ड, माड़ । "सिक्थकैरहितो मण्डः ।" स च चतुर्द्दशगुणाम्बुसाधितः सिद्धः अर्थात् तण्डुलपरिमाणापेक्षया ऊनविंशगुणजले सिद्धः । "मण्डश्चतुर्द्दशगुणे ।" च.द.ज्व.चि. । "जले चतुर्द्दशगुणे तण्डुलानां चतुष्पलं । विपचेत्स्रावयेन्मण्डः समक्तो मधुरो लघुः । नीरे चतुर्द्दशगुणे सिद्धो मण्डस्त्वसिक्थकः ॥" प.प्र.२ख. । गुणाः —"तण्डुलानां सिक्थहीना पेया चाग्निदीपनी । ग्राहिणी लघुशीता च पाचनी वातलोमनी । धातूनाञ्चैव नाड़ीनां मृदुत्वस्वेदकारिता । तृषाश्रमाश्मरीपित्तातीसारकफदोषहा ॥" वै.निघ. । अष्टगुणवारिसिद्धे मण्डे । स चाग्निमान्द्ये हितः । सि.ग्रा.अग्निमा.चि. । गुणाः —"क्षुद्बोधनो वस्तिविशोधनश्च प्राणप्रदः शोणितवर्द्धनश्च । ज्वरापहारी कफपित्तहन्ता वायुं जयेदष्टगुणो हि मण्डः ॥" राज.३प. । भेके । भूनके । शाकभेदे । मे. । मस्तुनि । सारे । पिच्छे । हे.च. ।

मण्डकः । पुं । मण्डे । जातीपुष्पवृक्षे । पिष्टकविशेषे । हिं. माँड़ा । "वारिणा कोमलाङ्कृत्वा समितां साधु मर्द्दयेत् । हस्तचालनया तस्या लोप्त्रीं सम्यक् प्रसारयेत् । अधोमुखघटस्यैतां विस्तृतामुपचिपेद्बहिः । मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते ॥ दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः । अथवा सिद्धमांसेन सतक्रवटकेन वा ···॥" गुणाः—"मण्डको बृंहणो वृष्यो बल्यो रुचिकरो भृशं । पाकेऽपि मधुरो ग्राही लघुर्दोषत्रयापहः ॥" भा. । लोप्त्री = लेची ।

मण्डनः । पुं । मधुमाधवीलतायाम् । वै.निघ. । स्त्रभ.शैलूषादिचूर्णे ।

मण्डपः । पुं । माधवीलतायाम् । वै.निघ. ।

मण्डपा । स्त्री । निष्पाव्यां । रा.नि.व.१६ ।

मण्डपारोहः । पुं । मुखालौ । रा.नि.व.७ ।

मण्डपी । स्त्री । क्षुद्रपत्रोपोदक्यां । क्षुद्रपत्र पुँइ । रा.नि.व.७ ।

मण्डयन्तः । पुं । अन्ने । उणा. ।

मण्डरी । स्त्री । झुर्घुरिकायाम् । हारा. ।

मण्डल(क)म् । क्ली । पिटकवन्मण्डलयुक्तचर्म्मरोगे । চাকা দাগ । कोठरोगे । शीतपित्तरोगे । रा.नि.व.२० । मा.नि. । नखीनामगन्धद्रव्ये । श.च. । पुं । उदर्दरोगे । सर्पभेदे । वृत्तेऽङ्गे व्रणबन्धभेदे । "मण्डलं वेष्टनाकारं विदध्यादिति लक्षणं ।" सु.सू.१८अ. । कुक्कुरे । त्रिका. । अष्टचत्वारिंशद्दिवसेषु । ৪৮ দিন । "संस्थाप्य मण्डलं पश्चादर्कं निष्काशयेत्ततः ।" अर्क.चि. ।

मण्डलच्छदा । स्त्री । शुक्लपुनर्नवायाम् । वै.निघ. । [रा.नि.व.५ ।

मण्डलपत्रिका । स्त्री । रक्तपुनर्नवायाम् ।

मण्डलपुच्छकः । पुं । तन्नामकप्राणहरकीटे । सु.कल्प.८अ. । [ति वृक्षे । वै.निघ. ।

मण्डलशुक्लभाक् । पुं । आनारस इति ख्या-

मण्डलसन्धिः । पुं । कण्ठहृदयनेत्रक्लोमनाड़ीषु मण्डलाकारसन्धौ । सु.शा.५अ. ।

मण्डला । स्त्री । कुमार्य्याम् । घृतकुमारी । दूर्व्वायाम् । वै.निघ. ।

मण्डलाग्रम् । क्ली । मण्डलमिवाग्रं यस्येति । स्वनामख्यातषड़ङ्गुलशस्त्रविशेषे । लक्षणं यथा— "वृत्ताग्रे मण्डलं वृत्तङ्गुरसंस्थानमेव वा । मण्डलाग्रस्य जानीयात्प्रमाणन्तु षड़ङ्गुलम् ॥" सु.सू.८अ. । ड. ।

मण्डली (इन्) । पुं । वटवृक्षे । रा.नि.व.११ । सर्पे । त्रिका. । गोनससर्पे । रा.नि.व.१९ । कृष्णककलासे । हे.च. । विड़ाले । श.मा. । कर्कटे । भौमसर्पजातौ । "ज्ञेया मण्डलिनो भोगाः मण्डलैर्विविधैश्चिताः । प्रांशवो मन्दगमनाः···॥" वा.उ.३६अ. । वै.निघ. । तद्भेदाः—आदर्शमण्डलश्वेतमण्डलरक्तमण्डलचित्रमण्डलपृषतरोध्रपुष्पमिलिन्द-

कगोनसत्रङ्गोनसपनसमहापनसवेणपत्रकशिशुक-बभ्रुकषायकलुषपारावतहस्ताभरणचित्रकैणीपदाश्चेति । तद्दष्टलक्षणमाह — मण्डलिदष्टस्य प्रथमे वेगे रक्तं दुष्टं पीतीभवति । तेन च पीताङ्गता दाहश्च । द्वितीये श्वयथुः । तृतीये दंशपरिक्लेदादयः । चतुर्थे ज्वरो दाहश्च । पञ्चमे सर्व्वशरीरदाहश्च भवति । वा.उ.३६अ. । स्त्री (ली) । दूर्व्वायां । हारा. । घृतकुमार्य्याम् । गुडूच्याम् । वै.निघ. ।

मण्डा । स्त्री। मेथिकायां। प.मु.। मद्ये । हारा.। आमलक्याम् । मे. ।

मण्डूकः । पुं । भेके । ব্যাঙ্ । स अष्टविधः—कृष्ण-सार-कुहक-हरित-रक्त-यववर्णाभ-भृकुटी-कोटिकाः इति । तद्दंशे दंशकण्डूः पीतफेणागमश्च । सु.कल्प.८अ.। पृथुशिम्बश्योणाकवृक्षे । বড় শোঁটা শোণাগাছ । रा.नि.व.९। पुण्डरीकवृक्षे । পুণ্ডরিয়া । वै.निघ. । मण्डूकपर्ण्याम् । থুলকুড়ি । भैष.अ.पि.चि.सुधावतीगुड्यां । अश्वस्य खुरतलप्रदेशे । ज.द. ।

मण्डूकता (तापः) । स्त्री, पुं । अश्वस्य पादरोगविशेषे । लक्षणं यथा—"मण्डूकतापो मण्डूक्यां व्रणेनाश्वस्य जायते । अभिघातसमुत्थेन दुष्टकर्द्दमकेन च ॥" ज.द.३९अ. ।

मण्डूकपर्णः । पुं । श्योणाकवृक्षे । अम. । पाटलावृक्षे । वै.निघ. । शोणके । मे. ।

मण्डूकपर्णी । स्त्री। (Hydrocotyle Asiatica.) Asiatic Penny wort. स्वनामख्यातशाके । থুলকুড়ি, থালকুনি । हिं खुलखुड़ि, ब्रह्ममाण्डूकी । तें मण्डूकब्रम्मी । ता. वल्लरीकेरी । बम्. ब्रह्मी । रा.नि.व.२३ । गुणैर्ब्राह्मीसदृशी । गुणाः—कासघ्नी स्वादुपाकरसा हिमा च । राज.३प. । भैष. । महाभवन्यां । अस्य पत्रं कुष्ठे उपदंशे च परमहितं । चर्म्मरोगे नाड़ीव्रणे च हितम् । दृष्टफलम् । मञ्जिष्ठायां । रा.नि.व.६।२३ । च.सू.४अ. । आदित्यभक्तायाम् । रा.नि.व.४।२३ । पृथुशिम्बश्योणाकवृक्षे। বড় শোঁটা শোণা গাছ । रा.नि.व.९ । शालपर्ण्याम् । पाटलायाम् । वै.निघ. । ब्राह्म्यां । ব্রাহ্মী শাক । भा.उ.रसायने । "मण्डूकपर्ण्याः स्वरसः । तदभावे मञ्जिष्ठा ग्राह्या ।" ब्राह्मीभेदे । सु.चि.९अ. ।

मण्डूकमाता । स्त्री । ब्राह्मीक्षुपे । रा.नि.व.५ ।

मण्डूका । स्त्री । मञ्जिष्ठायां । श.मा. । मण्डूकपर्ण्यां । থুলকুড়ি । प.मु. । आदित्यभक्तायां । হুড়হুড়িয়া । रा.नि.व.४ ।

मण्डूकी । स्त्री । मण्डूकपर्ण्याम् । থুলকুড়ি । र.मा. । आदित्यभक्तायां । रा.नि.व.४ । ब्राह्मीक्षुपे । रा.नि.व.५ । जलशुक्तौ । सु.चि.१अ. । अश्वस्य खुरतलभागे । ज.द.२अ. । भेकपत्न्यां ।

मण्डूरम् । क्ली, पुं । लौहमले । মণ্ডুর । प.मु. । अस्य करणविधिः — "अक्षाङ्गारैर्धमेत् किट्टं लौहजं तद्गवां जलैः । सेचयेत्तप्ततच्च सप्तवारं पुनः पुनः । चूर्णयित्वा ततः क्वाथैर्द्विगुणैस्त्रिफलोद्भवैः । आलोड्य भर्जयेद्वह्नौ मण्डूरं जायते वरम् । यल्लौहे यद्गुणाः प्रोक्ता तत्किट्टे चापि तद्गुणाः । शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम् । अधमं षष्टिवर्षीयं ततो हीनं विषोपमम् ॥" रस.चि.७अ. ।

मण्डूरवटकः । पुं । पाण्डुरोगे औषधम् । "त्रिफलात्र्यूषणं मुस्तं विड़ङ्गं चव्यचित्रकौ। दार्व्वी त्वक् माक्षिको धातुः ग्रन्थिको देवदारु च। एतान्द्विपलिकान् भागान् चूर्णान् कुर्य्यात् पृथक् तथा । मण्डूरं द्विगुणं चूर्णात् शुद्धमञ्जनसन्निभं । गोमूत्रेऽष्टगुणे पक्त्वा तस्मिंस्तत्प्रक्षिपेत्ततः । उदुम्बरसमान् कृत्वा वटकांस्तान् यथाग्निना । उपयुञ्जीत तक्रेण ··· ।" च.चि.२०अ. ।

मतङ्ग(रा)जः । पुं । हस्तिनि । अम. ।

मतिः । स्त्री । बुद्धौ । अम. । इच्छायाम् । मे. । शाकविशेषे । शब्दकल्पे अजयपालः ।

मतिदा । स्त्री । शिगुड़ीक्षुपे । रा.नि.व.४ । ज्योतिष्मतीलतायां । रा.नि.व.३ ।

मतिविभ्रंशः । पुं । बुद्धिवैपरीत्ये । श.र. ।

मतिविभ्रान्तिः । पुं । उन्मादरोगे । रा.नि.व.२० ।

मत्कः । पुं । मत्कुणे । ছারপোকা । श.मा. ।

मत्कुणः । पुं । कीटभेदे । ছারপোকা । रा.नि.व.१९ । नारिकेले । अश्मश्रुपुरुषे । मे. । ह-

च्छिदे । वै.निघ. । स्त्री । केशरहितस्त्रीयोनौ । श
र. । [श.मा. ।

मत्कुणारिः । पुं । शणवृक्षे । भङ्गायां । सिद्धि ।

मत्तः । पुं । धुस्तूरवृक्षे । रा.नि.व.१० । को-
किले । महिषे रा.नि.व.१९ । त्रि । उन्मत्ते ।

मत्तकाशिनी । स्त्री । उन्मत्तस्त्रियां । श्रम.।

मत्तकीशः । पुं । हस्तिनि । श.मा. ।

मत्तवारणम् । क्ली । पूगफलचूर्णे । श.मा. ।
कुन्दुरुवृक्षे । कुँदरूक्‌कर (वेड़ा । मे. । पुं ।
मत्तहस्तिनि । [याम् । सिद्धि । वै.निघ. ।

मत्ता । स्त्री । मद्ये । रा.नि.व.१४ । विजया-

मत्ताख्यः । पुं । कोकिले । वै निघ. ।

मत्सः (त्स्यः) । पुं । जलचरजन्तौ । माछ । ते
बहुविधा नानाजातीयाश्च । यथा—"रोहितो ग-
र्गरो भोरुर्वालको बर्बरस्तथा । छागलो रक्तमत्स्यो
ऽथ महिषश्च चिलीचिमः । वातूकः खलमीसा च
ज्ञेया गर्भविषादयः ।" तेषां विशेषाः पर्य्याये स
ग्याः । साधारणतो मत्स्यमांसगुणाः स्निग्धम्
उष्णं गुरु रक्तपित्तजनकं वातहरञ्च । "निःशल्का-
निन्दिता मत्स्याः सर्व्वे शल्कयुता हिताः । वपु-
स्थैर्य्यकरा वीर्य्यबलपुष्टिविवर्द्धनाः ॥ ह्रदकूल्या
जलनिधिनिर्झरतड़ागवापीजले च ये मत्स्याः । ते
तु जड़ा, नादेया यथोत्तरलघूत्तरास्तु नादेयाः ॥
धाराम्बुमत्स्या गुरवोऽस्रदाहदा विष्टम्भदास्ते लव-
णाम्बुजाताः । तेनान्यजाः स्वादुजलस्थिता अपि
ज्ञेया जड़ास्तेऽपि यथाश्रुतानिमान् ॥" रा.नि.व.
१७ ।" नादेया मधुरा मत्स्या गुरवो मारुताप
हाः । रक्तपित्तकराश्चोष्णाः वृष्याः स्निग्धाल्पव
र्च्चसः । कषायानुरसास्तेषां शष्पशैवालभोजनाः ।
सरस्तड़ागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः । म
हाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः ॥" तेषा-
मत्तानिलघ्नत्वाच्चौण्ट्रकौप्यौ गुणोत्तरौ । स्निग्ध-
त्वात् स्वादुपाकत्वात्तयोर्वाप्या गुणोत्तराः । नादेया
गुरवो मध्ये यस्मात् पुच्छास्यचारिणः । सरस्तड़ा-
गजानान्तु विशेषेण शिरो लघु । अदूरगोचरा य-
स्मात्तस्मादुत्सोदपानजाः । किञ्चिन्मुक्त्वा शिरोदेश-
मत्यर्थं गुरवस्तु ते । अधस्ताद्गुरवो ज्ञेया मत्स्याः
सरसिजाः स्मृताः । उरोविचरणात्तेषां पूर्व्वमङ्गं
लघु स्मृतम् ।" सु.सू.४६अ. । महामत्स्यगुणाः—
"महाप्रमाणा गुरवः शस्ता बद्धवर्चसः ।" क्षुद्र-
मत्स्यगुणाः—"क्षुद्रमत्स्यास्तु लघवः ग्राहिणो ग्रह-
णीहिताः । कृष्णमत्स्या लघुस्निग्धा वातघ्ना वह्नि-
वर्द्धनाः ।" पाण्डुवर्णमत्स्यगुणाः—"पाण्डुरा दोष-
लाः स्निग्धा गुरवो भिन्नवर्चसः ।" क्लिन्नशुष्कमत्स्य-
योर्गुणाः—कथिता दोषला मत्स्याः शुष्का विष्ट-
म्भिदुर्ज्जराः ।" लवणयुक्तमत्स्यगुणाः—"लवणै-
स्ताड़िता मत्स्याः कफपित्तकराः सराः ॥" सा-
मुद्रमीनगुणाः—"सामुद्रा गुरवो वृष्याः स्निग्धोष्णा
वातनाशनाः । पित्तलास्तु विशेषेण मांसाशित्वाद्ब-
लावहाः ।" जम्बीररसयुक्तमत्स्यगुणाः—"दग्धम-
त्स्यास्तु जम्बीररसाक्तो वातनाशनः । मधुरो रोच-
नो हृद्यो बृंहणो बलवर्द्धनः ।" सन्तोलितमत्स्य-
गुणाः—"आर्द्रकैः कटुतैलेन सद्यः सन्तोलितो भ-
वेत् । स स्वादुः कफवातघ्नः शुक्रलो बलवर्द्धनः ।"
मत्स्यव्यञ्जनगुणाः—"व्यञ्जनं शाकमत्स्याख्यं हृद्यं
वृष्यञ्च पुष्टिकृत् ।" मत्स्यघण्टगुणाः—"मत्स्यघ-
ण्टो बलकरो वातघ्नो रोचनः परः ॥" राज.२प.।

मत्सग(घ)ण्टः । पुं । मत्स्यशल्के । समत्स्य-
व्यञ्जनभेदे । माछेर घण्ट । श.च. । See मत्स्यः ।

मत्सरः । पुं । मक्षिकायां । चिका. ।

मत्स्यकाली (क्षी) । स्त्री । उपोदिकायाम् ।
वै.निघ. । [४ । जटा. ।

मत्स्यगन्धा । स्त्री । जलपिप्पल्यां । रा.नि.व.

मत्स्यगन्धिः । स्त्री । मत्स्याक्ष्याम् । ब्रह्मी
शाक । (का) । शुकनासायाम् । वै.निघ. ।

मत्स्यघण्टः । पुं । व्यञ्जनविशेषे । माछेर
घण्ट । श.च. । See मत्स्यः ।

मत्स्यण्डिका (ण्डी) । स्त्री । गुड़कृतमिष्ट-
द्रव्यभेदे । मिछिरि, नवात । शर्करायां । रा.नि.
व.१४ । माद्गुड़ । "इक्षो रसो यः संपक्वो
घनः किञ्चिद्द्रवान्वितः । मन्दं यत् स्यन्दते तस्मात्
तन्मत्स्यण्डी निगद्यते ।" गुणाः—"मत्स्यण्डी भेदि-
नी बल्या लघ्वी पित्तानिलापहा । मधुरा बृंहणी
वृष्या रक्तदोषापहा स्मृता ॥" भा. । मत्स्यण्डि-
काखण्डशर्कराविमलजाता उत्तरोत्तरं शीतस्निग्ध-
गुरुमधुरतरा भवन्ति । सु.सू.४५अ. ।

मत्स्यण्डीफलितम् । क्ली । खटीशर्करायाम् । वै.निघ. ।

मत्स्यनाशकः (नाशनः) । पुं । मत्स्यरङ्कपक्षिणि । মাছরাঙা পাখী । कुररपक्षिणि । त्रिका. । हे.च. ।

मत्स्यपित्तम् । क्ली। मीनपित्ते । মাছের পিত্ত । तच्छुद्धिः—"मत्स्यादिपित्तं संशुष्कं निम्बद्रावैर्विभावितं । दिनान्तं शुद्धिमायाति सत्यं गुरुवचो यथा ॥" सा.कौ. । [रा.नि.व.६ ।

मत्स्यपित्ता । स्त्री । कटुरोहिण्यां । कट्‌की ।

मत्स्यपुटपाकः । पुं । पुटेन मत्स्यपाकभेदे । तत्साधनं दग्धमत्स्यतुल्यमेव । [रा.नि.व.६ ।

मत्स्यभि(वि)न्ना । स्त्री। कटुकायाम् । कट्‌की।

मत्स्यभेदिनी । स्त्री । कटुकायां। रा.नि.व.६।

मत्स्यरङ्कः (ङ्गः, कः) । पुं । जलकाके । মাছরাঙা । हारा. ।

मत्स्यराजः । पुं । रोहितमत्स्ये । त्रिका. । "मुद्गरी रोहितः श्रेष्ठः शकुलश्च विशेषतः । मत्स्यराज इति प्रोक्तः ।" रस.चि.९अ. ।

मत्स्यर्कः । पुं । शफरीमत्स्ये । च.शा.८अ. ।

मत्स्यवेधनी । स्त्री । मीनरङ्कौ । মাছরাঙা । जटा. । वड़िशे । श.र. ।

मत्स्यशकलम् । क्ली । मीनशल्के । मत्स्यचर्म्मणि । भा.म.कुष्ठ.चि. । स्त्री । कटुक्यां । भा.म.१भ. चितभम.ज्व.चि.। "सदीकामरदारुमत्स्यशकला ।"

मत्स्यसन्तानिकः । पुं । मत्स्यव्यञ्जनभेदे । यथा—"दग्धेऽङ्गारे सलवणो वेशवारैरुपस्कृतः । सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत् ॥" श.च. ।

मत्स्या । स्त्री । कटुकायाम् । वै.निघ. ।

मत्स्याङ्गी । स्त्री । गण्डदूर्व्वायाम् । रा.नि.व.८। हिलमोचिकायां । शिञ्चे । त्रिका. ।

मत्स्याण्डम् । क्ली। मीनाण्डे। মাছের ডিম। गुणाः—"मत्स्यकूर्म्मखगाण्डानि स्वादुवाजीकराणि च । कटुपाकानि रुच्यानि वातश्लेष्मकराणि च ॥" राज.३प. ।

मत्स्यादनी । स्त्री । जलपिप्पल्यां । रा.नि.व.४ । सूक्ष्मैलायाम् । मत्स्याक्ष्याम् । शिञ्चे । काकमाच्याम् । गण्डदूर्व्वायाम्। मण्डूक्याम् । रा.नि.व. २३ । [त्रिका. ।

मत्स्याशनः । पुं । मत्स्यरङ्के । মাছরাঙা ।

मत्स्याक्षकम् । क्ली । ब्राह्म्याम् । पञ्चाङ्गचन्दने । भा.म.४भ.बाल.चि. । "मत्स्याक्षकं शङ्खपुष्पी ।" सु.शा.१०अ. । पत्तूरे । वा.उ.३९अ. ।

मत्स्याक्षिका । स्त्री । गण्डदूर्व्वायाम् । वै. निघ. ।

मत्स्याक्षी । स्त्री । हिलमोचिकायां । शिञ्चे-শাক । हिं मछेच्छी, मछरिया । मं जलब्राह्मी । र.मा. । त्रिका. । सोमलताविशेषे । गुणाः—शीतला रुच्या व्रणक्षयघ्नी च । रा.नि.व.५ । "मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रजित् । लघुस्तिक्ता कषाया च स्वाद्वी कटुविपाकिनी ॥" भा.गु.व. । काकमाच्यां । रा.नि.व.४ । गण्डदूर्व्वायां । रा.नि.व.८ ।

मत्स्यी । स्त्री । जटामांस्यां । वै.निघ.२भ.वा-व्या.चि.शतावरीतैले । स्त्रीमत्स्यजातौ । व्याक. ।

मत्स्योदनम् । क्ली । मीनपक्वभक्ते । মাছের পোলাও । गुणाः—"मत्स्योदनं कफकरं त्रिदोषकरणं तथा । अग्निमान्द्यकरं प्रोक्तं चतुरैर्मत्स्यभक्षकैः ॥" वै.निघ. । [मद. । र.मा. ।

मथः (नः) । पुं । अग्निमन्थवृक्षे । গণিরি ।

मथितम् । क्ली । वस्त्रपूतनिर्ज्जलदधि । अम. । भा.म. । १भ.अ.सा.चि.गङ्गाधरचूर्णे । "चूर्णं मथितसमेतम् ।" केवलं मथितदधि । "तत् केवलन्तु मथितं मुनयो वदन्ति ।" प.प्र.३ख. । गुणाः—श्लेष्मवातघ्नं । रा.नि.व.१५ । कफपित्तघ्नं रोचनं धातुपुष्टिकरञ्च । राज.३प. । [हकारे ।

मथुरानाथः । पुं । वैद्यामृतलहरीनामसंग्र-

मदः । पुं । मृगनाभौ । मृगनाभि । रा.नि.व. १२ । See कस्तूरी । च.द.वा.व्या.चि.अष्टादशशतिकमहाप्रसारणीतैले । मत्ततायाम् । "पूगकोद्रवधुत्तूरभक्षणादिव मत्तता ।" भा.म.१भ.ज्व.चि. । "मूर्च्छादाही मदस्तृषा ।" मा.नि. । मद्ये । हे.च. ।

मदकारः । पुं । धुस्तूरवृक्षे । स्त्री (रा) । धातकीवृक्षे । (री) सुरायाम् । वै.निघ. ।

मदकृद्द्रुमः । पुं । तालवृक्षे । वै.निघ. ।

मदगन्धः । पुं । सप्तपर्णवृक्षे । ছাতিমগাছ । रा.नि.व.१२ । स्त्री । अतसीक्षुपे । মশিনাগাছ । प.मु. । मद्ये । रा.नि.व.१४ ।

मदगमनः । पुं । महिषे । वै.निघ. ।

मदघ्नी । स्त्री । उपोदिकायां । পুঁইগাছ । प.मु. । नागदमन्यां । रा.नि.व.५ ।

मदद्रुः । पुं । माड़ इति कोङ्कणदेशप्रसिद्धे वृक्षे । रा.नि.व.९ ।

मदनः (कः) । पुं,क्ली । (Randia dumetorum. Syn. Posoqueria dumetorum or R. longispina.) मुचुकुन्दवृक्षे । स्वनामख्यातफलगन्धवर्गीयवृक्षे । ময়নাগাছ । हिं मइन्फल, करहर । ते वसन्तकड़िमिचेट्टु, मण्डचेट्टु, चङ्गचेट्टु, उन्मत्तचेट्टु । उत्. पातर । ता. मड़ुक्करय । नेपा. मैदल । पञ्जा. मिण्डकोल्ल । मं मेणाइल । कं गेल । गुणाः —कटुतिक्तोष्णः कफवातव्रणघ्नः शोफघ्नः वामनश्च । रा.नि.व.८ । एतत्फलं वामनम् अर्थात् अपक्वपित्तश्लेष्माणौ ऊर्द्ध्वं नयेत् । भ्रमरे । जटा. । अङ्कोलवृक्षे । আঁকোড় গাছ । रा.नि.व.९ । वकुलवृक्षे । धुस्तूरवृक्षे । रा.नि.व.१०।२३। भा.४ख.जात्यादितैले। सिक्थके । रा.नि.व.१३ । काके । शल्ये । कोषाम्रे । मानके । कुटजवृक्षे । रा.नि.व.२३ । कोशातक्याम् । सरलकाष्ठे । वै.निघ. । कुन्दपुष्पवृक्षे । (कः) दमनकवृक्षे । দোনা । रमा. । च.द.वा.व्या.चि. "मांसीसुरामदन ।" चीरिणीवृक्षे । कपोते । वै.निघ. । मण्डलिसर्पविशेषे । सु.कल्प.४अ. । वसन्ते । मे. । माषे । हे.च. । खदिरवृक्षे । श.च. । [११ ।

मदनकाकुरवः । पुं । पारावते । रा.नि.व.

मदनकोद्रवः । पुं । तृणधान्यविशेषे । মদন ঘাস । च.द.पाना.चि. । "मदनकोद्रवजम्" ।

मदनपाठकः । पुं । कोकिले । रा.नि.व.१९ ।

मदनफलम् । क्ली । मदनवृक्षफले । ময়নাকুঁড় ।

मदनमञ्जरी । स्त्री । जिङ्गिन्याम् । वै.निघ. ।

मदनमृगः । पुं । कस्तूरीमृगे । वै.निघ. ।

मदनमोदकः । पुं । वाजीकरणाधिकारे मोदकः । पाठः —"त्रैलोक्यविजयापत्रं सवीजं घृतभर्ज्जितं । त्रिकटु त्रिफला कुष्ठं शटी सैन्धवधान्यकं । शृङ्गी तालीशपत्रञ्च कट्फलं नागकेशरं । यमानी चाजमोदा च यष्टीमधुकमेव च । मेथी जीरकयुग्मञ्च गृहीत्वा भर्ज्जितं क्रियत् । यावन्त्येतानि चूर्णानि तावदेव तदौषधं । तावत्येव सिता देया यावत्या याति बन्धनम् । घृतेन मधुना मिश्रं मोदकं परिकल्पयेत् । त्रिसुगन्धिसमायुक्तं कर्पूरेणाधिवासयेत् । स्थापयेद्घृतभाण्डे तु श्रीमन्मदनमादकम् ॥" त्रिकटु,त्रिफला, কুড়, শটী,সৈন্ধবলবণ, ধনিয়া, কাঁকড়াশৃঙ্গী, তালীশপত্র, কট্ফল, নাগেশ্বর, যমানী, বনযমানী, যষ্টিমধু, মেথি, জীরা, কৃষ্ণজীরা, প্রত্যেক চূর্ণ সমভাগ । ঈষৎ ভর্জ্জিত সবীজ সিদ্ধিচূর্ণ ঐ সর্বচূর্ণ-সমান । সমস্তসমষ্টি-সমান চিনি । ঘৃত ও মধু তত দিবে যাহাতে মোদক বান্ধা যায় । अन्यो महामदनमोदकः —त्रैलोक्यविजयापत्रं सवीजं घृतभर्ज्जितं । समे शिलातले पश्चात् चूर्णयेदतिचिक्कणम् । शतावरीरजश्चैव विदारीकन्दजं रजः । बलातिबलयोश्चैव मूलवल्कलजं रजः । गोक्षुरक्षुरयोर्वीजाद्रजो वानरिवीजतः । एतदेकीकृतं यावच्छतावर्य्यादिजं रजः । तस्माच्चतुर्गुणं कार्य्यं त्रैलोक्यविजयारजः । स्वरसेऽथ शतावर्य्या विदार्य्याः स्वरसे तथा । पयसाथ समे तस्मिन् गोलयेच्चूर्णसञ्चयम् । गोलयित्वा सिताञ्चैव शक्रचूर्णाच्चतुर्गुणां । पचेदवहितो वैद्यो मन्दमन्देन वह्निना । ततः पाकक्रमं दृष्ट्वा भ्रष्टा चैवासितं तिलं । बुद्ध्वावतारितं दद्यान्मोदकार्थं भिषग्वरः । त्रिकटु त्रिसुगन्धञ्च सैन्धवं सधनीयकं । जातीकोषफलञ्चैव बालकं जीरकद्वयं । शटी कुन्दुरुखोटिश्च मुस्ता मधुरिका मुरा । मांसी तालीशपत्रञ्च पत्रं वारेन्द्रमेव च । ग्रन्थिपर्णं शिवा चैव तथैव शतपुष्पिका । चविका देवदारुश्च सप्रियङ्गु लवङ्गकं । सरलः शैलजश्चैव सर्व्वमेतद्विचूर्णयेत् । अत्र यद्भर्ज्जने युक्तं द्रव्यं तद्गन्धवद्वये । भर्ज्जयित्वा कृतं चूर्णं शक्रचूर्णस्य पादिकं । सैन्धवं स्वादुतायोग्यं देयं कटुकमेव च । ततः सुमिलितं कृत्वा मोदकं परिकल्पयेत् । भूय-

त्रिजातकं चूर्णं चूर्णं त्र्यूषणञ्च तथा। मोदयेन्मोदकानेतान् सिद्धार्थान्रसिद्धये॥” শতাবরীচূর্ণ, ভূমিকুষ্মাণ্ডচূর্ণ, বেলেড়ার মূলচূর্ণ, গোরক্ষচাকুলিয়ার ছালচূর্ণ, গোক্ষুরবীজ চূর্ণ, কুলেখাড়ার বীজচূর্ণ, আলাকুশীবীজ চূর্ণ, প্রত্যেকে সমভাগ মিলিত ২ প.। ঘৃতভর্জ্জিত সবীজ সিদ্ধিচূর্ণ ৮প. শর্করা ৩২ প.। পাকার্থ—শতমূলীরস,ভূমিকুষ্মাণ্ডরস এবং দুগ্ধ প্রত্যেকে ৮প. (মতান্তরে দুগ্ধ ১৬প.) একত্র গুলিয়া পাক করিবে। পাকসিদ্ধ হইলে নামাইয়া, তাহাতে কৃষ্ণতিল চূর্ণ ২ প. প্রক্ষেপার্থ ত্রিকটু গুড়ত্বক্ তেজপত্র এলাইচ, সৈন্ধব, ধনিয়া, জায়ফল, জয়িত্রী, বালা. জীরা, কৃষ্ণজীরা, শটী, কুন্দুরুখোটী, মুতা, মউরী, মুরামাংসী, জটামাংসী, তালীশপত্র, তেজপত্র, পচাপাতা, গেঁঠেলা, হরীতকী, গুলুফা, চই, দেবদারু, প্রিয়ঙ্গু, লবঙ্গ, সরলকাষ্ঠ, শৈলজ। ইহাদের মধ্যে যে যে দ্রব্য ভর্জ্জনোচিত, গন্ধবৃদ্ধির জন্য তাহা ভাজিয়া চূর্ণ করিবে। এই সকল দ্রব্য চূর্ণ প্রত্যেকে সমভাগ মিলিয়া ২ প. সৈন্ধব ও ত্রিকটুচূর্ণ যে পরিমাণে দিলে স্বাদু হয়, সেই পরিমাণ বিবেচনা করিয়া দিতে হইবে। মোদক প্রস্তত হইলে সেই মোদক ত্রিকটু ও ত্রিজাতকচূর্ণে আলোড়িত করিয়া ভাণ্ডে তুলিয়া লইবে। रस.र.। [वै.निघ.।

मदनमोदनी। स्त्री। गणिकारिकायाम्।

मदनरिपुः। पुं। मदनफले। वै.निघ.।

मदनशलाका। स्त्री। सारिकायाम्। कामोन्मादकौषधे। त्रिका.। कोकिलायां। श.र.।

मदनसारिका। स्त्री। सारिकायाम्। শালিক পাখী। जटा.। [याम्। है.च.।

मदना। स्त्री। कस्तूर्य्याम्। धातक्याम्। सुरा-

मदनाङ्कुशः। पुं। शिश्ने। त्रिका.। नखे। वै.निघ.। [प.मु.।

मदनाग्रजः। पुं। कोद्रवधान्ये। কদোধান।

मदनायुधम्। क्ली। योनौ। श.च.। कामवृद्धिक्षुपे। रा.नि.व.४।

मदनालयः। पुं। स्त्रीयोनौ पद्मे। वै.निघ.।

मदनाह्वः। पुं। मदनवृक्षे। रा.नि.व.८। स्त्री (ह्वा)। क्षीरोटवृक्षे। वै.निघ.।

मदनी। स्त्री। मेथिकायां। মেতি। प.मु.। कस्तूर्य्यां। মৃগনাভি। रा.नि.व.१२। मद्ये। रा.नि.व.१४। धातकीवृक्षे। अतिमुक्तके। रा.नि.व.१०।

मदनीयहेतुः। पुं। धातकीवृक्षे। ধাই ফুলের গাছ। वा.सू.१५अ.प्रियङ्ग्वादिव.। “पुन्नागमीतं मदनीयहेतुः।”

मदनीया। स्त्री। मल्लिकावृक्षे। वै.निघ.।

मदनेच्छाफलः। पुं। चाम्रवृक्षे। रा.नि.व.११।

मदभञ्जिनी। स्त्री। शतमूल्याम्। श.च.।

मदमत्तः। पुं। महाकरञ्जवृक्षे। वै.निघ.।

मदमादिनी। स्त्री। कोङ्कणदेशे गणिकारीनामप्रसिद्धे पुष्पवृक्षे। रा.नि.व.१०।

मदयन्तिका (न्ती)। स्त्री। नवमल्लिकायां। কাঠমল্লিকা। र.मा.। त्रिपुरमल्लिकायां। प.मु. भैष.क्षुद्ररो.चि.महानीलतैले। च.द.र.पि.चि.। वा.चि.२अ।

मदयित्नु। क्ली। मद्ये। मे.।

मदरोगः। पुं। मदात्ययरोगे। रा.नि.व.२०।

मदव्याधिः। पुं। पानात्ययरोगे। रा.नि.व.२०। [७।

मदशाकः। पुं। उपोदिकायाम्। रा.नि.व.

मदशौण्डः। पुं। जातीफलवृक्षे। वै.निघ.।

मदसारः। पुं। तूलवृक्षे। रा.नि.व.६।

मदस्थानम्। क्ली। सुरापानस्थाने। त्रिका.।

मदहस्तिनिकः (नी)। महाकरञ्जवृक्षे। ডহর করঞ্জ। रा.नि.व.६।

मदहेतुः। पुं। धातकीवृक्षे। वैद्यकं।

मदा। स्त्री। धातकीवृक्षे। वै.निघ.अ.सा.चि. शुण्ठीचूर्णे, कुटजचूर्णे। ग्रहणी.चि.पाठादिचूर्णे। कस्तूर्य्याम्। মৃগনাভি। चि.क्र.क.प्रदर.चि.।

मदाढ्यः। पुं। तालवृक्षे। कदम्बवृक्षे। रा.

वि.व.१। आम्रवृक्षे। रा.नि.व.११। स्त्री। लोहितभिण्ड्याम्। इक्कुंटी। श.च.।

मदातङ्कः (त्ययः) । पुं। पानात्ययरोगे। तस्य निदानादिकं यथा—"ये विषस्य गुणाः प्रोक्ताः सेऽपि मद्ये प्रतिष्ठिताः। तेन मिथ्योपयुक्तेन भवत्युग्रो मदात्ययः। किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम्। अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम्। प्राणाः प्राणभृतामन्नं तदयुक्त्या हिनस्त्यसून्। विषं प्राणहरं तच्च युक्तियुक्तं रसायनम्। विधिना मात्रया काले हितैरन्नैर्यथाबलं। प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतोपमम्। स्निग्धैस्तदन्नैर्मांसैश्च भक्ष्यैश्च सह सेवितं। भवेदायुःप्रकर्षाय बलायोपचयाय च। काम्यता मनसस्तुष्टिस्तेजो विक्रम एव च। विधिवत् सेव्यमाने तु मद्ये सन्निहिता गुणाः॥ बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रारतिवर्द्धनश्च। संपाठगीतस्वरवर्द्धनश्च प्रोक्तोऽतिरम्यः प्रथमो मदो हि॥ अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाकृतिरप्रशान्तः। आलस्यनिद्राभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन॥ गच्छेदगम्यांश्च गुरुंश्च मन्येत् खादेदभक्ष्याणि च नष्टसंज्ञः। ब्रूयाच्च गुह्यानि हृदि स्थितानि मदे तृतीये पुरुषोऽस्वतन्त्रः॥ चतुर्थे तु मदे मूढ़ो भग्नदार्व्विव निष्क्रियः। कार्य्याकार्य्यविभागज्ञः मृतादप्यपरो मृतः। को मदं तादृशं गच्छेदुन्मादमिव चापरम्। बहुदोषमिवामूढ़ः कान्तारं स्ववशः कृती॥ निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यं। आपादयेत् कष्टतमान् विकारान् आपादयेच्चापि शरीरभेदम्॥ क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन। व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि। अत्यम्लभक्ष्यावततोदरेण साजीर्णभुक्तेन तथा बलेन। उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान् विकारान्। पानात्ययं परमदं पानाजीर्णमथापि वा। पानविभ्रममुग्रञ्च तेषां वक्ष्यामि लक्षणम्। हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः। विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम्। तृष्णादाहज्वरस्वेदमोहातिसारविभ्रमैः। विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम्। छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः। विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम्। ज्ञेयस्त्रिदोषजश्चापि सर्व्वलिङ्गैर्मदात्ययः॥" मा.नि.। तत्र सन्निपातजमदात्ययो दशभेदः। यथा—"उत्कर्षेण यदाल्पेको मध्येन द्वौ तदा हिमः। उत्कर्षेण यदा द्वौ तु मध्येनैको द्वितीयकः। एको मध्येन दोषः स्यात् द्वावल्पेन तृतीयकः। उत्कर्षेणैक एव स्यात् अल्पेन द्वौ चतुर्थकः। उत्कर्षेण यदा द्वौ तु अल्पेनैकश्च पञ्चमः। एकोऽल्पेन तु मध्येन द्वौ दोषाविति षष्ठकः। उत्कर्षिणः समस्ताः स्युरेवं भवति सप्तमः। मध्येन सर्व्वेऽपि यदा तदा भवति चाष्टमः। अल्पेन सर्व्वेऽपि यदा तदा तु नवमः स्मृतः। अल्पेनैकस्तरामन्यो मध्येनैक इति स्फुटाः। सन्निपातस्य मुनिना दश भेदाः प्रकीर्त्तिताः॥" वा. चि.७अ.। [गजे। विश्व.।

मदारः । पुं। शूकरे। मृगनाभौ। वै.निघ.।

मदार्मदः । पुं। फलिकमत्स्ये, राजग्रीवमत्स्ये। फलुई माछ। त्रिका.।

मदालापी (इन्) । पुं। कोकिले। श.मा.।

मदाह्वः । पुं। कस्तूर्य्यां। मृगनाभि। त्रिका.।

मदिरः । पुं। रक्तखदिरे। श.च.। मत्तखञ्जने। श.र.।

मदिरा । स्त्री। मद्यसामान्ये। रा.नि.व.१४। गुणाः—"हिक्काश्वासप्रतिश्यायकासवर्चोग्रहारुचौ। वम्यानाहविबन्धेषु वातघ्नी मदिरा हिता॥" च.सू. २७अ.। See मद्यम्।

मदिरासखः (वः) । पुं। आम्रवृक्षे। जटा.।

मदिष्ठा । स्त्री। मद्ये। हे.च.।

मदोत्कटः । पुं। मत्तगजे। कपोते। वै.निघ.।

मदोत्कटा । स्त्री। मद्ये। रा.नि.व.१४। माधवीसुरायाम्। वै.निघ.। अतसीक्षुपे। तिल गाछ। रा.नि.व.१६। दन्त्यां। ब्याकुड़। मद.।

मदोद्रेकः । पुं। महानिम्बः। घोड़ा निम। रा.नि.व.६।

मद्गुः । पुं। जलकाके। पानकौड़ी। च.सू. २७अ.। प्लवजातीयपक्षिविशेषे, मत्स्यरङ्के। माछ्राङा। गुणाः—वातघ्नः स्निग्धः सृष्टमलः वृष्यः रक्तपित्तहरः हिमश्च। राज २प.।

मद्गुमूषिकः । पुं। वृक्षमर्कटे, पर्णमृगे। सु.सू.४६अ.।

मद्गुरः (कः) । पुं । मत्स्यभेदे । মাগুর মাছ । तन्मांसगुणाः—मधुरं स्निग्धं संग्राहि शुक्रकरं गुरु च । राज. । शु.र. । [शर ।

मद्गुरसी । स्त्री । शृङ्गीमत्स्ये । শিঙী মাছ ।

मद्यम् । क्ली । तरलमादकद्रव्यविशेषे । মদ । इति दारु । मद्यसामान्यगुणाः—मधुराम्लं कफवातघ्नं बलकरं कान्तिकरञ्च । मद्यं त्रिविधं गौडी माध्वी पैष्टी चेति तानि अम्लमद्यानि । अन्यत्र सौगन्धिकादिद्रव्यान्तरयोगेन विविधं भवति । अन्ये तु तेषां द्वादश भेदानाहुः । तानि सर्व्वाणि गौड्यादिष्वेवान्तर्भवन्तीति न पृथगुक्तम् । रा.नि.व.१४ । विशेषाः स्वस्वपर्य्यायेषु द्रष्टव्याः । "गौड़ी माध्वी तथा पैष्टी निर्य्यासाः कथितापरा । इति चातुर्विधा ज्ञेयाः सुरास्तासां प्रभेदकाः । भेदेन द्वादश प्रोक्ताः सुराः सौवीरका रसैः । शीधुर्गौड़ी च मत्स्यण्डी गुड़ेन प्रभवास्त्रयः । माध्वीकं माधुकं माध्वं मधुना संयुताः सुराः । पैष्टीष्वरिष्टजातन्तु तण्डुलप्रभवास्त्रयः । मृद्वीकारससम्भूताः तालमाड़समुद्भवाः । निर्य्यासाः सा तु विज्ञेया तासां वच्मि गुणागुणान् ॥" अत्रि.२९अ. । नवं मद्यं अजातरसप्रसादमनतिक्रान्तसंवत्सरं सर्व्वविकारजनकं वातादिजनकञ्च । "द्विजस्त्रीभिस्तु न ग्राह्यं यद्यप्युज्जीवयेन्मृतम् ।" रा.नि.व.१४ । "नवं मद्यमभिष्यन्दि गुरु वातादिकोपनं । अनिष्टगन्धं विरसमहृद्यञ्च विदाहि च ॥"इति नवं मद्यम् । "चिरस्थितं जातरसं दीपनं कफवातजित् । रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहम् ॥" इति पुराणं । "तस्यानेकप्रकारस्य मद्यस्य रसवीर्य्यतः । सौक्ष्म्यादौष्ण्याच्च तैक्ष्ण्याच्च विकाशित्वाच्च वह्निना । समेत्य हृदयं प्राप्य धमनीरूर्द्ध्वमागतम् । विक्षोभ्येन्द्रियचेतांसि वीर्य्यं मदयतेऽचिरात् ॥" चतुरशीतिरिति चरकः । तद्योनयो नव, धान्यफलमूलसारपुष्पकाण्डपत्रत्वचो भवन्त्यासवयोनयः शर्करा चेति । ताभ्यश्चतुरशीतिविधा हितकरा आसवा जायन्ते, यथा—फलजाः षड्विंशतिः, मूलजा एकादश, सारजा विंशतिः, पुष्पजा द्वौ, काण्डजाः चत्वारः, त्वग्जाश्चत्वारः, शर्कराजातश्चैकः, धान्यजाश्च षट् । इति । च.सू. २५अ. । तत्साधने जलादिदानविचारः—"आसवादिषु साध्येषु द्वात्रिंशद्गुणसम्मतम् । खदिरादेः प्रतिपलं जलमाहुश्चिकित्सकाः ॥ अष्टावशेषितं कृत्वा गुड़ं क्वाथसमं क्षिपेत् । मधुराणी गुड़ी देयः कफघ्नश्चाग्निरतोऽन्यथा ॥" इति । "क्वाथद्रव्यस्य बाहुल्यादुदकं स्वल्पमेव च । सम्यक्पाकं न मुञ्चन्ति हीनवीर्य्यन्तु केवलम् ॥ क्वाथ्यद्रव्यं घटसमं जलं द्रग्रघटं क्षिपेत् । निष्क्वाथ्य पादशेषन्तु गुड़ं सार्द्धं घटं न्यसेत् । विमृद्य सञ्चितं यत्र तदासवमितीरितम् ।" वृद्धसुश्रुतः । "विना क्वाथेन सन्धानमासवः प्रोच्यते किल । गुड़ं क्वाथौषधसमं जलं चापि चतुर्गुणम् ॥ आसवारिष्टमद्येषु ह्यावापश्च दशांशकः । चौद्रञ्च गुड़पादीनं प्रयोक्तव्यं भिषक्तमैः । अरिष्टेषु च सर्व्वेषु द्रोणे पञ्चशतं गुड़म् । चिरस्थायिष्वरिष्टेषु द्विगुणं गुड़मावपेत् ॥ अनुक्तमानारिष्टेषु द्रवे द्रोणे गुड़ात्तुलां । चौद्रं क्षिपेद्गुड़सार्द्धं प्रक्षेपन्तु दशांशिकः । तद्विद्येषु च द्रष्टव्या मद्यकर्त्तव्यता बुधैः । आसवारिष्टयोर्यत्र न गुणो लभ्यते तदा । एकविंशतिशतं कृत्वा दापयेद्गुणवद्वये ॥" इति गोपुरः । "यथा यथा जलञ्चात्र विरसं पललं भवेत् । तथा तथा गुड़ं देयं ह्यधिकं सम्प्रदायतः ॥ यथा तथा भवेदत्र शावी बहुतरः शुभः । अनुक्ते दशमूलादौ वव्वूलबदरादिकम् ॥ शावणार्थे प्रदातव्यं मासवादौ कदाचन । अनुक्तेऽपि च प्रस्थार्द्धं धातकीकुसुमं क्षिपेत् ॥ शावणार्थेषु सर्व्वेषु मधुकुष्ठविवर्ज्जितं । कुष्ठेन शिरसः पीड़ा छर्द्दिः पुष्परसाद्भवेत् ॥ अरिष्टासवयोर्मात्रा प्रोक्तमाकुड़वान्विता । यथा यथा शुतं मद्यं मात्रा चाल्पा तथा तथा ॥" भद्रशौनकः । [त्रि । वै.निघ. ।

मद्यगन्धः । पुं । वकुलवृक्षे । स्त्री । कदम्बवृ-

मद्यदोहदः । पुं । वकुलवृक्षे । वै.निघ. ।

मद्यद्रुमः । पुं । कोङ्कणदेशप्रसिद्धे माड़वृक्षे । रा.नि.व.९ ।

मद्यनित्यः । त्रि । नित्यं मद्यपानशीले । च. ।

मद्यपङ्कः । पुं । मेदके । মদের মেয়া । हे.च. ।

मद्यपाशनम् । क्ली । पिपासाजनकद्रव्ये । वै.निघ. । पानरुचकभक्ष्यद्रव्ये । চাট্ । हे.च. ।

मद्यपुष्पा (ष्पी) । स्त्री । धातकीवृक्षे । रा. नि.व.६ ।

मद्यमण्डः । पुं । मद्यफेने, सुरामण्डे । মদের মেয়া । अम. ।

मद्ययोनिः । स्त्री । सर्ज्जवृक्षे । शालगाछ । वै.निघ. । [गाछ । र.मा. ।

मद्यवासिनी । स्त्री । धातकीवृक्षे । धाइफुल

मद्यवीजम् । क्ली । बहुद्रव्यकृतसुरावीजे । वाकर इति लोके । हे.च. ।

मद्यश्रेष्ठम् । क्ली । द्राक्षासुरायाम् । वै.निघ.।

मद्यसन्धानम् । क्ली । सुरानिष्पादनार्थं फलकंदाङ्कुरादीनां सुचिरसंस्थापने । हे.च. ।

मद्यहेतुः । पुं । धातकीवृक्षे । वै.निघ. ।

मद्यामोदः । पुं । वकुलवृक्षे । रा.नि.व.१० ।

मद्योत्तमम् । क्ली । माध्वीसुरायां । वै.निघ.।

मधु । क्ली । (Mel.) Honey. पुष्परसे । मधु, मउ । प.मु. । हिं ता. सहद, मध । तें तेने । गुणाः—मधुरं कषायानुरसं रूक्षं शीतमग्निदीपनं वर्ण्यं स्वर्य्यं लघु सुकुमारं लेखनं हृद्यं सन्धानं शोधनं रोपणं वाजीकरणं संग्राहि चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्दितृष्णाकृमिविषप्रशमनं ह्लादि त्रिदोषघ्नञ्च । तत्तु लघुत्वात् कफघ्नं पैच्छिल्यान्माधुर्य्यात् कषायभावाच्च वातपित्तघ्नम् । सु.सू.४५अ. । अष्टविधा मधुजातिः, तद्यथा—माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रकम् आर्घ्यं औद्दालकं दालकञ्चेति । रा.नि.व.१४ । एषां विशेषाः पर्य्यायेषु द्रष्टव्याः । तच्च नवं पुरातनञ्चेति द्विधा । तयोर्नवं मधु स्थौल्यकरं नातिश्लेष्मलम् । पुराणञ्च तत् स्थौल्यघ्नं ग्राहि च । पक्वं तत् त्रिदोषघ्नं विविधरोगजाड्यजिह्वारोगघ्नं बलदं बुद्धिधैर्य्यवर्द्धनं वीर्य्यवर्द्धनञ्च । आमं तत् आमगुल्मवातरोगपित्तदाहनाशनं वातजननं शोषजननं अण्डवृद्ध्यन्तरायश्च भवति । तथा मधु सन्धानव्रणरोपणादिषु साधारण्येन हितम् । अपिच आमं मधु उष्णैर्द्रव्यैः सह उष्णकाले वा स्वयमुष्णं बहुकालस्थितं विषवत् तापजनकं भवति । यन्मधु कीटादियुतमम्लं पर्य्युषितं तदपथ्यं ज्ञेयम् । यत्तु सद्योप्राप्तं तद्रसायनयोगयोग्यं निर्दोषञ्च । रा.नि.व.१४ । मद्ये । मधुयष्ट्यां । यष्टिमधु । रा.नि.व.२३ । च.सू.४अ. । वै.निघ.सुदर्शनचूर्णे । जले । दुग्धे । विश्व.। मिष्टरसे । श.र.।

मधुः । पुं । मधूकवृक्षे । मउल गाछ । वसन्तकाले । चैत्रमासे । मे. । अशोकवृक्षे । हे.च. । यष्टिमधुनि । रा.नि.व.६ । स्त्री । जीवन्तीवृक्षे । अम. ।

मधुकम् । क्ली । यष्टिमधुनि । तच्च द्विविधं स्थलजानूपभेदेन वमनादिप्रतिकर्म्मविशेषेण च । च.सू. २अः । क्लीयष्टिमधुके । रा.नि.व.६ । च.सू.४अ.। वै.निघ.ज्व.चि.महालाक्षादितैले । वा.सू.१५अ.शोधनव.अञ्जनादिव.अम्बष्ठादिव.न्यग्रोधादिव. । च.द.पि.ज्व.चि.त्रायमाणादिव.सा.ज्व.चि.मुस्तादिगणे। अ.सू.४अ.सन्धानीये कषायगणे । वै.निघ.ज्व.चि. चन्दनबलातैले । यशदे । दस्ता । हे.च. । पुं । मधूकवृक्षे । मउल गाछ । र.मा.सु.सू.३८अ.न्यग्रोधादौ । जीवके । रा.नि.व.५ । पक्षिविशेषे । यष्टिमधुवृक्षे । विश्व.। [निघ. ।

मधुकच्छदा । स्त्री । मयूरशिखायाम् । वै.

मधुकण्ठः । पुं । कोकिले । त्रिका. ।

मधुकन्दः । पुं । आलुकभेदे । वै.निघ. ।

मधुकरः । पुं । मधुरजम्बीरे । अपामार्गे । वै.निघ. । भृङ्गराजवृक्षे । श.मा. । भ्रमरे । अम. ।

मधुकरप्रियः । पुं । आम्रवृक्षे । रा.नि.व.११

मधुकर्कटिका (टी) । स्त्री । (Citrus acida.) मधुरबीजपूरवृक्षे । मिष्टलेबु । हिं मधुकाकड़ी,मउफुटी । गुणाः—शीतला रक्तपित्तहरा गुरुश्च । तन्मूलं विसूचिकाघ्नं कर्णशोषघ्नञ्च । मद.क.६ । "मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः । रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ॥" भा.पू.१भ.आम्र.व. । मधुखर्ज्जूरीवृक्षे । रा.नि.व.११ ।

मधुकसारः । पुं । गुड़पुष्पवृक्षसारे । मउलेर आठा । वै.निघ.भुग्ननेत्रज्व.चि.।

मधु(धू)कसुरा । स्त्री । मधुकमद्ये । मउआर मद । गुणाः—"वातपित्तकरं रूक्षं कषायं विशदं गुरु । श्लेष्मलं भेदनं ग्राहि मूत्रकृच्छ्रशिरोऽर्त्तिनुत् ॥" अत्रिः १८अ. ।

मधुका । स्त्री । यष्टिमधुनि । प.मु. । लताभेदे । गुडूच्याम् । मे.। मधुरनिम्बवृक्षे । वै.निघ. । कृष्णकङ्गुन्यां । हे.च. ।

मधुकादिः । पुं । विषमज्वरे कषायभेदे । "मधुकं चन्दनं मुस्तं धात्री धान्यमुशीरकं । किराततिक्तं

घटीभिश्च क्वाथः समधुशर्करः। ज्वरमष्टविधं हन्ति …॥" भैष.ज्व.चि.।

मधुकादिघृतम् । क्ली । कासाधिकारे घृतम् । गव्यघृतं ४ श.। क्वाथार्थं—यष्टिमधु ८ प. द्राक्षा १६ प.। पाकार्थं—जलं १६ श. शे. श.। कल्कार्थं—पिप्पली ८ प.। पाकसिद्धौ अवतार्य शीते मधुनः शर्करायाश्च प्र. ८ प. प्रक्षेप्यम्। घृत ৪শ.। ক্বাথার্থ—যষ্টিমধু ৮প. দ্রাক্ষা ১৬ প.। পাকার্থ—জল ১৬ শ. শে. ৪ শ.। কল্কার্থ—পিপুল ৮ প.। পাক হইলে মধু ৮ প. শর্করা ৮ প. প্রক্ষেপ দিবে। [निघ.।

मधुकाश्रयः । पुं । मधूच्छिष्टे। मम। वै.

मधुकाष्ठः । पुं । मधूकवृक्षे। মউল গাছ। वै.निघ.।

मधुकुक्कुटिका (टी) । स्त्री । मातुलुङ्गवृक्षे, जम्बीरभेदे। महूर इति भाषा। गुणाः—"मधुकुक्कुटिका शीता श्लेष्मलास्यप्रसादनी। रुच्या स्वादुर्गुरुः स्निग्धा वातपित्तविनाशिनी।" राज.३प.।

मधुकृत् । स्त्री । मधुमक्षिकायाम्। हे.च.।

मधुकेशटः । पुं । भ्रमरे। त्रिका.।

मधुकोदकम् । क्ली । यष्टिमधुकसिद्धजले। इदं तृष्णाहरम्। सि.यो.तृ.चि.।

मधुकोषः । पुं । क्षौद्रपटले। মৌচাক। श. च.। कागमुच्छे। श.कल्पद्रुमः।

मधुक्रमः । पुं । मध्वाश्रये। মৌচাক। श.च.।

मधुक्रोड़ा । स्त्री । घृततैलभर्ज्जिते समधुपिष्टकभेदे। सा गुरुः पुष्टिकरी च। च.सू.२७अ.।

मधुखर्ज्जु(र्ज्जू)रिका (री) । स्त्री । मिष्टफलखर्ज्जूरीवृक्षे। মিষ্ট খেজুরগাছ। मं मिष्टखीं। कं सींहर्द्दचिलु। गुणाः—मधुरा वृष्या शीतलासन्तापपित्तघ्नी क्रमिजननी वीर्य्यवर्द्धनी च। रा.नि.व.११।

मधुगन्धः । पुं । वकुलवृक्षे। अर्ज्जुनवृक्षे। वै. निघ.।

मधुगन्धप्रसूनकः । पुं । अर्ज्जुनवृक्षे। वै निघ.।

मधुगायनः । पुं । कोकिले। रा.नि.व.१९।

मधुगुञ्जनः । पुं । शोभाञ्जनवृक्षे। সজিনা-গাছ। श.मा.।

मधुघातकः । पुं । पक्षिविशेषे। वै.निघ.।

मधुघोषः । पुं । कोकिले। श.मा.।

मधुच्छदा । स्त्री । मयूरशिखायाम्। भा.।

मधुजः । पुं, क्ली । मधूच्छिष्टे। रा.नि.व.१४।

मधुजम्बीरः । पुं । (Citrus limetta.) Sweet lime of India. मधुरजम्बीरवृक्षे। মিষ্ট লেবুগাছ। हिं मिठानेबु। रा.नि.व.११।

मधुजम्भः । पुं । मधुरजम्बीरे। रा.नि.व.११।

मधुजा । स्त्री । मधुशर्करायाम्। रा.नि.व.१४। सितायां। চিনি। त्रिका.।

मधुजीरकः । पुं। (Pimpinella anisum.) Common anise. जीरकभेदे। মিঠাজীরা। हिं सौंफ्। तें पेद्दजिलकर। ता. सोम्बु। वम्. आनिसून्। पुस्तकान्तरम्।

मधुजीवनः । पुं । विभीतकवृक्षे। वै.निघ.।

मधुतालः । पुं । शीतालवृक्षे। रा.नि.व.९। नकुल.१०अ.। [व.१४। त्रिका.।

मधुतृणः । पुं, क्ली । इक्षौ। प.मु.। रा.नि.

मधुतैलवस्तिः । पुं । निरूहवस्तिभेदे। यथा —"एरण्डक्वाथतुल्यांशं मधुतैलपलाष्टकम्। शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम्। मधुतैलकसंज्ञोऽयं वस्तिर्दारुविलोड़ितः। मेदोगुल्मक्रमिप्लीहमलोदावर्त्तनाशनः। बलवर्णकरश्चैव वृष्यो दीपनवृंहणः।" भा.।

मधुत्रयम् । क्ली। मधुरत्रये, घृतमधुशर्करासु। रा.नि.व.२२। भा.म.४भ.कुष्ठ.चि.।

मधुदला । स्त्री। मूर्व्वायां। মূর্গা। रा.नि.व.३।

मधुदूतः । पुं। आम्रवृक्षे। भा.। कोकिले। वै. निघ.।

मधुदूती । स्त्री । पाटलवृक्षे। भा.।

मधुद्रः । पुं । भ्रमरे। त्रिका.।

मधुद्रवः । पुं । मधुशिग्रौ, रक्तशिग्रुवृक्षे। লাল সজিনা গাছ। श.र.। वा.चि.३अ.।

मधुद्रुमः । पुं । मधूकवृक्षे। মউল বা গুড়-

पुष्पवृक्ष । र.मा. । आम्रातकवृक्षे अम्लछायाम् । वै.निघ. । [रा.नि.व.१० ।

मधुधातुः । पुं । स्वर्णमाक्षिके । रूप्यमाक्षिके ।

मधुधूलिः । स्त्री । खण्डशर्करायाम् । थाँड़ । वै.ध. ।

मधुनारिकेरकः । पुं । नारिकेलवृक्षविशेषे । एरनारिकेर इति कोङ्कणे प्रसिद्धः । बम्. मोहानारल । वामननारिकेल । फलगुणाः—मधुरं शीतलं तृष्णादाहपित्तघ्नं बलपुष्टिकरं कान्तिजनकं वीर्य्यवर्द्धनं रुच्यञ्च । दुर्ज्जरं क्रमिकरं स्निग्धं वातातिसारश्रमशमनम् अग्निदीप्तिनाशनम् आमश्लेष्मप्रकोपजनकञ्च । रा.नि.व.११ ।

मधुनिष्पावः । पुं । मुकुटशिम्ब्यां । मुकुटम्शीम । प.मु । गुणाः—रुच्यः मधुरः ईषत्कषायः शीतलः वातलो बल्यः आध्मानकरः गुरुः पुष्टिकरश्च । रा.नि.व.१६ ।

मधुनी । स्त्री । क्षुपविशेषे । माकड़ चाउलि, माकड़ हाता । र.मा.अधिः स्थानं २ अ. ।

मधुपञ्जरः । पुं । बकुलवृक्षे । प.मु. ।

मधुपर्णिका । स्त्री । गाम्भारीवृक्षे । भा.म.४, भ.गर्भ.चि. । नीलीवृक्षे । भा. । सुदर्शनायाम् । पद्म गुलञ्च । गुडूच्यां । रा.नि.व.३। प्रसारण्याम् । गन्धभादुलिया । वराहक्रान्तायाम् । बराक्रान्ता । श.च. ।

मधुपर्णी । स्त्री । विकङ्कतक्षुपे । बइचिगाछ । र.मा. । गुडूच्यां । र.मा. । रा.नि.व.३ । च.सू.४ अ. । भा.जीवकाद्यमिश्रके, अ.पि.अ. । वराहक्रान्तायां । बराक्रान्ता । च.द.शूल.चि. रामसख्ये । गाम्भारीवृक्षे । रा.नि.व.९ । यष्टिमधुनि । भा.म.४भ.कर्णरो.चि.त्रिफलाद्यघृते । मधुरवीजपूरके । मिष्ट लेबु । रा.नि.व.११ । नीलीवृक्षे । मे. । प्रसारण्याम् । वै.निघ. ।

मधुपाका । स्त्री । षड्भुजायां, खर्मूजा इति ख्यातायां फलशाकलतायाम् । रा.नि.व.७ ।

मधुपालिका । स्त्री । गाम्भारीवृक्षे । श.मा.।

मधुपीलुः । पुं । महापीलुवृक्षे । आकरोट । रा.नि.व.११ ।

मधुपुष्पः । पुं । मधूकवृक्षे । मउलगाछ । सिंहपुष्पा । र.मा. । रा.नि.व.२३। अशोकवृक्षे । रा.नि.व.१० । शिरीषवृक्षे । रा.नि.व.९।२३ । बकुलवृक्षे । रा.नि.व.१० । दन्तिवृक्षे । रा.नि.व.२३ ।

मधुपुष्पा । स्त्री । दन्तिवृक्षे । रा.नि.व.६ । धातकीवृक्षे । वै.निघ. । नागदन्तिवृक्षे । रा.नि.व.५।

मधुपुष्पी । स्त्री । अवाक्पुष्प्यां । चोरहुली । दन्तिवृक्षे । पुत्रञ्जीववृक्षे । वै.निघ. ।

मधुप्रियः । पुं । भूमिजम्बूवृक्षे । जटा. ।

मधुफलः । पुं । मधुनारिकेलवृक्षे । रा.नि.व. ११ । विकङ्कतक्षुपे । श.च. । राजादनीवृक्षे । क्षीरिणी । रा.नि.व.११ । मधुखर्ज्जूरीवृक्षे । वै.निघ. ।

मधुफला । स्त्री । मधुपाकायाम् । खर्बुजा । मातुलुङ्गवृक्षे । कपिलद्राक्षायाम् । वै.निघ. । वा.सू.१५अ. । [नि.व ११ ।

मधुफलिका । स्त्री । मधुखर्ज्जुरिकायां । रा.

मधुबहुला । स्त्री । वासन्तीलतायाम् । वासन्ती गाछ । रा.नि.व.१० । शुक्लयूथिकायाम् । वै.निघ.।

मधुबिम्बी । स्त्री । कुन्दरुलतायाम् । कुँदरुकी । वै.निघ. ।

मधुबीजः । पुं । दाड़िमवृक्षे । वै.निघ. ।

मधुभवा । स्त्री । मधुशर्करायाम् । वै.निघ. ।

मधुमज्जा । पुं । अक्षोटवृक्षे । आखरोट गाछ । रा.नि.व.११ ।

मधुमती । स्त्री । गाम्भारीवृक्षे । मूर्व्वायां । रा.नि.व.३।९ । काश्मीरदेशीयनद्यां । तज्जलगुणाः—अग्निदीपनं तथा चन्द्रभागाजलसदृशगुणम् । रा.नि.व.१४ । [रा.नि.व.६ ।

मधुमत्तः (त्ता) । पुं, स्त्री । महाकरञ्जवृक्षे।

मधुमल्ली । स्त्री । मालतीलतायाम् । श.मा. ।

मधुमस्तकम् । क्ली । पिष्टान्नविशेषे । लक्षणं —"समिता वेष्टिता मध्ये मधु दत्त्वा शृता घृते । मधुमस्तकमुद्दिष्टं तद्वृष्यं गुरु दुर्जरम् ॥" राज.३ प. । त्रि । मधुना उपलिप्ते । भा.म.४भ. ।

मधुमक्षिका । स्त्री । मक्षिकाविशेषे । मौमाछि । अम. ।

मधुमाधवकः । पुं । पलाशवृक्षे । वै.निघ. ।

मधुमाध्वीकम् । क्ली । मधूकपुष्पमद्ये । वै. निघ. । मद्ये । च.टी.भ. ।

मधुमानी । स्त्री । मधुनः अष्टपलेषु । सि.यो. कास.चि.वासाकुष्माण्डे । "पिप्पलीकुडवञ्चैव मधुमानीं प्रदापयेत् ।" [कम् ।

मधुमालती । स्त्री । मालतीपुष्पवृक्षे । वैद्य-

मधुमाक्षिकम् । क्ली । स्वर्णमाक्षिके । भा. ।

मधुमूलम् । क्ली । रक्तालुके । (मौ आलू । श.च. ।

मधुमेहः । पुं । प्रमेहरोगविशेषे । मधूमेह । निदानादि । "सर्व्वएव प्रमेहास्तु कालेनाप्रतिकारिणः । मधुमेहत्वमायान्ति तदासाध्या भवन्ति हि। गुरुस्निग्धाम्ललवणान्यतिमात्रं समश्नतां । नवमन्नञ्च पानञ्च निद्रामास्यासुखानि च । त्यक्तव्यायामचिन्तानां संशोधनमकुर्व्वतां । श्लेष्मा पित्तञ्च मेदश्च मांसञ्चातिप्रवर्त्तते । तैरावृतगतिर्वायुरोज आदाय गच्छति । यदा वस्तिं तदा कृच्छ्री मधुमेहः प्रवर्त्तते ।" च.सू.१७. । [यष्टिमधुनि । वै.निघ ।

मधुयष्टिः । स्त्री । इक्षौ । श.च. । मधूकवृक्षे ।

मधुयष्टिका (यष्टी) । स्त्री । यष्टिमधुनि । प.मु. । चि.क्र.क.सोमरी.चि. । मधूकवृक्षे । इक्षौ । वै.निघ. । [घ. ।

मधुयोनिः । स्त्री । कपिलद्राक्षायाम् । वै.नि-

मधुरम् । क्ली । वङ्गे । रा.नि.व.१३ । मधुरिकायां । मउरी । (शीतकषायपाने) । वल्लीयष्टिमधुनि । रा.नि.व.६ । सिक्थके । मम । रा.नि. व.१३ । विषे । त्रिका. ।

मधुरः । पुं । षड्रसान्यतमे रसे । मिष्टरस । स च भूम्यम्बुगुणभूयिष्ठः परितोषाह्लादतृप्तिमुखावलेपजनकः रसरक्तमांसमेदोऽस्थिवर्द्धनश्च । "यः परितोषमुत्पादयति प्रह्लादयति तर्पयति जीवयति मुखावलेपं जनयति स मधुरः, स च स्निग्धगुरुशीतधातुवर्द्धनायुर्बलवर्णतृप्तिकृत् कण्ठ्यः सन्धानकृच्च । तद्विपाकः मधुरः । तद्विपाकगुणश्च श्लेष्मकृत् वातपित्तहरश्च ।" सु.सू.४२अ. । केशवर्द्धकः, अतिसेवनात् प्रमेहजड़तादिकञ्च करोति । रा.नि. व.२० । रक्तशिग्रौ । रा.नि.व.७ । मञ्जरतृणे । रा.नि.व.८ । द्राक्षामवृक्षे । रा.नि.व.११ । रक्तेक्षौ । गुडे । रा.नि.व.१४ । मातुलुङ्गवृक्षे । वातामवृक्षे । काकोल्याम् । वै.निघ.२भ.ज्व.चि. । श्वेतनिष्पावे । वरवटी । राजमाषे । मटर । रा.नि.व.१६ । जीवके । मेदायाम् । रा.नि.व.२३ । वन्यबदरे । मधूकवृक्षे । वै.निघ. । काकोल्यादिगणे । च.द. स्व.भे.चि. । त्रि । मधुररसयुक्ते ।

मधुरकः । पुं । जीवकवृक्षे । अम. ।

मधुरकण्टकः (का) । पुं, स्त्री । मत्स्यविशेषे । श.र. । [लेबू । रा.नि.व.११ ।

मधुरकर्कटी । स्त्री । मधुरबीजपूरे । मिष्ट

मधुरकुष्माण्डम् । क्ली । कुष्माण्डे । छाँचि कुम्ड़ा । हिं मिठाकदु । संग्रहः ।

मधुरखर्ज्जूरी । स्त्री । मधुखर्ज्जूरीवृक्षे । रा. नि.व.११ ।

मधुरगणः । पुं । काकोल्यादिदशद्रव्येषु । See काकोल्यादिगणः । च.द.सि.यो.स्व.भे., अ.चि.चि.तृष्णा.चि. । "शर्करामधुमिश्राणि शृतानि मधुरैः सह ।" सु.चि.३अ. ।

मधुरजम्बीरः । पुं । जम्बीरविशेषे । मिठा जामीर । मं साखरनिम्बु । कं किचिले । गुणाः —मधुरः शीतलः कफपित्तघ्नः शोफघ्नः, तर्पणः हृद्यः श्रमघ्नः पुष्टिकारकश्च । रा.नि.व.११ ।

मधुरजम्भलः । पुं । मधुरजम्बीरवृक्षे । रा. नि.व.११ ।

मधुरजीवकादिः । पुं । जीवन्तीमधूकयुक्तजीवकादिगणे । "जीव्यामधूकयुतया मधुराङ्गयोऽयं योगी महानिह विराजति जीवकादिः ।" रा.नि.व.२२ । See जीवकादिः ।

मधुरजीवनीयः । पुं । जीवकर्षभकौ मेदे काकोल्यौ मधुकं सहे जीवन्ती चेति द्रव्यगणे । च. ।

मधुरज्वरः । पुं । मन्थरापरनामकज्वरविशेषे । लक्षणं यथा—"ज्वरो दाहो भ्रमो मोहो ह्यतीसारो वमिस्तृषा । अनिद्रा च मुखं रक्तं तालु जिह्वा च शुष्यति । ग्रीवायां परिदृश्यन्ते स्फोटकाः सर्षपोपमाः । घृताशनात् स्वेदरोधात् मधुरो जायते नृणाम् ॥" वै.निघ. ।

मधुरत्वक् (च:) । पुं । धवहचे । धाওয়া গাছ । रा.नि.व.८ ।

मधुरत्रयम् । क्ली । समभागघृतमधुशर्करासु । "सितामाचिकसर्पींषि मिलितानि यदा तदा । मधुरत्रयम्…… ।" रा.नि.व.२२ ।

मधुरत्रिफला । स्त्री । समभागद्राक्षागाम्भारीखर्ज्जूरेषु । কিস্মিস্, গাম্ভারফল, খেজুর সমান । षम. । "द्राक्षाकाश्मर्य्यखर्ज्जूरीफलानि मिलितानि तु । मधुरा त्रिफला ज्ञेया ।" रा.नि.व. २२ ।

मधुरफल: । पुं । राजबदरहचे । নারকুলে কুলের গাছ । रा.नि.व.११। तरम्बुजे । वै.निघ.।

मधुरफला । स्त्री । मधुरवीजपूरकहचे । মিঠা লেবু । रा.नि.व.११ । चिर्भटिकायां । वै.निघ. ।

मधुरविम्बी । स्त्री । कुन्दुरुलतायाम् । कुन्दूरुकी । वै.निघ. ।

मधुरलता । स्त्री। वल्लीयष्टिमधुनि । वै.निघ.।

मधुरवर्ग: । पुं । दुग्धादिकुष्माण्डान्तद्रव्यगणे । दुग्धघृतवसामज्जशालिषष्टिकयवगोधूममाषशृङ्गाटककसेरुकैर्व्वारुक(গোমুক)कर्कारुका কাঁকুড়)-त्रापुकाभिन्द(তরমুজ)कतक(निर्म्मला गिलोडय-(গিলে)पियालपुष्करवीजकाश्मर्य्यमधूकद्राक्षाराजादन(খীর্ণী तालनारिकेलेक्षुविकारवलातिवलात्मगुप्ताविदारीपयस्यागोक्षुरकक्षीरमोरटमधूलिकाकुष्माण्डप्रभृतीनि समासेन मधुरोवर्ग: । सु सू.४२अ.।

मधुरवल्ली । स्त्री । मधुवीजपूरद्रुमे । रा.नि.व. ११ । [ताम्रे । মিঠাবাদাম । संग्रह: ।

मधुरवाताम: । पुं । (Dulcis.) मिष्टवा-

मधुरवीजपूर: । पुं । मिष्टमातुलुङ्गहचे । মিষ্টলেবু গাছ । मं मधुकाकड़ी । कं सखरेमाघवल । गुणा:—मधुर: शीतल: दाहघ्न: त्रिदोषघ्न: रुच्य: हृद्य: गुरु: दुर्ज्जरश्च । रा.नि.व.११ ।

मधुरस: । पुं । तालहचे । रा.नि.व.८ । सु.सू. ३८अ.पिप्पल्यादि: ।

मधुरसा । स्त्री । मूर्व्वायां । मुगरा । रा.नि. व.३ । र.मा. । वा.सू.१५अ.आरग्वधादि:, "वल्ली निम्बाघृतमधुरसा ।" भा.म.१भ.सन्ततादिज्व.चि.महाषट्पलकतैले । "मधुरसादेवाह्वरीहीतकै: ।" यष्टिमधुनि । रा.नि.व.६ । द्राक्षायाम् । मे. । गाम्भारीहचे । भा. । प्रसारण्याम् । शतपुष्पायाम् । शुल्फा । वै.निघ. । दुग्धिकायां । थिरुई । मे. ।

मधुरस्कन्ध: । पुं । षड्विधास्थापनमध्ये मधुरवर्गीयद्रव्यकृतास्थापनविशेषे । च.विमा.८अ. ।

मधुरस्रवा । स्त्री । मूर्व्वायाम् । पिण्डीखर्ज्जूरिकायाम् । रा.नि.व.११ ।

मधुरा । स्त्री । मेदायां । रा.नि.व.५ । काकोल्यां । वृहज्जीवन्त्याम् । रा.नि.व.३ । शतावर्य्यां । रा.नि.व.४ । महाशिम्ब्यां । कदलीहचे । प.मु. । शतपुष्पायां । शुलफा । भा. । पालङ्कशाके । रा. नि.व.७ । मधुखर्ज्जूरीहचे । रा.नि.व.११ । तिलवासिनीशाली । उम्पाशाली । रा.नि.व.१६ । मूर्व्वायां । च.चि.३अ. । मातुलुङ्गहचे । यष्टिमधुनि । मधुरिकायां । मउरी । मे. । काञ्जिके । त्रिका. । ऋषभके । मसूरे । महामेदायाम् । वै.

मधुराकर: । पुं । इचौ । प.मु. ।

मधुराजालुकम् । क्ली । मिष्टरसालुकभेदे । মৌ আলু । गुणा:—"मधुराजालुकं शीतं मधुरं वायुकारकं । पाके कटु च विज्ञेयं रुचिदं दाहपित्तनुत् । शोषहृट्कफनुत् प्रोक्तमस्य कन्दस्तु शीतल: । अग्निमान्द्यमलस्तम्भकफकृत् पित्तनुत्पर: ॥" वै.निघ. । [याम् । रा.नि.व.२२ ।

मधुरादिफलत्रयम् । क्ली । मधुरत्रिफला-

मधुराम्रफल: । पुं । पियालहचे । र.मा. ।

मधुराम्ल: (क:) । पुं । आम्रातकहचे । श. च. । दाड़िमहचे । नागरङ्गहचे । वै.निघ. ।

मधुराम्लरस: । पुं । नागरङ्गहचे । নারঙ্গী লেবুর গাছ । वै.निघ. । [१८ ।

मधुरालापा । स्त्री । शारिकायां । रा.नि.व.

मधुरालावु: (नी) । स्त्री । मिष्टालाब्वाम् । মিঠা লাউ । रा.नि.व.७ ।

मधुरालिका । स्त्री । क्षुद्रमत्स्यविशेषे । মউরলামাছ । भरुचिपथ्यापथ्यम् ।

मधुरासव: । पुं । भासे । वै.निघ. ।

मधुरास्यता । स्त्री । मुखलिप्तताायाम्, मुखस्य मिष्टतायाम् । मा.ज्व.नि. ।

मधुरिका । स्त्री । मिश्रेयाख्यक्षुपे । মৌরী । प.मु. । रा.नि.व.४ । रक्तसर्षपे । रा.नि.व.१६ । शताह्वायाम् । শুল্ফা । वै.निघ. ।

मधुरी । स्त्री । आम्रवृक्षे । वै.निघ. । मधुरिकायां । মৌরী । च.द.वा.व्या.चि.प्रसारणीतैले ।

मधुरेणुः । पुं । कृष्णकटभीवृक्षे । रा.नि.व.९ । See कटभी । शुक्लपुष्पपाटलायाम् । वै.निघ. ।

मधुरौषधम् । क्ली । मधुरगणे । भा.म.३भ. ।

मधुलः । पुं । मधूकविशेषे । र.मा. । क्ली । मद्ये । श.च. ।

मधुलग्नः । पुं । रक्तशिग्रुवृक्षे । र.मा. ।

मधुलता । स्त्री । शूलीतृणे । रा.नि.व.८ । वल्लीयष्टिमधुनि । वै.निघ. ।

मधुलिका (ली) । स्त्री । स्वनामख्यातवृक्षे । মধুলী । र.मा. । च.वि.८अ.। कपिलद्राक्षायाम् । पुष्परागे । वै.निघ. । शमीधान्यभेदे । च.सू.२७ अ. । (लिका) । राजिकायाम् । रा.नि.व.१६ ।

मधुवलः । पुं । कोकिले । श.च. ।

मधुवल्लिका (ल्ली) । स्त्री । मिष्टमातुलुङ्गवृक्षे । रा.नि.व.११। कारवेल्लके । করলা । र.मा.। वल्लीयष्टिमधुनि । रा.नि.व.६। कपिलद्राक्षायाम् । वै.निघ. । निघ. ।

मधुवासिनी । स्त्री । लघुधातकीवृक्षे । वै.

मधुविट् । स्त्री । मधूच्छिष्टे । मम । वै.निघ. ।

मधुवीजः । पुं । दाड़िम्बवृक्षे । रा.नि.व.११ ।

मधुवीजपूरः । पुं । मधुरमातुलुङ्गवृक्षे । रा. नि.व.११ । [निघ. ।

मधुवृक्षः । पुं । मधूकवृक्षे । মউল গাছ । वै.

मधुशर्करा । स्त्री। मालखण्डीति प्रसिद्धे शर्कराजातखाद्यद्रव्ये। सिताखण्ड, পাটালী। তিলুয়া । गुणाः—अतिमधुरा चक्षुष्या छर्दिघ्नी कुष्ठव्रणकफश्वासहिक्कारक्तपित्तघ्नी च । रा.नि.व.१४ । अष्टविधमधूत्पन्नशर्करासु । तास्व मधूनामष्टविध्यादष्टविधा भवन्ति । तच्छर्करागुणा अपि तत्तन्मधुगुणतुल्याः ज्ञेयाः । "यद्गुणं यन्मधु प्रोक्तं तद्गुणा तस्य शर्करा ।" रा.नि.व.१४। श्वेतनिष्पावे । रा.नि.व. १६ । [श.च. ।

मधुशाखः । पुं । मधूकवृक्षे । মউল গাছ ।

मधुशिग्रुः । पुं । रक्तशोभाञ्जनवृक्षे । লাল সজিনাগাছ । गुणाः—"मधुशिग्रुः सरस्तिक्तः शोफघ्नो दीपनः कटुः ।" सु.सू.४६अ. । (कः) श्वेतशिग्रौ । रा.नि.व.७ ।

मधुशिता । स्त्री । श्वेतनिष्पावे । रा.नि.व.१६।

मधुशेषः । पुं,क्ली । सिक्थके । मम् । रा.नि. व.१७ । च.सू.३अ. ।

मधुश्रेणी । स्त्री । मूर्व्वायां । रा.नि.व.३ ।

मधुश्वासा । स्त्री । जीवन्तीलतायाम् । रा.नि. व.३ ।

मधुष्ठीलः । पुं । मधूकवृक्षे । भा. ।

मधुसन्धानम् । क्ली । मद्ये । वै.निघ. ।

मधुसम्भवम् । क्ली । सिक्थके । मम । रा. नि.व.१७ । [निघ. ।

मधुसम्भवा । स्त्री । कपिलद्राक्षायाम् । वै.

मधुसिक्थकः । पुं । मधूच्छिष्टे । मम । भा. म.४भ पादस्फोट.चि. "मधुसिक्थकगैरिकघृत···
···।" स्थावरविषभेदे । हे.च. ।

मधुशु(सु)क्तम् । क्ली। पिप्पलीमूलजम्बीररसकृतसन्धानविशेषे । "जम्बीरस्य फलरसं पिप्पलीमूलसंयुतं । मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत् । त्र्यहेण तज्जातरसं मधुशुक्तमुदाहृतम् ।" शार्ङ्ग. ।

मधुसूदनः । पुं । भ्रमरे । त्रिका. ।

मधुसूदनी । स्त्री । पालङ्कीशाके । পালংশাক । हे.च. ।

मधुस्नेहः । पुं । मधूच्छिष्टे । मम । वै.निघ. । स्त्री । चीव(तोप)चीनीतिख्याते पुष्टिकरौषधे । वै.निघ. ।

मधुस्रवः । पुं। मधुकवृक्षे । মউল গাছ । भा.। मोरटलतायाम् । ক্ষীর কড়ার । रा.नि.व.३ । स्त्री। मूर्व्वायां । रा.नि.व.३। क्षीरमूर्व्वायाम् । हंसपद्यां । গোয়ালিয়া লতা । र.मा. । रा.नि.व.

५। पिण्डखर्जूरवृक्षे। पिण्डी খেজুর। रा.नि.व.११। जीवन्त्याम्। म.च.। यष्टिमधुनि। जटा.। रक्तबालुकायाम्। वै.निघ.।

मधुस्रवाः (स्) । पुं। मधूकवृक्षे। মউল গাছ। जटा.। वा.सू.१५।१०ष.पटोलादिः। "मधुस्रवीगडूचीपाठाञ्चितम्।"

मधुस्रावः । पुं। मोरटलतायाम्। रा.नि.व.३। मधूकवृक्षे। মউল গাছ। भा.।

मधुस्वरः । पुं। कोकिले। श.र.।

मधुहा (न्) । पुं, स्त्री (हा)। प्रसहजातीयपक्षिभेदे। च.सू.२७ष.।

मधुज्वरा । स्त्री। शिम्बीभेदे। प.मु.। [रा.।

मधुचोरः (री) । पुं, स्त्री। खर्जूरवृक्षे। हा

मधूकम् । क्ली। गुडपुष्पे, मधूकपुष्पे। মউল ফুল। वा.सू.१५ष.न्यग्रोधादिः। "कोलीकदम्बविल्वामधुकं मधूकम्।" च.द.वा.पि.ज्व.चि.मधूकादिः। "मधूकं चन्दनोत्पलम्।" वा.चि.३ष.। यष्टिमधुनि। रा.नि.व.६।-सु.सू.३८ष.उत्पलादिः। वै.निघ.श्व.चि.मधूकघृते।

मधूकः । पुं। (Bassia latifolia.) स्वनामख्य तरुवृक्षे। মউল গাছ। हिं महुया,वनमहुया। ता. कटइलुपि। तैं पिन्ना। वम्. मोहा। वा.सू.१५ष.सारिवादिः। सु.सू.३८ष.न्यग्रोधादिः। स द्विविधः स्थलजजलजभेदेन। गुणाः—समुत्तेजकः स्निग्ध उष्णः शैत्यकरः बल्यः धातुपोषकश्च। पुष्पक्वाथः कायहितः। तैलं शिरःशूले हितम्। तत्सुरा मधुरा पाचिका च। कश्चित्। "मधूकपुष्पं मधुरं शीतलं गुरु बृंहणं। बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम्। फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत्। अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षतक्षयान्।' भा.। एतत्तैलं गाम्भारीतैलगुणम् अहृद्यं तर्पणं बृंहणञ्च लग्गुणाः—"मधूकं रक्तपित्तघ्नं व्रणशोधनरोपणम्।" तन्मज्ज तत्फलगुणम्। पक्वफलं वातपित्तघ्नम्। राज.। [वै.निघ.।

मधूकपर्णसाहस्री । स्त्री। तुलसीवृक्षे।

मधूकपर्णा । स्त्री। अम्बष्ठायाम्। আমড়া গাছ। वै.निघ.।

मधूकफाणितम् । क्ली। मधूकपुष्पोत्थशर्करायाम्। মউল ফুলের চিনি। गुणाः—रुच्यं वातपित्तकृत् कफघ्नं मधुरं वस्तिदोषकरञ्च। सु.सू.४५ष.।

मधूकशर्करा । स्त्री। मधूकफाणिते।

मधूकसारः । पुं। मधूकरसे। মউলের সার আটা। च.द.ज्व.चि.मधूकसारादिः। "मधूकसारसिन्धूत्थः।"

मधूच्छिष्टम् । क्ली। (Cera, Alba, Flava.) Wax. मधुसिक्थके। मम्। र.मा.। हिं मम। तैं मैनम। ता. मञ्जु। सु.सू.६ष.। स्निग्धं क्षते हितञ्च। द्रव्यगुणान्तरम्।

मधूत्थ(त्थित)म् । क्ली। सिक्थके। मम्। रा.नि.व.१३।

मधूत्था । स्त्री। मधुकृतशर्करायाम्। रा.नि.व.१४। [रा.नि.व.१०।

मधूत्सवः । पुं। रक्ताम्लानवृक्षे। রক্ত ঝাঁটী।

मधूलः । पुं। वारिजे गिरिजे च मधूकवृक्षे। জলমহুয়া, গিরিমহুয়া। प.मु.। जटा.।

मधूलकः । पुं। जलजमधूकवृक्षे। भा.। स्थलजमधूकवृक्षे। श.र.। क्ली। मद्ये।

मधूलिः । स्त्री। मालकाङ्‌ड़ी इति ख्यातौषधौ। মালকাঁকড়ী। प.मु.।

मधूलिकः । पुं। दूर्वौ। आसवविशेषे। गुणाः—"श्लेष्मलस्तु मधूलिकः।" च.सू.२७ष.।

मधूलिका । स्त्री। मूर्व्वायां। प.मु.। रा.नि.व.३। भा.पू.२भ.। यष्टिमधुनि। जलयष्ट्यां। भा.पू.२भ.। वा.टी.हेमा.वमनकल्पे। क्षुधान्यभेदे, स्वल्पगोधूमे। मध्यदेशजगोधूमे इति भावमिश्रः। स्वल्पगोधूमोत्थसुरायाम्। गुणाः—मलमूत्ररोधिनी गुरुः श्लेष्मला च। सु.सू.४६ष.। मक्षिकाविशेषे। सु.कल्प.८ष.। मर्कटहस्तिवृषे। মাকড়শাতা। च.द.भग्न.चि.।

मधूली । स्त्री। आम्रवृक्षे। रा.नि.व.११। मूर्व्वायाम्। मधुकर्कटिकायाम्। रा.नि.व.११। सु.चि.३ष.। मधूकवृक्षे। जलजमधुयष्ट्यां। मध्यदेशजगोधूमे। भा.। गुणाः—मधुरा स्निग्धा शीतला च। च.सू.२७ष.। वा.चि.६ष.।

मधूवकम् (षितम्)। क्ली। मधूच्छिष्टे। वै.निघ.।

मध्यः। पुं। कटिदेशे। মাঝা। धूमनधूमपानविशेषे। भा.। क्ली। मधुनि। "गुड़ं मध्यं विभीतकान्।" च.चि.१८अ.। वा.उ.३७अ.। विरामे। चिका.।

मध्यगन्धः। पुं। आम्रवृक्षे। श.च.।

मध्यजम्बूः। स्त्री। मधुजम्बूवृक्षे।

मध्यदेशभवा। स्त्री। वक्राकशाली। শালিধান্যবিশেষ। रा.नि.व.१६।

मध्यन्दिनः। पुं। बन्धुजीवपुष्पवृक्षे। বান্ধুলিবৃক্ষ। रा.नि.व.१०। क्ली। मध्याह्ने।

मध्यपञ्चमूलकम्। क्ली। बलापुनर्नवैरण्डशालपर्णीपृश्निपर्णीषु। "बलापुनर्नवैरण्डैः सू(र्प)र्यपर्णीद्वयेन च। एकत्र योजितैनैतत् मध्यमं पञ्चमूलकम्॥" रा.नि.व.२२।

मध्यपाकः। पुं। तैलादीनां नातिमृदुखरपाकविशेषे। च.द.।

मध्यपुष्पः। पुं। जलवेतसे। मद.व.५।

मध्यमम्। क्ली। देहमध्यभागे। अम.।

मध्यमकदलम्। क्ली। अर्द्धपुष्टकदलीफले। गुणाः—ईषत्कटु मधुरं गुर्व्वग्निमान्द्यकरञ्च। वै.निघ.।

मध्यमनारायणतैलम्। क्ली। वातव्याध्यधिकारे तैलम्। पाठः—"विल्वाश्वगन्धाबृहतीश्वदंष्ट्राश्योणाकवाट्यालकपारिभद्रं। क्षुद्राकठिल्लातिबलाग्निमन्थं मूलानि चैषां सरणीयुतानां। मूलं विदध्यादथ पाटलीनां प्रस्थं सपादं विधिनोद्धृतानां। द्रोणैरपामष्टभिरेव पक्वा पादावशेषेण रसेन तेन। तैलाढ़कानां सममेव दुग्धमाजं निदध्यादथवापि गव्यं। एकत्र सम्यग्विपचेत् सुबुद्धिर्दद्याद्रसञ्चैव शतावरीणां। तैलेन तुल्यं पुनरेव तत्र रास्नाश्वगन्धामिषिदारुकुष्ठं। पर्णीचतुष्कागुरुकेसराणि सिन्धूत्थमांसीरजनीद्वयञ्च। शैलेयकं चन्दनपुष्कराणि एलायष्टीतगराब्दपत्रं। भृङ्गाष्टवर्गाम्बुवचापलाशं स्थौणेयवृश्चीरकचोरकाख्यं। एतैः समस्तैर्द्विपलप्रमाणैरालोड्य सर्व्वं विधिना विपक्वं। कर्पूरकाश्मीरमृगाण्डजानां चूर्णीकृतानां त्रिपलप्रमाणम्। प्रस्वेददौर्गन्ध्यनिवारणाय दद्यात् सुगन्धाय वदन्ति केचित्॥" भैष.। पुस्तकान्तरे महानारायणतैलमुक्तं। क्षुद्रा कण्टकारी। कठिल्ला पुनर्नवा। अतिबला श्वेतबला। सरणी भद्रबिलका। प्रत्येकमेषां सपादप्रस्थविंशतिपलानि। जलस्याष्टौ द्रोणाः (५१२ श.)। शे. १२८ श.। तैलस्याढ़कद्वयं (३२ श.)। मिषिः शतपुष्पा। भृङ्गं गुड़त्वक्। पलाशः शटी। वृश्चीरः श्वेतपुनर्नवा। स्थौणेयकं ग्रन्थिपर्णं। चोरकः चोरहुली। सिद्धे पूतीणे कर्पूरकुङ्कुमकस्तूरीणां प्र. १ प. चूर्णयित्वा प्रक्षेप्यम्। তিলতৈল ৩২ শ.। কাথার্থ—বেলছাল অশ্বগন্ধা, বৃহতী গোক্ষুর, শ্যোণা, শ্বেতবেলেড়া, পারিভদ্র, কণ্টিকারী, পুনর্নবা, গোরক্ষচাকুলি, গণিরি, গন্ধভাদুলিয়া, পারুল, ইহাদের মূল প্রত্যেকে ২০ প.। পাকার্থ—জল (৫১২ শ.) শে. ১২৮ শ.। ছাগদুগ্ধ বা গব্যদুগ্ধ ৩২ শ.। শতমূলীরস ৩২ শ.। কল্কার্থ—রাস্না, অশ্বগন্ধা, মউরী, দেবদারু, কুড়, মুগানী, মাষাণী, শালপাণি, চাকুলিয়া, অগুরু, নাগেশ্বর বা কুঙ্কুম, সৈন্ধব, জটামাংসী, হরিদ্রা, দারুহরিদ্রা, শৈলজ, রক্তচন্দন, পুষ্করমূল, এলা, মঞ্জিষ্ঠা, যষ্টিমধু, তগরপাদুকা, মুতা, তেজপত্র, গুড়ত্বক্, কাকোলী, ক্ষীরকাকোলী, মেদা, (অভাবে অশ্বগন্ধা) মহামেদা, (অভাবে অনন্তমূল) জীবক, ঋষভক (অভাবে গুলুঞ্চ ও বংশলোচন) ঋদ্ধি, বৃদ্ধি (অভাবে বেলেড়া ও গোরক্ষচাকুলিয়া) বালা, বচ, শটী, গেঁটেলা, শ্বেতপুন্যা, চোরহুলী, প্রত্যেকে ২প.। গন্ধদ্রব্য—কর্পূর, কুঙ্কুম, মৃগনাভি, প্রত্যেকে চূর্ণ ১ প. প্রক্ষেপ দিবে। रस.र.।

मध्यमनिष्पावा। स्त्री। एकोनविंशविधरणे। सु.चि.२१अ.।

मध्यमा (मिका)। स्त्री। क्षुद्रजम्बूवृक्षे। ছোট জামগাছ। र.मा.। दृष्टार्त्तवायां स्त्रियाम्। रा.नि.व.१८। श.र.। काकोल्याम्। कर्णिकायाम्। मे.। अङ्गुष्ठात्तृतीयाङ्गुली। रा.नि.व.१८।

मध्यमाग्निः। पुं। अकार्यमग्नितापविशेषे।

सुद्दिमेयकाष्ठचतुरंशेन योऽपि: तद्दिगुणेन क्वाथेन मध्यमाग्निरुच्यते । "ऊर्म्मीकृताभ्यां ताभ्यान्तु मध्यमाग्निः ।" धर्क.वि. ।

मध्ययव: । पुं । षट्श्वेतसर्षपपरिमाणे । शब्दकल्पद्रुम: । [फुलेर गाछ । र.मा. ।

मध्यवासिनी । स्त्री । धातकीवृक्षे । धाइ-

मध्यसत्त्व: । त्रि । पुरुषभेदे । "य: परानात्मनि उपनिधाय संस्तम्भयति आत्मनात्मानं, परैश्चापि संस्तभ्यते ।" च.वि.८अ. ।

मध्यस्थलम् । क्ली । कटिदेशे । उज्ज्वट: ।

मध्या । स्त्री । नाभौ । वै.निघ. । मध्यमाङ्गुलौ । हे.च. । [लक्षणसूचक: ।

मध्याह्न: । पुं । दिनमध्यभागे । अयत्र यौष

मध्वम्बु: । क्ली । मधुयुक्तजले । वा.चि.१अ. ।

मध्वरिष्टम् । क्ली । ग्रहण्यामरिष्टभेदे ।—"नवे पिप्पलिमध्वाक्ते कलसेऽगुरुधूपिते । मध्वाढकं जलसमं चूर्णानीमानि दापयेत् । कुडवार्द्धं विडङ्गानां पिप्पल्या: कुडवस्तथा । चतुर्थकांशान् त्वक्क्षीर्य्या: केशरं मरिचानि च । त्वगेलापत्रकशटीक्रमुकातिविषाशिफा: । हरेण्वनुकतेजोह्वापिप्पलीमूलचित्रकान् । कार्षिकांशान् स्थितं मासमत ऊर्द्धं प्रयोजयेत्……।" च.चि.१८अ. ।

मध्वल: । पुं । अतिपाने । मधुवारे । पुन: पुन: सुरापान परिपाटी । श.च. । [निघ. ।

मध्वाधार: । पुं । मधुक्रमे । मौचाक । वै.

मध्वालु(लू)कम् । क्ली । स्वनामख्यातकन्दशाके । मउ आलू । प.मु. । गुणा: –रक्तपित्तघ्नं गुरु स्वादु शीतलं स्तन्यशुक्रकरञ्च । राज. ।

मध्वावास: । पुं । आम्रवृक्षे । रा.नि.व.११ ।

मध्वासव: । पुं । धातकीपुष्पमधुसंहिते मधूकपुष्पासवे । आसवविशेष । "मध्वासव: स विज्ञेयो धातकीक्वाथमाचिकात् ।" वृद्धशौनक: । गुणा:—लघुर्मेदोघ्न: मेहकुष्ठविषघ्न: तिक्त: कषाय: शोफघ्न: तीक्ष्ण: स्वादु: अवातकृच्च । सु.सू.४५अ. । पुष्पमद्ये । चिका. । अन्य: प्रमेहाधिकारे—"लोध्रं शटीं पुष्करमूलमेलां मूर्व्वां विडङ्गं त्रिफलां यमानीं । चव्यं प्रियङ्गुं क्रमुकं विशालां किराततिक्तं कटुरोहिणीञ्च । भार्गीं नतं चित्रकपिप्पलीनां मूलं सकुष्ठातिविषं सपाठं । कलिङ्गकान् केशरमिन्द्रसाह्वान्नखं सपत्रं मरिचं प्लवञ्च । द्रोणेऽम्भस: कर्षसमानि पक्त्वा पूते चतुर्भागजलावशेषे । रसेऽर्द्धभागं मधुन: प्रदाय पक्षं विधेयो घृतभाजनस्थ: । मध्वासवोऽयं कफपित्तमेहान् क्षिप्रं निहन्यात् द्विपलप्रयोगात् ॥" च.चि.६अ. । अन्य: ग्रहण्यां । "द्रोणं मधूकपुष्पाणां विडङ्गानां ततोऽर्द्धत: । चित्रकस्य ततोऽर्द्धं स्यात्तथा भल्लातकाढकं । मञ्जिष्ठा त्रिपलं चैव त्रिद्रोणेऽपां विपाचयेत् । द्रोणशेषे तु तच्छीतं मध्वर्द्धाढकसंयुतम् । एलामृणालागुरुभिश्चन्दनेन च रूषिते । कुम्भे मासस्थितं जातमासवं तं प्रयोजयेत् ॥" च.चि.१८अ. ।

मध्विजा । स्त्री । मद्ये । हे.च. ।

मन: । पुं । जटामांस्यां । श.च. । क्ली (स्) । अन्त:करणे । "रजस्तमोऽतिनिकृष्टसत्त्वगुणबहुलात्मकं परमसूक्ष्मं वस्तु । तच्च सात्विकं राजसं तामसञ्चेति" त्रिधा । च.सू.१अ. । सात्त्विकादिगुणयुक्तं सात्विकं, क्रोधताड़नादियुक्तं राजसं, क्रोधान्धतादियुक्तं तामसमिति । भा. ।

मन:शि(सि)ल: (ला) । पुं,स्त्री । Realgar. स्वनामख्यातखनिजोपरसभेदे । मनछाल । सा च रसातवीर्य्याज्जाता । भा. । गुणा:—"मन:शिला गुरुर्वर्ल्या सरोष्णा लेखनी कटु: । तिक्ता स्निग्धा विषश्वासकासभूतकफास्रणुत् । मन:शिला मन्दबलं करोति जन्तुं ध्रुवं शोधनमन्तरेण । मलानुबन्धं किल मूत्ररोधं सशर्करं कृच्छ्रगदञ्च कुर्य्यात् ॥" भा.पू.१भ.धा.व. । "जयन्तिकाद्रवे दोलायन्त्रे पक्वा मन:शिला । दिनमेकं त्वजामूत्रे भृङ्गराजरसेऽपि वा । अगस्त्यपत्रतोयेन भाविता सप्तवासरम् । शृङ्गवेररसैर्वापि विशुध्यति मन:शिला ॥" इति शुद्धि: । सा.कौ. ।

मनसा । स्त्री । सर्पदुहितरि देव्याम् । "कन्या सा च भगवती कश्यपस्य च मानसी । तेनेयं मनसा देवी मनसा या च दीव्यति ॥" पुराणम् ।

मनस्तालम् । क्ली । हरिताले । र.मा. ।

मनस्वी (इन्) । पुं । महासिंहे । शरभे । रा.नि.व.१९ ।

मनका । स्त्री । हस्तिन्यां । उणा. ।

मनुः । स्त्री । स्पृक्कायां । रा.नि.व.१२ ।

मनुजः (भूः) (थः) । पुं । मानुषे । अम. ।

मनोगुप्ता । स्त्री । मनःशिलायां । प.मु. ।

मनोजवा । स्त्री । अग्निजिह्वावृक्षे । जटा. ।

मनोजवृद्धिः । पुं। कामवृद्धिक्षुपे। रा.नि.व.४।

मनोज्ञम् । क्ली । सरलकाष्ठे । সরলকাঠ । र.मा.। प.मु. । पुं । कुन्दपुष्पवृक्षे । रा.नि.व.१० ।

मनोज्ञा । स्त्री । मनःशिलायां । र.मा. । आवर्त्तकीलतायां । रा.नि.व.३ । स्थूलजीरके । रा.नि.व.६ । जातीपुष्पक्षुपे । रा.नि.व.१० । मद्ये । रा.नि.व.१४ । बन्ध्याकर्कोटक्यां । रा.नि.व.७ ।

मनोरमः । पुं । कुन्दवृक्षे । मुचुकुन्दवृक्षे । हंसपादीलतायाम् । क्ली । रक्तपद्मे । वै.निघ. ।

मनोरमा । स्त्री । गोरोचनायां । रा.नि.व.१२ । रक्तयूथिकायाम् । शङ्खपुष्प्याम् । वै.निघ. ।

मनोविभ्रमः । पुं । चित्तविभ्रमे । निदा. ।

मनोहरः । पुं । कुन्दपुष्पक्षुपे । কুন্দ গাছ । रा.नि.व.१० । क्ली । सुवर्णे । रा.नि.व.१३ । रक्तकाञ्चने । कुन्दपुष्पे । वै.निघ. ।

मनोहरा । स्त्री । स्वर्णयूथिकायां । रा.नि.व.१० । जातीकुसुमवृक्षे । रा.नि.व.१० ।

मनोह्वा । स्त्री । मनःशिलायां । च.द.सि.यो.अप.चि. । "मनोह्वातार्क्ष्यजञ्चैव ।"

मन्त्रजिह्वः । पुं । अग्नौ । हे.च. ।

मन्थः । पुं । अग्निमन्थवृक्षे । र.मा. । द्रवेणालोड़ितसक्तौ । পেয়াবিশেষ । सि.यो.मदा.चि. । "मन्थः खर्जूरमृद्वीका ।" शीतवारिगोलितघृताभ्यक्ताः नातिस्वच्छा नातिसान्द्राः सक्तवो मन्थः । "सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः । नात्यच्छो नातिसान्द्रश्च मन्थः······ ।" रा.नि.व.२२ । गुणाः—"मन्थः सद्योबलकरः पिपासाश्रमनाशनः ।" राज.३प. । फाण्टभेदे । चतुष्पलमिते तोये क्षुण्णद्रव्यं पलमितं क्षिप्त्वा मृत्पात्रे मन्थयेत् । "जले चतुष्पले शीते क्षुण्णं द्रव्यपलं क्षिपेत् । मृत्पात्रे मन्थयेत्सम्यक् तस्माच्च द्विपलं पिबेत् । मधुश्वेतागुड़ादीनि फाण्टवन्निःक्षिपेद्बुधः ॥" भा.। शार्ङ्ग.म.३अ.। मन्थो बहुविधः—घृतसक्तुदाड़िमगुड़कृत इत्येकः । घृतशक्तुजलकृत इति द्वितीयः । द्राक्षाशर्करेक्षुरसकृतश्चेति तृतीयः । मन्थनदण्डे । कम्पने । मर्दने । त्रिका.। नेत्रमले । धरणि.। नेत्ररोगे । विश्व.। कुम्थने । व्याक. ।

मन्थजम् । क्ली । नवनीते । र.मा. ।

मन्थनः । पुं । मन्थनदण्डे । श.र. । अग्निमन्थवृक्षे । क्ली । कुम्थने । विलोड़ने । व्याक. ।

मन्थनोद्भवम् । क्ली । नवनीते । वै.निघ. ।

मन्थरः । पुं । वैशाखमासे । हरिणे । क्ली । नवनीते । वै.निघ. । कुसुम्भे । मे. । फले । त्रि । जड़े । श.र. ।

मन्थरज्वरः । पुं। ज्वरविशेषे । हिं मतीज्वर । लक्षणं यथा —"ज्वरो दाहो भ्रमो मोहो ह्यतीसारो वमिस्तृषा । अनिद्रा मुखशोषश्च तालुजिह्वे च शुष्यति ग्रीवायां परिदृश्यन्ते स्फोटकाः सर्षपोपमाः । घृताशनात् खेदरोधात् मन्थरो जायते नृणाम् ॥" योगरत्नाकरः ।

मन्थराधिः । पुं । मध्यकाये । च.शा.७अ. ।

मन्थरुः । पुं । चामरवायौ । त्रिका. ।

मन्थसारः । पुं । नवनीते । वै.निघ. ।

मन्था । स्त्री । मेथिकायां । रा.नि.व.६ ।

मन्थानः । पुं, क्ली । स्थूलारग्वधवृक्षे । বড় শোণালু । रा.नि.व.६ । मन्थनदण्डे । त्रिका. । च.सू.१५अ. ।

मन्थानकः । पुं । शस्यविशेषे । ঘাসবিশেষ । मं मारवेलि । कं मारवल्ली । गुणाः—स्निग्धः धेनुप्रियः दुग्धकरः मधुरः बहुवीर्य्यश्च । रा.नि.व.८।

मन्थानभैरवः । पुं । अम्लपित्ते रसः । पाठः —"मृतं सूतं मृतं ताम्रं हिङ्गुपुष्करमूलकं । सैन्धवं गन्धकं तालं कटुकीं चूर्णयेत्समं । पुनर्नवादेवदारुनिर्गुण्डीतण्डुलीयकैः । तिक्ताकोशातकीद्रावैर्दिनैकं मर्दयेद्दृढं । माषमात्रं लिहेत् क्षौद्रैः रसो मन्थानभैरवः ॥" अनु. निम्बक्वाथः । रस.चि.८अ.।

मन्थ्रः । पुं । सक्तौ । ছাতু । वै.निघ. ।

मन्दः । पुं । रोगिणि । रा.नि.व.२०।

मन्दगन्धः । पुं । सप्तपर्णवृक्षे । स्त्री । मद्ये । वै.निघ. ।

मन्दगमना । स्त्री । महिषस्त्रियाम् । वै.निघ. ।

मन्दजः । त्रि । मन्दजाते । च.सू.१८च. ।

मन्दटः । पुं । पारिभद्रवृक्षे । श.र । निम्बवृक्षे । वै.निघ. ।

मन्दता । स्त्री । आलस्ये । रा.नि.व.२० ।

मन्दरः । पुं । मन्दारवृक्षे । मे. । तन्नामकलूता दिकीटविषन्नागदविशेषे । "अपामार्गमनोह्वालदार्व्योष्यामकगैरिकैः । नतैलाकुष्ठमरिचयष्ट्याह्वघृतमाचिकैः ॥" वा.उ ३७श. ।

मन्दरोत्थम् । क्ली । शिलाजतुनि । वै.निघ. ।

मन्दसानः । पुं । प्राणे । निद्रायाम् । उणा. ।

मन्दसानुः । पुं । स्वप्ने । उणा. ।

मन्दा । स्त्री । वल्लीकरञ्जे । लताकरञ्ज । वै.निघ. ।

मन्दाग्निः । पुं । अग्निमान्द्यरोगे । See अग्निमान्द्यम् । मुष्टिमेयकाष्ठचतुरंशकृते अर्कार्थमग्निविशेषे । "चतुरंशेन तेनैव मन्दाग्निः परिकीर्त्तितः ।" अर्क.चि. ।

मन्दारः । पुं । पारिभद्रवृक्षे । रा.नि.व.८ । श्वेतार्के राजार्कवृक्षे । श्वेत आकन्द । प.मु. । रा.नि.व.१० । निम्बवृक्षे । हस्तिनि । मे. ।

मन्दारफलिका । स्त्री । काकोदुम्बरिकायां । काकडुमुर । वै.निघ. । [चि.१९श. ।

मन्दारी । स्त्री । रक्तार्के । लाल आकन्द । सु.

मन्दारुः । पुं । धातकीपुष्पवृक्षे । वै.निघ. ।

मन्दालकम् । क्ली । खटिकायाम् । थड़ी । वै.निघ. ।

मन्दिकुकुरः । पुं । मत्स्यविशेषे । वै.निघ. ।

मन्दिरः । पुं । जानुपश्चाद्भागे । हे.च. ।

मन्दिरपशुः । पुं । विड़ाले । श.च. । [र । मे. ।

मन्दि(न्दु)रा । स्त्री । शय्यासनविशेषे । माङ्-

मन्दोष्णः । त्रि । ईषदुष्णे । अम. ।

मन्द्रपुष्पः । पुं । जपावृक्षे । वै.निघ. ।

मन्मथः । पुं । कपित्थवृक्षे । प.मु । आम्रवृक्षे । वै.निघ. । आम्रातकवृक्षे । चि.क्र.क. । शय्याम् । वै.निघ. ।

मन्मथशठी । स्त्री । कर्पूरशट्याम् । वै.निघ. ।

मन्मथानन्दः । पुं । महाराजचूते, बहुरसालाम्रवृक्षे । रा.नि.व.११ ।

मन्मथालयः । पुं । आम्रवृक्षे । रा.नि.व.११ ।

मन्मथावासः । पुं । महाराजाम्रे । रा.नि.व.११ ।

मन्मनः । पुं । गद्गदध्वनौ । त्रिका. ।

मन्या (का) । स्त्री । ग्रीवापश्चाच्छिरायाम् । घाड़ेर शिर । रा.नि.व.१८। च.द.ज्व.चि.कवलधारणे । । "मन्यापार्श्वशिरोगलात् ।"

मन्याचाली । पुं । अश्वस्य वातव्याधौ । तस्य लक्षणम् स्तब्धायां ग्रीवायां स्फुरणम् । ज.द.५५ ।

मन्यास्तम्भः । पुं । तन्नामकवातव्याधौ । "दिवास्वप्नाशनस्नानविकृतोर्द्धनिरीक्षणैः । मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणायुतः ॥" इति निदानम् । "दशमूलीकृतं क्वाथं पञ्चमूल्यापि कल्पितं । रूक्षस्वेदं तथा नस्यं मन्यास्तम्भे प्रयोजयेत् ॥" इति चिकित्सा । अश्वस्यापि वातव्याधौ । लक्षणम् "नमत्युन्नमति ग्रीवा स्तब्धा च यस्य वाजिनः । मन्यास्तम्भं विजानीयाद्रोगं तस्य सुदारुणम् ॥" ज.द.५५श. ।

मन्युः । पुं । शोके । अम. । अहङ्कारे । श.र. ।

मन्युमणी । स्त्री । भेकपर्ण्यां । थूलकुड़ि । भैष. विद्याधराभ्रे । "शिलातले मन्युमणीदलस्य ।"

मन्वाद्यम् । क्ली । धान्ये । वै.निघ. ।

मप(पु)ष्टः (कः) । पुं । वनमुद्गे । मुगानी । अ.टी.भ. ।

मयः । पुं । उष्ट्रे । त्रिका. । अश्वतरे । मे. । स्त्री । उष्ट्राम् । चिकित्सायाम् । श.च. ।

मयटः । पुं । पर्णकुटीरे । हारा. । [क्लिष्टे ।

मयनः । मदनवृक्षे । रा.नि.व.८ । क्ली । मधू-

मय(यु)ष्टकः । पुं । वनमुद्गे । मुगानी । अ.टी.भ. ।

मयुः । पुं । अश्वे । त्रिका. । मृगे । मे. ।

मयूरः । पुं । अपामार्गवृक्षे । मे. । अजमोदा-

याम् । ताकूनी । भा. । सु.चि.२३अ. । रुद्रजटायाम् । अम. । सारसपक्षिणि । चटकपक्षिणि । फज्ञोवन्वे । वै.निघ.। स्थलचरपक्षिविशेषे । मयूर । गुणाः—"सुस्निग्धः श्लेष्मलो हृष्यो घनः शुक्रविवर्द्धनः । मांसवृद्धिकरो बल्यो द्वितीयश्च मयूरकः॥" अत्रिः २१अ. । तन्मांसभक्षणकालः—"हेमन्तकाले शिशिरे वसन्ते सेव्यं हि मायूरमुशन्ति मांसम् । उष्णो हि वह्नीं विषभोजनाच्च वर्षाशरद्ग्रीष्मसुखेऽपथ्यः ।" राज.३प. । तस्याङ्गगुणः—"रेतःक्षीणेषु कालेषु वृद्धरोगेषु चैतेषु च । मधुराण्यविपाकीनि सद्योबलकराणि च ॥" च.सू.२७अ. ।

मयूरकः । पुं । अपामार्गक्षुपे । आपाङ् । प.मु.। रा.नि.व.४ । च.द.अ.पि.चि. । सु.सू ३७अ. अर्कादिः, "चव्यचित्रकमयूरकवर्षाभूसिद्धम् ।" सु.चि.२३अ.। तुत्थके । तूँते । विश्व. । अजमोदायां । मद.२व.। भैष.स्त्रीरो.चि.। मयूरे । विश्वः । See मयूरः । मयूरशिखायाम् । जटा.। क्ली। तुत्थाञ्जने । तूँते । अम. । गन्धके । च.द.शूल.चि.राममण्डूरे । विषभेदे । प.मु. ।

मयूरका । स्त्री । अम्बष्ठायाम् । वै.निघ. ।

मयूरग्रीवकम् । क्ली । तुत्थे । तूँते । रा.नि.व.१३ ।

मयूरचटकः । पुं । कुक्कुटे । हारा. ।

मयूरचूडम् । क्ली । स्थौणेयकनामगन्धद्रव्ये । गेँटेला । रा.नि.व.१२ ।

मयूरचूडा । स्त्री । मयूरशिखायाम् । वै.निघ.।

मयूरजङ्घः । पुं । श्योणाकवृक्षे । श्योणागाछ। रा.नि.व.९ । [नायाम् । परिभाषा ।

मयूरटभावना । स्त्री । पलचतुष्टयेन भाव-

मयूरतुत्थम् । क्ली । तुत्थके । रा.नि.व.१३।

मयूरपुच्छम् । क्ली । चन्द्रके । पुच्छेर चाँद । भा.म.१भ.सततादि.ज्व.चि.,माहेश्वरधूपे। "घृतयवमयूरपुच्छ···।

मयूरविदला । स्त्री । अम्बष्ठायाम् । वै.निघ.।

मयूर(वि)शिखा । स्त्री । स्वनामख्यातक्षुपे । मं मयूरशिखा । कं हौरेयसूसुव । तें मयूरशिखियने क्षुपविशेषमु । गुणाः – स्वादुरसा मूत्रकृच्छ्रघ्नी बालग्रहनाशिनी वशीकरणी च । रा.नि.व.५ ।

मयूरा । स्त्री । कृष्णतुलस्याम् । अजमोदायाम् । वै.निघ. । [काल । रा.नि.व.२१ ।

मयूरालासकः । पुं । प्रावृट्काले । वर्षा-

मयूराक्षेपियन्त्रम् । क्ली । सुगन्धगीतनयन्त्रविशेषे । ভাটী । भैष.मृतसञ्जीवनीसुरा. ।

मयूरिका । स्त्री । अम्बष्ठायां । रा.नि.व.४ । तन्नामकवायव्यकीटे । सु.कल्प.८अ.। See कीटः। अजमोदायाम् । वै.निघ. । [वै.निघ. ।

मयूरी । स्त्री । अजमोदायाम् । मयूरस्त्रियाम् ।

मरः । पुं । विषे । মিঠা । वै.निघ. ।

मरकः । पुं । महामारीरोगे । মড়ক । है.च.।

मरकतम् । क्ली । पञ्चविधमहारत्नान्यतमे रत्ने । हरिन्मणिविशेषे । प.मु.। गुणाः—विषघ्नं शीतलं मधुरं आमपित्तहरं रुच्यं पुष्टिकरं भूतघ्नञ्च । रा.नि.व.१३ । [नि.व.१० ।

मरकतपत्री । स्त्री । पाचीनामपत्रशाके । रा.

मरक्तम् । क्ली । मरकतमणौ । श.र. ।

मरटः पुं । खदिरविशेषे । वै.निघ. ।

मरणम् । क्ली । वत्सनाभविषे । रा.नि.व.६ । मृत्यौ । श.र. । [श.र. ।

मरन्दः (कः) । पुं । पुष्पमधुनि । पुष्परेणौ ।

मराकाली । स्त्री। वृश्चिकालीक्षुपे । বিছাতি। र.मा. ।

मरारः । पुं। शस्यरक्षणस्थाने । মরাই। जटा.।

मरालः (कः) । पुं । राजहंसे । हंसे । रा.नि.व.१९। घोटके । कारण्डवपक्षिणि । कज्जले। शब्दकल्पे सारस्वतः । त्रि । मसृणे । त्रिका. । स्त्री । हंस्याम् । [শেষ । वै.निघ. ।

मरालिका । स्त्री । सरलायाम् । মনসা বি-

मरि(री)चम् । क्ली । (Piper nigrum.) Black pepper. स्वनामख्यातवणिग्द्रव्ये. গোলমরিচ । हिं मिरी, कालामरिच । तें मिरियलु। ता. मिलगु । मं मरिच । कं मेणसु । गुणाः—छेदनं श्लेष्मकफादिदोषोन्मूलनं प्रमाथि उष्णं पित्तकरं रुच्यं श्वासशूलकृमिहरञ्च । आर्द्रं तत्पाके मधुरं नात्युष्णं गुरु कटु किञ्चित्तीक्ष्णगुणं श्लेष-

प्रतीकि चपिनलच। भा.। "मरिचं कटु तिक्तोष्णं लघुश्लेष्मविनाशनं। समीरकृमिहृद्रोगहरञ्च रुचिकारकम्। कटूष्णं श्वेतमरिचं विषघ्नं भूतनाशनम्। चक्षुष्यं हृष्टिरोगघ्नं युक्त्या चैव रसायनम्।" रा.नि.व.६। "कटूष्णं लघु तत्तुष्णमचक्षुष्यं कफवातजित्। नात्युष्णं नातिशीतञ्च वीर्य्यतो मरिचं सितम्। गुणवन्मरिचेभ्यश्च चक्षुष्यञ्च विशेषतः।" सु.सू.४६अ.। कक्कोलि रा.नि.व.१२। वा.सू. वत्सकादिव.। कतकफले। कुमरिचे। लङ्कामरिच। वै.निघ.। [कुडूनसी। रा.नि.व.१०।

मरि(री)च (कः) । पुं। मरुवकवृक्षे। ग-

मरि(री)चपत्रकः । पुं। देवदारुवृक्षे। सरलवृक्षे। रा.नि.व.१२।

मरिचसहृशः । पुं। कक्कोलवृक्षे। वै.निघ.।

मरिचाद्यतैलम् । क्ली। कुष्ठाधिकारे तैलम्। "मरिचालशिलाब्दार्कपयोऽश्वारिजटाचिवृत्। शकृद्रसविशालाहृङ्गिशायुग्दारुचन्दनैः। कटुतैलात् पचेत् प्रस्थं द्व्यक्षैर्विषपलान्वितैः। सगोमूत्रैस्तदभ्यङ्गात् दद्रुश्वत्रविनाशनम्। सर्व्वेष्वपि च कुष्ठेषु तैलमेतत्प्रशस्यते॥" कटुतैलं ४ श.। कल्कार्थं— मरिचं हरितालं मनःशिला मुस्ता अर्कदुग्धं करवीरमूलं त्रिवृन्मूलं गोमयरसः इन्द्रवारुणीमूलं कुष्ठं हरिद्राद्वयं देवदारु रक्तचन्दनं प्र. ४ तो. विषं ८ तो. गोमूत्रं १६ श.। সরিষার তৈল ৪ শ.। কল্ক—মরিচ, হরিতাল, মনছাল, মুতা, আকন্দের আঠা, করবীর মূল, তেউড়ীমূল, গোময়রস, রাখালশশার মূল, কুড়, হরিদ্রা, দারুহরিদ্রা, দেবদারু, রক্তচন্দন. প্রত্যেকে ৪ তো. বিষ ৮ তো. গোমূত্র ১৬ শ.। बृहत् यथा—"मरिचं त्रिवृता दन्ती चीरमार्कं शकृद्रसः। देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनं। विशालाकरवीरञ्च हरितालं मनःशिला। चित्रकी लाङ्गलाख्या च विड़ङ्गं चक्रमर्द्दकं। शिरीषं कुटजो निम्बः सप्तपर्णः स्नुहामृता। शम्पाको नक्तमालोऽब्दी खदिरं पिप्पली वचा। ज्योतिष्मती च पलिका विषस्य द्विपलं भवेत्। आढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणं। मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत्। पक्वा तैलवरं ह्येतन्म्रक्षयेत् कुष्ठकान् व्रणान्॥" কটুতৈল ১৬ শ.। কল্কার্থ— মরিচ, তেউড়ীমূল, দন্তীমূল, আকন্দের আঠা, গোময়রস, দেবদারু, হরিদ্রা, দারুহরিদ্রা, জটামাংসী, কুড়, রক্তচন্দন, রাখালশশার মূল, শ্বেতকরবীর মূল. হরিতাল, মনছাল, চিতার মূল, বিষলাঙ্গুলিয়ার মূল, বিড়ঙ্গ, চাকন্দার বীজ, শিরীষছাল, কুড়চির ছাল. নিমছাল. ছাতিমছাল, মনসার আঠা, গুলঞ্চ. সোন্দালপাতা, ডহরকরঞ্জাবীজ, মুতা, খদির, পিপুল, বচ, লতাফট্কী প্রত্যেকে ১ প. বিষ ২ প. গোমূত্র ৬৪ শ.। भैष.। [লাগা। अम.।

मरीचिका । स्त्री। मृगतृष्णिकायाम्। ঝোলা

मरीचिः (ची) । पुं, स्त्री। षड्ध्वंसिकात्मके माने। 'षड्ध्वंसीभिर्मरीची स्यात्।' प.प.। तालीशपत्रे। श्वेतमरुवके। वै.निघ.।

मरुः । पुं। अनुर्व्वरभूमौ। रा.नि.व.२। निर्ज्जलभूमौ। अम.। मरुवकवृक्षे। भा.। च.द.महासुगन्धतैले।

मरुजः । पुं। विट्खदिरे। रा.नि.व.८। नखीनामगन्धद्रव्ये। श.च.। स्त्री। कर्कटीर्व्वारौ। रा.नि.व.७। त्रि। मरुजाते। [नाकुली। वै.निघ.।

मरुजाता । स्त्री। कपिकच्छूलतायाम्। आ-

मरुटा (ण्डा) । स्त्री। उच्चललाटस्त्रियां। श.र.। हारा.।

मरुतः । पुं। घण्टापाटलायाम्। श.च.।

मरुत् । पुं। वायौ। रा.नि.व.२१। मरुवकवृक्षे। भा.। क्ली। ग्रन्थिपर्णे। গেঁটেলা। मे.। स्त्री। पृक्कायाम्। श.र.।

मरुत्करः । पुं। राजमाषे। बर्ब्बटी। श.च.।

मरुत्कारः (क्रिया) । पुं, स्त्री। अपानवायौ। शब्दकल्पद्रुमे।

मरुत्तकः । पुं। श्वेतमरुवकवृक्षे। भा.म.१भ. चित्तविभ्रम.ज्व.चि.। देवदारुवृक्षे।

मरुत्पुत्री । स्त्री। वननिर्गुण्ड्याम्। वै.निघ.।

मरुत्प्रियः । पुं। उष्ट्रे। हे.च.।

मरुत्प्लवः । पुं। सिंहे। त्रिका.। [व.१२

मरुद्दिष्टः (देश्यः) । पुं। गुग्गुलौ। रा.नि.

मरुदूर्व्वा । स्त्री । कार्पास्यां । रा.नि.व.४ ।

मरुद्भवः । पुं । वनकार्पासे । शुकशिम्ब्याम् । कृष्णखदिरे । इन्द्रवारुण्याम् । রাখালশশা । वै. निघ. । [र.मा. ।

मरुद्भ(भ)वा । स्त्री । चीरिकायां । খিরাই ।

मरुद्रथः । पुं । अश्वे । त्रिका. ।

मरुद्रुमः । पुं । विट्खदिरे । र.मा. ।

मरुद्विपः । पुं । उष्ट्रे । त्रिका. । [अम. ।

मरुन्माला । स्त्री । स्पृक्कायां । পিড়িংশাক ।

मरुपुष्पी । स्त्री । हेमपुष्प्यां । र.मा. ।

मरुप्रियः । पुं । उष्ट्रे । हे.च. । [नि.व.२ ।

मरुभूः (भूमिः) । स्त्री । निर्ज्जलदेशे । रा.

मरुभूरुहः । पुं । करीरवृक्षे । भा. ।

मरुलः । पुं । हंसविशेषे । পাতি হাঁস । कारण्डवे । हे.च. ।

मरुवः (कः) पुं । स्वनामख्याततुलसीजातीयसुगन्धक्षुपे । मरुवा इति भाषा । মরুয়াফুলের গাছ । গন্ধতুলসী । मरुवो द्विभेदः श्वेतकृष्णभेदेन । तयोः श्वेतो भेषजकार्य्ये कृष्णश्च शिवपूजायां प्रयुज्यते । गुणाः—कटुः तिक्त उष्णः कृमिकुष्ठघ्नः विड्बन्धाध्मानशूलघ्नः अग्निमान्द्यत्वग्दोषघ्नश्च । रा.नि.व.१० । "मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः । वृश्चिकादिविषश्लेष्मवातकुष्ठकृमिप्रणुत् । कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः ॥" भा. । मदनवृक्षे । ময়না গাছ । र.मा. । जम्बीरभेदे । अ.टी.भ. । नागदमनीक्षुपे । নাগদনা । र.मा. । व्याघ्रे । जटा. । [के । रा.नि.व.७ ।

मरुसम्भवम् । क्ली । स्थूलमूलके. चाणक्यमूल

मरुसम्भवा । स्त्री । महेन्द्रवारुण्यां । মাকাল-ফল । रा.नि.व.३ । क्षुद्रदुरालभायां । रा.नि.व.४ । कृष्णखदिरे । कार्पासे । रा.नि.व.२३ ।

मरुस्था । स्त्री । महेन्द्रवारुण्यां । মাকাল গাছ । क्षुद्रदुरालभायां । रा.नि.व.३।४ । [उणा. ।

मरूकः । पुं । हरिणभेदे । मयूरे । शय्यां ।

मरूद्भवा । स्त्री । दुरालभाविशेषे । प.मु. । कार्पास्यां । क्षुद्रखदिरे । रा.नि.व.४।८ । पुं । यवासे । দুরালভা । रा.नि.व.४ । [श.र. ।

मरीलिः (कः) । पुं । मकरमत्स्ये । त्रिका. ।

मर्कः । पुं । शरीरे । उणा. । मर्कटे । श.र. ।

मर्ककः । पुं । ऊर्णनाभौ । মাকড়শা । वै. निघ. । गलगण्डपक्षिणि । হাঁড়গিলে । श.र. ।

मर्कटः (कः) । पुं । वानरे । प.मु. । मे. । अजमोदायाम् । রাঙ্কুনী । मद.व.२ । विषभेदे । हे.च. । मर्कटहस्ततृणे । माकरा इति लोके । মাকড়শাত ঘাস । सु.चि.१अ. । गलगण्डपक्षिणि । হাড়গিলে । ऊर्णनाभौ । त्रिका. । (कः) शस्यविशेषे । मे. । मत्स्यभेदे । श.र. ।

मर्कटतिन्दुकः । पुं । कारस्करवृक्षे, कुपीलौ । কুঁচিলা গাছ । भा. । [व.४ ।

मर्कटपिप्पली । स्त्री । अपामार्गे । रा.नि.

मर्कटप्रियः । पुं । A kind of Mimosa. क्षीरवृक्षे । श.मा. ।

मर्कटवासः । पुं । ऊर्णनाभिजाले । মাকড়শার জাল । श.र. ।

मर्कटशीर्षम् । क्ली । हिङ्गुले । र.मा. ।

मर्कटाख्यम् । क्ली । कपिकच्छूबीजे । আলাকুশীর বীজ । वै.निघ.१भ.चय.चि.गुडूच्यादिमोदके ।

मर्कटाम्रः । पुं । राजाम्रे । আমড়া । भा. ।

मर्कटास्यम् । क्ली । ताम्रे । हे.च. ।

मर्कटिकाफलम् । क्ली । कपिकच्छूफले । আলাকুশীর বীজ । योग.र.उ.केशरपाके ।

मर्कटी । स्त्री । अपामार्गक्षुपे । শ্বেত আপাঙ্ । रा.नि.व.३ । अजमोदायां । বনযওয়ান । रा.नि.व.६ । मर्कटकरञ्जे । মাকড়াকরঞ্জ । अ.टी.भ. । कपिकच्छ्वां । रा.नि.व.३ । र.सा.सं.भीमरुद्ररसे । सि.यो.उन्मा.चि.महापैशाचघृते । "चारटी मर्कटी वचा ।" वा.उ.६अ.महापैशाचघृते । [च. ।

मर्कटेन्दुः । पुं । काकतिन्दुके । কুঁচিলা । श.

मर्करः । पुं । भृङ्गराजे । श.र. । स्त्री (री) । निष्फलस्त्रियाम् । विश्व. । [कला ।

मर्त्यकदली । स्त्री । कदलीविशेषे । মর্ত্তমান

मर्त्येन्द्रमाता । स्त्री । चपिदमनीक्षुपे । रा. नि.व.४ ।

मर्द्दकः । पुं । कासमर्द्दे । चक्रमर्द्दे । वै.निघ. ।

मर्द्दनम् । क्ली । पेषणे । पारदस्य संस्कारविशेषे। See पारदः । गात्रमर्द्दने । गा टेपा । गुणाः— श्रमहरं निद्राकरं शुक्रकरं रक्तमांसत्वक्प्रसादकरं वातकफघ्नञ्च । राज. ।

मर्द्दनकम् । क्ली । तैले । वै.निघ. । [भा.नि. ।

मर्म्मच्छेदः । पुं । मर्म्मव्यथायां । हृदयभेदने ।

मर्म्मधाम । क्ली । मर्म्मस्थाने । भा.म.४भ.। मसूरि.चि. ।

मर्म्मरी । स्त्री । दारुहरिद्रायाम् । मे. । सरलकाष्ठे । वै.निघ.। कर्णस्थशिराविशेषे । वा.उ.१७.।

मर्म्मव्रणः । पुं । नाड़ीव्रणे । रा.नि.व.२० ।

मर्म्मसंरोधः । पुं । मर्म्मव्यथायाम् । भा.म. ४भ.विस्फोट.चि. ।

मर्म्मस्थानम् । क्ली । जीवस्थाने । यत्राघातेन प्राणसंशयो भवेत् । तानि च स्थानानि शरीरे बहूनि—"जीवस्थानन्तु मर्म्म स्याज्जीवागारं तदुच्यते । मर्म्मस्थानन्तु चोक्तं स्यात् भूमध्यादिष्वनेकधा । भूमध्यकण्ठगलशङ्खकटीकपृष्ठग्रीवागुदाण्डपदपाणियुगांसमस्थीन् । वैद्याः शरीरगणितानि वदन्ति मर्म्मस्थानानि चाङ्गगतिनाशकराणि···।" रा.नि.व.१८ । एवञ्च सप्तोत्तरं मर्म्मशतमुक्तम् । तेषामेकादश मांसे, अस्थिषु ८, सन्धिषु २०, स्नायुषु २७, शिरासु च ४१, इति । तत्र सक्थियुगले २२, भुजद्वये २२, उरसि १२, कुक्षौ १२, पृष्ठे १४, ग्रीवोर्द्धभागे ३७। तानि च मर्म्माणि पञ्चधा भवन्ति । तेषु सद्यःप्राणहराणि १९, कालान्तरप्राणहराणि ३३, विशल्यानि ३, कैवल्यजनकानि ४४, पीड़ाकरमर्म्माणि च ८ भवन्ति। सद्यःप्राणहराणि शृङ्गाटकाधिपतिशङ्ख-कण्ठ-शिरा-गुह्य-हृदयवस्तिनाभयो भवन्ति। एषां स्थानानि पर्य्यायेषु द्रष्टव्याणि । कालान्तरप्राणहराणि – वक्षो-मर्म्म-सीमन्त-तल-चिप्रेन्द्रवस्ति-वृहती-पार्श्वसन्धि-कटीकतरुणनितम्बद्वयानि । एषां स्थानानि पर्य्यायेषु द्रष्टव्याणि । कैवल्यकरमर्म्माणि—लोहिताचाणि जानूर्व्वीकूर्चविटपकूर्परकुन्दरयुगल-कक्षधरद्वयविधुरद्वय-कृकाटिकाद्वयांशांसफलकापाङ्ग-नीलद्वयमन्याद्वयफणद्वयावर्त्तद्वयानि । रुजाकराणि – गुल्फद्वयमणिबन्धद्वयकूर्चशिरांसि भवन्ति । विशल्याणि च – उत्क्षेपौ स्थापनी चेति त्रीणि भवन्ति । भा. ।

मर्म्मिकः । त्रि । मर्म्मविदि । जटा. ।

मर्य्यादा । स्त्री । सीमायां । भा.ज्व.नि. ।

मलम् । क्ली । विष्ठायाम् । रा.नि.व.१८ । मयला, मैलि इति च लोके । भा.म.४भ. । तच्चाहारकिट्टभागः । तदाधारश्च पक्वाशयः । "तत्किट्टञ्च मलं ज्ञेयं तिष्ठेत् पक्वाशये च तत् । बलित्रितयमार्गेण यात्यपानेन नोदितम् ।" शार्ङ्ग.६अ. । कर्पूरे । श.च. । समुद्रफेने । नखे । वै.निघ. । वातादौ । मूत्रे । स्वेदे । माधवः ।

मलघ्नः । पुं । शाल्मलीकन्दे । रा.नि.व.७ । स्त्री (घ्नी) । नागदमन्याम् । रा.नि.व.५ । कटुक्याम् । वै.निघ. ।

मलङ्गी । स्त्री । मत्स्यभेदे । মৌরলা। गुणाः—"मलङ्गी मधुरा हृद्या वातघ्नी श्लेष्मला गुरुः ।" राज.३प. ।

मलजम् । क्ली । पूये । श.च. ।

मलद्रावी (इन्) । पुं । जैपालवृक्षे । জয়পাল গাছ । वै.निघ. ।

मलधातुः । पुं । शरीराबाधकरभावेषु । तद्यथा—"शरीरच्छिद्रेषु उपदेहाः पृथग्जन्मानो वहिर्मुखाः परिपक्वाश्च धातवः, प्रकुपिताश्च वातपित्तश्लेष्माणः, ये चान्येऽपि केचित् शरीरे तिष्ठन्ति भावाः शरीरस्योपघातायोपपद्यन्ते······ ।" च. शा.६अ. ।

मलपाकः । पुं । दोषपाके, वातादीनां पाकावस्थायां पूर्णावस्थायां वा । तल्लक्षणं—"दोषप्रकृतिवैकृत्यं लघुता ज्वरदेहयोः । इन्द्रियाणाञ्च वैमल्यं दोषाणां पाकलक्षणम् ॥" वैद्यकम् ।

मलपूः (यूः) । स्त्री । काकोदुम्बरिकायां । কাকডুমুর । रा.नि.व.११ । मद.व.५ । भैष. । च.द.भग.चि. । (यूः) वाकुच्याम् । সোমরাজ । वै.निघ. ।

मलभुक् । पुं । काके । श.र. ।

मलभिद्(त्) । क्ली । रौप्ये । स्त्री । कटुकायाम् । कट्की । रा.नि.व.६ ।

मलयः । पुं । शाल्मलीकन्दे । रा.नि.व.७ ।

मलयजम् । क्ली, पुं । चन्दनसामान्ये । वै.निघ. २भ.तृष्णा.चि. । रक्तचन्दने । श्रीखण्डचन्दने । रा.नि.व.१२ ।

मलयतपना । स्त्री । भल्लातकवृचे । वै.निघ.।

मलयद्रुमः । पुं। मदनवृचे । द्वि.कोषः । [मे.।

मलया । स्त्री । सोमराज्याम् । त्रिवृतायाम् ।

मलयोत्थ(द्भव)म् । क्ली । श्वेतचन्दने । श्वेत चन्दन । रा.नि.व.१२ । [मुदो । रा.नि.व.२० ।

मलरोधनम् । क्ली । विष्टम्भे । आनाहरोगे ।

मलवेगः । पुं । अतीसाररोगे । रा.नि.व.२० ।

मलशैत्यम् । क्ली । तन्नामश्लेष्मजरोगे । भा. ।

मलहन्ता (न्तृ) । पुं । शाल्मलीकन्दे । रा. नि.व.७ । [सैन्धवाद्यतैले ।

मलहरः । पुं। जैपालवृचे । भैष.आ.वा.चि.

मला । स्त्री । भूम्यामलक्याम् । श.च. । आम्रहरिद्रायाम् । वै.निघ.। नाभिनालायाम् । त्रिका.।

मलाकर्षी (इन्) । पुं । हड़िके । हाड़ि, मेथर । श.मा. ।

मलाख्यकिट्टम् । क्ली । भुक्ताहारस्यान्यतरभागे, यतः सूत्रपूरीषाद्युत्पत्तिर्भवति । मल । च. सू.२८अ. । [कुल । वै.निघ. ।

मलाज्जातकः । पुं । गन्धमार्ज्जारे । गन्धगो-

मलाधिक्यम् । क्ली । मलबाहुल्यरूपश्लेष्मजरोगे । भा. ।

मलापहा । स्त्री । कुलत्थाञ्जने । रा.नि.व.१३। दाचिणात्यनदीविशेषे । तज्जलं गुणैः कृष्णाजलतुल्यं, विशेषेण पथ्यं स्वादुतरं कान्तिदञ्च । रा. नि.व.१४ । वनकुलत्थे । वै.निघ. ।

मलायनम् । क्ली । मलद्वारे, गुदोपस्थादौ । च.द.स्वस्थवृत्ते । [नि.व.६ ।

मलारिः । पुं । मलधावनद्रव्ये । सोहागा । रा.

मलावरोधः । पुं । मलविष्टम्भे ।

मलिनम् । क्ली । घोले । श.च. । टङ्कणचारे । सोहागा । रा.नि.व.६ । कृष्णागुरुकाष्ठे । रा. नि.व.१२ । सद्यःप्रसूताया गो दुग्धे । वङ्गे । यशदे । दन्ती । पुं । हंसे । वै.निघ. ।

मलिना (नी) । स्त्री । रजस्वलायाम् । रा. नि.व.१८ । शर्करायाम् । वृहत्याम् । वै.निघ. ।

मलिनाम्बु । क्ली । मस्यां । कालि । है.च. ।

मलिष्ठा । स्त्री । सञ्जातरजस्कायां । त्रिका. ।

मलीमसम् । क्ली । पुष्पकासीसे । रा.नि.व. १३ । लौहे । मे. । त्रि । मलयुक्ते ।

मलूकः । पुं । कीटविशेषे । उकुण । उणा. ।

मल्लः । पुं । पात्रे । मत्स्यविशेषे । त्रि । बलिष्ठे । त्रिका. । कपोले । मे. । [वृचे । अम. ।

मल्लकः । पुं । दन्ते । है.च. । स्त्री । मल्लिका-

मल्लखण्डः । पुं । गुड़शर्करायाम् । वै.निघ. ।

मल्लजम् । क्ली । मरिचे । जटा. ।

मल्लतरुः । पुं । पियालवृचे । रा.नि.व.११ ।

मल्लवाहः । पुं । ताम्रवर्णतृणविशेषे, पल्लिवाहतृणे.। रा.नि.व.८ ।

मल्ला । स्त्री । मल्लिकापुष्पवृचे । श.र. ।

मल्लारिष्टा । स्त्री । पाचीनामसुगन्धपत्रशाके । रा.नि.व.१० ।

मल्लिः (ल्ली) । पुं, स्त्री । मल्लिकावृचे । श.र.।

मल्लिकः । पुं । मलिनचञ्चुचरणहंसभेदे । अम.।

मल्लिका (ख्यः) । स्त्री । स्वनामख्यातपुष्पक्षुपे। बेल, मल्लिकाफुलेर गाछ । प.मु. । मं वेलिमोगरा । कं वल्लिमल्लिगे । तें मल्लेचेट्टु । गुणाः— कटुः तिक्ता चक्षुष्या मुखपाकघ्नी कुष्ठविस्फोटककण्डूविषव्रणघ्नी च । रा.नि.व.१० । उष्णा लघ्वी वृष्या वातपित्तास्यदृग्व्याधिकुष्ठारुचिविषव्रणघ्नी च । भा. । मङ्गल्यागुरुणि । रा.नि.व.१२ । लक्ष्मणाकन्दे । वचायाम् । यूथिकायाम् । वै.निघ. । मत्स्यभेदे । मे. । [मा. । See वनमल्लिका ।

मल्लिकाख्या । स्त्री । त्रिपुरमल्लिकायां । र.

मल्लिकागन्धम् । क्ली । मङ्गलागुरुकाष्ठे । रा. नि.व.१२ । [का चेति द्वयं.। च.द.कुष्ठ.चि. ।

मल्लिकाद्वयम् । क्ली । मल्लिका आस्फोटमल्लि

मल्लिकापुष्पः । पुं । मल्लिकापुष्पवृक्षे । वै.निघ. । कुटजवृक्षे । কুড়চি গাছ । रा.नि.व.९ । कदम्बनिम्बूवृक्षे । করুণা লেবুর গাছ । ह.च. ।

मल्लिकाक्षः । पुं । हंसविशेषे । यस्य नेत्रपरितः शुक्ला रेखा वर्त्तते । ताम्रपदचञ्चुके हंसे । गुणाः—हंसवत् । सु.सू.४६अ. ।

मल्लिगन्धि । क्ली । अगुरुकाष्ठे । श.च. ।

मल्लिनाथः । पुं । कल्पतरुनामसंग्रहकारे ।

मल्लिनी । स्त्री । अतिमुक्तकपुष्पवृक्षे । रा.नि.व.१० ।

मल्लिपत्रम् । क्ली । छत्राके । त्रिका. ।

मल्लुः । पुं । भल्लुके । श.च. ।

मश(स)कः । पुं । तन्नामकक्षुद्ररोगे । অঁচিল । हिं मशा । लक्षणं—"अवेदनं स्थिरञ्चैव यस्य गात्रेषु दृश्यते । माषवत् कृष्णमुत्सन्नमनिलान्मशकं दिशेत् ॥" सु.नि.१३अ.। तन्नामककीटे । মশা, ডাঁশ । हिं मच्छर । तद्दंशलक्षणं—"कण्डूमान् मशकैरीषत् शोथः स्यान्मन्दवेदनः ।" स पञ्चभेदः सामुद्रपरिमण्डलहस्तिमशककृष्णपार्व्वतीयभेदेन । सु.कल्प.८अ. । [যজ্ঞডুমুর গাছ ।

मशकी (इन्) । पुं । उदुम्बरवृक्षे । ह.च. ।

मशखः । पुं । मशकनामक्षुद्ररोगभेदे । भा. ।

मशच्छदः । पुं । तृणविशेषे । वै.निघ. ।

मशहरी । स्त्री । मशकवारणार्थं वस्त्रगृहे । মশারি । जटा. ।

मशी(षी)लेख्यदलः । पुं । कोङ्कणे प्रसिद्धे शीतालवृक्षे । তেড়েৎ । रा.नि.व.९ ।

मशुनः । पुं । कुक्कुरे । श.मा. ।

मषी । स्त्री । जटामांस्यां । रा.नि.व.१२ । एलायाम् । तिलकवृक्षे । वै.निघ. ।

मसनम् । क्ली । सोमराज्याम् । श.च. ।

मसरा । स्त्री । मसूरे । মুসুরি । जटा. ।

मसारः (कः) । पुं । मरकतमणौ । श.र. ।

मसि(सी)का । स्त्री। जटामांस्याम् । वै.निघ.। शेफालिकायाम् । श.र. ।

मसिवर्द्धनम् । क्ली । गन्धरसे, बोले । त्रिका. ।

मसी । स्त्री । शेफालिकावृक्षे । श.र. । कज्जली । वै.निघ. । [গাছ । श.च. ।

मसीना । स्त्री । स्वनामख्यातक्षुपे । মশনে ।

मसीनिका । स्त्री । शेफालिकावृक्षे । श.र. ।

मसु(सू)रः । पुं । (Vicialens or Ervum lens. Syn. Cicer lens. Lentil.) स्वनामख्यातशिम्बीधान्ये । মুসুরি কলায় । मं चणक । कं चणगि । तें चिरिशनमलु । मिसूरपप्पु । हिं मसूर । ता. मिसुरपुरपुर । गुणाः—मधुरः शीतलः संग्राही कफपित्तघ्नः वातरोगकरः मूत्रकृच्छ्रहरः लघुश्च । रा.नि.व.१६ । "रुच्यो विशेषो मधुरः प्रदिष्टः शूलार्त्तिगुल्मग्रहणीविकारान् । करोति वातामयवर्द्धनश्च पित्तास्रसंकृच्छ्रहरो मसूरः ।" अत्रि.१५अ. । मसूरिकायाम् अस्य प्रलेपो हितः । ताम्बूलरागे । हारा. ।

मसुरा । स्त्री । मसूरे । মুসুরি । मे. ।

मसूरकः । पुं । मसूरकलाये । रा.नि.व.१६ । गण्डोपधाने । গাল বালিশ । श.र. ।

मसूरघृतम् । क्ली । गृहण्यां घृतम् । "मसूरस्य कषायेण विल्वगर्भं पचेद्घृतं । हन्ति कुक्ष्यामयान् ... ।" च.द. । घृत ४श. মুসুরকাথ ৪শ. বেলশুঁঠ কল্ক ১ শ. ।

मसूरयूषः । पुं, क्ली । मसूरकृतक्वाथे । মুসুরির ঝোল । गुणाः—"मसूरयूषः संग्राही वृंही स्वादुः प्रमेहजित् ।" द्रव्यगुणः ।

मसूरविदला । स्त्री । श्यामत्रिवृति । কাল তেউড়ী । च.वि.८अ. । श्यामालतायाम् । र.मा. सि.यो.च.द.वा.पि.ज्व.चि.निदिग्धिकादिः । "मसूरविदलाक्वाथः ।" वा.चि.६अ. । आम्रातकवृक्षे । मेषशृङ्ग्यां । वै.निघ. ।

मसूरसूपः । पुं । भर्ज्जितमसूरकृतयूषे ।—गुणाः—"मसूरसूपः संग्राही शीतलो मधुरो लघुः । कफपित्तास्रजिद्रूक्षो विषमज्वरनाशनः ।" द्रव्यगुणः ।

मसूरा (री) । स्त्री । मेषशृङ्ग्याम् । त्रिवृति । रा.नि.व.६ । मसूरिकारोगे । বসন্ত রোগ । मे. । [२०

मसूराभा । स्त्री । मसूरिकारोगे । रा.नि.व.

मसूरिका । स्त्री । प्रमेहपिटकाभेदे । लक्षणं यथा—"मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका।" सु.नि.६अ. । वसन्तरोगे । वसन्त रोग । तस्य निदानादि । "कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः। दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः । क्रूरग्रहेक्षणाच्चापि देशे दोषसमुद्भवाः । जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः । मसूराकृतिसंस्थानाः पिड़कास्ता मसूरिकाः । तासां पूर्व्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः । त्वचि शोथः सवैवर्ण्यो नेत्ररोगस्तथैव च ।" इति पूर्व्वरूपम् । सा वातपित्तकफसन्निपातरक्तसप्तधातुजा भवति । भा. । "गात्रेष्वन्तश्च वक्त्रस्य दाहज्वररुजान्विताः । मसूरमात्रास्तद्वर्णास्तत्संज्ञाः पिटिका घनाः ।" वा.उ.३१ अ. । वातजा यथा—"स्फोटाः कृष्णारुणा रूक्षाः तीव्रवेदनयान्विताः । कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः ।" पित्तजा यथा—"सन्ध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिर्भ्रमः । शोषस्तालोष्ठजिह्वानां तृष्णा चारुचिसंयुता । रक्तपीतासिताः स्फोटाः सदाहास्तीव्रवेदनाः । मृदवश्चिरपाकाश्च पित्तकोपसमुद्भवाः ।" रक्तजा यथा—विड्भेदाङ्गमर्द्ददाहतृष्णारुचिमुखपाकनेत्रपाकतीव्रज्वरा भवन्ति । कफजा यथा—श्वेतस्निग्धातिस्थूलकण्डूमन्दवेदनाः चिरपाकाश्च भवन्ति । सन्निपातजा यथा—नीलाः चिपिटविस्तीर्णनिम्नमध्या महारुजः पूतिस्रावाः चिरपाकाः प्रभूताश्च भवन्ति । रसस्था यथा—त्वचमाश्रित्य जलबुद्बुदतुल्याः स्वल्पदोषाः स्फोटा भिन्ना जलं स्रवन्ति । रक्तस्था मसूरिका रक्तमाश्रित्य रक्तवर्णाः शीघ्रपाकाः तनुत्वचः भिन्ना रक्तं स्रवन्ति च । मांसस्था मसूरिकाः मांसमाश्रित्य कठिनाः स्निग्धाः चिरपाकाः तनुत्वचः सत्यः गात्रशूलनिशाकण्डूमूर्च्छादाहतृषाः कुर्व्वन्ति । मेदस्थाः—मेदः समाश्रित्य मण्डलाकारा मृदवः किञ्चिदुन्नता घोरज्वरकराः स्थूलाः स्निग्धाः सवेदनाश्च भवन्ति । साध्यः कश्चिदेव जीवति । अस्थिगाः तदाश्रित्य क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नता भवन्ति । मज्जस्थाः तदाश्रित्य भ्रमसंमोहवेदनारतियुक्ताः सर्व्वतः अस्थीनि भ्रमरेणेव विद्धानि कुर्व्वन्ति प्राणांश्चाशु हरन्ति । शुक्रस्थाः पिड़काः पक्वाभाः स्निग्धसूक्ष्मा अतिवेदना स्तैमित्यारतिसम्मोहदाहोन्मादयुक्ता भवन्ति । असाध्यश्च केवलं दृश्यते जीवनन्तु न दृश्यते । अरिष्टलक्षणमाह । "मसूरिकाभिभूतो यो भृशं घ्राणेन निःश्वसेत् । स भृशं त्यजति प्राणान् तृष्णार्त्तो वायुदूषितः ॥" मसूरिकाहेतुकं शोथमाह—"मसूरिकान्ते शोथः स्यात् कूर्परे मणिबन्धके । तथांसफलके चापि दुश्चिकित्स्यः सुदारुणः ॥" मसूरिकोत्पादनक्रियामाह—या टीकादानमिति लोके उच्यते—यथोक्तं धन्वन्तरिकृतशाक्तेयग्रन्थे । "सा तु गोस्तनजनरगात्रजमसूरिकापूयेन भवति—"धेनोस्तन्यमसूरिका नराणाञ्च मसूरिका । तज्जलं बाहुमूलाच्च शस्त्रान्तेन गृहीतवान् । बाहुमूले च शस्त्राणि रक्तोत्पत्तिकराणि च । तज्जलं रक्तमिलितं स्फोटकज्वरसम्भवम् ॥" इति शब्दकल्पद्रुमः । मशहर्य्यां । मशारि ।

मसूरीहररसः । पुं । मसूर्य्यधिकारे रसः । "अथ शुद्धस्य सूतस्य मूर्च्छितस्य मृतस्य च । धन्ना पिप्पलीधात्रीरुद्राक्षघृतमाक्षिकैः । पापरोगान्तको योगः पृथिव्यामेव दुर्लभः ॥" रस.र. ।

मसृणा । स्त्री । अतस्याम् । मसिना । मे. ।

मस्करः । पुं । रक्तेरण्डे । रा.नि.व.८ । वंशे । रन्ध्रवंशे । रा.नि.व.७ ।

मस्करी । स्त्री । देवकुरुण्टके । वै.निघ. ।

मस्तः (कः) । पुं, क्ली । शिरसि । माथा । रा.नि.व.१८ । [च. ।

मस्तकस्नेहः । पुं । मस्तिष्के । माथार घि । हे.

मस्तकाख्यः । पुं । वृक्षाग्रे । श.च. ।

मस्तकी । स्त्री । गुह्यबदरीफले । रूमिमुस्तगीति लोके । भैष.वाजी.चि. ।

मस्तकोद्भवम् । क्ली । मस्तिष्के । रा.नि.व.१८।

मस्तदारुः । पुं । देवदारुवृक्षे । भा. ।

मस्तमूलकम् । क्ली । ग्रीवायाम् । घाड़ । श.च. । मस्तकस्नेहे । मस्तिष्क । वै.निघ. ।

मस्तिष्कम् । क्ली । मस्तकस्नेहे । मगज । रा.नि.व.१८ ।

मस्तु । क्ली । दधिमस्तुनि । दयेर मात । र.मा. । रा.नि.व.१५ । भा.म.१भ.ज्व.चि.लाक्षादितैले । "तैलान्मस्तु चतुर्गुणम् ।" द्विगुणवारियुत-

दधिकृते तक्रे। "तक्रं दधि त्रिगुणवारियुतन्तु मन्तु।" रा.नि.व १५। गुणाः—"उष्णाम्लं रुचिपित्तदं क्रमिहरं बल्यं कषायं सरं भुक्तिक्लेदकरं कफोदरगदप्लीहार्शसां नाशनं। शीतःग्रुडिकरं कफानिलहरं विष्टम्भशूलापहं पाण्डुश्वासविकारगुल्मशमनं मस्तु प्रशस्तं लघु॥" रा.नि.व.१५। [ष.।

मस्तुलुङ्गः । पुं । मस्तिष्के। चिका.। सु.शा.१०

महः । क्ली । तेजसि । मे.। [४।

महतिक्रान्ता । स्त्री । बृहत्याम् । रा.नि.व.

महती । स्त्री । बृहतीक्षुपे । व्याकूड़ । रा नि.व.४ । वार्त्ताकी । तन्नामकहिक्कायां—"मर्म्माण्युत्पीड़यन्तीव सततं या प्रवर्त्तते। महाहिक्केति सा ज्ञेया सर्व्वगात्रप्रकम्पिनी॥" मा.नि.।

महत् । क्ली । हृदये । यत्र शरीरधारकदशधमन्यः स्थापिताः। च.सू.३०ष.।

महत्तत्त्वम् । क्ली । बुद्धितत्त्वापरनामधेये प्रकृतेरुत्पन्ने तत्त्वे । भा.।

महत्तेजाः । पुं । पारदे । वै.निघ.।

महत्पत्रः । पुं । मालाकन्दे । वै.निघ.।

महत्फला । स्त्री । राजकोषातक्यां । वै.निघ.। महेन्द्रवारुण्याम् । মাকাল । रा.नि.व.३ ।

महद्बलः । पुं । मधुरवालुके । মিঠা বেতো । वै.निघ.। [ल । रा.नि.व.३ ।

महद्वारुणी । स्त्री । महेन्द्रवारुण्यां । মাকা-

महद्वृक्षः । पुं । वटवृक्षे । वै.निघ.।

महर्षभी । स्त्री । कपिकच्छ्वां । আলাকুশী । रा.नि.व ३ । [লাকুশী ।

महर्षिः । पुं । कपिकच्छ्वां । वै.निघ.। আ-

महर्षिका । स्त्री । शुक्लकण्टकार्य्याम् । वै.निघ.। [श च.।

महा । स्त्री । गोरक्ष्याम् । গোরক্ষচাকুলিয়া।

महाकटभी । स्त्री । श्वेतकटभीवृक्षे । रा.नि.व.८ । See कटभी । [গিমনসা । श.च.।

महाकण्टकिनी । स्त्री । विम्बसारके । फ-

महाकण्टा । स्त्री । शिवल्लीवृक्षे । গোলাপ । वै.निघ.।

महाकदम्बः । पुं । केलिकदम्बे । কেলিকদম । प.मु.।

महाकन्दः । पुं । पलाण्डौ । रक्तरसोनकन्दे, राजपलाण्डौ । सुखालौ । चाणक्यमूले । मालाकन्दे । रा.नि.व.७।२३ ।

महाकपित्थः । पुं । विल्ववृक्षे । प.मु.।

महाकपोतः । पुं । दर्व्वीकरसर्पविशेषे । सु.कल्प.४ष.। See सर्पः ।

महाकरञ्जः । पुं । करञ्जविशेषे । ডহর করঞ্জা । सु.सू.३८ष.। "गुणाः—महाकरञ्जकस्तीक्ष्णः कटुरुष्णश्च तिक्तकः। कण्डूविचर्चिकाकुष्ठलग्रुग्विषव्रणापहः॥" रा.नि.व.८ ।

महाकरम्भकम् । क्ली । तन्नामकपत्रविषभेदे । सु.कल्प.२ष.। [नि.व.८ ।

महाकर्णिकारः । पुं । आरग्वधवृक्षे । रा.

महाकल्याणगुड़ः । पुं । See कल्याणगुड़ः । भा.।

महाकषायः । पुं । कट्फलवृक्षे । वै.निघ.।

महाकालः । पुं । (Citrullus colocynthis or Yrichosanes Palmata.) स्वनामख्यातलतायां । प.मु.। মাকাল বা রক্ত মাকাল ফলের গাছ । हिं लालइन्द्रायण । तैं अव्वगुड़पण्डु, एटिपुच । ता. पेयकोमति । बम्. कौण्डल् । एतत्फलगुण्डं नारिकेलतैलयुक्तं नासाक्षतं कर्णक्षतञ्च रोपयति । एतद्धूमपानं श्वासहरम् । स्त्री (ली) । वृश्चिकाल्यां । বিছাতি গাছ । वै.निघ.।

महाकिराततिक्तकः । पुं । (Exacum bicolor.) बृहत्किराततिक्तके । বড় চিরাতা, দেশী চিরাতা । कश्चित् निघण्टुः ।

महाकुमारिका (री) । स्त्री । महाशिवल्लीवृक्षे । বড় গোলাপ । वै.निघ.।

महाकुमुदा (दिका) । स्त्री । गाम्भारीवृक्षे । रा.नि.व.८ । [नि.व.८ ।

महाकु(म्भा)म्भी । स्त्री । कट्फलवृक्षे । रा.

महाकुष्ठम् । क्ली । बृहत्कुष्ठरोगे, महाव्याधौ । মহাব্যাধি । तत्—अरुणम्, औडुम्बरम्, ऋष्यजि-

ह्वकम्, कपालकं, काकणकं, पुण्डरीकं, दद्रुकुष्ठञ्चेति सप्तविधम्। तत्र वातेनारुणं पित्तेनौडुम्बरर्ष्यजिह्वकपालकाकणानि श्लेष्मणा पुण्डरीकं दद्रुकुष्ठञ्चेति। एषां लक्षणानि पर्य्याये द्रष्टव्यानि। क्षुद्रकुष्ठभेदे। तल्लक्षणं—त्वक्सङ्कोचभेदाङ्गसादादिकम्। सु.नि.५अ.।

महाकृष्णः। पुं। दर्व्वीकरसर्पभेदे। सु.कल्प.४ अ.। See सर्पः। मूषिकविशेषे। तद्दष्टे—पित्तं भवति। सु.कल्प.६अ.। [निघ.।

महाकृष्णा। स्त्री। कृष्णापराजितायाम्। वै.

महाकोशफला। स्त्री। देवदालीलतायाम्। দেয়াতাড়া। रा.नि.व.৭।

महाकोशातकी। स्त्री। (Laffu aegyptiaca. Syu. L. Pentandra.) हस्तिकोषातक्यां। रा.नि.व.৭। হস্তিঘোষা। धुन्दुल। हिं नेनुआ। तैं एनुगवीर। उत्. तरड़ि। "महाकोशातकी प्रोक्ता हस्तिघोषा।" गुणाः—स्निग्धा रक्तपित्तानिलघ्नी च। भा.पू.१भ.शा.व.।

महाक्रीतनः (निका)। पुं, स्त्री। शालपर्ण्याम्। শালপাণি। वै.निघ.।

महाखदिरघृतम्। क्ली। कुष्ठाधिकारे घृतम्। पाठः—"खदिरस्य तुलाः पञ्च शिंशपासनयोस्तुले। तुलार्द्धाः सर्व्वएवैते करञ्जारिष्टवेतसाः। पर्पटः कुटजश्चैव वृषः कृमिहरस्तथा। हरिद्रे कृतमालश्च गुड़ूची त्रिफला त्रिवृत्। सप्तपर्णश्च संक्षुण्णा दशद्रोणे च वारिणः। अष्टभागावशेषन्तु कषायमवतारयेत्। धात्रीरसञ्च तुल्यांशं सर्पिषश्चाढ़कं पचेत्। महातिक्तककल्कैश्च यथोक्तैः पलसम्मितैः···।" कल्कद्रव्याणि तिक्तकघृतादादेयानि। গব্যঘৃত ১৬ শ.। ক্বাথার্থ—খদিরছাল ৫০০ প. শিশুগাছের ছাল ১০০ প. আসনছাল ১০০ প.। করঞ্জছাল, নিমছাল, বেতসছাল, ক্ষেত্রপর্পটী, কুড়চিছাল, বাসকছাল, বিড়ঙ্গ, হরিদ্রা, দারুহরিদ্রা, শোণালুফল, গুলঞ্চ, ত্রিফলা, তেউড়ী, ছাতিমছাল প্রত্যেকে ৫০ প. জল ৬৪০ শ. শে. ৮০ শ.। আমলকীরস ১৬ শ.। কল্কার্থ—ছাতিমছাল, আতইচ, শোন্দাল, কটুকী, আকনাদিমূল, মুতা, বেণার মূল, ত্রিফলা, পলতা, নিমছাল, ক্ষেৎপাপড়া, দুরালভা, রক্তচন্দন, পিপুল, গজপিপুল, পদ্মকাষ্ঠ, হরিদ্রা, দারুহরিদ্রা, বচ, রাখালশশা, শতমূলী, শ্যামালতা, অনন্তমূল, ইন্দ্রযব, বাসকছাল, মূর্ব্বামূল, গুলঞ্চ, চিরেতা, যষ্টিমধু, বলাডুমুর প্রত্যেকে ১ পল। च.चि.৭অ.।

महागदः। पुं। महारोगे। तन्नामकविषघ्नयोगे। "त्रिवृद्विशल्ये मधुकं हरिद्रे रक्ता नरेन्द्रो लवणश्च वर्गः। कटुत्रिकञ्चैव विचूर्णितानि शृङ्गे निदध्यान्मधुसंयुतानि···।" सु.कल्प.५अ.। ज्वररोगे। रा.नि.व.२०। [ख्याते वृत्ते। अचि.।

महागदमहीरुहः। पुं। चालमुग्रा इति

महागन्ध(क)म्। क्ली। बोले। নিশাদল। रा.नि.व.६। कुङ्कुमागुरुचन्दने। रा.नि.व.१२। अतिसारोदरामयग्रहणीघ्नरसविशेषे। पारदगन्धकयोः प्र. २ तो.। कज्जलीकृत्य जलेन संमर्द्य च पर्पटीवत् पाच्यम्। अथ जातीफलजातीकोषलवङ्गशुष्कनिम्बपत्राणां प्र. २ तो. तया पर्पट्या एकत्र जलेन मर्द्दयित्वा गोलकं कृत्वा शुक्तिद्वयमध्ये संस्थाप्य कदलीपत्रेणावेष्ट्य कर्द्दमेनालिप्य च रौद्रे शोषयेत्। शुष्के करीषाग्नौ आगन्धानुभवं पक्त्वा उद्धरेत्। পারা ২ তো, গন্ধক ২ তো, কজ্জলি করিয়া জলে গুলিয়া পর্পটীবৎ পাক করিবে। তাহার সঙ্গে জায়ফল, জয়িত্রী, লবঙ্গ, শুষ্কনিম্পাতা প্রত্যেকে ২ তো. দিয়া মর্দ্দনপূর্ব্বক ২ খানি ঝিণুকের মধ্যে ভরিয়া কদলীপত্র বেষ্টনপূর্ব্বক কাদায় লেপিয়া শুকাইবে। পরে ৮।১০খানি ঘুটের আগুনে পাক করিবে, পুড়িয়া যখন গন্ধকের গন্ধ অনুভব হইবে অমনি তুলিয়া লইবে, শীতল হইলে খল করিয়া লইবে। सा.कौ.भैष.।

महागन्धः। पुं। कुटजवृक्षे। শ্বেত কুড়চি গাছ। रा.नि.व.৫। जलवेतसे। श.च.। स्त्री। केविकापुष्पवृक्षे। रा.नि.व.१०। नागबलायाम्, महाबलायाम्। रा.नि.व.४। कुटजवृक्षे। वै.निघ.।

महागवयः (गवः)। पुं। बृहद्गवयमृगे। रा.नि.व.१९।

महागुदः। पुं। कफजकृमिविशेषे। च.चि, ৭अ.।

महागुल्म: (ल्मा) । पुं, स्त्री । सोमवल्लीलतायाम् । रा.नि.व.३ ।

महागुहक: । पुं । क्रमी । वै.निघ. ।

महागुहा । स्त्री । पृश्निपर्णीभेदे । চাকুলিয়া । रा.नि.व.४ । [See गोधूम: ।

महागोधूम: । पुं । वृहद्गोधूमे । भा.धा.व. ।

महागोपा । स्त्री । सारिवायाम् । अनन्तमूल। वै.निघ. । [नि.व.१६ ।

महाग्रीव: (वी) (इन्) । पुं । उष्ट्रे । रा.

महाचूर्णा । स्त्री । द्राक्षामद्ये । सुरायाम् । श.च. ।

महाघृतम् । क्ली । एकादशोत्तरशताधिकवार्षिकघृते । नकुल.१२श. । गुणा:—"पेयं महाघृतं भूतै: कफघ्नं पवनाधिकै: । बल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहं । सर्व्वभूतहरञ्चैव घृतमेतत् प्रशस्यते ॥" सु.मू ४५श. ।

महाघोषा । स्त्री । कर्कटशृङ्गयां । प.मु. । रा.नि.व.६ । मद.व.१ । कुन्दुरौ । श.च. ।

महाङ्ग: । पुं । गोक्षुरभेदे । रा.नि.व.४ । रक्तचित्रकभेदे । रा.नि.व.६ । उष्ट्रे । प.मु. ।

महाचुञ्चु: । स्त्री । वृहच्चुञ्चुभेदे । বড় চেঁচকো । रा.नि.व.४ । See चुञ्चु: । [११ ।

महाचूत: । पुं । महाराजाम्रवृक्षे । रा.नि.व.

महाच्छद: । पुं । देवताड़वृक्षे । र.मा. ।

महाच्छाय: । पुं । वटवृक्षे । रा.नि.व.११ ।

महाच्छिद्रा । स्त्री । महामेदायां । रा.नि.व.५। क्ली । कायप्रत्यङ्गरूपनवद्वारेषु । तेषां_सप्त शिरसि द्वे चाध: । च.शा.७श. ।

महाज: । पुं । महाछागे । रा.नि.व.१९ ।

महाजटा । स्त्री । रुद्रजटायां । रा.नि.व.३ ।

महाजम्बीर: । पुं । वृहज्जम्बीरवृक्षे । করুণা লেবু । हिं बड़निम्बु । अस्य त्वक् दीपनी वातघ्नी च । तैलं वातघ्नं । यूष: उदरामयघ्न: रक्तातिसारे पामादौ च हित: ।

महाजम्बु: (म्बू:) । स्त्री । स्वनामख्यातवृहत्फलजम्बूवृक्षे । বড় জাম গাছ । र.मा. । मं महाराजजम्बू । गुणा:—उष्णा मधुरकषाया श्रमघ्नी मुखजाड्यहरी स्वरकरी विष्टम्भकरी शोषघ्नी अतीसारभ्रमकरी श्वासकासकफघ्नी च । रा.नि.व.११ । [व.१९ ।

महाजव: । पुं । गवये । গবয় মৃগ । रा.नि.

महाजाति: । स्त्री । वासन्तीपुष्पलतायाम् । জাতি ফুলের গাছ । रा.नि.व.१० । See वासन्ती ।

महाजालि: (लिका, ली) । स्त्री । पीतघोषायां । प.मु. । हेमा. । आवर्त्तकीलतायां । रा.नि.व.३ । राजकोशातक्यां । रा.नि.व.७ ।

महाज्योतिष्मती । स्त्री । स्वनामख्यातलतायाम् । বড় লতা কট্‌কী । हिं बड़ीमालकांगनी । गुणा:—तिक्ततरा रुक्षा किञ्चित्कटु: वातकफघ्नी दाहकरी दीपनी मेधाप्रज्ञाकरी च । रा.नि.व.३ ।

महाज्वराङ्कुश: । पुं । विषमज्वराधिकारे रस: । (१) "सूतं गन्धं विषं तुल्यं धूर्त्तबीजं त्रिभि: समं । चतुर्णां द्विगुणं व्योषचूर्णं गुञ्जाद्वयं हितम् । जम्बीरकस्य मज्जाभिरार्द्रकस्य रसैर्युतम् । महाज्वराङ्कुश: ...... ।" व्योषचूर्णं मिलितसर्व्वचूर्णापेक्षया द्विगुणम् । रस.र. । रस.चि. । भा. । (२) —"पारदं हिङ्गुलं ताम्रं माक्षिकं तुल्यमेव च । वङ्गं सूतञ्च गन्धञ्च खर्परञ्च मन:शिलां । तालकं घनपाषाणं गैरिकं टङ्कणं समं । दन्तीबीजञ्च सर्व्वाणि चूर्णयित्वा विभावयेत् । जयन्ती विजया चित्रा तुलसी शणपर्णिका । प्रत्येकञ्च रसं दत्त्वा निर्म्मले वाग्मभूरुहे । चणमात्रां वटीं कृत्वा छायाशुष्कान् कारयेत् ।" घनपाषाणमभ्रकम्। जीर्णज्वरे । (১) পারা ১ তো. গন্ধক ১ তো. অর্থাৎ কজ্জলী ২ তো. বিষচূর্ণ ১ তো. ধুতুরাবীজচূর্ণ ৩ তো. ত্রিকটুচূর্ণ মিলিত ১২ তো. । মাত্রা ২ রতি । অনু. জম্বীরমজ্জা ও আদার রস । (২) পারা, হিঙ্গুল, তামা, স্বর্ণমাক্ষী, তুঁতে, বঙ্গ, লোহ, গন্ধক, খাপর, মনছাল, হরিতাল, অভ্র, গেরিমাটী, সোহাগার খই ও দন্তীবীজ প্রত্যেকে সমভাগ । টাবা, সিদ্ধি, তেঁতুল ও তুলসীপত্র রসে মর্দন । প্রয়োগা. । পুস্তকান্তরে তুঁতিয়া নাই । (৩) পারা

১ তো. গন্ধক ১ তো. বিষ ১ তো. ধুতুরার বীজ ৩ তো. শেয়ালকাঁটার মূল (চোক) ১০ তো. চূর্ণ একত্র মিশাইবে। অনুপান আদার রস। (৪) দামুজ, তুঁতে, খাপর প্রত্যেকে ৩ তো. ধুতুরাপাতার রসে ৩ দিন মর্দন। ভা.।

महाख्यः । पुं । कदम्बवृक्षे । रा.नि.व.१० ।

महातङ्कः । पुं। मदात्ययरोगे । रा.नि.व.२०। महाव्याधौ ।

महातरुः । पुं । स्नुहीवृक्षे । মনসা গাছ । इ.च. । [नि.व.३ ।

महाताली । स्त्री । आवर्त्तकीलतायाम् । रा.

महातिक्तः । पुं । महानिम्बे । ঘোড়ানিম । रा.नि.व.८ । किराततिक्तके । চিরেতা । वै. निघ. । स्त्री । यवतिक्तालतायां । তিৎপল্তা । रा.नि.व.३ । भैष.कन्दर्पसारतैले । पाठायाम् । श. च. ।

महातिक्तकघृतम् । क्ली । कुष्ठाधिकारे घृतम् । See तिक्तकघृतम् । च.चि.७अ. ।

महातीक्ष्णा । स्त्री । भल्लातकवृक्षे । रा.नि. व.११ ।

महातुम्बी । स्त्री । महालाब्वाम् । वै.निघ. ।

महातेजाः । पुं । पारदे । रा.नि.व.१३।

महात्रिफला । स्त्री । पथ्याविभीतकधात्रीषु । "पथ्या विभीतकं धात्री महती त्रिफला मता ।" प.प्र.३ख. ।

महादन्ता । स्त्री । नागबलायां । रा.नि.व.४।

महादारु । क्ली । देवदारुकाष्ठे । মলঙ্গা দেবদারু । जटा. ।

महादीर्घः । पुं । सरलदेवदारौ । वै.निघ. ।

महादुग्धा । स्त्री । वनस्पतिभेदे । वै.निघ. ।

महादूषकः । पुं । मादकशालिधान्यविशेषे । गुणाः —शालिवत् । सु.सू.४६अ. । [घ. ।

महादेवमणिः । पुं । महामेदायाम् । वै.नि-

महाद्रावकः । पुं,क्ली। यकृत्प्लीहाधिकारे औषधविशेषे ।—शुद्धं स्वर्णमाक्षिकं,कांस्यमाक्षिकं,सैन्धवं, रसाञ्जनं, समुद्रफेनं, सर्ज्जिक्षारः, सम्भलक्षारः, एषां प्र. १ तो. टङ्कणक्षारः ७ तो. । नृसारदं ३॥० तो. । फटिकारी ३॥० तो. । यवक्षारः १४ तो. । कासीषं पुष्पकासीषं, धातुकासीषं, इति द्रव्यत्रयं मिलित्वा १४तो.। अभावे कासीषं १४ तो. । एकत्र चूर्णयित्वा वकयन्त्रेण द्रावकं निष्कासयेत् । শুদ্ধ স্বর্ণমাক্ষিক, কাংস্যমাক্ষিক, সৈন্ধব, রসাঞ্জন, সমুদ্রফেন, সাজিমাটী, সম্ভলক্ষার প্রত্যেকে ১ তো. । সোহাগা ৭ তো. নিশাদল, ফট্কিরী প্র. ৩॥০ তো.। যবক্ষার ১৪ তো. । কাশীষ, পুষ্পকাশীষ, ধাতুকাশীষ মিলিয়া ১৪ তো. । (অভাবে হিরাকস ১৪ তো.) । একত্র চূর্ণ করিয়া বকযন্ত্রে চোয়াইয়া লইবে । रत्नमालासंग्रहः ।

महाद्रुः । पुं । शुकशिम्ब्यां । আলাকুশী, শুয়াশিম্ । र.मा. ।

महाद्रुमः । पुं । अश्वत्थवृक्षे । श.च. । तालवृक्षे । मधूकवृक्षे । वै.निघ. ।

महाद्रोणा (णी) । स्त्री । द्रोणपुष्पीविशेषे । বড় ঘলঘসিয়া । मं देवकुंवा । कं देवतुंवे । गुणाः - कटुः तिक्ता मेध्या वातव्याधिभूतघ्नी पारदशोधनी च । रा.नि.व.५ । वा.उ.३६अ. ।

महाधनम् । क्ली । सुवर्णे । सिह्लके । শিলারস । मे. ।

महाधातुः । पुं । सुवर्णे । श.च. ।

महाधात्री । स्त्री । आमलकीवृक्षे । वै.निघ. वा.व्या.चि. वातविध्वंसनरसे ।

महानन्दा । स्त्री । आरामशीतलायां । पत्रशাকবিশেষে । रा.नि.व.१० । मद्ये । रा.नि.व. १४ ।

महानयः । पुं । उष्ट्रे । वै.निघ. ।

महानलः । पुं । देवनले । বড় নলগাছ । हिं नर्कठ । रा.नि.व.८ । पारदे । वै.निघ. ।

महानसः । पुं । पाकशालायां । রসুইঘর । "प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि । सजालकं गवाक्षाढ्यमाप्तवर्गनिषेवितम् । विकचस्वष्टसंसृष्टं सवितानं कृतार्चनम् । परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम् ॥" सु.कल्प. १ अ. ।

महानसाध्यक्षः । पुं । रसवत्यधिकारिपुरुषे । রন্ধনশালার অধ্যক্ষ । "तत्राध्यक्षं नियुञ्जीत प्राज्ञं वैद्यगुणान्वितम् ॥" तत्परिकर्म्मिणश्च शुचयो दक्षा दक्षिणा नीचकेशनखादयश्च स्युः ॥ सु.कल्प. १अ. । [धिकृतपुरुषे । सु.कल्प.१अ. ।

महानसिकवोढ़ा । त्रि । राजपाकशाला-

महानागः । पुं । सुरपुन्नागवृक्षे । वै.निघ. ।

महानाड़ी । स्त्री । कण्डरायाम् । रा.नि.व. १८ । [गजे । मै. । कर्षे । सिंहे । है.च. ।

महानादः । पुं । शङ्खे । उष्ट्रे । रा.नि.व.१८।

महानारायणतैलम् । क्ली । वातव्याधौ तैलम् । पाठः—"शतावरी चांशुमती पृश्निपर्णी शटी वचा । एरण्डस्य च मूलानि बृहत्याः पूतिकस्य च । गवेधुकस्य मूलानि तथा सहचरस्य च । एषां दशपलान् भागान् जलद्रोणे विपाचयेत् । पादावशेषे पूते च गर्भञ्चैनं विधापयेत् । पुनर्नवा वचा दारु शताह्वा चन्दनागुरु । शैलेयं तगरं कुष्ठमेला मांसी स्थिरा बला । अश्वाह्वा सैन्धवं रास्ना पलार्द्धानि च योजयेत् । गव्याजपयसः प्रस्थौ द्वौ द्वावत्र प्रदापयेत् । शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत् ॥" तिलतैलं ४ श. । क्वाथार्थे—शतावरी शालपर्णी पृश्निपर्णी (पीठवन) शटी वचा एरण्डमूलं बृहतीमूलं करञ्जमूलं गवेधुकमूलं झिण्टीमूलं प्र. १० प. पाकार्थजलं ६४ श. शे. १६ श. । कल्कार्थे—पुनर्नवा वचा देवदारु शलुफा रक्तचन्दनं अगुरु शैलेयं तगरमूलं कुष्ठम् एला जटामांसी शालपर्णी बला अश्वगन्धा सैन्धवं रास्ना च प्र. ४ तो. । गव्यदुग्धं छागदुग्धं शतावरीरसः प्र. ४ श. । তিলতৈল ৪ শ. । ক্কাথার্থ—শতমূলী, শালপাণি, চাকুলিয়া, শটী, বচ, এরণ্ডমূল, বৃহতীমূল, করঞ্জমূল, গড়গড়মূল এবং ঝাঁটিমূল প্রত্যেকে ১০ প. বারি ৬৪ শ. শে. ১৬ শ. । কল্কার্থ—পুনর্নবা, বচ, দেবদারু, শুল্ফা, রক্তচন্দন, অগুরু, শৈলজ, তগরপাদুকা, কুড়, এলাইচ, জটামাংসী, শালপাণি, শ্বেত বেলেড়া, অশ্বগন্ধা, সৈন্ধব, রাস্না প্রত্যেকে ৪ তো. । গব্যদুগ্ধ, ছাগদুগ্ধ, শতমূলীরস প্রত্যেকে ৪ শ. । भैष. । भा. ।

महानिम्बः । पुं। (Melia azendarach. Syn. Melia sempervirens or Melia azendarach.) The Persian Lilac. स्वनामख्यातनिम्बभेदे । ঘোড়ানিম্, মহানিম্, বননিম্। हिं बकाइन् । मं ड़ौंराचा निम्बाचाझाड़ । तें गङ्गराविचेट्टु, पेद्दवेपचेट्टु, तुरकवेप, कण्डवेप । दा. हिं गौरिनिम् । ता. मलाइवेतु वा वेप्पम् । कन्दर्पसारतैले, पिप्पल्यादिवर्गे च । गुणाः—शीतलः कषायः कटुः तिक्तः रक्तदाहश्वासघ्नः विषमज्वरघ्नश्च । रा.नि.व.९ । त्वक् अतितिक्ता अतिसेविता मादकगुणा, पुष्पं शिरःशूले हितं, फलं पत्रञ्च विषवत् कुष्ठघ्नञ्च । द्रव्यगुणः ।

महानीलः । पुं । नीलभृङ्गराजे । रा.नि.व. ४ । नीलकान्तमणौ । रा.नि.व.१३ । सर्पभेदे । वै.निघ. ।

महानीला (ली) । स्त्री । नीलापराजितायां । रा.नि.व.३ । महानीलीक्षुपे । गुणैः नीलीसमा । रा.नि.व.४ । महाजम्बूवृक्षे । रा.नि.व.११।

महानेमिः । पुं । काके । वै.निघ. ।

महान् । पुं । वाराहमदनवृक्षे । कालमदनवृक्षे। रा.नि.व.८ । उष्ट्रे । रा.नि.व.१९ । महाषष्टिकशालौ । वै.निघ. ।

महापञ्चमूलम् । क्ली । विल्वाग्निमन्थश्योणाकपाटलीगणिकारिकासु । "विल्वोऽग्निमन्थः श्योणाकः पाटली टुण्टुकस्तथा । सर्व्वैस्तु मिलितैरेतैः स्यान्महापञ्चमूलकम् ॥" रा.नि.व.२२ । एतत्कषायः तिक्तानुरसो वातं शमयेदुष्णवीर्य्यत्वात् । सु. सू.४०अ. ।

महापञ्चविषम् । क्ली । शृङ्गीविषकालकूटमुस्तकवत्सनाभसक्तुकविषैः समभागिकयोगे । "शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः । सक्तुकश्चेति योगोऽयं महापञ्चविषाभिधः ॥" रा.नि.व. १२ । [व.१८ ।

महापञ्चाङ्गुलः । पुं । रक्तैरण्डवृक्षे । रा.नि.

महापत्रः (कः) । पुं। मालाकन्दे । वै.निघ.। (कः) शाकवृक्षे । শেগুন গাছ । प.मु. ।

महापत्रा । स्त्री । महाजम्बूवृक्षे । বড় জাম গাছ । र.मा. । नागबलायां । रा.नि.व.४ ।

महापद्मम् । क्ली । श्वेतपद्मे, पुण्डरीके । पुं ।

दग्धविन्दुशिरोदर्व्वीकरसर्पभेदे । सु.कल्प.४अ. । See सर्पः ।

महापद्मकघृतम् । क्ली । विस्फोटकाधिकारे घृतम् । "पद्मकं त्रिनिशायष्टित्रुटिशैलुनतामयैः । शिरीषक्रिमिजिल्लाचासिकथतुल्यकपित्थकैः । पञ्चनागाह्वलोध्रैश्च कल्कैः सिद्धं जले घृतं ॥" घृतं ४ श. पद्मकाष्ठादिकल्कः १ श. वारि १६ श. एकत्र पचेत् । रस.र. । [निदा. ।

महापद्मविसर्पः । पुं । बालविसर्परोगे ।

महापनसः । पुं । मण्डलिसर्पविशेषे । सु.कल्प.४अ. । [शाले । वै.निघ. ।

महापर्णः । पुं । ब्रह्मराक्षसरोहीतके । भूमि-

महापारे(ले)वतः । पुं । द्वीपान्तरमहाखर्जूरीवृक्षे । गुणाः—पुष्टिकृत् बल्यो वृष्यो मधुरः शीतलः कफकरो गुरुरग्निमान्द्यकरो महावातज्वरघ्नश्च । पक्वः स रुच्यो बल्य आग्नेयश्च । वै.निघ. ।

महापाशुपतः । पुं । वकुलवृक्षे । वै.निघ. ।

महापिचुमन्दः (न्दः) । पुं । पर्व्वतनिम्बे । निम्बसदृशवृहत्पत्रवृक्षे । वकाइन इति लोके । महानिम् । ग्रामनिम्ब एव पर्व्वतभवत्वेन पर्व्वतनिम्ब इत्युच्यते इति केचित् । एतस्य त्वगेव ग्राह्या । सि.यो.अर्श.चि.लवणोत्तमाद्यचूर्णे, श्रीकण्ठः । "लवणोत्तमवह्निकलिङ्गयवान् चिरविल्वमहापिचुमन्दयुतान् ।"

महापिण्डीतकः । पुं । महामदनवृक्षे । बड़ मयना गाछ, काल मयना । मं थोरमेनाहल । बम्. गेल । गुणाः—कटुतिक्तरसः छर्द्दनः कफहृद्रोगपक्वाशयशोधनश्च । रा.नि.व.८ ।

महापिण्डीतरुः । पुं । वृक्षविशेषे । श्वेतपिण्डीतरौ । मं पेंड़िरा । कं ओंदयमारुवमरनु । गुणाः—कषायोष्णः त्रिदोषघ्नः चर्म्मरोगघ्नः रक्तदोषघ्नश्च । रा.नि.व.६ ।

महापीलुः । पुं । वृहत्पीलुवृक्षे । पीलुफलेर गाछ । तत्फलगुणाः—मधुरं वृष्यं विषघ्नं पित्तघ्नं रुच्यम् आमघ्नं दीपनीयञ्च । रा.नि.व.११ ।

महापुटम् । क्ली । औषधपाकार्थं पुटविशेषे । लक्षणम्—"गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके । वनोपलसहस्रेण पूरितं पुटदायकम् । कोष्ठे रुद्धे प्रयत्नेन गोविष्ठोपरि धारयेत् । वनोपलसहस्राद्धं कोष्ठिकोपरि निःक्षिपेत् । वह्निं विनिक्षिपेत्तत्र महापुटमिति स्मृतम् ॥" भा. ।

महापुरुषः । पुं । महामेदायाम् । वै.निघ. ।

महापुरुषदन्ता (न्तिका, न्ती) । स्त्री । महाशतावर्य्याम् । रा.नि.व.४ । वा.उ.६अ. । विष्णुक्रान्तायां शतावर्य्यां वा । च.द.सि.यो.उन्मा.चि. महापैशाचघृते । महापुरुषदन्ता च वयस्था नाकुलीद्वयम् । मेदायां । रा.नि.व.५ ।

महापुष्पः । पुं । कुन्दवृक्षे । कुन्द गाछ । कृष्णमुद्गे । काल मुग । रक्तकाञ्चने । लवङ्गवृक्षे । वै.निघ. । स्त्री (ष्पा) । अपराजितायाम् । श.च. । महाकोशातक्याम् । धुन्दुल । वै.निघ. ।

महापृष्ठः । पुं । उष्ट्रे । प.मु. ।

महापैशाचिकघृतम् । क्ली । उन्मादाधिकारे दृष्टफलघृतम् । पाठः—"जटिला पूतना केशी चारटी मर्कटी वचा । त्रायमाणा जया वीरा चोरकः कटुरोहिणी । कायस्था शूकरी छत्रा सातिच्छत्रा पलङ्कषा । महापुरुषदन्ती च वयस्था लाङ्गलीद्वयं । कटम्भरा वृश्चिकाली स्थिरा चैव च तैर्घृतम् । सिद्धं चातुर्थकोन्मादग्रहापस्मारनाशनम्...... ॥" जटिला (जटामांसी), पूतना (हरीतकी), केशी (भूतकेशः), चारटी (स्थलपद्मं कुष्माण्डः ब्राह्मी वा), मर्कटी (शुकशिम्बी), जया (जयन्ती), वीरा (चीरकाकोली पृश्निपर्णी वा), चोरकः (चोरहुली), कायस्था (सिन्धुवारः), शूकरी (वाराहीकन्दः तदभावे चर्म्मकारालुक), छत्रा (मधुरिका), न तु जीरकं । मिषीति (जतूकर्णात्), अतिच्छत्रा (शतपुष्पा), पलङ्कषा (गुग्गुलुः), महापुरुषदन्ती (शतावरी), वयस्था (ब्राह्मी गुडूची वा), लाङ्गलीद्वयं (रास्नाद्वयं) [तयोः एका गन्धरास्ना तदभावे भागद्वयं], कटम्भरा (भद्रालिका कटभी वा), वृश्चिकाली (विछाति), स्थिरा (शालपर्णी) । घृतप्रस्थे प्रत्येकमेषां २ तो. ६ मा. ३ र. । जलं घृताच्चतुर्गुणं । अत्र महच्छब्दः पूजावचनः स्वल्पस्याभावात् । गव्यघृत ४ श. । कल्कार्थ—जटामांसी, हरीतकी, भूतकेश, स्थलपद्म कुष्माण्ड वा ब्राह्मी, आलाकुशीर बीज, वच, वलाडुमुर, जयन्ती, क्षीरकाकोली वा का-

কোনী কিংবা চাকুলিয়া, চোরহুলী, কট্‌কী, জয়িত্রী বা নিশিন্দা বা ছোট এলাচ, বারাহীকন্দ (চামরকষাস্তক্), মউরী, শুল্‌ফা, গুগ্‌গুল, শতাবরী বা অপরাজিতা বা গুলঞ্চ, রাস্না, গন্ধরাস্না (অভাবে রাস্না ২ ভ.), গন্ধভাদুলিয়া, বিছাতী, শালপাণি মিলিত ১ শ. জল ১৬ শ.। रस.र.। सि.यो.च. चि.१४अ.। [वै.निघ.।

महाप्रहारवल्ली। स्त्री। मांसरोहिण्याम्।

महाप्राणः (सः)। पुं। द्रोणकाके। দাঁড়কাক। रा.नि.व.१०।

महाफलः। पुं। विल्ववृक्षे। र.मा.। नारिकेलवृक्षे। तालवृक्षे। पीलुवृक्षे। वै.निघ.। क्ली। बृहत्फले।

महाफला। स्त्री। नील्यां। नागबलायां। रा.नि.व.४। महेन्द्रवारुणीलतायां। বড় মাকাল। रा.नि.व.३। राजजम्बूवृक्षे। वनवीजपूरके। मधुरमातुलुङ्गे। মিষ্ট লেবু, কমলা লেবু। रा.नि.व.११। महाकोशातक्याम्। भा.पु.१भ.शा.व.। कटुतुम्ब्याम्। তিৎলাউ। वै.निघ.।

महाफेणा। स्त्री। समुद्रफेणे। श.च.।

महाबभ्रुः। पुं। विलेशयमृगविशेषे। सु.सू. ४६अ.।

महाबर्वरिका। स्त्री। भार्ग्याम्। वै.निघ.।

महाबलम्। क्ली। सीसधातौ। र.मा.। पुं। वंशे। रा.नि.व.७। तमालवृक्षे। धन्वनवृक्षे। ধামনা গাছ। रा.नि.व.९।

महाबला। स्त्री। अतिबलायां, पीतवाट्यालके। পীতপুষ্প বেলেড়া। रा.नि.व.४। श्वेतवाट्यालके। प.मु.। पेटकायाम्। পেটারি। पिप्पल्याम्। नीलीवृक्षे। धामनवृक्षे। ধাওয়া গাছ। वै.निघ.।

महाबीजः। पुं। पारदे। वै.निघ.।

महाभद्रा। स्त्री। गाम्भारीवृक्षे। रा.नि.व.९।

महाभरी। स्त्री। (Cuscuta zerumbet.) वचाविशेषे। यस्या लोके कुलिञ्जन इति नामान्तरम्। মহাভরী বচ। एषा द्विधा। गुणाः—"सुगन्धाप्युग्रगन्धा च विशेषात् कफकासनुत्। सुस्वरकरी तथा हृत्कण्ठमुखशोधनी॥" अन्या स्थूलग्रन्थिः सुगन्धा हीनगुणा च। भा.।

महाभल्लातकः (गुड़ः)। पुं। कुष्ठाधिकारे औषधम्। पाठः—"निम्बं गोपाभया कट्वी चायन्ती त्रिफला घनम्। पर्पटा वल्गुजानन्ता वचा खदिरचन्दनम्। पाठा शुण्ठी शटी भार्गी वासा भूनिम्बवत्सकम्। श्यामेन्द्रवारुणी मूर्व्वा विड़ङ्गेन्द्रविषानलम्। हस्तिकर्णामृताद्रिका पटोलं रजनीद्वयम्। कणारग्वधसभाह्लक्लणवैचोचटाफलम्। भूकन्दं व्रणपर्णञ्च शिङ्गी पद्माटमूषली। विष्ककेना च कैटर्य्यं शरपुङ्खाथ कञ्चुकी। एषां द्विपलिकान् भागान् जलद्रोणे विपाचयेत्। अष्टभागावशिष्टन्तु कषायमवतारयेत्। भल्लातकसहस्राणि त्रीणि छित्वार्म्मणेऽम्भसि। चतुर्भागावशिष्टन्तु कषायमवतारयेत्। तौ कषायौ समादाय वस्त्रपूतौ च कारयेत्। गुड़स्य तु तुलां ताभ्यां कषायाभ्यां पचेद्भिषक्। भल्लातकसहस्राणां मज्जानं तत्र दापयेत्। त्रिकटुत्रिफलामुस्तसैन्धवानाम्पलम्पलम्। दीप्यकस्य पलञ्चैव चातुर्जातं पलांशिकम्। संचूर्ण्य प्रक्षिपेदत्र गन्धकञ्च चतुष्पलम्।...... ॥" নিম্বত্বক্, শ্বেত শ্যামা, অতিবিষা, কটুকী, বলাডুমুর, ত্রিফলা, মুতা, ক্ষেত্রপর্পটী, সোমরাজী, দুরালভা, বচ, খদিরকাষ্ঠ, শ্বেতচন্দন, আকনাদি, শুঁট, শটী, বামনহাটী বা কন্টকারীমূল, বাসকছাল, চিরেতা, কুড়চিমূলের ছাল, শ্যামালতা, রাখালশশার মূল, মূর্গামূল, বিড়ঙ্গ, ইন্দ্রযব, বিষ, চিতামূল, হস্তিকর্ণ, পলাশছাল, গুলঞ্চ, ঘোড়ানিম্‌ছাল, পল্‌তা, হরিদ্রা, দারুহরিদ্রা, পিপুল, সোন্দালের আটা, ছাতিমছাল, জলবেতস বা কেলেলতা, শ্বেত কুঁচ, ওল, চীনাঘাস, মঞ্জিষ্ঠা, চাকন্দাবীজ, তালমূলী, প্রিয়ঙ্গু, কট্‌ফল, শরপুঙ্খা, শিরীষছাল প্রত্যেকে ২প.। ক্কাথার্থ—জল ৬৪ শ. শে. ৮ শ.। ভেলা ৩০০০, জল ৬৪ শ. শে. ১৬ শ.। পুরাতন গুড় ১২॥০ শ. ভল্লাতকাস্থিমজ্জা (ভেলার মুটী) ১০০০ একত্র পাক করিবে। প্রক্ষেপ—ত্রিকটু, ত্রিফলা, মুতা, বিড়ঙ্গ, চিতার মূল, রক্তচন্দন, কুড়, সৈন্ধব, যমানী প্রত্যেকে ১ প.। গুড়ত্বক্, তেজপত্র, এ-

লাইচ, নাগেশ্বর প্রত্যেকে ১ প. গন্ধক ৪ প.। অনু. গুলুঞ্চকাথ, দুগ্ধ। ভাবপ্রকাশ-মতে ওল হইতে এই দ্রব্যগুলি দেওয়া হয়। যথা—বিষলাঙ্গুলিয়ামূল, রাস্না, ডহরকরঞ্চ, পুনর্নবা, দন্তীমূল, পিয়ালবীজ, ভীমরাজ, শ্বেত ঝাঁটী, আঁকড়মূল ও শ্যাওড়াবীজ। भैष.। भा.।

महाभीता । स्त्री । लज्जालुकायाम् । श.च.।

महाभीरुः । पुं । गोपालिकाख्यकीटे । हे.च.।

महाभूतम् । क्ली । चित्यप्तेजोमरुद्व्योमसु । तद्गुणाः —"शब्दः श्रोत्रेन्द्रियं वापि छिद्राणि च विविक्तता । वियतः कथिता एते गुणाः··· । स्पर्शस्त्वगिन्द्रियञ्चापि लघुता स्पन्दनं तनोः । चेष्टाः सर्व्वशरीरस्य वायोरिति गुणाः··· । रूपं नेत्रेन्द्रियं पाकः सन्तापस्तीक्ष्णता तथा । वर्णो भ्राजिष्णुतामर्षः शौर्य्यं वह्नेर्गुणाः··· । रसो रसेन्द्रियं शैत्यं स्नेहश्च गुरुता तथा । सर्व्वद्रवसमूहश्च शुक्लं वारिगुणाः ··। गन्धो घ्राणेन्द्रियञ्चापि काठिन्यं गौरवं तथा । वसुन्धरागुणाः एते··· ।" भा.पू १भ.।

महाभृङ्गः । पुं । नीलभृङ्गराजे । নীল ভীমরাজ । रा.नि.व.४ ।

महाभ्रवटिका । स्त्री । राजयक्ष्माधिकारे रसः । पाठः—"अभ्रकं पुटितं ताम्रं लौहगन्धकपारदं । कुलटा टङ्कणक्षारः त्रिफला च पलं पलम् । गरलञ्च तथा माषचतुष्कं चैव चूर्णितं । दृढ़पाषाणपात्रे च भूयोभूयः सुचूर्णितं । तत्सर्व्वं भावयेदेषां रसैः प्रत्येकशः पलैः । देवराजाशनाख्यस्य केशराजाख्यकस्य च । सोमराजस्य भृङ्गाख्यराजस्य त्रिफलस्य च । पारिभद्राग्निमन्थस्य वृद्धदारकतुम्बुरोः । मण्डूकपर्णीनिर्गुण्डीपूतिकोन्मत्तकस्य च । ग्रीष्मसुन्दरकन्याटरूषकस्य क्रमेण तु । रसैश्च ताम्रपर्ण्याश्च दलोत्थैर्भावितं भिषक् । द्रवैः किञ्चित् स्थितं चूर्णं मरिचस्य पलं क्षिपेत् । ततश्चैव वटीं कुर्य्यात् चतुस्त्रोण्येकरक्तिका ॥" रस.र.।

महामण्डूकः । पुं । मण्डूकविशेषे, पीतमण्डूके । সোণাবেঙ্ । रा.नि.व.१९ ।

महामत्ता । स्त्री । महाकरञ्जवृक्षे । ডহরকরঞ্চ গাছ । रा.नि.व.९ ।

महामधुफला । स्त्री । पीतवर्णालावूविशेषे । वै.निघ. । [व.१९ ।

महामनस् (नाः) । पुं । महासिंहे । रा.नि.

महामांसम् । क्ली । नरादिमांसे ।

महामांसी । स्त्री । रुदन्तीवृक्षे । वै.निघ. ।

महामार्जारगन्धिका । स्त्री । वनमुद्गे । মুগানী । वै.निघ. ।

महामाषः । पुं । राजमाषे । भा.पू.१भ.धा.व.।

महामुखः । पुं । कुम्भीरे । हे.च. ।

महामुण्डम् । क्ली । बोलनामगन्धद्रव्ये । रा.नि.व.१६ ।

महामुण्डिति(नि)का (ण्डी) । स्त्री । महाश्रावणिकायां । গোরক্ষমুণ্ডী । रा.नि.व.५ । रस.र.बाल.चि. ।

महामुनिः । पुं । तुम्बुरुवृक्षे । रा.नि.व.११ । क्ली । औषधे । श.र. । धन्याके । ধনে । जटा. ।

महामूर्द्धा (र्द्धन्) । स्त्री । ऋद्धौ । वृद्धौ । वै.निघ. ।

महामूलः । पुं । राजपलाण्डौ । रा.नि.व.७

महामूषिकः । पुं । बृहन्मूषिके । रा.नि.व.१९ । [गजे । हे.च. ।

महामृगः । पुं । महासिंहे । रा.नि.व.१९ ।

महामृगाङ्कः । पुं । यक्ष्माधिकारे रसः । पाठः—"शुद्धसूतं मृतं स्वर्णं जम्बीरैर्मर्द्दयेद्दिनं । तेषां द्विगुणितं मुक्तं त्रिभिस्तुल्यञ्च गन्धकं । टङ्कणं गन्धकार्द्धञ्च सर्व्वं जम्बीरजैरसैः । मर्द्यं यामन्तु तद्गोलं वस्त्रेरुद्धा विपाचयेत् । दोलायन्त्रे सारणाले यामादुद्धृत्य शोषयेत् । ततोऽपि मृण्मये पात्रे किञ्चिल्लवणपूरिते । तत्पृष्ठे काचकूप्यन्ते गोलके वस्त्रवेष्टिते । स्थिते तु लवणैर्भाण्डे पूरयित्वा तु बन्धयेत् । चूल्ल्यां दिनं पचेत् सिद्धो रसो महामृगाङ्कः ॥" मात्रा २ रतिः ; अनुपानं मधुपिप्पली । रस.कौ.।

महामेदः । पुं । महामेदायाम् । र.मा. । निम्बवृक्षे । वै.निघ. ।

महामेदा । स्त्री । स्वनामख्यातकन्दशाके । महामेदा इति सर्व्वत्र । तं महामेदयनेचेद्दु । सा

लताजाता सुपाण्डुरा च। "महामेदाभिधः कन्दो लताजातः सुपाण्डुरः।" इति। एतदभावे शारिवा ग्राह्या। गुणाः—हिमा रुच्या कफशुक्रवृद्धिकृत् दाहपित्तघ्नी च। रा.नि.व.५। महामेदा सुनामेदेति च द्विधा। मेदाद्वयलक्षणम्—"महामेदाभिधः कन्दो मोरङ्गादौ प्रजायते। महामेदा सुनामेदा स्यादित्युक्तं मुनीश्वरैः। शुक्लार्द्रकनिभः कन्दो लताजातः सुपाण्डुरः। महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते। शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत्। यः स मेदेति विज्ञेयः · ···। मेदायुगं गुरु स्वादु वृष्यं स्तन्यकफापहम्। बृंहणं शीतलं पित्तरक्तवातज्वरप्रणुत्॥" भा.पू.१भ.।

महामोदः। पुं। कुन्दपुष्पवृक्षे। कन्द गाछ। रा.नि.व.१०। [श्वेतधुस्तूरके। वै.निघ.।

महामोहः। पुं। मुचुकुन्दवृक्षे। (ह्रौ इन्)।

महाम्लम्। क्ली। तिन्तिड़ीके। जटा.।

महायमलपत्रकः। पुं। काञ्चनवृक्षे। वै.निघ.। [निघ.।

महायावनालः। पुं। देवधान्यवृक्षे। वै.

महायोगेश्वरी। स्त्री। नागदमन्याम्। नागदना। भा.।

महायोनिः। स्त्री। योनिरोगविशेषे। लक्षणं—"दुष्टो विष्टभ्य योन्यास्यं गर्भकोष्ठञ्च मारुतः। कुरुते विवृतां स्रस्तां वातिकीमिव दुःखिताम्। उत्सन्नमांसां तामाहुः महायोनिं महारुजाम्॥" वा.उ.३३ष.।

महारक्तम्। क्ली। प्रवाले। वै.निघ.।

महारजतम्। क्ली। धुस्तूरफले। अम.। सुवर्णे। रा.नि.व.१३। [वर्णे। मे.।

महारजनम्। क्ली। कुसुम्भपुष्पे। अम.। सु-

महारतिवल्लभमोदकः। पुं। वाजीकरणाधिकारे औषधम्। जयावीजचूर्णं ५ प. घृतं ४ प. शर्करा १६ प. शतावरीरसः ३२ प. दुग्धं ३२ प. विजयारसस्तत्क्वाथो वा ३२ प. छागदुग्धं ३२ प.। प्रक्षेपः—आमलकं जीरकं कृष्णजीरकं मुस्तकं त्वक् एला तेजपत्रं नागकेसरं वानरीवीजं (आलाकुशीर वीज) गोरचतण्डुला तालाङ्कुरः केशराजः शृङ्गाटकं त्रिकटु धान्यकम् अभ्रं वङ्गं हरीतकी द्राक्षा काकोली क्षीरकाकोली पिण्डीखर्जूरं कोकिलाक्षवीजं कटुकी यष्टिमधु कुष्ठं लवङ्गं सैन्धवं यमानी वनयमानी जीवन्ती गजपिप्पली एषां चूर्णं प्र. २ तो.। मधु २ प. मृगमदकर्पूरचूर्णेन वासयेत्। भैष.।

महारत्नम्। क्ली। मुक्तादिनवरत्नेषु। मौक्तिकहीरकवैदूर्यपद्मरागगोमेदपुष्परागमरकतप्रवालनीलरत्नेषु।

महारम्भम्। क्ली। गाढ़लवणे। रा.नि.व.६।

महारवः। पुं। भेके। वै.निघ.।

महारसम्। क्ली। काञ्जिके। जटा.। कान्तलौहे। हिङ्गुले। स्वर्णमाक्षिके। अभ्रके। रौप्यमाक्षिके। पुं। पारदे। रा.नि.व.१३। इक्षौ। प.मु.। खर्ज्जूरवृक्षे। कशेरौ। मे.। स्त्री। जम्बूवृक्षे। वै.निघ.।

महारसाष्टकम्। क्ली। पारदाभ्रकहिङ्गुलवैक्रान्तस्वर्णमाक्षिकरूप्यमाक्षिकशङ्खकान्तलौहेषु। "दरदः पारदः शङ्खः वैक्रान्तं कान्तमभ्रकम्। माक्षिकं विमलश्चेति स्युरेतेऽष्टौ महारसाः॥" रा.नि.व.२२।

महाराजः। पुं। नखे। है.च.।

महाराजचूतः। पुं। आम्रवृक्षविशेषे। मं महाराजांवा। कं महाराजमाचु। रा.नि.व.११। See राजाम्रः। [सोणालू। रा.नि.व.६।

महाराजद्रुमः। पुं। आरग्वधवृक्षे। वड़

महाराजफलः। पुं। महाराजचूतवृक्षे। रा.नि.व.११। [रा.नि.व.११।

महाराजाम्रकः। पुं। महाराजचूतवृक्षे।

महाराष्ट्री। स्त्री। जलपिप्पल्यां। माराटीति राजवल्लभः। काँचड़ा, पानसगा। पिप्पलक। वोमुगलु। पणिसंगा। इति मं कं। भैष.मु.रो.चि.मुखरोगहररसे। अग्निदग्ध.चि.। गुणाः—कटुः तीक्ष्णा कषाया मुखशोधनी व्रणकीटादिदोषघ्नी रसदोषघ्नी च। रा.नि.व.४। वातकफघ्नी। राज.। [रा.नि.व.६।

महारिष्टः। पुं। महानिम्बे। घोड़ानिम्।

महारूपः। पुं। राले। रजन,धुना। वै.निघ.।

महारोगः। पुं। महाव्याधौ। वैद्यकम्। उ-

ज्वरादिरोगेषु । यथा—उन्मादः त्वग्दोषः राजयक्ष्मा श्वासः मधुमेहः भगन्दरः उदरः अश्मरी चेति । नारदस्मृतिः । [लावपचिणि । विश्व. ।

महार्घः । पुं । महासोमलतायाम् । वै.निघ. ।

महार्द्रः । पुं । महार्द्रके । मश आदा । श.च. ।

महार्द्र(क)म् । क्ली । शुण्ठ्याम् । वै.निघ.२भ. दुर्जलज्व.चि. । स्थूलार्द्रके, वनार्द्रके । वन आदा । गुणाः—"महार्द्रं दीपनं ग्राहि रुच्यं वातकफापहम् ।" राज.३प. ।

महार्हम् । क्ली । श्रीखण्डचन्दने । श्वेत चन्दन । रा.नि.व.१२ । [रा.नि.व.६ ।

महालिकटभी । स्त्री । श्वेतकिणिहीवृक्षे ।

महालोध्रः । पुं । शवरलोध्रे । पाटिया लोध । र.मा. । [१६ ।

महालोभः (लः) । पुं । काके । रा.नि.व.

महालोहम् । क्ली । कान्तलौहे । रा.नि.व.१३।

महावपः । पुं । मण्डभेदे । श.च. । [र. ।

महावरा । स्त्री । मूर्व्वायाम् । दूर्व्वायाम् । श.

महावरोहः । पुं । प्लचवृक्षे, क्षुद्रप्लचवृक्षे । पाकुड़ गाछ । रा.नि.व.११ । [निघ. ।

महावर्षाभूः । स्त्री । श्वेतपुनर्नवायाम् । वै.

महावल्कः । पुं । जातीफलवृक्षे । वै.निघ. ।

महावल्ली । स्त्री । माधवीलतायाम् । श.च. । श्वेतालाव्वाम् । कटुवल्लिकायाम् । कट्की । रा. नि.व.३ ।

महावसः । पुं । शिशुमारे । हे.च. ।

महावसु । क्ली । रौप्ये । वै.निघ. ।

महावातव्याधिः । पुं । वातरक्ते । स एक एव । मतान्तरे उत्तानावगाढभेदेन द्विविधः । सु. चि.५अ. । [वन बेगुन । वै.निघ. ।

महावार्त्ताकिनी । स्त्री । महावार्त्ताकुवृक्षे ।

महावास्तु । क्ली । महायतने । भा.म.कुष्ठचि. ।

महावास्तुपरिग्रहः । त्रि । व्यापकतया प्रशस्तस्थानग्राहिणि । भा.गुल्म-चि. ।

महाविलम् । क्ली । अन्तःकरणे । वै.निघ. । आकाशे । जटा. ।

महाविषः । पुं । तन्नामककन्दविषे । सु.कल्प. २अ. । कालसर्पे । त्रिका. ।

महाविहङ्गः । पुं । गरुड़े । च.द. ।

महावीजः । पुं । पियालवृक्षे । पेयाशाल । क्ली । विटपे । तत्तु मुष्कवङ्क्षणयोरन्तरम् । हे.च. ।

महावीरः । पुं । एकवीरवृक्षे । रा.नि.व.८ । करवीरपुष्पवृक्षे । करवी गाछ । रा.नि.व.१० । सिंहे । शुक्लाश्वे । मे. । कोकिले । हे.च. । स्त्री (रा) । क्षीरकाकोल्याम् । र.मा. ।

महावीर्य्यः । पुं । वाराहीकन्दे । एकवीरवृक्षे । रा.नि.व.७।८ । स्त्री (र्य्या) । महाशतावर्य्याम् । रा.नि.व.४ । शुक्लदूर्व्वायाम् । वनकार्पास्याम् । श.र. । संज्ञायाम् । त्रिका. ।

महावृषा (ष्या) । स्त्री । मुशलीभेदे । कालतालमूली । वै.निघ. । [बेगुन । त्रिका. ।

महावृहती । स्त्री । महावार्त्ताक्याम् । वन

महावृक्षः । पुं । स्नुहीवृक्षे । सिजू गाछ । र. मा. । सेहुण्डभेदे । करञ्जवृक्षे । सु.सू.३६अ. । तालवृक्षे । महापीलुवृक्षे । वै.निघ. ।

महावेगवती । स्त्री । तन्नामकमहौषधौ । सु.चि.३०अ. । See ओषधिः । [दा. ।

महाव्याधिः । पुं । कुष्ठादिमहारोगेषु । नि-

महाव्रणम् । क्ली । दुष्टव्रणे । नाली घा । शब्दकल्पे वाराहीतन्त्रम् ।

महाव्रीहिः । पुं । व्रीहिविशेषे । षष्टिकधान्ये । बेटे धान । वै.निघ. ।

महाशङ्खः । पुं । नरकपाले, ललाटे । मे. । कर्णनेत्रयोर्मध्यगतास्थनि । तन्त्रम् ।

महाशठः । पुं । पीतधुस्तूरवृक्षे । रा.नि.व.१० ।

महाशणः । पुं । स्वनामख्यातवृक्षविशेषे । प. मु. । शणवीजे । वै.निघ. ।

महाशणपुष्पिका (ष्पी) । स्त्री । शणपुष्पीनामक्षुपविशेषे । आतुशी फुलेर गाछ, श्वेत अरण्य शण । मं साङ्गीकिलिहिला । कं पाढ़रीकिलिहिला । हिं फुणफुणा । गुणाः—कषाया उष्णा रसनियामिका मोहनस्तम्भनादौ शस्ता । रा. नि.व.४ ।

महाशणा । स्त्री । आरण्यशणे । वै.निघ. ।

महाशता (वरी) । स्त्री । वृहच्छतावर्य्याम्, सहस्रमूलीशतावर्य्याम् । हिं कङ्‌हीमूल । गुणाः —"महाशतावरी मेध्या हृद्या वृष्या रसायनी । शीतवीर्य्या निहन्त्यर्शोग्रहणीनयनामयान् ॥" भा. । हिमा वृष्या मधुरा तिक्ता रसायनी पित्तघ्नी वातकफघ्नी च । रा.नि.व.४ ।

महाशफरः । पुं । पार्व्वतमीने । पाब्दा माछ । तैं श्वोकानीपेहमत्स्यम् । [नि.व.८ ।

महाशरः । पुं । स्थूलशरे । रामशर । रा.

महाशल्कः । पुं । महाचिङ्गटमत्स्ये । मोटा-चिंड़ि । हारा. ।

महाशाखा । स्त्री । नागबलायां । रा.नि.व.४ ।

महाशालिः । पुं, स्त्री । सुगन्धशाली । रा. नि.व.१६ । शालिधान्यविशेषे । मोटा धान । प सु. । वा.सू.६अ. । गुणाः —"महाशालिर्गुरुर्वृष्या चक्षुष्या बलवर्द्धनी ।" अचि.१५अ. ।

महाशिम्बी । स्त्री । कलायविशेषे । राङाकलाइ । रा.नि.व.७ ।

महाशिराः । पुं । मत्स्यभेदे । वै.निघ. । दर्व्वीकरसर्पभेदे । गौधेरकजातिभेदे । सु.कल्प.४।८ अ. । [वनस्पतिविशेषे । वै.निघ. ।

महाशीता । स्त्री । शतावर्य्याम् । श.च. । व-

महाशुक्तिः । स्त्री । मुक्तागृहे । झिनुक । रा. नि.व.१३ ।

महाशुण्डी । स्त्री । हस्तिशुण्डीनाममहाक्षुपे । हातिशुँड़ । रा.नि.व.५ । [व.१३ ।

महाशुद्ध(भ्र)म् । क्ली । रौप्यधातौ । रा.नि.

महाशृङ्गः । पुं । सम्बरमृगे । वै.निघ. ।

महाशोण्डी । स्त्री । श्वेतकिणिहीवृक्षे । कटभीवृक्षे । रा.नि.व.९ ।

महाश्यामा । स्त्री । वृद्धदारके । सु.सू.३८अ. श्यामादि. । श्यामालतायाम् । प.सु. । कृष्णशिंशपावृक्षे । काल शिशु गाछ । रा.नि.व.९ ।

महाश्रयः । पुं । अक्षोटवृक्षे । आक्‌रोट गाछ । वै.निघ. ।

महाश्रावणिका (णी) । स्त्री । स्वनामख्यातमहाक्षुपे । बड़ थुलकुड़ि । गोरक्षमुण्डी । गुणाः — उष्णा तिक्ता रोचनी मेहहृत् रसायनी च । रा.नि.व.५ । कट्वी । वा.सू.१४।१५अ. । श्वेतमुण्डीर्य्याम् । च.चि.३अ. ।

महाश्वासः । पुं । श्वासरोगभेदे । हाँपानि रोग । तस्य लक्षणम् —"उद्धूयमानवातो यः शब्दवद्दुःखितो नरः । उच्चैः श्वसिति संरुद्धमत्तर्षभ इवानिशम् । प्रनष्टज्ञानविज्ञानः तथा विभ्रान्तलोचनः । विवृताख्याननो बद्धमूत्रवर्चा विशीर्णवाक् । दीर्घमश्वसितं चास्य दूराद्विज्ञायते भृशम् । महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते ॥" मा.नि. ।

महाश्वेतघण्टी । स्त्री । महाशणपुष्पीक्षुपे । वै.निघ. ।

महाश्वेता । स्त्री । वन्ध्याकर्कोटक्याम् । सु.सू. ३७अ. । क्षीरविदार्य्याम् । प.सु. । कृष्णभूमिकुष्माण्डे । अम. । आस्फोतायाम् । श्वेतअपराजिता । श्वेतकटभीवृक्षे । रा.नि.व.९ । श्वेतापराजितायां । र.मा. । नीलापराजितायाम् । च.सू.४अ. । शुक्लारण्यशणे । शर्करायाम् । मधुशर्करायाम् । त्रिका.।

महाषष्टिकः । पुं । षष्टिकधान्यभेदे । सु.सू. ४६अ. । [शीयसीवफले । वै.निघ. ।

महासंवितिकाफलम् । क्ली । काबेलदे-

महासफरः । पुं । पार्व्वतमत्स्ये । पाब्दा माछ । वृहत्प्रोष्ठीमत्स्ये । गुणाः —तिक्तः पित्तकफघ्नः शीतलः मधुरः रुच्यः वातभूयिष्ठश्च । भा. ।

महासमङ्गा । स्त्री । स्वनामख्यातक्षुपविशेषे, वाट्यालकभेदे । हिं कगाहिया, खिरेहिटिरा । वम्. थोरचिकणाभेद । गुणाः —मधुराम्ला त्रिदोषघ्नी ज्वरदाहघ्नी च । रा.नि.व.५ ।

महासर्ज्जः । पुं । असनवृक्षे । र.मा. । पनसवृक्षे । काँटाल गाछ । रा.नि.व.११ । [४अ. ।

महासर्पः । पुं । दर्व्वीकरसर्पविशेषे । सु.कल्प.

महासहः । पुं । कुब्जकवृक्षे, कौङ्कणदेशख्याते पुष्पवृक्षे । रा.नि.व.१० । शुक्लझिण्ट्याम्, कुरण्टके । भा. । स्त्री (हा) । माषपर्ण्यां । माषाणी । प.सु. । सु.चि.८अ. । वा.उ.२अ. । अम्लानवृक्षे । झाँटी । रा.नि.व.६ । च.वि.८अ. । महाराजतरु-

-श्रीपुष्पवृक्षे । কাঁটাসেউতী । रा.नि.व.१० । म-हाबलायाम् । अतिबलायाम् । वै.निघ. ।

महासारः । पुं। विट्खदिरवृक्षे । रा.नि.व.८।

महासिंहः । पुं । शरभापरनामसिंहे । रा.नि.व.१९ ।

[बन शण । रा.नि.व.४ ।

महासिता । स्त्री । महाशणपुष्पीक्षुपे । শ्বेत

महासिद्धिकरः । पुं । कृष्णवनालुके । वै.निघ. ।

महासुखम् । क्ली । मैथुने । त्रिका. ।

महासुगन्धषट्कम् । क्ली । चन्दनकस्तूरीकर्पूरकृष्णागुरुमूर्व्वाकुङ्कुमेषु वै.निघ. ।

महासुगन्धा (न्धिः) । स्त्री । गन्धनाकुल्यां । रा.नि.व.७ ।

महासुगन्धितैलन् । क्ली। मेदोरोगे तैलम् । तिलतैलं ४ श. । कल्कार्थं—चन्दनं कुङ्कुमं वीरणमूलं प्रियङ्गु एला गोरोचना कपितैलम् अगुरु मृगनाभिः कर्पूरं जयित्री जातीफलं कक्कोलं पूगफलं लवङ्गं नलुका जटामांसी कुष्ठं रेणुकं तगरं मुस्तं नखी स्पृक्का गन्धबोलः नागदमनी ग्रन्थिपर्णी चोरकः शैलजम् एलबालुकं सरलकाष्ठं सप्तपर्णत्वक् लाक्षा भूधात्री गन्धतृणं धातकीपुष्पं प्रपौण्डरीकं शटी प्र. तो. । पाकार्थजलं १६ श. । তিলতৈল ৪ শ. । কল্কার্থ—রক্তচন্দন, কুঙ্কুম, বেণার মূল, প্রিয়ঙ্গু, এলাইচ, গোরোচনা, শিলারস, অগুরু, মৃগনাভি, কর্পূর, জয়িত্রী, জায়ফল, কক্কোল, গুপারি, লবঙ্গ, নলুকা, জটামাংসী, কুড়, রেণুক, তগর, নাগরমুতা, নখী, পিড়িং, গন্ধবোল, নাগদনা, গেঁঠেলা, চোরা, শৈলজ, এলবালুক, সরলকাষ্ঠ, ছাতিমছাল, লাহা, ভূঁই আমলা, গন্ধতৃণ, ধাইফুল, পুণ্ডরিয়া, শটী প্রত্যেকে ২ তো. । জল ১৬ শ. । ভা. ।

[१२ ।

महासूक्ष्मा । स्त्री । बालुकायाम् । रा.नि.व.

महासोमः । पुं । सोमलताभेदे । सु.चि.२९ अ. ।

महासु(सौ)षिरः । पुं । दन्तवेष्टगतरोगविशेषे । तत्र दन्तचालनतालुदारणदन्तमांसपूतित्वमुखदौर्गन्ध्यादिकं भवति । लक्षणं यथा—"दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते । दन्तमांसानि पच्यन्ते मुखञ्च परिवाप्यते ॥" भा.म.४भ.मुखरो.चि. । अत्र सप्तरात्रान्मरणं भवतीति भोजः । "महासौषिर इत्येवं सप्तरात्रान्निहन्त्यसून् । ससन्निपातज्वरवान् सपूयरुधिरस्रुतिः । महासुषिर इत्युक्तो विशीर्णद्विजबन्धनः ॥" वा.उ.२१अ. ।

महास्कन्धा । स्त्री । जम्बूवृक्षे । জাম গাছ । रा.नि.व.११ ।

[च. ।

महास्नायुः । स्त्री । रक्तवहमहानाड्याम् । है.

महास्नेहः । पुं। छर्द्दिचिकित्सायां स्नेहः । ঘৃত ৪ শ. । কল্কার্থ—রাস্না, জীবক (গুলুঞ্চ) জীবন্তী, বেলেড়া, কণ্টিকারী, পুনর্নবা, বামনহাটী, শালপাণি, বচ, শুঁট, পিপুল, মরিচ প্রত্যেকে ৫।০ তো. দধিমাত ১ শ. অম্লবর্গ যথালাভ গ্রহণ করিবে । वा.चि.६अ.। भूरिस्नेहवत्त्वात् घृततैलवसामज्जसु । च.सू.१अ. ।

महाहविः । क्ली । गव्यघृते । श.चि. ।

महाहिक्का । स्त्री । तन्नामकहिक्कारोगविशेषे। लक्षणं यथा—"मर्म्माण्युत्पीड़यन्तीव सततं या प्रवर्त्तते । महाहिक्केति सा ज्ञेया सर्व्वगात्रप्रकम्पिनी ॥" निदा. ।

[नि.व.७ ।

महाहिगन्धा । स्त्री । गन्धनाकुल्याम् । रा.

महाह्रस्वा । स्त्री । शूकशिम्बयाम् । আলাকুশী । प.मु. ।

[वै.निघ. ।

महाक्षारः । पुं । सावान इति ख्याते द्रव्ये ।

महाक्षीरा । स्त्री । महिष्याम् । वै.निघ. ।

महिका । स्त्री । हिमे । अम. ।

महिज्ञकः । पुं । मूषिके । वै.निघ. ।

महिला । स्त्री । रेणुकायाम् । রেণুকবীজ । रा.नि.व.६ । प्रियङ्गौ । अम. ।

महिलाह्वया । स्त्री । प्रियङ्गुलतायां । अम.।

महिषः । पुं । स्वनामख्यातमहामृगजातीयपशुविशेषे । মহিষ । हिं भैंस । तें दुन्नपोतु । स च ग्राम्यारण्यभेदेन द्विविधः । तयोर्वन्यमांसम् ईषल्लघु दीपनं बलदञ्च । ग्राम्यमांसं स्निग्धं निद्राकरं पित्तहरञ्च । रा.नि.व.१७ ।

महिषकन्दः । पुं । श्वेतालुके । रा.नि.व.७ ।

महिष(षी)प्रिया । स्त्री । शूलीतृणे । रा.नि.व.८ ।

महिषमत्स्यः । पुं । मत्स्यविशेषे । तल्लक्षणगुणाः—कृष्णः दीर्घकायः बलवान् महाशल्कश्च । तन्मांसं दीपनं बलवीर्य्यकरञ्च । रा.नि.व.१७ ।

महिषमस्तकः । पुं । शालिधान्यविशेषे । शालिधान । भा.पू.१भा.धा.व. । गुणाः—शालिवत् ।

महिषवल्ली । स्त्री । स्वनामख्यातसोमवल्लीसम लताविशेषे । हिं छिरहिट्टी । मं महिषवेलि । कं ग्राम्यवल्लि । गुणाः—रसवीर्य्यविपाकेषु सोमवल्लीसमा । रा.नि.व.३ । [रा.नि.व.१२ ।

महिषासुरसम्भवः । पुं । भूमिजगुग्गुलौ ।

महिषाक्षः (कः) । पुं । स्वनामख्यातगुग्गुलुविशेषे । महिषाक्ष गुग्गुल । गुग्गुलौ । प.मु. रा.नि.व.१२ । भा.म.४भ. । भगन्दरे । च.द. कुष्ठ.चि. । [मे ।

महिषी । स्त्री । महिषस्त्रियाम् । औषधद्रव्ये ।

महिषीकन्दः । पुं । स्वनामख्यातमहाकन्द विशेषे । महिषीकन्द । यम्मेगड्डे इति अनुपदेशे प्रसिद्धः । गुणाः—कटूष्णः कफवातरोगघ्नः रोचनः सुखजाड्यघ्नश्च । रा.नि.व.७ ।

महिषीघृतम् । क्ली । महिषदुग्धोत्थघृते । भैंसेर घि । गुणाः—"सवातपित्तशमनं सुशीतं माहिषं घृतम् । मधुरं गुरु विष्टम्भि बल्यं श्रेष्ठगुणात्मकम् ॥" अत्रि.८अ. ।

महिषीतक्रम् । क्ली । महिषीघोले । मईषेर घोल । गुणाः—"माहिषं कफकृत् किञ्चिद्घनं शोफकरं नृणां । शस्तं प्लीहार्शोग्रहणीदोषेऽतीसारिणामपि ॥" अत्रि.८अ. ।

महिषीदधि । क्ली । महिषीदुग्धोत्थदधनि । मईषेर दई । गुणाः—"घनं माहिषमुद्दिष्टं मधुरं रक्तदोषकृत् । कफशोफहरं स्वस्थं पित्तकृद्वातकोपनम् ॥" अत्रि.८अ. ।

महिषीदुग्धम् । क्ली । महिषीक्षीरे । मईषेर दुध् । भैंषीदुध् । कं याम्मियहालु । गुणाः—गौल्यं विपाके गुरु शीतलं बलदं पुष्टिदं वृष्यं पित्तदाहासृग्घ्नञ्च । रा.नि.व.१५ । "स्निग्धं मरुच्छीतकरं च तन्द्रानिद्राकरं वृष्यतमं श्रमघ्नं । बलप्रदं पुष्टिकरं कफस्य सञ्जीवनं माहिषमुच्यते पयः ॥" अत्रि.८अ. ।

महिषीमूत्रम् । क्ली । महिषीजले । मईषेर मूत । गुणाः—"सरं सतिक्तं कटुकं कषायं प्रभेदि वातस्य शमं करोति । पित्तप्रकोपं कुरुते सदा च कुष्ठार्शपाण्डूदरशूलनाशम् ॥" अत्रि.८अ. ।

मही । स्त्री । गाम्भारीवृक्षे । कटुकायां । त्रिका. । हिलमोचिकायाम् । हिंचे । त्रिका. । गवि । जटा. ।

महीकदम्बः । पुं । भूकदम्बे । सु.चि.१७अ. ।

महीजम् । क्ली । आर्द्रके । रा.नि.व.६ । पुं । वृक्षे । वै.निघ. ।

महीपदः । पुं । किञ्चुलुके । केँचो । वै.निघ. ।

महीलता । स्त्री । गण्डूपद्याम् । केँचो । अम. । [रा.नि.व.६ ।

महीसहः । पुं । शाकवृक्षे । शेगुन गाछ ।

महेन्द्रकदली । स्त्री । कदलीवृक्षविशेषे । बुनो कला । गुणाः—उष्णा वातासृग्दरपित्तघ्नी च । रा.नि.व.११ ।

महेन्द्रलोहम् । क्ली । अगुरुकाष्ठे । वै.निघ. ।

महेन्द्रवारुणी । स्त्री । महाकाललतायाम् । बड़ माकाल । मं वड़िलइन्द्रवारुणी । कं हिरियहामेक्के । गुणाः—गुणैरिन्द्रवारुणीसमा । "रसे वीर्य्ये विपाके च किञ्चिद्दोषगुणाधिका ।" रा.नि.व.३ । इन्द्रवारुण्याम् । राखालशशा । वै.निघ. ।

महेन्द्राणी । स्त्री । इन्द्रचिर्भट्याम् । श.र. ।

महेन्द्री । स्त्री । महेन्द्रवारुणीलतायाम् । बड़ माकाल । रा.नि.व.३ । [अम.अ.टी.भ. ।

महेर(रु)णा (रुहा) । स्त्री । सल्लकीवृक्षे ।

महेलिका (ला) । स्त्री । स्थूलैलायाम् । वै.निघ. । [श.च. ।

महेशबन्धुः । पुं । श्रीफलवृक्षे । बेल गाछ ।

महेश्वरः । पुं । श्वेतमन्दारे । विश्वकोषप्रणेतरि । क्ली । स्वर्णे । रस.कौ.ज्वरान्तकरसे ।

महेश्वरी । स्त्री । यवतिक्तालतायां । रा.नि.

व.३ । राजरीती । পিত্তল বিশেষ । रा.नि.व. १३ । अपराजितायां । श.च. । कांस्ये । हे.च. ।

महैरण्ड: । पुं । स्थूलैरण्डे । रा.नि.व.८ ।

महैला । स्त्री । स्थूलैलायां । रा.नि.व.६ ।

महोटिका (टी) । स्त्री । वृहतीक्षुपे । ব্যাকুড় গাছ । रा.नि.व.४ । वार्त्ताकौ । वै.निघ. ।

महोत्पलम् । क्ली । कमले । रक्तपद्मे । पुं । सारसपक्षिणि । अम. ।

महोदधिवटी । स्त्री । अजीर्णाधिकारे औषधम् । पाठ: —"एकैकं विषसूतञ्च जातीटङ्गं द्विकं द्विकं । कृष्णात्रिकं विश्वषट्कं तथा दग्धं कपर्द्दकं । देवपुष्पं वाणमितं सर्व्वं संमर्द्य यत्नत: । महोदधिवटी नाम्ना नष्टमग्निं प्रदीपयेत् ॥" रस.र.।

महो(हौ)दनी । स्त्री । शतावर्य्याम् । शतमूली । वै.निघ. ।

महोदय: । स्त्री । नागबलायाम् । रा.नि.व.४।

महोदरम् । क्ली । पिण्डीतगरे । वै.निघ. । स्त्री (री) । महाशतावर्य्यां । भा. ।

महोद्रेक: । पुं । महानिम्बे । वै.निघ. ।

महोन्नत: । पुं । तालवृक्षे । भा. । नारिकेलवृक्षे । धाराकदम्बे । वै.निघ. ।

महोन्मद: । पुं । मत्स्यविशेषे । ফলুই মাছ । श.र. । मद्रे । [महासर्पे ।

महोरगम् । क्ली । तगरपादिके । प.मु. । पुं ।

महोक्ष: । पुं । महावृषे । अम. । [वै.निघ. ।

महौजसी । स्त्री । तेजोवत्याम् । তেজবল ।

महौषधम् । क्ली । शुण्ठ्याम् । रा.नि.व.६ । भा.त्रिपुरभैरवरसे । च.द.ज्व.चि.अष्टादशाङ्गे कषाये । "भूनिम्बदारुदशमूलमहौषधाब्द...... ।" भूम्याहुल्ये । रा.नि.व.४ । वत्सनाभविषे । श्वेतरसोने । वाराहीकन्दे । लशुने । रा.नि.व.७ । अतिविषायां । अम. । पिप्पल्याम् । श.च. ।

महौषधि: (धी) । स्त्री । लज्जालुकाक्षुपे । श.च.। श्वेतकण्टकार्य्यां । रा.नि.व.४ । ब्राह्मीक्षुपे । रा.नि.व.५ । अतिविषायां । कटुक्यां । रा.नि.व.६ । त्रिका.। वाराहीकन्दे । रा.नि.व.७। हिलमोचिकायां । হিঞ্চে । त्रिका. । नीलदूर्व्वायां । रा.नि.व.८ । अपराजितायाम् । आदित्यभक्तायाम् । হুড়হুড়িয়া । लशुने । वै.निघ. ।

मक्षवीर्य्य: । पुं । प्रियालवृक्षे । रा.नि.व.११ ।

मक्षिका (क्षी) । स्त्री । मधुमक्षिकायाम् । মৌমাছি । कीटविशेषे । মাছি । हिं मक्खी । त्रिका. । भा. । सा षड्विधा – कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिका चेति । ताभिर्दष्टे दाहशोफौ भवत: । स्थालिकाकाषायीभ्यामेतदेव पिड़काश्च सोपद्रवा भवन्ति । सु.कल्प. ८अ. । [नि.व.१३ ।

मक्षिकामलम् । क्ली । सिक्थके । मम । रा.

मक्षिकाविट् । स्त्री । मक्षिकामले । মাছির বিষ্ঠা । वै.निघ. ।

मांसम् । क्ली। शरीरे रक्तजतृतीयधातौ । মাংস । रा.नि.व.१८। तत्तु गर्भस्थस्याष्टभिर्मासै: भवति । सुखबोध:। तत्स्वरूपं यथा—"शोणितं स्वाग्निना पक्वं वायुना च घनीकृतं । तदेव मांसं जानीयात्··· ।" लेपश्च तत्कर्म्म । भा. । गुणा:— "सर्व्वं मांसं वातविध्वंसि वृष्यं बल्यं रुच्यं वृंहणं तत्र मांसं । देशस्थानाद्यात्मसंस्थं स्वभावै: भूयो नानारूपतां याति नूनम् ॥'' इति साधारणदेशमांसगुणा: । रा.नि.व.१७ । मांसरससाधनं यथा —घने मांसरसे कर्त्तव्ये प्रस्थे जले मांसस्य द्वादशपलं दत्त्वा पक्तव्यम् । तदनु तनुके रसे कर्त्तव्ये मांसस्य षट्पलं पानीयं प्रस्थमात्रमेव दातव्यम् । अच्छतरे रसे कर्त्तव्ये प्रस्थे जले मांसस्य पलं दत्त्वा एतन्मांसं पिष्ट्वा प्रस्थार्द्धशेषस्थितजले पक्त्वा अनुरूपं स्थाप्यं वस्त्रेण छानयित्वा यूष: कार्य्य: । "द्रव्यतो द्विगुणं मांसं सर्व्वतो द्विगुणं पय: । पादस्थं संस्कृतं स्नेह: षड़ङ्गी यूष उच्यते । पलानि द्वादशप्रस्थे घनेऽथ तनुके तु षट् । मांसस्य वटकं कुर्य्यात् पलमच्छतरे रसे ॥" प.प्र.२ख.। त्याज्यमांसं यथा— तत्र पूतिशुष्कव्याधितविषसर्पहतदिग्धविद्धजीर्णकृशबालानामसात्म्यचारिणां मांसानि अभक्ष्याणि दोषकराणि च भवन्ति । "बालस्य वृद्धस्य कृशस्य रोगिणो विषाग्निदग्धस्य मृतस्य चाम्बुषु । त्याज्यं मृगादे: पिशितन्तु तस्य विगन्धि शुष्कञ्च चिरस्थितञ्च ॥'' रा.नि.व.१७। "मृतञ्च व्याधितं वृद्धं

हृद्यं बाल्यं विशेषतः । अगोचरहतं व्याड़ं मदितं मांसमुत्सृजेत् ॥" राज.३प. । उपादेयमांसं यथा —"स्त्रियश्चतुष्पादेषु पुमांसो विहङ्गमेषु महाशरीरेषु अल्पशरीरा: अल्पशरीरेषु महाशरीरा: प्रधानतमा: । एवमेकजातीयानां महाशरीरेभ्य: क्रमशरीरा प्रधानतमा: ॥" सु.सू.४६अ. । पुन: पूर्व्वभागो योषितोऽधोभागश्च गुरु: । पश्चिम उरोग्रीवं विशेषेण गुरु । सु.सू.४६अ । "गुरुभक्ष्या बहुभुजो ये चोपचितमेदस: । एकदेहेऽपि पूर्व्वार्द्धं खगानां पश्चिमं परम् ॥" तैलसिद्धमांसगुणा: — "मांसं यत्तैलसंसिद्धं वीर्य्योष्णं पित्तलं कटु । अग्निसन्दीपनं हृद्यं दृष्टिनुत् पुष्टिकृद्गुरु ॥" घृतसिद्धमांसगुणा:—"मांसन्तु घृतसंसिद्धं दृष्टिदं पुष्टिकृद्गुरु । प्रीणनं सर्व्वधातूनां विशेषान्मुखशोषिणां ॥" शुष्कमांसगुणलक्षणे—"परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु । पित्तघ्नं बलमेधाग्निमांसौज:शुक्रवर्द्धनम् । मांसं बहुघृते पक्वं सिद्धञ्चोष्णाम्बुना मुहु: । नीरजाद्यै: समायुक्तं परिशुष्कं तदुच्यते ॥" प्रदिग्धमांसलक्षणगुणा: —"तदेव घनतक्राढ्यं प्रदिग्धं स त्रिजातकम् । प्रदिग्धं बलमांसाग्निवर्द्धनं कफपित्तजित् ॥" राज.३प. । पुं । कीटे । श.र.।

मांसकच्छप: । पुं । तालुगतमुखरोगे । See कच्छप: । [हृन । वा.उ. ।

मांसकर्णी । स्त्री । वरव्यादिकीटे । वकशृङ्गे ।

मांसकारि । क्ली । रक्ते । वै.च. ।

मांसकीलक: । पुं । तन्नामकगुह्यरोगभेदे । अर्शोभेदे वा । लक्षणं यथा —"अन्तर्बहिर्वा मेढ्रस्य कण्डूला मांसकीलका: । पिच्छिलास्रस्रवा योनौ तद्वच्च छत्रसन्निभा: । तेऽर्शांस्युपेक्षया घ्नन्ति मेढ्रपुंस्त्वभगार्त्तवम् ॥" वा.उ.३३अ. ।

मांसकेशी (इन्) । पुं । पादरोगभेदयुक्ते अश्वे । "केशाकाराणि मांसानि यस्य खुरतलजानि च । मांसकेशीति तं विद्यात् ··· ॥" ज.द.३९अ.।

मांसकोथ: । पुं । मांसगलने । वा.उ.२८अ.।

मांसखुर: । पुं । पादरोगविशेषयुक्ते अश्वे । लक्षणं यथा —"बहुमांसखुरश्चैव ज्ञेयो मांसखुरो हय: ।" ज.द.३९अ. ।

मांसगज्वर: । पुं । ज्वरविशेषे । तल्लक्षणम् —"पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता । ऊष्मान्तर्दाहविक्षेपौ ग्लानि: स्यान्मांसगज्वरे ॥" चिकित्सा तीक्ष्णविरेचनादि । निदा. ।

मांसग्रन्थि: । पुं । मांसजग्रन्थिरोगे । लक्षणम् — "मांसलैर्दूषितं मांसमाहारैर्ग्रन्थिमावहेत् । स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम् ॥" वा.उ.२९अ. । [नि.व.११ ।

मांसच्छदा । स्त्री । मांसरोहिण्याम् । रा.

मांसजम् । क्ली । मेदोधातौ । वै.च. ।

मांसजाति: । स्त्री । मृगविष्किरप्रतुदप्रसहविलेशयमहामृगजलचरमत्स्याद्यासु मांसजातिषु अष्टविधासु । प.सु. ।

मांसजालम् । क्ली । जालवन्मांसे । मांसशिल्ली वा जाल । "चत्वारि मांसजालानि, तानि मणिबन्धगुल्फसंश्रितानि परस्परसन्निबद्धानि परस्परसंश्लिष्टानि परस्परगवाक्षितानि चेति यैर्गवाक्षितमिदं शरीरम् ··· ।" सु.शा.५अ. ।

मांसतान: । पुं । कण्ठगतमुखरोगभेदे । लक्षणं यथा —"प्रतानवान् य: श्वयथु: सुकष्टो गलोपरोधं कुरुते क्रमेण । स मांसतान: कथितोऽवलम्बी प्राणप्रणुत्सर्व्वकृतो विकार: ॥" सु.नि.१६अ. ।

मांसतेज: । क्ली । मेदोधातौ । वै.च. ।

मांसदलन: । पुं । लोहवृक्षे, रक्तरोहितकवृक्षे । श.च. । [व.६ ।

मांसद्रावी (इन्) । पुं । अम्लवेतसे । रा.नि.

मांसधरा । स्त्री । तन्नामकप्रथमकलायाम् । "यस्यां मांसे शिरास्नायुधमनीस्रोतसां प्रताना भवन्ति ।" स्थूलापरनामसप्तमत्वचि । या व्रीहिद्वयप्रमाणा भवति । सु.शा.४अ. ।

मांसपचनम् । क्ली । मांसपाके । सु. ।

मांसपाक: । शुक्ररोगविशेषे । लक्षणं यथा— "शीर्य्यन्ते यत्र मांसानि यत्र सर्व्वाश्च वेदना: । विद्यात्तं मांसपाकन्तु सर्व्वदोषकृतं भिषक् ॥" सु. नि.१४अ. ।

मांसपुष्टिका । स्त्री । भ्रमरारिपुष्पवृक्षे । भ्रमरमारी इति मालवे प्रसिद्धा । रा.नि.व.१० ।

मांसपेशी । स्त्री । मांसवर्त्ती । मांसस्यैव मे

दः । सु.सू.१४अ. । "बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः । द्विसप्ताहात् भवेत् पेशी रक्तमांसचिता दृढ़ा । बीजस्यैवाङ्कुराः पेश्यः पञ्चविंशतिरात्रतः ॥" सुखबोधः । मांसपेशीराह—"यथार्थमूष्मणा युक्तो वायुः स्रोतांसि दारयेत् । अनुप्रविश्य पिशितं पेशीर्विभजते तथा ॥" मांसपेश्यः शरीरे पञ्चशतसंख्यकाः । तासां चतुःशतानि शाखासु । कोष्ठे षट्षष्टिः । ग्रीवाया ऊर्द्ध्वगाश्चतुस्त्रिंशत् । स्त्रीणान्तु विंशत्यधिकपञ्चशतानि । तास्र गर्भाशयगर्भमार्गयोनिस्तनेषु तिष्ठन्ति । पेशीनाञ्च कर्म्माणि—देहिनां शिरास्नायूस्थिपर्व्वसन्धयः पेश्यावृताः सबला भवन्ति । शाखासु तत्संख्या यथा—पादाङ्गुलीषु १५। पादाग्रे १० । पादोपरिकूर्च्चसन्निविष्टाः १० । गुल्फतलयोः १० । गुल्फजानुनोरन्तरे २०। जानुनि ५ । ऊरौ २० । वङ्क्षणे १० । एवमेकत्र सक्थिनि १०० । एतेनेतरसक्थिबाहू व्याख्यातौ । कोष्ठेषु यथा – गुदे ३ । शेफसि १ । सेवन्यां १ । वृषणयोः २ । स्फिचोः १० । वस्तिमूर्द्धनि २ । उदरे ५। नाभौ १। पृष्ठोर्द्ध्वमभयतः पञ्च पञ्च दीर्घाः १०। पार्श्वयोः ६ । वक्षसि १० । अक्षकांसौ प्रति समन्तात् ७ । हृदि २ । यकृति २ । प्लीह्नि २ । उण्डुके २ । ग्रीवोर्द्ध्वे यथा—ग्रीवायां ४ । हन्वोः ८ । कण्ठमणौ १ । गले १ । तालुनि २ । जिह्वायां १ । ओष्ठयोः २ । नासायां २ । नेत्रयोः २ । गण्डयोः ४। कर्णयोः २ । ललाटे ४ । शिरसि १ । स्त्रीणां अधिका विंशतिः यथा—गर्भाशये ३। शुक्रार्त्तवप्रवेशिन्यां ३ । योनावभ्यन्तरे सुखाश्रिते प्रसृते २ । योनिकर्णिके २ । स्तनयोः १० । इति । भा. । सु.शा.५अ. । [गोछ । रा.नि.व.७ ।

मांसफलः । पुं । तरम्बुजवल्ल्याम् । তরমুজ

मांसफला । स्त्री । वार्त्ताक्याम् । रा.नि.व.७ ।

मांसरक्ता । स्त्री । रोहिण्याम् । মাংসরোহিণী । वै.निघ. ।

मांसरज्जुः । स्त्री । मांसनिबन्धनस्नायौ । ताः चतस्रः । "महत्यो मांसरज्जवश्चतस्रः पृष्ठवंशमुभयतः पेशीनिबन्धनार्थं द्वे बाह्ये आभ्यन्तरे च द्वे ।" सु.शा.५अ. ।

मांसरसः । पुं । मांसयूषे । মাংসের ঝোল । गुणाः—"रसो मांसस्य चक्षुष्यो बृंहणः प्राणवर्द्धनः । वृष्यो वातविकारघ्नः स्मृत्योजःस्वरवर्द्धनः । भग्नविश्लिष्टसन्धीनां कृशानां व्रणिनां हितः ॥" राज. ३प. । तत्पाकविधिः—मांसं १ प. जलं १६ प. शे. ४ प. । यवागूकर्म्मणि – मांसं ४ प. जलं ६४ प. शे. १६ प. । "प्रस्थेऽम्भसि पलं साध्यं मांसं पादस्थिते रसः । कंसाम्बु कुडवं मांसं पक्त्वा पादावशेषिते । तेन क्वाथेन विपचेत् यवागूप्रोक्तकर्म्मसु ॥" नलः । [व.१२ ।

मांसरुहा । स्त्री । मांसरोहिण्याम् । रा.नि.

मांसरोहा (ही) । स्त्री । मांसरोहिण्यां । रा.नि.व.१२ । [रा.नि.व.१२ ।

मांसरोहिका । स्त्री । मांसरोहिणीभेदे ।

मांसरोहिणी । स्त्री । स्वनामख्यातसुगन्धद्रव्ये । মাংসরোহিণী । सा द्विधा परं तुल्यगुणा । गुणाः—शीता कषाया कृमिघ्नी कण्ठशोधनी रुच्या वातदोषहरी च । रा.नि.व.१२ ।

मांसलः । पुं । माषनामशिम्बीधान्ये । মাষকলাই । रा.नि.व.१६ ।

मांसलफला । स्त्री । वार्त्ताकौ । रा.नि.व.७ । तरम्बुजे । वै.निघ. ।

मांसलिप्तम् । क्ली । अस्थनि । वै.निघ. ।

मांसवर्गः । पुं । जलेशयानूपग्राम्यक्रव्यभुगेकशफजाङ्गलेषु । विशेषास्तत्तत्पर्य्याये द्रष्टव्याः । सु.सू. ४६अ. ।

मांसवहस्रोतः । क्ली । मांसनायकनाड्यां । तस्य मूलं स्नायुः त्वक् च । च.वि.५अ. ।

मांसवारुणी । स्त्री । हरिणादिमांसकृतवारुणीमद्ये । तत्करणविधिः—एषां मांसन्तु कणशः कृत्वा पूर्व्वद्रवे न्यसेत् । संस्थाप्य मण्डलं पश्चादर्कं निष्काशयेत्ततः । एवं सर्व्वेच मांसस्य वारुणीकरणक्रिया । पूर्व्वद्रव्यः तक्रादि । मण्डलं ४८ दिनानि । रावणः ।

मांससङ्कोचः । पुं । मांसस्य शठितभावे । भा. म.४भ.विस्फोट.चि. । "हृट्श्वासमांससङ्कोचः ।"

मांससङ्घातः । पुं । तालुरोगविशेषे । तत्र तालुमध्ये श्लेष्मणा दुष्टः अवेदनो मांससङ्घातो जायते । "दुष्टं मांसं श्लेष्मणा नीरुजञ्च तालन्तःस्थं मांससङ्घातमाहुः ।" भा.म.४भ.मु.रो.चि. ।

मांससम्भवा । स्त्री । वसायाम् । वै.निघ. ।

मांससर्पि: । पुं । राजयक्ष्मणि घृतम् । विलेशयप्रसहमांसं १२॥० श. जलं १२८ श. शे. १६ श. । घृतं ४ श. । कल्कार्थं जीवनीयगण: प्रत्येकं १ प. । एकत्र पाच्यम् । वा.चि.५अ. ।

मांससार: । पुं । मेदोधातौ । रा.नि.व.१८ ।

मांसस्नेह: । पुं । मेदोधातौ । रा.नि.व.१८ । वसायाम् । वै.निघ. ।

मांसहासा । स्त्री । चर्म्मणि । श.र. ।

मांसाङ्कुर: । पुं । अङ्कुरवन्मांसेषु, अर्शोबलौ । मा.नि. ।

मांसारि: । पुं । अम्लवेतसे । वै.निघ. ।

मांसार्व्वुदम् । क्ली शुक्ररोगविशेषे । "मांसदोषेण जानीयादर्व्वुदं मांससम्भवम् ।" सु.नि.१४ अ. । अर्व्वुदविशेषे । মাংসজন্য আব্ । लक्षणं —"अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपममप्रचाल्यम् । प्रदुष्टमांसस्य नरस्य वाढ़मेतद्भवेन्मांसपरायणस्य । मांसार्व्वुदं त्वेतदसाध्यमुक्तम् ।" सु.नि. ११अ. । [वा.उ.३७अ. ।

मांसावद(दा)रणम् । क्ली । मांसभेदने ।

मांसिका । स्त्री । जटामांस्यां । चि.क्र.क.स्त्रीरो.चि. ।

मांसिनी । स्त्री । जटामांस्यां । रा.नि.व.१२ ।

मांसी । स्त्री । सुरामांस्याम् । च.द.यक्ष्म.चि. चन्दनादितैले । वाव्यालके । বেলেড়া । र.मा. । जटामांस्यां । रा.नि.व.१२ । सु.सू.३८अ. । च.द. ज्व.चि.अङ्गारकतैले । वा.सू.१५अ.एलादि: । मांसरोहिणीभेदे । रा.नि.व.१२ । रुदन्त्याम् । काकोल्याम् । मे. ।

मांसेष्टा । स्त्री । वल्गुलायाम् । रा.नि.व.४ ।

मांसौदनम् । क्ली । मांससिद्धौदने । गुणा: —"मांसौदनं धातुवृद्धिकरं स्निग्धं गुरु स्मृतम् ।" वै.निघ. । च. ।

मांस्याह्वया । स्त्री । जटामांस्यां । सु.चि.२अ. ।

माकन्द: । पुं । आम्रवृक्षे । भा. ।

माकन्दी । स्त्री । स्वनामख्यातवनशाकवृक्षे । मं मायिनी । कं मागिनी । गुणा:— कटु तिक्ता मधुरा किञ्चिद्वातला दीपनी रुच्या पथ्या वर्षासु न मिताधिका च । रा.नि.व.७ । आमलकीवृक्षे । मे. । पीतचन्दने । श.मा. । [र.मा. ।

माकरा । स्त्री। मरुदकवृक्षे । মরুয়াফল গাছ।

माकुलि: । पुं । कृष्णसर्पेण गोनसां वैपरीत्येन वा जाते सर्पे । सु कल्प.४अ. ।

मागधम् । क्ली पिप्पलीमूले । सौवर्चललवणे । वै.निघ. । पुं । स्थूलजीरके । प.मु. । जीरके । रा.नि.व.६ । शुक्लजीरके । मे. । [व्या.चि. ।

मागधिका । स्त्री । पिप्पल्याम् । वै.निघ.वा.

मागधिमूलम् । क्ली । पिप्पलीमूले । प्र. बाहुशालगुड़े द्रव्यम् ।

मागधी । स्त्री । पिप्पल्यां । प.मु. । रा.नि.व. ६।२३ । भैष.मृतसञ्जीवन्यां । शर्करायां । जटा. । सूक्ष्मैलायां । यूथिकायां । শ্বেত যূঁই । रा.नि.व. १० । जीरके । रा.नि.व.२३ । शतपुष्पाविशेषे । वै.निघ.। शालिधान्यविशेषे । सा च कफवातला । अत्रि.१५अ. ।

मागधीजटा । स्त्री । पिप्पलीमूले । वै.निघ.।

मागधीशिफा । स्त्री । पिप्पलीमूले । सर्व्वज्व.चि.त्रिभुवनकीर्त्तिरसे ।

मागधेया । स्त्री । स्वर्णजीवन्त्यां । वै.निघ. ।

माघमा । स्त्री । कर्कटे । वै.निघ. ।

माघवती / **माघोनी** } स्त्री । पूर्व्वदिशि । रा.नि.व.२१ ।

माघ्यम् । क्ली । कुन्दपुष्पे । কুঁদ ফুল । र.मा. ।

माङ्गल्यम् । क्ली । स्वर्णे । कपित्थफले । दधनि । नारिकेले । जीवके । स्थलपद्मे । मसूरके । मधूके । रा.नि.व.२३। पिप्पलीमूले । रीठाकरञ्जे । ऋषभके । हरिमुद्गे । वै.निघ. ।

माङ्गल्य: । पुं । विल्ववृक्षे । र.मा. ।

माङ्गल्यकाया । स्त्री । दूर्व्वायाम् । हरिद्रायाम् । ऋद्धौ । माषपर्ण्याम् । गोरोचनायां । हरीतक्याम् । वै.निघ. । [निघ. ।

माङ्गल्यकुसुमा । स्त्री । शङ्खपुष्प्याम् । वै.

माङ्गल्यप्रवरा । स्त्री । वचायाम् । वै.निघ. ।

माङ्गल्या । स्त्री । गोरोचनायाम् । शमीवृक्षे । जीवन्त्याम् । वै.निघ. ।

माङ्गल्यागुरुः । पुं । अगुरुभेदे । केदारदेशे प्रसिद्धः । गुणाः—शीतगुणः स सुगन्धियोगवाहः श्रेष्ठश्च । रा.नि.व.१२ । [व.५ ।

माङ्गल्याहीं । स्त्री । त्रायमाणायाम् । रा.नि.

माचिका । स्त्री । आम्रातकवृक्षे, मोइआ इति पश्चिमदेशप्रसिद्धवृक्षे । गुणाः—"...अम्ला रसे पाके कषाया शीतला लघुः । पक्वातीसारपित्तास्र कफकण्ठामयापहा ।" भा. । पाठायां । आक्नादि । च.चि.८अ. । मक्षिकायाम् । त्रिका. ।

माची । स्त्री । काकमाचीक्षुपे । गुड़काउली । वै.निघ. ।

माचीकम् । क्ली । देवदारुणि । रस.र.प्रद. चि.पुष्यानगचूर्णे । [रा.नि.व.१० ।

माचीपत्रम् । क्ली । सुरपर्णनामपत्रशाके ।

माजलः । पुं । चासनामकपक्षिविशेषे । श.च. ।

माञ्जरिकः । पुं । अपामार्गक्षुपे । रा.नि.व.४ ।

माटी । स्त्री । पर्णदलशिरायाम् । पातेर शिर । वै.निघ. । [वै.निघ. ।

माठः । पुं । सुनिषण्णकशाके । शुशुनि शाक ।

माड़ः (द्रुमः) । पुं । स्वनाम्ना कोङ्कणदेशप्रसिद्धे वृक्षविशेषे । वम्. भेलीमाड़ । मं माडु । कं वैनी । कोङ्कणे जिर्कतुंड । गुणा.—शिशिरः कषायः रुच्यः पित्तदाहकरः तृषाघ्नः वातलः श्लेष्मलः श्रमघ्नश्च । रा.नि.व.६ । नारिकेलवृक्षे । वै.निघ. ।

माढ़िः (ढ़ी) । स्त्री । पत्राङ्कुरे । दन्तवेष्टभागे । अ.टी.भ. । पर्णशिरायाम् । हे.च. । दन्तशिरायां । श.र. ।

माणः (कः) । पुं । (Arum Indicum.) स्वनामख्याते कन्दविशेषे । मानकचू । प.मु. । हिं वम्. मानकन्द । गुणाः—"माणकः स्यान्महापत्रः कथ्यते तद्गुणा अथ । माणकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥" भा.पू.१भ.शा.व. ।

माणकघृतम् । क्ली । शोथे घृतम् । "माणकक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत्... ।" घृतं ४ श. । क्वाथार्थं—माणः १२॥० श. जलं ६४ श शे. १६ श. माणकल्कः १ श. । भा. ।

माणतुण्डिकः । पुं । जलचरपक्षिविशेषे । च.सू.२७अ. ।

माणवकः । पुं । सप्तवर्षीयबालके । रा.नि.व. १८ । द्वीपान्तरखर्ज्जूरिकायाम् । वै.निघ. । मनुष्ये । हारभेदे । त्रिका. । कुत्सितपुरुषे । मे. । वटौ । हे.च. । गोणके । च.सू.१५अ. । [श.मा. ।

माणिका । स्त्री । पलाष्टकमाने । प.प्र.१ख. ।

माणिक्यम् । क्ली । रक्तवर्णरत्नविशेषे । माणिक । गुणाः—मधुरं स्निग्धं वातपित्तघ्नं रसायनञ्च । रा.नि.व.१३ । "शुध्येदम्लेन माणिक्यं जयन्त्या मौक्तिकन्तथा । विद्रुमं क्षारवर्गेण तार्क्ष्यं गोदुग्धतस्तथा । पद्मरागन्तु सन्धानैः कुलत्थक्वाथसंयुतैः । तण्डुलीयरसैर्वज्रं नीलं नीलीरसेन च । रोचनाभिश्च गोमेदं वैदूर्यं त्रिफलाजलैः । स्वेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च । मणिमुक्ताप्रवालादि यामैके शोधितं भवेत् । चूर्णोदके तथा तैले काञ्जिके याममात्रकम् । दोलायन्त्रेण मतिमान् स्वेदयेत्तालकं वरम् । अनेन शुद्धिमायाति सत्यं गुरु वचो यथा ॥" इति शोधनमारणे । सा.कौ. । [भा. ।

माणिक्यकदली । स्त्री । कदलीविशेषे ।

माणिबन्ध(मन्थ)म् । क्ली । सैन्धवलवणे । अ. टी.स्वा. । रा.नि.व.६ । वै.निघ.२भ.अभिन्यासज्व. चि. । सामुद्रलवणे । वै.निघ. ।

माण्डविकः । पुं । तद्देशजमध्यमाश्वे । "कैकनाकारदेहस्तु भवेन्माण्डविको हयः ।" ज.द.६अ. ।

माण्डव्यः । पुं । पीतमण्डूके । वै.निघ. ।

माण्डूकम् । क्ली । वङ्गधातौ । रा.नि.व.१३ । अहिफेने । भैष.अभयनृसिंहरसे ।

माण्डूकी । स्त्री । ब्राह्मीक्षुपे । वै.निघ. ।

मातङ्गः । पुं । अश्वत्थवृक्षे । अ.टी. । हस्तिनि अम. । उदुम्बरवृक्षे । वै.निघ. ।

मातङ्गकृष्णा । स्त्री । गजपिप्पल्याम् । वै. निघ.२भ.वा.व्या.पञ्चवध-चि. ।

मातङ्गमकरः । पुं । महामत्स्यविशेषे । हस्तिमकर । रा.नि.व.१६ ।

मातरः । पुं । क्रमौ । वै.निघ. ।

माता । स्त्री । जनन्यां । अम. । आखुकर्णीलतायां । मूषाकाणी लता । इन्द्रवारुणीलतायां । ब्राथालशशा । रा.नि.व.३ । जटामांस्याम् । रा.नि.व.१२ । महाश्रावणिकायाम् । रा.नि.व.५ । घृतकुमार्य्याम् । वै.निघ. । गवि । मे. ।

माताङ्गा । स्त्री । नागबलायाम् । वै.निघ. ।

मातुलः (कः) । पुं । धुस्तूरक्षुपे । धुतूरा गाछ । मदनवृक्षे । कलायविशेषे । मे. । रा.नि.व. १० । त्रिका. । [शिमूल गाछ । वै.निघ. ।

मातुलद्रुमः । पुं । धुस्तूरवृक्षे । शाल्मलीवृक्षे ।

मातुलपुत्रकः । पुं । धुस्तूरफले । श्वेत धुतूरार फल । अम. ।

मातुलपुष्पम् । क्ली । धुस्तूरपुष्पे । वै.निघ. ।

मातुलानी । स्त्री । प्रियङ्गुलतायाम् । श.च. । शणबीजे । हे.च. । भङ्गायाम् । सिद्धि । कलाये । मे. । [केउटिया साप । अम. ।

मातुलाहिः । पुं । सर्पविशेषे । मालुया साप,

मातुली । स्त्री । शणबीजे । भङ्गायां । श.च. ।

मातुलुङ्गः (कः) । पुं । (Citrus medica.) बीजपूरवृक्षे । टावा लेबुर गाछ । हिं बीजौरा । मं माइलिङ्ग । कं माधला । तें मादीफलपुचेट्टु । उत्. कलंबा । प.मु. । सु.सू.३६अ. । च.द.ज्व.चि. । "अरुचौ मातुलुङ्गस्य केशरम् ।" च.सू.४अ. । गुणाः—"स्यान्मातुलुङ्गः कफवातहन्ता हन्ता क्रमीणां जठरामयघ्नः । स दूषितरक्तविकारपित्तसन्दीपनः शूलविकारहारी ॥" तत्फलगुणाः—"श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनं । दीपनं लघु रुच्यञ्च मातुलुङ्गमुदाहृतम् ॥" अम्लकटूष्णं श्वासकासघ्नं पाचकं कण्ठशोधनं दीपनं लघु हृद्यं रुचिकृच्च । तत्र फलं बालं वातपित्तकफरक्तकरं । मध्यं फलं तादृशमेव । पक्वं फलं वर्णकरं हृद्यं पुष्टिकरं बलकरं शूलहरम् अजीर्णनाशनं विबन्धवातकफश्वासाग्निमान्द्यहरं कासारोचकशोफघ्नञ्च । त्वक् तिक्ता दुर्जरा क्रमिकफवातघ्नी च । तत्करहं स्वादु शीतं गुरु स्निग्धं वातपित्तहरञ्च । तन्मध्यमुष्णं शूलपित्तहरमरोचकघ्नञ्च । तत्केसरं दीपनं लघु संग्राहि गुल्मार्शोघ्नञ्च । तद्रूकेसरं पित्तमारुतघ्नं हृद्यं वर्णकरं रुच्यं रक्तमांसबलदञ्च । स्वरसः अरुचौ श्वासकासयोश्च हितः। तथा शूले अजीर्णे मन्दाग्नौ वातकफे च हितः । तत्कटाहः कफकृत् दुर्जरश्च । तत्पुष्पं तिक्तम् । बीजं गुल्मघ्नम् । अत्रि.१७अ. । तत्केसरं वातघ्नम् उदररोगघ्नं दीप्यमम्लञ्च । बीजम् तिक्तं कफार्शःशोथहरञ्च । रा.नि.व.११ । तन्मांसं बृंहणं शीतलं गुरु वातपित्तजिच्च । केसरः लघुः संग्राही शूलगुल्मोदरघ्नश्च । च.द.पि.ज्व.चि.कण्ठतालुशोषलेपे । "केसरं मातुलुङ्गस्य ।" च.द.वातश्लेष्मज्व. चि. । "मातुलुङ्गफलकेशरो धृतः ।" बीजम् उष्णं क्रमिश्लेष्मवातघ्नं गर्भदं गुरु च । पुष्पं वातलं ग्राहि लघु रक्तपित्तहरं शूलाजीर्णविबन्धाग्निमान्द्ये हितम् । तद्रसः अरुचिश्वासकासेषु हितः अतिमधुरः हृद्यश्च । मद.व.६ ।

मातुलुङ्गशिफा । स्त्री । मातुलुङ्गमूले । छोलङ्ग लेबुर मूल । च.द.कफज्व.चि. । "मातुलुङ्गशिफाविश्व··· ।"

मातुलुङ्गा (ङ्गिका, ङ्गी) । स्त्री । जम्बीरभेदे । शरवती लेबु । हिं शान्तारा । रा.नि.व. ११ । भा.म.३भ.मू.घा.चि. । सि.यो.विसू.चि.प्रमोलिकाद्यञ्जने ।

मातृकः । पुं । ऋषभके । प.मु. । स्त्री (का) । ऋषभके । आटरूषके । वै.निघ. ।

मातृकाकुन्दः । पुं । शिशोर्गुदजव्रणविशेषे । वा.उ.२अ. । See गुदकुन्दः ।

मातृकावहः | मातृवाहकः पुं । पर्दकीटे । पेदो पोका । "मातृकावहकीटजः ।" प्रयोगा. । च.द.ग.ग.चि. ।

मातृनन्दनः (न्दी(इन्)) । पुं । महाकरञ्जे । वै.निघ. । गुच्छकरञ्जवृक्षे । रा.नि.व.९ ।

मातृनिन्दकः । पुं । प्रतुदजातीयपक्षिणि । सु.सू.४६अ. ।

मातृमण्डलम् । क्ली । नेत्रयोर्मध्यभागे । तत्तु आसन्नमरणो न पश्यति । स्मृतिः । [नि.व.१९ ।

मातृवाहिनी । स्त्री । वल्गुलापक्षिणि । रा.

मातृसिंही । स्त्री । वासकवृक्षे । श.र. ।

मात्रा । स्त्री । अनपायिपरिमाणे । च.सू.१अ.। भोजनादिपरिमाणे । कालपरिमाणे । अम. । द्रव्यविशेषे मात्रामाह पुष्कलावत:—"आर्द्रस्याष्टपला मात्रा कुड़वस्य प्रमाणत: । मधुतैलघृतादेश्च शुष्कद्रव्ये चतुष्पलम् ॥" विश्वामित्र: –"शुद्गगुग्गुलुवाह्लीकत्रिफलारिष्टनागरै: । कुष्माण्डार्द्रकनिम्बानां कुड़वश्चाष्टभि: पलै: ॥" "सर्पि: खण्डजलक्षौद्रतैलक्षीरासवादिषु । अष्टौ पलानि कुड़वो नारिकेले च शस्यते ॥" सा.कौ. । तथाच भेद: । "गुड़रामठशुण्ठीनां मांसकुष्माण्डयोरपि । गुड़ूच्या गुग्गुलोश्चैव प्रस्थ: षोड़शभि: पलै: ॥" भोज:—"यच्चूर्णं गुटिकायाश्च कर्त्तव्या गुल्मरोगिणाम् । क्षीरहिङ्गुजमोदाम्लवेतसैस्ता न केवला: ॥ क्रोष्टुशीर्षादिरोगेषु जटायुर्द्विगुणो मत: । प्रमेहादिषु रोगेषु मात्रातोऽर्द्ध: प्रशस्यते ॥"

मादक: । पुं । अहिफेणे । আফিম্ । प.मु. । हरिणभेदे । वै.निघ. । दात्यूहपक्षिणि । श.मा. । स्त्री (का) । भङ्गायाम् । সিদ্ধি, ভাঙ্ । वै.निघ. ।

मादनम् । क्ली । लवङ्गे । रा.नि.व.२३ । पुं । मदनवृक्षे । त्रि । मदजनके ।

मादनी । स्त्रीं । माकन्द्याम् । रा.नि.व.७ । विजयायाम् । সিদ্ধি । भा. ।

मादिनी । स्त्री। शक्राशने । সিদ্ধি । वै.निघ.।

माद्री । स्त्री । कृष्णातिविषायाम् । কাল আতইচ। रा.नि.व.६। वा.चि.८।१२अ.। वा.उ.२अ.।

माधव: । पुं । कृष्णमुद्गे । प.मु.। रा.नि.व.१६। वैशाखमासे । त्रिका. । मधूकवृक्षे । वसन्तकाले । जीरकवृक्षे । क्ली । मधूकभेदे । वै.निघ. । च.द. सात्म्य.चि. । [सकौमुदीकारे च ।

माधवकर: । पुं । रुग्विनिश्चयग्रन्थकारे । र-

माधवद्रुम: । पुं । आम्रवृक्षे । रा.नि.व.११ ।

माधवप्रियम् । क्ली । पीतचन्दने । रा.नि.व. १२ । [भ. ।

माधविका । स्त्री । माधवीलतायां । अ.टी.

माधवी । स्त्री। माधवीलतायां। रा.नि.व.१०। शताह्वाक्षुपे । रा.नि.व.४ । वासन्तीपुष्पवृक्षे । रा.नि.व.१०।२३ । शतपत्रे । रा.नि.व.२३ । मधुशर्करायाम् । रा.नि.व.१४।२३ । तुलसीवृक्षे । वाराहीकन्दे । माध्वीसुरायाम् । वै.निघ. । मद्ये । त्रिका. ।

माधवीमूलम् । क्ली । माधवीलतामूले । रस.र.स्तनरो.चि. । "घोलेन माधवीमूलं पीतं स्त्रीमध्यकार्श्यकृत् ।"

माधवीलता । स्त्री । स्वनामख्यातलतायां । মাধবী ফুলের গাছ । गुरुविन्द, माधवी, इन्द्रगोचे, इति महाराष्ट्रकर्णाटदेशयो: प्रसिद्धा । तें माधवतोगे, पुव्वुलगुरिविन्द । गुणा:—कटुका तिक्ता कषाया मदगन्धयुक्ता पित्तकासव्रणघ्नी दाहशोषघ्नी च । रा.नि.व.१० । मधुरा शीता लघ्वी दोषत्रयघ्नी च । भा. । [वै.निघ. ।

माधवेष्टा । स्त्री । वाराहीनाममहाकन्दशाके ।

माधवोचितम् । क्ली । कक्कोले । रा.नि.व. १२ । [গাছ । रा.नि.व.११ ।

माधवोद्भव: । पुं । राजादनीवृक्षे । খীর্ণী

माधुतैलिक: । पुं । तन्नामकवस्तिविधौ । सु. चि.३८अ. ।

माधुरम् । क्ली । मल्लिकापुष्पे । त्रिका. ।

माधुरी । स्त्री । अजमोदायां । रा.नि.व.६ । द्राक्षासवे । मधुरतायाम् । वै.निघ. ।

माधूकसार: । पुं। मधूकपुष्परसे मधुनि वा । মউলফুলের রস বা মধু । वा.सू.१५अ.शिरोविरेचने ।

माध्वकम् । क्ली । माध्वीके । वै.निघ. ।

माध्वाम्र: । पुं । बहुरसालाम्रवृक्षे । খাস আমের গাছ । रा.नि.व.११ ।

माध्वी । स्त्री। मधुखर्ज्जूरीवृक्षे । रा.नि.व.११ । मधुरकण्टकमत्स्ये । श.र. । पुष्परसादिमधुकृते मद्ये । "पुष्पद्रवादिमधुसारमया तु माध्वी ।" गुणा:—मधुरा हृद्या वातपित्तहृत् नात्युष्णा पाण्डुकामलागुल्मार्शोमेहघ्नी च । रा.नि.व.१४ । पुष्परसे । मधुशर्करायाम् । वै.निघ. । मद्ये । त्रिका. ।

माध्वीकम् । क्ली । मध्वासवे । च.द.सात्म्यचि. । मधूकपुष्पकृतमद्ये । अम. । मद्ये । रा.नि. व.१४ । द्राक्षाकृतमद्ये । দ্রাক্ষামদ্য, পোর্ট । गु-

णा: —"माध्वीकं शीतलाम्बं मधुरमपि तथा संक-
षायीणकञ्च द्द्यात् पित्तामयार्त्त:श्वसनमपि तथा
चातिसारं प्रमेहान्। मूत्रानाहोपमर्द्दं जरयति
सकलं दीपयत्यग्निमान्द्यम् तस्मादातामवातं व-
मनमपि तथा हन्ति सर्व्वांश्च रोगान्॥" चचि.
१६ष.। पुं। निष्पावे। শিম্। प.मु.। त्रिका.।

माध्वीकफल:। पुं। मधुनारिकेलवृक्षे। रा.
नि.व.११। [रा.नि.व.१६।

माध्वीका। स्त्री। श्वेतनिष्पावे। শ্বেত শিম্।

माध्वीमधुरा। स्त्री। मधुखर्ज्जूरिकायां।
रा.नि.व.११।

माध्वीशर्करा। स्त्री। मधुशर्करायाम्। म-
ধু। চিনি। ता षट्विधा मधूनामष्टविधत्वात्।
गुणा अपि तत्तन्मधुतुल्या भवन्ति। रा.नि.व.१४।

माध्वीसिता। स्त्री। मधुशर्करायाम्। रा.
नि.व.१४।

मानम्। क्ली। परिमाणे। পরিমাণ, ওজন।
"मानापेक्षितमाचार्य्या भेषजानां प्रकल्पनम्। मि-
मिरे यत्ततो मानमुच्यते परिभाषिकम्॥" तच्च
द्विविधं कालिङ्गमागधभेदेन। तयोर्द्वितीयं श्रे-
ष्ठम्। "कालिङ्गान्मागधं श्रेष्ठम्।" इति। "तुला
पलशतञ्ज्ञेया सर्व्वत्रैष विनिश्चय:। माषटङ्काक्षवि-
ल्वानि कुड़व: प्रस्थ आढ़क:। राशिर्द्रोणी खारि-
रिति यथोत्तरचतुर्गुणा:। गुञ्जादिमानमारभ्य या-
वत् स्यात् कुड़वस्थिति:। द्रवार्द्रशुष्कद्रव्याणां ताव-
न्मानं समं मतम् प्रस्थादिमानमारभ्य द्विगुणन्तु
द्रवार्द्रयो:। मानं तथा तुलायाश्च द्विगुणं न क-
चित् स्मृतम्॥" प.प्र.१ख.।

मानकम्। क्ली। शरावे। ১ সের। वै.निघ.
ज्व.चि.चन्दनाद्यतैले। पुं। माणके। মানকচু।
र.मा.। मालाकन्दे। वै.निघ.। [भैष.।

मानकक्षार:। पुं। माणकदण्डपत्रक्षारे।

मानत:। पुं। पर्पटके। ক্ষেৎপাবড়া। वै.
निघ.।

मानद्रुम:। पुं। शाल्मलीवृक्षे। वा.सू.१५ष.
प्रियङ्ग्वादिव.। "मानद्रुमो मोचरस:।"

मानधानिका। स्त्री। त्रपुष्याम्। শশা,
কাঁকুড়। श.मा.।

मानभाण्डम्। क्ली। परिमाणभाण्डे। মাপ-
ভাঁড়। च.सू.१५ष.।

मानमृताफल:। पुं। पटोलवृक्षे। वै.निघ.।

मानव:। पुं। मनुष्ये। अम.।

मानवकोत्तम:। पुं। शिग्रौ। रा.नि.व.१८।

मानसम्। क्ली। मनसि। त्रिका.।

मानसक्लैव्यम्। क्ली। चित्तसम्भूतक्लैव्ये। ম-
নঃক্ষুণ্ণতা। सु.चि.२६ष.।

मानसज्वर:। पुं। य आदौ मनसि जायते,
वैचित्त्यादौ। लक्षणम्—"वैचित्त्यमरतिर्ग्लानिर्मन-
सस्तापलक्षणम्।" च.चि.३ष.। [नि.व.१६।

मानसालय: (ओका:)। पुं। हंसे। रा.

मानिकम् (का)। क्ली, स्त्री। अष्टपलमिते
माने। ६४ तो.। ১ সের। सि.यो.बृहद्गुडूचीस्था-
ने। "कुड़वाभ्याञ्च मानिका।" प.प्र.१ख.। मद्ये।
श.र.। (क्ली) वमनविरेचनयो: शोधनान्यतरे। च.
द.वमनाधिकारे।

मानिनी। स्त्री। लक्षणाकन्दे। रा.नि.व.७।

मानिमन्थम्। क्ली। सैन्धवलवणे। भैष.कुष्ठ-
चि.। "मानिमन्थञ्च तुल्यांशम्।"

मानी (इन्)। पुं। सिंहे। रा.नि.व.१६।
स्त्री (नी)। शरावमिते। ১ শ.। भैष.।

मानुषी। स्त्री। औषधनिर्म्माणकार्य्ये। चिकि-
त्साभेदे। श.च.। नार्य्याम्। স্ত্রীলোক। अम.।

मानुषीदधि। क्ली। मानुषीदुग्धजातदध्नि।
মানুষের দুধের দৈ। गुणा:—विपाके मधुरं
बल्यम् अम्लं गुरु सन्तर्पणं चक्षुष्यं ग्रहदोषघ्नञ्च।
रा.नि.व.१५।

मानुषीक्षीरम्। क्ली। मानुषीस्तनदुग्धे। মা-
নুষের দুধ। मधुरं कषायं हिमं लघु चक्षुष्यं दी-
पनं पथ्यं पाचनं रोचनञ्च। रा.नि.व.१५। "स-
ञ्जीवनं बृंहणमेव सात्म्यं सन्तर्पणं नेत्ररुजापहञ्च।
पित्तस्य रक्तस्य च नाशनञ्च नारीपय: स्नेहनमेव
शस्तम्॥" अत्रि.८अ.। [गे। हे.च.।

मान्द्यम्। क्ली। आलस्ये। रा.नि.व.२०। रो-

माम्बिका। स्त्री। अम्बष्ठायाम्। रा.नि.व.४।

मायादः । पुं । कुम्भीरे । त्रिका. ।

माया(यि)फलम्
मायिकम् } क्ली । फलविशेषे । मा-जूफल, माय़ाफल । गुणाः—कटूष्णं वातहरं केशकृष्णताकरं शैथिल्यसङ्कोचकरञ्च । रा.नि.व.६ । [र.मा. ।

मायी । स्त्री । हिलमोचिकायां । हिञ्चेशाक ।

मायुः । पुं । पित्ते । रा.नि.व.२१ । त्रिका. । प्र.रविसुन्दररसे । "स मीनमायुः ।" भा.ज्व.चि. ।

मायूरा । स्त्री। काकोदुम्बरिकायाम् । वै.निघ.।

मायूरादिपत्त्रव्यजनम् । क्ली। मयूरपत्त्रवस्त्रवेत्रादिव्यजने । गुणाः—"मायूरा वस्त्रजा वैत्रा वाता दोषत्रयापहाः ।" राज.२प. । [भा. ।

मायूरी । स्त्री । अजमोदायाम् । वनयमानी ।

मारः । पुं । मृत्यौ । मे. । धुस्तूरवृक्षे । श.च. ।

मारकः । पुं । श्येनपक्षिणि । বাজবৌরী । त्रि । हिंसके । वै.निघ. । क्ली । हिङ्गुले । रा.नि. व.१३ ।

मारकवर्गः । पुं । रसमर्द्दकद्रव्यगणे । यथा—"घनवचाचित्रकगोक्षुराः कटुतुम्बी दन्तिका जातिः ।सर्पाक्षी शरपुङ्खा कन्या चाण्डालिनीकन्दम् । विषमुष्टिरजवल्ल्यौ लज्जा देवदाली लाक्षा । सहदेवानीपकणानिर्गुण्डीचक्रलाङ्गलिकाः । मानार्कचन्द्ररेखा रविभक्ता काकमाचिका चार्कः । विष्णुक्रान्ता वायसतुण्डी वज्री बला शुण्ठी चैव । कोषातकी जयन्ती वाराही हस्तिशुण्डिका रम्भा । मत्स्याक्षी यमचिञ्चा हरिद्रे द्वे पुनर्नवाद्वितयम् । धुस्तूरकाकजङ्घे शतावरी कञ्चुकी चैव वन्ध्या । तिलभेकपर्ण्यौ दूर्व्वा मूर्व्वा हरीतकी तुलसी । गोकण्टकाखुपर्ण्यौ कर्कटीकन्दवर्गलता च । सुषवी हिङ्गु गुडूची शिग्रुः गिरिकर्णिका महाराष्ट्री । मार्कवसैन्धवसरणीसोमलताः श्वेतसर्षपोऽसनश्च । हंसपदी व्याघ्रपदी किंशुकभल्लातकेन्द्रवारुणिका । सर्व्वेषाङ्कांशं वा अष्टादशाधिका वापि द्रव्यम् । समारणमूर्च्छादौ च युक्तिशैर्विधिवदुपयोज्यम् ॥" र.सा.सं. ।

मारङ्गा । स्त्री । मेदायां । रा.नि.व.५ ।

मारजातकः । पुं । मार्ज्जारे । वै.निघ. ।

मारटम् । क्ली । इक्षुमूले । वै.निघ. ।

मारणम् । क्ली । अभिचारभेदे ।

मारारिनारीरजः । क्ली । गन्धके । भा. ज्व.चि.कल्पतरौ ।

मारिशः (षः) । पुं । पत्त्रशाकविशेषे । काँटानटेर शाक । हिं नवड़ा। उत्. नेउटा शाग । स द्विविधः श्वेतरक्तभेदेन । गुणाः—"मारिषो मधुरः शीतो विष्टम्भी पित्तनुद्गुरुः । वातश्लेष्मकरो रक्तपित्तनुद्विषमाग्निजित् ॥ रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः । श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥" भा.पू.१भ.शा.व. ।

मारीचः । पुं । कङ्कोलवृक्षे । रा.नि.व.१२ ।

मारीचपत्त्रकः । पुं । सरलवृक्षे । रा.नि.व. १२ । [न्वन्तरी । वै.निघ. ।

मारीचपत्त्रका । स्त्री । सरलदेवदारौ । ध-

मारीचवल्ली । स्त्री । मरिचवृक्षे । वै.निघ. ।

मारी(रु)षः । पुं । मारिषशाके । हि. ।

मारुण्डः । पुं । सर्पाण्डे । मे. ।

मारुतः । पुं । वायौ । रा.नि.व.२१ ।

मारुता । स्त्री । स्पृक्कायां । পিড়িং । वै.निघ.।

मारुतापहः । पुं । वरुणवृक्षे । रा.नि.व.९ ।

मार्कः । पुं । भृङ्गराजे । र.मा. ।

मार्कटपिप्पली । स्त्री । कपिपिप्पल्याम् । আপাং । रा.नि.व.४ ।

मार्कण्डिका (ण्डी) । स्त्री । भूम्याहुल्ये । কাঁকরোল । हिं भूइखखसावल्ली भूमिप्रसरणशीला। बम्. भूँइतरवड़ । गुणाः—"मार्कण्डिका कुष्ठहरी ऊर्द्धाधःकायशोधनी। विषदुर्गन्धकासघ्नी गुल्मोदरविनाशिनी ॥" भा.पू. । वै.निघ.२भ.च. सा.चि.शुण्ठ्यादिचूर्णे । [४ ।

मार्कण्डीयम् । क्ली । भूम्याहुल्ये । रा.नि.व.

मार्कवः । पुं । भृङ्गराजे । ভীমরাজ । र.मा.। हिं भंगरा । मं गवगमूरु । कं भंगरैया । बम्. माका । मार्कवः नीलपीतमहाभेदेन त्रिधा । गुणाः—चक्षुष्यः तिक्तः उष्णः केशरञ्जनः कफशोथविषघ्नः रसायनश्च । रा.नि.व.४ । च.द.ज्वराति-

सा.चि.व्योषाद्यचूर्णे । “निम्बभूनिम्बमार्कवम् ।” च.द.वा.वा.चि.सिंहलायां ।

मार्गः । पुं । मृगे । मलद्वार । त्रिका. । कस्तूर्य्याम् । मृगनाभि । मे. । रक्तापामार्गे । रस.चि. नागसिन्दूरे । भैष.कर्णरो.चि.अपामार्गक्षारतैले । (कः) मार्गशीर्षमासे । श.मा. ।

मार्गशाहिनी । स्त्री । चन्द्रनाड्याम् । वै.निघ. ।

मार्गविशोधनम् । क्ली । मूत्रपुरीषसङ्गे सति तन्मार्गशोधनकर्म्मणि । सु.सू.७अ. ।

मार्जनम् । क्ली । शुद्धकरणे । श.र. । पुं । लोध्रवृक्षे । प.मु. । श्वेतलोध्रे । सुभूतिः । रक्तरोध्रे । स्वामी । स्त्री (नी) । सम्मार्जन्याम् । ঝাঁটা ।

मार्जारः । पुं । रक्तचित्रकक्षुपे । रा नि.व.६ । पूतिसारिवायाम् । वै.निघ. । विड़ाले । अम. । खट्टाशे । খটাশ । हे.च. । (कः) मयूरे । त्रिका. ।

मार्जारकण्ठः । पुं । मयूरे । श.र. ।

मार्जारगन्धा (न्धिका) । स्त्री । मुद्गपर्ण्यां । মুগানী । प.मु. । रा.नि.व.३ ।

मार्जारपादः । पुं । अश्वभेदे । यस्याश्वस्य पादे पूर्वे च स्ववर्णभिन्नवर्णा रेखा भवेत् । स च भर्त्तुरमङ्गलकरः । ज.द.२अ. ।

मार्जारिका । स्त्री । कस्तूर्य्याम् । वै.निघ. ।

मार्ज्जारी (ली) । स्त्री । गन्धमार्ज्जारे । খাটাশী । गुणाः—वामनी चक्षुष्या वातघ्नी च । मदनपालः । कस्तूर्य्यां । মৃগনাভি । रा.नि.व. १२।२३ ।

मार्जारीयः । पुं । विड़ाले । मे. ।

मार्जालः । पुं । विड़ाले । हि.कोषः ।

मार्जिता । स्त्री । दधिशक्तौ । प.मु. । शिखरिण्याम् । वै.निघ. ।

मार्त्तण्डः । पुं । अर्कवृक्षे । अम. । शूकरे । मे. । स्वर्णमाक्षिके । वै.निघ. ।

मार्त्तण्डमूलम् । क्ली । अर्कमूले । वै.निघ. २भ.ज्व.चि.निर्गुण्डीधूपे ।

मार्त्तण्डवल्लभा । स्त्री । आदित्यभक्तायां । হড়হড়িয়া । रा.नि.व.४ ।

मार्त्तिकः । त्रि । मृण्मये । च.चि.१अ.आमलकघृते । पुं । शरावे । त्रिका. ।

मार्द्वीकम् । क्ली । द्राक्षारसजातमद्ये । “मार्द्वीकमविदाहित्वान्मधुरान्वयतस्तथा । रक्तपित्तेऽपि सततं बुधैर्न प्रतिषिध्यते । मधुरं तद्धि रुच्यञ्च कषायानुरसं लघु । लघुपाकि सरं शोषविषमज्वरनाशनम् ॥” सु.सू.४५अ.मद्यव. ।

मार्द्वीकमद्यम् । क्ली । द्राक्षाकृतमद्ये । “मृद्वीकाभिः कृतं मद्यं मार्द्वीकमिति चोच्यते । मृद्वीकानां सुपक्कानां यः स्वयं गालितः पटात् ॥ रसलेन हि तन्मद्यं कषायरहितेन यत् । मार्द्वीकं कापिशं भीमविक्रान्तं कापिशायनम् ॥” तोड़.वृद्धशौनकः ।

मार्द्वीकशुक्तम् । क्ली । मार्द्वीकरसेन सतैलेन कन्दशाकफलैश्चाम्लते अम्ले । प.प्र.२ख. ।

मार्षः । पुं मारिषशाके । নটে শাক । भा. पू.१भ.शा.व. ।

मार्षकः । पुं । मधुरवालुके । মিঠা বেতো । मारिषशाके । নটে শাক । रा.नि.व.७ ।

मार्ष्टिः । स्त्री । तैलमर्द्दने । वै.निघ. ।

मालकम् । क्ली । स्थलपद्मे । जटा. ।

मालकः । पुं । निम्बवृक्षे । महानिम्बे । अम. ।

माल(ला)कन्दः । पुं । स्वनामख्यातमहाकन्दशाके । मं दावणियगड्डु । कं करियगोलि । गुणाः—सुतीक्ष्णः गण्डमालाघ्नः दीपनः गुल्महरः वातश्लेष्मघ्नश्च । रा.नि.व.७ ।

मालती । स्त्री । (Aganosma calicina. Syn. Echites caryophyllata.) स्वनामख्याते पुष्पशाके । মালতীলতা, গন্ধমালতী । र.मा. । सु.सू.३९अ. । गुणाः—“मालती कफपित्तास्यरुग्व्रणक्रिमिकुष्ठजित् । चक्षुष्यं कुसुमं तस्याः पत्रं त्वक्कफपित्तजित् ॥” राज.५प. । पीतजातीवृक्षे । পীত জাতীফুলের গাছ । श्वेतजात्याम् । जातीकुसुमवृक्षे । रा.नि.व.१० । पाठायाम् । आकनादि । वै.निघ. । युवत्यां । ज्योत्स्नायां । भारतीयनदीविशेषे । हे.च. ।

मालतीजातः । पुं । टङ्गणक्षारे । र.सा.सं. ।

मालतीतीरजः । पुं । टङ्कणे । সোহাগা । हे.च. । [हागा । रा.नि.व.१० ।

मालतीतीरसम्भवम् । क्ली । टङ्कणे । সো-

मालतीपत्रिका । स्त्री । जातीकोशे । ज-यित्री । रा.नि.व.१२ ।

मालतीपुष्पम् । क्ली । जातीपुष्पे । सि.यो. पानीयकल्याणघृते । स्वनामकपुष्पे । वै.निघ. ।

मालतीफलम् । क्ली । जातीफले । जायफल । रा.नि.व.१२ ।

मालतीमूलम् । क्ली । मालतीशिफायाम् । মালতীশিকড় । इदं जङ्गमविषहरं । नकुल १६अ. । [মালতৃণ । वै.निघ. ।

मालतृणम् । क्ली । तृणसामान्ये । तृणविशेषे ।

मालयः । पुं । चन्दनवृक्षे । वै.निघ. । क्ली । श्रीखण्डचन्दने । त्रिका. । पद्मकनामसुगन्धकाष्ठे । পদ্মকাষ্ঠ । रा.नि.व.१२ ।

मालवा । स्त्री । उपोदक्याम् । বড় পুঁই । भा.पू.१भ.शा.व. ।

मालवि(वी)का । स्त्री । त्रिवृति । তেউ-ড়ী । रा.नि.व.६ । वा.चि.२अ. । [निघ. ।

मालविटपी (इन्) । पुं । कुम्भीवृक्षे । वै.

मालवी । स्त्री । पाठायां । আকনাদি । रा. नि.व.६ ।

मालसी । स्त्री । कैशपुष्टवृक्षे । श.र. ।

माला । स्त्री । वल्लीदूर्व्वायां । रा.नि.व.८ । भू-म्यामलक्याम् । वै.निघ. । [रा.नि.व.४ ।

मालाकण्टः (कः) । पुं । अपामार्गक्षुपे ।

मालागुणा । स्त्री । असाध्यलूताविशेषे । सु.कल्प.८अ. । [र्व्वायाम् । रा.नि.व.८ ।

मालाग्रन्थिः । स्त्री । मालादूर्व्वायां, वल्लीदू-

मालातृण(क)म् । पुं, क्ली । भूतृणे । গন্ধ থড় । रा.नि.व.८ । आन्ध्रदेशप्रसिद्धसगन्धरोहिष-तृणे । वै.निघ. ।

मालादूर्व्वा । स्त्री । मालाकारदूर्व्वाविशेषे । মালদূর্ব্বা, গাঁটিয়াদূর্ব্বা । मं वेलिहरियाली । कं वल्लिगरुके । वम्. वेलिदूर्व्वा । गुणाः—मधुरा तिक्ता शिशिरा पित्तघ्नी कफवान्तितृष्णाहरी च । रा.नि.व.८ ।

मालाफलम्, **मालामणिः** । क्ली, पुं । रुद्राक्षे । वै.निघ. ।

मालारिष्टा । स्त्री । पाचीनामसुगन्धपत्रे । रा. नि.व.१० । [द्रव्ये । रा.नि.व.१२ ।

मालालिका (ली) । स्त्री । स्पृक्कानामगन्ध-

मालाश्रेष्ठतमा । स्त्री । तुलसीवृक्षे । वै.निघ.

मालिकः । पुं । पक्षिविशेषे । मे. । रञ्जके । श.र. । स्त्री (का) । द्राक्षामद्ये । वै.निघ. । म-ल्लिकाविशेषे । চন্দ্রমল্লিকা । मद्ये । हारा. । सप्त-लायाम् । मे. । अतस्याम् । মশিনা । श.च. ।

मालिनी । स्त्री । अग्निशिखावृक्षे । दुरालभा-याम् । श.च. ।

मालुकः । पुं । कृष्णार्ज्जके । কাল বাবুই । ईं-षच्छ्वेतराजहंसे । वै.निघ. । [वृक्षे । वै.निघ. ।

मालुकाच्छदः (पत्रः) । पुं । अश्मन्तकवृ-

मालुधानः । पुं । मातुलाहिसर्पे । মালুয়া সাপ । अम. । स्त्री (नी) । लताभेदे । वै.निघ. ।

मालूकः । पुं । कृष्णार्ज्जके । কৃষ্ণপত্র ক্ষুদ্র তুলসী । रा.नि.व.१० ।

मालूरः । पुं । विल्ववृक्षे । प.मु. । कपित्थवृक्षे । কয়েৎ গাছ । रा.नि.व.११ ।

मालूरमूलम् । क्ली । विल्वमूले । भा.म.१भ. जिह्वकज्व चि. । "मालूरमूलामयमधुलुता ।"

मालेया । स्त्री । स्थूलैलायाम् । प.मु. ।

माल्यम् । क्ली । पुष्पे । पुष्पमालायाम् । मे. ।

माल्यर्कः । पुं । मदनवृक्षे । वै.निघ. ।

माल्यपुष्पः । पुं । शणवृक्षे । শণ গাছ । रा. नि.व.४ । [ण । रा.नि.व.४ ।

माल्यपुष्पिका । स्त्री । शणपुष्प्यां । वन श-

माल्या । स्त्री । तृणभेदे । वै.निघ. ।

माषः (कः) । पुं । क्षुद्ररोगविशेषे । তিল । तिलकान् उन्नतान्माषानाहुः । "माषांस्तानेव चो-न्नतान् ।" वा.उ.३१अ. । A sort of kidney

bean. (Phaseolus radiatus or P. Roxburghii.) स्वनामख्यातव्रीहिभेदे। माषकलाय। प मु.। हिं उरीद तें मिनुमलु, इत्य धान्यविशेषस्तु। गुणाः—स्निग्धः मलकरः शोषणः श्लेष्मकरः वीर्य्योष्णः रक्तपित्तप्रकोपकरः वातघ्नः गुरुः बलकरः रोचनः स्वादुः श्रमसुखरतां नित्यं सेवनीयश्च। रा.नि.व.१६। "माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः। उष्णः सन्तर्पणो बल्यः शुक्रलो बृंहणः परः। भिन्नमूत्रमलस्तन्यमेदःपित्तकफप्रदः। गुदकीलार्दितश्वासपक्तिशूलानि नाशयेत्। कफपित्तकरा माषाः……॥" भा.पू.१भ.धा.व.। "स्निग्धोऽथ वृष्यो मधुरश्च बल्यो मरुत्कफानां परिबृंहणश्च। पाकेऽम्लकोष्णो विदितो हिमश्च माषोऽथ वृष्यः कथितो नरेश॥" अत्रि.१५अ.। माषयूषगुणाः—"घनं सवातं कफकृन्माषयूषश्च पित्तकृत्। अम्लपर्य्युषितं तच्च तैलपाने च शस्यते॥" अत्रि.१३अ.। "माषयूषो गुरुर्वृष्य ईषत्पवनपित्तकृत्। अनल्पकं कफं कुर्व्वन् मलदोषं विवर्द्धयेत्॥" द्रव्यगु.। परिमाणभेदे। माषा। स मागधमाने सुश्रुतमते च ५ रक्तिकात्मकः। चरकमते ६।८ गुञ्जात्मकः। कालिङ्गमाने सुश्रुतमते ५।७।८ गुञ्जापरिमाणम्। भा.। चरके वैद्यकान्तरे च १० गुञ्जात्मकमानम्। १२ गुञ्जात्मकोऽप्यस्ति। १२ धान्यात्मकः १८ माषात्मकोऽपि दृश्यते। अतएव स ह्यधिकः षड्विधः पञ्चगुञ्जात्मकः षड्गुञ्जात्मकः सप्तगुञ्जात्मकः अष्टगुञ्जात्मकः दशगुञ्जात्मकः द्वादशगुञ्जात्मकश्चेति। तत्र पञ्चगुञ्जात्मको यः स नाम्ना कालिङ्गः सौश्रुतश्च षड्गुञ्जात्मकोऽपि कालिङ्ग इति केचित्। दशरक्तिकमाषः चरकसम्मतो गौड़माषक इत्युच्यते। स एव सर्व्वत्र व्यवहार्य्यः। यथा—"माषस्तु पञ्चभिस्तथा सप्तभिरष्टभिः। दशभिर्द्वादशभिश्च रक्तीभिः षड्विधो मतः। अत्र कालिङ्गमाषश्च पञ्चगुञ्जः स सौश्रुतः। दशगुञ्जस्तु माषः स्यात् माषकः स च चारकः। सप्तगुञ्जस्तु केऽप्याहुः मानकं मानकोविदाः। दशरक्तिकमानन्तु गौड़माचचतेऽत्र तु। दशरक्तिकमाषेण व्यवहारो भिषग्विदाम्॥" प्रयोगा.मानकथने। "दशगुञ्जात्मकं माषं प्रवदन्ति चिकित्सकाः।" तत्र श्रेष्ठमध्यादिभेदात् माषकादिप्रतिपत्तौ समाधानमूह्यम्। "माषैर्द्दशभिर्धान्यैर्माषकः परिकीर्त्तितः। कषायादिनिरूहेषु द्रव्यमानविधावपि॥ ततोऽष्टादशभिर्माषैर्माषकः परिकीर्त्तितः। वम्यादिरक्तमोक्षेषु माने मूत्रवधादिषु॥ वमनादिषु योज्यश्च माषकश्चाष्टरक्तिकः। लौहरजादिविषये दशरक्तिकमाषकः॥ वमने च विरेके च तथा शोणितमोक्षणे॥" माषी माषकलायः। कृष्णाक्षेयः। [अ.टी.भ.।

माषकलायः । पुं। माषव्रीहौ। माषकलाय।

माषतैलम् । क्ली। वातव्याधौ तैलं। "माषक्वाथे बलाक्वाथे रास्नाया दशमूलजे। यवकोलकुलत्थानां छागमांसे भवेत् पृथक्। प्रस्थे च तिलतैलस्य क्षीरं दत्त्वा चतुर्गुणम्। रास्नात्मगुप्तासिन्धूत्थशताह्वैरण्डमुस्तकैः। जीवनीयबलाव्योषैः पचेदक्षसमैर्भिषक्। क्वाथप्रस्थाः षड़ेवात्र विभक्त्यन्तेन कीर्त्तिताः॥" তিলতৈল ৪ শ.। ক্বাথার্থ—মাষকলায়, বেলেড়া, রাস্না, দশমূল, যব, কুল, কুলথ, ছাগমাংস প্রত্যেকে ১৬ প. জল ১৬ শ. শে. ৪ শ.। কল্কার্থ—রাস্না, আলাকুশীমূল, সৈন্ধব, শুল্‌ফা, এরণ্ডমূল, মুতা, জীবক, ঋষভক, মেদ, মহামেদ, ঋদ্ধি, বৃদ্ধি, কাকোলী, ক্ষীরকাকোলী, বেলেড়া, ত্রিকটু প্রত্যেকে ২ তো.। इहोपदेशान्नखीप्रभृति यथासाध्यं दातव्यम्। इदं सप्तप्रस्थमाषतैलम्। सा.कौ.। भैष.वृहन्माषतैलम्। स्वल्पं यथा—"माषप्रस्थं समावाप्य पचेत्सम्यक् जलाढ़के। पादशेषे रसे तस्मिन् क्षीरं दद्याच्चतुर्गुणं। प्रस्थञ्च तिलतैलस्य कल्कं दत्त्वाक्षसम्मितं। जीवनीयानि यान्यष्टौ शतपुष्पां ससैन्धवां। रास्नात्मगुप्तामधुकं बलाव्योषं त्रिकण्टकं।……ऊर्द्धजत्रु गदापहं॥" মাষকলায় ১৬ প. জল ১৬ শ. শে. ৪ শ.। তিলতৈল ৪ শ. দুগ্ধ ১৬ শ.। কল্কার্থ—জীবক, ঋষভক, মেদ, মহামেদ, ঋদ্ধি, বৃদ্ধি, কাকোলী, ক্ষীরকাকোলী, শুল্‌ফা, সৈন্ধব, রাস্না, আলাকুশীবীজ, যষ্টিমধু, বেলেড়া, ত্রিকটু, গোক্ষুরবীজ প্রত্যেকে ২ তো.। सा.कौ.। भैष.। महामाषतैलं यथा—"माषस्याढ़कं दत्त्वा तुलार्द्धं दशमूलतः। पलानि छागमांसस्य त्रिंशद्द्रोणेऽम्भसः पचेत्। पूते शीते कषाये च चतुर्थांशावशेषिते। प्रस्थञ्च तिलतैलस्य पयो दत्त्वा चतुर्गुणम्। आत्मगुप्तोरुवकञ्च शताह्वा लवणत्रयम्। जीवनीयानि मञ्जिष्ठा चव्यचित्रककट्फ-

लम्। मरीचमिप्पलीमूल रास्ना मधुकसैन्धवम्। देवदार्व्वमृताकुष्ठं वाजिगन्धा वचा शठी। एतैरक्षसमैः कल्कैः साधयेन्मृदुनाग्निना॥" তিলতৈল ৪ শ.। কাথার্থ—মাষকলায় ৪ শ. দশমূল ৬।০ শ. ছাগমাংস ৩০ প. একত্র ৬৪ শ. জলে পাক করিয়া শেষ ১৬ শ. নামাইবে। দুগ্ধ ১৬ শ.। কল্কার্থ—আলাকুশীমূল, এরণ্ডমূল, শুল্ফা, সৈন্ধব, বিট্, সাম্ভরলবণ, জীবনীয়গণ, মঞ্জিষ্ঠা, চই, চিতার মূল, কট্ফল, ত্রিকটু, পিপুলমূল, রাস্না, যষ্টিমধু, সৈন্ধব, দেবদারু, গুলঞ্চ, কুড়, অশ্বগন্ধা, বচ, শটী প্রত্যেকে ২ তো.। रस.र.। भैष.।

माषपत्रिका। स्त्री। माषपर्ण्यां। रा.नि.व.३।

माषप(व)र्णा (र्णी)। स्त्री। (Teramnus labialis. Syn. Glysine debilis. Rox.) स्वनामख्यातलतायाम्। মাষাণী। हिं माषोणी, मासवणी। मं राणउड़दी। कं रानीउडिंदु, काडुद्दु। वा.सू.१५अ.। गुणाः—"माषपर्णी रसे तिक्ता वृष्या दाहज्वरापहा। शुक्रवृद्धिकरी बल्या शीतला पुष्टिवर्द्धनी॥" रा.नि.व.३। "माषपर्णी हिमा तिक्ता रुक्षा शुक्रबलाश्रकृत्। मधुरा ग्राहिणी शोथवातपित्तज्वरास्रजित्॥" भा.।

माषयोनिः। पुं। पापड़ इति ख्यातखाद्यद्रव्ये। পাঁপর। वै.निघ.।

माषरा। स्त्री। अन्नमण्डे। प.मु.।

माषसूपः। पुं। भृष्टमाषकृतयूषे। ভৃষ্টমাষযূষ। गुणाः—"माषसूपस्तु कुल्माषः स्निग्धो वृष्योऽनिलापहः। उष्णः सन्तर्पणो बल्यः सुस्वादू रुचिकारकः॥" द्रव्यगु.।

माषादः। पुं। कच्छपे। श.र.।

माषान्नम्। क्ली। माषकृतान्ने। गुणाः—"माषान्नं दुर्जरंशीतं मांसवृद्धिकरं गुरु। वातनाशकरं वृष्यम्......॥" वै.निघ.।

माषिकः। पुं। जीवशाके। वै.निघ.।

माषेण्डरी। स्त्री। माषपिष्टविकृतौ। च.द. शूल.चि.। [रिमाणे। माषा। अ.टी.भ.।

मासः (कः)। पुं। पक्षद्वये। अम.। माषप-

मासकः। पुं, क्ली। तन्नामकक्षुद्ररोगविशेषे। আঁচিল। लक्षणं—"अवेदनं स्थिरञ्चैव यस्मिन् गात्रे प्रदृश्यते। माषवत् कृष्णमुत्सन्नमनिलान्माषकन्तु तत्॥" मा.नि.। [क्षुपचिर्भिटे। श.र.।

मासघ्नः। पुं। हरिणविशेषे। वै.निघ.। दाक्षु-

मासद्वयोद्भवः (वा)। पुं, स्त्री। षष्टिकशालिधान्ये। गौरषष्टिके। रा.नि.व.१६।

मासनम्। क्ली। औषधिबीजविशेषे। সোমরাজ। श.च.।

माससमानम्। क्ली। माषपरिमाणे। ১ মাষা।

मासरः। पुं। काञ्जिके। वै.निघ.। भक्तसमुद्भवमण्डे। अम.। [श.मा.।

मासवर्त्तिका। स्त्री सर्षपीनामपक्षिविशेषे।

मासु(सू)री। स्त्री। भेदनयोग्यवृद्धिपत्रनखशस्त्रादीनां तनुधाराविशेषे। सु.सू.८अ.। श्मश्रौ। हे.च.। [न्तरम्।

माहिषः (षी)। पुं, स्त्री। महिषे। कोषा-

माहिषघृतम्। क्ली। महिषीक्षीरजातघृते। ভয়সাঘৃত। घृतमिदं तीक्ष्णकभस्मकादिरोगेषु हितम्। सि.यो.अग्निमा.चि.। वातश्लेष्मघ्नं बलकरं वर्णकरम् अर्शोग्रहणीहरं दीपनं चक्षुष्यञ्च। रा.नि.व.१५।

माहिषदधि। क्ली। महिषीदुग्धकृतदधनि। মহিষের দই। गुणाः—मधुरं स्निग्धं रक्तपित्तघ्नं श्लेष्मलं बलशोणितवर्द्धनं वृष्यं श्रमघ्नं शोधनञ्च। रा.नि.व.१५।

माहिषनवनीतम्। क्ली। महिषीदुग्धजातनवनीते। মহিষের ননি। गुणाः—कषायं मधुरं शीतं वृष्यं बल्यं ग्राहि पित्तघ्नं पुष्टिदञ्च। रा.नि.व.१५। "माहिषीनवनीतेन स्तनपीड़ास्थिरा भवेत्।" रस.र.स्तनरो.चि.।

माहिषमूत्रम्। क्ली। महिषजले। মহিষের মূত্র। गुणाः—कटु उष्णम् आनाहशोषगुल्मरोगघ्नं कुष्ठकण्डूतिशूलोदररोगघ्नञ्च। रा.नि.व.१५।

माहिषवल्लरी (ल्लिका)। स्त्री। कृष्णवृद्धदारके। (ल्लिका) श्वेतवृद्धदारके। वै.निघ.।

माहिषवल्ली। स्त्री। लघुसोमलतायाम्। वै.निघ.।

माहिषाचः । पुं । महिषाचगुग्गुलौ । वै.निघ. । [लशुन । रा.नि.व.२ ।

माहेन्द्री । स्त्री । इन्द्रवारुणीलतायाम् । রাখা-

माहेयः । पुं । प्रवाले । वै.निघ. ।

माहेश्वरधूपः । पुं । ज्वरे हिते धूपे । জ্বরে ধূপবিশেষ । "हिङ्गुलं देवकाष्ठञ्च श्रीवेष्टं घृतमेव च । गव्यास्थीनि तथा ध्यामं निर्माल्यङ्कटुरोहिणी । सर्षपं निम्बपत्राणि पिच्छाहिकञ्चुकन्तथा । मार्ज्जारविष्ठा गोशृङ्गं मदनस्य फलानि च । हे बृहत्यौ वचा चैव कार्पासास्थि तुषास्तथा । छागगोमायुविट् चैव हस्तिदन्तस्तथैव च । एतत्सर्व्वं समाहृत्य छागमूत्रेण भावयेत् । उदुखले तु सङ्कुट्य स्थापयेन्मृण्मये घटे ॥" হিঙ্গুল, দেবদারু, সরলকাষ্ঠ, গব্যাস্থি, গোহাড়, গন্ধতৃণ, শিবনির্ম্মাল্য, কটকী, শ্বেত সরিষা, নিমপাতা, ময়ূরপুচ্ছ, সাপের খোলোস, বিড়ালবিষ্ঠা, গোশৃঙ্গ, ময়নাফল, বৃহতী, কণ্টিকারী, বচ, পাকাটী, তুষ, ছাগবিষ্ঠা, শৃগালবিষ্ঠা, হস্তিদন্ত প্রত্যেকে সমভাগ । ছাগমূত্রে ভাবনা দিবে । भैष. । জটালঙ্কা, গোশৃঙ্গ, বিড়ালবিষ্ঠা, সাপের খোলোস, ময়নাফল, জটামাংসী, মুরামাংসী, বংশত্বক্, শিবনির্ম্মাল্য (পুষ্পাদি), ঘৃত, যব, ময়ূরপুচ্ছ, ছাগরোম, সরিষা, বচ, হিং, গোহাড়, মরিচ প্রত্যেকে সমভাগ ; ছাগমূত্রে পেষণ করিয়া ধূপ দিবে । भा. । [লতা । रा.नि.व.२ ।

माहेश्वरी । स्त्री । ग्रन्थिनीवृचे । যবতিক্তা

माक्षम् । क्ली । सौवर्चललवणे । प.मु. ।

माक्षि(क्षी)कम् । क्ली । धातुमाक्षिके । রৌপ্য ও স্বর্ণমাক্ষিক । र.मा. । तत्र द्विविधं स्वर्णमाक्षिकं रौप्यमाक्षिकञ्चेति । "माक्षिकं द्विविधम्प्रोक्तं हेमाद्यं तारमाक्षिकम् । भिन्नवर्णविशेषत्वाद्रसवीर्य्यादिकं पृथक् ॥" र.सा.सं. । च.द.र.पि.चि. । "माक्षिकेन हतस्य च ।" तैलवर्णमधुविशेषे । तत्र कपिलवर्णातिस्थूलवनमक्षिकाभिः नानापुष्पेभ्यः समाहृत्योत्पादितम् । "नानापुष्परसाहाराः कपिला वनमाक्षिकाः । याः स्थूलास्ताभिरुत्पन्नं मधु माक्षिकमुच्यते ॥" गुणाः—तैलवर्णं मधुरं रूक्षं लघु श्वासहरञ्च । रा.नि.व.१४ । सामुद्रलवणे । [रा.नि.व.१२ ।

माक्षि(क्षी)कजम् । क्ली । सिक्थके । मम ।

माक्षिकधातुः । पुं । धातुमाक्षिके । सि.यो.पाण्डु-चि. । काम.चि.मण्डुरवटके । "समैर्माक्षिकधातुना ।" स्वर्णमाक्षिके । रा.नि.व.१२ ।

माक्षिकपाकः (फलः) । पुं । मधुनारिकेलवृक्षे । रा.नि.व.११ ।

माक्षि(क्षी)कशर्करा । स्त्री । मधुशर्करायाम्, माक्षिकमधुजनितशर्करायां । गुणाः—माक्षिकमधुतुल्याः । रा.नि.व.१४ ।

माक्षिकश्रेष्ठा । स्त्री । रूप्यमाक्षिके । प.मु. ।

माक्षिकाम्लम् । क्ली । माधवीमद्ये । वै.निघ. ।

माक्षिकाश्रयम् । क्ली । सिक्थके । रा.नि.व.१२ । [च. ।

माक्षिकी । स्त्री । सुवर्णमाक्षिके । नकुल.१६

मिताशनः । त्रि । परिमिताहारे, परिमितभोजिनि । च. ।

मित्रम् । क्ली । अतिविषायाम् । वै.निघ. ।

मित्रपञ्चकम् । क्ली । घृत-मधु-गुञ्जा-टङ्कण-गुग्गुलौ । तथाच—"मधु सर्पिस्तथा गुञ्जा टङ्कणं गुग्गुलुस्तथा । मित्रपञ्चकमेतत्तु गदितं धातुमेलने ॥" र.सा.सं. । [सु.नि.५अ. ।

मिथ्याचारः । पुं । शास्त्रोक्तविधिभ्रष्टाचारे ।

मिथ्यायुक्तः । त्रि । अविधिप्रयुक्ते । भा.म.ख.सा.चि. ।

मिथ्यायोगः । पुं । रूपादीनां विरुद्धयोगेषु । विषमस्थानाभिघाताशुचिभूतसंस्पर्शादिरूपविरुद्धयोगेषु । यथा—वेगधारणादिः शारीरमिथ्यायोगः, परुषवचनादिः वाङ्मिथ्यायोगः, दुर्गन्धाद्यतिघ्राणादिः घ्राणमिथ्यायोगः, स्तनितादिशब्दानामतिश्रवणं शब्दमिथ्यायोगः । इत्यादि । च.सू.१६ अ. । [नि. ।

मिथ्याविहारः । पुं । बलवद्विग्रहादौ । मा.

मिथ्याहारः । पुं । अनुचिताहारे, सात्म्यविपरीताहारे, दुग्धमीनादौ । सु.नि.५अ. ।

मिथ्योपचारः । पुं । प्रवातादिसेवनरूपानुचिताचरणे । "मिथ्योपचारात्संक्लेशात् ।" भा. ।

मिन्मिनः । पुं । वातव्याधिविशेषे । খোঁনা । निदानम् यथा—"आवृत्य वायुः सकफः धमनीः शब्दवाहिनीः । नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान् ॥" सु.नि.१अ. ।

मिरा । स्त्री । मूर्व्वायाम् । रा.नि.व.३ ।

मिलपत्रः । पुं । अश्मन्तकवृत्ते । वै.निघ. ।

मिशिः (शी) । स्त्री । मधुरिकायाम् । মৌরী । च.द.वा.व्या.चि.। शतपुष्पायाम् । শুলফা । अ.टी.भ. । वा.सू.१५अ. । जटामांस्याम् । श.र. । वै.निघ.महाशाल्मलखिदे । कासमेदे, महादर्भे । কেসেবিশেষ । गुणाः—मधुरशीतः पित्तदाहचयन्नश्च । रा.नि.व.८ । मेथिकायाम् । वै.निघ. ।

मिश्रः । पुं । सन्निपाते । क्लो । चाणक्यमूलके । रा.नि.व.७ । रक्ते । वै.निघ. ।

मिश्रकम् । क्ली । औषरलवणे । रा.नि.व.६ । यशदे । मूलके । वै.निघ. । वङ्गभेदे । भा. ।

मिश्रकस्नेहः । पुं । गुल्मे औषधम् । पाठः—"त्रिवृतां त्रिफलां दन्तीं दशमूलं पलोन्मितं । जले चतुर्गुणे पक्का चतुर्भागस्थितं रसं । सर्पिरैरण्डजं तैलं चीरञ्चैकत्र साधयेत् । स सिद्धो मिश्रकस्नेहः सचौद्रः कफगुल्मनुत् । कफवातविबन्धेषु कण्ठलीहोदरेषु च । प्रयोज्यो मिश्रकस्नेहः योनिशूलेषु चाधिकम् ॥" তেউড়ী, ত্রিফলা, দন্তীমূল, দশমূল প্রত্যেকে ১ প. জল ১৬ শ. শে. ৪ শ.। ঘৃত ২ শ. এরণ্ডতৈল ২ শ. দুগ্ধ ৪ শ. । च.चि.५अ. ।

मिश्रजः । पुं । खेसरे । रा.नि.व.१९ ।

मिश्रपुष्पा । स्त्री । मेथिकायां । रा.नि.व.६ ।

मिश्रवनफला । स्त्री । वार्त्ताक्यां । বেগুন । रा.नि.व.७ ।

मिश्रवर्णः । पुं । पुण्ड्रकेचौ । পুঁড়ি ইক্ষু । रा.नि.व.१४। क्ली । कृष्णागुरुणि । रा.नि.व.१२।

मिश्रीतुत्थम् । क्ली । खर्परे । থাপর । वै.निघ. ।

मिश्रेया । स्त्री । मधुरिकानामरूपे । মৌরী গাছ । (Foeniculum valgare. F Panmorium.) वनगुलुफायाम् । বন শুল্ফা । हिं सौंआ, वरिसौंफ । मं वनसउफ । कं कासव्वसिगे । तें पेद्दजिलकुर्र । ता. सोहिकिरै । गुणाः—मधुरा स्निग्धा कटुः कफहरी वातपित्तोत्थदोषघ्नी सीहकृमिघ्नी च । रा.नि.व.३ । मधूदकेन तच्छुद्धिः । [संग्रहः ।

मिश्रोदनम् । क्ली । खेचरिकायां । খিচুড়ি ।

मिषिः (सिः) (षी,सी) । स्त्री । मधुरिकायां । श.च. । शताह्वायां । শুল্ফা । रा.नि.व.४ । जटामांस्यां । श.र. । अजमोदायां । রাধুনী । मे. । उशीर्य्याम् । উশীরী । रा.नि.व.८ ।

मिषिका । स्त्री । मधुरिकायां । शताह्वायाम् । श.र. ।

मिष्टः । त्रि । मधुररसे । भा. । [वै.निघ. ।

मिष्टनिम्बः । पुं । निम्बवृक्षभेदे । মিষ্টি নিম্ ।

मिष्टनिम्बूः । स्त्री । मधुरजम्बीरे । मधुनिम्बुके । মিষ্ট লেবু । गुणाः—"मिष्टनिम्बूफलं स्वादु गुरु मारुतपित्तनुत् । गररोगविषध्वंसि कफोत्क्लेशि च रक्तहृत् । शोषारुचितृषाच्छर्दिहरं बल्यञ्च बृंहणम् ॥" भा. ।

मिष्टपाकः । पुं । मिष्टान्ने । मधुररसविपक्कफलादौ । মোরব্বা । पाकराजः ।

मिष्टरसः । पुं । स्वादुपाकरसे द्रव्ये । तद्गुणौ—श्लेष्मकृद्-वातपित्तहरौ । सु. ।

मिष्टान्नम् । क्ली। मधुरान्ने, परान्नादौ । हला.।

मिहिका । कर्पूरे । रा.नि.व.१२ । नीहारे । श.र. ।

मिहिरः । पुं । अर्कवृत्ते । अम. । वै.निघ.२भ.ज्वर.चि.त्रैलोक्यचिन्तामणिरसे । क्ली । ताम्रे । वै.निघ. ।

मीनः । पुं । मत्स्यसामान्ये । अम. ।

मीनकम् । क्ली । नयनाञ्जनविशेषे । उणा. ।

मीनकाचः (नाचः) । पुं । शुक्लकरवीरे । वै.निघ. । [नि.व.१९ ।

मीनघाती (इन्) । पुं । वकपक्षिणि । रा.

मीननेत्रा । स्त्री । गण्डदूर्व्वायां । रा.नि.व.८।

मीनपित्तम् । क्ली । कटुकायाम् । वै.निघ. ।

मीनरः । पुं । हारके । हाङर । विका. ।

मीनरङ्कः (ङ्गः) । पुं । मत्स्यरङ्कपक्षिणि । माछ्राङा पाखी । विका.। जलकाके । वै.निघ.।

मीनाण्डी । स्त्री । शर्करायां । रा.नि.व.१४ ।

मीनाम्रीणः । पुं । खञ्जरीटपक्षिणि । वै. निघ. । दर्दुरामे । मे. ।

मीनाक्षी । स्त्री । ब्राह्मीशाकक्षुपे । रा.नि.व. ५ । गण्डदूर्व्वायां । रा.नि.व.८ । शर्करायाम् । वै.निघ. ।

मीलकः । पुं । रोहितमत्स्ये । वै.निघ. ।

मीलनम् । क्ली । नेत्रमुद्रणे । निदा. । व्याक.।

मीरः । पुं । पानीये । उणा. । [उणा. ।

मीवा(न) । स्त्री । उदरक्रमौ । शीकरे । सारे ।

मीशानः । पुं । महारम्वधवृक्षे । वै निघ. ।

मुकन्दः (कः) । पुं। पलाण्डौ । अ.टी.भ.। षष्टिकव्रीहिविशेषे। कुधान्यभेदे । भा.। सु.सू.४६अ.। गुणाः कङ्गुवत् । च.सू.२७अ. ।

मुकलः । पुं । आरग्वधे । वै.निघ. ।

मुकुन्दः (न्दुः) । पुं। कुन्दुरौ। कुन्दूरुखोटी । अम. अ.टी.भ. । श्वेतकरवीरे । उपोदिकायाम् । पारदे । है.च. । स्त्री । गाम्भारीवृक्षे । गामार-गाछ । रा.नि.व.९ ।

मुकुरः । पुं । मल्लिकापुष्पवृक्षे । विश्व. । वकुलवृक्षे । आदर्शे । मे. । बदरवृक्षे । श.र. ।

मुकुलः । पुं, क्ली । ईषद्विकसितकलिकायाम् । स्थूलकलिकायाम् । अम. । जैपालवृक्षे । 'पिस्ता' इति ख्याते फलवृक्षे । आत्मनि । शरीरे, धरणिः ।

मुकुष्टः (कः) । पुं । वनमुद्गे । मुगानी । र. मा. । च.द.ज्व.चि.। "कुलत्थान् समुकुष्ठकान् ।" गुणाः—शीतलः ग्राही कफपित्तज्वरघ्नश्च । राज.।

मुकूलकः । पुं । दन्तीक्षुपे । दन्ती गाछ । र. मा. । वा.चि.६अ. । [निघ. ।

मुक्तचण्डा । स्त्री । चिञ्चायाम् । তেতুল । वै.

मुक्तचक्षुः । पुं । सिंहे । श.मा. ।

मुक्तपालेवतः । पुं। हैमखर्ज्जूरीवृक्षे। वै.निघ.।

मुक्तबन्धना (न्धा) । स्त्री । मल्लिकावृक्षे । वार्षिकीमल्लिकाभेदे । रा.नि.व.१० । See वार्षिका । [वै.निघ. ।

मुक्त(क्ता)माता । स्त्री । शुक्तौ । झिनुक ।

मुक्तरसा । स्त्री । रास्नायाम् । र.मा. । [च. ।

मुक्त(क्ता)वासः । पुं । शुक्तौ । झिनुक । श.

मुक्तशृङ्गः । पुं । रोहीतकमत्स्ये । वै.निघ. ।

मुक्तसारः । पुं। कदलीवृक्षे । वै.निघ. । .

मुक्ता । स्त्री । मौक्तिके । प.मु. । रास्नायां । र. मा. । च.सू.४अ.वयःस्थापने । तद्योनिः यथा— "शुक्तिः शङ्खो गजक्रोड़ः फणी मत्स्यश्च दर्दुरः । वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ॥" भा. पू.१भ. । गुणाः—सारका शीतला कषाया स्वादुः लेखनी चक्षुष्या च । राज. ।

मुक्तागारम् । क्ली । शुक्तौ । झिनुक । श.च.।

मुक्तापुष्पः । पुं। कुन्दपुष्पक्षुपे । कुन्द गाछ । रा.नि.व.१० ।

मुक्ताप्रसूः । पुं । शुक्तौ । प.मु. ।

मुक्ताफलम् । क्ली । कर्पूरे । लवलीफले । मे.। मौक्तिके । भा. ।

मुक्ताभा । स्त्री । वृत्तमल्लिकायां। रा.नि.व.१०।

मुक्ताशुक्तिः । स्त्री । मुक्तायोनिशुक्तौ, मुक्तास्फोटे । मूक्तार झिनुक । मं मोतीसींप । कं मुक्तिनसिंपु । गुणाः—"कटुः स्निग्धा श्वासहृद्रोगहारिणी । शूलप्रशमनी रुच्या मधुरा दीपनी परा॥" रा.नि.व.१३ । [झिनुक । अम. ।

मुक्तास्फोटः (टा) । पुं, स्त्री । मुक्तास्फोटे ।

मुक्तिप्रदः । पुं । हारिद्रमुद्गे । हारि मुग । वै.निघ. ।

मुक्तिमुक्तः । पुं । शिलारसे । र.मा. ।

मुखम् । क्ली । वदनविवरे । भा. । वदने । मुख । रा.नि.व.१८ । तत्तु गर्भस्थस्य पञ्चभिः मासैर्भवति । सुखबोधः । "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च । गलो मुखादि सकलं सप्ताङ्गं मुखमुच्यते ।" भा. । जीरके । पक्षिचञ्चौ । वै.निघ. । पुं । डहुके । ডেলো । श.च. ।

मुखगन्धकः । पुं । पलाण्डौ । रा.नि.व.७ ।

मुखचीरी । स्त्री, पुं (इन्) । पलाण्डौ । श.चि. । जिह्वायाम् । श.मा. ।

मुखजः । पुं । दन्ते । वै.निघ. ।

मुखदूषः (णः) । पुं । पलाण्डौ । रा.नि.व.७ ।

मुखदूषिका । स्त्री । मुखगतक्षुद्ररोगभेदे । ब्रयस् ফোড়া । लक्षणं यथा—"शाल्मलीकण्टकप्रख्या कफमारुतशोणितैः । जायन्ते पिड़का यूनां वक्त्रे या मुखदूषिकाः ।" सु.नि.१३अ. ।

मुखदूषी (इन्) । पुं । लशुने । রসুন । वै.निघ. ।

मुखधावनम् । क्ली । मुखस्य प्रक्षालने । মুখধোওয়া । वा.चि.५अ. । [च. ।

मुखधौता । स्त्री । भार्ग्यां । বামুনহাটী । श.

मुखपाकः । पुं । अश्वस्य मुखरोगे । ज.द.२८अ. । मुखरोगभेदे । निदानलक्षणे यथा—"करोति वदनस्यान्तर्व्रणान् सर्व्वसरोऽनिलः । सञ्चारिणोऽरुणान् रुक्षान् ओष्ठौ ताम्रौ चलत्वचौ । जिह्वा शीतासहा गुर्व्वी स्फुटिता कण्टकाचिता । विवृणोति च कृच्छ्रेण मुखपाको मुखस्य च । अधः प्रतिहतो वायुरर्शोगुल्मकफादिभिः । यात्यूर्द्ध्वं वक्त्रदौर्गन्ध्यं कुर्व्वन्नूर्द्ध्वं गदस्तु सः । मुखस्य पित्तजे पाके दाहोषौ तिक्तवक्त्रता । क्षारोक्षितक्षतसमा व्रणास्तद्वच्च रक्तजे । कफजे मधुरास्यत्वं कण्डूमत्पिच्छिला व्रणाः । अन्तःकपोलमाश्रित्य श्यावपाण्डु कफोऽर्व्वुदम् । कुर्य्यात्तत्पाटितं छिन्नं मुदितञ्च विवर्द्धते । मुखपाके भवेत्सर्वैः सर्व्वैः सर्व्वाकृतिर्मलैः ।" वा.उ.२१अ. ।

मुखपूरणम् । क्ली । गण्डूषे । च. ।

मुखप्रसेकः । पुं । श्लेष्मजमुखव्याधौ । भा. ।

मुखप्रक्षालनम् । क्ली । शीतोदकेन मुखधावने । गुणाः—"नीलिकां मुखशोषञ्च पिड़कां व्यङ्गमेव च । रक्तपित्तकृतान् रोगान् सद्य एव विनाशयेत् ।" सु.चि.२४अ. ।

मुखप्रियः । पुं । नागरङ्गवृक्षे । भा. । स्त्री । कर्कटिकायां । কাঁকুড় । वै.निघ. ।

मुखभूषणम् । क्ली । ताम्बूले । निदा. ।

मुखमण्डलकः । पुं । तिलकवृक्षे । তিলগাছ । रा.नि.व.१० । [मिष्टि । भा. ।

मुखमाधुर्य्यम् । क्ली । श्लेष्मजमुखरोगे । মুখ-

मुखमुण्ड(ति)का । स्त्री । बालरोगभेदे । लक्षणं यथा—"म्लानाङ्गः सुरुचिरपाणिपादवक्त्रः बह्वाशी कलुषशिरावृतोदरो यः । सोद्वेगो भवति च मूत्रतुल्यगन्धिः स ज्ञेयः शिशुरथ वक्त्रमुण्डिकार्त्तः ॥" सु.उ.२७अ. । [छ । रा.नि.व.७ ।

मुखमोदः । पुं । शोभाञ्जनवृक्षे । সজিনা গা-

मुखरः । पुं । शङ्खे । काके । रा.नि.व.१९ ।

मुखरोगः । पुं । ओष्ठादिरोगे । ओष्ठद्वयदन्तमूलदन्तजिह्वातालुगलरूपं सप्ताङ्गं मुखम्, तत्रस्थो यो रोगः स मुखरोग इत्युच्यते । मुखरोगसंख्या—ओष्ठयोरष्टौ, एकादशेति वाभटः । दन्तमूले षोड़श, दन्तेषु अष्टौ, जिह्वायां पञ्च, तालुनि नव, कण्ठे अष्टादश, सर्व्वेषु त्रय इति सप्तषष्टिर्मुखरोगाः साकल्येन भवन्ति । "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च । गलो मुखानि सकलं सप्ताङ्गं मुखमुच्यते । स्युरष्टावोष्ठयोर्दन्तमूले तु दश षट् तथा । दन्तेष्वष्टौ च जिह्वायां पञ्च स्युर्नव तालुनि । कण्ठे त्वष्टादश प्रोक्तास्त्रयः सर्व्वेषु च स्मृताः । एवं मुखामयाः सर्व्वे सप्तषष्टिर्मता बुधैः ॥" भा.म.४भ.मु.रो.चि. । निदानं—आनूपमांसादिसेवनात् कुपिता दोषा मुखरोगानुत्पादयन्ति । तदुक्तं—"आनूपपिशितक्षीरदधिमाषनिसेवनात् । मुखमध्ये गदान् कुर्य्युः क्रुद्धा दोषाः कफोत्तराः ॥" इति । मा.नि. । "मात्स्यमाहिषवाराहपिशितामकमूलकं । माषसूपदधिक्षीरशुक्तेक्षुरसफाणितम् । अवाक् शय्याञ्च भजतो द्विषतो दन्तधावनम् । धूमच्छर्दनगण्डूषानुचितञ्च शिराव्यधम् । क्रुद्धाः श्लेष्मोल्वणा दोषाः कुर्व्वन्त्यन्तर्मुखे गदान् । ओष्ठकोपे तु पवनात् स्तब्धावोष्ठौ महारुजौ । दाल्येते परिपाट्येते परुषासितकर्कशौ । पित्तात्तीक्ष्णासहौ पीतौ सर्षपाकृतिभिश्चितौ । पिटिकाभिर्बहुक्लेदावाशुपाकौ कफात्मकः । शीतासहौ गुरू शूनौ सवर्णपिटिकाचितौ ॥ सन्निपातादनेकाभौ दुर्गन्धास्रावपिच्छिलौ । अकस्मात् म्लानसंशूनरुजौ विषमपाकिनौ ॥ रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ । खर्ज्जूरसदृशं चात्र क्षीणे रक्तेऽर्बुदं भ-

वेत् ॥ मांसपिण्डोपमो मांसात् ख्यातो मूर्द्धकृमी क्रमात्। तैलाभश्वयथुर्नेदो सकण्डू मेदसा मद्रू ॥ चतजावरदोर्ष्येते पार्श्वते चासकृपुनः ॥" वा.उ. २१अ.। अश्वस्य यथा —"उपकुशलया लेशो जिह्वासन्धलवेव च। चल्यावुकः प्रसूनश्च दन्तरोगो गलग्रहः ॥ मुखपाकोऽधिदन्तश्च रोहिणी चोपजिह्विका। गण्डरोगोष्ठरोगौ च गलशालूक एव च ॥ इत्येते वाजिनां रोगा मुखजाः परिकीर्त्तिताः। एषां निदानं वक्ष्यामि चिकित्साञ्च यथाक्रमम् ॥ समेभ्यो दन्तमांसेभ्यो यस्य निर्याति शोणितम्। चलदन्तस्य वाहस्य विद्यादुपकुशं भिषक् ॥ इनुदेशे यदा दन्तो भवत्यभ्यन्तराश्रयः। चालेन इति तं विद्यात् श्लेमरक्तसमुद्भवम् ॥ येनाश्वो दुर्म्मनात्यर्थं मन्दं पिबति खादति। जर्ज्जरं कासते चैव बलाच परिहीयते ॥ शूना यस्य भवेज्जिह्वा वाजिनः स्फोटकैर्युता। प्रक्लिन्ना वापि यस्यैव जिह्वास्तम्भोति तं विदुः॥ मुखं दुर्गन्धिकञ्चैव तालुकः शूनको भवेत्। यासविद्वेषिणोऽश्वस्य रोगं विद्यादलाबुकम् ॥ स्यावौष्ठतालुवक्त्रे वा मन्दाहारे तथैव च। संशीर्णे दन्तमांसे च प्रसूनं व्याधिमादिशेत् ॥ हन्वोश्चैव तथा गण्डे श्वयथुर्यस्य जायते। जिह्वामूले गले चापि तस्य विन्द्याद्गलग्रहम् ॥ सृक्कौष्ठतालुदेशेषु व्रणं यस्योपजायते। विवर्णन्तु मुखं दुष्टं मुखपाकं तमादिशेत् ॥ दन्तानामुपरिष्टात्तु यदा दन्तस्य सम्भवः। अधिदन्तः स विख्यातो मन्दाहारस्य वाजिनः ॥ यस्य शूनाचिकूटस्य गले शोथः प्रलम्बते। यवसद्वेषिणोऽश्वस्य रोहिणीरोगमादिशेत् ॥ अधस्तादथ जिह्वायाः श्वयथुर्यस्य जायते। तं विन्द्यादुपजिह्वाख्यं मुखरोगन्तु वाजिनाम् ॥ अधिजिह्वाभिधानन्तु उपरिष्टाद्‌ विनिर्दिशेत्। गण्डाभ्यन्तरगो गण्डो गण्डरोग इति स्मृतः ॥ सव्रणः पिड़काकीर्णः ओष्ठ उच्छून एव च। स्फुटितः कठिनश्चैव ओष्ठरोगोऽभिधीयते ॥ गलाभ्यन्तरशोथेन ग्रासमुद्गिरते हयः। गलशालूकिनं विन्द्यात् कासार्त्तञ्च तुरङ्गमम् ॥ सर्व्वेषां मुखरोगाणां सम्भवः श्लेष्मशोणितम् ॥" ज.द.२८अ.।

मुखलाङ्गलः । पुं। शूकरे। जटा.।

मुखलिप्तता (लेपः) । पुं। मुखरोगे। भूथ চট্চটে করা। भा.।

मुखवल्लभः । पुं। दाड़िम्बवृक्षे। श.मा.।

मुखवाचिका । स्त्री। अम्बष्ठायां। रा.नि.व.४।

मुखवासः । पुं। तरम्बजलतायां। তরমুজ গাছ। र.मा.। फुटी इति प्रसिद्धे फलशाकविशेषे। गन्धतृणे। आम्रदेशख्याते सुगन्धभूतृणे। रा.नि.व.८। [ने। अम.।

मुखवासनः । त्रि। मुखसुरभीकरणद्रव्यमा-

मुखविलुण्ठिका । स्त्री। छाग्याम्। श.र.।

मुखविष्ठा । स्त्री। तैलपायिकायाम्। তেলাপোকা। है.च.।

मुखवैदलः । पुं। तन्नामकवायव्यकीटे। सु.कल्प.८अ.। [निदा.।

मुखव्यङ्गः । पुं। गण्डगतचुद्ररोगे। মাছতে।

मुखशुद्धिः । स्त्री। मुखशोधने।

मुखशोधनम् । क्ली। त्वचि। গুড়ত্বক্, দাৰুচিনি। रा.नि.व.६। [कटुरसे। है.च.।

मुखशोधनः । त्रि। मुखशोधकद्रव्यमात्रे। पुं।

मुखशोधी (इन्) । पुं। जम्बीरवृक्षे। रा.नि.व.११।

मुखशोषः । पुं। शुष्कास्यतायाम्। निदा.।

मुखसम्भवम् । क्ली। पुष्करमूले। वै.निघ.।

मुखसिञ्चनमन्त्रः । पुं। पीतविषस्य मुखसिञ्चनार्थजलस्य मन्त्रपूतकरणमन्त्रे। জলপড়া। "ओं हर हर नीलकण्ठ अमृतं स्रावय स्रावय हुङ्कारेण विषं ग्रस ग्रस क्लीङ्कारेण हर हर ह्रौङ्कारेण अमृतं स्रावय स्रावय हर हर नास्ति विषम् उत्क्षिरे।" अत्रि,श्मशान.५६अ.।

मुखसुरम् । क्ली। तालसुरायां। তাড়ী। त्रिका.। अधरामृते।

मुखसूची । स्त्री। आम्रातकवृक्षे। वै.निघ.।

मुखस्रावः । पुं। लालायाम्। रा.नि.व.१८। बालकरोगभेदे। निदा.।

मुखामयः । पुं। मुखरोगे। भा.।

मुखामोदः (दा) । पुं, स्त्री। सल्लकीवृक्षे। रा.नि.व.११। कृष्णशिग्रौ। वै.निघ.।

मुखार्जकः । पुं। अर्जकवृक्षे। ক্ষুদ্রতুলসী গাছ। रा.नि.व.१०।

मुखालुः । पुं । स्वनामख्यातकन्दशाकविशेषे । मिष्ट आलू । गुणाः—मिष्टः शीतः पित्तघ्नः रुच्यः वातलः दाहशोषतृष्णाघ्नश्च । रा.नि.व.७ ।

मुखास्त्रः । पुं । कर्कटे । काँकड़ा । त्रिका.।

मुखिकः । पुं । मुष्ककवृक्षे । वै.निघ. ।

मुगूहः । पुं । हरिणविशेषे । वै.निघ.। दात्यूहपक्षिणि । भूरि.प्र. ।

मुचकः । पुं । लाक्षायाम् । वै.निघ. ।

मुच(चु)कुन्दः । पुं । (Pterospermum suber folium.) स्वनामख्यातवृक्षे । मूचकुन्द फुलेर गाछ । र.मा.। कोङ्कणेऽपि मुचुकुन्द इति ख्यातः । हिं मेकचन्द । तैं लोलगु । उत्. वड़-लो । ता. टड्डी । गुणाः—कटुः तिक्तः कफका-सघ्नः कण्ठदोषहरः त्वग्दोषशोफघ्नः व्रणपामाघ्नश्च । रा.नि.व.१० । पुष्पगुणाः—"मुचुकुन्दं शिरोऽर्त्ति-जित् ।" राज.५प.। कण्टकमदने । सु.चि.१८अ.।

मुचिलिन्दः (कः) । पुं । मुचुकुन्दवृक्षे । तिलकवृक्षे । (कः) राजादनवृक्षे । वै.निघ. ।

मुचुकः । पुं । पिचुके, मदनवृक्षभेदे । काँटा-मयना । प.मु. ।

मुचुटी । स्त्री । अङ्गुलिमोटने । आङ्गुल मट्-कान । श.र. । मुष्टौ । मूटा । हे.च. । [षणे ।

मुञ्चकः । पुं । मुष्ककवृक्षे । रा.नि.व.११ । वृ-

मुञ्जः । पुं । (Saccharum munga.) स्वनामख्याततृणविशेषे । मुञ्जतृणमिति भागीर-थीतीरे प्रसिद्धः । मूज । तैं मुंजगड्डि, अग्निसु-लिङ्ग । स द्विविधः भद्रमुञ्जमुञ्जभेदेन । गुणाः —शीतवीर्य्यो मधुररसः कफपित्तघ्नः ग्रहरक्षादी-क्षासु पावनः भूतघ्नश्च । रा.नि.व.८ । "मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा । दाहतृष्णाविसर्पास्रमू-त्रकृच्छ्राक्षिरोगजित् । दोषत्रयहरं वृष्यं मेखला-सूपयुज्यते ॥" भा. । शरतृणे । प.मु. ।

मुञ्जकः (जालम्) । पुं,क्ली । अक्ष्णः कृमि-जन्याक्षिरोगे । "एकेन मुञ्जमाख्यातं बहुभिर्मुञ्ज-जालकं । कृमिभिः पटलान्तःस्थैर्विद्यान्निचरुजाद्व-यमिति । प्रथमं तैलवर्णाभं द्वितीयं स्फटिकप्रभं । रक्ताभञ्च तृतीयञ्च चतुर्थं तैलमुच्यते । प्रथमं पटलं साध्यं द्वितीयञ्च तथा भवेत् । तृतीयं कृच्छ्रसाध्यं स्याच्चतुर्थं नैव सिध्यति ॥" ज.द.३०अ. ।

मुञ्जतृणम् । क्ली । मुञ्जे । मूज । रा.नि.व.८ ।

मुञ्जनकः । पुं । मुञ्जे । मूज । रा.नि.व.८ ।

मुञ्जमणिः । पुं । पुष्परागमणौ । भा. ।

मुञ्ज(ञ्जा)रम् । क्ली । शालूककन्दे । श.मा. । मृणाले । वै.निघ. ।

मुञ्जवलयः । पुं । प्रसाधनार्थं जलरक्षणाधा-रविशेषे । सु.सू.४५अ. ।

मुञ्जवान् । पुं । सोमलताभेदे । सु.चि.२९अ.।

मुञ्जातः (कः) । पुं । स्वनामप्रसिद्धे शीत-रापथिककन्दविशेषे । ह्रस्वमुञ्जतृणे । एतदभावे तालमज्जा ग्राह्या । वम्. मुजाताकन्द । गुणाः—अतिस्वादुः वृष्यः पित्तानिलघ्नश्च । राज.। मुञ्जात-पुष्पगुणाः—"मुञ्जातकं परं स्वादु वृष्यं पित्तानि-लापहं ।" राज.३प. । सि.यो.अपस्मा.चि.महाचै-तसघृते । अश्वगन्धाघृते । सु.सू.३९अ.कफशमने । वनशूरणे ।

मुञ्जातकफलम् । क्ली । मुञ्जातकबीजे । च. द.वृष्य.चि.गोधूमाद्यघृते । अभावे तालमस्तकं दे-यम् ।

मुण्डः । पुं । स्थाणुवृक्षे । मस्तके । रा.नि.व. १८ । क्ली । मुण्डलौहे । रा.नि.व.१३ । बोले । रा.नि.व.६ ।

मुण्डक(ज)म् । क्ली । मुण्डलौहे । रा.नि.व. १३ । पुं (कः) । नापिते । हे.च. ।

मुण्डकिट्टः । पुं,क्ली । मुण्डलौहभेदे । मण्डूर-लौहे । र.सा.सं. ।

मुण्डचणकः । पुं । वृहच्चणके । बड़ छोला । प.मु. । कलाये । रा.नि.व.१६ । [हे.च. ।

मुण्डनम् । स्त्री । वपने, केशच्छेदने । मूड़ान ।

मुण्डनकः । पुं । श्वेतवटवृक्षे । वै.निघ. ।

मुण्डन(नि)का । स्त्री । (नका) निःशूकस्थू-लशालिधान्ये, मुण्डशालौ । बोरो धान । रा. नि.व.१६ । (निका) मुण्डितिकायां । मूण्डीरी । रा.नि.व.५ ।

मुण्डफलः । पुं । नारिकेलवृक्षे । श.र. ।

मुण्डलोहम् । क्ली । लौहविशेषे । तत्र यद् किट्टकठोरमिति त्रिधा । रा.नि.व.१३ ।

मुण्डशालिः । पुं । स्वनामख्यातनिःशूकशालिधान्ये । শূকশূন্য ধান, বোরো ধান । मं निःशूकशालि । कं बोळनलु । बम्. बोडके भात । गुणा.—त्रिदोषघ्नः मधुराम्लो बलप्रदश्च । रा.नि.व.१६ ।

मुण्डा (ण्ड्या) । स्त्री । महाश्रावणिकायाम् । বড় থুলকুড়ি । মুণ্ডীরী । रा.नि.व.५ । मे. । शार्ङ्गधरे महानीलकल्परसे ।

मुण्डायसम् । क्ली । मुण्डलोहे । रा.नि.व.१३ ।

मुण्डिका । स्त्री । गोरखमुण्ड्याम् । মুণ্ডীরী । रा.नि.व.२३ ।

मुण्डितम् । क्ली । लौहे । रा.नि.व.१३ ।

मुण्डितिका (निका, नी) । स्त्री । (Sphaeranthus Indicus. Syn. S. Hirtus.) मुण्डीर्याम् । মুণ্ডীরী, বড় থুলকুড়ি । हिं मुण्डी, गोरखमुण्डी । तें बोड़सरपुचेट्टु । बम्. ता. कोट्टक । च.द.सि.यो.र.पि.चि. खण्डखाद्यलौहे । "उष्णमुण्डितिकाबलाः ।" गुणाः —"मुण्डितिका कटुः पाके वीर्य्योष्णा मधुरा लघुः। मेध्या गण्डापचीकृच्छ्रकृमियोन्यर्त्तिपाण्डुनुत् । श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्त्तिहृत् । महामुण्डी तु तत्तुल्या गुणैरुक्ता महर्षिभिः ॥" भा. ।

मुण्डिनी । स्त्री । कस्तूरीमृगे । वै.निघ. ।

मुण्डी । स्त्री । मुण्डितिकायां । মুণ্ডীরী । हिं गोरखमुण्डी । प.मु. । जटा. । (पर्पटीरसे । वै. निघ.२भ.क्षय.चि.नवरत्नराजमृगाङ्के । रस.र.स-नरी.चि.) । "मुण्डीमूलं दशपलं ।"

मुण्डीरिका (री) । स्त्री । मुण्डितिकायां । মুণ্ডীরী । अलम्बुषायाम् । प.मु. । [प.मु. ।

मुण्डीहृचानुकारकः । पुं । मुचुकुन्दवृक्षे ।

मुत् (दा) । स्त्री । वृद्धौषधौ । रा.नि.व.५ ।

मुत्तोली । स्त्री । मूटिकायाम् । वा.कल्प.१अ.।

मुदिरः । पुं । भेके । उणा. । [११ ।

मुदिरफलः । पुं । विकण्टकवृक्षे । रा.नि.व.

मुदी । स्त्री । कृष्णगाम्भारीवृक्षे । ज्योत्स्नायाम् । वै.निघ. ।

मुद्गः । पुं । (Phaseolus mungo.) स्वनामख्यातशमीधान्यभेदे । मुग इति लोके । মুগ । हिं हरिमुं । मं मुग । कं हेसरेक । तें पेसलु । पञ्जा. मूंजि । तद्भेदा यथा—"कृष्णमुद्गा महामुद्गा गौरा हरितपीतकाः । श्वेता रक्ताश्च निर्द्दिष्टा लघवः पूर्व्वपूर्व्वतः । प्रधाना हरितास्तत्र वन्यमुद्गास्तु मुद्गवत् ॥" राज.३प. । सा. गुणाः—"कषायमधुरो रूक्षः शीतः पाके कटुर्लघुः । विशदः श्लेष्मपित्तघ्नः मुद्गः सूप्योत्तमो मतः ॥" च.सू. २७अ. । "मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः । स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा । कृष्णमुद्गो महामुद्गो हरितः पीतकस्तथा । श्वेतो रक्तश्च तेषान्तु पूर्व्वः पूर्व्वो लघुः स्मृतः । सुश्रुतेन पुनः प्रोक्ता हरितः प्रवरो गुणैः । चरकादिभिरप्युक्त एष एव गुणाधिकः ॥" भा.पू.१भ. धा.व. । "शीतः कषायो मधुरो लघुः स्यात् पैत्तास्रभूदोषहरः सरश्च । विपाकतोऽसौ कटुकप्रधानो मुद्गस्तथान्यः कथितोऽतिरम्यः ॥" अत्रि.१५अ.। रक्तपित्ते पथ्यः । सि.यो.र.पि.चि.खण्डखाद्यलौहे । जलवायसे । हे.च. । [क्र.क.प्रद.चि. ।

मुद्गदला । स्त्री । मुद्गपर्ण्यां । মুগানী । चि.

मुद्गपर्णी । स्त्री । (Phaseolus Trilobus or P. Aconitifolius.) वनमुद्गे । মুগানী । हिं माठमुगानी । मं राणमुग । कं काहेसरु । तें पिल्लपेसरचेट्टु । सु.सू.३८अ.काकोल्यादिः । वा. सू.१५अ.जीवन्त्यादिः । "मेदे द्वे मुद्गमाषपर्ण्यौ च ।" सा द्विधा सामान्या मार्जारगन्धा चेति । प. मु. । गुणाः—"मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला । चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् । दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित् ॥" भा. । तद्यूषगुणाः—"आरण्यमुद्गयूषस्तु वृष्यो धातुविवर्द्धनः । रक्तपित्तज्वरतापपित्तकृच्छ्रविनाशनः ॥" द्रव्यगु. । [रा.नि.व.१९ ।

मुद्गभुक् (भोजी) । पुं । घोटके । त्रिका. ।

मुद्गमोदकः । पुं । पक्वान्नभेदे । মতিচুর । মুগের লাড়ু । गुणाः—लघुः ग्राही त्रिदोषघ्नः चक्षुष्यः स्वादुः ज्वरघ्नः बल्यः शीतलः रुच्यश्च ।

तत्साधनविधिः यथा —"मुद्गानां धूमसीं सम्यक् गीलयेन्निर्मलाम्बुना। कटाहस्थघृतस्योर्द्धं झर्झरं स्थापयेत्ततः। धूमसीन्तु द्रवीभूतां प्रक्षिपेत् झर्झरोपरि। पतन्ति विन्दवस्तस्मात् तान् सुपक्कान् समुद्धरेत्। सितापाकेन संयोज्य कुर्य्यात् युक्तेन मोदकान्॥" भा.।

मुद्गयूषः । पुं,क्ली। चतुर्भागाम्बुसाधितमुद्गरसे। মুগের ঝোল। प.मु.। स च पित्तपानात्यये वातपित्तज्वरे च हितः। सि.यो.पाना.चि.। च.द.ज्व.चि.। गुणाः—पित्तज्वरघ्नः लघुः सन्तापहरः अरोचकघ्नः रक्तप्रसादनः सैन्धवयुतः सर्व्वरोगघ्नश्च। रा.नि.व.१६। "शीतलं मधुरं मौद्गयूषं पित्तविकारजित्। तच्च वातहरं प्रोक्तं ज्वराणां शमनं परम्॥" अत्रि.१३अ.। "मुद्गयूषो लघुर्ग्राही कफपित्तहरो हिमः। स्वादुर्नेत्रगोऽनिलहरः कृत्राषः शुक्रवर्द्धनः। रक्तपित्तज्वरहरस्तुवरस्तृप्तिकारकः। सन्निपातज्वरहरो ग्लानिनाशकरः स्मृतः॥" द्रव्य.गु.।

मुद्गरः । पुं। स्वनामख्याते पुष्पवृक्षविशेषे। গন্ধরাজ। गुणाः—मधुरः शीतः सुरभिः सुखदः पित्तप्रकोपघ्नश्च। रा.नि.व.१०। मल्लिकावृक्षे। मत्स्यविशेषे। মাগুর মাছ। कर्म्मारवृक्षे। কামরাঙা। रा.नि.व.११। क्ली। मल्लिकापुष्पभेदे। मे.।

मुद्गरकः । पुं। कर्म्मरङ्गवृक्षे। কামরাঙ্গা গাছ। रा.नि.व.११। [लि। वै.निघ.।

मुद्गरफलः । पुं। कर्म्मरङ्गवृक्षे। क्ली। तत्फ-

मुद्गलम् । क्ली। रोहिषतृणे। रा.नि.व.८।

मुद्गवटकः । पुं। मुद्गकृतवटके। মুগের বড়া। गुणाः—"मौद्गी वटी गुरू रुच्या वातपित्तास्रदा मतः। श्लेष्मलः पुष्टिबलकृत् शुक्रलो बलदोऽल्पहट्॥" वै.निघ.। [र.। अम.।

मुद्गष्टः (कः) । पुं। वनमुद्गे। মুগানী। श.

मुद्गार्द्रवटकः । पुं। वटकविशेषे। আদাবড়া। "मुद्गपिष्टीविरचितान् वटकांस्तैलपाचितान्। हस्तेन चूर्णयेत् सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत्। भृष्टं हिङ्ग्वार्द्रकं सूक्ष्मं मरिचं जीरकं तथा। निम्बूरसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत्। मुद्गपिष्टीं पचेत्सम्यक् स्थाल्यामङ्गारकोपरि। तस्यास्तु गोलकं कुर्य्यात् तन्मध्ये पूरणं क्षिपेत्। तैले तान् गोलकान् पक्त्वा क्वथितायां निमज्जयेत्॥" गुणाः—"मुद्गार्द्रकवटीः रुच्या लघवो बलकारकाः। दीपनास्तर्पणाः पथ्यास्त्रिदोषेषु प्रपूजिताः॥" भा.। [अ.।

मुद्गोलुम्बः । पुं। किञ्चिद्भृष्टमुद्गे। सु.चि.२३

मुद्र(द्रि)णी । स्त्री। लाक्षायाम्। रा.नि.व.६।

मुद्राशङ्खम् । क्ली। स्वनामख्यातखनिजपदार्थे। মুদ্রাশঙ্খ। गुणौ—सङ्कोचनम् आवरकञ्च।

मुद्रिका । स्त्री। छेदनार्थं भेदनार्थञ्च दशाङ्गुलशस्त्रविशेषे। सा च प्रदेशिन्यग्रपर्व्वप्रदेशप्रमाणा कर्त्तरीति कथ्यते। सु.सू.८अ.।

मुनिः । पुं। दमनकक्षुपे। দনা। रा.नि.व.१०। वकवृक्षे। भैष.कुष्ठ.चि.। "मुनिमुञ्जासुहीपयः।"

मुनिका । स्त्री। ब्राह्मीक्षुपे। वै.निघ.।

मुनिखर्जु(र्जू)रिका । स्त्री। श्रेष्ठपिण्डीखर्जूरे। रा.नि.व.११।

मुनिच्छदः । पुं। सप्तपर्णवृक्षे। रा.नि.व.१२।

मुनितरुः । पुं। रक्तवकवृक्षे। লাল বকফুলের গাছ। र.मा.।

मुनिद्रुः (मः) । पुं। श्योणाकवृक्षे। प.मु.। पृथुशिम्बश्योणाकवृक्षे। বড় শোণাগাছ। रा.नि.व.९। अगस्त्यवृक्षे। বক ফুলের গাছ। रा.नि.व.१०। [न। रा.नि.व.१६।

मुनिधान्यम् । क्ली। नीवारधान्ये। উড়িধা-

मुनिनिर्म्मितः । पुं। डिण्डिशफलवृक्षे। ট্যাঁড়শ গাছ। गुणाः—"डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः। सुशीतो वातलो रुच्यो मूत्रलश्चाश्मरीहरः॥" भा.पू.१भ.शा.व.।

मुनिपत्रः । पुं। दमनकवृक्षे। দনা। वै.निघ.।

मुनिपादपः । पुं। वकवृक्षे। प.मु.।

मुनिपित्तलम् । क्ली। ताम्रे। त्रिका.।

मुनिपुत्रः (कः) । दमनकवृक्षे। দনা। भा.। (कः) खञ्जनपक्षिणि। त्रिका.। [शब्द.कल्प.।

मुनिपुष्पम् । पुं, क्ली। अगस्तिपुष्पे। বকফুল।

मुनिपूगः । पुं । पूगवृक्षभेदे । রামগুয়া । त्रिका. ।

मुनिप्रियः । पुं । पचिराजशालौ । रा.नि.व. १६ । पिण्डीखर्जूरवृक्षे । प्रियालवृक्षे । वै.निघ. । स्त्री (या) । तिलवासिनीशालौ । रा.नि.व.१६ ।

मुनिफलः । पुं । अगस्तिफलकोषे । বক ফুলের শোঁটা । वै.निघ. ।

मुनिभक्त(क्य)म् । क्ली । देवधान्ये, नीवारधान्ये । উড়িধান । वै.निघ. । [वकवृक्षे । मे. ।

मुनिभेषजम् । क्ली । हरीतक्याम् । लङ्घने ।

मुनिभोजनम् । क्ली । श्यामाकधान्ये । श्यामा धान । नीवारे । वै.निघ. ।

मुनिवरः । पुं । पुण्डरीकवृक्षे । পুণ্ডরিয়া । वै.निघ.कास.चि.पर्पटीरसे । [वै.निघ. ।

मुनिवल्लभः । पुं । प्रियालवृक्षे । পেয়াশাল ।

मुनिवृक्षः । पुं । अगस्तिवृक्षे । प.मु. ।

मुनिशस्त्रम् । क्ली । श्वेतदर्भे । वै.निघ. ।

मुनिसुतः । पुं । दमनकवृक्षे । भा. ।

मुनिह्वयः । पुं । समष्ठिलच्चुपे । रा.नि.व.४ ।

मुनीन्द्रः । पुं । अगस्तिवृक्षे । लोध्रवृक्षे । वै. निघ. । [सु. ।

मुनीष्टम् । क्ली । नीवारधान्ये । উড়িধান । प.

मुमूर्षा । स्त्री । मरणेच्छायां । त्रि (पुं:) । मरणोन्मुखे ।

मुरगण्डः । पुं । वरण्डे । वर्णक । जटा. ।

मुरङ्गिका । स्त्री । मूर्व्वायाम् । वै.निघ. ।

मुर(रु)ङ्गी । स्त्री । कृष्णशिग्रौ । वै.निघ. । रक्तपुष्पशोभाञ्जनवृक्षे । सु.सू.३८अ.शिरोरो.चि. । अत्र सुरङ्गीति डल्लणपाठः, तेन स एवार्थः । सु. चि.२२अ. । "महौषधमुरङ्गीमूलसिद्धं वा ।" सु. चि.३अ. ।

मुरजफलः । पुं । पनसवृक्षे । त्रिका. ।

मुरलः । पुं। मत्स्यविशेषे । মউরলা মাছ । गुणाः—बृंहणो वृष्य-स्तन्यश्लेष्मकरश्च । सु.सू.४६अ. ।

मुरा (मांसी) । स्त्री । गुर्ज्जरदेशे खनामख्यातगन्धद्रव्ये । मूरामांसी । मं मुरा । कं मुरै । सि.यो.व.द.यक्ष्म.चि.चन्दनादितैले । भा.म.१भ. विसविभमज्व.चि. । गुणाः – कटुः तिक्ता शीता कषाया कफपित्तहृत् श्वासरक्तविषदाहभ्रमहृष्णाघ्नी च । रा.नि.व.१२ । "मुरा तिक्ता हिमा स्वाद्वी लघ्वी पित्तानिलापहा । ज्वरासृग्भूतरक्षोघ्नी कुष्ठकासविनाशिनी ॥" भा.पू.१भ. । "किञ्चित् पीता मुरा शस्ता मांसी पिङ्गजटाकृतिः ।" भैष. ।

मुर्भिणी । स्त्री । अङ्गारधानिकायाम् । श.च.।

मुर्म्मुरः । पुं । तुषाग्नौ । তুষের আগুন । मे. ।

मुशटी । स्त्री । श्वेतकङ्गौ । শ্বেত কঙ্গু ধান । हे.च. ।

मुश(ष)लिका (ली) । स्त्री । (Curculigo orchioides or hypoxis orchioides.) तालमूलीनामकन्दशाके । তালমূলী । हिं मुषली, कालीमुषली, सिया । तें नेलतलि गडडलि, नेलताड़ि । रा.नि.व.७ । र.सा.सं. । शाबल्यां । वा.उ.३२अ. । गुणाः—ध्वजभङ्गे अर्शसि प्रमेहे च हिता । See तालमूली । गृहगोधिकायाम् । श.र. । [निघ. ।

मुश(ष)लीकन्दः । पुं । तालमूल्याम् । वै.

मुषकः । पुं । मूषिके । वै.निघ. । [टी.रा. ।

मुषा । स्त्री । स्वर्णादिगालनपात्रे । মূচি । अ.

मुष्कः । पुं । अण्डकोषे । रा.नि.व.१८ । मुष्ककवृक्षे । ঘণ্টাপারুল । मे. । मांसले । हे.च. ।

मुष्ककः । पुं । (Schrebera swietenioides.) घण्टापाटलवृक्षे । पलाशवत् पर्व्वतवृक्षे । ঘণ্টাপারুল । हिं मोखा । मं मोखे । कं मोखदलाद । तें मोक्कपुचेट्टु, मुष्कतुन्डुचेट्टु । भा. । वा.सू.१५अ. । गुणाः—"मुष्ककः कटुकोऽम्लश्च रोचनः पाचनः परः । प्लीहगुल्मोदराशोंघ्नो द्विधा तुल्यगुणान्वितः ॥" रा.नि.व.११ ।

मुष्ककादिवर्गः । पुं । मुष्ककस्नुक्वराद्वीपिपलाशधवशिंशपा इति गणे । गुणाः—गुल्ममेहाश्मरीपाण्डुमेदोऽर्शःकफशुक्रघ्नः । वा.सू.१५अ. ।

मुष्करः । पुं । महाण्डकोषमनुष्ये । কুরণ্ডে । हे.च. ।

मुष्कशून्यः । पुं । षण्डे । খোজা । श.मा. ।

मुष्टः । त्रि । मर्द्दिते । মর্দিত (?) । "अल्प-नखमुष्टिमुष्टे यष्टीमधुककषाये ।" सु.सू.४३अ. ।

मुष्टिः । पुं,स्त्री । अल्पनखमुष्टौ । मूठा । भा.म. ४भ.कर्णरो.चि. । संहतपिण्डिताङ्गुलिकरे । "मुष्टिर्भवेत् संहतपिण्डिताङ्गुलावाकुञ्चितोऽयं प्रकृतिः प्रकीर्त्तितः ।" रा.नि.व.१८ । पले । ८ तो. । प.प्र.१ख. । ऋद्धौ । घण्टापाटलवृक्षे । र.मा. । र.सा.सं.शूलचि.अग्निमुखरसे ।

मुष्टिकः । पुं । बलिदानयोग्योपकरणविशेषे । वा.कुमारतन्त्रम् ।

मुष्टिन्धयः । पुं । बालके । त्रिका. ।

मुष्टिप्रमाणबदरम् । क्ली । सेवफले । সেও ফল । भा. ।

मुष्टियोगः । पुं । "उद्धृत्य मुष्टिनाच्छाय सगुप्तं यन्निधापयेत् । तं मुष्टियोगमित्याहुर्विबुधा भिषगीश्वराः ॥" इति परिभाषान्तरम् ।

मुष्ठकः । पुं । राजसर्षपे । र.मा. ।

मुसली । स्त्री । तालमूल्याम् । प.मु.महाभल्लातकगुड़े । गृहगोधायां । टिकटिकि । अम. ।

मुस्तः । पुं,क्ली । मुस्तके । हारा. । सु.कल्प.२अ. । च.द.पित्त.ज्व.चि.कलिङ्गादिः । "कलिङ्गं कट्फलं मुस्तम् ।" च.सू.४अ. । कन्दविषभेदे । प.मु. ।

मुस्तकः । पुं,क्ली । (Cyperus rotundus. Syn. Hexastachyos. Roxb.) स्वनामख्यातगन्धद्रव्ये । मूता । हिं मोथा । तैं तुगमुस्त । सक्त्हतुङ्गविरु । ता. कोरय । गुणाः—तिक्तकषायं शीतं पाचनं पित्तज्वरघ्नं ग्राहि च । रा.नि. व.६। "अनपदेशे यज्जातं मुस्तकं तत् प्रशस्यते ।" तत्रापि तु नागरमुस्तं वरम् । भा. । "द्विमुस्तं नूतनं पुष्टं गन्धाढ्यं परमं विदुः ।" भैष. । (C. Pertenuis. Syn. Mariscus cyperus.) नागरमुस्तके । तच्छुद्धिर्यथा—'मुस्तकन्तु मनाक् चुण्णं काञ्जिके त्रिदिनोषितं । पञ्चपल्लवतोयेन स्विन्नमातपशोषितं । गुडाम्बुना सिच्यमानं भर्ज्जयेच्चूर्णयेत्ततः । आजशोभाञ्जनजलैर्भावयेच्चेति शुध्यति ॥" भैष.वा.व्या.चि. । पुं । स्थावरविषभेदे । र.मा. ।

मुस्तकादिः । पुं । विषमज्वरे कषायभेदे । "मुस्तामलकगुड़ूचीविश्वौषधकण्टकारिकाक्वाथः । पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति ॥" भैष.ज्व.चि. ।

मुस्तद्वयम् । क्ली । नागरमुस्तकैवर्त्तिमुस्तयोः । च.द.वा.व्या.चि.महाप्रसारणीतैले ।

मुस्ता । स्त्री । भद्रमुस्तायाम् । अम. । वा.सू.१५ अ. । "मुस्तावचाग्नि ।"

मुस्ताकृतिः । स्त्री । शठ्यां । वै.निघ. ।

मुस्तादः । पुं । शूकरे । जटा. ।

मुस्ताद्यगणः । पुं । मुस्ताद्यष्टादशद्रव्यगणे । तत्क्वतकषायः सन्निपातज्वरे पित्तोत्तरसन्निपाते च हितः । "मुस्तपर्पटकोशीरदेवदारुमहौषधम् । त्रिफला धन्वयासश्च नीली कम्पिल्लकं त्रिवृत् ॥ किराततिक्तकं पाठा बला कटुकरोहिणी । मधुकं पिप्पलीमूलं मुस्ताद्योगण उच्यते ॥" च.द.सा.ज्व.चि. । अयं मुस्ताद्यष्टादशाङ्ग इति संग्रहान्तरे ।

मुस्ताभम् । क्ली । नागरमुस्तायाम् । र.मा. ।

मुहूर्त्तः । पुं । घटिकाद्वये । सु.सू.५अ. ।

मुह्वकः । पुं । मुष्ककवृक्षे । अरुणः ।

मूकः । पुं । तन्नामकवातरोगविशेषे । বোবা । निदानलक्षणे—"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यवचनान् मूकमिण्मिणगद्गदान् ॥" सु.चि.१अ. ।

मूढ़म् । क्ली । मूर्च्छायाम् । त्रि । जड़े । है.च. ।

मूढ़गर्भः । पुं । गर्भजरोगे । গর্ভস্রাবাদি রোগ । "तमेव कदाचिद्विहङ्गमसम्यगागतमपत्यपथमनुप्राप्तमनिवस्यमानमपानवैगुण्यसम्मोहितं गर्भं मूढ़गर्भमित्याचक्षते ।" स चतुर्विधः—कीलः प्रतिखुरः बीजकः परिघ इति केचित् । सुश्रुतस्तु अष्टविधमाह । सु.नि.८अ. । सु.शा. । एषां विशेषाः स्वस्वपर्य्याये मृग्याः । तस्य निदानं यथा—"भयाभिघातात्तीक्ष्णोष्णपानाशननिषेवणात् । गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् ॥ गर्भोऽभिघातविषमाशनपीड़िताद्यैः पक्वं द्रुमादिव फलं पतति क्षणेन । मूढ़ः करोति पवनः खलु मूढ़गर्भं शूलञ्च योनिजठरादिषु मूत्रसङ्गम् ॥" मा.नि. ।

मूढ़िः । स्त्री । मूर्च्छायाम् । रा.नि.व.२० ।

मूत्रम् । क्ली । आहारस्य सारहीनमलद्रवे । प्रस्रावे । প্রস্রাব, মূত্ । रा.नि.व.१८ । "शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात् ।" शार्ङ्ग.६ख. । सा. मूत्रगुणाः—"मूत्रम् आलेपने प्रलेपे आस्थापने निरूहवस्तौ विरेचनेऽधोभागहरणे च ।" च.सू.१ अ. । "मूत्रं तीक्ष्णोष्णलवणं पित्तकृत्कटुकं लघु । दत्तं क्रिमुदरानाहशोथार्शोविषकुष्ठनुत् ॥" राज. ३प. । तत्र दश—गोच्छागमेषमहिषगजाश्वोष्ट्रगर्द्दभनरनारीमूत्रभेदेन । विशेषाः तत्तत्पर्य्याये मन्तव्याः । "शूलगुल्मोदरानाहवातविच्छर्द्दनादिषु । मूत्रप्रयोगसाध्येषु गोमूत्रं कल्पयेद्बुधः ॥" रा.नि.व.१५ । "अजागवीगतं मूत्रं पाने शस्तं भिषग्वर । आविकं माहिषञ्चापि तैलपाके विधीयते ॥" अत्रि.८अ. । अप्रसूतायाः प्रसूतायाश्च मूत्रगुणाः —"अप्रसूताया घनं मूत्रं प्रसूताया द्रवं लघु । न किं गुणविशेषः स्यात्समता पाकवीर्य्ययोः ॥" अत्रि.८अ. । सु.सू. ३८अ.शिरो.वि. । मूत्रपरीक्षा —"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः । रक्तमेव भवेद्रक्तात् धवलं फेनिलं कफात् ॥" भा. ।

मूत्रकृच्छ्रम् । क्ली । मूत्ररोधरोगे । मूत्रस्य कृच्छ्रेण महता दुःखेन प्रवृत्तौ । वि.र. । तच्चाष्टविधं —वातादिभेदेन चत्वारि, शल्यजपुरीषजशुक्रजाश्मरीजलाश्च चत्वारीति । तस्य निदानं—"व्यायामतीक्ष्णौषधरूक्षमद्यप्रसङ्गनित्यद्रुतपृष्ठयानात् । आनूपमत्स्याध्यशनादजीर्णात् स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ॥" लक्षणं—"पृथङ्मलाः स्वैः कुपिता निदानैः सर्व्वेऽथवा कोपमुपेत्य वस्तौ । मूत्रस्य मार्गं परिपीड़यन्ति यदा तदा मूत्रयतीह कृच्छ्रात् ॥" मूत्रकृच्छ्रमूत्राघातयोरयं विशेषः—तत्र प्रथमे कृच्छ्रत्वमतिशयितम् ईषद्विबन्धश्च । द्वितीये विबन्धो बलवान् कृच्छ्रत्वमल्पमिति । वि.र. ।

मूत्रकोशः । पुं । मूत्राशये । ज.द.२अ. ।

मूत्रग्रन्थिः । पुं । मूत्राघातरोगविशेषे । लक्षणं यथा—"अन्तर्वस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत् । अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते ॥" मा.नि. । अश्मर्य्यां पित्तादि कुप्यति अत्र तु रक्तमेवेति भेदः । वि.र. ।

मूत्रग्रहः । पुं । अश्वस्य मूत्रसङ्गरोगे । लक्षणं यथा—"स्तोकं स्तोकं सफेणञ्च कृच्छ्रान्मूत्रं करोति यः । तस्य वातसमुत्थन्तु विद्यान्मूत्रग्रहं बुधः । दाहोत्क्रामयुतः पित्तान्मूत्ररोगः प्रजायते । वाजिनः पीतमूत्रस्य अथवा रक्तमूत्रिणः । कफजे मूत्ररोगे तु सान्द्रमूत्रं सपिच्छिलम् ॥" ज.द.४७अ. ।

मूत्रजठरः । पुं । मूत्राघातभेदे । तस्य लक्षणं —"मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः । अपानः कुपितो वायुरुदरं पूरयेद्भृशम् । नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम् । तन्मूत्रजठरं विद्यादधोवस्तिनिरोधजम् ॥" मा.नि. ।

मूत्रदशकम् । क्ली । दशविधमूत्रेषु हस्तिमेषोष्ट्रगवाजमहिषघोटकगर्द्दभमानुषीमानुषजातेषु । "मूत्राणि हस्तिमहिषोष्ट्रगवाजकानां मेषाश्वरासभकमानुषमानुषीणाम् । यत्नेन यत्र मिलितानि दशेति तानि शास्त्रेषु मूत्रदशकाह्वम्‥‥‥ ॥" रा. नि.व.२२ ।

मूत्रदोषः । पुं । प्रमेहरोगे । उदकमेहादौ । প্রস্রাবের দোষ । रा.नि.व.२० ।

मूत्रनिरोधः । पुं । मूत्ररोधरोगे । निदा. ।

मूत्रपञ्चकम् । क्ली । पञ्चविधमूत्रेषु । "गवाजजानां मेषीणां महिषीणाञ्च मिश्रितम् । मूत्रेण गर्द्दभीनाञ्च तन्मतं मूत्रपञ्चकम् ॥" रा.नि.व.२२ ।

मूत्रपतनः । पुं । गन्धमार्जारे । গন্ধগোকুল । रा.नि.व.१९ ।

मूत्रपथः । पुं । योनौ । वै.निघ. ।

मूत्रपुटम् । क्ली । वस्तौ, नाभेरधोभागे । हे.च. ।

मूत्रफला । स्त्री । कर्कव्याम् । काँकुड़ । रा. नि.व.७ ।

मूत्रबीजकः । पुं । असनवृक्षे । वै.निघ. ।

मूत्ररोधः । पुं । मूत्रकृच्छ्ररोगे, मूत्रसङ्गे । रा. नि.व.२० ।

मूत्रलम् । क्ली । त्रपुषे । शशा । त्रि । वस्तिशोधने । श.च. । स्त्री । चिर्भटिकायाम् । फूटी । रा.नि.व.७ । कर्कटिकायां । चिका. ।

मूत्रवहनाड़ी । स्त्री । या आमाशयाद्वस्तौ मूत्रं नयति । "पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः । तर्पयन्ति सदा मूत्रं सरितः सागरं यथा । सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः । नाड़ीभिरुपनीतस्य मूत्रस्यामाशयान्तरात् ॥" सु.नि.३अ. ।

मूत्रवृद्धिः । स्त्री । अन्त्रवृद्धिरोगे । लक्षणं— मूत्रसन्धारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णो दृतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदनां वृषणयोः शोफं कोषयोः करोति च । मा.नि. ।

मूत्रशुक्रम् । क्ली । मूत्राघातरोगविशेषे । लक्षणं —"मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम् । स्थानाच्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते । भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ॥" मा.नि. ।

मूत्रशोधनिका । स्त्री । चिर्भटिकायाम् । वनकर्कटीविशेषे । वै.निघ. ।

मूत्रशोक्रम् । क्ली । श्लेष्मजन्यमूत्ररोगे । भा. ।

मूत्र(त्रोत्)सङ्गः । पुं । मूत्राघातभेदे । तस्य लक्षणं—"वस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः । मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः । स्रवेच्छनैरल्पमल्पं सरुजं वाथनीरुजम् । विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः ॥" मा.नि. ।

मूत्रसादः । पुं । मूत्राघातभेदे । लक्षणं— "पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत् । कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं स्रवेत् । स दाहं रोचनाशङ्खचूर्णवर्णं भवेच्च तत् । शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम् ॥" मा.नि. ।

मूत्रक्षयः । पुं । मूत्राघातभेदे । "रुक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ । मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम् ॥" मा.नि. ।

मूत्राघातः । पुं । त्रयोदशविधमूत्ररोधरोगे । निदानादि—"जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश । प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकादयः ॥" यथा—वातकुण्डलिका अष्ठीला वातवस्तिः मूत्रातीतः मूत्रजठरः मूत्रोत्सङ्गः मूत्रक्षयः मूत्रग्रन्थिः मूत्रशुक्रम् उष्णवातः मूत्रसादः विड्विघातः वस्तिकुण्डलः इति । मा.नि. । सुश्रुते द्वादश उक्ताः । एषां लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि ।

मूत्रातीतः । पुं । मूत्राघातभेदे । तस्य लक्षणं —"चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते । मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते ॥" मा.नि. ।

मूत्राधिक्यम् । क्ली । श्लेष्मजन्यमूत्रबाहुल्यरोगे । भा. । [स्तिर्मूत्राशयः स्मृतः । रा.नि.व.१८ ।

मूत्राशयः । पुं । नाभेरधो वस्तिस्थाने । "व-

मूत्राष्ट(क)म् । क्ली । "गोऽजाविमहिषाश्वानां खरोष्ट्रकरिणां तथा । मूत्राष्टकमिति ख्यातं सर्व्वशास्त्रेषु सम्मतम् ॥" प.प्र.३ख. । भा.म.४भ. बाल.चि. ।

मूत्रिका । स्त्री । सल्लकीवृक्षे । वै.निघ. ।

मूत्रोष्णता । स्त्री । पित्तजन्यमूत्ररोगे । भा. ।

मूर्वः । पुं । वनमुद्गे । माषे । মাষকলায় । चिका. । स्त्री (र्वा) । मूर्व्वायाम् । वै.निघ. ।

मूर्च्छनम् (ना) । क्ली, स्त्री । पारदस्य संस्कारविशेषे । रस.चि.३म. । See पारदः ।

मूर्च्छा । स्त्री । सर्व्वथा ज्ञानशून्यतायां, रूपादेरज्ञाने । सा पित्ततमोजाता । भा.म.१भ.ज्व. चि. । "मूर्च्छा दाहो मदस्तृषा ।" रोगविशेषे । मूर्छा রোগ । निदानं—"क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः । वेगघातादभीघातात् हीनसत्त्वस्य वा पुनः । करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च । निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः । संज्ञावहासु नाड़ीषु पिहितास्वनिलादिभिः । तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् । सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् । मोहो मूर्च्छेति तामाहुः षड्विधा सा प्रकीर्त्तिता । वातादिभिः शोणितेन मद्येन च विषेण च । षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते । हृत्पीड़ा जृम्भणं ग्लानिः संज्ञानाशो बलक्षयः । सर्व्वासां पूर्व्वरूपाणि यथा स्वं तं विभावयेत्··· ॥" मा.नि. ।

मूर्च्छालः }
मूर्च्छितः } त्रि । मूर्च्छायुक्ते । अम. ।

मूर्त्तिः (मत्) । स्त्री, क्ली । शरीरे । रा.नि.व. १८ । त्वचायाम् । वै.निघ. ।

मूर्द्धकर्णी (र्परी) । स्त्री । छत्रे । हारा. ।

मूर्द्धखोलः । पुं । जलत्राणायाम् । টোকা, পেকে । त्रिका. ।

मूर्द्धजः । पुं, क्ली । केशे । रा.नि.व.१८ । स्त्री (जा) । बालके । বালা । भा.म.१भ.चित्तविभ्रमज्व.चि. । "सुरामूर्द्धजमेघाह्व··· ।"

मूर्द्धपुष्पः । पुं । शिरीषवृक्षे । श.मा. । [श.च. ।

मूर्द्धरसः । पुं । भक्तफेने । ভাতের ফেন ।

[मूर्द्धवेष्टनम् । क्ली । उष्णीषे । পাগড়ী । हे.च. ।

मूर्द्धा (न्) । पुं । मस्तके । रा.नि.व.१८ ।

मूर्व्वा । स्त्री । (Sansevieria zeylanica. Syn. S. Roxburghiana.) Bow string hemp. स्वनामख्यातक्षुपे । धनुर्गुणोपयोग्या दुचउड़, कदलीसदृशस्वल्पविटपा इषोड़ इति च लोके । सु.सू.३८।३६अ.पित्तशमने । মূর্ব্বা, মুর্গা, মুরহর, শোচমুখী, বোড়াচক্র । हिं चूर्णहार । मं गीनसफल । तैं चागचेट्टु, सग, चग । बम्. मोरवेल, मुहरसि । ता. मरुल । गुणाः—"...सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत् । त्रिदोषहृत्तृड्डृद्रोगकण्डूकुष्ठज्वरापहा ॥" भा. । मूलं रासायनहरम् । मूर्व्वाभावे पिप्पलीमूलं । सि.यो. कफजसंशमने ।

मूलम् । क्ली । पिप्पलीमूले । पुष्करमूले । कुड़विशेष । रा.नि.व.६ । वै.निघ.वा.व्या.प्रत्यष्ठीला. चि. । वा.उ.५अ. । तरुमूले । रा.नि.व.२ । हैमी । भा. । कारणे । च.सू.१अ. ।

मूलकम् । क्ली, पुं । (Raphanus sativus.) Radish. स्वनामख्यातमूलशाकविशेषे । মূলা । हिं दा. मूली । मं कं ता. मूलंगि । तैं मूलंगिचेट्टु । मूलकं पञ्चविधं—चाणक्य-राजक-पिण्ड-बाल-गर्ज्जरभेदेन । विशेषास्तत्तत्पर्य्याये द्रष्टव्याः । भावमिश्रेण मूलकस्य द्विभेदः कृतः बालं महच्चेति । কচি মূলা ও পাকা মূলা । सा. गुणाः—"मूलकं कटुकं श्लेष्माणं संवर्द्धयति स्निग्धवीर्य्यत्वात् ।" सु.सू.४०अ. । तीक्ष्णम् उष्णं कटूष्णं ग्राहि दीपनम् अर्शोगुल्महृद्रोगहरं गुरु रुच्यं वातघ्नञ्च । रा.नि.व.७ । स्वर्य्यं श्वासाक्षिपीनसघ्नञ्च । शुष्कं तत् शोथघ्नं लघुत्रिदोषघ्नञ्च । तत्पुष्पं पित्तश्लेष्मघ्नं । फलं वातकफघ्नञ्च । मद.व.७ । लघु तत्—कटु उष्णं लघु पाचनं रुच्यं त्रिदोषघ्नं स्वर्य्यं ज्वरश्वासघ्नं नासारोगघ्नं कण्ठरोगघ्नं नेत्रामयहरञ्च । महत्तत्—रुक्षोष्णं गुरु त्रिदोषजनकं । स्नेहसिद्धं तत् त्रिदोषघ्नम् । तत्तैलगुणाः तीक्ष्णं लघु उष्णवीर्य्यं कटु कटुविपाकं सरं वातकफक्रिमिकुष्ठप्रमेहशिरोरोगहरञ्च । सु.सू.४५अ. । तत्पत्रगुणाः—"पाचनं लघु रुच्योष्णम् ।" "पक्वं मूलकजं नवम् । स्नेहसिद्धं त्रिदोषघ्नमसिद्धं कफपित्तकृत् ॥" भा.पू.१भ.शा.व. । "मूलकं गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषकृत् । तदेव स्नेहपक्वं स्वेल्पकफकृद्वातपित्तजित् ॥" "बालमूलकपत्री तु रोचनी वह्निदीपनी ।" राज.३प. । तत्कृतयूषगुणाः—"मूलकयूषी हरति लालास्रावं गलग्रहं जूर्त्तिं । मेदारोचकपीनसकासकफश्वाधिनाशनञ्चापि ॥" द्रव्यगु. । उशीरे । रा.नि.व.१२ । शिग्रुमूले । विषभेदे । हे.च. । [ना । वै.निघ. ।

मूलकच्छदः । पुं । कृष्णशिग्रौ । কাল সজি-

मूलकपर्णी । स्त्री । शोभाञ्जनवृक्षे । সজিনা গাছ । र.मा. । [ला । वा.चि.८अ. ।

मूलकपोता । स्त्री । बालमूलके । কচি মূ-

मूलकपोतिका । स्त्री । अतिबालमूलके । অতি কচি মূলা । योग.र.मध्यज्वरे । गुणाः—कटुतिक्तरसा उष्णवीर्य्या लघुपाका । प्रभावश्च सर्व्वदोषघ्नता रुचिजनकता च । "सर्व्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका ।" सु.सू.४६अ. । चाणक्यमूलके । वै.निघ. । [বিচি । भा. ।

मूलकबीजम् । क्ली । मूलकशस्ये । মূলার

मूलकमूला । स्त्री । चोरीशवृक्षे । प.मु. । चोरकाकोल्याम् । वै.निघ. ।

मूलकर्कटी । स्त्री । कृष्णोदुम्बरे । वै.निघ. ।

मूलकविषम् । क्ली । कन्दविषभेदे । सु.कल्प. २अ. ।

मूलकशाकः । पुं । मूलकपत्रे ।

मूलकक्षारः । पुं । शुष्कमूलकक्षारे । च.द. ग्रन्थि.चि. । [व.८ ।

मूलग्रन्थिः । स्त्री । वल्लिदूर्व्वायाम् । रा.नि.

मूलजः । त्रि । यो मूलादुत्पद्यते । यथा पद्मादिकम् । हे.च. । क्ली । आर्द्रके । আদা । रा. नि.व.६ । [मूले । रा.नि.व.१८ ।

मूलजिह्वा । स्त्री । सूक्ष्मजिह्वाधोवर्त्तिजिह्वा-

मूलपर्णी । स्त्री । मण्डूकपर्ण्याम् । থুলকুড়ি । प.मु. । [रा.नि.व.६ ।

मूलपुष्करम् । क्ली । पुष्करमूले । কুড়ভেদ ।

मूलपोती । स्त्री । मालवे प्रसिद्धायां पोतिका-

यां । मं मालविरलि । कं तींटदवसले । गुणा:—त्रिदोषघ्नी हृष्या बल्या लघु: बलपुष्टिकरी रुच्या जठरानलदीपनी च । रा.नि.व.७ । आरामवल्लिकायां । रा.नि.व.२३ । [निघ. ।

मूलफल: (ला) । पुं, स्त्री । पनसवृक्षे । वै.

मूलफलद: । पुं। पनसवृक्षे । কাঁঠাল গাছ। रा.नि.व.११ ।

मूलरस: । पुं । मोरटलतायां । र.मा. ।

मूलविरेचनम् । क्ली । वृहतादिमिफारुपश्रेष्ठविरेचने । तदुक्तं—"सप्तला शङ्खिनी दन्ती द्रवन्ती गिरिकर्णिका । वृहच्छामोदकीर्य्यां च प्रकीर्य्या चीरिणी तथा । छगलाण्डी गवाची च कुचाची गिरिकर्णिका । मसूरविदला चैव भवेन्मूलविरेचनम् ॥" वा.चि.६अ. ।

यवानिका (नी) । स्त्री । यमानीक्षुपे । रा.नि.व.६ । यमान्यां । भा.पू.१भ. । पारसीकयमान्याम् । वै.निघ. ।

यवानीकः । पुं । यमानीभेदे । वा.चि.६अ. ।

यवानीशाकम् । क्ली । यमानीदले । যমানের শাক । हिं जवाइन । [वै.निघ. ।

यवान्नम् । क्ली । यवकृतभक्ते । যবের ভাত ।

यवापत्यम् । क्ली । यवक्षारे । रा.नि.व.६ ।

यवाम्लम् । क्ली । यवकाञ्जिके । যবের কাঁজি । गुणाः—"जातं यवाम्लं कटुकं विपाके वातापहं श्लेष्महरं सरञ्च । पित्तप्रकोपं कुरुते सभेदि विदूषणं पित्तगदास्रजोषु ॥" अत्रि.११अ. ।

यवाम्लजम् । क्ली । यवाम्ले, सौवीरकाञ्जिके । रा.नि.व.१५ ।

यवासः (कः) । पुं । (Alhagi manrorum. Syu. Hedysaram Alhagi.) The camel's thorn. यासक्षुपे । দুরালভা । तें पिन्नरेगटिट्टुलगोंडि । रा.नि.व.४ । सि.यो. पित्तातिसारचि.कलिङ्गादौ । च.द.पि.श्लेष्मज्व.चि. कण्टकार्य्यादिः । च.द.ज्व.चि.वासाद्यघृते ।

यवासशर्करा । स्त्री । यवासकृतशर्करायाम् । तवराज, ख्याना, सीरखस्ता इति लोके । गुणाः—अतिमधुरा पित्तघ्नी श्रमघ्नी तृष्णाघ्नी हृद्या सरा मूर्च्छादाहभ्रमघ्नी च । रा.नि.व.१४ । मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति । सु.सू. ४५अ.इक्षुव. । [दुरालभायाम् । वै.निघ. ।

यवासा । स्त्री । गुच्छासिनीवृक्षे । रा.नि.व.८ ।

यवाह्वः । पुं । यवक्षारे । सु.चि.२०अ.अलस. चि. । यमान्याम् । स्त्री (ह्वा) । दुरालभायाम् वै.निघ.२भ.उन्मा.चि. । यमान्याम् । यवक्षारे । वै.निघ. । [रा.नि.व.१५ ।

यवोत्थम् । क्ली । काञ्जिके । सौवीरकाञ्जिके ।

यवोद्भवः । पु । यवक्षारे । रा.नि.व.६ ।

यवोद्भूता । स्त्री । यवशर्करायाम् । वै.निघ. ।

यव्यम् । क्ली । यवक्षेत्रे । रा.नि.व.२ ।

यशदम् । क्ली । (Zinkum.) Zink. धातुविशेषे । দস্তা । यशदं वङ्गसदृशं रीतिहेतुश्च तन्मतं । गुणाः—"यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् । चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ॥" भा.पू.१भ.धा.व. ।

यशस्करी । स्त्री । बृहज्जीवन्तीलतायाम् । रा.नि.व.३ । शङ्खिन्याम् । वै.निघ. ।

यशस्या । स्त्री । ऋद्धौ । ऋद्धि ওষধি । रा.नि.व.५ । जीवन्तीलतायाम् । रा.नि.व.३ ।

यशस्विनी । स्त्री । यवतिक्तालतायां । महाज्योतिष्मतीलतायां । रा.नि.व.३ । वनकार्पास्यां । श.र. ।

यशोदः । पुं । पारदः । रा.नि.व.१३ ।

यष्टिः । पुं, स्त्री । भार्ग्यां । বামনহাটি । रा.नि.व.६ । वै.निघ.मधुरज्व.चि.मधुकादिः । यष्टिमधुके । मे. ।

यष्टि(ष्टी)कः । पुं, क्ली । यष्टिमधुनि । रा.नि.व.६। च.सू.४अ.। टिट्टिभे । तित्तिर पाखी । श.र. । स्त्री । भार्ग्यां । वामनहाटी । प.मु. । मञ्जिष्ठायाम् । सि.यो.षट्करञ्जतैले । यष्टिमधुनि। श.र. । [करणोपाये । सु.सू.४५अ. ।

यष्टिकाभ्रामणम् । क्ली । जलस्य शीतलीकरणोपाये ।

यष्टि(ष्टी)पुष्पः । पुं । पुत्रञ्जीवद्वृक्षे । भा. ।

यष्टि(ष्टी)मधु (कम्) । क्ली। (Glycyrhiza glabra.) स्वनामख्यातमधुरकाष्ठे। यष्टिमधु । इला. । हिं जेठीमधु। मुलहटी । तें मिष्टमूलविशेषम् । जलजस्थलजभेदेन द्विधा । "आनूपं स्थलजञ्चैव प्रत्येकं द्विविधं स्मृतम् ।" च.सू.१अ. । गुणाः—मधुरं किञ्चित्तिक्तं चक्षुष्यं शीतलं पित्तघ्नं शोषव्रणत्रणापहम् । रा.नि.व.६ । सुश्रुतेऽस्य मूलस्य प्राशस्त्यं, किन्तु विरेचनं प्रति फलमेव प्रशस्तम् । च.सू.१अ.टी. । स्निग्धं शिथिलकारकञ्च । केचित् ।

यष्टिमधुका । स्त्री । यष्टिमधुनि । अम. ।

यष्टिलता । स्त्री । भ्रमरारिपुष्पवृक्षे । भ्रमरमारीति मालवदेशे प्रसिद्धा । रा.नि.व.१० ।

यष्टी । स्त्री । यष्टिमधुनि । प.मु. । रा.नि.व.६ । रस.र.मनरी.चि.। वा.सू.१५अ.सारिवादिः। "यष्टी परूषकं हन्ति ।" च.द.ज्व.चि.शिरोलेपे । "यष्टीबदरकाञ्जिकम् ।" भैष.बृहत्खदिरवटी. ।

यष्टीकर्णः । पुं । तन्नामककर्णबन्धनाकृतौ । "तदाकारः ग्रथितमांसस्तब्धशिराततः सूक्ष्मपालिश्च ।" सु.सू.१६अ. ।

यष्ट्याह्वम् । क्ली । यष्टिमधुनि । रा.नि.व.६ । वा.सू.हरिद्रादिव. । सि.यो.र.पि.चि.मुस्तादि । अपस्मा.चि.कुष्माण्डकघृते ।

यक्षकर्दमः । पुं । कर्पूरादिकृतगन्धानुलेपने । स च समभागकर्पूरागुरुकस्तूरीकक्कोलात्मकः । "कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षधूपकः । चन्दनागुरुकुरङ्गनाभिकाचन्द्रचन्दनसमांशसम्भृतम् । नाकपूजनपरैकगोचरं यक्षकर्दममिमं प्रचक्षते ॥" रा.नि.व.२२ ।

यक्षग्रहः । पुं । यक्षोन्मादे । रा.नि.व.४५ ।

यक्षतरुः । पुं । वटवृक्षे । रा.नि.व.११ ।

यक्षधूपः । पुं । सर्ज्जरसे । धूना । प.मु. । रा.नि.व.१२ । सर्जतरौ । सरलनिर्यासे । तार्पिन तैल । इ.च. । यक्षकर्दमे । रा.नि.व.२२ ।

यक्षरसः । पुं । पुष्पमद्ये । त्रिका. ।

यक्ष(क्षा)वासः । पुं । वटवृक्षे । मद.व.५ । रा.नि.व.११ । [श.मा. ।

यक्षामलकम् । क्ली । पिण्डीखर्ज्जूरकफले ।

यक्षोदुम्बरकम् । क्ली। अश्वत्थफले । त्रिका.।

यक्षोन्मादः । पुं । यक्षावेशकृते उन्मादविशेषे । लक्षणं—"ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरो द्रुतगतिरल्पवाक् सहिष्णुः । तेजस्वी वदति च किं ददासि कस्मै...... ॥" भा. ।

यक्ष्मघ्नी । स्त्री । द्राक्षायाम् । श.मा. ।

यक्ष्मा (अन्) । पुं। तन्नामकरोगे । यक्ष्मारोग । यक्ष्यते पूज्यत इति । तन्निदानं—"वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् । त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥" तन्निरुक्तिः—"वैद्यो व्याधिमता यस्मात् व्याधिर्यत्नेन यक्ष्यते ।" भा. । See राजयक्ष्म ।

याचनकः । पुं । रक्तैरण्डवृक्षे । रा.नि.व.८ ।

याजः । पुं । अन्ने । सिक्तत ण्डुलान्न । इ.च. ।

याज(ज्ञि)कः । पुं । पलाशवृक्षे । रा.नि.व.१० । कुशतृणे । कुश । श.र. । रक्तखदिरवृक्षे । रा नि.व.८ । अश्वत्थवृक्षे । रा.नि.व.११ ।

याजुषः । पुं । तित्तिरपक्षिणि । वै.निघ. ।

यातना । स्त्री । अतितीव्रवेदनायाम् । अम. ।

यातयामः । पुं । वृद्धे । रा.नि.व.१८ । त्रि । जीर्णे । अम. । उज्झिते । मे ।

यातुकः । पुं । पत्रशाकविशेषे । गुणाः—पीलुपर्णीवत् । च.सू.२७अ. । स्त्री (का) । मयूरशिखायाम् । वै.निघ. ।

यातुघ्नः । पुं । गुग्गुलौ । रा.नि.व.१२ ।

यादः । क्ली । जलजन्तौ । अम. ।

यादोनिवासः । पुं । जले । इ.च. ।

यानम् । क्ली । गमने । हस्त्यादिभिर्भ्रमणे । गुणाः—"हस्त्यश्वरथदोलाद्यैर्भ्रमणं वातकोपनं। स्थि-

शीकरणमज्जानां बल्यं बह्निविवर्द्धनम्।" रात्र.२प.।

यापनवस्तिः । पुं । निरूहवस्तिभेदे । "क्षीद्राज्यक्षीरतैलानां प्रसृतं प्रसृतं भवेत् । हवुषासैन्धवाभ्यांश्च वस्तिः स्याद्यापनः परः ॥" भा. ।

याप्यः । त्रि । दुःखसाध्ये । तल्लक्षणम्—"यापनीयन्तु तं विद्यात् क्रिया धारयते हि यम् । क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति ॥" भा.। याप्यत्वमसाध्यत्वञ्च द्विधा प्रकीर्तितं उपेक्षयाचेति । "याप्याः केचित् प्रकृत्यैव केचिद्याप्या उपेक्षया ।" सारचन्द्रिका ।

यामघोषः । पुं । कुक्कुटे । श.मा.। स्त्री (षा) । घटिकायन्त्रे । घड़ि । त्रिका. ।

यामनादी (न्) । पुं । कुक्कुटे । वै.निघ. ।

यामिनी । स्त्री । हरिद्रायाम् । रा.नि.व.६ ।

यामिनीचरः । पुं । गुग्गुलौ । पेचके । वै.निघ. । [श.र. ।

यामिनीपतिः । पुं । कर्पूरे । मे. । चन्द्रे ।

यामुन(नेय)म् । क्ली । स्रोतोऽञ्जने । उज्ज्व. । सौवीराञ्जने । रा.नि.व.१३ ।

यामुनेष्टकम् । क्ली । शीषधातौ । जटा. ।

याम्यम् । क्ली । चन्दने । मे. । वै.निघ.चयरी. चि.चन्दनादितैले ।

याम्यज्वरः । पुं । प्रवृद्धहीनमध्यवातादिजनितसन्निपातज्वरे । लक्षणं—"हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुप्फुसाः । पच्यन्तेऽत्यर्थमूर्द्धाधः पूयशोणितनिर्गमः । शीर्णदन्तश्च मृत्युश्च तत्राप्येतद्विशेषतः । भिषग्भिः सन्निपातोऽयं याम्यो नाम्ना प्रकीर्त्तितः ॥" भा.म.१भ. । [निघ. ।

याम्यदिग्भवा । स्त्री । तमालपत्राम् । वै.

याम्यद्रुमः । पुं । शाल्मलिवृक्षे । वै.निघ. ।

याम्योद्भूतः । पुं । कोङ्कणे प्रसिद्धे शीतालवृक्षे । रा.नि.व.९ । [वै.निघ. ।

यावः । पुं । अलक्तके । अम. । लाक्षायाम् ।

यावकः । पुं । कुलत्थे । प.मु. । यवान्नां । यवेर याउ । हे.च. । च.चि.१५.। माषे । माषकलाय । अम. । बोरोधान्यद्वये । माषाकारपत्रे काश्मीरेषु तुलसीति ख्याते । सुभूतिः । अलक्तके । श.र. । यवान्ने । शिक्क यव । हे.च. । गुणाः—"यावकोऽतिगुरुः स्वादुर्वृष्यः स्निग्धः प्रकीर्त्तितः । गुल्मज्वरप्रतिश्यायकण्ठरुक्कासमेहहा ॥" वै.निघ. ।

यावनः (कल्कः) । पुं । शिलारसे । अम. ।

यावनकः । पुं । रक्तैरण्डे । वै.निघ. ।

यावनालः । पुं । (Zea mays.) स्वनामकशिम्बीधान्ये । काल जनार. जनार, जुयारी । हिं भुट्टा, मक्का । तें मक्का जोन्नलु । बम्. मकइ, बुट, वजा । ता. मक्कशोलम् । गुणाः—अस्य मूलम् ईषन्मधुरं रुच्यं शीतं पित्तघ्नं तृष्णाहरं पशूनां दौर्ब्बल्यकरञ्च । रा.नि.व.१६ ।

यावनालनिभः (भा) । पुं । यावनाले । रा.नि.व.८ ।

यावनालरसजगुड़ः । पुं । तद्रसजातगुड़े । जनारेर गुड़ । गुणाः—क्षारः कटुः सुमधुरः कफवातघ्नः पित्तलः नित्यसेवनेन कण्डुकुष्ठजननः रक्तदाहघ्नश्च । वै.निघ. ।

यावनालशरः । पुं । यावनालस्य शरे । जनारेर शर । हिं जोहरली । गुणाः—ईषन्मधुरः रुच्यः शीतलः पित्ततृष्णाहरः पशूनामबलप्रदश्च । रा.नि.व.१६ ।

यावनाली(शर्करा) । स्त्री । यावनालगुड़कृतशर्करायां । जनारेर चिनि। गुणाः—शैत्या उष्णा तिक्ता अतिपिच्छिला वातघ्नी सारका रुच्या दाहपित्तासदा च । रा.नि.व.१४ ।

यावनी । स्त्री । करञ्जशालिनामेक्षौ । रा.नि.व.१४ । रसालेक्षौ । वै.निघ. ।

यावशूकः (जः) । पुं । यवक्षारे । च.द.सि.यो.कास.चि.कुलत्थाद्यघृते । "दाड़िमगुड़यावशूकानाम् ।" (लवङ्गादिचूर्णे) ।

याविः (वी) । स्त्री । शङ्खिन्याम् । वै.निघ. । (वी) यवतिक्तालतायां । रा.नि.व.३ । [मु. ।

याविकः । पुं । यवनाले । काल जनार । प.

याव्यः । पुं । यवक्षारे । वै.निघ. ।

यासः (कः) । पुं। रक्तदुरालभायां । गुणाः—मधुरः तिक्तः शीतः पित्तदाहहरः बल्यः तृष्णाकफच्छर्द्दिघ्नश्च । रा.नि.व.४ । सि.यो.ज्व.चि.अष्टा-

ष्टावलेहे। "व्योषं यासश्च कारवी।" च.द.अभिन्यासज्व.चि.। "यासभार्गीपुनर्नवा:।" [निघ.।

यासशर्करा। स्त्री। यवासशर्करायाम्। वै.

यासा। स्त्री। मदनशलाकापक्षिणि। श.मा.। सि.यो.कास.चि.। "मूर्वातिक्ता निशा यासा।"

युक्तरथ:। पुं। निरूहवस्तिभेदे। "एरण्डमूलनिक्काथो मधुतैलं ससैन्धवं। एष युक्तरथो वस्ति: सवचापिप्पलीफल:॥" भा.।

युक्तरसा। स्त्री। गन्धरास्नायां। सामान्यरास्नायां। रा.नि.व.६। काँटा श्यामलती इति भाषा। अम.भ.।

युक्तश्रेयसी। स्त्री। गन्धरास्नायां। रा.नि.व.६।

युक्ता। स्त्री। रास्नायां। वा.सू.१५अ.रोध्रादि:। वृक्षभेदे। एलानीति लोके। र.मा.।

युक्तिव्यपाश्रय:। त्रि। या चेष्टा प्रत्यक्षं फलति तदौषधवाचके, संशोधनसंशमनौषधवाचके च। च वि.८अ.।

युगम्। क्ली। ऋद्धौ। भेषजे। हस्तचतुष्टये। मे.। "न युगमात्रदृक्।" च.सू.८अ.।

युगच्छद:। पुं। आपटा इति ख्याते वृक्षे। वै.निघ.उन्मा.चि.।

युगन्धर:। पुं। यावनाले। जनार। वै.निघ.

युगन्धरभक्तम्। क्ली, पुं। यावनालभक्ते। गुणा:—"अप्रसाधितभक्तो युगन्धराणां भक्तश्च घनो विशदमधुरश्च। कफे त्रिदोषशमने च कथ्यते कासे च श्वासात्मकएव स स्मृत:॥" अत्रि.२३अ.।

युगन्धराम्लम्। क्ली। यावनालकृतकाञ्जिकविशेषे। गुणा:—"युगन्धराम्लं कफवातहन्तृ शूलामयानां जरणप्रकर्त्तृ। तीक्ष्णं तथाम्लं श्रमदोषहन्तृ मेहार्शसो: रक्तहितं मतञ्च॥" अत्रि.११अ.।

युगप(पा)त्र: (क:)। पुं। रक्तकाञ्चनवृक्षे। प.मु.। अम.। अश्मन्तके। लोध्रे। वै.निघ.।

युगपत्रिका। स्त्री। शिंशपावृक्षे। सर्षपवृक्षे। त्रिका.।

युगपात्रिका। स्त्री। शिंशपावृक्षे। त्रिका.।

युगभृङ्गराज:। पुं। भृङ्गराजे केशराजे च। संग्रह:।

युगलाक्ष:। बर्बूरकवृक्षे। बाबला गाछ। रा.नि.व.८।

युगाक्षिगन्धा। स्त्री। वृद्धदारकलतायाम्। बीजताड़क। प.मु.। [निघ.।

युग्बला। स्त्री। सुगन्धतृणे, रोहिषतृणे। वै.

युग्मम्। क्ली। युगले। [छ। मद.व.६।

युग्मकण्टका। स्त्री। बदरीवृक्षे। कुल गा-

युग्मपत्र: (क:)। पुं। रक्तकाञ्चनवृक्षे। र.मा.। भूर्जवृक्षे। सप्तपर्णवृक्षे। वै.निघ.।

युग्मपत्रिका। स्त्री। शिंशपावृक्षे। श.र.।

युग्मपर्ण:। पुं। रक्तकाञ्चनवृक्षे। रा.नि.व.१०। सप्तपर्णवृक्षे। रा.नि.व.१२। स्त्री (र्णी)। वृश्चिकालीक्षुपे। श.चि.।

युग्मफला। स्त्री। इन्दीवरालतायाम्। रा.नि.व.३। वृश्चिकालीलतायां। बिछाति गाछ। रा.नि.व.९। [प.मु.।

युग्मफलिनी। स्त्री। दुग्धिकायां। थिरुइ।

युग्माञ्जनम्। क्ली। अञ्जनद्वये। एकं स्रोतोऽञ्जनम् अपरं सौवीरमिति। अरुण:। वा.सू.१५अ.प्रियङ्ग्वादिव.। [वै.निघ.।

युग्या। स्त्री। ऋद्धौ। ऋद्धि। वृद्धौ। वृद्धि।

युजौ। पुं द्वि.। अश्विनीकुमारौ। त्रिका.।

युञ्जातक:। पुं। वृक्षविशेषे। गुणा:—"बल्य: शीतो गुरु: स्निग्धस्तर्पणो बृंहणात्मक:। वातपित्तहर: स्वादु: वृष्यो युञ्जातक: परं॥" च.सू.२७अ.।

युद्धसार:। पुं। अश्वे। श.च.।

युधिष्ठिरराज:। पुं। कङ्कपक्षिणि। काँक् पाखी। त्रिका.।

युयु:। पुं। घोटके। हला.।

युयुक्षुर:। पुं। क्षुद्रव्याघ्रे। श.च.।

युवगण्ड:। पुं। पोगण्डे। त्रिका.। यूनो गण्डस्थव्रणे। वयस्फोँड़ा। श.र.।

युवती। स्त्री। दृष्टार्त्तवायां स्त्रियि। रा.नि.व.१८। प्रियङ्गौ। च.चि.१अ.ब्राह्मरसायने। स्वर्णयूथिकायाम्। वै.निघ.। हरिद्रायां। श.च.।

युवतीष्टा । स्त्री । स्वर्णयूथिकायाम् । रा.नि.व.१० । [वयस्के । युवा । रा.नि.व.१८ ।

युवा (न्) । पुं । षोड़शमारभ्य पञ्चाशत्पर्य्यन्त-

युवानपिड़का । स्त्री । यौवनकृतमुखव्रणे । वयसफोंड़ा । भैष.चुद्रदी.चि. ।

युवावस्थः । पुं । यूनि । रा.नि.व.१८ । [च. ।

यूः । स्त्री । मुद्गादिद्विदलधान्यकृतयूषे । यूष । हे.

यूकः । पुं । वकवृक्षे । प.मु. । मत्कुणे । जटा. । स्त्री (का) । कृष्णोदुम्बरे । यमान्यां । वै.निघ. ।

यूकाण्डः । पुं । लिक्षायां । लिखि । वै.निघ. ।

यूकारी । स्त्री । लाङ्गलिकायाम् । विषलाङ्गलिन्य । वै निघ. । [छ । रा.नि.व.९ ।

यूकावासः । पुं । माखीटवृत्ते । श्याओड़ा गा-

यूथपः । पुं । मुनिपत्रकशाके । वै.निघ. ।

यूथा । स्त्री । पाठायां । आकनादि । वै.निघ. ।

यूथिका । स्त्री । (Jasminum auriculatum.) स्वनामख्यातपुष्पवृपे । जूई । हिं यूही, स्वर्णयूही । मं पांड़रोजूइ । कं विलियमोले । यूथिका श्वेतस्वर्णभेदेन द्विधा । गुणाः—यूथिकायुगलं स्वादु शीतलं शर्कराघ्नं पित्तदाहतृषाघ्नं सव्रणत्वदोषघ्नञ्च । "सितपीतनीलभेचकनामभ्रः कुसुमैन यूथिकाः कथिताः । तिक्तहिमपित्तकफामयज्वरघ्नः व्रणादिदोषहराः । इति साधारणगुणाः । सर्व्वासां यूथिकानान्तु रसवीर्य्यादिसाम्यता, स्वर्णयूथिकायान्तु सुरूपता सुगन्धता च विशेषतो वर्त्तते । रा.नि.व.१० । "यूथीयुगं हिमं तिक्तं कटुपाकरसं लघु । मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् । व्रणास्रमुखदन्ताचिशिरोरोगविषापहम् ॥" भा. । पाठायां । आकनादि । रा.नि.व. ६ । चम्पानके । मे. ।

यथिकापत्रः । पुं । तालीशपत्रे । वै.निघ. ।

यूथी । स्त्री । यूथिकायां । श.र. । शुक्लयूथिकायाम् । स्वर्णयूथिकायाम् । वै.निघ. ।

यूपः (कः) । पुं । मदनवृक्षे । मद.व. ।

यूपद्रुः (मः) । पुं । खदिरवृक्षे । त्रिका. । रक्तखदिरे । रा.नि.व.८ ।

यूपलक्ष्यः । पुं । पक्षिणि । श.मा. ।

यूषः । पुं, क्ली । मुद्गादिरसे । डाल, कलाइ प्रभृतिर झोल । "अष्टमुद्गदलानान्तु पलेकेन विपाचितः । पूतापनीतविदलः तनुर्यूषः कृताकृतः । वृद्धवैद्याः पलं द्रव्यं ग्राहयन्ति जलाढ़के । भेषजस्यातिबाहुल्यात्कदाचिदुचितम्भवेत् । पेया मण्डादियोगेषु भेषजं यत्प्रकीर्त्तितम् । तत्तथैव प्रयोक्तव्यमरुचिर्न भवेत् यथा ॥" तोड़नानन्दोड़तनलात् । चतुर्भागाम्बुसाधितनिष्पीड़ितवैदलादिसम्भूतवारि यूष उच्यते । "वैदलान् वितुषान् भृष्टान् चतुर्भागाम्बुसाधितान् । निष्पीड्य तोयमेतेषां संस्कृतं यूष उच्यते ॥" प.मु. । "…यूषः किञ्चिद्घनः स्मृतः ।" गुणाः—"यूषो बल्यः स्मृतः कण्ठ्यः लघुपाकः कफापहः ।" प.प्र.२ख. । द्विदलादिरन्धनद्रवे । "रन्धनद्रवो यूष ।" इति । सा.कौ. । मांसरसे । यूषो बहुविधः वैदलादीनां वैचित्र्यात् । विशेषाः स्वस्वपर्य्याये सग्याः । पुं । ब्रह्मदारुवृचे । श.र. ।

योकम् । क्ली । यूकावृन्दे । सि.यो.कृमि.चि. ।

योगः । पुं । औषधे । द्रव्ये । उपाये । त्रिका. । येन वाक्यं युज्यते स योगः । सु.उ.६५अ. । "यद्दोषघ्नन्तु प्रथमं यस्य योगस्य कथ्यते । तत्रामैव स योगो हि कथ्यतेऽत्र विनिश्चयः ॥" प.प्र.१ख. । वपुस्थैर्य्ये । मे. । [विशेषे श्रीहर्षसूरिकृते ।

योगचिन्तामणिः । पुं । चिकित्सासंग्रह-

योगजम् । क्ली । अगुरुणि । काष्ठागुरुणि । भा. । [विशेषे चिमल्लभट्टकृते ।

योगतरङ्गिनी । स्त्री । वैद्यकचिकित्सासंग्रह-

योगनाविकः । पुं । मत्स्यविशेषे । हारा. ।

योगरङ्गः । पुं । नागरङ्गवृक्षे । रा.नि.व.११ ।

योगरत्नाकरः । पुं । चिकित्साग्रन्थविशेषे ।

योगराजगुग्गुलुः । पुं । ऊरुस्तम्भाधिकारे, आमवाते च औषधम् । पाठः—"चित्रकं पिप्पलीमूलं यमानीं कारवीन्तथा । विड़ङ्गान्यजमोदाञ्च जीरकं सुरदारु च । चव्यैले सैन्धवं रास्नां तथा गोक्षुरधान्यकं । त्रिफलां मुस्तकं व्योषं त्वग्‌शीरं यवाग्रजं । तालीशपत्रं पत्रञ्च श्लक्ष्णचूर्णानि कारयेत् । यावन्त्येतानि चूर्णानि तावन्मात्रन्तु गुग्गुलं ।

सम्मर्द्य सर्पिषा गाढ़ं स्निग्धे भाण्डे निधापयेत् । तती मात्रां प्रयुञ्जीत यथेष्टाहारवानपि । योगराजइति ख्यात:······॥” চিতামূল, পিপুলমূল, যমান, কৃষ্ণজীরা, বিড়ঙ্গ, বনযমান, জীরা, দেবদারু, চই, এলাইচ, সৈন্ধব, কুড়, রাস্না, গোক্ষুর, ধনিয়া, আমলা, হরীতকী, বহেড়া, মুতা, শুঁট, পিপুল, মরিচ, গুড়ত্বক্, বেণার মূল, যবক্ষার, তালীশপত্র, তেজপত্র প্রত্যেকে সমভাগ চূর্ণ সমষ্টি করিবে ; সেই চূর্ণসমষ্টির সমান শুদ্ধ মহিষাক্ষগুগ্গুল। গুগ্গুল ঘৃতের সহিত মাড়িয়া পরে তাহার সহিত চূর্ণ মিশাইবে। মাত্রা ॥০ তো.। रस.र.। भा.। [रहे । मधुनि । हे.च. । चारे । वै.निघ.।

योगवाही (हिन्) । पुं । सर्ज्जिकाचारे । पा-

योगशतकम् । क्ली । चिकित्सासंग्रहग्रन्थे लक्ष्मीदासकृते । [व.६ ।

योगसार: (क:) । पुं । नागरङ्गवृक्षे । मद.

योगा(गी)रङ्ग: । पुं । नागरङ्गवृक्षे । रा.नि.व.११ । [रा.नि.व.७ ।

योगिदण्ड: । पुं । वेत्रवंशे । বেউড় বাঁশ ।

योगी(गे)ष्टम् । क्ली । शीषधातौ । र.मा. । रा.नि.व.१३ ।

योगेश्वरी । स्त्री । वन्ध्याकर्कोटक्याम् । भा. । नागदमन्याम् । নাগদনা । वै.निघ. ।

योग्यम् । क्ली । पुष्पकासीसे । रा.नि.व.१३ । ऋद्धौ । वृद्धौ । अम. । चन्दने । वै.निघ. । स्त्री (ग्या) । ऋद्धौ । रा.नि.व.५ । वृद्धौ । गोरोचनायाम् । वै.निघ. । [नि. । अजयपाल: ।

योजनगन्धा (न्धिका) । स्त्री । कस्तूर्य्यां ।

योजनपर्णी । स्त्री । मञ्जिष्ठायाम् । प.मु. ।

योजनमल्लिका । स्त्री । आस्फोतायाम् । हापरमाली । भैष.ज्व.चि.पानीयवटी ।

योजनवल्लिका (ल्ली) । स्त्री । मञ्जिष्ठायां । रा.नि.व.६ । वा.सू.१५अ.प्रियङ्ग्वादिव. । “पद्मारङ्गौ योजनवल्ल्यनन्ता ।” सु.सू.३८अ.प्रियङ्ग्वादि. ।

योनल: । पुं । यावनाले । জনার । हे.च. ।

योनि: । पुं, स्त्री । स्त्रीचिह्ने । रा.नि.व.१८ ।

सा तु गर्भस्थाया: सप्तभिर्मासैर्भवति । सुखबोध: । स्वरूपं यथा —“शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा प्रकीर्त्तिता । तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ॥” उपस्थे । जले । कारणे । हे.च. । उत्पत्तिस्थाने । सा चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जभेदात् । च.शा.३अ. ।

योनिकन्द: । पुं । स्त्रीरोगविशेषे । निदानादिकं कन्दशब्दे द्रष्टव्यम् । [निर्व्यापदि । निदा. ।

योनिदोष: । पुं । उपदंशे । स्त्रीरोगे । यो-

योनिभ्रंश: । पुं । योनिवहिर्गमने । सु.नि. ८अ. ।

योनिरञ्जन: । पुं । योनिदोषभेदे । निदा ।

योनिरोग: (व्यापत्) । पुं, स्त्री । उदावर्त्तादिस्त्रीरोगे । निदानं—“प्रहृष्टलिङ्गं पुरुषं यात्यर्थमुपसेवते । रूक्षदुर्ब्बलबालायास्तस्या वायु: प्रकुप्यति । स दुष्टो योनिमासाद्य योनिरोगाय कल्पते । त्रयाणामपि दोषाणां यथास्वं लक्षणेन तु ॥ विंशतिर्व्यापदो योनेर्निर्द्दिष्टा रोगसंग्रहे । मिथ्याचारेण ता: स्त्रीणां प्रदुष्टेनार्त्तवेन च । जायन्ते वीजदोषाच्च दैवाच्च शृणु ता: पृथक् ॥ सर्व्वलिङ्गसमुत्थाना सर्व्वदोषप्रकोपजा । चतसृष्वपि चाद्यासु सर्व्वलिङ्गोच्छ्रयो भवेत् । पञ्चासाध्या भवन्तीह योनय: सर्व्वदोषजा: ॥” सु.उ.३८अ. । नामानि यथा—उदावर्त्ता वन्ध्या विप्लुता परिप्लुता वातला, वातदोषेण । लोहितक्षरा स्रंसिनी वामिनी पुत्रघ्नी पित्तला, पित्तदोषेण । अत्यानन्दा कर्णिनी अचरणा (चरणा वा) अतिचरणा श्लेष्मला, श्लेष्मदोषेण । षण्ढी अण्डिनी (वा फलिनी) महती सूचीमुखी त्रिदोषिणी, त्रिदोषदोषेण । मा.नि. । अतिचरणा उदा(वर्त्ता वृत्ता जातघ्नी अन्तर्मुखी सूचीमुखी शुष्काख्या वामिनी षण्ढसंज्ञा महायोनि: रक्तयोनि: पैत्तिकी श्लैष्मिकी लोहितक्षया परिप्लुता उपप्लुता विप्लुता कर्णिनी सान्निपातिकी चेति । वा.उ.३६अ. । आसां लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि । [पीड़ायां । निदा. ।

योनिशूलम् । क्ली । योनिरोगविशेषे । योनि- ।

योनिशूलघ्नी । स्त्री । शतपुष्पायां । শুলুফা । वै.निघ. । [सङ्कोचे । सु.नि.८अ. ।

योनिसंवरणम् । क्ली । गर्भजन्यरोगे, गर्भ-

यौन्यर्शः । क्ली । योनिकन्दरोगे । चिका. । See कन्दः ।

योषित्प्रिया । स्त्री । हरिद्रायाम् । भा. ।

यौगन्धरावम् । क्ली । यावनालक्रतान्ने । ज-নেরের ভাত। गुणाः—"यौगन्धरं गुरु घनं का-सश्वासप्रशमिक्रम् ।" वै.निघ. ।

यौतवम् । क्ली । परिमाणे । चम. ।

यौवनम् । क्ली । यौवनावस्थायाम् । तत्र पञ्च-दशाद्वर्षमुच्यते । "कैशोरमापञ्चदशात् यौवनन्तु त-तः परम् ।" रा.नि.व.१८ ।

यौवनः । पुं । यावनालि । जनार । प.मु. ।

यौवनकण्टकः । पुं, क्ली । मुखव्रणरोगे । বয়সকোঁড়া । श.मा. ।

यौवनपिड़का । स्त्री युवकाले मुखजातपि-ड़कायाम् । বয়সকোঁড়া । लक्षणं—"शाल्मलीक-ण्टकप्रख्याः कफमारुतशोणितैः । जायन्ते पिड़का यूनां वक्त्रे या मुखदूषिकाः ॥" सु.नि.१३श. ।

र

रकः । पुं । सूर्य्यकान्तमणौ । वै.निघ. ।

रकणः । पुं कोविदारवृक्षे । কুলেখাড়ার গাছ । रा.नि.व.४ ।

रकसा । स्त्री । क्षुद्ररोगविशेषे, कुष्ठरोगभेदे वा । लक्षणं—"कण्डून्विता या पिड़का शरीरे सं-स्रावहीना रकसोच्यते सा ।" सु.नि.५श. ।

रक्त(क)म् । क्ली । हिङ्गुले । रा.नि.व.१३ । भा म.१म.ज्व.चि.त्रिपुरभैरवरसे । "शुमचिरक्त-कमार्द्रकमर्दितम् ।" ताम्रे । रा.नि.व १३ । वक्र-धातौ । र.मा. । रक्तचन्दनभेदे । रक्त काठ । सिन्दूरे । प.मु. । कुङ्कुमे । पद्मकाष्ठे । रा.नि.व. ११ । पद्मे । रा.नि.व.१० । प्राचीनामलके । श. । रक्तखदिरे । कौन्ते । रक्तपद्मे । वै.निघ. । शरीरस्थसप्तधात्वन्यतमद्वितीयधातौ । रक्त । हिं लहू, खुन । रा.नि.व.१८ । रक्तस्वरूपमाह— "रसस्तु हृदयं याति समानमारुतेरितः । रञ्जितः पाचितस्तत्र पित्तेनायाति रक्तताम् । रक्तं सर्व्व-शरीरस्थं जीवस्याधारमुत्तमम् । स्निग्धं गुरु च-लं स्वादु विदग्धं पित्तवद्भवेत् ॥" शार्ङ्ग.पू.६श. । रक्तस्थानम् यथा—यकृत् प्लीहा च रक्तस्य मुख्य-स्थानम् । तच्च कर्म्म च जीवनम् । भा. । तत्स्थ-मेव शोणितस्थानानामनुग्रहं करोति । सु.सू.२१ श. । तत्र च विस्रताद्रवतारागचलनविलया इति भूम्यादिपञ्चभूतगुणाः सन्ति । शुद्धरक्तलक्षणं – "मधुरं लवणं किञ्चिदशीतोष्णमसंहतं । पद्मेन्द्रगो-पहेमाविशशलोहितलोहितं । लोहितप्रभवः शुद्धं तनोस्तेनैव च स्थितिः ॥" वा.सू.२७श. । तस्मिंश्च दुष्टे सति शोषरक्तमण्डलादिबहवो रोगा जाय-न्ते । वृद्धे च रक्ताङ्गनेत्रताशिरापूर्णतादयो जाय-न्ते । क्षीणे च तस्मिन् मूर्च्छादयो भवन्ति । रक्तं वातदूषितं फेनिलारुणपरुषचलतनु, पित्तदूषिते पीतहरितनीलश्यावास्वादुविस्रोष्णं, कफदूषिते शी-तलबहलस्निग्धादि च भवति । द्विदोषदुष्टं संसृष्टं त्रिदोषदुष्टञ्च पूतिगन्धं भवति । भा. । पुं । लोध्र-वृक्षे । प.मु. । कुसुम्भवृक्षे । हिज्जलवृक्षे । रा.नि. व.७.८ । रक्तशिग्रौ । रक्तपुनर्नवायाम् । कम्पील-वृक्षे । रक्तैरण्डे । रक्तरोहीतके । मत्स्यविशेषे । वै. निघ. । सविषमण्डूकभेदे । महाविषवृश्चिकभेदे । मन्दविषवृश्चिकभेदे । सु.कल्प.८श. । त्रि । रक्तव-र्णे । रञ्जिते ।

रक्तकः । पुं । लोहितवर्णे । मे. । बन्धुजीववृक्षे । ডাকুনি গাছ । प.मु. । रक्तझिण्ट्यां । मे. । र-क्तशिग्रुवृक्षे । কাল সজিনা গাছ । प.मु. । रक्तै-रण्डवृक्षे । वै.निघ.२भ.जिह्वक.स्व.चि. । पत्राङ्ग-चन्दनवृक्षे । वकम् । रा.नि.व.१२ ।

रक्तकङ्गुः । पुं । धूनके । वै.निघ. ।

रक्तकण्टा । स्त्री । विकङ्कतवृक्षे । বঁইচি গা-ছ । वै.निघ. । [कना । वै.निघ. ।

रक्तकदली । स्त्री । लोहितकदल्याम् । চাঁপা

रक्तकन्दः (कः) । पुं । राजपलाण्डौ । বড় পেয়াজ । रक्तपिण्डालुके । লাল আলু । रा.नि. व.७ । प्रवाले । है.च. ।

रक्तकन्दलः । पुं । रक्तप्रवालद्रुमे । चिका. ।

रक्तकमलम् । क्ली। रक्तवर्णपद्मे। रा.नि.व.१०।

रक्तकम्बलम् । क्ली। कह्लारे। রক্তকম্বল।

रक्तकरवीरकः । पुं। रक्तपुष्पकरवीरवृक्षे। লালকরবী গাছ। मं रक्तकरवीर। कं केंगण-लिगे। हिं लालकनेल। गुणाः—कटुः तीक्ष्णः शोधकः त्वग्दोषव्रणकण्डूकुष्ठघ्नः विषघ्नश्च। रा.नि.व.१०।

रक्तका । स्त्री। पानीयामलके। वै.निघ.।

रक्तकाञ्चनः । पुं। (Bauhinia variagata or B. Purpurea.) Mountain ebony. काञ्चनारवृक्षे। রক্তকাঞ্চন। हिं कचनार। प.मु.। [व.५।

रक्तकाण्डा । स्त्री। रक्तपुनर्नवायाम्। रा.नि.

रक्तकाष्ठम् । क्ली। पत्राङ्गचन्दने। বকম কাষ্ঠ। रा.नि.व.१२।

रक्तकुमुदम् । क्ली। रक्तकैरवे। রক্তহেলা ফুল, লালশুন্দি। जटा.।

रक्तकुरण्टकः । पुं। रक्तझिण्ट्याम्। রক্তঝাঁটী। गुणाः—तिक्तो वर्ण्य उष्णः कटुः शोथघ्नः ज्वरघ्नः, तथा वातरोगं कफं रक्तरोगं पित्तम् आध्मानं शूलं श्वासं कासञ्च नाशयेत्। वै.निघ.।

रक्तकुसुमः । पुं। पारिभद्रवृक्षे। পালতে মান্দার গাছ। रा.नि.व.८। धन्वनवृक्षे। ধামনা গাছ। रा.नि.व.९। रक्तकाञ्चने। स्त्री (मा)। दाड़िम्बवृक्षे। वै.निघ.। [वै.निघ.।

रक्तकृमिजा । स्त्री। लाक्षायाम्। লাহা।

रक्तकेशरः । पुं। पारिभद्रवृक्षे। रा.नि.व.८। पुन्नागवृक्षे। र.मा.।

रक्तकैरवम् । क्ली। रक्तकुमुदे। जटा.।

रक्तकोकनदम् । क्ली। रक्तोत्पले। রক্তপদ্ম। जटा.। [नकुल.१०अ.।

रक्तकोपः । पुं। शोणितप्रकोपे। रक्तविकारे।

रक्तखदिरः । पुं। रक्तवर्णखदिरवृक्षे। রক্তবর্ণ খদির গাছ। गुणाः—कटूष्णः तिक्तः कषायः गुरुः आमवातघ्नः वातरक्तहरः व्रणभूतज्वरघ्नश्च। रा.नि.व.८।

रक्तखाण्डवः । पुं। ईषत्खर्ज्जूरीवृक्षे। वै.निघ.।

रक्तगतज्वरः । पुं। रक्तधातुगतज्वरे। लक्षणं यथा—"रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ। प्रलापः पिड़का तृष्णा रक्तप्राप्ते ज्वरे नृणाम्॥" मा.नि.।

रक्तगन्ध(न्धि)कम् । क्ली। बोलनामगन्धद्रव्ये। বোল। খুনখারাপী। रा.नि.व.६।

रक्तगन्धा । स्त्री। अश्वगन्धायाम्। वै.निघ.।

रक्तगर्भा । स्त्री। नखरञ्जनीवृक्षे। মেহেদী গাছ। वै.निघ.।

रक्तगुल्मः । पुं। आर्त्तवजन्यगुल्मे। निदानं—"नवप्रसूताहितभोजना या या चामगर्भं विसृजेदृतौ वा। वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहं। पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणञ्चाप्यपरं निबोध। यः स्पन्दते पिण्डित एव नाङ्गैः चिरात्सशूलः समगर्भलिङ्गः। स रौधिरः स्त्रीभव एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः॥" भा.।

रक्तगैरिकम् । क्ली। स्वर्णगैरिके। वै.निघ.।

रक्तग्रन्थिः । पुं। रक्तलज्जालौ। লাল লজ্জাবতী। रक्तजन्यग्रन्थिरोगे। लक्षणं—"स्रवत्यजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकं स्यात्।" सु.नि.११अ.।

रक्तग्रीवः । पुं। कपोते। পায়রা। वै.निघ.।

रक्तघ्नः । पुं। रोहितकवृक्षे। রোড়া, রয়না গাছ। जटा.। स्त्री (घ्नी)। ग्रन्थिदूर्व्वायां। গাঁটিয়া দূর্ব্বা। श.च.।

रक्तचन्दनम् । क्ली। (Pterocarpus santalinus.) Red sandal wood. स्वनामख्यातसुगन्धिकाष्ठे। রক্তচন্দন। दा. हिं लालचन्दन। तें एर्रगन्धपुचेक्क। ता. सेन्शाण्डनम्। फा. सण्डले सुरख। आ. सण्डले अहमर्। तच्चिधा—"आक्राणमुत्तमं नूनं रक्तञ्चेदञ्च मध्यमम्। आरक्तमधमं विद्धि रक्तचन्दनकं त्रिधा॥" भैष.। गुणाः—शीतलं तिक्तं कफपित्तकासज्वरभ्रान्तिक्रमिवमितृष्णाहरम्। रा.नि.व.१२। एतच्चन्दनं कषायपानयोः प्रयोज्यं। तथा कषायलेपयोश्च ग्राह्यम्। वा.सू.१५अ.गुडूच्यादिः। "धानकारक्तचन्दनम्।"

रक्तचित्रकः । पुं। (Plumbago rosea

or Coccinea. Syn. P. Rosea.) रक्तवर्ण-दलपत्रचित्रकक्षुपे । রক্তচিতা । मं रक्तचित्रक । कं केंपिनचित्रमूल । तें एर्रचित्र । ता. शिवप्पुचित्तिर । गुणाः – स्थौल्यकरः वश्यः कुष्ठघ्नः रसनियामकः लोहवेधकः रसायनः चित्रकान्तराद्गुणाढ्यश्च । रा.नि.व.६ । [শ্বেতো । वै.निघ. ।

रक्तचिल्लिका । स्त्री । मधुरवास्तुके । মিঠা

रक्तचूर्ण(क)म् । क्ली । सिन्दूरे । लोहितचूर्णमात्रे । पुं । कम्पिल्लके । কমলাগুড়ি । रा.नि.व. १२ ।

रक्तजक्रिमिः । पुं । रक्तजन्यक्रिमिरोगे । लक्षणं —"रक्तवाहिशिरास्थानरक्तजा जन्तवोऽणवः । अपादा वृत्तताम्राश्च सौक्ष्म्यात्केचिददर्शनाः । केशादा रोमविध्वंसा रोमद्वीपा उडुम्बराः । षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः ॥" मा.नि. ।

रक्तजन्तुकः । पुं । भूनागे । শীষ । रा.नि.व. १९ । लोहितप्राणिमात्रे ।

रक्तजिह्वः । पुं । सिंहे । श.मा. ।

रक्तझावुकः । पुं । (Tamarix dioica.) स्वनामख्याततरुे । লাল ঝাউ । हिं लालझाउ । श.चि. । [See रक्तकुरण्टकः ।

रक्तझिण्टी । स्त्री । रक्तपुष्पझिण्टीक्षुपे । अम. ।

रक्ततरम् । क्ली । स्वर्णगैरिके । वै.निघ. ।

रक्ततुण्डः (कः) । पुं । सारसपक्षिणि । शुकपक्षिणि । रा.नि.व.१९ । (कः) भूनागे । रा.नि. व.१३ । [(णा) । गोमूत्रिकातृणे । रा.नि.व.८ ।

रक्ततृणम् । क्ली । तृणविशेषे । वै.निघ. । स्त्री

रक्तत्रिवृत् । स्त्री । रक्तमूलत्रिवृति । লাল তেউড়ী । मं लोहिड़ी तिधर । कं केंपिनेय तिगड़े । गुणाः—तिक्ता कटूष्णा रोचनी ग्रहणी मलविष्टम्भहरी च । रा.नि.व.६ ।

रक्तदला । स्त्री । चिविल्लिकायां । नलिकायां । रा.नि.व.५ । नलिकानामगन्धद्रव्ये । रा.नि.व.१२ ।

रक्तदृक् । पुं, स्त्री । कपोते । জাগপায়রা ।

रक्तद्रुमः । पुं । रक्तबीजासनवृक्षे । পিয়াল গাছ । रा.नि.व.९ ।

रक्तधरा । स्त्री । मांसाभ्यन्तरे द्वितीयायां कलायाम् । "मांसस्याभ्यन्तरतस्तस्यां शोणितं विशेषतश्च शिरासु यकृत्प्लीह्नोश्च भवति ।" सु.शा.४अ. ।

रक्तधातुः । पुं । गैरिकधातौ । গিরিমাটী । प.मु. । ताम्रे । रा.नि.व.१३ । रक्तवर्णधातुमात्रे ।

रक्तनाड़ी । स्त्री । दन्तमूलगतरक्तजनाड़ीरोगविशेषे । मा.नि. ।

रक्तनालः । पुं । जीवशाकक्षुपे । रा.नि.व.७ । जीवन्त्याम् । क्ली । कह्लारे । वै.निघ. ।

रक्तनासिकः । पुं । पेचके । श.र. । [व.९ ।

रक्तनिर्यासः । पुं । रक्तबीजासनवृक्षे । रा.नि.

रक्तनीलः । पुं । महाविषवृश्चिकविशेषे । सु. कल्प.८अ. । [निघ. ।

रक्तनेत्रः । पुं । सारसपक्षिणि । कपोते । वै.

रक्तनेत्रत्वम् । क्ली । रक्तविकारजनेत्ररोगे । निदा. ।

रक्तपत्रः । पुं । फौञ्जाली । रा.नि.व.७ ।

रक्तपत्रा (त्रिका) । स्त्री । रक्तपुनर्नवायां । वै.निघ. । नाकुल्यां । रा.नि.व.७ । [जटा. ।

रक्तपदी । स्त्री । क्षुद्रवृक्षविशेषे । লজ্জাবতী ।

रक्तपद्मः । पुं, क्ली । रक्तकमले । तत्पुष्पगुणाः —पद्मं कषायमधुरं शीतपित्तकफास्रजित् । राज.५प. ।

रक्तप(पा)दी । स्त्री । लज्जालुकायां । हंसपद्यपरनामलज्जालुकायां । रा.नि.व.५ ।

रक्तपर्णः । पुं । रक्तपुनर्नवायाम् । वै.निघ. ।

रक्तपल्लवः (कः) । पुं । अशोकवृक्षे । रा. नि.व.१० ।

रक्तपा । स्त्री । जलौकायाम् । জোঁক । मे. ।

रक्तपाका (की) । स्त्री । लताबृहतीक्षुपे । र.मा. ।

रक्तपात्री । स्त्री । जलौकायाम् । श.र. ।

रक्तपादः । पुं । शुकपक्षिणि । हे.च. । हंसे । वै.निघ. । [व.१९ । मत्कुणे । वै.निघ. ।

रक्तपायिनी । स्त्री । जलौकायाम् । रा.नि.

रक्तपायी (इन्) । पुं । मत्कुणे । ছারপোকা । व्याक. ।

रक्तपारदम् । क्ली, पुं । हिङ्गुले । त्रिका. । जटा. । [वै.निघ. ।

रक्तपाषाणः । पुं, क्ली । गिरिमृत्तिकायाम् ।

रक्तपिण्डम् । क्ली । जपापुष्पवृक्षे त्रिका. । रक्तालौ । वै.निघ. । चीनदेशीयगुलावपुष्पे । श.चि. ।

रक्तपिण्डकः । पुं । रक्तवर्णपिण्डालौ । रा.नि.व.७ । जपावृक्षे । त्रिका. ।

रक्तपिण्डालुः । पुं । रक्तवर्णपिण्डालौ । লাল চুবড়ি আলু । मं रातालु । कं केंपिनहेड़ल । गुणाः—शीतः मधुरः अस्रः श्रमघ्नः दाहपित्तघ्नः वृष्यः गुरुः बलपुष्टिकरश्च । रा.नि.व.७ ।

रक्तपित्तम् । क्ली । तन्नामकरोगभेदे । निदानं —“घर्म्मव्यायामशोकाध्वव्यवायैरतिसेवितैः । तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च । पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम् । ततः प्रवर्त्तते रक्तमूर्द्ध्वञ्चाधो द्विधापि वा । ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः । कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते ॥” इति निदानम् । “सदनं शीतकामित्वं कण्ठधूमायनं वमिः । लोहगन्धश्च निःश्वासो भवत्यस्मिन् भविष्यति ॥” पूर्व्वरूपम् । वातिकादिलक्षणं —“सान्द्रं सपाण्डु सस्नेहं पिच्छिलञ्च कफान्वितं । श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम् । रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभं । मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम् । संसृष्टलिङ्गं संसर्गात् त्रिलिङ्गं सान्निपातिकम् । ऊर्द्ध्वगं कफसंसृष्टमधोगं पवनानुगम् । द्विमार्गं कफवाताभ्यामुभाभ्यामनुवर्त्तते । ऊर्द्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतं । एकमार्गं बलवतो नातिवेगनवोत्थितं । रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् । एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते । यत्त्रिदोषमसाध्यं स्यात् मन्दाग्नेरतिवेगवत् ॥” मा.नि. । अत्र प्रथममपतर्पणम् ऊर्द्ध्वगे रेचनं अधोगे च वमनं शस्तम् । पुं । हारीतपक्षिणि । भा. ।

रक्तपित्तहा । स्त्री । ग्रन्थिदूर्व्वायां । গেঁটে দূর্ব্বা । श.च. ।

रक्तपित्तान्तकरसः । पुं । रक्तपित्ताधिकारे रसः । पाठः—“मृताभ्रं मृततीक्ष्णञ्च माक्षिकं रसतालकं । गन्धकञ्च भवेत्तुल्यं यष्टिद्राक्षामृताद्रवैः । दिनैकं मर्द्दयेत् खल्ले सिताक्षौद्रसमन्वितं ॥” मात्रा माषमात्रं । र.सा.सं. । [निदा. ।

रक्तपीटिकादर्शनम् । क्ली । रक्तजविकारे ।

रक्तपीतफला । स्त्री । मधुरविम्बिकायाम् । वै.निघ. ।

रक्तपुनर्नवा । स्त्री । स्वनामख्यातपत्रशाकक्षुपे । গাদাপুণ্যা । मं रक्तघेंटुलि । कं केंपिन वेल्लड़ाकलु । गुणाः—तिक्ता सारणी शोथघ्नी रक्तप्रदरघ्नी पाण्डुपित्तघ्नी च । रा.नि.व.५ ।

रक्तपुष्पः । पुं । रक्तवकवृक्षे । লাল বকফুলের গাছ । र.मा । रक्तकरवीरवृक्षे । जटा. । रोहितकवृक्षे । श.मा. । दाड़िमवृक्षे । प.मु. । रक्तकाञ्चनवृक्षे । बन्धूकवृक्षे । पुन्नागवृक्षे । रा.नि.व.१० । पर्पटके । शाल्मलीवृक्षे । पलाशवृक्षे । पारिभद्रवृक्षे । जवावृक्षे । रक्तार्कें । वै.निघ. ।

रक्तपुष्पकः । पुं । पलाशवृक्षे । रोहितकवृक्षे । जटा. । पर्पटके । रा.नि.व.५ । शाल्मलीवृक्षे । रा.नि.व.८ ।

रक्तपुष्पा । स्त्री । शाल्मलीवृक्षे । जटा. । कनककदलीवृक्षे । চাঁপাকলা গাছ । प.मु. । नागदमन्याम् । নাগদনা । रा.नि.व.५ ।

रक्तपुष्पिका । स्त्री । भूपाटल्यां । रक्तपुनर्नवायां । रा.नि.व.५ । लज्जालुकायाम् । श.च. । पाटलीवृक्षे । পারুল গাছ । रा.नि.व.१० । मञ्जिष्ठायाम् । लाङ्गलिकायाम् । रक्तशङ्खपुष्प्याम् । शाल्मलीवृक्षे । वै.निघ. ।

रक्तपुष्पी । स्त्री । धातकीवृक्षे । र.मा. । पाटलीवृक्षे । जटा. । जवापुष्पवृक्षे । रा.नि.व.१० । आवर्त्तकीलतायां । रा.नि.व.३ । नागदमन्यां । रक्तार्कें । रक्तपुनर्नवायाम् । वै.निघ. । कोङ्कणदेशीयकरुणीपुष्पवृक्षे । उष्ट्रकाण्डीपुष्पवृक्षे । रा.नि.व.१० । [नि.व.६ ।

रक्तपूरकम् । क्ली । वृक्षाम्ले । তেঁতুল । रा.

रक्तपूर्व्वकः । पुं । रक्तापामार्गे । वै.निघ. ।

रक्तपोस्तः । पुं । (Papaver Rhoeas.) Red poppy. रक्तखस्खसवृक्षे । লাল পোস্ত । हिं लालपुस्ता । तें एर्रगसगसलाचेट्टु । ता. शिगप्पु पोस्तकाचेड़ि । कोषान्तरम् ।

रक्तप्रतिश्याय: । पुं । दुष्टरक्तजप्रतिश्यायरोगे । लक्षणम् —“रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते । ताम्राक्षश्च भवेज्जन्तुः उरोघातप्रपीड़ितः । दुर्गन्धोच्छ्वासवदनो गन्धानपि न वेत्ति सः ॥” भा. नि. ।

रक्तप्रवृत्ति: । पुं । पित्तज्वरोगे । भा. ।

रक्तप्रसव: । पुं । रक्तकरवीरे । मुचुकुन्दवृक्षे । मूच्कुन्द गाछ । रक्तम्लाने । ब्रक्त झाँटी । रा.नि.व.१० ।

रक्तफल: । पुं । वटवृक्षे । रा.नि.व.११ । शाल्मलीवृक्षे । रा.नि.व.८ । रक्तापामार्गे । स्त्री (ला)। बिम्बीलतायाम् । तेलाकुचा । प.मु. । स्वर्णवल्ल्याम् । शोनालू । रा.नि.व.६ । वार्त्ताकुवृक्षे । वटवृक्षे । वै.निघ. । [वै.च. ।

रक्तफेनज: । पुं । फुस्फुसे, वामपार्श्वस्थक्लोम्नि ।

रक्तभ्रु: । पुं । महावृश्चिकविशेषे । सु.कल्प. ८अ. । [रै । हारा. । त्रिका. ।

रक्तबाल(लु)कम् (का) । क्ली,स्त्री । सिन्दू-

रक्तबिन्दु: । पुं । रक्तापामार्गे । रा.नि.व.४ ।

रक्तबिन्दुच्छदा । स्त्री । पुत्रदाख्याम् । शुक्लकण्टकार्य्याम् । वै.निघ. ।

रक्तबीज: । पुं । दाड़िमवृक्षे । रा.नि.व.११ । रीठाकरञ्जे । रिठा । रक्तबीजासनवृक्षे । आमन गाछ । रक्तकुलत्थे । वै.निघ. । [रा.नि.व.८ ।

रक्तबीजका । स्त्री । तरटीवृक्षे । तरुई गाछ ।

रक्तभस्म । क्ली । रससिन्दूरादिकरणे । एतत्साधनप्रणाली र.सा.संग्रहे मृग्या ।

रक्तमञ्जर: । पुं । वेतसलतायाम् । त्रिका. । निम्बवृक्षे । वै.निघ. ।

रक्तमञ्जरी । स्त्री । रक्तकरवीरे । वै.निघ. ।

रक्तमण्डल: । पुं । मण्डलिसर्पविशेषे । सु.कल्प.४अ. । [लाल लज्जावती । वै.निघ. ।

रक्तमण्डलिका । स्त्री । रक्तलज्जालुकायाम् ।

रक्तमण्डूक: । पुं । रक्तवर्णमण्डूकजातीयकीटे । सु.कल्प.८अ. ।

रक्तमत्स्य: । पुं । रक्तवर्णमत्स्यविशेषे । लाल माछ । तद्गुणा:—“यो रक्ताक्षो नातिदीर्घो न चाल्पो नातिस्थूलो रक्तमत्स्यः स चोक्तः । शीतो वृष्यः पुष्टिकृद्दीपनोऽसौ नाम्नं धत्ते किञ्च दोषत्रयस्य ॥” रा.नि.व.१७ ।

रक्तमरिचम् । क्ली । मरिचभेदे । लङ्कामरिच । हिं लालमरिच । वै.निघ. ।

रक्तमातृका । स्त्री । रसधातौ । वै.निघ. ।

रक्तमिलातक: । पुं । रक्ताम्लान-पुष्पवृक्षे । रक्तझाँटी । रा.नि.व.१० । [वै.निघ. ।

रक्तमुख: । पुं । रोहितमत्स्ये । षष्टिकधान्ये ।

रक्तमूत्रता । स्त्री । रक्तप्रस्रावरोगे । निदा. ।

रक्तमूर्द्धा (न्) । पुं । सारसपक्षिणि । वै.निघ. ।

रक्तमूलक: । पुं । देवसर्षपक्षुपे । रा.नि.व.९ ।

रक्तमूला (ली) । स्त्री । लज्जालुकालतायां । रा नि.व.५ ।

रक्तमृत् । स्त्री । गैरिके । गिरिमाटी । वै.निघ. ।

रक्तमेह: । पुं । रक्तस्राविप्रमेहरोगे । लक्षणं —“विस्रमुष्णं सलवणं रक्ताभं रक्तमेहिनः ।” भा. ।

रक्तमोक्षणम् । क्ली । जलौकावचारणे । जोँक धरान । शोणितबाहुल्यात् बहुविधरोगजनकत्वाच्च स्रावणस्यातीव प्रयोजनं भवति प्रयोजने च सञ्जाते जलौकालाबुकाभिरुपायैः शिरामोक्षैश्च तत्स्रावणं क्रियते । परन्तु कृशातिव्यवायिक्लीवादीनां न शिरामोक्षः कार्य्यः, जलौकावचारणन्तु शस्तम् । विषदुष्टं वातादिदुष्टं वा शीघ्रञ्जलौकालाबूभिः शस्तम् । भा. । [मञ्जिष्ठायां । प.मु. ।

रक्तयष्टि: (ष्टी) । स्त्री । लज्जालुकायां । म-

रक्तयष्टिका । स्त्री । मञ्जिष्ठायाम् । रा.नि.व. ६ । [जनार । रा.नि.व.१६ ।

रक्तयावनाल: । पुं । तुवरयावनाले । लाल

रक्तयोनि: । पुं । योनिव्यापद्विशेषे । लक्षणम् —“रक्तयोन्याख्यासृगतिस्रुते ।” वा.उ.३३अ. ।

रक्तरङ्गा । स्त्री । मेन्दीतिख्याते वृक्षे । वै.निघ. ।

रक्तरज: । क्ली । सिन्दूरे । वै.निघ. ।

रक्तरस: । पुं । रक्तासनवृक्षे । वै.निघ. ।

रक्तरसा । स्त्री । रास्नायाम् । वै.निघ. ।

रक्तरसोनः । पुं । लोहितरसोने । लाल र-शुन । मं लोहिवावीलुरसण । कं केंपिनवेल्लि । गुणाः—मधुरः कटुः बलकरः । पत्रं तिक्तं । अ-स्थि सलवणञ्च । रा.नि.व.७ । पत्रं मधुरं चारं नालो मधुरपिच्छलः कषायः इति । मद.व.७ ।

रक्तराजालुकम् । क्ली । रक्तवर्णालुकभेदे । एतच्च किञ्चिदुष्णम् आग्नेयं वातकफहरञ्च । द्रव्य-गुणः । [व्यकीटविशेषे । सु.कल्प.८अ. ।

रक्तराजिः (जी) । स्त्री । सर्षपिकानामवाय-

रक्तरेणुः । पुं । सिन्दूरे । भा. । पलाशकलि कायां । मे. । पुन्नागवृत्ते । रा.नि.व.१० ।

रक्तरेणुका । स्त्री । पलाशकलिकायां । पला-शकुँड़ि । श.मा. । [नि.व.११ ।

रक्तरैवतकः । पुं । द्वीपान्तरखर्ज्जूरीवृत्ते । रा.

रक्तरोहितकः । पुं । (Rheum wightii.) রক্তরোড়া । हिं रक्तरोहिड़ा ।

रक्तलशुनः । पुं । रक्तरसोने । লাল্ রশুন । रा.नि.व.७ । [व्योलतायां । रा.नि.व.३ ।

रक्तला । स्त्री । काकादन्यां । কুঁচ গাছ । मू

रक्तलोचनः । पुं । कपोते । है.च. । भा. ।

रक्तवटी । स्त्री । मसूरिकायां । वसन्त । चिका.।

रक्तवरटी । स्त्री । मसूरिकायाम् । वसन्त । जटा. ।

रक्तवर्गः । पुं । दाड़िमकिंशुकलाचाहरिद्रा-दारुहरिद्राकुसुम्भपुष्पमञ्जिष्ठाबन्धूकेषु । "दाड़िमं किंशुकं लाचा बन्धूकञ्च निशाद्वयम् । कुसुम्भपुष्पं मञ्जिष्ठा ह्येते रक्तवर्गकः ॥" रा.नि.व.२२ ।

रक्तवर्णः । पुं । इन्द्रगोपकीटे । লাল আষা-ঢ়ে পোকা । रा.नि.व.१९ । गोमेदमणौ । प्रवा-ले । कम्पिल्लके । वै.निघ. ।

रक्तवर्त्तकः । पुं । विष्किरपचिविशेषे । লাল বটের । च.सू.२७अ. ।

रक्तवर्त्मा । पुं । कुक्कुटे । वै.निघ. ।

रक्तवर्द्धनः । पुं । वार्त्ताकी । श.च. । [व.५।

रक्तवर्षाभूः । स्त्री । रक्तपुनर्नवायां । रा.नि.

रक्तवल्ली । स्त्री । पीतपुष्पदण्डोत्पले । र.मा. । मञ्जिष्ठायां । नलुकायाम् । वै.निघ. ।

रक्तवातः । पुं । वातरक्तनामरोगविशेषे । यो रोगः रक्तवस्त्रप्रवालहरणादुत्पद्यते । निष्कृतिश्च य-स्मात् पद्मरागसहितसवस्त्रमहिषीदानाद्भवति। "र-क्तवस्त्रप्रवालानां हारी स्याद्रक्तवातवान् । सवस्त्रां महिषीं दद्यात् पद्मरागसमन्विताम् ॥" कर्म्मवि-पाकः । नारिकेलमूलं छागीदुग्धेन पीतं वातरक्तं नश्यति । पुराणम् । [रा.नि.व.१० ।

रक्तवारिजम् । क्ली । कोकनदे । রক্তপদ্ম ।

रक्तवास्तुकः । पुं । शोणवास्तुकशाके । লাল বেতো শাক । वै.निघ. ।

रक्तविकारः । पुं । रक्तजरोगे । निदा. ।

रक्तविद्रधिः । पुं । रक्तजन्यविद्रधौ । लक्षणं —"कृष्णस्फोटावृतः श्यावः तीव्रदाहरुजाकरः । पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ॥" मा.नि. ।

रक्तवृन्तकः । पुं । पुनर्नवायाम् । वै.निघ. ।

रक्तवृन्ता । स्त्री । शेफालिकावृत्ते । শিউলি গাছ । प.मु. । [ड़ि । वै.निघ. ।

रक्तशमनम् । क्ली । कम्पिल्लके । কমলাগুঁ-

रक्तशालिः । पुं, स्त्री । (Oriza sativa.) रक्तधान्ये । দাদখানি মিহি চাউল । प.मु. । तै एरनिवर्नंगलधान्यमु । गुणाः—सुमधुरः लघुः स्निग्धः बलकरः रुचिकृद्दीपनः सुखजाड्यहरः प-थ्यश्च । सर्व्वरोगघ्नः वृष्यः पित्तदाहवातरक्तघ्नश्च । रा.नि.व.१६ । त्रिदोषघ्नः चक्षुष्यः शुक्रलः मूत्रलः तृष्णाघ्नः बल्यः स्वर्य्यः हृद्यश्च । राज. । त्रिदोषघ्नी चक्षुष्या मूत्ररोगहा । चचि.१५अ. । वा.सू.६अ. । "रक्तो महान् सकलमः ।" च.द.ज्व.चि. । "पेयां वा रक्तशालीनां पार्श्ववस्तिशिरोरुजि ।" तन्मण्ड-गुणाः—रक्तशाल्युद्भवं मण्डं मधुरं ग्राहि शीतलं । प्रमेहानश्मरीं हन्ति वातलं पित्तहृद्धरम् ॥" चचि. १२अ. । [न्दे । রক্তপদ্মের গেঁড় । वै.निघ. ।

रक्तशालुकः (का) । पुं, स्त्री । रक्तकमलक-

रक्तशाल्मलिः । पुं । रक्तपुष्पशाल्मलिवृत्ते । রক্তশিমুল । वै.निघ. ।

रक्तशासनम् । क्ली । सिन्दूरे । हारा. ।

रक्तशिग्रुः । पुं । रक्तशोभाञ्जनवृक्षे । लाल स-जिना गाछ । मं रक्तसेगुया । कं केंपिनेयनुग्गि । गुणाः — महावीर्य्यः मधुरः रसायनः शोफाध्मान-वातघ्नः पित्तश्लेष्मघ्नश्च । रा.नि.व.७ । [वै.निघ. ।

रक्तशिम्बी । स्त्री । शिम्बीभेदे । लाल शिम् ।

रक्तशीर्षकः । पुं । लवणखोच्यां । प.मु. । सारसपक्षिणि । च.मू.२७श. ।

रक्तशृङ्गिकम् । क्ली । विषे । रा.नि.व.६ ।

रक्तशेखरः । पुं । पुन्नागवृक्षे । र.मा. ।

रक्तश्रीखण्डकम् । क्ली । रक्तचन्दने । वै. निघ.२भ.वा.व्या.चि.महाराजादौ ।

रक्तश्वेतः । पुं । तदर्थमहाविषवृश्चिकभेदे । सु. कल्प.८श. ।

रक्तष्ठीविसन्निपातः । पुं । स्वनामख्यात-सन्निपातविशेषे । तस्य लक्षणं — "रक्तष्ठीवी ज्वर-वमितृष्णामोहशूलातिसारहिक्काध्मानभ्रमणदवथुश्वा-ससंज्ञाप्रणाशः । श्यामा रक्ताधिकतररसा मण्ड-लीत्यानरूपा रक्तष्ठीवी निगदित इह प्राणहन्ता प्र-सिद्धः ॥" निदा. । [चिका. ।

रक्तसंज्ञ(सङ्कोचपिशुन)म् । क्ली । कुङ्कुमे ।

रक्तसंवरणम् । क्ली । कृष्णाञ्जने । वै.निघ. ।

रक्तसन्दंशिका । स्त्री । जलौकायाम् । जोँ-क । रा.नि.व.१९ ।

रक्तसन्ध्यकम् । क्ली । रक्तकह्लारे । रक्तकम-ल । चम. । रक्तोत्पले । वै.निघ. ।

रक्तसरोरुहम् । क्ली । रक्तपद्मे । चम. ।

रक्तसर्षपः । पुं । (Brassica nigra) रक्त-वर्णसर्षपे । राई वा रक्तसरिषा । हिं लालिरा-इ, माकड़ाराइ । मं महुरी । कं सासिराइ । तें आवलो । ता. कड़घो । गुणाः—कटुः तिक्तः उ-ष्णः वातघ्नः शोफशूलघ्नः दाहपित्तकरः कफगुल्म-कृमिव्रणघ्नश्च । रा.नि.व.१६ ।

रक्तसहा (ह्वः) । स्त्री, पुं । रक्ताम्लानपुष्पवृ-क्षे । रक्तपुष्पझाँटी गाछ । रा.नि.व.१० ।

रक्तसारम् । क्ली । रक्तचन्दने । प.मु. । रा. नि.व.१२ । रस.र.च.द.मेह,चि,न्यग्रोधादिपञ्चके । पतङ्गचन्दने । वकमकाष्ठे । प.मु. । पुं । अम्लवे-तसे । रा.नि.व.६ । रक्तखदिरवृक्षे । रा.नि.व.८। सु.चि.९श. । रक्तबीजासनवृक्षे । रा.नि.व.९ । र-क्तशिंशपायाम् । वाराहीकन्दे । वै.निघ. ।

रक्तसूः । स्त्री । शरीरस्थरसधातौ । रसधातु । रा.नि.व.१८ । [जटा. ।

रक्तसौगन्धिकम् । क्ली । रक्तकह्लारपुष्पे ।

रक्तस्थज्वरः । पुं । रक्तगतज्वरविशेषे । लक्षणं —"रक्तनिष्ठीवनं दाहो मोहश्छर्द्दनविभ्रमौ । प्र-लापः पिड़का तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥" मा.नि. ।

रक्तस्रावः । पुं । अम्लवेतसे । जटा. । नेत्र-सन्धिगतरोगे । निदा. । अश्वस्य रक्तजन्यनेत्ररोगे । लक्षणं यथा —"रक्ताभिष्यन्दिनोऽश्वस्य नेत्रं भवति लोहितं । सर्व्वं त्रिभागमङ्गं वा सावरुग्दाहपीड़ि-तम् । रक्तस्रावोऽथवा यस्य वाजिनो लोचनाद्भवेत् । रक्तस्रावाभिधानन्तु नेत्ररोगं समादिशेत् ॥" ज.द. ३०श. ।

रक्तस्रुतिः । स्त्री । रक्तस्रावे । व्याक. ।

रक्तहरः । पुं । भल्लातके । भाल्ला । वै.निघ.। त्रि । रक्तघ्नद्रव्यमात्रे ।

रक्ता । स्त्री । गुञ्जायां । कूँच । रा.नि.व.३ । सु. चि.१७श.,सु.कल्प.५श.। लाक्षायां । मञ्जिष्ठायां । रा.नि.व.६।२३ । शिम्बीभेदे । प.मु. । उष्ट्रकाण्डी-नामपुष्पवृक्षे । रा.नि.व.१० । लक्षणाकन्दे । वचा-याम् । वै.निघ. । रक्तवर्णशतपद्यां । लाल केन्नु-ई । सु.कल्प.८श. । कृच्छ्रसाध्यलूताविशेषे । कर्ण-शिराभेदे । वा.उ.१श. ।

रक्ताका(ङ्क्ष)रः । पुं, क्ली । प्रवालद्रुमे । पला-र गाछ । रा.नि.व.१३ ।

रक्ताक्तम् । क्ली । रक्तचन्दने । जटा. । [निघ.।

रक्ताख्यातः (कः) । पुं । रक्तापामार्गे । वै.

रक्ताङ्गम् । क्ली । रक्तचन्दने । प.मु. । कुङ्कुमे । मे. । पुं । कम्पिल्लके । कमलागुंड़ि । प.मु. । प्रवालतरौ । रा.नि.व.१३ । मत्कुणे । छारपो-का । रा.नि.व.१९ ।

रक्ताङ्गी । स्त्री । कटुकायां । कट्की । रा.नि.

व.६ । मञ्जिष्ठायां । भा. । जीवन्त्यां । मे. । नलिकायाम् । वै.निघ. । [निशा । च.द.चारतैले ।

रक्ताञ्जना । स्त्री । रक्ताञ्जनिकायां । रक्ताञ्ज-

रक्ताढ़की । स्त्री । रक्तपुष्पाढ़क्याम् । लाल अ-हर । गुणाः—रुच्या बल्या पित्ततापादिहरी च । रा.नि.व.१६ । [५०श. । See अण्डस्कन्दः ।

रक्ताण्डः । पुं । अश्वस्य अण्डरोगभेदे । ज.द.

रक्तातिसारः । पुं । सरक्तातिसाररोगे । तस्य सम्प्राप्तिः—"पित्तकृन्ति यदात्यर्थं द्रव्याण्यश्नाति पैत्तिके । तदोपजायतेऽभीक्ष्णं रक्तातीसार उल्बणः ॥" मा.नि. ।

रक्ताधारः । पुं । चर्म्मणि । रा.नि.व.१८ ।

रक्तापराजिता । स्त्री । रक्तपुष्पापराजितायां ।

रक्तापहम् (हा) । क्ली, स्त्री । बोलनामगन्धद्रव्ये । खूनखारापि । रा.नि.व.६ ।

रक्तापामार्गः । पुं । स्वनामख्यातक्षुपे । लाल आपाङ् । हिं लालचिरचिरा । मं रक्तलट्जीरा । कं वड़ाआघाड़ा । तें केम्पिगुत्तरणे । गुणाः—शीतः कटुः कफवातघ्नः व्रणकण्डूविषघ्नः संग्राही वान्तिघ्नश्च । रा.नि.व.४ । वातविष्टम्भी कफकृत् शीतलः । भा.पू.१भ. ।

रक्ताब्ज(क)म् । क्ली । रक्तकमले । वै.निघ. ।

रक्ताभः (भा) । पुं, स्त्री । रक्तजपायाम् । लाल जवा । इन्द्रगोपकीटे । वै.निघ. ।

रक्ताभिष्यन्दः । पुं । सर्व्वगतनेत्ररोगभेदे । यथा—"रक्ताश्रुराजीदूषीकशुक्लमण्डलदर्शनम् । रक्तास्यन्देन नयनं सपित्तस्यन्दलक्षणम् ॥" वा.उ.१५श. । [रा.नि.व.१३ ।

रक्ताभ्रम् । क्ली । रक्तवर्णाभ्रके । लाल अभ्र ।

रक्ताम्भोजम् । क्ली । कोकनदे । रक्तकमल । रा.नि.व.१० । [नि.व.११ ।

रक्ताम्रः । पुं । कोषाम्रवृक्षे । कलपाई । रा.

रक्ताम्लातकः, **रक्ताम्लानः** } पुं । रक्तझिण्टीक्षुपे । रक्तझाँटी गाछ । हिं लालकट्सरैया । मं वाणझाड़ । कं वणदगिडु । गुणाः—उष्णः कटुः वातामयशोफघ्नः ज्वरघ्नः आध्मानशूलकफकासघ्नः वर्ण्यश्च । रा.नि.व.१० ।

रक्तारिः । पुं । महाराष्ट्रीक्षुपे । प.मु. ।

रक्तार्कः । पुं । अरुणार्कवृक्षे । लाल आकन्द गाछ । गुणाः—"अर्कद्वयं शस्त्रवातकुष्ठकण्डूचयव्रणान् । निहन्ति प्लीहगुल्मार्शोयकृत्श्लेष्मोदरक्रमीन् ॥" मद.व.१ । रा.नि.व.१० ।

रक्तार्त्तिः । स्त्री । शोणितामये । रा.नि.व.२० ।

रक्तार्म्म (न्) । क्ली । नेत्ररोगभेदे । लक्षणं यथा—"पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सिते ।" मा.नि. । [See अर्बुदः ।

रक्तार्बुदः । पुं । शुक्ररोगे । रक्तजन्यार्बुदरोगे ।

रक्तार्शः । क्ली । रक्तजन्यगुदजरोगे । लक्षणं—"तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसाम् । कट्यूरुगुदशूलञ्च दौर्ब्बल्यं यदि चाधिकम् । तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् । शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलम् । यदार्शसां घनञ्चासृक् तनुमत्पाण्डु पिच्छिलम् । गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कारणम् । श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥" मा.नि. । [श. ।

रक्ता(लता) । स्त्री । मञ्जिष्ठायां । सु.कल्प ५

रक्तालुः । पुं । (Dioscorea sativa.) Common Yam. रक्तपिण्डालुके । लाल पिण्ड आलू । हिं रक्तालु, रतआलु, रक्तालु । ता. यामक्कीलं । गुणाः—शीतलः मधुरः अन्नः श्रमपित्तदाहघ्नः श्रयः बलपुष्टिकरः गुरुश्च । रा.नि.व.७ । शालिधान्यविशेषे । प.मु. । [२श. ।

रक्तावसेचनम् । क्ली । रक्तमोचणे । च.चि.

रक्ताश्वमारपुष्पम् । क्ली । रक्तकरवीरपुष्पे, रक्तकरवी फूल । सि.यो.विषमज्वरे । "रक्ताश्वमारपुष्पञ्च ।" [ते शतके ।

रक्ताश्वारिः । पुं । रक्तकरवीरवृक्षे । रावणकृ-

रक्तास्रावः । पुं । रक्तजनेत्रसन्धिरोगे । लक्षणं यथा—"रक्तास्रावः शोणितोत्थः सरक्तं कोष्णं नाल्पं संस्रवेन्नातिसान्द्रम् ।" सु.उ.२श. ।

रक्ताक्षः । पुं । महिषे । पारावते । चकोरे । मे. । सारसपक्षिणि । रा.नि.व.१९ । [चि. ।

रक्ताक्षी । स्त्री । गुग्गुली । वै.निघ.२भ.प.सा.

रक्तिः । पुं । अष्टसर्षपमाने । च.कल्प.१२श. ।

रक्तिका । स्त्री । गुञ्जायां । কুঁচ । र.मा. । रा.नि.व.२ । राजिकायाम् । रा.नि.व.१६ ।

रक्तेक्षुः । पुं । रक्तदण्डके । বম্বাই আক্ । गुणाः—पाके मधुरः शीतलः मृदुः पित्तदाहहरः क्षयः तेजोबलवर्द्धनश्च । रा.नि.व.१४ ।

रक्तेक्षुशर्करा । स्त्री । रक्तेक्षुकृतशर्करायाम् । गुणः—पित्तघ्नी । रा.नि.व.१४ ।

रक्तैरण्डः । पुं । रक्तवर्णैरण्डवृक्षे । লাল ভেরেণ্ডা । अयं प्रायेण श्वेतवद्गुणः । विशेषस्तु शोथघ्नः लघुः अरोचकघ्नः कफश्वासघ्नः ज्वरघ्नः रक्तपाण्डुभ्रान्तिनाशनश्च । रा.नि.व.८ । "रक्तोरुबुकस्तुवरो रसे कटुर्लघुः स्मृतः । तिक्तो वातकफश्वासकासगुल्मार्शसंश्चहा । रक्तदोषपाण्डुरजाभ्रान्त्यरोचकनाशनः । प्रायस्त्वन्ये गुणाश्चास्य श्वेतवच्च समीरिताः ॥" वै.निघ. । [व.२ ।

रक्तैर्वारुः । पुं । इन्द्रवारुणीलतायां । रा.नि.

रक्तोच्चटा । स्त्री । श्वेतगुञ्जायाम् । भा. ।

रक्तोत्पलम् । क्ली । लघुरक्तपद्मे । कोकनदे । प.मु. । रा.नि.व.१० । सु.सू.२८अ. । गैरिके । पुं, स्त्री (ला) । शाल्मलीवृक्षे । रा.नि.व.८ ।

रक्तोदरः । पुं । रोहितमत्स्ये । महाविष-मध्यविष-वृश्चिकविशेषे । सु.कल्प.८अ. ।

रक्तोपलम् । क्ली । गिरिमृत्तिकायां । धारा. ।

रक्तौदनम् । क्ली । रक्तशाल्यादिभक्ते । अलक्तकरञ्जितभक्ते । च.द.बाल.चि. ।

रघुनाथः । पुं । वैद्यविलासनामग्रन्थकारे ।

रङ्कुः । पुं । मत्स्यरङ्के । वै.निघ. । शबलपृष्ठहरिणविशेषे । रा.नि.व.१९ ।

रङ्गम् । क्ली । वङ्गधातौ । রাঙ্ । प.मु. । रा.नि.व.१३ । पुं । टङ्कणे । সোহাগা । रा.नि.व.६ । खदिरसारे । रा.नि.व.८ । [नि.व.१२ ।

रङ्गकाष्ठम् । क्ली । पत्तङ्गे । বকমকাষ্ঠ । रा

रङ्गजम् । क्ली । सिन्दूरे । र.मा. ।

रङ्गदः । पुं । खदिरसारे । रा.नि.व.८ । टङ्कणक्षारे । रा.नि.व.६ । [निघ. ।

रङ्गदलिका । स्त्री । नागवल्लीलतायाम् । वै.

रङ्गदा । स्त्री । स्फटिकायां । ফট্কিরি । भा. ।

रङ्गदायकम् । क्ली । कङ्कुष्ठे । रा.नि.व.१३ ।

रङ्गदृढ़ा । स्त्री । स्फटिकायाम् । रा.नि.व.१३ ।

रङ्गपत्री । स्त्री । नीलीवृक्षे । নীল গাছ । रा.नि.व.४ । [वाहुचे । वै.निघ. ।

रङ्गपुष्पी । स्त्री । नीलीवृक्षे । रा.नि.व.४ । अ-

रङ्गबीजम् । क्ली । रूप्ये । त्रिका. । [व.१३ ।

रङ्गमाणिक्यम् । क्ली । माणिक्यरत्ने । रा.नि.

रङ्गमाता (तृका) । स्त्री । लाक्षायां । লাশ । रा.नि.व.६।१२ । त्रिका. ।

रङ्गलता । स्त्री । (Helicteres Isora.) आवर्त्तकीलतायाम् । আঁতমোড়া । हिं मरोरफली मेन्ढु. कपासी । तें गुवादर्र । वम्. गेरादश्रिं, केवान् । गुणः—शूलघ्नी । केचित् ।

रङ्गलासिनी । स्त्री । शेफालिकावृक्षे । श.च. ।

रङ्गसट्टशम् । क्ली । यशदे । দস্তা । भा. ।

रङ्गक्षारः । पुं । टङ्कणक्षारे । সোহাগার খৈ । वै.निघ. ।

रङ्गा । स्त्री । जवावृक्षे । জবা গাছ । वै.निघ. ।

रङ्गाङ्गा । स्त्री । फटिकारिकायां । ফট্কিরি । रा.नि.व.१३ । [र.मा. ।

रङ्गारिः । पुं । करवीरवृक्षे । করবী গাছ ।

रङ्गिणी । स्त्री । शतमूल्याम् । जटा. । कैवर्त्तिकायाम् । কেওট্মুতা । रा.नि.व.६ । हरिद्रायाम् । वै.निघ. । [রাঙা আলু । त्रिका. ।

रङ्गिष्ठालुकम् । क्ली । स्वनामख्याते आलौ ।

रजः । पुं । पर्पटके । ক্ষেৎপাবড়া । भा.म.१ भ.चित्तभ्रम.ज्व.चि. । "पथ्यारिष्टतरामसेनकरजः ।" भा.म.१भ.ज्वरे कास.चि. । "कलिङ्गद्रुफलं रजः ।" वै.निघ.दुर्जलज्व.चि.ज्ञानोदयरसे । क्ली । स्त्रीकुसुमे । श.र. ।

रजः (स्) । पुं, क्ली । स्त्रीपुष्पे । अमरदत्तः । श.र. । "पाचिताः पित्ततापेन रसाद्या धातवः क्रमात् । शुक्लं यान्ति मासेन तथा स्त्रीणां रजो भवेत् ॥" शार्ङ्ग.६अ. । रूपणे । उद्रेके । कालुष्ये ।

मतिभ्रमे। "रजोरूषणमुद्रेक: कालुष्यं मतिविभ्रम: ।" रा.नि.व.२१ । परागे । मे. ।

रज:शय: । पुं । कुक्कुरे । श.मा. ।

रज:सारम् । क्ली । कर्पूरे । नकुल.१२अ. ।

रजतम् । क्ली । रौप्ये । अम. । स्वर्णे । वि.ज्व.चि.ज्वरकुञ्जरपारीन्द्ररसे । हस्तिदन्ते । है.च. ।

रजतप्रभ: । पुं । सोमलताभेदे । সোমলতা । सु.चि.२९अ. ।

रजतोपमम् । क्ली । रौप्यमाक्षिके । वै.निघ.।

रजनक: । पुं । कम्पिल्लके । কমলাগুঁড়ি । वा.सू.१५अ.श्यामादि: । "शिखरिरजनकच्छिन्नरुहा: करञ्जा: ।" [अटी. ।

रजनि: । स्त्री । वालुके । रात्रौ । हरिद्रायां ।

रजनिपुष्पम् । क्ली । हरिद्रापुष्पे । হলুদফুল । रस.र.नागार्ज्जुनचूर्णे ।

रजनी । स्त्री । हरिद्रायां । रा.नि.व.६ । शि.यो.पाण्डु.चि. । सु.सू.३८अ.वल्लीपञ्चके । यतुकालतायां । रा.नि.व.३ । नीलिन्याम् । নীল । मे. । दारुहरिद्रायां । वालुके । वै.निघ.। रात्र्यां। अम.।

रजनीगन्धा । स्त्री । (Polianthes tuberosa.) Tuberose. स्वनामख्यातपुष्पवृक्षे । রজনীগন্ধ । हिं गुल्शब् । भूरिप्र. ।

रजनीजलम् । क्ली । नीहारे । हारा. ।

रजनीद्वयम् । क्ली । हरिद्राद्वये, हरिद्रादारुद्रयो: । च.द.विषमज्वरे ।

रजनीपुष्प: । पुं । पूतिकरञ्जे । रा.नि.व.९ ।

रजनीहासा । स्त्री । शेफालिकापुष्पवृक्षे । श.र. ।

रजसानु: । पुं । मनसि, हृदये । उणा.।

रजस्वर्ण: । पुं । पीतधुस्तूरके । वै.निघ. ।

रजस्वल: । पुं । महिषे । त्रिका. । पारदे । वै.निघ.। स्त्री(ला) । जातरजस्कायां स्त्रियि । रा.नि.व.१८ । तत्स्वरूपं यथा—"द्वादशाद्वत्सरादूर्द्ध्वमापञ्चाशत्समा: स्त्रिय: । मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत् । आर्त्तवस्रावदिवसादृतु: षोड़शरात्रय: । गर्भग्रहणयोग्यस्तु स एव समय: स्मृत: ॥" रज:स्वलाकृत्यं—"आर्त्तवस्रावदिवसादहिंसाब्रह्मचारिणी । शयीत दर्भशय्यायां पश्येदपि पतिं न च ॥" इत्यादि । भा. । ऋतुस्नानानन्तरमादौ पतिमेव पश्येत् ।

रज्जु: । पुं । केशवेण्याम् । दामनि । দড়ি । मांसरज्ज्वाम् । "पृष्ठवंशस्योभयत्र महत्यो मांसरज्जव: । चतस्रो मांसपेशीनां बन्धनं तत्प्रयोजनम् ॥" भा. ।

रञ्जक: । पुं । कम्पिल्लके । কমলাগুঁড়ি । रा.नि.व.१३ । भल्लातकवृक्षे । वै.निघ. । तन्नामकजठराग्नौ । तस्य स्थानं यकृत्प्लीह्नोर्मध्यम् । स एवाहाररसं रञ्जयति । सु.सू.२१अ. । क्ली । हिङ्गुले, हिङ्गुलविशेषे । रा.नि.व.१३ । स्त्री (का) । नखरञ्जिन्यां । মেহেদি গাছ । वै.निघ. ।

रञ्जनम् । क्ली । रक्तचन्दनभेदे । বকম কাঠ । र.मा. । रक्तचन्दने । मद.व.१ । हिङ्गुले । रा.नि.व.१३ । स्वर्णे । जातीफले । वै.निघ. । पारदरञ्जनद्रवे । तारकर्म्मण्यस्य न तथा प्रयोगो दृश्यते । "केवलं निर्म्मलं ताम्रं वापितं रञ्जनेन तु । कुरुते त्रिगुणं जीर्णं लाक्षारसनिभं रसम् ॥" रस.चि.३अ. । पुं । मुञ्जतृणे । মুঞ্জ । रा.नि.व.८ । कम्पिल्लके । কমলাগুঁড় । वै.निघ. ।

रञ्जनक: । पुं । कट्फलवृक्षे । रा.नि.व.९ ।

रञ्जनकेशी । स्त्री । नीलीवृक्षे । वै.निघ. ।

रञ्जनगण: । पुं । रञ्जनद्रव्यवर्गे । "चतुर्विधा हरिद्रा स्यात् पत्तङ्गं रक्तचन्दनं । नीलीकुसुम्भमञ्जिष्ठालाक्षामहर्द्दिकिंशुकम् ॥" रा.नि.व.९ ।

रञ्जनद्रु: (**म:**) । पुं । मच्कुकवृक्षे । আচ্‌ফুলের গাছ । श.चि. । धूनकवृक्षे । वै.निघ. ।

रञ्ज(ञ्जि)नी । स्त्री । गुण्डारोचनिकायाम् । श.च. । नागवल्लीलतायाम् । वै.निघ. । नील्यां । रा.नि.व.४ । जन्तुकालतायां । रा.नि.व.३ । मञ्जिष्ठायाम् । शेफालिकायां । मे.। हरिद्रायां । रा.नि.व.६ । पर्पट्यां । रा.नि.व.१३ । [रा.नि.व.९ ।

रञ्जनीपुष्प: । पुं। पूतिकरञ्जे । নাটাকরঞ্জ ।

रण: । पुं । दुम्बामेषे । দুম্বা । वै.निघ. ।

रणघण्टासमाकृति: । पुं । महाशणे । वै.निघ. ।

रणपक्षी (इन्) । पुं । रणगृध्रे । (শ্যেন পাখী । वै.निघ. । [श्येनपक्षिणि । रा.नि.व.१९ ।

रणप्रियम् । क्ली । उशीरे । रा.नि.व.१२ । पुं ।

रणमुष्टिः । पुं । विषमुष्टिवृक्षे । कुचिला इति भाषा । रा.नि.व.४ । [व.६ ।

रणमूर्द्धजा । स्त्री । कर्कटशृङ्ग्याम् । रा.नि.

रणरणः । पुं । भ्रमरे । मशके । मशा । त्रिका.। (कः) उत्कण्ठायाम् । हे.च. ।

रणालङ्करणः । पुं । कङ्कपक्षिणि । কাঁক্ পাখী । रा.नि.१९ । [च. ।

रण्डकः । पुं । अफलवृक्षे । রাঁড়া গাছ । श.

रण्डा । स्त्री । मूषिककर्ण्याम् । अम. । प्र.वृहत् सोमनाथरसे ।

रतम् । क्ली । मैथुने । अम. । गुह्ये । मे. ।

रतकीलः । पुं । कुक्कुरे । हे.च. ।

रतज्वरः । पुं । काके । त्रिका. ।

रतनारीचः । पुं । कुक्कुरे । वै.निघ. ।

रतनिधिः । पुं । खञ्जनपक्षिणि । श.र. ।

रतव्रणः । पुं । कुक्कुरे । त्रिका. । मे. ।

रतशायी (इन्) । पुं । कुक्कुरे । हे.च. ।

रताङ्घ्री । स्त्री । कुम्भटिकायां । त्रिका. ।

रतान्दुकः । पुं । कुक्कुरे । हे.च. ।

रतामर्द्दः । पुं । कुक्कुरे । श.मा. ।

रतिः । स्त्री । प्रीत्याम् । सुरते । गुह्यदेशे । मे. ।

रतिकुहरम् । क्ली । भगे । त्रिका. ।

रतिगृहम् । क्ली । भगे । त्रिका. ।

रतिचर्य्या । स्त्री । स्त्रीसेवायाम् । वा.उ.४०अ. ।

रतिमन्दिरम् । क्ली । योनौ । जटा. ।

रतिवल्लभमोदकः । पुं । वाजीकरणाधिकारे औषधम् । पाठः – "शक्राशनस्य वीजानि चूर्णितानि पलाष्टकं । कुड़वं हविषश्चैव खण्डप्रस्थं प्रगृह्य च । शतपुत्रीरसप्रस्थं प्रस्थं शक्राशनस्य च । गव्यमाजं पयः प्रस्थं दत्त्वा प्रस्थद्वयं पचेत् । धात्री हिजोरकं मुस्तं त्वगेलापत्रकेशरं । आत्मगुप्ता चातिवला तालाङ्कुरकशेरुकं । शृङ्गाटकं त्रिकटुकं धन्याकं चित्रकं तथा । पथ्या द्राक्षा च काकोल्यौ खर्ज्जूरं चुरकं तथा । कटुका मधुकं कुष्ठं लवङ्गं सारसैन्धवं । यमानिका चाजमोदा जीवन्ती गजपिप्पली । प्रत्येकं कर्षमेकञ्च चूर्णितानि शुभानि च । मधुनः कुड़वार्द्धञ्च पाकशेषे तथा क्षिपेत् । मृगाण्डजं सकर्पूरं यथालाभं विनिक्षिपेत् । रतिवल्लभनामायं सेव्यमानो रसायनः ॥" सिद्धिवीजचूर्णं ८ प. (मतान्तरे ५ प.) घृतं ४ प. शर्करा २ श. शतावरीरसः गव्यदुग्धं छागदुग्धं प्र. ४ श. । प्रक्षेपः—आमलकी जीरकं कृष्णजीरकं मुस्ता त्वक् एला तेजपत्रं नागकेशरं कपिकच्छूवीजं (আলকুশীর বীজ) गोरक्षतण्डुला (গোরক্ষচাকুলিয়া) तालास्थिशस्यं कशेरुकं शृङ्गाटकं त्रिकटु धान्यकं चित्रकं (मतान्तरे अभ्रं वङ्गञ्च) हरीतकी द्राक्षा काकोली क्षीरकाकोली पिण्डखर्ज्जूरं कोकिलाक्षवीजं कटुकी यष्टिमधु कुष्ठं लवङ्गं सैन्धवं यमानी वनयमानी जीवन्ती गजपिप्पली प्र. २ तो. मधु २ प.। रस.र. । भैष. । [श.च. ।

रतिसत्वरा । स्त्री । पृक्कायां । পিড়িং শাক ।

रतिसाधनम् । क्ली । शिश्ने । वै.निघ. ।

रती । स्त्री । रक्तगुञ्जायाम् । वै.निघ. ।

लताकरञ्जः । पुं । वल्लीकरञ्जे । লতাকরঞ্জ । बम्. सागरगोटी । गुणाः—"लताकरञ्जपत्रन्तु कटूष्णं कफवातनुत् । तद्बीजं दीपनम्पथ्यं शूलगुल्मव्यथापहम् ॥" रा.नि.व.८ ।

लताकस्तूरिका (री) । स्त्री । (Hibiscus Abelmoschus. Syn. Abelmoschus moschatus.) Musk mallow. स्वनामख्यातवृक्षे । লতাকস্তুরী,কাল কস্তুরী । हिं मुसुक्‌दाना । तें तक्कोलफलमु, कर्पूरवेण्ड । ता. कठेकस्तूरी । द्रा. कस्तुरवेण्ड । गुणाः—"लताकस्तूरिका तिक्ता स्वाद्वी वृष्या हिमा लघुः । चक्षुष्या छेदनी श्लेष्मतृष्णावस्त्यास्यरोगहृत् ॥" भा.। शीतला वस्तिशोधनी च । सु.सू.४६अ. । [वै.निघ. ।

लताङ्गी । स्त्री । कर्कटशृङ्ग्यां । কাঁকড়াশৃঙ্গী ।

लताजिह्वः । पुं । सर्पे । श.मा. ।

लतातरुः । पुं । तालवृक्षे । निम्बूवृक्षे । श.मा.। लताशालवृक्षे । त्रिका. । [गाछ । रा.नि.व.९ ।
लतातालः । पुं । हिन्तालवृक्षे । হেঁতাল
लताद्रुमः । पुं । लताशाले । र.मा ।
लतापनसः । पुं । तरम्बुजलतायाम् । তরমুজ গাছ । त्रिका. । [मउरी । वै.निघ. ।
लतापर्णी । स्त्री । तालमूल्यां । मधुरिकायां ।
लतापृक्का । स्त्री । स्पृक्कायाम् । পিড়িং । श.र. । [याम् । अम. ।
लताप्रतानिनी । स्त्री । शाखाप्रचयवल्लता-
लताफलम् । क्ली । पटोले । পটোল । ब्रह्मवै. पु. । [सु. ।
लताबृहतिका । स्त्री । बृहतीलतायां । प.
लताभद्रा । स्त्री । भद्रालीलतायां । गन्धभादुलिया । श.मा. ।
लतामणिः । पुं । प्रवाले । रा.नि.व.१३ ।
लतामरुत् । स्त्री । स्पृक्कायां । পিড়িং । श.र.।
लतामाधवी । स्त्री । माधवीलतायां । श.र.।
लतायष्टिः(ष्टी) । स्त्री । मञ्जिष्ठायां । श.मा.।
लतायावकम् । क्ली । तरुप्रवाले । हारा. ।
लतारसनः । पुं । सर्पे । हारा. ।
लतार्कः । पुं । हरितपलाण्डौ । अम. ।
लतालकः । पुं । गजे । त्रिका. ।
लतावृक्षः । पुं । शल्लकीवृक्षे । वै.निघ. ।
लताशङ्कुतरुः । पुं । लताशालवृक्षे । त्रिका.।
लताशङ्कः । पुं । शालवृक्षे । श.र. ।
लताशिरीषः । पुं । वल्लीशिरीषे । प.मु. ।
लतिका । स्त्री । यमकलतायाम् । व्याक. ।
लत्तिका । स्त्री । व्येष्ठ्याम् । টিকটিকী । गोधायां । उणा. ।
लपनम् । क्ली । मुखे । रा.नि.व.१८ ।
लप्सिका । स्त्री । खाद्यविशेषे । মোহনভোগ। करणविधिः—"गोधूमपिष्टं साज्येन घृतं न्यस्य सुभर्ज्जयेत् । शर्करां पिष्टमानेन समां तत्सजले न्यसेत् । लोड़यित्वा ततो वस्त्रपूतां पिष्टे विनिक्षिपेत् । मन्दाग्नौ विपचेत्तावज्जलम्पीता घृतन्हरेत् । शुण्ठीफलचूर्णमेलाशुण्ठीमरीचनिर्वीजाः । केतकीफलखण्डांश्च क्षिप्त्वा दर्व्या विचालयेत् कुशलः ॥ पक्वा च रक्तता याति सिद्धोऽयं भोगमोहनः । शीतकाले तु भोक्तॄणां परः शीतः सुखावहः ॥" वै.निघ. ।
लम्फः । पुं । उल्लम्फने ।
लम्बः । पुं । अङ्गे । उणा. ।
लम्बकर्णः । पुं । अङ्कोलवृक्षे । আঁকোড় গাছ । रा.नि व.९ । शशके । খরগোষ । भा. । छागे । त्रिका । श्येनपक्षिणि । रा.नि.व.१९ ।
लम्बदन्ता } स्त्री । सिंहपिप्पल्याम् । रा.नि.
लम्बबीजा } व.६ ।
लम्बनः । पुं । कफे । श.च. ।
लम्बा । स्त्री । तिक्ततुम्ब्यां । লম্বা তিৎলাউ । दीर्घतिक्तालाबुसंज्ञा । वा.सू.१५अ.धा.व.। "लम्बां शुकनसां तथा ।" सु.चि.१८अ. । स्थावरविषान्तर्गतपत्रविषे । सु.कल्प.२अ. ।
लम्बिका । स्त्री । सूक्ष्मजिह्वायां । আলজিবী। रा.नि.व.१८ । श.र. । [निघ. ।
लम्बितम् । क्ली । मांसधातौ । মাংস । वै.
लम्बो(म्बौ)ष्ठः । पुं । उष्ट्रे । रा.नि.व.१९ । त्रिका. ।
लयम् । क्ली । उशीरे । वै.निघ. ।
ललज्जिह्वः । पुं । उष्ट्रे । कुकुरे । मे. । स्त्री (ह्वा) । महासमङ्गायाम् । रा.नि.व.४ ।
ललद्म्बुः । पुं । पुष्पभेदे । लिम्पाके । जटा. । क्ली । उदकविशेषे । वै.निघ.हिक्का.चि. ।
ललनः (ना) । पुं, स्त्री । सर्ज्जवृक्षे । ধূনো শালের গাছ । रा.नि.व.९।२३ । चारवृक्षे । पियाল গাছ । रा.नि व.११।२३ । राले । ধূনো । रा.नि.व.१२ । बालके । रा.नि.व.१९ । स्त्री । जिह्वायां । मे. ।
ललनाप्रियम् । क्ली । ह्रीवेरे । বালা । रा. नि.व.१० । पुं । कदम्बवृक्षे । रा.नि.व.९ ।
ललाकः । पुं । शिश्ने । श.च. ।
ललाट(क)म् । क्ली । भाले । গণ্ডদেশ, क-

पाल। रा.नि.व.१८। प्रशस्तललाटे। श.र.।

ललाटरेखा। स्त्री। दीर्घजीवनसूचककपालस्थरेखायाम्। [७अ.।

ललाटास्थि। क्ली। कपालास्थिनि। च.शा.

ललामम्। क्ली। अश्वे। शृङ्गे। चिह्ने। वालधौ। मे.।

ललितः। पुं। तन्नाम्ना ख्याते अर्शोऽङ्कुरविशेषे। लक्षणं—"गुदद्वारात् पृष्ठदेशे जायन्ते पाण्डुराङ्कुराः। ललितास्ते······ ॥" निदा.।

ललिता। स्त्री। कस्तूर्य्यां। मृगनाभि। रा.नि.व.१२। लताकस्तूर्य्यां।

लवम्। क्ली। जातीफले। श.च.। लामज्जके। रा.नि.व.१२। पुं। लावपक्षिणि। चतुर्थभागे। सिकि। भैष.रसा.वसन्तकुसुमाकररसे। छेदने। लेशे। चिका.।

लवङ्ग(क)म्। क्ली। (Caryophyllus aromaticus.) Cloves. स्वनामख्यातपण्यद्रव्ये। मलक्कद्वीपजवृक्षस्य पुष्पवृन्ते। लवङ्ग। हिं लौङ्। मं कं लवङ्गकलिका। फा. लौंग, मेखक्। ता. किरम्बेर। तें लवङ्गलु। द्रा. लवङ्। गुणाः—शीतलं तिक्तं चक्षुष्यं भक्तरोचनं त्रिदोषघ्नं तीक्ष्णं शिरोरोगहरञ्च। रा.नि.व.१२। कटुतिक्तं कफघ्नं लघु तृषाघ्नं मुखदौर्गन्ध्यघ्नञ्च। सु.सू.४६अ.। "आध्मानानाहशूलघ्नं लवङ्गं पाचनं लघु।" राज.३प.। [निघ.।

लवङ्गकन्दपत्रा। स्त्री। लघुतालीशपत्रे। वै.

लवङ्गकलिका। स्त्री। लवङ्गे। रा.नि.व.१२।

लवङ्गचतुस्समः। पुं। अतीसाराधिकारे योगः। पाठः—"जातीफलं त्रिदशपुष्पसमन्वितञ्च जीरञ्च टङ्कणयुतं चरकैः प्रयुक्तं। चूर्णानि माक्षिकसितासहितानि लीढ्वा सामातिसारमखिलं गुरु हन्ति शूलम्॥" रस.र.। [गाछ। जयदेवः।

लवङ्गलता। स्त्री। पुष्पवृक्षविशेषे। लवङ्ग

लवङ्गादिचूर्णम्। क्ली। राजयक्ष्माधिकारे चूर्णौषधे। पाठः—"लवङ्गकक्कोलमुशीरचन्दनं नतं सनीलोत्पलजीरकं समं। त्रुटिः सकृष्णागुरुभृङ्गकेशरं कणा सविश्वानलदं महाम्बुदं। अहीन्द्रजातीफलवंशलोचनासिताष्टभागं समसूक्ष्मचूर्णितं। अरोचकं तर्पणमग्निदीपनं बलप्रदं वृष्यतमं त्रिदोषनुत्॥" त्रुटिः एलाबीजं। अहीन्द्रम् अनन्तमूलं। महाम्बुदं मुस्तकं। भृङ्गं गुड़त्वक्। नलदं जटामांसी। वातपित्ताधिके वह्निबले सर्व्वचूर्णापेक्षया शर्कराष्टगुणा। कफाधिके चाग्निमान्द्ये च एकभागापेक्षयाष्टगुणेति। अन्यत् ग्रहण्यधिकारे—"लवङ्गातिविषामुस्तं विल्वं पाठाथ शाल्मली। जीरकं धातकीपुष्पं लोध्रेन्द्रयवबालकं। धान्यकं सर्ज्जकं शृङ्गी पिप्पली विश्वभेषजम्। समङ्गायावशूकञ्च सैन्धवं सरसाञ्जनं। समभागानि चैतानि भक्षयेत्प्रातरुत्थितः॥" रस.र.।

लवणम्। क्ली। क्षाररसद्रव्यविशेषे। नून। हिं निमक्। तत् पञ्चविधं—सौवर्चलसैन्धवविडौद्भिदसामुद्रभेदेन।३अम.। सैन्धवसौवर्चलकाचविड़गाढ़सामुद्रौद्भिदौषररोमकभेदेन नवधा। रा.नि.व.२०। तद्वर्गः—सामुद्रसैन्धवविड़रोमकसौवर्चलचुल्लिकाभेदेन षट्। "लवणानि च कथ्यन्ते सामुद्रं सैन्धवं विड़ं। सौवर्चलं रोमकञ्च चुल्लिकालवणन्तथा॥" र.सा.सं.। तत्र सैन्धवं श्वेतरक्तभेदेन द्विविधं। गाढ़लवणं शाकम्भरदेशे प्रसिद्धं। एषां गुणाः स्वस्वपर्य्याये ज्ञेयाः। सैन्धवलवणे। वा.सू.१५अ.। "कणलवणवचैला।" क्षारविशेषे। লোণার ক্ষার। च.द.गुल्म चि.। "सलवणा दग्धा जले पाचितं।" पुं। षड्रसान्यतमरसे। स च सैन्धवादौ दृश्यते। गुणाः—"लवणो रुचिकृद्रसोऽग्निदायी पचनः स्वादुकरश्च सारकश्च। अतिसेवनतो जराञ्च पित्तं शिथिमानञ्च ददाति कुष्ठकारी॥" रा.नि.व.२०। अपिच—"लवणः क्लेदनस्तीक्ष्णः पाचनो दीपनः सरः। स्निग्धो रुचिकरः स्यन्दी दृष्टिशुक्रहरो लघुः॥ अपिच—लवणः शोधनो रुच्यः पाचनः कफपित्तदः। पुंस्त्ववातहरः कायशैथिल्यमृदुताकरः। सोऽतियुक्तोऽक्षिपाकास्रपित्तकोष्ठचयापकृत्॥" राज.। यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्द्दवञ्चापादयति स लवणः। सु.सू.४२अ.। त्रि। लवणरसयुक्ते। मे.।

लवणकिंशुका। स्त्री। महाज्योतिष्मतीलतायाम्। बड़ लताफट्की। रा.नि.व.३।

लवणख(खा)निः। पुं। लवणाकरे। লবণের খনি। हे.च.।

लवणटकम् । क्ली। स्वनामप्रसिद्धे द्रव्यविशेषे । লোণাধাস । गुणाः—क्षारत्वं कषायम् अत्यन्तम् अग्निदीपकरत्वं । रा.नि.व.८ ।

लवणत्रयम् । क्ली । विट्सैन्धवरुचकेषु । সৈন্ধব, বিট্, সচল । "सैन्धवञ्च विड़ञ्चैव रुचकञ्चेति मिश्रितं । लवणत्रयमाख्यातम्……… ॥" रा.नि.व.२२ । च.द.ग्रहणीचि. ।

लवणद्वयम् । क्ली । सौवर्चलसैन्धवलवणे । সচল ও সৈন্ধব । च.सू.२अ. । [क्षीरे । च. ।

लवणनित्यः । त्रि । नित्यं लवणरसास्वादन-

लवणभेदः । पुं। लवणक्षारे । লোণার ক্ষার। वै.निघ. । [रा.नि.व.६ ।

लवणमदः । पुं। लवणक्षारे। লোণার ক্ষার।

लवणमेहः । पुं । मेहविशेषे । अत्र रोगी विशदं लवणतुल्यं मेहति । सु.नि.६अ. ।

लवणयन्त्रम् । क्ली । औषधपाकार्थलवणपूर्णयन्त्रविशेषे । "ऊर्द्धं तज्जलहीनं चेत् यन्त्रं डमरुकाह्वयम् । तद्यन्त्रं लवणैः पूर्णं लवणाख्यमितीरितम् ॥"

लवणव्यापत् । स्त्री । अश्वस्य अतिमात्रलवणभक्षणजन्यव्यापदि । "प्रभूतं लवणं यस्य भोजने वाजिनो भवेत् । केवलं वाततप्तस्य व्यापत्सुमहती भवेत् ॥" अ.द.६०अ. ।

लवणस्कन्धः । पुं । षड्विधास्थापनेषु लवणवर्गीयद्रव्यकृतास्थापनविशेषे । च.वि.८अ. ।

लवणक्षारः । पुं । लोणारक्षारे । रा.नि.व.६।

लवणा । स्त्री । चुक्रिकायां । চুকাপালং । वै.निघ.२भ.वा.व्या.चि. । चाङ्गेर्य्यां । আমরুল । लवणशाके । ज्योतिष्मतीलतायां । লতাফট্কী । रा.नि.व.३ । लवणक्षारे ।

लवणाब्धिजम् । क्ली । सामुद्रलवणे । रा.नि.व.६ । [ক্ষার । रा.नि.व.६ ।

लवणारम् । क्ली। लवणक्षारे। লোণার

लवणारजम् । क्ली। लोणारक्षारे। रा.नि.व.६।

लवणोत्तमम् । क्ली । सैन्धवलवणे । र.मा. । वि.यो.ज्व.चि. ।

लवणोत्तमाद्यचूर्णम् । क्ली । अर्शसि चूर्णम् । सैन्धवचित्रकेन्द्रयवकरञ्जमूलमहापिचुमर्द्दमूलानां चूर्णं प्रत्येकं २ तो. । मात्रा ८ माषा । अनु. तक्रं । च.द. ।

लवणोत्थम् । क्ली । लोणारक्षारे । रा.नि.व.६।

लवणोत्था । स्त्री । क्षुद्रज्योतिष्मतीलतायाम् । ছোট লতাফট্কী । वै.निघ. ।

लवणोदः । पुं । लवणसमुद्रे । अम. ।

लवनी । स्त्री । छेदने। अम.। शीघ्रजफलभेदे । লোণা । श.च. ।

लवली । स्त्री । फलवृक्षविशेषे । লোওয়াড় গাছ । हिं हरफरी । फलगुणाः—"लवलीफलमर्शोघ्नंकफपित्तहरं गुरु । विशदं रोचनं रुच्यं स्वादम्लं तुवरं रसे ॥" भा.आम्रव. । "कषायं कफपित्तघ्नं किञ्चित्तिक्तं रुचिप्रदं । हृद्यं सुगन्धि विशदं लवलीफलमुच्यते ॥" सु.सू.४६अ. ।

लशु(शू)नम् । क्ली,पुं। रसोने । রশুন । अम.। रा.नि.व.७ । [द्रावाम् । वै.निघ. ।

लसा । स्त्री । हरिद्रायाम् । हारा. । आम्रहरि-

लसान्द्रः । पुं । राजमाषे । बर्वटी । र.मा. ।

लसि(सी)का । स्त्री । इक्षुरसे । लालायां । श.च. । वा.उ.२६अ. । भा.म.४भ.विसर्प.चि. । शर्कराविशेषे । ফেণীগুড় । गुणाः—"लसीका फाणितगुड़ं खण्डमत्स्यण्डिका सिता । निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम् । यथायथैषां नैर्म्मल्यं गुणवत् स्यात् तथा तथा ॥" राज.३प. ।

लच(क्ष)णम् । क्ली । चिह्ने । मे. । श.र. । "लक्षणं चिह्नमाकृतिः ।" मा.नि.पञ्चनिदाने । रोगस्य व्यक्ते विशिष्टपूर्व्वरूपे । "पूर्व्वरूपं विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतम् ।" भा. । रूपे । पुं । सारसपक्षिणि । श.र. । सुचुकुन्दवृक्षे । रा.नि.व.१० । प्रक्षवृक्षे । পাকুড় গাছ । प.मु. । लक्षणोत्सवनामग्रन्थकारे ।

लच(क्ष)णा । स्त्री । श्वेतकण्टकार्य्याम् । रा.नि.व.४ । वै.निघ.उन्माद.चि.सारस्वतघृते । सारसपत्न्यां । मे. । स्वनामख्यातकन्दे । লক্ষণামূল । बम्. लक्षणाकन्द । वा.उ.१।१३अ. । लक्षणं—"पुत्रकारकरक्ताल्पबिन्दुभिर्लाञ्छिता सदा । लक्ष-

स्या पुत्रजननी वसगन्धाकृतिर्भवेत् ॥" भा. । गुणा:—मधुरा शीतला बन्ध्यादोषघ्नी रसायनी बल्या त्रिदोषघ्नी च । रा.नि.व.७ । जवाहचे । मुचुकुन्दवृक्षे । वै.निघ. । [क.बन्ध्याप्रतीकारे ।

लक्ष्मणाजटा । स्त्री । लक्ष्मणामूले । चि.क.

लक्ष्मी: । स्त्री । श्वेततुलस्यां । रा.नि.व.१० । सुक्कानामगन्धद्रव्ये । पिড়িং । रा.नि.व.१२ । प्रियङ्गौ । ऋद्धौ । वृद्धौ । मे. । पद्मचारिण्याम् । स्थलपद्म । रा.नि.व.१० । वा.सू.२६अ. । पद्मे । त्रिका. । शमीवृक्षे । हरिद्रायाम् । मुक्तायां । रा.नि.व.६.८.१२ । मेषशृङ्ग्याम् । মেড়াশিঙে । वै.निघ. ।

लक्ष्मीगृहम् । क्ली । रक्तोत्पले । त्रिका. ।

लक्ष्मीताल: । पुं । श्रीतालवृक्षे । कोङ्कणे मलियादेशे च प्रसिद्ध: । रा.नि.व ६ ।

लक्ष्मीदास: । पुं । योगशतकग्रन्थप्रणेतरि ।

लक्ष्मीपति: । पुं । लवङ्गवृक्षे । पूगवृक्षे । विश्व. ।

लक्ष्मीपुत्र: । पुं । घोटके । मे. ।

लक्ष्मीपुष्प: । पुं । पद्मरागमणौ । हे.च. ।

लक्ष्मीफल: । पुं । बिल्ववृक्षे । रा.नि.व.११ ।

लक्ष्मीवान् । पुं । पणसवृक्षे । কাঁঠাল গাছ । श.मा. । श्वेतरोहितके । শ্বেত রোহিড়া । रा.नि.व.८ । अश्वत्थवृक्षे । वै.निघ. ।

लक्ष्मीविलासरस: । पुं । ज्वरे वातव्याधौ च रस: । पाठ:—"पलं कृष्णाभ्रचूर्णस्य तदर्द्धौ रसगन्धकौ । बलानागबलाभीरुविदारीकन्दमेव च । कृष्णधुस्तूरनिचुलं गोक्षीरवृद्धदारयो: । बीजं शक्राशनस्यापि जातीकोषफले तथा । कर्पूरश्चैव कर्षांशं सूक्ष्मचूर्णं पृथक् पृथक् । गृहीत्वा चाष्टमांशेन स्वर्णं पर्णरसेन च ॥" वटिका खिन्नचणकप्रमाणा । কৃষ্ণাভ্রচূর্ণ ৮ তো. পারা, গন্ধক প্রত্যেকে ৪ তো. (মতান্তরে রস ২ তো. গন্ধক ২ তো.) শ্বেত বেলেড়া, গোরক্ষচাকুলিয়ামূল, শতমূলী, ভূমিকুষ্মাণ্ড, কাল ধুতুরার বীজ, হিজলবীজ,গোক্ষুরবীজ, বিজতাড়কের বীজ, সিদ্ধিবীজ, জায়ফল, জয়িত্রী,কর্পূর ইহাদের চূর্ণ প্রত্যেকে ২তো. স্বর্ণভস্ম ।০ চারি আনা পানের রসে মাড়িয়া বটী করিবে । মাত্রা সিদ্ধচণকবৎ । মতান্তরে জায়ফল, জয়িত্রী এক এক তো. বীজতাড়ক প্রভৃতির বীজ মিলিত ২ তো. । अन्यो महालक्ष्मीविलास: स्त्रीरोगे । पाठ:—"लौहमभ्रं विषं मुस्तं फलत्रयकटुत्रयं । धुस्तूरं वृद्धदारस्य बीजमिन्द्राशनस्य च । गोक्षुरकद्वयञ्चैव पिप्पलीमूलमेव च । एतत्सर्वं समं ग्राह्यं रसे धुस्तूरकस्य च । भावयित्वा वटी कार्य्या द्विगुञ्जाफलमानत: ॥" লৌহ, অভ্র, বিষ, মুতা, ত্রিফলা, ত্রিকটু, ধুতুরাবীজ, বীজতাড়কবীজ, সিদ্ধিবীজ, ছোট গোখুরীবীজ, বড় গোখুরীবীজ, পিপুলমূল সমভাগ । ধুতুরাবীজের রসে ভাবনা দিয়া বটী করিবে । মাত্রা ২ কুঁচ । र.सा.सं. । अन्य: कासे—वङ्गं लौहम् अभ्रं ताम्रं कांस्यं पारद: हरितालं मन:शिला खर्परं प्र. १ प. । केशराजस्य कुलत्थस्य च क्वाथे प्र. दिनत्रयं भावयेत् । एला जातीफलं तेजपत्रं लवङ्गं यमानी जीरकं त्रिफला त्रिकटु तगरं गुड़त्वक् वंशलोचना प्र. २ तो. तेन सह मिश्रयित्वा पूर्व्ववत् भावना देया । मात्रा चणकमिता । भैष. । [लनिर्यासे । रा.नि.व.१२ ।

लक्ष्मीवेष्ट: । पुं । श्रीवेष्टनामसुगन्धद्रव्ये, सर-

लक्ष्मीश्रेष्ठा । स्त्री । स्थलपद्मिन्यां । वै.निघ. ।

लागजीर: (क:) । पुं । शङ्खजीरके । वै.निघ. ।

लाघरक: । पुं । हलीमकरोगे । सु.उ.४४अ. ।

लाघवम् । क्ली । लघुत्वे । आरोग्ये । रा.नि.व.२० । [लिङ्गे । त्रिका. ।

लाङ्गलम् । क्ली । पुष्पभेदे । तालवृक्षे । मे. ।

लाङ्गलक: । पुं । लाङ्गलाकारे भगन्दरच्छेदे । "कुटारहितहलाकार: पार्श्वद्वये यश्छेद: स सम्पूर्णहलाकार: ।" वा.उ.२८अ. । "द्वाभ्यां समाभ्यां पार्श्वाभ्यां छेदो लाङ्गलको मत: ।" सु.चि.८अ. । भा.म.४भ.भगन्दरचि. ।

लाङ्गलकी । स्त्री । लाङ्गलीक्षुपे । বিষলাঙ্গুলিয়া । प.मु. । रस.र.अर्श.चि. ।

लाङ्गलाख्या (ह्वया) । स्त्री । लाङ्गलिकायां । বিষলাঙ্গুলিয়া । भैष.कुष्ठ.चि. । सु.सू.२६अ. ।

लाङ्गलि: (लिका,ली) । स्त्री । लाङ्गली-

हचे। विषलाङ्गुलिया। श.र.। भैष.स्त्रीरोग.चि.। गजपिप्पल्यां। रा.नि.व.२३। च.द.वा.व्या.पलङ्कषातैले। चव्ये। চই। भा.पू.१भ.। महाराष्ट्रीलतायाम्। কাঁচড়াদাম। श.च.। रा.नि.व.४। सु.सू.३९अ.। पृश्निपर्ण्याम्। চাকুলিয়া। मञ्जिष्ठायाम्। ऋषभके। कपिकच्छ्वाम्। আলাকুশী। वै.निघ.।

लाङ्गलिकः। पुं। स्थावरविषभेदे। श.च.।

लाङ्गलिकी (नी)। स्त्री। कलिकारिकायां। विषलाङ्गलिया। अम.। सु.सू.३९अ.कफशोधने।

लाङ्गली (इन्)। पुं। नारिकेलवृक्षे। रा.नि.व.११। सर्पे। श.च.।

लाङ्गलीशाकः। पुं। जलजशाकविशेषे। কাঁচড়া শাক। गुणाः—"लाङ्गली कफपित्तघ्नी रुचा वातविबन्धकृत्।" राज.३प.।

लाङ्गु(ङ्गू)लम्। क्ली। पुच्छे। লেজ। भ.टी.। शिश्ने। मे.।

लाङ्गु(ङ्गू)ला (लिका,ली)। स्त्री। कपिकच्छ्वाम्। रा.नि.व.३। पृश्निपर्ण्याम्। চাকুলিয়া। रा.नि.व.४। पुं.(ली [इन्])। ऋषभके। रा.नि.व.५।

लाजम्। क्ली। उशीरे। বেণা। मे.। पुं। आर्द्रतण्डुले। मे.। पुंबहु, स्त्री(जा)। अक्षते। मे.।

लाजचूर्णम्। क्ली। खदिचूर्णे। খৈয়ের গুঁড়া।

लाजतर्पणम्। क्ली। लाजसक्तुकृततर्पणविशेषे। भा.म.१भ.ज्व.चि.। "दाहवम्यर्दितं क्षामं निरन्नं तृषयान्वितं। शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम्॥"

लाजपेया। स्त्री। खदिकृतपेयायां। খৈয়ের মণ্ড। वा.चि.१अ.। "लाजपेयां सुखजरां।" च.द.। गुणाः—"पूर्ववच्च कृता लाजपेया लघ्वी स्मृता यतः। गुणैः प्रशस्ता विज्ञेया पूर्वोक्ताया गुणाधिका। त्रिकटुसैन्धवैलाभिर्युक्तातिगुणदा मता॥" वै.निघ.। "लाजपेया श्रमघ्नी तु क्षामकण्ठस्य देहिनः। तृट्तृष्णाग्लानिदौर्बल्यकुक्षिरोगविनाशिनी॥" राज.३प.।

लाजभक्तः। पु। खदिभक्ते। गुणाः—"लाजभक्तो लघुः शीतश्चाग्निदीप्तिकरो मधुः। पथ्यो निद्रारुचिकरः कफपित्तविनाशकः। व्रणशोधनकारी स्यादृषिभिः परिकीर्त्तितः॥" वै.निघ.।

लाजमण्डः। पुं। खदिमण्डे। খৈয়ের মণ্ড। गुणाः—अग्निजननो दाहतृष्णानिवारणः ज्वरातिसारशमनश्च। श्रेष्ठश्च आमपाचनः मन्दाग्निविषमाग्निबालस्थविरयोषितां देयश्च। राज.३प.।

लाजवर्णा। स्त्री। असाध्यलूताविशेषे। सु.कल्प.८अ.।

लाजश(स)क्तुः। स्त्री। खदिचूर्णे। খৈয়ের ছাতু। शीतवीर्य्या अतः सान्निपातिके न हिता। सि.यो.ज्व.चि.।

लाजाः। पुं बहु। खदिकायां। লাওয়া,খৈ। भृष्टव्रीहिमात्रे। "ये केचिद्व्रीहयो भृष्टास्ते लाजाः।" रा.नि.व.१६। सतुषधान्यानि भृष्टस्फुटितानि लाजानाहुः। भा.। भृष्टधान्येषु। सि.यो.र.पि.चि.सिद्धतमयोगे। च.सू.४अ.छर्द्याम्। गुणाः—"लाजास्तृट्छर्द्यतीसारमेहमेदःकफच्छिदः। कासपित्तोपशमना दीपना लघवो हिमाः॥" राज.३प.।

लाञ्जुलम्। क्ली। धान्ये। वै.निघ.।

लाञ्छनम्। क्ली। रागिनामलवणधान्ये। रा.नि.व.१६। तन्नामकक्षुद्ररोगे। लक्षणं—"कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम्।" वा.उ.३१अ.। चिह्ने। मे.। [नी]। वै.निघ.।

लाटपत्रः (र्णः)। पुं। त्वचायाम्। দারুচিনি।

लामज्ज(क)म्। क्ली। उशीरभेदे। গন্ধ বেণা। सु.सू.३९अ.। च.द.सि.यो.दाह.चि.। "लामज्जेनाथ शुक्लेन चन्दनेनानुलेपयेत्।" (Andropogon laniger.) The Juncus odoratus. उशीरवत्पीतच्छविलृणविशेषे, सुगन्धवीरणे। हिं लामज्जक। तैं तैलवदिवेरु। अभावे उशीरं देयम्। भा.म.१भ.ज्व.चि.महालाक्षादितैले। "लामज्जकं चन्दनश्च।" च.सू.२५अ। "लामज्जकं यदा न स्यादुशीरं दीयते तदा।" गुणाः—हिमं तिक्तं मधुरं वातपित्तघ्नं तृष्णादाहश्रमसूर्च्छारक्तपित्तज्वरघ्नञ्च। रा.नि.व.१२। "दीर्घमूलं दृढं सूक्ष्ममुत्तमं गन्धसंयुतं। देशे साधारणे जातं लामज्जं भद्रकं भवेत्॥" भैष.।

लालनम्। क्ली। पियालबीजे। वै.निघ.। पुं।

मूषिकविशेषे । तद्दष्टे लालास्रावः हिक्का छर्दिश्च जायते । सु.कल्प.६अ. । वा.उ.३८अ. ।

लालसा । स्त्री । गर्भिणीदोहदे । সাধ । हे.च. ।

लालसीकम् । क्ली । पिच्छिले । श.र. ।

लाला । स्त्री । मुखस्रावे । লাল । रा.नि.व.१८ ।

लालामेहः । पुं । प्रमेहभेदे । लक्षणं—"लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलं । प्रमेहति…… ॥" निदा. ।

लालाविषः । पुं । लूतादौ । हे.च. ।

लालास्रावः । पुं । लालाक्षरणे । লালপড়া । ऊर्णनाभौ । মাকড়শা । हे.च. ।

लालिकः । पुं । महिषे । हे.च. ।

लावः (कः) । पुं । स्वनामख्यातस्थलचरपक्षिविशेषे । বটের পাখী । चिका. । मं लावुगे, लावुकपिट्ट । तन्मांसगुणाः—पथ्यं ग्राहि लघु च । रा.नि.व.७ । "पक्षिणाञ्च महाश्रेष्ठो लावको जाङ्गलात्मकः । संग्राही दीपनः प्रोक्तः कषायी मधुरो लघुः । तथा विपाके मधुरः सन्निपातेऽतिपूजितः ॥" चरि.२१अ. । लवङ्गे । चं.द.वा.व्या. महासुगन्धितैले ।

लावणः (णिकः) । त्रि । लवणसंस्कृते । हे.च. । क्ली । नस्ये । र.सा.सं. । [माचाशितीय अ. ।

लावणिकतैलम् । क्ली । तैलविशेषे । च.सू.

लावण्यम् । क्ली । लवणत्वे । লোণতা । कान्तौ ।

लावण्या । स्त्री । ब्राह्मीक्षुपे । वै.निघ. ।

लावा । स्त्री । लावपक्षिणि । रा.नि.व.१९ ।

लावाचकः । पुं । व्रीहिधान्यभेदे । व्रीहेर्हीनगुणः । सु.सू.४६अ. । [श.र. ।

लावुः (वूः) । पुं, स्त्री । अलाब्वाम् । লাউ ।

लासः । पुं । यूषे । ঝোল । श.च. ।

लासकः । पुं । मयूरे । मे. ।

लास्फोटनी । स्त्री । आस्फोटन्यां । वेधनिकायां । अ.टी.रा. ।

लाह्वा । स्त्री । पेचके । वै.निघ. ।

लाक्षा । स्त्री । (Coccus lacca.) Lac. स्वनामप्रसिद्धरञ्जकद्रव्ये । লাহা, গালা । हिं लाही । मं लाख । कं अरगु । तें लत्तुक, लक्क । च.द.वि.ज्व.चि.षट्कतैले । "लाक्षानिशालोहितयष्टिकाभिः ।" गुणाः—तिक्ता कषाया श्लेष्मपित्तघ्नी विषघ्नी रक्तघ्नी विषमज्वरघ्नी च । रा नि.व.६ । "लाक्षा च नूतना ग्राह्या मृत्तिकादिविवर्ज्जिता ।" भैष. ।

लाक्षातरुः । पुं । पलाशवृक्षे । श.मा. ।

लाक्षादितैलम् । क्ली । बालरोगाधिकारे तैलम् । पाठः—"लाक्षारससमं सिद्धं तैलं मस्तुचतुर्गुणं । रास्नाचन्दनकुष्ठाब्दवाजिगन्धानिशायुगैः । शताह्वादारुयष्ट्याह्वमूर्व्वातिक्ताहरेणुभिः । बालानां ज्वररक्षोघ्नमभ्यङ्गात् बलवर्णकृत् ॥" महालाक्षादितैलं यथा—"लाक्षारसाढ़के प्रस्थं तैलस्य विपचेद्भिषक् । मस्त्वाढ़कसमायुक्तं पिष्ट्वा चात्र समावपेत् । शतपुष्पां हरिद्राञ्च मूर्व्वां कुष्ठं हरेणुकां । कटुकां मधुकं रास्नामश्वगन्धाञ्च दारु च । मुस्तकं चन्दनञ्चैव पृथगक्षसमानकैः । द्रव्यैरेतैस्तु तत्सिद्धम् अभ्यङ्गान्मारुतापहम् । विषमाख्यान् ज्वरान्सर्व्वान्नाशैव प्रशमं नयेत् …… ॥" अत्र दोलायन्त्रविधानात् षड्गुणजलेन लाक्षामेकविंशतिवारान् परिस्राव्य लाक्षारसो ग्राह्यः । कुट्टितलाक्षा ३ श. वारि १८ श. २१ वारान् दोलायन्त्रे परिस्राव्य १६ श. ग्राह्यम् । अथवा लाक्षा ८ श. वारि ६४ श. पक्त्वा शे. १६ श. ग्राह्यम् । तिलतैलं ४ श. लाक्षारसः क्वाथो वा १६ श. दधिमस्तु १६ श. । कल्कार्थे—शलुफा हरिद्रा मूर्व्वामूलं कुष्ठं रेणुकं कटुकी यष्टिमधु रास्ना अश्वगन्धा देवदारु मुस्तं रक्तचन्दनं प्र. २ तो. पाके सिद्धे कर्पूरं शिलारसः नखी प्र. २ तो. तैले मिश्रयेत् । रस.र. ।

लाक्षादिवर्गः । पुं । लाक्षारेवतकुटजाश्वमारकटफलहरिद्राद्वयनिम्बसप्तच्छदमालत्यः त्रायमाणा चेति । सु.सू.३८अ. ।

लाक्षापुष्पा । स्त्री । शतपत्राम्, गुलाब इति ख्यातपुष्पवृक्षे । भा. । [লোধ । अम. ।

लाक्षाप्रसादः । पुं । पट्टिकारोध्रे । श्वेत

लाक्षाप्रसादनः । पुं । रक्तलोध्रे । अम. ।

लाक्षारसः । पुं । लाक्षाजले क्वाथे वा । লাহার রস । सि.यो.यक्ष्म.चि.चन्दनादितैले । तत्साधनविधिः—"षड्गुणेनाम्भसा लाक्षा दोलायन्त्रे पु-

वस्थिता । विसवधा परिस्रावा साधारसमिमं विदुः ॥" प.प्र.२ख. ।

लाक्षावृक्षः । पुं । कोशाम्रवृक्षे । कुलपाइ । रा.नि.व.११ । पलाशवृक्षे । हारा. ।

लिकुचम् । क्ली । चुक्रे । চুকাপালঙ্ । रा.नि.व.७ । चुद्रपणसे । তেলো । वै.निघ. । पुं । लकुचवृक्षे । ডেলো গাছ, মান্দার গাছ । र.मा. । रा.नि.व.९ ।

लिक्षा (ख्या) । स्त्री । केशकीटभेदे । निकि । श.र. । सूर्य्यकिरणान्तर्गतसूक्ष्मरजश्चतुष्टयमाने । प.प्र. ।

लिङ्गम् । क्ली । शिश्ने । रा.नि.व.१८ । चिह्ने । अम. । लक्षणे । रोगव्यापकहेतौ । "संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ।" मा.नि. ।

लिङ्गकः । पुं । कपित्थवृक्षे । श.च. । [व.१ ।

लिङ्गजा । स्त्री । लिङ्गिनीलतायाम् । रा.नि.

लिङ्गनाशः । पुं । लिङ्गम् इन्द्रियशक्तिं दृष्टिं नाशयति । नीलिकाकाचापरनामके नेत्ररोगविशेषे । काचे उपेक्षिते तृतीयं चतुर्थं पटलं वा गते लिङ्गनाशो जायते । তিমির, ঝাপ্সা । ছিঁ নজ্লা । स वातजादिभेदेन षट् । ते च पुनर्वर्णभेदेन षड़िति द्वादशधा । लक्षणं—"स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः । वातेन चापि रूपाणि भ्रमन्तीव च पश्यति । आविलान्यरुणाभानि व्याविद्धानीव मानवः ॥" मा.नि. । "तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः । लिङ्गनाशं मलः कुर्व्वन् छादयेद्दृष्टिमण्डलम् ॥" तत्र वातेन यथा—"स्पष्टारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनां । स लिङ्गनाशः...... ॥" पित्तजे यथा—"भृङ्गनीला निरालोका दृक्स्निग्धा लिङ्गनाशतः ।" कफजे यथा—"लिङ्गनाशे तु लक्ष्यते......... । मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः । बिन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः । उष्णे सङ्कोचमायाति छायायां परिसर्पति । शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा ॥" रक्तजे यथा—"लिङ्गनाशेन तादृग्दृक् निष्प्रभा हतदर्शना ।" सन्निपातजे यथा—"संसर्गे सन्निपातेषु विद्यात्सङ्कीर्णलक्षणान् ।" कफजं विना लिङ्गनाशान् असाध्यान् विदुः । वा.उ.१२ख. ।

लिङ्गरोगः । पुं । उपदंशे । भा. ।

लिङ्गवर्त्तिः
लिङ्गार्शः } क्ली । शुकरोगविशेषे । लक्षणं—"अङ्कुरैरिव सञ्जातैरुपर्य्युपरि संस्थितैः । क्रमेण जायते वर्त्तिः ताम्रचूड़शिखोपमा । मेढ्रसन्धौ नृणां केचित् केचित् सर्व्वाश्रयाः मृताः । रुजादाहार्त्तिबहुलास्तथातोदसमन्विताः । स्त्रीणां पुंसाञ्च जायन्ते ह्युपदंशाः सुदारुणाः ॥" मा.नि. ।

लिङ्गवर्द्धनः । पुं । कपित्थवृक्षे । श.च. ।

लिङ्गवर्द्धिनी । स्त्री । अपामार्गवृक्षे । আপাঙ্ । श.च. । [तायां । रा.नि.व.३ ।

लिङ्गसम्भवा (म्भूता) । स्त्री । लिङ्गिनील-

लिङ्गालिका । स्त्री । क्षुद्रमूषके । हारा. ।

लिङ्गिनी (ङ्गी) । स्त्री । स्वनामख्यातायां लतायां । পঞ্চগুড়িয়া । শিবলিঙ্গিনী । गुणाः—कटुः उष्णा दुर्गन्धा रसायनी च । रा.नि.व.३ ।

लिप्तः । त्रि । विषलिप्ते । বিষগাধা । मे. ।

लिप्तास्यता । स्त्री । मुखस्य श्लेष्मलिप्ततायां । মুখ চট্‌চট্ করা । मा.नि. ।

लिम्पाकः । पुं । (Citrus acida.) जम्बीरवृक्षविशेषे । পাতিলেবুর গাছ । करुणलिम्पाकगुणाः—"करुणं कफवातामदोषघ्नं पित्तकोपनम् ।" राज.३प. ।

लि(ली)क्षा । स्त्री । लिख्यायाम् । নিথি । अम.शर. । परिमाणभेदे, सर्षपषष्टांशे । श.च. ।

लीका । स्त्री । ह्रस्वमूषिकमार्य्यां । ছোট ইন্দুরমারী । वै.निघ. ।

लीलाविलासरसः । पुं । अम्लपित्ताधिकारे रसः । पाठः—"रसो बलिर्व्योम रविश्च लौहं धात्र्यक्षमीरैस्त्रिदिनं विमर्द्य । तदल्पदृष्टं मृदुमार्कवेण सम्मर्द्दयेदस्य च वल्लयुग्मं । हन्त्यम्लपित्तं मधुनावलीढं... ॥" र.सा.सं. । [गाछ । वै.निघ. ।

लुङ्गः । पुं । मातुलुङ्गवृक्षे । ছোলঙ্গ লেবুর

लुङ्गमांसम् । क्ली । मातुलुङ्गमांसे । वै.निघ. ।

लुङ्गाम्लम् । क्ली । मातुलुङ्गाम्ले । र.सा.सं.अम्लवर्गे ।

लुङ्गुष: । पुं । मातुलुङ्गवृक्षे । ছোলঙ্গ লেবুর গাছ । र.मा. । [श.च. ।

लुण्टक: । पुं । शाकविशेषे । নটিয়া শাক ।

लुण्ठनम् । क्ली । लुठने । লোটা । श.र. ।

लुण्ठाक: । पुं । काके । त्रिका. ।

लुण्डिका । स्त्री । लोमादिगोलके । लुटी । "मेषलोमलुण्डिकया ।" भैष. । [वै.निघ. ।

लुब्धक: । पुं । चोरनामगन्धद्रव्ये । গেঁঠেলা ।

लुलाप: (य:) । पुं । महिषे । प.मु. ।

लुलाप(य)कन्द: । पुं । महिषकन्दे । शुक्लाली । रा.नि.व.७ । [नि.व.१९ ।

लुलाप(य)कान्ता । स्त्री । महिष्याम् । रा.

लूता । स्त्री । नाडीव्रणरोगे । रा.नि.व.२० । ऊर्णनाभौ । মাকড়শা । हिं माकड़ी । एषा विषात्मिका भवति कीटेभ्यश्च घोरा । "कीटेभ्यो दारुणतरा लूता: षोड़श ता जगु: ।" निरुक्ति: —"यस्माल्लूनं तृणम्प्राप्ता मुने: प्रस्वेदबिन्दव: । तस्माल्लूता: प्रभाष्यन्ते संख्यया तास्तु षोड़श ॥" सु.कल्प.८अ. । "अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसी: । सहस्ररश्म्यनुचरा वदन्त्यन्ये सहस्रश: । बहुपद्रवरूपा तु लूतैकैव विषात्मिका ॥ रूपाणि नामतस्तस्या दुर्ज्ञेयान्यतिसङ्करात् । कृच्छ्रसाध्या पृथग्दोषैरसाध्या निचयेन सा ॥" दंशलक्षणं —"लूतादंशश्च सर्व्वोऽपि दद्रुमण्डलसन्निभ: । सितोऽसितोऽरुण: पीत: श्यावो वा मृदुरुन्नत: । मध्ये कृष्णोऽथवा श्याव: पर्य्यन्ते जालकावृत: । विसर्पवान् शोफयुतस्तप्यते बहुवेदन: । ज्वराशुपाकी विक्लेदकोथावदरणान्वित: । क्लेदेन यत्स्पृशत्यङ्गं तत्रापि कुरुते व्रणम् । श्वासदंष्ट्राशकृन्मूत्रशुक्रलालानखार्त्तवै: । अष्टाभिरुद्दमत्येषा विषं वक्त्रैर्विशेषत: । लूता नाभेर्दशत्यूर्द्धम् ऊर्द्ध्वं वाधश्च कीटका: ॥" लूतादंश: दिनार्द्धं नैव लक्ष्यते । प्रथमे दिने सूचीव्यधनवत्, द्वितीये उन्नतं पिड़काचितं, तृतीये पुलकरक्तमण्डलातिवेदनारोमकूपस्रावश्च, चतुर्थे महाशोफताप:, पञ्चमे विषकोपजविकार:, षष्ठे मर्म्मव्याप्ति:, सप्तमे च दिने नाश: । चिकित्सा—दंशोद्धारदाहादिकं कार्य्यम् । अगदाश्चात्र पद्मक-मन्दर गन्धमादनादयो हिता: । वा.उ.३७अ. । तदुत्पत्त्यादि—"विश्वामित्रो नृपवर: कदाचिदृषिसत्तमम् । वसिष्ठं कोपयामास गत्वाश्रमपदं किल । कुपितस्य मुनेस्तस्य ललाटात् स्वेदबिन्दव: । अपतन् दर्शनादेवमधस्तात्तीक्ष्णवर्च्चस: । लूने तृणे महर्षीणां धेन्वर्थं सम्भृतेऽपि च । ततो जातास्त्विमे घोरा नानारूपा महाविषा: । अपकाराय वर्त्तन्ते नृपसाधनवाहने । कृच्छ्रसाध्यास्तथासाध्या लूतास्तु द्विविधा: स्मृता: । तासामष्टौ कृच्छ्रसाध्या वर्ज्यास्तावत्य एव तु । त्रिमण्डला तथा श्वेता कपिला पीतिका तथा । आलमूत्रविषा रक्ता कसना चाष्टमी स्मृता । ताभिर्दष्टे शिरोदु:खं कण्डूर्दंशे च वेदना । भवन्ति च विशेषेण गदा: श्लैष्मिकवातिका: । सौवर्णिका लाजवर्णा जालिनी एणीपदी तथा । कृष्णाग्निवर्णा काकाण्डा मालागुणाष्टमी स्मृता: । ताभिर्दष्टे दंशकोथ: प्रवृत्ति: क्षतजस्य च । ज्वरो दाहोऽतिसारश्च गदा: स्युश्च त्रिदोषजा: । पिड़का विविधाकारा मण्डलानि महान्ति च । शोफा महान्तो मृदव: रक्ता: श्यावाश्चलास्तथा ॥" सु.कल्प.८अ. । [व.४ ।

लूतारि: । पुं । दुग्धिकायां । থিরুই । रा.नि.

लूतिका । स्त्री । लूतायां । মাকড়শা । श.र. ।

लून: । त्रि । छिन्ने । अम. ।

लूमम् । क्ली । लाङ्गूले । अम. ।

लूमविष: । पुं । पुच्छदंशकप्राणिमात्रे, वृश्चिकादौ । हे.च. ।

लेख: । पुं । तालवृचे । प.मु. ।

लेखनम् । क्ली । काशीषे । হিরেকস্ । लेखनौषधे अनिलानलभूयिष्ठे द्रव्ये । सु. । भूर्ज्जत्वचि । तालपत्रे । मे. । ईषच्चर्म्मदारणे । तन्नामकाञ्जने । "लेखनञ्चारतीक्ष्णाम्लरसैरञ्जनमुच्यते ।" तोड़. । भा. । पुं । काशतृणे । কেশে । रा.नि.व.८ । तन्नामकनिरूहवस्तौ । "त्रिफलाक्काथगोमूत्रक्षौद्रक्षारसमायुता: । ऊषकादिप्रतीवापैर्वस्तयो लेखना: स्मृता: ॥" भा. । त्रि । वान्तिकरे । मे. ।

लेखनाञ्जनम् । क्ली । कषायाम्लकटुद्रव्यैरञ्जने । च.द. ।

लेखनात्मकम् । क्ली । कतकबीजे । वै.निघ. ।

लेखनी । स्त्री । खटिकायां । থড়িমাটী ।

कामदुघे । वै.निघ.। वर्त्तिविशेषे, चन्द्रोदयवर्त्तौ । शङ्खनाभिमनःशिलापथ्याबिभीतकमज्जापिप्पलीमरिचवचाकुष्ठखेति द्रवैः क्षामदुग्धेन वर्त्तिः । सा.कौ.।

लेखनीयवर्गः । पुं । चरकोक्ततृतीयदशके । यथा—“मुस्तकुष्ठहरिद्रादारुहरिद्रावचातिविषाकटुरोहिणीचित्रकचिरविल्वहैमवत्यः ।” इति दशेमानि लेखनीयानि भवन्ति । चिरविल्वः करञ्जः । हैमवती शुक्लवचा । च.सू.४अ. । [भा. ।

लेख(ख्य)पत्रः । पुं । तालवृक्षे । भूर्ज्जवृक्षे ।

लेखशा(सा)टः (कः) । पुं । शेलुवृक्षे । वै.निघ. ।

लेखार्हः । पुं । तालवृक्षभेदे, श्रीताल इति कोङ्कणे प्रसिद्धे । শ্রীতাল, তেড়েট্। रा.नि.व.९।

लेख्यः । पुं । श्रीतालवृक्षे । रोहिण्यादिरोगे । सु.सू.५अ. । त्रि । लेखनीये, लेखनार्हे ।

लेण्डम् । क्ली । वर्चस्कायां । ন্যাড় । भूरिप्र. ।

लेनीतकः । पुं । चीनरापथिकपाषाणभेदे । सि.यो.छर्द्दि.चि. ।

लेपः (नम्) । पुं, क्ली । सुधायां । চূণ । विश्व. । भोजने । चन्दनादिद्रव्यमर्द्दने । গায়ে লেপা । लेपस्त्रिविधः—दोषघ्नो विषहा वर्ण्यश्चेति । पुनश्च तस्य द्वौ भेदौ आलेपः प्रदेहश्चेति । तयोरालेपः पित्तघ्नः आर्द्रमाहिषचर्म्मवच्छीतलः तनुर्विशोषी च । द्वितीयः वातश्लेष्मघ्नः आर्द्रः घनश्चेति । प्रलेपनिषेधो रात्रौ केवलं व्रणे पथ्यः । शुष्यमाणञ्च तं न धारयेदिति । तदुक्तं—“दोषघ्नो विषहा वर्ण्यो लेपस्त्वेवं त्रिधा मतः । द्वौ तस्य कथितौ भेदौ प्रलेपाख्यप्रदेहकौ ॥ तमसा पिहितो ह्यूष्मा रोमकूपेषु संस्थितः । विना लेपेन निर्य्याति रात्रौ नालेपयेदतः ॥” गुणाः—“सुशीतो लेपसंज्ञः स्यादुष्णः प्रोक्तः प्रदेहकः । प्रलेपः शीतलः प्रोक्तः रक्तपित्तहरः परः ॥ प्रदेहः कफवातघ्नः पाचनः परिकीर्त्तितः । यदार्द्रं माहिषच्चर्म्म तस्योत्सेधेन लेपनं ॥ लोमाभिमुखमादेयौ प्रलेपाख्यप्रदेहकौ । अङ्गुष्ठस्य चतुर्भागो मुखलेपो विधीयते ॥ न रात्रौ लेपनं दद्यात् दत्तं निष्पतितं तथा । न च पर्य्युषितं चापि शुष्यमाणं न धारयेत् । न चापि मुखमालिम्पेत् तेन दोषः प्रसिच्यते ।” सु. । “अपाकि शोथे विषमे गम्भीरे कफवातुना । संयुक्तरक्ते विहितो रात्रौ लेपश्च निश्चितम् ॥ षड्भागाः पैत्तिके स्नेहाः चतुर्भागाश्च वातिके । अष्टभागास्तु कफजे स्नेहमात्राः प्रदापयेत् ॥” डल्लणः । अथ कृष्णात्रेयः । “षोड़शांशं षडंशञ्च चतुर्थांशं प्रदापयेत् । लेपप्रदेहयोः चौद्रं विपरीतं विपेत्तिलम् । विकारतत्त्वप्रकृतिप्रमाणे सैन्धवादिके । उपनाहो मतस्तस्मात् यस्मादुपरि बध्यते ॥ स्नेहाम्ललवणं तत्र व्यक्तं कृत्वा विनिक्षिपेत् । विषदोषहरावाद्यौ तयोरर्थे विधिस्त्वयम् । यस्तु वर्ण्यो न तस्यैषा इति वृद्धपरम्परा ॥” अथ शिरोलेपविधिः—“उक्तानुक्तेषु लेपेषु संवेष्ट्यैरण्डपत्रकैः । कुर्य्याद्रात्रौ दिवास्नानं युक्तिरेषा प्रशस्यते ॥” इति लेपविधिः । चन्दनलेपगुणाः—“चन्दनं शीतलं तिक्तं तृष्णादाहास्रपित्तजित् ।” अगुरुलेपगुणाः—“अगुरु व्रणजित्तिक्तकटूष्णं कफवातजित् ।” कुङ्कुमलेपगुणाः—“कुङ्कुमभेदि वैवर्ण्यकण्डूवातकफापहम् ।” कस्तूरीलेपगुणाः—“कस्तूरी छर्द्दिदौर्गन्ध्यरक्तपित्तज्वरापहा ।” लताकस्तूरीलेपगुणाः—“लताकस्तूरिका हृद्या शीता तिक्तास्यरोगनुत् ।” तेजपत्रलेपगुणाः—“पत्रकङ्कफवातार्शोहृल्लासारोचकापहम् ।” कक्कोलादिलेपगुणाः—“कक्कोलः कटुको हृद्यः सुगन्धिः कफवातजित् ।” शट्यादिलेपगुणाः—“शटी वातकफश्वासकासज्वरविनाशिनी ।” “उशीरं स्वेददौर्गन्ध्यदाहपित्तास्ररोगजित् । रक्तपित्तहरं बल्यं चक्षुष्यं रक्तचन्दनम् । श्रीवासः सरलं पूतिः कुन्दुरुर्ग्रन्थिपर्णिकं । सिह्लकः परमा मांसीदेवदारुमुरानखं । सर्व्वेऽमी परमा लक्ष्मी रक्षोघ्ना ज्वरनाशनाः ॥” राज.२प. । [१२ ।

लेपनः । पुं । सिह्लके । শিলারস । रा.नि.व.

लेलिहः । पुं । कृमौ । पुरीषजकृमिविशेषे । च.वि.७अ. ।

लेलीनः (कः) । पुं । गन्धके । वै.निघ. ।

लेहः (नम्) । पुं, क्ली । आस्वादने । চাটা । रा.नि.व.२० । हे.च. । भोजने । अवलेहे । प.प्र.१ख.। लेहपाकविधिः—“लेहे यत्रास्ति यो भागो निर्द्दिष्टो द्रवकल्कयोः । तत्रापि पादिकः कल्कः द्रवात् कार्य्यो विजानता ॥ तुलाद्रवंत्र जलद्रोणे

द्वीषे द्रवेत्र तु सा मता ॥ देयो गुड़: सिता वापि इति सर्व्वत्र निश्चितम् । अवलेहश्च लेहश्च तस्य मानं पलद्वयम् ॥ सुखमर्थ्यः सुखस्पर्शो गन्धवर्णर-सान्वितः । पीड़ितो भजते स्नेहं लेहः पाकमुपा-गतः ॥" वा. । [हे.च. ।

लेहिनः । पुं । टङ्गणक्षारे । সোহাগার খৈ ।

लेही । स्त्री । कर्णपालीरोगे । निदा. ।

लेह्यम् । क्ली । अष्टविधान्नान्यतमान्ने । रा.नि.व. २० । अमृते । श.मा. । त्रि । लेहनयोग्ये ।

लैङ्गिकी । स्त्री । वमनविरेचनयोः शोधनवि-शेषे । च.द.वमनाधिकारे ।

लैङ्गी । स्त्री । लिङ्गिनीलतायाम् । रा.नि.व.३ ।

लोकः । पुं । प्रसिद्धः, स द्विविधः स्थावरो ज-ङ्गमश्च । "द्विविधात्मक एवाग्नेयः सौम्यश्च पञ्चात्म-को वा" इति । सु.सू.१अ. । [व.५ ।

लोककान्ता । स्त्री । ऋद्धिनामौषधे । रा.नि.

लोकतुषारः । पुं । कर्पूरे । रा.नि.व.१२ ।

लोकनाथः । पुं । पारदे । वै.निघ. ।

लोकसंज्ञा (ज्ञिका) । स्त्री । कन्दगुडूच्यां । रा.नि.व.३ ।

लोकस्कन्दः । पुं । तमालवृक्षे । वै.निघ. ।

लोकहिता । स्त्री । तुल्याञ्जने । कुलत्थायाम् । বনমান্দরা । रा.नि.व.५ ।

लोकेशः । पुं । पारदे । रा.नि.व.१३ ।

लोचकः । पुं । नेत्रकनीनिकायां । कज्जले । कदल्यां । भ्रुवः शिथिलचर्म्मणि । मे. । मांसलड्डु-के । बदरीवृक्षे । नीलवस्त्रे । निर्म्मितौ । त्रिका. । अहिनिर्मोके । श.र. ।

लोचकर्कटः । पुं । लोचमस्तके । अ.टी.स्वा. ।

लोचनम् । क्ली । नेत्रे । रा.नि.व.१८ । जीर-के । वै.निघ. । गवाक्षे । वा.उ.२९अ. ।

लोचनहिता । स्त्री । कुलत्थाञ्जने । रा.नि. व.१३ ।

लोच(भ)ना (नी,या) । स्त्री । महाश्राव-णिकायां । মুণ্ডীরী । रा.नि.व.५ ।

लोचनामयः । पुं । नेत्ररोगे । त्रिका. ।

लोचमर्कटः । पुं । मयूरशिखायाम् । रुद्रज-टा । अ.टी.स्वा. । [मयूरशिखायां । अम. ।

लोचमस्तकः । पुं । अजमोदायां । भा. ।

लोचशिरः । क्ली । अजमोदायां । वै.निघ. ।

लोचिका । स्त्री । लुचीति ख्याते खाद्यद्रव्ये । লুচি । पाकराजेश्वरः । [लः । वै.निघ. ।

लोटा (टिका) । स्त्री । चुक्रायां । চুকাপা-

लोठनम् । क्ली । इतस्ततश्चालने । চালা । লোটা । मा.नि. ।

लोड़ा (णा) । स्त्री । चाङ्गेर्य्याम् । আমরুল শাক । लोणिकाद्वये । ছোট গুনী বড় গুনী শাক । रा.नि.व.५ । क्षुद्रलोणिकायाम् । भा. ।

लोणकम् । क्ली । लवणे । वै.निघ. ।

लोणतृणम् । क्ली । लवणतृणे । रा.नि.व.८ ।

लोणाम्ला । स्त्री । क्षुद्राम्लिकायाम् । খুদে গু-নী । रा.नि.व.५ ।

लोणारम् । क्ली । लवणक्षारे । लोणार खाद इति दाक्षिणात्ये प्रसिद्धम् । লোণার ক্ষার । गु-णाः—अत्युष्णं तीक्ष्णं पित्तवृद्धिकरं वातगुल्मघ्नं शू-लघ्नम् ईषल्लवणञ्च । रा.नि.व.६ ।

लोणिका । स्त्री । लोणीशाके । খুদে গুনী, বন গুনী । प.मु. । चाङ्गेर्य्यां । আমরুল । भा.पू. २भ. । चुक्रायां । চুকাপালং । वै.निघ. ।

लोणी । स्त्री । (Portulaca quadrifida. Syn. Meridiana or P. Oleracea.) Indian Purslane. पत्रशाकभेदे । বড় বা বন গুনী, ক্ষুদে গুনী । हिं लुनियाशाक वा लुणिया, खुरका । तें पद्दलकुर । बम्. कुर्फा । ता. कोरिलकीरइ । सा द्विधा क्षुद्रा बृहती च । तयोः क्षुद्रा रुक्षा गुरुः वातश्लेष्महरी अर्शोघ्नी दीपनी अम्ला मन्दाग्निहरी च । बृहती अम्ला स-रा उष्णा वातकृत् कफपित्तघ्नी वाग्दोषघ्नी व्रणघ्नी गुल्मघ्नी श्वासकासप्रमेहघ्नी शोथे नेत्ररोगे च हि-ता । भा.पू.१भ.शा.व. ।

लोतः (त्रम्) । पुं, क्ली । लवणे । नेत्रजले । त्रिका. । चिह्ने । उणा. ।

लोधः (ध्रः,कः) । पुं । (Symplocos

racemosa.) स्वनामख्यातवृक्षे । লোধ গাছ, লোধ কাষ্ঠ । हिं लोध । तै तेल्ललोद्दुगचेट्टु । गुर्ज. लोदर । सु.सू.३७अ.लोध्रादिः । च.द.ज्व. चि.लोध्रादिः । "लोध्रोत्पलाम्रतापघ्न ।" स द्विविधः वल्कसामान्यभेदात् । तत्र विशिष्टो वल्करोध्र इति । रा.नि.व.६ । सा. गुणाः—रोध्रद्वयं कषायं शीतलं वातकफास्रघ्नं चक्षुष्यं विषघ्नञ्च । "रोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तनुत् । कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत् ॥" भा.।

लोध्रपुष्पः । पुं । मधूकवृक्षे । মউল গাছ । वै.निघ. । [१भ.धा.व. ।

लोध्रपुष्पकः । पुं । शालिधान्यविशेषे । भा.पू.

लोध्रपुष्पिणी । स्त्री । क्षुद्रधातक्यां । ক্ষুদ্র ধাই ফুল । वै.निघ. ।

लोध्रवलम् । क्ली । तन्नामके चक्रपाणिदत्तस्य कुले । त्रि.(स्त्री) । तत्कुलसम्भूते । च.द. ।

लोध्रवृक्षः । पुं । मधूकवृक्षे । रोध्रवृक्षे । वै. निघ. ।

लोध्रादिः । पुं । पित्तज्वरघ्नकषाये । च.द.पि. ज्व.चि । "लोध्रोत्पलामृतापद्मसारिवाणां समशर्करः । क्वाथः पित्तज्वरं हन्यात् ।"

लोपाकः । पुं । शृगालभेदे । स लाङ्गूलकशृगालस्तूच्यते । लोमारति लोके । খ্যাঁক্‌শিয়াল । सु. चि.८अ. । अयं विलेशयगणः ।

लोपाकि(शि)का । स्त्री । धूर्त्तशृगालिकायाम् । খ্যাঁক্‌শিয়ালী । श.मा. । हारा. ।

लोपाशकः । पुं । शृगाले । খ্যাঁক্‌শিয়াল । हारा. ।

लोभनम् । क्ली । मांसे । वै.निघ. ।

लोभ्यः । पुं । हरिताले । वै.निघ. । शिम्बीधान्यभेदे, मुद्गे । মুগ । वै.च. ।

लोमम् । क्ली । लाङ्गूले । লেজ । जटा. ।

लोम (न्) । क्ली । केशे । रोम्णि । রোঁওয়া । -श्म. । तदुक्तं—"षष्ट्यो मलानि लोमानि असंख्यानि भवन्ति हि ।" भा. । [नि.व.१२ ।

लोमकरणी । स्त्री । मांसरोहिणीभेदे । रा.

लोमकर्कटी । स्त्री । धन्वमीदायां । वै.निघ.।

लोमकर्णः । पुं । शशके । খরগোষ । वै.च. ।

लोमकूपः । पुं । त्वग्रन्ध्रे । "सन्ति यावन्ति रोमाणि तावन्तो लोमकूपकाः ।" भा. ।

रोमघ्नम् । क्ली । इन्द्रलुप्तरोगे । টাক্‌পোকা । त्रि । लोमपातने । निदा. ।

लोमद्वीपः । पुं । शोणितजकृमिभेदे । রক্তজকৃমি । च.वि.७अ. । [नि.व.११ ।

लोमफलम् । क्ली । भव्यफले । চাল্‌তা । रा.

लोमविध्वंसः । पुं । कृमौ । कृमि । वै.निघ.।

लोमविषः । पुं । व्याघ्रादौ । वै.च. ।

लोमशः । पुं । मध्वालौ । মউ আলু । धातुकाशीषे । "काशीषे तमालपत्रे वा ।" च.द. । मेषे । त्रिका. । लोकड़नामविलेशयमृगे । रा.नि. व.१९ ।

लोमशकर्णः । पुं । शशके । शशक । सु.सू. ४६अ. । [कुड़ गाछ । रा.नि.व.७ ।

लोमशकाण्डा । स्त्री । कर्कटिकायां । কাঁ-

लोमशच्छदः । पुं । देवताड़वृक्षे । দেবতাড় । प.मु. । पीतदेवदाल्याम् । त्रिका. ।

लोमशपत्रा (त्रिका) । स्त्री । पीतदेवदाल्याम् । वै.निघ. । [णी । प.मु. ।

लोमशपर्णिनी । स्त्री । माषपर्ण्याम् । माषा-

लोमशपुष्पकः । पुं । शिरीषवृक्षे । रा.नि.व.९।

लोमशमार्जारः । पुं । गन्धमार्जारे । গন্ধগকুল । तन्मुष्कगुणाः—कफवातघ्नः चक्षुष्यः सुगन्धिः वीर्य्यकरः कण्डूकोठघ्नश्च । रा.नि.व.१९ ।

लोमशा । स्त्री । गन्धमांस्यां, सुगन्धजटामांस्यां । গন্ধমাংসী, সুগন্ধ জটামাংসী । रा.नि.व.१२ । वचायाम् । বচ । काकोल्यां । কাঁকুলা । रा.नि. व.२१ । मिष्यां । মউরী । च.सू.३अ. । काकजङ्घायां । शूकशिम्बायां । महामेदायां । मे. । शणपुष्प्यायाम् । एर्व्वारौ । কাঁকুড় গাছ । रा.नि. व.४।७ । अतिबलायां । विश्वः । [दो । तन्त्रम् ।

लोमशातनम् । त्रि । लोमनाशके हरिताला-

लोमशी । स्त्री । कर्कटीविशेषे । वै.निघ. ।

लोमहृत् । पुं । हरिताले । वै.च. ।

लोमा । स्त्री । वचायाम् । वै.निघ. ।

लोमादः । पुं । मलजक्रमिभेदे । च.वि.७ष. ।

लोमालिका । स्त्री। श्रृगालिकायां । আলেস্না । খ্যাঁক্শিয়ালী । त्रिका. ।

लोलजिह्वा । स्त्री । महाबलायाम्। वै.निघ.।

लोला । स्त्री । जिह्वायां । त्रिका. ।

लोलान्धः । पुं । अपस्माररोगे । रा.नि.व.२० ।

लोलिका । स्त्री । हंसीविशेषे । পাতিহাঁস । चाङ्गेर्यां । আমরুল । जटा. ।

लोलिनी । स्त्री । नीलवृक्षायाम् । (विन्दुघृते) ।

लोलिम्बराजः । पुं । वैद्यजीवनग्रन्थकारे ।

लोष्टम् । क्ली,पुं । गुड़े । लोष्टे । ঢেলা । अम.। लोहरजसि । লোহাচূর, মণ্ডুর । रा.नि.व.१४ ।

लोष्टराजः । पुं । रौप्ये । वै.निघ. ।

लोहम् । क्ली, पुं । अगुरुणि । काष्ठागुरुणि । रा.नि.व.१२ । च.सू.३ष. । सि.यो.यक्ष्म.चि. । "लोहामृताभया: ।" भा.पू.१भ.चित्तभमज्ज.चि. । "लोहलामज्जकैलाभि: ।" कांस्यधातौ । কাঁসা । रा.नि.व.१३ । रक्तधातौ । রক্ত । रा.नि.व.१८ । स्वर्णे । मुण्डलौहे । कान्तलौहे । ताम्रे । पित्तले । रौप्ये । शीषके । वङ्गे । अस्त्रे । मे. ।

लोहकण्टकः । पुं । मदनवृक्षे । श.च. ।

लोहकर्षः (कः) । पुं । लौहचुम्बके । চুম্বক-পাথর । भा. ।

लोहकान्तम् । क्ली । कान्तलौहे । ইস্পাৎ । प.मु. । लौहचुम्बके । वै.निघ. ।

लोहकिट्टम् । क्ली । लौहमले । মণ্ডুর । रा. नि.व.१३ । प्रयोगे तत्र पुराणं ग्राह्यम् । सि.यो. वृहदग्निमुखचूर्णे ।

लोहकीटः । पुं । मण्डूरे । वै.निघ. ।

लोहचूर्णम् । क्ली । लौहमले । মণ্ডুর । रा. नि.व.१३ ।

लोहजम् । क्ली । रक्तलौहे । वर्त्तलौहे । लौहमले । মণ্ডুর । रा.नि.व.१३ । कांस्ये । हे.च. ।

लोहद्रावी (द्रन्) । पुं । टङ्गणक्षारे । সোহাগা । रा.नि.व.६ । अम्लवेतसे । प.मु. ।

लोहनिर्यासः । पुं । लौहकिट्टे । মণ্ডুর ।

लोहपञ्चकम् । क्ली । स्वर्णरौप्यताम्रवङ्गशीषेषु, स्वर्णरौप्यताम्रत्रपुकान्तलौहेषु वा ।

लोहपृष्ठः । पुं । कङ्कपक्षिणि । কাঁক পাখী । अम. । च.सू.२७ष. ।

लोहबालः । पुं । शालिधान्यविशेषे । লোহ-বাল ধান । च.सू.२७ष. । [निघ. ।

लोहमलम् । क्ली । लौहकिट्टे । মণ্ডুর । वै.

लोहमारः (कः) । पुं। शाल्मलिशाके । प.मु.। त्रिका. । लौहमर्द्दकद्रव्ये । लौहमर्द्दकद्रव्यवर्गो यथा—"त्रिफला त्रिवृता दन्ती कटुकी तालमूलिका । वृद्धदारकहस्तीरवृषपत्रकचित्रकाः । शृङ्गवेरविडङ्गौ च भल्लभल्लातकौषधम् । दाड़िमस्य च पत्राणि शतपुष्पी पुनर्नवा । कुठारक्रामकौ कन्दः तक्षौ भेकस्य पर्णिका । हस्तिकर्णपलाशश्च कुलिशः केशराजकः । माषः खण्डितकर्णश्च गोजिह्वा लौहमारकः । गिरिशाल्मलकः शीक्रः त्रिफलादिरयं गणः ॥" र.सा.सं. ।

लोहरण्डकः । पुं । मदनवृक्षे । वै.निघ. ।

लोहलः । त्रि । अस्फुटभाषिणि । अम. ।

लोहवरम् । क्ली । स्वर्णे । त्रिका. । [वै.निघ.।

लोहविट् (ष्ठा) । पुं । लौहमले । মণ্ডুর ।

लोहश्लेषणः । पुं । टङ्गणक्षारे । সোহাগা । हे.च. । [रा.नि.व १३ ।

लोहसङ्करम् । क्ली । वर्त्तलौहे, रक्तलौहे ।

लोहसारः । पुं । सारलौहे । वै.निघ. ।

लोहसिंहानम् (निका) । क्ली, स्त्री । लौहकिट्टे । भा. ।

लोहहृत् । पुं । हरिताले । वै.निघ. ।

लोहाख्यम् । क्ली । अगुरुकाष्ठे । र.मा. ।

लोहि । क्ली । शुक्लटङ्गणे । শ্বেত সোহাগা । रा.नि.व.६ । [ड़ि । त्रिका. ।

लोहिका । स्त्री । लौहपात्रविशेषे । লোহাগ-

लोहितम् । क्ली । रक्तचन्दने । रा.नि.व.१२ । सि.यो.षट्कट्वरतैले । पत्राङ्गचन्दने । বকম কাষ্ঠে । लघुकुङ्कुमे । हरिचन्दने । रा.नि.व.१२ । कु-

कुमे । मे. स्वर्णगैरिके । कृष्णागुरुणि । वै.निघ. । पुं । माणिक्ये । পদ্মরাগ । भा. । रक्तपिण्डालौ । লাল আলু । रा.नि.व.७ । रक्तेचौ । रक्तशालौ । रा.नि.व.१४।१६ । पल.ण्डौ । प.मु. । रोहितमत्स्ये । मृगविशेषे । श.र. । मयूरे । श.च. । सर्पे । धरणि. । नदभेदे । मे. । रक्तलशुने । नेत्ररोगभेदे । त्रि । रक्तवर्णे ।

लोहितकम् । क्ली । पित्तलधातौ । পিতল । रा.नि.व.१३ । पुं । माणिक्यभेदे । পদ্মরাগ । हे.च. । शालिधान्यभेदे । सु.सू.४६श. ।

लोहितचन्दनम् । क्ली । रक्तचन्दने । कुङ्कुमे । शम. ।

लोहितपुष्पक: । पुं । दाड़िमवृक्षे । भा. ।

लोहितपुष्पिका (ष्पी) । स्त्री । उष्ट्रकाण्डीपुष्पवृक्षे । वम्. উট্কাটারা । रा.नि.व.१० ।

लोहितमृत्तिका । स्त्री । गैरिकमृत्तिकायां । গেরিমাটী । रक्तमृत्तिकायां । লালমাটী । प.मु. ।

लोहितयष्टिका । स्त्री । मञ्जिष्ठायाम् । सि.यो.च.द.ज्व.चि.षट्कत्वरतैले । "लाक्षानिशालोहितयष्टिकाभि: ।"

लोहितलता । स्त्री । मञ्जिष्ठायाम् । संग्रह: ।

लोहितशालि: । पुं । रक्तशालौ । দাদখানি ধান, রাঙা ধান । रा.नि.व.१६ ।

लोहितशिग्रु: । पुं । रक्तशिग्रौ । লাল সজিনা । वै.निघ. ।

लोहितक्षया । स्त्री । योनिव्यापद्विशेषे । लक्षणं यथा --"वातपित्ताभ्यां क्षीयते रज: । सदाहकार्श्यवैवर्ण्यं यस्यां सा लोहितक्षया ।" वा.उ. ३३श. ।

लोहिता । स्त्री । वराहक्रान्तायाम् । বরাক্রান্তা । श.च. । रक्तपुनर्नवायाम् । रा.नि.व.५ । शिम्बीभेदे । मञ्जिष्ठायाम् । लाक्षायाम् । लज्जालुकायां । वै.निघ. । शरीरे तन्नामिका द्वितीया त्वक् । "या व्रीहे: षोड़शभागप्रमाणा तिलकालकाद्यधिष्ठाना ।" सु.शा.४श. ।

लोहिताङ्ग: । पुं । कम्पिल्लके । কমলাগুঁড়ি । रा.नि.व.१३ ।

लोहितानन: । पुं । नकुले । নেউল । रा.नि.व.१९ । [विशेषे । सु.कल्प.८श. ।

लोहिताभ: । पुं । रक्ताभमहाविषवृश्चिक-

लोहिताय: (यसम्) । क्ली । ताम्रे । তামা । त्रिका. । व्याक. ।

लोहितार्म (न्) । क्ली । शुक्लभागगतनेत्ररोगे । लक्षणं —'यन्मांसं प्रचयमुपैति शुक्लभागे पद्माभं तदुपदिशन्ति लोहितार्म्म ।" सु.उ.४श. ।

लोहितालु: । पुं । रक्तपिण्डालौ । লাল আলু । कौङ्कणे प्रसिद्धे फौण्डालौ । रा.नि.व.७ ।

लोहिताक्षम् । क्ली । तन्नामकसक्थिमर्म्मभेदे । 'ऊर्द्धमधोवङ्क्षणसन्धे: ऊरुमूले ।" सु.शा.६श. । पुं । दर्व्वीकरजातीयसर्पे । सु.कल्प.४श. । कोकिले । श.च. । [ण्यां । सु.चि.११श. ।

लोहितिका । स्त्री । मञ्जिष्ठायां । रामतरु-

लोहितेक्षु: । पुं । रक्तेक्षौ । কাজলি ইক্ষু । रा.नि.व.१४ ।

लोहित्याज: । पुं । तृणधान्यभेदे । লোহিত শ্যাম । गुणा: —श्यामाकवत् । च.सू.२७श. ।

लोहिनी । स्त्री । श्वेतकिणिह्याम् । वै.निघ. ।

लोहोच्छिष्टम् । क्ली । लौहकिट्टे । वै.निघ. ।

लोहोत्तमम् । क्ली । स्वर्णे । हे.च. ।

लोहोत्थम् । क्ली । मण्डूरे । वै.निघ. ।

लौह: । पुं,क्ली । (Ferrum.) Iron. स्वनामख्यातधातौ । লোহা । हिं लोहोया । तें इनुमु । लौहस्य गुणा: —"लौहं तिक्तं सरं शीतं मधुरं तुवरं गुरु । रुच्यं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् । कफं पित्तं गरं शूलं शोथार्श:प्लीहपाण्डुता: । मेदोमेहक्रमीन् कुष्ठं तत्किट्टं तद्वदेव हि ॥"इति । लौहमष्टधा क्रौञ्च(कान्ति)कालिङ्गकलिभद्रवज्रपाण्डिनिरङ्गकान्तभेदेन गुणा: —"सामान्याद्द्विगुण: क्रौञ्च: कालिङ्गोऽष्टगुणस्तत: । कले शतगुणं भद्रं भद्राद्वज्रं सहस्रधा । वज्रात् शतगुणं पाण्डि निरङ्गं दशभिर्गुणै: । तत: कोटिसहस्रैर्वा कान्तलौहं महागुणम् ॥" रस.चि.६श. । दोषा:—"गुरुता दृढ़तोत्क्लेद: कश्मलं दाहकारिता । अश्मदोष: सुदुर्गन्धो दोषा: सप्तायसस्य तु ॥" इति । पर्व-

अशुद्धलौहदोषाः—“षण्ढत्वकुष्ठामयमृत्युदं भवेत् हृद्रोगशूलौ कुरुतेऽश्मरीञ्च । नानारुजानाञ्च तथा प्रकोपं करोति हृल्लासमशुद्धलोहम् ।” तत्सेवने निषेधः । “कुष्माण्डं तिलतैलञ्च माषान्नं राजिकान्तथा । मद्यमम्लरसञ्चापि त्यजेल्लौहस्य सेवकः ॥” लौहशोधनादिपरिभाषा—“शुद्ध्यर्थं त्रिफला लौहात् कर्त्तव्या द्विगुणा सदा । चतुर्गुणं फलात्तोयमर्द्धभागावशेषितम् । एष एव विधिर्नित्यं चालनेऽपि प्रशस्यते । वधार्थं त्रिफला ग्राह्या लौहात्त्रित्यं चतुर्गुणाः । तोयमष्टगुणन्तत्र चतुर्भागावशेषितम् । भानुपाकार्थमिच्छन्ति त्रिफलामयसा समाम् ॥” प.प्र. । लौहमारणम्—“शुद्धं लौहभवं चूर्णं पातालगरुड़ीरसैः । मर्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयम् । पुटत्रयं कुमार्य्याश्च कुठारच्छिन्नकारसैः । पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत् ॥” अन्यच्च—“क्षिपेच्च द्वादशांशेन दरदं तीक्ष्णचूर्णतः । मर्द्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पुटेत् । एवं सप्तपुटैर्मृत्युं लौहचूर्णमवाप्नुयात् ॥” इत्यादि । ‘लौहवत् सप्तधा तप्ता लौहपत्री तलापिना । गोमूत्रे शुद्धिमायाति निषिक्ता स्वविधानतः ॥” सा.कौ. । मृतलौहलक्षणम्—“लौहगूथसमाकारः स्पर्शग्राह्यः प्रतीयते । यदा लौहस्तदा ज्ञेयः सुमृतो वैद्यसत्तमैः ॥” संग्रहः । लौहोत्पत्तिः—“पुरा लोमिनदैत्यानां निहतानां सुरैर्युधि । उत्पन्नानि शरीरेभ्यो लौहानि विविधानि च ॥” भा.पू.१भ.धा.व. । लौहसंस्कारः । स त्रयोदशविधः । शाणिघर्षणम् उद्वर्त्तनम् अम्लभावनम् आतपशोषः निषेकः मारणं दलनं चालनं सूर्य्यपाकः स्थालीपाकः चूर्णनं पुटपाकः पाकनिष्पत्तिश्च । “स्यात् षोड़शगुणं तोयमष्टभागावशेषितम् । अन्यानि यानि वस्तूनि योक्तव्यानि पुटादिषु । तानि लौहसमान्याहुर्जलं प्रागेव कीर्त्तितम् । लभ्यते स्वरसो येषां तेषां क्वाथोऽत्र नेष्यते ॥ त्रिफलाव्यतिरेकेण मतमेतत् पतञ्जलेः । एष एव विधिर्न्नित्यं चालनेऽपि प्रशस्यते ॥ लौहवत् त्रिफला व्योम्नि त्रिफलावत् पयो मतम् । प्राक्कीर्त्तितं जलञ्चात्र मृदुमध्यादिभेदतः ॥ मृदुमध्यकठोरत्वात् क्वाथ्यद्रव्यं त्रिधा मतम् । क्वाथ्यद्रव्यानुसारेण देयं क्वाथ्यं जलं त्रिधा ॥” पतञ्जलिश्चाह सामान्यपरिभाषां लौहमारणार्थम् । “द्विगुणा त्रिफला लौहात् फलात् षोड़शिकं जलम् । अष्टभागावशिष्टन्तु मारणे जलमिष्यते ॥ समा च त्रिफला ग्राह्या जलञ्चाष्टगुणं धा । वधार्थं स्थापयेत्तोयं तस्माद्वै वस्त्रशोधितम् ॥ वधार्थेन समं ग्राह्यं पाकार्थञ्च समं फलम् । अष्टभागावशिष्टञ्च पाकार्थं जलमिष्यते ॥ एवं जलं फलं प्रोक्तं यथासङ्ख्येन योजयेत् ॥” अथ लौहपाकलक्षणमाह । तदुक्तं पतञ्जलिना । “तावल्लौहं पचेद्वैद्यो यावद्धस्तेन गालितम् । समुद्रं जायते वाष्पं न निःसरति सन्धिभिः ॥” अन्यच्च—“अङ्गुलिभ्यां दृढं घृष्टं यदा चूर्णत्वमागतम् । तदा सिद्धं विजानीयाल्लौहं लौहविदां वरः ॥ अञ्जनाभं घनं स्निग्धं श्लक्ष्णमूलमलेपनम् । अक्लिन्नमम्भसि क्षिप्तं सम्यक्पक्वस्य लक्षणम् ॥ मन्दमाहुरधो लौहमलभ्याखिललक्षणम् । अतिपाकेन तज्ज्ञेयं खरमुज्झितलक्षणम् ॥” अमोघतन्त्रे चोक्तं । “पाकास्तु त्रिविधाः प्रोक्ता मृदुमध्यमतीक्ष्णकाः । त्रैविध्यात् सर्व्वधातूनां पित्तानिलकफात्मनाम् ॥ दर्व्वीमाश्लिष्यते यत्तत् स्वैरं स्खलति वा नवा मृदुपाकं विजानीयात् पित्ते तद्वीक्ष्य योजयेत् ॥ सिकतापुञ्जोपमं यत्तु सुषिकेण समान्वितम् । तदयः खरपाकं स्यात् श्लेष्मण्येव प्रकीर्त्तितः ॥ एकैकगुणयोगित्वात् न तदिच्छन्ति तद्विदः । सर्व्वप्रकृतिसेव्यत्वान्मध्यमं बहुपूजितम् । गुड़ादिः प्रविशेद् यत्र तत्र पाकोऽस्य मुद्रया ॥” कान्तलौहे । तीक्ष्णलौहे । रा.नि.व. १३।२२ । मण्डूरे । कांस्ये । अगुरुणि । रा.नि.व. १२ । [व.१३ ।

लौहकान्तकम् । क्ली । कान्तलौहे । रा.नि.

लौहकिट्टम् । क्ली । मण्डूरे । प.मु. ।

लौहजम् । क्ली । वर्त्तलौहे । विदग्धे । रा.नि. व.१२ । मण्डूरे । र.मा. ।

लौहदाहः । पुं । अश्वस्य वायुप्रकोपादौ दग्धलौहशलाकया दाहकरणे । ज.द.१४अ. ।

लौहपत्री । स्त्री । लौहचटकायां । লোহার চটী । सा.कौ.लौहमारणे ।

लौहभाण्डः । पुं । अश्मभाले । হামানদিস্তা । श.च. । क्ली । लौहनिर्म्मितभाण्डे ।

लौहभूः । स्त्री । लौहपात्रविशेषे । श.च. ।

लौहभेकीवीजम् । क्ली । रसजारणवीजभेदे । रस.चि.३अ. ।

लौहमलम् । क्ली । लौहकिट्टे । मण्डूर । रा.नि.व.१३ । सु.सू.३८ष.वयादि. ।

लौहविशुद्धिदः । पुं । टङ्कणक्षारे । সোহাগা । र.सा.सं.टङ्कणशुद्धौ ।

व

वंशः । पुं । (Bambusa arundinacea.) स्वनामख्यातपत्रशाखावृक्षे । বাঁশ । हिं बांस । मं वेलू । तें वेदुरु, वेत्रिमुक, वेदुर्शपि, वेनु । बम्. माक्कय । ता. मन्गिल । स द्विधा सामान्यो रन्ध्रवंशश्च । गुणाः—उभावेव कषायौ ईषत्तिक्तौ शीतलौ मूत्रकृच्छ्रप्रमेहार्शोदाहपित्तास्रघ्नौ च । रन्ध्रवंशस्तु विशेषेण दीपनोऽजीर्णघ्नः रुच्यः पाचनः हृद्यः शूलघ्नश्च । रा.नि.व.७ । तत्करीरगुणाः—"करीरो वंशजो रुच्यः वातपित्तकरः कटुः । सकषायो विदाही च श्लेष्मघ्नः पाकतः कटुः ॥" राज.२प. । सर्ज्जवृक्षे । শাল গাছ । रा.नि.व.९ । इक्षौ । रा.नि.व.१४ । पृष्ठास्थि । পিঠের দাঁড়া । त्रिका. ।

वंशकः । पुं । इक्षुविशेषे । শামশাঁড়া আখ । गुणाः—शीतलः मधुरः स्निग्धः पुष्टिकरः श्लेष्मलः सारकः अविदाही गुरुः वृष्यः बलवर्द्धनश्च । सु.सू. ४५ष. । क्षुद्रमत्स्ये । বাঁশপাতা মাছ । क्ली । अगुरुकाष्ठे । हारा. ।

वंशकञ्जम् । क्ली । कृष्णागुरुकाष्ठे । वै.निघ. ।

वंशकफम् । क्ली । शाल्मलीतूलके, वंशतूलि वा । यद्वातादेव वायुना नीतं नभसि उड्डीयते । हारा. ।

वंशकरीरः । पुं । वंशाङ्कुरे । বাঁশের কোঁড় । गुणाः—"तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः । कषायः कफकृत् स्वादुर्विदाही वातपित्तलः ॥" भा. ।

वंशकर्पूरः (रोचना) । पुं स्त्री । वंशरोचनायाम् । বংশলোচন । रा.नि.व.६ ।

वंशकारः । पुं । गन्धके । वै.निघ. ।

वंशकुटजा । स्त्री । कृष्णकुटजे । वै.निघ. ।

वंशजः । पुं, क्ली । वेणुयवे । বাঁশের চাউল । रा.नि.व.१६ । अगुरुकाष्ठे । स्त्री (जा) । वंशरोचनायाम् । বংশলোচন । श.र. । "वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला । तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः । हरेत्कुष्ठं व्रणम्पाण्डुं कषाया वातकृच्छ्रजित् ॥" भा. । [रा.नि.व.६ ।

वंशतण्डुलः । पुं । वेणुयवे । বাঁশের চাউল ।

वंशतैलम् । क्ली । अर्शोविकारोक्ते तैलम् । "कटुतैलमर्कपिष्टं मूत्रे वंशफलैः शृतम् ।" रस.र. ।

वंशदला । स्त्री । वंशपत्रतृणे । বাঁশপাতাঘাস । रा.नि.व.८ ।

वंशदूर्व्वा । स्त्री । कटुकायाम् । কট্‌কী । शतपर्व्वायाम् । দূর্বাবিশেষ । किंशुकायाम् । रा.नि.व.२२ ।

वंशधान्यम् । क्ली । वेणुयवे । বাঁশের চাউল । तच्च देशभेदाद्बहुविधं । रा.नि.व.१६ ।

वंशनेत्रम् । क्ली । इक्षुमूले । আখের চক্ষু । रा.नि.व.१४ ।

वंशपत्रः । पुं । नले । নল । रा.नि.व.७ ।

वंशपत्रकः । पुं । श्वेतेक्षौ । रा.नि.व.१४ । वंशकमत्स्ये । বাঁশপাতা মাছ । श.मा. । देवनले । वै.निघ. । क्ली । वंशपत्रहरिताले । हे.च. ।

वंशपत्रिका (त्री) । स्त्री । वेणुदले । বাঁশের পাতা । सा.कौ.सर्व्वज्वरहरलौहे । वंशपत्राकारतृणे । বাঁশপাতাঘাস । मं वेलुपत्री । कं विदिरयेले । गुणाः—मधुरा शीतला पित्तघ्नी रक्तदोषहरी रुच्या पशुदुग्धवर्द्धिनी च । रा.नि.व.८ ।

वंशपीतः । पुं । कणगुग्गुलौ । रा.नि.व.१२ ।

वंशपुष्पा । स्त्री । सहदेवायां । रा.नि.व.४ ।

वंशपूरकम्, **वंशमूलम्** } क्ली । इक्षुमूले । रा.नि.व.१४ ।

वंशबीजः । पुं । वेणुयवे । বাঁশের চাউল । रा.नि.व.१६ ।

वंशयवः । पुं । वेणुयवे । বাঁশের চাউল । रा.नि.व.१६ ।

वंशरोचना । स्त्री । The manna of the

bambu. वंशपर्व्वमध्यजातनीलाभधवलपदार्थे। वংশলোচন। तें तवचीरि। गुणाः—रूचा कषाया मधुरा हिमा श्वासकासघ्नी रक्तशुद्धिकरी तापघ्नी पित्तोद्रेकशमनी च। रा.नि.व.६। [निघ.।

वंशवर्द्धिनी। स्त्री। वंशलोचनायाम्। वै.

वंशविदलः। पुं। वंशकृतसन्दंशिकायां। বাঁশের চিম্‌টা। सु.चि.२७अ.।

वंशव्यजनवायुः। पुं। वंशकृततालवृन्तवायौ। বাঁশের পাখার বাতাস। गुणाः—"वंशव्यजनजो वातः रूचोष्णो वातपित्तदः।" राज.२प.।

वंशशर्करा। स्त्री। वंशेक्षुकृतशर्करायां। শাগশাঁড়ার চিনি। गुणाः—चक्षुष्या बल्या सुमधुरा रूचा च। रा.नि.व.१४। वंशरोचनायाम्। रा.नि.व.६।

वंशशलाका। स्त्री। वीरणमूले। বেণার মূল। वंशनिर्म्मितशलाकायां। हे.च.।

वंशचीरी। स्त्री। वंशलोचनायां। रा.नि.व.६।

वंशाङ्कुरः। पुं। वंशकरीरे। বাঁশের কোঁড়। रा.नि.व.७। [वै.निघ.।

वंशाग्रम्। क्ली। वंशाङ्कुरे। বাঁশের কোঁড়।

वंशान्तरः। पुं। नले। নল, খাগড়া। रा.नि.व.८। [क्। सु.चि.१८अ.।

वंशावलेखः। पुं। वंशत्वचि। বাঁশের ত্ব

वंशास्थि। क्ली। मर्कटास्थनि। वै.निघ.।

वंशाह्वः। पुं। वेणुयवे। रा.नि.व.१६।

वंशिकः। पुं,क्ली। कृष्णेचौ। কাজলি ইক্ষু। वै.निघ.। अगुरुकाष्ठे। अम.। स्त्री (का)। पिप्पल्याम्। वै.निघ.।

वंशी। स्त्री। वंशलोचनायां। वै.निघ.२भ.संग्रहणी.चि.जातीफलादिचूर्णे। वंशे। कर्षचतुष्टये। ८तो.। रा.नि.व.२१। [पि.चि.वासाखण्डे।

वंशोद्भवा। स्त्री। वंशरोचनायाम्। वै.निघ.र.

वंश्यम्। क्ली। वंशलोचने। वै.निघ.२भ.चय.चि.सूर्य्यप्रभावट्याम्।

वकः। पुं। अगस्तिवृचे। বকফুলের গাছ। हिं वासना। मं अगस्ता। तें अविसि। ता. अनेति। प्लवजातीयजलचरपचिविशेषे। वक পাখী। तस्य मांसं भचणात् गुरु। रा.नि.व.१७। वातघ्नं स्निग्धं सृष्टमलं वृष्यं रक्तपित्तहरं हिमञ्च। राज.३प.। See प्लवः।

वकचिञ्चिका। स्त्री। मत्स्यविशेषे। हारा.।

वकपुष्पः (ष्पा,ष्पी)। पुं,स्त्री। अगस्तिवृचे। বাসনা ফুলের গাছ। श.र.। क्ली। वकपुष्पे।

वकाचो। स्त्री। वकचिञ्चिकामत्स्ये। हारा.।

वकु(कू)लः। पुं। (Memusops Elegni.) स्वनामख्यातवृचे। বকুল গাছ। हिं वकुल, मौलसरी। तें पोगड़चेट्टु। उत्. वउड़कुड़ि। वम्. वकुलौ। दा. घोलसरी। ता. मोगदम्। गुणाः—शीतलः हृद्यः विषदोषहरः मधुरः कषायः मदाढ्यः हृष्टदश्च। रूच्यं चौराढ्यं सुरभि शीतलं मधुरं स्निग्धकषायं मलसंग्राहि च। इति त्वक्पुष्पगुणाः। रा.नि.व.१०। "वकुलस्तुवरोऽनुष्णः कटुपाकरसो गुरुः। कफपित्तविषश्वित्रक्रमिदन्तगदापहः॥" भा.। "मधुरञ्च कषायञ्च स्निग्धं संग्राहि वाकुलं। स्थिरीकरञ्च दन्तानां विशदं फलमुच्यते॥" सु.सू.४६अ.।

वकुलपुष्पम्। क्ली। वकुलकुसुमे। अम.।

वकुला। स्त्री। कटुकायां। কট্‌কী। रा.नि.व.६।

वकुली। स्त्री। काकोल्यां। কাঁকলা। श.च.।

वकेरुका। स्त्री। वलाकायां। मे.।

वकोटः। पुं। वके। त्रिका.।

वक्कसः। पुं। मद्यविशेषे। अयं जगल एव। गुणाः—"हृद्यः प्रवाहिकाटोपदुर्नामानिलशोफहृत्। वक्कसो हृतसारत्वात् विष्टम्भी वातकोपनः। दीपनः सृष्टविण्मूत्रो विशदोऽल्पमदो गुरुः॥" सु.सू.४५अ.मद्यव.।

वक्त(क)शालिः। पुं। स्वनामख्यातमध्यदेशसम्भूतशालिधान्ये। শালিধান্যবিশেষ, যাহা মধ্যদেশে জন্মে। मं धकोड़धान। गुणाः—लघुः सुखपाककरश्च। रा.नि.व.१६।

वक्त्रम्। क्ली। मुखे। रा.नि.व.१८। तगरमूले। वै.निघ.। तगरपुष्पे। টগর ফুল। रा.नि.व.१०।

वक्त्रकटुता। स्त्री। मुखस्य कटुतायाम्। सुखवैरस्ये। मा.नि.।

वक्रखुरः । पुं । दन्ते । त्रिका. ।
वक्रपट्टः । पुं । चणस्य चणकभोजनपात्रे । তোবড়া । হে.চ. ।
वक्रभेदी (इन्) । पुं । तित्तिरपक्षि । हे.च. ।
वक्रवासः । पुं । नागरङ्गवृक्षे । লেবু গাছ । रा.नि व.११ ।
वक्रशल्या स्त्री । काकादनीलतायाम्, श्वेतगुञ्जायाम् । रा.नि.व.३। रक्तगुञ्जायाम् । वै.निघ.।
वक्रशोधनम् । क्ली । निम्बूफले । লেবু । वै. निघ. । भव्यफले । চালতা । रा.नि.व.११। त्रि । मुखशोधने । [टा. । त्रि । मुखशोधके ।
वक्रशोधी (इन्) । पुं । जम्बीरे । লেবু । ज
वक्राधिवासः । पुं । नागरङ्गवृक्षे । वै.निघ.।
वक्रालुः । पुं । वाराहीकन्दे । वै.निघ. ।
वक्रम् । क्ली । तगरे । তগরপাদুকা । वा.उ. ३७म. । सि.यो.च.द.म.ग्रा.चि. । पर्पटके । ক্ষেৎপাপড়া । रा.नि.व.५ । स्थानं त्यक्त्वा वक्रीभूते अस्थिभङ्गविशेषे । "तत्राभुग्नमविमुक्तास्थि" इति लक्षणम् । सु नि.१५म. । भा. । त्रि । असरले ।
वक्रकण्टः (कः) । पुं । खदिरवृक्षे । খয়ের গাছ । रा.नि.व.८ । बदरवृक्षे । কুল গাছ । रा. नि.व.११ ।
वक्रगः । पुं । सर्पे । वै.निघ. ।
वक्रगुल्फः । पुं । उष्ट्रे । वै.निघ. ।
वक्रग्रीवः । पुं । उष्ट्रे । त्रिका. । [श.र. ।
वक्रचञ्चुः । पुं । शुकपक्षिणि । টেয়া পাখী ।
वक्रतुण्डः । पुं । शुकपक्षिणि । श.र. ।
वक्रदंष्ट्रः । पुं । शूकरे । वै.निघ. ।
वक्रदन्ती । स्त्री । क्षुद्रदन्त्याम् । वै.निघ. ।
वक्रनक्रः । पुं। शुकपक्षिणि । টেয়াপাখী। मे.।
वक्रनासिकः । पुं । पेचके । त्रिका. ।
वक्रपुच्छः । पुं । कुक्कुरे । त्रिका. ।
वक्रपुष्पः । पुं । बकवृक्षे । বকফুলের গাছ । रा.नि.व.१० । पलाशवृक्षे । পলাশ গাছ । वै. निघ. ।

वक्रपुष्पिका । स्त्री । लाङ्गलिकायाम् । বিষলাঙ্গুলিয়া । वै.निघ. ।
वक्रबालधिः / **वक्रलाङ्गूलः** } पुं । कुक्कुरे । हे.च. । रा.नि. व.१९ । त्रि । वक्रपुच्छयुक्ते ।
वक्रवक्त्रः । पुं । शूकरे । श.र. ।
वक्रशल्या । स्त्री । कुटुम्बिनीक्षुपे । रा.नि.व. ५ । कटुतुम्ब्याम् । তিৎলাউ । रक्तलाङ्गलिकायाम् । লাল বিষলাঙ্গুলিয়া । वै.निघ. ।
वक्रा । स्त्री । कर्कटशृङ्ग्याम् । কাঁকড়াশৃঙ্গী । मद.व.३ । सूक्ष्मायाम् । পিড়িং শাক । वै.निघ.।
वक्राग्रम् । क्ली । कवाटवक्रवृक्षे । र.मा. ।
वक्राङ्गः । पुं । हंसे । हे.च.। त्रि । कुटिलाङ्गे ।
वक्री (इन्) । पुं । गर्भविकारजन्यपुरुषभेदे । यथा—"मातुर्व्यवायप्रतिघेन वक्री स्याद्बीजदौर्बल्यतया पितुश्च ।" च.शा.२म. । [का. ।
वङ्कसेनः । पुं । अगस्तिवृक्षे । বক বৃক্ষ । त्रि-
वङ्क्षिः (ङ्क्षीः) ।पुं, क्ली (ङ्क्षि,ङ्क्षी) । पर्शुके, पार्श्वास्थनि । उणा. । हे.च. ।
वङ्क्षिलः । पुं । कण्टके । त्रिका. ।
वङ्गम् । क्ली । शीषधातौ । সীসা । रङ्गधातौ । রাং, টিন্ । रा.नि.व.१३ । वङ्गं द्विविधं खुरकमिश्रभेदेन । यदुक्तं—"श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णसहं हिमम् । मूत्रपत्रकरं कान्तं त्रपुश्रेष्ठमुदाहृतम् । खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते । उत्तमं खुरकं तत्र मिश्रकं त्ववरं मतम् ॥" गुणाः—"वङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन् । निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ॥" भा.पू.१भ.धा.व. । तिक्तं मधुरं भेदि पाण्डुक्रिमिघ्नं वातघ्नं लेखनम् ईषत्पित्तलञ्च। राजः । "त्रपु वङ्गमयसि दृष्टं सयवचारसैन्धवं वङ्गी । अम्भसि पठं गलितमधी मृतममृतं पुनर्मदाम् ॥" अन्यमतं यथा—"वङ्गं सतालमर्कस्य दुग्धैः पिष्टा च तं पुटेत् । शुष्काश्वत्थभवैश्चूर्णैः सप्तधा भस्मतां व्रजेत् ॥" समभागवङ्गतालकम् अर्कक्षीरेण पिष्टा अश्वत्थवल्कचूर्णेन सप्तधा गजपुटे पचेत् । "चुल्ल्यां दृढतरे पात्रे लौहदण्डेन बुद्धिमान् । वङ्गं रुप्यद्वयैश्चूर्णैर्मीषामतियत्नतः । प्रथमं रजनीचूर्णैर्द्वितीये जीर-

कस्य च। तृतीये त्रिफलाचूर्णैः चतुर्थेऽश्वत्थचिञ्चयोः। एवं यामद्वयं मर्द्यं सुतप्तञ्च दृढाग्निना। अनेन जायते भस्म वङ्गस्य नात्र संशयः॥" सा.कौ.। अमृतीकरणं सीसशब्दे द्रष्टव्यम्। पुं। कार्पासे। वार्त्ताकौ। मे.।

वङ्गजम् । क्ली। सिन्दूरे। र.मा.। [श.र.।

वङ्गनः । पुं। वार्त्ताकुवृक्षे। বেগুন গাছ।

वङ्गमलः । पुं, क्ली। शीषधातौ। वै.निघ.।

वङ्गशुल्वजम् । क्ली। कांस्यधातौ। কাঁসা। हे.च.।

वङ्गसद्मम् । क्ली। यशदे। দস্তা। वै.निघ।

वङ्गसेनः (कः) । पुं। वकवृक्षे। বকফুলের গাছ। त्रिका.। रक्तवकवृक्षे। र.मा.। तत्पुष्पगुणाः—"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि। कटुपाकानि तिक्तानि कासक्षयकराणि च॥" राज.२प.। चिकित्सासारसंग्रहकारे।

वङ्गारिः । पुं। हरिताले। हे.च.।

वङ्गावलेहः । पुं। मेहे अवलेहः। "वङ्गभस्म द्विवल्लञ्च लेहयेन्मधुना सह। ततो गुड़समं गन्धं भक्षयेत् कर्षमात्रकम्······॥" रस.चि.।

वङ्गेश्वरः । पुं। मेहघ्नरसविशेषे। अत्र रससिन्दूरं वङ्गभस्मसमभागम्। अन्यः यथा—"रसेन वङ्गं द्विगुणं प्रगृह्य विद्राव्य निःक्षिप्य समुद्रजे तत्। विमर्दयेदम्लजलेन गोलं कृत्वा सुसंवेष्ट्य पुटेत तीव्रम्। ततः क्षिपेत्तत् जलपात्रमध्ये नीरन्तु सन्त्यज्य गृहाण सूतम्॥" मात्रा वल्लमिता। अत्र लवणस्य २० भागाः। रस.चि.। [व.१८।

वङ्क्षणः । पुं। सक्थिसन्धौ। কুচকি। रा.नि.

वङ्क्षणानाहः । पुं। वङ्क्षणयोराकर्षणवत्पीड़ायाम्। भा.म.३भ.।

वचः । पुं। कीरपक्षिणि। টিয়া। मे.।

वचण्डा (ण्डी) । स्त्री। शारिकायाम्। শালিক পাখী। त्रिका.। वर्त्तौ। বাতি। श.र.।

वचनम् । क्ली। शुण्ठ्यां। শুঁট। श.च.।

वचरः । पुं। कुक्कुटे। কুকড়া। मे.।

वचा । स्त्री। (Acorus calamus.) The sweet flag. स्वनामख्यातपण्यद्रव्ये। বচ। हिं वच, घोरवच। तें वड़ज, नञ्जवस। वम्. वेखंडें। ता. वशम्बु। वा.सू.१५अ.शोधनव.,वत्सकादिव.। सु.सू.३८अ.मुस्तादिः। "भारुणवचा।" गुणाः—तीक्ष्णा कटुः उष्णा कफामग्रन्थिशोफघ्नी वातज्वरातिसारघ्नी वान्तिकृत् उन्मादभूतघ्नी च। रा.नि.व.६। "अशुचापि सरागापि ग्रन्थिलापि परा भवेत्। अन्तःशुचित्वमात्रेण वचा कर्म्मणि गर्हिता॥" गोमूत्रे पञ्चपल्लवोदके पक्त्वा पश्चात् सुगन्धजलेन खेदनात् वचा हरिद्रा च शुद्धा भवति। भेष.। लाङ्गलिकायां। বিষলাঙ্গুলিয়া। वै.निघ.।

वचादिवर्गः । पुं। वचामुस्तदेवदारुशुण्ठ्यातिविषासु। "वचाजलददेवाह्वनागरातिविषाभयाः।" गुणाः—आमातीसारघ्नः मेदःकफवातस्तन्यदोषघ्नश्च। वा.सू.३५अ.वचादिव.।

वचाद्यघृतम् । क्ली। गण्डमालाद्यधिकारे घृतम्। पाठः—"वचा शटी हरिद्रे द्वे दावीन्द्रयवमुस्तकम्। पथ्या चातिविषा शुण्ठी सर्व्वं दशपलं पृथक्। चतुर्द्रोणेऽम्भसः पक्त्वा पादशेषे विपाचयेत्। सर्पिःप्रस्थपलोन्मानैः क्वाथ्यद्रव्यैः सुपेषितैः। प्रक्षिप्य त्रिगुणं चौद्रं वशीषचूर्णात् पलानि षट्······॥" रस.र.।

वर्चोग्रहम् (ग्रहः) । क्ली,पुं। श्रवणेन्द्रिये। কাণ। वै.निघ.। रा.नि.व.१८।

वज्रम् । क्ली। महारत्नान्यतमे रत्ने। হীরে। तच्च श्वेतरक्तपीतकृष्णभेदेन चतुर्धा चतुर्जातिकञ्च। तस्य पुंस्त्रीनपुंसकत्वमप्यस्ति। तत्र पुरुषः वृन्ताकफलसम्पूर्णं रेखाबिन्दुशून्यं बृहत्तरञ्च। रेखाबिन्दुमत् षट्कोणञ्च स्त्रीजातिकम्; तथा त्रिकोणं दीर्घं पत्तलञ्च नपुंसकमिति। तत्र पुंवज्रं श्रेष्ठं वेधकं रसबन्धकञ्च, स्त्रीवज्रं देहसिद्ध्यर्थं, नपुंसकं क्रामणे च ज्ञेयम्। विप्रो रसायने चत्रः रोगशमने वैश्यो वादे शूद्रो वयस्तम्भने योज्यः। तथा स्त्री स्त्रियि पुरुषः पुरुषे नपुंसको नपुंसके च योज्यम्। रस.चि.७अ.। गुणाः—षड्रसोपेतं सर्व्वरोगघ्नं सर्व्वपापहरं सुखदं शरीरदार्ढ्यकरं रसायनञ्च। रा.नि.व.१३। अशुद्धस्य दोषाः—"पार्श्वपीड़ां पाण्डुरोगं ह्रासं दाहसन्ततिं। रोगानीकं गुरुत्वञ्च धत्ते वज्रमशोधितम्॥" तच्छोधनम्—"व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचितं। सप्ताहं कोद्रवक्वाथे कौलत्थे विमलं भवेत्॥" र,

ह्वा.सं. । See माणिक्यम् । हीवेरे । वाला । रा.नि.व.१० । काञ्जिके । काँजि । धरणि: । लौह विशेषे । कान्तलौह । पुष्पविशेषे । वज्रपुष्प । श.र. । अस्थिसम्धौ । धाम्ना । मे. । विड्ङ्गे । च-भ्रधाती । भा. । भैष.महालक्ष्मीविलासे ।

वज्र: । पुं । कोकिलाक्षवृक्षे । कुलेथाड़ा । रा.नि.व.४ । सितदर्भे । श्वेत कुश । रा.नि.व.८ । शालवृक्षे । सुहीवृक्षे । मनसा गाछ । भा. ।

वज्रकम् । क्ली । वज्रक्षारे । रा.नि.व.६ ।

वज्रकण्टक: । पुं । सुहीवृक्षे । मनसा गाछ । रा.नि.व.८। कोकिलाक्षवृक्षे । कुलेथाड़ा गाछ। रा.नि.व.४ ।

वज्रकन्द: । पुं । शर्करकन्दालुके । शकरकन्द आलु । र.मा. । तालवृक्षस्य शिरोमज्जायां । तालेर माती । वै.निघ. । (क:) पुं, क्ली । कटुशूरणे । वनशूरणे । गुणा:—कफघ्न: पित्तरक्तकरश्च । वै.निघ. ।

वज्रक्षार: । पुं,क्ली । वज्रक्षारे । वै.निघ. ।

वज्रकाञ्जिकम् । क्ली । प्रसूतिचिकित्साधिकारे औषधम् । पाठ:—"पिप्पलीपिप्पलीमूलं चव्यं शुण्ठी यमानिका । जीरके द्वे हरिद्रे द्वे विड़सौवर्चलं तथा । एतैरेवौषधै: पिष्टैरारनालं विपाचयेत्...... । चीरपाकविधानेन काञ्जिकस्यापि साधनम् ॥" काञ्जिकं ८ प. पानीयं ३२ प. पिप्पल्यादीनां प्रत्येकं ४ मा. काञ्जिकशेष: कार्य: । रस.र. । [निघ. ।

वज्रकारक: । पुं । नखीनामगन्धद्रव्ये । वै.

वज्रगोप: । पुं । इन्द्रगोपकीटे । वै.निघ. ।

वज्रचर्म्म (न्) । पुं । गण्डके । गण्डार । रा.नि.व.१९ ।

वज्रचञ्चु: । पुं । गृध्रपक्षिणि । वै.निघ. ।

वज्रतुण्ड: । पुं । सुहीवृक्षे । मनसा गाछ । गृध्रे । वै.निघ. । मशके । रा.नि.व.१९ ।

वज्रदण्डक: । पुं । सुहीवृक्षे । मनसा गाछ । वै.निघ. ।

वज्रदन्त: । पुं । शूकरे । त्रिका. । मूषिके । श.मा. । अस्थिसंहारे । हाड़भाङ्गा । र.मा. ।

वज्रदशन: । पुं । उन्दूरे । हे.च. ।

वज्रद्रु: (म:) । पुं । सुहीवृक्षे । मनसा गाछ । अम. । श.र. ।

वज्रपाषाणम् । क्ली । दुग्धपाषाणे । फुलथड़ि । बम्. शिरगोला । वै.निघ. ।

वज्रपुष्पम् । क्ली । तिलपुष्पे । तिलफुल । शतपुष्पायाम् । शुल्फा । वै.निघ.। स्त्री (ष्पा) । शताह्वायाम् । शुल्फा । रा.नि.व.४ ।

वज्रबीज: (क:) । पुं । लताकरञ्जे । वै.निघ. । रा.नि.व.६ ।

वज्रभूमिरज: । क्ली। वैक्रान्तमणौ । वै.निघ.।

वज्रभृङ्गी । स्त्री । मधुरतृणविशेषे । गुड़ाखु । गुणा:—कटु: उष्णा श्वासघ्नी हिक्काकम्पकण्ठरोगवातगुल्मपीनसप्लीहकृम्यामशूलोदरघ्नी च। वै.निघ.।

वज्रमण्डूरम् । क्ली । पाण्डुरोगे औषधम् । पाठ:—"पञ्चकोलं समरिचं देवदारु फलत्रिकं । विड़ङ्गमुस्तयुक्ताश्च भागास्त्रिपलसम्मिता: । यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणन्तत: । पक्त्वा चाष्टगुणे तोये घनीभूते तदुद्धरेत् । ततोऽक्षमात्रान् वटकान् पिबेत्तक्रेण तक्रभुक् ॥" रस.र. ।

वज्रमुष्टि: । पुं । आरण्यशूरणकन्दे, शूरणसदृशकन्दभेदे । वै.निघ.२भ.कर्णकज्व.चि.वज्रमुष्ट्यादितैले ।

वज्रमूली । स्त्री । माषपर्ण्याम् । माषाणी । रा.नि.व.३ । [यन्त्र । संग्रह: ।

वज्रमूषा । स्त्री । अन्धमूषायाम् । अन्धमूषा

वज्ररद: । पुं । शूकरे । त्रिका. ।

वज्रलौहकम् । क्ली । कान्तलौहे । वै.निघ. ।

वज्रवल्लरी (वल्ली) । अस्थिसंहारलतायाम् । हाड़जोड़ा, हाड़कु । हारा. । र.सा.सं. । भैष.मुखरो.चि.वकुलाद्यतैले ।

वज्रवृक्ष: । पुं । सुहीवृक्षे । मनसा गाछ । रा.नि.व.८ । सु.सू.३८अ. । [नि.व.१९ ।

वज्रशल्य: । पुं । शल्लकमृगे । शजारु । रा.

वज्रशृङ्खलिका । स्त्री । वज्रास्थनि । कुलेथाड़ा । हिं तालमाखना । कर्ं कोलिस्ता । बम्. विखरा ।

वज्रक्षारम् । क्ली । मालवदेशप्रसिद्धक्षारे । वज्रक्षार इति लोके । बम्. नवसागर । गुणाः—अत्युष्णं तीक्ष्णं क्षाररसं रेचनं गुल्मोदरविष्टम्भशूलघ्नं सरञ्च । रा.नि.व.६ । [च्याम् । গুলঞ্চ । मे. ।

वज्रा । स्त्री । स्नुहीवृक्षे । মনসা গাছ । गुड़-

वज्राख्यम् । क्ली । दुग्धपाषाणे । ফুলখড়ি । पुं । सेहुण्डवृक्षे । মনসা গাছ । सु.चि.६अ. ।

वज्राङ्गकः । पुं । सर्पे । रा.नि.व.१६ । अस्थिसंहारे । হাড়ভাঙ্গা । भा. । स्त्री (ङ्गी) । गवेधुकायाम् । श.च. । [रा.नि.व.१२ ।

वज्राभः । पुं । शुक्लगोदन्तमणौ । दुग्धपाषाणे ।

वज्राभ्रम् । क्ली । अभ्रकविशेषे । लक्षणं यथा —"यदञ्जननिभं चित्रं सद्वह्नौ विकृतिं व्रजेत् । वज्रसंज्ञं हि तद्योज्यमभ्रं सर्व्वत्र नेतरत् ।" रस.चि.४अ. ।

वज्रास्थिः (शृङ्खला) । स्त्री । कोकिलाक्षक्षुपे । কুলেখাড়া । हिं तालमाखना । कों कलिस्ता । रा.नि.व.४ । [कुशी । वै.निघ. ।

वज्राह्विका । स्त्री । कपिकच्छ्वाम् । আলা-

वज्राह्वम् । क्ली । तगरपादुके । वै.निघ. ।

वज्री । स्त्री । स्नुहीभेदे । मे. । वै.निघ.२भ.शीतज्व.चि. । अस्थिसंहारके । वै.निघ. ।

वञ्च(ञ्चु)कः । पुं । शृगाले । अम. ।

वञ्जुलः (द्रुमः) । पुं । पक्षिभेदे । हला. । (Calamus rotong.) वेतसवृक्षे । जलवेतसे । বেত গাছ । रा.नि.व.६ । सु.सू.३८अ. । सु.कल्प.८अ. । वा.सू.१५अ.न्यग्रोधादिः । च.सू.४अ. । स्थलपद्मद्रुमे । श.र. । अशोकवृक्षे । रा.नि.व.१० । तिनिशवृक्षे । अम. । [र.मा. ।

वञ्जुलप्रियः । पुं । वेतसवृक्षे । বেত গাছ ।

वञ्जुला । स्त्री । बहुदुग्धायां गवि । দুধোলা গাই । हे.च. ।

वटः । पुं । (Ficus Bengalensis. Syn. Ficus Indica.) The Benyan tree. स्वनामख्यातच्छायावृक्षे । বট গাছ । हिं बर, बर्गट । मं वट । कं आल । तें मर्रिचेट्टु, मारि, पेड़ि मरि । उत्. वीरु । ता. अल । गुणाः—कषायः मधुरः शीतलः पित्तकफघ्नः ज्वरदाहतृष्णामोहव्रणशोफघ्नश्च । रा.नि.व.११ । गन्धके । भवनवृक्षे । कपर्दके । मे. । माषतण्डुलादिकृतपिष्टकभेदे । वड़ा इति लोके । गुणाः—"......वटी विदाही तृष्णाकृत् ।" राज.२प. ।

वटकः । पुं । वटिकायां । বড়ি । माषाष्टके । ৮ মাষা । कोलमितमाने । ১ তোলা । प.प्र.१ख. । नदीवटे । रा.नि.व.११ ।

वटकाकारः । पुं । पक्षिविशेषे । बम्. कालंवटपक्षी । वै.निघ. । [वै.निघ. ।

वटच्छदः । पुं । श्वेतार्जके । শ্বেত বাবুই ।

वटजटा । स्त्री । वटशुङ्गायां । বটের ঝুরি । सा.कौ.अभ्रमारणे ।

वटपत्रः (कः) । पुं । सितार्जके । শ্বেতপত্র ক্ষুদ্র তুলসী । रा.नि.व.१० ।

वटपत्रा । स्त्री । त्रिपुरमल्लिकायां । र.मा. । वृत्तमल्लिकायां । বৃত্তমল্লিকা । रा.नि.व.१० ।

वटपत्री । स्त्री । पाषाणभेदकविशेषे । বড় পাথরকুচি । मं वड़वती । तें पिंड़ि वल्लचेट्टु । गुणाः—हिमा मेहदद्रुघ्नी बलदा व्रणघ्नी किञ्चिद्दीपनी च । रा.नि.व.५ । "वटपत्री कषायोष्णा योनिमूत्रगदापहा ।" भा.गु.व. ।

वट(ठ)रः । पुं । कुक्कुटे । श.र. । वैद्ये । हे.च. ।

वट(प्र)रोहः । पुं । वटाङ्कुरे । বটের ঝুরি । वै.निघ.२भ.तृष्णा.चि. । च.द.बृहत्खदिरवट्यां ।

वटशुङ्गकम् । क्ली । वटप्ररोहे । বটের ঝুরি । च.द.ज्वरातिसा.चि.कलिङ्गाद्यगुड़िका । "धातकी वटशुङ्गकम् ।"

वटशुङ्गा । स्त्री । वटाङ्कुरे । भा.क्षुद्ररो.चि. ।

वटहा (न्) । पुं । प्रतुदपक्षिविशेषे । च.सू.२७अ. ।

वटाग्रजः । पुं । वटशुङ्गायां । रस.र.बालचि. ।

वटिः । स्त्री । वटके । বড়ি । प.प्र.१ख. । उपजिह्विकायां । ঘুন্টি়, আলজিব । हारा. ।

वटिका (टी) । स्त्री । वटके । গুলি । प.प्र.१ख. । कलायमात्रकृतखाद्यद्रव्ये । বড়ি । गुणाः—कषाया मधुरा शीतला पित्तघ्नी तृष्णादाहश्रम-

वातविषकर्दिघ्नी च । रा.नि.व.१६ । वै.निघ.२ भ.वा.व्या.चि.रसोनपाके । मुद्गवटीगुणा—पथ्या यथा लघुः मुद्गसूपगुणा च । कुष्माण्डवटीगुणाः --रक्तघ्नी लघुश्च । भा. वटीवटे । रा.नि.व.११ । प्रवटके । मद.व.५ ।

वटुः (कः) । पुं । कुटजवृक्षे । শোণা গাছ । बालके । श.र. ।

वट्टलोहकम् । क्ली । वर्त्तलौहे । वम्. पत्तर-सलोह । रा.नि.व.१२ । [वै.निघ. ।

वड़वानलः । पुं । वाराहीकन्दे । सागराग्नौ ।

वड़ा । स्त्री । पिष्टकविशेषे । বড়া । यथा—"कदलिनाथवा तालैर्युक्तं यत्नाखुलं पिष्टं । पिष्टं चूर्णं वटी वड़ा...... ॥" श.च. ।

वड़िशम् (शा) । क्ली,स्त्री । मत्स्यधारणयन्त्रे । বড়শী । अम. । श.र. । पुं । ऋषिविशेषे । च. ।

वण्ठः । पुं । खर्व्वे । বেঁটে । मे. । [मे. ।

वण्ठरः । पुं । नूतनतालाङ्कुरे । कुकुरलाङ्गूले ।

वण्डः । पुं । षण्डपुरुषे । अनावृतमेढ्रे । हे.च. । चि । लाङ्गूलादिरहिते । বেঁটে । मे. ।

वतूः । पुं । नेत्ररोगे । उणा. ।

वत्सम् । क्ली । वक्षसि । अम. । पुष्पकाशीषे । गुणाः—रौक्ष्यशैत्यकषायलघुपाकत्वात् वातकृत् स्तम्भनश्च । पुं । गोवत्से । पुत्रे । वर्षे । त्रिका. । इन्द्रयवे । च.द.कामला.चि.व्योषाद्यघृते ।

वत्सकम् । क्ली । पुष्पकाशीषे । নীল হিরেক-স্ । रा.नि.व.२३। कुटजवल्कले । কুড়চির ছাল । सं.श्वेतवत्सादाचूर्णे । पुं । कुटजवृक्षे । प.मु. । रा.नि.व.९। इन्द्रयवे । सा.कौ.सर्व्वज्वरहरलौहे । च.द.अञ्जनगुड़िकायां । वा.सू.१५अ.वत्सकादिव. । "वत्सकमूर्व्वाभार्गी ।" च.द.भग्नेयुष्कज्व.चि. । "वत्सकाशुभवल्लके ।" निर्गुण्ड्याम् । निशिन्दा । वै.निघ. । [कोषान्तरम् ।

वत्सकण्टकः । पुं । पर्पटके । ক্ষেৎপাবড়া ।

वत्सकफलम् । क्ली । इन्द्रयवे । च.सू.४अ. । च.द.ज्वरातिसा.चि.वत्सकादौ । कटफलमिति केचित् । [नि.व.९ ।

वत्सकबीज(फल)म् । क्ली । इन्द्रयवे । रा.

वत्सनागः (भः) । पुं । (Aconitum ferox.) Indian Aconite. Root of the Aconite ferox brought from Nepál. स्थावरविषभेदे, कन्दविषभेदे । স্থাবর কন্দবিষ, কাঠবিষ, মিঠেবিষ । हिं मिठा । वम्. बचना-ग । ता. वसनवी । गुणाः - अतिमधुरः उष्णः वातकफघ्नः कण्ठरोगसन्निपातघ्नः पित्तसन्तापका-रकश्च । रा.नि.व.६ । सु.कल्प.२अ. । वा.व्या.चि. लघुवातविध्वंसरसे । लक्षणं यथा—"सिन्धुवारस-दृक्पत्री वत्सनाभ्याकृतिस्तथा । किन्तु किञ्चिन्नतो हीनो विशेषोऽयमुदाहृतः ॥" भा.पू.१भ.विषव. ।

वत्सभक्षकः । पुं । ईन्द्रास्यां । ইঁদোড়া, গো-বাগা । वै.निघ. ।

वत्सरः । पुं । द्वादशमासात्मके काले । বছর । अम. । [२१ ।

वत्सरान्तकः । पुं । फाल्गुनमासे । रा.नि.व.

वत्सा । स्त्री । वसायाम् । रा.नि.व.१८ ।

वत्सादनः । पुं । ईन्द्रास्यां । वृके । গোবাগা । रा.नि.व.१९ ।

वत्सादनी । स्त्री । गुड़ूच्याम् । प.मु. । सु.सू. ३९अ.संशोधने । गजपिप्पल्याम् । रा.नि.व.२१ । वनकार्पास्यां । स्वनामख्यातलतायां । गुणाः - म-धुरा पित्तदाहरक्तदोषहरी हृद्या सन्तर्पणी रुच्या विषदोषघ्नी च । रा.नि.व.३ ।

वत्साह्वः (यः) । पुं । कुटजवृक्षे । भैष.उपदं-श.चि. । सु.चि.२८अ. । अत्रि.३स्थान.५६अ. ।

वत्साक्षी । स्त्री । गोडुम्बायाम् । গোমুক । जटा. । [ড়া গাছ । अत्रि. ।

वदङ्गुः । पुं । आम्रशाखोटवृक्षे । আম্শ্যাও-

वदनम् । क्ली । मुखे । रा.नि.व.१८ ।

वदनाम्लता । स्त्री । पित्तज्वरोगे । भा. ।

वदामम् । क्ली । वातामफले । বাদাম । रा. नि.व.११ ।

वदालः (कः) । पुं । मत्स्यविशेषे । বোয়াল মাছ । पाठीनमत्स्ये । চিতল মাছ । त्रिका. ।

वधकः । पुं । व्याधौ । मर्त्यौ । उणा. ।

वधाङ्कम् । क्ली । विषे । वै.निघ. ।

वधूः । स्त्री । स्नुषायां । पिड़िं । रा.नि.व.१२। शठ्यां । शारिवायाम् । मे. । [त्रिका. ।

वधूटशयनम् । क्ली । वातायने । जानाला ।

वनम् । क्ली । जले । रा.नि.व.१४ । रक्ताञ्जने । वै.निघ. । [श्वित् ।

वनकचुः । पुं । कचुविशेषे । बुनो कचु । क-

वनकणा । स्त्री । वनपिप्पल्यां । वै.निघ. ।

वनकण्डूलः । पुं । मधुरशूरणे । वै.निघ. ।

वनकदली । स्त्री । काष्ठकदल्यां । बुनो कला । रा.नि.व.११ । [नि.व.७ ।

वनकन्दः । पुं । श्वेतशूरणे । धरणीकन्दे । रा.

वनकर्कटी । स्त्री । आरण्यकर्कट्यां । वन काँकड़ी । र.मा.सं. ।

वनकर्कोटम् । क्ली । अरण्यकर्कोटिकायाम् । काँक्रोल । भैष.विषाधिकारे ।

वनकर्णिका । स्त्री । सल्लकीवृक्षे । वै.निघ. ।

वनकार्पासी । स्त्री । भारद्वाज्यां । वन कापासी । र.मा. ।

वनकुक्कुटः । पुं । वनताम्रचूड़े । बुनो कुक्ड़ा । तें अड़विकोड़ि । रा.नि.व.१९ ।

वनकुण्डली (इन्) । पुं। वनशूरणे । वै.निघ. २भ.कर्णकज्व.चि. । [निशिन्दा । वै.निघ. ।

वनकेन्द्राणी । स्त्री । श्वेतनिर्गुण्ड्यां । श्वेत

वनकोद्रवः । पुं । वनजकोद्रवधान्ये । बुनो कदो धान । भा. । [कुल गाछ ।

वनकोलिः । स्त्री । वनजबदरीवृक्षे । बुनो

वनगजः । पुं । वन्यकरिणि । बुनो हाती ।

वनगौः । स्त्री । The Gayál, अरण्यभवायां गवि । गवये । रा.नि.व.१९ । [विश्व. ।

वनचन्दनम् । क्ली । अगुरुणि । देवदारुणि ।

वनचन्द्रिका । स्त्री । मल्लिकापुष्पक्षुपे । रा. नि.व.१० ।

वनचम्पकः । पुं । वनजचम्पकवृक्षे । वन चाँपार गाछ, नागेश्वर चाँपा । गुणाः—कटुरुष्णः वातकफघ्नः वर्णकरः चक्षुष्यः व्रणरोपणः अग्निमान्द्यकरश्च । रा.नि.व.१० ।

वनचिचिण्डा । स्त्री । (Tricosanthes Cucumerina.) आरण्यचिचिण्डायां । वन चिचिङ्गा, वन पटोल । हिं जंलि चिचीण्डा । तें अड़विपोटल । [त्रिका. । शूकरे । श.मा. ।

वनच्छागः । पुं । वानरे । आरण्यच्छागले ।

वनजम् । क्ली । पद्मे । मे. । पुं । मुस्तके । मे. । वनबीजपूरके । बुनो लेबु । रा.नि.व.११ । वनजशूरणे । बुनो ओल । रा.नि.व.७ । वनतिलके । वनकुलत्थे । वै.निघ. । स्त्री (जा) । मुद्गपर्ण्याम् । मुगानी । रा.नि.व.३ । अश्वगन्धायाम् । मिश्रेयायाम् । मउरि । वनकार्पासे । निर्गुण्ड्याम् । निशिन्दा । श्वेतकण्टकार्य्याम् । रा.नि.व.४ । वनतुलस्यां । रा.नि.व.१० । वनार्द्रके, आम्रहरिद्रायां । रा.नि.व.६ । वनोपोदिकायाम् । वनपुँई । रा.नि.व.७ ।

वनजताम्रचूड़ः । पुं । वन्यकुक्कुटे ।

वनजमूर्द्धजा । स्त्री । कर्कटशृङ्ग्याम् । काँकड़ा शृङ्गी । वै.निघ. । [निघ. ।

वनजवृत्तिका । स्त्री । ऋक्षमेषशृङ्ग्याम् । वै.

वनजीरः । पुं । वनजातजीरके, कटुजीरके । वन जीरे । मं वनजीरे । कं काजीरगे । गुणाः —पाके कटुकाः क्रमिघ्नाः दीपनाः जीर्णज्वरहरा रुच्याः व्रणहराश्च । सर्व्वजीरकगुणाः । रा.नि. व.६ ।

वनतण्डुली । स्त्री । (Amblogina polygonoides.) तण्डुलीयभेदे । वनतण्डुलीयशाके ।

वनतरुः । पुं । अर्ज्जुनवृक्षे । वै.निघ.२भ.ज्व. चि. । [वृक्षे । वै.निघ. ।

वनतिक्तः । पुं । हरीतक्यां । श.मा. । लोध्र-

वनतिक्तका । स्त्री । पाठायां । उत्पलशाके । गुणाः—तिक्तं शीतलं पाके कटु कफपित्तघ्नञ्च । च.सू.२७अ. ।

वनतिक्ता (क्तिका) । स्त्री । वनतिक्तकायां । पाठायां । आकनादि । र.मा. । अम. ।

वनत्रपुषः (कः) । पुं । आरण्यत्रपुषे । इन्द्रवारुण्यां । वै.निघ. । [दनी । रा.नि.व.१० ।

वनदमनः । पुं । आरण्यदमनकवृक्षे । वन-

वनदीपः । पुं । वनचम्पके । সোণচাঁপা । चम्पकवृक्षे । रा.नि.व.१० । [नि.व.११ ।

वनद्रुः । पुं । चारवृक्षे । পিয়াল গাছ । रा.

वनद्रुमः । पुं । अर्ज्जुनवृक्षे । काष्ठागुरौ । वै.निघ. । [গরু, গবয় । रा.नि.व.१९ ।

वनधेनुः । पुं । अरण्यभवायां गवि । বুনো

वनपलाण्डुः । पुं । (Urginea Indica. Syn. Scilla Indica.) Indian Squill. वनजपलाण्डौ । বন পিঁয়াজ । हिं जंगलिपियाज । तें नक्कुल्लिगड्ड । बम्. राणकान्दा । दा. कन्द । रा.नि.व.७ । [গাছ । जटा. ।

वनपल्लवः । पुं । शोभाञ्जनवृक्षे । সজিনা

वनपिप्पली । स्त्री । वनोद्भवपिप्पल्याम् । বনপিপুল, ছোট পিপুল । मं रानपिपुल । कं काडिपिप्पलि । गुणाः—उष्णा तीक्ष्णा रुच्या दीपनी । "आमा भवेद्गुणाढ्यास्तु शुष्काः स्वल्पगुणाः स्मृताः ।" रा.नि.व.६ । [वै.निघ. ।

वनपीतः । पुं । भूमिजगुग्गुलौ । कणगुग्गुलौ ।

वनपुष्पा । स्त्री । शताह्वायां । रा.नि.व.४ ।

वनपुष्पोत्सवः । पुं । आम्रवृक्षे । वै.निघ. ।

वनपूतिका । स्त्री । आरण्यपूतिकायां । বন পূঁই । गुणाः—कटुतिक्तोष्णा रुच्या च ।

वनपूरः (कः) । पुं । वनबीजपूरके । বুনো লেবু । रा.नि.व.११ ।

वनप्रियम् । क्ली । त्वचि । গুড়ত্বক্ । रा.नि.व.६ । पुं । बिभीतकवृक्षे । शट्याम् । शटी । अम्लरसगे । वै.निघ. । कोकिले । अम. ।

वनब(व)र्व्वरः । पुं । कृष्णार्जके । কৃষ্ণপত্র ক্ষুদ্র তুলসী । रा.नि.व.१० ।

वनब(व)र्व्वरिका । स्त्री । वनजातार्ज्जकजातीयपत्रशाके । বনবাবুই তুলসী । मं पाजवलाभेदु । कं सुगन्धि मजरा । गुणाः—सुगन्धा उष्णा कटुः वमिघ्नी पिशाचभूतघ्नी घ्राणसन्तर्पणी च । रा.नि.व.१० । [नि.व.११ ।

वनबीजः (पूरः) । पुं । वनमातुलुङ्गे । रा.

वनभद्रिका । स्त्री । भद्रबलायां । शब्दकल्पद्रुमः ।

वनभुक् । पुं । ऋषभके । श.च. ।

वनभूषणा । स्त्री । कोकिलायां । वै.निघ. ।

वनमञ्जरी । स्त्री । वननिर्गुण्ड्यां । वै.निघ. ।

वनमल्लिका (ल्ली) । स्त्री । स्वनामख्यातलतायां । सेवतीति लोके । সেউতী ফুলের গাছ । र.मा. । श.र. । [अम. ।

वनमक्षिका । स्त्री । क्षुद्रदंशे । दंशे । ডাঁশ ।

वनमार्जारः । पुं । वनबिडाले । वै.निघ. ।

वनमालिका (लिनी) । स्त्री । आस्फोतायां । হাপরমালী । ज.द. । वनमल्लिकायाम् । শেউতী । वाराहीकन्दे । रा.नि.व.७ ।

वनमुद्गः । पुं । मकुष्ठके । বন মুগ । रा.नि.व.१६ । स्त्री (द्गा) । मुद्गपर्ण्याम् । মুগানী । रा.नि.व.३ । सु.सू.४६अ. । [शृङ्गी । रा.नि.व.६ ।

वनमूर्द्धजा । स्त्री । कर्कटशृङ्ग्याम् । কাঁকড়া-

वनमेथिका । स्त्री । आरण्यमेथिकायाम् । বনমেথি । [नी । रा.नि.व.११ ।

वनमोचा । स्त्री । काष्ठकदलीवृक्षे । বনকদ-

वनयमानी । स्त्री । (Seseli Indicum. Syn. Ligusticum diffusum.) स्वनामख्यातक्षुपे । বন যমান । उत्. विलयमानी । प.मु. । See अजगन्धा ।

वनरम्भा । स्त्री । काष्ठकदल्याम् ।

वनराजः । पुं । अश्मन्तकवृक्षे । আবুটা । मं. आपटा । वै.निघ. । सिंहे । श.मा. ।

वनराट् । पुं । वटवृक्षे । বট গাছ । वै.निघ. ।

वनलक्ष्मीः । स्त्री । कदलीवृक्षे । কলাগাছ । रा.नि.व.११ । [रा.नि.व.८ ।

वनवल्लभा (री) । स्त्री । निःश्रेणिकातृणे ।

वनवाताम्रः । पुं । वाताम्रभेदे । বনবাদাম ।

वनवासः । पुं । मधूकवृक्षे । মউল গাছ । वै.निघ. ।

वनवासकः । पुं । शाल्मलीकन्दे । रा.नि.व.७ ।

वनवासनः । पुं । खट्टासे । খাটাশি । त्रिका. ।

वनवासी (इन्) । पुं । महिषीकन्दे । शाल्मलीकन्दे । वाराहीकन्दे । रा.नि.व.७ । ऋषभके ।

रा.नि.व.५ । मुष्ककवृक्षे । घण्टापारुल । रा.नि.व.११। द्रोणकाके । दीपान्तरखर्जूरीवृक्षे । वै.निघ.।

वनविड़ालः । पुं । वनमार्जारे । वै.निघ. ।

वनविलासिनी । स्त्री । मञ्जुपुष्पीलतायाम् । रा.नि.व.३ । [টাবা লেবু । रा.नि.व.११ ।

वनवीजः (कः) । पुं । वनवीजपूरके । লেবু,

वनवीजपूरकः पुं । वनजातमातुलुङ्गवृक्षे । বুনো লেবুর গাছ, টাবা । मं वनमाहुलिङ्ग । कं कामाधवल । गुणाः—अम्लः कटुरुष्णः रुचिप्रदः वातघ्नः अम्लदोषकृमिनाशकः कफघ्नः श्वासघ्नश्च । रा.नि.व.११ । [व.४ ।

वनवृन्ताकी । स्त्री । महावृहत्याम् । रा.नि.

वनव्रीहिः । पुं । देवधान्ये, नीवारे । উড়িধান । हे.च. ।

वनशिम्बिका । स्त्री । अरण्यशिम्ब्याम् । भैष.शिरोरो.चि.वृहद्दशमूलतैले ।

वनशू(सू)करी । स्त्री । कपिकच्छ्वां । আলাকুশী । रा.नि.व.३ । वनवाराह्यां । বুনো বারাহীকন্দ । रा.नि.व.७ ।

वनशू(सू)रणः । पुं । आरण्यशूरणे । বুনো ওল । गुणाः—रुचिकरः कटुरुष्णः कृमिगुल्मशूलघ्नश्च । रा.नि.व.७ ।

वनशृङ्गाटः (कः) । पुं । गोक्षुरे, क्षुद्रगोक्षुरे । গোখুরী, ছোট গোখুরী । रा.नि.व.४ ।

वनशोभनम् । क्ली । पद्मे । श.च. ।

वनश्वा (न्) । पुं । गन्धमार्जारे । गन्धगकुल । व्याघ्रे । मे. । शृगाले । त्रिका. । [वै.निघ. ।

वनषण्डी । स्त्री । पद्मिन्यां । পদ্মের ঝাড় ।

वनसङ्कटः । पुं । मसूरे । মসূরী । श.च. ।

वनसरोजिनी । स्त्री । वनकार्पास्यां । श.र.।

वनस्थः । पुं । मृगे । श.च.। स्त्री (स्था) । अश्वत्थीवृक्षे । গয়া অশ্বথ । रा.नि.व.११ । अत्यम्लपर्ण्याम् । रा.नि.व.३ । [ব্যাকুড় । वै.निघ. ।

वनस्नेहफला । स्त्री । क्षुद्रवृहत्याम् । क्षुद्र

वनस्पतिः । पुं । विनापुष्पफलद्रुमे । तरुमात्रे । रा.नि.व.२ । नन्दीवृक्षे । वटवृक्षे । रा.नि.व.११।

वनहरिद्रा । स्त्री । (Curcuma aromatica. Syn. Curcuma zedoaria.) Wild Turmeric. स्वनामख्यातहरिद्रायाम् । वन हलुद । हिं जंली हलदी । मं साली । अडिविषका, अरिसिन इति कौङ्कणे प्रसिद्धा । तें कस्तुरिपशुपु, अड़विपसुपु । वम्. रानहलद, कचोरा । ता. कस्तुरिमञ्जल । गुणाः—कटुः रुच्या गौल्या तिक्ता दीपनी च । रा.नि.व.७ ।

वनहासः (कः) । पुं । कुन्दपुष्पवृक्षे । रा.नि.व.१० । काशतृणे । त्रिका. ।

वनाखुः (कः) । पुं । शशके । খরগোষ । मुद्गे । মুগ । त्रिका. । [हे.च. ।

वनाजः । पुं । वनच्छागले । বুনো ছাগল ।

वनाटुः । पुं । नीलमक्षिकायाम् । नील माछि । श.मा. । [व.१० ।

वनादिदमनः । पुं । वन्यदमनके । रा.नि.

वनामलः । पुं । कृष्णपाकफलद्रुमे, करमर्द्दके । श.मा. । [कोषाम्रे । रा.नि.व.११ ।

वनाम्रः । पुं । (Mangifera syluatica.)

वनायुः । पुं । हरिणे । वै.निघ. ।

वनायुजः । पुं । तद्देशोद्भवाश्वे । ज.द. ।

वनारिष्टा । स्त्री । वनहरिद्रायाम् । रा.नि.व.७ ।

वनार्द्रकः (का) । पुं, स्त्री । (Zingiber cassumuna.) वनजार्द्रके । বন আদা । हिं वन आद्रक । तें करपुसुपु । रा.नि.व.७ ।

वनालक्तम् । क्ली । गैरिके । গেরিমাটী । वै.निघ. । [শুঁড়ে । हारा. ।

वनालिका । स्त्री । हस्तिशुण्ड्याम् । হাতি-

वनालुकम् । क्ली । वनालौ । गुणौ—तर्पणं त्रिदोषघ्नञ्च । [जटा. ।

वनाश्रयः । पुं । द्रोणकाके । দাঁড় কাক ।

वनाहिरः । पुं । शूकरे । त्रिका. ।

वनिता । स्त्री । प्रियङ्गौ । र.सा.सं.पूर्णचन्द्ररसे । कस्तूरीमोदके । च.द.यक्ष्म.चि.चन्दनादितैले ।

वनितावल्लभा । स्त्री । प्रियङ्गौ । वै.निघ. ।

वने(न्वे)ज्यः । पुं । बड़रसालाम्रवृक्षे । रा.नि.व.११ । पर्पटके । क्षेत्पापड़ा । वै.निघ. ।

वनेभवा । स्त्री । शाकविशेषे । लोणी शाक । वै.निघ. ।

वनेरुहा । स्त्री । विपर्णीकन्दे । तिलकन्द । वै.निघ. । [पियाल गाछ । प.मु. ।

वनेसर्ज्जः । पुं । असनवृक्षे । असन गाछ,

वनेक्षुद्रा । स्त्री । करञ्जवृक्षे । प.मु. । पानीयामलके । पानि आम्ला । र.मा. ।

वनोत्सवः । पुं । आम्रवृक्षे । वै.निघ. ।

वनोद्भवः (वा) । पुं, स्त्री । वन्यतिले । रा.नि.व.१६ । वनमातुलुङ्गे । टाबा लेबू । शृगालकोल्याम् । शेयाकूल । प.मु. । रा.नि.व.४ । वनशूरणे । वै.निघ । स्त्री (वा) । वनकार्पास्याम् । वन कापासी । र.मा. । काष्ठमल्लिकायाम् । काठमल्लिका । प.मु. । मुद्गपर्ण्याम् । मुगानी । रा.नि.व.३ । वनबीजपूरके । रा.नि.व.११ ।

वनौका:(स्) । स्त्री । अजमोदायां । रांधुनी। शूकशिम्ब्यां । आलकुशी । वै.निघ. । पुं । वानरे । अम. ।

वन्दका । स्त्री । वन्दायाम् । परगाछा । भ. ।

वन्दनम् । क्ली । मुखे । श.च. । वै.निघ. ।

वन्दनी । स्त्री । गोरोचनायाम् । वै.निघ. ।

वन्दनीयः । पुं । पीतभृङ्गराजे । रा.नि.व.४ । स्त्री (या) । गोरोचनायाम् । रा.नि.व.१२ ।

वन्दा (कः) । स्त्री, पुं । (Epidendrum tessellatum &c.) A parasite plant. वृक्षोपरिजातवृक्षे । मान्दड़ा, परगाछा, बाँद्र । हिं तें बन्दा । बम्. वादांगुल । गुणाः—तिक्तशिशिरः कफपित्तशमनः वृष्यः कषायः रसायनः वश्यादिसिद्धिदश्च । रा.नि.व.५। वातहरः । सु.सू.४६अ. । [हड्डचन्द्रः ।

वन्दाका (की) । स्त्री । वन्दायां । मान्दड़ा ।

वन्दारुः । पुं । वन्दाके । परगाछा । वै.निघ. ।

वन्ध्यफला । स्त्री । रक्तकार्पास्यां । लाल कापास । वै.निघ. ।

वन्ध्या । स्त्री । गोरोचनायां । गোরোচনা । भा. । वन्दायां । परगाछा । श.च. ।

वन्यम् । क्ली । कुटन्नटे । वा.सू.१५अ. । शवरचन्दने । रा.नि.व.१२ । कैवर्त्तमुस्तके । च.सू.३अ. । च.द.कुष्ठ.चि. । त्वचि । गुड़त्वक् । रा.नि.व.१२ । पुं । लताशाले । र.मा. । श्वेतशूरणे । वन ওল । वाराहीकन्दे । শুয়ার আলু । रा.नि.व.७ । द्विवनले । नल । रा.नि.व.८ । शङ्खे । शाँक । च.द.मदा.चि. । [वै.निघ. ।

वन्यजा । स्त्री । वनोपोदक्याम् । वन पुँई ।

वन्यजीरकम् । क्ली । वनजकटुजीरके । वनजोरा । वै.निघ. ।

वन्यदमनः । पुं । वनजदमनवृक्षे । वन दना । मं राणदवणा । कं कादवणा । गुणाः—वीर्य्यस्तम्भनः बलदः आमदोषहरश्च । रा.नि.व.१० ।

वन्यधान्यम् । क्ली । नीवारे । उड़ि धान । प.मु. ।

वन्यवृक्षः । पुं । अश्वत्थवृक्षे । वै.निघ. ।

वन्यसहचरी । स्त्री । पीतझिण्ट्याम् । पीत झाँटी । रा.नि.व.१०

वन्या । स्त्री । मुद्गपर्ण्यां । मुगानी । गोपालकर्कट्यां । राखाल काँकुड़ी । गुञ्जायां । कुँच । रा.नि.व.३ । मिश्रेयायां । मउरी । रा.नि.व.४ । मुस्तके । रा.नि.व.६ । गन्धपत्रायाम् । रा.नि.व.१० । पिण्डीखर्ज्जूरे । वनहरिद्रायां । मेथिकायां । মেতি । वै.निघ. । [पुँई । रा.नि.व.७ ।

वन्योपोदकी । स्त्री । वनजोपोदक्यां । वन

वपरः । पुं । केशराजे । केशुत्ते । त्रिका. ।

वपा । स्त्री । मेदोधातौ । रा.नि.व.१८ ।

वपाटिका । स्त्री । अवपाटिकायां । सु.चि.२०अ. । [शा.७अ. ।

वपावहम् । क्ली । मेदस्थानरूपकोष्ठाङ्गे । च.

वपुः । क्ली । शरीरे । रा.नि.व.१८ । [व.१८ ।

वपुःस्रवः । पुं । शरीरस्थरसधातौ । रा.नि.

वपुर्वीर्य्यम् । क्ली । शुक्रधातौ । वै.निघ. ।

वपुषा । स्त्री । हवुषायां । হবুষ ফল । भा. ।

वपुष्टमा । स्त्री । (Hibiscus mutabilis.) स्थलपद्मिन्याम् । স্থলপদ্ম গাছ । जटा. ।

वप्र(विष्टक)म् । क्ली, पुं । शीषधातौ । हे.च.।

वप्रा । स्त्री । मञ्जिष्ठायाम् । रा.नि.व.६ ।

वप्री । स्त्री । वल्मीके । উইঢিপি । हला. ।

वभ्रुः । पुं । मण्डलिसर्पभेदे । सु.कल्प.४अ. ।

वभ्रुधातुः । पुं । सुवर्णगैरिके । স্বর্ণগেরিমাটী । रा.नि.व.१३ ।

वमः (थुः) । पुं । वमिरोगे । रा.नि.व.२० । करिशुण्डाग्रशीकरे । मा.नि. ।

वमनम् । क्ली । वान्तौ, ऊर्द्ध्वमुखेन दोषहरणे । বমি । वमनस्य कालः—पूर्व्वाह्णं, तथा शरद्वसन्तप्रावृट्कालाश्च । तस्य स्थानम्—मन्दाग्न्यादिपीड़ितं गुल्मिनं वमनसात्म्यं धीरचित्तञ्च वामयेत् । तच्च श्लेष्माधिक्यज्वरे श्लेष्मपित्तविशुद्ध्यर्थं कार्य्यम् । हारीतः । वमनार्हस्य सद्योभुक्तस्य सन्तर्पणोत्थे ज्वरे कफज्वरे क्लेशज्वरेषु शस्तम् । च.द. । विषदोष स्तन्यरोग श्लीपदार्व्वुद-विसर्प-कुष्ठ हृद्रोग-मेहाजीर्णभ्रमकास-श्वासादिवन्तः अतिवृद्धगर्भिणीबालकादयश्च न वाम्याः । वमनद्रव्याणि च अग्निवायुगुणभूयिष्ठानि मदनफलादीनि । सु.सू.४१अ. । वमनद्रव्यमात्रामाह—कल्कचूर्णावलेहानां पलत्रयं पलद्वयं पलञ्च यथाक्रममुत्तमादिषु मात्रा । तथा क्वाथपाने नवप्रस्थाः श्रेष्ठाः । षट्प्रस्था मध्यमाः । त्रिप्रस्थाश्च कनीयसी मात्रा । प.प्र.४ख.। वमनीयक्वाथादिमात्रामाह—"नव प्रस्था भवेज्ज्येष्ठा मध्यमा षट् प्रकीर्त्तिता । निःक्वाथस्य त्रयः पञ्च मगधा तु कनीयसी ॥ त्रिपलं श्रेष्ठमाख्यातं द्विपलं मध्यमम्भवेत् । कनीयस्तु पलं विद्यादिति मे निश्चिता मतिः ॥ कल्कचूर्णादिषु सदा यथासंख्यं विनिर्द्दिशेत् । पित्तेन स्यान्मृदुः कोष्ठः क्रूरो वातकफात्मकः ॥" सिद्धसारः । पुं । शणक्षुपे । শণ গাছ । रा.नि.व.४ ।

वमनकल्पः । पुं । वमनार्थं मदनादिनानायोगयोजनविधौ । तत्र मदनकल्प एव शस्तः । सु.सू.४३अ. ।

वमनद्रव्यम् । क्ली । ऊर्द्ध्वगुणभूयिष्ठे अग्निवायुगुणभूयिष्ठे च वान्तिकरद्रव्ये । বমিকর দ্রব্য । तानि चाग्निवायुगुणभूयिष्ठानि अग्निवायू हि लघू लघुत्वाच्च तानि ऊर्द्ध्वमुत्तिष्ठन्ति । तानि यथा—मदनकुटजजीमूतकेक्ष्वाकुधामार्गवकृतवेधनसर्षपविड़ङ्गपिप्पलीकरञ्जप्रपुन्नाड़कोविदारकर्व्वुदारारिष्टाश्वगन्धाविदुलवन्धुजीवकश्वेताशणपुष्पीविम्बीवचामृगेर्वारुचित्राश्चेति ऊर्द्ध्वभागहराणि द्रव्याणि । कोविदारपूर्व्वाणां फलानि कोविदारादीनां मूलानि ময়নাফল, কুড়চিফল, দেয়াতাড়াপুষ্প, তিৎলাউপুষ্প, ঘোষাফল, শ্বেত ঘোষা, শ্বেত সর্ষপ, বিড়ঙ্গ, পিপুল, করঞ্জ, নাগেশ্বর, রক্ত কাঞ্চন, শ্বেত কাঞ্চন, নিম্, অশ্বগন্ধা, বেতস, বান্ধুলি, অপরাজিতা, আতুসী, তেলাকুচা, বচ, রাখালশশা, শ্বেত রাখালশশা প্রভৃতি । सु.सू.३९अ. ।

वमनव्यापत् । स्त्री । वान्त्यसिद्धौ आध्मानादिविकारे । तद्वैद्यातुरनिमित्तं वमनं विरेचनञ्च पञ्चदशधा व्यापद्यते सावशेषौषधत्वं जीर्णौषधत्वं हीनापहृतदोषापहृतत्वं वातशूलमयोगातियोगौ जीवादानमाध्मानं परिकर्त्तिका परिस्रावः प्रवाहिका हृदयोपसर्पणं विबन्ध इति । सु.चि.३४अ. ।

वमनी । स्त्री । जलौकायां । জোঁক । रा.नि.व.१९ ।

वमनीया । स्त्री । मक्षिकायां । মাছি । रा.नि.व.१९ ।

वमिः । स्त्री । वान्तौ । रा.नि.व.२० ।

वम्भः । पुं । वंशे । श.र. ।

वयः (स्) । क्ली । बाल्यादौ । तच्च त्रिविधं बाल्यमध्यवार्द्धक्यानि । तेषूनषोड़शवर्षो बालः । बालश्च त्रिविधः दुग्धाशी दुग्धान्नाशी अन्नभुक् चेति । तत्र एकवर्षो दुग्धाशी, द्विवर्षो दुग्धान्नाशी, तदुत्तरमन्नाशी च । तथा षोड़शसप्तत्योर्मध्ये मध्यमः, मध्यमश्चतुर्द्धा यौवनादि । ततः सप्ततेरुर्द्ध्वं वार्द्धक्यमिति । तत्र धातुरसादिकम् इन्द्रियबलरेतांसि च दिने दिने क्षीणतां यान्ति । भा. । अपिच—"वयश्चतुर्विधं प्रोक्तमुत्तमाधममध्यमं । हीनं चातुर्थिकं प्रोक्तम्···। बालं युवानं वृद्धञ्च मध्यमञ्च तथैव च । चतुर्विधं वयःसम्यक् तत्समासेन वक्ष्यते । पथिश्रान्तं श्रमक्षीणं बालस्त्रीसुकुमारकं । एतेषां मध्यमा संज्ञा प्रोच्यते वैद्यकागमे । आषोड़शाद्भवेद्बालः पञ्चविंशो युवा नरः । मध्यमः सप्ततिर्यावत्परतो

ह्य उच्यते । तथाच सुकुमारखेत्येते मध्यमसंज्ञकाः । वयसः षोड़शाधिकं समयः स्याद्वेन यः । चाविंशतिसमाः प्राप्तो यथा च क्रमदेहवान् । पूर्वं वयस्त्रियः प्राप्ता मध्यमे चाधमं वयः । पञ्चविंशत्समादूर्द्धम् चापञ्चाशद्गतः पुमान् । कर्कशकठोरा वनिता दृश्यते चोत्तमं वयः । पञ्चविंशात्समादूर्द्धं पञ्चाशत् संयुतः समाः । बालो ह्रद्रस्तथा मध्य इत्येतदुत्तमं वयः । पञ्चवर्षा स्मृता बाला मुग्धा च षट्समावधि । द्वादशाब्दं स्मृता बाला मुग्धा स्यात् सप्तमावधि । प्रौढ़ा च नववर्षाच्च प्रगल्भा च चत्वारिंशत्समावधि । चतुर्विंशद्वर्षमूर्द्धं समाचिंशति मध्यमा । पूर्वं वयः स्त्रियः प्राप्ता इत्येतदुत्तमं वयः ॥" अभि. ५ष. । यौवने । मे. । पक्षिणि । अम. ।

वयःसंस्थापनी । स्त्री । ब्राह्म्याम् । ब्रह्मी शाक । वै.निघ. ।

वयस्थः । पुं । आमलकवृक्षे । वै.निघ. ।

वयस्था । स्त्री । इष्टार्त्तवायां स्त्रियि । रा.नि. व.१८ । हरीतक्याम् । प.मु. । भा.पु.१भ. । काकोल्यां, क्षीरकाकोल्यां । दारुहरिद्रायाम् । सोमवल्ल्याम् । সোমলতা । रा.नि.व.२३ । ब्राह्मीशाके । रा.नि.व.५ । च.सू.४अ.संज्ञास्थापने । सि.यो.उन्मा.चि.महापैशाचघृते । आमलक्याम् । रा.नि.व.११ । वै.निघ.उन्मा.चि.सारस्वतघृते । वा.चि.६अ. । गुड़ूच्याम् । रा.नि.व.३ । च.द.उन्मा.चि.महापैशाचघृते । सूक्ष्मैलायाम् । प.मु. । शाल्मलीवृक्षे । हे.च. । अत्यम्लपर्ण्यां । मत्स्याक्ष्यां । युवत्याम् । रा.नि.व.२३ ।

वयस्या । स्त्री । आमलक्याम् । गुड़ूच्याम् । भा. ४भ.नैगमेय.चि. । "वचां वयस्यां जटिलाम् ।" क्षीरकाकोल्याम् । हरीतक्याम् । वै.निघ. ।

वयोवङ्गम् । क्ली । श्रीषधातौ । कश्चित् । रा. नि.व.१ ।

वरम् । क्ली । कुङ्कुमे । रा.नि.व.१२ । आर्द्रके । त्वचि । দারুচিনি । रा.नि.व.६ । सैन्धवलवणे । सुगन्धद्रव्ये । वै.निघ. । पुं । पियालवृक्षे । बकुलवृक्षे । विकङ्कतवृक्षे । हरिद्रावृक्षे । वै.निघ. । गुग्गुलौ । श.र. ।

वरकः । पुं । प्रियङ्गुकनामकधान्ये । চীনাধান, কাংনী ধান । वीजगुणाः—मधुरं रूक्षं कषायं वातपित्तकरं षष्टिकाद्दीनगुणञ्च । रा.नि.व.१६ । च.सू.२७अ । वनमुद्गे । মুগানী । हे.च. । पर्पटके । ক্ষেৎপাবড়া । रा.नि.व.५ । च.वि.८अ. । क्ली । क्षुद्रवदरीफले । मद.व.६ ।

वरकान्ता । स्त्री । चोरीशवृक्षे । प.मु. ।

वरकोद्रवः । पुं । कोविदारवृक्षे । र.मा. ।

वरचन्दनम् । क्ली । कालीयचन्दने । देवदारुणि । मे. ।

वरटः । पुं । हंसे । मे. । वेदिकायाम् । বোলতা । अम. । क्ली । कुन्दपुष्पे । কুঁদফুল । श.र. ।

वरटा (टी) । स्त्री । हंस्याम् । अम. । मे. । कुसुम्भवीजे । भा.पु.१भ.धा.व. । अग्निप्रकृतिकीटभेदे, वरटायाम् । বোলতা । वह्नै । त्रिका. । सु.कल्प.८अ. । [भा.पु.१भ.धा.व. ।

वरट्टिका । स्त्री । कुसुम्भवीजे । योग.र.उ. ।

वरणः । पुं । वरुणवृक्षे । বরুণ গাছ । अम. । उष्ट्रे । हारा. ।

वरणा । स्त्री । (Capharis trifoliata.) तुवर्य्याम् । उहर । नकुल.१३अ. ।

वरण्डः (कः) । पुं । यौवनकण्टके । ब्रण, বয়সফোঁড়া । मे. । श.र. । [धी । मे. ।

वरण्डा । स्त्री । शारिकायाम् । শালিক পা-

वरण्डालुः । पुं । एरण्डवृक्षे । कन्दशाकविशेषे । त्रिका. ।

वरतिक्तः (कः) । पुं । कुटजवृक्षे । কুড়চি গাছ । निम्बवृक्षे । रा.नि.व.९ । पर्पटके । ক্ষেৎপাবড়া । भा.म.१भ.प्रलापकज्व.चि. । रोहितकवृक्षे । রয়না গাছ । प.मु. ।

वरतिक्त(क्ति)का (क्ता) । स्त्री । पाठायां । আকনাদি । रा.नि.व.६ । [श.च. ।

वरत्कारी । स्त्री । रेणुकानामगन्धद्रव्ये । রেণুক ।

वरत्रा । स्त्री । करिवक्षनरज्ज्वाम् । কাছদড়ি । अ.टी.भ. ।

वरत्वचः । पुं । निम्बवृक्षे । নিম্ গাছ । र.मा. ।

वरदा । स्त्री । अश्वगन्धायां । मद.व.१ । सुवर्चलायां । হুড়হুড়ে । रा.नि.व.४ । वाराहीकन्दे । गेंट इति लोके । वै.निघ. । कन्यायां । मे. ।

वरदातुः (रुः) । पुं शाकवृक्षे । শেগুন গাছ । हिं सुँदसद । गुणाः—शिशिरः रक्तपित्तप्रसादनश्च । भा. । [वै.निघ ।

वरदायिनी । स्त्री । सुवर्णलतायां । হুড়হুড়ে ।

वरपर्णाख्यः । पुं । क्षीरकञ्चुकीवृक्षे । ক্ষীরকড়ার । र.मा. । [च. ।

वरम्बरा । स्त्री । पृश्निपर्ण्यां । চাকুলিয়া । श.

वरलः । पुं । वरटे । বোলতা । श.मा. ।

वरलब्धः । पुं । चम्पकवृक्षे । प.मु. । रक्तकाञ्चने, नागकेसरचम्पके । त्रिका. ।

वरला (ली) । स्त्री । हंसाम् । वरटायाम् । বোলতা । त्रिका. । मे. ।

वरवर्णिनी । स्त्री । हरिद्रायां । रा.नि.व.६ । लाक्षायाम् । प्रियङ्गुलतायां । गोरोचनायां । मे. ।

वरवारणः । पुं । जाङ्गलजीवविशेषे । चचि. २०अ. ।

वरवाह्लीकम् । क्ली । श्रेष्ठकुङ्कुमे । च.टी. ।

वरवेलः । पुं । वीरतरौ । स चतुर्विधः श्वेतकृष्णनीलरक्तभेदेन । वै.निघ. । [निघ. ।

वरशीतम् । क्ली । त्वचि । দারুচিনি । वै.

वरश्रेणी । स्त्री । कृष्णमूर्व्वायाम् । वै.निघ. ।

वरचकः । पुं । श्यामाके । वै.निघ. ।

वरा । स्त्री । शणपुष्प्याम् । त्रिफलायां । प.मु. । भा.उ.रतिवल्लभपूगपाके । "त्रिशावीरत्ववारिवारिदवरा ।" वै.निघ.२भ.वा.व्यां.चि.महाराजादौ । वातिङ्गने । বেগুন । पाठायाम् । আকনাদি । ओड्रपुष्पे । জবা ফুল । र.मा. । हरिद्रायां । वन्ध्याकर्कोटक्याम् । मेदे । वाराहीकन्दे । श्वेतापराजितायाम् । सोमराज्यां । वै.निघ. । शतमूल्यां । रा.नि.व.४ । गुडूच्यां । रा.नि.व.३ । मेदायां । ब्राह्म्याम् । ব্রাহ্মী শাক । रा.नि.व.५ । विडङ्गायां । रा.नि.व.६ । रेणुकायां । রেণুক । श.च. ।

वराकः । पुं । पर्पटके । ক্ষেৎপাপড়া । वै. निघ. ।

वराङ्गम् । क्ली । त्वचि । গুড়ত্বক্ । रा.नि.व. ६ । भैष.मु.रो.त्रि. । च.द.अ.च.चि. । पाठायां । আকনাদি । हरिद्रायां । रा.नि.व.६ । मेदायां । रा.नि.व.५ । योनौ । त्रिका. । रस.र.स्त्रीरो.चि. । मस्तके । रा.नि.व.१८ । उपस्थे । कङ्कुष्ठे । वै. निघ. । गुह्ये । अम. ।

वराङ्गः (ङ्गी[इन्]) । पुं । अम्लवेतसे । प.मु. । गजे । त्रिका. । त्रि । श्रेष्ठावयवे । स्त्री (ङ्गी) । हरिद्रायां । नागदन्त्याम् । বড় দন্তী । मञ्जिष्ठायां । रा.नि.व.६ ।

वराङ्गकम् । क्ली । त्वचि । দারুচিনি । अम. ।

वराङ्गदलम् । क्ली । प्रियङ्गुपत्रे । च.चि.३अ. ।

वराङ्गवल्कलम् । क्ली । त्वचि । গুড়ত্বক্ । र.सा.सं.ज्वरान्तकलौहे ।

वराटः (कः) (टी) । पुं, स्त्री । कपर्दके । কড়ি । स श्रेष्ठमध्यकनिष्ठभेदेन त्रिधा । यथा—"सार्द्धनिष्कभवा श्रेष्ठा निष्कभावा च मध्यमा । पादोननिष्कभावा च कनिष्ठा परिकीर्त्तिता । रसवैद्यकनिर्द्दिष्टा सा वराटकसंज्ञका ॥" तच्छुद्धिगुणाः—"वराटी काञ्जिके स्विन्ना यामाच्छुद्धिमवाप्नुयात् । परिणामादिशूलघ्नी चयहा ग्रहणीहरा । कटूष्णा दीपनी वृष्या तिक्ता वातकफापहा ॥" र.सा. सं. । पद्मबीजे । मे. । भैष.स्त्रीरो.चि.सौभाग्यशुण्ठीमोदके । [वै । নাগেশ্বর গাছ । श.मा. ।

वराटकरजाः (स्) । पुं, स्त्री । नागकेशरवृ-

वराटकविषम् । क्ली । तन्नामकलवकारनिर्यासविषे । सु.कल्प.२अ. ।

वराटिका । स्त्री । कपर्दके । ঘেঁচিকড়ি । अ.टी.भ. । "पीताभा ग्रन्थिला पृष्ठे दीर्घवृत्ता वराटिका ।" इति भेदाः । र.सा.सं. । पद्मबीजकोषे । नागकेशरवृक्षे । वै.निघ. । शालूककन्दे । भा. उ.वाजी. । "वराटिका मांसी मिषिः ।"

वराणः । पुं । वरुणवृक्षे । श.र. ।

वरादनम् । क्ली । राजादनफले । পিয়াল ফল । श.च. ।

वरान्नम् । क्ली । भर्जितधान्यद्विदलकृतश्रेष्ठान्ने । यथा—"शमीधान्यस्य भृष्टस्य दालिकृत्वा सुनिस्तुषां । पक्वोदके सुसिद्धा सा वरान्नमिति चक्षते । कुरुते मलसंस्तम्भं सतुषं कुरुते जराम् ॥" द्रव्यगु. ।

वराभिधः । पुं । अम्लवेतसे । रा.नि.व.६ ।

वराम्लः । पुं । करमर्द्दवृक्षे । र.मा. ।

वराङ्गः । पुं, क्ली । अम्लवेतसे । प.मु. ।

वरारकम् । क्ली । हीरके । হীরে । हे.च. ।

वरारोहः । पुं । पक्षिविशेषे । वै.निघ. । अ-वरोहे । विश्व. । स्त्री (हा) । कट्याम् । हे.च. ।

वरार्द्धकम् । क्ली । भागैककुङ्कुमं भागैकचन्दनं भागैकह्रीवेरं वरार्द्धकमुच्यते । "चन्दनं कुङ्कुमं वारि चयमितद्वरार्द्धकम् ।" रा.नि.व.२२ ।

वराल(क)म् । क्ली, पुं । लवङ्गे । अष्टाङ्गसारसंग्रहे । वै.निघ.२भ.वा.व्या.चि. ।

वराशिः (सिः) । पुं । स्थूलवस्त्रे । মোটা কাপড় । श.र. । जटा. । धरणि. । [श.मा. ।

वरासनम् । क्ली । ओड्रपुष्पे । জবা ফুল ।

वरासी स्त्री । मलिनवस्त्रे । श.मा. ।

वराहः । पुं । शूकरे । कृष्णपिण्डारे, कृष्णमदने । र.मा. । मुस्तायां । शिशुमारे । वाराहीकन्दे । रा.नि.व.२३ । मानभेदे । मे. । हीरके । वै.निघ. ।

वराहकः । पुं । हीरके । হীরে । शिशुमारे । শুশুক । वै.निघ. ।

वराहकन्दः । पुं । वाराहीकन्दे । চামর আলু । बम्. डुकरकन्द । रा.नि.व.७ ।

वराहकर्णी । स्त्री । अश्वगन्धायां । रा.नि.व.४ ।

वराहकाली (इन्) । पुं । सूर्य्यमणिपुष्पवृक्षे । সূর্য্যমণি ফুলের গাছ । हारा. । स्त्री (ली) । आदित्यभक्तायाम् । হুড়হুড়িয়া । वै.निघ. ।

वराहक्रान्ता । स्त्री । स्वनामख्यातक्षुपे । বরাক্রান্তা । प.मु. । श.मा. । वाराहीकन्दे । अ.टी.भ. । [দাড় । मा.नि. ।

वराहदंष्ट्रा । स्त्री । क्षुद्ररोगविशेषे । वराह-

वराहनामा (न्) । पुं । वाराहीकन्दे । श.मा. । [सू.२५. ।

वराहनिर्य्यूहः । पुं । वराहमांसरसे । च.

वराहपत्री । स्त्री । अश्वगन्धायां । रा.नि.व.४ ।

वराहपित्तम् । क्ली । शूकरपित्ते । अस्य शोधनं मत्स्यपित्तशब्दे द्रष्टव्यम् । शा.कौ. ।

वराहमांसम् । क्ली । शूकरमांसे । गुणाः—"वराहमांसं गुरु वातहारि वृष्यं बलस्वेदकरं वनीत्यम् । तथाङ्गरु ग्रामवराहमांसं तनोति मेदो बलवीर्य्यवृद्धिम् ॥" रा.नि.व.१७ ।

वराहशिम्बी । स्त्री । शूकरभोज्यशिम्ब्याम् । चि.क्र.क.वन्ध्याप्रतीकारे ।

वराहाङ्गी । स्त्री । क्षुद्रदन्त्याम् । वै.निघ. ।

वराहिका । स्त्री । अश्वगन्धायां । रा.नि.व.४ । कपिकच्छ्वां । আলকুশী । रा.नि.व.३ ।

वराही । स्त्री । वाराहीकन्दे । रा.नि.व.७ । मुस्तायां । रा.नि.व.६ । अश्वगन्धायाम् । कृष्णवटकायाम् । वै.निघ. ।

वरिवस्या । स्त्री । शुश्रूषायाम् । अम. ।

वरिशी । स्त्री । वड़िशे । श.र. ।

वरिषाप्रियः । पुं । चातकपक्षिणि । श.र. ।

वरिष्ठम् । क्ली । ताम्रे । তামা । र.मा. । उशीरे । वै निघ. । मरिचे । मे. । पुं । नागरङ्गवृक्षे । নারাঙ্গা লেবুর গাছ । रा.नि.व.११ । तित्तिरपक्षिणि । তিতির পাখী । मे. । स्त्री (ष्ठा) । हरिद्रायां । वै.निघ. । आदित्यभक्तायाम् । হুড়হুড়ে । रा.नि.व.४ । [सु चि.१८अ. ।

वरिहिष्टम् । क्ली । उशीरे । वालके । বালা ।

वरिहिष्टमूलम् । क्ली । उशीरमूले । सु.चि.१८अ. ।

वरी । स्त्री । शतावर्य्याम् । प.मु. । भा.उ.भै.च. वाजी.कामाग्निसन्दीपनरसे । "ब्राह्मी वरी वानरी ।" लघुशतावर्य्यां । महाशतावर्य्याम् । वै निघ. ।

वरीयसी । स्त्री । शतमूल्याम् । रा.नि व.४ ।

वरुकः । पुं । कुधान्यभेदे । वरके । চীনাধান । सु.सू.४६अ. । गुणाः—कुधान्यवत् ।

वरुणः । पुं । (Crataeva religiosa. Syn. Capparis triforliata.) स्वनामख्याततिक्तशाकवृक्षे । বরুণ গাছ । हिं बिलि । मं वरुण । कं मदवसले । तै उरुमट्टि, माजिचेट्टु, उलिमिरिचेट्टु । बम्. वायवरणा । ता. मरलिङ्गम् । गुणाः—कटुः उष्णः रक्तदोषघ्नः शिरोवातहरः स्निग्ध आग्नेयः विद्रधिवातघ्नश्च । रा.नि.व.९ । तत्पुष्पगुणाः—"पुष्पं वरुणजं ग्राहि पित्तघ्नमामवातजित् ।" राज.१प. । सु.सू.३८अ. । वा.सू.१५

च. । वै.निघ.२भ.वा.व्या.चि.लशुनारायणतैले । जले । मे. ।

वरुणग्रहः । पुं । तन्नामके अपस्मारदुष्टग्रहविशेषे । लक्षणं —"तालुजिह्वे च नेत्रे च हर्षणी मेढ्रमेव च । स्यावं रूपञ्च यस्य स्याद्गात्रगौरवमेव च । तस्य स्वेदपरीतस्य बुद्धिमान् वरुणग्रहैः । कृतं दोषं महाघोरं सर्वाङ्गस्य विनिर्दिशेत् ॥" ज.द ५७अ. ।

वरुणात्मजा । स्त्री । मद्ये । अम. ।

वरुणादिगणः । पुं । तदादिद्रव्यवर्गे । वरुणसहचरद्वयशतावरीदहनमोरटविल्वविषाणिकाद्विबृहतीद्विकरञ्जजयाद्वयबहुलपल्लवदर्भरुजाकरेषु । गुणाः – कफमेदोमन्दाग्निहरः अधोवातशिरःशूलगुल्मान्तर्विद्रधिघ्नश्च । वा.सू.१५अ.। "वरुणादिर्गणो ह्येषः कफमेदोनिवारणः । विनिहन्ति शिरःशूलं गुल्माभ्यन्तरविद्रधीन् ॥" सु.सू.३८अ. । "वरुणार्तगलौ शिग्रुस्तर्कारी मधुशिग्रुकः । मेषशृङ्गी करञ्जौ च बिम्बाग्निमन्थमोरटाः । सैरीयौ वसिरी दर्भौ वरीवसुकचित्रकौ । बिल्वश्चैवाजशृङ्गी च बृहतीद्वयमेव च । वरुणादिर्गणः··· ॥" सु.सू.३८अ. । च. द.अश्मरीचि. ।

वरूथम् । क्ली । चर्मणि । मे. ।

वरेण्यम् । क्ली । कुङ्कुमे । रा.नि.व.१२ ।

वरोटम् । मरुवकपुष्पे । श.मा. ।

वरोत्पलम् । क्ली । श्वेतरक्तपद्मे । वै.निघ. ।

वरोलः । पुं । वरटे । भृङ्गरोले । भीमरुल । त्रिका. । [गाछ । रा.नि.व.११ ।

वरोहशाखी (इन्) । पुं । प्लक्षवृक्षे । पाकुड़

वरौषधी । स्त्री । आदित्यभक्तायाम् । हुड़हुड़िया । ब्राह्मीशाके । वै.निघ. ।

वर्कणा । स्त्री । तरुणच्छाग्याम् । सु.चि.१अ. ।

वर्करः । पुं । पशुजातीयतरुणे । युवा पशु । अम. । छागे । त्रिका. । मेषशावके । अ.टी.भ. ।

वर्गः । पुं । गणे । सु.कल्प.५अ. । [वै.निघ. ।

वर्गचरः । पुं । पाठीनमत्स्ये । चितल माछ ।

वर्च्चः (स्) । क्ली । रूपे । विष्ठायां । तेजसि । मे. ।

वर्च्चस्कः । पुं, क्ली । विष्ठायाम् । अम. ।

वर्च्चस्कीटः । पुं । अग्निप्रकृतिकीटविशेषे । मलकृमौ । विष्ठार कीट । सु.कल्प.८अ. ।

वर्ज्जनम् । क्ली । मारणे । हे.च. ।

वर्णम । क्ली । कुङ्कुमे । हे.च. । स्वर्णे । मे. । र.मा.सं.ज्व.चि.रत्नगिरिरसे । पुं, क्ली । शुक्लादिरङ्गे । रङ् । स बहुविधः श्वेतपाण्डुधूसररक्तपीतहरितरक्तश्योणारुणपाटलश्यावधूम्रपिङ्गलकर्बुरेषु । चामरः । स गर्भस्थस्य षष्ठे मासि भवति । सुखबोधः । अङ्गलेपने । स्वर्णे । मे. । स्वर्णे । अङ्गरागे । हे.च. ।

वर्णकम् । क्ली । हरिताले । रमा. । सुगन्धचूर्णलेपने । अम. । पुं, क्ली । चन्दने । विलेपने । मे. । श.र. । हिङ्गुलादौ । अम.भ. । काचे । अम. ।

वर्णकण्टम् । क्ली । तुत्थे । तूँतिया । वै.निघ. ।

वर्णकृत् । क्ली । पीतवर्णचन्दने । वै.निघ. ।

वर्णदम् । क्ली । कालीयकचन्दने । जटा. ।

वर्णदा (त्री) । स्त्री । हरिद्रायाम् । रा नि. व.६ ।

वर्णपुष्पः (कः) । पुं । राजतरुणीपुष्पवृक्षे । रक्त झाँटी । वम्. रक्तकोरंटा । रा.नि.व.१० ।

वर्णपुष्पी । स्त्री । उष्ट्रकाण्डीपुष्पवृक्षे । रा.नि. व.१० । [णि । रा.नि.व.१२ ।

वर्णप्रसादनम् । क्ली । अगुरुणि । काष्ठागुरु-

वर्णभूः । स्त्री । स्थौणेयके । गैंठेला । वै.निघ. ।

वर्णभेदिनी । स्त्री । सुगन्धप्रियङ्गौ । वै.निघ. ।

वर्णमातृका । स्त्री । वाग्देवतायाम् ।

वर्णमृत्तिका । मृत्तिकाविशेषे । लालमाटी वा आलामाटी । रस.चि.६अ. । [त्रिका. ।

वर्णरे(ले)खा । स्त्री । खटिकायाम् । खड़ि ।

वर्णलेखिका । स्त्री । कठिन्याम् । र.मा. ।

वर्णलोहकम् । क्ली । राजपित्तले । वै.निघ. ।

वर्णवती । स्त्री । हरिद्रायां । जटा. ।

वर्णविलासिनी । स्त्री । हरिद्रायां । वै.निघ. ।

वर्णशाकः । पुं,क्ली । गौरसुवर्णशाके । वै.निघ. ।

वर्णसिः । पुं । जले । उणा. ।

वर्णा । स्त्री । आढ़क्याम् । অড়হর । वै.श. ।

वर्णार्हः । पुं । हरितमुद्गे । হারিমুগ । रा.नि. व.१६ ।

वर्णि । क्ली । स्वर्णे । सिद्धान्तकौमुदी ।

वर्णिका । स्त्री । कठिन्यां খড়ি । तारा. ।

वर्णिनी । स्त्री । हरिद्रायां । रा.नि.व.६ ।

वर्ण्यम् । त्रि । वर्णकरे । क्ली । कुङ्कुमे । वै.निघ.। पुं । श्वेतार्जके । वै.निघ.। वर्णकरमहाकषायगणे । यथा—"चन्दनतुङ्गपद्मकोशीरमधुकमञ्जिष्ठासारि-वापयस्याशितालता इति दशेमानि वर्ण्यानि भवन्ति।" রক্তচন্দন, পুন্নাগ বা বকম, পদ্মকাষ্ঠ, বেণার মূল, যষ্টিমধু, মঞ্জিষ্ঠা, অনন্তমূল, ভূঁইকুমড়া, চিনি, দূর্ব্বা । च.सू.४अ. ।

वर्त्तः । पुं । गन्धके । वै.निघ. ।

वर्त्तकम् । क्ली । वर्त्तलौहे । বিদরী । रा.नि. व.१३ । पुं । पक्षिविशेषे । ভারুই পাখী । हिं बटेरी गुड़गुड़े । योग.र.ज्व.चि. । तन्मांसगुणाः—निर्दोषं वीर्य्यकरं पुष्टिकरञ्च । रा.नि.व.१७ । "वर्त्तको विशदो लघ्वो यथा लावस्तथैव च ।" अत्रि.२१अ. । अश्वखुरे । अम. ।

वर्त्तका । स्त्री । वर्त्तकपक्षिणि । ভারুই, বটের বিশেষ । अ.टी.रा. ।

वर्त्तकी । स्त्री । सप्तलायां । সাতলা । वै.निघ.।

वर्त्ततीक्ष्णम् । क्ली । वृत्तलौहे । বিদ্‌রী । रा.नि.व.१३ ।

वर्त्तनम् । क्ली । परिवर्त्तने । भा.म.१म भग्न. चि. । विहतस्य वर्त्तुलीकरणकर्म्मणि । शल्यकम्पनकर्म्मणि । सु.सू.७अ. । जीवने । मे. । पुं । वामने । मे. । [पेषणे । श.र. ।

वर्त्तनी । स्त्री । तर्कुपीठिकायाम् । त्रिका. ।

वर्त्तलो(लौ)हम् । क्ली । लौहविशेषे, वृत्तलौहे । বিদ্‌রী । वम्. पञ्चरसलौह । गुणाः—कटु तिक्तं शीतलं कफदाहपित्तघ्नं मधुरं पित्तदाहशमनञ्च । रा.नि.व.१३ ।

वर्त्तिः । स्त्री । दशायाम् । বাতি, শল্‌তে । प.प्र. । नेत्राञ्जनशलाकायां । सि.यो.न.रो.चि. । गात्रानुलेपने । मे. ।

वर्त्ति(र्त्ती)कः । पुं । वन्यचटके, वर्त्तिकपक्षिणि । हिं बटेर गुड़गुड़े । अम. । च.सू.२७अ.। बालचटके । বাবুই । हिं बगेरि । भा. ।

वर्त्तिका / **वर्त्तिनी** } स्त्री । पिष्टकविशेषे । च.चि.२अ. । तित्तिरपक्षिणि । वै.निघ. । वर्त्तकपक्षिणि । বটের পাখী । अम. । पक्षिविशेषे, वनचटकायाम् । বাবুই পাখী, তালচটা । त्रिका. । च.सू.२७अ. । गुणाः—"वर्त्तिका मधुरा रुच्या कफमारुतनाशिनी ।" राज.२प. । मेषशृङ्ग्याम् । अजशृङ्ग्यां । তোঁৎপুচ্ছী । प.मु. । रा.नि.व.६ ।

वर्त्ति(र्त्ती)रः । पुं । कपिञ्जलसदृशपक्षिणि, तित्तिरपक्षिणि । च.सू.२७अ. ।

वर्त्ती स्त्री । वर्त्तिकायाम् । বাতি । प.प्र. । लेपनचूर्णे । पुं (इन्) । वनचटके । वै.निघ. ।

वर्त्तुलम् । क्ली । गृञ्जने । गाजर इति भाषा । रा नि.व.७ । गुण्ठतृणे । वै.निघ. । पुं । कलायभेदे । বাঁটুল কলায়, মটর । हिं केराव । श. मा. । टङ्कणक्षारे । मणिभेदे । वै.निघ. ।

वर्त्तुलफलम् । क्ली । कालिङ्गफले । তরমুজ । वै.निघ. ।

वर्त्तुली । स्त्री । गजपिप्पल्याम् । रा.नि.व.६ ।

वर्त्म (न्) । क्ली । नेत्रपक्ष्मणि । मे. ।

वर्त्मकर्दमम् । क्ली । नेत्रवर्त्मगरोगविशेषे । लक्षणं—"क्लिन्नं पुनः पित्तयुक्तं विदहेच्छोणितं यदा । तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमम् ॥" सु.उ.३प. ।

वर्त्मकुन्दः । पुं । अन्यनेत्ररोगे । लक्षणं—"चक्षुषो यस्य बाह्यस्य पूयस्रावो विजायते । वर्त्मकुन्द इति ख्यातस्तस्य कुर्य्यात् क्रियामिमाम् ॥" ज.द. ।

वर्त्मबन्धः (कः) । पुं । नेत्रपक्ष्मगतरोगे । लक्षणं यथा—"कण्डूमताल्पतोदेन वर्त्मशोफेन यो नरः । न समं छादयेदक्षि भवेद्बन्धः स वर्त्मनः ॥" सु.उ.३प. । [निघ. ।

वर्त्ममाचिकम् । क्ली । स्वर्णमाचिके । वै.

वर्त्मरोगः । पुं । नेत्रपक्ष्मगतरोगे । निदानादि—"पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः । शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । वि-

र्त्म मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान्। विकारान् जनयन्त्याशु······ ॥" ते च बहुविधाः यथा —उत्सङ्गिनी कुम्भीका पोथक्यः वर्त्मशर्करा च-र्शोवर्त्म शुष्कार्शः अञ्जनिका बहलवर्त्म वर्त्मबन्धकः क्लिष्टवर्त्म कर्दमवर्त्म श्यावबर्त्म प्रक्लिन्नवर्त्म अक्लिन्नवर्त्म वाताहतवर्त्म वर्त्मार्बुदं निमेषिणी शोणितार्शः लगणः विषवर्त्म पक्ष्मकोपश्चेति। सु.उ.३अ.। "सर्व्वरोगनिदानोक्तैरहितैः कुपिता मलाः। अचक्षुष्यैः विशेषेण प्रायः पित्तानुसारिणः। शिराभिरूर्द्धं प्रसृता नेत्रावयवमाश्रिताः। वर्त्मसन्धिं सितं कृष्णं दृष्टिं वा सर्व्वमक्षि वा। रोगान् कुर्य्युः ·· ······ ॥" वर्त्मरोगाः चतुर्विंशतिः—कृच्छ्रोन्मीलः निमेषः वाताहतं कुम्भीसंज्ञा पित्तोत्क्लिष्टं पक्ष्मशातः पोथकी कफोत्क्लिष्टं लगणः उत्सङ्गाख्या रक्तोत्क्लिष्टम् अधिमांसम् अञ्जननामिका विषवर्त्म उत्क्लिष्टवर्त्म श्याववर्त्म क्लिष्टवर्त्म सिकतावर्त्म कर्दमवर्त्म बहलवर्त्म अलजी कुकूणकः पक्ष्मरोधः अर्बुदश्चेति। एषु कृच्छ्रोन्मीलनाख्यो भेषजैः साध्यः। निमेषवाताहते अर्शश्च वर्ज्यम्। पक्ष्मरोधो याप्यः। शेषानेकोनविंशतिविधान् शस्त्रेणोपाचरेत्। तेषु पक्ष्मसदनं कुट्टयेत् सूचीकूर्च्चेन अर्व्वुदं हन्द्विपत्रेण लगणादीनि व्रीहिमुखेन पोथक्यादयः कुकूणकान्ताः एकादश विलेख्याः। उत्क्लिष्टचतुष्टयं यथा—पित्तोत्क्लिष्टं कफोत्क्लिष्टं रक्तोत्क्लिष्टमुत्क्लिष्टवर्त्म चेति। वा.उ.८अ.। एषां लक्षणानि पर्य्यायेषु द्रष्टव्याणि। अयस्य नेत्रवर्त्मगतरोगे। ज.द.२०अ.।

वर्त्मशर्करा। स्त्री। नेत्रवर्त्मगतरोगे। लक्षणं —"पिड़काभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता। पिड़का या खरा स्थूला सा ज्ञेया वर्त्मशर्करा॥" सु.उ.३अ.।

वर्त्मार्व्वुदम्। क्ली। नेत्रवर्त्मगतरोगे। लक्षणं —"वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम्। विज्ञेयमर्वुदं पुंसा सरक्तमवलम्बितम्॥" सु.उ.३अ.।

वर्द्दम्। क्ली। सीसके। हे.च.।

वर्द्धः (कः)। पुं। ब्राह्मणयष्टिकायां। वामनहाटी। जटा.। अम.।

वर्द्धनम्। क्ली। छेदने। मे.। पुं। पक्षीण्डवृक्षे। पम्. पक्षीव्रा। कों पाषवंद। दन्तमूलगतमुखरोगे। लक्षणं यथा—"मारुतेनाधिको दन्तो जायते तीव्रवेदनः। वर्द्धनः स मतो व्याधिर्जाते रुक्च प्रशाम्यति॥" सु.नि.१६अ.। स्त्री (नी)। सम्मार्ज्जन्यां। झाड़ न। हे.च.।

वर्द्धमानः। पुं। एरण्डवृक्षे। अम.। वै.निघ. २भ.ज्व.चि.रसपर्पटी। श्वेतैरण्डे। रा.नि.व.८। सु.कल्प.७अ.। मधुरमातुलुङ्गे। पशुभेदे। शरावे। मे.। [क्ली। वै.निघ.। शरावे। अम.।

वर्द्धमानकः। पुं। एरण्डवृक्षे। मधुरमातुलु-

वर्द्धमानपिप्पली। स्त्री। योगविशेषे। "त्रिवृद्ध्या पञ्चवृद्ध्या वा सप्तवृद्ध्याथवापि वा। गव्यक्षीरेण संपिष्टा पिबेद्दशदिनानि च। तथैवापनयेदेता एवं विंशतिवासरान्। पिबतां ज्वरशान्तिः स्यात् पाण्डुरोगश्च शाम्यति······ ॥" रस.र.।

वर्द्धमानषट्कम्। क्ली। षट्कभेदे। यथा— "सान्द्रं दधि गृहीत्वा तु किञ्चिन्मथ्ना च मन्थयेत्। शर्करामरिचं शुण्ठीपिप्पलीजीरचूर्णकं। निक्षिप्य च यथा योग्यं हस्तेनालोड्य यत्नतः। वस्त्रेण गालयेत्तस्मिन् पक्वदाड़िमबीजकं। निक्षिप्य सिद्धमेतत्तु षट्कं वर्द्धमानकम्। गुरु दीप्तिकरं रुच्यं बलदं तृप्तिकारकं। कफवातञ्च पित्तञ्च श्रमं ग्लानिं तृषां जयेत्॥" वै.निघ.द्रव्य.गु.। [११।

वर्द्धमाना। स्त्री। मधुरबीजपूरके। रा.नि.व.

वर्द्ध्रम्। क्ली। चर्म्मणि। चाम्ड़ा। उणा.। स्त्री (ध्री)। चर्म्मरज्ज्वाम्। अम.।

वर्पः। पुं। रूपे। उणा.।

वर्म्मः। पुं। पर्पटके। क्षेत्पापड़ा। भा.म.१भ.ज्व.चि.विश्वादियोगे। "विश्वावर्म्मविभावरीयुग-वरा।" [रा.नि.व.५।

वर्म्मकण्टकः। पुं। पर्पटके। क्षेत्पापड़ा।

वर्म्मणः। पुं। नागरङ्गवृक्षे। त्रिका.।

वर्म्मिः (र्म्मी[इन्])। पुं। मत्स्यमत्स्यविशेषे। बाणि माछ। गुणाः—"वर्म्मिमत्स्यो गुरुर्हृद्यः कषायो रक्तपित्तहा।" राज.२प.।

वर्म्मूषः। पुं। मत्स्यविशेषे। बामिरूप माछ। गुणाः—"वर्म्मूषो वातहा स्निग्धो ग्राही दोषविनाशनः।" राज.२प.।

बर्य्या । स्त्री । भुजाढ़का । टোঁডর কলায় । प.मु. । भाढ़क्याम् । अड़र । रा.नि.व.१६ ।

वर्य्याञ्जनम् । क्ली । रसाञ्जने । वै.निघ. ।

वर्व्वट: (टी) । पुं, स्त्री । स्वनामख्यातकलाये । वर्बटी । उत्. बरगुड़ि । त्रिका. ।

वर्व्वणा । स्त्री । नीलमक्षिकायां । अम. ।

वर्व्वर: । पुं । मत्स्यविशेषे । तल्लक्षणं यथा—"पृष्ठे कुक्षौ कण्टकी दीर्घतुण्ड: सर्पाभो य: सोऽप्ययं वर्व्वराख्य: ।" गुणा:—वाताटोपकर: गुरु: बल्य: स्निग्ध: दुर्जर: वीर्य्यवर्द्धनश्च । रा.नि.व.१७ । स्वनामख्यातकण्टकवृक्षे । वावला गाछ । हिं बाबुल । गुणा:—कषायोष्ण: कफकासघ्न: आमरक्तातिसारघ्न: पित्तार्शोघ्नश्च । रा.नि.व.८ । कृष्णार्जके । काल वावुइ । हिं कालीवावरी । गुणा: —कटु: उष्ण: सुगन्धि: वान्तिविसर्पविषघ्न: लक्ष्मीवर्द्धनश्च । रा.नि.व.१० । वैजयन्तीतुलसीवृक्षे । नखीनामगन्धद्रव्ये । व्याघ्रनखे । नखी । वै.निघ. । क्ली । नीलनामगन्धद्रव्ये । रा.नि.व.६ । हिङ्गुले । रा.नि.व.१३ । सिन्दूरे । वै.निघ. । पीतचन्दने । गुणा:—शीतलं तिक्तं कफपित्तवातघ्नं कण्डूकुष्ठव्रणघ्नं रक्तशोधकञ्च । रा.नि.व.१२ ।

वर्व्वरक: । पुं । विन्ध्योत्तरप्रसिद्धे नदे । तज्जलं शोषजलसदृशगुणम् । रा.नि.व.१४ । क्ली । वर्व्वरचन्दने । स्त्री (का) । भार्ग्याम् । वामनहाटी । वै.निघ. ।

वर्व्वरगन्ध: । पुं । श्वेतरक्तमिश्रचन्दनविशेषे । वर्व्वरगन्धेति भाषा । वर्बर चन्दन । वै.निघ. ।

वर्व्वरा (री) । स्त्री । भार्ग्याम् । वामनहাটী । कर्णस्फोटायाम् । কাণছিড়া । वै.निघ. । वनतुलस्यां । वावुइ तुलसी । सा त्रिधा कृष्णशुक्लवटपत्रभेदेन । सा. गुणा:—"वर्व्वरीत्रितयं रूक्षं शीतं कटु विदाहि च । तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च । पित्तलं कफवातास्रदद्रुक्रिमिविनाशकम् ॥" भा. । शाकविशेषे । पुष्पविशेषे । मे. । मक्षिकाभेदे । श.र. ।

वर्व्वराह्वयम् । क्ली । वर्व्वरचन्दने । वै.निघ. ।

वर्व्वरीक: । पुं । बोले । वै.निघ. । भार्ग्याम् । वामनहাটী । उणा. । तुलसीभेदे । वावुइ तुलसी । श.च. । महाकाले । माकाल । है.च. ।

वर्व्वरीगन्धा । स्त्री । कर्णस्फोटायाम् । वनतुलस्याम् । वै.निघ. ।

वर्व्वरोत्थम् । क्ली । वर्व्वरचन्दने । শ্বেত রক্ত [চন্দন । वै.निघ. ।

वर्व्वा । स्त्री । वर्व्वरिकायां । वावुइ तुलसी । श.च. ।

वर्व्वूर: (क:) । पुं । (Acacia arabica.) The Babhul tree. वर्व्वूलवृक्षे । वावला गाछ । हिं बाबुल । तें चलवंतुड़ु. नल्लतुम्म । वम्. रीमकड़ि । बाभूल । उत्. गुडुड़ा । दा. कलिकिकर । गुणा:—कषाय उष्ण: कफकासघ्न: आमरक्तातिसारपित्तदाहार्शोघ्नश्च । रा.नि.व.८ ।

वर्ष: । पुं, क्ली । वृष्टौ । वत्सरे । अम. ।

वर्षकरी । स्त्री । झिल्ल्यां । है.च. ।

वर्षकाली । स्त्री । जीरके । वै.निघ. ।

वर्षकेतु: । पुं । रक्तपुनर्नवायां । रा.नि.व.५ । शुक्लपुनर्नवायाम् । वै.निघ. । [श.र. ।

विल्वः । पुं । (Ægle marmelos.) स्वनामख्याततरौ । বেল গাছ । हिं बेल । मं बेल, विल । कं बेलवन । तें मारेडु । ता. विल्व । गुणाः—मधुरः हृद्यः पित्तघ्नः गुरुः कषायः कफज्वरातिसारघ्नः रुचिकृत् दीपनश्च । विल्वमूलं — त्रिदोषघ्नं मधुरं लघु वातघ्नञ्च । कोमलं फलं — स्निग्धं गुरु संग्राहि दीपनञ्च । पक्वं फलं—गुरु मधुरं कटुतिक्तकषायोष्णं संग्राहि त्रिदोषघ्नञ्च । रा.नि.व.११ । "फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम् । विल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम् । द्राक्षाविल्वशिवादीनां फलं शुष्कं गुणाधिकम् ॥" भा.आमव. ।

विल्वजा । स्त्री । शालिधान्यविशेषे । सा च मागधीगुणैस्तुल्या । "विल्वजा मागधी पीता सामान्याला गुणागुणैः । रुचिकृद्बलकृन्मूत्रदोषघ्नी च श्रमापहा ॥" अत्रि.१५अ. ।

विल्वतैलम् । क्ली । कर्णरोगाधिकारे तैलम् । "फलं विल्वस्य मूत्रेण पिष्टा तैलं विपाचयेत् । एतत्कल्कप्रदायैव वाधिर्य्ये परमौषधम् ॥" रस.र. ।

विल्वपत्रम् । क्ली । विल्वदले । বেলপাতা । रस.र.ग्रहणीकवाटरसे । [सू.२७अ. ।

विल्वपर्णी । स्त्री । वातघ्नपत्रशाकविशेषे । च.

विल्वपेशि(षि)का (शी) । स्त्री । विल्वमज्जायां, विल्वशलाटौ । বেলশুঁটা । वा.सू.१५अ. । चि.४अ. । गुणाः—"कफवातामशूलघ्नी ग्राहिणी विल्वपेषिका ।" राज.३प. ।

विल्वमध्यम् । क्ली । विल्वशस्ये । বেলশুঁটা । सु.चि.३८अ. ।

विल्वा । स्त्री । हिङ्गुपत्र्याम् । रा.नि.व.६ ।

विल्वादिकषायः । पुं । विल्वादिपञ्चमूलैः गुड़ूच्यामलकधान्यकैश्च कृते कषाये । स वातज्वरे हितः । च.द.वा.ज्व.चि. । "विल्वादिपञ्चमूलीयगुड़ूच्यामलकै तथा ।"

विल्वान्तरः । पुं । कण्टकिवृक्षविशेषे, उशीराख्यवीरतरौ । तें वेणुतुरुचेट्टु । जाङ्गलदेशे नर्म्मदातटे चर्म्मण्वतीनदीसमीपे च । तल्लक्षणमुच्यते—"विल्वान्तरो जगति वीरतरुः प्रसिद्धः श्वेतासितारुणविलोहितपीतपुष्पः । स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः स्यात् कण्टकी विजलदेशज एष वृक्षः ॥" इति डल्हणः । सु.सू.३८।३९अ. । सु.चि.१५अ. । "वीरतरुः उशीराख्यः ।" वा.सू.१५अ. । गुणाः—कटुरुष्ण आग्नेयः पथ्यः वातरोगघ्नः सन्धिशूलघ्नश्च । रा.नि.व.८ । "विल्वान्तरो रसे पाके तिक्तस्तूष्णः कफापहः । मूत्राघाताश्मजित् ग्राही योनिमूत्रानिलप्रणुत् ॥" भा. ।

विवर्णत्वम् । क्ली । म्लानगात्रत्वे । मा.नि. ।

विवर्त्तनम् । क्ली । कर्णनाडी: निष्काशयितुमिष्टस्य कर्णलग्नस्य पुनर्विवर्त्तनरूपयत्नकर्म्मणि । यत्नस्य कर्णान्तरेव भ्रमणकर्म्मणि । सु.सू.७अ. ।

विवर्त्तितः । त्रि । परिवर्त्तिते । भा. ।

विवर्त्तितसन्धिः । पुं । सन्धिमुक्तभग्नरोगविशेषे । "विवर्त्तिते तु सन्धिपार्श्वापगमनाद्विषमाङ्गता वेदना च ।" सु.नि.१५अ. ।

विवर्द्धनम् । क्ली । घृते । वै.निघ. । [अम. ।

विवस्वान् । पुं । अर्कवृक्षे । আকন্দ গাছ ।

विविधविषापहा । स्त्री । निर्विषीवृक्षे । वै.निघ. ।

विवृता (त्ता) । स्त्री । क्षुद्ररोगभेदे । लक्षणं —"विवृतास्यां महादाहां पक्कोदुम्बरसन्निभाम् । विवृतामिव तां विद्यात्पित्तोत्थां परिमण्डलाम् ॥" सु.नि.१३अ ।

विवृताक्षः । पुं । स्थलचरपक्षिविशेषे । कुক্ড়া । त्रिका. । गुणाः—"विवृताक्षस्त्रिदोषघ्नो वृष्यः शुक्रविवर्द्धनः ।" अत्रि.२१अ. ।

विशम् । क्ली । रौप्ये । वै.निघ. । मृणाले । अ. टी.रा. । सु.चि.११अ. । पुं । मनुष्ये ।

विशदम् । क्ली । काशीशे । হিরেকস্ । वै.निघ. । स्त्री (दा) । वृहत्याम् । मद. ।

विशर्द्धनम् । क्ली । गुदे कुत्सितशब्दकरणे । বায়ুত্যাগ । सु.नि.१अ. ।

विशल्यकरणी । स्त्री । ओषधिविशेषे । নির্বিষী, আয়াপান । रामायणम् ।

विशल्यकृत् । पुं । भूपलाशे, भाण्डीतके । হাপরমালী । र.मा. ।

विशल्या । स्त्री । गुडूच्याम् । रा.नि.व.३ । विकङ्कतवृक्षे । বঁইচি গাছ । लाङ्गलिकायाम् । বিষলাঙ্গুলিয়া । रा.नि.व.४ । वा.सू.१५अ.अर्कादिव. । उ.६अ. । शाकभेदे । दन्तिवृक्षे । अम. । च.द.विषाधिकारे । त्रिवृतायाम् । তেউড়ী । पाटलायाम् । পারুল । सु.चि.१८अ. । च.द. विषाधिकारे । नागदन्त्यां । হাতিশুঁড়ে । र.मा. । त्रिपुटायाम् । मे. । अजमोदायां । रा.नि.व.६ ।

विशाकरः । पुं । कृष्णदन्त्याम् । रा.नि.व.६ । हस्तिशुण्ड्याम् । হাতিশুঁড়ে । प.मु. । पाटलावृक्षे । পারুল গাছ । भा.म.४भ.गर्भ.चि. । भद्रचूड़वृक्षे । লঙ্কাসিজু । श.च. ।

विशाखः । पुं । पुनर्नवायाम् । শ্বেত পুণ্যা । रा.नि.व.५ । स्कन्दापस्मारे । सु.उ.२७अ. ।

विशाखग्रहः । पुं । विल्ववृक्षे । বেল গাছ । वै.निघ. । [গাছ । श.च. ।

विशाखजः । पुं । नागरङ्गवृक्षे । টাবা লেবু

विशाखपत्रः । पुं । बालरोगभेदे । निदा. ।

विशाखा (खिका) । स्त्री । श्वेतरक्तपुनर्नवायाम् । वै.निघ.२भ.वा.व्या.चि.षड्शीतिगुग्गुलौ । कृष्णापराजितायाम् । वै.निघ. । कठिल्लकवृक्षे । मे. । तन्नामनक्षत्रे । अम. ।

विशारदः । पुं । वकुलवृक्षे । रा.नि.व.१० । स्त्री (दा) । क्षुद्रदुरालभायाम् । रा.नि.व.४ । कपिकच्छ्वां । वै.निघ. । [मृगविशेषे । श.र. ।

विशालः । पुं । वृक्षविशेषे । पक्षिभेदे । मे. ।

विशालतैलगर्भः । पुं । अङ्कोटवृक्षे । আঁকোড় গাছ । रा.नि.व.९ ।

विशालत्वक् । पुं । सप्तपर्णवृक्षे । प.मु. ।

विशालपत्रः । पुं । श्रीतालवृक्षे । रा.नि.व. ९ । माणे । মানকচু । प.मु. । [नि.व.७ ।

विशालफलिका । स्त्री । निष्पाव्यां । रा.

विशाला । स्त्री । इन्द्रवारुणीलतायाम् । রাখালশশা, মামানড়ী । रा.नि.व.३ । भा.म.४भ. मसूरी.चि., अर्शःचि.पथ्यादिगुड़े । वै.निघ.ज्व. चि.द्वात्रिंशाङ्गे । इन्द्रवारुणीफले । वा.सू.१५अ. । महेन्द्रवारुणीलतायाम् । মাকাল গাছ । वै.निघ.जीर्ण.ज्व.चि.कल्याणघृते । उपोदक्याम् । পুঁই গাছ । रा.नि.व.३ । मुरामांस्याम् । शाकभेदे । রাজগিরা । वै.निघ. । गोरक्षकर्कट्याम् । রাখালকাঁকড়ী । च.द.पाण्डु.चि. । उन्मा.चि. ।

विशालाक्षी । स्त्री । नागदन्त्याम् । रा.नि. व.५ । [रा.नि.व.६ ।

विशाली । स्त्री । अजमोदायाम् । রাকুনী ।

विशिख: । पुं । शरवृक्षे । रा.नि.व.१८ । स्त्री (खा) । अपत्यमार्गे । सु.शा.१०अ. । कर्म्ममार्गे । सु.सू.१०अ. ।

विशिखपुङ्खा । स्त्री । शरपुङ्खायाम् । भा.म. ४भ. । "श्वेतया विशिखपुङ्खया सह ।" चि.क्र.क. बध्याप्रतीकारे ।

विशिष्ट: । पुं । शीषके । वै.निघ. । [हारा. ।

विशिष्टपत्र: । पुं । ग्रन्थिपर्णवृक्षे । গেঁটেলা ।

विशीर्णपत्र: (र्णः) । पुं । निम्बवृक्षे । निम् गाछ । रा नि.व.८ ।

विशेष: । पुं । शाखयो: प्रकृतिविकारयो: प्रवृत्तिनिवृत्त्योश्च असामान्यदर्शने । च.शा.५अ. । पृथक्त्वकृत्त्वे । व्यावृत्तबुद्धिकृत्त्वे । च.सू.१अ. ।

विशेषक: । पुं । तिलकवृक्षे । তিলগাছ । रा. नि.व.१० ।

विशोक: । पुं । अशोकवृक्षे । रा.नि.व.१० ।

विशोध(धि)नी । स्त्री । नागवल्लीलतायाम् । नीलीवृक्षे । वै.निघ.। नागदन्त्यां । হাতিশুঁড় । रा.नि.व.५। दन्तिवृक्षे । জয়পাল । रा.नि.व.६ ।

विशोधनीवीजम् । क्ली । जैपालवीजे । वैद्यकम् ।

विश्राम: । पुं । आयासापहरणे । गुणा:— "विश्रामो बलकृत् खेदश्रमनुत् खाप्यद: शुभ: ।" राज.२प. ।

विश्लिष्टसन्धि: । पुं । अस्थिभङ्गविशेषे, सन्धिमुक्तभग्नरोगविशेषे । यथा —"विश्लिष्टेऽल्पशोफो वेदनासातत्यं सन्धिविक्रिया च ।" सु.नि.१५अ. । See भङ्गम् । [सु.सू.२२अ. । पृथक्करणे ।

विश्लेषणम् । क्ली । वायुजन्यव्रणवेदनायाम् ।

विश्वम् । क्ली । शुण्ठ्याम् । শুঁট् । बोलनामगन्धद्रव्ये । নিশাদল । रा.नि.व.६ । वै.निघ.२भ. ज्व.चि.विश्वादिकषाये । परिमाणभेदे । "विश्वं विंशपलं प्रोक्तम् ।" शब्दकल्पे ज्योतिषाती ।

विश्वकद्रु: । पुं । मृगयानिपुणकुक्कुरे । अम. ।

विश्वका । स्त्री । गङ्गाचिल्ल्यां । গাং চিল । हारा. । [तृ:

विश्वकसेना । स्त्री । प्रियङ्गुलतायाम् । कश्चि-

विश्वगन्धम् । क्ली । बोलनामगन्धद्रव्ये । নিশাদল । रा.नि.व.६ । पुं । पलाण्डौ । रा.नि.व. ७ । स्त्री (न्धा) । पृथिव्याम् । श.च. ।

विश्वग्रन्थि: । स्त्री । हंसपादीलतायाम् । रक्तलज्जालुकायाम् । रा.नि.व.५ ।

विश्वग्वायु: । पुं । सर्व्वतोगामिवायौ । এলোমেলো বাতাস । गुणा:—"विश्वग्वायुरनायुष्य: प्राणिनां नैकदोषकृत् । सर्व्वर्त्तुलिङ्गको ग्लानिकृत्योन्मादप्रदः स्मर: ॥" राज. ।

विश्वजा । स्त्री। शुण्ठ्याम् सा.कौ.वा.ज्व.चि.।

विश्वतुलसी । स्त्री । (Ocymum basilicum. Syn. Pilosum.) Common sweet basil. तुलसीभेदे, मधुरतुलस्यां । বাবুই তুলসী । दा. हिं. सब्जा । ते. रुद्रजेड़ । ता. तिरुनिक्रु । पञ्जा. बहरि । बम्. बाराइतुलसी । गुणा:—वीजं शीतलं । क्वाथ: मेहघ्न उदरामयघ्न: रक्तातिसारघ्नश्च । पत्ररस: क्रमिघ्न: सर्पदंशे हितश्च । कश्चित् ।

विश्व(श्वे)देवा । स्त्री । गोरक्षतण्डुलायाम् । গোরক্ষচাকুলিয়া । जटा. । रा.नि.व.४ । सु.सू. ३८अ. । गाङ्गेरुकीति पूर्व्वदेशे, अन्ये सितकुसुमां बलाम् । सु.चि.८अ. । नागबलायाम् । र.मा. । रक्तकुसुमदण्डोत्पलायाम् । र.मा. । च.वि.८अ. ।

विश्वपर्णी । स्त्री । भूम्यामलक्याम् । ভুঁই আমলা । रा.नि.व.५ ।

विश्वभेषजम् । क्ली । शुण्ठ्याम् । শুঁট । भा.म.१भ. । रा.नि.व.६ । च.द.वातपित्त.ज्व.चि.पञ्चभद्रे । "किरातं विश्वभेषजम् ।"

विश्वम्भर: । पुं । सौम्यकीटविशेषे । सु.कल्प. ८अ. । See कीट: । स्त्री (रा) । भूनिम्बे । চিরেতা । भा.म.१भ.ज्वरातिसा.चि. । "विश्वम्भरानिम्बविषा: ।"

विश्वरूपकम् । क्ली । कृष्णागुरुणि । रा.नि.व. १२ । पुं । राजादनवृक्षे । ক্ষীরিণী গাছ । वै. निघ. ।

विश्वरोचन: । पुं । पेचुके । कचू । त्रिका. ।

विश्ववर्णा । स्त्री । भूम्यामलक्याम् । ভুঁই আমলা । वै.निघ. ।

विश्वसारकम् । क्ली । विदरवृक्षे । फणिमनसा । श.च. । [नि.व.४ ।

विश्वस्था । स्त्री । शतावर्य्याम् । शतमूली । रा.

विश्वा । स्त्री । शतावर्य्याम् । शतमूली । शुण्ठ्याम् । शुंठ । अतिविषायाम् । रा.नि.व.६।२३। शङ्खिन्यां । वै.निघ. ।

विश्वाख्या । स्त्री । शतावर्य्यां । रा.नि.व.४ ।

विश्वाची । स्त्री । तन्नामकवातव्याधौ । लक्षणं —"तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः । बाह्वोः कर्मक्षयकरी विश्वाचीतीह सोच्यते ॥" मा.नि. । सु.नि.१अ. । "दशमूली बला माषक्वाथं तैलाज्यमिश्रितं । सायं भुक्त्वा चरेन्नस्यं विश्वाच्यामवबाहुके ॥"

विश्वादिः । पुं । कषायविशेषे । "विश्वाम्बुपपटोशीरघनचन्दनसाधितम् । दद्यात् सुशीतलं वारि तृट्छर्द्दिज्वरदाहनुत् ॥" च.द.पि.ज्व.चि. ।

विश्वामित्रप्रियः । पुं । नारिकेलवृक्षे । श.र.।

विश्वाह्वा । स्त्री । शुण्ठ्यां । वै.सं.बाहुशालगुड़े।

विश्वोरः । पुं । रक्तार्के । र.मा. ।

विश्वौषधम् । क्ली । शुण्ठ्याम् । रा.नि.व.६ ।

विषम् । क्ली । जले । रा.नि.व.१४ । पुं, क्ली । वत्सनाभे । काठविष । रा.नि.व.२२ । बोले । रा.नि.व.६ । पद्मकेशरे । अ.टी. । स्वनामख्याते जीवितघ्नद्रव्यमात्रे । विष । तच्च द्विविधं—स्थावरं जङ्गमञ्चेत्यकृत्रिमं विषम् । गरसंज्ञकं कृत्रिमं नाम । तत्र स्थावरं पञ्चपञ्चाशद्विधः । जङ्गममसंख्यमिति । विशेषाः स्वस्वपर्य्याये मृग्याः । सामान्यतः तस्योत्पत्त्यादि—"प्रजामिमामात्मयोनेर्ब्रह्मणः सृजतः किल । अकरोदसुरो विघ्नं कैटभो नाम दर्पितः । ततः क्रुद्धस्य वै वक्त्राद्ब्रह्मणस्तेजसो निधेः । क्रोधो विग्रहवान् भूत्वा निपपाताथ दारुणः । सत्वं ददाह गर्जन्तमन्तकाभं महाबलम् । ततोऽसुरं घातयित्वा तत्तेजोऽवर्द्धताद्भुतं । ततो विषादं देवानामभवत्तं निरीक्ष्य वै । विषादजननत्वाच्च विषमित्यभिधीयते । ततः सृष्टा प्रजाः शेषं तदा तं क्रोधमीश्वरः । विन्यस्तवान् स भूतेषु स्थावरेषु चरेषु च ॥" सु.कल्प.३अ. । सा. गुणाः—विषं हि नाम निखिलरसायनानामूर्जस्वलमखिलव्याधिविध्वंसविधायकतामासादयति । रस.चि. । "विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च । आग्नेयं वातकफहृत् योगवाहि मदावहम् । तदेव युक्तियुक्तन्तु प्राणदायि रसायनम् । योगवाहि त्रिदोषघ्नं बृंहणं वीर्य्यवर्द्धनम् । ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात् । तस्माद्विषम्प्रयोगेषु शोधयित्वा प्रयोजयेत् ॥" भा. । "तीक्ष्णोष्णरूक्षविशदं व्यवाय्याशुकरं लघु । विकाशि सूक्ष्ममव्यक्तरसं विषमपाकि च । ओजसो विपरीतं तत् तीक्ष्णाद्यैरन्वितं गुणैः । वातपित्तोत्तरं नृणां सद्यो हरति जीवितम् । विषं हि देहं संप्राप्य प्राग्दूषयति शोणितम् । कफपित्तानिलांश्चानु समं दोषान् सहाशयान् । ततो हृदयमास्थाय देहोच्छेदाय कल्पते ॥" वा.उ.३५अ. । तच्छोधनं यथा—"गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुध्यति । तन्नवधा—कालकूट-हालाहल-ब्रह्मपुत्र-वत्सनाभ-हारिद्रक-सक्तुक-प्रदीपन-सौराष्ट्रिक-शृङ्गकेषु । महाकूट-सूचीसात्तुक-यागगन्ध-मद्याभ-दुर्गन्धोनीति षट् । मतान्तरे शृङ्गी-कालकूट-मुस्तक-वत्सनाभ-शङ्खकर्णीनीति पञ्च महाविषाणि । स्नुहीकरवीरार्कलाङ्गलीविषमुष्टीनीति उपविषाणि ।

विषकङ्का(ङ्को)लिका (ली) । स्त्री । वृक्षविशेषे । विषकाँकला । नकुल.१६अ. ।

विषकण्टः । पुं । इङ्गुदीवृक्षे । रा.नि.व.८ ।

विषकण्टकः । पुं । यासक्षुपे । दुरालभा । रा.नि.व.४। [न्ध्याकर्कोटिकायाम् । रा.नि.व.३।

विषकण्टका (किनी, की) । स्त्री । व-

विषकण्टालिका (ली) । स्त्री । विषकण्टालीति प्रसिद्धवृक्षे । र.सा.सं.स्वच्छन्दभैरवरसे ।

विषकण्ठी । स्त्री । बलाकायां । रा.नि.व.१९।

विषकन्दः । पुं । महिषकन्दे । नीलकन्दे । रा.नि.व.७ । इङ्गुदीवृक्षे । वै.निघ. ।

विषगन्धकः । पुं । कृष्णसुगन्धतृणे । वै.निघ.।

विषगन्धा । स्त्री । कृष्णगोकर्ण्याम् । काल अपराजिता । वै.निघ. । [च.चि.बलाद्यघृते ।

विषग्रन्थिः । पुं । मृणालपर्व्वणि । च.द.यु-

विषघ्ना । स्त्री । गुडूच्याम् । श.च. ।

विषघाती (इन्) । पुं । शिरीषवृक्षे । श.मा.।

विषघ्नः । पुं । यवासवृक्षे । দুরালভাবিশেষ । रा.नि.व.४ । चम्पकवृक्षे । ভটা । भूकदम्बे । কুকশিমা । रा.नि.व.८ । सुगन्धार्जके । वै.निघ. । तण्डुलीयवृक्षे । भा.पू.१भ.शा.व. । शिरीषवृक्षे । रा.नि.व.९ । [बा.उ.६अ. ।

विषघ्ना । स्त्री । अतिविषायाम् । আতইচ ।

विषघ्निका । स्त्री । श्वेतकिणिहीवृक्षे । श्वेतापामार्गे । वै.निघ. ।

विषघ्नी । स्त्री । हिलमोचिकायाम् । হিঞ্চে । कटुकायां । चिका. । रास्नायाम् । हवुषभेदे । হবুষ গাছ । रा.नि.व.४ । इन्द्रवारुणीलतायां । রাখালশশা । रा.नि.व.३ । वनवर्वरिकायाम् । বনবাবুই । रा.नि.व.१० । भूम्यामलक्यां । ভুঁই আমলা । रक्तपुनर्नवायाम् । रा.नि.व.५ । हरिद्रायाम् । रा.नि.व.६ । वृश्चिकाल्याम् । বিছাতী । प.मु. । महाकरञ्जे । रा.नि.व.९ । देवदाल्यां । দেয়াতাড়া । प.मु. । रा.नि.व.३ । पीतदेवदाल्याम् । भा. । काष्ठकदल्याम् । श्वेतापामार्गे । वै.निघ. । [निघ. ।

विषचक्रः (कः) । पुं । चकोरपक्षिणि । वै.

विषजिह्वः । पुं । देवताड़वृक्षे । দেয়াতাড়া र.मा. ।

विषज्वरः । पुं । तन्नामकागन्तुज्वरे । लक्षणम् —"श्यावास्यता विषकृते दाहोऽतीसार एव च । भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥" निदानम् । महिषे । श.र. ।

विषण्डम् । क्ली । मृणाले । श.र. ।

विषतन्त्रम् । क्ली । तन्नामसर्पादिविषोपशमनतन्त्रभेदे । यथा—"सर्पवृश्चिकलूतानां विषोपशमनी तु या । सा क्रिया विषतन्त्रञ्च नाम प्रोक्तं मनीषिभिः ॥" वैद्य.सं.२अ. ।

विषतरुः । पुं । कुचेलकवृक्षे । কুঁচিলা গাছ। भैष.वातरक्तचि.विषतिन्दुकतैले ।

विषतिन्दुः (कः) । पुं । (Diospyros moutana.) विषद्रुमे । কুঁচিলা গাছ । हिं विषतेन्द । तें मचितन्की, माकड़टेम्बि । रा.नि.व.२३ । भा. । वै.निघ.नवज्व.चि.विश्वतापहरणरसे । See कारस्करः ।

विषतिन्दुकजम् । क्ली । मधुरतिन्दुकफले । रसा.सं.त्रैलोक्यडम्बररसे । कारस्करफले । কুঁচিলা ফল । गलत्कुष्ठारिरसे ।

विषदम् । क्ली । पुष्पकाशीशे । रा.नि.व.१३ ।

विषदंशः (कः) । पुं । मार्जारे । वै.निघ. ।

विषदंष्ट्रा । स्त्री । सर्पकङ्कालिकायाम् । प.मु. । र.सा.सं. । नागदमन्याम् । वै.निघ. ।

विषदन्तः (कः) । पुं । विड़ाले । वै.निघ. । (कः) सर्पे । श.च. । [नि.व.७ ।

विषदमूला । स्त्री । बहुमूलमाकन्द्याम् । रा.

विषदर्शनमृत्युकः । पुं । चातकपक्षिणि । हे.च. ।

विषदाता (तृ) । पुं । विषप्रयोक्तृपुरुषे । लक्षणं —"न ददात्युदरं पृष्टो विवक्षन् मोहमेति च । अपार्थं बहुसङ्कीर्णं भाषते चापि मूढवत् । स्फोटयत्यङ्गुलीर्भूमिमकस्माद्विलिखेद्धसेत् । वेपथुर्जायते तस्य त्रस्तश्चान्योन्यमीक्षते ॥" इत्यादि । सु.कल्प.१अ । [ड़া গাব । रा.नि.व.८ ।

विषद्रुमः । पुं । विषतिन्दुके । কুঁচিলা, মক্-

विषधरः । पुं । सर्पे । अम. । [श.च. ।

विषधर्म्मा । स्त्री । शूकशिम्ब्यां । আলাকুশী ।

विषध्वंसी (इन्) । पुं । नागरमुस्तायाम् । वै.निघ. । [माणके । মানকচু । प.मु. ।

विषनाशनः । पुं । शिरीषवृक्षे । प.मु. ।

विषनाशिनी । स्त्री । सर्पकङ्काल्याम् । श.च. । वन्ध्याकर्कोटिकायाम् । वै.निघ. ।

विषनुत् । श्योणाकवृक्षे । श.च. ।

विषपत्रिका । स्त्री । पत्रविषभेदे । तत्तु जैपालादिवीजमध्यस्थपत्रम् । सु.कल्प.२अ. ।

विषपुष्पम् । क्ली । अतसीपुष्पे । रा.नि.व.२३ । नीलपद्मे । श.मा. । [व.८ ।

विषपुष्पः (कः) । पुं । मदनवृक्षे । रा.नि.

विषप्रशमनी । स्त्री । वन्ध्याकर्कोटक्याम् । वै.निघ. । [दन्ती গাছ । रा.नि.व.६ ।

विषभद्रा (द्रिका) । स्त्री । भद्रदन्त्याम् ।

विषभिषक् । पुं । विषवैद्ये । हे.च. ।

विषभुजङ्गः । विषधरसर्पे । वैद्यकम् ।

विषमः । त्रि । वन्धुरे । অসমান । अनियतकालस्थायिनि । "वेपथुर्विषमो वेगः ।" मा.नि. ।

विषमग्राहि । त्रि । एकदेशग्राहिणि । सु.सू. ७अ. । [গাছ । प.मु. ।

विषमच्छदः । पुं । सप्तपर्णवृक्षे । ছাতিম

विषमज्वरः । पुं । ज्वरविशेषे । "यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च । वेगतश्चापि विषमः स ज्वरो विषमः स्मृतः ॥" र.सा.सं. । रसरक्ताश्रितज्वरे । एकाहिकद्वितुर्थकज्वरेषु । निदानादि—"दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः । धातुमन्यतमं प्राप्य करोति विषमज्वरम् । सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ । सन्ततो रसधातुस्थः सततो रक्तधातुगः । भिषजा स च विज्ञेयः सोऽन्येद्युः पिशिताश्रयः । मेदोगतस्तृतीयेऽह्नि अस्थिमज्जागतः पुनः । कुर्य्याच्चतुर्थकं घोरमन्तकं रोगसङ्करम् । विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते । तेनार्द्धं शीतलं देहमर्द्धमुष्णं प्रजायते । काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः । तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः । काये श्लेष्मा यदा दुष्टः पित्तं चान्ते व्यवस्थितं । शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः ॥" इत्यादि । मा.नि. ।

विषमज्वराङ्कुशलौहम् । क्ली । विषमज्वरे औषधम् । पाठः—"रक्तचन्दनह्रीवेरपाठोशीरकणाशिवाः । नागरोत्पलधात्रीभिस्त्रिमदेन समन्वितम् । लौहं निहन्ति विविधान् समस्तान् विषमज्वरान्… ॥" पुस्तकान्तरेऽस्य नाम चन्दनादिलौहम् । रस.चि. ।

विषमज्वरान्तकरसः । पुं । विषमज्वरे पुटपक्वम् औषधम् । पाठः—"हिङ्गुलसम्भवं सूतं गन्धकेन सुकज्जलम् । पर्पटीरसवत्पाच्यं सूतांह्रिहेमभस्मकम् । लौहं ताम्रमभ्रकञ्च रसस्य द्विगुणं तथा । वङ्गकं गैरिकञ्चैव प्रबालञ्च रसार्द्धकम् । मुक्ता शङ्खं शुक्तिभस्म प्रदेयं रसपादिकम् । मुक्तागर्भे च संस्थाप्य पुटपाकेन साधयेत् ॥" इत्यादि । হিঙ্গুলোত্থ পারা ১ তো. গন্ধক ১ তো. একত্র কজ্জলি করত পর্পটীবৎ পাক করিবে। স্বর্ণভস্ম ।০ আনা। লৌহ, তাম্র, অভ্র প্রত্যেকে ২ তোলা। বঙ্গ, গেরিমাটী এবং প্রবাল প্রত্যেকে ॥০ তোলা। মুক্তা, শঙ্খভস্ম, শুক্তিভস্ম প্রত্যেকে ।০ আনা। সমস্ত একত্র জলে মাড়িয়া উহা ঝিনুকের ভিতর ভরিয়া উহাতে গোময়মৃত্তিকার লেপ দিবে। শুকাইলে ১৫।২০ খানি ঘুঁটের পুট দিয়া লক্ষ্য রাখিবে, যেমন গন্ধকের গন্ধ বাহির হইবে অমনি তুলিয়া লইবে। भैष. ।

विषमभोजनम् । क्ली । विषमाशने । मा.नि. ।

विषमई(ही)निका (नी) । स्त्री । गन्धनाकुल्याम् । গন্ধরাস্না । रा.नि.व.७ ।

विषमवल्कलः । पुं । करुणनिम्बुके । নারঙ্গলেবু । प.मु. ।

विषमवेगः । पुं । न्यूनाधिकवेगे । मा.नि. ।

विषमा । स्त्री । सौवीरबदरे । भा. ।

विषमाग्निः । पुं । न समानाग्नौ । येन कदाचित् सम्यक् पच्यते कदाचिन्न न पच्यते । निदा. ।

विषमाधुरम् । क्ली । शृङ्गीविषे । भैष.ज्व.चि. पानीयवट्याम् ।

विषमाधूकम् । क्ली । द्रव्यविशेषे । विगमा इति लोके । भैष.शिरो.रो.चि.किङ्किणीतैले ।

विषमाशनम् । क्ली । अकाले बहुनि स्तोके वा भोजने । "बहुस्तोकमकाले वा तज्ज्ञेयं विषमाशनम् ।" गुणाः—"आलस्यगौरवाटोपशब्दांश्च कुरुतेऽधिकं । हीनमात्रं तनोः कार्श्यं करोति च बलक्षयम् ।" भा. । [ला । वै.निघ. ।

विषमाशुकरः । पुं । ग्रन्थिपर्णमूले । গেঁঠে-

विषमुष्ककः । पुं । मदनवृक्षे । ময়না গাছ । वै.निघ. ।

विषमुष्टिः । पुं । महानिम्बे । মহানিম্ । मदनवृक्षे । रा.नि.व.८।२३ । राजनिम्बे, क्षुद्रक्षुपविशेषे । ঘোড়ানিম্ । हिं विषदोड़ी, कड्सिङ्गे । गुणाः—तिक्तः कटुः दीपनः कफवातघ्नः कण्ठरोगघ्नः रुच्यः रक्तपित्तहरश्च । रा.नि.व.४ । र.सा.सं.अग्नितुण्डीरसे । कुचेलायाम् । কুঁচলে । वै.निघ.२भ.अर्श:-चि.विषमुष्टिचूर्णे । लाङ्गलिकायाम् । वै.निघ. ।

विषमुष्टिकः (का) । पुं, स्त्री । विषमुष्टी । रा.नि.व.२२ । सु.सू.३८ऋ.सुरसादिः । "तथाच विषमुष्टिका ।" वृहदलम्बुषेति केचित् । कर्कोटी वा ।

विषमूला । स्त्री । शिरामलके । प.मु. ।

विषमृत्युः । पुं। जीवञ्जीवपक्षिणि । চকোর । त्रिका. । [:भग्नाकूल । वै.निघ. ।

विषमोभयकण्टकः । पुं। घण्टाबदरे ।

विषयः । पुं । इन्द्रियभोग्येषु रूपरसस्पर्शगन्धशब्देषु । रा.नि.व.१८ । मुञ्जतृणे । मूँज । वै.निघ.।

विषयि । क्ली । इन्द्रिये । [रा.नि.व.१८ ।

विषयेन्द्रियम् । क्ली । शब्दादिग्राहकेन्द्रियेषु ।

विषरूपा । स्त्री । अतिविषायाम् । আতইচ । रा.नि.व.६ । महानिम्बके । वृहदलम्बुषायाम् । कर्कोट्यां । वा.सू.१५ऋ.सुरसादिः । अरुणः ।

विषरोगः । विषजन्यरोगमात्रे ।

विषलम् । क्ली । विषे । श.च. ।

विषलता । स्त्री । इन्द्रवारुणीलतायाम् । রাখালশশা । रा.नि.व.३ ।

विषलिप्तकम् । क्ली । विषशचरणे । विषচরা । वा.उ.२६.ऋ. ।

विषवज्रपातः । पुं । रसे । रस.र.विष.चि.।

विषवल्ली । स्त्री । इन्द्रवारुणीलतायाम् । রাখালশশা । रा.नि.व.३ । [ज्ञानशास्त्रे ।

विषविद्या । स्त्री । विषघ्नमन्त्रभेदे । विषवि-

विषवृक्षः । पुं । उदुम्बरवृक्षे । यज्ञडुमुर । प. मु. । [अम. ।

विषवैद्यः । पुं । विषमन्त्राभिज्ञे वैद्ये । ওঝা ।

विषवैरिणी । स्त्री । निर्व्विषायाम् । निर्व्विषी घास । रा.नि.व.६ ।

विषशालूकः । पुं । पद्मकन्दे । পদ্মের গেঁড়ে । गुणाः—गुरुः विष्टम्भी शीतलश्च । राज. ।

विषशूकः । पुं । भृङ्गरोले । ভীমরুল । भूरिप्र. ।

विषशृङ्गी (ङ्गिन्) । पुं । भृङ्गरोले । हारा. ।

विषशोकापहः । पुं । तण्डुलीयवृक्षे । কাঁটা নটিয়া । वै.निघ. ।

विषसंयोगः । पुं । सिन्दूरे । वै.निघ. ।

विषसूचकः । पुं । चकोरपक्षिणि । हे.च. ।

विषसृक्का (क्वन्) । पुं । भृङ्गरोले । ভীমরুল । त्रिका. । [भा. ।

विषस्फोटः । पुं । स्फोटकभेदे । विषफोँड़ा ।

विषहन्ता (न्तृ) । पुं । शिरीषवृक्षे । रा.नि. व.९ । [राजितायाम् । रा.नि.व.७ ।

विषहन्त्री । स्त्री । अपराजितायाम् । श्वेताप-

विषहरः । पुं । ग्रन्थिपर्णभेदे । त्रि । विषघ्नौषधादौ ।

विषहरा (रा) । स्त्री । देवदालीलतायाम् । দেয়াতাড়া । रा.नि.व.३ । निर्विषायाम् । रा. नि.व.६ ।

विषहरी । स्त्री । मनसादेव्यां । श.र. ।

विषहरी(वर्त्तिः) । स्त्री। विषे हिता । पाठः—"जयपालभवां मज्जां भावयेन्निम्बुकद्रवैः । एकविंशतिवारन्तु ततो वर्त्तिं प्रकल्पयेत् । मनुष्यलालया घृष्टा ततोनेत्रे तयाञ्जयेत्··· ॥" रस.चि. ।

विषहारकः । पुं । भूकदम्बे । वै.निघ. ।

विषहारिणी । स्त्री । निर्विषायां । वै.निघ. ।

विषा । स्त्री । अतिविषायाम् । আতইচ । रा. नि.व.६ । चि.क्र.क.प्रदर.चि. । "लोध्रं विषा गैरिकम् ।" वै.निघ.२भ.कण्ठकुब्ज.ज्व.चि.। "त्रिषानलकपुष्कराः ।" लाङ्गलिकायाम् । विषलाङ्गुलिया । वै.निघ. । कटुतुम्ब्यां । कटुतराइ । रा.नि. व.३ । काकोल्यां । वा.उ.५ऋ. ।

विषाख्या । स्त्री । शुक्लकन्दातिविषायाम् । শ্বেত আতইচ । वा.सू.१५ऋ.मुस्तादिः । "भल्लातपाठात्रिफलाविषाख्या ।" वा.उ.५ऋ. ।

विषाङ्कुरः । पुं । शल्यास्त्रे । त्रिका. ।

विषाणम् । क्ली । कुष्ठौषधे । कुड़ । हस्तिदन्ते । पशुशृङ्गे । मे. ।

विषाणिका । स्त्री । आवर्त्तकीलतायाम् । रा.नि.व.३ । च.सू.१ऋ. । सु.चि.१८ऋ. । कर्कट-

ग्रज्ञाम्। रा.नि.व.६। वै.निघ.२भ.वा.व्या.चि. षड़शीतिगुग्गुलौ। मेषग्रङ्गाम्। মেড়াশিঙে। र.मा.। रा.नि.व.८। सु.सू.३८अ.अध:संशमने। वा.सू.१५अ.वरुणादि:। ऋषभके। ग्रङ्गाटके। शातलायाम्। रा.नि.व.४।५।७। काकोल्याम्। वै.निघ.।

विषाणी। स्त्री। चीरकाकोल्याम्। मे.। चर्मकषायाम्। वृश्चिकाल्याम। रा.नि.व.८। अजग्रङ्गाम्। अम.। आवर्तकीलतायाम्। रा.नि.व.३। क-दलीवृचे। रा.नि.व.११। तिन्तिड्यां। श.च.। पुं (इन्)। कुञ्जरे। वृषे। रा.नि.व.२३। ग्रङ्गाटके। रा.नि.व.७। तिन्तिड्याम्। ऋषभके। रा.नि.व.५।

विषाद्नी। स्त्री। पलाशीलतायाम्। হাপরমালী। रा.नि.व.३। इन्द्रवारुणीलतायाम्। রাখালশশা। वै.निघ.।

विषाननः। पुं। सर्पे। श.मा.।

विषान्नम्। क्ली। सर्षपादौ।

विषापहः। पुं। कृष्णमुष्ककवृचे। घণ্টাপারুল। रा.नि.व.११।

विषापहा। स्त्री। इन्द्रवारुणीलतायाम्। রাখালশশা। रा.नि.व.३। निर्व्विषायाम्। रा.नि.व.६। नागदमन्यां। নাগদনা। भा.। अर्कपत्राम्। ঈশের মূল। सर्पकङ्कालिकायाम्। र.मा.। विपर्णीनाममहाकन्दे। रा.नि.व.७।

विषाभावा। स्त्री। निर्विषायां। रा.नि.व.६।

विषायुधः। पुं। सर्पे। श.र.।

विषारः। पुं। सर्पे। श.च.। [१०।

विषारातिः। पुं। कृष्णधुस्तूरवृचे। रा.नि.व.

विषारिः। पुं। महाचुचुशाके। रा.नि.व.४। घृतकरञ्जे। रा.नि.व.८।

विषाला। स्त्री। मत्स्यविशेषे। गुणाः—"शकुली च विषाला च ज्ञेयौ वातकफात्मकौ।" अत्रि. २२अ.।

विषास्यः। पुं। सर्पे। श.र.।

विषास्या। स्त्री। भल्लातकवृचे। श.च.।

विषूचिका। स्त्री। रोगविशेषे, विसूचीरोगे।

विषौषधी। स्त्री। नागदन्त्याम्, हस्तिशुण्ड्यां। र.मा.।

विष्कलः। पुं। ग्रामवराहे। रा.नि.व.१९।

विष्कलनम्। क्ली। भोजने। त्रिका.।

विष्किरः। पुं। पचिणि। পাখী। कपोतकुक्कुटतित्तिरादिषु। अम.। ते भूमिं विलिख्य नखैर्वर्त्तयन्तीति विष्किरसंज्ञका:। तन्मांसगुणाः—कषायं मधुरं रुच्यं शीतलं रुचिकरञ्च। एवं यथाक्रमं पचिणामपि गुणो ज्ञेयः। रा.नि.व.१७। दर्वीकरसर्पभेदे। सु.कल्प.४अ.।

विष्टब्धाजीर्णम्। क्ली। वातविदग्धाजीर्णे।

विष्टम्भः। पुं। विबन्धरोगे। আনাহরোগ। रा.नि.व.२०। [ष्टब्धाजीर्णकरपदार्थे।

विष्टम्भी (इन्)। त्रि। मलरोधकद्रव्ये। वि-

विष्टरः। पुं। अर्कवृचे। আকন্দ গাছ। रा.नि.व.१०। वृचे। त्रिका.।

विष्टरा। स्त्री। गुण्डासिनीतृणे। रा.नि.व.८।

विष्टिका। स्त्री। चुद्रशणपुष्पिकायाम्। रा.नि.व.४।

विष्ठा। स्त्री। पुरीषे। रा.नि.व.१८।

विष्ठाभुक् (ग्)। पुं। ग्राम्यशूकरे। वै.निघ.।

विष्ठारुहा। स्त्री। सुवर्णकेतक्याम्। रा.नि.व.१०।

विष्ठिष्टा। स्त्री। हरिद्रायाम्। वै.निघ.।

विष्णुकन्दः। पुं। कोङ्कणे स्वनामख्यातमहाकन्दे। गुणाः—मधुरः शीतलः पित्तदाहशोफघ्नः रुच्यः सन्तर्पणश्च। रा.नि.व.७।

विष्णुक्रान्ता। स्त्री। नीलापराजितायाम्। নীল অপরাজিতা। मं विष्णुक्रान्ता। कं विष्णुकाके। गुणाः—कटुः तिक्ता कफवातघ्नी च। रा.नि.व.५। कटुः मेध्या क्रमिव्रणकफघ्नी च। मद.व.१। वाराहीकन्दे। वै.निघ.।

विष्णुगुप्तः। पुं। महामूलके। विष्णुकन्दे। रा.नि.व.७। क्ली। चाणक्यमूले। रा.नि.व.२३।

विष्णुगुप्तकम्। क्ली। चाणक्यमूले। रा.नि.व.२३।

विष्णुतैलम् । क्ली । वातव्याधौ तैलम् । पाठः —"शालपर्णी पृश्निपर्णी बला गोरक्षतण्डुला । एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च । शतावरी सहचरं पचेदेतैः पलोन्मितैः । तैलप्रस्थं पयो दत्त्वा गव्यं वाजं चतुर्गुणम् ॥" इत्यादि । रस.र. । तिलतैलं ४ श. गव्यं छागं वा दुग्धं १६ श. । कल्कार्थं शालपर्णी,पृश्निपर्णी (চাকুলিয়া) वाट्यालकं, गोरक्षतण्डुली (গোরক্ষচাকুলিয়া) एरण्डमूलं, बृहती, कण्टकारी, पूतिकरञ्जमूलं (নাটার মূল) शतमूली, झिण्टीमूलं प्र. १ प. । क्वाथान्तराभात् कश्चित् क्षीरचतुर्गुणं वारि ददाति। "स्वरसक्षीरमाङ्गल्यैः पाको यत्रेरितः क्वचित् । जलं चतुर्गुणं तत्र वीर्य्याधानार्थमावपेत् ॥" प.प्र. इति स्वल्पम् । बृहद्विष्णुतैलं यथा —"जलधरोऽश्वगन्धा च जीवकर्षभकौ शटी । काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका । देवदारु मधुरिका पद्मकाष्ठञ्च सैन्धवम् । मांसी चैला त्वचं कुष्ठं वचा शैलजचन्दनं । मञ्जिष्ठा मृगनाभिश्च श्वेतचन्दनकुङ्कुमं (रेणुकं) । पर्ण्यश्च: कुन्दखोटिश्च ग्रन्थिकञ्च नखी तथा । एतेषां पलिकैर्भागैः तैलञ्चापि तथाढ़कं । शतावरीरससमं दुग्धञ्चापि समं भवेत् । विष्णुतैलवरं श्रेष्ठं सर्व्ववातविकारनुत् .. ॥" इत्यादि । तिलतैलं १६ श. । शतमूलीरसः १६ श. दुग्धं १६ श. वारि ३२ श. । कल्कार्थं—मुस्ता अश्वगन्धा जीवकः ऋषभकः (अभावे गुड़ूची वंशरोचना) शटी काकोली क्षीरकाकोली जीवन्ती यष्टिमधु देवदारु मधुरिका पद्मकाष्ठं सैन्धवं जटामांसी एला गुड़त्वक् कुष्ठ वचा शैलजं रक्तचन्दनं मञ्जिष्ठा मृगनाभिः श्वेतचन्दनं कुङ्कुमं शालपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी कुन्दुरुखोटिः ग्रन्थिपर्णं नखी च प्र. १ प. । रस.र. ।

विष्णुपदम् । क्ली । आकाशे । अम. । पद्मे । हे.च. । [लिया । वै.निघ. ।

विष्णुपर्णिका । स्त्री । पृश्निपर्ण्याम् । চাকু-

विष्णुपर्णी । स्त्री । भूम्यामलक्याम् । वै.निघ. ।

विष्णुप्रिया (हिता) । स्त्री । तुलसीवृक्षे । वै.निघ. । [पार्थौ । त्रिका. ।

विष्णुलिङ्गी । स्त्री। वर्त्तिकापक्षिणि । বটের

विष्णुवल्लभा । स्त्री । तुलसीवृक्षे । रा.नि.व. १० । अग्निशिखायाम् । বিষলাঙ্গুলিয়া । श.च. ।

विष्वक्पर्णी । स्त्री । भूम्यामलक्यां । वै.निघ. ।

विष्वक्सेनकान्ता (प्रिया) । स्त्री । वाराहीकन्दे । रा.नि.व.७ । अम. । च.शा.८अ. ।

विष्वक्सेना । स्त्री । प्रियङ्गुलतायाम् । अम.। भैष कुष्ठ.चि.महाभल्लातकगुड़े ।

विष्वग्वायुः । पुं । घूर्णितवाते । এলোমেলো বাতাস । गुणाः—"विष्वग्वायुरनायुष्यः प्राणिनां नैकदोषकृत् । सर्व्वर्त्तुलिङ्गको हन्ता हृद्योत्पातपुरःसरः ॥" राज.२प. ।

विसम् । क्ली । मृणाले । रा.नि.व.१० । च.द. हृद्रो.चि.श्वदंष्ट्राद्यघृते । [व.१० ।

विसकुसुमम् । क्ली । कमले, पद्मे । रा.नि.

विसग्रन्थिः । पुं । पद्ममूले । পদ্মের মূল । बलप्रसाधनद्रव्यमिदम् । सु.सू.४५अ. ।

विसङ्कटः । पुं । इङ्गुदीवृक्षे । रा.नि.व.८ । सिंहे । श.च. ।

विसजम् । क्ली । पद्मे । श.कल्प. । [त्रिका. ।

विसनाभिः । स्त्री । पद्मिन्यां । পদ্মের ঝাড় ।

विसप्रसूनम् । क्ली । पद्मे । अम. ।

विसर्गः । पुं । मोक्षे । त्यागे । वर्षाशरद्धेमन्तकालेषु । मा.ज्व.नि.वि.र. । मलनिर्गमे । मे. ।

विसर्पः । पुं । पाण्डुरोगे । रा.नि.व.२० । स्वनामकक्षुद्रकुष्ठे । तन्निदानादि—"लवणाम्लकटूष्णादिसंसेवाद्दोषकोपतः । विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात् । पृथक् त्रयस्त्रिभिश्चैको विसर्पो द्वन्द्वजास्त्रयः । वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः । चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः । आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः । यस्तु कर्द्दमको घोरः स पित्तकफसम्भवः । रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः । विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त धातवः ॥" मा.नि. । अन्यच्च—"त्वङ्मांसशोणितगताः कुपितास्तु दोषाः सर्व्वाङ्गसारिणमिहास्थितमात्मलिङ्गम् । कुर्व्वन्ति यं विस्तृतमुन्नतमाशुशोफं तं सर्व्वतो विसरणाच्च विसर्पमाहुः ॥" तत्र वातात्मकोऽसितमृदुरूक्षत्वादिलक्षणः वर्ज्यस । पित्तात्म-

क्ती द्रुतगतिर्ज्वरदाहपाकस्फोटप्रभेदबहुल:, श्लेष्मात्मक: मन्दसर: भ्रशीघ्रपाक: स्निग्ध: सित:, अल्पवेदन उग्रकण्डू: सर्व्वात्मक: सर्व्वलक्षणयुक्तोऽवगाढ़: पक्कश्च मांसशिरानाशात् न सिध्यति। इत्यादि। सु.नि.१०अ.। [सर्पि:पानादिकं शस्तम्।

विसर्पज्वर:। पुं। तज्जन्यागन्तुज्वरे। तत्र

विसर्पणम्। क्ली। कार्ये सञ्चरणे। तन्तुव्रणविटपादे: विसर्पणे। म.।

विसर्पि:। पुं। विसर्परोगे। रा.नि.व.२०।

विसर्पिणी। स्त्री। श्वेतबुह्नायाम्, यवतिक्तालतायाम्। रा.नि.व.३।

विसलम्। क्ली। पल्लवे। त्रिका.।

विसवर्त्म (अन्)। क्ली। वर्त्मगतनेत्ररोगविशेषे। लक्षणं—"शूनं यद्वर्त्म बहुभि: सूक्ष्मैश्छिद्रै: समन्वितं। विसमन्तर्जल इव विसवर्त्मेति तन्मतम्॥" सु.उ.३अ.।

विसशालूकम्। क्ली। पद्मकन्दे। पद्मेर गेंड़ो। गुणा:—गुरु विष्टम्भि शीतलञ्च। राज. ३प.।

विसार:। पुं। मत्स्ये। अम.। रा.नि.व.४।

विसारिणी। स्त्री। माषपर्ण्याम्। माषाणी। रा.नि.व.१। [पद्मिन्यां। अम.।

विसिनी। स्त्री। मृणाले। रा.नि.व.१०।

विसूचिका (ची)। स्त्री। अजीर्णजातरोगविशेषे। ওলা উঠাবিশেষ। निरुक्ति:—"सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिल:। यत्राजीर्णेन सा वैद्यैर्विसूचीति निगद्यते॥" तस्य निदानं यथा—"अजीर्णमामं विष्टब्धं विदग्धञ्च यदीरितम्। विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका। न तां परिमिताहारा लभन्ते विदितागमा:। मूढ़ास्तामजितात्मानो लभन्तेऽशनलोलुपा:॥" लक्षणं—मूर्च्छातिसारौ वमथु: पिपासा शूलं भ्रमोद्वेष्टनजृम्भदाहा:। वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेद:॥" तदुपद्रवाश्चाह—"निद्रानाशोऽरति: कम्पो मूत्राघातो विसंज्ञता। अमी उपद्रवा घोरा विसूच्या: पञ्च दारुणा:॥" तस्या अरिष्टं श्यावदन्तादि। इत्यादि। मा.नि.।

विसृत:। त्रि। निर्गते। वा.उ.२६अ.।

विस्तारी (इन्)। पुं। वटवृक्षे। वै.निघ.।

विस्तीर्णपर्णम्। क्ली। माणकन्दे। মাণকচু। श.च.।

विस्फा(स्फु)रक:। पुं। वातोल्बणसन्निपातज्वरे। लक्षणं—"श्वास: कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथू। पार्श्वयो: वेदना जृम्भा कषायत्वं मुखस्य च। वातोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। एष विस्फारको नाम्ना सन्निपात: सुदारुण:॥" भा.म.१भ.।

विस्फुरणी / **विस्फूर्जनी** } स्त्री। तिन्दुकवृक्षे। গেঁদগাছ। वै.निघ.।

विस्फुरितम्। क्ली। काण्डभग्नास्थिभङ्गभेदे। तेनास्थि स्तोकं विदीर्णं भवति। भा.म.४भ.।

विस्फुलिङ्ग:। पुं। विषभेदे। हे.च.।

विस्फोट:। पुं। दुष्टस्फोटके। বিষফোড়া। रा.नि.व.२०। तस्य निदानपूर्व्वां सम्प्राप्तिमाह—"कट्वम्लतीक्ष्णोष्णविदाहिरुक्षक्षारैरजीर्णाध्यशनातपैश्च। तथर्त्तुदोषेण विपर्य्ययेण कुप्यन्ति दोषा: पवनादयस्तु॥ त्वचमाश्रित्य ते रक्तं मांसास्थीनि प्रदूष्य च। घोरान् कुर्व्वन्ति विस्फोटान् सर्व्वान् ज्वरपुर:सरान्॥" इत्यादि। भा.।

विस्फोटज्वर:। पुं। तज्जन्यागन्तुज्वरे।

विस्रम्। क्ली। चाणक्यमूलके। भा.पू.१भ.शा. व.। त्रि। पूतिगन्धे, आमगन्धिनि। अम.।

विस्रगन्ध: (न्धा, न्धि:)। पुं, स्त्री। पलाण्डौ। পেঁয়াজ। रा.नि.व.७। गोदन्तहरिताले, हरिताले। हे.च.। हवुषायां। হবুষ ফল। रा.नि व.४। [नि.व.१३।

विस्रगन्धक:। पुं। गोदन्तहरिताले। रा.

विस्रसा। स्त्री। जरायाम्। अम.।

विस्रा। स्त्री। हवुषायाम्। হবুষ ফল। रा. नि.व.४। वसायाम्। अम.। [वै.निघ.।

विस्राव:। पुं। अन्नमण्डे। ভাতের মাড়।

विस्रावणम्। क्ली। उत्थितस्य व्रणस्य वेदनोपशमार्थं पाकशमनार्थञ्चोपक्रमविशेषे। सु.चि.१ अ.। सु.सू.१४अ.।

विस्राव्यः । त्रि । विद्रधिकुष्ठादिविस्रावणार्हे । स्रावयोग्ये । सु.सू.५ अ. ।

विहगः (ङ्गमः) । पुं । पक्षिणि । अम. ।

विहङ्गम् । क्ली । स्वर्णमाक्षिके । रस.कौ.ज्वरान्तकरसे ।

विहङ्गमा । स्त्री । भारयष्ट्यां । बाँक् । श.र. ।

विहायसः । पुं । पक्षिणि । श.टी.भ. ।

विहायाः (स्) । पुं । पक्षिणि । क्ली । आकाशे । त्रिका. ।

विहारः । पुं । चेष्टायाम् । भ्रमणे । मे. । विन्दुरेखकपक्षिविशेषे । श.च. ।

विहावः । पुं । हिक्कायाम् । हेंचि । वै.निघ. । कासे । भा. । [गाछ । रा.नि.व.१० ।

विहीरः । पुं । रक्तार्के । अर्कवृक्षे । आकन्द

विक्षेपः (णम्) । पुं, क्ली । वायुजन्यव्रणवेदनाविशेषे । सु.सू.२२ अ. । हस्तादिचालने । मा.नि. । अवधूनने । वा.चि.४ अ. ।

वीङ्गा । स्त्री शुकशिम्ब्यां । आलाकुशी । वै.च. ।

वीजम् । क्ली । अङ्कुरे । मे. । मज्जायाम् । शुक्रधातौ । रा.नि.व.१८ । वीजसारे । पद्मवीजे । भा.म.२भ.अश्मरी.चि. । पुष्करमूले । रा.नि.व.६ । कारणे । अम. । शस्ये । विचि । वीजानां शोधनं यथा—"वीजमादौ समादाय रौद्रयन्त्रे विशोषयेत् । ईषत्सैन्धवयुक्तेन द्रवेण यवतः सुधीः । अपामार्गकषायेण निम्बवीजं विशोधयेत् । शिग्रुकार्पासवीजानि अपामार्गस्य वीजकम् । घर्म्मेण शोधनं तेषां न दद्यात् सैन्धवं ततः । तिक्तां कोषातकीं दन्तीं पटोलीं चेन्द्रवारुणीम् । कटुतुम्बीं देवदालीं काकतुण्डीञ्च शोधयेत् । धात्रीफलरसेनैव महाकालस्य शोधनम् । करञ्जयुग्मयोर्वीजं भृङ्गराजेन शोधयेत् । गुञ्जादिसर्व्ववीजानां नरमूत्रैः पटुं विना । नारिकेलाम्बुना शोध्यं विल्वं भल्लातकोद्भवम् । गुडूचीं त्रिफलाक्वाथे क्षीरे चैव विशेषतः । पक्वा च खण्डशः शुद्धं टङ्कीयान्मृदुगुग्गुलुम् । ऊडदारकवीजन्तु पक्वं दोलाकृतं पचेत् । दुग्धपूर्णेषु पात्रेषु ततः शुध्यति निश्चितम् ॥" इत्यादि । र.सा.सं. ।

वीजकः । पुं । प्रियालवृक्षे । पियाशाल । हिं विजयसार । प.मु. । See अक्षिका । रस.र.शिरोरो.चि. । "त्रिकटु पुष्करवीजकः ।" मातुलुङ्गवृक्षे । रा.नि.व.११ । वै.निघ.२भ.क्षय.चि.दशमूलासवे । मूढगर्भभेदे । "यस्तु निर्गच्छत्येकशिरोभुजः स वीजकः ।" सु.नि.८ अ. । श्वेतशिग्रौ । वै.निघ. । क्ली । वीजे । [वै.निघ. ।

वीजकरः । पुं । माषव्रीहौ । माषकलाय ।

वीजकर्कटिका (टी) । स्त्री । दीर्घकर्कटिकायां । लम्बा काँकुड़ । वै.निघ. ।

वीजकसारः । पुं । प्रियालवीजे । सु.चि.२७ अ. । भा.कुष्ठचि.महाभल्लातके । मातुलुङ्गसारे । रा.नि.व.११ ।

वीजका । स्त्री । कपिलद्राक्षायाम् । वै.निघ. ।

वीजकाह्वः । पुं । मातुलुङ्गवृक्षे । वै.निघ. ।

वीजकृत् । क्ली । वाजीकरणे । रा.नि.व.२० ।

वीजकोशः (षः) । पुं । पद्मकर्णिकायाम् । पद्मेर चाकि वा फोँपल । भा. ।

वीजकोशकम् । क्ली । त्रपणे । वै.निघ. ।

वीजगर्भः । पुं । पटोले । रा.नि.व.३ । भा. ।

वीजगुप्तिः । स्त्री । धान्यादिकञ्चुकाम् । धान्यादिर खोसा । शिम्ब्यां । शीम् । रा.नि.व.१६ ।

वीजद्रुमः । पुं । असनवृक्षे । पियाशाल । रा.नि.व.२३ । [नि.व.६ ।

वीजधान्यम् । क्ली । धान्यके । धनिया । रा.

वीजनः । पुं । पीतलोध्रे । वै.निघ. । जीवञ्जीवपक्षिणि । सारस्वतः ।

वीजपादपः । पुं । असनवृक्षे । पियाशाल । वै.निघ. । भल्लातकवृक्षे । रा.नि.व.११ ।

वीजपुष्पः (कः) । पुं, क्ली । यवनालवृक्षे । जनार गाछ । रा.नि.व.१६ । मदनवृक्षे । मरुवकवृक्षे । मे. ।

वीजपूरः (कः) । पुं । (Citrus medica.) The citron. छोलङ्गवृक्षे । टावा लेवुर गाछ । हिं वीजौरा । प.मु. । सा.कौ.पि.ज्व.चि. । गुणाः—"वीजपूरफलमम्लकटूष्णं श्वासकासशमनं

पचनञ्च । कण्ठशोधनपरं लघु हृद्यं दीपनञ्च रुचिकृत् पवनञ्च ॥" तथाच—बालं पित्तमरुत्कफास्रकरणं मध्यञ्च तादृग्विधं पक्वं वर्णकरञ्च हृद्यमथ तत् पुष्णाति पुष्टिं बलम् । शूलाजीर्णविबन्धमारुतकफश्वासार्त्तिमन्दाग्निजित् कासारोचकशोकशान्तिदमिदं··· । अन्यच्च—"त्वक् तिक्ता दुर्ज्जरा स्यात् क्रमिकफपवनध्वंसिनी स्निग्धमुष्णं मध्यं शूलार्त्तिपित्तप्रशमनमखिलारोचकघ्नञ्च गौल्यं । वातार्त्तिघ्नं कटाढ्यं जठरगदहरं केसरं दीप्यमम्लं वीजं तिक्तं कफार्शःश्वयथुशमकरं वीजपूरस्य पथ्यम् ॥" रा.नि.व.११ । तन्मज्जगुणाः—स्वादुपाकः आग्नेयः बलकृत् स्निग्धः पित्तघ्नश्च । सु.सू.४६अ. । फलगुणाः—रुच्यं रसाम्लं लघु दीपनं रक्तपित्तकरं कण्ठं जिह्वाहृदयशोधनम् । मद.व.६। मधुरकर्क्कट्यां । শরবতী লেবু । गुणाः—"वीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी । मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः । रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ॥" भा. ।

वीजपूरमज्जा (न्) । पुं । मातुलुङ्गमज्जनि । টাবা লেবুর বীচির শাঁস । रा.नि.व.११ ।

वीजपूरफलम् । क्ली । मातुलुङ्गफले । টাবা লেবু । हिं वीजौरा । मद.व.६ ।

वीजपूर्णः । पुं । वीजपूरवृक्षे । प.मु. । मधुरमातुलुङ्गे । শরবতী লেবু । वै.निघ. ।

वीजपेशिका । स्त्री । वृषणे । অণ্ডকোষ । रा.नि.व.१८ ।

वीजफलकः । पुं । मातुलुङ्गवृक्षे । मधुवीजपूरे । টাবা লেবু, শরবতী লেবু । रा.नि.व.११ ।

वीजमातृका । स्त्री । पद्मवीजे । हारा. ।

वीजरत्नः (त्नम्) । पुं, क्ली । माषकलाये । हे.च. । [यो वीजरुहाः ।" हे.च. ।

वीजरुहः । पुं । शालिधान्यादौ । "शाल्याद-

वीजरेचक(न)म् । क्ली । जैपालवीजे । रा.नि.व.६ ।

वीजवृक्षः । पुं । असनवृक्षे । পিয়াশাল । "असनो वीजवृक्षकः ।" रा.नि.व.२३।९ । भल्लातकवृक्षे । वै.निघ. ।

वीजस्नेहः । पुं । पलाशवृक्षे । वै.निघ. ।

वीजाख्यः । पुं । जैपालवृक्षे । क्ली । तद्वीजे । জয়পাল গাছ বা তৎফল । वै.निघ. ।

वीजाम्लम् । क्ली । वृक्षाम्ले । रा.नि.व.२२ । पिण्डाम्ले । रा.नि.व.२२ ।

वीजाविकः । पुं । उष्ट्रे । वै.निघ. ।

वीजाह्वः । पुं । मातुलुङ्गवृक्षे । वा.चि.१६अ. ।

वीजी (इन्) । पुं । तण्डुलीयकवृक्षे । वै.निघ. ।

वीजोदकम् । क्ली । करकायां । मे. ।

वीटिः (टिका, टी) । स्त्री । ताम्बूललतायां । পাণ গাছ । सज्जिततामूले । পাণের বীড়া । शब्दकल्पद्रुमः ।

वीतनः । पुं । कृकपार्श्वयोः । কক্ষরামধ্যভাগের পার্শ্বদ্বয় । "कृकस्तु कन्धरामध्यं कृकपार्श्वौ तु वीतनौ ।" हे.च. ।

वीतशोकः । पुं । अशोकतरौ । श.मा. ।

वीतिः । पुं । घोटके । हे.च. । [वै.निघ. ।

वीतिका । स्त्री । यष्टिमधुनि । नीलिकायां ।

वीभत्सः । पुं । विकृतौ । त्रिका. ।

वीरम् । क्ली । (पवर्गीयमपि) । उशीरे । वीरणमूले । বেণার মূল । रा.नि.व.१२ । सिन्दूरे । प.मु. । मरिचे । रा.नि.व.६ । शालपर्ण्याम् । च.चि.२अ.वृंहणीगुड़िकायां । पुष्करमूले । পুষ্করমূল । लौहे । वै.निघ. । काञ्जिके । रा.नि.व.१५ । नले । मे. । आरुके । रा.नि.व.११ । पुं । अर्ज्जुनवृक्षे । हे.च. । भल्लातकवृक्षे । अम. । वीरणे । शुक्लदर्भे । काकोल्याम् । वै.निघ. । पीतभिण्टाम् । एकवीरवृक्षे । ऋषभके । र.मा. । श्वेतकरवीरे । रा.नि.व.१० । लताकरञ्जे । रा.नि.व.८ । वाराहीकन्दे । तण्डुलीयक्षुपे । কাঁটানটিয়া । रा.नि.व.७ ।

वीरकः । पुं । श्वेतकरवीरे । रा.नि.व.१० ।

वीरणम् (मूलं, लिका) । क्ली, स्त्री । उशीरतृणे । বেণার মূল । हिं खस् । तें वट्टिवेरु । उत्. विणा, गन्दविणा । वम्. खस्खस् । ता. वेत्तिवेर । रा.नि.व.१२ । च.सू.४अ.स्तन्यजनने । भा.उ.वाजी.रतिवल्लभमोदके । गुणाः—"वीरणं पाचनं शीतं वान्तिघ्नं लघु तिक्तकम् । स्तम्भ-

र्ष स्वरकृत् वाग्निमदजित् कफपित्तहृत्। तृष्णा सविषवीसर्पकृच्छ्रदाहव्रणापहम् ॥" भा.। कुशा दितृणगणे। यथा—"कुशः काशश्च दर्भश्च क तृणं मूलणं तथा। श्वेतदूर्व्वा नीलदूर्व्वा गण्डदूर्व्वे ति वीरणम् ॥" अर्कगुणाः—एतदर्को हरेच्छूलं सम्भुत्थयति चानलम्। अतस्तस्मानकृष्यं बलं कुर्य्यादनेकधा ॥" अर्क.चि.। [अनूपे। कश्चित्।

वीरतण्डुलनामा (न्)। पुं। तण्डुलीयशा

वीरतरम्। क्ली। वीरणमूले। বেণার মূল। प.मु.।

वीरतरः। पुं। शरवृक्षे। শর গাছ। विल्लान्तरवृक्षे। रा.नि.व.८। महाशाली। भल्लातकवृक्षे। प.मु.। श्वेतकोकिलाक्षे। শ্বেত কুলিয়াখাড়া। र.मा.।

वीरतरुः। पुं। भल्लातकवृक्षे। विल्लान्तरवृक्षे। अर्जुनवृक्षे। रा.नि.व.११.८.६। शरतृणे। শর গাছ। "अन्ये तु वीरतरुर्विल्लान्तर इति वदन्ति।" सु.सू.३८अ.। श्वेतकोकिलाक्षे। प.मु.। प्रियालवृक्षे। वै.निघ.।

वीरतर्व्वादिगणः। पुं। तदादिद्रव्यवर्गे। यथा—वीरतरुसहचरद्वयदर्भवृक्षादनीगुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थमोरटावसुकवसिरभल्लूककुरुण्टकेन्दीवरकपोतवङ्काः श्वदंष्ट्रा चेति। गणोऽयं वातघ्नः अश्मरीशर्करामूत्रकृच्छ्राघातरुजाहरश्च। सु.सू.३८अ.। अन्यः—"वीरतरुः सहचरौ दर्भो वृक्षादनी नलः। गुन्द्राकाशकुशावश्मभेदमोरटटुण्टुकाः। कुरुण्टकोऽथ वशिरो वसुकः साग्निमन्थकः। इन्दीवरी श्वदंष्ट्रा च तथा कापोतवक्रकः। वीरतर्व्वादिरित्येष गणो वातविकारनुत् ॥" শর বা বিল্বান্তর, পীত নাল ঝাঁটীদ্বয়, উলু, রাস্না বা মান্দরা, নল, গুলুঞ্চ বা মুতা, কাশ, কুশ, পাষাণভেদমূল, ইক্ষুমূল, শোণাছাল, শ্রীহস্তিনী, শুনিঠা বা গজাপপুল, বকবৃক্ষ বা জাম-আঁটী, আগস্ত, চুঞামূল, গোক্ষুরী, কাউ-আঁটী। च.द.मू.घा.चि.,अश्मरी.चि.।

वीरद्रुः। पुं। अर्जुनवृक्षे। रा.नि.व.९। विल्लान्तरवृक्षे। वै.निघ.।

वीरनायकः। पुं। उशीरे। বেণা। वै.निघ.।

वीरपत्रा (त्री)। स्त्री। विजयायाम्। सिद्धि। रा.नि.व.६। धारणीनाममहाकन्दे। रा.नि.व.७। [नि.प.१०।

वीरपर्णम्। क्ली। सुरपर्णाभिधसुगन्धपत्रे। रा.

वीरपादपः। पुं। विल्लान्तरवृक्षे। वै.निघ.।

वीरपुष्पा (ष्पी)। स्त्री। वाट्यालकभेदे, महाबलायाम्। वै.निघ.। सिन्दूरपुष्पीवृक्षे। रा.नि.व.१०।

वीरभद्रः। पुं। वीरणे। বেণা। मे.।

वीरभद्रकम्। क्ली। वीरणे। বেণা। जटा.।

वीरभद्ररसः। पुं। सन्निपातज्वरे रसः। पाठ.—"त्र्यूषणं पञ्च लवणं द्विक्षीरं जीरकद्वयं। क्षारत्रयं समांशेन चूर्णमेषां पलत्रयम्। शुद्धसूतं मृताभ्रञ्च गन्धकञ्च पलं पलम्। आर्द्रकस्य द्रवैः खल्ले दिनमेकं विमर्दयेत्। वीरभद्ररसः ख्यातो माषैकं सन्निपातजित्। चित्रकार्द्रकसिन्धूत्थमनुपानं जलेन च ॥" रस.चि.।

वीररजः (स्)। क्ली। सिन्दूरे। रा.नि.व.१३

वीरवती। स्त्री। मांसरोहिण्याम्। भा.।

वीरवल्ली। स्त्री। देवदाल्याम्। দেয়াতাড়া। वै.निघ.।

वीरवृक्षः। पुं। भल्लातकवृक्षे। अम.। महाशाली। देवधान्ये। মোটাধান, দেধান। प.मु.। विल्लान्तरवृक्षे। रा.नि.व.८। अर्ज्जुनवृक्षे। हे.च.।

वीरवेतसः। पुं। अम्लवेतसे। रा.नि.व.६।

वीरशाकः। पुं। वास्तूकशाके। বেতো শাক। वै.निघ.।

वीरसिंहः। पुं। वीरसिंहावलोकनप्रणेतरि।

वीरसिंहावलोकनम्। क्ली। वीरसिंहकृतवैद्यकग्रन्थे।

वीरसेनः। पुं। आरुकवृक्षे। रा.नि.व.११।

वीरा। स्त्री। मद्यसामान्ये। रा.नि.व.१४। पृश्निपर्ण्यां। চাকুলিয়া। च.द.उन्मा.चि.। वृहद्दलायाम्। शतावर्य्याम्। तालमूल्याम्। कटुक्यां। कृष्णातिविषायाम्। काकोल्याम्। रा.नि.व.२३। वा.उ.६अ.महापैशाचघृते। क्षीरकाकोल्यां। मे.।

रा.नि.व.३ । च.चि.५ऋ जायमाणाद्यते । प्रयोगा. ऋर्श:-चि.सुनिषखकवाङ्गेरीद्यते । च.द.उन्मा.चि. महाकल्याणद्यते । आमलक्याम् । एलवालुके । र भायां । विदार्य्यां । भूमिकुष्माण्ड । मे.वा.टी.हे मा.वमनकल्पे । चीरविदार्य्याम् । शुक्र भूमिकुष्माण्ड । सुरामांस्यां । मे. । महाशतावर्य्याम् । ब्राह्म्याम् । रा.नि.व.४ । शिंशपावृक्षे । र.मा. । घृतकुमार्य्याम् । रा.नि.व.५ । भूम्यामलक्याम् । रा.नि.व.५ । वै.निघ.चय.चि.शिवगुटी । जटामांस्यां । च.द.रसायने । "ऋद्धियुग ऋषभवीरा ।"

वीरान्तकः । पुं । अर्जुनवृक्षे । वै.निघ. ।

वीराम्लः । पुं । अम्लवेतसे । । रा.नि.व.६ ।

वीरायतच्छदा । स्त्री । कदलीवृन्दे । वै.निघ ।

वीरारुकम् । क्ली । आरुके । रा.नि.व.११ ।

वीरुत् (धा) । स्त्री । विस्तृतलतायाम् । अम. । श.र. ।

वीरुपत्रिका । स्त्री । चुचुशाके । रा.नि.व.४ ।

वीरेश्वररसः । पुं । पित्तश्लेष्मज्वरे रसः । पाठः—"मृतसूताभतीक्ष्णञ्च तालं गन्धककट्फलं । मेषशृङ्गी वचा शुण्ठी भार्गी पथ्या च बालकं । धान्यकं मर्दयेत्तुल्यं पर्पटीत्थद्रवैर्दिनं । मर्द्यं माषं लिहेत् चौद्रैः…… । काकमाचीरसञ्चातु सैन्धवेन युतं पिबेत् ॥" रस.कौ. ।

वीर्य्यम् । क्ली । बले । प्रभावे । अम. । शुक्रधातौ । रा.नि.व.१८ । द्रव्यगतशक्तौ । "द्रव्याणि येन कुर्व्वन्ति तद्वीर्य्यम् ।" सु.सू.४१ऋ. । "उष्णशीतगुणोत्कर्षात् बुधैर्वीर्य्यं द्विधा स्मृतम् । यत्सर्व्वमग्निसोमीयं दृश्यते भुवनत्रयम् ॥" भा. । अन्यच्च—तद्द्विविधं चिन्त्याचिन्त्यक्रियाहेतुत्वेन । तत्र चिन्त्यक्रियाहेतुर्या द्रव्यरसादीनां स्वस्वकर्म्मणि स्वभावसिद्धा शक्तिः । अचिन्त्यक्रियाहेतुश्च प्रभावापरपर्य्यायः । द्रव्याणां रसाद्यननुरूपकार्य्यकरणशक्तिः । तदुक्तं—"भूतप्रभावातिशयौ द्रव्ये पाके रसे स्थितः । चिन्त्याचिन्त्यक्रियाहेतुवीर्य्यं धन्वन्तरेर्मतम् ॥" शिवदासः । वीर्य्यगुणाः—शीतोष्णस्निग्धरूक्षमृदुतीक्ष्णपिच्छिलविशदाः । तत्र शीतोष्णौ आग्नेयौ । शीतपिच्छिलौ अम्बुगुणभूयिष्ठौ । मार्दवस्य तोयाकाशभूयिष्ठत्वं, रौक्षस्य वायुभूयिष्ठत्वं वैशद्यस्य च चितिवायुभूयिष्ठत्वम् । सु.सू.४१ऋ. । तेजसि । मे ।

वीर्य्या । स्त्री । वीर्य्ये । ऋ.टी.भ. ।

वीहा । स्त्री । वनकुलत्थे । वै.निघ. ।

वीचः । पुं । हट्टे । व्याक. ।

वृंहणम् । क्ली । बलवर्द्धने । घृततैलादिशीतक्रियायाम् सा.कौ. ।

वृंहणः । त्रि । बलवर्द्धके । पृथिव्यम्बुभूयिष्ठे । सु.सू.४१ऋ. । तन्नामकधूमपाने । भा. । स्त्री । अश्वगन्धायाम् । कपिलद्राक्षायाम् । भूकुष्माण्डे । वै.निघ. । वराहमांससाधितयवाग्वाम् । च.सू.२ऋ. ।

वृंहणवस्तिः । पुं । निरूहवस्तिभेदे । "वृंहणद्रव्यनिःक्वाथैः कल्कैर्मधुरकैर्युताः । सर्पिर्मांसरसोपेता वस्तयो वृंहणाः स्मृताः ॥" भा. ।

वृंहणीयवर्गः । पुं । वृंहणाय हिते कषायवर्गे । यथा—चीरिणीराजक्षवकवलाकाकोलीचीरकाकोलीवाट्यायनीभद्रौदनीभारद्वाजीपयस्यार्ष्यगन्धा इति दशेमानि वृंहणीयानि । क्षीरलता, थिराई, বেলেড়া, কাকোলী, ক্ষীরকাকোলী, শ্বেত বেলেড়া, পীত বেলেড়া, বনকাপাস, ভূমিকুষ্মাণ্ড, শুক্র ভূমিকুষ্মাণ্ড । च.सू. ४ऋ. ।

वृकः । पुं । ईहामृगे । हिं हुण्डार । घोष इति लोके । नाथी इति महाराष्ट्रादौ । रा.नि.व.१९ । काके । उणा. । शृगाले । हारा. । वकवृक्षे । श. र. । सरलनिर्यासे । भ.रभसः ।

वृकदंशः । पुं । कुकुरे । हे.च. । [वै.निघ. ।

वृकदन्ती । स्त्री । पाठायाम् । আকনাদি ।

वृकधूपः (कः) । पुं । बहुसुगन्धद्रव्यकृतकृत्रिमधूपे । अम. । सरलद्रवे । তার্পিন্ । अम. ।

वृकधूर्त्तः । पुं । शृगाले । हारा. ।

वृका । स्त्री । पाठायाम् । আকনাদি । रा.नि. व.६ । वै.निघ.२भ.ज्व.चि. । सूर्पद्वयपरिमाणे ।

वृकारातिः (रिः) । पुं । कुकुरे । रा.नि.व. १९ । श.मा. ।

वृकाची । स्त्री । त्रिवृति । তেউড়ী । र.मा. ।

वृकिः (की) । स्त्री । पाठायां । আকনাদি । वै.निघ.२भ.वा.व्या.चि.महारास्नादौ ।

वृजनः । पुं । केशे । उणा. ।

वृजिनः । पुं, क्ली । केशे । मे.। क्ली । शोणिते । रक्तचर्मणि । हे.च. । [श.र. ।

वृतिङ्करः । पुं । विकङ्कतवृक्षे । বঁইচী গাছ।

वृत्तम् । क्ली । सनाथे । रा.नि.व.१८ । पुं । धवलयावनाले । শ্বেত জনার । रा.नि.व.१६ । गुण्डतृणे । रा.नि.व.८ । अम्लीरवृक्षे । वै.निघ. । सप्तपर्णवृक्षे । प.मु. । कच्छपे । रा.नि.व.१९ ।

वृत्तकम् । क्ली । वेत्रे । वै.निघ. ।

वृत्तकर्कटी । स्त्री । वर्त्तुलाकारकर्कट्याम् । থর্মুজা । रा.नि.व.७ ।

वृत्तका । स्त्री । उपोदक्यां । পুঁই । वै.निघ. ।

वृत्तकोशा । स्त्री । देवदाल्याम् । रा.नि.व.३ ।

वृत्तकोषः । पुं । पीतदेवदाल्याम् । দেয়াতাড়া । भा. ।

वृत्तगुण्डः । पुं । गुण्डतृणे । गुणाः—मधुरः शीतलः कफपित्तघ्नः अतीसारदाहरक्तघ्नश्च । रा.नि.व.८ ।

वृत्ततण्डुलः । पुं । यावनालनामकशिम्बीधान्ये । জনার, জুওয়ারি । रा.नि.व.१६ ।

वृत्ततुम्बी । स्त्री । वृत्तालाब्वां । গোল লাউ । वै.निघ. ।

वृत्ततृणम् । क्ली । गुण्डतृणे । वै.निघ. ।

वृत्तनिष्पाविका । स्त्री । नखनिष्पाव्यां, क्षुद्रशिम्ब्याम् । ছোট মটর শুঁটী । रा.नि.व.७ ।

वृत्तपत्रः । पुं । उत्तमशाकविशेषे । নটিয়া শাক । प.मु. । स्त्री (त्रा) । पुत्रदात्र्याम् । रा.नि.व.३ । [ছাগল বেঁটে । रा.नि.व.३ ।

वृत्तपर्णिका । स्त्री । अजान्त्रीलतायाम् ।

वृत्तपर्णी । स्त्री । पाठायाम् । আকনাদি । रा.नि.व.६ । महाश्रावणपुष्पिकायाम् । रा.नि.व.४ ।

वृत्तपत्त्रः । पुं । शुद्रमझे । वै.निघ. ।

वृत्तपुष्पः । पुं । कदम्बवृक्षे । शिरीषवृक्षे । मल्लिकावृक्षे । मुद्गरवृक्षे । रा.नि.व.२३ । जलवेतसे । भूकदम्बे । रा.नि.व.९ । स्त्री (ष्पा) । नागदमन्यां । নাগদনা । रा.नि.व.५ । कौङ्कणदेशप्रसिद्धवृत्तपुष्पवृक्षे । रा.नि.व.१० । [जीरके । वै.निघ. ।

वृत्तफलम् । क्ली । मरिचे । रा.नि.व.६ ।

वृत्तफलः । पुं दाड़िमवृक्षे । ডালিম গাছ । बदरवृक्षे । কুল গাছ । कपित्थवृक्षे । কয়েৎ গাছ । रा.नि.व.११ । रक्तापामार्गे । भा.पू.१भ. । करञ्जवृक्षे । तरम्बुजे । তরমুজ, থর্মুজ । वै.निघ. ।

वृत्तफला । स्त्री । वार्त्ताकीवृक्षे । বেগুণ গাছ । रा.नि.व.७ । शशाण्डुल्याम् । ক্ষেত্রকর্কটী । आमलक्याम् । रा.नि.व.११ । [श.च. ।

वृत्तभोजनः । पुं । गण्डीरे । শমঠ শাক ।

वृत्तमल्लिका । स्त्री । श्वेतार्के । वै.निघ. । त्रिपुरमल्लिकायाम् । मं वाटीगरें । कं दुन्दुभि मल्लिका । बम्. वटमोगरी । गुणाः— नेत्ररोगघ्नी कटुः उष्णा व्रणघ्नी बहुगन्धा मुखरोगघ्नी च । रा.नि.व.१० । [वै.निघ. ।

वृत्तयुग्मः । पुं । वातामवृक्षे । বাদাম গাছ ।

वृत्तवीजः । पुं । राजमाषे । বরবটী । रा.नि.व.१६ । भिण्डातुपे । रा.नि.व.४ ।

वृत्तवीजका (जा) । स्त्री । पाण्डुरफल्याम् । रा.नि.व.५ । आढ़क्यां । অরহর । रा.नि.व.१६ ।

वृत्ता । स्त्री । मांसरोहिण्याम् । प्रियङ्गुलतायां । रा.नि.व.१२ । श्वेतनिष्पावे । শ্বেত শীম্ । रा.नि.व.१६ । झिञ्झिरीटाक्षुपे । रा.नि.व.४ । नागदमन्याम् । নাগদনা । रा.नि.व.५ । रेणुकायाम् । রেণুক । रा.नि.व.६ । वै.निघ.२भ.वा.व्या.चि.वातारिरसे । हस्तिकोशातक्याम् । হস্তিঘোষা । रा.नि.व.७ ।

वृत्तिः । स्त्री । जीवनोपाये । अम. ।

वृत्तिस्थः । पुं । कृकलासे । रा.नि.व.१९ ।

वृत्तेर्व्वारुः । पुं । खर्मूजावृक्षे । থর্মুজা গাছ । रा.नि.व.७ । [व.१८ ।

वृथार्त्तवा । स्त्री । वन्ध्यायां स्त्रियाम् । रा.नि.

वृद्धम् । क्ली । शैलजनामगन्धद्रव्ये । শৈলজ । रा.नि.व.१२ । पुं । एकपञ्चाशदूर्द्ध्वे वृद्धे, स्थविरे । रा.नि.व.१८ । वृद्धदारकलतायाम् । रा.नि.व.३ ।

वृद्धकण्टः (कः) । पुं । इङ्गुदीवृक्षे । वै.निघ.।

वृद्धकर्णिका । स्त्री । पाठायां । रा.नि.व.६ ।

वृद्धकाकः । पुं । द्रोणकाके । दाँड़काक । हे.च. । [कल्प.४अ. ।

वृद्धगोनसः । पुं । मण्डलिसर्पविशेषे । सु.

वृद्धतिक्ता । स्त्री । पाठायाम् । आकनादि । वै.निघ. ।

वृद्धत्वम् । क्ली । वार्द्धक्ये । अम. ।

वृद्धदारकः (रुः, कः) । पुं । (Gmelina asiatica or Rourea santaloides.) स्वनामख्यातलताविशेषे । वीजताड़क । हिं वधार । स द्विविधः श्वेतरक्तभेदेन । गुणाः—"वृद्धदारुद्वयं गौल्यं पिच्छिलं कफवातहृत् । बल्यङ्गासामदोषघ्नं द्वितीयं स्वल्पवीर्य्यदम् ॥" रा.नि.व. २ । कृष्णवृद्धदारके । वै.निघ. ।

वृद्धदारकादिलौहम् । क्ली । ऊरुस्तम्भाधिकारे औषधम् । पाठः—"वृद्धदारचित्रहन्तीकरिकर्णाग्निमानकैः । त्रिकत्रययुतो लौह आमवातान्तको मतः ॥" इदं योगरत्नाकरस्य । रस.र. ।

वृद्धधूपः । पुं । शिरीषवृक्षे । श्रीवासवृक्षे । वै. निघ. ।

वृद्धधूमा । स्त्री । श्लेष्मातकवृक्षे । वै.निघ. ।

वृद्धनाभिः । त्रि । उन्नतनाभौ । (गोंड़ा । अम.

वृद्ध(द्धि)बला । स्त्री । महासमङ्गायां । बड़ लज्जालुका । रा.नि.व.४ । महाबलायाम् । वै. निघ. ।

वृद्धराजः । पुं । अम्लवेतसे । कश्चित् ।

वृद्धरुहा । स्त्री । शतावर्य्यां । च.सू.४अ. ।

वृद्धवाहनः । पुं । आम्रवृक्षे । कश्चित् ।

वृद्धविभीतकः । पुं । आम्रातकवृक्षे । आमड़ा गाछ । श.मा. ।

वृद्धसूत्रकम् । क्ली । इन्द्रतूलके । हारा. ।

वृद्धा । स्त्री । पञ्चाशीर्द्धं प्राचीनायाम् । बुड़ि मा । तत्सम्भोगे मरणं भवति । राज. । महाश्रावणिकायां । र.नि.व.५। अङ्गुष्ठे । बुड़ आङ्गुल । श.र. ।

वृद्धाङ्गुलिः । स्त्री । अङ्गुष्ठाङ्गुलौ । बुड़ा आङ्गुल । श.र. ।

वृद्धिः । स्त्री । आधिक्ये । च.सू.१अ. । स्वनामख्यातौषधौ । वृद्धि । एषा दक्षिणावर्त्तफला गौड़े प्रसिद्धा । "ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामले । वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः । प्रयोगेष्वनयोरेकं यथालाभं प्रयोजयेत् ॥" गुणाः—"वृद्धिर्गर्भप्रदा शीता बृंहणी मधुरा स्मृता । वृष्या पित्तास्रशमनी क्षतकासक्षयापहा ॥" भा. मधुरा स्निग्धा तिक्ता शीतला रुचिमेधाकरी श्लेष्मकुष्ठकृमिघ्नी च । रा.नि.व.५ । वा.सू.१५अ.पद्मकादिः । रोगविशेषे ताः सप्तविधाः- वातपित्तकफशोणितमेदोमूत्रान्त्रजा इति । निदानादि —"कुद्धोऽनूर्द्धगतिर्वायुः शोथशूलकरश्चरन् मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः । प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः । दोषास्रमेदोमूत्रान्त्रैः सवृद्धिः सप्तधा गदः ॥" मा.नि. । तासां मूत्रान्त्रनिमित्ते वृद्धी वातसमुत्थे, केवलमुत्पत्तिहेतुरन्यतमः । अथ प्रकुपितोऽन्यतमो हि दोषः फलकोषवाहिनीरभिप्रपद्य धमनीः फलकोषयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते । तासां भविष्यतीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोशशोफश्चेति । तत्र वातवृद्धिं वातपूर्णदृतिमिव परुषां, पित्तवृद्धिं पक्वोदुम्बरसङ्काशां, श्लेष्मवृद्धिं कठिनामल्पवेदनां शीतां कण्डुमतीं, रक्तवृद्धिं कृष्णस्फोटावृतां पित्तवृद्धिलिङ्गां, मेदोवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनाञ्च जानीयात् । मूत्रवेगधारणशीलस्य मूत्रवृद्धिर्भवति । सु.नि.१२ अ. ।

वृद्धिका । स्त्री । शङ्खपुष्प्याम् । (श्वेत अपराजिता । अर्कपुष्प्याम् । वै.निघ. । ऋद्धौ । श.मा. ।

वृद्धिदः । पुं । जीवकनामकक्षुपे । जीवक । रा.नि.व.५ । वाराहीकन्दे । रा.नि.व.७ ।

वृद्धिदात्री । स्त्री । ऋद्धौ । वृद्धि । रा.नि.व.५ ।

वृद्धिपत्रम् । क्ली । षड्ङ्गुलशस्त्रविशेषे छेदने भेदने च । सु.सू.८अ. । वृद्धेः पत्रमिव वृद्धिपत्रं तत् द्विविधं—ऋजिताग्रं प्रयताग्रञ्च । द्वे अपि सप्ताङ्गुलम् अर्द्धपञ्चाङ्गुलं वृत्तं सार्द्धाङ्गुलफलञ्च कार्य्यं । तयोः प्रथमं चरमाह । सू.टी.ड. ।

वृद्धिभाक् । स्त्री । वृद्ध्यौषधौ । नकुल.१०प. ।

वृहदेला । स्त्री । स्थूलैलायाम् । বড় এলাচ । वै.निघ. ।

वृधसानः । पुं । मनुष्ये । उणा. ।

वृन्तम् । क्ली । प्रसूनबन्धने । বোঁটা । अम. । कुचाग्रे । मे. ।

वृन्ताकः । पुं । शाकश्रेष्ठे । নটিয়া শাক । रा.नि.व.२२ । उपोदिकायाम् । পুঁই । वार्त्ताकीवृक्षे । বেগুন গাছ । रा.नि.व.७ । क्ली । तत्फले । বেগুন । भा.नवज्व.चि. । "वृन्ताकाख्यं पथ्यमेतत् प्रदिष्टम् ।" गुणाः—"वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम् । ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु । तद्वालं कफपित्तघ्नं वृद्धं पित्तकरं लघु । वृन्ताकं पित्तलं किञ्चिदङ्गारपरिपाचितम् । कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम् । तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम् । अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत् । तदर्शःसु विशेषेण हितं हीनञ्च पूर्व्ववत् ॥" भा.पू.१भ.शा.व. । [वृहत्याम् । मद. ।

वृन्ताकी । स्त्री । वार्त्ताकीवृक्षे । रा.नि.व.७ ।

वृन्तिका । स्त्री । कटुकायां । কট্‌কী । श.च. ।

वृन्दः । पुं । वृन्दाचार्य्यकृतचिकित्सासंग्रहे ।

वृन्दा । स्त्री । तुलसीवृक्षे । श.र. । वृक्षोपरिजातलतायाम् । वै.निघ. ।

वृशः । पुं । वासकवृक्षे । বাসক গাছ । अ.टी.भ. । उन्दुरौ । श.र. । स्त्री । वासायाम् । বাসক । उणा. । [चि.कण्टकारीघृते ।

वृश्चिः । पुं । रक्तपुनर्नवायाम् । वै.निघ.कास.

वृश्चिकः । पुं । श्वेतपुनर्नवायाम् । रक्तपुनर्नवायाम् । वै.निघ.२भ.वा.व्या.चि.महारास्नादौ । तन्नामककीटविशेषे । বিছা । हिं बिच्छू । मं विंचू । तद्विषगुणाः—"वृश्चिकस्य विषं तीक्ष्णमादौ दहति वह्निवत् । ऊर्द्ध्वमारोहति क्षिप्रं दंशे पश्चात्तु तिष्ठति । दंशः सद्योऽतिरुक् श्यावस्तुद्यते स्फुटतीव च ॥" वा.उ.३७अ. । ते त्रिविधाः मन्दमध्यमहाविषभेदेन । तत्र मन्दविषा गोशकृत्कोथजाः द्वादश, मध्यविषाः काष्ठेष्टिकोद्भवास्त्रयः, उत्तमाश्च महाविषाः सर्पकोथजाः विषजाश्च पञ्चदश । एवं त्रिंशद्वृश्चिकजातयः । तेषां मन्दविषाः यथा—"कृष्णः श्यावः कर्व्वुरः पाण्डुवर्णो गोमूत्राभः कर्कशो मेचकश्च । श्वेतो रक्तो रोमशः शाद्वलाभो रक्तश्चैते मन्दवीर्य्या मतास्तु । दष्टलक्षणानि—एभिर्दष्टे वेदना वेपथुश्च गात्रस्तम्भः कृष्णरक्तागमश्च । शाखादष्टे वेदना चोर्द्धमेति दाहस्वेदौ दंशशोफो ज्वरश्च ।" इति । मध्या यथा—"रक्तः पीतः कापिलेनोदरेण सर्व्वे धूम्राः पर्व्वभिश्च त्रिभिः स्युः । एते मूत्रोच्चारपूत्युत्थजाता मध्या ज्ञेयास्त्रिप्रकारोरगाणां । जिह्वाशोफो भोजनस्यावरोधो मूर्च्छा चोग्रा मध्यवीर्य्याभिदष्टे ।" उत्तमा यथा—"श्वेतश्चित्रः श्यामलो लोहिताभो रक्तः श्वेतो रक्तनीलोदरौ च । पीतो रक्तो नीलपीतोऽपरश्च रक्तो नीलो नीलशुक्लस्तथा च । रक्तो बभ्रुः पूर्व्ववच्चैकपर्वा यश्चापर्व्वा पर्व्वणी द्वे च यस्य । नानारूपा वर्णतश्चापि घोरा ज्ञेयाश्चैते वृश्चिकाः प्राणचौराः । जन्मैतेषां सर्पकोथात् प्रदिष्टं देहेभ्यो वा घातितानां विषेण । एभिर्दष्टे सर्पवेगप्रवृत्तिः स्फोटोत्पत्तिर्भ्रान्तिदाहौ ज्वरश्च । खेभ्यः कृष्णं शोणितञ्चापि तीव्रं तस्मात् प्राणैस्त्यज्यते शीघ्रमेव ॥" सु.कल्प.८अ. । ओषधिविशेषे । मे. । यूककीटे । গুয়াপোকা । अम. । मदनवृक्षे । कर्कटे । गोमयकीटे । গোবরে পোকা । भरतः । स्त्री (का) । क्षुद्रक्षुपविशेषे । मं चिञ्चुवा । कं इरुले । वम्. बिच्छुवा । गुणाः—पिच्छिला अम्ला अन्त्रवृद्धिघ्नी च । रा.नि.व.५ । चि.क्र.फ.५प. । पृश्निपर्ण्याम् । চাকুলিয়া । श्वेतपुनर्नवायाम् । वै.निघ. । [শাক । श.मा. ।

वृश्चिकप्रिया । स्त्री । पूतिकायाम् । পুঁই

वृश्चिकर्णी । स्त्री । आखुकर्णीलतायाम् । মূষাকাণী লতা । रा.नि.व.३ ।

वृश्चिकविषम् । क्ली । वृश्चिककीटस्य विषे ।

वृश्चिकविषापहा । स्त्री । महारास्नायाम् । नाकुल्याम् । वै.निघ. ।

वृश्चिकाली । स्त्री । (Fragia involucrata.) स्वनामख्यातक्षुपविशेषे । বিছাতী । हिं बर्हण्टा । मं वृश्चिकाली । कं चेलिगलु । तें तेलुघोंड़ी । ता. कञ्चुरि । वम्. शेढशिंगी । गुणाः—कटुः तिक्ता हृदयवक्त्रशोधनी रक्तपित्तघ्नी विष-

भारीचकघ्नी बल्या च। रा.नि.व.६। कासघ्नी वातघ्नी च। राज.। कण्टकितमेषशृङ्गतुल्याकारफला। इति। सु.सू.३८।३९अ.वातशमने। उष्ट्रधूम्रकमेषशृङ्गी। इति। वा.सू.१५अ.अर्कादिः। "भार्गी रास्ना वृश्चिकाली प्रकीर्या।" कण्टकितमेषशृङ्गतुल्याकारफला पाठापत्रा ईषद्रोमशा श्वेतपुष्पपुच्छा दक्षिणावर्त्तवल्ली मेषशृङ्गीभेदः। सु.चि.८अ.। सि.यो.उन्मा.चि.। च.द.चारगुड़े।

वृश्चिकाहिविषापहा। स्त्री। नाकुल्यां। गन्धरास्ना। वै.निघ.।

वृश्चिपत्री (र्णी)। स्त्री। वृश्चिकाल्याम्। विछाती। प.मु.। र.मा.। लघुमेषशृङ्ग्याम्। क्षुद्र मेड़ाशिङे। वै.निघ.। [भ.।

वृश्वी। स्त्री। वृश्चीरक्षुपे। पुनर्नवा। वा.चि.२

वृश्वीद्वयम्। क्ली। वृश्चीरयुगले। श्वेतरक्तपुनर्नवयोः। चि.क्र.क.१स.३अ.।

वृश्वीरः (वः) (कः)। पुं। श्वेतपुनर्नवायाम्। শ্বেতপুনা। प.मु.। च.सू.४अ.। र.सा.सं.चुषावतीगुड्यां नागबलातैले च। च.द.वि.ज्व.चि.। "वृश्चीरबिल्ववर्षाभू।" वा.सू.१५अ.विदार्यादौ। च.द.कास.चि.वृहत्कण्टकारीघृते। च.द.वा.व्या.चि.एकादशशतप्रसारणीतैले। वा.र.पि.चि.अमृताद्यघृते।

वृषः। पुं। बलीवर्द्दे। षाँड़। अम.। तन्मूत्रगुणाः—"वृषमूत्रञ्च शोफघ्नं क्रमिदोषविनाशनम्। कामलाग्रहणीपाण्डुनाशनञ्चाग्निदीपनम्॥" अत्रि.६अ.। ऋषभकौषधौ। रा.नि.व.५। दुरालभायाम्। रा.नि.व.२२। वासकवृक्षे। रा.नि.व.४। च.चि.३अ.। च.द.गुड़.घृते, कामदेवघृते। नदीभल्लातके। गोधूमे। प.मु.। मूषिके। मे.। क्ली। वासामूले। वर्हे। श.मा.।

वृषकर्णिका (र्णी)। स्त्री। सुदर्शनालतायाम्। সুদর্শন গুল্মক, উরতি পুরতি। च.सू.४अ.। वा.सू.१५अ.सुरसादौ। "खरवुषवृषकर्णी कट्फलं कासमर्दः।"

वृषगन्धा (न्धिका)। स्त्री। छगलान्त्र्याम्। ছাগলবেঁটে। रा.नि.व.३। अतिबलायाम्। পীত বেলেড়া। वै.निघ.।

वृषणः। पुं। अण्डकोषे। रा.नि.व.१८। तदुत्पत्तिः—मांसरुधिरकफमेदसां सारांशात् वायुयोगेन भवति। सु.शा.४अ.।

वृषणकच्छूः। पुं। क्षुद्ररोगविशेषे। চষিপোকা। निदानादि—"स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः। प्रक्लिद्यते यदा स्वेदात् स कण्डूं जनयेत्तदा। तत्र कण्डूयनात् क्षिप्रं स्फोटः स्रावश्च जायते। प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजां॥" सु.नि.१३अ.। मा.नि.।

वृषदंशः (कः)। पुं। विड़ाले। अम.। च.द.वात.ज्व.चि.। "पयसा वृषदंशस्य शकृत्।" वा.उ.३अ.। [रा.नि.व.६।

वृषध्वाङ्क्षा (ङ्क्षी)। स्त्री। नागरमुस्तायाम्।

वृषनाशनः। पुं। विड़ङ्गे। श.मा.।

वृषपत्रिका। स्त्री। वस्तान्त्र्याम्। ছাগলবেঁটে। रा.नि.व.३।

वृषपर्णिका। स्त्री। ब्राह्मणयष्टिकायां। বামনহাটী। च.सू.४अ.क्रमिघ्न-गणः।

वृषपर्णी। स्त्री। आखुकर्णीलतायाम्। ইন্দুরকাণী। পূরাতী। प.मु.। क्षणदन्त्याम्। र.मा.।

वृषपर्व्वा (न्)। पुं। कशेरौ। কেশুর। विश्व.।

वृषभः। पुं। वृषे। मे.। ऋषभके। उणा.।

वृषभध्वजा। स्त्री। महादन्तीवृक्षे। বড় দন্তী। वै.निघ.।

वृषभपल्लवः। पुं। वासावृक्षे। বাসকবৃক্ষ। वै.निघ.२भ.चय.चि.वसन्तकुसुमाकररसे।

वृषभाक्षी। स्त्री। इन्द्रवारुणीलतायाम्। রাখালশশা। रा.नि.व.३।

वृषमूलम्। क्ली। वासामूले। বাসকমূল। वातरक्तचि.रुद्रतैले।

वृषलः। पुं। शूद्रे। गाजरे। घोटके। मे.।

वृषलोचनः। पुं। मूषिके। हे.च.।

वृषवीभत्सः। पुं। कपिकच्छूभेदे। वै.निघ.।

वृषसारः। पुं। शुक्लवटे। देवकुम्भायाम्। वै.निघ.। [श.मा.।

वृषस्कन्धी (इन्)। पुं। भृङ्गरोले। ভীমরুল।

वृषस्यन्ती । स्त्री । अतिकामुकायाम् । अम. ।

वृषा (न्) । पुं । घोटके । वृषे । हे.च. । कर्णे । मे. । स्त्री (षा) । लघुमूषिकपर्णीलतायां । পূরাতী । रा.नि.व.३ । द्रवन्त्यां । বড় দন্তী । रा.नि.व.५ । इयम् एरण्डवत्पत्रविटपा, अलाभे दन्ती देया । भा.सन्निकज्व.चि. । अश्वगन्धायाम् । भा.सन्निक-ज्व.चि.वचादिः । महाज्योतिष्मतीलतायाम् । क-पिकच्छ्वां । हे.च. । मे. ।

वृषाकपायी । स्त्री । शतावर्य्याम् । जीवन्त्यां ।

वृषाकरः । पुं । माषे । মাষকলায় । रा.नि.व.१६ । [षण्डे । मे. ।

वृषाङ्कः । पुं । पानीयभल्लातके । জলভেলা ।

वृषाणी (इन्) । पुं । ऋषभके । रा.नि.व.५ ।

वृषादनी । स्त्री । इन्द्रवारुण्याम् । রাখালশ-শা । वै.निघ. ।

वृषायणः । पुं । चटकपक्षिणि । हारा. ।

वृषाहारः । पुं । विडाले । हारा. ।

वृषी (इन्) । पुं । मयूरे । श.मा. ।

वृष्टिः । स्त्री । जलवर्षणे । गुणाः—"वृष्टिर्निष्य-न्दिनी शीता निद्राश्लेष्मबलप्रदा । मलापहारिणी वायुदायिनी वह्निवारिणी ॥" राज.२प. । वृष्टिज-लं भूमिपतितमष्टविधं भवति । तद्यथा—श्रावण-भाद्राश्विनकार्त्तिकभवजलानीति चतुर्विधं, तथा धारकारतौषारहैमभेदेन च चतुर्विधमित्यष्टविधं वृष्टिजलम् । तत्र पुनर्दिवावृष्टिरात्रिवृष्टिदुर्दिनवृ-ष्टिभवत्वेन भिन्नगुणं भवति । यथा—"निशाजलं कफकरं घनं शीतगुणात्मकं । सामुद्रतोयस्य समं विज्ञेयं वातकोपनम् । दिवा सूर्य्यांशुतप्ता च मेघा वर्षन्ति यत्पयः । तत्कफघ्नं पिपासाघ्नं लघु वातप्र-कोपनम् । दुर्दिने वृष्टिसम्भूतं वातभूतं सवात-कम् । कफकृच्छ्लेष्महननं तर्पणं दोषकोपनम् ॥" अथ श्रावणवृष्टिजलगुणाः—"तथा श्रावणवृष्टिश्च दोषरोगकरी नृणाम् । कण्डूत्रिदोषजननं पानीयं न प्रशस्यते ॥" अथ भाद्रवृष्टिजलगुणाः—"सघनं सभसं नीरं श्लेष्मकृद्वातकोपनं । शमनं पित्तरो-गाणां मधुरं रक्तदोषकृत् ॥" अथाश्विनवृष्टिजलगु-णाः—"रूक्षं पित्तकरं चाम्लं गुल्मरक्तविकारकृत् । त्रिधानद्वयसम्भूतं खरं शस्यविदोषकृत् ।" अथ कार्त्तिकवृष्टिजलगुणाः—"कार्त्तिकवृष्टिसम्भूतं सा-तिसन्तापशीतलं । नाशनञ्च त्रिदोषाणां सर्व्वशस्य-प्रवर्द्धनम् । शीतलं बलकृद्धृष्यं विदाहज्वरनाशनं । क्वचित् पुण्यतरे देशे शरद्वर्षति माधवम् । पित्त-ज्वरविनाशाय शस्यनिष्पत्तिहेतवे । अम्बरस्थं सदा-पथ्यममृतं स्वातिसम्भवं । गगनाम्बु त्रिदोषघ्नं गृ-हीतं यत्र भाजने । बल्यं रसायनं मेध्यं यत्ना-पेक्ष्यं ततः परं । अनार्त्तवं विमुञ्चन्ति जलं धारा-धरास्तु यत् । पतितं तत् त्रिदोषाय सर्व्वेषां देहि-नामपि ॥" इति चातुर्मासिकजलम् । अत्रि.७अ. । अन्यच्चतुर्विधं जलशब्दे द्रष्टव्यम् । अकालवृष्टिजलं श्लेष्मरोगकरं न प्रशस्तञ्च ।

वृष्टिका । स्त्री । आरण्यशणपुष्प्यां । বুনো শ- [ণ ।

वृष्टिघ्नी । स्त्री । क्षुद्रैलायां । গুজরাটি এলাচ । श.च. ।

वृष्टिभूः । पुं । भेके । हारा. ।

वृष्णिः (ष्णी) (इन्) । मेषे । अम. ।

वृष्यम् । क्ली । मनोहर्षणे । "मनसो हर्षणं यत्तु तत्सर्व्वं वृष्यमुच्यते ।" यथा—वृष्यं मात्रापीतं ह-र्षणं भवति । "स्वस्यौजस्करं यत्तु तद्वृष्यम् ।" च.चि.१अ. । पुं । इक्षुदण्डे । रा.नि.व.१४ । माषे । মাষকলায় । हे.च. । आमलके । त्रि । शुक्रवृद्धिकरे । भा. ।

वृष्यकन्दका (न्दा) । स्त्री । विदार्य्यां । ভূ-মিকুষ্মাণ্ড । रा.नि.व.७ । मूलके । वै.निघ. ।

वृष्यगन्धा । स्त्री । वृद्धदारके । বীজদারক । श.र. । अजान्त्रीलतायाम् । ছাগলবেঁটে । रा.नि.व.३ । अतिबलायाम् । পীতবেলেড়া । वै.निघ. । [তবেলেড়া । रा.नि.व.४ ।

वृष्यगन्धिका । स्त्री । अतिबलायां । পী-

वृष्यचण्डी । स्त्री । महामूषिककर्ण्याम् । বড় মূষাকাণী । वै.निघ. ।

वृष्यपर्णी । स्त्री । भूमिकुष्माण्डे । वै.निघ. ।

वृष्यफला । स्त्री । आमलकीवृक्षे । वै.निघ. ।

वृष्यवल्लिका (ल्ली) । स्त्री । भूमिकुष्माण्डे । रा.नि.व.७ ।

वृष्या । स्त्री । ऋद्धौ । र.मा. । शतावर्य्यां । भू-

ग्यामलक्याम् । रा.नि.व.५ । आमलक्याम् । रा.नि.व.११ । भूमिकुष्माण्डे । अतिबलायाम् । बृहद्दन्त्याम् । वै.निघ. ।

बृहच्चित्तः । पुं । फलपूरे । श.च. ।

बृहच्चुञ्चुः । पुं । महाचुञ्चुशाके । रा.नि.व.४ ।

बृहच्छतावरीघृतम् । क्ली । असृग्दराधिकारे घृतम् । पाठः—"शतावरीरसप्रस्थं क्षीरयित्वावपीड़येत् । घृतप्रस्थसमायुक्तं क्षीरद्विगुणितं भिषक् । अतः कल्कानिमान् दद्यात् स्थूलोडुम्बरसम्मितान् । जीवनीयानि यान्यष्टौ यष्टी चन्दनपद्मकौ । श्वदंष्ट्रा चात्मगुप्ता च बला नागबला तथा । शालपर्णी पृश्निपर्णी विदारी शारिवाद्वयं । शर्करा च समा देया काश्मर्य्याश्च फलानि च । सम्यक्सिद्धञ्च विज्ञाय तद्घृतञ्चावतारयेत् ॥" च.द.असृग्दर.चि. । [গাছ । वै.निघ. ।

बृहच्छदः । पुं । अक्षोटवृक्षे । আক্রোট

बृहच्छफरी । स्त्री । महाप्रोष्ठीविशेषे । নরলপুটী । गुणाः—"स्निग्धास्यकण्ठरोगघ्नी श्रेष्ठा प्रोष्ठी प्रकीर्त्तिता ।" राज. । [গাছ । जटा. ।

बृहच्छल्कः । पुं । चिङ्गटमत्स्ये । চিংড়ি-

बृहच्छालपर्णी । स्त्री । (Flemingia congesta.) महाशालपर्णी । বড় শালপানি । हिं बड़ शालपान्, भालड़ कसन्द । बम्. तौड़ौला । [म् । वै.निघ. ।

बृहच्छिम्बी । स्त्री । महाशिम्बयाम् । বড় শি-

बृहज्जीरकम् । क्ली । स्थूलजीरके । মোটা-জীরা । भा.वाजी.चि. । "बृहज्जीरकमप्यत्र ।"

बृहज्जीवन्ती । स्त्री । स्वनामख्यातौषधिविशेषे । बड़जीवन्ती । रा.नि.व.३ ।

बृहज्जीवा । स्त्री । बृहज्जीवन्त्याम् । रा.नि.व.३ ।

बृहतिका (ती) । स्त्री । वार्त्ताक्यां । বেগুণ । र.मा. । (Solanum Indicum.) क्षुद्रवार्त्ताकी । व्याकुड़ । हिं वाईंगटा । बम्. डोरली विङ्गनी । तें कुकमाचि । ता. चेरुचुण्ट । सा द्विधा चविका श्वेता चेति । गुणाः—"बृहती पाचनी तीक्ष्णा ग्राहिणी वातनाशिनी ।" राज. । "चविका बृहती तिक्ता कटुष्णा च तत्समा । युक्त्या द्रव्यविशेषेण भारासंस्तम्भसिद्धिदा । विशेषा श्वेतबृहती वातश्लेष्मविनाशिनी । रुच्या चाञ्जनयोगेन नानानेत्रामयापहा ॥" रा.नि.व.४ । तत्फलगुणाः—"तथा बृहत्याः फलमेव शस्तं सन्दीपनं स्यात् कफवातनाशि । कण्डुविसर्पज्वरकामलानां तथारुचौ शस्तमिदं वदन्ति ॥" अत्रि.१६अ. । कण्टकार्य्याम् । अम. । च.द.कफज्व.चि.निम्बादिः । च.द.कास.चि. । वै.निघ.ज्व.चि.तिक्तादिकषाये । ज्व.चि.बलाद्यघृते । पृष्ठमर्म्मविशेषे । सु.शा.६अ. ।

बृहतीकल्पः । पुं । चिकित्साकल्पभेदे ।

बृहतीद्वयम् । क्ली । बृहती कण्टकारी चेति द्वये । सु.सू.३८अ. । च.द.वा.ज्व.चि.किरातादिः । "बृहतीद्वयगोक्षुरैः ।" भा.मि.ज्वर.चि. । सूक्ष्मफला स्थूलफला चेति बृहतीद्वये । सु.चि.८अ. ।

बृहतीफलम् । क्ली । बृहत्या बीजे ।

बृहत्कन्दः । पुं । विष्णुकन्दे । रा.नि.व.७ । गृञ्जने । र.मा. ।

बृहत्कालशाकः । पुं । महाकासमर्द्दे । বড় কালকাশন্দা । त्रिका. । [सु. ।

बृहत्काशः । पुं । खगगड़वृणे । থাগড়া । प.

बृहत्कुक्षिः । त्रि । तुन्दिले । अम. ।

बृहत्कोशातकी । स्त्री । हस्तिकोशातक्याम् । ধুন্দুল । रा.नि.व.७ । [পিণ্ডীখেজুর । वै.निघ. ।

बृहत्खर्ज्जूरिका । स्त्री । राजखर्ज्जूरिकायां ।

बृहत्तालः । पुं । हिन्तालवृक्षे । रा.नि.व.६ ।

बृहत्तिक्ता । स्त्री । पाठायाम् । আকনাদি । रा.नि.व.६ ।

बृहत्तृणः । पुं । वंशवृक्षे । श.च. ।

बृहत्त्वक् । पुं । सप्तपर्णवृक्षे । ছাতিম গাছ । "बृहत्त्वक् सप्तपर्णे स्यात् ।" रा.नि.व.१२ ।

बृहत्त्वचः । पुं । निम्बवृक्षे । प.मु. ।

बृहत्पञ्चमूलम् । क्ली । बिल्वाग्निमन्थटुण्टुक(श्योणाक)पाठाकाश्मरीषु । सु.सू.३८अ. । "बिल्वश्योणाकगाम्भारीपाटलागणिकारिकाः……पञ्चमूलमिदं महत् ।" च.द.ज्व.चि. । गुणाः—"पञ्चमूलं महत्तिक्तं कषायं कफवातनुत् । मधुरं श्वासकासघ्नमुष्णं लघ्वग्निदीपनम् ॥" भा. ।

बृहत्पत्रः । पुं । हस्तिकन्दे । रा.नि.व.७ । श्वे-तलोध्रे । मधुवालुके । মিঠা বেতো । वै.निघ. ।

बृहत्पत्रा । स्त्री । त्रिपर्णिकायाम् । रा.नि.व.७ । कासमर्दक्षुपे । वै.निघ. ।

बृहत्पर्णः । पुं । शूकरीभे । वै.निघ ।

बृहत्पर्णी । स्त्री । महाशणपुष्पीविशेषे । বন-শণ । रा.नि.व.४ । [त्रिका. ।

बृहत्पाटलिः (ली) । पुं, स्त्री । धुस्तूरवृक्षे

बृहत्पादः । पुं । वटवृक्षे । श.च. ।

बृहत्पारे(ले)वतम् । क्ली । महापारेवतफले । বড় পেয়ারা । रा.नि.व.११ ।

बृहत्पाली (न्) । पुं । वनजीरकक्षुपे । বন-জীরা । रा.नि.व.११ ।

बृहत्पीलुः । पुं । महापीलुवृक्षे । পাহাড়ে আকরোট । रा.नि.व ११ ।

बृहत्पुष्पः । पुं । महाकुष्माण्डे । वै निघ. । स्त्री । कदलीवृक्षे । वै.निघ. ।

बृहत्पुष्पी । स्त्री । शणवृक्षे । प.मु. ।

बृहत्फलम् । क्ली । कुष्माण्डे । भा.पू १भ.शा. व. । पनसफले । কাঁটাল । जम्बूफले । জাম । वै. निघ. । स्त्री (ला) । चलाम्बाम् । লাউ । प.मु. । कटुतुम्ब्याम् । তিৎলাউ । रा.नि.व.३ । महेन्द्र-वारुण्याम् । মাকাল । कुष्माण्ड्याम् । কুমড়া গাছ । रा.नि.व.७ । राजजम्ब्वाम् । বড় জাম । रा.नि.व.१० । र.मा. ।

बृहत्यादिः । पुं । तदादिदशद्रव्यात्मककषाये । यथा—“बृहती पुष्करं भार्गी शटी शृङ्गी दुरालभा । वत्सकस्य च बीजानि पटोलं कटुरोहिणी । ......सन्निपातज्वरे हितः ।” च.द.ज्व.चि. ।

बृहदम्लः । पुं । कर्म्मरङ्गवृक्षे । কামরাঙা গাছ । श.च. । [रा.नि व.६ ।

बृहदेला । पुं । स्थूलैलायाम् । বড় এলাচ ।

बृहद्गोलम् । क्ली । तरम्बुजे । তরমুজ । श.च. ।

बृहद्दन्ती । स्त्री । एरण्डपत्रविटपदन्तीविशेषे । सैव द्रवन्तीत्युच्यते । गुणाः—“दन्तीद्वयं सरं पाके रसे च कटु दीपनम् । गुदाङ्कुराश्मशूलार्शःकण्डू-कुष्ठविदाहनुत् ।”

बृहद्दलः । पुं । पट्टिकालोध्रे । শুক্লোধ্র । रा.नि.व.६ । सप्तपर्णवृक्षे । ছাতিম গাছ । वै. निघ. । हिन्तालवृक्षे । হেতাল গাছ । रा.नि. व.९ । रक्तरसोने । वै.निघ. । स्त्री । लज्जालुका-याम् । ক্ষুদ্র লজ্জাবতী । वै.निघ. ।

बृहद्द्रोणी । स्त्री । द्रोणीपरिमाणे । १२८ श. । प.प्र.१ख. ।

बृहद्धान्यः । पुं । चैत्रैषी । জনার গাছ । महाशाली । प.मु. ।

बृहद्बदरम् । क्ली । महाकोलीफले । गुणाः— कफपित्तकरं गुरु सरञ्च । मद.व.६ ।

बृहद्बला । स्त्री । महाबलायाम् । পীত বেলেড়া । “रास्नैरण्डबृहद्बला ।” सि.यो.उन्मा.चि. चैतसघृते । शूकरीभे । लज्जालुकायाम् । লজ্জা-বতী । वै.निघ. ।

बृहद्ब्रण्डी । स्त्री । त्रायमाणालतायाम् । বড় গোয়ালিয়া । प्रयोग.कनकतैले ।

बृहद्भानुः । पुं । अग्नी । चित्रकवृक्षे । अम ।

बृहद्राव: (वी) (इन्) । पुं । क्षुद्रपेचके । रा.नि.व.१९ । [মাক্ষিক । र.सा.सं. ।

बृहद्वर्णः । पुं । माक्षिकनामोपधातौ । স্বর্ণ-

बृहद्वल्कः (लः) । पुं । पट्टिकालोध्रे । रा. नि.व.६ । सप्तपर्णवृक्षे । वै.निघ. । [मद. ।

बृहद्वल्ली । स्त्री । कारवल्लयां । করলা,উচ্ছে ।

बृहद्वातः । पुं । देवधान्ये । দেধান । अयं अश्मरीहरः । र.मा. ।

बृहद्वारुणी । स्त्री । महेन्द्रवारुणीलतायाम् । বড় মাকাল । রাখালশশা । रा.नि.व.२ ।

बृहद्बीजः । पुं । आम्रातकवृक्षे । আমড়া গাছ । श.च. । [গাছ । मे. ।

बृहन्नलः । पुं । महापोटगले । বড় নল

बृहन्निम्बः । पुं । महानिम्बे । वै.निघ. ।

बृहन्मरीचः । पुं । मरीचे । वै.निघ. ।

बृहस्पतिः । पुं । अष्टस्य ग्रहभेदे । तद्दृष्टौ अश्वः शूनाक्षिकूटः रक्ताक्षः क्रमः शुष्कस्खलनशी-लश्च भवेत् । ज.द.५७अ. ।

वृक्षः । पुं । तरौ । গাছ । तस्य षड्जातयः—"कुरुण्टाद्या अग्रवीजा मूलजास्तूत्पलादयः । पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः सल्लकीमुखाः । शाल्यादयो वीजरुहाः संमूर्च्छजास्तृणादयः । स्युर्वनस्पतिकायस्य षड़ेते मूलजातयः ॥" है.च. । लोध्रद्रुमे । লোধ গাছ । रा.नि.व.६ । धववृक्षे । ধাওয়া গাছ । र.मा. ।

वृक्षकः । पुं । श्वेतकुटजवृक्षे । কুড়্চি গাছ । र.मा. । च.कल्प.५अ. । सु.सू.३७अ. । चि.२३अ. । ३८अ. । नन्दिवृक्षे । তূণগাছ । धन्वन्तरिः ।

वृक्षचरः । पुं । वानरे । धनञ्जयः ।

वृक्षतपनः । पुं । कर्णिकारवृक्षे । কলিকা ফুলের গাছ । वै.निघ. ।

वृक्षधूपः । पुं । श्रीवेष्टनामकगन्धकाष्ठे । সরল ধূপ । रा.नि.व.१२ । [निघ. ।

वृक्षधूमकम् । क्ली । शैवाले । শেওলা । वै.

वृक्षनाथः । पुं । वटवृक्षे । श.र. ।

वृक्षपाकः । पुं । वटवृक्षे । श.च. ।

वृक्षभक्षा । स्त्री । वन्दायाम् । মান্দড়া । भा ।

वृक्षभेदी (इन्) । पुं । वृक्षादने । মান্দড়া । अम. । अश्वत्थवृक्षे । कश्चित् ।

वृक्षमर्कटिका । स्त्री । काष्ठविड़ालिकायां । কাটবিড়ালি । केचित् ।

वृक्षमद्गुः । पुं । जलवेतसे । श.च. ।

वृक्षराजः । पुं । महामेदायाम् । द्वीपान्तरवचायाम् । তোপচিনি । वै.निघ. ।

वृक्षरुहा । स्त्री । वन्दायाम् । মান্দড়া, বন্দা । रा.नि.व.५ । च.सू.४अ. । आकाशलतायां । আলোকলতা, পরগাছা । च.सू.४अ. । जतुकालतायाम् । रा.नि.व.३ । विदारीकन्दे । र.मा. । अमृतस्रवालतायाम् । महासमङ्गायाम् । रा.नि.व.३।४ । पुष्करमूले । वै.निघ. ।

वृक्षवान् । पुं । पर्व्वते । रा.नि.व.२ ।

वृक्षवीरा । स्त्री । भूम्यामलक्याम् । ভুঁই আমলা । वै.निघ. ।

वृक्षशायिकः । पुं । गोलाङ्गूलवानरे । মুকপোড়া । अयं पर्णमृगगुणः । सु.सू.४६अ. ।

वृक्षादनः । पुं । अश्वत्थवृक्षे । मे. । पियालवृक्षे । धरणिः । वन्दायाम् । মান্দড়া । हिं नेहाली । अम. । मधुच्छत्रे । मे. । स्त्री (नी) । वन्दायाम् । পরগাছা । रा.नि.व.५ । सु.सू.३७अ. । च.द.वा.ज्व.चि.रास्नादिः । "रास्ना वृक्षादनी दारु ।" विदारीकन्दे । ভুঁই কুমড়া । मे. । भैष.नेत्ररो.चि. ।

वृक्षामयः । पुं । लाक्षायाम् । লাহা । वै.निघ. ।

वृक्षाम्लम् । क्ली । तिन्तिड्याम् । তেঁতুল । अ.टी.रा. । महदा इति अ.टी.भ. । अम्ललकुटा इति प.मु. । চুকা इति भानुदीक्षितः । हिं विषांविल । च.द.अ.च.चि. । च.सू.४अ. । गुणाः—अम्लं कटुकं कषायं कफार्शोघ्नं तृष्णाघ्नं वातघ्नं हृद्रोगघ्नमुदरामयघ्नं गुल्मातिसारव्रणघ्नञ्च । रा.नि.व.६ । अम्ललोण्यां । আমরুল । वृहदग्निमुखचूर्णे । च.सू.४अ.हृद्यगणे ।

वृक्षाम्लः । पुं । आम्रातकवृक्षे । আমড়া গাছ । श.च. । अम्लवेतसे । অম্লবেতস । वै.निघ. ।

वृक्षायुर्वेदः । पुं । वृक्षरोपणपोषणादिशास्त्रे । स आग्नेयपुराणे मृग्यः ।

वृक्षार्हा । स्त्री । महामेदायाम् । रा.नि.व.५ ।

वृक्षाश्रयी (इन्) । पुं । क्षुद्रोलूके । কুঠুরে পেচা । रा.नि.व.१९ । [४अ. ।

वृक्षेशयः । पुं । निर्विषसर्पविशेषे । सु.कल्प.

वृक्षोत्पलः । पुं । द्रुमोत्पले । ওলটকম্বল । र.मा. ।

वेकटः । पुं । मत्स्यभेदे । ভেকটীমাছ । मे. ।

वेगः । पुं । गुदेन मलनिर्गमप्रवृत्तौ । भ. । त्वरायाम् । प्रवृत्तौ । मा.नि. । महाकालफले । मे. । शुक्रे । है.च. । स्त्री (गा) । महाज्योतिष्मतीलतायाम् । বড় লতাফট্কী । वै.निघ. ।

वेगधारणम् । क्ली । मलादीनां वेगनिरोधे । यथा—"न वेगान् धारयेद्धीरः कामादीनान्तु धारयेत् ।" राज.१प. ।

वेगनाशनः । पुं । श्लेष्मणि । श.र. ।

वेगनिरोधः । पुं । वेगविधारणे । निदानम् ।

वेगविघातः । पुं । मूत्रपुरीषादिहठधारणे ।

"जवाभिरमणैर्वेगविघातैः ।" भा.म.सा.चि. ।

वेगिहरिणः । पुं । मीकामृगे । रा.नि.व.१९ । [राज. । रा.नि.व.१९ ।

वेगी (इन्) । पुं । श्येनपक्षिणि । बाजपाखी ।

वेट्टचन्दनम् । क्ली । श्रीखण्डचन्दनान्यतरे चन्दने । শ্বেত চন্দন । मं वेट्टश्रीखण्ड । कं वेट्टपत्रगन्ध । तत्र सार्द्रविच्छेदं मलयाद्रिसमीपस्थवेट्टगिरिजत्वाद्वेट्टमित्युच्यते । "मलयाद्रिसमीपस्थाः पर्व्वता वेट्टसंज्ञिताः । तज्जातं चन्दनं यत्तद्वेट्टवाच्यं क्वचिन्न ॥" गुणाः—अतिशीतं दाहपित्तघ्नं ज्वरच्छर्दिमोहतृषाकुष्ठतैमिरीत्वाशहरं तिक्तञ्च । रा.नि.व.१२ । [न । रा.नि.व.१२ ।

वेड़म् । क्ली । सार्द्रविच्छिन्नचन्दने । শ্বেত চন্দ-

वेड़मिका । स्त्री । रोटिकाविशेषे । यथा—"माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः । रचिता रोटिका सैव प्रोक्ता वेड़मिका बुधैः । भवेद्वेड़मिका बल्या वृष्या रुच्याऽनिलापहा । उष्णा सन्तर्पणी गुर्व्वी बृंहणी शुक्रला परम् । भिन्नमूत्रमला स्तन्यमेदःपित्तकफप्रदा । गुदकीलार्द्दितश्वासयकृच्छूलानि नाशयेत् ॥" भा. ।

वेणिः । स्त्री । देवदाल्याम् । পীত ঘোষা । वा.कल्प.१म. । [त्रिका. ।

वेणिवेधनी । स्त्री । जलौकायाम् । জোঁক ।

वेणी । स्त्री । पीतदेवदाल्याम् । भा. । देवदाल्याम् । प.मु. । "खराखरी वा वेणी च देवदाली च जीमूतम् ।" चरणः । मेष्यां । ভেড়ী । है.च. । [व.१२ ।

वेणीग(मूलक)म् । क्ली । उशीरे । रा.नि.

वेणीफलम् । क्ली । देवदालीफले । পীত ঘোষাফল । वै.निघ.२भ.कामलानसे ।

वेणीरः । पुं । अरिष्टे । श.च. ।

वेणुः । पुं । वंशे । বাঁশ । रा.नि.व.७ ।

वेणुकर्करः । पुं । करीरवृक्षे । त्रिका. ।

वेणुका । स्त्री । तन्नामकफलविषभेदे । सु.कल्प.२म. ।

वेणुज(न)म् । क्ली । मरिचे । र.मा. ।

वेणुजः (जन्मा[न्]) । पुं । वेणुयवे । বাঁশের চাউল । रा.नि.व.१६ । वा.चि.१५म. ।

वेणुनिःसृतः । पुं । इक्षौ । वै.निघ. ।

वेणुनिर्लेखनम् । क्ली । वंशत्वचि । বাঁশের নীল । सु.चि.१म. ।

वेणुपत्रकः । पुं । मण्डलिसर्पविशेषे । सु.कल्प.४म. । [र.मा. ।

वेणुपत्रिका (त्री) । स्त्री । नाड़ीहिङ्गौ ।

वेणुयवः । पुं । वंशजधान्ये । বাঁশের ধান । मं वेणुजव । कं बिदरकी । तें वेदुरु बियम्मु । गुणाः—शीतः कषायः मधुरः रुक्षः मूत्रश्लेष्मविषघ्नः बलपुष्टिवीर्य्यदः पित्तघ्नश्च । रा.नि.व.१६ । "रुक्षः कषायानुरसो मधुरः कफपित्तहा । मेदःक्रिमिविषघ्नश्च बल्यो वेणुयवो मतः ॥" च.सू.२७म. । [रा.नि.व.१६ ।

वेणुवीजम् । क्ली । वेणुयवे । বাঁশের চাল ।

वेतः । पुं । वेतसलतायाम् । रा.नि.व.७ ।

वेतनम् । क्ली । रौप्ये । श.च. ।

वेतसः (सा) । पुं, स्त्री । (Calamus rotoug.) Common cane. स्वनामख्यातपत्रशाकलतायाम् । বেত গাছ । मं वेड़सु । कं वेतसु । तें जीतयुरकुली । गुणाः—कटुः स्वादुः शीतलः भूतघ्नः पित्तकोपनः रुच्यः दीपनः रक्तपित्तघ्नः कुष्ठघ्नश्च । रा.नि.व.९ । तत्फलगुणाः—"फलं वेतस्य वातघ्नमम्लपित्तबलासकृत् ।" राज.२प. । शाकगुणाः—"वातलं कटुतिक्ताम्लमधोमार्गप्रवर्त्तकम् ।" च.सू.२७म. ।

वेतसपत्रकम् । क्ली । व्यधनार्थके शस्त्रविशेषे । सु.सू.८म. । तल्लक्षणं यथा—"तीक्ष्णमङ्गुलविस्तारं चतुरङ्गुलमायतम् । अङ्गुलानि तु चत्वारि हन्तव्यार्थ्यै विजानता ॥" सु.टी.ड.भोजः ।

वेतसाम्लः । पुं । अम्लवेतसे । रा.नि.व.६ । र.सा.सं.शूलचि.अग्निमुखरसे । "वेतसाम्लं विषं स्यात् ।"

वेतसी । स्त्री । वेतसवृक्षे । श.र. ।

वेतालग्रहः । पुं । भूतग्रहविशेषे । लक्षणं—"गन्धमाल्यरतिं सत्यवादिनं परिवेपिनम् । बहु-

च्छिद्रञ्च जानीयात् वेतालेन वशीकृतम् ॥” वा.उ. ४अ. ।

वेतालरसः । पुं । कुष्ठाधिकारे रसः । पाठः —“अभ्रकं मृतलौहञ्च शुद्धसूतं शिलाजतु । ताप्यं वाकुचिबीजानि त्रिफला मुषली समम् । सव्योषं चूर्णितं लिह्यं मधुना निष्कमात्रकम् । मासैकं नाशयेत् सिध्म वेतालोऽयं महारसः ॥” अन्यः सन्निपातज्वरे—“रसं गन्धं विषञ्चैव मरिचाद्दं समांशिकम् । शिलायां मर्द्दयेत्तावत् यावज्जायेत कज्जलम् । गुञ्जामात्रमयोक्तव्यं हरिद्राद्रसंज्ञकं । साध्यासाध्यं निहन्त्याशु सन्निपातं सुदारुणम् ॥” र.सा सं. ।

वेत्रः । पुं । वेतसवृक्षे । रा.नि.व.९ । वंशविशेषे । বেউড় বাঁশ । मं वेत । कं वेत्त । गुणाः— शीतकषायः भूतपित्तघ्नश्च । रा.नि.व.७ । च.चि. ३अ. ।

वेत्रकः । पुं । रामशरे । वै.निघ. ।

वेत्रमूला । स्त्री । शङ्खिन्याम् । वै.निघ. ।

वेत्रविषम् । क्ली । तन्नामकपुष्पविषभेदे । বেতের ফুল । सु.कल्प.२अ. ।

वेत्राग्रम् । क्ली । नाड़ीशाकविशेषे । বেতের ডগি, বেতাগ্ । गुणाः--“वेत्राग्रं दीपनं रुच्यं तिक्तं पित्तकफापहम् ।” राज.३प.। [व्यायाम् ।

वेदना । स्त्री । चिकित्सायाम् । रा.नि.व.२० ।

वेदनाधिष्ठानम् । क्ली । मनोदेहेन्द्रियादौ । “वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः । केशरोमनखाग्रान्नमलद्रवगुणैर्विना ॥” च.शा.१अ. ।

वेदयिता । त्रि। मनसः प्रवर्त्तके । सु.शा.३अ.।

वेदारः । पुं । कृकलासे । त्रिका. ।

वेदिः । स्त्री । परिष्कृतभूमौ । अम. । क्ली । अङ्गुष्ठायाम् । श.च. । [निघ. ।

वेदिकः (का) । पुं, स्त्री । श्वेतधुस्तूरके । वै.

वेदिनी । स्त्री । तन्नामिका पञ्चमी त्वक् या व्रीहिपञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना च । सु. शा.४अ. ।

वेधकम् । क्ली । धान्यके । रा.नि.व.६ । पुं । कर्पूरे । त्रिका. । अम्लवेतसे । रा.नि.व.६ ।

वेधनिका । स्त्री । छिद्रकरणार्थास्त्रे । ভোমরা । अम. ।

वेधनी । स्त्री । मेथिकायाम् । মেতি । रा.नि. व.६ । करिकर्णवेधनास्त्रे । त्रिका. ।

वेधफलः । पुं । करञ्जवृक्षे । रा.नि.व.९ ।

वेधमुख्यः । पुं । गन्धशठ्याम् । গন্ধশঠী रा. नि.व.६ । स्त्री (ख्या) । कस्तूर्य्याम् । মৃগনাভি । रा.नि.व.१२ ।

वेधमुख्यकः । पुं । गन्धशठ्याम् । प.मु. । हरिद्रायाम् । কাঁচাহলুদ গাছ । अम.भ. ।

वेधसम् । क्ली । अङ्गुष्ठमूले । श.च. ।

वेधाः (स्) । पुं । श्वेतार्कवृक्षे । श.च. ।

वेधिनी । स्त्री । मेथिकायाम् । रा.नि.व.६ । जुकायां । জোঁক । श.र. ।

वेधी (इन्) । पुं । अम्लवेतसे । रा.नि.व.६ ।

वेध्यः । त्रि । वेधनार्हे, शिरादौ । अल्पमुखैः शस्त्रैः व्यधनीये । सु.सू.५अ. ।

वेपथुः । पुं । कम्पने । रा.नि.व.२० । [२० ।

वेपनम् । क्ली । वातव्याधौ । कम्पे । रा.नि.व.

वेरम् । क्ली । कुङ्कुमे । त्रिका. । वार्त्ताके । त्रिका. । शरीरे । मे. ।

वेरकम् । क्ली । कर्पूरे । हारा. ।

वेलनम् । क्ली । हिङ्गौ । ज.द. ।

वेला । स्त्री । रोगे । समयभोजने । समये । भोजने । त्रिका. । दन्तमांसे । हारा. ।

वेलाजलपानम् । क्ली । वेलायां वारिपाने । तच्चातीव स्वास्थ्यकरं । तथाहि—“उष्णं क्वापि क्वापि शीतं कवोष्णं क्वापि क्वापि क्वाथशीतञ्च पाथः । इत्थं नृणां पथ्यमेतत् प्रयुक्तं कालावस्थादेहसंस्थानुरोधात् ॥” तथा—“अपनयति पवनदोषं दलयति कफमाशु नाशयत्यरुचिम् । पाचयति चान्नमनलं पुष्णाति निशीथपीतमुष्णाम्बः ॥ रात्रौ पीतमजीर्णदोषशमनं संशन्ति सामान्यतः पीतं वारि निशावसानसमये सर्व्वामयध्वंसनं । भुक्त्वा तूर्द्दमिदं च पुष्टिजननं प्राक्चेदपुष्टिप्रदं रुच्यं जाठरवह्निपाटवकरं पथ्यञ्च भुक्त्यन्तरे ॥” रा.नि.व.१४ ।

वेलाज्वरः पुं । ज्वरविशेषे । लक्षणं —"शोकात् क्रोधात्तथाजीर्णात् सन्तापाद्दलहानितः । चलकाले च मर्त्यानां जायन्ते दारुणाः ज्वराः ॥" ज्व.नि. ।

वेलिभुक्प्रियः । पुं । सुगन्धाम्रे । श.र. ।

वेल्ल(क)म् । क्ली । विड़ङ्गे । अम. । च.द.शिरोव्यधे । वा.सू.१५अ.मूर्द्धविरेके । "वेल्लापामार्गव्योष ।" वै.निघ.२भ.ग्रहणी.चि तालिशादौ । वा.व्या.अजमोदावटौ । रस.र.बाल.चि.अष्टमङ्गलघृते । वा.उ.२९अ. ।

वेल्लगिरिका । स्त्री । प्रियङ्गौ । वै.निघ. ।

वेल्लजम् । क्ली । मरिचे । भा.पू.१भ. ।

वेल्लनम् । क्ली । मरिचे । प.मु. । लुण्ठने । त्रिका. । रोटीवेल्लनार्थं वर्तुलकाष्ठे । বেলুন । भा. ।

वेल्लनी । स्त्री । श्वेतदूर्व्वायाम् । रा.नि.व.८ ।

वेल्लन्तरः । पुं । विल्लान्तरवृक्षे ।

वेल्लन्तरादिगणः । पुं । तदादिद्रव्यवर्गे स वातरोगघ्नः अश्मरीशर्करामूत्रकृच्छ्रमूत्राघातहरश्च । वा.सू.१५अ. । [त्रिकटुचूर्णे ।

वेल्लभवम् । क्ली । मरिचे । वै.निघ.कास.चि.

वेल्लरी । स्त्री । कृष्णवृद्धदारके । কাল বীজ-তাড়ক । वै.निघ.२भ.वा.व्या.चि.एरण्डपाके । श्वेतदूर्व्वायाम् । वै.निघ. ।

वेल्लिः । स्त्री । लतायाम् । श.र. ।

वेल्लिका । स्त्री । इन्दूपीदक्यां । পুঁইবিশেষ । रा.नि.व.२३ ।

वेल्लिकाख्या । स्त्री । बिल्वशलाटौ । বেলশুঁ-ঠী । श.च. । [४अ. ।

वेल्लितकः । पुं । वैकरञ्जसर्पविशेषे । सु.कल्प.

वेशन्तः । पुं । क्षुद्रसरोवरे । अम. ।

वेशरः । पुं । अश्वतरे । त्रिका. ।

वेशवारः । पुं । रन्धनोपकरणविशेषे । বাটনা, মসলা । गुणाः—"वेशवारो गुरुः स्निग्धो बलोपचयवर्द्धनः ।" राज.३प. । वेशवारद्रव्यगणः यथा—अजाजीमरिचशुण्ठीग्रन्थिकधान्यहरिद्रादारुहरिद्रापिप्पलीदाड़िमेषु । "अजाजी मरिचं शुण्ठी ग्रन्थिधान्यनिशाद्वयम् । पिप्पली दाड़िमश्चेति वेशवारगणो मतः ॥" रा.नि.व.२२ । पक्वमांसभेदे । यथा —निरस्थिपिष्टं स्विन्नं गुड़घृतयुक्तं पिप्पलीमरिचयुक्तञ्च मांसं वेशवार इत्युच्यते । "निरस्थि पिशितं पिष्टं स्विन्नं गुड़घृतान्वितं । कृष्णामरिचसंयुक्तं वेशवार इति स्मृतः ॥" प.प्र.३ख. ।

वेशवारीकृतः । त्रि । पिष्टे । वा.चि.५अ. ।

वेश्मकलिङ्गः । पुं । चटकपक्षिणि । तन्मांसं सन्निपातहरम् अतिशुक्रलञ्च । राज. ।

वेश्मकूलः । पुं । चचेण्डायाम् । চিচিঙ্গা । मद. । रा.नि.व.७ । [त्रिका. ।

वेश्मनकुलः । पुं । छुछुन्दर्य्यां । ছুঁচো ।

वेश्मरसः । पुं । मोचरसे । वै.निघ. ।

वेश्या । स्त्री । पाठायाम् । আকনাদি । श.च. ।

वेषणः । पुं । कासमर्द्दवृक्षे । हारा. ।

वेषणा । स्त्री । वितुन्नकवृक्षे । धনে । र.मा. ।

वेषवारः । पुं । वेशवारे । বাটনা । अ.टी.रा. ।

वेषिका । स्त्री । जातीपुष्पवृक्षे । वै.निघ. ।

वेष्टः । पुं । श्रीवेष्टनामकसुगन्धकाष्ठे । সরল-কাষ্ঠ । रा.नि.व.१२ । निर्यासे । श.मा. ।

वेष्टकम् । क्ली । निर्यासे । আটা । श.मा. । उष्णीषे । श.र. । पुं । श्रीवेष्टनामकसुगन्धकाष्ठे । रा.नि.व.१२ । कुष्माण्डे । हारा. । वल्कले । र.मा. ।

वेष्टनम् । क्ली । गुग्गुलौ । श.च. । उष्णीषे । कर्णशष्कुल्यां । मे. । स्त्री (नी) । खर्परपोलिकायाम् । वै.निघ. । [বেউড় বাঁশ । श.च. ।

वेष्टवंशः । पुं । कण्टकिवंशेत्यपरनामवंशे ।

वेष्टसारः । पुं । श्रीवेष्टनामकसुगन्धकाष्ठे । সরলকাষ্ঠ । रा.नि.व.१२ ।

वेष्टा । स्त्री । हरीतक्याम् । वै.निघ. ।

वेसनम् । क्ली । द्विदलचूर्णे । বেসন । यथा —"दालयश्चणकानान्तु निस्तुषा यन्त्रपेषिताः । तच्चूर्णं वेसनं प्रोक्तम् ...... ॥" तद्वटिका रुच्या विष्टम्भिनी बलपुष्टिकरी च । भा. ।

वेसवारः । पुं । वेशवारे । বাটনা । अम. ।

वैकङ्कतः । पुं । श्रुवाद्रुचे । बँइचि गाछ । श.र. ।

वैकतिकः । पुं । मणिकारे । हे.च. ।

वैकरञ्जः । पुं । दर्व्वीकरादीनां सर्पाणां व्यतिकरेण जाते सर्पजातिविशेषे । स माकुलिः पोटगलः स्निग्धराजिश्चेति त्रिविधः। सु.कल्प.४अ. ।

वैकुण्ठः । पुं । अर्ज्जके । क्षुद्रतुलसी । "वैकुण्ठमर्ज्जकं प्राहुः ।" रा.नि.व.२१ । सितार्ज्जके । श्वेतपत्र क्षुद्रतुलसी । रा.नि.व.१० । See अर्ज्जकः ।

वैकुण्ठाश्रमी (इन्) । पुं । वैद्यवल्लभनामग्रन्थकारे । [नि. ।

वैकृतः । त्रि । विकृतिसम्पन्ने । दुःसाध्ये । मा.

वैकृतज्वरः । पुं । अप्रकृतकालजाते वातज्वरे । "प्रायेणानिलजो दुःखः कालेष्वन्येषु वैकृतः । हेतवो विविधास्तस्य निदाने सम्प्रदर्शिताः ॥" च.चि.३अ. । वर्षादिषु वाताद्यैः क्रमाद् यो ज्वरः स प्राकृतः, वर्षासु वातिकः, शरदि पैत्तिकः, वसन्ते च श्लैष्मिकः, अतोऽन्यो वैकृतः तथा वर्षासु पैत्तिक इत्यादि । मा.नि. ।

वैक्रान्तम् । क्ली । स्वनामख्यातमणिविशेषे । चुनीविशेष । तत्र श्वेतनीलरक्तभेदेन त्रिधा । निरुक्तिः—"वज्राकारतयैव प्रसह्य हरणाय सर्व्वरोगाणाम् । यद्विक्रान्तिं धत्ते तद्वैक्रान्तं बुधैरिदं कथितम् ।" गुणाः—रसवीर्य्यविपाकेषु वज्रसमं क्षयकुष्ठविषघ्नं पुष्टिकरं रसायनञ्च । अपिच—"वैक्रान्तं वज्रसदृशं वज्रवद्रसवीर्य्यकम् । तथाप्यभावे वज्रस्य ग्राह्यं वैक्रान्तमुत्तमम् ॥" रा.नि.व.१३ । तच्छोधनमपि हीरकवत् । See हीरकम् । "वैक्रान्तं वज्रवत् शोध्यं नीलं श्वेतञ्च लोहितम् । वज्रलवणसंयुक्तं दाहघातासहिष्णु तत् । हयमूत्रेण तत् सिञ्चेत् तप्तं तप्तं त्रिसप्तधा । पञ्चाङ्गोत्तरवारुण्या लिप्तं मूषागतं पुटैः । कुञ्जराख्यैर्मृतिं याति वैक्रान्तं सप्तभिस्तथा । भस्मीभूतन्तु वैक्रान्तं वज्रस्थाने नियोजयेत् ॥" अत्रि.७अ. ।

वैगन्धिकः । पुं । गन्धके । वा.उ.३९अ. ।

वैजननः । पुं । प्रसवमासे । अम. ।

वैजपाणिः । पुं । ऋषिविशेषे । च. ।

वैजयन्तिका । स्त्री। जयन्तीवृक्षे। जन्तिगाछ। अम. । अग्निमन्थवृक्षे । गणिरि । रा.नि.व.९ ।

वैजयन्ती स्त्री । जयन्तीवृक्षे । र.मा. । सु.चि.११अ.। अग्निमन्थवृक्षे । गणिरि । हे.च. । सु.चि.१९अ. । वा.उ.३अ. ।

वैजिकम् । क्ली । शिग्रुतैले । शजिनार तैल। मे.। पुं । सद्योजाताङ्कुरे । मे.। आत्मनि । श.मा.।

वैडालशकृत् । क्ली । विडालविष्ठायाम् । "वैडालं वा शकृद् योज्यं वेपमानस्य धूपने ।" च.द.ज्व.चि.धूपे ।

वैणवम् । क्ली । वेणुयवे । वंशधान्य । अम.। पुं । उपनयने वेणुदण्डे । अम. । स्त्री (वी) । वंशलोचनायाम् । रा.नि.व.६ । [अम. ।

वैतंसिकः । पुं । मांसविक्रेतरि । कशाइ ।

वैतरणवस्तिः । पुं । निरूहवस्तिभेदे । यथा—"पलशुक्तिककर्षकुडवैरम्लीकासगुडसिन्धुगोमूत्रैः। ईषत्तैलयुतो वस्तिः शूलानाहामवातहृत् । वैतरणः क्षारवस्तिः भुक्ते चापि प्रदीयते ॥" च.द.निरूहवस्तौ । गोमूत्रं ८ प. पक्वतैलं १ प. मदनफलस्यैकं व्यवहारात् । एकपुटकस्यैयं मात्रा ।

वैतसः । पुं । अम्लवेतसे । जटा. ।

वैदर्भः । पुं। दन्तमूलगतमुखरोगे । "घृष्टेषु दन्तमूलेषु संरम्भो जायते महान् । भवन्ति च चला दन्ताः स वैदर्भोऽभिघातजः ॥" सु.नि.१६अ. ।

वैदलः । पुं । दालिनिर्म्मितपिष्टकभेदे । दालपुरि । श.च.। गुणाः – गुरुः भक्ष्यः विष्टम्भी सृष्टमारुतश्च । राज. ।

वैदलान्नम् । क्ली। वैदलयुक्तभक्ते । डालिभात। गुणाः—"वैदलान्नं रुचिकरं गुरु द्रव्यगुणैः समम् ।" वै.निघ. ।

वैदलिकशिम्बः । पुं । वैदलिकशिम्बायां। गुणाः—'रुचिप्रदाश्चैव सुदुर्जराश्च सर्व्वे स्मृता वैदलिकास्तु शिम्बाः ।"

वैदारिकः । पुं । हीनमध्यप्रवृद्धवातादिजनितसन्निपातज्वरे । लक्षणं—अल्पशूलकटीतोदादिकं भवति । एतस्मिन् निवृत्ते कर्णमूले पिड़कादि जायते । भा.म.१भ. ।

वैदिका । स्त्री । भूमिजम्बूवृक्षे । वनजाम । वै. निघ. ।

वैदुलम् । क्ली । वेतसमूले । सु.चि.१च. ।

वैदूर्य्य(रत्न)म् । क्ली । विदूरभूमिजमणौ । प्रवालविशेष । रा.नि.व.१३। गुणाः—उष्णमम्लं कफवातघ्नं गुल्मघ्नं शुभावहं केतुग्रहफलप्रदच । भा.। See माणिक्यम् ।

वैदूर्य्यवर्णः । त्रि । कृष्णवर्णे । भा. ।

वैदेहिका (ही) । स्त्री । पिप्पल्याम् । भा.पू. १भ. । रा.नि.व.६ । भैष.ने.रो.चि. । "वैदेहीं श्वेतमरिचम् ।" रोचनायाम् । मे. । भूजम्बूवृक्षे । वै.निघ. ।

वैद्यः । पुं । चिकित्सकजातौ । चिकित्सके । "विप्रो वैद्यकपारगः शुचिरनूचानः कुलीनः कृती धीरः कालकलाविदास्तिकमतिर्दक्षः सुधीर्धार्म्मिकः । स्वाचारः समदृग्दयालुरखलो यः सिद्धमन्त्रश्चमः शान्तः काममलोलुपः कृतयशा वैद्यः स विद्योतते ॥" इति सद्वैद्यलक्षणम् । "अधीरः कर्कशस्तब्धः सरोगी न्यूनशिक्षितः । पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि ॥" इति कुवैद्यलक्षणम् । रा.नि.व.२० । अपिच—"व्याधिस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः । एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥" इति वैद्यकर्म्म । भैष. । वैद्याः त्रिधा—छद्मचराः सिद्धसाधिताः गुणयुक्ताश्चेति । लक्षणानि यथा—"वैद्यभाण्डौषधैः पुस्तैः पल्लवैरवलोकनैः । लभन्ते ये भिषक्शब्दमज्ञास्ते प्रतिरूपकाः । श्रीयशोज्ञानसिद्धानां व्यपदेशादतद्विधाः । वैद्यशब्दं लभन्ते ये ज्ञेयास्ते सिद्धसाधिताः । प्रयोगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः । जीविताभिसरा ये स्युर्वैद्यत्वं तेष्ववस्थितम् ॥" च.सू.११ अ. । वासावृक्षे । श.च. ।

वैद्यकम् । क्ली । वैद्यस्य कर्म्मणि । अष्टाङ्गचिकित्साशास्त्रे, दशाङ्गवैद्यशास्त्रे च । यथा—शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यागदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रञ्च । सु. । द्रव्याभिधानं रुग्विनिश्चयः कायसौख्यसम्पादनं शल्यविद्यापञ्चाचरीप्रभावेण भूतनिग्रहः विषप्रतीकारः बालोपचारः रसायनं शालाक्यं हृष्यञ्चेति । वै.निघ. ।

वैद्यचिन्तामणिः । पुं । वल्लभेन्द्रकृतवैद्यकग्रन्थे । [ग्रन्थे । रुद्रटकृते च ।

वैद्यजीवनम् । पुं । लोलिम्बराजकृतवैद्यकग्र-

वैद्यतोषसंग्रहः । पुं । भीमसेनकृतचिकित्सासंग्रहे । [कौटीकायां ।

वैद्यत्रिंशट्टीका । स्त्री । चन्द्रटकृतत्रिंशच्छ्लो-

वैद्यदर्पणम् । क्ली । वैद्यकसंग्रहे ।

वैद्यनाथवटी । स्त्री । ज्वरातिसारे औषधम् । पाठः—"रसस्य शाणं संगृह्य काञ्जिकेन तु शोधयेत् । चित्रकस्य रसे चापि त्रिफलायाश्च बुद्धिमान् । रसार्द्धं गन्धकं शुद्धं भृङ्गराजरसेन वै । ताभ्यां संमूर्च्छनं कृत्वा स्वरसैः शाणसम्मितैः । खल्वयेत्र शिलाखल्ले क्रमशो वक्ष्यमाणजैः । निर्गुण्डीमण्डूकीश्वेताकुचेलाशोषसुन्दरैः । भृङ्गाह्वकेशराजैश्च जयन्तीन्द्राशनोल्कटैः । सर्षपाभां वटीं कृत्वा दद्यात्तां ग्रहणीगदे ······ ॥" रस.र. । [छ । श.च. ।

वैद्यबन्धुः । पुं । आरग्वधवृक्षे । শোন্দাল গা-

वैद्यमनोरमा । स्त्री । वैद्यकग्रन्थभेदे ।

वैद्यमाता । स्त्री । वासायाम् । বাসক গাছ । अम. ।

वैद्यरसायनम् । क्ली । रसायनग्रन्थविशेषे ।

वैद्यवल्लभः । पुं । उदयरुचिकृतवैद्यकग्रन्थे ।

वैद्यविनोदः । पुं । शङ्करकृतवैद्यकग्रन्थे ।

वैद्यविलासः । पुं । रघुनाथकृतवैद्यकशास्त्रे ।

वैद्यवृन्दः । पुं । नारायणकृतवैद्यशास्त्रे ।

वैद्यसारः । पुं । हर्षकीर्त्तिरचितवैद्यके ।

वैद्यसिंही । स्त्री । वासायाम् । বাসক গাছ । श.र. ।

वैद्यहितोपदेशः । पुं । श्रीकण्ठकृते तथा शिवपण्डितकृते च चिकित्साशास्त्रे ।

वैद्या । स्त्री । काकोल्याम् । কাঁকলা । श.च. ।

वैद्यामृतम् । क्ली । नारायणदासकृते सामेश्वरकृते च वैद्यशास्त्रे । [कग्रन्थे ।

वैद्यामृतलहरी । स्त्री । मथुरानाथकृतवैद्य-

वैद्यावतंसः । पुं । लोलिम्बराजकृतवैद्यके ।

वैधात्री । स्त्री । ब्राह्मीक्षुपे । रा.नि.व.५ ।

वैपरीत्यलज्जालुः । पुं, स्त्री । लघुलज्जालुकायाम् । "लज्जालुर्वैपरीत्यान्या स्वल्पक्षुपवहद्दला ।" गुणाः — कटुरुष्णः कफघ्नः रसनियामकः नानाविज्ञानकारकश्च । रा.नि.व.५ ।

वैरस्यम् । क्ली । मुखविरसतायाम् । "वैरस्यं नयनस्रवः ।" मा.नि. ।

वैराटः । पुं । इन्द्रगोपकीटे । है.च. ।

वैराटकः । पुं । तन्नामककन्दविषभेदे । गुणाः —"वैराटकेनातिदुःखं शिरोरोगश्च जायते ।" सु.कल्प.२अ. । See कन्दविषम् ।

वैरातङ्कः । पुं । अर्जुनवृक्षे । रा.नि.व.९ ।

वैरोचनरसः । पुं । अजीर्णादौ रसः । पाठः —"मृतसूतं चतुर्भागं भागैकं मृतहेमकं । अष्टभागं शुद्धगन्धं दिनैकं चित्रकद्रवैः । मर्दितं शोषितं चूर्णं वराटीस्तेन पूरयेत् । टङ्कणेन मुखं रुद्ध्वा भाण्डमध्ये निरोधयेत् । शुष्कं गजपुटे पचात् साङ्गशीतं विचूर्णयेत् । चतुर्गुञ्जा कणा क्षौद्रं लौहमग्निप्रदीपनम्…… ॥" रस.र. ।

वैल्वम् । क्ली । विल्वफले । अ.टी. । त्रि । विल्वभवे । विलेशये । वा.चि.१अ. ।

वैवर्ण्यम् । क्ली । विवर्णतायाम् । मा.नि. ।

वैवस्वतद्रुमः । पुं । कृष्णवैरिवृक्षे । চালমুগরা । अत्रि. ।

वैशाखः । पुं । मन्थनदण्डे । वर्षस्य प्रथमे मासि । अम. । रक्तपुनर्नवायाम् । वै.निघ. । अश्वस्य तन्नामकग्रहे । लक्षणं —"स्कन्देन गुरुणा चैव वेपमानेन पण्डितः । गात्रेण विद्याद्वाहन्तु वैशाखग्रहसेवितम् ॥" ज.द.५७अ. । स्त्री (खी) । रक्तपुनर्नवायाम् । গাদাপুণ্যা । रा.नि.व.५ ।

वैशिकी । स्त्री । वमनविरेचनयोः चतुर्विधशोधनान्यतमे । च.द.वमनाधिकारे । [नि.व.३ ।

वैशिजाता । स्त्री । पुत्रदात्रीलतायाम् । रा.

वैश्या । स्त्री । हरिद्रायाम् । वै.निघ. ।

वैश्रवणालयः । पुं । वटवृक्षे । है.च. ।

वैश्रवणावासः । पुं । वटवृक्षे । जटा. ।

वैश्रवणोदयः । पुं । वटवृक्षे । र.मा. ।

वैश्वानरः । पुं । चित्रकवृक्षे । अम. । पित्ते । अग्नौ । अम. ।

वैश्वानरचूर्णम् । क्ली । उदरघ्ने चूर्णम् । पाठः—"माणिमन्थस्य भागौ द्वौ यमान्यास्तद्वदेव तु । भागास्त्रयोऽजमोदाया नागराद्भागपञ्चकं । दश द्वौ च हरीतक्याः श्लक्ष्णचूर्णीकृताः शुभाः । अनु. मस्तुकाञ्जिकं तक्रमुष्णोदकं वा… ।" रस.र. ।

वैश्वानररसः । पुं । उदराधिकारे रसः । पाठः —"रसकं गन्धकं चाभ्रं शिलाजित्कान्तलौहकं । त्रिकटुश्चित्रकं कुष्ठं निर्गुण्डी मुषली विषम् । अजमोदा च सर्व्वेषां द्वौ द्वौ भागौ प्रकल्पयेत् । चूर्णीकृत्य ततः सर्व्वं निम्बक्वाथेन भावयेत् । भावयेदेकविंशच्च भृङ्गराजेन सप्तधा । मधुना गुडिकां शुष्कां रजन्यां तां प्रदापयेत् । वैश्वानराभिधो योगो जलोदरविशेषणः ।" रस.चि. ।

वैष्किरः । त्रि । विकीर्य्य भक्षणशीले, कुक्कुटादौ । वा.चि.६अ. ।

वैष्णवी । स्त्री । लघुशतावर्य्याम् । रा.नि.व.४ । तुलसीवृक्षे । श.मा. ।

वैसारिणः । पुं । मत्स्ये । अम. ।

वोड़ः । पुं । गुवाकवृक्षे । श.र. । [विशेषे । मे.।

वोड्रः । पुं । गोनससर्पे । বোড়াসাপ । मत्स्य-

वोढ़ः । पुं । कदम्बवृक्षे । वै.निघ. ।

वोढ़ा (ऋ) । पुं । ऋषभके । रा.नि.व.५ ।

वोण्टः । पुं । वृन्ते । বোঁটা । श.र. ।

वोदालः । पुं । मत्स्यविशेषे । বোয়াল মাছ । श.र. । [कोशकीतकि ।

वोपदेवः । पुं । हृदयदीपकनिघण्टुमन्थशतश्लो-

वोरटः । पुं । कुन्दवृक्षे । কুন্দ গাছ । त्रिका. ।

वोरवः । पुं । तन्नामकव्रीहिधान्यभेदे । বোরো ধান । गुणाः —"वोरवस्तु बुधैः प्रोक्तः त्रिदोषस्य प्रकोपनः । मधुरश्चाम्लपाकेन व्रीहिः पित्तकरो गुरुः ॥" राज.३प. ।

वोलम् । क्ली । (Balsamodendron Myrrh.) Myrrh. तन्नामकसारद्रव्ये ।

गन्धरसे। गन्धरस, বোল, হিরাবোল, শুন-খারাপী। हिं दा. बोल। मं क. बोल। तें गा-लिम्बोपीलम्। ता. वेल्लइपपोलम्। बम्. रत्था बोल। वै.निघ.२भ.र.पि.चि.बोलपर्पटीरसे। च. द.कुष्ठचि.। गुणाः—कटुतिक्तोष्णं कषायं रक्त-दोषघ्नं कफपित्तरोगघ्नं प्रदरघ्नञ्च। रा.नि.व.६।

बोलपत्रम् । क्ली। तेजपत्रसदृशसुगन्धिपत्रे। च.द.वा.व्या.चि.महाराजप्रसारणीतैले। "देवपु-ष्पी बोलपत्रम्।"

व्यक्तगन्धा । स्त्री। नीलापराजितायाम्। रा. नि.व.३। स्वर्णयूथिकायाम्। रा.नि.व.१०। पि-प्पल्याम्। वै.निघ.।

व्यङ्गः । पुं, क्ली। तन्नामकगण्डरोगभेदे। तस्य लक्षणम्—"क्रोधायासप्रकुपितो वायुः पित्तेन सं-युतः। मुखमागत्य सहसा मण्डलं विसृजत्यतः। नीरुजं तनुकं श्यावं मुखव्यङ्गं तमादिशेत्॥" मा. नि.। "परुषं परुषस्पर्शं व्यङ्गं श्यावञ्च मारुतात्। पित्तात्ताम्रान्तमानीलं श्वेतान्तं कण्डुमत्कफात्। र-क्ताद्रक्तान्तमाताम्रं शोषचिमचिमान्वितम्॥" वा. उ.३१अ.।

व्यजनम् । क्ली। तालवृन्ते। পাখা। तद्वायु-गुणाः—"मूर्च्छाखेदश्रमदाहश्रमघ्नो व्यजनानि-लः।" तालव्यजनगुणाः—त्रिदोषघ्नं लघु च। वं-शव्यजनगुणाः—रूक्षमुष्णं वातपित्तकरञ्च। मयूर-पुच्छवस्त्रव्यजनगुणाः—त्रिदोषघ्नम्। वालव्यजनं तेजस्करं मक्षिकादिनिवारणञ्च। राज.२प.।

व्यञ्जनम् । क्ली। सूपशाकादिमिष्टान्नेषु। বা-ঞ্জন, তরকারি। "व्यञ्जनं सूपशाकादि मिष्टान्नं तेमनं स्मृतम्।" रा.नि.व.२०। शाकमत्स्यगुणाः —"व्यञ्जनं शाकमत्स्याख्यं हृद्यं वृष्यञ्च पुष्टिदं। द्रव्येण येन येनेह व्यञ्जनं मत्स्यमांसयोः। तस्य तस्य तयोश्चैतद्गुणदोषैर्विभावयेत्॥" राज.२प.। श्मश्रुणि। দাড়ি। वै.निघ.। लक्षणे। चिह्ने। व्यक्तीभूतपूर्व्वरूपे। "संस्थानं व्यञ्जनं लिङ्गम्।" मा.पञ्चनिदाने।

व्यञ्जनकेशी । स्त्री। नील्याम्। रा.नि.व.४।

व्यड्म्बकः (नः) । पुं। एरण्डवृक्षे। अम.। सं.कनकतैले। [ला। वै.निघ.।

व्यण्डा । स्त्री। भूम्यामलक्याम्। ভুঁই আম-

व्यतिक्रमः । पुं। क्रमविपर्य्यये।

व्यत्यासः । पुं। परस्परक्षेपणे। वा.चि.९अ.। "व्यत्यासेन शकृद्रक्तम्।"

व्यथा । स्त्री। वेदनायाम्। अम.।

व्यन्तरः । पुं। सर्पसङ्करजातौ। वा.उ.३६अ.।

व्यवसायः । पुं। निश्चयबुद्धौ। यथा—वातिक एवायं व्याधिरिदमेवास्य भेषजमिति। च.वि.८अ.।

व्यवहारिकः (का) । पुं. स्त्री। इङ्गुदीवृक्षे। सम्मार्जन्यां। मे.। [तेजसि। मे.।

व्यवायः । पुं। स्त्रीसेवायाम्। अम.। क्ली।

व्यवायशोषः । पुं। स्त्रीसेवाजन्यशोषरोगे। लक्षणं यथा—"व्यवायशोषः शुक्रस्य क्षयलिङ्गैरु-पद्रुतः। पाण्डुदेहो यथा पूर्व्वं क्षीयन्ते चास्य धात-वः॥" सु.उ.४१अ.। [६५अ.।

व्याख्यानम् । क्ली। अतिशयोपवर्णने। सु.उ.

व्याघ्रः । पुं। स्वनामख्यातपशुजातीयमृगे। বাঘ। मांसगुणाः सिंहवत्। रा.नि.व.१९। क-रञ्जवृक्षे। मे.। रक्तैरण्डे। रा.नि.व.८।

व्याघ्रकरः । पुं। रक्तैरण्डे। वै.निघ.।

व्याघ्रखड्गः । पुं। व्याघ्रनखे। নখীবিশেষ। वै.निघ.।

व्याघ्रघण्टा (ण्टी) । स्त्री। कोङ्कणे प्रसिद्ध-लताविशेषे। बम्. लघु वाघाण्टी। मं गोविन्दी। गुणाः—"व्याघ्रघण्टा पित्तलोष्णा रुच्या विषक-फापहा। फलं चास्यास्तु तिक्तोष्णं विसूचीकफवा-तनुत्। त्रिदोषहारिणी प्रोक्ता वैद्यशास्त्रविशार-दैः।" वै.निघ.।

व्याघ्रतरुः । पुं। रक्तैरण्डे। वै.निघ.।

व्याघ्रतलः (ला) । पुं। व्याघ्रनखे। नखी। वै.निघ.। रक्तैरण्डे। ज.द.।

व्याघ्रदलः (ला) । पुं। रक्तैरण्डे। व्याघ्रन-खे। नखी। रा.नि.व.८।

व्याघ्रनखम् । क्ली, पुं। नखीनामगन्धद्रव्ये। নখীবিশেষ। मं उत्. वाघनखा। गुणाः—ति-क्तोष्णः कषायः वातकफघ्नः कण्डूकुष्ठव्रणघ्नः वर्ण्यः सुगन्धश्च। रा.नि.व.१२। सु.सू.३८अ.एलादिः। समुद्रजः—वा.सू.१५अ.एलादिः। 'शुक्तिव्याघ्रन-

ख: ।” स्नुहीवृक्षे । মনসা গাছ । रा नि.व.८ ।

व्याघ्रनखी । स्त्री । व्याघ्रनखे । भा.४भ.प्रद. चि. । “शुचिस्थाने व्याघ्रनख्या: ।”

व्याघ्रनायक: (सेवक:) । पुं । शालावृके । ফেউ, শৃগাল । रा.नि.व.१९ ।

व्याघ्रपात् (द:) । पुं । विकङ्कतवृक्षे । বঁইচী গাছ । भा. । रा.नि.व.९ । भैष.शिरोरो.चि. तप्तराजतैले । विकण्टकवृक्षे । रा.नि.व.११ ।

व्याघ्रपुच्छ: । पुं । एरण्डवृक्षे । अम. ।

व्याघ्रपुष्प: । पुं । व्याघ्रनखे । वै.निघ. ।

व्याघ्ररूपा । स्त्री । बन्ध्याकर्क्कोटक्याम् । वै.निघ.।

व्याघ्रहस्त: । पुं । रक्तैरण्डे । रा.नि.व.८ ।

व्याघ्राङ्घ्रिज: । पुं। व्याघ्रनखे । নখীবিশেষ । वै.निघ. ।

व्याघ्राट: । पुं । भरद्वाजपक्षिणि । अम. ।

व्याघ्रादनी । स्त्री । त्रिवृतायाम् । प.मु. ।

व्याघ्रायुधम् । क्ली। व्याघ्रनखे । নখীবিশেষ । वै.निघ. ।

व्याघ्रास्य: । पुं । विड़ाले । श.च. ।

व्याघ्री । स्त्री । कण्टकार्य्याम् । प.मु. । रा. नि.व.४ । च.द.यक्ष्म.चि.जीवन्त्याद्यघृते । “व्याघ्रीगोक्षुरसाधिता ।” च.द.ज्व.चि.“व्याघ्रीदुस्पर्शगोक्षुरै: ।” वराटिकाभेदे । কাঁড়বিশেষ । रा.नि.व.१३ । व्याघ्रपत्न्याम् । বাঘিনী । व्याघ्रनख्यां । নখীবিশেষ । च.द.वा.व्या.चि. ।

व्याघ्रीयुक् (युगम्) । स्त्री, क्ली । बृहत्यां, कण्टकार्य्याञ्च । चि.क्र.क. ।

व्याड़: । पुं । सर्पे । हिंस्रे । अम. ।

व्याड़म्ब: । पुं । रक्तैरण्डे । वै.निघ. । [अम.।

व्याड़ायुधम् । क्ली। नखीनामगन्धद्रव्ये। নখী ।

व्याधि: । पुं । रोगे । রোগ। हिं बेमारी । पुरुषदु:खसंयोगा व्याधय: । ते चतुर्व्विधा: शारीरागन्तुमानसस्वाभाविकभेदेन । तत्रागन्तवोऽभिघातजन्या:, शारीरास्त्वन्नपानमूला: वातादिवैषम्यमूलाश्च । मानसा: क्रोधादिका इच्छाद्वेषभेदैर्भवन्ति । स्वाभाविका: क्षुत्पिपासादिकाश्च । सु.सू.१अ. । तच्च दु:खं त्रिविधम् आध्यात्मिकमाधिभौतिकमाधिदैविकञ्चेति । तत्तु दु:खं सप्तविधे व्याधावुपनिपतति । ते पुन: सप्त व्याधय: यथा—आदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ता: संघातबलप्रवृत्ता: कालबलप्रवृत्ता: दैवबलप्रवृत्ता: स्वभावबलप्रवृत्ताश्चेति । तत्रादिबलप्रवृत्ता: शुक्रशोणितदोषान्वया: कुष्ठार्श:प्रभृतय: । शेषाणां विशेषा: तत्तत्पर्य्याये मृग्या: । सु.सू.२४अ. । रोग: दोषवैषम्यरूप: । “रोगस्तु दोषवैषम्यम् । रोगा दु:खस्य दातारो ज्वरप्रभृतयो हि ते ॥” ते च रोगा: केचित् स्वाभाविका: केचिदागन्तव: केचिन्मानसा: केचित् कायिका: केचित् कर्म्मजा: केचिद्दोषजा: केचित् साध्या: केचिद्याप्या: केचिदसाध्याश्च । तस्य च रोगस्य विज्ञानं पञ्चधा “हेतुस्तदनु संप्राप्ति: पूर्व्वरूपञ्च लक्षणं । तथैवोपशय: पञ्च… … ।” भा. । कुष्ठौषधौ । কুড় । अम. । रस.र. ज्वरी.चि. । See रोग: । [काले । मा.नि. ।

व्याधिकाल: । पुं । रोगवृद्धिहानिहेतुभूते

व्याधिघात: (क:) । पुं । स्थूले आरग्वधवृक्षे । বড় শোন্দাল গাছ । रा.नि.व.९ । च.द. ज्व.चि. । “गजाह्वा व्याधिघातक: ।” [द. ।

व्याधिघ्न: (जित्) । पुं । आरग्वधवृक्षे । ज.

व्याधित: । पुं। रोगिणि । रा.नि.व.२० ।

व्याधिनाशन: । पुं । द्वीपान्तरवचायाम् । তোপচিনি । वै.निघ. । [९ ।

व्याधिरिपु: । पुं । कर्णिकारवृक्षे । रा.नि.व.

व्याधिविपरीत: । पुं । रोगविपरीतौषधादौ । यथा—अतिसारे मलरोधके पाठादौ ; मसूरादिपथ्ये । उदावर्त्ते अधोवायुनि:सारके देवगुरुसेवादौ । मा.नि. ।

व्याधिहन्ता (र्त्ता) । पुं । वाराहीनामकन्दशाके । শূয়ার আলু । रा.नि.व.७ ।

व्याध्यर्गल: । पुं । दामोदरकृतवैद्यकग्रन्थे ।

व्यान: (वायु:) । पुं । देहस्थवायुविशेषे । ব্যানবায়ু । “कृत्स्नदेहचरो व्यान: रससंवहनोद्यत: । स्वेदासृक्स्राविणो वापि पञ्चधा चेष्टयत्यपि । क्रुद्धश्च कुरुते रोगान् प्रायश: सर्व्वदेहगान् ॥” सु.नि.१अ. ।

व्यापत् । पुं । स्त्री । अधिकलवणादिभक्षणजन्यरोगसङ्कटे । वैद्यकम् ।

व्याप्यम् । क्ली । कुष्ठौषधौ । कुड़ । अम. ।

व्यामः । पुं । तिर्य्यग्विस्तृतबाह्वोर्यदन्तरं स व्यामः । এক বাঁও । "व्यामः स्वप्नस्तु तयोस्तिर्य्यग्बाह्वोर्यदन्तरम् ।" रा.नि.व.१८ ।

व्यायामः । पुं । वेगकृद्व्यापारे । च.सू.१५अ. । अङ्गादिचालने । कुस्ति, मल्लश्रम । शरीरायासजनककर्म्मणि । भा.म.४अ.शिरोरो.चि. । "शरीरायासजननं कर्म्म व्यायामसंज्ञितम् ।" गुणादि—"तत्कृत्वा तु सुखं देहं विमृद्नीयात्समन्ततः । शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता । दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा ॥" इत्यादि । सु.चि.२४अ. । "व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनां । स च शीते वसन्ते च तेषां पथ्यतमो मतः । सर्व्वेष्वृतुषु सर्व्वैर्हि नरैरात्महितार्थिभिः । शक्त्यर्द्धेन च कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा । कुक्षौ ललाटे ग्रीवायां यदा घर्म्मः प्रवर्त्तते । शक्त्यर्द्धं तं विजानीयाद् यावदुच्छ्वासमेव च । लाघवं कर्म्मसामर्थ्यं स्थैर्य्यं क्लेशसहिष्णुता । दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते । व्यायामं कुर्व्वतो नित्यं विरुद्धमपि भोजनम् । विदग्धमविदग्धं वा निर्दोषं परिपच्यते । वयो बलं शरीरञ्च देशकालमथापि च । समीक्ष्य कुर्य्याद्व्यायामं युक्त्या शक्त्या च बुद्धिमान् । रक्तपित्ती क्षयी शोषी कासी श्वासी क्षतातुरः । भुक्तवान् स्त्रीषु च क्षीणो व्यायामं परिवर्ज्जयेत् । वातपित्तामयी बालो वृद्धो जीर्णश्च तं त्यजेत् । अतिव्यायामतः कासो रक्तपित्तप्रतानकौ । श्रमः क्लमः क्षयस्तृष्णा ज्वरश्छर्द्दिश्च जायते ॥" राज.२प. ।

व्यायामशोषः । पुं । अतिव्यायामजन्यशोषरोगे । लक्षणं—"व्यायामशोषी भूयिष्ठमेभिरेवमुपद्रुतः । लिङ्गैरुरःक्षतसमैः संयुक्तश्च क्षतं विना ॥"

व्यायोजिमः । पुं । स्थूलाणुसमविषमपाली । सु.सू.१६अ. ।

व्यालः । पुं । व्याघ्रे । दुर्दान्तगजे । रा.नि.व.१९ । रक्तचित्रके । रा.नि.व.६ । चित्रकवृक्षे । भा.पू.१भ. । सर्पे । श्वापदे । अम. । [वै.निघ. ।

व्यालकरजः । पुं । व्याघ्रनखे । নখীবিশেষ ।

व्यालखड्गः । पुं । व्याघ्रनखे । নখীবিশেষ । रा.नि.व.१२ ।

व्यालगन्धा । स्त्री । लाङ्गलीनाममहाकन्दशाके । বিষলাঙ্গুলিয়া । रा.नि.व.७ । [नि.व.४ ।

व्यालजिह्वा । स्त्री । महासमङ्गायाम् । रा.

व्यालदंष्ट्रः । पुं । गोक्षुरक्षुपे । रा.नि.व.४ ।

व्यालनखः । पुं । व्याघ्रनखे । নখীবিশেষ । रा.नि.व.१२ । क्षुद्रीवृक्षे । रा.नि.व.८ ।

व्यालपत्रः । पुं । एर्व्वारुकलतायाम् । ফেঁৎ কাঁকুড় । कश्चित् ।

व्यालपत्रा (त्रिका, त्री) । स्त्री । कर्कटीभेदे । কাঁকুড়বিশেষ । रा.नि.व.७ ।

व्यालपाणिजः । पुं । व्याघ्रनखाख्यगन्धद्रव्ये । নখী । रा.नि.व.१२ । [वै.निघ. ।

व्यालप्रहरणम् । क्ली । व्याघ्रनखे । নখী ।

व्यालबलः । पुं । व्याघ्रनखे । নখী । रा.नि.व.१२ । [भारतम् ।

व्यालमृगः । पुं । चित्रकव्याघ्रे । চিতা বাঘ ।

व्यालम्बः । पुं । रक्तैरण्डे । वैद्यकम् ।

व्यालवल्लरी । स्त्री । नागवल्ल्याम् । পাণ গাছ । वै.निघ. । [ষা । वै.निघ. ।

व्यालवेणी । स्त्री । देवदाल्याम् । পীত ঘোষা । वै.निघ. ।

व्यालायुधम् । क्ली । नखीनामगन्धद्रव्ये । अ.टी.मथुरा. । पुं । व्याघ्रनखे । নখী । रा.नि.व.१२ ।

व्यालीढ़(दष्टक)म् । क्ली । सर्पदंशनभेदे । लक्षणं यथा—"एकं दंष्ट्रापदं द्वे वा व्यालीढ़ाख्यमशोणितम् ।" वा.उ.३६अ. ।

व्यालुप्त(दष्टक)म् । क्ली । सर्पदंशनभेदे । लक्षणं—'दंष्ट्रापदे सरक्ते द्वे व्यालुप्तं… ।" वा.उ.३६अ. ।

व्यावर्त्तः (कः) । पुं । चक्रमर्द्दे । চাকন্দা গাছ । रा.नि.व.४ । नाभिकण्टके । श.च. ।

व्यासः । पुं । परिमाणभेदे । বেধ । श.र. ।

व्यासदीपप्रजा । स्त्री । वन्ध्याकर्क्कोट्याम् । वै.निघ. । [च. । त्रि । ऊषिते । दग्धे । मे. ।

व्युष्टम् । क्ली । प्रभाते । पर्य्युषिते । फले । हे.

व्यूहः । पुं । देहे । त्रिका. ।

व्योम । क्ली । जले । मे. । आकाशे । अम. । अभ्रधातौ । रा.नि.व.१३ । शूल.चि.पीड़ाभञ्जिरसे । वै.निघ.वा.व्या.चि.वातविध्वंसरसे । भैष.स्त्रीरो.चि.प्रदरारिरसे ।

व्योमचारी (इन्) । पुं । पक्षिणि । मे. ।

व्योमनासिका । स्त्री । भारतीपक्षिणि । त्रिका. ।

व्योमपूरम् । क्ली । सुगन्धतृणे । वै.निघ. ।

व्योमवल्लिका (ल्ली) । स्त्री । आकाशवल्ल्याम् । আলোকলতা । रा.नि.व.३ । [व.१४ ।

व्योमोदकम् । क्ली । आकाशसलिले । रा.नि.

व्योषम् । क्ली । त्रिकटुनि । শুঁট, পিপুল, মরিচ । भा. । एतच्च शिरोविरेचने शस्तम् । वा.सू.१५अ. ।

व्योषाद्यगुग्गुलुः । पुं । स्थौल्ये गुग्गुलुः । पाठः—"व्योषाग्नित्रिफलामस्तुविड़ङ्गं गुग्गुलुं समम् । खादेत्…… ॥" रस.र. ।

व्योषाद्यघृतम् । क्ली । अर्शसि घृतम् । पाठः—"व्योषगर्भं पलाशस्य त्रिगुणे भस्मवारिणि । साधितं पिबतः सर्पिः पतन्त्यर्शांसि निश्चितम् ॥" पलाशक्षारात् षड्गुणपरिस्रावितक्षारवारि ग्राह्यम् ।

व्योषाद्यचूर्णम् । क्ली । अर्शसि हितम् । "व्योषाऽग्न्यरुष्करविड़ङ्गतिलाभयानां चूर्णं गुड़ेन सहितन्तु सदोपयोज्यम् ।" सर्व्वं समभागम् । अन्यत् ज्वरातीसारे – ত্রিকটু, ইন্দ্রযব, নিমছাল, চিরেতা, ভীমরাজ, চিতে, কটুকী, আকনাদি, দারুহরিদ্রা, আতইচ প্রত্যেকে সমভাগ সর্ব্বসমান কুড়চিছাল চূর্ণ। মাত্রা ৪ মাষা । च.द. ।

व्योषाद्यलौहम् । क्ली । विद्रध्यधिकारे लौहम् । लक्षणं—"व्योषं त्रिवृत्तिक्तकरोहिणी च सायोरजस्तु त्रिफलारसेन । पीतं कफोत्थं शमयेत्तु शोथं गव्येन मूत्रेण हरीतकी च ॥" रस.चि. ।

व्रजभूः । पुं । कैलिकदम्बवृक्षे । श.च. ।

व्रणः । पुं, क्ली । तन्नामकरोगे, क्षतादौ । ব্রণরোগ, ঘা । स द्विविधः शारीर आगन्तुश्चेति । तयोः शारीरः पवनपित्तकफशोणितसन्निपातनिमित्तः । आगन्तुरपि पुरुषपशुपक्षिव्यालसरीसृपप्रपतनपीड़नप्रहाराग्निक्षारविषतीक्ष्णौषधशकलकपालशृङ्गचक्रेषुपरशुशक्तिकुन्ताद्यायुधाद्यभिघातनिमित्तः । तस्य लक्षणं द्विविधं सामान्यं वैशेषिकञ्च । तत्र सामान्यं रुग्व्रणगात्रविचूर्णने व्रजतीति व्रणः । विशेषलक्षणं पुनर्वातादिलिङ्गविशेषः ।" सु.चि.१अ. । स पुनः पञ्चदशविधः । पृथग्दोषैस्त्रयः संसर्गजास्त्रयः सन्निपातेनैकः एवम्भूता रक्तसहितैः सप्त, एवं चतुर्दश, रक्तेन केवलेनैक इति पञ्चदश । "स पञ्चदशधा दोषैः सरक्तैस्तत्र मारुतात् । श्यावः कृष्णोऽरुणो भस्मकपोतास्थिनिभोऽपि च । मस्तुमांसपुलाकाम्बुतुल्यतन्वल्पसंस्रुतिः । निर्मांसस्तोदभेदाढ्यो रूक्षश्चटचटायते । पित्तेन क्षिप्रजः पीतो नीलः कपिलपिङ्गलः । मूत्रकिंशुकभस्माम्बुतैलाभोष्णबहुस्रुतिः । क्षारोक्षितक्षतसमव्यथारागोष्मपाकवान् । कफेन पाण्डुः कण्डूमान् बहुश्वेतघनस्रुतिः । स्थूलौष्ठः कठिनः स्नायुशिराजालततोऽल्परुक् । प्रवालरक्तो रक्तेन सरक्तं पूयमुद्गिरेत् । वाजिस्थानसमो गन्धे युक्तो लिङ्गैश्च पैत्तिकैः । द्वाभ्यां त्रिभिश्च सर्वैश्च विद्याल्लक्षणसङ्करात् ।" इति । जिह्वाप्रभो मृदुः श्लक्ष्णः श्यावौष्ठपिटिकः समः । किञ्चिदुन्नतमध्यो वा व्रणः शुद्धोऽनुपद्रवः । इति । त्वगामिषशिरास्नायुसन्ध्यस्थीनि व्रणाश्रयाः । कोष्ठो मर्म्म च तान्यष्टौ दुःसाध्यान्युत्तरोत्तरम् । सुसाध्यो नवमांसाग्निवर्चोबलवति व्रणः । वृत्तो दीर्घस्त्रिपुटकश्चतुरस्राकृतिश्च यः । तथा स्फिक्पायुमेढ्रौष्ठपृष्ठान्तर्वक्त्रगण्डगः । कृच्छ्रसाध्योऽक्षिदशननासिकापाङ्गनाभिषु । सेवनीजठरश्रोत्रपार्श्वकक्षास्तनेषु च ।" इति । वा.उ.२५अ. । तथा—त्वङ्मांसशिरास्नाय्वस्थिसन्धिकोष्ठमर्म्माणीति । तत्राद्यैकवस्तुसन्निवेशी त्वग्भेदो व्रणः सूपचारः शेषाः स्वयमवदीर्य्यमाणा दुरुपचाराः । तत्रायतश्चतुरस्रः वृत्तस्त्रिपुटक इति व्रणाकृतिसमासः शेषा विकृताकृतयो दुरुपक्रमा भवन्ति । इति । व्रणवेदना तु बहुधा तद्यथा—तोदनभेदनताड़नच्छेदनायमनमन्थनविक्षेपणचुमचुमायननिर्दहनावभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधशूलविश्लेषणविकिरणपूरणस्तम्भनस्वप्नावकुञ्चनाङ्कुशिका भवन्ति । इति । सु.सू.२२अ. । व्रणबन्धनं चतुर्दशविधं तानि च कोशदामस्वस्तिकानुवेल्लितप्रतोलीम-

मण्डल-स्थगिकायमकखट्टाचीनविबन्धवितानगोफणाः पञ्चाङ्गुलीति चतुर्दश । व्रणायतनविशेषेण तद्बन्धनानि त्रिधा गाढ़समशिथिलानीति। सु.सू.१८अ.। वाभटस्तु उत्सङ्गं पञ्चाङ्गुलीस्थाने पञ्चाङ्गीति स्वीकरोति । विशेषाः स्वस्वपर्य्यायेषु मृग्याः ।

व्रणकृत् । पुं । भल्लातकवृक्षे । ভেলা গাছ । र.मा. । [रा.नि.व.५ ।

व्रणकेतुः (घ्नी) । पुं, स्त्री । दुग्धफेन्याम् ।

व्रणग्रन्थिः । पुं । रोगभेदे । ব্রণের ঘেটা । लक्षणं—"अरूढ़े रूढ़मात्रे वा व्रणे सर्व्वरसाशिनः । सान्द्रे वा बन्धरहिते गात्रेऽश्माभिहतेऽथवा । वातासृगसृतं दुष्टं संशोष्य ग्रथितं व्रणम् । कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ॥" वा.उ. २९अ. । [वै.निघ. ।

व्रणघ्नी । स्त्री । लघुकारवेल्लके । ছোট উচ্ছে ।

व्रणजिता । स्त्री । मुण्ड्याम् । মুণ্ডীরী । वै. निघ. । [शटी । श.च. ।

व्रणद्विट् । पुं । ब्राह्मणयष्टिकायाम् । বামন-

व्रणधूपनः । पुं । तन्नामकधूपदानविधौ । यथा—"शरावसम्पुटे क्षिप्ता कल्कमङ्गारदीपितम् । छिद्रे नेत्रं निवेश्याथ व्रणं तेनैव धूपयेत् ॥" अत्र व्रणनाड़िका दशाङ्गुलमिता कार्य्या । भा. ।

व्रणरोपणरसः । पुं । क्षुद्ररोगाधिकारे औषधम् । पाठः—"गन्धेशाहिफेणातुल्यं त्र्यहं जम्बीरमर्दितं । कुमार्य्या नरमूत्रेण चित्रकेण च शिग्रुना । सौवर्चलेन च पृथक् युक्ता च विबुधैः क्रमात् ॥" मात्रा ६ र. । अनु. मधु । रस.चि. ।

व्रणशोथः । पुं । व्रणनिमित्तश्वयथौ । तस्य पूर्व्वरूपं शोथस्यैकदेशोत्थानम् । स षट् वातपित्तकफसन्निपातरक्तागन्तुभेदेन । यथा—"पृथक्समस्तदोषोत्था रक्तागन्तुजौ तथा । व्रणशोथाः षड़ेते स्युः संयुक्ताः शोथलक्षणैः ॥" मा.नि.। [वै.निघ.।

व्रणशोधनः । पुं। कम्पिल्लके । কমলাগুঁড়ি ।

व्रणशोषः । पुं। क्षतजन्यशोषरोगे । निदानं—"रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् । व्रणिनश्च भवेच्छोषो स चासाध्यतमो मतः ॥" मा.नि. ।

व्रणस्थानम् । क्ली । व्रणवस्तुनि । ব্রণ স্থান । तानि च त्वङ्मांसशिरास्नाय्वस्थिसन्धिकोष्ठमर्म्माणीत्यष्ट भवन्ति । सु.सू.२२अ. ।

व्रणहः । पुं । एरण्डवृक्षे । श.च. । स्त्री (हा) । गुड़ूच्याम् । श.र. । [शूलिघ्ना । वै.निघ. ।

व्रणहरी । स्त्री । लाङ्गलिकौषधौ । विषला-

व्रणहृत् । पुं । भल्लातकवृक्षे । ভেলা গাছ । कलिकारीवृक्षे । विषलाशूलिघ्ना । रा.नि.व.४ ।

व्रणायामः । पुं । वातव्याधिविशेषे । लक्षणं —"मर्म्माश्रितं व्रणं प्राप्य वायुर्यः सर्व्वदेहगः । वेगैरानामयेद्देहं व्रणायामस्तु तं त्यजेत् ॥" मा.नि.।

व्रणारिः । पुं। बोलनामगन्धद्रव्ये । গন্ধবোল। रा.नि.व.६ । अगस्तिवृक्षे । বাসনা গাছ । रा.नि.व.१० ।

व्रणोपक्रमः । पुं । व्रणचिकित्सायाम् । व्रणोपक्रमः षष्टिविधोऽपतर्पणादिभेदेन । यथा—अपतर्पणमालेपः परिषेकोऽभ्यङ्गः स्वेदो विम्लापनमुपनाहः पाचनं विस्रावनं स्नेहो वमनं विरेचनं छेदनं भेदनं दारणं लेखनमेषणमाहरणं व्यधनं विस्रावनं सीवनं सन्धानं पीड़नं शोणितास्थापनं निर्व्वापणमुत्कारिका कषायौ वर्त्तिः कल्कः सर्पिस्तैलं रसक्रियावचूर्णनं व्रणधूपनमुत्सादनमवगाहनं मृदुकर्म्म दारणकर्म्म क्षारकर्म्माग्निकर्म्म कृष्णकर्म्म पाण्डुकर्म्म प्रतिसारणं रोमसंजननं लोमापहरणं वस्तिकर्म्मोत्तरवस्तिकर्म्म बन्धः पत्रदानं कृमिघ्नं बृंहणं विषघ्नं शिरोविरेचनं नस्यं कवलधारणं धूमो मधुसर्पिर्यन्त्रमाहारो रक्षाविधानञ्चेति । सु. चि.१अ. ।

व्रतम् । क्ली । ईप्सिताकामनियमे । च.सू.१अ. ।

व्रततिः (ती) । स्त्री । लतायाम् । अम. ।

व्रतादेशः । पुं । उपनयने । स्मृतिः ।

व्रश्चनम् । क्ली । छेदने । पुं । स्वर्णादिच्छेदके अस्त्रे । ছেনী । अम. ।

व्रह्मा (न्) । पुं । विधातरि । तत्प्रादुर्भावः यथा —"विधाताथर्व्वसर्व्वस्वमायुर्व्वेदं प्रकाशयन् । स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम् ॥" इत्यादि । भा. ।

व्रीड़ा । स्त्री । वनकुलत्थिकायाम् । प मु. ।

व्रीहिः । पुं । प्रावृट्कालजातधान्ये । আশু

धान्ये । हैमन्तिकशूकधान्यमात्रे च । मे. । तस्य लक्षणम्—"वार्षिकाः कण्डिताः शुक्ला व्रीहयश्चिरपाकिनः ।" तद्भेदाः—"कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि । शालामुखो जतुमुख इत्याद्या व्रीहयः स्मृताः ॥" गुणाः—"व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः । अल्पाभिष्यन्दिनो बद्धवर्च्चस्काः षष्टिकैः समाः । कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे ॥" भा.पू.१भ.धा.व. । "मधुराम्लपाकश्च व्रीहिः पित्तकरो गुरुः ।" च.सू.२७अ. । गौरः मधुरः शीतलः पित्तघ्नः कषायः स्निग्धो वृष्यः कृमिकफहरः तापरक्तहरश्च । तथा पुष्टिकरः श्रमघ्नः वीर्य्यबुद्धिकरो रुच्य आनन्दजनको वातजनकश्च । रा.नि.व.१६ ।

व्रीहिकाञ्चनः । पुं । मसूरवृक्षे । त्रिका. ।

व्रीहितुण्डिका । स्त्री । देवधान्ये । দেধান। वै.निघ. ।

व्रीहिधान्यम् । क्ली । षष्टिकादिधान्ये । वै.निघ. ।

व्रीहिपर्णिका (र्णी) । स्त्री । शालपर्ण्याम् । শালপাণি । रा.नि.व.४ । [र.मा. ।

व्रीहिभेदः । पुं । चीनाकधान्ये । কাংনীধান।

व्रीहिमुखम् । क्ली । व्यधनार्थं व्रीहिमुखाकारमुखशस्त्रे । सु.सू.८अ. । तत् षडङ्गुलायतं द्व्यङ्गुलवृत्तं चतुरङ्गुलफलञ्च कार्य्यम्, तन्मुखञ्च व्रीहिविस्तारं संमूढकुण्ठञ्च कार्य्यम् । इति सु.टी.ड. । भोजः । [धान्ये । কাংনী ধান । मे. ।

व्रीहिराजिकः । पुं । चीनाकधान्ये, कङ्गु-

व्रीहिश्रेष्ठः । पुं । शालिधान्ये । হেমন্তধান। रा.नि.व.१६ ।

व्रीह्यास्यम् । क्ली । व्रीहिमुखास्त्रभेदे । च.द. ।

श

शंवः । पुं । मुषलाग्रस्थलौहमण्डले । লোহার শুলো । धरणिः ।

शंवरम् । क्ली । जले । अम. । रा.नि.व.१४ ।

शकटः । पुं, क्ली । धववृक्षे । ধাওয়া গাছ । च.सु. । शरीरे । वै.निघ. । तिनिशवृक्षे । रा.नि.व.६ । [গাছ । र.मा. ।

शकटाख्यः (कः) । पुं । धववृक्षे । ধাওয়া

शकलम् । क्ली । त्वचि । গুড়ত্বক্ । रा.नि.व.६ । आमलके । पद्मदण्डे । পদ্মের ডাঁটা । वै.निघ. । वल्कले । ছাল । त्रिका. । शल्के । আঁইশ । पुं, क्ली । खण्डे । अंशे । अम. ।

शक(कु)ली (न्) । स्त्री, पुं । शगालमत्स्ये । মিরগাল মাছ । अम.भ. । गुणाः—वातकफकरत्वम् । अत्रि.२२अ. । महाशकुलमत्स्ये । বড় শউল, পিপ্‌লেশোউল । गुणाः—"शकुली रोहिताकारा भूमौ प्रायश्चरत्यसौ । गुर्वी पाके च मधुरा मेदिनी दोषकोपनी ॥" राज.३प. ।

शकुनः । पुं । पक्षिणि । गृध्रे । শকুনি । मे. । कृष्णचटके । শ্যামা পাখী । वै.निघ. । क्ली । शुभसूचकनिमित्ते । সগুন্ । मे. ।

शकुनञ्जा । स्त्री । क्षुद्रगृहगोधिकायाम् । ক্ষুদ্র টিক্‌টিকি । त्रिका. ।

शकुनाहृतः (त) । पुं । बालरोगविशेषे । শকুনিগ্রহ । मत्स्यविशेषे । वै.निघ. । शालिधान्यभेदे । भा.पू.१भ.धा.व. । गुणाः—शालिवत् ।

शकुनिः । पुं । पक्षिणि । পাখী । अम. । कृष्णचटके । শ্যামা পাখী । गृध्रे । रा.नि.व.१९ । चिल्लपक्षिणि । চীল পাখী । हे.च. । [हारा. ।

शकुनिप्रपा । स्त्री । पक्षिपानीयशालायाम् ।

शकुनी । स्त्री । तन्नामकबालग्रहविशेषे । लक्षणं—"स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः संस्राविव्रणपरिपीडितः समन्तात् । स्फोटैश्च प्रचिततनुः सदाहपाकैर्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥" सु.उ.२७अ. । श्यामाकपक्षिणि । শ্যামা পাখী । रा.नि.व.१९ ।

शकुन्तः (न्तिः) । पुं । पक्षिणि । अम. । काकभेदे । कुक्कुटभेदे । वै.निघ. । भासपक्षिणि । उणा. । कीटविशेषे । मे. ।

शकुन्दः । पुं । श्वेतकरवीरे । रा.नि.व.१० ।

शकुल: । पुं । मत्स्यविशेषे । শাল মাছ । गुणा: "शकुलो मधुरो ग्राही हृद्य: पित्तास्रजिद्गुरु: ।" राज.२प. । [त्रिका. ।

शकुलगण्ड: । पुं । मत्स्यविशेषे । শাল মাছ ।

शकुला । स्त्री । कटुकायाम् । কট্‌কী । रा.नि.व.६ ।

शकुलादनी । स्त्री । कटुकायां । কট্‌কী । रा.नि.व.६ । च.सू.४च.भेदनीये । जलपिप्पल्यां, कच्छटशाके । কাচড়াদাম । र.मा. । गजपिप्पल्याम् । रा.नि.व.६ । गण्डदूर्व्वादाम् । जटामांस्यां । गण्डूपदे । কেঁচো । कटफले । विश्व: ।

शकुलार्भक: । पुं । गडकमत्स्ये । গজুই মাছ । शम. ।

शकुलाक्षक: (का) । पुं, स्त्री । श्वेतदूर्व्वायाम् । गण्डदूर्व्वायाम् । शम. । [व.८ ।

शकुलाक्षी । स्त्री । गण्डदूर्व्वायाम् । रा.नि.

शकृत् । क्ली । विष्ठायाम् । शम. ।

शकृत्करि: (री) । पुं, स्त्री । गोवत्से । त्रिका. ।

शकृत्कार: । पुं । मलत्यागकारके । व्याक. ।

शकृद्द्वारम् । क्ली । मलद्वारे । हे.च. ।

शकृद्द्रव: । त्रि । द्रवरूपे । भा.म.४भ.तालुकण्टकचि. । [सु.सू.२६च. ।

शकृद्रस: । पुं । गोमयरसे । গোবরের রস ।

शक्कर: (रि:) । पुं । वृषे । हे.च. । त्रिका. ।

शक्तव: । पुं । भृष्टयवादिचूर्णे । ছাতু ।

शक्तिक: । पुं । गन्धके । रस.र. रस.कौ. भैष. द्वादशायसे । [जटा. ।

शक्तिपर्ण: । पुं । सप्तपर्णवृक्षे । ছাতিম গাছ ।

शक्तु: । पुं, क्ली । भर्जितयवादिचूर्णे । ছাতু । "धान्यानि भाष्ट्रभ्रष्टानि यवे · ... ।" रा.नि.व. १६ । "यन्त्रपिष्टानि शक्तव: ।" भा. । "धाना भृष्टयवे भूम्नि स्त्रियां पुंभूम्नि शक्तव: ।" जटा. ।

शक्तुक: । पुं । तन्नामकविषभेदे । लक्षणं यथा —"यद्ग्रन्थि: शक्तुकेनैव पूर्णमध्य: स शक्तुक: ।" भा.पू.१भ.विष.व. । क्ली । शक्तौ ছাতু । सा. कौ. ।

शक्तुपिण्डी । स्त्री । शक्तुकृतपिण्डाकारभोज्यद्रव्ये । ছাতুর লাড়ু । गुणा:—"गुर्वी पिण्डी खरात्यर्थं लघ्वी सैव विपर्य्ययात् ।" राज.२प. ।

शक्तुफला (ली) । स्त्री । शमीवृक्षे । শাঁই গাছ । शम. । श.र. ।

शक्त्ववलेहिका । स्त्री । शक्तुकृतावलेहिकायाम् । ছাতুর অবলেহ । गुणा:—"शक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका ।" राज.२प. ।

शक्र: (क:) । पुं । कुटजवृक्षे । কুড়চি গাছ । प.मु. । च.द.मेह:चि.न्यग्रोधाद्यचूर्णे । रस.र.कस्तूर्यावलेहे । अर्ज्जुनवृक्षे । मे. । इन्द्रयवे । भैष.च.द.बालरो.चि. । [পোকা । जटा. ।

शक्रगोप: । पुं । इन्द्रगोपकीटे । আষাঢ়ে

शक्रचापसमुद्भवा । स्त्री । बलायाम् । वै.निघ. । [श.र. ।

शक्रज: (जात:) । पुं । काके । त्रिका. ।

शक्रजा । स्त्री । इन्द्रवारुण्याम् । রাখালশশা । सु.चि.३८च. । [वै.निघ. ।

शक्रदारु: । पुं । शालवृक्षे । तैलदेवदारुवृक्षे ।

शक्रद्रुम: । पुं । वकुलवृक्षे । भा.म.१भ.ज्वरोपद्रवचि.द्वात्रिंशत्क्वाथे । "श्योणाकशक्रद्रुमै. ।" तैलदेवदारौ । भा. ।

शक्रनेमी । स्त्री । कृष्णमेषशृङ्ग्याम् । शुक्लकुटजवृक्षे । देवदारुवृक्षे । वै.निघ. । [प.मु. ।

शक्रपर्य्याय: । पुं । कुटजवृक्षे । কুড়চিগাছ ।

शक्रपादप: । पुं । कुटजवृक्षे । কুড়চি গাছ । रा.नि.व.९ । देवदारुवृक्षे । शम. ।

शक्रपुष्पम् । क्ली । इन्द्रयवे । वै.निघ.जीर्णज्वरचि.लवङ्गादिकषाये ।

शक्रपुष्पा (ष्पी) । स्त्री । नागदमन्यां । নাগদনা । र.मा. । लाङ्गलीवृक्षे । বিষলাঙ্গুলিয়া । शम. । [লাঙ্গুলিয়া । र.मा. ।

शक्रपुष्पिका । स्त्री । अग्निशिखावृक्षे । विश्व

शक्रबीजम् । क्ली । इन्द्रयवे । रा.नि.व.९ ।

शक्रभूभवा । स्त्री । इन्द्रवारुण्याम् । রাখালশশা । श.च. ।

शक्रभूरुहः । पुं । कुटजवृक्षे । কুড়চি গাছ । वै.निघ. । [रा.नि.व.९ ।

शक्रमाता । स्त्री । भार्ग्याम् । বামনহাটী ।

शक्रमूर्द्धा (न्) । पुं । वल्मीके । त्रिका. ।

शक्रयवः । पुं । इन्द्रयवे । वै.निघ.२भ.अ.सा.चि. । भैष.बालरो.चि. ।

शक्रवल्ली । स्त्री । इन्द्रवारुणीलतायाम् । রাখালশশা । रा.नि.व.३ ।

शक्रशाखी (इन्) । पुं । कुटजवृक्षे । भा. ।

शक्रशिराः । पुं । वल्मीके । रा.नि.व.१३ ।

शक्रसुधा । स्त्री । कुन्दुरुखोटी । সল্লের আঠা । श.च. ।

शक्रसृष्टा । स्त्री । हरीतक्याम् । त्रिका. ।

शक्राख्यः । पुं । उलूके, पेचके । त्रिका. ।

शक्राशनम् । क्ली । भङ्गायाम् । ভাঙ,সিদ্ধি । गुणाः—"शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम् । बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम् ॥" राज. । पुं । विजयावृक्षे । সিদ্ধি গাছ । प.मु. । कुटजवृक्षे । কুড়চি গাছ । श.च. । इन्द्रयवे । वै.निघ.२भ.दुर्जलज्व.चि.ज्ञानोदयरसे ।

शक्राह्वः । पुं । इन्द्रयवे । रा.नि.व.९ । भा.म.१भ.सन्ततादिज्व.चि. । "शक्राह्वत्रिफलाशृतम् ।" स्त्री (ह्वा) । इन्द्रयवे । वा.उ.५अ.भूतरावघृते ।

शक्रेन्द्रः । पुं । इन्द्रगोपकीटे । আষাঢ়ে পোকা । वै.निघ.२भ.अर्शःचि.त्रिफलागुग्गुलौ ।

शक्वरी । स्त्री । अङ्गुल्यां । আঙ্গুল । उणा. ।

शक्वा (न्) । पुं । गजे । उणा. ।

शङ्करः । पुं । श्वेतार्के । শ্বেত আকন্দ । भीमसेनीकर्पूरे । कपोते । वै.निघ. । वैद्यविनोदग्रन्थकारे । नाड़ीपरीक्षाकारे ।

शङ्करप्रियः । पुं । द्रोणपुष्पाम् । ঘলঘসা । प.मु. । तित्तिरिपक्षिणि । शब्दकल्पद्रुमः ।

शङ्करमत(लोह)म् । क्ली । अर्शसि लोहम् । भा. । रस.चि.९अ. । [तरौ ।

शङ्करशुक्रम् । क्ली । पारदे । भा.ज्व.चि.कल्प-

शङ्करस्वेदः । पुं । आमवाते स्वेदविशेषे । "कार्पासास्थिकुलत्थिकातिलयवैरेरण्डमूलातसीवर्षाभूशणवीजकाञ्जिकयुतैरेकीकृतैर्वा पृथक् । स्वेदः स्यात्········ ॥" भैष. । "शकृता महिषाश्वानां गोमयेन तथैव च । अग्नितप्तेन यः स्वेदः शङ्करस्वेद उच्यते ॥" न.द.१८अ. ।

शङ्करा (री) । स्त्री । शमीवृक्षे । শাঁই গাছ । रा.नि.व.८ । मञ्जिष्ठायाम् । श.र. ।

शङ्कराद्रिः । पुं । शुक्लार्कवृक्षे । শ্বেত আকন্দ । रा.नि.व.१० । [व.१२ ।

शङ्करावासः । पुं । भीमसेनीकर्पूरे । रा.नि.

शङ्कराह्वया । स्त्री । ह्रस्वशमीवृक्षे । वै.निघ. ।

शङ्कितः । पुं । चोरकनामगन्धद्रव्ये । हिं चोरा । গেটেলা । रा.नि.व.१२ ।

शङ्कुः । पुं । मत्स्यविशेषे, जलजन्तुविशेषे । शाँकोच इति भाषा । अर्क.चि.४र्थ शतके । अस्त्रे । कीलके । मे. । पर्णशिराजाले । পাতার শির । मेढ्रे । हे.च. । नखीनामगन्धद्रव्ये । नखी । जटा. ।

शङ्कुकर्णः । पुं । गर्दभे । त्रिका. ।

शङ्कुचिः । पुं । मत्स्यविशेषे । শঙ্কু মাছ । श.र. ।

शङ्कुतरुः (वृक्षः) । पुं । शालवृक्षे । श.र. । र.मा. ।

शङ्कुफलिका (फली) । स्त्री । ह्रस्वशमीवृक्षे । ছোট শাঁই গাছ । रा.नि.व.८ ।

शङ्कुमुखी । स्त्री । निर्विषजलौकायाम् । নির্বিষ জোঁক । सु.सू.१३अ. । See जलायुका ।

शङ्कुला । स्त्री । यन्त्रिकायाम् । জাঁতি । शब्दकल्पः । उत्पलपत्रायाम् । उणा. ।

शङ्काचः (चिः) । पुं । मत्स्यविशेषे । শাঁকোচ মাছ । जटा. । श.र. ।

शङ्खः । पुं, क्ली । तन्नामकस्थावरविषभेदे । स अतिविषासदृशः । शङ्खीविषे, दारुमोचभेदे वा । সেঁকো, দারমুজ । अचि.३स्थान.५६अ. । सामुद्रकीषस्थजन्तुविशेषे । শাঁক । गुणाः—"शङ्खकुम्भादयः स्वादुरसपाका मरुन्नुदः । शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः ॥" सु.सू.४६अ. । कटुः शीतः पुष्टिवीर्य्यबलदः गुल्मशूलकफश्वासविषघ्नश्च । रा.नि.व.१९ । "कङ्कुष्ठं गैरिकं

शङ्खं काश्मीरं टङ्कणमथा। नीलाञ्जनं शुक्तिभेदाः सूषकाः सवराटिकाः। जम्बीरवारिणा स्विन्नाः क्षालिताः कोष्णवारिणा। शुद्धिमायान्त्यमी योज्या भिषग्भिर्योगसिद्धये।" इति शङ्खादिशुद्धिः। सा.कौ.। शङ्खनाभौ। शङ्खनाभि। र.सा.सं.प्रदरान्तकरसे। नखीनामगन्धद्रव्ये। नखी। रा.नि.व.१२। च.द.ज्वरातिसा.चि.कलिङ्गाद्यगुड़िकायाम्। कर्णसमीपदेशे। रा.नि.व.१८। भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयोर्मध्ये मर्म्मद्वये। तच्च सद्योमारकम्। सु.शा.६अ.।

शङ्खकः। पुं। शङ्खे। शाँक। मे.। नीलकाशीषे। नील हिराकस। वै.निघ.। शिरोरोगभेदे। तस्य लक्षणं—"रक्तपित्तानिलाः दुष्टाः शङ्खदेशे विमूर्च्छिताः। तीव्ररुग्दाहरागं हि शोथं कुर्व्वन्ति दारुणं। स शिरो विषवद्वेगी निरुध्याशु गलं तथा। त्रिरात्राज्जीवितं हन्ति......॥" मा.नि.। च.इन्द्रिय.८अ.। [सु.।

शङ्खकन्दः। पुं। शङ्खालौ। शाँक आलु। प.

शङ्खकुसुमा। स्त्री। शङ्खपुष्प्याम्। श्वेत अपराजिता। रा.नि.व.३। [चिका.। श.र.।

शङ्खचरी (चर्च्ची)। स्त्री। ललाटिकायां।

शङ्खचूर्णम्। क्ली। शङ्खभस्मजातचूर्णे। शाँकेर चूण। गुणाः—पटु क्षारम् उष्णं परं क्रमिघ्नञ्च। राज.३प.। See चूर्णम्।

शङ्खजः। पुं। पारावताण्डाकारस्थूलमौक्तिके। बड़ शङ्खमुक्ता। शब्दकल्पः।

शङ्खद्रावकः। पुं। लौहयकृदधिकारे। शङ्खद्रावक। शङ्खादिद्रव्यसङ्करजातद्रावकौषधे। पाठः—शङ्खचूर्णं यवक्षारं सर्ज्जिक्षारं टङ्कणं विट् सैन्धवं सौवर्च्चलं शाम्भरि कर्कचं फटिकारीं नृसारदं समभागं काचकूप्यां निधाय वारुणीयन्त्रेण साधयेत्। भैष.। [रा.नि.व.६।

शङ्खद्रावी (न्)। पुं। अम्लवेतसे। अम्ल वेतस।

शङ्खधरा। स्त्री। हिलमोचिकायाम्। हिञ्चे। भा.पू.१भ.शा.व.। [जुई। वै.निघ.।

शङ्खधवला। स्त्री। शुक्लयूथिकायाम्। श्वेत

शङ्खनखः। पुं। क्षुद्रशङ्खे। जोड़ङ्गा। अम.भ.। नखीभेदे। श.र.। हट्टविलास्यां। र.मा.।

शङ्खनखा (खी)। स्त्री। हट्टविलास्याम्। र.मा.।

शङ्खनाभिः। स्त्री। सुगन्धद्रव्यविशेषे। शङ्खनाभि। इयं जम्बीररसेन भाविता शुद्धिमायाति। सा.कौ.। भा.उपदं.।

शङ्खनाम्नी। स्त्री। शङ्खपुष्प्याम्। श्वेत अपराजिता। वै.निघ.।

शङ्खपालः। पुं। स्वनामप्रसिद्धे दर्व्वीकरमहासर्पे। सु.कल्प.४अ.।

शङ्खपुष्पिका। स्त्री। श्वेतयूथिकायाम्। श्वेतापराजितायाम्। श्वेत जुई, श्वेत अपराजिता। सि.यो.कु.टी.उन्मा.चि.।

शङ्खपुष्पी। स्त्री। (Andropogon acicularium, or Canscora decussata.) लताद्रव्यविशेषे। शङ्खाहुलुई, डानकुनी। प.मु. इति केचित् खर्णमारबे। श्वेतापराजितायाम्। श्वेत अपराजिता। बम्. शंखोनी। गुणाः—हिमा तिक्ता मेधास्वरकरी ग्रहभूतादिदोषघ्नी च। रा.नि.व.३। "शङ्खपुष्पी सरा मेध्या वृष्या मानसरोगहृत्। रसायना कषायोष्णा स्मृतिकान्तिबलाग्निदा। दोषापस्मारभूतासकुष्ठक्रिमिविषप्रणुत्॥" भा.गु.व.। [रा.नि.व.३।

शङ्खमालिनी। स्त्री। शङ्खपुष्पीलतायाम्।

शङ्खमुखः। पुं। कुम्भीरे। हे.च.।

शङ्खमूलम्। क्ली। श्वेतमूलके। हाँसा मूला। रा.नि.व.७। [वै.निघ.।

शङ्खयूथिका। स्त्री। शुक्लयूथ्यां। श्वेत जुई।

शङ्खवटी। स्त्री। अग्निमान्द्ये शूलाधिकारे च हिता वटी। पाठः—"चिञ्चाक्षारपलं पटुव्रजपलं निम्बूरसे कल्कितं तस्मिन् शङ्खपलं सुतप्तमसकृन्निर्वाप्य शीर्णावधि। हिङ्गुव्योषपलं रसामृतबलीन्निक्षिप्य निष्कांशिकान् बद्धा शङ्खवटी क्षयग्रहणिकारुकपङ्क्तिशूलादिषु।" यावत् चूर्ण हइया ना याय, तावत् शङ्खके वारंवार पोड़ाइया लेबुर रसे फेलिबे, चूर्णवत् हइले तुलिबे। तेँतुलक्षार ८ तो. पञ्चलवण मिलित ८ तो. उक्त शङ्खचूर्ण ८ तो. हिङ्गु, शुट, पिपुल ओ मरिच मिलित ८ तो. पारा, विष ओ गन्धक प्रत्येके अर्द्ध तोला एकत्र लेबुर रसे

गाড়িয়া গাড়িয়া অম্ল রস হইলে বটী করিবে। रस.चि.। भैष.।

शङ्खविषम् । क्ली। (Arsenicum album.) White arsenic. विषभेदे। সেঁকো। हिं दा. साम्बलखार सन्‌बुलखार, संखसन्‌बुल। तैं तेल्लपाषाणम्। ता.वेल्लइपाषाणम्। [वै.निघ.।

शङ्खसङ्काशः । पुं। शङ्खालौ। শাঁক আলু।

शङ्खाख्यः । पुं। बृहन्नखे। বড়নখী। र.मा.।

शङ्खालुः (कः) । पुं। श्वेतालौ। শাঁক আলু। वै.निघ.।

शङ्खावर्त्तः । पुं। शम्बूकावर्त्तनामभगन्दररोगे। See शम्बूकावर्त्तः। स्रोतःशृङ्गाटकेषु तन्नामकास्थिसन्धिभेदे। सु.शा.५अ.।

शङ्खास्थि । क्ली। मस्तकस्थास्थिद्वये। মাথার খুলি। च.शा.७अ.। पृष्ठास्थनि। रा.नि.व.१८।

शङ्खाहुली । स्त्री। शङ्खपुष्पयाम्। শ্বেত অপরাজিতা। रा.नि.व.३।

शङ्खाह्वया (ह्वा) । स्त्री। शङ्खपुष्पीलतायाम्। শ্বেত অপরাজিতা। रा.नि.व.३। वै.निघ.२भ. छर्दि.चि.धान्यकयूषे। [श.च.।

शङ्खिका । स्त्री। चोरपुष्प्यां। চোরহুলী।

शङ्खिनः । पुं। शिरीषवृक्षे। वै.निघ.।

शङ्खिनिका । स्त्री। ग्रन्थिपर्णवृक्षे। গেঁঠেলা। वै.निघ.।

शङ्खिनी । स्त्री। चोरपुष्प्यां। চোরহুলী, ভাঁটুই इति पूर्व्ववङ्गे। प्रयोगोविन्दघृते। "क्रमुककुटरुणाशङ्खिनीचर्म्मषाह्वा।" यवतिक्तायां। श्वेतवुह्नायां। रा.नि.व.३। प.मु.। सु.सू.२९अ.। च. सू.४अ.। वा.सू.१५अ.। चर्म्मकषायां। চামরকষা। च.द.परिणामशूले। "सप्तला शङ्खिनी श्वेता।" श्वेतापराजितायां। वै.निघ.। शुक्लपुन्नागवृक्षे। विश्वः। श्वेतचुक्रायां। শ্বেত চুকা। श.र.।

शङ्खिनीफलः । पुं। शिरीषवृक्षे। रा.नि.व.९।

शङ्खिनीवासः । पुं। शाखोटवृक्षे। শ্যাওড়া গাছ। श.च.।

शङ्खोदधिमलः । पुं। समुद्रफेने। वै.निघ.।

शङ्खोदरी । स्त्री। वृक्षविशेषे। वम्. गुलतुरा। गुणाः—उष्णा कफवातघ्नी शूलामवातघ्नी च। वै.निघ.।

शची । स्त्री। सृक्कायाम्। পিড়িং। वै.निघ.। शतावर्य्यां। শতমূলী। मे.।

शटः । त्रि। अम्लरसे। व्याक.।

शटिः (टी) । स्त्री। शठ्याम्। শঠী, বন আদা। श.र.। च.सू.४अ.।

शट्टकम् । क्ली। सघृतजलमिश्रितशालिचूर्णे। সবেদার শটা। "शालिचूर्णं घृतं तोयं मिश्रितं शट्टकं भवेत्।" भा.।

शठम् । क्ली। तीक्ष्णलौहे। रा.नि.व.१३। तगरपुष्पे. तगरपादिके। তগরপাদুকা। रा.नि.व.१०। कुङ्कुमे। रा.नि.व.१२। पुं। धुस्तूरवृक्षे। रा.नि.व.२३। चित्रकवृक्षे। तालवृक्षे। स्त्री। आम्रातकवृक्षे। वै.निघ.। [नि.व.४।

शठाङ्गा (म्बा) । स्त्री। अम्बष्ठायाम्। रा.

शठिका (ठी) । स्त्री। (Curcuma gedoaria. Syn. Curcuma gerumbet.) Long and round gedoary. स्वनामख्यातमूले। गन्धशटीति च लोके। শটী। हिं कचूर। वम्. कचोरा, कापुरकाचरी। तैं किचलिएगड्डल। गुणाः—वातकफश्वासकासज्वरविनाशिनी। राज.। "सुगन्धिः कटुपाका स्यात् कुष्ठार्शोव्रणकासनुत्। उष्णा लघुश्च............। भा.। "शठी तिक्ता च कटुका कोष्णा तीक्ष्णाग्निदीपनी। सुगन्धी रुचिरा लघ्वी मुखस्वच्छकरी मता। कोपनी रक्तपित्तस्य गलगण्डादिरोगहा। कुष्ठार्शोव्रणकासघ्नी श्वासगुल्मकफापहा। त्रिदोषक्रमिवातानां ज्वरप्लीहादिनाशकृत्।" वै.निघ.। See कर्चूरः। आरण्यकार्द्रके। বন আদা। च.द.कफज्व.चि.निम्बादिः। "शठीभूनिम्बपौष्करम्।" च.द.ज्व.चि.किराततिक्तादौ। भा.म.१भ. कण्ठकूजज्व.चि.। "शठीकलिङ्गकिलिमाभयाः।"

शठीरूपा । स्त्री। कन्दगुडूच्याम्। वै.निघ.।

शठ्यादिः । पुं। त्रिदोषज्वरे कषायविशेषः। "शठीपुष्करमूलञ्च भार्गी शृङ्गी दुरालभा। गुडूची नागरं पाठा किरातं कटुरोहिणी।" च.द.ज्व.चि.।

शणः । पुं। (Crotalaria juncea.) In-

dian hemp. स्वनामख्यातक्षुपे। শণ গাছ। हिं सण। मैं शणमनुवेल, जैनपनर, रैलचेह्। ना, जैनपनर्। दा, जनवकनर। प.मु.। गुणाः —शणः कषायो मलगर्भास्रपातनः वान्तिकृत् वातकफघ्नश्च। रा.नि.व.४। तत्पुष्पं रक्तपित्ते हितं मलरोधकञ्च। बीजं शोणितशुद्धिकरम्। राज.१प। क्ली। शणे। हे.च.।

शणकन्दः । पुं। चर्म्मकषायां। চামর কষা। रस.र.उद.चि.वह्निभल्लातकरसे।

शणघण्टा (ण्टिका) । स्त्री। शणपुष्प्याम्। বন শণই। रा.नि.व.४।

शणपर्णी । स्त्री। अशनपर्ण्याम्। রহর। श.र.।

शणपुष्पिका । स्त्री। शणपुष्प्यां। आढ़क्याम्। রহর। भा.पू.१भ.धा.व.।

शणपुष्पी । स्त्री। शणसदृशविटपे क्षुपे, महाशणे। ঝন্ঝনিয়া, বন শণ। हिं घागरी, शणइ, वनशणइ। शणहुली। सु.सू.३९अ संशोधने। च.सू.१।४अ.। गुणाः—कषाया कफवातघ्नी अजीर्णज्वरघ्नी वामनी रक्तदोषघ्नी च। रा.नि.व.४। अवाह्रचे। र.मा.। [च.।

शणमूलम् । क्ली। शणशिफायाम्। सु.सू.२६

शणालः (लुकः) । पुं। आरग्वधवृक्षे। শোঁদাল গাছ। श.र.। [रा.नि.व.४।

शणिका । स्त्री। शणपुष्प्याम्। বন শণ,

शण्डम् । क्ली। पद्मिन्याम्। श.र.। पुं। नपुंसके। अम.।

शण्ढः । पुं। क्लीबे। হিজরে। अ.टी.भ.। वन्ध्यपुरुषे। जटा.। अन्तर्महल्लिके। খোজা। अम.।

शतकुन्दः । पुं। करवीरे। "शतकुन्दः करवीरे।" रा.नि.व.२३।

शतकुलीरकः । पुं। वायव्यकीटविशेषे। सु.कल्प.८अ.। See कीटः। [च.सिद्धिः।

शतकुसुमा । स्त्री। शतपुष्पायाम्। শুল্‌ফা।

शतकोटि । क्ली। हीरके। रा.नि.व.१३। See वज्रम्।

शतकौम्भ(क)म् । क्ली। स्वर्णे। वै.निघ.।

शतक्रतुद्रुमः । पुं। कृष्णकुटजवृक्षे। वै.निघ.।

शतक्रतुयवः । पुं। इन्द्रयवे। वै.निघ.।

शतखण्डम् । क्ली। सुवर्णे। श.च.।

शतग्रन्थिः । स्त्री। दूर्व्वायाम्। नीलदूर्व्वायाम्। रा.नि.व.८।

शतघ्नी । स्त्री। वृश्चिकाल्याम्। বিছাতী। करञ्जवृक्षे। मे। गलरोगविशेषे। लक्षणं यथा—"वर्त्तिर्घना कण्ठनिरोधिनी या चितातिमात्रं पिशितप्ररोहैः। नानारुजोच्छायकरी त्रिदोषाज्ज्ञेया शतघ्नीव शतघ्न्यसाध्या॥" सु.नि.१६अ.।

शतच्छदः । पुं। काष्ठकुट्टपक्षिणि। কাঠঠোকরা পাখী। त्रिका.।

शतजटा । स्त्री। शतमूल्याम्। चि.क्र.क.।

शतदन्तिका । स्त्री। नागदन्त्याम्। হাতিশুঁড়ে। रा.नि.व.५।

शतदलमल्लिका । स्त्री। स्वनामख्यातपुष्पक्षुपे। শতদলমল্লিকা। प.मु.।

शतदला । स्त्री। शतपत्रीपुष्पवृक्षे। শেউতি, গোলাপ। रा.नि.व.१०।

शतद्रुः । स्त्री। नदीविशेषे। तज्जलं शीतलं लघु स्वादु सर्व्वरोगहरं निर्म्मलं दीपनं पाचनं बुद्धिमेधाबलकरञ्च। रा.नि.व.१४।

शतधा । स्त्री। दूर्व्वायाम्। श.च.।

शतधौतघृतम् । क्ली। यत् पुनः पुनः सन्ताप्य शीताम्भसा निर्वाप्यते तथाविधसर्पिषि। শতধোত ঘি। ईशानदेवः। "शतं वारान् शीततोयेन धौतं फेणितं घृतम्।" डल्लणः। सि·यो.दाहचि.। [रा.नि.व.४।

शतनेत्रिका । स्त्री। शतावर्य्याम्। শতমূলী।

शतपत्रम् । क्ली। कमले। पुष्पभेदे। रा.नि.व.२३। वा.उ.३१अ.। शतदलकमले। रक्तपद्मे। वा च.सू.४अ.।

शतपत्रः (कः) । पुं। मयूरे। मे.। राजशुके। তুরী পাখী। अयं प्रतुदजातीयः। रा.नि.व.२३। हे.च.। सु.सू.४६अ.। (कः) काष्ठकुट्टकपक्षिणि। अम.। च.सू.२७अ.। सारसपक्षिणि। मे.।

शतपत्रा (त्रिका, त्री) । स्त्री । शतदलमल्लिकायाम् । শ্বেত বা পাটলবর্ণ গোলাপ । हिं सेवती, गुलाब । मं सेवती । कं सेंवतिगे । तें चेमन्तिचेट्टु । गुणाः—शीतला तिक्ता कषाया कुष्ठघ्नी मुखस्फोटहरा हृद्या दाहपित्तघ्नी च । रा.नि.व.१० । "शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः । दोषत्रयास्रजिद् वर्ण्या तिक्ता कट्वी च पाचनी ॥" भा. । नीलदूर्व्वायाम् । रा.नि.व.८ ।

शतपदी । स्त्री । शतमूल्याम् । শতমূলী । रा.नि.व.४ । कर्णजलौकायाम् । কাণবিছা, কাণকোটারি । हिं खान् खोजारा । हे.च. । सा चाष्टधा—परुषा कृष्णा चित्रा कपिलिका पित्तिका रक्ता श्वेता अग्निप्रभा चेति । ताभिः दष्टे शोफो वेदना दाहश्च हृदये भवति। सु.कल्प.८अ.।

शतपद्मम् । क्ली । श्वेतकमले । र.मा. ।

शतपर्व्वा[न्](र्व्विका) । पुं,स्त्री। वंशे । বাঁশ। रा.नि.व.७। च.द.अम्ल.चि.वरुणाद्यघृते । (र्व्विका) यवे । श.र. । शतपोरनाम्नि इक्षुभेदे । हिं शतपोरक । गुणाः—"शतपर्व्वा भवेत्किञ्चित्कोशकारगुणान्वितः । विशेषात्किञ्चिदुष्णश्च सक्षारः पवनापहः ॥" भा. । स्त्री (र्व्वा, र्व्विका) । दूर्व्वायाम् । वचायाम् । বচ । मे. । श्रीरुद्रतैले । प्रयोग. । श्वेतदूर्व्वायाम् । प.मु. । च.चि.३अ. । कटुकायाम् । কট্‌কী । रा.नि.व.६। नीलदूर्व्वायाम् । रा.नि.व.८ । कलम्बीशाके । भा.पू.१भ.शा.व. ।

शतपात् (द्) । स्त्री । शतपद्याम् । কাণকোটারী । जटा. । [सु.कल्प.८अ. ।

शतपादकः । पुं । अग्निप्रकृतिकीटविशेषे ।

शतपादिका । स्त्री । काकोल्याम् । কাঁক্‌লা जटा.। कर्णजलौकायाम् । কাণকোটারী। श.र. ।

शतपादी । स्त्री । श्वेतकटभीवृक्षे । रा.नि.व. ६ । See कटभी । नीलापराजितायां । वै.निघ.।

शतपुत्री । स्त्री । ह्रस्वशतमूल्याम् । শতমূলী । र.सा.सं. । लघुघोषायाम् । ক্ষুদ্র ঘোষা । वै.निघ. ।

शतपुष्पः । पुं । षष्टिकशालिधान्ये । ষেটে ধান । वै.निघ. । स्त्री (ष्पा, ष्पिका, । (Peucedanum Sowa. P. Graveslons.) Drill seeds. शताह्वायाम् । শুল্‌ফা । श.र. । रा.नि.व.४ । हिं सोंया । तें पेद्दसदापचेट्टु । गुणाः—"शतपुष्पा त्रिदोषघ्नी मेध्या पथ्या रुचिप्रदा ।" अत्रि.१६अ. । "शतपुष्पा तु मधुरा वातपित्तहरा गुरुः ।" राज.३प.। च.द.वा.ज्व.चि.पिप्पल्यादिः। मिषिभेदे । মৌরী । गवेधुकायाम् । रा.नि.व.४ । सु.सू.३६अ. । च.सू.४अ. ।

शतपुष्पादल(शाक)म् । क्ली । शताह्वापत्रे । শুল্‌ফা শাক । मं सोउप । कं सब्बसिगे । गुणाः—मधुरमुष्णं गुल्मशूलघ्नं वातघ्नं दीपनं पित्तहृत् रुच्यञ्च । रा.नि.व.७ ।

शतपोदः (कः) । पुं । शतपोनकनामभगन्दरविशेषे । शूकरोगे । कश्चित् ।

शतपोनकः । पुं, क्ली । शूकरोगविशेषे । तच्च मेढ्रसमन्तादणुमुखच्छिद्रव्याप्तं वातशोणितजं भवति । सु.नि.१४अ. । वातजन्यभगन्दररोगे । निदानम्—"कषायरुक्षैरतिकोपितोऽनिलस्त्वपानदेशे पिड़कां करोति यां । उपेक्षणात् पाकमुपैति दारुणं रुजा च भिन्नारुणफेनवाहिनी । तत्रागमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत् ॥" मा.नि. । "दीर्य्यतेऽणुमुखैश्छिद्रैः शतपोनकवत् क्रमात् । अच्छं स्रवद्भिरास्रावमजस्रं फेणसंयुतम् । शतपोनकसंज्ञोऽयम्...... ॥" वा.उ.२८अ. ।

शतपोरकः (पोरः) । पुं । इक्षुविशेषे । गुणाः—वंशकेक्षुवत् ईषदुष्णः वातशान्तिकरश्च । सु.सू.४५अ. ।

शतप्रसूना । स्त्री । शताह्वायाम् । শুল্‌ফা । रा.नि.व.४ ।

शतप्रासः । पुं । करवीरवृक्षे । अम. । [८अ.।

शतबाहुः । पुं । वायव्यकीटविशेषे । सु.कल्प.

शतभीरुः । स्त्री । मल्लिकापुष्पवृक्षे । अम. ।

शतभेदकः (नः) । पुं । अम्लवेतसे । मद.व. ६ । [आढ़कमाने । अम.भ.।

शतमानः । पुं । रूप्यमले । রূপার খাদ ।

शतमूला । स्त्री । नीलदूर्व्वायाम् । रा.नि.व. ८ । महाशतमूल्याम् । শতমূলী । रा.नि.व.४ । वचायाम् । रा.नि.व.६ ।

शतमूलिका । स्त्री । द्रवन्त्याम् । दन्तीविशेष । रा.नि.व.५ । महामूषिककर्ण्याम् । बड़ इन्दुरकाणी । वै.निघ. । [रा.नि.व.४ ।

शतमूली । स्त्री । शतावर्य्याम् । शतमूली ।

शतवल्ली । स्त्री । काकोल्याम् । काँकला । र.मा. ।

शतवीर्य्या । स्त्री । शतमूल्याम् । शतमूली । द्राक्षायाम् । किस्मिस् । रा.नि.व.२२ । महाशतावर्य्याम् । बड़ शतमूली । रा.नि.व.४ । श्वेतदूर्व्वायां । श्वेत दूर्वा । र.मा. । दूर्व्वायां । अ.द. ।

शतवेधी (धिन् । पुं, क्ली । अम्लवेतसे । रा.नि.व.६ । स्त्री (धी) । चुक्रे । चूकापालं । भा.पू.१भ.शा.व. । [द्रव्यगुणे ।

शतश्लोकी । स्त्री। वोपदेवकृते चन्द्रकलानामके

शतश्लोकीटीका । स्त्री । कृष्णदत्तकृतशतश्लोकीटीकायाम् । [रो.चि.वरुणाद्यघृते ।

शतसुता । स्त्री । शतावर्य्याम् । रस.र.शिरो-

शता । स्त्री । शतावर्य्याम् । वै.निघ.२भ.वा.व्या.चि.एरण्डपाके । [रा.नि.व.६ ।

शताङ्गः । पुं । तिनिशवृक्षे । সাদন, তিনিশ ।

शताङ्कुलः । पुं । तालवृक्षे । कश्चित् ।

शतायुषः । पुं । मनुष्ये । वै.निघ. ।

शतारुः(स्) (रुषी) । क्ली, स्त्री । कुष्ठरोगभेदे । लक्षणं—"रक्तश्यावं सदाहार्त्ति शतारुः स्याद्बहुव्रणम् ।" भा.कुष्ठ.चि. ।

शतावरी । स्त्री । (Asparagus racemosus, or Asparagus sarmentosus) स्वनामख्यातमधुरवर्गीयमूलविशेषे । শতমূলী । हिं सफेदमुसली, शतावर, छोटीशतावरी । मं सासोकांटेसेंद । कं किरियखासड़ि । तें चल्ल, चल्लगड्डलु । वम्. शतावरी । प.मु. । वा.सू.१५अ. वरुणादिः "शतावरीगुड़ूचीभ्याम् ।" गुणाः—हिमा वृष्या मधुरा पित्तघ्नी कफवातघ्नी तिक्ता मेहघ्नी रसायनी च । क्षुद्रमहाभेदेन द्विधा । गुणाः—"शतावर्यौ हिमे वृष्ये मधुरे पित्तजित्परे । कफवातहरे तिक्ते मेहश्रेष्ठे रसायने । शतावरीद्वयं वृष्यं मधुरं पित्तजिद्धिमम् । महती कफवातघ्नी तिक्ता श्रेष्ठा रसायने ।" रा.नि.व.४ । तथा शुक्रवृद्धिकरत्वात् शुक्रला । च.द. ।

शतावरीमण्डूरम् । क्ली । परिणामशूले मण्डूरम् । शुद्धमण्डूरं शतावरीरसः दधि दुग्धं प्र. ८ प. घृतं ४ प. एकत्र पचेत् । पिण्डीभवतारयेत् । শোধিতমণ্ডূর, শতমূলীর রস, দধি, দুগ্ধ প্রত্যেকে ৮ প. ঘৃত ৪ প. পাক করিবে । वृहत् यथा—त्रिफलाक्वाथशुद्धमण्डूरं ८ प. । पाकार्थं—शतावरीरसः दुग्धं दधि आमलकीरसः प्र. ८ प. घृतं ४ प. । पाकसिद्धौ मुस्तकपिप्पलीजीरकधान्यकहरीतकीत्वक्तेजपत्रैलानां प्र. चूर्णं ४ मा. प्रक्षिप्यालोडयम् । रस.र. ।

शताह्वया । स्त्री । शताह्वायाम् । শুল্ফা । शतावर्य्याम् । रा.नि.व.४ । वै.निघ.२भ.सर्व्वज्व.चि. आरग्वधादिनिरूहे । मधुरिकायां । মৌরী । रा.नि.व.२२ ।

शताह्वा । स्त्री । सुगन्धक्षुपविशेषे । শুলফা গাছ । हिं सौंफ । मं सोफ् । कं सब्बसिगे । वम्. बड़ी सौफ । च.द.अजी.चि.चन्दनबलातैले । गुणाः—कटुः तिक्ता स्निग्धा श्लेष्मातिसारघ्नी ज्वरघ्नी नेत्रव्रणघ्नी वस्तिकर्म्मणि हिता च । रा.नि.व.४ । लघुस्तीक्ष्णा पित्तकृत् दीपनी कटुः उष्णा शूलाक्षिरोगघ्नी च । भा.पू.१भ. । शतमूल्यां । रा.नि.व.४ । वै.निघ.अर्शः.चि.लघुचव्यादिघृते, विजयाचूर्णे । अजमोदायां । রাঙ্গুনী । रा.नि.व.२२ ।

शताह्वाद्वयम् । क्ली । शतपुष्पामधुरिकयोः । শুল্ফা ও মৌরী । च.सू.२अ. । [श.र. ।

शताच्ची । स्त्री । शताह्वायां । শুল্ফা । रात्रौ ।

शत्रम् । क्ली । बले । त्रिका. ।

शत्रिः (त्रिः) । पुं । गजे । उणा. ।

शत्रुकण्टकः (का) । पुं, स्त्री । धीघ्रायां । শেয়াকুল । रा.नि.व.८ ।

शत्रुद्रुमः । पुं । अम्लवेतसे । कश्चित् ।

शत्रुभङ्गः । पुं । मुञ्जतृणे । मूँज । वै.निघ. ।

शत्रुभूमिजः । पुं । नीलाञ्जने । वै.निघ. ।

शदः । पुं । शाकफलादौ । व्याक. । [च. ।

शनकावल्लिः । पुं, स्त्री । गजपिप्पल्यां । श.

शनपर्णी । स्त्री । कटुक्यां । কট্কী । श.च. ।

शनिप्रियम् । क्ली । नीलकान्तमणौ । शब्द-कल्पः ।

शनीरुहः । पुं । मन्दिषे । वै.निघ. ।

शनैर्मेहः । पुं । प्रमेहविशेषे । अत्र शनैः सकफं पिच्छिलं मेहति । सु.नि.६अ. । त्रि (ही) । शनैर्मेहनशीले ।

शप्तः । पुं । तृणविशेषे । উলু । श.च. ।

शफः । पुं । नखीनामगन्धद्रव्ये । নখী । रा.नि.व.१२ । क्ली । पशुखुरे । পশুর খুর । तरुमूले । मे. ।

शफरः । पुं । मत्स्यविशेषे । পুঁটী মাছ । अम. ।

शफराधिपः । पुं । इल्लीशमत्स्ये । त्रिका. ।

शफरी । स्त्री । अम्ललोणिकायाम् । আমরুল-শাক । भा.पू.१भ.शा.व. । प्रोष्ठीमत्स्ये । পুঁটী মাছ । अम. । गुणाः—"श्लेष्मकरी तु शफरी ।" चचि.२२अ. ।

शबलः । पुं । चित्रकवृक्षे । চিতা গাছ । सुगन्धतृणे । गन्धतृण । मूषिकभेदे । ইন্দুরবিশেষ । वा.उ.३८अ. ।

शब्दः । पुं । वर्णसमाम्नाये । यथा—"शब्दोनाम वर्णसमाम्नायः । स दृष्टार्थश्चादृष्टार्थश्च सत्यश्चानृतश्चेति । तत्र दृष्टार्थः त्रिभिर्हेतुभिः दोषाः प्रकुप्यन्ति षड्भिरुपक्रमैश्च प्रशाम्यन्ति । श्रोत्रादिसद्भावे शब्दादिग्रहणमित्यदृष्टार्थः पुनरस्ति प्रेत्यभावोऽस्ति मोक्ष इति । सत्यः नाम यथायुर्वेदोपदेशाः । सन्त्युपायाः साध्यानां सन्त्यारम्भफलानीति सत्यविपर्ययाच्चानृतः ।" च.वि.८अ. ।

शब्दग्रहः । पुं । कर्णे । अम. ।

शब्दभेदी (इन्) । पुं । मलद्वारे । शब्दकल्पः ।

शब्दमालः । पुं । रश्मुवंशे । वै.निघ. ।

शब्दरोचनम् । क्ली । वर्णे । वै.निघ. ।

शब्दाख्यम् । क्ली । श्वेतकांस्यधातौ । ভাল কাঁসা । वै.निघ. ।

शब्दाधिष्ठानम् । क्ली । श्रवणेन्द्रिये । त्रिका. ।

शमः । पुं । हस्ते । मनःस्थैर्य्ये । अम.टी. । उपचारे । रा.नि.व.२० । [८शेष । वै.निघ. ।

शमठः । पुं । शाकविशेषे । तूदभेदे । तूँ९वि-

शमनः । त्रि । समीकृतविषमदोषाणां समतापादके । वा.चि.१अ. । अरुण. । क्ली । अन्ने । वै.निघ. । "पित्तादिजिन्निरामस्य यत् स्यात्तत् शमनं मतम् ।" चर्व्वणे । धरणिः । हिंसायां । हे.च. । पुं । मृगभेदे । श.च. । कलाये । মটর । रा.नि.व.१६ । तन्नामकनिरूहवस्तौ । "प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम् । सक्षीरः शस्यते वस्तिर्दोषाणां शमनः स्मृतः ॥" धूमपानभेदे । अत्र धूमनाड़ी रोगिणश्चत्वारिंशाङ्गुला तथैलादिकश्च धूमद्रव्यं भाव्यम् । भा. । स्त्री (नी) । रात्रौ । कषायभेदे । येन वमनादि विनैव वातादयः शान्तिं यान्ति । च.द.ज्व.चि. ।

शमलम् । क्ली । विष्ठायाम् । अम. ।

शमिः । स्त्री । शिम्बायाम् । ছিমড়া । हे.च. ।

शमिका । स्त्री । महाशमीवृक्षे । वै.निघ. ।

शमि(मी)जः (जा) । पुं स्त्री । रक्तकुलत्थके । (जा) शिम्बीधान्ये । भा.पू.१भ.धा.व. ।

शमि(मी)रः । पुं । ह्रस्वशमीवृक्षे । ক্ষুদ্র শাঁই গাছ । श.र. । अम. । [निघ. ।

शमिला । स्त्री । जातीपुष्पवृक्षे । চামিলী । वै.

शमी । स्त्री । (Prosopis spicigera.) स्वनामख्यातसकण्टकवृक्षे । শাঁই গাছ । हिं छिकुर । मं शमी, खैरी । कं वन्नि, कावन्नि । उत्. शमी । सा द्विधा लघुमहाभेदेन । गुणाः—रूक्षा कषाया रक्तपित्तातिसारघ्नी च । तत्फलं स्वादु रूक्षम् उष्णं केशघ्नञ्च । रा.नि.व.८ । "शमीफलं गुरु स्वादु रूक्षोष्णं केशनाशनं ।" सु.सू.४६अ. । रक्तपलाशशमीवृक्षे । सु.चि.१अ. । See अग्निगर्भा । शिम्बायाम् । शिम् । अम. । सोमराज्याम् । সোমরাজ । मे. ।

शमीधान्यम् । क्ली । शिम्बीधान्ये, माषादौ, मुद्गराजमाषतिलकुलत्थादौ च । पुरातनादिगुणाः —"शूकधान्यं शमीधान्यं समातीतं प्रशस्यते । पुरातनं वातकृद्रूक्षं प्रायेणाभिनवं गुरु । यवगोधूममाषाश्च तिलाश्चापि नवा हिताः । पुराणा विरसा

ष्वा न तथार्थकरा मताः। अनार्त्तवं व्याधिहत- मपर्य्यागतमेव च। अभूमिजं नवञ्चापि न धान्यं गुणवत् स्मृतम्॥" राज.२प.।

शमीपत्रा। स्त्री। लज्जालुकालतायाम्। लज्जावती। रा.नि.व.५। [आलू। कोषालरम्।

शमीरकन्दः। पुं। वाराहीकन्दे। শুয়ার

शम्पदा। स्त्री। ऋद्धौ। वृद्धि ওষধি। वै.निघ.।

शम्पाकः। पुं। महारग्वधवृक्षे। বড় শোণালু, সোন্দাল। अम.। मरिचाद्यतैले। रत्नमालासंग्रहे पित्तशोथचि.; विन्दुघृते च। तन्मज्जगुणाः—"स्वादुपाकोऽपिबलकृत् स्निग्धः पित्तानिलापहः।" सु.सू.४६अ.। यावके। सम्यक्पाके। हे. च.। [छ। श.र.।

शम्पातः। पुं। आरग्वधवृक्षे। শোন্দাল গা-

शम्ब(व)रः (लः)। पुं। लोध्रवृक्षे। লোধ গাছ। अर्ज्जुनवृक्षे। रा.नि.व.९। चित्रकवृक्षे। চিতা গাছ। रा.नि.व.६। तालवृक्षे। रा.नि.व. २३। हस्ते। उणा.। मृगविशेषे। শম্বর মৃগ। त्रिका.। मत्स्यभेदे। विश्व.। क्ली। जले। त्रिका.।

शम्ब(व)रकन्दः। पुं। वाराहीकन्दे। শুয়ার আলু। रा.नि.व.७।

शम्ब(व)रचन्दनम्। क्ली। वर्व्वरचन्दने। শবর চন্দন। गुणाः— तिक्तं शीतलं उष्णं श्लेष्मवातहरं श्रमपित्तविस्फोटपामादिकुष्ठव्रणातापहरञ्च। रा.नि.व.१२। [লোধ। वै.निघ.।

शम्ब(व)रदेशजः। पुं। शुक्लरोध्रे। শ্বেত-

शम्ब(व)रपादपः। पुं। शुक्लरोध्रे। वै.निघ.।

शम्ब(व)राहारः। पुं। वनवदरे। বুনোকুল। वै.निघ.।

शम्ब(व)री। स्त्री। आखुकर्णीलतायाम्। मूषाकाणी। रा.नि.व.२३। शुक्लश्रेणीक्षुपे। रा.नि.व.४। द्रवन्तीक्षुपे। বড় দন্তী বা স্বয়ংবরা। रा.नि.व.५। [निघ.।

शम्ब(व)रीगन्धा। स्त्री। वनतुलस्याम्। वै.

शम्ब(व)रोद्भवः। पुं। शुक्ललोध्रे। वा.उ. ३२अ.।

शम्बुः। पुं। शम्बूके। শামুক। हड्डचन्द्रः।

शम्बु(म्बू)कः। पुं। शम्बूके। শামুক। See शङ्खः। प्राणनाशककीटविशेषे। सु.कल्प.८अ.। शङ्खे। শাঁক। हे.च.। क्षुद्रशङ्खे। ছোট শাঁক। रा.नि.व.१९।

शम्बुक्कः। पुं। शम्बूके। শামুক। श.र.।

शम्बूकपुष्पी। स्त्री। शङ्खपुष्प्याम्। भा.पू.१ भ.चित्तभ्रमचि.। "शम्बूकपुष्पाः स्मृताः।"

शम्बूका। स्त्री। जलशुक्तौ। ঝিনুক। शम्बूके। শামুক। रा.नि.व.१९।

शम्बूकाद्यतैलम्। क्ली। कर्णरोगे तैलम्। पाठः—"शम्बूकमांसकल्केन कटुतैलं विपाचयेत्। अस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति॥" द्वितीयं वृहत् यथा—"प्रस्थं शम्बूकमांसस्य कटुतैलस्य तत्समम्। कुष्ठं भङ्गी रजो वासा ह्यर्कपत्रं सुही घनं। विल्वं शालिञ्च पत्रञ्च केशरं नागकेशरम्। द्राक्षा चातिविषा चैव यष्टीमधुकमेव च। शटी चैरण्डकार्पासभृङ्गकेशरजस्य च। एतेषां कर्षमादाय पचेत्तैलं भिषग्वरः। तस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति॥" रस.र.।

शम्बूकावर्त्तः। पुं। सन्निपातजभगन्दररोगे। तस्य लक्षणं यथा—"बहुवर्णरुजास्रावा पिड़का गोस्तनोपमा। शम्बूकावर्त्तवन्नाड़ी शम्बूकावर्त्तको मतः॥" मा.नि.।

शम्भुः। पुं। श्वेतार्के। সাদা আকন্দ। श.च.। रस.चि.३अ.। "वह्निरेकः शम्भुरेकः।"

शम्भुकेतनः। पुं। पीतलोध्रे। वै.निघ.।

शम्भुतेजः। क्ली। पारदे। र.सा.सं.।

शम्भुप्रिया। स्त्री। आमलक्याम्। श.र.।

शम्भुवीजम्। क्ली। पारदे। भैष.ध्वजभङ्गचि.।

शम्भुवल्लभम्। क्ली। श्वेतकमले। रा.नि.व.१०।

शम्भोःकण्ठविभूषणम्। क्ली। विषे। কণ্ঠবিষ। भैष.पञ्चाननरसे। [निद्रायां। विश्वः।

शयः। पुं। हस्ते। रा.नि.व.१८। सर्पे। मे.।

शयथः। पुं। सर्पविशेषे। वराहे। मीने। उणा.। त्रि। गाढ़निद्रिते। हे.च.।

शयनम्। क्ली। निद्रायाम्। ঘুম। शय्यायाम्। বিছানা। अम.। मैथुने। मे.।

शयानकः । पुं । कृकलासे । गिर्गिटी । हे.च. । सर्पे । उणा. ।

शयामूत्रम् । क्ली । शय्यामूत्रे । वै.निघ. ।

शयालुः । पुं । कुकुरे । त्रिका.। शृगाले । त्रि । अलसे । [श.मा. । त्रि । निद्रिते । अम. ।

शयितः । पुं । अजगरे । श्रेलौ । चाल्ता ।

शयुः । पुं । अजगरनामसर्पजातौ । अम. ।

शय्या । स्त्री । आस्तरणे, तल्पे । बिछाना । अम. । सुखशय्यागुणाः —"सुखशय्यासनं सेव्यं निद्रापुष्टिधृतिप्रदं । श्रमानिलहरं वृष्यं विपरीतमतोऽन्यथा ॥" भूशय्यागुणाः —"भूशय्याऽनिलपित्तघ्नी बृंहणी शुक्रवर्द्धनी ।" खट्वापट्टशय्ययोर्गुणाः —"खट्वा तु वातला प्रोक्ता पट्टी रुचोऽतिवातलः ।" राज.५प. ।

शय्यामूत्रम् । क्ली । शिशोस्तन्नामकरोगे । (शय्यागोत) । औषधं यथा—"कृतमूत्रार्त्तिभूभागमृदं दग्ध्वा तु खोलके । संचूर्ण्य मधुसर्पिभ्यां लीढ्वा स्वप्ने न मूत्रयेत् ॥" रस.र.बाल.चि. ।

शरम् । क्ली । जले । मे. ।

शरः । पुं, क्ली । (Saccharum sara.) Penreed grass. स्वनामख्यातटणे । शर गाछ । हिं काँड़ा, रामशर, शरपत् । तें रेल्लु, काकिवेदुरु, गुन्द्र । शरण, अंवलिनगणे इति मालवे प्रसिद्धः । पञ्जा. कंड़ । स द्विविधः स्थूलसूक्ष्मभेदेन । तद्द्विविधगुणाः—मधुरं तिक्तम् ईषदुष्णं बलवीर्य्यकरं नित्यसेवनात् ईषद्वातकरं कफभ्रान्तिमदघ्नञ्च । काशभेदे । रा.नि.व.८ । वाणे । अम. । स द्विविधः कर्णी शल्यश्च । सु.सू.२६अ. । दध्नः अग्रभागे ; दधिर माथा । मे. । महापिण्डीतरौ । रा.नि.व.६ । [सु ।

शरखड्गकः । पुं । खागड़टणे । थागुड़ा । प.

शरजम् । क्ली । नवनीते । ननि । शब्दकल्प. । हैयङ्गवीनघृते । हे.च. ।

शरटः । पुं । कुसुम्भशाके । कुसुम गाछेर पाता । र.मा. । पूतीकरञ्जे । नाटा । प.मु. । कृकलासे । अ.टी. । स्त्री (टी) । खादिरपर्ण्याम् । लज्जावती । वै.निघ.जीर्णज्व.चि. ।

शरणा (णी) । स्त्री । प्रसारण्याम् । गन्धभादुलिया । मद.व.३ । श.र. । जयन्त्याम् । जन्ती गाछ । श.र. ।

शरण्डः । पुं । पक्षिणि । श.र. । गृहगोधायाम् । टिक्टिकि । कृकलासे । काँक्लास । मे. ।

शरत् (द्) (दा) । स्त्री । वत्सरे । ऋतुभेदे । शरत्काल । अम. । श.र. । तुलावृश्चिकौ शरत् । "तुलावृश्चिकयोः शरत् ।" मतान्तरे भाद्राश्विनौ । गुणाः—"शरदुष्णा पित्तकर्त्री नृणां मध्यबलावहा ।" भा. ।

शरत्कामी (इन्) । पुं । कुकुरे । श.र. ।

शरत्पद्मम् । क्ली । श्वेतकमले । रा.नि.व.१० ।

शरत्पुष्पः । पुं । आहुल्यक्षुपे । रा.नि.व.४ ।

शरदन्तः । पुं । शरे । हेमन्तकाले । रा.नि.व.२१ ।

शरदुदाशयम् । क्ली । शरत्कालिकसरोवरे । भागवतम् । [शाक । र.सा.सं. ।

शरदुद्भवः । पुं । वृत्तपत्रशाकविशेषे । नटे

शरपुङ्खः (ङ्खा) । पुं, स्त्री । (Tephrosia purpurea.) स्वनामख्यातक्षुपविशेषे । शरपुङ्खेति लोके । वननील, शरपुङ्खा । हिं शरफोंका । बम्. दा. जंलिकुलथि । कं येरडुकोग्गि । मं उह्नलि । तें तेल्लवेंपल्लिचेट्टु । ता. कोल्लुक्कयवेलयि । सा श्वेतपीतभेदेन द्विधा। गुणाः—कटुरुष्णा कृमिवातघ्नी । श्वेतशरपुङ्खा तु गुणाढ्या रसायने प्रशस्ता च । रा.नि.व.४ । "शरपुङ्खी यकृत्प्लीहगुल्मव्रणविषापहः । तिक्तः कषायः कासास्रश्वासज्वरहरी लघुः ।" भा. । तद्वीजं मूषिकविषहरम् । वा.उ.३८अ. । विशेषेण प्रमेहघ्नः रक्तशुद्धिकरश्च । अर्वाचीनाः । वै.निघ. ।

शरबीजम् । क्ली । शरधान्ये । शरेर बीचि ।

शरभः । पुं । महासिंहे । रा.नि.व.१९ । काश्मीरदेशीयहरिणविशेषे । स उच्चो विशालशृङ्गश्च । एतन्मांसं कषायमधुरादिगुणयुक्तम् । शलभे । फड़िङ्ग । उष्ट्रे । जटा.। करिशावके । वानरभेदे । मे. । [शालिक । श.च. ।

शरमल्लः । पुं । शारिकाभेदे, मयनभेदे । (गो-

शरलः । पुं । सरलद्रवे । সরল গাছ । शब्दकल्पः ।

शरलकम् । क्ली । जले । श.च. ।

शरलोमा । पुं । ऋषिविशेषे ।

शराटिः (ड़िः) (तिः) । पुं । आटिनामकपक्षिणि । শরাল পাখী । श.र.। अ.टी.र.मा.।

शराटिका । स्त्री । शरारिपक्षिणि । শরাল পাখী । खदिरपर्ण्याम् । लज्जावती । वै.निघ. ।

शरादिपञ्चमूलम् । क्ली । शरादिपञ्चद्रव्यकृतकषाये । यथा—"शरेक्षुदर्भकाशानां शालीनां मूलमेव च ।" च.द.अश्म चि शरादिद्दते ।

शरादिपञ्चमूलाद्यघृतम् क्ली । अश्मर्य्यां घृते । "शरादिपञ्चमूल्या वा कषायेण पचेद्घृतम् । प्रस्थं गोक्षुरकल्केन सिद्धमद्यात् सशर्करम् ॥" च. द.अश्म.चि. ।

शरारिः (री) । पुं, स्त्री । स्वनामख्यातशवजातीयपक्षिणि । শরাল পাখী । भैष.शिरोरो. चि. । तन्मांसगुणाः—वातघ्नं स्निग्धं सृष्टमलं हृष्यं रक्तपित्तहरं हिमञ्च । राज.३प. ।

शरारि(री)मुखः । पुं । शरारिपक्षिणि । শরাল পাখী । सु. । क्ली । धवलस्कन्धशरारिनाम्ना दीर्घचञ्चुपक्षिणश्चञ्चुसदृशमुखे विस्रावणास्त्रे । कर्त्तरीति संज्ञा लोके । কাঁচি,কাতারি । "ताञ्च दशाङ्गुलां चलत्पलाशां कुर्य्यात् ।" सु.सू.८अ. ।

शरालिः (का) (ली) । स्त्री । शरारिपक्षिणि । শরাল পাখী । श.र. ।

शरावः । पुं । पलाष्टके, ६४ तो., १ श. । "शरावोऽष्टपलम् ।" प.प्र.१ख. । मृण्मयपात्रभेदे । শরা । अम. । [८अ. ।

शरावकुर्द्दः । पुं । वायव्यकीटविशेषे । सु.कल्प.

शरावार्द्धम् । क्ली । अर्द्धशरावपरिमाणे । /॥० আধ সের, ৩২ তোলা । प.प्र. ।

शराविका । स्त्री । प्रमेहपिड़काभेदे । लक्षणं यथा—"शरावमात्रा तद्रूपा निम्नमध्या शराविका ।" सु.नि.६अ. । [च.द धूमाधिकारे ।

शरी । स्त्री । मेथीतृणे । भा. । शरपुङ्खलते ।

शरीरम् । क्ली । देहे । দেহ रा.नि.व.१८ । शीर्य्यत इति शरीरम् । तच्च चेतनाधिष्ठानभूतम् आत्मभोगायतनं पञ्चभूतविकारसमुदायात्मकञ्च । च.शा.६अ. । "पञ्चमहाभूतविकारात्मके आत्मनो भोगायतने ।" च.सू.१अ. । च.द. । "गर्भो यदा हस्तपादादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते । तच्च शरीरं षड़ङ्गं, शाखाश्चतस्रः, मध्यं पञ्चमं, षष्ठं शिरः" इति । सु.शा.५अ.। इह खलु शरीरमधिकृत्याष्टौ पुरुषा निन्दिता भवन्ति । अतिदीर्घश्चातिह्रस्वश्चातिलोमा चालोमा चातिकृष्णश्चातिगौरश्चातिस्थूलश्चातिकृशश्चेति । च.सू.२१अ. । तस्मिंश्च शरीरे त्रीणि षष्ट्यधिकानि शतान्यस्थ्नां सह दन्तोलूखलनखैः । तद्यथा—द्वात्रिंशद्दन्तोलूखलानि, ३२ दन्ताश्च, २० नखाः, २० पाणिपादशलाकाः, ४ शलाकाधिष्ठानानि, ६० अङ्गुल्यस्थीनि, २पार्ष्ण्यस्थिनी, २कूर्चाधः,२पाण्योः मणिकाः, ४ पादयोर्गुल्फाः, ४ अरत्न्योरस्थीनि, ४ जङ्घयोः, २ जानुनोः, २ उर्व्वोः, २ बाह्वोः, २ अंसयोः, २ अचकौ बाहुसजत्रुसन्धिकीलकौ, २ तालुनि, २ श्रोणिफलके, १ भगास्थि, १ पुंसां मेढ्रास्थि, १ त्रिकास्थि, १ गुदास्थि, ३५ पृष्ठास्थीनि, १५ ग्रीवायां, २ जत्रुस्थिनी, १हन्वस्थि,२ हनुबन्धनास्थिनी, २ ललाटे, २ गण्डयोः, ३ नासिकायां, २४ द्वयोः पार्श्वयोः, २४ पञ्जरास्थीनि, २४ पार्श्वकास्थीनि, २ शङ्खास्थीनि, ४ शिरःकपालास्थीनि, १७ वक्षसि इति । अस्मिंश्च शरीरे—इन्द्रियाधिष्ठानानि त्वगादीनि ५, स्पर्शादीनि बुद्धीन्द्रियाणि ५, हस्तादिकर्म्मेन्द्रियाणि ५, चेतनाधिष्ठानं हृदयं १, प्राणायतनानि १०, कोष्ठाङ्गानि १५, नाभ्यादीनि जङ्घापिण्डिकादीनि प्रत्यङ्गानि ५६ । नव स्नायुशतानि (९००), सप्त शिराशतानि (७००), द्वे धमनीशते (२००), पञ्च पेशीशतानि (५००), मर्म्मस्थानानि १०७, सन्धिस्थानानि च २०० । अस्मिन् शरीरे आहारपरिणामजरसपरिमाणं ९ अञ्जलयः, रक्तस्य ८ अञ्जलयः, पुरीषस्य ७ अञ्जलयः,श्लेष्मणः ६ अञ्जलयः, पित्तस्य ५ अञ्जलयः, मूत्रस्य ४ अं., वसायाः ३ अं., मेदसः २ अं., मज्जाया १ अं., मस्तिष्कस्य शुक्रस्य श्लेष्मौजसोश्च ॥० अं. ।च.शा.७अ. । [ति ।

शरीरसंस्कारः । पुं । देहस्य पवित्रीकरणे ।

शरीरावरणम् । क्ली । त्वचि । চামড়া । रा.नि.व.१८ । [रा.नि.व.१८ ।

शरीरास्थि । क्ली । कङ्काले । অস্থিপঞ্জর ।

शरीरी (इन्) । पुं । जीवे । जटा. ।

शरेष्टः । पुं । आम्रवृक्षे । जटा. ।

शरोटिका । स्त्री । लज्जालुकायाम् । लज्जावती । वै.निघ. ।

शरीरजः । पुं । रोगे । धरणिः । त्रि । देहजे ।

शरीर(परि)मार्ज्जनम् । क्ली । देहमार्ज्जने । গাত্রমার্জ্জন । गुणाः—"दौर्गन्ध्यं गौरवं कण्डूं कच्छूं मलमरोचकं । स्वेदवीभत्सतां हन्ति शरीरपरिमार्ज्जनम् ॥" राज.२प. । [६अ. ।

शरीरविचयः । पुं । शरीरविज्ञाने । च.शा.

शरीरोपस्तम्भः । पुं । शरीरधारकस्तम्भे । स त्रिविधः आहारस्वप्नब्रह्मचर्य्यभेदेन । लभ्यमानं धार्य्यमाणम् उप समीपं गत्वा स्तम्भयति धारयतीति उपस्तम्भः धारकः । च.सू.११अ. ।

शर्करकः । पुं । मधुरजम्बीरे । শরবতীলেবু । रा.नि.व.११ ।

शर्करकन्दः । पुं । (Ipomoea batatas.) आलुकविशेषे । রাঙাআলু. শকরকন্দ আলু । हिं शकरकन्द । ता. वुल्लिकिज्हङ्ग । Watts.

शर्करजा । स्त्री । मधुशर्करायाम् । रा.नि.व. १४ ।

शर्कराक्षः । पुं । ऋषिविशेषे । च. ।

शर्करा । स्त्री । खण्डविकारे । চিনি । सा. गुणाः—मधुरा शीता दाहपित्तश्रमघ्नी रक्तदोषघ्नी भ्रमिघ्नी क्लमिघ्नी च । रा.नि.व.१४। 'सिता सुमधुरा शीता वृष्या शुक्रविवर्द्धनी । तत्पायिनीगुणाः—"पित्तघ्नी मधुरा बल्या शर्करापायिनी नृणाम् ।" "शर्करान्या सुशीता च कासशूलसमुद्भवा । हिता पित्तासृजि शोषे मूर्च्छाभ्रममदापहा॥" अचि.१०अ. । "शर्करा ज्वरपित्तासृङ्मूर्च्छाच्छर्द्दितृषापहा ।" राज. । "सिता सुमधुरा रुच्या वातपित्तास्रदाहजित् । मूर्च्छाच्छर्द्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ॥" भा. । सा च खण्डोपलाश्वेतीपलाक्षुद्रागौड़ीमलखण्डपौण्ड्रकवंशेक्षुकेक्षुश्यामेक्षुरक्तेक्षुरसालेक्षुजपुष्पोद्भवमधुजयवासशर्करा-भेदेन बहुधा । आसां विशेषाः पर्य्याये द्रष्टव्याः । मद्यविशेषे, शर्करामद्ये । गुणाः—"हरति मलमियं या दीपनी पाण्डुमेहान् लघुमधुरसुशीता रोचनी पित्तहन्त्री । जरयति सकलं वा पीतमन्नादिमात्रं श्वसनरुधिरकासान् हन्ति वा कामलाश्च ।" अचि.१६अ. । विषे । र.सा.सं.शीतारिरसे । वालुकायाम् । বালি । भा.म.४भ.क्षुद्ररो.चि.कदरलक्षणे । "शर्करोन्मथिते पादे ।" दन्तरोगभेदे, दन्तशर्करायाम् । तल्लक्षणं यथा—"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै । सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा ॥" सु.नि.१६अ. । स्तनामकवस्तिरोगे, अश्मरीशर्करायाम् । लक्षणं—"अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना । पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः । सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते ।" सु.नि.३अ. ।

शर्करार्बुदम् । क्ली, पुं । क्षुद्ररोगविशेषे । लक्षणं –"प्राप्य मांसशिरास्नायुश्लेष्मभेदास्तथानिलः । ग्रन्थिं कुर्व्वन्ति भिन्नोऽसौ मधुसर्पिर्वसानिभम् । स्रवत्यास्रावमत्यर्थं तत्र वृद्धिं गतोऽनिलः । मांसं विशोष्य ग्रथितां शर्करां जनयेत् पुनः । दुर्गन्धं क्लिन्नमत्यर्थं नानावर्णं ततः शिराः । स्रवन्ति सहसा रक्तं तद्विद्याच्छर्करार्बुदम् ॥" सु.नि.११अ. । वा.उ.३१अ. ।

शर्करालेहः । पुं । रसायनाधिकारे लेहः । यथा – मेदा महामेदा ऋद्धिः वृद्धिः जीवकः ऋषभकः काकोली क्षीरकाकोली जीवन्ती यष्टिमधु एषां प्रति ४ तो. ५ माषा. ५ र. । कुशमूलं काशमूलम् उलुमूलं शरमूलं इक्षुमूलम् एषां प्रति ३प. जलं ३२ श. शे. ८ श. । नारिकेलजलं १२ श. घृतं ४ प. । शर्करा १६ प. । सिद्धे शीते प्रक्षेपार्थं एला तेजपत्रं धान्यकं जीरकं गुड़त्वक् कृष्णजीरकं वंशलोचना नागकेसरम् एषां प्रति चूर्णं १ तो. । रस.र. ।

शर्करासवः । पुं । शर्करोत्थासवे । गुणाः—"सुखप्रियः सुखमदः सुगन्धिर्वस्तिरोगनुत् । जरणीयः परिणतो हृद्यो वर्ण्यश्च शार्करः ॥" च.सू. २७अ. ।

शर्करासुरभिः । पुं । शर्करासवे । वै.निघ. ।

शर्करोदकम् । क्ली । सिताजले । চিনির পানা, শরবৎ । यथा—एलालवङ्गमरिचकर्पूर-युक्तशीतलजलगोलिता शर्करा शर्करोदकमुच्यते । गुणाः—शर्करं वरं शीतलं बल्यं रुच्यं लघु स्वादु वातपित्तक्षयघ्नं रक्तदोषहरं वमिमूर्च्छाज्वरदाह-घ्नञ्च । भा. ।

[वार्यां । व्याकरणम् ।

शर्द्धः (नम्) । पुं, क्ली । मरुत्कारे । अपान-

शर्द्धञ्जहः । पुं । शिम्बयादौ, माषे । व्याक. । त्रि । मलद्वारेण वायुत्यागिनि ।

शर्म्मणी । स्त्री । ब्राह्मीक्षुपे । वै.निघ. ।

शर्म्मरा । स्त्री । दारुहरिद्रायाम् । धरणिः ।

शर्म्माख्यः । पुं । मसूरे । মুসুরি । प.मु. ।

शर्व्वरी । स्त्री । रात्रौ । अम. । नार्य्यां । मे. । सन्ध्यायां । उणा. । हरिद्रायाम् । रा.नि.व.६ । भा. तन्द्रिज्वर.चि. । "क्रमिहरनागरशर्व्वरी ।" कण्ठकुब्जकज्वर.चि. । "कलिङ्गसिंहाननशर्व्वरी-भिः ।" [भैष.चक्री.चि. ।

शर्व्वरीद्वयम् । क्ली । हरिद्रादारुहरिद्रयोः ।

शर्व्वाक्षम् । क्ली । रुद्राक्षे । रा.नि.व.११ ।

शलः । पुं, क्ली । तालवृक्षे । वै.निघ. । उष्ट्रे । हे.च. । शल्लकीकण्टके । শজারুকাঁটা । अम. ।

शलकः । पुं । तालवृक्षे । शल्लकीकण्टके । वै. निघ. । मर्कटके । মাকড়শা । त्रिका. ।

शलङ्गः । पुं । लवणविशेषे । उणा. । [अम. ।

शलभः । पुं । पतङ्गे । ফড়িঙ্গ, পঙ্গপোকা ।

शलभोलिः । पुं । उष्ट्रे । हे.च. । [अम. ।

शलली । स्त्री । शल्लकीकण्टके । শজারুকাঁটা ।

शलाका । स्त्री । मदनवृक्षे । ময়না গাছ । शरे । শর । शारिकायां । শালিক পাখী । शल्यां । সজারু । मे. । नलकास्थनि । নলার হাড় । श.च. । नेत्राञ्जनसाधनकाष्ठिकायां । অঞ্জনের শলা । यथा—"दशाङ्गुला तनुर्मध्या शलाका सु-कुलानना । अश्मजा धातुजा वापि कलायपरि-मण्डला । ताम्रलौहाश्मसञ्जाता शलाका लेखने मता । सुवर्णरजतोद्भूता शलाका स्नेहने मता ॥" लोह.वद.सु. ।

शलाकाधिष्ठानास्थि । स्त्री । पाणिपाद-योः शलाकाख्याधारभूते अस्थनि । নলকাস্থির আধারাস্থি । तानि ४ । च.शा.७अ. ।

शलाकायन्त्रम् । क्ली । तदाकाराष्टाविंशति-विधयन्त्रेषु । तानि नानाप्रकाराणि, नानाप्रयोज-नानि यथायोगपरिणाहदीर्घाणि च । यथा—गण्डूपदमुखं शरपुङ्खमुखं सर्पफणमुखं बडिशमुख-मेति द्वे द्वे एषणव्यूहनचालनाहरणार्थम् । मसूर-दलमात्रमुखे द्वे किञ्चिदानताग्रे स्रोतोगतशल्यो-द्धरणार्थम् । षौणि दव्र्याकृतीनि खल्लमुखानि क्षारौषधप्रणिधानार्थम् । त्रीणि जाम्बववदनानि, त्रीण्यङ्कुशवदनानि अग्निकर्म्मार्थानि । षट् कार्पा-सकृतोष्णीषाणि प्रमार्ज्जनक्रियासु । एकं कोला-स्थिदलमात्रमुखं खल्लतीक्ष्णोष्ठं नासार्बुदहरणा-र्थम् । एकमञ्जनार्थं कलायपरिमण्डलम् उभयतो मुकुलाग्रम् । मूत्रमार्गविशोधनार्थमेकं मालतीपुष्प-वृन्ताग्रप्रमाणपरिमण्डलमिति । सु.सू.७अ. ।

शलाकास्थि । क्ली । नलकास्थनि । নলার হাড় । तानि ४ । च.शा.७अ. ।

शलाटः । पुं । शकटपरिमाणे, द्विसहस्रपले । २००० পল । "शकटः शाकटीनश्च शलाटः ।" हे.च. ।

शलाटुः । पुं । बिल्ववृक्षे । रा.नि.व.२२ । को-मलफले । ফলের শুঁটো । अम. । सु.सू.उ.२अ. ।

शलातु । क्ली । सुगन्धद्रव्यविशेषे । व्याक. ।

शली । स्त्री । क्षुद्रशल्लकीमृगे । तन्मांसं गुरु स्नि-ग्धं शीतलं कफपित्तघ्नञ्च । रा.नि.व.१७ ।

शल्कम् । क्ली । खण्डे । अम. । मत्स्यत्वचि । মা-ছের আঁইষ । कोषान्तरम् । वल्कले । अम. ।

शल्कलम् । क्ली । मत्स्यशल्के । মাছের আঁ-ইষ । तरुवल्कले । গাছের ছাল । व्याक. ।

शल्कली (इन्) । पुं । मत्स्ये । श.र. ।

शल्मलिः (ली) । पुं । शाल्मलिवृक्षे । শিমুল-গাছ । (लिकः) । रक्तरोहीतकवृक्षे । লাল রক্ত্-না গাছ । रा.नि.व.८ ।

शल्यः । पुं, क्ली । सर्व्वशरीरदुःखोत्पादकभाव-मात्रे, विभिन्नलोष्टकाष्ठकादौ ।" "तत्शल्यमिति

आनीयाल्लोष्टकष्ठविभिन्नकम् ।" वै सं.२अ. । शारीरागन्तुभेदेन शल्यं द्विविधं । यत् सर्व्वशरीराबाधकरं शल्यं तदिहोपदिश्यत इत्यतः शल्यशास्त्रम् । ततः शारीरं नखरोमादिधातवोऽन्नमलादोषाश्च दुष्टाः । आगन्तु शारीरशल्यव्यतिरेकेण यावन्तो भावा दुःखमुत्पादयन्तीति ते बाधाः ज्ञेया । सु.सू.२६अ. । विद्धशल्यमपि द्विविधमवबद्धमनवबद्धञ्चेति । अवबद्धशल्योद्धरणार्थं पञ्चदश हेतवो भवन्ति । यथा—स्वभाव पाचनभेदनदारणपीड़नप्रमार्ज्जननिर्ध्मापन-वमन विरेचनप्रक्षालन-प्रतिमर्षप्रवाहणाचूषणायस्कान्तहर्षाश्चेति । सु.सू. २७ अ. । अस्थनि । वंशकन्धिकायाम् । विश्वः । वाणे । मे. ।

शल्यः (कः) । पुं । हृहल्लोधाकारे तन्नामकमृगविशेषे, সজারু । तन्मांसगुणाः—गुरु स्निग्धं दीपनं श्वासकासघ्नञ्च । रा.नि.व.१७ । स्वादु पित्तघ्नं लघु शीतं विषघ्नञ्च । सु.सू.४६ अ. । मदनवृक्षे । ময়না গাছ । अम. । श्वेतखदिरे । वै. निघ. । मत्स्यभेदे । শোলমাছ । रा.नि.व.१९ । पीतलोध्रे । वै.निघ. । विल्ववृक्षे । रा.नि.व.११ । रक्तखदिरे । च.द.मेह.चि. । "विड़ङ्गदार्वीधवशल्यकानां ।" शलाकायां । हे.च. । [श.च. ।

शल्यकण्ठः । पुं । सल्लकीमृगे । সজারু ।

शल्यकेटर्य्यः । पुं । मदनवृक्षे । ময়না গাছ । रा.नि.व.८ ।

शल्यतन्त्रम् । क्ली । सौश्रुताष्टविधतन्त्रान्यतमे तन्त्रे । यथा—शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनखपूयास्रावान्तर्गर्भशल्योद्धारार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थञ्च । सु.सू.१अ. । [क्ष्मा । रा.नि.व.५ ।

शल्यदा । स्त्री । मेदायाम् । অভাবে अश्वग-

शल्यपर्णिका (र्णी) । स्त्री । मेदायाम् । रा. नि.व.५ । [ক্রুকাঁটা । रा.नि.व.१९ ।

शल्यलोम (न्) । क्ली । शल्लकीरोमणि । সজা-

शल्या । स्त्री । मेदायाम् । रा.नि.व.५ । विकङ्कतवृक्षे । नागवल्लीलतायाम् । वै.निघ. ।

शल्योद्धरणम् । क्ली । विद्धशल्योत्पाटने । वै. सं.२अ. ।

शल्लम् । क्ली । वृक्षवल्कले । ছাল । ত্বচি । চামড়া । श.र. ।

शल्लः । पुं । भेके । श.र. ।

शल्लकः । पुं । शालतरुविशेषे । शल्लकी वृक्ष । जटा. । शल्लकीमृगे । সজারু । हिं साहिल । गुणाः—"शल्लको बृंहणो बल्यः स्निग्धो वृष्यो रुचिप्रदः । वातश्लेष्महरो हृद्यो मधुरो धातुवर्द्धनः ॥" अत्रि.२०अ. । क्ली । तरुवल्कले । श.र. ।

शल्लकी । स्त्री । ((Boswellia serrata) Indian olibanum. शालविशेषे । शलइ, শালবিশেষ । हिं शालइ, शलग । मु शालयधूपं । ता. कुंलि । गुणाः—"शल्लकी तुवरा शीता पित्तश्लेष्मातिसारजित् । रक्तपित्तव्रणहरी पुष्टिकृत् समुदीरिता ।" भ.पू.१भ.वटादिव. । रा.नि.व. ११ । See सल्लकी । शिलारसे । च.सू.५अ. ।

शल्लकीत्वक् । स्त्री । शिह्लकीवृक्षत्वचि । च. सू.४अ. ।

शल्लकीद्रवः (रसः) पुं । सिह्लके । कुन्दुरुখোটী, শিলারস । जटा. । च.द.वा.व्या.चि. अष्टादशशतीप्रसारणीतैले । [वै.निघ. ।

शल्ली । स्त्री । सल्लकीवृक्षे । सल्लकीमृगे । সজারু ।

शवम् । क्ली । लौहे । जले । मे. ।

शवः । पुं, क्ली । मृतशरीरे । अम. ।

शवकाम्यः । पुं । कुक्कुरे । श.र. ।

शवलः । पुं । चित्रकवुपे । रा.नि.व.६ । (ला, ली) स्त्री । शवलवर्णायां गवि । अ.टी.भ. ।

शशः (कः) । पुं । विलेशयमृगभेदे । খরগোশ । मं खरहा । तें चेवुलपिल्लि । तन्मांसगुणाः—त्रिदोषघ्नं दीपनं श्वासकासघ्नञ्च । रा.नि.व.१७ । शीतं लघु धारकं रुचं स्वादुकफपित्तघ्नं वाते साधारणं ज्वरातीसारघ्नं सदा हितञ्च । भा.पू.१६ । 'शशको जाङ्गलश्रेष्ठो लघुर्बल्यश्च दीपनः । रुचिकृत्तर्पणो बल्यस्त्रिदोषशमनो मतः । ज्वरे च पाण्डुरोगे च क्षये कासे गुदामये । राजयक्ष्मणि पार्श्वे च तथातीसारिणां हितः॥" अत्रि.२०अ. । लोध्रवृक्षे । বোলে । নিশাদল । मे. ।

शशघाती (इन्) । पुं । मसहजातीयपक्षिणि । বাজ । सु.सू.४६अ. ।

शशधरः । पुं । कर्पूरे । रा.नि.व.१२ ।

शशभृत् । पुं । कर्पूरे । चै.च. । भैष.वा.व्या. गन्धद्रव्यकथने ।

शशलोम (न्) । क्ली । शशकरोमणि । अम. ।

शशशिम्बिका । स्त्री । जीवन्तीलतायां । रा. नि.व.३ ।

शशाङ्कः । पुं । कर्पूरे । रा.नि.व.१२ ।

शशाङ्कलेखा । स्त्री । सोमराज्यां । च.द.कुष्ठ.चि ।

शशाण्डुलिः (ली) । पुं । स्वनामख्यातफलशाकविशेषे । তিৎকাঁকুড় । गुणाः—तिक्ता कटुः कोमला कटुत्वयुक्ता कफापहा जरठा पाके अम्लमधुरा विदाहकृत् रुक्षा रुचिकृत् दीपनी च । रा.नि.व.७ । [रा.नि.व.१९ । अम. ।

शशादः (नः) । पुं । श्येनपक्षिणि । বাজ ।

शशिकान्तः । पुं । चन्द्रकान्तमणौ । रा.नि. व.१३। क्ली । कुमुदे । শ্বেত শুঁদি । रा.नि.व.१० ।

शशिपर्णी । स्त्री । पटोले । वै.निघ. ।

शशिपुष्पम् । क्ली । पद्मे । वै निघ. ।

शशिप्रभम् । क्ली । मुक्तायाम् । रा.नि.व.१३ । कुमुदपुष्पे । নালফুল । श.मा. । स्त्री । ज्योत्स्नायाम् । जटा. । [वै.निघ. ।

शशिप्रियम् । क्ली । कुमुदपुष्पे । मुक्तायाम् ।

शशिरे(ले)खा । स्त्री । गुडूच्याम् । গুলঞ্চ । मे. । सोमराज्याम् । হাকুচবীজ । भैष.कुष्ठ.चि. भा.कुष्ठ.चि.स्वायम्भुवगुग्गुलौ । च.द.कुष्ठ.चि. ।

शशिवाटिका । स्त्री । पुनर्नवायाम् । प.मु. । रा.नि.व.५ । [चि.लक्ष्मीविलासतैले ।

शशी (इन्) । पुं । कर्पूरे । वै.निघ.२भ.ज्वरी.

शशोर्णम् । क्ली । शशकलोम्नि । अम. ।

शष्कुलः । पुं । करञ्जवृक्षे । ডহরকরঞ্জ । श.र. ।

शष्कु(स्कु)ली । स्त्री । कर्णरन्ध्रे । কর্ণকুহর । श.र. । पिष्टकविशेषे । পুলিপিটে । च.चि.२अ. तिलपिष्टके । তিলের পিটে । गुणाः—गुरुः पुष्टिकरी । च.सू.२७अ. । मत्स्यभेदे । सोहारीति लोके । हिं सौरी । गुणाः—"शष्कुली ग्राहिणी रुच्या मधुरा तुवरा स्मृता ।" भा. । तिलतण्डुलमाषकृतयवाग्वाम् । श.च. । "सुधौतानां तण्डुलानां पिष्टं सूक्ष्मं विधाय च । तत्प्रमाणं तत्र जलं स्थाप्यं चुल्ल्यां तु तत् पचेत् । अल्पमल्पं विकीर्य्याथ मेलयित्वा घनं पचेत् । घनीभूते तु उत्तार्य्य तत्पर्प्यां सुयुक्तितः । पूरणञ्च विधायाथ सिताश्रीफलदं तथा । त्रिहस्तान्तामर्द्धचन्द्रसमानां कारयेत् सुधीः । एवं शष्कुलयः कार्य्याः पाच्याः स्वेदनयन्त्रके । एवञ्च मोदकाः कार्य्यास्ते हृद्या गुरवो मताः । वातपित्तप्रशमनाः मलावष्टम्भकारकाः । कफदा गुरवः शीतास्तथा तृप्तिकरा मताः ॥" वै.निघ. । "पर्पटा लघवो रुच्या शष्कुल्यः कफपित्तलाः । मांसैरिक्षुविकारांश्च काञ्जिकैस्तिलशष्कुलीं । न भक्षयेत्...... ॥" राज. । [दूर्व्वायाम् । वै.निघ. ।

शष्पम् । क्ली । बालतृणे । रा.नि.व.२३ । नील-

शस्तः । त्रि । प्रशस्ते । क्ली । शरीरे । त्रिका. ।

शस्त्रम् । क्ली । तीक्ष्णलौहे । रा.नि.व.१३ । भैष.क्षुद्ररो.चि.महानीलतैले । वै.निघ.२भ.अर्शःचि. काञ्चनीलेपे । अस्त्रे । অস্ত্র । शस्त्राणि विंशतिः तद्यथा—मण्डलाग्रं करपत्रं वृद्धिपत्रं नखशस्त्रं मुद्रिका उत्पलपत्रम् अर्द्धधारं सूची कुशपत्रम् आटीमुखं शरारीमुखम् अन्तर्मुखं त्रिकूर्चकं कुठारिका व्रीहिमुखम् आरामुखं वेतसपत्रं वडिशो दन्तशङ्कुः एषणीचेति । एतानि छेदाद्यष्टविधकर्म्मणि उपयुज्यन्ते । तत्र मण्डलाग्रकरपत्रे छेदने लेखने च, वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च, सूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे । कुठारिकाव्रीहिमुखारामुखवेतसपत्राणि सूची च व्यधने । वडिशो दन्तशङ्कुश्चाहरणे । एषण्येषणे, आनुलोम्ये च । सूच्यः सेवने । इत्यष्टविधे कर्म्मणि उपयोगः शस्त्राणां व्याख्यातः । सु.सू.८अ. । एषां विशेषास्तत्पर्य्यायेषु मृग्याः । शस्त्रसम्पत् यथा—सुग्रहसुलोहसुधारसुरूपतादीनि । शस्त्रदोषाः वक्रताकुण्ठताखण्डता-खरधारतातिस्थूलतातिदीर्घतातिह्रस्वता इति । करपत्रमृते अतो विपरीतगुणमाददीत । शस्त्रधाराभेदा यथा—मासूरी अर्द्धमासूरी कैशिकी अर्द्धकैशिकी चेति । तत्र भेदनानां मासूरी लेखनानामर्द्धमासूरी व्यधनविस्रावणानां कैशिकी छेदनानामर्द्धकैशिकी च । तेषां पायनापि त्रिधा क्षारोदकतैलेषु । तेषां निशानार्थं श्लक्ष्णशि-

का माषवर्णा धारसंस्थापनार्थं शाल्मलीफलकम् । सु.सू.८अ. ।

शस्त्रकम् । क्ली । लौहे । प.मु. ।

शस्त्रकर्म्म । क्ली । छेदने । কাটা, ছেঁড়া । तत्राष्टविधं छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यञ्चेति । शस्त्रपदञ्च महत्स्वपि पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा भवेत् । सु.सू.५अ. ।

शस्त्रकोशतरुः । पुं । महापिण्डीतकवृक्षे । रा.नि.व.९ । [निघ. ।

शस्त्रचूर्णम् । क्ली । लौहकिट्टे । মণ্ডুর । वै.

शस्त्रप्रणिधानम् । त्रि । शस्त्रचालने, छेदनभेदनादिरूपौषधे । च.सू.११अ. ।

शस्त्राङ्गा । स्त्री । चाङ्गेर्य्याम् । আমরুল শাক । रा.नि.व.५ । [रा.नि.व.१३ ।

शस्त्रायसम् । क्ली । तीक्ष्णलौहे । ইস্পাৎ ।

शस्त्री (इन्) । त्रि । शस्त्रधारिणि । स्त्री (स्त्री) । छुरिकायां । मे. ।

शस्प(स्य)म् । क्ली । कोमलतृणे । নরম গাছ । अ.टी.भ. । वृक्षादिजातफलादौ । धान्यादौ । व्रीहियवादौ च । स्मृतिः । [श.च. ।

शस्यध्वंसी (इन्) । पुं । तुन्नवृक्षे । তুঁদ গাছ ।

शस्यमञ्जरी । स्त्री । धान्यादिकणिशे । শস্যের শীশ । अम. । [শুঙা । अम. ।

शस्यशूकम् । स्त्री । शस्यशृङ्गायाम् । শস্যের

शस्यसम्बरः (रणः) । पुं । अश्वकर्णनामलताशाले । লতাশাল । रा.नि.व.१९ ।

शस्याकः (वनः) । पुं । कृष्णशमीवृक्षे । श.र. ।

शाकम् । क्ली.पुं । पत्रपुष्पादौ । শাগ । अम. । तत् षड्विधम्—"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजञ्चेति" राज. । तच्चतुर्विधमिति अत्रिः । "शाकश्चतुर्विधं प्रोक्तं पत्रं पुष्पं फलं तथा । कन्दञ्चापि समुद्दिष्टं वक्ष्याम्येतत् पृथक् पृथक् ।" अत्रि.१६अ. । तद्गुणाः—विष्टम्भित्वं गुरुत्वं रूक्षत्वं मलवर्द्धकत्वं पाकलघुत्वञ्च । च.द. । दोषाः—शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं वर्णं विनाशयति शुक्रमथास्त्रजञ्च । प्रज्ञाक्षयञ्च कुरुते पलितञ्च नूनं हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥" "स्विन्नं निष्पीड़ितरसं हितं स्नेहादिसंस्कृतं ।" इति व्यवहारविधिः । राज.३प. । "शाकेषु सर्व्वेषु वसन्ति रोगास्ते हेतवो देहविनाशनाय । तस्माद्बुधः शाकविवर्जनन्तु कुर्य्यात्तथाम्लेषु स एव दोषः ॥" भा.पू.१भ.शा.व. । प्रायः सर्व्वाणि शाकानि विष्टम्भीनि गुरूणि च । रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च । पिण्डालुका बला भिण्डी चिञ्चुकाम्ला बला...... । एते श्लेष्मकराः शाका वातलाग्निप्रशान्तकाः । सर्व्वे शाका दृष्टिहरा वीर्य्यलास्तण्डुलीयकं । तथैव शतपुष्पा च जयन्ती कासमर्दकः । आनूपकञ्च वेत्राग्रं गुडूची चापमर्द्दकः । किराततिक्तसहिताश्चिञ्चाः पित्तहरा मताः ।" अत्रि.१६अ. । पुं । वृक्षविशेषे । শেগুন গাছ । रा.नि.व.९ । "महावृक्षकर्क्कोटरपृष्ठदलो वृक्षविशेषः ।" सु.सू.३८अ. । शाकफले । শেগুন ফল । "राजाह्वं दाड़िमं शाकम् ।" वा.सू.१५अ. ।

शाकचुक्रिका । स्त्री । चिञ्चायाम्, तिन्तिड्याम् । তেতুঁল গাছ । रा.नि.व.११ ।

शाकटः । पुं । श्लेष्मान्तकवृक्षे । চালতা গাছ । रा.नि.व.११ । धववृक्षे । ধাওয়া গাছ । र.मा. ।

शाकटमुखम् । क्ली । पटवासे । गन्धचूर्णे । वै.निघ. ।

शाकटाख्यः । पुं । धववृक्षे । र.मा. ।

शाकटीनः । पुं । २० तुलापरिमाणे । २००० पले । हे.च.प.प. । [श.मा. ।

शाकतरुः । पुं । शाकवृक्षे । শেগুন গাছ ।

शाकद्रुमः । पुं । वरुणवृक्षे । वै.निघ. ।

शाकपत्रः । पुं । शिग्रुवृक्षे । সজিনা গাছ । रा.नि.व.७ । [শাক । वै.निघ. ।

शाकपाकी (इन्) । पुं । सुनिषण्णके । শুশুনি

शाकफलम् । क्ली । तन्नामकवृक्षफले । শেগুন ফল । सु.सू.३८अ. ।

शाकमत्स्यम् । क्ली । मत्स्यव्यञ्जनभेदे । गुणाः—मत्स्यकशब्दे द्रष्टव्याः । राज. । [श.र. ।

शाकवालेयः । पुं । ब्रह्मयष्ट्यां । বামুনহাটী ।

शाकम्भरीभवम् । क्ली । रोमकलवणे । সাম্ভর লবণ । भा. ।

शाकयोग्यः । पुं । धान्यके । धनियां । रा. नि.व.६ । [তো শাক । रा.नि.व.७ । भा. ।

शाकराजः (ट्) । पुं । वास्तूकक्षुपे । বে-

शाकवरः । पुं । जीवशाके । प.मु. । वा उ. १७अ. । स्त्री (रा) । जीवन्तीशाके । वै.निघ. ।

शाकवल्ली । स्त्री । लताकरञ्जके । वै निघ. ।

शाकविन्दः (ल्वः) (कः) । पुं । वार्त्ताकुक्षुपे । जटा. । त्रिका. ।

शाकवीजम् । क्ली । शाकतरुवीजे । শেগুনের বিচি । "मधुकं शाकवीजञ्च ।" भा.४भ. योनिरो.गर्भचि. । महजतरुवीजे । च.द.गर्भाधिकारे । शाकवीजे । শাকের বীচি ।

शाकवीरः । पुं । वास्तूकक्षुपे । বেতো শাক । पुनर्नवायाम् । त्रिका. । जीवशाके । रा.नि. व.७ ।

शाकवृक्षः । पुं । (Tectona grandis.) Teak tree. स्वनामख्याततरुवृक्षे । শেগুন গাছ । हिं सगुण । उत्. सिंगुरु । ता. टेक । बम्. खस्पत्र । मं सीये । कं नेगु । तें टेकुचेट्टु । गुणाः —सारकः पित्तदाहश्रमघ्नः सरः कफघ्नः । तत्फलं कषायम् । रा.नि.व.९ ।

शाकशाकट(किन)म् । क्ली । शाकक्षेत्रे । শাকের ক্ষেত । रा.नि.व.२ । है.च. ।

शाकशालः । पुं । महानिम्बे । महानिम् । हिं बकायन । वै.निघ. ।

शाकश्रेष्ठः । पुं । वास्तुकक्षुपे । अर. । रा.नि. व.२२ । स्त्री (ष्ठा) । लघुजीवन्तीलतायाम् । जीवन्ती । रा.नि.व.३ । डोड़ीक्षुपे । লতাবৃহতী । वार्त्ताकी । বেগুণ গাছ । रा.नि.व.४ । कुष्माण्डलतायाम् । কুমড়া গাছ । तरम्बुजलतायाम् । তরমুজ গাছ । वै.निघ. ।

शाका । स्त्री । हरीतक्याम् । शब्दकल्पः ।

शाकाख्यम् । क्ली । व्यञ्जनयोग्यफलमूलपत्रपुष्पादौ । ব্যঞ্জনার্হ ফল, মূল, পাতা, ফুল ইত্যাদি শাকপদবাচ্য । अम. । "मूलपत्रकरीरायफलकाण्डाधिरूढ़कम् । त्वक्पुष्पं कवकञ्चैव शाकं दशविधं स्मृतम् ॥" अ.टी.भ. । पुं । शाकवृक्षे । শেগুন গাছ । र.मा. ।

शाकाङ्गम् । क्ली । मरिचे । रा.नि.व.६ ।

शाकान्नम् । क्ली । शाकयुक्तभक्ते । गुणाः— "शाकान्नं लेखनं चोष्णं रुच्यं वै दोषद्रावकम् ।" वै.निघ. ।

शाकाम्लम् । क्ली । वृक्षाम्ले । তেঁতুল । रा. नि.व.६ । चिञ्चाम्ले । তেঁতুলের অম্বল । रा.नि. व.११ ।

शाकाम्लभेदनम् । क्ली । चुक्रनामककाञ्जिकभेदे । रा.नि.व.१५ । See शुक्तचुक्रम् ।

शाकालाबुः । स्त्री । राजालाबुके । বড়লাউ গাছ । रा.नि.व.७ ।

शाकुनिकः । पुं । शकुनशास्त्रज्ञे । पक्षिमारके । পাখীমারা । अम. । [रा.नि.व.१९ ।

शाकुनेयः । पुं । पक्षिभेदे । ডুগুল পক্ষী ।

शाखा । स्त्री । पल्लवे । ডাল । अम. ।

शाखाकण्टः । पुं । स्नुहीवृक्षे । মনশা গাছ। रा नि.व.८ ।

शाखापित्तम् । क्ली । हस्तपादांसमूलदाहे । मुखतालोष्ठादिषु सदाहदवथौ । হাত পা ও মুখাদি জ্বালা । "सदाहमुखताल्वोष्ठ दवथुश्चक्षुरादिषु । पाणिपादांसमूलेषु शाखापित्तं तदुच्यते॥" रा.नि.व.२० ।

शाखामृगः । पुं । कपौ । प.मु. ।

शाखाम्ला । स्त्री । तिन्तिड़ीवृक्षे । रा.नि.व.६।

शाखारोगः । पुं । रक्तादिधातुजेषु त्वगेषु च वीसर्पगुल्मादिषु रोगेषु । च.सू.११अ. ।

शाखालः । पुं । जलवेतसे । रा.नि.व.९ ।

शाखावातः । पुं । हस्तपदादिगतवातरोगे । वैद्यकम् । [বটাদির নামাল । वै.निघ. ।

शाखाशिफा । स्त्री । शाखाजातशिफायाम् ।

शाखी (न्) । पुं । वृक्षे । अम. ।

शाखोटः (कः) । पुं (Streblus asper.) स्वनामख्याततरुवृक्षे । শেওড়াগাছ । हिं सहोरा, बंसा सिंधोड़ । कं भाखोड़मरण । मं साहोड़ । तें भारांगकेचेट्टु, वरन्की । बम्. साहोड़ा । गुणाः—तिक्ताख्यः पित्तकरः वातघ्नः । रा.नि.

व.६। एतद्बीजं श्वित्रहरं लेपनेनेति लोके। रक्तपित्तार्शोवातश्लेष्मातिसारजित्। भा.।

शाङ्करः । पुं। सोमलताभेदे। सु.चि.२६अ.। ऋषि। त्रिका.। स्त्री (री)। शमीवृक्षे। वै.निघ.।

शाङ्कितः । पुं। ग्रन्थिपर्णभेदे। চোরা। वै. निघ.। [माछ। श.च.।

शाङ्कुची । स्त्री। शङ्कीचमत्स्ये। শাঁকোচ

शाङ्कुष्ठा । स्त्री। गुञ्जायाम्। र.मा.।

शाञ्ची । स्त्री। शालिञ्चशाके। रस.चि.६अ.।

शाटिका । स्त्री। शट्याम्। शठी। अ.टी.भ.।

शाणः । पुं। माषचतुष्टयमिति मानविशेषे। ४ माष। "माषैश्चतुर्भिः शाणः स्यात्।" प.प्र.। "विन्दुभिश्चाष्टभिः शाणः प्रोक्तश्च भिषगुत्तमैः।" कषणप्रस्तरे। কষ্টিপাথর। अम.। लौहादिनिशाणचक्रे। শাণ। मे.।

शाणिः । पुं। पट्टशाकवृक्षे। পাটশাক। श.मा.।

शाड्वलः । पुं। नीलदूर्व्वायाम्। वै.निघ.।

शाण्डिल्यः । पुं। विल्ववृक्षे। रा.नि.व.११।

शातः । त्रि। शाणिते। पुं। धुस्तूरवृक्षे। अम.।

शातकुम्भम् । क्ली। सुवर्णे। रा.नि.व.१३। पुं। धुस्तूरवृक्षे। अम.। करवीरवृक्षे। मे.।

शातकौम्भम् । क्ली। सुवर्णे। भ.दि.।

शातपत्रकः । पुं। चन्द्रप्रकाशे। श.च.।

शातभीरुः । पुं। मदनमालीनाममल्लिकावृक्षे। र.मा.।

शातला । स्त्री। स्वनामप्रसिद्धसेहुण्डभेदे। पीतसेहुण्डे। चर्म्मकषा इति लोके। মনসাভেদ। गुणाः—"शातला कटुका पाके वातला शीतला लघुः। तिक्ता शोथकफानाहपित्तोदावर्त्तरक्तजित्।" भा.।

शादः । पुं। कर्द्दमे। कोमलतृणे। अम.।

शाद्वलः । पुं। दूर्व्वायां। वा.चि.२अ.।

शाद्वलाभः । पुं। मन्दविषवृश्चिकभेदे। सु.कल्प.८अ.।

शानः । पुं। ४ माषके। ४ মাষা। "माषैश्चतुर्भिः शानः स्यात्।" प.प्र.१ख। २ माषके। ७ माष। अचि.। [पिंड़ी। भारते।

शानपादः । पुं। चन्दनपीठिकायां। চন্দন-

शानी । स्त्री। इन्द्रवारुण्यां। রাখালশশা। श.च.।

शान्तनुः । पुं। क्षुधान्नविशेषे। सु.सू.४६अ.। कर्कटिकायां। কাঁকুড়গাছ। र.मा.।

शान्ता । स्त्री। आमलक्याम्। रा.नि.व.११। See अकरा। शमीवृक्षभेदे। रा.नि.व.८।

शापटिकः । पुं। मयूरे। शब्दकल्प.। [६अ.।

शाबरवल्कलम् । क्ली। लोध्रत्वचि। वा.चि.

शामीलम् । क्ली। भस्मनि। ছাই। सा.कौ.।

शाम्बरः (रिकः) । पुं। लोध्रवृक्षे। वै.निघ.।

शाम्बरी । स्त्री। मूषिकमाण्याम्। ইন্দুরকাণী গাছ। वै निघ.।

शाम्बु(म्बू)कः । पुं। शम्बूके। श.र.।

शाम्भवम् । क्ली। देवदारुणि। रा.नि.व.१२।

शाम्भवः । पुं। गुग्गुलौ। रा.नि व.१२। विषभेदे श.च.। कर्पूरे। रा.नि.व.१२। शिवमल्लिकायां। বক বৃক্ষ। रा.नि.व.१०।

शाम्भवी । स्त्री। धान्यादिकचुक्याम्। धान्यादির খোলা। रा.नि.व.१६। नीलदूर्व्वायां। रा.नि.व.८।

शायिका । स्त्री। निद्रायाम्। [अ.टी.भ.।

शारङ्गः । पुं। हरिणे। चातके। गजे। मयूरे।

शारदम् । क्ली। शुक्लपद्मे। रा.नि.व.१०। पुं। शरत्कालीनशालिधान्यभेदे। अयं षष्टिकहीनगुणः। च.सू.२७अ.। हरितमुद्गे, धूसरमुद्गे। মেসোমুগ। रा.नि.व.१६। र.मा.। वकुलवृक्षे। रा.नि.व.२३। कृष्णमुद्गे। কালমুগ। रा.नि.व. २३। सप्तपर्णवृक्षे। ছাতিম গাছ। अम.। च. द.मेह.चि.। "दयस्य शारदस्य च"। सरिकायां। महाराष्ट्रीलतायाम्। কাঁচড়া। काशतृणे। रा. नि.व.२३। रोगे। वत्सरे। मे.। [जलम्।

शारदजलम् । क्ली। शरत्कालीनजले। See

शारदमल्लिका । स्त्री। शरत्कालभवमल्लिकायाम्। শারদমল্লিকা। रत्ना.।

शारदमुद्रः । पुं । हरितमुद्गे । "कपित्थान् शारदान् मुद्गान् ।" सि.यो.श.सा चि. ।

शारदयावनालः । पुं । शारदीययावनाले। गुणाः—श्लेष्मकरः पिच्छिलः गुरुः शीतल मधुरः वृष्यः बलपुष्टिदश्च । रा.नि.व.१६ ।

शारदा । स्त्री । काष्ठशारिवायाम् । अनन्तमूल । रा.नि.व.१२ । ब्राह्मीशाके । रा.नि.व.५ ।

शारदिकः । पुं । शरत्कालीनरोगे । व्याक. ।

शारदी(दिन्) । पुं । सप्तपर्णवृक्षे । छातिम गाछ । चक्र. । कच्छटशाके । कांचड़ाशाक । र.मा. । अपराजितायां । अ.द. ।

शारिः (का) । स्त्री । स्वनामख्यातपक्षिणि । शालिक, मयना । चिका.। शालिधान्यभेदे । च.सू. २७ अ. ।

शारिवा । स्त्री । (Hemidesmus Indicus, Syn. asclipias pseudosarsa.) स्वनामप्रसिद्धलतायाम् ।"जम्बूपत्रा दुग्धगर्भा वल्ली स्वनामख्याता ।" सु.सू.३८अ.। अनन्तमूल । हिं अनन्तमूल,उपलसरी । उत्. गुआपानमूल । कों शेवेल । सा द्विधा श्वेता कृष्णा चेति । भा.पू.१भ. काष्ठशारिवा कृष्णशारिवा चेन्नुरापथे प्रसिद्धा । गुणाः—शारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु च अग्निमान्द्यारुचिघ्नं श्वासकासवमिहरणाघ्नं त्रिदोषघ्नं रक्तप्रदरज्वरातीसारनाशनञ्च । मद.व.१ । मधुरे हिमे भूतघ्नी कुष्ठकण्डूज्वरहरे देहदुर्गन्धहरे च । रा.नि.व.१२ । शुक्लं स्निग्धं स्वादु अग्निमान्द्यादिहरञ्च । भा.पू.१भ. । वै.निघ.सा.ज्व.चि.अर्कादि. दुरालभायां । पटोलादौ, त्रायन्त्यादौ । वै.निघ. उन्मा.चि.सारस्वतघृते । रस.र.अष्टमङ्गलघृते ।

शारी । स्त्री । कुशे, शरपत्रकुशे, मुञ्जतृणे । रा.नि.व.८ ।

शारीरम् । क्ली । (Anatomy.) सुश्रुतादिवैद्यकसंहितासु शरीरमधिकृत्य कृते शरीरवृत्तान्तव्याख्याने अन्यतमे स्थाने । यत्र शुक्रशोणितशुद्धिगर्भावक्रान्तिगर्भशरीरसंख्यामर्मशिराशिराव्यधधमनीगर्भिणीव्याकरणानि कृतानि । सु.शा.च.शा. १अ. । पुं । वृषे । मे.। See शरीरम् । [रशास्त्र ।

शारीरकग्रन्थः । पुं । श्रीमुखविरचितशारी-

शारीरगुणः । पुं । दैहिकगुणसमष्टौ । स च विंशतिसंख्यकः यथा लघुगुरुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलखरमसृणस्थूलसूक्ष्मसान्द्रद्रवा इति । च.सू.१अ. ।

शारीरज्वरः । पुं । देहगतज्वरे । लक्षणं— "शारीरो जायते पूर्वं देहे मनसि मानसः । इन्द्रियाणाञ्च वैकृत्यं देहसन्तापलक्षणम् ॥" च.चि. ३अ. ।

शारीरव्रणः । पुं । शरीरसम्बन्धिवातादिदोषजनितव्रणे । स द्विविधः शारीरागन्तुभेदेन । यथा —"द्विधा व्रणः स विज्ञेयः शारीरागन्तुभेदतः । दोषैराद्यस्तयोरन्यः शस्त्रादिक्षतसम्भवः । स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः । तुद्यते स्फुरति श्यावो व्रणो मारुतसम्भवः। तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणैः । व्रणं पित्तकृतं विद्याद्गन्धैः स्रावैश्च पूतिकैः। बहुपिच्छो गुरुः स्निग्धः स्तिमितो मन्दवेदनः । पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः । रक्तो रक्तस्रुतो रक्तात् द्विचिजः स्यात्तदन्वयैः । त्वङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः । धीमतोऽभिनवः काले सुखे साध्यः सुखं व्रणः । गुणैरन्यतमैर्हीनस्ततः कृच्छ्रो व्रणः स्मृतः । सर्वैर्विहीनो विज्ञेयस्त्वसाध्यो भूर्य्युपद्रवः ॥" इत्यादि । मा.नि. ।

शार्कः । पुं । शर्करायाम् । चिनि । श.र. ।

शार्ककः । पुं । दुग्धफेने । शर्करापिण्डे । मे. ।

शार्करः । पुं । लोध्रवृक्षे । दुग्धफेने । मे. ।

शार्करमद्यम् (शीधुः) । क्ली, पुं । शर्कराधातकीसिद्धमद्ये । लक्षणं—"शर्कराधातकीतोयक्वथितैः शार्करी मता ।" इति । द्रव्यगुणमाला। गुणाः—शीतं हृद्यं दीपनं मोहनञ्च । रा.नि.व. १४। अन्यः शर्कराजाततीक्ष्णमद्ये । गुणाः—मधुरः रुच्यः दीपनः वस्तिशोधनश्च । सु.सू.४५अ. ।

शार्करिलः । त्रि । शर्करान्वितभूमिजे । शर्कराभूयिष्ठे । व्याक. ।

शार्ङ्गम् । क्ली । आर्द्रके । आदा । रा.नि.व.६ ।

शार्ङ्गधरः । पुं । स्वनामख्यातचिकित्सासंग्रहकारे । ज्वरत्रिशतीकारे । [र्ङ्गधरटीकाविशेषे ।

शार्ङ्गधरदीपिका । स्त्री । आढमल्लकृते शा-

शार्ङ्गवेरिकः । पुं । शुण्ठीसमानवर्णे स्थावर विषभेदे । अत्रि.३स्थान.५६अ. ।

शार्ङ्गष्टा । स्त्री । काकजङ्घायाम् । কাঁটা গুড়কাঁউলি । सु.चि.२३अ. । काकमाच्याम् । गुञ्जायां । सु.सू.३८अ. ।

शार्ङ्गा(र्ङ्गि)ष्टा । स्त्री । महाकरञ्जे । ডহরকরঞ্জ । रा.नि.व.९ । वा.उ.२४. । लताकरञ्जे । काकमाच्याम् । वै.निघ. ।

शार्दूलः । पुं । व्याघ्रे । रा.नि.व.१९ । चित्रक वृक्षे । रा.नि.व.६ । पक्षिविशेषे । धरणि । सरभे । मे. ।

शार्दूलजम् । क्ली । व्याघ्रनखे । नखी । वै.निघ. ।

शार्व्वरी । स्त्री । रात्रौ । अ.टी.भ. । रोध्रे । লোধ । वै.निघ. ।

शालः । पुं । राले । धुনো । रा.नि.व.१२ । शालि । मत्स्यभेदे । শাল মাছ, গজাড় । त्रिका. । वृक्षे । रा.नि.व.२ । लकुचवृक्षे । रा.नि.व.९ । (Shorea robusta.) स्वनामख्यातवृक्षे । শাল গাছ । हिं शाल, शालवा । तें एपचेट्टु । ता. कुङ्गिलियम् । गुर्ज. गल । गुणाः—"........ कषायः स्यात् व्रणस्वेदकफक्रिमीन्। ब्रध्नविद्रधिबाधिर्य्ययोनिकर्णगदान् हरेत् ॥" भा.पू.१भ.वटादिः । शङ्खी । सु.चि.९अ. । अर्ज्जुनवृक्षे । प्रियालवृक्षे । वै.निघ. । [वै.निघ. ।

शालकम् । क्ली । नाड़ीशाके । পাটশাক ।

शालकल्याणी । स्त्री । पत्रशाकविशेषे । गुणाः—"शाकं गुरु च रुक्षञ्च प्रायो विष्टभ्य जीर्य्यति । मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम् ॥" च.सू. २७अ. । [र. ।

शालजः । पुं । शालमत्स्ये । শাল মাছ । श.

शालद्वयम् । क्ली । शालपीतशालयोः । শাল, পেয়াশাল । शा.कौ.शिलाजतुशोधने ।

शालनम् । क्ली । हरितके । শাকশজি । वा. चि.७अ. ।

शालनिर्यासः । पुं । राले । ধুনো । रा.नि. व.१२ । भा.म.४भ.पादस्फुटचि. । सर्ज्जवृक्षे । रा. नि.व.९ ।

शालपत्रसमपत्री । स्त्री । शालपर्ण्याम् । শালপাণি । प.मु. । रत्ना. । [मुरा । वै.निघ. ।

शालपर्णिका । स्त्री । मुरायाम् । एकाङ्गी,

शालपर्णी । स्त्री । (Desmodium gangeticum. Syn. Hedysarum gangeticum.) स्वनामख्यातक्षुपे । শালপাণি । रा. नि.व.४ । See अंशुमती ।

शालपर्ण्यादिः । पुं । तदादिद्रव्यगणे । यथा - शालपर्णीपृश्निपर्णीवाट्यालकविल्वशलाटुषु । শালপাণি, চাকুলে, বেড়েলা, বেলশুঁট। । च.द.र.पि.चि.शालपर्ण्यादिः । "शालपर्णीबलाविल्वैः पृश्निपर्ण्या च साधिता । दाड़िमाम्ला हिता पेया पित्तश्लेष्मातिसारिणाम् ॥" [निघ. ।

शालमर्कटः (कः) । पुं । दाड़िमवृक्षे । वै.

शालरसः । पुं । राले । ধুনো । रा.नि.व.१२

शालवः । पुं । लोध्रवृक्षे । श.र. ।

शालवर्गः । पुं । शालसारादिवर्गे । भा. ।

शालवेष्टः । पुं । शालनिर्यासे । ধুনো । त्रिका. ।

शालशाकम् । क्ली । नाड़ीशाके । वै.निघ. ।

शालसारः । पुं । शालवृक्षे । सु.सू.३८अ. । हिङ्गुवृक्षे । विश्वः ।

शालसारादिः । पुं । तदादिद्रव्यगणे । यथा —"शालयुग्मं करञ्जौ द्वौ खदिरश्चन्दनद्वयम् । गर्दभाण्डोऽर्ज्जुनो भूर्जो लोध्रयुग्मश्ववास्तथा । शिरीषागुरुकालीयपूगपूतिककर्कटाः । शालसारादिरप्येष गणः श्लेष्मगदापहः ॥" शालयुग्मं शालप्रियालौ । गर्दभाण्डो भाँटिरिति प्र. । पूतिकौ गन्धभादुलिः । शा.कौ. ।

शाला । स्त्री । तरुशाखायां । गृहे । त्रिका. ।

शालाकी (इन्) । पुं । शस्त्रवैद्ये ।

शालाक्यम् । क्ली । आयुर्व्वेदस्य अष्टविधतन्त्रान्यतमे । तत्र ऊर्द्ध्वजत्रुगतरोगाणां श्रवणनयनाद्याश्रितरोगाणाञ्चोपशमनार्थम् । सु.सू.१अ. । "शिरोरोगा नेत्ररोगाः कर्णरोगा विशेषतः । भूशङ्खकण्ठमन्यासु ये रोगाः सम्भवन्ति हि । तेषां प्रतीकारकर्म्म नासावर्त्ताञ्जनानि च । अभ्यङ्गसुखगण्डूषक्रियाः शालाक्यनामकाः ॥" वैद्य.सं.२य. ।

शालाङ्गारः । पु । कर्म्मकारशालाग्नौ । কামার শালের আগুন । रम.चि.८म. । शालका- ङ्गारि ।

शालाजिरः । पुं । शरावे । শরা । त्रिका. ।

शालाञ्चिः । पुं । शाकभेदे । শালিঞ্চশাক । श.र. । [श.र. ।

शालानी । स्त्री । विदार्य्याम् । শালপাণি ।

शालामर्कटकम् । क्ली । चाणक्यमूले । रा. नि.व.७ । बालमूलके । भा.पू.१भ.शा.व. ।

शालामुखः । पुं । कृष्णशूकतण्डुलव्रीहिधान्ये । "शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।" भा. पु.१भ.धा.व. ।

शालामृगः । पुं । शृगाले । हारा. ।

शालावृकः । पुं । प्रश्नकजातीयशृगालविशेषे । ফেউ । विड़ाले । रा.नि.व.१८। वानरे । कुक्कुरे । चम. । मृगे । হরিণ । श.र. ।

शालिः(धान्यम्) । पुं,क्ली । हैमन्तिकधान्ये । আমন ধান্ত, হৈমন্তিক ধান । देशभेदेन तस्य नानाभेदा दृश्यन्ते । ते च यथा—शालिर्महाशा- लिः कलमः तूर्णकः शकुनाहृतः सारामुखः दी- र्घशूकः रोध्रशूकः सुगन्धकः पतङ्गः तपनीयश्च । एते निर्द्दोषाः शालयः । गुणाः—बद्धाल्पवर्चसः स्वादुपाकरसाः स्निग्धा वृष्याः कषायानुरसा लघवः पथ्या मूत्रला हिमाश्च । वा.सू.६म. । न मधुरा वीर्य्यतः शीता लघुपाका बलावहाश्च । सु.सू.२८ च. । शालिः कलमः सुगन्धकः शकुनाहृतः म- हाशालिः शीतभीरुकः रोध्रपुष्पकः महिषमस्तकः कर्द्दमकः पाण्डुकः महादूषकः पुष्पाण्डकः पुण्ड- रीकः काञ्चनकः दीर्घशूकः हायनकः दूषकः म- हादूषकश्च । सु.सू.४६ च. । गुणाः—मधुराः शीता लघुपाका बलकराः पित्तघ्नाः वातकराः स्निग्धा ब- द्धाल्पवर्चसश्च । राज. । शालिसामान्यगुणाः—मधु- रा वृष्याः । राजनिघण्टुस्तु शालिधान्यस्य दशभे- दानाह, राजान्नषष्टिककृष्णरक्तमुण्डस्थूलाण्डगन्धनि- रापव्रीहय इति दश भेदाः । एषां विशेषाः पर्य्या- ये द्रष्टव्याः । "राजान्नं दीर्घशूकः खरिपुरिव- सजः षष्टिको वर्णतो द्वौ नि.शूकौ मुण्डशालिः स्वगुणविशदितः स्वाभिधानास्त्रयोऽन्ये। मासैर्योऽन्य- स्त्रिभिः स्यात् स भवति निरपो वापि कृष्णमुमण्डू- रेषः स्याद्व्रीहिसंज्ञस्तदिति दशविधाः शालयस्तु प्र- सिद्धाः ॥ रा.नि.व.१६ । हारीतस्तु शालीनामष्टाद- शभेदानाह । भा. । "रक्तशालिर्महाशालिः कलमः षष्टिकोऽपरः । खञ्जरीटापसाही च जीरकान्या कपिञ्जला । सौगन्धी शूकला चान्या बिलवासी कचोरका । गुरुड़ा रुक्मवन्ती च कलमान्या तथा- परा । विल्लजा मागधी पीता ता अष्टादश शाल- यः । देशे देशे विभिन्नानि नामानि परिलक्षयेत् । समानैः गुणैः सर्व्वांस्तान् भूमिभागोद्भवान् विदुः । शालयश्छिन्नरोहाश्च मूत्रला बद्धवर्चसः । ग्रीष्मकाले सुपथ्याश्च मूत्रला वातला हिमाः ।" चचि.१५ च. । लक्षणं यथा—'कण्डनेन विना शुक्ला हैम- न्ताः शालयः स्मृताः ।" गन्धमृगे । গন্ধগোকুল । त्रिका. । कृष्णजीरके । रा.नि.व.६ । रसाञ्जने । वै.निघ. ।

शालिका । स्त्री । विदारिकायाम् । ভুঁই কু- মড়া । श.र. । [খাটাশী । च.द.वा.व्या.चि. ।

शालिजः (जाहकः) । पुं । खट्टाशाख्ये ।

शालिञ्चः (ञ्ची) । पुं, स्त्री । स्वनामख्यातशा- कभेदे । শালিঞ্চ শাক, শাঞ্চি শাক । गुणाः— "शालिञ्ची दीपनस्तिक्तः शीतोष्णःकफपित्तजित् ।" राज.३प. । [रा.नि.व.४ ।

शालिदला । स्त्री । अंशुमत्याम् । শালপাণি ।

शालिनाथः । पुं । रसमञ्जरीकारे ।

शालिनी । स्त्री । पद्मकन्दे । रा.नि.व.१० । मेथिकायाम् । वै.निघ. ।

शालिपर्णिका । स्त्री । सुरामांस्यां । वै.निघ.।

शालिपर्णी । स्त्री । अंशुमत्याम् । শালপাণি । रा.नि.व.४। च.द.ज्व.चि.। "शालिपर्णीपृश्निपर्णी।" माषपर्ण्याम् । মাষাণী । रा.नि.व.३ । मेदायां । पृश्निपर्ण्याम् । वै.निघ. ।

शालिपिष्टम् । क्ली । स्फटिके । त्रिका. ।

शालिमूलम् । क्ली । हैमन्तिकधान्यमूले । च. चि ३च. । [শক্ত ধান । प.मु. ।

शालिराट् । पुं । महाशाली, राजशाली ।

शालिशूकः । पुं । शालिधान्यकृतरुकुके । गुणाः —"मधुरा लघवः शीताः शक्तवः शालिसम्भवाः ।

ग्राहिणी रक्तपित्तघ्नाः तृष्णाच्छर्द्दिज्वरापहाः ॥" च.सू.२७अ. ।

शालिहोत्रः । पुं । तन्नामकाश्वशास्त्रप्रणेतरि ऋषिविशेषे । घोटके । त्रिका. ।

शालिहोत्रम् । क्ली । नकुलकृते अश्ववैद्यकविशेषे । अपरं भोजराजकृतञ्च ।

शाली । स्त्री । कृष्णजीरके । रा.नि.व.६ । मेथिकायां । शालपर्ण्यां । दुरालभायाम् । वै.निघ. ।

शालीना । स्त्री । मिश्रेयाख्यक्षुपे । মউরিগাছ। रा.नि.व.४ ।

शालु । क्ली । शालूके । শালুক । श.र. । पुं । भेके । हे.च. । चौरकनामगन्धद्रव्ये । গেঁটেলা বিশেষ । मे. ।

शालु(लू)कम् । क्ली । पद्मकन्दे । পদ্মের গেঁড়ো, শালুক । रा.नि.व.२३ । अम. । हिं कसेरु भिसौड़ा । तैं जाजिकाय । गुणाः—शीतलं वृष्यं पित्तदाहास्रघ्नं गुरु दुर्जरं स्वादुपाकं स्तन्यवातकफकरं संग्राहि मधुरं रूक्षञ्च । तत् बालम् —अनार्त्तवं जीर्णं व्याधितं कृमिभक्षितम् अग्न्यादिदूषितञ्च वर्ज्यम् । तथातिजीर्णम् अकालोत्थम् अतैलादिसिद्धं कर्कशमतिकोमलं व्यालादिदूषितं मूलकं विना शुष्कञ्च शाकं नाश्नीयात् । भा.पू.१भ.शा.व. । च.द.वा.व्या.चि.अश्वगन्धातैले । जातीफले । रा.नि.व.१२ । वै.निघ.२भ.अ.च.चि. पिप्पल्यादिचूर्णे । [दमूले । त्रिका. ।

शालूकः । पुं । मण्डूके । रा.नि.व.१९ । पद्मा-

शालूरः । पुं । भेके । अम. । पद्मकन्दे । वै.निघ. ।

शालूरपर्णी । स्त्री । ब्राह्मीशाके । বির্ম্মীশাক। "शालूरपर्णीमालूर ।" भा.म.१भ.जिह्वकज्व.चि. ।

शालूरकः । पुं । पुरीषजकृमिभेदे । च.वि.७अ. ।

शालेयः । पुं । मधुरिकायाम् । रा.नि.व.४ । च.सू.२७अ. । क्ली । शालिधान्यक्षेत्रे । रा.नि.व.२ । बालमूलके । भा.पू.१भ.शा.व. । स्त्री । मिश्रेयायाम् । মেতি । रा.नि.व.४ । शलुफायाम् । वै.निघ. ।

शाल्मलः (कः) । पुं । मोचरसे । रा.नि.व.८ । भैष.स्त्रीरो.प्रदरारिरसे । शाल्मलीवृक्षे । শিমুল গাছ । श.र. ।

शाल्मलिः । पुं, स्त्री । (Bombax malabarica. Syn.Salmalica malabarica.) स्वनामख्यातमहातरौ । শিমুল গাছ। हिं सेम्बल, सेमुर । उत् বোন্রো । ता.पुला । मं सांवरि । प.मु. । गुणाः—वृष्यो बल्यः स्वादुः शीतः कषायो लघुः स्निग्धः शुक्रश्लेष्मवर्द्धनश्च । तद्रसस्तद्गुण एव, ग्राही कषायश्च । तत्पुष्पफलमपि तत्समगुणमेव । रा.नि.व.८ । तत्पुष्पं घृतसैन्धवसाधितं प्रदरघ्नं रसे पाके च मधुरं कषायं गुरु शीतलं ग्राहि वातलञ्च । भा.पू.१भ.शा.व. । कृमिमेहघ्नं रूक्षमुष्णं पाके कटु लघु वातकफघ्नञ्च । सु.सू.४६अ. । च.द.द्वन्द्वजज्व.चि.त्रिफलादौ । "त्रिफला शाल्मली रास्ना ।"

शाल्मलिकः । पुं । रोहितकवृक्षे । রক্ত রোড়া । रा.नि.व.७ । च.वि.८अ. ।

शाल्मलिनी । स्त्री । शाल्मलिवृक्षे । श.र. ।

शाल्मलिपत्रकः । पुं । सप्तपर्णवृक्षे । ছাতিম গাছ । रा.नि.व.१२ ।

शाल्मली । स्त्री । शाल्मलिवृक्षे । শিমুল গাছ। अम. । मोचरसे । च.सू.४ । शिंशपावृक्षे । त्रिका. ।

शाल्मलीकण्टकः । पुं । प्रसिद्धः । শিমুল কাঁটা । अयं व्यङ्गघ्नः । वा.उ.३२अ. ।

शाल्मलीकन्दः । पुं । स्वनामख्यातमहाकन्दे । स भागीरथीतीरे प्रसिद्धः । शांवरीकन्द इति च महाराष्ट्रादौ ख्यातः । শিমুল গাছের মূল । गुणाः—मधुरः मलसारणः शीतः पित्तदाहशोषसन्तापघ्नश्च । रा.नि.व.७ । [त्साकल्पभेदे । ज.द. ।

शाल्मलीकल्पः । पुं । वैद्यशास्त्रान्तर्गतचिकि-

शाल्मलीफलः । पुं । तेजःफलवृक्षे । रा.नि.व.११ ।

शाल्मलीफलकम् । क्ली । क्षुरादिशस्त्राणां धारासंस्थापनार्थाकर्कशकाष्ठपट्टके । सु.सू.८अ. ।

शाल्मलीवेष्टः (कः) । पुं । मोचरसे । শিমুল আটা । रा.नि.व.८ । भा.म.१भ.अ.सा.चि. समङ्गादिचूर्णे । "शाल्मलीवेष्टको रोध्रः ।"

शाल्मलीसत्त्वनिर्यासः । पुं । मोचरसे । भैष.ध्वजभ.चि. । रस.र.कामदीपकरसे ।

शाल्वणस्वेदः । पुं । वातव्याधौ स्वेदविशेषे ।

यथा –"काकोल्यादिः सवातघ्नः सर्व्वाम्लद्रव्यसंयुतः । सानूपौदकमांसस्तु सर्व्वस्नेहसमन्वितः । सुखोष्णः स्पृष्टलवणः शाल्वणः परिकीर्त्तितः । तेनोपनाहं कुर्व्वीत सर्व्वदा वातरोगिणाम् ।" सु.चि.४ष. । "वातघ्नो भद्रदार्व्वादिः काकोल्यादिश्च शोधितः । मांसेनाचौषधं तुल्यं यावदम्लेन चाम्लता । पट्टौ स्यात् स्वेदनार्थञ्च काञ्जिकाद्यम्लेमिष्यते । चतुःस्नेहोऽत्र तावान् स्यात् सुस्निग्धत्वं यतो भवेत् । समस्तं वर्गमर्द्धं वा यथालाभमथापि वा । प्रयुञ्जीतेति वचनं सर्व्वत्र गणकर्म्मणि ...... ।" शाल्वणस्वेदः । जीवनीयदशক, গুড়ূচী, কাঁক্ড়াশৃঙ্গী, বংশলোচনা, পদ্মকাষ্ঠ, ঋদ্ধি, বৃদ্ধি, দেবদারু, কুড়, হরিদ্রা, বরুণত্বক্, মেষশৃঙ্গী, বাড়িয়ালা, গোরক্ষচাকুলিয়া, আলাকুশী, শণ, ঝাটী, শ্বেত আকন্দ, গুলঞ্চ, গোক্ষুর, পাষাণভেদ, রক্ত আকন্দ,শতমূলী, পুনর্নবা, বস্ত্র আটা, ধুতুরা, বামনহাটী, বিছাতি, যব, কুল, কুলথ এবং দশমূল, প্রত্যেকে ৯ মাষা মিলিত ৮ পল । च.द.वा.व्या.चि. ।

शाव: (क:) । पुं । शिशौ । रा.नि.व.१८ ।

शावर: । पुं । शबरलोध्रे । পাটিয়ালোধ । मे.। भा.म.४भ.नेत्ररोगचि.। "शरिष्टदलशावर···।"

शावरकरोध्र: । पुं । शबिभिषजापरसंज्ञे स्वनामख्याततरौ । পাটিয়ালোধ । वा.सू.१५ष. रोध्रादौ ।

शावरभेदाख्य(च)म् । क्ली । ताम्रे । हे.च.।

शावरी । स्त्री । शूकशिम्ब्याम् । আলাকুশী । मे. ।

शाष्कुल: । त्रि । मांसाशिनि । हे.च. ।

शिंशपा । पुं । (Dalbergia śiśu.) A Timber tree. स्वनामख्याततरौ । শিশু গাছ । हिं शीसव,शिशु.शीसह । तें शिशुकरर । ता. सातुक्कुकट्ट। पंशकेदर् । सा त्रिधा कृष्णश्वेतपीतभेदेन । सा.गुणाः—तिक्ता कटुरुष्णा कफवातघ्नी दीपनी शोथातिसारघ्नी च । "श्वेतादिशिंशपा तिक्ता शिशिरा पित्तदाहनुत् । कपिला शिंशपा तिक्ता शीतवीर्य्या श्रमापहा । वातपित्तज्वरघ्नी च छर्दिहिक्काविनाशिनी । शिंशपात्रितयं वर्ण्यं हिमशोफविसर्पजित् । पित्तदाहप्रशमनं वर्ण्यं रुचिकरं परम् ।" रा.नि.व.९ ।

शीकतावलम्बनम् । क्ली । जलस्य शीतलीकरणोपायविशेषे । सु.सू.४५ष. ।

शिक्थ(क)म् । क्ली । मधूच्छिष्टे । मम । गुणाः—पिच्छिलं स्वादु कुष्ठवातरक्तघ्नं कटु मृदु स्निग्धं लेपेन स्फुटिताङ्गविलोपनञ्च। रा.नि.व.१३।

शिक्यम् । क्ली । द्रव्यरक्षणार्थं रज्जुकृताधारे । শিকা । श.र.। जलप्रसादनार्थं पात्ररक्षणाधारविशेषे । सु.सू.४५ष. ।

शिखण्ड: (क:) । पुं । मयूरपुच्छे । अम. । काकपक्षे । জুলপি । मे. । श.र. ।

शिखण्डिक: । पुं । कुक्कुटे । भा. ।

शिखण्डिनी । स्त्री । गुञ्जालतायाम् । प.मु.र.सा.सं.रसप्रकरणे । यूथिकायाम् । र.मा. ।

शिखण्डी (इन्) । मयूरे । मयूरपुच्छे । मे. । कुक्कुटे । हे.च. । स्त्री । गुञ्जालतायाम् । रा.नि. व.३ । स्वर्णयूथिकायाम् । रा.नि.व.१० ।

शिखरम् । क्ली । पुलके । রোমাঞ্চ । माणिक्यविशेषे । त्रिका. । कक्षे । मे. ।

शिखरा । स्त्री । मूर्व्वायां । মূর্গা । श.च. ।

शिखरिचरणम् । क्ली । अपामार्गमूले । वै. निघ.२भ.उन्मा.चि. । [ने.रो.चि.भा.म.४भ. ।

शिखरिज: । पुं । अपामार्गे । আপাং । भैष.

शिखरिणी । स्त्री । दधिजले । द्राक्षान्तरे । रोमराज्याम् । मे. । रा.नि.व.२३ । नवमल्लिकायाम् । रा.नि.व.१०।२३ । तन्नामकसन्धानविशेषे। तत्र द्रव्याणि दधि, ३२ पलं खण्डस्याष्टपलानि तत्परिमितं मरिचचूर्णं त्वगेलाचूर्णञ्च, मध्वाज्ययोः प्रत्येकं पलचतुष्टयम्, एकत्र भाण्डे संस्थाप्य हिमवासिता शिखरिणीत्युच्यते । रा.नि.व.२२ । एवं मल्लिकादयो बहुविधशिखरिण्योज्ञेयाः । मूर्व्वायां । श.च. । [শোঁকা । श.च. ।

शिखरिलोहित: । पुं । भूकदम्बे । কুকুর-

शिखरी (इन्) । पुं । कुन्दुरौ । কুন্দুরুখোটী । रा.नि.व.१२ । सामान्ययावनाले । জনার । रा.नि.व.१६ मृगविशेषे । तन्मांसं लघु हृद्यं

वलप्रदश्च । रा.नि.व.१७ अपामार्गे । रा.नि.व. ४ । च.द.र.सा.सं. विसूचीयोगे । वा.सू.१५अ. श्यामादिः । भा.म.४भ.कर्णरो.चि.। वन्दाके । मा-न्दरा । रा.नि.व.५ । कर्कटशृङ्ग्याम् । काँकड़ा शृङ्गी । रा.नि.व.६ ।

शिखा । स्त्री । चूचके रा.नि.व.१८ । मूर्व्वायाम् । शाखायां । चूड़ायां । मे. । मयूरशिखायाम् । विश्लाङ्गुलिया । रा.नि.व.५ । शिरोमध्यकेशे । টিকি । अम. । अरज्वरे । श.र. । तरुमूले । है.च. । तुलसीवृक्षे । जटामांस्यां । वचायाम् । वै.निघ. । [रा.नि.व.७ ।

शिखाकन्दम् । क्ली । गृञ्जने । शालगम ।

शिखाच(व)लः । पुं । मयूरे । त्रिका. ।

शिखाधरः (धारः) । पुं । मयूरे । श.र. ।

शिखामूलम् । क्ली । गृञ्जने । গাজর মূলা । रा.नि.व.७ ।

शिखालः । पुं । मयूरे । वै.निघ. । [५ ।

शिखालुः । पुं । मयूरशिखायाम् । रा.नि.व.

शिखावती । स्त्री । मूर्व्वायाम् । মূর্গা । श.च. ।

शिखावरः । पुं । पनसवृक्षे । কাঁঠাল গাছ । श.मा. । [व.५ ।

शिखावला । स्त्री । मयूरशिखायाम् । रा.नि.

शिखावान् । पुं । चित्रकवृक्षे । अम. । भाष-पत्रिणि । वै.निघ. । [नि.व.१२ ।

शिखिकण्ठम् । क्ली । तुत्थके । তুঁতে । रा.

शिखिकुन्दः । पुं । कुन्दुरुक्याम् । कुन्दुरु-খোটী । कश्चित् ।

शिखिग्रीवम् (वा) । क्ली, स्त्री । तुत्थके । अम. । भा.म.१भ.ज्व.चि. । ज्वराङ्कुशरसे "दारुमूषां शिखिग्रीवाम् ।" (वम्) कान्तपाषाणे । तुत्थके । र.सा.सं. । [वै.निघ. ।

शिखिध्वजः । पुं । धूमे । त्रिका. । मयूरे ।

शिखिनी । स्त्री । मयूरशिखायाम् । रा.नि.व. ५ । [च.द.हिक्का.श्वास.चि.हिंसाद्यघृते । ।

शिखिपुच्छम् । क्ली । मयूरपुच्छे । श.र. ।

शिखिपुच्छभूति । स्त्री । पुच्छभस्मनि । च. द.हिक्का.श्वास.चि. ।

शिखिप्रियः । पुं । लघुबदरे । ছোটকুল । रा.नि.व.११ ।

शिखिमण्डलः । पुं । वरुणवृक्षे । বরুণ গাছ । श.र. । [रस.र.स्त्रीपदचि. ।

शिखिमन्यः । पुं । गणिकारिकायां, গণিরি ।

शिखिमुखी । स्त्री । मयूरशिखायाम् । वै.नि-घ । [ला । रा.नि.व.७ ।

शिखिमूलम् । क्ली । गृञ्जनमूले । গাজরমূ-

शिखिमोटा (दा) । स्त्री । अजमोदायाम् । রাঙ্কুনী । रा.नि.व.६ । [११ ।

शिखियूपः । पुं । श्वेतारिमेदे । रा.नि.व.

शिखिवर्द्धकः । पुं । कुष्माण्डे । श.र. ।

शिखिवाड़वरसः । पुं । गुल्माधिकारे रसः । पाठः —"मारितं सूततात्राभ्रं गन्धकं माक्षिकं समम् । मर्दयेच्चित्रकद्रावैः यवक्षारयुतं दिनम् । त्रिगुञ्जं भक्षयेन्नित्यं नागवल्लीदलेन वा । वातगुल्महरः ख्यातो रसोऽयं शिखिवाड़वः ।" रस.र. ।

शिखिवृष्टी । स्त्री । महाबलाक्षुपे । वै. निघ. ।

शिखी (न्) । पुं । चित्रकवृक्षे । চিতা গাছ । रा.नि.व.६ । वै.निघ.कर्णक.ज्व.चि.बीजपूरलेपे । मयूरे । मेथिकायाम् । মেথি । रा.नि.व.२२ । विषभेदे । प.मु. । सुनिषण्णशाके । भा.पू.१भ.शा. व. । अपामार्गे । আপাং । र.सा.सं. । घोटके । है.च. । कुक्कुटे । वृक्षे । मे. । शूकशिम्ब्याम् । আলকুশী । प.मु. । वकपक्षिणि । त्रिका. । पित्ते । वै.निघ. । [शाक । रा.नि.व.४ ।

शिखीवम्रुः । स्त्री । शितावरीक्षुपे । শুশুনি

शिगूड़िः । स्त्री । स्वनामख्यातक्षुपे । हिं चक्रौनी । गुणाः— कटुः उष्णा वातघ्नी पृष्ठशूलघ्नी योगेन रसायनी देहदार्ढ्यकरी च । रा.नि.व.४ ।

शिग्रुः । पुं । (Moringa pterygosperma Syn. Hyperan-thera Moringa.) Horse-radish tree. स्वनामख्यातपत्रशाके, शोभाञ्जनवृक्षे । শজিনা গাছ । सु.सू.३८अ. । वम्. पीतसेगवा । हिं सोहिञ्जन । दा.हिं मुङ्गेकाभाड़ । ता. मोरुङ्गा । तें मुनुगचेट्टु मुनग । गुणाः

—कटुतिक्तोष्णः तीक्ष्णः वातकफघ्नः मुखजाड्यहरः रुच्यः दीपनः व्रणनाशनश्च। शिग्रुचतुर्भेदः श्वेतपीतनीलरक्तभेदेन। रा.नि.व.८। विशेषास्तत्पर्य्यायेषु मन्तव्याः। शाके। धन्व.।

शिग्रुजम्। क्ली। शिग्रुपत्रे। शिग्रुवीजे यत् श्वेतमरिचमित्युच्यते। धन्व.।

शिग्रुतैलम्। क्ली। शिग्रुवीजोद्भवतैले। সজিনাবীজের তৈল। सं सेगुतेल। गुणाः—कटु उष्णं कफघ्नं वातघ्नं त्वग्दोषव्रणकण्डूतिशोफघ्नं पिच्छिलञ्च। रा.नि.व.१५।

शिग्रुवीजम्। क्ली। श्वेतमरिचे। "शोभाञ्जनस्य यद्वीजं तत् श्वेतमरिचं स्मृतम्।" श.च.।

शिग्रुशाकम्। क्ली। प्रसिद्धे। সজিনাশাক। सं सेगुपत्र। कं ह्लियपत्रे। गुणाः—रुच्यं वातकफघ्नं कटूष्णं दीपनं पथ्यं क्रमिघ्नञ्च। रा.नि.व.७।

शिग्रूद्भवम्। क्ली। शिग्रुवीजे। वै.निघ.।

शिङ्घाणकः। पुं। कफे। नासामले। নাকের পোটা। उणा। वाजिनो नासागतरोगविशेषे। ज.द.।

शिङ्घाणम् (णिका)। क्ली,स्त्री। काचपात्रे। त्रिका.। लौहमले। मण्डूर। नासामले। শিকনি। मे.।

शिञ्जितः। त्रि। शाते। श.र.।

शिण्डाकी। स्त्री। चासुतविशेषे। गुणाः—रोचनी लघुश्च। च.सू.२७अ.। यथा—"शिण्डाकी राजिकायुक्तैः स्वान्मूलकदलद्रवैः। सर्षपस्वरसैर्वापि शालिपिष्टकसंयुतैः। शिण्डाकी रोचनी गुर्वी पित्तश्लेष्मकरी स्मृता।" रा.नि.व.१४। भा.।

शितः। पुं। यवे। क्ली। रजते। धने.ध्वनिः। त्रि। कृशे। विश्वः।

शितकरः। पुं। कर्पूरे। रा.नि.व.१२।

शितकर्णी। स्त्री। वासायाम्। বাসক গাছ। रा.नि.व.४।

शितच्छदा। स्त्री। शताह्वायाम्। वै.निघ.।

शितद्रुः। पुं, स्त्री। क्षीरमोरटे। ক্ষীরক ঝাড়। र.मा.। शतद्रुनद्यां। धन्व.।

शितनिर्गुण्डी। स्त्री। श्वेतनिर्गुण्ड्यां। শ্বেতনিশিন্দা। रस.र.बाल.चि.।

शितपर्णः। पुं। क्षुद्रमूलके। वै.निघ.।

शितपुष्पः। पुं। शिरीषवृक्षे। रा.नि.व.९।

शितपुष्पकम्। क्ली। काशतृणे। रा.नि.व.८।

शितशाकः। पुं। शालिञ्चशाके। শালিঞ্চ শাক। प.मु.।

शितशिवम्। क्ली। सैन्धवलवणे। वै.निघ.। मिशेयायाम्। स्त्री। शताह्वायाम्। वै.निघ.।

शितशिंशपा। स्त्री। श्वेतशिंशपायाम्। শাদাশিশু। रा.नि.व.९। [त्रिका.।

शितशूकः। पुं। यवे। त्रिका.। गोधूमे।

शितसारः। पुं। तिन्दुकवृक्षे। গাবগাছ। धन्व.। [रा.नि.व.२३।

शिताद्रिकर्णी। स्त्री। श्वेतापराजितायाम्।

शितावरः (री)। पुं, स्त्री। सुनिषण्णके। শুশুনিশাক। सोमराज्यां। वै.निघ.। रा.नि.व.४। [शे। मे.।

शितिः। पुं। भूर्जवृक्षे। मे.। त्रि। शुभ्रे। कृ-

शितिकण्ठः। पुं। दात्यूहपक्षिणि। ডাকপাখী। त्रिका.। [जटा.।

शितिचारः। पुं। सुनिषण्णके। শুশুনি শাক।

शितिच्छदः
शितिपक्षः } पुं। हंसे। श.र.।

शितिमूलकम्। क्ली। उशीरे। বেণা। रा.नि.व.१२।

शितिवरः (वारः)। पुं। सुनिषण्णकशाके। শুশুনিশাক। भा.पू.१भ.शा.व.।

शितिसारः (कः)। पुं। तिन्दुकवृक्षे। গাব গাছ। धन्व.।

शिथिलः। त्रि। पीड़नाक्षमे। शिथिलस्य स्खलितकथनदोषः। सु.सू.७अ.।

शिफः। पुं। मूले। ध.टी.विद्याविनोदः।

शिफा। स्त्री। तरुमूले। শিকড়। धन्व.। शताह्वायाम्। रा.नि.व.४। हरिद्रायां। रा.नि.व.६। जटा.। मांस्याम्। मे.। पद्मकन्दे। वैनिघ.।

शिफाकः (कन्दः) । पुं । पद्ममूले । श.च. । अम. ।

शिफाधरः । पुं । शाखायां । श.च. ।

शिफारुहः । पुं । वटवृक्षे । रा.नि.व.११ ।

शिम्हड़ी । स्त्री । स्वनामख्यातक्षुपे । हिं चक्रीनो । गुणाः—कटूष्णा वातघ्नी पृष्ठशूलघ्नी योगेन रसायनी देहदार्ढ्यकरी च । रा.नि.व.४ ।

शिम्बः । पुं । चक्रमर्दक्षुपे । চাকন্দা । श.च. ।

शिम्बा (म्बिः) । स्त्री । शिम्बीधान्ये । रा.नि.व.१६ । कलायादिकोशे । শুঁটী । छिमड़ा श.र.। स्वनामख्यातलतायां। শিম গাছ । हिं शेंवि । बम्. शेंगा । शिम्बीपुत्रकशिम्बीभेदेन द्विविधा । गुणाः—शिम्बीद्वयं रसे मधुरं पाके हिमं गुरु बलकरं दाहकरं श्लेष्मकरं वातपित्तहरञ्च । भा.पू.१भ.शा०व. । "शिम्बा तु विविधा रूक्षवातला स्वादुशीतला । विष्टम्भिनी कषायाग्निविट्शुक्रकफनाशिनी ॥" राज ३प. । शिम्बी रूक्षा कषाया च कोष्ठे वातप्रकोपनी । न च वृष्या न चक्षुष्या विष्टभ्य च विपच्यते । शिम्बीजातिगुणाः—"गुर्व्योऽथ मधुरा शीता बलघ्नाः रूक्षणात्मिकाः । सस्नेहा वलिभिर्भोज्या विविधाः शिम्बिजातयः ।" च.सू २७अ. । श्वेतकृष्णपीतरक्तभेदेन चतुर्धा । सा पुनर्द्विधा वल्लीजमूलभेदेन । गुणाः—रसपाकयोः कटूष्णा । सु.सू.४६अ.। (म्बिः) एरकायां । भा. । मुलके । वै.निघ. ।

शिम्बिकः । पुं । कृष्णमुद्गे । কালমুগ । हे.च.।

शिम्बिका । स्त्री । शिम्ब्याम् । श.र. ।

शिम्बिजः । पुं । शिम्बीधान्ये । रक्तकुलत्थे । स्त्री । शिम्बीधान्ये । वै.निघ. । भा. ।

शिम्बिनी । स्त्री । असितशिम्बीलतायाम् । बड़ শ্বেতশিম । रा.नि.व.७ । कृष्णचटकायाम् । वै. निघ. । [मुगानी । प.मु. । श.च. ।

शिम्बिपर्णिका (र्णी) । स्त्री । मुद्गपर्ण्याम्।

शिम्बिरिङ्गणी । स्त्री । वनमुद्गे । वै.निघ. ।

शिम्बिरीटिका । स्त्री । स्वर्णजीवन्त्यां । वै. निघ. ।

शिम्बी । स्त्री । धान्यादिकशुके । ধান্যাদির খোলা, শুঁটী । रा.नि.व.१६ । शिम्बीधान्ये । शिम्ब्यां । শিম্ । श.र. । मुद्गपर्ण्याम् । मुगानी, कपिकच्छ्वां । আলাকুশী । रा.नि.व.३ ।

शिम्बीधान्यम् । क्ली । शिम्बीनिगूढमुद्गमकुष्ठकादौ । गुणाः—अतिगुरु हिमं विबन्धकरञ्च । रा.नि.व.१६ । "……मधुरं रूक्षं कषायं कटुपाकि च । वातलं कफपित्तघ्नं बद्धमूत्रमलं हिमं। ऋते मुद्गमसूराभ्यामन्यदाध्मानकारि च ।" भा. पू.१३ । See धान्यम् । [व.४ ।

शिम्बीफलम् । क्ली । आढ्ल्यक्षुपे । रा.नि.

शिम्बीभवः । पुं । शिम्बीधान्ये । भा.पू.१भ. ।

शिरः । पुं, क्ली । मस्तके । रा.नि.व.१८ । पिप्पलीमूले । मे. ।

शिरःकम्पः । पुं मस्तककम्पने ।

शिरःखण्डम् । क्ली। कपालास्थनि । वै.निघ.।

शिरःफलः । पुं । नारिकेलवृक्षे । त्रिका. ।

शिरःशूलम् । क्ली । शिरोरोगे । মাথার ব্যাম, মাথাবেথা । तदौषधं यथा—शुण्ठी पिप्पली श्वेतापराजितामूलञ्च समभागं पिष्टा लेप्यम्।

शिरःस्नानम् । क्ली । शिरःपर्य्यन्तं सर्व्वाङ्गं जले मज्जयित्वा स्नाने । च.सू.१५अ. ।

शिरजः । पुं । केशे । श.र. ।

शिरपीड़ा । स्त्री । शिरोरोगे । মাথাবেথা, মাতাধরা । निदा. ।

शिरसिजः (रोरुहः) । पुं। केशे । रा.नि. व.१८ । श.र. । [शिरोरोगः ।

शिरस्तापः । पुं । वातजशिरोरोगे । See

शिरा । स्त्री । धमन्याम् । শির । रा.नि.व.१८। ताः सन्धिबन्धनकारिण्यो दोषधातुवहा नाभिनिबद्धाः समन्ततो धावन्ति । पुष्यन्ति च शरीरं प्रणालीभिरारामानिव प्रसारणाकुञ्चनादिभिः सततम् । ताश्च शिराः ७००। ताश्च तरुपत्र इव शरीरे वर्त्तन्ते । तत्रताश्च पवनादयो यदा कुप्यन्ति तदा तज्जा विविधा रोगा जायन्ते । तेषु अरुणा वातवहा नीलाः पित्तदुष्टा गौरवर्णाश्च कफदुष्टा ज्ञेयाः । तासां मूलशिराः ४० । तासाञ्च वातपित्तकफरक्तादिष्वी दश दश भवन्ति इति । ता-

स्थान् वातवाहिनीनां वातस्थानगतानां पञ्च प्रतिशतम्। तावन्त एव पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यश्च कफस्थाने, रक्तवाहिन्यश्च यकृत्प्लीहोरिवमेतानि सप्त शिराशतानि। सु.शा.७अ.।

शिराजपिड़का। पुं। शुक्लगतनेत्ररोगे। लक्षणम् यथा—"शुक्लस्थाः सितपिड़काः शिराऽऽवृता याता विद्यादसितसमीपजाः शिराजाः।" सु.उ. ४अ.।

शिराजालः। पुं। नेत्रशुक्लगतरोगे। लक्षणम्—"जालाभः कठिनशिरोऽरुणः शिराणां सन्तानो भवति शिरादिजालसंज्ञः।" भा.।

शिराग्रन्थिः। पुं। वातेन शिरासङ्कोचेन ग्रन्थिरोगभेदे। लक्षणं—"पदातेस्तु, सहसाम्भोऽवगाहनात्। व्यायामाद्वा प्रतान्तस्य शिराजालं सशोणितम्। वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च। निस्फुरं नीरुजं ग्रन्थिं कुरु। सग्निरावयः॥" वा.उ.२९अ.।

शिरापत्रः। पुं। हिन्तालवृक्षे। হাতাল গাছ। रा.नि.व.९। कपित्थवृक्षे। কয়েৎ গাছ। श.च.।

शिराप्रहर्षः। पुं। सर्व्वगताक्षिरोगे। लक्षणं—"मोहाच्छिरोत्पात उपेक्षितस्तु जायेत रोगस्तु शिराप्रहर्षः।" मा.नि.।

शिराफलः। पुं। नारिकेलवृक्षे। श.च.।

शिरामलकः। पुं। स्वनामख्यातवृक्षे। শিরা আমলা। प.मु.। [हान। नकुल.१४अ.।

शिरामोक्षः। पुं। रक्तमोक्षणे। জোঁকধ-

शिरायामः। पुं। शिरायाः प्रसरणवत्पीड़ायाम्। मा.नि.।

शिरायुः। पुं। भल्लूके। रा.नि.व.१९।

शिरालम्। क्ली। कर्म्मरङ्गे। কামরাঙা। श.च.। [ঙ্গা গাছ। श.च.।

शिरालकः। पुं। अस्थिभङ्गवृक्षे। হাড়ভা-

शिरालपत्रः (कः)। पुं। तालवृक्षभेदे, शीताल इति मलियादेशे ख्यातः। তেড়েৎ গাছ। रा.नि.व.९। [नि.व.१२।

शिराहृत्तम्। क्ली। शीर्षके। শীষা। रा.

शिरावेधः (व्यधः)। पुं। शोणितदुष्टिजन्यरोगेषु शिरायां वेधने। रक्तमोक्षणे। वा.उ.९१ अ.। मा.नि.।

शिरीषः। पुं। (Albizzia lebbec, Syn. Acacia lebbec.) स्वनामख्यातवृक्षे। শিরীষ গাছ। हिं शिरिष, लसरीन्, कलसिस। तें दिरसन। गुणाः—"शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः। दोषशोथविसर्पघ्नः कासव्रणविषापहः।" भा.। कण्टकशिरीषगुणाः—विषविसर्पस्वेदलम्दोषशोथघ्नः। राज.।

शिरीषपत्रा (त्रिका)। स्त्री। श्वेतकटभीवृक्षे। কাঁটাশিরীষ। रा.नि.व.९।

शिरीषवीजम्। क्ली। तन्नामकवृक्षस्य वीजे। वा.मू.१५अ.शिरोविरेचने। च.द.ज्व.चि.अञ्जनप्रकरणे।

शिर(रो)ग्रहः। पुं। वातव्याधिविशेषे। মাথাধরা। लक्षणं—"रक्तमाश्रित्य पवनः कुर्य्यान्मूर्द्धधराः शिराः। रुक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः। शिरोग्रहे तु कर्त्तव्या शिरागतमरुत्क्रिया। दशमूलीकषायेण मातुलुङ्गरसेन च। शीतेन तैलेनाभ्यङ्गः शिरोवस्तिश्च युज्यते।" संग्रहः।

शिरोत्पातः। पुं। सर्व्वगताक्षिरोगे। लक्षणं यथा "अवेदना वापि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः। मुहुर्विरज्यन्ति च याः स तादृक् व्याधिः शिरोत्पात इति प्रदिष्टः॥" मा.नि.।

शिरोधरा। स्त्री। कन्धरायाम्। গ্রীবা। रा.नि.व.१८। वा.चि.८अ.।

शिरोधिः। स्त्री। कन्धरायाम्। रा.नि.व.१८।

शिरोधिजा। स्त्री। शिरायाम्। रा.नि.व.१८।

शिरोभ्यङ्गः। पुं। मस्तकाभ्यङ्गे। মাথায় তৈল মর্দ্দন। सु.चि.२४अ.। See अभ्यङ्गः।

शिरोमर्म्मा (न्)। पुं। शूकरे। है.च.।

शिरोरुजा। स्त्री। सप्तपर्णवृक्षे। ছাতিম গাছ। त्रिका.। शिरोवेदनायां।

शिरोरुट् (हः)। पुं। केशे। श.च.। अम.।

शिरोघूर्णनम्। क्ली। मस्तकघूर्णने। মাথা ঘোরা। निदानम्।

शिरोरोगः । पुं । मस्तकरोगे । माथार पीड़ा । निदानादि —"धूमातपतुषाराम्बुक्रीड़ातिस्वप्नजागरैः । उत्स्वेदादिपुरोवातवाष्पनिग्रहरोदनैः । अत्यम्बुमद्यपानेन क्रिमिभिर्वेगधारणैः । उपधानम्रजाभ्यङ्गद्वेषाधःप्रततेक्षणैः । असात्म्यगन्धदुष्टामभाष्याद्यैश्च शिरोगताः । जनयन्त्यामयान् दोषास्तत्र मारुतकोपतः । निस्तुद्यते भृशं शङ्खौ घाटा संभिद्यते तथा । भ्रुवोर्मध्यं ललाटञ्च पततीवातिवेदनम् । बाध्येते स्वनतः श्रोत्रे निष्कृष्येत इवाक्षिणी । घूर्णतीव शिरः सर्व्वं सन्धिभ्य इव मुच्यते । स्फुरत्यति शिराजालं कन्धराहनुसंग्रहः । प्रकाशासहता प्राणस्रावोऽकस्मात् व्यथाशमौ । मार्दवं मर्दनस्नेहस्वेदबन्धैश्च जायते ।" शिरस्तापोऽयम् । "अर्द्धं तु मूर्ध्नः सोऽर्द्धावभेदः……।" "शिरोऽभितापे पित्तोत्थे शिरोधूमायनं ज्वरः । स्वेदोऽक्षिदहनं मूर्च्छा निशि शीतैश्च मार्दवम् । अरुचिः कफजे मूर्द्धा गुरुस्तिमितशीतता । शिरानिस्पन्दतालस्यं रुक् मन्दाग्र्यधिका निशि । तन्द्रा शूनाक्षिकूटत्वं कर्णकण्डूयनं वमिः । रक्तात्पित्ताधिकरुजः सर्व्वैः स्यात् सर्व्वलक्षणः ।" वा.उ.२३अ. । स चैकादशविधः । वातजपित्तजकफजसन्निपातजरक्तजक्षयजक्रिमिजसूर्य्यावर्त्तानन्तवातार्द्धावभेदकशङ्खकभेदेन । वाभटस्तु न क्षयजमाह । तत्र वातशिरोरोगेऽनिमित्तं शिरोवेदना निशि च वर्द्धते, तथा बन्धनादिभिर्विशेषो भवति । पित्तेन उष्णाङ्गारचितमिवाचितं शिरो भवति । रात्रौ शीतेन विशेषो भवति च । कफेन, गुरु हिमं शूनाक्षिकूटं मुखञ्च भवति । त्रिदोषे त्रिदोषलिङ्गं भवति । रक्तेन पित्तलिङ्गं शिरसः स्पर्शासहत्वञ्च । क्षयेणान्तःस्फुरणवदनुभवः, अतिशिरोवेदना चेति । मा.नि. ।

शिरोऽर्त्तिः । स्त्री । शिरःपीड़ायाम् । मा.नि. ।

शिरोवस्तिः । पुं । मूर्द्धवस्तौ । तस्य प्रकरणं यथा—"शिरोवस्तिश्चर्म्मणः स्यादिमुखो द्वादशाङ्गुलः । शिरःप्रमाणस्तं बद्धा मस्तके माषपिष्टकैः ॥ सन्धिरोधं विधायाथ स्नेहैः कोष्णैः प्रपूरयेत् । तावद्धार्य्यस्तु यावत् स्यान्नासाकर्णमुखश्रुतिः । वेदनोपशमो वापि मात्राणां वा सहस्रकम् । स्वजानुनः करावर्त्तं कुर्य्याच्छोटिकया युतम् । एषा मात्रा भवेदेका सर्व्वत्रैवैष निश्चयः । विना भोजनमेवात्र शिरोवस्तिः प्रशस्यते । प्रयोज्यस्तु शिरोवस्तिः पञ्च सप्त दिनानि वा । विमोच्य शिरसो वस्तिं स्नेहोयाञ्च समस्ततः । ऊर्द्धकायं ततः कोष्णे नीरे स्नानं समाचरेत् । अनेन दुर्ज्जया रोगा वातजा यान्ति सङ्क्षयम् । शिरःकम्पादयस्तेन सर्व्वकालेषु युज्यते ।" भा. ।

शिरोवल्ली । स्त्री । मयूरशिखायाम् । श.च. ।

शिरोविरेचनम् । क्ली । नस्यद्रव्ये । नस्ये । तद्व्याणि । यथा—पिप्पलीविड़ङ्गापामार्गशिग्रुसिद्धार्थकशिरीषमरिचकरवीरबिम्बीगिरिकर्णिकादीनि । सु.सू.१९अ.शिरोविरेचने ।

शिरोवृत्तम् । क्ली । मरिचे । रा.नि.व.६ । शीषके । रा.नि.व.१३ ।

शिरोवृत्तफलः । पुं । रक्तापामार्गक्षुपे । भा. ।

शिरोस्थिखण्डम् । क्ली । शिरःखर्परे । माथारथापरी । रा.नि.व.१८ । [रा.नि.व.१८ ।

शिरोऽस्थि । क्ली । करोटी । माथार खुलि ।

शिरोत्खण्डनम् । क्ली । केशभूमिस्फुटने । ललाटशङ्खभेदे । वि.र.जेज्जड़ः ।

शिल(ला)गर्भजः । पुं । पाषाणभेदक्षुपे । पाथर कुचा । रा.नि.व.५ ।

शिलजम् । क्ली । शैलजनामगन्धद्रव्ये । शैलज । रा.नि.व.१२ ।

शिला । स्त्री । मनःशिलायाम् । मनछाल । रा.नि.व.१३ । र.मा. । वै.सं.मेहवज्ररसे । शिलाजतुनि । शिलाजतु । वै.निघ.र.चि.चि.एलादिगुड़िका गैरिके । दीर्घपाषाणे । शिल । भा. । कर्पूरे । रा.नि.व.१२ । नीलिकायाम् । नील । हरीतक्यां । गोरोचनायाम् । दूर्व्वायाम् । वै.निघ. ।

शिलाकर्णी । स्त्री । सल्लकीवृक्षे । श.च. ।

शिलाजम् । क्ली । शिलाजतुनि । भा. । शैलेये । शैलज । श.च. । लौहे । रा.नि.व.१३ ।

शिलाजतु । क्ली । शिलानिस्रुतगिरिजधातुविशेषे । शिलाजतु । शिलाजित् इति लोके । तच्च स्वर्णादीनां मलभेदात् हेमरजतताम्रकृष्णायससम्भवाच्चतुर्धा । तेषु हैमं जवापुष्पाभं, राजतं श्वेतवर्णं, ताम्रभवं वर्हिकण्ठाभं, आयसञ्च गुग्गुलुनिभं भवति यथाक्रमं वातपित्तश्लेष्मकफ-

रं। तदुक्तं यथा—“निदाघे घर्म्मसन्तप्तं धातुसारं धराधराः। निर्य्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम्। सौवर्णं राजतं ताम्रमायसं तच्चतुर्व्विधम्। शिलाजं कटुतिक्तोष्णं कटुपाकं रसायनं। छेदि योगवहं हन्ति कफमेदोऽश्मशर्कराः। मूत्रकृच्छ्रं क्षयं श्वासं वातार्शांसि च पाण्डुताम्। अपस्मारं तथोन्मादं शोथकुष्ठोदरक्रिमीन्। सौवर्णन्तु जपापुष्पवर्णं भवति तद्रसात्। मधुरं कटुतिक्तञ्च शीतलं कटुपाकि च। राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च। ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णं च जायते। लौहं जटायुपक्षाभं तत्तिक्तं लवणं भवेत्। विपाके कटुकं शीतं सर्व्वश्रेष्ठमुदाहृतम्।” भा.पू.१भ. धा.व.। तत्संग्रहणक्रिया यथा—उष्णे लौहपात्रे त्रिफलादशमूलक्वाथे निक्षिप्य प्रचण्डातपे संस्थाप्य च दधिसरवदूर्द्धीभूतं यत् तदग्राह्यम्। ततः शालसारादिगणक्वाथैर्भावनीयम्। इत्येकम्। मतान्तरं यथा—“गोदुग्धत्रिफलाभृङ्गद्रवैः पिष्टं शिलाजतु। दिनैकं लौहजे पात्रे शुद्धिमायात्यसंशयमिति।” शा.कौ.। शिलाजतु प्रथमं केवलजलधौतं शुष्कं कारयेत् वह्निमंलमपाकर्त्तुम्। ततश्च तदन्तःस्थसन्तानिकाकीटपतङ्गदंशदुष्टौषधिदोषनिवारणाय निम्बगुडूचीसर्पिर्भिः यथावत् भावनां दद्यात्। ततो रौद्रे चत्वारि कृष्णायसपात्राणि जतुसहितानि स्थापयित्वा शिलाजत्वर्द्धं वारि तथा उष्णं क्वाथं तदर्द्धञ्च दत्त्वा संमर्द्य शोषयेत्। शोषिते च उपरि सन्तानिकावत् रविरश्मितापात् यत् कृष्णमुपैति तत् द्वितीयपात्रे यवतो ग्राह्यम्। तत्र च पुनः कोष्णं जलं दत्त्वा पुनस्तृतीयपात्रे गालयेत् पश्चाच्च चतुर्थे पात्रे गालयेत्। एवं कृते यदा समस्तं मलमधो याति, विशदञ्च कृष्णं जलमूर्द्धमुपैति, तदा तत्सलिलं मलञ्च परित्यजेत्। शा.। दशमूलक्वाथेनोन्मेनालोड्य प्रचण्डातपे प्रस्तरभाजने कांस्ये वा स्थापयेत्। ऊर्द्धभूतं दधिसरवत् मलालिकावहणं कर्त्तव्यं। तदनु शिलागुड़िकोक्तकाकोल्याद्यष्टाविंशतिद्रव्यक्वाथैः भावनीयं। तदनु शालसारादिगणक्वाथैः त्रिफलाक्वाथैः तदनु धान्यपटोलादिक्वाथैः तदनु गुडूचीक्वाथैः तदनु यष्टीमधुक्वाथैश्च भाव्यम्। रस.र.। तत्सेविनो निषिद्धमाह “कुलत्थां काकमाचीञ्च कपोतांश्च सदा त्यजेत्।” वा.उ.३९अ.। चरनादे तु काकमाचीकपोतौ न निषिद्धौ। अस्य शिलाजतोः सविस्तरवर्णनं सु.सू चि.मधुमेहचिकित्सायां मृग्यम्।

शिलाजा। स्त्री। श्वेतशिलानामपाषाणभेदे। [रा.नि.व.५।

शिलाञ्जनी। स्त्री। कालाञ्जन्याम्। रा.नि.व.४।

शिलाटकः। पुं। विलेपने। मे.।

शिलाजतुलेहः। पुं। प्रमेहाधिकारे लेहः। यथा—“शिलाजतुपलान्यष्टौ सितायाश्च पलाष्टकं। हरीत्यास्तु फलं मूलं शृङ्गी धात्री कणा तुगा। एषामेषां पलस्यातुर्जातस्य मिलितं पलम्। संचूर्ण्य मिलितं कृत्वा निहन्ति मधुना लिहन्……।” रस.र.।

शिलात्मजम्। क्ली। मुण्डलोहे। रा.नि.व.१३।

शिलात्मिका। स्त्री। मूषिकायां। श.च.।

शिलात्वक्। स्त्री। श्वेतशिलानामपाषाणभेदे। रा.नि.व.५।

शिलाद्रुः। पुं, क्ली। शैलेयनामकगन्धद्रव्ये। শৈলজ। रा.नि.व.१२। शिलाजतुके। वै.निघ.।

शिलाद्वन्द्वम्। क्ली। शैलेये। শৈলজ। हिं पत्थरफुल।

शिलाधातुः। पुं। सुवर्णगैरिके। স্বর্ণ গেরি। रा.नि.व.१३। कठिन्याम्। थड़ि। प.मु.। शर्करायां। चिनि। श.र.। [लोके। रा.नि.व.९।

शिलान्तः। पुं। चम्पककाञ्चे। चापटा इति

शिलापट्टः। पुं। पेषणशिलायां। शिल। शब्दकल्पः।

शिलापुत्रः। पुं। नोड़ा इति ख्याते प्रस्तरखण्डे। श.र.। [पत्थरफुल। रा.नि.व.१२।

शिलापुष्पम्। क्ली। शैलेये। শৈলজ। हिं

शिलाप्रसू(त)नम्। क्ली। शिलापुष्पे। শৈলজ। रा.नि.व.१२।

शिलाभवम्। क्ली। शैलेये। শৈলজ। जटा.।

शिलाभिष्यन्दः। पुं। शिलाजतुके। शिला जतु। वै.निघ.।

शिलाभेदः (दी) (भित्)। पुं। पाषाणभेदे। পাতর কুচ, পাথরচুর। र.मा.। रा.नि.व.५। वै.निघ. अ.चय,चि.मार्कवादिचूर्णे।

भैष.क्षीरी.चि. पुष्पानगचूर्णे। करज्योड़िपाषाण-भेदे। भा.म.कुष्ठ.चि.।

शिलामलः । पुं । शिलाजतुके । वैनिघ.।

शिलारम्भा । स्त्री । काष्ठकदल्याम् । रा.नि.व.११ ।

शिलारसः । पुं । स्वनामख्यातखनिजगन्धद्रव्य-विशेषे । शिलारस । गुणाः--कटुकः स्वादुः स्नि-ग्धोष्णः शुक्रकान्तिकृत् वृष्यः कण्ठ्यः स्वेदकुष्ठ-ज्वरदाहग्रहापहश्च । भा. । स मधुना भावितः शुद्धो भवति । एवं कुङ्कुमं घृतेन, अगुरु कुङ्कु-मेन, ग्रन्थिपर्णं गोमूत्रेण मधुरिका समधुजलेन, तेजपत्रं तण्डुलोदकेन भावितञ्च शुद्धं भवति । भैष.वा.व्या.चि. ।

शिलावल्का । स्त्री । औषधिविशेषे । हिं शि-लावाक् । गुणाः—हिमा स्वादुः मूत्रकृच्छ्रमेहसू त्ररीधाश्मरीशूलज्वरपित्तघ्नी च । रा.नि.व.५ ।

शिलाव्याधिः । पुं । शिलाजतुनि । त्रिका.।

शिलासनम् । क्ली । शैलेये । शैलज । श.र.।

शिलासारम् । क्ली । लौहे । हे.च. ।

शिलाह्वा । स्त्री । शैलेये । भा.म.३भ.अश्म. चि. । मनःशिलायाम् । मनछाल । र.सा.सं.वृह-च्चिन्तामणिरसे । कुष्ठल्याम् । कुलुत्थ । रा.नि.व.२३ । क्ली । शिलाजतुनि ।

शिलास्वेदः । पुं । शिलाजतुके । वै.निघ. ।

शिलाक्षारः । पुं । चूर्णके । चून । वै.निघ. ।

शिलिः । पुं । भूर्जवृक्षे । श.मा. । [व.५ ।

शिलिगर्भजा । स्त्री । पाषाणभेदके । रा.नि.

शिलिन्दः । पुं । मत्स्यविशेषे । शिलन् माछ । गुणाः—"शिलिन्दः श्लेष्मलो बल्यो विपाके मधु-रो गुरुः । आमवातकरो हृद्यो वातपित्तहरो म-तः ॥" राज.३प. ।

शिली । स्त्री । गण्डूपद्याम् । কেঁচো । मे. ।

शि(लि)लीन्ध्रः (कः) । पुं । (Agaricus Compestris.) Mushroom. भूच्छत्राके,छ-त्रिकायां । পোয়াল ছাতু, কোড়ক ছাতা । मे. । भूमिकदलीवृक्षे । मे. । हारा. । वसुधा मे. । चित्रफलकमत्स्ये । भा.पू.१भ.शा.व. । जटा. ।

करकायां । मे. । त्रिपुटायां । विश्वः ।

शिलीन्ध्रपुष्पम् । क्ली । कदलीपुष्पे । मे. ।

शिलीन्ध्री । स्त्री । किञ्चुलुकायां । मृत्तिकायां। मे. ।

शिलीपदः । पुं । श्लीपदरोगे । গোদ । श.र.।

शिलीमुखः । पुं । भ्रमरे । श्रम. । [निघ. ।

शिलुः । पुं । बहुवारवृक्षे । চালতা গাছ । वै.

शिलेयम् । क्ली । शैलेये । শৈলজ । श.र. ।

शिलोत्थम् । क्ली । शैलजनामगन्धद्रव्ये । শৈ-লজ । रा.नि.व.१२ । शिलाजतुनि । प.मु. ।

शिलोद्भवम् । क्ली । शैलजनामगन्धद्रव्ये । শৈ-লজ । रा.नि.व.१२ । शिलाजतुनि । वै.निघ.२भ. मार्कवादिचूर्णे वा.उ.३४अ.। पीतचन्दने । श.च.।

शिलोद्भिदा । स्त्री । पाषाणभेदे । পাথর কুচা । भा.म.३भ. ।

शिल्पिका (नी) । स्त्री । महाराष्ट्रादौ ख्या-ते तृणविशेषे । मं लाहनसिंपि । कं किरिय-सिंपिगे । गुणौ—मधुरा शीता च । तद्बीजं ब-लवीर्य्यदम् । रा.नि.व.८ । [रा.नि.व.११ ।

शिल्पी (न्) । पुं । नखे । नखी इति भाषा ।

शिवम् । क्ली । धात्रीफले । আমলা । म.द. नकुल१३अ. । फटिकारिकायाम् । ফট্‌কিরি । प.मु. । सैन्धवे । रा.नि.व.६ । सामुद्रलवणे । सि-न्दूरे । प.मु.। जले । उणा. । मरिचे । तिलपुष्पे । कुन्दपुष्पे । रौप्ये । चन्दने । लौहे । वै.निघ. । श्वे-तटङ्कणे । रा.नि.व.६ ।

शिवः । पुं । गुग्गुलौ । रा.नि.व.१२ । पारदे । रा.नि.व.१३ । कैलिकदम्बे । प.मु. । See महा-कदम्बः । धुस्तूरवृक्षे । रा.नि.व.१० । टङ्कणक्षारे । रा.नि.व.६ । पुण्डरीकद्रुमे । मे. । बालुके । मे. । भासपक्षिणि । काके । वकुलवृक्षे । वै.निघ. ।

शिवजा । स्त्री । लिङ्गिनीलतायाम् । শিব-লিঙ্গিনী লতা । रा.नि.व.३ ।

शिवतेजः । क्ली । पारदे । र.सा.सं ।

शिवदारु । क्ली । देवदारुणि । তেল দেব-দারু । रा.नि.व.१२ ।

शिवद्रुमः । पुं । विल्ववृक्षे । रा.नि.व.११ ।

शिवद्विष्टा । स्त्री। केतकीवृक्षे । কেয়া গাছ। रा.नि.व.१० । [व्हकल्प: ।

शिवधातु: । पुं । पारदे । गोदन्तमणौ । श-

शिवधूप: । पुं । महिषाक्षगुग्गुलौ । वै.निघ.।

शिवनामा (न्) । पुं । पारदे । र.सा.सं. ।

शिवनिर्माल्यम् । क्ली । पुष्पादौ । रावणकृ-तकुमारतन्त्रम् ।

शिवपण्डित: । पुं । वैद्यकहितोपदेशकारे ।

शिवपत्र: । पुं । बिल्ववृक्षे । वै.निघ. ।

शिवपिण्डम् । क्ली । वकुलवृक्षे । वै.निघ. ।

शिवपुत्र: । पुं । पारदे । वै.निघ. ।

शिवपुष्पक: । पुं । अर्कवृक्षे । আকন্দ গাছ। रा.नि.व.१० ।

शिवप्रियम् । क्ली । वकपुष्पे । বকফুলের গাছ । धुस्तूरपुष्पे । रुद्राक्षे । रा.नि.व.११ । पुं । वकवृक्षे । जटा. । धुस्तूरवृक्षे । स्फटिके । रा.नि. व.१०।१३ । स्त्री । भङ्गायाम् । ভাঙ, সিদ্ধি । वै.निघ. ।

शिवप्रीति: । पुं । बिल्ववृक्षे । वै.निघ. ।

शिवब्राह्मी । स्त्री । ब्राह्मीशाकभेदे, शङ्खपु-ष्याम् । प.मु. ।

शिवमत: । पुं। श्वेतरक्तवसुकवृक्षे । रा.नि.व.५।

शिवमल्लक: । पुं । अर्ज्जुनवृक्षे । रा.नि.व.९ ।

शिवमल्लिका (ल्ली) । स्त्री । श्वेतरक्तार्कवृक्षे। শ্বেত ও রক্ত আকন্দ । रा.नि.व.५ । वकवृक्षे । বাকস্ গাছ । रा.नि.व.१० । (ल्ली) खिङ्गिनील-तायाम् । रा.नि.व.३ । श्रीवल्लीनामकण्टकवृक्षे । रा.नि.व.८ ।

शिवरस: । पुं । त्र्यहात्पर्य्युषितान्नोदकजरसे खनाम्ना महाराष्ट्रकर्णाटदेशे ख्याते । गुणा:—दी-पन: मधुराम्ल: दाहघ्न: मधुरस्तर्पणश्च। "अन्नोदज: शिवरस: त्र्यहात्पर्य्युषिते रसे ।" रा.नि.व.१५ ।

शिवलिङ्गी । स्त्री । खिङ्गिनीलतायाम् । रा. नि.व.३ । अर्कचि.नवमशतकी । [रा.नि.व.१० ।

शिववल्लभा । स्त्री । शतपत्र्याम् । সেউতি ।

शिववल्लिका (ल्ली) । स्त्री । शिवलिङ्गि-न्याम् । रा.नि.व.३ ।

शिववीज(र्य्य)म् । क्ली । पारदे । रा.नि.व. १३ । भा. । र.सा.सं. त्रैलोक्यडम्बररसे ।

शिवशित: । पुं । कफे । वै.निघ. ।

शिवशेखर: । पुं । वसुकवृक्षे । বকবৃক্ষ । रा.नि.व.५ । धुस्तूरवृक्षे । रा.नि.व.१० । मन्दा-रार्के । শ্বেতাকন্দ । वै.निघ. ।

शिवसाधनम् । क्ली । शालिधान्ये । प.मु. ।

शिवा । स्त्री । शृगाले । रा.नि.व.१९ । हरीत-क्यां । अम. । भा.म.४भ.कर्णरो.चि.अञ्जने । "अ-ञ्जनमथ शिवाकीतकम् ।" च.सू.४अ. । हरिद्रा-याम् । रा.नि.व.६ । नीलदूर्व्वायाम् । रा.नि.व. ८।२३ । गोरोचनायाम् । रा.नि.व.१२।२३ । बहुपुष्प्याम् । মেতি । रा.नि.व.२३ । शमीवृक्षे । শাঁই গাছ । रा.नि.व.८ । श्यामायां । শ্যামাল-তা । त्रिका. । आमलक्याम् । रा.नि.व.११ । भूम्यामलक्याम् । ভুঁই আমলা । आम्रातकवृक्षे । আমড়া গাছ । वै निघ. ।

शिवाख्या । स्त्री। वल्लिदूर्व्वायाम् । रा.नि.व.८।

शिवाघृतम् । क्ली। उन्मादे घृतविशेष: । गव्य-घृतं ४ श. । क्वाथार्थं पुंशृगालमांसं ६ श. । जलं ६४ श. शे १६ श. । दशमूलं प्र. ५ प. जलं ६४ श. शे. १६ श. । छागदुग्धं ८ श. । क-ल्कार्थं—यष्टिमधु मञ्जिष्ठा कुष्ठं रक्तचन्दनं पद्म-काष्ठं विभीतकं हरीतकी आमलकी वृहती तग-रपुष्पं विडङ्गं दाड़िमवीजं देवदारु दन्तीमूलं रे-णुकं तालीशपत्रं नागकेसरपुष्पं श्यामलता इन्द्र-वारुणीमूलं शालपर्णी प्रियङ्गु: मालतीपुष्पं का-कोली क्षीरकाकोली पद्मपुष्पं नीलपद्मं हरिद्रा दारुहरिद्रा अनन्तमूलं मेदा एला एलवालुकं पृश्निपर्णी प्र. २ तो. । रस.र. । भैष. ।

शिवाङ्क: । पुं । अगस्तिवृक्षे। ছোট বাসক । रा.नि.व.१० ।

शिवाटिका । स्त्री । श्वेतरक्तपुनर्नवायाम् । प.मु.वा.चि.३अ. । हिङ्गुपत्र्याम् । प.मु. । वंशप-त्र्याम् । তৃণবিশেষ । र.मा. । काकोदुम्बरिका-याम् । কাক ডুমুর । वै.निघ. ।

शिवात्मकम् । क्ली। सैन्धवलवणे। रा.नि.व.६।

शिवानी । स्त्री । जयन्तीवृक्षे । जन्ती गाछ । श.च. । [रा.नि.व.१० ।

शिवापीड़ः । पुं । अगस्तिवृक्षे । बक वृक्ष ।

शिवाप्रियः । पुं । छागे । त्रिका. ।

शिवाफला । स्त्री । शमीवृक्षे । रा.नि.व.१०।

शिवामूलम् । क्ली । दूर्व्वामूले । रत्नमाला.सं. बालग्रह-चि. ।

शिवारातिः । पुं । कुक्कुरे । श.मा. ।

शिवालयः । पुं । रक्ततुलसीवृक्षे । श.च. । क्ली । श्मशाने । हारा. । [व.१९ ।

शिवालुः । पुं । शृगालके । শেয়াল । रा.नि.

शिवास्मृतिः । स्त्री । जयन्तीवृक्षे । श.च. ।

शिवाह्लादः । पुं । अगस्तिवृक्षे । বক ফুলের গাছ । रा.नि.व.१० । [टवृक्षे । वै.निघ. ।

शिवाह्वयः । पुं । पारदे । भा. । श्वेतार्के । व-

शिवाह्वा । स्त्री । रुद्रजटायाम् । रा.नि.व.७।

शिवाक्षम् । क्ली । रुद्राक्षे । रा.नि.व.११ । वै.निघ.२भ.वा.व्या.चि. षड़शीतिगुग्गुलौ ।

शिविः । पुं । भूर्जवृक्षे । मे. ।

शिविका । स्त्री । खाद्यद्रव्यभेदे । यथा—"गोधूमचूर्णं निस्तुषं दुग्धेन सह मर्दयेत् । तन्तुयोग्यं भवेत्तावद्द दृषदीपरि कुट्टयेत् । हस्तेन तस्याः सूत्रेण समाः कृत्वा सुतन्तवः । शुष्कीकृतासु शिविका यथेच्छं भक्षणे भवेत् । उदके ता विपक्वा च दुग्धे शर्करया युते । चिक्वा सितास्वशिकरा बलदा गुरवी ग्रहाः । रुचिरास्थिसुसन्धानकर्त्तारः पित्तानिलापहाः ।" वै.निघ. ।

शिविरः । पुं । तृणधान्यभेदे । गुणाः—श्यामाकवत् । च.सू.२७अ. ।

शिवेशः । पुं । शृगाले । वै.निघ. ।

शिवेष्टः । पुं । अगस्तिवृक्षे । बक वृक्ष । रा.नि.व.१० । बिल्ववृक्षे । रा.नि.व.११ । स्त्री । दूर्व्वायाम् । नीलदूर्व्वायाम् । रा.नि.व.८ ।

शिशिरः । पुं । तन्नामकर्त्तौ । गुणाः—"शिशिरः शीतलोऽतीव रूक्षो वाताग्निवर्द्धनः ।" भा.राज १प. । हिमे । मे. । क्ली । उशीरे । रा.नि.व.१२ । चन्दने । वै.निघ. । स्त्री । रेणुकायाम् । রেণুক । नागरमुस्तायाम् । पाठायाम् । आकनादि । रा.नि.व.६ ।

शिशिरद्वयम् । क्ली। श्वेतरक्तचन्दनयोः। "एकं सितं चन्दनं मलयजसंज्ञकं । अन्यत् रक्तचन्दनसंज्ञकम् ।" वा.सू.१५अ.सारिवादौ । "मधूकं शिशिरद्वयम् ।" [नि.व.१८ ।

शिशुः । पुं । बालके । एकवार्षिकबालके । रा.

शिशुकः । पुं । शिशुमारे । শুশোক । अम. । मण्डलिसर्पविशेषे । सु.कल्प.४अ. । बालके । मे. । वृक्षभेदे । শিশু গাছ । हे.च. । भाङ्गाल इति ख्याते मत्स्यभेदे ।

शिशुगन्धा । स्त्री । मल्लिकाविशेषे । श.मा. ।

शिशुप्रियः । पुं । गुड़े । रा.नि.व.१४ ।

शिशुमारः । पुं । सपादजलजन्तुविशेषे । শুশোক । गुणाः—शङ्खवत् । सु.सू.४६अ. ।

शिशुवाह(ह्य)कः । पुं । वन्यच्छागे । हे.च. । त्रिका. ।

शिश्नः । पुं, क्ली । लिङ्गे । रा.नि.व.१८ ।

शिष्टः । पुं । आम्रवृक्षे । वै.निघ. ।

शिष्यः । पुं । छात्रे ।

शिह्लः(कः) । पुं । शिलारसे । শিলারস । लोवान् इति च केचित् । श.च.र.मा. ।

शिक्षा । स्त्री । वेदाङ्गविशेषे । र.मा. । शीशाकवृक्षे । श.मा. ।

शीकरम् । क्ली । सरलद्रवे । সরল আটা । मे. । पुं । तुषारे । अम. । वायौ । मे. ।

शीघ्रम् । स्त्री । लामज्जके, पीतोशीरे । रा. नि.व.१२ ।

शीघ्रकारी (इन्) । पुं । सन्निपातज्वरे । আশুকারি সন্নিপাত । स वातश्लेष्मोल्वणः । लक्षणं—"वातश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति। तस्य शीतज्वरो मूर्च्छा क्षुत्तृष्णा पार्श्वनिग्रहः। शूलमस्विद्यमानस्य तन्द्रा श्वासश्च जायते । असाध्यः सन्निपातोऽयं शीघ्रकारीति कथ्यते ।" भा.म.१भ.।

शीघ्रचेतनः । पुं । कुक्कुरे । श.मा. ।

शीघ्रजन्मा (न्) । पुं । कण्टककरञ्जे । नाटा-करञ्ज । श.र. ।

शीघ्रजीर्णः । पुं । तण्डुलीयशाके । काँटानटिया । श.मा. । [रा.नि.व.१० ।

शीघ्रपुष्पः । पुं । अगस्तिवृक्षे । छोट बाकस् ।

शीघ्रप्ररोही (न्) । पुं । शणवृक्षे । वै.निघ. ।

शीघ्रा । स्त्री । दन्तीवृक्षे । रा.नि.व.६ ।

शीतम् । क्ली । प्रपौण्डरीके । पुण्डरिया । रा.नि.व.१२ । त्वचे । गुड़त्वक् । रा.नि.व.६ । चन्दने । वा.सू.१५अ. । "पुन्नागशीतं मदनीयहेतुः ।" बर्बरचन्दने । सुगन्धतृणे । र.मा. । शीतवीर्य्ये । भा. । "शीतन्तु तनुते जराम् ।" जले । श.मा. । चि । शीतले । श.च. ।

शीतः । पुं । कर्पूरे । रा.नि.व.१२ । निम्बवृक्षे । रा.नि.व.९ । वेतसवृक्षे । प.मु. । शेलुवृक्षे । चालता गाछ । र.मा. । रा.नि.व.११ । भा. । पर्पटके । क्षेत्पापड़ा । रा.नि.व.५ । तन्नामकर्त्तौ । शीतकाल । अशनपर्णीवृक्षे । श.र. ।

शीतकः । पुं । अशनपर्णीवृक्षे । श.र. । वृश्चिके । श.मा. । शीतकाले । मे. । [वै.निघ. ।

शीतकणा । स्त्री । श्वेतजीरके । शादा जीरा ।

शीतकषायः । पुं । पलमितद्रव्यात् षट्पलमिते तोये निमज्य निशि रक्षितात् यः कषायो भवति स शीतकषायः । तदुक्तं—"द्रव्यादापोथितात्तोये तत्पुनर्निशि संस्थितम् । कषायो योऽभिनिर्याति ।" शौनकः । चरकं । प.प्र.१म । वा.चि.१अ. । तत्परिमाणं फाण्टवत् । शार्ङ्ग.म.४अ. । "वयोरोगादिके मध्ये क्वाथः पेयश्चतुःपलः । शीतस्वरसयोरेवं विधिर्ज्ञेयः कषाययोः ॥" इति चक्रपाणिः । अन्यच्च । "द्रव्यात् पूतात्पमञ्चस्तं षड्भिस्तोयपलैः सुतम् । निःशेषितं स विज्ञेयो हिमः शीतः कषायकः ॥ रक्तोत्पलं हतं तैलं पुरं वञ्ची दक्षं तथा । गव्याणकं प्रयोक्तव्यं कषाये हिमसंज्ञके ॥" तोड़ ।

शीतकालः । पुं । हेमन्ते ऋतौ । स च अग्रहायणपौषमासात्मकः । मे. । पौषमाघाविति सुश्रुतम् ।

शीतकुम्भः । पुं । करवीरवृक्षे । र.मा. ।

शीतकुम्भिका (कुम्भी) । स्त्री । कुम्भीरिकालतायां । कुम्भीरे लता । च.चि.३अ. । (म्भी) जलजवृक्षे । शिउलीछोप इति लोके । पाताड़ि । र.मा. । [निघ. ।

शीतकूर्चिका । स्त्री । लघुवाच्यालके । वै.

शीतकेशरी(रसः) । पुं । रसप्रदीपोक्ते शीतज्वरे रसः । "पारदं गन्धकञ्चैव तुल्यञ्च दरदं विषम् । विषादष्टगुणं योज्यं मरिचं विश्वभेषजम् । अश्वगन्धा च विजया कासमर्द्दः कटिल्लकः । चतुर्णाञ्च रसैरेतैश्चूर्णान्येतानि मर्द्दयेत् । तुलस्यास्तु दलैः सार्द्धं भक्षितो रक्तिकामितः ।" भा. ।

शीतगन्धम् । क्ली । श्रीखण्डचन्दने, श्वेतचन्दने । रा.नि.व.१२ ।

शीतगात्रः । पुं । तन्नामकसन्निपाते । शीताङ्ग सन्निपात । निदा. । तस्य लक्षणं—"हिमशिशिरशरीरः सन्निपातज्वरी यः श्वसनकसनहिक्का-मोहकम्पप्रलापैः । क्लमबहुकफवातादाहवम्यङ्गपीड़ाखरविकृतिभिरार्त्तः शीतगात्रः स उक्तः ॥"

शीतगुणकर्म्म (न्) । क्ली । गुणाः—ह्लादनलं मूर्च्छातृष्णास्वेददाहघ्नत्वञ्च । सु.सू. ।

शीतचम्पकः । पुं । दर्पणे । मे. ।

शीतच्छायः । पुं । वटवृक्षे । वै.निघ. ।

शीतदन्तः । पुं । दालनापरनामकदन्तरोगे । लक्षणं—"वातादुष्णसहा दन्ता शीतस्पर्शाधिकव्यथाः । दाल्यन्त इव शूलेन शीताख्यो दालनश्च सः ॥" वा.उ.२१ अ. ।

शीतदन्तिका । स्त्री । नागदन्त्यां । रा.नि.व.२० ।

शीतदीप्यम् । क्ली । श्वेतजीरके । वै.निघ. ।

शीतद्रुः । पुं । चीरमोरटे । क्षीरकराड़ । प.मु. ।

शीतपत्रा । स्त्री । श्वेतलज्जालुकायाम् । श्वेत लज्जावती । वै.निघ. । [र.मा. ।

शीतपर्णी । स्त्री । अर्कपुष्पिकायां । अर्कहुली ।

शोथः (कः) । पुं । तन्नामकरोगे । फुलोरोग । रा.नि.व.२० । तस्य विप्रकृष्टनिदानं यथा—"शुद्ध्यामयाऽभक्तकृशाबलानां क्षाराम्लतीक्ष्णोष्णगुरूपसेवा । दध्याममृच्छाकविरोधिपिष्टगरोपसृष्टान्ननिषेवणाच्च । अर्शांस्यचेष्टा वपुषो ह्यशुद्धिर्मर्माभिघातो विषमा प्रसूतिः । मिथ्योपचारः प्रतिकर्म्मणाञ्च निजस्य हेतुः श्वयथोः प्रदिष्टः ॥" सन्निकृष्टनिदानमाह—"दोषैः पृथग्द्वयैः सर्व्वैरभिघाताद्विषादपि । सर्व्वं हेतुविशेषैस्तु रूपभेदान्नवात्मकः ॥" सम्प्राप्तिपूर्व्वं सामान्यलक्षणमाह—"रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिः शिराः । नीत्वा रुद्धगतिस्तैर्हि कुर्य्यात्त्वङ्मांससंश्रयम् । उत्सेधं संहतं शोथं तमाहुर्निचयादतः ॥ सगौरवं स्यादनवस्थितत्वं सोत्सेधमुष्माथ शिरातनुत्वं । सलोमहर्षं च विवर्णता च सामान्यलिङ्गं श्वयथोः प्रदिष्टम् ॥" असाध्यलक्षणमाह—"श्वासस्पिपासा छर्द्दिश्च दौर्ब्बल्यं ज्वर एव च । यस्य चान्ने रुचिर्नास्ति शोथिनं तं विवर्ज्जयेत् ॥" मा.नि. । स षड्विधः—अवयवसमुत्थः शोफोऽभिहितः लक्षणतः प्रतीकारतश्च । सर्व्वसरस्तु पञ्चविधः यथा—वातपित्तकफशोणितसन्निपातविषनिमित्तः । तत्र वातजोऽरुणः कृष्णो वा, पित्तजः पीतः, कफजः पाण्डुवर्णः, सन्निपातजः सर्व्ववर्णः, शोणितजः पीतः, आगन्तुजः विषजो वा लोहितावभासश्च । पथ्यं पिष्टान्नाम्ललवणमद्यमृत्तिकादिवानिद्रास्त्रीसेवनघृततैलादि त्याज्यम् । सु.चि.२३अ. । अपरञ्च शोथरोगलक्षणं—"वेदनास्थौल्यसंयुक्तं मृदुस्पर्शन्तु शीतलं । शोथं वातात्मकं विद्याच्छजिदेहसमुद्भवं । रक्तपित्तेन शोथः स्यात् कृष्णपाकेन संयुतः । वेदनोषसमायुक्तः नाभ्यच्छोच्छूनकस्तथा । कठिनत्वासहत्वाभ्यां युक्तं रुग्दाहवर्ज्जितं । श्लेष्मशोथं विजानीयाद्रक्तजम्पित्तलक्षणम् । सर्व्वलिङ्गं विदुर्वैद्याः सन्निपातसमुद्भवम् ॥" ज.द.४६अ. ।

शोथकम् । क्ली । कङ्कुष्ठे । গৈরিক ধাতু । रा.नि.व.१३ ।

शोथघ्नी । स्त्री । रक्तपुनर्नवायाम् । अम. । "शोथघ्नीन्द्रयवा पाठा ।" भा.म.१भ.शोथातीसा.चि. । शालपर्ण्याम् । रा.नि.व.४ । [दा. ।

शोथजनेत्रपाकः । पुं । सर्व्वाक्षिरोगे । नि-

शोथजित् । पुं । भल्लातकवृक्षे । ভেলা গাছ । प.मु. । पुनर्नवायां । শেয়াপুণ্যা । त्रिका. ।

शोथजिह्मः । पुं । पुनर्नवायाम् । त्रिका. ।

शोथारिः । पुं । पुनर्नवायां । रस.र.वह्निभल्लातरसे ।

शोथोदरारिलौहः । पुं । उदराधिकारे औषधम् । क्वाथार्थे—पुनर्नवा गुड़ूची चित्रकमूलं गोरक्षतण्डुलामूलं (গোরক্ষচাকুলিয়ার মূল) माणमूलं स्नुहीमूलं (তেকাঁটা সিজুর মূল) सूर्य्यावर्त्तमूलं (হুড়হুড়ের মূল) अर्कमूलं प्र. ८ प.

वारि ६४ प्र. गो. १६ प्र. । क्वाथे पुटितलौहं ८ प. घृतं ८ प. शर्करोरं २ प. गुड़ोचीरं ४ प. गुडगुग्गुलु: २ प. मस्तकपारदयो: यथाक्रमं प चाईपलयो: कज्जलि: । अथ एकत्र सम्मिश्य पचेत् । आसन्नपाके जयपालबीजं मरततामं सताभं कटुकं चित्रकमूलचूर्णं वनशूरणचूर्णं शरपुङ्खाचूर्णं अपटाकर्ण(वेंटु)चूर्णं पलाशबीजचूर्णं चीरिकाचूर्णं(चिरातेचूर्ण) तालमूलीचूर्णं त्रिफलाचूर्णं विडङ्गचूर्णं त्रिवृच्चूर्णं दन्तीमूलचूर्णं सूर्य्यावर्त्तमूलचूर्णं गोरक्षतण्डुलामूलचूर्णं पुनर्नवाचूर्णं हाड़चूर्णञ्च मिलित्वा ८ प. प्रक्षिप्य समालोड्य च घृतभाण्डे स्थाप्य: । भैष. । रस.र. ।

शोधकम् क्ली । कङ्कुष्ठे । रा.नि.व.१३ ।

शोधन: । त्रि । शोधनद्रव्ये निम्बादौ । भा.म. ४भ.योनिरो.चि. । शुद्धिकारके प्रलेपादौ । भा. । क्ली । काशीसे । शिरेकम् । कुङ्कुष्ठे । रा.नि.व. १३ । धातुशुद्धिकरणे । तच्च वमनविरेचनास्थापनशिरोविरेचनभेदेन चतुर्द्धा भवति । वा.सू.१५ अ. । विष्ठायां । श.च. । पुं । द्वादशांशावशिष्टकषाये । "शोधनो द्वादशांशक: ।" रा.नि.व. २० । निम्बवृक्षे । रा.नि.व.११ । स्त्री (नी) । सम्मार्जन्याम् । अम. । नील्याम् । रा.नि.व.४ । चित्रकूटख्याततास्रवल्लीलतायाम् । रा.नि.व.३ । स्नुह्यौ । वै.निघ. ।

शोधनीवीजम् । क्ली । जैपालवीजे । रा.नि. व.६ ।

शोफ: । पुं । शोथरोगे । फुला । रा.नि.व.२० । सर्व्वाङ्गरोगे । त्रिका. ।

शोफकर: । पुं । भल्लातके । वै.निघ. ।

शोफकृत् । पुं । भल्लातकवृक्षे । भा. ।

शोफघ्नी । स्त्री । शालपर्ण्याम् । रा.नि.व.४ । रक्तपुनर्नवायाम् । रा.नि.व.५ ।

शोफनाशन: । पुं । नीलवृक्षे । रा.नि.व.८ । त्रि । शोथनाशके ।

शोफहारी (इन्) । पुं । वनवर्व्वरिकायाम् । बावुई तुलसी । रा.नि.व.१० ।

शोफारि: । पुं । हस्तिकन्दे । वै.निघ. ।

शोभनम् । क्ली । पद्मे । श.च. । कङ्कुष्ठे । वै.निघ. । त्रि । सुन्दरे । [गाछ । श.च. ।

शोभनक: । पुं । शोभाञ्जनवृक्षे । सजिना

शोभना । स्त्री । हरिद्रायाम् । रा.नि.व.६ । गोरोचनायाम् । रा.नि.व.१२ ।

शोभनानन: । पुं । सुगन्धार्ज्जके । वै.निघ. ।

शोभनीया । स्त्री । गोरक्षदुग्धायाम् । महादुग्धौर्य्याम् । मुडौरी । वै.निघ. ।

शोभा । स्त्री । हरिद्रायाम् । रा.नि.व.६ । गोरोचनायां । रा.नि.व.१२। शुक्लजात्यां । চামিলি वै.निघ. ।

शोभाञ्जन: । पुं । (Moringa ptery-gosperma. Syn. Hyperanthira moringa.) Horse radish tree. नीलशिग्रुवृक्षे । नील सजिना गाछ, (সেমগ'), सजना । हिं सोहिञ्जन, सञ्जन । मं कालासेगुवा । कं करियनुग्गि । तें मुनगा । ता. मोरुङ्ग । वम्. शेगव, सेगत । गुणा:—तीक्ष्ण: कटु: स्वादूष्ण: पिच्छिल: क्रमिवातशूलघ्न: चक्षुष्य: रोचनश्च । रा.नि.व.७ । तत्पुष्पं—कटुतीक्ष्णोष्णं स्नायुशोथकरं क्रमिघ्नं वातकफघ्नं विद्रधिप्लीहगुल्महरं । मधुशिग्रुपुष्पं नेत्रहितं रक्तपित्तप्रसाधनञ्च । शोभाञ्जनफलं (तें मुनगपंडु) स्वादु कषायं कफपित्तघ्नं शूलकुष्ठक्षयश्वासगुल्मघ्नं दीपनञ्च । भा.पू.१भ.शा.व. ।

शोलिका (ली) । स्त्री । वनहरिद्रायाम् । वन हलुद । सालि, कड़िविषका, करिसिनि, इति कोङ्कणे प्रसिद्धा । गुणा:—कटु: गौल्या कच्चा तिक्ता दीपनी च । रा.नि.व.७ ।

शोष: । पुं । राजयक्ष्मणि । सन्तापे । रा.नि.व. २० । धातुक्षये । मा.नि. । यक्ष्मरोगविशेषे । तन्निरुक्ति: यथा—"अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा: । क्षीयन्ते धातव: सर्व्वे तत: शुष्यति मानव: ॥" इति । शोषे उत्पन्ने प्रतिलोमक्षयो भवति तद्यथा—शुक्रे क्षीणे मज्जा, मज्जनि क्षीणे अस्थि च क्षीयते पूर्व्वं पूर्व्वं क्षीयते । स द्विधा रसोर:क्षतभेदेन । See राजयक्ष्म ।

शोषणम् । क्ली । शुण्ठ्याम् । रा.नि.व.६ । पिप्पल्यां । रस.र.चन्द्रोदयरसे । "जातीफलं शोष-

भिमूत्रपुष्पम् ॥" पुं। षोड़शांशावशिष्टकषाये। "विशोष: षोड़शांशस्य।" रा.नि.व.२०। श्योषा-कवृचे। শোণা গাছ। भा.।

शोषसम्भवम् । क्ली। पिप्पलीमूले। रा.नि.व.६।

शोषहा (न्) । पुं। जलापामार्गे। वै.निघ.।

शोषापहा । स्त्री। वल्लीयष्टिमधुके। रा.नि.व. ६।

शौकरी । स्त्री। वाराहीकन्दे। वै.निघ.।

शौक्तिकम् । क्ली। मौक्तिके। मुक्ता। भा.। स्त्री (का)। मुक्ताशुक्तौ। झिनुक। वै.नघ.।

शौक्तिकेयम् }
शौक्तेयम् } क्ली। मुक्तायाम्। प.मु.।

शौक्तिकेय: । पुं। विषे। प.मु.। सोमलतायाम्। वै.निघ.। विषभेदे। अम.। शुक्तिकोर्देश-विशेषस्तत्र भव: शौक्तिकेय:। भ.।

शौक्लम् । क्ली। शुक्लतायाम्। अम.।

शौग्रम् । क्ली। शोभाञ्जनवीजे। সজিনাবীজ। वै.निघ.। [च.द.दिनचर्या।

शौचविधि: । पुं। मूत्रपुरीषोत्सर्गादिकार्य्ये।

शौचाधानम् । क्ली। पवित्रतानुष्ठाने। गुणा: —"मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनं। पाद-योर्मलमार्गाणां शौचाधानमभीक्ष्णश:॥" राज.१ प.।

शौटीर्य्यम् । क्ली। शौण्डीरे। वीर्य्ये। श.र.।

शौण्ठी । स्त्री। पिप्पल्याम्। रा.नि.व.२३।६। कृष्णकटभीवृचे। रा.नि.व.६। See कटभी। चव्ये। চই। विश्व.।

शौण्ड: (ण्डी) । पुं,स्त्री। देवधान्ये। कुक्कुटे। वै.निघ.। स्त्री (ण्डी)। पिप्पल्याम्। वै.निघ.।

शौण्डिकम् । क्ली। पिप्पलीमूले। वै.निघ.।

शौण्डिकप्रिय: । पुं। आम्रवृचे। वै.निघ.।

शौधिका । स्त्री। रक्तकन्नी। লাল কাংনী। दे.च.।

शौभ: । पुं। गुवाकवृचे। श.मा.।

शौभाञ्जन: । पुं। शोभाञ्जनवृचे। भ.वि.।

शौरिप्रियम् । नीलहीरके। प.मु.। See इन्द्रोपलम्।

शौरिरत्नम् । क्ली। नीलमणौ। रा.नि.व.१३।

शौल्फम् । क्ली। शुलफाशाके। शब्दकल्प:।

शौल्यशीत: । पुं। चैचै। জনার। प.मु.।

शौषिर: । पुं। दन्तवेष्टगतरोगविशेषे। लचणं यथा—"श्वयथुर्दन्तमूलेषु रुजावान् कफरक्तज:। लालास्रावी स विज्ञेय: कण्डूमान् शौषिरो गद:॥" सु.नि.१६अ.।

शौष्कल: । त्रि। मत्स्यमांसभचके। अम.।

श्मन् । क्ली। मुखे। भ.।

श्मश्रु । क्ली। पुंमुखे दीर्घलोमराजिषु। দাড়ি। दाड़िकर्त्तनगुणा:—"पौष्टिकं बल्यमायुष्यं शौच-रूपविराजनं। केशश्मश्रुनखादीनां कर्त्तनं सम्प्र-सादनम्॥" राज.३प.।

श्मश्रुमुखी । स्त्री। श्मश्रुयुक्तनार्य्यां। श.र.।

श्मश्रुशेखर: । पुं। नारिकेलवृचे। वै.निघ.।

श्यामम् । क्ली। मरिचे। सिन्धुलवणे। मे.। पुं। श्यामाके। শ্যামা ঘাস। रा.नि.व.१६। वृ-द्धदारके। বীজতাড়ক। कोकिले। मे.। धुस्तू-रवृचे। रा.नि.व.१०। पीलुवृचे। रा.नि.व.११। दमनकवृचे। गन्धतृणे। विश्व:। त्रि। कृष्णवर्णे।

श्यामक: । पुं। स्वनामख्याततृणधान्यविशेषे। শ্যামাধান। वम्. सांवा। कं सामे। तैं चाम-धान्यम्। गुणा:—मधुर: स्निग्ध: कषाय: लघु: शीतल: वातकर: कफपित्तघ्न: संग्राही विषदोष-घ्नश्च। रा.नि.व.१६। क्ली। रोहिषतृणे। गन्धतृণ. वा रामकर्पूर। रा.नि.व.८।

श्यामकण्ठ: । पुं। मयूरे। हला.। श्यामक-ण्ठपचिणि। নীলকণ্ঠ পাখী। शब्दकल्प:।

श्यामकन्दा । स्त्री। अतिविषायाम्। रा.नि. व.६। [नि.व.८।

श्यामकाण्डा । स्त्री। गण्डदूर्व्वायाम्। रा.

श्यामग्रन्थि: । स्त्री। गण्डदूर्व्वायाम्। रा. नि.व.८। [পাথী। वै.निघ.।

श्यामचूड़ा । स्त्री। कृष्णचटकायाम्। শ্যামা

श्यामपत्रः । पुं । तमालवृक्षे । श.च. । स्त्री (त्रा) । जम्बूवृक्षे । जाम गाछ । वै.निघ. ।
श्यामपर्णः । पुं । शिरीषवृक्षे । वै.निघ. ।
श्यामभूषणम् । क्ली । मरिचे ।
श्याममृगः । पुं । कृष्णवर्णहरिणे । श. ।
श्यामलः । पुं । पिप्पलवृक्षे । अश्वत्थ गाछ । रा.नि.व.११ । मद.व.५ । नीलभृङ्गराजे । नील-पुष्प भीमराज । रा.नि.व.४ । शिरीषवृक्षे । रा.नि.व.८। महाविषकृष्णवृश्चिकभेदे । सु.कल्प.८ष. । See वृश्चिकः । [व.२ ।
श्यामलचूड़ा । स्त्री । रक्तगुञ्जायाम् । रा.नि.
श्यामलता । स्त्री । श्यामानामलतायाम् । श्यामा लता । प.मु. ।
श्यामला (ली) । स्त्री । गन्धमूलीमाकन्याां । रा.नि.व.७ । अश्वगन्धायाम् । रा.नि.व.४ । कृष्णकटभ्याम् । रा.नि.व.८ । कस्तूर्य्याम् । मृगनाभि । रा.नि.व.१२ । जम्बूवृक्षे । जाम गाछ । रा.नि.व.११ ।
श्यामलालः । पुं । सङ्केपरवावलीकारे ।
श्यामलालुः । पुं । नीलालुके । नील आलू । रा.नि.व.७ । [रा.नि.व.४ ।
श्यामलिका । स्त्री । नील्याम् । नीलगाछ ।
श्यामलेक्षुः / **श्यामवंशः** } पुं । कृष्णेक्षौ । काजलि इक्षु । रा.नि.व.१४ ।
श्यामशालिः । पुं । कृष्णशालिधान्ये । काल धान । रा.नि.व.१६ ।
श्यामसर्पः । पुं । कृष्णसर्पे । चि.क्र.क.१स. ।
श्यामा । स्त्री । दृष्टार्त्तवायां मध्यमस्त्रियि । रा.नि.व.१८ । प्रियङ्गौ । रा.नि.व.१२ । च.द. वा.व्या.चि.एकादशशतीमहाप्रसारणीतैले । छिन्नायाम् । गुलञ्च । रा.नि.व.३ । कृष्णमूलचित्रतायाम् । काल तेउड़ी । मे. । रा.नि.व.६ । सु.सू.३८ष. । पिप्पल्याम् । वै.निघ.ज्व.चि.कल्याणघृते । वा.व्या.त्रिकशूलचि. । हरिद्रायाम् । रा.नि.व.६ । वन्दायां । मान्दड़ा । नीलपुनर्नवायां । रा.नि.व.५ । नीलदूर्व्वायां । रा.नि.व.८ । तुलसीवृक्षे । पद्मबीजे । रा.नि.व.१० । नीलिन्याम् । नील । रा.नि.व.४ । पक्षिविशेषे । श्यामा पाखी । रा.नि.व.१९ । कस्तूर्य्यां । मृगनाभि । गौरीचनायाम् । रा.नि.व.१२ । कृष्णसारिवायां । रा.नि.व.१२ । सोमलतायां । गुन्द्रायां । गड़-गड़े । त्रिक. । लताकस्तूर्य्यां । अजमर्दायां । ति-ऽपुष्यौ । प.मु. । वृद्धदारके । भा. । "काकजङ्घा श्यामा ।" च.द.ज्व.चि.शा.वा.चि.अलम्बु-षाद्यचूर्णे । सु.मू.४४ष. । शिंशपावृक्षे । शिशु गाछ । रा.नि.व.८ । वाकुच्यां । सोमराज । गुग्गुली । मे. । श्वेतशारिवायाम् । भा.पू.१भ. । अनन्तमूले । भैष.खदिरवल्यां.बृहत्कुष्ठमूलाद्यतैले । हरीतक्यां । वै.निघ २भ.अप.चि.चन्दनादि. अवलेहे । वा.व्या.चि.एरण्डपाके । कोकिलायां । त्रिका. ।
श्यामाकः । पुं । स्वनामख्याततृणधान्ये, कुधान्ये वा । श्यामाधान । क्षुद्रधान्ये । अचि. । गुणाः—शोषणो रूक्षः वातलः कफपित्तजित् । भा.पू.१भ.धा.व. । "श्यामाकः शोषणो रूक्षो वातलः कफवारणः ।" अचि.१५अ.। तदन्नगुणाः— "श्यामाकभक्तो रुचिदो लघुरूक्षश्च दीपनः । बलवातकरो मेहगलरुङ्मूत्रकृच्छ्रहा ॥" वै.निघ. । "सकोरदूषः श्यामाकः कषायमधुरो लघुः । वातलः कफपित्तघ्नः शीतसंग्राहिशोषणः ॥" च.सू.२७अ. ।
श्यामाङ्गी । स्त्री । नीलदूर्व्वायाम् । वै.निघ. ।
श्यामाढ़की । स्त्री । कृष्णपुष्पाढक्याम् । कालरहर । गुणाः—दीपनी पित्तदाहघ्नी च । रा.नि.व.१६ ।
श्यामादिवर्गः । पुं । तदादिद्रव्यगणे । गणोऽयं गुल्मविषहरः आनाहोदरोदावर्त्तादिघ्नश्च । यथा—श्यामामहाश्यामावृद्धदन्तीशङ्खिनीतिल्वक-कम्पिल्लकरम्यकक्रमुकपुत्रश्रेणीगवाक्षीराजवृक्षकरञ्जद्वयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति । शादा तेउड़ी, बीजताड़क, लाल तेउड़ी, दन्ती, यवतिक्ता, लोध, कमलागुँड़ि, पटोल, गुपारि, इन्दूरकाणी, गोड़ुम्बा, सोन्दाल, करञ्ज, नाटाकरञ्ज, गुलञ्च, छातिम, छागलबेंटे, सिजू, थिरुइ । सु.सू.३८ष. ।
श्यामाम्ली । स्त्री । नीलाम्लायां । रा.नि.व.४ ।

श्यामालता । स्त्री। (Ichnocarpus frutescens.) कृष्णशारिवायां। श्यामालता। हिं दुधि। तें नीलतिग। कश्चित्। [सं.महेश्वरश्च।

श्यामावीजम् । क्ली। वृद्धदारकवीजे। र.सा.

श्यामाह्वा । स्त्री। पिप्पल्याम्। वै.निघ.।

श्यामेक्षुः । पुं। कृष्णेक्षौ। रा.नि.व.१४।

श्यावः । पुं। शुक्लानुविद्धकृष्णवर्णे शाकवर्णे वा। भा.म.१भ.आगन्तुज्वरे। "श्यावास्यता विषकृते।" कर्णपालीगतरोगे। सु.सू.१६अ.। मन्दविषवृश्चिकभेदे। सु.कल्प.८अ.।

श्यावदन्तः (कः) । पुं। दन्तगतमुखरोगे। लक्षणं—"योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः। श्यावतां नीलतां वापि गतः स श्यावदन्तकः॥" सु.नि.१६अ.।

श्याववर्त्म (न्) । क्ली। नेत्रवर्त्मगतरोगे। लक्षणम्—"यद्वर्त्म वाह्यतोऽन्तश्च श्यावशूनं सवेदनम्। दाहकण्डूपरिक्लेदि श्याववर्त्मेति तन्मतम्॥" सु.उ.३अ.।

श्यावास्यता । स्त्री। मुखकृष्णतायां। निदा.।

श्येतकोलकः । पुं। (Yprinus saphore.) मत्स्यविशेषे। पुँटीमाछ। हारा.।

श्येनः । पुं। प्रसहजातीयपक्षिविशेषे। सञ्चान, শেন, শিক্রে বা বাজ। काकसमगुणः। सु.सू.४६अ.।

श्येनघण्टा । स्त्री। दन्तीवृक्षे। रा.नि.व.६।

श्येनाहृतः । पुं। सोमलतायाम्। वै.निघ.।

श्येनी । स्त्री। श्येनस्त्रियाम्। মাদি বাজ। शब्दकल्पः।

श्योणा(ना)कः । पुं। (Calosanthes Indica, or Oroxylum Indicum. Syn. Bignonia Indica.) स्वनामख्यातवृक्षे। শোণা গাছ। हिं सोनापाठा, अर्लु। मं टेण्टुः। उत्. फणफणा। पञ्जा. मुलिन्। नेपा. करमकान्द। ता. पन। गुणाः—शीतलः त्रिदोषघ्नः पित्तश्लेष्मातिसारघ्नः सन्निपातज्वरघ्नश्च। एतत्फलगुणाः—कटूष्णं कफवातहरं लघु दीपनं पाचनं हृद्यं रुचिकृत् लवणसारञ्च। रा.नि.व.९।

"टुण्टुकस्य फलं बालं रूक्षं वातकफापहं। हृद्यं कषायं मधुरं रोचनं लघु दीपनम्। गुल्मार्शःकृमिहृत् प्रौढ़ं गुरु वातप्रकोपनम्॥" भा.। च.सू.४अ.अनुवासने। लोध्रे। वै.निघ.।

श्रपितम् । त्रि। पक्के। पाचिते। घृतदुग्धजलभिन्नपक्कद्रव्ये। यथा—"अन्यत्तु श्रपितं श्राद्धं समुदक्तोद्धृते समे।" जटा.।

श्रपिता । स्त्री। काञ्जिके। शब्दकल्पः।

श्रमः । पुं। चिकित्सायाम्। रा.नि.व.२०। चित्तखेदे। सु.शा.२अ.। श्रान्तौ। "श्रमोऽरतिर्विवर्णलम्"। मा.नि.।

श्रमणा । स्त्री। सुदर्शनायाम्। উরতিপূরতি, পদ্মগুলঞ্চ। मुण्डीर्य्यां। মুণ্ডীরী। मांस्याम्। জটামাংসী। मे.। [ताम्बूली। वै.निघ.।

श्रमभञ्जिनी । स्त्री। नागवल्लीलतायाम्।

श्रवः (स्) । पुं। श्रवणेन्द्रिये। কাণ। रा.नि.व.१८। अम.।

श्रवणम् । क्ली। श्रवणेन्द्रिये। रा.नि.व.१८।

श्रवणविभ्रमः । पुं। अन्यथाश्रवणे। वैद्यकम्। [नाममहाक्षुपे। मुण्डीरी। रा.नि.व.४।

श्रवणशीर्षिकः (का) । पुं, स्त्री। श्रावणी-

श्रवणा (णी) । स्त्री। प्रपौण्डरीकनामगन्धद्रव्ये। পুণ্ডরিয়া। रा.नि.व.१२। श्रावण्याम्। মুণ্ডীরী। रा.नि.व.५। मुण्डीरीभेदे। प.मु.। See कदम्बपुष्पी।

श्रवणाह्वया (ह्वा) । स्त्री। निर्विषीवृक्षे। ঘাসবিশেষ। कचटे। কাঁচড়া। सु.सू.३६अ.।

श्राणम् । क्ली। पक्के। मे.। घृतजलदुग्धभिन्नपक्कद्रव्ये। जटा.। स्त्री (णा)। यवाग्वां। জাউ। प.मु.।

श्राद्धशाकम् । क्ली। कालशाके। কালকাসন্দা। नाड़ीचशाके। वै.निघ.। भा.पू.१भ.शा.व.।

श्रान्तोपचारः । पुं। अश्वस्य श्रान्तौ उपचारविधाने। ডলাই মলাই। ज.द.। [भा.।

श्रावः । पुं। श्रीवासे। সরল বৃক্ষের আটা।

श्रावकः । पुं। काके। त्रिका.।

श्रावणा। स्त्री। दध्यालीवृक्षे। मि.। भूकदम्बे। ৫কাকৃশিমা। ह.गडूचीतैले।

श्रावणी। स्त्री। मुण्डीर्याम्। क्षुद्रमुण्डाम्। মুণ্ডীরী। मं कोटीमुण्डी। गुणाः—कषाया कटुका कफपित्तघ्नी चामातीसारकासघ्नी विषच्छर्दिघ्नी च। रा.नि.व.५। महामुण्डीक्षुद्रमुण्डीतुल्यगुणा। भा.। See अलम्बुषा। रक्तमुण्डीर्याम्। च.चि.२च.। महौषधौ। See औषधिवर्गः। सु.चि.३०च.। ऋद्धौ। वा.सू.१५च.। भूकदम्बे। च.वि.८च.। वृद्धौ। वै.निघ.। [च.वि.२च।

श्रावणीद्वयम्। क्ली। श्रावणी महाश्रावणी॥

श्रावा। स्त्री। चन्द्रमण्डे। प.मु.। [च.।

श्रावी (इन्)। पुं। सर्ज्जिकाचारे। सु.चि.२०

श्रीः। स्त्री। लवङ्गां। विल्ववृक्षे। বেল গাছ। रा.नि.व.२१। वै.निघ.च सा.चि.कुटजचूर्णे। लवङ्गलतायाम्। नकुल.१२च.। कमले। पद्म। रा.नि.व.१०। सरलवृक्षे। मि.। वृद्धौ। रा.नि.व.५। नवनीतखोटौ। सु.चि.२२च.। च.द.वा.व्या.चि.एलादितैले। उपकरणे। मि.।

श्रीकण्ठः। पुं। वैद्यहितोपदेशकारे। कुसुमावलीटीकाकारे च। [व.३।

श्रीकन्दा। स्त्री। वन्ध्याकर्कोटक्याम्। रा.नि.

श्रीकरम्। क्ली। रक्तोत्पले। त्रिका.। पुं। शालवृक्षे। वै.निघ.।

श्रीकारी(इन्)। पुं। मृगविशेषे। तन्मांसगुणाः—लघु हृद्यं बलकरञ्च। रा.नि.व.१८।

श्रीकुक्कुटः। पुं। तिलसर्षपपिण्याकजे मालवदेशप्रसिद्धे चर्मखड़कविशेषे। स च प्रमेहे हितः। वा.चि.१२च.।

श्रीखण्डः। पुं। हरिचन्दने। प.मु.। वेद्दसुक्रड़िभेदेन तद्विविधम्। तयोः वेद्दं सार्द्रविच्छेदं, अन्यत् स्वयंशुष्कमिति। तदुक्तं—"चन्दनं द्विविधं प्रोक्तं वेद्दसुक्रड़िसंज्ञितम्। वेद्दन्तु सार्द्रविच्छेदं स्वयंशुष्कन्तु सुक्रड़ि॥" गुणाः—कटुतिक्तशीतलं कषायं पित्तभ्रान्तिवमिज्वरक्रमितृष्णासन्तापहरं हृद्यं मुखरोगघ्नं कान्तिकरं गात्रे लिप्तं निद्रादिजनकञ्च। रा.नि.व.१२। See चन्दनम्।

श्रीगन्धम्। क्ली। श्वेतचन्दने। वै.निघ.२भ.दाह.चि.पुनर्नवातैले।

श्रीग्रहः। पुं। पक्षिपानीयशालायां। हारा.।

श्रीघनम्। क्ली। दधनि। जटा.।

श्रीचन्दनम्। क्ली। श्वेतचन्दने। वै.निघ.२भ.अप.चि.द्राक्षावलेहे।

श्रीचमरी। स्त्री। चमरीमृगे। वै.निघ.।

श्रीतरुः। पुं। शालवृक्षे। वै.निघ.।

श्रीतालः (ली)। पुं, स्त्री। मलियादेशप्रसिद्धे तालसदृशवृक्षे। श्रीताल इति लोके। गुणाः—मधुरः शीतः ईषत्कषायः पित्तघ्नः कफकरः ईषद्वातप्रकोपनश्च। रा.नि.व.११। नकुल.१६च.।

श्रीधात्री। स्त्री। शिरामलके। শিরামলা। "अपुष्पवल्याः श्रीधात्र्याः।" रस.कौ.महामृत्युञ्जयरसे।

श्रीनिकेतः (नम्)। पुं, क्ली। नवनीतधूपे, सरलनिर्यासे। তার্পিন্। सु.चि.६अ.। रक्तपद्मे। सुवर्णे। वै.निघ.।

श्रीनिवासकः। पुं। कुरुण्टकवृक्षे। ঝাঁটী গাছ। वै.निघ.वा.व्या.चि.।

श्रीपदी। स्त्री। वार्षिकीमल्लिकायां। বেলফুল। भा.।

श्रीपर्णम्। क्ली। पद्मे। रा.नि.व.१०। पुं। गणिकारिकायाम्। গণিরী। अम.। च.वि.८च.।

श्रीपर्णिका (र्णी)। स्त्री। कट्फलवृक्षे। रा.नि.व.६। गाम्भारीवृक्षे। प.मु.। अम.। च.चि.१च.। वा.चि.६च.। "श्रीपर्णीफलशीतकषायः।" भा.म.१भ.रक्तष्ठीवीज्व.चि.। भैष.हृद्रो.चि.। गणिकारिकायाम्। গণিরী। रा.नि.व.६। शाल्मलीवृक्षे। हे.च.। पृश्निपर्ण्याम्। र.मा.। शालपर्ण्यां। पृश्निपर्ण्याम्। र.मा.। वै.निघ.२भ.संग्रहणीचि.नागरादिकषाये।

श्रीपर्णीतैलम्। क्ली। स्तनरोगाधिकारे तैलम्। पाठः—"श्रीपर्णीरसकल्काभ्यां तैलं स्निग्धं स्तनोपरि। तूलकेन धृतं कुर्यात् पतितावुत्थितौ स्तनौ॥" श्रीपर्णी गाम्भारी तस्याः त्वचो रसः। अभावे अर्थाश्लिष्टः क्वाथः। रस.र.।

শ্রীপিষ্টঃ । পুং । সরলবৃক্ষনির্য্যাসে । তার্পিন্ । শ.টী.রা.মা. । লবণক্ষীর্য্যাম্ । কশ্চিত্ ।

শ্রীপুত্রঃ । পুং । ঘোটকে । ত্রিকা. ।

শ্রীপুষ্পম্ । ক্লী । লবঙ্গে । রা.নি.ব.২৩ । প্রপৌণ্ডরীকে । পুণ্ডরিয়া । জ.দ. । পদ্মকাষ্ঠে র.মা. । শ্বেতপদ্মে । চ.দ.মুখরো.চি.বৃহত্খদিরবট্যাং ।

শ্রীপুষ্পমঞ্জরী । স্ত্রী । প্রপৌণ্ডরীকে । পুণ্ডরিয়া । রা.নি.ব.১২ ।

শ্রীপ্রসূনকম্ । ক্লী । লবঙ্গে । বৈ.নিঘ. ।

শ্রীফলঃ । পুং । বিল্ববৃক্ষে । রাজাদনীবৃক্ষে । খীর্নী গাছ । রা.নি.ব.১১ । ভা.ম.১ভ. । "শ্রীফলঃ সর্ব্বতোভদ্রা ।" ক্লী । বিল্বফলে । র.মা. । বা.চি.১অ. । "শ্রীফলৈঃ কৃতম্ ।" আমলকে । বৈ.নিঘ. । আর্দ্রচিক্কণপূগে । কাঁচা চিকি । রা.নি.ব.২৩ । স্ত্রী (লা) । নীলীবৃক্ষে । নীল গাছ । রা.নি.ব.৪ । ক্ষুদ্রকারবেল্ল্যাম্ । উচ্ছে । রা.নি.ব.৩ । আমলক্যাম্ । রা.নি.ব.১১ ।

শ্রীফলশলাটুঃ । পুং । বিল্বশলাটৌ । বেলশুঁটা । সা.কৌ.গ্রহণী.চি. ।

শ্রীফলিকা । স্ত্রী । ক্ষুদ্রকারবেল্লে । ক্ষুদ্র করলা । রা.নি.ব.৩ । মহানীলীবৃক্ষে । রা.নি.ব.৪ ।

শ্রীফলী । স্ত্রী । আমলক্যাম্ । আমলা গাছ । রা.নি.ব.১১ । নীল্যাম্ । নীল গাছ । স্রী. । মহাজ্যোতিষ্মতীলতায়াম্ । বড় লতাফট্কী । রা.নি.ব.৩ ।

শ্রীবাহুশালগুড়ঃ । পুং । অর্শোঽধিকারে পক্বগুড়ঃ । ক্বাথার্থং—ত্রিবৃত্ চবী দন্তী গোক্ষুরং চিত্রকং শটী ইন্দ্রবারুণী শুণ্ঠী মুস্তকং বিড়ঙ্গং হরীতকী এষাং প্র. ৮ তো. ভল্লাতকং ৬৪ তো. বৃদ্ধদারকবীজং ৪৮ তো. শ্রীল্লং ১২৮ তো. জলং ১২৮ শ. শে. ৩২ শ । গুড়ঃ ৯৮৪ তো. ১২৩ পলং বা । প্রক্ষেপদ্রব্যং—ত্রিবৃচ্চূর্ণং চবিচূর্ণম্ শ্রীল্লচূর্ণং চিত্রকমূলচূর্ণম্ এষাং প্র. ১৬ তো. এলা গুড়ত্বক্ মরিচং নাগকেশরম্ এষাং চূর্ণং প্র. ৪৮ তো. । তেউড়ী, চই, দন্তী, গোক্ষুর, চিত্রক, শটী, রাখালশশা, শুঁট, মুতা, বিড়ঙ্গ, হরীতকী প্রত্যেকে ৮ তো. ভল্লাতক ৬৪ তো. বৃদ্ধদারকবীজ ৪৮ তো. ওল ১২৮ তো. জল ১২৮ শ. শে. ৩২ শ. । গুড় ৯৮৪ তো. বা ১২৩ প. । প্রক্ষেপদ্রব্য—তেউড়ীচূর্ণ, চইচূর্ণ, ওলচূর্ণ, চিতামূলচূর্ণ প্রত্যেকে ১৬ তো. এলাইচ, গুড়ত্বক্, মরিচ ও নাগেশ্বরচূর্ণ প্রত্যেকে ৪৮ তো. । চ.দ. । ভা. ।

শ্রীবীজঃ । পুং । তালবৃক্ষে । বৈ.নিঘ. ।

শ্রীভদ্রঃ । পুং । মুস্তায়াম্ । শ.র. ।

শ্রীভ্রাতা । পুং । ঘোটকে । রা.নি.ব.১৯ ।

শ্রীমঞ্জরী । স্ত্রী । তুলসীবৃক্ষে । বৈ.নিঘ. ।

শ্রীমত্ । ক্লী । তিলপুষ্পে । বৈ.নিঘ. । স্ত্রী (তী) । মুস্তীর্য্যাম্ । মুণ্ডীরী । বৈ.নিঘ. ।

শ্রীমদনানন্দমোদকঃ । পুং । ধ্বজভঙ্গে ঔষধম্ । যথা—পারদস্য ১ ভ. গন্ধকস্য ১ ভ. লৌহস্য ১ ভ. অভ্রস্য ২ ভ. কর্পূরস্য জটামাংস্যাঃ সৈন্ধবস্য আমলক্যাঃ এলায়াঃ শুণ্ঠ্যাঃ মরিচস্য পিপ্পল্যাঃ জৈত্র্যাঃ জাতীফলস্য তেজপত্রস্য লবঙ্গস্য জীরকস্য কৃষ্ণজীরকস্য যষ্টিমধুনঃ বচায়াঃ হরিদ্রায়াঃ কুষ্ঠস্য দেবদার্বোঃ হিজ্জলবীজস্য টঙ্গণস্য ভার্গ্যাঃ শুণ্ঠ্যাঃ নাগকেশরস্য কর্কটশৃঙ্গ্যাঃ তালীশপত্রস্য চিত্রকস্য দ্রাক্ষায়া দন্তীবীজস্য বাষ্পালকস্য গৌরতণ্ডুলীয়স্য ত্বচঃ ধান্যকস্য গজকণায়াঃ শট্যাঃ বালকস্য মুস্তকস্য গোক্ষুরবীজস্য হ্রীবেরস্য প্রসারণ্যা ভূকুষ্মাণ্ডস্য শতমূল্যা অর্কমূলস্য বানরীবীজস্য বৃদ্ধদারকবীজস্য শক্রাশনবীজস্য চ চূর্ণং প্রত্যেকং ১ তো. একত্র শতাবর্য্যা রসেন মর্দয়িত্বা সংশোষ্য পুনশ্চূর্ণয়েত্ । অথ সর্ব্বচূর্ণচতুর্থাংশ শাল্মলীচূর্ণং মিশ্রয়েত্ । এতত্ সর্ব্বার্দ্ধং শক্রাশনচূর্ণং মিশ্রয়িত্বা ছাগীদুগ্ধেন মর্দয়েত্ । অথ সর্ব্বচূর্ণদ্বিগুণাঃ শর্করা গৃহীত্বা ছাগীদুগ্ধেন পাচ্যঃ । পাকসিদ্ধৌ ত্বগেলাপত্রকেশরকর্পূরসৈন্ধবত্রিকটুচূর্ণং যথাসম্ভবং প্রক্ষিপ্য ঘৃতং মধু চ যথাবশ্যকং মিশ্রয়েত্ । ভৈষ.ধ্বজভঙ্গে । [ব.৯ ।

শ্রীমলাপহা । স্ত্রী । ধূম্রপত্রায়াম্ । রা.নি.

শ্রীমস্তকঃ । পুং । রক্তৈষ্টালুকে । রাঙ্গা আলু । রসোনে । ত্রিকা. ।

শ্রীমান্ । পুং । তিলকবৃক্ষে । তিল গাছ । অ.ম. । অশ্বত্থবৃক্ষে । রা.নি.ব.১১ । ঋষভকে । ঋষভক । হরিদ্রাবৃক্ষে । বৈ.নিঘ. ।

श्रीमुखः । पुं । शारीरकग्रन्थकारे ।

श्रीरसः । पुं । श्रीवेष्टे । सरलनिर्यास, तार्पिन् । रा.नि.व.१२ ।

श्रीलता । स्त्री । महाज्योतिष्मतीलतायाम् । रा.नि.व.३ ।

श्रीवल्ली । स्त्री । स्वनामख्यातकण्टकवृक्षे । मं सोनियवल्ली । कं श्रीवल्ली । गुणाः—कटुरसा वातश्लेष्मकफघ्नी । तत्फलं तैललेपघ्नं रुचिकरञ्च । रा.नि.व.८ । वार्षिकीमल्लिकाभेदे । रा.नि.व.१० ।

श्रीवाटा (टी) । स्त्री । नागवल्लीविशेषे । पान गाछविशेष । मं सिरिवाड़ीपान । कं सिरिवाड़ियेले । रा.नि.व.११ । See नागवल्ली ।

श्रीवार(स)कः । पुं । शितावरशाकक्षुपे । शुशुनी शाक । रा.नि.व.४ । भा.पू.१भ. ।

श्रीवासः (कः) । पुं । सरलनिर्यासे, सरलवृक्षरसे । तार्पिन् इति भाषा । गन्धविरजा । रा.नि.व.१२ । लवणखोटीति । च.द.वा.व्या.चि. एकादशशतीकमहाप्रसारणीतैले । वा.सू.१५अ. एलादिः । गुणाः—"श्रीवासो मधुरस्तिक्तः स्निग्धोऽम्लतुवरः सरः । पित्तलो वातमूर्द्धाक्षिस्वररोगकफापहः । रक्षोघ्नः स्वेददौर्गन्ध्ययूकाकण्डूव्रणप्रणुत् ॥" भा. । "श्रीवासः सरलं पूतिः कुन्दुरुर्यन्त्रिपर्णिकं । सिह्लकः परमा मांसी देवदारु सुरा नखं । सर्व्वेऽमी परमा लक्ष्मीः··· ॥" राज. । गुग्गुलौ । भा.उ.वाजी.। "श्रीवासो गुग्गुलुस्तथा ।" देवदारौ । देवदारु गाछ । भैष.ने.रो.चि. । "श्रीवासो भद्रकः प्रोक्तोऽमलकाष्ठविवर्जितः ।" भैष. । धूपे । त्रिका. ।

श्रीवासाः (स) । पुं । सरलद्रवे । च.टी. ।

श्रीवृक्षः (कः) । पुं । अश्वत्थवृक्षे । हे.च. । बिल्ववृक्षे । शब्दकल्पः ।

श्रीवेष्टः (कः) । पुं । सौराष्ट्रदेशे प्रसिद्धः स्वनामख्यातसुगन्धवृक्षे । सरल वृक्ष । सु.सू.३८अ. एलादौ । सरलनिर्यासे । तार्पिन् । गुणाः—कटुः तिक्तः कषायः पित्तश्लेष्महरः योनिदोषाजीर्णव्रणाध्मानहरश्च । रा.नि.व.१२ । सु.चि.२२अ. । नवनीतखोट्याम् । च.सू.४।५अ. । च.द.वा.र.चि. कुष्ठाद्यतैले । गुग्गुलौ । सु.सू.३१अ. ।

श्रीवेष्टफलम् । क्ली । सरलवृक्षफले । वै.निघ. २भ.शीताङ्गसन्निपातज्व.चि. ।

श्रीसंज्ञम् । क्ली । लवङ्गे । श्रम. । भा.उ.वाजी. । "श्रीसंज्ञपुष्पैः समम् ।"

श्रीसम्पदा । स्त्री । ऋद्धौ । रा नि.व.५ ।

श्रीहर्षसूरिः । पुं । योगचिन्तामणिकारे ।

श्रीहस्तिनी । स्त्री । हस्तिशुण्ड्यां । हातिशुँड़े । जटा. । [च.सू.५अ । च.द.कुष्ठ.चि. ।

श्राह्नः । पुं । नवनीतखोटी । सरल-आटा ।

श्रुवारः । पुं । विकङ्कतवृक्षे । बँइचो गाछ । र.मा. ।

श्रुघ्नः (घ्नी) । स्त्री । सर्जिकाक्षारे । साजिमाटी । "शुक्तिः श्रुघ्नी यवक्षारः ।" र.मा. । सु. चि २०अ.अजगल्लि.चि. ।

श्रुतश्रेणी । स्त्री । द्रवन्तीवृक्षे । इन्दुरकाणी । भा. । गुणाः—चक्षुष्या कटुः आखुविषापहा व्रणनेत्रामयहिता । रा.नि.व.४ ।

श्रुतिः । स्त्री । श्रवणेन्द्रिये । काण । रा.नि.व. १८ । स गर्भस्य पञ्चमे मासि भवति । सुखबोधः ।

श्रुतिकटः । पुं । सर्पे । मे. ।

श्रुतिमूलम् । क्ली । कर्णमूले । संग्रहः ।

श्रुतिवर्जितः । त्रि । वधिरे । जटा. ।

श्रुतिवेधः । पुं । कर्णवेधे । शब्दकल्पः ।

श्रुतिसारः । पुं । वैद्यकग्रन्थभेदे ।

श्रुतिस्फोटा । स्त्री । कर्णस्फोटालतायाम् । काणछिड़ा । रा.नि.व.३ ।

श्रुवः । पुं । अश्वस्य शिरोऽधः केशान्तभागे । ज.द.२अ. । स्त्री (वा) । मूर्व्वायाम् । रा.नि.व.३ ।

श्रुवावृक्षः । पुं । विकङ्कतवृक्षे । बँइचो गाछ । रा.नि.व.११ ।

श्रेणिका । स्त्री । निःश्रेणिकातृणे । रा.नि.व.८ ।

श्रेणिः (णी) । स्त्री । लाजमण्डे । थैथेर मण्ड । प.सु. । समानशिल्पसंहतौ । कोम्पानि । मे. । सेकपात्रे । विश्व. ।

श्रेयः । पुं । जीवके । वै.निघ. ।

श्रेयसी । स्त्री । हरीतक्याम् । भा.पू.१भ. । रा.नि.व.११ । वै.निघ.कास.चि.चित्रकादिलेहे । गजपिप्पल्याम् । भा.पू.१भ.वृहत्सैन्धवाद्यतैले । अग्निमुखचूर्णे च । सि.यो.वृहत्पञ्चगव्यघृते । सर्व्वज्वरहरलौहे । भैष.शोथचि.शोथकालानलरसे । पाठायाम् । আক্নাদি । रा.नि.व.६ । रास्नायाम् । विश्वः । च.सू.४अ. । भा.वातश्लेष्मज्व.चि.वृहत्पिप्पल्यादौ । "श्रेयसी सदुरालभा ।" प्रियङ्गौ । रा.नि.व.१२ । [दिरे । प.मु. ।

श्रेष्ठम् । क्ली । गोदुग्धे । त्रिका. । पुं । श्वेतख-

श्रेष्ठकाष्ठः । पुं । शाकवृक्षे । শেগুন গাছ । रा.नि.व.९ । [प.मु. ।

श्रेष्ठमल्लिका । स्त्री । शतदलमल्लिकायाम् ।

श्रेष्ठलवणम् । क्ली । सैन्धवलवणे । वै.निघ. ।

श्रेष्ठवृक्षः । पुं । वरुणवृक्षे । रा.नि.व.९ । कृष्णागुरुवृक्षे । वै.निघ. । [वै.निघ. ।

श्रेष्ठवेधिका । स्त्री । कस्तूर्य्याम् । মৃগনাভি ।

श्रेष्ठव्रीहिः । पुं । षष्टिकशालौ । সেটে ধান । वै.निघ. ।

श्रेष्ठा । स्त्री । स्थलपद्मिन्याम् । স্থলপদ্ম । रा.नि.व.५ । मेदायाम् । वै.निघ.२भ.अर्शःचि.सूरणमोदके । त्रिफलायाम् । वा.चि.१२अ. ।

श्रेष्ठाम्बु । क्ली । तण्डुलोदके । চেলুনি জল । वा.उ.३७अ. ।

श्रेष्ठाम्लम् । क्ली । वृक्षाम्ले । रा.नि.व.६ ।

श्रोणः । त्रि । खञ्जे । अम. । स्त्री (णा) । काञ्जिके । शब्दकल्पः ।

श्रोणिः (णी) । स्त्री । नितम्बे । रा.नि.व.१८ । सा गर्भस्य मासद्वयेन भवति । सुखबोधः । (णी) अग्निमन्थवृक्षे । গণিরী । वै.निघ. ।

श्रोणिफल(क)म् । क्ली । वरस्त्रीणां प्रशस्तनितम्बे । নিতম্বাভোগ । रा.नि.व.१८ । अम. ।

श्रोणिफलकास्थि । क्ली । नितम्बाभोगास्थीनि । तानि चत्वारि । च.शा.७अ. ।

श्रोतः (स्) । क्ली । कर्णे । त्रिका. । इन्द्रिये । हे.च. । शिरायाम् । सु. ।

श्रोतोजम् । क्ली । सौवीराञ्जने । रा.नि.व.१३ ।

श्रोतोद्भवम् । क्ली । श्रोतोऽञ्जने । रा.नि.व.१३ ।

श्रोत्रम् । क्ली । श्रवणेन्द्रिये । रा.नि.व.१८ ।

श्रौत्रम् । क्ली । श्रवणेन्द्रिये, कर्णे । अम. ।

श्राह्वः । पुं । नवनीतखोट्याम् । च.सू.३अ. प्रदेहे । क्ली । कमले । शब्दकल्पः ।

श्लक्ष्णकम् (का) । क्ली, स्त्री । पूगफले । रा.नि.व.११ । (का) कृष्णापराजितायां । वै.निघ. ।

श्लक्ष्णत्वक् । पुं । अश्मन्तकवृक्षे । আপটা । रा.नि.व.९ ।

श्लीपदम् । क्ली । पादरोगविशेषे । গোদ । निदानं यथा —"कुपितास्तु दोषा वातपित्तश्लेष्माणोऽधःप्रपन्ना वङ्क्षणोरुजानुजङ्घास्ववतिष्ठमानाः कालान्तरेण पादमाश्रित्य शनैः शोफं जनयन्ति, तत् श्लीपदमित्याचक्षते ।" सु.नि.१२अ. । तस्य कारणं –"पुराणोदकभूयिष्ठाः सर्व्वर्त्तुषु च शीतलाः । ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः ॥" लक्षणं यथा—"यः सज्वरो वङ्क्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण । तच्छ्लीपदं स्यात्करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः ॥" "वातजं कृष्णरूक्षं हि स्फुटितं तीव्रवेदनम् । अनिमित्तरुजञ्चास्य बहुशो ज्वरएव च । पित्तजम्पीतसङ्काशं दाहज्वरयुतं भृशम् । श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डुरमस्थिरम् । त्रीण्यप्येतानि जानीयात् श्लीपदानि कफात् त्रयात् । गुरुत्वञ्च महत्वञ्च यस्मान्नास्ति कफं विना ॥" मा.नि. । "पाणिना सौष्ठकर्णेषु वदन्त्येके तु पादवत् । श्लीपदं जायते तत्र देशेऽनूपे भृशं भृशम् ॥" वा.उ.२९अ. ।

श्लीपदप्रभवः । पुं । आम्रवृक्षे । श.मा. ।

श्लीपदापहः । पुं । पुत्रजीववृक्षे । त्रिका. ।

श्लीष्टः । पुं । आम्रवृक्षे । वै.निघ. ।

श्लेष्मकः । पुं । कफे । श.च. ।

श्लेष्मकोष्ठः । पुं । अश्वरोगभेदे । स चाश्वस्य मन्दाहारेणानुमेयः । ज.द.४६अ. ।

श्लेष्मघ्नः । त्रि । श्लेष्महरे, तत्र लघुपाकद्रव्यमात्रम् । तीक्ष्णरूक्षविशदगुणभूयिष्ठत्वात् कटुतिक्तकषायद्रव्यमात्रम् । सु.सू.४१अ. ।

श्लेष्मघ्ना (घ्नी) । स्त्री । त्रिपुरमल्लिकायाम् । त्रिका. । केतक्याम् । विश्व. । ज्योतिष्मतीलतायाम् । जटा. । त्रिकटी । त्रिकटु । श.र. ।

श्लेष्मज्वरः । पुं । कफजन्यज्वरे । लक्षणं यथा —"स्तैमित्यं स्तिमितो वेगः आलस्यं मधुरास्यता । शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च । गौरवं शीतमुत्क्लेशः...... ॥" इत्यादि । निदा. ।

श्लेष्मणः । पुं । कफे । तस्य च स्थानं सन्धयः । "तस्य स्थानं सन्धयः, तत्कर्म्म च सन्धीनां संश्लेषणम् ।" भा॰ ।

श्लेष्मधरा । स्त्री । चतुर्थकलायाम् । या सर्व्वसन्धिषु प्राणभृतां भवति सेत्युच्यते । सु.शा.४अ. ।

श्लेष्मनाड़ी । स्त्री । दन्तमूलगतरोगे । দন্তনালী । "श्लेषा कफाद्दृढघनार्जुनपिच्छिलासास्रा सकण्डुरुगजा रजनीप्रवृद्धा ।" [पाण्डुः ।

श्लेष्मपाण्डुः । पुं । श्लेष्मजन्यपाण्डुरोगे । See

श्लेष्मप्रकृतिः । त्रि । कफप्रकृतौ मनुष्ये । तल्लक्षणं —"सुस्निग्धवर्णः सितनेत्रदन्तः श्यामः सुकेशो नखदीर्घरोमा । गम्भीरशब्दः सुतशास्त्रनिद्रातन्द्राप्रियः तिक्तकटूष्णभोजी । समांसलः स्निग्धरसप्रियश्च सगीतवाद्योऽतिसहिष्णुशीतः । व्यायामशीलो रतलालसोऽसौ भवेत् कफस्य प्रकृतिर्मनुष्यः ॥" चवि.५अ. ।

श्लेष्मलः । त्रि । श्लेष्मप्रकृतौ । अम. ।

श्लेष्मलफलः । पुं । बहुवारवृक्षे । वै.निघ. ।

श्लेष्मविसर्पः । पुं । कफजन्यविसर्पे । निदा. ।

श्लेष्मसम्भूतः । त्रि । श्लेष्मजे । रा.नि.व.२० ।

श्लेष्मस्रावः । पुं । नेत्रसन्धिगतरोगविशेषे । लक्षणं—"श्वेतं सान्द्रं पिच्छिलं यः स्रवेच्च श्लेष्मस्रावी नीरुजः स प्रदिष्टः ।" सु.उ.२अ. ।

श्लेष्महः । पुं । पनसवृक्षे । কাঁটাল গাছ । वै.निघ. । कट्फलवृक्षे । श.च. ।

श्लेष्महन्त्री । स्त्री । देवदालीलतायां । দেয়াতাড়া । वै.निघ. ।

श्लेष्मा (न्) । पुं । शरीरस्थकफे । स च माधुर्य्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणः । तस्य समानयोनिः मधुरो रसः स माधुर्य्यादिभ्यः माधुर्य्यादीनि वर्द्धयति । सु.सू.४२अ. । तस्य स्थानमामाशयः । गुणाः—श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च । मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः ॥ तत्रामाशयः पित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्धगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्विधस्याहारस्याधारः । स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः सुखजरश्च भवति । माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च । आमाशये सम्भवति श्लेष्मा मधुरशीतलः । स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति । उरस्थः त्रिकसन्धीनामात्मवीर्य्येणान्नरससहितेन हृदयावलम्बनं करोति । जिह्वामूलकण्ठस्थः जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते । शिरःस्थः स्नेहसन्तर्पणाधिकृतत्वात् इन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति । सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिसंश्लेषात् सर्व्वसन्ध्यनुग्रहं करोतीति ॥ सु.सू.२१अ. । चतुर्थी श्लेष्मधरा नाम सर्व्वसन्धिषु प्राणभृतां भवति । "स्नेहाभ्यक्ते यथैवाक्षे चक्रं साधु प्रवर्त्तते । सन्धयः साधु वर्त्तन्ते संश्लिष्टाः श्लेष्मणा तथा ॥" सु.शा.४अ. । "प्राकृतस्तु बलं श्लेष्मा वैकृतो मल उच्यते । स चैवोजः स्मृतः काये स च पाप्मोपदिश्यते ॥" च.सू.२७अ॰ ।

श्लेष्माटः (तः, कः, की) । पुं, स्त्री । शेलुवृक्षे । চালতা গাছ । हिं लसोरा । र.मा. । रा.नि.व.११ । भा. । च.सू.४अ. । गुणाः—"गुरु श्लेष्मातकफलं कफकृन्मधुरं हिमं ।" सु.सू.४६अ. । च.सू.२७अ. ।

श्लेष्माणा । स्त्री । वृक्षविशेषे । श.मा. ।

श्लेष्मातकसदृशपत्रः । पुं । पनसवृक्षे । কাঁটাল গাছ । वै.निघ॰ ।

श्लेष्मान्तकः । पुं । शेलुवृक्षे । रा.नि.व.११ ।

श्लेष्माभिष्यन्दः । पुं । सर्व्वगताक्षिरोगभेदे । लक्षणं—"...स्यन्दे तु कफसम्भवे । जाड्यं शोफो महान् कण्डूर्निद्रान्नानभिनन्दनम् । सान्द्रस्निग्धबहुश्वेतपिच्छावद्दूषिकाश्रुता ॥" वा.उ.१५अ. ।

श्लेष्मोल्वणः । त्रि । श्लेष्माधिके । वा.चि.७अ. ।

श्लेष्मिकः । त्रि । श्लेष्मसम्भूते । रा.नि.व.२० ।

श्लैष्मिकरक्तपित्तम् । क्लीं । कफजन्यरक्तपित्ते । मा.नि. । See रक्तपित्तम् ।

श्लैष्मिकी । स्त्री । श्लेष्मजन्ययोनिव्यापदि । लक्षणम्—"कफोऽभिष्यन्दिभिः क्रुद्धः कुर्याद्योनिमवेदनाम् । शीतलां कण्डुलां पाण्डुपिच्छिलां तद्विधस्रुतिम् । सा व्यापत् श्लैष्मिकी...... ॥" वा.उ. ३३अ. ।

श्वग्रहः । पुं । बालग्रहविशेषे । लक्षणं—"कम्पो हृषितरोमत्वं स्वेदश्चक्षुर्निमीलनं । बहिरायामनं जिह्वादंशोऽन्तःकण्ठकूजनं । धावनं विट्सगन्धत्वं क्रोशनं श्वानवच्छुनि ॥" वा.उ.३अ. ।

श्वचिल्ली । स्त्री । कुक्कुरचिल्लीक्षुपे । कुकुरशोँका । वै.निघ. । [नि.व.४ ।

श्वदंष्ट्रकः । पुं । गोक्षुरक्षुपे । গোখুরী । रा.

श्वदंष्ट्रा । स्त्री । गोक्षुरे । গোখুরী । र.मा. । सु.सू.३८अ. । च.द.ज्व.चि.ज्वरातिसारे । "श्वदंष्ट्राकण्टकारीभ्यां ।" च.सू.४अ. ।

श्वधूर्त्तः । पुं । शृगाले । श.र. ।

श्वनकः । पुं । कुक्कुरे । प.मु. । [र्यां । जटा. ।

श्वनिशम् (शा) । क्ली,स्त्री । मत्तकुक्कुरनिशा-

श्वपुच्छः । पुं । वृश्चिके । বিছা । स्त्री (च्छा) । पृश्निपर्ण्यां । চাকুলিয়া । वै.निघ. ।

श्वफलः । पुं । चूर्णे । চূণ । बीजपूरे । লেবু গাছ । र.मा. ।

श्वभीरुः । पुं । शृगाले । श.मा. ।

श्वभ्रम् । क्ली । छिद्रे । अम. ।

श्वयथुः । पुं । शोथरोगे । रा.नि.व.२० ।

श्वयीचिः (ची) । स्त्री । रोगे । पीड़ायाम् । व्याक. । [चि । प.मु. । वायौ । अम. ।

श्वसनम् । क्ली । निःश्वासे । मे. । पुं । मदनवृ-

श्वसनाशनः । पुं । सर्पे । हारा. ।

श्वसनेश्वरः । पुं । अर्जुनवृक्षे । श.च. ।

श्वसनोत्सुकः । पुं । सर्पे । श.र. ।

श्वसितम् । क्ली । निःश्वासे । हे.च. ।

श्वसुनः । पुं । कासालौ । रा.नि.व.७ । चतष्पवृक्षे । কুকুর শোঁকা । श.च. ।

श्वा (न्) । पुं, (स्त्री शुनी) । कुकुरे । श.र. ।

श्वादन्तः पुं । कुकुरदन्ते । व्याक. । [श.र. ।

श्वानः । पुं । कुकुरे । स्त्री (नी) । सारमेयायां ।

श्वानचिल्लिका (ल्ली) । स्त्री । शुनकचिल्लीशाके । वै.निघ. ।

श्वावलिका । स्त्री । धन्याके । रा.नि.व.६ ।

श्वावित् । पुं । शल्यके । शल्लकीमृगे । সজারু । भा. । अथ विशेषगुणः । सु.सू.४६अ. । शल्लकीवृक्षे । त्रिका. ।

श्वासः । पुं । स्वनामख्यातरोगविशेषे । হাঁপানি । तस्य निदानं—"यैरेव कारणैर्हिक्का बहुभिः सम्प्रवर्त्तते । तैरेव कारणैः श्वासो घोरो भवति देहिनां । विहाय प्रकृतिं वायुः प्राणोऽथ कफसंश्रितः । श्वासयत्यूर्द्ध्वगो भूत्वा तं श्वासं परिचक्षते ॥" स पञ्चविधः यथा —"महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदैश्च पञ्चधा । भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥" पूर्व्वरूपं यथा—"प्राग्रूपं तस्य हृत्पीड़ा शूलमाध्मानमेव च । आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च । यदा स्रोतांसि संरुध्य मारुतः कफपूर्व्वकः । विष्वग्व्रजति संक्रुद्धस्तदा श्वासं करोति च ॥" चिकित्सा – कफवातघ्नमुष्णं वातानुलोमनं भेषजं देयम् । भा. । अश्वस्य यथा—"मुखेन नासया चैव यः श्लेष्माणं विमुञ्चति । वातिकः शिशिरे काले तस्य श्वासं विनिर्दिशेत् । शरन्निदाघयोश्चैव श्वासः पित्तेन जायते । तृष्णादाहपरीतस्य खिन्नगात्रस्य वाजिनः । मुखेन नासया चैव कफो यस्य प्रवर्त्तते । प्रावृट्काले वसन्ते वा श्वासस्तस्य कफात्मकः ॥" ज.द.३५अ. ।

श्वासकासः । पुं । प्रसिद्धरोगद्वये । হাঁপানি-কাশি । निदा. । [रा.नि.व.८ ।

श्वासभक्षः । पुं । वर्व्वूरकवृक्षे । বাবলাগাছ ।

श्वासहेतिः । स्त्री । निद्रायां । हे.च. ।

श्वासारिः । पुं । पुष्करमूले, कुष्ठे । কুড় । रा.नि.व.६ ।

श्वित्रम् । क्ली । किलासे । श्वेतकुष्ठे । धवल রোগ । अम. । लक्षणं—"कुष्ठैकसम्भवं श्वित्रं किलासं वारुणं भवेत् । निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् । वाताद्रुक्षारुणं पित्तात्ताम्रं कमलपत्र-

वत्। सदाहं रोमविध्वंसि कफाच्छेतं घनं गुरु। सकण्डुरं क्रमाद्रक्तमांसमेदःसु चादिशेत्। वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरं। अशुक्लरोमबहुलमसंश्लिष्टं मिथो नवम्। अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा। गुह्यपाणितलोष्ठेषु जातमप्यचिरन्तनं। वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता॥" भा.नि.। [श.च.।

श्वित्रघ्नी। स्त्री। वृश्चिकाल्याम्। বিছাতী।

श्वित्री (इन्)। त्रि। श्वित्ररोगिणि।

श्वेत(क)म्। क्ली। रौप्ये। त्रिका.। श्वेतकांस्ये। ভাল পিতল। वै.निघ.। पुं। कपर्दके। কড়ি। रा.नि.व.१३।

श्वेतः। पुं। शुक्लार्के। শ্বেত আকন্দ। रा.नि.व.१०। महाविषशुभ्रवृश्चिके, मन्दविषे च। सु.कल्प.८अ.। See वृश्चिकः। श्वेतशिग्रौ। श्वेतेक्षौ। श्वेतैरण्डे। कर्पूरे। चन्दनवृक्षे। मे.। श्वेतसर्षपे। श्वेतकाञ्चने। हंसे। वै.निघ.। शङ्खे। শাঁক। रा.नि.व.१। कपर्दके। কড়ি। हे.च.। श्वेताश्वे। श.र.। जीवके। जटा.।

श्वेतकटभी। स्त्री। शुक्लकटभीवृक्षे। वा.उ.३८अ.। श्वेतगुञ्जायाम्। वा.उ.५अ.। [निघ.।

श्वेतकण्टकः। पुं। श्वेतलज्जालुकायाम्। वै.

श्वेतकण्टकारिका (री)। स्त्री। शुभ्रपुष्पकण्टकार्य्याम्। শ্বেত কণ্টিকারী। रा.नि.व.४।

श्वेतकण्टारिका। स्त्री। शुक्लपुष्पकण्टकार्य्याम्। শাদা কণ্টিকারী। हिं. श्वेतरिंगिनी, श्वेतभटकटैया। तें विलियनेलगुलु। गुणाः—कटूष्णा कफवातघ्नी चक्षुष्या दीपनी रसघ्नी च। रा.नि.व.४। [व.६।

श्वेतकन्दा। स्त्री। शुक्लातिविषायां। रा.नि.

श्वेतकपोतः। पुं। दर्व्वीकरसर्पविशेषे। सु.कल्प.४अ.।

श्वेतकमलम्। क्ली। श्वेतपद्मे। रा.नि.व.१०।

श्वेतकाकः। पुं। शुक्लकाके। শাদা কাক। रावणकृतकार्म्मणशतके।

श्वेतकाञ्चनः। पुं। शुक्लपुष्पकाञ्चनवृक्षे। শ্বেত কাঞ্চন। प.मु.।

श्वेतकाण्डा। स्त्री। श्वेतदूर्व्वायाम्। रा.नि.व.८। [सु.चि.२०अ.।

श्वेतकापोती। स्त्री। स्वनामख्यातमहौषधौ।

श्वेतकाम्भोजी। स्त्री। श्वेतगुञ्जायाम्। শাদা কুঁচ। रा.नि.व.३। [कुल। वै.निघ.।

श्वेतकाष्ठा। स्त्री। श्वेतपाटलायां। শাদা পা-

श्वेतकिणिही। स्त्री। शुक्लकटभीवृक्षे। रा.नि.व.९।

श्वेतकुम्भिका (म्भी)। स्त्री। शुक्लपाटलवृक्षे। वै.निघ.।

श्वेतकुरुण्टकः। पुं। शुक्लझिण्ट्याम्। শাদা ঝাঁটী। गुणाः—तिक्तः केश्यः स्निग्धः मधुर उष्णः तीक्ष्णः दन्तहितः वलीपलितकुष्ठवातरक्तदोषकफकण्डूविषव्रणघ्नश्च। वै.निघ.।

श्वेतकुशः। पुं। शुक्लदर्भे। मूलगुणाः—हिमं रुच्यं मधुरं पित्तरक्तज्वरघ्नं तृष्णाश्वासकामलानाशनञ्च। रा.नि.व.८।

श्वेतकुष्ठम्। क्ली। श्वित्रे। धवल। निदा.।

श्वेतकुसुमा। स्त्री। श्वेतनिर्गुण्ड्यां। শ্বেত নিশিন্দা। वै.निघ.। [च.।

श्वेतकृष्णा। स्त्री। कीटजातिभेदे। सु.कल्प.८

श्वेतकेशः। पुं। रक्तशिग्रौ। লাল সজিনা। जटा.। [त्रिका.।

श्वेतकोलः। पुं। शफरमत्स्ये। পুঁটী মাছ।

श्वेतखदिरः। पुं। शुक्लखदिरवृक्षे। পাপরী খয়ের গাছ। प.मु.। मं पाढ़रा खैर। कं विलियतर्त्ति, पपरीखयेर। तें तेल्लचंड। गुणाः—तिक्तः कषायः कटुः उष्णः कण्डूघ्नः कफवातव्रणघ्नश्च। रा.नि.व.८। "………वर्ण्यो मुखरोगकफास्रजिच्च।" भा.।

श्वेतगण्डा। स्त्री। श्वेतदूर्व्वायाम्। वै.निघ.।

श्वेतगरुत्। पुं। राजहंसे। अम.।

श्वेतगुञ्जा। स्त्री। शुक्लगुञ्जालतायाम्। শাদা কুঁচ গাছ। गुणाः—तीक्ष्णा उष्णा च। वीजं वान्तिजनकम्। तन्मूलं शूलविषघ्नम्। तत्पत्रं वश्यकर्म्मणि शस्तम्। रा.नि.व.३।

श्वेतघण्टा । स्त्री। नागदन्त्यां । হাতিশুঁড়ে। दन्त्याम् । रा.नि.व.५।६ । [ঘোষা । वै.निघ. ।

श्वेतघोषा । स्त्री । श्वेतकोषातक्यां । শাদা

श्वेतचणकः । पुं । शुक्लचणके । শাদা ছোলা । वै.निघ. ।

श्वेतचन्दनम् । क्ली, पुं । (Santalum album.) स्वनामख्यातचन्दनवृक्षे । সারচন্দনের গাছ । प.मु. । [सू.४६अ. ।

श्वेतचरणः । पुं । प्लवचरजलपक्षिविशेषे । सु.

श्वेतचामरः (पुष्पः) । पुं। काशतृणे । কেসে ঘাস । वै.निघ.।

श्वेतचिल्लिः (ल्लिका) (ल्ली) । स्त्री । शुक्लवास्तुकशाके । श्वेतचिल्लीति भागीरथीतीरे प्रसिद्धा । শাদা বেতো । मं वास्तुवा । कं विलियचिल्लिके । वम्. लघुचाकवत । गुणाः—मधुरा क्षारा शिशिरा त्रिदोषघ्नी पथ्या ज्वरघ्नी च । रा.नि.व. ७ । [श्र.च. । हंसे । हला. ।

श्वेतच्छदः । पुं । गन्धपत्रे । বাবুই তুলসী ।

श्वेतजयन्ती । स्त्री । शुक्लजयन्तीवृक्षे । শ্বেত জন্তী । भैष.कुष्ठ.चि. । [वै.निघ. ।

श्वेतजरणः । पुं । शुक्लजीरके । শাদা জীরা।

श्वेतजलजम् । क्ली । कुमुदे । হেলাফুল । वै.निघ. ।

श्वेतजीरकः । पुं । गौरजीरके । শাদা জীরা । मं पांढ़रे जीरे । कं विलियजिरिगे । गुणाः —हिमो रुच्यः कटुः मधुरो दीपनः क्रमिघ्नः विषघ्नः चक्षुष्यः उदराध्मानहरश्च । रा.नि.व.६ ।

श्वेतटङ्क(ण)म् । क्ली। फटिकारिकायाम् । ফট্‌কিরি। प.मु.। टङ्कणक्षारभेदे । সোহাগা, শাদা সোহাগা । गुणाः—स्निग्धं कटु उष्णं कफवातघ्नम् आमचयश्वासविषकासमलघ्नञ्च। रा.नि. व.६ ।

श्वेततण्डुलमण्डम् । क्ली,पुं । आतपतण्डुलसिद्धमण्डे। আলো চেলের মণ্ড। गुणाः —“मधुरं शीतलं किञ्चित् श्लेष्मलं शोषनाशनम्। अश्मरीमेहसंकृर्द्दिवातलं श्वेततण्डुलम् ॥” अत्रि.१२अ. ।

श्वेततुलसी । स्त्री। शुभ्रपत्रतुलसीवृक्षे । प.मु.।

श्वेतत्रिवृत् । स्त्री । शुक्लमूलत्रिवृति । শাদা তেউড়ী । हिं श्वेतनिशोत्तर । गुणाः—“श्वेता त्रिवृद्रेचनी स्यात् स्वादुरुष्णा समीरहृत् । रुक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा ॥” भा. ।

श्वेतदण्डा (ण्डी) । स्त्री । श्वेतदूर्व्वायाम् । वै.निघ. ।

श्वेतदन्ता । स्त्री । नागदन्त्यां । वै.निघ. ।

श्वेतदर्भः । पुं । शुक्लदर्भे । वै.निघ. ।

श्वेतदूर्व्वा । स्त्री । शुक्लदूर्व्वायाम् । प.मु.। वम्. पाड़रीहरियाली । कं विलियकुरुके । तें शुक्लदूर्व्वालु । गुणाः—शीतला मधुरा वान्तिपित्तघ्नी आमातीसारकासघ्नी रुच्या दाहतृष्णाघ्नी च । रा. नि.व.८। “श्वेता दूर्व्वा कषाया स्यात् स्वाद्वी व्रण्या च जीवनी । तिक्ता हिमा विसर्पासृट्‌पित्तकफदाहहृत् ॥” भा. । [निघ. ।

श्वेतद्रुमः । पुं । वरुणवृक्षे । বরুণ গাছ । वै.

श्वेतधातुः । पुं । दुग्धपाषाणे । ফুলখড়ি। रा.नि.व.१२ । [मे. ।

श्वेतधामा (न्) । पुं । कर्पूरे । समुद्रफेने ।

श्वेतधूनकम् । क्ली । शुक्लधूनके । रस.र.ज्वराति.चि.ग्रहणीकपाटरसे ।

श्वेतनाड़ी । स्त्री । खटिकायां। ফুলখড়ি । वै.निघ. । श्वेतापराजितायां । শ্বেত অপরাজিতা । च.सू.२अ. । [निघ. ।

श्वेतनामा । स्त्री । श्वेतापराजितायां । वै.

श्वेतनिष्पावा । स्त्री । श्वेतपुष्पनिष्पावे। শ্বেত শিম্ । गुणाः—सुरुच्या मधुरा अल्पकषाया शीतला वातला बल्याध्मानकरी पुष्टिकरी च । रा.नि.व.१६ । [म । वै.निघ. ।

श्वेतपटलम् । क्ली। यशदधातौ । দস্তাবিশে-

श्वेतपत्रम् । क्ली । श्वेतकमले । रा.नि.व.१० । वा.उ.५अ. । पुं । श्वेततुलस्याम् । प.मु. । राजहंसे । ह्रस्वदर्भे । ক্ষুদ্র শাদা কুশ । वै.निघ. । स्त्री (त्रा) । श्वेतशिंशपायाम् । শাদা শিশু গাছ । रा.नि.व.९ ।

श्वेतपद्मम् । क्ली । शुक्लकमले । रा.नि.व.१० । See पुण्डरीकम् ।

श्वेतपर्णः । पुं । श्वेतार्जके । प.मु.। स्त्री(र्णा)। वारिपर्ण्यां । পানা । र.मा. ।

श्वेतपर्णासः । पुं । श्वेततुलस्याम् । प.मु. ।

श्वेतपाटला । स्त्री । शुक्लपुष्पपाटलवृक्षे । ज टा. । [পারুল । वै.निघ. ।

श्वेतपारावतः । पुं । शुभ्रकपोते । শাদা

श्वेतपाषाणः । पुं । शुभ्रप्रस्तरे । শাদা পাথর । र.सा.सं.रसप्रकरणे । स्फटिके । वै.निघ. ।

श्वेतपिङ्गः (लः) । पुं । सिंहे । त्रिका. ।

श्वेतपिण्डीतकः । पुं । महापिण्डीतरौ, शुक्लमदने । শ্বেত ময়না গাছ । रा.नि.व.८ ।

श्वेतपुङ्खा । स्त्री । शुक्लशरपुङ्खायाम् । रा.नि. व.४ ।

श्वेतपुनर्नवा । स्त्री । शुभ्रपुनर्नवायां । শ্বেতমূলপুনর্নবা । गुणाः—"कटुः कषायानुरसा पाण्डुघ्नी दीपनी परा । शोफानिलगरश्लेष्महरी व्रणोदरप्रणुत् ॥" भा.गु.र. ।

श्वेतपुष्पः । पुं । श्वेतसिन्धुवारवृक्षे । শাদা নিশিন্দা । जटा. । महाशणक्षुपे । শণ । रा.नि. व ४ । सेवन्तीपुष्पवृक्षे । শেউতী । वै.निघ.२भ. जीर्णज्व.चि.सेवन्तीपाके । वरुणवृक्षे । अर्कवृक्षे । वै निघ. । क्ली । शुक्लपुष्पे ।

श्वेतपुष्पकः । पुं । करवीरवृक्षे । रा.नि.व. १० । श्वेतकासे । वै.निघ. ।

श्वेतपुष्पा । स्त्री । कोषातकीलतायाम् । শাদা ঘোষা । र.मा. । श्वेतशणे । শাদা শণ । श्वेतनिर्गुण्ड्यां । শাদা নিশিন্দা । श्वेतगोकर्णिकायां । শাদা অপরাজিতা । वै.निघ. । नागदन्त्याम् । काँकुड़ी । रा.नि.व.५ । मृगेर्व्वारौ । रा.नि.व.७

श्वेतपुष्पिका (ष्पी) । स्त्री । पुत्रदात्रीलतायाम् । रा.नि.व.२३ । महाशणपुष्पिकायाम् । বড় শাদা শণ । रा.नि.व.४ ।

श्वेतपूरिका । स्त्री । खाद्यद्रव्यभेदे । यथा —"गोधूमसक्तं च घृतं यावत् पिण्डत्वमाप्नुयात् । तावद्धत्वा जलेनाथ मर्दनीयं प्रयत्नतः । तस्यैव पूरिकाः कार्य्याः घृते पाच्याश्च ताः स्मृताः । शर्करासहिता जाड्या दुर्ज्जरा धातुवर्द्धकाः । स्निग्धाश्च गुरवः पित्तवातनाशकरा मताः ॥" वै.निघ. ।

श्वेतप्रसूनकः । पुं । शाकवृक्षे । শেগুন গাছ । श.मा. । [कूड़ । रा.नि.व.४ ।

श्वेतफला । स्त्री । शुक्लवृहत्याम् । শাদা ব্যা-

श्वेतभृङ्गराजः । पुं । (Heliotropium brevipolium.) शुक्लपुष्पभृङ्गराजे । শাদা ভীমরাজ । हिं शफेद भांरा ।

श्वेतभण्टिका । स्त्री। शुक्लवार्त्ताकौ । वै.निघ.।

श्वेतभण्डा । स्त्री । श्वेतापराजितायाम् । শাদা অপরাজিতা । र.मा. ।

श्वेतमञ्जरी । स्त्री । चुचुक्षुपे । वै.निघ. ।

श्वेतमण्डलः । पुं । मण्डलिसर्पविशेषे । सु. कल्प.४अ. ।

श्वेतमन्दारः (कः) । पुं । श्वेतार्कवृक्षे । শ্বেত আকন্দ গাছ । बम्. श्वेतमंदार । कं विलियमन्दारण । गुणाः—मन्दुष्णः तिक्तः मलशोधनः मूत्रकृच्छ्रकृमिघ्नश्च । रा.नि.व.१० ।

श्वेतमरिचम् । क्ली । Seeds of Hyperanthira moringa. शोभाञ्जनवीजे । সজিনার বীজ । र.मा. । मं पांढरे मिरिये । कं विलियमेणसु । तें तेल्लमिरियालु । गुणाः—कटूष्णं विषघ्नं भूतघ्नं दृष्टिरोगघ्नं युक्त्या रसायनमपि भवति । रा.नि.व.६ । "सैन्धवं श्वेतमरिचम् ।" च.द.ज्व.चि.नस्ये । पुं । श्वेतशिग्रौ । रा.नि.व.७ ।

श्वेतमूलः (ला) । पुं, स्त्री । श्वेतपुनर्नवायाम् । वै.निघ. । [दा वृहती । रा.नि.व.४ ।

श्वेतमहोटिका । स्त्री । श्वेतवृहत्याम् । শা-

श्वेतमृगः । पुं । भूशयमृगविशेषे । च. ।

श्वेतयूथिका । स्त्री । शुक्लयूथिकायां । শাদা যূঁই । वै.निघ. ।

श्वेतरञ्जनम् । क्ली । शीषके । शब्दकल्पः ।

श्वेतरत्नम् । क्ली । स्फटिके । प.मु. ।

श्वेतराजिः (जी) । स्त्री । चिचिण्डे । চিচিঙ্গা । भा.पू.१भ.शा.व. ।

श्वेतराजिका । स्त्री । श्वेतपीतसर्षपे, राजिकायां । রাই । रा.नि.व.१६ । [श्वित्र. ।

श्वेतरास्ना । स्त्री । श्वेतपुष्परास्नाविशेषे । भू-

श्वेतरो(लो)ध्रः । पुं । पट्टिकारोध्रे । शुक्ल লোধ । वै.निघ.२भ.ज्व.चि. । रा.नि.व.६ ।

श्वेतरोहितः । पुं । शुक्लपुष्परोहितकवृक्षे । শাদা রোঢ়া, রয়না । गुणाः—कटुः स्निग्धः कषायः शीतलः क्रिमिदोषघ्नः व्रणघ्नः प्लीहरक्तनेत्ररोगघ्नश्च । रा.नि.व.८ ।

श्वेतलक्ष्मणा । स्त्री । श्वेतकण्टकार्य्यां । শাদা কণ্টিকারী । वै.निघ. ।

श्वेतवचा । स्त्री । शुक्लवचायाम् । শাদা বচ । प.मु. । मं पांढरे वेखंडा । कं विलियवजे । गुणाः—वृष्या मतिमेधायुःकफघ्नी भूतवातक्रिमिघ्नी दीपनी च । अतिविषायाम् । আতইচ । रा.नि.व.६ ।

श्वेतवर्णकम् । क्ली । श्वेतरक्तचन्दने । वै.निघ. ।

श्वेतवर्णा । स्त्री । वराटकभेदे । শাদাবর্ণ কড়িবিশেষ । रा.नि.व.१३ । श्वेतपुष्पपाटलवृक्षे । শ্বেত পারুল গাছ । वै.निघ. । [१२ ।

श्वेतवर्वरकम् । क्ली । वर्व्वरचन्दने । रा.नि.व.

श्वेतवर्व्वरिका । स्त्री । शुभ्रतुलस्याम् । শ্বেত তুলসী । रा.नि.व.१० । रावणकृतसप्तशतके ।

श्वेतवल्कलः । पुं । उदुम्बरवृक्षे । যজ্ঞডুমুর গাছ । जटा. ।

श्वेतवल्ली । स्त्री । शुक्लवास्तुके । वै.निघ. ।

श्वेतवारिजम् । क्ली । श्वेतपद्मे । रा.नि.व.१० । [रा.नि.व.४ ।

श्वेतवार्त्ताकिनी (की) । स्त्री । श्वेतवृहत्यां ।

श्वेतवाहः (नः) । पुं । अर्ज्जुनवृक्षे । অর্জ্জুন গাছ । "श्वेतवाहः प्रकीर्त्यः ।" वा.सू.१५अ.असनादिः । [रोषतायां । वै.निघ. ।

श्वेतविट्कता । स्त्री । कफाधिक्यजन्यशुक्लपु-

श्वेतवीजः । पुं । श्वेतकुलत्थे । শ্বেত কুরতি-কলায় । रा.नि.व.१६ । [শাদা বোণা । प.मु. ।

श्वेतवुह्ना । स्त्री । स्वनामख्यातलताविशेषे ।

श्वेतवृन्ताकः । पुं । शुक्लवार्त्ताकौ । वै.निघ. ।

श्वेतवृहती । स्त्री । शुक्लवर्णक्षुद्रवृहत्यां । শাদা বৃহতী । कं विलियगुल्ल । वम्. पांढरी डोरली । गुणाः—वातश्लेष्मघ्नी रुच्या अञ्जनयोगेन नानानेत्ररुजापहा । रा.नि.व.४ । [मु. ।

श्वेतवृक्षः । पुं । वरुणवृक्षे । বরুণ গাছ । प.

श्वेतवेतसः । पुं । जलवेतसे । वै.निघ. ।

श्वेतशरपुङ्खा । स्त्री । शुक्लपुष्पशरपुङ्खायां । শরপুঙ্খা । हिं श्वेतशरफोंका । गुणाः—कटूष्णा वातरोगक्रिमिघ्नी च । रा.नि.व.४ ।

श्वेतशा(सा)रिवा । स्त्री । शारिवाभेदे । অনন্তমূল । सा च दुग्धगर्भा व्रततिः । भा.पू.१भ. । गुणैः कृष्णशारिवासदृशी । गुणाः—"श्वेता तु शारिवा शीता मधुरा शुक्रला गुरुः । स्निग्धा तिक्ता सुगन्धिश्च कुष्ठकण्डूज्वरापहा । देहदौर्गन्ध्याग्निमान्द्यश्वासकासारुचीहरा । आमत्रिदोषविषहृत् रक्तरुक्प्रदरापहा । कफातिसारतृड्दाहरक्तपित्तहरा परा ॥" वै.निघ. । See अनन्ता ।

श्वेतशाल्मलिः । पुं । (Eriodendron anfractuosum.) White cotton tree. शुक्लपुष्पकिंशुकवृक्षे । শ্বেত শিমুল গাছ । हिं सेनिवल हतियान । ता. इलवम् । Watts.

श्वेतशिंशपा । स्त्री । श्वेतपत्रशिंशपावृक्षे । শাদা শিশু গাছ । मं वम्. पांढरा शिंशपा, शिसव । कं विलिय इवीडु । गुणाः—तिक्ता शीतला पित्तदाहहरी च । रा.नि.व.९ ।

श्वेतशिग्रुः । पुं । श्वेतपत्रपुष्पशिग्रुवृक्षे । শ্বেত শজিনা গাছ । मं वम्. पांढरा सेगवा । कं विलियनुग्गि । गुणाः—कटुः तीक्ष्णः शोफानिलघ्नः अङ्गव्यथाहरः रुच्यः दीपनः मुखजाड्यहरश्च । रा.नि.व.७ ।

श्वेतशिम्बा(म्बिः,म्बी)कः । स्त्री, पुं । राजशिम्ब्याम् । শ্বেত শিম্ । र.मा. । भा.पू.१भ.धा.व. । See निष्पावः ।

श्वेतशिला । स्त्री । श्वेतपाषाणभेदे । শ্বেত পাথরকুচি । गुणाः—हिमा स्वादुः मेहकृच्छ्रघ्नी मूत्ररोधाश्मरीशूलचयपित्तघ्नी च । रा.नि.व.८ ।

श्वेतशृङ्गः । पुं । यवे । जटा. ।

श्वेतशूकः । पुं । यवे । रा.नि.व.२१ ।

श्वेतशूरणः । पुं । वनशूरणनामककन्दशाके । বুনো ওল । मं वम्. पांढरा शूरण । कं विलिय शूरण । गुणाः—रुच्यः कटूष्णः क्रमिघ्नः गुल्मशूलघ्न. अरोचकघ्नश्च । रा.नि.व.७ । [चे । संग्रहः ।

श्वेतशेफालिका । स्त्री । शुक्लशेफालिकाया-

श्वेतश्रेष्ठः । पुं । चन्दनवृक्षे । वै.निघ. ।

श्वेतसर्जः । पुं । श्वेतधूनके । শ্বেত ধূনা । संग्रहः । [प.मु. ।

श्वेतसर्षपः । पुं । शुक्लसर्षपे । শ্বেত শরিষা ।

श्वेतसारः । पुं । खदिरे । रा.नि.व.८ ।

श्वेतसिंही । स्त्री । श्वेतवृहत्याम् । रा.नि.व.४।

श्वेतसुरसा । स्त्री । श्वेतनिर्गुण्ड्याम् । अम. । श्वेतपुष्पतुलसीवृक्षे । শ্বেত তুলসী গাছ । सु.सू. सुरसादिः । "सुरसा श्वेतसुरसा ।" श्वेतशेफालिकायाम् । च.सू.शिरोविरेचने । [ज. ।

श्वेतसुरा । स्त्री । सुराभेदे । ধেনো মদ । रा

श्वेत(ता)स्यन्दा । स्त्री । श्वेतापराजितायां । रा.नि.व.३ । [४अ ।

श्वेतहनुः । पुं । राजिमत्सर्पविशेषे । सु.कल्प.

श्वेतहरः । पुं । महाशालवृक्षे । वै.निघ. ।

श्वेता । स्त्री । शरीरे तन्नामकतृतीयत्वचि । सा व्रीहेर्द्वादशभागप्रमाणा चर्म्मदलाजगल्लीमशकाधिष्ठाना । सु.शा.४अ. । शर्करायाम् । চিনি । रा.नि.व.१४ । स्फटिकारिकायां । ফটকিরি । भा. । दच्चौ । आथ् । मत्स्यण्ड्याम् । মিছরি । रा.नि.व.२१ । श्वेतवचायाम् । শ্বেত বচ । सु.सू. ३९अ. । श्वेतकाञ्चने इति वृद्धाः, वै.निघ.उन्मा. चि. । श्वेतदूर्व्वायाम् । रा.नि.व.८ । लताशिरीषे । अतिविषायां । আতইচ । प.मु. । काष्ठपाटलायाम् । কাঁটাশিরীষ । र.मा. । वराटिकायां । কড়ি । मे. । गाम्भारीवृक्षे । গামার গাছ । रा.नि.व.९ । अपराजितायाम् । भा.म.४भ.मु.रो.चि. । श्वेतवृहत्यां । श्वेतकण्टकार्य्यां । पाषाणभेदे । रा.नि.व.४।५ । श्वेतापराजितायां । শ্বেতাপরাজিতা । रा.नि.व.३ । च.द.उन्मा.चि. । लूतामेदे । মাকড়শাবিশেষ । शर्कराजातसुरायां । सा श्वेतपुनर्नवादिशालिपिष्टकमभवा । भा. । गुणाः—"कासार्शोग्रहणीश्वासप्रतिश्यायविनाशिनी । श्वेता मूत्रकफस्तन्यरक्तमांसकरी सुरा ॥" सु.सू.४६अ. । वंशरोचनायां । रा.नि.व.६ । शुक्लत्रिवृतायां । শ্বেত তেউড়ী । शुक्लगुञ्जायां । শাদা কুঁচ । श्वेतसारिवायां । অনন্তমূল । वै.निघ. ।

श्वेताञ्जनम् । क्ली । शुक्लाञ्जने । শাদা আঁজন, শাদা সুর্মা । इदं सौवीरगुणम् । वै.निघ.।

श्वेताढ़की । स्त्री । श्वेतपुष्पाढ़क्याम् । শাদা অড়হর । गुणः—दीपदा । रा.नि.व.१६ ।

श्वेतात्रिवृत् । स्त्री । शुक्लमूलत्रिवृति । শ্বেত তেউড়ী । भा. । [यां । वा.उ.५अ. ।

श्वेताद्रिकर्णिका । स्त्री । शुक्लगिरिकर्णिका-

श्वेतापराजिता । स्त्री । शुक्लपुष्पापराजितायाम् । শাদা অপরাজিতা । मं वम्. पांढरी सुपली । कं विलिय गिरिकर्णिके । गुणाः—हिमा तिक्ता पित्तोपद्रवहरी चक्षुष्या विषघ्नी च । रा.नि.व.३ । [পরাজিতা । वै.निघ. ।

श्वेताभद्रा । स्त्री । श्वेतगोकर्ण्यां । শাদা অ-

श्वेताभ्रम् । क्ली । श्वेतवर्णाभ्रे । শাদা অভ্র । रा.नि.व.१३ । See अभ्रम् ।

श्वेताम्लिः (का) । स्त्री । पीठौंड़ीति प्रसिद्धवृक्षविशेषे, अम्लिकायां । मं पीठौंड़ी । कं विलिय हुलि । गुणाः—वृष्या मधुरा पित्तघ्नी बलदा च । रा.नि.व.४ ।

श्वेतायुग्मम् । क्ली । अपराजिताद्वये । एका किणिहिसंज्ञा, अन्या महाश्वेता पालिन्दीसंज्ञा च । "श्वेतायुग्मं तापसानाञ्च वृचः ।" वा.सू.१५ अ.अकणः ।

श्वेतारिरसः । पुं । श्वित्रकुष्ठे रसः । पाठः—"शुद्धसूतं समं गन्धं त्रिफला भृङ्गवाकुची । भल्लातकी तिलः कृष्णो निम्बवीजं समं समं । मर्दयेद्भृङ्गजद्रावैः शोष्यं पेष्यं पुनः पुनः । इत्थं कुर्य्याच्चित्रसप्ताहं रसः श्वेतारिको भवेत् ॥" अनु. घृतमधुनी । रस.चि. । [न्द । See शुक्लार्कः ।

श्वेतार्कः । पुं । शुभ्रपुष्पार्कवृक्षे । শ্বেত আক-

श्वेतालुः । पुं । शुक्लवर्णालुके, महिषकन्दे । गु-

णा:—कटु: उष्ण: कफवातघ्न: मुखजाड्यहर: रु-च्यश्च । रा.नि.व.७ । [नि.व.४ ।

श्वेताम्ब(व)र: । पुं । सुनिषण्णकशाके । रा.

श्वेतावलोकन: । पुं । कफजरोगविशेषे । निदा. ।

श्वेताश्व: । पुं । कैटर्य्ये । ঘোড়াগুটী । प.मु. ।

श्वेताह्वा । स्त्री । शुक्लगोकर्ण्याम् । वै.निघ. । सितपाटलायां । শ্বেত পারুল । रा.नि.व.१० ।

श्वेताक्ष: । पुं । सोमलताभेदे । सु.चि.२९अ. । See सोम: ।

श्वेताक्षुद्रा । स्त्री । श्वेतकण्टकार्य्याम् । वै.निघ. ।

श्वेतेक्षु: । पुं । श्वेतवर्णेक्षौ । শাদা আখ । बम्. पांड़रा उंस । कं बिलिय कबु । गुणा:—कठिन: रुच्य: गुरु: कफमूत्रकृत् दीपन: पित्तदाहघ्न: विपाके च कोष्ण: । रा.नि.व.१४ । वातपित्तशमन: वृष्य: अन्तर्विदाही कफकृत् सितेक्षु: । अत्रि.१०अ. ।

श्वेतैरण्ड: । पुं । शुक्लैरण्डवृक्षे । শাদা রেড়ি । हिं शफेद एरण्ड । मं पांड़रे एरंडु । गुणा:—"कटुक: श्वेतएरण्डस्तीक्ष्णश्चोष्णो गुरु: स्मृत: । मधुरस्तिक्तको वृष्यो गुरु: स्वादु: सर: स्मृत: । वातोदावर्त्तकफहृज्ज्वरकासोदरापह: । शोथशूलकटीवस्तिशिरोरुङ्नाशन: स्मृत: । श्वासानाहकुष्ठवर्ध्म-गुल्मप्लीहामपित्तहा । प्रमेहोष्णवातरक्तमेदान्त्रवर्द्धनप्रणुत् ॥" वै.निघ. । [४अ. ।

श्वेतोदर: । पुं । दर्वीकरसर्पविशेषे । सु.कल्प.

श्वित्रम् । क्ली । श्वित्ररोगे । धवल । प.टी. ।

ष

षटि: । स्त्री । शट्याम् । শটী । वा.चि.६अ. ।

षट्कम् (कटु) । क्ली । त्रिकटुचव्यचित्रकपिप्पलीमूलेषु । वै.निघ.२भ.वा.व्या.प्रत्यष्ठीला.चि. ।

षट्कनिघण्टु: । पुं । वैद्यकनिघण्टुभेदे ।

षट्कोणम् । क्ली । हीरके । वै.निघ. ।

षट्चरण: (पद:) । पुं । भ्रमरे । हला. । यूकायां । रा.नि.व.१९ । [यो.वा.व्या.चि. ।

षट्चरणयोग: । पुं । षड्धरणयोगे । सि.

षट्पदघाती (इन्) । पुं । स्वर्णचम्पके । वै.निघ. ।

षट्पददल: (प्रिय:) । पुं । सुरपुन्नागे । পুনাঙ্ গাছ । वै.निघ. । नागकेसरपुष्पवृक्षे । श.मा. । स्त्री (या) । वनमल्लिकायां । वै.निघ. ।

षटपदमोदिनी । स्त्री । वर्व्वूलवृक्षे । বাবলা গাছ । वै.निघ. ।

षट्प(पा)दा (दी) । स्त्री । कीटभेदे । গঙ্গা ফড়িং । हे.च. । "आपाण्डुवर्णा कपिला हरिता च प्रजायते । महोदरा च षट्पादी सूक्ष्मवक्त्रोत्तमाङ्गिका । षट्पदी नाम········· ॥" ज.द. ।

षट्पदातिथि: । पुं । आम्रवृक्षे । त्रिका. । स्वर्णचम्पके । वै.निघ. । [छ । वै.निघ. ।

षट्पदाधार: । पुं । कदम्बवृक्षे । কদম্ গা-

षट्पदानन्दवर्द्धन: । पुं । देववर्वूरके । वै.निघ. । किङ्किरातवृक्षे । অশোক গাছ । रा.नि.व.१० । [বেলমল্লিকা । भा. ।

षट्पदानन्दा । स्त्री । वार्षिकीमल्लिकायाम् ।

षट्पदालय: । पुं । सुरपुन्नागवृक्षे । वै.निघ. ।

षट्पदीभक्ष: । पुं । गङ्गापतङ्गभक्षणजन्याम्ररोगे । लक्षणं यथा—"ग्रासमध्यगतं वाहा ये भक्षन्ति सुदारुणम् । तेषां शोषश्च मूर्च्छा च भ्रम: श्वासश्च जायते ॥" ज.द. ।

षट्भद्रिका । स्त्री । बालरोगे औषधम् । पारसीययमानिकाघनकणाशृङ्गीविड़ङ्गारुणानां चूर्णे । वा. ।

षट्लवणम् । क्ली । मृल्लवणोपेते पञ्चलवणे । "काचसैन्धवसामुद्रविड़सौवर्चलै: समै: । स्यात् पञ्चलवणं तच्च मृत्सोपेतं षड़ाह्वयम् ॥" रा.नि.व.२२ । [निघ. ।

षट्लौहसम्भवम् । क्ली । शिलाजतुनि । वै.

षड्गः । पुं । मण्डलिसर्पविशेषे । सु.कल्प ४ ।

षडङ्गः । पुं । गोक्षुरक्षुपे । গোখুরী । वै.निघ. ।

सर्पाक्षी । स्त्री । सर्पसहायाम् । পানশিউলী । हिं सरहची गन्धिनी । प.मु. । र.सा.सं. । वै.निघ.२भ.एकाहिक.ज्व.चि.मृतसञ्जीवनीरसे । र.स.र.विष.चि. । गुणाः—"सर्पाक्षी कटुका तिक्ता सोष्णा कृमिनिकृन्तनी । वृश्चिकोन्दुरसर्पाणां विषघ्नी व्रणरोपणी ॥" भा.गु.व. । श्वेतापराजितायां । रक्तशङ्खिन्याम् । वै.निघ. । गन्धनाकुल्याम् । रा.नि.व.७ ।

सर्पिः (स्) । क्ली । दुग्धसम्भूतस्नेहे । घृते । घि । रा.नि.व.१५। सृप गतौ संस्कारात् सर्पणात् सर्पिः । "नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्त्तते । यथा सर्पितरं सर्पिः सर्व्वस्नेहोत्तमं मतम् ॥" सि.यो.वा.व्या.चि.श्रीकण्ठः ।

सर्पिका । स्त्री । गोकर्णीलतायां । वै.निघ. ।

सर्पिणी । स्त्री । सर्पाकारवत्क्षुपविशेषे । সর্পকঙ্কালী । गुणाः—विषघ्नी कुचवर्द्धिनी च । रा.नि.व.५ । सर्पस्त्रियां । श.र. ।

सर्पिर्गर्भम् । क्ली । नवनीतके । वै.निघ. ।

सर्पिर्मेहः । पुं । वातजन्यप्रमेहरोगे । तत्र घृ-
ततुल्यं मेहति । सु.नि.६अ. ।
सर्पिषम् । क्ली । घृते । वै.निघ. ।
सर्पी । स्त्री । भुजग्याम् । श.र. । [जटा. ।
सर्पी(र्पे)ष्टम् । क्ली । श्रीखण्डचन्दने । र.मा.।
सर्व्वः । पुं । पारदे । र.सा.सं.प्रकारान्तरविष-
मज्व.रसे । भैष.वा.र.चि. । सा.कौ.ज्वरान्तकर-
से । रसाञ्जने । शिलाजतुके । वै.निघ. ।
सर्व्वगः । पुं । जीवे । आत्मनि । श.मा.। क्ली ।
जले । मे. ।
सर्व्वगन्धम् । क्ली । चातुर्जातकादिषु द्रव्येषु ।
"चातुर्जातककर्पूरकक्कोलागुरुसिह्लकम् । लवङ्ग-
सहितञ्चैव सर्व्वगन्धं विनिर्दिशेत् ॥" प.प्र.२ख. ।
कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनेषु । भा.म.४भ.अम्ल.
पू.चि. । "सर्व्वगन्धैः प्रदेहश्च ।" "चातुर्जातकक-
र्पूरं कक्कोलागुरुकुङ्कुमम् । लवङ्गसहितञ्चैव सर्व्व-
गन्धं विनिर्दिशेत् ॥" इति च । भा. । सौश्रुते
एलादिगणे ।
सर्व्वगा । स्त्री । प्रियङ्गुलतायाम् । श.च. ।
सर्व्वग्रन्थिः (कम्) । पुं, क्ली । पिप्पलीमूले ।
रा.नि.व.६ । हे.च. । [ना । वै.निघ. ।
सर्व्वग्रहापहा । स्त्री । नागदमन्यां । নাগদ-
सर्व्वजगत्प्रिया
सर्व्वजनप्रिया } स्त्री । ऋद्धौ। वृद्धौ। वै.निघ.।
सर्व्वज्वरहरलौहः । पुं । विषमज्वरे रसवि-
शेषः । पत्री—चित्रकमूलं त्रिकटु त्रिफला विड़ङ्गं
मुस्तकं गजपिप्पली पिप्पलीमूलं वीरणमूलं देव-
दारु किराततिक्तं वालकं कटुकी कण्टकारी सि-
ग्रुवीजं यष्टिमधु कुटजत्वक् इन्द्रयवी वा एषां प्रति
समभागः सर्व्वचूर्णसमं लौहं । मात्रा १ माषा ।
अनुपानं मधु । सा.कौ. । अन्यः—জারিতলৌহ
১৬ তো. পারা ২ তো. গন্ধক ২ তো. আ-
মলা, হরীতকী, বহেড়া, শুঁট, পিপুল, মরি-
চ, বিড়ঙ্গ, মুতা, গজপিপুল, পিপুলমূল, হ-
রিদ্রা, দারুহরিদ্রা, চিতের মূল প্রত্যেকে
১ তো.। আদার রসে মর্দ্দন । মাত্রা ২রতি ।
भैष. । तृतीयः वृहत्सर्व्वज्वरहरः—পারা, গন্ধক,
অভ্র, তাম্র, স্বর্ণমাক্ষিক, স্বর্ণ, রৌপ্য, শুদ্ধ-
হরিতাল প্রত্যেকে ২ তো. কান্তলৌহ ৮
তো. । মর্দ্দনদ্রব্য—উচ্ছেপাতার রস, দশমূ-
লক্কাথ, ক্ষেৎপাপড়ার রস, ত্রিফলাকাথ, গুড়-
লুঞ্চরস, পানের রস, কাকমাচীরস, নিশু-
ণ্ডীপত্ররস, পুনর্নবারস ও আদার রস। মা-
ত্রা ১ রক্তি। অনুপান পিপুলচূর্ণ ও পুরাণ
গুড় । र.सा.सं. । [श.च. ।
सर्व्वतःशुभा । स्त्री । पिप्पलीमूले । प्रियङ्गौ ।
सर्व्वतन्त्रसिद्धान्तः । पुं । सिद्धान्तविशेषे ।
सर्व्वतिक्ता । स्त्री । काकमाचिकायाम् । रा.-
नि.व.४ ।
सर्व्वतोभद्रः । पुं । निम्बवृक्षे । रा.नि.व.८ ।
क्ली । आसनपर्य्यङ्काकारेण अश्मरीच्छेदने । "सेव-
नीं वर्ज्जयित्वा तु चतुर्धा दारिते गुदे । सर्व्वतोभ-
द्रकम्……… ॥" सु.चि.७अ. । वा.उ.२८अ. ।
सर्व्वतोभद्रा (द्रिका) । स्त्री । गाम्भार्य्यां ।
গামার গাছ । रा.नि.व.९ । वा.सू.१५अ.सालि
सारादौ । भा.म.१भ.ज्व.चि. । "श्रीफलः सर्व्वतोभ-
द्रा ।"
सर्व्वतोमुखम् । क्ली । जले । रा.नि.व.१४ ।
सर्व्वधातुकम् । क्ली । ताम्रे । वै.निघ. ।
सर्व्वपाचकः । पुं । टङ्कणक्षारे । সোহাগা ।
वै.निघ. ।
सर्व्वभक्ष्या । स्त्री । छाग्यां । পাঁটী । हे.च. ।
सर्व्वभूतप्रमर्द्दिनी । स्त्री। बन्ध्याकर्कोटक्यां
वै.निघ. । [द्रव्ये । वै.निघ. ।
सर्व्वभूमिकः । पुं । दारुचिनीति ख्याते पण्य-
सर्व्वमूल्यम् । क्ली । कपर्दके। कड़ि । निकष.।
सर्व्वयूषः । पुं । गोरसधान्याम्लफलाम्लैरेकत्र
मिलितैर्यो रसो भवति । स गुरुतरः । वै.निघ. ।
सर्व्वरसः । पुं । धूनके । अम. । लवणरसे ।
हे.च. । स्त्री (सा) । लाजमण्डे । খৈয়ের মণ্ড ।
प.मु. ।
सर्व्वरसोत्तमः । पुं । लवणरसे । हे.च. ।
सर्व्वलवणम् । क्ली। औषरलवणे। रा.नि.व.६।

सर्व्वलोहम् । क्ली । ताम्रे । वै.निघ. ।

सर्व्ववर्चसम् । क्ली । ताम्रे । वै.निघ. ।

सर्व्ववर्णिका । स्त्री । गाम्भारीवृक्षे । जटा. ।

सर्व्वश्वेता । स्त्री । सर्षपिकानामप्राणहरकीटविशेषे । सु.कल्प.८ष. । See कीटः ।

सर्व्वसंसर्गलवणम् । क्ली । औषरलवणे । रा.नि.व.६ । [ष्टिकधान्ये । श.च. ।

सर्व्वसङ्गतः । पुं.। विप्रवृद्धिधान्यविशेषे, ष-

सर्व्वसरः । पुं.। तन्नामकमुखरोगे । स वातपित्तकफशोणितनिमित्तः । तत्र वातजे वदनं सतोदस्फोटैः समन्तादाचितं भवति । पित्तजे मुखं रक्तपीतसदाहतनुस्फोटाचितं भवति । कफेनाल्परुक्कण्डूयुतैः सवर्णैर्व्याप्तं भवति । रक्तजे च पित्तलक्षणं भवति । सु.नि.१६ष. ।

सर्व्वसहः । पुं । गुग्गुलौ । प.मु. ।

सर्व्वसाधनम् । क्ली । स्वर्णे । वै.निघ. ।

सर्व्वसिद्धिः । पुं । श्रीफले । বেল । श.च.।

सर्व्वस्नेहः । पुं । चतुःस्नेहेषु । सि.यो.वा.व्या.चि.शालणक्षेदे । See स्नेहचतुष्टयम् ।

सर्व्वहितम् । क्ली । मरिचे । रा.नि.व.६ ।

सर्व्वक्षारः । पुं । क्षारविशेषे । সাবান । साबन् इति लोके । सज्जखार इति दाक्षिणात्ये । गुणाः—अतिचारः अत्युष्णः वस्तिशोधनः गुदावर्त्तकृमिघ्नः मलमूत्रविशोधनश्च । रा.नि.व.६ । मुष्ककवृक्षे । घণ্টাপারুল । वै.निघ. ।

सर्व्वाख्यः । पुं । पारदे । পারা । रस.कौ. । भैष.वा.र.चि.द्वादशायसे ।

सर्व्वाङ्गकम्पारिरसः । पुं । वातव्याध्यधिकारे रसः । पाठः—"मृतं सूतं मृतं ताम्रं मर्दयेत् कटुकद्रवैः । एकविंशतिवारञ्च शोष्यं पेष्यं पुनः पुनः । चणमात्रा वटी भक्ष्या…… ॥" रस.र. ।

सर्व्वाङ्गसुन्दरः । पुं । रसोऽयं विरेचनाधिकारोक्तः । पाठः—"शुद्धसूतञ्च गन्धञ्च विषञ्च जयपालकम् । कटुत्रयञ्च त्रिफला टङ्कणञ्च समांशकम् ॥" मात्रा ३ गुञ्जामिता । পারা, গন্ধক, বিষ, জয়পালবীজ, ত্রিকটু, ত্রিফলা, সোহাগার খৈ প্রত্যেকে সমভাগ । মাত্রা ৩ রতি । र.सा.सं. । अन्यः कासाधिकारे यक्ष्माधिकारे च—"रसगन्धकतुल्यांशौ द्वौ भागौ टङ्कणस्य च । मौक्तिकं विद्रुमं शङ्खं मारयेच्च प्रयत्नतः । हेमभस्मार्द्धभागञ्च सर्व्वं खल्ले निधापयेत् । निम्बद्रवस्य योगेन पिण्डिकां कारयेद्भिषक् । पश्चाद्गजपुटं दद्यात्शीतलञ्च समुद्धरेत् । हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं दरदो मतः । एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत्…… ॥" নীরসরূপে সোহাগার খৈ করিয়া উত্তমরূপে তাহা চূর্ণ করত সেই খই ২ তো. পারা ১ তো. গন্ধক ১ তো. মুক্তাভস্ম, প্রবালভস্ম, শঙ্খভস্ম প্রত্যেকে ২ তো. সোণা ॥৹ তো. । একত্র নিমছালের রসে মাড়িয়া গোলক প্রস্তুতকরত সেই গোলক বদ্ধমূষায় রাখিয়া গজপুটে তীব্র জ্বালে পাক করিবে। শীতল হইলে তুলিয়া লৌহ ॥৹ তো. ও হিঙ্গুল ।৹ আনা দিয়া একত্র মাড়িয়া রাখিবে। মা. ২ র। অনু. পিপুলচূর্ণ ও মধু। रस.कौ. । भैष. ।

सर्व्वाङ्गसुन्दरी । स्त्री । वैद्यकग्रन्थविशेषे ।

सर्व्वानुकारिणी । स्त्री । शालपर्ण्यां । শালপাণি । रा.नि.व.४ । [তেউড়ী । अम. ।

सर्व्वानुभूतिः । स्त्री । श्वेतत्रिवृति । শ্বেত

सर्व्वान्नीनः । त्रि । सर्व्वान्नभक्षके । वा.चि.१ अ. । "सर्व्वान्नीनो भवेत्तथा ।"

सर्व्वायनी । स्त्री । श्वेतत्रिवृतायां । वै.निघ. ।

सर्व्वाम्लम् । क्ली । सर्व्वविधप्रशस्ताम्लद्रव्येषु, काञ्जिकसुरासौवीरकदधिमस्त्वादिषु । सि.यो.शालणक्षेदे ।

सर्व्वाक्षः । पुं । रुद्राक्षवृक्षे । वै.निघ. ।

सर्व्वाक्षिरोगः । पुं । सर्व्वगतनेत्ररोगे । स षोड़शविधः—वाताभिष्यन्दः अधिमन्थः हताधिमन्थः अन्यतोवातः शिक्षनेत्रः पित्ताभिष्यन्दः कफाभिष्यन्दः रक्ताभिष्यन्दः शुष्काक्षिपाकः सशोफाक्षिपाकः अक्षिपाकात्ययः अम्लोषितः सन्निपाताभिष्यन्दः वातपैत्ताभिष्यन्दः वातकफाभिष्यन्दः पित्तश्लेष्माभिष्यन्दश्च । वा.उ.१५ष. । एषां विशेषाः स्वस्वपर्य्याये मृग्याः । See नेत्ररोगः ।

सर्व्वाची । स्त्री । दुग्धिकायां । थिरुई । वै. निघ. ।

सर्व्वौषध(धि)गणः । पुं । कुष्ठाद्यौषधिवर्गे । कुष्ठजटामांसीवचाहरिद्राशैलेयचन्दनमुरामांसीकर्पूरमुस्तासु । "कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः । मुराकर्पूरमुस्ताभिः सर्व्वौषधमुदाहृतम् ॥" रा.नि.व.२२ । "मुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयं । शटी चम्पकमुस्तञ्च सर्व्वौषधिगणः स्मृतः ॥" ज्योतिःशास्त्रम् ।

सर्व्वौषधिः । स्त्री । सर्व्वौषधिगणे ।

सर्षपः । पुं । (Brassica campestris. Syn. Dinapis dichotoma.) स्वनामख्याततृणक्षुपविशेषे । সরিষা গাছ । हिं सरीसा, सर्षौं, जिरिया । गुणाः—रसपाकयोः कटुः स्निग्धः तिक्तः तीक्ष्णोष्णः वातकफघ्नः रक्तपित्ताग्निवर्द्धनः रक्षोघ्नः कण्डूकुष्ठकृमिघ्नश्च । गौरस्तु श्रेष्ठः । भा.पू. । तीक्ष्णः वातकफघ्न उष्णः रक्तपित्तकरः कटुः कृमिकुष्ठघ्नश्च । सिद्धार्थोऽपि तद्गुणः । राज । स सितासितभेदेन द्विधा । (Brassica nigra.) The black mustard. कृष्णसर्षपे । কাল সরিষা । हिं कालिराइ, माकड़ाराइ, सर्षौं, पियरी सरीस । तें अवली । गुणाः—"…कटूष्णो वातशूलनुत् । पित्तदाहप्रदो गुल्मकण्डूकुष्ठव्रणापहः ॥" (Brassica juncea. Syn. Sinapis juncea.) राजिकायाम् । শ্বেত সরিষা, রাই সরিষা । हिं राजिका । गुणाः—"सिद्धार्थः कटुकोष्णश्च वातरक्तग्रहापहः । त्वग्दोषशमनो रुच्यो विषभूतव्रणापहः ॥" सर्षपतैलगुणाः—तिक्तं कटुकं वातकफविकारघ्नं पित्तासृग्दोषदं कृमिकुष्ठघ्नं तिलजवच्चक्षुष्यञ्च । सर्षपशाकगुणाः—"सार्षपं कृमिलं स्वादु त्रिदोषरक्तपित्तकृत् ।" राज.३प. । अप्युष्णं रक्तपित्तप्रकोपकरं विदाहि कटुकं स्वादु रुचिदञ्च । रा.नि.व.७ । "सार्षपञ्च त्रिदोषघ्नं रुचिदञ्चाग्निवर्द्धनम् ।" अत्रि.१६अ. । "विदाहि बद्धविण्मूत्रं द्रव्यं तीक्ष्णोष्णमेव च । त्रिदोषं सार्षपं शाकम्…… ॥" सु.सू.४६अ. । सर्षपनालगुणाः—"तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मव्रणापहम् । कण्डूवमिहरं दद्रुकुष्ठघ्नं रुचिकारकम् ॥" भा.पू. १भ.शा.व. । सर्षपविशेषे । কপি । हिं गोरि । अस्य बीजं दीपनम् । पत्रं वातघ्नम् । Watts. षण्मरीच्यात्मकमाने । "षण्मरीच्यस्तु सर्षपः ।" मागधमानमिदम् । प.प्र. । राजिकात्रयपरिमिते माने । "तिसृभीराजिकाभिश्च सर्षपः ।" कालिङ्गमानमेतत् । [अ. । See कन्दविषम् ।

सर्षपकः । पुं । तन्नामकन्दविषे । सु.कल्प.२

सर्षपतैलम् । क्ली । सर्षपबीजोत्थतैले । See सर्षपः । [मिदम् । भा. । See सर्षपः ।

सर्षपनालम् । क्ली । सर्षपदण्डे । नालशाक-

सर्षपा । स्त्री । श्वेतसर्षपे । वै.निघ. ।

सर्षपिकः । पुं । प्राणहरकीटविशेषे । सु.कल्प. ८अ. । See कीटः ।

सर्षपिका । स्त्री । शूकरोगभेदे । लक्षणं—"गौरसर्षपतुल्या तु शूकदुर्भग्नहेतुका । पिड़का कफरक्ताभ्यां ज्ञेया सर्षपिका बुधैः ॥" सु.नि.१४ अ. । तन्नामककीटभेदे । गलगोली श्वेतकृष्णरक्तराजिः रक्तमण्डला सर्व्वश्वेता सर्षपिका चेति । ताभिर्दष्टे सर्षपिकावर्ज्जं दाहशोफक्लेदा भवन्ति । सर्षपिकया हृत्पीड़ातिसारश्च भवति । सु.कल्प.८ अ. । मसूरिकाभेदे । "चतुर्थी सर्षपाकारा पीतसर्षपवर्णिनी । नाम्ना सर्षपिका ज्ञेयाऽभ्यङ्गमत्र विवर्जयेत् ॥" भा. ।

सर्षपी । स्त्री । श्वेतसर्षपे । वै.निघ. । खञ्जरिकायां । खञ्जन । त्रिका. ।

सर्षपोद्भूतम् । क्ली । श्वेतसर्षपे । वै.निघ. ।

सलम् । क्ली । जले । अ.टी.भ. । [प.मु. ।

सलटुकः । पुं । वृत्तपत्रशाके । নটিয়া শাক ।

सलपत्रम् । क्ली । दारुशर्करायां । दारुचिनि । वै.निघ. ।

सलिलम् । क्ली । जले । रा.नि.व.१४ ।

सलिलकुन्तलः । पुं, क्ली । शैवाले । त्रिका. ।

सलिलग्रहः । पुं । अश्वस्य ग्रहभेदे । लक्षणं यथा—"हेषते सततं यस्तु हृष्टरोमा तुरङ्गमः । सन्ध्याचौ जृम्भतेऽत्यर्थं तस्यापि सलिलग्रहः ॥" ज. द.५७अ. ।

सलिलजम् । क्ली । कमले । पद्म । अम. ।

सलिलधरः । पुं । मुस्तायाम् । मूता । वै. निघ २भ.जिह्वकन्न.चि. । [See जलदः ।

सल्लकद्रुः । पुं । प्रियालवृक्षे । रा.नि.व.११ ।

सल्लकी (ल्ली) । स्त्री। (Boswellia thurifera.) Gum olibanum tree. स्वनामख्यातफलशाकलतायाम् । कुँदरुकी । शालविशेषे । यस्य निर्यासः शिलारस इत्युच्यते । अगभस्या, शालइ इति लोके । मं सल्लकि । कं तदिरु । बम्. शालइ । गुणाः—तिक्तमधुरा कषाया ग्राहिणी कुष्ठरक्तकफवातार्शोव्रणदोषघ्नी च । रा. नि.व.११ । वै.निघ.२भ.र.प.सा.चि.सल्लक्यादिस्वरसे । सु.सू.२५ष. । [कल्प. ।

सवम् । क्ली । जले । जटा. । पुष्परसे । शब्द-

सवनम् । क्ली । प्रसवे । शब्दकल्प. ।

सवरम् । क्ली । जले । त्रिका. । [प.मु. ।

सवररोध्रम् । क्ली । श्वेतरोध्रे । পাটিশালোধ।

सवर्णकरणम् । क्ली । विवर्णक्षतस्थानस्य देहसमानवर्णकरणे । सु.चि.१ष. ।

सवहा । स्त्री । त्रिवृतायां । ष.टी.भ. ।

सविता (तृ) । पुं । अर्कवृक्षे । আকন্দগাছ । रा.नि.व.१० ।

सवित्रम् । क्ली । प्रसवकरणे । व्याक. । स्त्री (त्री) । धात्र्याम् । धाई । अचिः । [निघ. ।

सविभालम् । क्ली । नखीनामगन्धद्रव्ये । वै.

सवीर्य्या । स्त्री । शतावर्य्याम् । শতমূলী । रा. नि.व.४ ।

सव्यम् । क्ली । वामकाये । अम. ।

सव्यभिचारम् । क्ली । सव्यभिचारं नाम यत् व्यभिचरणं, यथा—"भवेदिदमौषधमस्मिन् व्याधौ यौगिकमथवा नेति ।" च.वि.८ष. ।

सव्यसाची (इन्) । पुं । अर्ज्जुनवृक्षे । रा.नि. व.९ ।

सव्रणशुक्लः । पुं । नेत्रकृष्णगतरोगभेदे । लक्षणं यथा—"निमग्नरूपं हि भवेत्तु कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै । स्रावं स्रवेदुष्णमतीव रुक् च तत्सव्रणं शुक्रमुदाहरन्ति ॥" सु.उ.२ष. ।

सशल्यः (ल्या) । पुं, स्त्री । भल्लूके । रा.नि.व. १९ । नागदन्त्यां । হাতিশুঁড়ে । र.मा. । [६ ।

सशाकम् । क्ली । आर्द्रके । আদা । रा.नि.व.

ससत्त्वा । स्त्री । गर्भवत्यां स्त्रियाम् । श.र. ।

ससिद्धः । पुं । सर्जवृक्षे । ধুনোর গাছ । रा. नि.व.९ । [धान । हे.च. ।

सस्यम् । क्ली । फले । अ.टी.भ. । धान्यके ।

सस्यमारी (इन्) । पुं । महामूषिके । মেটো ইন্দুর । रा.नि.व.१९ ।

सस्यसंव(ब)रः । पुं । लघुशालवृक्षे । अम. । सल्लकीवृक्षे । वै.निघ. । [९ ।

सस्यसंवरणः । पुं । अश्वकर्णशाले । रा.नि.व.

सहम् । क्ली । बले । मे. । मार्गशीर्षमासे । हे. च. । पांशुलवणे । रा.नि.व.६ ।

सहकारः । पुं । अतिसौरभयुक्ते आम्रवृक्षे । प.मु. । रा.नि.व.११ । अम. ।

सहचरः । पुं । झिण्टीक्षुपे । ঝাঁটী গাছ । मे.। पीतझिण्ट्यां । পীতঝাঁটী । र.मा. । वा.सू.१५ष. वेल्लन्तरादिव. । "गोकण्टकोत्कटसहाचरवाणकाशाः ।" नीलझिण्ट्यां । प.मु. । सु.सू.३९ष.संशोधने । [कण्टकशेलुदये । सु.सू.३८ष.डल्वणः ।

सहचरद्वयम् । क्ली । नीलपीतझिण्टीद्वये ।

सहचरा (री) । स्त्री । पीतझिण्ट्यां । र.मा.। वै.निघ.। सन्निक.ज्व.चि.वचादिः। नीलझिण्ट्यां । प.मु. ।

सहजकृति । क्ली । सुवर्णे । वै.निघ. ।

सहजरसः । पुं । स्वरसे । रस.चि.९ष. ।

सहखण्डकम् । क्ली। मांसकृतव्यञ्जनविशेषे । यथा—"छागादिमांसं मूर्द्धादि: कुट्टितं खण्डितं पुनः । शुद्धमांसविधानेन पचेदेतत् सहखण्डकम् । सहखण्डकं गुणग्रन्थे शुद्धमांसगुणं स्मृतम् ॥" भा. ।

सहदेवा (वी) । स्त्री । (Sonchus aruenois. Syn. S. Orixensis.) बलायाम् । বেলেড়া । वनपालङ्क । বন পালং । हिं सहदेवी बरी । मं सहदेवी । पञ्जा. भांरा । पीतपुष्पबलायाम् । काङ्कसोति लोके । পীত বেলেড়া । सर्पाक्ष्याम् । शारिवायाम् । मे. । नीलपुष्पबला-

याम् । सु.सू.३८अ. । चि.८अ. । महाबलायाम् । গোরক্ষচাকুলিয়া । रा.नि.व.४ । भा.सन्ततादि. ज्व.चि. । पीतदण्डोत्पलायां । পীত ডানকুনী । र.मा. । भैष.ज्व.चि.पानीयभक्तवट्याम् । दण्डोत्पलायाम् । ডানকুনী । हिं चिचड़ी । च.द. शूल.चि.एरण्डद्वादशके । च.वि.८अ. । प्रियङ्गौ । महानील्याम् । वै.निघ. ।

सहपानम् । क्ली । एकत्रपाने । है.च. ।

सहभाद्ली । स्त्री । प्रसारण्याम् । गन्धभाद्लि । भैष.आमवातचि.लेपे ।

सहभोजनम् । क्ली । एकत्रभोजने । अम. ।

सहरसा । स्त्री । मुद्गपर्ण्याम् । মুগানী । श. र. ।

सहसानुः । पुं । मयूरे । उणा. ।

सहस्यः । पुं । पौषे मासि । अम. । [व.८ ।

सहस्रकाण्डा । स्त्री । श्वेतदूर्व्वायां । रा.नि.

सहस्रजित् । स्त्री । कस्तूर्य्याम् । মৃগনাভি । वै.निघ. ।

सहस्रदंष्ट्रः । पुं । महापाठीनमत्स्ये । বোয়াল মাছ, চিতল মাছ । अम. ।

सहस्रदंष्ट्री (इन्) । पुं । मत्स्यविशेषे । বোয়াল মাছ । श.र. ।

सहस्रधौतः । त्रि । सहस्रवारं चालिते घृतादौ । হাজার বার ধোওয়া ঘৃতাদি । वा चि.१ अ. ।

सहस्रनुत् । पुं । अम्लवेतसे । भा.पू.१भ. ।

सहस्रपत्रम् । क्ली । कमले । পদ্ম । रा.नि. व.१० । [व.८ ।

सहस्रपर्व्वा । स्त्री । श्वेतदूर्व्वायाम् । रा.नि.

सहस्रपादः । पुं । कारण्डवपक्षिणि । সারস পাখী । मे. ।

सहस्रभित् । क्ली । अम्लवेतसे । भा. ।

सहस्रमूली । स्त्री । द्रवन्त्यां । रा.नि.व.५ । आखुकर्ण्याम् । মূষাকাণী । वै.निघ. । [श.र. ।

सहस्ररसा । स्त्री । मुद्गपर्ण्याम् । মুগানী ।

सहस्रवीर्य्या । स्त्री । दूर्व्वायां । र.मा. । च. चि.४अ. । नीलदूर्व्वायां । च.शा.८अ. । महाशतावर्य्यां । रा.नि.व.४ । श्वेतदूर्व्वायां । रा.नि.व.८। च.सू.४अ. ।

सहस्रवेध(धि)म् । क्ली । चुक्रनामककाञ्जिकभेदे । रा.नि.व.१५ । हिङ्गुनि । হিঙ্ । मे. । भा. । [निघ.२भ.मधुरज्व.चि. ।

सहस्रवेधपाषाणः । पुं । हिङ्गुप्रस्तरे । वै.

सहस्रवेधिका । स्त्री । मृगनाभौ । वै.निघ. ।

सहस्रवेधी (इन्) । पुं । अम्लवेतसे । हिङ्गुनि। रा.नि.व.६। मृगमदे । মৃগনাভি । रा.नि.व.१२। चुक्रे । টকপালং । प.मु. ।

सहस्रांशी
सहस्राङ्गी } स्त्री । ह्रस्वपीलुवृक्षे । वै.निघ. ।

सहस्रा (स्त्री) । स्त्री । अम्बष्ठायां । आम्ड़ा । भा. । मयूरशिखायां । वै.निघ. ।

सहाः (स्) । पुं । हेमन्तकाले । मे.। अग्रहायणमासे । अम.। स्त्री (हा) । घृतकुमार्य्यां । प.मु. । माषपर्ण्यां । মাষাণী। च.द.बाल.चि.सहादिस्नाने। मुद्गपर्ण्यां । মুগানী । सु.सू.३८अ. । सर्पकङ्कालिकायां । श.च.। शुक्लझिण्ट्यां । श.च.। रास्नायां । र.मा. । स्वर्णक्षीर्य्याम् । শেয়ালকাঁটা । प.मु. । पीतदण्डोत्पलायाम् । পীত ডানকুনী । र.मा. । तरणीपुष्पवृक्षे । रा.नि.व.१० । देवताड़वृक्षे । দেয়াতাড়া । रा.नि.व.३ । सेवतीपुष्पजातौ । भा.रेवतीग्रहचि । "सहा विदारी श्वेतासाम् ।" नवमेषजे । মেহেদী । मे. ।

सहाचरः । पुं। नीलपीतझिण्ट्याम् । নীল ও পীতঝাঁটী । श.र.। वा.सू.१५अ. । "नीकण्ठकीलकटसहाचरवाणकाशाः ।" सु.चि.३७अ. ।

सहाद्वयम् । क्ली । मुद्गपर्ण्यां माषपर्ण्यां च । सु.मधुरजीवनीयगणे ।

सहारः । पुं । आम्रवृक्षे । उणा. ।

सह्यम् । क्ली । स्वास्थ्ये । सहिष्णुतायाम् । सुमधुरे । श.र. । [निघ. ।

सक्षीरा । स्त्री । क्षीरिणीवृक्षे । খিরাই । वै.

साकु(ख)रुण्डः । पुं । स्वनामख्यातवृक्षे । संकुरुण्ड इति गुर्ज्जरे ख्यातः । गुणाः—कषाय;

रुचिकर: दीपन: सारक: श्लेष्मवातघ्न: वस्तरञ्जन: लघुश्च। रा.नि.व.६। वै.निघ.२भ.च.सा.चि.सा सहस्रपूर्वे।

सातुकम् । क्ली। अमुसमूहे। यवे। व्याक.।

सागरकम् । क्ली। सामुद्रलवणे। वै.निघ.।

सागरगामिनी । स्त्री। सूक्ष्मैलायां। ছোট এলাচ। रा नि.व.६।

सागरजम् । क्ली। लवणे। वै.निघ.।

सागरजमल: । पुं। समुद्रफेने। वै.निघ.।

सागरोत्थम् । क्ली। सामुद्रलवणे। रा.नि.व. ६।

सागरोद्भूत: । पुं। शङ्खे। শাঁখ। वै.निघ.।

साङ्कृत्य: । पुं। ऋषिविशेषे। च.।

साङ्कुष्ठा । स्त्री। गुञ्जालतायाम्। र.मा.।

साङ्घातिक: । त्रि। मारात्मके।

साचिवाटिका । स्त्री। पुनर्नवायाम्। र.मा.।

साञ्जन: । पुं। गृहगोधायाम्। कृकलासे। কাঁকলাস। श.च.।

सातला । स्त्री। पीतदुग्धसेहुण्डभेदे। মনসা-বিশেষ। वम्. वड़िलसीतुली के हिरियचटक-नख। गुणा: - कफपित्तघ्नी लघु: तिक्ता कषाया त्रिसर्पकुष्ठविस्फोटव्रणघ्नी च। रा.नि.व.४।

सातीलक: । पुं। कलायभेदे। মটর। श. टी.रा।

सात्म्यम् । क्ली। यद्यस्य सेवितं सुखाय सम्पद्यते तत्तस्य सात्म्यम्। तच्च द्विविधं चेष्टाख्यमाहाराख्यञ्च। चेष्टाख्यञ्च कायवाङ्मनोभेदात्त्रिविधं, आहाराख्यञ्च रसभेदात् षड्विधम्। सु.सू.१०भ. उ.। औषधादिजनितसुखानुबन्धे, व्याधिगुणविपरीते आहारविहारादौ। "हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणां। औषधान्नविहाराणामुपयोगं सुखावहम्। विद्यादुपशयं व्याधे: सहि सात्म्यमिति स्मृतम् ॥" मा.नि.। सात्म्यं नाम तत् यदात्मन्युपशेते। तत्त्रिविधं प्रवरावरमध्यविभागेन। तत्र सर्व्वरसं प्रवरम् एकरसमवरं मध्यन्तु प्रवरावरमध्यस्थम्। च.वि.१भ.।

साद: । पुं। अवसाने। क्षणतायां। वै.निघ.।

सादनी । स्त्री। कटुकायां। कट्की। रा.नि.व. ६।

सादृश्य: । पुं। कुरङ्गमृगे। त्रिका.।

साधकम् । क्ली। तन्नामकपित्ते। भा.। See पित्तम्। पुं। तन्नामकहृदयस्थाग्नौ येन मनोऽभिलाष: सिध्यति। सु.सू.२१भ.। दमनकवृक्षे। वै. निघ.। [जीववृक्षे। वै.निघ.। द्रव्ये। अम.।

साधनम् । क्ली। शिश्ने। रा.नि.व.१७। पुत्र-

साधारणदेश: । पुं। जाङ्गलानूपोभयदेशलक्षणयुक्ते प्रदेशे। लक्षणं यथा—"उभयगुणयुतं वा नातिरुक्षं न स्निग्धं न च खरबहुलश्चेत्राभित: कण्टकाद्यं। भवति च जलकीर्णं नाति शीतं न चोष्णं समप्रकृतिसमेतं विद्धि साधारणञ्च ॥" अत्रि. ४भ.।

साधारणमृग: । पुं। शूकरादौ, यथा—"शूकरा मृगशल्याद्या: सलिलाश्रयमाश्रिता:। मकराद्याश्च गण्डका गवयाश्च तथापरे। महिषाद्याश्च ये चैव ते च साधारणा मता: ॥" अत्रि. २०भ.।

साधिका । स्त्री। सुषुप्तौ। हे.च.।

साधु: (क:) । पुं। दमनकवृक्षे। वै.निघ.। साधुवृक्षे। रा.नि.व.६। [मा.।

साधुपुष्पम् । क्ली। स्थलपद्मे। স্থলপদ্ম। श.

साधुवृत्त: । त्रि। हिताहारविहारकारिणि।

साधुवृक्ष: । पुं। कदम्बवृक्षे। কদম গাছ। श.च.। वरुणवृक्षे। বরুণ গাছ। रा.नि.व.६।

साध्वसम् । क्ली। भये। अम.।

साध्वी । स्त्री। मेदायां। रा.नि.व.५। दुग्धपाषाणे। ফুলখড়ি। प.मु.।

सानन्द: । पुं। गुच्छकरञ्जे। रा.नि.व.६।

सानसि: । पुं। सुवर्णे। उणा.।

सानुज: । पुं। तुम्बुरुवृक्षे। रा.नि.व.११। पुण्डरीकवृक्षे। পুণ্ড্রিয়া গাছ। रा.नि.व.१२।

सानुबाधन: । त्रि। कालान्तरप्राणहरे। च. सू.१भ.। [गाछ। वै.निघ.।

सानुमानक: । पुं। पुण्डरीकवृक्षे। পুণ্ড্রিয়া

सान्दृष्टिकम् । क्ली। तात्कालिकफले । वै.निघ.।

सान्द्रम् । क्ली । तक्रे । ঘোল । वै.निघ. ।

सान्द्रपुष्पः । पुं । विभीतकवृक्षे । श.च. ।

सान्द्रप्रसादमेहः (ही[इन्]) । पुं । कफजमेहविशेषे । लक्षणं यथा—"यस्य संहन्यते मूत्रं किञ्चित्किञ्चित् प्रसीदति । सान्द्रप्रसादमेहीति तमाहुः श्लेष्मकोपतः ॥" च.नि.४अ. ।

सान्द्रमेहः । पुं । मेहरोगभेदे । अत्याविलं सान्द्रञ्च मेहति । सु.नि.६अ. ।

सान्ध्यकुसुमा । स्त्री । त्रिसन्धिपुष्पवृक्षे । यस्य पुष्पं त्रिकालमेव विकसति । रा.नि.व.१० ।

सान्नाय्यम् । क्ली । घृते, हविषि । त्रिका. ।

सान्निपातिकः । पुं । त्रिदोषजरोगे । रा.नि.व.२१ । त्रि । त्रिदोषसम्बन्धिनि ।

सान्निपातिकी । स्त्री । सन्निपातजन्ययोनिरोगे। लक्षणम्—"......त्रिभिर्दोषैः योनिगर्भाशयाश्रितैः । यथास्वोपद्रवकरैर्व्यापत्सा सान्निपातिकी ॥" वा.उ.३३अ. ।

साब्दी । स्त्री । द्राक्षाविशेषे । शब्दकल्पः ।

सामजः (योनिः) । पुं । गजे । मे. ।

सामत्रयम् । क्ली । हरीतकी-शुण्ठी गुडूचीषु । वै.निघ. ।

सामवातः । पुं । आमयुक्तवातरोगे । लक्षणं —"वायुः सामो विबन्धाग्निसादस्तन्द्रान्त्रकूजनैः । वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीड़येत् ॥" भा. ।

सामान्यम् । क्ली । एकत्वबुद्धिकरजातौ । यदनेकासु भिन्नदेशकालासु गवादिव्यक्तिषु अयं गौरयं गौरित्यादिप्रकारा एकाकारा बुद्धिः तत् सामान्यम् । च.सू.१अ. ।

सामुद्गकः । पुं । संपुटे । वा.उ.३८अ. ।

सामुद्गसन्धिः । पुं । ग्रीवोर्द्धगतसन्धिषु । भा. अंसपीठगुदयोनिनितम्बेषु सन्धौ । सु.शा.५अ. ।

सामुद्रम् । क्ली । समुद्रजलवणे । করকচ, পাঙা । हिं पांगा । गुणाः—लघु हृद्यं पलितजनकं पित्तकरं दीपनं रुच्यञ्च । रा.नि.व.६ । समुद्रफेने । रस.र.वृहल्लवङ्गादिचूर्णे । नारिकेले । द्वीपान्तरवचायां । তোপচিনি । वै.निघ. । पुं । मत्स्यकविशेषे । सु.कल्प.८अ. ।

सामुद्रमत्स्यः । पुं । तिमितिमिङ्गिलकुलिशपाकमत्स्यादिषु । तन्मांसगुणाः—गुरु स्निग्धं मधुरं नातिपित्तलं वातहरमुष्णं वृष्यं श्लेष्मवर्द्धनञ्च । सु.सू.४६अ. ।

सामुद्राद्यचूर्णम् । क्ली । उदराधिकारे चूर्णम् । সাম্ভরিলবণ, সচললবণ, সৈন্ধবলবণ, বনযমানী, যবক্ষার, বিড়ঙ্গ, হিঙ্গু, পিপুল, চিতামূল, শুঁট, প্রত্যেকে চূর্ণ সমভাগ । ঘৃত দিয়া সেবন করিবে । ভা.কৌ. ।

सामुद्रिका । स्त्री । सविषजलायुकायाम् । सविष জোঁক । सु.सू १३ । See जलायुका ।

साम्ब(भ,म्भा)रम् । क्ली । माढ़लवणे । শাম্ভরিলবণ । रा नि.व.६ ।

साम्भरी । स्त्री । रक्तलोध्रवृक्षे । श.च. ।

साम्राणिकर्द्दमम् । क्ली । जवादिनामगन्धद्रव्ये । থাটাশী, মৃগনাভি । रा.नि.व.१२ ।

साम्राणिजम् । क्ली । महापारेवतफले । रा. नि.व.११ ।

सायकः । पुं । शरे । रा.नि.व.८ ।

सायकपुङ्खा । स्त्री । शरपुङ्खायां । শরপুংখ । रा.नि.व.४ ।

सायङ्कालः । पुं । सायाह्ने ।

सायोद्भिदुरा । स्त्री। मल्लिकाविशेषे । यः सायं विकसति । गुणैर्वार्षिकीतुल्या । रा.नि.व.१० ।

सारः । पुं । मज्जायां । শাঁস্ । नकुल.१२अ. । अम. । दाड़िम्बवृक्षे । वै.निघ.२भ.। पियालवृक्षे । वङ्गे । मुद्गे । মুগ । क्वाथे । वै.निघ. । वज्रक्षारे । रा.नि.व.६ । रोगे । धरणिः । बले । अम. । दधिसरे । দৈয়ের মাথা । श.च. । कर्पूरे । रा. नि.व.१२ । नकुल.१२अ. । नीलीवृक्षे । वै.निघ.१ भ.वा.व्या.प्रत्यष्ठीलाधि. । काष्ठान्तर्भूतपरिणतनिर्यासे । শুকনা আঁটা। "स्वतो निर्गतवेष्टकं लाक्षासर्जरसमोचरसादिकम् ।" च.सू.१अ. । सालसारे । सु.चि.१८अ.। लौहे । भा.। नवनीते । रा. नि.व.१५। पानके । পানা, শরবত । देहान्तर्गत-

स्थिरपदार्थे, स चाष्टविधः—यथा त्वग्रक्तमांसमेदोऽस्थिमज्जाशुक्रसत्त्वानि। तत्र स्निग्धश्लक्ष्णमृदुप्रसन्नसूक्ष्माल्पगम्भीरसुकुमारलोमा सप्रभेव च त्वक्साराणां। सा च सारता सुखसौभाग्यादीनि चाचष्टे। कर्णाक्षिमुखजिह्वानासौष्ठपाणिपादादीनि स्निग्धरक्तानि श्रीमन्ति भ्राजिष्णूनि रक्तसाराणां। सा सारता सुखमुद्धततां मेधां मनःस्वित्वसौकुमार्यादीन्याचष्टे। मांससाराणां शङ्खललाटकृकाटिकाक्षिगण्डादीनि स्थिरगुरुमांसोपचितानि भवन्ति। सा सारता क्षमाधृतिविद्यासुखारोग्यबलप्रभृतीनि चाचष्टे। मेदःसाराणां बलवर्णनेत्रकेशलोमनखदन्तौष्ठमूत्रपुरीषेषु विशेषतः स्नेहः। सा च सारता वित्तैश्वर्य्यसुखोपभोगप्रदानान्यार्जवं सुकुमारोपचारतामाचष्टे। अस्थिसाराः पार्ष्णिगुल्फजान्वरत्निजत्रुचिबुकशिरःपर्व्वस्थूलाः स्थूलास्थिनखदन्ता मन्दोत्साहादयो भवन्ति। मज्जसाराः तन्वङ्गा बलवन्तः स्निग्धवर्णस्वराः स्थूलदीर्घवृत्तसन्धयः दीर्घायुषो बलवन्तश्च। श्रुतविज्ञानवित्तापत्यसम्मानभाजश्च सौम्याः सौम्यप्रेक्षणाश्च क्षीरपूर्णलोचना इव प्रहर्षबहुलाः स्निग्धवृत्तसारसमसंहतशिखरदशनाः प्रसन्नस्निग्धवर्णस्वरा भ्राजिष्णवो महास्फिजश्च शुक्रसारास्ते स्त्रीप्रियाः स्त्रीप्रियोपभोगा बलवन्तश्च। सुखैश्वर्य्यारोग्यवित्तसम्मानापत्यभाजः स्मृतिमन्तः भक्तिमन्तः कृतज्ञाः प्राज्ञाः शुचयो महोत्साहा दक्षा धीराः समरविक्रान्तयोधिनः सत्त्वसाराः।" च.वि.८अ.। क्ली। जले। मे.।

सारकः । पुं। जैपालवृक्षे। प.मु.। वै.निघ. २भ.चित्तविभ्रम.चि.। पीतमुद्गे। धान्यके। वै.निघ.। त्रि। विरेचके। [रा.नि.व.८।

सारखदिरः । पुं। दुःखदिरे। गुजरात बावला।

सारगन्धः । पुं। चन्दनवृक्षे। श.च.।

सारघम् । क्ली। सरघाकृतमधुनि। सारघमधु। जटा.। गुणाः—"तस्माल्लघुतरं रूक्षं सारघं नातिशीतलं। कासे क्षये प्रशस्तं स्यात् कामलाशी विनाशनम्। नातिशीतं न च रूक्षं दीपनं बलकृन्मतं। अतीसारे नेत्ररोगे क्षते वा क्षतजे हितम्।" अत्रिः १८अ.।

सारङ्गः । पुं। मृगविशेषे, चित्रमृगे। हरिण विशेष। मे.। श.र.। तन्मांसगुणाः—आरण्यं स्निग्धं मधुरं लघु वृष्यञ्च। रा.नि.व.१७। विष्किरजातीयचातकपक्षिणि। रा.नि.व.१९। सु.सू. ४६अ। हस्तिनि। वै.निघ.। कर्वुरार्थे। "सारङ्गः कर्व्वुरः स्मृतः।" नकुल.२अ.। छत्रे। राजहंसे। मे.। सिंहे। केशे। मयूरे। कोकिले। कर्पूरे। क्ली। पुष्पे। चन्दने। शङ्खे। पद्मे। स्वर्णे। अनेकार्थकोषः।

सारजम् । क्ली। नवनीते। ननि। श.च.।

सारजासवः । पुं। शालचन्दनादिसारोत्थविंशतिविधासवेषु। च.सू.२५अ.।

सारणः । पुं। भद्रबलायाम्। गन्धभादुलि। धरणिः। आम्रातकवृक्षे। श.च.। अतीसाररोगे। हे.च.। नवनीते। क्ली। गन्धभेदे। धरणिः।

सारणा । स्त्री। रसस्य संस्कारविशेषे। रस.चि.३अ.।

सारणिः (णी) । स्त्री। प्रसारण्याम्। गन्धभादुलि। उणा.। रा.नि.व.५। मद.व.१। नकुल.१२अ.। पुनर्नवायां। वै.निघ.।

सारण्डः । पुं। सर्पाण्डे। सर्पडिम्ब। जटा.।

सारतरुः । पुं। कदलीवृक्षे। धनञ्जयः। खदिरवृक्षे। वै.निघ.।

सारतैलम् । क्ली। सुश्रुतोक्तक्षुद्ररोगतैले, शिंशपागुरुसरलदेवदार्व्वादितैले। सु.चि.२०अ.।

सारद्रुमः । पुं। खदिरवृक्षे। रा.नि.व.८।

सारपाकम् । क्ली। तन्नामकफलविषभेदे। सु.कल्प.२अ.। See फलविषम्।

सारपादपः । पुं। धामनवृक्षे। श.र.।

सारफलः । पुं। साराम्ले। वै.निघ.।

सारबन्धका । स्त्री। मेथिकायाम्। वै.निघ.।

सारभाण्डम् । क्ली। कस्तूरीमृगाण्डे। शब्दकल्पः। [कल्प.८अ.। See कीटः।

सारमण्डूकः । पुं। मण्डूकजातीयकीटे। सु.

सारमूषिका । स्त्री। देवदालीलतायां। (देयाताड़ा। रा.नि.व.३। See अगरी। [श.र.।

सारमेयः । पुं। कुक्कुरे। प.मु.। स्त्री। कुक्कुर्य्यां।

सारलोहम् । क्ली । लौहसारे । ইস্পাত । तस्य लक्षणम्—"यमाघ्नच्छिन्नखराकाराण्यङ्गान्यम्लेन लेपिते । लौहे सूर्य्येण सूक्ष्माणि तत्सारमभिधीयते ॥" गुणाः—"लौहं साराह्वयं हन्यात् ग्रहणीमतिसारकम् । अर्द्धसर्व्वाङ्गजं वातं शूलञ्च परिणामजम् । छर्दिञ्च पीनसं पित्तं श्वासमाशु व्यपोहति ॥" भा.पू.१भ.धा.व. । [इचि. ।

सारवर्गः । पुं । क्षीरवृक्षवर्गे । भा.म.३भ.प्रमे

सारवृक्षः । पुं । धामनवृक्षे । वै.निघ. ।

सारशल्यः । पुं । श्वेतखदिरे । वै.निघ. ।

सारसम् । क्ली । कमले । रा.नि.व.१० । सरोजले । मे. ।

सारसः । पुं । सवजातीयोऽम्भश्चरपक्षिविशेषे । সারস পাখী । तन्मांसगुणाः—मधुरमम्लं कषायं महातीसारघ्नं पित्तहरं ग्रहण्यर्शोघ्नञ्च । रा.नि.व. १७ । तदञ्च कफजाड्यशुक्रजननी वृष्योऽतिरुच्यो गुरुश्च । अत्रि.२२अ. । स्त्री । सारसपक्षयाम् । हे.च. ।

सारसङ्ग्रहः । पुं । वैद्यकग्रन्थभेदे चक्रपाणिकृते । [भेदे ।

सारसङ्ग्रहनिघण्टुः । पुं । वैद्यकनिघण्टु

सारसजलम्, **सारसाम्बु** } क्ली । सरोवरजले । वै निघ. ।

सारसैन्धवम् । क्ली । सैन्धवे । च.द.रतिवल्लभमोदके ।

सारा । स्त्री । कृष्णत्रिवृतायाम् । কাল তেউড়ী । श.र. । सातलायाम् । পীতদুগ্ধ মনসা । वै.निघ. । दूर्व्वायां । श.च. । अंशुमत्फलायाम् । কলা গাছ । रा.नि.व.११ ।

सारामुखः । पुं । स्वादुपाकरसयुक्ते कृष्णशूकधान्ये । वा.सू.६अ.हेमा. ।

साराम्लम् । क्ली । निम्बुभेदे । গোঁড়ালেবু । गुणाः—अम्लं पित्तलं गुरु वातघ्नं कफकरञ्च । वै.निघ. ।

सारालः । पुं । तिले । श.च. ।

सारिका । स्त्री । पक्षिविशेषे । শালিক পাখী । अम. ।

सारिणी । स्त्री । कार्पासे । কাপাস গাছ । रा.नि.व.४ । महाबलायाम् । रा.नि.व.४ । कपिलशिंशपायां । কপিলবর্ণ শিশু । रा.नि.व.९ । रक्तपुनर्नवायां । रा.नि.व.५ । दुरालभायां । रा.नि.व.४ । प्रसारण्यां । গন্ধভাদুলিয়া । रा.नि.व.५ । [वै.निघ. ।

सारितम् । क्ली । कृष्णाञ्जने । কাল সুর্মা ।

सारिवा । स्त्री । अनन्तायां । অনন্তমূল । हिं गोरियासाउ । मं वम्. उपलसरी । "जम्बूपत्राः दुग्धगर्भा वल्ली स्वनामप्रसिद्धा ।" सु.चि.८अ.ड. । वा.सू.१५अ. । सारिवोशीरकाश्मर्य्येति चक्रदत्तः । श्यामौ । शालिधान्ये । वै.निघ. । कृष्णसारिवायां । सा इन्द्रजम्बूत्वचा सुगन्धा कलचरटेति ख्याता । শ্যামালতা । हिं करियसाउ । See अनन्ता, शारिवा ।

सारिवादिगणः । पुं । सारिवोशीरकाश्मर्य्यचन्दनद्वययष्टीपरूषककृते कषाये । स दाहपित्तासृट्ज्वरघ्नश्च । वा.सू.१५अ. ।

सारिवाद्वयम् । क्ली । श्यामानन्तयोः । শ্যামালতা, অনন্তমূল । च.द वातपित्तज्व चि. । "मधुकं सारिवे द्राक्षा ।"

सारी । स्त्री । सप्तलायाम् । তেকাঁটা মনসা । रा.नि.व.८ । शारिकापक्षिणि । श.र. । [६अ. ।

सारोदकम् । क्ली । सालसारोदके । च.चि.

सारोद्धारः । पुं । वैद्यकग्रन्थविशेषे । [भ. ।

सारोष्ट्रिकः पुं । सौराष्ट्रदेशजविषे । अ.टी.

साङ्गेरम् । क्ली । शुण्ठ्याम् । रा.नि.व.६ ।

सार्जः । पुं । सर्जरसे । ধুনা । र.मा. ।

सार्द्रः । त्रि । आर्द्रे । ভিজা । अम. ।

सार्व्वगुणम् । क्ली । औषरलवणे । रा.नि.व.६ ।

सार्व्वभौमः । पुं । गजे । হাতী । त्रिका. ।

सार्व्वसहम् । क्ली । सर्ज्जिकालवणे । সোরা । वै.निघ. । [पुं । श्वेतसर्षपे । वै.निघ. ।

सार्षपः । त्रि । सर्षपसम्बन्धीये, शाकतैलादौ ।

सार्षपतैलम् । क्ली । सर्षपजतैले । See सर्षपः ।

सार्षपशाकम् । क्ली । सर्षपशाके । সরিষা-শাক । चचि: १९च. । See सर्षप: ।

साल: । पुं । हचे मी. । शिंशपाहचे । वरुण-हचे । चिका. । मत्स्यविशेषे । শাল মাছ । च. टी.भ. । शाकहचे । শেগুন গাছ । कुणपे । वै. निघ. । राले । धूনা । रा.नि.व.१२ । सर्जहचे । रा.नि.व.६ । स्वनामख्यातहचे । শাল গাছ । हिं सखुया । मं साकरा । कं सज्जर दामर । गुणा: —कटु: तिक्त: उष्ण: हिम: स्निग्ध: अतीसारपि-त्तदोषघ्न: कण्डूकुष्ठविस्फोटकवातघ्नश्च । रा.नि.व. ६ ।

सालज: (क:) । पुं । सर्जरसे । धूনা । प. मु. । सर्जतरौ । ধুনোর গাছ । रा.नि.व.६ ।

सालनिर्य्यास: । पुं । सर्जरसे । धूনা । र. मा. । [श.र. ।

सालपर्णी । स्त्री । अंशुमत्यां । শালপানি ।

सालपुष्पम् । क्ली । स्थलपद्मे । श.र. ।

सालरस: । पुं । शालनिर्य्यासे । धूনা । रा. नि.व.१२ । [स्य: ।

सालवेष्ट: । पुं । सर्जरसे । धूনা । शब्दक-

सालसार: । पुं । शालभेदे । "शाल: शङ्कु: तस्य सार: ।" इति डल्लण: । सु.सू.३८च. ।

सालाटक: । पुं । कुक्कुरे । शृगाले । शब्दकल्प: ।

सालिमकन्द: । पुं । काबेलदेशीयकन्दभेदे । শালমমিছরি । गुणा:—उष्णवीर्य्य: मधुर: वृष्य: धातुवर्द्धक: तिक्त: गुरु: रसायन: पुष्टिकर: क्षय-मेहपित्तरक्तविकारघ्नश्च । वै.निघ. ।

सालूर: । पुं । भेके । श.र. । [टी.भ. ।

सालेय: । पुं । मधुरिकायाम् । मउरी । च-

साल्विक: । पुं । पचिविशेषे । শালিক । श.च. ।

सावर: । पुं । लोध्रविशेषे । শ্বেত লোধ । श. र. । लोध्रे । रस.र.स्तनरो.चि.काशीशाद्यघृते ।

सावररोध्र: । पुं । श्वेतरोध्रे । "श्वेत: स्थूल-त्वक् ।" सु.सू.३८च. अम्बष्ठादि: ।

सावरिका । स्त्री । निर्विषजलौकायाम् । নি-র্বিষ জোঁক । सु.सू.१३च. । See जलायुका ।

सावर्णलक्ष्यम् । क्ली । चर्म्मणि । श.र. ।

सावित्र: । पुं । गर्भे । श.र. ।

सावित्री । स्त्री । आमलकीहचे । वै.निघ. ।

साशयन्दक: । पुं । गृहगोधायाम् । টিক্-টিকি । शब्दकल्प: ।

साशूक: । पुं । कम्बले । हारा. । [चिका. ।

सास्थितास्राद्दम् । क्ली । कांस्ये । কাঁসা ।

सास्ना । स्त्री । गोगलकम्बले । अम. । रास्ना-यां । वै.निघ. ।

सास्राव: । त्रि । अश्रुयुक्ते, स्रावयुक्ते । मा.नि. ।

साहसम् । क्ली । बलवद्विग्रहादिके ।

सिंह: । पुं । रक्तशिग्रौ । লাল সজিনা । रा. नि.व.७ । पशुराजे । अयं विलेशय: । সিংহ । हिं सेर । तन्मांसगुणा:—मधुरं गुरु स्निग्धं बल्यं वातघ्नम् उष्णवीर्य्यं नेत्ररोगे अर्शसि च हितम् । सु.सू.४६च. । वकुलहचे । वै.निघ. ।

सिंहकेश(स)र: । पुं । वकुलहचे । सिंहज-टायाम् । সিংহের জটা । चिका. । [निघ. ।

सिंहचित्रा । स्त्री । माषपर्ण्यां । মাষাণী । वै.

सिंहच्छदा । स्त्री । श्वेतदूर्व्वायां । रा.नि.व.८।

सिंहतुण्ड: । पुं । सेहुण्डहचे । स्नुहीहचे । म-নসা গাছ । रा.नि.व.८ ।

सिंहनादगुग्गुलु: । पुं । आमवाते औष-धम् । क्वाथार्थं—त्रिफला प्र. ३ प. चतुर्गुणे वा-रिणि क्वाथयित्वा पादशेष: कार्य्य: । गुग्गुलु: ८ तो. नवनीतसारगन्धकं १ श. एरण्डतैलं १ श. एकत्र पाच्य: । কাথার্থ—আমলা, হরীতকী, বহেড়া প্রত্যেকে ৩ প. জল চতুর্গুণ (৩৬ প.), শেষ চতুর্থাংশ (৯ প.) । গুগ্গুল ৮ তো. নবনীতসারগন্ধক ৬৪ তো. এরণ্ডতৈ-ল ৬৪ তো. সকল একত্র করিয়া পাক ক-রিবে । सा.कौ. । रस.र. ।

सिंहनादिका । स्त्री । दुरालभायां । श.च. ।

सिंहपत्रा । स्त्री । माषपर्ण्यां । মাষাণী । वै. निघ. । [छ । रा.नि.व.४ ।

सिंहपर्णी । स्त्री । वासकहचे । বাকস্ গা-

सिंहपिप्पली । स्त्री । सैंहलीपिप्पल्यां । रा.नि.व.६ ।

सिंहपुच्छिका (च्छी) । स्त्री । कदम्बीपत्रसदृशदीर्घपत्रपृश्निपर्णीविशेषे, काटवासिंहपुच्छीति ख्याते । छोट चाकुले । र.मा.। रा.नि.व.४ । "सिंहपुच्छी चुरालिका ।" च.द.शूल.चि. एरण्डद्वादशके । माषपर्ण्यां । माषाणी । प.मु. ।

सिंहपुष्पी । स्त्री । पृश्निपर्ण्यां । चाकुले । रा.नि.व.४ ।

सिंहमुखः । पुं । वासकवृक्षे । वै.निघ. ।

सिंहमुखी (वदना) । स्त्री । वासकपुष्पक्षुपे । वाकस् गाछ । रा.नि.व.४ । वै.निघ.श्वास.चि.सिंह्यादिकषाये । (नवरत्नराजमृगाङ्के) । माषपर्ण्यां । माषाणी । चारवृत्तिकायाम् । थारिमाटी । वै.निघ. ।

सिंहल(क)म् । क्ली । राजरीतौ । भाल पितल । रा.नि.व.१३ । वङ्गे । हे.च.। त्वचि । गुड़त्वक् । रा.नि.व.६ । [व.६ ।

सिंहलस्था । स्त्री । सैंहलीपिप्पल्यां । रा.नि.

सिंहलस्थानः । पुं । तालतरुसदृशतरौ । छ टो वृक्ष । श.मा. । [छ । वै.निघ. ।

सिंहवल्लभा । पुं । आटरूषवृक्षे । वाकस् गा-

सिंहविक्रान्तः । पुं । अश्वे । हारा. ।

सिंहविन्ना (वृन्ता) । स्त्री । माषपर्ण्याम् । माषाणी । वै.निघ. । रा.नि.व.३ ।

सिंहा । स्त्री । वृहत्यां । वै.निघ. । नाड्यां । रा.नि.व.१८ ।

सिंहाणम् । क्ली । लौहमले । मण्डूर । प.मु. । नासामले । पोँटा, सिकनी । श.र. ।

सिंहाननः । पुं । वासकवृक्षे । वाकसगाछ । भा.म.१भ.कण्ठकुब्जज्व.चि. । "कलिङ्गसिंहाननशर्व्वरीभिः ।"

सिंहामृतघृतम् । क्ली । अर्शसि घृतम् । पाठः—"पचेदारिचतुर्द्रोणे कण्टकार्य्यमृताशतम् । तत्राग्निविफलाव्योषपूतिकल्कलिङ्गकैः । सकाश्मर्य्यविड़ङ्गैस्तु सिद्धं दुर्नाममेहनुत् ॥" कण्टकार्य्यमृतयोः प्रत्येकं शतं पलं मिलित्वा वा । जलं २५६ श. शे. ६४ श. । पूतिकल्क = करञ्जलकं । काश्मर्य्यं = गाम्भारीफलम् । च.द. ।

सिंहाली । स्त्री । सिंहलीपिप्पल्याम् । सिंहपिपूल । वै.निघ. । [निघ. ।

सिंहासनम् । क्ली । लौहकिट्टे । मण्डूर । वै.

सिंहास्यः । पुं । वासकवृक्षे । वाकस गाछ । र.मा. । वै.निघ.२भ.सिंहास्यादिकषाये । भैष.स्त्रीरो.चि.कुष्ठ.चि. ।

सिंहास्यादिः । पुं । शोथे कषायविशेषः । "सिंहास्यामृतभण्टाकीक्वाथं कृत्वा समाक्षिकम् ।" भैष.शोथ.चि. ।

सिंहिका (ही) । स्त्री । वृहत्यां । रा.नि.व.४ । प.मु. । वासकक्षुपे । वासक । रा.नि.व.४ । कण्टकार्य्यां । कण्टिकारी । वै.निघ.जीर्णज्व.चि. लवङ्गादिकषाये । तच्छाकगुणाः—"जरा तु सिंहिका प्रोक्ता सातीसारे प्रशस्यते ।" अत्रि.१६अ. । (ही) वार्त्ताक्यां । वृहती । त्रिका. । कण्टकार्य्यां । प.मु. । वै.निघ.जिह्वक.ज्वःचि.कास.चि. सिंहास्यादिः । वृहत्कण्टकार्य्यां । हिं बड़ीकटैया । भा.म.१भ.ज्व.चि.श्वास.चि. । "सिंही व्याघ्री तालमूली ।" शिरायाम् । नाड्याम् । रा.नि.व.१८ । स्वर्णवराटिकायाम् । मुद्गपर्ण्यां । मुगानी । रा.नि.व.३ । [धिकारे अश्वगन्धाघृते ।

सिंहीफलम् । क्ली । वृहतीफले । च.द.क्षया-

सिंहीलता । स्त्री । लतावृहत्यां । भा. । मुद्गपर्ण्यां । रा.नि.व.३ ।

सिकता । स्त्री । लोणिकाशाके । वन लुनिशाक । प.मु. । बालुकायां । रा.नि.व.१३ । शर्करायां । वै.निघ. ।

सिकतामेहः । पुं । प्रमेहभेदे । यत्र रोगी बालुकानुविद्धं सरुजं मेहति । सु.नि.६अ. ।

सिकतारूपम् । क्ली । खण्डे । थाँड़ । भा. ।

सिकतिलः । पुं । सिकतामयभूमौ । रा.नि.व.२ । [श्वास.चि. ।

सिक्कासिः । पुं । उत्कासिकायाम् । प्रयोगा.

सिता । स्त्री । बालुकायाम् । वै.निघ. ।

सिक्थ(क)म् । क्ली । सिक्थके । मम, सि-

टौ स.नि.व.११। नील्यां। नील। हे.च.।

सिङ्(ङ्घ्)ण(क)म्। क्ली। काचपात्रे। हारा.। नासिकामले। পোঁটা, সিকনি। रा.नि.व.१८। नासारोगभेदे। निदानादि —"कफः प्रवृद्धो नासायां रुद्धा स्रोतांस्यपीनसम्। कुर्य्यात् सघुर्घुरं श्वासं पीनसाधिकवेदनम्। अवैरिव सव त्यस्य प्रक्लिन्ना तेन नासिका। अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम्॥" वा.उ.१८अ.। अस्य रोगविशेषे। लक्षणं —"वातिके पैत्तिके चैव श्लैष्मिके सान्निपातिके। सिङ्घाणके प्रवक्ष्यामि लक्षणं भिषजं तथा॥ तनुस्रावं सफेनञ्च वातिकं तत्प्रकीर्त्तितम्। रक्तपीताभितैः स्रावैर्विन्द्यात् पित्तसमुद्भवम्॥ घनेन दधिवर्णेन कफजञ्चैव निर्द्दिशेत्। नानावर्णेन जानीयाद्दसाध्यं सान्निपातिकम्॥" ज.द.। लौहकिट्टे। মণ্ডুর। वै.निघ.।

सिङ्घानः। पुं। कुरण्डवृक्षे। त्रिका.। [१८।

सिङ्घिनी। स्त्री। नासिकायाम्। रा.नि.व.

सिञ्चिता। स्त्री। पिप्पल्यां। श.च.।

सिञ्चितिका। स्त्री। सेव इति प्रसिद्धे फले। সেওফল। सा च द्विधा क्षुद्रवृहद्भेदेन। क्षुद्रफल गुणाः—हृद्यं गुरु धातुवर्द्धकं पाके रसे च शीतं कफकरञ्च। महत् शीतं कषायं क्षुद्रसमगुणञ्च। बदरफले। वै.निघ.।

सितः। पुं। भूर्ज्जवृक्षे। स्थूलजीरके। प.मु.। धववृक्षे। धाওয়া গাছ। र.मा.। क्ली। रौप्ये। रङ्गे। रा.नि.व.१३। मूलके। মূলো। रा.नि.व.७। चन्दने। र.मा.। श्वेततिले। वै.निघ.।

सितकङ्गुः। स्त्री। सर्ज्जरसे। ধূনো। वै.निघ.।

सितकटभी। स्त्री। श्वेतकटभीवृक्षे। रा.नि.व.९। See कटभी।

सितकण्टकी / **सितकण्टा (रिका)** } स्त्री। श्वेतपुष्पकण्टकार्य्यां। रा.नि.व.४।

सितकण्ठः। पुं। दात्यूहपक्षिणि। ডাক পাখী। श.र.।

सितकरः। पुं। भीमसेनीकर्पूरे। ভীমসেনী কর্পূর। रा.नि.व.१२। स्त्री (रा)। नीलदूर्व्वायाम् वै.निघ.।

सितकर्णी। स्त्री। वासकवृक्षे। বাসক গাছ। रा.नि.व.१०।

सितकल्याणघृतम्। क्ली। स्त्रीरोगाधिकारे घृतम्। घृतं ४ श. गव्यदुग्धं १६ श.। कल्कार्थं—कुमुदपुष्पं पद्मकाष्ठं वीरणमूलं गोधूमः रक्तशालिः मुद्गपर्णी चोरकाकोली गाम्भारीवीजं यष्टीमधु वाट्यालकं गोरचतण्डुलामूलम् उत्पलं तालमज्जा भूकुष्माण्डं शतावरी शालपर्णी जीरकं त्रिफला गोक्षुरवीजम् आमकदली च प्र. ४तो. जलं ८ श. एकत्र पाच्यम्। घृত ৪ শ. দুগ্ধ ১৬ শ.। কল্কার্থ—কুমুদফুল, পদ্মকাষ্ঠ, বেণার মূল, গম, দাদ্‌খানি চাউল, মুগানী, ক্ষীরকাঁকলা, গাম্ভারবীজ, যষ্টিমধু, শ্বেত বেলেড়া, গোরক্ষচাকুলিয়ার মূল, নীলোৎপল, তালমজ্জা, ভূঁইকুমড়া, শতমূলী, শালপাণি, জীরা, ত্রিফলা, গোক্ষুরবীজ, কাঁচা কলা প্রত্যেকে ৪ তো. জল ৮ শ. পাক করিবে। [मा.।

सितकाञ्चनः। पुं। श्वेतपुष्पकाञ्चनवृक्षे। र.

सितकारिका। स्त्री। ह्रस्ववाट्यालके। ক্ষুদ্র বেলেড়া। वै.निघ.।

सितकुम्भी। स्त्री। श्वेतपाटलायां। শ্বেতপুষ্পপারুল। रा.नि.व.१०।

सितगुञ्जा। स्त्री. श्वेतगुञ्जायां। रा.नि.व.२३।

सितचन्दनम्। क्ली। श्रीखण्डचन्दने। সারচন্দন। च.द.खदिरवटी। [তো। वै.निघ.।

सितचिल्ली। स्त्री। श्वेतवास्तुके। হুদে বে-

सितचिङ्गः। पुं। (Lacerta scincus.) वल्लीगड़कमत्स्ये। বেলেগুড়গুড়ি মাছ। हारा.।

सितच्छत्रा। स्त्री। शतपुष्पायां। শুল্‌ফা। अम.।

सितच्छदः। पुं। रक्तशोभाञ्जने। লাল সজিনা। वै.निघ.। हंसे। हे.च.। स्त्री (दा)। श्वेतदूर्व्वायाम्। रा.नि.व.८। [रा.नि.व.२३।

सितजः। पुं। मधुशर्करायाम्। মধুর চিনি।

सितजफलः। पुं। मधुनारिकेलवृक्षे। रा.नि.व.११।

सितजलजम्। क्ली। श्वेतपद्मे। वै.निघ.।

सितजा । स्त्री । मधुशर्करायां । रा.नि.व.१४।

सितजाम्बकः । पुं । बहुरसालाम्रवृक्षे । रा. नि.व.११ । [जीरा । भैष.बाल.चि. ।

सितजीरकम् । क्ली । शुक्लजीरके । श्वेत

सितदर्भः । पुं । श्वेतकुशे । श्वेतकुश । मं पांढरीकुशी । कं बिलियबुट्टकुशि । गुणाः—तन्मूलं हिमं-मधुरं हृद्यं पित्तघ्नं रक्तज्वरतृष्णाश्वासकामलाघ्नञ्च । एतदभावे साधारणकुशो ग्राह्यः । रा.नि.व.८ । [के । रा.नि.व.६ ।

सितदीप्यः । पुं । श्वेतयमान्याम् । श्वेतजीर-

सितदूर्वा । स्त्री । श्वेतदूर्वायाम् । प.मु. ।

सितद्रुः (मः) । पुं । मोरटमेदे । लताकड़ार । र.मा. । अर्जुनवृक्षे । वै.निघ. ।

सितधातुः । पुं । खटिकायाम् । खड़िमाटी । रा.नि.व.१३ ।

सितपद्मम् । क्ली । श्वेतपद्मे । वै.निघ. ।

सितपर्णी । स्त्री । अर्कपुष्पिकायां । र.मा. ।

सितपक्षः । पुं । शुक्लपक्षे । (शब्दकल्पः) । हंसे । श.र. ।

सितपाटला (लिका) । स्त्री । शुक्लपुष्पपाटलवृक्षे । श्वेत पारुल । मं श्वेतपाड़लि । कं बिलियहादरि । गुणाः—तिक्ता उष्णा गुरुः वातघ्नी हिक्कावमिकफघ्नी शोषघ्नी च । रा.नि.व.१०।

सितपुङ्खा । स्त्री । श्वेतपुष्पशरपुङ्खायाम् । रा. नि.व.४ ।

सितपुष्पम् । क्ली । कैवर्त्तमुस्तके । जटा. । पुं । श्वेतपुष्परोहितके । श्वेत रोहा । रा.नि.व. ८ । काशतृणे । केसेघास । तगरवृक्षे । रा.नि. व.८ । श.र. । द्वीपान्तरखर्ज्जूरीवृक्षे । पिण्डीखेजुर गाछ । शिरीषवृक्षे । वै.निघ. । स्त्री (ष्पा) । मल्लिकायाम् । मल्लिका फूलेर गाछ । श.र. । (ष्पी) श्वेतापराजितायाम् । रा.नि.व.३ । नागदन्त्याम् । हातिशुँड़े । रा.नि.व.५ । नागवल्लीलतायां । पाणलता । वै.निघ. ।

सितमरिचम् । क्ली । श्वेतमरिचे, तत्तु शोभाञ्जनबीजमिति वृद्धाः । रा.नि.व.६ ।

सितमाषः । पुं । (Dolichos catjang.) राजमाषे । द्वारा. । [पारुल गाछ । वै.निघ.।

सितमोघा । स्त्री । श्वेतपाटलवृक्षे । श्वेत

सितरजः । क्ली । कर्पूरे । वै निघ. ।

सितरागः । पुं । रौप्ये । वै.निघ. ।

सितलता । स्त्री । चित्रकूटे ख्याता अमृतस्रवालतायाम् । रक्तरुदन्ती । रा.नि.व.३ ।

सितलशुनः । पुं । शुक्लरसोने । वै.निघ. ।

सितवर्णा । स्त्री । क्षीरिणीवृक्षे । प.मु. ।

सितवर्षाभूः । पुं । श्वेतपुनर्नवायाम् । रा. नि.व.५ । [प.मु. ।

सितवल्लरी । स्त्री । भूमिजम्बूवृक्षे । वनजाम ।

सितवल्लि(ल्ली)जम् । क्ली । श्वेतमरिचे । रा. नि.व.६ । [मा. ।

सितवारः (कः) । पुं । शालिञ्चशाके । र.

सितवारिकः । पुं । सिंहलीपिप्पल्याम् । वै.निघ. । [वै.निघ.चयचि.लघुशिवगुड्यां ।

सितशर्करा । स्त्री । धवलशर्करायाम् । चिनि।

सितशा(सा)यका । स्त्री । श्वेतपुष्पशरपुङ्खायाम् । रा.नि.व.४ ।

सितशिंशपा । स्त्री । श्वेतपुष्पशाल्मलीवृक्षे । श्वेत शिमुल । श्वेतशिंशपायाम् । श्वेत शिशु । वै.निघ. । रा.नि.व.९ ।

सितशिम्बिकः । पुं । गोधूमे । गम । वै.च.।

सितशिम्बी । स्त्री । श्वेतशिम्ब्याम् । वै.निघ ।

सितशि(सि)वम् । क्ली । सैन्धवलवणे । वै. निघ. । स्त्री । शमीवृक्षे । प.मु. ।

सितशूकः । पुं । यवे । प.मु. । रा.नि.व.१६।

सितशू(सू)रणः । पुं । श्वेतशूरणे । श्वेत ओल वा वन ओल । रा.नि.व.७ । [नि.व.१६ ।

सितसर्षपः । पुं । गौरसर्षपे, सिद्धार्थे । रा.

सितसारः (कः) । पुं । शालिञ्चशाके । रा. नि.व.८ । च.द.मू.कृ.चि. । "तक्रेण युक्तं सितसारकस्य ।" [रा.नि.व.४ ।

सितसिंहिः (ही) । स्त्री । श्वेतकण्टकार्य्यां ।

सितसूर्य्या । स्त्री । शुक्लसूर्य्यावर्त्ते । वै.सं.सू.क्र.
नि. । [গা । वै.निघ. ।

सितसार: । पुं । श्वेतटङ्कणे । শ্বেত সোহা-

सितक्षुद्रा । स्त्री । श्वेतकण्टकार्य्याम् । रा.
नि.व.४।२३ ।

सितांशु: । पुं । कर्पूरे । (शब्दकल्प:) ।

सितांशुतैलम् । क्ली । कर्पूरतैले । रा.नि.व.
१५ ।

सिता । स्त्री । शर्करायाम् । চিনি । गुणा:—
"सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत् । मू
र्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ॥"
रा.नि.व.१४ । "धात्रीद्राक्षासितानां वा ।" च.द.
ज्व.चि. । च.सू.४अ. । वचायाम् । বচ । सोम
राज्याम् । সোমরাজ । सिंहल्याम् । শিউলি-
ছোপ । प.मु. । आमलक्यां । আম্লা । गोरो-
चनायाम् । গোরোচনা । हर्जी । सुरामेदे । रा.
नि.व.२३ । दीप्ये । शुक्लचित्रतायां । শ্বেত তে-
উড়ী । त्रिसन्धिपुष्पवृक्षे । श्वेतपुनर्नवायाम् । वै.
निघ. । आस्फोतके । হাপরমালী । गिरिजाप-
राजितायां । र.मा. । मल्लिकापुष्पक्षुपे । श्वेतपा-
टलिकायाम् । শ্বেত পারুল । रा.नि.व.१० ।
श्वेतकण्टकार्य्याम् । रा.नि.व.४ । विदार्य्याम् ।
ভূঁইকুম্ড়া । रा.नि.व.७ । श्वेतदूर्व्वायाम् । प.
मु. । सु.सू.२६अ. । च.सू.४अ. । श्वेतशिम्ब्याम् ।
শ্বেত শিম্ । रा.नि.व.१६ । See श्वेतनिष्पाव: ।
कुटुम्बिन्याम् । रा.नि.व.५ । त्रायमाणालतायाम् ।
বলা লতা । গোহালিয়া । वैजन्याम् । लताफ-
ट्की. मूत्रा । रा.नि.व.३ ।

सिताखण्ड: । पुं । मधुजशर्करायां । মধুর
চিনি, মালথওী । गुणा:—अतिमधुर: चक्षुष्य:
कुष्ठच्छर्दितृष्णकफश्वासहिक्कापित्तास्रदोषघ्नश्च । रा.
नि.व.१४ ।

सिताख्य: (**ख्या**) । पुं । श्वेतमरिचे । वै.
निघ. । श्वेतदूर्व्वायाम् । रा.नि.व.८ ।

सिताग्र: । पुं । कण्टके । কাঁটা । हारा. ।

सिताङ्ग: । पुं । वालुकागड़मत्स्ये । বেলেগু-
ড়ি মাছ । हारा. । [ঢ়া গাছ । रा.नि.व.८ ।

सिताङ्ग: । पुं । श्वेतरोहितकवृक्षे । শ্বেত রো-

सिताजाजि: (**जी**) । स्त्री । श्वेतजीरके ।
শাদা জীরে । रा.नि.व.६ ।

सिताचयम् । क्ली । त्रिशर्करायाम् । "गुडी:
त्पन्ना हिमोत्पन्ना मधुरा चेति मिश्रितं । …सि-
ताचयम् ॥" रा.नि.व.२२ ।

सितादि: । पुं । गुड़े । रा.नि.व.१४ ।

सितानन: । पुं । विल्ववृक्षे । वै.निघ. ।

सितापाङ्ग: । मयूरे । त्रिका. ।

सिताफलम् । क्ली । (Anona squamosa.) The custard apple. स्वनामख्यातफ-
ले । আতা, নোণা । हिं सिताफल । ता. सि-
ता । पक्वफलं पाचकं । वीजं क्रमिघ्नम् । कश्चित् ।

सिताब्जम् । क्ली । श्वेतकमले । रा.नि.व.१० ।

सिताभ: । पुं । कर्पूरे । अ.टी.रा. ।

सिताभा (**सा**) । स्त्री । तक्राह्वायाम् । रा.
नि.व.४ ।

सिताभ्र: (**क:**) । पुं । कर्पूरे । अम. ।

सिताम्बु(म्भो)जम् । क्ली । श्वेतकमले । अम. ।

सितार्क: (**क:**) । पुं । श्वेतार्कवृक्षे । শ্বেত
আকন্দ গাছ । रा.नि.व.१० ।

सितार्ज्जक: । पुं । श्वेतपत्रक्षुद्रतुलस्याम् ।
ছোট শ্বেত তুলসী । हिं श्वेताजवला । मं पां-
ड़रा आजवला । गुणा:—कटूष्ण: कफवातनेत्र-
रोगघ्न: रुच्य: सुखप्रसवकरश्च । रा.नि.व.१० ।

सितालता । स्त्री । अमृतस्रवालतायाम् । रा.
नि.व.३ । श्वेतदूर्व्वायाम् । र.मा. । च.सू.४अ. ।

सितालर्क: (**र्का**) । पुं, स्त्री । श्वेतमन्दारा-
र्के । শ্বেত ও রক্ত আকন্দ । रा.नि.व.१० ।

सितालिकटभी । स्त्री । श्वेतकिण्टिवृक्षे ।
रा.नि.व.९ । [हारा. ।

सितालिका । स्त्री । पङ्कशुक्ती । ঝিনুক ।

सितावर: । पुं । सुनिषण्णके । শুশুনীশাক ।
गुणा:—संग्राही कषाय उष्ण: त्रिदोषघ्न: मेधा:
रुचिकर: रसायन: दाहज्वरहरश्च । रा.नि.व.४ ।
See सुनिषण्ण । [रा.नि.व.४ ।

सितावरी । स्त्री । वाकुच्याम् । সোমরাজ ।

सिताश्मजम् । क्ली । पाषाणोदके । শিলা-জল । वै.निघ. । [वै.निघ. ।

सितासिता । स्त्री । वाकुच्यां । সোমরাজ ।

सिताह्वयः । पुं । श्वेतशिग्रौ । শ্বেত সজিনা। रा.नि.व.७ । श्वेतरोहितके । শ্বেত রোড়া । रा.नि.व.८ । श्यामशालौ । কাল ধান । कश्चित् ।

सिताह्वया । स्त्री । श्वेततुलस्याम् । रा.नि.व.१० । श्वेतपाटलवृक्षे । वै.निघ. । :

सिताह्वा । स्त्री । सितपाटलीवृक्षे । শাদা পারুল গাছ । रा.नि.व.१० ।

सितिः । पुं । सुनिषण्णकशाके । वै.निघ. ।

सितिवारः (कः) । पुं । कुटजवृक्षे । सुनिषण्णकशाके । भा. । [अग्न.चि. ।

सितिसारकः । पुं । शालिञ्चशाके । च.द.

सितेतरः । पुं । कृष्णशालौ । कुलत्थके । रा.नि.व.१६ ।

सितेक्षुः । पुं । श्वेतेक्षौ । रा.नि.व.१४ ।

सितैरण्डः । पुं । श्वेतैरण्डे । रा.नि.व.८ ।

सितोच्चटा । स्त्री । श्वेतगुञ्जायाम् । वै.निघ. ।

सितोत्पलम् । क्ली । श्वेतोत्पले । वै.निघ. ।

सितोदरा । स्त्री । वराटिकाभेदे । কড়িবিশেষ । रा.नि.व.१३ ।

सितोद्भवम् । क्ली । श्वेतचन्दने । (शब्दकल्पः)।

सितोपलम् । क्ली । शुक्लखड़िकायाम् । ফুলখড়ি । त्रिका. । पुं । स्फटिके । रा.नि.व.१३ । स्त्री (ला) । शर्करायाम् । চিনি । मत्स्यण्डिकायाम् । মিছরি । है.च. । सु.सू.४४अ. ।

सितोपलादिलेहः । पुं । राजयक्ष्माधिकारे लेहः । "सितोपला तुगाक्षीरी पिप्पली बहुला त्वचः । अन्त्यादूर्ध्वं द्विगुणितं लेहयेत् क्षौद्रसर्पिषा ॥" গুড়ত্বক্চূর্ণ ১ ভ. এলাচূর্ণ ২ ভ. পিপুলচূর্ণ ৪ ভ. বংশলোচন ৮ ভ. চিনি ১৬ ভ. । रस.र. ।

सिद्धः । पुं । गुड़े । रा.नि.व.१४ । कृष्णधुस्तूरे । रा.नि.व.१० । द्व्यन्तरं त्र्यन्तरं वा भोजने । त्रिका. । कृष्णनिर्गुण्ड्यां । কাল নিশিন্দা । श्वेतसर्षपवृक्षे । वै.निघ. । क्ली । सैन्धवलवणे । रा.नि.व.६ । त्रि । अव्याहतशक्तौ । वा.उ.३९अ. ।

सिद्धकः । पुं । सिन्धुवारवृक्षे । নিশিন্দা গাছ। रा.नि.व.४ । शालवृक्षे । रा.नि.व.९ । [जलि ।

सिद्धजलम् । क्ली । काञ्जिके । हारा. । पक्व-

सिद्धधातुः । पुं । पारदे । त्रिका. ।

सिद्धनामकः । पुं । अश्मन्तकवृक्षे । আবুটা । वै.निघ. ।

सिद्धपुष्पः । पुं । श्वेतकरवीरवृक्षे । रा.नि.व.१० । [१६ । See सिद्धार्थः ।

सिद्धप्रयोजनः । पुं । श्वेतसर्षपे । रा.नि.व.

सिद्धप्राणेश्वरः । पुं । ज्वरातीसारे औषधम् । पाठः – गन्धेशाभ्रं पृथग्वेदभागमन्यच्च भागिकम् । सर्जिटङ्कयवक्षाराः पञ्चैव लवणानि च । वराव्योषेन्द्रबीजानि द्विजीरायमानिकाः । सहिङ्गु बीजसारञ्च शतपुष्पा सुचूर्णिता ।-सिद्धप्राणेश्वरः सूतः......॥ मा. १ माषा । গন্ধক, পারা, অভ্র প্রত্যেকে ৪ তো. সাজিমাটী, সোহাগার খৈ, যবক্ষার, পঞ্চলবণ, ত্রিফলা, ত্রিকটু, ইন্দ্রযব, জীরা, কৃষ্ণজীরা, চিতামূল, যমানী, হিঙ্গু, বিড়ঙ্গ, শুল্ফা প্রত্যেকে চূর্ণ ১ তো. জলে মর্দ্দন, বটী ১ মাষা । रस.चि.भैष. ।

सिद्धमन्त्रप्रकाशः । पुं । वोपदेवकृतमन्त्रशास्त्रे । [বিশেষ । रा.नि.व.१४ ।

सिद्धमोदकः । पुं । तवराजखण्डे । মালখণ্ডী

सिद्धयोगशतकम् । क्ली । वृन्दकृते प्रसिद्धवैद्यकसंग्रहभेदे । [लः । खनिजधात्वादौ । मे. ।

सिद्धरसः । पुं । पारदे । शब्दकल्पे धजयपा-

सिद्धवस्तिः । पुं । वस्तिभेदे । "पञ्चमूलस्य निःक्वाथैस्तैलं मागधिका मधु । ससैन्धवः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः ॥" भा. ।

सिद्धसलिलम् । क्ली । काञ्जिके । हारा. ।

सिद्धसाधनः । पुं । सिद्धार्थे । শ্বেত সরিষা। रा.नि.व.१६ ।

सिद्धा । स्त्री । ऋद्धौ । रा.नि.व.५ ।

सिद्धान्तः । पुं । निर्णये, निश्चये । "सिद्धान्तो

नाम यः परीक्षकैर्बहुविधं परीक्ष्य हेतुभिः साधयित्वा स्थाप्यते निर्णयः, स सिद्धान्तः स चौकश्चतुर्विधः — सर्व्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तः इति। तत्र सर्व्वतन्त्रसिद्धान्तो नाम सन्ति निदानानि सन्ति व्याधयः सन्ति सिद्धुपायाः साध्यानामिति। प्रतितन्त्रसिद्धान्तो नाम तस्मिंस्तस्मिन् तन्त्रे तत्तत्प्रसिद्धं — यथान्यत्राष्टौ रसाः षड़त्र; पञ्चेन्द्रियाणि यथान्यत्र षड़िन्द्रियाणि ...... । अधिकरणसिद्धान्तो नाम यस्मिन्नधिकारे संस्तूयमाने सिद्धान्यन्यान्यपि अधिकरणानि भवन्ति। यथा — "न मुक्तः कर्म्मानुबन्धिकं कुरुते निस्पृहत्वादिति प्रस्तुते सिद्धाः कर्मफलमोक्षपुरुषप्रेत्यभावा भवन्ति। अभ्युपगमसिद्धान्तो नाम यमर्थमसिद्धमपरीक्षितमनुपदिष्टमहेतुकं वा वादकाले अभ्युपगच्छन्ति भिषजः॥" च.वि.८अ.।

सिद्धार्थः (कः)। पुं। (Cruciferae, sinapis.) स्वनामख्यातसर्षपे। (শ্বেত সরিষা। हिं राजिका। तें नल्लसरिचेट्टु, तेल्लावाल। सु. सू.३९अ.शिरोविरेचने। वा.सू.१५अ.। गुणाः— कटुतिक्तोष्णः वातरक्तघ्नः ग्रहदोषघ्नः त्वग्दोषहरः रुच्यः विषभूतव्रणघ्नश्च। रा.नि.व.१६। नदीवटे। रा.नि.व.११। [वा.उ.५अ.।

सिद्धार्थयुग्मम्। क्ली। पीतकृष्णगौरसर्षपे।

सिद्धिः। पुं। ऋद्धौ। वृद्धि। रा.नि.व.५। साध्यसाधनज्ञाने। च.सू.१अ.। प्रशमनोपाये। यथा—रोगसिद्धिः। वा.कल्प.६अ.। ऋद्धौ। वृद्धि। मे.। मेषशृङ्ग्यां। (মেড়াশিঙে। वै.निघ.।

सिद्धिदः। पुं। पुत्रजीववृक्षे। जियापूत। रा.नि.व.९। महाशालवृक्षे। वै.निघ.। [कल्पः।

सिद्धिली। स्त्री। क्षुद्रपिपीलिकायाम्। शब्द

सिद्धिसाधकः (नः)। पुं। श्वेतसर्षपे। रा. नि.व.१६। दमनकवृक्षे। वै.निघ.।

सिद्धिस्थानम्। क्ली। चरकोक्तान्तिमस्थाने।

सिद्धोदकम्। स्त्री। काञ्जिके। কাঁজি। हारा.।

सिद्धौषधिः। पुं। औषधिवर्गभेदे। तैलकन्दसुधाकन्दक्रोड़कन्दरुदन्तीसर्पाक्षीषु। "तैलकन्दः सुधाकन्दः क्रोड़कन्दो रुदन्तिका। सर्पनेत्रयुताः पञ्च सिद्धौषधिकसंज्ञकाः॥" रा.नि.व.१२।

सिध्मम्। क्ली। क्षुद्रकुष्ठभेदे। किलासरोगे। छुलि। हे.च.। लक्षणं यथा — "कण्डून्वितं श्वेतमपायि सिध्म विद्यात्तनु प्रायश ऊर्द्धकाये।" सु.नि. ५अ.।

सिध्मपुष्पिका। स्त्री। सिध्मरोगभेदे। सा त्वग्गता अलाबुपुष्पवत् शुक्ला च। वि र.।

सिध्मलः। त्रि। किलासरोगिणि। त्रिका.।

सिध्मला। स्त्री। शुष्कमीने। শুটকী মাছ। त्रिका। कुष्ठरोगिण्याम्। वै.निघ.। मत्स्यविकृतौ। मे.।

सिध्मवान्। त्रि। सिध्मरोगिणि। वै.निघ.।

सिध्मा। स्त्री। किलासरोगे। छुलि, (শোস, कछु, पाचड़ा। हे च.।

सिध्रः। पुं। वृक्षे। उणा। [अम.भ.]

सिध्रका। स्त्री। सीध इति ख्याते वृक्षविशेषे।

सिनः। पुं। ग्रासे। (व्याक.)। क्ली। शरीरे। उणा.। त्रि नी)। एकनेत्रे। शब्दकल्पः।

सिन्दुकः। पुं। क्षुपजातीये सिन्धुवारवृक्षे। रा.नि.व.४।

सिन्दुरम। क्ली। सिन्दूरे। वै.निघ.।

सिन्दु(न्धु)वारः। पुं। (Vitex trifolia.) निर्गुण्ड्याकारस्वल्पपुष्पवृक्षे, श्वेतनिर्गुण्डीक्षुपे। इँश्रूर गाछ। শাদা নিশিন্দা। हिं शम्भालु। मं लिङ्गुर। तें वविल्लि। वम् निर्गुण्डी। ता. निर्नौचि। श्वेतगुणाः — कटुः तिक्तः कफवातक्षयापहः कण्डूकुष्ठघ्नः शूलकासघ्नश्च। रा.नि.व.४। विषश्लेष्मव्रणकुष्ठक्षयघ्नः। राज.। नीलगुणाः — "सिन्धुवारदलं तत्र वातश्लेष्महरं लघु।" "सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः। केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान्। क्रमिकुष्ठारुचिश्लेष्मज्वरान्...... ॥" भा.।

सिन्दु(न्धु)वारच्छदा। स्त्री। वननिर्गुण्ड्यां। वै निघ.। [काल निशिन्दा। वै.निघ.]

सिन्दु(न्धु)सहा। स्त्री। कृष्णनिर्गुण्ड्याम्।

सिन्दूरम्। क्ली। (Plumbi oxidum rubium) Red lead, शीषकस्योपधातौ।

सिन्दूर। हिं दा. सिन्दूर। तें चेन्दुरमु। ता. चेन्दूरम्। पारस्य. सिरिन्ज्। गुणाः — "सीसोपधातुः सिन्दूरं गुणैस्तस्मीसवन्मतम्। संयोगजप्रभावेन तस्याप्यन्ये गुणाः स्मृताः। सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम्। भग्नसन्धानजननं व्रणशोधनरोपणम्। दुष्धान्नयोगतस्तस्य विशुद्धिर्गदिता बुधैः॥" भा.पू.१भ.धा.व.। पुं। पुष्पवृक्षविशेषे। मे.।

सिन्दूरकारणम्। क्ली। शीषधातौ। हे.च.।

सिन्दूरपुष्पी (री)। स्त्री। स्वनामख्यातपुष्पवृक्षे। हिं सेन्दरिया। मं शेंद्री। गुणाः — कटुका तिक्ता कषाया वातश्लेष्मघ्नी शिरोरोगघ्नी भूतघ्नी च। रा.नि.व.१०। "सिन्दूरी विषपित्तास्रतृष्णावान्तिहरी हिमा।" भा.। (री) रोचन्याम्। धातक्याम्। रक्तचेलिकायाम्। मे.।

सिन्दूरा। स्त्री। श्वेतनिर्गुण्ड्याम्। शादा हेञ्‌जूर। वै.निघ.।

सिन्धुः। पुं। पाञ्चालदेशीयनदे। तज्जलं समुद्रसलिलतुल्यगुणम्। रा.नि.व.१४। नीलसिन्धुवारवृक्षे। नील निशिन्दा गाछ। सैन्धवलवणे। च.द.स्व.भेदचि.गर्भाधिकारे। वान्तौ। वमि। मे.। सिन्धुवारवृक्षे। सादा निशिन्दा। श.च.। श्वेतटङ्कणे। रा.नि.व.६।

सिन्धुकः। पुं। नीलसिन्धुवारवृक्षे। रा.नि.व.४। श्वेतसिन्धुवारवृक्षे। श.च.।

सिन्धुकफः। पुं। समुद्रफेने। श.र.।

सिन्धुकरम्। क्ली। श्वेतटङ्कणे। शादा सोहागा। रा.नि.व.६। [जटा.।]

सिन्धुजम् (न्म)। क्ली। सैन्धवलवणे। अम.।

सिन्धुजः। पुं। पारदे। टङ्कणे। रा.नि.व.२३। (जा) स्त्री। मुक्ताशुक्तौ। वै.निघ.।

सिन्धुजातम्। क्ली। मुक्तायाम्। वै.निघ.।

सिन्धुपर्णी। स्त्री। गाम्भारीवृक्षे। वै.निघ.।

सिन्धुपुत्री। स्त्री। मौक्तिकशुक्तौ। वै.निघ.२भ.कणक.ज्व.चि.।

सिन्धुपुष्पः। पुं। शङ्खे। शाँख। श.च.। कदम्बवृक्षे। वकुलवृक्षे। रा.नि.व.२३।

सिन्धुमन्थजम्। क्ली। सैन्धवलवणे। र.मा.।

सिन्धुरः। पुं। हस्तिनि। हे.च.। निर्गुण्डीवृक्षे। निशिन्दा गाछ। र.सा.सं.जातीफलादौ।

सिन्धुरद्वेषी (इन्)। पुं। सिंहे। व्याक.।

सिन्धुलतायम् / **सिन्धुवल्लायम्**} क्ली। प्रवाले। पला। वै.निघ.।

सिन्धुलवणम्। क्ली। सामुद्रलवणे। र.मा.।

सिन्धुवारः (कः) (रितः)। पुं। सिन्दुवारवृक्षे, निर्गुण्ड्याकारशुक्लपुष्पवृक्षे। শ্বেত নিশিন্দা গাছ। श.र.। च.द.विषाधिकारे विषतैले। च.सू.४अ.। वा.उ.३६अ.।

सिन्धुवारदलम्। क्ली। निर्गुण्डीपत्रे। निशिन्दा पाता। च.द.कफज्व.चि.। "सिन्धुवारदलक्वाथः।"

सिन्धुवेषणः। पुं। गाम्भारीवृक्षे। श.च.।

सिन्धुसम्भवम्। क्ली। फटिकारिकायाम्। ফট্‌কিরি। प.मु.।

सिन्धूत्प्लवः। पुं। अग्निजरवृक्षे। वै.निघ.।

सिन्धूद्भवम् / **सिन्धूद्गतम्**} क्ली। सैन्धवलवणे। प.मु.। वै.निघ.२भ.वा.व्या.चि.।

सिन्धूपलम्। क्ली। सैन्धवलवणे। हारा.।

सिप्रः (व्रः)। पुं। घर्मे। स्वेदे। मे.। स्त्री (प्रा)। महिष्यां।

सिम्बा (म्बिः)। स्त्री। शमीधान्ये। भ द्विरूपकोषे। शिम्ब्यां। शुँटी। भ.। नखीनामगन्धद्रव्ये। रा.नि.व.१२।

सिम्बिजा। स्त्री। सिम्बिधान्ये। भा.।

सिम्बितिका। स्त्री। सेववृक्षे। সেব গাছ। सु.सू.४६अ.।

सिम्बितिकाफलम्। क्ली। सेवफले। সেব ফল। "सेवं समीरपित्तघ्नं बृंहणं कफकृद्गुरु। रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत्॥" भा.। गुणाः — कषायं स्वादु संग्राहि शीतलञ्च। सु.सू.४६अ.।

सिम्बी। स्त्री। निष्पाव्याम्। रा.नि.व.७। सा द्विधा सिम्बी पुस्तकशिम्बी चेति। शिम्बीद्वयं

मधुरं रसे पाके हिमं गुरु दाहकं बल्यं श्लेष्मकरं वातपित्तहरञ्च । भा. । मुद्गपर्ण्यां । रा.नि.व.९ । पुस्तकान्तरे सिंहीपाठः ।

सिरः । पुं । पिप्पलीमूले । हे.च. ।

सिरा । स्त्री । नाड्याम् । हे.च. ।

सिरामातृका । स्त्री । तन्नामकोर्द्धजत्रुमर्म्मणि । तत्स्थानं ग्रीवाया उभयपार्श्वे । सु.शा.६ष. ।

सिरावृत्तम् । क्ली । सीसके । सीसा । रा.नि. व.१३ ।

सिराव्यधः । पुं । See शिराव्यधः ।

सिरी । स्त्री । लाङ्गलिकालतायां । विषलाङ्गलिया । वै.निघ. । [वै.निघ. ।

सिलीन्ध्रः । पुं । मत्स्यविशेषे । छिलिन्द माछ ।

सिल्लकी । स्त्री । सल्लकीवृक्षे । श.टी.भ. ।

सिविका । स्त्री । सेवफले । सेउ फल । वै. निघ. ।

सिवितिकाफलम् । क्ली । सेवफले । सेउ फल । भा. । गुणाः—कषायं स्वादु संग्राहि शीतञ्च । सु.सू.४६ष. । [पातोड़ि । प.मु. ।

सिह्लली । स्त्री । सिउलिक्कीप इति ख्याते द्रव्ये ।

सिहुण्डः । पुं । स्नुहीवृक्षे । मनसा गाछ । श्रम. ।

सिह्लः (कः) । पुं । स्वनामख्यातगन्धद्रव्ये । शिलारस । सं पिल्हतैल । गुणाः—सुरभिः तिक्तः कटुः स्निग्धः कुष्ठघ्नः कफपित्ताश्मरीमूत्राघातभूतज्वरघ्नश्च । रा.नि.व.१२ । "निर्म्मलः कपिलः स्वच्छः सिह्लकोऽतितरां नवः । मध्वाभो मलसंयुक्तः वर्ज्जितो गन्धकर्म्मणि ॥" भैष. । [श.र. ।

सिह्लकी । स्त्री । सल्लक्याम् । शालविशेष ।

सिह्लभूमिका । स्त्री । सल्लक्याम् । श.र. ।

सिह्लसारः । पुं । शिलारसे । वै.निघ. ।

सिह्लहासः । पुं । सिह्लके । शिलारस । रा. नि.व.१२ । [२भ.वा.व्या.चि.विषगर्भतैले ।

सिह्लारः । पुं । गर्भतैले, शिलारसे । वै.निघ.

सिध्यः । पुं । स्फटिके । शब्दकल्पः ।

सीतः । पुं । वेतसवृक्षे । वै.निघ. ।

सीतजाम्रः । पुं । महाम्रवृक्षे । वै.निघ. ।

सीतफेणः (नः) । पुं । रीठाकरञ्जे । वै.निघ. ।

सीता । स्त्री । महासमङ्गायाम् । रा.नि.व.४ ।

सीताफलम् । क्ली । फलविशेषे । आता । गुणाः—मधुरं शीतलं हृद्यं बल्यं वातलं कफकरं स्वादु पुष्टिकरं पित्तघ्नञ्च । वै.निघ. ।

सीतीलकः । पुं । सतीलके, शिम्बीधान्यविशेषे । श.टी.रा. ।

सीतोत्पलम् । क्ली । श्वेतमरिचे । रा.नि.व.६ ।

सीत्यम् । क्ली । धान्ये । शस्ये । हे.च. ।

सीधुः (धूः) । पुं, स्त्री । पक्वापक्वेक्षुरसकृतमद्ये । रा.नि.व.१४ । च.वि.८ष. । गुडासवे । च. द.सामान्यविधिः । "आमैन शीतरसिकः सीधुः पक्वरसोद्भवः ।" इक्षुशीनकात् । See शीधुः ।

सीधुगन्धः । पुं । वकुलवृक्षे । रा.नि.व.१० ।

सीधुपर्णी । स्त्री । गाम्भारीवृक्षे । रा.नि.व.९ ।

सीधुपुष्पः । पुं । वकुलवृक्षे । रा.नि.व.१० । कदम्बवृक्षे । रा.नि.व.९ । स्त्री (ष्पी) । धातकीवृक्षे । रा.नि.व.६ । [११ ।

सीधु(धू)रसः । पुं । आम्रवृक्षे । रा.नि.व.

सीधुराचः । पुं । मातुलुङ्गवृक्षे । वै.निघ. ।

सीधुराचिकम् । क्ली । काशीशे । हिरेकम् । वै.निघ. ।

सीधुवृक्षः । पुं । स्नुहीवृक्षे । वै.निघ. ।

सीधु(धू)संज्ञः । पुं । वकुलवृक्षे । रा.नि.व. १० । [णिते । वै.निघ. ।

सीधूकफाणितम् । क्ली । मधूकपुष्पोत्थफा-

सीधूरसा । स्त्री । आमलक्यां । वै.निघ. ।

सीध्रम् । क्ली । पायौ । मलद्वार । शब्दकल्पः ।

सीमन्तः । पुं । अस्थिसङ्घातविशेषे । यैः सङ्घाताः सीविताश्च एव सीमन्ता उच्यन्ते । ते च चतुर्दश । भा. । तैरुन्मादादिभिर्मरणम् । ते चास्थिसङ्घातवद्गणनीया यतश्चैर्युक्ता अस्थिसङ्घाताः । सु.शा.५ष. ।

सीमन्तकम् । क्ली । सिन्दूरे । रा.नि.व.१३ ।

सीमा । स्त्री । अण्डकोषे । जटा. ।

सीमिकः । पुं । सूक्ष्मक्रमौ । सरु क्रिमि । व ल्मीके । वृक्षविशेषे । उणा. ।

सीमीकः । पुं । वृक्षविशेषे । शब्दकल्प: ।

सीरः । पुं । अर्कवृक्षे । अम. ।

सीरकः । पुं । शिशुमारके । श.मा. ।

सीरी (इन्) । पुं । स्थूलदर्भे । स्त्री (री) । लाङ्गलिकायाम् । वै.निघ. ।

सीलन्धः । पुं । मत्स्यभेदे । शिलिन्दा माछ । गुणाः—"श्लेष्मलः वृष्यः विपाके मधुरः गुरुः वातपित्तहरः हृद्य आमवातकफकरश्च ।" भा. ।

सीवनम् । क्ली । सूचीकर्म्मणि । সেলাই । अम. । स्त्री (नी) । सीवनकर्म्मणि । সেলাই । लिङ्गमण्यधःसूत्रे । हे.च. । सा चतुर्था—वेल्लितं गोफणिका तुन्नसीवनी ऋजुग्रन्थिरिति । सु.सू.२५ अ. । [अ. ।

सीव्यः । त्रि । गोफणिकादिसीवनार्हे । सु.सू.५

सीषपत्रकम् । क्ली । सीसधातुपत्रे । সীসের পাত । हे.च. ।

सीषभस्म (न्) । क्ली । (Plumbi carbonas.) White lead. সফেদা । हिं दा. सफेदा । तें सीसभस्मम् ।

सीस(क)म् । क्ली । (Plumbum.) Lead, sulphate of lead. स्वनामख्यातधातौ । সীসা । हिं सीषक, शीषा । तें शिषमु । दा. शिश । गुणाः—"सीसं रङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम् ।" "नागस्तु नागशततुल्यबलं ददाति व्याधिं विनाशयति जीवितमातनोति । वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः ॥" सङ्कोचकः अवसादकरः शुष्ककारकः वेदनाहरः रक्तरोधकश्च । तथा—"पाकेन हीनौ किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथातिकष्टान् । पाण्डुप्रमेहानिलसादशोथभगन्दरादीन् कुरुतः प्रभुक्तौ ॥" भा.पू.१भ.धा.व. । मारणं—"मनःशिलायुतो नागो वासारसविमर्द्दितः । त्रिभिर्गजपुटैर्भस्म भवेत्तन्मेहरोगजित् । तारस्य रञ्जको नागो वातपित्तकफापहः ॥" इति । सा.कौ. । तथा—"अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निक्षिपेत् । मृत्पात्रे विद्रुते नागे लौहदर्व्या च चालयेत् । यामैकेन भवेद्भस्म तत्तुल्याञ्च मनःशिलाम् । काञ्जिकेन द्वयम्पिष्ट्वा पचेद्दृढपुटेन च । साङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च । पुनः पुटेत्त्ररावाभ्यामेवं षड्भिः पुटैर्मृतिः । नागः सिन्दूरवर्णाभो म्रियते सर्व्वकार्य्यकृत् ॥" मृतस्य गुणाः—"सतिक्तो मधुरो नागो मृतो भवति भस्मसात् । आयुः कीर्त्तिं वीर्य्यवृद्धिं करोति सेवनात्सदा । रोगान्हन्ति मृतो नागो वङ्गवद्गुणकारकः ॥" र.सा.सं. । "जम्बाम्भसा सैन्धवसंयुतेन सगन्धकं स्थापयेत् शुल्वपत्रम् । पक्वायमानं पुटयेत् सुयुक्त्या वान्त्यादिकं यावदुपैति शान्तिम् ॥" रस.चि.६अ. ।

सीसोपधातुः । पुं । सिन्दूरे । भा. ।

सीहुण्डः । पुं । सेहुण्डवृक्षे, सुहीवृक्षे । अम. ।

सुकटुः । पुं । शिरीषवृक्षे । वै निघ. ।

सुकण्टका । स्त्री । घृतकुमार्य्याम् । रा.नि.व. ५ । पिण्डीखर्ज्जूरवृक्षे । वै.निघ. ।

सुकण्डुः । पुं । कण्डूरोगे । চুলকনা । श.र. ।

सुकन्दः (कः) । पुं । कशेरौ । কেশুর । रा. नि.व.८ । पलाण्डौ । পেঁয়াজ । अम. । वाराहीकन्दे । मुखालौ । धरणीकन्दे । रा.नि.व.७ ।

सुकन्दकरणः । पुं । श्वेतपलाण्डौ । वै. निघ. ।

सुक(कु)न्दनः । पुं । वैजयन्तीतुलस्यां । वै. निघ. । वर्व्वरके । বাবুই । रा.नि.व.१० ।

सुकन्दा । स्त्री । लक्ष्मणाकन्दे । रा.नि.व.७ । बन्ध्याकर्कोटक्याम् । वै.निघ. ।

सुकन्दी (इन्) । पुं । शूरणे । रा.नि.व.७ ।

सुकर्णकः । पुं । हस्तिकन्दे । रा.नि.व.७ ।

सुकर्णा । स्त्री । आखुकर्णीलतायाम् । मूषाकाणी । रा.नि.व.३ ।

सुकर्णिका । स्त्री । मूषिककर्ण्याम् । मूषाकाणी । श.र. । महाबलायां । वै.निघ. ।

सुकर्णी । स्त्री । इन्द्रवारुण्याम् । রাখালশশা । रा.नि.व.३ ।

सुकाण्डः (कः) । पुं । कारवेल्ललतायाम् । করলা গাছ । रा.नि.व.३ । कासमर्दे । वै.निघ. ।

सुकाण्डिका । स्त्री । कारवेल्लतायां । करला गाछ । रा.नि.व.३ । [लता । रा.नि.व.५ ।

सुकामा । स्त्री । त्रायमाणालतायाम् । वला

सुकार: । पुं । कुङ्कुमशालौ । रा.नि.व.१६ ।

सुकार्पास: । पुं । रक्तकार्पासाम् । र.सा.सं. चन्द्रोदयरसे ।

सुकाष्ठकम् । क्ली । देवदारुणि । काष्ठदारुणि । দেবদারুবিশেষ । रा.नि.व.१२ ।

सुकाष्ठा । स्त्री । कटुक्यां । कट्की । काष्ठकदल्याम् । रा.नि.व.३।११ । [वै.निघ. ।

सुकुन्द: । पुं । सल्लकीनिर्यासे । সরল-আটা ।

सुकुमार: (क:) । पुं । पुण्ड्रकेक्षौ, रसालेक्षौ । পুঁড়ি আখ । मे. । रा.नि.व.१४ । श्यामाके । শ্যামা ধান । रा.नि.व.१६।२३ । वनचम्पके । स्वर्णचम्पके । चम्पकवृक्षे । रा.नि.व.१०।२३ । राजमाषे । कङ्गुधान्ये । কাংনোধান । रा.नि.व.१६। क्ली । राजरीतौ । ব্যাঙাপিতল । वै.निघ. । तमालपत्रे । তেজপত্র । रा.नि.व.६ ।

सुकुमारा (री) । स्त्री । स्पृक्कानामगन्धद्रव्ये । গেঁঠেলা । रा.नि.व.१२।२३ । जातीपुष्पवृक्षे । रा.नि,व.१० । (री) शिम्बीभेदे । प.मु. । रा.नि. व.२३ । वनमल्लिकायाम् । रा.नि.व.१०।२३ । महाकारवेल्लके । বড় করলা । इक्षौ । वै.निघ. । कदलीवृक्षे । विसन्धिपुष्पवृक्षे । रा.नि.व.१०।११ ।

सुकुमारिका । स्त्री । कदलीवृक्षे । रा.नि,व. ११ । [গাছ । रा.नि.व.११ ।

सुकेश(स)र: । पुं । बीजपूरवृक्षे । গোঁড়ালেবু

सुकेशिनी । स्त्री । शङ्खिन्यां । वै.निघ. ।

सुकोली । स्त्री । क्षीरकाकोल्याम् । बदरीवृक्षे । र.मा. । [ঘোষা । रा.नि.व.७ ।

सुकोशा (षा) । स्त्री । कोशातक्याम् । ঝিঙা।

सुकोषक: । पुं । कोषाम्रे । भा. ।

सुक्तम् । क्ली । कन्दादिकृतसन्धानविशेषे । तदुक्तं —"कन्दमूलफलादीनि सस्नेहलवणानि च । यत्र द्रवेऽभिषूयन्ते तत् सुक्तमभिधीयते ॥" शार्ङ्ग. । शुक्तापरनामके तद्भेदे । चुक्र शुक्त । "यन्मस्वादि शुची भाण्डे सगुड़क्षौद्रकाञ्जिकं । धान्यराशौ त्रिरात्रस्थं सुक्तं चुक्रं तदुच्यते ॥" तच्च गुड़ेक्षुरसमधुमाध्वीकभेदेन चतुर्विधम् । नामतश्च गुड़सुक्तं इक्षुरससुक्तं मधुसुक्तं माध्वीकसुक्तञ्चेति यथोत्तरं लघु ज्ञेयम् । तस्य साधारणगुणा:—रक्तपित्तकफघ्नं वातानुलोमनम् अत्युष्णतीक्ष्णरुचाम्लं रुचिकरं दीपनं पाण्डुकृमिघ्नञ्च । वा.सू. ।

सुक्ता (क्तिका) । स्त्री । तिन्तिड्यां । वै.निघ.।

सुक्तड़िचन्दनम् । क्ली । स्वनामख्याते श्रीखण्डचन्दनान्तरचन्दने । गुणा:—तिक्तं कृच्छ्ररक्तपित्तदाहघ्नं शीतलं सुगन्धि आर्द्रगुष्कलेपे तदन्यथागुणञ्च । रा.नि.व.१२ । See श्रीखण्डम् । शुष्कचन्दने । वै निघ. । [च. । रा.नि.व.५ ।

सुखम् । क्ली । स्वर्गे । ऋद्धि । जले । आरोग्ये ।

सुखङ्करी । स्त्री । जीवन्तीलतायां । জীবন্তী । रा.नि.व.३ । [नि.व.८ ।

सुखदा । स्त्री । शमीवृक्षे । শাঁই গাছ । रा.

सुखदायिनी । स्त्री । रोहिण्याम् । মাংসরোহিণী । वै.निघ. । [रा.नि.व.७ ।

सुखभक्ष: । पुं । श्वेतशिग्रौ । সাদা সজিনা ।

सुखभोजी (इन्) । पुं । गरुड़शालौ । পক্ষিরাজ ধান্য । रा.नि.व.१६ ।

सुखमोद: । पुं । शोभाञ्जनवृक्षे । লাল সজিনা গাছ । रा.नि.व.७ ।

सुखमोदा । स्त्री । सल्लकीवृक्षे । रा.नि.व.११।

सुखर: । पुं । सारसपक्षिणि । वै.निघ. ।

सुखवर्चक: (वर्चा:(स्)) । पुं । सर्जिक्षारे । সাজিমাটী । अम. । रा.नि.व.८ ।

सुखवास: । पुं । तरम्बुजे । তরমুজ । त्रिका.।

सुखवासन: । पुं । सुखवासनसुगन्धद्रव्ये । ग.र.।

सुखा । स्त्री । वह्निनामौषधौ । वै.निघ. ।

सुखात्मक: । पुं । शुक्लमरुवकवृक्षे । মরুয়া বৃক্ষ । वै.निघ. ।

सुखाम्बु । क्ली । उष्णोदके । উষ্ণজল । चं.द. वा.व्या.चि. । [रा.नि.व.६ ।

सुखार्जिक: । पुं । सर्जिक्षारे । সাজিমাটী ।

सुखालुका । स्त्री । जीवन्तीभेदे । रा.नि.व.३।

सुखाशः (सः) (कः) । पुं । चेलालफलवृक्षे । तरमुज गाछ । त्रिका. । (Curcuma sativus.) राजतिनिशे । ग्राम्यकर्कटी, शशा। श.मा. । सुखभोजने । मे. ।

सुखोदकम् । क्ली । उष्णाम्बुनि । गरम जल । "उष्णाम्बु च सुखोदकम् ।" प.प्र.३ख. ।

सुखोद्भवा । स्त्री । सूर्य्यावर्त्तक्षुपे । हुड़हुड़िया । वै.निघ. ।

सुखोषिता । स्त्री । मूर्व्वायाम् । रा.नि.व.३।

सुगम् । क्ली । विष्ठायां । श.च. ।

सुगन्धम् । क्ली । गन्धतृणविशेषे । गन्धतृण, नागदना, रामकर्पूर । र.मा. । प.मु. । एलबालुके । वै.निघ. । वृहद्गन्धतृणे । सु.सू.३८अ. । नीलोत्पले । नील शुन्दि । रा.नि.व.१० । श्रीखण्डचन्दने । श्वेत चन्दन । शवरचन्दने । गन्धराजे । रा.नि.व.१२ । कणजीरके । क्षुद्र जीरे । श.च. । ग्रन्थिपर्णे । गेँटेला । भा. ।

सुगन्धः । पुं । गन्धके । रा.नि.व.१३ । र.मा.। कृष्णजीरके । भा. । देवशालिरित्यपरनामशालिधान्यविशेषे । जालन्धरमगधादिषु गन्धशालिरिति ख्यातः । गुणाः—स्वादुपाकरसत्वादियुक्तः । चक्र. चि. । षष्टिकाद्वीनगुणः । च.सू.२७अ. । आस्फोतके । हापरमाली । र.मा. । रक्तशिग्रौ । लाल सजिना । रा.नि.व.७ । मरुवके । शिलारसे । श्वेतकेतक्यां । अतिमुक्तके । चणके । छोला गाछ। रा.नि.व.१६ । श्वेतकरवीरे । वै.निघ. । भूतृणे । गन्धतृण । रा.नि.व.८ । कसेरौ । केशुर । धवलयावनाले । श्वेत जनार । रा.नि.व.१६ । तुम्बुरुवृक्षे । मं कं तेंदु, तुम्बुरु । रा.नि.व.११ ।

सुगन्धकः । पुं । गन्धतुलस्यां । फुलानतुलसी । प.मु. । सु.सू.३८अ. । धरणीकन्दे । वै.निघ. । रक्ततुलस्याम् । र.मा. । वृहद्गन्धतृणे । बड़ गन्ध खड़ । सु.सू.३८अ.सुरसादिः । गन्धके । र.मा. । र.सा.सं. । द्रोणपुष्प्याम् । घलघसा । नागरङ्गवृक्षे । त्रिका. । कर्कोटके । काँकुड़ गाछ । हे. च. । शालिधान्यभेदे । गन्ध शालि । गुणाः शालिवत् । सु.सू.४६अ. ।

सुगन्धकेश(स)रः । पुं । रक्तशिग्रौ । लाल सजिना । वै.निघ. ।

सुगन्धगन्धकः । पुं । गन्धके । वै.निघ. ।

सुगन्धगन्धा । स्त्री । दारुहरिद्रायाम् । दारुहरिद्रा । वै.निघ. । [वै.निघ. ।

सुगन्धचन्द्री । स्त्री । सुगन्धशट्याम् । शठी ।

सुगन्धतृणम् । क्ली । तृणभेदे । पुदिना, गन्धतृण रा.नि.व.८ ।

सुगन्धतैलनिर्यासः । पुं । यवादिनामगन्धद्रव्ये । थाटाशि । रा.नि.व १२ ।

सुगन्धत्रयम् । क्ली । चन्दनबालकनागकेसरेषु । वै.सं. ।

सुगन्धत्रिफला । स्त्री। जातीफललवङ्गैलासु । वै.निघ. । पूगजातीफललवङ्गेषु । "जातीफलं पूगफलं लवङ्गकलिकाफलम् ।" रा.नि.व.२२ ।

सुगन्धनम् । क्ली । जीरके । वै.निघ. ।

सुगन्धपत्रा । स्त्री । रुद्रजटायाम् । रा.नि.व. ३ । (त्री) जातीपत्राम् । जयित्री । वै.निघ. ।

सुगन्धफलम् । स्त्री । कक्कोले । काँकला। वै.निघ. ।

सुगन्धभूतृणम् । क्ली । गन्धतृणे । पुदिना। गुणाः—सुगन्धि ईषत्तिक्तं रसायनं स्निग्धं मधुरं शीतं कफघ्नं पित्तघ्नं श्रमहरञ्च । रा.नि.व.८ ।

सुगन्धमुख्या । स्त्री । कस्तूरिकायां । मृगनाभि । वै.निघ. । [कृगकुल । वै.निघ. ।

सुगन्धमूत्रपतनः । पुं । सुगन्धमार्जारे । ग-

सुगन्ध(न्धि)मूला (ली) । स्त्री । स्थलपद्मिन्याम् । स्थलपद्म । रा.नि.व.५ । आमलक्यां । वै.निघ. । रास्नायाम् । रा.नि.व.६ । लवलीवृक्षे । नोयाड़ गाछ । भा. । (ली) सुगन्धशट्यां । वै. निघ. । [वै.निघ. ।

सुगन्धमूषिका । स्त्री । कुछुन्दर्य्यां । छुँचा ।

सुगन्धवल्कलम् । क्ली । त्वचि । गुड़त्वक् । वै.निघ. । [गन्ध तृण । वै.निघ. ।

सुगन्धवैरजात्यम् । क्ली । रोहिषतृणे । सु-

सुगन्धशालिः । पुं । स्वनामकशालिधान्यवि-

शेषे । गुणाः मधुरा हृद्या, कफपित्तज्वरास्रजित् । रा.नि.व.१८ ।

सुगन्धषट्कम् । क्ली । जातीफलकक्कोललवङ्गबालककर्पूरपूगेषु । जायफल, कांकला, लवङ्ग, बाला, कर्पूर, सुपारि । वै.निघ. ।

सुगन्धसारः । पुं । शाकवृक्षे । शेगुन गाछ । वै निघ. ।

सुगन्धा । स्त्री । स्पृक्कायां । पिड़िং । रा.नि.व.१२। सुगन्धशाली । रा.नि.व.१६। कृष्णजीरके । रा.नि.व.६ । तिलवासिनीशाली । रा.नि.व.१६ । सल्लकीवृक्षे । रा.नि.व.११ । गन्धरास्नायाम् । प.मु. । वन्ध्याकर्कोटकाम् । रा.नि.व.३ । नीलशिम्बुवारे । नील निशिन्दा । रा.नि.व.४ । शठ्यां । शटी । श.र. । रुद्रजटायाम् । रा.नि.व.३ । एलवालुके । एलवालुक । ज.द. । शतपुष्पायाम् । शुल्फ. । रा.नि.व.४ । नाकुलीनामकन्दशाके । रा.नि.व ७ । सु.कल्प.५अ. । वा.उ.३६अ. । वनमल्लिकायाम् । सेउती । र.मा. । स्वर्णयूथिकायाम् । माधवीलतायाम् । रा.नि.व.१० । अनन्तायाम् । अनन्त मूल । प.मु. । भा.पू.१भ. । मातुलुङ्गायाम् । लेबु गाछ । प.मु । गङ्गापत्रीवृक्षे । रा.नि.व.८ । तुलस्याम् । र.मा. ।

सुगन्धाढ्या । स्त्री । वृत्तमल्लिकायाम् । वटपत्रमल्लिकायां । रा.नि.व.१० । चम्पाशाली । सुगन्धशालिधान्यविशेषे । रा.नि.व.१६ ।

सुगन्धामलकगणः । पुं । शुष्कामलकलग्नयुक्ते सर्व्वौषधिगणे । "सर्व्वौषधिसमायुक्ताः शुष्काश्चामलकलवः । यदा तदायं योगः स्यात् सुगन्धामलकाभिधः ॥" रा.नि.व.२२ ।

सुगन्धि । क्ली । वर्व्वरचन्दने, रक्तचन्दनभेदे । रा.नि.व.१२ । एलबालुके । रा.नि.व.४ । मुस्तायाम् । रा.नि.व.६ । कसेरौ । केशुर । रा.नि.व.८ । धान्यके । धनिया । पिप्पलीमूले । रा.नि.व.६ । गन्धतृणे । रा.नि.व.८ ।

सुगन्धिः । पुं । गन्धशाली । रा.नि.व.१६ । सहकारवृक्षे । आम गाछ । श.च. । शुभगन्धे । अम. । स्त्री । वर्व्वरिकायाम् । वन बाबुई । रा.नि.व.१० । चिर्भटिकायां । फूटी । वै.निघ. ।

सुगन्धिकम् । क्ली । उशीरे । वेणार मूल । रा.नि.व.१२ । धन्याके । रा.नि.व.६ । कह्लारे । रक्तकम्बल । श.र. । पुष्करमूले । मद.व.१ । सुरपनामसुगन्धपत्रे । रा.नि.व.१० । एलवालुके । रा.नि.व.४ । गौरसुवर्णशाके । रा.नि.व.७ । जीरके । वै.निघ. । कृष्णजीरके । मद.व.२ । मुस्तके । रा.नि.व.६ ।

सुगन्धिकः । पुं । सिह्लके । शिलारस । रा.नि.व.१२ । महाशाली । हे.च. । च.मू.२७अ. । गन्धके । अ.टी.रा. । सुगन्धार्जकवृक्षे । पुन्नागवृक्षे । पुनाং । कपित्थवृक्षे । वै.निघ. ।

सुगन्धिका । स्त्री । कृष्णनिर्गुण्ड्याम् । काल निशिन्दा । वै.निघ.२भ.सर्व्वज्व.चि.चन्दनबलातैले । सु.चि.१७अ. । कस्तूर्य्याम् । मृगनाभि । वै.निघ. । श्वेतशारिवायाम् । सु.चि.१७अः । स्वर्णकेतक्यां । सु.कल्प.५अ. ।

सुगन्धिकुसुमः । पुं । पीतपुष्पकरवीरे । रा.नि.व.१० । क्ली । सुगन्धपुष्पे । स्त्री । स्पृक्कायाम् । पिड़ং । जटा. ।

सुगन्धिकृत् । पुं । शिलारसे । वै.निघ. ।

सुगन्धित्रिफला । स्त्री । जातीफलं पूगफलं लवङ्गञ्चेति द्रव्यत्रये । "जातीफलं पूगफलं, लवङ्गकलिकाफलम् । सुगन्धित्रिफला प्रोक्ता ।" रा.नि.व.१२ ।

सुगन्धिनी । स्त्री । आरामशीतलायाम् । रा.नि.व.१० । सुनन्दिनीति २यः पाठः—स्वर्णकेतक्यां । वै.निघ. ।

सुगन्धिपुष्पः । पुं । राजकदम्बवृक्षे । वै.निघ. ।

सुगन्धिमूलकम् । क्ली । उशीरे । वेणार मूल । रा.नि.व.१२ । [ड़ा । रा.नि.व.१६ ।

सुगन्धिमूषिका । क्ली । मूषिकविशेषे । छुँ-

सुगरम् । क्ली । हिङ्गुले । रा.नि.व.१३ ।

सुगर्भकम् । क्ली । चपुषे । शशा । वै.निघ. ।

सुगुण्डा । स्त्री । गुण्डासिनीतृणे । रा.नि.व.८ ।

सुगुप्ता । स्त्री । कपिकच्छ्वाम् । आलाकुशी । प.मु. ।

सुग्रहः (ह्री[हन्]) । पुं । समुद्रपक्षिविशेषे,

वच्चुमुचिकपचिणि । हे.च. । सु.सू.४६अ. । कारण्डवपचिणि । त्रिका. ।

सुग्रन्थिः । पुं । चोरकनामगन्धद्रव्ये । গেঁঠেলা। रा.नि.व.१२ । क्ली । पिप्पलीमूले । পিপুলমূল । रा.नि.व.६ ।

सुग्रीवः । पुं । राजहंसे । शब्दकल्प. ।

सुच(चु)टी । स्त्री । यन्त्रविशेषे । चिमिटा इति लोके । शब्दकल्पः ।

सुच(चु)ञ्चुका । स्त्री । महाचञ्चुशाके । চেঁচ্‌কো শাক । रा.नि.व.४ ।

सुचन्दनम् । क्ली । पत्राङ्गचन्दने । বকমকাঠ । रा.नि.व.१२ । चि.क्र.क.गर्भ.चि. ।

सुचर्म्मा(न्) । पुं । भूर्जवृचे । रा.नि.व.९ ।

सुचक्षुः । पुं । उदुम्बरवृचे । যজ্ঞ ডুমুর গাছ । जटा. ।

सुचित्रकः । पुं । मत्स्यरङ्गपचिणि । মাছরাঙা পাখী । चित्रसर्पे । চিতি সাপ । श.र. ।

सुचित्रवीजा । स्त्री । विड़ङ्गायाम् । বিড়ঙ্গ । रा.नि.व.६ । [व.७ ।

सुचित्रा । स्त्री । चिर्भटायां । ফুটী । रा.नि.

सुचुक्रिका । स्त्री । तिन्तिड्याम् । वै.निघ. ।

सुच्छिद्रिका । स्त्री । महामेदायां । वै.निघ. ।

सुजलम् । क्ली । कमले । रा.नि.व.१० । सुन्दरजले ।

सुजातका । स्त्री । कुङ्कुमशाली । হৈমন্তিক শালিধান্যবিশেষ । रा.नि.व.१६ । [व.१३ ।

सुजाता । स्त्री । सौराष्ट्रमृत्तिकायाम् । रा.नि.

सुजीवन्ती । स्त्री । स्वर्णजीवन्त्यां । रा.नि.व.३।

सुतङ्गी । स्त्री । महीपीदिकायां । বড় পুঁই । वै.निघ. । [व.९ ।

सुतजीवकः । पुं । पुत्रञ्जीवकवृचे । रा.नि.

सुतपादि(दु)का । स्त्री । चुपजातीयहंसपादीलतायाम् । গোহালিয়া লতা । रा.नि.व.५ ।

सुतकारी । स्त्री । देवदालीलतायाम् । দেয়াতাড়া । रा.नि.व.३ ।

सुतर्द्दनः । पुं । कोकिले । त्रिका. ।

सुतवस्करा । स्त्री । पुत्रसप्तकमातरि । সাত বিউনী । त्रिका. ।

सुतश्रेणी । स्त्री । वृहद्दन्तीवृचे । বড় দন্তী । मुतश्रेणीचुपे, मूषिककर्ण्यां । ইন্দুরমারী । हिं उन्दुरविणीवा । गुणाः—चचुष्या कटुः आखुविषव्रणदोषनेत्ररोगघ्नी च । रा.नि.व.४ ।

सुता । स्त्री । श्वेतदूर्व्वायाम् । रा.नि.व.८ । दुरालभायां । श.च. । [नि.व.५ ।

सुतिक्तः । पुं । पर्पटके । ক্ষেৎপাব্‌ড়া । रा.

सुतिक्तकः । पुं । पारिभद्रवृचे । পালিধামান্দার । जटा । भूनिम्बवृचे । চিরাতা । पर्पटके । ক্ষেৎপাব্‌ড়া । श.र. ।

सुतिक्ता । स्त्री । कोशातकीलतायाम् । ঘোষা লতা । रा.नि.व.३ । शल्लकीवृचे । वै.निघ. ।

सुतिन्तिड़ः । पुं । तिन्तिड़ीवृचे । वै.निघ. ।

सुतीक्ष्णकः । पुं । श्वेतशिग्रौ । শ্বেত সজিনা । रा.नि.व.७ । शोभाञ्जनवृचे । রক্ত সজিনা । जटा. । मुष्ककवृचे । ঘণ্টাপারুল । स्त्री (का) । सर्षपवृचे । वै.निघ. । [नि.व.११ ।

सुतुङ्गः (ङ्गा) । पुं, स्त्री । नारिकेलवृचे । रा.

सुतूर्थ्यः । पुं । उलूके । र.मा. ।

सुतृणः । पुं । कुन्दुरतृणे । वै.निघ. । मञ्जरतृणे । ऊषरतृणे । रा.नि.व.८ ।

सुतेजनः । पुं । धन्वनवृचे । भा. ।

सुतेजाः (स) । स्त्री । आदित्यभक्तायाम् । হুড়হুড়িয়া । रा.नि.व.४ ।

सुतैला । स्त्री । महाज्योतिष्मतीलतायाम् । লতাফট্‌কী । रा.नि.व.३ ।

सुदग्धिका । स्त्री । दग्धानामवृचे । 'कहड़ी' इति कौङ्कणे ख्याता । रा.नि.व.९ । [नि.व.७ ।

सुदण्डः । पुं । वेत्रवंशे । বেউড় বাঁশ । रा.

सुदण्डिका (ण्डी) । स्त्री । गोरच्याम् । গোরক্ষচাকুলিয়া । रा.नि.व.५। ब्रह्मदण्ड्याम् । বামনহাটী । वै.निघ. ।

सुदधि । क्ली । कपित्थफले । वै.निघ. ।

सुदन्तिका । स्त्री । गवि । গাই । वै.निघ. ।

सुदमनः । पुं । आमडवृक्षे । वै.निघ ।

सुदर्भा । स्त्री । इक्षुदर्भातृणे । रा.नि.व.८ ।

सुदर्शनः । पुं । मन्त्रभेदे । रा.नि.व.४ । अर्क.चि.४र्थ शतके । मलोरा । भा. ।

सुदर्शनचूर्णम् । क्ली । विषमज्वरे औषधविशेषः । अत्र पुष्करमूलाभावे कुष्ठं, भार्ग्यभावे कण्टकारीमूलं, क्षीराह्वाभावे कण्टकारी, नगराभावे कुष्ठं, जीवकर्षभकयोरभावे विदारीकन्दस्य भागद्वयं, काकोल्यभावे अश्वगन्धामूलं, तालीशाभावे च कण्टकारीमूलं ग्राह्यम् । भा.म.१भ.ज्व.चि. । कृष्णागुरु हरिद्रा वचा देवदारु मुस्तकं हरीतकी दुरालभा कर्कटशृङ्गी कण्टकारी शुण्ठी त्रायमाणा क्षेत्रपर्पटकं निम्बत्वक् पिप्पलीमूलं बालकं शटी कुष्ठं पिप्पली मूर्वामूलं कुटजत्वक् यष्टीमधु शिग्रुबीजं नीलोत्पलम् इन्द्रयवः खोरासानीवचा (पाठान्तरे शतमूली) दारुहरिद्रा रक्तचन्दनं पद्मकाष्ठं वाट्यालकं (বেলেড়) पाठान्तरे सरलकाष्ठं) उशीरं गुडत्वक् पर्पटी शालपर्णी यमानी अतिविषा बिल्वपेशिका मरिचं तेजपत्रं (गन्धतृणं वा) आमलकी चित्रकमूलं पटोलपत्रं धान्यकं पृश्निपर्णी बृहती गुडूची कटुकी चेति द्रव्याणि । एषां द्रव्याणां चूर्णं प्रत्येकं १ तो कैरातचूर्णं सर्वचूर्णार्द्धम् । अनु. शीतलजलम् । কৃষ্ণাগুরু, হরিদ্রা, বচ, দেবদারু, মুতা, হরীতকী, দুরালভা, কাঁকড়াশৃঙ্গী, কণ্টিকারী, শুঁট, বনভাণ্ডিয়া (বলাডুমুর), ক্ষেৎপাবড়া, নিমছাল, পিপুলমূল, বালা, শটী, কুড়, পিপুল, মূর্বামূল, কুড়চিছাল, যষ্টিমধু, সাজনাছাল বা বীজ, শুন্দীমূল বা ফুল, ইন্দ্রযব, খোরাসানীবচ, দারুহরিদ্রা, রক্তচন্দন, পদ্মকাষ্ঠ, বাট্যালক বা সরলকাষ্ঠ, বেণার মূল, গুড়ত্বক্, পঙ্কপর্পটী, শালপাণি, যমানী, আতইচ, বেলশুঁঠ, মরিচ, তেজপত্র বা গন্ধতৃণ, আমলকী, চিতামূল, পটোলপত্র, ধনে, চাকুলিয়া, বৃহতী, গুলঞ্চ, কটুকী প্রত্যেকে ১ তো. চিরাতাচূর্ণ সর্ব্বচূর্ণার্দ্ধ । অনুপান শীতল জল । সা.কৌ. ।

सुदर्शना । स्त्री । स्वनामख्यातलतायाम् । উগ্রতিপুরতি, পদ্মগুলঞ্চ । भैष.ज.पि.चि.सुधावतीगुडी । च.द.बालवाङ्गेरीघृते । गुणाः—"सा दुष्णा कफशोफास्रवातजित् ।" भा. । रक्तदोषञ्च वातञ्च नाशयेत । वै.निघ. ।

सुदलः । पुं । मुचुकुन्दवृक्षे । रा.नि.व.१० । चीस्मीरटे । र.मा. । स्त्री (ला) । शालिपर्णीक्षुपे । रा.नि.व.४ । तरुणीपुष्पवृक्षे । বন শেউতী । रा.नि व.१० । [निघ. ।

सुदारु । क्ली । देवदारुकाष्ठे । सरलकाष्ठे । वै.

सुदीर्घः । पुं । चिचिण्डके । চিচিঙ্গা । भा.पू.१भ.शा.व. । [राजिका । श.च. ।

सुदीर्घघर्म्मा । स्त्री । अमनपर्ण्याम् । अप-

सुदीर्घफला । स्त्री । बृहत्कर्कटिकायाम् । বড় কাঁকুড় । वै.निघ. ।

सुदीर्घफलिका । स्त्री । दीर्घवल्लाकभेदे । শিঙ্গাবেগুণ । र.मा. ।

सुदीर्घा । स्त्री । चीनकर्कटिकायाम् । रा.नि.व.७ । [नि.व.४ ।

सुदूरमूलः । पुं । यासक्षुपे । দুরালভা । रा.

सुदृढ़त्वचा । स्त्री गाम्भारीवृक्षे । रा.नि.व.९ ।

सुदृष्टिः (कः) । पुं । गृध्रे । शकुनि । वै.निघ. । [१५ ।

सुधांशुतैलम् । क्ली । कर्पूरतैले । रा.नि.व.

सुधांशुरत्नम् । क्ली । मौक्तिके । মুক্তা । रा.नि.व.१३ ।

सुधा । स्त्री । शालपर्ण्याम् । रा.नि.व.४ । अमृते । अम. । मूर्वायां । মুর্গা । इष्टकायां । मे. । स्नुहीवृक्षे । মনসা, তেকাঁটা সিজ । रा.नि.व.८ । सु.सू.३८अ.श्यामादिः । चि.२अ. । च.द.ना.व.चि. । स्नुहीमूले । च.द.बृहदग्निघृते । गुडूच्याम् । भा.म.१भ.सन्निकज्व.चि. । "सनागरसुधान्विता ।" वैधनचारे । विषे । रा.नि.व.२३ । रसे । जले । धात्र्यां । अनेकार्थध्वनिः । हरीतक्यां । मधुनि । श.च. ।

सुधानिधिरसः । पुं । रक्तपित्ते औषधम् । पाठः—"सूतं गन्धं माक्षिकं लौहचूर्णं सर्व्वं घृष्टं त्रैफलेनोदकेन । मूषामध्ये भूधरे तत्पुटित्वा दद्याद्गुञ्जां त्रैफलेनोदकेन ॥" रात्रौ लौहपात्रपक्वं दु-

र्ध देयम्। পারা, গন্ধক, স্বর্ণমাক্ষিক, লৌহ সমভাগ ত্রিফলার জলে মাড়িয়া মূষামধ্যে ভূধরযন্ত্রে পাক করিবে। রাত্রে দুগ্ধ দিবে। रस.चि.।

सुधान्यम् । क्ली। षष्टिकधान्ये। ষেটে ধান। रा.नि.व.१६। [शब्दकल्पः।

सुधापयः । क्ली। सुहीक्षीरे। সিজুর ক্ষীর।

सुधापाणिः । पुं। धन्वन्तरौ। शब्दकल्पः।

सुधापाषाणः । पुं। शुक्लखड़िकायाम्। ফুল খড়ি। वै.निघ.। [नि.व.१४।

सुधामोदकः । पुं। यवासशर्करायाम्। सा.

सुधामोदकजः । पुं। तवराजखण्डे। मालथওবিশেষ। रा.नि.व.१४।

सुधालता । स्त्री। गरुड़वल्ल्याम्, गुड़ूचीभेदे वै.निघ.२भ.ज्व.चि.।

सुधावासः । पुं। त्रपुषफले। শশা। भा.। कर्कटिकायाम्। কাঁকুড়। वै.निघ.।

सुधाशर्करा । स्त्री। शुक्लपाषाणे। শুক্ল খড়ি। सु.सू.११अ.।

सुधाश्र(स्र)वा । स्त्री। रुदन्तीनाममहाक्षुपे। রুদন্তী। रा.नि.व.५। उपजिह्वायां। আলজিবি। त्रिका.।

सुधासूतिः । पुं। पद्मे। श.र.।

सुधाह्वयः । पुं। चूर्णके। চূণ। वै.निघ.।

सुधाक्षारः । पुं। चूर्णक्षारे। वै.निघ.।

सुधूपकः । पुं। श्रीवेष्टे। সল্লকী আটা। रा.नि.व.१२। [गन्धसारे। रा.नि.व.१२।

सुधूमः (म्यः) । पुं। अगुरुसारे। स्वादुनाम

सुधोद्भवः । पुं। धन्वन्तरौ। त्रिका.। स्त्री (वा)। हरीतक्याम्। त्रिका.। गुडूच्यां। वै.निघ.।

सुनखः । पुं। कुक्कुरे। वै.निघ.।

सुनन्दा । स्त्री। गोरोचनायाम्। मे.। अर्कपत्राम्। ঈশের মূল। र.मा.। शिशोर्मातृकाग्रहविशेषे। यो द्वितीये दिवसे मासि वर्षे वा बालं गृह्णाति। तेन बालस्य ज्वरचक्षुरुन्मीलनादिकं भवति। च.द.बालरो.चि.।

सुनन्दिनी । स्त्री। आरामशीतलायाम्। वै.निघ.।

सुनयनः । पुं। मृगे। श.च.।

सुनाकृतः । पुं। कर्पूरे। श.च.।

सुनादः । पुं। शङ्खे। শাঁখ। वै.निघ.।

सुनाभा (मा) । स्त्री। श्वेतकिणिह्यां। (मा) ब्राह्म्याम्। ব্রাহ্মীশাক। वै.निघ.।

सुनामिका । स्त्री। त्रायमाणालतायाम्। বলালতা। वै.निघ.। [कुक्कुरीस्तन्ये। मे.।

सुनारः । पुं। चटकपक्षिणि। सर्पडिम्बे।

सुनालम् । क्ली। लामज्जके। উশীরবিশেষ। रा.नि.व.१२। [श.च.।

सुनालकः । पुं। वकपुष्पवृक्षे। বক বৃক্ষ।

सुनासा (सिका) । स्त्री। काकनासालतायां। কুঁচ গাছ। रा.नि.व.३। [निघ.।

सुनिर्घोषा । स्त्री। जिङ्गिन्यां। ঝিঞ্জা। वै.

सुनिर्यासा । स्त्री। जिङ्गिनीवृक्षे। भा.।

सुनिषण्णः (कः) । पुं, क्ली। शितावरीक्षुपे, जलान्विते देशे चाङ्गेरीपत्रसदृशचतुष्पत्रशाके। শুশুনী শাক। हिं चणपत्ती, शिरीआरी। मं कं कुरड़ाहके, खड़कतिरा। तें सुनिषण्णमनेशाकमु। उत्. कुनकुनिया। रा.नि.व.४। इदं निद्राकरं, रक्तपित्ते वर्ज्यम्। भा.र.पि.चि.। गुणाः— "सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहः। अविदाही लघुः स्वादुः कषायो रुचदीपनः। वृष्यो रुच्यो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत्॥" भा.पू.१भ.शा.व.। संग्राही कषायोष्णः त्रिदोषघ्नः मेधारुचिकरः दाहज्वरहरः रसायनश्च। रा.नि.व.४। क्ली। शैवाले। र.मा.।

सुनिषण्णकच्छदा(पत्रिका) । स्त्री। चाङ्गेर्याम्। আমরুল শাক। वै.निघ.।

सुनीलः (कः) । पुं। नीलकान्तमणौ। रा.नि.व.१३। दाड़िमवृक्षे। रा.नि.व.११। नीलभृङ्गराजे। वै.निघ.।

सुनीला । स्त्री। गर्म्मोटिकातृणे। रा.नि.व.८। अतसीवृक्षे। মশিনা গাছ। रा.नि.व.१६। च-

पिकावर्णे । रा.नि.व.८ । विष्णुक्रान्तायाम् । रा.नि.व.५ ।

सुनेपाली । स्त्री । पिण्डीखर्जूरभेदे । गुणाः —"सुनेपाली श्रमभ्रान्तिदाहमूर्च्छासपित्तहृत् ।" भा. ।

सुन्दरः । पुं । तिलकपुष्पवृक्षे । रा.नि.व.१० । शोफसुन्दरके । গিমা শাক । भैष.ज्व.चि.अचिन्त्यशक्तिरसे । स्वनामख्यातवृक्षे । সুঁদরী গাছ । सुखबोधः । स्त्री (री) । हरिद्रायाम् । श.च. । प्रियङ्गौ । च.द.वा.व्या.चि. । "चम्पकसुन्दरीतक ।" काकमाच्याम् । रा.नि.व.४ । सुन्दरवृक्षे । मे. ।

सुपक्कः । पुं । सुगन्धाम्रे । श.च. ।

सुपत्रम् । क्ली । तेजपत्रे । श.च. । पुं । पल्लीवाहतृणे । रा.नि.व.८ । आदित्यपत्रक्षुपे । হুড়হুড়িয়াবিশেষ । रा.नि.व.४ । इङ्गुदीवृक्षे । रा.नि.व.८ । (कः) शिग्रुवृक्षे । সজিনা গাছ । रा.नि.व.७ ।

सुपत्रा । स्त्री । रुद्रजटालतायाम् । रा.नि.व.३ । शतावर्य्याम् । শতমূলী । शालपर्ण्याम् । रा.नि.व.४ । शमीवृक्षे । শাঁই গাছ । रा.नि.व.८ । पालक्यशाके । পালংশাক । रा.नि.व.७ ।

सुपत्रिका । स्त्री । शालपर्ण्याम् । रा.नि.व.४ । जतुकालतायाम् । रा.नि.व.३ ।

सुपत्री (त्रन्) । पुं । पक्षिणि । वै.निघ. ।

सुपथ्यः । पुं । आम्रवृक्षे । वै.निघ. । स्त्री । श्वेतचिल्लीशाके । लघुवास्तुके । रा.नि.व.७ ।

सुपद्मा । स्त्री । वचायाम् । श.च. । चि.क्र.क. गर्भ.चि. ।

सुपर्णः । पुं । नागकेशरवृक्षे । নাগেশ্বর গাছ । त्रिका. । कृतमालवृक्षे । সোন্দাল গাছ । स्वर्णचूड़पक्षिणि । मे. । स्त्री । पद्मिन्यां । श.मा. ।

सुपर्णकः । पुं । आरग्वधवृक्षे । সোন্দাল গাছ । र.मा. । सप्तपर्णवृक्षे । ছাতিম গাছ । रा.नि.व.१२ । [গাছ । प.मु. ।

सुपर्णाख्यः । पुं । नागकेशरवृक्षे । নাগেশ্বর

सुप(व)र्णिका । स्त्री । स्वर्णजीवन्त्याम् । रा.नि.व.३ । वाकुच्यां । সোমরাজ । रा.नि.व.४ । अतिबलायां । वै.निघ. । पलाशीलतायां । नागरदेशे ख्याता । रा.नि.व.३ । शालपर्ण्यां । रा.नि.व.४ । रेणुके । রেণুক । रा.नि.व.६ ।

सुपर्णी । स्त्री । पलाशीलतायां । नागरे ख्याता । रा.नि.व.३ । पद्मिन्यां । পদ্মের ঝাড় । मे. । रेणुके । रा.नि.व.६ । अपराजितायां । वै.निघ. ।

सुपर्व्वा (न्) । पुं । वंशे । धूमे । पर्व्वणि । पाव । मे. । स्त्री । श्वेतदूर्व्वायाम् । रा.नि.व.८ ।

सुपाकिनी । स्त्री । आम्रहरिद्रायाम् । वै.निघ । [रा.नि.व.६ ।

सुपाक्यम् । क्ली । विड़लवणे । বিট্‌লবণ ।

सुपार्श्वः (कः) । पुं । गर्दभाण्डवृक्षे । পলাশপিপুল । प्लक्षवृक्षे । পাকুড় গাছ । अम. ।

सुपिङ्गला । स्त्री । जीवन्तीशाके । रा.नि.व.७ । ज्योतिष्मत्याम् । লতা ফট্‌কী । रा.नि.व.३ ।

सुपीतः । पुं । पीतझिण्टीक्षुपे । পীতঝাঁটী । रा.नि.व.१० । क्ली । गर्जरमूलके । গাজর । रा.नि.व.७ ।

सुपुटः । पुं । कोलकन्दे । विष्णुकन्दे । रा.नि.व.७ । (टा) स्त्री । वनमल्लिकायाम् । वै.निघ. ।

सुपुत्रः । पुं । जीवकद्रुमे । জেঁয়ুং ষষ্ঠী । प.मु. ।

सुपुत्रिका । स्त्री । जतुकालतायाम् । रा.नि.व.३ । [रा.नि.व.५ ।

सुपुष्करा । स्त्री । स्थलपद्मिन्याम् । স্থলপদ্ম ।

सुपुष्पम् । क्ली । प्रपौण्डरीके । পুণ্ডরিয়া । रा.नि.व.१२ । लवङ्गे । श.च. । तूलकाष्ठे । रा.नि.व.९ । आहुल्यक्षुपे । रा.नि.व.४ । देवदारुणि । वै.निघ. ।

सुपुष्पः (कः) । पुं । मुचुकुन्दवृक्षे । মুচ্‌কুন্দ গাছ । शुक्लार्कवृक्षे । শ্বেত আকন্দ । राजतरुणीपुष्पवृक्षे । रा.नि.व.१० । शिरीषवृक्षे । শিরীষ গাছ । हरिद्रुमे । रा.नि.व.९ । पारिषाश्वत्थे । পলাশপিপুল । वै.निघ. । पारिभद्रवृक्षे । পালিধামান্দার । श.च. ।

सुपुष्पा । स्त्री । कोशातक्याम् । ঘোষা লতা । रा.नि.व.७ । द्रोणपुष्प्यां । ঘলঘসা । शतपुष्पा-

।र्या। शुलुफा। शतपत्र्यां। वन সেউতী वै.निघ.।

सुपुष्पिका । स्त्री । शताह्वायाम् । শুলফা । रा.नि.व.४ । पाटलावृक्षे । পারুল গাছ । रा.नि.व.१० । वृद्धदारकविशेषे । ছাগলবেঁটে । रा.नि.व.३ । कृष्णमहिषवल्ल्यां । वनशणे । वै.निघ. ।

सुपुष्पी । पुं । श्वेतापराजितायाम् । रा.नि.व. ३। मिश्रेयाख्यक्षुपे । মৌরী গাছ । शतपुष्पायां । শুলফা । रा.नि.व.४ । द्रोणपुष्प्याम् । घलघसा । रा.नि.व.५ । कदल्याम् । श.च, ।

सुपूरः (कः) । पुं । चूर्णकविशेषे । চূণবিশেষ । मातुलुङ्गवृक्षे । টাবা গাছ । हिं बीजौड़ा । रा.नि.व.११ । (कः) वकपुष्पवृक्षे । र.मा. ।

सुप्तम् । क्ली । सुषुप्तौ । हे.च. ।

सुप्तजनः । पुं । अर्द्धरात्रे । जटा. ।

सुप्तज्ञानम् । क्ली । स्वप्ने । जटा. । [मि. ।

सुप्तिः । स्त्री । निद्रायाम् । शयने । स्पर्शतायां ।

सुप्रतिभा । स्त्री । मदिरायाम् । रा.नि.व.१४।

सुप्रतिष्ठः (ष्ठितः) । पुं । उदुम्बरवृक्षे । যজ্ঞডুমুরের গাছ । रा.नि.व.११ ।

सुप्रतिष्ठा । स्त्री । मद्यसामान्ये । रा.नि.व.१४।

सुप्रतिष्ठिता । स्त्री । महाजम्बूवृक्षे । वै.निघ.।

सुप्रतीका । स्त्री । मद्ये । वै.निघ. ।

सुप्रभम् । क्ली । पद्मकाष्ठे । वै.निघ. ।

सुप्रभा । स्त्री । वाकुच्याम् । সোমরাজ । रा.नि.व.४ । [याम् । रा.नि.व.१० ।

सुप्रसन्नकः । पुं । कृष्णार्जके, वनवर्व्वरिका-

सुप्रसरा । स्त्री । प्रसारिण्याम् । গন্ধভাদুলিয়া । रा.नि,व.५ ।

सुफलः । पुं । कर्णिकारवृक्षे । সোণালু । रा.नि.व.६ । दाड़िमवृक्षे । बदरवृक्षे । কুল গাছ । रा.नि.व.११ । वदामवृक्षे । वै.निघ. । मातुलुङ्गवृक्षे । টাবা । प.मु. । मुद्गवृक्षे । रा.नि.व.१६ । कपित्थवृक्षे । কৎ বেলের গাছ । श.च. । स्त्री । इन्द्रवारुणीलतायाम् । রাখালশশা । रा.नि.व. ३ । कुष्माण्ड्याम् । কুমড়া গাছ । रा.नि.व.७ । गाम्भारीवृक्षे । रा.नि.व.९ । कदलीवृक्षे । कपिलद्राक्षायाम् । रा.नि.व.११ । महाजम्बूवृक्षे । বড় জাম গাছ । महाखर्ज्जूरवृक्षे । ছোহারা গাছ । वै.निघ. ।

सुफेनम् । क्ली । समुद्रफेने । रा.नि.व.६ ।

सुबन्धः । पुं । तिले । श.च. । अस्य मूलं स्थावरविषान्तर्गतमूलविषभेदे वर्त्तते । सु.कल्प.२अ. । See मूलविषम् । [वै.निघ. ।

सुबीजम् । क्ली । खस्खसबीजे । পোস্তদানা ।

सुभगम् । क्ली । शैलजनामगन्धद्रव्ये । শৈলজ । रा.नि.व.१२ । पुं । टङ्कणे । সোহাগা । प.मु. । गन्धके । रस.कौ.ज्वरारिरसे । चम्पकवृक्षे । रक्ताम्लाने । রক্তঝাঁটী । पीतझिण्ट्यां । পীতঝাঁটী । अशोकवृक्षे । रा.नि.व.१० ।

सुभगा । स्त्री । प्रियङ्गौ । कस्तूर्य्याम् । মৃগনাভি । रा.नि.व.१२ । नीलदूर्व्वायां । रा.नि.व. ८ । शालपर्ण्यां । रा.नि.व.४ । स्वर्णकदल्यां । চাঁপাকলা । रा.नि.व.११ । तुलसीवृक्षे । रा.नि. व.१० । हरिद्रायाम् । कैवर्त्तमुस्तके । কেওটমুতা । रा.नि.व.६ । जातीपुष्पवृक्षे । वै.निघ. । वनमल्लिकायां । श.र. ।

सुभगाह्वया । स्त्री । कैवर्त्तिकालतायाम् । सुरङ्गीलतेति मालवे ख्याता । रा.नि.व.३ । शालपर्ण्याम् । रा.नि.व.४ । हरिद्रायाम् । रा.नि.व. ६। सुवर्णकदल्याम् । চাঁপাকলা । रा.नि.व.११ । तुलसीवृक्षे । रा.नि.व.१० । नीलदूर्व्वायाम् । रा. नि.व.८ ।

सुभङ्गः । पुं । नारिकेलवृक्षे । जटा. ।

सुभ(भा)ञ्जनः । पुं । शोभाञ्जनवृक्षे । সজিনা গাছ । भा.विरूपकौ. । [म्बवृक्षे । वै.निघ. ।

सुभद्रः (कः) । पुं । बिल्ववृक्षे । श.च. । नि-

सुभद्रा । स्त्री । श्यामालतायाम् । प.मु. । गाम्भारीवृक्षे । रा.नि.व.६ । शमीवृक्षे । শাঁই গাছ । रा.नि.व.८ । घृतमण्डायां । श.च. । रक्तापराजितायां । वै.निघ. ।

सुभद्राणी (णी) । स्त्री । त्रायमाणालतायाम् । बहुला इति लोके । र.मा. ।

सुभिक्षा । स्त्री । धातकीवृक्षे । धाই ফুলের গাছ । प.मु. । [छ । हारा. ।

सुभीरः (कः) । पुं । पलाशवृक्षे । পলাশ গা-

सुभूतिकः । पुं । बिल्ववृक्षे । रा.नि.व.११ ।

सुभोजकः । पुं । गरुड़माखी । पক্ষিরাজ খাঞ্জ । रा.नि.व.१६ ।

सुमम् । क्ली । पुष्पे । श.टी.भ. । [वै.निघ. ।

सुमकरन्दः । पुं । कुन्दवृक्षे । কুঁদ গাছ ।

सुमङ्गलः । पुं क्ली । विषभेदे । प.मु. । स्त्री । मधूली । মাকড়শতাঘাস, মালকাঁকড়ী, মাকড়িয়া । र.मा. ।

सुमङ्गल्यम् । क्ली। चिड़ादेवदारुणि । वै.निघ.।

सुमञ्जरी । स्त्री। कृष्णतुलस्यां । কালতুলসী । वै.निघ. । [वै.निघ. ।

सुमतिः । स्त्री । शारिकायां । মাদি শালিক ।

सुमदनः । पुं । आम्रवृक्षे। रा.नि.व.११ ।

सुमधुरः । पुं ।जीवशाके ।रा.नि.व.७ । गोधूमे । वै.निघ. ।

सुमनः । पुं । गोधूमे । प.मु. । धुस्तूरवृक्षे । श.मा. । पूतकरञ्जे । जातीपत्राम् । जयित्री । वै.निघ. । क्ली (स्) । पुष्पे । अम. ।

सुमनःपत्रिका । स्त्री । जातीकोषे । जयित्री । रा.नि.व.१२ ।

सुमनःप्रवालः (पल्लवः) । पुं । जातीपल्लवे । জাতীফুলের শাখা । च.द. । च.मू.३ष. कुष्ठलेपे ।

सुमनःफलः । पुं । कपित्थवृक्षे । কয়েৎ গাছ । श.च. । क्ली । जातीफले । জায়ফল । रा.नि.व.१२ ।

सुमना: (स्) । पुं । पूतिकरञ्जे । নাটা । श.मा. । महाकरञ्जे । ডহর করঞ্জা । निम्बवृक्षे । रा.नि.व.६ । गोधूमे । रा.नि.व.१६ । स्त्री (नाः) । मालतीपुष्पवृक्षे । मे. । सु.मू.२६ष. । पुष्पे । मे. । जातीपुष्पवृक्षे । চামিলি । शतपत्राम् । সেউতী । रा.नि.व.१० । (ना) जातीपुष्पवृक्षे । रा.नि.व.१० । च.वि.८ष. । सु.चि. १६ष. । चि.६ष. । भा.भग.चि. । शतपत्रां । সেউতী । रा नि.व.१०। मालतीवृक्षे । र.मा. ।

सुमनोमुकुलम् । क्ली । जातीपुष्पमुकुले । জাতীফুলের কুঁড়ি । सु.मू.२६ष. ।

सुमनोरजः (स्) । क्ली । पुष्परजसि । পুষ্পপরাগ । अम. ।

सुमुखः । पुं । राजिकायाम्‌ । রাইসরিষার গাছ । गुणाः—रोचनः सुगन्धः नातिकटुकश्च । च.सू.२७ष. । वनबर्व्वर्याम् । বনবাবুই । च.वि. ८ष. । श्वेतपत्रक्षुद्रतुलस्याम् । শ্বেতপত্র ক্ষুদ্রতুলসী । कृष्णबर्व्वरे । কাল বাবুই । रा.नि.व. १० । सु.सू.३८ष.सुरसादिः । जलचरपक्षिविशेषे । ভারুণ্ড পাখী । च.सू.२७ष. ।

सुमूलः (कः) । पुं । श्वेतशिग्रौ । শ্বেত সজিনা । क्ली। गर्ज्जरमूले । গাজর । रा.नि.व.७ । स्त्री (ला) । शालपर्ण्याम् । শালপাণি । पृश्निपर्ण्याम् । চাকুলিয়া । रा.नि.व.४ ।

सुमेखलः । पुं। मुञ्जतृणे । মুঞ্জ । रा.नि.व.८ ।

सुमेधाः (स्) । स्त्री । ज्योतिष्मतीलतायाम् । লতাফট্‌কী । मे. ।

सुम्पलुण्ठः । पुं । कर्पूरे । श.च. ।

सुरः । पुं । देवदारुणि । वै.निघ.ज्व.चि. । वा. व्या.महाराजादौ ।

सुरकन्दः । पुं । कटुशूरणे । वै.निघ. ।

सुरकाष्ठम् । क्ली । देवदारुकाष्ठे । वा.चि.३ष.।

सुरक्तता । स्त्री । गुडूच्याम् । रा.नि.व.३ ।

सुरक्तकः । पुं । कोषाम्रे । रा.नि.व.११ । क्ली। सुवर्णगैरिके । रा.नि.व.१३ । रक्तचन्दने । वै. निघ. । [निदा. ।

सुरगण्डः । पुं । विद्रधिविशेषे । রাজগাঁড় ।

सुरगोपः । पुं । इन्द्रगोपकीटे । আষাড়ে পোকা । च.द.स्त्रीरो.चि. ।

सुरङ्गम् । क्ली । हिङ्गुले । रा.नि.व.१३ । पत्तङ्गचन्दने । বকমকাষ্ঠ । रा.नि.व.१२ ।

सुरङ्गः (कः) । पुं । नागरङ्गवृक्षे । নারঙ্গা নেবুর গাছ । प.मु.। रा.नि.व.११ । रक्तशिग्रौ । লাল সজিনা । प.मु. ।

सुरङ्गदम् । क्ली । पत्तङ्गचन्दने । বকমকাষ্ঠ।
रा.नि.व.१२ । [माटी । रा.नि.व.१२ ।

सुरङ्गधातुः (युक्) । पुं । गैरिके । গেরি-

सुरङ्गा । स्त्री । कैवर्त्तिकालतायां । सुरङ्गीलता इति मालवे ख्याता । वम्.शिरोंजि । रा.नि.व.३।

सुरङ्गिका । स्त्री । मूर्व्वालतायाम् । रा.नि.व.३ । उपोदिकायां । পুঁই গাছ । श्वेतकाकमाच्यां । শ্বেত গুড়কাঁউলী । वै.निघ. ।

सुरङ्गी । स्त्री । काकनासायाम् । কুঁচ গাছ। रा.नि.व.३ । काकमाच्याम् । গুড়কামাই । वै.निघ. । रक्तशोभाञ्जनवृक्षे । प.मु. । सु.सू.३९ष. शिरोविरेचने । रस.र.कर्णरो.चि. । [कश्चित् ।

सुरजम् । क्ली । लवणक्षारे । লোণার ক্ষার ।

सुरजःफलः । पुं । पनसवृक्षे । কাঁটালগাছ। शब्दकल्प. ।

सुरजितः । पुं । लघुनिदाननामग्रन्थकर्त्तरि ।

सुरञ्जनः । पुं । गुवाकवृक्षे । त्रिका. ।

सुरञ्जी । स्त्री । श्वेतकाकमाच्यां । वै.निघ. ।

सुरतम् । क्ली । मैथुने । मे. ।

सुरतरुः । पुं । विकङ्कतवृक्षे । বঁইচী গাছ । वै.निघ. । देवदारुवृक्षे । रा.नि.व.१२ ।

सुरतुङ्गः । पुं । सुरपुन्नागवृक्षे । সুরপুনাং গাছ । रा.नि.व.१० ।

सुरत्नम् । क्ली । स्वर्णे । माणिक्ये । वै.निघ. ।

सुरथकर्णिका । स्त्री । पुन्नागवृक्षे । পুনাং গাছ । वै.निघ. ।

सुरदारु । क्ली । देवदारुणि । দেবদারু । रा.नि.व.१२ । सरलदेवदारौ । वै.निघ. ।

सुरदुन्दुभी । स्त्री । तुलसीवृक्षे । रा.नि.व.१०।

सुरद्रुमः । पुं । देवदारुवृक्षे । सं.वा.व्या.चि. रसोनपाके । देवनाले । বড় নল গাছ । रा.नि.व.८ । विकङ्कतवृक्षे । বঁইচী গাছ । वै.निघ. ।

सुरधूपः । पुं । राले । ধুনো । रा.नि.व.१२ ।

सुरनालः । पुं । देवनाले । বড় নল । रा.नि.व.८ ।

सुरनिर्गन्धम् । क्ली । पत्रके । তেজপাত। रा.नि.व.६ ।

सुरपत्री (र्णम्) । स्त्री, क्ली । सुगन्धपत्रशाकविशेषे । माटीपत्री इति ख्यातम् । পানমৌরী, ফুলাশতুলসী । मं सुरपर्णि । कं मच्चिपत्रे । गुणाः—कटूष्णं क्रिमिश्वासवलासघ्नं दीपनं वातकफघ्नं वर्णकरं बालहितञ्च । रा.नि.व.१० ।

सुरपर्णिकः । पुं । सुरपुन्नागवृक्षे । रा.नि.व.१० । पुन्नागवृक्षे । वै.निघ. ।

सुरपर्णी । स्त्री । सुरपुन्नागे । रा.नि.व.१० । पलाशीलतायाम् । रा.नि.व.३ । [रिप. ।

सुरपादपः । पुं । कल्पवृक्षे । देवदारौ । भू-

सुरपुन्नागः । पुं । स्वनामख्यातवृक्षे । পুন্নাগবিশেষ । मं सुरपन्ना । कं सुरवन्नि । गुणाः—पुन्नागसमाः । रा.नि.व.१० । सप्तपर्णवृक्षे । ছাতিম গাছ । प.मु. ।

सुरपुष्पी । स्त्री । अजगन्धायाम् । রান্ধুনী । रा.नि.व.४ । [গাছ । रा.नि.व.१० ।

सुरप्रियः । पुं । अगस्तिपुष्पवृक्षे । বক ফুলের

सुरप्रिया । स्त्री । सुवर्णकदलीवृक्षे । চাঁপা কলার গাছ । रा.नि.व.११ । पीतजात्याम् । পীতপুষ্প চামিলি । वै.निघ. ।

सुरभिः । पुं । सुगन्धे । अम. । राले । ধুনো । रा.नि.व.१२ । वै.निघ.कास.चि.कुलत्थादिकषाये । गन्धशालौ । সুগন্ধ ধান্য । रा.नि.व.१६ । चम्पकवृक्षे । চাঁপা গাছ । वकुलवृक्षे । বকুল গাছ । रा.नि.व.१० । कदम्बवृक्षे । কদম গাছ । रा.नि.व.६। जातीफलवृक्षे । জায়ফলের গাছ । मे. । शमीवृक्षे । শাঁই গাছ । सुगन्धतृणे । গন্ধতৃণ । रा.नि.व.८ । कणगुग्गुलौ । रा.नि.व.१२ । गन्धफले । श.र. । वसन्तकाले । हारा. । क्ली । स्वर्णे । गन्धपाषाणे । গন্ধক । श.र. । वर्व्वरचन्दने । रा.नि.व.१२ । स्त्री । मुरानामगन्धद्रव्ये । মুরামাংসী । रा.नि.व.१२ । तुलसीवृक्षे । पाचीनामसुगन्धपत्रे । मं पाचि । कं पच्चे । সুগন্ধ পত্রবিশেষ । गङ्गापत्र्याम् । সুগন্ধ পত্র । रा.नि.व.१० । शमीवृक्षे । শাঁই গাছ । रा.नि.व.८। शल्लकीवृक्षे । यस्य निर्यासः शिलारस इत्युच्यते ।

रा.नि.व.११। च.द.खदिरवट्याम्। गवि। मि.। नवमल्लिकायां। एलवालुके। रुद्रजटायाम्। रा.नि.व.३। महामरीचपायाम्। भा.म.क्षुद्री.चि. कुङ्कुमाद्यतैले। "सर्षपाः सुरभिर्वचा।"

सुरभिका। स्त्री। स्वर्णकदल्याम्। চাঁপা কলা। रा.नि.व.११।

सुरभिकान्ता। स्त्री। वासन्तीपुष्पवृक्षे। বাসন্তীফুলের গাছ। वै.निघ.।

सुरभिगन्धम्। क्ली। पत्रे। তেজপত্র। रा.नि.व.६। स्त्री (न्धा)। जातीपुष्पवृक्षे। জাতীফুল বা চামিলি গাছ। रा.नि.व.१०।

सुरभिच्छदः। पुं। कपित्थवृक्षे। কৎবেল। वै.निघ.। [रा नि.व.२२।

सुरभित्रिफला। स्त्री। सुगन्धित्रिफलायाम्।

सुरभित्वक्। स्त्री। सूक्ष्मैलायाम्। ছোট এলাচ। रा.नि.व.६। [रा.नि.व.१२।

सुरभिदारुः (कः)। पुं। सरलदेवदारुवृक्षे।

सुरभिनिम्बुः। पुं। (Murraya konigii. Syn. Bergera konigii.) सुगन्धनिम्बुकभेदे। বরসুঙ্গা। हिं हरफरि, कटनिम्। मं. काढिनिम्बु। तें करिवेपचेट्टु। ता. करुवेम्बु। Watts.

सुरभिपत्रा। स्त्री। राजजम्बूवृक्षे। বড় জাম বা গোলাপ জাম। रा.नि.व.११।

सुरभिमञ्जरी। स्त्री। श्वेततुलस्यां। वै.निघ.।

सुरभिवल्कलम्। क्ली। गुड़त्वचि। দারুচিনি। श.र.। भैष.मु.रो.चि.बृहत्खदिरवटी।

सुरभिशाकः। पुं। सुगन्धशाकभेदे। रा.नि व.१०। [प.मु.। रा.नि.व.११।

सुरभिस्रवा। स्त्री। शल्लकीवृक्षे, शालभेदे।

सुरभी। स्त्री। शल्लकीवृक्षे। श.च.। सुगन्धे। भ.टी.भ.। शुकशिम्बायाम्। আলাকুশী। च.सू. ५अ.षड्बिन्दुतैले। तुलसीभेदे। বাবুই তুলসী। प.मु.। माचिकाशाके। পুঁদিনা শাক। रुद्रजटायां। सुगन्धशालिधान्ये। मुरायां। মুরামাংসী। एलवालुके। रास्नायां। वै.निघ.। नवमल्लिकायां। रा.नि.व.१०।

सुरभीजल(मूत्र)म्। क्ली। गोमूत्रे। গাভির মূত্র। गुणाः—"सौरभेयकमूत्रन्तु घनं सान्द्रं प्रशस्यते। तत्र हंसवहीनानां किञ्चिल्लघुतरं मतम्॥" च.नि.८अ.। भैष.शूलचि.शर्करालौहे।

सुरभीरसा। स्त्री। शल्लकीवृक्षे। भ.टी.भ.।

सुरभूरुहः। पुं। देवदारुवृक्षे। তার্পিনগাছ। भा.। [पीतचन्दने। रा.नि.व.१२।

सुरमृत्तिका। स्त्री। सौराष्ट्रमृत्तिकायां। गो-

सुरमेदसमुद्भवा। स्त्री। महामेदायां। वै.निघ.।

सुरमेदा। स्त्री। महामेदायाम्। रा.नि.व.५।

सुररक्तजः। पुं। वैक्रान्तमणौ। वै.निघ.।

सुरराजवस्तिः। पुं। इन्द्रवस्तौ। পায়ের ডিম। सु.चि.१८अ.।

सुरलता। स्त्री। महाज्योतिष्मतीलतायाम्। লতাফট্কী। रा.नि.व.३।

सुरवल्लभा। स्त्री। श्वेतदूर्व्वायां। रा.नि.व.८।

सुरवल्ली। स्त्री। तुलसीवृक्षे। रा.नि.व.१०। ज्वरकुञ्जरपारीन्द्ररसे।

सुरवारुणी। स्त्री। इन्द्रवारुणीलतायाम्। রাখালশশা। वै.निघ.।

सुरवृक्षः। पुं। देवदारुवृक्षे। वै.निघ.।

सुरशाखी (इन्)। पुं। कल्पवृक्षे। जटा.।

सुरश्रेष्ठः। पुं। श्वेतकरवीरे। वै.निघ.। स्त्री (ष्ठा)। ब्राह्मीशाके। रा.नि.व.५।

सुरसम्। क्ली। बोले। গন্ধবোল। त्वचि। গুড়ত্বক্। पत्रे। তেজপত্র। रा.नि.व.६। सुगन्धतृणे। গন্ধতৃণ। रा.नि.व.८। तुलस्याम्। मे.। पुं। कणगुग्गुलौ। रा.नि.व.१२। पर्णासे। শ্বেতপুষ্প তুলসীবিশেষ। मे.। गुणाः—"कफानिलविषश्वासकासदौर्गन्ध्यनाशनः। पित्तकृत्पार्श्वशूलघ्नः सुरसः······॥" रस.र.बाल.चि.कुमारकल्याणघृते। च.द.कास.चि.दशमूलाद्यघृते। सुगन्धभूतृणे। मोचरसे। रा.नि.व.८। सिन्धुवारवृक्षे। হেঁউর গাছ। श.र.। च.द.आम.वा.चि.।

सुरसमिध्। स्त्री। देवकाष्ठे। দেবদারু। चि.क्र.क.१स्तवकः।

सुरसम्भवा । स्त्री । आदित्यभक्तायाम् । हुड़-हुड़े । रा.नि.व.४ ।

सुरसयुगम् । क्ली । गौरकृष्णतुलसीद्वये । वा.सू.१५अ. । "सुरसयुगफणिज्झकम् ।"

सुरसर्षपः (कः) । पुं । देवशिरीषवृक्षे काँटाशिरीष । रा.नि.व.६ ।

सुरसा । स्त्री । रक्ततुलस्याम्, पर्णासभेदे । श.र. । च.द.श्ली.चि. । कृष्णपुष्पतुलस्याम् । कालतुलसी । गुणाः—कफघ्नी लघुः रुचा स्निग्धोष्णा पित्तला कटुपाकरसा च । सु.सू.३८।४६अ. । "सुरसा श्वेतसुरसा ।" सु.सू.३९अ.शिरोविरेचने । च.सू.४अ. । सू.२अ. । श्वेतयूथिकायाम् । श्वेत जुइ । नाकुलीकन्दे । सर्पगन्धा । श्वेतचित्रतायां । श्वेत तेउड़ी । ब्रह्मकीवृक्षे । वै.निघ. । निर्गुण्ड्याम् । ईश्वर । रस.चि.८अ.स्वच्छन्दभैरवरसे । रास्नायां । रा.नि.व.६ । सु.सू.३८अ. । ब्राह्मीशाके । र.मा. । प्रयोगा रसराजेन्द्ररसे । मिश्रेया-ख्यक्षुपे । मौरी । महाशतावर्य्यां । रा.नि.व.४ । बृहत्याम् । कण्टकारिकायां । पुनर्नवायां । श.च. ।

सुरसाग्रम् । क्ली । सिन्धुवारमञ्जर्य्यां । निशिन्दा मञ्जरी । च.द.विष.चि. ।

सुरसाग्रणी । स्त्री । श्वेततुलस्यां । वै.निघ. ।

सुरसादिवर्गः । पुं । सुरसयुग्म-फणिज्झका लमाला-विड़ङ्ग-खरबुषवृषपर्णी कट्फल कासमर्द्द-क्षवक-सुरसी-भार्गी-कासुका काकमाची-कुलहल-विषमुष्टिभूस्तृणभूतकेशीषु । गणोऽयं श्लेष्मभेदः-कृमिघ्नः प्रतिश्यायारुचिश्वासकासघ्नः व्रणशोधनश्च । श्वेत तुलसी, कृष्ण तुलसी, क्षुद्रपत्र तुलसी, बाबुइ तुलसी, विड़ङ्ग, बन बाबुइ, इन्दुरकाणी, कट्फल, कासमर्द्द, हैंचेता, श्वेत निर्गुण्डी, बामनहाटी, अतिमुक्तलता, कोकशिमा, घोड़ानिम्, गन्धतृण, नील निशिन्दा । वा.सू.१५अ. । अन्यः—सुरसा श्वेतसुरसाफणिज्झकार्ज्जकभूस्तृणसुगन्धकसुमुखकालमालकासमर्द्दक्षवकखरपुष्पाविड़ङ्गकट्फलसुरसीनिर्गुण्डीकुलाहलोन्दुरकर्णिकाफञ्जीप्राचीबलकाकमाची विषमुष्टिश्च । श्वेत तुलसी, कृष्ण तुलसी, गन्धपलाश, बाबुइ तुलसी, गन्धतृण, बृहत् गन्धतृण, राइसरिषा, बाबुइ, बन बाबुइ, कासमर्द्द, हैंचेता, विड़ङ्ग, कट्फल, श्वेत निशिन्दा, नील निशिन्दा, कुकशिमा, इन्दुरकाणी, बामनहाटी, केउयाठुँटी, काकमाची, घोड़ानिम । सु.सू.३८अ. ।

सुरसाष्टः । पुं । तद्वर्गभेदे] यथा—"निर्गुण्डी तुलसी ब्राह्मी बृहती कण्टकारिका । पुनर्नवेति...... ॥" श.च. ।

सुरसी । स्त्री । श्वेतनिर्गुण्ड्याम् । श्वेत निशिन्दा । कपित्थपत्रसदृशपत्रा विल्लनाम्नीति लोके । सु.सू.३८अ.सुरसादिः ।

सुरसुन्दरीगुड़िका । स्त्री । रसायनाधिकारे औषधम् । पाठः—"अभ्रकं माक्षिकं वज्रं कान्तं हेम समं समम् । सर्व्वाणि समभागानि सूतयुक्तानि कारयेत् । गोलकञ्च ततः कृत्वा पक्वं निचुलवारिणा । ततस्तं पुटपाकेन लभयित्वा प्रयत्नतः । वाह्ये चास्यापि लिप्त्वा च वल्लोत्या गुञ्जिकोत्तमा । लभयेच्छस्त्रसङ्घातं विषरोगांश्च नाशयेत् ।...... ॥" रस.र. ।

सुरा । स्त्री । चषके । मे. । मद्यसामान्ये । रा.नि.व.१४ । परिपक्वान्नसन्धानजातसुरायां । यथा—"परिपक्वान्नसन्धानसमुद्भूता सुरा मता ।" तोड़. । सा पिष्टकिण्वकल्केन किञ्चित्कलुषा लोहितवर्णा बुद्धिलोपकरत्वात् मदकारिणी च । गुणाः—"कषाया मधुरा चाम्ला सुरा सन्दीपनी मता । कासार्शोग्रहणीस्तन्यमूत्ररोगविनाशिनी ॥" अत्रि.१९अ. । सामान्यतः—"कासार्शोग्रहणीदोषमूत्राघातानिलापहा । स्तन्यरक्तक्षयहिता सुरा ग्रहणदीपनी ॥" सु.सू.४६अ. । सुराविशेषगुणाः—"कृशानां रक्तमूत्राणां ग्रहण्यर्शोविकारिणां । सुरा प्रशस्ता वातघ्नी स्तन्यरक्तक्षयेषु च ॥" श्वेतसुरागुणाः—"कासार्शोग्रहणीदोषप्रतिश्यायविनाशिनी । श्वेतमूत्रकरा स्तन्यरक्तमांसकरी सुरा । छर्दरोचकहृत्कुक्षितोदशूलप्रमर्द्दिनी ॥" राज.२प. ।

सुराकरः । पुं । नारिकेलवृक्षे । शब्दकल्पः ।

सुराकिट्टम् । क्ली । सुराबीजे । मदेर गेंता । भा.म.४भ. ।

सुरागा । स्त्री । मनःशिलायां । मनछाल । वै. [निघ. ।

सुराजः । पुं । गोधूमे । गम । वै.निघ. ।

सुराजकः । पुं । भृङ्गराजे । ভীমরাজ । श.मा. । [र. ।

सुरापानम् । क्ली । मद्यपाने । श्चवर्द्ध्वंशे । श.

सुराभाग: (मण्ड:) । पुं । सुराया श्चवभागे । মদের মেতা । श.च. । श्चम । भैष.शूल.चि. ।

सुरामेहः । पुं । प्रमेहविशेषे, यत्र रोगी सुरासदृशं मेहति । सु.नि.६श्च. ।

सुरार्हम् । क्ली । हरिचन्दने । रा.नि.व.१२ । कुङ्कुमागुरुचन्दने । वै.निघ. । स्वर्णे । शब्दकल्प: ।

सुरार्हः (कः) । पुं । बर्बरके । কাল বাবুই । रा.नि.व.१० । वैजयन्तीतुलस्यां । वै.निघ. ।

सुराल: । पुं । श्वेतसर्जरसे । ভাল ধূনো । वा.सू.१५श्च.विरेचने । [মনসা । वै.निघ. ।

सुरालिका । स्त्री । सातलायां । তেকাঁটা

सुरावीजम् । क्ली । सुराकिण्वे पक्वसारमेदके । মদের মেতা । शार्ङ्ग. । "सुरावीजञ्च किण्वकम् ।" बीजाम्लमिति । जगलसूरा ।

सुराष्ट्रजम् । क्ली । सौराष्ट्रमृत्तिकायां । भा. । पुं । कृष्णमुद्गे । কালমুগ । रा.नि.व.१६ । प.मु. । स्त्री । सौराष्ट्रमृत्तिकायां । पञ्चपर्पटी । रा.नि.व.१३ । सु.सू.३६श्च. । सु.चि.१७श्च. । च.द.यक्ष्मचि.एलादिमन्थे । चि.क्र.क.१म.स्तवके । रक्तकुलत्थ । লালকুরতি কলাই । गोपीचन्दने । তিলকমাটী । वै.निघ. ।

सुरासव: । पुं । श्चासवविशेषे । गुणा:—"तीक्ष्ण: सुरासवो हृद्यो मूत्रल: कफवातनुत् । मुखप्रिय: स्थिरमदो विज्ञेयोऽनिलनाशन: ॥" सु.सू.४५श्च. । "सुरासवस्तीव्रमदो वातघ्नो वदनप्रिय: ।" च.सू.२७श्च. ।

सुराह्व: (य:) । पुं । देवदारुवृक्षे । र.मा. । भा.म.१भ.सन्निकज्व.चि. । "सुराह्वघननागरा: ।" च.सू.३श्च.प्रदेहे । च.द.व्र.शो.चि. । मरुवकवृक्षे । गन्धतुलसी । रा.नि.व.१० । हरिद्रुवृक्षे । रा.नि.व.८ । [श.मा. ।

सुरुङ्ग: । पुं । शोभाञ्जनवृक्षे । সজিনা গাছ ।

सुरुद्रिः । स्त्री । भारतवर्षीयनदीविशेषे । तज्जलगुणा:—शीतलं स्वादु लघु सर्व्वरोगघ्नं निर्म्मलं दीपनं पाचनं बलबुद्धिमेधायुष्करञ्च । पिपासादिसुजलगुणा श्चपि एवं । रा.नि.व.१४ ।

सुरूपम् । क्ली । तूलकाष्ठे । पुं । पारिशाश्वत्थे । পলাশপিপুল । रा.नि.व.८ । स्त्री (पा) । शालपर्ण्याम् । रा.नि.व.४ । भार्ग्याम् । বামনহাটী । रा.नि.व.६ । वनमल्लिकायां । কাঠমল্লিকা । वार्षिकोमल्लिकायाम् । বেল ফুল । रा.नि.व.१० । See वार्षिका ।

सुरुहक: । पुं । गर्द्दभाश्वे । हे.च. ।

सुरेज्या (ष्टा) स्त्री । तुलसीवृक्षे । रा.नि.व.१० । (ष्टा) ब्राह्मीशाकक्षुपे । रा.नि.व.५ ।

सुरेन्द्र: (क:, कन्द:) । पुं । कटुशूरणविशेषे । বাগা ওল । वै.निघ. ।

सुरेन्द्रगोप: । पुं । इन्द्रगोपकीटे । আষাঢ়ে পোকা । मा.नि.सद्योव्रणे ।

सुरेन्द्र(श्र)लुप्तम् । क्ली । शिर:कीटभेदे । টাকপোকা । च.द.भग.चि. । च.सू.३श्च. ।

सुरेन्द्रा । स्त्री । कुलेन्द्रवारुण्यां । । वै.निघ. ।

सुरेभम् । क्ली । वङ्गे । রাং । त्रिका. ।

सुरेवट: । पुं । (Areca grasilis or triandra.) पूगवृक्षविशेषे, रामपूगे । त्रिका. ।

सुरेश्वरी । स्त्री । निर्गुण्ड्याम् । নিশিন্দা । च.द.स्त्री.चि. ।

सुरेष्ट: (क:) । पुं । श्वेतरक्तवकवृक्षे । সাদা লাল বক বৃক্ষ । रा.नि.व.५ । सुरपुन्नागवृक्षे । रा.नि.व.१० । सर्जवृक्षे । শালগাছ । रा.नि.व.८ ।

सुरोत्तर: । पुं । चन्दनवृक्षे । श.र. ।

सुरोद्भवम् । क्ली । पद्मकाष्ठे । वै.निघ. ।

सुरोहिषम् । क्ली । सुगन्धरोहिषतृणे । বড় গন্ধতৃণ । वै.निघ. ।

सुलङ्घनम् । क्ली । सुष्ठुलङ्घने । সু উপোষ । लक्षणं—"सृष्टमारुतविण्मूत्रं क्षुत्पिपासासहं लघु । प्रसन्नात्मेन्द्रियं क्षामं नरं विद्यात् सुलङ्घितम् ॥" सु. ।

सुलभा । स्त्री । माषपर्णीलतायाम् । মাষাণী । रा.नि.व.३ । धूम्रपत्रायाम् । गंधानीति महाराष्ट्रे ।

रा.नि.व.५ । तुलसीवृचे । वै.निघ. । वार्षिकीमल्लिकायाम् । বেল ফুল । रा.नि.व.१० ।

सुलेमानी । स्त्री । खनामख्याते पिण्डीखर्जूरभेदे । गुणाः—श्रमभ्रान्तिदाहमूर्च्छारक्तपित्तहृत् । भा. । [मना । वै.निघ. ।

सुलोकिनी । स्त्री । भूम्यामलक्यां । ভূঁই আ-

सुलोचनः । पुं । सुरङ्गमृगे । হরিণ । रा.नि.व.१९ । चकोरे । वै.निघ. ।

सुलोमनी । स्त्री । जटामांस्यां । वै निघ. ।

सुलोमशा । स्त्री । काकजङ्घायाम् । रा.नि.व.४ । जटामांस्यां । वै.निघ. ।

सुलोमा (म्या) । स्त्री । मांसरोहिणीभेदे । रा.नि.व.१२ । वै.निघ. । ताम्रवल्लीलतायाम् । मालवे प्रसिद्धा । रा.नि.व.३ ।

सुलोमी । स्त्री । आखुकर्णीलतायां । ইন্দুরকাণী । वै.निघ. ।

सुलोहकम् । क्ली । पित्तले । है.च. ।

सुवंशः । पुं । श्वेतेक्षौ । শাদা আখ । रा.नि.व.१४ । [বন বাবুই । रा.नि.व.१० ।

सुवक्तः (क्ता) । पुं, स्त्री । वनवर्वरिकायाम् ।

सुवदनः । पुं । वर्वरके । বন বাবুই । रा.नि.व.१० । [स्त्रियि । रा.नि.व.१८ ।

सुवयाः (स्) । स्त्री । हृष्टार्त्तवायां मध्यमायां

सुवर्चकः । पुं । सर्ज्जिकाचारे । সাজিমাটী । जटा. ।

सुवर्चलम् (ला) । क्ली, स्त्री । सौवर्चललवणे । সচল লবণ । वै.निघ.२भ.अर्शचि.चन्द्रप्रभायां । (ला) आदित्यभक्तायाम् । হুড়হুড়িয়া । रा.नि.व.४ । सु.शा.१०अ. । "सुवर्चलां विशल्यां वा ।" चि.२अ. । भा.म.४भ.गर्भचि. । ब्राह्मीनामक्षुपे । ব্রাহ্মী শাক । रा.नि.व.५ । वै.निघ.अ.सा.चि.शुण्ठ्यादौ । अतसीवृचे । আতসী ফুলের গাছ । र.मा. ।

सुवर्चिः (कः) । पुं । सर्ज्जिचारे । সাজিমাটী । रा.नि.व.६ । स्त्री (का) । सर्ज्जिकाचारे । সাজিমাটী । र.मा. । सौवर्चललवणे । च.सू.२अ. । च.द.वि.ज्व.चि.षट्कतैले । "सुवर्चिकानागरकुष्ठमूर्व्वा ।" अनुकालतायां । मालवे प्रसिद्धा । रा.नि.क.३ ।

सुवर्चा । स्त्री । सर्जिकाचारे । रा.नि.व.६ ।

सुवर्णम् । क्ली । हरिचन्दने । मे. । नागकेसरपुष्पे । रा.नि.व.६ । वै.निघ.२भ.उन्मा.चि.ब्राह्म्यादिकल्के । स्वर्णधातौ । সোণা । कम. । कर्षे । २०तो. । प.प्र.१ख. । १६ सुवर्णमाषके । ८० र. । सु.वि.३१अ. । हरिद्रायां । गौरसर्षपशाके । उशीरे । स्वर्णगैरिके । र.मा. । पुं । सुरपुन्नागवृचे । कणगुग्गुलौ । रा.नि.व.१२ । पीतधुत्तूरवृचे । वै.निघ. ।

सुवर्णकम् । क्ली । राजपित्तले । সোণা পিতল । है.च. । कर्षपरिमाणे । प.प्र.१ख. । पुं । आरग्वधवृचे । সোন্দাল গাছ । र.मा. ।

सुवर्णकदली । स्त्री । कदलीविशेषे । চাঁপাকলা । उत्. पाटीया । सोने केलीति कोङ्कणे । गुणाः—मधुरा हिमा स्वल्पभचणे दीपनी तृष्णाघ्नी दाहघ्नी कफकारी च गुरुश्च । रा.नि.व.११ । अग्निवर्द्धनीति द्रष्टफलम् ।

सुवर्णकमलम् । क्ली । रक्तपद्मे । লাল পদ্ম । गुणाः—"सुवर्णकमलं शीतं मधुरं वर्णकारकम् । कफपित्ततृषादाहरक्तदोषविसर्पकान् । विषविस्फोटकादींश्च नाशयेदिति कीर्त्तितम् ॥" वै.निघ. ।

सुवर्णकेतकी । स्त्री । स्वर्णकेतक्याम् । রক্ত কেতকী । वै.निघ ।

सुवर्णगैरिकम् । क्ली । अत्यन्तलोहितवर्णगैरिके । লাল গেরিমাটী, বর্ণকমাটী । हिं पीतगेरु । रा.नि.व.१३ । "सुवर्णगैरिकस्यापि चूर्णानि मधुना सह । लीढ्वा सुखमवाप्नोति चिप्रं हिक्कार्दितः शिशुः ॥" रस.र.बाल.चि । च द.बाल.चि. । गुणाः—मधुरं शीतं कषायं व्रणरोपणं विस्फोटार्शोऽग्निदाहघ्नञ्च । रा.नि.व.१३ ।

सुवर्णघ्नम् । क्ली । वङ्गधातौ । রাং । वै.निघ. ।

सुवर्णजातिः । स्त्री । भूमिजलौहसङ्करजरसवेधजसहजक्रतिखनिसम्भवजवह्निजरसेन्द्रजतदेषजेषु । वै निघ. ।

सुवर्णतिलका । स्त्री । ज्योतिष्मतीलतायां । লতাফট্কী । वै.निघ. ।

सुवर्णदुग्धी । स्त्री । स्वर्णक्षीरिणीनामक्षुपे । সোণাখিরুই । रा.नि.व.५ ।
सुवर्णनकुली । स्त्री । महाज्योतिष्मतीलतायाम् । বড় লতাফট্কী । रा.नि.व.३ ।
सुवर्णपुष्पः । पुं । राजतरुणीपुष्पवृक्षे । रा.नि.व.१० ।
सुवर्णप्रसवम् । क्ली । एलवालुके । वै.निघ. ।
सुवर्णभापकः । पुं । मध्यमद्वादशधान्यमाने । सु.चि.११अ. । [नि.व.१३ ।
सुवर्णमाक्षिकम् । क्ली । स्वर्णमाक्षिके । रा.
सुवर्णमित्रम् । क्ली । टङ्कणक्षारे । সোহাগা। वै निघ. । [কলার গাছ । वै.निघ. ।
सुवर्णमोचा । स्त्री । सुवर्णकदल्याम् । চাঁপা-
सुवर्णयूथिका (थी) । स्त्री । स्वर्णयूथिकायाम् । পীত যূঁই, স্বর্ণযূঁই । गुणाः—स्वादुः शीतला शर्करा—पित्तदाहतृषाघ्नी नानालग्दोषघ्नी च । रा.नि.व.१० ।
सुवर्णरम्भा । स्त्री । सुवर्णकदलीवृक्षे । চাঁপা-কলার গাছ । रा.नि.व.११ ।
सुवर्णवर्णा (र्णी) । स्त्री । हरिद्रायाम् । श.च. । कपर्दकभेदे । रा.नि.व.१३ । (र्णी) जीवन्त्याम् । प.मु. ।
सुवर्णसंज्ञम् । क्ली । सुवर्णकर्षे । (लीलावती)।
सुवर्णसिन्दूरम् । क्ली । See स्वर्णसिन्दूरं । र.सा.सं. ।
सुवर्णक्षीरिणी (री) । स्त्री । स्वर्णक्षीर्याम् । वनलाशहस्रपत्रा हिमावलीति लोके । সোণাখিরুই । मं पिसौरामेद्, चिक्कणिकेशभेद् । रा.नि.व.५ । कटुके । सु.सू.३८अ.श्यामादिवर्गः, ३९अ. अधःसं. । वृक्षविशेषे । শেয়ালকাঁটা । यस्य क्षीरं सुवर्णवर्णं चक्षुष्यं द्रष्टव्य । कश्चित् ।
सुवर्णा (र्णी) । स्त्री । हरिद्रायाम् । रा.नि.व.६ । कणगुग्गुली । इन्द्रवारुण्यां । রাখালশশা । रा.नि.व.२३ । कृष्णागुरुणि । কাল অগুরু । मे. । वाह्यालके । বেলেড়া । श.च. । सुवर्णक्षीर्यां । শেয়ালকাঁটা । रा.नि.व.५ । (र्णी) आखुकर्ण्याम् । ইন্দুরকাণী । रा.नि.व.३ ।

सुवर्णाख्यः । पुं । नागकेशरवृक्षे । र.मा. ।
सुवर्णाभः । पुं । राजावर्त्तमणौ । वै.निघ. ।
सुवर्णारः । पुं । काञ्चनारवृक्षे । রক্ত কাঞ্চন গাছ । रा.नि.व.१० ।
सुवर्णाह्वा । स्त्री । स्वर्णयूथिकायां । वै.निघ. ।
सुवर्णिका । स्त्री स्वर्णजीवन्त्याम् । रा.नि.व.३ । [निघ. ।
सुवर्त्तुलम् । क्ली । तरम्बुजे । তরমুজ । वै.
सुवर्षा । स्त्री । मल्लिकापुष्पवृक्षे । वै.निघ. ।
सुवल्लिः (ल्ली) । स्त्री । सोमराज्याम् । সোমরাজ । श.टी.भ. । रा.नि.व.४ । पुत्रदात्रीलतायां । कटुकवल्ल्याम् । কট্কী । रा.नि.व.३ ।
सुवल्लिका स्त्री । जन्तुकालतायाम् । मालवे ख्याता । रा.नि.व.३ । सोमराज्याम् । रा.नि.व.४ ।
सुवल्लिजः । पुं । प्रवाले । পলা । वै.निघ. ।
सुवसन्ता । स्त्री । माधवीलतायाम् । মাধবী লতা । श्वेतजात्याम् । শুক্ল জাতী । वै.निघ. ।
सुवहा । स्त्री । शेफालिकावृक्षे । শিউলী গাছ । प.मु. । रा.नि.व.४ । हंसपादीलतायाम् । গোহালিয়া লতা । रा.नि.व.५ । सु.चि.२अ. । सल्लकीवृक्षे । শালভেদ । रा.नि.व.११ । जीरके । वै.निघ. । गन्धनाकुल्याम् । রাস্নাবিশেষ । रा.नि.व.७ । सु.चि.१७अ. । रुद्रजटायां । रा.नि.व.३ । तालमूल्याम् । रा.नि.व.७ । एलापर्ण्यां । मे. । नीलसिन्धुवारे । নীলনিশিন্দা । रा.नि.व.४ । त्रिवृतायाम् । তেউড়ী । प.मु. । च.सू.४अ. । गन्धरास्नायाम् । भा.म.१भ.सन्धिकज्व.चि. । "सुवहा गुरुगन्धता: ।" रास्नायाम् । अम. । च.सू.४अ. । वि.७अ. । [म्बे ।
सुवासः । पुं । कदम्बवृक्षे । वै.निघ. । सुसुग-
सुवासरा । स्त्री । चन्द्रशूरे । তোকমারী । भा. । [चिरण्ट्यां । अम. ।
सुवासिनी । स्त्री । पितृभवनस्थायां नार्य्यां,
सुविदः । पुं । तिलकवृक्षे । वै.निघ. । [८ ।
सुविष्टरा । स्त्री । गुच्छासिनीवृक्षे । रा.नि.व.
सुवीजः । पुं । बदरवृक्षे । কুল গাছ । स्वस्त-

षि। বেণা। रा.नि.व.११। क्लौ। सुन्दरवीजे।

स्थलपद्मिनी (द्मी) । स्त्री । स्थलपद्मवृक्षे । স্থলপদ্ম । गुणाः—गौल्या तिक्ता शीता रक्तपित्तवान्तिमेहभूतातीसारघ्नी च । रा.नि.व.५ ।

स्थलपिण्डा । स्त्री । पिण्डीखर्ज्जूरिकायाम् । वै.निघ. ।

स्थलपुष्पा । स्त्री । भेण्डकक्षुपे । रा.नि.व.५ ।

स्थ(स्थू)लभण्टा (की) । स्त्री । वृहतिकायां । বিরুতি । वै.निघ. । मद. ।

स्थ(स्थू)लमञ्जरी । स्त्री । अपामार्गे । र.मा. ।

स्थलमर्कटः । पुं । करमर्द्दकवृक्षे । वै.निघ. ।

स्थ(स्थू)लरुहा । स्त्री । स्थलपद्मिन्याम् । रा. नि.व.५ । वै.निघ. ।

स्थलशृङ्गाटः (कः) । पुं। क्षुद्रगोक्षुरे। छोट गोखरी । रा.नि.व.४ । गोक्षुरे । र.मा. ।

स्थला (ली) । स्त्री । जलशून्याकृत्रिमभूमौ । अ.टी.भ ।

स्थलेरुहा । स्त्री। महत्कुमार्य्यां । घृतकुमारी। रा.नि.व.५ । दग्धावृक्षे । कुरुहीति कोङ्कणे ख्याता । रा.नि.व.६ । सितपाटलावृक्षे । श्वेत पारुल । रा.नि.व.१० ।

स्थलेशयः । पुं। क्रोड़वराहशल्लकादौ। तन्मांसं सर्व्वगुणकरम् । रा.नि.व.१७ ।

स्थविका । स्त्री । मक्षिकाभेदे । सु.कल्प.८अ. ।

स्थविरम् । क्ली । शैलेये । शैलज । रा.नि.व.१२ । वा.चि.३अ. । पुं । ब्रह्मे । रा.नि.व.१८ । कदम्बवृक्षे । वै.निघ.। वृद्धदारके । वीजताड़क । "मूलं स्थविरस्य शिंशपा चैभिः ।" भा.म.४भ.क्षुद्ररी.न्यक्कव्यङ्गचि. । स्त्री (रा) । महाश्रावणिकायाम् । रा.नि.व.५ । वृद्धायाम् । रा.नि.व.१८ ।

स्थविरदारु । क्ली । वृद्धदारुणि । वीजताड़क । "स्थविरदारुरास्नाः समाः ।" भा.म.१भ.सन्धिकज्व.चि. ।

स्थाणुः । पुं । जीवके । शब्दकल्प. ।

स्थाणुकर्णी । स्त्री । महेन्द्रवारुणीलतायाम् । बड़ माकाल । रा.नि.व.३ ।

स्थाणुरोगः । पुं । अश्वस्य पादरोगविशेषे । लक्षणं – "प्रावृट्काले व्रणो यस्य जङ्घायामुपजायते । स्थाणुरोगः स विज्ञेयः दुष्टशोणितसम्भवः ॥" ज.द.३९अ. । [शब्दकल्प: ।

स्थानकम् । क्ली । आलवाले । हे.च. फेणे ।

स्थानचञ्चला । स्त्री । वर्व्वरीवृक्षे । श.च. ।

स्थानमृगः । पुं । कर्कटे । मत्स्ये । कच्छपे । मकरे । वै.निघ. ।

स्थापना । स्त्री । समर्थनायां । "प्रतिज्ञाया एव हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापनायाम् । पूर्व्वं हि प्रतिज्ञा पश्चात् स्थापना ॥" च.वि.८अ. ।

स्थाप(यि)नी । स्त्री । पाठायाम् । आकनादि । रा.नि.व.६ ।

स्थालम् । क्ली । सुवर्णादिपात्रे । थाल । अम.।

स्थालिका । स्त्री । मक्षिकाविशेषे । सु.कल्प.८अ. । [तानि त्रिसप्ततिसंख्यकानि । च.शा. ।

स्थालिकास्थि । क्ली । अर्व्वुदाकारास्थनि ।

स्थालिद्रुमः । पुं । नन्दीवृक्षे । तूणगाछ । वै.निघ. ।

स्थालिपर्णी । स्त्री । शालपर्ण्याम् । वै.निघ.।

स्थाली । स्त्री । सङ्कीर्णमुखपात्रविशेषे । थालि । हण्डिकायाम् । अम. । रक्तपाटलवृक्षे । रक्त पारुलगाछ । मे. । [शब्दकल्प: ।

स्थालीपक्वम् । क्ली । स्थालीपाचितान्नादौ ।

स्थालीपाकः । पुं । भानुपाकानन्तरं लौहस्य स्थाल्यां पाकविधौ । लौहद्विगुणत्रिफलया षोड़शगुणेनाष्टावशेषक्वाथं कृत्वा लौहमालोड्य स्थालीमध्ये रसशोषणपर्य्यन्तं पचेत् । तथा हस्तिकर्णपलाशशतावरीभृङ्गराजकेशराजानाम् एकस्य वा स्वरसेन, अभावे लौहसमानां त्रिफलामष्टगुणतोये निःक्वाथ्य पादशेषक्वाथेन स्थालीपाकं कुर्य्यात् । त्रिफलायाः पुनः स्वरसलाभेऽपि स्वरसो न ग्राह्य इति ज्ञेयम् । र.सा.सं. ।

स्थालीवृक्षः । पुं । अश्वत्थविशेषे । गयां अश्वथ । हिं वेलियापीपर । गुणाः—स्वादुः कटुः तिक्तः तुवर उष्णः कटुपाकरसः ग्राही विषपित्तकफास्रघ्नः । भा. । [वै.निघ. ।

स्थावरः । त्रि । स्थितिशीले । पुं । नन्दीवृक्षे ।

स्थावरविषम् । क्ली । कन्दमूलखनिजादिविषेषु । तेषु नागीयशृङ्गी नाम विषभेदो श्रेष्ठो । "नागी देहकरे श्रेष्ठः लौहे चैवीयशृङ्गकः ।" रा.नि.व.६ । दार्व्विकवत्सनाभसैकतशक्तुकसुस्तकसार्षपकौर्म्मशृङ्गीकालकूटदर्दुरहालाहलयमदंष्ट्रमेषशृङ्गीहारिद्रकर्कटरक्तशृङ्गीयन्थिककेशराणीति । र.सा.सं. । "विषन्तु गरलः क्ष्वेड़स्तस्य भेदानुदाहरे । वत्सनाभः सहारिद्रः शक्तुकश्च प्रदीपनः । सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च । हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव ॥" भा.पू.१भ. । एतदर्कगुणाः—"लेपेन गलगण्डाद्या वातरोगाः प्रयान्ति च ।" अर्क.चि. । अन्यच्च स्थावरविषाणि समासेन पञ्चपञ्चाशत् । तानि च मूलपत्रफलनिर्य्यासक्षीरधातुकन्दाश्रयत्वाद्दशभेदानि । तत्र मूल-

विषाणि अष्ट, पत्रविषाणि पञ्च, फलविषाणि द्वादश, पुष्पविषाणि पञ्च, त्वक्सारनिर्यासविषाणि सप्त, क्षीरविषाणि त्रीणि, धातुविषे द्वे, कन्दविषाणि च त्रयोदशेति पञ्चपञ्चाशत्। गुर्वादि स्वस्वपर्य्याये द्रष्टव्यम्। सु.कल्प.१अ। [६।

स्थावरादि:। क्ली। वत्सनाभविषे। रा.नि.व.

स्थिक:। पुं। कटिग्रीथि, स्फिचायाम्। फिँक्। श.र.।

स्थिति:। स्त्री। आयुर्वेदनिश्चये। च.द.।

स्थिर:। पुं। धववृक्षे। धाओगा गाछ। भा.। वृक्षसामान्ये। चिका.। त्रि। कठिने। धरणि:।

स्थिरक:। पुं। शाकवृक्षे। शेगुन गाछ। वै.निघ.।

स्थिरकुसुम:। पुं। वकुलवृक्षे। रा.नि.व.१०।

स्थिरगन्ध:। पुं। स्वर्णचम्पकवृक्षे। रा.नि.व.१०। स्त्री (न्धा)। पाटलवृक्षे। श्वेतकेतकीवृक्षे। रा.नि.व.१०। [भा.।

स्थिरच्छद: (दा)। पुं, स्त्री। भूर्जवृक्षे। र.

स्थिरच्छाय:। पुं। वटादौ छायातरौ। चिका.।

स्थिरजिह्व:। पुं। मत्स्ये। वै.च.। [श.मा.।

स्थिरजीविका (ता)। स्त्री। शाल्मलीवृक्षे।

स्थिरदंष्ट्र:। पुं। सर्पे। मे.।

स्थिरपत्र:। पुं। हिन्तालवृक्षे। हेँतालगाछ। रा.नि.व.९। महाताले। वै.निघ.।

स्थिरपुष्प:। पुं। चम्पकवृक्षे। वकुलवृक्षे। तिलकपुष्पवृक्षे। रा.नि.व.१०।

स्थिरपुष्पी (इन्)। पुं। तिलकपुष्पवृक्षे। रा.नि.व.१०। [गाछ। वै.निघ.।

स्थिरफला। स्त्री। कुष्माण्डीलतायां। कुमड़ा

स्थिरमुद्गा। स्त्री। रक्तकुलत्थे। वै.निघ.।

स्थिरयोनि:। पुं। छायावृक्षे। शब्दकल्प:।

स्थिररङ्गा। स्त्री। नील्याम्। नील गाछ। रा.नि.व.४। [व.६।

स्थिररागा। स्त्री। दारुहरिद्रायाम्। रा.नि.

स्थिराङ्ग:। पुं। माषपर्ण्यां। माषाणी। वै.निघ.। [ल। वै.निघ.।

स्थिरशाल्मली। स्त्री। शाल्मलीवृक्षे। शिमू-

स्थिरसाधनक:। पुं। सिन्दुवारवृक्षे। निशिन्दा गाछ। रा.नि.व.४। [रा.नि.व.९।

स्थिरसार:। पुं। शाकवृक्षे। शेगुन गाछ।

स्थिरा। स्त्री। शालपर्ण्याम्। शालपाणि। रा.नि.व.४।२३। "सारिवातिविषे स्थिरा।" च.द.ज्व.चि.पिप्पल्याद्यघृते। च.सू.४अ.बल्यगणे, वय:-स्थापने च। काकोल्याम्। काँकला। "बृहती कलशी स्थिरा।" भा.। शाल्मलीवृक्षे। शिमुल गाछ। श.च.। वनमुद्गे, माषपर्ण्यां। माषाणी। आखुकर्णीलतायां। मुषाणीलता। वै.निघ.।

स्थिराङ्घ्रि: (प:)। पुं। तालवृक्षे। हिन्तालवृक्षे। वै.निघ.। रा.नि.व.९। [वामसूले।

स्थिरादि:। पुं। स्वल्पपञ्चमूल्यां। च.द.परि-

स्थिराद्वयम्। क्ली। शालपर्णीपृश्निपर्ण्यौ:। शालपाणि ओ चाकुलिया। "स्थिरे द्वे।" वा.सू.१५अ.पद्मकादौ। [अम.।

स्थिरायु:। पुं। शाल्मलिवृक्षे। शिमूल गाछ।

स्थूर:। पुं। वृषे। उणा.। मनुष्ये। व्याक.।

स्थूल:। पुं। पनसवृक्षे। काँठाल गाछ। रा.नि.व.११। तूदवृक्षे। तुँत गाछ। भा.। प्रियङ्गुनामतृणधान्ये। रा.नि.व.१६। इक्षौ। वै.निघ.। त्रि। पीने। अम.।

स्थूलक:। पुं। तृणविशेषे। उलू। र.मा.।

स्थूलकङ्गु:। पुं। ककधान्ये। कामिनीधान्य। रा.नि.व.१६। प.मु.। See प्रियङ्गुक:, कङ्गुश।

स्थूलकणा। स्त्री। स्थूलजीरके। रा.नि.व.६।

स्थूलकण्टक:। पुं। जालवर्वूरके। रा.नि.व.८। [च.।

स्थूलकण्टकिका। स्त्री। शाल्मलिवृक्षे। श.

स्थूलकण्टफल:। पुं। पनसवृक्षे। वै.निघ.।

स्थूलकण्टा (ली) (ण्टी)। स्त्री। वृहत्यां। रा.नि.व.४।

स्थूलकन्द: (क:)। पुं। रक्तलशुने। लाल

रशुन। रा.नि.व.७। शूरणे = वनशूरणे। वै.निघ.। हस्तिकन्दे। माणकन्दे। मान कचु। मुखालो। थाम आलू। रा.नि.व.७ २१।

स्थूलका। स्त्री। आम्रहरिद्रायां। वै.निघ.।

स्थूलकुमुदः। पुं। श्वेतकरवीरे। वै निघ.।

स्थूलग्रन्थिः। स्त्री। महाभरीवचायाम्। म हाभरी वच। वै.निघ.। [शाक। रा.नि.व.४।

स्थूलचञ्चुः। पुं। महाचञ्चुचुपे। চেঁচ্কা

स्थूलचम्पकः। पुं। श्वेतचम्पके। वै.निघ.।

स्थूलजीरकः। पुं। जीरकभेदे। মোটা কা-ল জীরা। हिं मगरेला। वै.निघ.२भ.ग्रहणी.चि. जातीफलाद्यचूर्णे। गुणाः—कटुः तिक्त उष्णः वातघ्नः गुल्मघ्नः श्लेष्माध्मानहरः अजीर्णक्रमिघ्नः दीपनश्च। रा.नि.व.६।

स्थूलतण्डुलः। पुं। स्थूलशाली। মোটা হৈ-মন্তিক ধান। रा.नि.व.१६। प.मु.।

स्थूलतालः। पुं। हिन्ताले। হেঁতাল। रा. नि.व.६। [वै.निघ.।

स्थूलतिक्ता। स्त्री। दार्व्व्यां। दारुहरिद्रा।

स्थूलतिन्दुकः। पुं। काकतिन्दुके। মাকড়-গাব। वै.निघ.। [छ। रा.नि.व.६।

स्थूलत्वचा। स्त्री। काश्मर्य्याम्। গাগার গা-

स्थूलदण्डः। पुं। देवनाले। महानल। रा. नि.व.८। [८।

स्थूलदर्भः। पुं। मुञ्जतृणे। मूँज। रा.नि.व.

स्थूलदला। स्त्री। घृतकन्यायां। घृतकुमा-री। रा नि.व.५। [नि.व.८।

स्थूलनालः। पुं। देवनले। বড় নল। रा.

स्थूलनासः (सिकः)। पुं। शूकरे। हे.च.। चिका.। [वै.निघ.।

स्थूलनिम्बुः (कः)। पुं। महानिम्बुवृक्षे।

स्थूलनीलः। पुं। श्येनपक्षे। বাজ। वै.निघ.।

स्थूलपट्टः। पुं। कार्पासे। श.र.।

स्थूलपट्टाकः। पुं। स्थूलवस्त्रे। श.र.।

स्थूलपत्रः। पुं। दमनकक्षुपे। দনা। रा.नि. व.१०। सप्तपर्णवृक्षे। ছাতিম গাছ। वै.निघ.।

स्थूलपर्णी। स्त्री। सप्तपर्णवृक्षे। ছাতিম গা-ছ। वै.निघ.। [निघ।

स्थूलपादः। पुं। गजे। त्रि। श्लीपदिनि। वै.

स्थूलपुष्पः। पुं। वकवृक्षे। বাকস গাছ। र. मा.। प.मु.। झुण्टुक्षुपे। रा.नि.व.५। स्त्री (ष्पा)। पार्व्वतीयापराजितायाम्, आस्फोतायाम्। হাপ-রমালী। र मा.। [नि.व २१।

स्थूलपुष्पी। स्त्री। यवतिक्तालतायाम्। रा.

स्थूलप्रियङ्गुः। स्त्री। वरकधान्ये। কামিনী ধান। वै.निघ.।

स्थूलफलः। पुं। शाल्मलिवृक्षे। रा.नि.व.८। महानिम्बूवृक्षे। বড় লেবুর গাছ। वै.निघ.।

स्थूलफला। स्त्री। शणपुष्प्याम्। শণ। रा. नि.व.४। शाल्मलीवृक्षे। শিমুল গাছ। रक्तफल-वृक्षे। वै.निघ.। [व.१।

स्थूलभण्टाकी। स्त्री। महावृहतीक्षुपे। मद.

स्थूलमरिचम्। क्ली। कक्कोलके। ককথল। रा.नि.व.१२। [মার আলু। रा.नि.व.७।

स्थूलमूल(क)म्। क्ली। चाणक्यमूलके। চা-

स्थूलवर्त्मकृत्। स्त्री। भार्ग्याम्। বামনহাটী। श.च.।

स्थूलवर्बु(र्बू)रिका। स्त्री। महावर्व्वूरवृक्षे। বড় বাবলা। "स्थूलवर्व्वूरिकापत्ररसः पानाद्वा-पोहति। सर्व्वातिसारान्......" शार्ङ्ग.स.१भ.।

स्थूलवल्कलः। पुं। रक्तलोध्रे। जटा.।

स्थूलवृत्तः। पुं। महावकुलवृक्षे। वै.निघ.।

स्थूलवृत्तफलः। पुं। स्निग्धपिण्डीतकवृक्षे। ময়না বৃক্ষবিশেষ। रा.नि.व.८। [व.६।

स्थूलवैदेही। स्त्री। गजपिप्पल्याम्। रा.नि.

स्थूलशरः। पुं। शरविशेषे। स मालवदेशे त-न्नाम्ना ख्यातः। রামশর, মোটা শর। गुणाः— मधुरः सुतिक्तः कफवान्तितापहरः बलवीर्य्यकरः नित्यसेवनेन ईषद्वातकरश्च। रा.नि.व.८।

स्थूलशालिः। पुं। शालिधान्यविशेषे स्वनाम-ख्याते। মোটা হৈমন্তিক ধান। मं बड़ीशालि।

कं दोड्डनेलु । गुणाः—स्वादुः मधुरः शीतलः पित्तशमनः जीर्णज्वरदाहजठररोगघ्नः बालकद्वयूनां हितः अग्निबलवीर्य्यकरश्च । रा.नि.व.१६ ।

स्थूलशिम्बः । पुं । असितशिम्ब्याम् । रा.नि.व.७ । [१६ ।

स्थूलशिम्बी । स्त्री । श्वेतनिष्पावे । रा.नि.व.

स्थूलशीर्षा (र्षिका) । स्त्री । महामस्तकपिपीलिकायाम् । क्षुद्रपिपीलिकायाम् । हे.च. । सु.कल्प.८अ. । See पिपीलिका । [निघ. ।

स्थूलषट्पदः । पुं । वरोलि । বোল্তা । वै.

स्थूलसायकमुखाख्यः । पुं । स्थूलशरे । रा.नि.व.८ ।

स्थूलस्कन्धः । पुं । लकुचवृत्ते । रा.नि.व.६ ।

स्थूलांशा । स्त्री । गन्धपत्रायाम् । रा.नि.व.१० ।

स्थूला । स्त्री । बृहदेलायाम् । বড় এলাচ । र.मा. । शतपुष्पायाम् । শুল্ফা । मधुरिकायाम् । মৌরী । कपिलद्राक्षायाम् । वै.निघ. । कार्पास्याम् । रा.नि.व.४ । गजपिप्पल्यां । श.च. । एर्वारुके । কাঁকুড় । रा.नि.व.७ ।

स्थूलाङ्गः (ङ्गी) । पुं, स्त्री । स्थूलशालौ । মোটা ধান । वै.निघ. । [জীরা । मद.व.२ ।

स्थूलाजाजी । स्त्री । स्थूलजीरके । মোটা

स्थूलान्त्रम् । क्ली । तन्नामककोष्ठाङ्गे । মোটা আঁতড়ি । च.शा.७अ. । [११ ।

स्थूलाम्रः । पुं । महाराजचूतवृत्ते । रा.नि.व.

स्थूलारुष्कम् । क्ली । क्षुद्रकुष्ठभेदे । কুষ্ঠরোগবিশেষ । अनेन स्थूलातिदारुणशोफाः सन्धिषु भवन्ति । सु.नि.५अ. ।

स्थूलास्यः । पुं । सर्पे । श.च. ।

स्थूली (इन्) । पुं । उष्ट्रे । शब्दकल्पः ।

स्थूलैरण्डः । पुं । बृहदेरण्डवृत्ते । বড় ভেরেণ্ডা গাছ । मं घोरएरंड । गुणाः—रसवीर्य्यविपाकेषु गुणाढ्य इति । रा.नि.व.८ ।

स्थूलैला । स्त्री । (Amomum subulatum.) Larger cardamum. बृहदेलायाम् । বড় এলাচ । हिं बड़ एलाइच । तें पेड्ड-एलाकुलु । ता. एलम् । मं एलदोड्डि । गुणाः—शीतला तिक्ता सुगन्धा कफपित्तघ्नी हृद्रोगहरी मलहरी पुंस्त्वघ्नी च । रा.नि.व ६ । [मि. ।

स्थूलोच्चयः । पुं । मुखव्रणे । वयसफोड़ा ।

स्थौणेय(क)म् । क्ली । ग्रन्थिपर्णे । गँठियाला । हिं थुनेर । तें सुगन्धद्रव्यमु । नेपाले भटेउर । गुणाः—"स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषहृत् । मेधाशुक्रकरं रुच्यं रक्षोघ्नं ज्वरजन्तुजित् । हन्ति कुष्ठास्रतृड्दाहदौर्गन्ध्यतिलककालकान् ॥" भा. । च.द.वा.व्या.चि.एलादि. । सु.सू. ३८अ. । वा.सू.१५अ.एलादिः ।

स्थौल्यम् । क्ली । स्थूलतायां । व्याक. ।

स्नपनम् । क्ली । स्नाने । शब्दकल्पः ।

स्नवः । पुं । चरणे । अम. ।

स्नसा । स्त्री । वस्नसायां । स्नायु । हे.च. ।

स्नानम् । क्ली । अवगाहने । गुणाः—"स्नानं पवित्रमायुष्यं श्रमस्वेदमलापहम् । शरीरबलसन्धानं कोऽस्य्मौजस्करं परम् ॥" राज.२प. । "रक्तप्रसादनं चापि स्नानमग्नेश्च दीपनम् । उष्णेन शिरसः स्नानम् अहितश्चक्षुषः सदा ॥ शीतेन शिरसः स्नानं चक्षुष्यमिति निर्दिशेत् । श्लेष्ममारुतकोपे तु ज्ञात्वा व्याधिबलाबलम् । कामसुष्णं शिरःस्नानं भैषज्यार्थं समाचरेत् । अतिशीताम्बुशीते च श्लेष्ममारुतकोपनम् । अत्युष्णमुष्णकाले च पित्तशोणितवर्द्धनम् । तच्चातिसारज्वरितकर्णशूलानिलार्त्तिषु । आध्मानारोचकाजीर्णभुक्तवत्सु च गर्हितम् ॥" इत्यादि । सु.चि.२४अ. ।

स्नानतृणम् । क्ली । कुशतृणे । श.र. ।

स्नापकः । त्रि । स्नानकारके । च.सू.१५अ. ।

स्नायुः । स्त्री, क्ली । वायुवाहिनाड्याम् । नहर इति लोके । सा गर्भस्थस्य सप्तभिर्मासैर्भवति । सुखबोधः । स्नायुश्चतुर्विधा यथा—प्रतानवत्यः वृत्ताः पृथ्व्यः शुषिराश्चेति । सु.शा.५अ. । तत्स्वरूपं यथा—"मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात् । शिराणां हि मृदुः पाकः स्नायूनान्तु ततः खरः ॥" इति । "स्नायवो बन्धनानि सुदेहमांसास्थिमेदसाम् । सन्धीनामपि यत्तासु शिराभ्यः सुदृढाः स्मृताः ॥" तत्संख्या—"शतानि नव जायन्ते

शरीरे स्नायवो नृणाम् ।” तासु शाखासु स्नायूनि ६०० । कोष्ठे २३०, ग्रीवोर्द्ध्वं ७०, पादाङ्गुलिषु ३०, तलकूर्च्चगुल्फेषु ३०, जङ्घायां ३०, जानुनि १०, ऊरौ ४०, वङ्क्षणे १०, सक्थ्यर्द्धे १५० । कट्यां ६०, पृष्ठे ८०, पार्श्वयोः ६०, उरसि ३०, ग्रीवायां ३६, मूर्ध्नि ३४ । सु.शा.५अ. । भा. ।

स्नायुकः । पुं । तन्नामकरोगविशेषे । स्नायुरोग । हिं नहरुया । निदानं —“शाखासु कुपितो दोषः शोथं कृत्वा विसर्पवत् । भिनत्ति तत्क्षते तत्र सोष्मा मांसं विशोष्य च । कुर्य्यात् तन्तुनिभं जीवं वृत्तं सितप्रतिर्बहिः । शनैः शनैः क्षताद् याति छेदात् कोपमुपैति च । तत्पातात् शोकशान्तिः स्यात् पुनः स्थानान्तरे भवेत् । स स्नायुक इति ख्यातः क्रियोक्ता तु विसर्पवत् । बाह्यार्यदि प्रमादेन जङ्घयोस्त्रुट्यते क्वचित् । सङ्कोचं खञ्जताचैव छिन्ने जन्तुः करोत्यसौ ।” सु. ।

स्नायुर्मं (न्) । क्ली । शुक्लगतनेत्ररोगभेदे । लक्षणं यथा —“शुक्ले यत् पिशितमुपैति वृद्धिमेतत् स्नायुर्मेत्यभिपठितं खरं प्रपाण्डु ।” सु.उ.४अ. ।

स्नावः । पुं । स्नायुशिरायां । शब्दकल्पः ।

स्नाव्नी । स्त्री । कंसहये । वा.शा.४अ. ।

स्निग्धम् । क्ली । मधूच्छिष्टे । মোম । रा.नि.व.१४ । पुं । रक्तैरण्डे । रा.नि.व.८ । सरलवृक्षे । रा.नि.व.६ । दुग्धसरे । सरलनिर्यासे । वै.निघ. । त्रि । चिक्कणे । श.र. ।

स्निग्धकरञ्जकः । पुं । गुच्छकरञ्जे । वै.निघ. ।

स्निग्धच्छदः । पुं । वटवृक्षे । वै.निघ. । (दा) स्त्री । बदरीवृक्षे । वै.निघ. ।

स्निग्धतण्डुलः (ला) । पुं, स्त्री । षष्टिकशालिधान्ये । प.मु. । रा.नि.व.१६ । See गौरषष्टिकः ।

स्निग्धदलः । पुं । गुच्छकरञ्जे । रा.नि.व.६ ।

स्निग्धदारु । क्ली । देवदारुकाष्ठे । रा.नि.व. १२ । पुं (रुः,कः) । सरलवृक्षे । गन्धकाष्ठविशेष । रा.नि.व.१२। शालवृक्षे । वै.निघ.। [निघ.।

स्निग्धनिर्म्मलम् । क्ली । उत्तमकांस्ये । वै.

स्निग्धपत्रः (कः) । पुं । घृतकरञ्जे । गुच्छकरञ्जे । रा.नि.व.६ । आवर्त्तक्यां । আঁৎমোড়া । वै.निघ. । मञ्जरवृक्षे । रा.नि.व.८ ।

स्निग्धपत्रा (त्री) । स्त्री । बदरीवृक्षे । जटा । पालङ्कशाके । रा.नि.व.७ । लोणिकायाम् । নুনিশাক । वै.निघ. । गाम्भारीवृक्षे । গামার গাছ । रा.नि.व.६ ।

स्निग्धपर्णिका (र्णी) । स्त्री । मूर्व्वायाम् । रा.नि.व.३ । पृश्निपर्ण्यां । চাকুলিয়া । वै.निघ. ।

स्निग्धपिण्डीतकः । पुं । मदनवृक्षविशेषे । मं घोरमेणाहण । अयं वाराहतुल्यगुणः । रा.नि.व.८ ।

स्निग्धफला । स्त्री । वालुककर्कटिकायाम् । कूटी । वै.निघ. । नाकुल्यां । गन्धराश्ना । रा.नि.व.७ । [গাছ । वै.निघ. ।

स्निग्धमज्जकः । पुं । वातामवृक्षे । বাদাম

स्निग्धराजिः । पुं । कृष्णसर्पेण राजिमत्यां जाते सर्पविशेषे । सु.कल्प.४अ. । See सर्पः ।

स्निग्धा । स्त्री । मेदायाम् । रा.नि.व.५ । अस्थिसारे । मज्जा । विकङ्कतवृक्षे । বঁইচী গাছ । ज.द. ।

स्नुक् । स्त्री । स्नुहीवृक्षे । মনসা গাছ, মনসা সিজু । र.मा. । सेहुण्ड इति ङ. । सु.सू.२६अ. अधःसंशमने । वा.सू.१५अ. । “स्नुक् शङ्खिनी ।”

स्नुक्च्छदः । पुं । क्षीरीशवृक्षे । থিরিশ গাছ । प.मु. । क्षीरकञ्चुकीवृक्षे । र.मा. ।

स्नुक्च्छदोपमः । पुं । वाराहीकन्दे । শুয়ার আলু । वै.निघ. ।

स्नुग्दलम् । क्ली । मनसापत्रे । মনসাপাতা । रस.र.बाल.चि. । पुं । स्नुहीवृक्षे । মনসা গাছ বা তেকাঁটা সিজু । श.च. ।

स्नुषा । स्त्री । पुत्रभार्य्यायाम् । वा.चि.६अ. । स्नुहीवृक्षे । মনসা সিজু, তেকাঁটা সিজু । श.च. ।

स्नुहा (हिः, ही) । स्त्री । (Euphorbia neriifolia. Syn. E. Ligularia. Euphorbia antiquorum.) स्वनामख्यातक्षीर-

भारद्वले । सुहीविशेषे । मनसा गाछ, घोड़ा सिजू, তেকাঁটা সিজু । हिं थोहर, तिधार, आकुनिया । तैं बेमुड़्चेट्ट । वम्. निवडुंग । र. मा. । सं.कुष्ठ.चि.मरिचाद्यतैले । गुणा: – उष्णा पित्तदाहघ्नी कुष्ठवातप्रमेहघ्नी च । तत्क्षीरं वातविषाध्मानगुल्मोदरघ्नञ्च । रा.नि.व.८ । "बहुदोषे प्रयोक्तव्यमग्नितुल्यं सुधापयः ।" राज. । विरेचने च प्रशस्तं । च.सू.१अ. । सु.चि.१४अ ।

स्नुह्याद्यतैलम् । क्लो । खालित्ये तैलम् । টাকের তেল । पाठः—"स्नुहीपयः पयोऽर्कस्य मार्कवो लाङ्गलीविषम् । मूत्रमाजं सगोमूत्रं रक्तिका सेन्द्रवारुणी । सिद्धार्थं तीक्ष्णतैलञ्च गर्भं दत्त्वा विपश्चिता । वह्निना मृदुना पक्वं तैलं खालित्यनाशनम् ॥" लाङ्गलीविषं लाङ्गलीमूलं, रक्तिका गुञ्जाफलं, तीक्ष्णतैलं नवाफुटकीतैलं । केचित्तु सिद्धार्थतीक्ष्णतैलमिति श्वेतसर्षपतैलं वदन्ति । रस. र. । [वोल । सं.कनकतैले ।

स्नुहीवीजम् । क्ली । स्नुहीवृक्षवीजे । মনসা

स्नुह्यम् । क्ली । उत्पले । त्रिका. ।

स्नु(ही)क्षीरम् । क्ली । स्नुहीवृक्षनिर्य्यासे । সিজুর আটা । सु.सू.३६अ. । सं.वाहुशालगुड़े ।

स्नेहः । पुं । दुग्धसारे । वै.निघ. । मस्तिष्के । रा.नि.व.१८ । सर्षपे । भा.पू.१भ.धा.व. । पृथिव्यम्बुगुणभूयिष्ठद्रव्ये, घृतादौ । सु.सू.४१अ. । स चतुर्विधः घृततैलवसामज्जान इति । च.सू.२अ. । स्नेहः स्थावरजङ्गमभेदेन द्वियोनिः । तयोस्तैलं स्थावरयोनिः, घृतञ्च जङ्गमयोनिः । तत्पानसमयो रवेरुदयात् किञ्चिदनन्तरम् । तत्पानञ्च शीते दिवा, ग्रीष्मे रात्रौ, वातपित्ताधिके रात्रौ, वातश्लेष्माधिके च दिवा हितम् । घृते कोष्णजलं, तैले यूषः, वसामज्ज्ञोः मण्डमनुपेयम् । भा. । स्नेहप्रयोगविधिः—"स्वेद्यसंशोध्यमद्यस्त्रीव्यायामासक्तचित्तकाः । वृद्धबालाबलकृशा रुक्षाः क्षीणास्रेतसः । वातार्त्तस्यन्दतिमिरदारुणप्रतिबोधिनः । स्नेह्या न त्वतिमन्दाग्नितीक्ष्णाग्निस्थूलदुर्ब्बलाः । उरुस्तम्भातिसारामगलरोगगरोदरैः । मूर्च्छाच्छर्द्यरुचिश्लेष्मतृष्णामद्यैश्च पीड़िताः ॥" तस्य सप्तदिनपर्य्यन्तः कालः । स त्रिविधः उत्तममध्यमाधमभेदेन । तत्र दिनत्रयपर्य्यन्तमधमः, दिनचतुष्टयपर्य्यन्तं मध्यमः, सप्तदिनपर्य्यन्तमुत्तमः । गुणाः—"स्नेहोऽनिलं हन्ति मृदूकरोति देहं मलानां विनिहन्ति सङ्गम् । स्निग्धस्य सूक्ष्मेष्वयनस्य लीनं ………॥" च.सिद्धि.१अ. । स्नेहमात्रा —"उत्तमस्य पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमे । जघन्यस्य पलार्द्धेन स्नेहक्वाथौषधेषु च ॥" च.द. । स्नेहपाकविधिः—"क्वाथ्याच्चतुर्गुणं वारि पादस्थं स्याच्चतुर्गुणम् । स्नेहात् स्नेहसमं क्षीरं कल्कस्तु स्नेहपादिकः । चतुर्गुणत्वष्टगुणं द्रवद्वैगुण्यतो भवेत् । तत्र द्रवान्तरानुक्तौ क्षीरमेव चतुर्गुणम् । द्रवान्तरेण योगे हि क्षीरं स्नेहसमं भवेत् ॥" अन्यत्—"जलमष्टगुणं क्वाथ्यात् क्वाथश्च जलपादिकः । क्वाथ्याच्च पादिकः स्नेहः स्नेहात् कल्कस्तु पादिकः ॥ पञ्चप्रभृति यत्र स्युर्द्रवाणि स्नेहसंविधौ । अत्र स्नेहसमान्याहुरर्वाक् च स्याच्चतुर्गुणम् ॥" अन्यच्च —"एकद्वित्रिद्रवद्रव्यैः कुर्य्यात् स्नेहाच्चतुर्गुणम् । क्षीरं स्नेहसमं देयं चतुर्भिश्च चतुर्गुणम् । कल्काच्चतुर्गुणः स्नेहः स्नेहात्तोयं चतुर्गुणम् । क्वाथ्याच्चतुर्गुणं वारि क्वाथ्यः क्वाथसमो भवेत् । जलस्नेहौषधानाञ्च प्रमाणं यत्र नेरितं । पादः स्यादौषधं स्नेहात् स्नेहात्तोयं चतुर्गुणम् । वृषादिकुसुमात् कल्कः केवलं स्नेहसिद्धये ॥ यत्रोक्तः स्नेहपादांशः स्नेहकार्य्ये मनीषिभिः । स्नेहे सिध्यति शुद्धाम्बुनिःक्वाथस्वरसैः क्रमात् । कल्कस्य योजयेदंशं चतुर्थं षष्ठमष्टमम् । स्वरसक्षीरमाङ्गल्यैः पाको यत्रेरितः क्वचित् । जलं चतुर्गुणं तत्र वीर्य्याधानार्थमावपेत् । (माङ्गल्यं दधि) । न मुञ्चति रसं द्रव्यं क्षीरादिभिरुपस्कृतम् । सम्यक् पाको न जायेत तस्मात्तोयं चतुर्गुणम् । स्नेहपाकविधौ यत्र क्षीरमेकन्तु कथ्यते । तोयादीनामनिर्द्देशे क्षीरमेव चतुर्गुणम् । अकल्कोऽपि भवेत् स्नेहो यः साध्यः केवले द्रवे । स्नेहपाकविधौ यत्र प्रमाणं नेरितं क्वचित् । स्नेहस्य कुड़वं तत्र पचेत् कल्कपलेन तु । मानानुक्तौ घृते तैले प्रस्थमाहुश्चिकित्सकाः । द्विगुणं त्रिगुणं वापि बहुमात्राञ्च पादिकाम् । योगं यदि पचेन्मूढ़ो हीनवीर्य्यं भवेत्तदा । तुलाद्रव्ये जलद्रोणो द्रोणे द्रव्यतुला मता । अनुक्ते द्रवकार्य्ये तु सर्व्वत्र सलिलं मतम् ॥" अन्येऽप्याहुः—"अङ्गेऽप्यनुक्ते विहितन्तु मूलं भागेऽप्यनुक्ते समता विधेया । द्रवेऽप्यनुक्ते जलमेव देयं कालेऽप्यनुक्ते दिवसस्य पूर्व्वम् । प्रसारण्यादिनिर्दिष्टं शतमेकं पृथक्

पृथक्। जलद्रोणेन चैकैकं साधयेत् स्नेहकर्हितम्। क्वाथ्यद्रव्यस्य बाहुल्यादुदकं स्वल्पमेव तु। सम्यक् पाकं न गृह्णीत हीनवीर्य्यन्तु केवलम्॥ कल्कक्वाथाविनिर्द्दिष्टे गणात्तस्मात् समाहरेत्। समस्तवर्गमर्द्धं वा यथालाभमथापि वा। प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित्॥ यत्राधिकरणेनोक्तिर्गणे स्यात् स्नेहसंविधौ। तत्रैव कल्कनिर्य्यूहौ विष्येते स्नेहवेदिना॥ गणोक्तमपि यद्द्रव्यं भवेद्व्याधावयौगिकम्। तदुद्धरेद्यौगिकन्तु प्रक्षिपेदप्रकीर्त्तितम्॥” शार्ङ्गधरस्तु—“कल्काच्चतुर्गुणीकृत्य घृतं वा तैलमेव वा। चतुर्गुणद्रवे साध्यं तस्य मात्रा पलोन्मिता॥ द्वादशाहन्तु मूलानां वल्लीनां क्रमशैव च। एकाहं व्रीहिमांसानां पाकं कुर्य्याद्विचक्षणः॥ चतुर्गुणं मृदुद्रव्ये कठिनेऽष्टगुणं जलम्। तथा च मध्यमे द्रव्ये दद्यादष्टगुणं पयः॥ अत्यन्तकठिने द्रव्ये नीरं षोड़शिकं मतः। कर्षादितः पलं यावत् क्षिपेत् षोड़शिकं जलम्॥ तदूर्द्ध कुड़वं यावत् भवेदष्टगुणं पयः। प्रस्थादितः क्षिपेन्नीरं चोरं यावच्चतुर्गुणम्॥ अम्बुक्वाथरसैर्य्यत्र पृथक् स्नेहस्य साधनम्। कल्कस्यांशं तत्र दद्यात् चतुर्थं षष्ठमष्टमम्॥ द्रवाणि यत्र स्नेहेषु पञ्चादीनि भवन्ति हि। तत्र स्नेहसमान्याहुर्यथापूर्व्वं चतुर्गुणम्॥ द्रवेण केवलेनैव स्नेहपाको भवेद्यदि। तत्राम्बुपिष्टाः कल्काः स्युर्द्रवयाच्च चतुर्गुणः॥ क्वाथेन केवलेनैव पाको यत्रेरितः क्वचित्। क्वाथ्यद्रव्यस्य कल्कोऽपि तत्र स्नेहे प्रयुज्यते॥” स्नेहपाकनिष्पत्तिलक्षणमाह—“स्नेहकल्को यदाङ्गुल्या वर्त्तितो वर्त्तिवद्भवेत्। वह्नौ क्षिप्ते च नो शब्दस्तदा सिद्धिं विनिर्द्दिशेत्॥ शब्दस्योपरमे प्राप्ते फेनस्योपरमे तथा। गन्धवर्णरसादीनां सम्पत्तौ सिद्धिमादिशेत्॥ स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरस्तथा। ईषत् खरसकल्कन्तु स्नेहपाको मृदुर्भवेत्। मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमले॥ ईषत्कठिनकल्कस्य स्नेहपाको भवेत् खरः॥ तदूर्द्ध खरपाकः स्यात् दाहकृन्निष्प्रयोजनः। सर्व्वेषामिह द्रव्याणां मध्यपाकः प्रशस्यते। वरं पाको मृदुः कार्य्यः तथापि न खरो मतः॥ घृततैलगुड़ादींश्च नैकाहादवतारयेत्। व्युषितास्तु प्रकुर्व्वन्ति विशेषेण गुणान् यतः॥ केवलं व्रीहिजन्त्वङ्गक्वाथो व्युष्टस्तु दोषलः॥” प.प्र.२ख.। अभ्यस्य घृतादिप्रयोगविधाने। च स द्विविधः पिण्डपेयभेदेन। “तयोः पिण्डो भोजनेषु पेयः पाने च कथ्यते।” ज.द.१८ष.।

स्नेहकरः। पुं। शालवृक्षे। वै.निघ.। [सु.।

स्नेहगर्भः। पुं। तिलक्षुपे। তিল গাছ। प.

स्नेहचतुष्टयम्। क्ली। सर्पिस्तैलवसामज्जसु। प.प्र.२ख.। सि.यो.वा.व्या.चि.।

स्नेहनः। पुं। बृंहणधूमपानविशेषे। कफे। तस्य स्थानं शिरः। स्नेहदानेनेन्द्रियतर्पणश्च। भा.। व्रणशोषिणां स्नेहपाने। सु.चि.१ष.। क्ली। अभ्यङ्गे। रा.नि.व.१५। दुग्धसारे। ननि। वै.निघ। त्रि। स्निग्धकरे। स्त्री (नी)। स्नेहजनन्यां। च.सू.२ष.। तन्नामकनेत्राञ्जनवर्त्तौ। “धात्र्यक्षपथ्यावीजानि एकद्वित्रिगुणानि च। पिष्टा वर्त्तिं जलैः कुर्य्यादञ्जनं स्नेहनं परम्॥” भा.।

स्नेहपाककल्पः। पुं। स्नेहपाकविधौ। “स्नेहकुड़वे भेषजपलं पिष्टं कल्कं चतुर्गुणं द्रवमावाप्य विपचेत्।” इत्यादि। सु.चि.३१ष.।

स्नेहपिण्डीतकः। पुं। पीतमदनवृक्षे। वै.निघ.।

स्नेहपूरफलः। पुं। तिलक्षुपे। वै.निघ.।

स्नेहभूः। पुं। कफे। हे.च.।

स्नेहमुख्यम्। क्ली। तैले। वै.निघ.।

स्नेहरङ्गः। पुं। तिले। श.र.।

स्नेहवती। स्त्री। मेदायाम्। रा.नि.व.५।

स्नेहवर्त्तिः। स्त्री। अश्मरीरोगे। ज.द.।

स्नेहवस्तिः। पुं। तैलादिना वस्तिदाने। তৈলপিচ্কিরি। “स्नेहवस्तिर्विधेयस्तु नाविशुद्धस्य देहिनः। स्नेहवीर्य्यं तथादत्ते स्नेहेनानुविसर्पति॥” च.द.। See अनुवासनवस्तिः।

स्नेहविद्धः (द्धा:)। पुं। तैलदेवदारुणि। তৈলদেবদারু। वै.निघ.। जटा.।

स्नेहवीजः। पुं। पियालवृक्षे, चारवृक्षे। পিয়াল গাছ। रा.नि.व.११। [सु.।

स्नेहव्यापत्। स्त्री। स्नेहातियोगजन्यविकारे।

स्नेहसारः। पुं। मज्जधातौ। মজ্জা। वै.निघ.।

स्नेहा(न्) **(हुः)**। पुं। चन्द्रे। रोगे। उणा.।

स्नेहोत्तमम् । क्ली तैले । वै.निघ. ।

स्पन्दः (नम्) । पुं, क्ली । कम्पने । मा.नि. ।

स्परिशः । पुं । स्पर्शे । शब्दकल्प. ।

स्पर्शः । पुं । त्वाचप्रत्यक्षे । रोगे । दाने । वि-का. । मणिविशेषे । परशपाथर । शब्दकल्पः ।

स्पर्शनः । पुं । वायौ । रा.नि.व.११ । क्ली । स्पर्शे । मे. । [शब्दकल्प. ।

स्पर्शमणिः । पुं । मणिविशेषे । परशपाथर ।

स्पर्शमणिप्रभवम् । क्ली । स्वर्णे । श.र. ।

स्पर्शलज्जा । स्त्री । लज्जालुकायाम् । लज्जा-वती । रा.नि.व.५ । [श.च. ।

स्पर्शशुद्धा । स्त्री । शतमूल्याम् । शतमूली ।

स्पर्शसङ्कोचपत्रिका । स्त्री । शुक्ललज्जालु-कायाम् । श्वेत लज्जावती । वै.निघ. ।

स्पर्शस्यन्दः । पुं । भेके । बेङ । शब्दकल्प. ।

स्पर्शहानिः । स्त्री । शूकरोगविशेषे । "जन-येत् स्पर्शहानिन्तु शोणितं शूकदूषितम् ।" सु.नि. १४अ. ।

स्पृक्का । स्त्री । तन्नामकसुगन्धशाके । पिड़िं शाक । मं स्पृक्का । कं हिक्के । तें स्पृकुथनेडुद्रव्य-मु । गुणाः—कटुः कषाया तिक्ता कफकासघ्नी श्लेष्ममेहाश्मरीमूत्रकृच्छ्रेषु हिता च । रा.नि.व. १२ । सु.सू.३८अ. । लज्जालुकायाम् । रा.नि.व. ५ । वा.सू.१५अ.एलादिः । "स्पृक्काचोरकचोचप-त्रतगरम् ।" वै.निघ.२भ.चय.चि.मार्कवादिचूर्णे । ब्राह्म्याम् । विन्नी शाक । मालत्यां । मालती फूल । शतपत्र्यां । सेउति । पाचीनामपुष्पवृक्ष-विशेषे । वै.निघ. ।

स्पृशा । स्त्री । सर्पकङ्कालिकावृक्षे । श.च. । (शा, शी) । कण्टकार्य्याम् । ज.द. । प.मु. ।

स्पृष्टरोदनिका । स्त्री । समङ्गायां । लज्जा-वती । सु.चि.२८अ.ड. ।

स्पृष्टास्पृष्टि । अ्य । परस्परस्पर्शने । छोँओया-छुँयि । शब्दकल्पः ।

स्पृष्टिः । स्त्री । स्पर्शने । अम. ।

स्पृह्यः । पुं । मातुलुङ्गवृक्षे । श.च. ।

स्फटः (टा) । पुं, स्त्री । सर्पफणायां । अम. ।

स्फटिकः । पुं । सूर्य्यकान्तमणौ । हला. । स्वनामख्यातमणौ । स्फटिक । गुणाः—पित्तदाह-रोगघ्नः रक्तसमवीर्य्यश्च । एतज्जपमालया जपतां कोटिगुणं फलं भवति । रा.नि.व.१३ । स्फटिका-रौ । फट्किरि । भा.म.४भ.ने.रो.चि. । "स्फटि-कशङ्खनाभीन्दवः ।" कर्पूरे । वै.निघ. ।

स्फटिकविषम् । क्ली । दारुमोचभेदे । सं. ।

स्फटिका (ख्या) । स्त्री । स्फटिकारिकायां । फट्किरि । भा. । सं.रसकर्पूरे ।

स्फटिकात्मा (न्) । पुं । स्फटिके । श.र. ।

स्फटिकाद्रिभिदः / **स्फटिकाभ्रः** } पुं । कर्पूरे । शब्दकल्प. । रा.नि.व.१२ ।

स्फटिकारिः । स्त्री । स्वनामख्यातखनिजोप-रसे । फट्किरि । हिं फिटिकारी । गुणाः—क-षाया उष्णा वातपित्तकफव्रणघ्नी श्वित्रविसर्पघ्नी योनिसङ्कोचकारिणी च । भा.पू.१भ.उ.रसव. ।

स्फटिकोपमः । पुं । कर्पूरे । यशदे । दस्ता । चन्द्रकान्तमणौ । वै.निघ. ।

स्फटिकोपलः । पुं । स्फटिके । वै.निघ. ।

स्फटी । स्त्री । स्फटिकारौ । फट्किरि । भा. ।

स्फाट(टि,टी)कम् । क्ली । स्फटिके । श.र. ।

स्फाटिकोपलः । पुं । स्फटिके । त्रिका. ।

स्फिक् (च्) । स्त्री । कटिप्रोथे । गुदपुला । रा.नि.व.१८ ।

स्फिक्घातनकः । पुं । कट्फलवृक्षे । श.च. ।

स्फुटकपत्रम् । क्ली । ज्योतिष्मतीपत्रे । लता-फट्किर पाता । च.द.बाल.चि. । प्रयोगा. ।

स्फुटत्वचा । स्त्री । ज्योतिष्मत्यां । लताफट्-कि । वै.निघ. ।

स्फुटनम् । क्ली । विसरणे । अम. ।

स्फुटफलः । पुं । तुम्बुरौ । ताम्बूल । वै.निघ. ।

स्फुटबन्धना (नी) । स्त्री । पारावतपद्यां । लताफट्की । प.मु. । [फट्की । र.मा. ।

स्फुटवल्कली । स्त्री । पारावतपाद्यां । लता-

स्फुटा । स्त्री । फणायाम् । अ.टी.रा. ।
स्फुटिः (टी) । स्त्री । स्फुटितकर्कटिकायाम् । फुटी । पादस्फोटरोगे । हारा. । श.र. ।
स्फुटिका । स्त्री । स्फटिकारिकायां । फट्किरि । वै निघ. ।
स्फुटितम् । क्ली । काण्डभग्नास्थिभङ्गरोगे । "शूकपूर्णमिवाभातं विपुलं विस्फुटीकृत"मिति लक्षणम् । सु. ।
स्फुल्क(ल्का)रः । पुं । अग्नौ । श.च. । फुल्कारे । फूँ देओया ।
स्फुरः । पुं । स्फुरणे । फलके । अ.टी. ।
स्फुरणः । पुं । वायौ । क्ली । ईषत् स्पन्दने । कम्पे । भ. ।
स्फूर्जकः । पुं । तिन्दुकवृक्षे । कुचिला गाछ । प.मु. । लकुचाकारपत्रकाख्ये क्षीणाकवृक्षे । सु. सू.३८अ. । [नटे शाक । रा.नि.व.५ ।
स्फूर्जथुः । पुं । तण्डुलीयशाकक्षुपे । काँटा-
स्फूर्जनतरुः । पुं । नन्दीवृक्षे । वै.निघ. ।
स्फूर्त्तिः । स्त्री । स्फुरणे । कम्पने । व्याक. ।
स्फोटः । पुं । विस्फोटके । फोड़ा । रा.नि.व. २० । मुक्तायाम् । वै.निघ. ।
स्फोटकः । पुं । पक्षिविशेषे । विस्फोटके । फोड़ा । रा.नि.व.२० ।
स्फोटकरः । पुं । भल्लातकवृक्षे । वै.निघ. ।
स्फोटनम् । क्ली । विदारणे । स्फोटनवद्वायुजन्यत्रणवेदनायाम् । सु.सू.२१अ. ।
स्फोटलता । स्त्री । कर्णस्फोटालतायाम् । काणछिड़ा । रा.नि.व.३ । [व.११ ।
स्फोटवीजकः । पुं । भल्लातकवृक्षे । रा.नि.
स्फोटहेतुः (कः) । पुं । भल्लातकवृक्षे । वै. निघ. ।
स्फोटा । स्त्री । फणायाम् । शब्दकल्पः ।
स्फोटिका । स्त्री । स्फोटके । फोड़ा । हापुत्रिकापक्षिणि । त्रिका. । [निघ. ।
स्फोटिनी । स्त्री । कर्कटिकालतायाम् । वै.
स्फोता । स्त्री । श्वेतोत्पलशारिवायाम् । अनन्तमूल । भा.पू.१भ. । See अनन्ता । [त्रिका. ।
स्मरकूपकः (पिका) । पुं, स्त्री । भगे ।
स्मरगृह(च्छत्र)म् । क्ली । भगे । योनौ । जटा. । शब्दकल्पः ।
स्मरणम् । क्ली । स्मृतौ । हे.च. । [ल्पः ।
स्मरणापत्यतर्पकः । पुं । कच्छपे । शब्दक-
स्मरध्वजम् । क्ली । योनौ । श.र. ।
स्मरमन्दिरम् । क्ली । भगे । रा.नि.व.१८ ।
स्मरलेखनी । स्त्री । सारिकापक्षिणि । श.र. ।
स्मरवृद्धिः (संज्ञः) । पुं । कामवृद्धिवृक्षे । रा. नि.व.४ ।
स्मरस्तम्भः । पुं । लिङ्गे । त्रिका. ।
स्मरस्मरा । स्त्री । वनमल्लिकायाम् । वनमालि । रत्ना. ।
स्मरस्मर्य्यः । पुं । गर्द्दभे । त्रिका. ।
स्मरागारम् । क्ली । भगे, योनौ । त्रिका. ।
स्मराङ्कुशः । पुं । लिङ्गे । त्रिका. । [१० ।
स्मराधिवासः । पुं । अशोकवृक्षे । रा.नि.व.
स्मराम्रः । पुं । राजाम्रे । थास आम् । रा. नि.व.११ ।
स्मरासवः । पुं । तालसुरायाम् । ताड़ेर मद । शब्दकल्पः । लालायाम् । त्रिका. । [निघ. ।
स्मारणी । स्त्री । ब्राह्मयाम् । बिर्मी शाक । वै.
स्मृतिः । स्त्री । अनुभूतार्थस्मरणे । च.शा.१अ. । सा चाष्टविधकारणेभ्यः समुत्पद्यते—"वक्ष्यन्ते कारणान्यष्टौ स्मृतिर्यैरुपलभ्यते । निमित्तरूपग्रहणात् सादृश्यात् सविपर्य्ययात् । सत्त्वानुबन्धादभ्यासात् ज्ञानयोगात् पुनः श्रुतात् । दृष्टश्रुतानुभूतानां स्मरणात् स्मृतिरुच्यते ॥" च.शा.१अ. ।
स्मृतिहिता । स्त्री । शङ्खपुष्पीलतायाम् । श्वेतापराजिता । वै.निघ. ।
स्मेरविष्किरः । पुं । मयूरे । शब्दकल्पः ।
स्यदः । पुं । वेगे । अम. ।
स्यन्दः । पुं । चरणे । व्याक. ।

स्यन्दनम् । क्ली । जले । चरणे । मे. ।

स्यन्दनः । पुं । मन्नामकवृत्ते । तिनिश, सादन इति पाश्चात्ये । सादन गाछ । भा.म.पूतना.चि. । "स्यन्दनोऽर्ज्जुन एव च ।" च.चि.३अ. । वि.८अ. । तिन्दुकवृत्ते । तेँद गाछ । वै.निघ. ।

स्यन्दनतैलम् । क्ली । भगन्दरे तैलम् । पाठः —"चित्रकार्कौ त्रिवृत्पाठे मलपू हयमारकम् । सुधां वचां लाङ्गलकीं सप्तपर्णं सुवर्चिकां । ज्योतिष्मतीञ्च सम्भृत्य तैलं धीरो विपाचयेत् । एतद्धि स्यन्दनं तैलं भृशं दद्याद्भगन्दरे ॥" सु.चि.८अ.।

स्यन्दनद्रुः (मः) । पुं । तिनिशद्रुमे । सादन गाछ । रा.नि.व.६ ।

स्यन्दनाह्वयः । पुं । तिनिशवृत्ते । तिन्दुकवृत्ते । तेँद गाछ । वै.निघ. । [प.मु. ।

स्यन्दनिः । पुं । तिनिशवृत्ते । सादन गाछ ।

स्यन्द(न्दि)नी । स्त्री । मुखलालायां । लाल । रा.नि.व.१८ । तिनिशवृत्ते । सादन गाछ । र.सा.सं. । मूत्रवहनद्यां । कश्चित् । [वै.निघ. ।

स्यन्दिता । स्त्री । तिन्दुकवृत्ते । तेँद गाछ ।

स्यमीकः । पुं । वल्मीके । उइटिपि । तरुभेदे । शाइ गाछ । मे. । स्त्री (का) । नीलिकायाम् । मे. ।

स्युमम् । क्ली । जले । उणा. ।

स्योनाकः । पुं । श्योणाकवृत्ते । शोणा गाछ । वै.निघ. ।

स्रंसः । पुं । पूगवृत्ते । गुपारिगाछ । वै.निघ. ।

स्रंसनम् । क्ली । विरेचने । "स्निग्धोष्णेनोदिते गुल्मे पैत्तिके स्रंसनं हितम् ।" भैष.गुल्मचि. । ऊर्द्ध्वगदोषस्याधःकरणे । सु.उ. ।

स्रंसिनीफलः । पुं । शिरीषवृत्ते । श.मा. ।

स्रंसी (इन्) । पुं । पीलुवृत्ते । आक्‌रोट । भा. । पूगवृत्ते । गुपारि गाछ । वै.निघ. ।

स्रक् (ज्) । स्त्री । मालायां । फूलेर माला । अम. ।

स्रद्रू । स्त्री । वातकर्म्मणि । शब्दकल्पः ।

स्रवः । पुं । मूत्रे । रा.नि.व.१८ ।

स्रवणम् । क्ली । मूत्रे । रा.नि.व.१८ । घर्म्मे । चरणे । श.र. । व्याक. । [लोके । वै.निघ. ।

स्रवत्तोया । स्त्री । रुदन्तीवृत्ते । रुदन्तीति

स्रवद्गर्भा । स्त्री । पतितगर्भायां गवि । अम. ।

स्रवन्ती । स्त्री । ओषधिविशेषे, श्रावण्याम् । मुण्डीरी । मे. । [ह.चि.महाद्रावके ।

स्रवन्तीपतिफेनः । पुं । समुद्रफेणे । सं.सी-

स्रवा । स्त्री । जीवन्त्यां । वै.निघ. । मूर्व्वायां । भ.टी.रा. ।

स्रष्टा (सृ) । पुं । वेधे । वै.निघ. ।

स्रस्ताङ्गता । स्त्री । शिथिलाङ्गतायां । निःसहायावयवतायां । मा.ज्व.नि. ।

स्रावः । पुं । क्षरणे, निस्यन्दे । रसे । निर्यासे । आटा । वै निघ. ।

स्रावकम् । क्ली । मरिचे । श.च. ।

स्रावणिका (णी) । स्त्री । ऋद्धौ । शब्दकल्पः । मुण्डीर्य्यां । मुण्डीरी । भा.म.कुष्ठ.चि. ।

स्रावी (इन्) । पुं । कर्णपालीगतरोगे । सु.सू. १६अ. । [कम् ।

स्राव्यः । त्रि । स्रावणार्हे, विद्रध्यादौ । वैद्य-

स्रुग्दारुः । पुं । विकङ्कतवृत्ते । बँइची गाछ । र.मा. । [च. ।

स्रुघ्नी । स्त्री । स्वर्जिकाक्षारे । साजिमाटी । है.

स्रुता । स्त्री । हिङ्गुपत्र्याम् । श.च. ।

स्रुवतरुः (द्रुमः) । पुं । विकङ्कतवृत्ते । बँइची गाछ । वै.निघ. । रा.नि.व.६ ।

स्रुव(वा)वृक्षः । पुं । विकङ्कतद्रुमे । बँइची गाछ । रा.नि.व.६ । वा.सू.१५अ.आरग्वधादि. । "निम्बाहृतामधुरसास्रुववृक्षपाठः ।"

स्रुवा । स्त्री । शल्लकीवृत्ते । मे. । मूर्व्वायाम् । मूर्गा । प.मु. ।

स्रोतः (स्) । क्ली । जलवेगे । मे. । छिद्रे । रा.नि.व.१८ । देहस्थनवद्वारेषु । "यैर्मार्गैर्देहस्थमलादयः सञ्चरन्ति तानि स्रोतांस्युच्यन्ते ।" भा. । उक्तञ्च —"मूलात् खादन्तरं देहे प्रसृतन्त्वभिवाहि य-

म् । स्रोतस्तदिति विज्ञेयं शिराधमनिवर्ज्जितम् ॥" सु.शा.६अः । तानि नव श्रवणनयनवदनघ्राणगुदमेढ्राणि नराणां बहिर्मुखान्येतान्येव स्त्रीणामपराणि च त्रीणि हे स्तनयोरधस्ताद्रक्तवहञ्च । सु.शा.५अ. । इन्द्रिये । मे. । [मा.नि. ।

स्रोतःपाकः । पुं । मुखनासिकादिपाके ।

स्रोतोजः । पुं । जलवेतसे । क्ली । स्रोतोऽञ्जने, सौवीराञ्जने । वै.निघ. ।

स्रोतोऽञ्जनम् । क्ली । सौवीराञ्जने । শ্বেত সুর্ম্মা । भा. । सु.सू.३८अ.प्रियङ्ग्वादि.ङ. । स्वनामख्याताञ्जनविशेषे । ऽजनाञ्जन, কাল সুর্ম্মা । र.मा. । सु.चि.१७अः । तत् श्वेतकृष्णलोहितभेदेन त्रिधा । लक्षणं –"वल्मीकशिखराकारं भिन्ननीलाञ्जनप्रभं । घृष्टे च गैरिकावर्णं श्रेष्ठं स्रोतोऽञ्जनञ्च तत् ॥" गुणाः – शीतलं कटु कषायं क्रमिघ्नं रसायनं रसे योग्यं लन्यवृद्धिकरञ्च । रा.नि.व.१३ । "किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम् ।" भा. । [निघ. ।

स्रोतोनदीभवम् । क्ली । स्रोतोऽञ्जने । वै.

स्वः । पुं । आत्मनि । क्ली । स्वे । त्रिका. ।

स्वकुलक्षयः । पुं । मत्स्ये । हे.च. ।

स्वगुप्ता । स्त्री । शूकशिम्ब्याम् । আলাকুশী । श.र. । वै.निघ.कास.चि.चूषणादिघृते । भा.म.३भ.मू.कृ.चि. । श्वेतलज्जालुकायाम् । रा.नि.व.५ ।

स्वगृहः । पुं । कलिकारपक्षिणि । जटा. ।

स्वग्रहः । पुं । बालरोगभेदे । निदा. ।

स्वच्छः । पुं, क्ली । स्फटिके । रा.नि.व.१३ । बदरवृक्षे । কুল গাছ । रा.नि.व.११ । क्ली । रौप्यमाक्षिके । विमलानामोपधातौ । मौक्तिके । रा.नि.व.१३ । अभ्रधातौ । वै.निघ. । त्रि । रोगमुक्ते । श.र. । [के । वै.निघ. ।

स्वच्छधातुः । पुं । कर्पूरकमणौ । रौप्यमाक्षि-

स्वच्छन्दभैरवः । पुं । रसोऽयं सन्निपातादिनवज्वरे हितः । पाठः—"ताम्रभस्म विषं हेमः सप्तधा भावितं रसैः । गुञ्जार्द्धं सन्निपातादिनवज्वरहरं परम् ॥" তামা, বিষ সমভাগ । ধুতুরাপত্ররসে ৭ ভাবনা দিবে । द्वितीयः—"रसगन्धकयोः शाणं प्रत्येकं कज्जलीकृतं । सुवर्णमाक्षिकं शाणं शुद्धचैकत्र कारयेत् । रुद्रजटा निर्गुण्डी च नागदामलकी तथा । विषकण्टालिका चैषां स्वरसं शाणमात्रकम् । दत्त्वा संशोध्य संमर्द्य कार्य्या मुद्गसमा वटी ॥" आर्द्रकरसेन पेया । রস, গন্ধক, স্বর্ণমাক্ষিক প্রত্যেকে ৩২ রতি । রুদ্রজটা, নিশিন্দা, হরীতকী, আমলা এবং বিষকাটালিয়া প্রত্যেকে ৩২ রতি রসে সংশোধন করিয়া মর্দনপূর্ব্বক মুগসমান বটী করিবে । र.सा.सं. । अन्यः ज्वरे—"समभागांश संगृह्य पारदामृतगन्धकान् । जातीफलस्य भागार्द्धं दत्त्वा कुर्य्याच्च कज्जलिम् । सर्व्वार्द्धं पिप्पलीचूर्णं खल्लयित्वा निधापयेत् । गुञ्जाद्वयं नयस्यापि नागवल्लीदलैः सह ॥" পারা, বিষ, গন্ধক প্রত্যেকে ২ তো. জায়ফল ১ তো. পিপুলচূর্ণ ৩।০ তো. । भैष. । अन्यः वातव्याधौ—"शुद्धसूतं मृतं लौहं ताप्यगन्धकतालकम् । पथ्याग्निमन्थनिर्गुण्डी त्र्यूषणं टङ्कणं विषम् । तुल्यांशं मर्दयेत् खल्ले दिनं निर्गुण्डिकाद्रवैः । मुण्डीद्रवैः दिनैकन्तु द्विगुञ्जां वटकीकृताम् ॥" শুদ্ধপারা, গন্ধক, লৌহ, স্বর্ণমাক্ষিক, হরীতকী, আগগস্ত, নিশিন্দামূল, শুঁট, পিপুল, মরিচ, সোহাগার খৈ, বিষ প্রত্যেকে সমভাগ নিশিন্দা ও আদার রসে এক দিন গাড়িয়া ২ রতি পরিমাণ বটী করিবে । रस.र. ।

स्वच्छपत्रम् । क्ली । अभ्रकधातौ । অভ্র । हे.च. । [नि.व.१३ ।

स्वच्छवालुकम् । क्ली । विमलाधातौ । रा.

स्वच्छमणिः । पुं । स्फटिके । रा.नि.व.१३ ।

स्वच्छा । स्त्री । श्वेतदूर्व्वायाम् । रा.नि.व.८ ।

स्वजम् । क्ली । रुधिरे । मे. । पुं । पुत्रे । घर्म्मे । मे. । स्त्री (जा) । कन्यायां । त्रि । आत्मजाते ।

स्वज्ञः । पुं । अश्वमनुष्ये । शब्दकल्पः ।

स्वदनम् । क्ली । भोजने । हे.च. । लौहे । रा.नि.व.१३ ।

स्वदिः । स्त्री । भक्षणे । रा.नि.व.२० ।

स्वधाप्रियः । पुं । कृष्णतिले । श.र. ।

स्वधालता । स्त्री । लताभेदे । चि.क्र.क.प्रद.चि. ।

स्वनिताह्वयः । पुं । तण्डुलीयशाकक्षुपे । रा.नि.व.५ । [श.र. ।

स्वनोत्साहः । पुं । खड्गिनि । गাণ্ডার ।

स्वपनम् । क्ली । निद्रायाम् । श.र. ।

स्वपिण्डा । स्त्री । पिण्डखर्ज्जूरे । रा.नि व.११ ।

स्वप्नः । पुं । निद्रायाम् । अम. । निद्रितस्य ज्ञाने । স্বপন । दर्शने । मे. । [श.च. ।

स्वप्नकृत् । क्ली । सुनिषण्णकशाके । শুশুনিশাক ।

स्वप्नक् । त्रि । निद्रालौ । अम. ।

स्वप्नदर्शनम् । क्ली । निद्रावस्थायां दर्शने । স্বপন দেখা । तल्लक्षणं यथा—"पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः । रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान् । करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते । अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते ॥" सु.शा ४अ. ।

स्वप्नदोषः । पुं । स्वप्ने रेतःस्खलने । शब्दकल्पः ।

स्वप्ननाशः । पुं । निद्राविरहे । मा.ज्व.नि. ।

स्वप्ननित्यः । त्रि । नित्यं निद्रागमनशीले । स्वप्नदर्शनशीले । च.शा.८अ. । [रा.नि.व.९ ।

स्वभद्रा । स्त्री । गाम्भारीवृक्षे । গাম্ভার গাছ ।

स्वभावः । पुं । शक्तौ । प्रकृतौ । वै.निघ. ।

स्वभावबलप्रवृत्तः । त्रि । क्षुत्पिपासाजरामृत्युप्रभृतिषु आधिदैविकरोगेषु । ते अपि द्विधा कालकृता अकालकृता च । तत्र परिरक्षणकृताः कालकृताः, अपरिरक्षणकृता अकालकृताश्च । सु.सू.२४ ।

स्वयङ्गुप्ता । स्त्री । कपिकच्छ्वां । আলাকুশী । रा.नि.व.३ । सु.चि.३७अ. । च.द.कास.चि.अगस्त्यहरीतक्याम् । [२९अ. ।

स्वयम्प्रभः । पुं । तन्नामसोमलताभेदे । सु.चि.

स्वयम्भुवः । पुं । वनमुद्गे । মুগানী । वै.निघ. । स्त्री (वा) । धूम्रपत्रायां । তামাক । रा.नि.व.५ । लिङ्गिन्याम् । शिवलिङ्गिनी लता । माषपर्ण्यां । মাষাণী । रा.नि.व.३ ।

स्वयम्भूः । पुं । माषपर्ण्याम् । মাষাণী । लिङ्ग्याम् । शिवलिङ्गी लता । रा.नि.व.३ ।

स्वरः । पुं । शब्दे । अम. । सुवर्णे । वै.निघ. । नासावायौ । मे. ।

स्वरघ्नः । पुं । स्वरनाशकगलरोगभेदे । तस्य लक्षणं यथा—"योऽतिप्रताम्यन् श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः । कफोपदिग्धेष्वनिलायनेषु ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥" सु.नि.१६अ. ।

स्वरभङ्गः (भेदः) । पुं । स्वरनाशकरोगविशेषे । निदानादि यथा—"अत्युच्चभाषणविषाध्ययनाभिघातसन्दूषणैः प्रकुपिताः पवनादयस्तु । स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः । वातेन कृष्णनयनाननमूत्रवर्चा भिन्नस्वरं वदति गर्द्दभवत् खरञ्च । पित्तेन पीतनयनाननमूत्रवर्चा ब्रूयाद्गलेन स च दाहसमन्वितेन । ब्रूयात्कफेन सततं कफरुद्धकण्ठः स्वल्पं शनैर्वदति चापि दिवा विशेषात् । सर्व्वात्मके भवति सर्व्वविकारसम्पत् तच्चाप्यसाध्यमृषयः स्वरभेदमाहुः । धूमे(मे)त वाक् चयकृते चयमाप्नुयाच्च वागेष चापि हतवाक् परिवर्जनीयः । अन्तर्गतस्वरमलक्ष्यपदं चिरेण मेदोन्वयाद्वदति स्निग्धगलस्तृषार्त्तः ॥" मा.नि. । "वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकं । कफे सक्षारकटुकं क्षौद्रं केवलमिष्यते ॥" सं. ।

स्वरभङ्गी (इन्) । पुं । पक्षिविशेषे । श.र. ।

स्वरसः । पुं । आर्द्रद्रव्यपेषणजरसे । "यन्त्रप्रपीड़नाद्द्रव्यं रसः स्वरस उच्यते ।" च. । एतदलाभे शुष्कद्रव्यम् अष्टगुणतोये पक्त्वा पादावशेषो ग्राह्यः । प.प्र.१ख. । तस्य मात्रार्द्धपलम् । "आहतात्तत्क्षणाकृष्टाद्द्रव्यात् क्षुण्णात् समुद्भवः । वस्त्रनिष्पीड़ितो यः स्यात् रसः स्वरस उच्यते ॥" शार्ङ्ग.म.१अ. । स्वरसविधिः—"कुड़वं चूर्णितं द्रव्यं प्रक्षिप्तं द्विगुणे जले । अहोरात्रं स्थितं तस्माद्भवेत् स्वरस उच्यते ॥ स्वरसस्य गुरुत्वेन शुक्तिमात्रं प्रदापयेत् । वह्निसिद्धं रसञ्चैव पलमात्रं प्रदापयेत् ॥ मधुश्वेतागुड़क्षीरजीरकं लवणं तथा । घृतं तैलं च चूर्णञ्च कोलमात्रं रसे न्यसेत् ॥" कृष्णात्रेयः ।

स्वरसा । स्त्री । कपित्थपत्रायां । वै.निघ. ।

स्वरसादः । पुं । स्वरभङ्गे । रा.नि.व.२० ।

स्वरसादिः । त्रि । कषाये । वै.निघ. ।

स्वरहा (न्) } **स्वरघ्नः** } पुं । स्वरभङ्गे । रा.नि.व.२० ।

स्वरामकः । पुं । अक्षोटवृक्षे । आक्रोडगाछ । वै.निघ. ।

स्वरालुः । पुं । वचायाम् । श.च. ।

स्वरुः । पुं । इषिकभेदे । शब्दकल्प: ।

स्वर्गपुष्पम् । क्ली । लवङ्गे । वै.निघ. ।

स्वर्गलोकेशः । पुं । शरीरे । जटा. ।

स्वर्जः (चारः) पुं । सर्ज्जिक्षारे । च.द.प रिणामशूले । "हिङ्गुप्लवचास्वर्ज्ज ।"

स्वर्ज्जिः (कः) । पुं । स्वर्ज्जिक्षारे । साजिमाटी । रा.नि.व.६ । यवक्षारे । जोवा । भा. ।

स्वर्ज्जिकापाक्यः । पुं । स्वर्ज्जिक्षारे । वै.निघ.।

स्वर्ज्जि(का)चारः । पुं । (Coroxylon griffithii.) Panjab salt wort or Sajji. स्वनामकक्षारे । साचिक्षार, साजिमाटी । हिं सांजीखार, कङ्गणखार । गुणाः—कटुरुष्णः तीक्ष्णः वातकफघ्नः गुल्माध्मानकृमिघ्नः व्रणोदरघ्न श्च । रा.नि.व.६ । "यवक्षारो जयेदर्शःश्वासान् वातकफामयान् । गुल्महृद्ग्रहणीपाण्डुप्लीहानाह-गलामयान् । तस्मादल्पान्तरगुणः स्वर्ज्जिकाक्षार उच्यते ॥" राज. । [रा.नि.व.६ ।

स्वर्ज्जी (न्) । पुं । स्वर्ज्जिक्षारे । साचिक्षार ।

स्वर्णम् । क्ली । स्वनामप्रसिद्धधातौ । सोणा । धुस्तूरे । अम. । वै.निघ.२भ.चर्याच.कालान्तकर-से । नागकेसरपुष्पे । नागेश्वर फूल । गौरसुवर्ण-शाके । सोणानटिया शाक । रा.नि.व.७।१० । "पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम् । मरीचिराङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । व-सिष्ठश्चेति सप्तैते कीर्त्तिताः परमर्षयः ॥ पत्नीर्वि-लोक्य लावण्यलक्ष्मीसम्पन्नयौवनाः । कन्दर्पदर्पवि-ध्वस्तचेतसो जातवेदसः । पतितं यद्धरापृष्ठे रेतस्त-द्धेमतामगात् ॥ कृत्रिमञ्चापि भवति तद्रसेन्द्रस्य वे-धतः ॥" इति स्वर्णोत्पत्तिः । "दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् । तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥" इति परीक्षा । "स्वर्ण-तारारताम्रायस्पत्राण्यग्नौ प्रतापयेत् । निषिञ्चेत्त-प्ततानि तैले तक्रे गवां जले । काञ्जिके च कुल-त्थानां कषाये सप्तधा पृथक् । एवं स्वर्णादिलो-हानां विशुद्धिः संप्रजायते ॥" पत्तलीकृतपत्राणि अग्नौ तापयित्वा तप्तानि तैले तक्रे काञ्जिके गोमू-त्रे कुलत्थकषाये निक्षिप्निर्वाप्य शोधयेत् । एवमे-वान्येषां धातूनामपि शोधनं कार्य्यम् ॥ इति शोध-नम् । मारणं यथा—स्वर्णस्य एकं भागं पारदस्य च भागद्वयम् अम्लेन मर्दयित्वा गोलकसमं गन्धक-चूर्णं तदध उपरि च निधाय शरावसंपुटे निरुध्य त्रिंशद्वनकरीषैः चतुर्दश पुटान् दद्यात् । "शिला-गन्धार्कदुग्धाक्ता स्वर्णाद्याः सप्त धातवः । म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा ॥" शिला मनःशि-ला । एषां चूर्णादिभिः पत्राणि लेपयित्वा गज-पुटैः पचेत् । अथवा रसकज्जलिकया केवलेन वा रसेन स्वर्णपत्रं लिप्त्वा हिङ्गुहिङ्गुलसिन्दूरमनःशि-लाभिः स्वर्णसमाभिर्मेलयित्वा धुस्तूररसेन घनं म-र्दयित्वा गोलकं कुर्य्यात् । ततो हण्डिकामध्ये सं-स्थाप्य शरावेणाच्छाद्य वह्निलेपं दत्त्वा पलाशभस्म-ना पूरयेत् । ततो दिनद्वयं गाढ़ाग्निं दद्यादिति । र.सा.सं. । गुणाः—"सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् । स्वादु तिक्तञ्च तुवरं पाके च स्वादु पिच्छलम् । पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्र-दम् । हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत् । विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित् । बलं स-वीर्य्यं हरते नराणां रोगव्रजान् शोषयतीह काये । असौख्यकारञ्च सदा सुवर्णमशुद्धमेतन्मरणञ्च कु-र्य्यात् । असम्यक् मारितं स्वर्णं बलं वीर्य्यञ्च नाश-येत् । करोति रोगान् मृत्युञ्च तद्धन्याद्यत्नतस्ततः । भा.पू.धा.व. । [किङ्किणीतैले ।

स्वर्णकम् । क्ली । धुस्तूरफले । भैष.शिरोरो.चि.

स्वर्णकणः । पुं । कणगुग्गुलौ । रा.नि.व.१२।

स्वर्णकण्डूः । स्त्री । सर्ज्जरसे । धुनो, रजन । वै.निघ. ।

स्वर्णकमलम् । क्ली । रक्तपद्मे । वै.निघ. ।

स्वर्णकेतकी । स्त्री । रक्तकेतकीवृक्षे । सोणा-केया । पुष्पगुणाः—वर्णकरं केशसौगन्ध्यकरं स्व-र्णवर्णं मदनोन्मत्ततावाहुल्यकरं सौख्यकारि च । केतकीस्तनः, अतिशीतलः कटुः पित्तकफघ्नः रसा-यनः बल्यः देहदार्ढ्यकरश्च । रा.नि.व.१० ।

स्वर्णगैरिकम् । क्ली । रक्तगैरिके । রক্ত গেরিমাটী । वै.निघ. । [जटा. ।

स्वर्णचूड़ः । पुं । पक्षिविशेषे । চাষ পক্ষী ।

स्वर्णजम् । क्ली । स्वर्णमाक्षिके । वै.निघ. । वङ्गे । हे.च. ।

स्वर्णजातिका (ती) । स्त्री । (Jasminum revolutum.) पीतजातीपुष्पवृक्षे । পীত চামিলী । वै.निघ. ।

स्वर्णजीवन्तिका (न्ती) । स्त्री । पीतपुष्पजीवन्त्याम् । স্বর্ণজীবন্তী । हिं सोनाजीवइ । गुणाः—वृष्या मधुरा चक्षुष्या शिशिरा वातपित्तरक्तदाहघ्नी च । रा.नि.व.३ ।

स्वर्णजीवा । स्त्री । स्वर्णजीवन्त्याम् । वै.निघ.।

स्वर्णदी । स्त्री । स्वर्गगङ्गायाम् । अम. । वृश्चिकाल्याम् । বিছাতী । रा.नि.व.५ ।

स्वर्णदुग्धा । स्त्री । स्वर्णक्षीरिकायाम् । সোণাথিরুই, শেয়ালকাঁটা । वै.निघ. ।

स्वर्णद्रुः । पुं । महारग्वधवृक्षे । বড় সোন্দাল । रा.नि.व.९ ।

स्वर्णधातुः । पुं । स्वर्णगैरिके । स्वर्णे । वै.निघ.।

स्वर्णनिभम् । क्ली । स्वर्णगैरिके । স্বর্ণ গেরিমাটী । वै.निघ. । [পাত । रस.चि. ।

स्वर्णपत्रम् । क्ली । पत्तलसुवर्णपत्रे । সোণার

स्वर्णपर्चिका । स्त्री । सुवर्णमुख्याम् । সোণামুখী । भैष.शूल.चि.हरीतकीखण्डे ।

स्वर्णपर्णी । स्त्री । स्वर्णजीवन्त्यां । वै.निघ. ।

स्वर्णपर्पटी । स्त्री । ग्रहण्यधिकारे रसः । यथा —पारदस्य पलं स्वर्णस्य तोलकम् एकत्रामिश्रणान्मर्दयित्वा तेन सह गन्धकस्य पलं मिश्रयित्वा लौहखल्ले मर्द्दयित्वा कज्जलिः कार्य्या । अथ यथाविधि पर्पटी पाच्या । भैष. । [र.मा. ।

स्वर्णपाटकः । पुं । टङ्गणक्षारे । সোহাগা ।

स्वर्णपारे(ले)वतम् । क्ली । द्वीपान्तरखर्ज्जूरे । महापारेवतफले । रा.नि.व.११ ।

स्वर्णपुष्पः । पुं । वाबलवृक्षे । বাবলা গাছ । श.च. । आरग्वधवृक्षे । সোন্দাল গাছ । रा.नि.व.९ । कपित्थवृक्षे । कुष्माण्डलतायां । वै.निघ. । स्वर्णचम्पकवृक्षे । रा.नि.व.११ । स्त्री (ष्पा) । लाङ्गलिकौषधौ । বিষলাঙ্গুলিয়া । सातलायाम् । পীতদুগ্ধ মনসা । रा.नि.व.४ । मेषशृङ्ग्याम् । মেড়াশিঙে । वै.निघ. । [ণালু । वै.निघ. ।

स्वर्णपुष्पध्वजा । स्त्री । स्वर्णुलीवृक्षे । সো-

स्वर्णपुष्पिका । स्त्री । लाङ्गलिकौषधौ । বিষলাঙ্গুলিয়া । रा.नि.व.४ । स्वर्णयूथिकायाम् । वै.निघ. ।

स्वर्णपुष्पी । स्त्री । स्वर्णकेतक्यां । रा.नि.व.१०। सातलायां । रा.नि.व.४ । आरग्वधवृक्षे । সোণালু । श.च. ।

स्वर्णफलम् । क्ली । धुस्तूरफले । ধুতুরাবীজ । भैष.महालक्ष्मीविलासरसे । स्त्री (ला) । स्वर्णकदल्याम् । रा.नि.व.११ । [अ.सा.चि.महारसे ।

स्वर्णबीजम् । क्ली । धुस्तूरबीजे । वै.निघ.२भ.

स्वर्णभूमिः । स्त्री । मधुरवल्कले । দারুচিনি । वै.निघ. । [रिके । वै.निघ. ।

स्वर्णभूषणम् । क्ली । आरग्वधवृक्षे । स्वर्णगै-

स्वर्णभृङ्गारः । पुं । पीतभृङ्गराजे । रा.नि.व.४।

स्वर्णमण्डनम् । स्वर्णगैरिके । वै.निघ. ।

स्वर्णमाता । स्त्री । महाजम्बूवृक्षे । বড় জাম গাছ । वै.निघ. ।

स्वर्णमाक्षिकम् । क्ली, पुं । स्वनामख्यातोपधातुविशेषे । স্বর্ণমাক্ষিক । अस्य स्वर्णसाहित्यात्तथाभिधानम्—“किञ्चित् सुवर्णसाहित्यात् स्वर्णमाक्षिकमुच्यते ।” “उपधातुः सुवर्णस्य किञ्चित् स्वर्णगुणान्वितम् । तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम् ॥ किन्तु तस्यानुकल्पत्वात् किञ्चिदूनगुणास्ततः । न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके । द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणा यतः ॥” गुणाः—“सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम् । चक्षुष्यं वस्तिरुक्कण्ठपाण्डुमेहविषोदरान् । अर्शः शोथं विषं कण्डूं त्रिदोषमपि नाशयेत् ॥” अशुद्धं तत् मन्दाग्निं बलहानिं विष्टम्भं नेत्ररोगं कुष्ठादिकञ्च करोति । भा.पू.१भ.धा.व । “सिन्धूद्भवस्य भागैकं द्विभागं माक्षिकस्य च । मातुलुङ्गरसैर्वापि जम्बीरोत्थद्रवेण वा । कृत्वा तदा

यसि पात्रे लौहदर्व्या च चालयेत्। सिन्दूराभं भवेद्यावत्तावन्मृदग्निना पचेत्। संशुद्धं माक्षिकं ज्ञेयं सर्व्वरोगेषु योजयेत् ॥" इति तच्छुद्धिः। परीक्षा यथा —"भङ्गे सुवर्णसङ्काशो मनाक्‌कृष्णच्छविर्बहिः। हद्दर्ण इति ख्यातो माक्षिकोऽत्र प्रशस्यते ॥" योगर.।

स्वर्णयूथिका (थी)। स्त्री। पीतयूथिकायां। श.र.। [বেঙা পিতল। वै.निघ.।

स्वर्णरीतिः (ती)। पुं, स्त्री। राजपित्तले।

स्वर्णलता। स्त्री। स्वर्णजीवन्त्यां। ज्योतिष्मतीलतायाम्। লতাফট্‌কী। रा.नि.व २।

स्वर्ण(र्णु)ली। स्त्री। आरग्वधभेदे। শোনালু গাছ। हिं आमलटास्। मं गुड़मलवर। तैं येयलु, पंकनिषार। बम्. सोणली। गुणाः— कटुः शीता कषाया व्रणघ्नी च। रा.नि.व ४।

स्वर्णवर्णः। पुं। कणगुग्गुलौ। रा.नि.व.१२। वंशपत्रहरिताले। स्वर्णगैरिके। वै.निघ.। स्त्री। हरिद्रायाम्। दारुहरिद्रायां। रा.नि.व.६।

स्वर्णवल्कलः। पुं। शोणाकवृक्षे। श.च.।

स्वर्णवल्ली। स्त्री। स्वर्णलतायाम्। লতাবিশেষ। तें वेकुडुतीगे। गुणाः—शिरःपीड़ां हन्ति त्रिदोषं हन्ति दुग्धदा च भवति। भा.। रा.नि.व.३। स्वर्णुलीवृक्षे। শোন্দাল গাছ। वै.निघ.। स्वर्णजीवन्त्यां। रा.नि.व.३।

स्वर्णशेफालिका। स्त्री। पीतशेफालिकायां। चि.क्र.क.स्वीरो.चि.। आरग्वधवृक्षे। সোন্দাল গাছ। श.मा.।

स्वर्णसिन्दूरम्। क्ली। रससिन्दूरविशेषे। पचौ—शुद्धरसः ८ तो. शुद्धगन्धकः ८ तो. स्वर्णं २ तो. वटाङ्कुररसेन प्रहरं कुमारीरसेन च प्रहरं मर्द्दयित्वा काचकूप्यां निधाय बालुकायन्त्रेण पचेत्। शीते कूपीगलस्थपीतरजांसि गृह्णीयात्। भैष.। रस.चि.। [च.सू.२च.।

स्वर्णहालिः। पुं। चतुरङ्गुलौ। শোন্দাল।

स्वर्णक्षीरिणी (री)। स्त्री। (Agremone mexicana.) स्वनामख्यातवृक्षे। সোণাখিরুই, শিয়ালকাঁটা। हिं भेरवन्द। मं पिसौराभेदु। कं चिक्कणिक्केभेदु। बम्. पिंवलाधोत्रा। ता. ब्रमदण्डुविरद्र। च.सू.४च.। तन्मूलं चोक् इति हिन्दी। गुणाः—"……रेचनी तिक्ता भेदिन्युत्क्लेशकारिणी। क्रमिकण्डूविषानाहकफपित्तास्रकुष्ठनुत् ॥" भा.कुष्ठ.चि.। [ল। रा.नि.व.९।

स्वर्णाङ्गः। पुं। महारग्वधवृक्षे। বড় সোন্দাল।

स्वर्णाभम्। क्ली। हरिताले। वै निघ.।

स्वर्णाभा। स्त्री। पीतपुष्पयूथिकायाम्। वै. निघ.। [शब्दकल्पः।

स्वर्णारिः। पुं। शीषके। वै.निघ.। गन्धके।

स्वर्णाह्वा। स्त्री। स्वर्णक्षीर्य्याम्। শিয়ালকাঁটা। वै निघ.।

स्वर्णिका। स्त्री। धन्याके। धनिया। वै.निघ.।

स्वर्भानवः। पुं। गोमेदरत्ने। रा.नि.व.१३।

स्वर्वैद्यौ। पुं। अश्विनीकुमारयोः। अम.।

स्वल्पः। पुं। नखीनामगन्धद्रव्ये। नखी। वै. निघ.।

स्वल्पकन्दः। पुं। कसेरौ। কেশুর। वै.निघ.।

स्वल्पकाष्ठः। पुं,क्ली। श्वेतालौ। शाँक् आलू। वै.निघ.। [चे। रक्तकाञ्चन। रा.नि.व.१०।

स्वल्पकेशरः (री[इन्])। पुं। कोविदारवृ-

स्वल्पकेशी। स्त्री। भूतकेशे। कालदूर्व्वा। श.च.। [ণ। वै निघ.।

स्वल्पघण्टा। स्त्री। आरण्यशणवृक्षे। वन श-

स्वल्पचटकः। पुं। क्षुद्रचटके। मनुयां पाखी। वै.निघ.। [য়াল। वै निघ.।

स्वल्पजम्बूकः। पुं। क्षुद्रशृगाले। थैंाकृशि-

स्वल्पतरुः। पुं। केमुककन्दे। কেঁউ গাছ। वै.निघ.। [মণ্ডলবিশেষ। र.मा.।

स्वल्पपत्रकः। पुं। गौरशाके, मधूकविशेषे।

स्वल्पफला। स्त्री। हवुषाभेदे। হবুষবৃক্ষবিশেষ। हवुषासदृशगुणः। रा.नि.व.४।

स्वल्परूपा। स्त्री। आरण्यशणवृक्षे। বনশণ। वै निघ.।

स्वल्पवर्त्तुलः। पुं। कलायवृक्षे। वै.निघ.।

स्वल्पवल्कला । स्त्री । तेजोवत्यां । তেজবল। वै.निघ. । [निघ. ।

स्वल्पविटपः । पुं । केमुककन्दे । কেঁউ । वै.

स्वल्पशब्दा । स्त्री । ह्रस्वशणवृक्षे । বন শণ। वै.निघ. । [श । वै.निघ. ।

स्वल्पशृगालः । पुं । रोहितकमृगे । বনরো-

स्वल्पसङ्घातवीर्य्यः । पुं । स्वल्पचटके । শর-মনুয়া পাখী । वै.निघ. । [ख. ।

स्ववहा । स्त्री । त्रिवृति । তেউড়ী । च.सू.४

स्वसंज्ञा । स्त्री । अन्यशास्त्रासामान्यसंज्ञायाम् । यथा—मिथुनमिति मधुसर्पिषोर्ग्रहणम् । सु.उ. ६५अ. ।

स्वसा (सृ) । स्त्री । तेजोवत्यां । वै.निघ. ।

स्वस्ति । क्ली । पुष्पे । वै.निघ. ।

स्वस्तिकः । पुं, क्ली । सुनिषण्णकशाके । শুশুনি শাক । भा.पू.१भ.शा.व. । वा.चि.६अ. । रसोने । রসুন । त्रिका. । पिष्टकविकारे । विश्व. । पूर्णकुम्भादौ । सु.सू.१०अ.। तन्नामकयन्त्रे । तच्चतुर्विंशतिविधम् अष्टादशाङ्गुलपरिमाणञ्च । तेषामाकाराश्च यथाक्रमं सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्जारशृगालमृगैर्वारुकाककङ्ककुररचासभासशशघात्युलूकचिल्लश्येनगृध्रक्रौञ्चभृङ्गराजाञ्जलिकर्णावभञ्जननन्दिमुखमुखतुल्या विनष्टशल्योद्धरणार्थम् । सु.सू.७अ. । सन्धिकूर्च्चादिषु व्रणबन्धनभेदे । सु.सू.१८अ.। "स्वस्तिकाकृतिमासीव्य पश्चादावेष्ट्य बध्यते ।" इति लक्षणम् । तण्डुलचूर्णादिकृतत्रिकोणाकारः स्वस्तिकः तस्येवाकृतिर्यस्य स स्वस्तिकाकृतिः । स्वस्तिकाकारं कृत्वा वेष्टनानन्तरं यद्बन्धनं, स बन्धः स्वस्तिकः । सु.सू.१८अ ड. । सु.चि.३अ.। लङ्केश्वालौ । त्रिका. । मूलके । स्त्री (का) । जातीवृक्षे । वै.निघ. ।

स्वस्तिकाह्वयः । पुं। तण्डुलीयक्षुपे । वै.निघ.।

स्वस्थः । त्रि । सुस्थे, समदोषधात्वग्नौ । "समदोषः समाग्निश्च समधातुमलक्रियः । प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥" भा. ।

स्वस्थवृत्तम् । क्ली। येन विधिना स्वस्थस्तिष्ठति तदाचरणे । यथा—"यस्मिन् यस्मिन् ऋतौ ये ये दोषाः कुप्यन्ति देहिनां । तेषु तेषु प्रदातव्या रसास्ते ते विजानता । बलिनः शीतसंरोधाद्धेमन्ते प्रबलोऽनिलः । सेवेतातो हिमे स्निग्धा स्वाद्वम्ललवणान् रसान् । गोधूमपिष्टं मांसेक्षुक्षीरोत्थविकृतीः सुरां । नवमन्नं वसां तैलं शौचकार्य्ये सुखोदकं । युक्त्यार्ककिरणान् स्वेदं पादत्राणञ्च सर्व्वदा । प्रावाराजिनकौषेयप्रवेणीकुथकास्तृतम् । उष्णस्वभावैर्लघुभिः प्रावृत शयनं भजेत् । अङ्गारतापसन्तप्तगर्भभूवेश्मनि प्रियां । पीवरोरुस्तनश्रोणीमालिङ्ग्य गुरुचर्चितां । अयमेव विधिः कार्य्यः शिशिरेऽपि विशेषतः । तदा हि शीतमधिकं रौक्ष्यं चादानकालजं । कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः। हत्वाग्निं कुरुते रोगानतस्तत्र प्रयोजयेत्। तीक्ष्णं वमननस्यादि कवड़ग्रहमञ्जनं । व्यायामोद्वर्त्तनं धूमं शौचकार्य्ये सुखोदकं । सानुलिप्तश्च कर्पूरचन्दनागुरुकुङ्कुमैः । पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक् । प्रपिबेदासवारिष्टसीधुमाध्वीकमाधवान् । वसन्तेऽनुभवेत् स्त्रीणां काननानाञ्च यौवनम् । गुर्व्वम्लस्निग्धमधुरं दिवास्वप्नञ्च वर्ज्जयेत् । मयूखैर्ज्जगतां तेजो ग्रीष्मे पेपीयते रविः । स्वादुशीतं द्रवं स्निग्धमनुपानं तदा हितम् । शीतं सशर्करं मन्थं जाङ्गलान् मृगपक्षिणः । घृतं पयः सशाल्यन्नं भजन् ग्रीष्मे न सीदति । मध्याह्ने चन्दनार्द्राङ्गः स्वप्याद्धारागृहे निशि । निशाकरकराकीर्णे प्रवाते सौधमस्तके । निवृत्तकामो व्यजनैः पाणिस्पर्शैः सचन्दनैः। सेव्यमानो भजेदास्यां मुक्तामणिविभूषितः । लवणाम्लकटूष्णाणि व्यायामांश्चात्र वर्ज्जयेत् । वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः । भजेत् साधारणं सर्व्वमुष्मणस्तेजनञ्च यत् । आस्थापनं शुद्धतनु जीर्णं धान्यं रसान् कृतान् । जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम् । दिव्यं कौपं शृतञ्चाम्भो भोजनं त्वतिदुर्द्दिने ! व्यक्ताम्ललवणं स्नेहं संशुष्कं क्षौद्रवल्लघु । नदीजलोदमन्थाहःस्वप्नायासातपांस्त्यजेत् । वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः । तप्तानामाचितं पित्तं प्रायः शरदि कुप्यति । तज्जयाय घृतं तिक्तं विरेको रक्तमोक्षणं । तिक्तं स्वादुकषायञ्च क्षुधितोऽन्नं भजेल्लघु । इक्षवः शालयो मुद्गाः सरोऽम्भः क्वथितं पयः । शरद्येतानि पथ्यानि प्रदोषे चेन्दुरश्मयः । शारदानि च माल्यानि वासांसि विमलानि च । तुषारक्षारसौ-

स्निग्धदधितैलवसातपान् । तीच्णमद्यदिवास्वप्नपुरो वातान् परिवर्जयेत् । शीते वर्षासु चाद्यांस्त्रीन् वस-न्तेऽन्त्यान् रसान् भजेत् । स्वादुं निदाघे शरदि स्वादुतिक्तकषायकान् । शरद्वसन्तयो रुचं शीतं घर्म्म-घनान्तयोः । अन्नपानं समासेन विपरीतमतोऽन्यदा । नित्यं सर्व्वरसाभ्यासः स्वस्वाधिक्यमृतावृतौ ॥” च.द.सात्म्याधिकारे । [२१अ. ।

स्वस्यारिष्टः । पुं । स्वस्य मृत्युचिह्ने । ज.द.

स्वादः (नम्) । पुं, क्ली । आस्वादे । रसग्रहणे । व्याक. ।

स्वादुः । पुं । मधुररसे । मिष्टिरस । गुणाः— “रसायनोत्तमो बल्यो रोगवारण उत्तमः । स्निग्धस्य तर्पणो वापि हंहणस्य सजीवनः ॥” अत्रि. १०अ. । गुडे । त्रिका. । जीवकौषधौ । जीवक । जटा. । मधूकवृत्ते । हे.च. । प्रियालवृत्ते । दाड़िम्ववृत्ते । मातुलुङ्गभेदे । कमला लेबु । काम्रवृत्ते । बदरे । वै.निघ. । अगुरुसारे । अगुरु वृक्ष । गुणाः—कटुः कषायोष्णः सधूमामोदवातघ्नः । रा.नि.व.१२ । स्त्री । द्राक्षायाम् । किस्मिस् । अ.टी.भ. । क्ली । सैन्धवलवणे । दुग्धे । वै.निघ. । त्रि । मधुरे । मे. ।

स्वादुकण्टकः । पुं । विकङ्कतवृत्ते । वँइचौ गाछ । भा. । ह्रस्वगोक्षुरके । छोट गोखरी । भा.म.४भ.जात्यादितैले । विकण्टकवृत्ते । रा.नि. व.११ ।

स्वादुकन्दः । पुं । भूमिकुष्माण्डे । श्वेतपिण्डा-लौ । (कः) केमुककन्दे । केँउ गाछ । वै.निघ. । स्त्री । भूमिकुष्माण्डे । रा.नि.व.७ ।

स्वादुका । स्त्री । नागदन्त्यां । हातिशुँड़े । रा.नि.व.५ । [श्चिञः । वै.निघ. ।

स्वादुकोषातकी । स्त्री । मधुरकोशातक्यां ।

स्वादुखण्डः । पुं । गुडे । खण्डे । श.र. ।

स्वादुगन्धच्छदा । स्त्री । कृष्णतुलस्यां । काल तुलसी । वै.निघ. ।

स्वादुगन्धा । स्त्री । रक्तशोभाञ्जने । लाल सजिना । र.मा. । भूमिकुष्माण्डे । भूँइकुमड़ा । जटा. । [वै.निघ. ।

स्वादुगन्धिः । पुं । रक्तशिग्रौ । लाल सजिना ।

स्वादुतिक्तम् । क्ली । पीलुफले । आक्‌रोट । वै.निघ. । [गाछ । वै.निघ. ।

स्वादुतिक्तफलः । पुं । ऐरावतीवृत्ते । लेबू

स्वादुपटोलिका (ली) । स्त्री । मधुरपटोललतायाम् । मिठा पल्‌ता । वै.निघ. ।

स्वादुपत्रः । पुं । स्वादुपटोलिकायाम् । वै. निघ. । [रा.नि.व.५ ।

स्वादुपर्णी । स्त्री । दुग्धिकायाम् । थिरुइ ।

स्वादुपाकफला
स्वादुपाका } स्त्री । काकमाचिकायाम् । केउयाठुँटी, गुड़कामाउली । वै.निघ. । रा.नि.व.४ । [वे । वै.निघ. ।

स्वादुपारे(ले)वतः । पुं । द्वीपान्तरखर्ज्जूरीवृ-

स्वादुपिण्डा । स्त्री । पिण्डीखर्ज्जूरवृत्ते । वै. नि.घ. । [रा.नि.व.६ ।

स्वादुपुष्पः (ष्पी) । पुं,स्त्री । कृष्णकटभीवृत्ते ।

स्वादुपुष्पिका । स्त्री । दुग्धिकायाम् । दुधियां, थिरुइ । वै.निघ. ।

स्वादुफलम् । क्ली । बदरीफले । श.र. । पुं । धन्वनवृत्ते । धामना गाछ । रा.नि.व.६ । स्त्री (ला) । कोशातक्याम् । घोषा । रा.नि.व.७ । कोलिवृत्ते । कुलगाछ । त्रिका. । खर्ज्जूरीवृत्ते । कदल्यां । कपिलद्राक्षायाम् । भा. ।

स्वादुबीजः । पुं । अश्वत्थवृत्ते । वै.निघ. ।

स्वादुमज्जा (न्) । पुं । पर्व्वतपीलौ । आक्‌रोट । जटा. । [खेजुर गाछ । भा. ।

स्वादुमस्तका । स्त्री । खर्ज्जूरीवृत्ते । क्षुद्र

स्वादुमांसी । स्त्री । काकोल्याम् । काँकला । रा.नि.व.३ । [वै.निघ. ।

स्वादुमाषा । स्त्री । माषपर्ण्याम् । माषाणी ।

स्वादुमूलम् । क्ली । गर्ज्जरमूले । गाजरमूल । रा.नि.व.७ ।

स्वादुरसा । स्त्री । काकोल्यां । अम. । मूर्व्वायाम् । वै.निघ. । आम्रातकफले । श.र. । शतावर्य्यां । रा.नि.व.४ । द्राक्षायाम् । मदिरायाम् । हे.च. ।

स्वादुलः । पुं । क्षीरमूर्व्वायाम् । वै.निघ. ।

स्वादुलता । स्त्री । विदार्य्याम् । भूँइकुमड़ा । रा.नि.व.७ ।

स्वादुलुङ्गी । स्त्री । मधुकर्कटिकायाम् । शरबती लेबु, शान्तारा लेबु । मद.व.६ । स्वादुमातुलुङ्गे । वै.निघ. ।

स्वादुवीर्य्यः । पुं । प्रियालवृक्षे । वै.निघ ।

स्वादुशुण्ठी । स्त्री । श्वेतकिणिह्याम् । वै.निघ. ।

स्वादुशुद्ध(स्वच्छ)म् । क्ली । पार्व्वतलवणे । सैन्धव । शब्दकल्पः ।

स्वादुसिञ्चितिकाफलम् । क्ली । काबेलदेशीयफले । सेवफल । वै.निघ. ।

स्वादगुरुः । पुं । मधुररसागुरुवृक्षभेदे । गुणाः—उष्ण आमवातहरः तुवरश्च । राज. ।

स्वादन्नम् । क्ली । स्वादुरसान्ने । गुणाः—"सौमनस्यं बलं पुष्टिमुत्साहं वृद्धिमायुषः । स्वादु सञ्जनयत्यन्नम्...... ॥" भा. ।

स्वादम्लः । पुं । दाड़िमवृक्षे । चिका. । नागरङ्गवृक्षे । नारेङ्गा लेबुर गाछ । राज. । कदम्बवृक्षे । वै.निघ. ।

स्वाद्वी । स्त्री । द्राक्षायाम्, कपिलद्राक्षायाम् । द्राक्षा, काल द्राक्षा । अम. । चिर्भटिकायाम् । फुटी । वै.निघ. । क्षुद्रखर्ज्जूरीवृक्षे । भा. ।

स्वाध्यायः । पुं । वेदाभ्यासे । वै.निघ. ।

स्वान्तम् । क्ली । मनसि । रा.नि.व.१८ ।

स्वापः । पुं । स्पर्शाज्ञाने । असाड़ । सु.नि.५अ. । निद्रायाम् । अम. ।

स्वापतेयम् । क्ली । द्रव्ये । वै.निघ. ।

स्वापाश्रयम् । क्ली । शयनशय्यायां । च.सू.१५अ. ।

स्वामी (इन्) । पुं । पारदे । वै.निघ. ।

स्वाम्युपकारकः । पुं । अश्वे । शब्दकल्पः ।

स्वायम्भुवगुग्गुलुः । पुं । वातरक्ताधिकारे पक्वगुग्गुलौ । पाठः—"अलम्बुषा लौहचूर्णं तयोरर्द्धपले पृथक् । पलत्रयञ्च ताप्यस्य वाकुच्याश्च पलत्रयम् । शिलाजतु तयोस्तुल्यं पलानि दश गुग्गुलोः । सर्व्वाण्येतानि संचूर्ण्य गुड़िकां कारयेद्भिषक् । शाणं कर्षार्द्धकर्षं वा ततः खादेत् भयमतः । जालपादेन विख्यातो नाम्ना स्वायम्भुवो रसः ॥" रस.र. ।

स्वायम्भुवी । स्त्री । ब्राह्मीशाके । वै.निघ. ।

स्वास्थ्यम् । क्ली । यथाप्रकृतित्वे । आरोग्ये । श.र. । वा.चि.१अ. ।

स्वाद्वः । पुं । शल्लकीनिर्यासे । वै.निघ. ।

स्विन्नः । त्रि । कृतस्वेदे । घर्म्मयुक्ते । हला. । पक्वे । व्याक. ।

स्वेदः । पुं । घर्म्मे । घाम । रा.नि.व.१८ । "स्वेदावरोधः सन्तापः ।" मा.नि. । धूपे । भापरा । मे. । स व्याधिविशेषेषु महामध्यमदुर्भवति । स तापोष्मा द्रवोपनाहैनेति चतुर्विधोपायेन साध्यते । पुनश्च रोगभेदेषु त्रयोदश । यथा—सङ्करस्वेदः प्रस्तरस्वेदो नाड़ीस्वेदः परिषेकस्वेदोऽवगाहनस्वेदो जेन्ताकस्वेदः अश्मघनस्वेदः कर्षूस्वेदः कुटीस्वेदो भूस्वेदः कुम्भीस्वेदः कूपस्वेदः होलाकास्वेदश्च । च.सू.१४अ. । ते सर्व्व एव वातहारिणः । "स्वेदौ तापोष्मजौ प्रायः श्लेष्मघ्नौ समुदीरितौ । उपनाहस्तु वातघ्नः पित्तसङ्गे द्रवो हितः । महाबले महाव्याधौ शीते स्वेदो महान् स्मृतः । दुर्ब्बले दुर्ब्बलः स्वेदो मध्यमे मध्यमो मतः । बलासे रूक्षणः स्वेदो रूक्षस्निग्धः कफानिले । कफमेदोवृते वाते कोष्णं गेहं रवेः करान् । नियुद्धं मार्गगमनं गुरु प्रावरणं भयम् । चिन्ताव्यायामभारांश्च सेवेतामयमुक्तये ॥" भा. । व्रणोपक्रमविशेषे, यो रुजावद्दारुणकठिनेषु कार्य्यः । सु.चि.१अ. ।

स्वेदकः । पुं । अयस्कान्तभेदे । कान्तलोह । अयं रसायने श्रेष्ठः । रा.नि.व.१३ ।

स्वेदचूषकः । पुं । शीतलवायौ । शब्दकल्पः ।

स्वेदजः । त्रि । कृमिकीटपिपीलिकादौ । अम. । कान्तलौहे । वै.निघ. ।

स्वेदजशाकम् । क्ली । शाकभेदे । तच्च भूगोमयकाष्ठवृक्षाद्युद्भवं शिलीन्ध्रादिकम् । छाता इति लोके । पोयालछाता । गुणाः—शीता दोषला पिच्छिला गुरवः छर्द्यतीसारज्वरश्लेष्मरोगहराश्च । "श्वेतशुभ्रस्थलीकाष्ठवंशगोव्रजसम्भवाः । नातिदो-

चकराले स्युः शेषास्तेभ्यो विगर्हिताः ॥" भा.पू.१भ.शा.व. । "कृत्तिकासु पलालेषु करीषचितिरिणःजाः । सर्व्वाः संस्वेदजाः शीताः कषायाः स्वादुशीतलाः । गुरवश्छर्द्यतीसारज्वरश्लेष्मामयापहाः । श्वेताः शुचिस्थलीकाष्ठवंशगोव्रजसम्भवाः । नातिदोषकरा ज्ञेयाः शेषास्तेभ्यो विगर्हिताः ॥" राज.।

स्वेदनम् । क्ली । स्वेदे मे. । स्वेदनयन्त्रेण रससंस्कारविशेषे । भा. ।

स्वेदनयन्त्रम् । क्ली । पारदस्वेदनयन्त्रे । (दे'-लायन्त्र । तल्लक्षणम् –"साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च । पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥" भा. ।

स्वेदनाशः । पुं । वायौ । वै.निघ. ।

स्वेदनी । स्त्री । सुरानिर्म्माणार्थपात्रविशेषे । भाटी । वै.निघ. । लौहपात्रविशेषे । ताओया । भ. । [रा.नि.व.१८ ।

स्वेदमाता (तृ) । स्त्री । शरीरस्थरसधातौ ।

स्वेदवाहिस्रोतः । क्ली । घर्म्मवाहिनाड्यां । तस्य मूलं मेदः रोमकूपाश्च । च.वि.५अ. ।

स्वेदस्रावः । पुं । पित्तजरोगे । घाम हओया । मिदा. । [स्वेनियहे । मा.नि. ।

स्वेदाप्रवर्त्तनम् । क्ली । घर्म्मातिशये । च.

स्वेदावरोधः । पुं । घर्म्मावरोधे । जठराग्नेरवरोधे । मा.नि. ।

स्वैरिता । स्त्री । स्वच्छन्दतायाम् । अम. ।

स्वोरसः । पुं । स्वरसे । शिलापिष्टकल्के । श.च. ।

ह

हंसः । पुं । शवजातीयजलचरपक्षिणि । हाँस । मं वलकि । गुणाः—"हंसः श्लेष्मकरो वलातिसृष्टिदो हृष्यो गुरुः शीतलः······ " अत्रि.२२अ.। अस्य मांसगुणाः—हृष्यतमं तिमिरघ्नञ्च । रा नि.व.१७ । गुरु उष्णं मधुरं स्निग्धं स्वरवलवर्णकरं बृंहणं शुक्रलं वातघ्नञ्च । सु.सू.४६अ. । हंसडिम्बगुणाः—"रेतःक्षीणेषु कासेषु हृद्रोगेषु क्षतेषु च । मधुराण्यविपाकीनि सद्योबलकराणि च ॥" च.सू.२७अ. । घोटकभेदे । शारीरवायुभेदे । मे. । पारदे । वनस्पतिभेदे । रौप्ये । वै.निघ. । अन्तःकरणे । विष्णौ । सूर्य्ये । त्रिका. ।

हंसकः । पुं । राजहंसे । श.च. ।

हंसकूटः । पुं । ककुदि । झुँटि । शब्दकल्पः ।

हंसदाहनम् । क्ली । अगुरुणि । अगुरु । श.च. ।

हंसपदम् । क्ली । कर्षे । २ तो. । प.प्र.१ख.।

हंसप(पा)दी । स्त्री । हंसपदाकारपत्रलतायाम्, गोधापद्याम् । (गोयालिया लता । मं हंसपादी । कं नविलड़ि । गुणाः—"हंसपादी कटूष्णा स्याद्विषभूतविनाशिनी । भान्त्यपस्माररदोषघ्नी विज्ञेया च रसायनी ॥" रा.नि.व.५ । "हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् । विसर्पदाहातीसारलूताभूताग्निरोहिणीः ॥" भा.पू.१भ.गु.व. । सु.सू.३८अ. । रक्तलज्जालुकायाम् । वै.निघ. ।

हंसपाकयन्त्रम् । क्ली । औषधपाकार्थयन्त्रविशेषे । यथा—"खर्परं सिकतापूर्णं कृत्वा तस्योपरि क्षिपेत् । तत् समं खर्परं तत्र शनैर्मृद्वग्निना पचेत् । हंसपाकं समाख्यातं यन्त्रम्······ ॥" र.चि.३अ. । [योग्याग्नौ । रस.चि.३अ. ।

हंसपाकाग्निः । पुं । हंसपाकयन्त्रेण पाकः

हंसपाद(क)म् । क्ली । हिङ्गुले । हला. । सिन्दूरे । वै.निघ. ।

हंसपादिका । स्त्री । हंसपाद्याम् । रा.नि.व.५ । र.मा. । मण्डूकपर्ण्याम् । थूलकुड़ि, थानकुनी । च.सू.४अ. । र.सा.सं. । रक्तलज्जालुकायाम् । वै.निघ. । [रा.नि.व.२ ।

हंसमाषा । स्त्री । माषपर्ण्याम् । माषाणी ।

हंसयोषिता । स्त्री । राजहंस्यां । वै.निघ. ।

हंसलोमशम् । क्ली । कासीसे । हिराकस । रा.नि.व.१३ ।

हंसलोहकम् । क्ली । पित्तले । हे.च. ।

हंसवती । स्त्री । हंसपद्याम् । जटा. ।

हंसवीजम् । क्ली । हंसडिम्बे । रा.नि.व.१९ । गुणाः—"हंसवीजं परं हृद्यं वृंहणं वातकोपनं । पाके लघुतरं प्रोक्तं सर्व्वामयविनाशनम् ॥" राज. ३प. । [वै.निघ. ।

हंसाङ्घ्रिः । स्त्री । हिङ्गुले । रक्तलज्जालुकायां ।

हंसाण्डम् । क्ली । हंसडिम्बे । হাঁসের ডিম। गुणाः—अतिबल्यम् अतिवृंहणं वातघ्नं पाके लघुतरं सर्व्वरोगहरञ्च । रा.नि.व.१९ । राज.३प. ।

हंसाभिमुख्यम् । क्ली । रौप्यधातौ । रा.नि. व.१३ । वै.च. ।

हंसाह्वया । स्त्री । हंसपाद्यां । গোহালিয়া । सु.चि.१८अ. । च.द.ग्रन्थि.चि.अमृताद्यतैले ।

हंसिका (सी) । स्त्री । हंसपद्याम् । श.र. । मुद्गपर्ण्याम् । वै.निघ. । वराटकभेदे । रा.नि.व. १३ ।

हंसिरः । पुं । मूषिकभेदे । तद्दष्टे "हंसिरेणा-न्नविद्वेषः जृम्भालोमाञ्चहर्षणं ।" सु.कल्प.६अ. ।

हंसोदकम् । क्ली । अंशूदके । च.सू.१६अ. । See अंशूदकम् ।

हञ्जिः । स्त्री । क्षुधायां । जटा. । [भा. ।

हञ्जिका । स्त्री । भार्ग्याम् । বামনহাটী ।

हञ्जी । स्त्री । जिङ्गिन्याम् । वै.निघ. ।

हटत्वणम् । क्ली । शैवाले । सु.सू.४५अ. ।

हट(ठ)पर्णि (र्णी) । क्ली, स्त्री । शैवाले । श.र. । त्रिका. ।

हट्टविलासिनी । स्त्री । नखीनामगन्धद्रव्य-विशेषे । अम. । हरिद्रायां । भा. ।

हठः । पुं । शैवाले, जलकुम्भिकायाम् । পানা । सु.चि.११अ. ।

हठालुः । स्त्री । कुम्भिकायां । পানা । श.च.।

हठी । स्त्री । वारिपर्ण्याम् । পানা । धरणिः ।

हड्डम् । क्ली । अस्थनि । হাড় । श.च. ।

हड्डजम् । क्ली । मज्जायाम् । श.च. ।

हण्डिका (ण्डी) । स्त्री । मृत्पात्रविशेषे । হাঁড়ি । शब्दकल्पः ।

हण्डिकासुतः । पुं । क्षुद्रहण्डिकायां । ছোট হাঁড়ি । त्रिका. ।

हतचूर्णकः । पुं । सोमलतायाम् । कश्चित् ।

हताधिमन्थः । पुं । सर्व्वाक्षिगतरोगे । लक्षणं—"उपेक्षणादक्षि यदाधिमन्थो वातात्मकः सादयति प्रसह्य । रुजाभिरुग्राभिरसाध्य एष हताधिमन्थः...... ॥" मा.नि. ।

हनुः । पुं । व्याधौ । अस्त्रे । उणा. ।

हदनम् । क्ली । विष्ठात्यागे । হাগা । व्याक. ।

हनीलः । पुं । केतक्यां । र.मा. ।

हनुः (नूः) । स्त्री । हट्टविलासिन्यां । हरिद्रा। अ.टी.भ. । रोगे । अस्त्रे । मृत्यौ । जटा. । पुं । नखीनामगन्धद्रव्ये । रा.नि.व.१२ ।

हनुग्रहः । पुं । तन्नामवातव्याधौ । निदानादि —"जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः । कुपितो हनुमूलस्थः संसयित्वानिलो हनुं । करोति विवृतास्यत्वमथवा संवृतास्यताम् । हनुग्रहः स तेन स्यात् कृच्छ्राच्चवणभाषणम् ॥" मा.नि. । अस्य वातव्याधौ अत्र हनू संगृहीतौ निश्चलौ लालास्रवश्च । च.द.५५अ. ।

हनुमूलबन्धनास्थि । क्ली । हन्वस्थिमूलयोर्बन्धनभूतयोरस्थ्नोः । च.शा.७अ. ।

हनुमोक्षः । पुं । दन्तगतमुखरोगभेदे । निदानं यथा—"वातेन तैस्तैर्भाविस्तु हनुसन्धिर्विसंहतः । हनुमोक्ष इति ज्ञेयो व्याधिरर्दितलक्षणः ॥" सु.नि.१६अ ।

हन्नः । त्रि । कृतपुरीषोत्सर्गे । अम. ।

हन्वस्थि । क्ली । हनुदेशास्थनि । চোয়ালের হাড় । च.शा.७अ. ।

हपुषा । स्त्री । वणिग्द्रव्यविशेषे । सा च मरीचवत्तवद्दीर्घकृष्णवर्णा । हवुषफल इति ख्याता । हिं हौहवेर । See हवुषा ।

हमलः । पुं । कृकलासे । কাঁকলাস । वै.निघ. ।

हयः । पुं । घोटके । अम. ।

हयकातरा (रिका) । स्त्री । अश्वकातरिकाख्ये । हिं घोड़काथरा । रा.नि.व.५ ।

हयगन्धम् । क्ली । काचलवणे । रा.नि.व.६ ।

हयगन्धा (न्धिका) । स्त्री । अश्वगन्धायाम् । र.मा. । च.द.क्षयाधिकारे । वनयमान्याम् । रा.नि.व.६ ।

हयघ्नः । पुं । करवीरवृक्षे । वै.निघ. ।

हयघ्नी । स्त्री । तेजोवत्याम् । तेजबल । वै.निघ. । [मालाणी । अम. ।

हयपुच्छिका (च्छी) । स्त्री । माषपर्ण्याम् ।

हयप्रियः । पुं । यवे । हे.च. । श्वेतकरवीरे । रा.नि.व.१० । स्त्री (या) । अश्वगन्धायाम् । रा.नि.व.४। खर्ज्जूर्य्याम् । रा.नि.व.११ । यवे । वै.निघ. ।

हयभक्ष्या । स्त्री । पिण्डीखर्ज्जूरिकायाम् । वै.निघ. ।

हयमारः (कः) । पुं । करवीरवृक्षे । रा.नि.व.१० । अम. । वै.निघ.२भ.अ.सा.चि.क्षमिसागररसे । अयं व्रणदारणः । सु.सू.३६अ. ।

हयमारणः । पुं । अश्वत्थवृक्षे । श.च. ।

हयवरप्रियः । पुं । कदम्बवृक्षे । वै.निघ. ।

हयवाहनशङ्करः । पुं । रक्तकाञ्चनवृक्षे । श.च. ।

हयवैरिः । पुं । महिषे । वै.निघ. ।

हयशाला । स्त्री । अश्वशालायाम् ।

हया (यी) । स्त्री । अश्वगन्धायाम् । रा.नि.व.४ । घोटक्याम् । जटा. । [अ. ।

हयागारः । पुं । अश्वशालायाम् । नकुल.१७

हयानन्दः । पुं । मुद्गे । मूग । रा.नि.व.१६ ।

हयायुर्व्वेदः । पुं । अश्ववैद्यकशास्त्रे । तच्च शालिहोत्रनकुलजयदत्तभोजादिकृतम् ।

हयारिः । पुं । करवीरे । र.मा. ।

हयाशना । स्त्री । शल्लकीवृक्षे । श.च. ।

हयाह्वया (ह्वा) । स्त्री । अश्वगन्धायाम् । वै.निघ. ।

हयेष्टः । पुं । यवे । रा.नि.व.१६ ।

हय्यङ्गवीनम् । क्ली । सद्योजातघृते । वै.निघ. ।

हरः । पुं । गर्दभे । शब्दकल्प: ।

हरजः । पुं । पारदे । भैष.ध्व.भ. । "हरजमुजगलीहम् ।"

हरणम् । क्ली । शुक्रे । स्वर्णे । वराटके । उष्णजले । शब्दकल्प: । भुजे । मे. ।

हरतेजः । क्ली । पारदे । रा.नि.व.१३ ।

हरप्रियः । पुं । धुस्तूरकवृक्षे । वै.निघ.२भ.चयचि.नवरवराजमृगाङ्के । [वै.निघ. ।

हरवल्लभः । पुं । शुक्लधुस्तूरे । श्वेत धुतूरा ।

हरवीजम् । क्ली । पारदे । त्रिका. ।

हरहरा । स्त्री । हारहूरायाम् । हड़हाड़ । द्राक्षायाम् । शब्दकल्प: ।

हराक्षम् । क्ली । रुद्राक्षे । रा.नि.व.११ ।

हरिः । पुं । विष्णौ । भेके । अम. । शुकपक्षिणि । टिया पाखी । सिंहे । रा.नि.व.१८।१९ । मर्कटे । अश्वे । त्रिका. । वंशे । मुद्गे । मूग । वै.निघ । सर्पे । हंसे । मयूरे । कोकिले । श.र. । त्रि । हरिद्वर्णे । हे.च. ।

हरिक्रान्तः । पुं । घोटके । त्रिका. । स्त्री (न्ता) । विष्णुक्रान्तायाम् । काल अपराजिता । रा.नि.व.५ ।

हरिगन्धः । पुं । कुङ्कुमागुरुचन्दने । वै.निघ. ।

हरिग्रहः । पुं । अश्वस्य ग्रहविशेषे । लक्षणं —"कम्पते पूर्व्वकायन्तु निश्चलो यस्य पश्चिमः । पश्चाल्लङ्गी सकम्पश्च खिद्यते हरिपीड़ितः ॥" ज.द.५७अ. ।

हरिचन्दनम् । क्ली, पुं । कौङ्कणदेशप्रसिद्धे सप्तविधचन्दनान्यतमे चन्दनविशेषे । सारचन्दन । गुणाः—तिक्तं हिमं पित्ताटोपश्रमघ्नं रक्तचन्दनवक्ष्मादिहरञ्च । रा.नि.व.१२ । क्ली । कुङ्कुमे । मे. । रक्तचन्दने । रा.नि.व.१२ । पद्मकेशरे । हला. । [गाछ । वै.निघ. ।

हरिजीवकः । पुं । चणकवृक्षे । छोलार

हरिणः । पुं । मृगे, ताम्रवर्णमृगे । ताम्रहरिण । प.मु. । गुणाः—"मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः । शीतलो बद्धविण्मूत्रः सुगन्धिर्ह्रिणो लघुः ॥" "हरिणस्ताम्र उच्यते ।" सु.सू.४६अ. । कृष्णस्य गुणाः—"एणः कषायो मधुरः

पित्तास्रकफनाशनः ।" राज.३प. । "एतस्य मांसं लघुशीतलर्थं त्रिदोषहृत् षड्रसदञ्च रुच्यं । कुरङ्ग-मांसं मधुरञ्च यद्वत् कफापहं पित्तहरं मरुद्वत् ॥" रा.नि.व.१७ । [द्रव्ये । नथौ । श.च. ।

हरिणाची । स्त्री । हृद्विलासिनीनामगन्ध

हरिणी । स्त्री । मृग्यां । अम. । मञ्जिष्ठायां । रा.नि.व.६ । स्वर्णयूथिकायाम् । স্বর্ণযূঁই । रा.नि.व.१० । विजयायाम् । সিদ্ধি । श्वेतयूथिकायाम् । শ্বেত যূঁই । वै.निघ. ।

हरितम् । क्ली । स्थौणेयके । গাঁঠিয়ালা । रा.नि.व.१२ । कालिङ्गे । তরমুজ । वै.निघ. ।

हरितः । पुं । मन्थानकतृणे । रा.नि.व.८ । यवे । प.मु. । नीलदूर्व्वायाम् । वै.निघ. । सिंहे । शब्दकल्पः । सविषमण्डूके । বিষযুক্তব্যাঙ্ । सु. ।

हरितकम् । क्ली । शाके । आर्द्रकादौ । अम. । "अन्यत्र मांसहरितकशुष्कशाकफलभक्ष्येभ्यः ।" च.सू.८अ. । [ना । मद.व.७ ।

हरितच्छदः । पुं । श्वेतशिग्रौ । শ্বেত সজি-

हरितनेत्रः । पुं । उलूके । পেঁচা । त्रिका. ।

हरितपत्रिका । स्त्री । पाच्यां । गङ्गापत्रयां । সুগন্ধশাকবিশেষ, কর্পূরশাক । रा.नि.व.१० ।

हरितयवः । पुं । निःशूकयवे । वै.निघ. ।

हरितलता । स्त्री । पाचीलतायां । वै.निघ. ।

हरितशाकः । पुं । शिग्रुशाके । সজিনার শাক । रा.नि.व.७ । [বিশেষ । रा.नि.व.१० ।

हरितद्वेचा । स्त्री । गङ्गापत्रयां । সুগন্ধশাক

हरिता । स्त्री । दूर्व्वायां । मे. । जयन्त्याम् । জন্তী গাছ । रा.नि.व.४ । हरिद्रायाम् । रा.नि.व.६ । कपिलद्राक्षायां । नीलदूर्व्वायां । रा.नि.व.८ । पाच्याम् । কর্পূরশাক । रा.नि.व.१० । ब्राह्मीक्षुपे । বির্মীশাক । वै.निघ. ।

हरिताल(क)म् । क्ली । पीतवर्णखनिजोप-विषभेदे । হরিতাল । प.मु. । तच्च पत्रपिण्डभेदेन द्विविधम्, तयोराद्यं श्रेष्ठम् । गुणाः—"तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम् । स्वर्णवर्णं गुरु स्निग्धं सपत्रञ्चाभ्रपत्रवत् । पत्राख्यं तालकं विद्यात् गुणाढ्यं तद्रसायनम् ॥ निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु । स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकं । हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् । कण्डूकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥" भा.पू.१भ.धा.व. । तच्छोधनादि यथा —"तालकं पोट्टलीं कृत्वा सचूर्णे काञ्जिके क्षिपेत् । दोलायन्त्रेण यामैकं ततः कुष्माण्डजे रसे । तिलतैले पचेद्यामं यामञ्च त्रैफले जले ॥ दोलायन्त्रे चतुर्यामं भस्मीभूतं न दोषकृत् । तथा लाक्षाराजीतिलाः शिग्रुटङ्कणं लवणं गुडम् । तालकार्द्धेन संमिश्र्य छिद्रमूषां निरोधयेत् । पुटेत् पातालयन्त्रेण सत्त्वं पतति निश्चयम् ॥" रस.चि.७अ. ।

हरितालः । पुं । स्वनामख्यातपक्षिविशेषे । হরেতেল ঘুঘু । हिं हरियाल । गुणाः—"हरितालोऽल्पविट्कः स्यात् कषायो विशदो लघुः । रक्तपित्तप्रशमनस्तृष्णाघ्नो वातकोपनः ॥" राज.२प. । दूर्व्वायां । वै.निघ. ।

हरितालिका (ली) । स्त्री । दूर्व्वायाम् । त्रिका. । मे. । खड्गलतायाम् । विश्व. ।

हरिताश्म (न्) । क्ली । तुत्थके । তুঁতে । रा.नि.व.१३ ।

हरिताचः । पुं । अश्वस्य दुष्टग्रहभेदे । तद्गृहीते अकस्मात् चक्षुषी रक्ता विन्दवो भवन्ति । ग्रासद्वेषश्च जायते । ज.द.५७अ. ।

हरित् । स्त्री । हरिद्रायां । रा.नि.व.६ । पुं, क्ली । तृणे । मे. । पुं । मुद्गे । মুগ । हे.च. । त्रि । शाकवर्णे ।

हरित्कन्दः । स्त्री । कन्दविशेषे । वै.निघ. ।

हरित्पर्णम् । क्ली । मूलके । মূলা । प.मु. ।

हरिद(द्र)र्भः । पुं । हरिदर्भकुशे, शरपत्रकुशे । শ্বেত কুশ । रा.नि.व.८ ।

हरिदश्वः । पुं । सूर्य्ये । अर्कवृक्षे । আকন্দ গাছ । अम. । [See कुशः ।

हरिद्दर्भः । पुं । कुशभेदे । শ্বেত কুশ । भा. ।

हरिद्रकः । पुं । हरिद्रावृक्षे । वै.निघ. ।

हरिद्रवः । पुं । नागकेशरचूर्णे । त्रिका. ।

हरिद्रा (द्री) । स्त्री । (Curcuma longa.) स्वनामख्यातकन्दौषधी । হলুদ । हिं हल्दी,

हलदी। मं हलदि। कं अरसिन। तें पसुप। दा. गुर्ज. हलद। गुणा:—कफपित्तास्रशोथकण्डू व्रणापहा। राज०। कटुतिक्तोष्णा कफवातास्रकुष्ठघ्नी मेहकण्डूव्रणघ्नी वर्णकरी च। रा.नि.व.६। च.द.कफज्व.चि.। हरिद्रा चतुर्धा हरिद्रा कर्पूरहरिद्रा वनहरिद्रा दारुहरिद्रा चेति। विशेषा: पर्य्याये मृग्या:। तत्कुचि: वचाशब्दे मृग्या। "हरिद्रा क्रियते स्थूला छेदे या कुङ्कुमच्छवि:।" भैष०। [घृघृ। श.च०।

हरिद्राङ्ग:। पुं। हरितालपक्षिणि। हरडेल

हरिद्रादिवर्ग:। पुं। हरिद्रादारुहरिद्राय व्याह्वकलसीकुटजीशवद्रव्येषु। गुणा:—आमातीसारघ्न: मेद:कफाश्ववातस्तन्यदोषघ्नश्च। वा.सू.१५ अ.।

हरिद्राद्वयम्। क्ली। हरिद्रादारुहरिद्रयो:। पिण्डा एका, पचम्पचासंज्ञान्या। चरण:। वा.सू. १५अ.हरिद्रादि.। "हरिद्राद्वयव्याह्व······।"

हरिद्रापञ्चकम्। क्ली। हरिद्रावनहरिद्रादारुहरिद्राशटीविककतेषु। वै.निघ.।

हरिद्रापत्रकण्टका। स्त्री। दार्व्याम्। दारुहरिद्रा। वै.निघ.।

हरिद्राभ:। पुं। पीतशालवृक्षे। পেয়াশাল। कर्पूरे। श.च.। त्रि। पीतवर्णे।

हरिद्रामेह:। पुं। पित्तजन्यप्रमेहभेदे। यत्र रोगी सदाहं हरिद्रावर्णं मेहति। सु.नि.६अ.।

हरिद्रु:। स्त्री। दारुहरिद्रायां। দারুহরিদ্রা। मं. हलदिवा। कं विलिलु। गुणा:—शीतल: तिक्त: मङ्गल्य: वान्तिपित्तघ्न: देहकान्तिकर: बल्य: नानालग्दोषघ्नश्च। रा.नि.व.६। अम.। सा पञ्चधा—सैव कालीयक: प्रोक्तस्तथा कालेयकोऽपि च। पीतद्रुश्च हरिद्रुश्च पीतदारु कपीतकं। दार्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत्॥" भा.।

हरिनामा (न्)। पुं। मुद्गे। মুগ। त्रिका।

हरिनेत्रम्। क्ली। श्वेतपद्मे। रा.नि.व.१०। पुं। पेचके। त्रिका.।

हरिन्मणि:। पुं। मरकतमणौ। পান্না इति लोके। रा.नि.व.१२।

हरिन्मुद्ग:। पुं। हरिमुद्गे। হরিমুগ। रा. नि.व.१६। [के; हे च.।

हरिपर्णम्। क्ली। कृष्णचन्दने। प.मु.। मूल-

हरिप्रियम्। क्ली। उशीरनामगन्धद्रव्ये। गन्धवেণা। रा.नि.व.१२। कृष्णचन्दने। কালিয়া কাঠ। श.च.। पुं। श्यामाकधान्ये। শ্যামাধান। प.मु.। कदम्बवृक्षे। र.मा.। पीतभृङ्गराजे। পীত ভীমরাজ। रा.नि.व.४। See मार्कव:। विष्णुकन्दे। रा.नि.व.७। करवीरवृक्षे। बन्धुजीववृक्षे। বান্ধুলী। रा.नि.व.१०। शङ्खे। শাঁখ। रा.नि.व.१६।

हरिप्रिया। स्त्री। तुलसीवृक्षे। रा.नि.व.१०। खर्जूरीवृक्षे। খেজুর গাছ। रा.नि.व.११।

हरिबालुकम्। क्ली। एलबालुके। এলবালুক। प.मु.। रा.नि.व.४। [श.च.।

हरिभद्रम्। क्ली। एलबालुके। এলবালুক।

हरिभद्रकम्
हरिभव्यकम् } क्ली। कुष्ठौषधौ। কুড়। वै. निघ.।

हरिमन्थ:। पुं। अग्निमन्थे। গণিরি। प.मु.। र.मा.सं.। चणके। ছোলা গাছ। रा.नि.व.१६।

हरिमन्थक: (ज:)। पुं। चणके। अ.टी. भ.। अम.। कृष्णमुद्गे। কাল মুগ। हे.च.।

हरिमुद्ग:। पुं। (Phaseolus mungo.) शारदमुद्गविशेषे। ঘাসিমুগ, হরিমুগ। हिं हरिमुङ्। मं हरियरमुंग। कं हसरुहेसरु। गुणा: —कषाय: मधुर: पित्तकफघ्न: रक्तमूत्ररोगघ्न: शीतल: लघु: दीपनश्च। रा.नि.व.१६।

हरिमूला। स्त्री। शालपर्ण्याम्। वै.निघ.।

हरिलोचन:। पुं। कर्कटे। त्रिका.। पेचके। शब्दकल्प:।

हरिवल्लभ:। पुं। मुचुकुन्दवृक्षे। মুচকুন্দ গাছ। स्त्री (भा)। जवापुष्पवृक्षे। रा.नि.व.१० २३। तुलसीवृक्षे। रा.नि.व.१०।

हरिवास:। पुं। पीतभृङ्गराजे। পীতপুষ্প ভীমরাজ। रा.नि.व.४। See मार्कव:। अश्वत्थवृक्षे। मद.व.५।

हरिवीजम्। क्ली। हरिताले। जटा.।

हरिहरः । पुं । रसाधिकाररसमणिकारे ।

हरीतकी । स्त्री । (Terminalia chebula.) Chebulic myrobalan. स्वनामख्यातवृक्षे । হরীতকী গাছ । हिं हर । मं हिरड़ा । कं अणिले । तें करकचेट्टु । उत्. हरिड़ा,करेड़ा । दा. हिं कल्रा । ता. कड़कै । सा. गुणाः—हरीतकीफलम् अनुलोमनं (अर्थात् मलपाकं कृत्वा बन्धञ्च भित्त्वाधो नयति), तथा रसायनं शोधनञ्च । हरीतकी सप्तभेदा—"विजया रोहिणी चैव पूतना चामृताभया । जीवन्ती चेतकी चेति पथ्यायाः सप्त जातयः ॥" तासु विजया अलाबुवद्वृत्ता सर्व्वरोगहिता च । रोहिणी वृत्ता व्रणरोपणी च । पूतना अस्थिमती सूक्ष्मा प्रलेपे हिता च । अमृता मांसला शोधनी च । अभया पञ्चरेखान्विता चक्षुष्या च । जीवन्ती स्वर्णवर्णा सर्व्वरोगहिता च । चेतकी त्रिरेखा चूर्णार्थे प्रशस्ता च । पुनः श्वेतकृष्णभेदेन चेतकी द्विधा, तयोः शुक्ला षड़ङ्गुलायता, कृष्णा चैकाङ्गुला । आसु कस्याश्चित् स्वादेन कस्याश्चिद्गन्धेन कस्याश्चिद्दर्शनेन कस्याश्चिच्च स्पर्शनेन भेदोऽनुमीयते । चेतकीतरुमूलमुपस्य यस्य कस्यचित्प्राणिनो विरेचनं भवति । एतस्याश्च चेतक्या धारणेन नरो यावत्तिष्ठति तावदेव तस्य विरेको भवति । एषा तृष्णार्त्तसुकुमारकृशानामौषधद्वेषिणामतीव प्रशस्ता । आसु च सप्तजातीयहरीतकीषु विजयैव प्रधाना सुखप्रयोगा सुलभा सर्व्वरोगेषु शस्ता च । हरीतक्यां स्वादुतिक्तकषायरससद्भावेन पित्तहरत्वं, कटुतिक्तकषायरससद्भावेन कफहरत्वं, अम्लरससद्भावेन वातनाशित्वञ्चास्ति । स्वभावत एव प्रभावसिद्धमस्या वातनाशित्वम् । तथास्या मज्जसु स्नायुषु वृन्ते त्वचि अस्थिषु च यथासंख्यं स्वाद्वम्लतिक्तकटूत्कृष्टरसा व्यवस्थिता एव । या हरीतकी नवीना स्निग्धा घना वृत्ता गुरुश्च, या च जले क्षिप्ता निमज्जति, सैव प्रशस्ता गुणदा च । हरीतकीचर्व्वणेनाग्निवृद्धिः । पिष्टसेवनेन मलशुद्धिः । आर्द्रसेवनेन कोष्ठबद्धता, भर्ज्जितसेवनेन च त्रिदोषनाशित्वं भवति । भोजनेन सह हरीतकीसेवनेन बुद्धीन्द्रियोन्मेलनं बलं वातपित्तकफनाशः मलमूत्रशुद्धिः भवति । भोजनोत्तरं भक्षणेनान्नपानकृतवातादिदोषशान्तिराशु भवत्येव । लवणेन भक्षिता कफनाशः, शर्करया पित्तनाशः, घृतेन वातरोगनाशी गुड़ेन च सर्व्वरोगनाशी भवति । तथा वर्षादिषु षट्सु ऋतुषु यथाक्रमं सैन्धवशर्कराशुण्ठीपिप्पलीमधुगुड़ैर्भक्षणीया । केवलमेव पथश्रान्तदुर्बलरूक्षकृशानाहारनिपीड़ितपित्तलविमुक्तशोणितगर्भिण्यश्च न कदापि हरीतकीं व्यवहरेयुः । भा.पू.१भ. । "हरस्य भवने जाता हरिता च स्वभावतः । हरयेत् सर्व्वरोगांश्च तेन प्रोक्ता हरीतकी ॥" इति निरुक्तिः । "बीजास्थितिक्ता मधुरा तदन्तः त्वग्भागतः सा कटुरुष्णवीर्य्या । मांसांशतश्चाम्लकषाययुक्ता हरीतकी पञ्चरसा मतेयम् ॥" रा.नि.व.११ । "अजीर्णिनो रूक्षभुजः स्त्रीमद्यविषकर्षिताः । सेवेरन्नाभयामेते क्षुधातृष्णार्द्दिताश्च ये ॥" च.चि.१अ. । बालहरीतक्यां । জঙ্গিহরীতকী । सं.अजी.चि.अग्निमुखचूर्णे ।

हरीतकीतैलम् । क्ली । हरीतकीफलोद्भवतैले । गुणाः—शीतलं कषायं मधुरं कटु सर्व्वव्याधिहरं पथ्यं नानाविधत्वग्दोषघ्नञ्च । रा.नि.व. १५ ।

हरीतकीवीजम् । क्ली । हरीतक्यस्थनि । হর্তুকীর আঁটী । गुणाः—चक्षुष्यं गुरु वातघ्नं पित्तघ्नञ्च । वै.निघ. ।

हरीन्द्रवैशेषिकः । पुं । वैद्यकग्रन्थभेदे । स्त्री (का) । रेणुकायाम् । রেণুক । च.सू.२अ.शिरोविरेचने । निर्गुण्ड्याम् । নিশিন্দা । कम्पिल्लके । কমলাগুঁড়ি । वै.निघ.हिक्काचि.नस्ये ।

हरेणुः (कः) । पुं । बृहच्चणके । বড় ছোলা। प.मु. । पर्पटके । ক্ষেৎপাব্ড়া । वै.निघ.२भ. कल्याणघृते, लाक्षादितैले । चय.चि.गुड़ूच्यादिमोदके । कलाये । মটর । रा.नि.व.१६ । "शतपुष्पा हरेणुभिः ।" च.द.अ.च.चि. ।

हरेणुका । स्त्री । रेणुकायाम् । রেণুক । रा. नि.व.६ । सु.सू.३८अ.पिप्पल्यादिः । कलायभेदे । অরহর কলায় । रा.नि.व.१४ । सु.सू.४६अ. ।

हर्म्म (न्) । क्ली । जृम्भायां । श.र. ।

हर्म्मुटः । पुं । कच्छपे । शब्दकल्पः ।

हर्य्यः । पुं । विभीतकवृक्षे । वै.निघ. ।

हर्य्यक्षः । पुं । सिंहे । रा.नि.व.१६ । [व.८]

हर्षः । पुं । मदनवृक्षे । ময়না গাছ । रा.नि.

हर्षकीर्त्तिः । पुं । वैद्यकसारग्रन्थकारे ।
हर्षणम् । क्ली । शुक्रधातौ । रा.नि.व.१८ । पुं । नेत्ररोगभेदे । श.र. ।
हर्ष(र्षि)णी । स्त्री । कपिकच्छाम् । আলাকুশী । वै.निघ. । भल्लायां । सिद्धि । शब्दकल्पः ।
हर्षणीक्रिया । स्त्री । सुरापानजन्यहर्षोत्पादकक्रियाम् । "नाविचोभ्य मनो मद्यं शरीरमविहत्य वा । कुर्य्यान्मदात्ययं तस्मादिष्यते हर्षणीक्रिया ॥" वा.चि.७अ. । [त्रि । हर्षजनके ।
हर्षयित्नुः । पुं । पुत्रे । क्ली । स्वर्णे । मे. ।
हर्षसम्भवम् । क्ली । शुक्रे । वै.निघ. ।
हलच्छदः । पुं । कृष्णशिंशपो । কাল শিশিনা। वै.निघ. । [रा.नि.व.६ ।
हलदी (द्दी) (का) । स्त्री । हरिद्रायाम् ।
हलराचम् । क्ली । पाहुल्यक्षुपे । रा.नि.व.४ ।
हललोमशम् । क्ली । कासीसे । হিরাকস্ । रा.नि.व.१२ ।
हला । स्त्री । मद्ये । जले । अनेकार्थकोषः । लाङ्गलकीवृक्षे । विषलाङ्गूलिया । भैष.कुष्ठ.चि, षड्विन्दुतैले ।
हलाहलम् । क्ली, पुं । विषभेदे । प.सु. । ब्रह्मसर्पे । আজনাই । चिका. ।
हलिनकः । पुं । केतकवृक्षे । राज ६प. ।
हलिनी । स्त्री । लाङ्गलिकायाम् । विषलाङ्गलिया । प.सु. । [छ । प.सु. ।
हलिनीप्रियः । पुं । कदम्बवृक्षे । কদম গা-
हलिप्रियः । पुं । कदम्बवृक्षे । अम. । [१४ ।
हलिप्रिया । स्त्री । मदिरायाम् । रा.नि.व.
हली । स्त्री । कलिकारीक्षुपे । विषलाङ्गूलिया। रा.नि.व.४ । भैष.कर्णरो.चि. । मद्यसामान्ये । रा.नि.व.१४ । [च. । केतकवृक्षे । प.सु. ।
हलीनः । पुं । शाकवृक्षे । শেগুন গাছ । श.
हलीमकः । पुं । पाण्डुरोगभेदे । तस्य लक्षणं —"यदा तु पाण्डोर्वर्णः स्याद्धरितः श्यावपीतकः । बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः । स्त्रीष्वहर्षोऽङ्गमर्दश्च दाहस्तृष्णारुचिर्भ्रमः । हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥" मा.नि. ।
हल्लकम् । क्ली । रक्तकह्लारे । হেলাকুল । अम. ।
हविः । पुं । अग्निमन्थवृक्षे । অগস্ত । र.मा. ।
हविः (स्) । क्ली । घृते । रा.नि.व.१५ । अन्ने । जले । शब्दकल्पः । [वै.निघ. ।
हविर्मण्डला । स्त्री । रक्तलज्जालुकायाम् ।
हविर्गन्धा । स्त्री । शमीवृक्षे । रा.नि.व.८ ।
हविर्मन्थः । पुं । गणिकारिकायाम् । र.मा. ।
हविष्यम् । क्ली । घृते । चिका. ।
हवुषा । स्त्री । शुष्कामसुकुले । प्र.नित्यानन्दरसे । स्वनामख्यातफले । হবুষ ফল । हिं हौहवेर । कं हौवेर । मं यरडुहव्वे । एतत् फलं द्विविधम् । तयोरेकं मत्स्यसदृशं विस्रगन्धञ्च, द्वितीयम् अश्वत्थफलसदृशं मत्स्यगन्धञ्च । उभयविधमेव फलं गुणैस्तुल्यं केवलमाकारतो भिन्नम् । भा. । गुणाः —कटुतिक्तोष्णा गुरुः श्लेष्मवलासघ्नी प्रदरोदरविड्बन्धशूलगुल्मार्शोघ्नी च । रा.नि.व.४ ।
हसन्तिका । स्त्री । वह्निशकटिकायां । वा.चि.१अ. ।
हसन्ती । स्त्री । मल्लिकायाम् । मे. ।
हस्तः । पुं । करे । হাত । रा.नि.व.१८ ।
हस्तज्योड़िः (ड़ी) । पुं । स्वनामख्यातमहाकन्दशाके । করজোড়া । हिं मं हाताजोड़ी । गुणाः—रसबन्धकृत् वश्यकृच्च । रा.नि.व.७ ।
हस्तपर्णः । पुं । रक्तैरण्डे । वै.निघ. ।
हस्तपुच्छम् । क्ली । करपुच्छे । হাতের পোঁছা । त्रिका. । [पाणौ । रा.नि.व.१८ ।
हस्तमानम् । क्ली । आमध्याङ्गुलिकूर्परं विस्तृते
हस्तसन्धिः । स्त्री । मणिबन्धे । वै.निघ. ।
हस्ताङ्गुलिः । पुं । कराङ्गुली । হাতের আঙুল । भूरिप्र. ।
हस्ताञ्जनः । पुं । पलीण्डवृक्षे । वै.निघ. ।
हस्ताभरणः । पुं । मण्डलिसर्पे । सु.कल्प.४अ. । See सर्पः । [शब्दकल्पः ।
हस्तामलकम् । क्ली । करस्थामलकीफले ।

हस्तिः । पुं । कदलीवृत्ते । गजे । अजमोदा-यां । वै.निघ. ।

हस्तिकन्दः । पुं । कोङ्कणे प्रसिद्धे स्वनाम-ख्यातमहाकन्दशाके । হাঁসা বড় মূলা । मं ह-स्तिकन्द । कं मल्लिरकसियगड्डे । गुणाः—कटु-कत्वः कफवातरोगघ्नः त्वग्दोषहरः महाकुष्ठविस-र्पघ्नश्च । रा.नि.व.७ । "हस्तिकन्दो गुरुर्ग्राही शु-क्रवृद्धिप्रदो मतः ।" अत्रि.१६अ. ।

हस्तिकरञ्जः (कः) । पुं । महाकरञ्जवृत्ते । ডহর করঞ্জ । रा.नि.व.९ ।

हस्तिकर्णः (पलाशः) । पुं । एरण्डवृत्ते । मे. । गजकर्णाकारैकपत्रे पलाशभेदे । भूपलाश इति लोके । হস্তিকর্ণ পলাশ । तें चिट्टामुद-पुचेट्टु । सु.सू.३९अ. कफशोधने । गुणाः—"ह-स्तिकर्णः परं हृद्यो मेधायुर्बलवर्द्धनः ।" राज.९प. । रक्तैरण्डे । वै.निघ.अजी.चि.विलम्बिकायोगे । ह-स्तिकन्दे । হাঁসা মূলা । रा.नि.व.७ । एतद्बीज-तैलं मूलकतैलवत् । See विभीतकतैलम् ।

हस्तिकर्णकः । पुं । किंशुकवृत्तभेदे । হস্তি-কর্ণপলাশ । श.र. ।

हस्तिकर्णदलः । पुं । हस्तिकर्णपलाशे । হ-স্তিকর্ণপলাশ । प.मु. ।

हस्तिकर्णी । स्त्री । कासालुके । वै.निघ.२भ. पाण्डु.चि. । वा.व्या.चि.षड्शीतिगुग्गुलौ ।

हस्तिकच्यः । पुं । सिंहे । व्याघ्रे । शब्दक-ल्पः । कणभकीटभेदे । मा.नि. ।

हस्तिकारवी । स्त्री । अजमोदायां । বনয-মানী । रा.नि.व.६ ।

हस्तिकृष्णा । स्त्री । गजपिप्पल्यां । वै.निघ. ।

हस्तिकोलः । पुं । राजबदरे । वै.निघ. ।

हस्तिकोलिः (ली) । पुं,स्त्री । वदरीभेदे । ডামাকুল । नामकोलीति पूर्ववङ्गे । प.मु. । मद.व.६ । [धुन्दुल । वै.निघ. ।

हस्तिकोशातकी । स्त्री । महाकोषातक्यां ।

हस्तिघोषा । स्त्री । महाकोशातकीनामफल-शाकविशेषे । धुन्दुल । हिं नेनुआ । मं पारिस-दोडका । कं अरहीरे । गुणाः—स्निग्धा मधुरा आध्मानवातकृत् हृष्या कृमिकरी व्रणरोपणी च । रा.नि.व.७ । रक्तपित्तानिलघ्नी च । भा.पू.१भ. शा.व. । [र.मा. ।

हस्तिघोषातकी । स्त्री । हस्तिघोषायाम् ।

हस्तिचारिणी । स्त्री । महाकरञ्जे । ডহর-করঞ্জ । रा.नि.व.९ ।

हस्तिदन्त (क)म् । क्ली । मूलके । মূলা । रा.नि.व.७ । श.मा. । [श.र. ।

हस्तिदन्तः । पुं । मूलके । মূলা । कुन्दिदन्ते ।

हस्तिदन्तफला । स्त्री । एर्वारुके । গোমু-ক । रा.नि.व.७ ।

हस्तिदन्ती । स्त्री । महेन्द्रवारुण्याम् । कृष्ण-दन्त्याम् । वै.निघ. । बृहत्फलगोडुम्बायाम्, नाग-दन्त्याम् । বড় গোমুক । च.सू.१अ. ।

हस्तिनी । स्त्री । महेन्द्रवारुण्याम् । বড় রা-খালশশা । महाकरञ्जे । ডহরকরঞ্জ । वै.निघ. । करिण्याम् । হাতিনী । तद्दुग्धगुणाः—"हस्तिन्या मधुरं हृष्यं कषायानुरसं गुरु । स्निग्धं स्थैर्यकरं शीतं चक्षुष्यं बलवर्द्धनम् ॥" सु.सू.४५अ. ।

हस्तिनीघृतम् । क्ली । हस्तिनीनवनीतजघृ-ते । হাতিনীর দুধের ঘি । गुणाः—कफपित्त-विषकृमिघ्नं कषायं लघु विष्टम्भि तिक्तम् अग्निक-रञ्च । रा.नि.व.१५ ।

हस्तिनीदधि । क्ली । करिणीदुग्धजातदध-नि । হাতিনীর দুধের দৈ । मं हातिनीदहि । कं आनेयमोसरु । गुणाः—कषायलघूष्णं पक्तिशू-लघ्नं रुचिदं कान्तिदं बलासरोगघ्नं वीर्यवर्द्धनं ब-लदञ्च । रा.नि.व.१५ ।

हस्तिनीदुग्धम् । क्ली । हस्तिनीजातक्षीरे । হাতিনীর দুধ । मं हातिनीचे दुध । कं आनेय-हालु । गुणाः—मधुरं हृष्यं गुरु कषायं स्निग्धं स्थैर्यकरं शीतलं चक्षुष्यं बलवर्द्धनञ्च । रा.नि.व. १५ ।

हस्तिनीनवनीतम् । क्ली । हस्तिनीदुग्धभ-वनवनीते । হাতিনীর দুধের মাখন । गुणाः—कषायं शीतलं लघु तिक्तं विष्टम्भि कृमिघ्नं कफ-पित्तघ्नञ्च । रा.नि.व.१५ ।

हस्तिपत्रः । पुं । हस्तिकन्दे । रा.नि.व.७ ।

हस्तिपर्णः । पुं । महाकोषातक्याम् । धुन्दुल । भा.पू.१भ.शा.व. । [क्याम् । रा.नि.व.७ ।

हस्तिपर्णिका (र्णी) । स्त्री । राजकोषात

हस्तिपर्णी । स्त्री । मोरटलतायाम् । लता-कस्राड़ । प.मु. । मूर्व्वायाम् । र.मा.। कर्कट्यां । काँकुड़ गाछ । रा.नि.व.२१ ।

हस्तिपात् (द्) । पुं । पिण्डालौ । कोम-रभोग कचु । प.मु. ।

हस्तिपिप्पली । स्त्री । गजपिप्पल्याम् । गज-पिपुल । प.मु. । चविकायाम् । रस.र.चाङ्गेरी-घृते ।

हस्तिवृषा । स्त्री । कदलीवृक्षे । भा. ।

हस्तिमगधा । स्त्री। गजपिप्पल्यां । वै.निघ.।

हस्तिमदः । पुं । गजमदे । दाक्षिणात्ये स्व-नाम्ना प्रसिद्धे औषधिविशेषे । गुणाः—स्निग्धस्ति क्तः अपस्मारघ्नः केश्यः विषघ्नः कण्डूकुष्ठव्रणदद्रु-विसर्पघ्नश्च । रा.नि.व.६ ।

हस्तिमयूरकः (का) । पुं, स्त्री । अजमो-दायां । मद.व.२ । इन्द्रवारुण्यां । वै.निघ.२भ. ज्व.चिं. ।

हस्तिमूत्रम् । क्ली । करिमूत्रे । गुणाः – ति-क्तोष्णं लवणं वातघ्नं भूतघ्नं कषायं शूलघ्नं हिक्का-श्वासघ्नञ्च । रा.नि.व.१५ । "गजमूत्रप्रलेपश्च क-ण्डूदद्रुविसर्पनुत् ।" चचि.८अ. ।

हस्तिमेहः । पुं । वातजन्यप्रमेहे । तत्र रोगी मत्तमातङ्गवदजस्रमेहं मेहति । सु.नि.६अ. ।

हस्तिरुचिः । पुं । वैद्यवल्लभनामग्रन्थकारे ।

हस्तिरोहणकः । पुं । महाकरञ्जे । रा. नि.व.६ ।

हस्तिलोध्रकः । पुं । लोध्रवृक्षे । रा.नि.व.६।

हस्तिवारुणी । स्त्री । महाकरञ्जे । वै.निघ.।

हस्तिविषाणकः (णी) । पुं, स्त्री । कद लीवृक्षे । रा.नि.व.११।२२ ।

हस्तिशुण्डा (ण्डिका,ण्डी) । स्त्री । स्व नामख्यातमहाक्षुपे। हातिशुँड़े । मं कं नेलवा ल, नलदावरे । गुणाः—कटूष्णा सन्निपातज्वरघ्नी च । रा.नि.व.५ । सु.चि.३२अ. । भूम्यामलक्यां । र.सा.सं. । इन्द्रवारुणीलतायाम् । राखालशशा । गजपृष्ठायाम् । वै.निघ. ।

हस्तिश्यामकः । पुं । तृणधान्यविशेषे । हा-तिया श्यामा । गुणाः—श्यामाकवत् । च.सू.२७ अ. । धातुशोषणः पित्तश्लेष्मघ्नः वायुवर्द्धनः रूक्षश्च । राज. ।

हस्ती (स्तिन्) । पुं । स्वनामख्याते विलम्बितजा-तीयकूलचरपशुविशेषे । हाती । हिं हाथी । त-स्य चतस्रो जातयः यथा—"भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ।" हे.च.। राजनिघण्टुस्तु त्रिविधमाह भद्रमन्द(न्द्र)मृगभेदेन । तन्मांसगुणाः —गुरु स्निग्धं वातलं श्लेष्मकरं पुष्टिकरं दुर्ज्जरम् अग्निमान्द्यकरञ्च । रा.नि.व.१७।१६ । "स्वादम्ल-लवणस्तेषां गजः श्लेष्मानिलापहः ।" सु.सू.४६अ.। स्त्री । कदल्यां । अजमोदायाम् । रा.नि.व.२३ ।

हस्त्यायुर्वेदः । पुं । पालकीयगजचिकित्सा-शास्त्रे ।

हहलम् । क्ली । हलाहलविषे । श.च. ।

हाङ्गरः । पुं । नक्रे, जलजन्तुविशेषे । हाङ्गर। श.च. । [लूरफले । अम. ।

हाटकम् । क्ली । सुवर्णे । रा.नि.व.१३ । धु-

हाटकमाक्षिकम् । क्ली । स्वर्णमाक्षिके । वै. निघ. ।

हातव्यः । पुं । हनुभवदन्ते । वै.निघ. ।

हानुः (नुः) । पुं । दन्ते । त्रिका. ।

हापुत्रिका (त्री) । स्त्री । Wagtail. स्व-नामख्यातपक्षिणि । खञ्जनिकायां । त्रिका. ।

हाफिका । स्त्री । जृम्भायाम् । हाई । हारा.।

हाफुः । पुं । अहिफेने । आफिङ् । प.मु. ।

हायनः (कः) । पुं । शालिधान्यविशेषे । भा. पू.१भ.धा.व. । गुणाः—शालिवत् । च.सू.२७अ.।

हारकः । पुं। शाखोटवृक्षे । श्याओड़ा गाछ । श.च. ।

हारहा(ह)रा । स्त्री। कपिलद्राक्षायाम् । रा.नि.व.११ । हारा. । भा.म.१भ.प्रलापकज्व. चि. । "भारतीहारहूरा ।"

हारहूर: । पुं । मद्ये । हे.च. ।

हारा । स्त्री । गाम्भारीवृक्षे । वै.निघ. ।

हारिकण्ठ: । पुं । कोकिले । मे. ।

हारित: (**क:**) । पुं । हारीतपक्षिणि । इ-ऽडेल घुघु । जटा. ।

हारितकम् । क्ली । शाके । श.र. ।

हारिद्र: । पुं । विषभेदे । हरिद्रावर्ण काठ-विष । लक्षणं—"हरिद्रातुल्यमूलो यो हारिद्र: स उदाहृत: ।" भा. । कदम्बवृक्षे । मे. । हरिद्रा-वृक्षे । (क:) महिषज्वरे । गजवैद्यकम् ।

हारिद्रसन्निपात: । पुं । सन्निपातज्वरभेदे, येन सर्व्वाङ्गमेव हरिद्रावर्णं भवति । लक्षणं—"हारिद्रदेहनखनेत्रकराङ्घ्रितापनिष्ठीवनादिकसनै-र्ष्वपलक्षितो य: । हारिद्रक: स कथित:......॥" वै.निघ. ।

हारिद्रु: । पुं । हरिद्रावृक्षे । वै.निघ. ।

हारी (इन्) । पुं । कदम्बवृक्षे । कोकिले । स्त्री (री) । मुक्तायाम् । श.र. ।

हारीत: (**क:**) । पुं । हरितालपक्षिणि । हरडेल घुघु । वम्. तिलगिरुपची । तन्मांसगुणा: —स्वादु कफपित्तरक्तदोषघ्नञ्च । रा.नि.व.१७ । "बल्यो वृष्यो रुचिकृच्च तथा हारीतको मत: ।" आत्रेयशिष्ये । तन्नामकतन्त्रकारे ।

हार्य्यम् । क्ली । रक्ताञ्जने । वै.निघ. ।

हार्य्य: (**वृक्ष:**) । पुं । विभीतकवृक्षे । बहेड़ा गाछ । रा.नि.व.११ । [विष । श.र. ।

हालह(हा)लम् । क्ली । विषभेदे । हलाहल

हाला । स्त्री । कण्टकपालीलतायां । आकड़-कड़ा । प.मु. । चि.क्र.क.सोमरी.चि. । मद्यसा-मान्ये । रा.नि.व.१४ ।

हालाहलम् । क्ली,पुं । हलाहल इति ख्याते मूलविषे । सु.कल्प.२अ. । स्वरूपं यथा—"नील-नाभफलो गवक्षतालपत्रच्छदस्तथा । श्रीजसा यस्य दह्यन्ते समीपस्था: द्रुमादय: । असौ हालाहलो ज्ञेय: किष्किन्ध्यायां हिमालये । दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते ॥" भा.पू.१भ.विषव.। See मूलविषम् ।

हालाहलगणा (**हली**) । स्त्री । मद्ये । वै.निघ. ।

हालाहलधर: । पुं । सर्पे । श.र. ।

हालाहला । स्त्री । क्षुद्रमूषिकायां । नेংটে ইন্দুর । जटा. । [हे.च. ।

हालिनी । स्त्री । अञ्जनिकायां । आञ्जनाइ ।

हाली । स्त्री । तालादिमद्ये । ताड़ि । रा.नि. व.१४ । मद्ये । अम. ।

हास: । पुं । कङ्कुष्ठे । वर्णमृत्तिकाविशेष । स्त्री (सा) । जातीपुष्पवृक्षे । वै.निघ. ।

हास्यफल: । पुं । विकङ्कतवृक्षे । বঁইচী গা-छ । रा.नि.व.११ ।

हाह(हा)लम् । क्ली । हलाहलविषे । श.च. ।

हिंसारु: (**सीर:**) । पुं । व्याघ्रे । त्रिका. । व्याक. । [उ । हारा. ।

हिंसालुक: । पुं । खादुककुक्कुरे । কাম্ড়াকু-

हिंसा (**स्रा**) । स्त्री । जटामांस्यां । रा.नि. व.११ । कण्टकार्याम् । भैष.योनिरो.चि., आम. वा.चि.खेदे । शिरायां । श.च. । कण्टकपाली-लतायाम् । গুড়কাঁউলী, কেলেকড়া । प.मु. । च.द.ग्रन्थि.चि. । सु.चि.१७अ. । च.दं.हिक्काश्वा-सचि.हिंस्राद्यघृते । गवेधुकायाम् । गरगशा । श.च. ।

हिक्का । स्त्री । तन्नामकरोगे । तस्या निदानं—"विदाहिगुरुविष्टम्भिरुक्षाभिष्यन्दिभोजनै: शीत-पानाशनस्नानरजोधूमातपानिलै: । व्यायामकर्म्म-भाराध्ववेगघातापतर्पणै: । हिक्का श्वासश्च कासश्च नृणां समुपजायते ॥" स्वरूपं निरुक्तिश्च—"मुहुर्मु-हुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवा-क्षिपन् । सघोषवानाशु हिनस्ति यस्मात्तस्तु हि-क्केत्यभिधीयते बुधै: ॥" तद्भेदा: संप्राप्तिश्च—"अन्न-जां यमलां क्षुद्रां गम्भीरां महतीं तथा । वायु: कफेनानुगत: पञ्च हिक्कां करोति च ॥" पूर्व्वरूपं यथा—"कण्ठोरसोर्गुरुत्वञ्च वदनस्य कषायता । हिक्कानां पूर्व्वरूपाणि कुक्षेराटोप एव च ॥" यम-लामाह—"चिरेण यमलैर्वेगै: या हिक्का संप्रवर्त्त-ते । कम्पयन्ती शिरोग्रीवां यमलां तां विनिर्दिशे-

तु ।" अन्नजामाह —"पानान्नैरतिसम्भुक्तैः सहसा पीड़ितोऽनिलः । हिक्कां यात्यूर्द्ध्वगो भूत्वा तां विद्यादन्नजां भिषक् ॥" गम्भीरा यथा —"नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी । अनेकोपद्रववती गम्भीरा नाम सा स्मृता ॥" महती यथा —"मर्म्माण्यापीड़यन्तीव सततं या प्रवर्त्तते । महाहिक्केति सा ज्ञेया सर्व्वगात्रप्रकम्पिनी ॥" भा.।

हिङ्गु । क्ली । (Ferula asafoetida or Ferula alliacea.) स्वनामख्यातपण्यद्रव्ये । हिंगु । हिं वम्. हिंगु । मं इङ्गु । कं लिंगु । तैं इंगुर । गुणाः—उष्णं कटूष्णं क्रमिवातकफघ्नं विबन्धाध्मानशूलघ्नं चक्षुष्यं गुल्मघ्नञ्च । रा.नि.व.६ । वा.सू.१५अ.ऊषकादौ । "ऊषकं तुत्थकं हिङ्गु" च.सू.२अ. । तीक्ष्णं कटुरसं शूलाजीर्णविबन्धघ्नं लघु उष्णं पाचनं स्निग्धं दीपनं कफवातघ्नञ्च । राज. । पाचनं रुच्यं क्रमिशूलोदरापहञ्च । मद. व.२ । "लघूष्णं पाचनं हिङ्गु दीपनं कफवातजित् । कटु स्निग्धं सरं तीक्ष्णं शूलाजीर्णविबन्धनुत् ॥" सु.सू.४६अ. । [ड़ा । रा.नि.व.६ ।

हिङ्गुनाड़िका । स्त्री । नाड़ीहिङ्गौ । शिङ्ग-

हिङ्गुनिर्यासः । पुं । निम्बवृक्षे । प.मु. । हिङ्गुरसे । हिं । मे. ।

हिङ्गुपत्रः । पुं । इङ्गुदीवृक्षे । रा.नि.व.८ ।

हिङ्गुपत्री (र्णी) । स्त्री । स्वनामख्यातवृक्षे । वंशपत्र तृण । गुणाः—कटुः तिक्ता तीक्ष्णा उष्णा वातकफक्रमिघ्नी रुच्या दीपनी पाचनी च । रा.नि.व.८ ।

हिङ्गुफला । स्त्री । हिङ्गुपत्र्याम् । वै.निघ. ।

हिङ्गु(ङ्गू)लम् (लिः) । क्ली, पुं । स्वनामख्यातपारदभूयिष्ठद्रव्ये । हिङ्गुल । अम. । जटा. । तच्च त्रिविधं—चर्म्मारशुकतुण्डकहंसपादभेदेन । तत्र चर्म्मारः शुक्लवर्णः, शुकतुण्डकः पीतः, हंसपादो जवाकुसुमसदृशः, स एव महोत्तमश्च । र. सा.सं.टी. । मधुरं तिक्तम् उष्णं वातकफघ्नं त्रिदोषद्वन्द्वदोषज्वरघ्नञ्च । रा.नि.व.१३ । शुद्धस्य गुणाः—"तिक्तं कषायं कटु हिङ्गुलं स्यात् नेत्रामयघ्नं कफपित्तहारि । हृल्लासकुष्ठज्वरकामलाश्च प्लीहामवातौ च गरं निहन्ति ॥ ऊर्द्ध्वपातनयुक्त्या तु कृतपारदमविकारत्रिविधम् । हिङ्गुलं तस्य सूतन्तु शुद्धमेव न शोधयेत् ॥" भा.पू.१भ.उ.रस.व. । शोधनविधिः—"मेषीदुग्धेन दरदं सप्तवारञ्च भावितम् । अम्लवर्गैस्तथा शुद्धिमायात्येवं न संशयः । आर्द्रकस्वरसैः भाव्यं शुद्धम्भवति हिङ्गुलम् ॥" सा.कौ. । तस्मात्पारदबहिष्करणविधिः – हिङ्गुलं निम्बूरसैः प्रहरं यावत् मर्द्दयित्वा अधःपिठर्य्यां दत्त्वा सूतवद्दूर्ध्वं पातयेत् । तेन ऊर्द्ध्वपिठरीलग्नं रसं गृह्णीयात् । भा. मधुमूले । आलु इति लोके । श.च.।

हिङ्गुलिका । स्त्री । कण्टकार्य्याम् । श.च ।

हिङ्गुली (इन्) । पुं । हिङ्गुले । स्त्री वार्त्ताकी। प.मु. । बृहत्याम् । भा. ।

हिङ्गुलुः । पुं, क्ली । हिङ्गुले । अम.। र.सा.सं. ।

हिङ्गुलेश्वरः । पुं । रसोऽयं वातप्रधानज्वरे हितः । हिङ्गुलं विषं पिप्पली च समभागं जलेन मर्द्दयित्वा वटी कार्य्या । द्विगुञ्जामिती मधुना देयः । र.सा.सं. ।

हिङ्गुलोत्थरसः । पुं । हिङ्गुलनिष्काशितपारदे । तत्प्रकरणम् —"अथवा हिङ्गुलात् सूतं ग्राहयेत्तन्निगद्यते । जम्बीरनिम्बुनीरेण मर्दितो हिङ्गुलो दिनम् । ऊर्द्ध्वपातनयन्त्रेण ग्राह्यः स्यान्निर्म्मलो रसः ॥" र.सा.सं. । [र.मा. ।

हिङ्गुशिरा(टि)का । स्त्री । वंशपत्रीतृणे ।

हिज्जः (लः) । पुं । (Barringtonia acutangula. Syn. Eugenia acutangula.) स्वनामख्यातवृक्षे । हिज्जल गाछ । हिं समुन्दरफल,इजर। मं पर्यलु । कं तीरेगणगिले । उत्. किञ्जोली । वम्. समुन्द्रफल, परेल । गुणाः —कटुः उष्णः पवित्रः भूतघ्नः वातरोगघ्नः ग्रहसञ्चारदोषघ्नश्च । श.च. । रा.नि.व.८ । जलवेतसे । भा. ।

हिण्डि(ण्डी)रः । पुं । समुद्रफेने । प.मु. । वार्त्ताकौ । मे. । दाड़िमवृक्षे । वै.निघ. । रुचके । उणा. ।

हितम् । क्ली । पथ्ये । रा.नि.व.२० ।

हितकः । पुं । शिशौ । रा.नि.व.१८ ।

हितलोहितः । पुं । तुवरयावनाले । रा.नि. व.१६ ।

हिंतावली । स्त्री । स्वनामख्यातवृक्षे । हिं हियावली । गुणाः—सारका तिक्ता श्लीहघ्नी गुल्मघ्नी उदरक्रमिकुष्ठघ्नी कण्डूघ्नी च । रा.नि.व.६ ।

हितावल्ली । स्त्री । हितावलीवृक्षे । वै.निघ. ।

हिताहितम् । क्ली । पथ्यापथ्ये । च.सू.१ अ. ।

हिन्तालः । पुं । स्वनामख्यातवृक्षे, महातालि । हिन्तालु इति दक्षिणदेशे प्रसिद्धः । হিঁতাল গাছ । गुणाः—मधुराम्लः कफकरः पित्तदाहघ्नः श्रमघ्नः तृष्णाहरः शीतलः वातदोषघ्नश्च । रा.नि. व.६ । [सु.नि.८अ. ।

हिन्दोलनम् । क्ली । भेषजेन गर्भपातने

हिमम् । क्ली । पद्मकनामसुगन्धकाष्ठे । पद्मकाष्ठे । रा.नि.व.१२ । उशीरे । वै.निघ.सुदर्शन चूर्णे । वङ्गे । রাং । रा.नि.व १३ । रक्तचन्दने । रा.नि.व.१२ । नवनीते । श.च. । मौक्तिके । रा. नि.व.१३ । पुं । चन्दनवृक्षे । कर्पूरे । रा.नि.व. २३ । तुषारे । शिम । गुणौ कफवायुवर्द्धकौ । राज.१५. । लक्षणं—"हिमवच्छिखरादिभ्यः द्रवीभूयाभिवर्षति । यत्तदेव हिमं हैमं जलमाहुर्मनीषिणः ॥" भा. ।

हिमकः । पुं । विकङ्कतवृक्षे । रा.नि.व.४।६ ।

हिमकरः । पुं । कर्पूरे । रा.नि.व.१२ ।

हिमकूटः । पुं । शिशिरर्त्तौ । रा.नि.व.२१ ।

हिमजा । स्त्री । शट्याम् । शठी । मे. । पालङ्क्शाके । পালং শাক । प.मु. । क्षीरिण्याम् । খিরুই । रा.नि.व.५ ।

हिमतैलम् । क्ली । कर्पूरतैले । रा.नि.व.१५।

हिमदुग्धा । स्त्री । क्षीरिण्याम् । খিরুই । रा.नि.व.५ ।

हिमद्रुमः । पुं । महानिम्बे । रा.नि.व.६ ।

हिमपूतिः । त्रि । उग्रदुर्गन्धे । भा.म.४अ. भग.चि. । [नि.व.१२।२३ । अम. ।

हिमबालुकः (का) । पुं,स्त्री । कर्पूरे । रा.

हिमयुतः । पुं । भीमसेनीकर्पूरे । वै.निघ. ।

हिमविधिः । पुं । द्रव्यपलं षट्पलजले क्षिप्तं विशोषितं हिम इत्युच्यते । स एव शीतकषायः । पाने च तस्य मानं पलद्वयम् । भा. ।

हिमशर्करा । स्त्री । यावनालशर्करायां । रा. नि.व.१४ । [अम. ।

हिमसंहतिः । स्त्री । हिमराशौ । বরফ ।

हिमहासकः । पुं । हिन्तालवृक्षे । হেঁতাল গাছ । श.र. । [वै.निघ. ।

हिमांशुः । पुं । कर्पूरे । रा.नि.व.१२ रौप्ये ।

हिमांशुभिख्यम् । क्ली । रौप्ये । हे.च. ।

हिमा । स्त्री । सूक्ष्मैलायाम् । रेणुके । भद्रमुस्तायाम् । रा.नि.व.६ । पृक्कायाम् । रा.नि.व.१२। चणिकाद्रव्ये । रा.नि.व.८ ।

हिमागमः । पुं । हेमन्तकाले । रा.नि.व.२१।

हिमाद्रिजा । स्त्री । क्षीरिण्याम् । খিরুই । रा.नि.व.५ । [नि.व.१० ।

हिमाब्दम् । क्ली । उत्पले । শুন্দিফুল । रा.

हिमारातिः । पुं । चित्रकक्षुपे । अर्कवृक्षे । अम. । [भूम्यामलक्याम् । रा.नि.व.५ ।

हिमालयः । पुं । शुक्लखदिरे । श.च. । स्त्री ।

हिमाली । स्त्री । यावनालीशर्करायाम् । रा. नि.व.१४ ।

हिमावती (नी) । स्त्री। स्वनामख्यातौषधौ। हिमावलीति भाषा । गुणाः—सरा तिक्ता श्लीहगुल्मोदरघ्नी क्रमिकुष्ठखर्जूकण्डूतिघ्नी च । रा.नि. व.६ । क्षीरिण्यां । स्वर्णक्षीरिण्यां । वै.निघ. ।

हिमाश्रया । स्त्री । स्वर्णजीवन्त्याम् । रा.नि. व.३ ।

हिमाह्वः (यः) । पुं । कर्पूरे । त्रिका. ।

हिमिका । स्त्री । वर्षोपले । हिमसङ्घाते । शिशिरविन्दौ । शब्दकल्पः । [नि.व.११ ।

हिमोत्तरा । स्त्री । कपिलद्राक्षायाम् । रा.

हिमोत्था (त्पन्ना) स्त्री । यावनालीशर्करायाम् । रा.नि.व.१४ । [निघ. ।

हिमोदकम् । क्ली । हिमजले । বরফ । वै.

हिमोद्भवा (द्भूता) । स्त्री । क्षीरिण्याम् । খিরুই । रा.नि.व.५ । शट्याम् । वै.निघ. ।

हिमोपमः । पुं । प्रवाले । वै.निघ. ।

हिरणम् । क्ली । स्वर्णे । रजते । धुस्तूरे । वराटके । त्रिका. ।

हिरण्यम् । क्ली । सुवर्णे । रा.नि.व.१३ । र.सा.सं.ज्वरचूड़ामणी । कपर्द्दके । त्रिका. । रेतसि । परिमाणभेदे । त्रिका. ।

हिरण्यकोषः । पुं । स्वर्णे । रौप्ये । हे.च. ।

हिरण्यपुष्पी । स्त्री । लाङ्गलिकायां । विषलाङ्गलिया । सु.शा.१०ञ. । [गाछ । अम. ।

हिरण्यरेताः (स्) । पुं । चित्रकवृक्षे । चिता

हिरण्यचीरा । स्त्री । ब्रह्मसुवर्चलानामौषधौ । सु.चि.३०ञ. । [प.मु. ।

हिलमुची । स्त्री । हिलमोचिकायां । हिंचे ।

हिलमोचिः । स्त्री । हिलमोचिकायाम् । हिंचे । प.मु. ।

हिलमोचिका (ची) । स्त्री । स्वनामख्यातजलशाकविशेषे । हिंचे शाक । हिं हरहुच् । बम्. हरहुची । उत्. हिरमिचा । भा.म.४भ.मसूरि.चि. । "हिलमोचीभवं द्रव्यम् ।" गुणाः—शोथकुष्ठकफपित्तघ्नी । भा.पू.१भ.शा.व. । शुक्ते । रा.नि.व.७ । शुक्तवालुके । टकवेटो । रा.नि. व.७।२२ ।

हिल्लः । पुं । (Turdus gininus.) शरारिनामपक्षिविशेषे । शराल पाखी ।

हीनकर्णः । पुं । तन्नामककर्णबन्धनाकृतौ । अयञ्च पर्य्यन्तयोर्हीनमांसः । सु.सू.१६ञ. ।

हीनाङ्गः । त्रि । विकलाङ्गे । जटा. ।

हीनाङ्गी । स्त्री । क्षुद्रपिपीलिकायां । हे.च. ।

हीन्तालः । पुं । हिन्तालवृक्षे । हेंतालगाछ । अ.टी. ।

हीर(क)म् । क्ली, पुं । वज्रे । हिरे । रा.नि.व.१३ । स श्वेतलोहितपीतकृष्णभेदेन चतुर्विधः—यथासंख्यं द्विजः क्षत्रः वैश्यः शूद्र इति । तत्र प्रथमो रसायने, द्वितीयो व्याधिनाशे, तृतीयो धनदाने देहदार्ढ्ये, चतुर्थश्च व्याधौ वयस्तम्भने च प्रयुज्यते । अस्य चाकारभेदेन स्त्रीपुंनपुंसकत्वं लक्ष्यम् । विन्दुरेखाहीनो रक्तः पुमान्, रेखायुक्तः षड्स्रयुक्तः स्त्री च । त्रिकोणो नपुंसकम् । मारितस्य हीरकस्य गुणाः—"आयुः पुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च । सेवितं सर्व्वरोगघ्नं मृतं वज्रं न संशयः । अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथान्तथा । पाण्डुतां पङ्गुतां तस्मात् संशोध्य मारयेत् ॥" हीरकजारणम्—"व्याघ्रीकन्दोदरे क्षिप्ता सप्तधा पुटितः पविः । हयमूत्रस्य निर्व्वापात् शुद्धः प्रतिपुटं भवेत् । मण्डूकमूत्रे तत्तप्तं हीरकं सेचयेत् सुधीः । सप्तधा म्रियते सत्यं नात्र कार्य्या विचारणा । भस्मीभावं गतं युक्त्या वज्रवत् कुरुते तनुम् ॥" सा.कौ. । स्त्री । गाम्भार्य्याम् । रा.नि. व.९ । [नि.व.१९ । स्त्री । मेथ्यां ।

हुड़ः (ड़ः) । पुं । मेषे । दुम्बा । त्रिका. । रा.

हुड़िका । स्त्री । अङ्कोलवृक्षे । आँकोड़ गाछ । वै.निघ. ।

हुड़ुकः । पुं । दात्यूहपक्षिणि । मे. । [श.मा. ।

हुड़ुम्बः । पुं । अष्टचिपिटे । हुड़ुम्भाजा ।

हुण्डः । पुं । व्याघ्रे । ग्राम्यशूकरे । शब्दकल्प. ।

हुण्डनम् । क्ली । मस्तकादीनाम् अन्तःप्रवेशे वक्रतायां वा । (धातूनामनेकार्थत्वात्) । वि.र. । अन्ये त्वाहुः शिरोहुण्डनं केशभूमिस्फुटनं, शङ्खे ललाटे च भञ्जवद्वेदना । नासाहुण्डनं घ्राणशक्तिलोपः । दृष्टिहुण्डनं दृष्टिव्युदासः । जत्रुहुण्डनं स्कन्धोपरोधः । ग्रीवाहुण्डनं ग्रीवास्तम्भः । इति निज्जड़ः ।

हुताशः । पुं । अग्नौ । अग्निवेशे । श. । चित्रकवृक्षे । भा.म.अग्न्यधिकारे । च.द.कुष्ठ.चि. ।

हुताशनः । पुं । चित्रकवृक्षे । सु.चि.२७ञ. ।

हुताशनरसः । पुं । अग्निमान्द्ये रसः । गन्धकः १ भ. पारदः १ भ. अष्टटङ्कणं १ भ. शृङ्गविषं १ भ. मरिचं ८ भ. एकत्र निम्बूरसेन मर्द्दयित्वा मुद्गमाना वटी कार्य्या । अनु. आर्द्रकरसः । भा. । भैष. ।

हुताशवेशः । पुं । अग्निवेशे । च.च.द.टी. ।

हूरवः । पुं । शृगाले । त्रिका. ।

हृच्छूलम् । क्ली । वक्षःशूले । निदा. ।

हृतगन्धा । स्त्री । कुलुन्चुरी । কাঁচাথনিয়া । वै.निघ. ।

हृत्कम्पः । पुं । हृदयस्य कम्पे । निदा. ।

हृत्पाषाणः । पुं । मनःशिलायाम् । भैष.कुष्ठ. चि.षड्विन्दुतैले ।

हृत्प्राणः । पुं । श्वासरोगे । रा.नि.व.२० ।

हृदयम् । क्ली । मनसि । त्रिका. । चेतनास्थाने । तच्च शोणितकफप्रसादजम् । यदाश्रया हि धमन्यः प्राणवहाः तस्य च चेतनास्थानत्वात्तस्मिन् तमसावृते प्राणिनः स्वपन्ति । तत्स्वरूपं यथा—"पुण्डरीकेण सदृशं हृदयं स्यादधोमुखं । जाग्रतस्तद्विकसति स्वपतश्च निमीलति ॥" सु.शा.४अ. । वक्षसि । रा.नि.व.१८ ।

हृदयचरः । पुं । कफजक्रिमिभेदे । च.वि.७अ. ।

हृदयदीपकः । पुं । वोपदेवकृतवैद्यकग्रन्थे ।

हृदयस्थानम् । क्ली । वक्षसि । हे.च. ।

हृदयात्मा (न्) । पुं । कङ्कपक्षिणि । श.च. ।

हृदयादकः । पुं । कफजक्रिमौ । निदा. ।

हृदयोपशरणम् । क्ली । हृदयोपद्रवणे । च. सू.१५अ. । [अम. ।

हृद् । क्ली । वक्षसि । रा.नि.व.१८ । मनसि ।

हृद्गदः । पुं । हृद्रोगे । रा.नि.व.२० ।

हृद्ग्रन्थः (न्थिः) । पुं । विद्रधिरोगे । रा.नि. व.२० ।

हृद्याची । स्त्री । हिंतावल्याम् । वै.निघ.२भ. वा.व्या.चि.विषगर्भतैले । [कपित्थे । वै.निघ. ।

हृद्यम् । क्ली । त्वचि । গুড়ত্বক্ । जीरके ।

हृद्यगन्धम् । क्ली । सूक्ष्मजीरके । श.च. । सौवर्चललवणे । काचलवणे । रा.नि.व.६ । पुं । विल्ववृक्षे । रा.नि.व.११ । स्त्री (न्धा) । जातीपुष्पवृक्षे । रा.नि.व.१० । अजमोदायाम् । रा.नि.व. ६ । [र.मा. ।

हृद्यगन्धि । क्ली । कणजीरके । ক্ষুদ্র জীরে ।

हृद्यवर्गः । पुं । हृदयहिते महाकषायवर्गे । स चतुष्कस्य चतुर्थदशकः । यथा—आम्राम्रातकलिकुचकरमर्दवृक्षाम्लाम्लवेतसकुवलबदरदाड़िममातुलुङ्गेषु । च.सू.४अ. ।

हृद्या । स्त्री । सप्तकीवृक्षे । रा.नि.व.११ । नागवल्याम् । পান । जीरकवृक्षे । शतपत्रीपुष्पे । সেউতী ফুল । मुरायाम् । মুরামাংসী । वै. निघ. । वृद्ध्यौषधौ । मे. ।

हृद्रुक् } पुं । हृदयरोगे । হৃদয়ের রোগ ।
हृद्रोगः } रा.नि.व.२० । निदाननिरुक्तौ यथा—"अत्युष्णगुर्व्वन्नकषायतिक्तैः श्रमाभिघाताध्यशनप्रसङ्गैः । सञ्चिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः । दूषयित्वा रसन्दोषा विगुणा हृदयं गताः । हृदि बाधां प्रकुर्व्वन्ति हृद्रोगन्तं प्रचक्षते ॥" मा. ।

हृद्रोगवैरी (रिन्) । पुं । अर्ज्जुनवृक्षे । श.च. ।

हृदण्टकः । पुं । आमाशये । जठरे । श.च. ।

हृद्व्रणः । पुं । विद्रधौ । रा.नि.व.२० ।

हृल्लक्ष्मीः । स्त्री । क्षुद्रतुलस्यां । वै.निघ. ।

हृल्लासः । पुं । उपस्थितवमनत्ववत् उत्क्लेशे । भा. । हिक्कायाम् । हे.च. ।

हृषीकम् । क्ली । कर्म्मेन्द्रिये । अम. ।

हृष्टः । पुं । काकविशेषे । कश्चित् ।

हेक्का । स्त्री । हिक्कायाम् । हे.च. ।

हेतुः । पुं । उपलब्धिकारणे । यत्तु येन विना न स्यात् तत्तस्य हेतुः । तत्पर्य्यायश्च निदानं कारणं हेतुर्निमित्तं निबन्धनं मूलम्, आयतनं प्रत्ययश्च । भा. । "हेतुर्नामोपलब्धिकारणं तत्प्रत्यक्षानुमानैतिह्यौपम्यैर्हेतुभिर्यदुपलभ्यते तत्तत्त्वम् ।" च.वि. ८अ. ।

हेतुविपरीतः । त्रि । कारणविपरीते (औषधादौ) । यथा—शीतज्वरे शुण्ठ्यादिकम् । श्रमादौ मांसरसायने । विहारे रात्रिजागरणादौ । मा.नि. । वि.र. ।

हेतुविपर्य्यस्तार्थकारी । त्रि । हेतुविपरीतार्थकारिणि (औषधादौ) । यथा—पित्तजन्यव्रणशोथे पित्तजनकोष्णपिण्डिकाबन्धनादौ । पित्तशोथे दाह्यन्नभोजनादौ । वातजोन्मादे त्रासनादौ च । मा.नि. । वि.र. ।

हेतुव्याधिविपरीत: । त्रि । हेतुव्याध्युभयविपरीते (औषधादौ) । यथा—वातश्लेष्मे तन्नाशकदशमूलादौ । कफश्लेष्मणां तन्नाशके भल्लादौ । स्निग्धतानाशकराचिजागरणादौ च । मा.नि. । वि.र. ।

